DUE DATE SLIP

GOVT. COLLEGE, LIBRARY

KOTA (Raj.)

Students can retain library books only for two weeks at the most.

BORROWER'S No.	DUE DTATE	SIGNATURE

भारतीयाधिशासनसंरक्षकतायां प्रकाशितम्
Published under the auspices of Government of India



शब्दकल्पद्रुमः।

अर्थात्

ऋग्वेदादिसमस्तवेदाङ्गसमस्तवेदसमस्तोपवेदसमस्तोपाङ्गसमस्तशास्त्रसङ्कलिताकारादिवर्णक्रमविन्यस्तशब्द-तल्लिङ्ग-नानार्थ-पर्य्याय-प्रमाण-प्रयोग-धातु-तदनुबन्धाभिधेय-सहित-तत्तच्छब्दप्रसङ्गोत्थित-वेद-वेदाङ्ग-वेदान्त-न्याय-पुराणेतिहास-सङ्गीत-शिल्प-सूपकारशास्त्र-ज्योतिष-तन्त्राख्यान-काव्यालङ्कार-च्छन्दःप्रभृति-नाम-लक्षणोदाहरण-द्रव्यगुण-रोगनिदानौषध-सूत्युक्तव्यवस्थादिसंयुक्त-सर्व्वदर्शनमतानुसारि-संकलिताभिधानग्रन्थः।

स्यार-राजा-राधाकान्तदेव-बाहादुरेण

विरचितः।

पाणिनिमतानुसारि-प्रत्येकशब्दव्युत्पत्ति-मूलग्रन्थातिरिक्तवङ्गीयशब्दार्थ-प्रमाण-प्रयोग-पर्य्याय-धातुपदोदाहरणादिभिः
नूतनसङ्कलितवङ्गीयशब्द-तदर्थ-तत्प्रमाण-प्रयोगादिसहित-
सुप्रशस्तपरिशिष्टेन च सार्द्धम्।

श्रीवरदाप्रसादवसुना तदनुजेन श्रीहरिचरणवसुना च

अशेषशास्त्रविशारदकोविदवृन्दसाहाय्येन संपरिवर्द्धितः। नागराक्षरैः प्रकाशितश्च।

पञ्चमः काण्डः।

व्यञ्जनवर्णाः।

मोतीलाल बनारसीदास
दिल्ली :: वाराणसी :: पटना

प्रकाशक :
सुन्दरलाल जैन
मोतीलाल बनारसीदास
बंगलो रोड, जवाहरनगर
दिल्ली-६

मुद्रक :
शान्तिलाल जैन
श्री जैनेन्द्र प्रेस
बंगलो रोड, जवाहरनगर
दिल्ली-६

ग्रन्थोऽयं भारतीयाधिशासन-विनियोजितावश्यकालभ्यसंस्कृतग्रन्थपुनर्मुद्रणयोजनायां प्रकाशितः ।
This book has been published under the Scheme
of reprinting of important out-of-print
Sanskrit books sponsored by the
Government of India.
Price Rs. 194-75 for Complete set

प्राप्ति स्थानम्
मोतीलाल बनारसीदास
१. बंगलो रोड, जवाहरनगर दिल्ली-६
२. चौकी खम्भा, वाराणसी
३. बाँकीपुर, पटना



शब्दकल्पद्रुमः।

पञ्चमकाण्डम्।

शं

शं, तालव्यशकारः। स तु शवर्गीयप्रथमवर्णः। वक्तव्यचिंशद्वर्णेषु। अस्योच्चारणस्थानं तालु। इति तन्त्रव्याकरणे॥ (तथा च शिक्षायाम्। १७।

"कण्ठ्या वर्गाविषुयशास्तालव्या श्वष्ठवायवः॥")

अस्य स्वरूपं यथा,—

"शकारं परमेशानि! शुद्धं वर्णं शुचिस्मिते!।
रक्तवर्णप्रभाकारं स्वयं परमकुण्डली॥
चतुर्व्वर्गप्रदं देवि! शकारं ब्रह्मविग्रहम्।
पञ्चदेवमयं वर्णं पञ्चप्राणात्मकं प्रिये!॥
रजःसत्त्वतमोयुक्तं त्रिबिन्दुसहितं सदा।
त्रिशक्तिसहितं वर्णमात्मादितत्त्वसंयुतम्॥"

इति कामधेनुतन्त्रम्॥ * ॥

(वङ्गीयवर्णमालायाम्), तल्लेखनप्रकारो यथा,

"कुचिता वामतो दृग्गता च गोलतिस्रधः।
पुनरूर्द्धगता तासु वह्निचन्द्रदिवाकराः।
मात्रा भवानी विज्ञेया ध्यानमस्य प्रचक्षते॥"

इति वर्णोद्धारतन्त्रम्॥ * ॥

तद्वाचकानि यथा,—

"शं: सत्यश्च कामरूपी कामरूपो महामतिः।
सौख्यनामा कुमारोऽस्मि नीलकण्ठो वृषकेतनः॥
वृषभः शयनं शास्ता सुभगा विष्णुलिङ्गिनी।
रुद्रदेवो महालक्ष्मीमंहेन्द्रः कुलकौलिनी॥
बाहुर्दैवो वियद्वक्त्रं चन्दनश्चारुभूः खलः।
वामोरुः पुष्करीकाक्षा कान्तिः कल्याण-
वाचकः॥"

इति योगिनीतन्त्रे ३भागे ७पटले वर्णाभिधानम्। (कायादावस्य प्रथमप्रयोगे सुखं फलम्। यथा, वृत्तरत्नाकरटीकायाम्।

"शः पुंसि चन्द्रे खेदम्॥"

धात्वादुत्तम विशेषः। यथा, कविकल्पद्रुमः।

"————षौ दृसादिः शं तुदादिकः॥"

एतेन तुदौ अम् वाधे तुदति इति स्यात्।)

शं, क्ली, शुभम्। इति त्रिकाण्डशेषशब्दरत्नावल्यौ। (यथा, देवीभागवते। ३। १८। ७।

"न च हर्षे वने शं मे दीर्घिकायां न पर्वते॥")

शंसितः

शं, [म्] अ, कल्याणम्। (यथा, राजेन्द्रकर्णपुरे। ५१।

"यः कीर्त्तौ भवतो वतो वृषगुणैर्यः शंतनुः शन्तनुः॥")

शुभम्। शास्त्रम्। इति शब्दरत्नावली॥

शंः, पुं, शिवः। शस्त्रम्। इति शब्दरत्नावली॥

शंगुः, त्रि, (शं शुभमस्याक्नोति। शं+"कंशंभ्यां वभयुक्तिसुतयसः।" ५। २। १३८। इति युस्।) शुभान्वितः। इति त्रिकाण्डशेषः॥ (यथा भट्टिः। ४। १८।

"कुर्व्वाणां पश्यतः शंयूनू सविणौ सुहृदानना॥"

पुं, दृढरथिपुत्रोऽभिविशेषः। यथा, महाभारते। ३। २१८। २।

"आहुतिश्चैव यस्याग्नेर्हविषाग्र्यं विधीयते।
सोऽग्निर्दृढरथेः पुत्रः शंयुर्नाम महाव्रतः॥")

शंवः, पुं, सुवर्णालङ्कारभेदकः। वस्त्रम्। इति धरणिः॥

शंवः, त्रि, (शमस्याक्नोति। शं+"कंशंभ्यामिति।" ५। २। १३८। इति वः।) शुभान्वितः। इति त्रिकाण्डशेषः॥

शंवरं, क्ली, (शं वृणोतीति। वृ+अच्।) जलम्। इत्यमरः॥

शंस, उ हिंसास्तुत्योः। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्। लावेट्।) तालव्यादिः। उ, शंसित्वा शस्ता। यः शंसति सतामिति दुर्गादासः॥ अनेकार्थत्वात् कथनेऽप्ययम्। यथा ऋचौ। शशंस वाधा पुनरुक्तवेदिति। न मे प्रिया शंसति किञ्चिदीक्षितमित्यादि च। इति दुर्गादासः॥

शंसा, स्त्री, (शंस+अः। स्त्रियां टाप्।) वाक्यम्। वाञ्छा। इति मेदिनी॥ प्रशंसा। इति शब्दरत्नावली॥

शंसितः, त्रि, (शंस+क्तः।) निश्चितः। इति शब्दानुधः॥ हिंसितः। स्तुतः। इति शब्दमाधातोः क्तप्रत्ययेन निष्पन्नमेतत्॥ (यथा, महाभारते। १। २१८। २५।

"ब्राह्मणाश्च महात्मानः सोमपाः शंसितव्रताः॥")

शंस्ता, [स्तृ] पुं, (शंस+"तृन्टचौ शंसिधदिभ्यः संज्ञायां चानिटौ।" उणा०। २। ६४॥ इति तृन्। यद्वा, छन्दसि "बहुलमन्यत्रापि शंसितृक्षंभितृक्षंभितेति।" ७। २। ३४। इति निपातनात् साधुः।) स्तोता। होता। इति संक्षिप्तसारोणादिवृत्तिः॥ (अशास्ता। यथा, ऋग्वेदे। १। १४२। ५।

"होताध्वर्युरावया अग्निमिन्धो
यावयाभ उत शंस्ता सुविप्रः॥"

"शंस्ता प्रशास्ता।" इति तद्भाष्ये सायणः॥)

शंस्यः, त्रि, (शं शुभे तिष्ठतीति। शम्+स्था+"स्थः कच।" ३। २। ७७। इति कः।) शुभान्वितः। शम्पूर्व्वस्याधातोर्ण्यत्प्रत्ययेन निष्पन्नमिदम्॥

शंस्यः, त्रि, (शं+स्था+"स्थः कच।" ३। २। ७७। इति क्विप्।) शुभान्वितः। शम्पूर्व्वष्ठाधातोः क्विप्प्रत्ययेन निष्पन्नमेतत्॥

शंस्यः, त्रि, (शंस+ण्यत्। "ईडवन्दवशंसदुहां ण्यतः।" ६। १। २१४॥ इत्याद्युदात्तः।) हिंस्यः। स्तुत्यः। शंपूर्व्वधातोः ण्यत्प्रत्ययेन निष्पन्नमेतत्॥

शक, ई क्ष चासश्रद्धयोः। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-चासे अक०-श्रद्धायां सक०-सेट्।) चासो भयम्। शङ्का संशयारोपः॥ ई, शङ्कते, आशङ्कनेन। ई, शङ्कते पुरुषस्तं स्थाणौ। स्थाणुर्वा पुरुषो वा इति संशयमारोपयतीत्यर्थः। इति दुर्गादासः॥

शक, न ई क्ष शक्तौ। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सक०-च-सेट्।) न, शक्नोत्यशक्यम्—प्यार्त्तो विजेतुं य इति श्रुतधुधः। ई क्ष, अशकत् अशक्नोत् अशाक्षीत्। क्वचित्तिनाशाशित्वं क्ष इत्यपि। क्ष, शकिष्यति शंक्ष्यति। एषकषादादौ न स्वादिः। दाधर्त्तीनामादित्वमपि। यङ्-स्वरादुभयम्; केषाञ्चिदनुदात्तात्। द्वावेव शकनेतरौ। यथा च। अकर्त्तोऽस्य मनुष्यस्य विजेतु-

मिति रघुः। रघोःपरिणाममेरौ न अवयते प्रत्याख्यातुमिति तच्छौण्डीयां वाचस्पतिमिश्रः। अन्या मतेनापि तदोष्मराशामिति नैषधम्। इति दुर्गादासः॥

अक, य ण अक्तौ। इति कविकल्पद्रुमः॥ (दिवा०-उभ०-सक०-सेट्।) अक्तिर्दिवादिपदे चक्षा खादिपदे वामर्थम्। अ क, अकयति अक्यते दुःखं दीनः। इति दुर्गादासः।

अकः, पुं, (अक + अप्।) जातिभेदः। शूद्रभेदः। इति मेदिनी। व च शूद्रः अकादित्यः इति आदित्यादृष्ट इति च गर्गोक्त्या ज्ञातः। तस्य सरयूदिगागमि बहुकलमत्वात्। अकाब्देति नाम्ना पञ्जिकायां लिख्यते। व च क्षौरकर्म्मजातिविशेषः। अत्यशुचौ पक्षदशाहेनास्य मरणकार्हं सूचयित्वा पक्षत्रयात्मकमशौचकारि। यथा,—

"ततः अकान् यवनान् काम्बोजान् पारदान् खशान्।
पह्लवांश्चापि निःशेषान् कर्त्तुं व्यवसितो नृपः॥
ते क्षत्रधर्माना यौनेश्च समरेण मही भुजा।
वशिष्ठं शरणं जग्मुः शूर्यवंशपुरोहितम्॥
वशिष्ठः शरणापन्नान् समये स्थाप्य भार्गवः।
सगरं वारयामास तेषां दत्त्वाभयं तदा॥
सगरस्तां प्रतिज्ञाञ्च निशम्य मुनिभाषितः।
धर्म्मं जघान तेषाञ्च वेशानन्यांश्चकार ह॥
अर्द्धं शिरः अकानान्तु कृत्वायान्न भूपतिः।
यवनानां शिरः सर्व्वं काम्बोजानामथो शिरः॥
पारदाश्चुक्तकेशांस्तु पह्लवान् श्मश्रुधारिणः।
निःस्वाध्यायवषट्काराम् सर्व्वानेव चकार ह॥"
इति भाषि भविष्ये सगरोपाख्यानम् १५ अ॥
देशभेदः। इति विश्वः॥ (यथा, भारते। १२०। ४५।
"तुषारान् बर्बरान् कारान् यवनान् पारदान् अकान्।
एतान् जनपदान् सर्व्वान् जयन्विन्दोदधिं गता॥")

अकटः, पुं, क्ली, (अकटति भारं वोढुमिति। अक् + "अकादिभ्योऽटन्।" उणा०। ४। ८१। इति अटन्।) यानविशेषः। गाड़ी इति भाषा॥ तत्पर्य्यायः। अनः २। शकटम्। ३। इति शब्दरत्नावली॥ विष्णुवधासुरविशेषः। त्रिंशद्धनुर्मानपरिमाणम्। तत्पर्य्यायः। भारः २ वाहितः ३ शाकटीनः ४ शताटः ५। इति हेमचन्द्रः॥ उक्तञ्च।

"अकटः शाकिनी गायो यानमस्त्रीलिङ्गं वनम्।
अनूपः पर्व्वतो राजा दुर्भिक्षे नव दत्तयः॥"
इति भरतः॥
तिनिसवृक्षः। इति राजनिर्घण्टः॥ (शूद्रविशेषः। यथा, मनुः। ७। १८०।
"दण्डपूर्वन्तु कर्त्तव्यं यानात् तु अकटेन वा॥"
अकटाशातित्वात् रोहिणीनक्षत्रम्। यथा, हरिवंशे आयाम्। २४५। ३०।
"रोहिणीअकटमध्यसंस्थिते
चन्द्रमस्यरजस्कोज्ज्वला यथा।

क्षपि यान्ति शिशुयाचिताग्रहाः
सूर्य्यतप्तपिटरामुपायिनः॥")

अकटङ्कः, [न्] पुं, (अकटं नयतीति। नी + क्विप्।) श्रीकृष्णः। इति हेमचन्द्रः॥ (एतद्विवरणं भागवते १० स्कन्धे ७ अध्याये तथा हरिवंशे ६१ अध्याये च द्रष्टव्यम्॥) अकटनाशके, त्रि॥

अकटाक्षा, स्त्री, (अकटमिति आज्ञा यस्याः।) रोहिणीनक्षत्रम्। तस्याः पञ्चतारामयअकाकातित्वात्॥

अकर्णं, क्ली, (अक्नोतीति। अक् + "अकिशकिभ्यो र्नित्।" उणा०। १। १११। इति कर्णः।) त्वक्। खड्गम्। (यथा, रघुः। २। ३६।
"अधान्यकारं गिरिगह्वराणां
दंष्ट्रामयूखैः अकर्णानि कुर्व्वन्॥")
रामवस्तु। वल्कलम्। इति मेदिनी॥ अल्कम्। औंण इति भाषा। इति अकर्णिनृशब्ददर्शनात्॥

अकर्णः, पुं, स्त्री, (अक् + कर्णः।) एकदेशः। (यथा, मनुः। ६। २८।
"प्रतिगृह्य पुटेनैव पाणिना अकर्णेन वा॥")
खड्गम्। यथा,—
"भिन्नं अकर्णखड्गौ वा पुंश्चलीञ्च सभेत्यके॥"
इत्यमरः॥
(यथा, मनुः। १। १३।
"तास्वाप्य अकर्णाम्भांस्य दिवं भूमिञ्च निर्ममे॥")

अकर्णी, [न्] पुं, (अकर्णमस्यास्तीति। इनिः।) मत्स्यः। इत्यमरः॥

अकर्णान्तकः, पुं, (अकर्णस्य क्लेच्छजातिविशेषस्य अन्तकः।) विक्रमादित्यराजः। इति केचित्॥

अकारः, पुं, राज्ञः अनूढायाः स्त्रियाः भ्राता। यथा, साहित्यदर्पणे ३ परिच्छेदे॥
"महाकुलीनोऽभिजनी दुष्कुलीनस्तथा सयुक्तः।
वीर्य्यमनूढाभ्राता राज्ञः श्यालः अकार इत्युक्तः॥"

अकारिः, पुं, (अकस्य क्लेच्छजातिविशेषस्य अरिः शत्रुः।) विक्रमादित्यराजः। स तु उज्जयिनीदेशाधिपतिः। यथा,—
"साहसाङ्कः अकारिः स्यादिक्रमादित्य इत्यपि॥"
इति जटाधरः॥

अकुनं, क्ली, (अक्नोति अशाशुभं विज्ञातुमनेनेति। अक् + "अकेरनीत्नोत्नुनयः।" उणा०। ३। ४८। इति उनः।) शुभाशुभं विज्ञातुमनेनेति। इति उनः।) शुभाशुभनिमित्तम्। इति मेदिनी॥ शगुन इति हिन्दीभाषा। फलसूचकम्। इत्यवधारणः॥ ॐ॥ अथ शुभाशकुनानि।
"कौशेनात् अवणतो विलोकनात्
सूर्य्यतात् यमधिकं समोत्तरम्।
मङ्गलाय दधिचन्दनादिकं
स्यात् प्रवासभवनप्रवेशयोः॥
दध्याज्यदूर्व्वाक्षतपूर्णकुम्भाः
सिद्धान्नसिद्धार्थकचन्दनानि।
आदर्शशङ्खामिषमीनगव्या-
गोरोचनागोमयगोमधूनि॥

गोर्व्वायवीणाफलभद्रपीठ-
पुण्याङ्गनालङ्करणायुधानि।
ताम्बूलयानासनवर्द्धमान-
ध्वजातपत्रव्यजनाम्बराणि॥
व्यञ्जोजभृङ्गारसवृद्धवह्नि-
गजाववाह्याः शुभशंसिरासि।
रत्नानि चामीकरताम्र-
वङ्गेड़काधौषधयः सुराश्च॥
वनस्पतेर्नूतनशाकमेवं
माङ्गल्यपक्षाशदिदं प्रदिष्टम्।
शुभेषु कार्य्येष्वशुभेषु चैव
कार्य्ये गतानां शुभदाः सदैव॥
एतानि दृष्ट्वा शुभदर्शनानि
कुर्व्वन्ति दृष्टः पथि दक्षिणेन।
चक्षुश्चिलोकादनुभावयानि
व्यक्तानि वामेन शुभा भवन्ति॥
गान्धारषड्जादृषभक्षधान्ये
स्वरेषु गम्भीरमनोरमा ये।
वादित्रवेदध्वनिगीतवृत्य
मित्यादिशस्तं किल यत्र रौद्रम्॥
आदाय रिक्तं कलसं जलार्थी
यदि व्रजेत् कोऽपि सहाध्वगेन।
पूर्णं समादाय निवर्त्तसेऽसौ
यथा कृतार्थः पथिकस्तथैव॥ ॐ॥
अङ्गारभस्मेन्धनरज्जुपङ्क-
पिण्याककार्पासतुषास्थिविष्ठाः।
क्षणायसावस्करलक्षणाधान्य
पाषाणकीशा भुजगौषधानि॥
तैलं गुड़ं चर्म्म वसा विभिन्नं
रिक्तञ्च भाण्डं लवणं दृषच्च।
तक्षार्मवा शस्त्रजलद्विषातः
कार्य्ये क्वचित् त्रिंशदिमे न शस्ताः॥ ॐ॥
स्खलदयानस्खलनं नृपाणां
भङ्गः क्वचिद्यानपथायनस्य।
द्वारामिघाताध्वगशस्त्रपाताः
प्रस्थानविघ्नं कथयन्तु यातुः॥
मार्जारगृहारवदर्शनानि
कलिः कुटुम्बस्य परस्परस्य।
चित्तस्य कालुष्यकरस्य सर्व्वं
गन्तुः प्रयागप्रतिषेधनाय॥
दृष्टे शवे रौदनशब्दहीने
महार्घसिद्धिः कथितोऽमेयु।
गृहप्रवेशेषु शवः शवत्वं
रुजं सदीर्घामघवा ददाति॥
गच्छन्तमावर्त्तयतां नराणा-
मन्तर्गतं चेत् प्रविशत्यकस्मात्।
भवेत् तदाभीप्सितसौख्यलाभो
यः कौतुकी तेन निरूप्यमेतत्॥
उज्झितं झटिति दन्तधावनं
संसुखं पतति यत्र वासरे।
भोजनं भवति तत्र वीक्षितं
याचभाषितमिदं हि गार्हतम्॥"

शकुनं

इति वसन्तराजशाकुने विचारिता: शुभावहा:॥
अथ नराङ्गिनविचार: ।
"अथाभिधास्ये द्विपदेषु तावत्
प्रधानभावात् शकुनं नराणाम् ।
नैमित्तिकं यत् प्रतिभाव्य सर्व्वं
फलं शुभाशोभनयोर्ब्रवीति ।
नरोऽभिरूप: सितवस्त्रमाल्यो
वाचं प्रशस्तां मधुराञ्च जल्पन् ।
सर्व्वविधा योषिदपि प्रयाणे
प्रवेशकाले च करोति सिद्धिम् ॥*॥
वमद्विकेशो हतमानगर्व्व:
क्षिप्ताङ्गनग्नान्यवनतेक्षिधार: ।
रजस्वला गर्भवती वदन्ती
मलान्वितोन्मत्तजराधवाश्च ॥
दीनो द्विषत्कण्ठविसृक्तकेशा:
क्रूनेक्षका: खरसैरिभस्था: ।
सन्ध्याचिरांक्रन्दनपुंसकाद्या
दु:खावहा: सर्व्वसमीहितेषु ॥*॥
पृथ्वीपतिर्ब्राह्मणहर्षयुक्तो
देच्या कुमारी सुहृद: सुकेशा: ।
नार्य्यो नराश्चाश्ववृषाधिरूढा:
शुभाय दृष्टा: शकुनोद्यमेषु ॥*॥
क्षणाम्बरा: क्षणविवेषनाढ्या:
क्षणां सजं मूर्द्धि विधारयन्ती ।
दृष्टा सकोपा यदि कृष्णवर्णा
नारी नरैस्तद्विपदो भवन्ति ॥*॥
श्वेताम्बरा श्वेतविवेषनाढ्या
मालां सितां मूर्द्धि विधारयन्ती ।
दृष्टा प्रसन्ना यदि गौरवर्णा
नारी नरै: स्यात्तदभीष्टसिद्धि: ॥
धृतातपत्र: सुविशुद्धवासा:
पुष्पान्वितश्चन्दनचर्चिताङ्ग: ।
नेम्राववुक्त: कृतभोजनो वा
विप्र: पठन् यच्छति सर्व्वसिद्धिम् ॥
अभ्युपगच्छति यस्य हि याने
स्त्रीपुरुषोऽप्यथवा फलहस्त: ।
सर्व्वसमीहितसिद्धिरवश्यं
तस्य नरस्य भवत्यचिरेण ॥"
इति वसन्तराजशाकुने नराङ्गितेषितसंग्रहम् ॥*॥
"गच्छेति दृष्टं पुरतस्तथैव
वाणीद्वयं केनचिदुच्यमाना ।
सर्व्वाणि कार्य्याणि शुभोदयेन ताभ्य-
श्चित्तस्य तुष्टिर्विजयाय पुंसाम् ॥
सिद्धे विरावा जहि छिन्धि भिन्धि
चैत्यादय: शकुनघोषितागाम् ।
क यासि मा गच्छत चैवमाद्या:
प्रयोजनारम्भनिवारणार्था: ॥
स्थैर्य्यं स्थिरार्थाद्गमनं तदर्था-
दाख्यान्निवृत्तिर्विनिवर्त्तितार्थात् ।
लाभं जयं भङ्गममङ्गलं वा
बुध्येत तत्तत्प्रतिपादनार्थात् ॥

शकुनि:

उच्चं भवेद्दोदनमग्रभागे
भवं भवेद्वृद्धिविभागभूते ।
नैर्ऋत्यकोणे रणमार्गरोधो
वायव्यकोणे रुदितं जनद्वेट् ॥
स्तनु: सुतानां रुदितेन पृष्ठे
लाभो भवेत्तच्च निवर्त्तनेन ।
स्तनुस्तदाग्ने रुदितेन गन्तु:
सिद्धिं विधत्ते रुदितं रिपूणाम् ॥"
इति वसन्तराजशाकुने नराङ्गिते उपसूतिप्रकरणम् ॥*॥ वकचक्रवाकटङ्कटिट्टिभलावखञ्जरीटभासभारद्वाजमयूरकपिञ्जल-लावकगृध्रोलूककपोतगोवृषकुक्कुटकलविङ्कभारतीचाषखञ्जनकाकपिञ्जलाख्यानि शकुनानि घोटकवृषभिषिखरगोमहिष्यजाजमेषेभकोकुक्कुरीस्फुटिकमार्जारवानरगवयराहशल्लकलावशशलट्टिकपिपीलिकापक्षी-कुक्कुरादिरूपशकुनानि च वसन्तराजशाकुने द्रष्टव्यानि । हस्तिशूकरखड्गगोवृषदमशरभसर्परूपाणि शकुनानि तत्तच्छब्दे द्रष्टव्यानि ।
शकुन:, पुं, (शक+उन: ।) पक्षिमात्रम् । (यथा, महाभारते । १ । ७२ । १० ·
"तं वने विजने गर्भं सिंहव्याघ्रसमाकुले ।
दृष्ट्वा शकुनं शकुना: समन्तात् पर्य्यवारयन् ॥")
पक्षिविशेष: । गृध्र इति ख्यात: । इति मेदिनी ॥ कश्यपपत्नीतास्ताया: श्येनगृध्रादय: पुत्रा: । इति श्रीभागवतम् ॥ गृध्रस्याशुभकर्त्तृत्वं यथा,—
"वामेऽपतथे पुरतश्च पृष्ठे
युद्धं विमिदं मरणं क्षियश्च ।
गृध्र: स्थित: वन क्रुरुते क्रमेण
शब्दोऽपसव्योऽस्य विपत्तिहेतु: ॥"
इति वसन्तराजशाकुनम् ॥
विप्रभेद: । इत्युणादिकोष: । सद्विवरणं भागवते उक्तम् । गीतविशेष: । तच्च उत्सवादिषु मङ्गलार्थगेयम् । इत्यजयपाल: ॥ शुभसूचकी । इति शब्दरत्नावली ॥
शकुनज्ञा, स्त्री, (शकुनं जानातीति । ज्ञा+क: । स्त्रियामाप् ।) श्येनी । इति त्रिकाण्डशेष: ॥ शकुनज्ञातरि, त्रि ॥ (यथा, कथासरित्सागरे । २१ । ५३ ।
"प्राह्निणोत्प्राङ्मिद्धापि स्वस्था शकुनज्ञया ।
खलन्तोऽभिनवारूढो युवतीनां मनोभव: ॥")
शकुनि:, पुं, (शकुनोति उन्नेतुमात्मानमिति । शक+"शकेरुनोन्त्युनय: ।" उणा० ३।४६। इति उनि: ।) पक्षी । इत्यमर: ॥ (यथा, मनु: । ५ । ११ ।
"क्रव्यादान् शकुनीन् सर्व्वांस्तथा ग्राम-
निवासिन: ।
अनिर्द्दशांश्चैकशफांस्त्रिशफञ्च विवर्जयेत् ॥")
चित्रपक्षी । इति हेमचन्द्र: ॥ सौबल: । स तु कौरवमातुल: । (अयं हि दुर्य्योधनमन्त्री । द्यूते पाण्डवान् जित्वा वनं प्रेरयसाख । अयं हि कौरवपक्षे सहदेवेन निरुद्ध: । एतद्विवरणं महाभारते शल्यपर्व्वणि द्रष्टव्यम् ।) वसाद्येकादशकरणान्तर्गताष्टमकरणम् । इति मेदिनी ॥ तत्करणजातफलम् ।
"परधनधनहर्त्ता वञ्चक: क्रूरचेष्ट:
करधृतकरवाली याचनव्याभिभक्त: ।
अतिशयपरदारासक्तचित्त: सदोषो
भवति शकुनिजन्मा लोभव: क्षीणकर्म्मा ॥"
इति कोष्ठीप्रदीप: ॥*॥
दु:सहस्फुल: । यथा,—
"दु:सहस्यासनात् भार्य्या निर्व्वाहिर्नास जायत: ।
जाता कन्येति भार्य्यायां क्षतौ शकुनदर्शनात् ॥
तयोरभवान्यभवन् चत्वारोऽपि पोड्श ।
अष्टौ कुमारा: कन्याश्च तथाष्टावतिभीषणा: ॥
दत्ताशक्तिस्तयोक्तिश्च परिवर्त्तक्रिया पर: ।
अङ्गभुक् शकुनिर्नेष मैत्रेयान्तरतिस्तया ॥"
तस्य पक्षे पुत्रा यथा,—
"श्येनकाककपोतांश्च गृध्रोलूकौ च वै सुतान् ।
जनयाम शकुनि: पक्षे जगृहुस्ताव सुरासुरा: ॥
श्येनं जघ्राह वै मृत्यु: काकं कालो गृहीतवान् ।
उलूकं निर्ऋतिस्त्वापि जग्राहातिभयावहम्' ॥
गृध्रं वाधिक्षदीशोऽथ कपोतश्च स्वयं यम: ।
मृतेषाबेव चैवोक्ता: छाया: पर्य्यायपादने ॥
तस्मात् श्येनादयो यस्य निजौकस्त्वे शिरस्यथ ।
तेनाग्रजन्मगायत्रं शकुनि: कार्य्या द्विजोत्तम ॥
गेहे प्रवृत्तिरेतेषां लक्ष्मीर्ड्डनिर्ऋतिर्नृणम् ।
न शकुनं वर्जयेत्तेषां कपोतोलूकान्तमस्तकम् ॥
श्येन: कपोतो भ्रमी वा कौशिको वा गृहे द्विज: ।
प्रविष्ट: कथयत्यन्तं वसतां तत्र वेश्मनि ॥
ईदृक् परित्यजेत्तेषां शान्तिं कुर्य्याद्विजोत्तम ।
स्वप्नेऽपि हि कपोतस्य दर्शनं न प्रशस्यते ॥"
इति मार्कण्डेयपुराणे दु:सहवंशोत्पत्तिनामाध्याय: ॥*॥ विष्कुचिपुत्र: । यथा,—
"वैवस्वतमनोरासीद्विष्वाकु: पृथिवीपति: ।
तस्य पुत्रशतं जातं विष्कुचिर्ज्येष्ठ उच्यते ॥
सोऽयोध्याधिपतिर्वीरस्तस्य पञ्चदश स्मृता: ।
शकुनिप्रमुखा: पुत्रा रचिता रोमहर्षिता: ॥"
इति वह्निपुराणे सगरोपाख्याननामाध्याय: ॥
शकुनिप्रपा, स्त्री, (शकुनीनां पक्षिणां पानार्थं या प्रपा ।) पक्षिण: पानीयशाला । तत्पर्य्याय: । श्रीग्रह: २ । इति हारावली ॥
शकुनी, स्त्री, (शकामापची । इति राजनिर्घण्टः ॥ चटकी । इति केचित् ॥ (पक्षिरूपधारिणी पूतना । यथा, महाभारते । ५ । १३० । ४५ ।
"अनेन हि हता बाल्ये पूतना शकुनी तथा ।"
तथा च हरिवंशे । ६२ । १—२ ।
"कस्यचित्त्वथ कालस्य शकुनीरूपधारिणी ।
धात्री कंसस्य भोजस्य पूतनेति परिश्रुता ॥
पूतना नाम शकुनी घोरा प्राणिभयङ्करी ।
आजग्मामार्द्धरात्रे तु पक्षौ क्षोभात् विधुन्वती ॥")

शकुलीश्वरः, पुं, (शकुलीनां मत्स्यानामीश्वरः।) शकरः। इति शब्दरत्नावली।

शकुलः, पुं, (शक्नोति उत्प्लवितुमिति। शक्+"शकिसहोलोलुपयः।" उणा० ३।६८। इति उलः।) पक्षी। इत्यमरः। (यथा, महाभारते। १। ७०। ११।

"तेषां चिरपुत्रेण वाणां क्षयादहो मातरिश्वनः।
प्रसरन्तश्च तां सद्य शकुला मेदकालयान्।")

कोकिलः। भासपक्षी। इति मेदिनी।

शकुलता, स्त्री, (शकुलीः मत्स्यिभिर्व्याप्ते इति। सा+ष्यर्थे तः। स्त्रियाम्।) मेघजालवारः। इत्यमरः। (यथा, माघे। ४। ५६।

"तमेरुजा कृत्तिमती शकुली विदिवा कृतः।
रक्तपादप्रसूता वै तामान्या वेगवाहिनी।")

शकुत, क्ली, (शक्नोति वर्त्मुमिति। शक्+"शकेर्डतिन्।" उणा० ४। ५८। इति डतिन्।) पिष्टा। इत्यमरः। (यथा, भागवते। ३।३०।२८।

"न दृष्ट्वा भक्तवृदयः शकृत्पूर्वं पिबत्यपि।")

शकृत्करिः, पुं स्त्री, (शकृत् करोतीति। शकृत्+कृ+"सत्यशकृन्नीरिन्।" ३।२।२४। इति इन्।) वत्सः। इत्यमरः। इन्द्रादिरिति विद्याविनोदः।

शकृत्कारः, त्रि, मलत्यागकारकः। शकृत् करोतीत्यर्थे शकृच्छब्दात् कर्णादेः घन् (अण्) प्रत्ययेन निष्पन्नः।

शकृद्दारं, क्ली, (शकृतो दारम्।) मलद्वारम्। तत्पर्य्यायः। अपानम् २ पायुः ३ गुदम् ४ गुदिः ५ अधोमार्ग ६ निर्ऋतिः ७ पायौ ८। इति हेमचन्द्रः।

शकृद्वरः, पुं, शूकरः। इति हेमचन्द्रः।

शकृद्वरिः, पुं, शूकरः। इति त्रिकाण्डशेषः।

शकरा, स्त्री, छन्दोभेदः। नदीभेदः। मेखला। इति मेदिनी। सा च समवृत्तषड्विंशतिवर्णच्छन्दोभेदात्मकचतुर्दशभेदभिन्नः। यथा,—

"उक्ष्णानुष्णा तथा मध्या प्रतिष्ठाया सुपूर्विका।
गायत्र्यादिप्रभेदेषु च दशसु शकरीव च।
त्रिष्टुप् च जगती चैव तथानिष्टगती मता।
अतीं धृतिमिमां चैव कृतिं प्रकृतिमाकृतिं।
विकृतिं संकृतिञ्चापि तथा चैवाभिकृतिकाम्।
उत्कृतां सप्तदशानां छन्दसां क्रमशः क्रमात्।"

तत्र चतुर्दशाक्षरपादयुक्तच्छन्दांसि यथा। गौर्या आदि त्रयोदश यथा।

"गौ गौ गौ गौ गः प्रथमपदमिहार्यायाः। १।
द्वितीयं पादार्द्धं तदनु तनया गौरि गः। २।
तृतीयं पादार्द्धं सरसिरुहपत्राक्षि। ३।
चतुर्थं पादार्द्धं तदनु तनया गौरि गः। ४।
गौरी गौ गौ गौ गौरि गिरिजा गौरवाप्तये। ५।
द्वितीयं पादार्द्धं गिरिवरसुतायै गौ गौ नमस्तेऽस्तु। ६।
गौरि गौरिति गौरी गौ गौ गौरीमुखोऽयम्। ७।

इति छन्दोमञ्जरी।

एतेषामुदाहरणानि छन्दोमञ्जरीतो बोध्यानि। शकरः, त्रि, (शक्+अरः।) शक्तिविशिष्टः। शर्करः। इत्यमरः। (शक्नोति वर्त्मुमिति। शक्+"शकेर्डतिन्।" उणा० ४। ५८। इति डतिन्।) पिष्टा। इत्यमरः। (यथा, भागवते। ३।३०।२८।

"न दृष्ट्वा भक्तवृदयः शकृत्पूर्वं पिबत्यपि।")

शकृत्करिः, पुं स्त्री, (शकृत् करोतीति। शकृत्+कृ+"सत्यशकृन्नीरिन्।" ३।२।२४। इति इन्।) वत्सः। इत्यमरः। इन्द्रादिरिति विद्याविनोदः।

शकृत्कारः, त्रि, मलत्यागकारकः। शकृत् करोतीत्यर्थे शकृच्छब्दात् कर्णादेः घन् (अण्) प्रत्ययेन निष्पन्नः।

शकृद्दारं, क्ली, (शकृतो दारम्।) मलद्वारम्। तत्पर्य्यायः। अपानम् २ पायुः ३ गुदम् ४ गुदिः ५ अधोमार्ग ६ निर्ऋतिः ७ पायौ ८। इति हेमचन्द्रः।

शकृद्वरः, पुं, शूकरः। इति हेमचन्द्रः।

शकृद्वरिः, पुं, शूकरः। इति त्रिकाण्डशेषः।

शकरा, स्त्री, छन्दोभेदः। नदीभेदः। मेखला। इति मेदिनी। सा च समवृत्तषड्विंशतिवर्णच्छन्दोभेदात्मकचतुर्दशभेदभिन्नः। यथा,—

"उक्ष्णानुष्णा तथा मध्या प्रतिष्ठाया सुपूर्विका।
गायत्र्यादिप्रभेदेषु च दशसु शकरीव च।
त्रिष्टुप् च जगती चैव तथानिष्टगती मता।
अतीं धृतिमिमां चैव कृतिं प्रकृतिमाकृतिं।
विकृतिं संकृतिञ्चापि तथा चैवाभिकृतिकाम्।
उत्कृतां सप्तदशानां छन्दसां क्रमशः क्रमात्।"

तत्र चतुर्दशाक्षरपादयुक्तच्छन्दांसि यथा। गौर्या आदि त्रयोदश यथा।

"गौ गौ गौ गौ गः प्रथमपदमिहार्यायाः। १।
द्वितीयं पादार्द्धं तदनु तनया गौरि गः। २।
तृतीयं पादार्द्धं सरसिरुहपत्राक्षि। ३।
चतुर्थं पादार्द्धं तदनु तनया गौरि गः। ४।
गौरी गौ गौ गौ गौरि गिरिजा गौरवाप्तये। ५।
द्वितीयं पादार्द्धं गिरिवरसुतायै गौ गौ नमस्तेऽस्तु। ६।
गौरि गौरिति गौरी गौ गौ गौरीमुखोऽयम्। ७।

इति छन्दोमञ्जरी।

एतेषामुदाहरणानि छन्दोमञ्जरीतो बोध्यानि।

शक्तिः

इति हेमचन्द्रः। (यथा, मनुः। ८। २०७।

"भ्रातृणां यस्तु नेहेत धनं शक्तः स्वकर्मणा।
न निर्भाज्यः स्वकादंशात् किञ्चिदुत्पाद्य दत्तवान्।")

त्रिकाण्डशेषः। इति शब्दरत्नावल्यां स्वामी।

शक्तवः, पुं, भूम्नि, भक्ष्यविशेषचूर्णम्। छातु इति भाषा। यथा,—

"धाना-भक्ष्ये भूम्नि स्त्रियां पुंभूम्नि शक्तवः।
केचित्तु शक्तुरक्तीति वसुरा भूम्नि स्त्रियाम्।"

इति जटाधरः।

अस्य विवरणं शक्तुशब्दे द्रष्टव्यम्।

शक्तिः, स्त्री, (शक्+क्तिन्।) कार्य्यजनकसामर्थ्यम्। यथा,—

"या देवी सर्वभूतेषु शक्तिरूपेण संस्थिता।"

इति देवीमाहात्म्यस्य टीकायां नागोजीभट्टः।

शक्यते चेतुमनया। सा प्रभावोत्साहमन्त्रभेदात्त्रिविधा। तत्र प्रभुसंसे साधकत्वात् कोषदण्डौ प्रभुशक्तिः १। विक्रमेण सम्पन्ना विष्णुरथसुत्साहशक्तिः २। मन्त्रादीनां सामादीनाञ्च यथावत्स्थानं मन्त्रशक्तिः ३। सामर्थ्यमाचम्। सत्यर्थायः। प्रविषम् २ तरः ३ शुद्धः ४ बलम् ५ शौर्यम् ६ स्थाम ७ शुष्मम् ८ पराक्रमः ९ प्राणः १०। इत्यमरः। शुक्रम् ११ वृषम् १२। इति शब्दरत्नावली। ऊर्क्कः १३। इति जटाधरः। काष्ठः। सा तु शब्दसामान्यम्। इति नानार्थे अमरभरतौ। गौरी। इति मेदिनी। लक्ष्मीः। इति शब्दमाला। ●।

विशक्तयो यथा,—

"एषा विशक्तिरुद्दिष्टा मयेच्छाज्ञानगामिनी।
एषा श्वेता परा दृष्टिः सात्त्विकी शक्तसंज्ञिता।
एषैव रक्ता रजसि वैष्णवी परिकीर्त्तिता।
एषैव कृष्णा तमसी रौद्री देवी प्रकीर्त्तिता।
परमात्मा यथा देवो एक एव त्रिधा स्थितः।
प्रयोजनवशात्तद्वदेवैव त्रिविधा भवेत्।"

इति वाराहे त्रिशक्तिमाहात्म्यनामाध्यायः। ३।

अपि च।

"त्रिधः त्रिधात्मकस्यास्य सौम्यं शक्त्यात्मकं जगत्।
तथोर्द्ध्वमेव भेदेभ्यो जातास्त्रिशक्तयः।"

इति त्रिधाभावः।

अपरञ्च।

"इच्छा क्रिया मता ज्ञानं सौरी ब्राह्मी तु वैष्णवी।
त्रिधा शक्तिः स्थिता यत्र तत्र सर्वं प्रतिष्ठितम्।"

इति गोरक्षसंहितायां ३।

अष्ट शक्तयो यथा,—

"इच्छाशक्तिर्ज्ञानशक्तिः क्रियाशक्तिस्तथैव च।
सौभाग्यशक्तिर्ललिता बाह्मी माहेश्वरी तथा।
कौमारी वैष्णवी चण्डी वाराही लक्ष्मीरेव च।
एताः सर्वाः शक्तयः प्रोक्ताः सर्वसम्पत्प्रदायिकाः।"

इति ब्रह्मवैवर्ते श्रीकृष्णजन्मखण्डे नामकर्म्मनाम ११८ अध्यायः।

अत्र शक्तयो यथा,—
"अत्र पद्मे चाष्टदले मध्ये च भक्तिपूर्व्वकम्।
वैष्णवीञ्चैव ब्रह्माणीं रौद्रीं माहेश्वरीं तथा॥
नारसिंहीञ्च वाराहीमिन्द्राणीं कार्त्तिकीं तथा।
सर्व्वशक्तिस्वरूपाञ्च प्रधानां सर्व्वमङ्गलाम्॥
नवशक्तीश्च संपूज्य घटे देवांश्च पूजयेत्॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ६१ अध्यायः॥*॥

पञ्चाशद्विष्णुशक्तयो यथा,—
"कीर्त्तिः कान्तिस्तुष्टिपुष्टी धृतिः शान्तिः क्रिया दया।
मेधा स्पृहा श्रद्धा स्वाहाच्छा लक्ष्मीः सरस्वती॥
प्रीतीं रतीं रमा प्रोक्ताः क्रमेण स्वरशक्तयः।
जया दुर्गा प्रभा सत्या चण्डा वाणी विलासिनी॥
विरजा विजया विश्वा विनदा सुनदा स्तुतिः।
ऋद्धिः सन्धिः सुधिश्च भक्तिर्मुक्तिर्मतिः क्षमा॥
रमोमा क्लेदिनी क्लिन्ना वसुदा वसुधा परा।
परा परायणा सूक्ष्मा सन्ध्या प्रज्ञा प्रभा निशा॥
अमोघा विद्युता चेति शक्तयः सर्व्वकामदाः।
एताः प्रियतमाश्चेषु नियताः सस्मितानानाः॥
विद्युद्दामसमानाङ्ग्यः पङ्कजाभयबाहवः॥"*॥

पञ्चाशद्ब्रह्मशक्तयो यथा;—
"गुणोदरी स्वाहिरवा ह्रीलक्ष्मीं तदनन्तरम्।
लोलाक्षी वर्त्तुलाक्षी च दीर्घघोणा समीरिता॥
सदीर्घसुखीगोसुखौ दीर्घजिह्वा तथैव च।
ह्रस्वोदर्य्यर्हकेश्यौ च तथा विकृतसुखयि॥
ज्वालासुखी ततो ज्ञेया पश्चादुल्कासुखी ततः।
सुश्रीसुखी चैव विद्यासुखेताः स्वरशक्तयः॥
महाकालीसरस्वत्यौ सर्व्वसिद्धिसमन्विते।
गौरी त्रैलोक्यविद्या स्याच्चन्तसिद्धिस्ततः परम्॥
त्र्यात्मशक्तिर्भूतमाता तृषा लम्बोदरी स्तुता।
द्राविणी नागरी भूयः खेंचरी चापि मञ्जरी॥
रूपिणी चिचिणी पश्चात् धाकोदर्य्यपि पूतना।
स्याद्ब्रह्मकाली योगिन्यौ शङ्खिनी गर्ज्जिनी तथा॥
कालरात्रिश्च कुब्जिन्या कपर्दिन्यपि वज्रया।
जया च सुमुखेश्वर्य्या रेवती माधवी ततः॥
वारुणी वार्षवी प्रोक्ता पञ्चाग्नेयीविदारिणी।
ततश्च सहजा लक्ष्मीर्व्यापिनी मायया न्विता॥
एता रुद्राकपीठस्थाः सिन्दूरारुणविग्रहाः।
रक्तोत्पलकपालाभ्यामलङ्कृतकराम्बुजाः॥"
इति प्रपञ्चसारः॥*॥

कुलशक्तयो यथा,—
"शक्तयः परमेशानि! विद्याः सर्व्वयोषितः।
नटी कापालिकी वेश्या मालिनी कुङ्कुमालिनी॥
चाण्डाली च कुलाली च रजकी नापिताङ्गना।
गोपिनी योगिनी शुद्धा ब्राह्मणी राजकन्यका॥
कायाङ्गना च देवेशि! तथैव शङ्खकारिणी।
एता षड्विंशतिः कन्या देवानामपि दुर्लभाः॥
देवज्ञा माधवामा च तथा मांसाग्रहारिणी।
बौद्धा च यवनी देवि तथा रसपसारिणी॥
वेश्या चतुर्व्विधा प्रोक्ता द्विविधा कुङ्कुमालिनी।
धोबरी द्विविधा प्रोक्ता तथैव गणिकाङ्गना॥
शुल्कारी द्विधा प्रोक्ता तथैव गोपिनी स्तुता।
धातवेद्याङ्गना देवि यवनी द्विविधा स्तुता॥
बौद्धकन्या त्रिधा देवि तथा कोचाङ्गना प्रिया।
पूर्व्वोक्ताभिः सहैकत्र चतुःषष्टिश्च शक्तयः॥"
इति रेवतीतन्त्रे ३ पटलः॥*॥

अपि च।
"पञ्चाचारेण देवेशि! कुलशक्तिं प्रपूजयेत्।
नटी कापालिकी वेश्या रजकी नापिताङ्गना॥
ब्राह्मणी शूद्रकन्या च तथा गोपालकन्यका।
मालाकारस्य कन्या च नव कन्याः प्रकीर्त्तिताः।
विशेषवेदधायुताः सर्व्वा एव कुलाङ्गनाः।
रूपयौवनसम्पन्ना शीलसौभाग्यशालिनीः
पूजनीया प्रयत्नेन ततः सिद्धिर्भवेद् ध्रुवम॥"
इति गुप्तसाधनतन्त्रे १ पटलः॥*॥

तस्याः प्रशंसा यथा।
"शक्तिं विना महेशानि! सदाहं शवरूपकः।
शक्तियुक्तो यदा देवि! शिवोऽहं सर्व्वकामदः॥
शक्तियुक्तं जपेन्मन्त्रं न मन्त्रं केवलं जपेत्।
सावित्रीसहितो ब्रह्मा सिद्धोऽभून्नगनन्दिनि॥
द्वारवत्यां कृष्णदेवः सिद्धोऽभूत् सत्यया सह।
तथा कोचवधूसङ्गान्मम सिद्धिर्वरानने॥
ईश्वरोऽहं महादेवि! केवलं शक्तियोगतः।
शक्तियोगेन देवेशि यदि सिद्धिर्न जायते॥
तदैव परमेशानि मम वाक्यं वृथा भवेत्।
यद्दृत्तं जलगण्डूषं शक्तिवक्त्रे सुरेश्वरि!॥
सिन्धुरूपं महेशानि! तच्चलं नात्र संशयः।
स्त्रीवेशदेवीभावेन भोजयेत्ताश्च यत्नतः॥
शक्तिश्च कथ्यते देवि शृणुष्व सुरसुन्दरि।
चतोदशाब्दादूर्द्धं या गम्यविंशतिवार्षिकी॥
अप्रगल्भा विशेषेण प्रथमेऽपि भवेत् प्रिये।
सुन्दरी तु त्रिशेषेण प्रगल्भा वाप्रगल्भिका॥
अवश्यं पञ्चमं कुर्य्यात् शक्तिमात्रे महेश्वरि॥"
इति शक्तिकागमसर्व्वस्वम्॥*॥

तस्या उत्पत्तिमाहात्म्यादिर्यथा,—
नारायण उवाच।
"सह बुद्ध्या बुद्धिमन्तो न वक्तुमीशते सुराः।
सर्व्वे शक्त्यालया विश्वे शक्तिमन्तो हि जीविनः॥
ब्रह्मादिस्तम्बपर्य्यन्तं सर्व्वं प्राकृतिकं जगत्।
सत्यं नित्यं विना माद्य मया शक्तिः प्रकाशिता॥
अविर्भूता च सा मत्तः स्त्री देवी महीश्वरी।
तिरोहिता च सा तत्रैव सृष्टिसंहरणे मयि॥
सृष्टिकर्त्री च प्रकृतिः सर्व्वेषां जननी परा।
मम तुल्या च मन्माया तेन नारायणी स्तुता॥
सुचिरञ्च तपस्तप्तं श्रमेण ध्यायता च माम्।
तेन तप्ते मया दत्ता तपसां फलरूपिणी॥
व्रतञ्च लोकशिक्षार्थमस्या न स्वार्थमेव च।
स्वयं व्रतानां तपसां फलदात्री जगन्मये॥
मायया मोहिताः सर्व्वे किमस्या वास्तवं वपुः।
साध्यमस्या व्रतफलं कल्पे कल्पे पुनः पुनः॥
सुरेश्वरा यदंशाश्च ब्रह्मविष्णुमहेश्वराः।
कलाः कलांशरूपाश्च जीविनश्च सुराद्यः॥
नृदा विना कुलालश्च घटं कर्त्तुं यथाक्षमः।
विना स्वयं सर्व्वकारः कुलं कर्त्तुमक्षमः॥
विना शक्त्या तथाऽज्ञश्च स्रष्टुं कर्त्तुमक्षमः।
शक्तिप्रधाना ह्यज्ञस्य सर्व्वदर्शनसम्मता॥
अहमात्मा च निर्लिप्तोऽज्ञः साक्षी च देहिनाम्।
देहाः प्राकृतिकाः सर्व्वे नश्वराः पाञ्चभौतिकाः॥
अहं नित्यशरीरी च भानुविग्रहविग्रहः।
सर्व्वाधारा च प्रकृतिः सर्व्वात्मा जगतां सु च॥
अहमात्मा मनो ब्रह्मा ज्ञानरूपा महेश्वरः।
पञ्च प्राणाः स्वयं विष्णुर्बुद्धिः प्रकृतीश्वरी॥
शक्तयो निद्राद्यश्चेताः सर्व्वाश्च प्रकृतेः कलाः।
सा च गोलेन्द्रकन्येयं इति वेदनिरूपितम्॥"
इति ब्रह्मवैवर्त्ते गणेशखण्डे ७ अध्यायः॥*॥

अपि च।
"सा शक्तिः सृष्टिकाले च पञ्चधा चेश्वरेच्छया।
राधा पद्मा च सावित्री दुर्गा देवी सरस्वती॥
प्राणाधिष्ठातृदेवी या कृष्णस्य परमात्मनः।
प्राणाधिकप्रियतमा सा राधा परिकीर्त्तिता॥
ऐश्वर्य्याधिष्ठातृदेवी सर्व्वमङ्गलकारिणी।
परमानन्दरूपा च सा लक्ष्मीः परिकीर्त्तिता॥
विद्याधिष्ठातृदेवी या परमेशस्य दुर्लभा।
वेदशास्त्रयोगमाता सा सावित्री प्रकीर्त्तिता॥
बुद्ध्यधिष्ठातृदेवी या सर्व्वशक्तिस्वरूपिणी।
सर्व्वशास्त्रात्मिका सर्व्वा सा दुर्गा दुर्गनाशिनी॥
रागाधिष्ठातृदेवी या प्राज्ञज्ञानप्रदा सदा।
कृष्णकण्ठोद्भवा या च सा च देवी सरस्वती॥
पञ्चधादौ स्वयं देवी मूलप्रकृतिरीश्वरी।
ततः सृष्टिक्रमेणैव बहुधा कलया च सा।
योषितः प्रकृतेरंशाः पुमांसः पुरुषस्य च॥
इति च ब्रह्मवैवर्त्ते गणेशखण्डे ४० अध्यायः॥*॥

ब्रह्मणोऽशक्त्युत्पत्तिर्यथा,
"ततो ब्रह्मादयो देवा भयं जग्मुः सवासवाः।
यदि स्याद्विर्जितो देवः क्षयः सर्व्वदिवौकसाम्॥
एतस्मिन्नन्तरे शक्र! ब्रह्मा चिन्तयते क्रियाः।
स्त्रीरूपधारिणी भूत्वा सहायत्वं महेश्वरे॥
क्षिप्रं कुरु स्वकार्य्यं त्वं एवं विश्वेश्वरे रणे।
ततो योजितवान् शम्भुः स्वशक्तिं किरणोज्ज्वलाम्॥
ब्रह्मरूपधरा किन्तु ललनाकारविग्रहाम्।
हंसस्यन्दनमारूढा सकीयायुधधारिणीं॥
तर्ज्जयन्तीं महौजेन दानवानां भयङ्करीं।
तस्य घोराणि कर्म्माणि दृष्ट्वा स विस्मयन् शिवः॥
का पुनः स्रष्टुः सुस्नेहा सदातिप्रतिमक्षमित्।
तस्याः शक्तिं द्वितीयाञ्च ह्यहमि अपराजिताम्॥"
इति देवीपुराणे चतुर्थे ब्रह्मखण्डे शक्त्युत्पत्तिः॥७॥

नन्दातीर्थे शक्तिमन्त्रविचारनिषेधो यथा।
"योऽसावनादिमध्यान्तशिवशक्तिमयः परः।
तस्यैव परमानन्दा सर्व्वकिल्बिषनाशिनी॥
तत्प्रभावेण प्राप्नोति तपोयज्ञादिकं फलम्।
मन्त्राद्यां देवशक्तीनां न विचारो वरानने॥"
इति देवीपुराणे नन्दाकुण्डप्रभेदः प्रथमाध्यायः॥*॥

शक्तिक्षेप

प्रकृतिः + यथा,—
"प्रधानं प्रकृतिः शक्तिर्निर्द्रा चाविद्यातिसंज्ञया ।
एतानि तस्या नामानि पुरुषं या समाश्रिता ॥"
तथा शब्दार्णवे ।
"सत्त्व रजस्तमस्त्रीणि विज्ञेयाः प्रकृतेर्गुणाः ।"
इति भावप्रकाशः ॥ * ॥

शक्तिविषयकपुण्यानि यथा,—
"अथ पुण्यं प्रवक्ष्यामि कर्म्मयोगे महेश्वरि ।
शृणुष्व परया भक्त्या यथोक्तं ब्रह्मणा पुरा ॥
कमले करवीरे द्वे कुशपुष्पे तुलसीदयम् ।
जात्यशोके केतकी द्वे कुमारीपत्रकोत्पलम् ॥
कुन्दमन्दारपुन्नागपाटलागस्त्यकम् ।
चारुवर्षं कर्णिकारं यावन्ती नवमल्लिका ॥
बौरुल्लिकं सकोरण्टं प्रलाशाशोकसप्तकाः ।
सिन्धुवारो व्यपामार्गवापुलीकच कामजम् ॥
चाम्रचेलं दमनकं मरुवकं ततः परम् ।
लवङ्गं जलकर्पूरं तगरस्य लवा तथा ॥
शिवपुष्पं द्रोणपुष्पं कामराजं सुकेतकम् ।
अन्यानि व्रतपुष्पाणि जलजस्थलजानि च ।
गिरिजानि देशजानि नानापुष्पाण्यतः परम् ॥"
इति प्रपञ्चसारः ॥

शक्तियष्टिः, पुं, (शक्तिं यष्टीति । शक्ति + यष्टि + "शक्तिलाङ्गलाङ्कुशेति ।" ३ । २ । ६ । इत्यस्य वार्त्तिकोक्त्या यच् ।) शिवः । कार्त्तिकेयः । शक्तिं गृह्णाति यः इत्यर्थे शक्तिशब्दपूर्व्वकग्रहधातोरल्प्रत्ययेन निष्पन्न इति केचित् ॥ (शक्तेर्यष्टो यष्टणम् ।) शब्दशक्तिज्ञानम् । यथा । 'अस्मात् शब्दात् अयमर्थो बोद्धव्य इतीश्वरेच्छा शक्तिरिति तार्किकाः । तन्त्रावन्तु व्याकरणादिभ्यः । अतएव ।

'शक्तिग्रहं व्याकरणोपमान-
कोषाप्तवाक्याद्व्यवहारतश्च ।
वाक्यस्य शेषाद्विवृतेर्व्वदन्ति
सान्निध्यतः सिद्धपदस्य वृद्धाः ॥'

इति प्राचः ।" इति दुर्गादासः ॥

शक्तियाष्टिकः, पुं, व्याकरणोपमानादिः । शक्तिर्यष्टिर्गृहीता च । शक्तिं यष्टयति गृह्णाति च इत्यर्थे प्राग्वाणान्तग्रहधातोर्ण्वुल्(ष्वुल्)प्रत्ययेन निष्पन्नमेतत् ॥

शक्तिधरः, पुं, (धरतीति । धृ + अच् । शक्तेर्धरः ।) कार्त्तिकेयः । इत्यमरः ॥ (यथा, हरिवंशे । ७३।६।
"बलेन वपुषा चैव वाक्येन चरितेन च ।
स्याक्ते शक्तिधरस्तुल्यो न तु कश्चन मानुषः ॥")
शक्तिधारके, त्रि ॥ (यथा, बृहत्संहितायाम् । ५८ । ४१ ।
"स्कन्दः कुमाररूपः शक्तिधरो वह्निकेतुश्च ॥")

शक्तिपर्णः, पुं, सप्तपर्णवृक्षः । इति शब्दरत्नावली ॥

शक्तिपाणिः, पुं, (शक्तिरस्त्रविशेषः पाणौ यस्य ।) कार्त्तिकेयः । इति हेमचन्द्रः ॥

शक्तिभृत्, पुं, (शक्तिं बिभर्त्तीति । भृ + क्विप् । तुक् च ।) कार्त्तिकेयः । इति हेमचन्द्रः ॥ शक्तयष्टिधारके, त्रि ॥

शक्तुः

शाक्तैहिकः, त्रि, (शक्तिर्हैहिः प्रहरणार्थं यस्य ।) शक्त्यस्त्रधारियोद्धा । तत्पर्य्यायः । शाक्तीकः २ । इत्यमरः ॥ शक्त्यायुधधरः ३ । इति शब्दरत्नावली ॥

शक्तुः, पुं क्ली, (शक + बाहुलकात् तुन् ।) भर्জ্জিত-यवादिचूर्णम् । क्वातु इति भाषा । यथा,—
"धाना भृष्टयवे भूम्नि स्त्रियां पुं भूम्नि शक्तवः ।
केचित्तु शक्तुरस्त्रीति वसुरा भूमनि स्त्रियाम् ॥"
इति जटाधरः ॥

अथ गुणाः ।
"यवानां शक्तवो रूक्षा लेखना वह्निवर्द्धनाः ।
वातला कफरोगघ्ना वातवर्च्चोऽनुलोमनाः ॥
धानाभ्यश्चाल्प तेऽतीव दुर्জ্জरा लेखनाः स्मृताः ।
गुर्व्वीं पिण्डीकृतास्वर्थं जग्धौ सैव विपर्य्ययात् ।
शक्तूनामाशु चीर्य्येत मृदुलाश्चलेष्किका ॥"
इति राजवल्लभः ॥

अथ शक्तवः ।
"धान्यानि भ्राष्टभृष्टानि यन्त्रपिष्टानि शक्तवः ।"
च यवशक्तवः ।
"यवजाः शक्तवः शीता दीपना लघवः सराः ।
कफपित्तहरा रूक्षा लेखनाश्च प्रकीर्त्तिताः ॥
ते शीता बलदा तृष्णा हृद्या भेदनास्तथा ।
तर्पणा मधुरा रुक्षाः परिणामे बलावहाः ॥
कफपित्तश्रमक्षुत्तृड्व्रणनेत्रामयापहाः ।
प्रशस्ता वर्ष्मदार्ढ्याय यायामार्क्षशरीरियाम् ॥"
अथ चणकयवशक्तवः ।
"निस्तुषैश्चणकैर्भृष्टैस्तूर्य्याग्नेश्च यवैः कृताः ।
शक्तवः शक्करासर्पिःशक्ता शीघ्रेतिपूजिताः ॥"
अथ शालिशक्तवः ।
"शक्तवः शालिसंभूता बल्या लघवो हिमाः ।
मधुरा ग्राहिणो रुक्षाः पथ्याश्च बलशुक्रदाः ॥
न शुष्का न रहस्थित्वा न निशायां न वा बहून् ।
न जलान्तरितान् न हि शक्तूनश्नन् कदाचन ॥
पृथक्पात्रं पुनर्द्दानं सक्तिमं पयसा निशि ।
दन्तच्छेदनदुष्टश्च सप्त शक्तुषु वर्জ্জयेत् ॥"
इति भावप्रकाशः ॥

ज्योतिषे तद्भक्षणफलम् । ज्योतिषे ।
"शक्तून् खादति यस्तु तस्य रिपवो नाशं
प्रयान्ति ध्रुवं
सुक्षेत्रे यस्तु गिरामिषं च हि भवेत् जन्मान्तरे
पण्डितः ।"
इति तिथ्यादितत्त्वम् ॥

मेषसंक्रान्त्यां तद्दानविधिर्यथा । स्मृतिः ।
"मेषादौ शक्तवो देया वारिपूर्णा च गर्गरी ।"
महार्णवे ।
"यो ददाति हि मेषादौ शक्तून्सघृटान्वितान् ।
पितृतृप्तिश्च विप्रेभ्यः सर्व्वपापैः प्रमुच्यते ।
विप्रेभ्यः प्राड्मुखे दत्तं पित्र्ये विष्णवे शुभम् ॥"
इति तिथ्यादितत्त्वम् ॥

चातुर्मास्यव्रते प्रातःस्नानस्य घृतशक्तवो दक्षिणा यथा । तत्रैव ।
"नित्यस्नाने हविर्द्देयाग्निः क्षेत्रे घृतशक्तवः ॥"
नित्यस्नाने प्रातःस्नाने । इति मलमासतत्त्वम् ॥

शक्रः

शक्तुकः, पुं, विषभेदः । तस्य लक्षणस्वरूपे यथा,
"यदङ्गन्थिः शक्तुकेनेव पूर्णसंधिः स शक्तुकः ॥"
इति भावप्रकाशः ॥

शक्तुफला, स्त्री, शमीवृक्षः । इत्यमरः ॥

शक्तुफली, स्त्री, शमीवृक्षः । इति शब्दरत्नावली ॥

शक्रवर्द्धः, पुं, (शक्तेरर्द्धः ।) अमवातरोगविशेषः कुक्षिललाट-ग्रीवास्तम्भजन्यो धर्म्मः दीर्घनिश्वासश्च । यथा,—
"कुक्षौ ललाटे ग्रीवायां यदा धर्म्मः प्रवर्त्तते ।
शक्रवर्द्धं तं विजानीयादायतोच्छ्वासमेव च ॥"
इति राजवल्लभः ॥

शक्तिः, पुं, वशिष्ठसुतभेदेनोत्पन्नः । इति पुराणम् ॥ (यथा, महाभारते । १ । १७७ । ६ ।
"अपश्यदजितः संख्ये सुतं प्रतिसुखागतम् ।
शक्तिं नाम महाभागं वशिष्ठकुलवर्द्धनम् ।
ज्येष्ठं पुत्रं पुत्रशतात् वशिष्ठस्य महात्मनः ॥"
अयं हि इक्ष्वाकुवंशीयं कल्माषपादनृपतिं अशपत् । स च नृपती राक्षसो भूत्वा तम-भक्षयत् । एतद्वृत्तान्तस्तु महाभारते १।१७७ अध्याये द्रष्टव्यः ॥)

शक्रः, त्रि, प्रियंवदः । इत्यमरटीकायां भरतः ॥

शक्रुः, त्रि, प्रियंवदः । इत्यमरः ॥

शक्वन्, [न्] पुं, (शक + "अशिशकिभ्यां क्वन्दवि ।" उणा० ४ । १३६ । इति मनिन् ।) शक्तिः । शकधातोरौणादिकसनिन्प्रत्ययेन निष्पन्नम् । इति सिद्धान्तकौमुदी ॥ (इन्द्रः । इत्युज्ज्वलः । ४ । १३६ ॥ क्ली, शक्नोतेऽनेनाभिमतं प्राप्तुं शक्नोतीष्टं साधयितुं वा शक्यते कर्त्तुमिति वा । शक + मनिन् । कर्म्म । इति निघण्टुः । २ । १ ॥ यथा, ऋग्वेदे । ६ । ३४ । २ ।
"दुहन्ति शक्मना पयः ॥"
"शक्मना कर्म्मणा ।" इति तद्भाष्ये सायणः ॥)

शक्यः, त्रि, (शक + "शकिसहोश्च ।" ३ । १ । ९९ । इति यत् ।) यमर्थनीयः । (यथा, रघुः । २ । ६८ ।
"शक्यो ऽस्य मन्युर्भवता विनेतुं
गाः कोटिशः सार्थयता घटोघ्नीः ॥")
शक्यार्थवः । (यदा भावे यत् स्यात् तदा क्लीबलिङ्गः स्यात् । यथा, गीतायाम् । १८ । ११ ।
"नहि शक्यं देहभृता त्यक्तुं कर्म्माण्यशेषतः ॥"
तथाच रामायणे । २ । १३ । ५ ।
"तानि सर्व्वाणि संयन्तुं शक्यं राम जितेन्द्रियैः ॥")

शक्यः, पुं, वाच्योऽर्थः । यथा,—
"शक्यो ऽर्थोऽभिधया शैवः लक्ष्यो लक्षणया मतः ।
व्यङ्ग्यो व्यञ्जनया शैवस्त्रिः शब्दस्य वृत्तयः ॥"
इत्यलङ्कारशास्त्रम् ॥

अन्यच्च ।
"शक्ये साहश्यबुद्धिस्तु भवेदुपमितौ गुणः ।"
इति भाषापरिच्छेदः ॥

अपिच । "ईश्वरसङ्केतः शक्तिस्तया यदर्थबोधकं पदं तच्छक्यम् । अथ गोशब्दादिभिर्यद्गवादिपदं तद्बोध्योऽर्थो गवादिर्व्यक्तिः स एव मुख्यार्थः प्रत्युच्यते ।" इति शक्तिवादः ॥

अव्ययतावच्छेदकं, त्रि, (अव्ययतायाः अवच्छेदकम्।) अव्ययांशे भासमानधर्म्मः। यथा।

"एवञ्च तादृशधर्म्मस्य अव्ययतावच्छेदकत्वं दुर्व्वारमेव।" इति शक्तिवादः॥

शक्रः, पुं, (शक्नोति देवान् नाशयितुम्। शक्+ "स्फायितञ्चीति।" उणा० २।१३। इति रक्।) इन्द्रः। इत्यमरः। (यथा, रघुः। ३। ३६।

"धनुर्भृतासन्नत एव दक्षिणां
जघार शक्रः किल गूढविग्रहः॥")

कुटजवृक्षः। अर्জ্জुनवृक्षः। इति मेदिनी॥ ज्येष्ठानक्षत्रम्। यथा,—

"शक्रो निर्ऋतिस्त्वष्टायं विश्वविरिञ्ची हरिर्वसु-
र्वरुणः।
अजपादोऽहिब्रध्नः पूषा चेतीश्वरा भवनाम॥"
इति ज्योतिस्तत्त्वम्॥

चतुर्दशेन्द्रा यथा,—

"विष्वक्सेनश्च विपश्चित्सुचित्तिः शिविरेव च।
विभुर्मनोजवश्चैव तथौजस्वी बलिस्तथा॥
अद्भुतश्च तथा शान्तिर्जया देवगुरुर्वृषः।
ऋतधामा दिवःस्वामी सुचिः शक्राश्चतुर्दश॥"*

ब्राह्मदिनमासाब्देषु इन्द्राणां नामसंख्या यथा।

"ब्राह्मे दिने वै नक्षत्रा चतुर्दश पुरन्दराः।
शतानि साग्नि चत्वारि विंशत्या सहितानि च।
अब्दे षण्णवसाग्नि चत्वारिंशच्छतानि च॥"

इत्याद्ये वह्निपुराणे गणभेदनामाध्यायः॥*॥

इन्द्रत्वप्राप्तिकारणं यथा,—

इन्द्र उवाच।

"इक्ष्वाकाश्च भवत्तीर्थे क्रतवः क्रतुशतं पुरा।
तेन पुण्येन सम्प्राप्तं मया सौरन्दरं पदम्॥
इदानीं भूतनः कोऽपि ज्ञातो दिवि पुरन्दरः।
न तेन धर्म्मो विहितो न तेन क्रतवः कृताः।
मम सिंहासनं दिव्यं कथमाक्रान्तमद्भुत॥
इत्येवं वदतस्तस्य श्रुत्वा वाक्यं रमापतिः।
उन्मीलितस्मिताभोऽसावुवाच मधुरं वचः॥

श्रीभगवानुवाच।

देवाद्यो मनुजान्ता मम सेवापरायणाः।
सदाचारपरता लोका सद्भक्तिश्रुतिपाठकाः॥
सम्पूर्त्तिषु कृतश्रद्धा लक्षधाश्वमखा इह।
जलादीदक्षदेवेभ्योऽन्यकर्म्मसेव ये॥
मन्नामकीर्त्तनपरा मम स्तुतिपरायणाः।
मन्मन्त्रजापका नित्यमनन्याश्रयसद्मदः॥
किं विधिर्वं किमिन्द्रत्वं देवत्वमपरं किमु।
तेषामलभ्यं यत्किञ्चित् दुर्लभं नास्ति संस्तवौ॥
किं दानैरल्पफलदैः किं तपोभिः किमध्वरैः।
सेव्यमानैः क्षितितले न मम प्रीतिमान् यदा॥

इन्द्र उवाच।

भगवन् कर्म्मणा केन न त्वत्प्रीतिपरो भवेत्।
तदद्य मधुवाणी प्रपन्नभयभञ्जन॥

श्रीभगवानुवाच।

अनेकधा सङ्क्षपनं मम प्रीतिकरं परम्।
यज्ञक्रिया तत् यदि वै मे तत् शृणुष्व पुरन्दर॥
अपत्यदादशाध्यायगीतानां श्लोकमन्त्रकम्।
तथा भक्त्या तु सम्प्राप्तं तव साम्राज्यमुत्तमम्॥"

इति पाद्मोत्तरखण्डे ६६ अध्यायः॥

(ऋग्वेदे। चि। यथा, ऋग्वेदे। ४। १६। ६।

"विश्वानि शक्रो नर्य्याणि विद्वा-
नपो रिरेच सखिभिर्निकामैः॥"

"विद्वान् जानन् शक्रः समर्थ इन्द्रः।" इति तद्भाष्ये सायणः॥)

शक्रक्रीड़ाचलः, पुं, (शक्रस्य क्रीड़ाचलः क्रीड़ापर्व्वतः।) सुमेरुपर्व्वतः। इति हलायुधः॥

शक्रगोपः, पुं, इन्द्रगोपकीटः। इति शब्दरत्नावली॥ (यथा, हरिवंशे। ६६। ५।

"नववर्षाविसिक्तानि शक्रगोपाङ्कुलानि च।
नष्टदावाग्निमार्गाणि वनानि प्रचकाशिरे॥")

शक्रजः, पुं, (शक्राज्जायते इति। जन+डः।) काकः। इति त्रिकाण्डशेषः॥ इन्द्रजाते, त्रि॥

शक्रजातः, पुं, (शक्राज्जातः।) काकः। इति शब्दरत्नावली॥ इन्द्रजाते, त्रि॥

शक्रजित्, पुं, (शक्रं जितवानिति। जि+क्विप्।) रावणपुत्रः। इति त्रिकाण्डशेषः॥ (यथा, रघुः। १४। ८३।

"अपि प्रभुः वानुशयोऽधुना स्यात्
किमुतसुखः शक्रजितोऽपि हन्ता॥")

इन्द्रजेतरि, त्रि॥

शक्रद्रुमः, (शक्रस्य द्रुमः।) देवदारुवृक्षः। इति भावप्रकाशः॥

शक्रधनुः, [स्] क्ली, (शक्रस्य धनुः।) इन्द्रधनुः। इत्यमरः॥ शक्री इति रामधनुश्च इति च भाषा॥

"इन्द्रायुधं शक्रधनुः कौशिकायुधमित्यपि।
ऐरावतं रोहितं स्यादवक्रं यदि तद्धनुः॥"
इति शब्दरत्नावली॥

(यथा, महाभारते। ५। ५६। ११।

"यथाकाशे शक्रधनुः प्रकाशते
न चैकवर्णं न च सेन्द्रि किञ्चु तत्॥")

शक्रध्वजः, (शक्रस्य ध्वजः।) इन्द्रध्वजः। (यथा, आर्य्यासप्तशत्याम्। २६६।

"ते श्रेष्ठिनः क्व सम्प्रति शक्रध्वज! यैः कृत-
स्त्वयोच्छ्रायः।
यूयं वा मेदिं बाधुनातनगाङ्गां विधित्सन्ति॥")

तद्विवरणं यथा,—

नृपवाहन उवाच।

"भगवन् श्रोतुमिच्छामि तस्य उत्थापनं यथा।
क्रियते दिव कस्मिंश्च मयमत्यविधिं वद॥

अगस्त्य उवाच।

तत्त्वया कथितं शक्र बृहस्पतिसमीपतः।
यथा तथा प्रवक्ष्यामि विधिं केतोः वसुक्षये॥

बृहस्पतिरुवाच।

शुभाह्नि ऋक्षे करणे मुहूर्त्ते शुभमङ्गले।
दैवज्ञः सत्त्वधारश्च वर्म गच्छेत् सधावधान्॥
देवीप्रतिष्ठाविधिना यात्रायां वा प्रवोहिता।
गत्वा दक्षं शुभं पुण्यं धवार्च्चुनप्रियङ्करम्॥
उदुम्बराजकर्णेश्च पक्षेते शोभना हरेः।
ध्वजार्थं वर्जयेद्वृक्षं देव उद्यानजान् द्रुमान्॥
कन्या मध्ये तु या यष्टीः करमानेन कल्पयेत्।
एकादशकरा वत्स नव पञ्च करापरा॥
अराजतं क्रिमिचितं तथा पक्षिनिकेतनम्।
वल्मीकपिप्पलवनजां सुशुष्ककोटरान्तराम्॥
शून्याश्च घटसिक्ताश्च तथा स्त्रीनामगर्हिताम्।
विद्युद्दग्धक्षतां चैव दग्धाश्च परिवर्जयेत्॥
अलाभे चन्दनं श्रेष्ठं शालशाकमयं तथा।
कर्त्तव्यं शक्रचिह्नार्थं न चान्यं वृक्षजं क्वचित्॥
शुभभूमिभवं श्रेष्ठं शुभतोयं सुभावहम्।
ततः संपूजयेद्वृक्षं प्राङ्मुखोदङ्मुखोऽपि वा॥
नमो वृक्षपते वृक्ष त्वामर्च्चयति पार्थिवः।
ध्वजार्थं तत्त्वतो नाथ अन्यथा उपशम्यताम्॥
रात्रौ देयो बलिश्चत्र शुभवृक्षे तथैव च।
वासवानां महावृक्षं छित्त्वा श्रान्यच्च गम्यताम्॥
ध्वजार्थं देवराजस्य न चात्रित्व अत्र च।
पूजयित्वा ततो वृक्षं बलिं भूताय दापयेत्॥
प्रभाते छेदयेद्वृक्षं सुमङ्गलादिदर्शने।
शुक्लाम्बरधरश्चैव सतूर्यतरवं नदी॥
वृक्षान्नत्वा शुभान् वीरानारोहेत देवतालयम्।
देवो द्विजस्तथा साधुलिङ्गश्च हरेरपि॥
प्रतिमा पूजिता स्वप्ने क्षिप्रं सिद्धिफलप्रदा।
मत्स्यमांसदधिक्षीरं रुधिरं घृतरोदनम्॥
अगस्त्यागमनं दृष्ट्वा आसु सिद्धिफलप्रदम्।
द्रुमांस्तिलं घनं धान्यं शकुनाग्रं यथा शुभम्॥
फलं पुष्पं क्षिता दूर्व्वा स्वप्ने लब्धा जयावहाः।
शुक्लगावस्तथा दन्तिजाभा राज्यप्रदायकाः॥
गौः सवत्सा नवसुता दृष्टा पुत्रफलप्रदा।
पङ्कस्तोहरणं कूपे व्याधिमोक्षकरं चिरात्॥
एवं स्वप्नान् शुभान् दृष्ट्वा तथा क्षिप्रेण यादवम्।
उदङ्मुखः प्राङ्मुखो वा सशुक्लवाक्यपाणिना॥
पूर्व्वोत्तरे च पतनं शब्दोऽशब्दोऽथवा शुभः।
अलाभादपि चान्यं व्यथा तु परित्यजेत्॥
अशुभूलं त्यजेत् वृक्षे चान्ये तन्तु बले क्षिपेत्।
तथा तमानयेद्वृक्षं शकटेन हरेरपि॥
युवानैर्बलसम्पन्नैर्नयं ततपुरतः परम्।
नीयमाना यदा यष्टी समा वा चतुरस्रका॥
वृक्षा वा भङ्गमाधत्ते राज्ञः पुत्रं पुरोहितम्।
आरभङ्गे बलं भित्त्वाद्राज्यनाशं भयं तथा॥
अर्थस्य अथभङ्गेन शान्तिस्तत्र तु कारयेत्।
इन्द्रलक्ष्मसमत्वेन ज्ञातदेवसमापि वा॥
तथा नीत्वा शुभे लग्ने पुरस्तादुपवेशयेत्।
द्वारशोभां पथरथा यष्टे वृद्धे च कारयेत्॥
यदा पटहनादाश्च वेत्रायशङ्खनिस्वनाः।
सङ्कुलैर्वेदशब्दैश्च तदा नेया यत्र उच्छ्रयेत्॥
तत्रस्थापित्वकर्म्मावनिर्मितैस्तान्तु वेष्टयेत्।
वस्त्रैरक्षतशेषोत्थैः शुभैः शुक्लैर्यथाक्रमम्॥
नन्दोपनन्दसंज्ञाश्च शुभार्थं प्रथमांशगाः।
देवो जयविजयाख्याः षोड़शांशव्यवस्थिताः॥

अधिके शत्रुनाशिनी तथाधेना देवतेदेखाः।
ध्वजपरिमाणार्थं वेणुपरिधिः प्रथमं पिटम्॥
षोडशांशविहीनानि कुर्य्याच्छेषाणि बुद्धिमान्।
रसनां विचित्रवर्णां प्रथमां दद्यात् स्वयम्भूः॥
सुरक्तां चतरस्राञ्च विश्वकर्म्मा द्वितीयतः।
अष्टास्रान्तं स्वयं शक्रो नीलरक्तां प्रदापयेत्॥
कृष्णां यमेन वृत्तञ्चैरुणेन चतुरस्रिकम्।
मञ्जिष्ठाजलदाकारं वासुदेवो मरुत्रकम्॥
नीलवर्णञ्च तं दद्यात् स्कन्दो बहुविचित्रितम्।
वृत्तन्तु दहनो दद्यात् सुवर्णाभं तथाष्टमम्॥
वैदूर्य्यसदृशमिन्दो रेवैयं दापयेद् बुधः।
चक्राङ्कमक्षतिन्तु सूर्य्यो विश्वेदेवाः पञ्चनिभम्॥
ऋषयो नियमं दद्युर्नीलं नीलोत्पलाभासम्।
गुरुणा शुक्रेण ततो विशालं मरुतो न्यस्तम्॥
मरुद्विचित्राणि बहुभाटभिः खानि रूपाणि।
यद्वैकनेत्रं वृत्तन्तु केतोस्तस्य भूषणम्॥
तद्वैत्र तं विजानीयाद्यत्नादिभिस्तमुच्छ्रयेत्।
प्रथमं प्रविशमाना भूमिं यष्टिर्हन्ति राष्ट्रम्॥
बालानां तालशब्देन देशविघातं समाचष्टे।
नृपवधकरा विशीर्णा शुभावहा सर्व्वसान्द्रा च॥
शुभमुर्ण्ययेमशक्रसोमधनदवारुणैः।
यष्टौशक्रर्षिमन्त्राच्च होतव्या दधिचार्चिताः॥
शुक्रस्कन्दगुरुरुद्रयमरादि प्रपाठयेत्।
हुत्वा तु विधिवद्वह्निज्वालां लक्षेत बुद्धिमान्॥
सुतेजाः समगो दीप्तः संहतो रुचिरप्रभः।
रक्ताशोकसमाकारो रथमेरीखनः शुभः॥
शक्रदुन्दुभिमेघानां नादाः शस्त्रास्तु पावके।
ततः सचक्रलोचदण्डान् पताकानि समुच्छ्रये॥
अन्याश्च विविधाः शोभाः शक्रकेतुसमुच्छ्रये।
पौष्टपदे तु अश्वत्थ्यां शुक्लायां शोभने क्षणे॥
आश्विने वाथ शुक्लायां अवणेनाथ उच्छ्रयेत्।
पौरजनलग्नवृन्दैः पटभेरीनिनादितम्
वितानध्वजशोभाढ्यं पताकाभिः समुज्ज्वलम्।
विष्णोश्शक्रक्रमन्तेन सिंहरक्षाक्षतेन च॥
दृढमालाकरन्यस्तं शुभतोरणमाकुलम्।
अखिलमित्तसत्यानमभस्मपिटकं समम्॥
न चुतं वा समुत्थाप्य केतुं मासवजं विभो।
उच्छ्रितं रक्षयेत्तावत् काकोलूकोफपोतयोः॥
न समुत्थापनं दद्यादन्येषामपि पक्षिणाम्।
यन्मोहेनेन तत् कुर्य्यात् सुखं केतोर्यथाविधि॥
तथा तुसंस्थितं पूज्यं सुखयन्तमुपस्थितम्।
रात्रौ जागरणं कुर्य्यादिन्द्रमन्त्रानुकीर्त्तनम्॥
पुरोहितः सदैवज्ञः शुभशान्तिरतः सदा।
वृत्तपातो नृपं हन्यात् पताका महिषीवधम्॥
पिटके युवराजस्य सचिवमनुकल्पते।
राष्ट्रं तोरणपातेन ध्वजे अग्रक्षयो भवेत्।
पतिते शक्रदण्डे तु नृपमन्यं समादिशेत्।
ध्वजालम्बक उत्थाने शुभभाक्तस्करान्नयम्।
सुसमे संस्थिते शान्तिर्नृपस्य नगरस्य च॥
याचोच्छ्रितन्तु तिष्ठन्ति सांवत्सं पौराः सदा
हृष्टाः।
केतोर्निरता यत्नेन भद्राधाश्रिप्रकल्पाय॥

पाते तु नथैव कुर्य्यादुत्थाने यादृशी पूजा।
रात्रौ शुभकृत् पातनं नो दृष्टं काककपोतैः॥
याति नृपं सहराष्ट्रं यत्रैव कारयेत् केतुम्।
नगरे वा पुरे खेटे यत्रैवं कुर्व्वते पौराः॥
पुरे नगरस्य द्वारे वृषसिंहखगोत्थितम्।
केतुं समस्तधीराणां नाशनं जयदं महत्॥
एवं पूर्व्वं हरिः केतुं प्राप्तवान् वृषवाहनात्।
तथा ब्रह्मसुतेनैव ब्रह्मणः शक्रमागतः॥
तेन सोमस्य तद्वृत्तं ततो वृत्ते समागतम्।
तदाप्रभृति कुर्व्वन्ति नृपा अद्यापि उच्छ्रयम्॥
एवं यः कारयेद्राजा केतुं विजयकारकम्।
तस्य पृथ्वी वलोपेता सद्दीपा वशगा भवेत्॥"
इत्याग्नेये देवीपुराणे इन्द्रध्वजलक्षणम् २१ अध्यायः॥

शक्रनन्दनः, पुं, (शक्रस्य नन्दनः।) अर्জ্জुनः। इति जटाधरः॥ (इन्द्रपुत्रमात्रमपि॥ शक्रं नन्दयतीति। नन्दि+ल्युः।) इन्द्रानन्दकारके, त्रि॥

शक्रपर्य्यायः, पुं, (शक्रस्य पर्य्यायो नाम यस्य।) कुटजवृक्षः। इति रत्नमाला॥ इन्द्रवाचकश्च॥

शक्रपादपः, पुं, (शक्रस्य पादपः।) देवदारुवृक्षः। इत्यमरः॥ कुटजवृक्षः। इति राजनिर्घण्टः॥

शक्रपुष्पिका, स्त्री, (शक्रपुष्पी+स्वार्थे कन्। अत इत्वम्।) अग्निशिखावृक्षः। इति रत्नमाला॥

शक्रपुष्पी, स्त्री, अग्निशिखावृक्षः। इत्यमरः॥

शक्रबीजं, क्ली, इन्द्रजवः। इति राजनिर्घण्टः॥

शक्रभवनं, क्ली, (शक्रस्य भवनम्।) स्वर्गः। इति त्रिकाण्डशेषः॥

शक्रभित्, [द्] पुं, (शक्रं भिनत्तीति। भिद्+क्विप्।) इन्द्रजित्। स च रावणपुत्रः। इति शब्दरत्नावली॥

शक्रभूभवा, स्त्री, इन्द्रवारुणी। इति शब्दचन्द्रिका॥

शक्रमाता, स्त्री, (शक्रस्य माता इव।) भार्गी। इति राजनिर्घण्टः॥ इन्द्रजननी च॥

शक्रमालका, स्त्री, (शक्रस्य मालकेव।) शक्रध्वजाङ्गयष्टिविशेषः। यथा, कालिकापुराणम्।
"कुमार्य्यः षष्ठ कर्त्तव्या शक्रस्य नृपसत्तम।
शालमय्यस्तु ताः सर्व्वास्तत्परा शक्रमालकाः॥
केतोः पादप्रमाणेन कार्य्या शक्रकुमारिकाः।
मालकार्द्धप्रमाणा तु यन्त्रं हस्तद्वयं तथा॥
एवं कृत्वा कुमारीश्च मालकां केतुमेव च।
एकादश्यां सिते पक्षे यष्टीनामधिवासनम्॥"
इति तिथ्यादितत्त्वम्॥

शक्रमूर्व्वा, [न्] स्त्री, (शक्रस्येव मूर्व्वा यस्य।) वल्मीकः। इति त्रिकाण्डशेषः॥

शक्रवल्ली, स्त्री, (शक्रप्रिया वल्ली।) इन्द्रवारुणी। इति राजनिर्घण्टः॥

शक्रवाहनः, पुं, (शक्रं वाहयतीति। वह्+णिच्+ल्युः।) मेघः। इति शब्दचन्द्रिका॥

शक्रशरासनं, क्ली, (शक्रस्य शरासनम्।) इन्द्रधनुः। इति हलायुधः॥

शक्रशाखी, [न्] पुं, (शक्रनामकः शाखी।) कुटजवृक्षः। इति भावप्रकाशः॥

शक्रशाला, स्त्री, प्रतिश्रयः। इति भूरिप्रयोगः॥ पुस्तकान्तरे सभशाला इति पाठश्च॥ (शक्रस्य शाला।) इन्द्रगृहञ्च।

शक्रशिरः, [स्] क्ली, (शक्रस्य शिर इव।) वल्मीकः। इति राजनिर्घण्टः॥ इन्द्रमस्तकञ्च॥

शक्रसारथिः, पुं, (शक्रस्य सारथिः।) मातलिः। इति हलायुधः॥

शक्रसुतः, पुं, (शक्रस्य सुतः।) वालिवानरः। इति हलायुधः॥ इन्द्रपुत्रमात्रञ्च॥

शक्रसुधा, स्त्री, (शक्रस्य सुधेव।) पालङ्की। इति शब्दचन्द्रिका॥ कुरुण्टखोटी इति भाषा॥

शक्रहृष्टा, स्त्री, (शक्रेण हृष्टा।) हरीतकी। इति त्रिकाण्डशेषः॥

शक्राख्यः, पुं, (शक्रस्य आख्या यस्य।) पेचकः। इति त्रिकाण्डशेषः॥ इन्द्रनामके, त्रि॥

शक्राणी, स्त्री, (शक्रस्य पत्नी। ङीष्। आनुक्।) शची। इति शब्दमाला॥ (यथा, महाभारते। ५। ११। २२।
"इत्युक्तनिरयोवाच शक्राणीं भयमोहिताम्॥")

शक्राशनं, क्ली, (शक्रेण अश्यते इति। अश+ल्युट्।) भङ्गा। भाङ् इति भाषा। अस्य गुणाः।
"शक्राशनन्तु तीक्ष्णोष्णं मोहकृत् कुष्ठनाशनम्।
बलमेधाग्निकृत् श्लेष्मदोषहारि रसायनम्॥"
इति राजवल्लभः॥
अन्यत् विजयाशब्दे द्रष्टव्यम्। इन्द्रभेषजञ्च॥

शक्राशनः, पुं, (शक्र इति नाम अश्नुते व्याप्नोतीति। अश+ल्युः।) कुटजवृक्षः। इति शब्दचन्द्रिका॥

शक्राज्ञः, पुं, (शक्रस्य आज्ञा यस्य।) इन्द्रयवः। इति राजनिर्घण्टः॥ इन्द्रनामके, त्रि॥

शक्रिः, पुं, (शक+बाहुलकात् क्रिन्।) मेघः। वज्रम्। इन्द्रः। पर्व्वतः। इति संक्षिप्तसारोणादिवृत्तिः॥

शक्रोत्थानं, क्ली, (शक्रस्य शक्रध्वजस्य उत्थानम्।) शक्रध्वजोत्सवः। अस्य विधिर्लिख्यते।
श्रीऔर्व्व उवाच।
"अथातः शृणु राजेन्द्र शक्रोत्थानध्वजोत्सवम्।
यत्कृत्वा नृपतिर्याति नो कदाचित् पराभवम्॥
रवौ हरिस्थे द्वादश्यां अवणे सितपक्षके।
आराधयेन्नृपः सम्यक् सर्व्वविघ्नोपशान्तये॥
राजोपरिचरो नाम वसुनामापरस्तु यः।
नृपस्तेनायमतुलो यज्ञः प्रावर्त्तितः पुरा॥
प्राविट्काले च नभसि द्वादश्यामसितेतरे।
पुरोहितो बहुविधैर्वादित्रैर्यैः समन्वितः॥
प्रथमं शक्रकेत्वर्थे वृक्षमामन्त्र्य वर्द्धयेत्।
सांवत्सरो वाद्यकिच्च कृतकौतुकमङ्गलः॥
उद्याने देवनागारे श्मशाने मार्गमध्यतः।
ये जातास्तरवस्तांस्तु पर्व्वयेदुत्सवध्वजे॥
बहुपक्षीयुतं शुष्कं बहुकण्टकसंयुतम्।

कुम्भं पृथादर्भयुक्तं सलाजकुशं तरं त्यजेत् ।
पश्चिमाधमभागौर्वं कोटरैर्बहुभिर्युतम् ।
पवनानलविध्वस्तं तरं यत्नेन वर्जयेत् ।
नारीसंज्ञाश्च ये वृक्षा अतिदुग्धा अतिक्षुद्राः ।
तान् सदा वर्जयेद्धीरः सर्व्वदा शक्रपूजने ।
अर्जुनोदुम्बरश्चैव प्रियको ध्रुव एव च ।
औदुम्बरश्च पर्य्येते देवार्थे सप्तमाः स्मृताः ।
अन्ये च देवदार्व्याद्याः शालाद्याश्चारवस्तथा ।
प्रशस्तानपि परित्यज्य नाप्रशस्ताः कदाचन ।
तरुं पूर्वं तनौ रात्रौ स्पृष्ट्वा मन्त्रमिमं पठेत् ।
यानि कानि तु भूतानि तेभ्यः शक्तिं नमोऽस्तु वः ।
उपहारं गृहीत्वेमं क्रियतां वासवज्ञयः ।
पार्थिवस्तां वरयते सन्ति तेऽस्तु नमोनमः ।
अशाप देवराजस्य पूजेयं प्रतिगृह्यताम् ।
ततोऽपरेऽह्नि तं छित्त्वा सप्तसप्ताङ्गुलं पुनः ।
अग्रे त्रिपेशदग्रस्य छिद्रयेयं चतुरङ्गुलम् ।
ततो नीत्वा पुरद्वारं केतुं निर्म्माय तत्र वै ।
शक्राणां भाद्रपदे केतुं वेदीं प्रवेशयेत् ।
पार्थिवग्रहणमानस्तु अथमः केतुरुच्यते ।
द्वादशं तत्तो ध्यायान् द्वादशारिंशदेव च ।
ततोऽधिकः समाख्यातो दारुणाश्चोत्तमोत्तमः ।
कुमार्य्यः पञ्च कर्त्तव्याः शक्रस्य वृषवत्तम ।
ग्रामसस्यस्य ताः सर्व्वाश्चवराः शक्रमालिकाः ।
केतोः पादप्रमाणेन कार्य्याः शक्रकुमारिकाः ।
मालकार्हप्रमाणास्तु यत्नं कृत्वा तथा ।
एवं कृत्वा कुमारीश्च मालकां केतुमेव च ।
शुक्लाद्यद्धा सिते पक्षे यष्टिं तामधिवासयेत् ।
अधिवास्य ततो यष्टिं गन्धद्वारादिमन्त्रकैः ।
द्वादशं मन्त्रकं कृत्वा वासवं विसृजेत्ततः ।
अथ पूजयित्वा तु शक्रं मन्त्रात् प्रपूजयेत् ।
शक्रस्य प्रतिमां कृत्वान् शालकीं दारवीं तथा ।
अन्यतोऽप्यभूतां वा सर्व्वाभावे तु मृन्मयीम् ।
तां मन्त्रकल्पं मध्ये तु पूजयित्वा विधेयतः ।
ततः शुभे मुहूर्त्ते तु केतुमुत्थापयेन्नृपः ।
वज्रहस्त सुरारिघ्न वृत्रहन्नेव पुरन्दर ।
इमामर्घं गृहाणेशानां पूजेयं प्रतिगृह्यताम् ।
यद्देहि पर्व्वतारिघ्नं वै-
रमिदुनो वज्रधरामरेश ।
अतस्त्विदमं अवनाद्यार्घं
मदाय पूजां भगवन् नमस्ते ।
शक्रध्वजसमुत्थोऽसि वृत्रहन्नमरेश्वर ।
इति मन्त्रेण कर्त्तव्यं शालकैर्वेदकैरपि ।
आदर्शैः शालकैः सर्व्वैर्नृपैर्नागरिकैरपि च ।
मन्त्रैर्मन्त्रविदैः पूजेयं नृपैरिन्द्रध्वजे ।
यष्टेस्तु दक्षिणे पार्श्वे मण्डपं परिकल्पयेत् ।
शालाद्यैर्वा शक्रशास्त्रेषु शालां सर्व्वोपकल्पजाम् ।
तत्र शुभे मुहूर्त्ते तु शास्त्रिभिर्वेदपारगैः ।
केतोरुत्थापनं कार्य्यं शक्रस्य विधिवत्ततः ।
शक्रध्वजं शक्रयष्टिं शक्रालयं शक्रमालकम् ।
शक्रवीथिं शक्रगृहं दिव्यशालाश्च पेटके ।"

पेटके: स्थाने पट्टकैरिति च पाठः ।
"दृष्ट्वद्भिरतिकान्तैश्च नानाद्रव्यसुपूरितैः ।
यथावर्णैर्यथादेश्यैर्जितैर्वेश्यवेष्टितैः ।
युक्तं तं किङ्किणीजालैर्हेमदण्डपताकरैः ।
भूषितं बहुरत्नैश्च माल्यैर्बहुविधैस्तथा ।
बहुपुष्पैः सुगन्धैश्च भूषितं रत्नमालया ।
चित्रमाल्याम्बरधरैश्चतुर्भिरपि तोरणैः ।
उत्थापयेन्महाकेतुं राजामात्यैः शुभैः शुभैः ।
ततस्तत्राथ दिक्पालान् सर्व्वांश्च गणदेवताः ।
अपूपाद्यैः पूजयेत्तु बलिभिः पायसादिभिः ।
पूजितानाथ देवार्गा गन्धहोमं समाचरेत् ।
होमान्ते तु वसिं दद्यात् वासवाय महात्मने ।
तिलं घृतं चाचतञ्च पुष्पं दूर्व्वां तथैव च ।
एतैस्तु जुहुयाद्देवान् स्वैः स्वैर्मन्त्रैर्नरोत्तमः ।
ततो होमावसाने तु भोजयेदपि ब्राह्मणान् ।
एवं संपूजयेन्नित्यं शक्रराजं दिने दिने ।
ब्राह्मणैः सहितो राजा वेदवेदाङ्गपारगैः ।
सर्व्वेषु शक्रपूजासु यज्ञेषु परिकीर्त्तितः ।
त्रातारमिति मन्त्रोऽयं वासवस्य प्रियः सदा ।
एवं कृत्वा दिवाभागे शक्रोत्थापनमादितः ।
अपराह्णेतुनायातु द्वादशीं पार्थिवः स्वयम् ।
अलङ्कारे भरण्यान्तु निशि शक्रं विसर्जयेत् ।
सुप्तेषु सर्व्वलोकेषु यथा राजा न पश्यति ।
यस्तामात्मन्युमाप्नोति राजा दृष्ट्वा विसर्जनम् ।
शक्रस्य वृषभाद्यैश्च तस्मान्नेक्षेत तं नृपः ।
विसर्जनस्य मन्त्रोऽयं पुराविष्णुरदीरितः ।
यान्तं सुरासुरगणैः पुरन्दर मरुत्वतो ।
उपचारं गृहीत्वेमं मदैश्वर्यस्य गम्यताम् ।
वज्रकेतुध्वसम्भूत वारे भौमस्य वा अने ।
भूमिकम्पादिकोत्पाते वासवं न विसर्जयेत् ।
उत्पाते सप्तरात्रन्तु सर्वोपद्रवदर्शने ।
अनीश अनिमौमौ च ह्यन्यर्क्षेऽपि विसर्जयेत् ।
यत्रके तत्र संग्रामे जयीते यत्रके पुरः ।
तस्मिंस्तस्मिन् दिने चैव यत्रकाले विसर्जयेत् ।
तथा रक्षेन्नृपः केतुं यस्मिन् शक्रो यथा ।
न केतौ वृषभाद्यैश्च यावदपि विसर्जनम् ।
अग्नेः अग्नेः यावत्तेषु सर्व्वोत्थापनमादितः ।
इत्थं तथान्यथा मर्त्ये केतौ स्कन्धमवाप्नुयात् ।
विदर्भं शक्रकेतुं तं वासवद्वारं तथा त्रिषु ।
त्रिपेशेनैव मानेन तत्राधे यष्टिके नृपः ।
त्रिषु केतौ महाभाग यावत् संवत्सरं अले ।
भूताय सर्व्वलोकानामसुराधविनाशन ।
उत्थापयेत्सुरेन्द्रेषु सर्व्वलोकस्य वै पुरः ।
इन्द्रो विसर्जयेत्तु केतुं विधिनैवं प्रपूजने ।
वर्षे वर्षे कृते पूजा वासवस्य महात्मनः ।
न चिरं पृथिवी भद्रा यावत्तं लोकमाप्नुयात् ।
न तस्य दारुणे दुर्भिक्षे केतौ शक्रध्वजोत्थिते ।
शक्रध्वजे यदुत्थाने यस्य वासवे ।
न तस्य दारुणे दुर्भिक्षे केतौ शक्रध्वजोत्थिते ।

तत्तुल्यः कोऽपि नान्योऽस्ति प्रियः शक्रस्य पार्थिव ।
तस्य पूजा सर्व्वपूजा कैशवाग्नाश्च तत्त्वतः ।
सकलकलुषहारि व्याधिदुर्भिक्षनाशि
सकलभवनिवेशं सर्व्वसौभाग्यकारि ।
सुरपतिगुरुगामी दार्घनं शक्रकेतोः
प्रतिशरदमनेकैः पूजयेन श्रीविहीनैः ।"

इति श्रीकालिकापुराणे ८८ अध्यायः ॥

शक्रोत्सवः, पुं, (शक्रस्योत्सवः ।) इन्द्रस्य उत्सवः । तत्पर्य्यायः । अजोत्थानम् २ । इति त्रिकाण्डशेषः ॥ (यथा, महाभारते । १ । ६१ । २० ।
"वरदानमहायज्ञैस्तथा शक्रोत्सवेन च ।
संपूजिता भवता वसुधेयोश्वरो नृपः ॥")
अस्य विवरणं शक्रोत्थानशब्दे द्रष्टव्यम् ॥

शक्रः, पुं, (शक्+"सृडभ्यन्विभ्यः ङ्कः ।" उणा० ४ । १०८ । इति ङ्कः ।) अग्निवंशः । इति शक्रशब्दटीकायां भरतः ॥

शङ्करः, पुं, शवः । इति सिद्धान्तकौमुद्यामरभरतादिधृतिः ॥

शङ्करी, स्त्री, (शङ्कते कर्म्मणि कर्त्तुमिति । शक+"सामदिपदीति ।" उणा० ४ । ११२ । इति वनिप् । "वनो रश्च ।" ४ । १ । ७ । इति ङीश् ।) अक्षुणी । इति सिद्धान्तकौमुद्यामरभरतादिधृतिः ॥ नदीविशेषः । मेखला । छन्दोभेदः । इति मेदिनी ॥ स तु चतुर्दशाक्षरपादवृत्तम् । तल्लक्षणं यथा । अर्णवाधा १ वसन्ततिलकम् २ सिंहोद्धता ३ अपराजिता ४ प्रहरणकलिका ५ वाणिनी ६ लोला ७ शार्दूलविक्रीडितम् ८ इति छन्दोमञ्जरी ॥ (शक् । यथा, ऋग्वेदे । १० । ८१ । ११ ।
"ऋचां त्वः पोषमास्ते पुपुष्वान्
गायत्रं त्वो गायति शङ्करीषु ॥"॥
शक्नोति चीरादिप्रदानेन तद्वत्तं प्रीणयितुं स्वर्गेणेन वा पापमपनेतुमिति । शक+वनिप् । ङीषौ च । णौ । इति निघण्टुः । २ । ११ ॥)

शङ्कः, [न्] पुं, (शक्नोतीति । शक्+"सामदिपदीति ।" उणा० ४ । ११२ । इति वनिप् ।) अक्षी । इति सिद्धान्तकौमुद्यामरभरतादिधृतिः ॥

शङ्कः, पुं, शकटादिवाहकवृषभः । यथा,—
"शङ्खवाद्यस्तु शङ्कश्च शङ्खी गौरश्वधूर्त्तिलः ।"
इति शब्दरत्नावली ॥

शङ्करः, पुं, (यं कल्याणं करोतीति । शम्+कृ+"शम्भ्वादेरुपसंख्यानम् ।" ३ । २ । १३ । इति अच् ।) शिवः । इत्यमरः ॥ अस्य युतः पर्य्यायाः,—
"सदा शान्ताय भक्तानां सदयं शिवरूपिणम् ।
भूतनाथमथेशानमार्यं शङ्करं स्मरेत् ॥"
इति स्वच्छन्दपुराणम् ॥
अस्य महात्म्यविधारकारणं यथा,—
"त्रिपुरस्य सतं सर्व्वान् कृत्वाऽऽत्मसात् ।
आराध्य शङ्करं संभोः शक्तिमस्त्रमवाप्तवान् ॥
उपयाचं ततो देवो ददौ तस्मै प्रसादतः ।

उत्तारयन्तु वकलान इमान् लोकान् गया इतम्।
उत्तरारे महादाव वक्षाप्युत्तारय इतम्॥
ततो गया: कामरूपादेवी क्षाप्यपराजिता।
लोकानुत्तारयामास: पीठं कर्त्तुं दृढस्यकम्॥
उत्तार्य्यमाणे लोकै तु चतुर्व्वर्षैर्दिजातिभि:।
सन्याचलं गतो विप्रो पश्चिड: कुपितो मुनि:॥
सोऽप्युत्तारया देवा उत्तारयितुमीश्वया।
गत्वे: सह धृत: प्राह शापं कुर्व्वन् सुदारुणम्॥
यस्मादहं धृतो वाने त्वयोत्तारयितुं मुनि:।
तस्मात्त्वं दास्यभावेन पूज्या भव समन्विका॥
भर्त्स्यन्ति म्लेच्छवद्यस्माद्गत्वाग्नौ मन्दबुद्धय:।
भवन्तु म्लेच्छात्मजादे भवत्या: कामरूपके॥
महादेवोऽपि यस्माच्चां नि:सारयितुमुद्यत:।
तपोधनं मुनिं दान्तं म्लेच्छवदेषारगम्।
तस्मात् म्लेच्छप्रियो भूयात् शङ्करस्यास्मिभस्मधृक्॥"

इति कालिकापुराणे ८३ अध्याय:॥*॥

शङ्करगीता देवीपुराणे ७ अध्याये द्रष्टव्या॥

शिवावतारविशेष:। यथा,—

"तद्भवान् लोकरक्षार्थमुत्पाद्य निखिलान् खलान्।
वर्त्मा स्थापयतु श्रौतं जगदुद्येन सुखं भवेत्॥
इत्युक्तोपरतान् देवानुवाच गिरिजाप्रिय:।
मनोरथं पूरयिष्ये मानुष्यमवलम्ब्य व:॥
दुष्टाचारविनाशाय धर्म्मसंस्थापनाय च।
भाष्यं कुर्व्वन् ब्रह्मसूत्रतात्पर्य्यार्थविनिर्णयम्॥
मोहयन् प्रकृतिदैत्यान्तमश्चाद्भागुभि:।
चतुर्भि: सहित: शिष्यैश्चतुर्वेदैरिवद्युतै:॥
यतीन्द्र: शङ्करो नाम्ना भविष्यामि महीतले।
मदत्तया भवन्तोऽपि मानुषीं तनुमाश्रिता:॥
तं मामनुसरिष्यन्ति सर्व्वे चिद्विलासिन:।
तदा मनोरथ: पूर्णो भवतां स्यान्न संशय:॥"

इति माधवीयसंक्षेपशङ्करजये १ सर्ग:॥*॥

(अयं हि दाक्षिण्यदर्शयिष्यति भौतिकशरीरं परित्यज्य परब्रह्मणि लीन आसीत्। यथा,तत्रैव।

"सर्वप्रकारै: किल कल्पयन्ने:
शिवावतारस्य शुभैश्चरित्रै:।
दाक्षिण्यदस्योज्ज्वलकीर्त्तिराप्ते:
समा यतीयु: किल शङ्करस्य॥")

मङ्गलकारके, त्रि। यथा,—

"क्षेमङ्करोऽरिष्टतात: स्यान्मङ्गल्यमङ्गलौ॥"

इति त्रिकाण्डशेष:॥

(यथा च महाभारते। ३। २२८। ६।

"हिरण्यगर्भ भद्रं ते लोकानां शङ्करो भव॥")

शङ्करप्रिय:, पुं। (शङ्करस्य प्रिय:।) तिन्तिरिपक्षी। इति केचित्॥ प्रियवल्लभे, त्रि। (यथा, कथासरित्सागरे। ६५। ८८।

"एतद्गत्वेत्य: श्रुत्वा सा शरण्या शङ्करप्रिया।
शापस्यास्यावयोर्व्वेते भोक्तव्यमिति चाब्रवीत्॥")

शङ्करभाचार्य्य:, पुं, (शङ्कर आचार्य्यश्च।) स्वनामख्यातो ग्रन्थ:। स तु अद्वैतवादी वेदान्तभाष्यकर्त्ता च। यथा,—

"श्रीशङ्कराचार्य्यनरावतारं
विश्वेश्वरं विश्वगुरुं प्रणम्य
वेदान्तशास्त्रश्रवणालसानां
बोधाय कुर्व्वे कमपि प्रयत्नम्॥"

इति मधुसूदनसरस्वतीकृतसिद्धान्तबिन्दुप्रथमश्लोक:॥

शङ्करावास:, पुं, (शङ्करस्य आवास इव शुक्लत्वात्।) कर्पूरभेद:। इति राजनिर्घण्ट:॥ (शङ्करस्य महादेवस्य आवास:।) कैलासश्च॥

शङ्करी, स्त्री, मल्लिष्ठा। इति शब्दचन्द्रिका॥ भ्रमरी। इति राजनिर्घण्ट:॥ शङ्करभार्य्या। यथा।

"शङ्करी शम्भुपत्नी च शिवा शूलनिनादिनी।
सुभा शुभप्रदा नित्या शतरूपसमप्रभा॥"

इति रुद्रयामले अन्नपूर्णासहस्रनामस्तोत्रम्॥

शङ्का, स्त्री, (शङ्क+अ:। स्त्रियां टाप्।) त्रास:। (यथा, हितोपदेशे।

"शङ्काभि: सर्व्वमाक्रान्तमग्नं पागध्य भूतले।
प्रवृत्ति: कुत्र कर्त्तव्या जीवितव्यं कथं नु या॥")

वितर्क:। इति मेदिनी॥ (यथा, भागवते। ८। २। ६।

"यत्र संगीतवाद्यादैर्नृत्तस्त्रीमण्डलेश्वरा।
अभिगर्ज्जन्ति हरय: श्वाघिन: परशङ्कया॥")

शङ्कित:, त्रि, (शङ्का ज्ञाता अस्य। शङ्का+इतच्।) ज्ञात:। इति त्रिकाण्डशेष:॥ (यथा, "अशङ्कमपि शङ्कते नित्यं शङ्कते शङ्कितानि॥") वितर्कित:। इति शङ्काशब्दार्थदर्शनात्॥ चोरकनामगन्धद्रव्ये, पुं। इति राजनिर्घण्ट:॥

शङ्कितवर्णक:, पुं, (शङ्कितं अत्र कोऽप्यस्ति नास्तीत्यादिकं वा वर्णयति तर्कयतीति। वर्ण+ण्वुल्।) चौर:। इति त्रिकाण्डशेष:॥

शङ्कु: पुं, (शङ्कतेऽसादिति। शङ्क+"खरशङ्कुपीयुनीलकुगुलिगु।" उणा० १। ३०। इति कुप्रत्ययेन निपातित:।) स्थाणु:। सुड़ा गाछ इति भाषा। मत्स्यविशेष:। शौंकोच इति भाषा। शल्याख्यम्। शेल इति भाषा। इत्यमरभरतौ॥ संख्याविशेष:। स तु लीलावतीमते दशलक्षकोटि:। कील:। गोँज इति भाषा। (यथा, मनु:। ८। २७१।

"नि:क्षेपोपनिधी शङ्कुभ्यां हिरण्यतोयाग्न्योर्व्वा")

ईश:। कलुष:। इति मेदिनी॥ पत्रशिराजालम्। मेढ्र:। इति हेमचन्द्र:॥ राक्षस:। इति शब्दमाला॥ नखीनामगन्धद्रव्यम्। इति जटाधर:॥ दीपस्तम्भयोश्छायापरिमाणार्थं काष्ठादिनिर्म्मित: क्रमेण सप्तत्रयोदशाङ्गुलपरिमित: कीलक:। यथा।

"अर्कांशुला तु सप्तघ्नी काष्ठी द्व्यङ्गुलमूलिका।
शङ्कुसंज्ञा भवेच्चैव तच्छायां परिकल्पयेत्॥
मध्याह्नछेदादित्यशुक्लेच्छायाङ्गुलैरेतु।
यद्पूरितदिवादण्डं लब्धं दण्डादिकं भवेत्॥
पूर्व्वाह्णच्छायायातीतं पराह्णच्छायायैष्यकम्।
सूत्रैकरामवाणैर्भदिग्भो वदा:। ०। १। ३। ५। ८। १०। ११। क्रमोत्क्रमै:॥
आषाढादिषु मासेषु च्छाया माध्याह्निकी मता।
त्रयनांशयुतमाद्यान्ते युक्तमेणादितो बुधै:।
संख्योक्तान्यहिने भागहारे हृतीतरे तथा॥"

इति ज्योतिस्तत्त्वम्॥

तस्य नामान्तरं नर:। यथा।

अथ करणशङ्कम्।

"शङ्कु: प्रदीपतलशङ्कुतलान्तरस्थ-
च्छाया भवेद्दिनकरदीपशिखौच्चभक्ता:।"

उदाहरणम्।

'शङ्कुप्रदीपान्तरभूक्षिप्तच्छा
दीपोच्छ्रिति: सार्द्धकरत्रया चेत्।
शङ्कोस्तथार्काङ्गुलसंमितस्य
तस्य प्रभा स्यात् कियती वदाशु॥'

न्यास:। शङ्कु: १२ भू: ३ दीप: ७ लब्धानि च्छायाङ्गुलानि १२। इति लीलावत्यां छायाव्यवहार: द्वादशाङ्गुलपरिमाणम्। यथा। विष्णुधर्म्मोत्तरीयप्रथमकाण्डम्।

"द्वादशाङ्गुलिक: शङ्कुस्तद्वयन्तु प्रथ: स्मृत:।
तच्चतुष्कं धनु: प्रोक्तं क्रोशो धनु:सहस्रिक:॥"

इति तिथ्यादितत्त्वम्॥

(जनमेजयस्य पुत्र:। यथा, महाभारते। १। ६५। ८६।

"भवतो वपुष्टमायां द्वौ पुत्रौ जज्ञाते प्रतानोक: शङ्कुश्च॥"*॥ उग्रसेनस्य पुत्रविशेष:। यथा, भागवते। ६। २४। २४।

"कंस: सुनामा न्यग्रोध: कङ्क: शङ्कु: सुहूस्तथा।
राष्ट्रपालोऽथ धृष्टिश्च तुष्टिमानौग्रसेनय:।")

शङ्कुकर्ण:, पुं, (शङ्कू इव कर्णौ यस्य।) गर्दभ:। इति त्रिकाण्डशेष:॥ (दानवविशेष:। यथा, हरिवंशे। ३। ८२।

"शङ्कुकर्णो विवादश्च गवेष्टो दुन्दुभिस्तथा॥"

नागविशेष:। यथा, महाभारते। १। ५७। १५।

"शङ्कुकर्ण: पिठरक: कुठारमुखसेचकौ॥"

शङ्कुवद्शङ्कुकर्णविशिष्टे, त्रि। यथा, भागवते। ७। ६। १५।

"व्यात्तस्रस्त: चतज्वकशरशङ्कुकर्णो-
न्निद्रादभीतदिगिभादरिभिन्नखाग्रात्॥")

शङ्कुचि:, पुं, शङ्कुमत्स्य:। इति शब्दरत्नावली॥

शङ्कुतरु:, पुं, (शङ्कुरिव तरु:।) शालवृक्ष:। इति शब्दरत्नावली॥

शङ्कुर:, त्रि, (शङ्कुरेवास्यादात। शङ्क+बाहुलकात् उरच्।) त्रासदायी। इति हेमचन्द्र:॥

शङ्कुला, स्त्री, ("शङ्कुपूर्व्वात् लातेः 'आतोऽनुपसर्गे कः।' ३। २। ३। इति के शङ्कुला।") व्युत्पादितायां उज्ज्वल:। १। ३७॥ "शङ्कुपूर्व्वात्तर्वर्थे कविधानमिति वा कप्रत्यय:।" इति राधिका। ६। २। २।) उत्पलपत्रिका। इति

संक्षिप्तसारोणादिवृत्तिः । पूगकर्णनी । जाँती इति भाषा । इति केचित् ।

शङ्खवृक्षः, पुं, (शङ्खरिव वृक्षः ।) शालवृक्षः । इति रत्नमाला ।

शङ्खोदः, पुं, शङ्खमत्स्यः । इति जटाधरः ।

शङ्खोलिः, पुं, मत्स्यविशेषः । शाँकोच इति भाषा । यथा,—

"अथ शङ्खः शङ्खचिः स्यात् शङ्खोलिः शङ्खचीत्यपि ।"

इति शब्दरत्नावली ।

शङ्खः, पुं,क्ली, (शाम्यति अशुभमस्मादिति । शम + "शमेः खः ।" उणा० १ । १०४ । इति खः ।) सप्तस्रोऽवचनविशेषः । शाँख इति भाषा । तत्पर्य्यायः । कम्बु २ । इत्यमरः । कम्बोजः ७ अब्जः ४ जलजः ५ । इति शब्दरत्नावली । अम्भोभवः ६ पावनध्वनिः ७ अन्तःकुटिलः ८ महानादः ९ श्वेतः १० पूतः ११ सुस्वरः १२ दीर्घनादः १३ बहुनादः १४ हरिप्रियः १५ । अस्य गुणाः । कटुरसत्वम् । शीतत्वम् । पुष्टिवीर्य्यबलप्रदत्वम् । गुल्मशूलकफश्वासविषदोषनाशित्वञ्च । इति राजनिर्घण्टः । अपि च ।

"कम्बुशुक्तिनखस्थापि शुक्तिशम्बूककर्कटाः ।
जीवा एवंविधाचान्ये कोषस्थाः परिकीर्त्तिताः ।
कोषस्था मधुराः स्निग्धाः पित्तवातहरा हिमाः ।
दृढत्वा बहुवर्षस्था दृढाश्च बलवर्द्धनाः ।"

इति भावप्रकाशः ।

अन्यच्च ।

"शङ्खोदधिमलौ शीतौ कषायावतिलेखनौ ।"

इति राजवल्लभः ॥*॥

अस्योत्पत्तिरादिर्यथा ।

"अथ शम्भुहरेः शूलं जघ्राह दानवं प्रति ।
शीर्षमध्याङ्गमार्गेऽष्टशतकरुषसञ्चयम् ॥
शूलस्य भ्रमणं कृत्वा ययौ दानवोपरि ।
चकार भस्मसात्तच्च सरघाव्रजलीलया ॥
स शिवस्येन शूलेन दानवस्यास्थिपञ्जरम् ।
प्रेम्णा च प्रेरयामास लवणोदे च सादरम् ॥
अस्थिभिः शूलचूर्णस्य शङ्खजातिर्बभूव ह ।
नानाप्रकाररूपा च शङ्खपूता सुरार्चने ॥
प्रशस्तं शङ्खतोयञ्च देवानां प्रीतिदं परम् ।
तीर्थतोयस्वरूपञ्च पवित्रं शम्भुना विना ॥
शङ्खशब्दो भवेद्यत्र तत्र लक्ष्मीश्च सस्थिरा ।
स स्नातः सर्व्वतीर्थेषु यः स्नातः शङ्खवारिणा ॥
शङ्खे हरेरधिष्ठानं यतः शङ्खस्ततो हरिः ।
तत्रैव सततं लक्ष्मीर्दूरीभूतममङ्गलम् ॥
श्रीशाश्च शङ्खध्वनिभिः शूलनाशश्च विश्रुतः ।
भीता रुदा याति लक्ष्मीः खलमन्यत् खलायतः ॥",

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे १८ अध्यायः ॥*॥

अथ शङ्खमाहात्म्यम् ।

ब्रह्मोवाच ।

"शृणु शङ्खस्य माहात्म्यं सर्व्वपापहरं शुभम् ।
क्षविक्षाधोरमाशाय शङ्खे कृत्वा जनार्द्दनम् ।
यज्ञायुतसहस्रस्य फलमिष्ट्वा लभेत् फलम् ॥
ययश्चिन्वाः शुभं चीरं शङ्खे कृत्वा तु नारद ।
यः स्नापयति देवेशं च गच्छेद्विष्णुगयः पदम् ॥
चिन्वा गङ्गोदकं शङ्खे यः स्नापयति माधवम् ।
नमो नारायणेत्युक्त्वा मुच्यते योनिसङ्कटात् ॥
शङ्खस्थन्तु यत्तोयं भ्रमितं केशवोपरि ।
निःक्षिपेन्मूर्द्ध्नि सततं गङ्गास्नानेन तस्य किम् ॥
कृत्वा पादोदकं शङ्खे वैष्णवाय प्रयच्छति ।
तिलमिश्रं तुलस्या च चान्द्रायणफलं लभेत् ॥
नदीतडागजं वारि वापीकूपह्रदोद्भवम् ।
गाङ्गेयं तद्भवेत् सर्व्वं हृतं शङ्खे हरिप्रिय ॥
गृहीत्वा विष्णुपादाम्बु शङ्खे कृत्वा च वैष्णवः ।
यो वहेत् शिरसा नित्यं स याति तापशोषणम् ॥
त्रैलोक्ये यानि तीर्थानि वासुदेवाज्ञया मुने ।
शङ्खे तान्यधितिष्ठन्ति तस्मात् शङ्खं सदार्चयेत् ॥
त्वं पुरा सागरोत्पन्नो विष्णुना विधृतः करे ।
नमितः सर्व्वदेवैश्च पाञ्चजन्य नमोऽस्तु ते ॥
पुरतो वासुदेवस्य सुपुण्यफलदायिने ।
शङ्खः समर्चितो येन तस्य लक्ष्मीर्न दुर्लभा ॥
दर्शनेनापि शङ्खस्य किन्तु तस्यार्चनेन च ।
विलयं यान्ति पापानि हिमः सूर्य्योदये यथा ॥
गर्भा देवारिनारीणां विनश्यन्ति सहस्रधा ।
तव नादेन पातालं पाञ्चजन्य नमोऽस्तु ते ॥
तीर्थोदकं हरेर्मूर्द्ध्नि भ्रामयेत् शङ्खसंस्थितम् ।
ददाति मुक्तिं देवेशः क्षीरसागरजाप्रियः ॥
यमदूताश्च कृष्णाङ्घ्रिशाचोरगराक्षसाः ।
दृष्ट्वा शङ्खोदकं मूर्द्ध्नि भीता यान्ति दिशो दश ॥
नित्ये नैमित्तिके काम्ये स्नानार्चनविलेपने ।
शङ्खं समर्चयति यः श्वेतद्वीपे वसेद्धि सः ।"

इति पाद्मोत्तरखण्डे १२६ अध्यायः ॥*॥

अथ दक्षिणावर्त्तशङ्खमाहात्म्यम् ।

"दक्षिणावर्त्तशङ्खेन गत्वा प्राक्स्रोतसं नदीम् ।
स्नात्वाभिषेकं विधिवत् ततः पापैः प्रमुच्यते ॥
दक्षिणावर्त्तशङ्खेन तिलमिश्रोदकेन तु ।
उदके नाभिमात्रे तु यः कुर्य्यादभिषेचनम् ॥
प्राक्स्रोतस्यां तु वै गङ्गा गरस्तस्याम्भसाहृतः ।
यावज्जीवकृतं पापं तत्क्षणादेव नश्यति ॥
दक्षिणावर्त्तशङ्खेन पात्रस्थोदं घरे स्थितम् ।
उदकं यः प्रतीच्छेत शिरसा हृष्टमानसः ।
तस्य जन्मकृतं पापं तत्क्षणादेव नश्यति ।
न शङ्खेन पिबेत्तोयं न चान्यात्मत्स्यमुत्करौ ।"

इति वाराहे प्रबोधनीमाहात्म्याध्यायः ॥*॥

दक्षिणावर्त्तशङ्खतोयेन विष्णुपूजाफलं यथा ।
स्कान्दे ।

"दक्षिणावर्त्तशङ्खस्य तोयेन योऽर्चयेद्धरिम् ।
सप्तजन्मकृतं पापं तत्क्षणादेव नश्यति ।"

इत्याह्निकाचारतत्त्वम् ॥

स च शङ्खः रत्नविशेषः । तल्लक्षणादि यथा,—

"क्षीरोदकूलेऽपि सुरासुरैर्ये
तदन्वयोऽपि प्रभवन्ति शङ्खाः ।
अरुक्षवर्णाः शशिशुभ्रभासः
सुसञ्चयत्ता गुरवो महान्तः ॥

ते वामदक्षिणावर्त्तभेदेन द्विविधा मताः ।
दक्षिणावर्त्तशङ्खस्तु कुर्य्यादानुवंशी धनम् ॥
वैनेय शिरसा यस्तु सद्धानः प्रतीच्छति ।
वारि क्षिप्त्वा च पापानि पुण्यमाप्नोति मानवः ॥
दृश्यते स्निग्धताच्छन्नं शङ्खस्येति गुणत्रयम् ।
आवर्त्तभङ्गदोषो हि दैन्ययोगाद्विनश्यति ॥
ब्रह्मादिजातिभेदेन स पुनस्तु चतुर्विधः ॥"*॥

इति युक्तिकल्पतरुः ॥

श्रीकृष्णार्জ্জুनादिशङ्खनामानि यथा,—

"पाञ्चजन्यं हृषीकेशो देवदत्तं धनञ्जयः ।
पौण्ड्रं दध्मौ महाशङ्खं भीमकर्म्मा वृकोदरः ॥
अनन्तविजयं राजा कुन्तीपुत्रो युधिष्ठिरः ।
नकुलः सहदेवश्च सुघोषमणिपुष्पकौ ॥"

इति श्रीभगवद्गीतायाम् १ अध्यायः ॥

अथ रत्नवाचविशेषः । यथा,—

"भक्ततूर्य्यं शत्रुतूर्य्यं रणतूर्य्यं सहाजनः ।
संग्रामपटहः शङ्खस्तथा चाभयडिण्डिमः ॥
सङ्घाह्वो वृषाभीरुर्भीरुः कोलाहलोऽपि च ।
शङ्खवादस्य पर्य्यायशब्दा भेदाः शुभादयः ॥"

इति शब्दरत्नावली ॥

ललाटास्थि । (यथा, सुश्रुते । १ । ५ ।

"तत्र भ्रूगण्डशङ्खललाटास्थिपुटोष्ठदन्तवेष्टकचाङ्कुशिवङ्क्षणेषु तिसृष्वेकैकेन उक्तः ॥") कुबेरस्य निधिविशेषः । (यथा, महाभारते । २ । १० । ३६ ।

"निधिप्रवरमुख्यौ च शङ्खपद्मौ धनेश्वरौ ।"

यथा च मार्कण्डेये । ६८ । ४२—४५ ।

"रत्नसञ्चयरक्षार्थं शङ्खश्चक्रे हि यो निधिः ।
तेनापि नीयते विप्र तनुनित्यं निधीश्वरः ॥
एकस्यैव भवत्येष नरं नान्यमुपैति च ।
यस्य गृहे निधिस्तस्य स्वरूपं शृणुते शृणु ॥
एक एवात्मना स्वल्पमन्नं भुङ्क्ते तथाम्बरम् ।
कदन्नसक्तु परिजनो न च शोभनवस्त्रधृक् ॥
न ददाति सुहृद्वर्गाय बालपुत्रबन्धुवादिषु ।
सर्व्वोपसञ्चयः शङ्खो नरो भवति सर्व्वदा ॥")

नखीनामगन्धद्रव्यम् । इत्यमरसेदिनीकारौ ॥ (यथा, सुश्रुते । ६ । १७ ।

"सगःशिला शृङ्गशङ्खमाक्षिकैः
सचन्दुकाक्षीश्वरसाञ्जनैः क्रियाः ।")

कर्णसमीपास्थि । इति राजनिर्घण्टः ॥ (यथा, याज्ञवल्क्ये । ३ । ६६ ।

"कर्णौ शङ्खौ भ्रुवौ दृष्ट्वेत्यावोष्ठौ कङ्कुन्दरे ।")

अष्टनागनायकान्तर्गतनागविशेषः । (यथा, मनसापूजायाम् ।

"अनन्तो वासुकिः पद्मो महापद्मस्तु तक्षकः ।
कुलीरः कर्कटः शङ्खो कुली नागाः प्रकीर्त्तिताः ॥")

हस्तिदन्तमध्यम् । इति चिकित्सायाम् ॥ दशनिखर्व्वसंख्या । सङ्ख्याविशेषः इति भागवतम् । यथा,

"सप्त दशगुणश्चैव सप्तसप्ततयो यथा ।
सप्तैव नियुतं चैव कोटिश्चार्बुदमेव च ॥
वृन्दः खर्व्वो निखर्व्वश्च शङ्खश्चैव तु सागरः ।

अन्त्य मध्यं परार्द्धञ्च दशहृद्धा यथाक्रमम् ॥"
इति भरतधृतब्रह्माण्डपुराणवचनम् ॥*॥
धर्म्मशास्त्रप्रयोजकमुनिविशेषः । यथा.—
"मन्वत्रिविष्णुहारीतयाज्ञवल्क्योशनोऽङ्गिराः ।
यमापस्तम्बसंवर्त्तौ कात्यायनबृहस्पती ॥
पराशरव्यासशङ्खलिखिता दक्षगौतमौ ।
शातातपो वशिष्ठश्च धर्म्मशास्त्रप्रयोजकाः ॥"
इति याज्ञवल्क्यवचनम् ॥
शङ्खक, क्ली, वलयः । इति मेदिनी ॥
शङ्खक, पुं क्ली, (शङ्ख+स्वार्थे कन् ।) क्षुपः ।
शिरोरोगे, पुं । इति मेदिनी ॥ तस्य लक्षणादि यथा,—
शङ्खकमाह ।
"पित्तरक्तानिला दुष्टाः शङ्खदेशे विमूर्च्छिताः ।
तीव्ररुजाज्वरागं हि शोथं कुर्व्वन्ति दारुणम् ॥
सशिरो विषवद्वेगाच्छिरुग्भासु गलं तथा ।
विरात्राच्जीवितं हन्ति शङ्खको नाम नामतः ।
त्र्यहाज्जीवति भैषज्यं प्रत्याख्येयस्य कारयेत् ॥"
पित्तरक्तानिलाः यत्र कफोऽपि योज्यः ।
कृताद्वनाप: कफपित्तरक्तैरिति सुश्रुतवचनात् ।
विमूर्च्छिताः प्रवृद्धाः । चिरात्तान् चिरात्तमर्म्मी मारयति । इति भावप्रकाशः ॥ अस्य चिकित्सा शिरोरोगशब्दे द्रष्टव्या ॥ (ललाटास्थि । यथा, याज्ञवल्क्यः । ३ । ६० ।
"द्वौ शङ्खकौ कपालानि चत्वारि शिरसस्तथा ।
ऊरः सप्तदशास्थीनि पुरुषस्यास्थिसंग्रहः ॥")
शङ्खकारः, पुं, (शङ्खं करोतीति । शङ्ख+क+अण् ।) वर्णसङ्करजातिविशेषः । शाँखारि इति भाषा । स तु शूद्रागर्भे विश्वकर्म्मौरसाज्जातः । इति ब्रह्मवैवर्त्तपुराणम् ॥ तत्पर्य्यायः । शाङ्खिकः २ काम्बजकः ३ । इति शब्दरत्नावली ॥ शाम्बिकः ४ । इति जटाधरः ॥
शङ्खचरी, स्त्री, (शङ्खे ललाटास्थि चरतीति । चर+टः । स्त्रियां ङीप् ।) ललाटिका । इति त्रिकाण्डशेषः ॥
शङ्खचूर्णी, स्त्री, ललाटिका । इति शब्दरत्नावली ॥
शङ्खचूर्णं, क्ली, (शङ्खस्य चूर्णम् ।) शङ्खजातचूर्णम् । शाँखेर चूण इति भाषा । अस्य गुणाः ।
"शङ्खचूर्णं कटु क्षारमुष्णं क्रिमिहरं परम् ॥"
इति राजवल्लभः ॥
शङ्खजः, पुं, (शङ्खाज्जायते इति । जन+डः ।) कपोतविशेषवद्दृष्टव्युक्ता । इति केचित् ॥ शङ्खजातवस्तुनि, त्रि ॥
शङ्खद्रावकः, पुं, (शङ्खं द्रावयतीति । द्रु+णिच्+ण्वुल् ।) औषधविशेषः । यथा,—
"अर्कक्षुद्रे तथा विल्वा निर्गुण्डीस्वर्णचित्रकम् ।
अपामार्गभस्मसमं वज्रमूलं जलं हरेत् ॥
गुडूचिका पचेत्तस्मिन् यावद्वज्रन्तु गलितम् ।
सर्व्वतुल्यं सर्जी क्षारौ द्वौ चारौ टङ्कणं तथा ॥
सप्तदशैतान्युद्धृत्याक्षार्द्धं शोरकं तथा ।
द्विगुणं पञ्चलवणं मातुलुङ्गरसेन च ॥
काचकुप्यान्तु सप्ताहं वासयेदम्लयोगतः ।
शङ्खचूर्णपलं दत्त्वा वारुणीयन्त्रमुद्धरेत् ॥
सर्व्वधातून् हरेच्छीघ्रं वराटीशङ्खकादिकान् ।
उदरादिसर्व्वरोगाणां सद्यो हि नाशकः परः ॥"
इति शङ्खद्रावकः ॥ * ॥
अपि च ।
"योगिनीभैरवाभ्याञ्च बलिमादौ प्रदापयेत् ।
पश्चाद्यत्नञ्च कर्त्तव्यमेवाह परमेश्वरी ॥
रसः शङ्खद्रवो नाम शम्भुदेवेन भाषितः ।
गुह्याद्गुह्यतमं गुह्यमिदानीं कथ्यते मया ॥
शङ्खचूर्णं यवक्षारं सर्জ्जिकाक्षारटङ्कणम् ।
समञ्च पञ्चलवणं स्फटिकारी तृणाद्दरः ॥
काचकुप्यां ततः क्षिप्त्वा वारुणीयन्त्रमुद्धरेत् ।
यामार्द्धं द्रावयत्येव शङ्खशुक्तिवराटकान् ॥
अर्शांसि नाशयेत् षट् च मूत्रकृच्छ्राश्मरीं तथा ।
उदरादिविधं हन्ति गुल्मप्लीहोदराणि च ॥
अजीर्णं नाशयेच्छीघ्रं ग्रहणीञ्च विशूचिकाम् ।
भुक्तपेषे च भोक्तव्यो माषमात्रो रसोत्तमः ॥
क्षणमात्राद्भवेद्वह्नेः पुनर्भोजनमिच्छति ।
प्रत्यहं भोजनान्ते च संसेव्योऽयं रसोत्तमः ॥
न रुजायां भयं क्वापि सत्यं सत्यं वदाम्यहम् ।
न देयं यस्य कस्यापि सदा गोप्यञ्च कारयेत् ।
इति, शङ्खद्रवो नाम वैद्यानामुपकारकः ॥"
शङ्खद्रावको रसः । इति भैषज्यरत्नावली ॥
शङ्खद्रावी, [न्] पुं, (शङ्खं द्रावयतीति । द्रु+णिच्+णिनिः ।) अम्लवेतसः । इति राजनिर्घण्टः ॥
शङ्खधरा, स्त्री, (धरतीति । धृ+अच् टाप् । शङ्खस्य धरा ।) छिलमोचिका । इति रत्नमाला ॥
शङ्खध्मः, पुं, (शङ्खं धमतीति । धमा+कः ।) शङ्खवादकः । तत्पर्य्यायः । शाङ्खिकः २ । इति जटाधरः ॥ (यथा, वाजसनेयसंहितायाम् । ३० । १६ ।
"क्रोशाय तूणवध्मवरम्पराय शङ्खध्मम् ॥"
शङ्खध्माः, पुं, (शङ्खं धमतीति । धमा+क्विप् ।) शङ्खवादकः । इति सुश्रुतटीकायां डल्हणः ॥
शङ्खनखः, पुं, क्षुद्रशङ्खः । ओड्रड़ा इति भाषा । इत्यमरभरतौ ॥ (यथा, महाभारते । १३ । ५० । २० ।
"नखैः शङ्खनखैर्गात्रैः क्रोडैश्चित्रैरिवार्पितम् ॥")
नखीनामगन्धद्रव्यम् । इति शब्दरत्नावली ॥ दृष्टनखी । यथा,—
"महाखसौ शङ्खनखः शङ्खाख्यो गन्धसारणः ।"
इति रत्नमाला ॥
शङ्खनखा, स्त्री, शङ्खनखी । यथा,—
"द्विधा शङ्खनखाख्यान्या शुक्त्याख्या वदरी-
च्छदः ।"
इति रत्नमाला ॥
शङ्खपुष्पी, स्त्री, (शङ्खवत् पुष्पं यस्याः । ङीप् ।) वृक्षविशेषः । शङ्खाहुली इति ज्ञानशून्यो इति च भाषा । तत्पर्य्यायः । सुपुष्पी २ शङ्खाह्वा ३ कम्बुमालिनी ४ शीतपुष्पी ५ कम्बुपुष्पी ६ मेध्या ७ मलविनाशिनी ८ किरीटी ९ शङ्खकुसुमा १० भूतमा ११ शङ्खमालिनी १२ । अस्या गुणाः । हिमत्वम् । तिक्तत्वम् । मेधाखरकारित्वम् । ग्रहभूतादिदोषनाशित्वम् । वशीकरणसिद्धिदात्रित्वञ्च । इति राजनिर्घण्टः ॥
अपि च ।
"शङ्खपुष्पी तु तीक्ष्णोष्णा मेध्या क्रिमिविषापहा ॥"
इति राजवल्लभः ॥
अन्यच्च ।
"शङ्खपुष्पी तु शङ्खाङ्गा मङ्गल्या कुसुमापि च ।
शङ्खपुष्पी सरा मेध्या दृष्या मानसरोगनुत् ॥
रसायनी कषायोष्णा स्मृतिकान्तिबलाग्निदा ।
दोषापस्मारभूतास्रकृच्छ्रक्रिमिविषप्रणुत् ॥"
इति भावप्रकाशः ॥
शङ्खप्रस्थः, पुं, चन्द्रस्य चिह्नम् । यथा,—
"सिङ्गं शङ्खस्य चिह्नस्य शङ्खप्रस्थो विधोरपि ।"
इति शब्दमाला ॥
शङ्खभृत्, पुं, (शङ्खं बिभर्त्तीति । भृ+क्विप् ।) विष्णुः । इति हेमचन्द्रः ॥ (यथा, महाभारते । १३ । १४६ । १२० ।
"शङ्खभृन्नन्दकी चक्री शार्ङ्गधन्वा गदाधरः ॥")
शङ्खमुखः, पुं, (शङ्खवत् मुखं यस्य ।) कुम्भीरः । इति हेमचन्द्रः ॥ (नागविशेषः । यथा, महाभारते । १ । ३५ । ११ ।
"नागः शङ्खमुखश्चैव तथा कूष्माण्डकः परः ॥")
शङ्खमूलं, क्ली, (शङ्खवत् शुक्लं क्रमस्तब्धं वा मूलं यस्य ।) मूलकम् । इति राजनिर्घण्टः ॥
शङ्खाख्यः, पुं, (शङ्ख इति आख्या यस्य ।) वृक्षवल्ली । इति रत्नमाला ॥
शङ्खाह्वा, स्त्री, (शङ्ख इति आह्वा नाम यस्याः ।) शङ्खपुष्पी । इति राजनिर्घण्टः ॥
शङ्खिका, स्त्री, (शङ्खवत् पुष्पमस्त्यस्याः । शङ्ख+ठन् ।) लतविशेषः । चोरवहुली इति भाषा । यथा । शङ्खिन्यां शङ्खिका चोरा । इति शब्दचन्द्रिका ॥
शङ्खिनी, स्त्री, (शङ्खवत् पुष्पमस्त्यस्याः । शङ्ख+इनिः ।) चोरपुष्पी । इत्यमरः ॥ श्वेतपुनागः । इति विश्वः ॥ श्वेतचन्दा । इति मेदिनी ॥ श्वेतपुका । इति शब्दरत्नावली ॥ वृहच्छङ्खभेदः । इति त्रिकाण्डशेषः ॥ यवनिका । इति राजनिर्घण्टः ॥ चतुर्व्विधस्त्रीमध्ये स्त्रीविशेषः । तल्लक्षणं यथा,—
"दीर्घा सुदीर्घनयना वरसुन्दरी या
कामोपभोगरसिका गुणशीलयुक्ता ।
रेखात्रयेण च विभूषितकण्ठदेशा
सम्भोगकेलिरसिका किल शङ्खिनी सा ॥
शशकं पद्मिनी तुष्टा चित्रिणी रमते मृगम् ।
हयमं शङ्खिनी तुष्टा हस्तिनी रमते हयम् ॥
पद्मिनी पद्मगन्धा च मीनगन्धा च चित्रिणी ।
शङ्खिनी चारगन्धा स्यात् मदगन्धा च हस्तिनी ॥"
इति रसमञ्जरी ।

शङ्खयुक्ता । यथा,—
"शङ्खिनी चापिनी बाणभुशुण्डीपरिघायुधा ॥"
इति देवीमाहात्म्यम् ॥
उपदेवताविशेषः । शङ्खिनीवासशब्दार्थदर्शनात् ॥

शङ्खिनीफलः, पुं, (शङ्खिन्याः फलमिव फलं यस्य ।) शिरीषवृक्षः । इति राजनिर्घण्टः ॥

शङ्खिनीवासः, पुं, (शङ्खिन्या वास आश्रयस्थानम् ।) शाखोटवृक्षः । इति शब्दचन्द्रिका ॥

शङ्खी, [न्] पुं, (शङ्खोऽस्यास्तीति । शङ्ख + इनिः ।) विष्णुः । समुद्रः । इति मेदिनी ॥ शाङ्खिकः । शङ्खविशिष्टे, त्रि । इति शब्दरत्नावली ॥ (यथा, हरिवंशे भविष्यपर्व्वणि । ८ । १२ ।
"शङ्खिनं चक्रिणं विष्णुं खड्गिनं गदिनं विभुम् ॥"
शङ्खनिधिविशिष्टे च त्रि । यथा, मार्कण्डेये । ६८ । ४५ ।
"स्वपोषणपरः शङ्खी नरो भवति सर्व्वदा ॥")

शच, ङ ऊ गत्याम् । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-सेट् ।) ङ, शचते । इति दुर्गादासः ॥

शच, ङ वाचि । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-सेट् ।) ङ, शचते । इति दुर्गादासः ॥

शचिः, स्त्री, (शच वाचि + "सर्व्वधातुभ्य इन् ।" उणा० ४ । ११७ । इति इन् ।) इन्द्रपत्नी । इत्यमरटीकायां भरतः ॥

शची, स्त्री, (शचि + कृदिकारादिति ङीष् ।) इन्द्रपत्नी । तत्पर्य्यायः । पुलोमजा २ इन्द्राणी ३ । इत्यमरः ॥ शचिः ४ सची ५ सचिः ६ । इति भरतः ॥ पूतक्रतायी ७ पौलोमी ८ । इति जटाधरः ॥ माहेन्द्री ९ जयवाहिनी १० ऐन्द्री ११ शतावरी १२ । इति शब्दरत्नावली ॥ (यथा, रघुः । ३ । २३ ।
"उमावृषाङ्कौ शरजन्मना यथा
यथा जयन्तेन शचीपुरन्दरौ ।
तथा नृपः सा च सुतेन मागधी
ननन्दतुस्तत्सदृशेन तत्समौ ॥")
शतमूली । स्त्रीकरणान्तरम् । तत्तु विश्वकरणमिति केचित् ॥ इति मेदिनी ॥ (कर्म्म । इति निघण्टुः । २ । १ ॥ यथा, ऋग्वेदे । ८ । ३२ । १५ ।
"न किरस्य शचीनां नियन्ता सूनृतानाम् ॥"
प्रज्ञा । इति निघण्टुः । ३ । ९ ॥ वाक् । इति च निघण्टुः । १ । ११ ॥)

शचीपतिः, पुं, (शच्याः पतिः ।) इन्द्रः । इत्यमरः ॥ (यथा, मार्कण्डेये । १५ । ७० ।
"यदि जानासि धर्म्मं त्वं त्वं वा शक्र शचीपते ।
मम पापेन [illegible] ॥"
कर्म्मपालके, त्रि । यथा ऋग्वेदे । ७ । ६७ । ५ ।
"शक्तिं शचीपती शचीभिः ॥"
'हे शचीपती शचीति कर्म्मनाम कर्म्मणां पालकौ ।' इति तद्भाष्ये माधवः ॥)

शट, शादे । शीर्णौ । गतौ । रुजि । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-गतौ सक०-सेट् ।) शादोऽवसादः । शीर्णिर्भेदः । शटति लोकः अवसीदति । विशीर्य्यति । गच्छति । रुजति वा इत्यर्थः । इति दुर्गादासः ॥

शट, क ङ श्लाघे । इति कविकल्पद्रुमः ॥ (चुरा०-आत्म०-अक०-सेट् ।) क ङ, शाटयते । इति दुर्गादासः ॥

शटः, त्रि, अम्लः । शटधातोरच्प्रत्ययेन निष्पन्नमेतत् । इति सिद्धान्तकौमुदी ॥

शटा, स्त्री, (शट + अच् । टाप् ।) सटा । जटा । इत्यमरटीका ॥

शटिः, स्त्री, (शट + इन् ।) शटी । इति शब्दरत्नावली ॥

शटी, स्त्री, (शटि + वा ङीष् ।) स्वनामख्यातौषधिः । शेठ आदा इति भाषा । कचूर इति हिन्दी भाषा । तत्पर्य्यायः । गन्धमूली २ षड्ग्रन्थिका ३ कर्व्वूरः ४ पलाशः ५ । इत्यमरः ॥ सटी ६ शटी ७ गन्धशटी ८ कर्व्वुरः ९ कर्च्चूरः १० । इति भरतादयः ॥ सुगन्धा ११ सटिः १२ शटिः १३ गन्धमूला १४ गन्धोलिः १५ गन्धमूलकः १६ । इति शब्दरत्नावली ॥ गन्धसटा १७ वधूः १८ गन्धमूलम् १९ । इति जटाधरः ॥ जीमूतमूलम् २० कच्चोरम् २१ हिमजा २२ । इति रत्नमाला ॥ हैमी २३ षड्ग्रन्थिः २४ सुव्रता २५ गन्धाली २६ पलाशा २७ हिमा २८ । इति ग्रन्थान्तरम् ॥ षड्ग्रन्था २९ आम्लानशा ३० सुगन्धमूला ३१ गन्धाली ३२ शटीका ३३ पलाशिका ३४ सुभद्रा ३५ तृणी ३६ दूर्व्वा ३७ गन्धा ३८ पृथुपलाशिका ३९ सौम्या ४० हिमोद्भवा ४१ गन्धवधूः ४२ । अस्या गुणाः । तिक्तत्वम् । अम्लरसत्वम् । लघुत्वम् । उष्णत्वम् । रुचिकारित्वम् । ज्वरकासकण्डव्रणदोषरक्तामयध्वंसकारित्वम् । हृद्यत्वञ्च । इति राजनिर्घण्टः ॥ अपि च । अथ गन्धपलाशी सुगन्धद्रव्यं काश्मीरे प्रसिद्धम् ।
"शटी पलाशी षड्ग्रन्था सुव्रता गन्धमूलिका ।
गन्धारिका गन्धवधूर्व्वधूः पृथुपलाशिका ॥
भवेद्गन्धपलाशी तु कषाया ग्राहिणी लघुः ।
तिक्ता तीक्ष्णा च कटुकानुष्णास्यमलनाशिनी ।
शोथकासव्रणश्वासशूलाध्मानग्रहापहा ॥"
इति भावप्रकाशः ॥

शट्टकं, क्ली, घृतजलमिश्रितशालिचूर्णम् । मयदार शटा इति भाषा । यथा,—
"शालिचूर्णं घृतं तोयं मिश्रितं शट्टकं वदेत् ॥"
इति भावप्रकाशः ॥

शठ, क्लेशकैतवे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) क्लेशो दुःखानुभवः । कैतवं मिथ्यावचनम् । शठति खलः साधुं वञ्चयतीत्यर्थः । इति दुर्गादासः ॥

शठ, क व्यासक्ते । गत्यसंस्कृतसंस्कृते । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-अक०-सेट् ।) क, शाठयति दुष्टः म्लियाम मन्दः स्यादित्यर्थः । इति दुर्गादासः ॥

शठ, क ङ श्लाघे । इति कविकल्पद्रुमः ॥ (चुरा०-आत्म०-अक०-सेट् ।) क ङ, शाठयते । इति दुर्गादासः ॥

शठ, त क दुर्भाषे । इति कविकल्पद्रुमः ॥ (अदन्तचुरा०-पर०-सक०-सेट् ।) शठयति नीचः कुत्सितं वदतीत्यर्थः । रमानाथस्तु सम्यग्भाषणे इति मत्वा शठयति सम्यग्वदतीत्यर्थं इत्याह । सम्यग्भाषणे इति गोमराः । समग्भावे इत्यन्ये । इति दुर्गादासः ॥

शठं, क्ली, (शठ + अच् ।) तगरम् । कुङ्कुमम् । लोहम् । इति राजनिर्घण्टः ॥

शठः, पुं, मध्यस्थपुरुषः । धूर्त्तः । (यथा, मनुः । ४ । ३० ।
"पाषण्डिनो विकर्म्मस्थान् वैडालव्रतिकान् शठान् ।
हैतुकान् वकवृत्तींश्च वाङ्मात्रेणापि नार्च्चयेत् ॥")
धुस्तूरः । इति मेदिनी ॥ शठस्य लक्षणम् । यथा,—
"प्रियं वक्ति पुरोऽन्यत्र विप्रियं कुरुते भृशम् ।
यस्तापराधचेष्टश्च शठोऽयं कथितो बुधैः ॥"
इति विष्णुपुराणे । ३ । १८ । २१ । श्लोकटीका ॥
चतुर्व्विधपत्यन्तर्गतपतिविशेषः । तस्य लक्षणम् । कामिनीविषयकपटपटुः । यथा,—
"मौलौ दाम विधाय भालफलके यावलक्षपत्रावलीं
केयूरं भुजयोर्निधाय कुचयोर्विन्यस्य मुक्तासजम् ;
विश्वासं समुपार्ज्जयन् मृगदृशः काञ्चीनिवेशच्छला-
न्नीवीग्रन्थिमपाकरोति मृदुना हस्तेन वामभुवः ॥"
इति रसमञ्जरी ॥
(वृष्णिवंशीयविशेषः । यथा, हरिवंशे । भविष्यपर्व्वणि । २ । ३ ।
"बलभद्र शिनेः पुत्त्रं हार्द्दिक्यं शठसारणौ ॥")

शठता, स्त्री, (शठ + तल् ।) शठस्य भावः । तत्पर्य्यायः । माया २ शाठ्यम् ३ कुसृतिः ४ निकृतिः ५ । इति हेमचन्द्रः ॥ अन्यच्च ।
"अस्त्रियां कपटो व्याज उपधिर्दम्भ एव च ,
कूटं कल्कं छलं छद्म मिषकैरवकैतवम् ॥
अथ शाठ्यञ्च शठता कुसृतिर्निकृतिश्च सा ।
हिंसाफले चतुष्कं स्यात् शाठ्यपर्य्याय ईरितः ॥
पूर्व्वः कपटपर्य्यायः फले वञ्चनमात्रके ।
उभयोरेकपर्य्याय इति केचित् प्रचक्षते ॥"
इति शब्दरत्नावली ॥

शठाम्ला, स्त्री, अम्बष्ठा । इति राजनिर्घण्टः ॥

शण, द ङ [illegible] । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-सेट् ।) नान्तादिः । ङ,

शृणाति। ट, शृणते। काष्ठो वीरं शृणतीत्यर्थः। इति दुर्गादासः॥
शृध, म दाने। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट।) म, शृधयति। इति दुर्गादासः॥
शृङ्गं, क्ली, (शृध+घञ्।) क्षुपविशेषः। तत्पर्य्यायः। भङ्गा २ मातुलानी ३। इति हेमचन्द्रः॥ (यथा, महाभारते। १।१४५।११।
"शृङ्गं तैलं घृतञ्चैव जतु दारूणि चैव हि।
तस्मिन वेश्मनि सर्व्वाणि निःक्षिपेथाः समन्ततः॥")
शृङ्गः, पुं, (शृध+घञ्।) स्वनामख्यातक्षुपः। तत्पर्य्यायः। माल्यपुष्पः २ वमनः ३ कटुतिक्तकः ४ निश्चावनः ५ दीर्घशाखः ६ त्वक्सारः ७ दीर्घपत्रतः ८। अस्य गुणाः। अम्लत्वम्। कषायत्वम्। मलशर्भासपातनत्वम्। वातकारित्वम्। पित्तकफक्षतीनाङ्गर्हणाग्निदत्वञ्च। इति राजनिर्घण्टः॥
शृङ्गवल्लिका, स्त्री, (शृङ्गस्य वल्लेव तत्तुल्यशृन्द्कारिफलवत्त्वात्। स्वार्थे कन्। टापि अत इत्वम्।) शृङ्गपुष्पी। इति राजनिर्घण्टः॥
शृङ्गपर्णी, स्त्री, (शृङ्गस्य पर्णमिव पर्णमस्याः। ङीष्।) अश्वत्थपर्णी। इति शब्दरत्नावली॥
शृङ्गपुष्पिका, स्त्री, (शृङ्गपुष्पी+स्वार्थे कन्। अत इत्वम्।) वराटिका। इत्यमरभरतौ॥ भनभनिया इति वनशृोश इति च भाषा॥
शृङ्गपुष्पी, स्त्री, (शृङ्गस्य पुष्पमिव पुष्पमस्याः।) क्षुपविशेषः। शृङ्गचुली इति शृङ्गर इति वनशृङ्गर इति च भाषा। तत्पर्य्यायः। कृष्णपुष्पी २ शृङ्गिका ३ शृङ्गवल्लिका ४ पीतपुष्पी ५ शूलफला ६ लोमशा ७ माल्यपुष्पिका ८। अस्या गुणाः। क्षुद्रतिक्तत्वम्। वमिकारित्वम्। रसनियामकत्वञ्च। इति राजनिर्घण्टः॥
शृङ्गसूत्रं, क्ली, (शृङ्गस्य सूत्रम्।) पवित्रकम्। इत्यमरः॥ "दे शृङ्गसूत्रजाते। शृङ्गस्य सूत्रं शृङ्गसूत्रम्। शृणाति ददाति सूत्रं शृङ्गः। शृङ्ग अस्त्र दाने ष्ट्रन्। शृङ्गः सालत्रयाद्यर्हेत्यण्यान्तः इति वङ्गाः। यनो दन्त्यादिर्हेत्यण्यान्त इत्यपरे। सूत्रकियमणिकाकलकोपकाणा इति भट्टहेत्यण्यान्ते विद्याभरणम्॥
'कार्पासमुपवीतं स्याद्विप्रस्योर्द्धृतं त्रिवृत्।
शणसूत्रमयं राज्ञो वैश्यस्याविकौविकम्।' इति मनुवचनात् पवित्रकमपि तदुच्यते। आनाय इत्यादि चतुष्कं जाते इत्येके। आनाय इत्यादि श्लोकार्द्धं क्वचिद्दृश्यते तत्र साम्यादुपेक्षितमपि अन्यैराहृतमिति बहुतम्।" इति तट्टीकायां भरतः॥
शृङ्गालुकः, पुं, (शृङ्गालुरेव। स्वार्थे कन्।) शारिवतरुः। इति शब्दरत्नावली॥ ओखाड़ इति भाषा॥
शृङ्गिका, स्त्री, (शृङ्ग+स्त्रियां टाप्। कन्। अत इत्वम्।) शृङ्गपुष्पी। इति राजनिर्घण्टः॥
शृङ्गीरं, क्ली, श्रोयमध्यस्थपुलिनम्। नदीरोधटम्। इति मेदिनी॥
शृङ्गं, क्ली, पद्मादिसमूहः। इति शब्दरत्नावली॥
शृङ्गः, पुं, नपुंसकम्। गोपतिः। इति भरतविरूपकोषः॥
शृङ्गता, स्त्री, (शृङ्गस्य भावः। तल्।) शृङ्गत्वम्। शृङ्गशब्दात् भावे तप्रत्ययस्यानन्तरं आप् प्रत्ययेन निष्पन्नमेतत्॥
शृङ्गिशः, पुं, (शृङ्गि रुजायाम्+"शृङ्गिकस्यृनिमहिभङ्गिभङ्गिशृङ्गीति।" उणा० १।१५५। इति इशच्।) मुनिविशेषः। इति विश्वप्रकाशः॥
शृङ्गः, पुं, (शृङ्गति शृङ्गधर्म्मात्। शृङ्ग+"शृङ्गेर्डः।" उणा० १।१३१। इति ङः।) अन्तर्मेषलिङ्कः। अण्डान्तरक्षीरघटकोऽयम्। खोवा इति भाषा। तत्पर्य्यायः। घर्घरः २। तल्लक्षणम् यथा,—
"ये त्वण्डवक्त्रा शृणमाः क्षीवाश्च क्षीरभाविनः।
जाया न इडाः कार्य्येषु ते वै वर्षधराः स्मृताः॥"
इति॥
नपुंसकम्। छिण्डे इति भाषा। इत्यमरभरतौ॥ गोपतिः। षाँड़ इति भाषा। इति मेदिनी॥ नन्यपुरुषः। इति जटाधरः॥ उन्मत्तः। इति धनञ्जयः॥
शृतं, क्ली, (दृश्र दृशतः परिमाणमस्येति।
"पंक्तिविंशतिचित्यृष्टिः।" ५।१।५८। इति तः। दृशादयो भावश्च निपात्यते।) दृशगुणितदृशवर्ग्गः। एकशतो इति हिन्दीभाषा। (यथा, भ्रान्तिशतके।
"निःस्वो वष्टि शतं शतानि दशशतं वर्षं सहस्राधिपः॥")
तत्पर्य्यायः। दशतिः २। इति पुराणम्॥ तद्वाचकानि। धार्त्तराष्ट्रः १ शतभिषातारा २ पुरुषायुषः ३ रावणाङ्गुलिः ४ मद्गदलम् ५ इन्द्रयज्ञः ६ अग्निष्टोमनम् ७। इति कविकल्पलता॥ (यजु०। इति निघण्टुः। ३।१॥ यथा, ऋग्वेदे। ८।१।५। "वज्रिवो न शृताय शृतामघ।" "शृताय बहुनामैतत् अपरिमिताय।" इति तद्भाष्ये सायणः॥)
शृतकः, त्रि, (शृतं परिमाणमस्य। शृत+"संख्याया अतिशृदन्तायाः कन्।" ५।१।२२। इति कन्।) शृतसंख्याविशिष्टः। यथा। भ्रान्तिशृतकामरशृतकादिः। शृतशब्दात् कप्रत्ययेन निष्पन्नमेतत्। (यथा, मार्कण्डेये। ९६।३०।
"सन्त्यसन्त्यप्रकथेय शृतकोटी समुद्राकृतौ॥")
स्वार्थे के शृतकम्॥
शृतकोटिः, पुं, भाषार्द्धविशेषः। इति हेमचन्द्रः॥
शृतकुन्दः, पुं, (शृतं कुन्दा यस्य।) करवीरः। इति राजनिर्घण्टः॥
शृतकुम्भाः, पुं, पर्व्वतविशेषः। इति शृतकुम्भशब्दटीकायां भरतः॥ (स्त्री, नदीतीर्थविशेषः। यथा, महाभारते। ३।८४।१०।
"सुगन्धां शृतकुम्भाञ्च पश्यन्त्यापः भारत।
अभिगम्य नरश्रेष्ठ स्वर्गलोके महीयते॥")
शृतकोटिः, पुं, (शृतं कोट्योऽग्राः शिखा यस्य।) वज्रम्। इत्यमरः॥ शृन्द्रसंख्या जीवावतीमते शृतसंख्या॥
शृतक्रतुः, पुं, (शृतं क्रतवो यस्य।) इन्द्रः। इति धनञ्जयकोषः॥ (यथा, महाभारते।३।४२।१२।
"आह मामरश्रेष्ठः पिता तव शृतक्रतुः॥"
बहुकर्म्मा। बहुप्रज्ञः। यथा, ऋग्वेदे।१।१०।१।
"ब्रह्माणस्त्वा शृतक्रत उद्वंशमिव येमिरे॥"
"हे शृतक्रतो बहुकर्म्मन् बहुप्रज्ञ वा।" इति तद्भाष्ये सायणः॥)
शृतखण्डं, क्ली, सुवर्णम्। यथा,—
"सौमेरुकं महाधातुः शृतखण्डं शृदुत्तमम्॥"
इति शब्दचन्द्रिका॥
शृतभागश्च॥
शृतग्रन्थिः, स्त्री, (शृतं ग्रन्थयो यस्याः।) दूर्व्वा। इति राजनिर्घण्टः॥
शृतघ्नी, स्त्री, (शृतं हन्तीति। शृत+टक्। ङीष्।) शस्त्रभेदः। अस्य लक्षणम्। यथा,—
"अयःकण्टकसंरुद्धा शृतघ्नी महती शिला।"
इति विश्वरत्नम्॥
"दुर्गस्य परिखोपेतं चयाट्टालकसंयुतम्।
शृतघ्नीयन्त्रसंरुद्धं शृतशस्त्रसमावृतम्॥
गोपुरं सकवाटञ्च तस्य स्यात् शुभशोभनम्।
एवंविधं गुणारूढो यश्च राजा विशेत् पुरम्॥"
इति मात्स्ये राजधर्म्मे दुर्गसम्पत्तिर्नाम १९९ अध्यायः॥ ०॥ (यथा, रघुः। १२। ६५।
"अयःशृङ्खलिता रुद्धः शृतघ्नीमध शुश्रुवे।
कृतां वैवस्वतस्येव कूटशाल्मलिमक्षिपत्॥"
"अथ रक्षो रावणः अयस्मयैः शृङ्खलिभिः कीलैश्चितां कीर्णां शृतघ्नीं लौहकण्टकवीजितयष्टिविशेषाम्। शृतघ्नी तु चतुरश्रा लौहकण्टकचयिता। यष्टिः————॥ इति केशवः॥" इति तट्टीकायां मल्लिनाथः॥) शृङ्खिकाजी। करञ्जकः। इति मेदिनी॥ गलरोगविशेषः। अस्य निदानलक्षणचिकित्सा दीपिकीशब्दे दृश्या॥
शृतच्छदः, पुं, (शृतं छदा यस्य।) काठशृङ्खपत्री। काठठोकरा इति भाषा। इति चिकित्सासंग्रहः॥ शृतदलपलाशश्च॥
शृततमः, त्रि, शृतस्य पूरणः। शृतशब्दात्तमट्प्रत्ययेन निष्पन्नमेतत्॥
शृततारा, स्त्री, (शृतं तारा यस्याम्।) शृतभिषानक्षत्रम्। इति केचित्॥
शृतदन्तिका, स्त्री, नागदन्ती। इति राजनिर्घण्टः॥
शृतद्रुः, स्त्री, (शृतधा द्रवतीति। शृत+द्रु "शृतेश्च।" उणा० १।३६। इति कुः।) नदीविशेषः। शृतलज् इति हिन्दी भाषा। या हिमालय-

दुनपत्रा विपाशायां मिलिता। (यस्या नामनिरुक्तिर्यथा, महाभारते। १। १७८। ६।
"शतधा विहता यस्माच्छतद्रिरिति विश्रुता॥")
तत्पर्य्यायः। शितद्रुः २। इत्यमरः॥ सुतुम्निः ३ शतद्रुः ४। पुत्तधोकवत्सलो वशिष्ठः कल्पे शिलां वह्वाद्यामस्यां प्रविश्यन्तो भीत्या स्वं शतधा दुता इति शतद्रुः। इति तट्टीकायां भरतः॥ (शतद्रुत्वान्तस्तु महाभारते १।१७८ अध्याये द्रष्टव्यः॥) अस्या जलगुणाः।
"शतद्रोर्विपाशायाश्च विसुनद्याः
सुशीतं लघु स्याद् सर्व्वामयघ्नम्।
उष्णं निर्म्मलं दीपनं पाचनञ्च
प्रदद्यं वर्षं बुद्धिमेधायुषञ्च॥"
इति राजनिर्घण्टः॥

शतधा, स्त्री, दूर्व्वा। इति शब्दचन्द्रिका॥

शतधा, व्य, (शत+धाप्।) शतप्रकारम्। यथा,
"लोकौकिकवचनं श्रुत्वा यः सर्पो न निवर्त्तते।
शतधा भिद्यते मूर्द्धि शिरीषस्य फलं यथा॥"
इति महाभारतम्॥

शतधामा, [न्] पुं, (शतं धामानि वर्त्मानि यस्य।) विष्णुः। इति जटाधरः॥

शतधारं, क्ली, (शतं धारा: कोणा यस्य।) वज्रम्। इति त्रिकाण्डशेषः॥ शतधारायुक्ते, त्रि। यथा,—
"वसोः पवित्रमसि शतधारं वसोः पवित्रमसि सहस्रधारम्।
वसोः पवित्रेण शतधारेण सुत्वा कामधुषः॥"
इति यजुर्व्वेदीयमन्त्रः॥

शतधृतिः, पुं, इन्द्रः। (यथा, महिम्नः स्तोत्रे।
"रथः क्षौमो यस्य शतधृतिरगेन्द्रो धनुरथो॥")
ब्रह्मा। इति मेदिनी॥ (यथा, भागवते। २।४।२।
"ब्रह्मं शतं शतधृतिर्हरयश्चाग्निपोरथ॥")
स्वर्गः। इति विश्वः॥

शतपत्रं, क्ली, (शतं पत्राणि यस्य।) पद्मम्। इत्यमरः॥ (यथा, महाभारते। ३।६८। २०।
"इत्यालपितकेयूरान्ता शतपत्रायतेक्षणा॥")

शतपत्रः, पुं, (शतं पत्राणि पक्षा यस्य।) मयूरः। सारसः। दार्व्वाघाटपक्षी। इति मेदिनी॥ दारकौरः। कुरी इति भाषा। इति हेमचन्द्रराजनिर्घण्टौ॥ (यथा, महाभारते। ३। १०८। ८।
"मयूरैः शतपत्रैश्च कीर्णा कोकिलैः॥")

शतपत्रकः, पुं, (शतपत्र+स्वार्थे कन्।) दार्व्वाघाटपक्षी। इत्यमरः॥ काठठोकरा इति भाषा॥

शतपत्रनिवासः, पुं, (शतपत्रे निवासो यस्य।) ब्रह्मा। इति कविकल्पलता॥ पद्मस्थे, त्रि॥

शतपत्री, स्त्री, (शतं पत्राणि यस्याः। ङीप्।) पुष्पविशेषः। सेउती इति भाषा। पाटलवर्णाभो गोलाव इति वदन्ति। तत्पर्य्यायः। सुसगा २ सुशीला ३ शिवचम्पा ४ सौम्यगन्धी ५ शतदला ६ सुदला ७ शतपत्रिका ८। अस्या गुणाः। त्रिदोषघ्नम्। तिक्तत्वम्। कषायत्वम्। कृष्णसुखस्फोटपित्तदाहनाशित्वम्। रुच्यत्वम्। सुरभित्वञ्च। इति राजनिर्घण्टः॥

शतपत्रिका, स्त्री, (शतपत्री+कन्। टाप्। अत इत्वम्।) शतपत्री। इति राजनिर्घण्टः॥

शतपथिकः, त्रि, (शतपथमधीते नदेद इति वा।) "शतपथे: ठिकन् पथो बहुलम्।" ४। २। ६०। इत्यस्य वार्त्तिकोक्त्या शत-शब्दोत्तरपथिन्-शब्दात् ठिकन्प्रत्ययेन निष्पन्नः।) नानामतावलम्बी। नानापथगामी। इति सिद्धान्तकौमुदी॥

शतपद्मचक्रं, क्ली, (शतं पद्मानि कोष्ठा यस्य तच्च तच्चक्रञ्चेति।) नाना गच्छन्नागार्थं चक्रम्। यथा,—
"चक्रं शतपदं वक्ष्ये ऋक्षांशाक्षरसम्भवम्।
नामादिवर्णतो ज्ञेया अक्षराश्चंशकास्तथा।
तिर्य्यगूर्द्धगता रेखा वज्रसंज्ञा लिखेद्बुधः।
जायते कोष्ठकानाञ्च शतैकं १००नाम संग्रयः॥
अ-व-क-ह-छा ऐशान्यां म-ट प-र-ता इति वायव्याम्।
न-य-भ-ण-खा नैर्ऋत्यां ग-स-ष-ष-ला आग्नेयाम्।
पञ्च पञ्च क्रमेणैव विंशवर्गान् प्रयोजयेत्।
पञ्चस्वरसमायोगे एकैकं पञ्चधा कुरु॥
अवर्गाद्याक्षयो ज्ञेया: सम्यक्स्वरयुतास्तथा।
सजातीयैक्यमास्थाय पञ्चस्वरविनिर्णयः॥
ऋदृल्तेरेयकारेण ग्रैन सस्य परिग्रहः।
कुर्य्यात् कु-पु-सु-दुस्थाने चोत्रि चीण्यक्षराणि च॥
क्र-ष-ट-छा भवेत् खण्डे रौद्रे क्षीणाक्षगोचरे।
प्र-य-ब-ठा भवेत् खण्डे दक्षे चार्यसमंज्ञके॥
स्र-ध-फ-ढा भवेत् खण्डे पूर्व्वाषाढे च नैर्ऋते।
द्र-ण-भ-डा भवेत् खण्डे वायव्ये भाद्र उत्तरे॥
एवं खण्डचतुष्कञ्च ज्ञातव्यं स्वरवेदिभिः॥
धिष्ण्यानि ऋक्षिकादीनि प्रत्येकं चतुरक्षरैः।
साभिजिन्त्यंशकाश्चात्र शतैकं ज्ञाद्यधिकम्॥
यद्यक्षांशककोष्ठस्थः क्रूरः सौम्योऽपि वा ग्रहः।
तत्रस्थो वेधयेत् सम्यक् पुंसो नामादिमाक्षरम्॥
सौम्यैर्विद्धं शुभं ज्ञेयमशुभं पापखेचरैः।
मिश्रैर्मिश्रफलं तत्र निर्व्वेधेन शुभाशुभम्॥
यद्यार्थं सर्व्वतोभद्रं यद्वोपग्रहवेधतः।
शुभाशुभफलं सर्व्वं तदिहापि विचिन्तयेत्॥
पृथक्स्वरा अ-इ-उ-ए-ओकारास्तैर्योगे धिष्ण्यानि नक्षत्राणि। अत्र कृत्तिकाभिर्ब्रह्मैरेकनक्षत्रं यथा,—
अ इ उ ए १। ओ व वि वृ ४। वे वो क कि ५। कृ घ ङ छ ६। के को ह हि ७। हु हे हो ड ८। डि डु डे डो ९। म मि सु मे १०। मो ट टि टु ११। टे टो प पि १२। पु ष ण ठ १३। पे पो र रि १४। ण रे रो त १५। ति तु ते तो १६। न नि नु ने १७। नो य यि यु १८। ये यो भ भि १९। सु श ध ढ २०। मे भो ज जि २१। खु खे खो ख। ०। खि ख खे खो २२। ग गि गु गे २३। गो ग्र शि श २४। शे यो द दि २५। दु थ झ ञ २६।

दे दो च चि २७। चु चे चो ल १। लि लु ले लो २। अक्षयुक्तः चकारयुक्तेन ज्ञेयः। ह्रस्वेन दीर्घो ग्रय.। नाक्षयशकारेण दन्त्यसकारो ज्ञेयः। इति शतपद्मचक्रम्। इति ज्योतिस्तत्त्वम्॥

शतपदी, स्त्री (शतं पादा यस्याः। ङीप।) बहुपदयुक्तकीटविशेषः। काञ्जिका इति काणकोटारी इति च भाषा। तत्पर्य्यायः। कर्कजलौकाः २। इत्यमरः॥ कर्णकोटी ३ भीरुः ४ शतपादिका ५ कर्कजलुका ६। इति शब्दरत्नावली॥ शतपात ७ शतपादी ८। इति जटाधरः॥ शतावरी। इति राजनिर्घण्टः॥

शतपद्मं, क्ली, श्वेतकमलम्। यथा,—
"शतपद्मं महापद्मं पुण्डरीकं सिताम्बुजम्॥"
इति रत्नमाला॥

शतपर्व्वा, [न्] पुं, (शतं पर्व्वाणि यस्य।) वंशः। इत्यमरः॥ इक्षुभेदः। —
"शतपर्व्वा भवेत् किञ्चित्क्षीरगन्धगुणान्वितः।
विशेषात् किञ्चिदुष्णश्च स्वादुः पवनपित्तहः॥"
इति भावप्रकाशः॥

शतपर्व्वा, स्त्री, (शतं पर्व्वाणि यस्याः।) दूर्व्वा। वचा। भार्गवपत्नी। (यथा, महाभारते। ५। २१७। १३।
"हविर्भुतिश्च तारायां शुक्रश्च शतपर्व्वया॥")
कोशागरपूर्णिमा। इति शब्दरत्नावली॥ कटुका। इति राजनिर्घण्टः॥

शतपर्व्विका, स्त्री, (शतपर्व्वा+कन्। टापि अत इत्वम्।) दूर्व्वा। वचा। इति मेदिनी॥ यवः। इति शब्दरत्नावली॥

शतपर्व्वेक्षुः, पुं, (शतपर्व्वाया इक्षुः।) मुक्तयवः। इति त्रिकाण्डशेषः॥

शतपाद् } स्त्री, (शतं पादा यस्याः। पाद्यस्य
शतपाद् } पात्।) कर्णजलौकाः। इति जटाधरः॥

शतपादिका, स्त्री, (शतपाद्+स्वार्थे कन्+टाप्। अत इत्वम्।) काकोली। इति जटाधरः॥ कर्णजलौकाः। इति शब्दरत्नावली॥

शतपुष्पः, पुं, भारावः। स तु किरातार्জ্জुनीयस्य कर्त्ता। इति त्रिकाण्डशेषः॥

शतपुष्पा, स्त्री, (शतं पुष्पाणि यस्याः।) शाकविशेषः। इति भरतः॥ शुलफा इति ख्याता। (यथा, सुश्रुतसंहितायाम्। ५९। १५।
"गन्धमांसिशतपुष्पया वदेत्॥")
तत्पर्य्यायः। सितच्छदा २ अतिच्छत्रा ३ मधुरा ४ मिसिः ५ अवाकपुष्पी ६ कारवी ७। इत्यमरः॥ शतावरी ८ शतपुष्पिका ९ मधुरिका १० शताङ्गा ११ छत्रा १२ मिसिः १३. मिशी १४। इति शब्दरत्नावली॥ माधवी १५ घोषा १६। इति जटाधरः॥ अस्या गुणाः। मधुरत्वम्। वातपित्तहरत्वम्। गुरुत्वञ्च। इति राजवल्लभः॥ * ॥ क्षुपविशेषः। भौरी इति भाषा। तत्पर्य्यायः। शताङ्गा २ मिसिः ३ घोषा ४ पीतिका ५ अतिच्छत्रा ६ अवाक्

शतभि

पृथ्वी ७ मायवी ८ कारवी ९ शिखा १० संघातपत्रिका ११ छत्रा १२ वयःपुष्पा १३ सुपुष्पिका १४ शतप्रसूना १५ वहला १६ पुष्पाह्वा १७ शतपत्रिका १८ वनपुष्पा १९ भूरिपुष्पा २० सुगन्धा २१ सुपापत्रिका २२ मधुरिका २३ अतिरूपा २४। अस्या गुणाः। कटुत्वम्। तिक्तत्वम्। स्निग्धत्वम्। श्वेषातिसारश्वरनेत्ररोगनाशित्वम्। वस्तिकर्म्मणि प्रशस्यत्वञ्च ॥ ७ ॥ तद्गुणाः। उष्णत्वम्। मधुरत्वम्। गुल्मशूलपालनाशित्वम्। दीपनत्वम्। पथ्यत्वम्। पित्तहारित्वम्। रुचिदायकत्वञ्च। इति राजनिर्घण्टः ॥ ८ ॥ अपि च।

"शतपुष्पा कटुः स्निग्धा तिक्तोष्णा कफवातजित्।
कण्ठ्या वस्तिशिरा नेत्रा वह्निवृद्धिमलप्रणुत्।
संग्राही शीतला तिक्ता दाहनुत् वातला लघुः ॥"

इति भावप्रकाशः।

अन्यच्च शतपुरिकाशब्दे द्रष्टव्यम्।

शतपुष्पिका, स्त्री, (शतपुष्पा + स्वार्थे कन्। टाप् अत इत्वम्।) शतपुष्पा। इति शब्दरत्नावली ॥

शतप्रसूना, स्त्री, (शतं प्रसूनानि पुष्पाणि यस्याः।) शतपुष्पा। इति राजनिर्घण्टः ॥

शतपाद्, पुं, (शतं पादा इव पदानि यस्य।) कर्कोटवृक्षः। इत्यमरः ॥

शतभिषक्, [ज्] स्त्री, (शतं भिषज इव तारा यत्र।) शतभिषानक्षत्रम्। इति शब्दरत्नावली ॥ (यथा, हरिवंशे त्रिंशायाम्। ८। ३४।

"शतभिषजि श्रोत्रिकाना-
मन्नैकपं भूतलोत्थिता मीढ्वा ॥

शतभिषजि जाते, त्रि। अत्र "नक्षत्राच्छा-भिविद्धयुक्तृनभिषजो वा।" ४। ३। ३६। इति छात्रार्थप्रत्ययस्य लुक् ॥)

शतभिषा, स्त्री, अश्विन्यादिसप्तविंशतिनक्षत्राणामेतन्नामकं नक्षत्रम्। तत्पर्य्यायः। शतभिषक् २। इति शब्दरत्नावली ॥ अस्या आकृतिर्मत्स्यावतारप्रस्तावे द्रष्टव्या। यथा,—

"मस्त्याभमुत्तरार्द्धाकृते-
र्मेघाभाभि नभसः प्रदेशभि।
शतभैषजसंज्ञितैस्तथा
तारैर्दृश्यति सप्तविंशतिः ॥" इति ज्योतिस्तत्त्वम्। ५५।

इति ज्योतिषशास्त्रप्रसिद्धनक्षत्रविशेषः ॥ अस्या अधिष्ठातृदेवता वरुणः। यथा,—

"अश्विभरण्यग्निकृत्तिकासु
रोहिण्यां मृगशिरसि च प्रसूताः।
आर्द्रेज्यश्लेषासु पुनर्वसौ च
शस्ताः सर्वे वरुणभे नरेन्द्रयोगाः ॥"

इति ज्योतिषतत्त्वम्। ३०।

तस्य चक्रम्।

"शतभिषजि सप्तमे पदे
निहतो हि चतुरो नरो भवेत्।
वैरिणामतिशयेन दारुणो
मारणेऽपि यदि यस्य सम्भवे ॥"

इति कोष्ठीप्रदीपः ॥ ७ ॥

तस्य चारस्य मित्रगुणाः। यथा।

"शतानलादित्यविघ्नाखमेक-
मृक्षोद्भवा मित्रगुणाः प्रदिष्टाः।
शिवाजहस्ताश्विभवा घनघ्ना
श्रेषोद्भवाः सत्पुरुषा भवन्ति ॥" ८ ॥

रविवारादौ शतभिषादियोगे ज्वरोत्पत्तिफलं यथा,—

"शिवशतभिषायासो याम्यवर्मेन्दिपूर्व्वा
ग्निरविभुजपारे भूसगोऽहीनवघ्न्याम्।
दह हि मरुद्यमोगे यो हि रौद्रोमयुक्तः
पशुपतिसमदेहः सोऽपि वह्नुं प्रयाति ॥
उत्तरे विंशतिर्ज्ञेया द्वौ मासौ अवमे तथा।
घनिष्ठायामर्द्धमासं वारुणेन दृग्भाजकम् ॥"

इति ज्योतिःसारसङ्ग्रहिकृत्यफलम् ॥

शतभीरुः, स्त्री, मल्लिका। इत्यमरः ॥ शतं बहवो वियोगिनो भीरवोऽस्या इति शतभीरुः। शीतभीरुरिति च पाठः। तदा त्रैप्रिकलेन शीतात्तिभैतीति शीतभीरुः। इति भरतः ॥

शतमखः, पुं, (शतं मखा यज्ञा यस्य।) इन्द्रः। इति शब्दरत्नावली ॥ (यथा, कुमारे। २। ६४।

"सहस्रमधुपक्तव्यसंभृताङ्कुराः
शतमखमुपतस्थे प्राञ्जलिः पुष्पवन्ता ॥")

शतमन्युः, पुं, (शतं मन्यवः क्रतवो यस्य।) इन्द्रः। इत्यमरः ॥ (यथा, भागवते। १। ८। ६।

"यानविलाक्यनेधैस्तं विभिदुस्तमकल्पकैः।
सदृशः भावनं दिक्षु शतमन्योरिवाहनोत् ॥"

शतमन्यादिषु, त्रि। यथा, हरिवंशे। ३१। ५४।

"शतमन्युः सभंकरः सत्यात्मः
सहस्रशीर्षा शतमन्युरीड्यः ॥"

बहुव्रीहौ च त्रि। यथा, ऋग्वेदे। १०।१०३।७।

"वीरः शतमन्युरिन्द्रः।"

"शतमन्युः बहुयज्ञः बहुक्रोधो वा।" इति तत्रार्थे सायणः ॥)

शतमानः, पुं, स्त्री, रूप्यपलम्। चाउरः। इत्यमरभरतौ ॥ (यथा, मनुः। ८। १३०।

"धरणानि दश द्वौ वा शतमानमु राजतः।
वृद्धौ नीवीसमो दण्डो विंशतिष्वनुशासनम् ॥"

शतमीढ्य, त्रि। यथा, यजुर्वेदीयतैत्तिरीयसंहितायाम्। १६। ८६।

शतमा

या तु अधोमुखी। यथा,—

"यश्चेषवश्चियमग्निश्चविघ्नारयुक्तं
पूर्व्वाचार्य्यं शतभिषा च नवाष्टकुनि।
एतान्यधोमुखगणानि श्रियानि नित्यं
विद्यार्थभूमिखननेषु च तूपितानि ॥"

इति ज्योतिस्तत्त्वम् ॥ ७ ॥

तत्र नामफलम्।

"शीतभीतिरतिसाहसी सदा
निष्ठुरो हि चतुरो नरो भवेत्।
वैरिणामतिशयेन दारुणो
मारणेऽपि यदि यस्य सम्भवे ॥"

इति कोष्ठीप्रदीपः ॥ ७ ॥

तत्र चारस्य मित्रगुणाः। यथा।

"शतानलादित्यविघ्नाखमेक-
मृक्षोद्भवा मित्रगुणाः प्रदिष्टाः।
शिवाजहस्ताश्विभवा घनघ्ना
श्रेषोद्भवाः सत्पुरुषा भवन्ति ॥" ८ ॥

रविवारादौ शतभिषादियोगे ज्वरोत्पत्तिफलं यथा,—

"शिवशतभिषायासो याम्यवर्मेन्दिपूर्व्वा
ग्निरविभुजपारे भूसगोऽहीनवघ्न्याम्।
दह हि मरुद्यमोगे यो हि रौद्रोमयुक्तः
पशुपतिसमदेहः सोऽपि वह्नुं प्रयाति ॥
उत्तरे विंशतिर्ज्ञेया द्वौ मासौ अवमे तथा।
घनिष्ठायामर्द्धमासं वारुणेन दृग्भाजकम् ॥"

इति ज्योतिःसारसङ्ग्रहिकृत्यफलम् ॥

शतभीरुः, स्त्री, मल्लिका। इत्यमरः ॥ शतं बहवो वियोगिनो भीरवोऽस्या इति शतभीरुः। शीतभीरुरिति च पाठः। तदा त्रैप्रिकलेन शीतात्तिभैतीति शीतभीरुः। इति भरतः ॥

शतमखः, पुं, (शतं मखा यज्ञा यस्य।) इन्द्रः। इति शब्दरत्नावली ॥ (यथा, कुमारे। २। ६४।

"सहस्रमधुपक्तव्यसंभृताङ्कुराः
शतमखमुपतस्थे प्राञ्जलिः पुष्पवन्ता ॥")

शतमन्युः, पुं, (शतं मन्यवः क्रतवो यस्य।) इन्द्रः। इत्यमरः ॥ (यथा, भागवते। १। ८। ६।

"यानविलाक्यनेधैस्तं विभिदुस्तमकल्पकैः।
सदृशः भावनं दिक्षु शतमन्योरिवाहनोत् ॥"

शतमन्यादिषु, त्रि। यथा, हरिवंशे। ३१। ५४।

"शतमन्युः सभंकरः सत्यात्मः
सहस्रशीर्षा शतमन्युरीड्यः ॥"

बहुव्रीहौ च त्रि। यथा, ऋग्वेदे। १०।१०३।७।

"वीरः शतमन्युरिन्द्रः।"

"शतमन्युः बहुयज्ञः बहुक्रोधो वा।" इति तत्रार्थे सायणः ॥)

शतमानः, पुं, स्त्री, रूप्यपलम्। चाउरः। इत्यमरभरतौ ॥ (यथा, मनुः। ८। १३०।

"धरणानि दश द्वौ वा शतमानमु राजतः।
वृद्धौ नीवीसमो दण्डो विंशतिष्वनुशासनम् ॥"

शतमीढ्य, त्रि। यथा, यजुर्वेदीयतैत्तिरीयसंहितायाम्। १६। ८६।

शतरु

"इन्द्रस्य रूपं शतमानमायु-
श्चन्द्रेण ज्योतिरुक्तं शताग्रः ॥"

"शतानामनेकेषां प्राणिनां मानं पूजा यस्मिन् तत् शतपूज्यमित्यर्थः।" इति तट्टीकायां मल्लीधरः ॥)

शतमार्कः, पुं, (शतं शतवारं मार्ष्टयति शुद्धः करोति। शत शुद्धौ + णिच् + अण्।) अम्लकारकः। इति केचित ॥ (क्वचित् शुद्धमार्क इति पाठः ॥)

शतमूला, स्त्री, (शतं मूलानि यस्याः।) दूर्व्वा। वचा। इति राजनिर्घण्टः ॥

शतमूलिका, स्त्री, (शतं मूलानि यस्याः। ततः स्वार्थे कन्।) दूर्व्वा। इति राजनिर्घण्टः ॥

शतमूली, स्त्री, (शतं मूलानि यस्याः। "शाकवर्त्तेति।" ४।१।४४। ङीष्।) स्वनामख्यातौषधविशेषः। तत्पर्य्यायः। बहुसुता २ अभीरुः ३ इन्दीवरी ४ वरी ५ अत्यग्रोक्ता ६ भीरुपत्री ७ नारायणी ८ शतावरी ९ अतीवः १०। इत्यमरः ॥ रङ्गिणी ११ शटी १२ द्वीपिप्रसुः १३। इति शब्दरत्नावली ॥ छत्रगता १४। इति शब्दरत्नावली ॥ शतपदी १५ वीरवरी १६ धीवरी १७ छत्रा १८ छिन्ना १९ दीपिका २० दरकण्डिका २१ छत्रपत्रा २२ सुपत्रा २३ बहुसूत्रा २४ शतावरी २५ खादुरसा २६ शताह्वा २७ बहुपर्णिका २८ आत्मगुप्ता २९ जटा ३० मूला ३१ शतवीर्य्या ३२ मधुपर्णी ३३ मधुरा ३४ शतमूला ३५ केशिका ३६ शतपत्रिका ३७ विश्वस्था ३८ वैदेयी ३९ पार्थी ४० वासुदेवप्रियङ्करी ४१ दुर्भगा ४२ तैलपर्णी ४३। अस्या गुणाः। इक्षुत्वम्। मधुरत्वम्। स्निग्धत्वम्। मेहकफवातपित्तनाशित्वम्। तिक्तत्वम्। श्वेतत्वम्। रसायनत्वञ्च। इति राजनिर्घण्टः ॥ अपि च।

"शतावरी बहुसुता भीरुरिन्दीवरी वरी।
नारायणी शतपदी शतवीर्य्या च धीवरी ॥
मधुशतावरी स्वल्पा शतमूल्यैकशिफिका।
बहुसवीर्य्या चेक्षुश्च अत्यग्रोक्ता मधोवरी ॥
शतावरी गुरुः स्निग्धा तिक्ता स्वादी रसायनी।
मेधाग्निबुद्धिदा स्निग्धा नेत्रा गुल्मविसार-
क्षित्।
शुक्रलस्यकरी बल्या वातपित्तास्रशोषजित् ॥"

इति भावप्रकाशः ॥ ७ ॥

अन्यच्च।

"शतावरी वातपित्तमेहकुष्ठहरा वरा।"

इति राजवल्लभः ॥

शतयष्टिकः, पुं, (शतं यष्टयो गुणा अस्य।) शतयष्टिकहारः। तत्पर्य्यायः। ऐकयष्टिकः २। इत्यमरः ॥

शतयु(धी)र्य, त्रि, (शतं यत्रा ईषवो अस्य। शतशब्दात् "शतसहस्रान्यतरस्याम्।" ४।४।१८। इत्यस्य वार्त्तिकोक्त्या यः। ङीष् च।) कविरादिकम्। इति त्रिकाण्डशेषः ॥ (यथा, महाभारते। ८। ७८। १३।

"शृण्वन्तौ वेदविदांवरौ तद्वच्च शतरुद्रियम्॥"
यजुर्वेदोक्तमन्त्रविशेषे, क्ली। यथा, महाभारते। ७। २००। १४६।
"पठन् वै शतरुद्रीयं ब्रह्मलोके महीयते॥")

शतरूपा, स्त्री, (शतं रूपाणि यस्याः।) ब्रह्मणः कन्या पत्नी च। यथा,—
"अथात्मानमात्मकं कृत्वा जगद्धात्रजीवनत्।
सावित्रीं लोकसिद्ध्यर्थं कृदि कृत्वा समास्थितः॥
ततः संशयतस्तस्य भित्त्वा देहमकल्मषम्।
स्त्रीरूपमर्द्धमकरोद्दक्षं पुरुषरूपवत्॥
शतरूपा च या ख्याता सावित्री च निगद्यते।
सरस्वत्यथ गायत्री ब्रह्माणी च परन्तप॥
दृष्ट्वा तां अधिकत्तावत्कामबाणार्दितो विभुः।
उपयेमे स विश्वात्मा शतरूपामनिन्दिताम्॥
ततः कालेन महता ततः पुत्रोऽभवन्मनुः।
स्वायम्भुव इति ख्यातः स विराडिति नः श्रुतम्॥"
इति मात्स्ये ३ अध्यायः॥
(विष्णुपुराणमते इयं स्वायम्भुवमनोः पत्नी। यथा, तत्रैव। १। ७। १४—१६।
"ततो ब्रह्मात्मसम्भूतं पूर्वं स्वायम्भुवं प्रभुः।
आत्मानमेव शतवान् प्रणामाख्ये मनुं द्विज॥
शतरूपां तु तां नारीं तपोनिर्धूतकल्मषाम्।
स्वायम्भुवो मनुर्देवः पत्नीत्वे जगृहे विभुः॥
तस्यां च पुरुषात् देवी शतरूपा व्यजायत।
प्रियव्रतोत्तानपादौ प्रसूत्यां कुक्षिसंश्रितम्॥")

शतशुम्बः, शतशुम्बकः, } पुं, भारविः। इति चिकाण्डशेषभूरिप्रयोगौ॥

शतवीर्य्या, स्त्री, (शतं वीर्य्याणि यस्याः।) श्वेतदूर्व्वा। इत्यमरः॥ शतावरी। कपिकच्छ्वाच्चा। इति राजनिर्घण्टः॥

शतवेधी, [न्] पुं, (शतं विध्यतीति। विध+णिनिः।) धान्यवेधकः। इत्यमरः॥

शतसहस्रं, क्ली, (शतगुणितं सहस्रम्। मध्यपदलोपिकर्म्मधारयः।) शतगुणितसहस्रम्। लक्षमिति यावत्। यथा हारीतः। मध्विज्यो गवादीनां प्रतिग्रहे सावित्र्यष्टसहस्रं जपेत् पञ्च मध्यमे दशोत्तमे द्वादशशतं पयोव्रतं शतसहस्रमनन्तप्रतिग्रहेष्विति। इति शुद्धितत्त्वम्॥ (यथा च हरिवंशे। १२१। १३।
"अष्टौ शतसहस्राणि देवज्ञाश्चोत्तमा दयाः॥")

शतह्रदा, स्त्री, (शतं ह्रदा आर्द्रादयः यस्याः। यद्वा, शतं ह्रादाः शब्दाः यस्याः। निपातनात् ह्रदः।) विद्युत्। इत्यमरः॥ (यथा, हरिवंशे। १४६। ३८।
"शतह्रदेव स रराज राजन्
शतह्रदाभीप्रभयाभिरामः॥")
वज्रम्। इति मेदिनी॥ दशकन्याविशेषः। यथा,
"दशैव मानुषाणान्तु दश चैव शतह्रदाः।
कन्याः पुराणे विदुषः स्मृताः॥"
इति वह्निपुराणे मत्स्योदरीनामे दशोद्वाहाधिकारे नामाख्यानम्॥

शतावं, स्त्री, रात्रिः। शतपुष्पा। इति शब्दरत्नावली॥ पार्व्वती। यथा,—
"भूयश्च शतवार्षिक्यामनावृष्ट्यामनम्भसि।
मुनिभिः संस्तुता भूमौ सम्भविष्याम्ययोनिजा॥
ततः शतेन नेत्राणां निरीक्षिष्यामि यन्मुनीन्।
कीर्त्तयिष्यन्ति मनुजाः शताक्षीमिति मां ततः॥"
इति मार्कण्डेयपुराणे देवीमाहात्म्ये देव्याश्चरितस्तुतिनामाध्यायः॥

शताङ्गः, पुं, (शतं अङ्गानि अवयवा यस्य।) रथः। इत्यमरः॥ तिनिसवृक्षः। इति राजनिर्घण्टः॥ (दानवविशेषः। यथा, हरिवंशे। २३२। ६।
"कराली ज्वालजिह्वश्च शताङ्गः शतलोचनः॥")
शतावयवविशिष्टे, त्रि। यथा, महाभारते। १। १८६। २२।
"शताङ्गानि च तुर्य्याणि वादकाः समवादयन्॥")

शतानकं, क्ली, घासधान्यम्। इति चिकाण्डशेषः॥

शतानन्दः, पुं, (शतं बहुलः आनन्दो यस्य।) मुनिभेदः। स तु जनकराजपुरोहितः। देवकीनन्दनः। इति मेदिनी॥ ब्रह्मा। गौतममुनिः। इति हेमचन्द्रः॥ विष्णुरथः। इति चिकाण्डशेषः॥ (विष्णुः। यथा, महाभारते। १३। १४६। ७६।
"श्रुतः खड्गः शतानन्दो नन्दिर्ज्योतिर्गणेश्वरः॥")

शतानीकः, पुं, (शतं अनीकानि यस्य।) वृक्षः। मुनिभेदः। स तु याज्ञवल्क्यस्य। राजभेदः। स च चतुर्थयुगे चन्द्रवंशीयद्वितीयराजः। तस्य पिता जनमेजयः पुत्रः सहस्रानीकः। इति मेदिनी॥ सुदासराजपुत्रः। इति श्रीभागवते ६ स्कन्धे २२ अध्यायः॥ (नकुलपुत्रः। यथा, महाभारते। १। २३४। १०।
"पुत्रस्ते प्रतिविन्ध्यश्च श्रुतसोमस्तथा विभुः।
श्रुतकर्म्माऽर्जुनिश्चैव शतानीकश्च नाकुलिः॥
सहदेवश्च यो ज्ञातः श्रुतसेनस्तथाबलः।
सर्व्वे कृतास्त्रिणो वीराः सताश्वाश्च सतार्थव॥")

शतारं, क्ली, (शतं आरादि यस्य।) वज्रम्। इति चिकाण्डशेषः॥

शतारुः, [सु] क्ली, } कुष्ठभेदः। इति शब्दरत्नावली॥ तस्य रूपमाह।
शतारुणी, क्ली, } वली॥
"रक्तं श्यावं सदाधार्त्ति शतारुः स्याद्दुरुत्तरम्।"
इति भावप्रकाशः॥

शतावरी, स्त्री, (शतं आवृणोतीति। आ+वृ+अच्। गौरादित्वात् ङीष्।) शतमूली। इत्यमरः॥ रम्भाख्या। इति शब्दरत्नावली॥ भटी। इति मेदिनी॥

शतावर्त्तः, पुं, विष्णुः। इति हेमचन्द्रः॥ (यथा, महाभारते। १३। १४६। ५०।
"शतमूलः शतावर्त्तः शतपत्रनिभेक्षणः॥")
"धर्म्मस्यायस्य शतमायस्यमानाः प्रादुर्भावा यस्मिन्निति शतावर्त्तः। नारायणेन प्राणरूपेण वर्त्तते इति वा शतावर्त्तः।" इति तत्र शाङ्करभाष्यम्॥ महादेवः। यथा, महाभारते। १३। २८४। ६।
"शतोदर शतावर्त्त शतजिच्च नमोऽस्तु ते॥")

शतावर्त्ती, [न्] पुं, विष्णुः। इति चिकाण्डशेषः॥

शतार्द्रा, स्त्री, (शतं आर्द्रा यस्याः।) शतपुष्पा। इति जटाधरः॥ शतावरी॥ इति राजनिर्घण्टः॥

शतिकः, त्रि, (शत+"शताच्च ठन् यतावशते।" ५। १। २१। इति ठन्।) शतेन क्रीतः। शतस्य विकारः। शतसम्बन्धी। इति सिद्धान्तकौमुदी॥

शतेरः, पुं, (शद शातने+"शदेश्च।" उणा० १। ६१। इति एरक् तकारान्तादेशश्च।) शत्रुः। हिंसा। इत्युणादिकोषः॥

शत्यः, त्रि, (शत+"शताच्च ठन्यतावशते।" ५। १। २१। इति यत्।) शतस्य विकारः। शतेन क्रीतः। धनपतिसंयोगः। शतमस्मै दृष्टिः आयः लाभः शुल्कमुपदा वा दीयते इत्यर्थे शत्यः शतिकः। शत्यं शतिकम्। दक्षिणाशिक्षुन्दनं शतस्य निमित्तमित्यर्थः। इति सिद्धान्तकौमुदी॥

शत्रिः, पुं, (शद+"राशदिभ्यां त्रिप्।" उणा० ४। ६७। इति त्रिप्।) वृक्षौ। इति सिद्धान्तकौमुदीसुषादिवृत्तिः॥ (राजर्षिविशेषः। यथा, ऋग्वेदे। ५। ४। ६।
"शत्रिमग्न उपमं केतुमर्य्यः॥"
"शत्रिं शतमामकं राधसेमम्।" इति तद्भाष्ये सायणः॥)

शत्रुः, पुं, (शद शातने+"कृशदिभ्यां कुन्।" उणा० ४। १७३। इति कुन्। यद्वा शातनम्-रोऽयवच्छित्तेकविषयाभिनिवेशिराजः। यथा,—
"विषयानन्तरो राजा शत्रुर्मित्रमतः परम्॥"
इति,
घातकः। निपातकारीत्यर्थः। तत्पर्य्यायः। रिपुः २ वैरिः ३ सपत्नः ४ अरिः ५ द्विषः ६ द्वेषणः ७ दुर्हृद् ८ द्विट् ९ विपक्षः १० अहितः ११ अमित्रः १२ दस्युः १३ शात्रवः १४ अभिघाती १५ परः १६ अरातिः १७ प्रत्यर्थी १८ परिपन्थी १९। इति शब्दरत्नावली॥ वृषः २० प्रतिपक्षः २१। इति जटाधरः॥ द्विषन् २२ घातकः २३ वैरी २४ विद्विषः २५ द्विषंतपः २६ विद्विट् २७ अप्रियः २८ अभिघातिः २९ अहितः ३० दौर्हृदः ३१। इति शब्दरत्नावली॥ तस्य जयोपायो यथा,—
मत्स्य उवाच।
"सर्व्वेषामनुपायज्ञो दानं श्रेष्ठतमं मतम्।
सदृशेनेह भवति दानेनोभयलोकजित्॥
न सोऽस्ति राजन् दानेन यस्यायोगो न जायते।
दानेन वशगा देवा भवन्तीह सदा नृणाम्॥
दानमेवौषधीत्यन्ति प्रज्ञाः सर्व्वा नृपोत्तम।
प्रियो हि दानवान् लोके सर्व्वस्यैवोपजायते॥
दानसम्बन्धिरेवैष तव राजा परान् जयेत्।

आख्योपत्तिर्यथा,—
"मरीचेः कश्यपो जज्ञे तस्माच्चक्षे विभावसुः।
तस्य भार्याभवत् संज्ञा पुत्री त्वष्टुः प्रजापतेः॥
नातितेजोमयं रूपं सोढुं सा विवस्वतः।
मायामयीं ततश्छायां सवर्णां निर्ममे सतीं॥
संज्ञोवाच ततश्छायां सवर्णे भद्रमु मे वचः।
अहं यास्यामि सदनं पितुस्तं पुनरत्र मे।
भवने वस कल्याणि निर्विशङ्कं ममाज्ञया॥
इति छायां सुते छाय्य संज्ञागात् पितुरालयम्।
मन्यमानोऽथ तां संज्ञां सवर्णायां तथा रविः॥
सावर्णिं जनयामास मनुश्रेष्ठं महीपते।
शनैश्चरं तृतीयञ्च सुतं भद्रां तपतीयिकाम्॥"
इति पाद्मे स्वर्गखण्डे ११ अध्यायः॥

तस्य क्रूरदृष्टेः कारणं यथा,—
"इतस्मिन्नन्तरे तत्र द्रष्टुं भास्करनन्दनम्।
आजगाम महायोगी सूर्यपुत्रः शनैश्चरः॥
अत्यन्तानन्दवदनः प्रफुल्लोत्पललोचनः।
हारियं मूलदस्तञ्च विशालाक्षमुवाच ह॥
शनैश्चर उवाच।
शिवाज्ञया शिवं द्रष्टुं यामि शङ्करकिङ्करः।
विष्णुप्रसादेवानां सतीनामहरोधतः॥
विशालाक्ष उवाच।
आज्ञावहो न देवानां नाथं शङ्करकिङ्करः।
द्वारं दातुमशक्तोऽहं विना मन्मातुराज्ञया॥
इदं वर्त्म यथेशाय चक्षुःकोणाज्ञया ततः।
शनिरभ्यन्तरं गत्वा ननामानन्दकन्दरः॥
रत्नसिंहासनस्थाञ्च पार्वतीं वक्षितां सदा।
नत्वा सूर्यसुतं दृष्ट्वा दुर्गा संभाष्य यत्नतः।
शुभाशिषं ददौ तस्मै दृष्ट्वा तत्कुशलं शुभा॥
पार्वत्युवाच।
कथमागम्यतां योतुमिच्छामि साम्प्रतम्।
कथं न मज्जसि मां साधो बालत्वञ्च यतेश्वर॥
शनिरुवाच।
यत्कर्म कर्तुमीशः साध्यि सुकृते वाऽथवा दुष्कृतम्।
शुभाशुभं वा यत् कर्म कोटिकल्पैर्न क्षुप्यते॥
इतिहासं प्रातिलोम्यं प्रश्नं शङ्करयत्नमे।
यत्कर्म जननीशापात्तत्प्राप्तञ्चकारणम्॥
शापावासात् क्षणमहोऽहं क्षणध्यानैकमानसः।
नमस्यासु रतः शश्वद्विषये विरतः सदा॥
विना हरौ विशालेन कन्यां चित्ररथस्य च।
प्रतिलोमप्रसिद्धां शश्वत्प्रश्नातुरतां सतीं॥
शकरा सा चतुष्पाता सुपेयं सं विधाय च।
रत्नालङ्कारसंयुक्ता सुनिमानसमोहिनी॥
प्रदियादं शापमानं मा मां पप्रेक्षुवाच ह।
सानुमोदं समाकर्ण्य सलिलाननलोचना॥
प्रणम्य मामपत्यत्वहेतुना सकोपतः।
शापप्रदानविधौच शापैकलानमानसम्॥
न दत्तवाँस्तथा येन न दत्तं सुतरत्नकम्।
तथा दत्तञ्च यद्दत्तं शृणु सर्वं विशालाक्षि॥
अक्षय विदुषे शापं मातरीशं पुरा सतीम्।
शापं मोक्षुं न शक्तो मा पश्चात्तापं चकार ह॥
तेन मातर्न पश्यामि किञ्चिदत्तञ्च सत्यशुभा।
ततः प्रभृति नत्वास्यः शापिष्टिंशमयादहम्॥"
इति ब्रह्मवैवर्ते गणपतिखण्डे ११ अध्यायः॥७॥

अस्य भोगकालो यथा,—
"रविर्मासं निशानाथः सपादद्विदलद्वयम्।
पक्षत्रयं भूमिपुत्रो बुधोऽष्टादश वासरान्॥
वर्षमेकं सुराचार्य्यश्चाष्टाविंशदिनं भृगुः।
शनिः सार्द्धत्रयं वर्षं खर्भानुः सार्द्धवत्सरम्॥"
इति ज्योतिस्तत्त्वम्।

तस्य जपमन्त्रो यथा,—
"प्रणवं वाग्भवं मायां श्रीसृत्य शनैश्चरम्।
चतुर्थ्यन्तं मनुं प्रोक्तं रविसूनोर्वाचरम्॥"
ॐ ह्रीं श्रीं शनैश्चराय। इति जपमन्त्रम्॥
ऊर्द्धपाणिस्तमन्त्रं जपेत्। यथा,—
"सूर्य्यरश्मुसन्तानाद्यः पाणौ जपेद्बुधः।
सोमकेलीरधः पाण्योरन्येषां गुरुपार्श्विकः॥"
इति च कल्पतरुः।

तस्य होममन्त्रो यथा। ॐ अग्ने देवीरभीष्टये
अग्ने भवन्तु पीतये यंयोरभिस्रवन्तु नः। यथा
शनैश्चरायेति पुनः अग्ने देवेति होमयेत्।
इत्युदाहृतस्तन्त्रतत्त्वपुराणम्॥७॥ वारविशेषः।
तत्र वारवेला यथा,—
"ऋतसुनियमभ्रमक्षय-
रामधुभास्करादियामार्द्धे।
प्रभवति हि वारवेला
न शुभाशुभकार्य्यकरणाय॥"८
तत्र कालवेला यथा,—
"कालस्य वेला रविनः शराग्नि-
कालानलागाब्धयो गवेन्दू।
दिने निशायाञ्चतुर्वेदनेत्र-
नगेषु रामा विधुदन्तिनौ च॥"
तत्र कुलिकवेला यथा,—
"षष्ठाष्टैकं दिनेजात् क्रमश्च दृष्ट दिने सन्धि-
चतुष्टयोक्तः।
पूर्वे वारार्द्धयामः कुलिक इह परो मध्यमश्चेति
कारः।"
तद्दिने पूर्वदिग्गमननिषेधो यथा,—
"शुक्रादित्यदिने न वाच्यदिशं न प्रे कुजे
पौत्तरां
मन्दैन्दोश्च दिने न शङ्करकुजं याम्यां गुरौ न
प्रतेत्॥"९
तत्र यमसरकोयोगे दोषो यथा,—
"चाद्दिने विधवा नारी सोमे चैव पतिव्रता।
वेश्या मङ्गलवारे च बुधे सौभाग्यमेव च॥
दुष्टपतिं पतिः श्रीमान् भृगौ चापत्यमेव च।
शनौ वन्ध्यां विजानीयात् प्रथमे स्त्री रजस्वला॥"
इति ज्योतिस्तत्त्वम्।

अथ नवानां ग्रहाणां दानानि।
"सूर्ये धेनुञ्च शङ्खञ्च गोधूमं रक्तचन्दनम्।
चन्द्रे चन्द्रमणिं च वस्त्रञ्च तिलतण्डुलान्॥
भूमे वृषः प्रदातव्यो रक्तवस्त्रं मृगौदनम्।
बुधे कर्पूरदुग्धञ्च हरिवस्त्रं घृतं तथा।
पीतवस्त्रञ्च जीवे हरिद्राकनकानि च।
शुक्रे भूमिं तिलो देयः शुक्रधान्यानि यानि च॥
शनौ च तिलसा देया छाया सौवर्णिकसुत्तमम्।
राहौ महिषीच्छागौ सीसाञ्च तिलसर्षपाः॥
अजामेषौ च दातव्यौ केतौ चान्नञ्च मिश्रितम्।
खर्जगोविप्रपूजाभिः सर्व्वेषां शान्तिरुत्तमा॥"
इति ज्योतिस्तत्त्वम्॥

ग्रहाणां बलयो यथा,—
"गुरुर्दृगं शनेश्चरः षष्टिवर्षं शीरयष्टिकम्।
इन्दुर्दृगं कविश्चर्क्षं मासं चिन्नामेव च॥
एतान् ग्रहक्रमार्द्धं द्विजेभ्यो भोजनं बुधः।
शक्तितो वा यथाचारं सतृप्तय विधिपूर्व्वकम्॥"
ग्रहाणां दक्षिणा यथा,—
"धेनुः शङ्खश्च धान्यञ्च, तैल माषौ तथैव च।
छाया शीरायसं छागस्तथा ते दक्षिणाः क्रमात्॥"
इति संस्कारतत्त्वम्॥

शनिचक्रं, क्ली, (शनेश्चक्रम्।) कृषां शुभाशुभ-
ज्ञानार्थशनिभोग्यनक्षत्रादिचार्त्तिपतिचक्रयुक्त-
नराकारचक्रम्। यथा,—
"शनिचक्रं नराकारं लिखित्वा शौरिभादितः।
नाम ग्रर्क्षं भवेद्यत्र फलं तत्र शुभाशुभम्॥
एकं सुखे दशहृत्से चत्वारि षट् पदद्वये।
हृदि पञ्च करे वामे चत्वारि मस्तके त्रयम्॥
दृगं नेत्रद्वये शून्यं दन्तं तत्र व्यसेद्बुधः।
सुखे व्याधिर्भयो दृष्टे मृत्युः पादे स्त्रियो हृदि।
वामे भीर्मस्तके राज्यं नेत्रे सौख्यं क्षतिर्मुखे॥
तृतीयेकादशे यदा विक्रमः शनिः।
तदा सौख्यं धनं पुत्रः स्त्रीभिर्नेत्रद्वयोः॥
चतुर्थैकादशे षष्ठे यदा सौख्यकरः शनिः।
तदा वित्तं शरीरस्थो मुखे वक्त्रेऽग्निवामयोः॥
यस्य पीड़ाकरः शौरिस्तस्य चक्रे फलान्त्विदम्।
लिखित्वा छागदुग्धेन तैलमध्ये विपेचितः॥
निक्षिप्य भूमिमध्यस्थं कृष्णपुष्पैः प्रपूजयेत्।
तुष्टिं याति न सन्देहः पीड़ां त्यजति शनैश्चरः॥"
इति ज्योतिस्तत्त्वम्॥

शनिप्रश्नः, क्ली, (शनेः प्रश्नजननी।) छाया।
सूर्य्यपत्नी। इति भूरिप्रयोगः॥

शनिप्रियं, क्ली, (शनेः प्रियम्।) नीलमणिः।
इति केचित्॥

शनिवारः, पुं, (शनिर्भोग्यः शनेर्वा वारः।) शनि-
भोग्यसावनदिनम्। तत्तु उदयादोदयकालः।
यथा,—
"उदयादिपरिच्छेदो दिनमानाद्यपाक्षया।
मध्यमग्रहसुस्पिश्च सावनेन प्रकीर्त्तितः॥"
दिनाधिपस्य रव्यादेर्भोग्यं दिनं वाररूपं
सावनमुदयोत्तम्।
"उदयादोदयाद्यानोर्भौमवासरवत् स्मृतः॥"
इति तिथ्यादितत्त्वम्॥
शनिभोग्यनक्षत्रमुहूर्त्तलग्नोदयाः शनिवार
योगे मध्यमाः स्मृताः। यथा। कालपुरुषे।
"वारदेव समायुक्ता मध्या ह्यत्र उदीरिताः।
नक्षत्राणां यदि लग्नं तत्तन्नक्षत्रजाः क्षमा।

शपथः

शतिवारसमायुक्ता या महापातकी स्मृता ॥"
इति तिथ्यादितत्त्वम् ॥ ० ॥

तत्र ज्ञानफलं यथा,—
"शप्तः सुवेषः क्लेशकीर्त्तिहीनो
ज्वरायुतो मध्यधनोऽङ्गहीनः।
तमोगुणः क्लेशकरो नराणां
मन्दस्य वारप्रभवोऽतिमन्दः ॥"
इति कोष्ठीप्रदीपः ॥७॥

तत्र याचानिषेधो यथा,—
"संत्यजेद्दिवसे याचां सूर्य्यारार्कीन्दुवक्रिणाम्।"
इति ज्योतिस्तत्त्वम् ॥

वारवेलादि शब्दे द्रष्टव्यम् ॥

शनैः, [स्] य, अद्भुतम्। इत्यमरः। यथा,—
"शनैर्विद्या शनैः पन्था शनैः पर्व्वतमारुहेत्।
शनैः कामश्च धर्म्मश्च पञ्चैतानि शनैः शनैः ॥"
इति गारुडे १०६ अध्यायः ॥

शनैश्चरः। इति मेदिनी ॥

शनैश्चरः, पुं, (शनैर्मन्दं मन्दं चरतीति। चर-गतौ + पदाद्यच्।) शनिः। इत्यमरः॥ अस्य स्तोत्रं यथा,—
"नीलाञ्जनचयप्रख्यं रविपुत्रं महाग्रहम्।
छायाया गर्भसम्भूतं वन्दे भक्त्या शनैश्चरम् ॥
यास्येदुक्तमिदं स्तोत्रं यः पठेत् प्रयतो नरः।
दिवा वा यदि वा रात्रौ शान्तिस्तस्य न संशयः ॥"
इति यात्राभाषितस्तोत्रम् ॥

शप्, य, "स्वीकारः। शप् करोति। इति विद्यानाकौमुदी॥

शप, य च औ } क्रोशे। इति कविकल्पद्रुमः।
शप्र, यौ च } (दिवा०-भा०-च-उभ०-सक०-अनिट्।) हौ तालव्यादी। य च, शप्यति शप्यते। औ, शप्ता। औ, अशप्सीत्। च, शपति शपते। क्रोश उक्तिविशेषः। निर्भर्त्सनमिति चतुर्भुजः। सहसप्रोऽसौ शपथानपप्रच्छ। क्रोशो भ्वादिपक्षे गालिदानम्। शपते + अपि शपथार्थोर्गत्यनुकारेति नियमात् शपथे आत्मनेपदं अन्यच्च परस्मैपदम्। ज्ञाताय शपते गोपी। अचैषीत् त्वां शशाप सा। इति रघौ। सत्यं शपामि यदि किञ्चिदपि स्मरामि। इति वाधा शरीरसर्पणाभाषादिति पाणिनीयाः। केचित्तु शपथे नित्यमात्मनेपदं अन्यच्च विभाषया इत्याहुः। तेन प्रतिवाचमदत्त केशवः शपमानाय न चेदिभूपतिः। इति माघः। इति दुर्गादासः।

शपः, पुं, शपथः। इति हेमचन्द्रः॥ निर्भर्त्सनम्। गालिदानम्। इति शपथालपर्थशब्दार्थनात्॥

शपथः, पुं, (शप क्रोशे + "शीङ्शपिरुग्रमीति।" उणा० ३। ११३। इति अथः।) असत्यं वदन् घोरं नरकं यास्यामि इत्येवं रूपं मिथ्यानिरूपणम्। सत्यावधारणम्। इति साष्कः। वाचा शरीरसर्पणम्। इति गोयीचन्द्रः॥ शपथो दिव्यम्। इति रमानाथः। इति भरतः। तत्पर्य्यायः। शपनम् २। इत्यमरः॥ शपः ३। इति हेमचन्द्रः॥ सत्यम् ४ समयः ५ शापः ६ प्रत्ययः ७ अभिघङ्गः ८। इति जटाधरः॥ चतुष्पादव्यवहारस्य क्रियापादाङ्गम्। यथा।
अथ शपथः।
"युक्तिव्यवसनाम्नासु शपथैरेनमर्द्दयेत्।
अर्थकालबलापेक्षमन्यान्यसुकृतादिभिः॥"
अर्थस्य विवादास्पदस्य बलं वक्तव्यभावः। कालस्य च बलं पुण्यापुण्यत्वम्। तदपेक्षं यथा स्यादित्यर्थः। दूर्व्वाकरत्वस्य पुत्रादिसपर्शस्य चाग्रे दर्शनीयत्वात्। अत्र मयैतत् कृतं न वा इति प्रतिज्ञासुद्धार्य्यौ जले वा हस्तं प्रक्षिपेत्। एतस्मिन्मार्गे मम सुकृतं नश्येदिति वा ब्रूयात्। न त्वग्निपरीक्षां जलपरीक्षां वा कुर्य्यात् इत्यभिप्रायवर्णनं युक्तम्। तस्य महाभियोगविषयकत्वेन शपथसमभिव्याहारानर्हत्वात्। सुकृतादिभिरित्यादिना दूर्व्वासत्याभ्युपग्रहः। तथा च विष्णुः। सर्व्वेष्वेवार्थजातेषु स्वल्पं कनकं प्रकल्पयेत्। तत्र क्षणालोने शूद्रं दूर्व्वाकरं शापयेत्। द्विक्षणालोने तिलकरम्। त्रिक्षणालोने जलकरम्। चतुःक्षणालोने स्वर्णकरम्। पञ्चक्षणालोने सीतोद्धृतमहीकरम्। सुवर्णार्द्धेन कोशो देयः। शूद्रस्य यथासमये विहिता क्रिया तथा द्विगुणोऽर्थे राजन्यस्य त्रिगुणोऽर्थे वैश्यस्य चतुर्गुणोऽर्थे ब्राह्मणस्येति। क्षणालः काञ्चनरत्तिका तन्मूल्यादूने क्षणालोने एवमन्यत्र। मनुः।
"सत्येन शापयेद्विप्रं क्षत्रियं वाहनायुधैः।
गोबीजकाञ्चनैर्वैश्यं शूद्रं सर्व्वैस्तु पातकैः।
पुत्रदारस्य वाप्येवं शिरांसि स्पर्शयेत् पृथक्॥"
ब्राह्मणेन मयैतत् कृतं न कृतं वेति प्रतिज्ञासुद्धार्य्यं सत्यमिति वक्तव्यम्। तथैव क्षत्रियेण वाहनायुधं स्पृष्टव्यम्। तथैव वैश्येन गोबीजकाञ्चनानामन्यतमं स्पृष्टव्यम्। शूद्रेण तु पूर्व्वोक्तं सर्व्वमेव स्पृष्टव्यम्। तेषां दृष्टान्तसपर्शानां पातकहेतुत्वात् पातकशब्देन निर्देशः। क्षणायुधोऽप्येवम्। देवक्रियाविषयमाह नारदः।
"अरण्ये निर्जने रात्रावन्तर्वेश्मनि साहसे।
व्यासापहरणे चैव दिव्या सम्भवति क्रिया॥"
बृहस्पतिः।
"देवब्राह्मणपादांश्च पुत्रदारशिरांसि च।
एते तु शपथाः प्रोक्ता मनुना स्वयमादरात्।
साहसेष्वभियोगे च दिव्यानि तु विशोधनम्॥"
अत्र शपथदिव्ययोः पृथक्त्वप्रतीतेः शपथे न दिव्यधर्म्माः। किन्तु वैधे कर्म्मणि तत्र प्रौढ्यार्थं स्नानाचमनादि कार्य्यम्। दिव्यानि तु दिव्यतत्त्वे कथितानि नात्र लिखितानि। अत्याभियुक्तेन शपथः कर्त्तव्य इत्युत्सर्गः। उभयेच्छया अभियोक्तापि। इत्याह नारदः।
"अभियोक्ता शिरोवर्त्ती सर्व्वत्रैव प्रकीर्त्तितः।
इच्छयान्यतरः कुर्य्यादितरो वर्त्तयेच्छिरः॥"
इतरः शपथकृन्निभ्नः। तथा कात्यायनः।

शपथः

"आचतुर्हस्तकादग्नौ यस्य नो राजदैविकम्।
शपनं जायते घोरं च शेषः शपथे शुचिः॥"
शपनमापत्। घोरमतिपीड़ाकरम्। तथा क्रोधाधिकारे यस्य पश्येदित्यनुवृत्तौ विष्णुः।
"रोगाग्निर्ज्ञातिमरणं राजातङ्कमथापि वा।
तमशुद्धं विजानीयात्तथा शुद्धं विपर्य्ययात्॥"
कात्यायनः।
"तस्यैकस्य न सर्व्वस्य जनस्य यदि सम्भवेत्।
रोगोऽग्निर्ज्ञातिमरणमर्थं दद्यात् दमञ्च सः।
ज्वरातिसारविस्फोटगृध्रास्यिपरिपीड़नम्।
नेत्ररुग्गलरोगश्च तथोन्मादः प्रजायते॥
शिरोरुग्गुदभङ्गश्च दैविका व्याधयो नृणाम्॥"
तस्यैकस्येति न तु देशग्रामकमरणादिः। मनुः।
"न वृथा शपथं कुर्य्यात् स्वल्पेऽप्यर्थे नरो बुधः।
वृथा हि शपथं कुर्व्वन् प्रेत्य चेह च नश्यति॥
कामिनीषु विवाहेषु गवां भक्ष्ये तथेन्धने।
ब्राह्मणाभ्युपपत्तौ च शपथे नास्ति पातकम्॥"
कामिनीष्विति रहसि कामिनीसम्भोगार्थं वृथा शपथः। एवं विवाहसिद्ध्यर्थं गोग्रासार्थं आवश्यकहोमेन्धनार्थं ब्राह्मणरक्षार्थमङ्गीकृतधनादौ। यमः।
"वृथा तु शपथं कृत्वा कीटस्य वधसंयुतम्।
अनृतेन च युज्येत वधेन च तथा नरः।
तस्मान्न शपथं कुर्य्यान्नरो मिथ्याविधेक्षितम्॥"
कीटस्येति प्राणिमात्रोपलक्षणम्। तद्वधपापेन वृथाशपथकर्म्मा युज्यत इत्यर्थः। इति व्यवहारतत्त्वम्॥

शपनं, क्ली, (शप क्रोशे + ल्युट्।) शपथः। इत्यमरः॥ गालिः। इति त्रिकाण्डशेषः॥

शप्तः, पुं, (शप + क्तः।) लगविशेषः। इति शब्दचन्द्रिका॥ उलु इति भाषा॥ अभिशापशब्दे, त्रि॥ (यथा, भागवते। १। १८। ४१।
"निशम्य शप्तमतदर्हं नरेन्द्रं
स ब्राह्मणो नात्मजमभ्यनन्दत्॥")

शफं, क्ली, गवादीनां खुरः। (यथा, याज्ञवल्क्यः। १। २०४।
"क्षेमङ्करी शफेरौष्ट्रैः सुशीला वडवायुता।
सकांस्यपात्रा दातव्या चौरिणी गौः सदक्षिणा॥")
वृक्षमूलम्। इति मेदिनी॥

शफरः, पुं, स्त्री, मत्स्यविशेषः। इत्यमरः॥ पुँटी इति भाषा॥ (यथा,—
"कैवर्त्तकर्कशकरात् शफरस्तनोऽपि
जाले पुनर्निपतितः सकरो विपाकः॥"
यथा च।
"अगाधजलसञ्चारी विकारी न च रोहितः।
गरुत्मज्जलमाश्रित्य शफरी फर्फरायते॥"
इत्युद्भटः॥)

शफराधिपः, पुं, (शफराणां मत्स्यानां अधिपः। इति त्रिकाण्डशेषः॥ तत्पर्य्यायः। इलिशः २ वारिकपूरः ३ झाङ्गेयः ४ जमताकः ५। इति त्रिकाण्डशेषः।

मसी १५ धरणी १६ धारणी १७ गोणी १८ रोहिणी १९ रमणी २० मणी २१ वीणा २२ वाणी २३ वसा २४ वेणी २५ राढ़ा २६ गङ्गा २७ तरङ्गिणी २८ कन्दली २९ लहरी ३० नारी ३१ रामा ३२ मेरी ३३ वसुन्धरा ३४ काली ३५ कराली ३६ भासुण्डा ३७ चण्डा ३८ रण्डा ३९ तुला ४० मही ४१ ॥ ❀ ॥ अथ संस्कृतप्राकृतक्लीवलिङ्गसमशब्दाः। अम्ल १ फल २ पल ३ मूल ४ वारि ५ कीलाल ६ कूल ७ वस्त्र ८ पलल ९ दुकूल १० लिङ्ग ११ गम्भीर १२ कूल १३ सलिल १४ कमल १५ क्षीर १६ तुच्छ १७ राजीव १८ नीर १९ हल २० रजत २१ कुटीर २२ दार २३ लाल २४ पटीर २५ कारण २६ रोहण २७ चेल २८ कुहर २९ अम्बर ३० मन्दिर ३१ कुट्मल ३२ मण्डल ३३ तामरस ३४ कुण्डल ३५ अङ्गद ३६ पुर ३७ अरविन्द ३८ लोह ३९ अङ्ग ४० तड़ाग ४१ करण ४२ कुल ४३ तोरण ४४ मरण ४५ तुङ्ग ४६ जलम् ४७ आगार ४८ भासुर ४९ ॥ ❀ ॥ अथ संस्कृतप्राकृतसमक्रियापदानि। भण १ देहि २ गच्छ ३ संहर ४ कुरु ५ चोरय ६ मारय ७ अवगच्छ ८ अवलोकय ९ अवचिन्तय १० खाद ११ ॥ ❀ ॥ अथ निरोष्ठ्यपुंलिङ्गशब्दाः। नीहार १ हार २ हरिण ३ अङ्क ४ हर ५ अट्टहास ६ कैलास ७ कास ८ रद ९ नारद १० सिंह ११ भृङ्ग १२ भृंग १३ अहि १४ हंस १५ घनसार १६ हलि १७ इन्द्र १८ नाग १९ हिण्डीर २० निर्झर २१ शरद्घन २२ चन्द्रकान्त २३ अङ्गार २४ सागर २५ तड़ाग २६ जलाशय २७ अग २८ हर्यक्ष २९ तक्षक ३० नख ३१ क्षत ३२ दीक्षित ३३ अक्ष ३४ नाराच ३५ काच ३६ कच ३७ कीचक ३८ वृकोदर ३९ पाणव ४० चारण ४१ गण ४२ क्षण ४३ काण ४४ शोण ४५ संहार ४६ सारस ४७ रस ४८ अरि ४९ रसाल ५० साल ५१ कङ्काल ५२ काल ५३ कलि ५४ शैल ५५ खल ५६ अगल ५७ अर्क ५८ किञ्जल्क ५९ कल्क ६० कर ६१ शुक्र ६२ कौर ६३ क्षीर ६४ लङ्केश ६५ केश ६६ गर ६७ केशव ६८ देश ६९ वेश ७० आनन्द ७१ नन्दन ७२ घनञ्जय ७३ खञ्जरीट ७४ कीट ७५ अग्नि ७६ कण्टक ७७ कटाक्ष ७८ कटाक्ष ७९ यक्ष ८० एक ८१ अङ्ग ८२ यज्ञ ८३ जनक ८४ अञ्जलि ८५ यन्त्र ८६ यत्न ८७ रत्नाकर ८८ अन्धक ८९ धराधर ९० धीर ९१ शूर ९२ गभीर ९३ नारायण ९४ कृष्ण ९५ हृषीकेश ९६ ॥ ❀ ॥ अथ निरोष्ठ्यस्त्रीलिङ्गशब्दाः। गङ्गा १ गीता २ सती ३ सीता ४ सिद्धि ५ सन्ध्या ६ गदा ७ गया ८ काशी ९ काशी १० निशा ११ गाथा १२ कान्ति १३ शान्ति १४ दया १५ रया १६ आर्या १७ निद्रा १८ हरिद्रा १९ उक्ति २० माया २१ लाज्जा २२ धृति २३ क्षति २४ छाया २५ जाया २६ कथा २७ कान्ता २८ धात्री २९ रात्रि ३० रति ३१ गति ३२ कन्था ३३ धारणा ३४ धारा ३५ तारा ३६ कारा ३७ जरा ३८ धरा ३९ आज्ञि ४० राजि ४१ रजनी ४२ अर्चि ४३ कीर्त्ति ४४ कन्या ४५ तटी ४६ नटी ४७ नारी ४८ सारी ४९ दरी ५० दासी ५१ घटिका ५२ खटिका ५३ घटा ५४ कक्षा ५५ रक्षा ५६ शिखा ५७ संख्या ५८ कालिन्दी ५९ कलिका ६० कला ६१ काली ६२ कराली ६३ दुर्गा ६४ ॥ ❀ अथ निरोष्ठ्यक्लीवलिङ्गशब्दाः। चरण १ करण २ चक्र ३ क्षेत्र ४ नक्षत्र ५ तक्र ६ रजत ७ घृत ८ शरीर ९ क्षीर १० नीर ११ अक्षि १२ तीर १३ धन १४ कनक १५ निधान १६ ध्यान १७ सन्धान १८ दान १९ नलिन २० नगर २१ गात्र २२ छत्र २३ नेत्र २४ अक्षि २५ दात्र २६ आलिङ्गन २७ स्थान २८ शिरः २९ चरित्र ३० जल ३१ स्थल ३२ स्थाल ३३ कलत्र ३४ पित्र ३५ कीलाल ३६ जाल ३७ अलक ३८ नाल ३९ दैन्य ४० लिङ्ग ४१ अङ्ग ४२ लावण्य ४३ हिरण्य ४४ सैन्य ४५ अङ्ग ४६ अजिन ४७ यान ४८ अस्थक् ४९ काञ्चन ५० आनन ५१ कानन ५२ घाटक ५३ नाटक ५४ नाट्य ५५ तैल ५६ चैल ५७ रसातल ५८ अदन ५९ सदन ६० भाग ६१ निदाघ ६२ दधि ६३ चन्दन ६४ अक्षर ६५ लक्षण ६६ लक्ष ६७ शुक्ल ६८ शाक्ल ६९ दल ७१ फल ७१ ॥ ❀ ॥ अथ निरोष्ठ्यक्रियापदानि। आघ्राति १ अक्षि २ धक्षि ३ निन्दति ४ हसति ५ आघ्रंसति ६ क्रीडति ७ ध्यायति ८ अर्थयति ९ याचते १० यति ११ वहति १२ आराधयति १३ लक्षयति १४ शेते १५ गच्छति १६ यच्छति १७ इच्छति १८ नयति १९ आयाति २० दीप्ति २१ ईक्षते २२ अश्नाति २३ स्नाति २४ दधाति २५ याति २६ जयति २७ हसति २८ करोति २९। इति कविकल्पलतायां १ स्तवके २ कुसुमम् ॥

शब्दकारः, त्रि, (शब्दं करोतीति। शब्द+अण्। "न शब्दश्लोककलहगाथेति।" ३।२।२४। इति टप्रतिषेधः।) शब्दं करोति यः। यथा,
"सतामरस्करं पक्षी वैरकारं नराशनम्।
हन्तुं कलहकारोऽयौ शब्दकारः पपात खम्।"
इति भट्टौ ५ सर्गः॥

शब्दग्रहः, पुं, (शब्दं गृह्णात्यनेनेति। ग्रह+"ग्रहवृदृनिश्चिगमश्च।" ३।३।५८। इति अप्।) कर्णः। इत्यमरः॥ शब्दस्य ज्ञानञ्च॥

शब्दनः, त्रि, (शब्दं कर्त्तुं शीलमस्य। शब्द+"चलनशब्दार्थादकर्मकादुयुच्।" ३।२।१४६। इति तच्छीले युच्।) शब्दकर्त्ता। तत्पर्य्यायः। रवणः २। इत्यमरः॥ (शब्द+भावे ल्युट्।) शब्दमात्रे, क्ली॥

शब्दभेदी, [न्] पुं, (शब्दमशब्दस्यैव भेत्तुं शीलमस्य। भिद्+णिनिः।) अर्জ্জुनः। इति त्रिकाण्डशेषः॥ पाशुः। इति केचित्॥ बाणविशेषः। इति रामायणम्॥

शब्दवेधी, [न्] पुं, (शब्दमशब्दस्य यद्यु शीलमस्य। विध+णिनिः।) अर्জ্জुनः। इति धनञ्जयः॥ दशरथराजः। यथा,—
"लब्धशब्देन कौशल्ये कुमारेण धनुष्मता।
कुमारः शब्दवेधीति मया पापमिदं कृतम्॥"
इति वाल्मीकीये रामायणे ६३ अध्यायः॥
शब्दवेधी इत्येवं लब्धकीर्त्तिनेति यावत्। इति तट्टीका॥

शब्दाधिष्ठानं, क्ली, (शब्दस्य अधिष्ठानं आश्रयस्थानम्।) कर्णः। इति हेमचन्द्रः॥

शम, उ भ य इर् शमे। इति कविकल्पद्रुमः॥ (दिवा०-परo-अकo-सेट्। क्त्वेट्।) उ, शमित्वा शान्त्वा। भ य, शाम्यति। इर्, अशमत् अशमीत्। पुषादित्वान्नित्यं ङ इत्यन्ये। शमः शान्तीभावः। शशाम इत्यापि विना दवाग्निरिति रघुः। शम इति पदस्य आन्तस्यापि सम्भवे शान्तीकरणेऽप्ययमिति धातुप्रदीपः।
'वरेण शमितुं लोकानलं दग्धुं हि तत्तपः॥'
इति कुमारसम्भवम्॥
'वधोः निशम्याधिपतिर्दिवौकसाम्।'
इत्यादावनेकार्थत्वात् श्रुत्येत्यर्थः॥ वा शम यम इत्यत्र वाशब्दस्य व्यवस्थावाचित्वादस्य नौ नित्यं दुखः शमयति। इति दुर्गादासः॥

शम, ऊ क ष आलोचे। इति कविकल्पद्रुमः॥ (चुरा०-आत्म०-उभ०-इति केचित्-सक०-सेट्।) आलोचः प्रणिधानम्। वा शम यम इत्यत्र वाशब्दस्य व्यवस्थावाचित्वात् अस्य स्वार्थे णौ दुखाभावः। ऊ क, शामयते कार्य्यं बुधैः। ष, शामयति शामयते।
'निशामय तदुत्पत्तिं विस्तराद्गदतो मम॥'
अयमात्मनेपदीत्यन्ये। इति दुर्गादासः॥

शमः, पुं, (शम्यत इति। शम+घञ्। शमेति षष्ठ्यन्तोपदेशेति वृद्ध्यभावः।) शान्तिः। इत्यमरः॥ (यथा, राजतरङ्गिण्याम्। ४। ३८१।
"विरागशैलमथितात् तस्य चित्तमहोदधेः।
प्रकोपकालकूटस्य पश्चात् शमसुधोदयात्॥")
मोक्षः। इति त्रिकाण्डशेषः॥ याज्ञिः। इति शमशब्दटीकायां रामाश्रमः॥ उपचारः। इति राजनिर्घण्टः॥ अन्तरिन्द्रियनिग्रहः। इति वेदान्तसारः॥ अन्तःकरणसंयमः। इति भगवद्गीतादशमाध्यायस्य ४ श्लोकटीकायाम् श्रीधरस्वामी॥ (यथा, गीतायाम्। १०।४।
"बुद्धिर्ज्ञानमसंमोहः क्षमा सत्यं दमः शमः॥")
चित्तैपककर्म्मोपरमः। इति च तस्यैव ६ अध्यायस्य ३ श्लोकटीकायां श्रीधरस्वामी॥ (बाह्येन्द्रियनिग्रहः। यथा, भागवते। ३।३२।३३।
"सत्यं शौचं दया मौनं बुद्धिर्ह्रीः श्रीर्यशः क्षमा।
शमो दमो भगश्चेति यत्सङ्गाद्यान्ति संक्षयम्॥"

श्रमः, सर्व्वकर्म्मनिवृत्तिः। यथा, गीतायाम्। ६। ३।
"योगारूढस्य तस्यैव शमः कारणमुच्यते॥"
"श्रमः उपरमः सर्व्वकर्म्मभ्यो निवृत्तिः।" इति श्रीधरभाष्यम्॥ शान्तरसस्य स्थायिभावः। यथा, साहित्यदर्पणे। ३। २३८।
"शान्तः शमः स्थायिभाव उत्तमः प्रकृतिर्म्मतः॥"
निवृत्तिः। यथा, राजतरङ्गिण्याम्। २। ५६।
"अभवन्निर्म्मलं योम देवीलक्ष्मैः सह क्रमात्।
सार्द्धं भूपालशोकेन दुर्भिक्षेण शमं ययौ॥")

शमकः, त्रि, (शामयतीति। शम+णिच्+ण्वुल्। "नोदात्तोपदेशेति।" ७। ३। ३४। इति न दीर्घः।) शान्तिकारकः। शान्तशमधातोर्ण्वुलप्रत्ययेन निष्पन्नमेतत्॥

शमथः, पुं, (शम+"इगुपधज्ञाभीकिरः कः।" इति अथः। इत्युज्ज्वलदत्तः। ३। ११४।) शान्तिः। इत्यमरः॥ मन्त्री। इति मेदिनी॥

शमनं, क्ली, (शम+ल्युट्।) यज्ञार्थपशुहननम्। इत्यमरः॥ शान्तिः। इति मेदिनी॥ (यथा, पाणिनौ। ५। १। ३८। "वातस्य शमनं कोपनं वा।" इति काशिका॥) चर्व्वणम्। इति धरणिः॥ हिंसा। इति हेमचन्द्रः॥ (प्रतिसंहारः। यथा, मार्कण्डेये। ७८। १६।
"निमेषकाष्ठादिमयः कालरूपः क्षयात्मकः।
प्रसीद स्वेच्छया रूपं स्वतेजःशमनं कुरु॥"
निवारकः। यथा, तत्रैव देवीमाहात्म्ये।
"दुर्व्वृत्तवृत्तशमनं तव देवि! शीलम्॥")

शमनः, पुं, (शमयति पापिनां कर्म्म आलोचयतीति। कर्त्तरि ल्युः।) यमः। इत्यमरः॥ ध्वजभेदः। इति शब्दचन्द्रिका॥ कलायः। इति राजनिर्घण्टः॥

शमनस्वसा, [ऋ] स्त्री, (शमनस्य यमस्य स्वसा।) यमुना। इत्यमरः॥

शमनी, स्त्री, (शमयति नृणां व्यापारान्। शम+ल्युः। स्त्रियां ङीप्।) रात्रिः। इति शमनीवदग्र्यशब्दादर्ग्रनात्॥ (शाम्यते अनेन इत्यर्थे करणे ल्युटि शान्तिकारके, त्रि। यथा, भागवते। ३। २४। ३६।
"साङ्ख्ये चाध्यात्मिकीं विद्यां शमनीं सर्व्वकर्म्मणाम्॥")

शमनीपदः, पुं, (शमन्यां सीदन्तीति। सद्+क्विप्।) निशाचरः। राक्षसः। इति त्रिकाण्डशेषः॥

शमलं, क्ली, (शम+"शाकपार्थिवादीनां सिद्धये उलोपश्च।" उणा० १। १२२। इति कलः। उलोपश्च।) विष्ठा। इत्यमरः॥ पापम्। इति संक्षिप्तसारोणादिवृत्तिः॥ (यथा, भागवते। २। ७। ३।
"जघे यथात्मशमलं गुणसङ्गप्रभुम्॥")

शमान्तकः, पुं, (शमस्य शान्तेरन्तकः।) कामदेवः। इति त्रिकाण्डशेषः॥

शमिः, स्त्री, शिखा। इति हेमचन्द्रः॥

शमितः, त्रि, (शम+क्तः।) शान्तः। इत्यमरः॥

शमिरः, पुं, शमीवृक्षः। इति शब्दरत्नावली॥

शमिरोहः, पुं, शिवः। इति त्रिकाण्डशेषः॥

शमी, स्त्री, वृक्षविशेषः। शाँइ इति भाषा। (यथा, शाकुन्तले। ३।
"अवेहि तनयां ब्रह्मन्नग्निगर्भां शमीमिव॥")
तत्पर्य्यायः। शक्तुफला २ शिवा ३। इत्यमरः॥ शक्तुफली ४। इति शब्दरत्नावली॥ शान्ता ५ तुङ्गा ६ कृष्णरिपुफला ७ केशमथनी ८ ईशानी ९ लक्ष्मीः १० तपनतनया ११ इष्टा १२ शुभकरी १३ हविर्गन्धा १४ मेध्या १५ दुरितदमनी १६ शक्तुफलिका १७ वसुदा १८ मङ्गल्या १९ सुरभिः २० पापशमनी २१ भद्रा २२ शङ्करी २३ केशघ्नी २४ शिवाफला २५ सुपत्रा २६ सुखदा २७। अस्य गुणाः। रूक्षत्वम्। कषायत्वम्। रक्तपित्तातिसारनाशित्वञ्च। तत्फलगुणाः। गुरुत्वम्। स्वादुत्वम्। रूक्षत्वम्। उष्णत्वम्। केशघ्नाशित्वञ्च। इति राजनिर्घण्टः॥ अपि च।
"शमी शक्तुफला तुङ्गा केशघ्नी शिवाफला।
मङ्गल्या च तथा लक्ष्मीः शमीरः खल्विका स्मृता॥
शमी तिक्ता कटुः शीता कषाया रेचनी लघुः।
कण्डूकासश्रमश्वासकुष्ठार्शःक्रमिजित् स्मृता॥"
इति भावप्रकाशः॥

शिम्बा। छिमड़ा इति भाषा। इत्यमरः॥ वायुशिः। इति मेदिनी॥ (कर्म्म। यथा, ऋग्वेदे। ६। २। २।
"ईजे यज्ञेभिः शशमे शमीभिः।
"शमीभिः कर्म्मभिः शक्वच्छान्त्यायनादिभिः॥"
इति तद्भाष्ये सायणः॥)

शमी, [न्] त्रि, प्रान्तः। शमो विद्यतेऽस्य इत्यर्थे इनिप्रत्ययेन निष्पन्नमिदम्॥

शमीकः, पुं, मुनिविशेषः। यथा,—
"जलाशयमुपस्पृश्य प्रविवेश तमाश्रमम्।
ददर्श मुनिमासीनं शान्तं मीलितलोचनम्॥"
इति श्रीभागवते। १। १८॥
अस्यार्थः। अपश्यत्। तं प्रसिद्धमाश्रमं तस्मिन् मुनिं शमीकम्। इति श्रीधरस्वामी॥

शमीगर्भः, पुं, (शम्या गर्भः।) ब्राह्मणः। अग्निः। इति हेमचन्द्रः॥

शमीधान्यं, क्ली, (शमी यज्ञादिकर्म्म तदर्थं धान्यम्।) माषादिः। इत्यमरः॥ तत्पर्य्यायगुणाः।
"शमीजाः शिम्बिजाः शिम्बातराः कृष्णाश्च वेदलाः।
वेदला मधुरा रूक्षाः कषायाः कटुपाकिनः॥
वातलाः कफपित्तघ्ना बहुमूत्रमलाः स्मृताः।
कृते सूक्ष्मशरीराध्यामन्ये त्वाध्मानकारकाः॥"
सूक्ष्मशरयोराध्मानकारित्वमन्यदेदलापेक्षया। न तु सर्व्वथा। उतयोरपि किञ्चिदाध्मानकारित्वदर्शनात्। इति भावप्रकाशः॥

शमीधान्यं समतीतं प्रशस्यते।
परतो वातलत्वं प्रायेणातिनवं गुरु॥
यवगोधूममाषाश्च तिलाश्चातिनवा हिताः।
पुराणा विरसा रूक्षा न तथार्थकरा मताः॥"
इति राजवल्लभः॥

शमीपत्रा, स्त्री, (शम्याः पत्राणीव पत्राणि यस्याः।) लज्जालुवृक्षः। इति जटाधरः॥

शमीरः, पुं, (कृष्णा शमी। "कृष्णशमीशुक्लाभ्यो रः।" ५। ३। ८८। इति रः।) अश्वा शमी। इत्यमरः॥

शम्या, स्त्री, विद्युत्। इत्यमरः॥

शम्याकः, पुं, व्यारुषधः। इत्यमरः॥ विषाकः। यावकः। इति हेमचन्द्रः॥ (दक्षिणापुरवासी कश्चिद्ब्राह्मणः। यथा, महाभारते। १२। १७६। २३।
"इत्येतद्वाक्षिणात्येन ब्राह्मणेनोपवर्णितम्।
सम्याकेन पुरा मह्यं तस्मात्त्यागः परो मतः॥")

शम्यातः, पुं, व्यारुषधः। इति शब्दरत्नावली॥

शम्ब, गतौ। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) शम्बति। इति दुर्गादासः॥

शम्बः, पुं, (शम्+"शमेर्व्वन्।" उणा० ४। ६४। इति वन्। यद्वा, शमस्यस्येति। शं+"कंशंभ्यां बभयुस्तितुतयसः।" ५। ६। १३८। इति बः।) वज्रम्। (यथा, ऋग्वेदे। १०। ४२। ७।
"उग्रो यः शम्बः पुरुहूत तेन।"
"शम्ब इति वज्रनाम।" इति तद्भाष्ये सायणः॥) सुषलाग्रस्थलोहमण्डलकम्। इति मेदिनी॥ लौहकाष्ठी। इति हेमचन्द्रः॥ अनुलोमकर्म्मणम्। इति शब्दार्थचन्द्रिकायां भरतः॥ दरिद्रः। इति संक्षिप्तसारोणादिवृत्तिः॥ भाग्यवति, त्रि। इति रामाश्रमः॥

शम्बरं, क्ली, सलिलम्। व्रतम्। चित्तम्। इति नानार्थरत्नमाला॥ चित्रम्। बौद्धव्रतविशेषः। इति विश्वहेमचन्द्रौ॥ (मेघः। यथा, ऋग्वेदे। २। २४। २। "अदर्द्दरुत शम्बरम्॥"
"शम्बरम् मेघनामैतत् मेघान् अदर्द्दः वर्षणार्थं विदारितवान्॥" इति तद्भाष्ये सायणः॥)

शम्बरः, पुं, असुरविशेषः। दैत्यविशेषः। इति मेदिनी॥ (यथा, ऋग्वेदे। १। ५१। ६।
"अरन्धयो तिथिग्वाय शम्बरम्।"
"शम्बरं एतन्नामानमसुरम्।" इति तद्भाष्ये सायणः॥ यथा च महाभारते॥ १। ६५। २२।
"शम्बरो बसुचित्तश्च पुलोमा चेति विश्रुतः।
असिलोमा च केशी च दुर्জ্জयश्चैव दानवः॥")
मत्स्यविशेषः। श्रेष्ठः। शिल्पभेदः। इति विश्वः॥ गुडूचम्। श्रेष्ठः। इति धरणिः॥ चित्रकवृक्षः। लोध्रः। चक्षुर्नृत्यः। इति राजनिर्घण्टः॥ शम्बरासुरस्य वधोपाख्यानं श्रीभागवते १० स्कन्धे ५५ अध्याये द्रष्टव्यम्॥

शम्बरकन्दः, पुं, (शम्बरनामकः कन्दः।) वाराहीकन्दः। इति राजनिर्घण्टः॥

शम्बरचन्दनं, क्ली, (शम्बरनामकं चन्दनम्।) चन्दनविशेषः। तत्पर्य्यायः। कैरातम् २ वङ्गलगन्धम् ३ वल्यम् ४ गन्धकाष्ठम् ५ कैरातकम् ६ शैलगन्धम् ७। अस्य गुणाः। शीतलत्वम्। तिक्तत्वम्। उष्णत्वम्। श्लेष्मानिलश्रमपित्तविस्फोटपामादिकुष्ठज्वरातापविमोचनाग्नित्वञ्च। इति राजनिर्घण्टः॥

शम्बरसूदनः, पुं, (शम्बरं सूदयतीति। सूद+ल्युः।) कामदेवः। इति हलायुधः॥

शम्बरारिः, पुं, (शम्बरस्यारिः।) कामदेवः। इत्यमरः॥

शम्बरी, स्त्री, व्याघ्रपर्णी। इति मेदिनी॥ माया। इति शब्दरत्नावली॥

शम्बलः, पुं, क्ली, कूलम्। पाथेयम्। मत्वरः। इति मेदिनी॥

शम्बाक्तं, त्रि, (शम्ब+"क्तो द्वितीयतृतीयशम्बबीजात् कृषौ।"५।४।५८। इति डाच्।) द्विवारकृष्टक्षेत्रम्। तत्पर्य्यायः। द्विगुणाकृतम् २ द्वितीयाकृतम् ३ द्विफलम् ४ द्विसीत्यम् ५। इत्यमरः॥

शम्बुः, पुं, शम्बुकः। यथा,—
"शम्बूकः शम्बुको ज्ञेयः पूर्व्वः कान्तस्तु सर्व्वदा।
ककारेण विना श्रेयो दृश्यते ग्रन्थविस्तरे॥"
इति चतुरचन्द्रः। इत्यमरटीकायां भरतः॥

शम्बुकः, पुं, (शम्बु+स्वार्थे कन्।) शम्बुकः। यथा,
"शम्बूकः शम्बुको ज्ञेयः पूर्व्वः कान्तस्तु सर्व्वदा।
ककारेण विना श्रेयो दृश्यते ग्रन्थविस्तरे॥"
इति चतुरचन्द्रः। इत्यमरटीकायां भरतः॥

शम्बुकः, पुं, शम्बूकः। इति शब्दरत्नावली॥

शम्बूकः, पुं स्त्री, (शम्बु+"उलूकादयश्चेति" उणा० ४। ४१। इति उकः युगागमश्च निपात्यते।) जलजन्तुविशेषः। शामूक इति भाषा। तत्पर्य्यायः। जलशुक्तिः २। इत्यमरः॥ शम्बुका ३ शम्बुकः ४ शम्बुकः ५ शामुकः ६ शम्बुः ७ शामुकः ८। इति शब्दरत्नावली॥ जलशिम्बः ९ दुग्धरः १० पङ्कमण्डूकः ११। इति शब्दरत्नावली॥ पुं, गजकुम्भान्तर्भागः। घोण्टः। ऋक्षशावसः। (यथा, उत्तरचरिते। २।
"एतामपि त्वयि यमादपि दक्षधारे
सञ्जीवितः शिशुरयं मम चेयदृष्टिः।
शम्बूक एष शिरसा चरणौ नतस्ते
सद्यःप्रणामनिधनान्यपि तारयन्ति॥")
इति मेदिनी॥ दैत्यविशेषः। शुक्रः। इति हेमचन्द्रः। शुद्रशुक्रः। इति राजनिर्घण्टः॥

शम्बूका, स्त्री, (शम्बूक+टाप्।) जलशुक्तिः। इति राजनिर्घण्टः॥

शम्बलः, पुं, ग्रामविशेषः। अधुना सम्भल-मोरदाबाद इति नाम्ना ख्यातः। तत्र षष्टितीर्थानि सन्ति कल्की चाविर्भूय सद्यः सभाः स्थास्यति। यथा,—
"शम्भले वसतस्तस्य सद्यः परिवृतस्वराः।
दशैता ग्रामपुरुषाः प्रतिग्रन्थिभिः सह॥
शम्भले सुमुखे श्रेणीसभापण्यकचत्वरे।
पताकाध्वजचित्राढ्ये यत्रास्ते षष्टितीर्थानां सम्भवः शम्भलेऽभवत्।
स्पृष्ट्वा मोक्षः क्षितौ कल्केरकल्कस्य क्षयाश्रयः॥
वनोपवनसन्तानानानाकुसुमसङ्कुले।
शोभितं शम्भलग्रामं मन्ये मोक्षोपमं भुवि॥
महीमाश्वास्य भगवान् निजजन्मक्षतोद्यमः।
शम्भलग्रामविप्रर्षिभाविवेश्म,परात्मकः॥
सुमत्यां विष्णुयशसो गर्भमाधत्त वैष्णवम्।
द्वादश्यां शुक्लपक्षस्य माधवे मासि माधवः॥
जातो ददृशतुः पुत्रं पितरौ हृष्टमानसौ।
धात्री माता महाषष्ठी नाड्यच्छेत्री तदाम्बिका॥
गङ्गोदकक्लेदमोक्षा सावित्री मार्ज्जनोद्यता।
तस्य विष्णोरनन्तस्य मातृकादात् पयःसुधाम्॥
सुमतिस्तं सुतं लब्ध्वा विष्णुं जिष्णुं जगत्प्रभुम्।
पूर्णकामा विप्रसुखानाढ्यादात् गवां शतम्॥
तं बालकं नराकारं विष्णुं मत्वा मुनीश्वराः।
कल्किं कल्किविनाशार्थमाविर्भूतं विदुर्बुधाः।
नामाकुर्व्वंस्ततस्तस्य कल्किरित्यभिविश्रुतम्॥"
इति कल्किपुराणे १ अध्यायः॥

शम्भली, स्त्री, (शम्भं कल्याणयुक्तं नायकादिकं लाति गृह्णातीति। ला+कः। गौरादित्वात् ङीष्।) कुट्टनी। इत्यमरः॥

शम्भुः, पुं, (शं मङ्गलं भवत्यस्मादिति। शम्+"मितद्वादिभ्य उपसंख्यानम्।" ३।२।१८०। इत्यस्य वार्त्तिकोक्त्या डुः।) शिवः। इत्यमरः॥ (यथा, भागवते। ४। ७। ५७।
"एतद्भगवतः शम्भोः कर्म्मदक्षाध्वरद्रुहः।
श्रुतं भागवतात् शिष्यादुद्धवाद्वै दृष्टवस्ततः॥"
एकादशरुद्राणामन्यतमः। यथा, विष्णुपुराणे। १। ५। १२३—१२४।
"हरश्च बहुरूपश्च त्र्यम्बकश्चापराजितः।
वृषाकपिश्च शम्भुश्च कपर्द्दी रैवतस्तथा॥
मृगव्याधश्च शर्व्वश्च कपाली च महामुने।
एकादशैते प्रथिता रुद्राख्यिभुवनेश्वराः॥")
ब्रह्मा। (यथा, महाभारते। १। ६४। ४५।
"तासुवाच महाराज भूमिं भूमिपतिः प्रभुः।
प्रभवः सर्व्वभूतानामीशः शम्भुः प्रजापतिः॥")
बुधः। इति मेदिनी॥ विष्णुः। इति हलायुधः॥ (यथा, महाभारते। १२। ४३। ७।
"चित्रचक्षुः शम्भुरेकस्त्रिसुदर्शोमोदरोऽपि च॥")
सिंहः। इति शब्दरत्नावली॥ श्वेतार्कः। इति चन्द्रिका॥ (अग्निः। यथा, महाभारते। ३। २२०। ५।
"शम्भुमग्निमथ प्राहुर्ब्राह्मण्या वेदपारगाः।
आवसथ्यं द्विजाः प्राहुर्दीप्तमग्निं महाप्रभम्॥"
सुखस्य भावयितरि, त्रि। यथा, ऋग्वेदे। १। ४६। १३।
"मनुष्वच्छम्भू आगतम्॥"
"हे शम्भू सुखस्य भावयितारौ।" इति तद्भाष्ये सायणः॥)

शम्भुतनयः, पुं, (शम्भोस्तनयः।) कार्त्तिकेयः। इति शब्दरत्नावली॥ गणेशश्च॥

शम्भुनन्दनः, पुं, (शम्भोर्नन्दनः।) गणेशः। इति शब्दरत्नावली॥ कार्त्तिकेयश्च॥

शम्भुप्रिया, स्त्री, (शम्भोः प्रिया।) आमलकी। इति शब्दचन्द्रिका॥ दुर्गा च॥

शम्भुवल्लभं, क्ली, (शम्भोर्वल्लभम्।) श्वेतकमलम्। इति राजनिर्घण्टः॥ शिवप्रिये, त्रि॥

शम्या, स्त्री, (शम्यतेऽनयेति। शम+यत्। टाप्।) युगकीलकः। इत्यमरः॥ (यथा, ऋग्वेदे। १। ३३। १३।
"उद्व ऊर्म्मिः शम्या इन्त्वापो योक्त्राणि सुष्वत॥")
दक्षिणहस्तगृहीततालविशेषः। इति सङ्गीतशास्त्रम्॥ (दण्डयष्टिः। इति मेधातिथिः॥ यथा, मनुः। ८। २३७।
"शम्यापाताञ्जयो वापि त्रिगुणो नगरस्य तु॥")

शम्याक्षेपः, पुं, (शम्याया क्षेपो यत्र।) श्रमितक्षिप्तयष्टिप्राप्तयावद्भूप्रदेशः। यथा,—
"भ्रामयित्वा बहुगुणं यष्टिः क्षिप्ता समाप्नुयात्।
भुवः प्रदेशं यावन्न शम्याक्षेपः स उच्यते॥"
इति मार्कण्डेयपुराणे विविधंशचरितं नामाध्यायः॥ (यज्ञविशेषः। यथा, महाभारते। ३। ८०। ५।
"पुण्यश्चाख्यायते दिव्यं शिवमग्निशिरोऽनघ।
सहदेवोऽयजत् यत्र शम्याक्षेपेण भारत!॥"
"बलवता क्षिप्ता शम्या लगुडविशेषो यावदूरं पतेत् तावान् यज्ञभण्डपो यस्मिन् यज्ञे न शम्याक्षेपस्तस्मिन्।" इति तट्टीकायां नीलकण्ठः॥)

शयः, पुं, (शेते सर्व्वमस्मिन्निति। शी+घञर्थे कः।) हरिः। इत्यमरः॥ शय्या। सर्पः। इति मेदिनी॥ निद्रा। पशुः। इति विश्वः॥

शयखः, त्रि, (शेते इति। शी+अखच्। इत्युज्ज्वलः। १। १२८।) निद्राशीलः। इत्युणादिकोषः॥ (पुं, विषयः। देशः। इत्युणादिटीका। १। १२८॥)

शयतः, पुं, निद्रालुः। इति संक्षिप्तसारोणादिवृत्तिः॥

शयथुः, पुं, (शेते इति। शीङ्+"शीङ्शपिशमिजीविप्राग्भ्योऽथुः।" उणा० ३। ११३। इति अथुः।) अजगरः। रुजुः। निद्रालुः। इति हेमचन्द्रः॥ वराहः। मत्स्यः। इति संक्षिप्तसारोणादिवृत्तिः॥ (मरणम्। यथा, ऋग्वेदे। ६। १७। ६।
"विश्वायुः शयथे जघान॥"
"शयथे शयननिमित्ते मरणायेत्यर्थः।" इति तद्भाष्ये सायणः॥)

शयनं, क्ली, (शी+ल्युट्।) निद्रा। शय्या इत्यमरः॥ (यथा, महाभारते। १।१४५।१७।
"आसनानि च दिव्यानि यानानि शयनानि च।
विधातव्यानि पाण्डूनां यथा तुष्येत वै पिता॥")
मैथुनम्। इति मेदिनी॥ अथ सर्व्वदेवशयनकालः।

पुलस्त्य उवाच ।
"यदाषाढी समायाति व्रजते पौष्टरायणम् ।
तदा स्वपिति देवेशो भोगिभोगे श्रियः पतिः ॥
प्रतिसूर्ये विभौ तस्मिन् देवगन्धर्वगुह्यकाः ।
देवानां मातरश्चापि प्रसुप्ताभ्यर्चयन्ति माम् ॥
नारद उवाच ।
कथयस्व सुरादीनां शयने विधिमुत्तमम् ।
सर्वेषामुक्रमेणैव पुरस्कृत्य जनार्दनम् ॥
पुलस्त्य उवाच ।
मिथुनाभिगते सूर्ये शुक्लपक्षे तपोधन ।
एकादश्यां जगत्स्वामिशयनं परिकल्पयेत् ॥
शेषाहिभोगपर्यङ्कं कृत्वा संपूज्य केशवम् ।
कृतोपवीतकश्चैव सम्यक् संपूज्य च द्विजान् ॥
अनुज्ञां ब्राह्मणेभ्यश्च द्वादश्यां प्रयतः शुचिः ।
लब्ध्वा पीताम्बरधरं स्वस्तिनिद्रां समानयेत् ॥
चयोदश्यां ततः कामः स्वपते शयने शुभे ।
कदम्बानां सुगन्धानां कुसुमैः परिकल्पिते ॥
चतुर्दश्यां ततो यज्ञाः स्वपन्ति सुखशीतले ।
सुवर्णपङ्कजक्लृप्ते सुखास्तीर्णोपधानके ॥
पौर्णमास्यासुमानाथः स्वपते चर्मसंस्तरे ।
यैयाग्रे च घटाभारं वसुदृग्व्याघ्रचर्मभिः ॥
ततो दिवाकरो रात्रिं संप्रयाति च कर्कटम् ।
ततोऽमरायां रजनी भवते दक्षिणायनम् ॥
ब्रह्मा प्रतिपदि तथा गोसोत्पलदलेशयः ।
स्वपिति देवानां दर्भशयनं मार्गसुत्तमम् ॥
विष्वक्सेनो द्वितीयायां तृतीयायां गिरेः सुता ।
विनायकश्चतुर्थ्यान्तु पञ्चम्यामपि धर्मराट् ॥
षष्ठ्यां स्कन्दश्च स्वपिति सप्तम्यां भगवान् रविः ।
कात्यायनी तथाऽष्टम्यां नवम्यां कमलालया ॥
दशम्यां सुगणेशाश्च स्वपन्ति वायुभोजनाः ।
एकादश्यान्तु कृष्णायां यावत् तत्रान् स्वपन्ति हि ॥
अथ क्रमस्य गदितो निद्रायां शयने सुने ।
अनयस्तु तेषु देवेषु प्रावृट्कालः समारयौ ॥
कृष्णः सर्वं यथाकालमिरारोहति नगोत्तमान् ।
वायवश्चापि शुम्भन्ति नीलानि तनिपुष्पवत् ।
गायन्तश्च स्वपन्तेता गर्जभराजयाः ॥
यस्यां निद्रां प्रयान्ति विश्वकर्मा प्रजापतिः ।
द्वितीया सा शुभा पुण्या सुपुण्या शयनोदिता ॥
तस्यां निशायां हरिं नीलताक्षं चतुर्भुजम् ।
पर्यङ्कस्थं सदा तस्यां सम्पुष्पादिभिर्नये ॥
ततो देवाय शय्यायां फलानि प्रक्षिपेत् क्रमात् ।
सुरभीणि विचित्राणि विशाखो मधुसूदनः ॥
यथा हि शय्या न विमुच्यते त्वं
विभिद्यमानस्य ममाश्रयाय ।
तथाऽस्तमस्यं शयनं मदेव
त्वमाश्रयेथेश तव प्रसादात् ॥
तस्मात् त्वमस्यं तव देव शय्यां
यावे हि शय्यां शयने सुरेश ।
यावेन तेनाभिलषीर्य विष्णो
मार्गेऽवतारो मम भातु देव ॥
इत्युक्त्वा पार्श्वमेकं प्रणम्य च पुनः पुनः ।
गच्छं भुञ्जीत देवर्षे तैलचारविवर्जितम् ॥
द्वितीयेऽह्नि द्विजाग्र्याय कृत्वा दत्वाह्निचक्षणः ।
लक्ष्मीधर प्रीयतां मे इत्युच्चार्य निवेदयेत् ॥
अनेन तु विधानेन चातुर्मास्यव्रतं चरेत् ।
यावद्दृश्चिकराशिस्थः प्रतिभाति दिवाकरः ।
ततो मिषुध्यन्ति सुराः क्रमशः क्रमशो मुने ॥
नभस्ये मासि च तथा या स्यात् कृष्णाष्टमी शुभा ।
युक्ता रुद्राग्निदैवैव सा तु कामाष्टमी स्मृता ॥
तस्यां सर्वेषु लिङ्गेषु तिथौ स्वपिति शङ्करः ।
वसते सन्निधानं तु तत्र पूजाजपा स्मृता ॥"
इति वामने १६ अध्यायः ॥०॥
अथ हरिशयनादिव्यवस्था । भविष्यनारदीययोः ।
"मैत्राद्यपादे स्वपितीह विष्णु
र्वैष्णवमध्ये परिवर्त्तते च ।
पौष्णावसाने च सुरारिहन्ता
प्रबुध्यते माघचतुष्टयेन ॥"
मैत्रमनुराधा । वैष्णवं श्रवणं । पौष्णं रेवती ।
भविष्ये ।
"निशि स्वापो दिवोत्थानं सन्ध्यायां परिवर्त्तनम् ।
अन्यच्च पादयोगे तु द्वादश्यामेव कारयेत् ॥"
इत्यत्र गण्डान्तयोगप्राप्तौ फलातिशयः । एतद्विधानं वामनपुराणे ।
"एकादश्यां जगत्स्वामिशयनं परिकल्पयेत् ।
शेषाहिभोगपर्यङ्कं कृत्वा संपूज्य केशवम् ॥
अनुज्ञां ब्राह्मणेभ्यश्च द्वादश्यां प्रयतः शुचिः ।
लब्ध्वा पीताम्बरधरं देवं निद्रां समानयेत् ॥"
अनुज्ञां लब्ध्वा इत्यन्वयः । एकादशीसमवे दिवाशयनीयकल्पनं रात्रौ द्वादशीयोगे निद्रेति । विष्णुधर्मोत्तरे ।
"स्वास्तीर्णशयनं कृत्वा शेषभोगाहिभोगायिनम् ।
आषाढशुक्लद्वादश्यां विष्णुलोके महीयते ॥"
स्वास्तीर्णशयनं शोभनास्तरणयुक्तं स्वट्टादि । वराहपुराणे श्रीभगवानुवाच ।
"अन्यत्तु संप्रवक्ष्यामि कर्म संसारमोचनम् ।
कदम्बकुटजैश्चैव वपकोरुणकैस्तथा ॥
एभिरभ्यर्चनं कुर्याद्विधिदृष्टेन कर्मणा ।
ततः संशयनं कृत्वा मम मन्त्रविधिः स्मृतः ।
नमो नारायणायोक्त्वा इमं मन्त्रमुदीरयेत् ॥
प्रसुप्तं मेघानपि मेघश्यामं
कुरुष्वासनं विश्वमानं मदीमिमाम् ।
निद्रां भगवान् लभतां लोकनाथ
वर्षाण्यिमं प्रयतु मेघवृन्दम् ॥
कृत्वैव पार्श्वं च लोकनाथ मासा-
नत्वारि वैकुण्ठस्व च पद्म नाथ ।
आषाढशुक्लद्वादश्यां सर्वपापक्षयकरं शिवम् ॥
य इदं विधानेन भूमि ! मे कर्म कारयेत् ।
न पुमान् न मनुष्येषु संसारेषु पुनः पुनः ॥
शयने कृष्णविहारात् विष्णुधर्मोत्तरीयनिबन्धेऽत्र । शयनं क्रमितः । संशयनं समाधानम् । भूमि इति कृषिद्वाः सम्बोधनम् ।

"एवमुक्तेन मन्त्रेण क्षणं सुप्त्वाथोत्ततः ।
सुप्ते त्वयि जगन्नाथ जगत् सुप्तं भवेदिदम् ।
विबुद्धे त्वयि बुध्येत जगत् सर्वं चराचरम् ॥"
इति मन्त्रेण पूजयेत् ॥ ॥
"प्राप्ते भाद्रपदे मासि एकादश्यां सितेऽहनि ।
कटदानं भवेद्विष्णोर्महापूजा प्रवर्त्तते ॥"
कटदानं पार्श्वपरिवर्त्तः । कामरूपीयनिबन्धे ।
"एवं संपूज्य विधिवत् भाद्रस्य द्वादशीदिने ।
मन्त्रेणानेन देवेशं पार्श्वेन परिवर्त्तयेत् ॥
वासुदेव जगन्नाथ प्राप्तेयं द्वादशी तव ।
पार्श्वेन परिवर्त्तस्व सुखं स्वपिहि माधव ॥
त्वयि सुप्ते जगन्नाथ जगत् सर्वं चराचरम् ॥"
ब्रह्मपुराणे ।
"एकादश्यान्तु शुक्लायां कार्त्तिके मासि केशवम् ।
प्रसुप्तं बोधयेद्रात्रौ श्रद्धाभक्तिसमन्वितः ॥"
रात्रौ प्रसुप्तमित्यन्वयः । बोधनन्तु दिवैव ॥
"कृत्वा वै मम कर्माणि द्वादश्यां मत्परो नरः ।
ममैव बोधनार्थाय इमं मन्त्रमुदीरयेत् ॥
महेन्द्ररुद्रैरभिभूयमानो
भवाद्भवद्भिर्वन्दितवन्दनीयः ।
प्राप्ता तवेयं किल कौमुदाख्या
जागृध्व जागृध्व च लोकनाथ ॥
मेघा गता निर्मलपूर्णचन्द्रः
प्रारब्धपुष्पाणि च लोकनाथ ।
अहं प्रदानीति च पुण्यहेतो-
र्जागृध्व जागृध्व च लोकनाथ ॥
एवं कर्माणि कुर्वीरन् द्वादश्यां ये यतस्त्रिनः ।
मम भक्ता नरश्रेष्ठास्ते यान्ति परमां गतिम् ॥"
अत्र मन्त्रद्वयपाठानन्तरम् ।
"उत्तिष्ठोत्तिष्ठ गोविन्द त्यज निद्रां जगत्पते ।
त्वया चोत्थीयमानेन उत्थितं भुवनत्रयम् ॥"
इति सम्प्रदायागतस्तृतीयः श्लोक इति वाचस्पतिमिश्राः । शयनोत्थानमन्त्रास्तु कल्पतरुप्रभृतिग्रन्थसंवादादालिखिताः । तदेवं द्वादश्यां एकादश्यां वा रेवत्यन्तपादयोगवशाद्विधोत्थानं नक्षत्रयोगाभावे तु द्वादश्यामेव कारयेदिति गुरुचरणाः । श्रीद्भूतवाहनस्तु भविष्ये ।
"आ-भा-का-सितपक्षेषु मैत्रश्रवणरेवती ।
आदिमध्यावसानेषु प्रस्वापावर्त्तबोधनम् ॥"
आ-भा-का-सितपक्षेषु आषाढभाद्रकार्त्तिकशुक्लपक्षेषु । एवाच द्वादश्यां प्राप्तौ सुखकरणः । भविष्यपुराणम् ।
"निशि स्वापो दिवोत्थानं सन्ध्यायां परिवर्त्तनम् ।
अन्यत्र पादयोगे तु द्वादश्यामेव कारयेत् ॥"
विष्णुधर्मोत्तरे ।
"विष्णुर्दिवा न स्वपिति न रात्रौ प्रतिबुध्यते ।
द्वादश्यन्तसंयोगे पादयोगे न कारयेत् ॥
अप्राप्ते द्वादशीयोगे उत्थानशयने हरेः ।
पादयोगेन कर्त्तव्यमन्यथा विधिमुत्सृजेत् ॥"
पद्मनाभस्तु ।
"रेवत्यन्ते यदा रात्रौ द्वादशी च समन्विता ।
तदा विबुध्यते विष्णुर्विशाखे सोम्य रेवतीम् ॥

दिनाग्रे त्रिधा विभक्तदिनतृतीयभागे दिनोत्थानमित्यपरोधात्। यमस्तव।

"रात्रौ विरोधो विनिद्रन्ति चौरान्
सायौ दिवा राक्षसकूर्मभूतौ:।
सन्ध्याद्वये सन्ततना धरित्री
भवेद्वराङ्गामपि रोगदुःखम्॥"

इति स्मृतिः। वराहपुराणे।

"द्वादश्यां पञ्चिमयामे नक्षत्राणामनन्तमे।
आ-भा-का-त्रिनयनेऽह्नि शयनार्चनादिकम्॥"

तत्रैव शयनादौ कालचतुष्टयम्। द्वादश्यां निशादौ नक्षत्रयोगः। तदभावेऽपि निशान्तादेव तिथ्यन्तरे तद्योगः। तस्याप्यभावेऽपि सन्ध्यायां नक्षत्रमात्रयोगः। तस्याप्यभावे द्वादश्यां सन्ध्यायामिति। विष्णुधर्मोत्तरे।

"किं तस्यैकादश्यादेन दशम्यन्तेन यो दिवा।
यौगपद्येन किं तेन प्रतिपद्यच यो निशि॥"

इति दशमीप्रतिपदोर्निषेधात् एकादश्यादिपौर्वमास्यन्तानां तिथीनामभ्युपगमः॥ ७॥

पद्मपुराणे सर्वदेवशयनादिकमुक्तं यथा,—

"प्रतिपद्युदयोक्ता पवित्रारोपणे तिथिः।
श्रिया देवा तिथौ या तु तिथिनासुतमा स्मृता॥
तृतीया तु भवान्याश्च चतुर्थी तनुसुतस्य च।
पञ्चमी शौभराज्ञस्य षष्ठी प्रोक्ता गुहस्य च॥
सप्तमी भास्करस्योक्ता दुर्गायाश्चाष्टमी स्मृता।
मातॄणां नवमी प्रोक्ता दशमी नागभेषजा॥
एकादशी तथौक्तानु द्वादशी चक्रपाणिनः।"

चक्रपाणिन इति चक्रधरस्य स्वस्यात्।

"चतुर्दशी तथाद्यस्य शिवस्योक्ता चतुर्दशी।
सम चैव तु विज्ञेयं पौर्णमासी तिथिः स्मृता॥
यस्य यस्य तु देवस्य यच्छयनं तिथिश्च या।
तस्य देवस्य तस्मिंश्च शयनार्चनादिकम्॥"

अत्र पवित्रारोपणाद्यागाङ्गत्वविधानात् तत्पार्वणश्राद्धेऽपि तथा। स्मृतिरपि।

"यस्मिन् यदा नियुतं विशाय
कर्मे रात्रावपवित्रितां तिथिं सूर्यः।
भवति यदा निर्यन्तं हिरण्याक्षः
शयनार्चनादिविधिरिहोच्यते मानि॥"

यदा पञ्चदशे दिनत्रितयं त्रयाणां संक्रान्तिदुष्टि:। तिस्रः पूर्णिमाः सायंकाले दृश्यन्ते तदा। कश्यपस्तु

"चौदश्यां नियमकर्तुं त्रयाणां संक्रान्तिदुष्टि:।
तिस्रः पूर्णिमाः सायंकाले दृश्यन्ते यदा।
कर्तव्यं तत्र पार्वं हि प्रथमेन तथोदिते।
दिनत्रयेऽपि वै सन्ध्ये: पार्वं कर्माणि कारयेत्।
प्रथमे च द्वितीये च तृतीये चैव वैदिकः।"

आषाढ्यामुत्तराषाढर्क्षयोगे शौक्लपक्षीयैकादश्यां विष्णोर्निद्रारम्भसङ्कल्पकरणसमयः। अयनद्वयं द्वादश्यां सङ्कल्पमिश्रय तदहरादित्यवारे कर्तव्यं पद्मपुराणे। वराहपुराणेऽपि एवं। कश्यपोऽप्येवमेव। तत्रैव विशेषमभिधास्यामः। कालादर्शे भविष्योत्तरे। द्वादश्यां प्रबोधनमन्त्रश्चैव दृश्यः। अत्र

प्रद्युम्नपुराणे चतुर्दश्यां प्रबोधसमयः। तेन वराहपुराणे द्वादश्यां प्रबोधाभिधानम्। यमस्तु कार्त्तिक्यां प्रबोधाभिधानम् सर्वसमञ्जसमिति। एवमेव श्रीदत्तोपाध्यायाः। कश्यपस्तु एकादश्यामेव शयनं प्रबोधञ्च। यमस्तुतावाषाढे कार्त्तिकस्येयमिति कृत्यपक्षा न तत्प्रत्यायनुपपत्तिः। अपवादविषयके क्वचिदुत्सर्गप्रवृत्तेरित्याह। श्रीभगवदाख्यम्।

"मध्यदने मदुत्याने मत्पार्श्वपरिवर्तने।
कृष्णजलशलाहारी कृदि शय्यां समार्पयेत्॥"

इत्याद्यारभ्य मननपरम्। तेन सर्वथा शयनपरत्वम्। इत्येकादशीतत्त्वम्॥ ॐ॥

मर्त्यानां शयनविधिनिषेधौ यथा,—

सूत उवाच।

"उपास्य पश्चिमां सन्ध्यां हुत्वाग्नीञ्जानुपास्य च।
भूमौ: परिहृतो शुक्ला नातिलज्जोच संविशेत्॥
मुखं देशं विवित्तञ्च गोमयेन तु लेपयेत्।
प्राग्दक्प्रवणे चैव संस्वपेत सदा बुधः॥
प्राक्शिराश्च स्वपेन्नित्यं तथा वै दक्षिणाशिराः।
स्वपेदुदक्शिरा नैव तथा प्रत्यक्शिरा न च।
न च नग्नस्तथाशीने तु न तिर्यक् च कदाचन॥
शून्यालये श्मशाने तु एकवृक्षे चतुष्पथे।
महादेवगृहे चापि भालवेश्मनि न स्वपेत्॥
न यज्ञनागायतने स्वाद्यस्यायतने तथा।
गर्भेषु च विना सीतां न स्वपेच्च कथञ्चन॥
धान्यगेहे च विप्राणां गुरुणाञ्च तथोपरि।
नाशुचौ पर्यङ्कोर्णे तु नाशुचिर्नाशिखस्तथा॥
दिने सन्ध्यां न गच्छेच नोत्तरापरमस्तकः।
नाकाशे पर्वते शून्ये न च चैत्यद्रुमे तथा॥
न तु क्षारोभसाक्षीर्णे नार्द्रपादस्तथावितः।
शालाग्रे शयने चैव बहुदारुकृते न च॥
न दग्धे विप्लुता चैव बहुमुष्टे जले तथा।
न स्वपेत् सन्ध्ययोर्नित्यं न शिरस्याग्नेये कदा॥
एवं स्वपन् नरो नित्यं सुखस्यैव परत्वभाक्।
अन्यथा च भवेद्रोगी सती गरुडमभुते॥"

इति वह्निपुराणे आह्निकस्नानयोगाभ्याये॥ ८॥

अपि च। अति सूर्ये शयां च न शातनीयां सूर्योदयात् पूर्वमुत्थानीयां। तथा च स्मृतिः।

"भास्करादुत्थायानि निशालिखितानि च।
सर्वाण्यशौचविधीयानि तस्मात्तत्र देवानि भोजनम्॥

स्नानं दानं जपं होमं स्वाध्यायं कर्मकारणम्।
स्नानम: मुनिदेवानि न परेण कदाचन॥"

न कदाचन इत्यनुमतिं विना अन्यथासिद्धानुवादः। स्मृतः।

"भूमौ वैव विविक्ते तु गोमयेनोपलिप्ते।
प्राग्दक्प्रवणे चैव संविशेत् सदा बुधः॥
मानुषं पूर्वकायस्य शिरस्याधाय शिक्षयेत्।
दैविकैर्मानवैर्भोगैर्युक्तो राजा स्वपेत्ततः॥"

मनुः।

"अकर्दे चाप्युदिशेत् शिरो नाशुचौ दक्षिणशिराः।
प्रत्यक्शिराः प्रवाचे तु न कदाचिदुदक्शिराः॥"

मार्कण्डेयपुराणे।

"प्राक्शिराः शयने विद्वान् धनमायुश्च दक्षिणे:
पश्चिमे प्रबलां चिन्तां हानिं मृत्युं तथोत्तरे॥"

तथा।

"नमस्कृत्याद्यं विष्णुं समाधिस्थः स्वपेन्निशि।"

मार्कण्डेयः।

"शून्यागारे श्मशाने च एकवृक्षे चतुष्पथे।
महादेवगृहे चापि शर्करालोष्टपांशुषु॥
धान्यगोविप्रदेवानां गुरूणाञ्च तथोपरि।
न चापि भग्नशयने नाशुचौ नाशुचिः स्वयम्॥
नार्द्रवासा न नग्नश्च नोत्तरापरमस्तकः।
नाकाशे सर्वशून्ये च न च चैत्यद्रुमे तथा॥"

न स्वपेदित्यर्थः। इत्याह्निकाचारतत्त्वम्॥ ९॥

अन्यच्च।

"भुक्त्वा च विधिवल्लैहिकी भुक्तावशिष्टकम्।
सक्तुद्रव्यान्वयवनः स्वपेत् शुष्कपदो निशि॥
नोत्तराभिमुखः स्वप्यात् पश्चिमाभिमुखो न च।
न चाकाशे न गर्त्तायां नाशुचिर्नांशने क्वचित्॥
न शीर्णायान्तु खट्वायां शून्यागारे न चैव हि।
नापि वंशे च पाषाणे शयने वा कदाचन॥"

इति कौर्मे उपविभागे १८ अध्यायः॥ ॥

अपि च:

"कृतपादादिशौचश्च भुक्त्वा भाव ततो गृही।
गच्छेत् शय्यां समन्त्राच्च अथवा दारभिर्मिताम्॥
शालालस्य कदम्बस्य नीपमन्दारकस्य च।
किंशुकस्य वटस्याथ तथा क्षुद्रमयस्य च॥
आरोहणात् भवेत् पापं तस्मात्तेषु न च स्वपेत्।
प्ररोहशय्यां सत्रे वा अपरे परमेश्वरि!॥
न शुक्ले नापविद्धे च न क्लिन्ने न च भूतले।
तूलिकायां तथा वस्त्रे शय्याभावे स्वपेदृजुः॥
स्वपेन्न पश्चरात्रे च फलपुष्पे कमलेषु च॥"

इति मत्स्यसूक्ते ४४ पटलः॥ ॥

अत्रैव च।

"सूर्येणाभ्युदितो यस्तु अस्तं सूर्येण यः स्वपन्।
अन्यधातुसमायोगः प्रायश्चित्तीयते नरः॥"

इति विष्णुपुराणे ३ अंशे १९ अध्यायः। यस्मिन् सूर्ये सूर्य उदेति न सूर्येणाभ्युदितः। यस्मिन् सूर्ये अस्तं याति न सूर्येण अस्तः। सूर्योदयास्तमययोः स्वपन् प्रायश्चित्तीयते पापकृत् भवेदित्यर्थः। इति तस्य टीका च॥ दिवा।

"आसनाद्यो गमनात्मकात् हि १५ पार्श्वे च पश्चिमे।
नवखद्विगुणात् ३२ यामे पश्चात् स्वप्यात्
यथासुखम्।
यामोद्गायामनतो नाशिरदीक्षित सन्-
नाम्।
गच्छात्तु यामपार्श्वे प्रयोत भुक्तप्रयाकार्यम्॥"

इति भावप्रकाशः॥

"त्यज संसारमसारं भज शरणं पार्व्वतीरमणम्।
विश्वसिहि श्रुतिशिखरं विश्वमिदं तव निदेशगकम्॥")
रक्षणम्। वधः। इति मेदिनी॥ घातकः। इति शब्दरत्नावली॥
शरणा, स्त्री, प्रसारणी। इति शब्दरत्नावली॥
शरणागतः, त्रि, (शरणमागतः प्राप्तः।) शरणापन्नः। तत्पर्य्यायः। शरणार्थकः २ अभिपन्नः ३ शरणार्थी ४। इति त्रिकाण्डशेषः॥ तद्रक्षणारक्षणयोः गुणदोषौ यथा.—
"शस्त्रहीनश्च भीतश्च दीनश्च शरणागतम्।
यो न रक्षत्यधर्म्मिष्ठः कुम्भीपाके वसेद्ध्रुवम्॥
राजसूयशतानाञ्च रक्षिता लभते फलम्।
परमैश्वर्य्ययुक्तश्च धर्म्मेण स भवेदिह॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ५५ अध्यायः॥*॥
अपि च।
"शरणागतरक्षां यः प्राणैरपि धनैरपि।
कुरुते मानवो ज्ञानी तस्य पुण्यं निशामय॥
सर्व्वपापविनिर्मुक्तो ब्रह्महत्यासुखेरपि।
आयुषोऽन्ते व्रजेन्मोक्षं योगिनामपि दुर्लभम्॥"
इति पाद्मे क्रियायोगसारे गङ्गामाहात्म्यं नाम ८ अध्यायः॥ अन्यच्च।
"लोभाद्वेयाद्भयादापि यस्त्यजेत् शरणागतम्।
ब्रह्महत्यासमं तस्य पापमाहुर्मनीषिणः॥
शास्त्रेषु निष्कृतिर्दृष्टा महापातकिनामपि।
शरणागतहन्तुस्तु न दृष्टा निष्कृतिः क्वचित्॥"
इति वह्निपुराणे दानावस्थानिर्णयनामाध्यायः॥
शरणार्थी, [न्] त्रि, (शरणं अर्थयते इति। अर्थ+णिनिः।) शरणागतः। इति हेमचन्द्रः॥ (यथा, महाभारते। १।१६२।१०।
"आगतस्य गृहं त्यागस्तथैव शरणार्थिनः।
याचमानस्य च वधो नृशंसो गर्हितो बुधैः॥")
शरणार्थकः, त्रि, (शरणार्थमर्थयति आत्मानमिति। अर्थ+खुल्।) शरणापन्नः। इति त्रिकाण्डशेषः॥
शरणिः, स्त्री, पन्थाः। इत्यमरः॥ सरत्यनयेति सरणिः नाम्नीति अनिः इदन्तात् पक्षे ईपि सरणी च
"सरणिः श्रोणिवर्त्मनोरिति दन्त्यादौ रभसः।"
शॄ स्वृ गि हिंसने इत्यस्मात् पूर्ब्ववदनौ शरणिस्तालव्यादिश्च। शुभे शुभे प्रदीप्ते च शरणिः पथि चावनाविति तालव्यादावजयः। इति तट्टीकायां भरतः॥ पृथ्वी। इत्यजयः॥ (हिंसा। यथा, ऋग्वेदे। १। ३१। १६।
"इमामग्ने शरणिं मीमृषो नः।"
"हे अग्ने नोऽस्मत्सम्बन्धिनीं इमामिदानीं सम्पादितां शरणिं हिंसां अतलोपरूपां मीमृषः क्षमस्व * * * शरणिं शॄ हिंसायामित्यस्मादौणादिकः अनिः प्रत्ययः।" इति तद्भाष्ये सायणः॥)
शरणी, स्त्री, (शरणि+वा ङीष्।) पन्थाः। प्रसारणी। इति शब्दरत्नावली॥ चयन्ती। इति शब्दचन्द्रिका॥

शरण्डः, पुं, पक्षी। कामुकः। इति शब्दरत्नावली॥ धूर्त्तः। शरटः। भूषणभेदः। इति मेदिनी॥ चतुष्यात्। इति संक्षिप्तसारोणादिवृत्तिः॥
शरण्यः, त्रि, (शृणाति भयमिति। शॄ हिंसायाम्+"शॄस्वृस्निहित्रपिचमिकमिकसिभ्यो न्यः।" उणा० ३। १०१। इति न्यः। यद्वा, शरणमिव। शरण+"शरणाख्यो यः।" ५।३।१०३। इति यः।) रक्षाकर्त्ता। यथा,—
"श्रेयं सदा परिभवघ्नमभीष्टदोहं
तीर्थास्पदं शिवविरिञ्चिनुतं शरण्यम्।
भृत्यार्त्तिहं प्रणतपालभवाब्धिपोतं
वन्दे महापुरुष ते चरणारविन्दम्॥"
इति श्रीभागवतम्॥
शरण्या, स्त्री, (शरण्य+टाप्।) दुर्गा। यथा,—
"विषाग्निभयचौरेषु शरणं स्मरणादृतः।
शरण्या तेन सा देवी पुराणे परिपठ्यते॥"
इति देवीपुराणे देवीनिरुक्ताध्यायः॥
शरण्युः, पुं, वारिदः। वातः। इति विश्वः॥ भरण्युः। इति शब्दमाला॥
शरत्, [द्] स्त्री, (शॄ हिंसायाम्+"शॄदृभ्सोऽदिः।" उणा० १। १२६। इति अदिः।) वत्सरः। (यथा, रघुः। १०। १।
"पृथिवीं शासतस्तस्य पाकशासनतेजसः।
किञ्चिदूनमनर्घैः शरदामयुतं ययौ॥")
ऋतुविशेषः। स चाश्विनकार्त्तिकमासद्वयात्मकः। इत्यमरः॥ तत्पर्य्यायः। शारदा २ कालप्रभातः ३। इति शब्दरत्नावली॥ कालप्रभातम् ४। इति त्रिकाण्डशेषः॥ वर्षावसानः ५ मेघान्तः ६ प्रावृडृतुव्ययः ७। (यथा, रघुः। ४। २४।
"सरितः कुर्व्वती गाधाः पथश्चाश्यानकर्द्दमान्।
याचायै चोदयामास तं शक्तेः प्रथमं शरत्॥")
तत्र जलगुणाः।
"वर्षासु नाभसं वारि सेवितोद्भिदमेव वा।
सर्व्वं शरदि हेमन्ते तडागं सारसन्तु वा॥"*॥
तत्र आश्वयुजयोर्यथा,—
"वसन्ते दक्षिणो वातो भवेत् वर्षासु पश्चिमः।
उत्तरः शारदे काले पूर्व्वो हेमन्तशैशिरे॥"
इति राजनिर्घण्टः॥*॥
अपि च।
"शारदश्वानभिष्यन्दि लघु तत्परिकीर्त्तितम्।
हैमन्तिकं जलं स्निग्धं बल्यं वृष्यं हितं गुरु॥"
इति राजवल्लभः॥*॥
वैद्यकमते भाद्राश्विनमासात्मकः। कैश्चित्तु।
"ऋतुषट्कं समाख्यातं रवेः राशिषु संक्रमात्॥
ग्रीष्मो मेषवृषौ प्रोक्तः प्रावृट् मिथुनकर्कटौ।
सिंहकन्ये स्मृता वर्षा तुलावृश्चिकयोः शरत्।
धनुर्म्मकरौ च हेमन्तो वसन्तः कुम्भमीनकौ॥"
अन्ये तु।
"शिशिरः पुष्यसमधा ग्रीष्मो वर्षा शरद्दिमः।
माघादिमासयुग्मैः स्युर्ऋतवः षट् क्रमादमी॥"

तस्या गुणाः।
"शरदुष्णा पित्तकर्त्री नृणां मध्यबलावहा।"
इति भावप्रकाशः॥*॥
तत्र जातफलम्।
"नरः शरत्सम्भवकालजन्मा
भवेत् सुकर्म्मा मनुजस्तरस्वी।
शुचिः सुशीलो गुणवान् समानी
धनान्वितो राजकुलप्रपन्नः॥"
इति कोष्ठीप्रदीपः॥*॥
तत्र वर्णनीयानि यथा। चन्द्रपटुता। रविपटुता। जलशुष्कता। अगस्त्यः। हंसः। वृषः। सर्पः। सप्तच्छदः। पद्मम्। श्वेतमेघः। धान्यम्। शिखिपक्षमदपातः। इति कविकल्पलता॥
शरत्कामी, [न्] पुं, (शरदि शरत्काले कामयते कुक्कुरीमिति। कम+णिङ्+णिनिः।) कुक्कुरः। इति शब्दरत्नावली॥
शरत्पद्मं, क्ली, (शरदः पद्मम्।) सिताम्भोजम्। इति राजनिर्घण्टः॥
शरत्पर्व्व, [न्] क्ली, (शरदः पर्व्व।) कोजागरपूर्णिमा। यथा,—
"कोजागरः शरत्पर्व्व शारदी द्यूतपूर्णिमा।"
इति जटाधरः॥
शरत्पुष्पं, क्ली, (शरदः पुष्पम्।) आकुल्यम्। इति राजनिर्घण्टः॥ शरदुद्भवकुसुमञ्च॥
शरद्, स्त्री, (शॄ+अदिः।) शरत्। इत्यमरः॥
शरदन्तः, पुं, (शरदः तदाख्य-ऋतोरन्तो यस्मात्।) हेमन्तः। इति राजनिर्घण्टः॥
शरदा, स्त्री, वत्सरः। शरद्ऋतुः। इति शब्दरत्नावली॥
शरदिजं, त्रि, (शरदि जायते यत्। जन+डः।
"प्रावृट्शरत्कालदिवां जे।" ६। ३। १५। इति सप्तम्या अलुक्।) शरत्कालजातम्। यथा,
"नद्यः प्रावृषिजास्तु पीनसकफश्वासार्त्तिकाशप्रदाः
पथ्या वातकफापहाः शरदिजा हेमन्तजा वृद्धिदाः।
सन्तापं शमयन्ति संविदधते ग्लैग्र्यंवासन्तजा-
स्तृष्णादाहवमिश्रमार्त्तिशमदा ग्रीष्मे यथास्वं गुणाः॥
इति राजनिर्घण्टः॥
शरदुदाशयं, क्ली, शरत्कालीनसरोवरम्। यथा,—
"शरदुदाशये साधुजातसत्-
सरसिजोदरश्रीमुषा दृशा।
सुरतनाथ तेऽशुल्कदासिका
वरद निघ्नतो नेह किं वधः॥"
इति श्रीभागवते। १०। ३१। २॥
शरदुदाशये शरत्कालीनसरसि। इति श्रीधरस्वामी॥
शरधिः, पुं, (शरा धीयन्तेऽस्मिन्निति। शर+धा+"कर्म्मण्यधिकरणे च।" ३। ३। ९३। इति किः।) तूणः। इति हेमचन्द्रः॥ (यथा, राजेन्द्रकर्णपूरे। ३३।

"नाकामयत तं दातुं वरं दाशाय शान्तनुः।
शरीरेणैव तीव्रेण दक्षसारोऽपि भारत॥")
युक्तः। इति भरतः। (यथा, महाभारते।
१३। २४। ४।
"इति तुष्टो मया राजन् वराशरशरीरजः।
अन्वशिष्टिगुणो धर्म्मो निःसंशयमनुत्तमम्॥")
देहधारे, त्रि। यथा,—
"शरीरजैः कर्म्मदोषैर्याति स्थावरतां नरः।
वाचिकैः पक्षिमृगतां मानसैरन्त्यजातिताम्॥"
इति प्रायश्चित्ततत्त्वम्॥
शरीरसंस्कारः, पुं, (शरीरस्य संस्कारः।) देह-संस्कारकर्म्म। शरीरस्य शोभनं मार्जनञ्च
शरीरावरणं क्ली, (शरीरस्य आवरणम्।) चर्म्म। इति राजनिर्घण्टः॥ कायवेष्टनञ्च। (वर्म्म। यथा, महाभारते। ७। १८५। ४२।
"विचित्रैर्विविधाकारैः शरीरावरणैरपि।
विचित्रैश्च रथैर्भेजे रथैश्च गजवाजिभिः॥")
शरीरी [न्] पुं, (शरीरमस्यास्तीति। शरीर+इनिः।) शरीरविशिष्टः। तत्पर्य्यायः।
"भवोद्भवौ च प्राणी तु शरीरिजन्तुजन्तवः।
प्राणभृच्चेतनी धन्वी चित्तन्तु हृदयं मनः॥"
इति शब्दार्थः॥
शरीरिलक्षणं यथा,—
"गर्भोपगमनं शुक्लमार्षवं जीवसंज्ञकः।
प्रकृतिः सविकारा च तत् सर्व्वं गर्भसंज्ञकम्॥
कालेन वर्द्धितो गर्भो यद्भावोपाङ्गसंयुतः।
भवेत्तदा च मुनिभिः शरीरीति निगद्यते॥"
पञ्चोपाङ्गसंयुतः यस्यात्रोपाङ्गः।
"तस्य यद्भाग्युपाङ्गानि ज्ञात्वा सुश्रुतशास्त्रतः।
मस्तकादभिधोयन्ते शिष्याः शृणुत यत्नतः॥
आद्यमङ्गं शिरः प्रोक्तं तदुपाङ्गानि मूर्द्धजाः।
तस्यान्तर्मस्तुलुङ्गश्च ललाटभ्रुवौ तथा॥
नेत्रद्वयं तयोरन्तर्वर्त्मते हे कनीनिके।
दृष्टिर्यत्र ज्ञानगोलौ श्वेतभागौ च वर्त्मनि॥
मस्तकाग्रपार्श्वौ शङ्खौ च कर्णौ तच्छष्कुलीद्वयम्।
घ्राणद्वयं कपोलौ च नासिका च प्रकीर्त्तिता॥
ओष्ठाधरौ च दशनाः सप्त तालु दशद्वयम्।
दशाथ दशपेशाश्च रसना विद्युत्क नखः॥
शिरोवयवसङ्ख्यां त्वेवं यथा कथ्यते।
ग्रीवां तु बाहुयुगलं तदुपाङ्गानथो ब्रुवे॥
स्कन्धौ हि भुजौ स्कन्धौ प्रकण्ठौ भवनस्तथः।
कक्षौ बाहुयुगं तद्वत् प्रकोष्ठयुगलं तथा॥
मणिबन्धौ तथे प्रोक्तौ तयोरङ्गुलयो दश।
नखाश्च दश ते ख्याता दश चेष्टाः प्रकीर्त्तिताः॥
वक्षस्थलं पक्षयुग्मं तदुपाङ्गान्यथ ब्रुवे।
स्तनौ पुंसस्तथा नार्य्या विशेष उभयोरयम्॥
यौवनागमने नार्य्याः पीवरौ भवतः स्तनौ।
गर्भस्थाः प्रकृतायास्तावेतौ क्षीरपूरितौ॥
हृदयं पुण्डरीकेण सदृशं स्यादधोमुखम्।
आमाशयश्चित्रसंज्ञः पक्वाशयमतः परम्॥
स्याद्यकृत्प्लीहकञ्चैव चेतनास्थाननुत्तमम्।
अन्त्रकण्डराभिधाङ्गे प्लीहानः प्रथयन्ति हि॥"

चेतनास्थानमुत्तममिति अयमभिप्रायः।
"चेतनानामधिष्ठानं मनो देहश्च सेन्द्रियः।
केशश्मश्रुनखाग्रान्तमर्म्मं द्रव्यगुणैर्विना॥"
इत्युक्तवता चरकेण सकलं शरीरं चेतनास्थानत्वं तदपेक्षया हृदयं विशेषतश्चेतनास्थानमिति।
"कक्षयोर्बस्तयोः वङ्क्षणौ जघनौ वसुदाहृते।
कक्षे उभे समाख्याते तयोः स्थानाच्च पंचधा॥
उदरं पञ्चमं भागं वक्षः पार्श्वद्वयं मतम्।
षष्ठवंशं पृष्ठमुक्तं सप्तमं श्रोणिमुत्तमम्॥"
उपाङ्गानि च कथ्यन्ते तानि शास्त्रविदो यथा॥
श्रोणिताच्छ्यते श्रोणा वामतो हृदयादधः।
रक्तवाहिशिराणां च मूलं स्थानं महर्षिभिः॥
हृदयादामतोऽधश्च पुप्फुसौ रक्तफेनजः।
अधो दक्षिणतश्चापि हृदयाद्यकृतः स्थितिः॥
तत्तु रञ्जकपित्तस्य स्थानं श्रोणितजं मतम्।
अधस्तु दक्षिणे भागे हृदयात् क्लोम तिष्ठति।
जलवाहिशिराश्चलं छत्राच्छादनरूपतम्॥"
क्लोम तिलकं एतत्तु वातरक्तजम। अत्राह च वृद्धवाग्भटः।
"रक्तादनिलसंयुक्तात् कालीयक समुद्भवः।"
इति।
"मेदःश्लेष्मतयोः सारादृजुवक्रयोर्युगलं भवेत्।
तौ तु पुष्टिकरौ प्रोक्तौ जठरस्यस्य नेदसः॥
उक्ताः सार्द्धत्रयो यामाः पुंसामन्त्राणि, ऋषिभिः।
चतुर्व्यामेन हीनानि योषितामन्त्राणि निर्द्दिशेत्॥
उशुकश्च कटी चापि त्रिकं वस्तिश्च पंचधा।
कटराणां शरीरेऽस्मिन् स्थानमेषां वीर्य्यसञ्चयः।
न एव गर्भस्याधान कुर्य्यान्नार्य्याश्च स्त्रियाः॥
शुक्रशोणितयोर्निष्पत्तावर्त्तो सा च कीर्त्तिता।
तस्यास्तृतीये त्वावर्त्ते गर्भशय्या प्रतिष्ठिता॥
वृषणौ भवतः सारात् कफास्थ्मांसमेदसाम्।
शीर्षवाहिशिराधारौ तौ मतौ पौरुषावहौ॥
गुदस्य मांसं सर्व्वस्य सर्व्वं स्नायुतरुद्भवम्।
तच्च खुल्लयस्त्रिकः शुक्रावर्त्तनिभास्तु ताः।
प्रवाहिनी भवेत् पूर्व्वा सार्द्धाङ्गुलमिता मता।
उत्सर्ज्जिनी तु तद्वः सा सार्द्धाङ्गुलसम्मिता॥
तस्या अधःशम्बरी स्यादेकाङ्गुलसम्मिता।
अर्द्धाङ्गुलप्रमाणन्तु वृधेर्मुष्टसं मतम्॥
मलोत्सर्गस्य मार्गोऽयं पायुर्देहे विनिर्मितः।
पुंसः प्रोथौ स्तनौ यौ तु तौ नितम्बौ च योषितः॥
तयोः कन्दरे स्नायुं सङ्घिनौ सङ्गमस्थम्।
तदुपाङ्गानि च भूमौ जानुनौ पिण्डिकाद्वयम्॥
अङ्घ्रि द्वे गुल्फिके पार्ष्णी तले च प्रपदे तथा।
मादावङ्गुलयस्तत्र दश तासां नखा दश॥"
इति भावप्रकाशः॥
(चेतनो जीवात्मा। यथा, मनुः। १। ५६।
"तस्मिन् ऋषिस्तु स्वे कर्म्मन्नाजः शरीरिणः।
सदसद्भावो विवेकेन सम्यक् स्वाभिरुदाहरेत्।")

शर्वः, पुं, (शृ हिंसायाम्+"शृस्वृस्निहित्रपि-चमीति।" उणा० १। ११। इति उः।) क्रोधः। वज्रम्। इति मेदिनी॥ बाणः। इति हेमचन्द्रः॥ आयुधम्। इति सिद्धान्तकौमुद्यामरसिंहश्च॥ (हिंसा। यथा, ऋग्वेदे। ६। २७। ६।
"वृषीवन्तः शरवे पत्यमानाः।"
"शरवे हिंसायै।" इति तद्भाष्ये सायणः॥ गन्धर्व्वविशेषः। यथा, महाभारते। १। १२३। ५५।
"विश्वावसुर्भुमन्युश्च सुचन्द्रश्च शरुत्तथा॥"
हिंसके, त्रि। यथा, तत्रैव। ७। ७१। १।
"दिवा नक्तं शरमसद्द्युतेतम्॥"
"शरं हिंसकम्।" इति तद्भाष्ये सायणः॥)
शरेरः, पुं, आम्रः। इति शब्दार्थः॥
शर्करकः, पुं, (शर्करा+"शृङ्खलगण्डेति।" ४। २। ८०। इत्यनेन कः।) मधुरजम्बीरः। इति राजनिर्घण्टः॥
शर्करजा, स्त्री, (शर्करायां जायते इति। जन+डः। स्त्रियां टाप्।) सितालवणः। इति राजनिर्घण्टः॥
शर्करा, स्त्री, खण्डविकृतिः। चिनी इति भाषा। तत्पर्य्यायः। सिता २। इत्यमरः॥ शुक्लोपला ३ सुक्ता ४ सिक्थोपला ५। इति रत्नमाला॥ मौगाधी ६ श्वेता ७ सत्यखिका ८ अहिच्छत्रा ९ सुसिकता १० गुडोद्भवा ११। अस्या गुणाः। मधुरत्वम्। शीतत्वम्। पित्तदाह-श्रमरक्तदोषश्लीपनाक्लमिकोपनाशित्वञ्च। इति साधारणशर्करागुणाः॥ ६॥
अथ शर्करावि शेषगुणाः।
"सिता पुष्पकशर्करा सितकरी क्षीरे मयरोचके
चक्षुष्या बलवर्द्धनी सुमधुरा रुच्या च वंशीसुता।
दृष्या लघ्वित्यलघ्वी श्रमहरा श्रमेक्षुजा शीतला
स्निग्धा कान्तिकरी रसालजनिता रक्तेक्षुजा पित्तजित्॥"
इति पक्वेक्षुशर्करागुणाः॥ ६॥
"यावन्नाली शिमोत्पला शिमाली शिमशर्करा।
क्षुद्रशर्करिका क्षुद्रा गुडजा जलविन्दुजा॥
शिमजा शर्करा गौल्या मौक्षा तिक्षातिपिच्छिला।
वालजी वारिका रुच्या दाहपित्तास्रदायिनी॥"
इति यावनालशर्करागुणाः॥ ७॥
"क्षौद्रजाच्या कर्करजा माक्षवी मधुशर्करा।
मालिका शर्करा प्रोक्ता सितास्वच्छा रसच्छदा॥
सितास्वल्पोऽतिमधुरश्चक्षुष्यश्चक्षुरञ्जनः।
कृमिघ्नश्छर्द्यतीसारहिक्काविषास्रदोषजित्॥
यदासच्छर्करा स्वच्छा सुभाभोदलमोदकः।
तदराजः स्वच्छशर्करः सच्छत्रा राजमोदकः॥"
इति राजनिर्घण्टः॥ ८॥

अपि च।
"मत्स्यण्डिका: खण्डसिता गुणश्रेष्ठा यथोत्तरम्।
सिमूला: शीतला: स्निग्धा गुर्व्य: स्वादुतरा: सरा: ॥
दृष्यास्तृषाच्छर्दिहरा रक्तपित्तानिलापहा:।
मत्स्यण्डी ग्राहिणी वल्या कषाया वातजिद्गुरु: ॥
खण्ड गुरु सरं रुच्यं वातघ्नं बलपुष्टिदम्।
सितोपला सरा गुर्व्वी वातघ्नी न कफप्रदा ॥"
इति पथ्यापथ्यविवेक: ॥*॥

अन्यच्च।
"शर्करा ज्वरपित्तास्रदाहमूर्च्छाछर्दितृष्णहा।
तृष्णान्वितज्वरान्सद्य: क्षयदाहसपित्तगुत् ॥
लवणिकाफाणितगुडखण्डमत्स्याण्डकासिता:।
निर्म्मला लघवो चैषां शीतवीर्य्या यथोत्तरम्।
यथा यथेषां वैमल्यं भवेच्छैत्यं तथा तथा ॥"
इति राजवल्लभ: ॥*॥

किञ्च।
"खण्डन्तु सिकतारूपं सुश्वेतं शर्करा सिता।
सिता सुमधुरा रुच्या वातपित्तास्रदाहजित्।
मूर्च्छाछर्दिज्वरान् हन्ति सुशीता शुक्रकारिणी ॥*॥
भवेन्मधुसिता शीता रक्तपित्तहरी लघु:।
सितोपला सरा लघ्वी वातपित्तहरी हिमा ॥*॥
मधुना शर्करा रूक्षा कफपित्तहरी गुरु:।
कृच्छ्रतीसारछर्दिहरक्तक्षुत्वरा हिमा ॥
यथा शुक्लेषां नैर्म्मल्यं मधुरत्वं तथा तथा।
स्नेहलाघवशैत्यानि रसत्वञ्च तथा तथा ॥"
इति भावप्रकाश: ॥०॥

उपला। कर्परांश:। (यथा, महाभारते। ३। ५५। २।
"ततो वायुर्म्महान् प्रीतो नीचै: शर्करवर्षम:॥")
शर्करान्वितदेश:। रोगभेद:। शुक्लम्। इति मेदिनी॥ शर्करारोगस्य निदानचिकित्सादिर्मूत्रकृच्छ्रशब्दे द्रष्टव्य:। (भूमिचक्रस्य पुच्छदेशस्थितदेशविशेष:। यथा, मार्कण्डेये। ५८।३५।
"तारचुरा शुक्लशका: शर्करा: शाल्मलैप्लकाश:॥")

शर्करावत:, पुं, (शर्करामयोऽचल:।) दानार्थैक्षविमृच्छर्करामयाचलविशेष:। अस्य विवरणं पर्व्वतशब्दे द्रष्टव्यम्॥

शर्करावेनु:, स्त्री, (शर्करामिर्निर्म्मिता धेनु:।) दानार्थशर्करानिर्म्मितधेनु:। तद्विधिर्यथा,—
श्रीदोगोवाच।
"सदत्त शर्करावेनुं प्रभो राजन् यथार्थत:।
व्यतिक्रमे मदीयेऽस्मिन् कृष्णाजिनकुशोत्तरे॥
धेनुं शर्करया राजन् कृत्वा भारचतुष्टयम्।
उत्तमा कथ्यते सद्भिस्तदर्द्धेन तदर्द्धकम्॥
गदर्द्दं मध्यमा प्रोक्ता कनिष्ठा भारकेण तु।
सदत्त पयसं प्रदुह्यौघ चतुर्थेन तथैव त:॥
अथ कुर्य्यादधस्तस्यै कुशसिद्धासनम्।
सप्तधा कारयेद्धेनुं यथाकालं न शीर्य्यते॥
सर्व्वबीजानि संस्थाप्य चतुर्दिक्षु समन्तत:।
सौवर्णसुखदङ्गानि मौक्तिकानयने तथा॥
गुडेन तु सुखं कार्य्यं जिह्वा मिष्टमयी तथा।
कम्बलं पट्टसूत्रेण कण्ठाभरणभूषितम्॥
दत्तुपादां रौप्यखुरां नवनीतमयस्तनीम्।
प्रशस्तपत्रश्रवणां सितचामरसूषिताम्॥
पद्मरत्नसमायुक्तां वस्त्रैराच्छादितां तथा।
गन्धपुष्पैरलंकृत्य ब्राह्मणाय कुटुम्बिने॥
श्रोत्रियाय दरिद्राय साधुवृत्ताय धीमते।
वेदवेदाङ्गविदुषे याचितायार्पयेत्सत:।
अदुष्टाय प्रदातव्या न तु मत्सरिणे नृप॥
अयने विषुवे पुण्ये यतीपाते ग्रहिच्चये।
एषु पुण्येषु कालेषु यदृच्छा वा सदार्पयेत्॥
सत्पात्रन्तु द्विजं दृष्ट्वा आगतं श्रोत्रियं गृहे।
तादृशाय प्रदातव्या पृच्छदेशे विशेषत: च॥
पूर्व्वाभिमुखमास्याय अथवा स उदङ्मुख:।
गां पूर्व्वाभिमुखीं कृत्वा वत्ससुत्तरतो न्यसेत्॥
दानकाले तु ये मन्त्रास्तान् पठित्वा समर्पयेत्।
संपूज्य विधिवद्विप्रं सुद्विजाकार्य्यभूषण:॥
स्वशक्त्या दक्षिणां दत्त्वा वित्तशाठ्यविवर्जित:।
दत्त्वा तु दक्षिणां दत्त्वा गत्वा पुण्यसचन्दनाम्॥
धेनुं समर्पयेत्तस्य सुखञ्च न विलोकयेत्।
एकाहं शर्कराहारो ब्राह्मणस्तिदिनं वसेत्॥
सर्व्वपापहरा धेनु: सर्व्वकामप्रदायिनी।
सर्व्वकामसमृद्धस्तु जायते नात्र संशय:॥
दीयमानां प्रशंसन्ति ते यान्ति परमां गतिम्॥
य इदं शृणुयाद्भक्त्या पठते वापि मानव:।
मुच्यते सर्व्वपापेभ्यो विष्णुलोकं स गच्छति॥"
इति वाराहे शर्कराधेनुमाहात्म्यनामाध्याय:॥

शर्करापभा, स्त्री, (शर्करेव प्रभा यस्या:।) जिनानां नरकविशेष:। यथा,—
"रत्नशर्करावालुकापङ्कधूमतमप्रभा।
महातमप्रभा चेत्यधोऽधो नरकभूमय:॥"
इति हैमचन्द्र:॥

शर्करार्व्बुद:, पुं क्ली, (शर्करावदर्व्बुद:।) क्षुद्ररोगविशेष:। तल्लक्षणं यथा,—
"प्राप्य मांसं शिरा: स्नायुं मेद: श्लेष्मा तथानिल:।
ग्रन्थिं करोत्यसौ भिन्नो मधुसर्पिर्व्वसानिभम्॥
सवेदनावमत्यर्थं तत्र दृष्टिं मनोऽनिल:।
मांसं विशोष्य ग्रथितां शर्करां जनयत्यल:॥
दुर्गन्धाक्तमत्यर्थं नानावर्णं तत: शिरा:।
स्रवन्ति सहसा रक्तं तं विन्द्याच्छर्करार्व्बुदम्॥"
शर्करा वालुकातुल्या। तच्चिकित्सा यथा,—
"मेरोरुन्नेदयधानेन साधयेच्छर्करार्व्बुदम्॥"
इति भावप्रकाश:॥

शर्करावान्, [न्] त्रि, (शर्करा विद्यतेऽस्मिन्।"देशे लुबिलचौ च।" ५।२।१०५। इति मतुप्।) कर्परांशयुक्तदेश:। तत्पर्य्याय:। शर्करा २ शर्करिल:३ शार्वर:४। इत्यमर:॥

शर्करासप्तमी, स्त्री, (शर्करायां दानविधायिका सप्तमी।) वैशाखीशुक्ला सप्तमी। तत्र व्रतविधिर्यथा,—
ईश्वर उवाच।
"शर्करासप्तमीं वक्ष्ये तद्व्रतं कल्मषापहाम्।
आयुरारोग्यमैश्वर्य्यं यत्रानन्तं प्रजायते॥
माधवस्य सिते पक्षे सप्तम्यां शुक्लपक्षत:॥
प्रात: स्नात्वा तिलै: शुक्लै: शुक्लमाल्यानुलेपनै:॥
स्थण्डिले पद्ममालिख्य कुङ्कुमेन सकर्णिकम्।
तस्मै नम: सवित्रे तु गन्धपुष्पं निवेदयेत्॥
स्थापयेद्घटकुम्भञ्च शर्करापात्रसंयुतम्।
शुक्लवस्त्रैरलंकृत्य शुक्लमाल्यानुलेपनै:।
सुवर्णाश्वसमायुक्तं मन्त्रेणानेन पूजयेत्॥
विश्ववेदमयो यस्मात् वेदवादीति पठ्यते।
त्वमेवाभ्रतसर्व्वस्वमत: कान्तिं प्रयच्छ मे॥
पद्मगर्भं तत: पीत्वा स्वपेत्तत् पार्श्वत: शिवौ।
सौरसूक्तं स्मरन्नास्ते पुराणश्रवणेन च॥
अहोरात्रे गते पश्चात् घृतस्नां छत्रनैत्यिक:।
तत् सर्व्वं वेदविदुषे ब्राह्मणस्य निवेदयेत्॥
भोजयेच्छक्तितो विप्रान् शर्करापृतपायसै:।
भुञ्जीतातैललवणं स्वयमप्यथ वाग्यत:॥
अनेन विधिना सर्व्वं मासि मासि समाचरेत्॥
संवत्सरान्ते शयनं शर्कराकलसान्वितम्।
सर्व्वोपस्करसंयुक्तं तथैकां गां पयस्विनीम्॥
गृहस्थ भक्तितो दद्यात् समस्तोपस्करान्वितम्।
सहस्रैकाथ निष्काणां कृत्वा दद्यात् घृतेन वा॥
दशभिर्वाथ निष्काणां तदर्द्धेनाथ भक्तित:।
सुवर्णाश्व: प्रदातव्य: पूर्व्ववन्मन्त्रवाचनम्॥
वित्तशाठ्यं न कुर्वीत ब्रुवन् दोषं समश्नुते।
अश्नतं पिबतो वक्त्रात् सूर्य्यस्यास्तविबिम्बवत्॥
निपेतुर्यें तदुत्थामी शालिसूक्ष्मेक्षव: क्षुता:।
शर्करोपरमक्तसालि तुसारोन्दतात्मक:॥
इत्था रवेरत: पुण्या शर्करासप्तकथयो:।
शर्करासप्तमी चैषा वाजपेयफलप्रदा॥
सर्व्वदु:खोपशमनीं पुत्रसन्ततिवर्द्धनीम्।
य: शृणोति परया भक्त्या च परं नाक गच्छति॥
कल्पमेकं वसेत् स्वर्गे ततो याति महत् पदम्॥
इदमनघं शृणोति य: सरेहा
मरिपठनीह दिवाकरस्य लोके।
मतिमपि च ददाति सोऽपि
देवैरमरवधूजनमालया च पूज्य:॥"
इति मात्स्ये ७२ अध्याय:॥

शर्करिक:, त्रि, (शर्करा विद्यते अस्मिन्। "मुञ्जकुशकाशेभ्य इति।" ४।२।८०। इति कुशादित्वात् ठक्।) शर्करावान्। इति सिद्धान्तकौमुदी॥

शर्करिल:, त्रि, (शर्करा विद्यते अस्मिन्। "देशे लुबिलचौ च।" ५।२।१०५। इति इलच्।) शर्करावान्। इत्यमर:॥

शर्करी, स्त्री, छन्दोविशेष:। नदी। मेखला। इति हलायुधधृतमेदिनी॥ जेवरनी। इति धरणि:॥ सुधाञ्जनमेदिनीहैमचन्द्रयो: रेफभूयस्त्वात्मकारमध्यपाठ:। अस्या विवरणं शर्करीशब्दे द्रष्टव्यम्॥

शल्यं

य:।) चूर्णः। रघुः। (यथा, रघुः। ६। ७५।

"शल्यप्रोतं प्रेक्ष्य सकुम्भं सुनिपुत्रं
नापादन्तःशल्य इवासीत् क्षितिपोऽपि॥")

तोमरम्। इति मेदिनी॥ वंशकन्निका। इति विश्वः॥ दुःसहम्। दुर्वाक्यम्। इति शब्दरत्नावली॥ पापम्। इति त्रिकाण्डशेषः॥ अस्मि। यथा। अथ शल्योद्धारविधिः।

"सुनिखितां मन्दिरभूमिमादौ
निखाय तोयावधि यत्नतस्ताम्।
कुर्याद्विशल्यामथवा गृहाणां
ज्ञात्वाथवा प्रश्नवशादिधिज्ञः॥
दूर्वाप्रवालाक्षतपुष्पपाणिः
शुचिः शुचिं देवविदं समेत्य
पृच्छेद्विनीतो मधुरस्वरेण
शल्यस्य तत्त्वं भवने तदीयः॥

ततः प्रश्नादिमो वर्णः सन्ध्यार्यो यत्नतोऽथवा।
क्रमात् पुण्यापगादेव फलानां ज्ञानसिद्धितः॥
प्रणवो धरणी धारिणी करौ च तदनन्तरम्।
न भूते नम इत्येष मन्त्रो वह्निप्रियान्तकः॥"

वह्निप्रिया स्वाहा।

"मन्त्रेणानेन कठिनीमभिमन्त्र्य विभावयेत्।
नवधा सदनस्थैवं तया पश्चादिलेखयेत्॥
व-क-च-त-ट-प: प्र-प-धा नव चैतं प्रश्ना-
क्षराणि जायन्ते।
प्रागादिकोष्ठे नवके वर्णास्ते शल्यमाख्यान्ति॥
प्रश्ने वकारः पुरतो गराग्नि
ब्रवीति शल्यं मरकप्रदायि।
क्षौणीग्रहक्षोरगहेतुरष्टमु-
ग्रहं ककारः खरशल्यमर्मौ॥
याम्यां चकारः श्रवणास्थि वेश्म
प्रभोर्विनाशं प्रकरोति शल्यम्।
रक्षोदिशि स्वास्थिगृहस्थितानां
महद्भयं वक्ति मुनिश्चितं तः॥
यः पाग्निदिग्भस्थि शिशोर्ब्रवीति
शल्यं प्रवासाद्गृहमेव शल्यम्।
ह्रीं वायुकोणे नररूपमस्थि
दारिद्र्यमित्यक्षरषट्कधत्ते॥"

धनदिशि शकारः प्राह विप्रास्थि वित्त-
क्षयस्तस्य पकारो वक्ति शल्यास्थि शर्म।
तदिश कुलविनाशं गोधनानाञ्च हानिं
पितरति गृहगायस्यापि गुह्यस्य देवैः॥
यो मध्यभागे भसितं कपालं
कालायसं चाह कुलक्षयाय।
ब्रह्मादयस्त्र्यम्बकना प्रमाणं
सर्वत्र तथं कथयामि शल्ये॥
रन्ध्रशोधेऽग्नि शल्यं स्याद्वैकरे कटौ।
यद्वामकुक्षेरेषु पुरुषे मध्यवातयोः॥"

देवीपुराणम्।

"पुरुषाधःस्थितं शल्यं न दृष्टं दोषदं भवेत्।
प्राप्तादे दोषदं शल्यं भवेदूर्ध्वञ्चलान्तकम्॥
रक्षारम्भोत्तिकपूति: स्वास्थ्ये यदि जायते।

शल्यः

शल्यं स्वपनयेत्तत्र प्रासादे भवनेऽपि वा॥"

इति ज्योतिस्तत्त्वम्॥ *॥

अन्य शल्यानि यथा,—

"नृपो न हरिसेवको यवधनो न क्षत्रार्पकः
कविर्न सुरजित् कविः श्रुतगुरुर्न सद्देशवः।
गुणी न भगवत्परो रसिकधीर्न क्षमाश्रयः
स न व्रजजनाङ्कुशो जगति यश्च शल्यानि च॥"

इति पाद्मोत्तरखण्डे १०० अध्यायः॥

शल्यः, पुं, (शल गतौ + यः।) मदनवृक्षः। श्वावित्। इत्यमरः॥ (यथा, भागवते। १२।१२।

"इक्षा वराहा महिषर्क्षशल्या
गोपुच्छशालावृकमर्कटाश्च॥")

नृपभेदः। स तु युधिष्ठिरमातुलः। (अयं हि दुर्योधनेन कापट्यात् पक्षीकृतः कुरुपाण्डवयुद्धे दुर्योधनपक्षं समाश्रयत्। यथा, महाभारते। १।२।२१६।

"मद्रराजञ्च राजानमायान्तं पाण्डवान् प्रति।
उपहारैर्वञ्चयित्वा वर्त्मन्येव सुयोधनः॥
वरं तं वरं वव्रे साहाय्यं क्रियतां मम।
शल्यस्त्वमे प्रतिश्रुत्य तथामोहिश्च पाण्डवान्॥"

कर्णार्जुनयोर्द्वैरथयुद्धे शल्यस्य कर्णतेजो भङ्ग-करणे प्रतिज्ञा। यथा, तत्रैव। ५। ८।३७-४५।

युधिष्ठिर उवाच।

"सुष्ठुक्तं ते कृतं राजन्! प्रच्छन्नेनान्तरात्मना।
दुर्योधनस्य यद्वीर त्वया वाचा प्रतिश्रुतम्॥
एकं त्विच्छामि भद्रन्ते क्रियमाणं महीपते।
राजन्नकर्त्तव्यमपि कर्त्तुमर्हसि मातुल॥
मम त्वत्तेजया वीर शृणु विज्ञापयामि ते।
भवानिह रणाराज्ञ वासुदेवसमो युधि॥
कर्णार्जुनाभ्यां संप्राप्ते द्वैरथे राजसत्तम।
कर्णस्य भवता कार्यं सारथ्यं नात्र संशयः॥
तत्र पाल्गोऽर्जुनो राजन् यदि मत्प्रियमिच्छसि।
तेजोवधस्त्वया कार्यः सौतेरस्यास्यथावहः।
अकर्त्तव्यमपि ह्येतत् कर्त्तुमर्हसि मातुल॥

शल्य उवाच।

शृणु पाण्डव भद्रं ते यद्ब्रवीषि दुरासदः।
तेजोवधनिमित्तं मां सूतपुत्रस्य संयुगे॥
अहं तस्य भविष्यामि संग्रामे सारथिर्ध्रुवम्।
वासुदेवेन हि समं नित्यं मां स हि मन्यते॥
तस्मादहं करिष्यामि प्रतीपमधिकं यथा।
ध्रुवं सङ्क्षयिष्यामि योद्धुकामस्य संयुगे॥
यथा च हतदर्पश्च हततेजाश्च पाण्डव।
भविष्यति सुखं क्षत्तुं सत्यमेतद्ब्रवीमि ते॥"

युधिष्ठिरस्तु एवं कृतवान्। एतद्वृत्तान्तस्तु महाभारते शल्यपर्व्वणि १७ अध्याये द्रष्टव्यः।) सीमा। शलाका। इति हेमचन्द्रः। भिल्ल-दृष्यः। मत्स्यभेदः। इति राजनिर्घण्टः॥ *॥

शल्यनिःसरणौषधं यथा,—

"रक्तं लाङ्गलिकामूलं छिन्नस्य तथैव च।
तेन प्रलेपनं लिप्तं शल्यो निःसरति द्रुतम्।
चिरकालप्रविष्टोऽपि तेन मार्गेण शुद्धयति॥"

इति गारुडे १६२ अध्यायः।

शल्यः

शल्यः, पुं, क्ली, शस्त्रविशेषः। शेल इति भाषा। तत्पर्य्यायः। शङ्कुः २। इत्यमरः॥ दीर्घायुधः ३ शूलः ४ कुन्तः ५ विषाङ्कुरः ६। इति त्रिकाण्डशेषः॥

शल्यकः, पुं, (शल्य इव। शल्य + स्वार्थे कन्।) मदनवृक्षः। इति शब्दरत्नावली॥ शल्लकी-जन्तुः। इति राजनिर्घण्टः॥ (यथा, मनुः। ५।१८।

"श्वाविधं शल्यकं गोधां खड्गकूर्म्मशशांस्तथा।
भक्ष्यान् पञ्चनखेष्वाहुरनुष्ट्रांश्चैकतोदतः॥")

शल्यकगन्धः, पुं, (शल्यं तद्वल्लोम कण्टकोऽपि यस्य।) शल्लकी। इति शब्दचन्द्रिका॥

शल्यलोम, [न्] क्ली, (शल्यवत् लोम।) शल्लकी। इति राजनिर्घण्टः॥

शल्यारिः, पुं, (शल्यस्य चरित्तन्नाशकत्वात्।) युधिष्ठिरराजः। इति हेमचन्द्रः॥

शल्क, गत्याम्। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) शल्लकी। इति दुर्गादासः॥ सौत्रधातुरयम्॥

शल्कं, क्ली, त्वक्। इति शब्दरत्नावली॥

शल्कः, पुं, मेकः। इति शब्दरत्नावली॥

शल्लकं, क्ली, (शल्लमेव। स्वार्थे कन्।) त्वक्। इति शब्दरत्नावली॥

शल्लकः, पुं, शोथवृक्षः। इति जटाधरः॥ (शल्लकीजन्तुः। यथा, याज्ञवल्क्ये। १। १७७।

"भक्ष्याः पञ्चनखाः सेधा गोधाकच्छपशल्लकाः।
शशाच्च मत्स्येष्वपि हि सिंहतुण्डकरोहिताः॥")

शल्लकी, स्त्री, पशुविशेषः। शजारु इति वङ्ग-भाषा। साहिल इति हिन्दीभाषा॥ तत्-पर्य्यायः। श्वावित् २ शल्लका ३ शल्यः ४। इति जटाधरः॥ कृकवपादः ५ क्रेदारः ६। इति शब्दरत्नावली॥ शल्यकः ७ शल्यन्तगः ८ वक्षशल्यः ९ विषेशयः १०। अस्या मांस-गुणाः।

"शल्यमांसं गुरु स्निग्धं प्रीतलं कफपित्तजित्॥"

इति राजनिर्घण्टः॥

भावप्रकाशोक्तगुणाः विषेशयशब्दे द्रष्टव्याः॥ वृक्षविशेषः। (यथा, रामायणे। २। ५५।६।

"कोशमात्रं ततो गत्वा नीलं प्रेक्ष्य च काननम्।
शल्लकीवदरीमिश्रं राम वत्स्येह यामुने:।
स पन्थाश्चित्रकूटस्य गतस्य बहुशो मया॥")

तत्पर्य्यायः। गजभक्षा २ सुरभा ३ सुरभिः ४ रसा ५ महेरणा ६ कुलुङ्की ७ क्षादिनी ८। इत्यमरः। गजभक्षा ९ सुरभी १० महेरणा ११ मधुरसा १२ क्षादिनी १३ शिलकी १४ शल्लकी १५। इति भरतः। सुरभीरसा १६ शिल्लकी १७। इति टीकान्तरम्॥ शिल्की १८ शिल्भूमिका १९। इति शब्दरत्नावली। शल्य-स्त्री २० कुन्नी २१। इति जटाधरः॥

शल्लकीद्रवः, पुं, सिल्कः। इति जटाधरः॥

शल्यः, पुं, शालदेशः। म्लेच्छादिकोषः॥

(अग्निः कला । चन्द्रकला । यथा,—
"कमलिनी मलिनी दिवसात्यये
अग्निकला विकला जगदाश्रये ।
इति विचिन्त्य दधे प्रमदामुखम्
भवति विघ्नतमः क्रमणी जनः ।"
इलायुधः ।)

अग्निकान्तः, पुं, (अग्नौ कान्तो यस्य ।) कुसुदम् । इति राजनिर्घण्टः ।

अग्निकान्तः, पुं, (अग्नौ कान्तो यस्य ।) चन्द्रकान्तमणिः । इति राजनिर्घण्टः । यथा, हृदयसंहितायाम् । ८० । ४ ।
"वैदूर्यविपुलकविमलस्फ-
राधमणिस्फटिकाग्निकान्ताः ।")

अग्निभवनः, पुं, (अग्नौ भवे यस्य ।) भल्लाटपुरराजः । यथा,—
"ततः अग्निभवो राजा गृहादाकृष्य पुत्रकान् ।
सुग्रामाया मतिं दुष्टां रमां प्रादात् स कल्कये ।
विघ्नाग्रयूथभूयाय रुधिराक्षय संयुगम् ।
अभ्याकर्षन्नृपैस्तानि भल्लाटं पुरमाययुः ।"
इति कल्किपुराणे २५ अध्यायः ।

अग्निप्रभं, क्ली, (अग्नेः प्रभेव प्रभा यस्य ।) कुसुदम् । इति शब्दमाला । सुक्ता । इति राजनिर्घण्टः । चन्द्रप्रभायुक्ते, त्रि । (चन्द्रप्रभामण्डले च, त्रि । यथा महाभारते । १ । ८६ । ४ ।
"तस्या वासः समुद्भूतं मारुतेन अग्निप्रभम् ।")

अग्निप्रभा स्त्री, (अग्नेः प्रभा ।) ज्योत्स्ना । इति जटाधरः ।

अग्निभूधरः, पुं, (अग्नौ भूधरं यस्य ।) शिवः । इति अग्निशेखरश्चन्द्रदर्शनात् ।

अग्निशिखा, स्त्री, चन्द्रकला । गुडूची । हरमेदः । इति मेदिनी । तद्दृक्षस्य लक्षणादि यथा,—
"स्त्री सी यौ यौ येन भवेतां सम्राट्केशवदेवसा ।
विष्टदेवे ते सुरारे पाण्डुकाख्या कन्याश्री
स्वामपार्थं दुकूलं न भाजते विभसी या ।
राधाभोदस्य मणौ लोका यथा चन्द्रदेवा
किंवाणं स्त्री सारसी यत्ते पुर्वं लोकयोगम् ।"
इति हेमचन्द्रः ।

अग्निशाटिका, स्त्री, पुनर्नवा । इति राजनिर्घण्टः ।

अग्निशेखरः, पुं, (अग्नौ शेखरे यस्य ।) शिवः । इति हेमचन्द्रः । (यथा, कथासरित्सागरे । १ । २० ।
"तस्याः सुतिक्ष्णो दुष्टात्मदुर्मतिरधिरोधः सः ।
दिनं दिनं कारोमीति यथाग्निशेखरः ।")

अग्नेयः । अग्नेयः । ऐरेयः च ऐरेयः । चन्द्रकलायां । ऐरेयः । विष्णुमी । चन्द्रदीप्तः । इति शिवाद्वैतः ।

अग्नी, [इ] पुं, (अग्नेरात्मीयति । अग्नि + क्विप् । अत्वं । यथा,—
"शिवानुचरमात्मानमग्नीं चक्रे शिवद्युतिः ।"
भरतसङ्गहकारः ।
। यथा च शिवोपनिषदि ।

"अग्निनस्तुल्यवंशोऽपि निर्धनः परिभूयते ।")
अर्थकुलाविशेषः । इति हेमचन्द्रः ।

अग्नीत्, क्ली, (अग्नस्य उत्वं । अभिधानात् क्लीबत्वम् ।) अग्नस्य लोम । इत्यमरः ।

अग्नत्, य, (अग्न + वाहुलकादुत् ।) पुनःपुनः । इत्यमरः । (यथा, गीतायाम् । ६ । ३५ ।
"क्षिप्रं भवति धर्मात्मा अग्नच्छान्तिं निगच्छति ।")

अग्नाप, वधे । इति कविकल्पद्रुमः । (भ्वा०-पर०-सक०-सेट् ।) अग्नपति । इति दुर्गादासः ।

अग्नुलः, पुं, क्षिप्तिः । इति शब्दचन्द्रिका । चरकरमूषा इति भाषा ।

अग्नुली, स्त्री, (अग्नुल + गौरादित्वात् ङीष् ।) तिलतण्डुलमाषाभिश्रितयवागूः । इति शब्दचन्द्रिका । कर्परन्यूनम् । इति शब्दरत्नावली । मत्स्यभेदः । सौरी । इति हिन्दी भाषा । अस्या गुणाः ।
'अग्नुली गाहिणी रुक्षा मधुरा तुवरा स्मृता ।'
इति भावप्रकाशः ।
(पिष्टकविशेषः । यथा, महाभारते । १२ । २२८ । ६२ ।
"पायसं क्षसरं मांसमपूपानथ अग्नुलीः ।")

अग्न्यं, क्ली, (अग्न हिंसायाम् + "सख्यशिल्पयज्ञयाच्यरूपपर्यंतस्याः ।" उणा० ३ । २८ । इति यत् निपात्यते ।) बालछत्रम् । इत्यमरः । (यथा, रघुवंशे । २ । २६ ।
"गङ्गाप्रपातान्तविरूढशष्पं
गौरीगुरोर्गह्वरमाविवेश ।")

अग्न, उ वधे । इति कविकल्पद्रुमः । (भ्वा०-पर०-सक० सेट् । क्वापेट् ।) उ, अग्नित्वा अग्नत्वा । इति दुर्गादासः ।

अग्नस, ट ड आक्षिपि । आदूपूर्वकोऽयम् । इति कविकल्पद्रुमः । (भ्वा०-आत्म०-सक०-सेट् ।) ट, आग्नंसते । ड, आग्नंसते । आक्षेपिरित्यर्थः । अग्नंसनम् । इच्छायामित्यर्थे । इति दुर्गादासः ।

अग्नसन, क्ली, (अग्न + ल्युट् ।) यज्ञार्थमशुद्धनम् । इति अग्नसन्नन्दीकायां रामाश्रमः । (अग्नसते इत्यतोऽच अधिकरणे ल्युटि इत्यालापम् । यथा, ऋग्वेदे । १० । ८८ । १३ ।
"अग्नसनं विश्वतस्कार्ये ।" इति तद्भाष्ये सायणः ।)

अग्नुली, स्त्री, (पिष्टकविशेषः । पूरी पिटा इति भाषा । (यथा, महाभारते । ७ । ६२ । ७ ।
"क्षीरेक्षुपूरिकापूपान् पायसमक-
रग्नुलीः ।")

अग्ना गुणाः ।
"अग्नेता मधुरा रूक्षा अग्नुला कफविवर्धिनी ।"
अग्निपुराणिक्षुकुल्यौ अग्ना यथा,—
"अग्निरिक्षुविकारोऽच अग्निरेवेक्षुकुल्यौ ।
अग्नं मांसमधुरं अग्नुला च अग्नपित्तं ।"
इति राजवल्लभः ।

अग्नं क्ली, (अग्नस्य इदं । अग्न + अण् ।) यथा गङ्गाजलमायश्चित्तं यथा । यथा पायसपूपमग्नुलीक्षुरसंयावमिश्रगुडौदनदधिमेधपभवानां भक्षणे कामतश्चाकृतोपवासः । अकामतश्चादर्शम् । चन्द्रियादीनां पादपादशानि: । इति प्रायश्चित्तविवेकः ।

अग्नस, ट र ञ् शब्दे । इति कविकल्पद्रुमः । (भ्वा०-पर०-अक०-सेट् ।) ट, अग्नंसते । गमध्यपाठेऽपि नस्य उपधात्वाभावात् लोपाभावे दन्त्यसकारो वेदेषूपलभ्यते । ञ, अग्नंसि । ट, वैदिकः । इति दुर्गादासः ।

अग्नं, क्ली, (अग्नस् + क्तः ।) कल्याणम् । इत्यमरः । (यथा, महाभारते । १६ । १० । ४२ ।
"लब्धयित्वा पुरोधास्तु यज्ञाग्नं नराधिपम् ।")
शरीरम् । इति त्रिकाण्डशेषः ।

अग्नः, त्रि, कल्याणयुक्तः । स्तुतः । इत्यमरः । प्रशस्तः । इति मेदिनी । (यथा, भागवते । ३ । २८ । १५ ।
"क्रियायोगेन अग्नेन नातिहिंसेन नित्यशः ।"
निघनः । यथा, महाभारते । ३ । ८० । ३ ।
"अकाभिषेके सुमहद्धनुर्लक्षदक्षिणम् ।
प्रयज्य दानवः अग्नाश्वमेधेन च प्रभो ।")

अग्नकं, क्ली, अङ्गुलित्राणम् । यथा,—
"अङ्गुलित्रं अग्नकञ्च तथा चाङ्गुष्ठरक्षणम् ।"
इति शब्दरत्नावली ।

अग्नकेशाग्रः, त्रि, (अग्नाः केशा यस्य सः । अग्नकेशाग्रयुक्तः । इति शब्दरत्नावली ।

अग्नं, क्ली, (अग्नते हिंसते अनेन । "अग्निशिमिदिग्रिभ्यः नः ।" उणा० ४ । १६३ । इति नः । यद्वा, "दाम्नीशसयुयुजेति ।" ३ । २ । १८० । इति क्यून् ।) लोहम् । अयस् । इत्यमरः । अग्नाश्वमेधकृत्या सुक्तैरित्यादिदर्शनात् अग्नाश्वयोः कर्त्तृविशेषमाह । येन करणेन कृष्यते सत् अग्नं सङ्गादि । येन लिखित्वा यज्यते तदग्नं काष्ठादि । इति भट्टोजिदीक्षा भरतः । तत्पर्यायः ।
"अग्नं अग्नं प्रहरणायुधो दैत्यिदारणः ।"
इति शब्दरत्नावली ।
"एकैकमग्नं अग्नाश्च देवैर्मुक्तं सहस्रशः ।
विष्टदेहं लोकयेत्वी जघान मधुसूदनः ।"
इति विष्णुपुराणे ५ अंशे ३० अध्यायः ।
अग्नं सङ्गामिमलितम् । अग्नं तदिदरत्नु । इति भट्टोजिः । ३ । राक्षो अग्नाश्वयोः यथा,—
"यज्ञयुक्ते पाण्डुपुत्रे अग्नके युद्धकारिते ।
अग्नाश्वार्थो विदर्भेभिः कृष्णश्च विनिवर्तते ।"
महाभारतिनिरुक्तस्य अग्नस्य यथा,—
"आयतनाविनिवासः सत्यं प्रतिज्ञासना ।
राज्ञः स्वादानुधाकारे दयः कर्मसु कौशलः ।"
इति माघे १५८ आश्वासः ।
अग्नकिलिका यथा । अग्नाशोऽशोऽग्नकरणांशमात्रं आत्मानम् । विशेषं स्त्री । पूर्वकर्मे अग्नाकरणे अग्नाकृत्यमिति । शब्दमालायां अनुदेशाम् । अधिकं आत्मे अग्नकर्मे-

प्राधान्यात् शस्त्रकर्मैव तावत् पूर्व्वमुपदेक्ष्याम-स्तत्सम्भारांश्च। तच्च शस्त्रकर्म्माष्टविधम्। तद्यथा। छेद्यं भेद्यं लेख्यं वेध्यमेष्यमाहार्य्यं विस्राव्यं सीव्यमिति ॥ * ॥ अतोऽन्यतमं कर्म्म चिकीर्षता वैद्येन पूर्व्वमेवोपकल्पयितव्यानि। तद्यथा। यत्नशस्त्रधाराग्निशलाकाश्चङ्गुलुञ्ज-जलौकालाबूक्षाम्रबीजपिचुप्रोत-स्नेहपट्टमधु-घृतदशाप्रयस्तैलतर्पणकाषायालेपनकल्कव्यञ्जन-प्रीतोष्णोदककटाहादीनि परिकर्म्मिणश्च क्षिप्राः स्थिरा बलवन्तः। ततः प्रशस्तेषु तिथि-करणमुहूर्त्तनक्षत्रेषु इष्टयज्ञतानपानरक्षोघ्नं विप्रान् भिषग्ब्राह्मणैर्वाचयित्वा कृतबलिमङ्गलस्वस्ति-वाचनं खलु सुस्नातं प्राङ्मुखमातुरमुपवेश्य यन्त्रयित्वा प्रत्यङ्मुखो वैद्यो मर्म्मशिरांसायु-सन्धिस्नायुधमनीः परिहरन्नुजोर्म्म शस्त्रं निर्दि-श्यादापूयदर्शनात् यतश्चैवापहरेच्छस्त्रमाशु च। मध्यमेऽपि च पाणेर्द्वाङ्गुष्ठं बाङ्गुष्ठं वा शस्त्र-पदमुत्तमम्। तत्रायतो विशालः समः सुविभक्त इति गणगुणाः। भवतश्चात्र।

"आयतस्य विशालस्य सुविभक्तोऽग्रिमाश्रयः। प्राप्तकालक्षतस्यापि व्रणः कर्म्मणि शस्यते ॥ शौर्य्यमात्मक्रिया शस्त्रतैक्ष्ण्यकल्पश्चैवेषु। असंमोहश्च वैद्यस्य शस्त्रकर्म्मणि शस्यते ॥"

शस्त्रेण वा व्रणेगाशुग्यमाणेनान्तरावृद्ध्यावेक्ष्य व्रणान् व्रणं कुर्य्यात्। भवन्ति चात्र।

"यतो यतो गतिं विद्वादृजुवक्रो यत्र यत्र च। तत्र तत्र व्रणं कुर्य्यादृथा दोषो न तिष्ठति ॥"

तत्र भ्रूललाटशङ्खललाटाक्षिपुटोष्ठदन्तवेष्टकचा-नुक्षिबाहुकोष्ठ तिर्य्यक्छेद उक्तः ॥

"चन्द्रमण्डलवत्क्षेद्यान् पाणिपादेषु कारयेत्। अर्द्धचन्द्राकृतींश्चापि गुदे मेढ्रे च बुद्धिमान् ॥"

अन्यथा तु शिरास्नायुच्छेदनादतिमात्रं वेदना शिराद्रव्यसंरोधो मांसक्लेदो प्रादुर्भावश्चेति। भृङ्गभेदिराग्रीवाश्वदंष्ट्रीभगन्दरसुखरोगेष्वशस्त्र-यतः कर्म्म कुर्व्वीत। ततः शस्त्रमवतार्य्य शीता-भिरद्भिरातुरमाश्वास्य वमनात् परिपीड्या-क्षुण्णा व्रणमभिमृद्य प्रक्षाल्य कषायेण क्षौद्रे-णोदकमादाय तिलकल्कमधुसर्पिःप्रगाढ़ामौषध-युक्तां वर्त्तिं प्रतिदध्यात्। ततः कल्केनाच्छाद्य नातिस्निग्धां नातिरूक्षां नातिघनां कवलिकां दत्त्वा पट्टबन्धेन यथोक्तादेनारोग्यैर्धूपैर्धूपयेद-क्षाक्षेप मनो रक्षां कुर्व्वीत। ततो गुग्गुलु-गुरुसर्ज्जरसयवागोरसर्षपचूर्णैर्वलवन्निम्नपत्रया मिश्रैराज्यवल्लीभिर्धूपयेत्। आज्यपूर्णेन चास्य प्राणान् समाश्वासयेत्। उदकुम्भाधारो गृहीत्वा प्रोक्षयन् रक्षाकर्म्म कुर्य्याच्चक्ष्यामः ॥ * ॥

"क्षयाणां प्रतिघातार्थं तथा रक्षोभयस्य च। रक्षाकर्म्म करिष्यामि प्रजा तदनुमन्यताम् ॥ नागाः पिशाचा गन्धर्व्वाः पितरो यक्षराक्षसाः। अभिभवन्ति ये ये वां ब्रह्मादा ग्रन्तु तान् सदा ॥ दृष्टिश्रामन्तरीक्षे च ये चरन्ति निशाचराः। दिशु वास्तुशिनाश्च भूतलं ते नमस्कृताः।

पान्तु त्वां मुनयो ब्राह्मा दिवा राजर्षयस्तथा। पर्व्वताश्चैव नद्यश्च सर्व्वाः सर्व्वेऽपि सागराः ॥ वायुर्रक्षतु ते जिह्वां प्राणान् वायुस्तथैव च ॥ सोमो वानमपानं ते पर्य्यण्यः परिरक्षतु ॥ उदानं विद्युतः पान्तु समानं स्तनयित्नवः। बलमिन्द्रो बलपतिर्मनुर्मन्यो मतिं तथा ॥ कामांस्ते पान्तु गन्धर्व्वाः सत्त्वमिन्द्रोऽभिरक्षतु। प्रज्ञां ते वरुणो राजा वसुधा नाभिमण्डलम् ॥ चक्षुः सूर्य्यो दिशः श्रोत्रे चन्द्रमाः पातु ते मनः। नक्षत्राणि सदा रूपं छायां पान्तु निशास्तव ॥ रेतस्याप्याययन्त्वापो रोमाण्योषधयस्तथा। आकाशं स्नानि ते पातु देहं तव वसुन्धरा ॥ वैश्वानरः शिरः पातु विष्णुस्त्व पराक्रमम्। पौरुषं पुरुषश्रेष्ठो ब्रह्मात्मानं भ्रुवौ भ्रुवौ ॥ एता देवे विशेषेण तव नित्या हि देवताः। एतास्त्वां सततं पान्तु दीर्घमायुरवाप्नुहि ॥ स्वस्ति ते भगवान् ब्रह्मा स्वस्ति देवाश्च कुर्व्व-ताम्। स्वस्ति ते चन्द्रसूर्य्यौ च स्वस्ति नारदपर्व्वतौ ॥ स्वस्त्यस्त्वेव वायुश्च स्वस्ति देवाः सचेन्द्रगाः। पितामहश्च ता रक्षा स्वस्त्यायुर्व्वर्द्धतां तव। इत्येवमुक्ते प्रशाम्यन्तु सदा भव गतव्यथः ॥"

इति स्नाहा ॥

"एतैश्चेदात्मकर्म्मज्ञैः ज्ञात्वा व्याधिविनाशनैः। मयैवं कृतरक्षस्त्वं दीर्घमायुरवाप्नुहि ॥" * ॥

ततः कृतरक्षमातुरमागारं प्रवेश्याचारिक-माहिशेत्। ततस्तत्रीयेऽहनि विसृष्टेवं वक्षी-याद्रक्षपट्टेन। न चैनं त्वरमाणोऽपरेद्युर्मोचये-त्। द्वितीयदिवसे परिमोचयाद्विग्धचितो व्रणश्चिरादुपसंरोहति तीव्ररुजश्च भवति। अत ऊर्द्धं दोषकालबलादीन्वेक्ष्य कषायालेपनबन्धा-हाराचारान् विदध्यात्। न चैनं त्वरमाणः सान्तर्दोषं रोपयेत् न रूक्षेणाप्यपचारेणाभ्य-न्तरसंस्रवं ज्ञात्वा भूयोऽपि विकरोति। भवन्ति चात्र।

"नक्षादन्तर्व्वहिश्चैव सुगुप्तं रोपयेद्व्रणम्। रूक्षैरप्यौषधायासमद्यवायादीन् विवर्जयेत् ॥ हर्षं क्रोधं भयञ्चापि यावदास्थैर्य्यसम्भवात्। मासान् षट् सप्त वा नृणां विधिरेष प्रशस्यते ॥ हेमन्ते शिशिरे चैव वसन्ते चापि मोक्षयेत्। चारयात् द्वारहाक्षरदृग्रीवर्षासपि च बुद्धि-मान् ॥

व्यतिपातेषु रोगेषु नेक्षेद्विधिमिमं भिषक्। प्रदीप्तागारवच्छीघ्रं तत्र कुर्य्यात् प्रतिक्रियाम् ॥

या वेदना शस्त्रनिपातजाता
तीव्रा शरीरं प्रदुनोति यत्नोः।
हृतेन सा शान्तिमुपैति क्षिप्रा
कोष्णेन यष्टीमधुकान्वितेन ॥"

इति सुश्रुते ५ अध्यायः

शस्त्रः, पुं, (शस्त्रेणेनेति। शस्त्र वधे + "अभिषि शिदिशमिभ्यः क्रः।" उणा० ४।१६३। इति क्रः। यद्वा, दाम्नीशस्त्रयुसूनेति।" ३। २। १८२।

इति कृत्।) खड्गः। यथा,—

"रिष्टः खड्गस्तरवारिः शस्त्रो भद्रात्मजश्च सः ॥"

इति त्रिकाण्डशेषः ॥

शस्त्रकं, क्ली, (शस्त्रमेव। स्वार्थे कन्।) लोहम्। इत्यमरः ॥

शस्त्रकोशतरुः, पुं, (शस्त्रस्य खड्गस्य कोश इव तरुः। महापिण्डीतरुः। इति राजनिर्घण्टः ॥

शस्त्रजीवी, [न्] (शस्त्रेण जीवतीति। जीव + णिनिः।) शस्त्राजीवः। इति हेमचन्द्रः ॥ (यथा, हरिवंशे। १७। २४।

"रविणेव सिते विजिते
गणसुखाः शस्त्रजीविनः क्षत्रम् ॥")

शस्त्रधारणजीवकः, त्रि, (शस्त्रधारणेन जीव-तीति। जीव + ण्वुल्।) शस्त्राजीवः। इति शब्दरत्नावली ॥

शस्त्रपाणिः, त्रि, (शस्त्रं पाणौ यस्य।) शस्त्र-हस्तः। यथा,—

"उल्काहस्तोऽग्निदो ज्ञेयः शस्त्रपाणिश्च घातकः।
केशाकेशिगृहीतश्च युगपत् पारदारिकः ॥"

इति व्यवहारतत्त्वम्

अपि च।

"अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः।
क्षेत्रदारापहारी च षडेते आततायिनः ॥"

इति प्रायश्चित्तविवेकः ॥

शस्त्रभृत्, त्रि, शस्त्रधारी। शस्त्रं बिभर्त्तीति। भृधातोः क्विप्प्रत्ययेन निष्पन्नमेतत् ॥ (यथा, रघुः। २। ४०।

"शस्त्रेण रक्ष्यं यदशक्यरक्षं
न तद्यशः शस्त्रभृतां क्षिणोति ॥")

शस्त्रमार्जः, पुं, (शस्त्राणि मार्ष्टीति। मृज + अण्।) शस्त्रमार्जनकर्म्मा। सिकलगर इति भाषा। तत्पर्य्यायः। असिधावकः २। इत्यमरः ॥ शस्त्र-मार्जः ३ असिधावः ४। इति शब्दरत्नावली ॥ प्राणाजीवः ५ भर्मसक्तः ६। इति हेम-चन्द्रः ॥

शस्त्रहतः, त्रि, (शस्त्रेण हतः।) शस्त्राघातेन मृतः। तस्याशौचादि यथा। व्यासः।

"व्रतेन म्रियते यस्तु तस्याशौचं भवेद्दिवा।
आसप्ताहात् त्रिरात्रं स्यात् दशरात्रमतःपरम् ॥
शस्त्राघाते व्यहादूर्द्धं यदि कश्चित् प्रमीयते।
अशौचं प्राकृतं तत्र सर्व्ववर्णेषु निश्चयः ॥"

अत्र शस्त्रघातमहं व्रततरशस्त्रघातपरं पारि-भाषिकशस्त्रघातपरमपि। यथा, देवीपुराणे।

"पश्चिमस्त्यग्नेर्यै तु दंष्ट्रिदन्तिनखैर्हताः।
पतनानशनग्रामैर्व्वेधाभिविषबन्धनैः।
मृता जलप्रवेशेन ते वै शस्त्रहताः स्मृताः ॥"

अन्यथा व्रतं विना पतनादिभिर्विलम्बमृतानां दिनग्रहणे अनध्यवसायः स्यात्। न च शास्त्रीय-व्यवहारोऽन्तरङ्गत्वेन पारिभाषिकस्यैव युक्त्य-मिति वाच्यं आहि पारिभाषिकापारिभाषिक-

श्रस्तघातप्रकरणवदत्रापि तथायुक्तत्वात् पारिभाषिकत्वादेव न प्रकरणनियमः ॥ * ॥
"क्रोधात् प्रायं विषं वह्निं श्रस्तमुद्बन्धनं जलम्।
गिरिवृक्षपपातञ्च ये कुर्व्वन्ति नराधमाः ॥
महापातकिनो ये च पतितास्ते प्रकीर्त्तिताः।
पतितानां न दाहः स्यान्नान्वेहिनांसिसत्तमाः ॥
न चाशुपातः पिण्डो वा कार्य्यं आह्नादिकं क्वचित्।
एतानि पतितानाञ्च यः करोति विमोहितः।
तप्तकृच्छ्रत्रयेणैव तस्य शुद्धिर्न चान्यथा ॥" * ॥
तदितरत्र भरीचिः।
"विषश्रस्तघ्नपदाहितिर्य्यग्ब्राह्मणघातिनाम्।
चतुर्दश्यां क्रिया कार्य्या अन्येषान्तु विगर्हिता ॥"
इति शुद्धितत्त्वम् ॥

श्रस्तहतचतुर्दशी, स्त्री, (श्रस्तहतानां चतुर्दशी। वृद्धादिहतानां आह्नादिकर्म्मणि प्रशस्ततयास्तत्वम्।) गौणाश्विनकृष्णचतुर्दशी। गौणकार्त्तिककृष्णचतुर्दशी च। यथा, लिङ्गपुराणम्।
"दीपमालां तथा कृष्णचतुर्दश्यां शिवालये।
चतुष्पथे च नद्यान्तु चत्वरेषु गृहेषु च।
एकविंशकुलोपेतो वसेच्छिवपुरे नरः ॥"
अत्र श्रस्तहतानामुल्कादानं अन्येषान्तु दर्शे।
इति संवत्सरकौमुदी ॥ * ॥ अन्यच्च। अथ श्रस्तहतचतुर्दशी तत्र विष्णुः। वृद्धहतानां आह्नकर्म्मणि चतुर्दशी प्रशस्ता। वृद्धहतागामेवेति न नियमार्थमिदम्। ब्रह्मपुराणे।
"प्रायोऽनशनश्रस्तघ्नविधानादुद्बन्धिनान्तथा।
चतुर्दश्यान्तु कर्त्तव्यं लघ्वर्थमिति निश्चयः ॥"
प्रायो महापथगमनम्। वायुपुराणे।
"युवानस्तु मृते यस्य स्वयञ्जेयान्तु दापयेत्।
श्रस्तघ्न तु हता ये वै तेषां श्राद्धचतुर्दशीम् ॥"
युवान एव पित्राद्यो हता इत्यर्थः। मरीचिः।
"विषश्रस्तघ्नपदाहितिर्य्यग्ब्राह्मणघातिनाम्।
चतुर्दश्यां क्रिया कार्य्या अन्येषान्तु विगर्हिता ॥"
ब्राह्मणहतत्वानोऽस्त्रादीति ब्राह्मणघाती ये च ये ब्राह्मणैर्हता इति ब्रह्मपुराणवचनात्। न तु हतब्राह्मणघातः तस्य पतितत्वात् अन्येषामश्रस्ताद्यहतानाम्। एतच्च श्रस्तहतश्राद्धं विष्णुादिभिः सामान्यप्रकरणलिखनात् सकलकृष्णपक्षसाधारणं पित्रादीनामेव पार्व्वणविधिनिरूपणात् पार्व्वणविधिना कार्य्यम्।
"सपिण्डीकरणादूर्द्धं यत्र यत्र प्रदीयते।
तत्र तत्र त्रयं कार्य्यादुर्ज्जयित्वा गतादिनं ॥"
इति श्रस्तवचनाच्च ॥ * ॥
नन्वन्येषान्तु विगर्हिता इति श्रवणात्। कथं चैपुरुषिकपार्व्वणविधिः। न यस्य पुरुषायुषं एव श्रस्तहतानान्तस्य चैपुरुषिकविधिरुपपद्यते। एवं यस्य वा श्रस्तहतत्वादेको वा तेनापि द्वैपुरुषिकेणैपुरुषिकं पार्व्वणं कर्त्तव्यम्। यथा, मनुः।
"पिता यस्य तु हतः स्यात् द्वौपेनापि पितामहः।
पितुः पितामहश्चैव द्वौपेयेत् प्रपितामहम् ॥"
तथा हारीतः।
"पितामहेऽपि जीवे वै पितर्य्येव समापयेत् ॥"
नन्वेकोद्दिष्टमेव श्रूयते। यथा श्रस्तः।
"सपिण्डीकरणादूर्द्धं हते क्षणचतुर्दशीम्।
प्रतिसंवत्सरादत्यदेकोद्दिष्टं न कारयेत् ॥"
यमः।
"सपिण्डीकरणादूर्द्धं यत् पित्रोश्च प्रदीयते।
एकोद्दिष्टविधानेन तत् कार्य्यं श्रस्तघातिने ॥"
भविष्यपुराणे।
"समत्वमागतस्यापि पितुः श्रस्तहतस्य च।
चतुर्दश्यान्तु कर्त्तव्यमेकोद्दिष्टं न पार्व्वणम् ॥
चतुर्दश्यान्तु यच्छ्राद्धं सपिण्डीकरणे हते।
एकोद्दिष्टविधानेन तत्कार्य्यं श्रस्तघातिने ॥" * ॥
उच्यते। एषां क्वचनानामस्मूलकत्वात् समूलत्वेऽपि पार्व्वणाप्रशस्तविषयाण्येतानि विष्णुादिवचनेषु पार्व्वणावगतेः। भ्रात्रादीनान्तु श्रस्तहतानामेकोद्दिष्टविधिना कार्य्यम्।
"अपुत्रा ये मृताः केचित् स्त्रियो वा पुरुषास्तथा ये।
तेषामपि च दैवं स्यादेकोद्दिष्टं न पार्व्वणम् ॥"
इत्यापस्तम्बवचनेन पार्व्वणनिषेधात्। तच्च न सकलकृष्णपक्षसाधारणं विष्णुादिवचनेषु आह्नश्राद्धस्य पार्व्वणपरत्वोक्तेः। किन्त्वाश्विनमासीयकृष्णपक्षविषयम्। ब्रह्मपुराणे प्रायोऽनशनेत्यादिना सकलकृष्णपक्षसाधारणं आह्नमभिधाय आश्विने। तर्पणीयाचतुर्दश्यां लुप्तपिण्डोदकक्रिया। इति यत् पुनरभिधानं तच्छ्रस्तहतभ्रात्रादिविषयं अतएव तत्रैवामावास्यायां पितरः पूज्या नान्दीमुखा पीति वृद्धप्रपितामहादीनामपि आह्नं दर्शितम्। एवञ्च चतुर्दश्यामश्रस्तहतआह्ननिन्दा आश्विनमासीयमघश्राद्धादिकृष्णपक्षतिरिक्तसामान्यकृष्णपक्षविहितआह्नकाम्यश्राद्धविषया प्रकरणभेदेन आह्नकर्म्मभेदात् सामान्यविशेषन्यायात् इतरथा चतुर्दश्यां संक्रान्तिश्राद्धेऽश्रस्तहतनिन्दा स्यात्। अतएव छागपक्षे दशम्यादौ वर्ज्जयित्वा चतुर्दशीमिति मनुवचनेऽपि चतुर्दशीवर्ज्जनं मघश्राद्धादिव्यतिरिक्तआह्नविषयम् ॥ * ॥ नन्वश्रस्तादिहतानां आह्ननिषेधः श्रूयते। तथा छागलेयः।
"श्रस्त्रविप्लुतनाथ यद्भिर्दंष्ट्रिसरीसृपैः।
आत्मनश्चाग्निनाथैव श्राद्धमेषां न कारयेत् ॥"
सत्यं वृद्धिपूर्व्वहतानामेव। प्रमादहतानान्तु श्राद्धादिकमाधाङ्गिराः।
"अथ कश्चित् प्रमादेन म्रियतेऽम्बुदकादिभिः।
अशौचं तस्य कर्त्तव्यं कर्त्तव्या चोदकक्रिया ॥"
अबुद्धिपूर्व्वमपि श्रस्त्रादिभिः क्रीड़ां कुर्व्वतां स्नानं न कर्त्तव्यम्। यथा, ब्रह्मपुराणम्।
"यद्भिर्दंष्ट्रिनखिव्यालविषवह्निक्रिया जले।
आदरात् परिहर्त्तव्यः क्रूर्व्वेण क्रीड़ां स्मरतु यः।"
परिहर्त्तव्यः आह्नादौ श्राद्धानुमत्या बुद्धिपूर्व्वहतानामपि कर्त्तव्यम्। यथाह वृद्धगार्ग्यः।

"वृद्धः शौचस्थतेनुर्भः प्रत्याख्यातभिषक्क्रियः।
आत्मानं घातयेद्यस्तु श्रस्त्रस्नानशनादिभिः ॥
अस्य चिराच्छमशौचं द्वितीये त्वस्थिसञ्चयः।
तृतीये तूदकं कृत्वा चतुर्थं आह्नमिष्यते ॥"
एवं क्रीड़ायतिरेकेणाबुद्धिपूर्व्वं हताः श्राद्धानुमत्या बुद्धिपूर्व्वकृता अपि आह्नार्हाः कथं लुप्तपिण्डोदकत्वमिति चेन् गौणमिति ब्रूमः। बुद्धिपूर्व्वे पिण्डोदकक्रियालोपादिति। इति आह्निकविवेकः ॥

श्रस्त्रहस्तः, पुं, श्रस्त्रं हस्ते यस्य सः। इति श्रस्त्रपाणिशब्ददर्शनात् ॥

श्रस्त्राजीवः, त्रि, (श्रस्त्रेण आजीवतीति। आ+जीव+अच्।) असिजीवी। तत्पर्य्यायः। काण्डपृष्ठः २ आयुधीयः ३ आयुधिकः ४। इत्यमरः ॥ काण्डस्पृक् ५। इति तट्टीका ॥ काण्डपृष्ठः ६ श्रस्त्रधारणजीवकः ७। इति श्रब्दरत्नावली ॥

श्रस्त्राभ्यासः, पुं, (श्रस्त्राणां अभ्यासः।) अस्त्रशिक्षा। तत्पर्य्यायः। खरली २। इति त्रिकाण्डशेषः ॥

श्रस्त्रायसं, क्ली, (श्रस्त्रार्थं यदायसम्।) लोहम्। इति राजनिर्घण्टः ॥

श्रस्त्री, स्त्री, (श्रस्त्र+कृत्। स्त्रियां ङीप्।) छुरिका। इति मेदिनी ॥ (यथा, माघे। ४।४४।
"श्रस्त्रीश्यामैरंशुभिरायुद्यतमन्-
स्यायाद्यच्छति नीली सलिलस्य ॥")

श्रस्त्री, [न्] त्रि, श्रस्त्रविशिष्टः। अस्त्रधारी। श्रस्त्रश्रब्दादिनिप्रत्ययेन निष्पन्नमेतत् ॥ (यथा, कामन्दकीयनीतिसारे। ७। ३७।
"आप्तश्रस्त्रानुगाच्च प्रविशेच्च
सङ्कटेषु गहनेषु न तिष्ठेत् ॥")

श्रस्थं, क्ली, बालतृणम्। इत्यमरटीकायां भरतः ॥ प्रतिभाहार्य्यः। इति जटाधरः ॥

श्रस्यं, क्ली, (श्रस+"तॄफलभजत्रपश्च यतीति।" ३।१।६७। इत्यस्य वार्त्तिकोक्त्या यत्।) वृक्षादिनिष्पन्नम्। तत्पर्य्यायः। फलम् २। इत्यमरः ॥ वृक्षाणां लतादीनाञ्च फलं निष्पन्नत्वमागतं आम्रादिकं श्रस्यं सस्यपदवाच्यं इत्यन्वयः। फलति निष्पद्यते फलं फलनिष्पत्तौ पचाद्यच्। सस्यि स्वपिति सस्यं सस गु र स्वप्ने क्यो रिति यः सस्यं हिदन्तयम्। ग्राम्यकृषिकषायुवन्य एव नीरसस्यमनोहरो देश इति नलदमयन्तीशेषात्।
"अंसनं सीवकं सस्यं श्रस्यं शाखा च साध्वसम् ॥"
इत्युणादिवृत्तेश्च ॥ तालश्यादिदन्त्यान्तश्च तथा हि अनसु क्षिप्तौ धातुत्वोरित्यस्मात् छ प्रत्यये सति यपि यत् श्रस्यं तत् क्रियावाच्येऽपि फलेऽपि दृश्यते। तालश्या अपि दन्त्यान्तश्च श्रस्यशूकरपांशुप्रत्ययभेदः। इति तट्टीकायां भरतः ॥ * ॥ चैत्रस्यधान्यादि। यथा,—
"श्रस्यं चैत्रगतं प्राहुः सतुषं धान्यमुच्यते।

श्यामं विद्युदमित्युक्तं खिन्नमन्नमुदाहृतम् ॥"
इति स्मृतिः ॥

श्यान्यश्यानि यथा,—
"व्रीहयश्च यवाश्चैव गोधूमाश्चाणवल्लिकाः ।
प्रियङ्गवो मुद्गाश्च कोरदूषाः सचीनकाः ॥"
उदाराः दीर्घशूकाः ।
"माषा सुद्गा मसूराश्च निष्पावाः सकुलत्थकाः ।
आढकश्चणकाश्चैव शाकाः सप्तदश स्मृताः ॥
इत्येता ओषधीनान्तु श्यान्यां जातयो मुने ॥"
श्यान्यारण्यश्यानि यथा,—
"ओषधयो यज्ञियाश्चैव श्यान्यारण्याश्चतुर्दश ।
व्रीहयश्च यवा माषा गोधूमाश्चाणवल्लिकाः ॥
प्रियङ्गुसप्तमा ह्येते अष्टमास्तु कुलत्थकाः ।
श्यामाकाश्चैव नीवारा जर्त्तिलाः सगवेधुकाः ॥
तथा वेणुयवाः प्रोक्तास्तथा मर्कटका मुने ।
श्यान्यारण्याः स्मृता ह्येता ओषध्यस्तु चतुर्दश ।"
इति विष्णुपुराणे १ अंशे ६ अध्यायः ॥*॥
नवश्यश्यभोजनपक्षाणि यथा,—
"अनुराधा मृगशिरो रेवती चोत्तराश्चयम् ।
हस्ता चित्रा मघा पुष्या श्रवणा च पुनर्व्वसुः ॥
रोहिणी नवश्यान्नादिनवह्यान्नादिषु ।
प्रशस्तं नवपीठादिसम्भोगं ग्रहविद्वदेत् ॥"*॥
नवश्यश्राद्धादिकालो यथा,—
"प्ररूढसस्यो: कैश्चिन्नवश्यं प्रचक्षते ।
धान्यपाकवशादन्ये श्यामाको वनिनः स्मृतः ॥"
इत्यनेन प्ररूढसस्यविहितनवश्येष्टेः ।
"श्यामाकैर्नीवृद्भिश्चैव यवैरन्योन्यकालतः ।
प्राग्वयं युज्यतेऽवश्यं न त्वाग्रयणकालयः ॥"
इति कालान्तरदर्शनात् आद्धेऽपि तथा ।
आग्रयणं नवश्येष्टिः ।
"दृष्टिके शुक्लपक्षे तु नवान्नं श्यस्यते बुधैः ।
अपरे क्रियमाणं हि धनुष्येव हुतं भवेत् ॥
धनुषि यत् हुतं श्राद्धं मृगनेत्रासु राजिषु ।
पितरस्तन्न गृह्णन्ति नवान्नामिषकाङ्क्षिणः ॥"
अपरे कृष्णपक्षे ।
"पौषे चैत्रे कृष्णपक्षे नवान्नं नाचरेद्बुधः ।
भवेत् जन्मान्तरे रोगी पितॄणां नोपतिष्ठते ॥
यद्यपि व्रीहिपाके च यवपाके च पार्थिव ।
न तावद्यौ महाराज विना श्राद्धं कथञ्चन ॥"
इति विष्णुधर्म्मोत्तरवचने श्राद्धं प्रति व्रीहियवपाकयोर्निमित्तत्वं प्रतीयते । तथापि नवोदके नवान्ने च इति प्रातातपवचने पूर्व्वोक्तबहुषु वचनेषु च नवान्नस्य श्रुतेर्नवान्नत्वेनैवोभयसाधारण्यं निमित्तं लाघवात् । अभिलाषवाद्ये नवान्नागमनिमित्तमिति नियोज्यम् । न तु यवान्नागमादि । दृष्टिके शुक्लपक्षे च इति तु धनुरादिमर्य्युदस्तेतरगौणकालमध्ये दृष्टिकस्य प्राशस्त्यमात्रार्थं न तु श्राद्धान्तरार्थमिति । इति मलमासतत्त्वम् ॥ अन्यत् नवान्नशब्दे द्रष्टव्यम् ॥

श्यध्वंसी, [न्] पुं, (श्यानि ध्वंसयतीति । ध्वंस + णिनिः ।) तुम्बुरुवृक्षः । इति शब्दचन्द्रिका ॥
श्यनाग्नके, त्रि ॥

श्यमञ्जरी, स्त्री, (श्यस्य मञ्जरी ।) अभिनवनिर्गतधान्यादिशीर्षकम् । शीष इति भाषा ॥ तत्पर्य्यायः । कणिशम् २ । इत्यमरः ॥ कणिशः ३ कणिशम् ४ । इति तट्टीका ॥

श्यमूकं, क्ली, (श्यस्य शूकम् ।) श्यस्य तीक्ष्णाग्रम् । शुडा इति भाषा । तत्पर्य्यायः । किंशारुः २ । इत्यमरः ॥

श्यम्बरः, पुं, वालदृचः । इत्यमरः ॥

श्यात्, त्रि, श्यभक्षकः । श्यं क्षुणत्ति इत्यर्थे अदधातोः कर्त्तरि क्विप्प्रत्ययेन निष्पन्नमेतत् । इति सुग्धबोधव्याकरणम् ॥

श्यावः, पुं, क्षुद्रश्यमीवृक्षः । इति शब्दरत्नावली ॥

श्यांशुपः, पुं, शिंशपाया विकारश्चमसः । शिंशपाशब्दादण्प्रत्यये इकारस्य आडादेशेन निष्पन्नमेतत् । इति सिद्धान्तकौमुदी ॥

श्यांशुपायनः, पुं, मुनिविशेषः । इति पुराणम् ॥ (यथा, विष्णुपुराणे । ३ । ६ । १६ ।
"काश्यपः संहिताकर्त्ता सावर्णिः श्यांशुपायनः ॥")

श्याकं, क्ली, पुं, (श्यते भोक्तुमिति । श्यक + घञ् ।) पत्रपुष्पादि । साग इति हिन्दीभाषा । तत्पर्य्यायः । हरितकम् २ शिग्रु: ३ । इत्यमरः ॥ शिग्रु: ४ । इति तट्टीका ॥ हारितकम् ५ । इति शब्दरत्नावली ॥ अथ श्याकवर्गः । तत्र श्याकनिरूपणम् ।
"पत्रं पुष्पं फलं नालं कन्दं संखेदजं तथा ।
श्याकं षड्विधमुद्दिष्टं गुरु विद्यात् यथोत्तरम् ॥"
अथ श्याकानां गुणाः ।
"प्रायः श्याकानि सर्व्वाणि विष्टम्भीनि गुरूणि च ।
रूक्षाणि बहुवर्च्चांसि दृष्टविण्मारुतानि च ॥
श्याकं भिनत्ति वपुरस्रि निहन्ति नेत्रं
वर्च्चं विनाशयति रक्तमथापि शुक्रम् ।
प्रज्ञाक्षयञ्च कुरुते पलितञ्च नूनं
दृष्टिं स्मृतिं गतिमिति प्रवदन्ति तज्ज्ञाः ॥
श्याकेषु सर्व्वे निवसन्ति रोगाः
सङ्केतवो देहविनाशनाय ।
तस्मात्बुधः श्याकविवर्जनञ्च
कुर्य्यात्सदाश्चेषु स एव दोषः ॥"
इति भावप्रकाशः ॥
अपि च ।
"सर्व्वश्याकमशाक्षुण्यमलक्ष्म्यमेधुनम् ।
क्षते पटोलवास्तूककाकमाचीपुनर्नवाः ॥"
इति राजवल्लभः ॥

श्याकः, पुं, वृक्षविशेषः । सेगोन् इति भाषा । तत्पर्य्यायः । श्याकवृक्षः २ श्याकाख्यः ३ खरपत्रः ४ अर्जुनोपमः ५ । इति रत्नमाला ॥ क्रकचपत्रः ६ शरपत्रः ७ अतिपत्रः ८ अर्जीरुहः ९ श्रेष्ठकाष्ठः १० स्थिरसारः ११ गृहद्रुमः १२ । अस्य गुणाः । सारकत्वम् । पित्तदाहश्रमापहत्वञ्च । अस्य वल्कलगुणाः । कफनाशित्वम् । मधुरत्वम् । रूक्षत्वम् । कषायत्वञ्च । इति राजनिर्घण्टः ॥ * ॥ श्यक्तिः । इति मेदिनी ॥ श्यिरीषवृक्षः । इति शब्दरत्नावली ॥ वृषभेदः । इति विश्वः ॥ द्वीपविशेषः । तस्य विवरणं यथा,—
सूत उवाच ।
"श्याकद्वीपस्य वक्ष्यामि यथावद्दिह निश्चयम् ।
कथ्यमानं निबोधध्वं श्याकद्वीपं द्विजोत्तमाः ॥
जम्बुद्वीपस्य विस्तराद्विगुणस्तस्य विस्तरः ।
विस्ताराद्विगुणश्चापि परिणाहः समन्ततः ॥
तेनावृतः समुद्रोऽयं द्वीपेन खलु वेष्टितः ।
तत्र पुण्या जनपदाश्चिराच्च म्रियते जनः ॥
कृत एव च दुर्भिक्षं क्षमातेजोयुतेष्विह ।
तत्रापि पर्व्वताः शुभ्राः सप्तैव मणिभूषिताः ॥
श्याकद्वीपादिद्वीपेषु सप्त सप्त नगाश्चिषु ।
अध्वायताः प्रतिदिशं निविष्टा वर्षपर्व्वताः ॥
रत्नाकराद्रिनामानः शोभावन्तो महाचिताः ।
समाचिताः प्रतिदिशं द्वीपविस्तरमानतः ॥
उभयत्रावगाढाश्च लवणक्षीरसागरौ ।
श्याकद्वीपे तु वक्ष्यामि सप्त स्थान् महाचलान् ॥
देवर्षिगन्धर्व्वयुतः प्रथमो मेरुरुच्यते ।
प्रागायतः स सौवर्ण्ण उदयो नाम पर्व्वतः ॥
तत्र मेघास्तु हृष्यर्थं प्रभवन्ति च यान्ति च ।
तस्मात्परेण सुमहान् जलधारो महागिरिः ॥
रैवत्त चन्द्रः समाख्यातः सर्व्वौषधिसमन्वितः ।
तस्मान्नित्यसुपाश्चन्ते वासवः परमं जलम् ॥
नारदो नाम शैवोक्तो दुर्गशैलो महाचितः ।
तत्राचले समुत्पन्नौ पूर्व्वं नारदपर्व्वतौ ॥
तस्मात्परेण सुमहान् श्यामो नाम महागिरिः ।
यत्र श्यामत्वमापन्नाः प्रजाः पूर्व्वमिमाः किल ॥
स एव दुन्दुभिर्नाम श्यामः पर्व्वतसत्तमः ।
शब्दयन्तु पुरा तस्मिन् दुन्दुभिस्ताडितः सुरैः ॥
वज्रज्वालान्तरमयः शालशश्चान्तरालकृत् ।
तस्मात्परेण रजतो महान्सोमो गिरिः स्मृतः ॥
यत्रैव सोमकः श्लक्ष्णो देवैर्यत्राप्लुतं पुरा ।
सम्भृतश्च क्षुतश्चैव मातुरर्थे मखस्य ता ॥
तस्मात्परे चाम्बिकेयः सुमनाश्चैव स स्मृतः ।
हिरण्याभो वराद्रिश्च तस्मिन् शैले निरुच्यते ॥
आम्बिकेयात् परो रम्यः सर्व्वौषधिसमन्वितः ।
विभ्राजस्तु समाख्यातः स्फाटिकः स महागिरिः ॥
यस्मादिभाजते नित्यं विभ्राजस्तन स स्मृतः ।
शैवेयः केशवेत्युक्तो यतो वायुः प्रवायति ॥
तेषां वर्षाणि वक्ष्यामि पर्व्वतानां द्विजोत्तमाः ।
शृणुध्वं नामतस्तानि यथावदनुपूर्व्वशः ॥
हिमाम्भोऽम्बे वर्षाणि यथैव गिरयस्तथा ।
उदयस्योदयं वर्षं जलधारेति विश्रुतम् ॥
नाना नानाभयन्नाम वर्षं तत् प्रथमं स्मृतम् ॥
द्वितीये जलधारस्य सुकुमारमिति स्मृतम् ।
तदेव शैशिरं नाम वर्षं संग्रहिकीर्त्तितम् ॥
रैवतस्य तु कौमारं तथैव च सुखोदयम् ।
श्यामपर्व्वतवर्षन्तु मणीचकमिति स्मृतम् ॥
आनन्दकमिति प्रोक्तं तदेव मुनिभिः शुभम् ।

सोमकस्य सुभं वर्षं विज्ञेयं कुसुमोत्तरम् ॥
तदेव शिवमित्युक्तं वर्षं सोमकसंज्ञितम् ।
आमिकेयस्य मेदाकिं क्षेमकस्येव तत् स्मृतम् ॥
सेतुपर्वतकस्यापि महाद्रुममिति स्मृतम् ।
तदेव ध्रुवमित्युक्तं वर्षं विभ्राजसंज्ञितम् ॥
द्वीपस्य परिमाणस्य दृश्यदीर्घत्वमेव च ।
जम्बुद्वीपेन संख्यातस्तस्य मध्ये वनस्पतिः ॥
शाको नाम महाद्रुमस्तस्य प्रभा महानुगाः ।
एतेषु देवगन्धर्वाः सिद्धाश्च सह चारणैः ॥
विहरन्ति रमन्ते च दृश्यमानाश्च ते सह ।
तत्र पुण्या जनपदास्तुर्यवर्ण्यसमन्विताः ॥
तेषु नद्यस्तु वै सप्त प्रतिवर्षं समुद्गताः ।
त्रिनामाश्चैव ताः सर्वा गङ्गाः सप्तविधाः स्मृताः ॥
प्रथमा सुकुमारीति गङ्गा शिवजला शुभा ।
अमृतप्रभा च नाम्नेयी नदी संपरिकीर्त्तिता ॥
सुकुमारी तपःसिद्धा द्वितीया नामतः सती ।
नन्दा च पावनी चैव तृतीया परिकीर्त्तिता ॥
शिवोक्ता चतुर्थी स्यात् त्रिविधा च पुनः स्मृता ।
दृश्यस्य पञ्चमी ज्ञेया तथैव च पुनः कथ ॥
धेनुका च त्रिना चैव षष्ठी संपरिकीर्त्तिता ।
सुकृता च गभस्ती च सप्तमी परिकीर्त्तिता ॥
एताः सप्त महाभागा प्रतिवर्षं शिवोदकाः ।
पावयन्ति जनं सर्वं शाकद्वीपनिवासिनम् ॥
आगच्छन्ति ताश्चान्या नदीनद्यः सरांसि च ।
वृष्टयकपरिस्रावा यतो वर्षन्ति वासवः ।
आख्यातु नामधेयानि पारमार्थं तथैव च ।
न शक्यं परिसंख्यातुं पुण्याख्याः सरिदुत्तमाः ॥
ताः पिबन्ति महाद्रुद्या नदीर्जनपदास्तु ते ।
ये ते शान्ततया प्रोक्ताः प्रमोदाश्चेति वै शिवाः ॥
आनन्दाश्चसुखाश्चैव क्षेमकेषु ध्रुवे सह ।
वर्णाश्रमाचारयुक्ता देशास्ते सप्त विश्रुताः ।
अरोगा बलिनश्चैव सर्वे परमवर्द्धिताः ।
अवसर्पिणी न तेष्वस्ति तथैवोत्सर्पिणी पुनः ॥
न तत्रास्ति युगावस्था चतुर्युगसमा क्वचित् ।
त्रेतायुगसमः कालस्तथा तत्र प्रवर्त्तते ॥
शाकद्वीपादिषु ज्ञेयं पञ्चस्वेतेषु सर्वशः ।
दृश्यस्य तु विचारेण कालः स्वाभाविकः स्मृतः ॥
न तेषु क्षत्रियः कश्चिद्वर्णाश्रमकृतः क्वचित् ।
धर्मस्थायभिचारेण एकान्तसुखिताः प्रजाः ॥
न तेषु माया लोभो वा ईर्ष्यासूया भयं तथा ।
विषमयो न तेष्वस्ति तदेव स्वाभाविकं स्मृतम् ॥
कालो न चैव तेष्वस्ति न दण्डो न च दाण्डिकाः ।
स्वधर्मेण च धर्मज्ञास्ते रक्षन्ति परस्परम् ॥"
इति मात्स्ये १०२ अध्यायः ॥ * ॥
अपि च । एवं परस्तात् क्षीरोदात् परित उपवेशितः शाकद्वीपो द्वाविंशद्योजनायामः समानेन दधिमण्डोदकेन परीतः । यस्मिन् हि शाको नाम महीरुहः स्वयंप्रभयदेशकः । यस्य हि महाद्रुमाभिगन्धमुपजिघ्रन्तः प्रजा आयुरारोग्यमैश्वर्यं प्रयत्नमूर्जां धृतिं स्मृतिं मेधामाप्नुवन्ति ।

सोऽपि विभज्य सप्त वर्षाणि पुत्रनामानि तेषु स्वात्मजानां पुरोजवमनोजवपवमानधूम्रानीकचित्ररेफबहुरूपविश्वाधारसंज्ञानां निधाप्याधिपतीन् स्वयं भगवत्यनन्त आवेशितमतिस्तपोवनं प्रविवेश । एतेषां वर्षमर्यादागिरयो नद्यश्च सप्त सप्तैव । ईशान उरुशृङ्गो बलभद्रः शतकेशरः सहस्रस्रोता देवपालो महानस इति । अथवा आयुर्दा उभयसृष्टिरपराजिता पक्षपदी सहस्रसृतिर्निजधृतिरिति । तद्वर्षपुरुषा ऋतव्रतसत्यव्रतदानव्रतानुव्रतनामानो भगवन्तं वायुात्मकं प्राणायामविधूतरजस्तमसः परमसमाधिना यजन्ते । इति श्रीभागवते ५ स्कन्धे २० अध्याये ॥ * ॥ युधिष्ठिरविक्रमादित्यशालिवाहनादिशकनरपतीनामतीताब्दः । तस्य प्रमाणं दिनपञ्जिकायां द्रष्टव्यम् ॥ (शक्तिः । कर्म्म । यथा, ऋग्वेदे । ६ । २४ । ४ ।
"शचीवतस्ते पुरुशाक शाका
गवामिव श्रुतयः सचरण्यः ॥"
"हे पुरुशाक बहुकर्म्मन्निन्द्र शचीवतः प्रज्ञावतस्ते तवीयाः शाकाः शक्तयः कर्म्माणि वा ।" इति तद्भाष्ये सायणः ॥ * ॥ समर्थे, त्रि । यथा, ऋग्वेदे । ५ । ३० । १० ।
"सन्ता इन्द्रो अहनदस्य शाकै-
र्यदीं सोमासः सुषुता अमन्दन् ॥"
"शाकैः शक्तिभिरङ्गिः सह ।" इति तद्भाष्ये सायणः ।)
शाकचुक्रिका, स्त्री, चिप्पा । इति राजनिर्घण्टः ॥
शाकटं, त्रि, (शकट + अण् ।) शकटसंबंधम् । शकटबोढ़ा । इति मेदिनी ॥
शाकटः, पु, श्लेष्मान्तकवृक्षः । इति राजनिर्घण्टः ॥ (शकट वहतीति । शकट + "शकटादण् ।" ४ । ४ । ८० । इत्यण् ।) युगादिबोढ़ा । तत्पर्य्यायः । युग्यः २ प्राजग्रः ३ । इत्यमरः ॥
शाकटाक्षः, पुं, (शाकट इतं आक्षा यस्य ।) धववृक्षः । इति रत्नमाला ॥
शाकटायनः, पुं, (शकटस्यापत्यं पुमान् । शकट + "नडादिभ्यः फक् ।" ४ । १ । ९९ । इति फक् ।) व्याकरणादिकाभर्त्तृकशाब्दिकविशेषः । यथा,—
"इन्द्रचन्द्रः काशकृत्स्ना पिशली शाकटायनः ।
पाणिन्यमरजैनेन्द्रा जयन्त्यष्टादिशाब्दिकाः ॥"
इति कविकल्पद्रुमः ॥
(अयन् नाममात्रं धातुनिष्पन्नमाह । यथा, कातन्त्रे कृत्सु उणादयो भूतेऽपि द्रव्यत्रिलोचनः ।
"नाम च धातुजमाह निरुक्ते
व्याकरणे शकटस्य च तोकम् ।
यन्नव महार्थविशेषसमत्वं
ब्रूयात् स चैतदृषीणां प्रथमः ॥")
शाकटिकः, त्रि, शकटगामी । शकटेन गच्छतीत्यर्थे ठक्प्रत्ययेन निष्पन्नमेतत् । इति सिद्धान्तकौमुदी ॥ (यथा, हरिवंशे । १०१ ।
"रोहिण्यां कोशलमद्र-
काशिप्राच्यालशाकटिकाः ॥")
शाकटीनः, पुं, विंशतितुलापरिमाणम् । तत्पर्य्यायः । भारः २ वाहितः ३ शकटः ४ फुल्लाटः ५ । इति हेमचन्द्रः ॥
शाकतरुः, पुं, शाकाख्यस्तरुः । शाकवृक्षः । इति शब्दमाला ॥ साजोग इति हिन्दी भाषा ॥
शाकपत्रः, पुं, शिग्रुः । इति राजनिर्घण्टः ॥
शाकवाटेयः, पुं, ब्रह्मयष्टिः । इति शब्दरत्नावली ॥
शाकम्भरी, स्त्री, (शाकेन बिभर्त्ति । भृ + खश् । ङीष् ।) दुर्गा । यथा,—
"ततोऽहमखिलं लोकमात्मदेहसमुद्भवैः ।
भरिष्यामि सुराः शाकैरावृष्टेः प्राणधारकैः ॥
शाकम्भरीति विख्यातिं तदा यास्याम्यहं भुवि ।
तत्रैव च वधिष्यामि दुर्गमाख्यं महासुरम् ॥"
इति मार्कण्डेयपुराणे नारायणीस्तुतिः ॥
अपि च ।
"भूयः सुरारिक्षयजे निराशना-
न्निरीक्ष्य मारीचगृहे समाश्रिता ।
लोकान् भरिष्यामि तनूजशाकै-
स्तदा भविष्यामि शाकम्भरीति ॥"
इति वामने ५३ अध्यायः
नगरविशेषः । शाम्भरीति ख्यातः । इति कैचित् ॥
शाकम्भरीयं, क्ली आजमेराख्यदेशान्तर्गतशाम्भरनगरीयजलाश्रयविशेषाद्भवलवणम् । शाम्भरि इति ख्यातम् । तत्पर्य्यायगुणौ यथा,—
"शाकम्भरीयं कथितं गड़ाख्यं रौमकं तथा ।
गड़ाख्यं सक्षारं वातघ्नमत्युष्णं भेदि पित्तलम् ।
तीक्ष्णं यवागू सूच्यम्बाभिष्यन्दि कटुपाकि च ॥"
इति भावप्रकाशः ॥
शाकयोग्यः, पुं, (शाकस्य योग्यः ।) धान्यकम् । इति राजनिर्घण्टः ॥
शाकराजः, पुं, (शाकानां राजा निर्द्देशत्वात् । "राजाहःसखिभ्यष्टच् ।" ५ । ४ । ९१ । इति टच् ।) वास्तूकम् । इति राजनिर्घण्टः ॥
शाकलः, पुं, शकलेन प्रोक्तमधीयते शाकशाकलकः, (शाकलेयां सङ्घोऽङ्गो घोषो वा । "शाकलाद्वा ।" ४ । ३ । १२८ । इति यञ् । परम्परासम्बन्धोऽङ्गः । इति सिद्धान्तकौमुदी ॥ (द्वीपविशेषः . यथा, महाभारते । २ । २९ । ९ ।
"शाकलद्वीपवासाश्च सप्तद्वीपेषु ये नृपाः ।
अर्जुनस्य च सैन्येस्तैर्विग्रहस्तुमुलोऽभवत् ॥")
शाकलिकः, त्रि, शकलसम्बन्धी । "शकलकर्दमाभ्यामण्ण्यौ ।" ४ । २ । २ । इत्यस्य वार्त्तिकोक्त्या शाकलिकः कार्दमिकः । भाष्यामण्यौति वृत्तिकारः । शाकलः । कार्दमः । इति सिद्धान्तकौमुदी ॥
शाकविल्वः, पुं, (शाके विल्व इव ।) वार्ताकुः । इति जटाधरः ॥
शाकविल्वकः, पुं, (शाकविल्व + स्वार्थे कन् ।) वार्ताकुः । इति त्रिकाण्डशेषः ।

शाकवीरः, पुं, (शाकेषु वीरः ।) वास्तूकशाकः । इति त्रिकाण्डशेषः ॥ जीवशाकः । इति राजनिर्घण्टः ॥

शाकशत्रुः, पुं, (शाकाख्यो वृक्षः ।) तरुविशेषः । इति रत्नमाला ॥ सेगोन इति भाषा । अस्य पर्य्यायगुणौ शाकशब्दे द्रष्टव्यौ ॥

शाकशाकटं, क्ली, (शाकानां भवनं क्षेत्रम् । शाक + "भवने क्षेत्रे शाकटशाकिनौ ।" इति शाकटः ।) शाकक्षेत्रम् । इति हेमचन्द्रः ॥

शाकशाकिनं, क्ली, (शाकानां भवनं क्षेत्रम् । शाक + शाकिनः ।) शाकक्षेत्रम् । इति हेमचन्द्रः ॥

शाकश्रेष्ठः, पुं, (शाकेषु श्रेष्ठः ।) वास्तूकशाकम् । इति शब्दरत्नावली ॥

शाकश्रेष्ठा, स्त्री, (शाकेषु श्रेष्ठा ।) जीवन्ती । दीर्घोच्छ्रयः । वार्षाकुः । इति राजनिर्घण्टः ॥

शाका, स्त्री, हरीतकी । इति केचित् ॥

शाकाख्यं, क्ली, (शाक इति आख्या यस्य ।) पत्रपुष्पादि । इत्यमरः ॥

"यज्ञनयोग्यं पत्रपुष्पादि शाकपदवाच्यम् ।
आदिना फलमूलादिग्रहः । यदुक्तम् ।
'मूलपत्रकरीराम्रफलकाद्याधिरूढकम् ।
त्वक् पुष्पं करकश्चेति शाकं दशविधं स्मृतम् ॥'
तत्र मूलं मूलकादेः । पत्रं पटोलादेः । करीरं वंशाङ्कुरादि । अम्रं चोचादेः । फलं कुष्माण्डादेः । काण्डं उत्पलादिनाड्यौ । अधिरूढं तालास्थिमज्जा । अधिरूढोऽङ्कुर इति केचित् । त्वक् मातुलुङ्गादेः । पुष्पं कोविदारादेः । करकं दधिका । भक्ष्यते भोक्तुमनेनेति शाकम् । शकि शाकार्थे तनूकरणे वा घञुत्वात् कः शाकमित्यत्रे ।" इति तट्टीकायां भरतः ॥

शाकारः, पुं, (शाक इति आख्या यस्य ।) शाकवृक्षः । इति रत्नमाला ॥ अस्य पर्य्यायगुणौ शाकशब्दे द्रष्टव्यौ ॥

शाकाङ्गं, क्ली, (शाकस्य अङ्गमिव ।) मरिचम् । इति राजनिर्घण्टः ॥

शाकाम्लं, क्ली, (शाके अम्लो यस्य ।) दध्याम्लम् । इति राजनिर्घण्टः ॥

शाकाम्लभेदनं, क्ली, (शाकाम्लं भेदनम् ।) शुक्रम् । इति राजनिर्घण्टः ॥

शाकालालुः, स्त्री, राजालालुः । इति राजनिर्घण्टः ॥

शाकाशकरः, क्ली, (शाकाः अशाः प्रदेशा यत्र ।) शाकोपकरणशाकाद्यार्थमी । सा च गौमालगृहशाकाशमी । अस्यियत्रं मांसाशशब्दे द्रष्टव्यम् ॥

शाकिनी, स्त्री, (शाकोऽस्यास्तीति । शाक + इनिः ।) योगिनभेदः । यथा,—

"शाकिनी योगिनी चैव खेचरी शाकिनी तथा ।
दिक्षु पूज्या इमा देव्यः सुसिद्धाः फलदायिकाः ॥"
इति कालीवचनोक्तेः ॥

"ब्रह्मा विष्णुश्च रुद्रश्च ईश्वरश्च सदाशिवः ।
ततः परशिवो देवि षट्शिवाः परिकीर्त्तिताः ॥
मूलाधारे तु ब्रह्माणं शाकिनीसहितं न्यसेत् ।
सर्वत्र चाचरीसङ्गा वादिसान्तं सबिन्दुकम् ॥
स्वाधिष्ठानाख्यचक्रे तु सविष्णुं राकिनीं तथा ।
वादिलान्तं प्रविन्यस्य नाभौ तु मणिपूरके ॥
डादिफान्तार्णसहितं रुद्रञ्च लाकिनीं तथा ।
अनाहते कादिठान्तं ईश्वरं काकिनीं तथा ॥
विशुद्धाख्ये महाचक्रे षोड़शस्वरसंयुतम् ।
सदाशिवं शाकिनीञ्च विन्यसेत् पूर्ववत्ततः ॥
आज्ञाचक्रे तु देवेशि ह-क्ष-वर्णसमन्वितम् ।
परं शिवं ब्रह्मरूपं हाकिनीसहितं न्यसेत् ॥"
इति तारान्यासभेदः । इति तन्त्रसारः ॥

शाकुणः, त्रि, परोक्षापी । इति शब्दमाला ॥

शाकुनः, पुं, (शकुनमधिकृत्य कृतो ग्रन्थः । शकुन + अण् ।) पक्षिपक्ष्यादिरूपशकुनद्वारा मनुष्यशुभाशुभनिर्णायकग्रन्थः । तस्येमौ श्लोकौ ।

"शुभाशुभज्ञानविनिर्णयाय
हेतुर्द्वयं यः शकुनः स उक्तः ।
प्रतिः स्वरालोकनभावचेष्टा
संकीर्त्तयामो द्विपदादिकानाम् ।
श्लोकोदितेना शाकुनसंज्ञकेन
ज्ञानेन विज्ञातसमस्तकार्य्यः ।
नरोऽयमूर्ध्वं पतति प्रवर्त्तन्
शास्त्रं हि दिव्या दृगतीन्द्रियेषु ॥"
इति वसन्तराजशाकुने १ सर्गः ॥

(शकुनस्यायमिति । शकुन + "तस्येदम् ।" ४ । ३ । १२० । इति अण् । मध्यमपदलोपी । यथा, मनुः । ३ । २६८ ।

"दौ सार्द्धौ सप्तमीसेन श्रौत्रासान् धारयेन तु ।
शौरसैनाथ चतुरः शाकुनेनाथ पञ्च वै ।")

शाकुनिकः, पुं, (शकुनान् हन्ति । शकुन + "पक्षिमत्स्यमृगान् हन्ति ।" ५ । १ । ७५ । इति ठक् ।) पक्षिहन्ता । पाक्षिमारा इति हिन्दिभाषा । तत्पर्य्यायः, शौत्रान्तिकः २ । इत्यमरः ॥ (यथा, मनुः । ८ । २६० ।

"साधारणं शाकुनिकाद् गोपाद् वैदेहकात् सूनकारकाद् ॥")

शाकुनेयः, पुं, (शकुनेरपत्यम् । शकुनि + "सुभ्रादिभ्यश्च ।" ४ । १ । १२३ । इति ढक् ।) कुक्कुरपक्षी । इति राजनिर्घण्टः ॥ (शकुनिपुत्रो दैत्यासुरः । यथा, भागवते । १० । ८८ । २६ । "शाकुनेय भवान् यक्तं आप्तः किं दूरमागतः ।
स्वमं विश्राम्यतां पुंस आत्मायं सर्वकामधुक् ॥")

शाकुनसम्बन्धिनि, त्रि ॥

शाकुन्तलेयः, पुं, (शकुन्तलाया अपत्यमिति । शकुन्तला + "स्त्रीभ्यो ढक् ।" ४ । १ । १२० । इति ढक् ।) भरतराजः । इति जटाधरः ॥

शाकुन्तलायनिनि, त्रि ॥

शाकुलिकः, त्रि, शकुलान् हन्ति यः । शकुलशब्दात् "पक्षिमांसादनात् ठन्ति ।" ४ । ४ । ४५ । इति ठक्प्रत्ययेन निष्पन्नमेतत् । इति सिद्धान्तकौमुदी ॥

शाकुरः, पुं, (शकुर एव । स्वार्थे अण् ।) चक्षुः । इति हेमचन्द्रः ॥

शाक्तः, त्रि, शक्तिर्देवता अस्य । (शक्ति + "तस्य देवता ।" ४।२।२४ । इति अण् ।) शक्त्युपासकः । तस्य पर्य्यायो यथा —

"स्वर्गे मर्त्ये च पाताले नास्ति शाक्तात् परः प्रियः ।
सौराणां शाक्तपत्यानां वैष्णवानां तथैव च ।
तदन्ते चैव शाक्ताः स्युः क्रमशः क्रमशः प्रिये ।
अतः देवि वरारोहे नास्ति शाक्तात् परो जनः ॥
शाक्तोऽपि शङ्करः साक्षात् परं ब्रह्मास्वरूपभाक् ।
आराधिता येन काली तारा त्रिभुवनेश्वरी ॥
षोड़शी चैव मातङ्गी छिन्ना च भगवद्भुवी ।
आराधिता महेशानि न शिवो नात्र संशयः ॥
अतिगोप्यं महेशानि शाक्तानां परमं पदम् ।
यो जानाति महीमध्ये स शिवो नात्र संशयः ॥
ब्रह्माद्यर्चितपादाब्जं यो भजेत् सततं मुदा ।
स याति चिरकालेन मुक्तिमन्दिरमेव हि ।
पार्वतीचरणाब्जभजनाकिङ्करो भवेत् ।
स्वर्गभोगञ्च मोक्षञ्च शाक्तानां न भवेत् किल ॥
शाक्तानामेव निन्दां ये कुर्वन्ति हि नराधमाः ।
तेषां शोणितपानं वै कुर्वन्ति भैरवीगणाः ॥
भैरवाश्चैव भैरव्यः सदा हिंसन्ति पामरान् ।
शाक्तान् हिंसन्ति गर्जन्ति निन्दन्ति यदु-
कथकाः ॥
छिन्दन्ति तेषां दृष्ट्वापि शिरांसि खरदम्भा ।
शाक्तेभ्य उत्तमो नास्ति स्वर्गे मर्त्ये रसातले ॥
शाक्तस्तु शङ्करो ज्ञेयश्चिन्तयेत् शिवमक्षरे ।"
देवीं प्रति शिववाक्यम् ।
"महेशाक्षेत्रे ये भूताले देवा नाथ संशयः ।
तदंशाश्चैव शाक्ताश्च सर्वे वै शिवरूपिणः ।
कलुषैर्मलयुक्तानां जीवाः शक्तिपराङ्मुखाः ।
शाक्ता वै शङ्करा देवि तस्य वक्त्रात् प्रसूताः ।
चाण्डाला शाक्ताः सूताः शक्तिपा वैष्ण-
वास्तथा ॥

एते शाक्ता जगद्धात्रि न मनुष्याः कदाचन ॥
पश्यन्ति मानुषान् लोके केवलं कर्म्मचक्षुषा।
ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रैरेव च जातिभिः ॥
वाममार्गप्रभावेण कर्त्तव्यं जपपूजनम्।
ये शाक्ता ब्राह्मणा देवि क्षत्रिया ब्राह्मणाः स्मृताः ॥
वैश्याश्च ब्राह्मणा देवि सर्व्वे शूद्राश्च ब्राह्मणाः।
ब्राह्मणाः शूकराश्चैव चिनेचाश्चन्द्रशेखराः ॥"
इति सुखमालातन्त्रे २।३।४।७ पटलाः ॥*॥
"शाक्ता एव द्विजाः सर्व्वे न शैवा न च वैष्णवाः।
उपासन्ते यतो देवीं गायत्रीं परमाक्षरीम् ॥"
इति निर्व्वाणतन्त्रे ३ पटलः ॥
शाक्तोपासनानन्तरमन्योपासननिषेधो यथा,—
"अस्याश्चाराधनं कृत्वा नान्यस्याराधनं चरेत्।
अन्यस्य स्मरणाद्देवि योगिनीशापमालभेत् ॥"
इति गन्धर्व्वतन्त्रे २ पटलः ॥ * ॥
तस्य आभ्यन्तरस्नानं यथा,—
"शाक्तमाभ्यन्तरस्नानमुक्तं श्रीपुष्पभीमते।
स्नानप्रकारो द्विविधो बाह्याभ्यन्तरभेदतः ॥
आन्तरं स्नानमत्यन्तं रहस्यमपि सादरात्।
कथयामि भयध्वस्त्यै चतुर्व्वर्गफलाप्तये ॥
सच्चित्त्रयमनुस्मृत्य चरणत्रयमध्यतः।
सवस्कं सच्चिदानन्दप्रभावं भावगोचरम् ॥
विमुक्तिसाधनं पुंसां स्मरणादेव योगिनाम्।
तेन भावितमात्मानं भावयेत् भयशान्तये ॥"
इति विश्वसारतन्त्रे २ पटलः ॥ * ॥
तस्य कुशविशेषो यथा,—
"तर्ज्जन्या रजतं धार्य्यं स्वर्णं धार्य्यमनामया।
अय एव कुशः शाक्ते न दर्भो वनसम्भवः ॥"
इति श्यामारहस्यम् ॥
(शक्तिमान्। यथा, ऋग्वेदे। ७। १०३। ५।
"वाचं शाक्तस्येव वदति शिक्षमाणः ॥"
"शिक्षमाणः शिक्षमाणः शिक्ष्यः शाक्तस्येव शक्तिमतः शिक्षकस्य वाचं यथा अनुवदति तद्वत्।" इति तद्भाष्ये सायणः ॥)
शाक्तीकः, पुं, (शक्तिः प्रहरणमस्य। शक्ति+ "शक्तियष्टीकाक्।" ४।४।५६। इति ईकक्।) शक्तिधारकः। तत्पर्य्यायः। शक्तिहेतिकः २। इत्यमरः ॥
शाक्यः, त्रि, शक्त्युपासकः। इति शक्तिशब्दात् ण्यप्रत्ययेन निष्पन्नमेतत् ॥
शाक्यः, पुं, (शाकोऽभिधानमस्येति। शाक+ "शाखिकादिभ्यो ण्यः।" ४।३।६२। इति ण्यः।) बुद्धः। इति हलायुधः ॥
शाक्यमुनिः, पुं, शाक्यवंशावतीर्णबुद्धमुनिविशेषः। इत्यमरः ॥ अस्य सप्त पर्य्यायाः गौतमशब्दे दृश्याः। पर्य्यायान्तरं यथा। खजितृ २ श्वेतकेतुः ३ धर्म्मकेतुः ४ महामुनिः ५ पद्मज्ञानः ६ सर्व्वदर्शी ७ महाबोधिः ८ महाबलः ९ बहुश्रुतः १० विमुक्तिः ११ सिद्धार्थः १२ शाक्यः १३। इति शब्दरत्नावली ॥ शाक्यवंशात् शाक्यः शाक्यश्चासौ मुनिश्चेति शाक्यमुनिः। तथा हि शाक्यो वृक्षविशेषः तत्र भवा विद्यमानाः शाक्याः। पितुः शाक्येन क्षत्रियेणेक्ष्वाकुवंश्या गौतमवंशजकपिलमुनेराश्रमे शाकवृक्षे कृतवासाच्च शाक्या उच्यन्ते। तदुक्तम्।
"शाकवृक्षप्रतिच्छन्नं वासं यस्मात् प्रचक्रिरे।
तस्मादिक्ष्वाकुवंश्यास्ते भुवि शाक्या इतिश्रुताः ॥"
इत्यमरटीकायां भरतः ॥
शाक्यसिंहः, पुं, (शाक्यः सिंह इव।) शाक्यमुनिः। इत्यमरः ॥
शाक्री, स्त्री, दुर्गा। यथा,—
"इन्द्राणी इन्द्रजननी शाक्री शक्रपराक्रमा।
वज्राङ्कुशकरा देवी वज्रा तेनोपगीयते ॥"
इति देवीपुराणे देवीनिरुक्ताध्यायः ॥
शक्रपत्नी च ॥
शाख, अट व्याप्तौ। इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट्।) अट, व्यशशाखत्। इति दुर्गादासः ॥
शाखः, पुं, क्षत्त्रिकापुत्रः। यथा,—
"अवाप चानिलात् पुत्रमग्नितुल्यगुणं पुनः।
अग्निपुत्रः कुमारस्तु शरस्तम्बे व्यजायत ॥
तस्य शाखो विशाखश्च नैगमेयश्च पृष्ठजः।
अपत्यं कृत्तिकानाञ्च कार्त्तिकेयस्ततः स्मृतः ॥"
इति मात्स्ये ५ अध्यायः ॥
क्षित्तिः। इति शब्दचन्द्रिका ॥
शाखा, स्त्री, (शाखति गगनं व्याप्नोतीति। शाख+अच्। टाप्।) वृक्षाङ्गविशेषः। डाल इति भाषा। (यथा, दुर्गापूजापद्धतौ।
"शाखाच्छेदोद्भवं दुःखं न च कार्य्यं त्वया प्रभो!॥")
तत्पर्य्यायः। लता २। इत्यमरः ॥ लङ्का ३। इति जटाधरः। शिखा ४। इति भरतधृतमेदिनी ॥ पश्चात्तरम्। बाहुः। वेदभागः। इति मेदिनी ॥ (यथा, मनौ। ३। १४५।
"यज्ञेन भोजयेच्छ्राद्धे वह्वृचं वेदपारगम्।
शाखान्तगमथाध्वर्युं छन्दोगन्तु समाप्तिकम् ॥")
अन्यभेदः। इति धरणिः ॥ अन्तिकः। इति विश्वः ॥ (प्रकारः। यथा, गीतायाम् १।४१।
"बहुशाखा ह्यनन्ताश्च बुद्धयोऽव्यवसायिनाम्॥")
शाखाकण्टः, पुं, (शाखायां कण्टो यस्य।) खुद्दीवृक्षः। इति राजनिर्घण्टः ॥
शाखानगरं, क्ली, (शाखेव नगरम्।) मूलनगरादल्पतरं पुरम्। इत्यमरः ॥ (यथा, महाभारते। १२। ८७। ८।
"शाखानगरमर्हस्तु सहसपतिरुत्तमः ॥")
मूलनगरेऽस्मितस्य जनौघस्य स्थानाय मूलनगरस्य समीपेऽन्ये वा यदल्पतरं पुरं नगरान्तरं क्रियते तत् शाखानगरं मूलनगरस्य तरुस्थानीयस्य शाखेव। अभिष्यन्दि रमणमप्यत्र। स्यादभिष्यन्दि रमणं शाखानगरमित्यपि। इति त्रिकाण्डशेषः। इति तट्टीकायां भरतः ॥ अपि च। यथा, शब्दरत्नावल्याम्।
"आरभ्य मूलनगरादपरं नगरं हि यत्।
तदभिष्यन्दि रमणं शाखानगरमित्यपि ॥"
शाखापित्तः, पुं, पाणिपादांशमूलदाहः। इति राजनिर्घण्टः ॥
शाखापुरं, क्ली, (पुरस्य शाखा अभिधानात् पूर्व्वनिपातः। शाखेव पुरमिति वा।) शाखानगरम्। तत्पर्य्यायः। उपपुरम् २। इति हेमचन्द्रः ॥
शाखाम्बा, स्त्री, (शाखायामम्बो यस्याः।) वृक्षाम्बा। इति राजनिर्घण्टः ॥
शाखामृगः, पुं, (शाखाया मृगः।) वानरः। इत्यमरः ॥ (यथा,—
"सुस्फाफलाय करिणं हरिणं पलाय
सिंहं निहन्ति मृगविक्रमसूचनाय।
का नौतिरीतिरियती रघुवंशवीर!
शाखामृगे जरति यत्नव वामनोऽपि ॥"
इत्युद्भटः ॥
शाखारण्डः, पुं, स्वशाखां परित्यज्य शाखान्तराध्ययनकर्त्ता। तत्पर्य्यायः। अन्यशाखकः २। इति हेमचन्द्रः ॥
शाखारथ्या, स्त्री, षोडशहस्तप्रस्तारपथः। यथा,—
"धनूंषि चैव चत्वारि शाखारथ्यास्तु निर्म्मिताः।
त्रिकराद्यैरपरथ्यास्तु द्विकराद्यैरपरथ्यकाः ॥"
इति देवीपुराणे गोपुरद्वारलक्षणनामाध्यायः ॥
शाखालः, पुं, (शाखां लाति आश्रयतीति। ला+कः।) वानीरवृक्षः। इति राजनिर्घण्टः ॥
शाखाशिफा, स्त्री, (शाखायाः शिफा।) वटादीनां शाखासम्भवशिफा। नामूना इति ख्याता। तरोर्म्मूलादारभ्य अग्रं यावत् गता लताशुङ्खादिः। इति भरतः ॥ तत्पर्य्यायः। अवरोहः २। इत्यमरः ॥
शाखी, [न्] पुं, (शाखास्त्यस्येति। शाखा+इनिः।) वृक्षः। इत्यमरः ॥ (यथा,—
"सीतायाः कुचकुम्भकुङ्कुमपरागे पलाशोच्चकैः
पौलस्त्यस्य नितान्तकुण्ठकुलिशे वक्षोधिके वक्षसि।
आपुङ्खं निममज्ज मज्जथुरसृक्पङ्केन जानीमहे
कः शाखी सखि! यस्य पुष्पमभवत् पुण्यायुधस्यायुधम् ॥"
इत्युद्भटः ॥)
वेदः। तुरुष्काख्यजनः। इति मेदिनी ॥ राजभेदः। इति हेमचन्द्रः ॥
शाखोटः, पुं, वृक्षविशेषः। शाखोड़ा इति भाषा ॥ तत्पर्य्यायः। पिप्पलाशदुः २ पीतफलः ३ कर्कशच्छदः ४। इति त्रिकाण्डशेषः ॥ भूतवृक्षः ५ सकटः ६ अक्षधरः ७। इति भूरिप्रयोगः ॥ गवाक्षो ८ घूकावासः ९ रूक्षपत्रः १० पीतः ११ कैशिकयोगः १२ क्षीरनाशनः १३। अस्य गुणाः। तिक्तत्वम्। उष्णत्वम्। पित्तकारित्वम्। वातहारित्वञ्च। इति राजनिर्घण्टः ॥ अपि च।
"शाखोटः पीतफलको भूतावासः खरच्छदः।

शाखोटो रक्तपित्तार्शोव्रातश्लेष्मातिसारजित् ॥"
इति भावप्रकाशः ॥

शाख्यः, त्रि, शाखासम्बन्धी। शाखाशब्दात् ष्यञ्प्रत्ययेन निष्पन्नमेतत् ॥

शाङ्करं, क्ली, (शङ्कर+अण्।) छन्दोभेदः। इति मेदिनी ॥ अस्य रूपान्तरं शाङ्करं शाङ्करश्च ॥ (शङ्करो देवतास्य इत्यर्थे अणि चाद्रानक्षत्रम्। यथा, बृहत्संहितायाम्। ७१। ७।
"म्रगे तु मूलकाङ्क्षयं वसुत्वमेव शाङ्करे ॥")

शाङ्करः, पुं, (शङ्करस्यायं वाहनत्वात्। शङ्कर+अण्।) वलीवर्दः। इति मेदिनी ॥ (शङ्कर-सम्बन्धिनि, त्रि। यथा, कथासरित्सागरे। ४६। २०१।
"तत्रैषां तद्गुहाद्वारप्राप्तानां शाङ्करा गणाः ॥")

शाङ्करिः, पुं, (शङ्करस्यापत्यं पुमान्। शङ्कर+इञ्।) कार्त्तिकेयः। गणेशः। इति मेदिनी ॥

शाङ्कुची, स्त्री, शङ्कोचनमतस्यः। इति शब्दरत्नावली ॥

शाङ्कः, त्रि, शङ्खसम्बन्धि। शङ्खशब्दात् ष्यञ्प्रत्ययेन निष्पन्नमेतत् ॥

शाङ्खिकः, पुं, (शङ्खकरणं शिल्पमस्य इति। शङ्ख+ठक्।) जातिविशेषः। शाँखारि इति भाषा। तत्पर्य्यायः। कास्वत्रिकः २। इत्यमरः ॥ शङ्खकारः ३ कास्वनकः ४। इति शब्दरत्नावली ॥ शङ्खवादकः। तत्पर्य्यायः। शङ्खधमः २। इति जटाधरः ॥

शाङ्खुष्टा, स्त्री, गुञ्जा। इति रत्नमाला ॥

शाटः, पुं, वस्त्रभेदः। इत्यमरभरतौ ॥ यथा,—
"दूरतः शोभते मूर्खो लम्बशाटपटावृतः।
तावच्च शोभते मूर्खो यावत् किञ्चिन्न भाषते ॥"
इति चाणक्यशतकम् ॥

शाटकः, पुं क्ली, (शाट+स्वार्थे कन्।) पटः। (यथा, कथासरित्सागरे। ५३। ३८।
"स राजवह्निनामा तद्दत्त्वा शाटकमग्रहीत् ॥")
नाटकभेदः। इत्यमरभरतौ ॥

शाटिका, स्त्री, शाटी। इत्यमरटीकायां भरतः ॥

शाटी, पुं स्त्री, वस्त्रभेदः। साड़ी इति भाषा। इत्यमरः ॥ अस्या निर्माल्यत्वं निर्माल्यशब्दे द्रष्टव्यम् ॥

शाण्डायनं, क्ली, प्रकृतकर्म्मवैगुण्यप्रशमनार्थहोमः। यथा। यत्तु प्रकृतकर्म्मवैगुण्यप्रशमनाय शाण्डायनहोमाभिधानं भवदेवभट्टसम्मतं तन्न प्रामाणिकं तस्यादपि महाप्रामाणिकेभट्टनारायण-परमेर्गोभिलभाष्ये तदप्रमाणीकृतत्वात्। छन्दोगपरिशिष्टेऽपि प्रायश्चित्तार्थं प्रकारत्रय-मात्रमुक्तम्। यथा,—
"यच्च शाण्डिलिभिर्होमः प्रायश्चित्तार्थको भवेत्।
तत्सम्मतञ्च विज्ञेया स्त्रीमात्रिण्यश्च ये यथा ॥
अपि वाज्ञातलिङ्गेषु प्रायश्चित्तमपि वाकृतिः।
स्त्रीणां त्रिभिरुक्तोऽयं प्रायश्चित्तविधिः स्मृतः ॥"

नर्व्विकल्प इत्यनेन कल्पान्तरनिषेधात् गोभि-लीयकर्म्मणि शाण्डायनहोमो न युक्तः। किन्तु यत्तसमन्तमहाव्याहृतिभिश्चतसृभिः प्राय-श्चित्तहोमो युक्तः। विश्वारदप्रभृतयोऽप्येवम्। शाण्डायनहोमस्य सङ्कल्पेऽपि शाखान्तरीय-त्वम्। इति तिथ्यादितत्त्वम् ॥

शाण्डायनः, पुं, मुनिविशेषः। इति पुराणम् ॥

शाण्ड्यं, क्ली, (शण्डस्य भावः। शण्ड+ष्यञ्।) शण्डता। (यथा। "शण्डे शाण्ड्यं समाचरेत् ॥") तत्पर्य्यायः। कपटः २ व्याजः ३ दम्भः ४ उपधिः ५ छद्म ६ कैतवम् ७ कुहकः ८ निकृतिः ९। इत्यमरः ॥ नव व्यवहार्थ-व्यवहारे। शठ वधे क्लीबकैतवे तालव्यादिः अण् तस्य कर्म्म शाण्ड्यम्। कपटादि-षट्कं कुहनि कुहकादित्रयं क्षिप्तकौटिल्ये इत्येके। कपटादिषट्कं वञ्चनमात्रफलम्। कुहकादित्रिकन्तु हिंसाफलमिति भेदः। इति सर्व्वानन्दो मधुश्च। नवैवैकार्था इति वहवः। इति भरतः ॥ अपि च।
"अक्षियां कपटोव्याज उपधिर्दम्भ एव च।
कूट कल्कं छलं छद्म मिषकैरवकैतवम् ॥
अथ शाण्ड्यञ्च शठता कुहकतिर्निकृतिश्च सा।
हिंसाफले चतुष्कं स्यात् शाण्ड्यपर्य्याय ईरितः ॥
पूर्व्वः कपटपर्य्यायः फले वञ्चनमात्रके।
उभयोरेकपर्य्याय इति केचित् प्रचक्षते ॥"
इति शब्दरत्नावली ॥

शाण्ड, कृ ड शाधे। इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-सेट्।) कृ, अशुशाण्डत्। ड, शाण्डते गुणिनं गुणो। अन्तःस्थतृतीय-यकारादिरयमिति कस्यचिद्भ्रमः। इति दुर्गा-दासः ॥

शाण्डुलः, पु, शाद्वलः। इति केचित् ॥

शाण्ड्यं, क्ली, (शणेन निर्म्मितमिति। शण+ष्यञ्।) शणनिर्म्मितवस्त्रम्। यथा। चौमं शाण्ड्यं वा ब्राह्मणस्य कार्पासं क्षत्रियस्य आविकं वैश्यस्य। क्षुमा अतसी तस्या इदं चौमं तसरादि। शाण्ड्यं शणतन्तुभवं तद्भवं ब्राह्मणस्य। इति संस्कारतत्त्वम् ॥

शाण्ड्यः, पुं, (शण्यते शायते गुणादिरत्रेति। शण+घञ्।) कपर्दिका। कड़ियातर इति भाषा। तत्पर्य्यायः। निकषः ३ कषः ३। इत्य-मरः ॥ शाणः ४ निकषः ५ कसः ६। इति भरतः ॥ आकषः ७। इति शब्दरत्नावली ॥ माषचतुष्टयम्। चारि माषा इति भाषा। तत्पर्य्यायः। निष्कः २ टङ्कः ३। इति वैद्यक-परिभाषा ॥ यथा,—
"माषैश्चतुर्भिः शाणः स्यात् तत्र सप्त निगद्यते।
टङ्कः स एव कथितस्तद्द्वयं कोल उच्यते ॥"
इति भावप्रकाशः ॥

लौहादीनां निकषः। शानपातर इति भाषा। इति मेदिनी ॥ करपत्रम्। करात् इति भाषा। इति विश्वः ॥

शाणाजीवः, पुं, (शाणेन आजीवतीति। आ+जीव+अच्।) अक्षमार्षकः। यथा,—
"शाणाजीवः शङ्खमार्जी क्षमासक्तोऽविधा-वकः ॥"
इति हेमचन्द्रः ॥

शाणिः, पुं, षट्टङ्कः। यथा,—
"षट्टैराजशाणः शाणिसिमिः कङ्खटपचकः ॥"
इति शब्दमाला ॥

शाणितः, त्रि, तीक्ष्णीकृतः। निशितः। कृतशाणः। शाणशब्दादितप्रत्ययेन निष्पन्नमेतत् ॥

शाणी स्त्री, (शणस्य विकारः। शण+अण्। टिड्ढेति ङीप्।) शणसूत्रमयी यष्टिका। यथा,—
"शाणीप्रायाणि वस्त्राणि शमीप्राया मही-रुहाः।
शूद्रप्रायास्तथा वर्णा भविष्यन्ति कलौ युगे ॥'
इति विष्णुपुराणे ६ अंशे १ अध्यायः ॥
शाणी शणसूत्रमयी यष्टिका तत्तुल्यानि वस्त्राणि। इति तट्टीका ॥ (यथा, महाभारते। ३। १६४। १६।
"वस्त्राणां प्रवरा शाणी धान्यानां कोर-दूषकः ॥")
प्रावरणान्तरम्। तासु इति भाषा। इति मेदिनी ॥ छिद्रवस्त्रम्। यथा, शाणी गोणी छिद्रवस्त्रे। इति हेमचन्द्रः ॥ हस्तकटाद्यादि-सूचना। इशारा इति पारस्यभाषा। इति शब्दरत्नावली ॥

शाणीरं, क्ली, शोभनदमध्यस्थतटः। दहरोनदी-तटः। इति विश्वः ॥

शाण्डिल्यः, पुं, विल्ववृक्षः। इत्यमरः ॥ (यथा, महाभारतस्य पतिव्रतोपाख्याने। ६।
"हैरण्यं प्रथमामि यस्य पुरतः शाण्डिल्यमूले श्रिया
विश्रब्धाम्बुरुहे समं मधुरिपुक्षेत्रे शुभक्षेत्रे वहन् ॥")
वह्निभेदः। (शण्डिलस्य मुनेर्गोत्रापत्यमिति। शाण्डिल+"गर्गादिभ्यो यञ्।" ४। १। १०५। इति यञ्।) मुनिविशेषः। इति मेदिनी ॥ स तु गोत्रकारः भक्तिसूत्रकारश्च। तत्सूत्र-भाष्यावतरणश्लोको यथा,—
"प्रणम्य परमं देवं श्रीरङ्गेश्वरसूरिणा।
शाण्डिल्यसूत्रसूत्रीयं भाष्यमाभाष्यतेऽधुना ॥"

शातं, क्ली, (शो+क्तः। "शाच्छोरन्यतरस्याम्।" ७। ४। ४१। इति पक्षे इत्वाभावः।) सुखम्। तद्वति, त्रि। इत्यमरः ॥ (विनाशः। यथा, सुश्रुते। ४। १।
"शातिप्राप्तं शातिदाहं नखशातं करोति च ॥")

शातः, त्रि, (शो+क्तः।) दुर्म्मलः। निशितः। इति मेदिनी ॥ शूरवीरः। इत्यमरः ॥

शातकुम्भं, क्ली, (शतकुम्भे पर्व्वते भवम्। शत-कुम्भ+अण्।) काञ्चनम्। (यथा, माघे। ६। ६।

श्राद्धलः

"दुनश्रातकुम्भनिभंशुमनो
वपुरर्हमम्बवपुषः पयसि ॥")
धुस्तूरः। इत्यमरः ॥
श्रातकुम्भः, पुं, करवीरवृक्षः। इति मेदिनी ॥
श्रातकौम्भं, क्ली, स्वर्णम्। इति भरतदिरूपकोषः॥
(सुवर्णनिर्म्मिते, त्रि। यथा, रामायणे। २।
६।११।
"श्रतञ्च श्रातकौम्भानां कुम्भानामभिवर्षताम्॥")
श्रातनं, क्ली, काश्यम्। विनाश्रनम्। यथा,—
"वसन्ते सर्व्वशस्यानां जायते श्रतनम्।
मोदमानाश्च तिष्ठन्ति यवाः कणिशशालिनः॥"
इति सारमञ्जरी ॥
(छेदके, त्रि। यथा, रघुः। ३।४२।
"स पूर्व्वैः पर्व्वतपक्षश्रातनं
दृश्यं देवं नरदेवसम्भवः॥")
श्रातपत्रकः, पुं, (श्रातपत्रं पत्रमिव। कन्।)
चन्द्रप्रकाशः। यथा,—
"चन्द्रिका कौमुदी ज्योत्स्ना प्रकाशो द्योत
श्रातपः।
श्रकल्का चन्द्रिकायाश्च प्रकाशे श्रातपत्रकः॥"
इति शब्दचन्द्रिका ॥
श्रातभीरुः, पुं, मदनमाली। मल्लिकाभेदः।
यथा,—
"श्रातभीरुर्भवेद्यूथी भूमिमल्लोऽपराजिका॥"
इति रत्नमाला ॥
श्रातमानं, त्रि, (श्रतमान+"श्रतमग्नविंशतिः
क्रेति।" ५।१।२०। इति श्रण्।) श्रत-
मानेन क्रीतम्। इति सिद्धान्तकौमुदी ॥
श्रातला, स्त्री, (श्रातं छेदं लातीति। ला+कः।)
मातला। धर्म्मकथा इति ख्याता। इत्यमर-
टीकायां भरतः ॥
श्रातवं, क्ली, (श्रातोर्भावः कर्म्मो वा। श्रतु+
श्रण्।) श्रतुभावः। श्रतुसंघातः। इति
मेदिनी ॥ (श्रतुसम्बन्धिनि, त्रि। यथा, रघुः।
४।४२।
"ताम्बूलीनां दलैस्तत्र रचितापानभूमयः।
नारिकेलासवं योधाः श्रातवश्च पपुर्यशः॥")
श्रातवः, पुं, (श्रतुरेव। स्वार्थे श्रण्।) श्रतुः।
इत्यमरः ॥ (यथा, माघे। १४। ४४।
"तत्र गाम्भवदर्शी मधाद्यैः
श्रातवादिव पराङ्मुखोऽर्चिनः॥")
श्रादः, पुं, (श्रीं तनूकरणे+"श्रातिभ्यां दनौ।"
उणा० ४।८०। इति दः।) कर्दमः। श्रण्यम्।
इत्यमरः ॥
श्रादहरितः, त्रि, (श्रादैः श्रण्यैः हरितः।)
श्राद्वलः। इत्यमरः ॥
श्राद्वलः, त्रि, (श्राद+"नडश्रादात् कुलच्।" ४।
२।८८। इति कुलच्।) नवश्रत्पवद्भूप्रदेशः।
इत्यमरः ॥ श्रादौ नवत्वं विदन्तेऽस्य श्राद्वलः।
श्रध्यक्षादित्वं श्रत्र श्रादशब्दात्सः स्यात् न तु
षड्भाषिणोऽभिधानात्। इति तट्टीकायां
भरतः ॥ (यथा, रामायणे। २।१०।१४।

श्रान्तः

"श्रादवेषु यदा ग्रिष्मे वनान्ते वनगोचरा।
कुधाश्रान्तयुक्तेषु किं स्यात् सुखतरं ततः॥")
श्रान, श तेजे। इति कविकल्पद्रुमः ॥ (भ्वा०-
उभ०-सक०-सेट्।) श्रानक्षिण्णीकरणम्।
श, श्रीश्रांसति श्रीश्रांसते खड्गं कर्म्मकारः।
इति दुर्गादासः ॥
श्रानः, पुं, श्राशः। इत्यमरटीकायां भरतः ॥
श्रा(श)नपादः, पुं, पारिपात्रपर्व्वतः। (श्रस्य
विवरणं हरिवंशे १३१ श्रध्याये द्रष्टव्यम्।)
चन्दनवर्ष्मश्रपाषाणः। इति महाभारते हरि-
वंशः ॥ चन्दनगिरि इति भाषा ॥
श्रानी, स्त्री, इन्द्रवारुणी। इति शब्दचन्द्रिका ॥
श्रान्तः, त्रि, (श्रम+क्तः। "वा दान्तश्रान्तेति।"
७।२।२७। इति निपातितः।) उपश्रमं
श्रापितः। श्रान्तोपश्रमः। इति भरतः ॥ तत्-
पर्य्यायः। श्रमितः २। इत्यमरः ॥ श्रान्तः ३
तितेन्द्रियः ४। इति हेमचन्द्रः॥ श्रमान्वितः५।
इति मेदिनी ॥
श्रान्तः, पुं, श्रभियुक्तः। रसभेदः। इति मेदिनी ॥
श्रान्तरसस्य लक्षणादि यथा,—
"श्रान्तः श्रमः स्थायिभाव उत्तमप्रकृतिर्मतः।
कुन्देन्दुसुन्दरच्छायः श्रीनारायणदेवतः॥
श्रनित्यत्वादिनाशेषवस्तुनिःसारता तु या।
परमार्थस्वरूपं वा तस्यालम्बनमिष्यते॥
पुण्याश्रमहरिक्षेत्रतीर्थरम्यवनादयः।
महापुरुषसङ्गाद्यास्तस्योद्दीपनरूपिणः॥
रोमाञ्चाद्याश्रुभावास्तथा स्युर्व्यभिचारिणः।
निर्व्वेदहर्षस्मरणमतिभूतदयादयः॥"
यथा,—
"रथ्याश्रान्तरतस्तथा श्रुतरतुकन्या नवस्या-
श्रमे:
सञ्चास्य सकौतुकश्च सदयं हस्तस्य तेनांगरे:।
निर्व्वीलीकलसच्चित्सुधारसमुदा निद्रायमाणस्य मे
निःश्रङ्कं करटः कदा करपुटी भिक्षां विधुक्षिष्यति॥"
पुस्तिषु महाभारतादौ द्रष्टव्या।
"निरहङ्कारकरणत्वात् दयावीरादिरेव नो।"
दयावीरादौ हि नीरतत्वाहङ्कादौ अन्तरा
मत्सरत्वाद्यनुरागादेरभे च विद्याधरचक्रवर्त्ति-
लाभादिभिर्दैन्यगरहङ्कारोपशमो न दृश्यते।
श्रान्तस्तु सर्व्वप्रकारेणाहङ्कारप्रशमैकरूपत्वात्र
तत्रान्तर्भावमर्हति। अतश्च नागानन्दे श्रान्त-
रसप्रधानत्वमास्तम्। तत्र।
"न यत्र दुःखं न सुखं न चिन्ता
न द्वेषरागौ न च काचिदिच्छा।
रसः स शान्तः कथितो मुनीन्द्रैः
सर्व्वेषु भावेषु समप्रमाणः॥"
इत्येवंरूपस्य श्रान्तस्य मोक्षावस्थायामेवात्म-
स्वरूपाभिव्यक्तत्वात् प्रादुर्भावात्। तत्र
सञ्चार्य्यादीनामभावात् कथं रसत्वमित्युच्यते
शुक्लविशुद्धदशायामवस्थितो यः श्रमः स एव

श्रान्तिः

यतः रसतामेति तदस्मिन् सञ्चार्य्यादेः स्थितिश्च न विरुद्धा। यच्चास्मिन् सुखाभावोऽप्युक्तस्तस्य वैषयिकसुखपरत्वान्न विरोधः। उक्तं हि।
"यच्च कामसुखं लोके यच्च दिव्यं महासुखम्।
तृष्णाक्षयसुखस्यैते नार्हतः षोडशीं कलाम्॥
सर्व्वाकारमहङ्काररहितत्वं ब्रवन्ति चेत्।
श्रत्रान्तर्भावमर्हन्ति दयार्द्रादयस्तदा॥"
श्रादिशब्दात् धर्म्मवीरदानवीरदेवताविषय-
रतिप्रभृतयः। तत्र देवताविषया रतिर्यथा,—
"कदा वाराणस्यामिह सुरधुनीरोधसि वसन्
वसानः कौपीनं शिरसि निदधानोऽञ्जलिपुटम्।
श्रये गौरीनाथ त्रिपुरहर शम्भो त्रिनयन
प्रसीदेति क्रोशन्निमिषमिव नेष्यामि दिवसान्॥"
इति साहित्यदर्पणे ३ परिच्छेदः॥
श्रान्तं, [न्] क्ली, वारणम्। इति मेदिनी ॥
श्रान्तनवः, पुं, (श्रान्तनोरपत्यं पुमान्। श्रान्तनु+
श्रण्।) श्रान्तनुरपत्यपुत्रः। भीष्मः। इति
विकाण्डशेषः॥ (यथा, महाभारते। १।३६।
६०।
"तथा भीष्मः श्रान्तनवो गङ्गायामिततद्युतिः।
वसुवीर्य्यात् समभवत् महावीर्य्यो महायशाः॥")
श्रान्तनुः, पुं, द्वापरयुगस्य चन्द्रवंशीयैकविंश-
राजः। स तु गङ्गायां भीष्मं जनयामास। तस्य
पिता प्रतीपः। यथा,—
"जयसेनस्तनयो राधिकोऽतोऽग्रुतायुभूत्।
ततश्चाक्रोधनस्तस्मात् देवातिथिरस्य च।
श्रभवत्तस्य दिलीपोऽभूत् प्रतीपस्तस्य चात्मजः।
देवापिः श्रान्तनुस्तस्य बाह्लीक इति चात्मजाः॥
यं यं करार्भ्यां स्पृशति जीर्णं यौवनमेष्यति।
श्रान्तिमाप्नोति चेदाग्र्यां कर्म्मजां तेन
श्रान्तनुः॥
बाह्लीकात् सोमदत्तोऽभूत् भूरिर्भूरिश्रवास्ततः।
श्रजनि श्रान्तनोरासीत् गङ्गायां भीष्म आत्म-
वान्॥"
इति श्रीभागवते ९ स्कन्धे २२ श्रध्यायः॥
तत्पर्य्यायः। महाभीष्मः २। इति षटाधरः॥
प्रातीपः ३। इति विकाण्डशेषः॥ प्रतीपः ४
प्रतिपः ५। इति शब्दरत्नावली॥ (श्रान्तनु-
रिति पाठस्तु नश्चुभिराहतः॥) कर्कटी। इति
रत्नमाला ॥
श्रान्ता, स्त्री, इक्ष्वाकुराजकन्या। इक्ष्वाकुना कन्यार्थं
सोमपादाय राज्ञे प्रदत्ता। सा च ऋष्यशृङ्ग-
भार्य्या। इति रामायणम्॥ (यथा, उत्तर-
चरिते १ अङ्के।
"कन्यां दशरथो राजा श्रान्तां नाम श्रयोनि-
जाम्।
ऋष्यशृङ्गतिकां राज्ञे सोमपादाय यां ददौ॥")
भूमीभेदः। तत्पर्य्यायः। शुभा २ भद्रा ३ श्रप-
राजिता ४ जया ५ विजया ६। अस्या शुभा
भूमीयत इति राजनिर्घण्टः॥
श्रान्तिः, स्त्री, (श्रम+क्तिन्।) कामक्रोधादि-
प्रशमः। विषोपशमः। इति भरतः। विषेभ्य

इन्द्रियोपरमः। इति चण्डीटीकायां नागोजीभट्टः॥ तत्पर्यायः। शमथः २ शमः ३। इत्यमरः॥ प्रशमः ४ उपशमः ५ प्रशान्तिः ६। इति शब्दरत्नावली॥ दृष्ट्यादयः ७। इति हेमचन्द्रः॥ तल्लक्षणं यथा,—

"यत्किञ्चिदस्तु संप्राप्य स्वल्पं वा यदि वा बहु।
या तुष्टिर्जायते चित्ते शान्तिः सा गद्यते बुधैः॥"

इति पद्मपुराणे क्रियायोगसारे १५ अध्यायः॥ भद्रम्। इति हेमचन्द्रः॥ गोपीविशेषः। यथा,

राधिकोवाच।

"श्रान्त्वा गोष्ठा युतस्त्वञ्च दृष्टोऽहं रासमण्डले।
वसन्पुष्पशय्यायां माल्यवान् चन्दनोक्षितः॥
रत्नप्रदीपैर्युक्तञ्च रत्ननिर्म्माणमन्दिरे।
रत्नभूषितभूषाढ्यो रत्नभूषितया सह॥
तया दत्तञ्च ताम्बूलं भुक्त्वांश्च पुरा विभो।
सद्यो मच्छब्दमात्रेण तिरोधानं कृतं तया॥
श्रान्तिर्देहं परित्यज्य भयाद्दीना त्वयि प्रभो।
ततस्त्वया शरीरञ्च गुणश्रेष्ठं बभूव च॥
संविभज्य तया दत्तं प्रेम्णा प्रददता पुरा।
विश्वे विषयिणे किञ्चित् सत्त्वरूपाय विष्णवे॥
शुद्धसत्त्वस्वरूपाये महालक्ष्म्यै पुरा विभो।
त्वन्मन्त्रोपासकेभ्यश्च वैष्णवेभ्यश्च किञ्चन।
तपस्विभ्यश्च धर्म्माय धर्म्मिष्ठेभ्यश्च किञ्चन॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ६ अध्यायः॥*॥

दुर्गा। यथा,—

"उत्पत्तिस्थितिनाशेषु दक्षादित्रिगुणा मता।
सर्व्वदा सर्व्वदेवेभ्यः क्षान्तित्वात्क्षान्तिरुच्यते॥"

इति देवीपुराणे देवीनिरुक्ताध्यायः॥*॥

धर्म्मद्वारा गर्हदोषाद्गुणस्वभावादिरुचिते क्षिप्रानिष्टहेतुदुरितनिवृत्तिः। यथा,—

"यथा शस्त्रप्रहाराद्यं क्षतं विनिवारकम्।
तथा दैवोपघातानां शान्तिर्भवति वारणम्॥"
बालग्रहभूतग्रहणराधिपग्रकलतरग्रहुदुःखदरोगाभिभवाद्भुतदुःस्वप्नदुर्दोःस्थ्यादिनिमित्तकं शान्तिकर्म्मापि मलमासे कार्य्यम्। शुद्धकालप्रतीक्षायामसहत्वेनागम्यगतिकत्वात्। अतएवालाभ सतं गोपायेत इति श्रुतौ सततमित्युक्तम्। इति मलमासतत्त्वम्॥*॥ उपसर्गशान्तिगाथा यथा,—

"एकासिन्धो महावीर्य्यस्त्रैलोक्यस्येश्वरोऽभवत्।
शतं क्रतूनामाहृत्य शुभाशान्तिर्नाम नामतः॥
तस्योपसर्गनाशाय नामाक्षरविभूषिता।
अद्यापि मानवैर्गाथा गीयतेऽत्र महीतले॥
शमशान्तिर्दमश्चैव दानं शान्तिं न प्रयच्छति।
सहितः शिवसत्याद्यैस्तेषां यज्ञवरक्षिभिः॥"

इति मार्कण्डेयपुराणे उत्तममन्वन्तरनामाख्याये॥*॥

अथाद्भुतशान्तिः। तत्राद्भुतनिरूपणम्। अद्भुतशब्दार्थे आथर्व्वणाद्भुतवचनम्। प्रकृतिविरुद्धमद्भुतमाहुः प्राक्प्रबोधाय देवाः शब्दस्तोति। तेनाप्रज्ञानाय भूम्यादीनां पूर्व्वं स्वभावप्रच्यवो दैवकृतोऽद्भुत इति। तच्च बुधोऽयपर्व्वणि ग्रहादीनां गणितागणितत्वेन प्रकृतानामपि यदुत्पातत्वं तद्वाक्यम्। तत्कारणञ्च गर्गसंहितावार्हस्पत्ययोः।

"अतिलोभादसत्त्वादा नास्तिक्याद्दाप्यधर्म्मतः।
नरापचाराभ्रियतसुपसर्गाः प्रवर्त्तते॥
ततोऽपचाराभ्रियतसमपवर्ज्जन्ति देवताः।
ता दलन्त्यद्भुतांस्तांस्तु दिव्यनाभसभूमिजान्॥
त एव त्रिविधा लोके उत्पाता देवनिर्म्मिताः।
विचरन्ति विनाशाय रूपैः सत्त्वोद्भवन्ति च॥"

तांश्च परं न दर्शयेदित्याह विष्णुः। नोत्पातं दर्शयेदिति। तच्च वैजयन्तीमण्डलनिरूपणम्। यथा, दीपिकायाम्।

"प्राग्दिक्चितसमांगैर्द्यौर्निशीरद्भुतेषु सर्व्वेषु।
अनिलाग्निशुक्रवरुणा मण्डलपतयः शुभाशुभेषु॥"

वैजयन्तीमण्डलः।

"सूर्य्यमृगादित्यतुरगादित्येषु वायुर्भवेत्
देवेज्याजविशाखयाम्ययुगले पित्र्याहृये चानलः।
विश्वादित्यधराजमैत्रयुगवैश्वित्रो भवेच्चण्डलः
सर्पोपान्त्यधनान्त्यमूलयुगलेष्वापामीश्वरः॥
पवनदहनौ नैर्ऋतो योगस्तयोरतिशोभनः।
सुरपतिवरुणौ श्रुतौ योगस्तयोरतिशोभनः।
सवरुणमरुन्मित्रः शक्रस्तधाग्निसमायुतः।
फलविरहितः सेन्द्रो वायुस्तधाग्नियुतोऽम्बुपः॥
यत्रस्थवेऽद्भुतं जातं शान्तिस्तद्दैवताश्रया।
तथा शान्तिदयं कार्य्यं मण्डलदयजाद्भुते॥"*॥

विष्णुधर्म्मोत्तरे।

"अथ वैजयन्तं दिव्यं व्याख्यास्यामि निबोध मे।
उल्कापातो दिशां दाहः परिवेषस्तथैव च॥
गन्धर्व्वनगरञ्चैव वृष्टिश्च विकृता तथा।
एवमादीनि लोकेऽस्मिन् नानारूपाणि विनिर्दिशेत्॥
चरस्थिरभवं भौमं भूकम्पमपि भूमिजम्।
जलाशयानां वैकृत्यं भौमं तदपि कीर्त्तितम्॥
भौमं चाक्षफलं ज्ञेयं स्थिरेषु परिपच्यते।
गाभवं मध्यफलदं मध्यकालफलप्रदम्॥
दिव्यं तीव्रफलं ज्ञेयं शीघ्रकाले तथैव च॥*॥
प्रोक्तानामविपर्य्यासः ऋतूनां रिपुजं भयम्।
पुष्पे फले च विकृते राज्ञा स्वत्यु तथा दिशेत्॥
अकालप्रभवा नार्य्यः कालातीताः प्रजास्तथा।
विकृताः प्रसवाश्चैव युग्मप्रसवनं तथा॥
हीनाङ्गाः अधिकाङ्गाश्च जायन्ते यदि वा नराः।
पशवः पक्षिणश्चैव तथैव च सरीसृपाः॥
विनाशं तस्य देहस्य कुलस्य च विनिर्दिशेत्।
प्रदोषे कुक्कुटारावो हेमन्ते चापि कोकिलाः।
अकोदयेऽर्कांभिमुखः खरादो वृषभं दिशेत्॥
उलूको वसते यत्र विपत्तेहा तथा गृहे।
श्येनो गृध्रपतेर्मृत्युर्धनगाश्रुकश्चैव च॥
गृध्रः कङ्कः कपोतश्च उलूकः श्वेन एव च।
दिक्षु चर्म्मविलक्षश्च भासः पाण्डर एव च॥

गृहे यस्य पतन्त्येते गेहं तस्य विपद्यते।
पक्षाभ्यासात्तथा वधान्मृत्युः स्यादृक्षमाधनः।
पत्राः पुत्रस्य वा मृत्युर्व्यथापि विनश्यति॥
ब्राह्मणाय गृहं दत्त्वा दत्त्वा तन्मूल्यमेव वा।
गृह्णीयादृयदि रोचेत शान्तिश्चेमां प्रयोजयेत्॥"

इमां वक्ष्यमाणाम्॥*॥

"मांसास्थीनि समादाय श्मशानादृग्रवायसाः।
श्वा शृगालोऽथवा मध्ये पुरस्य प्रविशन्ति चेत्॥
विकिरन्ति गृहादौ च श्मशानं सा मही भवेत्।
चौरेण हन्यते लोकः परचक्रसमागमः॥
संग्रामश्च महाघोरो दुर्भिक्षं मरकं तथा।
अद्भुतानि प्रवर्त्तन्ते तत्र देशस्य विद्रवः॥
अकाले फलपुष्पाणि देशविद्रवकारणम्॥"

मत्स्यपुराणे।

"अतिवृष्टिरनावृष्टिर्दुर्भिक्षादिभयं मतम्।
ऋतौ तु दिनवृद्धिं वृष्टिर्ज्ञेया भयाय च॥
निर्घाते वाथ राहौ वा श्वेतं यस्योत्तरेत्तु।
इन्द्रायुधं ततो दृष्ट्वा उल्कापातं तथैव च॥
दिग्दाहपरिवेषौ च गन्धर्व्वनगरं तथा।
परचक्रभयं विद्याद्देशोपद्रवमेव च॥"

भासो वनकुक्कुटः॥*॥ कंसनिधनलक्षणे हरिवंशः।

"वक्रमङ्गारकश्चक्रे चित्रायां घोरदर्शनः।
चलत्यपर्व्वणि मही गिरीणां शिखराणि च॥"

वाणोत्पाते च यथा,

"दक्षिणां दिशमास्थाय धूमकेतुः स्थितोऽभवत्।
वक्रमङ्गारकश्चक्रे कृत्तिकासु भयङ्करः॥"*॥

कल्पचिन्तामणौ।

"यत्काग्नौचविषेकतत्त्वकसुवा लोकाः क्षुधापीड़िताः
विप्रा वेदहतास्तथा प्रचलिता वह्नाग्निनो दुःखिताः।
चौलीमन्दफला नृपाश्च विकलाः संग्रामघोरा मही
प्रेताघातदुरन्तपीड़िततरा देवेष्यराक्षीयुतौ॥
रक्ते शस्योदयोगो मांसास्थिवसादिभिर्मरुः।
धान्यहिरण्यवस्त्रकुसुमाद्यै वर्द्धते भयं विद्यात्।
अङ्गारपांशुवर्षं विनाशमुपयाति तन्नगरम्॥
उपलं विगा जलधरैर्विकृता वा यदा प्रावृषि दृश्या।
छिद्रं वाप्यतिदृष्टिं शस्यानामीतिसंजननम्॥"

बुधकौशिकसंवादे।

"वह्नाः प्रपाते च फलं शरटस्य प्ररोदये।
शीर्षे राजश्रियोवाप्तिर्मांसे चैश्वर्यमेव च॥
कर्त्तर्यभूषणावाप्तिर्नेत्रयोर्बन्धुदर्शनम्।
नासिकायाश्च सौगन्ध्यं वक्त्रे मिष्टान्नभोजनम्॥
कण्ठे चैव श्रियोवाप्तिर्भुजयोर्विभवो भवेत्।
धनलाभो वाहुमूले करयोर्धनहृद्धिः॥
जघनस्थे च सौभाग्यं वृद्धि सौख्यविवर्द्धनम्।
पृष्ठे नित्यं महीलाभः पार्श्वयोर्बन्धुदर्शनम्॥
कटिदेशे वस्त्रलाभो गुह्ये स्त्रीसमागमः।

शान्तिः

अङ्गे चार्थक्षयो नित्यं गुदे रोगभयं भवेत् ॥
उर्व्योस्तु वाहनावाप्तिर्जानुजङ्घेऽर्थसंक्षयः ।
वामदक्षिणयोः पादे भ्रमणं नियतं भवेत् ॥
वल्ल्याः प्ररोहणे चैव पतने शरटस्य च ।
गत्यागाच्च फलञ्चैव तदहेव प्रजायते ॥
वल्ल्याः प्ररोहणं रात्रौ शरटस्य प्रपातनम् ।
विघ्नार्थाय भवति व्याधिपीडा विपर्यये ॥
पतनानन्तरं चैवारोहणं यदि जायते ।
गतने फलमुत्कृष्टं रोहणेऽन्यत् फलं भवेत् ॥
आरोहणञ्चोर्ध्ववक्त्रे अधोवक्त्रे च पातनम् ॥
भवेदिष्टफलं तस्य तत्काले जायते ध्रुवम् ॥*॥
स्वल्पमात्रे तयोः सद्यः सचैलं जलमाविशेत् ।
पञ्चगव्यप्राशनञ्च कुर्य्यादर्कावलोकनम् ॥
वल्लीरूपं सुवर्णस्य रक्तवस्त्रेण वेष्टयेत् ।
पूजयेन्नवपुष्पाद्यैस्तदग्रे पूर्णकुम्भके ॥
पञ्चगव्यं पयश्चरुं पञ्चाम्रतं सपल्लवम् ।
पञ्चवृक्षकषायञ्च निधिप्यावाहयेत्ततः ॥
पूजयेन्नवपुष्पाद्यैर्लोकपालांस्तथा यहान् ।
गृह्योक्तेन मन्त्रेण समिद्भिः खदिरैः शुभैः ।
तिलैर्व्याहृतिभिर्होममष्टोत्तरसहस्रकम् ॥"
वल्ली गृहगोधिका । गृह्यमन्त्रस्त्र्यम्बकमन्त्रः
इति विद्याकरः ॥*॥ गर्गसंहितायां व्याहृतिस्तवयोः ।
"ये तेषु शान्तिं कुर्व्वन्ति न ते यान्ति पराभवम् ।
ये तु न प्रतिकुर्व्वन्ति क्रियया अहृयानिनः ।
दाम्भिकव्याङ्गा विमोहाद्या विनश्यन्त्येव तेऽचिरात् ॥"*॥
अत्र निमित्तनिश्चयवतोऽधिकारोऽन्यथा दोष इत्याह मत्स्यपुराणम् ।
"भिन्नमण्डलवेलायां ये भवन्त्यद्भुताः क्वचित् ।
तत्र शान्तिहुतं कार्य्यं निमित्तं सति नान्यथा ।
निर्निमित्तकृता शान्तिर्निमित्तमुपपादयेत् ॥"
एतच्च तत्तद्विशेषविहितशान्तिविषयम् ।
अन्यथा वेलामण्डलसन्देहे शान्तिर्न स्यात् ॥*॥
अतएवोक्तं योगियाज्ञवल्क्येन ।
"यत्र यत्र च संकीर्णमात्मानं मन्यते द्विजः ।
तत्र तत्र तिलैर्होमो गायत्र्या सप्तदाहुतः ॥
गायत्र्या प्रयतः शुद्धः सर्व्वपापैः प्रमुच्यते ।
शान्तिकामश्च जुहुयाद्गायत्र्यैमन्त्रवित् शुचिः ॥
पुष्टिकामश्च घृतक्तैस्तेन जुहुयात् शुचिः ।
सावित्र्या शान्तिहोमांश्च कुर्य्यात् पर्व्वसु नित्यशः ॥
प्रणवव्याहृतिभ्याञ्च स्वाहान्तो होमकर्म्मणि ।
प्रतिलोमा प्रयोक्तव्या फट्कारान्तामिचारिके ॥
मार्कण्डेयपुराणम् ।
"दिग्दैर्घ्यजनसामान्यं नृपसामान्यमात्मनि ।
नक्षत्रग्रहसामान्यं नरो यदुक्तं शुभाशुभम् ।
परस्पराभिरक्षा च ग्रहदोषेषु जायते ॥"
तथा ।
"तस्माच्छान्तिपरः प्राज्ञो लोकवादरतस्तथा ।
लोकवादांश्च शान्तीश्च ग्रहपीडासु कारयेत् ॥

शान्तिः

भूदोहानुपवासांश्च शस्तं चैत्यादिवन्दनम् ।
कुर्य्यात् होमं तथा दानं आर्द्रं क्रोधविवर्ज्जनम् ॥
अद्रोहं सर्व्वभूतेषु मैत्रीं कुर्व्वन्ति पण्डिताः ।
वर्ज्जयेदुपतीं वाचमतिवादांस्तथैव च ॥
ग्रहपूजाश्च कुर्व्वीत सर्व्वपीडासु मानवः ।
एवं शाम्यन्त्युपद्रवाणि घोराणि द्विजसत्तम ।
प्रयतानां मनुष्याणां ग्रहचेष्टान्यनेकशः ॥"*॥
लोकवादाश्च तत्रैवोक्ता यथा,—
"आकाशादेवनागाश्च देवादीनाश्च सौहृदात् ।
पृथिव्यां प्रतिलोके च लोकवादा इति स्मृताः ॥"
ते च सर्व्वभूतडाकिन्याद्यभिभवशान्त्यर्थं लौकिकौषधमन्त्रादयः । विषहरीमङ्गलचण्डिकागीतादयः । चैत्यवृक्षादौ चैवपालकुलदेवतापूजा च ॥*॥ यथा चापस्तम्बः । स्त्रीभ्योऽवरवर्णेभ्यो धर्म्मप्रेक्षान् प्रतीयादित्येक इति । धर्म्मप्रेक्षान् श्रुतिस्मृतिसदाचारेष्वप्रसिद्धान् इति नारायणोपाध्यायाः ॥ भूदोहञ्च पात्रं विना भूमौ गोस्तनं निष्पीय दुग्धोत्सर्गः । चैत्यः पूज्यत्वेन ख्यातो ग्रामप्रधानवृक्षः । तथा च वायोत्पाते हरिवंशः ।
"अनेकशाखश्चैत्यश्च निपपात महीतले ।
अर्च्चितः सर्व्वकन्याभिर्ज्ञातिनां महात्मनाम् ॥"
उपतप्तां अकलागोम् । अतिवादश्च पूज्यमतिक्रम्य भाषणम् ॥*॥ मात्स्यपुराणम् ।
"काकस्त्रैकरवश्चाथ प्रभाते दुःखदायकः ।
काको मैथुनकासक्तः श्वेतो वा यदि दृश्यते ॥
उलूको वसते यत्र निपतेत् वा तथा गृहे ।
ज्ञेयो गृहपतेर्म्मृत्युर्धननाशश्च तत्क्षणे च ॥"*॥
वराहसंहितायाम् ।
"क्रीड़ानुरक्तो रतिमांसलुब्धो
भीतो रुजार्त्तः पतितो विहङ्गः ।
नासौ गृहस्थस्य विनाशहेतु-
र्दोषः समुत्थाप्यत आहुरार्याः ॥
गृहे पक्षिविकारेषु कुर्य्याच्छान्तिमतर्पणम् ।
देवाः कपोता इति वा जप्यं सप्तभिर्द्विजैः ॥
गावश्च देया विविधा द्विजानां
सकाञ्चना वस्त्रयुगोत्तरीयाः ।
एवं कृते पापमुपैति शान्तिं
गृहे द्विजैर्वापि निवेदितं तत् ॥"
द्विजैः पक्षिभिः । अग्निना अन्यैरपि ॥*॥
शुक्लबलीभौमे ।
"एको वृषस्त्रयो गावः सप्ताश्वा नव दन्तिनः ।
सिंहश्चप्रतिकाश्चैव कपिलाः स्वामिघातिकाः ॥"
सिंहश्चप्रतिका गावः ॥*॥ मत्स्यपुराणे ।
"अङ्गे दक्षिणभागे तु शस्तं विस्फुरणं भवेत् ।
अधश्शस्तं तथा वामे पृष्ठस्य हृदयस्य च ॥
लाञ्छनं पिटकश्चैव ज्ञेयं विस्फुर्त्तितं तथा ।
विपर्य्ययेण विहितं सर्व्वं स्त्रीणां फलं तथा ॥"
"अनिष्टनिष्क्रीपगमे द्विजानां कार्य्यं सुवर्णेन च तर्पणं स्यात् ।"शब्दः । दुःस्वप्नानिष्टदर्शनादौ घृतं हिरण्यञ्च दद्यादिति ॥*॥ मात्स्ये ।

शान्तिः

"नमस्ते सर्व्वलोकेश नमस्ते भृगुनन्दन ।
कवे सर्व्वार्थसिद्ध्यर्थं गृहाणार्घ्यं नमोऽस्तु ते ॥
एवं शुक्रोदये कुर्व्वन् यात्रादिषु च भारत ।
सर्व्वान् कामानवाप्नोति विष्णुलोके महीयते ॥
नमस्तेऽङ्गिरसां नाथ वाक्पतेऽथ बृहस्पते ।
क्रूरग्रहैः पीड़िनागामभयाय नमो नमः ॥
संक्रान्तावपि कौन्तेय यात्रास्वभ्युदयेषु च ।
कुर्व्वन् बृहस्पतेः पूजां सर्व्वान् कामान् समश्नुते ॥*॥"
वेणावास्ते व्यासः ।
"ग्रहयज्ञैः शान्तिकैश्च किं क्लिश्यन्ति नरा द्विज ।
महाशान्तिकरः श्रीमान् तुलस्या पूजितो हरिः ॥
उत्पातान् दारुणान् पुंसां दुर्निमित्तानवेक्षणः ।
तुलस्या पूजितो भक्त्या महाशान्तिकरो हरिः ॥"
अत्र ब्रह्मपुराणीयो मन्त्रः ।
"नमस्ते बहुरूपाय विष्णवे परमात्मने
स्वाहेति ॥*॥"
छन्दोगपरिशिष्टम् । अथातो रजस्वलाभिगमने गोऽश्वभार्य्यासु गमने यमजननेन विजातीयजननेन वा काककङ्कगृध्रबकश्येनभासचिल्लकपोतानां गृहप्रवेशे मानुषस्योपरिविश्रामणे एषामेव क्रियमाणे गृहद्वारारोहणे अन्येषु चादृष्टेषु कल्पदृष्टेन विधिनाग्निमुपसमाधाय प्रायश्चित्ताख्याहुतीर्जुहोति अद्भुताय व्यये स्वाहा सोमाय विष्णवे रुद्राय वायवे सूर्य्याय ब्रह्मणे विश्वेभ्यो देवेभ्यः स्वाहेति स्थालीपाकाहुतान्यदिति ॥*॥ कपोतं विशेषयति शौनकः ।
"रक्तपादः कपोताख्यो चरण्योकाः शुकच्छविः ।
स चेच्छालां विशेच्छालासमीपञ्च व्रजेद्यदि ।
अन्येषु गृहमध्ये वा वल्मीकस्योन्नतादिषु ॥"
कल्पदृष्टेन विधिना गृह्योक्तेन प्रायश्चित्ताख्याहुतीः अद्भुतदोषप्रशमनार्थाः सप्ताख्याहुतीः अद्भुतायाव्यये स्वाहा इत्यादिमन्त्रैः तत्स्थालीपाकेति कर्त्तव्यतया पायसचरुभिरेतेभ्यो देवेभ्यो जुहुयात् । छन्दोगपरिशिष्टम् । पश्चात् घृतपायसेन ब्राह्मणान् भोजयित्वा गोवरं दत्त्वा शान्तिर्भवतीति । गोवरं गोश्रेष्ठम् । दक्षिणां तां गां कृत्वा दोषशान्तिर्भवतीति । तथा चोक्तम् ।
"गोर्विशिष्टतमा लोके देवैरपि निगद्यते ।
न ततोऽन्यद्वरं यस्मात् तस्माद्गौर्वरमुच्यते ॥"
छन्दोगपरिशिष्टम् । यस्त्वेषामन्यतमसमापन्नः प्रायश्चित्तं न कुर्य्यात्तस्य गृहपतेर्मरणं सर्व्वस्वनाशो वा भवति तस्मात् प्रायश्चित्तं कर्त्तव्यं कर्म्मापवर्गे वामदेव्यगानं शान्तिः शान्तिरिति । अपवर्गे समाप्तौ । वामदेव्यगानं शान्तिः कार्य्या । आवृत्तिः प्रकरणसमाप्त्यर्था । वा हेत्वर्थे ।
"भ्रमयन्त्यासमाद्यात् कम्पादिकृतं निमित्तमाश्वेव ।
अतिवर्षणोपवासव्रतदीक्षाजप्यहवनानि ॥*॥"

वराहः।
"ये च न दोषं जनयन्त्युत्पातान् तान्नृलक्षभावज्ञतान्।
ऋषिपुत्रज्ञते: श्लोकैर्विद्यादेभि: समासोक्तै: ॥"
तथा च मत्स्यपुराणम्।
"वज्राग्निमहौकन्यसन्ध्यानिर्घातनिस्वना:।
परिवेषरजोधूमरक्तार्कास्तमयोदया: ॥
हेमेभ्योऽथ रसक्षेमसुपुष्पफलोद्गमा:।
गोपद्मिमदृद्धिश्च शिवाय मधुमाधवे ॥ ❀ ॥
तारोल्कापातकलुषं कपिलार्केन्दुमण्डलम्।
अनभिज्वलनं स्फोटं धूमरेणुनिराकुलम् ॥
रक्तपद्मारुणा सन्ध्या नभ: क्षुब्धार्णवोपमम्।
सरिताम्बुसंक्षोभं दृष्ट्वा क्षौद्रे शुभं वदेत् ॥❀॥
अक्षायुधपरीवेषौ विद्युच्छुष्कविरोहणम्।
कम्पोद्वर्तनवेक्षत्यं रसनं दरणं क्षिते: ॥
नद्युदपानसरसां दृष्ट्वाद्या भवनम्भवा:।
पतनश्चाद्रिगेहानां वर्षासु न भयान्वहम् ॥"
हरिवंशे वर्षावर्णनायाम्।
"क्वचित् कन्दरहासाढ्यं श्लिलीन्ध्राभरणं क्वचित्।"
इति दर्शनात् वर्षासु श्लिलीन्ध्रोद्गमो न भयावह:॥
"दिव्यस्त्रीभूतगन्धर्वविमानादृश्यतदर्शनम्।
ग्रहनक्षत्रतारागां दर्शनञ्च दिवाम्बरे ॥
गौतवाद्यनिर्घोषो वनपर्वतसानुषु।
शुष्कवृक्षो रथोत्पत्तिरपामा: शरदि स्मृता: ॥❀॥
शीतानिलतुषारत्वं नर्दनं खगपक्षिणाम्।
रथोपचादिसत्त्वानां दर्शनं वागमानुषी ॥
दिशो धूमान्धकाराश्च शुक्लभा वनपर्वता:।
उत्पे: सूर्योदयास्तत्वं हेमन्ते शोभना मता: ॥❀॥
हिममातानिलोत्पातविरूपादृश्यतदर्शनम्।
दृष्ट्वाक्षनाभमाकाशं तारोल्कापातपिङ्गरम् ॥
चित्रा गर्भोद्भवा: स्त्रीषु गोऽश्वाजगपक्षिणाम्।
पत्राङ्कुरलतानाञ्च विकारा: स्निग्धिरे शुभा: ॥❀
ऋतुस्वभावजा स्त्रीते दृष्टा: सर्वा शुभावहा:।
ऋतावन्यत्र चोत्पाता दृष्टास्ते भयदारुणा: ॥❀
उक्तानाञ्च या गाथा स्त्रियूनां चेष्टितञ्च यत्।
स्त्रियो यच्च प्रभाषन्ते तत्र नास्ति यतिक्रम: ॥
पूर्वं चरति देवेषु पश्चाच्चरति मानुषान्।
नादेशिता वाग्वदति सदा श्लेमा सरस्वती ॥"
दृष्टव्यति:।
"ज्योतिर्ज्ञानं तथोत्पातमविदित्वा तु ये नृणाम्।
आवयन्त्यर्थलोभेन विनेयास्तेऽपि यत्नत: ॥"
विनेया दण्डनीया:। इति ज्योतिस्तत्त्वम् ॥❀॥
भौमदिव्यान्तरीक्षोत्पातशान्तिमाख्ये २०२ अध्यायावधि २१२ अध्यायपर्यन्तं द्रष्टव्या। तथा देवीपराणे महाभ्युदयपादे सर्व्वदेवकौसर्व्वोत्पातशान्तिक्रमाम्नायाधाये षष्ठीशब्दे च द्रष्टव्या। तन्त्रोक्ता शान्ति: षट्कर्म्मशब्दे द्रष्टव्या ॥❀॥ अथ शान्तिकपौष्टिककर्म्मदिनम्। तत्र वारा रविसोमबुधहरुसतिशुक्राणां तत्र नक्षत्राणि उत्तराषाढा उत्तरफल्गुनी उत्तरभाद्रपत् रोहिणी चित्रा अनुराधा मृगशिर: रेवती पुष्या अश्विनी हस्ता। तत्र चन्द्र: शोभन:। सर्वं शोभनम्। इति ज्योतिषतत्त्वम्॥

शान्ति:, पुं, दृष्टाहैदिग्रेष:। जिनचक्रवर्त्तिविशेष:। इति हेमचन्द्र:॥ दशमन्वन्तरीयेन्द्र:। यथा,—
"धर्म्मपुत्रस्य पुत्रास्तु दशमस्य मनो: शृणु।
सुचेचश्चोरुमौजाश्च भूमिश्रेण्यश्च वीर्य्यवान्॥
शतानीको निरमित्रो वृषसेनो जयद्रथ:।
भूरिद्युम्न: सुवर्चाश्च शान्तिरिन्द्र: प्रतापवान्॥
आपो मूर्त्तिर्हविर्यज्ञ: खलतिश्चाथयस्तथा।
नाभागोऽप्रतिमश्चैव सौरभा ऋषयस्तथा॥
प्राणाख्या: शतसंख्याश्च देवतानां गणास्तथा।
वाक्षिशुक्तं हरिश्च गदया घातयिष्यति॥"
इति गारुडे ८७ अध्याय:॥

शान्तिकाम:, त्रि, (शान्तिं कामयते इति। कम्+णिच्+अच्।) शान्त्यभिलाषी। यथा,
"श्रीकाम: शान्तिकामो वा यदृच्छं समाचरेत्।
दृष्ट्याद्य:पुष्टिकामो वा तथैवाभिचरन्नपि॥"
इति संस्कारतत्त्वम्॥

शान्तिगृहं, क्ली, (शान्तेर्गृहम्।) शान्त्यालय:। यत्रान्ते शान्तिकुम्भस्थापनेन स्नानस्य ग्रहम्। तत्पर्य्याय:। आथर्व्वणम् २। इति हेमचन्द्र:॥ (यथा, दृहत्संहितायाम्। ४४। ५।
"कण्डेषु निवपीयात् पुष्पार्थे शान्तिगृहगानाम्॥")

शान्त्वं, क्ली, सान्त्वम्। इत्यमरटीकाभारतसुन्दरी॥

शान्त्वति:, स्त्री, ब्राह्मणयष्टिका। इति शब्दचन्द्रिका॥ पुस्तकान्तरे स्त्रियामिति च पाठ:॥

शाप:, पुं, (शपनमिति। शप+घञ्।) आक्रोश:। (यथा, रघु:। ५। ५६।
"संभोचित: सत्त्ववता त्वयाहं
शापोऽधिरप्राथितदर्शनेन॥")
दिव्यम्। इति मेदिनी॥ आद्यस्य पर्य्याय:। अकरणि: २। इत्यमर:॥ अजीवनि: ३ अजननि: ४ अवग्रह: ५ नियह: ६। इति भरत:॥ अभिसम्पात: ७। इति अन्यान्तरम्॥ शेषस्य पर्य्याय:। शपनम् २ शपथ: ३। इत्यमर:॥ मिथ्याभिशंसनम् ४। इति शब्दरत्नावली॥ (उपप्लव:। यथा, रामायणे। १।२६।३५।
"उवास रजनीं तत्र ताटकाया वने सुखम्।
सुकृशापं वनं तच्च तस्मिन्नेव तदाहनि।
रमणीयं विबभ्राज यथा चैत्ररथं वनम्॥"
"सुकृशापं शपसतोपद्रवम्।" इति तट्टीका॥ जलम्। यथा, ऋग्वेदे। १०। २८। ४।
"प्रतीपं शापं नद्यो वहन्ति।"
"नद्यो गङ्गाया: सरित: प्रतीपं प्रतिकूलं शापं उदकं वहन्ति।" इति तद्भाष्ये सायण:॥)

शापटिक:, पुं, मयूर:। इति केचित्॥

शापाख्य:, पुं, (शाप एव अर्थो यस्य।) मनि:। इति त्रिकाण्डशेष:॥

शाफरिक:, पुं, (शफरान् हन्तीति, शफर+"षष्ठिमत्स्यशृङ्गान् हन्ति।" ४। ४। ३५। इति ठक्।) मत्स्यघातक:। इति केचित्॥

शाब्द:, त्रि, (शब्दस्यायमिति। शब्द+अण्।) शब्दसम्बन्धी। यथा। एक: शाब्दोऽपरश्चार्थ:। इति दायभाग:॥ (शब्दमय:। यथा, भागवते। २। २। २।
"शाब्दस्य हि ब्रह्मण एष पन्था
यन्नामभिर्व्याहरता धियेत॥")
सरस्वत्यां स्त्री, शाब्दी। इति केचित्॥

शाब्दबोध:, पुं, (शाब्द: शब्दसम्बन्धी बोध:।) शब्दार्थज्ञानम्। न्यायमते पदार्थज्ञानजन्यज्ञानम्। तस्य करणं पदज्ञानम्। तस्य कारणं पदशक्तिज्ञानम्। कदाचित् लक्षणाज्ञानम्। एवं आकाङ्क्षायोग्यतासन्निधितात्पर्य्यज्ञानञ्च। यथा,—
"पदज्ञानन्तु करणं द्वारं तत्र पदार्थधी:।
शाब्दबोध: फलं तत्र शक्तिधी: सहकारिणी॥"
इति भाषापरिच्छेद:॥ ❀॥
शाब्दबोधप्रकारं दर्शयति पदज्ञानमिति। न तु ज्ञायमानं पदं करणं पदाभावेऽपि मौनिश्लोकादौ शाब्दबोधात्। पदार्थधीरिति पदजन्यपदार्थस्मरणं व्यापार:। अन्यथा पदज्ञानवत: प्रत्यक्षादिना पदार्थोपस्थितावपि शाब्दबोधापत्ते:। तत्रापि वृत्त्या पदजन्यत्वं बोध्यं अन्यथा घटादिपदात् समवायसम्बन्धेन व्योमाद्यस्मरणे जाते व्योमाद्यस्यापि शाब्दबोधापत्ते:। वृत्ति: शक्तिलक्षणान्यतरसम्बन्ध:। अत्रैव शक्तिज्ञानस्य उपयोग:। पूर्वं शक्त्यग्रहाभावे पदज्ञानेऽपि ततस्सम्बन्धेन स्मरणाद्यनुपपत्ते:। पदज्ञानस्य हि सम्बन्धिज्ञानविधेयार्थस्मारकत्वम्। ❀। शक्तिश्च पदेन सह पदार्थस्य सम्बन्ध:। अस्माच्छब्दादयमर्थो बोद्धव्य इतीश्वरेच्छारूपा आधुनिके नाम्नि शक्तिरस्त्येव एकादशेऽहनि पिता नाम कुर्य्यादितीश्वरेच्छाया: सत्त्वात्। आधुनिके तु सङ्केते न शक्तिरिति सम्प्रदाय:। नथास्तु ईश्वरेच्छा न शक्ति: किन्त्विच्छैव तेनाधुनिकसङ्केतेऽपि शक्तिरस्तीति वदन्ति। ❀। शक्तिग्रहश्च व्याकरणादित:। तथा हि।
"शक्तिग्रहं व्याकरणोपमान-
कोषाप्तवाक्याद्व्यवहारतश्च।
वाक्यस्य शेषाद्विवृतेर्वदन्ति
सान्निध्यत: सिद्धपदस्य वृद्धा:॥"
धातुप्रकृतिप्रत्ययादीनां शक्तिग्रहो व्याकरणादभवति क्वचित्तु सति बाधके लक्ष्यतेऽपि। यथा, वैयाकरणैराख्यातस्य कर्त्तरि शक्तिरुच्यते। चैत्र: पचतीत्यादौ कर्त्रा सह चैत्रस्याभेदान्वयश्च गौरवान्न उच्यते किन्तु क्तान्तौ शक्तिग्रहो लाघवात्। क्तान्तश्चैत्रादौ प्रकारीभूय भासते। न च कर्त्तुरनभिधानाच्चैत्रादिपदानन्तरं तृतीया स्यादिति वाच्यं कर्त्तृसंख्याऽनभिधानस्य तत्र तन्त्रत्वात्। संख्याभिधानयोग्यश्च कर्म्मत्वाद्यनवच्छ:। प्रथमान्तपदोपस्थाप्यकर्म्मत्वादीनस्य विशेषणतात्पर्य्यविषयत्वमर्थ: तेन चैत्र एव

"माया नारायणीशानी शारदेत्यम्बिकेति च ॥") तस्या पुजादिविधिर्यथा,—
"शरत्काले पुरा यस्मात् नवम्यां बोधिता सुरैः।
शारदा सा समाख्याता पीठे लोके च गीयते॥"
इति तिथ्यादितत्त्वम्॥
वीणादिशेषः। इति शब्दरत्नावली॥ शार्ङ्गी। सारिवा। इति राजनिर्घण्टः॥

शारदिकं, क्ली, (शरद्+"आर्हे शरदः।" ४।३।१२। इति ठण्।) आढकम्। इति विश्वप्रकाशकौमुदी॥

शारदिकः, पुं, (शरद्+"विभाषा रोगातपयोः।" ७।१।१३। इति ठण्।) रोगः। आतपः। इति विश्वप्रकाशकौमुदी॥

शारदी, स्त्री, (शरद्+ङीप्।) लोचविशेषः। तत्पर्य्यायः। इति मेदिनी॥ कोजागरपूर्णिमा। इति शब्दरत्नावली॥ शरत्कालीने, त्रि। यथा, स्कान्दभविष्ययोः।
"शारदीचण्डिकापूजा त्रिविधा परिगीयते।
सात्त्विकी राजसी चैव तामसी चेति तां शृणु॥
सात्त्विकी जपयज्ञाद्यैर्नैवेद्यैश्च निरामिषैः।
माहात्म्यं भगवत्याश्च पुराणादिषु कीर्त्तितम्॥
पाठस्तस्य जपः प्रोक्तः षष्ठेर्द्वौमनाः प्रिये।
राजसी बलिदानैश्च नैवेद्यैः सामिषैस्तथा॥
सुरामांसासृगुपचारैर्जपयज्ञैर्विना ४ वा।
विना मन्त्रैस्तामसी स्यात् किरातानाञ्च वल्लभा॥"
इति तिथ्यादितत्त्वम्॥
(संवत्सरसन्धिनी। यथा, ऋग्वेदे।१।१९१।७।
"यस्मिन्नश्वास शारदीरवासः उषासो यथा तिरः॥")

शारदीयमहापूजा, स्त्री, (शारदीया महापूजा।) शरत्कालीनदुर्गामहापूजा। यथा,—
"शारदीया महापूजा चतुःकल्पमयी शुभा।
सा तिथित्रयमासाद्य दुर्य्यात् सर्व्वा विधानतः॥"
इति तिथ्यादितत्त्वम्॥
अपि च।
"एते वीरे महावीरे सुरासुरभयङ्करे।
देवीसुपासका देवाः प्रसृता राजयक्षयोः॥
सर्व्वेषां सर्व्वदेवानां देवीं भक्त्या तुतोषिरे।
बलिञ्च ददुर्भूतानां महिषाजामिषेण च॥
एवं तस्मिन् दिने पत्ते प्रेतभूतसमाकुलम्।
जातवान् सर्व्वदेवस्य पूजास्य शास्त्रकौमुदीम्॥
अतस्तस्मिन् दिने मासि महिषादिनिबर्हिणीम्।
देवीं संपूजयित्वा तु अष्टमीमष्टदोषिणीम्॥
ये कुर्व्वन्ति सदा भक्त्या ते भवन्ति महाबलाः।
अधिकं ये प्रकुर्व्वन्ति सर्व्वभूतविमोहनम्॥
तेषान्तु तुष्यते देवी यावत् कल्पन्तु शाङ्करम्।
कीर्त्तनं विविधैर्भक्तैर्देवीलोके सुदुर्लभे॥
यावद्भूमण्डलाधारा सूर्य्यं यद्दिवाकरौ।
तावत्स्थास्यति पूजा मे विष्यति सदा भुवि॥
पाटलाकाले विल्वेषु चाश्विने शुक्लपक्षे च।
महाशब्दो नवम्याञ्च लोके ख्यातिं गमिष्यति॥
इन्द्र उवाच।
आश्विने पतिते घोरे नवमी प्रतिवत्सरम्।
श्रोतुमिच्छाम्यहं तात उपयामप्रकाशिकम्॥
महाव्रतं महापुण्यं शुद्धराद्धैरनुष्ठितम्।
कर्त्तव्यं दैवराजेन्द्र देवीभक्तिसमन्वितैः॥
कन्यास्थे रवौ शुक्ल प्रतिपदारभ्य नन्दिकाम्।
अपाणौ स्वर्य वैकाणौ नक्षत्रे च वायुदैवते॥
प्रातःकाले स्नातवन्दः सिद्धकार्य्यः शिवपूजकः।
उपवासमवाप्नुयात् कन्यकां भोजयेत् यदा॥
अष्टम्यां नवमेद्यान दारुणानि शुभानि च।
एवं वा त्रिदिनायेन कारयेत् सुरसत्तम॥
तस्मिन् दैवी प्रकर्त्तव्या दैवी वा राक्षसी च वा।
तदाद्यौ नवमीपेता खड्गे मृण्मय पूजयेत्॥
सर्व्वोपहारसम्पन्नो वस्त्ररत्नफलादिभिः।
कारयेन्मधुदोलाद्यैः पूजान्ते बलिदेवकीम्॥
पुष्पाद्यैरथविख्यातपातीपुत्रानवत्यकैः।
विचित्रां कारयेत् पूजां अष्टम्यामुपवासयेत्॥
दुर्गाग्रतो जपेत्सप्तशतमेकाग्रचित्तः।
तदर्द्धमानसोपेतं सम्पूर्णं सर्गचैतसम्॥
विधिवत् कालि कालीति मन्त्रं खड्गेन घातयेत्॥
तच्छोणितं रुधिरं मांसं महीत्वा पूतनादिषु।
नैर्ऋतायै प्रदातव्यं महाकौशिकमन्त्रितम्॥
तत्पश्चात्तो नृपः प्रायाच्छत्रं छत्त्वा तु पिष्टकम्।
खड्गेन घातयित्वा तु दद्यात् स्कान्दविधानतः॥"
ततो देवीं स्नापयेत् प्राज्ञः क्षीरसर्पिर्जलादिभिः।
कुङ्कुमागुरुकर्पूरचन्दनैरनुलेपके॥
दैवानि पुष्परत्नानि वासांसि स्नापनानि च।
निवेद्यं सुप्रभूतन्तु देयं देयाः सुभावितैः॥
अश्वमेधमवाप्नोति भक्तिमान सुरसत्तम।
महानवम्यां पूर्व्वेयं सर्व्वकामप्रदायिका॥
सर्व्वेषु सर्व्ववर्षेषु सर्व भक्त्या प्रकीर्त्तिता।
लभतेप्सितं यद्यो राज्यं पुत्रानुपमलक्षणः॥"
इति देवीपुराणे २६।३० अध्यायात् सङ्कलितं न तु सकलमकम्॥

शारिः, पुं, (शृ हिंसायाम्+इण्।) अक्षोपकरणम्। पाशकादेर्नलम्। गुटिका। इति मेदिनी॥ तत्पर्य्यायः। शारः २ खेलनी ३। इति हेमचन्द्रः॥

शारिः, स्त्री, (शृ+"अः शकुनौ।" उणा० ४। १२७। इति इन्।) शकुनिकाभेदः। युद्धार्थशस्त्रप्रभेदः। अवधारणकारम्। इति मेदिनी॥ कपटः। इति भरतिः॥

शारिका, स्त्री, (शारिरेव। स्वार्थे कन्।) पक्षिविशेषः। मयना इति भाषा। तत्पर्य्यायः। गोनसा २ गोराटी ३ गोलिराटिका ४। इति हेमचन्द्रः॥ शारिका ५ शारी ६ चित्रशोभना ७ शारिः ८। इति शब्दरत्नावली॥ शबलशारिका ९ शबलिका १०। इति भट्टारः॥ वीणादिवाद्यम्। तत्पर्य्यायः। कोणः २। इति हेमचन्द्रः॥

शारिफलं, क्ली पुं, (शारीणां खेलनीनां फलम्।) शारिमूलः। शारिखेलनाधारः। इक्षुः इति भाषा। तत्पर्य्यायः। अशनफलम् २। इक्षुमरः॥ कोकजः ३। इति शब्दरत्नावली॥ शाकपर्णः ४ शारिफलकः ५ विक्षुरकः ६ पर्णपीठी ७। इति भट्टारः॥

शारिफलकः, पुं क्ली, (शारीणां फलकः।) शारिफलम्। इति भट्टारः॥

शारिवा, स्त्री, (शबलवर्णा। तत्पर्य्यायः। गोपी २ श्यामा ३ अनन्ता ४ उत्पलशुक्लिका ५। इत्यमरः॥ "एष श्यामलतायाम्। नागविशेषायामिति केचित्। गोपीशारिवं श्यामलतायां अनन्तादिद्वयं अपरनाम्नि इति केचित्। गुडूचयाश्च गोपीशारिवाकीम् गोपाञ्च।
'गोपीश्यामा गोपवल्ली गोपा गोपाशारिवापि च।'
इति शब्दरत्नावलिः।
'एकं या शारिवाख्यं सर्व्वजन्तुविनोदकम्।
इति वैद्यकात्।" इति भरतः॥
अस्या गुणाः। वातपित्तदाहज्वरास्रदोषेश्वरनाशित्वम्। इति राजवल्लभः॥

शारिफलता, स्त्री, (शारीणां फलमिव यत्र।) पाशकविशेषः। यथा,—
"पुष्करी तिलिकी शूलं पञ्चमी शारिफलता।
गजपीठी षष्ठकाखो गजः स्यात्पञ्चपुष्करः।
एते पाशकभेदाः स्युर्जयकोलाहलोऽपि च॥"
इति शब्दरत्नावली॥

शारी, स्त्री, (शृ+इण्। वा ङीप्।) क्रुञ्चा। इति केचित्॥ (शकुनिकाभेदः। यथा, आर्य्यासप्तशत्याम्। ६२३।
'या विरुद्धदृष्टनष्टा सत्या सत्यापि जीवति पराक्षी।
शारीव निजय भवसम्मुखिका भांतिताक्षेप॥")

शारीरं, क्ली, दयः। (शरीरे भवः। शरीर+अण्।) शरीरजाते, त्रि। इति मेदिनी॥ शारीरदण्डो यथा,—
"दिग्दण्डं प्रथमं कुर्य्यात् वाग्दण्डं तदनन्तरम्।
ततीयं धनदण्डञ्च वधदण्डतः परमिति॥"
वधदण्डोऽपि शारीरो ब्राह्मणक्षत्रियातिरिक्तानाम्। इति मिताक्षरायां व्यवहाराध्यायम्॥
शारीरदुःखं यथा,—
"व्याधाश्रिको वै त्रिविधः शारीरो मानसस्तथा।
शारीरो बहुभिर्भेदैर्भिद्यते शृणुतान्यतः॥
शिरोरोगज्वरश्वासकण्ठास्यहृदयामयैः।
गुल्मार्शोव्रणकुष्ठाक्षिकर्णादिभिरनेकधा॥
तथाशिरोगार्तीवातरक्तशूलाजीर्णसंभवैः।
भिद्यते वैद्यशास्त्रेषु मानसं शृणुमर्त्त्यैः॥
कामक्रोधभयैर्लोभमोहैश्च विविधैः।

शोकाश्रयाणामनेकव्याधिमात्सर्यादिभयस्तथा ॥
मानसोऽपि द्विजश्रेष्ठ तापो भवति नैकधा ।
इत्येवमादिभिर्देहस्तापो ह्याध्यात्मिकः स्मृतः ॥
दुःखं सहस्रशो भेदैर्भिद्यते मुनिसत्तम ।
सुकुमारतनुर्गर्भे जन्तुर्बहुमलाकुले ॥
उल्बसंवेष्टितो भुग्नशीर्षग्रीवातिसंकुचितः ।
अत्यन्तकटुतीक्ष्णोष्णलवणैर्मातृभोजनैः ॥
अतितापिभिरत्यर्थं वर्द्धमानातिवेदनः ।
प्रसारणाकुञ्चनार्हो नाङ्गानां प्रभुरात्मनः ॥
शुक्रशोणितसंघातः सर्वतः पीडितः ।
निरुच्छ्वासः सचेतन्यः स्मरन् जन्मशतान्यथ ॥
आस्ते गर्भेऽतिदुःखेन निजकर्मनिबन्धनः ।
जायमानः पुरीषाक्तसूक्ष्मशुक्राविलाननः ॥
प्रजापत्येन वायुना पीड्यमानास्थिबन्धनः ।
अधोमुखो वै ह्रियते प्रबलैः क्षतिमारुतैः ॥
क्लेशैर्निष्क्रान्तमात्रोऽपि भवत्यात्मातुरातुरः ।
मूर्च्छामवाप्य महतीं संसृतौ वाप्यवायुना ॥
विज्ञानं भ्रंशमाप्नोति ज्ञानञ्च मुनिसत्तम ।
कण्टकैरिव तुन्नाङ्गः क्रकचैरिव दारितः ॥
पूतिव्रणाग्निपतितो धरण्यां कृमिको यथा ।
कण्डूयनेऽपि वाशक्तः परिवर्त्तेऽप्यनीश्वरः ॥
स्नानपानादिकाहारमप्याप्नोति परेच्छया ।
अशुचिः सस्तरे सुप्तः कीटदंशादिभिस्तथा ॥
भक्ष्यमाणोऽपि नैवैषां समर्थो विनिवारणे ।
जन्मदुःखान्यनेकानि जन्मनोऽनन्तराणि च ॥
बालभावे यदाप्नोति व्याधिभौवादिकानि च ।
अज्ञानतमसाच्छन्नो मूढान्तःकरणो नरः ॥
न जानाति कुतः कोऽहं क्व वा गन्ता किमात्मकः ॥"

इति विष्णुपुराणे ६ अंशे ५ अध्यायः ॥*॥

अथातः शरीरसंख्याव्याकरणं शारीरं व्याख्यास्यामः । शुक्रशोणितं गर्भाशयस्थमात्मप्रकृतिविकारसंमूर्च्छितं गर्भ इत्युच्यते । तत्र चेतनाधिष्ठितं वायुर्विभजति । तेज एनं पचति । आपः क्लेदयन्ति । पृथिवी संहन्ति । आकाशं विवर्द्धयति । एवं विवर्द्धितः स यदा हस्तपादशिक्षाप्रायकर्मेन्द्रियैरुपेतस्तदा शरीरमिति संज्ञां लभते । तत्र षडङ्गं शाखाश्चतस्रो मध्यं पञ्चमं षष्ठं शिर इति ॥*॥ अतः परं प्रत्यङ्गानि कथ्यन्ते । मस्तकोदरपृष्ठनाभिललाटनासाचिबुकवस्तिग्रीवा इत्येता एकैकाः । कर्णनेत्रनासाभ्रुवक्षःसगण्डकक्षस्तनहृदयपार्श्वस्फिक्कक्षाबाहुकपर्वतयो द्वे द्वे । विंशतिरङ्गुल्यः । स्रोतांसि च वक्ष्यमाणानि । एष प्रत्यङ्गविभाग उक्तः ॥*॥ तस्य पुनः संख्यानम् । त्वचः कला दातवो मला दोषा यकृत्प्लीहानौ फुप्फुस उण्डुको हृदयं वृक्कौ च ॥*॥ आशयास्तु वाताशयः पित्ताशयः श्लेष्माशयो रक्ताशय आमाशयः पक्वाशयो मूत्राशयः स्त्रीणां गर्भाशयोऽष्टम इति ॥*॥ सार्द्धत्रिशतमास्नायूनां पुंसां स्त्रीणामर्द्धाधिकानि । श्रवणनयनवदनघ्राणगुदमेढ्राणि नव स्रोतांसि नराणां वहिर्मुखान्येतान्येव स्त्रीणामपराणि च त्रीणि द्वे स्तनयोरधस्ताद्रक्तवहे ॥*॥ षोडश कण्डराः । तासामूर्ध्वतः पादयोस्तावत्यो हस्तग्रीवापृष्ठेषु । तत्र हस्तपादगतानां कण्डराणां नखाः प्ररोहाः । ग्रीवाहृदयनिबन्धिनीनां अधोभागगतानां मेढ्रं श्रोणिपृष्ठनिबन्धिनीनां अधोभागगतानां विम्बः । मूर्द्धास्थिवक्षोऽस्थिखण्डादीनाञ्च मांससिरास्नायुस्नेहजालानां प्रत्येकं चत्वारि चत्वारि । तानि मणिबन्धगुल्फसंश्रितानि परस्परनिबद्धानि परस्परसंश्रितानि परस्परगवाक्षितानि चेति । यैर्गवाक्षितमिदं शरीरम् ॥*॥ षट् कूर्चास्तु हस्तपादग्रीवामेढ्रेषु । हस्तयोर्द्वौ पादयोर्द्वौ ग्रीवामेढ्रयोरेकैकः । महत्यो मांसरज्जवश्चतस्रः पृष्ठवंशसुभयतः पेशीनिबन्धनार्थं द्वे बाह्ये आभ्यन्तरे च द्वे ॥*॥ सप्त सेवन्यः । शिरसि विभक्ताः पञ्च सिद्धासेफसीरेकैका ता: परिदर्शनेन्द्रियाङ्गम् ॥*॥ चतुर्दशास्थ्नां संघाताः । तेषां त्रयो गुल्फजानुवङ्क्षणेषु । एतैनेतरसक्थिबाहू च व्याख्यातौ । त्रिकशिरसोरेकैकः ॥*॥ चतुर्दशैव सीमन्ताः । ते चास्थिसंघातवक्ष्यमाणा यत्रैतैर्युक्ता अस्थिसंघाताः । ये त्वक्ताः संघातास्तु खल्वष्टाविंशत्येकैकयाम् ॥*॥ त्रीणि च षष्ठान्यस्थिशतानि वैद्यवादिनो भाषन्ते । प्रत्यन्तरे तु त्रीण्येव शतानि । तेषां सविंशमस्थिशतं शाखासु । सप्तदशोत्तरं शतं श्रोणिपार्श्वपृष्ठोदरोरःसु । ग्रीवां प्रत्यूर्द्धं त्रिषष्टिः । एवमस्थ्नां त्रीणि शतानि पूर्यन्ते । एकैकस्यान्तु पादाङ्गुल्यां त्रीणि त्रीणि तानि पञ्चदश । तलकूर्चेगुल्फसंश्रितानि दश । पार्ष्ण्यामेकम् । जङ्घायां द्वे । जानुन्येकम् । एकमूरावितीत्रिंशदेवमेकस्मिन् सक्थ्नि भवन्ति । एतैनेतरसक्थिबाहू च व्याख्यातौ । श्रोण्यां पञ्च तेषां गुदभगनितम्बेषु चत्वारि । त्रिकसंश्रितमेकम् । पार्श्वे षट्त्रिंशदेवमेकस्मिन् हितीयेऽप्येवम् । पृष्ठे त्रिंशत् । अष्टादशसु । द्वे अक्षकसंज्ञे । ग्रीवायां नवकम् । कण्ठनाड्यां चत्वारि । द्वे हन्वोः । हन्वा द्वात्रिंशत् । नासायां त्रीणि । एकं तालुनि । गण्डकर्णशङ्खेष्वेकैकम् । षट् शिरसि । एतानि पञ्चविधानि भवन्ति । तद्यथा । कपालरुचकफलकरुचकवलयनलककसंज्ञानि । तेषां जानुनितम्बांसगण्डनालुशङ्खशिरःसु कपालानि । हस्तनासासु रुचकानि । घ्राणकर्णग्रीवास्थिकोषेषु तरुणानि । पाणिपादपार्श्वपृष्ठोदरोरःसु वलयानि । ग्रीवायां नलकसंज्ञानि ॥*॥ भवन्ति चात्र ।

"अभ्यन्तरगतैः सारैर्यथा तिष्ठन्ति भूरुहाः ।
अस्थिसारैस्तथा देहा ध्रियन्ते देहिनां ध्रुवम् ॥
तस्मादविरविनष्टेषु त्वङ्मांसेषु शरीरिणाम् ।
अस्थीनि न विनश्यन्ति सारार्थेतानि देहिनाम् ॥
मांसान्यत्र निबद्धानि शिराभिः स्नायुभिस्तथा ।
अस्थीन्यालम्बनं कृत्वा न शीर्यन्ते पतन्ति वा ॥"

सन्त्यस्तु विविधाश्चेष्टावन्तः स्थिराश्च ।

"शाखासु हन्वोः कक्षायां चेष्टावन्तस्तु सन्धयः ।
शेषासु सन्धयः सर्वे विज्ञेया हि स्थिरा बुधैः ॥"

संख्यातस्तु दशोत्तरे द्वे शते । तेषां शाखास्वष्टषष्टिरेकोनषष्टिः कोष्ठे । ग्रीवां प्रत्यूर्द्धं त्रयोनीतिः । एकैकस्यां पादाङ्गुल्यां त्रयस्त्रयो द्वावङ्गुष्ठे ते चतुर्दश । जानुगुल्फवङ्क्षणेष्वेकैकः । एवं सप्तदशैकस्मिन् सक्थ्नि भवन्ति । एतेनेतरसक्थिबाहू च व्याख्यातौ । त्रयः कटीकपालेषु । चतुर्विंशतिः पृष्ठवंशे । तावन्त एव पार्श्वयोः । उरस्यष्टौ । तावन्त एव ग्रीवायाम् । त्रयः कण्ठे । नाड्यां हृदयक्लोमनिबद्धास्त्रयोदश । दन्तपरिमाणा दन्तमूलेषु । एकः काकलके नासायाञ्च । द्वौ वर्त्ममण्डलजौ नेत्राश्रयौ । गण्डकर्णशङ्खेष्वेकैकः । द्वौ हनुसन्धी । द्वावुपरिष्टाद्भ्रुवोः शङ्खयोश्च । पञ्च शिरःकपालेषु । एको मूर्द्धनि ॥*॥ त एते सन्धयोऽष्टविधाः । कोरोदूखलसामुद्गप्रतरतुन्नसेवनीवायसतुण्डमण्डलशङ्खावर्त्ताः । तेषामङ्गुलिमणिबन्धगुल्फजानुकूर्परेषु कोराः सन्धयः । कक्षावङ्क्षणदशनेषूदूखलाः । अंसपीठगुदभगनितम्बेषु सामुद्गाः । ग्रीवापृष्ठवंक्षयोः प्रतराः । शिरःकटीकपालेषु तुन्नसेवनी । हन्वोरुभयतस्तु वायसतुण्डाः । कण्ठहृदयनेत्रक्लोमनाड्यासु मण्डलाः । श्रोत्रशङ्खाटकेषु शङ्खावर्त्ताः ।

"तेषां नामभिरेवाकृतयः प्रायेण व्याख्याताः ।
व्यस्यन्तु सन्धयो ह्येते केवलाः परिकीर्त्तिताः ।
पेशीस्नायुशिराणान्तु सन्निसंख्या न विद्यते ॥"

नवस्नायुशतानि । तेषां शाखासु षट् शतानि । द्वे शते त्रिंशच्च कोष्ठे । ग्रीवां प्रत्यूर्द्धं सप्ततिः । एकैकस्यान्तु पादाङ्गुल्यां षट् निचितास्त्रिंशत् । तावत्य एव तलकूर्चेगुल्फेषु । तावत्य एव जंघायाम् । दश जानुनि । चत्वारिंशदूरौ । दश वङ्क्षणे । शतमर्द्धमेवमेकस्मिन् सक्थ्नि भवन्ति । एतेनेतरसक्थिबाहू च व्याख्यातौ । पृष्टिः कट्याम् । अशीतिः पृष्ठे । पार्श्वयोः पृष्टिः । उरसि त्रिंशत् । षट्त्रिंशत् ग्रीवायाम् । मूर्द्धनि चतुस्त्रिंशत् । एवं नवस्नायुशतानि व्याख्यातानि ॥*॥ भवन्ति चात्र ।

"स्नायुश्चतुर्विधा विद्वांस्तासु सर्वा निबोध मे ।

प्रतानवत्यौ दृष्ट्वाच दृष्ट्वाच भ्रुवोरान्तरया ।
प्रतानवत्यः शाखासु सर्वसन्धिषु चापरा ।
दशैतास्तु कण्डरा: सर्वा विद्येया: कुशलैरिह ।
आमपक्वाशयस्थेषु यकृतो च सुधिरा: स्मृता ।
पार्श्वोरसि तथा दृष्टे दृष्ट्वाच शिरसश्च ।
जीवया पक्वाशयाच्च सर्वसन्धिभिर्यता ।
भारक्षमा भवेदस्तु गुणका सुसमाहिता ।
एवमेव शरीरेऽस्मिन् यावन्त: सन्धय: स्मृता: ।
स्नायुभिर्बन्धुभिर्बद्धास्तेन भारक्षमा नरा: ।
न स्नायूनि न वा पेशी न शिरा न च सन्धय:
यापादितास्तथा दृष्ट्वर्यथा स्नायु: शरीरियम् ।
य: स्नाय: प्रविभागज्ञो वाताद्याश्रयान्तरा-
श्रया ।
स गर्भं शल्यमाहर्तुं देहाच्छक्नोति देहि-
नाम् ।" ॥

पञ्च पेशीशतानि भवन्ति तासां चत्वारि शतानि बाह्यासु । कोष्ठे षट्षष्टि: । ग्रीवां प्रत्यूर्ध्वमुत्क्षिप्यते । एकैकस्यान्तु पादाङ्गुल्यां तिस्रस्तिस्रस्ता: पञ्चदश । दश प्रपदे । पार्ष्णेरधि कूर्चसन्निविष्टास्तावत्य एव । दश गुल्फतलयो: । गुल्फजानुन्तरे विंशतिः । पञ्च जानुनि । विंशतिरूरौ । दश वङ्क्षणौ । शतमेवमेकस्मिन् सक्थि भवन्ति । एते नेतरसक्थिबाहू च व्याख्यातौ । सिव: पायौ । एका मेढ्रे । तिस्रस्तां वापरा । द्वे वृषणयो: । स्फिचो: पञ्च पञ्च । द्वे वङ्क्षणशिरसि । षण्णीदरे । नाभ्यामेका । एष्ठोर्ध्वसन्निविष्टा: पञ्च पञ्च पेशीश: । षट् पार्श्वयो: । दश वक्षसि । अक्षकाभ्यां प्रति समन्तात् पञ्च । द्वे हृदयामाशययो: । षट् यकृत्प्लीह्नोरुभयो: । ग्रीवाया: चतस्र: । अष्टौ हन्वो: । एकैका काकलकगलयो: । द्वे तालुनि । एका जिह्वायाम् । ओष्ठयोर्द्वे । द्वे दन्तवेष्टयो: । गण्डयोरुपरिगा: । चतस्रो ललाटे । एका शिरसीत्येवमेतानि पञ्च पेशीशतानि । ७ ॥

"शिरास्नायुसिरासन्धिसन्धयश्च शरीरिणाम् ।
देहोभि: संहतास्तस्मात् धारयन्ति भवन्तम: ।"

कोष्ठासु विंशतिरधिका । दश ताभ्यो बाह्यगोचरैकैकस्मिन् । पञ्च पञ्च ग्रीवायां तासां मरिष्यति: अधमपक्षे चतसृणां प्रहते: अन्यतरतो द्वे मुखाभिते वापि च प्रहते द्वे । गर्भशल्यमन्तिलाक्षय: । मुखाभ्यन्तरसन्निविष्टासु एव । तिसृणामन्यतमायां गर्भशल्यो यत्र गर्भमिच्छति । तासां प्रहर्षणेनमुखमुत्कृष्टमुत्कण्डनं दीर्घनिरुद्धश्वासत्वं मूर्च्छा: सद्यश्चिकित्सायाम् प्रहर्षणेन मरणम् । एवमेव ॥ ८ ॥

अस्ति चात्र ।

"पुंसो नेत्र: पुरस्कार: ग्रीवा तत्र प्रतिष्ठिता ।
मूर्धन्य: ।
कोष्ठासु विंशतिरित्युक्तं तत्र कस्मात् ।" अत्रोच्यते यस्मात्कोष्ठासु प्रहरणीयं भवति । ९ ।

"हृदयाशयपक्वाशयवस्तिशिरोगुदेषु च ।
तस्याकृतीये तावर्त्ते गर्भशय्या प्रतिष्ठिता ।
यथा रोहितमत्स्यस्य तुण्डं भवति रूपत: ।
तत्संस्थानां तथारूपां गर्भशय्यां विदुर्बुधा: ।
आसुयोरभिमुख: शेते गर्भो गर्भाशये स्त्रिया: ।
स योनिं शिरसा याति स्वभावात् प्रसवं प्रति ।
तत्कर्मयन्तस्य देहस्य योऽयमङ्गविनिश्चय: ।
शल्यज्ञानाहते नैष वर्ण्यतेऽङ्गेषु कैश्चित् ।
तस्मात्रि:संशयं ज्ञानं दृष्ट्वा शल्यस्य याज्ञया ।
श्रोतव्यित्वा स्मृतं सम्यक् ग्रहणोऽङ्गविनिश्चय: ।
प्रत्यक्षतो हि यद्दृष्टं शास्त्रदृष्टस्य यद्भवेत् ।
समासतस्तदुभयं भूयो ज्ञानविवर्धनम् ।
तस्मात् समस्तगात्रमधिगोपहृतं अहीर्घयाधिप्रीडितसर्वशरीरं नि:सृष्टान्त्रपुरीषं पुरुषमवहन्यात्मापगायां निवहं पञ्चरस्यं सुश्लक्ष्णवल्कलकुशप्लवादीनामन्यतमेनावेष्टिताङ्गं अप्रकाशे देशे कोचयेत् । सम्यक्प्रक्षुधितघोटकृत्य ततो देहं सप्तरात्राद्दशीरवालवेणुवल्कलकूर्चीनामन्यतमेन शनै: शनैरवधर्षयंस्त्वगादीन् सर्वानेव बाह्याभ्यन्तरान्प्रत्यङ्गविशेषान् यथोक्तान् लक्षयेत्यक्षुषा । श्लोकौ चात्र भवत: ।

"न प्रत्यक्षचक्षुषा द्रष्टुं देहे शक्यतमो विभु: ।
दृश्यते ज्ञानचक्षुर्भिस्तपश्चक्षुर्भिरेव च ।
शरीरे चैव शास्त्रे च दृष्टार्थै: स्वादिशारद: ।
दृष्टश्रुताभ्यां सन्दिग्धमवाप्तो व्याचरेत् क्रिया: ।"

षष्ठोऽध्याय: ।

अथात: प्रत्येकमर्म्मनिर्देशं शारीरं व्याख्यास्याम: । षडुत्तरं मर्म्मशतम् । तानि मर्म्माणि पञ्चात्मकानि । तद्यथा । मांसमर्म्माणि । सिरामर्म्माणि स्नायुमर्म्माणि । अस्थिमर्म्माणि । सन्धिमर्म्माणि चेति । न खलु मांससिरास्नायुस्थिसन्धिव्यतिरेकेणान्यानि मर्म्माणि भवन्ति यस्मात्प्रोपलभ्यन्ते । तत्रैकादश मांसमर्म्माणि । एकपञ्चाशत्सिरामर्म्माणि । सप्तविंशति: स्नायुमर्म्माणि । अष्टावस्थिमर्म्माणि । विंशति: सन्धिमर्म्माणि । तदेतत् षडुत्तरं मर्म्मशतम् । ७ । तेषामेकादशैकस्मिन् सक्थि भवन्ति । एतेनेतरसक्थिबाहू च व्याख्यातौ । उदरोरसोर्दश । चतुर्दश दृष्टौ । ग्रीवां प्रत्यूर्ध्वमुत्क्षिप्यते । तत्र सक्थिमर्म्माणि त्रिंशत्तत्र हृदयकूर्चकूर्चशिरोगुदेष्वङ्गविनिश्चायामनुक्रोशोद्धिताश्चापि विटपपेषिति । एतेनेतरसक्थि व्याख्यातम् । ८ । उदरोरसोस्तु । गुदवस्तिनाभिहृदयक्लोमयकृत्प्लीहोण्डुकामाशयपक्वाशयौ पेशि । वृक्कमर्म्माणि तु वृक्कौ वृक्कधरकुक्कुन्दर-निरुद्धपार्श्वसन्धिबन्धनकण्डराश्चौ पेशि । स्नायुमर्म्माणि तु त्रिंशत्तत्र हृदयकूर्चकूर्चशिरोगुदेष्वङ्गविनिश्चायामनुक्रोशोद्धिताश्चापि विटपपेषिति । एतेनेतरसक्थि व्याख्यातम् । एतेनेतरौ बाहू व्याख्यातौ । अस्थि मर्म्माणि । तत्रोर्ध्वं घाणयोरधो मांसलयो: । द्वे नासिके । द्वे विण्डे । द्वौ कर्णौ । द्वावाखरौ । द्वावपाङ्गौ । द्वौ भ्रुवौ । द्वे भ्रुवोरन्तरे । पञ्च शङ्खयो: । चतस्रो ललाटे । द्वौ कपालौ । एका सीमन्ते । एका शिरसीत्येवमेतानि पञ्च पेशीशतानि । ७ ॥

"शिरास्नायुसिरासन्धिसन्धयश्च शरीरिणाम् ।
देहोभि: संहतास्तस्मात् धारयन्ति भवन्तम: ।"

कोष्ठासु विंशतिरधिका । दश ताभ्यो बाह्यगोचरैकैकस्मिन् । पञ्च पञ्च ग्रीवायां तासां मरिष्यति: अधमपक्षे चतसृणां प्रहते: अन्यतरतो द्वे मुखाभिते वापि च प्रहते द्वे । गर्भशल्यमन्तिलाक्षय: । मुखाभ्यन्तरसन्निविष्टासु एव । तिसृणामन्यतमायां गर्भशल्यो यत्र गर्भमिच्छति । तासां प्रहर्षणेनमुखमुत्कृष्टमुत्कण्डनं दीर्घनिरुद्धश्वासत्वं मूर्च्छा: सद्यश्चिकित्सायाम् प्रहर्षणेन मरणम् । एवमेव ॥ ८ ॥

अस्ति चात्र ।

"पुंसो नेत्र: पुरस्कार: ग्रीवा तत्र प्रतिष्ठिता ।
मूर्धन्य: ।
कोष्ठासु विंशतिरित्युक्तं तत्र कस्मात् ।" अत्रोच्यते यस्मात्कोष्ठासु प्रहरणीयं भवति । ९ ।

"हृदयाशयपक्वाशयवस्तिशिरोगुदेषु च ।

"चतुर्विधा यास्तु शिरा: शरीरे
प्रायेण ता मर्म्मसु सन्निविष्टा: ।
आयुस्त्रिमांसानि तथैव सन्धीन्
सन्तर्प्य देहं प्रतिपालयन्ति ॥
तत: क्षते मर्म्मणि ता: प्रदुष्टा:
समन्ततो वायुरभिप्लुणोति ।
विवर्द्धमानस्तु स मातरिश्वा
रुज: सुतीव्रा: प्रतनोति काये ॥
रुजाभिभूतस्तु पुन: शरीरं
प्रलीयते नश्यति चास्य संज्ञा ।
यतो हि शल्यं विनिहन्तुमिच्छन्
मर्म्माणि यत्नेन परीक्ष्य कर्त्तम् ॥"

एतेन शेषं व्याख्यातम् । तत्र सद्य:प्राणहरमन्ने विद्धं दोषान्तरेण मारयति । कालान्तरप्राणहरमन्ने विद्धं वैकल्यमापादयति । विशल्यघ्नं प्राणहरमन्ने विद्धं कालान्तरेण क्लेशयति रुजाश्च करोति, रुजाकरमनीद्रवेदनं भवति । तत्र सद्य:प्राणहराणि सप्तरात्राभ्यन्तराण्मारयन्ति । कालान्तरप्राणहराणि पक्षाभ्यासाद: । तेष्वपि तु त्रिप्राणि कदाचिदासु मारयन्ति । विशल्यघ्नप्राणहराणि वैकल्यकराणि च कदाचिदत्यभिहतानि मारयन्ति ॥ * ॥ अत ऊर्द्धं प्रत्येकशो मर्म्मस्थानान्यनुव्याख्यास्याम: । तत्र पादाङ्गुष्ठाङ्गुल्योर्म्मध्ये क्षिप्रं नाम मर्म्म तत्र विद्धस्याप्येकेन मरणम् । मध्यमाङ्गुलीमनुपूर्व्वेण मध्ये पादतलस्य तलहृदयं नाम तत्रापि रुजाभिर्मरणम् । क्षिप्रस्योपरिष्टादुभयत: कूर्च्चौ नाम यत्र पादस्य भ्रमणवेपनं भवत: । गुल्फसन्धेरध उभयत: कूर्च्चशिरो नाम तत्र रुजाशोफौ । पदङ्गुष्ठयो: सन्धाने गुल्फौ नाम तत्र रुजस्तेषां पादता खञ्जता वा । पार्ष्णिं प्रति जङ्घामर्म्मणी इन्द्रबस्तिर्नाम तत्र शोणितक्षये मरणम् । जङ्घोर्व्वो: सन्धाने जानु नाम तत्र खञ्जता जानुन ऊर्द्ध्वमुभयतस्त्रयाङ्गुलमाणिर्गाम तत्र शोफाभिवृद्धि: सञ्चसङ्कुचिता च । ऊरुमध्ये ऊर्व्वी नाम तत्र शोणितक्षयात् सक्थिशोष: । ऊर्व्या ऊर्द्धमधोवङ्क्षणसन्धेरूरुस्थे लोहितार्द्धं नाम तत्र लोहितक्षयेण पक्षाघात: । वङ्क्षणवृषणयोरन्तरे विटपं नाम तत्र पाण्डुमत्स्यपुङ्गता वा भवति । एवमेतान्येकादशसक्थिमर्म्माणि व्याख्यातानि । एतेनेतरसक्थिबाहू च व्याख्यातौ । विशेषतस्तु यानि सक्थ्नि गुल्फजानुविटपानि तानि बाह्वो मणिबन्धकूर्परकक्षधराणि । यथा वङ्क्षणवृषणयोरन्तरं विटपमेवं वक्ष:कक्षयोर्म्मध्ये कक्षधरं तस्मिन् विद्धेत एवोपद्रवा: । विशेषतस्तु मणिबन्धे कुण्ठता । कूर्परास्थे कुब्जि: । कक्षधरे कक्षाघात: । एवमेतानि चतुश्चत्वारिंशच्छाखासु मर्म्माणि व्याख्यातानि ॥ * ॥ अत ऊर्द्धं शरीरसोर्म्मस्थानान्यनुव्याख्यास्याम: । तत्र वातप्रणोनिरयनं स्थूलान्त्रप्रतिबद्धं गुदं नाम मर्म्म तत्र सद्योमरणम् । अष्ठीलाशोणितोऽभ्यन्तरत: कण्ठ्यां मूत्रवाह्यौ वस्तिर्नाम तत्रापि सद्योमरणमश्मरीव्रणाद्वते । तत्राप्युभयतो भिन्ने न जीवत्येकतो भिन्ने मूत्रस्रावी व्रणो भवति । स तु यत्नेनोपक्रान्तो रोहति । पक्वाशयगुदयोर्म्मध्ये सिराप्रभवा नाभिर्नाम तत्रापि सद्य एव मरणम् । स्तनयोर्म्मध्यमधिष्ठायोरस्याशयद्वारं सत्त्वरजस्तमसामधिष्ठानं हृदयं नाम तत्र सद्य एव मरणम् । स्तनयोरधस्तात् हृदसृक्पूयनसुभयतस्तनमूले नाम मर्म्मणी तत्र कफपूर्णकोष्ठतया कासश्वासाभ्यां म्रियते । स्तनचूचुकयोरूर्द्ध्वं हृत्सृक्पूयसुभयत: स्तनरोहितौ नाम तत्र शोणितपूर्णकोष्ठतया कासश्वासाभ्याञ्च म्रियते । अंसकूटयोरधस्तात् पार्श्वोपरिभागयोरपलापौ नाम तत्र रक्तेन पूयभावं गतेन मरणम् । उभयोरसो नाड्यौ वातवहे अपस्तम्भौ नाम तत्र वातपूर्णकोष्ठतया कासश्वासाभ्याञ्च मरणम् । एवमेतान्युरोरसोद्भवानि मर्म्माणि व्याख्यातानि ॥ * ॥ अत ऊर्द्धं पृष्ठमर्म्माण्यनुव्याख्यास्याम: । तत्र पृष्ठवंशसुभयत: प्रतिश्रोणी काण्डमध्यानि कटीकतरुणे नाम मर्म्मणी तत्र शोणितक्षयात् पाण्डुर्विवर्णो हीनरूपश्च म्रियते । पार्श्वजघनवहिर्भागे पृष्ठवंशसुभयतो नातिनिम्ने कुकुन्दरे नाम मर्म्मणी तत्र स्पर्शानामधि:काये चेष्टोपघातश्च । श्रोणीकाण्डयोरुपर्य्यंशयाच्छादनौ पार्श्वान्तरप्रतिबद्धौ नितम्बौ नाम तत्राध:कायशोषो दौर्ब्बल्याच्च मरणम् । अध:पार्श्वान्तरप्रतिबद्धौ जघनपार्श्वमध्ययोस्त्र्यंगूर्द्धं च जघनात् पार्श्वसन्धी नाम तत्र शोणितपूर्णकोष्ठतया म्रियते । स्तनमूलादुभयत: पृष्ठवंशस्य वृहती नाम तत्र शोणितातिप्रवृत्तिनिमित्तरुपद्रवैर्म्रियते । पृष्ठोपरि पृष्ठवंशसुभयतस्त्रिकसन्धी अंसफलके नाम तत्र बाह्वो: स्राप: शोषो वा । बाहुमूर्द्ध्नोग्रीवामध्ये स्कन्धपीठस्कन्धनिबन्धनावंसौ नाम तत्र स्तब्धबाहुना । एवमेतानि चतुर्दश पृष्ठमर्म्माणि व्याख्यातानि ॥ * ॥ अत ऊर्द्धं चतुगतानि व्याख्यास्याम: । तत्र कण्ठनाड्यौ सुभयतश्चतस्रो धमन्यो द्वे नीले द्वे च मन्ये बलासेन तत्र मूकता स्वरवैकृतमरुग्राहिता च । ग्रीवायासुभयतश्चतस्र: सिरामाढकासञ्च सद्योमरणम् । शिरोग्रीवयो: सन्धाने हनकाटिके नाम तत्र चलमूर्द्धता । कर्णपृष्ठतोऽधश्चिते विधुरे नाम तत्र बाधिर्य्यम् । घ्राणमार्गसुभयत: स्रोतोमार्गप्रतिबद्धे अभ्यन्तरत: फणे नाम तत्र गन्धाज्ञानम् । भ्रूपुच्छान्तयोरधोऽक्ष्णोर्वा त्र्यङ्गुलतोऽपाङ्गौ नाम तत्रान्ध्यं दृष्टिप्रपातो वा । भ्रुवोरुपरिनिम्नयोरावर्त्तौ नाम तत्रान्ध्यं दृष्टिप्रपातश्च । भ्रुव: पुच्छान्तयोरुपरि कर्णललाटयोर्म्मध्ये शङ्खौ नाम तत्र सद्योमरणम् । शङ्खयोरुपरि केशान्त उत्क्षेपौ नाम तत्र सद्यस्को जीवति पाकात् पतितशल्यो वा नीहृतशल्य: । भ्रुवोर्म्मध्ये स्थपनी नाम तत्रोत्क्षेपवत् । पञ्च सन्धय: शिरसि विभक्ता: सीमन्ता नाम सद्योप्राणाभ्यघिचित्तनाशैर्मरणम् । प्राणश्रोताधिष्ठितत्वात्तेषां सिराणां मध्ये सिराधिपात: शङ्खाटकानि तानि चत्वारि मर्म्माणि तत्रापि सद्योमरणम् । मस्तकाभ्यन्तरोपरिष्टात् सिराधिसन्निपातो रोमावर्त्त: अधिपतिस्त्वपि सद्योमरणम् । एवमेतानि सप्तत्रिंशदूर्द्ध्वचतुगतानि मर्म्माणि व्याख्यातानि ॥ * ॥ भवन्ति चात्र ।

"ऊर्ध्वा: शिरांसि विटपे च सक्थ्नोर्पार्श्वे
एकैकमङ्गुलमिता स्तनपूर्व्वमूलम् ।
विद्धाङ्गुलद्वयमितं मांसवन्त्यगुल्फं
शीर्य्येत जानु सपरं सह कूर्पराभ्याम् ॥
हृद्वस्तिकूर्च्चगुदनाभि वदन्ति हृद्भिं
चत्वारि पञ्च च गले दश यानि च द्वे
तानि स्वपाणितलकुञ्चितसंमितानि
शेषाण्यवेहि शरिविस्तरतोऽङ्गुलार्द्धम् ॥
एतत् प्रमाणमभिवीक्ष्य वदन्ति तज्ज्ञा:
शूक्ष्मेण कर्म्मकरणं परिरक्ष्य मर्म्म ।
पार्श्वाभिघातितमपीह निहन्ति मर्म्म
तस्माद्धि मर्म्मसदनं परिवर्ज्जनीयम् ॥
क्षिप्रेषु पाणिचरणेषु शिरा नराणां
सङ्कोचमीयुरुदगच्छमतो निरेति ।
प्राप्यामितत्वसनसुग्रमतो मनुष्या:
संक्षिप्तशाखतरुवन्निधनं न यान्ति ॥
क्षिप्रेषु तत्र सतलेषु हतेषु रक्तं
गच्छत्यतीव पवनश्च रुजं करोति ।
एवं विनाशमुपयान्ति हि तत्र विद्धा
वृक्षा इवायुधविघातनिकृत्तमूला: ॥
तस्मात्तयोरभिहतस्य तु पाणिपादं
छेत्तव्यमाशु मणिबन्धनगुल्फदेशे ।
मर्म्माणि शल्यविषयाद्धि सुदारुणानि
यस्माच्च मर्म्मसु हता न भवन्ति सद्य: ।
जीवन्ति तत्र यदि वैद्यगुणेन कश्चित्
ते प्राप्नुवन्ति विकलत्वमसंशयं हि ।
सम्भिन्नशोणितकोष्ठशिर:कपाला
जीवन्ति शल्यविहतेषु च शरीरदेशे: ।
छिन्नेषु सक्थिभुजपादकरेरशेषै-
र्येषां च मर्म्मपतिता विविधा: प्रहारा: ।
सोममारुततेजांसि रक्तं सत्त्वमथापि च ।
मर्म्मसु प्रायश: पुंसां भूतात्मा यावतिष्ठते ॥
मर्म्मस्वभिहतास्वाशु जीवन्ति शरीरिण: ।
इन्द्रियार्थेष्वसंप्राप्तिर्मनोबुद्धिविपर्य्यय: ॥
रुजश्च विविधास्तीव्रा भवन्त्याशुहरे हते ।
हते कालान्तरे तु भुवो धातुक्षयो नृणाम् ॥
ततो धातुक्षयाच्चानुवेदनाभिश्च नश्यति ।
हते वैकल्यजनने केवलं वेदनेपुणात् ॥
शरीरं क्रियया युक्तं विकलत्वमवाप्नुयात् ।
विशल्यघ्नेषु विद्धेषु पूर्व्वोक्तं यच्च कारणम् ॥
रुजाकराणि मर्म्माणि यानि विविधा रुज: ।
कुर्व्वन्त्यन्ते च वैकल्यं शुद्धेष्वप्यगदो यदि ॥
छेदभेदाभिघातेभ्यो दहनाद्दारणादपि ।
उपघातं विजानीयान्मर्म्मणाभ्युल्बणक्षयम् ॥

मर्माभिघातस्तु न कश्चिदस्ति
योऽल्पात्ययो वापि निरत्ययो वा ।
प्रायेण मर्मस्वभिताडितास्तु
वैकल्यमृच्छन्त्यथवा म्रियन्ते ॥
मर्माण्यधिष्ठाय हि ये विकारा
मूर्च्छन्ति काये विविधा नराणाम् ।
प्रायेण ते कृच्छ्रतमा भवन्ति
नरस्य यत्नैरपि साध्यमानाः ॥”४३॥

सप्तमोऽध्यायः ।

अथातः सिरावर्णविभक्तिनाम शारीरं व्याख्यास्यामः । सप्त सिराशतानि भवन्ति । याभिरिदं शरीरमाराम इव जलहारिणीभिः केदार इव च कुल्याभिरुपस्निह्यतेऽनुगृह्यते चाकुञ्चनप्रसारणादिभिर्विशेषैः । द्रुमपत्रसेवनीनामिव च तासां प्रतानास्तासां नाभिर्मूलं ततश्च प्रसरन्त्यूर्ध्वमधस्तिर्यक् च ॥३॥ भवतश्चात्र ।

“यावत्यस्तु सिराः काये सम्भवन्ति शरीरिणाम् ।
नाभ्यां सर्वा निबद्धास्ताः प्रतन्वन्ति समन्ततः ॥
नाभिस्थाः प्राणिनां प्राणाः प्राणान्नाभिर्व्युपाश्रिता ।
सिराभिरावृता नाभिश्चक्रनाभिरिवारकैः ॥”

तासां मूलसिराश्चत्वारिंशत् । तासां वातवाहिन्यो दश । पित्तवाहिन्यो दश । कफवाहिन्यो दश । दश रक्तवाहिन्यः । तासान्तु वातवाहिनीनां वातस्थानगतानां पञ्चसप्ततिशतं भवति । तावत्य एव पित्तवाहिन्यः । पित्तस्थाने कफवाहिन्यश्च । कफस्थाने रक्तवाहिन्यश्च । यकृत्प्लीह्नोरेवमेतानि सप्तसिराशतानि । तत्र वातवाहिन्यः सिरा एकस्मिन् सक्थ्नि पञ्चविंशतिः । एतेनेतरसक्थि बाहू च व्याख्यातौ । विशेषतस्तु कोष्ठे चतुस्त्रिंशत्तासां गुदमेढ्राश्रिताः । श्रोण्यामष्टौ । द्वे द्वे पार्श्वयोः । षट् पृष्ठे । तावत्य एव चोदरे । दश वक्षसि । एकचत्वारिंशज्जत्रुण ऊर्द्ध्वम् । तासां चतुर्दश ग्रीवायाम् । कर्णयोश्चतस्रः । नव जिह्वायाम् । षट् नासिकायाम् । अष्टौ नेत्रयोः । एवमेतत् पञ्चसप्ततिशतं वातवहानां सिराणां व्याख्यातम् । एष एव विभागः शेषाणामपि । विशेषतस्तु पित्तवाहिन्यो नेत्रयोर्दश । कर्णयोर्द्वे । एवं रक्तवहाः कफवहाश्च । एवमेतानि सप्त सिराशतानि सविभागानि व्याख्यातानि ॥६॥ भवन्ति चात्र ।

“क्रियाणामप्रतिघातममोहं बुद्धिकर्मणाम् ।
करोत्यन्यान् गुणांश्चापि स्वाः सिराः पवनश्चरन् ॥
यदा तु कुपितो वायुः स्वाः सिराः प्रतिपद्यते ।
तदास्य विविधा रोगा जायन्ते वातसम्भवाः ॥
भ्राजिष्णुतामन्नरुचिमग्निदीप्तिमरोगताम् ।
संसर्पत् स्वाः सिराः पित्तं कुर्याच्चान्यान् गुणानपि ॥
यदा तु कुपितं पित्तं सेवते स्ववहाः सिराः ।
तदास्य विविधा रोगा जायन्ते पित्तसम्भवाः ॥
स्नेहमङ्गेषु सन्धीनां स्थैर्यं बलमुदीर्णताम् ।
करोत्यन्यान् गुणांश्चापि बलासः स्वाः सिराश्चरन् ॥
यदा तु कुपितः श्लेष्मा स्वाः सिराः प्रतिपद्यते ।
तदास्य विविधा रोगा जायन्ते श्लेष्मसम्भवाः ॥
धातूनां पूरणं वर्णं स्पर्शज्ञानमसंशयम् ।
स्वाः सिराः सञ्चरद्रक्तं कुर्याच्चान्यान् गुणानपि ॥
यदा तु कुपितं रक्तं सेवते स्ववहाः सिराः ।
तदास्य विविधा रोगा जायन्ते रक्तसम्भवाः ॥
न हि वातं सिराः काश्चिन्न पित्तं केवलं तथा ।
श्लेष्माणं वा वहन्त्येता अतः सर्ववहाः स्मृताः ॥
प्रदुष्टानां हि दोषाणामुच्छ्रितानां प्रधावताम् ।
ध्रुवमुन्मार्गगमनमतः सर्ववहाः स्मृताः ॥
तत्रारुणा वातवहाः पूर्यन्ते वायुना सिराः ।
पित्तादुष्णाश्च नीलाश्च शीता गौर्यः स्थिराः कफात् ।
असृग्वहास्तु रोहिण्यः सिरा नात्युष्णशीतलाः ॥
अत ऊर्द्ध्वं प्रवक्ष्यामि न विध्येद्याः सिरा भिषक् ।
वैकल्यं मरणञ्चापि व्यधात्तासां ध्रुवं भवेत् ॥
सिराशतानि चत्वारि विद्याच्छाखासु बुद्धिमान् ।
षट्त्रिंशच्च शतं कोष्ठे चतुःषष्टिञ्च मूर्द्धनि ॥
शाखासु षोडश सिराः कोष्ठे द्वात्रिंशदेव तु ।
पञ्चाशज्जत्रुणश्चोर्द्ध्वमवेध्याः परिकीर्त्तिताः ॥”

तत्र सिराशतमेकैकस्मिन् सक्थ्नि भवति तासां जालधरा त्वेका तिस्रश्चाभ्यन्तराः । तत्रोर्वीसंज्ञे द्वे लोहिताक्षसंज्ञा चैकैवमवेध्याः । एतेनेतरसक्थि बाहू च व्याख्यातावेवमशस्त्रकृत्याः षोडश शाखासु । द्वात्रिंशत् श्रोण्यां तासामष्टावशस्त्रकृत्याः । द्वे द्वे विटपयोः कटीकतरुणयोश्च । अष्टावष्टावेकैकस्मिन् पार्श्वे तासामेकैकामूर्द्ध्वगां परिहरेत् । पार्श्वसन्धिगते च द्वे । चतस्रो विंशतिश्च पृष्ठवंशमुभयतस्तासामूर्द्ध्वगामिन्यौ द्वे द्वे परिहरेद्बृहती सिरे । तावत्य एवोदरे तासां मेढ्रोपरि रोमराजीमुभयतो द्वे द्वे परिहरेत् । चत्वारिंशद्वक्षसि तासां चतुर्दशाशस्त्रकृत्याः । हृदये द्वे द्वे । द्वे स्तनमूले । स्तनरोहितापलापस्तम्भेषूभयतोऽष्टौ । एवं द्वात्रिंशदशस्त्रकृत्याः पृष्ठोदरोरःसु भवन्ति । चतुःषष्टिसिराशतं जत्रुण ऊर्द्ध्वं भवति तत्र षट्पञ्चाशच्छिरोधरायां तासामष्टौ चतस्रश्च मर्मसंज्ञाः परिहरेत् । द्वे कृकाटिकयोः । द्वे विधुरयोः । एवं ग्रीवायां षोडशावेध्याः । हन्वोरुभयतोऽष्टावष्टौ तासान्तु सन्धिधमन्यौ द्वे द्वे परिहरेत् । षट्त्रिंशज्जिह्वायां तासामधः षोडशाशस्त्रकृत्याः रसवहे द्वे वाग्वहे च द्वे । द्विर्दश नासायां तासामौपनासिक्यश्चतस्रः परिहरेत् । तासामेव च तालुन्येकां मृदावुद्देशे । अष्टत्रिंशदुभयोर्नेत्रयोस्तासामपाङ्ग्योरेकैकां परिहरेत् । कर्णयोर्दश तासां शब्दवाहिनीमेकैकां परिहरेत् । नासानेत्रगतास्तु षष्टिर्ललाटे तासां केशान्तानुगताश्चतस्रः । आवर्तयोरेकैका स्थपन्यां चैका परिहरणीया । शङ्खयोर्दश तासां शङ्खसन्धिगतामेकैकां परिहरेत् । द्वादश मूर्द्ध्नि तासामुत्क्षेपयोर्द्वे परिहरेत् । सीमन्तेष्वेकैकामधिपतावेकामिति । एवमशस्त्रकृत्याः पञ्चाशज्जत्रुण ऊर्द्ध्वमिति । भवति चात्र ।

“व्याप्नुवन्त्यभितो देहं नाभितः प्रसृताः सिराः ।
प्रतानाः पद्मिनीकन्दाद्बिसादीनां यथा जलम् ॥”

अष्टमोऽध्यायः ।

अथातः सिराव्यधविधिशारीरं व्याख्यास्यामः । बालस्थविररूक्षक्षतक्षीणभीरुपरिश्रान्तमद्याध्वस्त्रीकर्षितवमितविरिक्तास्थापितानुवासितजागरितक्लीबकृशगर्भिणीनां कासश्वासशोषप्रवृद्धज्वराक्षेपकपक्षाघातोपवासपिपासामूर्च्छाप्रपीडितानाञ्च सिरां न विध्येत् । याश्चाव्यध्या व्यध्याश्चादृष्टा दृष्टाश्चायन्त्रिता यन्त्रिताश्चानुत्थिता इति । शोणितावसेकसाध्याश्च विकाराः प्रागभिहितास्तेषु चापक्वेष्वन्येषु चानुक्तेषु यथाभ्यासं यथान्यायञ्च सिरां विध्येत् । प्रतिषिद्धानामपि च विषोपसर्गे आत्ययिकेषु सिराव्यधनमप्रतिषिद्धम् । तत्र स्निग्धस्विन्नमातुरं यथादोषप्रत्यनीकं द्रवप्रायमन्नं भुक्तवन्तं यवागूं पीतवन्तं वा यथाकालमुपस्थाप्यासीनं स्थितं वा प्राणानबाधमानो वस्त्रपट्टचर्मान्तर्वल्कलतानामन्यतमेन यन्त्रयित्वा नातिगाढं नातिशिथिलं शरीरप्रदेशमासाद्य यथोक्तं शस्त्रं गृहीत्वा सिरां विध्येत् ॥ ३ ॥

“नैवातिशीते नात्युष्णे न प्रवाते न चाभ्रिते ।
सिराणां व्यधनं कार्यमरोगे वा कदाचन ॥”

तत्र व्यध्यसिरं पुरुषं प्रत्यादित्यमुखमरत्निमात्रोच्छ्रिते उपवेश्यासने सक्थ्नोराकुञ्चितयोर्निवेश्य कूर्परसन्धिद्वयस्योपरि हस्तावन्तर्गलौ कृत्वा अङ्गुष्ठकृतमुष्टिमन्ययोः स्थापयित्वा यन्त्रणशाटकं ग्रीवायामुत्सङ्गोपरि परिक्षिप्यान्तेन पृष्ठतः पश्चात् स्थितेन वामहस्तेनोत्तानेन शाटकान्तद्वयं ग्राहयित्वा ततो वैद्यो ब्रूयाद्दक्षिणहस्तेन सिरोत्थापनार्थं नात्यायतशिथिलं यन्त्रमावेष्टयावेष्टय यन्त्रं पृष्ठमध्ये च पीडयेदिति कर्म कुर्याच्च वायुपूर्णमुखं स्थापयेदेष उत्तमाङ्गगतानामन्तर्मुखवर्जानां सिराणां यन्त्रणविधिः । तत्र पादव्यध्यसिरस्य पादं समे स्थाने सुस्थितं स्थापयित्वान्यं पादमीषत्सङ्कुचितमुच्चैः कृत्वा व्यध्यपादं जानुसन्धेरधः शाटकेनावेष्ट्य हस्ताभ्यां प्रपीड्य गुल्फं चतुरङ्गुले प्रदेशे प्लोतेनाबद्ध्य ततः पादसिरां विध्येत् । अथोपरिष्टाद्वद्ध्वा गूढाङ्गुष्ठमुष्टी सम्यगासने स्थापयित्वा सुखोपविष्टस्य पूर्ववद्यन्त्रं बद्ध्वा बाहुसिरां विध्येत् । गृध्रसीविश्वाच्योः सङ्कुचितजानुकूर्परः स्यात् । [illegible] शस्त्रेण विध्येत् । इन्द्रवस्त्यादि [illegible]

विस्फूर्जितदेहस्य बाहुभ्यामवलम्ब्यमानदेहस्य पार्श्वयोः। अवनामितमेढ्रस्य मेढ्रं। उन्नामितविदष्टजिह्वाग्रस्याधोजिह्वायाम्। अतिव्यत्याननस्य तालुनि दन्तमूलेषु च। एवं यन्त्रोपायानन्यांश्च निरीत्यापनहेतून् बुद्ध्वावेक्ष्य शरीरवर्णेन व्याधिवर्णेन च विदध्यात्। मांसलेष्ववकाशेषु यवमात्रं शल्यं निदध्यादनोन्मेढ्रे यवमात्रं व्रीहिमात्रं वा व्रीहिसुखेन। अस्यासुपरि क्षुद्रारिकया विध्येद्दर्भयवमात्रम्॥ भवन्ति चात्र।

"शवभे वर्षासु विध्येत ग्रीष्मकाले तु शीतले।
हेमन्तकाले मध्याह्ने शल्यकालात्ययः स्मृतः॥
सम्यक् शल्यनिपातेन धारया या सवेदवत्।
सुपूर्त्ता रुजा निष्ठेच्च सुविद्धान्तां विनिर्दिशेत्॥
यथा कुसम्भपुष्पेभ्यः पूर्वं स्रवति पीतिका।
तथा सिरासु विद्धासु दुष्टमग्रे प्रवर्त्तते॥
मूर्च्छितस्यातिभीतस्य श्रान्तस्य क्षपितस्य च।
न वहन्ति सिरा विद्धास्तथानुत्तिष्ठतश्चिरात्॥
क्षीणस्य बहुदोषस्य मूर्च्छया विद्धस्य च।
भूयोऽपराह्णे विस्राव्या सापरेद्युश्चहेऽपि वा॥
रक्तं सशेषदोषन्तु कुर्य्यादपि विचक्षणः।
न चातिप्रसृतं कुर्य्याच्चेयं संग्रमनैर्जयेत्॥
बलिनो बहुदोषस्य वयःस्थस्य शरीरिणः।
परं प्रमाणमिच्छन्ति प्रस्थं शोणितमोक्षणे॥"

तच्च पादद्राद्यपादद्राद्यांश्चबाहुकटिष्वविसर्पवातशोणितवातकण्टकविचर्च्चिकापादद्रारीप्रभृतिषु त्वित्प्रमर्शण उपरिष्टात् द्राक्षुचे व्रीहिसुखेन सिरां विध्येत्। क्षीपदे तत्त्विकित्सिते यथा वक्ष्यते। क्रोष्टुकशिरःखञ्जपक्षुलवातवेदनासु जङ्घायां गुल्फस्योपरि चतुरङ्गुले। अपस्मारिमन्थवस्तेरधस्ताद्द्राङ्गुले। आनुसन्धेरुपर्य्यधो वा चतुरङ्गुले गृध्रस्याम्। ऊरुमूलसंश्रितासु गलगण्डे। एतेनेतरसक्थिबाहू च व्याख्यातौ॥ विशेषतस्तु वामबाहौ कूर्परसन्धेरभ्यन्ततो बाहुमध्ये श्रोत्रि कनिष्ठिकानामिकयोर्मध्ये वा। एवं दक्षिणबाहौ यकृद्दाल्ये कफोदरे चैतामेव च कासश्वासयोरप्यादिशन्ति। गृध्रस्यामिव विश्वाच्याम्। श्रोणिप्रति समन्तात् द्राङ्गुले प्रवाहिकायां शूलिन्यां परिकर्त्तिकोपदंशशूकदोषशुक्रघातेषु मेढ्रमध्ये। वृषणयोः पार्श्वे मूत्रवृद्धयाम्। नाभेरधश्चतुरङ्गुले सेवन्यां वामपार्श्वे दक्षोदरे। वामपार्श्वे कक्षावक्षनयोरन्तरेऽन्तर्विद्रधौ पार्श्वशूले च। बाहुशीर्षावबाहुकायोरग्रेके वदन्त्यंसयोरन्तरे। चिक्कसन्धिगतशृङ्गाटां तृतीयके अधःस्रोतसन्धिगतामन्यतरपार्श्वसंस्थितां चतुर्थके। हनुसन्धिमध्यगतामपस्मारे। शङ्खकेशान्तसन्धिगतासीरोऽपाङ्गललाटेषु शोषादेरपस्मारे च। जिह्वारोगेष्वधोजिह्वायां दन्तव्याधिषु च तालुनि तालयेषु। कर्णयोरुपरि समन्तात् कर्णशूले तमीगेषु च। गन्धाग्रघ्रे नासारोगेषु च नासाग्रे तिमिरापिनाकप्रभृतिष्वंगयेषूपनासिकं। लालाव्यापदाङ्गाग्रेषेत्र एव शिरोरोगाधिमन्थप्रभृतिषु रोगेष्विति॥ * ॥ अत ऊर्द्धं दुष्टव्यधनं व्याख्यास्यामः। तत्र दुर्विद्धातिविद्धा कुचिता पिचिता कुट्टिता प्रसुप्ता अत्युद्दीर्णा अन्तेऽभिहता परिशुष्का कूणिता वेपिता अनुत्तिष्ठद्विद्धा ग्रस्तहता तिर्य्यग्विद्धा अविद्धा अव्याधा विद्धता धेनुका पुनः पुनर्विद्धा शिरास्नायुसन्धिसन्ध्यस्थिसु चेति विंशतिर्दुष्टव्यधाः। तत्र या सूक्ष्मशल्यविद्धा न यत्तमस्क् स्रवति रुजा शोफवती च सा दुर्विद्धा। प्रमाणातिरिक्तविद्धायामन्तः प्रविशति शोणितं शोणितातिप्रवृत्तिर्वा सातिविद्धा। कुचितायामप्येवम्। कुण्ठशल्यप्रमथिता पृथुलीभावमापन्ना पिचिता। अनासादिता पुनःपुनरन्तर्यैश्च बहुशः शल्याभिहता कुट्टिता। प्रीतभयमूर्च्छाभिरप्रवृत्तशोणिता अप्रसुता। तीक्ष्णा महासुखशल्यविद्धा अत्युद्दीर्णा। अल्परक्तसाविण्यन्ते विद्धा अन्तेऽभिहता। क्षीणशोणितस्यानिलपूर्णा परिशुष्का। चतुर्भागावसादिता किञ्चिन्नवृत्तशोणिता कूणिता। दुःस्थानबन्धनादेपमानायाः शोणितसम्मोहो भवति सा वेपिता। अनुत्तिष्ठद्विद्धायामप्येवम्। छिन्नातिप्रवृत्तशोणिता क्रियासङ्करी शल्यहता। तिर्य्यक् प्रणिहितशल्या किञ्चिच्छेषा तिर्य्यग्विद्ध। बहुशः क्षता क्षीणशल्यप्रणिधानेनागाढा अशल्यज्ञया अयाधा अनवस्थितविद्धा विद्धतः। प्रदेशस्य बहुशोऽवघट्टनादारोहयधा सहुर्मुहुःशोणितस्रवा धेनुका। सूक्ष्मशल्यव्यधनाद्बहुशो विच्छिन्ना पुनःपुनर्विद्धा। स्नायुसिरासन्धिमर्म्मसु विद्धा वा रुजां शोफं वैकल्यं मरणं वापादयति॥ * ॥ भवन्ति चात्र।

"सिरासु ग्रन्थितो नाड्यां श्लेष्मा स्रोतः स्वभावतः।
मत्स्यवत् परिवर्त्तन्ते तस्मादृजुना तां व्यधेत्॥
व्यधागता गृहीते तु शल्ये कायनिपातिते।
भवन्ति व्यापदश्चैता वक्ष्यन्ते व्याधुप्रदवाः॥
स्नेहादिभिः क्रियायोगैर्न तथा वेपनैरपि।
यान्त्याशु व्याधयः शान्तिं यथा सम्यक् सिरावधात्॥
सिरायधविधित्वार्द्धं शल्यतन्त्रे प्रकीर्त्तितः।
यथा प्रणिहितः सम्यक् वक्तुः कायचिकित्सिते॥"

तच्च स्निग्धस्विन्नवान्तविरिक्तास्थापितानुवासितसिराविद्धैः परिहर्त्तव्यानि। क्रोधायासमैथुनदिवास्वप्नव्यवाय्यायामयानोत्थानासनचंक्रमणशीतवाततपविरुद्धाजीर्णान्नावलग्नाभाष्यासमेके मन्यन्ते॥ * ॥ एतेषां विस्तरमुपरिष्टाद्वक्ष्यामः। भवतश्चात्र।

"सिराविधागतुम्बेस्तु बलौकाभिः पञ्चधा।
व्यवगाढं यथापूर्वं निर्हरेद्दुष्टशोणितम्॥
व्यवगाढे बलौका स्यात् प्रच्छानं पिण्डिते हितम्।
सिराङ्गव्यापके रक्ते शृङ्गालाबुर्बलेऽपि स्थिते॥"* ॥

शारीरं

नवमोऽध्यायः।

अथातो धमनीव्याकरणं शारीरं व्याख्यास्यामः। चतुर्विंशतिर्धमन्यो नाभिप्रभवा अभिहिताः। तत्र केचिदाहुः सिराधमनीस्रोतसामविभागः सिराविकारा एव धमन्यः स्रोतांसि चेति। तन्न सम्यक्। अन्या एव हि धमन्यः स्रोतांसि च सिराभ्यः कर्म्माहङ्गनान्यत्वान्मूलसन्नियमात् कर्म्मवैशेष्यादागमाच्च केवलन्तु परस्परसन्निकर्षात् षट्प्रागमकर्म्मत्वात् सौक्ष्म्याच्च विभक्तकर्म्मणामप्यविभाग इव कर्म्मसु भवति। तासान्तु नाभिप्रभवानां धमनीनामूर्द्ध्वगा दश दश चाधोगामिन्यश्चतस्रस्तिर्य्यग्गाः। ऊर्द्ध्वगाः शब्दस्पर्शरूपरसगन्धप्रत्यवसोच्छ्वासनभिलाषचेष्टितकथितरुदितादीन्विशेषानभिवहन्त्यः शरीरं धारयन्ति। तासु हृदयमभिप्रपन्नास्त्रिधा जायन्ते तास्त्रिंशत्। तासान्तु वातपित्तकफशोणितरसान् द्वे द्वे वहतस्ता दश शब्दरूपरसगन्धानहाभिगृह्णीते। द्वाभ्यां भाषते च द्वाभ्यां घोषं करोति द्वाभ्यां स्वपिति द्वाभ्यां प्रतिबुध्यते। ये चाप्युवाहिन्यौ। द्वे स्तन्यं स्त्रिया वहतस्तेन संश्रिते ते एव शुक्रं नरस्य स्तनाभ्यामभिवहतः। तास्त्रितास्त्रिंशत् सविभागा व्याख्याताः। एताभिरूर्द्ध्वं नाभेरुदरपार्श्वपृष्ठोरःस्कन्धग्रीवाबाहवो धार्य्यन्ते याप्यन्ते च॥ * ॥ भवति चात्र।

"ऊर्द्ध्वं गतास्तु कुब्जाना कर्म्माण्येतानि सर्व्वशः।
अधोगमास्तु वक्ष्यामि कर्म्म तासां यथायथम्॥"

अधोगमास्तु वातमूत्रपुरीषशुक्रार्त्तवादीन्यधो वहन्ति। तासु पित्ताशयमभिप्रतिपन्नाश्चतस्रोऽन्नपानरसं विपक्वमौष्ण्यादिरेचयन्त्योऽभिवहन्त्यः शरीरं तर्पयन्त्यप्यायन्ति चोर्द्ध्वगतानां तिर्य्यग्गतानां रसक्षयानाभिपूरयन्ति मूत्रपुरीषस्वेदांश्च विरेचयन्त्यामपक्वाशयान्तरे च त्रिधा जायन्ते तास्त्रिंशत्। तासान्तु वातपित्तकफशोणितरसान् द्वे द्वे वहतः ता दश द्वे अन्नवाहिन्यावन्त्राश्रिते नीयवहे द्वे मूत्रवहे द्वे शुक्रवहे द्वे शुक्रप्रादुर्भावाय द्वे विसर्गाय ते एव रक्तमभिवहतो नारीणामार्त्तवसंभवम्। द्वे वर्चोनिरसन्यौ स्थूलान्त्रप्रतिबद्धे। अष्टावन्यास्तिर्य्यग्गानां धमनीनां स्वेदमर्पयन्ति। तास्त्वेतास्त्रिंशत् सविभागा व्याख्याताः। एताभिरधोनाभेः पक्वाशयवंक्षणपुरीषगुदवस्तिमेढ्रसक्थीनि धार्य्यन्ते याप्यन्ते च॥ * ॥ भवति चात्र।

"अधोगमास्तु कुर्व्वन्ति कर्म्माण्येतानि सर्व्वशः।
तिर्य्यग्गताः संप्रवक्ष्यामि कर्म्म तासां यथा-
यथम्॥"

तिर्य्यग्गतानान्तु चतसृणां धमनीनामेकैका शतधा सहस्रधा चोत्तरोत्तरं विभज्यन्ते तास्त्वसंख्येयास्ताभिरिदं शरीरं सर्व्वाक्षितं विवहमानतश्च। तासां सुखानि रोमकूपप्रतिबद्धानि ये स्वेदमभिवहन्ति रसक्षयेऽपि सन्तर्पयन्त्यन्तर्बहिश्च

तैरेव चाभ्यङ्गपरिषेकावगाहालेपनवीर्य्याण्यन्तः शरीरमभिपद्यन्ते त्वचि विपक्वानि। तैरेव स्पर्शसुखमसुखं वा गृह्णाति। तास्वेताश्चतस्रो धमन्यः सर्व्वाङ्गगताः सविभागा व्याख्याताः। भवतश्चात्र।

"यथा स्वभावतः खानि मृगाणेषु विशेषु च।
धमनीनां तथा खानि रसो येरुपचीयते॥
पञ्चाभिभूतास्त्वच पञ्चत्वं
पञ्चेन्द्रियं पञ्चसु भावयन्ति।
पञ्चेन्द्रियं पञ्चसु भावयित्वा
पञ्चत्वमायान्ति विनाशकाले॥"*॥

अत ऊर्द्धं स्रोतसां मूलविद्धलक्षणमुपदेक्ष्यामः। तानि तु प्राणोदकरसरक्तमांसमेदोमूत्रपुरीषशुक्रार्त्तववहानि येष्वधिकारः शतेषां वक्ष्यते। शतेषां विंशतिर्वधाः। तत्र प्राणवहे द्वे तयोर्मूलं हृदयं रसवाहिन्यश्च धमन्यः। तत्र विद्धस्य क्षीणविमनमोहनमन्नद्वेषनानि मरणं वा भवति। अन्नवहे द्वे तयोर्मूलमामाशयोऽन्त्रवाहिन्यश्च धमन्यस्तत्र विद्धस्याध्मानं मूलान्नद्वेषौ हृद्दिः पिपासान्त्यं मरणं वा। उदकवहे द्वे तयोर्मूलं तालुक्लोम च। तत्र विद्धस्य पिपासा सक्लोमरणञ्च। रसवहे द्वे तयोर्मूलं हृदयं रसवाहिन्यश्च धमन्यस्तत्र विद्धस्य शोषः प्राणवद्विद्धवच्च मरणं तल्लिङ्गानि च। रक्तवहे द्वे तयोर्मूलं यकृत्प्लीहानौ रक्तवाहिन्यश्च धमन्यस्तत्र विद्धस्य श्यावारुणता ज्वरो दाहः पाण्डुता श्लोणितातिगमनं रक्तनेत्रता चेति। मांसवहे द्वे तयोर्मूलं स्नायुत्वक् रक्तवहाश्च धमन्यस्तत्र विद्धस्य श्यावुर्मांसशोषः शिराग्रन्थयो मरणम्। मेदोवहे द्वे तयोर्मूलं कटीवृक्कौ च तत्र विद्धस्य खेदागमनं स्निग्धाङ्गता तालुशोषः श्लथशोफता पिपासा च। मूत्रवहे द्वे तयोर्मूलं वस्तिर्मेढ्रञ्च तत्र विद्धस्यानद्धवस्तिता मूत्रनिरोधः स्तब्धमेढ्रता च। पुरीषवहे द्वे तयोर्मूलं पक्वाशयो गुदञ्च तत्र विद्धस्यानाहो दुर्गन्धता ग्रथितान्नता च। शुक्रवहे द्वे तयोर्मूलं स्तनौ वृषणौ च तत्र विद्धस्य क्लीवता चिरात् प्रसेको रक्तशुक्रता च। आर्त्तववहे द्वे तयोर्मूलं गर्भाशयः आर्त्तववाहिन्यश्च धमन्यस्तत्र विद्धायां वन्ध्यात्वं मैथुनासहिष्णुत्वमार्त्तवनाशश्च। सेवनीच्छेदादनाप्राद्भावः। वस्तिगुदविद्धलक्षणं प्रागुक्तमिति। स्रोतोविद्धेषु प्रत्याख्यायोपचरेद्व्रणलक्षणन्तु क्षतविधानेनोपचरेत्।

"मूलात् खादन्तरं देहे प्रवृत्तन्त्वभिवाहि यत्।
स्रोतस्तदिति विज्ञेयं शिराधमनिवर्ज्जितम्॥"*॥

दशमोऽध्यायः।

अथातो गर्भिणीव्याकरणं शारीरं व्याख्यास्यामः। गर्भिणी प्रथमद्वितीयात् प्रभृति नित्यं प्रहृष्टा शुक्लवस्त्रा शुक्लवस्त्रा भ्रान्तिमङ्गलदेवताब्राह्मणगुरुपरा च भवेन्मलिनविद्वतघृणागालीनि न स्पृशेद्दुर्गन्धदुर्दर्शनानि परिहरेद्दुर्जनीयाश्च कथाः शुष्कं पर्य्युषितं कुथितं क्लिन्नं चान्नं नोपयुञ्जीत। वहिर्निष्क्रमणं शून्यागारचैत्यश्मशानदृक्षाश्रयान् क्रोधभयशङ्कांश्च भारातुच्चैर्भाष्यादिकं परिहरेदयानि च गर्भं व्यापादयन्ति। न चाभीक्ष्णं तैलाभ्यङ्गोत्सादनादीनि निषेवेत। न चायासचेष्टाश्चरीरं पूर्व्वोक्तानि च परिहरेत्। अथवासनं गृहास्तरणं नात्युच्चमप्राश्रयोपेतमसञ्चाधं विदध्यात्। हृद्यं द्रवं मधुरप्रायं स्निग्धं दीपनीयसंस्कृतञ्च भोजनं भोजयेत् सामान्यमेतद्दापसवात्॥* विशेषतस्तु गर्भिणी प्रथमद्वितीयतृतीयमासेषु मधुरप्रीनद्रवप्रायमाहारमुपसेवेत। विशेषतस्तु तृतीये वस्तिकौद्दनं पयसा भोजयेच्चतुर्थे दध्ना पञ्चमे पयसा षष्ठे सर्पिषा चेत्येके। चतुर्थे पयोनवनीतसंसृष्टमाहारवेल्लाङ्गलमांससहितं हृद्यमन्नं भोजयेत्। पञ्चमे क्षीरसर्पिःसंसृष्टम्। षष्ठे यष्टीद्राक्षाक्षिद्रस्य सर्पिषो मात्रां पाययेदयवागूं वा। सप्तमे सर्पिः पृथक् पर्य्यादिसिद्धमेवमाप्याय्यते गर्भः। अष्टमे वदरीदकेन बलातिबलागुडपुष्पफलपयोदधिमस्तुतैलसक्षमदनफलमधुघृतमिश्रेणास्थापयेत्। पुराणपूरीषमूत्रवर्द्धमनुलोमनार्थञ्च वायोः। ततः पयोमधुरकषायसिद्धेन तैलेनानुवासयेदनुलोमे हि वायौ सुखं प्रसूयते निरुपद्रवा च भवति। अत ऊर्द्धं स्निग्धाभिर्यवागूभिर्भोजनसंस्कारैश्चोपक्रमेदाप्रसवकालादवसुपक्रान्ता स्निग्धा बलवती सुखमनुपद्रवा प्रसूयते। नवमे मासि सूतिकागारमेनां प्रवेशयेत् प्रशस्तनिद्यादौ। तत्रारिष्टं ब्राह्मणक्षत्रियवैश्यशूद्राणां श्वेतरक्तपीतकृष्णेषु भूमिप्रदेशेषु विल्वन्यग्रोधतिन्दुकभल्लातकनिर्म्मितं सर्व्वागारं यथासंख्यं तन्मयपर्य्यङ्कसुपलिप्तभित्तिं सुविभक्तपरिच्छदं प्राग्द्वारसुदग्द्वारं दक्षिणद्वारं वाऽरुक्षायतचतुरस्रविस्तृतं रत्नाभङ्गलसम्पन्नं विद्येयम्॥ ०॥

"जाते हि ग्रथिते कुक्षौ सूक्ते हृदयबन्धने।
सम्पूर्णे जघने नारी श्रेया सा तु प्रजायिनी॥"

तत्रोपस्थितप्रसवाः कटीपृष्ठं प्रति समग्रार्द्रेण भवत्यभीक्ष्णं पुरीषप्रवृत्तिर्मूर्द्धं प्रसिच्यते योनिसुखात् श्रेष्मा च। प्रजननविषमार्त्ता क्षतभङ्गलक्षितवाचनां कुमारपरिहृतां पुत्रामफलपुष्पां सम्पक्वासुष्णोदकपरिषिक्तामर्थेनां सघृतां यवागूमाकण्ठात् पाययेत्। ततः क्षतोपधाने मृदुविस्तीर्णे शयने स्थितामाशुसक्वीसुप्तानामग्रङ्गनीयाश्चतसः स्त्रियः परिगतवयसः प्रजननकुशलाः कल्पितनखाः परिचरेयुरिति॥* अथास्या विश्रिखान्तरमनुलोममनुसुखमभ्यज्यात् ब्रूयाच्चैनामेका सुभगे प्रवाहस्वेति न चाप्राप्तौ प्रवाहस्य विश्रिखान्तरमपसर्पमार्गम्। ततो विसृष्टे गर्भनाड्यां प्रवृत्ते सम्पूर्णे श्रोणिवङ्क्षणवस्तिशिरःसु प्रवाहेथाः शनैः शनैः। ततो गर्भनिर्गमे प्रगाढ़ं ततो गर्भे योनिसुखं प्रपन्ने गाढ़तरमविशल्यभावात्॥* अकालप्रवाहणात् वधिरं मूकं यक्ष्मणं मूर्द्धाभिघातिनं कासश्वासशोषोपद्रुतं कुब्जं विकटं वा जनयति। तत्र प्रतिलोममनुलोमयेत्। गर्भसङ्गे तु योनिं घृतयेत् क्षाराम्लपिनिर्म्मोकेण पिण्डीतकेन वा। वर्षाभ्याहिरण्यपुष्पीमूलं हस्तपादयोर्द्धारयेत् सुवर्चलां विश्वल्यां वा॥* अथ जातस्योल्वं सुखञ्च सैन्धवसर्पिषा विशोध्य घृताक्तं मूर्द्धि पिचुं दद्यात् ततो नाभिनाड़ीमपाङ्गुलमात्रम्य सूत्रेण बद्ध्वा छेदयेत् ततश्चैकदेशञ्च कुमारस्य ग्रीवायां सन्यस्यन्नीयात्॥* अथ कुमारं घृताभिरद्भिराश्वास्य जातकर्म्माणि कृते मधुसर्पिरनन्तान्नाक्षीरेण सुवर्णचूर्णमङ्गुल्यानामिकया लेहयेत्ततो बलातैलेनाभ्यज्य शीतोष्णकषायेण सर्व्वगन्धोदकेन वा स्नापयेदेनं कपित्थपत्रकषायेण वा वारिणा क्षापयेदेनं कपित्थपत्रकषायेण वा क्षौद्रेण यथाकालं यथादेशं यथाविभवं च।

"धमनीनां हृदिस्थानां विद्धतत्वादनन्तरम्।
चतुरायात्तिरात्राद्धा स्त्रीणां स्तन्यं प्रवर्त्तते॥"

तस्मात् प्रथमेऽह्नि मधुसर्पिरनन्तासिद्धं मन्त्रपूतं त्रिकालं पाययेद्द्वितीये लक्षणासिद्धं सर्पिस्तृतीये च। ततः प्राङ्निवारितस्तन्यं मधुसर्पिः क्षणाधितसम्मितं द्विकालं पाययेत्॥* अथ सूतिकां बलातैलाभ्यक्तां वातहरौषधनिःक्वाथेनोपचरेत् सशेषदोषान्तु तदहः पिप्पलीपिप्पलीमूलहस्तिपिप्पलीचित्रकशृङ्गवेरचव्यपूर्णं गुडोदकेनोष्णेन पाययेत्। एवं द्विरात्रं त्रिरात्रं वा कुर्य्यादादुष्टशोणितात्। विसृष्टे ततो विदारिगन्धादिसिद्धां स्नेहयवागूं क्षीरयवागूं वा पाययेत् त्रिरात्रम्। ततो यवकोलकुलत्थसिद्धेन जाङ्गलरसेन शाल्योदनं भोजयेद्बलमभिवलयिष्यन्। अनेन विधिना अधर्द्धमानसुपसंस्कृता विसृक्ताहाराचारा विगतसूतिकाभिधागा स्यात्। पुनरार्त्तवदर्शनादिष्टेके। धन्वभूमिजातां सूतिकां सूतलेखयोरन्यतरस्य मात्रां पाययेत्। पिप्पल्यादिकषायानुपाना स्नेहनित्या च स्यात्त्रिरात्रं पञ्चरात्रं वा बलवती। व्यवसां यवागूं पाययेत्त्रिरात्रं पञ्चरात्रं वा। अत ऊर्द्धं स्निग्धेनान्नसंसर्गेणोपचरेत्। प्रायशश्चैनां प्रभूतेनोष्णोदकेन परिषिञ्चेत्। क्रोधायासमैथुनादीन् परिहरेत्॥* भवतश्चात्र।

"मिथ्याचारात् सूतिकाया यो व्याधिरुपजायते।
स कृच्छ्रसाध्योऽसाध्यो वा भवेदत्ययतर्षणात्॥
तस्मात्तं देशकालौ च व्याधिसात्म्येन कर्म्मणा।
परीक्ष्योपचरेदेवं नेयमत्ययमाप्नुयात्॥"*॥

अथापरापतन्त्यानाध्मानौ क्षुभ्यते तस्मात् कक्षमस्याः क्षौद्रघृतेनाभ्यङ्क्ष्य प्रस्रोत्। कटुकालाबुक्षतवेधगमर्षप्रसर्षनिर्म्मोकैर्वा कटुतैलविमिश्रैर्योनिसुखं धूपयेत्। लाङ्गलीमूलकल्केन वास्याः पायिपादतलमालिम्पेत्। सूक्ष्मां वास्या

बलित्यात्। यथालाभं न्यग्रोधादित्वक् प्रवालफल्कं वा पयसा पाययेदुत्पलादिकल्कं वा कपोतपृष्ठाटकशालूककल्कं वा घृतेन पयसोदुम्बरफलौदकक्वाथेन वा शर्करामधुमधुरेण शालिपिष्टं न्यग्रोधादिक्षीरसपरिपीतं वा वस्त्रावपयं योन्यां धारयेत्॥ * ॥ अथाष्टग्रोणितवेदनायां मधुकदेवदारुपयस्यासिद्धं पयः पाययेत् तदेवाम्रजम्बुकशृतावरीपयस्यासिद्धं विदारिगन्धादिसिद्धं वा घृतौदुम्बरोत्पलशृतावरीसारिवापयस्यामधुकसिद्धं पयस्यार्कपुष्पीसिद्धं वा पयः पाययेदिति। एवं क्षिप्रप्रपक्वान्तायां उपावर्त्तन्ते रुजो गर्भाघाय्यायते। व्यवस्थिते च गर्भे गव्येनोड्डुम्बरशृताढकसिद्धेन पयसा भोजयेत्। अनीते लवणक्षौद्रवल्ल्यभिर्यवागूभिरुद्दालकादीनां पाचनीयोपसंस्कृताभिरुपक्रमेत यावन्तो मासा गर्भस्य तावन्त्यहानि। वस्त्युदरमूलेषु पुराणगुडं दीपनीयसंयुक्तं पाययेद्रिष्टं वा वातोपद्रवग्रहीतत्वात्। स्रोतसां लीयते गर्भः सोऽतिकालमवतिष्ठमानो व्यापद्यते तं शृतेना स्नेहादिक्रमेणोपचरेत्। उत्क्लेशरसंसिद्धामनल्पस्नेहां यवागूं पाययेत्। माषतिलविल्वशृताढकसिद्धान् वा कुल्माषान् भक्षयेन्मधुमाध्वीकं चानुपिबेत् सप्तरात्रम्। कालातीतस्यापिनं गर्भं विशेषतः सधान्यशृतस्नेहं सुखेनाभिहन्यात् विषमं वा यानासनं सेवेत। वातोभिपन्न एव शुष्यति गर्भः। स मातुः कुक्षिं न पूरयति मन्दं स्पन्दते च तं बृंहणैः पयोभिर्मांसरसैश्चोपचरेत्। शुक्रशोणितं वायुनाभिप्रपन्नमवक्रान्तजीवमाभाप्रयत्नोदरम्। तत् कदाचित् यदृच्छयोपशाम्यति नैगमेयापहृतमिति भाषन्ते। तमेव कदाचित् प्रलीयमानं नागोदरमित्याचक्षते। अपि लीनवत् प्रतीकारः॥ * ॥ अत ऊर्द्धं मासानुमासिकं वक्ष्यामः।

"मधुकं शाकवीजञ्च पयसा सुरदारु च।
अश्मन्तकक्षिला कृष्णाताम्रवल्ली शृतावरी॥
वृक्षादनी पयसा च लता चोत्पलसारिवा।
अनन्ता सारिवा रास्ना पद्मा मधुकमेव च॥
वृहत्यौ काश्मरी चापि क्षीरिशुङ्गाक्षवौ शृतम्।
वृश्चिपर्णी बला शिग्रु स्वदंष्ट्रा मधुपर्णिका॥
अङ्गाटकं विसं द्राक्षा कपोरु मधुकं सिता।
वल्लीते सप्त योगाः स्युर्द्वौद्वौकसमापनाः॥
यथासंख्यं प्रयोक्तव्या गर्भस्रावे पयोयुताः।
कपित्थवृहतीबिल्वपटोलैक्षुनिदिग्धिकाः॥
मूलानि क्षीरसिद्धानि पाययेद्विषमागमे।
नवमे मधुकानन्तापयस्यासारिवाः पिबेत्॥
क्षीरं शृङ्गीपयस्याभ्यां सिद्धं स्याद्गर्भमे हितम्।
सक्षीरा वा हिता शुङ्गी मधुकं सुरदारु च।
एवमाप्याय्यते गर्भस्त्रीणां रक्तं चोपशाम्यति॥"
निवृत्तप्रसवायास्तु पुनः षड्भ्यो वर्षेभ्य ऊर्द्धं प्रसवमानायाः नार्याः कुमारोऽप्यायुर्भवति॥ * ॥
अथ गर्भिणीं याधुत्पन्नावत्यये छर्दयेन्मधुराम्लेनान्नेनोपहितेनानुलोमयेच्च संसृष्टदोषां सृष्टविण्मूत्रां सृष्टवीर्य्यं मधुरप्रायं गर्भाविरुद्धञ्च गर्भाविरुद्धाञ्च क्रिया यथायोगं विदधीत सृष्टप्रायाः॥ * ॥ भवन्ति चात्र।
"सौवर्णं सुव्रतं चूर्णं कुष्ठं मधु घृतञ्च वा।
मांस्याल्कः शृङ्गपुष्पी मधु सर्पिः सकाञ्चनम्॥
अर्कपुष्पी मधु घृतं चूर्णितं कनकं वचा।
हेमचूर्णानि कैटर्य्यः श्वेता दूर्व्वा घृतं मधु॥
चत्वारोऽभिहिताः प्राशाः क्षीकार्द्धेषु चतुर्ष्वपि।
कुमारागां वपुर्मेधाबलबुद्धिविवर्द्धनाः॥"
इति सुश्रुत आयुर्व्वेदशास्त्रेऽष्टमीयं शारीरस्थानं समाप्तम्॥ इङ्गरेजीभाषायां एनाटोमीत्युक्तमेतत्॥ * ॥ शारीरं तपो यथा,—
"देवद्विजगुरुप्राज्ञपूजनं शौचमार्জ্জবম्।
ब्रह्मचर्य्यमहिंसा च शारीरं तप उच्यते॥"
इति भगवद्गीतायाम् १७ अध्यायः॥

शारीरकं, क्ली, (शरीरमेव शारीरं स्वार्थिकत्वात् तन्निवासी शारीरको जीवस्तमधिकृत्य कृतो ग्रन्थः। शारीरक + अण्।) वेदव्यासकृतवेदान्तमीमांसाशास्त्रम्। यथा। तथा च वयमस्यां शारीरकमीमांसायां प्रदर्शयिष्यामः। वेदान्तमीमांसाशास्त्रस्य चाधिष्ठासितस्वेदमादिमं सूत्रम्। अथातो ब्रह्मजिज्ञासेति। इति शङ्करभाष्यम्॥ (शरीरमेव शारीरकं तत्र भवम्। शरीरक + अण्। शरीरभवे, त्रि। यथा, भागवते। ३। ३१। १६।
"पश्यत्यसद्धियमृषा तनु सम्पदः
शारीरके दमशरीर्य्यपरः स्वदेहे॥")

शारीरिकः, त्रि, (शरीर + ठक्।) शरीरसम्बन्धि। तत्पर्य्यायः। कालेवरिकः २ गात्रिकः ३ वापुषिकः ४ सांहननिकः ५ वार्षिकः ६ वैग्रहिकः ७ कायिकः ८ दैहिकः ९ मौर्त्तिकः १० तानविकः ११। इति अमरोक्तशरीरपर्य्यायशब्दात् ठिकप्रत्ययेन निष्पन्नमिदम्॥

शारुकः, त्रि, (शृणातीति। शृ + "जृषशृतपदस्थेति।" ३। २। १५४। इति उकञ्।) हिंसकः। शृस्याभूकम गमेत्यादिना ऊकप्रत्ययेन निष्पन्नमिदम्। इति मुग्धबोधव्याकरणम्॥ (यथा, मुग्धबोधे कारकप्रकरणे।
"दृष्ट्वा दधि शारुकमेतदर्च्चकान्
उन्नीतवन्तं यतिभिः सुदर्शनम्॥")

शार्कः, पुं, शर्करा। इति शब्दरत्नावली॥

शार्कः, पुं, दुग्धफेनः। शर्करास्त्यत्रेति। शर्करा + "देये लुबिलचौ च।" ५। २। १०५। इति अण्।) शर्करान्वितदेशः। इति मेदिनी॥ शर्करासम्बन्धिनि, त्रि॥ (शर्करेव। "शर्करादिभ्योऽण्।" ५। ३। १०७। इत्यण्। शर्करासदृशम्॥ इति काशिका॥ * ॥ "सिकताशर्कराभ्यां च।" ५। २। १०४। इति अपि शर्कराविशिष्टम्॥ यथा, शार्करं मधु।" इति च काशिका॥)

शार्करकः, शार्करिकः } त्रि, शर्करावदुपदेशः। शर्करा-शब्दात् कण् प्रत्ययेन ठिकप्रत्ययेन च निष्पन्नः॥

शार्करीयः, त्रि, शर्करायुक्तदेशः। शर्करा-शब्दात् छण् प्रत्ययेन निष्पन्नमिदम्॥

शार्ङ्गं, क्ली, आर्द्रकम्। इति राजनिर्घण्टः॥ (शृङ्गस्य विकारः। शृङ्ग + अण्।) विष्णुधनुः। धनुर्म्मात्रम्। इति मेदिनी। गे, २६॥ (यथा, रघुः। ४। ६२।
"शार्ङ्गकूजितविज्ञेयप्रतियोधे रजस्यभूत॥")
शृङ्गसम्बन्धिनि, त्रि॥

शार्ङ्गेष्टा, स्त्री, मञ्जाकरञ्जः। इति राजनिर्घण्टः॥ पुस्तकान्तरे शार्ङ्गेष्टा इति च पाठः॥

शार्ङ्गी, [न्] पुं, (शार्ङ्गमस्यास्तीति। शार्ङ्ग + इनिः।) विष्णुः। इत्यमरः॥ (यथा, रघुः। १२। ७०।
"स सेतुं बन्धयामास शरैर्लवणाम्भसि।
रसातलादिवोन्मग्नं शैलं स्वप्राय शार्ङ्गिणः॥")
धन्विमात्रम्। इति शार्ङ्गशब्दार्थदर्शनात्॥

शार्दूलः, पुं, (शृ हिंसायाम् + "खर्ज्जिपिञ्जादिभ्य ऊलचौ।" उणा० ४। ६०। इति ऊलच् प्रत्ययेन साधुः।) व्याघ्रः। उत्तरपदे श्रेष्ठार्थवाचकः। इत्यमरः॥ राक्षसः। मशुभेदः। स तु सरभः। इति मेदिनी॥ पक्षिविशेषः। इति धरणिः॥ चित्रकः। इति राजनिर्घण्टः॥

शार्दूललालितं, क्ली, धृतिवृत्तौ अष्टादशाक्षरपादच्छन्दोविशेषः। यथा,—
"मः सो जः स-त-सा दिनेश ऋतुभिः शार्दूललालितम्।
छित्वा कंसचमूं पराक्रमविधिं शार्दूललालितं
यच्चक्रे क्षितिभारकारिषु सुरारातिष्वतिदेवम्।
सन्तोषं परमन्तु देवनिवहे त्रैलोक्यशरणं
श्रेयो वः स तनोत्यपारमहिमा लक्ष्मीप्रियतमः॥"
इति छन्दोमञ्जरी २ स्तवकः॥

शार्दूलविक्रीडितं, क्ली, अतिधृतिवृत्तौ जनविंशतिपादच्छन्दोविशेषः। यथा,—
"सूर्य्याश्वैर्मसजस्तताः सगुरवः शार्दूलविक्रीडितम्।
गोविन्दं पुरुषोत्तमञ्जलजनेत्रं वासुदेवं हरिं
यो वन्दे पूजयते सदा पठति वै तस्यालयं गच्छतम्।
रक्षेत् कुरुनाखिलं मम हितं पूर्णेन्दुतुल्यं मुखं
न प्रेक्ष्ये भवतां कदे भवमहाशार्दूलविक्रीडितम्।"
इति छन्दोमञ्जरी २ स्तवकः॥

शार्ब्बरं, क्ली, अन्धतमसम्। धातुके, त्रि। इति मेदिनी॥ (शर्ब्बर्या इदम्। शर्ब्बरी+अण्।) शर्ब्बरीसम्बन्धिनि, त्रि॥

शार्ब्बरी, स्त्री, रात्रिः। इत्यमरटीकायां भरतधृतवाचस्पतिः॥

शाल, ङ ऋ कत्थने। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-सेट्।) कत्थने प्रशंसायाम्। ङ, शालते गुणिनं गुणी। ऋ, अशूशालत्। इति दुर्गादासः॥

शालः, पुं, (शल्यते प्रशंस्यते इति। शाल+घञ्।) मत्स्यभेदः। राजाड़ इति ख्यातः। प्राकारः। वृक्षविशेषः। तत्पर्य्यायः। सर्जः २ काण्यः ३ अश्वकर्णकः ४ शुक्लसरः ५। इत्यमरः॥ शुङ्गवृक्षः ६। इति रत्नमाला॥ नदभेदः। इति शब्दरत्नावली॥ शालनृपः। स तु शालिवाहनराजः। इति विश्वः॥ वृक्षमात्रम्। इति राजनिर्घण्टः॥ शालो झषे धीवरे च दाशे इत्युभयभेदात्तालव्यादिः। दन्त्यादिश्च। कैवर्त्त इव बहुरालीवोत्पलसालो वसन्तकाल व्याजगाम। इति वासवदत्तश्लेषात्। कैवर्त्तपक्षे शालो मत्स्यविशेषः। वसन्तपक्षे शालस्य पुष्पं शालम्। इति भरतः॥

शालग्रामः, पुं, विष्णुमूर्त्तिविशेषः। स च गण्डक्युद्भववज्रकीटलक्षचक्रयुक्तशिला द्वारकीद्भवनादशिला च। तस्य माहात्म्यलक्षणादि यथा,—

"प्रसङ्गात् कथयिष्यामि शालग्रामशिलार्च्चनम्।
निष्कामो मुक्तिमाप्नोति मूर्त्तिं ध्यायन् स्तुवन् जपन्॥
शङ्खचक्रगदापद्मी केशवाख्यो गदाधरः।
वाजकौमोदकीचक्रशार्ङ्गी नारायणो विभुः॥
स च शङ्खाजपद्मो माधवः श्रीगदाधरः।
गदाजशङ्खचक्री वा गोविन्दाख्यो गदाधरः॥
पद्मशङ्खादिगदिने विष्णुशङ्खाय वै नमः।
सशङ्खाब्जगदाचक्रमधुसूदनमूर्त्तये॥
नमो गदासिचक्राब्जयुक्तत्रैविक्रमाय च।
साब्जकौमोदकीपद्मशङ्खामानमूर्त्तये॥
शङ्खाब्जचक्रगदिने नमः श्रीधरमूर्त्तये।
हृषीकेश साब्जगदाशङ्खपद्मिन्नमोऽस्तु ते॥
वाजशङ्खगदाचक्रपद्मनाभस्वरूपिणे।
दामोदर शङ्खगदाचक्रपद्मिन्नमोऽस्तु ते॥
साब्जशङ्खगदाजाय वासुदेव नमो नमः।
शङ्खाब्जचक्रगदिने नमः सङ्कर्षणाय च॥
शङ्खचक्रगदाब्जाय धृतप्रद्युम्नमूर्त्तये।
नमोऽनिरुद्धाय गदाशङ्खाब्जधरधारिणे॥
वाजशङ्खगदाचक्रपुरुषोत्तममूर्त्तये।
नमोऽधोक्षजरूपाय गदाशङ्खविधारिणे॥
नृसिंहमूर्त्तये पद्मगदाशङ्खविधारिणे।
पद्माब्जशङ्खिने नमोऽच्युतमूर्त्तये॥
शङ्खचक्राब्जगदं जनार्द्दनविधौ नमः।
उपेन्द्रं शरिणं साब्जशङ्खचक्र नमोऽस्तु ते॥
यज्ञशङ्खाब्जगदाचक्रयुक्ताय हरिमूर्त्तये।

सगदाब्जाविशङ्खाय नमः श्रीकृष्णमूर्त्तये॥
शालग्रामशिलाद्वारगतलक्ष्यद्विचक्रधृक्।
शुक्लाभाख्यश्च सोऽव्याद्वः सदैव श्रीगदाधरः॥
लक्ष्यद्विचक्रो चक्राभः पूर्व्वभागस्तु पुष्कलः।
सङ्कर्षणोऽथ प्रद्युम्नः सूक्ष्मचक्रस्तु मीतकः॥
स दीर्घः स शिरश्छिद्रो योऽनिरुद्धस्तु वर्त्तुलः।
नानाद्वारस्थिरेखश्च अथ नारायणोऽखिलः॥
मध्ये गदाकृता रेखा नाभिपद्ममधोन्नतः।
पृथुचक्रो वृषिंद्रो वः कपिलोऽव्याच्चिविन्दुकः॥
अथवा पञ्चबिन्दुस्तत्पूजनं ब्रह्मचारिणः।
वराहग्रन्थिलिङ्गोऽव्याद्विषमद्वयचक्रकः॥
नीलस्थिरेखः स्थूलोऽथ कूर्म्ममूर्त्तिः खबिन्दुमान्।
कृष्णः सवर्त्तुलावर्त्तः पाण्डरोन्नतपृष्ठकः॥
श्रीधरः पञ्चरेखोऽव्याद्वनमालागदाङ्कितः।
वामनो वर्त्तुलो नाम वामचक्रः सुरेश्वरः॥
नानावर्णोऽनेकमूर्त्तिर्नागभोगी त्वनन्तकः।
स्थूलो दामोदरो नीलो मध्ये चक्रः सुनीलकः॥
संकीर्णद्वारको वोऽव्यादथ ब्रह्मा सुमोहितः।
सदीर्घरेखा पृथिवी एकचक्राम्बुजः पृथुः॥
प्रत्युच्छिन्नः स्थूलचक्रः कृष्णोऽविन्दुश्च विन्दुमत्।
हयग्रीवोऽङ्कुशाकारः पञ्चरेखः समन्ततः॥
वैकुण्ठोऽमलवद्भाति एकचक्रात्मकोऽखिलः।
मत्स्यो दीर्घभुजाकारो द्वाररेखस्तु पाण्डरः॥
वामचक्रो दक्षरेखः श्यामो वोऽव्याच्चिविक्रमः।
शालग्रामे द्वारकायां स्थिताय गदिने नमः॥
एकेन लक्षितो वोऽव्याद्वदाधारी सुदर्शनः।
लक्ष्मीनारायणौ द्वाभ्यां चिभिर्मूर्त्तिस्त्रिविक्रमः॥
चतुर्भिश्च चतुर्व्यूहो वासुदेवश्च पञ्चभिः।
प्रद्युम्नः षड्भिरेवाव्यात् सङ्कर्षण इतः स्तुतः॥
पुरुषोत्तमोऽष्टभिः स्याच्च नवव्यूहो नवात्मितः।
दशावतारो दशभिरनिरुद्धोऽवनादथ।
द्वादशात्मा द्वादशभिरत ऊर्त्तो त्वनन्तकः॥"

इति पाद्मे पातालखण्डे १० अध्यायः॥

अपि च।

ईश्वर उवाच।

"शालग्रामे मणौ यन्त्रे मण्डले प्रतिमासु च।
नित्यन्तु श्रीहरेः पूजा कैवल्येन फलेन तु॥
गण्डक्यामेकदेशे तु शालग्रामस्थलं महत्।
पाषाणान्तर्भवं यत्तत् शालग्राममिति स्थितम्॥
शालग्रामशिलास्पर्शात् कोटिजन्माघनाशनम्।
किं पुनर्जननं तत्र हरेः सान्निध्यकारणम्॥
शालग्रामैकयजनात् धृतलिङ्गफलं लभेत्।
बहुभिर्जन्मभिः पुण्यैर्यदि कृष्णशिलां लभेत्॥
गोप्यदेन च चिह्नेन तेन वै त्रायते नरः।
यादौ शिलां परीक्षेत स्निग्धां श्रेष्ठाञ्च मेधकाम्॥
रूक्षणा मध्यमा प्रोक्ता मिश्रा मिश्रफलप्रदा।
सर्व्वकामप्रदा सौम्या कराला भयदुःखदा॥
स्निग्धा च श्रीकरी नित्यं रूक्षा दारिद्र्यदायिका।
पृथा चक्रयुता प्रोक्ता स्थूला स्थूलफलप्रदा॥
सदा काष्ठे स्थितो वह्निर्मन्थने च प्रकाशते।

यथा तथा हरिर्व्यापी शालग्रामे प्रकाशते॥
प्रत्यहं द्वादश शिलाः शालग्रामस्य योऽर्च्चयेत्।
द्वारवत्या शिलायुक्तः स वैकुण्ठे महीयते॥
शालग्रामशिलायान्तु गण्डकं लक्षते नरः।
पितरस्तस्य तिष्ठन्ति तृप्ताः कल्पान्तरं दिवि॥
शालग्रामशिला यत्र यत्र द्वारवतीशिला।
मृते विष्णुपुरं याति कृतार्थो योजनत्रयम्॥
जपपूजा च होमश्च सर्व्वं कोटिगुणं भवेत्।
मनस्कामः सदाभीष्टं क्रीणुयाच्च समन्ततः॥
कोकटेऽपि मृतो याति वैकुण्ठभवनं नरः।
शालग्रामशिलायां यो मूल्यमुत्पादयेन्नरः॥
विक्रेता चानुमन्ता च यः परीक्षानुमोदकः।
सर्व्वे ते नरकं यान्ति यावदाहूतसंप्लवम्॥
अतस्तं वर्ज्जयेद्देवि! हरिविक्रयणक्रयम्।
शालग्रामोद्भवो देवो यो देवो द्वारकोद्भवः॥
उभयोः सङ्गमो यत्र मुक्तिस्तत्र न संशयः॥
द्वारकोद्भवः शुक्लश्च बहुचक्रैश्च चिह्नितः।
चक्रमासीत् शिवाकारश्चिन्तास्वरूपनिरञ्जनम्॥
नमोऽस्त्वोङ्काररूपाय सदानन्दस्वरूपिणे।
शालग्रामे महाभाग भक्तस्यानुग्रहं कुरु।
त्वया युतस्य धर्म्मस्य ऋणग्रस्तस्य मे प्रभो॥"

इति तत्रैव ११ अध्यायः

अपरञ्च।

ब्राह्मण उवाच।

"गण्डकीपूर्व्व नदी राजन्! सुरासुरनिषेविता।
पुण्योदकपरीवाहैर्हृतपातकसञ्चया॥
दर्शनाच्चानयं पापं स्पर्शनात् कर्म्मचं दहेत्।
वाचिकं क्षीयतेतस्य पानतः पापसञ्चयम्॥
पुरा दुष्टाः प्रजानाथ! प्रजाः सर्व्वा विपाप्मनः।
खगण्डाद्विपुरोऽनेकपापघ्नीं दृष्ट्वानिमाम्॥
एनां नदीं ये पुण्यादां स्पृशन्ति सुतरङ्गिणीम्।
ते गर्भभाजो नैव स्युरपि पापकृतो नराः॥
तस्यां भवा ये चाश्मानश्चक्रचिह्नैरलङ्कृताः।
ते साक्षाद्भगवन्तो हि स्वस्वरूपधराः पराः॥
शिलाः संपूजयेद्यस्तु नित्यं चक्रयुताः सदा।
न जातुचिज्जनन्या वै जठरं समुपाविशेत्॥
पूजयेद् यो नरो धीमान् शालग्रामशिलां वराम्।
तेनाचारवता भाव्यं दम्भमोहवियोगिना॥
परदारपरद्रव्यविमुखेन नरेण च।
पूजनीयः प्रयत्नेन शालग्रामः सचक्रकः॥
द्वारवत्या भवं चक्रं शिला वै गण्डकीभवा।
पुंसां क्षणाहरन्येव पापं जन्मशतार्ज्जितम्॥
अपि पापसहस्राणां कर्त्ता तावन्नरो भवेत्।
शालग्रामशिलाया याः पीत्वा पूयेन तत्क्षणात्॥
ब्राह्मणः क्षत्रियो वैश्यः शूद्रो वेदपथे स्थितः।
शालग्रामं पूजयित्वा मुच्यते मोक्षमाप्नुयात्॥
न कदाचित् स्त्रिया कार्य्यं शालग्रामस्य पूजनम्
भर्त्तृदीनोद्यत सुभगा सर्व्वलोकहितैषया॥
मोहात् यद्यपि महिला जनयेत्पौत्रगुणान्विता
स्थित्वा पुण्यसमूहन्तु सत्वरं नरकं व्रजेत्॥
स्त्रीपाणिस्पृक्तपुष्पाणि शालग्रामशिलोपरि।

परैरधिकपापानि वह्निभ ब्राह्मणोत्तमाः ॥
चन्दनं विषपङ्काभं कुङ्कुमं वज्रसन्निभम् ।
नैवेद्यं कालकूटाभं भवेद्भगवतः क्षतम् ॥
तस्मात् सर्व्वात्मना त्याज्यः स्त्रियाः सङ्गः
शिलोपरि ।
कुर्व्वती याति नरकं यावदिन्द्राश्चतुर्दश ॥*॥
अपि पापसमाचारो ब्रह्महत्यायुतोऽपि वा ।
शालग्रामशिलातोयं पीत्वा याति परां गतिम् ॥
तुलसी चन्दनं चक्रं शङ्खो वैष्णव चक्रकम् ।
शिला ताम्रस्य पात्रन्तु विष्णोर्नाम पदाष्टकम् ॥
पदाष्टकन्तु नवभिः पापराशिप्रदाहकम् ।
वदन्ति मुनयः शान्ताः सर्व्वशास्त्रार्थकोविदाः ॥
सर्व्वतीर्थपरिस्नानात् सर्व्वक्रतुसमर्चनात् ।
पुण्यं भवति यद्राजन् विन्दौ विन्दौ तदद्भुतम् ॥
शालग्रामशिला यत्र पूज्यते पुरुषोत्तमैः ।
तत्र योजनमात्रन्तु तीर्थकोटिसमन्वितम् ॥*॥
शालग्रामाः समाः पूज्याः समेषु हितयं न हि ।
विषमा एव पूज्या वै विषमेषु त्रयं न हि ॥
द्वारवत्यीभवं चक्रं तथा वै गण्डकीभवम् ।
उभयोः सङ्गमो यत्र तत्र गङ्गा समुद्रगा ॥
रूक्षाः कुर्व्वन्ति पुरुषान् आयुःश्रीभिर्विवर्ज्जि-
तान् ।
तस्मात् स्निग्धा मनोहारिरूपेण दृढति श्रियम् ॥
आयुष्कामो नरो यस्तु धनकामोऽपि यः पुमान् ।
पूजयन् सर्व्वमाप्नोति पापं लौकिकमैहिकम् ॥
प्राणान्तकाले तु यस्य भवेद्वाग्यवलान्नृप ।
वाचि नाम हरेः पुण्यं शिलातुलसिदन्तिके ॥
गच्छन्तु प्राणमार्गेषु यस्य विश्रमतोऽपि चेत् ।
शालग्रामशिलाम्भोभिस्तदा मुक्तिर्न संशयः ॥
पुरा भगवता प्रोक्तमम्बरीषाय धीमते ।
ब्राह्मणो न्यासिनो भक्ताः शालग्रामशिला
मम ॥
स्वरूपचिह्नयं मत्स्यमेतद्धि क्षितिमण्डले ।
पापिनां पापनिर्व्वारं कर्त्तुं धृतसदव्रताम् ॥
निन्दन्ति पापिनो ये वा शालग्रामशिलां सेकृत्
कुम्भीपाके पचन्त्याशु यावदाकृतसंप्लवम् ॥
पूजां समुद्यतं कर्त्तुं यो वारयति मूढधीः ।
तस्य माता पिता बन्धुः सर्व्वे नरकगामिनः ॥
यो वै कथयति श्रेष्ठं शालग्रामार्चनं क्रतु ।
स क्रतार्थो नयत्याशु वैकुण्ठं खलु पूर्व्वजैः ॥"
इति च तत्रैव २० अध्यायः ॥ * ॥
अन्यच्च ।
श्रीईश्वर उवाच ।
"शालग्रामशिलायान्तु त्रैलोक्यं सचराचरम् ।
सदा वसति तेनात्र विष्णुस्तिष्ठति सर्व्वदा ॥
शालग्रामशिलापूजां प्रकुरुष्व षड़ानन ।
गङ्गामिव महापुण्यां चतुर्व्वर्गफलप्रदाम् ॥
दृष्ट्वेन मनसा येन स्थापिता पूजिता तथा ।
यज्ञकोटिसमं पुण्यं आशु तस्मै प्रयच्छति ॥
छिन्नस्तेन महाघेन गर्भवासः सुदारुणः ।
पीतं येन सदा विष्णोः शालग्रामशिलाजलम् ॥
कामासक्तोऽपि यो नित्यं भक्तिभावविवर्ज्जितः ।
शालग्रामशिलां पश्येत् तस्य पापक्षयो भवेत् ॥
शालग्रामशिला विप्र हत्याकोटिविनाशिनी ।
स्तुता संकीर्त्तिता ध्याता पूजिता च नमस्कृता ॥
शालग्रामशिलां दृष्ट्वा यान्ति पापानि देहि-
नाम् ।
सिंहं दृष्ट्वा यथा यान्ति वने मृगगणा भयात् ॥
नमस्कृत्वा तु यः कुर्य्यात् शालग्रामशिलार्च्चनम् ।
भक्त्या वा यदि वाभक्त्या स मुक्तिं समवाप्नुयात् ॥
यः सेवां कुरुते नित्यं शालग्रामशिलाग्रतः ।
वैकुण्ठताद्र्यं तस्य न स्यान्मरणजन्मनी ॥
शालग्रामशिलाचक्रं पयोदधिघृतादिकैः ।
यः स्नापयति नूनं स कल्पकोटिं वसेद्दिवि ॥
शालग्रामे नमस्कारो भावेनापि च यैः कृतः ।
मानवाः किं करिष्यन्ति मक्षिका ते महीतले ॥
मक्तिरत्नदरिद्रिष्ठा मत्प्रसं न नमन्ति ये ।
वैष्णवास्ते न विज्ञेया मक्षिका पापमोहिताः ॥
शालग्रामशिला यत्र तत्र पुत्र वसाम्यहम् ॥
पूजितोऽहं न तैर्मर्त्यैः स्थापितश्च न तैर्नरैः ।
न कृतं मर्त्यलोके यैः शालग्रामशिलार्चनम् ॥
किमर्च्चितैर्लिङ्गशतैर्विष्णुभक्तिविवर्ज्जितैः ।
शालग्रामशिलाचक्रं नार्च्चितं यदि पुत्रक ॥
जन्मकोटिसहस्रेण पूजिते मयि यत् फलम् ।
तत् फलं समवाप्नोति शालग्रामशिलार्च्चनात् ॥
अनर्घ्यं मम नैवेद्यं पत्रं पुष्पं फलं जलम् ।
शालग्रामशिलास्पृष्टं सर्व्वं याति पवित्रताम् ॥
नैवेद्यं मे न भोक्तव्यं शुक्रा चान्द्रायणं चरेत् ।
शुक्रा केशवनैवेद्यं कोटिभक्तिफलं लभेत् ॥
सकृदभ्यर्चितो विष्णुः शालग्रामशिलास्थितः ।
ददाति विपुलां मुक्तिं सर्व्वसङ्गविवर्ज्जिताम् ॥
मल्लिङ्गकोटिभिर्दैत्यैर्यत् फलं पूजितैः सुतैः ।
ततुफलं समवाप्नोति शालग्रामैकपूजनात् ॥
शालग्रामशिलाचक्रं यो विद्वान् पश्यति ध्रुवम् ।
अर्च्चयेद्वैष्णवो नित्यं तस्य पुण्यं निबोध मे ॥
कोटिलिङ्गसहस्रैर्यत् पूजितैर्जाह्नवीतटे ।
काशीवासाद्युगान्यष्टौ दिनेनैकेन तद्भवेत् ॥
तस्माद्भक्तैव मद्भक्तैः प्रीत्यर्थं मम पुत्रक ।
कर्त्तव्यं सर्व्वदा मर्त्यैः शालग्रामशिलार्चनम् ॥
शालग्रामशिलारूपी यत्र तिष्ठति केशवः ।
तत्र देवाः सुरा यज्ञा भुवनानि चतुर्दश ॥
शालग्रामशिलाग्रे यैः सकृच्छ्राद्धं कृतं भवेत् ।
वसन्ति पितरस्तेषां विष्णुलोके न संशयः ॥
ये पिबन्ति नरा नित्यं शालग्रामशिलाजलम् ।
पञ्चगव्यसहस्रैस्तु प्राशितैः किं प्रयोजनम् ॥
प्रायश्चित्ते समुत्पन्ने किं दानैः किंसुपोषणैः ।
चान्द्रायणैः किं हि तादृक् प्रीत्वा पादोदकं
शुचिः ॥"
इति पाद्मे उत्तरखण्डे १२७ अध्यायः ॥ * ॥
कलेर्दशसहस्रवर्षानन्तरं च च भारतं त्यक्ता
यास्यति । यथा,—
"शालग्रामो हरेर्मूर्त्तिर्जगन्नाथश्च भारतम् ।
कलेर्दशसहस्रान्ते ययौ त्यक्ता हरेः पदम् ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ६ अध्यायः ॥ * ॥
तस्योत्पत्तिलक्षणादि यथा,—
"शालग्रामसमुत्पत्तिं शृणुष्व परमाद्भुताम् ।
गण्डक्या प्राक् तपस्तप्तं भवतु मम देवताः ॥
सर्व्वाः पुत्राः सुखं दातुं जनानामिति ते सुराः ।
तस्यास्तु तपसा तुष्टा ब्रह्मविष्णुमहेश्वराः ॥
वरं दातुं समुद्युक्ता वव्रे सा स्वस्य पुत्रताम् ।
अयाचत्तांस्तं वरं दातुं तदा शप्तास्तया क्रुधा ॥
प्रतारणं मम सुराः कृतं यस्मात् पुनः पुनः ।
कीटयोनिं प्रपद्येथाः क्रुद्धास्ते शप्तवंश्च ताम् ॥
अविचार्य्य वयं शप्तास्तया यत्तपसोद्धताः ।
तेन कर्म्मविपाकेन जड़ा कृष्णा नदी भव ॥
अन्योन्यशापं श्रुत्वेत्थं महान् कोलाहलोऽभवत् ।
प्रकम्पिताः सुराः सा च ब्रह्माणन्ते व्यजिज्ञपत् ॥
ब्रह्मन् त्राहि महाशापादन्योन्यपतितात् क्रुधा ।
इति देववचः श्रुत्वा ब्रह्मा शङ्करमब्रवीत् ॥
शिवः प्रोवाच धातारमहं संहारकारकः ।
त्वं सृष्टिकर्त्ता विष्णुस्तु पालको बुद्धिमत्तरः ॥
स प्रष्टव्यो यथाशप्तास्तयोः सम्भवेदिति ।
इति माहेश्वरं श्रुत्वा वचनं विष्णुरब्रवीत् ॥
शृणु ब्रह्मन् महादेव शृणु देव गजानन ।
मद्भक्तौ ब्राह्मणौ ग्राह्यमानङ्गौ शापतोऽत्र तु ॥
भविष्यतस्तयोर्मोक्षं भविष्यामि कलेवरम् ।
शीर्णे भविष्यति यदा तच्छेदोभ्यस्तसम्भवाः ॥
पाषाणान्तर्गता कीटा वज्राख्या प्रभविष्यथ ।
अद्यैव गण्डकी पुण्या गङ्गातुल्या महानदी ॥
गण्डक्यां गिरिराजस्य दक्षिणे दशयोजनम् ।
विस्तीर्णं तत्समुं चक्रं पुण्यक्षेत्रं महीतले ।
चक्रतीर्थमिति ख्यातं त्रिषु लोकेषु विश्रुतम् ॥
शालग्रामगता देवा देवोद्धारावतीर्णतः ।
उभयोः सङ्गमो यत्र मुक्तिस्तत्र न संशयः ॥
सर्व्वदेवप्रीतिकरा मुक्तिमुक्तिप्रदायिनी ।
भवन्त्यस्यान्तु पाषाणा ये तदन्तर्गता सुराः ॥
प्रार्थितं स्वं विना सर्व्वे वज्रकीटा भवन्त्विति ।
अनेनैव तु गण्डक्याः पुत्रत्वं भवतामपि ॥
भविष्यति तदन्तश्च चिह्नं तद्देवतोद्भवम् ।
विज्ञाय येऽर्चयिष्यन्ति सा प्रीता तस्य देवता ॥
न यन्त्रस्य न मूर्त्तेश्च न दृष्टस्यापि पूजनात् ।
सन्तोषो जायते तेषां गण्डक्यां मार्ज्जनादृथा ॥
इति विष्णुवचः श्रुत्वा ब्रह्मा वचनमब्रवीत् ॥*॥
कीदृक् पूज्या शिला विष्णोः किञ्चिह्ना कस्य
वल्लभा ।
किं फलं चाधिकारी च केन मार्गेण तद्वद ॥
इति ब्रह्मवचः श्रुत्वा विष्णुर्वचनमब्रवीत् ।
स्त्रीवर्ण्या शिला पूज्या ब्राह्मणादेः सुखाप्तये ॥
स्निग्धा शिला मनस्विद्धिं रूक्षा सिद्धिं करोति
च ।
मेचका कीर्त्तिदा धौताङ्गारवत् सा यशोहरा ॥
बाहू रूपार्थगमनी मलिना पापधीकरा ।
पीता पुत्रफलं दद्यादारवर्णा सुतान् हरेत् ॥
नीला संदिशते लक्ष्मीं धूमाभा हरते मतिम् ।
रोगप्रदा रक्तवर्णा सिन्दूराभा महाकलिम् ॥
दारिद्र्यकारिणी वक्रा समा सर्व्वार्थसाधिका ।

मूला निष्कासि चेवायु: कृष्णा सस्यमतिं हरेत् ।
पृष्ठाकृतं साक्षिणया निष्कृतं लाञ्छनं विना ।
कपिला चित्रवैकल्यं नेत्ररोगाय कर्बुरा ।
भया भद्रकरी ज्ञेया बहुचक्रायमानताम् ।
लक्षणान्तरहीना च देवचक्रा वियोगिताम् ।
दृष्टमुखो कालचक्री दृष्टचक्रा सुतान् हरेत् ।
मंत्रमयचक्रा लक्ष्मीं बहुपक्षा मदागदम् ।
भग्नचक्रा तु दारिद्र्यं सर्वनाशं लघोसुखी ।
कृष्णादिकं बालसुखी विषमा विविधापदम् ।
विकृतावर्तनाभिश्च विकारान् कुरुते बहून् ।
वंशवृद्धिरो दृष्टस्थानो नारसिंही प्रणायते ।
रेखाणां दु:खदात्री च यथा कृष्णा तथा
सुखम् ।
यथा चिन्हलक्षणा लक्ष्मीलक्ष्मिभेदादत: प्रभो ।
लक्ष्मीहरि: स विज्ञेयो यत्र पद्मं सचक्रकम् ।
केवला वनमाला वा दृष्टस्थानामभीष्टद: ॥१॥
वासुदेव: स विज्ञेयो यद्वारं चक्रयुग्मकम् ।
निरन्तरं समं चापि स चैव: प्रायनाशन: ॥२॥
सङ्कर्षण: स विज्ञेय: प्राक् प्रभाचक्रयुग्मकम् ।
संलग्नपूर्वभागस्थं सङ्कर्षण: सुशोभन: ॥ ३ ॥
प्रद्युम्न: कृष्णचक्रं स्यात्किञ्चिद्दीर्घं विचिन्तितम् ।
मध्यिरान्तर्विच्छिन्नं पीत दृष्टप्रदायक: ॥४॥
अनिरुद्धस्तु नीलाभो वर्तुलश्चानिशोभन: ।
रेखाद्वयस्तु तद्वारि दृष्टं पद्मेन लाञ्छितम् ॥५॥
कैशव: स तु विज्ञेयश्चैकं वा द्वयमेव वा ।
प्रायो पद्माच्च चक्रं स्यात् चतुष्कोण: स भाग्य-
ज्ञान् ॥ ६ ॥
नारायण: श्यामवर्ण: नाभौ चक्रं तथोन्नतम् ।
दीर्घरेखायमायुक्तं दक्षिणे शुभिरं दृष्टं ॥७॥
परिरूपा शिला सा स्याद्दृश्या ऊर्ध्वं सुखं
भवेत् ।
परिवृत्तमुखे द्वारं मुक्तिमुक्तिप्रदा तु सा ॥८॥
परमेष्ठी स विज्ञेय: पद्मचक्रान्वितस्तु य: ।
विच्छायलिङ्ग शुक्लाभ: दृष्टे च शुभिरं मतम् ॥९॥
विष्णुस्तु शङ्खवर्ण: स्यात् शूलचक्रे सुशोभने ।
द्वारोपरि तथा रेखा दृश्यते मध्यदेशत: ॥१०॥
नारसिंहस्तु कपिल: दृष्टचक्रो दनुसुत: ।
अधो वा मध्य वा तस्य बिन्दवो वर्तिला न
यत् । ११ ।
कपिलो नरसिंहस्तु गुरुशालानिभो भवेत् ।
स्थूलचक्रद्वयं मध्ये द्वारि रेखा सुशोभना ॥१२॥
मधुसूदनरूपी विज्ञेय: पूर्वोक्तैर्लक्षणैर्युत: ।
रेखाश्च वैजयन्ताकारा सुवर्णा भवेदत्र ॥१३
लक्ष्मीहरिरूपी विज्ञेयश्चतुरङ्ग: सविस्तर: ।
पूर्वोक्तलक्षणैर्युक्तो वनमालाविराजित: ॥१४॥
वराहोऽयं प्रविज्ञेयो चक्रं च विपरीतगं तदा ।
दक्षिणोत्तरिका: सूक्ष्मास्तिस्रो रेखास्तु भवेत्१५
दक्षोदारादयश्चार्या या या वराहजातिभिन्ना ।
कामुका नैव रेखाश्च तथा स्थापयेदत्रिका ॥१६॥
कृष्णवर्णा या शिला नैव चिन्हवर्जिता शुभा ।
कन्दाकार: सर्वतोभद्रो या मुक्ति-
मुक्तिदा ॥१७॥

कूर्मोत्था तु शिला दृष्टे वर्तुला चोन्नता भवेत्।
हरितं पर्वताभन्तु कौस्तुभेन च चिह्नितं ॥
शिलाकूर्म: स विज्ञेय: कूर्माकारस्तु यो भवेत्।
चक्राङ्किता तथा दृष्टा पूजिता सा पदप्रदा ॥१८
हयग्रीवो हयाकारा रेखा चक्रा समीपगा ।
बहुचिह्नसमायुक्तं दृष्टं नीरदनीलकम् ॥ १९ ॥
ज्ञेय: सौम्यहयग्रीवो हयग्रीवासमा शिला ।
दीर्घया रेखया युक्ता रेखा वा तादृशी
भवेत् । २० ।
हयग्रीव: स विज्ञेयो सुखं यस्य हयाकृति ।
प्रज्ञाकृति भवेदापि साश्वमालं शिरस्तया ॥२१
वैकुण्ठस्तिलवर्णाभचक्रमेकं तथा व्रणम् ।
दारोपरि तथा रेखा पूज्याकारा सुशोभना ॥२२
श्रीधरस्तु तथा देवश्चिह्नितो वनमालया ।
कदम्बकुसुमाकारारेखापद्मकभूषित: ॥ २३ ॥
वामग: स तु विज्ञेयो योऽतिदृश्यस्य वर्तुल: ।
अनर्घीकुसुमप्रख्यो बिन्दुना परिशोभित: ॥२४॥
हयशिरामनामा तु ऊर्ध्वचक्रसंयुत: ।
महाद्युतिरतिदृश्य: सुभिक्ष: क्षेमदायक: ॥२५॥
सुदर्शनस्तथा देव: श्यामवर्णो महाद्युति: ।
वामपार्श्वे तथा चक्रं रेखैकैव तु दक्षिणे ॥२६॥
सहस्रार्च्चननामासौ नागरेखामयी भवेत् ।
चक्राकारा यत्पदृष्टि: स नष्टदायक:॥२७॥
स्थूलो दामोदरो यस्य मध्ये चक्रं प्रतिष्ठितम् ।
दूर्वाभं दारमध्ये तं पीतरेखा धनप्रद: ॥२८॥
राधादामोदरो ज्ञेय ऊर्ध्वचक्रविलम्बितम् ।
नानिर्दीर्घसुखं मध्ये तत्रैका स भोगद: ॥२९॥
दामोदर: स विज्ञेयो यत्पद्मदलाञ्छित: ।
एषां भवेच्च विवरं पूजित: सुखद: सदा ॥३०॥
अनन्तो बहुवर्ण: स्यान्नागभोगेन चिह्नित: ।
अनेकचक्रसंभिन्न: सर्वकामफलप्रद: ॥ ३१ ॥
पुरुषोत्तमनामासौ यस्य दिक्षु विदिक्षु च ।
ऊर्ध्वान्यास्यानि दृश्यन्ते पुरुषार्थफलप्रद: ॥३२॥
योगेश्वर: स विज्ञेयो लिङ्गं यस्य शिरोगतम् ।
मद्यपलादिपापानां नाशको योगसिद्धिद: ॥३३
पद्मनाभस्तथा रक्त: पद्मचक्रसमन्वित: ।
तुलस्या पूजितो नित्यं दरिद्रश्रीश्वरो भवेत् ॥३४
दक्षिणव्यापी दीर्घश्चाश्वचक्राभ: स्फटिकोप-
म: ।
अथवा दृश्यते नानावर्णरेखाभिरन्वित: ॥३५॥
मत्स्य: स तु विज्ञेयो मध्ये पद्मदलान्वित ।
सुरेखो दक्षणे रेखा स सर्वेश्वरनामक: ॥३६॥
अनर्घेण: स विज्ञेय: रेखाभि: स्फुटाभि च ।
अस्थीदरे तु चक्राणि चत्वारि चिह्नलिङ्गितम् ॥३७
लक्ष्मीनारायण: श्रेयो वनमालाङ्कितोदर: ।
सहस्रधारचक्रश्च भक्तिमुक्तिप्रदायक: ॥३८॥
सुखीकेश: स विज्ञेयो पीठचक्रसमन्वित: ।
नवचक्रो भवेत् सर्वं विष्णोश्च सर्वतोमुखान् ।
२८ ।
लक्ष्मीनारायण: श्रेयो वनमाल: शिरोधर: ।
वामपार्श्वे चक्रं चक्रं दक्षणाभीष्टदायक: ॥३९॥
विज्ञेयस्तु विज्ञेय: श्यामवर्णो महाद्युति: ।

वामपार्श्वे चक्रयुग्मेकरेखा तु दक्षिणे ॥४१॥
लक्ष्मी ज्ञेय: शिला दृश्या सचक्रा या विष-
क्रिका ।
प्रदक्षिणावर्तकृतवनमालाविभूषिता । ४२ ।
चतुर्मुख: स विज्ञेयो दे चक्रे मध्यदेशत: ।
चतस्र: पार्श्वगा रेखा वेदशास्त्रागमप्रद: ॥४३॥
विष्णोर्भेदा इमे प्रोक्ता सर्वे शास्त्रविचक्षणै: ।
विसर्ज्जयेच पूजान्ते प्रतिष्ठां नात्र कारयेत् ॥४४
शालग्रामा: समा: पूज्या समेषु द्विजयं न हि ।
असमा नैव पूज्यन्ते एक: पूज्यतमो मत: ।
शिला द्वादश यो नित्यं भक्त्या संपूजयेन्नर: ।
दिने दिने धर्मवृद्धि: पापनाशश्च जायते ।
शालग्रामशिला यत्तु भक्त्या संपूजयेन्नर: ।
मृतं दिनानि यत्नेन ज्ञान: काम: स सिध्यति ॥४५
शालग्रामा मनुस्वरूपा: पूज्या तेषान्तु लक्षणम् ।
यत्सेवनाच्चवेदिष्टमिह लोके परत्र च ।
शिवनाभ: स विज्ञेय: खलिङ्गाकारसंयुत: ।
स्वयम्भुलिङ्गालक्षितमान् मन्त्रविद्विधायक: ॥१॥
चक्रायक: स तु विज्ञेयो यो विन्दुत्रयभूषित: ।
मूलाकारा तथा रेखा मन्त्रपुत्रप्रदायक: ॥२॥
घूर्णट: स तु विज्ञेयो यत्र रेखा घटासमा ।
तिस्रो यत्र प्रदृश्यन्ते सोऽग्निभो ज्ञानदायक: ॥३
ग्रम्भस्तु पाण्डरो ज्ञेयो विन्दुलक्ष्मस्तु मस्तके ।
विल्वपत्रमाल्यलेखो पूजित: श्रीवधूकर: ॥४॥
हैश्वर: स तु विज्ञेयो रक्तो विन्दुस्तु मस्तके ।
एकचक्रो द्विचक्रो वाभ्यन्तरेऽथच मोदद: ॥५॥
गदाधृक: स विज्ञेय: सव्यगदातुविनाशक: ।
अधश्चक्रं तदूर्ध्वं च रेखा चिह्नयुतान् ॥६॥
चन्द्रशेखरनामासावर्द्धचन्द्राङ्कितस्तु के ।
मध्ये चक्रद्वयं तस्य रेखादोगनाशनम् ॥ ७ ॥
रुद्र: स एव विज्ञेय: कपिलो रुद्रं रचित: ।
चक्रमध्ये भवेद्रेखा मारयेद्दुष्टसङ्घितम् ॥८॥
शालग्रामानघो वक्ष्ये लक्षकोटिफलप्रदान् ।
येषां पूजनतो देवो भवानी सुप्रसीदति ।
श्रीविष्णो: सा तनुं चक्रमूर्द्धं दृश्यं प्रदृश्यते ।
वाम षट्कादिनी सङ्घा स्थिरा श्यामशिले-
यदा ॥ १ ॥
महाकालो तु सा ज्ञेया योनिचिह्नसमन्विता ॥२
द्विचिह्नाङ्गा सर्वशिला त्रिकोणैकादशिना च या।
यदाशुधाकालिचक्रोर्द्धं सा ज्ञेयं तत्र लिङ्गितम् ॥
ज्ञेयोशिला सचक्रा या दक्षमार्गेण सा यजेत् ।
साधिता वाममार्गेण सोऽरक्षसुरसाधका ।
या चक्ररहिता देवी शिला सा वामसंज्ञके
चेत् ।
सर्वकार्येषु विद्वान्तां नमामो शौभकृद्विभुम् ॥१॥
गौरीशिला पुरुषेण शाप: कल्पितो सुरा: ।
स्फटिकाभा भवेद्या तु पर्वतसुता विष्णुशि-
लुप्तकर्द्धं शिला चक्रं शालिग्रामा प्रकल्पयेत् ।
कृष्णवर्णे शिला ज्ञेया शालग्रामशिलाभिधा ॥२
मत्स्य: स तु विज्ञेय: स्वल्पदृश्यादिको भवेत् ।
मुखाकारा शिला यापि मत्स्यावतारसंज्ञिता ॥१
मध्ये चक्रद्वयं यस्य चक्रद्वयस्य दक्षिणे ।

सचक्रशङ्खाब्जगदो माधवः श्रीगदाधरः ।
गदाब्जशङ्खचक्री वा गोविन्दोऽर्च्यो गदाधरः ॥
पद्मशङ्खासिगदिने विष्णुरूपाय वै नमः ।
शङ्खाब्जचक्रगदिने नमः सङ्कर्षणाय च ॥
सुशङ्खसुगदाब्जाविधृते प्रद्युम्नमूर्तये ।
नमोऽनिरुद्धाय गदाशङ्खाब्जाविविधारिणे ॥
नमो गदासिशङ्खाब्जयुक्तायैवं क्रमाय च ।
सासिकौमोदकीपद्मगदिने वामनमूर्तये ॥
चक्राब्जशङ्खगदिने नमः श्रीधरमूर्तये ।
हृषीकेश सविगदाशङ्खपद्मिन्नमो नमः ॥
साब्जशङ्खगदाचक्रपद्मनाभस्वरूपिणे ।
दामोदर शङ्खगदाचक्रपद्मिन्नमो नमः ॥
साविशङ्खगदाब्जाय वासुदेवाय वै नमः ।
शङ्खाब्जचक्रगदिणे नमः सङ्कर्षणाय च ॥
साब्जशङ्खगदाचक्रपुरुषोत्तममूर्तये ।
नमोऽधोक्षजरूपाय गदाशङ्खासिपद्मिने ॥
नृसिंहमूर्तये पद्मगदाशङ्खाब्जधारिणे ।
पद्माब्जशङ्खगदिने नमोऽच्युतमूर्तये ॥
सशङ्खचक्राब्जगदं जनार्दनमिहानमे ।
उपेन्द्रं सगदं साविं पद्मशङ्खिन्नमो नमः ॥
हरिचक्राब्जगदाशङ्खयुक्ताय हरिमूर्तये ।
सगदाब्जाविशङ्खाय नमः श्रीकृष्णमूर्तये ॥
शालग्रामशिलाद्वारगतलक्ष्मद्विचक्रधृक् ।
शुक्लाभो वासुदेवाख्यः सोऽव्याद्वः श्रीगदाधरः ॥
लक्ष्मद्विचक्रो रक्ताभः पूर्वभागे तु पृष्कलः ।
सङ्कर्षणोऽथ प्रद्युम्नः स्निग्धचक्रस्तु पीतकः ॥
सदीर्घशुषिरच्छिद्रो योनिरन्ध्रस्तु वर्तुलः ।
नीलो हरिः स्थिरेखश्च अथ नारायणोऽसितः ॥
मध्ये गदाकृती रेखा नाभिचक्रमधोन्नतः ।
एषुचक्रो नृसिंहोऽथ कपिलोऽव्यात् त्रिविक्रमः ॥
अथवा पञ्चविच्छक्तिपूजनं ब्रह्मचारिणः ।
वराहः शक्तिलिङ्गोऽव्याद्विषमद्वयचक्रकः ॥
नीलस्थिरेखः स्थूलोऽथ कूर्ममूर्तिः स विघ्नमान् ।
कृष्णः सवर्तुलावर्तः पातु वोन्नतदृष्टकः ॥
श्रीधरः पञ्चरेखोऽव्याद्वनमाली गदान्वितः ।
वामनो वर्तुलो दक्षो वामचक्रः सुरेश्वरः ॥
नानावर्णोऽनेकमूर्तिर्नागभोगी त्वनन्तकः ।
स्थूलो दामोदरो नीलो मध्ये चक्रः सनीलकः ॥
संयोगोदारको वोऽव्यादथ ब्रह्मा सुलोहितः ।
सदीर्घरेखः शुषिरश्चक्रकाम्बुजः पृथुः ॥
पृथुच्छिद्रसूक्ष्मचक्रः कृष्णो विष्णुश्च विन्दवत् ।
दक्षग्रीवोऽङ्कुशाकारः पञ्चरेखः सकौस्तुभः ॥
वैकुण्ठो मणिरव्याभ एकचक्रामुजोऽसितः ।
मत्स्यो दीर्घेक्षुवाकारो हारेखश्च पातु वः ॥
वामचक्रो दशरेखः श्यामो वोऽव्यात्त्रिविक्रमः ।
शालग्रामे हारकाख्ये स्थिताय गदिने नमः ॥
एकेन लक्ष्मणो योऽव्याद्गदाधारी सुदर्शनः ।
एकद्वारे चतुश्चक्रे वनमालाविभूषितम् ।
शार्ङ्गरेखाङ्कमायुक्तं गोप्यदेन विराजितम् ।
कदम्बकुसुमाकारं लक्ष्मीनारायणं विदुः ॥
लक्ष्मीनारायणौ द्वाभ्यां त्रिभिर्मूर्त्तिस्त्रिविक्रमः ।
चतुर्भिश्चतुर्व्यूहो वासुदेवश्च पञ्चभिः ॥
प्रद्युम्नः षड्भिरेव स्यात् सङ्कर्षण इतस्ततः ।
पुरुषोत्तमोऽष्टभिः स्यान्नवव्यूहो नवोन्नतः ॥
दशावतारो दशभिरनिरुद्धोऽवतादथ ।
द्वादशात्मा द्वादशभिरत ऊर्द्धमनन्तकः ॥
विष्णोर्मूर्त्तिमयं स्तोत्रं यः पठेत् स दिवं व्रजेत् ॥"

इति गारुडे ४५ अध्यायः ॥*॥

अपरञ्च ।

हरिरुवाच ।

"निर्लक्ष्मणा शुभा स्याच्च चक्राङ्किनशिला-
र्चनात् ।
आदौ सुदर्शनो मूर्त्तिर्लक्ष्मीनारायणोऽपरः ॥
त्रिचक्रोऽसावच्युतः स्यात् चतुश्चक्रश्चतुर्भुजः ।
वासुदेवश्च प्रद्युम्नस्ततः सङ्कर्षणः स्मृतः ॥
पुरुषोत्तमो ह्यष्टमः स्यान्नवव्यूहो दशात्मकः ।
एकादशोऽनिरुद्धः स्याद्द्वादशो द्वादशात्मकः ॥
अत ऊर्द्धमनन्तः स्याच्चक्रैरेकादिकैः क्रमः ।
सुदर्शनाद्या लक्ष्मिताश्च पूजिताः सर्वकामदाः ॥
शालग्रामशिला यत्र देवो द्वारवतीभवः ।
उभयोः सङ्गमो यत्र तत्र मुक्तिर्न संशयः ॥"

इति गारुडे ६५ अध्यायः ॥*॥

चित्रविशेषः । यथा,—

धरण्युवाच ।

"भगवन् देवदेवेश शालङ्कायनको मुनिः ।
किं चकार तपः कुर्वन् तव चैत्रे विमुक्तिदे ॥

वाराह उवाच ।

अथ दीर्घेण कालेन स ऋषिः संशितव्रतः ।
तप्यमानो यथान्यायं पश्यते शालसत्तमम् ॥
विश्रामं कुरुते तत्र द्रष्टुकामोऽथ मां मुनिः ।
मायया मम मूढात्मा शक्तो द्रष्टुं न मामभूत् ॥
ततः पूर्वेण पार्श्वेन तस्य शालस्य सुन्दरि ।
वैशाखमासद्वादश्यां मद्दर्शनमुपागतः ॥
दृष्ट्वा मां तत्र स मुनिस्तप्त्वा संशितव्रतः ।
तुष्टाव वैदिकैः सूक्तैः प्रणम्य च पुनः पुनः ॥
ततोऽहं स्तूयमानो वै ऋषिसङ्घेन सुन्दरि ।
प्राप्तोऽस्मि परमां प्रीतिं तमवोचं ततः ऋषिम् ॥
तत्राश्रमे महाभाग स्थित्वा त्वं तपसांनिधे ।
पुत्रेण परमप्रीतो मत्तश्चैवं मत्समो भव ॥
अन्यच्च गुह्यं वक्ष्यामि शालङ्कायन तच्छृणु ।
तव प्रीत्या प्रवक्ष्यामि येनैतत् क्षेत्रमुत्तमम् ॥
शालग्राममिति ख्यातं तन्निबोध सुने शुभम् ।
योऽयं दृष्टस्त्वया दृष्टः सोऽहमेव न संशयः ॥
एतत् कोऽपि न जानाति विना देवं महेश्वरम् ।
एवं तस्मै वरं दत्त्वा शालङ्कायनकाय वै ॥
पश्यतस्तस्य वसुधे तत्रैवान्तर्हितोऽभवम् ।
दृष्ट्वं दक्षिणतः कृत्वा जगाम स्वाश्रमं मुनिः ॥
मम तत्रोचते स्थानं गिरिकूटशिलोच्चये ।
शालग्राम इति ख्यातं भक्तसंसारमोचनम् ॥"

इति वाराहे शालग्रामक्षेत्रमाहात्म्यवर्णन-
नामाध्यायः ॥

शालग्रामगिरिः, पुं, (शालग्रामस्य गिरिः ।) शालग्रामोत्पादकपर्व्वतः । यथा,—

वाराह उवाच ।

"कथयिष्यामि ते गुह्यं शालग्राममिति श्रुतम् ।
तस्मिन् क्षेत्रे हरौ देवो मत्स्वरूपेण संयुतः ॥
शालग्रामे गिरौ तस्मिन् शिलारूपेण तिष्ठति ।
अहं तिष्ठामि तत्रैव गिरिरूपेण नित्यदा ॥
तस्मिन् शिलाः समयास्तु मत्स्वरूपान संशयः ।
पूजनीयाः प्रयत्नेन किं पुनश्चक्रलाञ्छिताः ॥
लिङ्गरूपेण तु हरस्तत्र देवालये गिरौ ।
शिवनाभाः शिलास्तत्र चक्रनाभास्तथा शिलाः ॥
सोमेश्वराधिष्ठितस्तु शिवरूपो गिरिः स्मृतः ।
शालग्रामगिरिर्विष्णुरहं सोमेश्वराधिपः ॥
तयोः पर्व्वतयोर्यो वै शिला विष्णुशिलाभिधाः ॥
रेवया च कृतं पूर्वं तपः शिवसुतुष्टिदम् ।
मम त्वत्सदृशः पुत्रो भूयादभिमितो तया ॥
अहं कस्यापि न सुतः किं करिष्यामि चिन्तयन् ।
रेवायास्तु वरो देयस्त्वदृशं स्यगलाञ्छन ।
निश्चित्यैवं तदा प्रोक्तं प्रसन्नेनान्तरात्मना ॥
लिङ्गरूपेण ते देवि गजाननपुरस्कृतः ।
गर्भे तव वसिष्यामि पुत्रो भूत्वा शिवप्रिये ॥
मम त्वमपरा मूर्त्तिः ख्याता जलमयी शिवा ।
शिवशक्तिविभेदेन आवामेकत्र संस्थितौ ॥
एवं दत्तवरा रेवा मत्सान्निध्यमिहागता ।
रेवाखण्डमिति ख्यातं ततः प्रभृति गोपते ॥*॥
गण्डक्यापि पुरा तप्तं वर्षाणामयुतं विधे ।
ग्रीष्मपर्षाशनं कृत्वा वायुभक्षाण्यनन्तरम् ॥
दिव्यं वर्षशतं तेपे विष्णुं चिन्तयती तदा ।
ततः साक्षाच्यगन्नाथो हरिर्भक्तजनप्रियः ॥
उवाच मधुरं वाक्यं प्रीतः प्रणतवत्सलः ।
गण्डकि ! त्वां प्रसन्नोऽस्मि तपसा विस्मितेऽनघे ॥
अनवच्छिन्नया भक्त्या वरं वरय सुव्रते ।
किं देयं तद्वदस्वाशु प्रीतोऽस्मि वरवर्णिनि ॥
गण्डक्यपि पुरो दृष्ट्वा शङ्खचक्रगदाधरम् ।
दण्डवत् प्रणता भूत्वा ततः स्तोत्रं प्रचक्रमे ॥
अहो देव मया दृष्टो दुर्दर्शो योगिनामपि ।
त्वया सर्वमिदं सृष्टं जगत् स्थावरजङ्गमम् ॥
ततो हिमांशु सा देवी गण्डकी लोकतारिणी ।
प्राञ्जलिः प्रणता भूत्वा मधुरं वाक्यमब्रवीत् ॥
यदि देव प्रसन्नोऽसि देयो मे वाञ्छितो वरः ।
मम गर्भगतो भूत्वा विष्णो मत्पुत्रतां व्रज ॥
ततः प्रसन्नो भगवान् चिन्तयामास गोपते ।
किं याचितं निम्नगया नित्यं मत्सङ्गलुब्धया ॥
दास्यामि याचितं येन लोकानां भवमोचनम् ।
इत्येवं कृपया देवो निश्चित्य मनसा स्वयम् ॥
गण्डकीं कथयामास शृणु देवि वचो मम ।
शालग्रामशिलारूपी तव गर्भगतः सदा ॥
तिष्ठामि तव पुत्रत्वे भक्तानुग्रहकारणात् ।
मत्सान्निध्यान्नदीनां त्वमतिश्रेष्ठा भविष्यसि ॥
दर्शनात् स्पर्शनात् स्नानात् पानाच्चैवावगाहनात् ।

हरिष्यति महापापं वाङ्मनःकायसम्भवम् ॥"
इति वाराहे सोमेश्वरादिलिङ्गमहिमावमुक्तिक्षेत्रविशेषादिमहिमानामाधाय: ॥

शालङ्कटङ्कट:, पुं, सुकेशीराक्षस: । स विद्युत्केशिभार्य्याशालङ्कटङ्कटायाः पुत्र: । इति वामनपुराणम् ॥

शालङ्कायन:, पुं, (शलङ्कस्यापत्यम् । "नडादिभ्य: फक् ।"४।१।९९। इति फक् ।) मुनिविशेष: । नन्दी । इति मेदिनी ॥

शालङ्कायनजीवन्त:, स्त्री, वासमाता । यथा,—
"वासस्याख्या सत्यवती वासवी गन्धकालिका ।
योजनगन्धा दासेयी शालङ्कायनजीवन्त: ॥"
इति हेमचन्द्र: ॥

शालङ्कि:, पुं, मुनिभेद: । यथा,—
"वशिष्ठोऽरुन्धतीनाथो मैत्रावरुणिरित्यपि ।
शालातुरीय: शालङ्किर्दाक्षीपुत्रस्तु पाणिनि: ॥"
इति जटाधर: ॥

शालज:, पुं, (शालाज्जायते इति । जन् + ड: ।) शालसत्त्य: । यथा । शाल: शालजगर्जकौ ।
इति शब्दरत्नावली ॥

शालनिर्यास:, पुं, (शालस्य निर्यास: ।) सर्जरस: । धूना इति भाषा । तत्पर्य्यायः । शालज: २ सर्ज: ३ सर्जरस: ४ । इति रत्नमाला ॥ धूनक: ५ वृक्षवल्लभ: ६ सर्ज्जमणि: ७ । इति त्रिकाण्डशेष: ॥

शालपर्णी, स्त्री, (शालस्य पर्णवत् पर्णमस्या: । ङीष् ।) वृक्षविशेष: । शालपाणी इति भाषा । तत्पर्य्यायः । सुदला २ सुपत्री ३ स्थिरा ४ सौम्या ५ कुसदा ६ गुह्या ७ ध्रुवा ८ विदारिगन्धा ९ अंशुमती १० सुपर्णिका ११ दीर्घमूला १२ दीर्घपत्रिका १३ वातघ्नी १४ पौतिनी १५ तन्वी १६ सुधा १७ सर्व्वानुकारिणी १८ ओषधी १९ सुभगा २० देवी २१ निश्चला २२ प्रौढिपर्णिका २३ सुमूला २४ सुरूपा २५ शुभपत्रिका २६ सुपर्णी २७ शालिपत्री २८ शालिदला २९ । इति राजनिर्घण्टः । विदारी ३० सालपर्णी ३१ । इत्यमरटीकायां भरत: ॥ अस्या गुणा: । शीतत्वम् । कफपित्तनाशित्वञ्च । इति राजवल्लभ: ॥ तिक्तत्वम् । गुरुत्वम् । उष्णत्वम् । वातदोषविषमज्वरमेहार्शः-श्लीपहन्तापनाशित्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।

"शालपर्णी स्थिरा सौम्या त्रिपर्णी पीवरा गुहा ।
विदारिगन्धा दीर्घाङ्घ्रिर्दीर्घपत्रांशुमत्यपि ॥
शालपर्णी गरश्छर्द्दिज्वरश्वासातिसारजित् ।
श्लेष्मपित्तक्षयहरी दृंहणयुक्ता रसायनी ।
तिक्ता विषहरी स्वादुः सत्वकाप्यरुचिप्रणुत् ॥"
इति भावप्रकाश: ॥

शालभञ्जिका, स्त्री, (शालेन भज्यते निर्म्मीयते इति । भञ्ज + "कुञ् शिल्पिसंज्ञयोरपूर्व्वस्यापि ।" उणा० २।३१। इति कुञ् । टापि अत इत्वम् ।) काष्ठादिनिर्म्मितपुत्तिका । (यथा, राजतरङ्गिण्याम् । २ । ६६ ।
"अलोलकीर्त्तिकल्लोलदुकूलवसनोच्चलाम् ।
बभार यमुनस्त्रोतो जयश्रीशालभञ्जिकाम् ॥")
वेश्या । इति जटाधर: ॥

शालभञ्जी, स्त्री, काष्ठादिनिर्म्मितपुत्तिका । इति हेमचन्द्र: ॥

शालव:, पुं, लोध्र: । इति शब्दरत्नावली ॥

शालवेष्ट:, पुं, (शालस्य वेष्टो निर्य्यास: ।) शालनिर्य्यास: । इति त्रिकाण्डशेष: ॥

शालसार:, पुं, (शालस्य सार: ।) द्रुम: । धिसु: । इति विश्व: ॥

शाला, स्त्री, (शो + "बाहुलकात् श्यतेरपि कालन् ।" इत्युज्ज्वलदत्तोक्त्या कालन् ।१।११७।) गृहम् । इत्यमर: ॥ (यथा, भागवते ।८।६।१६।
"धूपामोदितशालायां जुष्टायां मालदीमके: ॥")
वृक्षस्य स्कन्धशाखा । गृहैकदेश: । इति मेदिनी ॥

शालाकी, [न्] पुं, अश्ववैद्य: । नापित: । श्लेष्मारी । इति केचित् ॥

शालाङ्गी, स्त्री, पुत्तलिका । इति शब्दरत्नावली ॥

शालाजिर:, पुं, क्ली, सराव: । इति हेमचन्द्र: शब्दरत्नावली च ॥

शालाधि:, स्त्री, शाकभेद: । इति शब्दरत्नावली ॥

शालानी, स्त्री, विदारी । इति शब्दरत्नावली ॥

शालान्धग:, पुं, (शालाया न्यग: ।) श्वगाल: । इति हारावली ॥

शालार्, क्ली, (शालां वृक्षच्छदीति । वृ + अण् ।) वृक्षनख: । सोपानम् । पक्षिपञ्जर: । इति मेदिनी ॥

शालाढक:, पुं, (शालायां गृहे शाखायां वा ढौकते इव ।) वागुर: । झुङ्गुर: । श्वगाल: । इत्यमर: ॥ न्यग: । इति शब्दरत्नावली । विड़ाल: । इति राजनिर्घण्टः ॥

शालि:, पुं, (शृणातीति । शृ + बालुलकात् इण् । रस्य लत्वम् ।) गन्धमार्জ्जार: । इति मेदिनी ॥ कलमादिधान्यम् । षष्टिकादिधान्यम् । इत्यमर: ॥ तत्पर्य्यायः । मधुर: २ रक्त: ३ व्रीहिश्रेष्ठ: ४ नृपप्रिय: ५ धान्योत्तम: ६ केदार: ७ सुकुमारक: ८ । पुस्तकान्तरे मधुरस्थाने कलम इति पाठ: । स तु दशविध: । यथा,—
"राजान्नषष्टिकसितेतररक्तमण्ड-
शूलाग्रगन्धतिरियादिकशालिसंज्ञा: ।
व्रीहिश्चसप्तेति दशधा भुवि शालय: स्यु-
स्तेषां क्रमेण गुणनामगणं ब्रवीमि ॥"
इति राजनिर्घण्टः ॥

अस्य गुणा: ।
"शालयो मधुरा: शीता लघुपाका बलावहा: ।
पित्तश्लेष्मानिलहरा: स्निग्धा वृंहणवर्षणा: ॥"
इति राजवल्लभ: ॥७॥

अथ शालिधान्यलक्षणम् ।
"लक्षणेन विना मुक्ता हैमन्ता: शालय: स्मृता: ॥"

शालीनां नामानि यथा,—
"रक्तशालि: सकलम: पाण्डुक: शकुनाहृत: ।
सुगन्धक: कर्दमको महाशालिश्च दूषक: ॥
पुण्याण्डक: पुण्डरीकस्तथा महिषमस्तक: ।
दीर्घशूक: काञ्चनको हायनो लोध्रपुष्पक: ।
इत्याद्या: शालय: सन्ति बहवो बहुदेशजा: ॥"
अथ तेषां गुणा: ।
"शालयो मधुरा: स्निग्धा बल्या बल्याल्पवर्चस: ।
कषाया लघवो रुच्या स्वर्य्या हृद्याश्च वृंहया: ॥
वात्यानिलकफा: प्रीता: पित्तघ्ना मूत्रलास्तथा ।
शालयो दग्धभूजाता: कषाया लघुपाकिन: ॥
हृद्यस्तन्यपुरीषाश्च रूक्षा: श्लेष्मापकर्षणा: ।
केदारा: वातपित्तघ्ना गुरव: कफशुक्रला: ॥
कषाया वर्ष्यवर्चस्का मधुराश्च तनावहा: ॥"
केदारा: क्षुद्धेचनजा उप्ता: ।
"श्यामजा: स्वादव: पित्तकफघ्ना वातवर्द्धिना: ।
किञ्चित्तिक्ता: कषायाश्च विपाके कटुका अपि ॥"
श्यामजा अकृष्टभूमिजा: स्वयंजाता: ।
"वापिता मधुरा हृद्या बल्या: पित्तप्रणाशना: ॥
श्लेष्मलाश्चाल्पवर्चस्का: कषाया गुरवो हिमा: ॥"
वापिता: कृष्टक्षेत्रे अकृष्टक्षेत्रे च ।
"वापिकेभ्यो गुणै: किञ्चिद्हीना: प्रोक्ता अवापिता: ॥"
कृष्टक्षेत्रे अकृष्टक्षेत्रे च ।
"रोपितास्तु गवा: हृद्या: पुराणा लघव: स्मृता: ।
रोपितारोपिता भूय: प्रीणनपाका गुण्याधिका: ॥
छिन्नरूढ़ा हिमा रूक्षा बल्या: पित्तकफापहा: ।
बहुविट्का: कषायाश्च लघवश्चाप्यतिक्तका: ॥"
अथ रक्तशालेर्गुणा: ॥
"रक्तशालिर्वरस्तेषु बल्यो वर्ण्यस्त्रिदोषजित् ।
चक्षुष्यो मूत्रल: स्वर्य्य: शुक्रलस्तृड्ज्वरापह: ।
विषनाशनश्चासकासदाहगुल्मक्षतापह: ।
तस्मादल्पान्तरगुणा: शालयो महदादय: ॥"
रक्तशालि: दाउदखानी इति मगधदेशे प्रसिद्ध: ।
इति भावप्रकाश: ॥ (पत्री । इत्युणादिवृत्तौ उज्ज्वल: । ४ । १२७ ॥)

शालिका, स्त्री, (शालिरेव । स्वार्थे कन् । विदारिका । इति शब्दरत्नावली ॥

शालिख:, पुं, शाकविशेष: । शाखा इति भाषा । तत्पर्य्यायः । शालख: २ शितसार: ३ पत्रकेत: ४ लोहसारक: ५ । अस्य गुणा: । दीपनत्वम् । तिक्तत्वम् । दीर्घाग्नि:कफवातनाशित्वञ्च । इति राजनिर्घण्टः ॥

शालिखी, स्त्री, (शालिख + स्त्रियां ङीष् ।) शाकभेद: । शाखे इति भाषा । अस्य प्रभार्थे शौण्डशब्दे द्रष्टव्यम् ॥

शालिनीकरण, क्ली, न्यग्भावनम् । इति त्रिकाण्डशेष: । तिरस्कार इति यावत् ॥

शालिपर्णी, स्त्री, / शालेरिव पर्णानि यस्या: । ङीष् ।) माषपर्णी । इति राजनिर्घण्टः ॥

प्रालिपिष्टं, क्ली (प्रालेः पिष्टमिव शुभ्रत्वात्।) स्फटिकम्। इति त्रिकाण्डशेषः॥
प्रालिवाहनः, पुं, राजविशेषः। स तु शुक्लकर्त्ता विक्रमादित्यप्रबन्धे॥
प्रालिहोत्रः, पुं, घोटकः। इति त्रिकाण्डशेषः॥
प्राली, [न्] त्रि, (प्रालाख्याक्लीति। इनिः।) प्रालाविशिष्टः। यदाह्नं पुल्लवाचकः। यथा,—
"चन्दनचर्चितनीलकलेवरपीतवसनवनमाली।
केलिचलन्मणिकुण्डलमण्डितगण्डयुगस्मितशाली॥"
इति जयदेवः॥
(प्राच्यः। यथा, भानवते। ३। २४। १।
"दायादुः प्रालिनीमाप शुक्लाभिर्यांचितं सरत्॥")
प्रालेयं, क्ली. कर्पूरकः। इति राजनिर्घण्टः॥
प्रालीनः, त्रि. (प्रालाप्रवेशनमर्हतीति। प्राला+"प्रालीनकीयौनेयौ च्यधकार्य्ययोः।" ५।२।२०। इति खञ्प्रत्ययेन निपातनात् सिद्धम्।) व्यधः। इत्यमरः॥ (यथा, मार्कण्डेये। ४१।८।
"व्यध गत्वा यदम्भोभ्रु प्रालीनेषु चरेदयतिः॥")
प्रालेयसम्बन्धी च॥
प्रालीना, स्त्री, (प्रालिन+टाप्।) मिश्रया। इति राजनिर्घण्टः॥
प्रालु, क्ली, (प्रयाति शीतागमे। प्रा+वाहुलकात् आलुच् डेश्च लत्वञ्च। इत्युज्ज्वलः। १। ५।) प्रालकम्। इति शब्दरत्नावली॥
प्रालः, पुं, (प्रा+णुल् डेश्च लत्वञ्च।) कषायद्रव्यम्। औषधार्थौषधिः। इति मेदिनी॥ भेकः। इति हेमचन्द्रः॥
प्रालुकं, क्ली, कुसुदादिमूलम्। तत्पर्य्यायः। पद्मकन्दम् २ प्रालूकः ३ प्रालु ४। इति शब्दरत्नावली॥
प्रालूकं, क्ली, (प्रल+"प्रतिमल्लिभ्यामूकण्।" उणा० ४। ४२। इति ऊकण्।) कुसुदादिमूलम्। इत्यमरः॥ पालीमूलम्। इति राजनिर्घण्टः॥
प्रालूकः, पुं, (प्रल+"प्रतिमल्लिभ्यामूकण्।" उणा० ४। ४२। इत्यूकण्।) कुसुदादिमूलम्। इति त्रिकाण्डशेषः॥ (यथा, सुश्रुतसंहितायाम्। ४१। ६।
"मिसुनेषि पाण्डुशारदबलीप्रालूककामांसाः॥")
मण्डूकः। इति राजनिर्घण्टः॥
प्रालूरः, पुं, (प्रलते प्रवेन गच्छतीति। प्रल+"सर्व्वधिप्रादिभ्यः ऊरोलचौ।" उणा० ४।८०। इति ऊरः।) भेकः। इत्यमरः॥
प्रालेयं, त्रि, (प्रालेयानां हेयम्। प्रालि+"हेयादिप्राग्दीव्यतीयम्।" ५।१।२। इति छप्रत्ययः।) प्रालेयजन्यम्। इत्यमरः॥ प्रालेयसम्बन्धि प्रालेयसम्बन्धि च॥
प्रालेयः, पुं, मधुरिपुः। इत्यमरः॥
प्रालेया, स्त्री, (प्रालेय+टाप्।) निशाया। इति राजनिर्घण्टः॥

प्रालोत्तरीयः, पुं, (प्रालीत्तरे ग्रामे भवः। प्रालोत्तर+छः।) पाणिनिमुनिः। इति त्रिकाण्डशेषः॥
प्राल्मलः, पुं, प्राल्मलीवृक्षः। इति शब्दरत्नावली॥ (यथा, महाभारते। ३। ६४। ३।
"अर्कैमारिषसच्छन्नं स्यन्दनेच सप्राल्मले॥")
द्वीपविशेषः। इति शब्दमाला॥ तद्विवरणं यथा,—
"अत ऊर्द्धं प्रवक्ष्यामि प्राल्मलस्य निबोधत।
प्राल्मलो द्विगुणो द्वीपः क्षौद्रद्वीपस्य विस्तरात्॥
परिवार्य्य समुद्रन्तु दधिमण्डोदकं स्थितः।
तत्र पुण्या जनपदाश्चिराद्य स्त्रियस्तु ताः॥
कुत एव सुदुर्भिक्षं क्षमातिक्रोशुना हि ते।
प्रथमः कुमुदश्चाद्रिः समना नाम पर्व्वतः॥
पीतस्तु मधुमस्तत्र शातकौम्भमयो गिरिः।
नाम्ना सर्व्वसुखो नाम दिव्यौषधिसमन्वितः॥
तृतीयश्चैव कौमार्य्यो भद्रश्चैवानिलो गिरिः।
स नाम्ना रोहितो नाम दिव्यो गिरिवरो महान्॥
समनाः कुमुदो देशः सुखोदर्कः सुखोदयः।
रोहितस्तु तृतीयस्तु रोहिणी नाम विश्रुतः॥
तत्र रत्नान्यनेकानि स्वयं रक्षति वासवः।
प्रजापतिसुपादाय प्रसन्नो विधिवत् स्वयम्॥
न तत्र नद्यो वर्षं वा शीतोष्णञ्चैव तद्विधम्।
वर्णाश्रमाणां धर्म्मो वा त्रिषु दोषेषु विद्यते॥
न कृष्णं न च दक्षोऽस्ति ईर्ष्यासूया भयं तथा।
उद्भिदान्युदकान्यत्र गिरिप्रस्रवणानि च॥
भोजनं षड्रसं तत्र तेषां स्वयमुपस्थितम्।
अधमोत्तमौ न तत्रास्ति न लोभो न परिग्रहः॥
अरोगा बलवन्तश्च एकाग्रमनसः प्रजाः।
त्रिसप्तवर्षसहस्राणि मानवीं त्रिद्विमास्थिताः॥
सत्त्वमायुःस्वरूपञ्च धर्म्मोधर्म्मं तथैव च।
प्राल्मलाद्येषु विज्ञेयं द्वीपेषु त्रिषु सर्व्वशः॥
आख्यातः प्राल्मलाद्यानां द्वीपानान्तु विधिः शुभः।
परिमण्डलस्तु स द्वीपश्चक्रवत् परिवेष्टितः।
सुरोदेन समुद्रेण दिगुणेन समन्वितः॥"
इति मत्स्यपुराणे भुवनकोषे सप्तद्वीपनिवेशनं नाम १२० अध्यायः॥ ७॥ अपि च।
"प्लक्षद्वीपप्रमाणात्तु द्विगुणेन समन्ततः।
संवेष्टयन्नुरसामोघिं प्राल्मलिः संप्रवर्त्तते॥
सप्त वर्षाणि तत्रैव तत्रैव कुलपर्व्वताः।
कथ्यन्ते सुप्रसिद्धाः सप्त नद्यश्च सुव्रताः॥
कुमुदश्चोन्नतश्चैव बलाहकः।
द्रोणः कर्कश्च महिषः ककुद्मान् सप्त पर्व्वताः॥
योनिर्योनिधरा च चन्द्रा सुरा दिव्योदकी।
विपाशा च शुक्ला च सप्तैता वरनिम्नगाः॥
न तेषु विद्यते लोभः क्रोधो वा द्विजसत्तमाः।
न चैवास्ति दुराचारा जना लोभपरायणाः॥
यत्रास्ति सत्यं सत्यञ्च दानं चापि सनातनम्।
तेषां सहाय कालुष्यं मात्सर्य्यञ्च कदाचनम्॥

कपिला ब्राह्मणा: प्रोक्ता राजानश्चारुणप्रभा।
पीता वैश्यास्तथा कृष्णा द्वीपेऽस्मिन् कृषला द्विजाः॥"
इति कौर्म्मे भुवनविन्यासे ४६ अध्यायः॥ ७॥
मोचरसः। इति रत्नमाला॥
प्राल्मलिः, पुं स्त्री, वृक्षविशेषः। शिमुल इति भाषा॥ (यथा मनौ। ८। ४६।
"प्राल्मलीन् प्रालतालांश्च शीरिणश्चैव पादपान्॥")
तत्पर्य्यायः। पिच्छिला २ पूरणी ३ मोचा ४ स्थिरायुः ५। इत्यमरः॥ दुरारोहा ६ प्राल्मलिनी ७ प्राल्मलः ८। इति शब्दरत्नावली॥ तूलिनी ९ कुक्कुटी १० रक्तपुष्पा ११ कण्टकारी १२ मोचनी १३। इति जटाधरः॥ चिरजीवी १४ पिच्छिलः १५ रक्तपुष्पकः १६ तूलवृक्षः १७ मोचाख्यः १८ कण्टकद्रुमः १९ रक्तोत्पलः २० रक्तपुष्पः २१ बहुवीर्य्यः २२ यमद्रुमः २३ दीर्घद्रुमः २४ स्थूलफलः २५ दीर्घायुः २६। इति राजनिर्घण्टः॥ कण्टकाढ्यः २७। इति भावप्रकाशः॥ अस्य गुणाः। पिच्छिलत्वम्। वृष्यत्वम्। बलत्वम्। मधुरत्वम्। शीतलत्वम्। कषायत्वम्। लघुत्वम्। स्निग्धत्वम्। शुक्रश्लेष्मवर्द्धनत्वञ्च। तन्मूलगुणाः। ग्राहित्वम्। कषायत्वम्। कफनाशित्वञ्च॥ तत्पुष्पं बलञ्च तद्विधम्। इति राजनिर्घण्टः॥
"प्राल्मली शीतला स्वादी रसे पाके कषायगी।
स्निग्धा स्थिरबीजा च दृढ़ग्रन्थी रक्तपित्तजित्॥
प्राल्मलीपुष्पमाकन्तु घृतसैन्धवमाधितम्।
प्रदरं नाशयत्येव दुःसाध्यञ्च न संशयः॥
रसे पाके च मधुरं कषायं शीतलं गुरु।
कफपित्तासृदृग्दाहि बालत्वञ्च प्रकीर्त्तितम्॥"
इति भावप्रकाशः॥ ७॥
नरकविशेषः। तत्र प्राल्मलिकण्टकैः पीड्यन्ते॥
प्राल्मलिकः, पुं, (प्राल्मली+"पुष्करादिभ्यो देशे।" ४। २। ८०। इति कुत्सादित्वात् ठक्।) रोहितकवृक्षः। इति राजनिर्घण्टः॥
प्राल्मलिनी, स्त्री, प्राल्मलिवृक्षः। इति शब्दरत्नावली॥
प्राल्मलिपचकः, पुं, (प्राल्मलिपचमिव पर्व्व यस्य।) सप्तच्छदवृक्षः। इति राजनिर्घण्टः॥
प्राल्मलिमः, पुं, (प्राल्मली वृक्षे विद्यतेति। ल्मा+कः।) मरुद्वः। इति राजनिर्घण्टः॥
प्राल्मली, स्त्री, (प्राल्मलि+ङीदादिकारादिति वा ङीष्।) प्राल्मलिवृक्षः। इत्यमरः॥ प्रातति देहात् दूरं गच्छति प्राल्मलिः। प्रल ञ मार्गे गतौ। मलिन् शिल्पिः। दृषोदरादित्वात् ओपधे पाक्षोनादीति इमि प्रल्मली च प्राल्मलिरपि लिङ्गात्तु सिद्धमिति भरतः। प्रल्मली रक्तपुष्पा च कुक्कुटी स्थिरजीविका इति कौमारस्मिति भरतः। इत्यमरटीकायां भरतः॥
प्राल्मली, [न्] पुं, (प्राल्मलः प्राल्मलमस्यास्तीति। इनिः।) मरुद्वः। इति त्रिकाण्डशेषः॥

श्वाल्मलीकन्दः, पुं, (श्वाल्मल्याः कन्दः।) श्वाल्मलिवृक्षमूलम्। तत्पर्य्यायः। विकुलः २ वर्षाभूकः ३ वनवासी ४ मूलजः ५ मूलकन्दा ६। अस्य गुणाः। मधुरत्वम्। मलसंग्रहरोधकारित्वम्। शिशिरत्वम्। पित्तदाहार्त्तिशोफसन्तापनाशित्वञ्च। इति राजनिर्घण्टः॥

श्वाल्मलीफलः, पुं, (श्वाल्मल्याः फलमिव फलं यस्य।) तेजःफलवृक्षः। इति राजनिर्घण्टः॥

श्वाल्मलीवेष्टः, पुं, (श्वाल्मल्या वेष्टः।) श्वाल्मलिनिर्यासः। शिमुल आठा इति भाषा॥ तत्पर्य्यायः। पिच्छा २। इत्यमरः॥ मोचरसः ३ श्वाल्मलः ४ श्वाल्मलीवेष्टकः ५। इति रत्नमाला॥ मोचसारः ६ मोचनिर्यासः ७। अस्य गुणाः।

"मोचसारो हिमो वाही स्त्रिग्धो दृष्यः कषायकः।
प्रयोहिकातिसाराम्रक्षपित्तासदाहजित्॥"

इति भावप्रकाशः॥

श्वाल्मलीवेष्टकः, पुं, (श्वाल्मलीवेष्ट + स्वार्थे कन्।) श्वाल्मलीवेष्टः। इति रत्नमाला॥

श्वास्यः, पुं, देशविशेषः। यथा,—

"श्वास्यास्तु कारुकुचीया मरवस्तु दशेरकाः॥"

इति हेमचन्द्रः॥

राजविशेषः। इति महाभारतम्॥ (भीष्मेण महास्य युद्धवृत्तान्तो महाभारते आदिपर्व्वणि १०२ अध्याये तथा द्रुमेण सहास्य युद्धवृत्तान्तस्तत्रैव वनपर्व्वणि १५ अध्यायमारभ्य दृश्यः॥)

श्वाहयः, पुं, यानौषधगणविशेषः। यथा,—

'काकोल्यादिः स वातघ्नः सर्व्वाम्लद्रव्यसंयुतः।
मांसपोदकमांसस्तु सर्व्वक्लेदसमन्वितः॥
सुखोष्णः सदलवणः श्वाह्यः परिकीर्त्तितः।
तेनोपनाहं कुर्व्वीत सर्व्वदा वातरोगिणाम्॥"

इति सुश्रुते चिकित्सितस्थाने ५ अध्यायः॥

श्वावः, पुं, (श्वयते श्वाप्यते इति। श्वि गतौ + घञ्।) शिशुः। इति शब्दरत्नावली॥ (यथा, रघुवंशे। ६। ९।

"शिलाविभङ्गैर्गजराजशाय-
तुङ्गं नगोत्सङ्गमिवाधिरोढुम्॥"

श्वावस्यायम्। श्वव + यण्।) श्वावसम्बन्धिनि, त्रि। यथा,—

"श्वश्वे श्वावमाशौचं विद्युक्तौलौकिकं स्मृतम्।
तयोः सम्पत्तिमात्रेण उपस्पृश्य क्रियाक्रमः॥"

इति तिथ्यादितत्त्वे ब्रह्मपुराणम्॥

श्वावकः, पुं, (श्वाव एव। स्वार्थे कन्।) शिशुः। इत्यमरः॥ (यथा, हरिवंशे। ४८। १३।

"दक्षाभयङ्गमङ्गश्वावकेषु तेष्वाश्रमेष्वथ॥")

श्वावरः, पुं, (श्वपराणामयम्। श्वपर + अण्।) पापम्। अपराधः। लोध्रवृक्षः। इति मेदिनी॥ श्वपरस्वामिकृतभाण्डविशेषः। शिवकृततत्त्वविशेषश्च। श्वपरसम्बन्धिनि, त्रि। यथा,—

"संपूज्य प्रेषयं कुर्य्यात् दृश्यां श्वावरोत्सवे॥"

इति तिथ्यादितत्त्वम्॥

श्वावरभेदार्त्त, क्ली, तास्त्रम्। इति हेमचन्द्रः॥

श्वावरी, स्त्री, भूकुशिम्बी। इति मेदिनी॥

श्वावरोत्सवः, पुं, (श्वावराणामुत्सवः।) म्लेच्छजनोत्सवः। यथा,—

"पूजयित्वा महादेव्यां नवम्यां बलिभिस्तथा।
विसर्ज्जयेत् दशम्यां तु श्रवणे श्वावरोत्सवे॥
अस्ताःपादो दिवाभागे श्रवणस्य यदा भवेत्।
तदा संप्रेषयं दैत्या दशम्यां श्वावरोत्सवे॥
रागिणीभिः कुमारीभिर्वेश्याभिर्नर्त्तकैस्तथा।
श्वतूर्य्यनिनादैश्च नटद्भैः पटहैस्तथा॥
अन्यैर्वन्यैर्बहुविधैर्लोकपुण्यप्रकीर्त्तकैः।
धूलीकर्द्दमविक्षेपैः क्रीड़ाकौतुकमङ्गलैः॥
भगलिङ्गविधानैश्च भगलिङ्गप्रतीतकैः।
भगलिङ्गादिशब्दैश्च क्रीड़येद्वरतं जगत्॥
परैर्निषिध्यते यस्तु यः परं नाभिपद्यपि।
कुलुहा भगवती तस्य श्वापं दद्यात् सुदारुणम्॥"

इति कालिकापुराणे उत्तरतन्त्रे ६० अध्यायः॥

श्वाश्वतं, त्रि, (श्वश्वत्वम्। श्वश्वत + श्वण्।) नित्यम्। इत्यमरः॥ (यथा, रामायणे। १। २। १५।

"मा निषाद प्रतिष्ठां त्वमगमः श्वाश्वतीः समाः।
यत् क्रौञ्चमिथुनादेकमवधीः काममोहितम्॥")

पारिभाषिकश्वाश्वतं यथा,—

"श्वाश्वतं दैवपूजादि विप्रदानञ्च श्वाश्वतम्।
श्वाश्वतं सगुणा विद्याः सूक्ष्मभिन्नञ्च श्वाश्वतम्॥"

इति गारुड़े नीतिसारे १०६ अध्यायः॥

श्वाश्वतः, पुं, वेदव्यासः। इति शब्दरत्नावली॥ शिवः। यथा महाभारते। १३। १७। ३२।

"प्रवृत्तिश्च निवृत्तिश्च नियतः श्वाश्वतो ध्रुवः॥")

श्वास्कुलः, त्रि, मांसाशी। इति हेमचन्द्रः॥

श्वास्कुलिकं, क्ली, (श्वस्कुल + स्वार्थे ठक्।) श्वस्कुलिमत्स्यः। इत्यमरः॥

श्वास, उ च पु श्वासने। इति कविकल्पद्रुमः॥ (अदा०-परं०-सकं०-सेट्। लुङि वेट्।) उ, श्वासित्वा श्वोष्ट्वा। च, श्वासति। पु, श्वास्ति। श्वास्ति यत्राश्वया राजः स सत्राड़ित्यमरः। इति दुर्गादासः॥

श्वास ट उ } चाशिषि। इति कविकल्पद्रुमः॥
श्वास ल रु } (भा०-अदा० च-आत्म०-सकं०-सेट्।) आस्पूर्व्वा इति केवलानामप्यस्पूर्व्वाणाञ्च प्रयोगनिराकाङ्क्षार्थम्। किन्तु इदं गुरुत्वं पूर्व्वेभ्यो नमो वाकं प्रश्नासचे। इत्युणादिवृत्तौ प्रपूर्व्वोऽपि दृश्यते। ड, आश्वासते। उ, आश्वासित्वा आश्वास्ता। षष्ठसस्वरानुबन्धसामर्थ्यात् श्वाप्रत्ययस्य न यम् समासाभावादिति गोविन्दभट्टः। किन्तु अस्य उदनुबन्धफलं छन्दस्येवेति धातुप्रदीपः। ल ड, आश्वासीत् श्वास हिंसने इत्यस्य अदादीयश्वासेरेव ग्रहणादस्योपधाया इकारो न स्यात्। आशीरिष्टार्थाशंसनम्। इच्छायामित्यन्ये। इति दुर्गादासः॥

श्वासनं, क्ली, (श्वास + ल्युट्।) आज्ञा। (यथा, मनौ। ९। २६२।

"कुर्व्वीत श्वासनं राजा सम्यक् शास्त्रानुसारतः॥")

तत्पर्य्यायः। अववादः २ निर्देशः ३ निदेशः ४ अतिथिः ५। इत्यमरः॥ श्वास्तिः ६। इति भरतः॥ आदेशः ७ आदेशनम् ८। इति शब्दरत्नावली॥ श्वास्त्रम् ९। इति शटाधरः॥ राजदत्तभूमिः। लेखा। श्वास्त्रम्। श्वास्तिः। इति मेदिनी॥ (दानलिखिततास्त्रफलकादिः। यथा, कथासरित्सागरे। १२४। ६२-६६।

"श्वासनं लेखयित्वा च तमेवं च समादिशत्।
ॐकारपीठमार्गेण भद्र गच्छोत्तरां दिशम्॥
तत्रासुना श्वासनेन श्वामं शुल्कं मदर्पितम्।
नाम्ना तं खण्डपटकं दृष्ट्वा गच्छान्यथाश्वसि॥"

यथाच मार्कण्डेये। ३६। ८।

"वाच्यं ते श्वासनं पट्टे क्षुद्राक्षरनिदेशितम्॥"

स्त्रियां धर्म्मोपदेशकर्त्री। यथा, ऋग्वेदे। १। ३१। ११।

"इलामकृण्वन्मनुषस्य श्वासनीम्॥")

श्वासनहरः, पुं, (हरतीति। हृ + अप्। श्वासनस्य हरः।) राजदूतः। आज्ञावाहकः। इति केचित्॥

श्वासितः, त्रि, (श्वास + क्तः।) कृतश्वासनः। यथा,

"सुखार्थमन्नं सुविचक्षणः श्रुतः
सुश्वासिता स्त्री नृपतिः सुसेवितः।
सुचिन्त्य चोक्तं सुविचार्य्य यत् कृतं
सुदीर्घकालेऽपि न याति विक्रियाम्॥"

इति पञ्चरत्नम्॥

श्वासिता, [ऋ] त्रि, (श्वास + तृच्।) श्वास्ता। इति त्रिकाण्डशेषः॥ (यथा, मनौ। ७।१७।

"स राजा पुरुषो दण्डः स नेता शासिता च सः॥"

श्वाश्वाता। यथा, तत्रैव। २। १५०।

"श्वासस्य जन्मनः कर्त्ता स्वधर्म्मस्य च
श्वासिता॥")

श्वास्ता, [ऋ] त्रि, (श्वास + "ल्वादिभ्यः तृन्नौ ण्वुलौ।" उणा०। २। ६४। इति असंज्ञायामपि तृन्। स च अनिट्।) श्वासनकर्त्ता। तत्पर्य्यायः। देशकः २ श्वासिता ३। इति त्रिकाण्डशेषः॥ यथा,—

"द्वौ धाता च विधाता च पौराणौ जगतः पतौ।
द्वौ श्वास्तारौ त्रिलोकेऽस्मिन् धर्म्माधर्म्मौ प्रकीर्त्तितौ॥"

इति वह्निपुराणे गणभेदनामाध्यायः॥

(यथा च भागवते। १। १२। २६।

"राजर्षीणां जनयिता श्वास्ता चोत्पथगामिनाम्॥")

श्वास्ता, [ऋ] पुं, (श्वास + "ल्वादिभ्यः तृन्नौ ण्वुलौ।" उणा०। २।६४। इति तृन्। स च अनिट्।) बुद्धः। इत्यमरः॥ उपाध्यायः। राजा। पिता। इति संक्षिप्तसारोणादिवृत्तिः॥

क्वचित्तु कपिला भल्लगर्भा चागुरुशिंशपा।
पिच्छिला शिंशपा युग्मपत्रिकागुरु चेत्यपि ॥"
इति शब्दरत्नावली ॥
अस्या गुणाः। "शिंशपा वातनाशिनी।" इति राजवल्लभः ॥ अपि च।
"शिंशपा कटुका तिक्ता कषाया श्लेष्मकारिणी।
उष्णवीर्या हरेन्मेदः कुष्ठक्षतकृमीन् बहून्।
बस्तिवङ्क्षणदाहास्रबलासागर्भपातिनी ॥"
इति भावप्रकाशः ॥
(तत्काष्ठनिर्म्मितरथस्तु दृढो भवति। यथा, ऋग्वेदे। ३। ५३। १६।
"अभियद्यस्व खदिरस्य सार-
मोजो धेहि स्यन्दने शिंशपायाम्।"
"स्यन्दने रथस्य गमने सति शिंशपायां शिंशपाकाष्ठद्वारानिर्म्मिते रथस्य फलके ओजो धेहि दार्ढ्यं कुरु।" इति तद्भाष्ये सायणः ॥)

शिक्, [च्] क्ली, शिक्थम्। इति शब्दरत्नावली ॥

शिक्कुः, त्रि, अध्यवसायी। इति त्रिकाण्डशेषः ॥

शिक्थं, क्ली, मधुजातद्रव्यविशेषः। सोम् इति भाषा। तत्पर्य्यायः। शिक्थकम् २ मधुजम् ३ विषम् ४ मधुसम्भवम् ५ मोदनम् ६ काचम् ७ उच्छिष्टमोदनम् ८ मक्षिकामलम् ९ चौद्रेयम् १० पीतरागम् ११ स्निग्धम् १२ माक्षिकजम् १३ चौद्रजम् १४ मधुश्लेषम् १५ द्रावकम् १६ माक्षिकाभ्रथम् १७ मधूत्थितम् १८ मधूत्थम् १९। अस्य गुणाः। पिच्छिलत्वम्। स्वादुत्वम्। कुष्ठवातास्रनाशित्वम्। मृदुत्वम्। कटुत्वम्। स्निग्धत्वम्। लेपेन स्फुटिताङ्गविलोपनत्वञ्च। इति राजनिर्घण्टः ॥

शिक्थकं, क्ली, (शिक्थ + स्वार्थे कन्।) शिक्थम्। इति राजनिर्घण्टः ॥

शिक्यं, क्ली, (संस + "संसेः शि कुट् किच्च।" उणा० ५। १६। इति यत्। स च कित्। कुडागमः शिरादेश्च।) ब्रथरचार्थरज्जुमयाधारविशेषः। शिक्का इति भाषा। तत्पर्य्यायः। काचः २ शिक्या ३ शिक् ४। इति शब्दरत्नावली ॥ (यथा, भागवते। १०। ८। ३०।
"हस्ताग्राह्ये रचयति विधिं पीठकोलूखलाद्यै-
श्छिद्रं ध्रुवन्निहितवयुनः शिक्यभाण्डेषु तद्विद् ॥")

शिक्या, स्त्री, (शिक्य + स्त्रियां टाप्।) शिक्यम्। इति शब्दरत्नावली ॥

शिक्यितं, त्रि, (शिक्ये स्थापितमित्यर्थे प्रातिपदिकात् धात्वर्थे इति णिच् ततः क्तः।) शिक्यस्थापितवस्तु। तत्पर्य्यायः। काचितः २। इत्यमरः ॥

शिक्ष, ड शिक्षणे। इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-सेट्।) दृस्वौ। ड, शिक्षते। शिक्षणं विद्याग्रहणम्। अशिक्षतास्त्रं पितुरेव मन्त्रविदिति रघुः। इति दुर्गादासः ॥

शिक्षणं, क्ली, (शिक्ष + ल्युट्।) विद्योपादानम्। इति शिक्षाशब्दटीकायां भरतः ॥

शिक्षा, स्त्री, (शिक्ष + "गुरोश्च हलः।" ३।३।१०३। इत्यः। ततष्टाप्।) शिक्षणम्। ग्रन्थेनाकृतः। इति शब्दमाला ॥ वेदाङ्गशास्त्रविशेषः। इत्यमरः ॥ यथा,—
"शिक्षा कल्पो व्याकरणं निरुक्तं ज्योतिषां गतिः।
छन्दोविचितिरित्येते षडङ्गो वेद उच्यते ॥"
इति।
तच्च अकारादिवर्णानां स्थानकरणप्रयत्नबोधिका अ-कु-ए ह-विसर्জ्जनीयाः कण्ठ्या इत्यादिका शिक्षा। इति तट्टीकायां भरतः ॥ * ॥ * ॥
अथ शिक्षाशास्त्रं लिख्यते।
"अथ शिक्षां प्रवक्ष्यामि पाणिनीयमतं यथा।
शास्त्रानुपूर्व्वं तद्विद्याद्यथोक्तं लोकवेदयोः ॥
प्रसिद्धमपि ग्रन्थार्थमविज्ञातमबुद्धिभिः।
पुनर्वक्तीकरिष्यामि वाचं उच्चारणे विधिम् ॥
त्रिषष्टिश्चतुःषष्टिर्वा वर्णाः शम्भुमते मताः।
प्राकृते संस्कृते चापि स्वयं प्रोक्ताः स्वयम्भुवा ॥
स्वरा विंशतिरेकश्च स्पर्शानां पञ्चविंशतिः।
यादयश्च स्मृता ह्यष्टौ चत्वारश्च यमाः स्मृताः ॥
अनुस्वारो विसर्गश्च × कश्चौ चापि पराश्रितौ।
दुःसृष्टश्चेति विज्ञेयः लकारः प्लुत एव च ॥
आत्मा बुद्ध्या समेत्यार्थान्मनो युङ्क्ते विवक्षया।
मनः कायाग्निमाहन्ति स प्रेरयति मारुतम् ॥
मारुतस्तूरसि चरन्मन्द्रं जनयति स्वरम्।
प्रातःसवनयोगन्तं छन्दो गायत्रमाश्रितम् ॥
कण्ठे माध्यन्दिनयुतं मध्यमं चैष्णुभानुगम्।
तारं तार्त्तीयसवनं शीर्षण्यं जागताश्रुगम् ॥
सोदीर्णो मूर्द्ध्नभिहतो वक्त्रमापद्य मारुतः।
वर्णाञ्जनयते तेषां विभागः पञ्चधा स्मृतः ॥
स्वरतः कालतः स्थानात् प्रयत्नानुप्रदानतः।
इति वर्णविदः प्राहुर्निपुणं तं निबोधत ॥
उदात्तश्चानुदात्तश्च स्वरितश्च स्वराश्रयः।
ह्रस्वो दीर्घः प्लुत इति कालतो नियमा अपि ॥
उदात्ते निषादगान्धारावनुदात्ते ऋषभधैवतौ।
स्वरितप्रभवा ह्येते षड्जमध्यमपञ्चमाः ॥
अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा।
जिह्वामूलञ्च दन्ताश्च नासिकौष्ठौ च तालु च ॥
ओभावश्च विवृत्तिश्च ग्र-घ-स रेफ एव च।
जिह्वामूलमुपध्मा च गतिरष्टविधोष्मणः ॥
यत्नोभावप्रसक्तानुकारादिपरं पदम्।
स्वराणां तादृशं विद्यादृग्यजुष्टत्साम्नुसृग्णः ॥
हकारं पञ्चमैर्युक्तमन्तःस्थाभिश्च संयुतम्।
औरस्यं तं विजानीयात् कण्ठ्यमाहुरसंयुतम् ॥
कण्ठ्यावहा वि-चु-ल-शास्त्रालव्या ओष्ठ्यावुपू।
स्मूर्द्धन्या ऋ-टु-र-षा दन्त्या ऌ-तु-ल-सा: स्मृताः ॥
जिह्वामूले तु कुः प्रोक्तो दन्त्यौष्ठ्यौ वः स्मृतौ बुधैः।
ए ऐ तु कण्ठतालव्या ओ औ कण्ठौष्ठजौ स्मृतौ ॥
अर्द्धमात्रा तु कण्ठ्या स्यादेकारैकारयोर्भवेत्।
ओकारौकारयोर्मात्रा तयोर्विवृतसंवृतम् ॥
संवृतं मात्रिकं ज्ञेयं विवृतन्तु द्विमात्रिकम्।
घोषा वा संवृताः सर्व्वे अघोषा विवृताः स्मृताः ॥
स्वराणामूष्मणाञ्चैव विवृतं करणं स्मृतम्।
तेभ्योऽपि विवृतावेडौ ताभ्यामैचौ तथैव च ॥
अनुस्वार्यमाणाश्च नासिकास्थानमुच्यते।
अर्योगवाहा विज्ञेया आश्रयस्थानभागिनः ॥
अलाबुवीणानिर्घोषो दन्त्यमूल्यस्वरानुगः।
अनुस्वारस्तु कर्णौष्ठौ नित्यं ह्रौः ग्र-घ-सेषु च ॥
अनुस्वारे विवृत्यान्तु विरामे चाक्षरद्वये।
द्विरोष्ठौ तु विगृह्णीयादृग्यजैकारवत्कारयोः ॥
व्याघ्री यथा हरेत् पुत्रान् दंष्ट्राभ्यां न च पीड़येत्।
भीता पतनभेदाभ्यां तद्वद्वर्णान् प्रयोजयेत् ॥
यथा सौराष्ट्रिका नारी लक्रं इत्यभिभाषते।
एवं रङ्गाः प्रयोक्तव्याः खेऽ-रँा इव खेदया ॥
रक्तवर्णं प्रयुञ्जीरन् नो असेत् पूर्व्वमक्षरम्।
दीर्घस्वरं प्रयुञ्जीयात् पश्चान्नासिक्यमाचरेत्।
हृदये चैकमात्रः स्यादर्द्धमात्रस्तु मूर्द्धनि।
नासिकायां तथार्द्धश्च रङ्गस्त्रैवं द्विमात्रता ॥
हृदयादुत्करे तिष्ठन् कांस्येन समनुस्वरम्।
मार्दवञ्च द्विमात्रश्च जघन्वां इति निदर्शनम् ॥
मध्ये तु कम्पयेत् कम्पमुभौ पार्श्वौ समौ तथा।
स रङ्गं कम्पयेत् कम्पं रथीवेति निदर्शनम् ॥
एवं वर्णाः प्रयोक्तव्या नाव्यक्ता न च पीड़येत्।
सम्यग्वर्णप्रयोगेण ब्रह्मलोके महीयते ॥
गीती शीघ्री शिरःकम्पी तथा लिखितपाठकः।
अनर्थज्ञोऽल्पकण्ठश्च षड़ेते पाठकाधमाः ॥
माधुर्य्यमक्षरव्यक्तिः पदच्छेदस्तु सुस्वरः।
धैर्य्यं लयसमर्थञ्च षड़ेते पाठका गुणाः ॥
शङ्कितं भीतमुद्घुष्टमक्षरमनुनासिकम्।
काकस्वरं शिरसि गतं तथा स्थानविवर्জ্জितम् ॥
उपांशुदुष्टं त्वरितं निरस्तं
विलम्बितं गद्गदितं प्रगीतम्।
निष्पीड़ितं ग्रस्तपदाक्षरञ्च
वदेन्न दीनं न तु सानुनास्यम् ॥
प्रातः पठेन्नित्यमुरःस्थितेन
स्वरेण शब्दोच्चतोपमेन।
मध्यं दिने कण्ठगतेन चैव
चक्राङ्कसंकूजितसन्निभेन ॥
तारन्तु विद्यात् सवनं तृतीयं
शिरोगतं तच्च सदा प्रयोज्यम्।
मयूरहंसान्यभृतस्वराणां
तुल्येन नादेन शिरःस्थितेन ॥
अघोऽसृष्टा यवस्त्रीषन्नमसृष्टाः ग्र-रक्षया।
शेषाः सृष्टा हलः प्रोक्ता निबोधाशुप्रदानतः ॥
यमोऽनुनासिका न ङ्रो नादिनो ह-भयः स्मृताः।
ईयन्मादा यमो जश्च खासिनश्च खरादयः ॥
ईयच्छ्वासांश्चरो विद्यात् गोर्हामेतत् प्रचक्षते।
दाक्षीपुत्रः पाणिनिना येनेदं व्यापितं भुवः ॥
छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते।

ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते ॥
शिक्षा घ्राणन्तु वेदस्य मुखं व्याकरणं स्मृतम् ।
तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते ॥
उदात्तमाख्याति दृशोऽङ्गुलीनां
प्रदेशिनीमूलनिविष्टमूर्त्ता ।
उपान्तमध्ये स्वरितं धृतञ्च
कनिष्ठिकायामनुदात्तमेव ॥
उदात्तं प्रदेशिनीं विद्यात्प्रचयं मध्यतोऽङ्गुलिम् ।
निहतन्तु कनिष्ठिकां स्वरितोपकनिष्ठिकाम् ॥
अन्तोदात्तमाद्युदात्तमुदात्त-
मनुदात्तं नीचस्वरितम् ।
मध्योदात्तं स्वरितं द्व्युदात्तं
चुदात्तमिति नव पदग्रया ॥
अग्निः सोमः प्र वो वीर्यं हविषां
स्वर्दृशमतिरिन्द्राद्दृक्षयी ।
अंशिरित्यनोदात्तं सोम इत्याद्युदात्तं प्र इत्युदात्तं व इत्यनुदात्तं वीर्यं नीचस्वरितम् ॥
हविषां मध्योदात्तं स्वरिति स्वरितम् । दृक्षयतिरिति द्व्युदात्तमिन्द्राद्दृक्षयी इति चुदात्तम् ॥
अनुदात्तो हृदि ज्ञेयो मूर्द्ध्युदात्त उदाहृतः ।
स्वरितः कण्ठमूले तु सर्व्वास्ये प्रचयः स्मृतः ॥
चाषस्तु वदते मात्रां द्विमात्रन्त्वेव वायसः ।
शिखी रौति त्रिमात्रन्तु नकुलस्त्वर्द्धमात्रकम् ॥
कृतोपादानगतं दग्धमपवर्गञ्च भक्षितम् ।
न तस्य पाठे मोघोऽस्ति पापाहेरिव किल्बिषात् ॥
सुनीर्घादागतं यत्तं साक्षात्यं सुव्यवस्थितम् ।
सुस्वरेण सुवक्त्रेण प्रयुक्तं ब्रह्म राजते ॥
मन्त्रो हीनः स्वरतो वर्णतो वा
मिथ्याप्रयुक्तो न तमर्थमाह ।
स वाग्वज्रो यजमानं हिनस्ति
यथेन्द्रशत्रुः स्वरतोऽपराधात् ॥
अनक्षरं हतायुष्यं विस्वरं व्याधिपीडितम् ।
अयता ग्रस्तरूपेण वक्त्रं पतति मस्तके ॥
एकहीनन्तु योऽधीते स्वरवर्णविवर्जितम् ।
ऋग्यजुःसामभिर्हन्यो वियोनिमधिगच्छति ॥
एकेन वेदं योऽधीते स्वरवर्णार्थसंयुतम् ।
ऋग्यजुःसामभिः पूतो ब्रह्मलोके महीयते ॥
ग्रहैः ग्राहकरौ प्रादाद्दाक्षीपुत्राय धीमते ।
वाद्यायेभ्यः समाहृत्य देवीं वाचमिति स्थितिः ॥
येनाक्षरसमाम्नायमधिगम्य महेश्वरात् ।
कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः ॥
येन धौता गिरः पुंसां विमलैः शब्दवारिभिः ।
तमश्चाज्ञानजं भिन्नं तस्मै पाणिनये नमः ॥
अज्ञानान्धस्य लोकस्य ज्ञानाञ्जनशलाकया ।
चक्षुरुन्मीलितं येन तस्मै पाणिनये नमः ॥
त्रिनयनसुखनिःसृतामिमां य
इह पठेत् प्रयतश्च सदा द्विजः ।
स भवति धनधान्यपशुपुत्रकीर्त्तिमा-
नतुलञ्च सुखं समश्नुते दिवीति दिवीति ॥
अथ शिक्षामालोदात्तश्च इकारं स्वरार्थं यथा गौरधिका । नीलग्रीवृषोदात्तं चामस्तु शुक्लं एकादश ।" इति वेदशिक्षासमाप्तिमगमत् ॥ * ॥ अपि च ।

अग्निरुवाच ।

"वक्ष्ये शिक्षां त्रिषष्टिः स्युर्वर्णा वा चतुराधिकाः ।
स्वरा विंशतिरेकञ्च सार्द्धानां पञ्चविंशतिः ॥
यादयश्च स्मृता ह्यष्टौ चत्वारश्च यमाः स्मृताः ।
अनुस्वारो विसर्गश्च × कश्चौ चापि परावुभौ ॥
दुःस्पृष्टमिति विज्ञेयः लकारः प्लुत एव च ।
रङ्गश्च खे अरॉ इव एकारः पञ्चमैर्युतः ॥
अन्तःस्थाभिः समायुक्तः औरस्यः कण्ठ्य एव सः ।
आत्मा बुद्ध्या समेत्यार्थं मनो युङ्क्ते विवक्षया ॥
मनः कायाग्निमाहन्ति स प्रेरयति मारुतम् ।
मारुतस्तूरसि चरन्मन्द्रं जनयति स्वरम् ॥
प्रातःसवनयोगन्तं छन्दो गायत्रमाश्रितम् ।
कण्ठे माध्यन्दिनयुतं मध्यमं चैष्टभागमम् ॥
तारं तार्त्तीयसवनं शीर्षण्यं जगतागमम् ।
सोदीर्यो मूर्द्ध्यभिहतो वक्त्रमापद्य मारुतः ॥
वर्णान् जनयते तेषां विभागाः पञ्चधा स्मृताः ।
स्वरः कालगतः स्थानात् प्रयत्नानुप्रदानतः ॥
अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा ।
जिह्वामूलञ्च दन्ताश्च नासिकोष्ठौ च तालु च ॥
ओ-भावश्च विवृत्तिश्च ग्र-घ-स-ञ रेफ एव च ।
जिह्वामूलमुपध्मा च गतिरष्टविधोच्यते ॥
यद्योभावप्रसन्नास्यसुकारादिपरं पदम् ।
स्वरान्तं तादृशं विद्यात् यदन्यद्वाक्तसुच्यते ॥
सुनीर्घादागतं दग्धमपवर्गञ्च भक्षितम् ।
एवमुच्चारणं पापमेवमुच्चारणं शुभम् ॥
सुनीर्घादागतं ह्यर्थं स्थानार्थं सुव्यवस्थितम् ।
सुस्वरेण सुवक्त्रेण प्रयुक्तं ब्रह्म राजते ॥
न करालो न लम्बोष्ठो नाशुक्लो नानुनासिकः ।
न गद्गदाव्यक्तभिन्नश्च न वर्णान् वक्तुमर्हति ॥
उदात्तश्चानुदात्तश्च स्वरितश्च स्वराश्रयः ।
ह्रस्वो दीर्घः प्लुत इति कालतो नियमा अपि ॥
कण्ठ्याववर्णा वि-षु-य-शाः तालव्या ओऽथ नासिक्यौ ङ-ञौ ।
मूर्द्धन्या ऋ-ट-ठ-ड-ढा दन्त्या ऌ-त-थ-द-धा-लाः स्मृताः ॥
जिह्वामूले तु कुः प्रोक्तो दन्तोष्ठ्यो पः स्मृतो बुधैः ।
एदैतौ तु कण्ठ्यतालव्यौ ओ औ कण्ठ्योष्ठ्यौ स्मृतौ ॥
अर्द्धमात्रा तु कण्ठ्या स्यात् एकारैकारयोर्भवेत् ।
अयोगवाहा विज्ञेया आश्रयस्थानभागिनः ॥
अघोषाः कुपौ यश्चोष्मणश्च शषसाः शरः स्मृताः ।
शेषाः घृष्टा लः प्रोक्तो निर्घोषानुप्रदागतः ॥
यमोऽनुनासिका ञ णो नादिनो घ झ भयः स्मृताः ।
ईषत्स्पृष्टा यणो जश्च झशिनश्च खफादयः ।
ईषत्स्पृष्टासंधरो विद्याद्घोषमितन्तु प्रचक्षते ॥"
इत्यग्नेये महापुराणे शिक्षानिरूपणं नाम ३३६ अध्यायः ॥

शिक्षाकरः, पुं, (करोतीति । कृ + अण् । शिक्षायां करः ।) व्यासः । इति शब्दमाला ॥ शिक्षाकर्त्तरि, त्रि ॥

शिक्षागुरुः, पुं, (शिक्षाया गुरुः ।) विद्यादाता गुरुः । मन्त्रानुपदेशकर्त्ता दीक्षागुरुः । यथा । इयं हि रसभावविशेषदीक्षागुरोर्विक्रमादित्यस्याभिरूपभूयिष्ठा परिषत् । इत्यभिज्ञानशकुन्तलायाम् १ अङ्कः ॥

शिक्षितः, त्रि, (शिक्ष + क्तः ।) विद्वान् । इत्यमरः । शिक्षायुक्तः । यथा,—

"आपरितोषाद्विदुषां न साधु मन्ये प्रयोगविज्ञानम् ।
बलवदपि शिक्षितानामात्मन्यप्रत्ययं चेतः ॥"

इत्यभिज्ञानशकुन्तलायाम् १ अङ्कः ॥

शिक्षिताक्षरः, पुं, (शिक्षितानि अक्षराणि येन ।) शिक्षाकारी । क्षाचः । यथा,—

"स्याद्वक्षरसुखः कालाक्षरिकः शिक्षिताक्षरः ।"

इति विकाण्डशेषः ॥

(शिक्षिते, त्रि । यथा, राजतरङ्गिण्याम् ५ । ८३ ।

"स सुग्यनामा मतिमान् प्रबुद्धः शिक्षिताक्षरः ।
कस्याप्यासीद्दृषदृषतेरर्भकाध्यापको गृहे ॥")

शिखकः, पुं, लेखकः । इति संक्षिप्तसारोणादिवृत्तिः ॥

शिखण्डः, पुं, मयूरपुच्छः । इत्यमरः । यथा,—

"शिखण्डोऽस्त्री पिच्छबर्हं शिखिपुच्छशिखण्डके ।"

इति शब्दरत्नावली ॥

(यथा, महाभारते । १२ । २८१ । ५८ ।

"वृत्तस्य रुधिरात्त्वेव शिखण्डाः पार्श्व आशिरे ।
द्विजातिभिरभक्ष्यास्ते दीक्षितेन तपोधनैः ॥")

चूडा । इति मेदिनी ॥

शिखण्डकः, पुं, (शिखण्ड इव । कन् ।) काकपक्षः । इत्यमरः । चुल्पी इति भाषा । "हे क्षत्रियकुमाराणां शिखाश्रये । उक्तञ्च ।

'बालानाञ्च शिरः कार्यं चिच्छिखं सुखमेव चेति ।'

शिखामण्डके इत्यन्ये । सामान्येन चूडायामित्यन्ये । काकपक्षाकारत्वात् काकपक्षः । शिरसि खण्डते शिखण्डकः मनीषादिः तालव्यादिः । शिखण्डे तु शिखावर्हे इति तालव्यादौ रभसः । शिखाण्डकञ्च । शिखण्डकशिखाण्डकाविति वाचस्पतिः ।" इति तट्टीकायां भरतः ॥

(यथा, रघुः । ११ । ५ ।

"तौ पितुर्नयनजेन वारिणा
किञ्चिदुक्षितशिखण्डकावुभौ ।
धन्विनौ तदभिमन्यगच्छतां
मौरवक्षितसमार्गतोरथौ ॥")

मयूरपुच्छे, क्लीबे च । इति शब्दरत्नावली ॥

शिखण्डिकः, पुं, (शिखण्डीव कायति शब्दायते इति । कै + कः । यद्वा, शिखण्डोऽस्यास्तीति । शिखण्ड + उन् ।) कुक्कुटः । इति हेमचन्द्रः ॥

शिखण्डिका, स्त्री, शिखा। यथा,—
"चूडा केशी केशपाशी शिखा शिखण्डिका समाः॥"
इति हेमचन्द्रः॥

शिखण्डिनी, स्त्री, (शिखण्डचूडा अस्त्यस्या इति। इनि। ङीप्।) यूथिका। गुञ्जा। इति मेदिनी॥ द्रुपदराजकन्या। (यथा, महाभारते।५।१६८।२।
"कन्या शिखण्डिनी जाता पुरुषो वै निवेदितः॥")
सा पत्यस्य पुंस्त्वप्राप्त्येव पुरुषो भूत्वा शिखण्डीति नाम्ना ख्यातः। एतद्विवरणं महाभारते। ५। १६० अध्यायमारभ्य विशेषतो द्रष्टव्यम्॥ मयूरी। शिखण्डिन्-शब्दात् स्त्रियां ङीप्प्रत्ययेन निष्पन्ना॥ (विशिताश्वराजस्त्री। यथा, भागवते। ४। २४। ३।
"अपत्यत्रयमाधत्त शिखण्डिन्यां सुसम्मतम्॥"
शिखण्डविशिष्टा। यथा, महाभारते। ४। ६५। १।
"सा प्राद्रवत् काञ्चनमाल्यधारिणी
व्येहेन भाता प्रहिता यशस्विनी।
सुदक्षिणा वेदिविलग्नमध्या
सा पद्मपत्राभनिभा शिखण्डिनी॥")

शिखण्डी, [न्] पुं, मयूरपुच्छः। गाङ्गेयारिः। स तु द्रुपदराजपुत्रः। (अस्य जन्मादिविवरणं महाभारते। ५। १६० अध्याये द्रष्टव्यम्॥) मयूरः। इति मेदिनी॥ (यथा, रघुः। १३६।
"षड्जसंवादिनीः केका द्विधाभिन्नाः शिखण्डिभिः॥")
कुकुटः। बाणः। इति हेमचन्द्रः॥ गुञ्जा। स्वर्णयूथिका। इति राजनिर्घण्टः॥ विष्णुः। यथा। शिखण्डी नहुषो वृषेति तस्य सप्तमनामस्तोत्रम्॥ (शिवः। यथा, महाभारते। १३। १७। ३१।
"जटी चर्मी शिखण्डी च सर्वाङ्गः सर्वभावनः॥")

शिखरं, क्ली, (शिखास्त्यस्मिन्निति। "पृषोदरादयः।" ६। ३। १०९। अलोपादिसाधुः। ह्रस्वश्च।) पर्वताग्रम्। तत्पर्य्यायः। कूटम् २ अङ्गम् ३। इत्यमरः॥ शैलाग्रदेशकम् ४। इति शब्दरत्नावली॥ (यथा, महाभारते। १। १६। २७।
"विदारयन् गिरिशिखराणि पत्रिभिः॥")

शिखरः, पुं क्ली, (शिखास्त्यस्येति। शिखा+रः। ह्रस्वश्च।) वृक्षाग्रम्। तत्पर्य्यायः। शिरः २ अग्रम् ३। इत्यमरः॥ शिरम् ४। इति शब्दरत्नावली॥ प्राग्रम् ५। इति राजनिर्घण्टः॥ पर्वतशृङ्गम्। गुलकः। कक्षः। पक्वदाडिमबीजाग्रमाग्निकम्। सकलाग्रम्। इति मेदिनी॥ कोटिः। इति त्रिकाण्डशेषः॥

शिखरवासिनी, स्त्री, (शिखरे वसतीति। वस+णिनिः। ङीप्।) दुर्गा। इति त्रिकाण्डशेषः॥

शिखरा, स्त्री, सुरा। इति शब्दचन्द्रिका॥

शिखरिणी, स्त्री, रसाला। वृत्तभेदः। नारीरत्नम्। मल्लिका। रोमावली। इति मेदिनी॥ वृत्तभेदो यथा,—
"रसै रुद्रैश्छिन्ना य-म-न-स-भला गः शिखरिणी।"
करादस्य भ्रष्टे गतु शिखरिणी दृश्यति शिखी-र्विलीनाः सः सद्यं नियतमवधेयं तदखिलैः।
इति चस्यश्लोपानुचितनिहतालापजनितं
क्लिन्तं बिभ्रत् देवो जगदवतु गोवर्द्धनधरः॥"
इति छन्दोमञ्जर्य्याम् २ स्तवकः॥ नवमालिका। द्राक्षाविशेषः। इति राजनिर्घण्टः॥ मूर्व्वा। इति शब्दचन्द्रिका॥

शिखरी, [न्] पुं, (शिखरोऽस्त्यस्येति। शिखर+इनिः।) पर्वतः। (यथा, गीतायाम्। १०। २३।
"वसूनां पावकश्चास्मि मेरुः शिखरिणामहम्॥")
वृक्षः। अपामार्गः। इति मेदिनी॥ कोङ्गः। कोशटिः। इति हेमचन्द्रः। वल्लाकः। कर्कटशृङ्गी। कुङ्कुरुकः। यावशूकः। इति राजनिर्घण्टः॥ (कोटिविशिष्टे, त्रि। यथा, महाभारते। १। ७४। ४।
"दन्तैः शुक्लैः शिखरिभिः सिंहसंहननोमहान्॥")

शिखलोहितः, पुं, वृक्षविशेषः। इति शब्दचन्द्रिका॥ कुकुरसुड़ा इति भाषा॥

शिखा, स्त्री, (शीङ्+"शीङो रुट्च।" उणा० ५। २४। इति रक् रुट्चो गुणाभावश्च। स्त्रियां टाप्।) अग्निज्वाला। तत्पर्य्यायः। ज्वालः २ कीलः ३ अर्चिः ४ रोचिः ५ शिखा ६। इत्यमरः॥ (यथा, माघे। १। २०।
"विदिद्युते वाडवशातवेदसः
शिखाभिराशिष्ट इवाम्बुसंनिधिः॥")
पिङ्गलशिखाग्नेः शुभसूचकत्वं यथा, वायुपुराणे।
"अर्चिष्मान् पिङ्गलशिखः सर्पिःकाञ्चनसन्निभः।
स्निग्धः प्रदक्षिणश्चैव वह्निः स्यात् कार्य्यसिद्धये॥"
अग्नेरशुभलक्षणं यथा। ब्रह्मपुराणे।
"अस्थे रूक्षे वस्फुलिङ्गे वामावर्त्ते भयानके।
आर्द्रकाष्ठेऽग्नि सम्पन्ने फुत्कारवति पावके॥
क्षणार्द्धेऽपि सुदुर्गन्धे तथा जिह्वति मेदिनीम्।
आहुतीर्जुहुयात् यस्य तस्य नाशो भवेत् ध्रुवम्॥"
इति तिथितत्त्वम्॥
शिरोमध्यस्थकेशः। तत्पर्य्यायः। चूड़ा २ केशपाशी ३। इत्यमरः॥ चुटिका ४ चूटिका ५। इति शब्दरत्नावली॥ केशी ६ शिखण्डिका ७। इति हेमचन्द्रः॥ ॥ गायत्र्या शिखाबन्धनं यथा,—
"गायत्र्या तु शिखां बद्ध्वा नैर्ऋत्यां मन्त्रवित्ततः।
ग्रन्थिञ्च ततो बद्ध्वा सतः कर्म्म समारभेत्॥"

शूद्रस्य शिखाबन्धे मन्त्रो यथा,—
"ब्रह्मवाणीसहस्राणि शिववाणी शतानि च।
विष्णोर्नामसहस्रेण शिखाबन्धं करोम्यहम्॥"
शिखामोचनमन्त्रो यथा,—
"गच्छन्तु सकला देवा ब्रह्मविष्णुमहेश्वराः।
तिष्ठत्वत्राचला लक्ष्मीः शिखामुक्तं करोम्यहम्॥"॥
शिखाबन्धनानन्तरमाचमनं यथा,—
"निबद्धशिख आसीनो द्विज आचमनं चरेत्।
कृतोपवीतं सर्व्वत्र वाङ्मनःकायसंयतः॥"॥
मुक्तशिखस्याचमने दोषो यथा,—
"शिरः प्रावृत्य कण्ठं वा मुक्तकच्छशिखोऽपि वा।
अकृत्वा पादयोः शौचं आचान्तोऽप्यशुचिर्भवेत्॥"
इति आह्निकतत्त्वम्॥॥
शाखा। वर्हिचूड़ा। (यथा, महाभारते। १२। २८२। ५३।
"रत्नागतमथाश्वानां शिखोद्भेदश्च वर्हिणाम्॥")
लाङ्गलिकी। अग्रभागः। (यथा, भागवते। ६। १३। ४४।
"घटाशिखोद्धूतशिवाम्बुबिन्दुभिः॥")
चूड़ामात्रम्। प्रपदम्। इति मेदिनी॥ प्रधानम्। शिखा। इति हेमचन्द्रः॥ (यथा, कथासरित्सागरे। २१। ८५।
"स्फुरद्रत्नशिखाजालं धावन् मोहतमोपहम्॥")
स्वरश्चयः। इति शब्दरत्नावली॥

शिखाकन्दं, क्ली, (शिखायुक्तः कन्दो यस्य।) पलाण्डुनम्। इति राजनिर्घण्टः॥

शिखाष्टकः, पुं, काकमत्तः। इति हेमचन्द्रः॥

शिखातरुः, पुं, (शिखायाः दीपशिखायास्तरुरिव।) दीपवृक्षः। इति त्रिकाण्डशेषः॥ मिलसुज इति भाषा॥

शिखाधरः, पुं, (शिखाया धरः।) मयूरः। इति शब्दमाला॥ मञ्जुघोषः। इति त्रिकाण्डशेषः॥

शिखाधारः, पुं, (शिखां धरतीति। धृ+अण्।) मयूरः। इति शब्दरत्नावली॥

शिखामूलं, क्ली, (शिखायुक्तं मूलं यस्य।) पलाण्डुनम्। इति राजनिर्घण्टः॥

शिखायुः, पुं, मयूरशिखा। इति राजनिर्घण्टः॥

शिखावती, स्त्री, (शिखा विद्यतेऽस्याः। शिखा+मतुप्। मस्य वः। स्त्रियां ङीप्।) वल्ली। इति शब्दचन्द्रिका॥

शिखावरः, पुं, (शिखा विद्यते अस्य। शिखा+"दन्तशिखात् संज्ञायाम्।" ५। २। १३९। इति वलच्। रस्य लत्वम्।) पलाण्डुः। इति शब्दमाला॥

शिखावलः, पुं, (शिखा विद्यतेऽस्य। शिखा+"दन्तशिखात् संज्ञायाम्।" ५। २। १३९। इति वलच्।) मयूरः। इत्यमरः॥ (शिखावलनगरम्। शिखावला सूरसा। इति जाह्निका॥)

शिखावला, स्त्री, (शिखा+वलच्। टाप्।) मयूरशिखा। इति राजनिर्घण्टः॥

शिखावान्, [न्] पुं, (शिखा विद्यतेऽस्य। शिखा+मतुप्। मस्य वः।) अग्निः। चित्रकवृक्षः। इत्यमरः॥ केतुग्रहः। इति शब्दरत्नावली॥ शिखायुक्ते, त्रि॥ (यथा, मनौ।१।३८ श्लोके। "केतवः शिखावन्ति ज्योतींषि।" इति मेधातिथिकुल्लूकौ॥)

शिखावृक्षः, पुं, (शिखाया वृक्षः इव।) दीपवृक्षः। इति शिखातरुशब्ददर्शनात्॥

शिखावृद्धिः, स्त्री, (शिखेव वृद्धिर्यस्याः।) कायिका वृद्धिः। प्रातःकृत्यदेयलाभः। इति स्मृतिः॥

शिखिकण्ठं, क्ली, (शिखिनो मयूरस्य कण्ठ इव आकृतिर्यस्य।) तुत्थम्। इति रत्नमाला॥

शिखिग्रीवं, क्ली, (शिखिनः ग्रीवेव आकृतिर्यस्य।) तुत्थम्। इत्यमरः॥

शिखिध्वजः, पुं, (शिखिनो वह्नेर्ध्वज इव।) धूमः। इति त्रिकाण्डशेषः॥ (शिखी मयूरो ध्वजो यस्य।) कार्त्तिकेयः। इति शब्दरत्नावली॥

शिखिनी, स्त्री, (शिखा विद्यतेऽस्याः। इनिः। स्त्रियां ङीप्।) मयूरशिखा। इति राजनिर्घण्टः॥

शिखिपुच्छं, क्ली, (शिखिनः पुच्छम्।) मयूरपिच्छम्। यथा,—

"शिखण्डोऽस्त्री पिच्छवर्हं शिखिपुच्छशिखण्डके॥"

इति शब्दरत्नावली॥

शिखिप्रियः, पुं, (शिखिनः प्रियः।) जगुवदरः। इति राजनिर्घण्टः॥

शिखिमण्डलः, पुं, वरुणवृक्षः। इति शब्दरत्नावली॥

शिखिमोदा, स्त्री, (शिखिनं मोदयतीति। मुद्+णिच्+अच्। टाप्।) अजमोदा। इति राजनिर्घण्टः॥

शिखियूपः, पुं, श्रीकारी मृगः। इति राजनिर्घण्टः॥

शिखिवर्द्धकः, पुं, (शिखिनं जठराग्निं वर्द्धयतीति। वृध+ण्वुल्।) कुक्कुटः। इति शब्दरत्नावली॥

शिखिवाहनः, पुं, (शिखी वाहनं यस्य।) कार्त्तिकेयः। इत्यमरः॥

शिखिव्रतं, क्ली, (शिखिनो व्रतम्।) व्रतविशेषः। यथा,—

ब्रह्मोवाच।

"वक्ष्ये प्रतिपदादीनि व्रतानि यम शृणुताम्।
प्रतिपद्येकभक्ताशी समाप्ते कपिलाप्रदः।
वैश्वानरपदं याति शिखिव्रतमिदं स्मृतम्॥"

इति गारुडे १२६ अध्यायः॥

शिखी, [न्] पुं, (शिखास्यास्तीति। शिखा+"श्रीशिखादिभ्यश्च।"५।२।११६। इति इनिः।) मयूरः। (यथा, हरिवंशे भविष्यपर्व्वणि।३।२८।

"शिखिपत्रनिभः सर्पिषं न करोति हाटकान्दानि॥")

अग्निः। (यथा, महाभारते।४।५१।६।

"खड्गी च धन्वी च विभाति पार्थः
शिखी वृतः सुगभिरिवाप्यसिक्तः॥")

चित्रकवृक्षः। इत्यमरः। वलीवर्दः। शूरः। केतुग्रहः। द्रुमः। कुक्कुटः। इति मेदिनी॥ घोटकः। इति हेमचन्द्रः॥ अजलोमा। इति रत्नमाला॥ सितावरः। मेथिका। इति राजनिर्घण्टः॥ पर्व्वतः। ब्राह्मणः। दीपः। इति केचित्॥ शिखायुक्ते, त्रि। इति मेदिनी॥

शिग्रुः, पुं, (शेते स्वप्त्येऽपि वायौ। शी+"जन्यनिदृषिषिशीङ्भ्यश्च।" उणा० ४।१०२। इति रुः। डस्य गुणागमश्च।) शाकम्। इत्यमरः॥ वृक्षविशेषः। शजिना इति भाषा। तत्पर्य्यायः। हरितशाकः २ शाकपत्रः ३ सुपत्रकः ४ उपदंशः ५ क्षमादंशः ६ कोमलपत्रकः ७ बहुमूलः ८ दंशमूलः ९ तीक्ष्णमूलः १०। अस्य गुणाः। कटुत्वम्। तिक्तत्वम्। उष्णत्वम्। तीक्ष्णत्वम्। वातकफसुखजाड्यव्रणदोषहरत्वम्। दीपनत्वम्। रुच्यत्वञ्च। तस्य पञ्चशाकगुणाः। रुच्यत्वम्। वातकफकृमिनाशित्वम्। कटुत्वम्। उष्णत्वम्। दीपनत्वम्। पथ्यत्वम्। पाचनत्वञ्च॥* अपि च।

"शोभाञ्जनो नीलशिग्रुस्तीक्ष्णगन्धो जगप्रियः।
सुखमोदः कृमिशिग्रुश्चुक्यो रुचिराङ्गः॥
शोभाञ्जनस्तीक्ष्णकटुः स्वादुपाकः पित्तिश्लेष्महा।
जन्तुवातार्त्तिशूलघ्नश्चुक्यो रोचनः परः॥*॥
श्वेतशिग्रुः सुतीक्ष्णः स्याच्छुखभङ्गः सिताह्वयः।
सन्मूलः श्वेतमरिचो रोचनो मधुशिग्रुकः॥
श्वेतशिग्रुः कटुस्तीक्ष्णः शोफानिलनिकृन्तनः।
अङ्गव्यथाहरो रुच्यो दीपनो मुखजाड्यनुत्॥*॥
रक्तको रक्तशिग्रुः स्यान्मधुरो बहुलच्छदः।
सुगन्धिः केशरी सिंही मृगारिश्च प्रकीर्त्तितः॥
रक्तशिग्रुर्मेहवीर्य्यो मधुरश्च रसायनः।
शोफाध्मानसमीरार्त्तिपित्तश्लेष्मापसारकः॥"

इति राजनिर्घण्टः॥

(वाग्प्रस्थात्रभिर्गां तद्वत्यजणिषेधो यथा मनौ। ६।१४।

"वर्ज्ज्येन्मधुमांसञ्च भौमानि कवकानि च।
भूस्तृणं शिग्रुकञ्चैव श्लेष्मातकफलानि च॥"

"शिग्रुकं पाटलीपुत्रे प्रसिद्धं शाकम्।" इति मेधातिथिकुल्लूकौ॥)

शिग्रुजं, क्ली, (शिग्रोर्ज्जायते इति। जन+डः।) शोभाञ्जनबीजम्। तत्पर्य्यायः। श्वेतमरिचम्२। इत्यमरः॥ शिग्रुभवे, त्रि॥

शिग्रुबीजं, क्ली, (शिग्रोर्बीजम्।) शोभाञ्जनबीजम्। इति शब्दचन्द्रिका॥

शिघ, ट आघ्राणे। इति कविकल्पद्रुमः॥ (भ्वा० पर०-सक०-सेट्।) ट, शिङ्घति। इति दुर्गादासः॥

शिङ्घाणं, क्ली, (शिङ्घ+आनक्।) पृषोदरादित्वात् कलोपः। इत्युणादिवृत्तौ उज्ज्वलदत्तः।३।८३।) कान्तपत्रम्। लोहमलम्। नासिकामलम्। इति मेदिनी॥ शिङ्घानि इति भाषा॥

शिङ्घाणकः, पुं, (शिङ्घते इति। शिघ+"आगकौ लृधूशिंघिधाकभ्यः।" उणा० ३।८३। इति आणकः।) श्लेष्मा। इत्युणादिकोषः॥

शिङ्घाणकः, पुं क्ली, (शिङ्घ+आणकः।) नासिकामलम्। इत्युणादिकोषः॥

शिङ्घितं, त्रि, (शिङ्घ+क्तः।) घ्रातम्। इति शब्दरत्नावली॥

शिञ, इ ल कि ङ अस्फुटध्वनौ। इति कविकल्पद्रुमः॥ (चुरा०-पक्षे भ्वा०-अदा० च-आत्म०-अक०-सेट्।) अस्फुटध्वनिरिह भूषणकर्त्तृकएव। भूषणानान्तु शिञ्जितमित्यमरात्। इ, शिञ्जते। ल ड, शिञ्जते। कि ङ, शिञ्जयते शिञ्जते मञ्जीरम्। तालैः शिञ्जद्वलयसुभगैर्नर्त्तितः कान्तयाने इत्यत्र शिञ्जदिति गगनक्रतानित्यत्वादिति रमानाथः। वस्तुतस्तु शिङ्क्ते शिञ्जः पचाद्यजन्तत्वात् ततः शिञ्ज इवाचरतीति क्विपि शिञ्चन्तम्। इति दुर्गादासः॥

शिञ्जा, स्त्री, (शिञ्जि अयथोक्तशब्दे+"गुरोश्च हलः।" ३।३।१०३। इत्यः। टाप्।) भूषणशब्दः। इति शब्दरत्नावली॥ धनुर्गुणः। इति हेमचन्द्रः॥

शिञ्जितं, क्ली, (शिञ्ज+क्तः।) भूषणध्वनिः। इत्यमरः॥ (यथा,—

"नखानि विधुशङ्कया विरहिणी करेणावृणोत्
ततः किशलयभ्रमात् स्वयमधाक्षिपद्दूरतः।
ततो वलयशिञ्जितं भ्रमरगुञ्जिताशङ्कया
उदूरिति कुहूरवध्वनिधिया ततो मूर्च्छिता॥"

इत्युज्ज्वलः॥)

शिञ्जिनी, स्त्री, (शिञ्जति आकृष्टसत्ता शब्दायते इति। शिञ्ज+णिनिः। स्त्रियां ङीप्।) धनुर्गुणः। इत्यमरः॥ नूपुरः। इति हेमचन्द्रः॥

शिञ्जी, [न्] त्रि, भूषणशब्दविशिष्टः। शिञ्जा विद्यतेऽस्य इत्यर्थे इनिप्रत्ययेन निष्पन्नः॥

शिट, अनादरे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) शेटति खलं लोकः। इति दुर्गादासः॥

शिण्डाकी, स्त्री, खाद्यद्रव्यविशेषः। यथा,—

"शिण्डाकी राजिकायुक्तैः स्याम्मूलकदलद्रवैः।
सर्षपस्वरसैर्व्वापि प्रालिप्तपिण्डकसंयुतैः।
शिण्डाकी रोचनी गुर्व्वी पित्तश्लेष्मकरी स्मृता॥"

इति राजनिर्घण्टः॥

शितं, त्रि, (शो तनूकरणे+क्तः। "शाच्छोरन्यतरस्याम्।"७।४।४१। इति इकारादेशः।) दुर्ब्बलः। निशितः। इति मेदिनी॥ (यथा, रघौ।६।४२।

"धारां शितां रामपरश्वधस्य
समावयत्युत्पलपत्रसाराम्॥")

क्षुरः। इति विश्वः॥ (पुं, विश्वामित्रगोत्रीय ऋषिः। यथा, महाभारते।१३।४।५६।

"आङ्गिकी नैकटक् चैव शिलायूपः शितः शुचिः ॥")

शितद्रुः, स्त्री, शुनद्रुनदी। इत्यमरः ॥ शुतलज् इति ख्याता ॥ क्षीरमोरटः। इति रत्नमाला ॥

शितशूकः, पुं, (शितं निशितं शूकं यस्य।) यवः। इत्यमरः ॥ इत्यादिरित्येके इति भरतः ॥ गोधूमः। इति विकाण्डशेषः ॥

शितिः, त्रि, (शुक्लिः सौत्रो धातुः + "क्रमितमिशुक्लिसम्भामत इच्।" उणा० ४। १२१। इति इन्। स च किन्। अत एकारश्च।) शुक्लः। कृष्णः। (यथा, माघे। १५। ४८।

"शितिनारकानुमितनाम्न-
नयनमरणीक्षितं क्षुधा ॥")

भूर्जवृक्षे, पुं। इति मेदिनी ॥ यथा च।

"शितिच्छिदि सिते कृष्णे भूर्जे सारेऽपि च त्रयोः।"
इति शब्दरत्नावली ॥

शितिकण्ठः, पुं, (शितिः कण्ठे यस्य।) शिवः। इत्यमरः ॥ (यथा, भागवते। ४। ३। १२।

"यासां व्रजद्भिः शितिकण्ठ! मण्डितं
नभो विमानैः कलहंसपाण्डुभिः॥")

दानुषमक्षी। इति विकाण्डशेषः ॥ (यथा, महाभारते। १। ८०। ६।

"यदातु तान् विसृजन्ते वयांसि
तदा शुभाः शितिकण्ठाः पतङ्गाः ॥")

शितिचारः, पुं, शाकविशेषः। यथा,—

"शितिचारः स्वनपुत्रो पित्तघ्नः सुनिषण्णकम् ॥"
इति शटाधरः ॥

शितिच्छदः, पुं, (शितौ छदौ यस्य।) हंसः। इति शब्दरत्नावली ॥

शितिपक्षः, पुं, (शितौ शुक्लौ पक्षौ यस्य।) हंसः। इति शब्दरत्नावली ॥

शितिसारकः, पुं, (शितिः सारो यस्य।) तिन्दुकः। इत्यमरः ॥

शिथिरं, त्रि, (श्रथ + "अचिरशिशिरशिथिलेति।" उणा० १। ५४। इति किरच् प्रत्ययेन साधुः।) श्रथः। इति हेमचन्द्रः ॥ (यथा, भागवते। ४। २८। १५।

"शिथिलावयवो यर्हि मन्त्रौषधिबलैर्यथा ॥")

शिथिरं, क्लो, (श्रथ + किरच्।) मन्दबन्धनम्। मन्दत्वम्। इति संक्षिप्तसारोणादिवृत्तिः ॥ संयोगविशेषः। यथा,—

"प्रश्रथः शिथिलाख्यो यः संयोगस्तेन कथ्यते।"
इति मायापरिच्छेदः ॥

"प्रश्रथ इति सति शिथिलाख्य इति किंविदश्रथाख्यश्चैवायुतसिद्धसंयोगोऽपि अप्रश्रथत्वे वर्णमात्र संयोगः प्रश्रथ इत्येके। अत्र अप्रश्रथत्वं न हेयं परमाणुसंयोगस्य प्रश्रथत्वेऽपि न व्यभिचारित्वम्। भूयोऽवयवावच्छेदेनावच्छेदकसंयोगित्वरूपं वर्णमात्र संयोगः प्रश्रथः तेन परमाणुसंयोगो द्व्यणुकसंयोगो वा न प्रश्रथ इत्यपरे।" इति सिद्धान्तमुक्तावली-टीकादिनकरी।

शिनिः, पुं, क्षत्रियभेदः। इञ्प्रत्ययेन शैनेयः ॥ (यथा, महाभारते। २। ४। ३०।

"अक्रूरः कृतवर्म्मा च सत्यकश्च शिनेः सुतः ॥")

शिनेर्नप्ता, [तृ] पुं, सात्यकिः। इति विकाण्डशेषः ॥

शिपविष्टः, पुं, शिपिविष्टः। इत्यमरटीकायां रमानाथः ॥

शिपिः, पुं. रश्मिः। यथा,—

"श्लेष्मातु श्रयनयोगाच्च शिपिवारि प्रचक्षते।
तत्पानान्नक्तकाचैव शिपयो रश्मयो मताः।
तेषु प्रवेशात् विश्वेशः शिपिविष्ट इहोच्यते ॥"
इति यास्कवचनम् ॥

शिपिविष्टः, पुं, खलतिः। दुश्चर्म्मा। महेश्वरः। इत्यमरः ॥ कुष्ठी। इत्यमरटीकायां रायमुकुटः ॥ अस्य रूपान्तरम्। शिपविष्टः। शिपिपिष्टः। इत्यमरटीका ॥ विष्णुः। यथा,—

"नैकरूपो बृहद्रूपः शिपिविष्टः प्रकाशनः ॥"
इति तस्य सहस्रनामस्तोत्रं रमानाथच्च ॥
(पशुप्रविष्टे, त्रि। यथा, भागवते। ४।१६। ३५।
"पुरोडाशं निरवपन् शिपिविष्टाय विष्णवे ॥"
"शिपिषु पशुषु यज्ञरूपेण प्रविष्टाय। तथाच श्रुतिः यज्ञो वै विष्णुः पशवः शिपिः यज्ञ एव पशुषु प्रतितिष्ठतीति।" इति श्रीधरस्वामी ॥)

शिप्रः, पुं, खरोवरविशेषः। यथा,—

"एवं विवाह्य विधिवत् सौवर्णे मानसाचले।
अरुन्तुदौ वशिष्ठस्तु मोदमाप तया सह ॥
तत्र यत् पतितं तोयं मानसाचलकन्दरे।
विवाहावभृतार्थाय शान्त्यर्थं वसुधाकृतम् ॥
ब्रह्मविष्णुमहादेवपार्षिभिः वसुधीरितम्।
तत्तोयं सप्तधा भूत्वा पतितं मानसाचलात् ॥
हेमाद्रेः कन्दरे सानौ सरस्याश्च पृथक् पृथक्।
तत्तोयं पतितं शिप्रे देवभोग्ये सरोवरे।
तेन शिप्रा नदी जाता विष्णुना प्रेरिता
क्षितिम् ॥"
इति कालिकापुराणे २३ अध्यायः ॥

शिप्रा, स्त्री, नदीविशेषः। यथा,—

"ततो हिमवतः प्रस्थे प्रतीच्यां तत्पुरस्य च।
शिप्रं नाम सरः पूर्णं दृष्ट्वा पुण्यं हिमादयः ॥
तदुत्तानमासाद्य ब्रह्मशक्रादयः सुराः।
उपविष्टा यथान्यायं पुरस्कृत्य महेश्वरम् ॥
तं शिप्रसंज्ञकासारं मनोज्ञं सर्वदेहिनाम्।
शीतामलजलं सर्व्वैर्गंधैर्मानसमन्मिसम् ॥
दृष्ट्वा सर्वं सरस्तस्मिन् सौख्यकोऽभूद्दिवौकसि।
शिप्रां नाम नदीं तस्माच्चिरतां दक्षिणोदधिम्।
गच्छतीष्व दशार्णौ पावयन्तीं जगज्जनान् ॥"
इति कालिकापुराणे १८ अध्यायः ॥
(शुभः। यथा, ऋग्वेदे। ८। ६५। १०।
"उक्षितश्चोजसा सप्त पीवो शिप्रे अवेपयः।")
"शिप्रे नदू।" इति सङ्गाणे सायणः।)

शिफः, पुं, शिफा। इत्यमरटीकायां विज्ञानिधिः।

शिफा, स्त्री, वृक्षादीनां जटाकारमूलम्। शिफक् इति ख्यातम्। तस्यपर्य्यायः। जटा २। ब्रह्मसरः ॥ मूलम् ३। इति जटाधरः ॥ नदी (यथा, ऋग्वेदे। १। १०४। ३।

"इमे ते स्यातां प्रवणे शिफायाः।"
"शिफायाः शिफा नाम नद्यः तस्याः।" इति तद्भाष्ये सायणः ॥) मांसिका। माता। इति मेदिनी ॥ शुनपुष्पा। हरिद्रा। इति राजनिर्घण्टः ॥ पद्मकन्दः। इति सुकुटधृतस्वामी ॥ (लता। इति मेधातिथिः ॥ यथा, मानौ। ८। २६०।

"शिफाविदलरज्ज्वादेर्विदध्यान्नृपतिर्दमम् ॥")

शिफाकः, पुं, (शिफा इव। कन्।) पद्ममूलम्। इति शब्दरत्नावली ॥

शिफाकन्दः, पुं, (शिफायुक्तः कन्दो यस्य।) पद्ममूलम्। तत्पर्य्यायः। केरुहाटः २। इत्यमरः ॥ शिफाकः ३। इति शब्दरत्नावली ॥ पद्मकन्दः ४ कर्कटः ५। इति जटाधरः ॥ शिफा ६ कन्दः ७। इति सुकुटधृतस्वामी ॥

शिफाधरः, पुं, (शिफाया धरः।) शाखा। इति शब्दचन्द्रिका ॥

शिफारुहः, पुं, (शिफाया रोहतीति। रुह + कः।) वटवृक्षः। इति राजनिर्घण्टः ॥

शिम्बडी, स्त्री, क्षुपविशेषः। चाङ्गेरी इति हिन्दीभाषा। तत्पर्य्यायः। मतिदा २ वल्या ३ पञ्चाङ्गुलपत्रिणी ४ ह्रस्वत्वची ५ वातघ्नी ६ गुच्छपुष्पी ७। अस्या गुणाः। कटुत्वम्। उष्णत्वम्। वातदोषमूलनाशित्वम्। रसायने युक्ता चेत् देहदार्ढ्यकारित्वञ्च। इति राजनिर्घण्टः ॥

शिम्बः, पुं, चक्रमर्दकः। इति शब्दचन्द्रिका ॥

शिम्बा, स्त्री, (शिम्ब + टाप्।) कलायादिवल्ली। सुँटी इति छिमड़ा इति च भाषा। तत्पर्य्यायः। समी २। इत्यमरः ॥ छिमा ३ छिम्बी ४ शिम्बी ५ शिम्बिका ६ शिम्बि: ८। इति शब्दरत्नावली ॥ शमिः १०। इति हेमचन्द्रः ॥

शिम्बिः, स्त्री, शिम्बा। इति हेमचन्द्रः ॥ सरका। इति भावप्रकाशः ॥

शिम्बिकः, पुं, लताभेदः। यथा,—

"लक्ष्मे प्रवरयामन्तपरिमन्थशिम्बिकाः ॥"
इति हेमचन्द्रः ॥

शिम्बिका, स्त्री, (शिम्बि + कन्। टाप्।) शिम्बा। इति शब्दरत्नावली ॥

शिम्बिपर्णिका, स्त्री, (शिम्बिपर्णी + स्वार्थे कन्।) शुक्लपर्णी। इति रत्नमाला ॥

शिम्बिपर्णी, स्त्री, (शिम्बेः पर्णमिव पर्णमस्याः। ङीष्।) शुक्लपर्णी। इति शब्दचन्द्रिका ॥

शिम्बी, स्त्री, (शिम्बि + पक्षे ङीष्।) शिम्बा। इति शब्दरत्नावली ॥ (यथा, राजतरङ्गिण्याम्। १। १११।

"शुक्लाने कृष्णशुक्लाभां शिम्बीरसुफलोज्ज्वले ॥")

शुक्लपर्णी। कपिकच्छुः। इति राजनिर्घण्टः ॥

शिरः, पुं, पिण्डीतगन्धम्। इति मेदिनी। मस्तकम्। इति जटाधरः ॥ (यथा,—

"शिरः दद्यात् गयाशिरे।" इति वायुपुराणम्॥ "शिरो वाटी शिरोऽरन्तो रजोवाटी रजस्वला।" इति कोषान्तरम्॥") मुख्या। अजमरः। इति संक्षिप्तसारोणादिवृत्तिः॥

शिरः, [स्] क्ली, (शॄ+"अयते: खाङ्गे शिरः किच्च।" उणा० ४। १६३। असुन्। सच्च कित्। धातोः शिरादेशश्च।) शिखरम्। (यथा, महाभारते। ४। २३। २।

"यथा वज्रेण वै दीर्णं पर्व्वतस्य महच्छिरः॥") मस्तकम्। इत्यमरः॥ (यथा, लक्ष्मीचरित्रे।

"शिरः सपुष्पं चरणौ सुपूजितौ॥")

तच्च मासमात्रेण भवति। इति सुश्रुतबोधः॥ तद्गोगनाशकौषधम्। यथा,—

"शिरोरोगहरं लेपात् गुञ्जामूलं सकाञ्जिकम्।"

इति गारुडे १८८ अध्यायः॥

प्रधानम्। (यथा, भागवते। ५ २३। ४५।

"योगाय सांख्यशिरसे प्रकृतीश्वर ते नमः॥")

सैन्यम्। इति मेदिनी॥

शिरःकपाली, [न्] पुं, (शिरःकपालोऽस्यास्तीति। इनिः।) नरमस्तककपालधारी सन्न्यासी। इति केचित्॥

शिरःफलः, पुं, (शिरस्युत्थं फलं यस्य।) नारिकेलः। इति त्रिकाण्डशेषः॥

शिरःशूलं, क्ली, (शिरसः शूलम्।) मस्तकवेदनारोगः। (यथा, कथासरित्सागरे। १३। १५५।

"प्रातः सोऽपि शिरःशूलव्यपदेशेन वेदनम्। कृत्वा प्रच्छादयामास ललाटतटमङ्गितम्॥")

तस्यौषधं यथा,—

"श्वेतापराजिताम्लं पिप्पलीशुण्ठिसंयुतम्। परिषिष्टं शिरोलेपात् शिरःशूलविनाशनम्॥"

इति गारुडे १८८ अध्यायः॥

शिरजः, पुं, (शिराज्जायते इति। जन+डः।) केशः। इति शब्दरत्नावली॥

शिरसिजः, पुं, (शिरसि जायते इति। जन+डः।) केशः। इति जटाधरः॥ (यथा, माघे। ७। ६२।

"अथशिरसिजपाशपातभारा-दिव नितरां नतिमङ्गिरंसभागे॥")

शिरसिरुहः, पुं, (शिरसि रोहतीति। रुह+कः।) केशः। इति शब्दरत्नावली॥

शिरस्कं, क्ली, शिरस्त्राणम्। इति हेमचन्द्रः॥ शिरःसमन्विनि, त्रि॥

शिरस्कं, क्ली, (शिरस्यायते इति। चै+कः।) शिरोरुहसमूहः। टोप् इति ख्यातः। इत्यमरभरतौ॥ (यथा, राजतरङ्गिण्याम्। ५।४७।

"यद्भग्नं मध्येऽश्वधारायां गृह्यतेऽश्वयायिना। यद्भग्नञ्चोदग्रदण्डं शिरस्कं वामपाणिना॥")

शिरस्त्राणं, क्ली, (शिरस्यायते त्रायते अनेन। त्रै+ल्युट्।) शिरोरक्षणसमाहः। लोपड़ा इति टोप् इति च भाषा। तत्पर्य्यायः। शीर्षण्यम् २ शीर्षकम् ३ शिरस्कम् ४। इति हेमचन्द्रः॥ शिरस्त्रम् ५। इत्यमरः॥ (यथा, रघौ। ४। ६४।

"अपनीतशिरस्त्राणाः शैशवात् शरणं ययुः॥")

शिरस्यः, पुं, (शिरस्+"शाखादिभ्यो यत्।" ५। ३। १०३। इति यत्।) विशदकचः। तत्पर्य्यायः। शीर्षण्यः २। इत्यमरः॥ हे खतः स्नानादिना वा निर्म्मले अन्योन्यासंपृक्ते केशे। इति भरतः॥

शिरा, स्त्री, धमनिः। इति मेदिनी॥ शिर इति भाषा। अस्याः पर्य्यायादिकं नाड़ीशब्दे द्रष्टव्यम्॥

शिरापत्रः, पुं, (शिरायुक्तं पत्रं यस्य।) हिन्तालवृक्षः। इति राजनिर्घण्टः॥ कपित्थः। इति शब्दचन्द्रिका॥

शिरालं, क्ली, (शिराः सन्ति अस्य। "प्राणिस्थादातो लजन्यतरस्याम्।" ५। २। ६६। इति लच्।) कर्म्मरङ्गम्। इति शब्दचन्द्रिका॥ (शिरायुक्ते, त्रि। यथा, भट्टौ। २। ६०।

"व्याप्तिङ्गरूक्षोर्द्धशिरस्त्रबाले: शिरालजङ्घैर्गिरिकूटदम्भैः॥")

शिरालकः, पुं, (शिराल इव। कन्।) अस्थिभङ्गवृक्षः। इति शब्दचन्द्रिका॥ हाड़भाङ्गा इति भाषा॥

शिराविल्वं, क्ली, सोषकम्। इति राजनिर्घण्टः॥

शिरिः, पुं, (शृणात्यनेन+"कृशृदृपृकुटिभिरिक्षिदिभ्यश्च।" उणा० ४। १४२। इति इः। स च कित्।) खड्गः। शरः। हिंस्रः। इत्युणादिकोषः॥ शलभः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

शिरीषः, पुं, (शृणाति झटिति स्रायतीति। शॄ+"शॄदृभ्यां किच्च।" उणा० ४। २७। इति ईषन् सच्च कित्।) स्वनामख्यातवृक्षः। (यथा, कुमारे। ५। ४।

"पदं सहेत भ्रमरस्य पेलवं शिरीषपुष्पं न पुनः पतत्रिणः॥")

तत्पर्य्यायः। कपीतनः २ भण्डिलः ३। इत्यमरः॥ भण्डिरः ४ भण्डीरः ५ भण्डीलः ६। इति तट्टीका॥ मृदुपुष्पः ७ शुकतरुः ८ विषनाशनः ९। इति रत्नमाला॥ शीतपुष्पः १० भण्डिकः ११ स्वर्णपुष्पकः १२ शुकेष्टः १३ वर्षपुष्पः १४ विषघ्नः १५ सुपुष्पकः १६ उदानकः १७ शुकतरुः १८ लोमशपुष्पकः १९ कपीतकः २० कलिङ्गः २१ श्यामलः २२ शुक्लिनीफलः २३ मधुपुष्पः २४ वृत्तपुष्पः २५। पुस्तकान्तरे शुक्लिनीफलः २६ भण्डी २७ प्रवरः २८ शुकपुष्पः २९। अस्य गुणाः। कटुत्वम्। शीतत्वम्। विषवातपामासकुष्ठकण्डूतिव्रणदोषनाशित्वञ्च। इति राजनिर्घण्टः॥ अपि च।

"शिरीषो भण्डिलो भण्डी भण्डीरश्च कपीतनः। शुकपुष्पः शुकतरुर्मृदुपुष्पः शुकप्रियः॥

शिरीषो मधुरोऽनुष्णस्तिक्तश्च तुवरो लघुः। दोषशोथविसर्पघ्नः कासव्रणविषापहः॥"

इति भावप्रकाशः॥ * ॥

कण्टकशिरीषस्य पर्य्यायः।

"कटभी किणिही श्वेता महाश्वेता च रोहिणी।"

इति रत्नमाला॥ * ॥

अस्य गुणाः।

"शिरीषो विषवीसर्पक्लेदव्रणदोषशोथजित्।"

इति राजवल्लभः॥

शिरीषपत्रिका, स्त्री, (शिरीषस्य पत्रमिव पत्रमस्याः। ततः स्वार्थे कन्। टापि अत इत्वम्।) श्वेतकिणिही। इति राजनिर्घण्टः॥

शिरोगृहं, क्ली, (शिरसो गृहम्।) अट्टालिकोपरिगृहम्। तत्पर्य्यायः। चन्द्रशाला २। इति हेमचन्द्रः॥

शिरोग्रीवं, क्ली, शिरश्च ग्रीवा च द्वयोः समाहारः। यथा। द्वन्द्वैकत्वं अव्ययीभावश्च क्लीवे स्यात् द्वन्द्वस्य समासस्य एकत्वं समाहारद्वन्द्व इत्यर्थः। यथा, वाक्त्वं श्रीमज्जं पाणिपदं शिरोग्रीवम्। इति क्लीवलिङ्गसंग्रहटीकायां भरतः॥

शिरोधरा, स्त्री, (शिरसो धरा।) ग्रीवा। इति हेमचन्द्रः॥ (यथा, भागवते। ३। १७। १०।

"सङ्कीर्णवर्त्मोदनवह्निमध्य शिरोधराम्। व्यनक्षन् विविधा वाचो ग्रामसिंहास्तनस्वतः॥")

क्लीवलिङ्गेऽपि दृश्यते। यथा, तत्रैव। ३। १३। ३७।

"दीर्घानुजन्मोपसदः शिरोधरम्॥")

शिरोधिः, स्त्री, (शिरो धीयते अनया। धा+"कर्म्मण्यधिकरणे च।" ३। ३। ९३। इति किः।) ग्रीवा। इत्यमरः॥

शिरोमणिः, पुं स्त्री, (शिरसो मणिः।) मस्तकधार्य्यरत्नम्। तत्पर्य्यायः। चूड़ामणिः २ शिरोरत्नम् ३। इति शब्दरत्नावली॥ प्रधानस्य उपाधिविशेषश्च॥ (दृयोरुदाहरणम्। यथा,—

"यस्य सांसारिकी चिन्ता चिन्ता चिन्तामणेः कुतः।

तस्यैव हि शिरः कस्य क्व शिरोमणिधारणम्॥"

इत्युद्भटः॥)

शिरोमर्म्मा, [न्] पुं, (शिर एव मर्म्म यौवाधानं यस्य।) शूकरः। इति हेमचन्द्रः॥

शिरोरत्नं, क्ली, (शिरसो रत्नम्।) शिरोमणिः। इत्यमरः॥

शिरोरुजा, स्त्री, (शिरसि रुजतीति। रुज+कः। टाप्।) सन्निपातजन्यः। इति त्रिकाण्डशेषः॥ मस्तकरोगश्च॥

शिरोरुट्, [ट्] पुं, (शिरसि रोहतीति। रुह+किप्।) केशः। इति शब्दरत्नावली॥

शिरोरुहः, पुं, (शिरसि रोहतीति। रुह+कः।) केशः। इत्यमरः॥ (यथा, भागवते। ४। २८। ४४।

"चीरवासा व्रतश्यामा वेणीभूतशिरोरुहा॥")

शिरोरोगः, पुं, (शिरसो रोगः ।) मस्तकपीड़ा । यथा,—
अथ शिरोरोगाधिकारः । अत्र शिरोरोगस्य निदानं संख्याचाह ।
"शिरोरोगास्तु जायन्ते वातपित्तकफैस्त्रिभिः । सन्निपातेन रक्तेन क्षयेण कृमिभिस्तथा ॥ सूर्य्यावर्त्तानन्तवातशंखकार्द्धावभेदकाः । एकादशविधस्यास्य लक्षणानि प्रचक्षते ॥"
शिरोरोगा अत्र शिरोरोगः मूलरूपा रुगभिधीयते । वातपित्तकफैस्त्रिभिः । ननु वातपित्तकफैरित्युक्ते तत्त्वबोधात् । किमर्थं त्रिभिरिति पदम् । वातपित्तकफानां पृथक्कारणत्वबोधनार्थम् । तर्हि सर्व्व एव शिरोरोगाः सन्निपातसमुद्भवा इति कथम् । तदा वातादय उल्बणतया पृथक्कारणानि बोद्धव्यानि । क्षयेण रक्तादित्यत्रेव ॥ ॥ वातिकस्य लक्षणमाह ।
"यस्यानिमित्तं शिरसो रुजश्च भवन्ति तीव्रा निशि चातिमात्रम् वन्योपतापैः प्रशमश्च यत्र शिरोऽभितापः स समीरणेन ॥"
भवेदिति विशेषः । अनिमित्तं अतर्कितविप्रलब्धनिमित्तम् । निशि चातिमात्रं रात्रौ श्लेष्मैव रोगाधिक्यात् । प्रतापः स्वेदनम् । शिरोऽभितापः शिरःपीड़ा ॥ ॥ पैत्तिकमाह ।
"यस्योष्णमङ्गारचिभं यथैव भवेच्छिरो दह्यति गात्रिनाशम् । श्लेष्मेण रात्रौ च भवेच्छमञ्च शिरोऽभितापः स तु पित्तकोपात् ॥"
रक्तसंसर्गत्वात् ॥ ॥ श्लैष्मिकमाह ।
"शिरो भवेद्यस्य कफोपदिग्धं गुरु प्रतिश्यायमथो स्तिमग्धम् । सुप्तालिजाड्यावदनञ्च यस्य शिरोऽभितापः स कफप्रकोपात् ॥"
कफोपदिग्धं आमः कफलिप्तम् । प्रतिश्यं सञ्जशिरम् ॥ ॥ सान्निपातिकमाह ।
"शिरोऽभितापे चिरप्रवृत्ते गम्भीरि लिङ्गानि सहोद्भवन्ति ।" ॥ रक्तजमाह ।
"रक्तात्मिकाः पित्तसमानलिङ्गाः सर्व्वाणि रक्तस्य शिरसो भवेयुः ॥"
श्लैष्मिकाद्भेदकलिङ्गमाह । शिरःसन्धिसन्धिति ॥ ॥ क्षयजमाह ।
"क्षयात्मकानां क्षतसम्भवानां शिरोगतानामतिसंक्षयेण क्षयप्रवृत्तिः शिरसोऽभितापः सर्वो भवेदुत्तमकोत्तिमाङ्गम् ॥"
उत्तमाङ्गं शिरः । कचः केशाः । "कचो भवति कुटिले शिरो जिह्मालकेऽलके । केशो मायाजलादश्च शिरोरोगे क्षयात्मके ॥" इति भरतः ॥
"क्रिमिप्रकोपे कृमयः शिरोऽभिघातं संभक्षयन्तः स्फुटतीव भान्तः ।
घ्राणाच्च गच्छेद्रुधिरं सपूयं शिरोऽभितापः कृमिभिः सघोरः ॥"
संभक्षयन्तः कृमिभिरिति शेषः । घ्राणादिति चकारेण कृमिनिर्गमोऽपि बोध्यते ॥ ॥ सूर्य्यावर्त्तमाह ।
"सूर्य्योदयं या प्रतिमन्दमन्द-मधिभुवं रुक् समुपैति गाढ़म् । विवर्द्धते चांशुमता सहैव सूर्य्यावर्त्तौ विनिवर्त्तते च ॥ प्रीतेन घ्राणं लभते च किञ्चि-दुष्णेन चक्षुः सुखमाप्नुयाद्वा । सर्व्वात्मकं कष्टतमं विकारं सूर्य्यावर्त्तं तमुदाहरन्ति ॥"
सूर्य्योदयमिति लक्षीकृत्य आरभ्येति यावत् । सूर्य्यस्यावर्त्तौ सूर्य्यस्याधोगतौ ॥ ॥ अनन्तवातमाह ।
"दोषास्तु दुष्टाः स्वयमेवमन्या संपीड्य घाटां सरुजां सुतीव्राम् । कुर्व्वन्ति शीर्षच्छिभुवि प्रकृद्देशे स्थितिं करोत्याशु विशेषतस्तु ॥ गण्डस्य पार्श्वे तु करोति कम्पं हनुग्रहं लोचनजान् विकारान् । अनन्तवातं तमुदाहरन्ति दोषक्षयोत्थं शिरसो विकारम् ॥"
एवमन्दोऽत्राध्यर्धः । क्षयजनामनेकार्थत्वात् । सरुजां सस्य रुजां यथादाहगौरवादिरूपां दोषाः कुर्व्वन्ति । अयमनन्तवातः । स अनन्तवातः अक्ष्यादिषु स्थितिं करोति । विशेषतः गण्डपार्श्वे स्थितिं करोति । पीड़या स्थितिं कृत्वा कम्पादींश्च करोति ॥ ॥ शृङ्गकमाह ।
"पित्तरक्तानिला दुष्टाः शृङ्गदेशे विमूर्च्छिताः । तीव्रमुद्दाहरागं हि शीर्षे कुर्व्वन्ति दारुणम् ॥ स शिरोविषवेगान् निरुणद्धाशु गलं तथा । चिराच्चाप्योषितं हन्ति शृङ्गको नाम नामतः । चाक्षाप्नोषति भैषज्यं प्रत्याख्येयस्य कारयेत् ॥"
पित्तरक्तानिलाः अत्र कफोऽपि योज्यः । क्षतानुतापः कफपित्तरक्तैरिति सुश्रुतवचनात् । विमूर्च्छिताः प्रकृताः । स शीर्षः । चिराद्यात् चिराच्छब्दे मारयति ॥ ॥ अर्द्धावभेदकमाह ।
"रूक्षाशनाद्यध्यशनाद्यथाप्राप्यातमैथुनैः । वेगसंधारणायासव्यायामैः कुपितोऽनिलः ॥ केवलः सकफो वार्द्धं गृहीत्वा शिरसो बली । मन्याभ्रूशङ्खकर्णाक्षिललाटार्द्धेषु वेदनाम् ॥ प्रकुर्य्यान्निमिमं कृच्छ्राच्छीघ्रं चोत्क्लेशभेदकः । नयनं वाथवा श्रोत्रमभिहन्यो विनाशयेत् ॥"
व्यधका व्यधनाय । व्यायामः अतिबलेन भारोद्वहनादिभिः । व्यायामः खल्वयम् । प्रकुर्य्यान्निमिमं प्रकुर्य्यादेव वक्ष्यतीव वेदनाम् ॥ ॥ अथ शिरोरोगाणां चिकित्सा ।
"वातजाते शिरोरोगे स्नेहस्वेदौ विमर्दनम् । धान्याम्लोपनाहांश्च कुर्याद्वातामयापहान् ॥ कुष्ठमेरण्यगर्भे च नावने सक्त पेषितम् ।
कटूष्णं शिरसः पीड़ां भाङ्गे क्षेपनतो हरेत् ॥ रसः श्वासकुठारोत्थस्तस्य गर्भे विशेषतः । शिरःशूलं हरत्येव विधेयो नात्र संशयः ॥"
अथ शिरोवस्तिविधिः ।
"आशिरोव्यापि तच्चर्म षोड़शाङ्गुलसुच्छ्रितम् । तेनावेष्ट्य शिरोऽर्धस्थाम्याधकल्केन लेपयेत् ॥ निश्छलस्योपविष्टस्य तैलैः कोष्णैः प्रपूरयेत् । धारयेदारुजः शान्तेर्यामं यामार्द्धमेव च ॥ शिरोवस्तिर्हरत्येष शिरोरोगं मरुद्भवम् । हनुमन्याशिरकर्णाक्षिमर्दितं मूर्द्धकम्पनम् । विना भोजनमेवैष शिरोरुग्व्याः प्रमुच्यते ॥ दिनानि पञ्च वा सप्त नवानि दशभिरपि वा । ततोऽनीतस्नेहस्य मोक्षयेद्वस्तिबन्धनम् ॥ शिरोललाटवदनग्रीवादीनि विमर्द्दयेत् । सुखोष्णेनाम्बुना गात्रं प्रक्षाल्याम्बु हितम् ॥ आमिषं जाङ्गलं यूषं तत्र शाल्यादयोऽपि च । सुस्नानं मायाम् क्षुत्स्यांश्च खादेद्वा निशि केवलान् ॥
कटुकोष्णान् सघृतान् शुण्ठीं चीरं पिबेत्तथा । पित्तात्मके शिरोरोगे श्रीखण्डं चन्दनासवम् ॥ कुसुदोत्पलपद्मानां सर्पिषः क्षैरेयस्य माक्षिकः । सर्पिषः घृतधौतस्य शिरसा धारणं हितम् ॥ रसः श्वासकुठारोत्थः कर्पूरं कुङ्कुमं मधु । घृतं छागीपयः सर्व्वं वदनेनानुवर्त्तयेत् ॥ तस्य गर्भं भिषग्दद्यात् पित्तजायां शिरोरुजि । किन्तु मस्तकमूलेषु सर्व्वत्रैवं हितं मतम् ॥ गुड़नागरकल्कस्य गर्भं मस्तकमूलजित् ॥ ॥ रक्तजे पित्तवत् सर्व्वं भोजनाद्येमेवनम् ॥ शीतोष्णयोश्च विज्ञानो विशेषो रक्तमोक्षणम् । कफजे लङ्घनं स्वेदो रूक्षोष्णैः पावकात्मकैः ॥ सन्निपातभवे कार्य्या सन्निपातहरी क्रिया । पुराणसर्पिषः पानं विशेषेण हितं हि ॥
एरण्डमूलं तगरं घृताक्ता जीवन्तिका सैन्धवराजिके च । भृङ्गं विड़ङ्गं मधुयष्टिका च विश्वौषधं छागपतिस्य तैलम् ॥ अधोगयश्लेष्मविमिश्रितेषु चतुर्गुणं भृङ्गरसं विपक्वम् । षड्बिन्दवो नासिकयोः प्रदेयाः सर्व्वाणि हन्युः शिरसो विकारान् ॥ पुंसां च केशान् पलितांश्च दृष्ट्वा निर्व्यध्य सूक्ष्मान् प्रकटीकरोति । सुपर्व्वयप्रतिमञ्च चक्षुः कुर्व्वन्ति वाक्शेषधिकं बलञ्च ॥"
जीवन्तिका अत्र हरीतकी प्राकविशेषश्च । इति षड्बिन्दुतैलम् ॥ ॥
"क्षयजे क्षयनाशाय कर्त्तव्यो लेखनो विधिः । पाने नस्ये च सर्पिः स्यादन्नमेभैर्मुदे हितम् ॥ क्रमिजे दोषजप्रोक्तः शिरुबीजेन साधनम् । भल्लातकृतं नस्यं कार्य्यं कृमिहरं परम् ॥ सूर्य्यावर्त्ते विधातव्यं गल्ल वर्मादिभेषजम् । धौतेन सघृतं सर्पिरुष्णेनानुवासयेत् ॥

लावणं चीरसर्पिर्भ्यां पानञ्च चीरसर्पिषोः।
चीरसिद्धैस्तिलैः स्वेदो जीवनीयैश्च शस्यते॥
भृङ्गराजरसच्छागचीरतुल्यार्कतापितः॥
सूर्य्यावर्त्तं निहन्त्याशु नस्येनैव प्रयोगराट्।॥
अर्द्धावभेदके पूर्व्वं स्नेहस्वेदौ हि भेषजम्॥
विरेकः कायशुद्धिश्च धूपश्चिन्धीष्वभोजनम्।
विकृष्टानि तिलान् क्षौद्रान् समान् पिष्ट्वा
विलेपयेत्॥
नस्यं वाप्याचरेत्तस्मादर्द्धभेदं यथोदितम्।
पिबेत् सशर्करं क्षीरं नीरं वा नारिकेलजम्॥
तप्तौतं वापि पानीयं सर्पिर्वा नस्ततस्त्रयोः॥"
नस्तनः नासिकया पिबेदित्यन्वयः। त्रयोः
सूर्य्यावर्त्तार्द्धभेदयोः॥ * ॥
"अनन्तवातं कर्त्तव्यः सूर्य्यावर्त्तहितो विधिः।
शिराव्यधश्च कर्त्तव्योऽनन्तवातप्रशान्तये॥
आहारश्च प्रदातव्यो वातघ्नक्षविनाशनः।
मधुमस्तकसंयावघृतपूपैर्विशेषतः॥"
संयावः पक्वान्नविशेषः। इरकिया इति लोके।
स च मधुरशुक्लः मधुनोपलिप्तः। घृतपूरो-
ऽपूपः।
"पथ्याक्षधात्री रजनी गुडूची
भूनिम्बनिम्बैः सगुडः कषायः।
भृष्टत्कषायोऽभिशिरोऽर्त्तिशूलं
निहन्ति नासानिहितः क्षणेन॥"
इति पथ्यादिक्वाथः॥ * ॥
"दार्व्वी हरिद्रा मञ्जिष्ठा वचिनिम्बोशीरपद्मकम्।
व्रतप्रलेपनं कुर्य्याच्छुक्लस्य विनाशयेत्॥
पीततोयाभिषेकश्च शीतलक्षीरसेवनम्।
कर्त्तव्यश्च शिरोरुग्णां शुक्लेषु लेपनं हितम्॥"
सर्व्वेषु।
"यष्टीमधुसमाभागः स्यात् तूर्य्यांशन्तु विस्रमेवेत्।
तयोर्यूषेन्तु सप्ताहं स्नात्तन्तूर्णं सर्षपोम्मितम्॥
नासिकाभ्यन्तरं न्यस्तं सर्व्वां शीर्षव्यथां हरेत्।
दृष्टप्रयोगो योगोऽयमनुभावविभाषितः॥
आर्द्रं यष्टिरसक्षीरपूर्णं पूर्णं नवसादरम्।
उभयं पीडितं गव्याज्यस्य नस्यति शीर्षरुक्॥"
इति भावप्रकाशे शिरोरोगाधिकारः॥
शिरोवस्तिः, स्त्री, (शिरसोवस्तिः।) शिरःपीडा।
इति लोके प्रसिद्धिः॥ (यथा, कथासरित्सागरे।
२१। १५२।
"आगरेयातिपानेन शिरोवस्तिं व्यदिद्रुच।
प्रातः स तस्थौ वसेव वेष्टयित्वाहितं शिरः॥")
शिरोवस्ती, स्त्री, (शिरसो वस्तीव।) वस्तिपूड़ा।
इति शब्दचन्द्रिका॥
शिरोवेष्टं, क्ली, (शिरः एव वेष्टम्।) मस्तिष्कम्।
इति राजनिर्घण्टः॥
शिरोवेष्टकवत्, पुं, (शिरसि वृत्तं वर्त्तुलं यस्य।)
रक्तशालमत्स्यः। इति भावप्रकाशः॥
शिरोवेष्टः, पुं, (शिरो वेष्टयतीति। वेष्ट+अच्।)
पेटीरोगः। इति चिकित्सारत्नम्॥
शिरोवेष्टं, क्ली, (शिरो वेष्टयतीति। वेष्ट+
घञ्।) शिरस्त्राणम्। पागड़ी इति भाषा।
तत्पर्य्यायः। उष्णीषः २ वेष्टनम् ३ वेष्टकम् ४।
इति शब्दरत्नावली॥ शिरोवेष्टः ५ चैलो-
ष्टुकः ६। इति चिकाण्डशेषः॥
शिरोऽस्थि, क्ली, (शिरसोऽस्थि।) मस्तकास्थि।
माथार खुलि इति भाषा। तत्पर्य्यायः।
करोटिः २ शिरस्त्राणम् ३ शीर्षकम् ४। इति
राजनिर्घण्टः॥
शिल, शु उञ्छे। इति कविकल्पद्रुमः॥ (तुदा०-
पर०-सक०-सेट्।) उञ्छः उद्धृतशस्यशेषाहर-
णम्। शु, शिलति धान्यं दीनः। शेलिता।
इति दुर्गादासः॥
शिलः, पुं, क्ली, (शिल+कः।) उञ्छः। इति
मेदिनी॥ (यथा, भागवते। ११। १७। ४१।
"अन्याभ्यामेव जीवेत शिलैर्वा दोषदृक्
तयोः॥")
जीवनोपायविशेषः। यथा,—
"ऋताभ्यां जीवेत्तु ऋतेन प्रमृतेन वा।
सत्यानृताभ्यामपि वा न श्ववृत्त्या कदाचन॥
ऋतमुञ्छशिलं ज्ञेयममृतं स्यादयाचितम्।
मृतन्तु याचितं भैक्षं प्रमृतं कर्षणं स्मृतम्॥"
इति मानवे ४ अध्यायः॥
"अबाधितस्थानेषु पथि वा चैत्येषु वा गृहप्रति-
हतावकाशेषु यत्र यत्राधयो विद्युर्न्त तत्र
तत्रानुलोभ्यां एकैकं कणं समुच्चिनुयात्। इति
बौधायनदर्शनात्। एकैकधान्यादिगुडकोच्चय-
स्तूञ्छः। मञ्जर्य्यादिकानेकधान्याचयनं शिलः।
उञ्छश्च शिलश्च इत्येकवद्भावः। तत् सत्यसमान-
फलत्वादृतमित्युच्यते।"इति तट्टीकायां कुल्लूक-
भट्टः॥ (रघुवंशीयपारियात्रनृपपुत्रः। यथा,
रघुवंशे। १८। १७।
"तस्याभवत् ऋतुरदारशीलः
शिलः शिलापट्टविशालवक्षाः॥")
शिलगर्भजः, पुं, पाषाणभेदनः। इति राज-
निर्घण्टः॥
शिला, स्त्री, पाषाणः। (यथा, मनौ। २।
२०३।
"गोऽश्वोष्ट्रयानप्रासादप्रस्तरेषु कटेषु च।
आसीत गुरुणा सार्द्धं शिलाफलकनौषु च॥")
दारावधिःखतदारु। इत्यमरः॥ सम्भ्रीर्षम्।
मनःशिला। इति मेदिनी॥ कर्पूरः। इति
राजनिर्घण्टः॥
शिलाकर्णी, स्त्री, (शिलेव कर्णः कोणो यस्याः।
ङीप्।) शल्लकीवृक्षः। इति शब्दचन्द्रिका॥
शिलाकुट्टकः, पुं, (शिलां कुट्टयति दारयतीति।
कुट्ट+ण्वुल्।) टङ्कः। इति शब्दरत्नावली॥
शिलाजं, क्ली, (शिलायां जायते इति। जन+
डः।) शैलेयम्। इति शब्दचन्द्रिका॥ लोहम्।
इति राजनिर्घण्टः॥
शिलाजतु, क्ली, (शिलायां जतु।) पर्व्वतधातो-
रयसानुविशेषः। शिलाजित् इति हिन्दीभाषा।
तत्पर्य्यायः। मेरेयम् २ अश्मजम् ३ गिरिजम् ४
शुक्लाश्मजम् ५। इत्यमरः॥ शिलाजम् ६ अश्मजम्
७ शैलम् ८ अद्रिजम् ९। इति रत्नमाला॥
शैलेयम् १० शीतपुष्पकम् ११। इति शब्द-
चन्द्रिका॥ शिलायोधिः १२। इति चिकाण्ड-
शेषः॥ अश्मशोत्थम् १३ अश्मलाक्षा १४ अश्म-
जतुकम् १५ जतुश्मकम् १६। अस्य गुणाः।
तिक्तत्वम्। कटुत्वम्। उष्णत्वम्। रसायनत्वम्।
मेहोन्मादाश्मरीशोफकुष्ठापस्मारनाशित्वं च।
इति राजनिर्घण्टः॥ अपि च। शर्करासर्व-
रोगहरत्वम्। योगवाहित्वम्। अनुष्णशीत-
कत्वम्। इति राजवल्लभः॥ अस्योत्पत्तिनाम-
लक्षणगुणाः।
"निदाघे घर्मसन्तप्ता धातुसारं धराधराः।
निर्यासवत् प्रसुस्रन्ति तच्छिलाजतु कीर्त्तितम्॥
सौवर्णं राजतं ताम्रं त्रायमं तच्चतुर्विधम्।
शिलाजत्वद्विजतु च शैलनिर्यास इत्यपि॥
गैरेयमश्मजत्वापि गिरिजं शैलधातुजम्।
शिलाङ्गं कटुतिक्तोष्णं कटुपाकं रसायनम्॥
छेदि योगवहं हन्ति कफमेदोश्मशर्करा।
मूत्रकृच्छ्रं क्षयं श्वासं वातासाध्यांश्च
पाण्डुनाम्॥
व्यपस्मारं तथोन्मादं शोथकुष्ठोदरक्रिमीन्।
सौवर्णं श्वासपुष्पवर्णं भवति तन्मतात्॥
मधुरं कटुतिक्तञ्च शीतलं कटुपाकि च।
राजतं पाण्डुरं शीतं कटुकं स्वादुपाकि च॥
ताम्रं मयूरकण्ठाभं तत्तिक्तं लवणं भवेत्।
विपाके कटुकं शीतं सर्व्वश्रेष्ठसदाद्भुतम्॥"
इति भावप्रकाशः॥
शिलाञ्जनी, स्त्री, (शिलामञ्जयतीति। अञ्ज+
ल्युः। स्त्रियां ङीप्।) कालाञ्जनोद्भवः। इति
राजनिर्घण्टः॥
शिलाटकः, पुं, (शिलामटतीति। अट+ण्वुल्।)
अट्टः। विल्वम्। इति मेदिनी॥
शिलात्मजं, क्ली, (शिलाया आत्मजमिव।)
लोहम्। इति राजनिर्घण्टः॥
शिलातिका, स्त्री, लता। इति शब्दचन्द्रिका॥
शिलादट्टः, पुं, (शिलाया दट्टरिव।) शैलेयम्।
इति राजनिर्घण्टः॥
शिलाधातुः, पुं, (शिलानां धातुः।) सिलो-
पल। इति चिकाण्डशेषः॥ सङ्गी इति भाषा॥
गैरिकभेदः, स तु पीतवर्णः। इति राज-
निर्घण्टः॥
"सिलीयम् शिलाधातुर्म्मन्दरेत्या च मक्षकम्।
शिलाधातुर्विशेषस्तु विज्ञेयो लोकशाखतः॥"
इति शब्दरत्नावली॥
शिलापट्टः, पुं, (शिलायाः पट्टः।) पेषणयोग्य-
शिला। सिल् इति भाषा। तत्पर्य्यायः। अव-
खानः २ शिलापुत्रकः ३। इति शब्दरत्ना-
वली॥
शिलापुष्पं, क्ली, (शिलायाः पुष्पमिव।) शैले-
यम्। इति राजनिर्घण्टः॥

शिलाभवं, क्ली, (शिलाया भवः उत्पत्तिर्यस्य।) शैलेयम्। इति जटाधरः॥
शिलाभेदः, पुं, (शिलां भिनत्तीति। भिद्+अच्।) पाषाणभेदी वृक्षः। इति रत्नमाला॥ प्रस्तरभेदकाख्ये, क्ली॥
शिलारम्भा, स्त्री, (शिलेव दृढा रम्भा।) काष्ठकदली। इति राजनिर्घण्टः॥
शिलावल्का, स्त्री, (शिलेव कठिनो वल्को यस्याः।) औषधद्रव्यविशेषः। शिलावाक् इति हिन्दी भाषा। तत्पर्य्यायः। शिलजा २ शैलवल्कला ३ वल्कला ४ शैलगर्भाङ्गा ५ शिलात्वक् ६ श्वेता ७। अस्या गुणाः। हिमत्वम्। स्वादुत्वम्। अक्ष्णोरुष्णत्वरोधाश्मरीशूलज्वरपित्तनाशित्वञ्च। इति राजनिर्घण्टः॥
शिलाव्याधिः, पुं, (शिलाया व्याधिरिव।) शिलाजतु। इति चिकित्साशास्त्रम्॥
शिलासनं, क्ली, (शिला व्याप्तं यस्य।) शैलेयम्। इति शब्दरत्नावली॥ प्रस्तरनिर्म्मितासनञ्च॥
शिलासारं, क्ली, (शिलावत् सारो यत्र।) लोहम्। इति हेमचन्द्रः॥
शिलाङ्गं, क्ली, (शिला इत्याख्या यस्य।) शिलाजतु। इति भावप्रकाशः॥
शिलिः, पुं, भूर्णपत्रवृक्षः। इति शब्दमाला॥
शिलिः, स्त्री, दारावः स्थितकाष्ठम्। इति शब्दरत्नावली॥ गोबराट् इति भाषा॥
शिलिन्दः, पुं, मत्स्यविशेषः। यथा,—
"शिलिन्दः श्लेष्मलो वल्यो विपाके मधुरो गुरुः।
आमवातकरो वृष्यो वातपित्तहरो मतः॥"
इति राजवल्लभः॥
शिली, स्त्री, (शिलि+ऋदिकारादिति ङीष्।) दारावः स्थितकाष्ठम्।) इति शब्दरत्नावली॥ गण्डूपदी। क्षमाशीर्षम्। इति मेदिनी॥
शिलीन्ध्रं, क्ली, कदलीपुष्पम्। (यथा, माघे। ६। ३२।
"नवकदम्बरजोरुचितास्वरे-
रधिपुरन्ध्रि शिलीन्ध्रसुगन्धिभिः॥")
करका। इति मेदिनी॥ त्रिपुटा। इति विश्वः॥
शिलीन्ध्रः, पुं, वृक्षविशेषः। इति मेदिनी॥ मत्स्यविशेषः। स तु चित्रफलकमत्स्यः। इति जटाधरः॥
शिलीन्ध्रकं, क्ली, गोमयच्छत्रिका। यथा,—
"गोमयच्छत्रिकामाहुर्दिलीरञ्च शिलीन्ध्रकम्।"
इति हारावली॥
शिलीन्ध्री, स्त्री, विष्णुशीमेदः। गण्डूपदी। रुक्तिका। इति मेदिनी॥
शिलीपदः, पुं, (शिलेव स्थूलं पदमस्मात्।) पादरोगविशेषः। गोद इति भाषा। तत्पर्य्यायः। पादगलोदः २ श्लीपदः ३। इति शब्दरत्नावली॥ पादवल्मीकः २। इति हेमचन्द्रः॥ श्लीपदस्य विप्रकर्षं निदानमाह।
"पुराणोदकभूयिष्ठाः पल्वलेषु च शीतलाः।
ये देशास्तेषु जायन्ते श्लीपदानि विशेषतः॥"
विशेषत इति वचनेनान्यत्रापि श्लीपदानि भवन्ति इति बोध्यते॥* सामान्यं लक्षणमाह।
"यः सञ्चरो वंक्षणजो भृशार्त्तिः
शोथो नृणां पादगतः क्रमेण।
तत् श्लीपदं स्यात् करकर्कशेन-
श्लिश्लीपनासास्रपि केचिदाहुः॥"
तत्त्रिविधम्। वातिकं पैत्तिकं श्लैष्मिकञ्चेति। तेषां लक्षणमाह।
"वातजं रुक्षणारूक्षं हि स्फुटितं तीव्रवेदनम्।
अनिमित्तरुजञ्चास्य बहुशो ज्वर एव च॥*॥
पित्तजं पीतसङ्काशं दाहज्वरयुतं भृशम्॥*॥
श्लैष्मिकन्तु भवेत् स्निग्धं तथा पाण्डु गुरु स्थिरम्॥
लक्षणैस्तानि जानीयात् श्लीपदानि कफोक्कयात्।
गुरुत्वञ्च महत्त्वञ्च यस्मात्तस्मिन् विना कफात्॥"
असाध्यमाह।
"वल्मीकमिव संजातं कण्टकैरुपचीयते।
सर्व्वात्मकं महत्त्वञ्च वर्जनीयं विशेषतः॥
यत् श्लेष्मलाहारविहारजातै-
र्जातं तथा भूरिकफस्य पुंसः।
साध्यावमप्यु प्रतिसर्व्वलिङ्गं
सकण्टकं वापि विवर्ज्जनीयम्॥"
अस्य चिकित्सा।
"लङ्घनालेपनस्वेदरेचनै रक्तमोक्षणैः।
प्रायः श्लेष्महरैरुग्रैः श्लीपदं समुपाचरेत्॥
सिद्धार्थशोभाञ्जनदेवदारु-
विश्वौषधैर्मूत्रयुतैः प्रलिम्पेत्।
पुनर्नवा नागरसर्षपाणां
कल्केन वा काञ्जिकमिश्रितेन॥"
श्लीपदमिति शेषः।
"धत्तूरैरण्डनिर्गुण्डीवर्षाभूश्लिग्रुसर्षपैः।
प्रलेपः श्लीपदं हन्ति चिरोत्थमपि दारुणम्॥
असाध्यमपि यात्यन्तं श्लीपदं चिरकालजम्।
सूक्ष्मेण सह चूर्णाया तालमिश्रेण लेपनात्॥"
तालस्य फलरसो ग्राह्यः।
"सप्तलास्थूलपत्राणां कल्कं तक्रेण वारिणा।
संस्थं लवणोपेतं लेपितं श्लीपदं हरेत्॥
ग्राम्योष्ट्रवल्लकल्कार्थं गोमूत्रेण युतं पिबेत्।
श्लीपदानां विनाशाय मेदोदोषनिवृत्तये॥
रजनीं गुडसंयुक्तां गोमूत्रेण पिबेन्नरः।
वर्षोत्थं श्लीपदं हन्ति दुष्कृष्टं विशेषतः॥
वर्षाभूत्रिफलाचूर्णं पिप्पल्या सह योजितम्।
सर्पिर्मधुसमायुक्तं श्लीपदं जयेत्॥
गन्धर्व्वतैलमिश्रा हरीतकी गोऽसुना पिबति।
श्लीपदविबन्धसक्तो भवत्यसौ समरात्रेण॥"
गन्धर्व्वतैलं एरण्डतैलम्। गोऽसुना गोमूत्रेण।
इति भावप्रकाशः॥
शिलीमुखः, पुं, (शिलीव मुखं यस्य।) भ्रमरः। (यथा, रघुः। ६। ५७।
"कटेषु करिणां पेतुः पुन्नागेभ्यः शिलीमुखाः॥")
बाणः। इत्यमरः॥ (यथा, महाभारते। ४। ४०। ११।
"कस्यायं शायको दीर्घः शिलीपृष्ठः शिलीमुखः॥")
गुडम्। जड़ीभूतः। इति शब्दरत्नावली॥
शिलेयं, क्ली, (शिलायां भवम्। शिला+ढक्।) शैलेयम्। इति शब्दरत्नावली॥ शिलास्वन्यनि, त्रि॥ (शिलेव+"शिलाया ढक्।" ५। ३। १०२। इति ढक्।) शिलासदृशे च त्रि॥ यथा, शिलेयं दधि। इति काशिका॥)
शिलोच्चयः, पुं, (शिलाया उच्चयो यत्र।) पर्व्वतः। इत्यमरः॥ (यथा, रघुवंशे। २। २७।
"न पादपोन्मूलनशक्तिरंहः
शिलोच्चये मूर्च्छति मारुतस्य॥")
शिलोञ्छः, पुं, उञ्छशिलम्। उपात्तशस्यात् चैत्यात् शैलावचयनम्। उञ्छेन परिचर्य्यादानवदृग्रहणेन शिष्यते सञ्चीयते उञ्छशिलम्। उञ्छि शुद्धे शिल शुद्धे क्तोरित्युक्ते हृ ग इति रुडुत्वात् कः उञ्छशिलं संघातविगृहीतं विपर्य्यस्तम्।
"शक्यं न चेदुञ्छशिलेन वृत्तिः
फलेन मूलेन च वारिणा च।"
इति समाहारद्वन्द्वे। उञ्छं शिलञ्च।
"उञ्छमेवञ्च यत्तान्यत् तत् परिग्रहणं स्मृतम्;"
इति निगमाभिधाने क्लीवं पुमानुञ्छ ऋतं शिलं इति वोपालिते पुंस्युञ्छः।
"रघुकाराहृतसारे
परिगतवाक् कल्मकेदारे।
भवभूतिकृतशिलोञ्छे
तत्तलपतितं वयं चिनुमः॥"
इति गोवर्द्धनः। केचिदुञ्छशिलयोर्भेदमाहुः। प्रतिग्रहात् शिलं अयत्नतोऽप्युञ्छः प्रशस्यते इति। तत्र शाल्यादेर्निपातितपरित्यक्तमञ्जरीणां चादानं शिलम्। शिलं धान्यमञ्जरीसंग्रह इति स्वामी च। एकैकशः कणोत्पन्नधान्यकणोद्ग्रहणमुञ्छः। तदुक्तं उञ्छो धान्यकणोच्चयः इति। शिलं तालशादि दन्त्यादि च। इत्यमरटीकायां भरतः॥ (यथा, मनौ। ७। १३३।
"एवं वृत्तस्य नृपतेः शिलोञ्छेनापि जीवतः।
विस्तीर्य्यते यशो लोके तैलबिन्दुरिवाम्भसि॥")
शिलोत्थं, क्ली, (शिलाया उत्तिष्ठतीति। उत्+स्था+कः।) शैलेयम्। इति राजनिर्घण्टः॥
शिलोद्भवं, क्ली, (शिलाया उद्भवो यस्य।) शैलेयम्। इति राजनिर्घण्टः॥ चन्दनविशेषः। यथा,—
"सुशीतलं चन्दनं यत् तैलपर्णिकमुच्यते।
उभौ च तस्य पर्य्यायौ सोमयोनि शिलोद्भवम्॥"
इति शब्दचन्द्रिका॥
शिलौकाः, [स्] पुं, (शिला पर्व्वतः ओकः वासस्थानं यस्य।) गरुड़ः। इति चिकाण्डशेषः॥
शिल्पं, क्ली, (शील समाधौ+"सन्यङ्घञ्शिल्पशाय्यवाय्यपर्य्यवपर्य्यवस्याः।" उणा०। ३। २८। इति

प: कृञश्च ।) कलादिकं कर्म्म । इत्यमर: । कुनर इति पारसीकभाषा । कारिगरी इति हिन्दीभाषा । वात्स्यायनोक्तनृत्यगीतवाद्यादि-चतु:षष्टि: वाङ्मयक्रिया: तथा आलिङ्गनचुम्बनादिचतु:षष्टि: अभ्यन्तरक्रिया: कला: । आदिना स्वर्णकारादिकारुकर्म्मग्रह: । एतत् सर्व्वं शिल्पं कथ्यते । इति तट्टीकायां भरत: ॥ (यथा, कथासरित्सागरे । २५ । १७५ । "ते तन्निरूप्य जगदुर्नैष शिल्पं देवस्य शूलिन: । अपर: कर्त्तुमेतहि दिव्यं शिल्पं न मानुषम् ॥") सुव: । इति मेदिनी ॥

शिल्पकार:, पुं, (शिल्पं करोतीति । कृ + अण् ।) शिल्पी । शिल्पविद्याव्यवसायी । कारिकर इति भाषा । शिल्पं करोति इत्यर्थे अण्प्रत्ययेन निष्पन्न: ॥

शिल्पकारी, [न्] त्रि, (शिल्पं कर्त्तुं शीलमस्य । णिनि: ।) शिल्पकर्म्मकर्त्ता । तस्योत्पत्त्यादि यथा,—

"विश्वकर्म्मा च शूद्रायां वीर्य्याधानं चकार स: । ततो बभूवु: पुत्राश्च नवैते शिल्पकारिण: ॥ मालाकार: कर्म्मकार: शङ्खकार: कुविन्दक: । कुम्भकार: कांसकार: षड्वै शिल्पिन्य वरा: ॥ सूत्रधारश्चित्रकर: स्वर्णकारस्तथैव च । पतितास्ते ब्रह्मशापादभाग्या वर्णबाह्यका: ॥ स्वर्णकार: स्वर्णचौर्य्यात् ब्राह्मणानां द्विजोत्तम । बभूव सद्य: पतितो ब्रह्मशापेन कर्म्मणा ॥ सूत्रधारो द्विजातीनां शापेन पतितो भुवि । शीघ्रञ्च यज्ञकाष्ठञ्च न ददौ तेन हेतुना ॥ चित्रकर्म्मेव चित्राणां सद्यश्चित्रकरस्तथा । पतितो ब्रह्मशापेन ब्राह्मणानाञ्च कोपत: ॥ कर्म्मिष्ठत्विग्विशेषञ्च संसर्गात् स्वर्णकारिण: । स्वर्णचौर्य्यादिदोषेण पतितो ब्रह्मशापत: ॥" इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे १० अध्याय: ॥

शिल्पशाला, स्त्री स्त्री, (शिल्पानां शाला ।) स्वर्णकारादीनां कर्म्मगृहम् । कारखाना इति पारसीकभाषा । तत्पर्य्याय: । आवेशनम् २ । इत्यमर: ३ शिल्पिशाला ३ शिल्पशालम् ४ शिल्पिशालम् ५ । इति तट्टीका ॥

शिल्पशास्त्रं, क्ली, (शिल्पस्य शास्त्रम् ।) शिल्पकर्म्मग्रन्थ: । तत्तच्छास्त्रे यद्यत् मतं तत्तत्प्रसङ्गे वास्तुशास्त्रैकं लिख्यते । यथा,—

"स्त्रीपुत्रादिकभोगधीक्षणकरं धर्म्मार्थकामप्रदं
शत्रूणां भयदं सुखास्पदमिदं श्रीमातु धर्म्मास्पदम् ।
यावद्दैवबलादिदुष्यमतिनां मोहात् मसूनुष्यते
तावत् पूर्वसुकर्म्मतेन विदुषा: शिल्पिकर्म्मोदय: ॥

गिरौ गह्वरभूमिषु प्रथा
यदीदृशे भवि यत्नपरौ ।
अमात्यगोत्रे सुदृशे शिल्पिके
भूमं रचौ सौख्यमनोरमम् ॥

चैत्ये श्रीकरकं गृहादि रचितं स्वाम्याधवेऽर्थप्रदं
ध्येष्टे स्युकरं शुचौ पशुहरं तद्दहिदं आवधे ।
भूम्यं भाद्रपदेऽश्विने कलिकरं भत्यक्षयं कार्त्तिके
धान्यं मार्गसहस्रयोर्दहनभीमांधे स्त्रिय: फाल्गुने ॥
आदित्ये हरिकर्कनक्रघटगे पूर्व्वापरास्यं गृहं
कर्त्तव्यं तुलमेषवृश्चिकवृषे याम्योत्तरास्यं तथा ।
द्वारं भिन्नतया करोति कुमती रोगार्थनाशस्तदा
कन्यामीनधनुर्गते मिथुनगे चास्मिन् कार्य्यं गृहम् ॥
कन्यादित्रिषु पूर्व्वतो यमदिशि त्र्याण्यष्ट चापादितो
द्वारं पश्चिमतश्चिके जलचरात् सौम्ये रवौ युग्मत: ।
यस्माद्वृषसुखं दिशासु भवनं द्वारादिकं स्थानिकृत्
सिंहं वापि वृषस्थ वृश्चिकघटं वाते स्थितं सर्व्वत: ॥
प्राची मेषतुलारवावुदयति स्याद्वैश्वये वह्निभे
चित्राख्यातिमभग्गा निगदिता प्राची बुधै: सद्यधा ।
प्रासादो भवनं करोति नगरं दिङ्मूढमर्घक्षयं
धर्म्मे देवगृहे पुरे च नितरामायुर्धनं दिक्सुखे ॥
तारे मार्कटिके ध्रुवस्य समतां नीते वधे वैनते
दीपाग्नेय तदैक्यतश्च कथिता सूत्रेण सौम्या दिशा ।
शङ्कोर्नेत्रगुणेन ३६ मण्डलवरे छाया तयो-
र्मत्स्यथी-
र्जाता पञ्चगुणिम्नु शङ्कुसलतो याम्योत्तरेखत्-
चुटे: ॥
राशीनामसिमीनसिंहभवनं पूर्व्वासुखं शोभनं
कन्याकर्कटनक्रराशिगृहिणां याम्यानन मन्दिरम् ।
राशेर्धन्विनुलानुगस्य सदनं शस्तं प्रतीचीसुखं
पुंसां कुम्भवृषालराशिभवनं सौम्यानन स्यादृषम् ॥" ७ ॥

अथ भूपरिग्रह: ।

"श्वेता ब्राह्मणभूमिका च एतवह्न्या क्षुभ-
स्यादिनी
रक्ता क्षौत्रियमन्त्रिणी वृषभिभू: स्यादे क्षया
च मा ।
स्यादेरा निखलेऽम्बिरदिना पीता च वैश्या
मधौ
ज्ञाता मक्षणमन्त्रिणी च कटुका क्षत्रेति
भूसाधनम् ।

स्यादे भेदृषा मधुरा लिसामा
चतुर्थे वर्णेन मधौ प्रसक्ता ।
सैन्धालिका क्षमृगक्षद्वयौ
सौम्यादेवलास्त्रिपुरमधौ ॥ ८ ॥

परीक्षितायां भुवि विप्रराजं
समर्चयेत् चक्रिकया समेतम् ।
क्षेत्राधिपं चाष्टदिशाधिनाथान्
सुपुष्पधूपैर्बलिभि: सुखाय ॥
स्यातं भूमिपरीक्षणे करमितं तत् पूरयेत्तृन्दा
हीने हीनफलं समे समफ लाभो रजोवर्द्धिते ।
तत् कृत्वा जलपूर्णमाप्लुतपदं गत्वा परीक्ष्यं पुन:
पादोनेऽर्द्धविहीनकेऽथ निभृते मध्याधमेऽम्भसि ॥
भूमे: प्राक् प्रवणेषु शङ्करकुकुप्सौम्याश्रितं
सौख्यदं
वह्नौ वह्निभयं यमे च मरणं चौराश्रयं रक्षसि ।
वायव्ये प्रवणेषु धान्यहरणं स्वाम्यीकृतं वारुणं
विप्रादेरनुवर्णतश्च सुखदं दृष्टिक्रमात् सौम्यत: ॥
अर्थो राक्षसवायुशङ्करदिशि स्याद्या: क्रमात् कीलका:
अश्वत्थात् खदिरात् शिरीषककुभात् वृक्षात् क्रमेण द्विजा: ।
वर्णानां कुशसङ्कराग्रशयनं सत्वं क्रमात् सत्त्वयो
निम्ना भू: स्फुटितोपरा विलवती श्रेष्ठैर्युता गाशुभा ॥"

ककुभादित्यत्र वकुलादिति च पाठ: ॥ ७ ॥

"प्रश्नत्रयं यापि गृहाधिपेन
देवस्य वृक्षस्य फलस्य वापि ।
वाच्यं हि कोष्ठाक्षरसंयुतेन ।
सत्यं विलोक्यं भवनेषु सद्भा ॥
या का चा टा ता व ह सा पापवर्गा:
प्राच्यादिस्थे कोष्ठके शस्यमुक्तम् ।
केशाङ्गारा: काकसीदास्थिकाष्ठं
सस्यात् कार्य्यं शोधनं भूमिकाया: ॥
शस्यं गवां भूपभयं हयानां
सत्यं शुनोऽत्वो: कलहप्रधानौ ।
खरोष्ट्रयोर्हानिमपत्यनाशं
स्त्रीणामणस्यामिभयं तनोति ॥ ७ ॥

कन्यार्कौ रविवस्त्रये फलिसुखं पूर्व्वादिदृष्टिक्रमं
स्यातं पान्तुवपुर्दिशाश्रयगतं शाङ्कुलघ्नं शिर:।
द्वारं तस्य सुखे गृहादि भयदं दृष्टिक्षये
सौख्यदं
दु:खं प्राक्प्रवणने शिरोऽङ्घ्रिवपुष: कुर्य्यौ सुखं
दृष्टिदे ॥
प्राच्यां नागसुरं कुबेरमहिपं भाद्रादिभे
कार्त्तिके ।
मार्गांतु वासुनक्रमुक्षत: क्रमतया याम्ये घटे
श्रीधरे ।
पीठे चाष्टदिभाजिते दिनकरात्तारान्विते
सौख्यदान्
प्रत्यङ्गारकयोश्च सप्त फलिन: प्रारोहकं नी
वसेत् ॥७॥
शौचे मार्गशिरश्चय: प्रथमसौ स्याते कथा
पुष्यके
एषे चाश्विभवे च कृत्तिकभवे स्यात् पुष्यादा-
दिकम् ।

पूर्वास्योनिलखातनं यमसुखे खातं शिवे कारयेत्
श्रीगे पश्चिमगे च वह्निखननं सौम्ये खनेन्नैर्ऋते ।
दक्षिणकोणे पूर्वविभागे पूजनपूर्वं शिलां समर्प्या ।
स्थाप्या शेषशिला दिशन्तः क्षमाः समर्प्या विधानेन ।"॥६॥

अथ ग्रन्थान्तरीया ।

"खर्वं मित्तिशिलान्यासं खम्भस्यारोपणं तथा ।
पूर्वादिदिक्शिरोवामपार्श्वान्यासं प्रदक्षिणम् ।"
नारदः ।

"नभस्यादिषु मासेषु त्रिषु त्रिषु यथाक्रमम् ।
पूर्वादिदिक्शिरोवामपार्श्वान्यासं प्रदक्षिणम् ।"
वास्तुशास्त्रेऽप्युक्तम् ।

"वास्तोः शिरसि पृष्ठे च वामकुक्षौ च दक्षतः ।
आयुःकामः सदैवेह दशकुक्षौ स्वपेत् सुधीः ।
भित्तेर्मूलं स्थापनीयं खलान्ते
यागाग्रे वा वेदरन्ध्रैः समर्मम् ।
ग्रीवे मूर्ध्नि वेधदीनासिका वा
सन्धिस्थेभ्यः पादहीनार्धदण्डैः ।
भवनपुरसुरादां सद्मनी पूर्वसूक्तः
कथित इह एषिधाः शोधनेऽपि त्रिनीयः ।
तदनु सुखनिवेशे खम्भसंरोपणे स्या-
द्भवनवसनकाले पञ्चधा वास्तुयज्ञः ॥७॥
इषा दुग्धसकणकाञ्च कलिनस्याज्या गृहाद् दूरतः
प्राप्ते चण्डकपाटके च कदली जाती तथा केतकी ।
यामाद्रुद्रमणेश्चतुस्तरसा स्थाप्या न प्रज्ञा गृहे
मार्गे कस्य हरेर्वीणपुरतो वैनायुधस्यापि वा ॥
न दुग्धइषा कलिनस्य वापं
कुर्वन्ति ये कण्टकिनोऽभवन्ति ।
प्रज्ञाविनाशं कलिनः समीपे
गृहस्य पश्चात् कलधौतपूजाः ।
इषौ भूतसमाभिनोऽपि विद्वांसो नोपिदशेत् कलिनः
सद्भिल्लोच यमीमशीकवटजौ दुग्धाम-
यप्रदौ ।
शाखापुष्पफलप्रपञ्च विलसत् छत्रां वदे-
दाकिमीं
नीपादेः शुभदौ क्षयोदयपटावौदुम्बराश्व-
त्थकौ ।
उत्तङ्कश्रमणाभिगुप्तः प्रवेशः
स्यात् दुग्धदो भवस्य दृष्टात् ।
विनाशहेतुः शोकोत्पादकश्च
दृषा प्रज्ञां मर्मगोऽन्तिगो वा ।
प्रोक्तः प्रक्रियाक्षौ वरुणस्थितौ भवेत्
गृहिणो
नामार्के उदग्दृशौ दक्षयुतिर्यौ शीतगाप्-
पूर्वे ।

उत्तङ्गौ नरवाहनाभिवदनः कृष्णा यथा निर्मितः
प्राग्द्वारोऽपि च पूर्वगाद्गुरुदितो गेहे चतुर्द्वा पुरे ॥८॥
दृक्षः पर्व्वाष्टयुक्तो मुनिवररचितः पर्व्व चैकं त्रिमार्चं
मात्रा पर्व्वा यवानासुरमिलिता निखचा-
सुत्तमानाम् ।
पूर्व्वेखत्वारि पूर्वं तदनु च विभजेदङ्गुलैः पर्व्व-
पूर्व्वै-
र्निर्यत्नौ रक्तकाली मनुमय उदितः खादिरो
वंशधात्वोः ॥
ज्येष्ठोरणीमर्थवेदैरङ्गुलैः सौनीमर्कमथस्तु षट्
कन्यसौ
मार्क्षं पौलस्त्यकेन ग्रामनगरं क्षौणादिकं योजनम् ।
प्रासादप्रान्ते नृपस्य भवनं मध्येन धर्म्मादिकं
वार्तं पशूपस्यसम्भवेन प्रथनं क्षत्रासनाख्या-
दिकम् ॥ ९ ॥
यदौ वायुर्विश्वकर्म्मा हुताशो
मघा कालस्तोयप: सोमविष्णु: ।
पूर्व्वे देवा मूलतोऽन्तिंच मध्यात्
पश्चात्यं हृत्विद्देवैर्विभज्यम् ।
ईशौ भानवित्वष्ट्रिविधयः सूर्यश्च रुद्रो यमो
वैरूपो वसवोऽष्ट दन्तिवरणौ षड्वक्त्र इज्या
क्रिया ।
आर्यं वित्तपतिर्निशाकरजयौ श्रीवासुदेवौ दलौ
कामी विष्णुरिति क्रमेण मनवो दक्षे त्रयो-
विंशतिः ॥१०॥
उच्चाटनं रोगभयस्य दुःखं
वह्नेर्भयं पीडनकं प्रजायाः ।
स्वर्भानुगाशोरपि धनक्षयः स्यात्-
सौख्यः क्षमादैवतपीडनेन ॥ ११ ॥
यस्मात् यस्मात् पुण्यवीरन्तराले
त्यक्त्वा शार्च्चां मन्दिरादौ निवेशे ।
एतद्भूमौ वास्तुकर्म्मावसादौ
कार्यं विप्रं दुःखमाविष्करोति ।
तासौ द्वादशमात्रिकापरिमितस्तालत्रयं स्यात्
करः ।
पादोनद्विकरोऽपि जिष्णुरुदितस्त्रयस्त्रयस्तुभिः
करैः ।
क्षोणी रुद्रमहस्वगर्त्तसहितो हस्तात्र मनुमिता-
सार्क्षा योजनके भूमिरतिथा कोटीशतं
योजने: ।
सत्त्वाकर्षं तदिदृक्षतर्मीक्षं,
कार्यान्तं स्यादृक्षमर्कर्क्षम् ।
जातस्य ऋक्षात्रमसीरीयैश्च-
सिद्धस्य सुरासि वदन्ति सन्तः ।"
इति वास्तुशास्त्रे राजवल्लभमण्डने सिद्धा
नुक्रमवर्णनं नाम १ अध्यायः ॥ ४ ॥
"पर्व्वसोऽन्तरकक्षेषु भक्तिः स्तिरो मनिरात्
स्थिरो

तस्मादद्भूतमभूच्च भीतिजननं शावाद्दधिर्या
मधुः ।
तद्दैवे रभसा विगुप्त निहितं भूमावधोवक्त्रकं
देवानां रचनाय वास्तु पुरुषस्तेनैव पृष्टो बुधैः ॥
प्रासादे भवने तडागखनने कूपे च वापीखने
जीर्णोद्धारपुरे च यागभवने प्रारम्भनिर्म्मलेने ।
वास्तोः पूजनकं सुखाय कथितं पूजां विना
ह्यागवे
पादौ रक्षसि कं शिवेऽक्षि करयोः सन्धौ च
कोणद्वये ॥
क्षेत्राक्षतिर्व्वास्तुरिहार्चनीय-
स्त्रैकांशतोभागसहस्रयुक्तः ।
आधारशोऽष्टाष्टपदोऽपि तंत्र
चैकाधिकाशीतिपदस्तथैव ॥ ७ ॥
ग्रामे भूपतिमन्दिरे च नगरे पूज्यश्चतुःषष्टिके-
रेकाशीतिपदैः समस्तभवने जीर्णे नवाब्यांशकैः ।
प्रासादेऽथ शतांशकैस्तु सकले पूज्यस्तथा मण्डपे
कूपे षण्णवचन्द्रभागसहिते १९६ वापीतडागे
वने ॥
ईशौ मूर्द्धि समाश्रितः अवयवौ पर्जन्यनामा दिति-
रापस्तस्य गदे तदंशयुगले प्रोक्तौ चरयार्या-
दितिः ।
उक्तावर्यमभूधरौ सनयुगे स्यादापवत्सौ पृथि
मध्येऽदितिसुरास्य दक्षिणसुजे वामे च नागा-
दयः ॥
सावित्रः सविता च दक्षिणकरे वामे हुतं वहतां
सत्यैमैत्रभवस्तयोरविषये स्याज्जाभिधस्तेविधिः
मेढ्रे शक्रजयौ च जानुयुगले तौ वह्निरोगौ
स्फुटौ ॥
पूषो गन्धिगणाश्च वस्त्र विबुधाः कण्ठाः पदौ ।
मैत्रकः ॥ ९ ॥
ईशस्तु पर्जन्यजयेन्द्रसूर्याः
शक्षौ भृशाकाशगक्च पूर्वे ।
वह्निश्च पूषा वितथाभिधानौ
गृहक्षतः प्रेतपतिः क्रमेण ॥
गन्धर्वभृङ्गौ मृगपितृसंज्ञौ
दौवारसुग्रीवकपुष्पदन्ताः ।
असाधिनाधोऽक्षतरक्ष शेषः
स वायवस्थाधि च रोगनामा ॥
तुम्बरु भाटकुवेरसंज्ञा-
स्त्रैव वास्तौ दितितोऽदितिश्च ।
द्वात्रिंशदेते क्रमशोऽर्चनीया-
श्चण्डोदण्डेऽपि विदक्षाश्च मध्ये ॥
सावित्रमैत्रा दक्षिणतो जिष्णवाद्या
मैत्रोऽपरे सौम्यदिशाभिधानौ ।
एतौ शेषेऽक्षतरक्षश्च मध्यतोऽपि
ब्रह्मार्चनीयः सकलेषु कर्म्मसु ॥
आसामग्रयौ जिष्णुसौम्यौ
सावित्रमैत्रौ सविता भवेत ।
तौ हि सर्वेषु पक्षौ स्मृतौ
दक्षोत्तरेषु सौम्यौ च दक्षतः ॥

ईशानवाच्ये चरकी द्वितीये
विदारिका पूतनिका तृतीये ।
पापाभिधा मारुतकोणके तु
पूज्याः सुरा उक्तविधानतस्तु ॥ * ॥
ब्रह्मा वेदपदस्तु तेन समका देवार्यमाद्यास्त्रयो
कोणेऽष्टौ द्विपदास्तथाष्टमरुतः कोणेऽर्धभागाद् बहिः ।
प्रेषा एकपदाः सुरास्तु कथिता वेदांशके-६४
ऽथो नव
ब्रह्मा षट्पदिनोऽर्यमादिविबुधा ईशादयश्चैक-
कृतः ॥
ब्रह्मा कलांशो वसुनोऽर्यमाद्याः
कोणेऽष्ट वाह्येऽपि च सार्द्धभागाः ।
विधाटकोणे द्विपदास्तथाष्टौ
प्रेषाः सुरा एकपदाः प्रतांशे ॥*॥
ब्रह्मानिनांशैश्च उदितः शिवनोऽर्यमाद्याः
कोणेषु सार्द्धपदतोऽपि तथैव चाष्टौ ।
प्रेषा द्विभागसमका रविभागकोऽर्यं
पूज्यो रथाश्वगजवाहनकेऽभियन्ते ॥
यन्ते त्रयोदशपदैरपि पूजनीय-
स्तत् पञ्चविंशतिरजो दशतोऽर्यमाद्याः ।
कोणेऽत्र्योऽमरगणा बहिके कलांशा
भद्रेऽधिकं रविविभागपरे द्विभागाः ॥*॥
द्वात्रिंशत् कमलासनोऽर्यमसुखाः स्युः सूर्य-
भागा क्रमात्
कोणेऽन्त्येऽसुरा द्विभागसहिता वाह्येषु
सार्द्धांशकाः ।
अष्टौ रामपदाः पुनर्दितिपदका षड्भागिनोऽष्टौ
सुराः
क्षेत्रे यमवसुचन्द्रभागसहिते १८६ स्याद्देवतानां
क्रमः ॥ * ॥
वेदांशो विधिरर्यमप्रभृतयस्त्रंशा नवस्वष्टके
कोणेऽन्त्येऽपदार्द्धगाः परसुरा षड्भागहीने
पदे ।
वास्तोर्नन्दयुगांश ४८ एवमधुनाशेषेषु तुः-
यष्टिके
सर्वैः खत्रमितान् सुधीः परिहरेद्भित्तीस्तुला-
स्तम्भकान् ॥ * ॥
रेखाद्वयं कोणगतं विधेय-
मंशान्तरेणैव तु कर्णसंज्ञात् ।
यदृच्छयैः कथितं तु पद्मं
सर्वोपजीव्यान् स्वामिधनप्रमाणः ॥
प्रोक्तं चतुर्विंशतिलाक्षुजं यत्
पादार्द्धगं धानिकरं प्रजायाः ।
षड्भिस्तु खत्रैर्मरणाय पद्मं
कोणे त्रिशूलस्य रिपोर्भयाय ॥
परीक्ष्य भूमीमपसेधयेत्तां
मृत्पाषाणेन ततो विनेया ।
रेखा सुवर्णेन मणिप्रवालैः
पिष्टाक्षतैर्जात्यपि पुंनकृद्भिः ॥
द्वात्रिंशदंशाः पृथुके च पद्मे
कोणेषु तस्यां त्रिनवैकभागाः ।

रसतृपदानां कथितं सहस्रं
क्षेत्रेषु सर्वोत्तममेव वास्तोः ॥ * ॥
मध्ये ब्रह्मा पूजनीयः घृतांशै-
श्चत्वारिंशद्भिः पदैर्बाह्यवीथी ।
प्रोक्ता देवा अर्यमाद्या अशीत्या
मध्ये कोणेऽष्टौ घृतं चाष्टषष्ट्या ॥
कोणेऽन्त्ययो गन्धपदैः सुराश्च
प्रेषाश्च बाह्ये वसुभागिनश्च ।
वीथी च बाह्ये रविभागयुक्तं
घृतं पदानां कथितं मुनीन्द्रैः ॥
दुर्गप्रतिष्ठाविधये निवेशे
तथा महार्चासु च कोटिहोमे ।
मेरौ च राष्ट्रेष्वपि ज्येष्ठसिद्धे
वास्तुः सहस्रेण पदैः प्रपूज्यः ॥*॥
त्रिमेखलं शूकरदन्तिभागे
कुण्डं प्रकुर्यात् करतो युगांसम् ।
होमं सुरागां घृतमष्टयुक्तं
प्रत्येकमष्टाधिकविंशतिं वा ॥
मध्याज्यदुग्धैर्दधिशर्कराभ्यां
क्षौद्रेक्षुसिक्तैर्व्रीहियवैर्वनाद्यैः ।
पलाशदूर्वाङ्कुरदुग्धवृक्षै-
र्होमं तदन्ते सुरपूजनञ्च ॥
ईशे घृतान्नमपरे सघृतौदनञ्च
दद्याज्ज्यायै हरितामरमेव कूर्म्मम् ।
रत्नानि पिष्टकमयं कलिशं सुरेन्द्रे
धूम्रं वितानमुदितञ्च दिवाकरस्य ॥
गोधूमयुक्तं घृतमेव मत्स्ये
मत्स्यान् शशे शष्कुलिमग्नरीक्षे ।
वह्नौ सुचं पूर्णि तथैव लाजा
दद्यादधर्मे चणकौदनञ्च ॥
मध्यन्नञ्च गृहक्षताय यमनो मांसौदनं दापयेत्
गन्धर्वे घृतपत्रमोदनयुतं भृङ्गेऽण्डसिद्धा तथा ।
प्रोक्ता नीलजवा मृगाय पितृतो देयाश्च सक्तो-
दकाः
प्रेषं क्षणबलिं तथैव विधिवद्दद्याच्च दौवारिके ॥
सुग्रीवाय च पूपका गणवरे श्वेतप्रसूनं पयः
पद्मं वारुणके सुराप्यसुरके तैलं तिलाः शेषके ।
पापाख्येऽपि च पक्वमांसमुदितं रोगाय सर्वौ-
षधीः
गोक्षीरं फणिने च मुख्यविबुधे श्रीखण्डभक्षे
तथा ॥
भल्लाटाय सुवर्णकं धनपतौ मण्डाज्यदुग्धं तथा
शुक्लान् पर्वतकैरदितेषु सपिकां दद्याद्दितौ
पूरिकाम् ।
सक्षीरं दधिकं क्रमेण विहितं त्वापापवर्त्से तथा-
ऽर्यमृगेऽरुणचन्दनञ्च पयसा युक्ता तथा
शर्करा ।
सावित्रेऽपि च लड्डुकाश्च सवितुः पूपा गुडा
सदृघृता
देयं वाथ विवस्वते घृतयुतं दुग्धं तथा मोदकाः ।
इन्द्राग्न्ये कुसुमसगन्धयवकं देयं तथा चम्पकं
मैत्रे दध्यन्नञ्च गुडघृतयुतौ गन्धस्तथा रक्तके ।

तत्सिद्धमन्नन्त्वपि रुद्रदासे
सद्वत्रमालां पृथिवीधराय ।
पयस्वलां गामथ दन्तं घटस्थ
दद्यादिधौ स्वर्णमनोऽखिलेभ्यः ॥
सुरास्थि मांसं विहितं चरक्ये
तथैव पीनोदरकौ विदार्य्यै ।
रक्तौदनैः पूतनिकार्चनीया
मत्स्यासवेनापि तथैव पापाः ॥
मांसं पक्वं पिलिपिञ्जाय तज्जृम्भाये विहितं
सद्यः ।
स्कन्दाय तस्मद्विरायुक्तं चार्यम्णे दधि
पूर्वादौ ॥
यः पूजयेद्वास्तुमनन्ययुक्ता
न तस्य दुःखं भवनीह किञ्चित् ।
जीवत्यसौ वर्षशतं सुखेन
स्वर्गे नरस्तिष्ठति कल्पमेकम् ॥"
इति श्रीसूत्रधारमण्डनविरचिते वास्तुशास्त्रे
राजवल्लभे वास्तुलक्षणम् [illegible]ध्यायः ॥ * ॥
"आयर्क्षव्ययतारकांशकविधुं राशिं ग्रहाद्यं
तथा
धान्यं सौख्ययशोऽभिवृद्धिरधिका यस्मादतः
कथ्यते ।
आयास्तु ध्वजधूमसिंहशुनका गोराक्षभेभाः
क्रमात्
ध्वाङ्क्षखरौ आयभेषु विषमाः प्रेष्ठाः सुरागां
गृहे ॥
मानं देवगृहादिभूपसदने प्राक्कीर्तितक्षेण तत्
गेहे कर्मकरस्य नाथकरतः प्राक्षेण देयं गृहे ।
अथो दण्डकराङ्गुलादिमपि ते दक्षाङ्गुलैरंगतः
क्षेत्रस्याप्यणुमानतोऽपि नगरे दक्षेन मानं पुरे ॥
आयः कल्पतरुर्हस्तमेयैः करैश्च
क्षेत्रे मात्रानिर्मिते मात्रकाभिः ।
मध्ये पर्यङ्कामने मन्दिरे च
देवागारे मण्डपे भित्तिवाह्ये ॥
क्षत्रे देवगृहे द्विजस्य भवने स्यादेदिकायां जले
विस्तारोच्छ्रयवज्रभूषणमटागारेषु शस्तो ध्वजः ।
धूमो वह्निपजीविनामपि गृहे कुण्डे च होमो-
द्भवे
सिंहद्वारनृपालयेऽक्षनिचये सिंहश्च सिंहा-
सने ॥
चण्डाले शुनको विप्राणु वृषभो वैश्ये वयानां
स्थितौ
वाणिज्ये धनभोजनस्य भवनेऽश्वो वाद्यगेहे
खरः ।
वादित्रे स्वरजीविनामपि गृहे प्रौढे गजो
योजितो
याने स्त्रीगृहवाहने च शयने शस्तो गृहे क्षत्रि-
याम् ॥
ध्वाङ्क्षः शिल्पिनपक्षिणां क्षितिकरक्षेत्रे गुरुं
नामवत्
ध्वाङ्क्षः काकसुतो विडालवदनो धूमो ध्वजो
मानुषः ।

मर्क्षे पक्षिपदा हरेरिव गती हस्तौ नरस्येव तु
प्राच्या: पश्चिमगा: क्रमेण मनवो ज्ञेयौ च ते
समुखा: ॥६॥
देया: सिंहगजध्वजादिदृशमे सिंहध्वजो कुञ्जरे
सिंहो वै ध्वज एष्यते न वृषभोऽश्वाऽपि देयो
बुधै: ।
सिंहो हस्तिदृशासये स्तिकरस्यायस्य वक्त्रं
गृहं
तस्मिन्नेव च वामदक्षिणदिशाद्वारे स जाय:
शुभ: ॥
शाके दैर्घ्यगुणेऽष्टभिर्विभजिते शेषो ध्वजाया-
यको-
ऽष्टघ्ने तद्गुणिते च विंशभजिते स्याद्दण्डमक्षा-
दिकम् ।
गजे वसुभिर्यमोऽपि भजिते हीनस्तु लक्ष्मी-
प्रद-
स्तुल्यायस्य विशाचको ध्वजहते संवर्द्धनो
राक्षस: ॥
तस्मात् व्ययर्क्षनामसहिते भक्ते त्रिभिस्तं
शक:
स्यादिन्दोपमभूपतिक्रमवशाद्देवे सुरेन्द्रो स्थित:।
वेद्यामेव यमस्तु पुण्यभवने नागे तथा भैरवे
राजांशो गजवाजियाननगरे राजालये
मन्दिरे ॥८॥
यावद्गृहर्क्षं गणयेत् स्वधिष्ण्या-
त्तारात्रिभक्ते नवभिश्च शेषा: ।
बुधैस्तनोया सकले विवर्ज्या
या पञ्चमी सप्तमिका न शस्ता ॥
विष्टायोऽष्ट च सप्तम: क्रमनया वह्नेस्तु पूर्वादित:
स्वस्था तानि भवन्ति यत्र गृहभं तत्रैव चन्द्रो
भवेत् ।
दानं पुष्कलत: करोति पुरतस्त्वायु:क्षयं
चन्द्रमा:
पार्श्वे दक्षिणवामके शुभकरोऽर्थे देवभूपालये ॥
प्रीति: स्यात् सप्तसप्तमो च दशमो धैकादशो
श्रीभवा
दारिद्र्यं दुखदा करोति मरणं षष्ठो कलि:
पञ्चमी ।
नैसोऽभिजिति हरिस्तु पिङ्गभाषाभक्षये
मलत:
शैवे: स्तुत्वेव राज्ञय: परमसे सन्त्यागकैस्ते
पृथक् ॥
सौम्ये श्रविष्ठत्रयेऽर्कपतुले शुक्रस्य वारेऽहिर्बुध्न्य
जन्मगृहस्य कर्कसदृशं चन्द्रस्य सिंहो वर्ये:
सौम्ये मीनवृषालिकर्कसहिते मन्दस्य मेषं मृतं
सिंहाजाकृतिकैर्गृहैर्गणयतो वारक्षके निष:
दैवज्ञे गणितुस्त्रिभिश्चमसत: मेषादिकं पौरुषं
चन्द्रादित्यमनोगृहक्षविधो पूर्वोदया
दक्षमम् ।
सर्वेऽप्यत्रिविधाश्चिकादिविहगं त्रिधा अनिरुद्ध-
वर्षं

ज्येष्ठाश्लेषमघोद्भ दैत्यमनुजे स्तम्भस्तु देवे कलि: ॥
वैरं चोत्तरफल्गुनीयुगलयो: स्वातीभरण्यो-
र्द्वयो
रोहिण्युत्तरषाढ़यो: श्रुतिपुनर्वस्वोर्विरोधं
तथा ।
चित्राहस्तभयोश्च पुष्यरविनोर्ज्येष्ठाविशाखा-
ख्ययो:
प्रासादे भवनारम्भे च शयने नक्षत्रवैरं त्यजेत् ॥
विप्रा: कर्कभवालिनो निगदिता: सिंहाजचापा
वृषा
विट्कन्या मकरी वृषोऽथ वृषला युग्मश्च
कुम्भस्तुला ।
वर्णोत्तमकामिनी च भवनं वर्ण्यं बुधैर्यत्नत:
त्रेष्ठा द्वादश नन्दरागगुणतो विप्रक्रमाद्राशय: ॥
अम्भोऽग्निनीशृतमर्थोर्यमपूषि हस्तौ
छागोऽग्निपुष्य उरगोऽपि विधाऽत्वसौम्ये ।
मूलार्द्रयो: शुनक ओतुरदावदित्ये
पूर्वा मघासु मत उन्दुरुरेव योनि: ॥
गौर्भद्रोत्तरफल्गुनीत उदिता स्वातौ करे
माहिषी
आश्लाश्वाश्विशाखयोश्च हरिणौ ज्येष्ठानु-
राधाभयो: ।
पूषाऽश्वयुजे कपिर्निगदितो वैश्वाभिजिन्नाकुलं
पूभाद्यां वसुभे स्वगेन्द्र उदितो वैरं त्यजेज्जोकत:॥
आयर्क्षनारा अयमंशकश्च
लोकत्र कृत्वा विभजेत् क्रमेण ।
निघ्ना च वारेश नखैव लब्धै:
शेषैस्तु भाग्यैव भवेयुरङ्के: ॥
दैर्घ्यं पृथुत्वेन च ताडनीयं
तयोर्यदैक्यं पुनरष्टशेषम् ।
शेषेऽधिनाथो वसुभाजितेऽस्मिन्
सम: प्रशस्तो विषमस्तु नैव ॥ ७ ॥
वर्गाष्टकस्य पतयो गरुडो विडाल:
सिंहश्वैव शुनकोरगमूषकेका: ।
मेढ़ाककारुच-ट-ता: प-य-शाश्च वर्गा
य: पञ्चम: स रिपुरेव बुधैर्निवर्ज्य: ॥
अश्विन्यादिकभत्रयं प्रतिनिभं चक्रं विनाभ्यु-
दयं
शेषेऽस्मिन् वरकन्ययोश्च यदि भं तन्मृत्युदं चांशत:॥
नाड़ीसेवकमित्रगेऽष्टपुरतस्त्येका शुभा सप्तधा
आद्यादित्रिकपञ्चमप्रभृतयश्चिन्त्यं हि सौख्यदम् ॥
मुखगतं वसुदोषसमन्वितं
भवनदेवमुखादिकमिष्यते ।
अवसथेन खिलो मकुलापघा-
त्त्र शमनेति मुनेरधिको मत: ॥"
इति श्रीमच्छाधारमल्लविरचिते वास्तुशास्त्रे
राजवल्लभे त्र्याद्यधिष्ठ्यक्षं ३ अध्याय: ॥
"दार्वीकुड्यतडागदेवभवनप्राकारमध्यादिकं
तीर्थानामवगाहनञ्च विधिवत् कन्याप्रदाला-
दिकम् ।
सर्वं पुण्यमिदं नृप: स लभते य: कारयेत्
धर्मवित्

दुर्गं सर्वजनाय शर्मजननं विश्राममेकं परम् ।
सिंहो वैरिपराभवं प्रकुरुते तिष्ठन् गिरौ
गह्वरे
दुर्गस्थो नृपति: प्रभूतकटकं शत्रुं जयेत् सङ्गरे ।
कैलासे नगरं शिवेन रचितं गौर्यादिसंरक्षणे
दुर्गं पश्चिमसागरे च हरिणाप्येषां किमत्रो-
च्यते ॥
भूदुर्गं जलदुर्गमद्रिविषये दुर्गं भवेद्गह्वरे
तेषामुत्तममद्रिदुर्गमुचितं तद्वैरिणां दुर्गमम् ।
अब्दाद्वेर्ष्टततोयतेजलवने: काष्ठेक्षुशाद्वेस्तथा
यन्तोपस्करवाग्रयुद्धसुभटै: संपूरयेद्भूमिप: ॥
माहेन्द्रं चतुरस्रमायतपुरं तत् सर्वतोभद्रकं
वृत्तं सिंहविलोकनं सुरुचिरनायत्तं तथा वारुणम् ।
नन्दाख्यं विसृताकृतीश्वमथ नक्षावर्त्तिस्वस्त्या-
कृति
प्रोक्तं तद्यववज्रयन्तमपि हृद्यं गिरेर्मस्तके ॥
पुण्यं चाष्टदलोपमं पुरुषाकारं पुरं पौरुषं
जेयं क्षत्रियभूधरस्य कथितं दण्डाभिधं दैर्घ्य-
कम् ।
प्राच्यं प्राक् सरिता परत्र कमलं याम्ये नदी
धार्मिकं
द्वाभ्यां चैव महाजयश्च धनदाशायां नदी
सौम्यकम् ॥
दुर्गैकेन युतं श्रियाख्यनगरं द्वाभ्यां रिपूणां पुरं
त्रयाणां जयवन्ति खस्तिकमिति प्रोक्ता गुणा
विंशति: ।
भूपानां सुखदा यशोऽर्थफलदा: कीर्त्तिप्रतापो-
द्भवा
लोकानाञ्च निवासतो विरचिता: प्राक्पुण्यभुक्तेर्गुणा: ॥"
इति पुराणां विंशतिगुणा: ॥८॥
"वह्नेर्भीतिकरं त्रिकोणनगरं षट्कोणकं क्षेमदं
वह्नौ वज्रभयश्च शाकटपुरे रोगस्त्रिशूले कलि: ।
प्रोक्तं तत्करभीतये द्विशकटे कार्याधिकैर्दण्डयो
दोषा: सप्त भयावहा: प्रकटिता ये विश्वकर्मो-
दिता: ॥"
इति पुराणां सप्त दोषा: ॥ ९ ॥
"यत्रेऽयो विविधं पुरं तनिमतं मध्योत्तमं
कण्डसं
तेषां दक्षयवप्रमन्तिमपुरं मध्यं सत: सार्द्ध-
कम् ।
ज्येष्ठं युग्मयवप्रमेषु चरमं भागाष्टकैकान्वितं
मध्यं द्वादशभागत: प्रथिमकं ज्येष्ठं विदध्यात्
सुधी: ।
मार्गा: सप्तदशैव चादिमपुरे चान्तं चतुर्भि: पुरं
प्रोक्तं कण्डमेव मार्गनवभिर्दैर्घ्यं तथा विस्तरे ।
मध्यस्थैव पुरावलीव हि तदधु मार्गाष्टका रेष्टकं
रेष्टार्द्धेन तु टूटनेव विधुये: प्रोक्तं सत: सार्द्ध-
दम् ।
दक्षाशाच्च युगाष्टगोदृगमदृक्षं भूमतीशां पुरं
तत्कक्षे रथया वदन्ति मुनयो मुख्यैव
सद्।

व्यायामे वसुपादसार्द्धवसुतो भागः प्रशस्तो-
ऽधिक-
स्त्वेकेकश्च चतुर्विधं निगदितं कार्यं समं
कर्णयोः ॥

षट्त्रिंशतः षट् क्रमतो विवृद्धा
देवे पुरे चत्वरके क्रमेण ।
यदृच्छया मानसुशन्ति केचित्
प्राकारकोष्ठस्य च भित्तिकायाः ॥*॥

पूर्व्वापरास्याः पुरसम्मुखाश्च
देवाः शुभा नोत्तरदक्षिणाश्च ।
भद्रं पुरस्यापि पराङ्मुखास्ते
कुर्व्वन्ति धात्रर्कजनार्द्दनेशाः ॥

ब्रह्मा विष्णुशिवेन्द्रभास्करयुताः पूर्व्वापरास्या
शुभाः
प्रोक्तौ सर्व्वदिशासुखौ शिवजिनौ विष्णुर्विधाता
तथा ।
चामुण्डा ग्रहमातरो धनपतिर्दैमातुरो भैरवो
देवा दक्षिणदिङ्मुखाः कपिवरो नैर्ऋत्यवक्त्रो
भवेत् ॥

मार्गाः सप्तदशाङ्कपक्षखिखिनो युग्मं पुरात्
खर्व्वटं
मार्गाः षोड़श सूर्य्यविंशतिकराः कार्य्याश्चिधा
विस्तरे ।
प्राकारोदयविंशहस्तमभितो द्वाभ्यां विहीनो-
ऽधिको
यामार्द्धेन तदूर्द्धतश्च कपिशीर्षाण्यष्टमाचा-
न्तरम् ॥

प्राकारेऽपि च कोष्ठका दशकराः सूर्य्येन्द्र-
हस्तास्तया
प्रोक्तास्तेन समैव कोणसहिता विद्याधरी
मध्यमा ।
तस्या वाथ सुवृत्तके च विविधं गृहासनं कार-
येत्
प्राकारोदयतो विधाय परिखाविस्तार उक्तो
बुधैः ॥

विद्याधरीकोष्ठकयोश्च मध्ये
बाहुप्रमाणं प्ररराजहस्तम् ।
पञ्चाधिकं पञ्चकरेण हीन-
मिति त्रिधा वास्तुमतो हितश्च ॥*॥

दुर्गोदयं नन्दकरप्रमाणं
तिथ्या समं सप्तदशैव केचित् ।
एकोनविंशं वसुयुक्तं त्रयाणां
दिक्कालसूर्य्याष्टकरा वदन्ति ॥

ताम्बूलं फलदन्तगन्धकुसुमं सुक्तादिकं यद्भवेत्
राजद्वारसुरालयो हि सुधिया कार्य्यं पुरे
सर्व्वतः ।
प्राग्विप्राश्च नृपा हि दक्षिणदिशि स्युः सौम्यतः
सूदकाः
कर्त्तव्याः पुरमध्यतोऽपि वणिजो वैश्या विचित्रै-
र्गृहैः ॥

ईशे रङ्ककराः कुविन्दरजका वह्नौ च तन्त्रो-
पिनः

प्रोक्ता वन्यजचर्म्मकारवरटाः स्युः शौण्डिका
राक्षसे ।
पश्यस्त्रीनिर्ऋतौ च मारुतयुते लोले न्यसेल्-
लुब्धकान्
वापीकूपतड़ागकुण्डमखिलं तोयं तथा वारुणे ॥
सिंहद्वारचतुष्टयञ्च खटकीद्वाराणि चाष्टौ तथा
कर्त्तव्यानि दृढ़ार्गलानि रुचिरैः कापाटकैः
सुदृढ़ैः ।
कीर्त्तिस्तम्भनृपालयामरगृहैर्हट्टैः सुधानिर्म्मितै-
र्हर्म्म्यैश्चोपवनैर्जलाशययुतैः कार्य्यं पुरं शोभ-
नम् ॥"

इति नगरप्रमाणम् ॥ * ॥

"यन्त्राः पुराणामथ रक्षणाय
संग्रामवह्न्यम्बुसमीरणाख्याः ।
विनिर्म्मिताः स्युर्जयदा नृपाणां
भवन्ति पूज्याः सुरया च मांसैः ॥
हस्ता त्रयश्च भैरवो नरकरस्त्रान्तो दशाद्यो
भवे-
द्वृद्धो भीमगजोऽपि भास्करकरैर्युग्मन्तु विश्वैः
प्रिखी ।
प्रोक्तोऽसौ यमदण्ड एव सुनिभिस्त्रिधा महा-
भैरवो
ज्यष्टौ शङ्करनिर्म्मिताश्च समरे देवासुरे भैरवे ॥
यन्त्रे चाष्टकरेऽष्टहस्तफणिनीसूर्य्याङ्गुला विस्तरे
स्तम्भा मर्कटिका च पञ्जरमतः षट्त्रिंशहस्ता
क्रमात् ।
यद्वा दृष्टविभागतोऽपि रदनैस्तुल्योऽष्टमाचा-
न्तरे:
प्रोक्ता कुण्डलवल्लयौ च वहितो मध्यादशीत्य-
न्तरे: ॥

यद्वा दृढ़ां मर्कटिकां विदध्या-
त्तोहस्य कीलेन च चर्म्मणापि ।
यन्त्रं प्रकुर्य्यादृढ़काष्ठकञ्च
तन्त्रानया ज्योतिकया समेतम् ॥
कराङ्गुलेः पञ्जरकस्य दैर्घ्यं
केषां मतं हस्तमिते च यन्त्रे ।
यष्टी कुली वह्निजलानिलाख्या-
स्ते लक्षणज्ञैः परिकल्पनीयाः ।"

इति यन्त्राष्टकप्रमाणानि ॥ * ॥

"नीराश्रयं पुरुषवनां विधेयं
मध्ये पुरस्यापि तथैव वाह्ये ।
वाप्यश्चतस्रोऽपि तथैव कूपा-
श्चत्वारि कुण्डानि च षट् तड़ागाः ॥*॥

कूपाः श्रीसुखवैजयौ च तदनु प्रान्तस्तथा
दुन्दुभि-
स्तस्मादेव मनोहरश्च परतः प्रोक्तस्तु चूड़ा-
मणिः ।
दिग्भद्रो जयनन्दशङ्करमतो वैदादिहस्तैर्मिता
विस्तारैः क्रमवर्द्धितैश्च कथिता वेदादयः
कूपिका ॥*॥

वापी च नन्दैकमुखा त्रिकूटा
षट्कूटिका युग्ममुखा च भद्रा ।

जया त्रिवक्त्रा नवकूटयुक्ता-
स्त्वर्कैस्तु कूटैर्विजया मता सा ॥*॥

सरोऽष्टचन्द्रश्च महासरश्च
वृत्तं चतुष्कोणकमेव भद्रम् ।
भद्रैः सुभद्रं परिधेकयुग्मं
वक्त्रस्थलैकद्वयमेव यस्मिन् ॥
ज्येष्ठं मितं दण्डसहस्रकैस्तु
मध्यं तदर्द्धेन ततः कनिष्ठम् ।
ज्येष्ठं करैः पञ्चशतानि दैर्घ्यं-
स्तदर्द्धमध्यं तु ततः कनिष्ठम् ॥*॥

भद्राख्यकुण्डं चतुरस्रकञ्च
सुभद्रकं भद्रयुतं द्वितीयम् ।
नन्दाख्यकं स्यात् प्रतिभद्रयुक्तं
मध्ये सुभद्रं परिधं चतुर्थम् ॥
कराष्टतो हस्तशतं प्रमाणं
द्वारैश्चतुर्भिः सहितानि कुर्य्यात्
मध्ये गवाक्षञ्च दिशो विभागे
कोणे चतुष्काण्यपि यज्ञशालाः ॥*॥

गङ्गाद्या रवयो हरेश दशकं रुद्रा दशैकाधिका
दुर्गा भैरवमातृका गणपतिर्वह्निश्चिकं नक्षिका ।
दुर्व्वासा मुनिनारदस्तु सकला द्वारावती
लौलिका
लोकाः पञ्च पितामहादिविबुधाः स्युर्मध्यभित्तौ
सदा ॥

तस्योर्द्धतः श्रीधरमाडकस्य
संदर्शनात् पूर्व्वफलञ्च काम्यम् ।
स्नानाच्च गङ्गाप्लवनस्य पुण्यं
हुतं भवेच्चेदिधिवद्विधिज्ञैः ॥
विधारितं जीवनमेव येन
तन्नोपदेशेन समं पृथिव्याम् ।
स षष्टिसंख्यं च सहस्रवर्षं
स्वर्लोकसौख्यान्यखिलानि भुङ्क्ते ॥

ग्राम वाथ पुरे नरेन्द्रभवने तत्षोड़शांशं भवेत
मध्यात् पश्चिमदिक्समाश्रितमिदं दुर्गे भवेच्चैव
हि ।
द्वारं दक्षिणवामतश्च पुरतः कार्य्यास्त्रय-
श्चत्वराः
सर्व्वं वास्तुगृहादिवासरचना भूपेच्छया कार-
येत् ।"

इति सूत्रधारमण्डनविरचिते वास्तुशास्त्रे राज-
वल्लभे प्राकारयन्त्रवापीकूपतड़ागलक्षणम् ४
अध्यायः ॥ * ॥

"अथो नृपाणां भवनानि वक्ष्ये
लोकातपत्रावनिपालकस्य ।
शतञ्च हस्ताष्टसमन्वितञ्च
व्यासे गृहं चोत्तममेव तस्य ॥
ये द्वापरे भूमिभुजो बभूवु-
स्तेषां गृहं हस्तशतं द्विहीनम् ।
तत्त्रेशभूमीश्वरको नृणाञ्च-
त्वष्टाधिकाशीतिकरं गृहं स्यात् ॥
ग्रामेकलक्षद्वयमस्ति यस्य
प्रोक्तो महामण्डलिको नरेशः ।

शिल्पशा

अशीतिरुक्तं द्विकरेण हीनं
कुर्यादृगर्हं शोभनमेव तस्य ॥
पञ्चायुतेशो वृषभध्वजोऽसौ
भवेद्गृहं तस्य कराष्टषष्टिः ।
मामन्त्यसंज्ञो द्वयुताधिपोऽसौ
तद्गेहमष्टेषु करप्रमाणम् ॥
तदेव पञ्चाशदपि द्विहीनं
सामन्तसंज्ञोऽयुतनाथ एव ।
तथा लघीयोऽपि ततो द्विहीनं
त्रिंशत्करादधिकमेव गेहम् ॥
प्रोक्तः प्रवीणेषचतुराशिकोऽसौ
यामा हि यस्येव सहस्रमेकम् ।
अधाधिकं विंशतिरुक्तहस्तं
निहेा समस्तानि यथोदितानि ॥
यामाधिपा ये तु शताधिपाश्च
ते खल्पराज्ञा अपि सैनिकाश्च ।
तेषां गृहा अष्टशताधिकेष
करैः समाना मुनिभिर्मताश्च ॥
भूपालकार्हेण च मन्त्रिगेहं
यथाधिकारेण भवन्ति हीनम् ।
आसादृशांशाधिकमेव देर्घ्यं
कुर्यादधो पञ्चमभागमिश्रम् ॥
गृहं चतुर्हस्तमितं करादि-
वृद्ध्या हिरामान्तमिति प्रमाणम् ।
ततः परं भूपतिमन्दिराणि
यावच्छतं षोडशकरादियुक्तम् ॥
स्याद्वृद्धिरेका वसुहस्तगेहे
दशाभिवृद्ध्या हितया पुनश्च ।
प्रासाद एवामरभूपयोग्यं
हर्म्याणि लोके मुनिभोदितानि॥
शालाथा नवधा च पञ्चकरतो मानस्य विधान्तकं
भित्तेरेव चतुर्दशाङ्गुलमितियावत् समादं करम् ।
आगारस्य तु षोडशांशरहितोऽष्टेन हीनोऽथवा
भित्तिर्मानमिदं विधा विरचितं कर्त्तुं यथायोगतः ॥
हैर्घ्यं चक्रकलाङ्गुलोत्तमशिला मध्याङ्गुलो मात्तिमा
मार्के दिङ्नवभूरुद्धिरिति विदेन चित्तारतः ।
कक्षाहैश्चिकरोदयं नवविधं पीठं गृहे सज्जनो
विप्राद्यै रसभूखवेदगुणकाः क्षुद्रपीठके नेत्रकाः ॥
अथवा वाप शताष्टसप्ततियावत्यश्च कक्षाकुलै-
र्द्विस्त्रिःकोदयको भवेच्च भवने मध्यः कनिष्ठोऽभवेत् ।
एवंविधेन तु विस्तरः प्रथिवकाभागोधिकः समस्तै-
र्हैर्घ्यं पीठविधानमेतदखिलं सर्वं कनिष्ठं क्रमात् ॥
पंक्तिः पञ्चमी त्रिभिष्कसंयुता
पीठोदयं विस्तरतश्च मध्यः ।

शिल्पशा

कनिष्ठिका रुद्रकरा क्रमेण
यावेष्ट सप्तैव च राशसंख्या ॥
वेदाश्वशाककलांशकैर्युगगुणैर्हस्तैस्त्रिसार्द्धैर्युते-
र्हैर्म्यास्य त्रिविधोदयः क्षितितलाद्यावच्च पट्टोर्ध्वकम् ।
एकैकोऽपि पुनस्त्रिधा निगदितः सर्वे त एकादश
चेष्टाः शशवतौ नखाः शशिकला वाष्टाशाश्च स्त्रिधा ॥
त्रिस्थाने युगपर्वताष्टखितियुता विंशैकविंशान्विता
मध्योऽयं त्रिकरैस्त्रिदंशसहितैः प्रोक्तः कनिष्ठस्त्रिधा । ॥
वृत्तं दुग्धविशुष्ककण्टकयुतं नीडेरुतं चैत्यद्रुमं
क्षीरं मागतपातितश्च भवने त्रिध्याविभीतं त्यजेत् ॥
शाकः शालमधूकसर्जखदिरा रक्तासनाः शोभनाः ।
एकोऽसौ सरलोऽर्जुनश्च पनसः श्रीपर्णिनौ त्रिंशपा ।
धारिद्रः पियुमर्हचन्दनतरुः पद्माख्यकस्त्रिध्रुकौ
नैतेऽन्येन युता भवन्ति फलदाः शाकादयः शोभनाः ॥
मेर्हादयस्तु नवधा विभजेत् षड्र्यं
स्तम्भोर्ध्वभागसमकं भरणं शिरश्च ।
कुम्भी युदम्बरसमैकविभागतुल्या
पट्टश्च तत्त्रिकयुतोऽंशसमान एव ॥
शालालोन्द उदाहृतो हि विबुधैर्वर्गेषु युग्मांशकः
सप्तांशेषु गुणेषु नन्दपदतो वेदांशतुल्यस्तथा ।
कापाटं गृहदक्षिणे निगदितं वामे भवेद्गर्गला
दृष्ट्वा निष्क्रमणं कृतं मुनिवरैर्दारेषु सर्वेषु यत् ॥
शालाश्रिनांशैर्मनुरेव मध्ये
त्रयो दयान्ते दयमस्य पार्श्वे ।
दारोत्तमाङ्गेन समानकर्णाः
प्रस्ता न प्रस्ता भवनाभिधाः ॥॥
दीपालयो दक्षिणदिग्विभागे
सदा विधेयोऽर्गलया समानः ।
वामे च मध्ये न शुभाय गेहे
सुरालये वामदिशोऽभिहेा ॥
दारार्ध षटकोसुरे च तदधो द्वाः षोडशांशाधिकं
सर्वं वा शुभमिच्छता च सततं कार्यन्तु षट्टादयः ।
तत्पूर्वं न शुभस्तलातलगतं कुर्यो तथा पृष्ठगं
कार्यं पञ्चक एव नीरदधिके यन्मूलपुल्लोत्तरम् ॥
दारार्धे यदयाममस्य प्रमाणं
शंकोर्वा शोभनं नाधिकं तत् ।
कुम्भद्वारागमेन यानि पृथूनि
तेषां शोभाधिक्यकृत्यानि कुर्यात् ।
अर्धं द्वारं शोभमानं समार्धं
यद्वा पृथ्वं तत् करोऽन्यैगयुग्मम् ।

शिल्पशा

गेहाद्यं यत् पूर्ववास्तुस्वरूपं
तेषां भङ्गान्नैव सौख्यं कदाचित् ॥
द्वारव्यासदशांशतोऽधिकमिदं कार्यं गृहं दक्षिणे
तुल्यं दक्षिणवच्च वामिभवनं तेनाधिकं वामनः ।
अष्टांशेऽथ जवांशके च वितथे तीये जयेन्द्रे स्थितं
द्वारं सौम्यगृहस्थिते च कुसुमे भल्लाटके शस्यते
प्राग्द्वाराष्टकमध्यतोऽपि न शुभं सर्वेशपर्जन्यनो
वास्यायाश्च यमाग्निपौष्णमपरे शेषासुरं पापकम् ।
सौम्यायामथ रोगनागगिरिजं त्याज्यं तथान्यच्छुभं
केचिद्द्वारगसौम्यकं न हि हितं प्रोक्तश्च वातायने ॥
द्वारं विद्धमशोभनश्च तरुणाकोणभ्रमस्तम्भकैः
कूपेनापि च मार्गदेवभवनैर्विद्धं तथा कीलकैः ।
उच्छ्रायाद्विगुणं विहाय पृथिवीं वेधो न भित्त्यन्तरे
प्राकारान्तरराजमार्गपरतो वेधो न कोणद्वरे ॥
दैर्घ्यं सार्द्धशताङ्गुलश्च दशभिर्हीनम् १४०।१३०।
१२०।११० चतुर्द्धा विधिः
प्रोक्तं वाथ शतं त्र्यशीतिसहितं १८० युग्मं २००
नवत्या शतम् १६० ।
तद्वत् षोडशभिः शतश्च ११६ नवभिर्युक्तं तथाशीतिकम् ८६
द्वारं सत्यमतानुचारि दशकं योग्यं विधेयं बुधैः ॥॥
स्वयमपि च कपाटोद्घाटनं वा विधानं
भयदमधिकहीनं शाखयोर्वा विवाहे ।
पुरुषयुवतिनाम्नश्चाक्षभाशाविहीनं
भयदमखिलकाष्ठाग्रं यदाधःस्थितं स्यात् ॥
देवालयं वा भवनं मठस्य
भानोः करैर्न्यायुभिरत्र भिन्नम् ।
तन्मूलभूमौ परिवर्जनीया
छाया गता यस्य गृहस्य कर्त्रे ।
नैर्ऋत्यां लघुर्ग्रामदिशाविभागे
मध्ये द्विषट् द्वारगवर्जगेहे ।
स्तम्भासनं हीनमपि त्रयाय
यदाधिकं रोगकरं तदा स्यात् ।
स्तम्भोऽथासनसूत्रभद्रसहितो रूपेण शालाकृतो
युक्तः पल्लवकैश्चयामरगकं यत् पद्मदेनाकृतम् ।
कुम्भो भद्रयुतो कुमारसहितं श्रीवृं तथा किन्नरैः
पत्रैश्चेति गृहे च शोभनमिदं प्रासादे शस्यते ।
स्तम्भौ द्वावीमंध्यगतौ न प्रशस्तौ
कुर्यात्करौ बहुसमांशहीनौ ।
गृहे प्रशस्तास्तुरुकाष्ठे
स्तम्भा न कर्त्रेन विधा प्रशस्ताः ।
एतेन्द्रुयामध्यगता रसस्य
स्तम्भोदयात्पञ्चभिरन्वितस्य ।

शिल्पशा

संलग्नचत्वार्यपि द्वानये स्यु:
स्तम्भासनं स्तम्भशिरश्च प्रीवम् ॥
उत्सेधार्द्धविनिर्गतं शरयुगांशेनाधिकं शस्यते
छाद्यं षट्समानकं सुखकरं नाशाय निम्नोन्नतम् ।
तत् काकस्य च पद्मवच्च कुसुदाभं सूर्य्यकाला-
यर्कं
प्रालम्बश्च करालकश्च विबुधै: प्रोक्तश्च तत् षड्विधम् ॥
भूम्यारोहणमूर्द्धतस्तदुपरि प्रादक्षिणं शस्यते
द्वारं तूर्द्धभवश्च भूमिरपरा द्वस्वार्कभागै:
क्रमात् ।
प्रासादे च मठे नरेन्द्रभवने शैल: शुभो नो
गृहे
तस्मिन् भित्तिषु वास्तुकासु सुभदा: प्राग्भूमि-
कुम्भां तथा ॥*॥
पृष्ठे चाग्नानन्तरमेव वास्तात्
गृहप्रवेशो न शुभङ्करोऽसौ ।
गृहस्य पृष्ठे यदि राजमार्ग-
स्तदादिभूमेर्न हि पृष्ठभीष्यम् ।
जीर्णं गेहं भित्तिमग्नं विशीर्णं
तत् पातव्यं स्वर्णनागस्य दन्ते: ।
गोष्ठङ्गैर्व्वा शिल्पिना निश्चयेन
पूजां कृत्वा वास्तुदोषो न तस्य ॥
धर्म्मस्यापि समन्तनो गृहपतिर्हि यदा-
! पीड्यते
सर्व्वाशासु विवर्द्धितश्च फलदं दुष्टं तदेकच्च च ।
प्राच्यादैरपि वैरसुत्तरदिशाभागे मनस्तापकृत्
पश्चादर्धविनाशदक्षिणदिशि प्रत्नोर्भयं वर्द्धते ॥
वामाङ्गे धनवस्त्रदेवभवनं धातु: स्त्रियो वाजिनो
नार्य्यस्तौषधिभोजनस्य भवनं स्याद्दाटिका
वामत: ।
उद्वेगोंशसदन्तिशस्त्रसदनं स्त्रीणां तथा दक्षिणे
स्थानं माहिषमाजमौक्षिकमिदं याम्याग्निमध्ये
शुभम् ॥
मृगावे वरुणेऽनुरे गरुवरे स्याद्दोटकानां गृहं
वायव्ये तुरगश्च वृत्तरमणं गान्धर्व्ववेदाश्रितम् ।
राज्ञो मालगृहं गणेन्द्रजयके रुद्रे महिष्या
गृहं
पत्ये धर्म्मगृहं रवौ जयगृहं प्रोक्तं जये
प्रीयदम् ॥
देशग्रामोरुनारे गर्भभागा-
द्गृहाणां वा स्थानमेवाच्च कार्यम् ।
प्राग्यामारं स्यात्तथा प्राक्कपोले
भद्रेऽर्द्धेऽपि शुभ्रुकोणे शिवाणो ॥
याव्यशिभे मारुतवह्निकोणे
प्रोक्ता पर्य्यन्तैरपि शुल्यशाला ।
वर्णेऽग्नं दक्षिणरम्य कोणे
स्यात् पश्चिमे भोजनशालिका च ॥*॥
प्राक् शोभा शुभमन्दिरे च पुरत: स्थानं तथा
पुष्पकं
याम्यादि वृषभोत्तमाश्वधरा: कुल्यासपक्षादि
च ।

शिल्पशा

छत्रं चामरतापसा: खगुरवस्ताम्बूलशृङ्गद्विजिघ्रे
गेहाधीशयदृच्छया च शयनं सर्व्वासु भूमीषु
च ॥
विवस्वदाख्ये शयनं प्रशस्तं
वादित्रगेहं सवितुर्व्विधेयम् ।
पूषाश्रितं भोजनमन्दिरञ्च
महानसं वह्निदिशाविभागे ॥
माहेन्द्राख्ये गोपुरं द्वित्रिभूमिं
भागो: संख्या तस्य मध्ये विधेया ।
उक्तानुक्तं मन्दिरादौ निवेश्ये
त्वया कार्य्यं चाज्ञया भूपतीनाम् ॥
दिक्शालाग्रं श्लोकशालादिगेहं
प्येष्ठा मध्या कन्यसा दक्षिणाङ्गात् ।
शाला कार्य्या लोकगेहे युगान्तात्
चित्रोक्ता स्युर्भूमयस्तेषु नूनम् ॥"
इति श्रीसूत्रधारमण्डनविरचिते वास्तुशास्त्रे
राजवल्लभे राजगृहनिवेशादिलक्षणं ५ अ: ॥*॥
"अथैकशालं द्विगुणाश्रिशालं
प्रस्तारतो लक्षणमेव तेषाम् ।
यथोदितं वास्तुमते तथैव
ब्रवीमि राज्ञामथ मानवानाम् ॥
चत्वारो गुरवस्तु पूर्व्वगुरवोऽधो द्वस्वतोऽन्ये
समा:
भूय: पश्चिमपूरितश्च गुरुभिर्यावल्लघुत्वं भवेत् ।
उद्दिष्टे द्विगुणाङ्कजैर्लघुभवै: संख्यैकमिश्रीकृते
नष्टे स्त्री विषमे समे गुरुलघू रूपे तदर्द्धाहत: ॥
स्थाने लघो: सङ्गसुखादलिन्दं
प्रदक्षिणं तं क्रमतो विदध्यात् ।
प्रस्तारत: प्रोढ़गृहं गृहाणां
प्रोक्तं तथाक्षां कथयामि तेषाम् ॥*॥
ध्रुवञ्च धान्यं जयनन्दसंज्ञे
खराग्यकन्तञ्च मनोरमाख्यम् ।
सुवक्त्रमम्रात् किल दुर्म्मुखाख्यं
क्रूरं विपक्षं धनदं जयञ्च ॥
आक्रन्दकं वैपुलवैजयञ्च
फलानि नाम्ना सदृशानि तेषाम् ।
इति ध्रुवादिषोड़शगृहाणि ॥ * ॥
धान्यादितोऽधो विजयान्तकं हि
त्वलिन्दयुग्मं सुखतो विदध्यात् ।
रम्यं श्रीधरभोदिते च परतस्तद्वर्द्धमानं गृहं
कारालञ्च सुनाभमेव तदनु धार्द्धं सदृशं तथा ।
इति रम्याष्टकम् ॥ * ॥
सर्व्वेषु ध्रुवबद्धवन्ति नियतं षड्दारके: सुन्दरं
प्रोक्तं तदरञ्च भद्रकुसुदेऽधो वैसुरास्यं शिवम् ॥
तत्तच्चलाभश्च विशालसंज्ञं
तथा विलक्षं त्वशुभं धनञ्च ।
उदीरितमेवं त्वथ भोगदञ्च
सौम्याभिधं स्व: कुलनन्दनञ्च ॥"
इति सुन्दरादिषोड़शगृहाणि ॥ * ॥
"पूर्व्वालिन्दसमन्वितेषु युगलं षड्दारु शालान्तरे
शृंगेषु सुलक्षणञ्च परत: सौम्यं शुभं भानुकम् ।
तत्पादुशमरीचिरे च सततं क्षेमं तथा क्षेपकं

शिल्पशा

चोदृक्तं वृषसुस्थितञ्च जयमानन्दं सुनन्दं
क्रमात् ॥"
इति हंसादिषोड़शगृहाणि ॥ * ॥
"मध्येऽपवर्गं ध्रुवरूपकाणा-
मलङ्कृताङ्गं प्रथमञ्च तत्र ।
तथाप्यलङ्कारमिति क्रमेण
ख्यातं तदन्यं रमणञ्च पूर्व्वम् ॥
तच्चेश्वरं तदनु पुण्यमत: सुगर्भं
प्रोक्तं गृहं कलसदुर्गतमेव रिक्तम् ।
स्याद्दीक्षितं तदनु भद्रकवर्द्धते च
दीनं गृहं विभवकामदमेव संख्या ॥"
इत्यलङ्कृतादिषोड़शगृहाणि ॥ * ॥
"षड्दारु सर्व्वेष्वपवर्गकेषु
प्रभावसंज्ञं त्वथ भावितञ्च ।
रुचकं तथान्यत्तिलकञ्च तत्र
सत् क्रीड़नं सौख्यमतो यशोदम् ॥
कुसुदमपि च कालं भासुरं भूषणञ्च
वसुधरमथ गेहं धान्यनाम्नं तदन्यत् ।
कुपितमपि च वित्तं वृद्धिदं प्रोक्तमेत-
त्तदनु कुलसमृद्धं षोड़शं प्रोक्तमादौ: ॥"
इति प्रभवादिषोड़शगृहाणि ॥ * ॥
"सर्व्वे सुखालिन्दसमन्वितास्च
दारुद्विषट्कं त्वपवर्गमध्ये ।
ततश्च चूड़ामणिकं प्रभद्रं
क्षेमं तथा श्रीवससुस्थितञ्च ॥
विशालसंज्ञं त्वथ भूतिदञ्च
दृष्टं विरोधं कथितं क्रमेण ।
तत्कालपाद्यं हि निरामयन्तु
सुशालरौद्रे सुनिसम्मताश्च ॥
वैद्यं गृहं चैव मनोरमञ्च
सुभद्रसंज्ञं कथिता च संख्या ।
इत्येकशालानि गृहाणि विद्या-
च्चतश्च चत्वार्यधिकं ध्रुवादि ॥
अपवरकं यत् कथितं तद्वामे धीमता गृहे
कार्य्यम् ।
यत् षड्दारुकमुदितं श्रिया सा षड्दा श्रेणी ॥"
इति चूड़ामण्यादिषोड़शगृहाणि । इति चतु-
रुत्तरं शतमेकशालगृहाणि ॥ * ॥
"अथ द्विशालालयलक्षणानि
पदैश्चिभि: कोष्ठकरन्धसंख्या ।
तन्मध्यकोष्ठं परिरुह्य युग्मं
शालाशतानां हि भवन्ति दिक्षु ॥
याम्याग्निगा च करिणी मनदाभिवक्त्रा
पूर्व्वाननाश्च महिषी पिठरारुकास्या ।
गावो यमाभिवदनापि च रोगमोक्षे
स्वामी महेन्द्रशिवयोर्वरुणाभिधाना ॥
धनिष्ठा महिषी द्विशालभवनं सिद्धार्थकं
तन्नुभं
गावो माहिषसंज्ञकं रतिकरं तद्याममुख्यं
भवेत् ।
दृष्टं भृङ्गवदाख्यितं धनधरं दक्षिणत्राख्यां
तथा

शिल्पशा

काचं गोकरिणीयुतं न हि शुभं चुल्ली च पूर्व्वा-
परम् ॥

नामान्यतः सन्ततशान्तिदश्च
स्याद्वर्द्धमानं लघ कुक्कुटाख्यम्।
दृश्यादितो नाम चतुष्टयञ्च
कर्म्मात् द्विशालं प्रथमं तथैव ॥
यत् स्वस्तिकं तन्नवदारुमध्ये-
ऽलिन्दसंयुक्तं कथितं द्विशालम्।
हंसाख्यकं स्याद्य वर्द्धमानं
कीर्त्तिर्विनाशं भवनं चतुर्थम् ॥
अलिन्दयुग्मं पुरतो विदध्यात्
षड्दारु मध्येऽपि च शान्तसंज्ञम्।
तस्माद्गृहे हर्षणवैपुले च
तथा चतुर्थं कथितं करालम् ॥
तस्मिन् गृहे दक्षिणतो ह्यलिन्दे
वित्तञ्च चित्तं धनकालदण्डे।
वामे पुनर्व्वंशुदपुच्छदं स्यात्
सर्व्वंशु तस्मिन्नपि कालचक्रम् ॥
लघुश्च पश्चात् पुरतोऽपि युग्मं
स्याद्दक्षिणैको रसदारुमध्ये।
तत्तैपुरं सुन्दरमेव नीलं
स्यात् कौटिलञ्चैव यथा क्रमेण ॥
प्रदक्षिणैकः पुरतोऽपि युग्मं
षट्कं गृहान्तः किल शाश्वदाख्यम्।
ततो द्वितीयं खलु शाश्वदं स्या-
च्चीलं तथा कोटरमेव संज्ञम् ॥
सौम्यं गृहं मध्यपसंयुतञ्च
तत्तुल्यरूपं विबुधैर्विधेयम्।
शुभद्रमप्यादपि वर्द्धमानं
कृत्वा सर्व्वेष्वशुभं चतुर्थम् ॥
सुखे चयं दक्षिणपश्चिमैकः
षड् दारुकं श्रीधरनामधेयम्।
प्रोक्तं गृहे कामदपुष्टिदे च
चतुर्थकं कीर्त्तिविनाशमेव ॥
वामे तथा दक्षिणपश्चिमैको
युग्मं सुखे मध्यपसंयुतञ्च।
श्रीभूषणं श्रीवसनं ततश्च
श्रीशोभकीर्त्तिक्षयमेव तद्वत् ॥
एकोऽपरे दक्षिणवामतश्च
मध्याधानं श्रीधरयुग्मपूर्व्वम्।
सर्व्वार्थदं स्यात्सुखसञ्चयश्चेत्
शर्म्मोन्नियाणं कुपितश्च नाम्ना।
युग्मं सुखे मध्यपमेव चाग्रे
युग्मं तथा दक्षिणतोऽन्तभित्तिः।
एषे तु उत्तीलकबाहुतेषः
सुतेष एवं कलहावहं स्यात् ॥
उत्तीलके पश्चिमभागतो द्वौ
कुर्य्यात् द्विशालञ्च बहिर्निवासम्।
तत् पुष्टिदं कीर्त्तिसमानमत्र-
मङ्गल्यदारुं क्रमतो विधेयम् ॥
लघुश्चिरं पूर्व्वदिशाविभागे
एको भवेद्दक्षिणवामपश्चात्।

शिल्पशा

महान्तमेतन्महितञ्च दत्तं
कुलक्षयं मध्यपसंयुतं स्यात् ॥
त्रयमेवं दिक्कृतिये विभागे
सुखे त्रिकं मध्यपमग्रतश्च।
प्रतापवर्द्धन्यमिदञ्च दिव्यं
सुखाधिकं सौख्यहरं चतुर्थम् ॥
तस्यैव रूपं रसदारुयुग्मं
पुनश्चलिन्दोऽजगजन्तञ्च।
स्यात् सिंहनादं लघ दक्षियानं
ज्ञेयं तथा कण्टकमेतदन्यम् ॥
शान्तादिगेहानि च षोड़शैव
द्विशालकानीह यथाक्रमेण।
नामानि चत्वार्य्यपि रूपमेकं
दृश्यादिभेदैः क्रमतो विधेयम् ॥"

इति सूत्रधारमण्डनविरचिते वास्तुशास्त्रे राज-
वल्लभे एकद्विशालगृहलक्षणं ६ अध्यायः ॥४॥

"द्विशालगेहानि तु षोड़शैव
वास्तुदधेः सारतरं पुनश्च।
वक्ष्याम्यलिन्दोऽपि यतो लघुश्च
द्वौ निन्दुकाख्यौ कथितावलिन्दौ ॥
सूर्य्यं द्विशालं लघुरस्य वामे
सुखे त्रिकं दक्षिणतस्त्रयेकः।
सुखे तथा वासवमेव गेहं
वामेऽपसव्ये लघुरेक एव ॥
प्रासादसंज्ञं सुखतश्चयश्चेत्
प्रदक्षिणं निन्दुकवेष्टितं स्यात्।
अलिन्दयुक्तं विमलं द्विशालं
तद्दीर्घवंशं सह मध्यपेन ॥
अथ द्विशालेषु समस्तकेषु
मध्ये विदध्याद्रसदारु चैकम्।
तदा भवेद्वासुरमग्रयुग्म-
मेको लघुर्दक्षिणदिग्विभागे ॥
एको लघुर्दक्षिणपूर्व्वगः स्यात्
तदुद्भवाख्यं सुखमध्यपेन।
द्वौ पूर्व्वतो दक्षिणतस्त्रयेको
युग्मं भवेन्मध्यपगं सुतेषः ॥
सुखे गुणा दक्षिणतस्त्रयेको
द्वौ मध्यपेऽस्मिन् क्षयलाभिधानम्।
महान्तगेहं सुखजे त्रिके तु
युग्मान्वितं मध्यपमेतदेव ॥
सुखे तथा मध्यपके च युग्मं
वामेऽपसव्ये युगलं लघोश्च।
लोकक्षयाड़म्बरमस्य नाम
षड्दारु गृह्णुगजेषयोश्च ॥
युग्मं सुखे मध्यपगं हयं स्या-
त्तथा हयं दक्षिणवामतश्च।
एको हि पश्चादरदाभिधानं
श्रीविश्वकर्म्मोक्तमतादिशालम् ॥
मालीनसंज्ञं सुखजैश्चतुर्भि-
र्युग्मं भवेद्दक्षिणवामभागे।
युग्मं तथा पश्चिमदिग्विभागे
तस्याग्रतो मध्यप एक एव ॥

शिल्पशा

प्राग्यामा लघवो विलासभवने वामे लघुर्दक्षिणे
तत्रैमध्यपसंयुतश्च कमलं स्याद्दक्षिणं सौख्य-
दम्।
वेदाम्बूदरके सुखे च सततं वामेऽग्रगे दक्षिणे
तस्याग्रे सुखमध्यपस्य फलदानेवं गृहान्
षोड़श ॥"

इति सूत्रधारमण्डनविरचिते वास्तुशास्त्रे राज-
वल्लभे एकद्विशालगृहलक्षणं ६ अध्यायः ॥४॥

"अथ त्रिशालं त्रिदशैश्चयैकं
स्यात्त्रिदशावासमरूपसंज्ञम्।
तथा चतुर्थं कुसुदाभिधानं-
दृश्यादिभेदैः क्रमतो विधेयम् ॥
छन्नं ह्यलिन्दञ्च तथैव पृष्ठं
हरश्च कामन्त्वथ दृश्यभद्रम्।
षट्कञ्च मध्ये खधनं कुबेरं
पृष्ठं तथा कामदमेतदेव ॥
अलिन्दयुग्मं त्वथ भद्रयुक्तं
मध्ये कपाटं जलजाभिधानम्।
स्यान्नन्दिवर्द्धं चैव गजं क्षपश्च
षड्दारु मध्ये सकले यथातः ॥
स्याद्वैजयं मध्यपदृश्यभद्रं
जयं निनादं त्वथ कीर्त्तिजञ्च।
भद्रोनदृश्याधिकसाकलाङ्गं
निर्लोभिकं वासदकौशले च ॥
चैत्रं क्रमादीश्वरवारदाख्यं
भौमञ्च कौशल्यमतः क्रमेण।
तद्वैद्युदृश्यजनं तृतीयं
स्यात् कौशलं नीलमिदं चतुर्थम् ॥
सुखगुणलघुवामे दक्षिणे चैक एत-
दरदग्ररदसूक्तं दृश्यकं काकपक्षम्।
इदमिह हि निनादं मध्यपेनाधिकं स्या-
दहनु च गजनादं वाहुलं कीर्त्तिदाढ्यम् ॥
दृश्यादिरूपसुखमध्यपमेव सिंहं
ज्ञेये गृहे दृश्यजे ज्ञेपि कोशसंज्ञम्।
वामेऽधिकञ्च लघुना कथितं सुभद्रं
स्याच्चाणिभद्रमपि रत्नलताधनाढ्यं ॥
युगसुखमपरैको भैरवं दक्षिणे च
भरत नरजमेतत् स्याच्चतुर्थं कुबेरम्।
पुनरपि लघु वामे दक्षियानं जियानं
दृयजक्षपजगेहं तच्चतुर्थं क्रमेण ॥
वर्णानां शुभदञ्च सागरगृहं मध्येव दृश्या सुखे
प्रोक्तं चौरदरत्नदाढ्यमिदं कोलाहलाख्यापरम्।
षड्दारुहयभद्रसप्तलघुवक्षिण्यैक् युतं शालया
गान्धर्व्वं क्षितिभूषणञ्च कथितं सर्व्वाङ्गकं दर्प-
कम् ॥
धान्यं वृद्धिकरं त्रिशालसहितं शाला विना
यायनी
शाकशाला रहितं शुभं निगदितं सुक्षेत्रमर्घ-
प्रदम्।
कुक्षीसंज्ञमिदं करोति सरसं दीनं तथा
याम्यया
पक्षं मध्यमलिन्दके च भवनं तत्पुत्रवन्धुक्षयम् ॥"

इति त्रिशालादिषोड़शगृहाणि ॥५॥

"त्रैशालानि च षोड़श प्रथमतः सौमस्य षड्-
दारुकं
तच्चैकेन पुरोऽपि शङ्करमिदं मध्ये क्रमात्
पूर्ववत्।
कृत्वे द्वौ सुखतोऽपि दक्षिणलघुस्त्वेकाधिकं
सागरं,
चत्वारो नृपशोभितश्च पुरतः प्राग्दक्षिणैकौ
लघुः॥
उच्चाग्रे सकलं भमस्य लघुना सर्वस्य तत्
सौख्यदं
रागाख्यं भमसंयुतश्च भवनं तत् सर्वशालं
भवेत्।
प्राग्वार्गाङ्गुलगन्दनं क्रमतया त्वेकद्वयैकान्वितं
तस्मिन्दक्षिणसंयुते च लघुके कल्याणसंज्ञे तथा॥
सर्वाशासु लघुत्रयं शरसुखं तत् षट्युगं
क्रमात्
तत्सौभाग्यविवर्द्धनश्च भवनं राज्ञां सदा निर्मि-
तम्।
व्यानन्दं सुखरान्दक्षिणलघुर्वामे च पृष्ठे द्वयं
रागाख्यं जनशोभनं गुणगणैकेनान्वितं स्फुटितः॥
स्याद्गोवर्द्धनमग्रतो रसयुतं युग्माग्निनेत्रैः क्रमात्
सप्ताग्रे त्रिगुणं त्रिकश्च लघवो लोकत्रिकं
सुन्दरम्।
गेहं श्रीतिलकं च भद्रसहितं दुःखेन हीनं सुखे
तद्युक्तं लघुना च भद्रसहितं विष्णुप्रियं
भूपतेः॥"

इति सोमादिषोड़शगृहाणि॥*॥

"षड्दारुकं श्रीचिदग्रं त्रिशालं
तत् श्रीनिवासं सुखदुःखयुक्तम्।
श्रीवत्सतः श्रीधरमेव दृष्ट्वा
श्रीभूषणं वेदसुखश्च गेहम्॥
बाणैः श्रीजयसंज्ञतोऽपि ऋतुभिः श्रीतैलिकं
मन्दिरं
रागाग्र रसदारयुग्मसहितं तत् श्रीविलासं
भवेत्।
श्रीतेजोजयसंज्ञतश्च मुनिभिः षड्दारु युग्मान्वितं
सोमादिद्विदशादिभूपतिगृहाः षष्ठाधिका
विंशतिः॥"

इति द्विदशादिनवगृहाणि॥*॥

"भवनवकसुखं यच्चतुःशालमध्यात्
नयनखगुसुखं स्याद्दक्षिणैकेन चन्द्रम्।
भवति सदनमध्ये सर्वतो दारुषट्कं
द्वितयमपि च तेषामन्तिमं युग्मयुक्तम्॥
मलयमथ च गेहं वामदक्षाधिकं स्यात्
भवति च गुणदुःखं शोभनं पूर्ववोऽपि।
त्रिभिरपि च सुकर्णैः पृष्ठयाग्ये तथैक-
स्यधिकमपि याने वैश्य नागेन्द्रसंज्ञम्॥
चक्रं चतुष्टयसुखं सकलेषु प्रोक्तं
याम्योत्तरे हि लघुनापि जयावहं स्यात्।
भद्राङ्गयश्च मकराङ्गयमेव तस्मिन्
पृष्ठाग्रदुःखमपि कामदमग्रभद्रम्॥"

इति त्रिजयादिनवचतुःशालगृहाणि॥*॥

"गुह्यादयो मुनिमतैरष्टविधा च शाला-
स्तासां षड़ेव कथिता भवनप्रसङ्गे।
शालालिमध्यरचितोऽपि लघुः सुखाय
यद्वा तदग्ररचिताः पृथगेव शालाः॥"

इति सूत्रधारमण्डनविरचिते वास्तुशास्त्रे राज-
वल्लभे द्विशालत्रिशालचतुःशालगृहलक्षणवर्णनं
सप्तमोऽध्यायः॥*॥

"शयनमथ नृपाणां लक्षुलानां शतैकं
नवतिरपि सुतानां मन्त्रिणः षड्विहीनम्।
बलपतिगुणहस्तं त्रासुलोनं गुरोश्च
तदनु युगलहीनं ब्राह्मणादेः प्रशस्तम्॥
यासोर्द्धभागे नतदैर्घ्यतश्च
कलांसकाच्चोधिक एव शस्तः।
चंद्रेण पादेन समुच्छ्रयः स्यात्
द्विचत्रांगुलानामधिको न कार्यः॥
श्रीपर्णी धनदासनोऽपि गदहा वित्तप्रदा तिन्दुकी
वृद्धिः शिंशपयाथ धाकशयने शमीमपि शालेः
कृते।
स्यायुः पद्मकजे च चन्दनमये शुचुच्चयः स्यात्
सुखं
श्रेष्ठं चैकमलं श्रिरीषघटितं पर्यङ्कयाना-
सनम्॥"

इति शयनम्॥*॥

"सिंहासनं चोत्तममङ्गुलानां
षष्ट्या दशोनश्च परं तथैव।
दशांशवस्वंशयुतो विहीनं
यासे च दैर्घ्यार्द्धसमुच्छ्रयः स्यात्॥
मुनिभिरथ शिवैर्वा भद्रभागत्रयं स्या-
दुदय इति विभागैर्भाजिते पीठमध्ये।
कनकमपि रथांशं सप्तधा यासपट्टी
शिवनवसुनिरन्नैर्दन्तिवाहौ शिवेन्द्रौ॥
छाद्यं स्याद्दशभागमेव तिथितो भागेन कक्षासनं
युक्तं स्तम्भयुगेन तोरणयुतं रत्नैः शुभे राजि-
तम्।
कर्त्तव्यं नृपवल्लभं मतिमता त्र्येष्ठश्च सिंहासनं
ज्ञातव्यश्च यशोऽभिवर्द्धनमिमैः सिंहैर्नृकक्षा-
सनम्॥
नरेषु वेदी पुनरेव छाद्यं
सुखासनं तोरणसंयुतं स्यात्।
पीठश्च कुम्भः कलशं विटङ्क-
सूत्रङ्गसंज्ञं सह छाद्यकेन॥
पीठे गोहरिवेदिके च सुयशश्छाद्येन सिंहासनं
हस्तौ मालकवेदिकासनयुतं तद्दीपचित्रं भवेत्।
छत्रं त्र्येकमशीतिवेदसहितं द्वासप्तनिर्मध्यमं
पद्मा कन्यसमङ्गलैर्नरपतेर्देवं शतार्द्धं शुभम्॥"

इति सिंहासनच्छत्रचलच्चमानि॥*॥

"वातायनो लुम्बिकया विहीनो
बुधैरुदीर्णक्षिपनाक एव।
द्विलुम्बिकश्चोभयसंज्ञकश्च
यः स्वस्तिकोऽसौ युगलुम्बियुक्तः॥
स्याद्वाग्रे: प्रियवक्त्र एव सुमुखः षड्भिः पुन-
श्चेति च

छाद्यैकेन युतः सुवक्त्र उदितो द्वाभ्यां प्रियङ्गो
भवेत्।
एकोनः परिपद्मनाभ उदितस्त्रीपक्षिणो युगे
र्व्यंचित्रैः प्रपदक्तिभिस्तु विविधाकारैर्युतः
पक्ष च॥
सिंहो दैर्घ्यविवर्द्धितो हि पृथुले हंसो गवाक्षो
भवेत्
कुम्भोऽसौ मतिदोऽपि भद्रसहितो ज्ञेयस्तु
वृद्ध्यर्थदः।
द्वारेणैव युगासकेन गरुड़ः पक्षद्वये जालकं
प्रोक्ताः पक्षदशैव रूपमदला वेद्यादिकक्षा-
सने:॥"

इति पक्षदश गवाक्षाः॥*॥

"सभा च नन्दा परतोऽथ भद्रा
जया च पूर्णा क्रमतोऽपि दिग्या।
पक्षी सुरत्नोद्भविकोत्पलाख्यौ
बुधैर्विधेयावनिपालगेहे॥
चैत्रं चतुष्टयपदैरपि षोड़शांशं
मध्ये तुरीयपदमेकपदौ लघुश्च।
नन्देति भद्रसहिता च पदेन भद्रा
तद्वेदतश्च जयदा लघुना च पूर्णा॥
दिग्या सभा केवलनन्दभागा
भद्रैश्चतुर्भिः सहिता च पक्षी।
रत्नोद्भवा स्याद्युगतोऽपि तुल्ये-
स्तथोत्पलाख्या प्रतिभद्रतश्च॥
स्तम्भैस्तोरणराजितैश्च मदला निर्यूहवेतानकै-
र्लूक्षाद्यैर्गजसिंहराजविविधैर्नृत्यान्वितैः
शोभितम्।
रत्नस्फाटिकरङ्गभूमिनृपतेः क्रीड़ास्पदं मण्डपं
कुर्याद्दक्षिणभद्रके च रुचिरां यन्मध्यतो वेदि-
काम्॥"

इति सभाष्टकम्॥*॥

"वेदी कोणचतुष्टयेन सकले पाणिग्रहे स्वस्तिका
कल्याणं रविकोणकेश्च नृपतेः सा भेद्रिका
सर्वदा।
कोणैः श्रीधरिका च विंशतिमितैस्त्रिसोऽम-
रागां गृहे
कोणैरष्टभिरन्विता च शुभदा चण्डार्चने
पद्मिनी॥
विप्रे सप्तकराश्च भूपभवने षट्पञ्च वैश्ये तथा
कुर्याद्धस्तचतुष्टयाच्च नृपते चित्रेऽकनो हीनके।
तस्योर्द्धे च नरेश्वरासनमतो मार्द्धं चतुस्तम्भकं
हित्वा मौक्तिकपट्टकूलमणिभिः सौभाग्यनं
राजितम्॥"

इति वेदिकाचतुष्टयम्॥*॥

"दीपस्तम्भं त्रिकरमुदये षड् भिरूर्द्धं क्रमेण
हस्तान्तं तं विहितमिति: पीठकुम्भान्वितश्च।
दीपस्योर्द्धे कनककलसं शोभितं कक्षगाद्यैः
कुर्याद्धालोरथ तरुमतो नागबन्धे विवर्ये॥"

इति श्रीसूत्रधारमण्डनविरचिते वास्तुशास्त्रे
राजवल्लभे शयनसिंहासनच्छत्रगवाक्षसभा-
ष्टकवेदिकाचतुष्टयदीपस्तम्भलक्षणं नवमोऽध्यायः॥

शिल्पशा

"गुरा वास्तुशास्त्रोदधौ राजयोग्या
अनन्ता हि सन्त्यत्र तेभ्यः कियन्तः।
मयोक्ताश्च योग्या नृणां सप्तधा
सभीभान्तिलाभे च कल्याणदाश्च ॥
त्रिभागं गृहं दिक्षुचत्वे प्रकुर्यु
सुखे वीथिकाग्रे च षड्दामभागम्।
गृहालिन्दवातुर्दिशं चैकवाहं
प्रशस्तश्च कोणे च भद्रे विधेयम् ॥
सदा भद्रके श्रीधरं मालयुक्तं
तथा भूमिका पञ्चमन्नैकभूत्वाम्।
त्रिभागादहं मध्यभं वेदवाहै
रिपुघ्नं गृहं राज्यवृद्ध्यप्रमेतत् ॥
मध्ये निजस्वल्पभागं तथोक्तैः
शालं देवं पुत्रनाशाय गेहम्।
सभद्रैस्तनो मध्यमानेन कार्या
त्रिधाधिक्ये नैव पूज्या न च श्रीः ॥
हीनस्तम्भे शालयोर्व्याप्तपट्टे
नो वेधः स्यादन्यतो वेध एव।
भूमेर्नेयं सप्तसंख्याप्रमाणं
तुल्या नेष्टा वर्धमानाः शुभाः स्युः ॥
भागेनैकेन विभजेत् करनस्तसंख्य-
मध्ये तयांशमुदितश्च करार्धमित्तिः।
तस्माच्च पोडशांशेऽपि च भद्रकेषु
दण्डैर्मितिश्च सकलासु चतुर्मुखं स्यात् ॥
भद्रे च भूमिरथवार्धं मालं
मालेऽधिभूमं कथितश्च गेहम्।
प्रशाखयोर्न्यूनमिदं नृणां
सम्पत्तिविलासश्च वदामि तस्मात् ॥
कार्या दश द्वश भद्रकेषु
वीथ्रशमध्ये तलमारभ्य।
सप्तप्रशाखावनिमाश्रयन्ते
सर्वाः सर्वं करोति च नित्यम् ॥
भागः पञ्चमुखाश्च षष्ठ भवनं षड्विंशता
तलकैः
कुर्यु मालयुते च सप्तदशकैर्भद्रं चतुर्दारकैः।
भद्रे वै मुखभद्रकानि सप्तविंशत्यर्धानिका तलकाः
मालं भूमियुते च मालयुगभूः स्यात्पञ्चविंशं
गृहम् ॥
मध्ये तत्प्रमितस्य भागसमके भित्तिचतुष्टयं
तत्कोणद्वयरोमसप्तसहितं भद्रं चतुर्भिस्तलैः।
षड्विंशद्विमितौ च तौ तु मकराः सप्ताः
त्रिभौ पूर्वतो
मालाः सप्त समीकृतश्च कथितं भूयश्चतुर्भा-
जितम्।
पार्श्वे भद्रकं शिरश्च कथितं षट्सप्तदो
भद्रके।
कार्या पञ्चदशीभवा तलिकाः शैलाद्यलक्षणयुता
मालाश्चैव तथालिका विरचिता सा सप्तकक्षोपि
वा ॥
सप्तैवोपरि तत्र मालिकाः शैलाद्यलक्षणयुता
विभागेन तत्कक्षतो निम्नमेवं
गृहस्योदयार्धेन पीठं वृषाणाम् ॥
उत्तानपट्टो वृषमन्दिरेऽसौ
दक्षे च वक्षे द्वियवोन्नतः स्यात्।
पाषाणतः सौख्यकरो वृषाणां
धनक्षयं सोऽपि करीति गेहे ॥
सुधेष्टके प्रस्तरया विमुक्ते
सकर्करैस्तैः सुदृढा गृहे भूः।
शुका न शुष्कं भवनेषु चित्रं
कपोतगृध्राः कपिकाकरौक्षम् ॥
शुक्लोल्लिखिशेषतश्च सकला भूर्धौधरङ्गान्विता
छादेनाप्यथ मत्तवारणयुतं माल्यं तथार्हो-
दयम्।
मौड्यो भद्रचतुष्किकाभिरुदितो माल्येन युक्त-
स्तथा
मल्लैस्तुल्यसपादकैस्तु सकलो वा शीर्षकैः
शेखरः ॥
राज्ञो गृहं छन्दचतुर्थं स्यात्
तत्रैव घण्टाकलसेन युक्तम्।
तुङ्गारसंज्ञस्य च सिंहकर्णैः
प्रासादके तेऽपि यथैव शुक्लाः ॥
षड्जातिभेदं क्रमपर्वपट्टै-
र्वंशैः कटैश्चापि यदा शिलाभिः।
छन्दं प्रकारैः कथितश्च षड्भि-
र्लोकप्रसिद्धा च परीक्षणीयम्।"
इति राजगृहादि ॥८॥
"वामे भागे दक्षिणे वा नृणां
त्रेधा कार्या वाटिका क्रीडनार्थम्।
एकद्वित्रिर्दण्डसंख्या शुभं स्यान्-
मध्ये धारागर्तमं तोयपन्तैः ॥
त्रेधा सप्तविभागभाजितमनो भद्रस्य भागत्रयं
तन्मध्ये जलवापिकालिनपदैरेकांशनो वेदिका।
तस्मेर्दाशभिश्च मध्यरचिता कोणेषु कूपान्विता:
कर्तव्यो जलयन्त्र एव विधिवत् भोगाय भूमी-
सुराम् ॥
तस्यां चम्पककुन्दजातिसुमनोवल्लाः सुनि-
र्व्याकुला
जातीदेवसमालकेतकिरपि क्षेत्रा तथा
पाटला।
नारङ्गः करमा वसन्तसनिका चारङ्गपुन्नादिकं
कर्तव्यो वटरो च पूगसमुका जम्बूश्च वृन्दद्रमाः ॥
मालूरः कदली च अन्यगवदाम्रत्यपक्षाश्रिया-
श्चित्राश्चोक्तदलप्रसिद्धतरवः सर्वर्तुका
वाटिकी।
कूर्परागुरुकिंशुका वयरियुः पृक्षाश्रयी निष्कुटो
प्रोक्षा नागलता च दीपनिधिता स्यात् निष्कुटो
स्वामिनी।
माल्येना प्रमदालिका च बकुला अशोकसंकेतो-
सखी
मालत्यादलमाल्यकौ सुरिभरी मन्दारपारि-
जमौ।

शिल्पशा

अन्ये भौम्यविचित्रखाद्यसुफलास्ते रीपगीया
बुधैः
यद्यापोति न भूतले शुभतरुं क्षेत्रस्थकान्
वापयेत्।
आस्थानं प्रतिवेदनाय च वटीयक्षस्तुधारोद्भवे
रोला स्त्रीजनखेलनाय रुचिरे वर्षावसन्तोन-
सवे।
बालाप्रौढवधूसुमध्यवनितागानैर्मनोहारिभि-
र्योगे प्रारदकेऽथ शीतलजलक्रीडा शुभे
मण्डपे ॥
इति वाटिका ॥९॥
"तुरङ्गमाणां गृहवामभागे
शाला चतुःषष्टिकरा विधेया।
शतार्हतो मध्यमिका च दैर्घ्ये
कनीयसी तैर्दशभिर्विहीना ॥
यासे च ज्येष्ठा तिथिदक्षमाना
त्रयोदशैकादशकैः क्रमेण।
तद्वाच्यभित्तिश्च करप्रमाणा
पञ्चार्हपञ्चाब्धिकरोदया स्यात् ॥
तेजोहानिमधीहया विदधते पूर्वापरास्या
नृणां
ते याम्योत्तरतो सुखादि सततं कीर्तिर्यशो
धान्यकम्।
कर्तव्यो धिषणं प्रतीह कलसस्थानं द्विदक्षोदयं
तस्याकोरणशुक्तिकश्च मुनिभिर्दक्षैः सुशोभा-
न्वितम्।
षष्ठा साधुहयाङ्गुलैर्निगदितो वेदाङ्गुलैकाधिकः
श्रीवत्सस्वस्तिकाव एव च मनोद्वारी द्विसप्ता-
ङ्गुलः।
रागाद्यङ्गुलकैस्तु वाजिविषयोद्गीता तथा
भैरवः
प्रान्तारस्तु युगाष्टमात्र उदये मानं करैः
सप्तधा।"
इत्यश्वशाला ॥१०॥
"निष्कद्वारं पूर्वमानेन कार्यं
चित्रिका वा मालिका सप्तशीर्षे।
स्यातां मध्ये लाक्षको रत्नमार्गे
तुल्यौ भागेनाधिकौ वापि मार्गे।
भागे दक्षिणवामके च करिणां शाला हरे-
र्हरस्य;
कर्तव्या सुदृढोन्नता च कलसैर्घण्टादिभि-
र्भूषिता।
संकीर्णा रसनी नवैर्निगदितो मन्दा स्याद्-
धारणः
सर्वेषूक्तसमा शालिरदितो गर्दैः करैकाङ्गुलैः।"
इति गजशाला ॥११॥
"यवोदरङ्गुलमानं प्रयुक्ते
दृष्टमानं चोत्तममेव मत्वात्।
अष्टाभिरष्टाभिरनो विहीनं
यवेन मानाधिक्योपि वेधैः ॥
अश्वोक्तिनो रासकरैश्च पीनाः;
प्रधानया भूयसुरिष्टमाश्च।

त्रिभागदैर्घ्येऽधिकतो विधेया
गृहा: क्रमेणैव यथोदितांश ॥
प्रोक्तं चतु:षष्टिकरं पृथुत्वे
क्रमेण षड्भिश्च करैर्विहीनम् ।
षड्भागतो दैर्घ्यमतोऽधिकं स्या-
द्बलाधिपस्यैव च पञ्चहस्ते: ॥
धरा हस्तैर्मन्त्रिगेहं पृथुत्वे
हीनं हीनं पञ्चकं वेदवेदै: ।
कुर्याद्धस्तैरष्टभांशोऽधिकोऽसौ
यावादये वह्नितो दैर्घ्य एव ॥
सामन्तादिकभूपतेश्च भवनं विंशद्विहस्ते: समं
हस्तैर्वेदविहीनकै: क्रमतया भागाधिकं
दैर्घ्यत: ।
दैवज्ञस्य सभासदश्च गुरुत: पौरोधसं भेषजं
विंशत्यष्टकरं द्विहस्तरहितं दैर्घ्ये द्विधा तद्-
भवेत् ॥
वेश्याकञ्चकिशिल्पिनामपि गृहे वेदाधिका
विंशति-
र्मानं हस्तचतुर्थवैरहितं दैर्घ्येऽधिका
यावत: ।
दर्शो ज्ञातकरान्वितस्य रचितो हस्तै: समं
विस्तरे
हीनं त्वर्धकरेण पञ्चकमिदं तुर्यांशदैर्घ्याधि-
कम् ॥
द्वाविंशता मानमिदं द्विजादे-
र्हीनं चतुर्भि: क्रमतो विधेयम् ।
दिगष्टरागाब्धिविभागतश्च
क्रमेण तद्वर्णचतुष्टयेऽपि ॥
कर्णाधिकं विस्तरतोऽधिकश्च
श्रीघ्रं विनाशं वसुदेति गेहम् ।
द्वारं नतं मूर्ध्नि यदाग्यतश्च
तत् सन्ततेर्घोनिकरं प्रदिष्टम् ॥
यासे सप्तनिहस्तविमुक्ते
प्रागामानमिदं मनुभुक्ते ।
पञ्चविंशत् पुनरपि तस्मिन्
मानमुशन्ति लघीरिव वृद्धा: ।
एकं द्वारं प्राक्सुखं शोभनं स्यात्
चातुर्वर्ण्यं शालभूपैश्च जैने ।
तुर्यां प्राच्यां पश्चिमे स्याच्चतुर्थे
वस्त्रं द्वारं दक्षिणे [illegible]र्जनीयम् ॥"

इति वास्तुशास्त्रे राज [illegible]ने राजगृहादि-
लक्षणं नाम नवमोऽध्या[illegible] ॥ ९ ॥

शिल्पिका, स्त्री, लताविशेष: । सहाचरिभी इति हिन्दीभाषा । तत्पर्य्याय: । शिल्पिनी २ प्रीता ३ प्रेयसी ४ वृत्तफला ५ । अस्या गुणा: । मधुरौषधरोचनूलस्वरपित्तापहारकत्वम् । इति राजनिर्घण्टः ।

शिल्पिनी, स्त्री, [illegible]हस्तौषधि: । इति मेदिनी ।

शिल्पिशाला, स्त्री, स्त्री, (शिल्पिनां शाला ।) शिल्पशाला । इत्यमरटीकायां स्वामी ।

शिल्पे [न्] त्रि, (शिल्पं क्रियाकौशलमस्यास्तीति । इनि ।) शिल्पकर्त्ता । (यथा, मनौ । ८ । ७५ ।

"ब्राह्मणै: शिल्पिभिर्म्लेच्छैर्वसेनोदकेन च ॥")

तत्पर्य्यायः । कारुः २ । इत्यमरः ॥ अस्य विवरणं शिल्पकारशब्दे द्रष्टव्यम् । शिल्पसम्बन्धी च ॥

शिवं, क्ली, (श्री + "सर्व्वनिघृष्वरिष्वलष्वशिव-पङ्कप्रकृष्वा अतन्ते ।" उणा० १ । १५३ । वसु प्रत्ययेन साधु ।) मङ्गलम् । इत्यमरः ॥ (यथा, रघुः । १ । ६० ।

"उपपन्नं ननु शिवं सप्तस्वङ्गेषु यस्य मे ।
दैवीनां मानुषीनाञ्च प्रतिहर्त्ता त्वमापदाम् ॥")

सुखम् । जलम् । इत्युणादिकोषः ॥ सैन्धवम् । वसुदलवल्कम् । श्वेतटङ्कणम् । इति राजनिर्घण्टः ॥ (मङ्गलवति, त्रि ॥ यथा, महाभारते । १ । २०८ । ३६ ।

"तत्र रम्ये शिवे देशे कौरवस्य निवेशनम् ॥")

शिवः, पुं, (श्री + "सर्व्वनिघृष्वेति ।"उणा० १।१५३। इति वसुप्रत्ययेन साधुः ।) ब्रह्मणः संज्ञाविशेषः । तस्य व्युत्पत्तिर्यथा । शिवं कल्याणं विद्यतेऽस्य शिवः । शं सुखं अस्यति भवतीति वा । शीरते ऽवतिष्ठन्ते अणिमादयोऽष्टौ गुणा अस्मिन् इति वा शिवः । इत्यमरटीकायां भरतः ॥ तत्पर्य्यायः । शम्भुः २ ईशः ३ पशुपतिः ४ मृडी ५ महेश्वरः ६ ईश्वरः ७ सर्व्वः ८ ईशानः ९ शङ्करः १० चन्द्रशेखरः ११ भूतेशः १२ खण्डपरशुः १३ गिरीशः १४ गिरिशः १५ मृडः १६ मृत्युञ्जयः १७ कृत्तिवासाः १८ पिनाकी १९ प्रमथाधिपः २० उग्रः २१ कपर्दी २२ श्रीकण्ठः २३ त्रिलोचनः २४ कपालभृत् २५ वामदेवः २६ महादेवः २७ विरूपाक्षः २८ त्रिलोचनः २९ कृत्तिवासाः ३० सर्व्वज्ञः ३१ धूर्ज्जटिः ३२ नीललोहितः ३३ हरः ३४ स्मरहरः ३५ भर्गः ३६ त्र्यम्बकः ३७ त्रिपुरान्तकः ३८ गङ्गाधरः ३९ अन्धकरिपुः ४० क्रतुध्वंसी ४१ वृषध्वजः ४२ व्योमकेशः ४३ भवः ४४ भीमः ४५ स्थाणुः ४६ रुद्रः ४७ उमापतिः ४८ । इत्यमरः ॥ वृषपर्व्वा ४९ रेरिहाणः ५० भगाली ५१ पांशुचन्दनः ५२ दिगम्बरः ५३ चटृहासः ५४ कालञ्जरः ५५ पुरहूटः ५६ वृषाकपिः ५७ महाकालः ५८ वराकः ५९ नन्दिवर्द्धनः ६० घोरः ६१ वीरः ६२ खरः ६३ भूरिः ६४ कटप्रूः ६५ भैरवः ६६ ध्रुवः ६७ शिविविष्टः ६८ गुडाकेशः ६९ देवदेवः ७० महानटः ७१ । इति जटाधरः ॥ तीव्रः ७२ सहस्रपात् ७३ पञ्चानन: ७४ कण्ठेकालः ७५ भरः ७६ भीरुः ७७ भीषणः ७८ कपालमाली ७९ जटाधरः ८० व्योमदेवः ८१ त्रिदशैवः ८२ धरणीश्वरः ८३ विश्वेशः ८४ जयन्तः ८५ धरणस्थः ८६ धन्यानाटी ८७ सुप्रसादः ८८ चन्द्रमौलिः ८९ भूधरः ९० वृषाङ्कः ९१ वृषभध्वजः ९२ भूतनाथः ९३ त्रिशिखिः ९४ वरेश्वरः ९५ विश्वेश्वरः ९६ विश्वनाथः ९७ नागीनाथः ९८ कुलेश्वरः ९९ व्योमकेशो १०० गिरानाथः १०१ शिखी १०२ प्रियतमः १०३ विषमाक्षः १०४ भद्रः १०५ ऊर्द्धरेताः १०६ यमान्तकः १०७ नन्दीश्वरः १०८ अष्टमूर्त्तिः १०९ अधीशः ११० खेचरः १११ भङ्गीशः ११२ अर्द्धनारीशः ११३ रसनायकः ११४ । इति शब्दरत्नावली ॥ उग्रः ११५ पिनाकपाणिः ११६ फणधरधरः ११७ कैलासनिकेतनः ११८ हिमाद्रितनयापतिः ११९ । इति कविकल्पलता ॥ तस्य सहस्रनामानि श्रीमहाभारते अनुशासनपर्व्वणि १७ अध्याये द्रष्टव्यानि ॥* ॥ अस्य कपालिनामकारणं यथा,—

ईश्वर उवाच ।

"आसीत्तत्र वरारोहे ब्रह्मणस्तु शिरोऽपरम् ।
पञ्चमं वदनं सुश्रोणि जातं काञ्चनसप्रभम् ॥
ज्वलन्तं परमं प्रीत्या जातं तस्य महात्मनः ।
स एवमब्रवीद्देवि ! जन्म जानामि ते त्र्यहम् ॥
अतः क्रोधपरीतेन संरक्तनयनेन च ।
वामाङ्गुष्ठनखाग्रेण छिन्नं तस्य शिरो मया ॥

ब्रह्मोवाच ।

यस्मादनपराधेन शिरश्छिन्नं त्वया मम ।
तस्माच्छापसमायुक्तः कपाली त्वं भविष्यसि ।"

इति मात्स्ये १५८ अध्यायः ॥ * ॥

अथ शिवमन्त्राः । तत्र एकाक्षरमन्त्रो यथा,—

"सान्तमौकारसंयुक्तं विन्दुभूषितमस्तकम् ।
प्रासादाख्यो मनुः प्रोक्तो भजतां कामदो
मणिः ।" शौं ॥ * ॥

अस्य पूजा । प्रातःस्नानादिमाल्यान्तां प्रागायामञ्च विधाय श्रीकण्ठादिन्यासं मालकान्यासेन कुर्य्यात् । ततः सामान्यपूजापद्धत्युक्तपीठन्यासं कृत्वा पीठशक्तीर्न्यसेत् । ततः कराङ्गन्यासौ । ततः ईशानाद्याः पञ्चमूर्त्तीन्यसेत् । मूलस्तु एतन्मन्त्रं न्यासं कृत्वा ध्यायेत् । अन्यत्रानधिकारात् । तत ऊर्द्धप्राग्दक्षिणोत्तरपश्चिमेषु सुखेषु ईशानस्य पञ्चकलाः पञ्च ब्रह्म ऋचः पदादिकाः प्रणवाद्या नमोऽन्ता न्यसेत् । ततः पूर्व्वपश्चिमदक्षिणोत्तरेषु तत्पुरुषस्य चतसः कला विन्यसेत् । ततो हृदये ग्रीवायां अंसद्वये नाभौ कुक्षौ पृष्ठे वक्षसि अघोरस्याष्टौ कलाः न्यसेत् । ततो गुह्ये अण्डकोषे ऊरुद्वये जानुद्वये जङ्घाद्वये कुक्षिद्वये कट्यां पार्श्वयोः वामदेवस्य चतुर्दशकलाः विन्यसेत् । ततः पार्श्वयोः स्तनयोर्नासिकायां भ्रूमध्ये बाहुयुगे सद्योजातस्याष्टौ कलाः न्यसेत् । ततः पञ्चाङ्गुलीषु ईशानाद्याः पञ्च ऋचो न्यसेत् । एवं मूर्द्धास्य हृदयगुह्यपादेषु तेषां ऋचो न्यसेत् । ततोऽङ्गन्यासान्तरं कुर्य्यात् । एवं विन्यस्य ध्यायेत् ।

"सुक्तापीतपयोदमौक्तिकजपावर्णैर्मुखैः पञ्चभि-
स्त्र्यक्षैरर्पितमौलिमिन्दुसुकुटं पूर्णेन्दुकोटि-
प्रभम् ।
शूलं टङ्ककपालवज्रदधनाम्भोजेऽक्षटाङ्कुशान्
पाशं भीतिहरं दधानममिताकल्पोज्ज्वलाङ्गं
भजे ॥"

एवं ध्यात्वा मानसैः संपूज्य अर्घ्यस्थापनं कृत्वा श्रीवोक्तपीठपूजां विधाय पुनर्ध्यात्वा आवाहनादिपञ्चपुष्पाञ्जलिदानपर्यन्तं कृत्वा आवरणपूजां विधाय धूपादिविसर्जनान्तं कर्म समापयेत्। अस्य पुरश्चरणं पञ्चलक्षजपः ॥१॥*॥

अस्याष्टाक्षरमन्त्रो यथा,—

"षड्वरः शक्तिरुद्रः कथितोऽष्टाक्षरो मनुः ॥"

क्लीं ॐ नमः शिवाय क्लीं। अस्य पूजा। प्रातः-स्नात्यादिश्रीवोक्तं पीठमन्त्रान्तं न्यासं विधाय ऋष्यादिन्यासकराङ्गन्यासान् प्राणायामञ्च कृत्वा ध्यायेत्।

"वन्दुकाभं त्रिनेत्रं शशिशकलधरं क्षीरवक्त्रं वहन्तं
हस्तैः शूलं कपालं वरदमभयदं धारयन्हासं
भजामि।
वामोरुन्यस्तभागायाः करतलविलसद्धारयन्कोत्-
पलायाः
पार्श्वेनाश्लिष्टदेहं मणिमयविलसद्भूषणायाः
प्रियायाः ॥"

एवं ध्यात्वा मानसैः संपूज्यार्घ्यस्थापनं कृत्वा श्रीवोक्तपीठपूजां विधाय पुनर्ध्यात्वावाहनादि पञ्चपुष्पाञ्जलिदानपर्यन्तं विधायावरणपूजां कृत्वा धूपदानादिविसर्जनान्तं कर्म समापयेत्। अस्य पुरश्चरणं चतुर्दशलक्षजपः ॥ २ ॥*॥ तस्याष्टाक्षरमन्त्रान्तरं यथा,—

"तारो माया वियद्बिन्दुमनुस्वारविभूषितम्।
षष्ठाक्षरसमायुक्तो वसुवर्णो मनुर्मतः ॥"

ॐ क्लीं क्लीं नमः शिवाय। अस्य पूजा। प्रातः-स्नात्यादिश्रीवोक्तपीठन्यासान्तं विधाय पूर्ववदृष्यादिन्यासं कराङ्गन्यासौ च कृत्वा ध्यायेत्।

"वन्दे बिन्दूदयं मणिस्फुटजलधरच्छन्नावतंसं
भालोद्यन्नेत्रभीमं स्मितसुखकमलं दिव्यभूषाङ्ग-
रागम्।
वामोरुन्यस्तपाणेरुरुकुवलयं संदधत्याः
प्रियाया-
श्चक्षोत्पुल्लत्तनाग्रं निहितकरतटं वेष्टयन्नेत्र-
हस्तम् ॥"

एवं ध्यात्वा मानसैः संपूज्यार्घ्यस्थापनं कृत्वा पीठपूजां विधाय पुनर्ध्यात्वावाहनादिपञ्चपुष्पाञ्जलिदानपर्यन्तं विधाय आवरणपूजां कृत्वा धूपादिविसर्जनान्तं कर्म समापयेत्। अस्य पुरश्चरणमष्टलक्षजपः ॥ ३ ॥*॥ अथास्य मृत्युञ्जयाख्यमन्त्रः।

"सारं स्थिरा सकर्णेन्दुर्मृगुः सर्गसमन्वितः।
चाक्षरात्मा निगदितो मन्त्रो मृत्युञ्जयात्मकः ॥"

ॐ जुं सः। अस्य पूजा। प्रातःस्नात्यादिश्रीवोक्त-पीठन्यासान्तं विधाय ऋष्यादिन्यासं कराङ्गन्यासौ च कृत्वा ध्यायेत्।

"चन्द्रार्काग्निविलोचनं स्मितमुखं पद्मद्वयान्तः-
स्थितं
मुद्रापाशमृगाक्षवरविलसत्पाणिं हिमांशु-
प्रभम्।
कोटीरेन्दुगलत्सुधाप्लुततनुं हारादिभूषोज्ज्वलं
कान्तं विश्वविमोहनं पशुपतिं मृत्युञ्जयं
भावये ॥"

एवं ध्यात्वा मानसैः सम्पूज्यार्घ्यस्थापनं कृत्वा पीठमन्त्रान्तं पीठपूजां विधाय पुनर्ध्यात्वावाहनादिपञ्चपुष्पाञ्जलिदानपर्यन्तं कृत्वा आवरणपूजां विधाय धूपादिविसर्जनान्तं कर्म समापयेत्। अस्य पुरश्चरणं लक्षत्रयजपः ॥ ४ ॥*॥

अथास्यापरद्वादशाक्षरमृत्युञ्जयमन्त्रः।

"मृत्युञ्जयं वसुधार्यं पालय द्वितयं वदेत्।
मृत्युञ्जयं वसुधार्यं पुनरेव विलोमतः ॥"

द्वादशाक्षरोऽयं मन्त्रः स्यात् मृत्युञ्जयाभिधोऽपरः।"

ॐ जुं सः पालय पालय ॐ जुं सः। अस्य ध्यानपूजादिकं सर्वं पूर्ववत् ॥ ५ ॥*॥ अस्य द्वाविंशत्यक्षरमन्त्रः।

"प्रणवो हृदयं पश्चात् ततो भगवते पदम्।
ऽनन्तश्च दक्षिणामूर्त्ति मन्त्रं मेधासुदीरयेत्।
प्रपद्ये ठद्वयान्तोऽयं द्वाविंशत्यक्षरो मनुः ॥"

ॐ नमो भगवते दक्षिणामूर्तये मन्त्रं मेधां प्रपद्ये स्वाहा। अस्य पूजा। प्रातःस्नात्यादि-श्रीवोक्तपीठमन्त्रान्तं विन्यस्य ऋष्यादिन्यासं कराङ्गन्यासौ च कृत्वा ध्यायेत्।

"वटतरुं महीच्छायं पद्मरागफलोज्ज्वलम्।
गारुत्मतमयैः पत्रैर्विचित्रैरुपशोभितम्।
नवरत्नमहाकल्पैर्जममानैरलङ्कृतम्।
विचिन्त्य वटमूलस्थं चिन्मयैकजगत्पतिम्॥
स्फटिकरजतवर्णौत्कीकीमक्षमाला-
मन्मतकलसविद्याज्ञानमुद्राः करालैः।
दधतमरुणकान्तं चन्द्रचूडं त्रिनेत्रं
विधृतविविधभूषं दक्षिणामूर्तिमीडे ॥"

एवं ध्यात्वा मानसैः सम्पूज्य अर्घ्यस्थापनादिः श्रीवोक्तपीठपूजां विधाय पुनर्ध्यात्वावाहनादि पञ्चपुष्पाञ्जलिदानपर्यन्तं विधायावरणपूजां कृत्वा धूपादिविसर्जनान्तं कर्म समापयेत्। अस्य पुरश्चरणं लक्षजपः ॥ ६ ॥*॥ अथास्य मन्त्रान्तरम्।

"अग्निसद्मभृगादित्यरागिनौ षष्ठबिन्दुमत्।
चिन्तामणिरिति ख्यातं बीजं सर्वसमृद्धिदम्॥"

ह-त्र म-र य-यौ ङें ॥ प्रपञ्चसारे।

"अनलक-ध-मरेफ-प्राणसत्यान्तवाम-
श्रुतिहिमरुचियुक्तैर्मन्मथेशस्तो मन्त्रराजः।"

अस्य पूजा। प्रातःस्नात्यादिश्रीवोक्तपीठमन्त्रान्तं विन्यस्य ऋष्यादिन्यासं कराङ्गन्यासौ च कृत्वा ध्यायेत्।

"नीलप्रवालरुचिरं विलसत्त्रिनेत्रं
पाशाङ्कुशोत्पलकपालकमूलहस्तम्।
चन्द्रार्धमिश्रमणिमूर्धं प्रविभक्तभूषं
बालेन्दुललसकुटं प्रणमामि रूपम् ॥"

एवं ध्यात्वा मानसैः संपूज्यार्घ्यं संस्थाप्य श्रीवोक्तपीठपूजां विधाय पुनर्ध्यात्वावाहनादि-पञ्चपुष्पाञ्जलिदानपर्यन्तं कृत्वा आवरणपूजां विधाय धूपादिविसर्जनान्तं कर्म समापयेत्।

अस्य पुरश्चरणं लक्षजपः। अयं अर्द्धनारीश्वरः ॥ ७ ॥*॥

"पार्श्वो वह्निसमारूढस्तारवानाद्यमीरितम्।
धान्तो वह्निसमारूढस्तूर्यस्वरसमन्वितः॥
बिन्दुगांसु द्वितीयः स्यात् टान्तः सर्गी ततीयकः।
नीलकण्ठात्मको मन्त्रो विषदयहरः परः ॥"

प्रमाणान्तरम्।

"सोच्चितोऽग्रासनः सत्वो बिन्दुमान् प्रथमं पुनः।
द्वितीया वह्निसंस्था दीर्घा ज्ञानीन्दुभूषिता॥
ततीया जाह्नवी सर्गी मन्त्रो दीक्षत्रयात्मकः।
नीलकण्ठात्मको मन्त्रो विषक्षयहरः परः ॥"

ह्रीं त्रूं ठः इति मन्त्रः। अस्य पूजा। प्रातः-स्नात्यादिश्रीवोक्तपीठन्यासान्तं कृत्वा ऋष्यादिन्यासं कराङ्गन्यासौ च विधाय ध्यानं कुर्यात्।

"बालार्कायुतसंकाशं धृतजटाजूटेन्दुखण्डोज्ज्वलं
नागैः कल्पितरुद्रं जपवटीं शूलं कपालं
करैः।
व्याघ्राजं विधृतं त्रिनेत्रविलसत्स्वानन्दं सुन्दरं
आप्लावक्परिधानमञ्जनिलयं श्रीनीलकण्ठं
भजे ॥"

एवं ध्यात्वा मानसैः संपूज्य अर्घ्यस्थापनादि-श्रीवोक्तपीठपूजां विधाय पुनर्ध्यात्वा आवाहनादिपञ्चपुष्पाञ्जलिदानपर्यन्तं कृत्वा आवरणपूजां विधाय धूपादिविसर्जनान्तं कर्म समापयेत्। अस्य पुरश्चरणं त्रिलक्षजपः। अयं नीलकण्ठः ॥८॥*॥ अस्याष्टाक्षरमन्त्रो यथा,—

"तारो ङेन्नीलकण्ठाय मन्त्रश्चाष्टाक्षरः परम्।
ॐ नमो नीलकण्ठाय। अस्य पूजादिकं सर्वं पूर्ववत् ॥ ९ ॥*॥ अस्य षडक्षरमन्त्रः षडक्षरमन्त्रश्च यथा,—

"हृदयं वपरं सान्तो ऽनन्तान्वितो मरुत्।
षष्ठाक्षरो मनुः प्रोक्तस्तारादोऽयं षडक्षरः ॥"

नमः शिवाय। ॐ नमः शिवाय। अस्य पूजा। प्रातःस्नात्यादिश्रीवोक्तपीठमन्त्रान्तं न्यासं विधाय ऋष्यादिन्यासं कुर्यात्। ततो मूर्धन्यासः। ततः करागन्यासौ। ततो गोलकन्यासः। ततो व्यापकन्यासं प्राणायामञ्च कृत्वा ध्यायेत्।

"ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारुचन्द्रावतंसं
रत्नाकल्पोज्ज्वलाङ्गं परशुमृगवराभीतिहस्तं
प्रसन्नम्।
पद्मासीनं समन्तात् स्तुतममरगणैर्व्याघ्रकृत्तिं
वसानं
विश्वाद्यं विश्ववीजं निखिलभयहरं पञ्चवक्त्रं त्रि-
नेत्रम् ॥"

एवं ध्यात्वा मानसैः सम्पूज्यार्घ्यस्थापनं कृत्वा श्रीवोक्तपीठपूजां विधाय पुनर्ध्यात्वावाहनादि-पञ्चपुष्पाञ्जलिदानपर्यन्तं विधायावरणपूजां कृत्वा धूपादिविसर्जनान्तं कर्म समापयेत्।

अस्य पुरश्चरणं षट्त्रिंशल्लक्षजपः ॥ १० ॥ ॐ ॥
अथास्य चाक्षरभेदः ।
"अर्धीशो वह्निशिखरी वामस्थो दीर्घ ईरितः ।
फट्कृन्तस्त्रिभेदोऽयं शिवमूर्तिमा समीरितः ॥"
ऊर्ध्वं फट् इति मनुः । अस्य पूजा । प्रातः-स्नात्वादिशैवोक्तपीठन्यासान्तं विधाय ऋष्यादि-न्यासं कराङ्गन्यासौ च कृत्वा ध्यायेत् ।
"वृषेश्वरं रक्ततनुं त्रिनेत्रं
रक्तांशुकाढ्यं हृदि भावयामि ।
टङ्कं त्रिशूलं स्फटिकाक्षमालां
कमण्डलुं बिभ्रतमिन्दुचूडम् ॥"
एवं ध्यात्वा मानसैः संपूज्यार्घस्थापनादिशैवोक्त-पीठपूजान्तं विधाय इमिति बीजेन मूर्त्तिं संकल्प्य पुनर्ध्यात्वावाहनादिपञ्चपुष्पाञ्जलिदान-पर्यन्तं विधायावरणपूजां कृत्वा धूपादिविसर्ज्जनान्तं कर्म समापयेत् । अस्य पुरश्चरणं त्रिलक्षजपः । अयं वृषेश्वरः ॥ ११ ॥ इति तन्त्रचारे शिवमन्त्राः ॥ ७ ॥ ॐ ॥ विष्णुशिवयोर-भेदो यथा,—
वराह उवाच ।
"शिवो मे दक्षिणं स्थानं तिष्ठते विगतज्वरः ।
लोकानां प्रवरः श्रेष्ठः सर्व्वलोकवरो हरः ॥
तं ये विन्दन्ति ते देवि ! नूनं मामेव विन्दति ।
ये मां विन्दन्ति देवेशि ! ते विन्दन्ति शिवं परम् ॥
अहं यत्र शिवस्तत्र शिवो यत्र वसुन्धरे ।
अहं तत्रापि तिष्ठामि त्यक्त्वा योनान्तरं क्वचित् ॥
शिवं यो वन्दते भूमे ! स हि मामेव वन्दते ।
लभते पुण्यजां सिद्धिमेवं यो वेत्ति तत्त्वतः ॥"
इति वाराहे शास्त्रमाश्रित्य महात्म्यवर्णननामा-ध्यायः ॥ ७ ॥ देवीविष्णुशिवानामभेदो यथा,—
"अयं नारायणो गौरी जगद्धाता सनातनः ।
विभज्य संस्थितो देवः स्वात्मानं बहुधेश्वरः ॥
न मे विदुः परं तत्त्वं देवाद्या न महर्षयः ।
एकोऽयं देवदेवात्मा भवानी विष्णुरेव च ॥
अहं हि निष्क्रियः शान्तः केवलो निष्परिग्रहः ।
मामेव केवलं देवमाहुर्वैमथाधिकाम् ॥"
इति कौर्म्मे १४ अध्यायः ॥ ७ ॥
शिवनिन्दानिषेधो यथा,—
"परात् परतरं यान्ति नारायणपरा जनाः ।
न ते तत्र गमिष्यन्ति ये दिवन्ति महेश्वरम् ॥
आगमं वैष्णवं पक्षं ज्ञानं यज्ञादिको विधिः ।
तेषां विनश्यति क्षिप्रं ये निन्दन्ति पिनाकिनम् ॥
यो मां समाश्रयेन्नित्यं एकान्तं भावमाश्रितः ।
विनिन्दन्देवदेवेशं स याति नरकायुतम् ॥
तस्मात् सा परिहर्त्तव्या निन्दा पशुपतेर्नृप ।
कर्म्मणा मनसा वाचा तद्भक्तैरपि यत्नतः ॥"
इति कौर्म्मे २५ अध्यायः ॥ ७ ॥
तस्य प्रलयकारकत्वं यथा,—
"मही पराद्धैर्हरते कालेनौकप्रकाशकः ।
कालाग्निर्नाशयत्यापः कर्त्तुं करोति निखिलं जलम् ॥

आत्मन्यात्मानमावेश्य भूत्वा देवो महेश्वरः ।
दहेदशेषं ब्रह्माण्डं सदेवासुरमानुषम् ॥
तमावेश्य महादेवो भगवान्नीललोहितः ।
करोति लोकसंहारं भीषणं लोकमाश्रितः ॥
प्रविश्य मण्डलं घोरं त्यक्त्वासौ वपुषा पुनः ।
निर्दहत्यखिलं लोकं सप्तसूर्त्तिस्वरूपधृक् ॥
स दग्ध्वा सकलं सत्त्वमस्त्रं ब्रह्मशिरो महत् ।
देवतानां शरीरेषु क्षिपत्यखिलदाहकः ॥
दग्धेष्वशेषदेहेषु देवी गिरिवरात्मजा ।
एषा सा साक्षिणः शम्भोस्तिष्ठते वैदिकी श्रुतिः ॥
शिवः कपालैर्देवानां कृतसंस्करभूषणः ।
आदित्यचन्द्रादिगणैः पूरयन्नोरमण्डलम् ॥
सहस्रनयनो देवः सहस्राक्षतिरीश्वरः ।
सहस्रहस्तचरणः सहस्रार्च्चिर्महाभुजः ॥
दंष्ट्राकरालवदनः प्रदीप्तानललोचनः ।
त्रिशूलं क्षत्रियसनो योगमैश्वरमास्थितः ॥
पीत्वा तत्परमानन्दं प्रभूतमखजं सकम् ।
करोति ताण्डवं देवमालोक्य परमेश्वरः ॥
पीत्वा तृप्यन्तं देवी भर्त्तुः परममङ्गला ।
योगमाश्राय देवस्य देहमायाभिभूषिनः ॥
स सृष्ट्वा ताण्डवरसं खेऽक्षयेव पिनाकधृक् ।
याति स्वभावं भगवान् दग्ध्वा ब्रह्माण्डमण्डलम् ॥
संस्थितेष्वथ देवेषु ब्रह्मविष्णुपिनाकिषु ।
गुणैरनेकैः पृथिवी विलयं याति वारिषु ॥
सवारितत्त्वं सगुणं ग्रसते हव्यवाहनः ।
तेजःसगुणसंयुक्तं वायौ संयाति संक्षयम् ॥
आकाशे सगुणो वायुः प्रलयं याति संक्षयम् ।
भूतादौ च तथाकाशं लीयते गुणसंयुतम् ॥
इन्द्रियाणि च सर्व्वाणि तैजसे यान्ति संक्षयम् ।
वैकारिके देवगणा प्रलयं यान्ति सत्तमाः ॥
वैकारिकास्तैजसस्य भूतादिरिति सत्तमाः ।
त्रिविधोऽयमहङ्कारो महते प्रलयं व्रजेत् ॥
महान्तमेभिः सहितं ब्राह्मणममितौजसम् ।
अव्यक्ते जगतो योनिः संहरेदेकमव्ययः ॥
एवं संहृत्य भूतानि तत्त्वानि च महेश्वरः ।
वियोजयत्यव्ययात्मानं प्रधानं पुरुषं परम् ॥
प्रधानपुंसोरप्ययोरेष संहार ईरितः ।
महेश्वरेच्छाजनितो न स्वयं विद्यते लयः ॥
गुणसाम्यं तदुच्यन्ते प्रकृतिः परिगीयते ।
प्रधानं जगतो योनिरादितत्त्वमचेतनम् ॥
कूटस्थश्चिन्मयो ह्यात्मा केवलः पञ्चविंशकः ।
गीयते मुनिभिः साक्षी महानेकः पिनाकधृक् ॥
एवं संहारकरणी प्रकृतिर्माहेश्वरी ध्रुवा ।
प्रधानस्य विशेषाणां दृष्टेद्वय इति श्रुतिः ॥
योगिनामथ सर्व्वेषां ज्ञानविध्वस्तचेतसाम् ।
आत्यन्तिकश्चैव लयो विधातोह शङ्करः ॥"
इति कौर्म्मे उपविभागे ४३ अध्यायः ॥ ७ ॥
ब्रह्मविष्णुशिवानामभेदो यथा,—
श्रीभगवानुवाच ।
"न ब्रह्मा भवतो भिन्नो न शम्भुर्नृपसत्तम ।
न चाहं युवयोर्भिन्नो ह्यभिन्नं सनातनम् ॥
प्रधानस्याप्रधानस्य भागाभागस्य रूपिणः ।

ज्योतिर्मयस्य भागो मेऽनेकोऽनेकोऽहमंशकः ॥
कस्त्वं कोऽहञ्च को ब्रह्मा ममैव परमात्मनः ।
अंशवयमिदं भिन्नं सृष्टिस्थित्यन्तकारणम् ॥
चिन्तयन् स्वात्मनात्मानं सम्भवं कुरु चात्मनि ।
एकत्वं ब्रह्मवैकुण्ठशम्भूनां हृदतं कुरु ॥
शिरोग्रीवादिभेदेन यथैवैकस्य धर्म्मिणः ।
अङ्गानि मे तथैकस्य भागवयमिदं हर ॥
यज्ज्योतिरग्र्यं स्वपरप्रकाशं
कूटस्थमक्षयमनन्तरूपम् ।
नित्यञ्च दीर्घादिविशेषणाद्यै-
र्हीनं परं तच्च वयं न भिन्नाः ॥"
इति कालिकापुराणे ११ अध्यायः ॥
अपि च ।
"ततो ब्रह्मा च शारीरं चिक्षेप चक्रे महेश्वर ।
प्रधानेच्छावलाच्छम्भो त्रिगुणं त्रिगुणीकृतम् ॥
तदूर्द्धभागः संजातश्चतुर्व्वक्त्रश्चतुर्भुजः ।
पद्मकेशरगौराङ्गकायो ब्रह्मा महेश्वर ॥
मध्यभागो नीलाङ्ग एकवक्त्रश्चतुर्भुजः ।
शङ्खचक्रगदापद्मपाणिः कायः स वैष्णवः ॥
अधस्तद्धभागः पञ्चवक्त्रश्चतुर्भुजः ।
स्फटिकाभ्रसमः कायः शुक्लः स चन्द्रशेखरः ॥
ईशश्चतो ब्रह्मकाये सृष्टिशक्तिं न्ययोजयत् ।
स्वयमेवाभवत् स्रष्टा ब्रह्मरूपेण लोकभृत् ॥
स्थितिशक्तिं निजां मायां प्रकृत्याख्यां न्ययो-जयत् ।
महेशो वैष्णवे काये ज्ञानशक्तिं निजां तथा ॥
स्थितिकर्त्ता भवेद्विष्णुरहमेव महेश्वरः ।
सर्व्वशक्तियोगेन सदा तद्रूपता मम ॥
अन्तशक्तिं तथा काये शाम्भवे संन्ययोजयत् ।
अन्तकर्त्ता भवेच्छम्भुः स एव परमेश्वरः ॥
ततस्त्रिषु शरीरेषु स्वयमेव प्रकाशते ।
ज्ञानरूपं परं ज्योतिरनादिर्भगवान् प्रभुः ॥
सृष्टिस्थित्यन्तकरणादेक एव महेश्वरः ।
ब्रह्मा विष्णुः शिवश्चेति संज्ञामात्र पृथक् पृथक् ॥
अतश्च विधाता च तथाहमपि न पृथक् ।
एवं शरीरं रूपञ्च ज्ञानमेकमनन्तरम् ॥"
इति तत्त्वे १२ अध्यायः ॥ ७ ॥
मार्कण्डेय उवाच ।
"ततो ब्रह्माण्डसंस्थानं दर्शयामास शम्भवे ।
वह्नये सोमराशिस्थं ब्रह्माण्डञ्च यथा पुरा ॥
तस्मिन्ने पद्मगर्भाभं ब्रह्माणं जगतः पतिम् ।
ज्योतीरूपं प्रकाशार्थं स्वार्थञ्च पृथग्गतम् ॥
शरीरिणं च ददृशे ब्रह्माण्डान्तर्गतं शुचुः ।
चतुर्भुजं प्रकाशन्तं ज्योतिर्भिः कमलासनम् ॥
तत्रैव च त्रिधाभूतं वपुर्ब्राह्मं ददर्श च ।
ऊर्द्धमध्यान्तभागेषु ब्रह्मविष्णुशिवात्मकम् ॥
अधोर्द्धभागो वपुषो ब्रह्मत्वमगमत्तथा ।
मध्यस्तदा विष्णुभूतो ददर्शान्तस्थ शम्भुताम् ॥
एकमेव शरीरन्तु त्रिधाभूतं सुचुम्बुः ।
हरौ ददर्श से गर्भे तथा सर्व्वमिदं जगत् ॥
कदाचित् वैष्णवं कायं ब्राह्मेकाये स्वयं व्रजेत् ।
ब्राह्मं तथा वैष्णवे च शाम्भवं वैष्णवे तथा ॥

शिवः

शाम्भवं वैष्णवं कार्यं ब्राह्मेऽप्याप्यं शाम्भवम् ।
गच्छन्तं लीनतां शम्भुरेकताच्च सुदुर्मुखः ॥
इदमूचे वामदेवोऽपि भिन्नषाण्मुष्यगोत्रजम् ;
परमात्मनि गच्छन्तं लीनतां तद्वपुश्च यत् ॥"

इति कालिकापुराणे १३ अध्यायः ॥ ❀ ॥

अथ शरभरूपधारणकारणं यथा,—

"इति तेषां निगदतां श्रुत्वा कार्यं जगादेमः ।
उवाच शङ्करं देवं ब्रह्माणश्च विशेषतः ॥
यत्कृते देवता: सर्वाः प्रजाश्च सकला इमाः ।
प्राप्नुवन्ति महद्दुःखं क्षीयते सकलं जगत् ॥
वाराहं सकलं कार्यं वक्तुमिच्छामि शङ्कर ।
त्वं त्वाणयस्व तत् कार्यं यतात्मा शङ्कराधुना ॥
त्वमाप्यायस्व तेजोभिर्जगत् स्थावरं सुहृः ।
आप्यायन्तु तदा देवाः शङ्करो वृत्तु योचितम् ॥
वासुदेवोऽपि तान् सर्व्वान् विदृश्य विदृशां-
ऋदा ।
वाराहं तेजसा वर्त्तुं स्वयं ध्यानपरोऽभवत् ॥
अग्नेः अग्नेर्यदा तेज आहरत्येष माधवः ।
तदा देहस्तु वाराहं सत्त्वहीनं व्यजायत ॥
तेजोहीनं यदा देहं ज्ञातं सर्व्वैरथामरैः ।
आससाद महादेवो यज्ञवाराहमद्भुतम् ॥
ब्रह्माद्याश्चिदृशुः सर्व्वे महादेवसमागतिम् ।
अनुजग्मुस्तदा तेज आधातुं स्मरनाशने ॥
ततः सर्व्वैर्वृगणैः स्वं स्वं तेजो दृषध्वजे ।
आदधे तेन बलवान् सोऽतीव समजायत ॥
ततः शरभरूपी स ततश्चागाद्गिरिशोऽभवत् ।
ऊर्ध्वाधोभागतश्चाष्टपादयुक्तः रुरुभैरवः ।
द्विनवयोजनोच्छ्रायः सार्द्धसप्तैकविस्तृतः ॥"

इति कालिकापुराणे २६ अध्यायः ॥

अथ विवाहो यथा,—

ईश्वर उवाच ।

"हिताय सर्व्वजगतां सम्भोगायात्मनस्तथा ।
दारान् ग्रहीतुमिच्छामि तथा सन्तानवृद्धये ॥
साहाय्यं तत्र कुर्व्वन्तु भवन्तो मम साम्प्रतम् ।
अर्थे तनयां कालीं याचन्तान्तु हिमाचलम् ॥

मार्कण्डेय उवाच ।

हरं सम्बोध्य मुनयो जगद्गुरुं गिरिराजमुपगम् ।
तेन संपूजिताश्चैव तु प्रोचुश्च मुनयो गिरिम् ॥
यज्जन्मशेखरो देवो देवदेवश्च यो मतः ।
शापान्नयत्यधो भक्तो य एको जगतां पतिः ॥
यः संहरति सर्व्वाणि जगन्ति प्रलयोद्भवे ।
यो विभूतिप्रदो भक्ते नानारूपो मनोहरः ॥
स ते दुहितरं कालीं भार्य्यामादातुमिच्छति ।
यदि पश्यति स्वदृश्योग्यं वरं त्वं दुहितुः समम् ।
तदा प्रयच्छ तनयां कालीं शशिभृते गिरे ! ॥

मार्कण्डेय उवाच ।

इत्युक्तस्तैर्गिरिपतिर्व्वरं वपुरुपस्थितम् ।
दृष्ट्वैव प्रियं ज्ञात्वाप्याप्य मुदमगाज्जदा ॥
दास्यामि शम्भवे पुत्रीं युष्माभिः प्रार्थितं-
स्वयम् ।
पूर्व्वमेष तपस्तप्त्वा तवेशः पतिरीप्सितः ॥
धातुर्भिक्षोऽनमिरं कोऽन्यथा वर्त्तु मुत्सहेत् ।

शिवः

कोऽन्यः प्रार्थयितुं शक्तः सुतां मम विना
हरात् ॥
हरेणानुगृहीता या नामन्यः कः समुत्सहेत् ।
हरं गृहीत्वा मनसा नार्य्यं सापीह वाञ्छति ॥
इत्युक्ता मेनया सार्द्धं सुतां दातुञ्च शम्भवे ।
अङ्गीकृत्य विदृशस्ते मुनयोऽगुर्महेश्वरम् ॥
ते गत्वा मुनयः सर्व्वे मरीचिप्रमुखा द्विजाः ।
शैलराजो यदाचष्ट तद्वपुर्मदगारवे ॥
हिमवांस्तनयां दातुं तुभ्यमुत्सहते हर ।
यदिदानीं त्वया कार्य्यं युज्यते क्रियतान्तु तत् ॥
अस्माभाप्यनुजानीहि हर गन्तुं निजाश्रमम् ।
सिद्धं ज्ञात्वा हरः सार्द्धं मुदितस्तान् विसृष्ट-
वान् ।
यथायोग्यं समाभाष्य क्रमादेकैकशो मुनीन् ॥
कालीविवाहदिवसे यूयमायात मां प्रति ।
इति चापि हरेणोक्तं प्रतिश्रुत्यर्षयो ययुः ॥
अथान्योन्यप्रियतया ज्ञात्वा ज्ञात्वा गतागतम् ।
समयं कारयामास विवाहाय हरो गिरिम् ॥
माधवे माघि पक्षस्यां तिथयेऽहिने ।
चन्द्रे चोत्तरफल्गुन्यां भरण्यादौ स्थिते रवौ ॥
आगता मुनयश्चत्र मरीचिप्रमुखा सुहृः ।
हरेण चिन्तिताः सर्व्वे तथा ब्रह्मादयः सुराः ॥
तथा च सर्व्वे दिक्पाला मुनयो ये तपोधनाः ।
मुख्या सह तदा शक्रो ब्रह्माद्याश्चास्तु मातरः ॥
नारदश्च मनस्तत्र देवर्षिर्ब्रह्मणः सुतः ।
एते परिकरैः सार्द्धं गणैराप्यायितः स्वकैः ।
कन्याविवाहविधिना गिरिपुत्र्यां हरोऽग्रहीत् ॥
विवाहे गिरिणा शम्भोः सर्व्वा सेष्टौ तनौ
स्थिताः ।
ते जात्यनदसम्भूता धवलङ्कारास्तदाभवन् ॥
द्विभुजोऽभूत्सदादेवो जटाः कैशत्वमागताः ।
शिरःस्थितश्चन्द्रखण्डः शोभिता ज्वलितोऽभवत् ॥
ललाटनेत्रमभवत्तदा रत्नं महार्घकम् ।
विचित्रवसनं व्याघ्रकृत्तिरासीत्तदा हिताः ॥
विभूतिलेपोऽभूत्तस्य सुगन्धिमलयोद्भवः ।
चारुरूपो हरश्चत्र बभूवाद्भुतदर्शनः ॥
ततो देवाः सगन्धर्व्वाः सिद्धा विद्याधरोरगाः ।
विस्मयं परमं प्रापुर्हरं दृष्ट्वा तथाविधम् ।
हिमवान् मुदितश्चाभूत् सहपुत्रेण मेनया ।
ज्ञातयश्चास्य मुमुहुर्हरं दृष्ट्वा तथाविधम् ॥
हरं ब्रह्मा तत्र भगौ हरं दृष्ट्वा मनोहरम् ।
सर्व्वं शिवकरं यस्मात्तस्माच्छम्भुरभवत् सुराः ।
तस्माद् शिवोऽयं लोकेषु नामादन्योऽधिकः
शिवः ॥
महेश्वरसमायुक्तमीदृशं यः स्मरेद्वृदा ।
सततं तस्य कल्याणं वाञ्छितञ्च भविष्यति ॥
एवं कालीं महामायां योगनिद्रां जगत्प्रसूः ।
पूर्व्वं दाक्षायणी भूत्वा पश्चात् गिरिसुताभवत् ॥
स्वयं समर्थापि सती कालीं सम्मोहितुं परम् ।
तथाप्युग्रं तपस्तेपे हिताय जगतां शिवा ।
एवं सम्मोहयामास कालिका चन्द्रशेखरम् ॥
एवेतत् कथितं सर्व्वं यत्पृष्टोऽहं सती यथा ।

शिवः

हिमवत्तनया भूत्वा पुनः प्राप महेश्वरम् ।"

इति कालिकापुराणे ३६ अध्यायः ॥ ❀ ॥

अथ गणा यथा,—

पुलस्त्य उवाच ।

"हरोऽपि शम्भरे याते समानूयाशु नन्दिनम् ।
प्राहामन्त्र्य शैलादौ ये स्थिताश्च शोभने ॥
ततो महेशवचनान्नन्दी सर्व्वगणाधिपः ।
उपस्पृश्य जलं धीमान् सस्मार गणनायकान् ॥
नन्दिना संस्मृताः सर्व्वे गणनाथाः सहस्रशः ।
चतुस्त्रय त्वराधुक्ता: प्रणताश्चिदृशेश्वरम् ॥
आगतांश्च गणाञ्छन्दी कृताञ्जलिपुटोऽब्रवीत् ।
सर्व्वाभिप्रेतदायाय शङ्कराय महात्मने ॥

नन्द्युवाच ।

यानेतान् पश्यसि शुभ्रो त्रिनेत्रान् जटिलान्
मुनीन् ।
एते ब्रह्मा इति ख्याता: कोट्य ब्रह्मादशैव च ॥
नागराजान् पश्यसि यान् भूर्द्धूलसमविक्र-
मान् ।
एते वै हारभाजश्चे महाभोगी यशोधनाः ॥
षण्मुखान् पश्यसि यांश्च शक्तिपाणीन् शिखि-
ध्वजान् ।
षट् च षष्टिसंख्या कोट्यः स्कन्दस्यानुचराः कुमार-
कान् ॥
एतावत्संख्या कोट्यः शाखा नाम षडाननाः ।
विशाखाच्छावदेवोक्ता नैगमेयाश्च शङ्कर ! ॥
सप्तकोटिगणाः शम्भो ये पश्यसि मयोत्तमाः ।
एकैकं प्रति देवेश मातरो ऽपि मातरः ॥
भयानकतिदेहाश्च त्रिनेत्राः शूलपाणयः ।
एते शैवा इति प्रोक्ताश्चव भक्ता गणेश्वराः ॥
तथा पाशुपताचार्य्ये भक्तप्रहरणा विभो ।
एते गणाश्चसंख्याता: साहाय्यार्थं समागताः ॥
पिनाकधारिणो रौद्रा गणाः कालमुखाः परे ।
तव भक्ताः समायाता जटामण्डलिनोऽद्भुताः ॥
खट्वाङ्गयोधिनो वीरा रक्तचर्म्मसमावृताः ।
इमे प्राप्ता गणा योद्धुं महाव्रतिन उत्तमाः ॥
दिग्वाससो यौगिनश्च घण्टाप्रहरणास्तथा ।
निराभया नाम गणाः समायाता जगद्गुरो ॥
सार्द्धदिनेत्राः पद्माक्षाः श्रीवत्साङ्कितवक्षसः ।
समायाताः खगारूढा दृषभध्वजिनोऽभया: ॥
महाघण्टाभुपता नाम चक्रशूलधराश्चथा ।
भैरवो विष्णुना सार्द्धमेभिर्दैत्यार्चितो हि यैः ॥
इमे नागेन्द्रवदनाः शूलखड्गधनुर्धराः ।
गणास्त्रकोमसम्भूता वीरभद्रपुरोगमाः ॥
एते चान्ये च बहवः प्रतशोऽथ सहस्रशः ।
साहाय्यार्थं तवायाता यथाप्रीत्याभिधत्स्व तान् ।
ततोऽब्रवीत् गणाः सर्व्वे प्रणिपत्यैकतनम् ॥"

इति वामनपुराणे ६७ अध्यायः ॥

अथ शिवपूजादि शिवलिङ्गशब्दे द्रष्टव्यम् ॥

अथातः शैवविहारदेशीयरीत्यनुसारेणोत्सवविधिर्यथा,

श्रीदेव्युवाच ।

"देवेश परमेशान सर्व्वज्ञ सर्व्वपूजित ।
कथं गच्छति सुकृतैरेव क्षयं यद्यद् शङ्कर ॥

ईश्वर उवाच ।
कोचाख्याने च देशे च योनिगर्भसमीपतः ।
साध्वी सती वाल्मिका हि रेवती जनविश्रुता ॥
म्लेच्छदेशोद्भवा या तु योगिनी सुन्दरी मता ।
तत्कुचौ कठिनौ हृन्दौ योनेस्तस्याश्च पीनता ॥
भिक्षाचारप्रसङ्गेन गच्छामि च दिवानिशम् ।
तत्सन्निधौ महेशानि तया मे रमणं महत् ॥

देव्युवाच ।
कुत्रासीत् किं तपस्तप्तं कथं प्राप्तं महीतलम् ।
त्वया सार्द्धं रतिर्यत् स्यात् नाथस्य तपसः फलम् ॥
तवापि च कृपा तस्यां जल्पते महती मया ।
इदानीं किमभूत् सा हि कृपया परया वद ॥

ईश्वर उवाच ।
नगेन्द्रतनये वाले शृणु सत्प्राणवल्लभे ।
शाबरीचरितं किञ्चित् कथयामि शुचिस्मिते ॥
रसक्रीड़ाचकाराहमेकाम्रकानने सुदा ।
येदाङ्गसम्भवा साध्वी योगिनी सा सुरी मता ॥
नाभूत्तस्याः सुतस्तस्मिन् मत्क्रियायां नगात्मजे ।
मामाप्तुत्कटं तप्तं हृये मे क्षेत्रकामदे ॥
एकाम्रगहने देवि पर्व्वते तीर्थसङ्कुले ।
तत्रैको ब्राह्मणो जातो भिक्षार्थं तासुवाच ह ॥
न दत्तस्तत्सरं तस्मै भिक्षा तिष्ठतु दूरतः ।
ततः शशाप विप्रस्तां म्लेच्छतां याहि दुर्म्मदे ।
इत्युक्ता म ययौ विप्रो म्लेच्छत्वमाप योगिनी ।
अतोऽर्थेन समर्थस्तु यात्तिं न ददाति च ॥
स दुर्गतिमवाप्नोत्यसमर्थो विनयञ्चरेत् ।
तस्मात्तु तपसा देवि क्रीतोऽहमभयं सदा ॥
अतस्तया रतिर्नीता मम कामिनि सर्व्वदा ।
तस्याः पुत्रो विनुसिंहो महौरससमुद्भवः ॥
एकेन जितवान् कामान् सौमारान् गौड़पश्चिमान् ।
विनिर्ज्जित्य नृपान् सर्व्वान् एकः श्रीमान् महामतिः ॥
तस्यापि बहवः पुत्राः पृथिवीपरिपालकाः ।
कुवाचा धार्म्मिकाः सर्व्वे राजानो युद्धदुर्म्मदाः ॥
सतोऽपि स विनुसिंहो योगमाश्रित्य विष्कले ।
तिष्ठत्यघक्तरूपेण पट्टे चाकल्पमम्बिके ।
कामात् सा माधवी देवी महेशे लीनतां गता ।
यथा छाया नन्दिमाता तथेयं योगिनी मता ॥
यथा पुत्रो भृङ्गरीटिस्तथा विनुर्म्मामात्मजः ।
विनुसिंहोऽपि कल्पान्ते परां सिद्धिमवाप्नुयात् ॥
तदंशजास्तु राजानः सर्व्वे कैलासवासिनः ।
भविष्यन्ति महात्मानो गणेशाः सर्व्वशालिनः ॥
रूपयौवनसम्पन्नैर्देवकन्यागणैः सह ।
विहरन्ति सदा देवि क्रीड़न्ति भैरवा यथा ॥
यदा यदा ब्रह्मशापः कामाख्यायां भवेत् पुनः ।
तदा तदावतीर्य्याहं विघ्नकामस्य पालकः ॥
तथा तदंशजाः सर्व्वे भवेयुः कामपालकाः ।
कथितमेवं देवेशि यावत् शापो विमुच्यते ॥
यावदेव महामाये महीयांस्तं क्रीड़ते ध्रुवम् ।
कल्पमेवं महेशानि कथं वर्षशतत्रयम् ॥

यावत्तु परमेशानि सङ्गते शापं परात्मिके ।
कामाख्या हि महामाये तदन्ते सफला भवेत् ॥
एवं ते कथितं देवि ब्रह्मशापविमोचनम् ।
कामाख्याया महेशानि साकल्येन मया ध्रुवम् ॥"
इति श्रीयोगिनीतन्त्रे देवीश्वरसंवादे चतुर्व्विंशतिसाहस्रे १३ पटलः ॥ शोचः । कीलकग्रहः । वाणुकम् । गुग्गुलुः । वेदः । पुष्करीकहमः । इति मेदिनी ॥ क्षणाधुस्कूरः । पारदः । इति राजनिर्घण्टः ॥ देवः । इति शब्दरत्नावली ॥ लिङ्गः । इत्युणादिकोषः ॥ विष्कम्भादिसप्तविंशतियोगान्तर्गततविंशतितमयोगः । तच्च जातफलम् ।

"महेशभक्तः श्रुतिपारदृश्वा
जितेन्द्रियस्तत्वरतो महात्मा ।
शिवाभिधानः खलु योगराजः
प्रकृतिकाले यदि मानवानाम् ॥"
इति कोष्ठीप्रदीपः ॥

शिवकः, पुं, कीलकः । इत्यमरः ॥ हे खोंटा इति ख्याते । गवां गात्रकण्डूयनार्थं गोष्ठे निखातस्तम्भे इति भरतः । कण्डूयनार्थकाष्ठे इति केचित् । बन्धनखट्टे इति केचित् । यत्र बद्धा गौर्दृश्यते इति केचित् । श्यति गात्रकण्डूं शिवः गो सनूकरणे नागीति डिवः स्वार्थे कः शिवकस्तालजादिः । कील्यते वध्यतेऽस्मिन् कीलः कील बन्धे घञ् स्वार्थे कः कीलकः । इति भरतः ॥

शिवकरः, पुं, (शिवस्य करः ।) चतुर्व्विंशतिभूताईदन्तर्गततिनविशेषः । इति हेमचन्द्रः ॥ मङ्गलकारके, त्रि ॥

शिवकाञ्ची, स्त्री, पुरीविशेषः । यथा,—
"शिवकाञ्ची विष्णुकाञ्ची काञ्चीयुग्मञ्च सम्मतम् ।
एतासु पृथिवीमध्ये न गण्यन्ते कदाचन ॥
काञ्ची शिवत्रिशूलस्था काञ्ची हरिहरात्मिका ।
वामदक्षिणशङ्खाभ्यां दधार द्विजपुङ्गवाः ॥"
इति भूतशुद्धितन्त्रम् ॥

शिवकीर्त्तनः, पुं, (शिवं सुखकरं कीर्त्तनं यस्य ।) भृङ्गरीटः । विष्णुः । इति मेदिनी ॥ शैवः । इति शब्दरत्नावली ॥

शिवगतिः, पुं, भूताईद्विशेषः । इति हेमचन्द्रः ॥

शिवचर्म्मजः, पुं, (शिवचर्म्मण्यातः । जन् + ड ।) मङ्गलग्रहः । अस्य प्रमाणं मङ्गलशब्दे द्रष्टव्यम् ॥

शिवङ्करः, त्रि, मङ्गलकर्त्ता । तत्पर्य्यायः । क्षेमङ्करः २ अरिष्टतातिः ३ शिवतातिः ४ । इति हेमचन्द्रः ॥ (पुं, बालग्रहविशेषः । यथा, हरिवंशे । १६६ । ७५ ।
"संवर्द्धनः संकुचमः कालभूतः शिवङ्करः ॥")

शिवचतुर्दशी, स्त्री, (शिवप्रिया चतुर्दशी ।) चतुर्दशीकर्त्तव्यशिवव्रतविशेषः । यथा,—
नन्दिकेश्वर उवाच ।
"शृण्वावहितो ब्रह्मन् वक्ष्ये माहेश्वरं व्रतम् ।
त्रिषु लोकेषु विख्याता नाम्ना शिवचतुर्दशी ॥

मार्गशीर्षे त्रयोदश्यां सितायामेकभक्तकम् ।
प्रार्थयेद्देवदेवेशं त्वामहं शरणं गतः ॥
चतुर्दश्यां निराहारः समभ्यर्च्च्य च शङ्करम् ।
सुवर्णवृषभं दत्त्वा भोक्ष्यामीति परेऽहनि ॥
एवं नियममास्थाय सुप्ता प्रातरुत्थाय मानवः ।
कृतस्नानजपः पश्चादुमया सह शङ्करम् ॥
पूजयेत् कमलैः शुक्लैर्गन्धधूपानुलेपनैः ।
पादौ नमः शिवायेति शिरः सर्व्वात्मने नमः ॥
ललाटं वामदेवाय नेत्राणि हरये नमः ।
मुखमिन्दुमुखायेति श्रीकण्ठायेति कन्धरम् ॥
सद्योजाताय कर्णौ तु वामदेवाय वै भुजौ ।
अघोरहृदयायेति हृदयञ्चापि पूजयेत् ॥
जठरं तत्पुरुषायेति तथेशायेति चोदरम् ।
गार्हे चानन्तधर्म्माय ज्ञानभूताय वै कटिम् ॥
ऊरू चानन्तवैराजसिंहायेति च पूजयेत् ।
अनन्तैश्वर्य्यनाथाय जानुनी चार्च्चयेद्बुधः ॥
प्रधानाय नमो जङ्घे गुल्फौ योमात्मने नमः ।
योमकेशात्मरूपाय पृष्ठमभ्यर्च्चयेन्नरः ॥
नमः पुष्ट्यै नमस्तुष्ट्यै पार्व्वतीञ्चापि पूजयेत् ।
ततस्तु वृषभं हैमसुदकुम्भसमन्वितम् ॥
शुक्लमाल्याम्बरयुतं पद्मरत्नपरिष्कृतम् ।
भक्ष्यैर्नानाविधैर्युक्तं ब्राह्मणाय निवेदयेत् ॥
प्रीयतां देवदेवोऽत्र सद्योजातः पिनाकधृक् ।
ततस्तु विप्रानन्नेन तर्पयेच्छक्तितः शुभान् ॥
वृषदाज्यञ्च संप्राश्य स्वपेद्भूमावुदङ्मुखः ।
पञ्चदश्यां ततः पुण्य विप्रान् भुञ्जीत वाग्यतः ॥
तद्वत् कृष्णचतुर्दश्यामेतत् सर्व्वं समाचरेत् ।
चतुर्दशीषु सर्व्वासु कुर्य्यात् पूर्व्ववदर्च्चनम् ॥
ये तु मासविशेषाः स्युस्तान्निबोध क्रमादिह ।
मार्गशीर्षादिमासेषु स्नपनमेतदीरयेत् ॥
शङ्कराय नमस्तुभ्यं नमस्ते करवीरकम् ।
त्र्यम्बकाय नमस्तेऽस्तु महेश्वर नमः परम ॥
नमस्ते तु महादेव स्थाणवे च ततः परम् ।
नमः पशुपते नाथ नमस्ते शम्भवे पुनः ॥
नमस्ते परमानन्द नमः सोमार्द्धधारिणे ।
नमो भीमाय इत्येवं त्वामहं शरणं गतः ॥
गोशृङ्गं गोमयं क्षीरं दधि सर्पिः कुशोदकम् ।
पञ्चगव्यं तथा विल्वं यवान् गोशृङ्गवारि च ॥
तिलांश्च कृष्णान् विधिवत् प्राशनं क्रमशः स्नृतम् ।
प्रतिमासं चतुर्दश्योरेकैकं प्राशनं स्नृतम् ॥
मन्दारैर्भालतीभिश्च तथा शुक्लैः करवीरकैरपि ।
सिन्धुवारैरशोकैश्च मल्लिकाभिश्च पाटलैः ॥
अर्कपुष्पकदम्बैश्च शतपत्रैस्तथोत्पलैः ।
एकैकेन चतुर्दश्यामर्च्चयेत् पार्व्वतीपतिम् ॥
पुनश्च कार्त्तिके मासि संप्राप्ते तर्पयेत् द्विजान् ।
अन्नैर्नानाविधैर्भक्ष्यैर्व्वस्त्रमाल्यविभूषणैः ॥
कृत्वा नीलवृषोत्सर्गं श्रुत्युक्तविधिना नरः ।
उमामहेश्वरं हैमं वृषभञ्च गवा सह ॥
सुवर्णफलसंयुक्तं सितनेत्रत्रयान्वितम् ।
सर्व्वोपस्करयुक्तायां शय्यायामुदङ्मुखोः ॥
ताम्रपात्रोपरि पुनः शालितण्डुलसंयुतम् ।

नाथाय विद्महे शान्ताय धीमहे तन्नः शिवः प्रचोदयात् ॥
लौकिकमन्त्रविधे दीक्षां न कथयन्ति कथितम् ।
गुरुरेको भवेत्तस्य दत्तादानार्थं तत्त्वतोऽपि हि ॥
अवधूतायाघोराय महाकालायधारिणे ।
अवधूतीकाय संपूर्ण मालायच्छिन्नमूर्धने ॥
मूर्धौ भवति मूर्धोर्ध्वं तदभावे दिगाम्बरे ।
न शिवरात्रिं कुर्वीत कुर्वन् मोहात् पतत्यधः ॥
अपेक्षे विधिना वस्तु कुर्यात् शिवचतुर्दशीम् ।
नोचेत्तेषामधस्तस्य फलमाप्नोति मानवः ॥
अकृष्टजादिकं किञ्चिदृषदन्नमथ वा हविः ।
शिवरात्रिमहिम्नैव सत्यं सर्वं न संशयात् ॥
दीर्घायुरारोग्यकुलाभिवृद्धि-
रवाप्यतामस्तु फलमुत्तमम् ।
तमाधिपत्यं दिवि कल्पकोटि-
शतं वसित्वा पदमेति शम्भोः ॥

न हृष्टचित्तरत्नसमस्ताः
पत्तनिस्थो न पितामहोऽपि वक्तुम् ।
न च सिद्धगणोऽपि शक्तं न चार्यं
यदि सिद्धायुतकोटयोऽपि वक्त्रे ॥
भवभयभरवक्रमः पठति यः करेऽहा सदा
शमेति च विमत्सरः सकलपापविध्वंसिनीम् ।
रमां शिवचतुर्दशीममरकामिनीकोटयः
स्वयंवरसमन्विताः किमु समाचरेद्यः सदा ॥
या पाप नारी दुरते च भक्ता
भर्तारमाद्यन्त सुतं गृहं वा ।
यापि प्रसादात् परमेश्वरस्य
परं पदं याति शिवाकपाली ॥"

इति माघे शिवचतुर्दशीव्रतं ८० अध्यायः ॥१॥
फाल्गुनी कृष्णा चतुर्दशी । तत्र शिवव्रतं कर्त्तव्यम् । तस्य विवरणं शिवरात्रिशब्दे द्रष्टव्यम् ।

शिवशा, स्त्री, (शिवं जानातीति । ज्ञा + कः । टाप् ।) शिवोपासिका । मङ्गलज्ञानी । शिवं जानाति या इत्यर्थे स्त्रियाम् ॥

शिवज्ञानं, क्ली, (शिवस्य ज्ञानमज्ञानात् ।) शुभाशुभकालबोधकशास्त्रम् । यदा याचादिक्रियाव्यवच्छकर्त्तया ज्योतिःशास्त्रोक्तशुभसमयप्राप्तिश्च न भवति तदा शिवज्ञानोक्तशुभसमये कर्म कर्त्तुमुचितं भवति । एतच्छिवज्ञानोक्तमादिक्रियोगे क्षौरयात्रादिर्मेयं आरम्भयोगे कार्य्यसिद्धिं वक्ते कार्य्यनाशं मूल्ये क्रयं अपमानं वा प्राप्नोति । दिवारात्रौ माघ-फाल्गुन-चैत्र-वैशाखश्रावणभाद्रेषु ऋतौ योगा एकरूपाः आश्विनकार्त्तिकमार्गशीर्षपौषेषु एकप्रकाराः ज्येष्ठाषाढयोश्च एकरूपा भवन्ति । यथा,—

माघ-फाल्गुन-चैत्र-वैशाख-श्रावण-भाद्रेषु
दिवादण्डा यथा ।

रविवारे	मा	२,	अ	८	मू	८	मा	२	य	१० ।			
सोमवारे	अ	४	य	८	अ	६	य	६	मा	४	मू	२ ।	
मङ्गलवारे	य	४	मू	२	अ	६	य	४	मू	२	अ	४	मू २ ।
बुधवारे	अ	४	य	६	अ	४	मू	२	य	४	मा	४	अ ४ मू २ ।
गुरुवारे	मा	४	मू	२	य	६	मा	६	मू	४	य	४	मू ४ ।
शुक्रवारे	अ	२	य	२	अ	६	य	६	अ	६	मू	४	अ ४ ।
शनिवारे	मू	४	य	४	मू	२	अ	८	मू	४	य	४	मू ४ ।

चैत्र रविदण्डा यथा ।

रविवारे	मू	२,	मा	२	अ	४	य	८	मा	८	मू	६ ।	
सोमवारे	य	८	अ	६	य	६	अ	८	मू	८ ।			
मङ्गलवारे	अ	२	य	४	मू	२	अ	६	य	६	अ	४	य ४ मू २ ।
बुधवारे	मू	२	अ	६	मा	४	य	४	मू	४	अ	१० ।	
गुरुवारे	य	१४	मू	४	य	४	अ	२	मू	६ ।			
शुक्रवारे	य	४	अ	४	मू	४	मा	२	य	६	मू	४	अ २ मा २ मू २ ।
शनिवारे	मू	२,	य	४	अ	६	य	४	अ	४	य	२	अ ४ मू ४ ।

आश्विन-कार्त्तिकमार्गशीर्षपौषेषु
दिवादण्डा यथा ।

रविवारे	मू	२	अ	६	य	८	अ	८	मू	२	मा	२	मू २ ।
सोमवारे	अ	४	मू	४	अ	६	य	१६ ।					
मङ्गलवारे	अ	६	य	२	अ	१०	य	६	मू	६	य	४ ।	
बुधवारे	अ	६	मा	२,	अ	२	य	६	अ	६	मू	२,	मा ६ य ४ ।
गुरुवारे	अ	६	य	४	मू	४	य	६	मू	२,	अ	४	य ६ ।
शुक्रवारे	अ	२	य	२	मा	६	य	६	अ	८	मू	२	अ ४ ।
शनिवारे	अ	२	य	२	अ	६	य	६	अ	८	मू	२,	अ ४ ।

ज्येष्ठ रविदण्डा यथा ।

रविवारे	मू	२	य	४	अ	२	य	६	अ	४	मू	२,	अ ८ ।
सोमवारे	य	६	अ	८	य	८	अ	६	य	६ ।			
मङ्गलवारे	मा	६	अ	२,	मू	२	अ	६	य	४	मा	४	मू २, अ ४ ।
बुधवारे	य	४	अ	२	य	४	अ	१४	य	२,	मू	४ ।	
गुरुवारे	मू	२,	अ	२	य	४	अ	८	मू	२	अ	४ ।	
शुक्रवारे	य	२,	अ	२	य	६	अ	८	मू	२,	अ	४ ।	
शनिवारे	य	१४	मू	४	य	४	अ	२	मू	४ ।			

शिवदू

ज्येष्ठाषाढ़योर्दिवादण्डा यथा।

रविवारे	भू	४	अ	६	व	६	अ	६	व	४	मा	२	भू २।
सोमवारे	व	८	अ	४	भू	६	व	८	भू	४।			
मङ्गलवारे	अ	६	भू	४	अ	६	व	६	मा	२	अ	२	मा २ भू २।
बुधवारे	भू	२	व	४	अ	८	व	६	अ	८	भू	४।	
गुरुवारे	मा	२	भू	२	व	६	मा	४	भू	४	व	६	अ ६।
शुक्रवारे	भू	२	मा	२	व	६	मा	२	भू	४	अ	६	व ४ भू ४।
शनिवारे	मा	२	भू	२	व	६	मा	६	भू	४	व	४	अ ६।

तत्र रात्रिदण्डा यथा।

रविवारे	अ	४	भू	४	व	४	अ	६	व	८	भू	४।	
सोमवारे	व	८	अ	८	भू	४	अ	४	भू	२	मा	२	भू २।
मङ्गलवारे	अ	२	व	४	मा	४	भू	४	व	२	अ	६	भू २ व ६।
बुधवारे	अ	१०	भू	२	व	४	अ	४	भू	१०।			
गुरुवारे	भू	२	अ	६	भू	२	व	४	भू	२	अ	६	भू ४ अ ४।
शुक्रवारे	अ	६	भू	२	व	४	भू	६	अ	६	भू	२	अ ४।
शनिवारे	भू	२	अ	२	व	८	भू	२	अ	६	भू	४	अ ६।

मतान्तरे अस्य प्रमाणं यथा,—
"माहेन्द्रे विजयो नित्यं अस्तते कार्य्यशोभनम्।
वह्नौ कार्य्यविलम्बः स्याच्छून्ये च मरणं ध्रुवम्॥
वेणाखादिश्रावणान्तं एकभावेन संवहेत्।
अष्टतादि दिवारात्रौ चतुर्मासं यथाक्रमम्॥
यामप्रमाणं दिवामाने ज्ञेयं सर्व्वत्र मासके।
तत्प्रमाणेन ज्ञातव्यं दण्डप्रमाणकं॥
रात्रिमानप्रमाणेन ज्ञेयो दण्डप्रमाणकः॥
न वारतिथिनक्षत्रं न योगकरणं तथा।
शिवज्ञानं समासाद्य सर्व्वं सुनिर्विचारयेत्॥"
तथा।
"भाद्रादिमार्गपर्य्यन्तं सप्तवारे समादिशेत्।
शून्यचक्रादियोगं हि पौषादिचेत्तत्तथा॥"
इति ज्योतिषे शिवज्ञानम्॥*॥

अनेकप्रकारं शिवज्ञानं शिवाज्ञा शिवालिखितं अन्यतघटौ च दृष्टं किन्तु परस्परमनैक्यं ज्ञातम्॥

शिवतातिः, स्त्री, कल्याणकारिणी। इति हेमचन्द्रः॥ अस्य पर्य्यायः शिवदारुशब्दे द्रष्टव्यः॥

शिवदत्तं, क्ली, (शिवेन दत्तम्।) विष्णुचक्रम्। इति केचित्॥ शिवेन शिवाय वा दत्तं त्रयमात्रञ्च॥

शिवदारु, क्ली, (शिवस्य दारु।) देवदारुवृक्षः। इति राजनिर्घण्टः॥

शिवदूतिका, स्त्री, (शिवदूती+स्वार्थे कन्।) मालकाविशेषः। इति शब्दरत्नावली॥

शिवदूती, स्त्री, (शिवेन दूतयति सन्देशं प्रापयतीत्यर्थे दूत+णिच्+पचाद्यच्। यद्वा, शिवो दूतो यस्याः। गौरादेराकृतिगणत्वात् ङीष्।) दुर्गा। इति त्रिकाण्डशेषः॥ योगिनीविशेषः। यथा,
"ब्रह्माणी प्रथमा प्रोक्ता ततो माहेश्वरी परा।
कौमारी वैष्णवी चैव वाराही पञ्चमी तथा॥
नारसिंही तथैवेन्द्री शिवदूती तथाष्टमी।
एताः पूज्याः महाभागा योगिनीः कामदायिनीः॥"

तस्या उत्पत्तिमन्त्रध्यानादि यथा,—
"कौशिक्या हृदयाद्देवी निःसृता ध्यायतो हरेः।
शिवदूतीति विख्याता शिवाशतसुसंवृता॥
मन्त्रमस्याः प्रवक्ष्यामि धर्म्मकामार्थदायकम्।
यत् श्रुत्वा साधको याति दुर्लभं शिवमन्दिरम्॥
येनाराध्य महादेवीं शिवदूतीं शिवात्मिकाम्।
न चिराल्लभते कामान्नरः सर्व्वत्रयी भवेत्॥
अन्तःसमाप्तसचिवो विन्दिन्दुभ्यां दशावरा।
स्वरेण पान्तयदन्तेन संस्थोऽन्तेन पूर्व्वगः॥
स एव बिन्दुयुगलपूर्व्वस्थोपान्त्यपावकः।
षष्ठस्वरकलाभूम्नैः संहितः प्रथमस्थितः॥
मन्त्रोऽयं शिवदूत्यास्तु शिवदूतीजयप्रदः।
रूपमस्याः प्रवक्ष्यामि शृणु वत्सक संमतम्॥
चतुर्भुजं महाकायं सिन्दूरसदृशद्युतिम्।
रक्तदन्तं मुण्डमालाजटाजूटार्द्धचन्द्रधृक्॥
नागयज्ञोपवीतहाराढ्यं शोभितं नखरोज्ज्वलम्।
व्याघ्रचर्म्मपरीधानं दक्षिणे शूलचक्रधृक्॥
वामे पाशं तथा चर्म्म विभ्रद्दूर्द्धं परिक्रमात्।
स्थूलवक्त्रश्च पीनोरुं तुङ्गमूर्त्तिं भयङ्करम्॥
निधिप्य दक्षिणं पादं सन्तिष्ठेत् कृष्णपोपरि।
वामपादं शृगालस्य पृष्ठे कैरवतेर्वृतम्॥
ईदृशं शिवदूत्यास्तु मूर्त्तिं ध्यायेद्विभूतये।
ध्यानमात्रादवेतस्या नरः कल्याणमाप्नुयात्॥
पूजनाद्चिराद्देवी सर्व्वान् कामान् ददाति च।
यः शिवाविरुतं श्रुत्वा शिवदूतीं शिवप्रदाम्।
प्रणमेत् साधको भक्त्या तस्य कामाः करे स्थिताः॥
यदा जघान जगतां रक्तबीजं हिताय वै।
महादेवी महामाया तदास्याः कायतः स्मृता॥
दूतं प्रस्थापयामास शिवं शुम्भाय चाम्बिका।
तेन सा शिवदूतीति देवैः सर्व्वैः प्रगीयते॥
क्षेमङ्करी च शान्ता च वेदमाता महोदरी।
कराला कामदा देवी भगाख्या भगमालिनी॥
भगोदरी भगाहारा भगजिह्वा भगा तथा।
एता द्वादश योगिन्यः पूजने परिकीर्त्तिताः॥
एता द्वादश योगिन्यः शिवदूत्याः सदैव हि।
विचरन्ति स्वयं देवी यत्र यत्रैव गच्छति॥"
इति कालिकापुराणे उत्तरतन्त्रे ५० अध्यायः॥
प्रमाणान्तरं वामने ५३ अध्याये मार्कण्डेयपुराणे देवीमाहात्म्ये रक्तबीजवधाध्याये च द्रष्टव्यम्॥

शिवद्रुमः, पुं, (शिवप्रियो द्रुमः।) विल्ववृक्षः। इति राजनिर्घण्टः॥

शिवद्विष्टा, स्त्री, (शिवेन द्विष्टा तत्पूजनानर्हत्वात्।) केतकी। इति राजनिर्घण्टः॥

शिवधातुः, पुं, (शिवस्य धातुः।) पारदम्। पारदं शिववीर्य्यं स्यादिति दर्शनात्। गोदन्तमणिः। इति केचित्॥

शिवनाभिः, पुं, (शिवस्य नाभिरिव।) शिवलिङ्गविशेषः। यथा,—
"उत्तमं मध्यमधमं त्रिविधं लिङ्गमीरितम्।
चतुरङ्गुलसुत्सेधे रम्बवदिकसुत्तमम्॥
उत्तमं लिङ्गमाख्यातं मुनिभिः शास्त्रकोविदैः।
तदर्द्धं मध्यमं प्रोक्तं तदर्द्धमधमं स्मृतम्॥
शिवनाभिमयं लिङ्गं प्रतिपूज्य महर्षिभिः।
श्रेष्ठश्च सर्व्वलिङ्गेभ्यस्तस्मात् पूज्यं विधानतः॥"
इति वीरमित्रोदयः॥

शिवपुरी, स्त्री, (शिवस्य पुरी।) काशी। इति हेमचन्द्रः॥

शिवप्रियं, क्ली, (शिवस्य प्रियम्।) रक्तचन्दनम्। इति राजनिर्घण्टः॥ शिवस्य प्रियत्वे, त्रि॥

शिवप्रियः, पुं, (शिवस्य प्रियः।) वकवृक्षः। इति जटाधरः॥ स्फटिकः। धुस्तूरः। इति राजनिर्घण्टः॥

शिवप्रिया, स्त्री, (शिवस्य प्रिया।) दुर्गा। इति शब्दमाला॥

त्वत्प्रसादान्मया देव व्रतमद्य समर्पितम्।
प्रसन्नो भव मे श्रीमन् मद्भूतिं प्रतिपद्यताम्।
त्वदालोकनमात्रेण पवित्रोऽस्मि न संशयः॥"
परदिने ब्राह्मणान् भोजयित्वा चतुर्दशीलाभे तत्र तदलाभे अमावस्यायां पारणं कुर्यात्। तत्र मन्त्रः।
"संसारक्लेशदग्धस्य व्रतेनानेन शङ्कर।
प्रसीद सुमुखो नाथ ज्ञानदृष्टिप्रदो भव॥"*॥
तत्र पार्थिवशिवलिङ्गपूजाविधिः। तत्र शिववाक्यं स्कान्दे।
"विप्रस्य तु सदैवाहं शुचेरप्यशुचेरपि।
गृह्णन् बलिं प्रदास्यामि विप्राणामिव दर्शनात्॥"
बलिं पूजाम्। तथा,
"शूद्रः कर्म्माणि यो नित्यं स्वीयानि कुरुते प्रिये।
तस्याहमर्चां गृह्णामि चन्द्रखण्डविभूषिते॥"
तथा,
"नमोऽन्तेन शिवेनैव स्त्रीणां पूजा विधीयते॥"
एवकारेण प्रणवनिवृत्तिः। एवं शूद्रस्यापि। तथा वृसिंहतापनीये। "सावित्रीं प्रणवं यजुर्लक्ष्मीं स्त्रीशूद्रयोर्नेच्छन्ति। सावित्रीं प्रणवं यजुर्लक्ष्मीं स्त्री शूद्रो यदि जानीयात् स गतोऽधो गच्छति इति।" नेच्छन्ति पर्यन्तं पराशरभाष्येऽपि लिखितम्। गोविन्दभट्टधृतम्।
"स्वाहाप्रणवसंयुक्तं शूद्रे मन्त्रं ददद्विजः।
शूद्रो नरकमाप्नोति ब्राह्मणः शूद्रतामियात्॥"
गौतमः।
"राजाशूद्रश्च सुखः कुर्य्यात् देवकार्य्यं सदैव हि।
शिवार्च्चनं सदाप्येवं शुचिः कुर्य्याच्छूद्रश्च सुखः॥"
सदा दिवारात्रौ। अत्र हेतुमाह रुद्रयामले।
"न प्राचीमग्रतः शूद्रो नोदीचीं शक्तिसंस्थिताम्।
न प्रतीचीं यतः पृष्ठमतो दृष्टं समाश्रयेत्॥"
यजमानः शूद्रो प्राचीमवस्थितये न समाश्रयेत् शूद्रोऽग्रगतसंचारकस्याग्रतः सांमुख्यात्। पञ्चवक्त्रपक्षे प्रधानं वक्त्रं प्राच्यवस्थितम्॥
एकवक्त्रपक्षे सुतरां तथा। तदुपमाह भविष्यपुराणम्।
"सौम्यं मौलोद्भवं चास्यं एकवक्त्रं चतुर्भुजम्।
शिवरूपं गृहे कुर्य्यात् प्रासादे वाप्यनिन्दितम्॥"
अत्राग्नेयी पूजानिषेधात् दैवाग्नेयस्य वाप्यग्नेयी प्राची प्रोक्ता गुरुक्रमैः। इत्यस्य न विषयः। किन्त्वभिधानादिप्रसिद्धा प्राची ग्राह्या। एतदनुसारादस्यमाणपूर्व्वाद्याग्नेयन्तपूजा। अतएव तत्रान्तरम्।
"यत्रैव भानुस्तु वियत्युदेति
प्राचीति तां वेदविदो वदन्ति।
तथा पुरः पूजकपूज्ययोश्च
सदागमज्ञाः प्रवदन्ति तान्तु॥"
एवञ्च देवतान्तरपूजा पूर्व्वाह्णे प्राङ्मुखेन सायं पश्चिमाभिमुखेन राजाशूद्रमुखेन कार्य्या।
"प्राक्पश्चिमोदगास्यस्तु प्रातः सायं निशासु च॥"
इति वचनात्॥
इति व्यासस्मृतिमिश्राः। मैवं पूजा रत्नाकरोक्तभविष्यपुराणीयसप्ताक्षरस्यैमन्त्रप्रस्ताव एव प्रागादिदिङ्नियमाभिधानात्। व्यवहारोऽपि अत्र न तथेति॥*॥ लिङ्गपुराणे।
"विना भस्मत्रिपुण्ड्रेण विना रुद्राक्षमालया।
पूजितोऽपि महादेवो न स्यात्तस्य फलप्रदः।
तस्मात्सदापि कर्त्तव्यं ललाटेऽपि त्रिपुण्ड्रकम्॥"
नन्दिपुराणे।
"आयुष्मान् बलवान् श्रीमान् पुत्रवान् धनवान् सुखी।
वरमिष्टं लभेल्लिङ्गं पार्थिवं यः समार्चयेत्।
तस्मात्तु पार्थिवं लिङ्गं ज्ञेयं सर्व्वार्थसाधकम्॥"
भविष्ये।
"स्फटिकं विल्वपत्रं लिङ्गं स्फाटिकं सर्व्वकामदम्।
नर्म्मदाशिरिजं श्रेष्ठमन्यदपि हि लिङ्गवत्॥"
लिङ्गवत् लिङ्गाकारम्। कालकौसुम्याम्।
"अन्यादृष्यपरीमाणं न लिङ्गं कुत्रचिन्नरः।
कुर्व्वीतात्यन्तदुःखं न कदाचित समाचरेत्॥"
घण्टोपरीतिरिक्तिका। अङ्गुष्ठतः दृष्टपर्व्वग्रन्थितः।
"अङ्गुष्ठाङ्गुलिमानन्तु यत्र यत्रोपदिश्यते।
तत्र तत्र दृष्टपर्व्वग्रन्थिभिर्मिनुयात् सदा॥"
इति छन्दोगपरिशिष्टात्॥
शिवधर्म्मे।
"सहस्रमर्च्चयेल्लिङ्गं निरयं स न गच्छति।
रुद्रलोकमवाप्नोति भुक्त्वा भोगानतुत्तमान्॥"
तथा।
"वालुकानि च लिङ्गानि सहस्राणि च कारयेत्।
सहस्रमर्च्चनात् सोऽपि लभते वाञ्छितं फलम्॥"
ततश्चासकृतिथावारभ्यासकलाभकामः "सहस्रमितपार्थिवशिवलिङ्गपूजनमिति यथास्थाने वाक्ये देयम्॥*॥ ब्रह्मपुराणे।
"यावन्न दीयते चार्घ्यं भास्कराय निवेदितम्।
तावन्न पूजयेद्विष्णुं शङ्करं वा महेश्वरीम्॥"
राघवभट्टधृतम्।
"सर्व्वैव प्रशस्तोऽयं शिवसूर्य्यार्चनं विना॥"
अयं शुक्लः। अग्निपुराणे।
"तल्लिङ्गैः पूजयेन्मन्त्रैः सर्व्वदेवान् पृथक् पृथक्।
ध्यात्वा प्रणवपूर्व्वन्तु तन्नाम्ना सुसमाहितः।
नमस्कारेण मन्त्रेण पुष्पाणि विन्यसेत् पृथक्॥"*
देवीपुराणे।
"स्नदाहरणमंचदृप्रतिष्ठाज्ञानमेव च।
स्नपनं पूजनञ्चैव विसर्ज्जनमतः परम्॥
हरौ महेश्वरञ्चैव भूतपाणिः पिनाकधृक्।
पशुपतिः शिवञ्चैव महादेव इति क्रमात्॥"
अत्र पूर्व्वोक्तसप्तकर्म्माणि परवचनोक्तसप्तनामभिः क्रियानुरूपविभक्तिमद्भिर्यथायथं कार्य्याणि। अदृष्टार्थयोरर्थक्रमासम्भवेन पाठक्रमादेव आवाहनात् प्राक् प्रतिष्ठा आद्धे कुशासनदानवत्॥*॥ तत्रानुष्ठानम्। हराय नमः इति स्नदाहरणम्। महेश्वराय नमः इति संदृष्टनम्। भूतपाणे इह सुप्रतिष्ठितो भव इति प्रतिष्ठा। ध्यायेन्नित्यमित्यादिना ध्यात्वा पिनाकधृक् इहागच्छ इत्याद्यावाहनम्। पशुपतये नमः इति स्नपनम्। एतत् पाद्यं नमः शिवाय नमः एवमर्घ्यादिना पूजयेत्। विसर्ज्जनात् पूर्व्वं भविष्यपुराणोक्तं स्वभावसिद्धप्राच्येशान्यादिदिक्षु वामावर्त्तेन पूजनम्। यथा। सर्व्वाय क्षितिमूर्त्तये नमः। भवाय जलमूर्त्तये नमः। रुद्राय अग्निमूर्त्तये नमः। उग्राय वायुमूर्त्तये नमः। भीमाय आकाशमूर्त्तये नमः। पशुपतये यजमानमूर्त्तये नमः। महादेवाय सोममूर्त्तये नमः। ईशानाय सूर्य्यमूर्त्तये नमः।
"मूर्त्तयोऽष्टौ शिवस्यैताः पूर्व्वादिक्रमयोगतः।
आग्नेयन्ताः प्रपूज्याश्चा यथा लिङ्गे शिवं यजेत्॥"
ततो महादेव नमस्क इति संहारमुद्रया विसर्ज्जयेत्॥*॥ नन्दिपुराणे।
"गोभूतिलहिरण्यादिबलिपुष्पनिवेदने।
श्रेयो नमः शिवायेति मन्त्रः सर्व्वार्थसाधकः॥
सर्व्वमन्त्राधिकश्चायमोङ्कारात्मा षडक्षरः।
तन्मन्त्रजापी तत्कर्म्मरतस्तद्गतमानसः।
निष्कामः पुरुषो राजन् स रुद्रपदमश्नुते॥"
भविष्ये पराशरमुपक्रम्य।
"अपवित्रः पवित्रो वा सर्व्वावस्थां गतोऽपिवा।
महापातकयुक्तो वा मन्त्रस्यास्य जपे यथा।
अधिकारी भवेत् सद्यः इति देवोऽब्रवीच्छिवः॥"
इति तथेत्यर्थः॥ पूर्व्वोक्तयथापदानुरोधात्। तेन यथाधिकारी भवेत्तथाब्रवीदित्यर्थः। तथा,
"सर्व्वेषामेव पात्राणां परं पात्रं महेश्वरः।
यतस्तं चायते यस्मादृतौव नरकार्णवात्॥
शिवसुद्दिश्य यद्दत्तं सर्व्वकारणकारणम्।
तदनन्तफलं दातुर्भवतीह किमद्भुतम्॥
दत्त्वा नैवेद्यवस्त्रादि नाददीत कदाचन।
त्यक्तयं शिवसुद्दिश्य तदादाने न तत्फलम्॥
आदाने ग्रहणे। शिवधर्म्मे।
"तस्मात् पुष्पैः फलैः पत्रैस्तोयैरपि च यत् फलम्
तदनन्तफलं ज्ञेयं भक्तिरेवात्र कारणम्॥"
भविष्ये।
"लिङ्गानुलेपनं कार्य्यं दिव्यगन्धैः सुगन्धिभिः।
वर्षकोटिशतं दिव्यं शिवलोके महीयते॥"
शिवधर्म्मे।
"तस्मात् पुण्यप्रदानेन लिङ्गेषु प्रतिमासु च।
अशीतिवर्षकोटीनां दुर्गतिं न नरो व्रजेत्॥"
स्कान्दे।
"शुष्कारण्यपि च पत्राणि श्रीवृक्षस्य सदैव हि।"
दातव्यानीति शेषः। भविष्ये।
"धुस्तूरकेण यो लिङ्गं सकृत् पूजयते नरः।
स गोलक्षफलं प्राप्य शिवलोके महीयते॥

विल्वपत्रैरखण्डैश्च यो लिङ्गं पूजयेत् सकृत्।
सर्व्वपापैर्विनिर्मुक्तः शिवलोके महीयते॥"
तथा।
"सर्व्वकामप्रदं विल्वं दारिद्र्यस्य प्रणाशनम्।
विल्वपत्रात् परं ज्ञात्वा येन तुष्यति शङ्करः॥"
तथा।
"केशकीटावपविद्धानि निशि पर्य्युषितानि च।
स्वयंपतितपुष्पाणि त्यजेदुपहतानि च॥"
तथा।
"देवदारुसमेतश्च सर्ज्जश्रीवासकुङ्कुमम्।
श्रीफलं चाज्यमिश्रन्तु दत्त्वाप्नोति परां गतिम्॥"
सर्ज्जः शालरसः। श्रीवासः सरलद्रवः। कुङ्कुमः प्रसिद्धः।
"गव्यं सौगन्धिकं धूपं षट्सहस्रगुणोत्तरम्।
अगुरुं घृतसाहस्रं द्विगुणञ्चाधिकागुरुम्।
गुग्गुलुं घृतसंयुक्तं साक्षात् गच्छति शङ्करः॥"
तथा।
"तैलेनापि हि यो दद्यात् घृताभावेन मानवः।
तेन दीपप्रदानेन शिववद्राजते भुवि॥"
नन्दिकेश्वरे।
"अथ भक्त्या शिवं पूज्य नैवेद्यन्तूपकल्पयेत्।
यद्दृष्ट्वैवात्मनः श्रेयस्तदीशाय कल्पयेत्॥
प्रालितण्डुलप्रस्थस्य कुर्य्यादन्नं सुसंस्कृतम्।
शिवाय तं वरं दद्यात् चतुर्दश्यां विशेषतः॥"
प्रस्थमानं प्रागुक्तम्। शिवसर्व्वस्वे स्कान्दम्।
"एकमाम्रफलं पक्वं यः शम्भोर्विनिवेदयेत्।
वर्षाणामयुतं भोगैः क्रीडते स शिवे पुरे॥
एकं बीजाफलं पक्वं यः शिवाय निवेदयेत्।
वर्षलक्षं तथा भोगैः शिवलोके महीयते॥"
शिवपुराणे।
"नैवेद्यं घृतसंयुक्तं मधुपर्कं निवेदयेत्।
अग्निष्टोमस्य यज्ञस्य फलमाप्नोति मानवः॥"
शिवसर्व्वस्वे स्कान्दम्।
"परिपक्वं सुसंस्कृतमाज्यमिक्तं सुसंस्कृतम्।
शिवाय मांसं दत्त्वा तु नरो यत् फलमाप्नुयात्॥
अश्वमेधफलदानेन यत् फलं परिकीर्त्तितम्।
तत् फलं प्राप्नुयान्नित्यं सर्व्वं मांसनिवेदनात्॥"
शिवधर्म्मे।
"लिङ्गवेदी भवेद्देवी लिङ्गं साक्षात् महेश्वरः।
ययोः संपूजनात् सम्यक् देवी देवश्च पूजितौ॥"
देवीपुराणे।
"सर्षं नैवेद्यतोयञ्च प्रसादं नैव लङ्घयेत्
एकीभूतमना भूत्वा यः कुर्य्यात् चिः प्रदक्षिणम्॥
छिन्नस्तेन भवन्नित्यं तस्य पुनरुद्भवः॥"
भविष्ये।
"बाहुभ्यां चैव पाणिभ्यां शिरसा च विचक्षणः।
कृत्वा प्रणामं देवेशं सर्व्वान् कामानवाप्नुयात्॥"
लिङ्गपुराणे।
"गन्धपुष्पनमस्कारैर्मन्त्रवाद्यैश्च सर्व्वशः।
यो मामर्च्चयते तत्र तदा तुष्याम्यहं सदा॥"
महाभारते।
"सर्व्वलक्षणहीनोऽपि युक्तो वा सर्व्वपातकैः।
सर्व्वं तरति तत् पापं भावयन् शिवमात्मना॥"
राघवभट्टधृतम्।
"अधोमुखे वामहस्ते ऊर्द्धास्यं दक्षहस्तकम्।
चिन्मात्रकुलीरकुलीभिः संगृह्य परिवर्त्तयेत्।
प्रोक्ता संहारमुद्रेयमर्पणे तु प्रशस्यते॥"
अर्पणे आत्मनीति शेषः। स्कान्दे।
"निर्म्माल्यं यो हि मद्भक्त्या शिरसा धारयिष्यति।
अशुचिर्भिन्नमर्य्यादो नरः पापसमन्वितः॥
नरके पच्यते घोरे तिर्य्यग्योनौ च जायते।
ब्रह्महापि शुचिर्भूत्वा निर्म्माल्यं यस्तु धारयेत्।
तस्य पापं महच्छीघ्रं नाशयिष्ये महामते॥"
शुचिः स्नानादिनेति शेषः। स्कन्दे।
"स्पृष्ट्वा रुद्रस्य निर्म्माल्यं सवासा आप्लुतः शुचिः॥"
इति कालिकापुराणीयमशुचिविषयम्॥
अनुपनीतविषयमिति श्रीदत्तः। वक्ष्यमाणपरिशिष्टम्।
"अग्राह्यं शिवनैवेद्यं पत्रं पुष्पं फलं जलम्।
श्राद्धग्रामशिलास्पर्शात् सर्व्वं याति पवित्रताम्॥
कालिकापुराणे।
"यो ह्यदेवार्चनरतः स नैवेद्यभक्षकः।
केवलं सौरशैवे तु वैष्णवो नैव भक्षयेत्॥"
इति तिथ्यादितत्त्वम्॥ * ॥
अन्यच्च।
ब्रह्मोवाच।
"शिवरात्रिव्रतं वक्ष्ये कथाञ्च सर्व्वकामदाम्।
यथा च गौरी भूतेशं पृच्छति स्म परं व्रतम्॥
श्रीमहादेव उवाच।
माघफाल्गुनयोर्म्मध्ये या च कृष्णा चतुर्दशी।
तस्यां जागरणाद्वः पूजितो मुक्तिमुक्तिदः॥
कामयुक्तो हरः पूज्यो दाश्वानेव केशवः।
उपोषितेः पूजितः सकरकाशार्घ्यदस्तथा॥
निषादश्चाखेटे राजा पापी सुन्दरसेनकः।
स कुक्कुरेणसंयुक्तो मृगान् हन्तुं वनं गतः॥
मृगादिकमसंप्राप्य क्षुत्पिपासार्दितो गिरौ।
रात्रौ तडागतीरे स निकुञ्जे जागदास्थितः॥
तत्रास्ति लिङ्गं स्वं रक्तकरवीरं चाक्षिपत्ततः।
पर्णानि चापतन्मूर्द्धि लिङ्गस्यैवं न जानतः॥
तेन धूलिनिरोधाय छिन्नं नीरञ्च लिङ्गके।
शरः प्रमादेनैकस्तु प्रच्युतः करपल्लवात्॥
जानुभ्यामवनीं गत्वा लिङ्गं स्पृष्ट्वा गृहीतवान्।
एवं स्नानं सपूजनञ्च जागरोऽभवत्॥
प्रातर्गृहागतो भार्य्यादत्तान्नं भुक्तवान् स च।
काले मृतो यमभटैः पाशैर्बद्धा तु नीयते॥
तदा मम गणैर्युद्धे जित्वा मुक्तीकृतः स च।
कुक्कुरेण सहैवाभूद्गणो मत्पार्श्वगोऽमलः॥
एवमज्ञानतः पुण्यं ज्ञानात् पुण्यमथाक्षयम्।
त्रयोदश्यां शिवं पूज्य कुर्य्यात्तन्नियमं व्रती॥
प्रातर्देव चतुर्दश्यां जागरिष्याम्यहं निशि।
पूजां दानं जपं होमं करिष्याम्यात्मशक्तितः॥
चतुर्दश्यां निराहारो भूत्वा शम्भो परेऽहनि।
भोक्ष्येऽहं मुक्तिमुक्त्यर्थं शरणं मे भवेश्वर॥
पक्षत्रयान्ततः स्नात्वा अन्तकाले गुरुं श्रितः।
ॐ नमो नमः शिवाय गन्धाद्यैः पूजयेद्धरम्॥
तिलतण्डुलव्रीहींश्च जुहुयात् स्रुक्घृतं चरुम्।
हुत्वा पूर्णाहुतिं दद्यात् ह्यणुयाज्ञीतसक्थाम्॥
अर्द्धरात्रे त्रियामे च चतुर्थे च पुनर्यजेत्।
मूलमन्त्रं तथा जप्त्वा प्रभाते च क्षमापयेत्॥
अविघ्नेन व्रतं देव त्वत्प्रसादात् समर्पितम्।
क्षमस्व जगतां नाथ त्रैलोक्याधिपते शिव॥
यन्मयाद्य कृतं पुण्यं तच्छिवस्य निवेदितम्।
त्वत्प्रसादान्मया देव व्रतमद्य समर्पितम्॥
प्रसन्नो भव मे श्रीमन् मद्गृहं प्रतिगम्यताम्।
तदालोकनमात्रेण पवित्रोऽस्मि न संशयः।
भोजयेद्ब्राह्मणान्निष्ठांश्च वस्त्रच्छत्रादिकं ददेत्॥
देवादिदेव भूतेश लोकानुग्रहकारक।
यन्मया श्रद्धया दत्तं प्रीयतां तेन मे प्रभुः॥
इति क्षमाप्य च यतीन् कुर्य्यात् द्वादशवार्षिकम्।
कौलिन्श्रीपुत्रराज्यादि प्राप्य शैवं पुरं व्रजेत्॥
द्वादशस्वपि मासेषु प्रकुर्य्यादिह जागरम्।
यतीन् द्वादश संपूज्य दीपदः स्वर्गमाप्नुयात्॥"
इति गारुडे शिवरात्रिव्रतकथा १२४अध्यायः॥

शिवलिङ्ग, क्ली, (शिवस्य लिङ्गम्।) महादेवस्य प्रसिद्धः। तस्योत्पत्तिर्यथा,—
"तत्रापि गत्वा मदनो ददर्श्ग हरकेतनम्।
दृष्ट्वा प्रधर्त्तुकामोऽस्य ततः स प्राद्रवद्धरः॥
ततो दारुवनं घोरं मदनाभिहतो हरः।
विवेश यत्र सपत्नीका अवस्थिताः॥
ते चापि ऋषयः सर्व्वे दृष्ट्वा स्त्रीभिः समन्विताः।
ततस्तान् प्राह भगवान् भिक्षां मे प्रतिदीयताम्॥
ततस्ते मौनिनस्तस्थुः सर्व्व एव महर्षयः।
तदाश्रमाणि पुण्यानि परिचक्राम नारद॥
तं प्रविष्टं तदा दृष्ट्वा भार्गवाद्येयोषितः।
प्रक्षोभमगमन् सर्व्वा हीनसत्त्वाः समन्ततः॥
ऋते त्वरुन्धतीमेनामनसूयाञ्च भाविनीम्।
एताभ्यां भर्तृपूजासु कृतं वै सुस्थिरं मनः॥
ततः संक्षुभिताः सर्व्वा यत्र यान्ति महेश्वरः।
तत्र प्रयान्ति कामार्त्ता मदविह्वलितेन्द्रियाः॥
त्यक्ताश्रमाणि स्थानानि त्यक्ता सुनियोषितः।
अनुजग्मुर्यथा मत्तं करिणं इव कुञ्जरम्॥
ततस्तु ऋषयो दृष्ट्वा भार्गवाद्यिरसो मुनेः।
क्रोधान्वितास्तुवन् सर्व्वे लिङ्गोऽस्य पततां भुवि॥
ततः प्रपात देवस्य लिङ्गं पृथ्वीं विदारयत्।
अन्तर्द्धानं जगामाथ त्रिशूली नीललोहितः॥
ततस्तत्पतितं लिङ्गं विभिद्य वसुधातलम्।
रसातलं विवेशाशु ब्रह्माण्डं चोर्द्धतोऽभिनत्॥
ततश्चचाल पृथिवी गिरयः सरितो नगाः।
पातालभुवनाः सर्व्वे चक्रमाचक्रमाः स्थिताः॥
संक्षुब्धान् भुवनान् दृष्ट्वा भूर्लोकादीन् पितामहः।
जगाम माधवं द्रष्टुं क्षीरोदं नाम सागरम्॥
तत्र दृष्ट्वा हृषीकेशं प्रणिपत्य च भक्तितः।
उवाच देव भुवना किमर्थं क्षुभिता विभो॥

अथोवाच हरिर्ब्रह्मन् शार्ङ्गं लिङ्गं महर्षिभिः।
पातितस्तस्य भारार्त्ता सचचाल वसुन्धरा॥
ततस्तदद्भुतमयं श्रुत्वा देवः पितामहः।
तत्र गच्छामि देवेशं एवमाह पुनः पुनः॥
ततः पितामहो देवः कैशवश्च जगत्पतिः।
आजगाम तमुद्देशं यत्र लिङ्गं भवस्य तत्॥
ततोऽनन्तं हरिर्लिङ्गं दृष्ट्वारुह्य खगेश्वरम्।
पातालं प्रविवेशाथ विस्मयात्त्वरितो विभुः॥
ब्रह्मा पद्मविमानेन ऊर्द्धमाक्रम्य सर्व्वगः।
नैवान्तमलभद्ब्रह्मा विस्मितः पुनरागतः॥
विष्णुर्गत्वाथ पातालं सप्तलोकपरायणः।
चक्रपाणिर्विनिष्क्रान्तो नैमेयस्थं न मघासुने॥
विष्णुं पितामहश्चाह हरिर्नैशाग्रमाह च।
नमोऽस्तु ते शूलपाणे नमोऽस्तु वृषभध्वज।
जीमूतवाहन कवे सर्व्व त्र्यम्बक शङ्कर॥
महेश्वर हरेशान सुवर्णाक्ष वृषाकपे।
दक्षयज्ञक्षयकर काल रुद्र नमोऽस्तु ते॥
त्वमादिरस्य जगतस्त्वं मध्यं परमेश्वरः।
भवानन्तश्च भगवान् सर्व्वरूपं नमोऽस्तु ते॥

पुलस्त्य उवाच।

एवं स्तूयमानस्तु तस्मिन् दारुवने हरः।
मरूपी तामिदं वाक्यमुवाच वदतां वरः॥

हर उवाच।

किमर्थं देवतागाधौ परिभूतक्रमन्निह।
मां स्तुवाते भक्तासक्तं कामतापितविग्रहम्॥

देवावूचतुः।

तदाङ्गपतितं लिङ्गं यदेतदुवि शङ्कर।
एतत् प्रसन्नतां भूयस्ततो देव वदावहे॥

हर उवाच।

यश्चर्चयन्ति चिदग्रा मम लिङ्गं सुरोत्तमौ।
नरैतत् प्रतिगृह्णीयान् नान्यथेति कथञ्चन॥
ततः प्रोवाच भगवानेवमस्त्विति केशवः॥
ब्रह्मा स्वयञ्च जग्राह लिङ्गं कनकपिङ्गलम्।
ततश्चकार भगवांश्चातुर्व्वर्ण्यं हरार्चने॥
ग्राह्याणि चैषां सूत्राणि नानोक्तिविधि-
तानि च।
आद्यं ग्रैवं परिज्ञातमन्यत् पाशुपतं मुने॥
तृतीयं कालवदनं चतुर्थञ्च कपालिनम्।
ग्रैवं आसीत् स्वयं ब्रह्मिर्व्वशिष्ठस्य प्रियः सुतः॥
तस्य शिष्यो बभूवाथ गोपायन इति श्रुतः।
मघापापुपतस्तासीद्धारहाराक्षपोषणः॥
तस्य शिष्योऽभवद्राजा श्वेतः श्वेतेश्वरः।
कालास्यो भगवानासीदाषसप्तसूत्रपोषणः॥
तस्य शिष्यो बको वैश्यो नाम्ना ज्ञानेश्वरो
मुने।
मघावती च यमदण्डस्य शिष्यश्च धौम्यवान्॥
कुन्दोदर इति ख्यातो जज्ञे मुनो मघातपाः।
एवं स भगवान् ब्रह्मा पूजनाय शिवस्य च॥
कला तु चातुराश्रम्यं स्वमेव भगवं ततः।
गते ब्रह्मणि भर्व्वोऽपि मघः संस्तुत्य तं तदा॥
लिङ्गं चिन्तयमे सम्यक् प्रतिष्ठाप्य यथार्च्च च॥"

इति वामनपुराणे ६ अध्यायः॥ ५॥

अपि च।

"ततः सृष्टिं चिन्तयतो ब्रह्मणो मोहितस्य च।
वालिखिल्याः समुत्पन्नास्तप्तुं समारभन्॥
दिव्यं वर्षसहस्रं वै तेपुस्ते दुश्चरं तपः।
ततः कालेन महता पार्व्वती च पतिव्रता॥
तेषां तपः समालोक्य याति देवी सुदुःखिता।
प्रसाद्य देवदेवेशं शङ्करं प्राह सुव्रता॥
क्लिश्यन्ति वालिखिल्याश्च प्रसादार्थं तव प्रभो।
एतेभ्योऽपि प्रियं देव विधिवत् कुरु सेवया॥
तच्छ्रुत्वा वचनं देवाः पिनाकी परचिन्तकः।
प्रोवाच कान्तं कालञ्च वचनं प्रियया सह॥
न वेत्सि देवि तत्त्वेन धर्म्मस्य गहना गतिः।
नैते धर्म्मं विजानन्ति यथार्थं धर्म्मचारिणः॥
न दास्यामि वरं तेभ्यो यस्मात्ते मूढबुद्धयः।
एतत् श्रुत्वाब्रवीत् देवी मा मैवं शंसितव्रताः॥
ततो रुद्र उवाचेदं देवीं देवः स्मितानन्नः।
तिष्ठ त्वमत्र यास्यामि यत्रैते मुनिसत्तमाः॥
इत्युक्ता तु ततो देवी शङ्करेण महात्मना।
गच्छस्वेत्याह मुदिता भर्त्तारं भुवनेश्वरी॥
यत्र ते मुनयः सर्व्वे काष्ठलोष्टसमाश्रिताः।
तान् विलोक्य ततो देवो नग्नः सर्व्वाङ्गसुन्दरः॥
वनमालाजटाधारी युवा भिक्षाकपालभृत्।
आश्रमे पर्य्यटन् भिक्षां मुनीनां नियतात्मनाम्॥
देहि भिक्षां ततश्चोक्ता स भ्रममाश्रमं ययौ।
तं विलोक्याश्रमगतं योषितो ब्रह्मवादिनाम्॥
सकौतुकस्वभावेन तस्य रूपेण मोहिताः।
प्रीयुः परस्परं कार्य्यमस्ति पश्याम भिक्षुकम्॥
परस्परमितीवोक्ता यस्य मूलफलं बहु।
गृहाण भिक्षामुत्तिष्ठं देवं मुनियोषितः॥
तस्मै दत्त्वैव तां भिक्षां पप्रच्छुस्ताः सरासुराः॥

नार्य ऊचुः।

कोऽसौ नाम व्रतविधिस्त्वया तापस सेव्यते।
यत्र नग्नेन लिङ्गेन वनमालाविभूषितः॥
भवान् वै तापसो दृष्टो दृष्टाः स्त्रो यदि
मन्यसे।

इत्युक्तस्तापसस्ताभिः प्रोवाच हसितानन्नः॥
इदं मम व्रतं किञ्चिन्न रहस्यं प्रकाशते।
शृण्वन्ति यद्यो यत्र तत्र तत्र न विद्यते॥
तस्य व्रतस्य सुभगा इति मत्वा गमिष्यथ।
एवमुक्तास्तदा तेन ताः प्रत्यूचुश्च मुनिम्॥
ततोऽभ्येत्य गमिष्यामो मुने नः कौतुकं महत्।
इत्युक्ता ताश्च दारांश्च जग्मुः सायिपक्षवे॥
कायिकस्तस्य बाहुभ्यां कांश्चित् कामपरा तथा।
बाहुभ्यामपरा नार्य्यः कंश्चि ज्जघनापरा॥
अपरा तु कटीवस्त्रे चामरा पादयोरपि।
दोर्भ्यां त्रिलोक्य मुनय आश्रमेषु स्थायोषितः॥
एवमस्तामिति प्रोक्त्य काश्चिद्यायास्थायः।
पातयन्ति च देवस्य लिङ्गमुद्वृत्य भीषणम्॥
पतिते तु ततो लिङ्गे सर्व्वोत्पत्तिर्नाशेश्वरः।
देवा च भगवान् रुद्रः कैलासं नगमाश्रितः॥
पतिते देवदेवस्य लिङ्गे नष्टे चराचरे।
शोभा बभूव सुमहान्तुर्णां भावितात्मनाम्।

उवाचैको मुनिवरस्तत्र बुद्धिमतां वरः।
विरिञ्चिं शरणं यामः स हि ज्ञास्यति चेष्टि-
तम्॥
एवमुक्ता सर्व्व एव ऋषयो लज्जिता भृशम्।
ब्रह्मणः सदनं जग्मुर्देवैः सह निषेवितम्॥

ऋषय ऊचुः।

अज्ञानाच्च कृतं ब्रह्मन्नस्माभिर्ज्ञानदुर्ब्बलैः।
तस्योपशमने यत्नं कुरु सर्व्वोपकारक॥

ब्रह्मोवाच।

गच्छामः शरणं देवं शूलपाणिं त्रिलोचनम्।
प्रसादाद्देवदेवस्य भविष्यथ यथा पुरा॥
इत्युक्ता ब्रह्मणा सार्द्धं कैलासं गिरिसत्तमम्।
ददृशुस्ते समासीनसुमया सहितं हरम्॥
ततः स्तोतुं समारब्धो ब्रह्मा लोकपितामहः।
अनन्ताय नमस्तुभ्यं वरदाय पिनाकिने॥
एवं स्तुतो महादेवो ब्रह्मणा ऋषिभिस्तथा।
उवाच मां मा व्रजतु लिङ्गं भोः पुरतः पुनः॥
क्रियतां मत्तः शीघ्रं येन मे प्रीतिरुत्तमा।
भविष्यति प्रजाश्चा या लिङ्गस्यार्च्चेन संभवः॥
ये लिङ्गं पूजयिष्यन्ति मम भक्तिसमाश्रिताः।
न तेषां दुर्लभं किञ्चित् भविष्यति हितं
फलम्॥"

इति वामने ४२ अध्यायः॥ ५॥

कुरुक्षेत्रस्थितानि लिङ्गानि यथा,—

सनत्कुमार उवाच।

"वटस्य दक्षिणे भागे चक्रतीर्थं प्रकीर्त्तितम्।
स्थाणोर्व्वटस्य पूर्व्वेण मम तीर्थं प्रकीर्त्तितम्॥
स्थाणोर्व्वटस्योत्तरतस्तीर्थं गाणेश्वरं मतम्।
स्थाणोर्व्वटस्य पश्चिमतः स्कन्दतीर्थं प्रकीर्त्तितम्॥
एतानि पुण्यतीर्थानि मध्ये कुरुवटः स्थितः।
महादेवं समभ्यर्च्च प्राप्नोति परमं पदम्॥
वटस्य दक्षिणे पार्श्वे तक्षकेण महात्मना।
प्रतिष्ठितं महालिङ्गं सर्व्वकामप्रदायकम्॥
वटस्य पूर्व्वदिग्भागे विघ्नकर्त्तृकृतं महत्।
लिङ्गं प्रत्यक्षतां दृष्ट्वा सिद्धिमाप्नोति मानवः॥
तत्रैव लिङ्गरूपेण संस्थिता या सरस्वती।
तां प्रणम्य प्रयत्नेन बुद्धिं मेधाञ्च विन्दति॥
वटपार्श्वस्थितं लिङ्गं ब्रह्मणा तत् प्रतिष्ठितम्।
दृष्ट्वा वटेश्वरं देवं प्रयाति परमं पदम्॥
ततः स्थाणुवटं दृष्ट्वा स्पृष्ट्वा चापि प्रदक्षिणम्।
प्रदक्षिणीकृता तेन सप्तद्वीपा वसुन्धरा॥
स्थाणोः पश्चिमदिग्भागे नकुलीशो गणः
स्थितः।
तमभ्यर्च्च प्रयत्नेन सर्व्वपापैः प्रमुच्यते॥
तस्य दक्षिणदिग्भागे सौम्यं रूपकरं स्थितम्।
तस्मिन् स्नातः सर्व्वतीर्थस्नायी भवति मानवः॥
तस्य चोत्तरदिग्भागे रामेण महात्मना
प्रतिष्ठितं महालिङ्गं गौरकर्णं नाम नामतः॥
चाषाटमासे या कृष्णा भविष्यति चतुर्दशी।
तस्यां प्रयति गौरकर्णं तस्य पुण्यफलं शृणु॥
कामगोऽश्वमयो वापि यत् प्रार्थं तेन सन्धि-
तम्।

तस्माद्विमुच्यते पापात् पूजयित्वा हरं शुचिः ॥
कौमारब्रह्मचर्य्येण यत् पुण्यं प्राप्यते नरैः ।
तत् पुण्यं सकलं तेषामग्र्यां योऽर्चयेच्छिवम् ॥
यदीच्छेत् परमं रूपं सौभाग्यं धनसम्पदम् ।
कुमारेश्वरमाहात्म्यात् सिध्यते नात्र संशयः ॥
तस्य चोत्तरदिग्भागे लिङ्गपूजां विभीषणः ।
अजरत्वामरत्वेन कल्पयित्वा बभूव ह ॥
आषाढस्य तु मासस्य शुक्ला या चाष्टमी
भवेत् ।
तस्यामभ्यर्च्य सौपवासश्चाप्नुतत्वमवाप्नुयात् ॥
पूर्वेण पूजितं लिङ्गं तस्मिन् स्थाने द्विजोत्तम ।
पूजयित्वा प्रयत्नेन सर्वकाममवाप्नुयात् ॥
दूषणश्चिशिराश्चैव तत्र पूज्य महेश्वरम् ।
यथाभिलषितान् कामानवापतुर्मुदान्वितौ ॥
चैत्रे मासि सिते पक्षे यो नरश्च पूजयेत् ।
तस्य तौ वरदौ देवौ प्रयच्छेतां हि वाञ्छितम् ॥
स्थाणोर्वटस्य पूर्वेण हस्तिपादेश्वरः स्थितः ।
तं दृष्ट्वा मुच्यते पापैरत्यजन्मसमुद्भवैः ॥
तस्य दक्षिणतो लिङ्गं हारीतस्य ऋषेः
स्थितम् ।
यं प्रणम्य प्रयत्नेन सिद्धिमाप्नोति मानवः ॥
तस्य दक्षिणपार्श्वे तु हारीतस्य महात्मनः ।
लिङ्गं त्रैलोक्यविख्यातं सर्वपापहरं शिवम् ॥
कङ्कालरूपिणा चापि रुद्रेणाप्तु महात्मना ।
प्रतिष्ठितं महालिङ्गं सर्वपापविनाशनम् ॥
मुक्तिमुक्तिप्रदं प्रोक्तं सर्वकिल्बिषनाशनम् ।
तल्लिङ्गस्पर्शनादेव अग्निष्टोमफलं लभेत् ॥
तस्य पश्चिमदिग्भागे लिङ्गं सिद्धप्रतिष्ठितम् ।
सिद्धेश्वरं भुवि ख्यातं सर्वसिद्धिप्रदायकम् ।
तद्दर्शनात् पूजनाच्च सर्वसिद्धिं हि विन्दति ॥
तस्य दक्षिणदिग्भागे रुद्रकङ्केन महात्मना ।
प्रतिष्ठितं यत्तु लिङ्गं दर्शनात् सिद्धिदायकम् ॥
तस्य पूर्वे च दिग्भागे आदित्येन महात्मना ।
प्रतिष्ठितं लिङ्गवरं सर्वकिल्बिषनाशनम् ॥
चित्राङ्गदस्तु गन्धर्वो रम्भा चाप्सरसां वरा ।
परस्परं सानुरागौ स्थाणुदर्शनकाङ्क्षिणौ ॥
दृष्ट्वा स्थाणुं पूजयित्वा सानुरागौ परस्परम् ।
आगम्य वरदं देवं प्रतिष्ठाप्य महेश्वरम् ॥
चित्राङ्गदेश्वरं दृष्ट्वा तथा रम्भेश्वरं द्विज ।
सुभगो दर्शनीयश्च कुले जन्म समाप्नुयात् ॥
तस्य दक्षिणतो लिङ्गं शक्तिना स्थापितं पुरा ।
तस्य प्रसादात् सम्प्राप्तं मनसा चिन्तितं फलम् ॥
पराशरेण मुनिना तपेवाराध्य शङ्करम् ।
प्राप्तं कवित्वं परमं दर्शनाच्छङ्करस्य च ॥
वेदव्यासेन मुनिना चाराध्य परमेश्वरम् ।
सर्वज्ञत्वं ब्रह्मज्ञानं प्राप्तं देवप्रसादतः ॥
स्थाणोः पश्चिमदिग्भागे वायुना जगदायुना ।
प्रतिष्ठितं महालिङ्गं दर्शनात् पापनाशनम् ॥
तस्यापि दक्षिणे भागे लिङ्गं हैमवतीश्वरम् ।
प्रतिष्ठितं पुण्यकृता दर्शनात् सिद्धिदायकम् ॥
तस्यापि पश्चिमे भागे कार्तवीर्य्येण स्थापितम् ।
लिङ्गं पापहरं सद्यो दर्शनात् पुण्यमाप्नुयात् ॥
तस्याप्युत्तरदिग्भागे तत्पार्श्वे स्थापितं पुनः ।
आराध्य चतुर्मासाग्र सिद्धिं देवप्रसादतः ॥
तस्यैव पूर्वदिग्भागे विष्णुना प्रभविष्णुना ।
आराध्य वरदं देवं चक्रं लब्धं सुदर्शनम् ॥
तस्यापि पूर्वदिग्भागे इन्द्रेण वरशीलेन च ।
प्रतिष्ठितौ लिङ्गवरौ सर्वकामप्रदायकौ ॥
एतानि मुनिभिः साध्यैरादित्यैर्वसुभिस्तथा ।
सेवितानि प्रयत्नेन सर्वपापहराणि वै ॥
स्थाणुलिङ्गस्य परितः ऋषिभिस्तत्त्वदर्शिभिः ।
प्रतिष्ठितानि लिङ्गानि तेषां संख्या न विद्यते ॥
तथा त्युत्तरतश्चैव यावद्दोधवती नदी ।
सहस्रमेकं लिङ्गानां देवपश्चिमतः स्थितम् ॥
तस्यापि पूर्वदिग्भागे वालिखिल्यैर्महर्षिभिः ।
प्रतिष्ठिता रुद्रकोटिर्यावत् सन्निहितं सरः ॥
दक्षिणेन तु देवस्य गन्धर्वैर्यक्षकिन्नरैः ।
प्रतिष्ठितानि लिङ्गानि तेषां संख्या न विद्यते ॥
तिस्रः कोट्यर्द्धकोटी च लिङ्गानां वायुरब्रवीत् ।
असंख्याताः सहस्राणि ये रुद्रा स्थाणु-
माश्रिताः ॥
एतज्ज्ञात्वा श्रद्धानः स्थाणुलिङ्गं समाश्रयेत् ।
यस्य प्रसादात् प्राप्नोति मनसा चिन्तितं फलम् ॥
अकामो वा सकामो वा प्रविशेत् स्थाणु-
मन्दिरम् ।
विमुक्तः पातकैर्घोरैः प्राप्नोति परमं पदम् ॥
चैत्रमासे त्रयोदश्यां दिने पुण्यतमे शुभे ।
प्रतिष्ठितं स्थाणुलिङ्गं ब्रह्मणा लोकधारिणा ॥
ऋषिभिर्देवसंघैश्च पूजितं शाश्वतीः समाः ।
तस्मिन् काले निराहारा मानवाः श्रद्धया-
न्विताः ।
पूजयन्ति शिवं ये वै ते यान्ति परमं पदम् ॥
स्थाणुनीर्घमिदं ज्ञात्वा ये कुर्वन्ति प्रदक्षिणम् ।
प्रदक्षिणीकृता तैस्तु सप्तद्वीपा वसुन्धरा ॥"

इति वामनपुराणे ४३ अध्यायः ॥*॥

एकगृहे लिङ्गद्वयार्चननिषेधो यथा,—
"गेहे लिङ्गद्वयं नार्च्यं शालग्रामद्वयं तथा ।
दे चक्रे द्वारकायास्तु नार्च्यं सूर्यद्वयं तथा ॥"
तन्निर्माल्यभक्षणविधिनिषेधौ यथा,—
"अभक्ष्यं शिवनिर्माल्यं पत्रं पुष्पं फलं जलम् ।
शालग्रामशिलायोगात् पावनं तद्व्रतेषु सदा ॥"
इति वाराहे रौप्यसौवर्णलिङ्गस्थापननामाध्यायः ॥*॥ लिङ्गपूजां विनान्यपूजाकरणनिषेधो यथा,—
"लिङ्गपूजां विना देवि! अन्यपूजां करोति यः ।
विफला तस्य पूजा स्यादन्ते नरकमाप्नुयात् ।
तस्माल्लिङ्गं महेशानि प्रथमं परिपूजयेत् ॥"*॥
तत्पूजनप्रशंसा यथा,—
"यद्राष्ट्रं लिङ्गपूजायां रहितं सततं प्रिये ।
तद्राष्ट्रं पतितं मन्ये विष्ठाभूमिसमं स्मृतम् ॥
ब्रह्मक्षत्रियविट् देवि यदि लिङ्गं न पूजयेत् ।
तत्क्षयात् परमेशानि क्षयश्चाण्डालतां व्रजेत् ॥
शूद्रश्च परमेशानि सदा शूकरवत् प्रिये ।
पूजयेत् परमेशानि चत्वारो ब्राह्मणादयः ॥
शिवार्चनन्तु पूजासु यद्गृहे वर्त्तितं सदा ।
विष्ठागर्तसमं देवि तद्गृहं विद्धि पार्वति ॥
शाक्तो वा वैष्णवो वापि शैवो वा परमेश्वरि ।
आदौ लिङ्गं समभ्यर्च्य विल्वपत्रैर्वरानने ।
पश्चादन्यं महेशानि शिवं प्रार्च्य प्रपूजयेत् ॥
शिवपूजां विना देवि! अन्यपूजां करोति यः ।
स एव रसनाहीनः मूकोरो जायते प्रिये ॥
निर्म्माय पार्थिवं लिङ्गं रुद्रसंहाररूपिणम् ।
आशुतोषं महादेवं शङ्करं वृषभध्वजम् ।
निर्म्माय पार्थिवं लिङ्गं विधिवत् पूजयेत्
शिवम् ॥
शिवपूजा महेशानि यद्गृहे सततं प्रिये ।
काशीपुरं महेशानि तद्गृहं वरवर्णिनि ।
शिवलिङ्गं प्रपूज्याथ सर्वपूजाफलं लभेत् ॥"*॥
चतुर्विधलिङ्गं यथा,—
"चतुर्धा पार्थिवं लिङ्गं रत्नभेदेन पार्वति ।
शुक्लं रक्तं तथा पीतं कृष्णञ्च परमेश्वरि ॥
शुक्लन्तु ब्राह्मणे प्रोक्तं क्षत्रिये रक्तमिष्यते ।
हरितं वैश्यजातौ तु कृष्णं शूद्रे प्रकीर्त्तितम् ।
चन्दनञ्च महेशानि सर्वजातिषु शस्यते ॥"
इति लिङ्गार्चनतन्त्रे १।२।३ पटलाः ॥*॥
अस्य पञ्चवक्त्राणि यथा,—
"तत् सर्वं शृणु चार्वङ्गि पार्थिवस्य सुखं प्रिये ।
विभाय सुखपद्मं हि शिवस्य वरवर्णिनि ॥
सद्योजातं वामदेवमघोरञ्च ततः परम् ।
तत्पुरुषं तथेशानं पञ्चवक्त्रं प्रकीर्त्तितम् ॥
सद्योजातञ्च वै शुक्लं शुद्धस्फटिकसन्निभम् ।
पीतवर्णं तथा सौम्यं वामदेवं मनोहरम् ॥
कृष्णवर्णमघोरञ्च रूपं भीमविवर्द्धनम् ।
रक्तं तत्पुरुषं देवं दिव्यमूर्त्तिमनोहरम् ॥
श्यामलञ्च तथेशानं सर्वदेवशिवात्मकम् ।
चिन्तयेत् पश्चिमे चाद्यं द्वितीयन्तु तथोत्तरे ॥
अघोरं दक्षिणे देवं पूर्वे तत्पुरुषं तथा ।
ईशानं मध्यतो ध्येयं चिन्तयेत् भक्तितत्परः ॥"
इति तत्रैव ६ पटलः ॥*॥
अस्य पूजायां सुखवाद्यकरणावश्यकत्वं यथा,
"संपूज्य पार्थिवं लिङ्गं परं ब्रह्म स्वयं प्रिये ।
ततस्तु लिङ्गकवचं पठित्वा कमलानने ॥
सुखवाद्यं समृत्यं हि कृत्वा तु परमेश्वरि ।
मालकामन्तसहितं सुखवाद्यं सुदुर्लभम् ॥
अकारादिक्षकारान्तं अनुलोमविलोमतः ।
उच्चार्य्य परमेशानि सुखवाद्यं शुचिस्मिते ॥
सबिन्दुवर्णसञ्चार्य्य पश्चाच्चाष्टकां प्रिये ।
अनुलोमविलोमेन सर्वेण च वरानने ॥
अनेनैव विधानेन सुखवाद्यं करोति यः ।
स सिद्धः सगणः सोऽपि स शिवो नात्र संशयः ॥
रत्नमुद्रयोर्हं देवेशि सुखवाद्यप्रवादतः ॥
यस्मिन् काले महेशानि असुरो बलवद्भवेत् ।
तस्मिन् काले महेशानि सुखवाद्यं करोम्यहम् ॥
तत् श्रुत्वा परमेशानि असुरा राक्षसाश्च ये ।
पलायन्ते महेशानि तत् श्रुत्वा परमेश्वरि ॥
ये नरा भुवि तिष्ठन्ति सुखवाद्यं विना प्रिये ।

स सर्व्वयातनाभोगी व्रजेत् कुम्भीरतां व्रजेत् ॥"
इति च तत्रैव ८ पटलः ॥*॥

अस्य निर्म्माल्यभोजनदोषकारणं यथा,—
देव्युवाच ।
"दुर्लभं तव निर्म्माल्यं ब्रह्मादीनां कृपानिधे ।
तत्कथं परमेशान निर्म्माल्यं तव दूषितम् ॥
ईश्वर उवाच ।
मध्यस्थानस्थितं यत्तु तन्मुखं परमेश्वरि ।
श्यामलं तत्तु ईशानं सदा ऊर्द्धं शुचिस्मिते ॥
कालाग्निरुद्रपिशं तत्तु सर्व्वशक्तिमयं सदा ।
तेजोमयं महेशानि सुखमूर्त्तं वरानने ॥
क्षीरोदमथने देवि उत्थितं गरलं महत् ।
ततः करतलीकृत्य तद्विषं परमेश्वरि ॥
निपीतं तद्विषं सूक्ष्मं तीक्ष्णं ब्रह्माण्डनाशनम् ।
तद्विषं कण्ठदेशे तु स्थितं हि सर्व्वदा मम ॥
ततः प्रभृति देवेशि सुखं ज्वालायते सदा ।
पत्रं वा यदि वा पुष्पं फलं वा वरवर्णिनि ॥
अन्यं हि परमेशानि उपचारं मनोहरम् ।
यो दद्यात् परमेशानि मन्मुखोपरि पार्व्वति ॥
अग्राह्यं तत्तु निर्म्माल्यं साचाद्ब्रह्ममयं यतः ॥
एतत्तु परमेशानि निर्म्माल्यं यस्तु धारयेत् ।
स भस्मो जायते देवि निष्कृतिर्नास्ति तत्र वै ।
अग्राह्यं मम निर्म्माल्यं अतएव वरानने ॥
यद्दत्तं सम्मुखे देवि पुष्पं वा पत्रमुत्तमम् ।
तन्निर्म्माल्यं महेशानि गृह्णीयात् शिरसा सदा ॥
प्रथमं विष्णवे दत्त्वा विष्णुमन्त्रेण पार्व्वति ।
निर्म्माल्यं मम देवेशि विष्णोर्ग्राह्यं वरानने ॥
देवासुरमनुष्याश्च गन्धर्व्वा किन्नरादयः ।
ते सर्व्वे परमेशानि वराकाः क्षुद्रबुद्धयः ।
निर्म्माल्येषु च देवेशि अधिकारो कथं भवेत् ॥"
इति च तत्रैव १३।१४ पटलौ ॥*॥

"चतुर्द्दश्यां महेशानि शुक्लायां वरवर्णिनि ।
कृष्णायां वा महेशानि अमावास्यां विशेषतः ॥
निर्म्माय च चतुर्द्दश्यां लिङ्गं भक्त्या च पूजयेत् ।
एकदृष्टे महेशानि निर्म्माय पार्थिवं शिवम् ॥
दक्षिणे वामहस्ते वा निर्म्माय ये च पार्थिवम् ।
तत्फलं परमेशानि लक्षलिङ्गसमं भवेत् ॥"
इति लिङ्गार्च्चनतत्त्वम् ॥*॥

बाणलिङ्गलक्षणादिकं बाणलिङ्गशब्दे द्रष्टव्यम् ॥*॥

अथ रौद्रलिङ्गलक्षणम् । वीरमित्रोदयधृतम् ।
"नदीसमुद्भवं रौद्रमन्योन्यस्य विघर्षणात् ।
नदीवेगात् समं स्निग्धं संजातं रौद्रमुच्यते ॥"
मत्स्यसूक्ते ।
"सरित्प्रवाहसंस्थानं बाणलिङ्गसमाकृति ।
तदप्यधि बोद्धव्यं रौद्रलिङ्गं सुखावहम् ॥
नदीसारनदीतायां बाणलिङ्गसमाकृति ।
तदप्यधि बोद्धव्यं लिङ्गं रौद्रं भविष्यति ॥
रौद्रलिङ्गं तथाख्यातं बाणलिङ्गसमाकृति ।
श्वेतं रक्तं तथा पीतं कृष्णं विप्रादिपूजितम् ॥
सभावात् कृष्णवर्णं वा सर्व्वजातिषु सिद्धिदम् ।
नर्म्मदासम्भवं रौद्रं बाणलिङ्गवदीरितम् ॥"
इति रौद्रलिङ्गलक्षणम् ॥

शिवनाभिलक्षणं तच्छब्दे द्रष्टव्यम् ॥*॥ अथ देवलिङ्गलक्षणम् । देवलिङ्गमधिकृत्य सिद्धान्तशेखरे ।
"करसंपुटसंख्यार्द्धं शूलटङ्कैरुभूषितम् ।
रेखाकोटरसंयुक्तं निम्नोन्नतसमन्वितम् ।
दीर्घाकारञ्च यल्लिङ्गं ब्रह्मभागादिवर्ज्जितम् ॥"
अथ गोललिङ्गलक्षणम् ।
"लिङ्गं गोलमिति प्रोक्तं गोलकं प्रोच्यतेऽधुना ।
कुष्माण्डस्य फलाकारं नागरङ्गफलोपमम् ।
काकडिम्बफलाकारं गोललिङ्गमितीरितम् ॥"
इति गोललिङ्गलक्षणम् ॥*॥

अथार्षलिङ्गलक्षणम् । तत्रैव ।
"गागाकोलफलाकारं ब्रह्मसूत्रविवर्जितम् ।
ह्रस्वं स्थूलञ्च यल्लिङ्गं कपित्थफलसन्निभम् ।
नालस्य वा फलाकारं मध्ये स्थूलञ्च यद्भवेत् ।
मध्ये स्थूलं वरं लिङ्गमृषिवाणमुदीरितम् ॥"
इत्यार्षलिङ्गलक्षणम् ॥*॥

लिङ्गं हि द्विविधमकृत्रिमं कृत्रिमञ्च । अकृत्रिमं स्वयम्भूतं स्वयम्भु बाणलिङ्गादि । कृत्रिमं निर्म्मितं धातुलिङ्गादि । सिद्धान्तशेखरे ।
"तल्लिङ्गं द्विविधं ज्ञेयमचलञ्च चलं तथा ।
प्रत्येकं त्रिविधं ज्ञेयं लिङ्गं तदुभयात्मकम् ॥
प्रासादे स्थापितं लिङ्गमचलं तच्छिलादिजम् ।
स्थापितं चचलं गेहे स्थिरं लिङ्गमयोजते ॥
पञ्चधा तत् स्थितं लिङ्गं स्वयम्भु दैवपालकम् ।
आर्षञ्च मानसं लिङ्गं तेषां लक्षणमुच्यते ॥"
सिद्धान्तशेखरे ।
"नानाच्छिद्रसुसंयुक्तं नानावर्णसमन्वितम् ।
अदृश्यमूलं यल्लिङ्गं कर्कशं सुषि दृश्यते ॥
तत् लिङ्गन्तु स्वयम्भूतमपरं लक्षणच्युतम् ।
स्वयम्भु लिङ्गमित्युक्तं तच्च नानाविधं मतम् ॥
ब्रह्माभमस्तकं लिङ्गं वैष्णवं तदुदाहृतम् ।
पद्माभमस्तकं ब्राह्मं रुद्राभं प्राकृमुच्यते ॥
शिरोयुग्मं तथाग्नेयं त्रिपदं याम्यमीरितम् ।
खड्गाभं नैर्ऋतं लिङ्गं वारुणं कलसाकृति ॥
वायव्यं ध्वजवोलिङ्गं कौवेरन्तु गदान्वितम् ।
ईशानस्य त्रिशूलाभं लोकपालादिनिःसृतम् ।
स्वयम्भु लिङ्गमाख्यातं सर्व्वशास्त्रविशारदैः ॥"
इति स्वयम्भुलिङ्गलक्षणम् ॥*॥

मत्स्यसूक्ते ।
"दृष्ट्वा लिङ्गं महेशस्य स्वयम्भूतस्य पार्व्वति ।
सर्व्वपापविनिर्म्मुक्तः परे ब्रह्मणि लीयते ॥"*॥
एतेषां पूजाफलन्तु तत्रैव ।
"विष्णोश्चैलं सुवर्णे सुक्तये चानलस्य च ।
पार्थिवं भुक्तये प्रोक्तं मुक्तये चानलस्य च ॥
एवं ये दारुजं ज्ञेयं चित्रलिङ्गं तथा पुनः ।
स्थिरलक्ष्मीप्रदं ज्ञेयं क्षेमं राज्यपदञ्च तत् ।
पुत्रवृद्धिकरं ताम्रं राज्ञमायुःप्रवर्द्धनम् ॥"
पद्मपुराणम् ।
"पारदञ्च महाभूत्यै सौभाग्याय च मौक्तिकम् ।
चन्द्रकान्तं रसुजित् स्फाटकं सर्व्वकामदम् ॥"
वीरमित्रोदयधृतकल्पोत्तरेऽपि ।
"सर्व्वा फलप्रदा भूमिर्म्मण्यस्तद्देव हि ।
अनन्ताद्याः स्मृता ह्यष्टौ मण्यो विद्युद्ज्वलाः ॥
राजौ प्रकाशकाः सर्व्वे विघाद्याघातकारिणः ।
नानावर्णास्तु विज्ञेया रसैर्गन्धैश्च रूपतः ॥
वज्राद्याः स्फाटिकाद्याश्च गुडान्नादिविनिर्म्मितम् ।
सर्व्वकामप्रदं पुंसां लिङ्गं तात्कालिकं मतम् ॥"
लक्षणसमुच्चये ।
"गान्धं सौभाग्यदं लिङ्गं पौष्पं मुक्तिप्रदायकम् ।"
तथा ।
"नानागुणोद्भवं लिङ्गं नानाकामप्रदायकम् ।
सैकतं गुणदं लिङ्गं सौभाग्याय च लावणम् ॥
उचाटने तु पाषाणं मौलं शुक्लत्वावहम् ।
तात्कालिकं दरिद्रश्च लब्ध्वा भक्त्या समर्च्चयेत् ॥"
तथा ।
"कस्तूरिकाया द्वौ भागौ चत्वारश्चन्दनस्य च ।
कुङ्कुमस्य चयस्चैव गुग्गुलेन च चतुःसमम् ॥
एतद्वै गन्धलिङ्गन्तु कृत्वा संपूज्य भक्तितः ।
शिवसायुज्यमाप्नोति वन्द्यभिः सहितो नरः ॥
कार्पासपुष्पमयं लिङ्गं घृतगन्धसमन्वितम् ।
नवखण्डां धरां भुक्त्वा गणेशोऽधिपतिर्भवेत् ॥
रत्नैर्भिर्निर्म्मितं लिङ्गं यः पूजयति भक्तितः ।
विद्याधरपदं प्राप्य पश्चात् शिवसमो भवेत् ॥
श्रीकामो गोघृतलिङ्गं कृत्वा भक्त्या प्रपूजयेत् ।
स्वच्छेन कापिलेनैव गोमयेन प्रकल्पयेत् ॥
कार्य्यं यष्टिक्रमं लिङ्गं यवगोधूमशालिजम् ।
श्रीकामः पुष्टिकामश्च पुत्रकामस्तदर्च्चयेत् ॥
खिनाखण्डमयं लिङ्गं कार्य्यमारोग्यवर्द्धनम् ।
वक्ष्ये लवणजं लिङ्गं तालत्रिकटुकान्वितम् ॥
गव्यघृतमयं लिङ्गं संपूज्य वृद्धिवर्द्धनम् ।
लवणेन च सौभाग्यं पार्थिवं सर्व्वकामदम् ॥
कामदं तिलपिष्टोत्थं तुषोत्थं मारणे स्मृतम् ।
भस्मोत्थं सर्व्वफलदं गुड़ोत्थं प्रीतिवर्द्धनम् ॥
गव्योत्थं गुणदं भूरि शर्करोत्थं सुखप्रदम् ।
वंशाङ्कुरोत्थं वंशकरं गोमयं सर्व्वरोगहम् ॥
केशास्थिसम्भवं लिङ्गं सर्व्वशत्रुविनाशनम् ।
लौहमं मारणं पिष्टसम्भवं लिङ्गमुत्तमम् ॥
दारिद्र्यदं दुग्धोद्भवं पिष्टं सारस्वतप्रदम् ।
दधिदुग्धोद्भवं लिङ्गं कीर्त्तिलक्ष्मीसुखप्रदम् ।
धान्यदं धान्यजं लिङ्गं फलोत्थं फलदं भवेत् ॥
पुष्पोत्थं दिशभोगायुर्मूले धान्यफलोद्भवम् ।
नवनीतोद्भवं लिङ्गं कीर्त्तिसौभाग्यवर्द्धनम् ॥
दूर्व्वाकाण्डसमुद्भूतमपस्तुविनाशनम् ।
कर्पूरसम्भवं लिङ्गं पूजा वै मुक्तिमुक्तिदा ।
अवस्कान्तं चतुर्द्धा तु ज्ञेयं सामान्यसिद्धिदम् ।"
इति गरुडपुराणम् ।
"सर्व्वं मणिभवं श्रेष्ठं तच्च वक्ष्यमरिन्दमे ।
यमलिङ्गं महाभूत्यै सौभाग्याय च मौक्तिकम् ॥
पुष्परागं महाभूत्यै ज्योतिस्तोरसमुद्भवम् ।
स्वर्णजं कुलमल्लत्वे तेजसं सूर्य्यकान्तजम् ॥

चन्द्रापीड़ं मलयजं स्फाटिकं सर्व्वकामदम्।
मूलाख्यमणिजं शुक्लच्छायार्थं मौक्तिकं तथा॥
आपत्यं हीरकं ज्ञेयं रोगहृन्मौक्तिकोद्भवम्।
शुभकृत् पुष्कलं तीर्थं वैदूर्य्यं शत्रुदर्पहृत्।
नीलं लक्ष्मीप्रदं ज्ञेयं स्फाटिकं सर्व्वकामदम्॥"
इति सारसंग्रहः॥

"महासुक्तिप्रदं हैमं राजतं भूतिवर्द्धनम्।
चारकूटं तथा कांस्यं प्रशस्तं सामान्यसुक्तिदम्॥
त्रपुसीसायसं लिङ्गं शत्रूणां नाशने हितम्।
कौलिदं कांस्यजं लिङ्गं राजतं पुत्रवर्द्धनम्॥
प्रेत्तलं सुक्तिमुक्त्यर्थं मिश्रलं सर्व्वसिद्धिदम्॥"
इति कालोत्तरतन्त्रम्॥

तत्रैव शिवनारदसंवादे।

"पित्तलं मुक्तये लिङ्गं पूर्त्यं रजतसम्भवम्।
हैमं सत्यलोकस्य प्राप्तये पूजयेत् पुमान्।
पूजयेत्ताम्रजं लिङ्गं पुष्टिकामो हि मानवः॥"
मत्स्यसूक्ते।

"ताम्रलिङ्गं कलौ नार्च्चेत् रैत्यस्य सीसकस्य च।
रक्तचन्दनलिङ्गञ्च शुक्लकांस्यायसं तथा॥" *॥
माहकामेदतन्त्रे १२ पटले।

"पार्थिवे शिवपूजायां सर्व्वसिद्धियुतो भवेत्।
पाषाणे शिवपूजायां द्विगुणं फलमीरितम्॥
स्वर्णलिङ्गे च पूजायां शत्रूणां नाशनं मतम्।
सर्व्वसिद्धीश्वरी रौप्ये फलं तस्माच्चतुर्गुणम्॥
ताम्रे पुष्टिं विजानीयात् कांस्ये च धनसंचयः।
गङ्गायाश्च सचगुणं लाक्षायां रोगवान् भवेत्॥
स्फाटिके सर्व्वसिद्धिः स्यात्तथा मरकते प्रिये।
लौहलिङ्गे रिपोर्नाशं कामदं भस्मलिङ्गकम्॥
वालुकायां कास्यसिद्धिर्गोमये रिपुहिंसनम्।
मृल्लिङ्गस्य माहात्म्यं धर्म्मकामार्थमोक्षदम्।
संस्कारेण विना देवि पाषाणादौ न पूजयेत्॥"
तत्संस्कारस्तत्रैव यथा,—

"रौप्यञ्च स्वर्णलिङ्गञ्च स्वर्णपात्रे निधाय च।
तस्मादुत्थाप्य तल्लिङ्गं दुग्धमध्ये दिनत्रयम्॥
ताम्रपात्रे स्थापयित्वा कालरुद्रं प्रपूजयेत्।
पौराणोपचारेण वेदान्तं पाठयेत्॥
तस्मादुत्थाप्य तल्लिङ्गं गङ्गातोये दिनत्रयम्।
ततो वेदोक्तविधिना संस्कारमाचरेत् सुधीः॥"
लक्षणशोनलिङ्गपूजने दोषो यथा,—

"लिङ्गं सुलक्षणं कुर्य्यात् लक्षलिङ्गमलक्षणम्।
दैर्घ्यहीने भवेद्व्याधिरधिके शत्रुवर्द्धनम्॥
मानहीने विनाशः स्यादधिके च शिशुक्षयः।
विस्तारे चाधिके हीने राष्ट्रनाशो भवेद्ध्रुवम्॥
पीठहीने तु दारिद्र्यं शिरोहीने कुलक्षयः।
प्रमाणविहीने च राज्ञां राष्ट्रस्य तत्क्षतिः।
तस्मात् सर्व्वप्रयत्नेन लिङ्गं कुर्य्यात् सुलक्षणम्॥"
अथ लिङ्गप्रमाणम्।

देव्युवाच।

"लिङ्गप्रमाणं देवेश कथयस्व मयि प्रभो।
पार्थिवे च शिलादौ च विशेषो यत्र यद्भवेत्॥
शैलेश उवाच।

स्फटिकादीनकं शास्त्रमथवा तोलकद्वयम्।
चिक्कणस्य प्रमाणेन घटनं कारयेद्बुधः।
अङ्गुष्ठपर्व्वमानन्तु ज्ञात्वा लिङ्गं प्रपूजयेत्॥"
इति षट्कर्म्मदीपिकाधृतविश्वसारतन्त्रम्॥*॥
चिक्कणीकरणसूक्तं कालोत्तरे।

"लिङ्गे वेद्यां तथा पीठे समश्चनिपातनात्।
समत्वेन विजानीयात् चिक्कणीकरणन्त्विदम्॥"
स्फटिकमेदेन ब्राह्मणादीनां पूजाफलस्य प्रश्नस्तत्वञ्च तत्रैव।

"शुक्लं हि पार्थिवं लिङ्गं निर्म्माय यस्तु पूजयेत्।
स याति परमेशानि त्रिवर्गफलभाग्भवेत्॥
क्षत्रियस्तु वरारोहे रक्तं निर्म्माय पार्थिवम्।
पूजयेत् सततं यस्तु त्रिवर्गफलभाग्भवेत्॥
हरितं पार्थिवं देवि निर्म्माय यस्तु पूजयेत्।
स च वैश्यो महेशानि त्रिवर्गफलभाग्भवेत्॥
कृष्णं हि पार्थिवं लिङ्गं निर्म्माय यस्तु पूजयेत्।
स शूद्रः परमेशानि त्रिवर्गफलभाग्भवेत्॥
शिलादौ च महेशानि स्थूलञ्च फलदायकम्।
अङ्गुष्ठमानं देवेशि यद्वा हैमाद्रिमानकम्॥
क्रमेण देवदेवेशि फलं बहुविधं लभेत्।
स्थूलात् स्थूलतरं लिङ्गं शुभाढ्यं परमेश्वरि।
पूजनाद्धारणाद्देवि फलं बहुविधं स्मृतम्॥"
स्थूलात् स्थूलतरमिति पार्थिवलिङ्गेतरपरम्। स्फटिकातोलकं शास्त्रमित्यादिवचनात्॥*॥
शिलास्फाटिकमरकतादीनां पञ्चसूत्रीकरणसूक्तम्। यथा,—

"शिवलिङ्गस्य यन्मानं तन्मानं दक्षसव्ययोः।
योन्यर्द्धमपि यन्मानं तदर्द्धोऽपि तथा भवेत्॥"
इति लिङ्गम्॥

"लिङ्गस्य यादृविस्तारः परिणाहोऽपि तादृशः।
लिङ्गस्य द्विगुणा वेदी योनिस्तदर्द्धसम्मिता॥
कुर्व्वीनाङ्गुष्ठतो दूरं न कदाचिदपि क्वचित्।
रत्नादिशिवलिङ्गानां मानमिच्छावशाद्भवेत्॥"
इति तन्त्रान्तरम्॥

लिङ्गशब्दव्युत्पत्तिर्यथा,—

"आकाशं लिङ्गमित्याहुः पृथिवी तस्य पीठिका।
आलयः सर्व्वदेवानां लयनाल्लिङ्गमुच्यते॥"
इति स्कन्दपुराणम्॥*॥

लिङ्गमहिमा यथा,—

शिव उवाच।

"न तुष्याम्यर्च्चितोऽर्च्चायां पुष्पधूपनिवेदनैः।
लिङ्गेऽर्च्चिते तथाप्यर्च्चे परं तुष्यामि पार्व्वति॥
यत्र देवि पुरा क्षत्ये जीनोर्द्धं सर्व्वदेवतैः।
लिङ्गत्वालिङ्गमित्युक्तं सदैवासुरकिन्नरैः॥
प्रयच्छामि शिवं देवि यो मल्लिङ्गार्च्चने रतः।
त्यक्त्वा सर्व्वाणि पापानि निर्म्मलो दग्धकल्मषः।
मन्मना मत्परमस्कारो मामेव प्रतिपद्यते॥"
इति वीरमित्रोदयधृतस्कन्दपुराणम्॥*॥

द्रव्यविशेषेण पूजादिफलमपि तत्रैव।

"वस्त्रपूतजलैर्लिङ्गं स्नपित्वा मम मानवः।
लक्षाणाञ्चाश्वमेधानां फलमाप्नोति सत्तमः॥
सुगन्धिचन्दनरसैर्लिङ्गमालिप्य भक्तितः।
चालिप्यते सुरस्त्रीभिः सुगन्धैर्यत्नकर्दमैः॥"*॥
लिङ्गपूजनाकरणे दोषस्तत्पूजाफलञ्च तत्रैव शिवनारदसंवादे।

"विना लिङ्गार्च्चनं यस्य कालो गच्छति नित्यशः।
महाहानिर्भवेत्तस्य दुर्गतस्य दुरात्मनः॥
एकतः सर्व्वदानानि व्रतानि विविधानि च।
तीर्थानि नियमा यज्ञा लिङ्गाराधनमेकतः॥
न लिङ्गाराधनादन्यत् पुरा वेदे चतुर्ष्वपि।
विद्यते सर्व्वशास्त्राणामेष एव सुनिश्चितः॥
मुक्तिसुक्तिप्रदं लिङ्गं विदिधापन्निवारणम्।
पूजयित्वा नरो नित्यं शिवसायुज्यमाप्नुयात्॥
सर्व्वमन्यत् परित्यज्य क्रियाजालमशेषतः।
भक्त्या परमया विद्वान् लिङ्गमेकं प्रपूजयेत्॥"
इति स्कन्दपुराणम्॥*॥

"अश्वमेधसहस्राणि वाजपेयशतानि च।
महेशार्च्चनपुण्यस्य कलां नार्हन्ति षोड़शीम्॥"
इति मत्स्यसूक्ते १६ पटलः॥*॥

"स्वयं नारायणः प्रोक्तो यदि शम्भुं प्रपूजयेत्।
स्वर्गे मर्त्ये च पाताले ये देवाः संस्थिताः सदा।
तेषां पूजा भवेद्देवि शम्भुनाथस्य पूजनात्॥"
इति माहकामेदतन्त्रम्॥*॥

षट्कर्म्मदीपिकायाम्।

"असारे खलु संसारे सारमेतच्चतुष्टयम्।
काश्यां वासः सतां सङ्गो गङ्गाम्भः शम्भु-सेवनम्॥"*॥

अथ पारदशिवलिङ्गमाहात्म्यम्।

"ज्योतिर्म्मयं महालिङ्गं कैलासनगरे प्रिये।
तस्यैव षोड़शांशैकः काश्यां विश्वेश्वरः स्थितः॥
पूर्णलिङ्गं महेशानि शिवबीजं न चान्यथा।
शिलामध्ये यथा चक्रं लक्ष्मीनारायणः परम्।
पारदस्य शतांशैको लक्ष्मीनारायणो न हि॥
पकारं विष्णुरूपञ्च आकारं कालिका स्वयम्।
रेफं शिवं दकारञ्च ब्रह्मरूपं न चान्यथा॥
पारदं परमेशानि ब्रह्मविष्णुशिवात्मकम्।
यो यजेत् पारदं लिङ्गं स एव शम्भुरव्ययः॥"
इति माहकामेदतन्त्रे ८ पटलः॥

तस्य निर्म्माणविधानं पारदशब्दे द्रष्टव्यम्॥*॥

प्रकारान्तरशिवलिङ्गोत्पत्तिर्यथा,—

"ततो विवाहं निर्व्वर्त्य कृतकृत्या यथागताः।
गताः सर्व्वे महेशोऽपि सत्या सह तदा गृहम्।
जगाम रेमे सत्या च चिरं निर्भरमानसः॥
अथ काले कदाचित्तु सत्या सह महेश्वरः।
रेमे न शक्तं तं सोढुं सती आत्मभवत्तदा।
उवाच दीनया वाचा देवदेवं जगद्गुरुम्॥
भगवन्न हि शक्नोमि तव भारं सुदुःसहम्।
क्षमस्व मां महादेव कुरु कृपां जगत्पते॥
निशम्य वचनं तस्या भगवान् वृषभध्वजः।
निर्भरं रमणं पक्षे गाढं निर्द्दयमानसः॥

कृत्वा संपूर्णरमणं सती च त्यक्तमैथुना।
उत्थानाय मनश्चक्रे उभयोस्तेज उत्तमम्।
पपात धरणीपृष्ठे तैर्व्याप्तमखिलं जगत्॥
पाताले भूतले स्वर्गे शिवलिङ्गास्तदाभवन्।
तेन भूता भविष्याश्च शिवलिङ्गाः सयोनयः॥
यत्र लिङ्गं तत्र योनिर्यत्र योनिस्ततः शिवेः।
उभयोरैव तेजोभिः शिवलिङ्गं व्यजायत॥"

इति नारदपञ्चरात्रे ३ रात्रम्॥ * ॥

कामनाभेदे पार्थिवशिवलिङ्गसंख्या यथा,—
"संख्या पार्थिवलिङ्गस्य यथाकामं निगद्यते।
स्फटिकं पार्थिवं नाम मुक्तिमुक्तिकरं परम्॥
देशकालादिकं ज्ञात्वा कुर्य्यात् लिङ्गं फलप्रदम्।
न करोति यदा ज्ञात्वा न कार्य्यं तस्य सिध्यति॥
विद्यार्थी घृतसाहस्रं धनार्थी च तदर्द्धकम्।
पुत्रार्थी सार्द्धसाहस्रं कन्यार्थी च घृतत्रयम्॥
विद्वान् लिङ्गायुतं कुर्य्यात् सर्व्वपापहरं परम्।
राज्यार्थी घृतसाहस्रं कान्तार्थी घृतपञ्चकम्॥
मोक्षार्थी कोटिगुणितं भूतिकामः सहस्रकम्।
रूपार्थी त्रिसहस्रन्तु तीर्थार्थी द्विसहस्रकम्॥
सुहृत्कामः सहस्रन्तु वस्त्रार्थं घृतमष्टकम्॥
मारणार्थं सप्तशतं मोहनार्थं शतार्द्धकम्॥
उच्चाटनवशार्थञ्च सहस्रन्तु यथोक्ततः।
क्षमणे च सहस्रन्तु दारणे च तदर्द्धकम्॥
महाराजभये प्राप्ते शतपञ्चापदि सङ्कटे।
सहस्रमयुतं सर्व्वकामदं परिकीर्त्तितम्॥
एकं पापहरं प्रोक्तं द्विलिङ्गञ्चार्थसिद्धिदम्।
त्रिलिङ्गं सर्व्वकामानां कारणं परमीरितम्॥"

तथा।

"लिङ्गानामयुतं कृत्वा पूजां राजभयं हरेत्।
सहस्राणि च लिङ्गानां निगड़ान्मोचयेद्ध्रुवम्॥
कारागृहविमुक्त्यर्थमयुतं कारयेद्बुधः।
डाकिन्यादिभये प्राप्ते सहस्रं कारयेत्तथा।
सहस्राणाञ्च पञ्चाशत्पूजां हि प्रकारयेत्॥"

इति वीरमित्रोदयधृतम्॥

"अनेन च क्रमादेवि लक्षं यस्तु प्रपूजयेत्।
सर्व्वाभीष्टफलं देवि लभते नात्र संशयः॥"*॥

एकीकृत्य लिङ्गपूजाविधिनिषेधौ यथा,—
"एकीकृत्य महेशानि युगलं न तु पूजयेत्।
एकीकृत्य महेशानि दश पञ्च शतानि च॥
प्रत्येकेनाथवा देवि विल्वपत्रैः प्रपूजयेत्।
एकैकं पूजयेल्लिङ्गं युगलं न तु पूजयेत्।
दरिद्रो जायते देवि युगलस्य च पूजनात्॥"

इति लिङ्गार्चनतत्त्वम्॥ * ॥

शिवलिङ्गस्फटिकादिनिरूपणं यथा,—
"तीर्थरत्नानि समाहृत्य निर्म्माय लिङ्गमद्भुतम्।
तीर्थाभावे महेशानि क्षुद्रस्य स्फटिकं प्रिये॥
पर्व्वतप्रभवा देवि नदीनाम्नेतुदाहृतम्।
एतच्चिह्नं महेशानि नदी क्षुद्रा इति प्रिये॥
निर्झरस्य च देवेशि नदी सम्यक्प्रदायिनी।
सर्व्वाभावे महेशानि मोक्षदस्याश्च स्फटिकम्।
अथवा परमेशानि यत्र चित्तं प्रमोदते॥
सुपीतं सुन्दरं रम्यं शर्करारहितं यदा।
निर्म्माय पार्थिवं लिङ्गं कुण्डलीसहितं प्रिये॥
यो लिङ्गं परमेशानि स रुद्रः परमेश्वरः।
कुण्डली वेष्टनी तस्य सा देवी परमेश्वरी॥
शिवस्य पूजनात् देवि देवीदेवौ च पूजितौ॥"

इति मत्स्यसूक्तम्॥ * ॥

वाणलिङ्गनिर्म्माल्यग्रहणे प्रतिप्रसवो यथा,—
"वाणलिङ्गे न चाशौचं न च निर्म्माल्यकल्पना।
सर्व्वं वाणार्पितं ग्राह्यं भक्ष्यं भक्तैश्च नान्यथा॥
ग्राह्याग्राह्यविचारोऽयं वाणलिङ्गे न विद्यते।
तदर्पितं जलं पत्रं ग्राह्यं प्रसादसंज्ञया॥
वाणलिङ्गे स्वयम्भूते चन्द्रकान्तेन्द्रसंस्थिते।
चान्द्रायणसमं ज्ञेयं शुभोर्नैवेद्यभक्षणे॥"

इति शिवनारदसंवादः।

शिवलोकः, पुं, (शिवस्य लोकः।) कैलासः। यथा,
"विल्वपत्रैरखण्डैश्च यो लिङ्गं पूजयेत् सकृत्।
सर्व्वपापैर्विनिर्मुक्तः शिवलोके महीयते॥"

इति तिथ्यादितत्त्वधृतभविष्यपुराणम्॥

शिवस्य भुवनं जनश्च॥

शिववल्लभा, स्त्री, (शिवस्य वल्लभा।) घृतपत्नी।

इति राजनिर्घण्टः॥ शिवप्रिये. त्रि॥

शिववल्लिका, स्त्री, (शिवस्य वल्लिका।) लिङ्गिनी।

इति राजनिर्घण्टः॥

शिववल्ली, स्त्री, (शिवस्य वल्ली।) लिङ्गिनी। श्रीवल्ली। इति राजनिर्घण्टः॥

शिववाहनः, पुं, (शिवस्य वाहनः।) अनड्वान्।

इति राजनिर्घण्टः॥

शिववीजं, क्ली, (शिवस्य वीजम्।) पारदः।

इति राजनिर्घण्टः॥

शिवशेखरः, पुं, (शिवः सुखकरः शिवप्रियो वा शेखरोऽग्रो यस्य।) वकपुष्पः। इति जटाधरः॥ धुस्तूरः। इति राजनिर्घण्टः॥ शिवस्य मस्तकस्थ॥

शिवसायुज्यं, क्ली, (शिवस्य सायुज्यम्।) मोक्षविशेषः। स च शिवेन सह योगः। यथा। नागरखण्डे।

"उपवासप्रभावेण बलादपि च जागरात्।
शिवरात्रेस्तथा तस्य लिङ्गस्यापि प्रपूजया।
अक्षयान् लभते लोकान् शिवसायुज्यमाप्नुयात्॥"

इति तिथ्यादितत्त्वम्॥

शिवसुन्दरी, स्त्री, (शिवस्य सुन्दरी।) दुर्गा।

इति तन्त्रशास्त्रम्॥

शिवा, स्त्री, (शिव+टाप्।) दुर्गा। सुक्तिः। यथा,—
"शिवा सुक्तिः समाख्याता योगिनां मोक्षगामिनी।
शिवाय यां जपेद्देवी शिवा लोके ततः स्मृता॥"

इति देवीपुराणे ४५ अध्यायः॥

अपि च।

"शिवा कल्याणरूपा च शिवदा च शिवप्रिया।
प्रिये दातरि चाख्यातः शिवा तेन प्रकीर्त्तिता॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ५४ अध्यायः॥

अपरञ्च।

"शुभ्र कल्याणवचन इरेदीत्कृष्टवाचकः।
सत्कृष्टवाचकश्चैव वाकारो दातृवाचकः॥
श्रेयःसंदीत्कृष्टदात्री शिवा तेन प्रकीर्त्तिता।
शिवराशिर्मूर्त्तिमती शिवा तेन प्रकीर्त्तिता॥
शिवो हि मोक्षवचनश्चाकारो दातृवाचकः।
स्वयं निर्व्वाणदात्री या सा शिवा परिकीर्त्तिता॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे २७ अध्यायः॥

शमीवृक्षः। हरीतकी। शृगालः। तामलकी। इत्यमरः॥ आमलकी। इति मेदिनी॥ बृहच्छक्तिविशेषः। स तु द्वात्रिंशच्छिनिभाता। इति तिथ्यादितत्त्वम्॥ हरिद्रा। दूर्व्वा। गोरोचना। इति राजनिर्घण्टः॥ * ॥ शृगालस्य ध्वनेः शुभाशुभं यथा,—

"शोभनं शुभफलाभिसूचकं
कथ्यतेऽत्यवितथं शिवारुतम्।
शान्तदीप्तकरुभां विशेषतो
ज्ञानमत्र च सदोपयुज्यते॥
दग्धा दिगुक्ता दिननाथयुक्ता
विवस्वदाप्ता भवति प्रदीप्ता।
सा धूमिता यां सविता प्रयातः
श्वेता दिगन्ता किल पञ्च शान्ताः॥
दग्धा दिशेन्द्री ज्वलिता दिशेन्द्री
प्रधूमिता चानलदिक्क्रमेण।
प्रत्येकमेकं प्रहराष्टकेन
शुक्ले दिशोऽष्टौ सविता क्रमेण॥
आद्ये दिनस्य प्रहरे प्रवृत्ते
महेशदेवेशहुताशदिक्षु।
शिवा रटन्ती कुरुते नराणां
संत्रासकायव्ययवन्धनानि॥
अथो द्वितीये प्रहरस्य भागे
सहस्रनेत्रानलकालदिक्षु।
शिवा रटन्ती कुरुते नराणां
संत्रासकायव्ययवन्धनानि॥
प्राप्ते तृतीये प्रहरे दिनस्य
हुताशवैवस्वतयातुदिक्षु।
शिवा रटन्ती कुरुते नराणां
संत्रासकायव्ययवन्धनानि॥
समागतेऽह्नः प्रहरे तुरीये
प्रेतेशरक्षःपतिमाशिदिक्षु।
शिवा रटन्ती कुरुते नराणां
संत्रासकायव्ययवन्धनानि॥
आद्ये निशायाः प्रहरे प्रवृत्ते
रक्षोऽधिनाथादितिवासदिक्षु।
शिवा रटन्ती कुरुते नराणां
संत्रासकायव्ययवन्धनानि॥
ततो द्वितीयप्रहरे रजन्या-
स्तोयोऽधिनाथानिलसोमदिक्षु।
शिवा रटन्ती कुरुते नराणां
संत्रासकायव्ययवन्धनानि॥
यामे तृतीयेऽपि च यामवत्याः
सौरेदीशाकरशम्भुदिक्षु।

शिवा रटन्ती कुरुते नराणां
संग्रामकायभयवन्यगानि ॥
समागते राजिसुरीयवासे
निशाकरेऽग्नासुरेऽग्रदिक्षु ।
शिवा रटन्ती कुरुते नराणां
संग्रामकायभयवन्यगानि ॥"

इति शिवारुते दग्धदीप्तधूमसितदिक्चययाम-प्रकरणं प्रथमम् ॥ * ॥

"इतीरितं दिक्चययामयोगात्
फलं विरुतं विरुते: शिवाया: ।
क्रमोऽथ दिक्पक्षकयामयोगात्
फलानि पुंसां क्रमत: शुभानि ॥
क्षतान्तरक्षोरुरुजानिकेऽक्-
दिग्द्वाद्ययामे रटिते: प्रगात्या: ।
स्यादिष्टवार्तोन्नतिरिष्टसिद्धि-
लाभ: सुमित्रं प्रियलोकसङ्ग: ॥
रुग्:प्रवेतोऽनिलसोमग्रभ्रमु-
दिक्षु द्वितीये प्रहरे रुतेन ।
स्यादिष्टवार्तोन्नतिरिष्टसिद्धि-
लाभ: सुमित्रं प्रियलोकसङ्ग: ॥
अजैणखातेन्द्रशिवामरेग्र-
दिक्षुत्रयेण प्रहरे तृतीये ।
स्यादिष्टवार्तोन्नतिरिष्टसिद्धि-
लाभ: सुमित्रं प्रियलोकसङ्ग: ॥
अजोरगोमेग्रसुरेग्यवह्नि-
दिक्षु स्वरेण प्रहरे चतुर्थे ।
स्यादिष्टवार्तोन्नतिरिष्टसिद्धि-
लाभ: सुमित्रं प्रियलोकसङ्ग: ॥
ग्रहाक्षुरुद्रेन्द्रुतुराशकाल-
दिक्षुत्रये: पञ्चमयामभागे ।
स्यादिष्टवार्तोन्नतिरिष्टसिद्धि-
लाभ: सुमित्रं प्रियलोकसङ्ग: ॥
ईशानशक्राग्निसुतान्तरक्षो-
दिक्षु स्वरेण प्रहरे च षष्ठे
स्यादिष्टवार्तोन्नतिरिष्टसिद्धि-
लाभ: सुमित्रं प्रियलोकसङ्ग: ॥
ब्रह्माग्निकाशाग्रयमाग्रपाग्नि-
दिक्षुत्रयै: सप्तमयामकाये ।
स्यादिष्टवार्तोन्नतिरिष्टसिद्धि-
लाभ: सुमित्रं प्रियलोकसङ्ग: ॥
अजैकपादैर्वसुमाग्निवास-
दिक्षुक्षये च प्रहरे रवेण च ।
स्यादिष्टवार्तोन्नतिरिष्टसिद्धि-
लाभ: सुमित्रं प्रियलोकसङ्ग: ॥"

इति श्रीवसन्तराजे शिवारुते दिग्यामप्रकरणं द्वितीयम् ॥ * ॥

"अजैकपादाहिवसुक्षमाग्नी
दिक्चययामक्रमतो यथर्क्षम् ।
प्राक्पादिकामस्तु दिगुद्भवं
यद्यत् फलं तत्तदुदीरयामः ॥
अजैकपादोऽहिबुधोऽग्निभं
पूर्वं यदीशेषु फलं शुभाय ।

भयं प्रजायां सकलस्य सौख्य-
मेकादिशब्दैः कुरुते प्रशस्ते ॥
भयान्यनिष्टश्रुतिरर्थहानि-
रिष्टैर्वियोगो मरणं च भीतिः ।
स्याद्विग्रहाग्निस्मरणस्य दीप्ते
त्रिकादीना चेत् क्षतसम्भवेन ॥
ऐन्द्रां विनादे प्रथमेऽर्थलाभो
भवेद्द्वितीये निधिदर्शनञ्च ।
कन्या तृतीये लभते चतुर्थे
वाध्वागमं पञ्चमकेऽथ सिद्धिम् ॥
षष्ठे रवे कृष्णति भूमिनाथो
भीः सप्तमे स्याद्विफलोऽष्टमेषु ॥
वाक्षोऽग्निभागे प्रथमे द्वितीये
नराधिपः कृष्णति भीस्तृतीये ।
वातश्चतुर्थे नगरस्य ग्रन्दे
शिवाक्षते पञ्चमके च युद्धम् ।
वदन्ति तज्ज्ञाः फलहच्च षष्ठे
भीः सप्तमे स्याद्विफलोऽष्टमेषु ॥
आद्ये शुभं स्यादशुभं द्वितीये
यान्ये महाव्याधिभयं तृतीये ।
स्वरे चतुर्थे स्वजनागमः स्यात्
पुत्रो भवेत् पञ्चसु फेतुक्षतेषु ।
जायेत कन्या रटिते च षष्ठे
भीः सप्तमे स्याद्विफलोऽष्टमेषु ।
ग्रामस्य घातो दिशि राक्षसाना-
माद्ये द्वितीयेऽपि च गोकुलस्य ॥
स्यात्तृतीये द्विचतुष्पदानां
हानिश्चतुर्थेऽपि च पञ्चमेऽज्ञ ।
चौराद्भयं राजभयञ्च षष्ठे
भीः सप्तमे स्याद्विफलोऽष्टमेषु ॥
ग्रन्दे शिवाया वरुणस्य भागे
आद्ये भयं स्यानिरघ द्वितीये ।
स्याद्राजदूतागमनं तृतीये
दाहश्चतुर्थे खलु चौरभीतिः ॥
स्यात् पञ्चमे राजभयञ्च षष्ठे
भीः सप्तमे स्याद्विफलोऽष्टमेषु ।
वायव्यभागे भयमेकशब्दे
भयानिरेको भवति द्वितीये ॥
वृष्टिस्तृतीये मरुतो चतुर्थे
मेघागमो वर्णति पञ्चमे च ।
क्रोधं विधत्ते नृपतेश्च षष्ठे
भीः सप्तमे स्याद्विफलोऽष्टमेषु ॥
दिक्चक्रवर्त्या विरुते शिवाये
त्रिकेण कश्चित् प्रथमे द्वितीये ।
महाभयं विग्रहमृत्युतीये
कष्टं चतुर्थे खलु पञ्चमे च ॥
षिट् पञ्चमे वत्सरपे च भूतौ
भीः सप्तमे स्याद्विफलोऽष्टमेषु ।
राष्ट्रीसभा दर्शनमाद्यशब्दे
वैशेषिकीति च तयोरनेन ॥
उत्पातमाख्यन्ति दुरिष्टमेव
चतुर्थं भद्रं खलु पञ्चमे च ।

सङ्गो भवेद्वैरिजनेन षष्ठे
भीः सप्तमे स्यादिफलोऽष्टमेषु ॥
आद्ये भवेद्दुर्दिनमीशदेशे
वृष्टिर्द्वितीये च रवे शिवायाः ।
वातस्तृतीये त्वग्निश्चतुर्थे
म्रियेत कश्चित् खलु पञ्चमे च ॥
स्रवेत वृष्टौ विनदे च षष्ठे
भीः सप्तमे स्याद्विफलोऽष्टमेषु ॥"

इति श्रीवसन्तराजे शिवारुते स्वराष्टकप्रकरणं तृतीयम् ॥ * ॥

"क्षेमलाभपुनरागमनानां
निश्चयं समधिगम्य विशङ्कः ।
येन याति पथिकः परदेशं
तं शिवारुतमथ प्रवदामः ॥
यं यं देशं गन्तुमभ्युद्यतानां
पुंसां शब्दानुधरन्ती प्रगाली ।
शान्तायां वा सिद्धये वाञ्छितानां
दीप्तायान्तु स्यादभीष्टव्ययाय ॥
प्राचीं दिशं सम्मुखभानुबिम्बं
प्रतिष्ठमानस्य नरस्य यस्य ।
शब्दं प्रगाली पुरतः करोति
वन्धं वधं वा प्रकरोति तस्य ॥
प्राचीदिगीशाभिमुखस्य पुंसः
प्रस्थानकामस्य शिवा सशब्दा ।
भियेऽर्थनाशाय च दक्षिणास्था
द्वामा पुनर्वाञ्छितकार्यसिद्ध्यै ॥
प्रत्यक्कमाशां चलितस्य पूर्वा
शिवा विरावं पुरुषस्य यस्य ।
करोति दृष्टे प्रकरोति तस्य
सर्वप्रकारामभिलाषसिद्धिम् ॥
प्रस्थापिनी यस्य च दक्षिणाशां
शिवा रवं सुचति दक्षिणेन ।
स्यादित्यसुक्ता यदि नो तदानीं
ध्रुवं भवेत्तस्य मरीपतित्वम् ॥
वैवस्वताशां चलितस्य यस्य
दिवाकरस्तिष्ठति दक्षिणेन ।
शिवा च वामा कुरुते विरावं
सम्पद्यते तस्य समस्तमिष्टम् ॥
प्रभात् यदा याम्यकुलप्रवासी
करोति शब्दं पुरतः प्रगाली ।
आसे विसर्जानपि सम्मुखेत्
भवेत् तदानीमचिरेण खलु: ॥
नरस्य यास्यां ककुभं त्रियामोः
प्रगालभाग्या यदि दृष्टभागे ।
वैकारमाख्याति मानवस्य
स्वयुष्य पुत्रेण भवत्यवश्यम् ॥
दिशं प्रतीचीं प्रथमः प्रगाली
नरस्य यस्याभिमुखी विरौति ।
प्राप्ता शिवा ग्रामसभाप्रदार्थं
सीमा तु दीर्घं भ्रमणाभ्युपैति ।
पाश्चात्यगां सम्मुखिलस्य कार्यां
प्रगालिका वक्ष्यति दक्षिणेन ।

मध्ये सुतैः पञ्चभिरभ्युपेता
शिवान्विता पिष्टमयी प्रसन्ना।
पूज्या शिवा तुष्यति भक्तियोगात्
प्रभूतपुष्पाक्षतधूपदीपैः॥
साज्यगुडौदनमाषकुलत्थै-
र्यावकपूपलिकासिधमद्यैः।
संभृतिरत्र नरासनमार्चं
बुद्धिमता बलिकर्मणि कार्या॥
प्राच्यांदिशीं वाथ चतुर्दशीं वा
संमन्त्र्य मन्त्रेण च सप्तशत्वः।
बलिं शिवाया निशि निश्चयेन
दद्यान्मुधो यदि भद्रमिच्छेत्॥

अत्र मन्त्रः। ॐ शिवे ज्वालामुखि बलिं गृह्ण गृह्ण हुँ फट् स्वाहा। ॐ शिवे शिवदूति भगवति चण्डे इदमर्घं बलिलीला-समुचितं गृह्ण गृह्ण आगच्छ आगच्छ वायुवेगेन शुभं कुरु कुरु स्वाहा। इत्यर्घ-मन्त्रः। बलिदानाय मन्त्रान्तरम्। ॐ नमो भगवति इमं इमं बलिं गृह्ण गृह्ण गन्धपुष्प-धूपदीपादिकं दह दह पच पच घोररूपिणि मो भगवति पिबत पिबत स्वाहा।

अनेन मन्त्रहितयस्य मध्या-
देकेन केनाप्यभिमन्त्रणीयः।
बलिः शिवायाः समधाप्रभावं
पृथक् पृथक् मन्त्रयुगं यदेतत्॥
ताम्बूलवस्त्रासनदक्षिणाभि-
र्नैमित्तिकं शाकुनशास्त्रदक्षम्।
प्रपूजयेत्तत्र भवद्भीष्ट-
माचार्यवर्यं परितोषिते हि॥
अन्वेधिकावद्विकलान्तरद्र-
ष्टव्यानि पूर्वोक्तविधेन सार्धम्।
अन्येद्युरप्यत्र विधीयते चेद्
श्रेयस्करी जम्बुकगोधिनी सा॥
स्निग्धेधिनी सर्वसमीहितेषु
देवी भवानी भुवि घेरवा च।
क्षमाधिपाना क्षमया सदैव
शिवारुते तेन यतेत विद्वान्॥"

इति शीवलसारोद्धारे उदयास्तसमयैक्यभेदे समस्तमन्त्रकौतुके विरचितं शिवारुतं षष्ठम्॥६॥

अथ बलिदानविधिः। गङ्गुक्तं कुलचूडामणौ।
"शिवाशब्दे प्रान्तरे वा श्मशाने वाथ साधकः।
मांसघृताक्तं नैवेद्यं मन्त्रान्ताक्षे निवेदयेत्।
काहि कालीति बलये सर्वांसा शिवरूपिणी।
अमुकस्या समायाहि परिवारगणैः सह॥
मुक्ता रौति यदैशान्यां सर्वसम्पत्तिसूचकम्।
तदैव मङ्गलं तस्य गान्धर्वा कुलभूषण॥
अवश्यमन्नदानेन नियतं तोषयेच्छिवाम्।
नित्यश्राद्धं तथा सन्ध्यावन्दनं पितृतर्पणम्॥
तथैव कुलसेवानां नित्यता कुलपूजने।
पशुरूपां शिवां देवीं यो नार्चयति निर्जने॥
शिवारावेण तस्याशु सर्वं नश्यति निश्चितम्।
जपपूजाविधानानि यत्किञ्चित् सुकृतानि च॥
गृहीत्वा ग्रामं दत्त्वा च शिवा रोदिति निर्जने।
एकया भुज्यते यत्र शिवया देव भैरव॥
तत्रैव सर्वशक्तीनां प्रीतिः परमदुर्लभा।
पशुशक्तिः पक्षिशक्तिर्नरशक्तिर्यथाक्रमात्॥
पूजनात् द्विगुणं कर्म मङ्गलं साधयेत्ततः।
तेन सर्वप्रयत्नेन कर्तव्यं पूजनं महत्॥
राजादिभयसंपन्ने देशान्तरभयादिके॥
शुभाशुभानि कर्माणि विचिन्त्य बलिमाहरेत्।
गृह्ण देवि महाभागे शिवे कालाग्निरूपिणि॥
शुभाशुभफलं यत्तं ब्रूहि गृह्ण बलिं तव।
एवमुच्चार्य दातव्यो बलिः कुलजनप्रियः॥
यदि न भुज्यते वत्स तदा नैव शुभं भवेत्॥
शुभं यदि भवेत्तत्र भुज्यते तदशेषतः।
एवं ज्ञात्वा महादेव शान्तिस्वस्ययनं चरेत्॥"

इति तन्त्रसारः॥

शिवार्च, क्ली, (शिवस्याचि कारणत्वेनास्त्यस्येति। अच्।) रुद्राक्षम्। इति राजनिर्घण्टः॥ (अस्य विवरणं रुद्राक्षशब्दे द्रष्टव्यम्॥)

शिवाटिका, स्त्री, वंशपत्री। इति भावप्रकाशः॥

शिवात्मक, क्ली, (शिवः सुखकरः आत्मा स्वरूपो यस्य।) सैन्धवम्। इति राजनिर्घण्टः॥ शिव-मये, त्रि॥

शिवानी, स्त्री, (शिवस्य भार्या। यद्वा, शिवं मङ्गलमानयतीति। आ+नी+ङ्।) गौरा-दित्वात् ङीष्।) दुर्गा। इति लोकप्रसिद्धिः॥ जयन्तीवृक्षः। इति शब्दचन्द्रिका॥

शिवाप्रियः, पुं, (शिवायाः प्रियः।) छागः। इति त्रिकाण्डशेषः॥ शिवस्य शिवाया अप्रियवस्तुनि शिवाया वल्लभे च त्रि॥

शिवापीड़ः, पुं, (शिवस्यापीड़ इव।) वकवृक्षः। इति राजनिर्घण्टः॥ शिवाशिवयोः शेखरत्व॥

शिवाफला, स्त्री, (शिवाया इव फलमस्याः।) शमीवृक्षः। इति राजनिर्घण्टः॥

शिवारातिः, पुं, (शिवायाः शृगालस्यारातिः।) शुनकः। इति शब्दमाला॥ शिवाशिवयोः शत्रुत्व॥

शिवालयः, पुं, (शिवायाः शिवस्य वा आलयः।) रक्तसुरसी। इति शब्दचन्द्रिका॥ शिवस्य गृहम्। यथा, रामार्चनचन्द्रिकायाम्।
"चन्दनकुंकुमपङ्के नीपे सिन्दूरिते शिवालये।
मनसाभावप्रकथनमुपदेशः स उच्यते॥"

इति तिथ्यादितत्त्वम्॥

शिवाशुः, पुं, शृगालः। इति राजनिर्घण्टः॥

शिवाश्(श्व)बलिः, पुं, (शिवाश्वौ शैवयानौ बलिः।) राजौ शिवाशैवमांसप्रधानवैद्यम्। यथा। अत्र शिवाबलिः। कुलचूडामणौ।
"शिवाशब्दे प्रान्तरे वा श्मशाने वाथ साधकः।
मांसघृताक्तं नैवेद्यं मन्त्रान्ताक्षे निवेदयेत्।
काहि कालीति बलये सर्वांसा शिवरूपिणी।
अमुकस्या समायाहि परिवारगणैः सह॥
मुक्ता रौति यदैशान्यां सर्वसम्पत्तिसूचकम्।
तदैव मङ्गलं तस्य गान्धर्वा कुलभूषण॥
अवश्यमन्नदानेन नियतं तोषयेच्छिवाम्।
नित्यश्राद्धं तथा सन्ध्यावन्दनं पितृतर्पणम्॥
तथैव कुलसेवानां नित्यता कुलपूजने।
पशुरूपां शिवां देवीं यो नार्चयति निर्जने॥
शिवारावेण तस्याशु सर्वं नश्यति निश्चितम्।
जपपूजाविधानानि यत्किञ्चित् सुकृतानि च॥
गृहीत्वा ग्रामं दत्त्वा च शिवा रोदिति निर्जने।
एकया भुज्यते यत्र शिवया देव भैरव॥
तत्रैव सर्वशक्तीनां प्रीतिः परमदुर्लभा।
पशुशक्तिः पक्षिशक्तिर्नरशक्तिर्यथाक्रमात्॥
पूजनात् द्विगुणं कर्म मङ्गलं साधयेत्ततः।
तेन सर्वप्रयत्नेन कर्तव्यं पूजनं महत्॥ * ॥
राजादिभयसंपन्ने देशान्तरभयादिके।
शुभाशुभानि कर्माणि विचिन्त्य बलिमाहरेत्॥
गृह्ण देवि महाभागे शिवे कालाग्निरूपिणि।
शुभाशुभफलं यत्तं ब्रूहि गृह्ण बलिं तव॥
एवमुच्चार्य दातव्यो बलिः कुलजनप्रियः।
यदि न भुज्यते वत्स तदा नैव शुभं भवेत्॥
शुभं यदि भवेत्तत्र भुज्यते तदशेषतः।
एवं ज्ञात्वा महादेव शान्तिस्वस्ययनं चरेत्॥
नैवेद्योपरि मूलमन्त्रमष्टोत्तरशतं जप्त्वा बलिं दद्यादिति शेषः।" इति तन्त्रसारः॥

शिवाश्रुतिः, स्त्री, जयन्तीवृक्षः। इति शब्द-चन्द्रिका॥

शिवाश्वरः, पुं, (शिवस्याश्वादौ यस्मात्।) वज्र-वृक्षः। इति राजनिर्घण्टः॥ शिवस्याश्वत्व॥

शिवाशा, स्त्री, (शिवेव आशा यस्याः।) वज्र-जटा। इति राजनिर्घण्टः॥ शिवसामके, त्रि॥

शिविः, पुं, हिंसप्रभुः। इति त्रिकाण्डशेषः॥ भूपतिवृक्षः। राजविशेषः। स च उशीनररा॰-पुत्रः। इति मेदिनी॥ तस्य चरितं यथा,—
मैत्रेय उवाच।
"शृणु राजन्! प्रवक्ष्यामि समासं शिबिभाषितम्।
उशीनरं दत्तवान् वत्सं पुरा स्त्रीशीनरो युवा॥
सत्यागरतं ज्ञात्वा शिबिमित्रासुतञ्चयौ।
शिक्षार्थं समेयातां वर्त्तमाने सत्राध्वरे॥
वह्निर्भूत्वा कपोतस्तु हरिश्चेनपुरःसरः।
अरण्यानीं महीमाशु निर्गत्यं भयविह्वलः॥
चाहि मां पृथिवीपालेत्यवदत् श्येनआद्रवात्।
स समाश्वासयामास कपोतं शरणागतम्॥
राजानमुपगम्याथ श्येनः प्रोवाच संसदि।
पक्षिणं मम मे राजन्! क्षुधार्तस्य मुदुस्मिनः॥
धर्मात्तागं त्यागाकुर्वे पृथिव्यां सर्वपार्थिवाः।
तदिदं तव धर्म्यं कर्म कर्तुमिच्छामि पार्थिव॥
सर्वेषां सम्मतः त्यागः स्वयमर्थेषु लक्ष्यते।
परार्थे भवतो नित्यं सत्यस्य परिरक्षिणः॥
नोपकारपरेष्वेवमपकारपरो जनः।
अपकारपरेष्वपि सदुपकारपरः सदा॥
अनेन पिशितेनाशु भक्षणीयं तवाधुना।

स श्येनमाह संप्राप्तस्त्राणार्थी सन्निधौ मम ॥
तस्मात्त्वत्तं न समर्पयिष्ये
कपोतकं श्येन यदत्र युक्तम् ।
त्वं मन्यसे तत् करवाणि सर्व-
मृते कपोतान् खलु मत्समत्व ॥
तुभ्यं हि सुमहद्राज्यं प्रयच्छामि विहङ्गम ।
यथा कामयसे चान्यद्वर्ज्यित्वा कपोतकम् ॥
श्येनः प्राह किमेतत्ते प्रीतिरासीत् खगे दृढा ।
कथञ्चिदस्य तुल्यानि स्वमांसानि प्रयच्छ मे ॥
राजा तमब्रवीद्दृष्टो यत्ते मांसानि याचसे ।
ततदृयच्छामि ते सद्यः स्वमांसं तुलया धृतम् ॥
श्यमुक्त्वा स्वमांसानि कपोतेन समं नृपः ।
उत्कृत्य तोलयामास प्रहृष्टो मनसा ततः ॥
तुलया ध्रियमाणस्तु कपोतो यतिरिच्यते ।
पुनश्चोत्कृत्य मांसानि ततः प्रादात् स पार्थिवः ।
न विद्यते यदा मांसं कपोतेन समं क्वचित् ।
ततः प्रक्षीणमांसोऽपि साधुः सुखयते परम् ॥
यदा तेन न तुल्यं तत् स तुलामारुहत् स्वयम् ।
अन्तःपुरवरस्त्रीषु न राज्ये न च जीविते ॥
करुणाभरक्तचित्तेन तेनापेक्षा कृता क्वचित् ।
परदुःखातुरा नित्यं स्वसुखानि महत्तमाः ॥
नापेक्षन्ते महात्मानः सर्वभूतहिते रताः ।
परार्थसुखताः सन्तः सन्तः किं किं न कुर्वते ॥
नाहगण्यमुपेक्षन्ते जलदेभ्यस्तृषार्दिताः ।
एक एव सतां मार्गो यदभीप्सितपालनम् ॥
दहन्तमकरोत् क्रोडे शावकं यदपांपतिः ।
आत्मानं पीडयित्वापि साधुः सुखयते परम् ॥
क्षादयन् तापितान् वृक्षो दुःखयन् सहते स्वयम् ।
अथ तस्मिन् समारूढे पुष्पवर्षं-पपात च ॥
देवदुन्दुभयो नेदुस्तुलामौशीनरे नृपे ।
ततस्तस्य तदा ज्ञात्वा वाक्यं चेतदभाषत ॥
शक्रः स्वरूपमास्थाय धर्मे राज्ञः परिस्थितिम् ।
इन्द्रोऽहमस्मि भद्रं ते-कपोतो हव्यवाहनः ॥
जिज्ञासमानौ त्वां राजन्निमं यज्ञमुपागतौ ।
महाकारुणिकेनेह यत् कृतं तत् सुदुष्करम् ॥
नैव पूर्वे नृपाश्चक्रुर्न करिष्यन्ति चापरे ।
यत्ते मांसानि गात्रेभ्यः समुत्कृत्तानि पार्थिव ॥
अया ते शाश्वती कीर्तिर्लोकाननुभविष्यति ।
दिव्यरूपधरश्चैव पालयित्वा महीं चिरम् ॥
सर्वान् लोकानतिक्रम्य ब्रह्मलोकं गमिष्यति ।
अयमुक्त्वा तमिन्द्राग्नी जग्मतुस्त्रिदशालयम् ।
राजा तु क्रतुमिष्ट्वा तं मुमुदे देवतां तदा ॥"
इति वह्निपुराणे शिविदेवप्रत्यानयनाध्यायः ॥

शिविका, स्त्री, (शिवं करोतीति । शिव + णिच् । ततो ण्वुल् । टाप् च अत इत्वम् ।) यानविशेषः । भोपान् इति ख्यातः । इति भरतः । पुल्ली इति मालती इति च भाषा । तत्पर्यायः । याप्ययानम् २ । इत्यमरः ॥ शिबीरथः ३ । इति शब्दरत्नावली ॥ तद्दानविधिर्यथा,—

ऋषिरुवाच ।
"ब्रूहि तावन्महीपाल महादानमनुत्तमम् ।
येन दत्तेन सुध्यते नरकार्त्तवान् ॥
मार्गशीर्षे शुभे पक्षे समुपोष्य हरेर्दिने ।
माघफाल्गुनयोर्वापि वैशाखस्य शरत्सु च ॥
द्वादश्यां हरिमभ्यर्च्य कलसोपरिसंस्थितम् ।
शिविकां चक्रवंशोत्थां ऋजुदारुमयीं तथा ॥
आनीय सन्निधिं विष्णोः शुभच्छत्रसमन्विताम् ।
संभूय च सगेयूकां जागरं तत्र कारयेत् ॥
विद्याभिजनसम्पन्नविद्वद्भ्यो ज्ञात्वित्तमम् ।
आज्ञासारं शुचिं दद्यात् कलत्रापत्यभूषितम् ॥
प्रातः समाप्यमभ्यर्च्य वाग्भिः स्वर्णभूषणैः ।
उपानच्छत्रिकां खड्गां पङ्कजुकवेणुकाम् ॥
आदर्शस्थगिकां पानीयपात्रं कांस्यभाजनम् ।
चत्वारो वृषभा देया धेनवः शुभलक्षणाः ॥
शिविकावाहकानान्तु तथा छत्रस्य धारके ।
वृत्तिर्देया तथान्नञ्च वर्षान्नं ब्राह्मणस्य तु ॥]
वर्षे वर्षे पुनर्देयं ब्राह्मणस्य तदेव तु ।
वृत्तिरेव तदसम्पत्तौ वर्षे वर्षेऽपि वार्षिकी ॥
इहामुत्रातपत्राणं कुरु केशव मे प्रभो ।
त्वत्प्रीणनाय मे दत्तं ज्ञात्वाविद्वान्नाय वै ॥
यत् प्रभो शिविकां देव प्रीतो भव जनार्दन ।
दत्तवान् ज्ञानविदुषे सपत्नीकाय पुत्रिणे ॥
सुरापस्त्रेयहत्यघ्नो ब्रह्महा गुरुतल्पगः ।
शिविकादानमाहात्म्यात् सुध्यते नात्र संशयः ॥
पितृपक्षान्मातृपक्षान् पत्नीपक्षांस्तथैव च ।
आत्मानं बन्धुपक्षांश्च तारयेन्नरकार्णवात् ॥
भुक्त्वा स विपुलान् भोगान् इहामुत्र सुखप्रदान् ।
सपत्नीकः सपितृको विष्णुसायुज्यमश्नुते ॥"
इति वह्निपुराणे शिविकादानाध्यायः ॥

शिविष्टः, पुं, महादेवः । इति शब्दरत्नावली ॥
शिपिविष्टशब्दार्थोऽप्यत्र ॥

शिविरं, क्ली, (शेरते राजबलान्यत्र । शीङ् स्वप्ने + बाहुलकात् किरच्प्रत्ययेन साधु । इत्युणादिवृत्तौ उज्ज्वलदत्तः । १ । ५४ ।) निवेशः । इत्यमरः ॥ दे आगन्तुकसैन्यवासे । कटके इत्यर्थे । नृपस्य स्थूलस्थाने इत्येके । इति भरतः ॥
"शिविरन्तु निवेशे च क्लीवत्वे वृद्धवेश्मनि ॥"
इत्युणादिकोषः ॥ *

अथ शिविरलक्षणम् ।
श्रीभगवानुवाच ।
"शिविरं परिखायुक्तमुच्चैः प्राकारवेष्टितम् ।
युक्तद्वादशद्वारञ्च सिंहद्वारपुरस्कृतम् ॥
युक्तं चित्रैर्विचित्रैश्च क्षत्रिभेश्च कपाटकैः ।
निर्विष्टवृक्षरहितं प्रविष्टैश्च पुरस्कृतम् ।
मूलक्षेत्रं चन्द्रवेधं प्राङ्मुखञ्च तथैव च ॥"
तत्र विप्रनृपनिषिक्तकाष्ठे तथा,—
विश्वकर्मोवाच ।
"कस्य कस्य तरोः काष्ठं प्रशस्तं शिविरे प्रभो ।
अमङ्गलञ्च केषां वा सर्वं मां वक्तुमर्हसि ॥
श्रीभगवानुवाच ।
आम्रजम्बू नारिकेलञ्च गृहिणाञ्च धनप्रदः ।
शिविरस्य यदीशाने पूर्वे पुत्रप्रदस्तरुः ॥
सर्वत्र मङ्गलार्हश्च तरुराजो मनोहरः ।
रक्षाकृत्वः पूर्वस्मिन् नृणां सम्पत्प्रदस्तथा ।
शुभप्रदश्च सर्वत्र सुरकारो निगद्यते ।
विल्वश्च पनसश्चैव जम्बीरो बदरी तथा ॥
प्रजाप्रदश्च पूर्वस्मिन् दक्षिणे धनदस्तथा ।
सम्पत्प्रदश्च सर्वत्र यतो हि वर्द्धते गृही ॥
जम्बुवृक्षश्च दाडिमः कदल्याम्रातकस्तथा ।
बन्धुप्रदश्च पूर्वस्मिन् दक्षिणे मित्रदस्तथा ॥
सर्वत्र शुभदश्चैव धनपुत्रशुभप्रदः ।
हर्षप्रदो गुवाकश्च दक्षिणे पश्चिमे तथा ॥
ईशाने सुखदश्चैव सर्वत्रैवं निगद्यते ।
सर्वत्र चम्पकः शुद्धो भवि भद्रप्रदस्तथा ॥
अलाबुश्चापि कुष्माण्डं मायाम्बुश्च सुकासुकः ।
खर्जूरी कर्कटी चापि शिविरे मङ्गलप्रदाः ॥
वासूकः कारवेल्लश्च वार्त्ताकुश्च शुभप्रदाः ।
लताफलश्च शुभदं सर्वं सर्वत्र निश्चितम् ॥*॥
प्रशस्तं कथितं कारो निगद्यश्च निगद्यते ।
वन्यवृक्षो निगद्यश्च शिविरे नगरेऽपि च ॥
वटो निगद्यः शिविरे नित्यं चौरभयं ततः ।
नगरेषु प्रसिद्धश्च दर्शनात् पुण्यदस्तथा ॥
हे कारो तिन्तिडीवृक्षो यत्नात्तं परिवर्जय ।
धरेश धनहानिः स्यात् प्रजाहानिर्भवेत् ध्रुवम् ।
शिविरेऽतिनिगद्यश्च नगरे किञ्चिदेव च ।
न निगद्यः प्रसिद्धश्च नगरेषु तथा पुरे ।
वाद्यामतिनिगद्यश्च प्राङ्मुखं परिवर्जयेत् ।
खर्जूरश्च डहुश्चैव निगद्यः शिविरे तथा ॥
न निगद्यः प्रसिद्धश्च ग्रामेषु नगरेषु च ।
वृक्षश्च चणकादीनां धान्यश्च मङ्गलप्रदम् ॥
ग्रामेषु नगरे चापि शिविरे च तथैव च ।
इक्षुवृक्षश्च शुभदः सन्ततं शुभदस्तथा ॥
अशोकश्च शिरीषश्च कदम्बश्च शुभप्रदः ।
कच्ची हरिद्रा शुभदा शुभदश्चार्द्रकस्तथा ॥
हरीतकी च शुभदा ग्रामेषु नगरेषु च ।
न वाट्यां भद्रदा नित्यं तथा चामलकी ध्रुवम् ॥
गजानामस्थि शुभदमश्वानाञ्च तथैव च ।
कल्याणसूचेः अवसां वास्तौ स्थापनकारिणाम् ॥
न शुभप्रदमन्येषामुच्चत्वकारणं परम् ।
वानराणां नराणाञ्च गर्दभानां गवामपि ॥
कुक्कुराणां शृगालानां मार्ज्जाराणामभद्रकम् ।
मेटकानां शूकराणां सर्व्वेषाञ्चाशुभप्रदम् ॥
ईशाने चापि पूर्वस्मिन् पश्चिमे च तथोत्तरे ।
शिविरस्य जलं भद्रमन्यत्राशुभमेव च ॥*॥
दीर्घे प्रस्थे समानस्थ न कुर्य्यान्मन्दिरं बुधः ।
चतुरस्रे गृहे कारो गृहिणां धननाशनम् ॥
दीर्घप्रस्थः परिमितो नेत्राङ्गैनापि संस्कृतम् ।
शून्येन रहितं भद्रं शून्यं शून्यप्रदं नृणाम् ॥
प्रस्थे एकत्रयात् पूर्वे दीर्घे एकत्रयं तथा ।
गृहिणां शुभदं द्वारं प्राकारस्य गृहस्य च ।
न मध्यदेशे कर्त्तव्यं किञ्चिच्छ्रेयाधिके शुभम् ॥
चतुरस्रं चन्द्रवेधं शिविरं मङ्गलप्रदम् ।
अभद्रं सूर्यवेधश्च शिविरं मङ्गलाप्रदम् ॥
अभद्रदं सूर्यवेधं प्राङ्मुखञ्च तथैव च ।
शिविराभ्यन्तरे भद्रा स्थापिता तुलसी नृणाम् ।
धनपुत्रप्रदात्री च पुण्यदा परिभक्तिदा ॥

प्रभाते तुलसीं दृष्ट्वा स्वर्णदानफलं लभेत्।
मालती यूथिका कुन्दमाधवी केतकी तथा॥
नागेश्वरं मल्लिका च काञ्चनं बकुलं शुभम्।
अपराजिता च शुभदा तेषामुद्यानमौचितम्॥
पूर्वे च दक्षिणे चैव शुभदं नात्र संशयः।
ऊर्द्धं षोड़शहस्तेभ्यो नैवं कुर्य्यादृगृहं गृही॥
ऊर्द्धं विंशतिहस्तेभ्यः प्राकारं न शुभप्रदम्।
सूत्रधारं तैलकारं स्वर्णकारञ्च हीरकम्॥
वाटीस्थले ग्राममध्ये न कुर्य्यात् स्थापनं बुधः।
ब्राह्मणं क्षत्रियं वैश्यं सच्छूद्रं गणकं शुभम्॥
भट्टं वैद्यं पुष्पकारं स्थापयेत् शिविरान्तिके।*
ग्रन्थे च परिखामानं शतहस्तं प्रशस्तकम्।
परितः शिविराणाञ्च गम्भीरं दशहस्तकम्॥
सङ्कीर्णपूर्व्वकक्षेव परिखादारमौचितम्।
शत्रोरगम्यं मित्रस्य गम्यमेव सुखेन च॥
शालालीनां तिन्तिड़ीनां चिन्तालानां तथैव च।

निम्बानां सिन्धुवाराणां उड़म्बराणामभद्रकम्॥
शुक्लूराणां वटानाञ्चाश्वित्थखदिराणामवाञ्छितम्।
एतेषामतिरिक्तानां शिविरे काष्ठमौचितम्॥
वृक्षञ्च वज्रहतकं दूरतो वर्जयेद्बुधः।
पुत्रदारधनं हन्यादित्याह कमलोद्भवः॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १०२अध्यायः॥

शिवौषधः, पुं, पाठ्यायनम्। इति हारावली॥

शिवेष्टः, पुं, (शिवस्य इष्टः।) वकवृक्षः। इति राजनिर्घण्टः॥ शिवप्रिये, त्रि॥

शिवेष्टा, स्त्री, (शिवस्य इष्टा प्रिया।) दूर्व्वा। इति राजनिर्घण्टः॥

शिशिरः, पुं, (शृणाति इतस्ततो गच्छतीति। शॄ+किरच् प्रत्ययेन साधुः।) हिमः। इति मेदिनी॥ (विष्णुः। यथा, महाभारते। १३। १४९। ११०।

"शब्दातिगः शब्दसहः शिशिरः शर्व्वरीकरः।")

शिशिरः, पुं,क्ली, (शृणाति गच्छति दृच्चादिगोभावस्तस्मात्। शॄ+"व्यचिरशिशिरशिथिलेति।" उणा० १। ५४। इति किरच्प्रत्ययेन साधुः।) ऋतुविशेषः। इत्यमरः॥ स तु माघफाल्गुनमासद्वयात्मकः। तत्पर्य्यायः। कम्पनः २ शीतः ३ हिमकूटः ४ कोटनः ५। क्वचित् पुस्तके कोटनस्थाने कोड़व इति पाठः। इति राजनिर्घण्टः॥ तत्कालीनजलगुणा जलशब्दे द्रष्टव्याः॥*॥ तज्ज जातफलम्।

"मिष्टान्नभोगी मधुरप्रवादी
कलत्रपुत्रादियुतः सुधार्त्तः।
क्रोधी सुधीचारुकलेवरश्च
यस्य प्रकृतिः शिशिराभिधा॥"

इति कोष्ठीप्रदीपः॥*॥

तत्र वर्ज्यनीयानि। करीषधूमः कुन्दः पद्मनाद्यः शिशिरोत्कर्षश्च। इति कविकल्पलता॥*॥ अस्य गुणाः।

"शिशिरं शीतलं रूक्षं शीतं वातप्रकोपणम्।"

इति राजवल्लभः॥

अपि च।

"शिशिरः शीतलोऽतीवरूक्षो वातानिवर्द्धनः।"

इति भावप्रकाशः॥

शिशिरः, त्रि, (शॄण् क्षुतगतौ+किरच्प्रत्ययेन साधुः।) शीतगुणयुक्तः। यथाह अमरः।

"शीतं गुणे तद्वदर्थाः सुधीमः शिशिरो जड़ः।
तुषारः शीतलः शीतो हिमः सप्तान्यलिङ्गकाः॥"

(यथा, रघुः। १४। ३।

"आनन्दजः शोकजमस्रु वाष्प-
स्त्रयोरशीतं शिशिरो विभेद॥")

शिशुः, पुं, (शृणातीति। शॄ+"शॄ किन् सन्वच्च।" उणा० १। २१। इति उः।) बालकः। तत्पर्य्यायः। पोतः २ पाकः ३ अर्भकः ४ डिम्भः ५ पृथुकः ६ शावकः ७। इत्यमरः॥ शावः ८ अर्भः ९ शिशुकः १० पोतकः ११ भिष्टकः १२। इति शब्दरत्नावली॥ गर्भः १३। इति जटाधरः॥ तस्य लक्षणादि यथा। वृद्धशातातपः।

"शिशोरभ्युचितं प्रोक्तं बालस्याचमनं स्नुतम्।
रजस्वलादि संस्पृश्य स्नातव्यन्तु कुमारकैः॥
प्राक् चूड़ाकरणाद्बालः प्रागन्नप्राशनाच्छिशुः।
कुमारस्तु स विज्ञेयो यावन्मौञ्जी न बन्धनम्॥"

इति गोपालन्यायपञ्चाननधृतस्मृतिनिर्णयः॥

अपि च।

"चतुर्थाद्दन्तराद्ऊर्द्धं यावद्दन्ता समा वयः।
शिशोस्तं प्रकुर्व्वन्ति गुरुसम्बन्धिबान्धवाः॥"

इति ब्रह्मपुराणवचनम्॥

"जातमात्रः शिशुस्तावत् यावद्दन्ता समा वयः।
स हि गर्भसमो ज्ञेयो व्यक्तिमात्रप्रदर्शकः॥
भक्ष्याभक्ष्ये तथा पेये वाच्यावाच्ये तथाकृते।
तस्मिन् काले न दोषः स्यात् स यावन्नोपनीयते॥"

इति मनुवचनम्॥*॥

तस्याध्यापनक्रमो यथा,—

"प्राङ्मुखो गुरुरासीनो वरुणाभिमुखं शिशुम्।
अध्यापयेच्च प्रथमं दिवाप्रीतिः प्रपूजितम्॥"

इति मज्जमासतत्त्वे दृढस्मृतिवचनम्॥*॥

शिशुपुत्रं त्यक्त्वा प्रव्रज्याश्रमनिषेधो यथा,—

"मातरं पितरं वृद्धं भार्य्यां बालं पतिव्रताम्।
शिशुञ्च तनयं हित्वा नावधूताश्रमं व्रजेत्॥"

इति महानिर्व्वाणतन्त्रम्॥

अन्यद्बालशब्दे द्रष्टव्यम्॥*॥ (कुमारः। कार्त्तिकेयः। यथा, महाभारते। ३। २३१। ४।

"शिशुः शीघ्रः शुचिश्चण्डो दीप्तवर्णः शुभाननः॥")

शिशुकः, पुं, (शिशोरिव प्रतिकृतिः। शिशु+स्वार्थे कन्।) जलजन्तुविशेषः। शुशुक् इति भाषा। तत्पर्य्यायः। उलूपी २। इत्यमरः॥ दे उपल इति ख्याते चतिचञ्चले मत्स्ये। शिशुमाराकृतिर्मत्स्यभेदः उलूपी। इति कलिङ्गादयः। शोशु इति ख्यातो मत्स्यविशेषः उलूपी-त्यन्ये। भाँगाल इति ख्याते इत्येके। शिशुमार एव उच्यते इति चर्व्वणम्। तथा च रत्नकोषादौ 'चुलुपी शिशुमारः स्याद्लूपी शिशुकस्तथा।' ऊर्द्धं लुम्पति भाम्पति उलूपी लुप्लृ श्लृ प्लृ औ छेदे उत्पूर्व्वः अन्यादित्वाच्छिन् मनीषादित्वात् तलोपः लोर्दीर्घश्च ह्रिह्रस्वोकारोऽपि। 'शिशुकस्तुलुपी बालः प्रोष्ठी तु सफरी हयोः।' इति वाचस्पतिः। चुलुपीति चवर्गादिपाठ इति केचित्। शिशुरिव शिशुकः।

'शिशुकः शिशुमारेऽपि बालकोलुपिनोरपि॥"

इति भरतः॥ अपि च।

"उलूपी स्याद्लूपीव चुलुम्पी चुलकी तथा।
शिशुकश्चेति पर्य्यायः शिशुमाराकृतौ भवे।
केचिदुत्तलमत्स्ये तु पर्य्यायोऽयं निगद्यते॥"

इति शब्दरत्नावली॥

"शिशुकः शिशुमारश्च स च ग्राहो वराहकः॥"

इति राजनिर्घण्टः॥*

शिशुमारः। (यथा, महाभारते।१२।२६।२७

"कूर्म्मान् कर्कटकान् नक्रान् मकरान् शिशुकानपि॥")

बालकः। इति मेदिनी॥ (यथा, कथासरित्सागरे। २१। ३६।

"शिशुकद्वयसंयुक्ता ब्राह्मणी काचि दुर्गता।
द्वारि स्थिता महाराज देवदर्शनकाङ्क्षिणी॥")

वृक्षविशेषः। इति हेमचन्द्रः॥

शिशुगन्धा, स्त्री, (शिशोर्गन्धो यत्र।) मल्लिकाविशेषः। यथा,—

"लक्ष्मीपतिर्लवङ्गे स्यात् नीमाली नवमालिका।
शिशुगन्धा मधुमल्ली तथा करुणमल्लिश्च॥"

इति शब्दमाला॥

शिशुचान्द्रायणं, क्ली, (शिशुरिव चान्द्रायणम्। स्वल्पचान्द्रायणमित्यर्थः।) व्रतविशेषः। यथा,

"चतुरः प्रातरश्नीयात् पिण्डान् विप्रः समाहितः।
चतुरोऽस्तमिते सूर्य्ये शिशुचान्द्रायणं स्मृतम्॥"

इति मनुः॥

शिशुता, स्त्री, (शिशोर्भावः। शिशु+तल्।) शिशुत्वम्। शिशोरवस्था। इति जटाधरः॥

शिशुत्वं, क्ली, (शिशोर्भावः। शिशु+त्व।) शैशवम्। इत्यमरः॥ तत्पर्य्यायः बाल्यशब्दे द्रष्टव्यः॥

शिशुपालः, पुं, चेदिदेशीयराजः। स तु कृष्णेन हतः। शिशुपालवधकाव्यं माघेन कृतम्॥ तत्पर्य्यायः। दमघोषसुतः २ चैद्यः ३ चेदिराड् ४। इति जटाधरः॥ शिशुपालकः ५। इति त्रिकाण्डशेषः॥ (यथा, भागवते। ७। १०। ३८।

"तावित्थं पुनर्जातौ शिशुपालकरूषकौ।
हरौ वैरानुबन्धेन पश्यन्तौ समीयतुः॥")

शिशुपालकः, पुं, (शिशुपाल+स्वार्थे कन्।) दमघोषसुतः। इति त्रिकाण्डशेषः॥ केशिकदम्बवृक्षः। इति शब्दचन्द्रिका॥ (शिशु

पालयतीति । पालि+ण्वुल् ।) बालकपालके, त्रि ॥

शिशुपालहा, [न्] पुं, (शिशुपालं हतवानिति । हन्+क्विप् ।) श्रीकृष्णः । इति हेमचन्द्रः ॥

शिशुभावः, पुं, (शिशोर्भावः ।) शिशुत्वम् । तान्त्रिकभावविशेषः । यथा,—

"उन्मादवत् यत् किञ्चित् क्रियते सर्व्वदा प्रिये ।
शिशुभाव इति ख्यातः सर्व्वतन्त्रेषु गोपितः ॥"

इति तन्त्रम् ॥

शिशुमारः, पुं, (शिशून् मारयतीति । मृ+णिच्+अण् ।) जलजन्तुभेदः । शोँष इति शुशुक् इति च ख्यातः । इत्यमरभरतौ ॥ (यथा, वाजसनेयसंहितायाम् । २४ । ३० ।

"नीलङ्गुः क्रिमिः समुद्राय शिशुमारो हिमवते हस्ती ॥" * ॥) अस्य पर्य्यायः शिशुकशब्दे द्रष्टव्यः । अस्य मांसस्य गुणाश्च पादिशब्दे द्रष्टव्याः ॥ तारात्मकाच्युतः । इति मेदिनी ॥ तद्विवरणं यथा,—

"शिशुमारस्तु यः प्रोक्तः स ध्रुवो यत्र तिष्ठति ।
सन्निवेशञ्च तस्यापि शृणुष्व मुनिसत्तम ॥
यदह्ना कुरुते पापं दृष्ट्वा तन्निशि मुच्यते ।
यावत्यश्चैव तारास्ताः शिशुमाराश्रिता दिवि ॥
तावन्त्येव तु वर्षाणि जीवत्यभ्यधिकानि तु ।
उत्तानपादस्तस्याथ विज्ञेयोऽप्युत्तरो हनुः ।
यज्ञोऽधरश्च विज्ञेयो धर्म्मो मूर्द्धानमाश्रितः ।
हृदि नारायणश्चास्ते अश्विनौ पूर्व्वपादयोः ॥
वरुणश्चार्य्यमा चैव पश्चिमे तस्य सक्थिनी ।
शिश्नं संवत्सरस्तस्य मित्रोऽपानं समाश्रितः ॥
पुच्छेऽग्निश्च महेन्द्रश्च कश्यपोऽथ ततो ध्रुवः ।
तारका शिशुमारस्य नास्तमेति चतुष्टयम् ॥
इत्येष सन्निवेशोऽयं पृथिव्या ज्योतिषां तथा ।
द्वीपानामुदधीनाञ्च पर्व्वतानाञ्च कीर्त्तितः ॥
वर्षाणाञ्च नदीनाञ्च ये च तेषु वसन्ति वै ।
तेषां स्वरूपमाख्यातं संक्षेपः श्रूयतां पुनः ॥
यदम्बु वैष्णवः कायस्ततो विप्र वसुन्धरा ।
पद्माकारा समुद्भूता पर्व्वताब्ध्यादिसंयुता ॥
ज्योतींषि विष्णुर्भुवनानि विष्णु-
र्वनानि विष्णुर्गिरयो दिशश्च ।
नद्यः समुद्राश्च स एव सर्व्वं
यदस्ति यन्नास्ति च विप्रवर्य्य ॥
ज्ञानस्वरूपो भगवान् यतोऽसा-
वशेषमूर्त्तिर्न तु वस्तुभूतः ।
ततो हि शैलाब्धिधरादिभेदान्
जानीहि विज्ञानविजृम्भितानि ॥
यदा हि शुद्धं निजरूपसर्व्वं
कर्म्मक्षये ज्ञानमपास्तदोषम् ।
तदा हि सङ्कल्पतरोः फलानि
भवन्ति नो वस्तुषु वस्तुभेदाः ॥
महीघटत्वं घटतः कपालिका
कपालिका चूर्णरजस्ततोऽणुः ।
जनैः स्वकर्म्मस्तिमितात्मनिश्चयै-
रालक्ष्यते ब्रूहि किमत्र वस्तु ॥"

इति विष्णुपुराणे २ अंशे १२ अध्यायः ॥ * ॥

अपि च । "केचिदेतज्ज्योतिरनीकं शिशुमारसंस्थानेन भगवतो वासुदेवस्य योगधारणायामनुवर्णयन्ति । यस्य पुच्छाग्रेऽवाक्शिरसः कुण्डलीभूतदेहस्य ध्रुव उपकल्पितः । तस्य लाङ्गूले प्रजापतिः अग्निरिन्द्रो धर्म्म इति पुच्छमूले धाता विधाता च कट्यां सप्तर्षयः ॥ तस्य दक्षिणावर्त्तकुण्डलीभूतशरीरस्य यान्युदगयनानि दक्षिणपार्श्वे नक्षत्राणि उपकल्पयन्ति । दक्षिणायनानि तु सव्ये यथा शिशुमारस्य कुण्डलाभोगसन्निवेशस्य पार्श्वयोरुभयोरप्यवयवाः समसंख्या भवन्ति । पृष्ठे त्वजवीथी आकाशगङ्गा चोदरतः । पुनर्व्वसुपुष्यौ दक्षिणवामयोः श्रोण्योरार्द्राश्लेषा च दक्षिणवामयोः पादयोरभिजिदुत्तराषाढ़े दक्षिणवामयोर्नासिकयोर्यथासंख्यं श्रवणपूर्व्वाषाढ़े दक्षिणवामयोर्लोचनयोर्धनिष्ठामूलञ्च दक्षिणवामयोः कर्णयोर्मघादीन्यष्टनक्षत्राणि दक्षिणायनानि वामपार्श्ववङ्क्रिषु युञ्जीत । वङ्क्रिषु अस्थिषु । तथैव मृगशीर्षादीन्युदगयनानि दक्षिणपार्श्वेषु प्रातिलोम्येन युञ्जीत । शतभिषा ज्येष्ठे स्कन्धयोर्दक्षिणवामयोर्न्यसेत् । उत्तराहनावगस्त्यः अधराहनौ यमः मुखे चाङ्गारकः शनैश्चर उपस्थे बृहस्पतिः ककुदि वक्षस्यादित्यो हृदये नारायणो मनसि चन्द्रो नाभ्यामुशनास्तनयोरश्विनौ बुधः प्राणापानयो राहुर्गले केतवः सर्व्वाङ्गेषु रोमसु सर्व्वे तारागणाः । एतदुहैव भगवतो विष्णोः सर्व्वदेवतामयं रूपमहरहः सन्ध्यायां प्रयतो वाग्यतो निरीक्षमाण उपतिष्ठेत नमो नमो ज्योतिर्लोकाय कालायनायानिमिषां पतये महापुरुषायाभिधीमहीति ।

ग्रहर्क्षतारामयमाधिदैविकं
पापापहं मन्त्रकृतां त्रिकालम् ।
नमस्यतः स्मरतो वा त्रिकालं
नश्येत तत्कालजमाशु पापम् ॥"

इति श्रीभागवते ५ स्कन्धे शिशुमारसंस्थानम् २३ अध्यायः ॥

शिशुवाहकः, पुं, (शिशुं वहतीति । वह+ण्वुल् ।) वनच्छागः । इति हेमचन्द्रः ॥ बालकवोढ़रि, त्रि ॥

शिशुवाह्यकः, पुं, (शिशुर्वाह्यो यस्य । ततः कन् ।) वनच्छागः । इति त्रिकाण्डशेषः ॥

शिश्नः, पुं, (श्रथतीति । श्रथ+बाहुलकात् नक्प्रत्ययेन साधु ।) मेढ़्रः । इत्यमरः ॥ (यथा, भागवते । २ । ६ । ८ ।
"वृषः शिश्न उपस्थस्तु प्रजात्यानन्दनिर्वृतेः ॥") अस्य पर्य्यायः लिङ्गशब्दे द्रष्टव्यः ॥

शिश्विदानः, त्रि, ([illegible] । श्विन्+आन, + "[illegible] ।" उणा० २ । ८६ । इति साधुः । [illegible] इकारः ।) पापकर्म्मा । तत्पर्य्यायः । कृष्णकर्म्मा २ । इत्यमरः ॥ [illegible] मायाचारे । [illegible] शिश्विदानो [illegible] पादः । इत्तायः । कृष्णं पापाचारत्वात् मलिनं कर्म्मास्य कृष्णकर्म्मा । केचित्तु अकृष्णकर्म्मा इति पठन्ति । शि निष्पापे । श्विदि शौक्ल्ये इत्यस्य कानि शिश्विदानः । अकृष्णं निष्पापत्वात् शुक्लं कर्म्मास्य अकृष्णकर्म्मा शुक्लकर्म्मा इत्यर्थः । इति व्याचष्टे च । इति भरतः ॥ * ॥

"शिश्विदानः कृष्णकर्म्मा शुक्लकर्म्मेति कस्यचित् ॥"

इति जटाधरः ॥

(यथा, प्रद्युम्नविजये । ७ अङ्के ।
"खाड्गिक ! छिद्यतां छिद्यतां एष क्षुद्रः शिश्विदानः ॥")

शिष, वधे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) शेषति । इति दुर्गादासः ॥

शिष, ऌ ध औ विशेषे । इति कविकल्पद्रुमः ॥ (रुधा०-पर०-सक०-अनिट् ।) विशेष उपरञ्जनम् । ऌ, अशिषत् । ध, विशिनष्टि सारं सूक्ष्मज्ञो यः । इति हलायुधः । मूर्त्तिविशिष्टं करोति इत्यर्थः । औ, शेष्टा । इति दुर्गादासः ॥

शिष, कि असर्व्वोपयोगे । इति कविकल्पद्रुमः ॥ (चुरा०-पक्षे-भ्वा०-सक०-सेट् ।) असर्व्वोपयोगः परिशेषीकरणम् । कि, शेषयति शेषति यशोराशिं लोकः अवशिष्टं करोति इत्यर्थः । वेदतिशायने शिष किरनुवर्त्तते । कि, विशेषयति विशेषति सम्पदा भूपं विधिः । इति दुर्गादासः ॥

शिष्टः, त्रि, (शास+क्तः । "शास इदङ्हलोः ।" ६ । ४ । ३४ । इति उपधाया इकारः । "शासिवसिघसीनाञ्च ।" ८ । ३ । ६० इति सस्य षः ।) शान्तः । सुबुद्धिः । धीरः । तस्य लक्षणं यथा,—

"न पाणिपादचपलो न नेत्रचपलो मुनिः ।
न च वागङ्गचपल इति शिष्टस्य लक्षणम् ॥"

इति महाभारते अश्वमेधपर्व्व ॥

अपि च ।

"धर्म्मो नाभिगतो यैस्तु वेदः सपरिबृंहणः ।
ते शिष्टा ब्राह्मणाः प्रोक्ता नित्यमात्मगुणान्विताः ॥"

इति कौर्म्मे उपविभागे २८ अध्यायः ॥ * ॥

अन्यच्च ।

"विधेयमन्दनिष्ठस्तु शेषः शिष्टः प्रचक्षते ।
मन्वन्तरेषु ये शिष्टा इह तिष्ठन्ति धार्म्मिकाः ॥
मनुः सप्तर्षयश्चैव लोकसन्तानकारणात् ।
तिष्ठन्तीह च धर्म्मार्थं तान् शिष्टान् परिचक्षते ।
तैः शिष्टैः पालितो धर्म्मः स्थाप्यते वै युगे युगे ॥"

इति मार्कण्डे १० अध्यायः ॥

(अवशिष्टः । यथा, गीतायाम् । ४ । ३१ ।
"यज्ञशिष्टामृतभुजो यान्ति ब्रह्म सनातनम् ॥")

शिष्टाचारः, पुं, (शिष्ट आचारः । शिष्टानामाचारो वा ।) साध्वाचारः । यथा,—
"[illegible] वर्णाश्रमविभागतः ।
एवं वै द्विविधो धर्म्मः शिष्टाचारः स उच्यते ॥

शिष्यः

त्रयी वार्त्ता दण्डनीतिः प्रजा वर्णाश्रमेज्यया ।
शिष्टैराचर्यते यस्मात् शिष्टाचारः स शाश्वतः ॥
दानं सत्यं तपोऽलोभो विद्येज्या भूतनं दमः ।
अष्टौ तानि चरित्राणि शिष्टाचारस्य लक्षणम् ॥

शिष्टा यस्माच्चरन्त्येनं मनुः सम्पर्यये च ये ।
मन्वन्तरेषु सर्व्वेषु शिष्टाचारस्ततः स्मृतः ॥
श्रुतिस्मृतिभ्यां विहितो धर्म्मो वर्णाश्रमात्मकः ।
शिष्टाचारविरुद्धस्तु धर्म्मः स साधुभिर्मतः ॥"

इति मात्स्ये १२० अध्यायः ॥

शिष्टिः, स्त्री, (शास + क्तिन् । "शास इदङ्हलोः ।" ६ । ४ । ३४ । इति उपधाया इः ।) आज्ञा । शासनम् । इत्यमरः ॥ (यथा, मनुः । ४।१६४।
"अन्यत्र पुत्रात् शिष्याद्वा शिष्यार्थं ताड़येत्तु तौ ॥")

शिष्यः, त्रि, (शिष्यतेऽसाविति । शास + "एतिस्तु-शास्वृदृजुषः क्यप् ।" ३ । १ । १०६ । इति क्यप् । "शास इदङ्हलोः ।" ६।४।३४। इति इः । "शासिवसीति ।" ८।३।६०। इति षः ।) उपदेश्यः । तत्पर्य्यायः । छात्रः २ अन्तेवासी ३ । इत्यमरः ॥ अन्तेसत् ४ । अन्तेषदः ५ । यथा,—
"छात्रान्तेवासिशिष्यान्तेषद एकार्थता इमे ॥"

इति जटाधरः ॥

तस्य लक्षणं यथा,—
"वाङ्मनः कायवस्तुभिर्गुरुशुश्रूषणे रतः ।
एतादृशगुणोपेतः शिष्यो भवति नारद ॥
देवताचार्य्यशुश्रूषां मनोवाक्कायकर्म्मभिः ।
शुद्धभावो महोत्साही वोढा शिष्य इति स्मृतः ॥"

इति दीक्षातत्त्वम् ॥

अपि च ।
"शान्तो विनीतः शुद्धात्मा श्रद्धावान् धारणक्षमः ।
समर्थश्च कुलीनश्च प्राज्ञः सच्चरितो नयी ।
एवमादिगुणैर्युक्तः शिष्यो भवति नान्यथा ॥"

निषिद्धशिष्यलक्षणमाह ।
"पापिने क्रूरचेष्टाय शठाय छलाय च ।
दीनायाचारशून्याय मन्त्रद्वेषपराय च ॥
निन्दकाय च मूर्खाय तीर्थद्वेषपराय च ।
भक्तिहीनाय देवेशि न देया मलिनाय च ॥
गुरुता शिष्यता वापि तयोर्व्वत्सरवासतः ॥"

तथा चोक्तं सारसंग्रहे ।
"सद्गुरुः स्वाश्रितं शिष्यं वर्षमेकं परीक्षयेत् ।
वर्षैकेन भवेद्योग्यो विप्रो गुणसमन्वितः ॥
वर्षद्वयेन राजन्यो वैश्यस्तु वत्सरैस्त्रिभिः ।
चतुर्भिर्वत्सरैः शूद्रः कथितो शिष्ययोग्यता ॥"

इति तन्त्रसारः ॥ * ॥

अन्यच्च ।
"आचारे शास्त्रदृष्टस्तु स आचार्य्य उदाहृतः ।
यस्याचार्य्यपराधीनस्तद्भावं शास्त्रते हृदि ।
शासने स्थिरवृत्तिश्च शिष्यः सद्भिरुदाहृतः ॥
एवं लक्षणसंयुक्तं शिष्यं सर्व्वगुणान्वितम् ।
अध्यापयेद्विधानेन मन्त्ररत्नमनुत्तमम् ॥"

इति प्राणोत्तरखण्डे २५ अध्यायः ॥ * ॥

पुत्रशिष्ययोस्तुल्यत्वं यथा,—
"यथा पुत्रस्तथा शिष्यो न भेदः पुत्रशिष्ययोः ।
तर्पणे पिण्डदाने च पालने परिपोषणे ॥
यथात्मिदाता पुत्रश्च तथा शिष्यश्च निश्चितम् ।
इतीदं काण्वशाखायामुवाच कमलोद्भवः ॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ६१ अध्यायः ॥

पुत्रशिष्याभ्यां विशेषो यथा,—
सनत्कुमार उवाच ।
"पुत्रे एवास्ति देवेश यतः शिष्योऽस्त्रियं विभो ।
न विशेषोऽस्ति पुत्रस्य शिष्यस्य च पितामह ॥
ब्रह्मोवाच ।
विशेषः शिष्यपुत्राभ्यां विद्यते धर्म्मनन्दन ।
धर्म्मकर्म्मसमायोगे तथापि गदतः शृणु ॥
पुन्नाम्नो नरकात्त्राति पुत्रस्तेनेह गीयते ।
शेषपापहरः शिष्य इतीयं वैदिकी श्रुतिः ॥
सनत्कुमार उवाच ।
कोऽयं पुन्नामको देव नरकात्त्राति पुत्रकः ।
कस्माच्छिष्यं ततः पापं हरेच्छिष्यश्च तद्वद ॥"

इति वामने ५७ अध्यायः ॥

ब्रह्मोवाच ।
"अतः परं प्रवक्ष्यामि शेषपापस्य लक्षणम् ।
ऋषयो देवर्षिभूतानां मनुष्याणां विशेषतः ॥
पितॄणाञ्च द्विजश्रेष्ठ सर्व्ववर्णेषु चैकतः ।
ॐकारादिनिरुक्तिश्च पापकार्य्यकृतिश्च या ॥
हत्यादिकं महापापं त्वगम्यागमनं तथा ।
घृतादिविक्रयं घोरं चण्डालादिप्रतिग्रहम् ॥
स्वदोषगोपनं पापं परदोषप्रकाशनम् ।
ईर्ष्याविद्वं वाक्यदुष्टं निष्ठुरत्वं परुषरम् ॥
ढाकित्वं तालवादित्वं नाना वाद्याद्यधर्म्मजम् ।
मारणत्वमधार्म्मिकं नरकावहमुच्यते ॥
एतैः पापैश्च संयुक्तः प्राप्यते यदि शूद्रकम् ।
ज्ञानाधिकमशेषेण शेषात् पापात् जयेत्ततः ॥
शारीरं वाचिकं यत्तु मानसं विविधं तथा ।
पित्तमालक्षतं यच्च क्षतं यच्चाग्निवेदनैः ॥
ज्ञातिभिर्ब्बान्धवैर्व्वापि तस्मिन् जन्मनि धर्म्मज ।
तत्सर्व्वं विलयं याति कर्म्मणा सुतशिष्ययोः ॥
तस्मात् पुत्रश्च शिष्यश्च विधातव्यौ विपश्चिता ।
श्रुतमर्थमभिध्याय शिष्यात् श्रेष्ठतरः सुतः ॥
शेषात्तारयते शिष्यः सर्व्वस्वेव हि पुत्रकः ॥"

इति वामने ५८ अध्यायः ॥

शिल्कः, पुं, शिल्कः । इति शब्दचन्द्रिका ॥

शिल्कः, पुं, (शिल्क एव । स्वार्थे कन् ।) गन्धद्रव्यविशेषः । शिलारसः । शिल्का इति लोकात् इति च भाषा । तत्पर्य्यायः । कपिनामा २ कपिः ३ तैलम् ४ कृत्रिमम् ५ कपिलः ६ चला ७ तुरुष्कः ८ सुक्तिसुक्तः ९ पिण्डतः १० वरः ११ । इति रत्नमाला ॥ पिल्कः १२ सिल्कः १३ यावनः १४ । इत्यमरः ॥ अस्यानुलेपनगुणाः ।
"शिल्कः परमा मांसी देवदारु सुरा नखम् ।
सर्व्वेभ्यो परमा लक्ष्मी रक्षोघ्ना व्रणनाशनाः ॥"

शिल्कः

शीघ्रं

रौक्ष्यघ्ना इति वा पाठः । इति राजवल्लभः ॥
अन्यत् तुरुष्कशब्दे द्रष्टव्यम् ॥

शी, ङ ल ञि स्वप्ने । इति कविकल्पद्रुमः ॥ (अदा०-आत्म०-अक०-सेट् ।) ङ ल, शेते । ञि, शयितोऽस्ति । मखपे शूयामीति गणकृतानित्यत्वात् परस्मैपदे शूपोऽलुग्भावे चेति रमानाथः । वस्तुतस्तु शेते शयः पश्चात् शय इवाचरतीति क्यौ साध्यम् । इति दुर्गादासः ॥

शीः, स्त्री, (शी + क्विप् ।) शान्तिः । शयनम् । इति शब्दरत्नावली ॥

शीक, ऋ ङ सेके । सर्पे । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-सेट् ।) ऋ, अशिशीकत् । ङ, शीकते । इति दुर्गादासः ॥

शीक, कि आमर्षे । सेके । इति कविकल्पद्रुमः ॥ (चुरा०-पक्षे भ्वा०-सक०-सेट् ।) कि, शीकयति शीकति । आमर्षः सर्षः । तथा च ।
"चन्द्रावतीतरङ्गाद्यां शीकयन्ति च यद्वपुः ।"

इति हलायुधः ॥

वायवः सृप्यन्ति इत्यर्थः । भट्टमल्लस्तु आमर्षण इति सूत्रेऽन्यमर्थं पठित्वा क्षमार्थमाह । इति दुर्गादासः ॥

शीकरः, क्लो, (शीक्यतेऽनेनेति । शीक + बाहुलकात् अरः ।) शरजलम् । इति मेदिनी ॥

शीकरः, पुं, (शीक्यतेऽनेनेति । शीक + बाहुलकात् अरः । इत्युज्ज्वलदत्तः । ३।१३१।) वातादिप्रेरितजलकणः । इत्यमरः ॥ (यथा, कुमारे । १।१५ ।
"भागीरथीनिर्झरशीकराणां
वोढ़ा मुहुः कम्पितदेवदारुः ॥")

वायुः । इति मेदिनी ॥

शीघ्रं, क्लो, (शिङ्क्ते याप्नोतीति । शिघ याप्नौ + रक्प्रत्ययेन साधु ।) विलम्बाभावः । तत्पर्य्यायः । त्वरितम् २ लघु ३ क्षिप्रम् ४ अरम् ५ द्रुतम् ६ सत्वरम् ७ चपलम् ८ तूर्णम् ९ अविलम्बितम् १० आशु ११ । अथथाः शीघ्रवाचकाः यथा । झाक् १२ झटिति १३ अञ्जसा १४ अञ्जाय १५ सपदि १६ द्राक् १७ मंक्षु १८ । इत्यमरः ॥ तद्वैदिकपर्य्यायः । तु १ मन्तु २ वत्रत ३ ओषम् ४ वीरः ५ जूर्णिः ६ ऊर्णः ७ शूघनाशुः ८ शीभम् ९ लघु १० तूयम् ११ तूर्णिः १२ अजिरम् १३ सरण्युः १४ शु १५ आशुः १६ प्राशुः १७ तूतुजिः १८ तूतुजानः १९ तुथ्यमानासः २० अचाः २१ साधिवित् २२ द्युगत् २३ ताणत् २४ तरणिः २५ वातरंहा २६ । इति षड्विंशतिः क्षिप्रनामानि इति वेदनिघण्टौ । २ । १५ ॥ सामञ्जकम् । इति हेमनिघण्टुः ॥ (पुं, कुशध्वंशीयाग्निवर्णस्य पुत्रः । यथा, भागवते । ६ । १२ । ५ ।
"सुदर्शनोऽथाग्निवर्णः शीघ्रस्तस्य मरुः सुतः ॥")

शीघ्रविशिष्टे, त्रि । इत्यमरः ॥ (यथा, महाभारते । ३ । ६७ । ६ ।
"स त्वमातिष्ठ योगं तं येन शीघ्रा इयां गमम् ।
भवेयुरश्वाश्चत्वारोऽपि वेतनं ते शतं शताः ॥")

इति राजनिर्घण्टः ॥ शैत्यम् । इति शब्दरत्नावली ॥ वीरणमूलम् । इति शब्दचन्द्रिका ॥

शीतलः, पुं, अग्निमन्थवृक्षः । इत्यमरः ॥ अर्हद्विशेषः । स तु चतुर्विंशतितीर्थङ्करमध्ये दशमतीर्थङ्करः । इति हेमचन्द्रः ॥ व्रतविशेषः । स तु मेषसंक्रान्त्यां कर्त्तव्यः । चन्द्रः । इति शब्दचन्द्रिका ॥ चम्पकः । कर्पूरभेदः । रालः । इति राजनिर्घण्टः ॥

शीतलः, त्रि, (शीतोऽस्यास्तीति । शीत + "तिभाद्यस्यत्वर्थेभ्यः ।" ५ । २ । ९७ । इति मत्वर्थे लच् ।) शीतगुणविशिष्टः । तत्पर्य्यायः । सुषीमः २ शिशिरः ३ जडः ४ तुषारः ५ शीतः ६ हिमः ७ । इत्यमरः ॥

शीतलकं, क्ली, सितोत्पलम् । इति राजनिर्घण्टः ॥

शीतलकः, पुं, मरुवकः । इति राजनिर्घण्टः ॥

शीतलच्छदः, पुं, (शीतलश्छदो यस्य ।) चम्पकः । इति राजनिर्घण्टः ॥ शीतलपत्रश्च ॥

शीतलजलं, क्ली, (शीतलं जलं यस्य ।) उत्पलम् । इति राजनिर्घण्टः ॥ हिमवारि च ॥

शीतलता, स्त्री, (शीतलस्य भावः । तल् ।) शीतलत्वम् । शीतलस्य भाव इत्यर्थे तत्त्वादिषु तात्त्विमिति संज्ञिप्रसारणेन तात्प्रत्ययनिष्पन्ना ॥

शीतलत्वं, क्ली, (शीतलस्य भावः । त्व ।) जडता । इति राजनिर्घण्टः ॥ शीतलता च ॥

शीतलप्रदः, पुं, (शीतलं प्रददाति । प्र + दा + कः ।) चन्दनम् । इति केचित् ॥ हिमप्रदारि, त्रि ॥

शीतलवातकः, पुं, (शीतलो वातो यस्य । कन् ।) अग्निमन्थः । इति शब्दरत्नावली ॥ शीतलवायुयुक्ते, त्रि ॥

शीतला, स्त्री, (शीतल + स्त्रियां टाप् ।) शीतलोवृक्षः । यथा,—

"शीतला शीतली शीतकुम्भी माधवपुष्पिका ।"

इति शब्दचन्द्रिका ॥

देवीविशेषः । सा च वसन्तविस्फोटकादेरधिष्ठात्री देवता । यथा,—

स्कन्द उवाच ।

"भगवन् देवदेवेश शीतलायाः कथं शुभम् ।
मसूरदर्शनञ्चैव विस्फोटकभयापहम् ॥

ईश्वर उवाच ।

शृणुष्व शीतलां देवीं राजभ्यां हितकारिणीम् ।
मार्जनीकलशोपेतां गर्दभारूढसंयुताम् ॥"

इति स्कन्दपुराणम् ॥

अस्या विवरणं मदरिकाशब्दे द्रष्टव्यम् ॥ क्षुद्रविलो । खारशाकशीतला । वास्तुका । इति राजनिर्घण्टः ॥

शीतलाष्टमी, स्त्री, (शीतला चासौ अष्टमी ।) माघशुक्लाष्टमी । यथा,—

"शून्या दारुणे माघि पूर्व्वाषाढविदूषणे ।
सुते चापे मघा पक्षौ शीतलाष्टमिकौ ।
वैशाखे चान्त्यभे पक्षे कार्त्तिके चाग्निभे तथा ।
आषाढे चार्द्रभे पक्षे माघे पुष्ये तथा ।
माघे पक्षौ विशाखा पूर्व्वाषाढासु च ।
गायाख्या कार्त्तिके मासि मार्गे मूलकरूपिणी ।
पौषे माघे त्वनूरूपा च शीतला तपसि स्मृता ।
गोरूपिणी फाल्गुने च चैत्रेऽशोका प्रकीर्त्तिता ॥"

इति स्कन्दपुराणम् ॥

शीतली, स्त्री, जलजतृणविशेषः । शिउली इति भाषा । तत्पर्य्यायः । शीतकुम्भी २ शुक्लपुष्पा ३ जलोद्भवा ४ बालानुसारिका ५ । इति रत्नमाला ॥

शीतवल्कः, पुं, (शीतलो वल्को यस्य ।) उदुम्बरः । इति राजनिर्घण्टः ॥ शीतलवल्कले, त्रि ॥

शीतवीर्य्यकः, पुं, (शीतं वीर्य्यं यस्य । कन् ।) मरुवकः । इति राजनिर्घण्टः ॥ शीतलवीर्य्ययुक्ते, त्रि ॥

शीतशिवं, क्ली, (शीते शीतकाले शिवं मङ्गलप्रदम् ।) सैन्धवलवणम् । शैलेयनामगन्धद्रव्यम् । इत्यमरः ॥

शीतशिवः, पुं, (शीते शीतकाले शिवः शुभप्रदः ।) मधुरिका । इत्यमरः ॥ इक्षुफलवृक्षः । इति मेदिनी ॥

शीतशिवा, स्त्री, (शीते शिवा मङ्गलप्रदा ।) सिन्ध्रेया । इति राजनिर्घण्टः ॥ भूमीवृक्षः । इति रत्नमाला ॥

शीतशूकः, पुं (शीते शूको यस्य ।) यवः । इति केचित् ॥ शीतलशूकयुक्ते, त्रि ॥

शीतसहः, पुं, (शीतं सहते इति । सह + अच् ।) शीतवृक्षः । इति घटाधरः ॥ शीतसहनीये, त्रि ॥

शीतसहा, स्त्री, (शीतसह + टाप् ।) नीलसिन्दुवारः । वासन्ती । इति राजनिर्घण्टः ॥

शीता, स्त्री, रामपत्नी । इति शब्दरत्नावली ॥ जानकीप्रभृतिः । इत्यमरटीकायां भरतः ॥ यथा,—

"शीता नमःसरिदिति जानकीप्रभृतौ च
शीता दशाननरिपोः सहधर्म्मिणी च ।
शीतं स्मृतं हिममृगे च तद्वति च
शीतोऽस्रे च बहुवारतरौ च हृद्यः ॥"

इति तालव्यादौ धरणिः ॥

अतिबला । कटुम्भिनी । दूर्व्वा । शिखिकालम् । इति राजनिर्घण्टः ॥

शीतांशुः, पुं, (शीताः शीतलाः अंशवो यस्य ।) कर्पूरः । इति राजनिर्घण्टः ॥ चन्द्रः । यथा,—

"शीतांशुर्मित्रमन्नं जनयति सततं जन्मराशौ नराणाम् ।"

इति ज्योतिस्तत्त्वम् ॥

शीतांशुतैलं, क्ली, (शीतांशोः कर्पूरस्य तैलम् ।) कर्पूरतैलम् । इति राजनिर्घण्टः ॥

शीताङ्गी, स्त्री, (शीतं शीतलमङ्गमस्याः । ङीष् ।) हंसमरीवृक्षः । इति राजनिर्घण्टः ॥ शीतलाङ्गि, त्रि । (यथा, चण्डी । २ । ८ ।

"शशिप्रभेति शिखरी यातु शीताङ्गी निरम्बरा ।
कौशेयवसिरा इति वा मर्मे न च सा तथा ॥")

शीतादः, पुं, (शीतमादत्ते इति । आ + दा + कः ।) दन्तरोगविशेषः । तस्य निदानं दन्तशब्दे द्रष्टव्यम् । तदौषधं यथा,—

"शीतादे रक्तरक्ते तु नीयनागरसर्षपान् ।
निष्काथ्य त्रिफलाक्षाथैः कुर्य्यान्नस्यधारणम् ॥
कासीसलोध्रक्षणा मनःशिला सप्रियङ्गुतेजोह्वा ।
एतच्चूर्णं मधुयुक् शीतादे पूतिमांसहरम् ॥"

तेजोह्वा तेजबला ।

"तैलं घृतं वा वातघ्नं शीतादे संप्रशस्यते ।"

इति भावप्रकाशः ॥

शीताद्रिः, पुं, (शीतजनकोऽद्रिः । शीतप्रधानोऽद्रिरिति वा ।) हिमालयपर्व्वतः । इति केचित् ॥

शीतावला, स्त्री, महाबलामूलम् । इति राजनिर्घण्टः ॥

शीताशैः, त्रि, (शीतेन जलेन पोषितः ।) शीतेन पोषितः । तत्पर्य्यायः । शीताशुः २ । इति घटाधरः ॥ (यथा, शिवरात्रिव्रतकथायाम् ।

"शीताशैश्च क्षुधार्त्तैश्च कन्यान्वितकलेवरः ।
जगाम्मार तदा रात्रौ शुनी नीहारवारिणा ॥")

शीताशुः, त्रि, (शीतं न सहते इति । शीत + "शीतोष्णाभ्यां कषश्च सहते ।" ५ । २ । १२२ । इत्यस्य वार्त्तिकोक्त्या आशुच् ।) शीताशैः । इति घटाधरः ॥

शीताश्मा, [न्] पुं, (शीतः शीतलोऽश्मा ।) चन्द्रकान्तमणिः । इति राजनिर्घण्टः ॥ शीतलप्रस्तरश्च ॥

शीतीभावः, पुं, (शीत + भू + घञ् । अभूततद्भावे च्विः ।) मोक्षः । इति त्रिकाण्डशेषः ॥ शीतलत्वञ्च ॥

शीतोत्तमं, क्ली, (शीतेषु वस्तुषु मध्ये उत्तमम् । जलम् । इति शब्दचन्द्रिका ॥

शील्यं, त्रि, शीलम् । वृत्तम् । इत्यमरटीकायां रमानाथः ॥ शीलयोगश्च ॥

शील्कारः, पुं, (शील्किति शब्दस्य कारः करणम् ।) वरस्त्रीणां रतिकालध्वनिः । यथा,—

"शील्कारो रतनारीणां सुरतं वरयोषिताम् ।"

इति घटाधरः ॥

(शील्कृतिमात्रे । यथा, कथासरित्सागरे । १ । २ ।

"सन्ध्यातूर्य्यत्वये तारा: करेणोद्यत विघ्नजित् ।
शील्कारशीकरैरन्याः कलयन्निव पातु वः ॥")

शीलकृतं, क्ली, (शील्किति शब्दस्य कृतं करणम् ।) शील्कारः । इति धरणिः ॥

शीलुः, पुं, क्ली, (शेतेऽनेनेति । शी + "शीङो लुक्चलञ्चवागलः ।" उणा० ७ । ३८ । इति लुक् ।) पक्वेक्षुरसकृतमद्यम् । इत्यमरभरतौ ॥

शीलुपः, त्रि, (शीलुं पातीति । पा + कः ।) शीलुपानकर्त्ता । इति शाब्दिकाः ॥

शीलुमत्तः, पुं, (शीलौ मत्तविशेषस्य मत्तो यत्र ।) वञ्जुलवृक्षः । इति त्रिकाण्डशेषः ॥ मधुमत्तश्च ॥

शीलं, त्रि, (शेते शर्त्तौ + क्तः । "ब्रह्मभ्रूणवृत्रक्रत्वादिभ्यः ।" ६ । १ । २४ । इति सम्प्रसारणम् । "ग्रहोरुच्चौ ।" ८ । २ । ४७ । इति नः । वर्णीभूतवृत्तादि । इति भरतमल्लिकाकरणम् ॥

शीलः, पुं, (शील अतिशायने + अच्।) अजगरसर्पः। इति शब्दरत्नावली॥ चरित्रम्। इत्यमरटीकायां नयनानन्दः॥

शीलनं, क्ली, (शील + ल्युट्।) अभ्यासनम्। (यथा, महाभारते। १२। ३२१। ४३।
"पुरा कृता भयङ्करा मनुष्यदेहगोचराः।
अभिदवन्ति सर्व्वतो यतस्व पुण्यशीलने॥")
अतिशायनम्। उपधारणम्। सेवानुभावनम्। प्रवर्त्तनम्। इति शीलधातोरनट्प्रत्ययेन निष्पन्नम्॥ पाठनिश्चयः। यथा,—
"भविनी गुणानी शीलनं स्तुतम्।"
इति ब्रह्मवर्गे त्रिकाण्डशेषः॥

शीलवान्, [त्] त्रि, (शीलमस्यास्तीति। शील + मतुप्। मस्य वः।) शीलविशिष्टः। सत्स्वभावः। यथा,—
"पथ्याशिनां शीलवतां नराणां
सदृत्तभाजां विजितेन्द्रियाणाम्।
एवंविधानामिदमाशुरत्र
चिन्त्यं सदा वृत्तसुनिप्रवादः॥"
इति मलमासतत्त्वम्॥
सदृत्तः। इति शीलशब्दार्थदर्शनात्॥

शीला, स्त्री, (शीलमस्या अस्तीति। शील + अच्। टाप्।) कौडिन्यमुनिपत्नी। यथा,—
"मध्याह्ने भोज्यवेलायां यमुनीयं सरित्तटे।
ददर्श शीला-सा स्त्रीणां सन्दृष्टं रक्तवाससाम्॥"
इति तिथ्यादितत्त्वम्॥

शीलितं, क्ली, (शील + क्तः।) चीर्णम्। इति त्रिकाण्डशेषः॥ अभ्यस्ते, त्रि॥

शीवलं, क्ली, (शी + वाहुलकात् वलः गुणाभावश्च।) शैवेयम्। शैवालम्। इति मेदिनी॥

शीवा, [न्] पुं, (शेते इति। शी + "शीङ्शुभिभ्यां वन्।" उणा० ४। ११३। इति वनिम्।) अजगरसर्पः। इति सिद्धान्तकौमुदी॥

शुक, सर्पे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) शोकति। सर्पो गमनम्। इति दुर्गादासः॥

शुक्, [च्] स्त्री, (शुच् शोके + क्विप्।) शोकः। इत्यमरः॥ (यथा, रघुः। १२। ७५।
"कामं जीवति मे नाथः इति सा विजयौ शुचम्।
प्राप्स्यता सत्यमस्यान्तं जीवितास्मीति लज्जिता॥")

शुक्ल, क्ली, (शोभते इति। शुभ दीप्तौ + "शुकबल्कौल्कलाः।" उणा० ३। ४२। इति कप्रत्ययेन निपातनात् साधुः।) अभ्रपर्णम्। इत्यमरः॥ वस्त्रम्। वल्कलवस्त्रम्। शिरस्त्राणम्। इति हेमचन्द्रः॥ शोणकदलः। इति विश्वः॥

शुकः, पुं, (शुभ दीप्तौ + कप्रत्ययेन साधुः। उणा० ३। ४२।) पक्षिविशेषः। शुआ इति भाषा। शुगा इति हिन्दी भाषा। तत्पर्य्यायः। कीरः २। इत्यमरः॥ वक्रतुण्डः ३ मेधावी ४ दाडिमप्रियः ५ रक्ततुण्डः ६ वक्रचञ्चुः ७ त्रिमिः ८ त्रिमिकः ९। इति शब्दरत्नावली॥ मूकः १० प्रियदर्शनः ११। इति जटाधरः॥ मञ्जुपाठकः १२। (यथा, आर्य्यासप्तशत्याम्। ३८१।
"प्रकटयति रागमधिकं जपनमिदं वक्रिमाणमावहति।
प्रीणयति च प्रतिपदं दूतः शुकस्येव दयितस्य॥")
अस्य मांसगुणाः। परमहृद्यत्वम्। त्रिदोषकृत्त्वम्। शीतलत्वम्। कासश्वासक्षयहरत्वम्। संग्राहित्वम्। लघुत्वम्। दीपनत्वञ्च। इति राजनिर्घण्टः॥ * ॥ तस्य शुभशकुनत्वं यथा,
"वामः पठन् राजशुकः प्रयाणे
शुभं भवेद्दक्षिणतः प्रवेशे।
वनेचराः काष्ठशुकाः प्रयातुः
स्युः खिन्नदाः संमुखमापतन्तः॥"
इति वसन्तराजशाकुने ८ वर्गः॥ *॥
व्यासपुत्रः। स च परीक्षिताय श्रीमद्भागवतं श्रावयामास। तस्योत्पत्तिर्यथा। हरिवंशे वायवीये च।
"परःशरस्तु योत्पन्नः शुको नाम महायशाः।
व्यासादरण्यां सम्भूतो विधूमोऽग्निरिव ज्वलन्॥
स तस्यां पिप्पलकन्यायां पीवर्य्यां जनयिष्यति।
कृष्णं गौरं प्रभुं शम्भुं तथा भूरिश्रुतं जयम्॥
कन्यां कीर्त्तिमतीं षष्ठीं योगिनीं योगमातरम्।
ब्रह्मदत्तस्य जननीं गृहिणीमनुहस्य च॥"
इति विष्णुपुराणे ४ अंशे १९ अध्यायटीकायां श्रीधरस्वामी॥ वह्निपुराणे प्रजापतिसर्गनामाध्यायेऽप्येवम्॥ * ॥ अपि च।
"द्वैपायनात्सुको जज्ञे भगवानेष शङ्करः।
अंशेनैवावतीर्य्यो वां संप्राप परमं पदम्॥
शुकस्याप्यभवन् पुत्राः पञ्चात्यन्ततपस्विनः।
भूरिश्रवाः प्रभुः शम्भुः कृष्णो गौरश्च षष्ठमः।
कन्या कीर्त्तिमती चैव योगमाता धृतव्रता॥"
इति कौर्म्मे १० अध्यायः॥ * ॥
(अस्यान्यविधोत्पत्तिविवरणं यथा, देवीभागवते। १। १४। १—२३।
श्रीसूत उवाच।
"दृष्ट्वा तामसितापाङ्गीं व्यासश्चिन्तापरोऽभवत्।
किं करोमि न मे योग्या देवकन्येयमक्षरा॥
एवं चिन्तयमानन्तु दृष्ट्वा व्यासं तदाक्षरा।
भयभीता हि सम्त्रासं गन्तुं मां विरहेदयम्॥
सा शत्वाथ शुकीरूपं गिरौता भयविह्वला।
कृष्णस्तु विस्मयं प्राप्तो विहङ्गीं तां विलोकयन्॥
कामस्तु देहे व्यासस्य दर्शनादेव सङ्गतः।
मनोऽतिविह्वलं जातं सर्व्वगात्रेषु विह्वलः॥
स तु धैर्य्येण महता नियम्यन् मानसं मुनिः।
न शशाक नियन्तुञ्च व्यासः प्रस्तं मनः॥
बभूवुर्मुनयस्तत्र दृष्ट्वा मोहितं मुनिः।
भाविवाक्येन विधृतं व्यासस्यामिततेजसः॥
मन्यन्तं कुर्व्वतस्तस्य मुनेरग्निरिवौजसा।
अरण्यामेव सहसा तस्य शुक्रमथापतत्॥
सोऽविचिन्त्य तथा मातं ममन्थारणिमेव च।
तस्माच्छुकः समुद्भूतो व्यासाज्जातमनोहरः॥
विस्मयं जनयन् बालः संजातश्चरण्यजः।
यथाम्बरं समिद्धोऽग्निर्भाति दीप्तिमान्॥
गर्भवस्तु सुतमालोक्य विस्मयं परमङ्गतः।
किमेतदिति सञ्चिन्त्य वरदानाच्छिवस्य वै॥
तेजोरूपी शुको जातोऽप्यरणीगर्भसम्भवः।
द्वितीयोऽग्निरिवाजस्रं दीप्यमानः स्वतेजसा॥
विलोकयामास तदा व्यासस्तु सुदितं सुतम्।
दिव्येन तेजसा युक्तं गार्हपत्यमिवापरम्॥
गङ्गान्तः स्नापयामास समागत्य गिरेस्तदा।
पुण्यदृष्टिस्तु खाज्जाता शिलारूपरि तापसाः॥
जातकर्म्मादिकं चक्रे व्यासस्तस्य महात्मनः।
देवदुन्दुभयो नेदुर्नृत्तुश्चाप्सरोगणाः॥
जगुर्गन्धर्व्वपतयो मुदितास्ते दिवौकसः।
विश्वावसुर्नारदश्च तुम्बुरुः शुकसम्भवे॥
तुष्टुवुर्मुदिताः सर्व्वे देवा विद्याधरास्तथा।
दृष्ट्वा व्याससुतं दिव्यमरणीगर्भसम्भवम्॥
अन्तरीक्षात् पपातोर्व्यां दण्डः कृष्णाजिनं शुभम्।
कमण्डलुस्तथा दिव्यः शुकस्यार्थे द्विजोत्तमाः॥
सद्यः स वटधे बालो जातमात्रोऽतिदीप्तिमान्।
तस्योपनयनं चक्रे व्यासो विद्याविधानवित्॥
उत्पन्नमात्रं तं वेदाः सरहस्याः ससंग्रहाः।
उपतस्थुर्महात्मानं यथास्य पितरन्तथा॥
यतो दृष्टं शुकीरूपं धृताथा सम्भवे तदा।
शुकेति नाम पुत्रस्य चकार मुनिसत्तमाः॥
दृष्ट्वा व्यतिसुपाध्यायं कृत्वा व्यासस्तदा।
व्रतानि ब्रह्मचर्य्यस्य चकार विधिपूर्व्वकम्॥
सोऽधीत्य निखिलान् वेदान् सरहस्यान् ससंग्रहान्।
धर्म्मशास्त्राणि सर्व्वाणि कृत्वा गुरुकुले शुकः।
गुरवे दक्षिणां दत्त्वा समावृत्तो मुनिस्तदा।
आजगाम पितुः पार्श्वं कृष्णद्वैपायनस्य च॥"
अस्य दारपरिग्रहादिदृष्टान्तस्तु तत्रैव विशेषतो द्रष्टव्यः॥ * ॥) स च श्रीकृष्णस्य क्रीड़ार्थं वृन्दावने उपनन्दस्य कन्या अभूत्। इति पाद्मे पातालखण्डम्॥ * ॥ रावणमन्त्री। शिरीषवृक्षः। इति मेदिनी॥ वृक्षविशेषः। इति रत्नमाला॥ शेयालकाँटा इति भाषा॥

शुकच्छदं, क्ली, (शुकवत् छदो यस्य।) अभ्रिपर्णम्। इति जटाधरः॥

शुकजिह्वा, स्त्री, (शुकस्य जिह्वेव फलं यस्याः।) वृक्षविशेषः। शुयाठाँटी इति भाषा॥ यथा,
"शुकाख्या शुकनासा च शुकजिह्वा शुकाह्वना॥"
इति रत्नमाला॥

शुकतरुः, पुं, (शुकवत् तरुः। शुकवत्सपर्णविशिष्टत्वादस्य तथात्वम्। शुकप्रियत्वाद्वा।) शिरीषवृक्षः। इति रत्नमाला॥

शुकद्रुमः, पुं, (शुकवत् द्रुमः। तद्वत्सपर्णविशिष्टत्वात् तथात्वम्। यद्वा, शुकप्रियो द्रुमः।) शिरीषवृक्षः। इति शब्दमाला॥

शुकनासा, स्त्री, (शुकस्य नासा नाम यस्याः।) शुकजिह्वा। इति रत्नमाला॥ शुकसंज्ञके, त्रि॥

शुकनाशनः, पुं. (शुकं नाशयतीति । नश+णिच् +ल्युः ।) दहनः । इति राजनिर्घण्टः ॥ शुकनाशके, त्रि ॥

शुकनासः, पुं, (शुकस्य नासेव फलं यस्य ।) श्योनाकवृक्षः । इत्यमरः ॥ शुकवन्नासायुक्ते, त्रि ॥

शुकपिप्रिः, स्त्री, शूकशिम्बी । इति शब्दरत्नावली ॥

शुकपुच्छः, पुं, (शुकस्य पुच्छ इव ।) गन्धकः । इति हेमचन्द्रः ॥ शुकस्य लाङ्गूलेच ॥

शुकपुच्छकं, क्ली, (शुकस्य पुच्छ इव । कन् ।) स्त्रौणेयम् । इति राजनिर्घण्टः ॥ शुकवत्पुच्छयुक्ते, त्रि ॥

शुकपुष्पं, क्ली, (शुकप्रियं पुष्पमस्य ।) स्त्रौणेयम् । इति भावप्रकाशः ॥

शुकपुष्पः, पुं, (शुकप्रियं पुष्पमस्य ।) शिरीषवृक्षः । इति राजनिर्घण्टः ॥

शुकप्रियः, पुं, (शुकस्य प्रियः ।) शिरीषवृक्षः । इति भावप्रकाशः ॥ शुकवल्लभे, त्रि ॥

शुकप्रिया, स्त्री, (शुकस्य प्रिया ।) जम्बूः । इति राजनिर्घण्टः ॥

शुकफलः, पुं, (शुक इव फलमस्य । तद्वर्णफलवत्त्वात् तथात्वम् ।) अर्कवृक्षः । इति राजनिर्घण्टः ॥

शुकबर्हं, क्ली, (शुकस्य बर्हमिव ।) गन्धद्रव्यविशेषः । इति शब्दरत्नावली ॥ गाँतियाला इति भाषा ॥

शुकम्, व, क्षीरम् । इति केचित् ॥

शुकवल्लभः, पुं, (शुकस्य वल्लभः प्रियः ।) दाडिमः । इति राजनिर्घण्टः ॥ शुकप्रिये, त्रि ॥

शुकवाहः, पुं, (शुको वाहो वाहनं यस्य ।) कामदेवः । इति केचित् ॥ शुकपक्षिवाहके, त्रि ॥

शुकशिम्बा, स्त्री, कपिकच्छुः । इति शब्दरत्नावली ॥

शुकशिम्बिः, स्त्री, कपिकच्छुः । इति शब्दरत्नावली ॥

शुकाख्या, स्त्री, (शुकस्य आख्या आख्या यस्याः ।) वृक्षविशेषः । शुयाटाँटी इति भाषा । तत्पर्य्यायः । शुकनासा २ शुकाजिह्वा ३ शुकानना ४ । इति रत्नमाला ॥

शुकादनः, पुं. (शुकेन अद्यतेऽसौ इति । अद् + कर्म्मणि ल्युट् ।) दाडिमः । इति शब्दचन्द्रिका ॥ शुकस्यादनीयमथमांसे, त्रि ॥

शुकानना, स्त्री, (शुकस्याननमिव फलं यस्याः ।) शुकाख्यावृक्षः । इति रत्नमाला ॥ शुकतुल्यमुखे, त्रि ॥

शुकी, स्त्री, (शुक + ङीष् ।) कपिलपक्षी । यथा, "शुकी श्येनी च भासा च सुग्रीवा शुचिरुधिका ॥" अत्र शुचिभाषिका इत्यपि पाठः । "शुकी शुकाननगरुडलूकी प्रत्युलूककान् ॥" इति गारुडे ६ अध्यायः ॥ शुकपक्षिणी च ॥

शुकोदरं, क्ली, (शुकस्योदरमिव ।) तालीशपत्रम् । इति राजनिर्घण्टः ॥ कीरजठरेच ॥

शुक्तं, क्ली, (शुच क्षेदे + क्तः ।) मांसम् । इति शब्दचन्द्रिका ॥ काञ्जिकम् । इति हारावली ॥ द्रवद्रव्यविशेषः । यथा,— "कन्दमूलफलादीनि सक्षेफलवणानि च । यत्तद्द्रव्येऽभिषूयन्ते तच्छुक्तमभिधीयते ॥" अस्य गुणाः । "शुक्तं तीक्ष्णोष्णलवणं पित्तकृत् कटुकं लघु । रूक्षं क्षय्युदरानाहशोथार्शोविषकृच्छ्रजुत् ॥" इति राजनिर्घण्टः ॥ * ॥

शुक्तं यन्मधुरं कालवशादम्लतां गतम् । इति प्रायश्चित्तविवेकः ॥ तस्य भक्षणनिषेधो यथा । यमः । "अपूपाश्च करम्भाश्च धाना वटकशुक्तवः । शाकं मांसमपूपश्च सूपं क्षीरमेव च ॥ यवागूं पायसञ्चैव यच्चान्यत् स्नेहसम्भवम् । सर्व्वं पर्य्युषितं भक्ष्यं शुक्तञ्च परिवर्ज्जयेत् ॥" तत्प्रतिप्रसवो यथा । मनुः । "दधिभक्ष्यञ्च शुक्तेषु सर्व्वञ्च दधिसम्भवम् ॥" इति तिथ्यादितत्त्वम् ॥ (यथा च मनुः । २ । १७७ । "वर्ज्जयेन्मधुमांसञ्च गन्धं माल्यं रसान् स्त्रियः । शुक्तानि यानि सर्व्वाणि प्राणिनाञ्चैव हिंसनम् ॥" "यानि स्वभावतो मधुरादिरसानि कालवशेन उदकवासादिना चाम्लवन्ति तानि शुक्तानि ।" इति तट्टीकायां कुल्लूकभट्टः ॥)

शुक्तं, त्रि, (शुच् + क्तः ।) निर्धुरम् । इति मेदिनी ॥ पूतम् । अम्लम् । इति विश्वः ॥ श्लिष्टम् । निर्व्वर्णम् । इति शब्दरत्नावली ॥

शुक्ता, स्त्री, (शुक्त + स्त्रियां टाप् ।) शुक्तिका । इति शब्दरत्नावली ॥

शुक्तिः, स्त्री, (शुच् + क्तिन् ।) जलजन्तुविशेषः । झिनुक् इति भाषा । तत्पर्य्यायः । सुक्तास्फोटः २ । इत्यमरः ॥ शुक्तिका ३ । इति जटाधरः ॥ तुक्तिप्रभः ४ महाशुक्तिः ५ तौलिकः ६ मौक्तिकप्रसवा ७ मौक्तिकशुक्तिः ८ सुक्तामाता ९ । अस्या गुणाः । कटुत्वम् । स्निग्धत्वम् । श्वासकृद्ग्रहणाग्नित्वम् । शूलप्रशमनत्वम् । रुच्यत्वम् । मधुरत्वम् । दीपनत्वञ्च । इति राजनिर्घण्टः ॥ कपालखण्डम् । शुक्तः । शुक्तनखः । नखी । अश्वावर्त्तः । अर्शोरोगः । इति मेदिनी ॥ चक्षूरोगविशेषः । इति हेमचन्द्रः ॥ तद्विवरणं यथा,— "प्रस्तारिशुक्रशुक्तजोधिमांससाख्यसंज्ञाः खलु षट् रोगाः । स्याच्छुक्तिका सार्ज्जुनपिष्टकाख्या जालं शिरायां पिडिकाच तासाम् ॥ रोगा बलासग्रथितेन सार्द्धं- मेकादशोक्ताः खलु शुक्तभागे ॥" शुक्तिमाह । "श्यावाः स्युः पिच्छिलनिभाश्च बिन्दवोऽयं शुक्लाभाः शितसिचिताः स्च शुक्तिसंज्ञः ।" श्यावा इत्यादि वर्णत्रयविकल्पो बोद्धव्यः ॥ * ॥ अथास्याश्चिकित्सा । "सेकं आश्योतनं पिण्डीविड़ालकर्षणं तथा । पुटपाकोऽञ्जनं चैभिः कल्पैर्नेत्रमुपाचरेत् ॥" इति कल्पविधिः ॥ तत्र सेकविधिर्यथा,— "सेकस्तु दिवसे कार्य्यो रात्रौ चाव्यन्तिके गदे । सेकस्तु सूक्ष्मधाराभिः सर्व्वस्मिन्नयने हितः ॥ मीलिताक्षस्य मर्त्यस्य प्रदेयश्चतुरङ्गुलम् । एरण्डदलमूलत्वक्क्षुतमाजं पयो हितम् । सुखोष्णं नेत्रयोः सिक्तं वाताभिष्यन्दनाशनम् ॥१॥ यष्टीमधुरिकासिन्धूत्पलदार्व्वीतार्क्ष्यसर्पिषां कै: । जलपिष्टैर्वहिर्लेपः सर्व्वनेत्रामयापहः ॥" २ ॥ इति भावप्रकाशः ॥ * ॥

कर्षद्वयपरिमाणम् । इति शब्दमाला ॥ चतुस्तोलकपरिमाणम् । तत्पर्य्यायः । अष्टमिका २ । इति वैद्यकपरिभाषा ॥

शुक्तिका, स्त्री, (शुक्तिरेव । स्वार्थे कन् ।) सुक्तास्फोटः । इति जटाधरः ॥ चुक्रिका । इति शब्दरत्नावली ॥

शुक्तिजं, क्ली, (शुक्तिर्जायते यस्मिन् । शुक्ति + जन् + डः ।) मुक्ता । इति हेमचन्द्रः ॥ (यथा, बृहत्संहितायाम् । १२ । ४ । "प्रचलत्तिमिशुक्तिजग्रहचितः सलिलेऽपहृतेऽपि पतिः सरितां ॥")

शुक्तिबीजं, क्ली, (शुक्तेर्बीजमिव ।) मुक्ता । इति त्रिकाण्डशेषः ॥

शुक्तिमान्, [न्] पुं, पर्व्वतविशेषः । यथा,— "महेन्द्रो मलयः सह्यः शुक्तिमान् ऋक्षपर्व्वतः । विन्ध्यश्च पारियात्रश्च सप्तैते च कुलाचलाः ।" इति त्रिकाण्डशेषः ॥

शुक्रं, क्ली, (शुच क्षेदे + "शुचेर्दीर्घश्चेति ।" उणा० २ । २८ । इति रन्प्रत्ययेन साधु ।) मज्जजातधातुः । तत्पर्य्यायः । पुंस्त्वम् २ रेतः ३ वीजम् ४ वीर्य्यम् ५ पौरुषम् ६ तेजः ७ इन्द्रियम् ८ अन्नविकारः ९ मज्जारसः १० रोहणम् ११ बलम् १२ । इति राजनिर्घण्टः ॥ तस्योत्पत्तिर्यथा,— "रसाद्रक्तं ततो मांसं मांसान्मेदः प्रजायते । मेदसोऽस्थि ततो मज्जा मज्जात् शुक्रस्य सम्भवः ॥" तस्य स्वरूपं यथा,— "शुक्रं स्त्रीणां सितं स्निग्धं बलपुष्टिकरं स्मृतम् । गर्भबीजं वपुःसारो जीवस्याश्रय उत्तमः ॥" जीवस्याश्रय उत्तम इति । यत आह । "जीवो वसति सर्व्वस्मिन् देहे तच्च विशेषतः । वीर्य्ये रक्ते मले यस्मिन् क्षीणे याति क्षयं क्षणात् ॥" * ॥ गर्भसंजननशुक्रस्य लक्षणं यथा,— "स्फटिकाभं हृद्यं स्निग्धं मधुरं मधुगन्धि च । शुक्रमिच्छन्ति केचित्तु तैलचौद्रनिभञ्च तत् ॥" तस्य स्थानमाह ।

"यथा पयसि सर्पिस्तु गृह्यते चौ रसो यथा।
सर्वं हि सकले काये शुक्रं तिष्ठति देहिनाम्॥"
अत्र सर्पिर्दृष्टान्तो बहुशुक्रोत्पत्तिमथनेन सर्पिः-शुक्रयोर्लाभात्। इक्षुरसदृष्टान्तस्तु स्वल्पशुक्रे पुंसि अतिपीडनेनेक्षुरसशुक्रयोर्लाभात्॥ * ॥
तस्य चरणमार्गो यथा,—
"द्वाङ्गुले दक्षिणे पार्श्वे वस्तिद्वारस्य चाप्यधः।
सूत्रस्रोतःपथे शुक्रं पुरुषस्य प्रवर्त्तते॥" * ॥
अथ शुक्रस्य चरणकारणमाह।
"क्षतशुद्धेऽस्थितं शुक्रं प्रसन्नमनसक्रिया।
स्त्रीषु यायुवतश्चापि हर्षात्तत् संप्रवर्त्तते॥"
स्त्रीषु यायुवतः सुरतरूपं यायामं कुर्वतः।
अन्यच।
"शुक्रं कामेन कामिन्या दर्शनात् स्पर्शनादपि।
शब्दसंश्रवणात् ध्यानात् संभोगाच्च प्रवर्त्तते॥"
इति भावप्रकाशः॥ * ॥
शुक्रक्षयकरद्रव्याणि यथा। सार्षपतैलम् २ राजमाषः २ तिलः ३ पटोलवास्तूककाकमाचीपुनर्नवाग्राकभिन्नसर्व्वशाकम् ४ तावदन्नक्षयम् ५ कारवेल्लकफलम् ६ कर्कोटकफलम् ७ बादामम् ८ लिकुचम् ९ शुष्कसरिषम् १० गुडत्वक् ११ पिप्पलीशुण्ठीभिन्नकटुरसः १२। इति राजवल्लभात् संगृहीतम्॥ * ॥ अपि च।
"बीजक्षयकरं नित्यं भक्ष्यं भोज्यञ्च पानकम्।
पर्व्वसेषु चारण्याकाद्यानत्वम् बहुतिक्तकम्॥
कांस्यराजतरत्नस्थं तोयं पानेऽप्यवर्जनम्।
सत्यान्ते सूक्ष्मबीजक्षयकारि विवर्ज्जयेत्॥"
शुक्रवृद्धिकरफलं यथा,—
"ताम्बायःस्वर्णमीसानां पात्रस्थं फलचर्म्मणोः।
शुक्रवृद्धिकरं तोयं तस्मात् पेयं प्रयत्नतः॥"
इति कालिकापुराणे ९८ अध्यायः॥ * ॥
शुक्रवर्द्धकद्रव्याणि यथा। पानीयम् १ विशेषतः ऐक्षवीकफलम् २ नालाम्बु ३ चन्दनादिद्रव्याङ्गलेपनम् ४ रक्तशालिधान्यम् ५ ऐक्षवीकषष्टिकधान्यम् ६ गोधूमः ७ माषः ८ सामान्यशुष्कनारीकेलशस्याकम् ९ सामान्यक्लिन्नशुष्कनारीकेलशस्याकफलम् १० कर्कोटाकम् ११ काकमाचीशाकम् १२ गोक्षुराकम् १३ शुक्लाशाकः १४ पार्षाकः १५ विदारी १६ इक्ष्वाकुफलम् १७ मध्वाम्लम् १८ मद्यम् १९ दुग्धाम्लम् २० नागरङ्गम् २१ बहुवारफलम् २२ मधुकशाकम् २३ कण्टकारिका २४ मक्षिकाम्लम् २५ पद्मकन्दम् २६ चम्पकफलम् २७ द्राक्षा २८ खर्जूरम् २९ धात्री ३० कुमार्य्यम्लम् ३१ तालशलाटुः ३२ इक्ष्वम्लकः ३३ सप्तपत्रकः ३४ रोहितमत्स्यः ३५ भाकुटमत्स्यः ३६ पाठीनमत्स्यः ३७ मेषशिम्बमत्स्यः ३८ शिवधनमत्स्यः ३९ वाठामत्स्यः ४० मद्गुरमत्स्यः ४१ शफरीमत्स्यः ४२ वलीमत्स्यः ४३ शिङ्गटमत्स्यः ४४ वर्म्मिमत्स्यः ४५ रक्तमत्स्यः ४६ शुक्लीमत्स्यः ४७ चम्पकमत्स्यः ४८ शौलमत्स्यः ४९ मत्स्यः ५० सामान्यमीनम् ५१ प्रसहमांसम् ५२ भूशयमांसम् ५३ अनेपमांसम् ५४ जलजमांसम् ५५ जलेचरमांसम् ५६ छागमांसम् ५७ वाराहमांसम् ५८ कूर्म्ममांसम् ५९ तित्तिरि-६० कुक्कुट-६१ चटकानां मांसम् ६२ हंसमांसम् ६३ हंसबीजम् ६४ शुकपक्षिमांसम् ६५ मयूर-६६ शरारि-६७ मद्गु-६८ कादम्ब-६९ बलाका-७० वकमांसम् ७१ जीर्णमद्यम् ७२ समस्तक्षीरम् ७३ गोदुग्धम् ७४ हस्तिनीदुग्धम् ७५ तावत्क्षीरसन्तालिका ७६ माहिषदधि ७७ दधिसरः ७८ दधिमस्तु ७९ नवनीतम् ८० तावद्घृतम् ८१ तावदिक्षुः ८२ विशेषतः पौण्ड्रकेक्षुः ८३ दन्तनिष्पीड़ितेक्षुरसः ८४ यन्त्रनिष्पीड़ितेक्षुरसः ८५ अग्निपक्वेक्षुरसः ८६ इक्षुफाणितम् ८७ इक्षुगुड़ः ८८ इक्षुखण्डम् ८९ मधुरी ९० शुष्कपिप्पली ९१ शुण्ठी ९२ आर्द्रकम् ९३ लशुनम् ९४ पलाण्डुः ९५ वैन्धवम् ९६ चणम् ९७ सतैलसवणान्वितदग्धमत्स्यः ९८ तैलसवणयुक्तपलाण्डवेष्टितकर्दमलेपिताङ्गारदग्धलवणवेष्टवारपुरस्कृतसार्द्रककटुतैलसन्तालितमत्स्यः ९९ शाकमत्स्याख्यव्यञ्जनम् १०० मांसरसः १०१ परिशुष्काख्यमांसम् १०२ घृतपूरः १०३ मधुमस्तकम् १०४ दुग्धफेनकः १०५ भूशया १०६ एरण्डमूलम् १०७ गोक्षुरः १०८ सामान्यबला १०९ विशेषतः पीतबला ११० अश्वगन्धा १११ प्रसारणी ११२ माषपर्णी ११३ ऋद्धिवृद्धिः ११४ राजवृक्षफलम् ११५ शिलाजतु: ११६। इति राजवल्लभात् संगृहीतम्॥ * ॥ नेत्ररोगविशेषः। इति मेदिनी॥ अस्य विवरणं शुक्लशब्दे द्रष्टव्यम्॥

शुक्रः, पुं, (शुच + रन्।) ग्रहविशेषः। तत्पर्य्यायः। दैत्यगुरुः २ काव्यः ३ उशना ४ भार्गवः ५ कविः ६। इत्यमरः॥ सितः ७ आस्फुजित् ८ भृतपर्व्वेशः ९ भृगुसुतः १० भृगुः ११ पोड़शार्चिः १२ महाभूः १३ श्वेतः १४ श्वेतरथः १५। इति शब्दरत्नावली॥ षोड़शांशुः १७। इति जटाधरः॥ * ॥ तस्य शुक्रेति नामकारणं यथा,—
"निकुम्भादिषु दैत्येषु भूय एवोत्थितेष्वथ।
युद्धायाभ्यागतेष्वेव नन्दी शुक्रमब्रवीत्॥
महादेवयशोवृद्धं शृणु तं परमाद्भुतम्।
अविचिन्त्यमसंख्येय स्तवानां जीवनं पुनः॥
ये स्तवाः प्रथमैर्दैत्या यथाशास्त्रा रथाजिरे।
ते सर्व्वे जीवितां भूयो भार्गवेणाथ विद्यया॥
तद्दिदं वै महादेव महत् कर्म कृतं त्वया।
संजातमखिलं देव शुक्रविद्याबलाश्रयात्॥
इत्येवमुक्ते वचने नन्दिना कुलनन्दिना।
प्रत्युवाच प्रभुः प्रीत्या स्मार्द्रसाधनमुत्तमम्॥
यस्य शुक्रं ग्रहयते ममाख्यिकतुप्रदाय च।
अहं तं संग्रहिष्यामि यथायोगं समेत्यहि॥
इत्येवमुक्ते वचने नन्दी मरुपतिस्ततः।
समस्तमसुरग्रामं नन्दी संपूज्य वेगवान्॥

रथाङ्गार्गवमाग्नेये सिंहः क्षुद्रगणं ययौ।
तमादाय हराभ्यासमाजगाम विनायकः॥
निपात्य रक्षितः सर्व्वानथ शुक्रं न्यवेदयत्।
तमागतं कविं शुक्रं प्राच्यिपद्दहने प्रभुः॥
स शूलभुग्ना कविश्रेष्ठो यस्तो जठरमाश्रितः।
तुष्टाव भगवन्तं तं वाग्मी वाग्भिरुदारात्॥
शुक्र उवाच।
नमोऽस्तु ते शङ्कर शुक्र शम्भो
सहस्रनेत्राङ्घ्रिशिरो नमस्ते।
दृष्ट्वैव सर्व्वं भुवनं तवोदरे
आन्तो भवन्तं शरणं प्रपन्नः॥
इत्येवमुक्ते वचने महात्मा
शूलभुर्व्वचः प्राह ततो विहस्य।
निर्गच्छ पुत्रोऽसि ममाधुना त्वं
शिश्नेन भो भार्गवचन्द्रचन्द्रः॥
श्रुत्वा तु शुक्रेति चराचरस्था
स्त्रीष्यन्ति नैवात्र विचरणाक्ति।
इत्येवमुक्त्वा भगवान् समीच
शिश्नेन शुक्रः स च निर्गतोऽभूत्॥
विनिर्गतो भार्गववंशचन्द्रः
शुक्रत्वमापद्य महानुभावः॥"
इति वामने ६६ अध्यायः॥ * ॥
अथ श्यामवर्णाग्निकोणस्त्रीग्राह्यजातियजुर्व्वेदरजोगुणाम्बरसवृषराशिक्षीरकरत्नभोजकटदेशानामधिपतिः। भृगुसुनिसन्तानः। नवाङ्गुलशरीरः। पद्मधः। सूर्य्यसुखः। श्वेतवर्णः। चतुर्भुजः। सदाजपमालावरकमण्डलुदण्डधारी। शुक्लवस्त्रः। इन्द्रादिदेवताकः। ग्रहीपत्र्यधिदेवताकः। शुभग्रहः। अपराह्णकालीप्रबलः। जलचारी। कफप्रकृतिः। रूप्यद्रव्यधान्यादिस्वामी। मध्यवयः। स्त्रीश्वरः। जलभूमिचारी। स्निग्धरुचिः। द्विपदमनुष्याणां स्वामी च। इति दृष्टजातकग्रहयागतत्त्वादयः॥ * ॥ तस्य भोग्यं दिनं शुक्रवारः। तत्र जातफलम्।
"प्रसन्नचित्तो मतिमान् गुणज्ञः
सुकेशयेशः सितवस्त्रमाल्यः।
बन्धुप्रियो भार्गववारजातः
श्रीप्रप्रसादः कुशली नरः स्यात्॥"
तस्य चैत्रजातफलम्।
"शुक्रालये कामकलाविदग्धो
दाताऽतिथेयः श्रुतशास्त्रदक्षः।
कलिप्रियो वातकफान्वितः स्या-
न्मेधान्वितो दीर्घपटुर्महाढ्यः॥"
तस्य वैशाखजातफलम्।
"वैशाखे भृगुनन्दस्य सुतनुः प्राज्ञो धर्म्मी-
पतेः
सर्व्वज्ञः सकलानुरागकुशलो दाता सतां वल्लभः
संपूर्णेन्द्र वराङ्गलक्षणधरः स्फीतः कृपाशुः
शुचिः
प्राप्तः सत्करसोऽभियुक्तहृदयो धर्म्मानुरक्तो
नरः॥"

तस्य नवांशजातफलम्।
"शरीरस्थो लक्षितनयनो मञ्जुकेशः क्षमाङ्गः
कम्बुग्रीवो भवति कनकश्यामवर्णः सुकेशः।
क्रूरः क्लेशः कविरतिधनो दानशीलो गुणज्ञो
यानस्थाश्वो विमलयशसा मानवो भार्गवांशे॥"
तस्य द्वादशांशजातफलम्।
"शूरो बहुधनो भोगी वृत्यगीतप्रियः सदा।
शुचिर्दाता क्षमी भोक्ता द्वादशांशे भृगोर्नरः॥"
तस्य त्रिंशांशजातफलम्।
"बहुगुणपरिपूर्णः सुन्दरश्चारुदृष्टि-
र्युवतिजनविनोदी लब्धसौख्यार्थभोगः।
द्विजसुरगुरुभक्तो दानशीलः कृपालु-
रसुरपतिगुरोः स्यात्मानवस्त्रिंशकांशे॥"
इति कोष्ठीप्रदीपः॥

विष्कम्भादि-सप्तविंशति-योगान्तर्गत-चतुर्विंशयोगः। तत्र जातफलम्।
"हास्यो विवादे विजयी सभायां
सङ्गन्धमाल्याम्बररत्नयुक्तः।
जितेन्द्रियः स्यान्मनुजो महौजाः
शुक्लाभिधाने घटने हि यस्य॥"
इति कोष्ठीप्रदीपः॥ * ॥

अग्निः। चित्रकवृक्षः। ज्येष्ठमासः। इत्यमरः॥

शुक्लकरः, पुं, (करोतीति। कृ+पचाद्यच्। शुक्लस्य करः।) मञ्जा। इति हेमचन्द्रः॥ वीर्य्यकारके, त्रि॥

शुक्लशुक्, [च्] पुं, (शुक्लं सङ्क्ते इति। सुज+क्विप्।) मयूरः। इति शब्दचन्द्रिका। रेतोभोजके, त्रि॥

शुक्लभूः, पुं, (शुक्लात् भूरुत्पत्तिर्यस्य।) मज्जा। इति शब्दचन्द्रिका॥ वीर्य्यजातमात्रे, त्रि॥

शुक्लला, स्त्री, (शुक्लं लाति ददातीति। दा+कः।) उचटा। इति चक्रलाशब्दटीकायां भरतः॥ वीर्य्यदातरि, त्रि॥

शुक्लवारः, पुं, (शुक्लस्य वारः।) शुक्लग्रहभोग्यदिनम्। यथा। तीर्थेतरत्र प्रतिप्रसवमाह। स्मृतिः।
"अयने विषुवे चैव संक्रान्त्यां ग्रहणेषु च।
उपाकर्म्मणि चोत्सर्गे युगादौ स्तवासरे।
सूर्य्यशुक्रादिवारेऽपि न दोषस्तिलतर्पणे॥"
इति प्रायश्चित्ततत्त्वम्॥

शुक्रशिष्यः, पुं, (शुक्रस्य शिष्यः।) असुरः। इत्यमरः॥

शुक्राङ्गः, पुं, मयूरः। इति जटाधरः॥

शुक्रिय, त्रि. शुक्रसम्बन्धी। शुक्रशब्दात् इयप्रत्ययनिष्पन्नः॥ (शुक्रो देवता अस्येति। शुक्र+"शुक्राद्घन्।" ४। २। २६। इति घन्। शुक्रदेवताको ग्रहविशेषादिः। इति सिद्धान्तकौमुदी। यथा, याज्ञवल्क्ये। ३। ३०८।
"शुक्रियारण्यकल्पो गायत्र्याश्च विशेषतः॥")

शुक्ल, क्लीं, (शुच+क्लीं+"अर्त्तिसृधृ-" उणा० २। २८। इति रन् प्रत्ययेन साधुः।) रजतम्। इति मेदिनी॥ नवनीतम्। इति शब्दचन्द्रिका॥

अग्निरोगविशेषः। इति जटाधरः॥ च तु चक्षुःशुक्लभागजरोगः। तद्विवरणं यथा,—
"प्रस्तारिशुक्लाचतजाधिमांस-
सास्रर्म्मसंज्ञाः खलु षट्च रोगाः॥"
तत्र शुक्लमाह।
"सुश्वेतं रूढ शुक्लाख्यं शुक्लं तद्वर्द्धते चिरात्॥"
अस्य चिकित्सा।
"शुक्ला प्राग्वितलं दृष्ट्वा चक्षुषोर्यदि शीर्यते
अचिरेणैव तद्वारि निमिराणि अपोहति॥
स्नानं क्षणं तिलैर्व्वापि चक्षुष्यमनिलापहम्।
श्यामले सततं स्नानं परदृष्टिबलापहम्॥
शुण्ठीनिम्बदलैः पिण्डीसुखोष्णास्रस्यसेच्यवा।
धात्र्या नेत्रेऽनिलश्लेष्मशोथकण्डूव्यथाहरी।
त्रिफला पिण्डिका नेत्रे पातपित्तकफापहा॥"*
अन्यदौषधं शुक्तिशुक्रशब्दयोर्द्रष्टव्यम्॥ काञ्जिकादि। यथा,—
"कार्त्तिके वर्जयेत्तैलं कार्त्तिके वर्जयेन्मधु।
कार्त्तिके वर्जयेत् कांस्यं कार्त्तिके शुक्तसन्धितम्॥"
इति श्रीगोपालभट्टविलिखिते भगवद्भक्तिविलासे १६ विलासः॥ शुक्तं काञ्जिकादिपर्य्युषितान्नद्रवं सन्धितञ्च वर्जयेत्। इति श्रीजीवगोस्वामिकृततट्टीका दिग्दर्शनी॥

शुक्लः, पुं, (शुच+रन्। रस्य लः।) वर्णविशेषः। सादा इति भाषा। तत्पर्य्यायः। शुभ्रः २ शुचिः ३ श्वेतः ४ विशदः ५ श्वेतः ६ पाण्डरः ७ अवदातः ८ सितः ९ गौरः १० बलचः ११ धवलः १२ अर्জ্জुनः १३। इत्यमरः॥ श्वेता १४ श्वेता १५ श्वेनी १६ विषदः १७ सिता १८ अवलचः १९। इति तट्टीका॥ शितिः २० पाण्डुः २१। इति शब्दरत्नावली॥ रामः २२ खरः २३। इति जटाधरः॥ शुक्लयोगः। इति मेदिनी॥ श्वेतेरण्डः। इति राजनिर्घण्टः॥ शुक्लपक्षः। यथा षट्त्रिंशन्मतम्।
"तत्र पञ्चादशौ मासे शुक्लकृष्णौ क्रमेण हि।
चन्द्रवृद्धिकरः शुक्लः कृष्णश्चन्द्रक्षयात्मकः॥"
इति तिथ्यादितत्त्वम्॥

शुक्लगुणयुक्ते, त्रि॥ * ॥ शुक्लवस्तूनि यथा,—
"सुधांशूच्चैःश्रवाः शम्भुकीर्त्तिश्योतस्खाम्बुरङ्गाः।
प्रासादसौधगरमन्दारदृषिमाद्रयः॥
सूर्य्येन्दुकान्तकर्पूरकरभा रजतं हली।
निर्मोकभस्मदधीरचन्दनं करका हिमम्॥
हारोर्णनाभनक्षत्रस्थि स्वर्गङ्गेभरदाभ्रकम्।
शैलाधिः शर्करा दुग्धं दधि गङ्गा सुधा जलम्॥
रत्नागसिकताहंसवकबकेरवधामरम्।
रत्नागर्भं पुण्डरीककेसरशैलनिर्झराः॥
लोध्रसिंहध्वजच्छत्रचूर्णशुक्तिकपर्दकाः।
सुक्ताकुसुमचन्द्रदन्तगुग्गुलुगुणाः॥
कैलासकाशकाशासवासवकुन्दराः।
नारदः पारदः सुन्दरखटिकास्फटिकादयः॥"
इति श्वेतानि॥ * ॥

शुक्लवस्तूनि यथा,—
"सितकृष्णौ विधुहरी शितिताराभ्रनागराज
घनसाराः।
रामपयोराशिसुतसिंहीजानन्तचन्द्र-
हासाद्याः॥"
विधुश्चन्द्रो विष्णुश्च। हरिः कृष्णः सिंहश्च। शितौ धवलमेघकौ। तारा नक्षत्रं अक्षिः कनीनिका च। अभ्रकं गिरिजं मेघश्च नागराजः शेषो गजश्च। घनसारः कर्पूरं मेघश्रेष्ठश्च। रामो बलभद्रो दाशरथिश्च। पयोराशिर्दुग्धसमुद्रः समुद्रश्च। अर्জ্জुनः शुभ्रः पार्थश्च। सिंहीजः सिंही राहुश्च। अनन्तो बलभद्रः कृष्णश्च चन्द्रहासः चन्द्रहासं खड्गश्च।
"शुक्लकरतारकेशसदाकाशव्योमकेशतालाङ्काः।
नीलांशुकाधिकेशारिष्टसदासिचयकलकण्ठाः॥"
शुक्लकरः कम्बुकान्तिः क्षणश्च। तारकेशश्चन्द्रः उज्ज्वलबालश्च। सदाकाशः सर्व्वदाकाशः सदागगनश्च। व्योमकेशः शिवो नभोवासौ च। तालाङ्को बलभद्रस्तालकलङ्कौ च। नीलांशुको बलभद्रः कृष्णकान्तिश्च। अधिकेशो अधिकशिवो अधिकबालश्च। अरिष्टस्तक्रं काकश्च। सदासिचयः सिचयो वस्त्रं असिचयः खड्गः समुद्रश्च। कलकण्ठो हंसः पिकश्च।
"कलकण्ठः पिके पारावते हंसे कलध्वनौ॥
हरिर्विष्णुघनाश्विभ्यो गजाः सिन्धुर्मुरारितः।
अदृभ्यो वाहोऽश्वानि कृष्णादयसुना कृष्णितो
द्विषः॥"
शुक्लश्यामाभिधायका भवन्तीति सम्बन्धः हरिगज ऐरावतः। एवं विष्णुगजः। चाक्षिगजः। घनगजः। पक्षे हरिर्विष्णुर्गजोऽस्ती। एवं सर्व्वत्र। गजा इति बहुवचननिर्द्देशात् गजपर्य्यायो ग्राह्यते। मुरारिसिन्धुर्गङ्गा कृष्णसमुद्रौ च। अम्बुवाहः उच्चैःश्रवा मेघश्च। कृष्णाङ्गं नाभीपुण्डरीकं नीलाब्जश्च। यमुनारिर्बलभद्रो यमुनाद्वेषी च।
"कृष्णार्थाम्राक्षटिनीवाचकशब्दात् परो वरो
योज्यः।
नीरदघनोपलसितसदाहिमकर-सिन्धुवेणि-
पृथुलाभाभाः॥"
सितश्यामवाचका इति पूर्ब्ववत्। कृष्णार्थाम्राक्षटिनीवाचकशब्दाहरो यथा। कृष्णनदीवरकान्तिः गङ्गाश्रेष्ठकान्तिः। पक्षे कृष्णनदीवरस्य समुद्रस्येव कान्तिः। नीरदो निर्घितो दन्तो मेघश्च। घनोपलसितः घनोपलः करका तद्वत् सितः घनो मेघः तद्वदुपलसितः कान्तः। सदाहिमकरः चन्द्रः सर्पमकरौ च। सिन्धुवेणिर्नदीप्रवाहः समुद्रश्च विन्यासौ च। पृथुलाभाः मक्षती भ्रष्टधान्यस्येवाभा यस्य कृष्णस्येव च। तथा च।
"वहलकलभवच्छायमन्धकारातिदीधितिः।
सदाधिकेशवच्छायो नेकपीयसमच्छविः॥

वपुर्महोदधिच्छायं बिभ्रत् वैजयकान्तिमान्।
स्फाटिकी च जयलक्ष्मीः पट्टांशुकटिं वहन्॥
श्वेताम्बरश्रियं धत्ते स्फाटिकान्तश्रियान्वितः।
अर्जुनद्युतिविद्योतीत्येवमादि वसुन्नयेत्॥"*॥
रक्तश्वेतवाचकानि वस्तूनि यथा,—
"रक्तश्वेतौ हरिशुचिपुष्करशुतपत्रसूर्य-
कान्तालाः।
नवहंसमहापद्मार्कजश्रीदराः कमलकोशाले॥"
हरिचन्द्रसूर्य्ययोः। शुचिः श्वेतवैश्वानरयोः।
पुष्करं जलपद्मयोः। शुतपत्रं हंसपद्मयोः।
सूर्य्यकान्तः स्फाटिके सूर्य्यकान्ते च। जलः
शुक्लाम्बुजयोः। नवहंसः नवहंसे प्रत्यग्रसूर्य्ये च।
महापद्मः श्वेतनागे पद्मे च। अर्कः स्फाटिक-
सूर्य्ययोः। कमलं जलाम्बुजयोः। कौशलं
जलरक्तयोः।
"सुरुद्रवज्रादिभिर्भागो रत्नेनाभे रदांशुकैः।
जलेभ्यो जन्मशोभाभिः सरोजकुसुदारिभिः॥"
भानोः परस्मात् सुरुद्रवज्रादिभिः सितरक्तौ
यथा। रविमित्रं चन्द्रः रवितुल्यश्च। भानुरत्नं
सूर्य्यकान्तो रविपद्मरागौ च। अग्निरत्नं सूर्य्य-
कान्तो अग्निपद्मरागौ च। रदांशुकं दन्तवस्त्रे
अधरश्च। जलजशोभा जलजा चासौ शोभा
चेति पद्मे पद्मकान्तिः। एवं सरोजारिशोभा
सरोजसूर्य्यशोभा पद्मे सरोजारिचन्द्रः। कुसु-
दारिशोभा कुसुदसूर्य्यशोभा। पद्मे कुसुदारि-
रादित्यः॥*॥ पीतश्वेतवाचकानि वस्तूनि
यथा,—
"पीतश्वेतौ गौरद्विजराजकपर्दभ्रुभृहरि-
तार्क्ष्याः।
हैमक्षोमाष्टापदमहारजतचन्द्रकलधौताः॥"
गौरः श्वेतपीतयोः। द्विजराजो गुरुचन्द्रयोः।
कपर्दः भ्रुभृजटाजूटवराटयोः। भ्रुभृन्मूर्द्ध-
त्रिलोचनयोः। हरिः पिङ्गलसिंहयोः। तार्क्ष्यो
गरुड़ः पक्षे उच्चैःश्रवाः। हैमक्षोमः हैक्षोमयं
हैमः। पक्षे द्विमस्यायम्। अष्टापदं सुवर्ण-
सरभयोः। महारजतं सुवर्णरूप्ययोः। चन्द्रः
स्वर्णभृङ्गराजयोः। कलधौतं हैमरूप्ययोः।
"सुशोभितारकूटश्रीःस्वर्णक्षोमसमद्युतिः।
दृष्टनीलसतृकान्तिर्गाङ्गिनच्छविपिङ्गलः॥"
तारकूटो रूप्यसमूहः। पक्षे तारकूटो रीतिः।
सुशोभनमणिः दृगक्षश्च॥*॥ अथ श्लोकोक्तौ-
षधानि। गोपतितार्क्ष्यकान्तिः रविगरुड़च्छविः।
पक्षे गोपतिरिन्द्रस्य तार्क्ष्यसुरङ्गः। वाम-
देवगिरिर्मेनोन्नमेरुः कैलासश्च। इति कवि-
कल्पलतायाम् २ शेषे उद्दिष्टवर्णनं १ कुसुमम्॥
शुक्लकः, पुं, (शुक्ल+स्वार्थे कन्।) शुक्लपक्षः।
यथा,—
"पञ्चम्याद्यास्तु तिथयः क्रमात् पक्षद्वय
स्थिताः।
दर्शान्ताः कृष्णपक्षे ना; पूर्णिमान्ताश्च शुक्लके॥"
इति तिथ्यादितत्त्वम्॥
श्वेतवर्णश्च॥

शुक्लकण्टकः, पुं, (शुक्लः कण्टो यस्य। कन्।)
दात्यूहपक्षी। इति शब्दमाला॥ श्वेतशलयुक्ते,
त्रि॥
शुक्लकन्दः, पुं, (शुक्लः कन्दो यस्य।) महिषकन्दः।
इति राजनिर्घण्टः॥ श्वेतमूलञ्च॥
शुक्लकन्दा, स्त्री, (शुक्लः कन्दो यस्याः।) अति-
विषा। इति राजनिर्घण्टः॥
शुक्लकर्म्मा, [न्] त्रि, (शुक्लं पूतं कर्म्म यस्य।)
शुक्लकर्म्मा। सुकर्म्मशीलः। इति जटाधरः॥
शुक्लकुष्ठं, क्ली, (शुक्लं कुष्ठम्।) श्वेतवर्णकुष्ठ-
रोगः। तस्यौषधं यथा,—
"सोमराजस्य बीजानि नवनीतयुतानि च।
मधुना खादितानि स्युः शुक्लकुष्ठहराणि वै॥"
इति गारुड़े १६५ अध्यायः॥
शुक्लचीरा, स्त्री, (शुक्लं चीरं यस्याः।) काकोली।
इति राजनिर्घण्टः॥ श्वेतदुग्धयुक्ते, त्रि॥
शुक्लत्वं, क्ली, (शुक्लस्य भावः। शुक्ल+त्व।)
शुक्लस्य भाव द्रव्यगे तल्प्रत्ययेन निष्पन्नम्॥
शुक्लदुग्धः, पुं, (शुक्लं दुग्धं निर्य्यासो यस्य।)
मदनाटकः। इति शब्दचन्द्रिका॥ श्वेतदुग्ध-
युक्ते, त्रि॥
शुक्लधातुः, पुं, (शुक्लः शुक्लवर्णो धातुः।) कठिनी।
इति हैमचन्द्रः॥ श्वेतवर्णधातुद्रव्यञ्च॥
शुक्लपक्षः, पुं, (शुक्लः पक्षः।) सितपक्षः। चन्द्र-
सम्बन्धि-वृद्धानुकूल-पक्षदशकलाक्रिया-प्रचयः।
तत्पर्य्यायः।
"सितपक्षापूर्य्यमाणः स्यात् शुक्लश्च विशुदः शुचिः॥
शुक्लपक्षः कृष्णपक्षो बहुलो वदि च स्मृतः॥"
इति राजनिर्घण्टः॥
स तु शुक्लप्रतिपदादिपौर्णमास्यन्तपक्षदश-
तिथ्यात्मकः। यथा,—
"तत्र पक्षावुभौ मासे शुक्लाद्यौ क्रमेण हि।
चन्द्रवृद्धिकरः शुक्लः कृष्णश्चन्द्रक्षयात्मकः॥"
इति तिथ्यादितत्त्वम्॥*॥
कर्म्मविशेषे तत्रोदयगामितिथेर्ग्राह्यत्वं यथा,—
"शुक्लपक्षे तिथिर्ग्राह्या यस्यामभ्युदितो रविः।
कृष्णपक्षे तिथिर्ग्राह्या यस्यामस्तमितो रविः॥"
इति विष्णुधर्म्मोत्तरम्॥
संस्कारकर्म्मणि शुक्लपक्षकर्त्तव्यता यथा।
आश्वलायनः। उदगयने आपूर्य्यमाणे पक्षे
कल्याणे नक्षत्रे चौड़कर्म्मोपनयनगोदान-
विवाहाः विवाहः सार्व्वकालिक इत्येके॥*॥
विद्यारम्भस्य शुक्लपक्षकर्त्तव्यता यथा। मदन-
पारिजाते।
"रवेर्गुरोर्भृगोर्लग्ने तनुस्थैर्वा शुभैर्युतः।
शुक्लैकेन्दुशुद्धौ च विद्यारम्भः प्रशस्यते॥"*॥
पुष्करिण्यारम्भस्य शुक्लपक्षकर्त्तव्यता यथा।
मत्स्यपुराणे।
"प्राप्य पक्षं शुभं शुक्लमतीते चोत्तरायणे।"
इत्यादि॥
देवप्रतिष्ठायां शुक्लपक्षकर्त्तव्यता यथा। तत्र-
प्रकरणतत्त्वे।
"प्रतिष्ठा सर्व्वदेवानां कैश्चित्तस्य विशेषतः।
उत्तरायण आपन्ने शुक्लपक्षे शुभे दिने॥"
यज्ञारम्भयज्ञप्रवेशयोः शुक्लपक्षकर्त्तव्यता यथा।
मत्स्यपुराणे।
"शुक्लपक्षे भवेत् सौख्यं कृष्णे तस्करतो भयम्॥"
इति ज्योतिस्तत्त्वम्॥
नवान्नप्राशस्य शुक्लपक्षकर्त्तव्यता यथा।
आश्विनाधिकारे।
"शुक्लपक्षे नवं धान्यं पक्वं ज्ञात्वा सुशोभनम्।
गच्छेत् वेणौ विधानेन गीतवाद्यपुरःसरम्।
तेन देवान् पितॄंश्चैव तर्पयेदर्चयेत्तथा॥"
अपि च।
"दृष्टिके शुक्लपक्षे तु नवान्नं भक्षयते बुधैः॥"
इति तिथ्यादितत्त्वम्॥
शुक्लपुष्पः, पुं, (शुक्लं पुष्पमस्य।) कुन्दवृक्षः।
कुन्दपुष्पवृक्षः। मरुवकः। इति रत्नमाला॥
श्वेतकुसुमयुक्ते, त्रि॥
शुक्लपुष्पा, स्त्री, (शुक्लं पुष्पमस्याः।) नागदन्ती।
श्वेतकुसुमी। इति रत्नमाला॥
शुक्लपुष्पी, स्त्री, (शुक्लं पुष्पमस्याः। ङीष्।)
नागदन्ती। इति राजनिर्घण्टः॥
शुक्लपृष्ठकः, पुं, (शुक्लं पृष्ठं यस्य। कन्।) सिन्धुक-
वृक्षः। इति शब्दचन्द्रिका॥ श्वेतवर्णपृष्ठयुक्ते,
त्रि॥
शुक्लबलः, पुं, शिवविशेषः। यथा,—
"वासुदेवो यमो ब्रह्मा नव शुक्ला बलास्त्वमी।
अचलो विमलो भद्रः सुप्रभश्च सुदर्शनः।
आनन्दो नन्दनः पद्मो रामो विष्णुश्चिरन्तनी॥"
इति हैमचन्द्रः॥
शुक्लमण्डलं, क्ली, (शुक्लं मण्डलम्।) चक्षुःश्वेत-
क्षेत्रम्। इति केचित्॥ श्वेतवर्णगोलवस्तु च॥
शुक्लरोहितः, पुं, (शुक्लः श्वेतवर्णो रोहितः।)
श्वेतरोहितवृक्षः। इति राजनिर्घण्टः॥ शुभ्र-
रोहितमत्स्यश्च॥
शुक्लला, स्त्री, (शुक्लं लातीति। ला+कः।)
उच्चटा। इति रत्नमाला॥ श्वेतदात्रि,
त्रि॥
शुक्लवर्गः, पुं, (शुक्लानां वर्गः समूहः।) श्वेतवर्ण-
सजातीयद्रव्यम्। यथा। शुभ्रशुक्तिकपर्दकादि।
इति राजनिर्घण्टः॥
शुक्लवायसः, पुं, (शुक्लो वायस इव।) बकः।
इति त्रिकाण्डशेषः॥ श्वेतकाकश्च॥
शुक्लशालः, पुं, (शुक्लः शाल इव।) गिरिनिम्बः।
इति राजनिर्घण्टः॥ श्वेतशालवृक्षश्च॥
शुक्ला, स्त्री, (शुक्लो वर्णोऽस्यस्या इति। अच्।
टाप्।) सरस्वती। इति त्रिकाण्डशेषः॥
शर्करा। इति शब्दचन्द्रिका॥ काकोली।
विदारी। खुरी। इति राजनिर्घण्टः॥ श्वेत-
वर्णा च॥
शुक्लाङ्गी, स्त्री, (शुक्लं अङ्गं यस्याः। ङीष्।)
शेफालिका। इति राजनिर्घण्टः॥ श्वेतावयव-
युक्ते, त्रि॥

शुक्लापाङ्गः, पुं, (शुक्लौ अपाङ्गौ यस्य।) मयूरः। इति हेमचन्द्रः॥ श्वेतवर्णनेत्रान्ते च॥ (यथा, मेघदूते। २३।
"शुक्लापाङ्गैः सजलनयनैः स्वागतीकृत्य केकाः
प्रत्युद्यातः कथमपि भवान् गन्तुमाशु व्यवस्येत्॥")

शुक्लाह्वं, क्ली, (शुक्लं अस्तम्।) अस्रशाकः। इति राजनिर्घण्टः॥

शुक्लार्म्म, [न्] क्ली, नेत्ररोगभेदः। यथा। अथ शुक्लभागजा रोगाः। तेषां नामानि सङ्ख्याञ्चाह।
"प्रस्तारिशुक्लार्बुदजाधिमांस-
स्नायुर्म्मसंज्ञाः खलु पञ्च रोगाः।
स्याच्छुक्तिका सार्ब्बुदपिष्टकाख्या
जालं शिराणां पिडिकाश्च तासाम्॥
रोगा बलासग्रथितेन सार्द्ध-
मेकादशोक्ताः खलु शुक्लभागे॥"
तेषु प्रस्तार्य्यर्म्मणो लक्षणमाह।
"प्रस्तार्य्यर्म्म तनुस्तीर्णं श्यावरक्तनिभं सितम्।"
तनुः पुत्तली। स्तीर्णं विस्तीर्णम्। श्यावरक्तमित्यत्र विकल्पो बोद्धव्यः॥ * ॥ शुक्लार्म्माह।
"सुश्वेतं मृदु शुक्लार्म्म शुक्लं तदर्द्धते चिरात्॥"
रक्तार्म्माह।
"पद्माभं मृदुरक्तार्म्म यन्मांसं चीयते सिते।"
पद्माभं वर्णेन रक्तमित्यर्थः। चीयते उपचीयते॥ अधिमांसार्म्माह।
"पृथु मृदधिमांसार्म्म बहुलञ्च यकृन्निभम्।"
पृथु विस्तीर्णम्। बहुलं पुरम्। यकृन्निभं दधत् कृष्णलोहितम्॥ * ॥ स्नायुर्म्माह।
"स्थिरं प्रसारि मांसाद्यं शुक्लं स्नायुर्म्म षण्णम्।"
स्थिरं कठिनम्। शुक्लं सावरहितम्॥ * ॥ शुक्तिमाह।
"श्यावाः स्युः पिप्पितनिभाश्च बिन्दवो यं शुक्लाभाः सितनिचिताः स शुक्तिसंज्ञः।"
श्यावा इत्यादिवर्णत्रये विकल्पो बोध्यः॥ * ॥ अर्ब्बुदमाह।
"एको यः शुक्लरुधिरप्रभस्तु बिन्दुः
शुक्लस्थो भवति तमर्ब्बुदं वदन्ति॥"
पिष्टकमाह।
"श्लेष्मणाऽतिकोपेन शुक्ले मांसं समुन्नतम्।
पिष्टवत् पिष्टकं विद्धि मलाक्तादर्शसन्निभम्॥"
पिष्टवत् श्वेतम्॥ * ॥ शिराजालमाह।
"जालाभः कठिनः शिरोरुरुः शिराणां सन्तानो भवति शिरादिजालसंज्ञः॥"
शिरादिजालसंज्ञः शिराजालसंज्ञः॥ * ॥ शिरापिडिकामाह।
"शुक्लस्थाः सितपिडिकाः शिराहता या-
स्ता विद्यादसितसमीपगाः शिराजाः।"
बलासग्रथितमाह।
"कांस्याभोऽतिदरुश्च वारिबिन्दुकल्पो
विज्ञेयो नयनसितेः बलाससंज्ञः।"
कांस्याभः स्वेन दृष्टान्तेन। अतिदरुः कठिनः। वारिबिन्दुकल्पः एतेन मनागुन्नतत्वं बोध्यते। बलाससंज्ञः बलासग्रथितसंज्ञः। क्वचिदेकदेशेनापि समुदायावगमात्। यथा भीमो भीमसेन इति। अतएव सुश्रुते। नामसंग्रहे बलासग्रथितपदं निर्दिष्टम्। इति भावप्रकाशः॥

शुक्लिमा, [न्] पुं. (शुक्लस्य भावः। शुक्ल+"वर्णदृढादिभ्यः ष्यञ् च।"५।१।१२३। इमनिच्।) शुक्लता। शुक्लशब्दादिमनुप्रत्ययेन निष्पन्नः॥

शुक्लोपला, स्त्री, (शुक्ल उपल इव आकृतिर्यस्याः।) शर्करा। इति रत्नमाला॥ * ॥ तप्रस्तरे, पुं॥

शुचिः, पुं. (शुच्यत्यनेनेति। शुच+"शुचिकुचिगुचिभ्यः किः।" उणा० ३।१५५। इति किः।) वायुः। तेजः। चित्रम्। इति संक्षिप्तसारोणादिवृत्तिः॥

शुङ्गः, पुं, वटवृक्षः। आम्रातकवृक्षः। इति मेदिनी॥ शूकः। शुँया इति भाषा। इति शूकशब्दार्थे मेदिन्युणादिकोषौ॥

शुङ्गा, स्त्री, (शुङ्गोऽस्त्यस्या इति। अच्। टाप्।) पर्कटीवृक्षः। इति मेदिनी॥ नवमल्लिकावृक्षः। इति हेमचन्द्रः॥ धान्यादिशूकश्च। शुँया यस्य प्रसिद्धिः॥ (यथा, सुश्रुते।४।२६।
"अश्वत्थफलमूलत्वक्शुङ्गासिद्धं पयो नरः।
पीत्वा सशर्करं क्षौद्रं क्षुधिक्ष इव भुञ्जति॥")

शुङ्गाकर्म्म, [न्] क्ली, पुंसवनसंस्कारविशेषः। यथा,
"अग्निस्तु मारुतो नाम गर्भाधाने विधीयते।
पुंसवने चन्द्रनामा शुङ्गाकर्म्मणि शोभनः॥
इति तिथ्यादितत्त्वम्॥

तत्कर्म्मानुष्ठानं यथा। शोभननामानमग्निं संस्थाप्य विरूपाक्षजपान्तां कृत्वाग्निकां समाप्य वटवृक्षस्य पूर्व्वोत्तरशाखायां फलयुगलशालिनीं क्षमिभिरनुपहतां वटशुङ्गां यवानां मायाषां वा चिभिश्चिभिर्गुच्छकैः सप्तवारान् सप्तभिर्मन्त्रैः क्षौमीयात्। सप्तानां मन्त्राणामृष्यादयः साधारणाः। प्रजापतिर्ऋषिः सोमवरुणवसुरुद्रादित्यमरुद्विश्वेदेवा देवता न्यग्रोधशुङ्गपरिक्रयणे विनियोगः। 'ॐ यद्यसि सौमी सोमाय त्वा राज्ञे परिक्रीणामि। इति गुडकलयेण एकं परिक्रयणम्॥ यद्यसि वारुणी वरुणाय त्वा राज्ञे परिक्रीणामि। इति गुडकलयेण द्वितीयं परिक्रयणम्॥ यद्यसि वसुभ्यो वसुभ्यस्त्वा राज्ञे परिक्रीणामि। इति गुडकलयेण तृतीयं परिक्रयणम्॥ तद्यसि रुद्रेभ्यो रुद्रेभ्यस्त्वा राज्ञे परिक्रीणामि। इति गुडकलयेण चतुर्थं परिक्रयणम्॥ यद्यसि आदित्येभ्य आदित्येभ्यस्त्वा राज्ञे परिक्रीणामि। इति गुडकलयेण पञ्चमं परिक्रयणम्॥ यद्यसि मरुद्भ्यो मरुद्भ्यस्त्वा राज्ञे परिक्रीणामि। इति गुडकलयेण षष्ठं परिक्रयणम्॥ यद्यसि विश्वेभ्यो देवेभ्यो विश्वेभ्यो देवेभ्यस्त्वा राज्ञे परिक्रीणामि। इति गुडकलयेण सप्तमं परिक्रयणम्॥ ततः क्रीतां वटशुङ्गां अनेन मन्त्रेण दक्षादानयेत्। प्रजापतिर्ऋषिरोषधी देवता न्यग्रोधशुङ्गाच्छेदने विनियोगः। ओषधयः समनसो भूत्वा यस्या वीर्य्यं समाधत्त इयं कर्म्म करिष्यति। ततस्तां वटशुङ्गां लक्षीन वेष्टितामन्तरीक्षेणानीय अन्तरीक्षे स्थापयेत्। ततः शतशोभननाम्नो अग्नेरुत्तरतः प्रज्वालितशिखायां ब्रह्मचारी कुमारी भगवती वा श्रुतस्वाध्यायशीलो वा ब्राह्मणः आचारतो गोहारजलेनानाहृतलोष्ट्रेण पुनः पुनः पेषयेत्। ततोऽग्नेः पश्चिमतः उत्तराग्रेषु कुशेषु पश्चिमाभिमुखीं वधूं पूर्व्ववदागतमस्तकां कृत्वा पृष्ठदेशे स्थितः पतिर्दक्षिणपाणिरङ्गुष्ठानामिकाभ्यां वस्त्रवद्धां पेषितवटशुङ्गां गृहीत्वा गर्भवत्या दक्षिणनासाविवरे शुङ्गारसं निक्षिपति अनेन मन्त्रेण। प्रजापतिर्ऋषिरनुष्टुप् छन्दोऽग्नीन्द्रदक्षसुतयो देवता न्यग्रोधशुङ्गारसस्य दाने विनियोगः।
पुमानग्निः पुमानिन्द्रः पुमान् देवो दक्षसुतः।
पुमांसं पुत्रं विन्दस्व तं पुमाननुजायताम्॥
ततो महाव्याहृतिहोमं कृत्वा प्रादेशप्रमाणां घृताक्तां समिधं तूष्णीमग्नौ हुत्वा प्रकृतं कर्म्म समाप्य उदीच्यं गार्ह्यायनहोमादिवामदेश्यगानान्तं कर्म्म समाप्य कर्म्मकारयित्रब्राह्मणाय दक्षिणां दद्यात्। इति भवदेवः॥

शुङ्गी, [न्] पुं, (शुङ्गा अस्त्यस्येति। शुङ्गा+इनिः।) प्लक्षवृक्षः। वटवृक्षः। इति जटाधरः॥ शुङ्गाविशिष्टे, त्रि॥

शुच, शौके। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) तालव्यादिः। शौचति। शौकः पुत्रादेरदर्शनाद्दुःखानुभवः। किं शौचतेहाभ्युदये वतास्मानिति भट्टिः। प्रियतमा मां शौचते शौचते। इति महानाटकम्। गमशकतानित्यत्वादात्मनेपदम्। इति दुर्गादासः॥

शुच, इर् य ण ई शौचे। विशरणे। क्लेदे। इति कविकल्पद्रुमः॥ (दिवा०-उभ० क्लेदे शौचे च अक०-अन्यत्र सक०-सेट्। निष्ठायां अनिट्।) शौचं शुद्धिः। विशरणं विभेदः। क्लेदः आर्द्रभावः। इर् अशुचत् अशौचीत्। य ण, शुध्यते लोकः स्नानात्। शुध्यति मार्ज्जनात् वाणः। शुध्यति यज्ञमन्त्रसा। ई, शुक्तः। शुचि र पूतीभावे इति प्राचः। रमानाथस्तु एतद्धातूंश्चादितानर्थान् व्याख्याति। इति दुर्गादासः॥

शुच्या, स्त्री, (शुच शौके+क्विप्। पक्षे टाप्।) शोकः। इति शब्दरत्नावली॥

शुचिः, पुं, (शुच्यति अनेनेति। शुच+"इगुपधात् कित्।" उणा० ४।११८। इति इन्। सच कित्।) अग्निः। (यथा, भागवते। ४।२४।३।
"पावकः पवमानश्च शुचिरित्यग्नयः पुरा।
वसिष्ठशापादुत्पन्ना पुनर्योगगतिं गताः॥")
चित्रकवृक्षः। आषाढ़मासः। शुक्लवर्णः। शृङ्गाररसः। इत्यमरः॥ शौण्डः। शुद्धमन्त्री। ज्येष्ठमासः। इति मेदिनी॥ सौराग्निः। यथा,
"पावकः पवमानश्च शुचिरित्यग्नयस्त्रयः।
निर्मथ्यः पवमानः स्यात् वैद्युतः पावकः स्मृतः॥

ब्रह्मणो तपते सूर्य्यः शुचिरग्निस्तथौ स्मृतः।
तेषान्तु वंशतावन्ये चत्वारिंशत्तु पञ्च च॥
पावकः पवमानश्च शुचिस्तेषां पिता च यः।
एते चैकोनपञ्चाशद्वह्नयः परिकीर्त्तिताः॥"
इति कौर्म्मे १२ अध्यायः॥

सूर्य्यः। यथा,—
"तपनस्तापनश्चैव शुचिः सप्ताश्ववाहनः॥"
इति आग्नेयपुराणम्॥

चन्द्रः। शुक्रः। ब्राह्मणः। इति केचित्॥
(अत्रिकस्य पुत्रविशेषः। यथा, भागवते। ६। २४। १६।
"कुक्कुरो भजमानश्च शुचिः कम्बलबर्हिषः॥"
कार्त्तिकेयः। इति महाभारतम्। ३।२३१।४०॥)

शुचिः, स्त्री, (शुच+इन्।) कश्यपपत्न्याः स्नाम्नायाः सुता। यथा,—
"षट् सुताश्च महासत्त्वास्ताम्नायाः परिकीर्त्तिताः।
शुकी श्येनी च भासा च सुग्रीवी शुचिगृध्रिका॥"
इति गारुड़े ६ अध्यायः॥

शुचिः, त्रि, (शुच+इन्।) शुक्लगुणविशिष्टः। इत्यमरः॥ शुद्धः। (यथा, महाभारते। १। १२८। ४६।
"क्रीड़ावसाने ते सर्व्वे शुचिवस्त्राः स्वलंकृताः॥")
व्यतुषहतः। इति मेदिनी॥ * ॥ परस्वर्णस्पर्शे हस्तप्रक्षालनात् शुचिर्यथा,—
"दैवात् परस्वियं दृष्ट्वा विरमेद् यो हरिं स्मरन्।
स्पृष्ट्वा परसुवर्णञ्च हस्तप्रक्षालनात् शुचिः॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ६५ अध्यायः॥
(निरपराधी। यथा, महाभारते। १।१४६।१४।
"अहो धिक् धृतराष्ट्रस्य बुद्धिर्नास्ति समञ्जसी।
यः शुचीन् पाण्डुदायादान् दाहयामास बालवत्॥")

शुद्धान्तःकरणः। यथा, मनुः। ७। ३८।
"वृद्धांश्च नित्यं सेवेत विप्रान् वेदविदो शुचीन्।
वृद्धसेवी हि सततं रक्षोभिरपि पूज्यते॥")

शुचिता, स्त्री, (शुचेर्भावः। शुचि+तल्।) शुचित्वम्। यथा,—
"शौचं नाम गुणस्तवैव सहजः स्वाभाविकी स्वच्छता
किं ब्रूमः शुचितां भवन्ति शुचयः सर्ज्जेन यस्यापरे।
किंवान्यत् कथयामि ते स्तुतिमदं त्वं जीवितां जीवनं
त्वय्येवोचितमर्थिने यदसि पयः कर्त्तुं निषेद्धुं क्षमः॥"
इति लक्ष्मणसेनः॥

शुचिद्रुमः, पुं, (शुचिः पवित्रो द्रुमः।) अश्वत्थवृक्षः। इति राजनिर्घण्टः। शुद्धवृक्षश्च॥

शुचिव्रतीः, पुं, (शुचिं व्रतयतीति। व्रत+णी+क्विप्।) आचमनम्। यथा,—
"आचामः स्यादाचमनमुपस्पर्शः शुचिव्रतीः।"
इति शब्दरत्नावली॥

शुचिमल्लिका, स्त्री, (शुचिर्मल्लिका।) नवमालिका। इति राजनिर्घण्टः॥

शुचिरोचिः, [स्] पुं, (शुचिः शुक्लं रोचिः किरणो यस्य।) चन्द्रः। इति केचित्॥ शुक्लकिरणे, त्रि॥

शुच्य, ई अभिषवे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सक० च-सेट्। निष्ठायामनिट्।) तालव्यादिः। पञ्चमस्वरी। तालव्यवर्गाद्योपधः। ईं, शुक्तः। यद्वा, यान्तोऽयमिलेके। अभिषवः स्नानं मन्थनं पीड़नं सन्धानञ्च। इति दुर्गादासः॥

शुटीरता, स्त्री, वीर्य्यम्। इति त्रिकाण्डशेषः॥

शुटीर्य्यं, क्ली, वीर्य्यम्। इति शब्दरत्नावली॥

शुठ, खोटने। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सेट्।) खोटनमिह गत्याघातः। शौटति पयः सेतुना। इति दुर्गादासः॥

शुठ, ट खोटने। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सेट्।) खोटनमिह गत्याघातः। ट, शुण्ठति। इति दुर्गादासः॥

शुठ, ट कि प्रोथने। इति कविकल्पद्रुमः। (चुरा०पक्षे भ्वा०-अक०-सेट्।) ट, शुण्ठयति। कि, शुण्ठयति शुण्ठति पचमातपात्। रमानाथस्तु भ्वादिपक्षे शुष्कीभावे। चुरादिपक्षे शुष्कीकरणेऽयमिति मत्वा भ्वादौ शुण्ठति पचं चुरादौ शुण्ठयति काष्ठमातप इत्युदाहृतवान्। वस्तुतस्तु उभयत्र शुष्कीभावः अन्यथा भौवादिकस्यैव प्रेरणवाचित्वाच्चुरादिपाठोऽनर्थकः स्यात्। इति दुर्गादासः॥

शुठ, क आलस्ये। इति कविकल्पद्रुमः॥ (चुरा०-पर०-अक०-सेट्।) क, शौठयति देहः क्रियासु मन्दः स्यादित्यर्थः। इति दुर्गादासः॥

शुण्ठिः, स्त्री, (शुठि शौथने+इन्।) शुण्ठी। इत्यमरटीका॥ (यथा, आर्य्यासप्तशत्याम्। २०१।
"तस्मिन् गतार्द्रभावे वीतरसे शुष्कशुष्कल इव पुरुषे।
अपि भूतिभाजि मलिने नागरशब्दो विडम्बाय॥")

शुण्ठी, स्त्री, (शुण्ठि+वा ङीष्।) शुष्कार्द्रकम्। शुँट इति भाषा॥ तत्पर्य्यायः। महौषधम् २ विश्वम् ३ नागरम् ४ विश्वभेषजम् ५। इत्यमरः॥ शुण्ठिः ६ विश्वा ७ महौषधी ८। इति तट्टीका॥ इन्द्रभेषजम् ९ भेषजम् १०। इति शब्दरत्नावली॥ विश्वौषधम् ११ कटुग्रन्थिः १२ कटुभद्रम् १३ कटूषणम् १४ चौषर्णम् १५ शृङ्गवेरम् १६ कफारिः १७ चान्द्रकम् १८ शौषणम् १९ नागराह्वम् २०। अस्या गुणाः। कटुत्वम्। उष्णत्वम्। स्निग्धत्वम्। कफशोफानिलमूलवन्योदराध्मानश्वासप्लीहपदनाशित्वञ्च। इति राजनिर्घण्टः॥ * ॥ अपि च।
"शुण्ठी रूक्षोष्णवातघ्नी पाचनी कटुका लघुः।
स्निग्धोष्णा मधुरा पाके कफवातविबन्धनुत्॥
तृष्या स्वर्य्या च निःश्वासशूलकासहृदामयान्।
हन्ति हीपदशोथार्शः-आनाहोदरमारुतान्॥
आग्नेयगुणभूयिष्ठं तोयांशं परिशोषयेत्।
संरुणद्धि मलं तत्तु आहि शुण्ठ्यादयो यथा॥
विबन्धभेदिनी या तु सा कथं आहिणी भवेत्।
शुक्तिर्विबन्धभेदे स्यादयतो न मलपातने॥"
इति भावप्रकाशः॥

अन्यच्च।
"शुण्ठी तु कफवातघ्नी सक्षेहा लघुदीपनी।
विपाके मधुरा तृष्या हृद्योष्णा कटुरोचनी॥"
इति राजवल्लभः॥

शुण्ठ्यं, क्ली, शुण्ठी। इति शब्दचन्द्रिका॥

शुण्डः, पुं, (शुन गतौ+अमन्तात् डः।) मद्यनिर्झरः। इति हेमचन्द्रः॥ करिकरश्च॥ (यथा, महाभारते। ७। ३५। ३५।
"षण्ढाशुण्डान् विषाणाघ्नान् क्षुरमाक्षुण्णपादाङ्गान्।
शूरैर्निर्भिन्नधाराग्रैः शात्रवाणामशातयत्॥")

शुण्डकः, पुं, शौण्डिकः। इति शब्दरत्नावली। शुण्डवेणुः। इति शब्दमाला॥

शुण्डरोहः, पुं, (शुण्डवत् रोहतीति। रुह+अच्।) भूलताम्। इति राजनिर्घण्टः॥ पुस्तकान्तरे शृङ्गरोह इति पाठः॥

शुण्डा, स्त्री, (शुन्+ड। टाप्।) मद्यपानगृहम्। अम्बुहस्तिनी। वेश्या। सुरा। हस्तिहस्तः। इति मेदिनी॥ शुँड़् इति भाषा॥ नलिनी॥ इति विश्वः॥ कुट्टनी। इति शब्दमाला॥

शुण्डापानं, क्ली, (शुण्डाया आपानम्।) मद्यपानगृहम्। तत्पर्य्यायः। मदस्थानम्। इत्यमरः॥ मदस्थलम्। इति शब्दरत्नावली॥

शुण्डारः, पुं, (शुण्डां रातीति। रा+कः।) शौण्डिकः। इति शब्दरत्नावली॥ (ह्रस्वा शुण्डा। "कुटीशमीशुण्डाभ्यो रः।" ५। ३। ८८। इति रः। स्वल्पशुण्डा। इति सिद्धान्तकौमुदी॥)

शुण्डालः, पुं, (शुण्डेन अलतीति। अल पर्य्याप्तौ+अच्।) हस्ती। इति धनञ्जयः॥

शुण्डिका, स्त्री, अलिजिह्वा। इति केचित्॥ शुण्डाशब्दार्थाण्येया॥

शुण्डिमूषिका, स्त्री, (शुण्डिनी शुण्डविशिष्टा मूषिका।) छुछुन्दरी। इति राजनिर्घण्टः॥

शुण्डी, [न्] पुं, (शुण्डा अस्त्यस्येति। शुण्डा+इनिः।) शौण्डिकः। इति शब्दरत्नावली॥ हस्ती च॥

शुण्डी, स्त्री, हस्तिशुण्डीवृक्षः। इति राजनिर्घण्टः॥

शुतुद्रिः, स्त्री, शतद्रुनदी। इत्यमरटीकायां भरतः॥

शुतुद्रुः, स्त्री, शतद्रुनदी। इति भरतद्विरूपकोषः॥

शुद्धं, क्ली, (शुध+क्तः।) सैन्धवम्। मरिचम्। इति राजनिर्घण्टः॥ मरिचपर्य्याये स्वयं यक्ष्यिते तदनुसन्धेयम्॥

शुद्धः, त्रि, (शुध+क्तः।) केवलम्। (यथा, मनुः। ६। २०६।
"नक्षत्रागमेदकं ब्रूयादपसु शुद्धवधेन वा।
तद्दापि प्रतिसंकुर्य्यात् दाप्यस्तूत्तमसाहसम्॥")
निर्दोषः। (यथा, वृहत्संहितायाम्। ४६। ४।
"सर्व्वे च शुद्धकाञ्चनविनिर्म्मिताः श्रेयसो
दृष्टेः॥")
पवित्रः। इति मेदिनी॥ (उज्ज्वलः। यथा, रघुः। १। ४६।
"काम्यभिक्षा तयोरासीत् व्रजतोः शुद्ध-
वेश्मयोः॥")
शुक्लः। इति धरणिः॥ रागान्तरामिश्रितरागः। इति संगीतशास्त्रम्॥ * ॥ शरीराशुद्धताकारणं यथा,—
श्रीनारद उवाच।
"मानवानां द्विजादीनां शरीरस्यापवित्रता।
भवेत् केन प्रकारेण कथ्यतां तत् सदाशिव॥
सर्व्ववेदपुराणादिशास्त्रज्ञानां द्विजन्मनाम्।
जितेन्द्रियस्मृतिविदां तपोः कथय पूततां॥
सदाशिव उवाच।
शृणु देवापवित्रत्वं विप्रादीनां यतो भवेत्।
सर्व्वं शृणु तत् सर्व्वं नराणामानुपूर्व्विकम्॥
जातके मृतकेस्नाते जलौकोभिः चते तथा
अपवित्रो द्विजादीनां देहः सन्ध्यादिकर्म्मसु॥
अपूतत्वगुरुत्वर्गं नरो मूत्रपुरीषयोः।
अशुध्यशर्गने चैव व्रणस्रवणयादिषु॥
रक्तपाते नखच्छेददन्तखड्गादिभिः चते।
विप्रादेरशुचिः स्नायः शस्त्राद्यैः कण्टकादिभिः॥
शवा एवाशनोच्छिष्टेऽपवित्रः क्षतमैथुने।
श्रवणे ब्राह्मणादीनां शरीरं क्षुरकर्म्मणि॥
ज्वरादिभिश्चतुःषष्टिरोगैर्युक्तद्विजन्मनाम्।
वपुरप्रयतं पूजादानहोमजपादिषु॥
धूमोद्गारे यमी आद्यपतितान्नादिभोजने:
तथा च रेतःस्खलने सर्व्वदेहापवित्रता॥
अपवित्रं द्विजादीनां वपुः स्नानाच्छुद्ध्यति।
सर्व्वेषामशौचानां तपोः सन्ध्यादिकर्म्मसु॥"
इति पाद्मे उत्तरखण्डे १६ अध्यायः॥
शुद्धकक्षः, पुं, (शुद्धा कक्षा यस्य।) गर्दभः। इति त्रिकाण्डशेषः॥ अपवित्रकक्षायुक्ते, त्रि॥
शुद्धदन्त, त्रि, शुद्धा दन्ता यस्य सः। ("अयान्त-शुद्धभद्रशुभवरादेभ्यश्च।" ५। ४। १४५। इति दन्तस्य दादेशः।) शुद्धदन्तयुक्तः। यथा,—
"अते सक्तिन् अस्तशुचिः शुद्धदन्तावलः स्त्रियो।
संपूर्णोऽमालावान् धारयो रूपसागुनः॥"
इति भट्टौ। ५। ६१॥
शुद्धमतिः, पुं, (शुद्धा मतिर्यस्य।) चतुर्विंशतिभूताद्यैश्वर्यसंख्याविशेषः। इति हेमचन्द्रः॥ (शुद्धा मतिर्यस्य।) पवित्रबुद्धौ स्त्री। शुद्धमति, त्रि। (यथा, हितोपदेशे। १। ८०।
"उपकारिणि विश्रब्धे शुद्धमतौ यः समाचरति
पापम्।
तं जनमसत्यसन्धं भगवति वसुधे कथं वहसि॥")
शुद्धमांसं, क्ली, (शुद्धं मांसं यस्य।) मांसशुद्धिविशेषः। यथा,—
"पाकपात्रे घृतं दत्त्वात्तैलं वा तदभावतः।
तत्र क्षिप्त्वा हरिद्राञ्च भर्ज्जयेत्तदनन्तरम्॥
छागादेरस्थिरहितं मांसं तत् खण्डखण्डितम्।
धौतनिर्गालितं तस्मिन् घृते तद्भर्ज्जयेच्छनैः॥
सिद्धयोग्यं जलं दत्त्वा लवणञ्च पचेत् ततः।
सिद्धे जलेन संपिष्य वेसवारं परिक्षिपेत्॥
द्रव्याणि वेसवारस्य नागवल्लीदलानि हि।
तण्डुलाञ्च लवङ्गानि मरिचानि समाचरेत्॥
अनेन विधिना सिद्धं शुद्धमांसमिति स्मृतम्॥
शुद्धमांसं परं वृष्यं बल्यं रुच्यञ्च दीपनम्।
त्रिदोषशमनं श्रेष्ठं दीपनं धातुवर्द्धनम्॥"
इति भावप्रकाशः॥
शुद्धवल्लिका, स्त्री, (शुद्धा वल्लिका लता।) गुडूची। इति शब्दचन्द्रिका॥ पवित्रलता च॥
शुद्धान्तः, पुं, (शुद्धाः अन्तो यस्य। शुद्धा रक्षकाः अन्ते यस्य इति वा।) अन्तःपुरम्। (यथा, कुमारे। ६। ५२।
"विधिप्रयुक्तसत्कारैः स्वयं मार्गस्य दर्शकः।
स तैराक्रमयामास शुद्धान्तं शुद्धकर्म्मभिः॥")
नृपस्यासर्व्वगोचरकक्षान्तरम्। इत्यमरभेदिन्यौ॥ राजयोषित्। इत्यजयः॥ (यथा, नैषधे। ३। ६३।
"शुद्धान्तसंभोगनितान्ततुष्टे
न नैषधे कार्य्यमिदं निगद्यम्।
अपां हि लक्षाय न वारिधारा
स्वादुः सुगन्धिः खदते तुषारा॥")
अशौचवान्। इति धरणिः।
शुद्धान्तपालकः, पुं, (शुद्धान्तं पालयतीति। पाल+ण्वुल्।) अन्तःपुररक्षकः। तत्पर्य्यायः। गृहद्वारिकः २ कञ्चारक्षकः ३ राजिधिष्ठकः ४। इति शब्दमाला॥ तस्य लक्षणं यथा,—
"वृद्धः कुलीनतः शक्तः पिङ्गलैनामकः शुचिः।
राज्ञामन्तःपराधज्ञो विनीतश्च तथेष्यते।"
इति मात्स्ये १८८ अध्यायः॥
शुद्धान्ता, स्त्री, (शुद्धान्तः आश्रयत्वेनास्त्यस्या इति। अच्। टाप्।) राज्ञी। यथा,—
"शुद्धान्तश्च विशङ्कन्ते शुद्धान्ता राजयोषितः।"
इति धरणिः॥
शुद्धापह्नुतिः, स्त्री, (शुद्धा अपह्नुतिः।) अलङ्कारविशेषः। यथा,—
"शुद्धापह्नुतिरत्यस्यारोपार्थो धर्म्मनिह्नवः।
नायं सुधांशुः किं तर्हि व्योमगङ्गाशरोरुहम्॥"
इति चन्द्रालोकः॥
शुद्धिः, स्त्री, (शुध+क्तिन्।) दुर्गा। यथा,—
"मारणाभिसरणादापि शोधयते च हि पातकात्।
तेन शुद्धिः समाख्याता देवी शबरनी स्मिता॥"
इति देवीपुराणे देवीनिरुक्ताध्यायः ४५॥

माज्जना। इति शब्दाधरः॥ वैदिककर्म्माहर्त्तृप्रयोजकसंस्कारविशेषः। यथा। शुद्धाशुद्धोः संस्काररूपत्वेन एकपुरुषस्यैकदोभयस्मिंस्तिर्घटते। अशुद्धेर्भावरूपत्वे शुद्धेरभावरूपत्वे नैतत् विरोधात्। अतएव शुद्धः।
"ततः आहमशुद्धौ तु कुर्य्यादेकादशे तथा।
कर्त्तुस्तात्कालिकी शुद्धिरशुद्धः पुनरेव सः॥"
अशुद्धौ चतुर्थाहादौ। कथमशुद्धौ आहं कालाशौचस्याधिकारिविशेषणत्वादत आह कर्त्तुस्तात्कालिकीति। आहविधानाद्येषात्तन्मात्रनिष्ठा शुद्धिः कल्प्यते। स पुनरशुद्ध एव कर्म्मान्तर एव। इति आहविवेकः॥ एवं शुद्धेर्भावरूपत्वे अशौचस्य तदभावरूपत्वे विरोधः। तथात्वे अशौचसङ्करोऽपि न स्यात्। एकस्मिन् शुद्धभावरूपे अशौचे सत्यपरस्य तद्रूपस्य तदानीं तत्पुरुषीयशुद्धिरूपप्रतियोग्यन्तराभावादनुत्पत्तेः। तस्मात् शुद्धाशुद्धोर्भावरूपत्वम्। इति शुद्धितत्त्वम्॥ * ॥ अथाशौचशुद्धिः
"अथवृद्धिमदाशौचमर्द्धरात्रेण शुध्यति।
अथ चेत् पक्षमासौ रात्रिमर्द्धेन परतो भवेत्।
अथवृद्धिमदाशौचं सदा पूर्व्वेण शुध्यति॥"
अथवृद्धिमत्त्वन्तु। सपिण्डजननाशौचापेक्षया स्वपुत्रजननाशौचस्य सपिण्डमरणाशौचापेक्षया पितृमातृभर्तृमरणाशौचस्य। * ।
"जाते पुत्रे पितुः स्नानं सचैलन्तु विधीयते।
माता शुध्येदहश्चैव स्नानात् स्पर्शनं पितुः॥"
शुध्येत् स्पर्शनमात्रे उत्तरत्रापि तथा दर्शनात्। * ।
जननाशौचमध्ये तु यत्पुत्रं जननं स्यात् तदा पूर्व्वाशौचस्यागमे शुद्धिः रात्रिशेषे दिनद्वयेन प्रभाते दिनत्रयेण मरणाशौचमध्ये त्वतिमरणेऽप्येवमिति॥ * ॥
"यस्य यस्य तु वर्णस्य यद्यत् स्यात् पश्चिमं
त्वहः।
स तस्य वस्तुशिष्यं शुद्धशुद्धिं करोत्यपि॥
समाप्य दशमं पिण्डं यथाशास्त्रमुदाहृतम्।
आमाद्यश्चिसतो गत्वा प्रेतशुद्धे च यायजी॥
अन्यानामाश्रितानाञ्च स्नात्वा स्नानं करोत्यपि।
शुक्लवस्त्रोत्तरीयाश्च यथाशास्त्रं तथाचरन्नपि॥
गौरसर्षपकल्केन तिलतैलेन संयुतः।
शिरःस्नानं ततः कृत्वा सोदकेनाचम्य वाग्यतः॥
वासोयुगं नवं शुभ्रमक्षतं शुद्धमेव च।
गृहीत्वा गां सुवर्णञ्च मङ्गलानि शुभानि च।
कृत्वा संकोचमित्वा तु यथास्वं शुद्धो भवेन्नरः॥"
यदशुद्धिः प्राक्तनपात्रमाल्यपरित्याग उपलेपादिना। स्नानं त्यागादेर्न।
"अथाहः सु त्रिरात्रेषु सुस्नाताः शुक्लवाससः।
आमुखाद्विप्रसुखेन माल्यालङ्कारभाजनाः॥
स्नात्वाशौचस्य मध्ये तु दीर्घाशौचं भवेदृचदि।
न तु पूर्व्वेण शुद्धिः स्यात् स्नानादेरेव शुध्यति।
समानं सतु चाशौचं पूर्व्वेणैव विशुध्यति॥
यदि स्यात् सगरे सन्निधाने च स्नानभेदतः।
त्रिरात्रेणैव भवेच्छुद्धिरहः शेषे दिनाष्टकम्।

मरणोत्पत्तियोगे तु मरणाच्छुद्धिरिष्यते ॥*॥
अर्वाक् चरात्रात: स्त्रीणां यदि स्यात् गर्भ-
संस्रव: ।
तदा मासमशौचासां दिवसै: शुद्धिरिष्यते ॥
गर्भस्रुत्यां यथामासमृतौ त्वेष उदाहृत: ।
राजन्ये तु चतूरात्रं वैश्ये पक्षाच्छमेव च ॥
अहोभिर्दशभिः शूद्रस्य शुद्धिरेषा प्रकीर्त्तिता ।
रात्रिभिर्मासतुल्याभिर्गर्भस्रावे विशुध्यति ॥
रजस्युपरते साध्वी स्नानेन स्त्री रजस्वला ।
शुद्धा भर्त्तुश्चतुर्थेऽह्नि अशुद्धा देवपैत्र्ययो: ।
दैवे कर्म्मणि पैत्र्ये च पञ्चमेऽहनि शुध्यति ॥*॥
दत्ता नारी पितुर्गेहे म्रियते म्रियतेऽथवा ।
समशौचं चरेत् सम्यक् एकस्यानयवस्थिता ॥
सद्यस्तुवर्गलिङ्गेन शुध्येत्तु जनकस्त्रिभि: ।
यस्ते: सद्यशनं कुर्य्यात् त्रयगादीनि चैव हि ।
बान्धवो वा परो वापि स दशाहेन शुध्यति ॥
स्त्रीणामसंस्कृतानान्तु चाहात् शुध्यन्ति
बान्धवा: ।
यथोक्तेनैव कल्पेन शुध्यन्ति हि सनाभय: ॥*॥
यस्यास्थ्यभ्यन्तरे शूद्रे म्रियते बाल एव चाहं विदु: ।
अनतीते द्विवर्षे वै म्रते शुध्येत् पक्षभि: ॥
बालस्यन्तर्दशाहे तु प्रेतत्वं यदि गच्छति ।
सद्य एव विशुद्धि: स्यान्नाशौचं नैव सूतकम् ॥
तृणामक्षतचूड़ानामशुद्धिर्नैश्चिकी स्मृता ।
निकृत्तचूड़कानान्तु चिरात्स्यच्छुद्धिरिष्यते ॥*॥
दशाहेन सपिण्डास्तु शुध्यन्ति प्रेतसूतके ।
चिरात्तेषु सकुल्यास्तु स्नात्वा शुध्यन्ति
गोत्रजा: ॥
शुध्येद्विप्रो दशाहेन द्वादशाहेन भूमिप: ।
वैश्य: पञ्चदशाहेन शूद्रो मासेन शुध्यति ॥
दशमेऽहनि शूद्रस्य कार्य्यं संस्पर्शनं बुधै: ।
मासेनैव विशुद्धि: स्यात् सूतके सूतकेऽपि वा ॥
संस्थिते पश्चिमे रात्रिं दौष्टिके भस्मिनीभूते ।
संस्कृते तु चिराच्चं स्यादिति धर्म्मो व्यवस्थित: ॥
पित्र्येऽपरेह्नि स्त्रीणामसंस्कृतानान्तु कार्य्यं भवेत् ।
चिरात्तेषेव शुद्धि: स्यादित्याह भगवान् शिव: ॥
यदा भोजनकाले तु अशुचिर्भवति द्विज: ।
भूमौ निक्षिप्य तद्ग्रासं स्नात्वा चैव विशु-
ध्यति ॥*॥
चिकित्सको यत् कुरुते तदर्थेन न मुच्यते ।
तस्मात् चिकित्सकस्यार्थे शुद्धो भवति नित्यश: ॥
गर्भिणी सूतिका नक्तं कुमारी च रजस्वला ।
यदाशुद्धा तदान्येन कारयेत् क्रियते यदा ॥*॥
प्रेतीभूतं द्विजं विप्रो योऽनुगच्छति कामत: ।
स्नात्वा सचेलं सृष्ट्वाग्निं घृतं प्राश्य विशुध्यति ।
एकाहात् क्षत्रिये शुद्धिर्वैश्ये च स्नाहाहेन तु ।
शूद्रे दिवसयं प्रोक्तं प्राणायामशतं पुन: ॥*॥
नारं सृष्ट्वाग्निं सचेलं स्नात्वा विप्रो विशुध्यति ।
आचम्यैव तु नि:स्नेहं गोमूत्रयार्कमीक्ष्य वा ॥
अथवाग्निं दिवं प्रेतं विप्रो निर्हृत्य बन्धुवत् ।
विशुध्यति चिरात्तेषु मातुरामाश्च बान्धवात् ॥
यद्यन्नमपि तेषाञ्च स दशाहेन शुध्यति ।
अनदन्नन्नमश्नैव न चेत्तस्मिन् गृहे वसेत् ॥*॥
अस्थिसञ्चयनादर्वाक् यदि विप्रोऽग्नु पातयेत् ।
मृते शूद्रे गृहं गत्वा त्रिरात्रेण विशुध्यति ॥
अस्थिसञ्चयनादूर्द्धं यावन्मासं द्विजातय: ।
दिवसेनैव शुद्धि: स्यादासन्नं स्नानेन च ॥*॥
खट्वातेर्दिवसेनैव स्नाहात् क्षत्रियवैश्ययो: ।
सर्पं विनानुगमने शूद्रो नक्तेन शुध्यति ॥*॥
अजा गावो महिष्यश्च ब्राह्मणी च प्रसूतिका ।
दशरात्रेण शुध्यन्ति भूमिश्च नवोदकम् ॥*॥
उदक्या सूतिका वापि अन्यत्र संस्पृशेद्यदि ।
त्रिरात्रेणैव शुद्धि: स्यादिति स्नातस्तथोऽन्न-
वीत् ॥*॥
नवस्रोतजलं गावो महिष्यश्छागयोनय: ।
शुध्यन्ति दिवसेनैव दशभिर्नाच संशय: ॥
काले नवोदकं शुद्धं न पातयेत् तत्राहम् ॥"*
अथ द्रव्यशुद्धि: । ब्राह्मे ।
"सुवर्णरूप्यशस्त्राश्मपुस्तिरत्नमयानि च ।
कांस्यायस्ताम्ररैत्यानि त्रपुसीसमयानि च ॥
निर्लेपानि विशुध्यन्ति केवलेन जलेन तु ।
शूद्रोच्छिष्टानि शुध्यन्ति विधाचारात्म-
वारिभि: ॥
सूतिकाशवविण्मूत्ररजस्वलाहतानि च ।
प्रक्षेप्यानि तानग्नौ यच्च यावत् सहेदपि ॥"
रैत्यं पित्तलम् । त्रपु रङ्गम् । यत् पात्रं यावत्
कालमग्निं सहेत तत् पात्रं प्रक्षालनानन्तरं
तावत्तापनीयमित्यर्थ: ॥*॥ दक्षस्मृति: ।
"अम्भसा चैमरत्नाय:कांस्यं शुध्येत भस्मना ।
अम्लैस्ताम्रञ्च रैत्यञ्च पुन:पाकेन रत्नयम् ॥"
राजधर्म्मे ।
"पक्वलोच्छिष्टकांस्यं यत् गवाघ्रातमथापि वा ।
शाकभोच्छिष्टमपि च विशुध्येद्दशभिस्तु तत् ॥"
दशभिर्दिनैरिति शेष: । तथा च ।
"कांस्ये न धावयेत् पादौ यच्च स्यादपि भोजन-
मिति ।"
यत्र पात्रान्तरे भोजनं तत्र श्रुतस्यैव तस्य
वाक्यशेषात् कांस्यदृक्छुद्धि: ॥ ॥ बौधायन: ।
"भिन्नकांस्ये तु योऽश्नीयात् नद्यां स्नात्वा
जपेद्विज: ।
गायत्र्याश्चसहस्रन्तु एकभक्तस्तत: शुचि: ॥"
देवल: । ताम्ररजतसुवर्णास्फटिकानां भिन्न-
मभिन्नम् । इति भिन्नस्यापि न दोष इत्यर्थ: ॥*॥
विष्णु: । शारीरैर्मलै: सुराभिर्दग्धैर्वा यदुपहतं
तदत्यन्तोपहतं सर्व्वं लौहभाजनमग्नौ प्रक्षिप्तं
शुध्यते । मणिमयमशमयमलमयञ्च समराद्यं
मद्दीखननेन शङ्खदन्तास्थिमयञ्च तक्षणेन दारु-
मयं रज्जुमयं वस्त्रादिति । लौहपदं सुवर्णाद्य-
पलक्षणपरम् ॥*॥ मनु: ।
"त्रीणि देवा: पवित्राणि ब्राह्मणानामकल्पयन् ।
अदृश्यमद्भिर्निर्णिक्तं यच्च वाचा प्रशस्यते ॥"
अदृश्यमपि यत्तद्भ्रादिभिरज्ञातम् । अज्ञातत्व
यदा शुचि इति याज्ञवल्क्योक्तवाक्यात् ।
वाचेति उपलक्षणत्वात् प्रविष्टं लपतीति
ब्राह्मणैर्यदाचा प्रशस्यते इति शूलपाणिमट्टा-
महीप्राधायकुल्लूकभट्टौ ॥ ॥ प्रातातप: ।
"गोकुले कदुशालायां तैलयन्त्रेक्षुयन्त्रयो: ।
अमीमांस्यानि शौचानि स्त्रीषु बालातुरेषु च ॥"
मनु: ।
"मक्षिका विप्रुषश्छाया गौरश्व: सूर्य्यरश्मय: ।
रजो भूम्यनुरश्मिश्च सर्पो मेध्यानि निर्दिशेत् ॥"
बौधायन: ।
"अदुष्टा: सन्ततधारा वातोद्भूताश्च रेणव: ।
आकरा: शुचय: सर्व्वे वर्जयित्वा सुराकरम् ॥"
शङ्खलिखितौ । आकरद्रव्याणि प्रोक्षितानि
शुचीनि ॥ ॥ यम: ।
"आममांसं घृतं क्षौद्रं क्षेहाश्च फलसम्भवा: ।
म्लेच्छभाण्डस्थिता दुष्टा निष्क्रान्ता: शुचय:
स्मृता: ॥"
विष्णुधर्म्मोत्तरे ।
"मुखवर्णश्च गौ: शुद्धा मार्ज्जारश्चंक्रमे शुचि: ।
पुष्पाणाञ्च फलानाञ्च प्रोक्षणात् शुद्धिरिष्यते ॥"
अत्रि: ।
"मक्षिका: सन्ततधारा भूमिस्तोयं हुताशन: ।
मार्ज्जारश्चापि दर्व्वी च मारुतश्च सदा
शुचि: ॥"
बौधायन: । अनेकोदाहृते दारुणिले भूमिसने
दृष्टकाश्च सङ्कीर्णीभूता: इति । सङ्कीर्णीभूता:
परस्परसंसृष्टा: ॥ ॥ विष्णु: । प्रोक्षणेन पुनर्न
इति ॥ ॥ प्रातातप: ।
"तापनं घृततैलानां स्रावणं क्षीरसस्य च ।
तप्तात्तप्तघृतं शुध्येत् कठिनन्तु पयो दधि ।
अविलीनं तथा सर्पिर्विलीनं अप्रेक्षणे तु ॥"
अविलीनं कठिनम् । ॥ मनु: ।
"द्रव्याणाञ्चैव सर्व्वेषां शुद्धिरुत्प्लवनं स्मृतम् ।
प्रोक्षणं संहतानाञ्च दारवाणाञ्च तक्षणम् ॥"
दृष्टमूच्छिष्टाद्यप्यदोषे। उत्प्लवनं वस्त्रान्तर
निर्व्वापणेन कौटाद्यपनयनम् ॥ प्रातातप: ।
"क्षीराभिघ्रमपतिते: सूतिकोदक्यनास्तिके: ।
दृष्टं वा स्यात् यदन्नन्तु तस्य निष्कृतिरुच्यते ।
अभ्युक्ष्य किञ्चिदुद्धृत्य भुञ्जीतान्यविघ्रुष्टिन: ॥"*॥
देवल: ।
"चाण्डालेन शुना वापि दृष्टं हविरयज्ञियम् ।
विड़ालादिभिरुच्छिष्टं दुष्टमन्नं विवर्जयेत् ॥"
अन्यत्र स्थिरण्योदकसर्पादिति । ॥ मनु: ।
"अद्भिस्तु प्रोक्षणं शौचं वस्त्राणां धान्यवाससाम् ।
प्रक्षालनेन वस्त्राणामद्भि: शौचं विधीयते ॥"
शुद्धिरित्यनुवृत्तौ विष्णु: । गुड़ागामिक्षुविका-
राणां प्रभूतानां वायुस्पर्शनेन सर्व्वत्रवणागा-
क्षेति । ॥ अङ्गिरा: ।
"यथा यतस्ततो वापि शुद्धिं यान्ति नदीगता: ।
शूद्रादिप्रयतैर्व्यग्रं प्रविशन्तु सदा शुचि ॥"
प्रविष्टं स्नात्वापादकप्रतिमाद्यादिनेति शेष: ॥
"सकृत्पयं सकृद्दधं सेध्यक्षोयमपास्य तत् ।
प्रक्षिपेत् पयसायत्र यमलं सर्व्वशुद्धिदम् ।
अपास्य क्षुद्रपं सेध्यो यज्ञतोयेन्द्र एव वा ।

शिखमस्नाकोति । शुषि+"ऊषशुषिपुष्कमधो रः ।" ५।३।१००। इति रः।) विवरम् । वंश्यादित्वादम् । वरन्ध्रे, त्रि । इत्यमरः । (नाकाग्रः । इत्युज्ज्वलदत्तः । १ । ५२ ।)

शुषिरः, पुं, (शुषिरिलमस्नाकोति । शुषि+रः ।) सूषिकः । इति मेदिनी । अग्निः । इति विश्वः ।

शुषिरा, स्त्री, (शुषिर+टाप् ।) नदी । इति शब्दरत्नावलिः । नदीनामग्रत्यत्रयम् । इत्यमरः ।

शुषिरः, पुं, (शुष+"शुषादिभ्यः किन् ।" उणा० २ । ५७ । इति इरच् । स च किन् ।) वायुः । इत्युणादिकोषः ।

शुष्कः, त्रि, (शुष शोषे+क्तः । यथा, "सूत्रभृशुषिमुषिभ्यः कः ।" उणा० ३।३१। इति कक् ।) निर्जलः । शुकना इति भाषा । यथा,—

"शुष्कं पर्युषितं वापि नीतं वा दूरदेशतः ।
कुत्सितस्य सुखाद्भक्षं तद्भक्षं पापदं भवेत् ।"
इति रुद्रयामे उत्कलखण्डम् ॥

(निष्पयोजनम् । यथा, मनुः । ४ । १६८ ।
"शुष्कवैरं विवादञ्च न कुर्य्यात् केनचित् सह ।")

शुष्कपर्णं, क्ली, (शुष्कं पर्णम् ।) केरुरहितपत्रम् । वातपादिरोगिनपथ्याकम् । गालिता इति शुका इति च भाषा । तस्य गुणाः ।

"शुष्कपर्णं पयोभिन्नं पित्तश्लेष्मज्वरापहम् ।
मन्दं शुष्कपर्णं अलदोषनाशनं
विशेषतः पित्तकफज्वरापहम् ।
अरुच्य तस्यापि च पित्तदाहकं
गुरीषमं वह्निमयोगकारकम् ।"
इति राजवल्लभः ॥

शुष्कमांसकः, पुं. (शुष्को मांसः ।) वातपादिना निर्जलीकृतमांसः । शुकनो मास इति भाषा । तस्य गुणा मांसशब्दे दृश्याः ।

शुष्कमांसं, क्ली, (शुष्कं मांसम् ।) वातपादिना निर्जलीकृतमांसम् । तस्यगुणाः । उष्णम् २ वलकरम् ३ । इत्यमरः । वसुरा ३ शुष्कजी ५ । इति तट्टीका । अस्य गुणाः ।

"शुष्कामां दीर्घजं मांसं वातानां वलदं परम् ।
विशेषतस्तदुष्णाक्षं शुष्कं शूकरजं गुरु ।"
इति भावप्रकाशः ।

शुष्कवैरी, स्त्री, मालतीविशेषः । यथा,—

"अथिलश्च यथा वाणो यथा पूर्णो मधालसा ।
यथा रुधिरं पीतमन्यासां सदृशं यथा ।
सा चाखिलं क्षणेनैव करोति वासम् शुष्क-
वैरिणी ।
इति गरुडपुराणे १४८ अध्यायः ।

शुष्कशाक, त्रि, शुष्कमिश्रम् । इत्युज्ज्वलदत्तः । शुष्कशाकी । इत्यमरटीकायां भरतः ।

शुष्कशी, स्त्री, शुष्कमिश्रम् । मांसशाकम् । यथा,
"शुष्कशी शुष्कशाके स्यान्मांसशाकेऽपि केचित्
इत्यादि ।" इति शब्दरत्नावलौ भरतः ।

शुष्कशूकः, पुं, (शुष्को शूकः ।) अवशूकः । इति राजनिर्घण्टः ।

शुष्कशूकः, पुं, (शुष्को शूकः ।) किण्वः । इति विश्वप्रकाशः ।

शुष्कशूकः, पुं, (शुष्कं शूकं यस्य ।) यवतृणः । इति वैद्यकम् । सेचनद्रव्यावयवे, त्रि ।

शुष्कशूकी, स्त्री. (शुष्कशूकीव शूकानि यस्याः ।) गोधिका । इति शब्दचन्द्रिका ।

शुष्कशृङ्गं, क्ली, (शुष्कं शृङ्गम् ।) शुण्ठी । इति शब्दचन्द्रिका ।

शुष्कः, पुं, (शुष्यत्यनेनेति । शुष+"लषिशुषिरुचिभ्यः किन् ।" उणा० ३ । १२ । इति नः । स च किन् ।) सूर्य्यः । इत्युणादिकोषः । अग्निः । इति संक्षिप्तसारोणादिवृत्तिः । (वले, क्ली । इति निघण्टुः । २ । ८ ।)

शुष्कं, क्ली, (शुष्यत्यनेनेति । शुष शोषे+"अविसिविसिशुषिभ्यः किन् ।" उणा० १ । १४३ । इति मन् । स च किन् ।) तेजः । इति मेदिनी । पराक्रमः । इति हेमचन्द्रः ।

शुष्मः, पुं, (शुष्यत्यनेनेति । शुष+मन् ।) सूर्य्यः । इति मेदिनी । अग्निः । इति त्रिकाण्डशेषः । वायुः । यज्ञी । इति संक्षिप्तसारोणादिवृत्तिः । अग्निः । यथा । शुष्मोऽग्निरिति हुताशने, । इति शुभाङ्कः । इत्यमरटीकायां भरतः ।

शुष्म, [न्] क्ली, (शुष+मनिन् । संज्ञापूर्वकत्वात् न गुणः ।) तेजः । इति शटाधरः । सौख्यम् । इति हेमचन्द्रः ।

शुष्मा, [न्] पुं, (शुष्यत्यनेनेति । शुष शोषे+मनिन् ।) अग्निः । त्रिकटुकः । इत्यमरः । अदनोऽपि शुष्मीति सर्व्वस्वम् । इति भरतः ।

शूकः, पुं क्ली, (श्री तनूकरणे +"उलूकादयश्च ।" इति ऊकप्रत्ययेन साधुः ।) अङ्गतीक्ष्णाग्रम् । शुँया इति भाषा । तत्पर्य्यायः । किंशारुः २ । इत्यमरः । शुङ्गा ३ कोशी ४ । इति हेमचन्द्रः । दया । इति मेदिनी । सविषाक्षुद्रजन्तुभेदविशेषः । शूकप्रधानशिम्बिवृक्षिकरयोगः । तद्विवरणं यथा । अथ शूकदोषाधिकारः । तत्र शूकदोषस्य निदानमाह ।

"अकमाश्चिपथो हृद्धिं योऽभिधास्यति मूढधीः ।
आधमस्तस्य आयन्ते दश पादौ च शूकजाः ।"
अकमात् अदूषितदृष्टिक्रमात् । अदूषिता च दृष्टिः भूरिविकारजनकस्य शूकस्य योनिः । शूकजाः । शूको यत्रजन्तुः यविनो यवजन्तुविशेषः । स तु यवमक्षीजन्तुः । अन्यत्तुच्छ दलादिकः । तथा शूकप्रधानो शिम्बिवृक्षिकरो वातपित्तकफात्मको योगः शूक उच्यते । यथा,

"भल्लातकास्थिचूर्णकमयोरजयव-
मक्षीसमेतं मलिनात्मु सह वैमवेन ।
एतद्विदग्धगुडतैलघृतोपसृष्ट-
मश्नीयिं संक्षपयितुं विषमीक्षकेन ।
शूकं वदन्ति कुशलास्तदिहानुरूपं
दैवः प्रयोजयति यं स विषं प्रयोक्ति ।"
इत्यादि । एतं शूकदूषितभक्षणजनितदोषं शूकदोष इत्युच्यते । तस्य

"अभ्यगत्वा वरी कृष्णं मांसी सिंहीफलान्वितम् ।
चतुर्गुणेन दुग्धेन तिलतैलं विपाचयेत् ।
तत्तैलं मेढ्रवीजकर्णयोर्लिप्तविवर्द्धनम् ।"
ते च शूकदोषा दश पादौ च भवन्ति । * ॥
तेष्वादौ सर्षपिकामाह ।
"गौरसर्षपसंस्थाना शूकदुर्भगहेतुका ।
पिडिका श्वेतवर्णाभ्यां श्वेया सर्षपिका तु सा ।"
शूकदुर्भगहेतुका शूकनिमित्ता दुष्टयोनिनिमित्ता च । * ॥ अष्ठीलिकामाह ।
"कठिना विषमैर्भुग्नैर्व्यायुनाष्ठौलिका भवेत् ।"
अष्ठीला लोककारस्य भाषाविशेषः । निघाट इति लोके । तद्वत् कठिना इत्यष्ठौलिका । विषमैर्भुग्नैरिति वक्ष्यमाणशूकविशेषणम् । विषमैर्भुग्नैः । भुग्नैः वक्रैः ॥ * ॥ अथितमाह ।
"शूकैर्यत्र पूरितं शूकवत् अथितं नाम तत् कफात् ।"
यस्मिन् सदा शूकैः पूरितं तदथितत्वादथितम् ॥ * ॥ कुम्भिकामाह ॥
"कुम्भिका रक्तपित्तोत्था जम्बुकास्थिनिभा सिता ।"
कुम्भिका कुम्भतुल्यफलत्वात् ॥ * ॥ अलजीमाह ।
"अलजी स्यात्तथा याहक् प्रमेहपिडिकालजी ।
सा च रक्ता सिता स्फोटदारुणा कथिता च सा ॥"
एषा रक्तपित्तनिमित्ता ज्ञेया ॥ * ॥ ग्रन्थिमाह ।
"ग्रन्थितं पीडितं यत्तु संरब्धं वातकोपतः ।
पाणिभ्यां भृशसंरूढं संरूढपिडिका भवेत् ॥"
शूकदोषे जाते पाणिभ्यां भृशसंरूढे पिच्यते लिप्ते च यत्रापि वातकोपतः स्वयमुपशमते ॥ * ॥
अवमन्थमाह ।
"दीर्घा वाऽपि पिडिका दीर्घते मध्यमस्तु याम्
सोऽवमन्थः कफात्मभ्यां वेदना सोमदर्शनम् ॥
दीर्घा दीर्घाकुराः ॥ * ॥ पुष्करिकामाह ।
"पिडिका पिडिकाश्यामा पित्तशोणितसम्भवा ।
पद्मकर्णिकसंस्थाना ज्ञेया पुष्करिकेति सा ।"
पिडिकाश्यामा क्षुद्रपिडिकाश्यामा । अतएव पद्मकर्णिकसंस्थाना ॥ * ॥ सर्षपादिनाह ।
"सर्षपादिषु जनयेच्छोणितं शूकदूषितम् ।"
अत्र सर्षपादिषु सर्षपाकारमेव शूकत्वम् ॥ * ॥ उत्तमाह ।
"सूक्ष्मसामोपमा रक्ता रक्तपित्तोद्भवा च सा ।
सोमोपमाभा पिडिका शूके सौम्यसमुद्भवा ।"* ॥
अलोमकमाह ।
"छिद्रैरनुसमैर्भिन्नं चिरं यत्र प्रसर्पणम् ।
वातश्लेष्मान्वितो व्याधिर्ज्ञेयः शूलोमकः ।
शूलोमकं वातश्लेष्मभ्यां शूलोमकः ।"* ॥
अलजाकमाह ।
"वातश्लेष्मयुते छिद्रैरजावत्पाको रुजावहः ।"
अजवत् छिद्रं अजावत् ॥ * ॥ रोमशमाह ।
"शूकैः स्फोटैः सरक्तैश्च पिडकाभिः प्रपीडितम् ।

लिङ्गं वासरजनीषा ज्ञेयं तत् शीर्णितार्बुदम् ।" वासरजः स्फोटकाधिस्थाने वेदना ॥ ॥ मांसार्बुदमाह ।
"मांसदुष्टा विजानीयादर्बुदं मांससम्भवम् ।" मांसपाकमाह ।
"शीर्यन्ते यस्य मांसानि यस्य सर्व्वाश्च वेदनाः । विद्यात्तं मांसपाकन्तु सर्व्वदोषकृतं भिषक् ॥" शीर्यन्ते गलन्ति । सर्व्ववेदनाः वातपित्तकफजाः ॥ विद्रधिमाह ।
"विद्रधिं सन्निपातेन यथोक्तमभिनिर्दिशेत् । उक्तं सान्निपातिकविद्रधितुल्यं कथयेत् ॥ ॥ तिलकालकमाह ।
"कृष्णानि चित्राण्यथवा शूकानि सविषाणि तु । पतितानि पवन्यासु मेढ्रं निरवशेषयेत् ॥ कलानि भूत्वा मांसानि शीर्यन्ते यस्य देहिनः । सन्निपातसमुत्थांश्च विद्यात्तं तिलकालकान् ॥" चित्राणि नानावर्णानि । शूकानि शूकवत्राणि । मक्षाः क्षोद्रलोनिवत् । सविषाणि सविषशूकाग्रवत्तुल्यविषोपेतानि । शीर्यन्ते गलन्ति । क्षणानिलतुल्यत्वात् तिलकालकाः ॥ ॥ व्यसाध्यमाह ।
"तत्र मांसार्बुदं यत्र मांसपाकश्च यः स्मृतः । विद्रधिश्च न सिध्यन्ति ये च स्युस्तिलकालकाः ॥" अथ शूकदोषस्य चिकित्सा ।
"शूकदोषेषु सर्व्वेषु विधिर्यो कारयेत् क्रियाम् । श्लोकाभिर्हरिदश्वस्य रेचयेत्तेषु भोजयेत् ॥ गुग्गुलुं पाचयेच्चापि त्रिफलाक्वाथसंयुताम् । क्षौद्रेण लेपसेकाभ्यां शीतानेव हि कारयेत् ॥ दार्व्वीसुरसयष्ट्याह्वैर्घृतमभ्यज्य सर्पिषा । सम्यक् तैलमभ्यङ्गान्मेढ्रोगं विनाशयेत् ।" सुरसः तुलसी । दार्व्वीतैलम् ।
"रसाञ्जनं साक्षयमेकमेव प्रलेपमात्रेण नयेत् प्रशान्तिम् । सपूतिपूयव्रणशोफकण्डू- श्लान्वितं सर्व्वमनङ्गरोगम् ॥"
साक्षयमित्यनङ्गरोगस्य विशेषणम् । अनङ्गरोगस्य मर्म्मापि दूरीकरोति । इति शूकदोषाधिकारः । इति भावप्रकाशः ॥

शूकः, पुं, (शूकेन कं जलं करोति । कै + कः ।) प्रावटः । रसः । इति मेदिनी ॥

शूककोटः, पुं, (शूकविशिष्टः कीटः ।) शूकयुक्तकीटविशेषः । घुंयापोका इति भाषा । तत्पर्य्यायः । दृष्टिकः २ । इत्यमरः ॥ शूककीटकः ३ । इति शब्दरत्नावली ॥

शूककीटकः, पुं, (शूककीट + स्वार्थे कन् ।) शूककीटः । इति शब्दरत्नावली ॥

शूकधान्यं, क्ली, (शूकप्रधानं धान्यम् ।) धान्यविशेषः । शूकी इति हिन्दी भाषा । तत्पर्य्यायः । शूकम् २ शूकधान्यम् ३ कनिष्ठकम् ४ । अस्य गुणः ।
"दुर्जरत्वं पयूषाच्च शूकभावे विशेषतः ।" इति राजनिर्घण्टः ॥
दुर्जरत्वमाश्वे पचेदित्यर्थः इति च पाठः ।

शूकधान्यं, क्ली, (शूकविशिष्टं धान्यम् ।) शूकयुक्तशस्यमात्रम् । न तु धान्यवर्गादिः । यथा,—
"व्रीह्यादिकं यदिह शूकसमन्वितं स्यात् तत् शूकधान्यमथ सूक्ष्मशुष्कादि । शिम्बीनिगूढमिति तत् प्रवदन्ति शिम्बी- धान्यं त्रयोऽत्र यमयो त्रयधान्यमन्यत् ॥"
अस्य गुणाः ।
"तत्र त्रिदोषशमनं लघु शूकधान्यं तेजोबलातिशयवीर्य्यविवृद्धिदायि । देशे देशे शूकधान्येषु संख्या ज्ञातुं शक्या नेह तेषां वर्णनं वा ॥"
इति राजनिर्घण्टः ॥
अपि च ।
"शूकधान्यं श्रमीधान्यं समातीतं प्रशस्यते । परतो वातकृद्रूक्षं प्रायेणाभिनवं गुरु ॥"
इति राजवल्लभः ॥
अन्यच्च ।
"यवस्तु सितशूकः स्यात् निःशूकोऽसितयवः स्मृतः । तोकलश्च स हरितस्तत्र स्वल्पश्च कीर्त्तितः ॥ यवः कषायो मधुरः शीतलो लेखनो लघुः । श्लेष्मपित्तविषश्वास- कासमेदःप्रणाशनः ॥ पीनसश्वासकासोरुस्तम्भोद्दितलटप्रणुत् । यस्मादसितयवो न्यूनस्तोको न्यूनतरस्ततः ॥"
इति भावप्रकाशः ॥

शूकपिण्डिः, स्त्री, (शूकैः पिण्डते इति । पिण्ड संघातौ + इन् ।) शूकशिम्बिः । इति शब्दमाला- शब्दरत्नावल्यौ ॥

शूकपिण्डी, स्त्री, (शूकपिण्डि + वा ङीष् ।) शूकशिम्बिः । इति शब्दमालाशब्दरत्नावल्यौ ॥

शूकरः, पुं, (शूकं तद्वल्लोम राती इति । रा + कः ।) पशुविशेषः । शुअर इति भाषा । तत्पर्य्यायः । वराहः २ सूकरोमा ३ रोमशः ४ किरिः ५ चक्रदंष्ट्रः ६ किटिः ७ दंष्ट्री ८ क्रोडः ९ दत्तायुधः १० वली ११ पृथुस्कन्धः १२ पोती १३ धोणी १४ भेदनः १५ कोलः १६ पोत्रायुधः १७ शूरः १८ यज्ञपतयः १९ रसायुधः २० । अस्य तस्य मांसगुणाः । गुरुत्वम् । वातहारित्वम् । हृद्यत्वम् । बलस्तेदकरत्वञ्च ॥ आद्यस्य तस्य मांसगुणाः । वन्यवराहमांसादगुरुत्वम् । मेदोबलवीर्य्यवृद्धिकारित्वञ्च । इति राजनिर्घण्टः ॥
अपि च ।
"सुलायगलवाराहचमरीवारणादयः । ते कूलेचराः प्रोक्ता यत्र कूले चरन्त्यमी ॥ कूलेचरा मरुस्थलचरा हृद्यबलाधयः । मधुराः शीतलाः स्निग्धा मूत्रला श्लेष्मजन्तुना ॥"
इति भावप्रकाशः ॥

शूकरकन्दः, पुं, (शूकरप्रियः कन्दः ।) वाराहीकन्दः । इति राजनिर्घण्टः ॥

शूकरदंष्ट्रः, पुं, शूकरदन्तविशेषः । तल्लक्षणमाह ।
"यदाहो रक्तपर्य्यन्तस्तत्कपाली तीव्रवेदनः । कण्डूमान् ज्वरकारी च स स्याच्छूकरदंष्ट्रकः ॥" स शुद्धभंगः ॥ ॥ तच्चिकित्सा यथा,—
"भृङ्गराजकमूलस्य रजन्या सहितस्य च । चूर्णन्तु सहसा लेपाद्वाराहद्विजनाशनम् ॥ राजीवमूलकल्कन्तु पीतो गव्येन सर्पिषा प्रातः । शमयति शूकरदंष्ट्रं दंष्ट्रोद्भूतज्वरं घोरम् ॥ रजनीमार्कवमूलं पिष्टं शीतेन वारिणा । तल्लेपाद्धन्ति वीसर्पं वाराहदशनाङ्कयम् ॥"
इति भावप्रकाशः ॥

शूकरपादिका, स्त्री, (शूकरस्य पादा इव शूलान्यस्याः । कन् । टाप् । अत इत्वम् ।) कोलशिम्बी । इति राजनिर्घण्टः ॥

शूकराक्रान्ता, स्त्री, (शूकरेणाक्रम्यते सेति । या + क्रम + क्तः ।) वराहक्रान्ता । इति शब्दचन्द्रिका ॥

शूकरी, स्त्री, (शूकर + ङीष् ।) वराहक्रान्ता । इति शब्दरत्नावली ॥ शूकरपत्नी च ॥

शूकरेष्टः, पुं, (शूकरायामिष्टः ।) कसेरुः । इति राजनिर्घण्टः ॥ शूकरप्रियवचे, त्रि ॥

शूकलः, पुं, (शूकवत् क्लेशं लाति ददातीति । ला + कः ।) दुर्विनीताश्वः । इति हेमचन्द्रः ॥

शूकवती, स्त्री, (शूकाः सन्त्यस्याः । शूक + मतुप् ।) कपिकच्छुः । इति शब्दचन्द्रिका ॥ शूकयुक्ते, त्रि ॥

शूकशिम्बा, स्त्री, (शूकविशिष्टा शिम्बा यस्याः ।) कपिकच्छुः । इति शब्दचन्द्रिका ॥

शूकशिम्बिः, स्त्री, (शूकविशिष्टा शिम्बिर्यस्याः ।) कपिकच्छुः । इत्यमरः ॥

शूकशिम्बिका, स्त्री, (शूकयुक्ता शिम्बिका यस्याः ।) कपिकच्छुः । इत्यमरटीका ॥

शूकशिम्बी, स्त्री, (शूकयुक्ता शिम्बी यस्याः ।) कपिकच्छुः । इत्यमरटीका ॥

शूका, स्त्री, (शूकाः सन्त्यस्याः इति । अर्शं आदित्वात् ।) कपिकच्छुः । इति शब्दचन्द्रिका ॥

शूकापूटः, पुं, त्यजमणिः । इति धारावली ॥ काफुरदाना इति काफरोवा इति च पारस्यभाषा ॥

शूद्रं, त्रि, अल्पम् । इत्युणादिकोषः ॥ अल्पार्थम् । सर इति मिधौ इति च भाषा । यथा,—
"मधुसक्तुसमायुक्तं शूद्रसक्तादिनिर्मितम् । वायो देवि गृहाण त्वं महाय परमेश्वरि ॥"
इति कालिकापुराणम् ॥

शूद्रः, पुं, (शूनक्ति । शूद क्षरणे + "शूदिमन्दिशकिभ्यो रक्" उणा० २ । २८ । इति रक् दीर्घश्चान्तादेशो धातोर्दीर्घश्च ।) चतुर्वर्णान्तर्गतजातिवर्णभेदः । तत्पर्य्यायः । अवरवर्णः २ वृषलः ३ जघन्यजः ४ । इत्यमरः ॥ दासः ५ प्रादासः ६ अन्यजन्मा ७ जघन्यः ८ द्विजसेवकः ९ । इति शब्दरत्नावली ॥

द्याः १०। इति जटाधरः॥ अन्त्यवर्णः ११ ष्यः १२। इति हेमचन्द्रः॥ चतुर्थः १३ द्विजदासः १४ उपासकः १५। इति राजनिर्घण्टः॥ प्लक्षद्वीपे तस्य संज्ञा सत्याङ्गाः। शाल्मलद्वीपे कपुत्तराः। कुशद्वीपे कुलकाः। क्रौञ्चद्वीपे सेवकाः। शाकद्वीपे अनुव्रताः। पुष्करद्वीपे सर्व्वे एकवर्णाः। अस्योत्पत्तिर्ब्रह्मणः पादात्। अस्य ब्राह्मणविहितो धर्म्मः जीविका च ब्राह्मणक्षत्रियवैश्यशुश्रूषा। अस्यैकाश्रमो गार्हस्थ्यः। इति श्रीभागवतम्॥ ॥ अथ शूद्रधर्म्मादि।

"विप्राणामर्चनं नित्यं शूद्रधर्म्मो विधीयते।
तद्वेषी नक्षनग्राही शूद्रचाण्डालतां व्रजेत्॥
शूद्रः कोटिसहस्राणि श्रुतजन्मानि शूकरः।
श्वापदः श्रुतजन्मानि शूद्रो विप्रधनापहा॥
यः शूद्रो ब्राह्मणीगामी मातृगामी च पातकी।
क्रुम्भीपाके पच्यते स यावद्वै ब्रह्मणः श्रुतम्॥
क्रुम्भीपाके तप्ततैले भुक्तः सर्पैरहर्निशम्।
शब्दञ्च विकृताकारं कुरुते यमताडनात्॥
तदा चाण्डालयोनिः स्यात् सप्तजन्मसु पातकी।
सप्तजन्मसु सर्पश्च वल्मीका सप्तजन्मसु॥
जन्मकोटिसहस्रञ्च विष्ठायां जायते कृमिः।
योनिकृमिः पुंश्चलीनां स भवेत् सप्तजन्मसु॥
भवां व्रणकृमिः स्याच्च पातकी सप्तजन्मसु।
योनौ योनौ भ्रमत्येवं न पुनर्जायते नरः॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ८३ अध्यायः॥

अपि च।

"द्विजानां पादशुश्रूषा शूद्रैः कार्य्या सदा द्विज।
पादप्रक्षालनं गन्धैर्भोज्यमुच्छिष्टमार्चकम्॥
ते तु भक्तिसदा चैव तेभ्यो भूयः पितामहः।
शुश्रूषार्थं मया यूयं तुरीये तु पदे सृताः॥
द्विजानां क्षत्रवर्गाणां वैश्यानाञ्च भवद्विधाः।
त्रिभ्यः शुश्रूषणं कार्य्यं इत्यवादीद्वचस्तदा॥"

इति पाद्मे सृष्टिखण्डे १६ अध्यायः॥

किञ्च।

"शुश्रूषैव द्विजातीनां शूद्राणां धर्म्मसाधनम्।
कायक्लेशं तपाणीयः पाकयज्ञोऽपि धर्म्मतः॥"

इति गारुडे ९६ अध्यायः॥

शूद्रराज्ये वासनिषेधो यथा,—

"धार्म्मिकैर्नार्हते वासो न चाधिपत्यकुले भृशम्।
न शूद्रराज्ये निवसेत् न पाषण्डजनैर्वृते॥"

शूद्राय मतिदाननिषेधो यथा,—

"न शूद्राय मतिं दद्यात् क्षुरं पायसं दधि।
गोक्षिरं वा मधु घृतं न च लक्षाजिनं हविः।
न चैवास्मै व्रतं ब्रूयात् न च धर्म्मान् वदेद्बुधः॥"

इति कौर्म्मे उपविभागे १५ अध्यायः॥

शूद्राणां वेदाधिकारनिषेधो यथा,—

"त्रयो वर्णा महाभाग यज्ञसाम्यभागिनः।
शूद्रा वेदपरित्यक्तो ब्राह्मणैस्तु बहिष्कृताः॥"

इति वाराहे संसारचक्रनामाध्यायः॥

कलौ ते धन्याः। यथा,—

"कलिः साध्विति यत् प्रोक्तं शूद्रः साध्विति मोचितः।
यदाह भगवान् साधुर्धन्यास्ते इति पुनः पुनः॥"

इति विष्णुपुराणे ६। २। १२॥

तस्य मद्यपानादौ दोषो यथा,—

"तथा मद्यस्य पानेन ब्राह्मणीगमनेन च।
वेदाक्षरविचारेण शूद्रचाण्डालतां व्रजेत्॥"

इति शूद्रकमलाकरधृतपराशरवचनम्॥

ब्राह्मणस्य तदन्नभोजननिषेधो यथा,—

"शूद्रान्नं ब्राह्मणोऽश्नन् वै मासं मासार्द्धमेव वा।
तदूयोनावभिजायेत सत्यमेतद्विदुर्बुधाः॥
अधोदरस्यशूद्रान्नो मृतः श्वानोऽपि जायते।
दाढ्यश्मश्रुचाष्टौ च शूकशूकरगुष्करः॥
उदरस्थितशूद्रान्नो ह्यधोयोनोऽपि जन्मभाक्।
जुह्वन् वापि जपन् वापि गतिमूर्द्धं न विन्दति॥
अन्नं ब्राह्मणस्यान्नं क्षत्रियस्यान्नं पयः स्मृतम्।
वैश्यस्य चान्नमेवान्नं शूद्रान्नं रुधिरं स्मृतम्॥
तस्मात् शूद्रं न भिक्षेत यज्ञार्थं सद्विजातयः।
श्मशानमिव सञ्चूद्रमन्नमात्रं परिवर्ज्जयेत्॥
कणानामथवा भिक्षां कुर्य्याच्चातिविकर्षितः।
सच्छूद्राणां गृहे कुर्व्वन् तत्पापेन न लिप्यते॥
विष्णुहस्तमयसंजातो निष्टप्तो मत्स्यमांसतः।
द्विजभक्तो वणिग्वृत्तिः शूद्रः स परिकीर्त्तितः॥"

इति दक्षसंहितायाम् ४ अध्यायः॥ ॥

अपि च। हारीतः।

"शूद्रान्नेन तु भुक्तेन उदरस्थेन यो मृतः।
स वै खरत्वमाप्नोति शूद्रत्वाधिगच्छति॥"

शूद्रान्नं शूद्रस्वामिकान्नं तद्दत्तमपि भोजनकाले तद्गृहावस्थितं यत्तदपि शूद्रान्नम्। तदाहाङ्गिराः।

"शूद्रवेश्मनि विप्रेण क्षीरं वा यदि वा दधि।
निष्टप्तेन न भोक्तव्यं शूद्रान्नं तदपि स्मृतम्॥"

अपिशब्दात् साक्षात्तप्ततण्डुलादि। न तु तदुत्तप्तपर्दकादिना क्रीतमपि। स्वगृहागते पुनरङ्गिराः।

"यथा यतस्ततो वापः शुद्धिं यान्ति नदीं गताः।
शूद्रादिप्रग्रहेष्वन्नं प्रविष्टन्तु सदा शुचि॥"

प्रविष्टं खलांपाकप्रतिग्रहादिनेति शेषः। अत एव पराशरः।

"तावच्चरति शूद्रान्नं यावन्न स्पृशति द्विजः।
द्विजातिकरसंस्पृष्टं सर्व्वं तद्विरुध्यते॥"

स्पृशति प्रतिग्रहातीति कल्पतरुः। तच्च संप्रोक्ष्य आत्मसाह विष्णुपुराणम्।

"संप्रोक्षयित्वा मन्त्रैर्यात्तच्छूद्रान्नं गृहमागतम्॥"

तच्च पाचान्तरे आत्मसाहाङ्गिराः।

"स्वपात्रे यत्तु विन्यस्तं शूद्रो यच्छति नित्यशः।
पात्रान्तरगतं भोज्यं दुग्धं स्वगृहमागतम्॥"

एतेन स्वगृहागतस्यैव शुद्धत्वं तद्गृहगतस्य शूद्रान्नदोषभागित्वं प्रतीयते। ततश्चैतादृगपि सर्व्वथा सर्व्वदा शूद्रान्नं न भोक्तव्यम्। इति शुद्धितत्त्वम्॥ ॥ कलौ शूद्रविशेषान्नभोजननिषेधो यथा,—

"शूद्रेषु दासगोपालकुलमित्रार्द्धसीरिणाम्।
भोज्यान्नता गृहस्थस्य तीर्थसेवातिदूरतः॥
एतानि लोकगुप्त्यर्थं कलेरादौ महात्मभिः।
निवर्त्तितानि कर्म्माणि व्यवस्थापूर्व्वकं बुधैः॥"

इति तिथ्यादितत्त्वम्॥

अपरञ्च।

व्यास उवाच।

"नाद्यात् शूद्रस्य विप्रोऽन्नं मोहाद्वा यदि वान्यतः।
स शूद्रयोनिं व्रजति यस्तु भुङ्क्ते ह्यनापदि॥
यस्यान्नान् यो द्विजो भुङ्क्ते शूद्रस्यान्नं विगर्हितम्।
जीवन्नेव भवेत् शूद्रो मृतः श्वा चाभिजायते॥
ब्राह्मणक्षत्रियविशां शूद्रस्य च सुनीश्वरः।
यस्यान्नेनोदरस्थेन मृतस्तद्योनिमाप्नुयात्॥"

कलौतरच्च शूद्रविशेषान्नभोजनविधिर्यथा,—

"आत्मनः कुलमित्रञ्च गोपालो दासनापितौ।
एते शूद्रेषु भोज्यान्ना यश्चात्मानं निवेदयेत्॥
कुशीलवः कुम्भकारः चेटकर्म्मक एव च।
एते शूद्रेषु भोज्यान्ना दत्त्वा स्वर्गं प्रयं बुधैः॥
पायसं क्षीरपक्वेषु यावत्तण्डुल एव हि।
पिण्याकस्तैल एव च शूद्रादग्राह्यं द्विजातिभिः॥"

इति कौर्म्मे उपविभागे १६ अध्यायः॥

अपि च।

"कन्दूपक्वानि तैलेन पायसं दधिभक्तवः।
द्विजैरेतानि भोज्यानि शूद्रगेहकृतान्यपि॥"॥

अन्यच्च।

"शूद्रास्तु ये दानपरा भवन्ति
व्रतान्विता विप्रपरायणास्तु।
अन्नं हि तेषां सततं सुभोज्यं
भवेद्विशेषादिमं पुरातनैः॥
तस्माद्दानं प्रकर्त्तव्यं व्रतस्थेन प्रयत्नतः।
सर्व्वपापविनाशाय महत्सुखविवृद्धये॥"

इति वह्निपुराणे दृषदानाध्यायः॥ ॥

वैदिकेतरमन्त्रपाठे शूद्रादेरप्यधिकारः। वेदमन्त्रवर्ज्जं शूद्रस्येति छन्दोगाह्निकाचारचिन्तामणिधृतस्मृतौ वैदेति विशेषणात्। एतच्च पुराणमधिकृत्य।

"अध्येतव्यं न चान्येन ब्राह्मणं क्षत्रियं विना।
श्रोतव्यमिह शूद्रेण नाधीतव्यं कदाचन॥"

इति भविष्यपुराणवचनं पुराणमन्त्रेतरपरम्॥ पञ्चयज्ञस्नानाह्निेषु पौराणिकमन्त्रोऽपि निषिद्धः। शूद्रमधिकृत्य।

"नमस्कारेण मन्त्रेण पञ्चयज्ञान्न चापयेत्॥"

इति याज्ञवल्क्येन॥

"ब्रह्मक्षत्रविशामेव मन्त्रवत् स्नानमिष्यते।
तूष्णीमेव हि शूद्रस्य स्नानमस्कारकं मतम्॥"

इति योगियाज्ञवल्क्येन॥

आह्निकमधिकृत्य।

"अयमेव विधिः प्रोक्तः शूद्राणां मन्त्रवर्ज्जितः।
नमस्कारस्तु शूद्रस्य विष्णो मन्त्रेण कथ्यते॥"

इति वराहपुराणेन च॥

नमस्कारेणेति तूष्णीमिति मन्त्रवर्ज्जनमिति चाभिधानादेतत्परं वैदिकपरञ्च शूद्राधिकारे गोत्रमवचनम्। अनुमतोऽस्य नमस्कारो मन्त्र इति। सावित्रीं प्रणवं यजुर्मन्त्रौ स्त्रीशूद्रयोर्नेच्छन्ति। सावित्रीं प्रणवं यजुर्मन्त्रौ स्त्री शूद्रो यदि जानीयात् स ह्यनोऽधो गच्छतीति। इति तिथ्यादितत्त्वम्॥*॥ 'प्रसङ्गादत्र कायस्थोत्पत्तिर्लिख्यते। पाद्मे सृष्टिखण्डे।

"सृष्ट्यादौ सदसत्कर्म्मैश्वर्य्ये प्राणिनां विधिः। ऋणं ध्याने स्थितस्यास्य सर्व्वकायादिनिर्गतः॥ दिव्यरूपः पुमान् हस्ते मसीपात्रञ्च लेखनीम्। चित्रगुप्त इति ख्यातो धर्म्मराजसमीपगः॥ प्राणिनां सदसत्कर्म्मलेखाय स निरूपितः। ब्रह्मणानीन्द्रियाणीव देयाग्नेर्यत्नमुक् स वै। भोजनाच्च सदा तस्मादाहुतिर्दीयते द्विजैः॥ ब्रह्मकायोद्भवो यस्मात् कायस्थो जातिरुच्यते। नानागोत्राश्च तद्वंश्याः कायस्था भुवि सन्ति वै॥"*॥

प्रकारान्तरम् यथा, स्कान्दे रेणुकामाहात्म्ये।

"एवं हत्वार्জ্জुनं रामः सन्धाय निशितान् शरान्।
एक एव ययौ हन्तुं सर्व्वानेवासुरान् नृपान्॥
केचिद्गगनमाश्रित्य केचित् पातालमाविशन्।
मगधां चन्द्रसेनस्य भार्य्यां दाल्भ्याश्रमं ययौ॥
ततो रामः समायातो दाल्भ्याश्रममनुत्तमम्।
पूजितो मुनिना सद्योऽन्वर्घ्यपाद्यासनादिभिः॥
ददौ मध्याह्नसमये तस्मै भोजनमादरात्।
रामस्तु भावयामास हृदिस्थं स्वमनोरथम्।
याचयामास रामञ्च कामं दाल्भ्यो महामुनिः॥
ततो द्वौ परमप्रीतौ भोजनं चक्रतुर्मुदा।
भोजनानन्तरं दाल्भ्यः पप्रच्छ भार्गवं प्रति।
यत्त्वया प्रार्थितं देव तत्त्वं शंसितुमर्हसि॥

राम उवाच।

तवाश्रमे महाभाग सगर्भा स्त्री समागता।
चन्द्रसेनस्य राजर्षेः क्षत्रियस्य महात्मनः॥
तस्मै त्वं प्रार्थितं देहि शिशुं तां मदाज्ञया।
ततो दाल्भ्यः प्रत्युवाच ददामि तव वाञ्छितम्॥

दाल्भ्य उवाच।

स्त्रियं गर्भमसृग्वाजं तस्मै त्वं दातुमर्हसि।
ततो रामोऽब्रवीद्दाल्भ्यं यद्गर्भमहमागतः॥
क्षत्रियान्तकरश्चाहं सत्यं याचितवानसि।
प्रार्थितश्च त्वया विप्र कायस्थो गर्भ उत्तमः॥
यस्मात् कायस्थ इत्याख्या भविष्यन्ति शिशोः शुभा।
एवं रामो महावाहुर्दित्वान्तर्गर्भमुत्तमम्॥
निर्ययौ गाधिगमनात् क्षत्रियान्तकरः प्रभुः।
कायस्थ एव उत्पन्नः क्षत्रियां क्षत्रियात्मजः॥
रामाज्ञया स दाल्भ्येन चक्रधर्म्मोहविच्छृतः।
कायस्थधर्म्मोऽभवत्तस्मिन्नुत्पन्न इति स्मृतः॥
ब्रह्मोवाच कायस्था दाल्भ्यगोत्रास्ततोऽभवन्।
दाल्भ्योपदेशतस्ते वै धर्म्मिष्ठाः सत्यवादिनः॥
सदाचारपरा नित्यं रता हरिहरार्च्चने।
देवद्विजपितृणाञ्च अतिथीनाञ्च पूजकाः॥"*॥

प्रकारान्तरम्।

"माहिष्यवनितासम्भुर्वैदेहात् यः प्रसूयते।
स कायस्थ इति प्रोक्तस्तस्य धर्म्मो विधीयते॥
तस्माद्देश्यायां माहिष्यां वैश्याद्विप्राच्च वैदेहः।
लिपीनां देशजातानां लेखनं स समाचरेत्॥
गणकत्वं विचित्रञ्च बीजपाटी प्रभेदनः।
अधमः शूद्रजातिभ्यः पञ्चसंस्कारवानसौ॥
चातुर्वर्ण्यस्य सेवां हि लिपिलेखनसाधनात्।
अवसायः शिष्यकर्म्म तज्जीवनसुदाहृतम्॥
शिखां यज्ञोपवीतञ्च वस्त्रमारक्तमम्बरम्।
सर्व्वत्र देवतानाञ्च कायस्थाश्च विवर्ज्जयेत्॥"

इति कमलाकरभट्टकृतशूद्रधर्म्मतत्त्वम्॥

शूद्रकर्त्तव्यं, क्ली, (शूद्रस्य कर्त्तव्यम्।) शूद्रकर्त्तव्यकर्म्म। यथा,—

"प्रणम्य सच्चिदानन्दं शूद्राणां न्यायवर्त्तिनाम्।
आह्निकः कृत्यमोक्षार्थं यक्ष्ये श्रीरघुनन्दनः॥"

तत्र मत्स्यपुराणम्।

"एवं शूद्रोऽपि सामान्यं दृष्टिमाश्रित्य सर्व्वदा।
नमस्कारेण मन्त्रेण कुर्य्यादामान्नवद्बुधः॥
दानप्रधानः शूद्रः स्यादित्याह भगवान् प्रभुः।
दानेन सर्व्वकामाप्तिरस्य संजायते यतः॥"

ततो दानमेवापेक्षितं न तु भोजनमपि। सामान्यं सर्व्वजनकर्त्तव्यत्वेन प्रतिमासकृष्णपक्षादिविहितआह्निकं आभ्युदयिकआह्निकञ्च एवं द्विजातिवत् शूद्रोऽपि कुर्य्यादित्यन्वयः। नमस्कारेण मन्त्रेण नतु स्वयं पठितमन्त्रेण। आमान्नवदित्यनेन जलसेकसिद्धान्नयाचनम्। स्विन्नमन्नमुदाहृतम्। इति वह्निसंस्कारेण स्विन्नत्वाभिधानात्। कन्दुपक्वस्य भृष्टत्वं न तु स्विन्नत्वम्। हारीतेन स्वेदनभर्ज्जनयोः पृथक्त्वमुक्तम्। यथा। आदीपनं तापनं स्वेदनं भर्ज्जनं पचनादिभिः पञ्चमीति। अस्यार्थः। आदीपनं काष्ठानाम्। तापनं तोयादेः। स्वेदनं धान्यादेः। भर्ज्जनं यवादेः। पचनं तण्डुलादेः। इति पञ्चमी कृता इति कल्पतरुः। अतएव स्विन्नधान्येन अवक्षियते।

"कन्दुपक्वानि तैलेन पायसं दधि शक्तवः।
द्विजैरेतानि भोज्यानि शूद्रगेहकृतान्यपि॥"

इति कूर्म्मपुराणवचनेन शूद्रकर्त्तृककन्दुपक्वादेर्ब्राह्मणस्य भक्ष्यत्वेन आह्निके देयत्वं युक्तम्। कन्दुपक्वं जलोपसेकं विना केवलपाकेन यद्दधिना पक्वम्। पायसं पाकेन क्षीरिन्यविकारापन्नं दुग्धम्। परमान्नपरत्वे पुंलिङ्गनिर्द्देशापत्तेः। तथा चामरः। परमान्नन्तु पायसः इति।

"दिने त्रयोदशे प्राप्ते पाकेन भोजयेद्द्विजान्।
अयं विधिः प्रयोक्तव्यः शूद्राणां मन्त्रवर्ज्जितः॥"

इति आह्निकचिन्तामणिधृतवराहपुराणवचनमपि कन्दुपक्वपरम्। एवञ्च एतद्वचनं सच्छूद्रपरं मैथिलोक्तं देयम्। एवं आममांसलाजादि आह्निके देयत्वं मामगआह्निकत्वेऽनुसन्धेयम्। तत्र तत्तद्देवताप्रकाशार्थं ब्राह्मणेन मन्त्राः पाठ्याः।

"अयमेव विधिः प्रोक्तः शूद्राणां मन्त्रवर्ज्जितः।
अमन्त्रस्य तु शूद्रस्य विप्रो मन्त्रेण याजयेत्॥"

इति वराहपुराणात्॥

अयं आह्निकनिष्पत्तयनाको विधिः शूद्रकर्त्तृकमन्त्रपाठरहितः। शूद्रस्य मन्त्रपाठानधिकारसिद्धौ यदमन्त्रस्येति पुनर्व्वचनं तत् स्त्रिया ग्रहणार्थं परिभाषार्थञ्च। ततश्च तत्कर्म्मसमभिमन्त्रेण विप्रस्तदीयकर्म्मकारयितृब्राह्मणो याजयेत्। तेन ब्राह्मणेन तत्र मन्त्रः पठनीय इति तात्पर्य्यम्। तत्र यजुर्वेदिको मन्त्रः। तथा च स्मृतिः।

"आर्षक्रमेण सर्व्वत्र शूद्रा याजसनेयिनः।
तस्माच्छूद्रः स्वयं कर्म्म यजुर्वेदीव कारयेत्॥"

आर्षक्रमेण सुयुक्तक्रमेण यजुर्वेदिसम्बन्धिग्रन्थादिना।

"चतुर्णामपि वर्णानां यानि प्रोक्तानि वेधसा।
धर्म्मशास्त्राणि राजेन्द्र शृणु तानि नृपोत्तम॥
विशेषतस्तु शूद्राणां पावनानि मनीषिभिः।
अष्टादश पुराणानि चरितं राघवस्य च॥
रामस्य कृष्णशार्দ্দूल धर्म्मकामार्थसिद्धये।
तथोक्तं भारतं वीर पाराशर्य्येण धीमता।
वेदार्थं सकलं योज्य धर्म्मशास्त्राणि च प्रभो॥"

इति भविष्यपुराणवचनाच्चैषां पौराणिकादिविधिर्योज्यो योजयित्वा। अत्र च आह्निके वेदमन्त्रवर्জ্জं शूद्रस्येतिवचने वेदेषु तदादानात् आह्निके पुराणमन्त्राः शूद्रेण पठनीय इति मैथिलोक्तम्। तत्र वराहपुराणे शूद्राणां मन्त्रवर्জ্জनं इत्यनेन मन्त्रमात्रनिषेधात् मत्स्यपुराणेन नमस्कारेण मन्त्रेण इत्युपादानाच्च। पौराणिकस्यापि आह्निके निषेधः प्रतीयते। एवं स्नानेऽपि।

"ब्रह्मक्षत्रविशामेव मन्त्रवत् स्नानमिष्यते।
तूष्णीमेव हि शूद्रस्य नमस्कारकं मतम्॥"

इत्यनेन नमस्कारविधानात्। प्रत्यवायश्चापि।

"शूद्रस्य द्विजशुश्रूषा तया जीवनवान् भवेत्।
शिल्पैर्व्वा विविधैर्जीवेत् द्विजातिहितमाचरन्॥
भार्य्यारतिः शुचिर्भृत्यो आह्वक्रियारतः।
नमस्कारेण मन्त्रेण पञ्चयज्ञान् प्रकल्पयेत्॥"

इति नमस्कारमात्रविधानात् आह्निकेषु पौराणिकमन्त्रनिषेधः। ततश्च स्नानाङ्गपञ्चयज्ञेतरश्च शूद्रस्य पौराणिकमन्त्रपाठः प्रतीयते। अथ।

"षष्ठेऽन्नप्राशनं मासि यष्ठिं मासं कुले।"

इति मनुवचनात्। चूड़ा कार्य्या यथाकुलं इति याज्ञवल्क्यवचनाच्च संस्कारमात्रे कुलधर्म्मानुरोधेन कालान्तरस्य नामविशेषोच्चारणस्याभिधानाच्च शूद्रादीनां नामकरणे वसुघोषादिकमहतिसुयुक्तनामकरणस्य च प्रतीतैर्लौकिककर्म्मणि शूद्राणां महतिसुयुक्तनामाभिधानं क्रियते इति। शूद्रस्नानमन्त्रे वैवस्वतीर्घे ओढे अयं चलतु स्त्रियेतु न पिबेत्। तथा च याज्ञवल्क्यः।

"शूद्रस्त्रीवानुगाद्विप्रं यथाकामं द्विजातयः।
शुद्धिरन्त्रीषु च शूद्रस्य सकृत् स्नानाभिरक्षतः॥"

अन्यतो शूद्रादिसम्बन्धेन ओढेन उत्तरीय-

अपकर्षात्। अतएव स्मृताभिरित्युक्तं न तु भणिताभिरिति।

"स्त्री शूद्रः शुध्यते नित्यं यावनाश करीष्वोः॥"

इति ब्रह्मपुराणवचनस्य। याज्ञवल्क्यः।

"प्राप्ता प्राचीग्रं तीर्थेन द्विजो नित्यमुपस्पृशेत्।"

अत्र द्विजस्यैव आचमने ब्राह्मतीर्थोपादानात् स्त्रीशूद्रयोर्न तेनाचमनम्। एवमेव मिताक्षरायां यक्तमुक्तं मरीचिना।

"स्त्रियाश्चैवाग्निकं तीर्थं शूद्रजातेस्तथैव च।
मद्यदाचमनात्तासु हिरेतयोरेव चोभयोः॥" इति।

यत्तदनन्तरं इन्द्रियादिस्पर्शनन्तु ब्राह्मणवदेव। प्रमाणान्तरन्तु वाचस्पतिविरचितमाह्निकतत्त्वयोरनुसन्धेयम्। इति वन्द्यघटीयश्रीहरिहरभट्टाचार्यौरसज-श्रीरघुनन्दनभट्टाचार्यविरचितं शूद्राह्निकाचारतत्त्वं समाप्तम्॥

शूद्रधर्म्मः, पुं, (शूद्रस्य धर्म्मः।) शूद्रस्य शास्त्रविहिताचारः। तस्य विवरणं शूद्रशब्दे द्रष्टव्यम्॥

शूद्रप्रियः, पुं, (शूद्राणां प्रियः।) पलाण्डुः। इति राजनिर्घण्टः॥ शूद्रस्य प्रियश्चे, त्रि॥

शूद्रप्रेष्यः, पुं, (शूद्रस्य प्रेष्यः।) शूद्रस्य परिचारकब्राह्मणादिः। इति केचित्॥

शूद्रभाजनं, क्ली, (शूद्रस्य भाजनम्।) शूद्रस्याधिकारो येषामपचादिनां। यथा,—

"स्वादभिष्यन्दिरमगं शाखानगरमित्यपि।
आयगं धर्मकोशः स्याच्छूद्रभाजनमेव च॥"

इति पुरुषर्गे विकाण्डशेषः॥

शूद्रा, स्त्री, (शूद्रस्य जातिः। शूद्र+"शूद्रा सामञ्जसूर्व्वा जातेः।" इति टाप्।) शूद्रजातिस्त्री। इत्यमरः॥ (यथा, मनुः। ३।१३।

"शूद्रैव भार्य्या शूद्रस्य सा च स्वा च विशः स्मृते॥")

शूद्रार्ज्जं, क्ली, (शूद्रस्य अर्ज्जम्।) शूद्रस्वामिकार्ज्जम्। यथा,—

"शूद्रार्ज्जं तु भुक्त्वेन उदरस्थेन यो नरः।
स वै खरत्वमाप्नोति शूद्रत्वमधिगच्छति॥"

शूद्रार्ज्जं शूद्रस्वामिकार्ज्जम्। इति शुद्धितत्त्वम्॥ अन्यत् शूद्रशब्दे द्रष्टव्यम्॥

शूद्राभार्य्यः, पुं, शूद्रा भार्य्या यस्य सः। शूद्रास्वामी। इति व्याकरणम्॥

शूद्रार्य्या, स्त्री, (शूद्रेण आर्य्या।) प्रियङ्गुवृक्षः। इति शब्दचन्द्रिका॥

शूद्रावेदी, [न्] पुं, (शूद्रां विन्दतीति। विद्+णिनिः।) शूद्राविवाहकर्त्ता। यथा,—

"शूद्रावेदी पतत्येवमनधीतस्तथैव च।
दीर्घकालं ब्रह्मचर्य्यादपि शूद्रासमो भवेत्॥"

इति दायभागः॥

शूद्री, स्त्री, (शूद्रस्य स्त्री। "पुंयोगादाख्यायाम्।" ४।१।४८। इति ङीप्।) शूद्रस्य भार्य्या। इत्यमरः॥ (यथा, याज्ञवल्क्ये। १।८१।

"विप्रात् स्त्रीभिषिक्तो हि क्षत्रियायां विशः स्त्रियाम्।
अम्बष्ठः शूद्रया निषादो जातः पारशवोऽपि वा॥")

शून, त्रि, (टु ओ श्वि गतिवृद्धयोः+क्तः। "ओदितश्च।" ८।२।४५। इति निष्ठातस्य नः। "वचिस्वपियजादीनां किति।" ६।१।१५। इति संप्रसारणम्।) "हलः।" ६।४।२। इति दीर्घः। "ओदितो निष्ठायाम्।" ७।२।१४। इति इड्नागमश्च न।) वर्द्धितः। इति व्याकरणम्॥ (यथा, सुश्रुते। ५।२।

"दुर्व्वर्णे व्रणिते शूने यायते यास्य लोचने॥"

शून्ये, त्रि। यथा, ऋग्वेदे। ७।१।११।

"मा शूने अग्ने निषदाम नृणाम्॥"

"हे अग्ने! शून्ये शून्ये पुत्रादिरहिते गृहे मा निषदाम न निवसाम।" इति तद्भाष्ये सायणः॥)

शूनवायु, [तु] त्रि, (टु ओ श्वि गतिवृद्धयोः+क्तवतु।) वर्द्धितः। इति व्याकरणम्॥

शूना, स्त्री, (श्वयन्ति गन्तुं गच्छन्ति वीटाद्यो यत्र। श्वि+क्तः। टाप्।) प्राणिवधस्थानम्। इति हलायुधः॥ पञ्चविधा शूना यथा,—

"पञ्च शूना गृहस्थस्य चुल्ली पेषण्युपस्करः।
कण्डनी चोदकुम्भश्च वध्यते याश्च वाहयन्॥"

पञ्चशूनापापनाशो यथा, मनुः।

"अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम्।
होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम्॥
पञ्चैतान् यो महायज्ञान् न हापयति शक्तितः।
स गृहेऽपि वसन्नित्यं शूनादोषैर्न लिप्यते॥"

इति प्रायश्चित्ततत्त्वम्॥

अधोलिखिका। इति हारावली॥

शूनावान्, [तु] पुं, (शूना+मतुप्। मस्य वः।) शूना विद्यते यस्य सः। कसाइ इति भाषा। इति केचित्॥

शून्यं, क्ली, आकाशम्। इति शब्दचन्द्रिका॥ (यथा, भागवते। ६।१३।२०।

"स वै त्वाष्ट्रवधो भूयानपि पापचयो नृप।
नीयमानैर्य्य शून्याय नीहार इव भानुना॥")

बिन्दुः। इति वैद्यचन्द्रः॥

शून्य, त्रि, अतिशयेन शूनः। अभावविशिष्टः। अवस्तुपूर्णः। खालि इति पारस्यभाषा। तत्पर्य्यायः। यशिकः २ तुच्छः ३ रिक्तकः ४। इत्यमरः॥ शून्यम् ५। इति तट्टीकायां भरतः॥

"अविद्याजीवनं शून्यं विद्या शून्या तयोर्विना।
ब्रह्मजीवं मृतं शून्यं सर्व्वशून्या दरिद्रता॥"

इति चाणक्यम्॥

(शूनाये प्राप्तिरिच्छायां क्विप्। दृश्यस्यानत्वात्। शूना+यत्। यद्वा, शूने क्षितम्। क्षि+"शुनः सम्प्रसारणं वा च दीर्घत्वम्।" ५।१। २। इत्यस्य वार्त्तिकोक्त्या यत् सम्प्रसारणं दीर्घत्वञ्च।) निर्ज्जनः। इति मेदिनी॥ (यथा, भट्टिः। १५।८८,

"जेन संदिहते नाम्नासौ नान्यवल्लभः।
विरौमि शून्यं प्रोषौमि कथं मनुष्यवल्लभम्॥")

शून्यमध्यः, पुं, (शून्यं मध्यं यस्य।) नभः। इति राजनिर्घण्टः॥ शून्यगर्भवस्तुनि, त्रि॥

शून्यवादी, [न्] पुं, (शून्यं वदतीति। वद्+णिनिः।) सौगतः। इति जटाधरः॥ नास्तिकश्च॥

शून्या, स्त्री, नदी। इति विश्वमेदिन्यौ॥ महाकाकटकिनी। इति शब्दचन्द्रिका॥ फलीमनसा इति ख्याता। वन्ध्या। इति राजनिर्घण्टः॥

शून्यालयः, पुं, (शून्य आलयः।) निर्ज्जनगृहम्। अत्र शून्यनिषेधो यथा। "मार्कण्डेयः।

'शून्यालये प्रसूयाने च एकवृक्षे चतुष्पथे।
महादेवगृहे चापि अर्द्धरात्रोत्थानेषु॥
धान्यगोविप्रदेवानां गुरूणाञ्च तथोपरि।
न चापि भक्षयेत् नाशुचौ नाशुचिः स्वयम्॥
नार्द्रवासा न नग्नश्च नोत्तरापरमस्तकः।
नाकाशे सर्व्वशून्ये च न च चैत्यद्रुमे तथा॥'
न स्वपेदित्यर्थः।" इत्याह्निकतत्त्वम्॥

शूपकारः, पुं, (शूपं करोतीति। कृ+अण्।) शूद्रान्नपाचकः। यथा,—

"शूद्रपाकोपजीवी यः शूपकार इति स्मृतः।"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २७ अध्यायः॥

अन्यत् अन्नशब्दकारादौ द्रष्टव्यम्॥

शूर, ऊ य ईं स्तम्भे। हिंसे। इति कविकल्पद्रुमः॥ (दिवा०-आत्म०-स्तभे अक०-हिंसे सक०-सेट्। निष्ठायामनिट्।) ऊ य, शूर्य्यते। ईं, शूर्णः। स्तम्भो जड़ीभावः। इति दुर्गादासः॥

शूर, तृ क रु विक्रमे। इति कविकल्पद्रुमः॥ (चुरादि०-आत्म०-अक०-सेट्।) रु, अशुशूरत्। विक्रमः उद्यमः। इति दुर्गादासः॥

शूरः, पुं, (शूरयति विक्रामतीति। शूर+अच्। यद्वा, शूर्यति वीर्य्यं प्राप्नोतीति। शू+"शूसिधिमिणां दीर्घश्च।" उणा० २।२५। इति क्रन् दीर्घश्च।) वीरः। इत्यमरः॥ (यथा, महाभारते। १।१०६।४।

"शूरांश्च सदृशविद्यांश्च सत्यश्च सुविनीतश्चभवत्।")

यादवः। स तु श्रीकृष्णस्य पितामहः। इति मेदिनी॥ (यथा, भागवते। ६।१४।२६।

"शूरो विदूरथादासीत् भजमानस्तु तत्सुतः।")

सूर्य्यः। इति विकाण्डशेषः॥ सिंहः। शूकरः। चित्रकः। साधुः। सज्जनः। मरुद्भेदः। इति राजनिर्घण्टः॥

शूरण, पुं, (शूर्य्यते इति। शूर हिंसे+क्युः।) मूलविशेषः। ओल इति भाषा। तत्पर्य्यायः। अर्शोघ्नः २ कन्दः ३। इत्यमरः॥ सुरणः ४। इति तट्टीकायां भरतः॥ ओलः ५। इति जटाधरः॥ ओलः ६। इति मेदिनी॥ कन्दलः ७ कन्दोः ८ सुकन्दो ९ भूकन्दकः १० दुर्नामारिः ११ सुरणः १२ वनारिः १३ कन्दशूरणः १४ लोमशकन्दः १५ कन्दार्शः १६ कन्दवर्द्धनः १७ बहुकन्दः १८ वज्रकन्दः १९ शूरणकन्दः २०। अस्य गुणाः। कटुत्वम्। कषायत्वम्। दीपनत्वम्। पाचनत्वम्। क्रिमिश्वासातिसाराधमानगुल्मनाशनः।

शूलगुल्मनाशित्वम्। अमरदीपकारित्वञ्च। इति राजनिर्घण्टः॥ अपि च।

"शूरणो दीपनो रूक्षः कषायः कफकृत् कटुः।
विष्टम्भी विशदो रूक्षः कफार्शःशूलनो लघुः॥
विशेषादर्शसि पथ्यः प्लीहगुल्मविनाशनः।
सर्व्वेषां कन्दशाकानां शूरणः श्रेष्ठ उच्यते॥
दद्रूणां रक्तपित्तानां कुष्ठानां न हितो हि सः।
सत्त्वागयोगसंप्राप्तः शूरणो गुणवत्तमः॥"

इति भावप्रकाशः॥

अन्यच्च।

"शूरणो दीपनो रूक्षः कफघ्नो विशदो लघुः।
विशेषादर्शसां पथ्यो वात्यकन्दस्तु दीपनः।"

इति राजवल्लभः॥

स्त्रीलिङ्गे कफघ्नः। इति शब्दमाला॥

शूरपोतुकः, पुं, चटिकाभेदपक्षी। इति शब्दचन्द्रिका॥

शूरपैणः, पुं, चतुर्विंशतिभाग्यर्क्षान्तर्गतार्क्षविशेषः। इति हेमचन्द्रः॥

शूरसेनः, पुं, (शूराः सेना यस्य।) राजविशेषः। देशविशेषः। यथा,—

"शूरसेनो यदुपतिर्मथुरामावसन् पुरीम्।
माथुरान् शूरसेनांश्च विषयान् बुभुजे पुरा॥"

इति श्रीभागवते १० स्कन्धे १ अध्यायः॥

शूर्प, क मार्गे। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-सेट्।) पठनशीलः। क, शूर्पयति धान्यं शूर्पी। इति दुर्गादासः॥

शूर्पः, पुं क्ली, (शूर्पयति धान्यादीनिति। शूर्प+अच्। यद्वा, शू हिंसायाम्+"शुभ्रुभ्यां निच्च।" उणा० ३। २६। इति पः। चकारात् स च कित्।) तण्डुलादिस्फोटनार्थं वंशादिनिर्म्मितमानविशेषः। कुला इति भाषा। तत्पर्य्यायः। प्रस्फोटनम् २। शूर्मः ३ कुल्यः ४ प्रस्फोटनी ५। इति शब्दरत्नावली॥ (यथा, "विहाय स्वर्पवत् दोषान् गुणान् गृह्णन्ति साधवः॥")

द्रोणचयपरिमाणम्। इति शब्दमाला॥

शूर्पकः, पुं, (शूर्प इव प्रतिकृतिरस्य। "ये प्रतिकृतौ।" इति कन्।) असुरविशेषः। स च कामदेवस्य भ्रातुः। इति हेमचन्द्रः॥

शूर्पकर्णः, पुं, (शूर्पाविव कर्णौ यस्य।) कुलौ। इति त्रिकाण्डशेषः। कुलकुलकुलिशुक्ले, त्रि॥ (यथा, कथासरित्सागरे। ५५। १४५।

"शटोदरः शूर्पकर्णो मलाध्यक्षो गणेश्वरः॥")

शूर्पकारातिः, पुं, (शूर्पकस्तन्नामासुरः शत्रुरातिर्यस्य।) कामदेवः। इति शब्दरत्नावली॥

शूर्पकारिः, पुं, (शूर्पकः शत्रुर्यस्य।) कामदेवः। इति शब्दरत्नावली॥

शूर्पणखा, स्त्री, (शूर्पा इव नखा यस्याः। "शूर्पादञ्यतौ संज्ञायाम्।" ५। ४। ६। इति अञ्। "अयस्शूलाद्दण्डाजिनाभ्याम्।" ८। ३। ९८। इति न ङीष्।) राक्षसभगिनी। इति शब्दमालाशब्दरत्नावली॥ (यथा, रघुः। १२। ३८।

"रूपं शूर्पणखायाश्च यदग्रं प्रत्यपद्यत॥")

शूर्पनखी, स्त्री, (शूर्पाकाराणि नखानि यस्याः। केवलयोगिकत्वे ङीष्।) राक्षसभगिनी। इति शब्दमालाशब्दरत्नावली॥

शूर्पपर्णी, स्त्री, (शूर्पा इव पर्णानि यस्याः। ङीष्।) शिम्बीविशेषः। इति शब्दचन्द्रिका॥

शूर्पवातः, पुं, (शूर्पस्य वातः।) शूर्पस्य वायुः। कुलार वातास इति भाषा। तत्पर्य्यायः। कुलफालः २। इति त्रिकाण्डशेषः॥

शूर्पश्रुतिः, पुं, (शूर्प इव श्रुती यस्य।) हस्ती। इति शब्दावली॥

शूर्पी, स्त्री, (शूर्प+गौरादित्वात् ङीष्।) क्षुद्रशूर्पः। इत्युणादिकोषः॥ शूर्पणखा। इति शब्दमाला॥

शूर्म्मः, पुं, लौहप्रतिमा। इत्यमरटीकायां रायमुकुटः॥

शूर्म्मिः, स्त्री, लौहप्रतिमा। इति भरतदिरूपकोषः॥

शूर्म्मिका, } स्त्री, लौहप्रतिमा। इति शब्दशूर्म्मी, } रत्नावली॥

शूल, रुजायाम्। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) दीर्णे। शूलति लोकं रोगः। इति दुर्गादासः॥

शूलः, पुं क्ली, (शूलति लोकानिति। शूल रोगे+अच्।) रोगविशेषः। अस्त्रविशेषः। वर्ज्या इति भाषा इति च भाषा। इत्यमरः॥ रुजुः। केतनः। विष्कम्भादिसप्तविंशतियोगान्तर्गतनवमयोगः। इति मेदिनी॥ तद्योगजातफलम्। यथा,—

"भीतो हरिर्दयिताप्रियश्च
शूलोद्भवः शूल इव स्वयम्भोः।
विद्यामयार्थां रचितोऽथ शूलो
करोति लोकं न हितं कदाचित्॥"

इति कोष्ठीप्रदीपः॥

सुतीक्ष्णः। अयःकीलः। इति धरणिः॥ (यथा, महाभारते। ३। १७०। १२।

"ततस्ते शूल आदीप्तं तं सुनिं रक्षिणस्तदा।
प्रतिचक्रुर्महीपाल यमदण्डादव त्वरया॥")

यवागूः। इति केचित्॥ त्रिफलेक्षुरसः। यथा,—

"व्यङ्गशूला अनपदाः शिवशूलाश्चतुष्पथाः।
प्रमदाः क्षेत्रशूलिन्यो भविष्यन्ति कलौ युगे॥"

इति महाभारते खादिपर्व्वे॥ ७॥

अथ शूलाधिकारः। तत्र शूलस्य सन्निपातं निदानमाह।

"शीतैः रुक्षैरुपवासात्तैः शूलोत्थिता भवेत्।
सर्व्वैर्व्वातेषु शूलेषु प्रायेण पवनः प्रभुः॥"

प्रभुः कर्त्ता॥ ७॥ वातिकस्य विशेषनिदानसंप्राप्तिरूपमाह।

"व्यायामयानादतिमैथुनाच्च
प्रजागराद्रौक्ष्यसदातिशीतात्।
कलायमुद्गाढकिकोरदूषान्
अत्यर्थरूक्षाश्यनाभिघातात्॥
कषायतिक्तानिविरूक्षभोज-
विरुद्धवल्लूरकशुष्कशाकैः।
विष्टम्भवातग्रहणीविरोधात्
शोकोपवासादतिरौक्ष्यभावात्॥
वायुः प्रवृद्धो जनयेद्धि शूलं
भृत्पृष्ठपार्श्वोदरबस्तिदेशे।
कोष्ठे प्रदोषे च घनागमे च
प्रीते च कोपं लभतेति गाढम्॥
सूक्ष्मं मुहुश्चोपशमप्रकोपै-
र्विभ्रन्तसंस्तम्भनतोदभेदैः।
सस्वेदनाभ्यञ्जनमर्दनाद्यैः
स्निग्धोष्णभोज्यैश्च समं प्रयाति॥"

व्यायामो मल्लयुद्धादिः। यानं शुरुगरुयादि। मैथुनं स्त्रीसेवा। प्रजागरं रात्रौ। श्यामतियोगात्। कषायस्त्रिपुटः। आढकी तुवरी। कोरदूषकः कोद्रवः। अत्यर्थरूक्षभक्षसेवा। अधश्शुगं शुक्तस्योपरि भोजनम्। अभिघातो लोष्टादिभिः। कषायतिक्तरससेवा। विरूक्षभोजं विरूक्षमङ्कुरितमन्नकलायशाकादि तच्चमन्नं भक्ष्यम्। वल्लूरं शुष्कमांसम्। तस्य शूलस्य देशमाह। हृदयादिषु। ७। तस्य हृच्छूलस्य एषणमपि लक्षणं पठति।

"कफपित्तावरुद्धस्तु मारुतो रसवहिनः।
हृदिस्थः कुरुते शूलमुच्छ्वासस्यावरोधकम्।
स हृच्छूल इति ख्यातो रसमारुतकोपजः॥"

पार्श्वशूलस्यापि लक्षणमाह।

"कफं निरुद्ध्य पवनः शूलौभिरिव निस्तुदन्।
पार्श्वयोः पार्श्वशूलं कुर्य्यादाध्मानसंयुतम्।
तेनोच्छ्वसिति वक्षेव नरोऽल्पञ्च न कांक्षति।
निद्राञ्च नाप्नुयादेष पार्श्वशूलः प्रकीर्त्तितः॥"

बस्तिशूलस्यापि लक्षणमाह।

"संरोधात् कुपितो वायुरस्थि संश्रित्य तिष्ठति।
बस्तिवङ्क्षणनाड्यौ च ततः शूलन्तु जायते॥
विण्मूत्रवातसंरोधो बस्तिशूलः स उच्यते॥"

प्रकृतमनुसरति। कोष्ठे शूले। प्रदोषे रात्र्यागमे रात्रिप्रथमयोरिति यावत्प्रकोपात्। घनागमे वर्षासु मेघोदये च। ७। तस्येव वैशिष्ट्यमाह।

"शारीरिकोष्णोष्णविदाहिशैल-
निष्पावपिण्याककुलत्थधूमैः।
यकृत्प्लवोदरसुराविकारैः
क्रोधाग्न्यगायासरविप्रतापैः॥
व्यायामयोर्मादपवनैर्विदग्धैः
पित्तं प्रकुप्यानु करोति शूलम्।
व्यत्यूषदाहारुचिकरं हि तस्य
सस्वेदमूष्माभिरमर्म्मयुक्तम्॥
तमं दिशे कुपति चाहरार्द्धे
निद्रागमे चाप्यहश्चेव च।
क्षीणैर्नरैर्नीरसभोजनैश्च
शुक्राङ्गजोक्षैरपि मोक्षणैश्च॥"

शूलः

त्रिफलायो राजमाषः। गौरीरं सन्यासमेदः। सुराविकारैः। पञ्चकाम्लमद्यानसंसृष्टया सुरा मद्या। तथा विकारैः। दधिप्रभृतिः। व्यायामः। व्यायामयोगो मैथुनाधिक्यम्। विदाहीनुत्क्लेशकृतापि अन्नेनेन्द्रियेरिति बोधयति। अविदाहिभक्तयोरपि विषमपाकादिदाहित्वं भवति। अन्नदाहाय प्रहरि। प्रीतिं प्रीतकाले। प्रीतेर्व्यातादिभिः। ॥ ॥ शैष्मिकमाह।

"आमपक्वाशयक्लिष्टपयोविकारै-
र्मांसेक्षुविष्टब्धगुरातिलशाकभीभिः।
मद्यैर्नवान्नसलकैरपि हेतुभिश्च
श्लेष्मा प्रकोपमुपगम्य करोति शूलम्॥
शूलाग्निकाम्लवदनारुचिसंप्रसेकै-
रामाशये स्तिमितकौष्ठशिरोगुरुत्वैः।
शुक्तैः सदैव हि सवं कुरुतेऽतिमात्रं
सूर्यादियेऽथ शिशिरे कुसुमागमे च॥"

ध्यानूपं वङ्गलटेशूर्णं भक्ष्यम्। वारिजं शालूकादि। किलाटः।

"घनं दृढा घनं क्षीरं विज्ञेया दधिकूर्चिका।
तक्रस्य तक्रकूर्चीं स्यात्सरः पिण्डः किलाटकः॥"

पयोविकारः पायसादिः। पिष्टं माषादिः। व्यायामैः मुद्गरादिभिः। स्तिमितमार्द्रचर्मावगुण्ठितमिव यत् कोष्ठं शिरश्च तयोर्गुरुत्वैः सह। सूर्योदय इति विधाविभक्तदिवसप्रथमभागोपलक्षणम्। शिशिरे तत्र कफस्यातिसञ्चयात्। कुसुमागमे वसन्ते। ॥ ॥ उद्वेजनमाह।

"शिरोवलासैरेतैर्विद्याच्छूलं शिरोभवम्॥"

शिरोभवमाह।

"सर्वेषु देहेषु समस्तलिङ्गं
विद्यात्त्रिदोषं सन्निपातं हि शूलम्।
शुक्लक्षयेनं विषमाशनस्य
विषर्त्तयोपेक्षणमर्मघातैः॥"

सर्वेषु देहेषु शुक्लक्षयादिकसमस्तलिङ्गाभ्यामाश्रयेषु। सन्निपातं शिरोभवं शूलं विद्यात्। शुक्लक्षयाद्धि विषमाशनस्य शुक्लं विषर्त्तयोपेक्षणमर्मघातैश्च। ॥ ॥ व्यासमाह।

"आटोपशूलाम्लवमीगुरुत्वं
क्लोमास्यमाधानकफप्रसेकैः।
वक्त्रस्य सिद्धेन समस्तलिङ्ग-
मामोद्भवं शूलमुदाहरन्ति॥

वक्त्रस्य क्लोमशूलस्य। आमोद्भवं आमाद्भवो मलो यं शूलम्। अपक्वाशयदेशे भवति पक्वाशयोपलक्षणम्। व्यासस्य शूलस्याटोपसङ्गमः। न च पक्वाशयाश्रये भवति पक्वाशयदोषैर्लिङ्गानामिहोक्तत्वात्तेषु भवति तथा दोषभेदतः। ॥ ॥ आमजशूल दोषभेदेन हेतुविशेषमाह।

"वातात्मकं दलितमर्दित
विष्टब्धकं च यदि वर्द्धति मारुतात्।
शूलार्णवेऽस्मिन् भवकर्णधारे
मर्त्यं हरेयुः स हि दीर्घमायुः॥"

शूलः

कृत्वार्द्धकुर्ची कृत्वार्द्धांघ्र्यां सहिते कुर्ची। कक्षसन्निविष्टं कक्षेनाविष्टम्॥ तत्कालरोक्षमामशूलमाह।

"अतिमात्रं यदा भुक्तं पावके मरुतां गते।
शरीरक्लेदनं तत्र कोष्ठे वायुनाशु विष्ठति॥
यदान्नं न गतं पाकं तच्छूलं कुरुते भृशम्।
मूर्च्छाभागविदाहांश्च क्षुत्क्लेशैः सविजृम्भिकम्॥
कण्ठवातमतीसारं प्रमोहं जनयेदपि।
अविपाकोद्भवं शूलमेतमाहुर्मनीषिणः॥"

अविपाकोद्भवं आमोद्भवमित्यर्थः। ॥ ॥ शूलस्योपद्रवानाह।

"वेदनातिक्षुधा मूर्च्छा आनाहो गौरवं ज्वरः।
भ्रमोत्क्लेदः कृशत्वं च बलहानिस्तथैव च॥
उपद्रवा दशैवैते यस्य शूलस्य नास्ति च॥"

शूलस्यैव भेदं परिणाममाह।

"स्नेहनिदानैः प्रकुपितो वायुः सन्निहितो यदा।
कफपित्ते समाहत्य शूलकारी भवेद्बली॥
शुक्ते जीर्यति यच्छूलं तदेव परिणामजम्॥"

स्नेहनिदानैरित्यादिना निदानपूर्विका संप्राप्तिरुक्ता। शुक्ते जीर्यतीत्यादिना सञ्चयशुक्तम्। समाहत्य व्याप्य। ॥ ॥ अपाद्यवनामानं शूलविशेषमाह।

"जीर्णेजीर्यत्यजीर्णे वा यच्छूलमुपजायते।
पथ्यापथ्यप्रयोगेण भोजनाभोजनेन वा।
न शमं याति नियमात् सोऽपक्व उदाहृतः॥"

नेदं शूलमसाध्यं चिकित्साभिधानात्॥ ॥ अथ शूलस्य चिकित्सा।

"वमनं लङ्घनं स्वेदं पाचनं क्षुधवर्धनैः।
चारचूर्णानि गुटिकाः शस्यन्ते शूलशान्तये॥
विज्ञाय वातशूलन्तु स्नेहस्वेदोपपादयेत्।
शूलघ्नाक्वाथस्य स्यात् स्नेहे दश सुखावहः॥
गुटिकां यवजां पाकाद्गुडीभूतां पटे क्षिपेत्।
कृत्वा तप्तोदरीं शूलो तया स्वेदं विधापयेत्॥"

इति गुटिकास्वेदः॥

"कार्पासास्थिकुलत्थिकातिलयवैरेरण्डमूलान्वितै-
रम्लीवर्गभृशाम्लदीपकाग्निकणकैरेकीकृतैर्वा पृथक्।
स्वेदः स्यादथ मूर्मरोदरशिरःस्त्रिग्वृक्षपादाङ्गुली-
गुल्फस्फिक्पृथुकट्युदावर्तो विषयते निःशेषवाता-
र्तिहा॥"

इति कार्पासास्थ्यादिस्वेदः॥

"तिलैश्च गुटिकां कृत्वा भ्रामयेच्छरीरोपरि।
शूलं सुदुस्तरं तेन प्राप्तिं गच्छति सत्वरम्॥
नाभिपीडाश्रयेच्छूलं मदनं काञ्जिकान्वितम्॥"

मदनं मदयन्तम्। ॥ ॥

"स्निग्धैरन्नरसैश्चान्नं क्षीणं कृत्वा नरं भिषक्।
स्निग्धस्वेदैश्च शूलं तं प्रायेणाशु विनाशयेत्॥
गुरुस्निग्धाः शीतं गव्यं पयश्च विरेचनम्।
वातघ्नानि च मांसानि भक्षयेत्पित्तशूलिनाम्॥
मद्यैरजलमाक्षीकं माधवादि सुरा च च।
शीतेन वारिणा शूलं पित्तोत्थं पाययेत्॥

विरेचनं पित्तहरं प्रशस्तं
रसाश्च शस्ताः शूलिनावकानाम्।
सगुडां घृतसंयुक्तां भक्षयेद्धरीतकीम्।
प्रलिह्याच्छूलशान्त्यर्थं धात्रीचूर्णं समाक्षिकम्॥
शाल्यन्नं साङ्गुलं मांसमरिष्टं कटुकं रसम्।
मधूनि शीतगोधूमं कफशूले प्रयोजयेत्॥"

अरिष्टं मैरेयकाक्षयविहं मद्यम्॥ ॥

"लवणत्रयसंयुक्तं पक्वकोलं सरामठम्।
सुखोष्णेनाम्बुना पीतं कफशूलं प्रशाम्यति॥"

आमशूले क्रिया कार्या कफशूलप्रशान्तये।
सैन्धवामहरं सर्वं मद्यमग्निविवर्द्धनम्॥"

तीक्ष्णावचूर्णसंयुक्तं त्रिफलाचूर्णसुत्तमम्।
प्रयोज्यं मधुसर्पिर्भ्यां सर्वशूलनिवारणम्॥"

तीक्ष्णा राजिका॥ ॥

"दारुहैमवतीकुष्ठशताह्वाद्विक्षुवैन्धवैः।
चव्यपिप्पलीसुरसैश्चित्रकेण विभेषजम्॥
मूलं वैल्वं तथैरण्डं त्रिपर्णं बिल्वमेषजम्।
द्विक्षुवैन्धवसंयुक्तं सद्यः शूलनिवारणम्॥"

वातरोगान्तर्गतसाधारणचिकित्सायां लिखितो नाराचनामा रसोऽत्यन्तं विरेचनं शूले हितम्॥

"कृष्णाङ्गं तनु कृत्वा तु क्षिप्त्वा धर्मे विशोषयेत्।
स्नात्वा निषिद्य तत् सर्वं पिधानेन विधाय्य च।
क्षुण्णां निषेव्य वह्निश्च व्यायामेत् क्षुधितो नरः॥
यथा तत्र भवेद्वह्नेः किञ्चाहारो दृढो भवेत्।
तदा निर्व्यापयेच्छौचं चूर्णितं चूर्णयेत्तु तम्॥
मायदयमितं तावच्छटीचूर्णेन मिश्रितम्।
जलेन भक्षयेन्नित्यं सर्वशूलाकुलो नरः॥
असाध्यमपि यच्छूलं तदप्येतेन शाम्यति॥"

इति कृष्णाद्यचारः॥ ॥

अथ परिणामशूलस्य चिकित्सा।

"लङ्घनं प्रथमं कुर्याद्दहनं बलिरेचनम्।
पक्त्याशूलोपशान्त्यर्थं तत्र वाग्भिर्विधेर्यथा॥
पीत्वा तु क्षीरमाकण्ठमरुक्षायसंयुतम्।
क्षारस्य कारस्य पौष्पस्य क्षीरकारस्य वा रसम्॥
कषायं वाथ निम्बस्य कटुतुम्बीरसं पचाम्।
यथायोगि वमेद्धीमान् पक्त्याशूलार्दितो नरः॥
चित्रकेण तथा हस्त्यार्कक्षीरेण रसेन वा।
दद्यं विरेचनं नरः पक्त्याशूलं निवारयेत्॥
चित्रकं तण्डुलं क्षीरं चित्रकक्षारसंयुतम्।
भक्षयेत्तिलतैलेन सर्वाशूलानि नाशयेत्॥
गुडेन मोदकान् कृत्वा रात्रौ दद्यात्तु वारिणा।
अचेत्तिदोषजं शूलं परिणामसमुद्भवम्॥"

इति चित्रकादिमोदकः॥ ॥

"क्षारतिलसुदकक्षीरं मधुना संयोज्य यः पुमान्
लिह्यात्।
सर्वं परिणामशूलं सप्तदिवसैस्य विनाशयेत्॥
क्षीरं गुडूचिकं भक्ष्यं क्षीरी क्षीरेण सेवितम्।
पक्त्याशूलं सप्तरात्रं हन्ति शिलाजतुसेवनात्॥
क्षीरभक्षणमात्रेण मासमेकं निरन्तरम्।
तिलैश्च सहितं शूलं परिणामसमुद्भवम्॥"

इति परिणामशूलोदयः॥ ॥

"नारिकेलं सतोयञ्च लवणेन सुपूरितम्।
स्वदानवेष्टितं शुष्कं पक्वं गोमयवह्निना॥
विपक्वा भक्षितं हन्ति शूलं हि परिणामजम्।
वातिकं पैत्तिकञ्चापि श्लैष्मिकं सान्निपातिकम्॥"
इति नारिकेलक्षारः॥८॥

अथाम्लवर्गस्य चिकित्सा।

"अम्लवाते तु शूले तु न तावत् व्याख्यामर्हति।
यावत् कटुकपोतान्नमन्नं न क्वथ्यवेद्दृढम्॥
ज्ञातमात्रे जरत्पित्ते शूलमाशु विनाशयेत्।
पित्तार्त्तं वमनं ज्ञात्वा कफार्त्तञ्च विरेचनम्॥
अम्लवर्चे च तत् कार्य्यं जरत्पित्ते यदीरितम्।
जरत्पित्तेऽपि तत् पथ्यं प्रोक्तमम्लवर्चे तु यत्॥
श्यामषष्टाशये शूले शुक्लेदम्लवर्चः श्रमम्।
माषेक्षरां लवणां सुस्निग्धां तैलपाचिताम्॥
तादृशीं सर्पिषा स्वादेदम्लवर्चनिपीडितः।
धात्रीफलभवं चूर्णमथचूर्णसमन्वितम्।
यष्टीचूर्णेन वा युक्तं लिह्यात् क्षौद्रेण नष्टदृक्।
श्यामकन्यस्तुषैः सिद्धं सिद्धं कोद्रवतण्डुलैः॥
प्रियङ्गुतण्डुलैः सिद्धं पायसं सघृतं हितम्॥"
प्रियङ्गुः कङ्गुविशेषः।
"गौड्रिकं शौरसं कन्दं कृष्णाष्टमपि भक्षयेत्।
कषायमद्यशुक्तञ्च वा शुक्तञ्च वा लाजसंयुतान्॥"
गौड्रिकं गुडेन संस्कृतं पक्वान्नम्॥८॥
"कुलत्थशुक्तकृषरा दध्याद्यधिकं तथा।
चणकानामथो शुक्तं कोद्रवस्यौदनं तथा॥"
दधिकं दध्ना संस्कृतं भक्तम्। मद्देरि इति भाषा॥८॥
"गोधूममण्डकं तत्र सर्पिषा गुडसंयुतम्।
घसितं शीतदुग्धेन भक्षितं क्षथितं हितम्॥
अम्लवर्गो दुष्चिकित्स्यो दुर्विज्ञेयो महागदः।
तस्मात्तस्य प्रशमने परं यत्नं समाचरेत्॥
अम्लवर्गे जरत्पित्ते वह्निर्मन्दो भवेद्यतः।
तस्मादग्निप्रयोगानि माषाद्यानानि कारयेत्॥८॥
दलाढ्यपक्वधूमाः श्यामाकाः कोरदूषकाः।
राजमाषाश्च माषाश्च कुलत्थाः कङ्गुशाल्यः॥
दधिगुप्तरसं घोरं सर्पिर्मेषं समाहितम्।
वास्तूकं कारवल्लीं च कर्कोटकफलानि च॥
जङ्गिणीं हरिणा मत्स्या रोहिणाद्याः कपिञ्जलाः।
अम्लवर्गमये शूले मता मुनिचिकित्सके॥"
दधिगुप्तरसं दध्ना गुप्तः शनैः दग्धो यस्य तत् घोरं दधितक्रे घोरमित्यर्थः॥८॥
"गुडाम्लकल्कयोगानां चूर्णं प्रक्षिप्य वल्लम्।
पिबेत् सौवर्चलयुतं तत् सर्पिः सघृतोषणम्॥
अम्लोद्गारे वमत्योदावमात्रं प्रमाणतः।
आध्मिमाधानयोगेषु भोजनस्य विधिश्च तत्॥
अम्लवर्गः अम्लविपाकानिदानं गुदादयम्।
अम्लेऽम्लामलत्वस्य शूलं संपक्वरोहितम्॥"
इति गुडूचमूरम्॥८॥
"माक्षिकं मेषशृङ्गं सर्वं सदृशं चतुर्गुणं दृषम्।
वैडूर्यं शुद्धं क्षौद्रं पिबेत् शूलाम्लजे॥"

इति शूलामपरिणामशूलाम्लवर्गरक्तपित्ताधिकारः। इति भावप्रकाशः॥८॥ अपि च।
"चर्कपत्रं गृहीत्वा तु मन्दाग्नौ तापयेच्छनैः।
निष्पीड्य पूरयेत् कर्णौ कर्णशूलं विनश्यति॥८॥
साञ्जनञ्च हृतं क्षौद्रं लवणं ताम्रभाजने।
दृष्टं पयःसमायुक्तं चक्षुःशूलहरं परम्॥"
साञ्जनञ्च इत्यत्र ताम्रलञ्च इति वा पाठः।
"चूर्णमामलकस्यैव पीतं शूलहरं परम्॥"
इति गारुडे १८३।१८५।१८८ अध्यायाः॥
क्षिप्त।
"सासुद्रं सैन्धवं चारो राजिका लवणं विड्म्।
कटु लोहरजः क्षिप्तं क्षिप्तं शूरणकं समम्॥
दधिगोमूत्रपयसा मन्दपावकपाचितम्।
एतच्चाग्निबलं चूर्णं पिबेदुष्णेन वारिणा॥
जीर्णे जीर्णे च संशीते माषादिष्टभोजनम्।
नाभिशूलं सूत्रशूलं गुल्मप्लीहभवञ्च यत्॥
सर्वं शूलहरं चूर्णं जठरानलदीपनम्।
परिणामसमुत्थस्य शूलस्य च हितं परम्॥"
इति गारुडे १९९ अध्यायः॥
तस्य उपधापजत्वं यथा,—
"बलोदरयकृत्प्लीहशूलरोगव्रणानि च।
श्वासार्शोगुल्वरच्छर्द्दिभ्रमोहगलग्रहाः।
रक्तार्बुदविषमाद्या उपधापोद्भवा गदाः॥"
इति भ्रातातपीयकर्म्मविपाकः॥
शूलकः, पुं, (शूल इव दुर्व्विनीतत्वात्। कन्।) दुर्व्वृत्तघोटकः। इति हलायुधः॥ अत्र शूकल इत्यपि पाठो दृश्यते। यथा,—
"विनीतस्तु साधुवाही दुर्व्विनीतस्तु शूलकः।"
इति हैमचन्द्रः॥
शूलगन्धिः, स्त्री. मांसादूर्व्वा। इति राजनिर्घण्टः॥
शूलघातनं, क्ली, (शूलं तद्रोगं घातयतीति। हन+णिच्+ल्युः।) मद्गुरम्। इति शब्दचन्द्रिका॥
शूलघ्नः, पुं, (शूलं हन्तीति। हन+टक्।) तुमुरुवृक्षः। इति रत्नमाला॥ शूलघातके, त्रि॥ (यथा, सुश्रुते। १। ४५।
"सर्षिर्मद्यञ्च मधुरः सरो योनिरोचाधिशिरसां शूलघ्नः इति॥")
शूलघ्निट्, [न्] पुं, (शूलस्य हिट् भ्रष्टुः।) शिवः। इति रत्नमाला॥
शूलधन्वा, [न्] पुं, (शूलो धनुर्यस्य।) शिवः। इति शब्दरत्नावली॥
शूलधरः, पुं, (शूलस्य धरः।) शिवः। इति शब्दरत्नावली॥
शूलधरा, स्त्री, (शूलस्य धरा।) दुर्गा। इति शब्दरत्नावली॥
शूलधारिणी, स्त्री, (शूलं धरति या। धृ+णिनिः।) दुर्गा। यथा,—
"शक्तिः शक्तो भयघ्नेति भवानी भवमोचनी।
आर्य्या दुर्गा धया धात्री विजेषा शूलधारिणी॥"
इति तन्त्रसारः॥ शूलधारिन्, पुं॥
शूलधृक्, [ज्] स्त्री, (शूलं धर्त्तुमीति। धृज्+क्विप्।) दुर्गा। इति चिकाण्डशेषः॥ महादेवे, पुं॥ (शूलधृत्-इत्येव क्वचित् पाठः॥)
शूलनाशनं, क्ली, (शूलं नाशयतीति। नश्+णिच्+ल्युः।) सौवर्चलसवणम्। इति हैमचन्द्रः॥
शूलपत्री, स्त्री, (शूलवत् पत्रमस्याः। ङीप्।) शूलीशाकम्। इति राजनिर्घण्टः॥
शूलप्रभुः, पुं, (शूलस्य प्रभुः।) एरण्डवृक्षः। इति शब्दचन्द्रिका॥
शूलघ्नी, स्त्री, (शूलं हन्तीति। हन+टक्। ङीप्।) यवानी। इति राजनिर्घण्टः॥
शूलहृत्, पुं, (शूलं हरतीति। हृ+क्विप्।) शिवः। इति चिकाण्डशेषः॥
शूला, स्त्री, दृढव्यधार्थकीलकः। वेशा। इति विश्वः॥
शूलाक्षतं, त्रि, (शूलेन क्षतम्। "शूलात् पाके।" ५। ३। ६५। इति ठाच्।) लौहादिशूलाकया विद्धं पक्वमांसम्। कावाब् इति पारस्यभाषा। तत्पर्य्यायः। भटित्रम् २ शूल्यम् ३। इत्यमरः॥ वासितारम् ४। इति जटाधरः॥ शूलिकम् ५। इति शब्दचन्द्रिका॥ अस्य गुणाः शूल्यशब्दे द्रष्टव्याः॥
शूलिकं, क्ली, (शूलः निमित्तत्वेनास्त्यस्येति। शूल+ठन्।) शूलाक्षतम्। इति शब्दचन्द्रिका॥
शूलिकः, पुं, शशकः। इति हैमचन्द्रः॥ (शूलः अस्यास्तीति। ठन्।) शूलयुक्ते, त्रि॥
शूलिगः, पुं, भाष्टीरवृक्षः। इति शब्दमाला॥
शूलिनी, स्त्री, (शूलं अस्या अस्तीति। शूल+इनि। ङीप्।) दुर्गा। यथा,—
"खड्गिनी शूलिनी घोरा गदिनी चक्रिणी तथा।
शङ्खिनी चापिनी बाणभुशुण्डीपरिघायुधा॥"
इति देवीमाहात्म्यम्॥
शूली, [न्] पुं, (शूलमस्यास्तीति। शूल+इनिः।) शिवः। इत्यमरः॥ (यथा, महाभारते। ३। ८४। ८४।
"नमो ध्रुवाय शर्व्वाय शाश्वतं देवस्य शूलिनः॥")
शूलः। इति भावप्रकाशः॥ शूलाक्षधारके शूलरोगयुक्ते च त्रि। यथा,—
"वर्षवेद्दिवसं शूली शुद्धो मांसं चयी स्त्रियम्।"
इति वैद्यकम्॥
तस्य क्षारं प्रायश्चित्तञ्च यथा,—
"शूली परीषतापेन जायते तत्समार्जकः।
सोऽपहन्यात् प्रकुर्व्वीत तथा यत्नं जयेन्नरः॥"
इति भ्रातातपीयकर्म्मविपाकः॥
शूली, स्त्री, लतभेदः। भाषायां। शूलघासी २ पाशाला ३ शूलगुलिका ४ शालाञ्चा ५ मधुशला ६ त्रिशिखा ७ अधिगोपिका ८। अस्या गुणाः। त्रिशिखात्वम्। कौटल्यम्। गुरुत्वम्। मौख्यत्वम्। वमथुदत्वम्। त्रिदोषदूषकत्वम्। रक्तत्वम्। दुश्चर्म्मविकारित्वञ्च। इति राजनिर्घण्टः॥

शूलोत्खा, स्त्री, सोमराजी। इति शब्दचन्द्रिका॥
शूल्यं, त्रि, (शूलेन संस्कृतम्। शूल+"शूलोखात् यत्।" ४। २। १७। इति यत्) शूलाङ्कितम्। इत्यमरः॥ कावाब् इति पारस्यभाषा। तत्पाकप्रकारो यथा,—
"कालखण्डादिमांसानि ग्रथितानि शूलाकया।
घृतं सलवणं दत्त्वा निर्धूमे दहने पचेत्।
तत्तु शूल्यमिति प्रोक्तं पाककर्मविचक्षणैः॥"
अस्य गुणाः।
"शूल्यं बल्यं सुधातुल्यं रुच्यं वह्निकरं लघु।
कफवातहरं हृद्यं किञ्चित् पित्तहरं हि तत्॥"
इति भावप्रकाशः॥
अस्य पर्य्यायः शूलाङ्कितशब्दे द्रष्टव्याः॥
शूलपाकः, पुं, (शूलेन पाको यस्य।) शूलविह्वाङ्गारपक्वमांसादि। इति पाकराजेश्वरः॥ कावाब् इति पारस्यभाषा॥
शूय, प्रसवे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) शूयति। इति दुर्गादासः॥
शृकालः, पुं, शृगालः। इति शब्दचन्द्रिका॥
शृगालः, पुं, (स्रजति मायामिति। स्रज+कालन्। पृषोदरादित्वात् साधुः।) प्रसिद्धविशेषः। शेयाल् इति भाषा। तत्पर्य्यायः। शिवा २ भूरिमायः ३ गोमायुः ४ स्रगधूर्त्तकः ५ वृषकः ६ क्रोष्टुः ७ फेरुः ८ फेरवः ९ जम्बुकः १०। इत्यमरः॥ शृगालः ११ जम्बुकः १२ सत्त्वमत्तः १३ कुरवः १४ घोरराक्षसः १५ वनश्वा १६ फेरुः १७ श्वधूर्त्तः १८। इति शब्दरत्नावली॥ ग्रासाहृकः १९ गोमी २० कटखादकः २१। इति जटाधरः॥ शिवालुः २२ फेरण्डः २३ व्याघ्रनायकः २४। इति राजनिर्घण्टः॥ दैत्यभेदः। इति मेदिनी॥ वासुदेवः। निष्ठुरः। खलः। इति शारस्वताभिधानम्॥ भीरुः। इत्यनेकार्थकोषः॥ *॥
शृगालशब्दादीनां शुभाशुभसूचकत्वं यथा,—
"अनर्थहेतुर्गतिशब्दहीनः
सदा शृगालः खलु दृष्टमात्रः।
ग्रस्ता हि वामा गतिरस्य शस्तो
वामो निनादो निशि यो बहूनाम्॥
कुवा कुवेति प्रथमं ततस्तु
टटेति दीर्घः सुतरां रवो यः।
स्याच्छम्बुकानां स मतः प्रशस्त-
स्तदन्यरूपः कथितः प्रदीप्तः॥
शृगालशब्दो भवने निशायाः
सुघाटनार्थं दिशि पश्चिमायाम्।
ग्राम्यां भयायोत्तरतः शिवाय
भवत्ववाच्यां भयनाशनाय॥"
इति वसन्तराजशाकुनम्॥
शृगालकण्टकः, पुं, (शृगालशीर्षवत् कण्टको यस्य।) क्षुपविशेषः। इति शब्दचन्द्रिका॥ शेयालकाटा इति भाषा॥
शृगालकोलिः, पुं, (शृगालप्रियः कोलिर्यस्य।) क्षुद्रकोलिवृक्षः। शेयाकुल इति भाषा। तत्पर्य्यायः। कर्कन्धुः २। इति रत्नमाला॥ अपि च।
"अथ घोण्टा ३ गोपघोण्टा ४ बदरं ५ वादिरच ६ तत्।
बदरीसदृशे वृक्षफले वृत्ते चतुष्टयम्॥"
इति शब्दरत्नावली॥
शृगालघण्टी, स्त्री, कोकिलाक्षः। इति राजनिर्घण्टः॥
शृगालजम्बुः, स्त्री, (शृगालस्य जम्बुरिव।) गोडुम्बः। घोण्टाफलम्। इति मेदिनी॥
शृगालविन्ना, स्त्री, (शृगालैर्विन्ना।) वृश्चिपर्णी। इति राजनिर्घण्टः॥
शृगालिका, स्त्री, शृगालपत्नी। त्रासात् पलायनम्। इति मेदिनी॥ भूमिकुष्माण्डः। इति जटाधरः॥ क्षुद्रशृगालः। खेंकशेयाली। इति भाषा। तत्पर्य्यायः। लोमालिका २ दीप्तजिह्वा ३ किखिः ४ उल्कामुखी ५। इति चिकाण्डशेषः॥
शृगाली स्त्री, विद्रवः। पलायनमिति यावत्। इति चिकाण्डशेषः॥ कोकिलाक्षः। विदारी। इति राजनिर्घण्टः॥ शृगालिका च॥
शृङ्खलः, त्रि, पुंसां कण्ठाभरणम्। गोट् इति भाषा॥ हस्त्यादीनां लौहमयपादबन्धोपकरणम्। याँदु इति हाँडुका इति च भाषा। तत्पर्य्यायः। उन्दुकः २ निगडः ३। इत्यमरः॥ शृङ्खला ४। इति तट्टीकायां भरतः॥ (यथा, रघुः। ५।७२।
"शून्यां जनाल्लुभयपक्षविनीतनिद्राः
स्वैरं रमा सुखरशृङ्खलकर्षिणस्ते॥")
लौहरज्जुः। शिकल वेड़ि इत्यादि भाषा॥ बन्धनम्। इति हेमचन्द्रः॥
शृङ्खलकः, पुं, (शृङ्खलं बन्धनमस्य। "शृङ्खलमस्य बन्धनं करभे।" ५। २। ७६। इति कन्।) उष्ट्रः। इति राजनिर्घण्टः॥ (यथा, माघे। १२। ७।
"तीव्रोत्थितास्तावदसह्यरंहसो
विशृङ्खलं शृङ्खलकाः प्रतस्थिरे॥")
पलायननिषेधाय पादेषु दारुमयशृङ्खलचित्तकरभः। इत्यमरभरतौ॥ (स्वार्थे कन्।) शृङ्खलश्च॥
शृङ्खला, स्त्री, निगडः। युग्मकटीबन्धबन्धः। इति मेदिनी॥ अन्यत् शृङ्खलशब्दे द्रष्टव्यम्॥
शृङ्खलितः, त्रि, (शृङ्खलो जातोऽस्येति। इतच्।) शृङ्खलायुक्तः। निगडितः। इति धनञ्जयः॥
शृङ्खली, स्त्री, कोकिलाक्षः। इति राजनिर्घण्टः॥
शृङ्ग, क्ली, (शृ हिंसे+"शृङ्गातेर्ह्रस्वश्च।" उणा० १। १२५। इति गन्। धातोर्ह्रस्वत्वं किञ्च्युट् च प्रत्ययश्च।) पर्व्वतोपरिभागः। तत्पर्य्यायः। कूटम् २ कूटः ३ शिखरम् ४। इत्यमरः॥ दन्तः ५ प्राग्भारः ६। इति जटाधरः॥ शैलाग्रम् ७। इति चिकाण्डशेषः॥ (यथा, रघुः। १३। २६।
"एतद्धिरेर्मौल्यवतः पुरस्ता-
दाविर्भवत्यम्बरलेखि शृङ्गम्॥")
साधुः। इति नानार्थे अमरः॥ प्रशस्तम्। चिह्नम्। क्रीड़ाजलयन्त्रम्। (यथा, रघुः। १६। ७०।
"वर्णोदकैः काञ्चनशृङ्गसक्तै-
स्तमायताक्षः प्रणयादसिञ्चत्॥")
विषाणम्। (यथा, रघुः। १६। १३।
"वन्यैरिदानीं महिषैस्तदस्मः
शृङ्गाहतं क्रोशति दीर्घकाणम्॥")
उत्कर्षः। इति मेदिनी॥ (यथा, रघुः। ८। ६२।
"शृङ्गं स दृप्तविनयाधिकृतः परेषा-
मत्युच्छ्रितं न मनसे न तु दीर्घमायुः॥")
ऊर्द्धम्। (यथा, कुमारे। ७। ४०।
"विमानशृङ्गाण्यवगाहमानः
शृण्वंस्च देवावसरेषु सूरेभ्यः॥")
तीक्ष्णम्। पङ्कजम्। इति शब्दरत्नावली॥ (कोटिः। यथा, कुमारे। २। ६४।
"अथ सलिलतयोषित् भ्रूलताचारुशृङ्गं
रतिवलयपदाङ्के चापमास्थाय कण्ठे॥"
स्तनम्। यथा, भागवते। ५। २। ११।
"किं सम्भृतं रुचिरयोर्द्वि शृङ्गयोस्ते
मध्ये कृशो वहसि तच्च दृशिः श्रिता मे॥"
"स्तनावालक्ष्याह। शृङ्गयोः स्तनयोः किं सम्भृतं किं पूर्णमस्ति मनोहरं किञ्चिदस्ति इत्येतावत् जानामि।" इति तट्टीकायां स्वामी॥*॥) महिषादिशृङ्गनिर्म्मितवाद्यविशेषः। शिङ्गा इति भाषा। यथा,—
"क्वचिद्दिनाशाय मनो दधद्व्रजात्
प्रातः सुमत्याय वयस्यवत्सपान्।
प्रबोधयन् शृङ्गरवेण चारुणा
विनिर्गतो वत्सपुरःसरो हरिः॥"
इति श्रीभागवते १०। स्कन्धे १२ अध्यायः॥
कामोद्रेकः। यथा, साहित्यदर्पणे। ३। २१०
"शृङ्गं हि मन्मथोद्भेदस्तदागमनहेतुकः।
उत्तमप्रकृतिप्रायो रसः शृङ्गार इष्यते॥"*॥
गोशृङ्गभङ्गप्रायश्चित्तं यथा। भवदेवभट्टधृतं यमवचनम्।
"अक्षिभङ्गं गवां कृत्वा लाङ्गलच्छेदनं तथा।
पाटने कर्णशृङ्गाणां मासार्द्धन्तु यवान् पिबेत्॥"
अङ्गिराः।
"शृङ्गभङ्गेऽक्षिभङ्गे च चर्म्मनिर्म्मोचनेऽपि वा।
दशरात्रं चरेद्वत्सं सुस्था सा यदि गौर्भवेत्॥"
भवदेवभट्टधृतहारीतोपाध्यायधृत संवर्त्तवचनम्।
"शृङ्गभङ्गेऽक्षिभङ्गे च कटिभङ्गे तथैव च।
यदि जीवति षण्मासान् प्रायश्चित्तं न विद्यते॥"
अत्र षण्मासोत्तरमरणे तद्दोषशमनाय प्रायश्चित्तं नास्ति तदभ्यन्तरमरणे वधप्रायश्चित्तं भवति। एवञ्च शृङ्गभङ्गादिनिमित्तकपापे पृथक् प्रायश्चित्तं न कर्त्तव्यम्। वधप्रायश्चित्तेनैव गुरुणा प्रसङ्गात्तदपगमसिद्धेः। षण्मासोत्तरन्तु शृङ्गभङ्गादिनिमित्तकपूर्व्वोक्तमासार्द्धयावकपानं प्राजापत्यं वा कर्त्तव्यम्। इति प्रायश्चित्ततत्त्वम्॥
शृङ्गः, पुं, (शृ+गन्। उणा० १। १२५।) कूर्च्चशीर्षकद्रुः। इति मेदिनी॥ सुनिभेदः। इति शब्दरत्नावली॥

शृङ्गकः, पुं, (शृङ्ग इव। कन्।) जीवकवृक्षः। इति जटाधरः॥

शृङ्गकन्दः, पुं, (शृङ्गवत् कन्दो यस्य।) शृङ्गाटकः। इति राजनिर्घण्टः॥

शृङ्गजं, क्ली, (शृङ्गात् जायते इति। जन+डः।) अगुरुः। इति रत्नमाला॥ अरे, पुं। यथा। शृङ्गाच्छरो जायते। इति संक्षिप्तसारकारकपादः॥ शृङ्गजाते, त्रि॥

शृङ्गवेरं, क्ली, (शृङ्गस्येव वेरं शरीरं यस्य।) आर्द्रकम्। इत्यमरः॥ शुण्ठी। इति राजनिर्घण्टः॥ (यथा, सुश्रुते। १। ३८।
"पिप्पलीमरीचशृङ्गवेराणि चिकटुकम्॥") गुहचण्डालगुरुम्। यथा,—
"मारुते गच्छ शीघ्रं त्वमयोध्यां भरतं प्रति।
जानीहि कुशली कच्चित् जनो नृपतिमन्दिरे॥
शृङ्गवेरपुरं गत्वा ब्रूहि मित्रं गुहं मम।
ज्ञानकीलक्ष्मणोपेतमागतं मां निवेदय॥"
इत्यध्यात्मरामायणे लङ्काकाण्डे १४ अध्यायः॥

शृङ्गवेरकं, क्ली, (शृङ्गवेरमेव। स्वार्थे कन्।) आर्द्रकम्। इति हेमचन्द्रः॥

शृङ्गवेराभमूलकः, पुं, (शृङ्गवेराभं मूलं यस्य। कन्।) एरका। इति भावप्रकाशः॥

शृङ्गमूलः, पुं, (शृङ्गवत् मूलं यस्य।) शृङ्गाटकः। इति राजनिर्घण्टः॥

शृङ्गमोही, [न्] पुं, (शृङ्गाय मन्मथोद्भेदाय मोहयतीति। मुह+णिच्+णिनिः।) चम्पकः। इति राजनिर्घण्टः॥

शृङ्गला, स्त्री, (शृङ्गवत् लातीति। ला+कः।) अजशृङ्गी। इति शब्दचन्द्रिका॥

शृङ्गवान्, [त्] पुं, (शृङ्गाणि सन्ति अस्येति। शृङ्ग+मतुप्। मस्य वः।) कुरुवर्षीयसीमापर्व्वतः। स तु दैर्घ्ये ८०००० अशीतिसहस्रयोजनानि। प्रस्थे २००० द्विसहस्रयोजनानि। विस्तारे तथैव। यथा,—
"हिमवद्धेमकूटश्च निषधश्चास्य दक्षिणे।
नीलः श्वेतश्च शृङ्गी च उत्तरे वर्षपर्व्वताः॥
लक्षप्रमाणौ द्वौ मध्यौ दशहीनास्तथा परे।
सहस्रद्वितयोच्छ्रायास्तावद्विस्तारिणश्च ते॥"
इति विष्णुपुराणे २ अंशे २ अध्यायः॥
लक्षप्रमाणौ द्वौ प्राक्पश्चिमतो दैर्घ्येण निषधनीलौ। यद्यपि जम्बुद्वीपमण्डलाकारस्य लक्षयोजनप्रमाणत्वान्मध्यरेखाभागमेव सुखं लक्षप्रमाणत्वम्। निषधनीलौ तु तन्मध्यरेखातो दक्षिणतश्चोत्तरतश्च सप्तदशयोजनसहस्रान्तरितत्वादीषन्न्यूनौ। तथापि स्थूलदृष्ट्या लक्षप्रमाणावित्युक्तम्। अपरे तु हेमकूटादयो दशहीना दशदशगुणाः हेमकूटश्चैतो नवतियोजनसहस्रप्रमाणौ हिमवच्छृङ्गिणावशीतियोजनप्रमाणौ। तदुक्तं वाराहे।
"द्वीपस्य मण्डलीभावात् हासवृद्धी प्रकीर्त्तिते॥"
इति तट्टीकायां श्रीधरस्वामी॥
भागवतमते दैर्घ्ये १०००० दशसहस्रयोजनानि।

शृङ्गाट प्रस्थे २००० द्विसहस्रयोजनानि। यथा। उत्तरोत्तरयोर्नीलाद्यं नीलः श्वेतः शृङ्गवान् इति त्रयो रम्यकहिरण्मयकुरूणां वर्षाणां मर्य्यादागिरयः प्रागायता उभयतः चारोदावधयो द्विसहस्रयोजनपृथव एकैकशः पूर्व्वस्मात् पूर्व्वस्मादुत्तरोत्तरो दशांशाधिकांशेन दैर्घ्ये एव भवन्ति। एवं दक्षिणेनेलावृतं निषधो हेमकूटो हिमालय इति प्रागायता यथा नीलादयः। अयुतयोजनोत्सेधा हरिवर्षकिंपुरुषभारतानां यथासंख्यम्॥ इति श्रीभागवते ५ स्कन्धे १६ अध्यायः॥

शृङ्गाटं, क्ली, (शृङ्गमुत्कर्षे अटतीति। अट्+अच्।) चतुष्पथम्। इति हेमचन्द्रः धरणिश्च॥

शृङ्गाटः, पुं, (शृङ्गवत् कण्टकं अटतीति। अट्+अच्।) जलकण्टकः। इति भूरिप्रयोगचिकाण्डशेषौ॥ खादुकण्टकः। इति शब्दरत्नावली॥ कामाख्यादेशस्थपर्व्वतः। यथा,—
"दीपवत्या: पूर्व्वतस्तु शृङ्गाटो नाम पर्व्वतः।
तत्र भर्गस्य देवस्य लिङ्गमेकं प्रतिष्ठितम्॥
सरित्तु सिद्धा त्रिस्रोता दक्षिणोदधिगामिनी।
शृङ्गाटकस्य सततं स्रवन्ती व्याप्नुपादतः।
दक्षिणं सागरं याति भर्गस्य प्रियकारिणी॥
सलिले यो नरः स्नाति तिस्रोतायां नरोत्तमः।
शृङ्गाटकं समारुह्य पूजयेल्लिङ्गशृङ्गरम्॥
सदीपकायः शुद्धात्मा प्राप्य कामानिहातुलान्।
अन्ते भर्गगृहं याति ततो मोक्षमवाप्नुयात्॥"
इति कालिकापुराणे ८२ अध्यायः॥

शृङ्गाटकं, क्ली, (शृङ्गाटमेव। स्वार्थे कन्।) चतुष्पथम्। इत्यमरः॥ (यथा, रामायणे। २। ७१। ४५।
"तां शून्यशृङ्गाटकवेश्मरथ्यां
रजोरुणद्वारकपाटयन्त्राम्॥")
जलज-लताफलविशेषः। पानिफल इति शृङ्गाड़ा इति च भाषा। तत्पर्य्यायः। जलरुचिः २ संघाटिका ३ वारिकण्टकः ४। इति जटाधरः॥ शृङ्गाटः ५ वारिकुञ्जकः ६। इति त्रिकाण्डशेषः॥ क्षीरशुक्लः ७ जलकण्टकः ८। इति शब्दमाला॥ शृङ्गाटकः ९ शृङ्गरुहः १० जलवल्ली ११ जलाशयः १२ शृङ्गकन्दः १३ शृङ्गमूलः १४ विषाणी १५। अस्य गुणाः। शीतत्वपित्तहरत्वम्। लघुत्वम्। सरत्वम्। दृष्यतमत्वम्। विशेषात् त्रिदोषवातत्वभ्रशीतनाग्नित्वम्। रुचिप्रदत्वम्। मेहनदाढ्यहेतुत्वञ्च। इति राजनिर्घण्टः॥ अपि च। गुरुत्वम्। विष्टम्भित्वम्। शीतलत्वञ्च। इति राजवल्लभः॥ खाद्यविशेषः। सङ्घरा इति हिन्दी भाषा॥ यथा, भावप्रकाशे।
"शृङ्गाटमांसं तनूकृत्य कर्षितं खदितं जले।
लवङ्गं हिङ्गुसहितं लवणाम्लकसंयुतम्॥
एलाजीरकधान्याकनिम्बूरससमन्वितम्॥
घृते सगन्धे तद्भृष्टं पूरकं प्रोच्यते बुधैः॥
शृङ्गाटकं समित्या क्षतं पूरणपूरितम्।
पुनः सर्पिषि संभृष्टं मांसं शृङ्गाटकं वदेत्॥
मांसं शृङ्गाटकं रुच्यं दृंहणं बलकृत् गुरु।
वातपित्तहरं दृष्यं कफघ्नं वीर्य्यवर्द्धनम्॥"

शृङ्गाटकः, पुं, (शृङ्गाट एव। स्वार्थे कन्।) जलकण्टकः। इति राजवल्लभः॥

शृङ्गारं, क्ली, (शृङ्गं प्राधान्यं ऋच्छतीति। ऋ+अण्।) लवङ्गम्। सिन्दूरम्। चूर्णम्। इति मेदिनी॥ आर्द्रकम्। इति शब्दचन्द्रिका॥ कालागुरुः। इति राजनिर्घण्टः॥

शृङ्गारः, पुं, (शृङ्गं कामोद्भेदकन्दच्छतीति। ऋ गतौ+"कर्म्मण्यण्।" ३।२।१। इत्यण्। यद्वा, शृ हिंसायाम्+"शृङ्गारशृङ्गारौ।" उणा० ३। १३६। इति आरन्प्रत्ययेन साधुः।) सुरतः। नाट्यरसः। गजभूषणम्। इति मेदिनी॥ * ॥ नाट्यरसस्य लक्षणं यथा,—
"पुंसः स्त्रियां स्त्रियाः पुंसि संयोगं प्रति या स्पृहा।
स शृङ्गार इति ख्यातो रतिक्रीड़ादिकारणम्॥"
इत्यमरटीकायां भरतः॥
अपि च।
"शृङ्गं हि मन्मथोद्भेदस्तदागमनहेतुकः।
उत्तमप्रकृतिप्रायो रसः शृङ्गार इष्यते॥
परोढां वर्जयित्वाच वेश्याश्चाननुरागिणीम्।
आलम्बनं नायिकाः स्युर्दक्षिणाद्याश्च नायकाः॥
चन्द्रचन्दनरोलम्बरुतादुद्दीपनं मतम्।
भ्रूविक्षेपकटाक्षादिरनुभावः प्रकीर्त्तितः॥
व्यक्तोग्र्यमरणालस्यजुगुप्साद्यभिचारिणः।
स्थायी भावो रतिः श्यामवर्णोऽयं विष्णुदेवतः॥"
स च द्विधा। विप्रलम्भः संभोगश्च। इति साहित्यदर्पणम्॥ अन्यत् मैथुनशब्दे द्रष्टव्यम्॥ * ॥ शृङ्गारादिभङ्गे नरको यथा,—
"शृङ्गाराहारनिद्राणां यश्च भङ्गं करोति च।
स व्रजेत् कालसूत्रञ्च स्वामिनञ्च विशेषतः॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ४२ अध्यायः॥

शृङ्गारकं, क्ली, (शृङ्गारमेव। स्वार्थे कन्।) सिन्दूरम्। इति राजनिर्घण्टः॥ शृङ्गविशिष्टे, त्रि। शृङ्गशब्दात् "शृङ्गदन्ताभ्यामारकन् वक्तव्यः।" ५। २। १२२। इत्यस्य वार्त्तिकोक्त्या आरकन्प्रत्ययेन निष्पन्नः। इति सिद्धान्तकौमुदी॥ स्वार्थे के शृङ्गारञ्च तत्र पुं॥

शृङ्गारभूषणं, क्ली, (शृङ्गारस्य भूषणम्।) सिन्दूरम्। इति हेमचन्द्रः॥

शृङ्गारयोनिः, पुं, (शृङ्गारे योनिरुत्पत्तिर्यस्य।) कामदेवः। इति हलायुधहेमचन्द्रौ॥

शृङ्गारी, [न्] पुं, (शृङ्गारोऽस्यास्तीति। इनिः।) पूगः। गजः। सशृङ्गारः। सुवेशः। इति मेदिनी॥ माणिक्यम्। इति राजनिर्घण्टः॥

शृङ्गिः, स्त्री, मत्स्यविशेषः। शिङ्गी माछ इति भाषा। यथा,—
"मद्गुरस्य प्रिया शृङ्गी शृङ्गिरित्यपि कुत्रचित्।
स्यादप्रिया मद्गुरसीति च नामद्वयम् कचित्॥"
इति शब्दरत्नावली॥

शृङ्गिकं, क्ली, विषभेदः। इति हेमचन्द्रः॥
शृङ्गिका, स्त्री, प्रतिविषा इति शब्दरत्नावली॥
शृङ्गिन्, पुं,(शृङ्गे स्तः अस्येति। शृङ्ग+"ज्योत्स्नातमिस्रेति।" ५। २। ११४। इति इनच्।) मेघः। इति हेमचन्द्रः॥
शृङ्गिणी, स्त्री, (शृङ्गे स्तः अस्या इति। शृङ्ग+इनिः। ङीप्।) गौः। इत्यमरः॥ श्वेतप्रीदृच्यः। मल्लिकाद्दच्यः। ज्योतिष्मतीदृच्यः। इति मेदिनी॥
शृङ्गी, [न्] पुं, (शृङ्ग+इनिः।) हरः। इन्द्रः। पर्वतः। (यथा, रघुः। १२। ८०।
"तरोध रामं शृङ्गीव टङ्कच्छिन्नमनःशिलः॥"
ऋषिविशेषः। स तु भृगीकपुत्रः। अभिमन्युः परिक्षित् अनेनाभिमन्युः।) शृङ्गयुक्ते, त्रि। इति मेदिनी॥ (यथा, रामायणे।२।२५।२०।
"महिषाः शृङ्गिणो रौद्रा नखे इत्यन्तु पुत्रक॥")
शृङ्गी, स्त्री, (शृङ्गि+वा ङीप्।) मत्स्यविशेषः। शिङ्गी इति जियल इति च भाषा। तत्पर्यायः। मद्गुरप्रिया २। इत्यमरः। मधुश्च॥ मद्गुरी ३। इति शब्दरत्नावली॥ मद्गुरसी ४ अप्रिया ५ शृङ्गिः ६। इति कैयदेवनिघण्टः॥ अस्या गुणाः। स्वादुरसत्वम्। स्निग्धत्वम्। दृंहणत्वम्। कफकोपनत्वम्। शोषपाण्डुरुत्पत्तिनाशित्वञ्च। इति राजवल्लभः॥ श्वेतविषा। ऋषभौषधम्। इत्यमरः॥ कर्कटशृङ्गी। शवः। वङ्गः। विषम्। इति राजनिघण्टः॥ अलङ्कारसुवर्णम्। यथा। स्त्री शृङ्गी मण्डनसुवर्णे। इति भरतधृतरत्नकोषः॥
शृङ्गीकनकं, क्ली, (शृङ्गी मण्डनसुवर्णम्। तदेव कनकम्।) अलङ्कारसुवर्णम्। इत्यमरः॥ अलंकारस्य कुण्डलादेर्यत् सुवर्णं तत् शृङ्गीकनकमुच्यते शृङ्गी अलङ्कारः तदर्थं कनकं शृङ्गीकनकं अलङ्कारसुवर्णस्य शृङ्गीति च नाम। स्त्री शृङ्गी मण्डनसुवर्णे इति रत्नकोषः॥ शृङ्गी शृङ्गान्ता च शृङ्गति कर्णादीन् शृङ्गिः अगि शगि गतौ नाम्नीति इः निपातनात् णिः। याच्ञोत्यादीति ईपि शृङ्गी। इति भरतः॥
शृङ्गिः, क्ली, अङ्कुरः। इत्यमरः॥"शृङ्गाति मर्म्मस्थानं शृङ्गिः। शृ शॄ गि हिंसने कृञ्चूण्यादीत्यादेर्निरिति स्वादित्वात् क्लिनिः निपातनादिह ह्रस्वः। नाम्नीति वृत्तिर्वा। 'शृङ्गिरङ्कुरवाची च काश्यञ्च लवणाचकः।' इति शब्दभेदात् तालव्यादिः। शरति मर्म्मस्थानं गच्छति शरिर्ईन्यादिरित्यन्ये। शिवयामित्यत्र द्वयोरिति पाठः। इति मेदिनी॥ यावच्चमयमयमस्य शृङ्गिं शितागमिति माघः। शिवयामिति प्रायिकत्वादुक्तमिति सुकुटः।" इति भरतः॥
शृतं, त्रि, (श्रा पाके+क्तः। "शृतं पाके।" ६। १। २७। इति शृभावः।) पक्वक्षीराद्यभयोः। इत्यमरः॥ शृतमन्नं विवर्ज्जयेदिति तार्क्ष्यम्। इति भरतः॥ क्वथितम्। इति शब्दचन्द्रिका रत्नमाला च॥ अथ क्वाथविधिः।
"पानीयं षोड्शगुणं क्षुण्णे द्रव्यतले क्षिपेत्।
स्यात्ततो क्वाथयेत् यावत्तुर्यांशावशेषितम्॥
कषादौ तु पलं यावत् दद्यात् षोड्शिकं जलम्।
तज्जलं पाययेद्धीमान् कोष्णं वह्निसाधितम्॥
श्रुतः क्वाथः कषायश्च निर्यूहः स निगद्यते॥"
क्वाथपानमात्रामाह।
"मात्रोत्तमा पलेन स्यात्त्रिभिरत्रैस्तु मध्यमा।
अधमा च पलार्द्धेन क्षेहक्वाथौषधेन च॥"
तत्रान्तरे।
"क्वाथद्रव्यतले वारि द्विरष्टगुणमिष्यते।
चतुर्भागावशिष्टन्तु पेयं पलचतुष्टयम्॥
दीप्तानलं महाकायं पाययेत् द्वात्रिंशं जलम्।
अन्ये त्वर्द्धं परित्यज्य प्रवदन्ति चिकित्सकाः॥
क्वाथत्यागमनिच्छन्तस्त्वष्टभागावशेषितम्।
पारम्पर्य्योपदेशेन दृष्ट्वैद्याः पलद्वयम्॥"
अष्टभागावशेषितस्य चतुर्भागावशिष्टापेक्षया गुरुत्वादीप्तानलं महाकायं पलद्वयं पाययेन्मध्यमाग्निमल्पकायं पलमात्रं पाययेत्। मात्रोत्तमा पलेन स्यादित्यादिवचनात्।
"क्वाथे क्षिपेत् सितामंशैश्चतुर्थांशमधोऽग्नेः।
वातपित्तकफार्त्तेषु विपरीतं मधु स्मृतम्॥
क्षीरकं,गुरुगुडं क्षारं लवणञ्च विवर्जयेत्।
हिङ्गु त्रिकटुकञ्चैव क्वाथे घ्राणोक्षितं क्षिपेत्॥
क्षीरं घृतं गुडं तैलं सूक्ष्मं चान्यत् द्रवं तथा।
कल्कं चूर्णादिकं क्वाथे निक्षिपेत् कर्षसम्मितम्॥
ततोपविश्य विश्रान्तः प्रसन्नवदनेक्षणः।
औषधं हेम रजतं शृङ्गाजनपरिस्थितम्॥
पिबेत् प्रसन्नहृदयः पीत्वा पात्रमधोमुखम्।
विधायाचम्य सलिलं ताम्बूलादुपयोजयेत्॥"
इति भावप्रकाशः॥
अन्यच्च।
"त्रयादापोत्थितात्क्षीये वह्निना परितापितात्।
निःस्रुतो यो रसः पूतः स च स्रुतः समुदाहृतः॥"
इति वैद्यकम्॥
शृध, व ल ड उ धर्षे। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-अक०-सेट्। क्त्वेट्।) व, शृर्त्स्यति शिश्रत्स्यति। ल, अशृधत्। ड, शृर्धते। उ, शृर्द्धित्वा शृद्धा। पदोंऽपानोत्सर्गः। शृधु प्रसहने इति चुरादिपरस्मैपदीधातुरन्येन मन्यते। प्रसहनं विप्रवः। इति गोविन्दभट्टः। शृर्द्धयति दृढं कृतसितशब्दैर्वालः। इति रमानाथः। इति दुर्गादासः॥
शृध, उ च क्लेदने। इति कविकल्पद्रुमः॥ (भ्वा०-उभ०-अक०-सेट्। क्त्वेट्।) उ, शृर्द्धित्वा शृद्धा। च, शृर्द्धति शृर्द्धते। क्लेदनमार्द्रभावः। इति दुर्गादासः॥
शृधुः, पुं, (शृध+बाहुलकात् कुः।) बुद्धिः। गुदम्। इति विश्वः॥
शृधूः, पुं, (शृध+"वृतिशृधोः कूः।" उणा० १। ६३। इति कूः।) कृतसितः। अपानम्। इति संक्षिप्तसारोणादिवृत्तिः॥
शृफः, पुं, शृ, गि हिंसने। इति कविकल्पद्रुमः॥ (क्रया०-पर०-सक०-सेट्।) गि, शृणाति। शृर्णः शृर्णिः। इति दुर्गादासः॥
शृफरः, क्ली, जलजन्तुः। इति राजनिघण्टः॥ शिशुशूलम्। इति शब्दचन्द्रिका॥
शृफरः, पुं, (शृफि शृतौ+बाहुलकात् अरप्रत्ययेन साधुः।) शृफावस्थितमालम्। इत्यमरः॥ यथा,—
"शृफाविन्यस्तमालायामापीड़ः शृफरोऽपि च॥"
इति शब्दरत्नावली॥
(यथा, माघे। ११। ४६।
"नवकरनिकरेण सप्तवर्णूकलग-
स्तवकरचितमेतं शृफरं बिभ्रतीव॥"
शिरोभूषणमाल्यम्। यथा, कुमारे। ७। ३२।
"बभूव भस्मैव सिताङ्गरागः
कपालमेवामलशृफरश्रीः॥")
गीतस्य ध्रुवविशेषः। तल्लक्षणं यथा,—
"हादशाक्षरपादः स्यात् स चाष्टानुभङ्गतः।
प्रभोः।
हंसके च रसे वीरे गीयते शृफरो ध्रुवः॥"
इति सङ्गीतदामोदरः॥
लघुशृफरो यथा,—
"लघुर्गुरुर्भवेद्यत्र स भवेल्लघुशृफरः॥"
इति तत्रैव॥
(शृङ्गम्। यथा, कथासरित्सागरे।२८।१८६।
"ततोऽस्तगिरिशृफरं व्रजति वासरेशे शनैः
सखीं पुनरुपागमप्रणयिनीं समाकृष्य ताम्।
चचाल चलितत्विषा गगनमार्गसूत्पत्य सा
जगाम वसतिं निजां प्रसवमेव सोमप्रभा॥")
शृफरी, स्त्री, वन्दा। इति शब्दरत्नावली॥
शृफः, पुं, (शृफि+बाहुलकात् पः।) शेफः। इति शब्दरत्नावली॥ (यथा, वाजसनेयसंहितायाम्। १६। ८८।
"वल्गिर्न शृफो हरसा तरस्वी॥")
शृफालः, पुं, (शृफि+बालच्। बाहुलकात् वकारस्य फकारः। इत्युणादिवृत्तौ उज्ज्वलदत्तः।४।३८।) शृवालः। इति शब्दरत्नावली॥
शृफः, पुं, शिश्नः। इति शब्दरत्नावली॥ (यथा, महाभारते। १०। ७। ३८।
"विकटाः कालसदृशा दृष्ट्वैकेशाग्रशृफिकाः॥")
शृफः, [स्] क्ली, (शृफि रेतःप्रातानन्तरमिति। शृ+"दृशृफ्रीड्भ्यां स्वरूपाङ्गयोः पुट् च।" उणा० ४। २००। इति असुन्। अत्र केचित्तु च चेति पठन्ति इत्यतो फः।) शिश्नः। इत्यमरः॥ मुक्तपाते सति शृफे पतति इति शृफः। शृफ्रीड्भ्यामोर्नान्त्रीति फसुप्रत्ययः। शृफसशृफसौ शृफशृफौ शृवशृफे इति पञ्च रूपाणि भवन्तीत्याचार्य्याः। इति भरतः॥ (यथा, हरिवंशे। ६८। ८।
"ऋजुवृत्तशृफसौ संगुणिरालम्बिनाच्च
घनवक्त्राः॥")

शृङ्गकः, पुं, (शृङ्ग इव। कन्।) शीवकवृक्षः। इति शटाधरः।

शृङ्गकन्दः, पुं, (शृङ्गवत् कन्दो यस्य।) शृङ्गाटकः। इति राजनिर्घण्टः।

शृङ्गजं, क्ली, (शृङ्गात् जायते इति। जन+डः।) अगुरुः। इति रत्नमाला। शृङ्गे, पुं। यथा। शृङ्गाक्षरो जायते। इति संक्षिप्तसारकारकपादः। शृङ्गजाते, त्रि।

शृङ्गवेरं, क्ली, (शृङ्गस्येव वेरं शरीरं यस्य।) आर्द्रकम्। इत्यमरः। शुण्ठी। इति राजनिर्घण्टः। (यथा, सुश्रुते। १। ६८।
"पिप्पलीमरीचशृङ्गवेराणि त्रिकटुकम्।")
शुण्ठ्यादिचूर्णम्। यथा,—
"मारुते गच्छ शीघ्रं त्वमयोध्यां भरतं प्रति।
ब्राह्मीहि कुशली कश्चित् घनो नृपतिमन्दिरे।
शृङ्गवेरपुरं गत्वा गुहं मित्रं गुहं मम।
ज्ञानकीलक्ष्मणोपेतमागतं मां निवेदय।"
इत्यध्यात्मरामायणे लङ्काकाण्डे १४ अध्यायः।

शृङ्गवेरकं, क्ली, (शृङ्गवेरमेव। स्वार्थे कन्।) आर्द्रकम्। इति हैमचन्द्रः।

शृङ्गवेराभमूलकः, पुं, (शृङ्गवेराभं मूलं यस्य। कन्।) एरका। इति भावप्रकाशः।

शृङ्गमूलः, पुं, (शृङ्गवत् मूलं यस्य।) शृङ्गाटकः। इति राजनिर्घण्टः।

शृङ्गमोही, [न्] पुं, (शृङ्गाय मत्सरोद्रेकाय मोहयतीति। मुह+णिच्+णिनिः।) धत्तूरकः। इति राजनिर्घण्टः।

शृङ्गला, स्त्री, (शृङ्गवत् लातीति। ला+कः।) जलशृङ्गी। इति शब्दचन्द्रिका।

शृङ्गवान्, [त्] पुं, (शृङ्गाणि सन्ति अस्येति। शृङ्ग+मतुप्। मस्य वः।) कुरुवर्षीयसीमापर्वतः। स तु दीर्घे ८००० अशीतिसहस्रयोजनानि। प्रस्थे २००० द्विसहस्रयोजनानि। विस्तारे तथैव। यथा,—
"हिमवद्धेमकूटस्य निषधस्यास्य दक्षिणे।
सीमः शैलश्च शृङ्गी च उत्तरे वर्षपर्वताः।
लक्षप्रमाणौ द्वौ मध्यौ दशहीनास्त्रया परे।
सहस्रद्वितयोच्छ्रायास्तावद्विस्तारिणश्च ते।"
इति विष्णुपुराणे २ अंशे २ अध्यायः।
लक्षप्रमाणौ द्वौ प्राक्पश्चिमतो दैर्घ्येण निषधवर्णौ। यद्यपि जम्बुद्वीपमण्डलाकारस्य सप्तयोजनप्रमाणत्वाच्छृङ्गेरावामेव शृङ्गं लक्षप्रमाणम्। निषधसीमौ तु लक्षाधरेरावौ दक्षिणतश्चोत्तरतश्च शतद्वयोच्छ्रायशतद्वयविस्तारौ। तथापि शृङ्गसंख्या सप्तप्रमाणत्वविवक्षया। अपरे तु हैमकूटादयो दशदेशा दशद्वयोना: हैमकूटदेशौ नवनियोजनसहस्रप्रमाणौ द्विसहस्रद्विशतयोजनोन्नियोजनप्रमाणौ। शतद्वयं वारादेः।
"दोषान् सप्तशतीमायान् हरणाद्धरो यतोऽभिधे।"
इति त्रिकाण्डशेषः। शीतस्वभावौ।
भारतवर्षे दैर्घ्ये १००० द्विसहस्रयोजनानि।

शृङ्गाट प्रस्थे २००० द्विसहस्रयोजनानि। यथा।
उत्तरोत्तरयेलावृतं नीलः श्वेतः शृङ्गवान् इति त्रयो रम्यकहिरण्मयकुरव्यां वर्षाणां मर्य्यादागिरयः प्रागायता उभयतः चारोदावधयो द्विसहस्रयोजनपृथव एकैकशः पूर्वस्मात् पूर्वस्मादुत्तरोत्तरो दशांशाधिकयेन दैर्घ्ये एव भवन्ति। एवं दक्षिणेनेलावृतं निषधो हेमकूटो हिमालय इति प्रागायता यथा नीलादयः। अयुतयोजनोत्सेधा हरिवर्षकिंपुरुषभारतानां यथासंख्यम्। इति श्रीभागवते ५ स्कन्धे १६ अध्यायः।

शृङ्गाटं, क्ली, (शृङ्गसुत्कर्षं अटतीति। अट+अच्।) चतुष्पथम्। इति हैमचन्द्रः धरणिश्च।

शृङ्गाटः, पुं, (शृङ्गवत् कण्टकं अटतीति। अट+अच्।) जलकण्टकः। इति भूरिप्रयोगचिकाण्डशेषौ। खाडुकण्टकः। इति शब्दरत्नावली। कामाख्यादेशस्थपर्वतः। यथा,—
"दीपवत्या: पूर्वतस्तु शृङ्गाटो नाम पर्वतः।
तत्र भर्गस्य देवस्य लिङ्गमेकं प्रतिष्ठितम्।
सरित्तु विद्धा त्रिस्रोता दक्षिणोदधिगामिनी।
शृङ्गाटकस्य सततं स्वनन्ती आविशादतः।
दक्षिणं सागरं याति भर्गस्य प्रियकारिणी।
सलिले यो नरः स्नाति तिस्रोतायां नरोत्तमः।
शृङ्गाटकं समारुह्य पूजयेल्लिङ्गशृङ्गरम्।
सदीप्तकायः शुद्धात्मा प्राप्य कामानिहातुलान्।
अन्ते भर्गगणं याति ततो मोक्षमवाप्नुयात्।"
इति कालिकापुराणे ८२ अध्यायः।

शृङ्गाटकं, क्ली, (शृङ्गाटमेव। स्वार्थे कन्।) चतुष्पथम्। इत्यमरः। (यथा, रामायणे। २। ७१। ४५।
"तां शून्यशृङ्गाटकवेश्मरथ्यां
रजोरुणद्वारकपाटयन्ताम्।")
जलज-जलाफलविशेषः। पानिफल इति शिङ्घाड़ा इति च भाषा। तत्पर्य्यायः। जलसूचिः २ संघाटिका ३ वारिकण्टकः ४। इति शटाधरः। शृङ्गाटः ५ वारिकुञ्जकः ६। इति त्रिकाण्डशेषः। क्षीरशुक्लः ७ जलकण्टकः ८। इति शब्दमाला। शृङ्गाटकः ९ शृङ्गरुहः १० जलवल्ली ११ जलाग्रयः १२ शृङ्गकन्दः १३ शृङ्गमूलः १४ विषाणी १५। अस्य गुणाः। शीतिसपित्तहरत्वम्। सङ्ग्रहित्वम्। गुरुत्वम्। वृष्यत्वम्। विशेषात् त्रिदोषवातरक्तमेहशोफनाशित्वम्। रुचिप्रदत्वम्। मेधनदार्ढ्यहेतुत्वञ्च। इति राजनिर्घण्टः। अपि च। गुरुत्वम्। विष्टम्भित्वम्। शीतलत्वञ्च। इति राजवल्लभः। स्वादुविपाकः। वातला इति क्वचित् भाषा। यथा, भावप्रकाशे।
"शृङ्गाटं सङ्ग्रकृत् कफिलं स्वादि वृष्यं गुरु।
स्वादुपाकं त्रिदोषघ्नं रक्तपित्तविनाशनम्।
मस्तिष्कोत्कर्षजनकं मेधाग्निबलवर्द्धनम्।
पुंसे मात्रं सदुग्धं पूर्वं शीतले दुग्धे:।
शृङ्गाटकं समिताया एवं पूरणपूरितम्।
पुनः सर्पिषि संभृष्टं मांसं शृङ्गाटकं वदेत्।
मांसं शृङ्गाटकं रुच्यं दृंहणं बलकृत् गुरु।
वातपित्तहरं वृष्यं कफलं वीर्य्यवर्द्धनम्।"

शृङ्गाटकः, पुं, (शृङ्गाट एव। स्वार्थे कन्।) जलकण्टकः। इति राजवल्लभः।

शृङ्गारं, क्ली, (शृङ्गं प्राधान्यं ह्रासयतीति। ह्रस+अच्।) सवङ्गम्। सिन्दूरम्। चूर्णम्। इति मेदिनी। आर्द्रकम्। इति शब्दचन्द्रिका। कालागुरुः। इति राजनिर्घण्टः।

शृङ्गारः, पुं, (शृङ्गं कामोद्रेकमञ्चतीति। अञ्च गतौ+"कर्म्मण्यण्।" ३।२।१। इत्यण्। यद्वा, शृ हिंसायाम्+"शृङ्गारशृङ्गारौ।" उणा० ३। १३६। इति आरनृप्रत्ययेन साधुः।) सुरतः। नागरसः। नवभूषणम्। इति मेदिनी। * । नागरसस्य लक्षणं यथा,—
"पुंसः स्त्रियां स्त्रियाः पुंसि संयोगं प्रति या स्पृहा।
स शृङ्गार इति ख्यातो रतिक्रीड़ादिकारणम्।"
इत्यमरटीकायां भरतः।
अपि च।
"शृङ्गं हि मन्मथोद्भेदस्तदागमनहेतुकः।
उत्तमप्रकृतिप्रायो रसः शृङ्गार इष्यते।
परोढा वर्णयित्वाच वेश्यास्वानुरागिणीम्।
आलम्बनं नायिका: सुदक्षिणाद्याश्च नायकाः।
चन्द्रचन्दनरोलम्बरताद्युद्दीपनं मतम्।
भ्रूविक्षेपकटाक्षादिरनुभावः प्रकीर्त्तितः।
व्यलीकाद्यमरणालस्यजुगुप्साद्यभिचारिणः।
स्थायी भावो रतिः श्यामवर्णोऽयं विष्णुदैवतः।"
स च द्विधा। विप्रलम्भः संभोगश्च। इति साहित्यदर्पणम्। अन्यत् मैथुनशब्द द्रष्टव्यम्। * । शृङ्गारादिभङ्गे नरको यथा,—
"शृङ्गारादाचारनिमग्नां यश्च भङ्गं करोति च।
स प्रयेत् कालसूत्रञ्च स्वामिनञ्च विशेषतः।"
इति ब्रह्मवैवर्ते प्रकृतिखण्डे ४२ अध्यायः।

शृङ्गारकं, क्ली, (शृङ्गारमेव। स्वार्थे कन्।) सिन्दूरम्। इति राजनिर्घण्टः। शृङ्गविशिष्टे, त्रि। शृङ्गशब्दात् "शृङ्गह्रस्वाभ्यामारकन् वक्तव्यः।" ५। २। १२२। इत्यस्य वार्त्तिकोक्त्या आरकन्प्रत्ययेन निष्पन्नः। इति सिद्धान्तकौमुदी। स्वार्थे के शृङ्गारश्च तत्र पुं।

शृङ्गारभूषणं, क्ली, (शृङ्गारस्य भूषणम्।) सिन्दूरम्। इति हैमचन्द्रः।

शृङ्गारयोनिः, पुं, (शृङ्गारे योनिरुत्पत्तिर्यस्य।) कामदेवः। इति एकाक्षरपुष्पदन्तौ।

शृङ्गारी, [न्] पुं, (शृङ्गारोऽस्त्यस्येति। इनिः।) पुरुषः। नरः। शृङ्गारः। सुरतः। इति मेदिनी। मालतिकम्। इति राजनिर्घण्टः।

शृङ्गि, क्ली, (शृङ्गविशेषः। शिङ्गी भाङ्ग इति भाषा। यथा,—
"शृङ्गिरक्तं त्रिधा शृङ्गी शृङ्गिरक्तमिति त्रिधा।
स्यादिधा शृङ्गिरक्तेति च नामत्रयम् क्वचित्।"
इति शब्दरत्नावली।

शेवधिः, स्त्री, (शेवते इति शेवाः शयनशालिनः काश्मा अस्यो भूत्वा यत्र।) शेफालिका। इति शब्दरत्नावली।

शेफालिका, स्त्री, (शेफालि + स्वार्थे कन्।) पुष्पवृक्षविशेषः। शिउली इति भाषा। (यथा,—

"शेफालिकां विदलितामयमीक्ष्य नत्वी
प्राणान् कथञ्चिदपि धारयितुं प्रभुः सा।
आकर्णय सम्प्रति रवं चरणायुधानां
किंवा अवस्थिति न वेद्मि तपस्विनी सा॥"

इत्युद्भटः।)

तत्पर्य्यायः। सुवहा २ निर्गुण्डी ३ नीलिका ४। इत्यमरः। अत्रापि शेफालिकामात्रे। शिव्यतीति व्युत्पत्त्या शेफालिकामिति केचित्। शेफालिकादिद्वयं शेफालिकामात्रे निर्गुण्डादिद्वयं नीलपुष्पशेफालिकायामिति केचित्। इति तट्टीकायां भरतः। शेफाली ५ मल्लिका ६ रजनीद्वया ७ निशिपुष्पिका ८। सा सुरा पेतु श्वेतसुरसा ९ भूतकेशी १०। इति शब्दरत्नावली। सुकाङ्क्षी ११ शीतमञ्जरी १२ विजया १३ वातारिः १४ भूतकेशी १५। अस्या गुणाः। कटुत्वम्। तिक्तत्वम्। उष्णत्वम्। रूक्षत्वम्। वातकफाङ्गमन्थिपाण्डुदाहादिदोषनाशित्वञ्च। इति राजनिर्घण्टः।

शेफाली, स्त्री, (शेफालि + ङीष्। यद्वा शेफा + लातीति ला + कः + ङीष्।) शेफालिका। इति शब्दरत्नावली। नीलसिन्दुवारः। इति भावप्रकाशः।

शेमुषी, स्त्री, (शेते इति शीङ् + मुट् च। शीङ् + क्विप्। मुट् च इति। शुभ शेषे + शुभ्रविभुवादिभ्यः। गौरादित्वात् ङीष्। इत्यमरटीका।) बुद्धिः। इत्यमरः। १। ५। १। (यथा, राजतरङ्गिण्याम्। ६। २०६।

"विवक्षा हि विवर्द्धेति सङ्कल्पाद्यापि शेमुषी।")

शेल, क आगमश्च। इति कविकल्पद्रुमः। (भ्वा०-पर०-सक०-सेट्।) शू, व्यक्तिगमनम्। इति दुर्गादासः।

शेलुः, पुं, (शेलयतीति। शेल गतौ + कः।) बदुरवृक्षः। इत्यमरः। (यथा, रघुवंशे। ४। ६८

"विदर्भराजशेलुताम्रकीर्णघनसानुरा।"

मनुष्यभेदे। यथा, मनुः। ५। ६।

"शेलूषं मद्यपं पैशुन्यप्रवर्त्तकं विवर्जयेत्।")

शेवः, पुं, (शेते देहेऽवस्थानकरोतीति। शीङ् + "इगुपधज्ञाप्रीकिरः कः।" उणा० ३। १४३। इति वन्।) लिङ्गम्। धनम्। सुखम्। इत्यजादिषोडशः। (शी, सुखम्। इति सिद्धान्तः। ३। ६। ३। वि, सुखकरम्। यथा, ऋग्वेदे। १। ५०। ६।

"मित्रं न शेवं दिव्याय जन्मने।"

"मित्रं न शेवं सखा यथा सुखकरो भवति तद्वत्।" इति महाभाष्ये भाष्यम्।)

शेवधिः, पुं, (शेवं सुखं धनमेतेभ्योऽस्तीति। धा + कः।) निधिः। इत्यमरः। (यथा, मनुः। ८। १३८।

"विद्या ब्राह्मणमेवाह शेवधिस्तेऽस्मि रक्ष माम्।
असूयकाय मां मादास्तथास्यां वीर्यवत्तमा॥")

शेवलं, क्लीं, शैवालम्। इति शब्दरत्नावली। (मनुष्यनाम। इति पाणिनिः। ५। ३। ८४।)

शेवलिनी, स्त्री, (शेवलं शैवालमस्या अस्तीति। इनिः।) नदी। इति राजनिर्घण्टः।

शेवालं, क्लीं, (शेते जले इति। शीङ् + "शीङो धुक्लमलष्वालनः।" उणा० ४। ३८। इति वालन्।) शैवालम्। इति शब्दरत्नावली। (यथा, राजेन्द्रकर्णपूरे। २५।

"अद्रौ पद्मे पतति यतते बालशैवालगुच्छे
कूले लोकः किमपि कुरुते कर्म वैकुण्ठकूर्मः॥")

शेवाली, स्त्री, चाकाशमांसी। इति राजनिर्घण्टः।

शेषं, क्लीं, (शिष्यते यदिति। शिष् + घञ्।) प्रसादः। इति मेदिनी। ये, २८।

शेषः, पुं, (शेषति सङ्कुर्यतीति। शिष हिंसायाम् + अच्।) सङ्कर्षणः। स तु बलदेवः। (यथा, माघे। २। ८८।

"निशम्य ताः शेषगवो रभिघातमधोक्षजः।
शिष्याय दृप्तां पतुः प्रसादमादिशत् तथा॥"

शिष वधे + भावे घञ्।) वधः। अवशिष्टः। स च सर्परोजः। इति मेदिनी। (यथा, कुमारे। १। ३।

"यादिश्यते भूधरतामवेक्ष्य
सद्यो देवीङ्गनाय शेषः॥")

तस्य ध्यानं यथा,—

"कषायरक्तसंयुक्तं चतुर्बाहुं किरीटिनम्।
नवाम्बुपलाशाकारं मिग्धलक्ष्मसुलोचनम्॥
पीताम्बरधरं देवं शुक्लयज्ञोपवीतिनम्।
करार्थे दक्षिणे पद्मं गदां तस्याप्यधःकरे।
धृतं सर्व्वलोकेशं सर्व्वाभरणभूषितम्।
श्रीरश्मिमणि श्रीमन्तमनन्तं पूर्णचेतसः॥"

इति भविष्यपुराणम्॥

गणः। नागः। श्वेतवर्णतरवस्तु। इत्यजयपालः। भागवतो द्वितीया मूर्त्तिः। यथा,—

"एका भागवती मूर्त्तिर्ज्ञानैकरूपा शिवामला।
वासुदेवाभिधाना सा मुक्तानामपि मुक्तिदा॥
द्वितीया कालरूपाख्या तामसी शेषसंज्ञिता।
विभर्त्ति सङ्कर्षणाख्यं वैष्णवी परमा तनुः॥"

इति श्रीमत्स्यपुराणे ३८ अध्यायः॥

शेषशयनव्रतप्रकारो यथा,—

"अनन्तश्च बलो यत्र यत्र क्षीरोदसागरः।
तत्र सर्वं क्षिपेत् तूर्णं सुवर्णञ्च अपार्थिवम्॥
सप्तधान्यानि कर्पूरमर्घो दक्षिणा तथा।
उत्तरा मारयोश्चैव उपवासं महाव्रतः॥
सायाह्नं तदा कुर्य्यात् न शेषः प्रथिवीं यथा।
सप्तधा क्षीरसागरे शेषशय्यां समाहितम्॥
पूजां पूर्वं प्रकुर्य्यात्तु शेषाय विधिवत्ततः।
शेषाय शेषभोगाय शेषपृथ्वी समाहितम्॥
शेषं शेषाय शेषाय शेषं शेषाय शेषतः।
एवं कृत्वा पूजां कार्यं इत्यर्घं तदा हरेः।

भूतभव्यभवन्नाथं परापरपतिं हरिम्॥
दधार शिरसानन्तः स्वयमेव सतां तनुम्।
एवं ब्रह्मादिभिर्देवैः प्रमाणैः निर्णयं हरिः।
सन्धाय समधिप्राप्य शेते नारायणोऽव्ययः॥"

इति कालिकापुराणे २७ अध्यायः॥

शेषः, पुं, क्लीं, (शिष्यते इति। शिष + घञ्।) उपयुक्तेतरवस्तु। इति मेदिनी। शेषोऽवशिष्टमवशिष्टना च शेषः शेषसेवादि। अनन्ते तु शेषः पुंलिङ्ग एव शिष्टप्रयोगात्। उक्तादन्यः शेषः। यथा। अस्तपद्मौ निधिवाक्यौ पुंलिङ्गौ जलजे तूभयलिङ्गौ। इति सर्व्वानन्दः। इत्यमरटीकायां भरतः। ७। अशादिशेषरक्षणनिषेधो यथा,—

"अग्निशेषं ऋणशेषं शत्रुशेषं तथैव च।
पुनः पुनः प्रवर्द्धन्ते तस्मात् शेषं न कारयेत्॥"

इति गारुडे ११६ अध्यायः॥

(अवशिष्टे, त्रि। यथा, रघुः। ४। ६४।

"अपनीतशिरस्त्राणाः शेषास्तं शरणं ययुः॥"

तथाच रामायणे। २। २६। ३२।

"वन्दितव्याश्च नित्यं वः शेषा मम मातरः॥")

शेषत्वं, क्लीं, (शेषस्य भावः। शेष + त्व।) उपकारित्वम्। पारार्थ्यम्। परोद्देश्यप्रयुक्तत्वम्। यथा,—

"शेषत्वमुपकारित्वं प्रयोगायाप्यपादरः।
पारार्थ्यं शेषता तस्य सर्व्वैरुक्तेति जैमिनिः॥"

इत्यधिकरणमालायां मायवाचार्य्यः॥

शेषस्य भावः। इति भावकरणम्॥

शेषरात्रिः, स्त्री, (शेषा अवशिष्टा रात्रिः।) रात्रिशेषः। तत्पर्य्यायः। उषसः २ अपरात्रः ३। इति शब्दरत्नावली॥

शेषा, स्त्री, (शिष्यतेऽसौ। शिष + घञ्। टाप्।) स्वनिर्माल्यार्पणम्। इति मेदिनी। (यथा, कुमारे। १। २२।

"तपेति शेषामिव भर्त्तुराज्ञा-
मादाय मूर्द्ना मदनः प्रतस्थे॥")

शैषः, पुं, (शिष्यामधीते इति। शिष्या + अण्।) प्राथमकल्पिकः। इत्यमरः॥ ये प्रथमारभ्य वेदाध्ययने। शिष्यन्ते शिष्या। शेषाद्यात् यत्रीति यः। शिष्या प्रथमोपदेशः सञ्जाताऽर्थात् यस्योऽपि शिष्या सामधीयते शैषः। इति भरतः। (शिष्या शीलमस्येति। "तृणादिनी यः।" ५। ४। ६३। इति यः। शिष्यासौ, त्रि॥)

शैषिकः, त्रि, शिष्यायाऽर्थायेषा। शिष्यां मिति अधीते वा इत्यर्थे ठिकन्नन्तत्वेन सिद्धम्॥

शैलगिरिः, पुं, (शिखरे पर्व्वते भवतीति। शिखर + कुत्वं।) कर्पूरम्। इत्यमरः॥

शैलशेयः, पुं, (शिखरे भवः। शिखर + ढक्।) कर्पूरम्। इति भरतधृतहरावलीः॥

शैत्यं, क्लीं, (शीतस्य भावः। शीत + "वर्णदृढादिभ्यः ष्यञ्।" ५। १। १२३। इति ष्यञ्।)

शैलेयं, क्ली, (शिलायां भवम्। शिला+ठक्।) शैलजाख्यगन्धद्रव्यम्। शैलेयक इति रन्दू च इति छरिला इति च ख्यातम्। तत्पर्य्यायो यथा,—
"शैलेयं शैलजं वृद्धं शिलापुष्पं शिलोद्भवम्। स्थविरं पलितं जीर्णं तथा कालानुसार्य्यकम्॥ शिलीत्यच्च शिलादः शैलाजं गिरिपुष्पकम्। शिलाप्रसूनं सुभगं शैलकं षोढ़शाह्वयम्॥"
अस्य गुणाः।
"शैलेयं शिशिरं तिक्तं सुगन्धि कफपित्तजित्। दाहतृष्णाविषिश्वासव्रणदोषविनाशनम्॥"
इति राजनिर्घण्टः॥

अपि च।
"शैलेयन्तु शिलापुष्पं वृद्धं कालानुसार्य्यकम्। शैलेयं शीतलं वृद्धं कफपित्तहरं लघु। कण्डूकुष्ठाक्षरीदाहविषवृद्धुदरक्तहृत्॥"
इति भावप्रकाशः॥ * ॥
तालपर्णी। सैन्धवम्। इति मेदिनी॥

शैलेयं, त्रि, (शैले भवम्। शैल+ठक्।) शैलसम्भवम्। इति हेमचन्द्रः॥ शिलातुल्यम्। इति शब्दरत्नावली॥ (शिलेव। शिला+"शिलाया ढः।" ५।३।१०२। इति योगविभागेन ठञ्॥)

शैलेयः, पुं, (शैले भवः। शैल+ठक्।) सिंहः। भ्रमरः। इति शब्दरत्नावली॥

शैलेयी, स्त्री, (शैले भवा। शैल+ठक्। ङीष्।) पार्व्वती। इति त्रिकाण्डशेषः॥

शैलोद्भवा, स्त्री, (शैलात् उद्भवो यस्याः।) क्षुद्रपाषाणभेदी। इति राजनिर्घण्टः॥

शैल्यं, त्रि, (शिला+ष्यञ्।) शिलासम्बन्धि। शिलाया इदं इत्यर्थे ष्यञ्प्रत्ययेन निष्पन्नम्॥

शैवं, क्ली, शैवालः। इति शब्दचन्द्रिका॥ (शिवमधिकृत्य कृतो ग्रन्थः। शिव+अण्।) शिवपुराणम्। यथा,—
"अष्टादश पुराणानि पुराणज्ञाः प्रचक्षते। ब्राह्मं पाद्मं वैष्णवञ्च शैवं भागवतं तथा॥"
इति मलमासतत्त्वे विष्णुपुराणम्॥ (शिवस्येदमिति। शिव+अण्।) शिवसम्बन्धिनि, त्रि॥ (यथा, कथासरित्सागरे। ४०।८६।
"प्रापदायतनं शैवं गत्वाऽऽलक्षितटस्थितम्॥")

शैवः, पुं, (शिव+अण्।) वसुकः। धुस्तूरः। इति राजनिर्घण्टः॥ आचारविशेषः। यथा,—
"अष्टाङ्गयोगसंयुक्तो यजेद्देवं विधानतः। यावज्जानं समाधिस्थ तावत् शैवः प्रचक्षते॥"
इत्याचारभेदतत्त्वम्॥ * ॥
शिवोपासकः। तत्पर्य्यायः। और्द्धपोतसिकः २। इति त्रिकाण्डशेषः। एतद्भेदा यथा,—
"ततश्चकार भगवान् चातुर्व्वर्ण्यं हरार्च्चने। शास्त्राणि चैषां सुख्यानि नानोक्तिविदितानि च॥ आद्यं शैवं परिख्यातमन्यत् पाशुपतं सुने!। तृतीयं कालवदनं चतुर्थञ्च कपालिनम्॥ शैव आसीत् स्वयं शक्तिर्व्यशिलस्य प्रियः सुतः। तस्य शिष्यो बभूवाथ गोपायन इति श्रुतः॥ महापाशुपतख्यातोऽङ्गारदाहस्तपोधनः। तस्य शिष्योऽभवद्राजा ऋषभः सोमकेश्वरः॥ कालास्यो भगवानासीदापस्तम्बस्तपोधनः। तस्य शिष्यो वको वैश्यो नाम्ना क्राथेश्वरो सुने॥ महाव्रती च धनदस्तस्य शिष्यश्च वीर्य्यवान्। कुलोदर इति ख्यातो लाट्या भूदो महातपाः॥ एवं स भगवान् ब्रह्मा पूजनाय शिवस्य च। कृत्वा तु चातुराश्रम्यं स्वमेव भवनं गतः॥"
इति वामने ६ अध्यायः॥ * ॥
तस्य स्वरूपं यथा। आयान्तं शैवमालोक्याह।
"श्रीमानसावेति जटालमौलि-र्व्याघ्रत्वगालम्बितमध्यभागः। विभूतिसंभूषितभास्वदङ्गो रुद्राक्षमालाकलितोर्द्धदेहः॥"
इति विद्योदतरङ्गिण्यां २ तरङ्गः॥

शैवलं, क्ली, (शैवते इति। शीङ्+"शीङो धुग्लग्लज् वालनः।" उणा०। ४। ३८। इति वलच्।) पद्मकाष्ठम्। शैवाले, पुं। इति मेदिनी॥ (यथा, कुमारे। ५। ६।
"न षट्पदश्रेणिभिरेव पङ्कजं सशैवलासङ्गमपि प्रकाशते॥"
विन्ध्यसमीपस्थिगभागवर्त्तिगिरिविशेषः। यथा, रामायणे। ७। ८८। १३।
"शैवलस्योत्तरे पार्श्वे ददर्श सुमहत् सरः॥")

शैवलिनी, स्त्री, (शैवलमस्या अस्तीति। इनिः।) नदी। इत्यमरः॥

शैवालं, क्ली, (शी+वाहुलकात् वालच्।) जलजन्यविशेषः। शेयाला इति भाषा। (यथा, महाभारते। ४। ६०। १७।
"प्रावर्त्तयन्नदीं घोरां शोणितोदां तरङ्गिणीम्। केशशैवालसंबाधां युगान्ते कालनिर्म्मिताम्॥")
तत्पर्य्यायः। जलनीली २ शैवलः ३। इत्यमरः॥ शेपालम् ४ शैवलम् ५ शीवलम् ६ शेपाल: ७ जलनीलिका ८। इति वाचस्पतिः॥ जलनीलः ९। इति सुकुटादयः। इति भरतः॥ सैवालम् १० शैवालम् ११ वारिचामरः १२ शैवलम् १३ सलिलकुन्तलम् १४ छटपर्णी १५ अम्बुतालम् १६। इति शब्दरत्नावली॥ अरकः १७ जलकेशः १८ कावारम् १९। इति धारावली॥ जलजम् २०। अस्य गुणाः। शीतलत्वम्। स्निग्धत्वम्। सन्तापव्रणनाशित्वञ्च। इति राजनिर्घण्टः॥

शैव्यः, पुं, श्रीकृष्णस्य घोटकविशेषः। यथा,—
"तुरगाः शैव्यसुग्रीवमेघपुष्पबलाहकाः।"
इति त्रिकाण्डशेषः॥
(यथा च महाभारते। १। २२१। ३।
"रथेन काञ्चनाङ्गेन कल्पितेन यथाविधि। शैव्यसुग्रीवयुक्तेन किङ्किणीजालमालिना॥")
पाण्डवसेनापतिविशेषः। यथा,—
"धृष्टकेतुश्चेकितानः काशीराजश्च वीर्य्यवान्। पुरुजित् कुन्तिभोजश्च शैव्यश्च नरपुङ्गवः॥"
इति श्रीभगवद्गीतायाम्। १। ५।

(स्त्री, प्रतीपस्य राज्ञः पत्नी। इति महाभारतम्। १। ९५। ४४॥ सगरस्य राज्ञः पत्नी। सा तु असमञ्जसो जननी। यथा, महाभारते। ३। १०७। ३६।
"असमञ्जा इति ख्यातः सगरस्य सुतोऽभवत्। यं शैव्या जनयामास पौराणां च हि दारकान्। गलेषु क्रोशतो गृह्य नद्यां चिक्षेप दुर्व्वसान्॥")
शिवसम्बन्धिनि, त्रि॥

शैशवं, क्ली, शिशोर्भावः। (शिशु+"इगन्ताच्च लघुपूर्व्वात्।" ५। १। १३१। इति अण्।) बाल्यम्। इत्यमरः॥ यथा,
"शैशवेऽभ्यस्तविद्यानां यौवने विषयैषिणाम्। वार्द्धके मुनिवृत्तीनां योगेनान्ते तनुत्यजाम्॥"
इति रघुवंशे १ सर्गः॥

शैशिरः, पुं, (शिशिरे ऋतौ भवः। शिशिर+अण्।) श्यामचटकः। इति राजनिर्घण्टः॥ शिशिरसम्बन्धिनि, त्रि। यथा। स्मृतिः। तपस्तप्स्यौ शैशिरादृतुः। इति तिथ्यादितत्त्वम्॥

शैष्योपाध्यायिका, स्त्री, (शिष्योपाध्यायानां भावः कर्म्म वा। शिष्योपाध्याय+"ब्रह्मणो जाति-भ्यश्च।" ५। १। १३३। इति ष्यञ्।) शिष्याध्यापना। इति सिद्धान्तकौमुदी॥

शो, य निशाने। इति कविकल्पद्रुमः॥ (दिवा०-पर०-सक०-अनिट्।) निशानमिहास्त्रीकरणम्। य, श्यति शातुं शूरः। इति दुर्गादासः॥

शोकः, पुं, (शुच+घञ्।) चित्तविकलता। इष्टवियोगानुचिन्तनम्। इति नागोजीभट्टः॥ बन्धादिवियोगजनिता मनःपीड़ा। इति भावप्रकाशः॥ तत्पर्य्यायः। मन्युः २ शुक् ३। इत्यमरः॥ शुचा ४ निःसमः ५। इति शब्दरत्नावली॥ शोचनम् ६ खेदः ७। इति हेमचन्द्रः॥ तन्निवारणहेतुर्यथा,—
"भरतं पतितं दीनं शोचन्तं सुभृशं तदा। शोचमानं वशिष्ठस्तु वारयामास हेतुभिः॥ शोचमानास्तु सक्लेशा बान्धवाः सुहृदस्तथा पातयन्ति गतं स्वर्गादश्रुपातेन राघव॥ भूरिद्युम्नो गतः स्वर्गं पुण्येन पतितः पुनः। शोचितो बन्धुवर्गेण रुतस्नेहं परित्यज॥"
इति वह्निपुराणम्॥
अपि च। अथ शोकापनोदनम्। याज्ञवल्क्यः
"ऋतोदकान् समृत्तीर्णान् स्पृष्टपुष्पबलिस्रजः। ज्ञातानपगतक्लेशानितिहासैः पुरातनैः॥ मानुष्ये कदलीस्तम्भे निःसारे सारमार्गणम्। यः करोति स संस्मृत्य जलबुद्बुदसन्निभे॥ पञ्चधा संभृतः कायो यदि पञ्चत्वमागतः। कर्म्मभिः स्वशरीरोत्थैरुक्त्र का परिवेदना॥ गन्धर्व्वनगरी नाशसदृशैर्दैवतानि च। फेनप्रख्यः कथं नाशं मर्त्यलोको न यास्यति॥ क्षेत्राश्च बान्धवैर्मुक्तं प्रेतो मुङ्क्ते यतोऽवशः। अतो न रोदितव्यं हि क्रिया कार्य्या विधानतः॥"
इति शुद्धितत्त्वम्॥

शोणः

अन्यच्च ।

श्रीभगवानुवाच ।

"अशोच्यानन्वशोचस्त्वं प्रज्ञावादांश्च भाषसे ।
गतासूनगतासूंश्च नानुशोचन्ति पण्डिताः ॥
अव्यक्तोऽयमचिन्त्योऽयमविकार्योऽयमुच्यते ।
तस्मादेवं विदित्वैनं नानुशोचितुमर्हसि ॥
अथ चैनं नित्यजातं नित्यं वा मन्यसे मृतम् ।
तथापि त्वं महाबाहो नैनं शोचितुमर्हसि ॥
जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च ।
तस्मादपरिहार्येऽर्थे न त्वं शोचितुमर्हसि ॥
देही नित्यमवध्योऽयं देहे सर्वस्य भारत ।
तस्मात् सर्वाणि भूतानि न त्वं शोचितुमर्हसि ॥"

इति श्रीभगवद्गीतायाम् २ अध्यायः ॥

शोकनाशः, पुं, (शोकस्य नाशो यस्मात् ।) अशोकवृक्षः । इति राजनिर्घण्टः ॥

शोकहारी, स्त्री, (शोकं हरतीति । हृ + अण् । ङीष् ।) वनवर्त्तिका । इति राजनिर्घण्टः ॥

शोकारिः, पुं, (शोकस्य अरिः ।) कदम्बवृक्षः । इति शब्दचन्द्रिका ॥

शोचनं, क्ली, (शुच् + ल्युट् ।) शोकः । इति हेमचन्द्रः ॥ (शोचतीति । शुच शोके + "चुच-डुक्रुञ्यदन्त्यस्यद्यधीति ।" ३ । २ । १५० । इति युच् । शोकशीले, त्रि ॥)

शोचना, स्त्री, शोकोत्पादना । शोचि णिजन्तात् ल्युलन्तात्प्रत्ययान्तादातश्चप्रत्ययनिष्पन्ना । इति संक्षिप्तसारव्याकरणम् ॥

शोचिः, [स्] क्ली, (शुच्यत्यनेनेति । शुच + "अर्चि-शुचिहुसृपीति ।" उणा० २ । १०६ । इति इसिः ।) प्रभा । इत्यमरः ॥ (यथा, भागवते । ३ । १५ । २६ ।

"तद्विश्वगुर्व्वधिकृतं स्ववनेकवर्त्म
दिव्यं विचित्रविबुधार्य्यविमानशोचिः ॥")

शोचिष्केशः, पुं, (शोचींषि केशा इव यस्य । नियतं समासेऽनुत्तरपदस्थस्येति सत्वम् ।) अग्निः । चित्रकवृक्षः । इत्यमरः ॥ (क्वचित् पाठान्तरे शोचिर्जटोऽपि । यथा, ऋग्वेदे । १ । ४५ । ६ ।

"शोचिष्केशं पुरुप्रियाग्ने हव्याय वोळ्हवे ।"

"शोचिष्केशं दीप्तिरूपकेशोपेतम् ।" इति तद्भाष्ये सायणः ॥)

शोचिष्कः, त्रि, अवरः । क्षुद्रः । इति शब्दमाला ॥

शोटीर्य्यं, क्ली, वीर्य्यम् । इति शब्दरत्नावली ॥

शोटः, त्रि, मूर्खः । अलसः । इति मेदिनी ॥ धूर्त्तः । नीचः । पामरतः । इति शब्दरत्नावली ॥

शोण, ऋ गतौ । वर्णे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-वर्णे अक०-सेट् ।) वर्णश्चेह रक्तीभावः । शोणति सूर्यः सन्ध्यायाम् । इति दुर्गादासः ॥

शोणं, क्ली, (शोणतीति । शोण वर्णे + पचाद्यच् ।) सिन्दूरम् । रुधिरम् । इति राजनिर्घण्टः ॥

शोणः, पुं, (शोण वर्णे + अच् ।) रक्तोत्पलतुल्य-वर्णः । तत्पर्य्यायः । कोकनदश्च्यवि २ । इत्यमरः । रक्तोत्पलनिभः ३ । इति शब्दरत्नावली ॥ रक्तोत्पलाभः ४ । इति जटाधरः ॥ (यथा, भागवते । १ । ११ । २ ।

"स उच्चकाशे धवलोदरोदरो-
ऽरुणरुक्मस्थाधरशोणशोभिभा ॥")

नदविशेषः । तत्पर्य्यायः । हिरण्यवाहुः । इत्यमरः ॥ हिरण्यवाहः ३ । इति भरतः ॥ स तु अमरकण्टकदेशात् पाटलिपुत्रे गङ्गायां मिलितः । तच्चलगुणाः । रुचिदत्वम् । सन्ताप-शोषापहत्वम् । पथ्यत्वम् । वह्निकरत्वम् । वलवीर्य्याङ्गदृढिप्रदत्वञ्च । इति राजनिर्घण्टः ॥ अग्निः । श्योनाकः । लोहितास्यः । कोकनद-च्छाये, त्रि । इति मेदिनी ॥ वसुभद्रविशेषः । इति धरणिः ॥ रक्तेक्षुः । श्योनाकभेदः । इति राजनिर्घण्टः ॥ (रक्तवर्णे, त्रि । यथा, कुमारे । १ । ७ ।

"न्यस्ताक्षरा धातुरसेन यत्र
भूर्ज्जत्वचः कुञ्जरविन्दुशोणाः ॥")

शोणकः, पुं, (शोण एव । स्वार्थे कन् ।) शोणाक-वृक्षः । इत्यमरः ॥

शोणभिण्टिका, स्त्री, (शोणा रक्तवर्णा भिण्टिका ।) रक्तसेरेयः । इति राजनिर्घण्टः ॥

शोणभिण्टी, स्त्री, (शोणा रक्तवर्णा भिण्टी ।) कुरुवकः । कण्टकिनी । इति राजनिर्घण्टः ॥

शोणपत्रः, पुं, (शोणवत् रक्तानि पत्राणि यस्य ।) रक्तपुनर्नवा । इति राजनिर्घण्टः ॥

शोणपद्मकं, क्ली, (शोणं रक्तवर्णं पद्मकम् ।) रक्त-कमलम् । इति राजनिर्घण्टः ॥

शोणपुष्पकः, पुं, (शोणं पुष्पं यस्य । कन् ।) कोविदारः । इति राजनिर्घण्टः ॥

शोणपुष्पी, स्त्री, (शोणवत् पुष्पमस्याः । ङीष् ।) सिन्दूरपुष्पी । इति राजनिर्घण्टः ॥

शोणरत्नं, क्ली, (शोणं रक्तवर्णं रत्नम् ।) पद्म-रागमणिः । इत्यमरः ॥

शोणा, स्त्री, (शोणो रक्तवर्णोऽस्त्यस्या इति । अच् । टाप् ।) शोणवर्णयुक्ता । इति जटाधरः ॥

शोणाकः, पुं, वृक्षविशेषः । शोणा इति ख्यातः । तत्पर्य्यायः । श्योनाकः २ शुकनासः ३ वक्षः ४ दीर्घवृन्तः ५ कुटन्नटः ६ अरुणः ७ स्वर्ण-वल्कलः ८ ध्वान्तध्वाक्षः ९ । इति शब्दमाला ॥ मण्डूकपर्णः १० पत्रोर्णः ११ नटः १२ कट्फलः १३ टुण्टुकः १४ शोणकः १५ अरलः १६ । इत्य-मरः ॥ स्योनाकः १७ अरटुः १८ । इति तट्टीका ॥

शोणितं, क्ली, (शोण वर्णे + क्तः ।) शोण + जातार्थे इतच् वा ।) रक्तम् । इत्यमरः ॥ (यथा, मनुः । ११ । २०८ ।

"शोणितं यावतः पांसून् संगृह्णाति मही नृणाम् ।
तावन्त्यब्दसहस्राणि तत्कर्त्ता नरके वसेत् ॥")

तस्योत्पत्तिर्गर्भस्थस्य पञ्चमे मासि भवति । इति सुश्रुतबोधः ॥ कुङ्कुमम् । इति राजनिर्घण्टः ॥

शोणितचन्दनं, क्ली, (शोणितवत् चन्दनम् ।) रक्तचन्दनम् । इति राजनिर्घण्टः ॥

शोणितपुरं

शोणितपुरं, क्ली, (शोणिताख्यं पुरम् ।) बाण-पुरम् । इति चिकाण्डशेषः ॥

शोणिताङ्गं, क्ली, (शोणितं आङ्गयो यस्य ।) कुङ्कुमम् । इति रत्नमाला ॥

शोणितोत्पलं, क्ली (शोणितवत् रक्तमुत्पलम् ।) रक्तोत्पलम् । इति केचित् ॥

शोणी, स्त्री, (शोणं + "शोणात् प्राचाम् ।" ४ । १ । ४३ । इति ङीष् ।) रक्तोत्पलतुल्यवर्णा स्त्री । इति व्याकरणं जटाधरश्च ॥ (वड़वा । इति काशिका ॥)

शोणोपलः, पुं, (शोणो रक्तवर्णं उपलः ।) माणि-क्यम् । इति राजनिर्घण्टः ॥

शोथः, पुं, (श्वयतीति । श्वि गतौ + वाहुलकात् थन् । इत्युणादिवृत्तौ उज्ज्वलः । २ । ४ ।) रोगविशेषः । तत्पर्य्यायः । शोफः २ श्वयथुः ३ । इत्यमरः ॥ शोथकः ४ । इति शब्दरत्नावली ॥ अथ शोथाधिकारः । तत्र शोथस्य विप्रकृष्टं निदानमाह ।

"क्षुद्ग्रामवाभक्तकशाकपत्राणां
क्षाराम्लतीक्ष्णोष्णगुरूपसेवा
दध्यामसच्छाकविरोधिपिण्ड-
गरोपदग्धान्ननिषेवणञ्च ॥
अर्शोऽस्यचेष्टा वपुषो ग्लपुह्नि-
र्मर्म्मोपघातो विषमा प्रसूतिः ।
मिथ्योपचारः प्रतिकर्म्मणाञ्च
निजस्य हेतुः श्वयथोः प्रदिष्टः ॥"

क्षुद्व्रमनविरेकादि । ग्रामया पाण्डुरोगा-दयः । अभक्त अभोजनम् । आमः अपक्को सुक्तस्य रसः । पिण्डगरोपदग्धान्नं पिण्डो वो गरः संयोगजं विषं तेन उपदग्धमन्नम् । वपुषो ग्लपुहिः शोथनार्हस्य वपुषोऽशोधनम् । मर्म्मोप-घातः दोषकृत एव ज्ञेयः । बाह्यहेतुकृतस्तु मर्म्मोपघातः आमसम्भवपतनादिना । प्रतिकर्म्मणां वमनादीनां पञ्चकर्म्मणाम् । मिथ्योपचारः असम्यक्करणम् । श्वयथोः शोथस्य । निजस्य आत्मीयस्य । सन्निकृष्टस्य हेतोर्वातादेः । हेतुः रूक्षोष्णमधुरादि ॥ * ॥ सन्निकृष्टनिदानमाह ।

"दोषैः पृथक् द्वयैः सर्व्वैरभिघाताद्विषादपि ।
सर्व्वो हेतुविशेषेस्तु रूपभेदो नवात्मकः ॥" * ॥

संप्राप्तिपूर्व्वकं सामान्यं लक्षणमाह ।

"रक्तपित्तकफान् वायुर्दुष्टो दुष्टान् वहिःशिराः ।
नीत्वा रुद्धगतिस्तेहि कुर्य्यात् त्वङ्मांससंश्रयम् ।
उत्सेधं संहतं शोथं तमाहुर्निचयादृताः ॥
सगौरवं स्यादनवस्थितत्वं
शोतूसेधनुग्ग्राथ शिरातताम्रम् ।
सलोमहर्षस्य विवर्णता च
सामान्यलिङ्गं श्वयथोः प्रदिष्टम् ॥"

उत्सेधः उन्नतत्वं किं विशिष्टमुत्सेधं यतः पूर्व्वोक्तान्निचयात् रक्तपित्तकफवातानां समु-दायात् । संहतं घनम् । तमुत्सेधं शोथमाहु-रित्यन्वयः । * ॥ तस्य शोथस्य किं स्यादित्या-

काङ्क्षायामाह । अनवस्थितत्वं स्यादनियतास्थितिः स्यादित्यर्थः । चिकित्साव्यतिरेकेणापि निवृत्तेः । तच्चानवस्थितत्वं सगौरवं स्यात् । गौरवमप्यनवस्थितं स्यात् । अर्थं च शीतसेधं स्यात् । उन्नतत्वमप्यनवस्थितं स्यादित्यर्थः ॥ * ॥ वातिकं शोथमाह ।

"चरस्तनुस्खक्पुरुषोरुशोऽसितः
प्रसुप्तिहर्षार्तियुतो निमित्ततः ।
प्रणाम्यति प्रोन्नतमेति पीड़ितो
दिवा बली स्यात् श्वयथुः समीरणात् ॥"

चरः सञ्चारी । प्रसुप्तिः सुप्तांशता । हर्षोऽत्र भिनभिनी रोमाणो वा । अर्तिः पीड़ा । एतद्युतः । दिवाबलीविकृतिविषमसमवायारब्धात् । अतएवोक्तं चरकेण ।

"स्नेहोष्मस्वेदनाद्यैः प्रणाम्येत् स च वातिकः ।
यश्चाप्यरुणवर्णः स्यात् शोथो नक्तं प्रणाम्यति ॥" * ॥

पैत्तिकमाह ।

"मृदुः सगन्धोऽसितपीतरागवान्
भ्रमज्वरस्वेदतृषामदान्वितः ।
य उच्यते सर्षपकर्णिकाचिरागकृत्
स पित्तशोथो भृशदाहपाकवान् ॥"

उच्यते सन्तप्यते । भृशदाहपाकवान् भृशदाहो यः पाकस्तद्युक्तः ॥ * ॥ श्लैष्मिकमाह ।

"गुरुः स्थिरः पाण्डुररोचकान्वितः
प्रसेकनिद्रा वमिवह्निमान्द्यकृत् ।
न क्षुज्जलाभ्रप्रशमे निषीड़नो
न चोन्नमेद्राचिबलीकफात्मकः ॥" *॥

द्वन्द्वजमाह ।

"निदानाकृतिसंसर्गात् ज्ञेयः शोथो द्विदोषजः ॥"

सान्निपातिकमाह ।

"सर्वाकृतिः सन्निपाताच्छोथो व्याधिस्वलक्षणः ।"

व्याधिस्वलक्षण इत्युक्ते सर्वाकृतिरिति उक्तवानजादिशोथसकललक्षणनियमार्थम् ॥ * ॥ अभिघातजमाह ।

"अभिघातेन शस्त्रादिच्छेदभेदक्षतादिभिः ।
हिमानिलोदधिनिलैर्भक्षातकपिकच्छुजैः ॥
रसैः शूकैश्च संसृष्टान् श्वयथुः स्यादभिघातजः ।
शूनोष्मा लोहिताभासः प्रायशः पित्तलक्षणः ॥"

छेदः खड्गादिना भेदः पाषाणादिना क्षतं शरादिना नाड़ीव्रणादि च । आदिशब्देन नखगुदप्रहारादि गृह्यते । भक्षातकैः । रसैः । कपिकच्छुजैः शूकैः । विसर्पवान् प्रसरणशीलः । पित्तलक्षणः पैत्तिकशोथलक्षणः ॥ * ॥ विषजमाह ।

"विषजः सविषप्राणिपरिसर्पणदूषणात् ।
दंष्ट्रादन्तनखाघातादविषप्राणिनामपि ॥
विण्मूत्रशुक्रौषधनमलवह्वस्रसंकटात् ।
विषदूषितानिलस्पर्शात् गरयोगावचूर्णनात् ॥
मृद्वल्पशोफवान्मध्ये च शोफो बहुरुजाकरः ।"

परिसर्पेण शरीरोपरि सर्पणम् । दंष्ट्रादिगुणोद्भवा दन्तावली । चौरेति लोके । दन्ता अग्रे भवाः । अविषप्राणिनामपीत्यनेन दंष्ट्रादन्तनखानां स्वभाव एव सविषत्वमुक्तम् । किन्तु सर्पादिविषं मारकं भवति । अविषप्राणिनां दंष्ट्रादिविषं शोथव्यथादिकरं भवतीति विशेषः । विण्मूत्रेत्यादिविड़ादुपहतं मलिनस्य यदस्रम् । तथा सङ्करः संभावनीनिःचिप्तो धूल्यादिः तेषां सम्पर्कात् । गरयोगावचूर्णनात् गरः संयोगजं विषं तस्य योगो यस्य तेन वस्तुनावधूननात् । अवलम्बी लम्बमानः । अयमप्यागन्तुजस्तथापि सामान्यागन्तुजशोथचिकित्सातोऽस्य विशिष्टचिकित्साभिधानात् पृथक् पठितः ॥ * ॥

यत्र स्थिता दोषा यत्र शोथं कुर्वन्ति तदाह ।

"दोषाः श्वयथुमूर्द्धं हि कुर्वन्त्यामाग्रये स्थिताः ।
पित्ताग्रयस्था मध्ये तु वर्चस्थानगतास्त्वधः ॥
कृत्स्नं देहमनुप्राप्ताः कुर्युः सर्वसरं तथा ।"

ऊर्द्धं उरःप्रभृत्यूर्द्धम् । मध्ये पक्वाशयमध्ये । अधः पक्वाशयादधः ॥ * ॥ उपद्रवानाह ।

"श्वासं पिपासां हृद्दोषं दौर्बल्यं ज्वरं एव च ।
यस्य चान्नं रुचिर्नास्ति शोथिनं तं विवर्जयेत् ॥"

कष्टसाध्यत्वादिकमाह ।

"यो पथ्यदेशे श्वयथुः स कष्टः सर्वगश्च यः ।
अर्द्धाङ्गिरिष्टभूतश्च यश्चोर्द्धं परिसर्पति ॥"

मध्यदेशे उरःपक्वाशयमध्ये । सर्वगः सकलशरीरभवः । सर्वग इति पाठे सान्निपातिकः । अर्द्धाङ्गे अर्द्धनारीश्वराकारे । यश्चोर्द्धं परिसर्पतीति पुरुषविषयम् । तथा च ।

"ऊर्द्धगामी नरं पङ्गुमधोगामी सुखात् क्षयम् ।
उभयं वक्त्रिसंजातः शोथो हन्ति न संशयः ॥"

ऊर्द्धगामी सुखगामी । तथा च तन्त्रान्तरे ।

"पादप्रवृत्तः श्वयथुर्नृणां यः प्राप्नुयान्मुखम् ॥"

इति ॥ स न सिध्यतीति शेषः । अधोगामी पादगामी । तथा च तन्त्रान्तरे ।

"स्त्रीणां वक्त्रात् पदं याति वस्त्रिजश्च न सिध्यति ।"

इति ॥

उभयं नरं नारीश्च । अपरश्च ।

"अनन्योपद्रवकृतः शोथः पादसमुत्थितः ।
पुरुषं हन्ति वा नारीं सुखजो वस्त्रिजो द्वयम् ॥"

अयमर्थः । पादसमुत्थितः पादाभ्यासमुत्थितो सुखगामीति यावत् शोथः पुरुषं हन्ति स किंविशिष्टः अनन्योपद्रवकृतः । शोफादन्ये व्याधयोऽनीसारमहत्यर्शःप्रभृतयः तेषामुपद्रवैः कृतः । तदुपद्रवेण जात इत्यर्थः । न अन्योपद्रवकृतः । अनन्योपद्रवकृतः । अर्थात् स्वहेतुभिरेव जातः । शोथव्याधिरेव तु पुनर्मुखजः सुखाज्जातः पदमागच्छति यावत् नारीं हन्ति । सोऽप्यनन्योपद्रवकृत एव । वस्त्रिजः द्वयं पुरुषं नारीश्च हन्ति सोऽप्यनन्योपद्रवकृत एव ॥ * ॥ अथ शोथस्य चिकित्सा ।

"गुग्गुलोः पुनर्नवैरण्डपञ्चमूलोद्भवं बलम् ।
वातिके श्वयथौ शस्तं पानाहारपरिग्रहे ॥" *॥

पटोलत्रिफलारिष्टदार्व्वीकाथः सगुग्गुलुः ।
हन्ति पित्तकृतं शोथं क्षणाच्चरसमन्वितम् ॥*॥
खुकुचीरभावितः क्षणा पथ्या मूत्रेण वा युतः ।
योजितः शमयत्याशु शोथं श्लेष्मसमुत्थितम् ॥
मिश्रे मिश्रक्रियां कुर्यात् सर्वत्रे सर्वमेव हि ।
बिल्वपत्ररसं पूतं शोथघ्नं त्रिभवे पिबेत् ॥*॥
शोथे त्वागन्तुजे कुर्यात् सेकलेपादिशीतलम् ।
भल्लातक्या हरेच्छोथं सतिला क्षणाऽत्तिका ।
महिष्या नवनीतेन लेपाद्दुग्धतिलान्वितम् ॥"

अत्र दुग्धं महिष्या एव । यत आह ।

"महिषीक्षीरसंपिष्टैर्नवनीतसमन्वितैः ।
तिलैर्लिप्तः समं याति शोथो भल्लातकोत्थितः ॥
यष्टिदुग्धतिलैर्लेपो नवनीतेन संयुतः ।
शोथमारुष्करं हन्ति चूर्णैः शालदलस्य च ॥"

विषजशोथचिकित्सा तु विषचिकित्सायां द्रष्टव्या ॥

अथ सामान्यचिकित्सा ।

"पथ्या निशा भार्ग्यष्टाग्निदार्व्वी-
पुनर्नवा दारु महौषधञ्च ।
क्वाथं प्रयोज्योदरपाणिपाद-
सुखागतं हन्त्यचिरेण शोथम् ॥"

इति पथ्यादिक्वाथः ॥ * ॥

"फलत्रिकोद्भवं क्वाथं गोमूत्रेणैव साधयेत् ।
वातश्लेष्मभवं शोथं हन्यादुदरसम्भवम् ॥*॥
वृक्षादेवदारुनागरैश्च
दन्ती त्रिवृच्चूर्णमथाक्षकैर्वा ।
दुग्धं सुसिद्धं विधिना निपीतं
गीतं परं शोथहरं भिषग्भिः ॥"

वृक्षादेवः वर्षाभूः ॥ * ॥

"कैमुक्षथार्कवर्षाभूनिम्बक्वाथेन शोथहृत् ।
गोमूत्रेणापि कुर्वीत सुखोष्णेनावसेचनम् ॥*॥
पुनर्नवा दारु शुण्ठी शिग्रुः सिद्धार्थकस्तथा ।
अम्लपिष्टः सुखोष्णोऽयं प्रलेपः सर्वशोथहृत् ॥
गुड़ार्द्रकं वा गुड़नागरं वा
गुड़ाभयां वा गुड़पिप्पलीं वा ।
कर्षाभिवृद्ध्या त्रिपलप्रमाणं
खादेन्नरः पञ्चमथापि मासम् ॥
शोथप्रतिश्यायगलास्यरोगान्
सश्वासकासारुचिपीनसादीन् ।
जीर्णज्वरार्शोग्रहणीविकारान्
हन्यात् तथान्यान् कफवातरोगान् ॥*॥
बिल्वं गुड़ेन तुल्यं वृक्षीवरसानुपानमभ्यस्तम् ।
विनिहन्ति सर्वशोथं घनवृन्दं चण्डवायुरिव ॥*॥
कणानागरजं चूर्णं सगुड़ं शोथनाशनम् ।
आमवातोत्थप्रशमनं शूलघ्नं वस्तिशोधनम् ॥*॥
गुड़ात् पलत्रयं ग्राह्यं शृङ्गवेरं पलत्रयम् ।
शृङ्गवेरसमा क्षारा लोहवित्तिलयोः पलम् ॥
चूर्णमेतत् सगुड़ितं सर्वश्वयथुनाशनम् ॥"

इति गुड़ादिवटिका ॥

"मानकक्वाथकल्काभ्यां घृतपक्वं विपाचयेत् ।
एकजं द्वन्द्वजं शोथं त्रिदोषमपि चापहेत् ॥"

इति मानकघृतम् ॥

"शुष्कमूलकवर्षाभूदारुरास्नासहौषधैः ।
पक्वमभ्यञ्जनात्तैलं सशूलं श्वयथुं हरेत् ॥"

मुष्कस्फूलकतैलम्। इति शोथाधिकारः। इति भावप्रकाशः॥

शोधकः, पुं, (शोध एव। स्वार्थे कन्।) शोधः। इति शब्दरत्नावली॥

शोधघ्नी, स्त्री, (शोधं हन्तीति। हन्+"आतश्चोपसर्गे च।" ३।३।१०३। इति टक्।) पुनर्नवा। इत्यमरः। शालपर्णी। इति राजनिर्घण्टः॥

शोधनाग्रके, त्रि॥

शोधयित्, पुं, (शोधं जयतीति। जि+क्विप्।) भल्लातकः। इति त्रिकाण्डशेषः॥

शोधजिह्मः, पुं, (शोधे जिह्मः कुटिल इव। तन्नाशकत्वात्।) पुनर्नवा। इति त्रिकाण्डशेषः॥

शोधदृत्, पुं, (शोधं धरति नाशयतीति। धृ+क्विप्।) भल्लातकः। इति रत्नमाला॥ शोफहारके, त्रि॥

शोधनं, क्ली, (शोधयतीति। शुध+णिच्+ल्युः।) कङ्कुष्ठम्। इति राजनिर्घण्टः॥ (शुध+भावे ल्युट्।) शौचम्। इति शुधधातुवर्गदर्शनात्॥ (प्रायश्चित्तम्। यथा, मनुः। ११। १६१।

"अभोज्यमन्नं नात्त्यमासात्मनः शुद्धिमिच्छता।
यश्चान्नमश्नन्त्यज्ञानात्सोधं वाप्याशु शोधनैः॥")

विष्ठा। इति शब्दचन्द्रिका॥ कांसीसम्। इति राजनिर्घण्टः॥ विहितविहितमासादिविचारणम्। यथा,—

"कर्म्मयज्ञयज्ञकालेन समानो नास्ति कश्चन।
तत्र यद्यत् कृतं सर्व्वमनन्तफलदं भवेत्।
न मासतिथिवारादिशोधनं सर्व्वपर्व्वसु॥"

इति मलमासतत्त्वम्॥ * ॥

धातुनिर्द्दोषकरणम्। यथा,—

"पक्वलोहरसपक्वानि दोषो वह्नौ प्रतापयेत्।
निषिञ्चेत्तप्तपत्राणि तैलक्षौद्रे च काञ्जिके॥
शोधयेच्च कुलत्थानां कषाये तु त्रिधा त्रिधा।
सर्व्वं दोषः परेषाय धातूनां शोधनं भवेत्॥"

मलादिपरिष्करणम्। यथा,—

"नवस्य लवणस्यास्य शुद्धिकरः परः।
घटोलनिम्बपत्रस्य सर्व्वत्रैव प्रयुज्यते॥
वातिते दधनक्षीरे घौरिणां पैत्तिके घृते।
आरग्वधादेः कल्के कषाये शोधनं हितम्॥"

अपि च।

"अरनेनाग्निदग्धेन चतुर्थेनार्द्धकेन वा।
अथवा क्षारपत्रेण सिद्धमुष्णोदकं पिबेत्।
सैन्धवामलकाभ्यां वा क्षितिशोधनदीपनम्॥"

इति च भावप्रकाशः॥ * ॥

तिलितण्डुलादेः प्रमाणीकरणम्। यथा। वैद्यशोधमाघ काश्यपः।

"सप्तधान्यैकमाषैश्च शोधनो वा यवस्तथा।
तण्डुलाः कलमैर्ज्ञेयाः प्रमाणैस्तण्डुलैर्यवैः॥"

विकृतदोषनिःसरणं मूत्रोत्सरणम्। यथा। वैद्यशोधमाघ काश्यपः।

"मूत्रदोषं मूत्रमार्गं मूत्रकारी विशोधयेत्।
न दद्यात्कुपथं भोगं प्रकृतौ सप्तमेदिनी॥"

काश्यपः।

"शोधयेत् पूर्व्वपक्षन्तु यावन्नोत्तरदर्शनम्।
उत्तरेणावरुद्धस्य निष्टत्तं शोधनं भवेत्॥"

इति व्यवहारतत्त्वम्॥ * ॥

अङ्कस्य हरणम्। यथा,—

"भाज्याद्धरः शुध्यति यद्गुणः स्या-
दन्यात् फलं तत् खलु भागहारे।
इमेन केनाप्यपवर्त्त्य हार-
भाज्यौ भवेदा यति सम्भवे तु॥"

इति लीलावती॥

अन्यत् शुद्धिशब्दे द्रष्टव्यम्॥

शोधनः, पुं, (शोधयतीति। शुध+णिच्+ल्युः।) निम्बूकः। इति राजनिर्घण्टः॥

शोधनः, त्रि, (शोधयतीति। शुध+णिच्+ल्युः।) शुद्धिकारकः। यथा,—

"महाशान्तगणः शुद्धो व्रतप्रकरणस्तु पावनः।
जलोपवासलङ्घनस्तु व्रतकृच्छ्रस्तु शोधनः॥"

इति प्रायश्चित्ततत्त्वधृतविश्वामित्रवचनम्॥

यथा च।

"तैलसैन्धवयवक्षाग्निमन्थनिशायुगैः।
त्रिदृद्घनयुतैः पिष्टैः प्रलेपो व्रणशोधनः॥"

इति भावप्रकाशः॥

शोधनी, स्त्री, (शोधयतेऽनयेति। शुध शौचे+णिच्+करणे ल्युट्। ङीप्।) सम्मार्জ্জनी। इत्यमरः॥ ताम्रवल्ली। नीली। इति राजनिर्घण्टः॥

शोधनीयौजं, क्ली, (शोधन्या बीजमिव बीजं यस्य।) जयपालः। इति राजनिर्घण्टः॥

शोधनीयः, त्रि, शोधितव्यः। शोध्यः। शुधधातोरनीयप्रत्ययेन निष्पन्नः॥ (यथा, कथासरित्सागरे। ५३। १४१।

"मुक्तं मया तदन्नं यत् शोधनीयं मयापि तत्॥")

शोधितं, त्रि, (शोधयते स्मेति। शुध+णिच्+क्तः।) मक्षिकाद्यपनयनेन कृतशोधनशञ्जनादि। तत्पर्य्यायः। संस्कृतम् २। इत्यमरभरतौ॥ अपि च।

"यज्ञे केशकीटादिशुद्धे संस्कृशोधिते॥"

इति शब्दरत्नावली॥

अपनीतमलम्। तत्पर्य्यायः। निर्मलम् २ शुद्धम् ३ निःशोध्यम् ४ अनवस्करम् ५। इत्यमरभरतौ॥

शोफः, पुं, (शु गतौ। वाहुलकात् फः।) शोथः। इत्यमरः॥ (यथा, सुश्रुते। १। १४।

"तद्दृष्टं शोणितमनिर्द्दिश्यमानः कण्डूशोफरागदाहपाकार्त्तिवेदना जनयेत्॥")

शोफघ्नी, स्त्री, (शोफं हन्तीति। हन्+टक्। ङीप्।) शालपर्णी। रक्तपुनर्नवा। इति राजनिर्घण्टः॥

शोफघ्नाग्नः, पुं, (शोफं नाशयतीति। नश+णिच्+ल्युः।) नीलाग्नः। इति राजनिर्घण्टः॥ शोफनाशके, त्रि॥

शोफघ्नः, पुं, (शोफं हरतीति। हृ+क्विप्।) भल्लातकः। इति भावप्रकाशः॥ शोफहारके, त्रि॥

शोभनं, क्ली, (शोभते इति। शुभ+ल्युः।) पद्मम्। इति शब्दचन्द्रिका॥ (शुभ+भावे ल्युट्। शुभम्। यथा, भागवते। ५।१६।२१।

"अहो बतैषां किमकारि शोभनं
प्रसन्न एषां स्विदुत स्वयं हरिः॥")

शोभनः, पुं, (शुभ+ल्युः।) अर्कः। इति धरणिः॥ विष्कम्भादिशुभत्रिंशद्धृतियोगान्तर्गतपञ्चमयोगः। इति मेदिनी॥ तत्र जातफलम्।

"स्याच्छोभनः शोभनयोगजन्मा
दक्षो विपक्षप्रतिलब्धवित्तः।
सदुत्तरश्चारुवपुः सुधीरः
संभोगयुक्तो मनुजः प्रवीणः॥"

इति कोष्ठीप्रदीपः॥

शोभनः, त्रि, (शोभते इति। शुभ+ल्युः।) सुन्दरः। इति मेदिनी॥ अस्य पर्य्यायो मनोज्ञशब्दे द्रष्टव्यः॥

शोभनकः, पुं, (शोभते इति। शुभ+ल्युः। ततः कन्।) शोभाञ्जनवृक्षः। इति शब्दचन्द्रिका॥ शोभनशब्दकारके, त्रि॥

शोभना, स्त्री, (शोभन+टाप्।) हरिद्रा। गोरोचना। इति राजनिर्घण्टः॥

शोभा, स्त्री, शोभन्तेऽनया। (शुभ+करणे घञ्। टाप्।) दीप्तिः। तत्पर्य्यायः। कान्तिः २ द्युतिः ३ छविः ४। इत्यमरः॥ द्युतौ ५ छवौ ६। इति तट्टीका॥ अभिख्या ७। इति जटाधरः॥ शुभा ८ भा ९ श्रीः १० भासा ११ भा १२। इति शब्दरत्नावली॥ सुषमा १३ क्षमा १४ विभा १५ दृक्प्रिया १६ भानम् १७ भातिः १८ कमा १९ रमा २०। इति राजनिर्घण्टः॥ तस्या लक्षणम्।

"सा शोभा रूपभोगाद्यैर्यत् स्याद्गुणविभूषणम्।
शोभैव कान्तिराख्याता मम्मटाप्यायनोज्ज्वला॥"

इत्युज्ज्वलनीलमणिः॥ * ॥

गोपीविशेषः। यथा,—

"दृष्टं शोभया गोप्या युक्तचन्दनकानने।
सखी मच्छन्दमात्रेण तिरोधानं कृतं त्वया॥
शोभा देहं परित्यज्य जगाम चन्द्रमण्डलम्।
ततस्तस्याः शरीरेण स्त्रियं तेजो बभूव ह॥
संविभज्य त्वया दत्तं हृदयेन विदूयता।
रत्नाय किञ्चित् स्वर्णाय किञ्चिन्मणिवराय च॥
किञ्चित् स्त्रीभ्यः सुवर्णेभ्यः किञ्चिदन्नाय
किञ्चन।
किञ्चित् किण्वमेयेभ्यश्च पुष्पेभ्यश्चापि किञ्चन॥
किञ्चिच्चन्दनपङ्केभ्यः कीर्त्तेभ्यश्चापि किञ्चन।
किञ्चित् फलेभ्यः पुत्रेभ्यः सुवर्णेभ्यश्च किञ्चन॥
किञ्चिन्नृपवर्त्तेभ्यो दुर्व्विभ्यश्चापि किञ्चन॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ८ अध्यायः॥ * ॥

हरिद्रा। गोरोचना। इति राजनिर्घण्टः॥

शोभाञ्जनः, पुं, (शोभं काञ्चिं व्यञ्जनं यस्मात्।) वृक्षविशेषः। शजिना इति भाषा। तत्पर्य्यायः। शिग्रुः२ तीक्ष्णगन्धकः३ तर्कारीः४ मोचकः५। इत्यमरः॥ तीक्ष्णगन्धः६ सुतीक्ष्णः७ अन-

पल्लवः ८ श्वेतमरिचः ९। इति जटाधरः॥ तीक्ष्णः १० गन्धः ११ गन्धकः १२ काचीवकः १३ काचीवः १४ शुभाञ्जनः १५ स्त्रीचित्तहारी १६ द्रविणनाशनः १७। इति शब्दरत्नावली॥ कृष्णगन्धा १८ मूलकपर्णी १९। इति रत्नमाला॥ नीलशिग्रुः २० जनप्रियः २१ सुखमोदः २२ कृष्णशिग्रुः २३ चक्षुष्यः २४ रुचिराञ्जनः २५। अस्य गुणाः। तीक्ष्णत्वम्। कटुत्वम्। स्वादुत्वम्। उष्णत्वम्। पिच्छिलत्वम्। जन्तुवातार्त्ति-शूलनाशित्वम्। चक्षुर्हितत्वम्। रोचनत्वञ्च। इति राजनिर्घण्टः॥ अपि च।

"शोभाञ्जनः कटुस्तिक्तः शोथविद्रधिगुल्मनुत्।"
इति राजवल्लभः॥

अन्यच्च। अथ शोभाञ्जनः श्यामः श्वेतः रक्तश्च।

"शोभाञ्जनशिग्रुतीक्ष्णगन्धकाचीवमोचकाः।
तद्बीजं श्वेतमरिचं मधुशिग्रुः सलोहितः॥
शिग्रुः कटुः कटुः पाके तीक्ष्णोष्णो मधुरो लघुः।
दीपनो रोचनो रूक्षः क्षवस्तिक्तो विदाहकृत्॥
संग्राह्यशुक्रलो हृद्यः पित्तरक्तप्रकोपणः।
चक्षुष्यः कफवातघ्नो विद्रधिश्वयथुक्रमीन्॥
मेदोपचीवियत्नीहगुल्मगण्डव्रणान् हरेत्।
श्वेतः प्रोक्तगुणो ज्ञेयो विशेषाद्दाहकृद्भवेत्॥
शीतानं विद्रधिं हन्ति व्रणः पित्तरक्तकृत्।
मधुशिग्रुः प्रोक्तगुणो विशेषाद्दीपनः सरः।
शिग्रुवल्कलपत्राणां स्वरसः परमार्त्तिहृत्॥*॥
चक्षुष्यं शिग्रुजं बीजं तीक्ष्णोष्णं विषनाशनम्।
कृमिघ्नं कफवातघ्नं तन्नस्येन शिरोऽर्त्तिनुत्॥
शिग्रुशाकं हिमं स्वादु चक्षुष्यं वातपित्तहृत्।
हृद्यं शुक्रकृत् स्निग्धं रुच्यं मदकफप्रणुत्॥"

अस्य पुण्यगुणाः।

"शिग्रोः पुष्पन्तु कटुकं तीक्ष्णोष्णं स्वादुशोथनुत्।
कृमिघ्नं कफवातघ्नं विद्रधिप्लीहगुल्मजित्॥"

अस्य फलगुणाः।

"शोभाञ्जनफलं स्वादु कषायं कफपित्तनुत्।
शूलकृच्छ्रयश्वासगुल्महृत् दीपनं परम्॥"
इति भावप्रकाशः॥

अथ रक्तशोभाञ्जनपर्य्यायः।

"सुरङ्गी स्वादुगन्धा च मधुलग्नः शुभाञ्जनः॥"
इति रत्नमाला॥

अन्यच्च।

"रक्तशोभाञ्जने तुल्यौ मधुशिग्रुमधुद्रवौ।"
इति शब्दरत्नावली॥

अस्य पुण्यगुणाः।

"मधुशिग्रोस्त्वचिहितं रक्तपित्तप्रसादनम्॥"
इति भावप्रकाशः॥

अन्यत् रक्तशिग्रुशब्दे द्रष्टव्यम्॥

शोली, स्त्री, वनहरिद्रा। इति राजनिर्घण्टः॥

शोषः, पुं, (शुष्+भावे घञ्।) शोषणम्। इति मेदिनी॥ (शुष्यत्यनेनेति। शुष्+करणे घञ्।) यक्ष्मारोगः। इत्यमरः॥ तद्रोगस्यौषधं यथा,—

"वचा चिरुटकश्चैव करञ्जं देवदारु च।
मञ्जिष्ठा त्रिफला श्वेता शिरीषो रजनीद्वयम्॥
प्रियङ्गुनिम्बत्रिकटु गोमूत्रेणावघर्षितम्।
नस्यमालेपनञ्चैव स्नानमुद्वर्त्तनं तथा॥
अपस्मारविषोन्मादशोथालक्ष्मीज्वरापहम्।
भूतेभ्यश्च भयं हन्ति राजद्वारे च भाषणम्॥"
इति गारुडे १९६ अध्यायः॥

शोषणं, क्ली, (शुष्+ल्युट्।) रसाकर्षणम्। शोषण इति भाषा। तत्पर्य्यायः। रसादनम् २। इति हेमचन्द्रः॥ स्नेहरहितीकरणम्। यथा,—

"शोषणेन शरीरस्य तपसाध्ययनेन च।
पापकृन्मुच्यते पापाद्दानेन च दमेन च॥"
इति प्रायश्चित्ततत्त्वम्॥

शुष्की। इति राजनिर्घण्टः॥

शोषणः, पुं, (शोषयतीति। शुष+णिच्+ल्युः।) कामदेवस्य बाणविशेषः। यथा,—

"उन्मादनः शोषणश्च तापनः स्तम्भनस्तथा।"
इति जटाधरः॥

शोषणाकृतिः। इति भावप्रकाशः॥ (शोषणकारके, त्रि॥)

शोषसम्भवं, क्ली, (शोषाय रसाकर्षणाय सम्भवो यस्य।) पिप्पलीमूलम्। इति राजनिर्घण्टः॥

शोषापहा, स्त्री, (शोषं व्यपहन्तीति। हन+डः। टाप्।) क्षीतनकम्। इति राजनिर्घण्टः॥ शोषनाशके, त्रि॥

शोषितः, त्रि, (शुष+णिच्+क्तः।) कृतशोषणः। यथा,—

"त्रातापिर्भक्षितो येन वातापिश्च महासुरः।
समुद्रः शोषितो येन स मेऽगस्त्यः प्रसीदतु॥"
इति मलमासतत्त्वम्॥

शौकं, क्ली, (शुकानां समूहः। शुक+"खण्डिकादिभ्यश्च।" ४।२।४५। इत्यण्।) शुकगणः। इत्यमरः॥ स्त्रीणां करणम्। इति मेदिनी॥

शौकरं, शौकरवं, क्ली, (शूकरस्येदमिति। शूकर+अण्।) तीर्थविशेषः। यथा,—

वराह उवाच।

"शृणु मे परमं गुह्यं यत्त्वया परिपृच्छितम्।
मम क्षेत्रं परञ्चैव शुद्धं भागवतप्रियम्॥
परं लोकासुखं स्थानं तथा मुक्तात्मकं परम्।
परं शौकरवं स्थानं सर्व्वसंसारमोचनम्॥
यत्र संस्था च मे देवि क्षुद्वतासि रसातलात्।
यत्र भागीरथी गङ्गा मम शौकरवे स्थिता॥

धरण्युवाच।

केषु लोकेषु यान्तीश शौकरे ये मृता प्रभो!।
किं वा पुण्यं भवेत्तत्र स्नातस्य पिबतस्तथा॥
कति तीर्था विशालाक्ष! क्षेत्रे शौकरवे तव।
धर्मसंस्थापनार्थाय तन्मे वक्तुमर्हसि॥

वराह उवाच।

शृणु तत्त्वेन मे देवि! यत्त्वं मां परिपृच्छसि।
कां गतिं ते प्रपद्यन्ते नराः शौकरवे मृताः॥
तेषां स्नानस्य वै पुण्यं मृतस्यैव मृतस्य वा।
तत्र यानि च तीर्थानि मम संस्थानसंस्थिताः॥
शृणु पुण्यं महाभागे मम क्षेत्रेषु सुन्दरि।
प्राप्नुवन्ति महाभागे गत्वा शौकरवं प्रति॥
दश पूर्व्वापरांश्चापि अपरान् सप्त पञ्च च।
स्वर्गं गच्छन्ति ते तत्र ये मृतास्तेषु जन्तवः॥
गमनादेव सुश्रोणि! सुखस्थे मम दर्शनात्।
सप्तजन्मान्तरे भद्रे जायते विपुले कुले॥
धनधान्यसमृद्धेषु रूपवान् गुणवान् शुचिः।
मद्भक्तश्चैव जायेत मम कर्म्मपरायणः॥
एवं वै मानुषो भूत्वा अपराधविवर्ज्जितः।
गमनं तस्य क्षेत्रस्य मरणं तत्र कारणम्॥
ये मृतास्तत्र सुश्रोणि क्षेत्रे शौकरवे मम।
शङ्खचक्रगदापद्मचतुर्हस्ताश्चतुर्भुजाः।
त्यक्त्वा कलेवरं तूर्णं मम लोकाय गच्छति॥"

इति वाराहे शौकरतीर्थमाहात्म्ये आदित्यवरप्रदानगजव्रजमुकोपाख्याननामाध्यायः॥

शौक्तिकेयं, क्ली, (शुक्तिकायां भवमिति। शुक्तिका+ठक्।) मुक्ता। इति राजनिर्घण्टः॥

शौक्तेयं, क्ली, (शुक्तौ भवमिति। शुक्ति+ढक्।) मुक्ता। इति राजनिर्घण्टः॥ शुक्तिसम्बन्धिनि, त्रि॥

शौक्ल्यं, क्ली, (शुक्लस्य भावः। शुक्ल+"वर्णदृढादिभ्यः ष्यञ् च।" ५।१।१२३। इति ष्यञ्।) शुक्लता। यथा,—

"पलितं जरसा शौक्ल्यं केशादौ सिसया जरा।"
इत्यमरः॥

(यथा, बृहत्संहितायाम्। ४।३।

"व्यचतोऽकेतलं शृङ्गिनः
पश्चादवलम्बते यथा शौक्ल्याम्॥")

शौचं, क्ली, (शुचेर्भावः। शुचि+"इगन्ताच्च लघुपूर्व्वात्।" ५।१।१३१। इत्यण्।) शुचिता। शुचित्वम्। शुद्धिः। तस्य लक्षणादि यथा,—

"त्यक्तसंपरिहारस्तु संसर्गस्याप्यनिन्दितैः।
स्वधर्म्मे च व्यवस्थानं शौचमेतत् प्रकीर्त्तितम्॥"
इत्येकादशीतत्त्वे बृहत्पतिवचनम्॥

अन्यच्च।

"सर्व्वेषामेव शौचानामर्थशौचं विशिष्यते।
योऽर्थेष्वशुचिः शौचान्न मृदा वारिणा शुचिः॥
सत्यशौचं मनःशौचं शौचमिन्द्रियनिग्रहः।
सर्व्वभूतदयाशौचं जलशौचन्तु पञ्चमम्॥
यस्य सत्यञ्च शौचञ्च तस्य स्वर्गो न दुर्लभः॥"
इति गारुडे २१० अध्यायः॥

अपि च।

"यावता शुद्धिं मन्येत तावच्छौचं समाचरेत्।
प्रमाणं शौचसंख्याया न शिष्टैरुपदिश्यते॥
शौचन्तु द्विविधं प्रोक्तं बाह्यमाभ्यन्तरं तथा।
मृज्जलाभ्यां स्मृतं बाह्यं भावशुद्धिरथान्तरम्॥"
इति गारुडे २१५ अध्यायः॥

पादादिशौचगुणा यथा,—

"मेध्यं पवित्रमायुष्यमलक्ष्मीकलिनाशनम्।
पादयोर्मलमर्गाणां शौचाधानमभीप्सताम्॥"
इति राजवल्लभः॥

अपि च।
"उद्धृताभ्यामद्भिरित्याभ्यामित्यं नारद यतः।
शवोत्सर्गे ततः कुर्यात् शौचं सूतकवत्सदा॥"
इति पाद्मोत्तरखण्डे १०६ अध्यायः॥
प्रसङ्गादशौचमाह लिख्यते।
व्यास उवाच।
"दशाहं प्राहुरशौचं सपिण्डेषु विपश्चितः।
स्नेहेषु चाथ जातेषु ब्राह्मणानां द्विजोत्तमाः॥
नित्यानि चैव कर्माणि काम्यानि च विशेषतः।
न कुर्याद्धितं किञ्चित् स्वाध्यायं मनसापि च॥
शुक्लीननिधनांस्त्यक्त्वा ज्ञातयो ह्यवयेद्धितान्।
शुष्कान्नेन फलैर्वापि वैतानानुद्वयात्ततः॥
न स्पृशेयुरिमान्ये न च तेभ्यः समाहरेत्।
चतुर्थे पञ्चमे वाह्नि संस्पर्शः कथितो बुधैः॥
सूतके तु सपिण्डानां संस्पर्शो न प्रदुष्यति।
सूतकं सूतिकाञ्चैव वर्जयित्वा वृणां पुनः॥
दशाहं निर्गुणे प्रोक्तमशौचं त्रातिनिर्गुणे।
एकद्वित्रिगुणैर्युक्तं चतुस्त्रीकादिने शुचिः॥
दशाहात्तु परं सम्यगधीयीत जुहोति च।
चतुर्थे तस्य संस्पर्शे मनुः प्राह प्रजापतिः॥
क्रियाहीनस्य मूर्खस्य महारोगिण एव च।
यतेश्चाश्रमसंस्थस्य त्रिरात्रमशौचकम्॥
त्रिरात्रं दशरात्रं वा ब्राह्मणानान्तु ज्ञातकम्।
प्राक् संस्कारात् त्रिरात्रं स्यादस्यादूर्ध्वं दशाहकम्॥
जन्मद्विवार्षिके प्रेते मातापित्रोस्त्रिरिष्यते।
त्रिरात्रेण शुचिस्तेषां यदि स्यात्तनिर्गुणः॥
आदन्तजातमरणे पित्रोरेकाहमिष्यते।
जातदन्ते त्रिरात्रं स्यादूर्ध्वं स्यात्तानु निर्गुणौ॥
स्यादन्तजननात् सद्य आचूडादेकरात्रकम्।
त्रिरात्रमौपनयनात् सपिण्डानामुदाहृतम्॥
जातमात्रस्य बालस्य यदि स्यान्मरणं पितुः।
सद्यःशौचं सपिण्डानां कर्तृणां सोदरस्य च॥
कर्तृ दशाहादेकाहं सोदरो यदि निर्गुणः।
अथोर्ध्वं दन्तजननात् सपिण्डानामशौचकम्॥
एकाहं निर्गुणानान्तु चूडादूर्ध्वं त्रिरात्रिकम्।
अदन्तजातमरणं सम्भवेद्यदि वत्सलाः॥
एकरात्रं सपिण्डानां यदि तत्त्वन्तनिर्गुणाः।
प्रेतादेशात् सपिण्डानामर्वाक् स्नानं विधीयते॥
सर्वेषामेव शुद्धिनाम्नर्तुषु विषमं पुनः॥
सार्वाक् षण्मासतः स्त्रीणां यदि स्याद्गर्भसंस्रवः।
तदा मासक्रमेणासामशौचं द्विषसैः स्मृतम्॥
अत ऊर्ध्वन्तु पतने स्त्रीणां स्यादहरात्रकम्।
सद्यःशौचं सपिण्डानां गर्भस्रावाच्च वा ततः॥
गर्भेष्वासादितोरात्रं सपिण्डेष्वन्तनिर्गुणे।
यदोदरस्थे ज्ञाते तु त्रिरात्रमिति निश्चयः॥
यदि स्यात् सूतके सूतिर्मरणे वा सूतिर्भवेत्।
शेषेणैव भवेच्छुद्धिरशौचे त्रिरात्रकम्॥
मरणोत्पत्तियोगे तु मरणाच्छुद्धिरिष्यते।
अथ द्वाभ्यां दशाहाभ्यां दशरात्रेण शुध्यति।
अथ चेत् पञ्चमी रात्रिमतीत्य मरणो भवेत्।
अपरेद्युरहं वर्णमवरं वा वरो यदि॥
अशौचे संस्पृशेत् स्नेहात्तदाशौचेन शुध्यति॥
प्रेतीभूतं द्विजं विप्रो योऽनुगच्छति कामतः।
स्नात्वा सचेलं स्पृष्ट्वाग्निं घृतं प्राश्य विशुध्यति॥
एकाहात् क्षत्रिये शुद्धिर्वैश्यानां स्यात् द्व्यहेन तु।
शूद्रे दिनत्रयं प्रोक्तं प्राणायामशतं पुनः॥
अनस्थिसंचिते शूद्रे रौति चेद्ब्राह्मणः सकृत्।
त्रिरात्रं स्यादशौचमेकाहं त्वन्यथा स्मृतम्॥
अस्थिसञ्चयनादर्वागेकाहं वैश्यशूद्रयोः।
अन्यथा चैव सञ्चयनिर्वाक्षणे स्नानमेव तु॥
अनस्थिसंचिते विप्रे ब्राह्मणो रौति चेत्तदा।
स्नानेनैतद्ब्रवीच्छुद्धिः सचेलेन न संशयः॥
यस्तैः सहाशनं कुर्याच्छ्राद्धादीनि चैव हि।
बान्धवो वा परो वापि स दशाहेन शुध्यति॥
यस्तेषामन्नमश्नाति सद्यस्तेषापि कामतः।
तदाशौचे निवृत्तेऽसौ स्नानं कृत्वा विशुध्यति॥
यावत्तदन्नमश्नाति दुर्भिक्षोपहतो नरः।
तावन्त्यहान्यशौचं स्यात् प्रायश्चित्तं ततश्चरेत्॥
दाहाद्यशौचं कर्तव्यं द्विजानामग्निहोत्रिणाम्।
सपिण्डानान्तु मरणे मरणादितरेषु च॥
सपिण्डता तु पुरुषे सप्तमे विनिवर्तते।
समानोदकभावस्तु जन्मनाम्नोरवेदने॥
पिता पितामहश्चैव तथैव प्रपितामहः।
त्रयोभाजश्चतुर्थाद्याः सापिण्ड्यं सप्तपौरुषम्॥
अनूढानां तथा स्त्रीणां सापिण्ड्यं सप्तपौरुषम्।
जायानां भर्तृसापिण्ड्यं प्राह देवः पितामहः॥
द्वे त्रैकजाता बहवो भिन्नयोनय एव च।
भिन्नवर्णास्तु सापिण्ड्यं भवेत्तेषां त्रिपौरुषम्॥
कारवः शिल्पिनो वैद्या दासी दासस्तथैव च।
दातारो नियमो चैव ब्रह्मविद्ब्रह्मचारिणौ॥
क्षत्रियो व्रतिनश्चैव सद्यःशौचा उदाहृताः।
राजा चैवाभिषिक्तश्च विप्राः सत्रिण एव च॥
यज्ञे विवाहकाले च देवयागे तथैव च।
सद्यःशौचं समाख्यातं दुर्भिक्षे वाप्युपद्रवे॥
हिंसाहतव्रतानाञ्च विदुषां पार्थिवैर्हितैः।
सद्यःशौचं समाख्यातमज्ञातमरणे तथा॥
अग्नौ मरुप्रपतने वीराध्वन्यघ्नशत्रुके।
ब्राह्मणार्थे च संत्यक्ते सद्यःशौचं विधीयते॥
नैष्ठिकानां वनस्थानां यतीनां ब्रह्मचारिणाम्।
नाशौचं कीर्त्यते सद्भिः पतिते च तथार्भके॥
पतितानां न दाहः स्यान्नान्त्येष्टिर्नास्थिसञ्चयः।
न चाशुपातः पिण्डो वा कार्यं त्राह्मादिकं क्वचित्॥
आपादयेद्यथात्मानं स्वयं योऽग्निं विषादिभिः।
विहितं तस्य नाशौचं नाग्निर्नाप्युदकादिकम्॥
अथ कश्चित् प्रमादेन म्रियतेऽग्निविषादिभिः।
तस्याशौचं विधातव्यं कार्यश्चैवौदकादिकम्॥
जाते कुमारे तद्देहः कामं कुर्यात् प्रतिग्रहम्।
शिरस्यधान्यगोवासस्तिलाज्यगुडसर्पान्॥
फलानि पुष्पं शाकञ्च लवणं काष्ठमेव च।
क्षीरं दधि घृतं चौरमौषधं तैलमेव च।

अशौचिनां गृहादन्नं शुष्कान्नमेव नित्यशः॥"
इति कौर्म्मे उपविभागे २२ अध्यायः॥
अन्यत् पाद्मोत्तरखण्डे १०६ अध्याये द्रष्टव्यम्॥
शौचाचारः, पुं, (शौचः आचारः।) शुद्धिकर्म्म। यथा,—
"शौचाचारविहीनस्य तमसा निष्फलाः क्रियाः॥"
इत्याह्निकाचारतत्त्वे ब्रह्मपुराणम्॥
अन्यच्च।
"उपनीय गुरुः शिष्यं महाव्याहृतिपूर्व्वकम्।
वेदमध्यापयेदेनं शौचाचारांश्च शिक्षयेत्॥"
इति याज्ञवल्क्यः॥
शौचिकः, पुं,. (शौचं गन्धादेः शुचिता कार्य्यत्वेनास्यास्तीति। शौच+ठन्।) वर्णसङ्करविशेषः। यथा,—
"कैवर्त्तस्य च कन्यायां शौण्डिकादेव शौचिकः॥"
इति पराशरपद्धतिः॥
शौचेयः, पुं, (शौचेन वस्त्रादिशुचित्वेन व्यवहरतीति। शौच+ठक्।) रजकः। इति शब्दरत्नावली॥
शौट, ऋ गर्व्वे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सेट्।) चतुर्दशस्वरी। ऋ, अशुशौटत्। शौटति वीरः। इति दुर्गादासः॥
शौटीरः, पुं, (शौटतीति। शौट गर्व्वे+"कृषृष्टृकटिपटिशौटिभ्यः ईरन्।" उणा० ४। ३०। इति ईरन्।) त्यागी। वीरः। इत्युणादिकोषः॥ गर्व्वान्विते, त्रि। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ (यथा, महाभारते। १२। ८३। ४३।
"सन्तुष्टः सम्मतः सत्यः शौटीरो वेद्यपावकः।
मन्त्रवित् कालवित् शूरः स मन्त्रं श्रोतुमर्हति॥")
शौटीर्य्यं, क्ली, (शौटीरस्य भावः कर्म्म वा। शौटीर+"गुणवचनब्राह्मणादिभ्यः कर्म्मणि च।" ५।१।१२४। इति ष्यञ्।) वीर्य्यम्। इति शब्दरत्नावली॥ गर्व्वः। शौटीरशब्दात् भावे ष्यञ्प्रत्ययेन निष्पन्नम्॥
शौण्ड, ऋ गर्व्वे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सेट्।) चतुर्दशस्वरी। ऋ, अशुशौण्डत्। इति दुर्गादासः॥
शौण्डः, पुं, (शुण्डायां मद्यैरतः। शुण्डा+अण्।) मद्यः। इत्यमरः॥ (यथा, महाभारते। ३। १३३। ११।
"पलाण्डुः शौण्डश्च मद्यानाञ्च
चौराश्च दुष्टाश्च पलाश्च वर्ज्याः॥")
शौण्डिकः, पुं, (शुण्डा पण्यमस्य। शुण्डा+"तदस्य पण्यम्।" ४।४।५१। इति ठक्।) जातिविशेषः। शुंड़ी इति भाषा। तत्पर्य्यायः। मद्यविक्रयकः २। इत्यमरः॥ भुण्डारः ३ शौण्डी ४ शुण्डकः ५। इति शब्दरत्नावली॥ अम्बः ६ पालः ७ पयः ८। इति जटाधरः॥ कल्पपालः ९ सुराजीवी १० वारिवाणः ११ पानवणिक् १२, अम्बी १३ आसुतीपलः १४। इति हेमचन्द्रः॥ तस्योत्पत्तिर्यथा,—
"ततो गान्धिककन्यायां कैवर्त्तादेव शौण्डिकः।
कैवर्त्तस्य च कन्यायां शौण्डिकादेव शौचिकः॥"
इति पराशरपद्धतिः॥
(अस्य गृहे भोजननिषेधो यथा, मनुः। ४। २१६।
"व्रतिनां शौण्डिकानाञ्च चेलनिर्णेजकस्य च।
रङ्गकस्य नृशंसस्य यस्य चोपपतिर्गृहे॥"
एषां गेहे नाद्यात् इत्यर्थः॥ * ॥ शुण्डिकादागते, त्रि। अत्र "शुण्डिकादिभ्योऽण्।" ४। ३। ७६। इत्यण्॥)
शौण्डी, [न्] पुं, (शुण्डा सुरा एव शौण्डं मद्यम्। स्वार्थे अण्। तत् पण्यत्वेनास्यस्येति। शौण्ड+इन्।) शौण्डिकः। इति शब्दरत्नावली॥
शौण्डी, स्त्री, (शुण्डायां मद्यपानगृहे भवा। मत्तानां रुचिप्रदत्वात्। शुण्डा+अण्। ङीप्।) पिप्पली। चव्यम्। इति विश्वः॥
शौण्डीरः, त्रि, (शौटतीति। शौट+ईरन्। पृषोदरादित्वात् साधुः।) अहङ्कारी। यथा,—
"शौण्डीरो गर्व्वितस्त्यक्तो मानी चाप्यक्षुद्रुद्धतः।
उद्ग्रीव उद्धुरोऽक्लीबो नीचश्च पिशुनोऽधमः॥"
इति धनञ्जयकोषः॥
शौद्धोदनिः, पुं, (शुद्धोदनस्यापत्यं पुमानिति। शुद्धोदन+"अत इञ्।" ४। १। ९५। इति इञ्।) शाक्यवंशावतीर्णबुद्धमुनिविशेषः। इत्यमरः॥ "शुद्धमोदनमस्य इति मनीषादिः। शुद्धोदनो नाम राजा। तथाहि।
'शुद्धोदनो यतो सुरुते न्यायवत् शुद्धमोदनम्।'
इत्यार्याभिधानम्॥
शुद्धोदनस्यापत्यं शौद्धोदनिः। वाङ्गाद्यत इञ्।" इति भरतः॥
शौद्रः, पुं, (शूद्रायां भवः। शूद्रा+अण्।) द्वादशविधपुत्रान्तर्गतपुत्रविशेषः। स तु ब्राह्मणक्षत्रियवैश्यान्यतमात् शूद्रायां जातः। यथा,—
"क्षौद्रः क्षेत्रजो दत्तो गूढोत्पन्नश्च कृत्रिमः।
क्रीतापविद्धकानीनशौद्रपौनर्भवा अपि॥
स्वयं दत्तः सहोढोऽपि द्वादशैरसौरसो समौ॥"
इति जटाधरः॥
(यथा, मनुः। ९। १६०।
"कानीनश्च सहोढश्च क्रीतः पौनर्भवस्तथा।
स्वयंदत्तश्च शौद्रश्च यद्दायादवान्धवाः॥"*॥
शूद्रस्येदमिति। अण्।) शूद्रसम्बन्धिनि, त्रि॥ (यथा, महाभारते। १२। ६२। ४।
"चात्वालानि वेद्यानि च सेवमानः
शौद्राणि कर्म्माणि च ब्राह्मणः सन्।
अस्मिल्लोके निन्दितो मन्दचेताः
परे च लोके निरयं प्रयाति॥")
शौधिका, स्त्री, रक्तकम्बुः। इति हेमचन्द्रः॥
शौनकः, पुं, (शुनकस्यापत्यमिति। शुनक+"अश्वादिभ्यः फिञ्च।" ४। १। १०४। इति अण्।) मुनिविशेषः। यथा,—
"सविशेषकरणादूर्द्धं न दद्यात् प्रतिमाधिकम्।
एकोद्दिष्टविधानेन दद्यादित्याह शौनकः॥"
इति तिथ्यादितत्त्वम्॥
शौनिकः, पुं, (शूना प्राणिवधस्थानं प्रयोजनमस्य। शूना+ठक्।) मांसविक्रयकर्त्ता। यथा,—
"वैतंसिकः कौटिकश्च मांसिकः शौनिकः समाः।"
इति जटाधरः हेमचन्द्रश्च॥
मृगया। इति शब्दमाला॥
शौभं, क्ली, (शोभायै हितम्। शोभा+अण्।) हरिश्चन्द्रपुरम्। इति त्रिकाण्डशेषः॥ तत्पर्य्यायः। शोभचारिपुरम् २। इति भूरिप्रयोगः॥ (पुरमेतत् शाल्वस्य नृपतेरासीत्। कथोनेदं विनाश्रितम्। एतद्वृत्तान्तस्तु भागवते १० स्कन्धे ७७ अध्याये द्रष्टव्यः॥)
शौभः, पुं, (शुभाय हितः। शुभ+अण्।) देवता। इति त्रिकाण्डशेषः॥ शुवाकः। इति शब्दमाला॥
शौभनेयः, त्रि, शोभनसम्बन्धी। शोभनशब्दात् ढ्यप्रत्ययेन निष्पन्नः॥
शौभाञ्जनः, पुं, (शोभाञ्जन एव। स्वार्थे अण्।) शोभाञ्जनवृक्षः। इति भरतदिरूपकोषः॥
शौभिकः, पुं, (शौभं शोभचारिपुरं उपजीव्यत्वेन तदधिकृत्य कृतं वस्तु साधनत्वेनास्यस्येति। शौभ+ठक्।) इन्द्रजालिकः। इति शब्दमाला॥
शौभ्रेयः, त्रि, (शुभ्रा+"शुभ्रादिभ्यश्च।" ४। १। १२३। इति ढक्।) शुभ्राया अपत्यम्। इति सुग्धबोधव्याकरणम्॥ शुभ्रसम्बन्धिनि च॥
शौरिः, पुं, (शूरस्यापत्यमिति। शूर+इञ्।) विष्णुः। (यथा, आनन्दलहर्य्याम्। २।
"तनीयांसं पांसुं तव चरणपङ्केरुहभवं
विरिञ्चिः सञ्चिन्वन् विरचयति लोकानविकलम्।
वहत्येनं शौरिः कथमपि सहस्रेण शिरसां
हरः संक्षुभ्येनं भजति भसितोद्धूननविधिम्॥")
अर्जुनः। इत्यमरभरतौ॥ (शूरवंशीयमात्रे। वसुदेवः। यथा, भागवते। ३। १। २६।
"क्वापित् कुरूणां परमः सुहृन्नो
भ्रातः स आस्ते सुखमङ्ग शौरिः॥"
बलदेवः। यथा, महाभारते। ५। ७। २५।
"ततोऽभ्ययाद्भीमबलो रौहिणेयं महाबलम्।
सङ्ग्रामगमने हेतुं च तस्मै संन्यवेदयत्।
प्रत्युवाच ततः शौरिर्यामैराकूतमिदं वचः॥"
कृष्णः। यथा, भागवते। १। १०। ७३।
"अथ दूरगतान् शौरिः कौरवान् विरहातुरान्।
सन्निवर्त्त्य ययौ स्निग्धान् प्रायात् स्वनगरीं प्रियैः॥")
शौर्पः, त्रि, (शूर्प+"शूर्पादञ्यतरस्याम्।" ५। १। २६। इति अञ् पक्षे ठञ्।) शूर्पपरिमितम्। शूर्पशब्दात् ञप्रत्ययेन ञिकप्रत्ययेन च निष्पन्नौ॥
शौर्य्यं, क्ली, (शूरस्य भावः कर्म्म वा। शूर+ष्यञ्।) शक्तिः। (यथा, रामायणे। ६। १५। ३।

"सत्त्वेन वीर्य्येण पराक्रमेण
धैर्य्येण शौर्य्येण च तेजसा च ॥")
न्यारभटी । इति मेदिनी ॥

शौल्कं, त्रि, शुल्कसम्बन्धि । शुल्कशब्दात् अप्रत्ययेन निष्पन्नम् ॥

शौल्किकः, पुं, (शुल्के अधिकृतः । शुल्क+ठञ् ।) शुल्काध्यक्षः । इति हेमचन्द्रः ॥ (यथा, याज्ञवल्क्ये । २ । १७६ ।
"शौल्किकैः स्थानपालैर्वा नष्टापहृतमाहृतम् ।
अर्वाक् संवत्सरात् स्वामी हरेत परतो नृपः ॥")

शौल्किकेयः, पुं, विषभेदः । इत्यमरः ॥ शुल्किको देशभेदस्तत्र भवः शौल्किकेयः । ढञ् । तालव्यादिः । इति भरतः ॥

शौल्फं, क्ली, शाकविशेषः । शुलफा इति भाषा । भूतचतुर्द्दश्यां चतुर्द्दशशाकमध्ये तद्भक्षणीयम् । यथा, निर्णयामृते ।
"ओलं केमुकवास्तूकं सर्षपं कालश्च निम्बं जयां
शालञ्चीं हिलमोचिकाञ्च पटुकं शौल्फं गुडूचीन्तथा
भण्टाकीं सुनिषण्णकं शिवदिने खादन्ति ये मानवाः
प्रेतत्वं न च यान्ति कार्त्तिकदिने कृष्णे च भूते तिथौ ॥"
इति तिथ्यादितत्त्वम् ॥
अस्य पर्य्यायगुणाः शतपुष्पाशब्दे द्रष्टव्याः ॥

शौल्विकः, पुं, कंसकारः । काँसारि इति भाषा । तत्पर्य्यायः । ताम्रकुट्टकः २ । इत्यमरः ॥ कांस्यघ्नौ ३ कांस्यकारः ४ । इति जटाधरः ॥ ताम्रिकः ५ ताम्रकारकः ६ । इति शब्दरत्नावली ॥

शौवं, क्ली, (श्वन्+"शुनः सङ्कोच उपसंख्यानम् ।" ६ । ४ । १४४ । इत्यस्य वार्त्तिकोक्त्या अणि साधु ।) शुनः सङ्कोचः । शुनो द्वन्द्वम् । श्वोऽयम् । इति संक्षिप्तसारव्याकरणम् ॥

शौवनं, क्ली, (श्वन्+अण् ।) शुनो भावः । शुनोऽपत्यम् । इति संक्षिप्तसारव्याकरणम् ॥ (शुनः समूहः । श्वन्+"खण्डिकादिभ्यश्च ।" ४।२।४५। इत्यञ् । कुक्कुरसमूहः । इति व्याकरणम् ॥ शुनो मांसम् । इति काशिका । ६ । ४ । १६३ ।)

शौवस्तिकं, त्रि, (श्वो भवम् । श्वस्+"श्वसस्तुट् च ।" ४ । ३ । १५ । इति ठञ् तुडागमश्च ।) आविदिनस्थायिवस्तु । यथा,—
"आलम्बालिरिदं शिशिलैर्नैराणां
पश्यद्भिरेव हृषि पनगतीनाम् ।
शौवस्तिकत्वं विभवा न येषां
व्रजन्ति तेषां दयसे न कस्मात् ॥"
इति माघे २ सर्गः ॥
"येषां विभवाः सम्पदः शौवस्तिकत्वं आविदिनस्थायित्वं न व्रजन्ति तेषां कस्मात् दयसे । श्वोभवः शौवस्तिकः श्वो भवार्थे ठञ्प्रत्ययात् आदि ऋषीभ्यादित्वात् ठञागमः इत्यभ्यर्येति त्वम्

शित्वं त्रिरिति त्रिः त्वतौ भावे इति त्वम् ।"
इति तट्टीका ॥

शौवापदं, त्रि, (श्वापदस्येदमिति । श्वापद+अण् । "पादान्तस्यान्यतरस्याम् ।" ७।३।६। इति पक्षे ऐच् ।) श्वापदसम्बन्धि । श्वापदशब्दात् अप्रत्ययेन निष्पन्नम् । इति मुग्धबोधव्याकरणम् ॥ (यथा, अनर्घराघवे । १ । २५ ।
"क्वचित् कान्तारभाजां भवति परिभवः
कोऽपि शौवापदो वा
प्रत्यूहेन क्रतूनां न खलु मखभुजो भुञ्जते
वा हवींषि ॥")

शौष्कलः, पुं, (शुष्कलं पण्यमस्येति । अण् ।) शुष्कमांसस्य पणकः । इति मेदिनी ॥

शौष्कलः त्रि, (शुष्कलीमत्तीति । शुष्कली+अण् ।) आमिषाशी । इत्यमरः ॥ मत्स्यमांसभोजनशीलः । आमिषं अश्नाति आमिषाशी ग्रहादित्वात् णिन् । शुष्कली शुष्कमांसे स्यात् मांसमात्रेऽपि दृश्यते । तामत्ति शौष्कलः णः । तालव्यादिन्त्यमध्यः । शुष्कं मांसं लाति इति शुष्कलः प्रज्ञादित्वात् अणि शौष्कलः । इति विद्याविनोदः । शाष्कलः इति पाठः । इति स्वामी । इति भरतः ॥

श्चुत } ,इर् क्षरणे । इति कविकल्पद्रुमः ॥
श्च्युत } (भ्वा०-पर०-अक०-सेट् ।) द्वौ तालव्यवर्गाद्ययुक्ततालव्यादी । शेषोऽन्तःस्थादियुक्तश्च । नकारणावनुस्वारपञ्चमाविव्यादिनियमेऽप्यनयोस्तालव्यादित्वं तद्वचनस्य व्यभिचारसूचनार्थं तेन चुक्षुम्भ लोपे इत्यादीनामोष्ठ्यवर्गशेषोपधत्वं सङ्गच्छते । तेन क्विपि संयोगान्तलोपे चुक्षुम इत्यादि सिद्धम् । किन्तु द्वौ दन्त्यादी इति धातुप्रदीपक्रमदीश्वरौ । तेन घृतं श्चोतति इति घृतश्चुत् तमाचष्टे इति णौ णीमंचेति क्त्वाट्टिलोपे घृतश्चयति पुनः क्विपि णेर्लोपे घृतश्च् इति स्थिते संयोगादेः सस्य लोपे घृतक् इति केचित् ॥ इर्, अश्चुतत् अश्चोतीत् । अश्च्युतत् अश्च्योतीत् । क्षर इति आसेचनं क्षरणञ्च । रक्तमाश्च्योतति क्षुर इति । इदं कवचमश्च्योतीदिति । निश्च्योतन्ति सुतनुकबरी बिन्दवो यावदेते । इति मालत्यां गमकस्तानित्यत्वम् । इति दुर्गादासः ॥

श्चोतः, पुं, (श्चोतनमिति । श्चुत+घञ् ।) प्राघारः । इत्यमरः ॥

श्न, [न्] क्ली, सुखम् । इति अन्नुशब्दटीकायां भरतः ॥ (शरीरम् । इति निरुक्तिः । ३ । ५ ॥ शवः । इति पुराणम् । अस्य प्रमाणं श्मशानशब्दे द्रष्टव्यम् ॥)

श्मशानं, क्ली, (श्मनां शवानां शानं शयनं यत्र । यद्वा, शवानां शयनमिति । "पृषोदरादीनि यथोपदिष्टानि ।" ६ । ३ । १०९ । इति शवशब्दस्य श्मादेशः शयनशब्दस्यापि शानशब्दादेशः ।) शवदाहस्थानम् । तत्पर्य्यायः । पितृवनम् २ । इत्यमरः ॥ शतानकम् ३ रुद्राक्रीडः ४ दाहसरः ५ । इति त्रिकाण्डशेषः ॥ अन्तशय्या ६ पितृकाननम् ७ । इति जटाधरः ॥ * ॥ तस्य व्युत्पत्तिर्यथा,—
"श्मशब्देन शवः प्रोक्तः शानं शयनमुच्यते ।
निर्व्वचन्ति श्मशानार्थं मुने शब्दार्थकोविदाः ॥
महान्त्यपि च भूतानि प्रलये समुपस्थिते ।
शेरतेऽत्र शवा भूत्वा श्मशानन्तु ततो भवेत् ॥"
महाश्मशानं यथा,—
"वाराणसीति विख्याता रुद्रावास इति द्विजाः ।
महाश्मशानमित्येवं प्रोक्तमानन्दकाननम् ॥"
इति श्रीस्कान्दे काशीखण्डे ३० अध्यायः ॥ * ॥
"उत्सवे व्यसने चैव दुर्भिक्षे शत्रुविग्रहे ।
राजद्वारे श्मशाने च यस्तिष्ठति स बान्धवः ॥"
इति चाणक्यम् । १७ ॥ * ॥
श्मशाने गत्वा विष्णुस्पर्शे दोषो यथा,—
वराह उवाच ।
"श्मशानं यो नरो गत्वा अस्नात्वैव तु मां स्पृशेत् ।
मम दोषापराधस्य शृणु तत्त्वेन यत् फलम् ॥
जम्बुको जायते भूमे वर्षाणां नव पञ्च च ।
गृध्रस्तु सप्तवर्षाणि जायते खचरेश्वरः ॥
चरन्तौ मानुषं मांसं उभौ तौ गृध्रजम्बुकौ ।
पिशाचो जायते तत्र वर्षाणि नव पञ्च च ॥
ततस्तु कुणपोच्छिष्टं त्रिंशद्वर्षाणि खादति ।
ततो नारायणाच्छ्रुत्वा धरणी वाक्यमब्रवीत् ॥
एतन्मे परमं गुह्यं लोकनाथ जनार्द्दन ।
परं कौतूहलं देव निखिलं वक्तुमर्हसि ॥
श्मशानं पुण्डरीकाक्ष ईश्वरेण प्रशंसितम् ।
तत्र किं विगुणं देव पावित्रे शिवभाषिते ॥
स तत्र रमते नित्यं भगवांस्तु महाद्युतिः ।
कपालं गृह्य देवोऽत्र दीप्तिमन्तं महौजसम् ॥
प्रशंसितश्च रुद्रेण भवता किं विनिन्दितम् ।
श्मशाणं पद्मपत्राक्ष रुद्रस्य च निशि प्रियम् ॥
वराह उवाच ।
शृणु तत्त्वेन मे देवि इदमाख्यानमुत्तमम् ।
यद्यापि ते न जानन्ति अनघे शंसितव्रताः ॥
कृत्वा सुदुष्करं कर्म्म सर्व्वभूतपतिर्हरः ।
हत्वा च बालवृद्धाणि त्रिपुरे रूपिणीः स्त्रियः ।
तेन पापेन संबद्धो न शक्नोति विचेष्टितुम् ॥
ततः ईशो मया चोक्तो वाक्यमेव सुखावहम् ।
किमिदं तिष्ठसे रुद्र कश्मलेन समावृतः ।
तव चैव प्रियार्थाय येनाहमिदमागतः ॥
ततो मम वचः श्रुत्वा लब्धसंज्ञो महेश्वरः ।
उवाच मधुरं वाक्यं पावकान्तलोचनः ॥
तव विष्णो प्रसादेन मया तत्त्रिपुरं हतम् ।
निहता दानवास्तत्र गर्भिण्यश्च निपातिताः ॥
बालवृद्धा हतास्तत्र विष्फुरन्तो दिशो दश ।
तस्य पापस्य दोषेण न शक्नोमि विचेष्टितुम् ॥
प्रनष्टयोगमायश्च नष्टैश्वर्य्यश्च माधव ।
किं मया विप्रकर्त्तव्यमनेनोत्थानेन माधव ॥
विष्णो तत्त्वेन मे ब्रूहि शोधनं पापनाशनम् ।
येन वै हरमाप्तेन शीघ्रं मुच्येत किल्विषात् ॥

भिषक्कोषकुटशृङ्गागुरुपापतमोनिशाः ॥
भक्षीपङ्कमदाम्भोधिवसुनाधूमकोकिलाः ।
गोलाङ्गुलास्यगुङ्गास्ये कच्छः खञ्जनकेकिनोः ॥
शृवलं नाकनाशिङ्गतिलेन्दीवरवह्नयः ।
रवविष्णुनखङ्गारौ कटाक्षोलिः कणीनिका ॥
नीली भमूफलं सुक्ता काकक्षया शुकीर्दयः ।
भिन्नच्छाया गजाङ्गारवल्लान्तःकरणादयः ॥"
इति कविकल्पलतायां २ श्लेषस्तवके ४कुसुमम् ॥

श्यामकं, क्ली, (श्याम + संज्ञायां कन् ।) रोहिषतृणम् । इति राजनिर्घण्टः ॥ (कृष्णवर्णे, त्रि । यथा, हरिवंशे भविष्यपर्वणि ६१ । ८ ।
"श्यामकपृथ्वचिताङ्गो
भस्मारुणसन्निभो विडालाक्षः ॥")

श्यामकः, पुं, (श्यामं तद्वर्णं अकतीति । अक गतौ + अण् । पृषोदरादित्वात् साधुः ।) श्यामाकः । इति हेमचन्द्रः ॥ (सूरस्य पुत्रविशेषः । सतु वसुदेवस्य भ्राता । इति भागवतम् ।६।२४।२६॥)

श्यामकण्ठः, पुं, (श्यामः कण्ठो यस्य ।) मयूरः । इति हलायुधः ॥ शिवः । पक्षिविशेषः । इति नीलकण्ठशब्ददर्शनात् ॥

श्यामकन्दा, स्त्री, (श्यामः कन्दो यस्याः ।) अतिविषा । इति राजनिर्घण्टः ॥

श्यामकाण्डा, स्त्री, (श्यामः काण्डो यस्याः ।) गण्डदूर्व्वा । इति राजनिर्घण्टः ॥

श्यामग्रन्थिः, स्त्री, (श्यामो ग्रन्थिर्यस्य ।) गण्डदूर्व्वा । इति राजनिर्घण्टः ॥

श्यामपत्रः, पुं, (श्यामानि पत्राणि यस्य ।) तमालवृक्षः । इति शब्दचन्द्रिका ॥

श्यामलः, पुं, (श्यामो वर्णः अस्यास्तीति । श्याम + "तिभादिभ्यश्च ।"५।२।९७। इति लच् ।) कृष्णवर्णः । पिण्डखर्जूरः । इति मेदिनी ॥ कृष्णगुणवति, त्रि । इत्यमरः ॥ (यथा, सुकुन्दमालायाम् ।२।
"जयतु जयतु मेघश्यामलः कोमलाङ्गो
जयतु जयतु पृथ्वीभारनाशी मुकुन्दः ॥")

श्यामलचूड़ा, स्त्री, (श्यामला चूड़ा यस्याः ।) गुञ्जा । इति राजनिर्घण्टः ॥

श्यामलता, स्त्री, (श्यामा लता ।) स्वनामख्यातलता । तत्पर्य्यायः । यथा, शब्दरत्नावल्याम् ।
"गोपी गोपा गोपवल्ली सारिवोत्पलसारिवा ।
अगन्धा शारिवा श्यामा कृष्णा श्यामलताह्वये ॥"
अपि च ।
"कासपेशी मधुश्यामा सुमनोत्पलसारिवा ।
दीर्घमूला च पालिन्दी मधुरविदला च सा ॥"
इति रत्नमाला ॥
राजनिर्घण्टोक्तपर्य्यायद्वयौ सारिवाशब्दे द्रष्टव्यौ ॥

श्यामला, स्त्री, पार्व्वती । श्यामं श्रीकृष्णं लाति इदानीति व्युत्पत्तिमिदा । इति हेमचन्द्रः । अम्बष्ठा । कटभी । अम्बुः । कस्तूरी । इति राजनिर्घण्टः ॥

श्यामलिका, स्त्री, नीली । इति राजनिर्घण्टः ॥

श्यामलेक्षुः, पुं, (श्यामलः कृष्णवर्णः इक्षुः ।) कृष्णेक्षुः । इति राजनिर्घण्टः ॥

श्यामसुन्दरः, पुं, (श्यामः सुन्दरश्च ।) श्रीकृष्णः । यथा,—
"यावन्ति च शरीराणि भोगार्हाणि महामुने ।
प्राकृतानि च सर्व्वाणि श्रीकृष्णविग्रहं विना ॥
ध्यायन्ते योगिनश्चैव मुदं ज्योतिःस्वरूपिणम् ।
हस्तपादादिरहितं निर्गुणं प्रकृतेः परम् ॥
वैष्णवास्तं न मन्यन्ते तद्भक्ता सूक्ष्मदर्शिनः ।
कृतो बभूव तज्ज्योतिरहो तेजस्विनं विना ।
ज्योतिरभ्यन्तरे नित्यं शरीरं श्यामसुन्दरम् ॥"
इति ब्रह्मवैवर्त्ते गणपतिखण्डे ४१ अध्यायः ॥*॥
अन्यच्च ।
"श्यामसुन्दर ते दास्यः करवाम तवोदितम् ।
देहि वासांसि धर्म्मज्ञ नो चेद्राज्ञे ब्रुवामहे ॥"
इति श्रीभागवते दशमस्कन्धे २२ अध्यायः ॥*॥
अपि च ।
"दृष्ट्वा श्रीहरिं ब्रह्मा शङ्करश्च सुरैः सह ।
वसन्तं तन्मध्यदेशे यथेन्दुं तारकावृतम् ॥
अमूल्यरत्ननिर्म्माणसर्व्वभूषणभूषितम् ।
किरीटिनं कुण्डलिनं वनमालाविभूषितम् ॥
शङ्खचक्रगदापद्मधारिणञ्च चतुर्भुजम् ।
नवीननीरदश्यामसुन्दरं सुमनोहरम् ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे १४ अध्यायः ॥

श्यामा, स्त्री, (श्यामो वर्णोऽस्त्यस्या इति । अच् । टाप् ।) शारिवौषधी । अप्रसवाङ्गना । प्रियङ्गुः । वागुलिः । यमुना । रात्रिः । कृष्णचिरुटिका । नीलिका । इति मेदिनी ॥ गुग्गुलुः । सोमलता । गुञ्जा । कृष्णा । अम्बिका । इति विश्वः ॥ गुडूची । कस्तूरी । वटपत्री । वन्द्या । नीलपुनर्नवा । पिप्पली । हरिद्रा । नीलदूर्व्वा । तुलसी । पद्मबीजम् । गौः । स्त्री । छाया । कृष्णसारिवा । शिंशपा । इति राजनिर्घण्टः ॥ (नारीविशेषः । यथा, भट्टिः । ५ । १८ ।
"योषिद्दारिका तस्य दयिता हंसनादिनी ।
दूर्व्वाकाण्डमिव श्यामा न्यग्रोधपरिमण्डला ॥"
तद्व्याख्यं यथा, तट्टीकायाम् ।
"प्रीतेः सुखोष्णसर्व्वाङ्गी शीते च सुख-
प्रीतला ।
तप्तकाञ्चनवर्णाभा सा स्त्री श्यामेति कथ्यते ॥")
पक्षिविशेषः । श्यामा इति भाषा । तत्पर्य्यायः । वराङ्गी २ शकुनी ३ कुमारी ४ दुर्गा ५ देवी ६ चटका ७ कृष्णा ८ पोतकी ९ पारुषिका १० वामा ११ कालिका १२ क्षितिनिम्बिनी १३ । इति राजनिर्घण्टः ॥*॥ श्यामाया उत्पत्तिर्यथा,—
"ततः सा कालिका देवी योगनिद्रा जगन्मयी ।
पूर्व्वलक्षसतीरूपा अन्तर्धिं मेनकां ययौ ॥
समयस्थागुरूपेण मेनकाजठरे शिवा ।
समूय च मनुत्पन्ना सा लक्ष्मीरिव सागरात् ॥
वसन्तसमये देवी नवम्यां शुक्लयोगतः ।
अष्टवर्षा मनुष्यत्वा गर्भेण शुभिमध्यतात् ॥
ततस्तस्यान्तु जातायां प्रसन्नाभवन् दिशः ।
वायुर्मन्दो ववौ वायुर्गम्भीरो मन्थिरः शुभः ॥
बभूव पुष्पवृष्टिश्च तोयवृष्टिः परा तथा ।
शान्त्युत्पातास्तथः शान्ता जगज्जुश्च घना घनम् ॥
तस्यान्तु जायमानायां सर्व्वं स्वास्थ्यमभवत् ।
तान्तु दृष्ट्वा यथाजातां नीलोत्पलदलद्युताम् ॥
श्यामां सा मेनका देवी मुदमापातिहर्षिता ।
देवाश्च हर्षमतुलं,प्रापुश्चैव मुहुर्मुहुः ॥
तुष्टुवुस्तामन्तरीक्षे गन्धर्व्वाश्चाप्सरोगणाः ।
तान्तु नीलोत्पलदलश्यामां हिमवतः सुताम् ॥
कालीति नाम्ना हिमवानाजुहाव शुभे दिने ।
वान्यवास्तु स्वसन्तानां नाम्ना तां पार्व्वतीति च ।
कालीति च तथा नाम्ना कीर्त्तिता गिरिनन्दिनी ॥"
इति कालिकापुराणे ४० अध्यायः ॥*॥
अथ श्यामामन्त्राः । क्रीं क्रीं क्रीं हूं हूं ह्रीं ह्रीं दक्षिणे कालिके क्रीं क्रीं क्रीं हूं हूं ह्रीं ह्रीं स्वाहा । यथा, कालीतन्त्रे ।
"कामत्रयं वह्निसंस्थं रतिबिन्दुसमन्वितम् ।
कूर्च्चयुग्मं तथा लज्जायुगलं तदनन्तरम् ॥
दक्षिणे कालिके चेति पूर्व्वबीजानि चोच्चरेत् ।
अन्ते वह्निवधूं दद्यात् विद्या राज्ञी प्रकीर्त्तिता ॥"
मन्त्रवर्णमाह यामले ।
"ककाराद्यलरूपत्वात् केवलं मोक्षदायिनी ।
ज्वलनार्कसमायोगात् सर्व्वतेजोमयी शुभा ।
मायात्रयेण देवेशि सृष्टिस्थित्यन्तकारिणी ॥
बिन्दूनां निष्कलत्वाच्च केवलफलदायिनी ।
बीजत्रया शाम्भवी सा केवलं ज्ञानचित्कला ॥
शब्दबीजद्वयेनैव शब्दराशिप्रवोधिनी ।
लज्जाबीजद्वयेनैव सृष्टिस्थित्यन्तकारिणी ॥
सर्व्वोदगदयेनैव सदा सन्निधिकारिणी ।
स्वाहया जगतां माता सर्व्वपापप्रणाशिनी ॥"
अस्याः पूजाप्रयोगः । प्रातःकृत्यादिकं कृत्वा मन्त्रार्चनं कुर्य्यात् । यथा,—
"कालिकाभिः स्त्रिभिः पीत्वा काल्यादिभिरुपस्पृशेत् ।
द्वाभ्यामोष्ठौ द्विरुन्मृज्य चक्षुषी चालभेत् करम् ॥
सुखप्राणेषु च न्यस्योच्चनाभ्युरस्कं मुखौ क्रमात् ।
व्याहृत्यैवं भवेत् काली वत्सराजां प्रपद्यते ॥"
कं शिरः । तद्यथा । क्रीमिति चिराचामेत् । ॐ कालै नमः कपालिन्यै नमः इति ओष्ठौ द्विरुन्मृज्येत् । ॐ कुल्लायै नमः इति करं चालयेत् । ॐ कुरुकुल्लायै नमः इति सुखे । ॐ विरोधिन्यै नमः इति दक्षिणनासायाम् । ॐ विप्रचित्तायै नमः इति वामनासायाम् । ॐ उग्रायै नमः ॐ उग्रप्रभायै नमः इति नेत्रयोः । ॐ दीप्तायै नमः ॐ नीलायै नमः इति श्रोत्रयोः । ॐ घनायै नमः इति नाभौ । ॐ बलाकायै नमः इति वक्षसि । ॐ मात्रायै नमः इति शिरसि । ॐ मुद्रायै नमः ॐ मितायै नमः इत्यंसयोः । इति मन्त्रार्चनम् । ॥ । ततो भूतशुद्धान्तं विधाय मायाबीजेन यथाविधि

प्राणायामत्रयं कुर्य्यात् ॥ * ॥ ऋष्यादिन्यासः। यथा। अस्य मन्त्रस्य भैरव ऋषिरुष्णिक् छन्दो दक्षिणकालिका देवता क्रीं बीजं हूँ शक्तिः क्रीं कीलकं पुरुषार्थचतुष्टयसिद्ध्यर्थे विनियोगः। तथा च कालीक्रमे।

"कीलकं चाद्यबीजं स्यात चतुर्व्वर्गफलप्रदम्।"

शिरसि भैरवाय ऋषये नमः। मुखे उष्णिक्छन्दसे नमः। हृदि दक्षिणकालिकायै देवतायै नमः। गुह्ये क्रीं बीजाय नमः। पादयोः हूँ शक्तये नमः। सर्व्वाङ्गे क्रीं कीलकाय नमः ॥* ततः करान्गन्यासौ। तदुक्तं कालीतन्त्रे।

"अङ्गन्यासकरन्यासौ यथावदभिधीयते।
भैरवोऽस्य ऋषिः प्रोक्तः उष्णिक् छन्द उदाहृतम् ॥
देवता कालिका प्रोक्ता लज्जाबीजन्तु बीजकम्।
कीलकं चाद्यबीजं स्याच्चतुर्व्वर्गफलप्रदम् ॥
शक्तिश्च कूर्च्चबीजं स्यादनिरुद्धा सरस्वती।
कवित्वार्थे नियोगः स्यादित्यादि तेन मायया ॥"

षड्ङ्गन्यासः।

"षड्दीर्घभाजा बीजेन प्रणवाद्येन कल्पयेत्।"

वीरतन्त्रेऽपि।

"दीर्घषट्कयुताद्येन प्रणवाद्येन कल्पयेत्।"

इति वा। तद्यथा। ॐ क्रां अङ्गुष्ठाभ्यां नमः। ॐ क्रीं तर्ज्जनीभ्यां स्वाहा। ॐ क्रूँ मध्यमाभ्यां वषट्। ॐ क्रैं अनामिकाभ्यां हुँ। ॐ क्रौं कनिष्ठाभ्यां वौषट्। ॐ क्रः करतलपृष्ठाभ्यां फट्। एवं हृदयादिषु। ॐ क्रां हृदयाय नमः इत्यादि। एवं ॐ हृां अङ्गुष्ठाभ्यां नमः इत्यादि वा ॥ * ॥ ततो वर्णन्यासः। अं आं इं ईं उं ऊं ऋं ॠं ऌं ॡं नमः इति हृदये। एं ऐं ओं औं अं अः कं खं गं घं नमः इति दक्षिणबाहौ। ङं चं छं जं झं ञं टं ठं डं ढं नमः इति वामबाहौ। णं तं थं दं धं नं पं फं बं भं नमः इति दक्षिणपादे। मं यं रं लं वं शं षं सं हं ळं क्षं नमः इति वामपादे। विरूपाक्षमते सबिन्दुरयं न्यासः। यथा वीरतन्त्रे। अं आं इं ईं उं ऊं ऋं ॠं ऌं ॡं वे हृदयं न्यसेदित्यादि। पुनर्निर्बिन्दुर्यथा। अ आ इ ई उ ऊ ऋ ॠ ऌ ॡ वे हृदयं सुगेदित्यादि। किन्तु सबिन्दून् वा न्यसेदेतान् निर्बिन्दून् वाथ वर्णकान् इत्याचार्य्यपरिगृहीतभैरवीयवाक्यात् उभयमेव युक्तम् ॥ * ॥ अथ षोढान्यासः। तदुक्तं वीरतन्त्रे।

"केवलां मालकां कृत्वा मालकां तारसंपुटाम्।
मालकापुटितं तारं न्यसेत् साधकसत्तमः ॥
श्रीबीजपुटितां तान्तु मालकापुटितन्तु तत्।
कामेन पुटितां देवीं तत्पुटं कामभेव च ॥
शक्त्या च पुटितां देवीं शक्तिञ्च तत्पुटां न्यसेत्।
क्रीं हृदञ्च पुनर्न्यस्य ऋ-ॠ ऌ-ॡ-ञ पूर्व्ववत्।
मूलेन पुटितां देवीं तत्पुटं मन्त्रमेव च ॥
अनुलोमविलोमेन न्यस्य मन्त्रं यथाविधि।
मूलेनाष्टशतं कुर्य्याद्व्यापकं तदनन्तरम् ॥"

यथा ॐ क्रां ॐ एवं मालकापुटिततारम्। एवं श्रीबीजपुटितां ताम्। ततपुटितं श्रीबीजम्। एवं कामेन पुटितां मालकाम्। मालकापुटितं कामम्। एवं शक्त्या पुटितां मालकां मालकापुटितां शक्तिं न्यसेत्। तथा क्रीं हृदञ्च ऋ-ॠ-ऌ-ॡ-ञ पूर्व्ववत्। ततपुटितां मालकां न्यसेत्। मालकापुटितञ्च तत्। मन्त्रपुटितां मालकां ततपुटितं मनुम्। पुनरनुलोमविलोमेन केवलं मालकास्थाने न्यस्य मूलेनाष्टशतेन व्यापकं कुर्य्यात् अयं न्यासस्तारायां व्यपि कार्य्यः।

"इति गुप्तेन दुर्गायाः अङ्गषोढाः प्रकीर्त्तिताः।
तारायाः कालिकायाश्च उन्मुख्याश्च तथापरे ॥
एतस्मिन् न्यासवर्य्ये च सर्व्वं पापं प्रणश्यति ॥"

ततस्तत्त्वन्यासः। यथामूलं चिखण्डं विधाय प्रथमखण्डान्ते ॐ आत्मतत्त्वाय स्वाहेति पादादिनाभिपर्य्यन्तम्। द्वितीयखण्डान्ते ॐ विद्यातत्त्वाय स्वाहा इति नाभ्यादिहृदयान्तम्। तृतीयखण्डान्ते ॐ शिवतत्त्वाय स्वाहा इति हृदयादिशिरःपर्य्यन्तं न्यसेत्। तदुक्तं खतन्त्रे।

"मूलविद्यात्रिखण्डान्ते प्रणवाद्येर्यथाविधि।
आत्मविद्या शिवेस्तत्त्वेस्तत्त्वन्यासं समाचरेत् ॥"

अथ बीजन्यासः। तदुक्तं कुमारीकल्पे।

"ब्रह्मरन्ध्रे भ्रुवोर्म्मध्ये ललाटे नाभिदेशके।
गुह्ये वक्त्रे च सर्व्वाङ्गे सप्तबीजं क्रमान्न्यसेत् ॥"

यथा आद्यबीजं ब्रह्मरन्ध्रे द्वितीयबीजं भ्रूमध्ये तृतीयबीजं ललाटे चतुर्थबीजं नाभौ पञ्चमबीजं गुह्ये षष्ठबीजं वक्त्रे सप्तमबीजं सर्व्वाङ्गे। एतत्त्रयं काम्यम् ॥* ततो मूलेन सप्तधा व्यापकन्यासं कृत्वा यथाविधि मुद्रां प्रदर्श्य ध्यायेत्। यथा कालीतन्त्रे।

"करालवदनां घोरां मुक्तकेशीं चतुर्भुजाम्।
कालिकां दक्षिणां दिव्यां मुण्डमालाविभूषिताम् ॥
सद्यश्छिन्नशिरःखड्गवामाधोर्द्ध्वकराम्बुजाम्।
अभयं वरदञ्चैव दक्षिणोर्द्ध्वाधःपाणिकाम् ॥
महामेघप्रभां श्यामां तथा चैव दिगम्बरीम्।
कण्ठावसक्तमुण्डालीगलद्रुधिरचर्च्चिताम् ॥
कर्णावतंसतानीतशवयुग्मभयानकाम्।
घोरदंष्ट्रां करालास्यां पीनोन्नतपयोधराम् ॥
शवानां करसंघातैः कृतकाञ्चीं हसन्मुखीम्।
सृक्कद्वयगलद्रक्तधाराविस्फुरिताननाम् ॥
घोररावां महारौद्रीं श्मशानालयवासिनीम्।
बालार्कमण्डलाकारलोचनत्रितयान्विताम् ॥
दन्तुरां दक्षिणव्यापिमुक्तालम्बिकचोच्चयाम्।
शवरूपमहादेवहृदयोपरिसंस्थिताम् ॥
शिवाभिर्घोररावाभिश्चतुर्दिक्षु समन्विताम्।
महाकालेन च समं विपरीतरतातुराम् ॥
सुखप्रसन्नवदनां स्मेराननसरोरुहाम्।
एवं सञ्चिन्तयेत् कालीं सर्व्वकामार्थसिद्धिदाम् ॥"*॥

शवयुग्मेति घोरवाग्यावतंसेति प्रेतकर्णावतंसेति च। मुक्तपदसंयुक्तवाग्यकर्णविभूषितामिति। विगतासृक्शिरोराभ्यां कृतकर्णावतंसिनीमिति च

दर्शनादुभयमेव पाठः ॥*॥ ध्यानान्तरं खतन्त्रे

"अञ्जनाद्रिनिभां देवीं करालवदनां शिवाम्।
मुण्डमालावलीकीर्णां मुक्तकेशीं सिताननाम् ॥
महाकालहृदम्भोजस्थितां पीनपयोधराम्।
विपरीतरतासक्तां घोरदंष्ट्रां शिवे: सह ॥
नागयज्ञोपवीताढ्यां चन्द्रार्द्धकृतशेखराम्।
सर्व्वालङ्कारयुक्ताश्च मुण्डमालाविभूषिताम् ॥
रक्तपूर्णसुखाम्भोजां मद्यपानप्रमत्तिकाम्।
वह्न्यर्कशशिनेत्राश्च रक्तविस्फुरिताननाम् ॥
विगतासृक्शिरोराभ्यां कृतकर्णावतंसिनीम्।
कण्ठावसक्तमुण्डालीगलद्रुधिरचर्च्चिताम् ॥
श्मशानवह्निमध्यस्थां ब्रह्मकेशवबन्दिताम्।
सद्यःकृत्तशिरःखड्गवराभीतिकराम्बुजाम् ॥"

ध्यानान्तरं रसरत्ने। यथा,—

"शवारूढां महाभीमां घोरदंष्ट्रां हसन्मुखीम्।
चतुर्भुजां खड्गमुण्डवराभयकरां पराम् ॥
मुण्डमालाधरां देवीं ललज्जिह्वां दिगम्बरीम्
एवं सञ्चिन्तयेत् कालीं श्मशानालयवासिनीम् ॥"

एवं ध्यात्वा मानसैः संपूज्य पुष्पाञ्जलिं कुर्य्यात्। यथा। स्वबीजे भूमौ हूंकारगर्भं त्रिकोणं विलिख्य अर्घ्यपात्रं संस्थाप्य मूलेन शुद्धजलादिना पुष्पादिपात्रमापूर्य्य गन्धादिकं दत्त्वा ॐ गङ्गे चेत्यादिना तीर्थमावाह्य मं वह्निमण्डलाय दशकलात्मने नमः इत्याधारम्। यं सूर्य्यमण्डलाय द्वादशकलात्मने नमः इति पुष्पम्। उं सोममण्डलाय षोड्शकलात्मने नमः इति जलं संपूज्य। ॐ हृां हृदयाय नमः। ॐ हृीं शिरसे स्वाहा। ॐ हूँ शिखायै वषट्। ॐ हैं कवचाय हूँ इत्यमीशासुरवायुयु। अग्ने ॐ हौं नेत्रत्रयाय वौषट्। चतुर्दिक्षु ॐ हः अस्त्राय फट्। इत्यभ्यर्च्च तदुपरि मत्स्यमुद्रयाच्छाद्य मूलं दशधा जप्त्वा धेनुमुद्रया चन्दनीकृत्य अस्त्रेण संरक्ष्य भूतिनीयोनिमुद्रे प्रदर्श्य तज्जलं किञ्चित् प्रोक्षणीपात्रे निःक्षिप्य मूलेन तेनोदकेनात्मानं पूजोपकरणञ्चाभ्युक्ष्य पीठपूजामारभेत् ॥ * ॥ अस्याः पूजायन्त्रम्। आदौ बिन्दुं स्वबीजं भुवनेशीञ्च विलिख्य ततस्त्रिकोणं तद्बाह्ये त्रिकोणचतुष्टयं वृत्तमष्टदलं पद्मं पुनर्वृत्तं चतुर्द्वारात्मकं भूगृहं लिखेत्। तदुक्तं कालीतन्त्रे।

"आदौ त्रिकोणमालिख्य त्रिकोणं तद्बहिर्लिखेत्।
ततो वै विलिखेन्मन्त्री त्रिकोणत्रयमुत्तमम् ॥
ततो वृत्तं समालिख्य लिखेदष्टदलं ततः।
वृत्तं विलिख्य विधिवल्लिखेद्भूपुरमेककम् ॥"

कुमारीकल्पे।

"मध्ये तु वैन्दवं चक्रं बीजमायाविभूषितम् ॥"

इति ॥ * ॥

अत्र विशेषाधारो मुण्डमालायाम्।

"ताम्रपात्रे कपाले वा श्मशानकाष्ठनिर्म्मिते।
अनिर्भौमदिने वापि शरीरे मृतसम्भवे ॥
स्वर्णे रौप्येथ लौहे वा चक्रं कार्य्यं विधानतः ॥"

निजबीजं बीजं लज्जाबीजं शक्तिः। वर्णन्यासादि दक्षिणावत्। ध्यानम्।
"खड्गाब्जिनेन्द्रखड्गवरदस्तरसाञ्चिताङ्घ्री
त्रिनेत्रा
मद्ये पाणौ कपालोत्पलदरदगमधो सृक्कर्कशौ
पिबन्ती।
दिग्वस्त्रावद्धकाञ्चीमणिमयमुकुटाद्योर्युता दीप्र-
जिह्वा
पायान्नीलोत्पलाभा रविशशिविलसत्कुण्डला-
लीढ़पादा॥"
एवं ध्यात्वा दक्षिणावत् सर्वं कार्यम्। पुरश्चरणन्तु एकविंशतिसहस्रजपः॥*॥ क्रीं ह्रीं ह्रीं। ३॥*॥ क्रीं क्रीं क्रीं स्वाहा। ५॥*॥ क्रीं क्रीं क्रीं फट् स्वाहा। ६॥*॥ क्रीं क्रीं क्रीं क्रीं क्रीं क्रीं स्वाहा। ८॥*॥ ऐं नमः। क्रीं ऐं नमः। क्रीं कालिकायै स्वाहा। १४॥*॥ अतस्याः पूजाप्रयोगः। अस्य दक्षिणा मूर्त्तिऋषिः पंक्तिश्छन्दः कालिका देवता। ध्यानम्।
"चतुर्भुजा कृष्णवर्णा मुण्डमालाविभूषिता।
खड्गञ्च दक्षिणे पाणौ बिभ्रतीन्दीवरद्वयम्॥
कर्त्रञ्च खर्परञ्चैव क्रमाद्वामेन बिभ्रती।
द्यां लिखन्ती जटामेकां बिभ्रती शिरसाद्यधौ॥
मुण्डमालाधरा घोरे ग्रीवायामथ चापराम्।
वक्षसा नागहारञ्च बिभ्रती रक्तलोचना॥
कृष्णवस्त्रधरा कट्यां व्याघ्राजिनसमन्विता।
वामपादं शवहृदि संस्थाप्य दक्षिणं पदम्॥
विलोल्य सिंहपृष्ठे तु लेलिहाना शवं स्वयम्।
साट्टहासा महाघोररावयुक्ता सुभीषणा॥"
ध्यानमेवं अन्यत् सर्वं दक्षिणावत्। पुरश्चरणं लक्षहयजपः। अन्यासां मन्त्रवर्णसंख्यलक्षजपः॥*॥ क्रीं ह्रीं ह्रीं दक्षिणे कालिके स्वाहा।११॥*॥ क्रीं ह्रूं ह्रीं दक्षिणे कालिके फट्। १०॥*॥ क्रीं क्रीं ह्रूं ह्रूं ह्रीं ह्रीं दक्षिणे कालिके क्रीं क्रीं ह्रूं ह्रूं ह्रीं ह्रीं स्वाहा।२०। एतासां दक्षिणा मूर्त्तिऋषिः पंक्तिश्छन्दो दक्षिणकालिका देवता। अन्यत् सर्वं दक्षिणावत्॥*॥ क्रीं स्वाहा। ३। भैरवोऽस्य ऋषिः॥*॥ क्रीं क्रीं ह्रूँ ह्रूँ ह्रीं ह्रीं स्वाहा। ८॥*॥ क्रीं ह्रूं ह्रीं स्वाहा।५। अस्य पञ्चवक्त्र ऋषिः॥*॥ क्रीं क्रीं क्रीं ह्रूँ ह्रूँ ह्रीं ह्रीं स्वाहा।६॥*॥ क्रीं दक्षिणे कालिके स्वाहा। ६॥*॥ क्रीं ह्रूं ह्रीं क्रीं ह्रूँ ह्रीं स्वाहा। ८॥*॥ क्रीं क्रीं क्रीं ह्रीं ह्रीं ह्रूं ह्रूं क्रीं क्रीं क्रीं ह्रीं ह्रीं ह्रूं ह्रूं स्वाहा। १६॥*॥ नमः ऐं क्रीं क्रीं कालिकायै स्वाहा। ११॥*॥ नमः ॐ ॐ क्रीं क्रीं फट् स्वाहा कालि कालि ह्रूँ। १४॥*॥ एतासां ऋष्यादिकं पूजादिकञ्च दक्षिणावत्। पुरश्चरणं लक्षजपः॥*॥ अथ गुह्यकालिकामन्त्राः। क्रीं क्रीं क्रीं ह्रूं ह्रूं ह्रीं ह्रीं गुह्ये कालिके क्रीं क्रीं क्रीं ह्रूं ह्रूं ह्रीं ह्रीं स्वाहा। २१॥*॥ क्रीं ह्रूं ह्रीं गुह्ये कालिके क्रीं क्रीं ह्रूं ह्रूं ह्रीं ह्रीं स्वाहा। १६॥*॥ क्रीं क्रीं क्रीं ह्रूं ह्रूं ह्रीं ह्रीं गुह्ये कालिके स्वाहा। १४॥*॥ क्रीं ह्रूं ह्रीं गुह्ये कालिके ह्रूं ह्रूं ह्रीं ह्रीं स्वाहा। १४॥*॥ क्रीं ह्रूं ह्रीं दक्षिणे कालिके ह्रूं ह्रूं ह्रीं ह्रीं स्वाहा। १५॥*॥ ह्रूं ह्रूं गुह्ये कालिके क्रीं क्रीं ह्रूं ह्रूं ह्रीं ह्रीं स्वाहा। १५॥*॥ क्रीं गुह्ये कालिके क्रीं स्वाहा। ६॥*॥ क्रीं दक्षिणे कालिके क्रीं स्वाहा। १०॥*॥ एतासां सर्वं पूर्ववत्। बलिमन्त्रस्तु। एह्येहि जगन्मातर्जगतां जननि ग्रह्ण ग्रह्ण मम बलिं सिद्धिं देहि देहि शत्रुक्षयं कुरु कुरु क्रूं क्रूं ह्रीं ह्रीं फट् फट् ॐ कालिकायै नमः फट् स्वाहा॥*॥ तथा गुह्यकाल्या अयं मन्त्रः। एह्येहि गुह्यकालि मम बलिं ग्रह्ण ग्रह्ण मम शत्रून् नाशय नाशय खादय खादय स्फुर स्फुर छिन्धि छिन्धि सिद्धिं देहि देहि क्रूं फट् स्वाहा॥*॥ अथ भद्रकाल्यादिमन्त्राः। क्रीं क्रीं क्रीं ह्रूं ह्रूं ह्रीं ह्रीं भद्रकाल्यै क्रीं क्रीं क्रीं ह्रूं ह्रूं ह्रीं ह्रीं स्वाहा।२०॥*॥ क्रीं क्रीं क्रीं ह्रूं ह्रूं ह्रीं ह्रीं श्मशानकालि क्रीं क्रीं क्रीं ह्रूं ह्रूं ह्रीं ह्रीं स्वाहा।२१॥*॥ क्रीं क्रीं क्रीं ह्रूं ह्रूं ह्रीं ह्रीं महाकालि क्रीं क्रीं क्रीं ह्रूं ह्रूं ह्रीं ह्रीं स्वाहा।२०॥*॥ एतासां पूजादिकं दक्षिणावत्। ध्यानम्।
"महामेघप्रभां देवीं कृष्णवस्त्रविधारिणीम्।
ललज्जिह्वां घोरदंष्ट्रां कोटराक्षीं हसन्मुखीम्॥
नागहारलतोपेतां चन्द्रार्द्धकृतशेखराम्।
द्यां लिखन्तीं जटामेकां लेलिहानां शवं स्वयम्॥
नागयज्ञोपवीताङ्गीं नागशय्यानिषेदुषीम्।
पञ्चाशन्मुण्डसंयुक्तवनमालां महोदरीम्॥
सहस्रफणसंयुक्तमनन्तं शिरसोपरि।
चतुर्दिक्षु नागफणाविष्टितां गुह्यकालिकाम्॥
तक्षकसर्पराजेन वामकर्णविभूषिताम्।
अनन्तनागराजेन कृतदक्षिणकर्णिकाम्॥
नागेन रसनाहारकल्पितां रत्नभूषिताम्।
वामे शिवस्वरूपन्तं कल्पितं वटरूपकम्॥
द्विभुजां चिन्तयेद्देवीं नागयज्ञोपवीतिनीम्।
नरदेहसमारूढकुण्डलश्रुतिमण्डिताम्॥
प्रसन्नवदनां सौम्यां नवरत्नविभूषिताम्।
नारदाद्यैर्मुनिगणैः सेवितां शिवमोहिनीम्।
साट्टहासां महाभीमां साधकाभीष्टदायिनीम्॥"
गुह्यकाली इत्युपलक्षणम्॥*॥ भद्रकालीमन्त्रान्तरम्।
"प्रासादबीजमुद्धृत्य कालीति पदमुद्धरेत्।
महाकालीपदं पश्चात् क्लिन्नयुग्मं ततः परम्॥
अस्त्रमग्निप्रियान्तोऽयं भद्रकाल्या महामनुः॥"
ॐ कालि महाकालि किलि किलि फट् स्वाहा॥*॥ ध्यानं यथा,—
"चतुर्भुजा कोटराक्षी मसिमलिनमुखी
मुक्तकेशी वदन्ती
नाहं क्षमा वदन्ती जगदखिलमिदं ग्रासमेकं
करोमि।
खड्गाभ्यां धारयन्ती ज्वलदनलशिखासन्निभं
पाशयुग्मं
दन्तैर्जम्बूफलाभैः परिहरतु भयं पातु मां
भद्रकाली॥"
अस्याः पुरश्चरणादिकं दक्षिणकालीतन्त्रवत्। इति केचित्॥ वस्तुतस्तु पुरश्चरणमष्टोत्तरसहस्रजपः। इति कृष्णानन्दकृततन्त्रसारः॥*॥ श्मशानकालीमन्त्रादिकं तच्छन्दे द्रष्टव्यम्॥*॥ अथ दीपान्विताश्यामापूजा। यामले।
"कार्त्तिके मासि कृष्णायां पक्षदश्यां महानिशि।
पूजयेत् योऽतियत्नेन कालीं विद्यां प्रसीदति॥
दारुमयीं प्रतिमां कृत्वा महाकालीं प्रपूजयेत्॥"
योगिनीहृदयसंहितायाम्।
"तुलार्के बहुले पक्षे पक्षदश्यां महेश्वरि।
पूजयेद्विधिवद्भक्त्या सर्वसिद्धीश्वरो भवेत्॥" इति॥
एवञ्च अहरात्रं पूजाया मुख्यकालः। स च कालो यद्युभयदिने तदा पूर्व्वदिने पूजा। यथा, तत्रैव।
"तत्रोभयदिने प्रस्तकाले भूतयुता यदि।
उमा माहेश्वरी सा च तिथिः सिद्धिप्रदा सताम्॥
बलिदानं बलितिथावात्मनाशकरं परम्।
ततस्तत्र न कर्त्तव्ये बलिदानविसर्ज्जने॥
मन्त्रसिद्धिकरं तत्र परन्तद्धि जपसाधनम्।
रात्रौ पूजा प्रकर्त्तव्या रात्रावेव विसर्ज्जनम्।
प्रकाशे सिद्धिहानिः स्याद्गोपने सिद्धिरुत्तमा॥"
तथा कालीकल्पे।
"तुलार्के बहुले पक्षे पक्षदश्यां महेश्वरीम्।
यथोपचारैः संपूज्य महानिशि नृपो भवेत्॥
अनिभौमदिने चेत् स्यात्ततः शतगुणं फलम्।
तत्रोभयदिने भूतयुक्तञ्चाद्यां महानिशि॥
इमां यात्रां कारयित्वा चक्रवर्त्ती भवेन्नृपः।"
इति॥
महेश्वरीं दक्षिणकालीं ततुप्रकरणोक्तत्वात्॥*॥ कार्त्तिकामावास्यायां कालीपूजाहेतुमाह विश्वसारे।
"कार्त्तिके कृष्णपक्षे तु पक्षदश्यां महानिशि।
आविर्भूता महाकाली योगिनीकोटिभिः सह॥
अतोऽत्र पूजनीया सा तस्मिन्नहनि मानवैः।
बलिपूजादिकं सर्वं निशायां क्रियते तु यत्।
तत्तदत्रयुतं याति काली विद्या प्रसीदति॥"
महानिशि अर्द्धरात्रे। तथा च उत्तरकामाख्यातन्त्रे।
"शरत्काले च देवेशि दीपयात्रादिनेऽपि च।
अमावास्यां समासाद्य मध्यरात्रौ विचक्षणः॥
दारुमयीं पुत्तलीं कृत्वा दीपादिभिरलङ्कृताम्।
बलिं नानाविधं दद्यात् वाद्यभाण्डसमन्वितम्॥
नृत्यगीतं कौतुकञ्च यावत् सूर्य्योदयं भवेत्।
प्रातःकाले शुद्धतोये स्नापयेदरिनाशिनीम्॥"
इति॥
एतेनास्या दीपयात्राप्यर्द्धरात्रे बोध्या। यात्रि-

भूतैत्यनेनार्द्धरात्रे अस्तअवणात् तत्रैव पूजा मुख्येति। तथा हरिहरभट्टपुराणे।

"रात्रौ निशीथव्यापायाममावास्यामिहैव तु।
पूर्व्वोत्तरं समाख्याता काली दिवसनायिका॥
अतस्तामत्र वै भक्त्या देवदेवीं हिलातयः।
पूजयेदात्मनो भक्त्या पशुपुष्पार्घ्यसम्पदा॥" इति।

तथा गुप्तसाधनतन्त्रे।

"निशा तु परमेशानि सूर्य्ये याते सुपागते।
प्रहरे च गते रात्रौ घटिके द्वे परे च ये॥
महानिशा समाख्याता ततश्चातिमहानिशा।
अर्द्धरात्रे गते देवि पशुभावो न पूजयेत्॥"

अर्द्धरात्रे गते अर्द्धरात्रात् परम्। तथा।

"दण्डद्वये तु या पूजा तत् सर्व्वमल्पकं भवेत्।
षडङ्गोर्ध्वं महेशानि तत् सर्व्वमल्पोपमम्॥
सप्तमङ्गोर्ध्वके देवि सर्व्वं क्षीरोपमं भवेत्।
अष्टमङ्गोर्ध्वके देवि! द्वयतुल्यं न संशयः॥
अतः परं महेशानि विषतुल्यं न संशयः।
एतत् सर्व्वं महेशानि पशुभावे मयोदितम्॥"

अर्द्धरात्रस्य गौणत्वश्रवणात् पशूनां यत्र पूर्व्वदिने अर्द्धरात्रव्यापिन्यमावास्या न तु तत्पूर्व्वं प्राप्तिः परदिने च रात्रेः षण्मसत्कूर्त्तव्यापिनी तदा परेद्युः पूजेति चेन्न गुप्तसाधनतन्त्रोक्तवचनस्य नित्यपूजाविषयत्वात्। कार्त्तिकामावास्यायामर्द्धरात्रे अस्मन्निमित्तकपूजाया विशेषेणाभिधानात्। पशुभिरपि एवंभूतस्थले पूर्व्वदिने अर्द्धरात्र एव पूजा कार्य्या। यथा श्रीदक्षिणपूजायाः सामान्यतो निशायामकर्त्तव्यत्वेऽपि अस्माभिरर्द्धरात्रकर्त्तव्यता सुखसम्मेति। परन्तु यत्र पूर्व्वदिने अर्द्धरात्रात् परममावास्या परदिने अर्द्धरात्रात् पूर्व्वमेव तत्र पशुभाविनः परदिने वीरादियोग्ये पूर्व्वदिने पूजा कार्य्या इति। प्रमाणं गोप्यगोपनलीलागमीयषष्ठपटले। एवं यत्र पूर्व्वदिने अर्द्धरात्रव्यापिन्यमावास्या परदिने तथा भूतापि कुलवारादियुक्ता तत्रापि पूर्व्वदिने पूजा गुणफलकुलवारादिकमपेक्ष्य चतुर्दशीयोगस्य मुख्यत्वात्। तथोक्तं योगिनीहृदये।

"कुलवारे अष्टगुणं पूर्व्वविद्धा तथाधिकेति।"

कुलवार इति शनिवारोपलक्षणम्।

"अतिभौमदिने चैव स्वातौ शतगुणं फलम्।" इति श्रवणात्।

कार्त्तिकामावास्यायां कालीपूजाया नित्यताभिधायायामले।

"वर्षे वर्षे च कर्त्तव्यं कालिकाया महोत्सवम्।
कार्त्तिके तु विशेषेण अमावास्यां निशार्द्धके।"

इति।

देवीयामले च।

"अतिवर्षकरं दुर्गात् कालिकाया महोत्सवम्।
कार्त्तिके तु विशेषेण अमावास्यां निशार्द्धके।
तत्र संपूजयेद्देवीं भोगमोक्षप्रदायिनीम्।"

इति।

एतच्च कार्त्तिकपदं गौणचान्द्रकार्त्तिकपरं जन्मतिथिकृत्यत्वात्। न तु नामावचने तुलार्कश्रवणात् सौरकार्त्तिकपरम्। तथा सति यस्मिन् वर्षे तुलार्के रात्रौ नामावास्याप्राप्तिस्तद्वर्षे क्षयलोपः स्यात्। एवं यत्र वर्षे तुलार्के दर्शद्वयं तत्रानध्यवसायापत्तेः। स्पष्टमुक्तं विद्योत्पत्तितन्त्रे।

"कार्त्तिकस्याप्यमावास्या गौणचान्द्रप्रमाणतः।
निशीथव्यापिनी या तु तस्यां पूजां समाचरेत्॥"

निशीथमर्द्धरात्रम्। एवं यत्र पूर्व्वदिने निशीथव्यापिन्यमावास्या कन्यार्के परदिने च तुलार्के ऽर्द्धरात्रात् परं मुहूर्त्तादिव्यापिनी तत्रापि पूर्व्वदिने निशीथस्य सुखकालत्वानुरोधात् भूततिथियोगानुरोधाच्च तुलार्कस्य दिनभेदनियामकत्वेनाश्रुतत्वात्। परन्तु तुलार्कपदं नामावचने यद्यस्ति तन्मायिकाभिप्रायेण गुणफलाभिप्रायेण वा बोध्यम्। अतएव तिथितत्त्वधृतमादित्यपुराणम्।

"अष्टरात्रिविधिर्येण यत् कर्म्म विहितं नरैः।
देवं वाप्यथवा पैत्र्यं तदन्यत्रापि दृश्यते॥"

इति।

अगस्त्यसंहितायाम्।

"मेषं पूषणि संप्राप्ते लग्ने कर्कटकाह्वये।
आविरासीत् सकलया कौशल्यायां परः पुमान्॥"

इति॥

यत्र मेषार्के जन्मश्रवणं मीनार्केऽपि कदाचित् उपवासः। यत्तु तन्त्रीयमिति श्रुत्वा पठन्ति।

"तुलार्के स्वर्द्धरात्रे या दीपयात्रातिथिर्भवेत्।
तत्र संपूजयेत् कालीं सर्व्वकामार्थसिद्धये॥
निशार्द्धे सा तिथिर्नास्ति तदयः कालसंयुता।
तत्रापि पूजयेत् कालीं तुलार्कं नैव लङ्घयेत्॥"

इति तदमूलम्। समूलकत्वेऽपि तुलार्के इत्यत्र तुशब्दः कन्यार्कग्राहकः। तेन तुलार्के कन्यार्के वा इत्यर्थः। तुलार्कमात्रपरत्वे प्रतिसंवत्सर इत्यस्य बाधापत्तेरुक्तत्वात्। तुलार्के नैव लङ्घयेदित्यस्य तुलार्कविहितपूजां न त्यजेत् इत्यर्थः। तुलार्कविहितपूजाया गौणकार्त्तिकत्वेन कर्त्तव्यतायां विधेस्तात्पर्य्यस्योक्तत्वात्। यद्वा सर्व्वत्र तुलार्कघटितवचनेषु तुलार्कस्यामावास्यायामुपलक्षणतयान्वयः। न तु विशेषणतया। न वा पूजायामपि तदन्वयः। तेन तुलार्कोपलक्षितामावास्यायां निशीथे कालीं पूजयेत् इति विधिस्तेन गौणचान्द्रकार्त्तिकामावास्याकामः। तस्यामेव तुलार्कसम्बन्धनियमात्। अन्यथा तुलास्थरथारम्भाभावेन कदाचित् तत्परप्रतिपदादिदर्शोत्पत्तस्य मुख्यकार्त्तिकत्वानुपपत्तिः। मुख्यकार्त्तिकामावास्यायाः कदाचित् वृश्चिके सञ्चात् न तु तुलार्के नियमः। तथा च तुलार्कनियतामावास्यायां निशीथे कालीं पूजयेदिति पर्य्यवसितम्। तुलार्के नैव लङ्घयेदित्यत्र तुलार्कपदञ्च तुलार्कोपलक्षितामावास्यापूजापरम्। संकल्पवाक्ये तु कार्त्तिके मासीत्युक्तिरयं न तु राशिमुख्यांशेऽपि गौणचान्द्रे विधानात्। केचित्तु उपलक्षणतया अमावास्यायां अन्वयात्पर्व्वेति

तुलाराशिस्थे भास्करे इत्युक्तेरयं इति भास्करपदोत्तरसप्तम्या उपलक्षणतया तत्कालसम्बन्धबोधनसामर्थ्यात् इति वदन्ति॥*॥ तन्त्रान्तरे।

"तुलाराशिं गते भानौ दीपयात्रानिशासु च।
पूजयेत् कालिकां देवीं धर्म्मकामार्थसिद्धये॥"

तन्त्रे।

"अर्द्धरात्रात् पुरस्तात्तु यावद्वै घटिकाद्वयम्।
सा महारात्रिरुद्दिष्टा यद्दत्तमक्षयं भवेत्॥
महानिशाच विज्ञेया अर्द्धरात्रात् परं शिवे।
नाड़ीचतुष्टयं प्रोक्तं तत्र पूजा महाफला॥"

विद्योत्पत्तितन्त्रे।

"दीपोत्सवचतुर्दश्याममावा योग एव च।
कालरात्रिर्महेशानि काली तारा प्रियङ्करी॥"

ज्ञानार्णवे।

"महारात्रावमावास्यां दक्षिणायाः प्रपूजनम्।
कार्त्तिके मासि सुश्रोणि कालीप्रीतिकरं परम्॥
तत्रापि च निशीथे तन्महासिद्धिप्रदं नृणाम्।
निशीथात् परतो देवि यत्तु नाड़ीचतुष्टयम्॥
सा महारात्रिरुद्दिष्टा तत्र पूजा महाफला।
तारतम्येन देवेशि पूजायाः फलकल्पनम्॥"

कुलार्णवेऽपि।

"भूतयुक्ता महेशानि महारात्रौ तु या कुहूः।
सा कालरात्रिरुद्दिष्टा काली तारा प्रियङ्करी॥
तत्र पूजा तयोः कार्य्या नानापशुविधिंसनम्।
बलिदानं बलिर्यावान्मनाग्रकरं शिवे!॥"

कुलचूड़ामणौ।

"तिथिभ्यः शतगुणं पर्व्व दर्शः कोटिगुणोत्तरः।
फलोपचारबहुलैर्य्यष्टे सूर्य्येन्दुसङ्गमे।
पूजयित्वा महाकालीं नरो निर्व्वाणमृच्छति॥
चतुर्वर्गप्रदं दर्शं कार्त्तिके कालिकार्चनम्।
अनन्तफलदं तत्र पर्व्वयुक्ते च पर्व्वणि॥
निशार्द्धे पूजयेद्देवीं वृषस्थां सुखमालिनीम्।
पशून्मिक्षीरवे घोरे सर्व्वप्राणिभयङ्करे॥"

कालीकुलसद्भावे।

"दीपोत्सवंचतुर्दश्यां संमिश्रा या भवेत् कुहूः।
तस्यां या तामसी रात्रिः सोच्यते काल-
रात्रिका॥
तस्यां पूजा प्रकर्त्तव्या काली तारा प्रियङ्करी॥
तुलामकरमेषेषु कन्यायां मिथुने तथा।
भूतविद्धाप्यमावास्या पूज्या भवति यत्नतः॥"

इति गौतमवाक्यप्रकाशे तत्त्वचिन्तामणिधारीतवचनम्॥*॥ शिवरात्रिप्रकरणे देवीपुराणे महानिशा यथा,—

"महानिशे द्वे घटिके रात्रेर्मध्यमयामयोः।"

इति गङ्गामाहात्म्यप्रकरणे गृहस्थरत्नाकरधृता तु।

"महानिशा तु विज्ञेया मध्यमं प्रहरद्वयम्।
तत्र स्नानं न कुर्व्वीत नित्यनैमित्तिकादृते॥"

मन्त्रवैदर्भे श्रीकृष्णजन्मप्रकरणे।

"मन्मुहूर्त्ते जनौ तु रात्रावेव महानिशा।"

जन्मतत्त्वार्णवे चौशनसः।

"महानिशा तु विज्ञेया मध्यं मध्यमयामयोः।"

देवागमे।
"अमावास्यामर्द्धरात्रे दक्षिणां पूजयेत् पराम्।"
कुलकर्त्ते च यः कुर्य्यात् स गच्छेच्छिवसन्निधिम्॥
तुलायां भौमवारे च अमावास्या यदा भवेत्।
तिथिः सापि महापुण्या शिवेन परिकीर्त्तिता॥
वर्षैश्चतुर्भिर्यत् पुण्यं विधिवत् पूज्य चण्डिकाम्।
तत्फलं लभते वीर अमावास्यां निशार्द्धके॥"
कालीकुलतन्त्रे।
"निशार्द्धे पूजयेद्देवीं श्मशानालयवासिनीम्॥"
इति॥

मालिनीतन्त्रे।
"एतत्सन्ध्यात्रयेणैव अर्द्धरात्रौ तु वन्दना।
महारात्रावपि तथा कार्य्या देशिकसत्तमैः॥"*
स्नापकालो यथा,—
श्रीदेव्युवाच।
'देवदेव महादेव संसारार्णवतारक।
श्वेतायाः स्नापकालं कथयस्व दयानिधे॥
श्रीशिव उवाच।
चतुर्दश्यात् परं देवि रात्रेः प्रथमयामकः।
स्नापकालस्तु कथितः पूजानर्घफलप्रदा।
पूजा होमस्तोत्रजपौ जागरकाले प्रशस्यते।"
इति कालीकुलाष्टतन्त्रे॥*॥
'समुद्रमथने देवि देवासुरगणाः पुरा।
नाराध्य त्वां प्रमघ्नीयुरतस्त्वं विघ्नरूपिणी॥
आविर्भूता महाकाली ब्रह्माण्डनाशनाशिनी।
तद्दृष्ट्वा देवा दैत्याश्च भीता मां शरणं गताः॥
तेषामपि भयं दृष्ट्वा भीतोऽहं विषसन्निधौ।
गत्वा ध्यानपरो भूत्वा विषं पातुं समारभे॥
पूर्व्वोक्ता या महाविद्या आविर्भूता च मे हृदि।
तुलां कृष्णां निशार्द्धे च देवदानवनिन्दिते॥
मनुष्यपशुपक्ष्यादौ निन्दिते चान्यजन्तुषु।
तस्मिन् काले मया पूज्या इन्द्रेणाप्यसुरेण तु॥
देव्युवाच।
कुत्र काले त्वया पूज्या इन्द्रेणाप्यसुरेण च॥
महादेव उवाच।
अर्द्धरात्रमुहूर्त्ते च मया चेन्द्रेण पूजिता।
ततो मुहूर्त्ते संपूज्या वीरेणाप्यसुरेण च॥
अतः आद्यः पाशवः स्यात् वीरः शैवः प्रकीर्त्तितः।
स्वायम्भुवेन मनुना सर्व्वे तेन प्रपूजिताः॥"
इति गोप्यगोपनकौलागमे ६ पटलः॥*॥
कालीकुलसर्व्वस्वे।
"निशार्द्धे सा तिथिर्नास्ति तदूर्द्धे भूतसंयुता।
तथापि पूजयेद्देवीं भूतयुक्तां न लङ्घयेदिति॥"
अथ रटाकालीपूजाप्रमाणम्। उत्तरकामाख्यातन्त्रे।
"मारीभये समायाते दुर्भिक्षभयपीड़िते।
पूजयेत् परया भक्त्या कालीं कालविनाशिनीम्॥
रटन्ति यस्मिन्भूतानां रटाकालीति सा स्मृता॥"
ज्ञानार्णवे।
"सर्व्वविघ्नोपशान्त्यर्थं रटाकालीं प्रपूजयेत्।
अग्निमङ्गलवारे च प्रदोषे पूजयेत् शिवाम्॥
चतुर्दश्याममायां वा नवम्यामष्टमीतिथौ।
पूजनात् वरदा काली यथेप्सितफलप्रदा॥"
कालीकुलसर्व्वस्वे।
"निशासुखे महेशानी कालीं रटार्घमादरात्।
पूजनीया वृभिः सर्व्वैरुपचारसमन्वितैः।
वित्तशाठ्यं न कर्त्तव्यं यथाविभवविस्तरैः॥"
निरुत्तरतन्त्रे।
"बलिदानन्तु विधिवत् मधुभिः पायसेन च।
पूपैर्मोदकसंघैश्च पृथुकैः शीफलैरपि॥
नानाफलैः शाकसूपैः पक्वतण्डुलसंहतैरीम्।
पूजयेद्विघ्नशान्त्यर्थं कालीं रटाविधायिनीम्॥
प्रदोषसमये पूजा कर्त्तव्या भूतिमिच्छता।
रात्रौ विसर्জ্জनं कार्य्यं क्रीड़ाकौतुकमङ्गलैः॥"
भैरवतन्त्रे।
"अथ वक्ष्ये महेशानि घोरे मारीभये तथा।
औत्पातिके च दुर्भिक्षे युद्धे राष्ट्रभयागते।
पूजां कुर्य्यात् महाकाल्या रटार्घं पद्मपर्व्वसु॥
प्रदोषकाले संपूज्य निशायान्तु विसर्জ্জयेत्।
सकृत्तेद्वितयं कालः प्रदोषोऽस्तमयात्ततः॥"
तन्त्रान्तरे।
"निशासुखे महाकालीं महामारीभये शिवाम्।
कालीं त्रैलोक्यरटार्घं पूजयेत् रटनात्मिकाम्॥"*॥
अथ फलहारीपूजाप्रमाणम्।
"मधुमासे सिताष्टम्यां वैशाखसितवैऽहनि।
पौर्णमास्यां तथा ज्येष्ठे अमायाञ्च महेश्वरि॥"
इत्यादि।
"आषाढ्यां कार्त्तिके चैव नवम्यां शुक्लपक्षके।"
इति कात्यायनीतन्त्रे ७८ पटलः॥
"ज्येष्ठे मासि तथाषाढ्यां सफलं कालिकार्च्चनम्।"
इत्युत्तरकामाख्यातन्त्रे ११ पटलः॥
"ज्येष्ठे मासि अमायां वै मध्यरात्रे महेश्वरि।
पूजयेत् कालिकां देवीं नानाद्रव्योपहारकैः॥
तत्रैव सितपक्षे तु पञ्चदश्यां निशार्द्धके।
पूजयेच्च फलैर्लक्षैः शक्तितो वापि कालिकाम्॥"
इति मायातन्त्रे २७ पटलः॥
अथ रटनीपूजाप्रमाणम्।
"माघे माससिते पक्षे रटन्ताख्या चतुर्दशी।
तस्यां निशार्द्धसमये पूजयेच्छुष्कमालिनीम्॥"
इति मायातन्त्रे १७ पटलः॥
"मकरस्थे रवौ शुक्लचतुर्दश्यां निशार्द्धके।
पूजयेद्दक्षिणां कालीं धर्म्मकामार्थसिद्धये॥"
इत्युत्तरकामाख्यातन्त्रे ६ पटलः॥
श्यामाकः, पुं, (श्यामं श्यामवर्णमकतीति। अक गतौ + अच्।) द्रव्यधान्यभेदः। शामा इति भाषा। तत्पर्य्यायः। श्यामकः २ श्यामः ३ विषौषः ४ अविप्रियः ५ सुकुमारः ६ राजधान्यम् ७ द्रव्यशीतलम् ८। अस्य गुणाः। मधुरत्वम्। शितत्वम्। कषायत्वम्। लघुत्वम्। श्लेष्मपित्तनाशित्वम्। वातकारित्वम्। कफपित्तव्रणदोषनाशित्वम्। सुपाच्यत्वञ्च। इति राजनिर्घण्टः॥
अपि च।
"श्यामाकः शीतलो रूक्षो वातलः कफपित्तहृत्॥"
इति भावप्रकाशः॥
श्यामाङ्गः, पुं, (श्यामानि अङ्गानि यस्य।) वृक्षभेदः। इति त्रिकाण्डशेषः॥ कृष्णकलेवरे, त्रि। यथा,—
"श्यामाङ्गीं शशिशेखरां निजकरैर्दानञ्च रक्तोत्पलं
रक्ताढ्यं चषकं परं भयहरं संबिभ्रतीं श्यामलौम्।
शुक्लाहारलसत्पयोधरनतां नेत्रत्रयोल्लासिनीं
वन्देऽहं सुरपूजितां हरवधूं रक्तारविन्दस्थिताम्॥"
इति तन्त्रसारे भुवनेश्वरीध्यानम्॥
श्यामान्ती, स्त्री, (श्यामा चासौ अन्ती चेति कर्म्मधारयः।) नीलान्ती। इति राजनिर्घण्टः॥
श्यालः, पुं, (श्यायते नर्म्मार्थं प्राप्यतेऽसौ इति। श्यै + बाहुलकात् कालन्।) पत्नीभ्राता। इत्यमरः॥ श्याला इति भाषा॥ (यथा, गीतायाम्। १। ३४।
"मातुलाः श्वशुराः पौत्राः श्यालाः सम्बन्धिनस्तथा।
एतान्न हन्तुमिच्छामि घ्नतोऽपि मधुसूदन॥")
तत्पर्य्यायः। वाक्षोरः २ श्यालिकः ३। इति शब्दरत्नावली॥ श्वशुर्यः ४ आत्मवीरः। इति जटाधरः॥ तस्यार्थे एकराजाधौचं यथा।
"आचार्य्यपत्नीपुत्रोपाध्यायमातुलश्वशुरश्वश्र्यश्वश्रूपाध्यायिशिष्येष्वेकरात्रमेवेति। इति शुद्धितत्त्वम्॥ दन्त्यसादिश्च। (भगिनीपतिः। यथा, ब्रह्मवैवर्त्ते। २। १०। १५१।
"भर्त्तृपुत्रो भागिनेयो भ्रातृपुत्रश्च भ्रातृजः।
श्यालस्तु भगिनीकान्तो भगिनीपतिरेव च॥")
श्यालकः, पुं, (श्याल एव। स्वार्थे कन्।) श्यालः। इति शब्दरत्नावली॥ (यथा, ब्रह्मवैवर्त्ते। २। १०। १४८।
"पत्नीभ्राता श्यालकश्च पत्नीभग्नी च श्यालिका॥")
श्यालिका, स्त्री, पत्न्या भगिनी। शाली इति भाषा। तत्पर्य्यायः। श्याली २ केलिकुक्षिका ३। इति शब्दरत्नावली॥ (यथा, ब्रह्मवैवर्त्ते। २। १०। १४८।
"पत्नीभ्राता श्यालकश्च पत्नीभग्नी च श्यालिका॥")
श्यावः, पुं, (श्यै + बाहुलकात् वः।) कपिशः। इत्यमरः॥ स तु श्यामपीतमिश्रवर्णः। इति भरतः॥ तद्युक्ते, त्रि॥ (यथा, हरिवंशे भविष्यपर्व्वणि। ४। २८।

"श्यावतनुः स्फुटितः स्फुरणो वा
चुल्लमरामयचौरभयाय ।")

श्यावदन्, [न्] त्रि, (श्यावा दन्ता यस्य । "विभाषा श्यावारोकाभ्याम् ।" ५ । ४ । १४४ । इति दन्तादेशः ।) कृष्णपीतमिश्रितवर्णदन्तयुक्तः । इति सिद्धान्तकौमुदी ।

श्यावदन्तः, श्यावदन्तकः, } त्रि, (श्यावा दन्ता यस्य । "विभाषा श्यावारोकाभ्याम् ।" ५ । ४ । १४४ । इति विभाषया दन्तादेशो न । स्वार्थे कन् च ।) स्वाभाविककृष्णवर्णदन्तयुक्तः । प्रधानदन्तद्वयमध्यस्थक्षुद्रदन्तविशिष्टः । प्रधानदन्तोपरिदन्तान्तरयुक्तः । यथा विष्णुः । अथ नरकाद्भूतदुःखानां तिर्यक्त्वमुक्तीर्णानां मानुष्ये लक्षणानि भवन्ति । कृष्णातिपातकी । ब्रह्महा यक्ष्मी । सुरापः श्यावदन्तकः । सुवर्णहारी कुनखी । गुरुतल्पगो दुश्चर्मा इत्यादि । श्यावदन्तकः स्वभावकृष्णदन्तः । प्रधानदन्तद्वयमध्यवर्त्तिक्षुद्रदन्तः । प्रधानदन्तोपरि दन्तान्तरमिति केचित् ॥ कुनखी सङ्कुचितनखः । दुश्चर्मा स्वभावतः व्रणाश्रितमेढ्रः । अतस्य महारोगिणो यावज्जीवमशौचमाह कूर्मपुराणम् ।

"क्रियाहीनस्य मूर्खस्य महारोगिण एव च ।
यथेष्टाचरणस्याहुर्मरणान्तमशौचकम् ॥"

क्रियाहीनस्य नित्यनैमित्तिककर्म्मानुष्ठायिनः । सर्व्वस्य गायत्रीरहितस्य । स्वार्थेगायत्रीरहितस्येति रघुनन्दनः । महारोगिणः पापरोगाष्टकान्यतमरोगवतः । ते च उन्मादश्वयथुदोषी राजयक्ष्मा स्वासो मधुमेही भगन्दर उदरोऽर्शसो इत्यष्टौ पापरोगा नारदोक्ताः । यथेष्टाचरणस्य धृतवेषाद्याचारस्य । एवञ्च भविष्यपुराणोक्तं यतिचान्द्रायणप्रायश्चित्तं अकृतप्रायश्चित्तानां कृच्छ्रादीनां दाहे बोद्धव्यम् । अन्येषां प्रायश्चित्तोपदेशो विफलः स्यात् । यथा विष्णुः । कुनखी श्यावदन्तश्च द्वादशरात्रं कृच्छ्रं चरित्वोद्वहेयातां तन्मतञ्चैवं इति । अत्र द्वादशरात्रं पराकरूपं तत्र पथ्यं घृतम् । न तु प्राजापत्यम् । एतच्चकर्णवेतिचान्द्रायणेन विषमशिष्टत्वात् । अत्र बहूनामेकधर्म्मत्वमिति यथाश्रुत श्यावदन्तादिसंख्यात्वं कृच्छ्रादीनामपि प्रायश्चित्तम् । अतस्य प्रायश्चित्तविवेकेरुक्तं एवं दुश्चर्मादिष्वप्युह्यमिति । महापातकादतिपातकस्य गुरुत्वात् तत्रैवेऽपि प्रायश्चित्तं द्विगुणम् । इति शुद्धितत्त्वम् ।

श्येनः, पुं, (श्यै ङ गतौ + "कृग्यासिभ्यामितन् ।" उणा० १ । ६६ । इति इतन् ।) शुक्लवर्णः । सङ्घातः, त्रि । इत्यमरः ।

श्येनकोशकः, पुं, (श्येनः कोशः क्रोडदेशो यस्य । कन् ।) मत्स्यविशेषः । पुँटी इति भाषा । यथा । समरः श्येनकोशकः । इति शब्दरत्नावली ।

श्येनः, पुं, (श्यै ङ गतौ + "श्यात्याकृसृवसिभ्य इनच् ।" उणा० २ । ६६ । इति इनच् ।) शुक्लवर्णः । इति मेदिनी । पक्षिविशेषः । सञ्चालः इति वाज् इति च भाषा । तत्पर्य्यायः । श्यामादनः २ पत्री ३ । इत्यमरः ॥ कपोतारिः ४ पतङ्गीरः ५ । इति शब्दरत्नावली । घातिपत्री ६ आशुकः ७ मारकः ८ । इति शब्दरत्नावली । घातिपत्री ६ आशुकः ७ मारकः ८ । इति जटाधरः ॥ श्यामादः ९ क्रव्यात् १० क्रूरः ११ वेगी १२ खगान्तकः १३ करगः १४ नीलपिच्छः १५ लम्बकर्णः १६ रणप्रियः १७ रणपत्री १८ पिच्छबाणः १९ स्थूलनीलः २० भयङ्करः २१ । इति राजनिर्घण्टः ॥ श्यामघातकः २२ । इति भावप्रकाशः ॥ अस्य मांसगुणाः प्रसङ्गाल्लिख्यन्ते ॥ तस्य शुभाशुभसूचकत्वं यथा,—

"प्रदक्षिणीकृत्य नरं प्रयान्तो
याचासु वामेन गता प्रयेषे ।
श्येनाः प्रशस्ताः प्रकृतस्वरास्ते
भ्रान्ताः प्रदीप्ता विकृतस्वरास्ते ।
श्येनो नृणां दक्षिणवामपृष्ठ-
भागेषु भाग्यैः स्थितिमादधाति ।
तिष्ठन् पुरस्तान्नृतनये करोति
युद्धे भयं क्रव्यरघध्वजस्थः ॥"

इति वसन्तराजशाकुने अष्टमवर्गः ॥

श्येनघण्टा, स्त्री, ङीष्नलोपश्च । इति राजनिर्घण्टः ॥

श्येनचित्, पुं, (श्येनेन चयति अन्यत्रचिण इति । चि + क्विप् ।) श्येनपक्षिरचकः । इति केचित् । (श्येन इव चीयते इति । "कर्म्मण्यग्न्याख्यायाम् ।" ३ । २ । ६२ । इति क्विप् । अग्न्यर्थे इष्टकाचयः । इति काश्चिका ।)

श्येनी, स्त्री, श्वेतवर्णा । इति जटाधरः ॥ श्येनपत्नी च ॥ (सातु कश्यपात् दनुकन्यायां ताम्रायां समुत्पन्ना । यथा, मार्कण्डेये । १०४ । ८ ।
"ताम्रा च सुषुवे श्येनीप्रमुखाः कन्यका द्विज ।
याभिः प्रसूताः खगमाः श्येनभासशुकादयः ॥")

श्येङ्, ङ गतौ । इति कविकल्पद्रुमः ॥ (भ्वा० आत्म० सक० अनिट् ।) तालव्यादिरन्तस्थाद्योपधः । ङ, श्यायते । इति दुर्गादासः ॥

श्येनपाता, स्त्री, (श्येनपातोऽस्यां वर्त्तते इति । "षः सास्यां क्रियेति षः ।" ४ । २ । ५८ । इति षः । "श्येनतिलस्य पाते ङे ।" २ । १ । ७१ । इति समासः ।) न्यग्या । इत्यमरः ॥ (यथा, नैषधे । १९ । १२ ।
"नभसि मरुतां व्यातन्वद्भिः प्रमाणपतत्रिणा-
मिव विधरणे; श्येनस्यातां रवेरवधारयन् ॥")

श्यो(या)नाकः, पुं, (श्यायते इति । श्यै ङ गतौ + पियाकादयश्चेति निपातनात् साधुः ।) वृक्षविशेषः । शोणागाछ इति भाषा । तत्पर्य्यायः । मधूकपर्णः २ मत्स्यौषः ३ नटः ४ कट्फलः ५ टुण्टुकः ६ शुकनासः ७ अक्षः ८ दीर्घवृन्तः ९ कूटमटः १० शोणकः ११ अरलुः १२ । इत्यमरः ॥ श्योनाकः १३ । इति भरतः ॥ शोणः १४ अक्षटुः १५ दीर्घवृन्तकः १६ । इति शब्दरत्नावली ॥ पृथुशिम्बिः १७ शुक्लकः १८ । इति जटाधरः ॥ कटम्भरः १९ मयूरशङ्खः २० अरलुकः २१ प्रियशीवः २२ । तद्भेदा यथा,—

"श्योनाकः पृथुशिम्बीऽन्यो भल्लूको दीर्घवृन्तकः ।
टेण्टुकः पीतवृक्षश्च भूतसारो सुनिद्रुमः ॥
निःसारः फलवृन्ताकः पूतिपत्रो वसन्तकः ।
मधूकवर्णः पीताङ्गो अक्षुकः पीतपादकः ॥
वातारिः पीतकः शोणः कुलटश्च विरोचनः ।
भमरेष्टो वह्निवल्लो नेत्रनेत्रमितामिधः ॥"

पुस्तकान्तरे टेण्टुकस्थाने दुण्टकः फलवृन्ताकस्थाने फलवृन्ताकः पीतपादकस्थाने पीतपादपः कुलटस्थाने कुणटः वह्निवल्लस्थाने वह्निवल्ल इति च पाठः ॥ तयोर्गुणाः ।

"श्योनाकस्य गुरुं तिक्तं शीतलञ्च त्रिदोषजित् ।
पित्तश्लेष्मातिसारघ्नं सन्निपातज्वरापहम् ॥"

इति राजनिर्घण्टः ॥

अपि च ।

"श्योनाकः शीतलश्च स्यान्मटकट्टुण्टुकाः ।
मधूकपर्णपत्रोर्णशुकनासकुटन्नटाः ॥
दीर्घवृन्तोऽरलुश्चापि पृथुशिम्बः कटम्भरः ।
श्योनाको दीपनः पाके कटुकस्तुवरो लिमः ॥
वाही तिक्तोऽनिलश्लेष्मपित्तकाशासनाशनः ।
कटुकस्य फलं वातं रूक्षं वातकफापहम् ॥
रूक्षं कषायं मधुरं रोचनं लघु दीपनम् ।
गुल्मार्शःकृमिहृत् प्रोक्तं गुरु वातप्रकोपणम् ॥"

इति भावप्रकाशः ॥

अक्, ङ ङ वर्त्मे । इति कविकल्पद्रुमः ॥ (भ्वा० आत्म० सक० सेट् ।) रेफयुक्तादयः । ङ, अक्रते । ङ, अक्षते । वर्त्मे गतिः । इति दुर्गादासः ॥

अग, ङ अग्रे । इति कविकल्पद्रुमः ॥ (भ्वा० पर० सक० श्रुवो अक० सेट् ।) रेफान्ततालव्यादिः । अयं श्रुतगतावित्यपि भट्टमल्लः । ङ, अग्रते । इति दुर्गादासः ॥

अघ, क दाने । इति कविकल्पद्रुमः ॥ (चुरा० पर० सक० सेट् ।) क, आघयति । स्मर्यते अस्य आदि रूपविकल्पनेऽप्यदमखरामुक्त्याभावोऽन्येषामनुरोधात् । इति दुर्गादासः ॥

अघ, म दाने । इति कविकल्पद्रुमः ॥ (भ्वा० पर० सक० सेट् ।) तालव्यादी रेफयुक्तः । म, अघ्यति । इति दुर्गादासः ॥

अन्, थ, अङ्गा । इति सुग्धबोधटीकायां दुर्गादासः ॥ (सत्यम् । इति निघण्टुः । ३ । १० ॥)

अथ, ङ ङ शैथिल्ये । इति कविकल्पद्रुमः ॥ (भ्वा० आत्म० अक० सक० च सेट् ।) शैथिल्यमिह शिथिलीभावस्तत्करणञ्च । ङ, अन्थते । ङ, अन्थते वस्त्रं शिथिलं स्यादित्यर्थः । अन्थते वस्त्रं लोकः शिथिलं करोतीत्यर्थः । इति दुर्गादासः ॥

अध, क यत्ने । प्रतिज्ञायि । इति कविकल्पद्रुमः ॥ (चुरा० पर० यत्ने अक० प्रतिज्ञायि सक० सेट् ।) क, आधयति पठितुं शिष्यः । आधयति शिष्यं लोकः पुनःपुनर्धयति इत्यर्थः । इति दुर्गादासः ॥

अथ कि वर्त्मे । मोक्षे । वधे । इति कविकल्पद्रुमः ॥ (चुरा०-पक्षे भ्वा०-सक०-सेट् ।) कि, आधयति अथयति । श्राद्धं आथयति स्फुटार्थमधुरं गद्यच्छन्दं सदा भावालङ्कृतिपेशलं अथयति खण्डाक्षरं नाटकम् । अथ्नाति प्रथितावदातचरितः श्राद्धं विचिनोति य इति हलायुधोक्तं अथयतीति अथ तु क दौर्ब्बल्ये इत्यदन्तस्य रूपम् । अनेकार्थत्वात् वध्नातीत्यर्थः । इति दुर्गादासः ॥

अथ, तृ क दौर्ब्बल्ये । इति कविकल्पद्रुमः ॥ (अदन्त चुरा०-परं०-अक०-सेट् ।) अथयति । इति दुर्गादासः ॥

अथ, म वधे । इति कविकल्पद्रुमः ॥ (भ्वा०-परं०-सक०-सेट् ।) म, अथयति । इति दुर्गादासः ॥

अथनं, क्लो, (अथ + ल्युट् ।) वधः । यत्नः । पुनः-पुनर्हेषणम् । अन्यनम् । मोचनम् । शिथिलीकरणम् । इति अथधातोरनट्प्रत्ययेन निष्पन्नम् ॥

अदधानः, त्रि, (अहत्ते इति । अत् + धा + शानच् ।) अहायुक्तः । यथा,—

"तच्छ्रद्दधाना मुनयो ज्ञानवैराग्ययुक्तया ।
पश्यन्त्यात्मनि चात्मानं भक्त्या श्रुतगृहीतया ॥"

इति श्रीभागवते १ स्कन्धे २ अध्यायः ॥

अहा, स्त्री, (अहानमिति । अत् + धा + "षिद्भिदादिभ्योऽङ् ।" ३ । ३ । १०४ । इत्यङ् । टाप् ।) संप्रत्ययः । श्रुद्धा । इत्यमरः ॥ (यथा, रामायणे । २ । ३८ । २ ।

"चिच्छेद जीविते अद्धां धर्म्मे यशसि चात्मनः ॥")

आदरः । शुद्धिः । इति शब्दरत्नावली ॥

स्वार्थे ड प्रत्ययः । यथा,—

"प्रत्ययो धर्म्मकार्य्येषु तथा अद्धेत्युदाहृता ।
नास्ति त्वश्रद्दधानस्य धर्म्मकृत्ये प्रयोजनम् ॥"

इति स्मृतिः ॥

(यथा, रघुः । २ । १६ ।

"वभौ च सा तेन सतां मतेन ।
अद्धेव साक्षात् विधिनोपपन्ना ॥")

चेतसः प्रसादः । इति पातञ्जलभाष्ये वेदव्यासः ॥ सा त्रिविधा । यथा,—

श्रीभगवानुवाच ।

"त्रिविधा भवति अद्धा देहिनां सा स्वभावजा ।
सात्त्विकी राजसी चैव तामसी चेति तां शृणु ॥
सत्त्वानुरूपा सर्व्वस्य अद्धा भवति भारत ।
अद्धामयोऽयं पुरुषो यो यच्छ्रद्धः स एव सः ॥
यजन्ते सात्त्विका देवान् यक्षरक्षांसि राजसाः ।
प्रेतान् भूतगणांश्चान्ये यजन्ते तामसा जनाः ॥"

इति श्रीभगवद्गीतायां १७ अध्यायः ॥*॥

स्तुतिः प्रशंसा यथा,—

ब्रह्मोवाच ।

"अद्धापूर्व्वा इमे धर्म्माः अद्धा मध्यान्तसंस्थिताः ।
अद्धा नित्या प्रतिष्ठाश्च धर्म्माः अद्धेव कीर्त्तिताः ॥
श्रुतिमात्ररसाः सख्यः प्रधानपुरुषेश्वराः ।
अद्धामात्रेण गम्यन्ते न करेण न चक्षुषा ॥
कायक्लेशेन बहुभिस्तथैवार्थस्य राशिभिः ।
धर्म्मः संप्राप्यते रूक्षः अद्धाहीनैः सुरैरपि ॥
अद्धा धर्म्मः परः सख्यः अद्धा ज्ञानं हुतं तपः ।
अद्धा स्वर्गश्च मोक्षश्च अद्धा सर्व्वमिदं जगत् ॥
सर्व्वस्वं जीवितं वापि दद्यादश्रद्दया यदि ।
नाप्नुयात्तत्फलं किञ्चित् अद्धादानं ततो भवेत् ॥
एवं अद्धान्वयाः सर्व्वे सर्व्वधर्म्माः प्रकीर्त्तिताः ।
केशवः अद्धया गम्यो ध्येयः पूज्यश्च सर्व्वदा ॥"

इति वह्निपुराणे धेनुदानमाहात्म्याध्यायः ॥

देवलः ।

"अर्थानामुदिते पात्रे अद्धया प्रतिपादनम् ।
दानमित्यभिनिर्द्दिष्टं आख्यानन्तस्य वक्ष्यते ॥"

उदिते श्राद्धकथिते । अद्धा देवलोक्ता यथा,

"सत्कृतिश्चानसूया च सदा अद्धेति
कीर्त्तिता ॥"

अतएव भगवद्गीतासु ।

"अश्रद्दया हुतं दत्तं तपस्तप्तं कृतञ्च यत् ।
असदित्युच्यते पार्थ न च तत् प्रेत्य नेह च ॥"

हरिवंशे बलिं प्रति भगवद्वाक्यम् ।

"अश्रीचियं आहृतमधीतमव्रतं
त्वदर्चियं यज्ञमृत्विजा हुतम् ।
अश्रद्दया दत्तमसंस्कृतं हवि-
र्भागाः यज्ञेते तव देत्यपुङ्गव ॥"

इति शुद्धितत्त्वम् ॥

याज्ञवल्क्यः ।

"अद्धाविधिसमायुक्तं कर्म्म यत् क्रियते नृभिः ।
सुविशुद्धेन भावेन तदानन्त्याय कल्पते ॥"

योगियाज्ञवल्क्यः ।

"विधिहीनं भवेद्दत्तं हुतमश्रद्दया च तत् ।
तद्वरन्त्यसुरास्तस्य रूढस्य दुष्कृतात्मनः ॥"

इति प्रायश्चित्ततत्त्वम् ॥

अद्धालुः, स्त्री, (अद्धातीति । अत् + धा + "सृहृधृक्षिपतिदयिनिद्रेति ।" ३ । २ । १५८ । इति आलुच् ।) दीक्षावती । अद्धायुक्ते, त्रि । इत्यमरः ॥ (यथा, भागवते । ३ । ८ । १० ।

"सोऽहं तवेतत् कथयामि वत्स
अद्धालवे नित्यमनुव्रताय ॥")

अद्धावान्, [त्] त्रि, (अद्धा विद्यतेऽस्येति । अद्धा + मतुप् । मस्य वः ।) अद्धायुक्तः । यथा,—

"अद्धावान् लभते ज्ञानं तत्परः संयतेन्द्रियः ।
ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति ॥"

इति भगवद्गीतायां ४ अध्यायः ॥

अन्थ, कि दर्भे । वधे । इति कविकल्पद्रुमः ॥ (चुरा०-पक्षे भ्वा०-सक०-सेट् ।) कि, अन्थयति अन्थति । दर्भो अन्थनम् । इति दुर्गादासः ॥

अन्थ, ग मोक्षे । प्रतिक्षेपे । इति कविकल्पद्रुमः ॥ (क्र्या०-परं०-सक०-सेट् ।) ग, अन्थ्नाति वर्त्मं लोकः मोचयतीत्यर्थः । अन्थ्नाति शिशुं लोकः पुनः पुनर्हेषयति इत्यर्थः । अन्थन्य । इति दुर्गादासः ॥

अन्थः, पुं, (अन्थ्नाति मोचयति भक्तान् संसारादिति । अन्थ + अच् ।) विष्णुः । इति त्रिकाण्डशेषः ॥ (अन्थ + भावे घञ् ।) अन्थधात्वर्थोऽप्यत्र ॥

अन्थनं, क्लो, (अन्थ + भावे ल्युट् ।) अन्थनम् । यथा,—

"सन्दर्भो रसना गुम्फः अन्थनं ग्रन्थनं समाः ।'

इति हेमचन्द्रः ॥

अन्थितः, त्रि, अन्थितः । बद्धः । क्षतवधः । सक्तः । हर्षितः । इति अन्थधातोः क्तप्रत्ययेन निष्पन्नः ॥

अपितं, त्रि, (अप + क्तः ।) घृतदुग्धजलभिन्नपक्वद्रव्यम् । यथा,—

"निष्पक्वं क्वथिते पक्वत्वाच्यं क्षीरं पयः स्रुतम् ।
अन्यत्तु अपितं आर्द्रं यत्सुदक्क्लोहृते सभे ॥"

इति जटाधरः ॥

अपिता, स्त्री, (अप + क्तः । टाप् ।) काङ्क्षिकम् । इति केचित् ॥

अम, उ भ य ञि इर् तपःखेदयोः । इति कविकल्पद्रुमः ॥ (दिवा०-परं०-अक०-सेट् । ह्रावेट् ।) उ, अमित्वा आन्त्वा । भ य, आम्यति लोकः तपः करोति खिद्यति वेत्यर्थः । ञि, आन्तोऽस्ति । इर्, अश्रमत् अश्रमीत् । अस्मात् पुगादिलाक्षित्यं ड इत्यर्थे । घूर्ण्यान् विश्राम्यतेति ड इति रघो श्राम तृ क मन्थे इत्यदन्तस्य रूपम् । इति दुर्गादासः ॥

अमः, पुं, (अम + घञ् । नोदात्तोपदेशस्येति वृद्ध्यभावः ।) तपः । खेदः । इति अमधात्वर्थदर्शनात् ॥ आन्तिः । तत्पर्य्यायः । क्लमः २ क्लेशः ३ परिश्रमः ४ प्रयासः ५ आयासः ६ आयामः ७ । इति हेमचन्द्रः ॥ क्लमथः ८ । इत्यमरः ॥ (यथा, भागवते । ५ । १६ । १४ ।

"यथेहिकामुष्मिककामलम्पटः
सुतेषु दारेषु धनेषु चिन्तयन् ।
अज्ञैतं विद्वान् ऋकलेवरात्ययात्
यस्तस्य यज्ञः श्रम एव केवलम् ॥")

श्रमाभ्यासः । तत्पर्य्यायः । श्रुरसी २ योग्यः ३ अभ्यासः ४ । इति च हेमचन्द्रः ॥

अमणः, पुं, (आम्यति तपस्यतीति । अम + ल्युः ।) यतिविशेषः । इति मेदिनी ॥ (स तु बौद्धसन्न्यासी ।) तत्पर्य्यायः ।

"सुक्तिर्मोक्षोऽपवर्गोऽथ सुसुप्तः अमणो यतिः ।
वाचंयमो व्रती साधुरनगार ऋषिर्मुनिः ॥
निर्ग्रन्थो भिक्षुरस्वं तपोयोगश्रमाश्यः ।"

इति हेमचन्द्रः ॥

(यथा, रामायणे । १ । १४ । १२ ।

"तापसा भुञ्जते चापि श्रमणाश्चैव भुञ्जते ॥")

निन्द्यजीविनि, त्रि । इति मेदिनी ॥

अमणा, स्त्री, सुदर्शना । मांसी । सुखीरी । श्रवरीभेदः । इति मेदिनी ॥

अमी, [न्] त्रि, अमविशिष्टः । अमशब्दादस्त्यर्थे इनिप्रत्ययेन निष्पन्नः ॥ (यद्वा, आम्यतीति ।

अवगः तपःखेदयोः + "ग्रमिमदाभ्यो घिनुण्।" ३।२।१४१। इति घिनुण्॥) अवयः, पुं, (अव+"अरच्।" ३।३।५६। इति अच्।) आश्रयः। अवधातोरल्प्रत्ययेन निष्पन्नः॥

अवयं, क्ली, (अव+ल्युट्।) आश्रयः। तत्पर्य्यायः। आयः २। इत्यमरः॥ (यथा, भागवते। ८। ६। २८।

"तत्राग्रतं सुरगणाः फलमञ्जसाप्नु-
यैत्पादपङ्कजरजःश्रयणान्न देव्याः॥")

अवः, पुं, (अवतेऽनेनेति। अव+"ऋदोरप्।" ३।३।५७। इत्यप्।) कर्म्म। (यथा, कथासरित्सागरे। १०३। १५८।

"तुमुलप्रोक्षसच्छर्दिपिहितान्यरवश्रवः।
श्वपाल स बलान्मोक्षितयोर्गर्भीरभीरवः॥"

अव + भावे घञ्।) अवणम्। इत्यमरटीकायां भरतः॥ (यथा, रघुः। ११। ७१।

"सुप्तसर्प इव दण्डघट्टनात्
रोषितोऽस्मि तव विक्रमश्रवात्॥"

अवयते इति। कर्म्मणि घञ्। शब्दः। यथा, वाजसनेयसंहितायाम्। १६। ३४।

"नमो वन्याय च कक्ष्याय च नमः श्रवाय च प्रतिश्रवाय च॥")

अवः, [स्] क्ली, (अवतेऽनेनेति। अव + "सर्व्वधातुभ्योऽसुन्।" इत्यसुन्।) कर्म्म। इत्यमरः॥ (अन्नम्। इति निघण्टुः। २। ७॥ यथा, ऋग्वेदे। ३। १६। ५।

"अधिश्रवांसि धेहि नस्तनूषु॥"

धनम्। इति निघण्टुः। २। १०॥ यशः। यथा, भागवते। ४। १७। ६।

"अवः सुश्रवसः पुण्यं सर्व्वदेवकथाश्रयम्॥"

शब्दः। यथा, तत्रैव। ५। ११। ६।

"गन्धाक्षति स्वशरसश्रवांसि
विसर्गवर्य्यैरभिवल्गुशिल्पाः॥")

अवर्यं, क्ली, (अवतेऽनेनेति। अव + करणे ल्युट्।) कर्म्म। इत्यमरः॥ न स्त्रियां अवः कर्म्मः। इति हेममाला। इति तट्टीकायां भरतः॥ परशास्त्राभ्यन्तरे अवणयोश्छिद्रं भवति। इति सुश्रुतः॥ श्रुतिः। सा तु कर्णेन्द्रियशब्दम्। इति मेदिनी॥ श्रोत्रा इति भाषा॥ (यथा, मनुः। ८। ७४।

"समक्षदर्शनात् साक्ष्यं श्रवणाच्चैव सिध्यति॥"

स्मृतौ नीतिशास्त्रोक्तबुद्धिगुणानामन्यतमम्। यथा, कामन्दकीये। ४। २२।

"शुश्रूषा श्रवणञ्चैव ग्रहणं धारणं तथा।
ऊहोऽपोहोऽर्थविज्ञानं तत्त्वज्ञानञ्च धीगुणाः॥")

षड्विधलिङ्गैरुपनिषदान्तानामद्वितीये वस्तुनि तात्पर्य्यावधारणम्। लिङ्गानि तु उपक्रमोपसंहाराभ्यासापूर्व्वता फलार्थवादोपपत्त्याख्यानि। इति वेदान्तसारः॥

अवणः, पुं क्ली. अवणनमवणम्। इति मेदिनी॥ (यथा च स्मृतिः।

"अमार्केपाते श्रवणं यदि स्यादिति॥")

श्रवणद्वादशी, स्त्री, (श्रवणयुक्ता द्वादशी।) श्रवणनक्षत्रयुक्तभाद्रशुक्लद्वादशी। यथा,—

पितामह उवाच।

"श्रवणद्वादशीं वक्ष्ये मुक्तिसुक्तिप्रदायिनीम्।
एकादशी द्वादशी च श्रवणेन च संयुता॥
विजया सा तिथिः प्रोक्ता हरिपूजादि चात्र यम्।

एकभक्तेन नक्तेन तथैवायाचितेन च॥
उपवासेन भक्ष्येण नैवाहाद्विधको भवेत्।
कांस्यं मांसं तथा चौद्रं लोभं क्षितघभाषणम्॥
व्यायामञ्च अवायञ्च दिवास्वप्नमथाञ्जनम्।
घृणास्पृष्टं मस्तरञ्च द्वादश्यां वर्ज्जयेन्नरः॥
माघे भाद्रपदे शुक्ले द्वादशी श्रवणान्विता।
महती द्वादशी प्रोक्ता उपवासे महाफला॥
सङ्गमे सरितः स्नानं बुधयुक्ता महाफला।
कुम्भे सरसि सजले यजेत् स्वर्गेतु वामनम्॥
सितवस्त्रयुगच्छन्नं छत्रोपानद्युगान्वितम्।
ॐ नमो वासुदेवाय शिरः संपूजयेत्ततः॥
श्रीधराय मुखं तद्वत् कण्ठं क्षणाय वै नमः।
नमः श्रीपतये बाहौ सर्व्वास्त्रधारिणे॥
व्यापकाय नमः कक्षौ केशवायेति हृदं बुधः।
त्रैलोक्यपतये मेढ्रं जङ्घां सर्व्वपते नमः॥
सर्व्वात्मने नमः पादौ नैवेद्यं घृतपायसम्।
कृसरांश्च मोदकान् दद्यात् शाकरं कारयेन्नरि॥
स्नात्वा प्रीतोऽर्चयित्वा तु कृतपुष्पाञ्जलिर्व्रतेत्।
नमो नमस्ते गोविन्द बुध श्रवणसंज्ञक॥
अघौघसंक्षयं कृत्वा सर्व्वसौख्यप्रदो भव॥
प्रीयतां देव देवेशो विप्रेभ्यः कृसरान् ददेत्।
नद्यास्तीरेऽथवा कुर्य्यात् सर्व्वान् कामानवाप्नुयात्॥"

इति गारुडे १९१ अध्यायः॥

अन्यत् द्वादशीशब्दे द्रष्टव्यम्॥

श्रवणर्क्षिका, स्त्री, श्रवणर्क्षस्य। इति राजनिर्घण्टः॥

श्रवणा, स्त्री पुं, नक्षत्रविशेषः। इति मेदिनी॥ सा तु अभिजिदाद्यन्तर्गतद्वाविंशनक्षत्रम्। तस्याः स्वरूपं शराकारतारात्रयात्मकम्। तस्याधिदेवो हरिः। यथा,—

"तारकात्रयमिते शराकृतौ
केशवे गगनमध्यवर्त्तिनि।
मत्तवारणगतेऽलघुत्वतो
निर्घृणैर्गुणमहीध्रलिङ्गिकाः॥" इं १। पं १८।

इति कालिदासकृतरात्रिलक्षणनिरूपणम्॥ ८॥

तत्र श्रवणारम्भार्द्धपञ्चकाष्ठादिच्छेदनसंग्रहदलिकादिकुमननिषेधा यथा,—

"छेदनं संग्रहश्चैव काष्ठादीनां न कारयेत्।
अवणादौ बुधः षट्के न गच्छेद्दक्षिणां दिशम्॥
व्यग्निपीड़ा भयं प्रोक्तं राजपीड़ा धनक्षयः।
संग्रहे दलकाष्ठानां छते वस्त्रादिषट्के॥"

इति ज्योतिस्तत्त्वम्॥

अवणा, स्त्री, सुखरिक्षावृक्षः। इति रत्नमाला॥

अवाय्यः, पुं, (न अवाय्ये + "ऋदुचिस्तृहृयधिभ्य आय्यः।" उणा० ३। ६६। इति आय्यः।) वत्सियोग्यपशुः। यज्ञियपशुः। इति सिद्धान्तकौमुदी॥ (अवणीये, त्रि। यथा, ऋग्वेदे। १। २७। ८।

"वाजो अस्ति श्रवाय्यः॥"

"श्रवाय्यः श्रवणीयो वाजोऽस्ति बलविशेषोऽस्ति।" इति तद्भाष्यम्॥)

अविष्ठा, स्त्री, (अवणमिति अवः। सोऽस्या अस्तीति। मतुप्। अतिशयेन अववती। अति, शयने तमविष्ठनौ इति इष्ठन्। विन्मतुपोर्लुगिति मतुपो लुक्।) धनिष्ठानक्षत्रम्। इत्यमरः॥ (यथा, वामनपुराणे ७७ अध्याये।

"अविष्ठायां तथा पृष्ठं श्रोणिभक्षस्य दोहदे।
पुष्ये सुखं पूजयेव दोहदे घृतपायसम्॥")

अविष्ठाजः, पुं, (अविष्ठायां जायते इति। जन् + डः।) बुधग्रहः। इति त्रिकाण्डशेषः॥ तत्र जाते, त्रि॥

अवः, त्रि, ओजयः। अवणार्हवाक्यादिः। श्रुधातोर्यत्प्रत्ययेन निष्पन्नः॥ (यथा, राधातन्त्रे। ८। ३।

"यतश्रुत्वा परमेशानि अश्रमन्यन्न रोचते॥")

आ, ल खेदे। इति कविकल्पद्रुमः॥ (अदा० पर० सक० अनिट्।) रेफयुक्तस्तालव्यादिः। ल, आति। इति दुर्गादासः॥

आ, ल म पाके। इति कविकल्पद्रुमः॥ (अदा० पर० सक० अनिट्।) रेफयुक्तस्तालव्यादिः। ल, आति। म, अपयति। इति दुर्गादासः॥

आर्यं, त्रि, (आ + क्तः।) पक्वम्। इति मेदिनी॥ घृतदुग्धतण्डुलभिन्नपक्वान्नम्। इति जटाधरः॥

आर्णा, स्त्री, (आयते स्नेहेति। आ + क्तः।) यवागूः। इत्यमरः॥

आर्द्धं, क्ली, (अर्द्धा प्रयोजनमस्य। अर्द्धा + "पृदृादिभ्य उपसंख्यानम्।" ५। १। ११०। इत्यस्य वार्त्तिकोक्त्या यत्।) श्राद्धोक्तविधानेन पित्रुद्देश्यकअद्धयादिदानम्। इत्यमरः॥ पित्रुद्देश्यकअद्धयादिदानम्। तस्य लक्षणम्। यथा,—

"संस्कृतव्यञ्जनाढ्यञ्च पयोदधिघृतान्वितम्।
अद्धया दीयते यस्मात् आर्द्धं तेन निगद्यते॥"

इति पुलस्त्यवचनात् अद्धया अन्नादेर्दानं आर्द्धं इति वैदिकप्रयोगाधीनयौगिकम्। इति आर्द्धतत्त्वम्॥ अपि च। सम्बोधनपदोपनीतासु पित्रादीनां चतुर्थ्यन्तपदेनोद्दिश्य क्रियमाणः श्राद्धम्। तच्च द्वादशविधं यथा। यमाग्निभः।

"नित्यं नैमित्तिकं काम्यं वृद्धिश्राद्धं सपिण्डनम्।
पार्व्वणमिति विज्ञेयं गोष्ठ्यां शुद्ध्यर्थमष्टमम्॥
कर्म्माङ्गं नवमं प्रोक्तं दैविकं दशमं स्मृतम्।
यात्रार्थमेकादशं प्रोक्तं पुष्ट्यर्थं द्वादशं स्मृतम्॥

कुलद्वयेऽपि चोच्छिन्ने स्त्रीभिः कार्य्याः क्रिया नृप ।
संघातान्तर्गतैर्वापि कार्य्याः प्रेतस्य याः क्रियाः ॥
उत्सन्नबन्धुरिक्थाद्वा कारयेदवनीपतिः ।
पूर्व्वाः क्रिया मध्यमाश्च तथा चैवोत्तराः क्रियाः ॥
त्रिप्रकाराः क्रियास्तासां भेदं शृणुष्व मे ।
आदाहवार्य्यायुधादिस्पर्शाद्यन्तास्तु याः क्रियाः ॥
ताः पूर्व्वा मध्यमा मासि मास्येकोद्दिष्टसंज्ञिताः ।
प्रेते पितृत्वमापन्ने सपिण्डीकरणादनु ॥
क्रियन्ते याः क्रियाः पित्र्याः प्रोच्यन्ते ता नृपोत्तराः ।
पितृमातृसपिण्डैस्तु समानसलिलैस्तथा ॥
संघातान्तर्गतैर्वापि राज्ञा वा धनहारिणा ।
पूर्व्वाः क्रियास्तु कर्त्तव्याः पुत्राद्यैरेव चोत्तराः ।
दौहित्रैर्वा नरश्रेष्ठ कार्य्यास्तत्तनयैस्तथा ।
मृताहनि च कर्त्तव्याः स्त्रीणामप्युत्तराः क्रियाः ॥
प्रतिसंवत्सरं राजन्नेकोद्दिष्टं विधानतः ॥”

इति विष्णुपुराणे ३ अंशे १३ अध्यायः ॥ * ॥

याज्ञवल्क्य उवाच ।

“अथ श्राद्धविधिं वक्ष्ये सर्व्वपापप्रणाशनम् ।
अमावास्याष्टकावृद्धिः कृष्णपक्षोऽयनद्वयम् ।
द्रव्यं ब्राह्मणसम्पत्तिर्विषुवत् सूर्य्यसंक्रमः ।
व्यतीपातो गजच्छाया ग्रहणं चन्द्रसूर्य्ययोः ॥
श्राद्धं प्रति रुचिश्चैव श्राद्धकालाः प्रकीर्त्तिताः ॥
अग्र्यः सर्व्ववेदेषु श्रोत्रियो वेदविद्युवा ।
वेदार्थविज्ज्येष्ठसामा त्रिमधुस्त्रिसुपर्णिकः ॥
स्वस्रीयऋत्विग्जामातृयाज्यश्वशुरमातुलाः ।
त्रिणाचिकेतदौहित्रशिष्यसम्बन्धिबान्धवाः ॥
कर्म्मनिष्ठास्तपोनिष्ठाः पञ्चाग्निर्ब्रह्मचारिणः ।
पितृमातृपराश्चैव ब्राह्मणाः श्राद्धसम्पदः ॥ * ॥
रोगी हीनातिरिक्ताङ्गः काणः पौनर्भवस्तथा ।
अवकीर्ण्यादयो ये च ये चाचारविवर्ज्जिताः ।
अपाङ्क्तेयाश्च ये सर्व्वे न श्राद्धार्हाः कदाचन ॥ * ॥
निमन्त्रयेच्च पूर्व्वेद्युर्ब्राह्मणांस्तैश्च संयतैः ।
आगतांश्चैव पूर्व्वाह्णे आसने उपवेशयेत् ॥
युग्मान् दैवे तथा पित्र्ये ह्ययुग्मानेव शक्तितः ।
द्वौ दैवे प्रागुदक् पित्र्ये त्रीनेकैकं चोभयोः पृथक् ।
मातामहानामप्येवं तन्त्रं वा वैश्वदेविकम् ।
पाणिप्रक्षालनं दत्त्वा विष्टरार्थं कुशानपि ॥
आवाह्य तदनुज्ञातो विश्वेदेवास इत्यृचा ।
यवैरन्ववकीर्य्याथ भाजने सपवित्रके ॥
शन्नो देव्या पयः क्षिप्त्वा यवोऽसीति यवांस्तथा ।
या दिव्या इति मन्त्रेण हस्ते त्वर्घं विनिक्षिपेत् ॥
दत्त्वोदकं गन्धमाल्यं धूपदानं सदीपकम् ।
अपसव्यं ततः कृत्वा पितॄणामप्रदक्षिणम् ॥
द्विगुणांस्तु कुशान् दत्त्वा उशन्तस्त्वेत्यृचा पितॄन् ।
आवाह्य तदनुज्ञातो जपेदायन्तु नस्ततः ॥
यवार्थास्तु तिलैः कार्य्याः कुर्य्यादर्घ्यादि पूर्व्ववत् ।
दत्त्वार्घ्यं संस्रवांस्तेषां पात्रे कृत्वा विधानतः ॥
पितृभ्यः स्थानमसीति न्युब्जं पात्रं करोत्यधः ।
अग्नौ करिष्येत्यादाय पृच्छत्यन्नं घृतप्लुतम् ॥
कुरुष्वेति तथोक्तोऽग्नौ हुत्वाग्नौ पितृयज्ञवत् ।
हुतशेषं प्रदद्याच्च भाजनेषु समाहितः ॥
यथालाभोपपन्नेषु रौप्येषु च विशेषतः ।
दत्त्वान्नं पृथिवी ते पात्रमिति पात्राभिमन्त्रणम् ॥
कृत्वेदं विष्णुरित्यन्ने द्विजाङ्गुष्ठं निवेशयेत् ।
सव्याहृतिकां गायत्रीं मधुवातेत्यृचं तथा ॥
जप्त्वा यथासुखं वाच्यं भुञ्जीरंस्तेऽपि वाग्यताः ।
अन्नमिष्टं हविष्यञ्च दद्यादक्रोधनोऽत्वरः ॥
आतृप्तेश्च पवित्राणि जप्त्वा पूर्व्वजपन्तथा ।
अन्नमादाय तृप्ताः स्थ शेषञ्चैवानुमन्य च ॥
तदन्नं प्रकिरेद्भूमौ दद्याच्चापः सकृत् सकृत् ।
सर्व्वमन्नमुपादाय सतिलं दक्षिणामुखः ॥
उच्छिष्टसन्निधौ पिण्डान् प्रदद्यात् पितृयज्ञवत् ।
मातामहानामप्येवं दद्यादाचमनं ततः ॥
स्वस्ति प्रीयन्तामिति चाप्येवं विश्वेदेवान् जलं ददत् ।
स्वस्तिवाच्य ततो दद्यादक्षय्योदकमेव च ॥
दत्त्वा तु दक्षिणां शक्त्या स्वधाकारमुदीरयेत् ।
वाच्यतामित्यनुज्ञातः पितृभ्यश्च स्वधोच्यताम् ॥
विप्रैरस्तु स्वधेत्युक्ते भूमौ सिञ्चेत्ततो जलम् ।
दातारो नोऽभिवर्द्धन्तां वेदाः सन्ततिरेव च ॥
श्रद्धा च नो मा व्यगमत् बहु देयञ्च नोऽस्त्विति ।
इत्युक्त्वापि प्रियं वाक्यं प्रणिपत्य विसर्ज्जयेत् ॥
वाजे वाजे इति प्रीत्या पितृपूर्व्वं विसर्ज्जनम् ।
यस्मिंस्ते संस्रवाः पूर्व्वमर्घ्यपात्रे निपातिताः ॥
पितृपात्रं तदुत्तानं कृत्वा विप्रान् विसर्ज्जयेत् ।
प्रदक्षिणमनुव्रज्य भुञ्जीत पितृसेवितम् ॥
ब्रह्मचारी भवेत्तान्तु रजनीं भार्य्यया सह ।
एवं प्रदक्षिणं कृत्वा वृद्धौ नान्दीमुखानपि ॥
यजेत दधिकर्कन्धुमिश्राः पिण्डा यवैः क्रियाः ।
एकोद्दिष्टं दैवहीनमेकार्घ्यैकपवित्रकम् ॥
आवाहनाग्नौकरणरहितं ह्यपसव्यवत् ।
उपतिष्ठतामित्यक्षय्यस्थाने विप्रान् विसर्ज्जयेत् ॥
अभिरम्यतां प्रब्रूयात् ब्रूयुस्तेऽभिरताः स्म ह ।
गन्धोदकतिलैर्मिश्रं कुर्य्यात् पात्रचतुष्टयम् ॥
अर्घार्थं पितृपात्रेषु प्रेतपात्रं प्रसेचयेत् ।
ये समाना इति द्वाभ्यां शेषं पूर्व्ववदाचरेत् ॥
एतत् सपिण्डीकरणमेकोद्दिष्टं स्त्रिया अपि ।
अर्व्वाक् सपिण्डीकरणं यस्य संवत्सराद्भवेत् ॥
तस्याप्यन्नं सोदकुम्भं दद्यात् संवत्सरं द्विजः ।
पिण्डांस्तु गोऽजविप्रेभ्यो दद्यादग्नौ जलेऽपि वा ॥
हविष्यान्नेन वै मासं पायसेन तु वत्सरम् ।
मात्स्यहारिणकौरभ्रशाकुनच्छागपार्षतैः ॥
ऐणरौरववाराहशाशैर्मांसैर्यथाक्रमम् ।
मासवृद्ध्याभितृप्यन्ति दत्तैरिह पितामहाः ।
दद्याद्वर्षात्रयोदश्यां मघासु च न संशयः ।
प्रतिपत्प्रभृतिष्वेवं कन्यादीन् श्राद्धदो भवेत् ।
शस्त्रेण निहतानाञ्च चतुर्द्दश्यां प्रदीयते ॥
स्वर्गं ह्यपत्यमोजश्च शौर्य्यं क्षेत्रं बलं तथा ।
पुत्रश्रैष्ठ्यं ससौभाग्यं समृद्धिं मुख्यतां शुभम् ।
प्रवृत्तचक्रतां पुत्रान् वाणिज्यप्रभृतींस्तथा ॥
अरोगित्वं यशो वीतशोकतां परमां गतिम् ।
धनं विद्यां भिषक्सिद्धिं कुप्यं गोऽजाविकं तथा ॥
अश्वानायुश्च विधिवद्यः श्राद्धं संप्रयच्छति ।
कृत्तिकादिभरण्यन्तं स कामानाप्नुयादिमान् ॥
वस्वाद्याः प्रीणयन्त्येव नरं श्राद्धं कृतं द्विजाः ।
आयुः प्रजां धनं विद्यां स्वर्गं मोक्षं सुखानि च ॥
प्रयच्छति तथा राज्यं प्रीतो नित्यं पितामहः ॥”

इति गारुडे ९९ अध्यायः ॥ * ॥

अपि च ।

“श्राद्धश्राद्धमहं वक्ष्ये भुक्तिमुक्तिप्रदं नृणाम् ।
पूर्व्वं निमन्त्रयेद्विप्रान् निशि स्नातब्रह्मचारिणः ॥
प्रदक्षिणोपवीतेन देवान् वामोपवीतिना ।
पितॄन्निमन्त्रयेत् पादौ क्षालयेद्वाक्यमन्त्रतः ॥

ॐ स्वागतं भवद्भिरिति प्रश्नः । ॐ सुस्वागतमिति तदुक्ते ॐ विश्वेभ्यो देवेभ्य एतत् पादोदकमर्घ्यं स्वाहा पितृभ्यः स्वधा इति देवब्राह्मणपादयोर्देवतीर्थेनाम्बुकुशजलकुसुमदानम् । ततो दक्षिणामुखस्य वामोपवीतेन अमुकगोत्रेभ्यः अस्मत्पितृपितामहप्रपितामहेभ्यो यथानामशर्म्मभ्यः सपत्नीकेभ्य एतत् पादोदकमर्घ्यं स्वधा इति पित्रादिब्राह्मणपादयोः पितृतीर्थेन सुम्न-कुशतिलकुसुमजलदानम् । एवं मातामहादिषु । एतद्व आचमनीयं स्वाहा स्वधेति ब्राह्मणहस्ते । एष वो अर्घ्यः इति ब्राह्मणहस्तेऽर्घ्यदानम् । एतद्वः पुष्पं इति ब्राह्मणहस्ते पुष्पदानम् । ॐ सिद्धमिदमासनं इत्यासनमित्यभिधाय ॐ भूः ॐ भुवः ॐ स्वः ॐ महः ॐ जनः ॐ तपः ॐ सत्यं महाव्याहृतिभिः पूर्व्वमुखदेवब्राह्मणोपवेशनम् । उत्तराभिमुखाः पितरः ॐ देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च । नमः स्वधायै स्वाहायै नित्यमेव नमो नमः ॥ इति त्रिर्ज्जपेत् । ॐ अद्यास्मिन्नेव अमुकमासे अमुकराशिगते सवितरि अमुकपक्षीय तिथौ अमुकगोत्राणामस्मत्पितृपितामहप्रपितामहानां यथानामशर्म्मणां विश्वदेवपूर्व्वकं श्राद्धमहं करिष्ये ॐ विश्वेभ्यो देवेभ्य इदमासनं स्वाहा । ॐ विश्वान् देवानावाहयिष्ये ॐ आवाहय इत्युक्ते ॐ विश्वेदेवास आगत शृणुताम इमं हवं एदं बर्हिर्निषीदत । ॐ विश्वेदेवाः शृणुतेमं हवं मे ये अन्तरिक्षे य उप द्यवि ष्ठ येऽग्निजिह्वा उत वा यजत्रा आसद्यास्मिन् बर्हिषि मादयध्वम् । ॐ ओषधयः समवदन्त सोमेन सह राज्ञा यस्मै कृणोति ब्राह्मणस्तं राजन् पारयामसि ।

ॐ आगच्छन्तु महाभागा विश्वेदेवा महाबलाः ।
ये यत्र विहिताः श्राद्धे सावधाना भवन्तु ते ॥

ॐ अपहता असुरा रक्षांसि वेदिषदः । इति तिलविकिरणम् । ॐ पवित्रस्थे वैष्णव्यौ ॐ कुरुध्वमिति देवौ गायत्र्या कुशद्वयं प्रादेशप्रमाणं छित्त्वा ॐ यवोऽसि सोमदेवत्यो वारुणेन कृतान्तेन छित्वा ॐ विष्णोर्मनसा पूते स्थः

दत्वाभ्युक्ष्य कुशान्तरेण विवृतं कृत्वा पात्रे पवित्रनिवेष्टनम्। अग्नौ देवीरभीष्टये आपो भवन्तु पीतये शंयोरभिस्रवन्तु नः। इति पात्रे जलदानम्। ॐ यवोऽसि यवयास्मद्द्वेषो यवयारातीर्दति यवदानम्।

ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्। ईश्वरीं सर्वभूतानां त्वामिहोपह्वये श्रियम्॥

इति गन्धदानम्॥

ॐश्रीश्च ते लक्ष्मीश्च पत्न्या इति पुष्पदानम्। ॐ या दिव्या आपः पयसा सम्बभूवुर्या अन्तरीक्षा उतपार्थ वीर्या हिरण्यवर्णा यज्ञियास्ता न आपः शिवाः संयोनाः सुहवा भवन्तु ॐ ध्रुरिलोचनसंज्ञकेभ्यो विश्वेभ्यो देवेभ्य एषोऽर्घ्यो नमः। इति एतेऽर्घ्यं दत्वा अनेनैव पात्रेण संस्रवपवित्रमग्रं प्रथमपात्रेण संस्रवं पवित्रञ्च गृहीत्वा ब्राह्मणदक्षिणपार्श्वे कुशोपरि ऊर्ध्वसुखपात्रे स्थापनं तदुपरि कुशदानम्। ततः ॐ ध्रुरिलोचनसंज्ञकेभ्यो विश्वेभ्यो देवेभ्य एतानि गन्धपुष्पधूपदीपवासोयुगसोत्तरीययज्ञोपवीतानि नमः। गन्धादिदानमच्छिद्रमस्तु संकल्पसिद्धिरस्तु। ब्राह्मणवाचनम्। ततः पितृपितामहप्रपितामह-मातामह-प्रमातामह-वृद्धप्रमातामहानां सपत्नीकानां आद्धमहं करिष्ये। अनुज्ञापनम्। ॐ कुरुष्वेति ब्राह्मणैरुक्ते। ॐ देवेभ्यः पितृभ्यश्च महायोगिभ्य एव च। इति विसर्जयेत्। तत ॐ अमुकगोत्राणां अमुकपितृपितामहप्रपितामहानां यथानामशर्मणां सपत्नीकानां आद्धं युग्मासनं करिष्ये। ॐ कुरुष्व आद्धकरणानुज्ञानम्। ॐ अमुकगोत्रेभ्यः अमुकपितृपितामहप्रपितामहेभ्यो यथानामशर्मभ्यः सपत्नीकेभ्य इदमासनं स्वधा। ब्राह्मणवामपार्श्वे आसनम्। ॐ पितृनावाहयिष्ये ॐ आवाहयेत्युक्ते ॐउशन्तस्त्वानीधीमह्युशन्तः समिधीमहि। उशन्नुशत आवह पितॄन्हविषे अत्तवे। ॐ आयान्तु नः पितरः सोम्यासो अग्निष्वात्ताः पथिभिर्देवयानैः। अस्मिन् यज्ञे स्वधया मदन्तोऽधिब्रुवन्तु तेऽवन्त्वस्मान्। इत्यावाहनम्। ॐ अपहता असुरा रक्षांसि वेदिषदः। इत्यासनविकिरणम्। ॐ विश्वेऽपि सोमदेवत्यो सोमपो देवनिर्मिताः। प्रथमाश्चः पृक्तः स्वधया पितॄन्लोकान् प्रीणाहि नः स्वाहा। नित्यदानम्। गन्धपुष्पं एकाभ्यां दत्वा पितृपात्रमुत्थाप्य वा दक्षिणे पतित्वा अमुकगोत्र अमुकपितः अमुकशर्मन् सपत्नीक एष ते अर्घ्यः स्वधा। एवं पितामहादीं। सपवित्रं पात्रं गृहीत्वा ब्राह्मणवामपार्श्वे दक्षिणाग्रकुशोपरि ॐ पितरः सोम्यासोति ऋचोत्तरयाधस्तात्पात्रम्। ॐ मधुमन्तो मोदाः पितृमदन्तः पितृमदनमसि। तत: अमुकगोत्रेभ्यः अमुकपितृपितामहप्रपितामहेभ्यः सपत्नीकेभ्यः इदमासनं स्वधा। पिण्डतीर्थेन गन्धादिदानम्। गन्धादिदानमच्छिद्रमस्तु सङ्कल्पसिद्धिरस्तु। ब्राह्मणवाचनम्। एवं मातामहादीनामनुज्ञापनादि कर्म्म। ॐ या दिव्येति भूमिसमार्ज्जनम्। ततो घृताक्तमन्नं गृहीत्वा दक्षिणोपवीतं पितृब्राह्मणम्। ॐअग्नौ करणमहं करिष्ये ॐ कुरुष्वेति तेनोक्ते ॐ अग्नये कव्यवाहनाय स्वाहा। ॐ सोमाय पितृमते स्वाहा। आहुतिद्वयं देवब्राह्मणहस्ते दत्त्वा अवशिष्टार्द्धं पिण्डार्थं स्थापयित्वा अपरमर्द्धं पित्रादिपात्रे मातामहादिपात्रे च निःक्षिपेत्। पात्रे अन्नादि निधाय कुशं दत्त्वा अधोमुखाभ्यां पाणिभ्यां पात्रं गृहीत्वा। ॐ पृथिवी ते पात्रं द्यौः पिधानं ब्राह्मणस्य मुखे अमृते अमृतं जुहोमि स्वाहा। पात्राभिमन्त्रणम्। इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम्। समूढमस्य पांसुले विष्णो रराटमसि। इत्यन्नोपर्यधोमुखहिताङ्गुष्ठनिवेष्टनम्। ॐअपहतेति तिर्यग्विकिरणम्।

ॐ निघ्नन्ति सर्व्वे यदमेध्यमस्मदे
एतान् च सर्व्वान्नुदतादवा मया।
रक्षांसि यज्ञाः सपिशाचसंघा
हता मया यातुधानाश्च सर्व्वे॥

इति सिद्धार्थविकिरणम्॥

ततः ॐ ध्रुरिलोचनसंज्ञकेभ्यो विश्वेभ्यो देवेभ्य एतदन्नं सघृतं सपानीयं सयज्ञानं स्वाहा इति वारिकुशाद्यैरन्नसङ्कल्पनम्। ॐ आद्धमिदमच्छिद्रमस्तु सङ्कल्पसिद्धिरस्तु। ततो वामोपवीतेन सयज्ञानं सघृतमन्नं पित्रादिपात्रे निधाय तदुपरि भूमिसंलग्नकुशं दत्त्वा ॐ पृथिवी ते पात्रं अभिमन्त्रणम्। उत्तानाभ्यां पाणिभ्यां पात्रं गृहीत्वा ॐ इदं विष्णुरित्यन्नोपरि उत्तानाङ्गुष्ठं निवेष्टयेत् ॐ अपहता इति तिलविकिरणम्। भूमिपातितवामजानुः। अमुकगोत्रेभ्यः अमुकपितृपितामहप्रपितामहेभ्य अमुकामुकशर्म्मभ्यः सपत्नीकेभ्य एतदन्नं सघृतं सपानीयं सयज्ञानं प्रतिपिण्डवर्त्तितं स्वधा। अन्नसङ्कल्पः। ॐ ऊर्ज्जं वहन्तीरमृतं घृतं पयः कीलालं परिस्रुतं स्वधास्थ तर्पयत मे पितॄन्। दक्षिणाग्रधारात्रयम्। ॐ अन्नमिदमच्छिद्रमस्तु सङ्कल्पसिद्धिरस्तु। ततः सव्याहृतिकया गायत्र्या विमन्त्र्य त्रिधा मधुमासा आयवे मधु क्षरन्ति सिन्धवः माध्वीर्नः सन्त्वोषधीः। मधु नक्तमुतोषसो मधुमत् पार्थिवं रजः मधु द्यौरस्तु नः पिता। मधुमान्नो वनस्पतिर्मधुमाँ अस्तु सूर्य्यो माध्वीर्गावो भवन्तु नः। मधु मधु मधु इति जपः। यथासुखं वाग्यता सुप्रसन्नमिति ब्रूयात्। सङ्कल्पस्तु समग्राद्यादिकं विसर्जनं जपेत्।

ॐ समग्राधा इषमूर्जमस्मा गावो यवसमत्तवे कृधि। अजाश्वाः सन्त्वद्रयः शतं हिमाः शरदो वीरयन्तां। तेऽपि आसां पुरुषत्वे ब्राह्मणा वेदपारगाः। धनिनो पूरुमध्यन्तं सूर्य शिष्यो वशीदृश॥

तत्तृप्तेषु। दक्षिणामुखो वामोपवीती। उच्छिष्टायतः।

ॐ अग्निदग्धाश्च ये जीवा येऽप्यदग्धा कुले मम।
भूमौ दत्तेन तृप्यन्तु तृप्ता यान्तु परां गतिम्॥

इति भूमौ कुशोपरि सघृतमन्नं जलसुतं विकिरेत्। ततो देवब्राह्मणक्रमेण जलगण्डूषं दत्त्वा पूर्ववत् पुनः सव्याहृतिकां सावित्रीं मधुवातेतिसूक्तं मधु मध्विति च त्रयम्। ॐ रुचितं भवद्भिरिति देवब्राह्मणप्रश्नः। सुरुचितमिति तेनोक्ते ॐ शेषमन्नमक्षय्यमिति प्रश्नः। दृष्टैः सह सुरुचितमिति तेनोक्ते पित्रादिब्राह्मणे वामोपवीतेन ॐ तृप्तास्थ इति प्रश्नः। ॐ तृप्तास्म इत्युक्ते शेषमन्नमिति प्रश्नः। ॐ दृष्टैः सह सुरुचितमिति तेनोक्ते मातामहादिब्राह्मणे तथैव प्रश्नः। ततः पित्रादिब्राह्मणौ पिण्डान्नं पातयित्वे पातयेत्युक्ते। तदुच्छिष्टाग्नेयोभ्युक्षणं मण्डलञ्च चतुष्कोणं तिलविकिरणं ॐ अमुकगोत्र अमुकपितः अमुकशर्म्मन् सपत्नीक एतत्ते पिण्डासनं स्वधा इदं ते रक्षामधे पितामहाय प्रपितामहाय च। सव्याहृतिकां गायत्रीं मधुवातेति त्रिर्जपेत् अन्नं साज्यं पिण्डं कृत्वा कुशोपरि अमुकगोत्रामुकपितः अमुकशर्म्मन् सपत्नीक एष ते पिण्डः ये चात्र त्वामनु यांश्च त्वमनु तस्मै ते स्वधा। एवं पितामहप्रपितामहमातामहप्रमातामहवृद्धप्रमातामहेभ्यः। पिण्डशेषविकिरणं पिण्डान्तिके। ॐ शेषभुजः प्रीयन्तां इति स्मरणकुशेषु हस्तमार्जनम्। प्रक्षालितेन पिण्डपात्रोदकेन अमुकगोत्र अमुकपितः अमुकशर्म्मन् सपत्नीक एतत्ते जलमवनेनिक्ष्व ॐ ये चात्र त्वामनु यांश्च त्वमनु तस्मै ते स्वधेति पिण्डपात्रमधोमुखं कृत्वा बहिरञ्जलिं ॐ अत्र पितरो मादयध्वं यथाभागमावृषायध्वमिति जपः। जपः सम्पूर्णा वामेन परावृत्य उदङ्मुखस्य प्राणान्धिः संयम्य।

ॐ वसन्ताय नमस्तुभ्यं ग्रीष्माय च नमो नमः।
वर्षाभ्यश्च शरत्संभूतये च नमः सदा॥
हेमन्ताय नमस्तुभ्यं नमस्ते शिशिराय च।
माससंवत्सरेभ्यश्च दिवसेभ्यो नमो नमः॥
ॐ सङ्घ्य ऋतुभ्यो नमः पितृभ्यो नमः। इति जपः। वामेनैव परावृत्य दक्षिणासुरः ॐ मदन्तु पितरो यथाभागमावृषायिषत। इति जपः। पादः शिथिलीकृत्याञ्जलिं कृत्वा ॐ नमो वः पितरः पितरो नमो वः। इति जपः। यद्वाः पितरो दत्त। इति एतन्नीच्यम्। ॐ यदो वः पितरो देवाः। इति पिण्डनीच्यम्। ॐ यमः पितरो वायः इत्यादिना अमुकगोत्र इत्यादिना एतत्ते वासः ॐ ये चात्र त्वामनु यांश्च त्वमनु तस्मै ते स्वधा। एतामग्रन्थिवस्त्रम्। वामेन पात्रिका उदङ्मुखं गृहीत्वा ॐ ऊर्ज्जं वहन्तीरमृतं घृतं पयः

कीलालं इत्यादिना पिण्डोपरि वारिधारात्यागः। पूर्वस्थापितपात्रेणोदकैः प्रत्येकं पिण्डसेचनम्। पिण्डवाह्मेन गन्धादिदानम्। पिण्डोपरि कुशं दक्षत्र दत्त्वा ॐ अक्षन्नमीमदन्त ह्यवप्रिया अधूषत अस्तोषत स्वभानवो विप्रा न विष्ट्या मतीयो योन्द्रिन्द्र ते हरीति जपः। इत्थं मातामहादेर्ब्राह्मणानामाचमनं सुसम्प्रोक्षितमस्त्विति भूम्यभ्युक्षणं कृत्वा।

अपां मध्ये स्थिता देवा सर्वमप्सु प्रतिष्ठितम्। ब्राह्मणस्य करे न्यस्ता शिवा आपो भवन्तु नः॥

शिवा आपः सन्त्विति हस्ते ब्राह्मणस्य जलदानम्।

लक्ष्मीर्वसति पुष्पेषु लक्ष्मीर्वसति पुष्करे। लक्ष्मीर्वसति सदा गोष्ठे सौमनस्यं सदास्तु मे॥

सौमनस्यमस्तु पुष्पदानम्।

ॐ अक्षतश्च स्तु मे पुण्यं शान्तिः पुष्टिर्धृतिश्च मे। यद्यत् श्रेयस्करं लोके तत्तदस्तु सदा मम॥

ॐ अक्षतश्चारिष्टाश्च सन्तु यवतण्डुलदानम्। अमुकगोत्राणामस्मत्-पितृ-पितामह-प्रपितामहानां सपत्नीकानां दत्तमिदमन्नपानादिकमक्षय्यमस्तु इति पित्रादिब्राह्मणहस्ते सतिलजलदानम्। यजमानस्य प्रश्ने अस्त्विति ब्राह्मणो वदेत। एवं मातामहादीनामप्यक्षय्यम्। आशिषः।

ॐ अघोराः पितरः सन्तु गोत्रं नो वर्द्धतां। दातारो नोऽभिवर्द्धन्तां वेदाः सन्ततिरेव च। अन्नं च नो मा व्यगमद्बहु देयञ्च नोऽस्त्विति॥ अन्नञ्च नो बहु भवेदतिथींश्च लभेमहि। याचितारश्च नः सन्तु मा च याचिष्म कञ्चन॥

एता एवाशिषः सन्तु सौमनस्यमस्तु सुमुखं चास्तु इत्युक्ते पिण्डपात्रे अर्घ्यसम्बन्धान् कुर्यात्। पवित्राणि पात्रीर्ये पित्रादिब्राह्मणं सृष्ट्वा स्वधां वाचयिष्ये ॐ वाच्यतां ॐ पितृपितामह-प्रपितामह-मातामह-प्रमातामह-वृद्धप्रमातामहेभ्यो यथानामगोत्रेभ्यः सपत्नीकेभ्यः स्वधोच्यतां अस्तु स्वधा इत्युक्ते ऊर्ज्जं वहन्तीरित्यृतं इति पिण्डानामुपरि वारिधारां दद्यात्। तत ॐ विश्वेदेवा अस्मिन् यज्ञे प्रीयन्तां देवब्राह्मणहस्ते यवोदकदानं ॐ प्रीयन्तामिति तेनोक्ते ॐ देवताभ्य इति निर्व्वपेत्। अधोमुखपिण्डपात्राणि चालयित्वा आचम्य दक्षिणोपवीती पूर्व्वाभिमुखः ॐ अमुकसगोत्राय अमुकशर्म्मणे ब्राह्मणाय सपत्नीकाय आसनप्रतिष्ठार्थं दक्षिणामिदं रजतं तुभ्यमहं ददे इति दक्षिणां दद्यात् एवं मातामहादौ ततो देवब्राह्मणाय दक्षिणादानम्। ततः पिण्डब्राह्मणे। पिण्डपात्रसन्तानं कृत्वा ॐ पिण्डाः सम्पन्नाः ॐ सुसम्पन्ना इति पिण्डे क्षीरधारां दत्त्वा पिण्डपालनम्।

ॐ आजे पाजे वसवाजिगो नो धनेषु विप्रा अमृता ऋतज्ञाः। अस्य मध्वः पिबत मादयध्वं तृप्ता यात पथिभिर्देवयानैः॥

इति पित्रादिविसर्ज्जनम्॥

ॐ आ मा वाजस्य प्रसवो जगम्यादेमे द्यावा पृथिवी विश्वरूपे। आ मा गन्तां पितरा मातरा चुवा मा सोमोऽमृतत्वाय गम्यात्॥

इति देवविसर्ज्जनम्॥

ॐ अभिरम्यतामित्युक्ते अभिरताः स्म इति ब्राह्मणैरनुज्ञातस्य निवर्त्तनम्। गवादिषु पिण्डप्रतिपादनमिति।

एष श्राद्धविधिः प्रोक्तः पठतां पापनाशनः। अनेन विधिना श्राद्धं कृतं वै यत्र कुत्रचित्॥ अक्षयं स्यात् पितॄणाञ्च स्वर्गप्राप्तिर्ध्रुवा तथा। इत्युक्तं पार्व्वणश्राद्धं पितॄणां ब्रह्मलोकदम्॥"

इत्याद्ये गारुडे पार्व्वणश्राद्धम् २२२ अध्यायः॥

ब्रह्मोवाच।

"नित्यश्राद्धं प्रवक्ष्यामि पूर्व्ववत्तद्विधेयवेत्॥ ॐ अमुकसगोत्राणामस्मत्पितृपितामहप्रपितामहानाममुकशर्म्मणां सपत्नीकानां श्राद्धं सिद्धान्नेन युष्मभ्यमहं करिष्ये। आसनादिकमत्र स्याद्विश्वेदेवविवर्ज्जितम्। वृद्धिश्राद्धं प्रवक्ष्यामि पूर्व्ववत्तद्विधेयकम्॥ जातपुत्रसुखदर्शनादौ वृद्धिश्राद्धं पूर्व्वाभिमुखेषु दक्षिणोपवीतिषु मधुयववदरमिश्राः पिण्डाः देवतीर्थेन नमस्कारान्तेन दक्षिणोपचारेण कर्त्तव्यम्। दक्षिणजानु गृहीत्वा ॐ अद्यास्मदीयामुकवृद्धौ अमुकगोत्राणामस्मत्पितृ-पितामह प्रपितामह-मातामह-प्रमातामह-वृद्धप्रमातामहानां अमुकशर्म्मणां सपत्नीकानां नान्दीमुखानां श्राद्धे कर्त्तव्ये वसुसत्यसंज्ञकानां विश्वेषां देवानां श्राद्धं सिद्धान्नेन युष्मासु मया कर्त्तव्यम्। इति देवब्राह्मणामन्त्रणं ॐ करिष्यतीति तेनोक्ते इत्यमेव मातृपितामहीप्रपितामहीनां देवब्राह्मणामन्त्रणम्। तत ॐ अमुकगोत्राया मत्प्रपितामह्या अमुकी देवी नान्दीमुखी श्राद्धं सिद्धान्नेन युष्मासु मया कर्त्तव्यमिति प्रपितामहीब्राह्मणामन्त्रणम्। करिष्यतीति तेनोक्ते इत्यमेव पितामहीब्राह्मणामन्त्रणं मातृब्राह्मणामन्त्रणञ्च। तत ॐ अद्यामुकवृद्धौ अमुकगोत्राणामस्मत्-प्रपितामह-पितामह-पितॄणां नान्दीमुखानां श्राद्धं सिद्धान्नेन युष्मासु मया कर्त्तव्यमिति ब्राह्मणामन्त्रणं ॐ करिष्यतीति तेनोक्ते इत्यमेव वृद्धप्रमातामहादि ब्राह्मणामन्त्रणम्। देवपितृसर्व्वदेवब्राह्मणश्राद्धकरणानुज्ञापनम्। आसने ॐ विश्वेदेवास आगत शृणुतामं हवं नो ये भूतनरीक्षे य उपक्षेति ये अग्निजिह्वा उतवा यजत्रा आसद्यास्मिन् बर्हिषि मादयध्वम्। ॐ आगच्छन्तु महाभागा विश्वेदेवा इति विश्वेदेवावाहनम्। गन्धादिदानञ्च। अक्षिच्छिद्रावधारणवाचनम्। ततः प्रपितामहीप्रभृतीनामनुज्ञापनं आसनं गन्धादिदानं अक्षिच्छिद्रावधारणम्। इत्थं प्रपितामहादीनां अनुज्ञापनम्। आसनं आवाहनं गन्धादिदानम्। एवं वृद्धप्रमातामहादीनां अनुज्ञापनादिकरणम्। ॐ वसुसत्यसंज्ञकेभ्यो विश्वेभ्यो देवेभ्य एतदर्घ्यं सतृतं सपानीयं सव्यञ्जनं सवदरं सदधि प्रतिष्ठद्वर्च्छितं नमः। इति अर्घ्यसङ्कल्पनम्। ॐ अमुकगोत्रे मत्प्रपितामहि अमुकीदेवि नान्दीमुखि एतदर्घ्यं सवदरं सदधि नमः। इत्थं पितामहीमातृब्राह्मणे। ततः प्रपितामहादिब्राह्मणपात्रे ॐ अमुकगोत्रेभ्यो मत्प्रपितामहपितामहपितृभ्य एतदर्घ्यं सवदरं सदधि सव्यञ्जनं सपानीयं नमः। एवं वृद्धप्रमातामहादिभ्यः॥ *॥

एकोद्दिष्टं पुरावत्स्यं तद्विधेयं वदे शृणु॥

प्रथमं निमन्त्रणं पादप्रक्षालनं आसनम्। अद्य अमुकगोत्रस्य मत्पितुरमुकदेवशर्म्मणः प्रतिसांवत्सरिकमेकोद्दिष्टं श्राद्धं सिद्धान्नेन युष्मान् अहं करिष्ये। श्राद्धकरणानुज्ञापनम्। आसनं अर्घ्यः। गन्धादिदानं पिण्डस्थापनम्। अत्र सङ्कल्पनं जप्यं निवीती उत्तराभिमुखीभूत तिथिश्राद्धं कुर्य्यात्। ततस्तृप्तिं ज्ञात्वा दक्षिणाभिमुखो वामोपवीती उच्छिष्टसमीपे ये अग्निदग्धा इति अन्नविकिरणम्। ॐ अमुकगोत्र पितरमुकदेवशर्म्मन् एतत्ते अन्नमवनेनिक्ष्व ये चात्र त्वामनु यांश्च त्वमनु तस्मै ते स्वधा इति रेखोपरि दक्षिणासुखवारिधारादानम्।" इति गारुडे २२३ अध्यायः॥ *॥

ब्रह्मोवाच।

"सपिण्डीकरणं वक्ष्ये पूर्णेऽब्दे तत्तृतीयाहनि। कृत्वा कृतपकाले तु प्रेतादेः पिण्डलोकदम्। सपिण्डीकरणं कुर्य्यात् अपराह्णे तु पूर्व्ववत्॥ पितामहादिब्राह्मणनिमन्त्रणम्। ॐ पुरोरवो मादवःसंज्ञकेभ्यो देवेभ्य एतदासनं नमः। वामपार्श्वे चासनदानम्। ततः पितामहप्रपितामहवृद्धप्रपितामहानां सपत्नीकानां आवाहनं करिष्ये। इत्यनुज्ञाग्रहणम्। पात्रत्रयकरणं पात्रोपरि कुशं दत्त्वा पात्रान्तरेण पिधाय अक्षिच्छिद्रावधारणान्तं परिसमाप्य तथैव पितुरपि सपत्नीकस्य प्रेतान्तनाम्ना आवाहकरणानुज्ञापनम्। देवपात्राच्छिद्रावधारणम्। तं परिसमाप्य पितामहप्रपितामहवृद्धप्रपितामहपिण्डक्रमेण पात्राणां मनाक् वाचनं उद्घाटनं कृत्वा ये समानाः समनसः पितरो यमराज्ये। तेषां लोकः स्वधा नमो यज्ञो देवेषु कल्पताम्। ये समानाः समनसो जीवाजीवेषु मामकाः। तेषां श्रीर्मयि कल्पतां अस्मिन् लोके शतं समाः॥

एतन्मन्त्रद्वयेन पिण्डपात्रोदकं पितामहप्रपितामहवृद्धप्रपितामहपात्रे दत्त्वा वृद्धप्रपितामहपात्रं परित्यज्य पितामहप्रपितामहयोरुदकं पवित्रञ्च पिण्डपात्रे निक्षिपेत्। ततः पिण्ड-

ब्राह्मणहस्ते पवित्रदानम्। पात्रपुष्पेण शिरसः करपादार्घेन हस्तेऽन्यजलदानं हस्ताभ्यां पात्रसत्याप्य ॐ या दिव्येति च पठित्वा अमुकगोत्र मनुपितरमुक प्रेत एष ते अर्घ्यो ये चात्र त्वामनु यांश्च त्वमनु तस्मै ते स्वधा इति पितृब्राह्मणहस्ते लोकमर्घोदकं पितृतीर्थेन दत्त्वा पितामहब्राह्मणहस्ते पवित्रदानं पात्रपुष्पेण शिरःकरपादार्घेन हस्तेऽन्यजलदानम्। हस्ताभ्यां पात्रसत्याप्य या दिव्येति पठित्वा अमुकगोत्र मनुपितामह अमुकदेवशर्मन् एष ते अर्घ्यः स्वधा। पितृपात्रेणैव पितामहब्राह्मणहस्ते लोकमर्घोदकं दत्त्वा शेषमुदकं पिण्डसेचनार्थं पात्रान्तरे निधाय तेनैव पात्रेण पितामहब्राह्मणानां हस्तस्थं उदकं पवित्रेण गृहीत्वा पितृब्राह्मणवामपार्श्वे दक्षिणाग्रकुशेषूपरि पितृभ्यः स्थानमसीति अधोमुखपात्रस्यापनम्। पितामहानां गन्धादिदानं अन्नौकरणम्। देवानां अवधिश्चाग्रं पितामहादिपात्रे क्षिपेत्। पितामहादिपात्राभिमन्त्रणादिवाचनपर्यन्तं क्रमेण समाप्य पितृब्राह्मणपात्राभिमन्त्रणं असुरुनिवेपनं तिलविकिरणम्। सिद्धान्नविकिरणं कृत्वा अमुकगोत्र मनुपितरमुक प्रेत एतत्ते अन्नं सपृतं सपानीयं सयञ्जनं प्रतिक्षिप्तवर्जितं ये चात्र त्वामनु यांश्च त्वमनु तस्मै ते स्वधा। ततो देवप्रभृति आपोशानं दद्यात्। अतिथौ प्राप्ते अतिथिश्राद्धं कुर्यात् अस्मिन्नवसरे। ततो विकिरणम्। पितामहादौ प्रश्नं कृत्वा पितृब्राह्मणे ॐ स्वदितं भवद्भिरिति प्रश्नः अमुकगोत्र मनुपितामह अमुकशर्मन् सपत्नीक एष ते पिण्डो ये चात्र त्वामनु यांश्च त्वमनु तस्मै ते स्वधा। एवमन्ययोः। पिण्डदानमक्षय्यमस्तु। सङ्कल्पसिद्धिरस्तु इति वाचनं कृत्वा ततः पितृप्रेतपिण्डपातनं ॐ संकल्पसिद्धिरस्त्विति पाठनम्। नं समाप्य पिण्डं त्रिधा कृत्वा ये समानाः समनसः इति मन्त्रद्वयं पठित्वा पितामहप्रपितामहवृद्धप्रपितामहपिण्डेषु क्षिपेत्। पिण्डेषु गन्धादिकं पितृब्राह्मणम्। अतिथिब्राह्मणे स्वदितमित्यादि प्रश्नः। ब्राह्मणानामाचमनं मुखप्रक्षालनं ताम्बूलदानं मुखप्रोक्षितमस्तु शिवा आपः सन्तु इतुप्रपितामहादिक्रमेण ब्राह्मणानां हस्ते अक्षतदानम्। गोत्रस्याक्षय्यमस्तु पितृब्राह्मणहस्ते ॐ उपतिष्ठतामिति सतिलजलदानं नामगोत्रेण उपतिष्ठतामिति तेभ्योक्ते अघोराः पितरः सन्तु सन्तिति उक्ते मधां वाचयिष्ये इति पितामहादिब्राह्मणानुज्ञापनम् ॐ वाच्यतामिदुक्ते पितामहादिभिः मधोच्यताम् अस्तु मधा इदुक्ते पितृब्राह्मणैः पितृभिः मधोच्यतां इति अस्तु मधा इदुक्ते ॐ दीर्घमायुरस्तु इति दक्षिणाभिमुखप्रदक्षिणाशीराः। ॐ विश्वेदेवा ऋतुं यज्ञे प्रीयन्तामिति देवब्राह्मणहस्ते यवोदकदानम्। ॐ देवताभ्य इति त्रिर्जपः। पिण्डान् पात्रे तोलयित्वा आचम्य पितामहादिभ्यो दक्षिणां दत्त्वा ततः पितृब्राह्मणाय ततो अतिथिब्राह्मणाय च। आशिषो मे दीयन्तामित्याशीःप्रार्थनं आशिषः प्रतिगृह्यन्तां इत्युक्ते दातारो नोऽभिवर्द्धन्तामिति पात्रसुत्तानं कृत्वा वाजे वाजे इति विसर्जनम्। अभिरम्यतामिति पितृब्राह्मणविसर्जनम्।

सपिण्डीकरणश्राद्धं यत्प्रोक्तं मया तव।
श्राद्धं विष्णुः श्राद्धकर्त्ता फलं श्राद्धादिकं हरिः॥"

इति गारुडे २२४ अध्यायः॥ ॐ॥

तिथ्यादिविशेषे श्राद्धकरणफलं यथा,—

व्यास उवाच।

"अथ श्राद्धममावास्यां प्राप्य कार्यं द्विजोत्तमैः।
पिण्डान्नाद्यार्घ्यकं भक्तभुक्तिमुक्तिफलप्रदम्॥
पिण्डान्नाद्यार्घ्यकं श्राद्धं त्रीणि राजनि यच्छते।
अपराह्णे द्विजातीनां प्रशस्तेनामिषेण तु॥
प्रतिपत्प्रभृति ह्येतास्तिथयः क्षणपञ्चके।
चतुर्दशीं वर्जयित्वा प्रशस्ता नृत्तरोत्तराः॥
अमावास्याष्टकास्तिस्रः पौषमाघादिषु त्रिषु।
तिसृष्वान्वष्टकाः पुण्या माघस्य दशमी तथा॥
त्रयोदशी मघायुक्ता वर्षासु तु विशेषतः।
यच्छ्राकश्राद्धकालो नित्यं प्रोक्ता दिने दिने॥
नैमित्तिकं हि कर्त्तव्यं यच्छणे चन्द्रसूर्ययोः।
वान्यथानाच्च मरणे नारकी स्यादथान्यथा॥
काम्यानि चैव श्राद्धानि यच्छन्ति यच्छणादिषु।
अयने विषुवे चैव व्यतीपातेऽप्यनन्तकम्॥
संक्रान्त्यामक्षयं श्राद्धं तथा जन्मदिनेष्वपि।
नक्षत्रेषु च सर्व्वेषु तथा कामे विशेषतः।
स्वर्गान्तु लभते कृत्वा ऋक्षिकासु द्विजोत्तमः।
अपत्यमथ रोहिण्यां सौम्ये तु ब्रह्मवर्चसम्॥
सुतानां कर्मणां सिद्धिमार्द्रायां यच्छमेव च।
पुनर्व्वसौ तथा भूमिं श्रियं पुष्ये तथैव च॥
सर्व्वान् कामान् तथा सर्पे पैत्रे सौभाग्यमेव च।
अर्यमृक्षे तु धनं विद्यात् फाल्गुन्यां पापनाशनम्॥
प्राप्तिश्रेष्ठं तथा हस्ते चित्रायां सुवचृक् सुतान्।
वाणिज्यसिद्धिं स्वातौ च विशाखायां सुवर्णकम्॥
मैत्रे बहूनि मित्राणि राज्यं यच्छे तथैव च।
मूले सर्वं समेकृत्यान् सिद्धिमाप्यं तथैव च॥
सर्व्वान् कामान् वैष्णवैवे श्रेष्ठत्व अवणे पुनः।
अविष्ठायां तथा कामान् वारुणे च परं बलम्॥
अजैकपादके कुर्य्यादहिर्ब्रध्ने यशे शुभम्।
रेवत्यां बहवो रोगा नश्यन्ति तुरगांस्तथा॥
मार्गे चाश्वीयजं तस्मात् यदि श्राद्धं प्रयच्छति॥
आदित्यवारे चारोग्यं चान्द्रे सौभाग्यमेव च।
कौजे सर्व्वत्र विषयं सर्व्वान् कामान् बुधस्य च॥
विप्रान्ममीष्टं वीर्यं तु धनं वै भार्गवे पुनः।
शनैश्चरे क्रमेणायुः प्रतिपत्तु शुभान् सुतान्॥
कन्यकां वै द्वितीयायां तृतीयायां सुवत्सया।
पशून् चतुर्थ्यांचतुर्थ्यां पञ्चम्यां श्रीभगान् सुतान्॥
षष्ठ्यां द्युतिं क्षयिष्यापि सप्तम्यां लभते नरः।
अष्टम्यामपि वाणिज्यं लभते श्राद्धदः सदा॥
स्यान्नवम्यां कुरुं दशम्यां द्विकुरं वदु।
एकादश्यान्तथा रूप्यं ब्रह्मवर्चस्विनः सुतान्॥
द्वादश्यां जातरूपन्तु रजतं रौप्यमेव च।
त्रातिश्रेष्ठं त्रयोदश्यां चतुर्दश्यान्तु कृषकाः॥
पञ्चदश्यां सर्व्वकाममाप्नोति श्राद्धदः सदा।
तस्माच्छ्राद्धं न कर्त्तव्यं चतुर्दश्यां द्विजातिभिः॥
प्रच्छेण तु हतानां वै तच्च श्राद्धं प्रकल्पयेत्।
त्रयब्राह्मणसम्पत्तौ न कालनियमः स्मृतः।
तस्माद्भोगापवर्गार्थं श्राद्धं कुर्य्यात् द्विजातिभिः॥
कर्म्मारम्भेषु सर्व्वेषु कुर्य्यादाभ्युदयं पुनः।
पुत्रजन्मादिषु श्राद्धं पार्व्वणं पर्व्वणि स्मृतम्॥
अहन्यहनि नित्यं स्यात् काम्यं नैमित्तिकं तथा।
एकोद्दिष्टन्तु विज्ञेयं दृद्धिश्राद्धेषु पार्व्वणम्॥
एतत् पञ्चविधं श्राद्धं मनुना परिकीर्त्तितम्।
याचायां षष्ठमाख्यातं तत् प्रयत्नेन पालयेत्॥
शुद्धये सप्तमं श्राद्धं ब्रह्मणा परिकीर्त्तितम्।
दैविकं चाष्टमं श्राद्धं यत् कृत्वा मुच्यते भयात्॥
सन्ध्याराज्यौर्ग कर्त्तव्यं राष्ट्रीरन्यच्च दर्शनात्।
देशानाञ्च विशेषेण भवेत् पुण्यमनुत्तमम्॥
गयायामक्षयं श्राद्धं प्रयागेऽमरकण्टके।
गायन्ति पितरो गाथां कीर्त्तयन्तिमनीषिणः॥
एतस्मा बहवः पुत्रा यद्येकोऽपि गयां व्रजेत्।
यजेत वाश्वमेधेन नीलं वा वृषमुत्सृजेत्॥
एतस्मा बहवः पुत्राः प्रोक्तवन्तो गुणान्विताः।
तेषान्तु समवेतानां यद्येकोऽपि गयां व्रजेत्॥
गयां प्राप्यानुयच्छेद्य आद्धं सम्यगाचरेत्।
तारिताः पितरस्तेन स याति परमां गतिम्॥
वराहपर्व्वते चैव गङ्गायाञ्च विशेषतः।
वाराणस्यां विशेषेण यत्र देवः स्वयं हरः॥
गङ्गाद्वारे प्रभासे च विल्वके नीलपर्व्वते।
कुरुक्षेत्रे च कनखले शङ्खतुङ्गे महालये॥
केदारे फलगुतीर्थे च नैमिषारण्य एव च।
सरस्वत्यां विशेषेण पुष्करे च विशेषतः॥
नर्म्मदायां कुशावर्त्ते श्रीशैले भद्रकर्णके।
वेत्रवत्यां विपाशायां गोदावर्य्यां विशेषतः॥
एवमादिष्वन्येषु तीर्थेषु पुलिनेषु च।
नदीनान्तेव तीरेषु तुष्यन्ति पितरः सदा॥
व्रीहिभिश्च यवैर्म्माषैरद्भिर्म्मूलफलेन च।
श्यामाकैश्च तथा नीवारैश्च प्रियङ्गुभिः॥
गोधूमैश्च तिलैर्मुद्गैर्म्मासं प्रीणयते पितॄन्।
आत्मानात्मातकानिघून् शमीकांश्च सदाडिमान्॥
विदारीश्च भरुकांश्च आद्धकारी प्रदापयेत्।
दाडिमान्मधुयुतान्द्राक्षान् शर्करया सह।
दद्याच्छ्राद्धे प्रयत्नेन शृङ्गाटककशेरुकान्॥
द्वौ मासौ मत्स्यमांसेन त्रीन्मासान् हारिणेन तु।
औरभ्रेणाथ चतुरः शाकुनेन तु सप्त वै॥
अथैणमांसेन मासान् दौरश्रेण नवैव तु।
एण मांसान्तु दशभि वराहमहिषामिषैः॥

श्राद्धमाचमनीयस्य संप्रयच्छेदयाचनम् ॥"
पुस्तकान्तरे विकिरेभ्यः स्थाने निक्षिपेत्य इति निकिरेभ्य इति च पाठः ।
"ये चात्र पितरो देवानां हिताः पूर्वं निमन्त्रिताः ।
प्राङ्मुखास्तान्नमस्कारैर्यां तिदर्भोपरिस्थितानि च ॥
दक्षिणाग्रेषु दर्भेषु प्रोक्षितानि तिलोदकैः ॥
तेषूपवेशनीयेदेतानाचमनं संस्पृशन्तु द्विजाः ।
आसध्वमिति संक्षप्तमार्षेरुक्तं ऋषद् ऋषद् ॥
द्वौ दैवे प्राङ्मुखौ पित्र्ये त्रयस्त्रीदङ्मुखास्तथा ।
एकैकं वा भवेत्तत्र दैवमातामहेष्वपि ॥
चतुष्टयं दैवकार्ये पञ्च त्रीणि त्रयाणि च ।
पवित्रैतान् विकुरुत इति तत्रापि दैवत विकुरुत ॥
यद्वा यो यत्र वेदैकं त्राह्मणं वेदपारगम् ।
मृतत्रीणादिसम्पन्नमलक्षणविवर्जितम् ॥
उद्धृत्य पात्रे पात्रं तत् सर्वस्मात् प्राङ्मतात् पुनः ।
दैवतायतने तत्रैः निवेशात्रं प्रवर्णयेत् ॥
प्राक्षेदग्नौ तदन्नस्य दद्याद्वा ब्राह्मणादिषे ।
तस्मादेकमपि ग्रेष्ठं पित्रर्थं भोजयेत् द्विजम् ॥
भिक्षुको ब्रह्मचारी वा भोजनार्थमुपस्थितः ।
उपविशेत् यः श्राद्धे कामं तमपि भोजयेत् ॥
अतिथिर्यस्य नाश्नाति न तत् श्राद्धं प्रशस्यते ।
तस्मात् प्रयत्नात् श्राद्धे तु पूजया कृतिवयो द्विजैः ॥
श्रोत्रियस्यदक्षिण्यायां भुञ्जते ये द्विजातयः ।
काक्योनिं तमस्यन्ते दाता चैव न संशयः ॥८॥
क्षीणाङ्गः पतितः कुष्ठी क्लीबो पुङ्खस्त्रीजितौ ।
कुनखी सूचकः श्यावो वक्रः श्राद्धेषु दूरतः ॥
यौनसम्बन्धिनं पक्षं मातृपक्षं तथैव च ।
श्रोत्रकार्यावसथ्यं वाग्यज्ञांश्च विवर्जयेत् ॥
यत्र क्रियेत कर्मैतद्वैश्वदेवैकपूर्वकम् ।
तत् सर्वमेव कर्तव्यं वैश्वदेवैकपूर्वकम् ॥
यथोद्दिष्टान् कर्मोङ्गानं कुर्याद्विभूयसैः ।
सङ्ख्यामिः शिरोदेशिःपवासोदर्भमेखैः ॥
तत्रापामार्जनैर्दैवान् प्राचीनावीतमङ्गया ।
उदङ्मुखो यथान्यायं पित्रर्थेषु इदाचरेत् ॥
ये मन्त्रिणो यज्ञोपवीतं च भवति पुनः ।
प्रजो देवा यज्ञं पित्रा यज्ञोपवीतिनः यज्ञोक्षया ।
सा पित्रा इति मन्त्रेण दक्षे तत्र निवेशयेत् ।
प्रदक्षिणान्यमाख्यानि कृपाणीनि च प्रतिज्ञा ।
आवसथं तमः कृत्वा पितृणां दक्षिणामुखः ।
आवाहनं ततः कुर्यात् तन्मन्त्रैस्तेषु धीः पुनः ।
आयान्तु नस्तदनन्तरं ये देवासो दाशतये पुनः ।
अस्मे रयिन्त्सर्ववीरं नियच्छत उरुधारा इति ।
पित्रे यज्ञियायेति पित्रर्थं तिलोदकम् ।
प्रदक्षिणं ततः कुर्यात् तन्मन्त्रैरेव धीः पुनः ।
ये यज्ञियाः पवमानेषु पूतं कर्म तिलोदकम् ॥
पितृभ्यः स्थानदोषेण सुतं कर्म तिलोदकम् तु ।
सर्वो वर्तिष्ठेत्यादाय दक्षिणाग्रं तिलोदकम् ।
कृत्वैतेषि ततश्चापो मुद्धन्यादुर्वीयत् ।
सर्वाभ्यो वीप्सया दीप्तः सर्वेषां तत्पवित्रिका ।
प्राचीनावीतिना दिद्यः दैवेष्वेतेषु दीपनम् ।
एतिर्यं पातयेच्चापि देवान् परिचरन् सदा ॥
पितृणां परिचर्यासु पातयेदितरं तथा ।
सोमाय वै पितृमते स्वधा नम इति ब्रुवन् ॥
यमाय वै कव्यवाहनाय स्वधेति शुक्रुयात्ततः ॥
यस्याभावे तु विप्रस्य पात्रापेक्षोपपादयेत् ॥
महादेवानिके वाथ गोष्ठे वा सुसमाहितः ।
ततस्तैरभ्यनुज्ञातो गत्वा वै दक्षिणां दिशम् ॥
गोमयेनोपलिप्योर्वीं स्थानं कृत्वा तु सैकतम् ॥
मण्डलं चतुरस्रं वा दक्षिणावनतं शुभम् ।
त्रिसप्तिलैस्तस्य मध्यं दर्भैरेकेन चैव हि ॥
ततः संस्तीर्य तत्स्थाने दर्भान् वै दक्षिणाग्रकान् ।
त्रीन् पित्रान् निर्वपेत्तत्र ऋविःश्रेयान् समाहितः ॥
न्युप्य पिण्डांस्तु तत्रस्थं निर्वप्याद्येपभागिनाम् ।
तेषु दर्भेष्वधाचम्य चिरायम्य अनैरसून् ॥
यद्दत्वानूनमस्त्वित्यात् पितृनेव च मनवत् ।
उदकं निनयेत्तेषां अग्नेः पिण्डान्तिकं पुनः ॥
अवजिघ्रेत तान् पिण्डान् यथाभुक्तान् समाहितः ।
अथ पिण्डावशिष्टान्नं विधिना भोजयेद्द्विजान् ॥
मांसान् पूपांश्च विविधान् दद्यात् लक्षरसायनम् ।
कषायाकषलानीयून् पयो दधि घृतं मधु ॥
यावदेव यथाकामं विविधं भक्षयेयकम् ।
यद्दृष्टं द्विजेन्द्राणां तत्तत्सर्वं निवेदयेत् ॥
दाक्षांखिलांश्च विविधान् शर्करा विविधास्तथा ।
उष्णमन्नं द्विजातिभ्यो दातव्यं नैव रूक्षता ॥
अन्नस्य प्रथमस्तेभ्यः पायसेभ्यस्तथैव च ।
नाभूमि पातयेच्चातु न कुर्यान्नाम्नं यदेत् ॥
न पादेन स्पृशेदन्नं न चैतदवधूनयेत् ।
क्रोधेन चैव यद्दत्तं यच्च त्वरया पुनः ॥
यातुधाना विलुम्पन्ति तस्मात्तत् परिवर्जयेत् ।
सिद्धान्नाग्नौ च तिष्ठेत्र सन्निधौ च द्विजस्यताम् ॥
न चात्र शौचकालादीन् परीक्षः प्रतिषेधयेत् ।
न दद्यात्तत्र दर्भे न प्रत्यक्षलवणं तथा ॥
न चाग्नेयेन पात्रेण न चैवाताम्रया पुनः ।
काचपात्रेण तु पात्रेण राजतौदुम्बरेण च ॥
दत्तमक्षयतां याति राक्षसेषु च विश्रुतः ।
पात्रे तु रजतमये यो वै श्राद्धे भोजयते पितॄन् ॥
न याति नरकं घोरं भोक्ता चैव पुरोधसा ।
न चैतत् दिवसं दद्यात् न चार्धेन्न च दापयेत् ॥
याचितः दापितो दत्तो नरकान् याति दायकान् ।
गृहीत्वा वाग्यतः कृत्वा न भूयः प्रार्थनां गुणान् ॥
प्रार्थन्ति पितरोऽत्रापि यावत्तोयं हि यौवनम् ।
नाम्नागोत्रेण मन्त्रेण प्रयच्छन्ति पितॄन् प्रति ॥
वसूनां पवनो रौद्राः मंत्रा वदति विश्रुतम् ।
न तिलैरवकीर्णेषु निक्षिप्तेषु द्विजोत्तमः ।
न श्राद्धं प्रतिगृह्णीयात् तथाभ्यक्तान्नभोजयेत् ।
या नाम्नाति द्विजो सार्धं नियुक्तः पितृकर्मणि ।
स प्रेत्य पशुतां याति सप्तजन्मनिकविंशतिम् ॥
स्वाध्यायं श्रावयेदेषां धर्मशास्त्राणि चैव हि ।
इतिहासपुराणानि आख्यानानि शोभनान् ॥
ततोऽनुमन्त्रयेच्छेषं विकिरन् भुवि ।
सृष्टा स्वदितमित्येवं लक्षणाचामयेत्ततः ॥
आचान्तानुचानीयाद्भिरतो रम्यतामिति ।
स्वधास्त्विति च तं ब्रूयुर्गच्छाम्यनन्तरम् ॥
ततो सुक्तवतां तेषामन्नशेषं निवेदयेत् ।
यथा ब्रूयुस्तथा कुर्यादनुज्ञातो द्विजोत्तमैः ॥
पित्रे स्वदितमित्येवं वाच्यं गोष्ठेषु सुव्रतम् ।
सम्पन्नमित्यभ्युदये देवे रुचितमित्यपि ॥
विसृज्य ब्राह्मणांस्तान् वै पितृपूर्वन्तु वाग्यतः ।
दक्षिणा दिशमाकाङ्क्षन् याचेतेमान् वरान् पितॄन् ॥
दातारो नोऽभिवर्धन्तां वेदाः सन्ततिरेव च ।
श्रद्धा च नो मा व्यगमद्बहु देयञ्च नोऽस्त्विति ॥
पिण्डान्तु गोऽजविप्रेभ्यो दद्यादग्नौ जलेऽपि वा ।
अथमन्तु ततः पिण्डमद्यात् पत्नी सुतार्थिनी ॥
प्रक्षाल्य हस्तावाचम्य ज्ञातीन् ग्रेषेण भोजयेत् ।
ज्ञातिष्वपि च भुक्तेषु स्वान् भृत्यान् भोजयेत्ततः ॥
यस्मात् स्वयञ्च पत्नीभिः ग्रेषमन्नं समाहरेत् ।
गोदायमेवदुच्छिष्टं यावन्नास्तं गतो रविः ॥
ब्रह्मचारी भवेत्तावत् दम्पती रजनीञ्च ताम् ।
दत्त्वा श्राद्धं तथा भुक्त्वा सेवते यस्तु मैथुनम् ॥
महारौरवमासाद्य कीटयोनिं व्रजेत् पुनः ।
शुचिरक्रोधनः श्राद्धः सत्यवादी समाहितः ॥
स्वाध्यायञ्च तथाध्यात्मं कर्ता भोक्ता च वर्धयेत् ॥
श्राद्धं कृत्वा परश्राद्धे भुञ्जते ये द्विजातयः ।
महापातकिभिस्तुल्या यान्ति ते नरकान् बहून् ॥
एष वोऽभिहितः सम्यक् श्राद्धकल्पः सनातनः ।
अनेन कर्मयोगेन्नित्यमुदयोगोऽथ तत्त्वित् ॥
अनभिरतो वापि सर्वेव श्रद्धान्वितः ।
श्रामश्राद्धं द्विजः कुर्यात् लवणन्तु वर्जयेद्धि ॥
श्रामश्राद्धं यदा कुर्यात् विधिना मन्त्रवर्जितम् ।
तेनामश्राद्धकं कुर्यात् पिण्डांस्त्रीनेव निर्वपेत् ॥
योऽनेन विधिना श्राद्धं कुर्यात् संयतमानसः ।
अपेतकल्मषो नित्यं यतीनां पदमृच्छति ॥
सम्यक् सर्वप्रयत्नेन श्राद्धं कुर्यात् द्विजोत्तमः ।
आराधितो भवेद्दीर्घमृषिभिः सम्यक् सनातनः ॥
अपि दुःस्वप्नजेनापि प्रकृतिविकृतिगो द्विजः ।
तिलोदकैस्त्रयैवेदं पितॄन् श्राद्धान् समाहितः ॥
न दीर्घमिच्छतो दद्याद्दीर्घमायुः वा विधीयते ॥
दैवं वापि पिता दद्यात्तेषां कर्म प्रवर्धते ।
पिता पितामहश्चैव सर्वेव प्रपितामहः ॥
यो यस्य जियते सर्वं दैवं श्राद्धस्य हेतु तु ।
भोक्तारोऽपि दीर्घत्वं वयोज्ञानेषु भक्षितः ॥
न दीर्घमतिलक्ष्य दद्यादि कुर्यात् मुनिः ।
श्राद्धानुध्यायिनो दद्याद्दीर्घमिच्छेद्विचक्षणः ॥
अकुर्वाणं समादद्यात् नियोगेष्वतिगो यदि ।
प्रतिकुर्यात् दानो यस्तु कुरुतो श्राद्धं द्विजः ॥
अदद्याद्दीर्घमिदं द्विजाति तु मनीषया ।

दौ पिण्डौ निर्वपेताभ्यां चैत्रिये वीजिने तथा ॥
कौर्मेवेदच चैकस्मिन् वीजिनं चैत्रियं ततः ।
शतानि तु कर्तव्यमेकोद्दिष्टं विधानतः ॥
अशौचे खे परिक्षीणे कार्यं वै कामतस्ततः ।
पूर्वाह्णे चैव कर्तव्यं श्राद्धमभ्युदयार्थिना ॥
दैववत् सर्वमेव स्यान्न वै कार्या तिलक्रिया ।
दर्भाश्च सर्वदा कार्या युग्मान् वै भोजयेत् द्विजान् ॥
नान्दीमुखास्ते पितरः प्रीयन्तामिति वाचयेत् ।
मातृश्राद्धन्तु पूर्वं स्यात् पितॄणां स्यादनन्तरम् ॥
ततो मातामहानाञ्च दद्यो श्राद्धत्रयं क्रमात् ।
दैवपूर्वन्तु दद्याद्वै न कुर्यादप्रदक्षिणम् ॥
प्राङ्मुखो निर्वपेत् पिण्डानुपवीती समाहितः ।
पूर्वं वै मातरः पूज्या भक्ता चैव गरीयसः ॥
स्खलितेषु प्रविद्धेषु प्रतिमासु द्विजातिषु ।
पुष्पैर्धूपैश्च नैवेद्यैर्गन्धाद्यैर्भूषणैरपि ॥
पूजयित्वा मातृगणान् कुर्यात् श्राद्धत्रयं पृथक् ।
अकृत्वा मातृयागन्तु यः श्राद्धं परिवेषयेत् ।
तस्य क्रोधवशाविष्टा हिंसामिच्छन्ति मातरः ॥"
इति कौर्मे उपविभागे २१ अध्यायः ॥
मात्स्ये १६ । १७ । १८ अध्यायेषु श्राद्धत्यं द्रष्टव्यम् ॥ * ॥ श्राद्धे कदलीपत्रं निषिद्धं भोजनपात्रतया । इति हेमाद्रिधृता श्राद्धखण्डे ॥
न जातीकुसुमानि दद्यात् न कदलीपत्रम् ।
इति ऋतुवचनम् ॥ * ॥ श्राद्धोत्तरनिषिद्धानि यथा,—
"यात्रा युद्धं नदीपारं मिथ्यालापो द्विभोजनम् ।
द्यूतक्रीड़ा दिवानिद्रा श्राद्धे सप्त विवर्जयेत् ॥"
इति कर्मलोचनम् ॥
स्मृतिः ।
"द्यूतञ्च कलहञ्चैव सायंसन्ध्यां दिवाशयम् ।
श्राद्धकर्त्ता च भोक्ता च पुनर्भुक्तञ्च वर्जयेत् ॥"
अपि च । विष्णुपुराणम् ।
"वर्ष्याणि कुर्वता श्राद्धं कोपोऽध्वगमनं त्वरा ।
श्रोत्रुरत्यच्च राजेन्द्र त्यजेतत्न प्रशस्यते ॥"
रामायणे ।
"पुनर्भोजनमध्वानं द्यूताध्ययनमैथुनम् ।
दानं प्रतिग्रहं सन्ध्यां श्राद्धं क्षत्राञ्च वर्जयेत् ॥"
नवश्राद्धं मागधता स्मृतिः ।
"पुनर्भोजनमध्वानं भाराध्ययनमैथुनम् ।
दानं सन्ध्यां पुनः स्नानं श्राद्धं क्षत्राञ्च वर्जयेत् ॥"
इति श्राद्धतत्त्वम् ॥
अथ वैष्णवश्राद्धविधिः ।
"प्राप्ते श्राद्धदिनेऽपि प्रागेव भगवतेऽर्चयेत् ।
सच्छ्रद्धेनैव कुर्वीत श्राद्धं भागवतो नरः ॥"
यम स्मृतौ ।
"यद्यग्निशिष्णुदेवागं यतीनां ब्रह्मचारिणाम् ।
पिण्डपाकोऽन्नदानञ्च यावत् पिण्डान्न निर्वपेत् ॥"
इति ॥
"एकन्तु सामान्यफलं विशेषवचनैर्बलैः ।
द्वित्रिस्मृतिपुराणादिवर्णैर्मिलितमीरितं ध्रुवम् ॥"
यथा च याज्ञे ।
"विष्णोर्निवेदितान्नेन यद्यं देवतान्तरम् ।
पितृभ्यश्चापि तद्देयं तदानन्त्याय कल्पते ॥"
मोक्षधर्मे नारदोक्तौ ।
"यावन्तं विधिमास्थाय प्राक् कुर्यान्मुखनिःसृतम् ।
पूजयामास देवेशं तच्छ्रेयेण पितामहान् ॥"
ब्रह्मवैवर्तपुराणे ।
"यः श्राद्धकाले हरिमुक्तभोज्यं
ददाति भक्त्या पितृदेवतानाम्
तेनैव पिण्डांस्तुलसीविमिश्रा-
नाकल्पकोटिं पितरः सुतृप्ताः ॥"
स्कान्दे श्रीशिवोक्तौ ।
"देवान् पितॄन् समुद्दिश्य यद्विष्णोर्निवेदितम् ।
तानुद्दिश्य ततः कुर्यात् प्रदानं तस्य चैव हि ॥
प्रयान्ति तृप्तिमतुलां मोदकेन तु तेन वै ।
सकृन्नामोच्चरणेन ब्राह्मणानां विशेषतः ॥
चन्दनेन तु पिण्डानां कर्तव्यं पितृतृप्तये ।
देवानाञ्च पितॄणाञ्च जायते तृप्तिरक्षया ॥
एवं कृते महीपाल सा भवेत् वंशयः क्षयि ॥"
तत्रैव श्रीपुरुषोत्तमखण्डे ।
"अज्ञात्वा श्राद्धकाले तु पतितान्नैर्नरीक्षितम् ।
तुलसीदलमिश्रेण सलिलेनाभिषिञ्चयेत् ॥
तदन्नं शुद्धतामेति विष्णोर्नैवेद्यमिश्रितम् ।
विष्णोर्नैवेद्यरूपन्तु तस्माद्देयं द्विजन्मना ।
पिण्डे चैव विशेषेण पितॄणां तृप्तिमिच्छता ॥"
तत्रैव श्रीलक्ष्मीनारदसंवादे ।
"पितॄनुद्दिश्य यैः पूजा केशवस्य कृता नरैः ।
तृप्ता ते नारकीं पीड़ां संसृतिं यान्ति मद्वशम् ॥
धन्यास्ते मानवा लोके कलिकाले विशेषतः ।
ये कुर्वन्ति हरेर्नित्यं पितृर्थं पूजनं मुने ॥
किं दत्तैर्बहुभिः पिण्डैर्गयाश्राद्धादिभिर्मुने ।
यैरर्चितो हरिर्भक्त्या पितरश्च दिने दिने ॥
यदुद्दिश्य हरेः पूजा क्रियते सुनिपुण्यया ।
उद्धृत्य नरकावासात् नयेत् परमं पदम् ॥
यो ददाति हरेः स्थानं पितॄनुद्दिश्य नारद ।
कर्तव्यं हि पितॄणां यत्तत् कृतं तेन भो द्विज ॥"
श्रुतौ च । एक एव नारायण आसीत् न ब्रह्मा नेमे द्यावापृथिवी सर्वे देवाः सर्वे पितरः सर्वे मनुष्याः विष्णुना अशितमश्नति विष्णुना प्रातं प्रिन्नन्ति विष्णुना पीतं पिबन्ति तस्माद्विद्वांसो विष्णूपहृतं भक्षयेयुरिति । अतएवोक्तं श्रीभगवता विष्णुधर्मे ।
"माधेयो कुरुयाद्यत्नं मन्निवेदितभक्षणम् ।
भक्षन्ति सर्वदा प्राणा मन्निवेदितभक्षणात् ॥
तस्मात् सर्वप्रयत्नेन प्रदेयं मन्निवेदितम् ।
ममापि हृदयस्थस्य पितृणाञ्च विशेषतः ॥"
किञ्च तत्रैवान्यत्र ।
"भक्षं भोज्यञ्च यत्किञ्चिदनिवेद्याश्नभोक्तरि ।
न देयं पितृदेवेभ्यः प्रायश्चित्ती यतो भवेत् ॥
स्मार्तादौ कथितो देवैरग्रभुग् भगवान् हरिः ।
यज्ञभागभुजो देवा तत्तत्तेन प्रकल्पिताः ॥"
इति श्रीहरिभक्तिविलासे ८ विलासः ॥

अधोपवासदिने श्राद्धनिषेधः । श्राद्धे पुष्करखण्डम्
"एकादश्यां यदा राम श्राद्धं नैमित्तिकं भवेत् ।
तद्दिने तु परित्यज्य द्वादश्यां श्राद्धमाचरेत् ॥"
तत्रैवोत्तरखण्डे ।
"एकादश्यान्तु प्राप्तायां सायंपिण्डोद्धृतेऽहनि ।
द्वादश्यां तत् प्रदातव्यं नोपवासदिने क्वचित् ॥
गर्हितान्नं न चाश्नन्ति पितरश्च दिवौकसः ॥"
स्कान्दे ।
"एकादशी यदा नित्या श्राद्धं नैमित्तिकं भवेत् ।
उपवासं तदा कुर्यात् द्वादश्यां श्राद्धमाचरेत् ॥"
ब्रह्मवैवर्ते ।
"ये कुर्वन्ति मधौपाक्षं श्राद्धं त्रैकाष्टकीदिने ।
अयज्ञे नरकं यान्ति दाता भोक्ता परत्रकः ॥"
इति श्रीहरिभक्तिविलास १२ विलासः ॥

श्राद्धं, क्लि, (श्रद्धा अस्त्यस्मिन्निति । श्रद्धा + "श्रद्धाया ण्यः ।" ५।२।१०९ । इति ण्यः ।) श्रद्धायुक्तम् । इति हेमचन्द्रः ॥

श्राद्धकर्त्ता, [र्तृ] त्रि, (करोतीति । कृ + तृच् । श्राद्धस्य कर्त्ता ।) श्राद्धकारकः । यथा,—
"श्राद्धकर्त्ता च भोक्ता च पुनर्भुक्तञ्च वर्ज्जयेत् ॥"
इति श्राद्धतत्त्वम् ॥

श्राद्धदेवः, पुं, (श्राद्धस्य देवः ।) यमः । इत्यमरः ॥ (यथा, मार्कण्डेये । ८ । १५६ ।
"श्राद्धदेवेन कथितं विश्वामित्रस्य चेष्टितम् ॥")
स तु विवस्वतः संज्ञायां पत्न्यां जातः ॥ मनुभेदः । इति पुराणम् ॥ (यथा, मार्कण्डेये । १०६ । ४ ।
"अनु वैवस्वतो ज्येष्ठः श्राद्धदेवः प्रजापतिः ।
ततो यमो यमी चैव यमलौ समभूवतुः ॥")

श्राद्धशाकं, क्ली, (श्राद्धे देयं शाकम् ।) काशशाकम् । इति भावप्रकाशः ॥

श्राद्धिकः, त्रि, (श्राद्धमनेन भुक्तमिति । श्राद्ध + "श्राद्धमनेन भुक्तमिनिठनौ ।" ५ । २ । ८५ । इति ठन् ।) श्राद्धभोक्ता । इति सिद्धान्तकौमुदी ॥ श्राद्धसम्बन्धिमात्रादि । यथा, याज्ञवल्क्यः ।
"सत्यागर्ग्यितनिर्घाते भूकम्पोल्कानिपातने ।
समाप्य वेदं पुनरिज्यारण्यकमधीत्य च ॥
पञ्चदश्यां चतुर्दश्यामष्टम्यां राहुसूतके ।
ऋतुसन्धिषु सर्वासु वा श्राद्धिकं प्रतिगृह्य च ॥"
इति तिथ्यादितत्त्वम् ॥

श्राद्धी, [न्] त्रि, श्राद्धभोक्ता । श्राद्ध + "श्राद्धमनेन भुक्तमिनिठनौ ।" ५ । २ । ८५ । इति सूत्रेण इनिः । इति सिद्धान्तकौमुदी ॥

श्रान्तः, पुं, (श्रम + क्तः ।) श्वासः । क्षितेन्द्रियः । इति हेमचन्द्रः । श्रमयुक्ते, त्रि । श्रम तपःखेदयोः इत्यस्मात् क्तस्य नः निष्पन्नः । यथा,—
"सति सम्भाव्यमाने तु ज्ञानयज्ञो निरुत्तरम् ।
अतिश्रान्तादि यद्वाक्यमेषयोरिव नौचितौ ॥"
इति कालिकापुराणम् ॥

श्रियंमन्या, स्त्री आत्मानं श्रियं मन्यते या। इति मुग्धबोधव्याकरणम्॥ (यथा, भट्टिः। ५।७१।
"भियेव श्रीः श्रियमन्या श्रीमत्सन्नो यथा हरिः।")

श्रिय, उ दाहे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) श्रायेट्।) उ, श्रेषिता त्रिष्ठा। इति दुर्गादासः॥

श्री, ण ग पाके। इति कविकल्पद्रुमः॥ (क्र्या०-उभ०-सक०-सेट्।) ण ग, श्रीणाति श्रीणीते। इति दुर्गादासः॥

श्रीः, स्त्री,(श्रयतीति। श्रि+"क्विप्वचिप्रच्छीति।" उणा० २। ५७। इति क्विप् दीर्घश्च।) लक्ष्मीः। (यथा, विष्णुपुराणे। १। ८। १३।
"श्रियश्च देवदेवस्य पत्नी नारायणस्य या॥")
स्वरूपम्। इत्यमरः॥ वेशरचना। शोभा। (यथा, रामायणे। २। ६४। १०
"रथमादिभिराकीर्णैः श्रियं पुष्यत्यथं गिरिः॥")
सरस्वती। सरलवृक्षः। त्रिवर्गः। सम्पत्तिः। (यथा,
"न दातुं नोपभोक्तुं वा शक्नोति कृपणः श्रियम्॥")
विद्या। उपकरणम्। विभूतिः। मतिः। इति मेदिनी॥ अधिकारः। प्रभा। कीर्त्तिः। इति धरणिः॥ वृद्धिः। सिद्धिः। इति शब्दरत्नावली॥ वृक्षादनीमाता। इति हेमचन्द्रः॥ कमलम्। बिल्ववृक्षः। वृद्धिनामौषधम्। इति राज-निर्घण्टः॥ * ॥ देवादिनाम्नः पूर्व्वं श्रीशब्द-प्रयोगः कर्त्तव्यः। यथा,—
"देवं गुरुं गुरुस्थानं क्षेत्रं क्षेत्राधिदेवताम्।
सिद्धं सिद्धाधिकारांश्च श्रीपूर्व्वं समुदीरयेत्॥"
इति राजवल्लभवृत्तप्रयोगसारदर्शनात् स्वर्ग-गामित्वादिना सिद्धोऽधिकारो येषां नराणां तत्त्वेन जीवतां श्रीशब्दादिकं नाम्नः। न तु मृतानां तथेति श्रिरूपादरः। इति संस्कार-तत्त्वम्॥ ८॥ पञ्चदशे श्रीशब्दस्यागमार्थं पद्य-शब्दे द्रष्टव्यम्॥ (एकाक्षरकोषोविशेषः। यथा, छन्दोमञ्जर्य्याम्। "ग् श्रीः।" उदा-हरणम्। "श्रीर्ल्लेः। याच्ञाम्॥")

श्रीः, पुं, (श्रि+क्विप् दीर्घश्च।) रागविशेषः। स तु पुनर्मतभेदे षड्रागान्तर्गतपञ्चमरागः। एषिया गायितो निर्गतः। अस्य जातिः सम्पूर्णा। तस्य स्वरावलिः। ग ऋ ग म प ध नि। अस्य ग्रहं षड्जस्वरः। हिमर्त्तौ शेषवेलायां गानसमयः। रागमालायां तस्याः स्वरूपं यथा। स्वर्णवस्त्रपरीधाना। पुष्पमाल्य-धरा। नायकमेलनार्थमेकाकिनीसङ्केतस्थानोप-विष्टा॥ २॥ तृतीया धनाश्रीः। अस्याः षाड़व-जातिः। अस्याः स्वरावलिः। ग प ध नि ऋ ग। ग्रहं षड्जस्वरः। हिमर्त्तौ द्वितीयप्रहर-दिवसे शेषवेलायां वा गानसमयः। रागमालायां तस्याः स्वरूपम्। वियोगिनी नारी। रक्तवस्त्रपरीधाना। वियोगजसन्तापेन दुःखि-तान्तरङ्गा। एकाकिनी रोरुद्यमाना वकुल-तरुतलोपविष्टा॥ ३॥ चतुर्थी वसन्तरागिणी। अस्याः सम्पूर्णा जातिः। अस्याः स्वरावलिः। प ऋ ग स प ध नि। अस्या ग्रहं षड्जस्वरः। हिमर्त्तौ मध्याह्ने वसन्तर्त्तौ दिवामाद्य च गान-समयः। रागमालायां तस्याः स्वरूपम्। सुन्दरपुरुषवाञ्छितः। कस्यचिन्मते श्यामवर्णा। रक्तवसना। मयूरपुच्छशिखा। आम्रसुकुल-हस्ता। यौवनमदमदमत्ता। पुष्पमाल्यमल-देहा। पुष्पोद्याने सह नर्त्तकीसुस्वरगायनीभिः सुखेन रागरङ्गयुता। वामहस्तधृततताम्बूल-वीटिका। स्त्रीगणसहितहास्यकौतुककीड़ा-वृत्यगीतवाद्यासक्ता। रागमालान्तरे उक्तगुण-युक्ता श्रीऋषभर्षिसदृग्ऋषिर्लिखिता॥ ४॥ पञ्चमी व्याघ्रावरी। अस्या औड़वजातिः। अस्याः स्वरावलिः। ध नि ग म प। अस्याः ग्रहं धैवतस्वरः। हिमर्त्तौ द्वितीयप्रहरदिवसे गानसमयः। रागमालायां अस्याः स्वरूपम्। श्यामवर्णा स्त्री। कोमलाङ्गी। श्वेतशाटीपरि-धाना। कर्पूरानुलेपना। रक्तपदयोर्हेमनूपुर्सप-वेष्टिता केशैर्बद्धचूड़ा। जलमध्यशृङ्गवर्त्तगुहा वासुपविष्टा। रागमालान्तरे उक्तगुणयुक्ता वृक्षपत्रबद्धकटिदेशा नम्रा लिखिता॥ ५॥ ६॥ अस्य पुत्रा अष्टौ। यथा। सिन्धुः १ मालवः २ गौंडः अथवा गोण्डः ३ अस्य स्थाने केचित् कल्याणः इति केचिच्च हामीर इति पठन्ति। गुणसागरः ४ कुम्भः ५ गम्भीरः ६ भङ्गरः अथवा आगरः ७ सिन्धारः ८। ७॥ कल्लि-नाथमते श्रीरागः प्रथमरागः अस्य भार्य्याः षट्। यथा। गौरी १ गौलाबली २ धवली ३ रटानी ४ मालकौश अर्थात् कौशिकी ५ देव-गान्धारी ६। तस्य ते पुत्रा अष्टौ पुनर्मत-भेदाः। किन्तु गौंडभङ्गरविभागरत्नाने कल्लाल आगड़ा सिगड़ा लिखिताः॥ ८॥ सोमेश्वरमतेऽपि प्रथमरागोऽयम्। अस्य रागिणः षट्। यथा। मालवी अथवा मरुवा। विभेषी अथवा तिरवणी २ गौरी ३ केदारा ४ मधुमाधवी ५ पाहाड़िका अथवा पाहाड़ी ६। अस्य पुत्राः पूर्व्वोक्तमतद्वयतुल्याः। तस्मते अस्य रागस्य रागिणीसहितस्य शिशिरर्त्तौ गानसमयः॥ * ॥ भरतमते पञ्चमरागोऽयम् अस्य रागिण्यः षट्। यथा। सिन्धुनी १ काफी २ गुमरी ३ पूर्व्वदेशे विस्तार इति ख्याता। विभिन्ना ४ शिरहटी अथवा सोरठी ५ तस्मते अस्याष्ट पुत्राः यथा। श्रीरसः १ कौलाहलः २ सामन्तः ३ भृङ्गरवः ४ राजे-श्वरः ५ खटरागः ६ वड़हंसः ७ दशकारः८। तेषां भार्य्या यथा। विन्ध्या १ धान्य२ कुम्भा ३ सुहनी ४ शरदा ५ क्षेमा ६ श्रीरेखा ७ सुर-सती ८। इति गानाचङ्गीतशास्त्रतः संगृहीतम्॥

श्रीकण्ठः, पुं, (श्रीः शोभा कण्ठे यस्य।) शिवः। इत्यमरः॥ कुरुवकाङ्गलदेशः। स तु हस्तिना-पुरस्य उत्तरपश्चिमे वर्त्तते। इति हेमचन्द्रः॥ (पक्षिविशेषः। यथा, बृहत्संहितायाम्। ८६। ३८।
"खञ्जरीटा भासभयककपिञ्जीकण्ठछिक्करः।
शिखिश्रीकण्ठपिप्पीकरुपश्चेनश्च दक्षिणाः॥")

श्रीकण्ठपदलाञ्छनः, पुं, (श्रीकण्ठ इति पदं लाञ्छनं यस्य।) भवभूतिः। स तु मालतीमाधवादि-नाटककर्त्ता। इति शब्दमाला॥ (यथा, उत्तर-चरिते प्रस्तावनायाम्।
"अस्ति खलु तत्रभवान् काश्यपः श्रीकण्ठ-पदलाञ्छनो भवभूतिर्नाम॥")

श्रीकण्ठसखः, पुं, (श्रीकण्ठस्य महादेवस्य सखा। समासे टच्।) कुबेरः। इति हलायुधः॥

श्रीकन्दा, स्त्री, (श्रीः शोभा तद्युक्तः कन्दो यस्याः।) वन्ध्याकर्कोटकी। इति राज-निर्घण्टः॥

श्रीकरं, क्ली, रक्तोत्पलम्। इति त्रिकाण्डशेषः॥

श्रीकरः, पुं, विष्णुः। इति त्रिकाण्डशेषः॥ स्मृति-ग्रन्थकारविशेषः। यथा। श्रीकरार्य्यादि-ग्रन्थादरपराहतविवेकानाम्। इति दायभागा-ग्रन्थटीकायां श्रीकृष्णतर्कालङ्कारः॥ (श्रियः शोभायाः करः।) श्रीकारके, त्रि॥

श्रीकर्य्यं, क्ली, (श्रीः क्रियतेऽनेनेति। कृ+करणे ण्युट्।) लेखनी। इति शब्दरत्नावली॥

श्रीकान्तः, पुं, (श्रियाः कान्तः।) विष्णुः। इति शब्दरत्नावली॥

श्रीकारी, [न्] पुं, (श्रियं श्रीभां करोतीति। कृ+णिनिः।) रागविशेषः। तत्पर्य्यायः। शिखि-युग्मः २ भृङ्गः ३ मधायवः ४ यवनः ५ वेगि-हरिप्रः ६ अलोलः ७ पाञ्चिकाख्यः ८। अस्य ज्ञानगुणाः। लघुत्वम्। गुरुत्वम्। बलप्रदत्वञ्च। इति राजनिर्घण्टः॥

श्रीखण्डः, पुं क्ली, (श्रियः श्रीभायाः खण्ड इव खण्डः।) चन्दनम्। इति त्रिकाण्डशेषः॥ (यथा, गीतगोविन्दे। ६। १०।

"तदुक्तं विपरीतकारिणि तव श्रीखण्डचर्चा-
विधं
प्रीतांशुक्तपनो हिमं हुतवहः क्रीड़ासुदो
यातनाः ॥")

श्रीगर्भः, पुं, (श्रीर्गर्भेऽस्य ।) विष्णुः । इति त्रिकाण्ड-शेषः ॥ खड्गः । यथा,—

"असिर्विश्वग्गः खड्गस्तीक्ष्णधारो दुरासदः ।
श्रीगर्भो विजयश्चैव धर्म्मपाल नमोऽस्तु ते ॥"
इति तिथ्यादितत्त्वम् ॥

श्रीगृहः, पुं, (श्रियः श्रहो यत्र ।) पक्षिणः पानीय-शाला । तत्पर्य्यायः । शुक्तनिप्रपा २ । इति हारावली ॥

श्रीघनं, क्ली, (श्रिया घनम् ।) दधि । इति जटा-धरः ॥

श्रीघनः, पुं, (श्रिया वृद्ध्या घनः ।) वृद्धः । इत्य-मरः ॥

श्रीचक्रं, क्ली, (श्रियाचक्रम् ।) त्रिपुरसुन्दर्य्याः पूजायन्त्रविशेषः । यथा,—

"श्रीचक्रस्योद्धृतिं वक्ष्ये तत्र पूजाप्रसद्धये ।
विन्दुगर्भं त्रिकोणन्तु कृत्वा षोडारसद्धरेत् ॥
दशारद्वयमन्वस्राष्टारयोऽष्टकोणकम् ।
त्रिरेखालक्षभूगेहवेष्टितं यत्नमालिखेत् ॥"
इति मन्त्रमहोदधौ ११ तरङ्गः ॥

अपि च । अथ श्रीचक्रम् । यथा विन्दुमत् त्रास्रं अष्टकोणं एतत्त्रयं संहारचक्रम् । द्विदशारं चतुर्दशारं स्थितिचक्रमेतत्त्रयम् । अष्टपत्रं षोड़शदलं वृत्तत्रयम् । भूपदत्रयं चतुर्द्वार-समायुक्तमेतत् सृष्ट्यात्मकम् । तदुक्तं यामले ।

"विन्दुत्रिकोणवसुकोणदशारयुग्म-
मन्वस्रनागदलसङ्गतषोड़शारम् ।
वृत्तत्रयञ्च धरणीसदनत्रयञ्च
श्रीचक्रराजमुदितं परदेवतायाः ॥"

चक्रराजं सिन्दूरकुङ्कुमादिना लिखितं सुवर्ण-रजतपट्टरत्नस्फटिकताम्रादावुत्कीर्णं कुर्य्यात् । तथा भूतभैरवतन्त्रे ।

"कृत्वा सुधमां रेखां नाशित्वा सुक्ष्मं सुखम् ।
योऽन्य यन्त्र प्रपूजेत तस्य सर्व्वं वृथाश्रमम् ॥
यस्मा यत्र स्थितिर्देवि तत्र तां नार्च्चयेद्यदि ।
तस्माच्छिरश्छेदमेव मारणा तस्य जायते ॥
मणीरालोकनं न स्यात्तथा कृतघ्न यजतः ।
यदि देवात् मणीरत्ने लिखितं विद्यते क्वचित् ।
समाप्तपत्तिरेवाश्च क्रियते मापमुत्तिना ॥"
तथा भूतभैरवे ।

"योऽस्मिन् यन्त्रे मनेद्यानि कैश्चराणि प्रकल्पयेत् ।
योगिनीगणिमाद्यास्तं क्षिपं कुर्व्वन्ति भैरवाः ॥"
इति यन्त्रसाराणि कैश्चराणि ।

"न राजापदृश्येत् यन्त्रं साधकस्तु कदाचन ।
प्रमादादस्थितं यन्त्रं शापो भवति तत्क्षणात् ।
तस्मात्तदस्थितापृच्छं करणीरे भवाम्यु च ।
तत्र देवी पणिष्यं तदुक्तं पूजनं मम ॥"
तथा तन्त्रान्तरे ।

"कुर्य्याच्च खलिखे यत्र कलनाशं सुदुष्करम् ।
रत्नादिषु च निर्म्माणे मानमिच्छावशाद्भवेत् ॥
एकतोलं द्वितोलं वा त्रितोलं वेदतोलकम् ।
एतोऽधिकं नरः कृत्वा प्रायश्चित्ती भवेत् ध्रुवम् ॥
रक्तेन रक्तसापूर्य्य श्रीचक्रं भुवि पूजयेत् ।
नश्यन्ति सर्व्वविघ्नानि प्राप्यते च यथेप्सितम् ॥
दशभागं सुवर्णस्य ताम्रस्य द्वादशं तथा ।
षड्दशं रजतस्याथ चेतल्लौहत्रयं भवेत् ॥
चक्रेऽस्मिन् पूजयेद्यो हि स सौभाग्यमवाप्नुयात् ।
अणिमाद्यष्टसिद्धीनामधिपो जायतेऽचिरात् ॥
विद्रुमे रचिते यन्त्रे पद्मरागेऽथवा प्रिये ।
इन्द्रनीलेऽथ वैदूर्य्ये स्फाटिके मरकतेऽपि वा ॥
धनं पुत्रं तथा दारान् यशांसि लभते ध्रुवम् ।
ताम्रन्तु कान्तिदं प्रोक्तं सुवर्णं भुक्तिमुक्तिदम् ॥
राजतं चैमदश्चैव स्फाटिकं सर्व्वसिद्धिदम् ॥"
एतद्यन्त्रमाचे ज्ञेयम् ॥ * ॥ अथ श्रीचक्रनाशे प्रायश्चित्तम् ।

"हृतं च स्फुटितं यन्त्रं क्षुतं चौरेण वा प्रिये ।
उपवासं प्रकुर्व्वीत दिनमेकमतन्द्रितः ॥
लक्षमात्रं जपेद्विद्यां होमतर्पणपूर्व्वकम् ।
सङ्कल्प्य च गुरुं तोष्य ब्राह्मणानपि भोज-
येत् ॥"

लक्षं जप्त्वा दशांशेन होमः तद्दशांशेन तर्पणम् । लक्षमभुक्तमित्येके ।

"कदाचिच्छुभचिह्नं वा स्फुटितादि विदूषणम् ॥
भयं करोति यो मर्त्यो गुरुवाक्यस्य दूतं भवेत् ।
तस्माच्च तीर्थराजे वा गङ्गादिसरितांवरे ॥
वसुदे वा क्षिपेद्देवि चान्यथा दुःखमाप्नुयात् ॥"
इदन्तु यन्त्रमाचविषयम् ॥ * ॥ अथ श्रीचक्र-पादोदकमाहात्म्यम् ।

"गङ्गापुष्करनर्म्मदासु यमुनागोदावरीगोमती-
गङ्गाद्वारगयाप्रयागवदरीवाराणसीसिन्धुषु ।
रेवासेतुसरस्वतीप्रभृतिषु ब्रह्माण्डभाण्डोदरे
तीर्थस्नानफलैकलक्षकोटिफलदं श्रीचक्रपादोदकम्॥"
अथ दर्शनफलम् ।

"सम्यक् प्रसक्रतून् क्षमा यत् फलं समवाप्नुयात् ।
तत् फलं लभते भक्त्या कृत्वा श्रीचक्रदर्शनम् ॥
षोड़शं वा महादानं कृत्वा यत्फलमश्नुते ।
तत् फलं लभते भक्त्या कृत्वा श्रीचक्रदर्शनम् ॥"
इति तन्त्रसारः ॥

श्रीजः, पुं, (श्रियः जायते इति । जन्+डः ।) कामदेवः । श्रिया जातत्वात् । धूमः । इति केचित् ॥

श्रीताल, पुं, (श्रियुक्तस्तालः ।) तालवृक्षभेद-वृक्षविशेषः । तत्पर्य्यायः । स्थूलतालः २ सप्तशी-तालः ३ महच्छदः ४ विशालपत्रः ५ देवताडः ६ मधोरेक्षदलः ७ शिरालपत्रकः ८ वाद्योद्भूतः । अस्य गुणाः । मधुरत्वम् । शीतलम् । ईषत् कषायत्वम् । पित्तनाशित्वम् । कफकारित्वम् । दुर्जरत्वञ्च । इति राज-निर्घण्टः ॥

श्रीदः, पुं, (श्रियं ददातीति । दा+कः ।) कुबेरः । इत्यमरः ॥ शोभादातरि, त्रि ॥

श्रीधरः, पुं, (धरतीति । धृ+अच् । श्रिया धरः ।) विष्णुः । (यथा, सुकुन्दमालायाम् । ६ ।

"सा भेर्मन्दमनो विचिन्त्य बहुधा यामीश्चिरं
यातना
यामी नः प्रभवन्ति पापरिपवः स्वामी ननु
श्रीधरः ।
त्रासस्तं त्यजनीय भक्तिसुलभं ध्यायस्व नारायणं
लोकस्य व्यसनापनोदनकरो दासस्य किं न
क्षमः ॥")

भूताईन्द्रभेदः । इति हेमचन्द्रः ॥ शालग्राम-चक्रे, क्ली । यथा,—

"अतिक्षुद्रं छिद्रचक्रं वनमालाविभूषितम् ।
श्रीधरं देवि विज्ञेयं श्रीप्रदं गृहिणां सदा ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे १६ अध्यायः ॥

श्रीनन्दनः, पुं, (श्रियाः नन्दनः ।) कामदेवः । इति हेमचन्द्रः ॥ लक्ष्मीपुत्रश्च ॥

श्रीनिकेतनः, पुं, (श्रियं निकेतयति वासयतीति । नि+कित+णिच्+ल्युः ।) विष्णुः । इति शब्दरत्नावली ॥ (यथा, भागवते ८।१८।१३।

"भगवानपि विश्वात्मा पावनः श्रीनिकेतनः ॥"

श्रियः आश्रयस्थाने, त्रि । यथा, भागवते ३। ३ । २० ।

"स्निग्धस्मितावलोकेन वाचा पीयूषकल्पया ।
चरित्रेणानवद्येन श्रीनिकेतेन चात्मना ॥")

श्रीनिवासः, पुं, (श्रियो निवास आश्रयस्थानम् ।) विष्णुः । इति त्रिकाण्डशेषः ॥

श्रीपं, त्रि, (श्री+पा+कः ।) श्रियं पाति यत् । इति शब्दचन्द्रिकाकरश्च ॥

श्रीपञ्चमी, स्त्री, (श्रियः सरस्वत्याः पञ्चमी ।) माघशुक्लपञ्चमी । यथा,—

"चतुर्थी वरदा शुक्ला तत्र गौरी सुपूजिता ।
सौभाग्यमतुलं कुर्य्यात् पञ्चम्यां श्रीरपि श्रियम् ॥"
सरस्वतीपूजानध्यायश्चात्र गौड़ानाम् । अत्र श्रीपञ्चम्यामारभ्य प्रतिमासं षड्वत्सरमाद्यं श्रीपञ्चमीव्रतं कुर्व्वन्ति पठन्ति च । इति संवत्-सरकौमुदीधृतब्रह्मपुराणवचनम् ॥

श्रीपतिः, पुं, (श्रियः पतिः ।) विष्णुः । इत्यमरः ॥ (यथा, सुकुन्दमालायाम् । १६ ।

"श्रेयः श्रीपतिरेव सर्व्वजगतामेकान्ततः
वाञ्छितः
प्रह्लादश्च विभीषणश्च करिराट् पाञ्चाल्य-
हल्या ध्रुवः ॥")

पृथिवीनाथः । इति मेदिनी ॥

श्रीपथः, पुं, (श्रियः पन्थाः । "अकर्द्धुरज्ञः पथा-मानक्षे ।" ५ । ३ । ७४ । इति चः ।) राज-पथः । इति हेमचन्द्रः ॥

श्रीपर्णं, क्ली, (श्रीपर्णी एव । स्वार्थे कन् ।) कटफलवृक्षः । इत्यमरः ॥

श्रीमान

श्रीपर्णी, स्त्री, (श्रीयुक्तानि पर्णानि यस्याः । ङीष् ।) गम्भारीवृक्षः । इत्यमरः । कट्फलवृक्षः । इति मेदिनी । शालपर्णीवृक्षः । एरण्डवृक्षः । इति हेमचन्द्रः । अग्निमन्थवृक्षः । इति राजनिर्घण्टः ॥

श्रीपिष्टः, पुं, (श्रियः श्रेष्ठस्य पिष्टः ।) श्रेष्ठकृष्णः । इत्यमरटीकायां रामाश्रमः ॥

श्रीपुत्रः, पुं, अश्वः । इति त्रिकाण्डशेषः ॥ (श्रियः पुत्रः ।) कामदेवश्च ॥

श्रीपुण्यं, क्ली, (श्रीयुक्तं पुण्यमस्य ।) जवक्षम् । इति राजनिर्घण्टः ॥ यज्ञकाष्ठम् । इति रत्नमाला ॥

श्रीफलः, पुं, (श्रीयुक्तं फलमस्य ।) बिल्ववृक्षः । इत्यमरः । राजादनी । इति राजनिर्घण्टः ॥

श्रीफला, स्त्री, (श्रीविशिष्टं फलमस्याः ।) नीली । क्षुद्रकारवेल्ली । इति राजनिर्घण्टः ॥

श्रीफलिका, स्त्री, (श्रीफला + स्वार्थे कन् । टापि अत इत्वम् ।) क्षुद्रकारवेल्ली । महानीलीवृक्षः । इति राजनिर्घण्टः ॥

श्रीफली, स्त्री, (श्रीयुक्तं फलमस्याः । ङीष् ।) आमलकी । नीली । इति मेदिनी ॥

श्रीभद्रा, स्त्री, भद्रमुस्तकः । इति शब्दरत्नावली ॥

श्रीभागवतं, क्ली, (श्रीमत् भागवतमिति मध्यपदलोपिसमासः ।) अष्टादशमहापुराणान्तर्गताष्टादशसहस्रश्लोकयुक्तपुराणविशेषः । (तच्च मतभेदेन विष्णुभागवतदेवीभागवतभेदात् द्विविधम् ।) यथा,—

"अष्टादशं भागवतं सारमाहुश्च सर्व्वतः ।
श्रावयन् भगवान् व्यासः शुकदाधापयत् सुतम् ॥
स्कन्धैर्द्वादशभिर्युक्तं ब्रह्मविद्यासमन्वितम् ।
वेदवेदान्तसारं तत् पुराणानाञ्च सत्तमम् ॥
यत्र संकीर्त्तितः कृष्णो भगवान् वै पदे पदे ।
श्रीमद्भागवतमिदं वै स्मरन्ति मुनयः क्वचित् ।
सुपक्वं सर्व्वशास्त्रेभ्यो यथा क्षीरं मनोहरम् ॥
मरीचिस्था यथा मेरोर्दीपानां देवयो यथा ।
किरणाः कामधेनूनामक्षरस्थु यथोर्ज्जयी ॥
कार्य्याणां पार्व्वतीनाथो राज्ञां दाशरथिर्यथा ।
नदीनाञ्चैव गन्धर्व्वा नदीनां जाह्नवी यथा ।
पुराणानां तथा राजन् श्रीमद्भागवतोत्तमम् ॥
अम्बरीष उवाच ।
पुराणं तं भागवतं ब्रह्मन् मे पुरतो हरेः ।
चरितं दैत्यराजस्य प्रह्लादस्य च मुनयेः ॥
गौतम उवाच ।
अम्बरीष शुकप्रोक्तं नित्यं भागवतं शृणु ।
सप्तजन्मकृतान्यापि पापानि भवति क्षयम् ॥
स्कन्धं स्कन्धेऽभेदस्य फलमाप्नोति मानवः ।
अन्तकाले राजसूयफलेन परिपूर्य्यते ॥
प्रतिश्लोकं वाजपेयफलं तस्योपजायते ।
पदे पदे महाराज गोमेधानाफलं लभेत् ॥
इदं भागवतं वेदि पुराणं मुक्तिसाधकम् ।
सप्तापि शूद्रस्कन्धः सर्व्वसत्त्वमयोहरः ।
सप्तापि राजशार्दूलाः पक्षाधारो महाफलाः ॥

श्रीमान्

श्रीपार्व्वत्युवाच ।
सर्व्वेष हरिलीलाकं श्रीमद्भागवतं परं ।
स्कन्धस्य दशमस्यायं महिमा केन हेतुना ॥
रासलीलेति तत्रापि कथ्यते सर्व्वतोऽधिका ।
तत्र मे कारणं श्रोतुमुत्कण्ठा वर्द्धते भृशम् ॥
श्रीसदाशिव उवाच ।
स्वयं भगवतो यत्र तस्य लीला च वर्ण्यते ।
श्रुतीनाञ्च स्तुतिर्यत्र सर्व्ववेदार्थसंमिता ॥
स्वयं भगवती लीला सर्व्वशक्तिश्च दर्शिता ।
दशमस्कन्धमाहात्म्यं ततश्च कारणं मतम् ।
तत्रापि रासलीलाया यन्माहात्म्यमुदीरितम् ।
तत्रापि कारणं वच्मि शृणु पर्व्वतनन्दिनि ॥
यः स्वयं भगवान् कृष्णः पूर्णैश्वर्य्य इतीर्य्यते ।
स सर्व्वशक्तिसम्पूर्णः सर्व्वलीलाप्रकाशकः ॥
तस्यैव शक्तयो गोप्यः प्रोक्ताः सर्व्वोत्तमा यतः ।
मुक्तीनाञ्च मुक्तिमतो लीला यत्रैकतः स्थिता ।
सा लीला सर्व्वतः श्रेष्ठा कीर्त्तिता परमर्षिभिः ॥"

इति पाद्मे पातालखण्डे ७१ अध्यायः ॥
(तथाच शिवपुराणे ।
"भगवत्याश्च दुर्गायाश्चरितं यत्र विद्यते ।
तत्तु भागवतं प्रोक्तं नतु देवीपुराणकम् ।"
अस्य विशेषविवृतिस्तु पुराणशब्द-भागवतशब्दयोर्द्रष्टव्यम् ॥)

श्रीभर्त्ता, पुं, (श्रियः भर्त्ता षष्ठ्यलुक्तत्वात् ।) अश्वः । इति राजनिर्घण्टः ॥ चक्रः । बहुव्रीहुत्पन्नत्वात् ॥

श्रीमतिः, स्त्री, राधा । यथा,—

"श्रीराधा श्रीमतिः श्रेष्ठा श्रेष्ठरूपा स्तुतिप्रिया ॥"

इति नारदपञ्चरात्रे तस्याः सहस्रनामस्तोत्रम् ॥

श्रीमती, स्त्री, (श्रीर्विद्यतेऽस्या इति । मतुप् । ङीप् ।) श्रीयुक्ता । योषिन्मात्रः पूर्व्वं एतच्छब्दो योग्यः । इति शिष्टाचारः ॥

श्रीमस्तकः, पुं, (श्रीयुक्तं मस्तकमस्य ।) रुचीनः । इति त्रिकाण्डशेषः ॥ (श्रियो मस्तकः ।) लक्ष्मीशिरश्च ॥

श्रीमान्, [न्] पुं, (श्रीर्विद्यतेऽस्येति । मतुप् ।) तिलकवृक्षः । इत्यमरः ॥ चाक्षुषमनुः । इति राजनिर्घण्टः ॥ विष्णुः । इति शब्दरत्नावली ॥ शिवः । इति त्रिकाण्डशेषः ॥ कुबेरः । इति शब्दमाला ॥

श्रीमान्, [न्] त्रि, (श्री + मतुप् ।) मनोज्ञः । (यथा, माघे । १ । १ ।

"श्रियः मतिः श्रीमति शासितुं जगत्
पतावियाय वसुदेवसद्मनि ।
वसन् दधावंशतरुत्तमस्वरान्
चिरस्यगर्भाकुहरं तुलिं हरिः ॥")

धनी । इति मेदिनी । तत्सम्बन्धः । लक्ष्मीवान् । लक्ष्मीः । ३ श्रेष्ठः । ४ । इत्यमरः । (यथा,—

"श्रीमताञ्च भवद्यशोविदुषि ये चारकाः
कोरका-

श्रीमूर्त्तिः

स्तथामलतमः पुरा विकसितो यः पूर्णिमाचन्द्रमाः ।
तेनेदं शरदिन्दुसुन्दरसुधास्यन्दैर्जगत् मण्डितं
हेयेष्वेषु विकस्वरेषु भविता कीदृक् न जानीमहे ॥"

इति कालिदासः ॥)

श्रीमल्लापद्मा, स्त्री, घृष्टपद्मा । इति राजनिर्घण्टः ॥

श्रीमुखः, पुं, (काञ्चनस्य श्रीमन्मुखत्वात् । इति केचित् ॥ पञ्चदशे श्रीशब्दलिखनम् । इति लोकप्रसिद्धिः ॥) श्रीभाजुक्तानने, क्ली ॥

श्रीमूर्त्तिः, स्त्री, (श्रीयुक्ता मूर्त्तिः ।) देवविग्रहः । विष्णुप्रतिमा । यथा । अथ श्रीमूर्त्तयः । एकादशस्कन्धे ।

"शैली दारुमयी लौही लेप्या लेखा च सैकता ।
मनोमयी मणिमयी प्रतिमाष्टविधा स्मृता ॥
स्थलाचलेति द्विविधा प्रतिष्ठा जीवमन्दिरम् ।
उद्वासावाहने न स्तः स्थिरायास्तूद्वयार्चने ॥
अस्थिरायां विकल्पः स्यात् स्थण्डिले तु भवेत् द्वयम् ।
स्नपनं त्वविलेप्यायामन्यत्र परिमार्ज्जनम् ॥
गोपालमन्त्रोदितत्वात् तच्छ्रीमूर्त्तिरपेक्षिता ।
तथापि वैष्णवग्रन्थे लेखाः श्रीमूर्त्तयोऽखिलाः ॥"

अथ श्रीमूर्त्तिलक्षणानि । हयशीर्षपञ्चरात्रे । भगवच्छ्रीहयशीर्षनारदसंवादे ।

"आदिमूर्त्तिर्व्वासुदेवः सङ्कर्षणमथाऽजनत् ।
चतुर्म्मूर्त्तिः परं प्रोक्तं एकैको भिद्यते त्रिधा ॥
केशवादिप्रभेदेन मूर्त्तिर्द्वादशकं स्मृतम् ।
पद्मं दक्षिणे दद्यात् पाञ्चजन्यं तथोपरि ॥
वामोपरि गदा यस्य चक्रं पाणौ व्यवस्थितम् ।
आदिमूर्त्तेस्तु भेदोऽयं केशवेति प्रकीर्त्तितः ॥१॥
अक्षरोक्षरभावेन कृतमेतत्तु यत्र वै ।
नारायणाख्या सा मूर्त्तिः स्थापिता मुक्तिदायिका ॥२॥
तथाधः पद्मं तस्य पाञ्चजन्यं तथोपरि ।
दक्षिणोर्द्धे गदा यस्य चक्रं वामोपरि स्थितम् ॥
आदिमूर्त्तेस्तु भेदोऽयं नारायणेति प्रकीर्त्तितः ॥३॥
दक्षिणाधःस्थितं चक्रं गदा तस्योपरिस्थिता ।
वामोर्द्धसंस्थितं पद्मं पद्मं पाणौ व्यवस्थितम् ।
सङ्कर्षणस्य भेदोऽयं माधवेति प्रकीर्त्तितः ॥४॥
दक्षिणोपरि पद्मं तु गदा पाणौ व्यवस्थिता ।
सङ्कर्षणस्य भेदोऽयं विष्णुरित्यभिधीयते ॥५॥
दक्षिणोपरि चक्रस्य चक्रं पाणौ प्रदृश्यते ।
वामोपरि तथा पद्मं गदा पाणौ प्रदृश्यते ।
मधुसूदनमायायं भेदः सङ्कर्षणस्य च ॥६॥
त्रिविक्रममूर्त्तिमाह ।
दक्षिणोर्द्धे गदा यस्य पद्मं पाणौ स्थितम्
वामोर्द्धे संस्थितं चक्रमधः पद्मं प्रदृश्यते ।
ब्रह्मायं वामपार्श्वे दक्षिणं केशवाह्वयम् ॥७॥
श्रीवामनमूर्त्तिमाह ।
दक्षिणोर्द्धसंस्थितं वामं पाञ्चजन्यविराजितम् ।
वामोर्द्धे कौमोदी यस्य पुष्करीकमधःस्थितम् ॥

दक्षिणोर्द्धे यदक्षारं पाषाणसमधःस्थितम् ।
मन्त्रनामप्रमाणेन वामनं कारयेत् ततः ॥८॥
ऊर्द्धे दक्षिणतश्चक्रमधः पद्मं व्यवस्थितम् ।
वामोर्द्धे कौमोदी यस्य पाषाणसमधःस्थितम् ।
पद्मा पद्मकरा वामे पार्श्वे यस्य व्यवस्थिता ।
स्त्रियो वाप्युभयोर्वा सानुरागविलासवान् ।
चतुर्भुजम् हि मैत्रेयं श्रीधरेति प्रकीर्त्यते ॥९॥
दक्षिणोर्द्धे गदाचक्रं कौमोदी तदधःस्थिता ।
वामोर्द्धे शङ्खिनं यस्य व्यधः पद्मं विराजते ।
भूमीदेवीति विज्ञेयः स्थापितः सर्वकामदः ॥१०॥
दक्षिणोर्द्धे पुनर्दक्षे पाषाणसमधस्तथा ।
वामोर्द्धे शङ्खिनं चक्रं कौमोदी तदधःस्थिता ।
पद्मनाभेति साक्षात्सः स्थापितामोघदायिनी ॥११॥
दक्षिणोर्द्धे पाषाणसमस्तात्तु कृष्णेश्वरम् ।
वामोर्द्धे कौमोदी-देवी वैनिराणसमधःस्थितम् ।
व्यतिरिक्तस्य मैत्रेयं दामोदर इति स्मितः ॥१२॥
कर्त्तव्यानु स्त्रियौ कार्ये यज्ञभोगाधरे शुभे ।
इति क्रमेण मार्गादिमासानियः केशवादयो
द्वादश ॥ ७ ॥ अथ विष्णोर्यंसंहितायां चतु-
र्विंशतिमूर्त्तयः ।

"वासुदेवो महाशङ्खचक्रगदाधरो मतः । १ ।
पद्मं चक्रं तथा चक्रं गदां वहति केशवः ॥२॥
चक्रं पद्मं गदां चक्रं धत्ते नारायणः सदा ॥३॥
गदां चक्रं तथा चक्रं पद्मं वहति माधवः ॥४॥
चक्रं पद्मं तथा चक्रं गदाश्च पुरुषोत्तमः ॥५॥
चक्रं कौमोदकी चक्रं चक्रं धत्ताऽधोक्षजः ॥६॥
चक्रधर्मा महाचक्रचक्रशार्ङ्गधरः स्मृतः । ७ ।
चक्रं गदां पद्मजातो गोविन्दो धरते सुधीः ॥८॥
गदां पद्मं तथा चक्रं चक्रं विष्णुर्जिनार्जि यः ॥९॥
चक्रं चक्रं तथा पद्मं गदाश्च मधुसूदनः ॥१०॥
गदां मयोर्ध्वं चक्रस्य चक्रं धत्तेऽथ त्रिविक्रमः ॥११॥
चक्रं कौमोदकीं चक्रशार्ङ्गः पद्मजदेहभृत् ॥१२॥
चक्रचक्रगदाचक्रः प्रद्युम्न उच्यते । १३ ।
पद्मं कौमोदकीं चक्रं चक्रं धर्मो निरञ्जनः ॥१४॥
चक्रं चक्रं तथा पद्मं गदां वामेषु बिभ्रते सदा ॥१५॥
पद्मं चक्रं तथा चक्रं गदां वैकुण्ठो धत्ते मुनी ॥१६॥
चक्रं पद्मं तथा चक्रं गदां यज्ञेश्वरो विभर्त्ति यः ॥१७॥
पद्मं गदाञ्च चक्रं च चक्रं धत्ते जनार्दनः ॥१८॥
चक्रचक्रगदाचक्रश्चक्रशार्ङ्गभृत्तथा । १९ ।
चक्रं गदां तथा चक्रं पद्मं धत्ते तथा हरिः ॥२०॥
चक्रं पद्मं गदां चक्रं चक्रं धत्ते कृष्णः ॥२१॥
चक्रं चक्रं गदां चक्रं पद्मं कौमोदकः सदा ॥२२॥
चक्रं पद्मं गदां चक्रं चक्रं धत्ते श्रीपतिः ॥२३॥
चक्रं कौमोदकीं पद्मं चक्रं चक्रं विभर्त्ति
यः ॥२४॥
इत्याह भगवान् वैद्यः प्रतिमाधारकस्य तु ।"
मत्स्यपुराणे च ।
"चतुर्हस्तः सौम्यरूपः प्रतिमालक्षणं परम् ।
विष्णोरेव च कर्त्तव्यं नरसिंहादृते द्विजाः ॥"
इति ।
विष्णोरेता इमाः कौमुदीप्रभृतयः शक्तयः ।
पाद्मसंहितायां तु विशेषः दृश्यते ।

सेव्या निष्णविकैरेव सर्वैः सर्वार्थसिद्धये ।
बालयामाद्यके रूपे नियमो नैव विद्यते ।
द्विभुजा श्यामलश्यामा विभङ्गी मधुराकृतिः ।
सेव्या ध्यानानुरूपैव श्रीमद्भिः शुद्धदैवतैः ॥
अन्याश्च विविधाः श्रीमदवतारादिमूर्त्तयः ।
प्रादुर्भावविधावत्रै वैष्णवागमदर्शितः ॥
नित्यकर्म्मप्रयत्नेन स्मर्त्तव्यास्तत्प्रतिष्ठयोः ।
विधिर्न लैखितुं योग्यः स तु वैखिष्यतेऽयतः ॥"
इति श्रीहरिभक्तिविलासे १९१ विलासः ॥

श्रीयुक्त, त्रि, (स्त्रिया युक्तः ।) लक्ष्मीविशिष्टः ।
श्रीमान् । श्रीवत्सपुरुषनाम्नः पूर्व्वं दानवोऽयम् ॥
श्रीयुतः, त्रि, (स्त्रिया युतः ।) लक्ष्मीविशिष्टः ।
श्रीमान् । श्रीवत्सपुरुषनाम्नः पूर्व्वं दानवोऽयम् ॥
श्रीरसः, पुं, (स्त्रियः रसो निर्य्यासः ।) श्रीवेष्टः ।
इति राजनिर्घण्टः ॥
श्रीरङ्गपत्तनं, क्ली, देशविशेषः । सारंपटम् इति
भाषा । इति मादराजाख्यदेशे प्रसिद्धम् ॥
श्रीरामः, पुं, षड्रागाणां मध्ये तृतीयरागः । इति
दत्तानुधः । तस्य रागिणो यथा,—
"भास्वारी देवमास्वारी मालवश्रीश्च सारवी ।
रामक्रीर्यापि रागिण्यः श्रीरामस्य प्रिया
इमाः ॥"
इति सङ्गीतदामोदरः ॥
विस्तारस्तु श्रीशब्दे दृश्यः ॥
श्रीरामः, पुं, (श्रीयुतो रामः ।) रामचन्द्रः । इति
शब्दरत्नावली ॥
श्रीरामनवमी, स्त्री, (श्रीरामस्य नवमी तिथ्यादि-
तत्त्वात् ।) चैत्रशुक्लनवमी । सा च श्रीरामस्य
जन्मतिथिः । तद्व्रतकथा यथा,—
"पुरैकदा सुतार्थीनं सगरं भगवान् पतिम् ।
उवाच सत्यवाक्यज्ञ सगरः संशितेन्द्रियः ॥
सगर उवाच ।
राजन् दशरथेनैव राज्ञा कौशल्ययापि वा ।
कथात् कर्त्तव्यमस्माभिः पुत्रोत्पत्तौ जगत्पतिः ।
पूर्व्वोदयप्रकाशात्मा विस्तार्य्य कथयस्व मे ॥
ऋषीवाच ।
साधु पृष्टं त्वया सम्यक् सगरं द्विजकारकम् ।
पुरा दशरथः कौशल्या च समाहिनौ ॥
दम्पत्याभ्यां तथा पुत्रार्थं द्विजश्च विधिवत् ।
ततोऽजनि सुतः साधु स्त्रियः प्रत्यक्षतां गताः ॥
दशरथ उवाच ।
किमी कार्यं महाराज तपसस्ते ददामि तत् ॥
दशरथ उवाच ।
देवदेवाच्युतो देवः पुत्रत्वेन सुतस्तव ।
स्त्रियं विधाय कस्यां त्वं विष्णोरायतनप्रभुः ॥
इति श्रुत्वा महादेवस्तथेत्याह दयाकरः ।
पुत्रं प्रदास्यते देवस्तव देवो जनार्दनः ॥
श्रीरामनामा पुत्रोऽयं कौशल्यायां भविष्यति ।
दशमासे तु सम्प्राप्ते श्रीरामोऽयं भविष्यति ॥

इति श्रुत्वा तथा राजा दशरथः सुमौ ।
ततश्चक्रे वैष्णवयज्ञं स देवा यत्र तत्परः ॥
ततः काले महाराज्ञी गर्भं लेभे मनोहरम् ।
चैत्रे मासि सिते पक्षे नवम्यां श्रीभगे दिने ॥
अतिपुण्ये सुसंलग्ने जातो रामः स्वयं हरिः ।
पुनर्वस्वृक्षसंयुक्ता सा तिथिः सर्वकामदा ॥
श्रीरामनवमी प्रोक्ता कोटिसूर्य्यग्रहाधिका ।
अस्मिन् दिने महापुण्ये रामसुद्दिश्य भक्तितः ॥
यत्किञ्चित् क्रियते कर्म्म तदक्षयकरं स्मृतम् ।
उपोषणं नागरस्य पितृनुद्दिश्य तत्क्षणम् ॥
तस्मिन् दिने तु कर्त्तव्यं नरैः प्राप्तिमभीप्सुभिः ॥
तस्मिन् दिने महापुण्ये रामसुद्दिश्य भक्तितः ॥
अपैद्दैकान्त जातोऽसौ यावत् स्यादयनीदिनम् ॥
तैरेव स्यात् पुरश्चर्य्या दृश्यां भोग्यैर्दृढात् ॥
भक्ष्यभोज्यैश्च विविधैर्भक्ष्या द्राक्ष च दक्षिणाम् ॥
छलछद्मो भवेद्यत्र सद्यो रामः प्रसीदति ॥
यस्तु रामनवम्यान्तु मुद्दिश्य मर्त्यो दिवङ्गतः ॥
कुम्भीपाकेषु घोरेषु पच्यते नात्र संशयः ॥
कुर्य्याद्रामनवम्यां य उपोषणमतन्द्रितः ॥
न यैते माद्दशैरत्र स्वयं रामो भवेत्तु नः ॥
श्रीरामनवमी नाम पुण्यात् पुण्यतमव्रतम् ॥
इति श्रुत्वा सुसंतुष्टः सगरः पुनरब्रवीत् ।
विधिना केन कर्त्तव्यं व्रतं मे कमलोद्भव ॥ ७ ॥
ऋषीवाच ।
तत्पूर्व्वदिने स्नात्वा सङ्कल्पं कृत्वा निरामिषम् ।
त्यक्त्वा च योषितं सम्यगुपोषेत् स्वादिवे शुचौ ॥
प्रातः सङ्कल्पं कृत्वाथ स्नात्वा प्रातःक्रियां ततः ।
प्रातः स्नात्वा शुचिर्भूत्वा सङ्कल्पं विधिनाचरेत् ॥
प्रतिमायां घटे वापि पटे वा यन्त्रतोऽपि वा ।
आवाह्यामन्त्रितान्तु तुलयोपरिकल्पिता ॥
पूजा श्रीरामचन्द्रस्य कोटिकोटिगुणाधिका ।
कौशल्या पूजनीयाऽपि राजा चैव सतः परम् ॥
सङ्कल्पं पूजनीयञ्च राज्ञस्तादीन् विशेषतः ।
पूजयेत् परया भक्त्या परिवारं ततः परम् ॥
ततो महांश्च दिक्पालानस्त्राणि च पूजयेत् ।
उपरि सप्तपत्रे सुवर्णरौप्यताम्रमयीं वा तिथौ
तस्मै कर्णटके पूजनेमुद्दिशे भेषं ततो पूजयेत् ।
निर्दहेत् विधिवत् पश्चात्प्रसिद्धो सम्प्रदायीक्षा-
दृष्ट-
दानिभूतमभूतपूर्व्वमिदं सङ्कल्पितेषं मयः ।
ततो ब्राह्मादिकं कृत्वा दक्षार्थं विधिवत् ॥
सम्प्रार्थ्यैव दक्षादि भक्त्या पुष्पाञ्जलित्रयम् ।
सप्तपत्रे यानेषु अक्षया च यथेष्टतः ।
दक्षिणाश्च यथा पूजा कौशल्यादीनां यथेष्ट ।
ततः परन्तु प्रातः प्रार्थं कृत्वा विधानतः ।
रामं पूर्णावतारञ्च भक्त्या भक्त्या प्रपूजयेत् ॥
दक्षिणां विधिवद्दत्वा सर्वेभ्यश्च ब्राह्मणेभ्यः ।
भोजयित्वा ततो विप्रान् स्वयं भारकमाचरेत् ॥
ये चैनं प्रपठन्तीह शृण्वन्ति च विशेषतः ।
सर्वपापैः प्रमुच्यन्ते सर्वैश्वर्य्यसमन्विताः ॥
ब्रह्मलोके वैष्णवो भूत्वा सर्वैः विष्णौ भवेत् ।
रामचन्द्रं महावीरं स्वयमेव पुरुषोत्तमम् ॥

दूर्वादलश्यामरामस्तस्य रक्षाकरो भवेत् ॥
भक्त्या यः शृणुयान्नित्यं उत्साहः स भवेत् सदा।
वन्ध्या पुत्रवती सा च पतिचित्तानुवर्त्तिनी।
सपत्नीदर्पदलनी सा भवेन्नात्र संशयः ॥
दरिद्रो लभते वित्तं भीतो भवति निर्भयः।
यद्यदागतमांस्यस्य तीर्थस्नानादिकाः क्रियाः ॥
न रामनवमी-नाम-व्रतस्यैककला-समाः।
यस्मै कस्मै न दातव्यं न प्रकाश्यं कदाचन ॥
शिष्याय भक्तियुक्ताय शुचयेऽपि प्रदापयेत्।
शठाय परतन्त्राय विकत्थनरताय च ॥
भ्रमादपि न वक्तव्यं यदीच्छेदात्मनो हितम्।
मयेतत् कथितं वत्स तव स्नेहाद्व्रतोत्तमम् ॥
य इदं शृणुते भक्त्या श्रीरामनवमीव्रतम्।
सर्व्वपापप्रमुक्तस्य अन्ते ब्रह्मलयमाप्नुयात् ॥"
इति श्रीरामभक्तितरङ्गिण्यां ब्रह्मसनकसंवादे श्रीरामनवमीव्रतकथा समाप्ता ॥

श्रीलः, त्रि, (श्रीर्विद्यतेऽस्येति। श्री+लिभ्रादित्वात् कः।) लक्ष्मीवान्। इत्यमरः ॥ शोभायुक्तश्च ॥

श्रीलता, स्त्री, (श्रीविशिष्टा लता।) महाज्योतिष्मती। इति राजनिर्घण्टः ॥

श्रीवत्सः, पुं, (श्रीयुक्तं वत्सं वक्षो यस्य।) विष्णुः। विष्णुचिह्नविशेषः। स तु पक्षस्थशुक्लवर्णदक्षिणावर्त्तरोमावली। (यथा, रघुः।१०।१०।
"प्रभानुलिप्तश्रीवत्सं लक्ष्मीविभ्रमदर्पणम्।
कौस्तुभाख्यमणिं बिभ्रद्वक्षसोरसा ॥")
अर्हतां भेदः। इति हेमचन्द्रः ॥ मुनिभेदः। इति त्रिकाण्डशेषः ॥

श्रीवत्सकी, [न्] पुं, (श्रीवत्सकः श्रीवत्सवत् चिह्नमस्येति। श्रीवत्सक+इनिः।) वृक्षक्रावर्त्तभेदः। इति हेमचन्द्रः ॥

श्रीवत्सभृत्, पुं, (श्रीवत्सं बिभर्त्तीति। भृ+क्विप्।) विष्णुः। इति हेमचन्द्रः ॥

श्रीवत्सलाञ्छनः, पुं, विष्णुः। इत्यमरः। १।१।२९॥
"श्रीवत्सो लाञ्छनं चिह्नं यस्य श्रीवत्सलाञ्छनः।
यद्यस्तनयमहापुरुषलक्षणं श्वेतरोमावर्त्तविशेषः श्रीवत्स इति सर्व्वत्रे। श्रीवत्सो वृत्तवक्षस्तमविशेषः कौस्तुभवदिति क्षीरदासः।" इत्यमरटीकायां भरतः ॥

श्रीवत्साङ्कः, पुं, (श्रीवत्सः श्रीवत्सचिह्नं यस्य।) विष्णुः। इति शब्दरत्नावली ॥ (यथा, वृत्तसंहितायाम्। ४२। ३।
"शम्बरः क्षीरोदं गत्वा ये तुष्टुवुः सुरा ऊचुः।
श्रीवत्साङ्कं कौस्तुभमणिकिरणोद्भासितोरस्कम्।")

श्रीवराहः, पुं, (श्रिया वृक्षो वराहः।) विष्णुः। इति त्रिकाण्डशेषः ॥

श्रीवल्ली, स्त्री, (श्रीयुता वल्ली।) कण्टकवृक्षभेदः। सप्तपर्णः। श्रियवल्ली २ कण्टवल्ली ३ श्रीवल्ली ४ अम्बा ५ कटुफला ६ दुरारोहा ७। अस्या गुणाः। कटुत्वम्। अन्नत्वम्। वातश्लेष्मपहत्वञ्च। तत्फलं तैलत्वेपनमत्वं वपिष्ठत्वं परम्। इति राजनिर्घण्टः ॥

श्रीवाटी, स्त्री, नागवल्लीभेदः। इति राजनिर्घण्टः ॥

श्रीवारकः, पुं, (श्रियं वारयति कामयते इति। वृ+णिच्+ण्वुल्।) सितावरशाकः। इति राजनिर्घण्टः ॥

श्रीवासः, पुं, (श्रियं वरत्वृक्षं वासयतीति। वस+णिच्+घञ्।) सरलवृक्षरसः। टारपिन् इति भाषा। तन्निर्य्यासः। पायसः २ वृक्षधूपः ३ श्रीवेष्टः ४ सरलद्रवः ५। इत्यमरः ॥ तैलपर्णी ६ श्रीपिष्टः ७। इति जटाधरः ॥ श्रीवेष्टः ८। इति शब्दरत्नावली ॥ अस्य गुणाः।
"श्रीवासः सरलं पूतिः कुष्ठरुग्व्रणिमर्दकम्।
विष्टकः परमा मांसी देवदारु सुरा गरुम्।
सर्व्वेऽमी परमा लक्ष्मी रक्षोघ्ना ज्वरनाशगाः ॥"
इति राजवल्लभः ॥

अन्यत् श्रीवेष्टशब्दे द्रष्टव्यम् ॥ (श्रियो लक्ष्म्या वासः आश्रयस्थानम्।) पद्मम्। (यथा, राजेन्द्रकर्णपूरे। ४२।
"श्रीवासो यशसां पदं सुमनसामभ्यासदं सम्पदां वचागच्छति शीपरं नयनयोः काश्मीरमौनव्रतः ॥")
विष्णुः। इति मेदिनी ॥ शिवः। इति शब्दरत्नावली ॥

श्रीवासाः, [स्] पुं, (श्रियं सरलवृक्षं वासयतीति। वस+णिच्+असुन्।) सरलद्रवः। इत्यमरटीका ॥

श्रीविद्या, स्त्री, (श्रिया विद्या।) महाविद्याविशेषः। सा तु त्रिपुरसुन्दरी। तस्याः मूलविग्रहेः मन्त्रवाहुल्यभिया न लिखिताः। अथ श्रीविद्या। तत्र मेरुः। प्राणार्य्ये।
"सुमिचन्द्रः शिवो माया शक्तिः क्षणार्द्धमारगौ।
धर्म्मचन्द्रश्च विन्दुश्च भवार्द्धौ मेरुरुच्यते ॥
महात्रिपुरसुन्दर्य्या मन्त्रो मेरुसमुद्भवः।
सकला सुवनेशानी कामेशी बीजसंदृब्धम्।
अनेन सकला विद्याः कथयामि वरानने ॥
प्रथमस्तत्सूर्य्यवर्णोऽयं कलमर्धे सुलोचने।
वाग्भवं मध्यवर्णाढ्यं कामराजमधोऽयते ॥
मादनं शिवचन्द्राढ्यं शिवान्तं भीमलोचने।
कामराजमिदं भद्रे षड्वर्णं सर्व्वमोहनम् ॥
शक्तिबीजं वरारोहे चन्द्रार्द्धं सर्व्वमोहनम्।
एतान्युक्त्वा देवेशि कामः सर्व्वाङ्गसुन्दरः।
कामराजो भवेद्देवि विद्येयं ब्रह्मरूपिणी ॥"
अस्यार्थः। शक्तिरेकारः तूर्य्य ईकारः तेन ककार एकार ईकारलकारमहामाया वाग्भवकूटम्। शिवो एकारः चन्द्रः सकारः तेन एकारसकारलकारमहामाया इति कामराजकूटम्। चन्द्रः सकारः तेन सकारककारलकारमहामाया इति शक्तिकूटम्। तैन त्रिभिः कूटैः कामराजविद्येयम् ॥ अस्याः ध्यानं यथा,—
"बालार्कमण्डलाभासां चतुर्बाहुं त्रिलोचनाम्।
पाशाङ्कुशशरांश्चापं धारयन्तीं शिवां भजे ॥"
एवं ध्यात्वा मानसपूजादिकं कुर्य्यात्। इति तन्त्रसारः ॥

श्रीवृक्षः, पुं, (श्रीप्रदः श्रीप्रियो वा वृक्षः। शाकपार्थिवादित्वात् समासः।) अश्वत्थवृक्षः। इति हेमचन्द्रः ॥ बिल्ववृक्षः। यथा,—
"वृधे मासयुते पक्षे नवम्यामार्द्रयोगतः।
श्रीवृक्षे बोधयामि त्वां यावत् पूजां करोम्यहम् ॥"
इति तिथ्यादितत्त्वधृतश्रीदुर्गाबोधनमन्त्रः ॥ (विष्णोर्वक्षस्थलस्थशुभावर्त्तविशेषः। यथा, विष्णुपादादिकेशान्तवर्णनस्तोत्रे। २८।
"वक्षः श्रीवृक्ष-काम्यं मधुकरनिकरश्यामलं शार्ङ्गपाणेः
संसाराध्वश्रमार्त्तैरुपवनमिव यत् सेवितं तत् प्रपद्ये ॥"
अश्वस्य वृक्षावर्त्तः। इति माधवीकायां भल्लिनाथः। ५। ५६ ॥)

श्रीवृक्षकः, पुं, (श्रीवृक्ष एव। स्वार्थे कन्।) अश्वस्य वृक्षावर्त्तः। इति त्रिकाण्डशेषः ॥ (अस्य प्रमाणं माघे। ५। ५६। इत्यस्य टीकायां द्रष्टव्यम् ॥ ७ ॥)

श्रीवेष्टः, पुं, (श्रियः सरलवृक्षस्य वेष्टः निर्य्यासः।) सरलवृक्षस्य निर्य्यासः। तन्निर्य्यायः।
"श्रीवेष्टो वृक्षधूपश्च चित्रागन्धो रसायकः।
श्रीवासः श्रीरसो वेष्टो लक्ष्मीवेष्टस्तु वेष्टकः ॥
वेष्टसारो रसावेष्टः क्षीरशीर्षः सुधूपकः।
धूपाङ्गस्त्रिलपर्णश्च सरलाङ्गोऽपि षोडश ॥"
तद्गुणाः।
"श्रीवेष्टः कटुतिक्तश्च कषायः श्लेष्मपित्तजित्।
योनिदोषव्रणाजीर्णप्रसन्नाश्यानदोषनुत् ॥"
इति राजनिर्घण्टः ॥ * ॥
अपि च।
"श्रीवासः सरलः स्रावः श्रीवेष्टो वृक्षधूपकः।
श्रीवासो मधुरस्निग्धः स्निग्धोष्णस्तुवरः सरः ॥
पित्तासावतमूर्द्धाक्षिरुरोगकफापहः।
रक्षोऽश्रीखेदशैत्यघ्नयूकाकण्डूव्रणप्रणुत् ॥"
इति भावप्रकाशः ॥

श्रीशः, पुं, (श्रिया ईशः।) विष्णुः। (यथा, मुग्धबोधे।
"श्रीशोऽधिशेतेऽधिमधि स्थितोऽवि-
मध्यास्य लोकं मधुरामनूप।
यो द्वारकामध्युषितो विकुण्ठ-
मुपावसच्चावसतात् स कृष्णः ॥")
श्रीरामः। इति शब्दरत्नावली ॥

श्रीसंज्ञं, स्त्री, (श्रियः संज्ञा संज्ञा यस्य।) लवणम् इत्यमरः ॥

श्रीसहोदरः, पुं, (श्रियाः सहोदरः सहजातत्वात्।) चन्द्रः। इति केचित् ॥

श्रीहस्तिनी, स्त्री, (श्रीयुक्ता हस्तिनीव।) वृक्षविशेषः। हातिशुँड़ा इति भाषा। तत्पर्य्याय

भूरिश्रवाः २। इत्यमरः। नागदत्तः ३। इति शब्दार्णवः।

श्रु, भवौ। इति कविकल्पद्रुमः। (भा०-पर०-सक०-अनिट्।) श्रवति। रेफरहितोऽयमिति केचित्। अश्रवीत्। इति दुर्गादासः।

श्रु, न भवौ। श्रुवौ। इति कविकल्पद्रुमः। (भा०-पर०-सक०-अनिट्।) न, श्रवोति। रक्षांसीति पुराणि संज्ञाशब्दमपि। इति मुरारौ श्रवीद्वारा-शब्दमेदम्। संज्ञाशब्द मयाख्यातम्। इति शब्दरत्नावलिश्चात्। आख्यातशब्दस्य क्रिया-विशेषवचनत्वाकर्मवत्ते सतो शब्दहीनादिना न वा। इति दुर्गादासः।

श्रुवारः, पुं, विट्कुलदृष्टः। इति रत्नमाला।

श्रुविका, स्त्री, सन्निपाताकारः। इति रत्नमाला।

श्रुवं, क्लो, (श्रूयते जा यदिति। श्रु+क्तः।) श्राक्रम्। इत्यमरः। (यथा, रघुः। २। २१।

"श्रुवस्य यावाद्यमनसमर्थक-
काया धरेणा सुनि वैनि पार्थिवः।
अवेक्ष्य सारोमसमार्थमर्थवित्
स्वकार मायां रघुमात्तसाधनम्।")

अचलमोक्षरः। इति शब्दरत्नावली। (यथा, माघे। १। ५। ६।

"आत्तमाला प्रबन्धेन सभो
न मेधया न बहुधा श्रुतेन।"

पुं, आत्मिदेशसंज्ञायाः। इत्यजयः। श्रुतविशेषः। यथा, भागवते। २। ५। १६।

'श्रुतः कविर्हविर्यो वीरः सुबाहुर्महाबलः।
आत्मिदेशाः पुत्रेभ्यः प्रायच्छद्भः सोमर्क-
श्वरः।")

श्रुतः, त्रि, (श्रु+क्तः।) अवधृतः। इत्यमरः। श्राकर्णितः। इति मेदिनी। (यथा, रघुः। ११। ७८।

"न प्रातो न जया राजन् न च धारणिना
श्रुतः।")

श्रुतकीर्तिः, स्त्री, (श्रुता कीर्तिर्यस्याः।) यदुराज-शूरसेनकन्यायाम्। सा चेदिराज-पत्नी। यथा,

"श्रुतश्रवायां चेदीनां भविता दमघोषतः।
श्रुतसेनो महावीर्यस्तस्य पुत्रो भविष्यति।"

इति हरिवंशे ३७. अध्यायः।

श्रुतकीर्त्तिः, पुं। पौरवोक्तसंज्ञायां सप्तमेऽन्तर इन्द्रः। यथा, मार्कण्डेये। ९३। ९४। १९०।

"श्रुतकीर्त्तिः सुनीतिश्च सत्यजिच्च सुधर्म्मणः।
सुधर्म्मा च सुधर्म्मायां सप्तमे मनुवंशजाः।"

कीर्त्तिमति, त्रि। इति हेमचन्द्रः।

श्रुतदेवी, स्त्री, (श्रुतस्य शास्त्रस्य देवी।) सर-स्वती। इति हेमचन्द्रः।

श्रुतधरः, त्रि, (श्रुतं शास्त्रं धरति। श्रुत+धृ+ अच्।) शास्त्रार्थ-[illegible]-शास्त्रोक्त-[illegible]। यथा,—

"इन्द्रस्य सदृशं वेन श्रुतमाचेद बुध्यते।
तदहं कथयिष्यामि श्रुतबोधमविक्लवम्।'

इति तदृश्यत्वशब्दोक्तेः।

श्रुतर्षिः, पुं, (श्रुतप्रधान ऋषिः।) ऋषिविशेषः। स तु सुश्रुतादिः। इति विश्वकोशे। यथा,—

"संहिता कान्यचुःसार्वा सहिताभ्यः श्रुत-
र्षिभिः।
सामाख्याद्वे तथाथर्वे द्वापरे त्रिष्व।"

इति मात्स्ये १२० अध्यायः।

श्रुतश्रवोऽश्रुवः, पुं, (श्रुतश्रवसोऽश्रुवः।) अनेश्वर-भेदः। इति शारावली।

श्रुतश्रोणी, स्त्री, श्रवणा। इति भावप्रकाशः।

श्रुतादानं, क्लो, (श्रुतस्यादानम्।) मञ्जवाद्यः। इति शारावली।

श्रुताध्ययनसम्पन्नः, त्रि, (श्रुतस्य शास्त्रस्य अध्य-यने सम्पन्नः युक्तः।) धर्मशास्त्रज्ञः। यथा, याज्ञवल्क्यः।

"श्रुताध्ययनसम्पन्नाः कुलीनाः सत्यवादिनः।
राज्ञा सभासदः कार्याः सर्वे सिद्धे च ये
समाः।"

इति व्यवहारतत्त्वम्।

श्रुतान्वितः, त्रि, (श्रुतेन शास्त्रेण अन्वितः।) शास्त्रज्ञः। यथा,—

"अभूत्सुधी विबुधवरः परन्तपः
श्रुतान्वितो दशरथ इत्युदाहृतः।
गुणैर्युतं सुखमधितस्थुषं यं
जनाजनः पितरमुपानमत् स्वयम्।"

इति भट्टिः। १। २।

श्रुतार्थः, पुं, (श्रुतेनार्थः।) शास्त्रीयविषयीभूतार्थः। अवश्यमाचरणीयोऽर्थः। यथा,—

"श्रुतार्थस्य परित्यागादनुत्पादस्य कर्मणः।
प्रायश्चित्तं यथादिष्टं परिपृच्छा विदोधिका।"

इति प्रायश्चित्ततत्त्वम्।

(त्रि, श्रुतोऽर्थो येन सः। यथा, हरिवंशे। ११४। ९७।

"श्रुतार्थो देव युक्तस्त्वं यत्र यत्र
गिरां।")

श्रुतावुः, पुं, सर्वज्ञदेवोपरागविशेषः। स तु श्रुतस्य चतुर्दशपूर्वरः। यथा,—

"सामानसामारोषोऽभूत् सिद्धुरोधसकोपोऽभवत्।
सप्तः श्रुतावुः पुरोऽभूत् अनुप्रासकलोऽभवत्।"

इति माघे १४. सर्गः।

श्रुतिः, स्त्री, (श्रूयतेऽनयेति। श्रु+"सुविसृधृ-[illegible]।" ३। ३। १७। इत्यस्य वार्त्तिकोक्ता क्तिन्।) वेदः। (यथा, मनुः। २। १०।

"श्रुतिस्तु वेदो विज्ञेयो धर्मशास्त्रन्तु वै स्मृतिः।")

सर्वः। इत्यमरः। (यथा, भागवते। ८। ५। १६।

'सत्यो दयोऽथ तपसः प्रसूतिश्च
श्रुतिर्दमः।
श्रुतं च यज्ञाङ्गानि न दक्षाद्यैः।')

अनेकान्त शब्दार्थः श्रुतिर्योगे। इति हेम-चन्द्रः। श्रुतीश्वरशब्दे अस्याः श्रुतेः। यथा,—

"श्राद्धस्य गोचरो गन्धो गन्धमादिरपि स्मृतः।
तथा रसो रसप्रायाशाया अन्योऽपि च
श्रुतेः।"

इति भाषापरिच्छेदः।

कर्णस्य शुभाशुभशब्दमात्रे।

"रक्ताश्वपरुषस्पर्शकर्णाः स्युः पापलक्षणाः।
निर्मांसेषिपिटेभोगाः शुषा दृश्यकर्णकाः।
प्रभूतकर्णाश्च राजानो रोमकर्णाः शताधुषः।
दृश्यकर्णाश्च राजानो धनिनः परिकीर्त्तिताः।"

इति गारुडे ६६ अध्यायः।

(श्रु+भावे क्तिन्।) श्रोत्रकर्म। (यथा, भाग-वते। ८। ५। १६।

"यन्नामश्रुतिमात्रेण पुमान् भवति निर्मलः।
तस्य तीर्थपदः किंवा दासानामवशिष्यते।")

वाणी। इति मेदिनी। (यथा, रघुः। १।२७।

"वाग्मी यत्नपरस्तेषु सुतो सत्करणा
क्षिता।")

यज्ञयागादिकम्। इति शब्दरत्नावली। मनु-वाद्याचारभेदाः। इति हेमचन्द्रः। श्रोतृ इति भाषा। (यथा, शिशुपालवधे। १। १०।

"रणद्विरावैरुदनया नभस्वतः
पृथक्कृविभिन्नकुलिमपक्षतैः सरैः।")

सा च द्वाविंशतिप्रकारा यथा,—

"तान्त्री चाणनिका रवा च सुघोषा विपञ्ची
विचित्रा घण्टा
मातङ्गी चरघाख्या मधुकरी मैत्री शिवा
माधवी।
वाला गान्धारयी कला कलरवा भाषा विशाला
अथा
माधेति श्रुतयः पुराणकविभिर्द्वाविंशतिः
कीर्त्तिताः।

तान्त्री-विचित्रा-सुघोषी-विपञ्चिकास्वराः यथा।

षड्जी मध्यमा सुघोषी च भरतेन विपञ्चिके च।

विपञ्ची घण्टा चाणनिका त्रिवेणाम्
संज्ञायोगी अथमस्वरेण।
स्वरोऽपि माता मरुमालिकाम्
गान्धारनामा प्रथमः पृथिव्याम्।

मातङ्गी माधवी मैत्री शिवाषाजन्तु षष्ठजः।
कला कलरवा वाला गान्धारजाश्च पञ्चमः।
चरघाख्यामधुकरी रौद्राश्च मध्यमस्वरः।
भाषा ऋषभजा रौद्राश्च निषादः संप्रकीर्त्तितः।
सुविशालाः स्वराश्चैव सप्त कर्णाधिदेवताः।
ऋषौ च सुतरां मार्गी रौद्राश्च रौद्रसम्भवे।
मार्गे चतस्रो वक्ष्यन्ते तासां नामानि लक्षणम्।
क्षत्रिया वैश्यजा चैव तथा शूद्रा च चण्डा
अन्या।

तथा वैश्यजा ब्रह्मिका शूद्रजाश्च।
शूद्राश्च रौद्रजाश्चैव तथा ब्राह्मजा श्रुतिः।
रौद्रासु सुविशालाख्यं स्वरद्वयमुदाहृतम्।
क्षत्रियासु तथा चण्डा शूद्रजाश्च षड्जम्।
षड्जमध्यमगान्धारा ब्राह्मणीषु श्रुतेः।"

इति सङ्गीतदामोदरः।

अन्यच्च ।
'तीव्राक्रुसद्वतीमन्दाछन्दोवत्यस्तु षड्जगाः ।
दयावती रञ्जनी च रतिका रूपमे स्थिताः ॥
रौद्री क्रोधा च शान्धारे वज्रिकाथ प्रचारिणी ।
प्रीतिश्च मार्ज्जनीत्येता श्रुतयो मध्यमाश्रिताः ॥
क्षितौ रक्ता च सन्दीपन्यालापिन्यपि पञ्चमे ।
मदन्ती रोहिणी रम्येत्येता धैवतसंश्रयाः ।
उग्रा च क्षोभिणीति वै निषादे वसतः श्रुती ॥"
इति सङ्गीतरत्नाकरः ॥

श्रुतिकटः, पु, (श्रुतिं कटतीति । कट् + अच् ।) प्राचलोहः । चपिः । पापशोधनम् । इति मेदिनी ॥

श्रुतिकटुः, पुं, (श्रुतौ कटुः ।) कठोरशब्दः । अलङ्कारस्य दोषविशेषः । यथा,—
"श्रुतिकटुश्रुतसंस्कृतिरङ्गमोज्झितुचिता कविभिर्विसन्धिका ।" उदाहरणम् ।
"वाचा मधुरया तन्वि सितापाङ्गतरङ्गया ।
मनाग्वदनसङ्कोच्य कार्त्तार्थ्यं कुरु साद्यताम् ॥"
इति काव्यचन्द्रिका ॥

श्रुतिकथितः, त्रि, (श्रुतौ कथितः ।) श्रुत्युक्तः । वेदोक्तः । इति लोकप्रसिद्धिः ॥

श्रुतिजीविका, स्त्री, (श्रुतिरेव जीविका यस्याः ।) धर्म्मशास्त्रम् । यथा,—
"स्मृतिर्धर्म्मसंहिता च संहिता श्रुतिजीविका ।"
इति शब्दरत्नावली ॥
वेदजीवनोपायश्च ॥

श्रुतितत्परः, त्रि, (श्रुतौ तत्परः ।) सकर्णः । इति जटाधरः ॥ वेदाभ्यासरतश्च ॥

श्रुतिधरः, त्रि, (श्रुत्या श्रवणमात्रेण धरतीति । धृ + अच् ।) श्रुतिमात्रधारकः । श्रवणमात्राभ्यासकर्त्ता । (यथा, गीतगोविन्दे । १ । ४ ।
"सन्ति कोऽपि न विश्रुतः श्रुतिधरो धीरो कविः क्ष्मापतिः ॥")
तदौषधं यथा,—
धन्वन्तरिरुवाच ।
"इक्षिकर्षस्य वै मूलं गृहीत्वा चूर्णयेद्धर ।
सर्व्वरोगविनिर्मुक्तं चूर्णं पलशतं पिबेत् ॥
सक्षीरं भक्षितं कुर्य्यात् सप्ताहेन श्रुतिधरम् ।
नरं श्रुतिधरं शूरं गजेन्द्रगतिविक्रमम् ॥
मण्डूकपर्णीकाग्रं युक्तं दशशतावरी ।
गोदुग्धाज्याक्तितं विप्र सततं दुग्धभोजिनम् ॥
मधुसर्पिःसमायुक्तं चक्षुष्यमायुष्करं भवेत् ।
नष्टमर्थं मधुना सार्द्धं दशवर्षसहस्रियम् ।
कुर्य्यान्नरं श्रुतिधरं प्रमदागणवल्लभम् ॥"
इति गारुडे १६९ अध्यायः ॥

श्रुतिबर्जितः, त्रि, (श्रुत्या वर्जितः ।) बधिरः । इति जटाधरः ॥ वेदरहितश्च ॥

श्रुतिवेधः, पुं, (श्रुतेः कर्णस्य वेधो यत्र ।) कर्णवेधः । तस्य विहितकालो यथा दीपिकायाम् ।
"गो जन्मेन्दुमासाब्दयुग्मविषमाजाब्दसप्ताब्धिषु
मूलेऽर्के सहयुग्मविष्णुरुद्रभे स्वात्युत्तरादित्रये ।
सौम्येज्यायत्रिकोणकण्टकगते: पापेक्षिलाभारिगे-
रोनोऽब्दे श्रुतिवेध इत्यभिमते लग्ने तु काले शुभे ॥"
इति ज्योतिस्तत्त्वम् ॥

अन्यच्च । तत्र तिथयः रिक्ताभिन्नाः प्रशस्ताः । वाराः बृहस्पतिबुधशुक्राणां प्रशस्ताः । नक्षत्राणि अश्विनी रेवती हस्ता चित्रा पुनर्व्वसुधनिष्ठा मृगशिरः पुष्यः श्रवणानुराधा उत्तरफल्गुनी उत्तराषाढा उत्तरभाद्रपदस्वातीं । लग्नानि वृषतुलाधनुर्मीनसंज्ञकानि । अयुग्मवर्षं । जन्ममासचैत्रपौषाग्रहायणभिन्नमासाः प्रशस्ताः । शुक्लपक्षे चन्द्रतारादिशुद्धौ हरिशयनभिन्नकाले कालशुद्धौ श्रुतिवेधः कार्य्यः । इति ज्योतिषम् ॥

श्रुतिस्फोटा, स्त्री, (श्रुतिं स्फोटयतीति । स्फुट् + अच् । टाप् ।) कर्णस्फोटा लता । इति राजनिर्घण्टः ॥

श्रुवः, पुं, (स्रु + कः ।) यागः । इति जटाधरः ॥ सुवे, स्त्री । इति केचित् ॥

श्रुवा, स्त्री, स्रुवा । इति राजनिर्घण्टः ॥

श्रुवाहस्तः, पुं, विकङ्कतहस्तः । इति राजनिर्घण्टः ॥

श्रेढ़ी, स्त्री, अङ्कविशेषः । भिन्नं भिन्नं यत्किञ्चिद्द्रव्यादिमेकीक्रियते तद्गणनायाः श्रेढ्या मिश्रव्यवहारात्तद्गणनानन्तरमारब्धः श्रेढ़ीव्यवहारः । इति सुधीश्वरगणकठक्कुरलीलावतीटीकायां रङ्गनाथः । तस्याद्यसूत्रं यथा । अथ श्रेढ़ीव्यवहारे करणसूत्रम् ।
"सैकपदघ्नपदार्द्धमथैका-
द्यङ्कयुतिः किल संकलिताख्या ।
सा द्विगुणेन पदेन विनिघ्नी
स्यात् त्रिहृता किल संकलितैक्यम् ॥"
उदाहरणम् ।
"एकादीनां नवानानां पृथक् संकलितानि मे ।
तेषां संकलितैक्यञ्च प्रब्रूहि गणक द्रुतम् ॥"
न्यासः । १ । २ । ३ । ४ । ५ । ६ । ७ । ८ । ९ । लब्धान्येषां तेषां संकलितानि । १ । ३ । ६ । १० । १५ । २१ । २८ । ३६ । ४५ । अथ तेषां संकलितैक्यानि । १ । ४ । १० । २० । ३५ । ५६ । ८४ । १२० । १६५ । तस्य प्रेमसूत्रं यथा । करणसूत्रं सार्द्धमार्य्या ।
"पादाग्रगमिते गच्छे गुणवर्गफलक्षये द्विगुणे ।
समवृत्तानां संख्या तद्वर्गो वर्गवर्गश्च । खखपदोनौ स्यातां सार्द्धसमानाश्च विषमाणाम् ॥"
उदाहरणम् ।
"समानामर्द्धतुल्यानां विषमाणां पृथक् पृथक् ।
वृत्तानां यद् मे संख्यामनुपृच्छसि तद्धुतम् ॥"
न्यासः उत्तरो द्विगुणः गच्छः ८ सख्या समवृत्तानां संख्या २५६ । तथार्द्धसमानाश्च ६५२८० विषमाणाञ्च ४२८४९२०६० । इति लीलावती ॥

श्रेणिः, पुं, स्त्री, (श्रयति श्रीयते वा । श्रि + 'वहिश्रिश्रुयुद्रुस्रुभ्यो नः किदिति ।' उणा० ३ । ५१ । इति णिः ।) निश्छिद्रपंक्तिः । तत्पर्य्यायः । पंक्तिः २ श्रेणी ३ विश्लोकी ४ वीथी ५ आलिः ६ पालिः ७ आवलिः ८ आली ९ पाली १० आवली ११ वीथिः १२ वीथिका १३ राजी १४ राजिः १५ रेखा १६ लेखा १७ । इति शब्दरत्नावली ॥ (यथा, कुमारे । ५ । ६ ।
"न षट्पदश्रेणिभिरेव पङ्कजं
सशैवलाबाङ्गमपि प्रकाशते ॥")
समानश्रेणिसंहतिः । इति मेदिनी ॥ कोस्यानि इति इङ्गरेजीयभाषा ॥ सेकपात्रम् । इति विश्वः ॥

श्रेणिकः, पुं, मगधदेशीयराजविशेषः । इति हेमचन्द्रः ॥

श्रेणी, स्त्री, (श्रेणि + ऋदिकारादिति ङीष् ।) श्रेणिः । इति शब्दरत्नावली ॥ (यथा, रघुः । १ । ४१ ।
"श्रेणीबन्धात् पितृन्नङ्गिरसश्चमां तोरणस्रजम् ।
सारसैः कलनिर्ह्रादैः क्वचिदुन्नमितानना ॥")

श्रेयः, [स्] क्ली, (द्वयमनयोरतिशयेन प्रशस्यम् । प्रशस्य + ईयसुन् । "प्रशस्यस्य श्रः ।" ५ । ३ । ६० । इति श्रः ।) धर्म्मम् । मुक्तिः । इत्यमरः ॥ (चतुर्व्वर्गं एव श्रेयः । यथा, मनुः । २ । २२४ ।
"धर्म्मार्थावुच्यते श्रेयः कामार्थौ धर्म्म एव च ।
अर्थ एवेह वा श्रेयस्त्रिवर्ग इति तु स्थितिः ॥"
"धर्म्मार्थकामास्त्रितयः परम्परादिच्छन्त्रिवर्ग एव पुरुषार्थतया श्रेय इति विनिश्चयः । एवञ्च त्रयीचूत प्रत्युपदेशो न तत्त्रयीचूत । तत्त्रयीचूतान्तु मोक्ष एव श्रेयः इति षष्ठे वक्ष्यते ।" इति तट्टीकायां कुल्लूकः ॥) शुभम् । इति मेदिनी ॥ (यथा, रघुः । १ । ७८ ।
"प्रतिबध्नाति हि श्रेयः पूज्यपूजाव्यतिक्रमः ॥")

श्रेयसी, स्त्री, (द्वयमनयोरतिशयेन प्रशस्या । प्रशस्य + ईयसुन् । प्रशस्यस्य श्रः । उगितश्चात् ङीप् ।) हरीतकी । पाठा । करिपिप्पली । इत्यमरः ॥ रात्रा । इति विश्वः ॥ शुभयुक्ता च ॥

श्रेयांशः, पुं, वृत्तार्द्धविशेषः । इति हेमचन्द्रः ॥

श्रेयान्, [स्] त्रि, (द्वयमनयोरतिशयेन प्रशस्यः । प्रशस्य + ईयसुन् । "प्रशस्यस्य श्रः ।" ५ । ३ । ६० । इति श्रः ।) श्रेष्ठः । इत्यमरः ॥ (यथा, मनुः । १० । ११२ ।
"प्रतिग्रहाच्छिलः श्रेयांस्ततोऽप्युञ्छः प्रशस्यते ।")
शुभयुक्तश्च ॥

श्रेष्ठं, क्ली, (द्वयमेषामतिशयेन प्रशस्यः । प्रशस्य + इष्ठन् । "प्रशस्यस्य श्रः ।" ५ । ३ । ६० । इति श्रः ।) गोदुग्धम् । इति त्रिकाण्डशेषः ॥

श्रेष्ठः, पुं, (प्रशस्य + इष्ठन् ।) कुबेरः । शुभः । द्विजः । इति शब्दरत्नावली ॥ विष्णुः । इति तस्य सहस्रनामस्तोत्रम् ॥ (महादेवः । यथा, महाभारते तस्य सहस्रनामस्तोत्रे । १३ । १७ । ४ ।
"विश्वरूपः स्वयं श्रेष्ठो बलवीरो बली गयः ।")

श्रेष्ठः, त्रि, (प्रशस्य + इष्ठन् ।) प्रशस्तः । वरः । (यथा, रामायणे । २ । ३ । ९० ।

"इक्ष्वाकेश्च पितुः श्रेष्ठो बभूव भरतागजः ॥") तत्पर्य्यायः। श्रेयान् २ पुष्कलः ३ वरिष्ठः ४ वरेण्यः ५ प्रमुखः ६ अग्रः ७ अग्रहरः १० उत्तमः ११ प्रग्रहः १२ अनुत्तमः १३ अग्रीयः १४ प्रवेकः १५ अग्र्यः १६ अग्रियः १७। इति शब्दरत्नावली॥ अनवरः १८ अग्रिमः १९ प्राग्रः २० प्राग्रहरः २१ प्रवर्हः २२। इति जटाधरः॥ वृद्धः। ज्येष्ठः। इति शब्दरत्नावली॥

श्रेष्ठकाष्ठः, पुं, (श्रेष्ठं काष्ठमस्य।) शाकवृक्षः। इति राजनिर्घण्टः॥

श्रेष्ठा, स्त्री, (इयमासामतिशयेन प्रशस्या। इष्ठन्। टाप्।) स्त्रलपद्मिनी। इति राजनिर्घण्टः॥ मेदा। इति कैचित्॥ उत्तमा नारी च॥

श्रेष्ठाङ्गं, क्ली, (श्रेष्ठं अङ्गम्।) दृढाङ्गम्। इति राजनिर्घण्टः॥

श्रेष्ठाश्रमः, पुं, (श्रेष्ठ आश्रमः।) गृहस्थाश्रमः। आश्रमत्रयाणां पालकत्वात्॥

श्रेष्ठी, [न्] पुं, (श्रेष्ठं धनादिकमस्त्यस्येति। इनिः।) कुलोत्तमश्रिल्पी। यथा,—

"कुलिकस्तु कुली श्रेष्ठी कुलश्रेष्ठिनि शिल्पिनाम्॥"

इति जटाधरः॥

(यथा, वृहत्संहितायाम्। २६। १०।

"श्रेष्ठी सुवर्णपुष्पैः पद्मैर्विप्राः पुरोहिताः कृतदेः॥")

श्रै, क्षेदे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-अनिट्।) आयति रौद्राक्षोकः। इति दुर्गादासः॥

श्रै, स पचने। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-अनिट्।) स, श्रपयति। इति दुर्गादासः॥

श्रोण, ञ्र संघाते। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) ञ्र, अशुश्रोणत्। संघातो राशीकरणम्। इति दुर्गादासः॥

श्रोणः, पुं, (श्रोणयतीति। श्रोण संघाते+अच्। यद्वा, शृणोतीति। शृ अवयवे बाहुलकात् नः। इत्युणादिटीकायां उज्ज्वलदत्तः। १।६।) पङ्गुः। इत्यमरः॥

श्रोणा, स्त्री, (श्रोण संघाते+घञ्।) अवयवानघचम्। (यथा, भागवते। ८। १८। ५।

"श्रोणायां श्रवणद्वादश्यां सुतुर्ये ऽभिजिति प्रभुः। सर्वे नक्षत्रतारादयाश्चकुस्तत्प्रदक्षिणम्॥") काम्बिकम्। पक्षे, त्रि। इति कैचित्॥

श्रोणिः, स्त्री, (श्रोण संघाते+इन्। यद्वा, शृ-अवयवे+"वहिश्रिश्रुयुद्रु।" उणा०। ४। ५१। इसि णिः।) कटिः। इत्यमरः॥ (यथा, वृहत्संहितायाम्। ५६। ७।

"फलसारद्रुमोरस्का हंसहासास भिन्नगाः॥") सा तु गर्भगृहस्य मातृहयेन भवति। इति सुखबोधः॥ पत्न्याः। इति शब्दरत्नावली॥

श्रोणिफलं, क्ली, (श्रोणिः फलं फलकमिव।) कटिः। इति राजनिर्घण्टः॥

श्रोणिफलकं, क्ली, (श्रोणिफल+स्वार्थे कन्।) कटिपार्श्वः। तत्पर्य्यायः। कटः २। इत्यमरः॥ फलकं चर्म्म तदाकारत्वात् श्रोणिः फलकमिव श्रोणिफलकम्। कथ्यते व्याप्नियते कटः कटे वर्षावरणयोः अच्। कटिः। इति कैचित्। इति भरतः।

श्रोणिबिम्बं, क्ली, कटिरूपम्। इति धनञ्जयः॥

श्रोणिसूत्रं, क्ली, (श्रोणिस्थितं सूत्रम्।) खड्गबन्धनसूत्रम्। परतला इति हिन्दीभाषा॥ कटिबन्धनसूत्रम्। इति कैचित्॥ घुनघुनी इति भाषा॥

श्रोणी, स्त्री, (श्रोणि+वा ङीष्।) कटिः। पत्न्याः। इति भरतदिरूपकोषः॥

श्रोतः, [स्] क्ली, (श्रु+असुन्। तुट् च।) कर्णः। नदीवेगः। इति जटाधरः॥ इन्द्रियम्। यथा,

"हृषीकमक्षं करणं श्रोतः खं विषयेन्द्रियम्॥"

इति हेमचन्द्रः॥

श्रोतव्यं, त्रि, (श्रु+तव्य।) श्रवणीयम्। यथा,—

"व्याख्येतव्यं न चान्येन ब्राह्मणं क्षत्रियं विणा। श्रोतव्यमिह मूढेन नाधीतं कदाचन॥"

इति तिथ्यादितत्त्वम्॥

श्रोता, [तृ] त्रि, (शृणोतीति। श्रु+तृच्।) श्रवणकर्त्ता। यथा,—

"व्याख्येयस्य च पठ्यस्य वक्ता श्रोता च दुर्लभः॥"

इति हितोपदेशः॥

पुराणश्रोतृत्वे प्रमाणमाह।

"पठेदर्धं बुधमानः श्रावयेदं नरोत्तमे। श्रोता तु प्राङ्मुखो भूत्वा शृणुयात् भक्तितत्परः॥"

इति पाद्मे पातालखण्डे ७१ अध्यायः॥

श्रोत्रं, क्ली, (श्रूयतेऽनेनेति। श्रु+"हुयामाश्रुभसिभ्यस्त्रन्।" उणा०। ४। १४७। इति त्रन्।) कर्णम्। इत्यमरः॥ (यथा, रघुः। ७। १६।

"इत्युक्तवा पौरवधूसुखेभ्यः शृण्वन् कथाः श्रोत्रसुखाः कुमारः॥")

श्रोत्रियता। इति त्रिकाण्डशेषः॥

श्रोत्रियः, पुं, (छन्दोऽधीते इति। छन्दस्+"श्रोत्रियं-छन्दोऽधीते।" ५। २। ८४। इति घनप्रत्ययेन साधुः।) वेदाध्येतब्राह्मणः। तत्पर्य्यायः। छान्दसः २। इत्यमरः॥ श्रूयते धर्म्माधर्म्मावनेन इति श्रोत्रो वेदः। तमधिते वेत्ति वा श्रोत्रियः। छन्दोऽधीते इत्यर्थे इये छन्दःशब्दस्य श्रोत्रादेशः। इति परे। छन्दो वेत्ति अधीते वा छान्दसः। इति पूर्व्वेण यञ्। इति भरतः॥ ॥ तस्य लक्षणं यथा,—

"जन्मना ब्राह्मणो ज्ञेयः संस्कारैर्द्विज उच्यते। विद्याभ्यासी भवेद्विप्रः श्रोत्रियस्त्रिभिरेव हि॥"

इति पाद्मे उत्तरखण्डे ११६ अध्यायः॥ मात्स्ये मार्कण्डेयपुराणे चाप्येवम्॥ ॥ अपि च।

"एकां शाखां सकल्पां वा षड्भिरङ्गैरधीत्य च। षट्कर्म्मनिरतो विप्रः श्रोत्रियो नाम धर्म्मवित्॥"

इति दानकमलाकरः॥

श्रोत्रियता, स्त्री, (श्रोत्रियस्य भावः। श्रोत्रिय+तल्।) श्रोत्रियधर्म्मः। तत्पर्य्यायः। श्रोत्रम् २। इति त्रिकाण्डशेषः॥

श्रौतं, क्ली, (श्रुतौ भवम्। श्रुति+अण्।) गार्हपत्याहवनीयदक्षिणाग्नयः। यथा,—

"त्रयो ये गार्हपत्याहवनीयदक्षिणाग्नयः। इदमग्निचितं श्रौतं चेताग्निहोत्रमित्यपि॥"

इति जटाधरः॥

श्रौतः, त्रि, (श्रुतौ भवः। श्रुति+अण्।) श्रुतिविहितधर्म्मादिः। यथा,—

"धर्म्मश्चैर्विहितो धर्म्मः श्रौतः स्मार्त्तो द्विधा द्विजैः। दानाग्निहोत्रसम्बन्धमिष्या श्रौतस्य लक्षणम्॥ स्मार्त्तो वर्णाश्रमाचारो यमेषु नियमेषुतः। पूर्व्वेषो वेदविद्भिश्च श्रौतं समृषयोऽब्रुवन्॥ ऋचो यजूंषि सामानि ब्रह्मणोऽङ्गानि या श्रुतिः। मन्वन्तरस्यातीतस्य स्मृत्वा तामब्रुवन्मनुः॥ ततः स्मार्त्तः स्मृतो धर्म्मो वर्णाश्रमविभागजः। एवं वै द्विविधो धर्म्मः शिष्टाचारः स उच्यते॥ श्रुत्यावेदात्मकः श्रौतः स्मार्त्तो वर्णाश्रमात्मकः॥"

इति मात्स्ये १२० अध्यायः॥

अपि च। अधिकरणमालालक्ष्माधवाचार्य्यधृतपराशरभाष्ये शातातपः।

"श्रौतं कर्म्म स्वयं कुर्य्यादन्योऽपि स्मार्त्तमाचरेत्। अशक्तौ श्रौतमप्यन्यः कुर्य्यादाचारमन्वतः॥"

इति तिथ्यादितत्त्वम्॥

श्रौत्रं, क्ली, (श्रोत्रमेव। प्रज्ञादित्वात् अण्।) कर्म्म। (श्रोत्रियस्य भावः कर्म्म वा। "ह्रायनान्तयुवादिभ्योऽण्।" ५। १। १३०। इत्यण्। "श्रोत्रियस्य यलोपश्च वाच्यः।" इति यलोपः।) श्रोत्रियकर्म्म। तत्पर्य्यायः। श्रौत्रियता २। इति शब्दरत्नावली॥ (श्रोत्रस्य भावः कर्म्म वा। अण्।) श्रोत्रकर्म्म च॥ (श्रोत्राणां समूहः। "भिक्षादिभ्योऽण्।" ४। २। ३८। इति अण्॥)

श्रौषट्, अ. देवप्रविदानम्। इत्यमरः॥ देवप्रविदानं इत्यनेनायं मन्त्रः सूचितः। इति भरतमल्लम्॥

श्लक्ष्णं, क्ली, (श्लिष्यं श्लक्ष्णा श्लक्ष्णा यस्य।) पद्मम्। इति कैचित्॥

श्लक, ङ ङ सर्पे। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-सेट्।) अन्तःस्थलतीयवर्णयुक्तादिः। ङ, श्लङ्कते। ङ, श्लङ्कते। सर्पो गतिः। इति दुर्गादासः॥

श्लक्ष्ण, त्रि, (श्लिष्य श्लालिङ्गने+"श्लिषेरक्षोपधायाः।" उणा० ३। १६। इति क्नः। अकारोपधायाः।) अल्पम्। इत्यमरः॥ मनोहरम्। इत्युणादिकोषः॥ (यथा, मनुः। २। १५६।

"अहिंसयैव भूतानां कार्य्यं श्रेयोऽनुशासनम्। वाक् चैव मधुरा श्लक्ष्णा प्रयोज्या धर्म्ममिच्छता॥"

क्षिप्त

क्षीरं, क्षी, पुंसकम्। दति रायमुकुटः।
०, क्षि, पुंसकम्। (अर्थे कन्।) क्षीरकम्।
क्षीरकन्द, [प] पुं, (क्षीरा क्षीरवत् कन्दः।) आलुकन्दः। दति राजनिर्घण्टः।
दुग्धकन्दकम्।
क्षुद्र, ए वर्षे। दति जटाधरः। (या०-पर०-अक०-सेट्।) आत्मम्भरीत्वपुंसकत्वादि। ए, पुंसकम्। दति दुर्गादासः।
क्षुध्, ध् क्षौ ईक्षणे। दति कविकल्पद्रुमः। (क्षुधा०पुरा०-पर०-अक०-सेट्।) आत्मम्भरीत्वपुंसकत्वादि। क, क्षुधति। दति दुर्गादासः।
क्षुधा, क्षौ, आलिङ्गनम्। दति त्रिकाण्डशेषः।
क्षुध्, क्षि, (क्षिप्+क्सः।) क्षौद्रपुंसकत्वादिः। मिताक्षरैकवाक्यतयाख्यानम्। तस्य लक्षणं यथा,—
"क्षिपतिक्षमक्षिणक्षेत्रैकवाक्यतामिति क्षः।"
दति सरस्वतीकण्ठाभरणम्।
क्षौद्रं, क्षौ, (क्षौद्रस्य क्षुद्रजन्तोरिदमिति। दृषोदरादित्वात् साधुः।) क्षौद्रपादादि। मौद दति भाषा। तत्पर्यायः। माक्षिकौक्षम् २। दति हैमचन्द्रः। (यथा, आर्यासप्तशत्याम्।

क्षेप

क्षौद्रमिति क्षेपः। ए।
"धातूरेरवनिर्मुक्षीवर्षाभूस्त्रिमुखर्षयैः।
प्रथैः क्षौद्रं क्षिति शिरोत्तमपि शास्त्रतम्।
यवाधमपि यावत्तं क्षौद्रं शिरकान्तकम्।
सर्वेषं गदहरादावालानविधेः क्षेपनात्।
सालक्ष यवरसो गाढः। ३।
यवक्षाम्भूमयवाभा-कल्कं सर्पेण वारिणा।
संसृष्टं सवसोपेतं क्षिप्तं क्षौद्रं हरेत्।४।
ज्ञातोष्टयवक्षाकाथं गोमूत्रेण पुनः पिबेत्।
क्षौद्रहानां विनाशाय मेदोगोधनिहन्तये। ५।
दशमी गुडसंयुक्ता गोमूत्रेण विवेचनः
वर्षोत्थं क्षौद्रं क्षति यदुक्तं विदुषाम्।६।
वर्षाभूस्त्रिवयाभूर्वं विष्वाया रक्त योजितम्।
सप्तौद्रं क्षौद्रं त्रिधात् शिरोत्थं क्षौद्रं जयेद्रुतं।
यवार्थेनेनसिद्धा चरोक्तौ गोमूत्रा पिबति।
क्षौद्रविस्मगुडो भक्षणौ यवरसेन।"

श्लेषः

"अलङ्कारः शृङ्गाकरनरकपालं परिजनो
विशीर्णाङ्गो भङ्गी वसु च तव एको बहुवयाः।
अवश्येयं स्थाणोरपि भवति सर्वामरगुरो-
र्विधौ वक्रे मूर्द्धि स्थितवति वयं के पुनरमी॥
पृथुकार्ष्णस्परपात्रं भूषितनिःश्रेयपरिच्छदं देव।
विलसत्करेणुगहनं चम्पति समभावयोः सदनम्॥
भक्तिप्रकटविलोकनप्रणयिनी नीलोत्पलस्पर्द्धिनी
ध्यानालम्बनतां समाधिनिरतैर्नीते हितप्राप्तये।
लावण्यैकमहानिधी रसिकतां लक्ष्मीदृशो-
स्तन्वती
युष्माकं कुरुतां भवार्त्तिशमनं नेत्रे तनुर्वा
हरेः॥"

एष एव वचनश्लेषोऽपि।

"महदे सुर सन्वस्मे तमवसमासं गमागमा
हरसे।
हर बहु सरसं तं चित्तमोहमवहर उमे
सहसा॥

अयं सर्व्वाणि शास्त्राणि वृद्धि श्लेषु च वक्ष्यति।
सामर्थ्यसूचनात्राणां भिन्नाभाश्च वृत्तयः॥
रणनिरगमनौचे: पादप्रहावलोक-
श्रवणसमयपरापा पूर्वसम्पत्सहस्रम्।
प्रथमनिवहमध्ये जातु चित्तप्रसादा-
दहसुचितरुचिः स्यान्नन्दिना सा तथा मे॥
सर्व्वस्वं हर सर्व्वस्य त्वं भवच्छेदतत्परः।
गयोपकारसाम्मुख्यमायासि तनुवर्त्तनम्॥
भेदाभावात् प्रकृत्यादेर्भेदोऽपि गमको भवेत्॥"
नवमोऽपीत्यपिभिन्नक्रमः। उदाहरणम्।
"योऽसक्तं परगोत्राणां पक्षच्छेदक्षमक्षमः।
अतकोटिदृतां बिभ्रद्विबुधेन्द्रः स राजते॥"
अत्र प्रकरणादिनियमाभावात् द्वापप्यर्थौ वाच्यौ।
ननु खरित्यादिगुणभेदात् भिन्नप्रयत्नोद्घाट्यत्वात्
नदभेदादभिन्नप्रयत्नोद्घाट्यत्वाच्च ग्रन्थानां वर्ण्ण-
नियमेनालङ्कारान्तरप्रतिभोत्पत्तिहेतुः। ग्रन्थ-
श्लेषोऽर्थश्लेषश्चेति द्विविधोऽप्ययमर्थालङ्कारमध्ये
गणितोऽन्यैरिति कथमयं ग्रन्थालङ्कारः।
उच्यते। इह दोषगुणालङ्काराणां ग्रन्थार्थगत-
त्वेन यो विभागः सोऽन्वयव्यतिरेकाभ्यामेव
व्यवतिष्ठते। तथा हि कष्टत्वादिगाढ़बन्धप्रसाद-
त्वयो अर्थत्वादिप्रौढ़त्वानुप्रासादयः ग्रन्थावयव-
भावानुविधायित्वादेव ग्रन्थार्थगतत्वेन व्यवस्था-
प्यन्ते। तथा हि।
"स्वयञ्च पल्लवानाम्रभास्वत्कर्विराजिता।"
इत्यभङ्गश्लेषः। प्रभासमन्वे वा त्वापफलयुक्ते
स्थितप्रदेशे सभङ्गग्रन्थश्लेषयोरिति द्वावपि ग्रन्थै-
कसमाश्रयाविभिन्नयोरपि ग्रन्थश्लेषत्वमुपपन्नम्।
न त्वार्थस्यार्थश्लेषत्वम्। अर्थश्लेषस्य तु च विषयः
यत्र ग्रन्थपरिवृत्तेरपि न श्लेषत्वहानिः।
यथा,—
"श्लोकेनोक्तमिमायाति श्लोकेनायात्यधोगतिम्।
अहो खलमयी सृष्टिर्लोकेः खलस्य च॥"
न चायमुपमाप्रतिभोत्पत्तिश्लेषः श्लेषः। अपि
तु श्लेषप्रतिभोत्पत्तिहेतुरुपमा। तथा हि।

श्लेष्मघ्न

यथा कमलमिव मुखं मनोज्ञमेतत् कपतितरा-
मित्यादौ गुणसाम्ये क्रियासाम्ये उभयसाम्ये वा
उपमा तथा सकलकलं पुरमेतच्छ्रान्तं संप्रति
च सितांशुबिम्बमिवेत्यादौ ग्रन्थमात्रसाम्येऽपि
सा युक्तैव तथा च्युक्तं रुद्रटेन। स्फुटं
अर्थालङ्कारावेतौ उपमासमुच्चयौ किन्तु।
आश्रित्य ग्रन्थमात्रं सामान्यमिहापि सम्भवत
इति। न च कमलमिव मुखमित्यादि साधा-
रणधर्म्मप्रयोगशून्य उपमाविषय इति वक्तुं
युक्तं पूर्णोपमाया निर्विषयत्वापत्तेः। देवत्वमेव
पातालमाप्तानां त्वं निबन्धनम्। त्वयामरमरुद्-
भूमिरेको लोकत्रयात्मकः। इत्यादिश्लेषस्य
चोपमालङ्कारविविक्तोऽपि विषयः। इति
द्वयोर्योगे सङ्कर एव उपपत्तिपर्य्यालोचने तु
उपमाया एवायं युक्तो विषयः अन्यथा विष-
यापहार एव पूर्णोपमायाः स्यात्। न च
अविद्धसुन्दरी नित्यं मखलावण्यबिन्दूकेत्यादौ
विरोधप्रतिभोत्पत्तिहेतुः श्लेषः। अपि तु श्लेष-
प्रतिभोत्पत्तिहेतुर्विरोधः। न ह्यत्रार्थद्वयप्रति-
पादकः ग्रन्थः श्लेषः द्वितीयार्थस्य प्रतिभात-
मात्रस्य प्ररोहाभावात्। न च विरोधाभास
एव विरोधः। श्लेषाभास एव श्लेषस्तस्मादेव-
मादिषु वाक्येषु श्लेषप्रतिभोत्पत्तिहेतुरलङ्कारा-
न्तरमेव साधीयः। तथा च सर्व्वप्रसक्ता मणि-
र्गाण्यः कविरिव स्वप्नश्लोको देव मघान् भवान्।
"अनुरागवती सन्ध्या दिवसस्तत्पुरःसरः।
अहो देवगतिश्चित्रा न तथापि समागमः॥
आदाय शपमचलं छलया हीनं गुणं विषम-
दृष्टिः।
पश्चिमपयुतधुरो वहमभाङ्गीन्नमस्तस्मै॥"
इत्यादावेकदेशविवर्त्तिरूपश्लेषव्यतिरेकसमासो-
क्तिविरोधत्वसूचितं न तु श्लेषत्वं ग्रन्थश्लेष इति
बोध्यते। अर्थालङ्कारमध्ये च वक्ष्यत इति
कोऽयं नयः किन्तु वैचित्र्यमलङ्कारः इति यत्रैव
कविप्रतिभासंरम्भगोचरस्तत्रैव विश्रान्तेति
श्लेषालङ्कारभूमिः। अर्थसुखमपेक्षित्वमेतेषां
ग्रन्थानामिति चेत् अनुप्रासादीनामपि तथेति
तेऽप्यर्थालङ्काराः किं गौण्यमे रसादिवत्प्रधान-
स्वरूपवाच्यविशेषयपेक्षेत्यनुप्रासादीनामलङ्का-
रतां ग्रन्थगुणदोषाणामप्यर्थापेक्षयैव गुणदो-
षता। अर्थगुणदोषालङ्काराणां ग्रन्थापेक्षयैव
व्यवस्थितिरिति तेऽपि ग्रन्थगतत्वेनोच्यन्ताम्।
विधौ वक्रे मूर्द्धि स्थितवतीत्यादौ च वर्णादि-
श्लेषे एकप्रयत्नोद्घाट्यत्वेऽर्थश्लेषत्वं ग्रन्थभेदेऽपि
प्रसज्यप्रसज्यभेदादि स्वयं विचार्य्यम्। इति
काव्यप्रकाशे ग्रन्थालङ्कारनिर्णयो नाम ९ उल्लासः।

श्लेष्मकः, पुं, (श्लेष्मा एव। स्वार्थे कन्।) कफः।
इति ग्रन्थचन्द्रिका।

श्लेष्मा, स्त्री, (श्लेष्माणं हन्तीति। हन+टक्।
अभिघातात् टाप्।) मल्लिका। केवड़ा। इति
विश्वभेदिनी। श्लेष्मणामके, त्रि।

श्लेष्मा

श्लेष्मान्ती, स्त्री, (श्लेष्माणं हन्तीति। हन+टक्।
टित्वात् ङीप्।) ज्योतिष्मती। इति जटा-
धरः॥ मल्लिका। इति मेदिनी॥ त्रिकटुः।
इति ग्रन्थरत्नावली॥

श्लेष्मलः, त्रि, (श्लेष्मा अस्त्यस्येति। श्लेष्मन्+
"लोमादिपामादिपिच्छादिभ्यः मनेलचः।"५।
२।१००। इति नः।) कफी। इत्यमरः॥

श्लेष्मला, स्त्री, (श्लेष्मन्+पामादित्वात् नः। टाप्।)
वृक्षविशेषः। यथा,—
"गुरुरूक्षत्वस्तर्पी च श्लेष्मला च वृषापि च।"
इति ग्रन्थमाला॥

श्लेष्मलः, त्रि, (श्लेष्मास्त्यस्येति। श्लेष्मन्+"सिध्मा-
दिभ्यश्च।" ५।२।९७। इति लच्।) श्लेष्म-
युक्तः। इत्यमरः॥

श्लेष्मलः, पुं. (श्लेष्मन्+लच्।) वृक्षविशेषः। बहु-
यार इति ख्यातः। इति ग्रन्थचन्द्रिका॥

श्लेष्मलः, पुं, (श्लेष्माणं हन्तीति। हन+कः।)
कट्फलवृक्षः। इति ग्रन्थचन्द्रिका। कफ-
नाशके, त्रि॥

श्लेष्मा, [न्] पुं, (श्लिष+"सर्व्वधातुभ्यो मनिन्।"
उणा० ४।१४४। इति मनिन्।) कफः।
इत्यमरः॥ तस्य प्रकोपहेतुर्यथा,—
"गुरुमधुररसातिस्निग्धदुर्गेक्षुभक्ष्य-
नवदधिदिननिद्रापूपसर्पिःप्रपूरैः।
तुहिनपतनकाले श्लेष्मणः संप्रकोपः
प्रभवति दिवसादौ भुक्तमात्रे वसन्ते॥"७॥
तस्य लक्षणं यथा,—
"स्निग्धं मधुरास्वादा शिशिरता शीतलं
प्रसेको मल-
प्राचुर्य्यं स्थिरता रसस्य सवणः कण्डूरतिस्वप्नता।
आलस्यं चिरकारिता कठिनता श्लेष्मोद्भवानां
स्निग्धता
तन्द्रा बहुप्रदेहकासगुरुता एताः कफोक्ता
गुणः॥"७॥
अस्य प्रशमनाकारणं यथा,—
"गुरुशीतमृदुस्निग्धं मधुरस्थिरपिच्छिलाः।
श्लेष्मणः प्रशमं यान्ति विपरीतगुणैर्गुणाः॥"
रूक्षोष्णतीक्ष्णकषायतिक्तकटुकक्षायामनिलीषण-
स्त्रीसेवाध्वनियुद्धजागररतिक्रीड़ापदाघातनम्।
धूमातपाग्निशिरोविरेकवमनस्वेदोपवासादिकं
नागाधारविधारभेषजमिदं श्लेष्मान्वयं
जयेत्॥"७॥
स च षड्विधो यथा,—
"अवलम्बक इत्येकः क्लेदकः श्लेष्मकोऽपरः।
बोधकस्तर्पकश्चेति श्लेष्मा षड्विधः स्मृतः॥"८॥
एतेषां लक्षणानि यथा,—
"कफधात्वाशु श्लेष्माणं यत् करोत्यवलम्बनम्।
ततोऽवलम्बकाख्यातिं श्लेष्मा प्राप्नोत्युरःस्थितः॥१॥
आमाशयाश्रितः सोऽम्लक्लेदनात् क्लेदकः स्मृतः।
२।
श्लेष्मकः श्लेष्मणात् सर्म्मः स च सन्धौ अव-
स्थितः॥३॥

रसनावस्थितस्यास्य बोधको रसबोधनात् ।७।
शिरसि प्रस्थितत्वाच्च तर्पको नेत्रतर्पणात् ।"५॥
अस्य स्थानानि ।
"उरःकण्ठशिरःक्लोमपर्व्वाण्यामाशयो रसः ।
मेदो घ्राणञ्च जिह्वा च कफस्थानान्यतः परम् ।"
तत्प्रकृतिलक्षणम् । यथा,—
"गम्भीरवृद्धिः श्लक्ष्णाङ्गः स्निग्धकेशो महाबलः ।
स्वप्ने जलाशयालोकी श्लेष्मप्रकृतिको नरः ।७०।
दोषो वस्तुः स्थिरत्वञ्च गौरवं दृश्यता बलम् ।
क्षमा धृतिर्लोभश्च कफकर्म्माविकारजम् ।"
इति सुखबोधः ॥७०॥

श्लेष्मकरद्रव्याणि यथा,—
"भोजनानन्तरं स्नानं जलपानं विना क्षुधा ।
तिलसैलं स्निग्धतैलं स्निग्धमामलकीद्रवम् ॥
पर्य्युषितान्नं तक्रञ्च पक्वरम्भाफलं दधि ।
मायाशुष्ककरीतोयं स्निग्धखञ्जनसेवनम् ॥
नारिकेलोदकं क्षुण्णान्नं पर्य्युषितं जलम् ।
तरुणशुष्ककदलं सुपक्वकर्कटीफलम् ॥
ज्ञातक्वाथञ्च वर्षासु शूलकं श्लेष्मकारणम् ।
तच्छलं ब्रह्मवर्च्चो च मद्यहैर्य्यविनाशनम् ।"७१॥
इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे १६ अध्यायः ॥
अपि च । एरण्डतैलम् १ अनूपदेशभवादि २ वार्ष्णिकपानीयम् ३ प्राक्खण्डजलम् ४ सामान्यशालिधान्यम् ५ माषः ६ अतसी ७ नूतनधान्यम् ८ मधुरनारीचणकम् ९ कषटशाकम् १० कलम्बीशाकम् ११ उत्पादिकाशाकम् १२ मध्यमकुशाकुफलम् १३ चलादुफलम् १४ श्वेतार्यशुक्लफलम् १५ पैलानम् १६ दीर्घपटोलिका १७ चलादुनाड़िका १८ पिण्डालुकम् १९ करीषगलाक्षक्षितिवेशुभ्यो जातं कुचिकाशाकम् २० विशेषतः पलाण्डुजातसंस्वेदजशाकम् २१ मधुकुकुटिका २२ वहुवारफलम् २३ वालात्मिकाफलम् २४ चौचकम् २५ पक्वकण्टाफलम् २६ कण्टाफलानि २७ पक्वदलम् २८ तावन्मत्स्यः २९ प्राकरमत्स्यः ३० घृतितमत्स्यः ३१ लवणभावितमत्स्यः ३२ भाकुटमत्स्यः ३३ पाठीनमत्स्यः ३४ शिलिन्ध्रमत्स्यः ३५ सेकलिमत्स्यः ३६ नरमत्स्यः ३७ कर्कटफलमत्स्यः ३८ शुक्तिमत्स्यः ३९ शङ्खीमत्स्यः ४० चिङ्गटमत्स्यः ४१ वाघमत्स्यः ४२ चिङ्गटीमत्स्यः ४३ गवाचीमत्स्यः अर्थात् पाँकालमत्स्यः ४४ कृष्णिङ्गमधिनांसम् ४५ तावत्क्षीरम् ४६ आमदुग्धम् ४७ आविकदधि ४८ माहिषदधि ४९ खाडुदधि ५० अजदधि ५१ तावद्घृतम् ५२ माहिषघृतम् ५३ तावद्दिक्षु ५४ विशेषतो भीरुनामकेक्षु ५५ कान्तारीक्षु ५६ इक्षुखण्डितम् ५७ इक्षुखण्ड ५८ नवान्नम् ५९ चिपिटः ६० हसपूरः ६१ पायसः ६२ शष्कुली ६३ सरसगुवाकफलम् ६४ मधुररसः ६५ अतिभक्ष्याखभोजनम् ६६ शवशरसः ६७ शीतवीर्य्यम् ६८ कुरुण्टकपुष्पम् ६९ घृष्टिकापुष्पम् ७० मण्डूकपुष्पम् ७१ तावच्छुरसः ७२ तावच्छुमञ्चा ७३ । इति द्रव्यगुणात् संग्रहीतम् ॥
श्लेष्मनाशकद्रव्याणि यथा,—
"वह्निखेदं भृष्टभङ्गं पक्वतैलं विशोषकम् ।
भ्रमणं शुष्कभक्षञ्च शुष्कमक्षहरीतकी ॥
पिण्डारकमपक्वञ्च रम्भाफलमपक्वकम् ।
वेणुवारसिन्धुवारमनाहारमपानकम् ॥
सघृतं रोचनाचूर्णं सघृतं शुष्कशर्करम् ।
मरीचं पिप्पलीं शुष्कमार्द्रकं क्षीरकं मधु ।
द्रव्याण्येतानि गन्धर्व्वि ! यदाः श्लेष्महराणि च ॥"
इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे १६ अध्यायः ॥७१॥
अपि च । सार्षपतैलम् १ तैलाभ्यङ्गः २ उष्णैनम् ३ शैशिरजलम् ४ वाप्यजलम् ५ कौपजलम् ६ नैर्झरजलम् ७ नादेयजलम् ८ सामान्योष्णोदकम् ९ विशेषतः पाटलेयोष्णोदकम् १० पैत्तिकवमासुरकसंयुक्तजलस्नानम् ११ अगुरु १२ कुङ्कुमम् १३ पनकम् १४ कक्कोलम् १५ शुटी १६ दग्धभूमिजातशालिधान्यम् १७ अविदोग्धधान्यम् १८ यवः १९ श्यामाकधान्यम् २० कोद्रवधान्यम् २१ कङ्गुधान्यम् २२ कृष्णश्यामाकधान्यम् २३ चीनकधान्यम् २४ मुद्गः २५ मुकुष्टम् २६ राजमाषः २७ मसूरः २८ चणकः २९ कुलत्थः ३० तुवरी ३१ नागाभिधा ३२ जलसंयोगिसामान्यशुष्कनारीचणकशाकम् ३३ पिलमोचीशाकम् ३४ शालूकीशाकम् ३५ शोभाञ्जनशाकम् ३६ पुनर्नवाशाकम् ३७ वास्तूकशाकम् ३८ वल्गुजीशाकम् ३९ चाङ्गेरीशाकम् ४० एकाशाकम् ४१ पालङ्कीशाकम् ४२ चणकपत्रशाकम् ४३ कौसुम्भशाकम् ४४ ओषधीशाकम् ४५ महाराष्ट्रीशाकम् ४६ कदलीमोचकम् ४७ क्षुद्रवार्ताकुफलम् ४८ अङ्गारपक्ववार्ताकुः ४९ पाण्डुरकृष्णफलम् ५० कारवेल्लफलम् ५१ कर्कोटकफलम् ५२ पटोलनाड़ी ५३ कृष्णाखण्डनाड़िका ५४ वेत्राग्रम् ५५ सूरणः ५६ केशुकमूलम् ५७ घृततैलाभ्यां सिद्धं मूलम् ५८ शूलकपुष्पम् ५९ खरटकर्णः ६० शूलकफलम् ६१ वाराहीकन्दमूलम् ६२ आम्रगन्धी ६३ चम्पकः ६४ दाड़िमम् ६५ मातुलुङ्गलकः ६५ जम्बीरम् ६७ कर्कन्धुः ६८ शुष्कसमस्तकोलफलम् ६९ अङ्कोरम् ७० जवनालम् ७१ लवलीफलम् ७२ जाम्बवम् ७३ पक्वान्त्रिकाफलम् ७४ पक्वतिन्दुकम् ७५ अम्लवेतसम् ७६ महाम्रम् ७७ कपित्थम् ७८ कोशाम्रफलम् ७९ तालास्थिमज्जा ८० बालबिल्वम् ८१ बिल्वपेशिका ८२ धात्री ८३ विभीतकम् ८४ विभीतमज्जा ८५ धात्रीमज्जा ८६ नन्द्यावर्त्तमत्स्यः ८७ कवयोमत्स्यः ८८ एलङ्गमत्स्यः ८९ रक्तिकामत्स्यः ९० चिलटमत्स्यः ९१ शोलीमत्स्यः ९२ मत्स्याण्डम् ९३ कूर्म्माण्डम् ९४ खगाण्डम् ९५ एणमांसम् ९६ खड्गिमांसम् ९७ कूर्म्मपादः ९८ कपिञ्जलमांसम् ९९ वर्त्तिकापक्षिमांसम् १०० प्रसन्नामद्यम् १०१ अरिष्टमद्यम् १०२ अर्ध्यमद्या १०३ पुराणमद्य १०४ नूतनमद्य १०५ मेषीक्षीरम् १०६ उष्ट्रीक्षीरम् १०७ घृतोष्णदुग्धम् १०८ छागदधि १०९ हास्तिनदधि ११० दधिमस्तु ११९ दधिसरः ११२ मथिततक्रम् ११३ आविकघृतम् ११४ औष्ट्रकघृतम् ११५ एकेक्षुरसः ११६ शिक्षु ११७ क्षीरकम् ११८ वास्तिका ११९ शुष्कवल्याकम् १२० कासमर्दीवटिका १२१ हरिद्रा १२२ यमानी १२३ शुष्कपिप्पली १२४ आर्द्रपिप्पली १२५ शुण्ठी १२६ आर्द्रकम् १२७ सर्षपः १२८ विड्घार्णः १२९ पलाण्डुः १३० गुड़त्वक् १३१ पत्रम् १३२ यवक्षारः १३३ सर्ज्जिकाक्षारः १३४ टङ्कणक्षारः १३५ मद्यः १३६ भृष्टतण्डुलः १३७ लाजाः १३८ लाजमण्डः १३९ अपक्वयवशूकः १४० वाल्यमण्डः स तु भृष्टयवमण्डः १४१ मुद्गयूषः १४२ रागयूषः स च दाड़िमाम्लाद्युक्तमुद्गयूषः १४३ मसूरयूषः १४४ कुलत्थयूषः १४५ खड़यूषः १४६ काम्बलिकयूषः स तु लवणघृतादितिलमाषमिश्रितपक्वदधि १४७ पलाण्डुवेष्टित-कर्दम-लेपिताङ्गार-दग्धलवणवेष्ट वारपुरस्कृतसार्द्धकटुतैलयन्त्रोत्तोलितमत्स्यः १४८ प्रदिग्धम् १४९ शालिपिष्टकम् १५० ताम्बूलम् १५१ चूर्णम् १५२ खदिरः १५३ एला १५४ जातीफलम् १५५ कर्पूरम् १५६ कटुरसः १५७ तिक्तरसः १५८ कषायरसः १५९ उष्णस्वभावद्रव्यम् १६० मालतीपुष्पम् १६१ मल्लिकापुष्पम् १६२ पद्मपुष्पम् १६३ वकुलपुष्पम् १६४ पुन्नागपुष्पम् १६५ कह्लारपुष्पम् १६६ उत्पलपुष्पम् १६७ पाटलपुष्पम् १६८ चम्पकपुष्पम् १६९ राजिकासरलम् १७० बिल्वमूलम् १७१ पाटला १७२ शालपर्णी १७३ पृश्निपर्णी १७४ एरण्डमूलम् १७५ कण्टकारिका १७६ विशाला १७७ जोषः १७८ भृङ्गराजः १७९ श्वेतराजः १८० द्रोणपुष्पी १८१ झिण्टी १८२ वचा १८३ शुक्लाशुनम् १८४ हरिद्रा १८५ दार्व्वी १८६ अवल्गुजः १८७ रक्तराजः १८८ रेणुका १८९ भूर्जः १९० आसनः १९१ निम्बपत्रम् १९२ भूनिम्बः १९३ कुटजः १९४ यासः १९५ दुरालभा १९६ कटुकी १९७ वायस्ती १९८ वट्वी १९९ कटफलम् २०० कुलम् २०१ मारिभद्रः २०२ वासकः २०३ मधुयुक्तगुडूची २०४ पिप्पलीमूलम् २०५ चविका २०६ गजपिप्पली २०७ अर्कः २०८ शूकरः २०९ सामान्यगुल्गुलुः २१० नूतनपुरातनगुग्गुलुः २११ अकृष्णा चित्रता २१२ सिता चित्रता २१३ सिन्धुवारः २१४ मनोज्ञा २१५ वीराद्वी २१६ ताम्रम् २१७ कांस्यम् २१८ ॥ इति द्रव्यगुणे संग्रहीतम् ॥१॥

श्लेष्मातः, पुं, (श्लेष्माणमततीति । अत + अच् ।) श्लेष्मातकवृक्षः । इति शब्दरत्नावली ॥

श्लेष्मातकः, पुं, (श्लेष्मात एव । स्वार्थे कन् ।) वहुवारकवृक्षः । इत्यमरः ॥ (यथा, मनुः ।६।१४

"वर्जयेत् मधुमांसञ्च भौमानि कवकानि च।
भूस्तृणं शिग्रुकञ्चैव श्लेष्मातकफलानि च॥")

श्लेष्मान्तकः, पुं, (श्लेष्मणा स्वसेवनजनितकफेन अन्तयति नाशयतीति। अन्त + णिच् + ण्वुल्।) वृक्षविशेषः। बहुवार इति बङ्गभाषा। लसोड़ा इति हिन्दी भाषा। तत्पर्य्यायः। बहुवारः २ पिच्छिलः ३ द्विजकृत्तिवः ४ श्लेष्मलः ५ श्लीतफलः ६ श्लीतः ७ श्राकटः ८ कर्कन्दारकः ९ भूतद्रुमः १० गन्धपुष्पः ११। अस्य गुणाः। कटुत्वम्। स्निग्धत्वम्। मधुरत्वम्। कषायत्वम्। स्वादुत्वम्। पाचनत्वम् कृमिश्लेष्महरत्वम्। आमसदोषमलरोधबहुव्रणाग्निविस्फोटशान्तिकरत्वम्। कफकारकत्वञ्च इति राजनिर्घण्टः॥ अस्याम्लफलगुणाः। विष्टम्भित्वम्। रूक्षत्वम्। पित्तकफासनाग्नित्वञ्च। तत्फलगुणाः। मधुरत्वम्। स्निग्धत्वम्। श्लेष्मलत्वम्। श्लीतलत्वम्। गुरुत्वञ्च। इति भावप्रकाशः॥

श्लैष्मिकं, त्रि, (श्लेष्मणः प्रशमनं कोपनं वा। श्लेष्मन् + "वातपित्तश्लेष्मभ्यः प्रशमनकोपनयोः।" ५। १। ६८। इत्यस्य वार्त्तिकोक्त्या ठञ्। कफप्रशमनम्। कफकोपनम्। इति व्याकरणम्।) श्लेष्मोद्भवम्। श्लेष्मसम्बन्धीयम्। इति श्लेष्मशब्दात् णिकप्रत्ययेन निष्पन्नम्॥ (यथा, सुश्रुते। १। ३।

"चिकित्साप्रविभागीये वातासृग्व्यध्वरोगः।
श्लैष्मिकस्य श्लैष्मिकस्य रौधिरस्य तथैव च॥")

श्लोक, भ्वा० उ० संघाते। वर्ज्जने। सर्ज्जने। इति कविकल्पद्रुमः। (भ्वा०-व्याम०-अक०-सक०-च-सेट्।) संघात इष्ट छन्दोविशिष्टवाक्यरचनम्। श्रु, श्रुश्लोकत्। उ, श्लोकते कविः। इति दुर्गादासः॥

श्लोकः, पुं, (श्लोक्यते इति। श्लोक संघाते + घञ्।) पद्यम्। यशः। इत्यमरः॥ ८॥ (वाक्। इति निघण्टुः। २। ११॥ "सु श्रवसे 'इण् भीकाशासल्लतिमचिभ्यः कनू' इति कनूप्रत्ययो धातुलक्षणात्वञ्च गुणः कपिलकादित्वाल्लत्वम्। श्रूयते इति श्लोकः। यद्वा श्लोक संघाते 'पुंसि संज्ञायां घः।' श्लोक्यते पद्यते रूपेण संस्कृते कविभिः श्लोकः।" इति तट्टीका॥) श्लोकनाम कारणम्। यथा,—

"मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः।
यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम्॥
तस्येयं हृदयस्थिता पभूव कृपि यौवतः।
श्लोकार्त्तेनास्य शकुनेः किमिदं व्याहृतं मया॥
चिन्तयन् स मधाप्राज्ञश्चकार मतिमान् मतिम्।
शिष्यैरेवान्वीक्षमाणमिदं स मुनिपुङ्गवः॥
माद्यन्योः चरसमक्रौञ्चयमुनिनः।
श्लोकोऽस्य प्रद्रवो मे श्लोको भवतु नान्यथा॥"
इति रामायणे बालकाण्डे २ सर्गः॥

श्लोक, भ्वा० उ० संघाते। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) श्रु, श्रुश्लोकत्। संघातो राशीकरणम्। इति दुर्गादासः॥

श्वः, [स्] अ, अनागताहः। इत्यमरः॥ कालि इति भाषा॥ (यथा, रामायणे। २। ६४। ३६।

"श्वो मया सह गन्तासि जनन्या च समेधितः॥")

श्वःश्रेयस, क्लो, (श्वः आगामिकाले श्रेयो यत्र। "श्वसो वसीयःश्रेयसः।" ५। ४। ८०। इति अच्।) कल्याणम्। इत्यमरः॥ (यथा, भट्टिः। ४। ३८।

"श्वःश्रेयसमवाप्तासि भाटभ्यां प्रजभाक्षिया॥")

परमात्मा। ब्रह्म। इति मेदिनी॥ कल्याणयुक्ते, त्रि॥

श्वक, ट ऊ सर्पे। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-सेट्।) वकारयुक्तादयः। ऊ, श्वक्ते। ऊ, श्वक्ते। सर्पो गतिः। इति दुर्गादासः॥

श्वगण, पुं, (शुनां गणः।) कुक्कुरसमूहः। यथा।

"द्वारादैर्घ्ययोरिसमौ स्यातां लिप्तक्षिते परे।
श्वापदन्यङ्क्षोस्तु वा। न तु श्वगणप्रभृतीनाम्।
इति सुग्धबोधव्याकरणटीकायां दुर्गादासः॥
(यथा, हरिवंशे भविष्यपर्व्वणि। ८। १४।

"श्वगणा नाम ते श्वपन्ते पिशाचा मांस-
भोजनाः॥")

श्वच, ट } गत्याम्। इति कविकल्पद्रुमः॥
श्वच, ट ऊ } (भ्वा०-आत्म०-सक०-सेट्।) द्वौ वकारयुक्तादी। पुनःपाठादाद्यो नेदनुबन्धः। द्वितौ तु द्वौ। एक एवेत्पाठबलाद्वाध्य इति नियमात्। ऊ, श्वचते। ट, श्वच्यते। ऊ, श्वचते। इति दुर्गादासः॥

श्वठ, क } गतौ। असंस्कृते। संस्कृते। इति
श्वठ, ट क } कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-सेट्।) द्वौ वकारयुक्तौ पुनःपाठादाद्यो नेदनुबन्धः। चयः अर्थाः। क, श्वाठयति। ट क, श्वठयति शनः। गच्छति किमपि संस्करोति वा इत्यर्थः। संस्कारगत्योरिति केचित्। इति दुर्गादासः॥

श्वठ, तृ क दुर्गन्धे। इति कविकल्पद्रुमः॥ (अदन्तचुरा०-पर०-सक०-सेट्।) वकारयुक्तः। श्वठयति नीचः। कुत्सितं वदतीत्यर्थः। रमानाथस्तु सम्यग्भावे इति मत्वा श्वठयति सम्यग्वदतीत्यर्थ इत्याह। सम्यग्भाव इत्यपेक्षे। इति दुर्गादासः॥

श्वदंष्ट्रक, पुं, (शुनो दंष्ट्रेव कण्टकोऽस्य।) गोक्षुरः। इति राजनिर्घण्टः॥

श्वदंष्ट्रा, स्त्री, (शुनो दंष्ट्रेव कण्टकाकृतत्वात्।) गोक्षुरकः। इत्यमरः॥ (यथा, सुश्रुते। १। ४६।

"पिप्पल्यादीनां श्वदंष्ट्रायवसूकयवः कृष्णाकादीनां दार्व्वीकरञ्जः।")

श्वपूर्ण, पुं, (शुनि पूर्णत्वपक्षत्वात्।) मृगालः। इति शब्दरत्नावली॥

श्वनिशं, स्त्री, } (शुनां निशा। "सुरासेनाश्वनिशा, स्त्री, } श्यामाशबलानिशा प्रियाख्या।" इति लिङ्गपुराणवचनेन विभाषया ङीष्त्वम्।) शुनां निशा। इत्यमरभरतौ॥ मत-

श्वनिशा श्वफल्कः

ङ्गकुक्कुरनिशा। यथा,—

"यस्यां मत्ता निशि श्वानः श्वनिशं श्वनिशा च सा॥"
इति जटाधरः॥

श्वपक्, [च्] पुं, (श्वानं पचतीति। पच् + क्विप्।) चण्डालः। यथा। निषादः श्वपचः श्वपक् इति भरतधृतवोपालितः॥ (यथा, मनुः। ३। ६२

"शुनाञ्च पतितानाञ्च श्वपचां पापरोगिणाम्।
वायसानां कृमीणाञ्च भुनकोर्निर्व्वपेत् भुवि॥")

श्वपचः, पुं, (श्वानं पचतीति। पच् + अच्।) चण्डालः। इत्यमरः॥ तस्य संज्ञा अन्त्यावसायी। तस्य धर्म्मो यथा,—

"चण्डालश्वपचानान्तु बहिर्ग्रामात् प्रतिश्रयः।
अपपात्राञ्च कर्त्तव्या धनं येषां श्वगर्हितम्॥
वासांसि मृतचेलानि भिन्नभाण्डेषु भोजनम्।
कार्ष्णायः समलङ्कारः परिवृज्या च नित्यशः॥
न तैः समयमन्विच्छेत् पुरुषो धर्म्ममाचरन्।
व्यवहारो मिथस्तेषां विवाहः सदृशैः सह॥
अन्नं येषां परायत्तं देयं स्याद्भिन्नभाजने।
रात्रौ न विचरेयुस्ते ग्रामेषु नगरेषु च॥
दिवा चरेयुः कार्य्यार्थं चिह्निता राजशासनैः।
अबान्धवं शवञ्चैव निर्हरेयुरिति स्थितिः॥
वध्याञ्च हन्युः सततं यथाशास्त्रं नृपाज्ञया।
वध्यवासांसि गृह्णीयुः शय्याश्चाभरणानि च॥
चाण्डालः श्वपचः क्षत्ता क्षत्तृ वैदेहकस्तथा।
मागधायोगवौ चैव सप्तैतेऽन्त्यावसायिनः॥"

तस्याम्भक्षणे प्रायश्चित्तं यथा,—

"अन्त्यावसायिनामन्नमश्नीयादृत्वसु कामतः।
य तु चान्द्रायणं कुर्य्यात् तप्तकृच्छ्रमथापि वा॥"
इति प्रायश्चित्ततत्त्वधृताङ्गिरोवचनम्॥

श्वपाकः, पुं, (शुनां पाकः कार्य्यत्वेन यस्य।) चण्डालः। इत्यमरः॥ तस्योत्पत्तिर्यथा,—

"शूद्रणीतस्त्रियोर्य्यायां श्वपाक इति कीर्त्तितः॥"
इति मानवे १० अध्यायः॥ ८॥

रजस्वलायास्तस्य स्पर्शने प्रायश्चित्तं यथा,—

"चाण्डालेन श्वपाकेन संस्पृष्टा यदि रजस्वला।
अतिक्रम्य तान्यहानि प्रायश्चित्तं समाचरेत्॥
त्रिरात्रमुपवासः स्यात् पञ्चगव्येन शुध्यति।
सा निशासु अतिक्रम्य स्नानान्युक्तानि कारयेत्॥"
इति पञ्चमात्रदर्शनात् शूद्रत्वं कामतः। अन्त्याङ्गं दृश्यमिति।

"पतितान्त्यश्वपाकेषु संस्पृष्टा स्त्री रजस्वला।
तान्यहानि अतिक्रम्य प्रायश्चित्तं समाचरेत्॥
प्रथमेऽह्नि त्रिरात्रन्तु द्वितीये द्वादशाचरेत्।
अर्द्धमासं तृतीयेऽह्नि चतुर्थे नक्तमाचरेत्॥"
चतुर्थेऽहनीति शुद्धिस्नानात् पूर्व्वम्। इति प्रायश्चित्ततत्त्वम्॥

श्वपाकः, पुं, (श्वपिर्यं पचतीति।) भीमपुरः। इति रत्नमाला॥

श्वपाकः, पुं, शुनिपुत्रः। स च ऋक्षविना। यथा। अनभिस्वान्त्यवेश्यानां शुनिः। तस्मात् श्वपाकः। तत्पालाद्यः क्षत्रिय एव। श्वपाकशब्दः

कनीयान् चित्रको नाम भ्राता। श्वफल्कादक्रूरो गान्दिन्यामभवत्। इति विष्णुपुराणे ४ अंशे १४ अध्यायः॥

श्वभ्रः, पुं, (शुनः कुक्कुरात् भीयं भयप्रदोः।) शृगालः। इति शब्दमाला॥

श्वभ्र, क विले। गर्त्ते। तद्वति। इति कविकल्पद्रुमः॥ (चुरा०-परo-सकo-तद्वे-अकo-सेट्।) विलं रन्ध्रकरणम्। क, श्वभ्रयति भाद्रं वातकः। तक् इति तकि दौःखे। इत्यस्य रूपम्। श्वभ्रयति दीनः दुःखेन जीवनीत्यर्थः। तक्कस्याने तक्क इत्यपपाठः। इति दुर्गादासः॥

श्वभ्रं, क्लीं, (श्वभ्रते यदिति। श्वभ्र विले+कर्म्मणि घञ्।) छिद्रम्। इत्यमरः॥ (यथा, मार्कण्डेये। ४३। २८।

"धनतो यस्य वै गर्त्तं श्वभ्रे दारं निधीयते।
न चोत्तिष्ठति यः श्वभ्रात् तद्गर्त्तं तस्य जीवितम्॥")

श्वयथुः, पुं, (टु ओ श्वि गतिवृद्धौः+"इतोऽथुच्।" ६। ३। ८८। अथुच्।) शोथः। इत्यमरः॥ (यथा, वृहत्संहितायाम्। ३२। १०।

"श्वयथुश्वासोत्साहज्वरकासभया वणिक्पीडा॥")

श्वयीयी, स्त्री, (श्वयतीति। श्वि गतिवृद्धोः+"श्वयतेरिच्।" उणा० ४। ७८। इति ईचिः। वा ङीष्।) पीड़ा। इति सिद्धान्तकौमुदी॥

श्वल, वेगे। इति कविकल्पद्रुमः॥ (भ्वा०-परo-अकo-सेट्।) वकारयुक्तादिः। श्वलति। वेगः शीघ्रगतिः। इति दुर्गादासः॥

श्वल्क, क भाषे। इति कविकल्पद्रुमः। (चुरा०-परo-सकo-सेट्।) वकारयुक्तलान्तादिरन्तः-मध्यतोयोपधः। क, श्वल्कयति। भाषः कथनम्। इति दुर्गादासः॥

श्वल, वेगे। इति कविकल्पद्रुमः॥ (भ्वा०-परo-अकo-सेट्।) वकारयुक्तादिः लघ्वन्तः। श्वलति। वेगः शीघ्रगतिः। इति दुर्गादासः॥

श्वश्रूः, स्त्री, (शुनः कुक्कुरस्येव परायणा वृत्तिः।) सेवा। इत्यमरः॥ चाकरी इति भाषा। शुन इव वृत्तिः परनिकोपजीवनात्। इति भरतः॥ अपि च।

"श्वशुरस्य यतिष्यं तेन चैवापि जीव्यते।
सेवा श्वसहिताभ्याना तस्माद्यां परिवर्जयेत्॥"
इति मानवे ४ अध्याये ६ श्लोकः॥

"सेवा तु दीनदरिद्रदर्शनश्वासितज्वलनीचक्रियादिधर्म्मसंयोगात् शुन इव वृत्तिरः अवज्ञिसेवा श्वसाधो प्रकृतो श्राज्ञाव्यवसेत्।" इति कुल्लूकभट्टः॥

श्वशुरः, पुं, (शुनो श्वशुः।) इक्ष्वाकुः। यथा, "श्वशुरः प्रथमोऽक्ष दीर्घो श्वाप श्वशादयः। श्वशाश्च श्वशुरश्च श्वाकुश्च श्वशुः समौ॥" इति अजादयः॥

श्वशुरः, पुं, (शु आशु श्वसति श्वासते इति। श्वस+"श्वसेरारोरौ।" उणा० १। ७५। इति उरन्। "शुशब्दोऽत्राशुशब्दाभिधायी। श्वाशु श्वाशय्यः श्वशुर इति धातुपारायणम्।" इति तट्टीकायां उज्ज्वलदत्तः॥) पतिपत्न्योः पिता। इत्यमरः॥ (यथा,—

"असारे खलु संसारे सारः श्वशुरमन्दिरम्।
हिमालये घरः शेते हरिः शेते महोदधौ॥"
इत्यद्भटः॥)

पूज्यः। इति मेदिनी॥

श्वशुरौ, पुं, (श्वश्वश्च श्वशुरश्च तौ। "श्वशुरः श्वश्रा।" १। २। ७१। इति प्राधिक एकशेषः।) श्वश्रूश्वशुरौ। द्विवचनान्तोऽयम्। इत्यमरः॥ श्वशुर शाशुड़ी इति भाषा॥

श्वशुर्यः, पुं, (श्वशुरस्यापत्यमिति। श्वशुर+"राज-श्वशुरात् यत्।" ४। १। १३७। इति यत्।) देवरः। श्याल। इत्यमरः॥ (यथा, कथासरित्सागरे। १६। ५७।

"इदौ वैदेहदेवौ च राज्यं शेषञ्जकाय सः।
सत्कारहेतोर्वृपतिः श्वशुर्यायानुगच्छते॥")

श्वश्रूः, स्त्री, (श्वशुरस्य स्त्री। श्वशुर+"श्वशुरस्योकारलोपश्च।" ४। १। ६८। इत्यस्य वार्त्तिकोक्त्या ऊङ् उकारलोपश्च।) पतिपत्न्योः प्रसूः। इत्यमरः॥ शाशुड़ी इति भाषा॥ * ॥ तस्याः सुधाभिः सद्भाविश्वासकारणं यथा,—

धर्म्मव्याध उवाच।

"मया तु दुहिता दत्ता पत्न्यर्थे वरवर्णिनी।
सा च त्वद्वार्त्तया प्रोक्ता दुहिता जनघातिनः॥
अतोऽर्घमागतोऽहं ते गृहं प्रति समीचितुम्।
आचारं देवपूजाश्च अतिथीनाञ्च तर्पणम्॥
एतेषामेकमप्यत्र कुर्वन्नपि न दृश्यते।
तदृश्यं गन्तुमिच्छामि पितृणां श्राद्धकाम्यया॥
श्वशुरे नैव सुप्राप्ति पितृणां कार्यमिदृशम्।
अहं यामो जीवघाती न तु लोकहिंसकः॥
मनसापि जीवघातस्य यद्दुःखं त्वत्सुतेन च।
तत्सर्वस्य संप्राप्तं प्रायश्चित्तं सपोधन॥
एवमुक्ता स चोत्थाय गृहं नारीं तदा घरे।
मा शुभाभिः समं श्वश्रूः विश्वासो भवतु क्वचित्॥
मा च दुःखा कदाचित् स्यात् या श्वश्रूं जीवतीमिवेत्।
एवमुक्ता गतो व्याधः श्वशुरं प्रति भामिनि॥"
इति वाराहे व्याधिकृतवृत्तान्तनामाध्यायः॥

श्वश्रूश्वशुरौ, पुं, (श्वश्रूश्च श्वशुरश्च तौ।) श्वश्रू-श्वशुरयोः समाहारः। तत्सम्बन्धः। श्वशुरौ २। इत्यमरः॥

श्वस, च शु प्राणने। इति कविकल्पद्रुमः॥ (अदा०-परo-अकo-सेट्।) "वकारयुक्तादिः। च शु, श्वसिति लोकः जीवनीत्यर्थः। आश्वसेदुर्निशादरान्। इति भट्टौ। न विश्वसेत् पूर्वविरोधितस्यापि। मनुरपि।
'न विश्वसेदविश्वस्ते विश्वस्ते नातिविश्वसेत्।'
इत्यादौ च गमनसमनिश्वसिति श्वासात् श्वसः स्त्रियां माधवम्। अथवा श्वादेराकृतिगणत्वात् अस प्रत्ययम्। वस्तुतस्तु पचाद्यजन्तोऽयं श्वस॥

इत्याचरतीति क्यौ साधवम्।" इति दुर्गादासः॥

श्वस, शु र श्वसे। इति कविकल्पद्रुमः॥ (अदा०-परo-अकo-सेट्।) शु, श्वस्ति। र, वैदिकः। इति दुर्गादासः॥

श्वसनं, क्लीं, (श्वस+ल्युट्।) श्वसितम्। निश्वासः। इति मेदिनी॥ (यथा, किरातेः। १०। ३४।

"श्वसनचलितपल्लवाधरोष्ठे
नवनिहितैर्यमिवावधूनयन्ती॥" * ॥

अर्ज्जुनम्। इति श्रीधरस्वामी॥ यथा, भागवते। २। २। २६।

"घ्राणेन गन्धं रसनेन वै रसं
रूपञ्च दृष्ट्या श्वसनं त्वचैव॥")

श्वसनः, पुं, (श्वसितीति। श्वस+ल्युः।) वायुः। (यथा, वृहत्संहितायाम्। ३४। २।

"इन्द्रयमवरुणनिर्ऋति-
श्वसनेशपितामहाभिसृताः॥")

मदनवृक्षः। इत्यमरः॥

श्वसनाशनः, पुं, (श्वसनो वायुरशनं भक्ष्यं यस्य।) सर्पः। इति हारावली॥ (यथा, राजतरङ्गिण्याम्। १। २२५।

"जगाद तं द्विजश्रेष्ठं निश्वस्य श्वसनाशनः॥")

श्वसनेश्वरः, पुं, (श्वसन ईश्वरो यस्य।) अर्ज्जुनवृक्षः। इति शब्दचन्द्रिका॥

श्वसनोत्सुकः, पुं, (श्वसनाय उत्सुकः।) सर्पः। इति शब्दरत्नावली॥

श्वसितं, क्लीं, (श्वस+क्तः।) श्वासः। यथा,—

"श्वासस्तु श्वसितं सोऽन्तर्मुखे उच्छ्वास आहरः।
श्वानो बहिर्मुखस्तु स्यान्निःश्वासः प्राण एतनः॥"
इति हेमचन्द्रः॥

श्वसुनः, पुं, (श्वस+बाहुलकात् उनन्।) श्वसनवृक्षः। इति शब्दचन्द्रिका॥ कुकुरशोंघा इति भाषा॥

श्वस्नं, त्रि, (स्त्री भवम्। श्वस्+"एषमोऽह्यः श्वसोऽन्यतरस्याम्।" ४। २। १०५। इति त्रयभावे युश्युसौ तुट् च।) भविष्यद्वस्तु। इति शब्दमाला॥ (यथा, भागवते। ११। ८। १२।

"सायन्तनं श्वस्तनं वा न संगृह्णीत भिक्षुकः।
मक्षिका इव संगृह्णन् सह तेन विनश्यति॥")

भविष्यत्काले, क्लीं। इति राजनिर्घण्टः॥

श्वस्यं, त्रि, (स्त्री भवमिति। श्वस्+"एषमोऽह्यः श्वसोऽन्यतरस्याम्।" ४। २। १०५। इति त्रयप्।) श्वोभवस्तु। इति शब्दमाला॥

श्वा, [न्] पुं, (श्वयति गच्छतीति। श्वि गतौ+"श्वन् उक्षन् पूषन्निति।" उणा० १। १५८। इति कनिन्प्रत्ययेन साधुः।) कुक्कुरः। तत्पर्य्यायः।

"कुक्कुरः श्वा च भषकः शुनको श्वादभक्षकः।
कौलेयको रसिकेयः सारमेयो रतस्रवः॥
कुक्कुरो दीर्घसरतः श्वानौ यामस्थोऽपि च।
वक्रपुच्छः शुनाशुः स्यात् शरस्काम्बरतस्रवः॥
औषधादिभोगितः श्वा श्वादनश्चोपलक्षकः।

रगयाकुशूलः श्वा तु विश्वकद् पुमानयम् ॥"
इति शब्दरत्नावली ॥
श्वागणिकः, त्रि, श्वगणेन चरति यः। "श्वगणात् ठच् च।"४।४।११। इति ठच्। श्वगणेन चरति श्वागणिकः श्वागणिकौ श्वागणिकाः श्वागणिकी श्वागणिकाः श्वागणिकाः। इति सिद्धान्तकौमुदी ॥
श्वादन्तः, पुं, (शुनो दन्त इव दन्तो यस्य। "शुनो दन्तदंष्ट्रेति।" ६। ३। १३७। इत्यस्य वार्त्तिकोक्त्या दीर्घः।) कुक्कुरदशनः। इति सिद्धान्तकौमुदी ॥
श्वान, पुं, (श्वा एव। श्वन्+स्वार्थे अण्।) कुक्कुरः। इति शब्दरत्नावली ॥ (शुनां समूहः। खण्डिकादित्वात् अञ्। कुक्कुरसमूहे, क्ली ॥)
श्वानचिल्लिका, स्त्री, (श्वानप्रिया चिल्लिका।) शुनकचिल्ली। इति राजनिर्घण्टः ॥
श्वानी, स्त्री, (श्वान+स्त्रियां ङीष्।) कुक्कुरी। इति शब्दरत्नावली ॥
श्वापदः, पुं. (शुन इव पदं यस्य। "शुनो दन्तदंष्ट्राकर्णकुन्दवराहपुच्छमर्देषु।" ६। ३। १३७। इत्यस्य वार्त्तिकोक्त्या दीर्घः।) हिंस्रपशुः। इति भैमसेनः। (यथा, विष्णुपुराणे। १।५।५१।
"श्वापदो द्विरदो हस्ती वानरः पक्षिपञ्चमः।
औदकाः पशवः षष्ठाः सप्तमास्तु सरीसृपाः।")
व्याघ्रः। इति शब्दरत्नावली ॥
श्वाविध्, [ध्] पुं, (श्वानं विध्यतीति। श्वन्+विध्+क्विप्। "नहि वृतीति।" ६। ३। ११६। इति दीर्घः।) शल्यः। इत्यमरः ॥ सजारु इति भाषा। (यथा, मनुः। ५। १८।
"श्वाविधं शल्यकं गोधां खड्गकूर्म्मशशांस्तथा।
भक्ष्यान् पञ्चनखेष्वाहुरनुष्ट्रांश्चैकतो दतः॥")
श्वाविध्, [ध्] पुं, (श्वानं विध्यतीति। श्वन्+विध्+क्विप्। "नहि वृतीति।" ६। ३। ११६। इति दीर्घः।) शल्यः। इत्यमरः ॥ सजारु इति भाषा ॥
श्वाश्वः, पुं, (श्वा कुक्कुरः अश्व इव वाहनं यस्य।) भैरवः। कुक्कुराश्वनत्वात्। इति केचित् ॥
श्वासः, पुं, (श्वसित्यनेनेति। श्वस+करणे घञ्। यद्वा, श्वसितीति। श्वस+"ग्लाजाश्वसेति।" ३। १। १३६। इति सः।) श्वसितम्। वायुः। इति भैमसेनः ॥ सप्तसंख्यायाः। प्राणः २। इति राजनिर्घण्टः ॥ (यथा, माघिलदर्पणे। ३।१।३०।
"श्वासान् सुखति भूसले विमुञ्चति सम्मार्ग-
मालोकते
दीर्घं रोदिति विक्षिपत्यथ इनः शामां सुधा-
धवलीम्।")
रोगविशेषः। स तु पञ्चधा महाश्वासकः। यथा,—
"ऊर्द्धश्वासस्तथा छिन्नः क्षुद्रश्वासस्तमस्तथा।
श्वासश्च पञ्चमो हिक्कारो व्याधयश्चैते पञ्च॥
इति भावप्रकाशः ॥ तत्र ऊर्द्धश्वासस्योपद्रवकथनम्। यथा,—
"ऊर्द्धश्वासस्य च भवेत् प्रलापो मोहमूर्च्छने च।
श्वासाश्चीर्णस्वरच्छर्दिभ्रममोहगलग्रहाः।
रक्तार्बुदविसर्पाद्या उभयार्थोद्भवा गदाः॥"
इति मलमासतत्त्वम् ॥ * ॥
अथ श्वासाधिकारः। तत्र निदानमाह।
"वैरव कारणैर्हिक्का देहिनां संप्रवर्त्तते।
तैरेव बहुभिः श्वासो व्याधिवीरः प्रजायते॥"
श्वासस्य भेदानाह।
"महोर्ध्वच्छिन्नतमकक्षुद्रभेदेषु पञ्चधा।
भिद्यते स महाव्याधिः श्वास एको विशेषतः॥"*
पूर्व्वरूपमाह।
"प्राग्रूपं तस्य हृत्पीड़ा शूलमाध्मानमेव च।
आनाहो वक्त्रवैरस्यं श्लेष्मणिस्रोद एव च॥"*
संप्राप्तिमाह।
"यदा स्रोतांसि संरुध्य मारुतः कफपूर्व्वकः।
विश्वग्व्रजति संदुष्टस्तदा श्वासं करोति सः॥"
स्रोतांसि प्राणोदकान्नवहानि। कफपूर्व्वकः कफः पूर्व्वः प्रधानं यस्य सः। विश्वग्व्रजति सर्व्वतो विमार्गान् याति। संरुद्धः कफेन रुद्धमार्गः॥*॥
महाश्वासस्य लक्षणमाह।
"उद्धूयमानवातो यः शब्दवत् दुःखितो नरः।
उच्चैः श्वसिति सन्नद्धो मत्तषभ इवानिशम्॥
प्रनष्टज्ञानविज्ञानस्तथा विभ्रान्तलोचनः।
विहताध्यानगो बहुशत्रुवर्द्धो विशीर्णवाक्॥
दीनः प्रस्वसितं श्वास्य दूरात् विज्ञायते भृशम्।
महाश्वासोपसृष्टस्तु क्षिप्रमेव विपद्यते॥"
उद्धूयमानवातः ऊर्द्धं नीयमानो वातो यस्य सः। शब्दवत् शब्दं यथा स्यात्। कोदृक् स शब्दस्तद्बोधयितुमाह। मत्तषभ इव उच्चैः श्वसितोत्तनयः। सन्नद्धः आनद्धः आनाहयुक्त इति यावत्। ज्ञानं शास्त्रम्। विज्ञानं तदर्थविनिश्चयः। विशीर्णवाक् स्खलितवचनः। दीनः म्लानः। मारकत्वायं महाश्वासः॥ * ॥ ऊर्द्धश्वासमाह।
"ऊर्द्धं श्वसिति योऽत्यर्थं न च प्रत्याहरत्यधः।
श्लेष्माहतसुखस्रोतः क्षुद्गन्धवहार्दितः॥
ऊर्द्धदृष्टिर्विपर्य्यस्तु विभ्रान्ताक्षश्च दृश्यते।
प्रमुह्यन् वेदनार्त्तश्च शुष्काख्यो रतिपीड़ितः॥
ऊर्द्धश्वासे प्रकुप्यते अधःश्वासो निरुध्यते।
सुखनस्नान्यतस्रोतं श्वासमार्गस्त्रयं दृश्यते॥"
मर्म्मसु श्वासमूर्द्धं भवते। अत्र अत्यर्थमिति विशेषः। न च प्रत्याहरत्यधः न श्वासमधः करोति। श्लेष्माहतेत्यादि। श्लेष्मणा आवृतं यत्सुखं स्रोतांसि च तैः क्षुद्रो यो गन्धवहस्तेनार्दितः। विपश्यन् दृश्यतो विज्ञतं यथा स्यादेवं पश्यन्। अधःश्वासो निरुध्यते श्वासो नाधः प्रवर्त्तत इत्यर्थः॥ * ॥ ऊर्द्धश्वासन्यारिष्टस्य लक्षणमाह। सुश्रुतो मोघं प्राप्नुवतः साध्यतो ज्ञानिं प्राप्नुवतश्च ऊर्द्धश्वासः श्वसन् प्राणान् हन्ति। तस्येति न तु मोहज्ञानिरहितस्य॥ * ॥ छिन्नश्वासमाह।
"यस्तु श्वसिति विच्छिन्नं सर्व्वप्राणेन पीड़ितः।
न श्वासमिति दुःश्वासी मर्म्मच्छेदरुजार्दितः॥
आनाहस्वेदमूर्च्छार्त्तो दृश्यमानेन वस्तिना।
विप्लुताक्षः परिक्षीणः श्वसन् रक्तेक्षणोत्तरः॥
विचेताः परिशुष्कास्यो विवर्णः प्रलपन्नरः।
छिन्नश्वासेन विच्छिन्नः स शीघ्रं विजहात्यसून्॥"
विच्छिन्नं सविच्छेदम्। सर्व्वप्राणेन यावद्बलेन। मर्म्मच्छेदरुजार्दितः हृदयशिरश्छेदवेदनयेव पीड़ितः। दृश्यमानेन वस्तिना उपलक्षितः। विप्लुताक्षः अश्रुपूर्णनेत्रः। विचेता उद्विग्नचित्तः। छिन्नश्वासेन विच्छिन्नः सः। यस्तु श्वसिति विच्छिन्नमित्यादिलक्षणयुक्तो यः मनरश्छिन्नश्वासेन विच्छिन्नः पीड़ितो वोद्वह इत्यर्थः। मारकत्वायं विच्छिन्नश्वासः॥ * ॥ तमकश्वासमाह।
"प्रतिलोमं यथा वायुः स्रोतांसि प्रतिपद्यते।
ग्रीवां शिरश्च संगृह्य श्लेष्माणं समुदीर्य च॥
करोति पीनसन्तेन कण्ठे घुर्घुरकं तथा।
अतीव तीव्रवेगश्च श्वासं प्राणप्रपीड़कम्॥
प्रताम्यति स वेगेन तमसीव प्रविश्यति।
सन्निरुध्यते श्वास इति तमकः॥
श्लेष्मणा अनुष्ठ्यमानेन। सुखं सुखमिव। उद्यमते यतितो भवति। प्रयासः प्रयासान्वितवान्। अवगृह्णाति पीड़यति। उष्णेनैवाभिनन्दति इत्यनेन तमको वातकफारब्ध इति बोद्धव्यम्। उच्छ्रिताक्षः सूनाक्षः। ललाटेन स्विद्यता उपलक्षितः। अवधम्यते गलाद्यूर्द्धमेव सर्व्वमार्द्यं वाह्यते॥ * ॥ तमकस्यैव पित्तानुबन्धजनितज्वरादियोगेन प्रतमकसंज्ञामाह।
"ज्वरमूर्च्छापरीतस्य विद्यात् प्रतमकं तु तत्।
उदावर्त्तगलौष्ठ्यौष्ठशिरोनयनरोधनः॥
तमसा यद्यतेऽत्यर्थं शीतेष्वाशु प्रशाम्यति।
मज्जनस्तमसो श्वास्य विद्यात् प्रतमकं तु तत्॥"
क्षुद्रश्वासमाह।
"रूक्षायासोद्भवः कोष्ठे क्षुद्रो वात उदीरयन्।
क्षुद्रश्वासेन संमोह्यं दुःखेनाल्पप्रपाधकः॥
क्षिणोति न च नाशयति न च क्षुद्रो यतस्ततः।

न च भोजनपानाभ्यां निरुन्ध्यादन्तरा गतिम् ॥
नेन्द्रियाणां तथा चापि काञ्चिदुन्मादयेद्बुधम् ।
स साध्य उक्तो बलिनः सर्व्वे वा स्युरव्ययाः ॥"
क्षुद्रः स्वल्पनिदानलिङ्गः । उदीरयन् कर्ष-
न्नुदन् । क्षुद्रः क्षुद्रपदः । सर्व्वे महाश्वासाद-
योऽपि ॥ * ॥ श्वासानां साध्यत्वादिकमाह ।
"क्षुद्रः साध्यतमस्तेषां तमकः कृच्छ्र उच्यते ।
त्रयः श्वासा न सिध्यन्ति तमको दुर्ब्बलस्य च ॥
कामं प्राणहरा रोगा बहवो न तु ते तथा ।
यथा श्वासश्च हिक्का च हरतो जीवमाशु ते ॥"
अथ श्वासस्य चिकित्सा ।
"श्वासहिक्कातुरं प्रायः स्निग्धैः स्वेदैरुपाचरेत् ।
स्निग्धैर्लवणतैलाभ्यां तैरस्य ग्रथितः कफः ॥
श्वासो विलयमायाति मारुतश्चोपशाम्यति ।
स्निग्धं ज्ञात्वा ततश्चैनं भोजयेच्च रसौदनम् ॥
स्वरसं शृङ्गवेरस्य माक्षिकेण समन्वितम् ।
पाययेत् श्वासकासघ्नं प्रतिश्यायकफापहम् ॥"
शृङ्गवेरमार्द्रकम् ।
"प्रस्थं विभीतकानां चाग्निं विना पाचयेच्छा-
खले ।
षडमलवेदो लीढो मधुघृतेन श्वासकासघ्नः ॥
दशमूली शटी रास्ना पिप्पली विश्वपौष्करौ ॥
शृङ्गीतामलकीभार्गीगुडूचीनागराग्निभिः ॥
यवागूं विधिना सिद्धां कषायं वा पिबेन्नरः ।
श्वासहृद्ग्रहपार्श्वार्त्तिहिक्काकासप्रशान्तये ॥"
तामलकी भूम्यामलकी ।
"शृङ्ग्यास्तथा वा क्वाथः पौष्करेणावचूर्णितः ।
श्वासकासप्रशमनः पार्श्वशूलविनाशनः ॥
रम्भाकुन्दशिरीषाणां कुसुमं पिप्पलीयुतम् ।
पिष्ट्वा तण्डुलतोयेन पीत्वा श्वासमपोहति ॥
शृङ्गीमहौषधकणाघनपुष्कराणां
चूर्णं शठीमरिचयोश्च सिताविमिश्रम् ।
[illegible] पीतमथवा वृषपत्रतोयैः
श्वासं जयेद्विनिहन्ति हि घोररूपम् ॥
पञ्चमूल्या तु [illegible] ॥
[illegible] ॥
[illegible] ।
[illegible] ॥
[illegible]
[illegible] ।

स्वरवर्णप्रदो ह्येष जठराग्नेश्च दीपनः ।
नाम्ना भार्गीगुडः ख्यातो भिषग्भिः सकलैर्मतः ॥"
इति भार्गीगुडः ॥
"रसो गन्धो विषञ्चापि टङ्कणञ्च मनःशिला ।
एतानि कर्षमात्राणि मरिचं चाष्टकर्षकम् ॥
कटुत्रयं कर्षयुग्मं पृथगत्र विनिःक्षिपेत् ।
रसः श्वासकुठारोऽयं सर्व्वश्वासनिवारणः ॥"
श्वासकुठारो रसः । इति श्वासाधिकारः । इति
भावप्रकाशः ॥ * ॥ अन्यच्च ।
"विभीतकस्य वै चूर्णं समधु श्वासनाशनम् ।
पिप्पलीत्रिफलाचूर्णं मधुसैन्धवसंयुतम् ।
सर्व्वरोगज्वरश्वासशोषपीनसहृद्भवेत् ॥"
इति गारुडे १८६ अध्यायः ॥ * ॥
तस्य पुराणोक्तनिदानं यथा,—
धन्वन्तरिरुवाच ।
"अथातः श्वासरोगस्य निदानं प्रवदाम्यहम् ।
कासवृद्ध्या भवेच्छ्वासः पूर्व्वो वा दोषकोपनैः ॥
आमातिसारवमथुविषपाण्डुज्वरैरपि ।
रजोधूमानिलैर्म्मर्म्मघातादपि हिमाम्बुना ॥
क्षुद्रकस्तमकश्छिन्नो महानूर्द्ध्वश्च पञ्चमः ।
कफोपरुद्धगमनः पवनो विष्वगास्थितः ॥
प्राणोदकान्नवाहीनि दुष्टस्रोतांसि दूषयन् ।
उरःस्थः कुरुते श्वासमामाशयसमुद्भवम् ॥ * ॥
प्राग्रूपं तस्य हृत्पार्श्वशूलं प्राणविलोमता ।
आनाहः शङ्खभेदश्च तत्रायासेन भोजनैः ॥
प्रेरितः प्रेरयन् क्षुद्रं स्वयं संशमनं मरुत् ।
प्रतिलोमं शिरा गच्छेत् उदीर्य्य पवनः कफम् ॥
परिगृह्य शिरोग्रीवमुरःपार्श्वे च पीडयन् ।
कासं घुर्घुरकं मोहमरुचिं पीनसं भ्रमम् ॥
करोति तीव्रवेगञ्च श्वासं प्राणोपतापनम् ।
प्रताम्येत्तस्य वेगेन निष्ठ्यूतान्ते क्षणं सुखी ॥
शय्याप्रसूयानः श्वसिति निषण्णः स्वास्थ्य-
मिच्छति ।
उच्छ्रिताक्षो ललाटेन स्विद्यता भृशमार्त्तिमान् ॥
विशुष्कास्यो मुहुःश्वासः काङ्क्षत्युष्णं सवेपथुम् ।
मेघाम्बुशीतप्राग्वातैः श्लेष्मलैश्च विवर्द्धते ॥
स याप्यस्तमकः साध्यो नरस्य बलिनो भवेत् ।
ज्वरमूर्च्छान्वितः प्रोक्तः प्रतमकस्तु सः ।
[illegible] ।
[illegible] ॥
[illegible] ।
[illegible] ॥
[illegible] ।
[illegible] ॥
[illegible] ।
[illegible] ॥
[illegible] ।
[illegible] ॥
[illegible] ।
इति [illegible] ॥"

इति गारुडे श्वासरोगनिदानं १५४ अध्यायः ॥
अथ श्वासरोगस्य कर्म्मविपाकः ।
"श्वासरोगो महाघोरो देहिदेहावघातकः ।
कर्म्मणा येन भवति तन्मे निगदतः शृणु ।
महोर्द्ध्वच्छिन्नतमकक्षुद्राभेदोऽस्य पञ्चधा ॥
श्वासः संजायते नृणां पृथक् कर्म्मानुसारतः ॥
यस्तु यज्ञं समासाद्य पशुश्वासं निरुध्य च ।
हन्ति खादन्ति वा तत्र महाश्वासेन गृह्यते ॥१॥
पौराणिककथामध्ये यस्तु वाचान्यथा वदेत् ।
स ऊर्द्ध्वश्वासमासाद्य दुनोत्यहरहर्निशम् ॥२॥
निषिद्धदानग्रहणात् छिन्नश्वासेन गृह्यते ॥३॥
मर्त्यः शास्त्राघनिर्णीतवाक्यं यो दूषयत्यपि ॥
पीड्यते तमकश्वासैः क्षुद्रैः पाकस्य विप्लुतः ॥४।५
परत्र कर्म्मतो देही नरकेषु विपच्यते ॥
नरकान्ते पुनर्णाग्रयोनिं शूकरवायसीम् ।
पृथक्कर्म्मवशाद्योनिं गत्वा स प्राप्य तप्यते ॥
मानुषत्वमनुप्राप्य पूर्व्वोक्तेनोपसृज्यते ।
श्रुत्वा तूग्रन्तु कदनं श्वासरोगसमुद्भवम् ।
प्रणम्य भरतः श्रीमान् भृगुं वाचमुवाच ह ॥
राजोवाच ।
श्वासकर्म्मक्षयं येन दानेन नियमेन च ।
एतेन मुक्तो भवति तन्मे वद प्रसादतः ॥
भृगुरुवाच ।
घाटकीं कारयेत्तूर्णं भक्त्या वरुणवातयोः ।
ताम्रपात्रोपरि स्थाप्य तत्पात्रं कलसोपरि ॥
राजतं कारयेत् पाशं ध्वजञ्चैव पलद्वयम् ।
वामदक्षिणतो मूर्त्तिं स्थाप्यैतां गन्धदीपकैः ॥
वायोर्ध्वजसमायुक्तां गन्धमाल्यपरिष्कृताम् ।
वरुणस्यापसव्यं तु कुर्य्याद्वायोः प्रपूजनम् ॥
न च श्वासं विना कासस्तत्कासः कासतोऽपि वा ।
तस्मात् पूज्याविमौ सम्यक् वायुर्व्वरुण एव च ॥
वारुणं कारयेद्धोमं वरुणस्येति मन्त्रतः ।
घृतधान्यतिलयवैः सहस्रं वा समाहितः ॥
वायोस्तिलयवैः कार्य्यं मनोवातेति मन्त्रतः ।
सादरं ब्राह्मणं पूज्य वस्त्रमाल्याक्षतादिभिः ॥
कर्म्मोपशमवाक्येन ब्राह्मणाय निवेदयेत् ।
मरुद्दिक्पाल तत्पूर्त्तिं दत्त्वा गाथां पठेन्नरः ॥
ॐ नमः पाशहस्ताय तुभ्यं ध्वजाधिपतये नमः ।
यक्षाधिपतये तुभ्यं वायो सर्व्वजनप्रिय ॥
गृह्णतं दीयते दानं ध्वजपाशौ तु राजतौ ।
श्वासकासौ हरेयातां प्रीतौ सर्व्वजनप्रियौ ॥
पूर्व्वजन्मविपाकोत्थौ श्वासकासौ च दारुणम् ।
अपरञ्च प्रवक्ष्यामि सुकरं स्वल्पसाधनः ॥
सादरं माघं नमस्या दिनदेवान् भास्करं द्विजम्
वस्त्राम्बरं सतं विप्रं पुनर्भानुमुदीरयेत् ।
अतः परं प्रकुर्व्वीत यदा [illegible] ।
[illegible] ॥
[illegible] ।
[illegible]
[illegible] ।
[illegible] ॥
[illegible] ।

दक्षाधारेण सन्तप्ते दिग्धाग्नि प्रशाम्यति ।
घोमेनानेन दानेन मुक्तो भवति कर्म्मतः ।
मातरं माधवं नत्वा सन्तप्ते दिग्धपूर्ववान् ।
स्नात्वा कमलनीचेन मुक्तो भवति मानुषः ।"
इति भृगुभरद्वोक्तश्यामकामकर्म्मविपाकः ।
अपि च ।
"विष्णुनो नरकस्यान्ते जायते श्यामकामवान् ।
दत्तं तेन प्रदातव्यं सप्तमण्डलमण्डितम् ।"
इति प्रायश्चित्तमौषधकर्म्मविपाकः ।

श्यामकामः, पुं, (श्यामयुक्तः कामः ।) श्यामयुक्तकामरोगः । श्यामकनकाभः । यथा,—
"कामदृष्ट्या भवेच्छ्यामः पूर्णोवा रोगकारणैः ।"
इति गारुडे १५४ अध्यायः ।
अत्र श्यामशब्दे द्रष्टव्यम् ।

श्यामकुटारः, पुं (श्यामस्य कुटार इव तन्नाशकत्वात् ।) श्यामरोगस्य औषधविशेषः । यथा,—
"रसो गन्धो विषञ्चापि टङ्गणञ्च मनःशिला ।
एतानि कर्षमात्राणि मरिचञ्चाष्टकर्षकम् ।
कट्वत्थं कर्षयुग्मं पृथग्यत्र विनिःक्षिपेत् ।
रसः श्यामकुटारोऽयं सर्व्वश्यामनिवारणः ।"
इति भावप्रकाशः ।

श्यामप्रश्यासधारणं, क्लो, (श्यामप्रश्यासयोर्धारणं यत्र ।) प्राणायामः । इति हैमचन्द्रः ।

श्यामभेदिः, स्त्री, (श्यामस्य भेदिरिव ।) निद्रा । इति हैमचन्द्रः ।

श्यामारिः, पुं, (श्यामस्य अरिः ।) पुष्करमूलम् । इति राजनिर्घण्टः ।

श्यामा, [न्] पुं, (श्यामयतीति । श्यम + णिच् + णिनिः ।) वायुः । इति शब्दरत्नावली ।
(श्यामोऽस्यास्तीति । इनिः ।) श्यामयुक्ते, त्रि ।
(यथा, सुश्रुते । १ । २८ ।
"श्यामाचारा कृतघ्नस्य स्वामिनो विकृतेक्षणाः ।
यस्या दिशं प्राप्नुवन्ति विषमैकपदेक्षिनाः ।
तेषां च उपसर्पन्ति दूतास्तं प्रति मन्त्रिणः ।"
श्यामरोगयुक्ते च त्रि । यथा, तत्रैव । ६ । ५१ ।
"श्वेतपर्व्वसु विना श्वित्रदूर्व्वाधव्य शोधनम् ।
श्यामप्रायेषु तैलं श्यामिनामादिशन्ति त्रि ।")
त्रि, टु ये भ्वौ इद इति धातोः । इति कविकल्पद्रुमः । (भ्वा०-पर०-सक०-सेट् ।) श्यामश्यादः । टु, श्यायः । ये, श्यायते । श्यै, श्यानः । इद, श्यानः श्यायोत । इति दुर्गादासः ।

श्यित, त्र ग्वा ९ क्षीणे । इति कविकल्पद्रुमः । (भ्वा०-आत्म०-अक०-सेट् ।) अकारयुक्तः । श्य, श्यायते । श्या, श्यित्वा श्यित्वम् । इ, श्यैयते श्यायः । इति दुर्गादासः ।

श्यित, क्लो, (श्यैते इति । श्यित क्तौ [क्त] "स्यतिवतिखतीति ।" उणा० । १ । १ । इति इट् ।) श्यैतकुसुम । तत्पर्य्यायः । कुसुम २ । इत्यमरः । श्यैतम् ३ श्यैयम् । इति शब्दरत्नावली ।
यथा, माघस्य । ७ । २ । १५ ।
"इक्षोरिवान्तरिह्यं दृष्ट्वा परस्परम् ।
श्यित्वं च भजते मिथुनौ कार्य्यं हि वैधुरम् ।"

श्यित्वं श्वित्वं श्वित्वमी

अथ व्यधिसाम्यात् कुष्ठभेदत्वाद्यात्रैव श्वित्रमाह ।
"कुष्ठैकसम्भवं श्वित्रं किलासाख्यञ्च भवेत् ।
निर्द्दिष्टमपरिसावि त्रिधातूद्भवसंश्रयम् ॥"
कुष्ठैकसम्भवं कुष्ठेन सह एकस्तुल्यः समवो निदानं यस्य तत् । श्वित्रस्य भेदान्तरम् । किलासं चारुणं भवेत् । श्वित्रमेव रक्तमांसाश्रयात् किलासमरुणं भवेत् इत्यन्वयः । नन्वु कुष्ठस्य श्वित्रस्य को भेदः इत्यत आह ।।निर्द्दिष्टमपरिसावीति । श्वित्रमपरिसावि भवति कुष्ठन्तु सावि अथच त्रिधातूद्भवसंश्रयमिति त्रयो धातवो वातपित्तकफास्तेभ्यः पृथग्भूतेभ्य उद्भवो यस्य तत् । अथच त्रयो धातवो रक्तमांसमेदांसि संश्रयोऽधिष्ठानं यस्य तत् । कुष्ठं सान्निपातिकं सर्व्वधातुगतञ्च भवति इति भेदः ।
दोषभेदेन लक्षणभेदमाह ।
"वाताद्रूक्षारुणं पित्तात्ताम्रं कमलपत्रवत् ।
सदाहं रोमविध्वंसि कफात्स्निग्धं घनं गुरु ॥
सकण्डूकं क्रमात् रक्तं मांसमेदःसु चादिशेत् ।
वर्णेनैवेदमुभयं कष्टं तयोत्तरोत्तरम् ।"
अरुणमौषसोदितम् । कमलपत्रवत् इत्यनेन मध्ये श्वेतमस्मे लोहितं बोधयति ।
"घनं पृथु क्रमात्तत्तं मांसमेदःसु चादिशेत् ।"
तथा च चरकः ।
"चरणं रक्तगे वाते ताम्रं पित्ते प्रलम्बते ।
श्वेतं श्लेष्मणि मेदःस्थे श्वित्रं कृष्णं परं परम् ।"
इति ।
उभयं द्विविधमपि श्वित्रं वरुण इवैव । अरुणं ताम्रं श्वेतञ्च दोषभेदात् । द्विविधं दोषजं प्रत्यजञ्च । तथा च भोजः ।
"श्वित्रञ्च द्विविधं विद्याद्दोषजं प्रत्यजं तथेति ।"
श्वित्रं साध्यमसाध्यमाह ।
"अणुश्लक्ष्णैरोमावृतमसंस्पष्टं मिथो नयम् ।
अनभिदग्धं साध्यं श्वित्रं वर्ष्मसतोऽन्यथा ।"
अणुश्लक्ष्णं नवु । अन्यच्च ।
"गुल्फपाणितलौष्ठेषु जातमप्यचिरन्तनम् ।
वर्ष्मजीर्यं विशेषेण किलासं सिद्धिमिच्छता ।"
गुल्फं मेढ्रं भगञ्च । सप्तमञ्च पादसप्तम् । सुश्रुतेनाप्ति जातमिति सामान्यतो निर्द्दिष्टत्वात् । ८ । अथ श्वित्रस्य चिकित्सा ।
"विषौषकल्पैरमलकुष्ठानां
क्षारेण क्षत्वा गुडसंयुतेन ।
अयस्कृतं भेषजमाकरोति
श्वित्राणि लग्नान्यपि पुष्करोक्तम् ।"
अमलकुष्ठं कटुपर्णी । अयस्कृतः वाकुची । २ ।
"पूतिवल्कलगुडकीर्णं पलाशानां मषीकृतम् ।
मनःशिला गालितार्द्धं गुडाष्टमसमन्वितम् ।
सर्षपं मधौ दिनं मण्डलाकारं श्वित्रगम् ।"
"श्वित्रकृद्भं प्रबलं मण्डलैर्नाधिकं वा ।
लिखितवत्तः लिखितात्र मण्डलं परिवेष्टितम् ।"
लिखितवत्तः लिखितात्र मण्डलं परिवेष्टितम् ।
रोगे । ३ ।

"क्षारः सवाकुचीक्षारं धात्रीस्वदिरसारयोः
प्रत्येकं कुन्दपत्रं श्वित्रं संसेवितो हन्ति ।"
मथितेन विषेकर्णं काकोदुम्बरवल्कजम् ।
तैलाक्तं घर्म्मसेवी स्नात्वाक्षाशी श्वित्रकृद्भवेत् ।"
मथितं निर्जलं विलोडितं दधि । तक्रं चतुर्थांशजलयुक्तं वस्त्रपूतं दधि । ५ ।
"खदिरस्य पलान्यष्टौ सोमराज्याः पलद्वयम् ।
त्रिफला त्रिगुणद्वञ्च दारुहार्द्धेन पर्पटः ।
पृथक् पलान् यवक्षुण्य सिञ्चिकायाः पलद्वयम् ।
जलाढकद्वये साध्यं यावत् पादावशेषितम् ।
क्वाथमानेन सर्व्वस्मै घृतप्रस्थं विपाचयेत् ।
चतुःपलं सोमराज्याः खदिरस्य पलं तथा ।
पटोलमूलत्रिफलात्रायमाणा दुरालभा ।
कर्षार्द्धं कटुकस्यापि कार्षिकान् सूक्ष्मपेषितान् ।
पलद्वयं कौषिकस्य गुडस्याक्ष प्रदापयेत् ।
सिद्धं सर्पिरिदं श्वित्रं हन्यादस्य दुरात्मनः ।
अष्टादशानां कुष्ठानां परमं वै सयौवधम् ।
सोमराजीघृतं नाम निर्म्मितं ब्रह्मणा पुरा ।
लोकानामुपकाराय श्वित्रकुष्ठाहिरोगिणाम् ।"
इति सोमराजीघृतम् ।६।
"महौषधं महामेदां निम्बपत्राणि सर्षपाः ।
मनःशिला च सिन्दूरं पद्मवारिणवल्गुणम् ।
हरिद्रे हरितालञ्च त्रिफला पीतमन्थकान् ।
एतानि समभागानि विषाद्यांशानि योजयेत् ।
सर्षपञ्च पलान्यष्टौ देवदारुरसं शुभम् ।
त्रिगुणं त्रिगुणं क्षीरं गोमूत्रञ्च चतुर्गुणम् ।
ताम्रपात्रे तु संस्थाप्य घृतेनाभ्यञ्जिनं पचेत् ।
चतुर्भागावशेषन्तु सकल्कमवतारयेत् ।
अयो त्रिफलन्तु निःशब्दं जलसुक्तं विशोधयेत् ।
अभ्यङ्गपानयोगाद्यान् सर्व्वान् मदान् जयेत् ।
अष्टादशानां कुष्ठानां दद्रूणां क्षिप्रिणां तथा ।
दुष्टव्रणेषु सर्व्वेषां कोटिनां तथा ।
अदक्स्रावपरीतानां ये च वक्त्रभिषक्क्रियाः ।
सर्व्वेषदविमुक्तानां श्रोणांङ्गानां विशेषतः ।
सर्व्वधातुगते कुष्ठे पतितभ्रूशिरोरुहम् ।
पर्पटाद्यक्तघोषाणां तथा सर्व्वाङ्गवासिनाम् ।
पाणिभ्यङ्गे तथा नस्ये वस्तिकर्म्मणि नित्यशः ।
सप्तरात्रप्रयोगेण सर्व्वकुष्ठानि नाशयेत् ।
दिनसप्तप्रयोगेण पूर्णचन्द्रनिभाननः ।
वासकेक्षुरसप्रस्थमौक्षं गोद्वयसंयुतम् ।
अभ्यङ्गपिचुं साध्यात् सर्व्वामयविनाशनः ।
एतद्घृतं मधार्श्वत्थं मार्गवेक्षावगाहितम् ।
मनुष्याणां श्रियश्चेव सर्व्वकाधिपरं परम् ।
मधामार्गेक्षकमिदं एतं सर्व्वामदारिणम् ।७।
इति भावप्रकाशः ।
अपि च ।
"पाषाणदारवो, शाकं पीत्वा च मधुसंयुतम् ।
अर्द्धेन्धनसमिद्धं कृमि तूर्णं न संशयः ।"
इति गारुडे १०५ अध्यायः ।

श्वित्री, स्त्री, (श्वित्रं श्वेतीति । श्वित्र + इनि । ङीप् ।) श्वेतदूर्व्वा । इति शब्दरत्नावली ।
श्वित्रुटी इति भाषा ।

श्वित्री, [त्] त्रि, (श्वित्रमस्यस्येति। श्वित्र+इनिः।) श्वित्ररोगयुक्तः। यथा,—
"श्वित्री वस्त्रं श्वा रसनु चौरी लवणहारकः॥"
इति याज्ञवल्क्यः। ३। २१५॥

श्विद्, इ ड श्वौक्ष्ये इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-अक०-सेट्।) वकारयुक्तः। इ, श्विन्द्यते। ड, श्विन्दते पुष्करीकम्। इति दुर्गादासः॥

श्वेतं, क्ली, (श्वेतते इति। श्वित+अच्।) रूप्यम्। इत्यमरः॥

श्वेतः, पुं, (श्वेतते इति श्वित श्वौक्ष्ये+पचाद्यच्।) शुक्लवर्णः। द्वीपविशेषः। (यथा, महाभारते। १२। ३३५। ८।
"क्षीरोदधेर्योत्तरतो हि द्वीपः
श्वेतः स नाम्ना प्रथितो विशालः॥")
पर्व्वतभेदः। इति मेदिनी॥ (स तु जम्बूद्वीपपर्व्वतानामन्यतमः। यथा, मार्कण्डेये। ५४। ६।
"हिमवान् हेमकूटश्च ऋषभो मेरुरेव च।
नीलः श्वेतस्तथा शृङ्गी सप्तास्मिन् वर्षपर्व्वताः॥")
श्वेतपर्व्वतस्य परिमाणादि यथा। "उत्तरोत्तरेऽयुतं नीलः श्वेतः शृङ्गवानिति त्रयो रम्यकहिरण्मयकुरूणां मर्य्यादागिरयः प्रागायताः उभयतः क्षारोदावधयो द्विसहस्रयोजनपृथव एकैकशः पूर्व्वस्मात् पूर्व्वस्मादुत्तरोत्तरो दशांशाधिकांशेन दैर्घ्ये एव भवन्ति। एवं दक्षिणेनेलावृतं निषधो हेमकूटो हिमालय इति प्रागायता यथा नीलादयः। अयुतयोजनोत्सेधा हरिवर्षकिंपुरुषभारतानां यथासंख्यम्।" इति श्रीभागवते ५ स्कन्धे १६ अध्यायः॥ * ॥
कपर्दकः। इति हेमचन्द्रः॥ शुक्रग्रहः। श्वेताभः। इति शब्दरत्नावली॥ शुक्लः। इति राजनिर्घण्टः॥ जीवकः। इति जटाधरः॥ शिवावतारविशेषः। यथा,—
"वेदव्यासावताराणि द्वापरे कथितानि तु।
महादेवावताराणि कलौ शृणुत सुव्रताः॥
आदौ कलियुगे श्वेतो देवदेवो महाद्युतिः।
नाम्ना हिताय विप्राणामभूद्देवस्ततोऽन्तरे॥
हिमवच्छिखरे रम्ये शुभगे पर्व्वतोत्तमे।
तस्य शिष्याः शिखायुक्ता बभूवुरमितप्रभाः॥
श्वेतः श्वेतशिखश्चैव श्वेताश्वः श्वेतलोहितः।
चत्वारस्ते महात्मानो ब्राह्मणा वेदपारगाः॥
सुभावो दमनश्चाथ सुहोत्रः कङ्कणस्तथा।
लोकाक्षिश्च योगीन्द्रो जैगीषव्यस्तु सप्तमे॥
अष्टमे दधिवाहुः स्याद्ऋषभश्च दृषभप्रभुः।
भृगुस्तु दशमे प्रोक्तस्तस्यादुग्रः परः स्मृतः॥
द्वादशोऽत्रिः समाख्यातो बलो चाथ त्रयोदशे।
चतुर्दशे गौतमस्तु वेदशीर्षा ततः परम्॥
गोकर्णश्चाभवत्तस्मात् गुहावासः शिखण्डश्च।
जटामाल्यट्टहासश्च दारुको लाङ्गली क्रमात्॥
अर्श्वत्थश्चापरः शूली तिण्डी मुण्डी च वै क्रमात्॥
सहिष्णुः सोमशर्म्मा च नकुलीशोऽग्रतिमे प्रभुः॥
पञ्चविंशतिराख्याता भवन्ते कलियुगे प्रभोः॥"
इति कौर्म्मे ५० अध्यायः॥ * ॥

राजविशेषः। यथा,—
ब्रह्मोवाच।
"श्वेताभिजनसम्पन्नः सत्यवागनसूयकः।
त्वयाधीतं हुतं दत्तं गुरवः परितोषिताः॥
न ते दत्तं हविर्भेभ्योऽवं कदाचिदिह बुभुक्षिते।
तस्मात्तेऽद्येह संजाता क्षुधा ते नृपसत्तम॥
अन्नदानादृते धर्म्मं न स्यात्तृप्तिर्मनीषिणे।
स्वर्गे वापि तथा नाके अन्नदानं ततोऽधिकम्॥"
इति वह्निपुराणे अन्नदाननामाध्यायः॥
(नागविशेषः। यथा, भागवते। ५। २४। ३१।
"ततोऽधस्तात् पातालैकपतयो वासुकिप्रमुखाः शङ्खकुलिकमहाशङ्खश्वेतधनञ्जयधृतराष्ट्रशङ्खचूड़कम्बलाश्वतरदेवदत्तादयो महाभोगिनो महामर्षा निवसन्ति॥")
श्वेतः, त्रि, (श्वेतो वर्णोऽस्यास्तीति। श्वेत+अर्शआद्यच्।) शुक्लवर्णयुक्तः। इत्यमरः॥ * ॥
(यथा, रघुः। १। ८३।
"ललाटोद्यमाभुग्नं प्रस्वेदस्निग्धपाटलम्।
विभ्रती श्वेतरोमाङ्कं सन्ध्येव शशिनं नवम्॥")
श्वेतवस्तूनि यथा जल श्वेतानि।
"सुधांशूक्षेः अवःशुभ्रकर्पूरैज्योत्स्नाशरद्घनाः।
प्रासादसौधगरमन्दारद्विमाद्रयः॥
सूर्य्यङ्कान्तकपूरकरभारजतं शुली।
हिमौकभस्म हिण्डीरचन्दनं करका हिमम्॥
हारीर्णनाभतन्तुस्थि स्वगङ्गेभरदाभ्रकम्।
श्वेताहिः शर्करा दुग्धं दधि गङ्गा सुधाजलम्॥
मृणालसिकता हंसबककैरवचामरम्।
रम्भागर्भपुण्डरीककेतकीशृङ्गनिर्झराः॥
लोध्रसिंहध्वजच्छत्रचूर्णशुक्तिकपर्दकाः।
मुक्ताकुसुमनक्षत्रदन्तपुण्योशनोगुणाः॥
कैलासकाशकाशांसहासवासवकुञ्जराः।
नारदः पारदः कुन्दखटिका स्फाटिकादयः॥"
इति कविकल्पलतायां द्वितीये शेषस्तवके वर्णो नाम द्वितीयं कुसुमम्॥
श्वेतकं, क्ली, (श्वेतमेव। स्वार्थे कन्।) रूप्यम्। इति राजनिर्घण्टः॥
श्वेतकः, पुं, (श्वेत एव। स्वार्थे कन्।) वराटकः। इति भूरिप्रयोगः॥ (श्वेतशब्दार्थोऽप्यत्र॥
श्वेतगुणविशिष्टे, त्रि। यथा, बृहत्संहितायाम्। ८१। १६।
"कृष्णश्वेतकपीतकताम्राणामीषदपि च
विषमाणाम्॥")
श्वेतकण्टकारी, स्त्री, (श्वेता कण्टकारी।) शुक्लकण्टकारिका। श्वेत रेंगनी इति हिन्दी भाषा। तत्पर्य्यायः। सितकण्टकारिका २ श्वेता ३ चैत्रवल्ली ४ लक्ष्मणा ५ सितसिंही ६ सितक्षुद्रा ७ क्षुद्रवार्त्ताकिनी ८ सिता ९ सिक्ता १० कटुवार्त्ताकी ११ श्वेतफला १२ कण्टेश्वरी १३ निःशेषफला १४ वामा १५ सितकण्टा १६ महौषधी १७ गर्दभी १८ चन्द्रिका १९ चान्द्री २० चन्द्रपुष्पा २१ प्रियङ्करी २२ नाकुली २३ दुर्लभा २४ रास्ना २५। अस्या गुणाः। रूक्षत्वम्। कटुत्वम्। उष्णत्वम्। कफवातनाशित्वम्। चक्षुष्यत्वम्। दीपनत्वम्। रसनियामकत्वञ्च। इति राजनिर्घण्टः॥ * ॥
अन्यच्च।
"श्वेता क्षुद्रा चन्द्रहासा लक्ष्मणा चैत्रदूतिका।
गर्दभा चन्द्रभा चान्द्री चन्द्रपुष्पा प्रियङ्करी॥
कण्टकारी सरा तिक्ता कटुका दीपनी लघुः।
रूक्षोष्णा प्राचनी कासश्वासज्वरकफानिलान्॥
निहन्ति पीनसं पार्श्वपीड़ाक्षमिक्षदामयान्।
तयोः पक्वं कटुरसं पाके च कटुकं भवेत्॥
शुक्रस्य रेचनं भेदि तिक्तं पित्तास्रिक्लघुः।
हन्यात् कफमरुत्कण्डूकासभेदःक्षमिज्वरान्॥
तद्वत् प्रोक्ता सिता क्षुद्रा विशेषाद्गर्भकारिणी॥"
इति भावप्रकाशः॥
श्वेतकन्दा, स्त्री, (श्वेता कन्दा।) अतिविषा। इति राजनिर्घण्टः॥
श्वेतकिणिही, स्त्री, (श्वेता किणिही।) अश्वविशेषः। तत्पर्य्यायः। सिताभिकटभी २ गिरिकर्णिका ३ शिरीषपत्री ४ कालिन्दी ५ शुक्लपत्रा ६ विषघ्निका ७ महाश्वेता ८ महाशौण्डी ९ महाभिकटभी १०। अस्या गुणाः। कटुत्वम्। उष्णत्वम्। गुल्मविषाध्मानशूलदोषनाशित्वम्। वातकफजीर्णरोगघ्नमनत्वञ्च। श्वेता च तत्र गुणयुक्ता। इति राजनिर्घण्टः॥ पुस्तकान्तरे सिताभिकटभीस्थाने सिताभिकटभी। महाभिकटभीस्थाने महाभिकटभीति च पाठः॥
श्वेतकुञ्जरः, पुं, (श्वेतः कुञ्जरः।) ऐरावतहस्ती। इति शब्दरत्नावली॥ शुक्लगजश्च॥
श्वेतकुशः, पुं, (श्वेतः कुशः।) लक्षणविशेषः। तत्पर्य्यायः। सितदर्भः २ हस्वकुशः ३ पूतः ४ यज्ञीयपत्रकः ५ वज्रः ६ ब्रह्मपवित्रः ७ तीक्ष्णः ८ यज्ञभूषणः ९ रुचीसुखः १० पुण्यलक्षणः ११ बर्हिः १२ पूतलक्षणः १३। अस्य मूलगुणाः। शीतत्वम्। रूक्षत्वम्। मधुरत्वम्। पित्तरक्तज्वरतृष्णाश्वासकामलादोषनाशित्वञ्च। इति राजनिर्घण्टः॥
श्वेतकेतुः, पुं, (श्वेतः केतुर्यस्य।) बुधः। इति त्रिकाण्डशेषः॥ केतुग्रहविशेषः। यथा,—
"केतवो नव दृश्यन्ते वारुणाख्य एव ते।
ऊर्म्मिकेतुः श्वेतकेतुर्धूमकेतुस्तृतीयकः॥
श्वेतकेतुर्यदा दृश्येत् श्वेतास्त्रि कुरुते महीम्।
तदा मानुषमांसानि भक्षयन्तीह मानुषाः॥
क्षुद्भयार्त्ता जगत् सर्व्वं चक्रवद्भ्रमते तदा॥"
अपि च।
"श्वेतः शस्त्राकुलं कुर्य्यात् लोहितस्त्रिभयं भयम्।
क्षुद्भयं पीतकः कुर्य्यात् कृष्णो रोगमथोल्बणम्॥"
अन्यच्च।
"श्वेतकेतुर्यदा दृश्यो यावद्दृश्यस्तदापरान्।
देशान् क्षपित्वा क्षपितो रोगदुर्भिक्षैः परिपीड़ितान्॥

श्वेताख्यस्तु घटाकारी श्यामो धोमत्रिभागः।
निवर्त्तते ऽपसर्पेण त्रिभागीकुरुते प्रजाः॥"
इति समयाग्टतम्॥
(मुनिविशेषः। यथा, महाभारते।१।५३।८।
"उद्दालकः प्रमतकः श्वेतकेतुश्च पिङ्गलः॥"
स तु उद्दालकसुनेः पुत्रः। पुरा किल आर्य्यः प्रायशः पूर्व्वपतिं परित्यज्य पत्यन्तरं गच्छन्ति। अनेन तु तद्दोषमपाकृत्य समाजमर्य्यादा स्थापिता। यथा, महाभारते।१।१२२।६—२०।
"बभूवोद्दालको नाम महर्षिरिति नः श्रुतम्।
श्वेतकेतुरितिख्यातः पुत्रस्तस्याभवन्मुनिः॥
मर्य्यादेयं कृता तेन धर्म्या वै श्वेतकेतुना।
कोपात्कमलपत्राक्षि! यदर्थं तं निबोध मे॥
श्वेतकेतोः किल पुरा समक्षं मातरं पितुः।
जग्राह ब्राह्मणः पाणौ गच्छावेति चाब्रवीत्॥
ऋषिपुत्रस्ततः कोपं चकारामर्षचोदितः।
मातरं तां तथा दृष्ट्वा नीयमानां बलादिव॥
क्रुद्धं तन्तु पिता दृष्ट्वा श्वेतकेतुमुवाच ह।
मा तात कोपं कार्षीस्त्वमेष धर्म्मः सनातनः॥
अनावृता हि सर्व्वेषां वर्णानामङ्गना भुवि।
यथा गावः स्थितास्तात स्वे स्वे वर्णे तथा प्रजाः॥
ऋषिपुत्रोऽथ तं धर्म्मं श्वेतकेतुर्न चक्षमे।
चकार चैव मर्य्यादामिमां स्त्रीपुंसयोर्भुवि॥
मानुषेषु महाभागे न त्वेवान्येषु जन्तुषु।
तदाप्रभृति मर्य्यादा स्थितेयमिति नः श्रुतम्॥
युध्यन्त्या पतिं नार्य्या अद्यप्रभृति पातकम्।
भ्रूणहत्यासमं घोरं भविष्यत्यसुखावहम्॥
भार्य्यां तथा युध्यतः कौमारब्रह्मचारिणीम्।
पतिव्रतामेतदेव भविता पातकं भुवि॥
पत्या नियुक्ता या चैव पत्नी पुत्रार्थमेव च।
न करिष्यति तस्याश्च भविष्यति तदेव हि॥
इति तेन पुरा भीरु मर्य्यादा स्थापिता बलात्।
उद्दालकस्य पुत्रेण धर्म्मज्ञा वै श्वेतकेतुना॥")

श्वेतकेशः, पुं, (श्वेताः केशा यस्मात्।) रक्तशिग्रुः। इति घटादरः॥ (श्वेतः केशः।) शुक्लकचश्च॥

श्वेतकोलः, पुं, (श्वेतः कोलः क्रोडदेशो यस्य।) शफरमात्स्यः। इति चिकाण्डशेषः॥

श्वेतखदिरः, पुं, (श्वेतः खदिरः।) शुक्लखदिरः। तत्पर्य्यायः। कदरः २ श्वेतसारः ३ कार्म्मुकः ४ कृष्णकण्टकः ५ सोमसारः ६ सोमवृक्षः ७ सोमवल्कः ८ पथिद्रुमः ९। अस्य गुणाः। तिक्तत्वम्। कषायत्वम्। कटुत्वम्। उष्णत्वम्। कण्डूतिभूतकृष्णकफवातव्रणनाशित्वञ्च। इति राजनिर्घण्टः। पुष्पकाम्तरे कार्म्मुकस्याने कासुकः कृष्णकण्टकस्याने कृष्णकण्टकः इति च पाठः। ७। अपरञ्च।
"खदिरः श्वेतसारोऽन्यः कदरः सोमवल्कलः।
कदरो द्विदोषघ्नो सुरसोऽकण्टकान्वितः॥"
इति भावप्रकाशः।

श्वेतगज, पुं, (श्वेतः शुक्लो गजः।) ऐरावतहस्ती। इति हेमचन्द्रः॥ शुक्लवर्णहस्ती च॥

श्वेतगरुत्, पुं, (श्वेतः गरुत् पक्षो यस्य।) हंसः। इत्यमरः। २। ५। २३॥

श्वेतगुञ्जा, स्त्री, (श्वेता गुञ्जा।) शुक्लगुञ्जा। सादा कुँच इति भाषा। तत्पर्य्यायः। श्वेतकाम्बोजी २ भृष्टिका ३ काकादनी ४ काकपीलुः ५ चक्रशल्या ६ चूड़ाला ७। अस्या गुणाः। तीक्ष्णत्वम्। उष्णत्वम्। तस्या बीजं वान्तिकरम्। तस्याः शिफा शूलविषनाशिनी। तस्याः पत्रं वश्ये प्रशस्तम्। इति राजनिर्घण्टः॥ अपि च।
"श्वेता रक्तोचटा प्रोक्ता कृष्णा चापि सा स्मृता।
रक्ता सा काकचिञ्ची स्यात् काकनन्ती च रक्तिका॥
काकादनी काकपीलुः सा स्मृताङ्गारवल्लरी।
गुञ्जाद्वयन्तु कैश्यं स्यात् वातपित्तज्वरापहम्॥
सुखशोषश्रमश्वासव्रणानामदविनाशनम्।
नेत्रामयहरा दृश्या वल्या कण्डूं व्रणं हरेत्।
क्षमीन्द्रलुप्तकुष्ठानि रक्ता च धवलापि च॥"
इति भावप्रकाशः॥
अन्यच्च।
"गुञ्जा शिखण्डिका ताम्रा रक्तिका काकशान्तिका।
श्वेतान्या चक्रिका चूड़ा दुमाषा काकपीलुका॥
गुञ्जा केश्या वलकरा रुच्या पित्तकफापहा।
नेत्रामयहरा दृश्या हन्ति कण्डूव्रणान्।
क्षमीन्द्रलुप्तकुष्ठानि तद्वत्कृतापि शस्यते॥"
इति मदनपालनिर्घण्टः॥

श्वेतचन्दनं, क्ली, (श्वेतं चन्दनम्।) शुक्लचन्दनम्। इति राजनिर्घण्टः॥ अस्य पर्य्यायगुणौ चन्दनशब्दे द्रष्टव्यौ॥

श्वेतचिल्ली, स्त्री, (श्वेता चिल्ली।) शाकभेदः। तत्पर्य्यायः। वास्तुकी २ सुपक्वा ३ श्वेतचिल्लिका ४ सितचिल्ली ५ उपचिल्ली ६ ज्वरघ्नी ७ क्षुद्रवास्तुकी ८। अस्या गुणाः।
"श्वेतचिल्ली सुमधुरा क्षारा च शिशिरा च सा।
त्रिदोषशमनी पथ्या ज्वरदोषविनाशिनी॥"
इति राजनिर्घण्टः॥

श्वेतच्छदः, पुं, (श्वेतः छदो यस्य।) हंसः। इति हलायुधः। अन्यत्र। इति शब्दचन्द्रिका। बाबुर तुलसी इति भाषा।

श्वेतजीरकः, पुं, (श्वेतो जीरकः।) गौरजीरकः। इति राजनिर्घण्टः॥

श्वेतटङ्कं, क्ली, (श्वेतं टङ्कम्।) श्वेतटङ्कम्। इति राजनिर्घण्टः॥

श्वेतटङ्कं, क्ली, (श्वेतं टङ्कम्।) क्षारविशेषः। सादा सोहागा इति भाषा। तत्पर्य्यायः। श्वेतटङ्कम् २ लोहि ३ सिन्धुकरम् ४ सिन्धु ५ माक्षतीतीरसम्भवम् ६ स्निग्धम् ७ क्षारकरम् ८ शीतक्षारम् ९ टङ्कणम् १०। अस्य गुणाः। स्निग्धत्वम्। कटुत्वम्। उष्णत्वम्। कफवातामत्रश्वासविश्वकासमलनाशित्वञ्च। इति राजनिर्घण्टः॥

श्वेतदूर्व्वा, स्त्री, (श्वेता दूर्व्वा।) शुक्लदूर्व्वा। तत्पर्य्यायः। गोलोमी २ सिताखा ३ चण्डा ४ भद्रा ५ भार्गवी ६ दुर्गा ७ गौरी ८ विघ्नेशानकान्ता ९ अगम्या १० श्वेता ११ दिव्या १२ श्वेतकाण्डा १३ प्रचण्डा १४ सहस्रवीर्य्या १५ सहस्रकाण्डा १६ सहस्रपर्व्वा १७ सुरवल्लभा १८ शुभा १९ सुपर्व्वा २० सितच्छदा २१ खच्छा २२ कच्छान्तरुहा २३। अस्या गुणाः। अतिशिशिरत्वम्। मधुरत्वम्। वान्तिपित्तामातिसारकासदाहच्छर्दानाशित्वम्। रुच्यत्वञ्च। इति राजनिर्घण्टः॥

श्वेतद्विपः, पुं, (श्वेतः शुक्लो द्विपः।) ऐरावतहस्ती। इति चिकाण्डशेषः॥ शुक्लगजश्च॥

श्वेतद्वीपः, पुं क्ली, (श्वेतो द्वीपः।) चन्द्रद्वीपः। स च वैकुण्ठाख्यविष्णुधाम। यथा,—
"श्वेतद्वीपं गतवति त्वयि द्रष्टुं तदीश्वरम्।
तत्र ह्ययमभूत् प्रश्नस्त्वं मां यमनुपृच्छसि॥"
इति श्रीभागवते १० स्कन्धे ८७ अध्यायः॥
अपि च।
"एकदा ब्रह्मणो लोकादायान्तं नारदं मुनिम्।
पर्य्यटन् रावणो लोकान् दृष्ट्वा गत्वाब्रवीदृषिः॥
भगवन्! ब्रूहि मे युद्धं कुत्र सन्ति महाबलाः।
योद्धुमिच्छामि बलिभिस्त्वं जानासि जगत्त्रयम्॥
सुनिर्ध्याय तु सुचिरं श्वेतद्वीपनिवासिनः।
महाबला महाकायास्तत्र याहि महामते॥
विष्णुपूजारता ये वै विष्णुना निहताश्च ये।
त एव तत्र संजाता अजेयाश्च सुरासुरैः॥
श्रुत्वा तद्रावणो वेगान्मन्त्रिभिः पुष्पकेण तान्।
योद्धुकामः समागत्य स तद्वीपसमीपतः॥
तत्प्रभाहततेजस्कं पुष्पकं नाशकत्ततः।
त्यक्त्वा विमानं प्रययौ मन्त्रिगण्य दशाननः॥
प्रविश्यैव तद्वीपं पुनो हस्तेन योषितः।
दृष्ट्वा त्वं कुतः कोऽसि प्रेषितः केन वा वद॥
इत्युक्तो लीलया स्त्रीभिरेसन्तीभिः पुनः पुनः।
कच्छात्तस्मादिनिर्मुक्तस्तासां स्त्रीणां दशाननः॥
आश्चर्य्यमतुलं लब्ध्वा चिन्तयामास दुर्म्मतिः।
विष्णुना निहतो यामि वैकुण्ठमिति निश्चितः॥
मयि विष्णुर्यथा कुप्येत्तथा कार्य्यं करोम्यहम्॥
इति निश्चित्य वैदेहीं जहार विबुधेश्वरः।
ज्ञात्वैव परमात्मानं स जहारायनीसुताम्॥"
इति श्रीब्रह्मपुराणे श्रीमदध्यात्मरामायणे उत्तरकाण्डे ४ अध्यायः॥ अन्यच्च।
"श्वेतं गङ्गा नरः स्नात्वा यः पश्येत् श्वेतमाधवम्।
सत्यात्मं माधवस्यैव श्वेतद्वीपं स गच्छति॥"
इति तीर्थचिन्तामणिः॥

श्वेतधातुः, पुं, (श्वेतो धातुः।) खटिका। इति राजनिर्घण्टः॥ शुक्लवर्णधातुश्च॥

लन् प्रायश्चित्तपरम्। इति तन्त्रसारः॥ ७॥
योगाङ्गषट्प्रकारक्रिया। तद्यथा,—
"धौतिर्वस्तिस्तथा नेतिर्नौलिकी चाटकस्तथा।
कपालभातिरेतानि षट्कर्माणि समाचरेत्॥
अन्तर्धौतिर्दन्तधौतिर्हृद्धौतिर्मलशोधनम्।
धौत्यश्चतुर्विधाः प्रोक्ता घटं कुर्वन्ति निर्म्मलम्॥
वातसारं वारिसारं वह्निसारं बहिष्कृतम्।
घटस्य निर्म्मलार्थाय अन्तर्धौतिश्चतुर्विधा॥"७
प्रयोगः।
"काकचञ्चुवदास्येन पिबेद्वायुं शनैः शनैः।
चालयेदुदरं पश्चादधर्म्मार्गेण रेचयेत् शनैः॥
वातसारं परं गोप्यं देहनिर्म्मलकारकम्।
सर्व्वरोगक्षयकरं देहानलविवर्द्धकम्॥ १॥
आकण्ठं पूरयेद्वारि वक्त्रेण च पिबेत् शनैः।
चालयेदुदरेणैव चोदराग्निं चयेदधः॥
वारिसारं परं धौतं देहनिर्म्मलकारकम्।
साधयेदयः प्रयत्नेन देवदेहं प्रपद्यते॥ २॥
नाभिमग्नजले स्थित्वा शक्तिनाड़ीं विसर्ज्जयेत्।
करान्यां चालयेन्नाड़ीं यावन्मलविसर्ज्जनम्।
तावत् प्रक्षाल्य नाड़ीञ्च उदरे वेष्टयेन् पुनः॥
इदं प्रक्षालनं गोप्यं देवानामपि दुर्ल्लभम्।
केवलं धौतिमात्रेण देवदेहो भवेत् ध्रुवम्॥
यामार्द्धधारणात् शक्तिं याबन्न साधयेन्नरः।
वह्निसारमहद्धौतिस्तावन्नैव न जायते॥ ४॥
दन्तमूलं जिह्वामूलं रन्ध्रं च कर्णयुग्मयोः।
कपालरन्ध्रं पञ्चैव दन्तधौतिस्त्रिधीयते॥"८॥
प्रयोगः।
"खादिरेण रसेनाथ मृत्तिकाभिश्च शुद्धिभिः।
मार्জ্জयेद्दन्तमूलञ्च यावत् किल्बिषमाहरेत्॥
दन्तमूलं परं धौतियोगिनां योगसाधने।
नित्यं कुर्य्यात् प्रभाते च दन्तरोगाय योगवित्॥
दन्तमूलं धारणादिकार्य्येषु योगिनां मतः॥ १॥
अथातः संप्रवक्ष्यामि जिह्वाशोधनकारणम्॥
जरामरणरोगादि नाशयेत् दीर्घजीविका।
तर्জ্জनी मध्यमानाभ्या मृत्तिकाभ्ययोगतः॥
वेष्टयेन्नलमध्ये तु मार्জ্জयेन्नलिकामलम्॥
शनैः शनैर्म्मार्জ্জयित्वा कफदोषं निवारयेत्॥
मार्জ্জयेन्नवनीतेन दोहयेच्च पुनः पुनः।
तद्वत् लौहयन्त्रेण घर्षयित्वा पुनः पुनः॥
नित्यं कुर्य्यात् प्रयत्नेन रचयेदयकैश्चकं।
एवं कृते तु नित्ये न लम्बिका दीर्घतां व्रजेत्॥२
सर्व्वव्याधुत्क्रमणेण मार्জ্জयेत कर्णरन्ध्रयोः।
नित्यमभ्यासयोगेन नादान्तरप्रकाशनम्॥३॥
दक्षाङ्गुष्ठेन दक्षेण मार्জ्जयेत्कालरन्ध्रकम्
एवमभ्यासयोगेन कफदोषं निवारयेत्॥

नाड़ी निर्म्मलतां याति दिव्यदृष्टिः प्रजायते।
निद्रान्ते भोजनान्ते च दिवान्ते च दिने दिने॥५
हृद्धौतिं त्रिविधां कुर्य्यात् दण्डवस्त्रवमादरा।
दण्डधौतिं त्रिविधां वेत्रदण्डन्तथैव च॥
हृन्मध्ये चालयित्वा तु पुनः प्रत्याहरेत् शनैः।
कफपित्तं तथा क्लेदं रेचयेदूर्द्ध वर्त्मना।
दण्डधौतिविधानेन हृद्रोगं नाप्नुयेत् ध्रुवम्॥"
दण्डधौतिं घटभुरि॥ १॥
"भोजनान्ते पिबेन्नारि आकण्ठं पूरितं सुधीः।
ऊर्द्धदृष्टिं क्षणं कृत्वा तज्जलं वमयेत् पुनः।
नित्यमभ्यासयोगोऽयं कफपित्तं निवारयेत्॥२॥
चतुरङ्गुलविस्तारं श्लक्ष्णवस्त्रं शनैर्ग्रसेत्।
पुनः प्रत्याहरेदेतत् प्रोच्यते धौतकर्म्मकम्॥
गुल्मज्वरप्लीहकुष्ठं कफपित्तं विनश्यति।
आरोग्यं बलपुष्टिञ्च भवेत्तस्य दिने दिने॥ ३॥
अज्ञानक्रूरतां तावन्मलं यावन्न शोधयेत्।
तस्मात् सर्व्वप्रयत्नेन मलशोधनमाचरेत्॥
पीतमूलस्य दण्डेन मध्यमाङ्गुलिनापि वा।
यत्नेन चालयेद्गुह्यं वारिणा च पुनः पुनः॥
वारयेत् कोष्ठकाठिन्यमामजीर्णं निवारयेत्।
कारणं कान्तिपुष्टीश्च दीपनं वह्निमण्डलम्॥७॥
जलवस्तिः शुष्कवस्तिर्वस्त्री च द्विविधो स्मृतौ।
जलवस्तिं जले कुर्य्यात् शुष्कवस्तिं क्षितौ सदा॥
नाभिमग्नजले पायुं न्यस्तनालोत्कटासनम्।
आकुञ्चनं प्रकाशञ्च जलवस्तिं समाचरेत्॥
प्रमेहञ्च गुदावर्त्तं क्रूरवायुं निवारयेत्।
भवेत् स्वच्छन्ददेहश्च कामदेवसमो भवेत्॥"
न्यस्तनालोत्कटासनं ऊरुद्वये हस्तं दत्त्वा
शरीरञ्चदरं कुर्य्यादित्यर्थः॥ १॥
"वस्तिं पश्चिमतानेन चालयित्वा शनैः शनैः।
अश्विनीमुद्रया पायुं आकुञ्चयेत् प्रकाशयेत्॥
एवमभ्यासयोगेन कोष्ठदोषो न विद्यते।
विवर्द्धयेत् जाठराग्निं आमवातं विनाशयेत्॥२
वितस्तिमानं सूक्ष्मञ्च नासानाले प्रवेशयेत्।
सुखान्निर्गमयेत् पश्चात् प्रोच्यते नेतिकर्म्मकम्॥
साधनान्नेतिकर्म्मापि खेचरीसिद्धिमाप्नुयात्।
कफदोषा विनश्यन्ति दिव्यदृष्टिश्च जायते॥७॥
घ्राणेन्द्रियेण तुन्दञ्च भ्रामयेदुभपार्श्वयोः।
सर्व्वरोगाग्निदग्धोऽपि देहानलविवर्द्धनम्॥"
इति नौलिकी॥७॥
"निमेषोन्मेषकं त्यक्त्वा सूक्ष्मलक्ष्यं निरीक्षयेत्।
यावदश्रु निपतति चाटकं प्रोच्यते बुधैः॥
एवमभ्यासयोगेन शाम्भवी जायते ध्रुवम्।
न जायते नेत्ररोगो दिव्यदृष्टिप्रदायकम्॥७॥
शीतकृत्य पीत्वा वक्त्रेण नासानालैर्विरेचयेत्।
पुनःक्रमेण पुनःक्रमेण शीतक्रमेण विनिर्गमेत्॥
भालभातिं त्रिधा कुर्य्यात् कफदोषं निवारयेत्॥
इड़या पूरयेद्वायुं रेचयेत् पिङ्गलया पुनः।
पिङ्गलया पूरयित्वा पुनश्चन्द्रेण रेचयेत्॥
पूरकं रेचकं कृत्वा वेगेन न तु धारयेत्।
एवमभ्यासयोगेन कफदोषं निवारयेत्॥७॥
नासाभ्यां जलमाकृष्य वक्त्रेण रेचयेत् पुनः।

पायं पायं प्रकुर्व्वीत श्लेष्मदोषं निवारयेत्॥
न जायते वार्द्धक्यञ्च वरो नैव प्रजायते॥"
इति घेरण्डसंहितायां षट्कर्म्मशोधनं प्रथमोऽध्यायः॥
षट्कर्म्मा, [न्] पुं, (षट् कर्म्माणि यस्याः। यस्य।) यागादिभिर्युतो ब्राह्मणः। इत्यमरः॥
तथा च।
"इज्याध्ययनदानानि याजनाध्यापने तथा।
प्रतिग्रहश्च तैर्युक्तः षट्कर्म्मा विप्र उच्यते॥"
षट्कर्म्माण्यस्य इति बहुव्रीहिः। इति भरतः॥
षट्कूटा, स्त्री. भैरवीविशेषः। यथा,—
अथ षट्कूटा भैरवी।
"डाकिनी राकिणी बीजे साकिनी काकिनी-युगम्।
साकिनी डाकिनी बीजे आद्यन्ते हरसुन्दरि॥
आद्यमेकारसंयुक्तमन्दीकारमखिलम्।
शुक्लस्वरान्वितं देवि तार्त्तीयं बीजमालिखेत्।
बिन्दुनादकलाक्रान्तं चितयं शैलसम्भवे॥"
तृतीयबीजं सविसर्गं इत्यपि केचित्। तन्त्रान्तरे।
"उरौ श्यामादनं जीयं शिवमध्ये विधा लिखेत्।
सूर्य्येण मायाशक्राभ्यां क्रमात्तं मस्तिकं कुरु॥
बिन्दुनादान्वितं पाद्यत्रयमन्यं विसर्गवत्।
ध्यानमस्याः प्रवक्ष्यामि सर्व्वभूतनिकृन्तनम्॥
बालसूर्य्यप्रभां देवीं नवाब्जकुसुमप्रभाम्।
मुक्तमालावलीरम्यां बालसूर्य्यसमांशुकाम्॥
सुवर्णकलसाकारपीनोन्नतपयोधराम्।
पाशाङ्कुशौ पुस्तकञ्च तथा च जपमालिकाम्॥"
ध्यानमिति शेषः।
"हिरण्यया यजेन्नित्यं विधाय परमेश्वरि।
यन्त्रमस्या वरारोहे त्रिकोणं तत्पुटं लिखेत्॥
बहिरष्टदलं पद्मं रविभञ्च ततो लिखेत्।
चतुरस्रं चतुर्द्वारमेवं मण्डलमालिखेत्॥
षड़ङ्गावरणं देवि! पूजयेत् पूर्ब्ववच्छिवे।
रत्यादि चितयं देवि त्रिकोणे परिपूजयेत्॥
डाकिन्याद्याश्च षट्कोणे वसुपत्रे ततः परम्।
ब्राह्म्यादि युगलं पश्चाद्दलमध्ये ततः परम्॥
बालायाः पौण्ड्रयष्टीश्च वामाद्याः पूजयेत् क्रमात्।
चतुरस्रे लोकपालान् सायुधान् परमेश्वरि।
अनेनैव विधानेन नित्याख्यां भैरवीं यजेत्॥"
इति तन्त्रसारः॥
षट्कोण, क्ली, षण्णां कोणानां समाहारः। तच्च रिपुस्थानम्। यथा,—
"पातालं छिद्रकं चैव क्षुद्रदम्भसुधैकम्।
त्रिकोणञ्च नवमं दुःखिवयं स्यात् तृतीयकम्॥
धीस्थानं पञ्चमं ज्ञेयं यामित्रं सप्तमं स्मृतम्।
द्यूनं द्यूनं तथास्त्राख्यं षट्कोणं रिपुमन्दिरम्॥"
इति ज्योतिस्तत्त्वम्॥७॥
(षट् कोणा यस्य।) यन्त्रम्। इति राज निर्घण्टः॥ षड़क्षरमन्त्रो यन्त्रभेदः। यथा, गणेशयन्त्रम्।

"दीर्घं षट्कोणमध्यं स्फुरदनलपुरे तारयं दिक्षु लक्ष्मी-
माया कन्दर्पभूमिस्तदनु रसपुटेष्वालिखेद्बीज-
षट्कम् ।"

इति तन्त्रसारः ॥

षट्चक्रं, क्ली, (षण्णां चक्राणां समाहारः ।) शरीरस्थषट्पद्माकारषट्प्रकारचक्रम् । यथा,—

"सप्त पद्मानि तत्रैव सन्ति लोका इव प्रभो ।
गुदे पृथ्वीयमं चक्रं चतुर्दलमितम् ॥
लिङ्गे तु षड्दलं चक्रं स्वाधिष्ठानमिति स्मृतम् ।
त्रिलोकपद्धतिर्नाम तप्तचामीकरप्रभम् ॥
नाभौ दशदलं चक्रं कृष्णलिप्या समन्वितम् ।
नीलाब्जसदृशं ज्ञानं पूर्वकमन्दिरम् ॥
मणिपूराभिधं स्वर्णं जलस्थानं प्रकीर्त्तितम् ।
उद्यदादित्यसंकाशं हृदि चक्रमनाहतम् ॥
कुसुमाकारं द्वादशारं वैष्णवं वायुमन्दिरम् ।
कण्ठे विशुद्धसरसं षोड़शारं पुरोदयम् ॥
शाम्भवीपरपक्राख्यं चन्द्रबिन्दुविभूषितम् ।
षडाम्नायालयं चक्रं द्विदलं श्वेतसुत्तमम् ॥
राधाचक्रमिति ख्यातं मनःस्थानं प्रकीर्त्तितम् ।
सहस्रदलमेकार्णं परमात्मप्रकाशकम् ॥
निर्ज्ञानमयं सत्यं सदसादित्यसन्निभम् ।
षट् चक्राणीह मेदानि नैतद्भेदं कथञ्चन ॥"

इति पाद्मे स्वर्गखण्डे २० अध्यायः ॥७॥

अपरञ्च ।

"तत्त्वस्वरूपभेदं तत् षट्चक्रं प्रतिलक्षयेत् ।
षट्चक्रेऽपि महामायां सत्यं ध्यात्वा प्रयत्नतः ॥
लम्बयेच्छून्यलम्बेच आदिषोड़शचक्रकम् ।
आदिषोड़शचक्रस्थां साधकानन्दकारिणीम् ॥
चिन्तयन् साधको देवीं शमकर्म समारभेत् ।
भ्रुवोरुपरि नाड़ीनां चयानां प्रान्त उच्यते ।
तस्यान्तं त्रिपथस्थानं षट्कोणं चतुरङ्गुलम् ॥
रक्तवर्णेन योगज्ञैराज्ञाचक्रमितीरितम् ।
कण्ठे चयानां नाड़ीनां वेदनं विद्धि पार्थिव ।
शुद्धैर्वेदाग्निसङ्ख्यानां षट्कोणं तत् षड़ङ्गुलम् ॥
तत् षट्चक्रमिति प्रोक्तं शुद्धं कण्ठस्य मध्य-
गम् ।
चयानामथ नाड़ीनां हृदये चैकता भवेत् ॥
तत्स्थानं षोड़शारं स्यात् सप्ताङ्गुलप्रमाणतः ।
तत् प्रोक्तमुक्तं योगज्ञैरादिषोड़शचक्रकम् ॥
आत्मानामथ सत्यानां चिन्तनस्य वशस्य च ।
सर्वादाद्यच्च भूयं तस्मादादीति गद्यते ॥"

इति कालिकापुराणे ५० अध्यायः ॥८॥

अपरञ्च ।

"सहस्रारे त्रिकोणाख्ये दक्षाज्ञाचक्रियानके ।
गर्भे सप्तमुखिलिङ्गं कोटिविद्युत्समप्रभम् ॥
शुद्धं कामकलाचक्रं क-ए-ऐमीशमारकम् ।
शुद्धं च त्रिपुरारारं कुलसो मध्यविग्रहः ॥
शुद्धं वैभवरूपं ह-स-सकेशमुद्दलम् ।
शुद्धं त्रिकोणसंस्थानं सदा तत्र विभावयेत् ॥
शुद्धं त्रिपथसंस्थानं षट्कोणं वीरवन्दितम् ।
कालिकाचक्रमेतत् तु पुरुषाधिष्ठानसंयुतम् ।

मूलमाधारषट्कानां मूलाधारं ततो विदुः ।
स्वयम्भुवं परं लिङ्गं स्वाधिष्ठानं ततो विदुः ॥
तदूर्द्धे नाभिदेशे तु मणिपूरं महत्प्रभम् ।
मेघाभं विद्युदाभञ्च वह्नितेजोमयं ततः ।
मणिपद्मिनं तत् पद्मं मणिपूरं तथोच्यते ॥
दशभिश्च दलैर्युक्तं डादिफान्ताक्षरान्वितम् ।
शिवेनाधिष्ठितं पद्मं विश्वलोकैककारणम् ॥
तदूर्द्धेऽनाहतं पद्मसुयदादित्यसन्निभम् ।
कादिठान्ताक्षरैरर्कपत्रैश्च समधिष्ठितम् ॥
तत्पद्मे वायुलिङ्गन्तु सूर्य्यायुतसमप्रभम् ।
शब्दब्रह्ममयं शब्दोत्पत्तिस्तत्रैव दृश्यते ॥
तेनाष्टदलाब्जं पद्मं तत् सुनिभिः परिकीर्त्तितम् ।
व्योमानन्दसदनं तत् पुरुषाधिष्ठितं परम् ॥
तदूर्द्धेन्तु विशुद्धाख्यं दलषोड़शपङ्कजम् ।
स्वरैः षोड़शकैर्युक्तं धूम्रवर्णं भवेत्प्रभम् ॥
विशुद्धिं तनुते यस्मात् जीवस्य संसृतेः क्षणात् ।
विशुद्धं पद्ममाख्यातं व्याकाशाख्यं महत् परम् ॥
आज्ञाचक्रं तदूर्द्धे तु आत्मनाधिष्ठितं परम् ।
आत्मासंज्ञमयं तत्र गुरोराज्ञेति कीर्त्तितम् ॥
कैलासाख्यं तदूर्द्धे तु बोधनीन्तु तदूर्द्धतः ।
एवञ्च शिवचक्राणि प्रोक्तानि तव सुव्रत ॥
सहस्रारास्बुजं विन्द्वाख्यानं तदूर्द्धमीरितम् ।
इत्येतत् कथितं सर्वं योगमार्गमनुत्तमम् ॥"

इति तन्त्रसारः ॥

षट्चरणः, पुं, (षट् चरणा यस्य ।) भ्रमरः । इति हलायुधः ॥ (यथा, आर्य्यासप्तशत्याम् । ५८७ ।

"षट्चरणकलीदलुष्टं परागसुखपूर्णमामुष्टं
त्वां सुरभिमधामसुना भक्तिं सारो
वहति ।")

यूका । इति राजनिर्घण्टः ॥ षट्पादश्च ॥

षट्, क निकेतने । हिंसे । दाने । बले । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-वाक्षे बले च सक०-हिंसे दाने च सक०-सेट् ।) भूर्द्धन्यादिरयमान्तः । क, षड्यति लोकः । नियमति हन्ति बली स्यात् ददाति वा इत्यर्थः । इति दुर्गादासः ॥

षट्त्रिंशी, [न्] त्रि, (उष्ट्रसैनादिभेदेन षट्प्रकाराङ्किता: षण्णवतय इति । षट्त्रिंशत् + इनिः ।) अष्टत्रिंशादौ तिलकरणकषट्कर्म्मकारी । यथा,—

"त्रिशोड्डमी तिलकायी तिलशेखी तिलप्रदः ।
तिलभक् तिलवापी च षट्त्रिंशी नावसीदति ॥"

इति तिथ्यादितत्त्वम् ॥

षट्त्रिंशत्, स्त्री, (षड़धिका त्रिंशत् । मध्यपदलोपि समासः ।) संख्याविशेषः । छत्तिस इति भाषा । यथा, व्याहृतिविवेकमालायाम् ।

"आसप्तमाच्छुभे सप्तदुर्जनविरुद्धके ।
सप्तमार्केन्दुराहुदिग्वसनाश्चने तथा ॥
षाट्त्रांशिकमतीत्यैव अर्कीयमनुपूर्व्वकौ ।
पुनराष्टमगौ सौम्य अर्कीयमनुपूर्व्वकौ ।
अष्टमारौ मकरस्थपूर्व्वौ सप्तमे च ।

ताम्बूलादकलेपं पुष्पमालां तथैव च ॥
अनुलेपञ्च मुद्रा च चामरव्यजनं तथा ।
आदर्शदर्शनञ्चैव नमस्कारोऽथ नर्त्तनम् ॥
गीतवाद्यं च दानानि स्तुतिर्होमप्रदक्षिणम् ।
दत्तकालप्रदानञ्च ततो देवविसर्জ্জনम् ॥
उपचारा इमे ज्ञेया; षट्त्रिंशत् सुरपूजने ॥"

इत्येकादशीतत्त्वम् ॥

षट्त्रिंशत्तत्त्वं, क्ली, (षट्त्रिंशत्तत्त्वसंख्यकपञ्चमशास्त्रकारिणां मुनीनां मतम् ।) षड़धिकत्रिंशत्तत्त्वाख्यधर्म्मशास्त्रप्रणेतृकमुनीनामभिप्रायः । यथा । तथा च षट्त्रिंशत्तत्त्वम् । इति तिथिस्वरूपकथने तिथ्यादितत्त्वम् । तेषां नामानि यथा,—

"मनुर्विष्णुर्यमो दक्षः शङ्खलिखितौ ।
आपस्तम्बोशना च कात्यायनपराशरौ ॥
वशिष्ठव्यासवर्त्ता हारीतगौतमावपि ।
प्रचेताः शङ्खलिखितौ याज्ञवल्क्यश्च काश्यपः ॥
शातातपो लोमशश्च जमदग्निः प्रजापतिः ।
विश्वामित्रपैठीनसी बौधायनभितामहौ ॥
छागलेयश्च पाराशरी मरीचिश्यवनौ भृगुः ।
सप्तर्षयो नारदश्च षट्त्रिंशत् स्मृति-
कारकाः ॥
एतेषान्तु मतं यत्तु षट्त्रिंशत्तत्त्वसंयुतम् ॥"

इति शङ्खलिखितौ ॥

षट्पदः, पुं, (षट् पदानि यस्य ।) भ्रमरः । इत्यमरः ॥ (यथा, रघुः । ६ । ६८ ।

"न हि प्रभुर्हन्तुमकारणेन
द्रुमान्तरं काङ्क्षति षट्पदाली ॥")

तच्छब्दानि यथा,—

"ये षट्पदाद्याः शब्दानि तेषा-
माख्यास्वरूपाणि निरूपयामः ।
अयेन वामी यदि सञ्जु शब्दान्
पद्मेन वा वामदृशं प्रयच्छेत् ।
आस्वादयेद्वा कुसुमं प्रशस्तं
भृङ्गस्तदा स्यात् सुमहान् प्रमोदः ।
अन्यापरे सन्ति च षट्पदा ये
यानासु ते यामगताः प्रशस्ताः ॥"

इति वसन्तराजशाकुने षट्पदाध्यः १५ वर्गः ॥

यूका । इति राजनिर्घण्टः ॥ षट्चरणः, त्रि ॥ (षट्पदविशिष्टे च त्रि । यथा, महाभारते । १४ । ५ । १६ ।

"पुरस्तात् सुगुप्तं स्यात् दृढ़प्राकारतोरणम् ।
अट्टाट्टालकसंबाधं षट्पदं सर्व्वतोदिशम् ॥")

षट्पदप्रियः, पुं, (षट्पदानां भ्रमराणां प्रियः ।) नागकेशरवृक्षः । इति शब्दमाला ॥

षट्पदाधिपः, पुं, (षट्पदः अतिशिरिव यस्य ।) आम्रवृक्षः । इति शिवकोषदेवः ॥

षट्पदानन्दवर्द्धनः, पुं, (षट्पदानामानन्दं वर्द्धयतीति । वध + ल्युः ।) किंशुकवृक्षः । इति राजनिर्घण्टः ॥

षट्पदी, स्त्री, (षट् पदानि यस्याः । ङीप् ।) यूका । इति शब्दरत्नावली ॥ अमरमाला च ॥

षड़ंशी

षट्प्रज्ञः. पुं, (षट्सु रसेषु प्रज्ञा यस्य ।) कामुकः । यथा,—
"विदूषी वेलीकः षट्प्रज्ञः कामकेलिर्विदूषकः ।
पीठमर्दो भवेल्लिङ्गदुरो विटः ॥"
इति विकाण्डशेषः ॥
(षट्सु धर्म्मादिषु प्रज्ञा यस्य ।) धर्म्मादिज्ञाखिज्ञः । यथा,—
"धर्म्मार्थकाममोक्षेषु लोकतत्त्वार्थयोरपि ।
षट्सु प्रज्ञास्ति यस्यैकः स षट्प्रज्ञ इति स्मृतः ॥"
इति च विकाण्डशेषः ॥

षड़ंशीकः, पुं, (षट्सु रसेषु अंशीकः ।) मत्स्यः ।
इति केचित् ॥

षड़ङ्ग, क्ली, (षण्णां अङ्गानां समाहारः ।) शरीरस्य षड़वयवम् । यथा,—
"अङ्के बाहू शिरो मध्यं षड़ङ्गमिदमुच्यते ॥"
इति शब्दचन्द्रिका ॥ ० ॥
वेदाङ्गषट्शास्त्रादि । यथा,—
"शिक्षा कल्पो व्याकरणं निरुक्तं ज्योतिषं तथा ।
छन्दसीति षडङ्गानि वेदानां वैदिका विदुः ॥"
इति शब्दरत्नावली ॥ * ॥
अपि च । अङ्गान्याह शिक्षापद्यम् ।
"छन्दःपादौ तु वेदस्य हस्तौ कल्पोऽथ कथ्यते ।
ज्योतिषामयनं नेत्रं निरुक्तं श्रोत्रमुच्यते ॥
शिक्षा घ्राणन्तु वेदस्य मुखं व्याकरणं स्मृतम् ।
तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते ॥"
इति निष्पादितत्त्वम् ॥ ० ॥
व्याप्तव्याप्तीयदामाङ्गपीठादिकम् । इति लोकप्रसिद्धम् ॥ * ॥ षट्प्रकारगवविशेषः । यथा,—
"गोमूत्रं गोमयं क्षीरं सर्पिर्दधि च रोचना ।
षड़ङ्गमेतन्माङ्गल्यं पवित्रं सर्व्वदा गवाम् ॥"
इति स्मृतिः ॥ * ॥
हृदयादिषड़वयवम् । तत्तन्मायं व्याचष्टे हृदयम् ।

षड़ङ्गः, पुं, (षट् अङ्गानि यस्य ।) क्षुद्रगोक्षुरकः ।
इति राजनिर्घण्टः ॥ (वेदः । यथा,—
"शिक्षा कल्पो व्याकरणं निरुक्तं छन्दसां चयः ।
ज्योतिषामयनञ्चैव षड़ङ्गो वेद उच्यते ॥")

षड़ङ्गजित्, पुं, (षड़ङ्गं जितवानिति । जि + क्विप् ।) विष्णुः । इति शब्दमाला ॥ षड़ङ्गशेषतरि, त्रि ॥

षड़भिज्ञः, पुं, (षट्सु धर्म्मार्थकाममोक्षलोकतत्त्वार्थेषु अभिज्ञा यस्य ।) बुद्धः । अमरः ॥

षड़ंशीतिः, स्त्री, अष्टाविंशाक्षरविशेषः । सा तु मिथुनकन्याधनुर्म्मीनराशिषु भवति । यथा, भविष्यात्तरखण्डे ।
"अष्टाविंशतिमात्राभी रेफाद्यन्तविभागयोः ।
विदुषी तुलामेषौ सौम्यमर्कं तथाधरः ॥
धनुर्मिथुनकन्यासु सौरेश्च परमोत्तमः ।
षड़शीतिः कृमीन सिंहे विष्णुपदी स्मृता ॥"
इति तिथ्यादितत्त्वम् ॥
अस्याः पुण्यकालः सौरेणाभिधानार्थं दर्शितः ॥ * ॥ अष्टाविंशतिमात्रिकाणां छन्दोभेदानाम् । छन्दोमञ्जर्यां दृष्टव्यम् ॥

षड़शीतिचक्रं. क्ली, (षड़शीतेश्चक्रम् ।) मिथुनकन्याधनुर्म्मीनराशिस्थरवेः शुभाशुभफलज्ञानार्थं नक्षत्राङ्कनराकारचक्रम् । यथा,—
"सुखे चैकं करे वेदाः पादयुग्मे द्वयं द्वयम् ।
क्रोड़े वाणसंघा वेदाः करे सप्तनरेऽपि च ॥
द्वयं द्वयं तथा नेत्रे मस्तके त्रितयं तथा ।
द्वयञ्चैव तथा गुह्ये षड़शीत्यां स्थिते रवौ ॥
सुखे दुःखं करे लाभः पादयोर्भ्रमणं हृदि ।
कान्ता स्यादन्यगं वामे हस्ते स्यात् स्त्रीयमे नृणाम् ॥
सम्मानं नेत्रयोश्चैव अपमानश्च मस्तके ।
गुह्ये चैव भवेन्मृत्युः षड़शीतिफलश्रुतिः ॥"
इति ज्योतिस्तत्त्वम् ॥

षड़ष्टकं, क्ली, योगविशेषः । स तु वरकन्ययोः स्वस्वराश्यपेक्षया परस्परषष्ठाष्टमराशिसम्बन्धः । स च मित्रारिभेदेन द्विविधः । तत्र मित्रषड़ष्टकं यथा । श्रीपतिरत्नमालायाम् ।
"मकरसमेतं मिथुनं कन्याकलसौ झषेन्द्र-
मीनौ च ।
वृषभतुले अलिमेषौ कर्कटधनुषी च मित्र-
विधौ ॥"
षड़ष्टकाविति शेषः ॥ * ॥ अरिषड़ष्टकमाह ।
"मकरः करिकुलरिपुणा
कन्या मेषेण सह झषस्तुलया ।
कर्किघटौ वृषधनुषौ
वृश्चिकमिथुने चारिविधौ ॥
यदि कन्याग्रमे भर्त्ता भर्त्तुः षष्ठे च कन्यका ।
षड़ष्टकं विजानीयान् वर्जितं विदुषैरपि ॥" * ॥
षड़ष्टकादौ तारानियममाह । भीमपराक्रमः ।
"सौकूटे शुभयोर्द्वयोरपि तयोरैक्येऽधिपत्येऽपि वा
तारायट् च समित्रमित्रजननक्षेमार्थसम्पद्यदि ।
षट्काष्टे नव पञ्चके वयधने योगेच युग्मेतयोः
प्रीत्यायुःसुखवृद्धिपुत्रिजनकः कार्य्यो विवाह-
स्तदा ॥"
गर्गः ।
"मरणं तारविरोधे मरणिभावे चिरेण ।
रोगादि नरनार्य्योः षट्काष्टे वैरं भवेदाशु ॥"
व्यासः ।
"मैत्र्यादियोगेऽपि षड़ष्टकादौ
तारा विपत्प्रत्यरिसैधनाख्याः ।
वर्ज्या विवाहे पुरुषोत्तमे हि
प्रीतिः परा कंसतु तारकासु ॥"
इति ज्योतिस्तत्त्वम् ॥ ० ॥
मतान्तरं यथा,—
"मिथुनेन मकरः मेषो कन्यया सेव उत्तमः ।
मृत्युना सह सौख्यन्तु कुम्भेन सह कर्कटः ॥
धनुना वृषभः प्रेमी मिथुनेन च वृश्चिकः ।
इतरं षड़ष्टकं प्रोक्तं सर्व्वसौख्यं न संशयः ॥"
इति मात्स्ये ६१ अध्यायः ॥

षड़ानन, पुं, (क्रमिकादीनां षण्णां मातृणामयं षट् आननानि यस्य ।) कार्त्तिकेयः । अमरः ॥ (यथा, महाभारते । ३ । २३१ । २० ।

षड़ान

"क्षोभयामि देवैर्ऋषिभिश्च जुष्टं
भक्त्या गुह्यं नामभिरप्रमेयम् ।
षड़াননं शक्तिधरं सुवीरं
निबोध चेतांसि कुरुप्रवीर ! ॥")
तस्य कार्त्तिकेयनामकारणं यथा,—
"अग्निपुत्रः कुमारस्तु शरस्तम्बे व्यजायत ।
तस्य शाखो विशाखश्च नैगमेयश्च पृष्ठजः ॥
अपत्यं शक्तिकायाश्च कार्त्तिकेयस्ततः स्मृतः ॥"
इति मात्स्ये ५ अध्यायः ॥
(षट्सु वदनेषु, क्ली । यथा, रघुः । १३ । २२ ।
"सर्व्वासु मातृष्वपि वत्सलत्वात्
स निर्विशेषप्रतिपत्तिरासीत् ।
षड़াননापीनपयोधरासु
नेता चमूनामिव कृत्तिकासु ॥")

षड़ाम्नायः, पुं, (षट् आम्नायाः ।) शिवस्य षड़्वक्त्रविनिर्गतषट्प्रकारतन्त्रशास्त्रम् । यथा,—
श्रीशिव उवाच ।
"अथेदानीं प्रवक्ष्यामि आम्नायकथनं पृथक् ।
पूर्व्वाम्नायो यदा मत्तस्तदा प्राचीदिशि स्थितः ॥
सद्योजिवोऽहं भगवानाचारः परिकीर्त्तितः ।
एवं वै दक्षिणाम्नायो दक्षिणस्यां दिशि स्थितः ॥
एवं हि पश्चिमाम्नायः पश्चिमायां दिशि स्थितः ॥
एवमेवोत्तराम्नाय उत्तरस्यां दिशि स्थितः ॥
सुरस्मद्भुतं देवि ! यत् प्रोक्तं तव सन्निधौ ।
ऊर्द्ध्वाम्नायश्च कथितो देवानामपि दुर्लभः ॥
यदा चाधोमुखं देवि यत् प्रोक्तं गिरिशे प्रिये ।
अथ आम्नाय इत्युक्तः सत्यं सत्यं तमध्यमे ।
षड़াम्नायाश्च कथिताश्चोत्पत्तिक्रमनामतः ॥
यस्मिन् यस्मिंश्च ये देवाः कथिताश्च वरानने ।
तान्देवांश्च प्रवक्ष्यामि साधकानां हिताय वै ॥
श्रीविद्याभेदसहिता तारा च त्रिपुरा तथा ।
सुवर्णश्री धान्यपूर्णा पूर्व्वाम्नाये प्रकीर्त्तिताः ॥
बगलामुखी च यक्षिणी त्वरिता धनदा तथा ।
यक्षिणी बालभैरवीत्यर्थः ।
महिषघ्नी महालक्ष्मीर्दक्षिणाम्नायकीर्त्तिता ॥
महात्वरन्तथा विद्या तथा वाराह्यादिनी परा ।
प्रत्यङ्गिरा भवानी च पश्चिमाम्नायकीर्त्तिता ॥
कालिकाभेदसहिता तारामेदैश्च संयुता ।
मातङ्गी भैरवी छिन्ना तथा धूमावती परा ।
उत्तराम्नायकथिताः कर्त्तृ श्रीक्रमदाः ॥
समस्तभेदसहिता कालिकायाः प्रकीर्त्तिताः ।
दार्व्विशाक्षरी तासां ऊर्द्ध्वाम्नायकीर्त्तिता ।
एकजटा षड़াम्नाये महामोक्षप्रदायिनी ।
तारा परमा विद्या च विद्यासारेणोदिता ॥
परप्रसादसम्पन्न ऊर्द्ध्वाम्नाये प्रकीर्त्तिताः ॥
पार्श्वेश्वरादयो देवा यत्र आम्नायकीर्त्तिताः ॥
ऊर्द्ध्वाम्नायो यत्रैव देवानां मोक्षदो भवेत् ।
धर्म्मार्थकाममोक्षार्थं आम्नायाय प्रकीर्त्तिताः ॥
अधोमुखविधिना मन्त्रे लभ्या धर्म्मफलप्रदाः ॥
पूर्व्वाम्नायादिकर्त्तॄणां विधानं शम्भु सुन्दरि ।
कथ्यते तेषान्तु मन्त्रे मन्त्रकर्त्तृत्वमेवच ॥
षट्कर्म्मकारका मुख्या मन्त्राम्नायाः प्रकीर्त्तिताः ।

उत्तराम्नायो देवेशि तेषामाशु फलप्रद: ॥"
इति समयाचारतन्त्रे २ पटल: ॥ ॐ ॥

तत्र आम्नायभेदेनाचारभेद उक्त: । यथा,—
"पूर्व्वाम्नायोदितं कर्म्म पाशुवं कथितं प्रिये।
यद्दत्तं दक्षिणाम्नाये तदेव पाशुवं स्मृतम्॥
पश्चिमाम्नायजं कर्म्म पशुवीरसमाश्रितम्।
उत्तराम्नायजं कर्म्म दिव्यवीराश्रितं प्रिये॥
दिव्योऽपि वीरभावेन साधयेत् पिल्वकानने।
वीरासनं विना दिव्य: पूजयेत् पिल्वकानने।
ऊर्द्ध्वाम्नायोदितं कर्म्म दिव्यभावाश्रितं प्रिये॥"
इति निरुत्तरतन्त्रे १ पटल: ॥

षड्गुण, क्ली, (षण्णामवयवानां समाहार:।) मिश्रितषट्कटुद्रव्यम्। यथा,—
"पिप्पली मरिचं शुण्ठी चव्यमेतद्विमिश्रितम्।
त्रिकटु त्रयुषणं योषं कटुत्रिकमथोच्यते।
मत्रिकानलचव्येषु चतु: पञ्च षड्गुणम्॥"
इति शब्दचन्द्रिका॥

अपि च।
"पञ्चकोलं समरिचं षड्गुणसदाहृतम्।
पञ्चकोलगुणं तत्तु रूक्षमुष्णं विषापहम्॥"
इति भावप्रकाश:॥

षड्गया, स्त्री, षड्विधगया। यथा,—
"गयागजो गयादित्यो गायत्री च गदाधर:।
गया गयासुरश्चैव षड्गया मुक्तिदायिका॥"
इति वायुपुराणे गयामाहात्म्यम्॥

षड्गव, त्रि, (षट् गावो यत्र। समासे अच्।) गोषट्कयुक्तशकटादि। यथा,—
"अष्टागवं धर्म्मशकटं षड्गवं जीविकार्थिनाम्।
चतुर्गवं कृषिवलानां द्विगवं ब्रह्मघातिनाम्॥"
इत्याह्निकाचारतत्त्वम्॥ ॐ॥

प्रत्ययविशेष:। (यथा। "प्रकृत्यर्थस्य षट्त्वे षड्गवच्।"५। २। २८। इत्यस्य वार्त्तिकोक्त्या भवति।) यथा,—
"पशुभ्यो गोयुगं युग्मे परं षट्त्वे तु षड्गवम्॥"
इति हैमचन्द्र:।
(यथा च महाभारते। ८। ३८। ६।
"अयं तस्मै वरं प्रादात् सौवर्णं रुक्मिषड्गवम्॥")
षण्णां गवां समाहार:। इति द्विगुसमासनिष्पन्नम्। तत्र, क्ली॥

षड्ग्रन्था, (षट् ग्रन्था यस्या: सा।) वचा। इति भावप्रकाश:॥ श्वेतवचा। अटरूष:। महाकरञ्ज:। इति राजनिर्घण्ट:॥

षड्ग्रन्थि, क्ली, (षट् ग्रन्थयो यस्य) पिप्पलीमूलम्। इति वैद्यकम्॥ षट्पर्व्वणि, पुं॥

षड्ग्रन्थिका, स्त्री, (षड्ग्रन्था एव। स्वार्थे कन्। टाप् च अत इत्वम्।) अटरूष:। इत्यमर:॥

षड्ग्रन्थी, स्त्री, (षट् ग्रन्था यस्या:। ङीष्।) वचा। इति शब्दरत्नावली॥

षड्ज:, पुं, (षड्भ्य: स्थानेभ्य: जायते इति। जन+ड:।) सप्तस्वरेषूच्चितस्वरविशेष:। इत्यमर:। अस्य व्युत्पत्तिर्यथा,—
"नासां कण्ठमुरस्तालु जिह्वां दन्तांश्च संश्रित:।
षड्भ्य: संजायते यस्मात् तस्मात् षड्ज इति स्मृत:॥"
स च मयूरस्वरतुल्यस्वर:। यथा,—
"षड्जं रौति मयूरो हि गावो नर्दन्ति चर्षभम्।
अजा विरौति गान्धारं क्रौञ्चो नदति मध्यमम्॥"
इति भरत:॥
(अस्मिन् चतस्र: श्रुतयो वसन्ति। यथा, सङ्गीतदर्पणे। ५३।
"तीव्रा कुमुदती मन्दा छन्दोवत्यस्तु षड्जगा:॥")
तानसेनमते सप्तस्वराणां मध्ये प्रथमस्वरोऽयम्। खरज् इति लोके ख्यात:। अस्योच्चारणस्थानं कण्ठ:। अयं विप्रवर्ण:। अस्यार्च्चकं नाम। अर्थात् एकस्वरमिलित:। सर्व्वस्वरापेक्षया चुदस्वरोऽयम्। अस्य ताल एक:। अस्याष्टौ भेदा भवन्ति। इति सङ्गीतशास्त्रम्॥

षड्दुर्ग, क्ली, (षट् प्रकारं दुर्गम्।) षट्प्रकारकोट्टम्। तद्यथा। धन्वदुर्गम् १ महीदुर्गम् २ गिरिदुर्गम् ३ मनुष्यदुर्गम् ४ रुद्दुर्गम् ५ वनदुर्गञ्च ६। इति महाभारते राजधर्म्म:॥

षड्धा, अ, (षष्+धाच्।) षट्प्रकारम्। इति व्याकरणम्॥

षड्बिन्दु:, पुं, विष्णु:। इति त्रिकाण्डशेष:। कीटभेद:। इति मेदिनी। शिरोरोगस्य यक्ततेलविशेष:। यथा,—
"एरण्डमूलं तगरं घृताक्षा
जीवन्तिका सैन्धवराजिके च।
भृङ्गं विडङ्गं मधुयष्टिका च
विश्वौषधं कृष्णतिलस्य तैलम्॥
अजापयस्तैलविमिश्रितञ्च
चतुर्गुणे भृङ्गरसे विपक्वम्।
षड्बिन्दवो नासिकयो: प्रदेया:
सर्व्वाभिघात्नु: शिरसो विकारान्॥
घृतांश्च केशान् पलितांश्च दन्तान्
निर्ब्बध्य मूलान् सुदृढ़ीकरोति।
सुपर्णगन्धप्रतिमञ्च चक्षु:
कुर्व्वन्ति वाजीरधिकं बलञ्च॥"
जीवन्तिकाच हरीतकीशाकविशेष:। इति भावप्रकाश:॥

षड्भुज:, त्रि, (षट् भुजा यस्य।) षड्भुजयुक्त:। यथा,—
"भीमस्त्रिपादस्त्रिशिरा: षड्भुजो नवलोचन:।
भयप्रदरणो रौद्र: कालान्तकयमोपम:॥"
इति नक्षत्रवेधपुराणे माहेश्वरव्यूहरूपम्॥
(यथा च महानिर्व्वाणतन्त्रे। ४। १७।
"चतुर्भुजा त्वं द्विभुजा षड्भुजाष्टभुजा तथा।
त्वमेव विश्वरक्षार्थं नानामूर्त्तिधारिणी॥")
चैतन्यदेवे, पुं। स तु पुरुषोत्तमक्षेत्रे षड्भुजो भूत्वा श्रीरामानन्दराघवशरीरे लीनोऽभूत्। इति लीलाप्रसङ्गे:॥

षड्भुजा, स्त्री, (षट् भुजा इव रेखा यस्याम्।) फललताविशेष:। खरबुजा इति भाषा। (अस्मिन्नर्थे क्लीवलिङ्गेऽपि दृश्यते॥) तत्पर्य्याय:। मधुफला २ षड्रेखा ३ वृत्तकर्कटी ४ तिक्ता ५ तिक्तफला ६ मधुपाका ७ वृत्तेक्षुरा: ८ षड्रेखा ९। अस्या फलगुणा:।
"तिक्तं वाल्पे तदनु मधुरं किञ्चिदम्लञ्च पाके
नित्यक्षेतु तदहतसमं तर्पणं पुष्टिदायि।
दृष्यं दाहश्रमविशमनं स्वल्पमूत्रं विधत्ते
पित्तोष्मादापहरकफदं षड्भुजं वीर्य्यकारि॥"
इति राजनिर्घण्ट:॥ ॐ॥

षड्भुजा। यथा। पूर्व्वदले षड्भुजां पीनवक्ष:स्थलरुचिं अग्निप्रभां षड्भुजां दक्षिणे गदाभयवज्रधरां वामे शक्तिशूलपरशुधरां देवीमिति॥ॐ॥ रुद्रचण्डा। यथा। दक्षिणदले रुद्रचण्डां कृष्णवर्णां दिव्याभरणभूषितां प्रसन्नवदनां षड्भुजां दक्षिणे वज्रशूलपरशुधरां वामे पाशाङ्कुशखेटधरां देवीमिति॥ॐ॥ चण्डवती। यथा। वायुदले चण्डवतीं धूम्रवर्णां प्रसन्नवदनां सर्व्वालङ्कारभूषितां षड्भुजां दक्षिणे अङ्कुशपाशाब्जखड्गधरां वामे दण्डशूलडमरुधरां देवीमिति॥
इति रुद्रयामिलेश्वरपुराणोक्तदुर्गापूजापद्धति:॥

षड्रस:, पुं, (षट्प्रकारो रस:।) मधुरादिषट्प्रकाररस:। यथा,—
"मधुरो लवणस्तिक्त: कषायोऽम्ल: कटुस्तथा।
सन्तीति रसनीयत्वादमी षड्मी रसा:॥"
एषां नामलक्षणं।
"मधुरं गौड्यमित्याहुरिक्ष्वादौ स च दृश्यते।
लवणस्तु पटु: प्रोक्त: सैन्धवादौ स दृश्यते॥
तिक्तस्तु पिचुमर्दादौ व्यक्तमास्वाद्यते रस:।
कषायस्तुवरस्तुक्त: स च पूगीफलादिषु।
कटुस्तु शार्ङ्गेष्ट: स्याद्भारीशादौ स चेष्यते॥"
इति राजनिर्घण्ट:॥
एषां गुणास्तत्तच्छब्दे द्रष्टव्या:॥

षड्रात्रं, क्ली, (षण्णां रात्रीणां समाहार:।) षड्रात्र:। यथा,—
"सद्य:शौचं भवेद्विप्रे तथा चोक्तं चतुर्व्विधम्।
गर्भस्रावे च वैदीक्तं पूर्व्वकाले त्वचेतसं॥
ब्राह्मणानामहोरात्रं क्षत्रियाणां दिनत्रयम्।
षड्रात्रमेव वैश्यानां शूद्राणां द्वादशाहकम्॥"
इति वामने १४ अध्याय:॥

षड्रेखा, स्त्री, (षट् रेखा यत्र।) षड्भुजा। इति राजनिर्घण्ट:॥ षड्रात्रौ च॥

षड्लवण, क्ली, (षट् लवणानि यत्र।) षड्लवणैर्युक्तं पञ्चलवणम्। इति राजनिर्घण्ट:॥

षड्वक्त्र:, पुं, (षट् वक्त्राणि यस्य।) कार्त्तिकेय:। यथा,—
"यत्तत्तेजो विप्रलोपं लोकेषु षण्मुख:।
स्कन्दो विशाख: षड्वक्त्र: कार्त्तिकेयश्च विश्रुत:॥"
इति मत्स्यपुराणस्य १३४ अध्याय:॥

षड्गुः

षड्विधं, त्रि, (षट् विधाः प्रकारा यत्र ।) षट्प्रकारम् । यथा,—
"संज्ञा च परिभाषा च विधिर्नियम एव च ।
अतिदेशोऽधिकारश्च षड्विधं सूत्रलक्षणम् ॥"
इति सुग्धबोधटीकायां दुर्गादासः ॥
अपि च ।
"तत्र चिह्नं गन्धहेतुर्नानारूपवती मता ।
षड्विधस्तु रसस्तत्र गन्धोऽपि द्विविधो मतः ॥"
इति भाषापरिच्छेदः ॥

षण्डः, पुं, (षण्ड दाने + "अमन्ताड्डः ।" उणा० १।११३। इति डः । बहुलवचनात् सत्वाभावः ।) वृषभः । षाँड़ इति भाषा । तत्पर्य्यायः । गोपतिः २ इष्टकरः ३ । इत्यमरः ॥ षण्डः ४ भण्डः ५ शंण्डः ६ । इति शब्दरत्नावली ॥ क्लीवम् । इति भटाधारमरटौकै ॥ समूहः । इति हेमा ॥ (यथा, हरिवंशे । ३३ । ३२ ।
"नता निश्चलसङ्घाता बभूवुस्ते महोरगाः ।
सायाह्ने कदलीगर्भे कस्मिंश्चित्तस्य वायुना ॥")

षण्डः, पुं, क्लीं, (षण्ड दाने + डः ।) अण्डादिकटाहम् । पद्मकुसुदादिसमूहः । इत्यमरः ॥ (यथा, माघे । ११ । १५ ।
"कलत्रवसुपगीते षट्पदौघेन षण्डैः
कुसुदकमलषण्डे तुल्यरूपामवस्थाम् ॥"
चिह्नम् । यथा, भागवते । ४ । १६ । २३ ।
"यानि रूपाणि जगृहे इन्द्रो दयितयेप्सितः ।
तानि मायास्य षण्डानि लिङ्गं षण्ढमिहोच्यते ॥")

षण्डाली, स्त्री, तैलमानम् । छटाक् इति भाषा । सरची । (षण्डेन वृषभवत् कायकपुरुषेण अलति पर्य्याप्नोतीति । अल + अच् । गौरादित्वात् ङीष् ।) कासुकस्त्री । इति मेदिनी ॥ सुद्राक्षितमेदिन्यां दन्त्यसकारादौ लिखिता ॥

षण्ढः, पुं, (शाम्यति शिथिलाभवात् । शम + "शमेर्ढः ।" उणा० १ । १०१ । इति ढप्रत्ययेन साधुः ।) नपुंसकः । इति राजनिर्घण्टः हेमचन्द्रश्च ॥ स च चतुर्दशविधः विंशतिविधश्च । यथा नारदः ।
"परीक्ष्य पुरुषः पुंस्त्वे निर्दोषेराङ्गलक्षणैः ।
चतुर्दशविधः प्राक्ते षण्ढो दृष्टो मनीषिभिः ॥
चिकित्स्यश्चाचिकित्स्यश्च तेषामुक्तो विधिः क्रमात् ।
निसर्गषण्ढो वहश्च पक्षषण्ढश्च षण्ढकः ॥
प्रतिज्ञाषण्ढकुरो रोगात् देवक्रोधात्तथैव च ।
ईर्ष्याषण्ढश्च सैरश्च वातरेता सुखेभगः ॥
व्याधिषण्ढौषधौजौ च शापात्तौ नपुंसकाः ॥"
१४ ॥

कामतन्त्रे तु ।
"निसर्गषण्ढो वहश्च पक्षषण्ढश्च कीलकः ।
शापादिषण्ढकश्चैव ईर्ष्यकः सैरकस्तथा ॥
व्याधिषण्ढौषधौजौ च शापात्तौ नपुंसकाः ।
सुखेभगो वातरेताः कुम्भीकः षण्ढसप्तकौ ॥
व्याधिश्च सुमनौ च शापः स्त्रीत्वानि विंशतिः ॥"
२० ॥

तेषां लक्षणानि यथा,—
"ध्वजादिरहितोत्पत्तौ निसर्गषण्ढ उच्यते ।१।
गलितास्थौ भवेद्वण्ढः २ पक्षान्तरितशुक्तिमान् ॥
पक्षषण्ढः ३ कीलकस्तु यः क्लैब्यादात्मनः स्त्रियम् ।
परेण सह संयोज्य पश्चात्तामेव सेवते ॥ ४ ॥
शापादिषण्ढो गुर्व्वादिशापादेवाप्रहर्षणः ।५।
सदा स्वाभिरतस्तासु रतिलब्धः ६ स ईर्ष्यकः ॥
दृष्ट्वा व्यवायमन्येषां व्यवाये यः प्रवर्त्तते । ७ ।
बहुस्त्रीसेवनाच्यातविरसः सैरकः स्मृतः ॥८॥
प्रत्यक्प्रवृत्तवीर्य्यो यो विसर्गसमये भवेत् ।
आच्छिन्नबीजः स ज्ञेयो ९ मोघबीजस्तु स स्मृतः ॥
धृष्टस्त्रीसन्निधानादैर्य्यो भवेत् पतितध्वजः ।१०।
अत्र श्लोकौ नलस्यैतौ पतितम् ॥ ११ ॥
परस्यामेव यस्याञ्च पुंस्त्वं सोऽन्यापतिर्मतः ।१२
वक्त्रमेव तु यः कुर्य्यान्मैथुनं स सुखेभगः ॥१३॥
वातरेता विसर्गे यो वातं लिङ्गेन मुञ्चति ।१४।
कुम्भीकः स तु यो गार्य्याः पाणावेव प्रवर्त्तते ॥
१५ ॥
अविकारिध्वजः षण्ढो १६ नष्टो रोगादशुक्रकः ।
१७ ।
शुक्रप्राप्यध्वजोच्छ्रायौ व्याशेयः १८ सुमनस्कः ॥
यो योनिसेकसौरभ्यमाघ्राय लभते बलम् । १०।
षण्ढः स्त्रीतुल्यवाक्चेष्टः स्त्रीधर्म्मा छिन्नलिङ्गकः ॥"२०॥

इति वाचस्पतिमतस्मृतिरत्नावल्यामुद्वाहरहस्यविकाशः ॥ तद्दर्शनस्पर्शनयोः प्रायश्चित्तं यथा,—
"नालपेच्छनविदित्वा चौरहीनां तथा स्त्रियम् ।
देवतापितृसत्कृत्यं यज्ञसत्रादिनिन्दकैः ॥
कृत्वा तु स्पर्शनालापं शुद्ध्येनाकावलोकनात् ।
अवलोक्य तथोदक्यामन्यं पतितं श्वपचम् ॥
विधर्म्मिस्मृतिकामषण्ढविक्षान्तावसायिनः ।
एतानेव हि कर्त्तव्यं प्राज्ञैः शोधनमात्मनः ।
अभोज्यस्मृतिकामषण्ढमार्ज्जारांश्च कुक्कुटान् ॥
पतितावविद्धचाण्डालक्षत्तृहारांश्च धर्म्मवित् ।
संस्पृश्य शुध्यते स्नानादुदक्याग्रामशूकरौ ॥"
इति मार्कण्डेये सदाचाराध्यायः ॥

षड्गाड़ीचक्रं, क्ली, (षड्विधं गाड़ीचक्रम् ।) नराणां जन्मादिमरणचक्रघटितचक्रविशेषः । यथा,—
"जन्मादौ कर्म्म ततोऽपि दशमं सांघातिकं
षोड़शम् ।
चतुदायमष्टादशं विनाशसंज्ञं चयोविंशम् ॥
द्वाद्यापु षण्विंशं मानसमेवं नरः षड्गुः
स्यात् ॥"२॥

तेषां फलम् ।
"ईहादेहार्थहानिः स्याज्जन्मर्क्षे उपतापिते ।
कर्म्मर्क्षे कर्म्मणां हानिः पीड़ा मनसि मानसे ॥
सम्पदविघ्नयत्नानां हानिः सांघातिके तथा ।
चतुर्थे मासुदयिके मित्रभृत्यार्थसङ्क्षयः ।

षड्ज

वैनाशिके विनाशः स्याद्देहद्रव्यविगमस्य दाम् ॥"
इति ज्योतिस्तत्त्वम् ॥

षण्मासः, त्रि, (षण्मासे भवः । षण्मास + "षण्मासाट्यण्यच् ।" ५ । १ । ८३ । इति यत् ।) षाण्मासः । इति सिद्धान्तकौमुदी ॥

षण्मुखः, पुं, (षट् मुखानि यस्य ।) कार्त्तिकेयः । इति हलायुधः ॥ (यथा, महाभारते । ३ । २३१ । १६ ।
"त्वं क्रीड़से षण्मुख कुक्कुटेन
यथेच्छसे नानाविधकामरूपी ॥")

षण्मुखा, स्त्री, (षट् मुखानीव रेखा यस्याम् ।) षड्भुजा । इति राजनिर्घण्टः ॥

षत्वं, क्ली, (षस्य भावः । ष + त्व ।) मूर्द्धन्यषकारस्य भावः । यथा । इत्वषत्वे । इति सुग्धबोधव्याकरणम् ॥

षद्, ल ट च औ शृ विषादे । शरणे । गतौ । इति कविकल्पद्रुमः ॥ (तुदा० पर० सक० विषादे अक० अनिट् ।) ल, अषदत् । ट, षादः षद्यः । औ, असात्सीत् । शृ, सीदती सीदन्ती । विषाद आकुलीभावः । सीदति राधा माधवहेतोः । शरणं हिंसा । इति दुर्गादासः ।

षद्, क गतौ । आङ्पूर्व्वोऽयम् । इति कविकल्पद्रुमः ॥ (चुरा० पर० सक० सेट् ।) मूर्द्धन्यादिः । क, आसादयति । इति दुर्गादासः ॥

षन, सम्भक्तौ । इति कविकल्पद्रुमः ॥ (भा० पर० सक० सेट् ।) सम्भक्तिः सेवनम् । सनति गुरुं लोकः । इति दुर्गादासः ॥

षन, ह ण उ दाने । इति कविकल्पद्रुमः ॥ (तना० उभ० सक० सेट् । लुवेट् ।) ह ण, सनोति सनुते । उ, सनित्वा सत्वा । इति दुर्गादासः ॥

षनृच, गतौ । इति कविकल्पद्रुमः ॥ (भा० पर० सक० सेट् ।) सर्पति । इति दुर्गादासः ॥

षनृच, औ णि सङ्गे । इति कविकल्पद्रुमः ॥ (भा० पर० अक० अनिट् ।) औ, असाङ्क्षीत् । णि, सक्तोऽक्ति । सर्पति वपुषि वासः । इति दुर्गादासः ॥

षप, सर्पे । इति कविकल्पद्रुमः ॥ (भ्वा० पर० अक० सेट् ।) सर्पति । अजीषपत् । सप्तः सप्तवान् । इति दुर्गादासः ॥

षम, वैकृत्ये । इति कविकल्पद्रुमः ॥ (भ्वा० पर० अक० सेट् ।) वैकृत्यं विक्लवीभावः ।
"सम्यन्ति यदियोगेन सीमन्तिन्यः सरातुराः ।"
इति दुर्गादासः ॥

षम, तृ क वैकृत्ये । इति कविकल्पद्रुमः ॥ (चुरा० पर० अक० सेट् ।) सिषमयिषति । इति दुर्गादासः ॥

षर्ब, सर्पणे । इति कविकल्पद्रुमः ॥ (भ्वा० पर० सक० सेट् ।) सर्बति । इति दुर्गादासः ॥

षर्ब्ब, सर्ब्बने । इति कविकल्पद्रुमः ॥ (भ्वा० पर० सक० सेट् ।) सिसर्ब्बयिषति । सर्ब्बति धर्मं लोकः । इति दुर्गादासः ॥

षर्व्व, सर्पणे। इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट्।) षर्व्वति। इति दुर्गादासः ॥

षर्षपी, स्त्री, पक्षिविशेषः। यथा,—
"हापुत्रिका खञ्जनिका षर्षपी खञ्जनाकृती।"
इति शब्दरत्नावली ॥

षल, गतौ। इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट्।) सलति। सिषालयिषति। इति दुर्गादासः ॥

षष्टिः, स्त्री, (षड् दशतः परिमाणमस्य। "पङ्क्तिविंशतित्रिंशदिति।" ५।१।५९। इति निपातनात् साधुः।) संख्याविशेषः। षाट इति भाषा। इति ज्योतिषम् ॥ (यथा, मनुः। ३। १७७।
"वीक्ष्यान्धो नवतेः काणः षष्टेः श्वित्री शतस्य तु।
पापरोगी सहस्रस्य दातुर्नाशयते फलम् ॥")

षष्टिकः, पुं, (षष्टिरात्रेण पच्यन्ते इति। "षष्टिकाः षष्टिरात्रेण पच्यन्ते।" ५।१।९०। इति कन्प्रत्ययेन निपातितः।) धान्यविशेषः। षष्टिरात्रेण पच्यते षाटिया इति स्वामिसुभूती। इत्यमरभरतौ ॥ तत्पर्य्यायः। षष्टिशालिः २ षष्टिजः ३ स्निग्धतण्डुलः ४ षष्टिवासरजः ५। अस्य गुणाः।
"गौरो नीलः षष्टिकोऽयं द्विधा स्या-
दाद्यो रुच्यः शीतलो दोषहारी।
बल्यः पथ्यो दीपनो वीर्य्यवृद्धिं
धत्ते तस्मात् किञ्चिदूनो द्वितीयः ॥"
इति राजनिर्घण्टः ॥
षष्टिसंख्याक्रीते, त्रि ॥

षष्टिका, स्त्री, (षष्टिक + स्त्रियां टाप्।) षष्टिकधान्यम्। यथा,—
"हैमन्तिकं सितास्विन्नं धान्यं मुद्गास्तिला यवाः।
कलायकङ्गुनीवारा वास्तूकं हिलमोचिका।
षष्टिका कालशाकञ्च मूलकं केमुकेतरत् ॥"
इति तिथ्यादितत्त्वे हविष्यान्नप्रकरणीयस्मृतिवचनम् ॥ किञ्च। शरदि षष्टिकाभिः मार्ज्जनं नितमिति वाचस्पतिमिश्राः ॥

षष्टिक्यं, त्रि, (षष्टिकानां भवनं क्षेत्रम्। षष्टिक + "यवयवकषष्टिकात् यत्।" ५।२।३। इति यत्।) षष्टिकधान्योपयुक्तक्षेत्रादि। इत्यमरः। २।९।७ ॥

षष्टितमः, त्रि, (षष्टि + "षष्ट्यादेश्चासंख्यादेः।" ५।२।५८। इति तमट्।) षष्टेः पूरणः। इति मुग्धबोधव्याकरणम् ॥

षष्टिधा, व्य, षष्टिप्रकारम्। षष्टिशब्दात् धाच्प्रत्ययेन निष्पन्नम् ॥

षष्टिमतः, पुं, (षष्ट्या वर्षैर्मतः।) हस्ती। षष्टिवर्षमध्ये वयःपूर्व्वार्द्धस्थिता षष्टिमताः इति वारणताभिधानं शब्दमाला च ॥

षष्टिलता, स्त्री, भ्रमरमारी। इति राजनिर्घण्टः ॥

षष्टिसंवत्सराः, पुं, (षष्टिसंख्यकाः संवत्सराः।) प्रभवादिषष्टिसंख्यकवर्षम्। यथा,—

अथ षष्टिसंवत्सरगणना।
"शाकेन्द्रकालः पृथगाकृतिघ्नः २२
शशाङ्कनन्दाश्वियुगैः ४१९१ समेतः।
शराद्रिवस्विन्दु-१८७५हृतः सलब्धः
षष्ट्यावशिष्टाः प्रभवादयोऽब्दाः ॥
वर्षं वर्च्चेन्दु यच्छेषं सूर्य्यैः संपूर्य्य खोग्निभिः ६०।
हृतव्युत्क्रमतः खाग्निहृतेऽंशे मासकादयः ॥"
अस्यार्थः। शाकेन्द्रकालः शकराजाब्दकालः पृथक् स्थितः तत्रैव आकृतिघ्नः २२ द्वाविंशत्या पूरितः शशाङ्कनन्दाश्वियुगैरेकनवत्यधिकशतद्वयाधिकचतुःसहस्रैः समेतोऽङ्कः। शराद्रिवस्विन्दुहृतः पञ्चसप्तत्यधिकाष्टादशशतैर्यावत्संख्यं हन्तुं शक्नोति तावता हृतः कर्त्तव्यः। सलब्धः पूर्व्वशकाब्दः शरेत्यादिना लब्धसंख्यया युतः कार्य्यः षष्ट्यावशेषे षष्ट्यादिशेषोऽङ्कः पूर्व्ववत् षष्ट्या हृते लब्धस्यावशिष्टे प्रभवादयः। एकावशेषे प्रभवः द्व्याद्यवशिष्टे विभवादिः। वर्षवर्च्चेन्दु यच्छेषं वर्षातिरिक्तं शराद्रिवस्विन्दुहृतावशिष्टं तत् सूर्य्यैर्द्वादशभिः संपूर्य्य खोग्निभिः षष्ट्या हृते व्युत्क्रमत इत्यनेन षष्टिहृतावशिष्टाः अङ्काः दण्डाः षष्टिहृतलब्धांशके खाग्निहृते त्रिंशता हृते चावशिष्टा अंशका लब्धा मासाः स्युरिति ॥ ॥ प्रभवादिषष्टिवर्षाण्युपक्रम्य।
"आद्या तु विंशतिर्ब्राह्मी द्वितीया वैष्णवी स्मृता।
तृतीया रुद्रदैवत्या श्रेष्ठा मध्याधमा भवेत् ॥"
भविष्यपुराणे।

भैरव उवाच।

"षष्ट्यब्दं कथयाम्यत्र क्रूराः सौम्याश्च ये प्रिये।
संवत्सरफलं सुभ्रु प्रभवादौ वरानने ॥
बहुतोयास्तथा मेघाः सर्व्वशस्या च मेदिनी।
बहुक्षीरास्तथा गावो व्याधिरोगविवर्ज्जिताः।
प्रशान्ताः पार्थिवाश्चैव प्रभवे परिकीर्त्तिताः ॥१॥
सुभिक्षं क्षेममारोग्यं सर्व्वे व्याधिविवर्ज्जिताः।
प्रशान्ता मानवाः सर्व्वे बहुशस्या वसुन्धरा।
हृष्टास्तुष्टा जनाः सर्व्वे विभवे च वरानने ॥२॥
रोगा बहुविधाश्चैव मनुष्या वाजिकुञ्जराः।
सर्व्व एव प्रणश्यन्ति शुक्ले वर्षे वरानने ॥ ३ ॥
उन्नतञ्च जगत् सर्व्वं धनधान्यसमाकुलम्।
नित्योत्सवः प्रजावृद्धिः प्रमोदे जायते प्रिये ॥४॥
नीरोगाश्च निराबाधा मानवा विगतद्विषः।
बहुक्षीरास्तथा गावः प्राजापत्ये वरानने ॥५॥
निरातङ्कं जगत् सर्व्वं धनयौवनगर्व्वितम्।
अङ्गिरसि प्रजाः सर्व्वा नित्योत्साहा वरानने ॥ ६ ॥
सुभिक्षं क्षेम..रोग्यं यथाकालं सुशोभनम्।
शस्यवृद्धिं विजानीयात् श्रीमुखे सुरवन्दिते ॥७॥
बहुक्षीरास्तथा गावो धान्यञ्च बलवत्तरम्।
जायन्ते सर्व्वशस्यानि भावे वर्षे वरानने ॥ ८ ॥
महार्घं जायते सर्व्वं घृततैलरसादिकम्।
प्रजानाश्च भवेद्वृद्धिर्युवनि संवत्सरे शुभे ॥ ९ ॥
निष्पत्तिः सर्व्वशस्यानां मध्या धातरि कीर्त्तिता।
इक्षुक्षीरगुडादीनां प्रबलत्वं वरानने ॥ १० ॥
सुभिक्षं क्षेममारोग्यं कार्पासस्य महार्घता।
लवणं मधु गव्यञ्च ईश्वरे दुर्लभं प्रिये ॥ ११ ॥
सुभिक्षं क्षेममारोग्यं प्रशान्ताः पार्थिवाः प्रिये।
तस्करोपहृतं वित्तं बहुधान्ये वरानने ॥ १२ ॥
राष्ट्रभङ्गश्च दुर्भिक्षं तस्करैश्चोपपीड़नम्।
जानीयाद्विग्रहं घोरं प्रमाथिनि वरानने ॥१३॥
जायन्ते सर्व्वशस्यानि मेदिनी निरुपद्रवा
लवणं मधु गव्यञ्च महार्घं विक्रमे प्रिये ॥१४॥
कोद्रवाः शालिमुद्गाश्च शक्तुमाषास्तथैव च।
महार्घं जायते सर्व्वं वृषे च सुरवन्दिते ॥१५॥
चणका मुद्गमाषाश्च अन्यच्च विदलं प्रिये।
महार्घं जायते सर्व्वं चित्रभानौ वरानने ॥ १६ ॥
सुभिक्षं क्षेममारोग्यं विश्वञ्च निरुपद्रवम्।
व्यवहारो भवेत् श्रेयान् स्वर्भानौ देवपूजिते ॥१७॥
अतिवृष्टिश्च जायेत धान्यस्याथ प्रपीड़नम्।
शस्यं भवति सामान्यं तारणे देववन्दिते ॥ १८ ॥
बहुशस्यानि जायन्ते सर्व्वदेशे सुलोचने।
सौराष्ट्रे लाटदेशे च पार्थिवे नात्र संशयः ॥१९॥
दुर्भिक्षं जायते घोरं सर्व्वोपद्रवसंयुतम्।
अनावृष्टिः समाख्याता व्यये संवत्सरे प्रिये ॥२०॥
उन्नतो वर्षणे मेघो जलं नैवोपयच्छति।
महार्घं सर्व्वजिद्वर्षे सर्व्वमेव वरानने ॥ २१ ॥
कोद्रवाः शालिमुद्गाश्च कङ्गुमाषास्तथैव च।
सुलभं जायते सुभ्रु जगद्वै सर्व्वधारिणि ॥ २२ ॥
अनलप्रबला लोका धान्यौषधिप्रपीड़नम्।
जायते मानुषे कष्टं विरोधिनि न संशयः ॥२३॥
सर्व्वाः प्रजाः प्रपीड्यन्ते व्याधिः शोकश्च जायते।
शिरोवक्षोऽक्षिरोगाश्च पापाद्धि विकृते
जनाः ॥ २४ ॥
उपद्रुतं जगत् सर्व्वं तस्करैर्मूषिकैः खगैः।
पीड़िताश्च प्रजाः सर्व्वा देशभङ्गः खरे प्रिये ॥२५॥
सुभिक्षं क्षेममारोग्यं शस्यं भवति शोभनम्।
बहुक्षीरास्तथा गावो नन्दनं नन्दने प्रिये ॥२६॥
अल्पतोयास्तथा मेघा वर्षन्ति खण्डमण्डले।
नश्यन्ति सर्व्वशस्यानि विजये नात्र संशयः ॥२७॥
क्षत्रियाश्च तथा वैश्याः शूद्राश्च नटनर्त्तकाः।
पीड़ितास्ते वरारोहे जये सर्व्वे न संशयः ॥२८॥
सरोगञ्च तथा देवि दाहज्वरसमन्वितम्
अभिभूतं जगत् सर्व्वं मन्मथे सुरवन्दिते ॥२९॥
तुषधान्यक्षयो देवि सर्व्वशस्यमहार्घता।
व्यवहाराश्च नश्यन्ति दुर्म्मुखे दुर्म्मुखाः प्रजाः ॥३०
पीड़्यन्ते सर्व्वशस्यानि देशे देशे शुचिस्मिते।
हेमलम्बे प्रजाः सर्व्वाः क्षीयन्ते नात्र संशयः ॥३१
तस्करैः पार्थिवैश्चैव अभिभूतमिदं जगत्।
अर्घो भवति सामान्यो विलम्बे तु भयं महत् ॥३२
विषमञ्च जगत् सर्व्वं विरोधि भवनं ध्रुवम्
विकारी सर्व्वतोऽपायो रसपावयन्तु नान्यथा ॥३३
क्वचिद्वर्षति पर्ज्जन्यो देशे संक्षिप्तमण्डलः।
दुर्भिक्षं सर्व्वरोगैर्वै चरद्वारी विपर्य्ययः ॥ ३४ ॥-

दुर्भिक्षं जायते सर्व्वा मेदिनी दुष्यति ध्रुवं ।
ध्रुवे ध्रुवन्ति तोयानि मानवा दुःखिता भुवि ॥३५
सुवर्णरूप्यधान्यानि जगत् सर्व्वं सुशोभनम् ।
ब्राह्मणा वणिजस्तुष्टाः सुभिक्षे शुभकृत् प्रिये॥३६
सुभिक्षं क्षेममारोग्यं लक्ष्मा गोब्राह्मणाः प्रिये ।
सुस्थिताः शोभने वर्षे प्रजाः सर्व्वाः सुलोचने॥३७
विधमस्थं जगत् सर्व्वं व्याकुलं समुदाहृतम् ।
जनानां जायते भङ्गे क्रोधे क्रोधः परस्परम् ॥३८॥
सर्व्वत्र जायते क्षेमं सर्व्वशस्यसमर्घता ।
विश्वावसौ वरारोहे कार्त्तिकस्य महार्घता ॥३९
पार्थिवेनृपसेनेश्च समस्ते: खण्डमण्डले ।
प्रपीड़न्ते जनाः सर्व्वे भयभीताः पराभवे ॥४०॥
लग्नधान्यानि पीड्यन्ते ग्रीष्मे वर्षति वासवः ।
प्रवड़ै पीड़िताः सर्व्वाः प्रजाश्च सुरवन्दिते ॥४१
जायन्ते सर्व्वशस्यानि सुभिक्षं निरुपद्रवम् ।
सौम्यदृष्टिर्भवेद्राजा कालिके च शुभं वदेत् ॥४२
सुभिक्षं क्षेममारोग्यं सुखञ्च निरुपद्रवम् ।
सौम्यदृष्टिर्भवेद्राजा सौम्ये सौख्यं प्रकीर्त्तितम्॥४३
तोयपूर्णा भवेन्मेघो वर्षते च दिने दिने ।
निरुपद्रवाश्च राजानः सर्व्वसाधारणे प्रिये ॥४४
वासवो वर्षते देवि देशे चाखण्डमण्डले ।
अधिकक्षेत्रे कान्यकूले विरोधि क्षणिनाशकृत् ॥४५
व्याभूतं जगत सर्व्वं क्षीणैर्व्वहुविधैः प्रिये ।
मारुतैः फलदाहैश्च परिवारिणि शोभने ॥४६॥
निष्पत्तिः सर्व्वशस्यानां सुभिक्षं भवति प्रिये ।
प्रमाथिनि जलोद्गारो जलदो मोदते प्रजा ॥४७
निष्पत्तिः सर्व्वशस्यानां सर्व्वशस्यामहार्घता ।
शृतं तैलसमं याति व्याजन्दे नन्दति प्रजा ॥४८॥
कोद्रवाः शालिमुद्गाश्च पीड्यन्ते वरवर्णिनि ।
सर्व्वौषधानि धान्यानि राक्षसे निधुराः प्रजाः ॥ ४९ ॥

दुर्भिक्षं जायते घोरं धान्यौषधिप्रपीड़नम् ।
व्याजले च समाख्यातं नात्र कार्य्या विचारणा॥५०
देशभङ्गः सुदुर्भिक्षं समासान कथयाम्यहम् ।
पिङ्गले धान्यपक्वानि दुर्भिक्षं नर्म्मदातटे ॥५१॥
गोमहिष्यो विनश्यन्ति ये चान्ये गटनर्त्तकाः ।
वासवो वर्षते देवि शस्यञ्च नहि जायते ॥
निःसमर्घसमाख्यातं धान्यानां महार्घता ।
गोमहिष्यः सुखेनेह वर्त्तन्यन्ताब्दशेषतः ॥
सत्र सर्व्वं देवि विक्रीय कर्त्तव्यो धान्यसञ्चयः ।
तेन धान्येन लोकोऽयं निस्तरिष्यति दुर्दिनम् ।
पार्थिवा मोघका दीनाः कालयुक्ते प्रपीड़िताः॥५२
तोयपूर्णाः स्थला मेघा वसुधास्या च मेदिनी ।
निधुराः पार्थिवा देवि निर्धार्थे च वराभने ।५३
अन्योन्या धनलोभेन दीक्षिता: प्रमदा: स्मृता: ।
निःस्वाः पार्थिवा देवि रौद्रे संवत्सरे प्रिये ॥५४
दुर्भिक्षं मध्यमं प्रोक्तं अवग्रहो न जायते ।
भवेद्रे मध्यमा वृष्टिर्भाद्रो सम्यक्प्रवर्त्तते ॥ ५५ ॥
दुर्भिक्षं जायते घोरं सर्व्वे व्याधिसमन्विताः ।
प्राणिनां जायतेऽत्यर्थं दुःखञ्च वरवर्णिनि ॥५६॥
महिषीगोनिधिस्त्रीणां क्षीणाब्दशेषतः ।
सत्र सर्व्वं देवि विक्रीय कर्त्तव्यो धान्यसञ्चयः ।

रक्ते संवत्सरे देवि क्रूरवृद्धिर्नराधिपः ।
मानवाः क्रूरचेष्टाश्च संग्रामे रुधिरं भवेत् ॥५७॥
दुर्भिक्षं मरणं घोरं धान्यौषधिप्रपीड़नम् ।
पापरोगी भवेद्देवि रक्ताख्येऽमरवन्दिते ॥५८॥
रोगे मरणदुर्भिक्षं विरोधो बहुसङ्कुलम् ।
क्रोधे तु विषमं सर्व्वं समाख्यातं हरप्रिये ॥५९॥
मेदिनी लभते देवि सर्व्वभूतं चराचरम् ।
देशभङ्गश्च दुर्भिक्षं क्षये संक्षीयते प्रजा ॥
सौराष्ट्रे मालवे देशे दक्षिणे कोङ्कणे तथा ।
दुर्भिक्षं जायते घोरं क्षये संवत्सरे प्रिये ॥
कौसदीनर्म्मदाश्चाश्च यमुनानर्म्मदातटम् ।
विन्ध्यायां सैन्धवाश्चापि विनश्यन्ति न संशयः ॥
सिंहलं मध्यदेशश्च कालञ्जरं तथैव च ।
क्षये क्षयन्ति सर्व्वाणि नान्यथा वरवर्णिनि ॥"६०

इति ज्योतिस्तत्त्वम् ॥

षष्टिहायनः, पुं, (षष्टिर्हायना आयुःकालो यस्य ।) गजः । धान्यविशेषः । इति मेदिनी कोषः ॥ षष्टिसंख्यकवत्सरः । तत्संख्यवयोयुते, त्रि ॥ (यथा, महाभारते ।१।२५४।४४।
"वभञ्जतुस्तदा वृक्षांस्तालाचाकर्षतुस्तदा ।
मत्तौविव च संरब्धौ वारणौ षष्टिहायनौ ॥")

षष्ठः, त्रि. (षष्+"तस्य पूरणे डट् ।" ५ । २ । ४८ । डट् ।"षट्कतिकतिपयचतुरां थुक् ।"५ । २ । ५१ । इति थुक् ।) षष्ठ्या पूरणः । इति मेदिनी ॥ (यथा, रघुः । १० । ७८ ।
"षष्ठमं लोकपालानामूचुः साधर्म्मयोगतः ।
भूतानां महतां षष्ठमष्टमं कुलभूभृताम् ॥")

षष्ठकः, त्रि, षष्ठः । षष्ठशब्दात् स्वार्थे कन्प्रत्ययेन निष्पन्नः ॥ (षष्ठो भागः । "मानपशुबन्धयोः कनुलुकौ च ।" ५ । ३ । ५१ । इति कन् । "षष्ठको भागो मानपशुबन्धे ।" इति काशिका ॥)

षष्ठालुकालकं, क्ली, द्विरह्नोऽनन्तरभुक्तम् । यथा, "द्व्यन्तरे चाप्यन्तरे भुक्तमाहुः षष्ठालुकालकम् ।"
इति क्रियायोगसारः ॥

षष्ठिका, स्त्री. (षष्ठी+स्वार्थे कन् ।) यथा । षष्ठ्यष्टम्यञ्च षष्ठिकेत्यत्र ॥ इति दुर्गोत्सवीयषष्ठिदानप्रकरणं तिथ्यादितत्त्वम् ॥

षष्ठी, स्त्री, (षष्ठ+ङीप् ।) कात्यायनी । इति मेदिनी ॥ षोड़शमातृकान्तर्गतमातृकाविशेषः । सा प्रकृतेः षष्ठीकला स्कन्दभार्य्या च । तस्याः स्वरूपादिर्यथा,—
"प्रधानांशस्वरूपा या देवसेना च नारद ! ।
मातृकासु पूज्यतमा सा च षष्ठी प्रकीर्त्तिता ॥
शिशूनां प्रतिविश्वेषु प्रतिपालनकारिणी ।
तपस्विनी विष्णुभक्ता कार्त्तिकेयस्य कामिनी ॥
षष्ठांशरूपा प्रकृतेर्निर्गुणेन षष्ठी प्रकीर्त्तिता ।
पुत्रपौत्रप्रदात्री च धात्री विधमतां सती ॥
सुन्दरी युवती रम्या सर्व्वाभरणभूषिता ।
स्थाने शिशूनां परमा रक्षरूपा च योगिनी ॥
पूजा द्वादशमासेषु यस्या विश्वेषु सम्मतम् ।
पूजा च सूतिकागारे षष्ठ्यां षष्ठदिने शिशोः ॥
एकविंशतिमे चैव पूजा यस्याश्चानुकूला ।

शुभ्रवर्णयर्मिता चैषा नित्या कार्य्याकृतिः परा ॥
मातृरूपा दयारूपा शुभ्रवस्त्रगरूपिणी ।
बाले बाले चान्तरीक्षे शिशूनां खप्नगोचरे ॥
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे १ अध्यायः ॥ * ॥
अपि च ।

श्रीनारायण उवाच ।

"षष्ठांशा प्रकृतेर्या च सा च षष्ठी प्रकीर्त्तिता ।
तस्याः पूजाविधौ ब्रह्मन् इतिहासमिमं शृणु ॥
राजा प्रियव्रतश्चासीत् स्वायम्भुवमनोः सुतः ।
योगीन्द्रो न वहेद्वार्य्यां तपस्यासु रतः सदा ॥
ब्रह्मज्ञया च यत्नेन क्षतदारो बभूव सः ।
सुचिरं क्षतदारश्च न लेभे तनयं ततः ॥
पुत्रेष्टियज्ञं तेनापि कारयामास कश्यपः ।
मानिन्यै तस्य कान्तायै सुनिर्यत्नचरुं ददौ ॥
भुक्त्वा चरुञ्च तस्याञ्च सद्यो गर्भो बभूव ह ।
दधार तञ्च सा देवी देवं द्वादशवत्सरम् ॥
ततः सुषाव सा ब्रह्मन् कुमारं कनकप्रभम् ।
सर्व्वावयवसम्पन्नं मृतसुत्थानलोचनम् ॥
प्रसन्नाननञ्च ययौ राजा गृहीत्वा बालकं मुने ।
एतस्मिन्नन्तरे तत्र विमानञ्च ददर्श ह ॥
ददर्श तत्र देवीञ्च कमनीयां मनोहराम् ।
दृष्ट्वा तां पुरतो राजा तुष्टाव परमादरम् ॥
पप्रच्छ राजा तां दृष्ट्वा ग्रीष्मसूर्य्यसमप्रभाम् ।
तेजसा ज्वलितां कान्तां शान्तां स्कन्दस्य नारद ॥

प्रियव्रत उवाच ।

का त्वं सुशोभने कस्य कान्ते कान्तासि सुव्रते ।
कस्य कन्या वरारोहा धन्या मान्या च योषितां ॥

देवसेनोवाच ।

ब्रह्मणो मानसी कन्या देवसेनाहमीश्वरी ।
दृष्ट्वा मां मनसा धाता ददौ स्कन्दाय भूमिप ॥
मातृकासु च विख्याता स्कन्दभार्य्या च सुव्रता ।
विश्वे षष्ठीति विख्याता षष्ठांशा प्रकृतेर्यतः ॥
इत्येवमुक्त्वा सा देवी गृहीत्वा बालकं मुने ।
मधुरज्ञानेन तपसा जीवयामास लीलया ॥
गृहीत्वा बालकं देवी गगनं गन्तुमुद्यता ।
पुनस्तुष्टाव तां राजा शुष्ककण्ठौष्ठतालुकः ॥
नृपस्तोत्रेण सा देवी परितुष्टा बभूव ह ।
उवाच तं नृपं ब्रह्मन् ! वेदोक्तं कर्म्मनिर्म्मितम् ॥

देवसेनोवाच ।

त्रिषु लोकेषु राजा त्वं स्वायम्भुवमनोः सुतः ।
मम पूजाञ्च सर्व्वत्र कारयित्वा स्वयं कुरु ॥
तदा दास्यामि पुत्रन्ते कुलपद्मनभोहरम् ।
इत्येवमुक्त्वा सा देवी तस्मै बालकं ददौ ॥
राजा चकार सोत्साहं तत्पूजार्थञ्च सुव्रतः ।
जगाम देवी स्वर्गञ्च दत्त्वा तस्मै शुभं वरम् ॥
आजगाम महाराजः स्वगृहं हृष्टमानसः ।
देवीं तां पूजयामास नानोपचारयोगतः ॥
राजा च प्रतिमासेषु शुक्लषष्ठ्यां महोत्सवम् ।
षष्ठ्या देवाश्च यत्नेन कारयामास यत्नतः ।
बालानां सूतिकागारे षष्ठदे यत्पूजनक्रमम् ।
तत्सर्व्वं कारयामास चैकविंशतिवासरे ॥

बालानां शुभकार्य्ये च शुभान्नप्राशने तथा।
सर्व्वत्र वर्द्धयामास स्वयमेव चकार ह ॥
ध्यानं पूजाविधानञ्च स्तोत्रं मन्त्रो निशामय।
यत् श्रुतं धर्म्मवक्त्रेण कौथुमोक्तञ्च सुव्रत ॥
शालग्रामे घटे वाथ वटमूलेऽथवा शुभे।
भित्तौ पुत्तलिकां कृत्वा पूजयेद्वा विचक्षणः ॥
षष्ठांशां प्रकृतेः शुद्धां सुप्रतिष्ठाञ्च सुप्रभाम्।
सुपुत्रदाञ्च शुभदां दयारूपां जगत्प्रसूम् ॥
श्वेतचम्पकवर्णाभां रत्नभूषणभूषिताम्।
पवित्ररूपां परमां देवसेनामहं भजे ॥
इति ध्यात्वा खड्गिरसि पुष्पं दत्त्वा विचक्षणः।
पुनर्ध्यात्वा च मूलेन पूजयेत् सुव्रतां सतीम् ॥
पाद्यार्घ्याचमनीयैश्च गन्धधूपप्रदीपकैः।
नैवेद्यैर्विविधैश्चापि फलेन शोभनेन च ॥
मूलेनौं ह्रीं षष्ठीदेव्यै स्वाहेति विधिपूर्व्वकम्।
अष्टाक्षरं महामन्त्रं यथाशक्ति जपेन्नरः ॥
ततः स्तुत्वा च प्रणमेद्भक्तियुक्तः समाहितः।
स्तोत्रञ्च सामवेदोक्तं वरपुत्रफलप्रदम् ॥
अष्टाक्षरं महामन्त्रं लक्षधा यो जपेन्नरः।
स पुत्रं लभते नूनमित्याह कमलोद्भवः ॥ * ॥
स्तोत्रं शृणु मुनिश्रेष्ठ सर्व्वकामशुभावहम्।
आज्ञाप्रदञ्च सर्व्वेषां गुह्यं वेदेषु नारद ॥

प्रियव्रत उवाच।

नमो देव्यै महादेव्यै सिद्ध्यै शान्त्यै नमो नमः।
शुभायै देवसेनायै षष्ठ्यै देव्यै नमो नमः ॥
वरदायै पुत्रदायै धनदायै नमो नमः।
सुखदायै मोक्षदायै षष्ठीदेव्यै नमो नमः ॥
प्रकृतेश्चांशरूपायै सिद्धायै च नमो नमः।
मायायै सिद्धयोगिन्यै षष्ठीदेव्यै नमो नमः ॥
सारायै वारदायै च धारायै सर्व्वकारिण्यै।
धात्र्यधिष्ठातृदेव्यै च षष्ठीदेव्यै नमो नमः ॥
कल्याणदायै कल्याण्यै फलदायै च कर्म्मणाम्।
प्रत्यक्षायै च भक्तानां षष्ठीदेव्यै नमो नमः ॥
पूज्यायै स्कन्दकान्तायै सर्व्वेषां सर्व्वकर्म्मसु।
देवरक्षणकारिण्यै षष्ठीदेव्यै नमो नमः ॥
शुद्धसत्त्वस्वरूपायै वन्दितायै नृणां सदा।
हिंसाक्रोधवर्জ্জितायै षष्ठीदेव्यै नमो नमः ॥
धनं देहि प्रियां देहि पुत्रं देहि सुरेश्वरि।
धर्म्मं देहि यशो देहि षष्ठीदेव्यै नमो नमः ॥
देहि भूमिं प्रजां देहि विद्यां देहि सुपूजिते।
कल्याणञ्च जयं देहि षष्ठीदेव्यै नमो नमः ॥
इति देवीञ्च संस्तूय लभेत पुत्रं प्रियव्रतः।
यस्यस्यिनश्च राजेन्द्र षष्ठीदेवीप्रसादतः ॥
षष्ठीस्तोत्रमिदं ब्रह्मन् यः शृणोति च वत्सरम्।
अपुत्रो लभते पुत्रं वरं सुचिरजीविनम् ॥
वर्षमेकञ्च या भक्त्या संस्तुतेदं शृणोति च।
सर्व्वपापविनिर्म्मुक्ता महाप्रज्ञा प्रजायते ॥
वीरं पुत्रञ्च गुणिनं विद्यावन्तं यशस्विनम्।
सुचिरञ्चिरायुषन्तमेव षष्ठीदेवीप्रसादतः ॥
काकवन्ध्या च या नारी मृतापत्या च या भवेत्।
वर्षं श्रुत्वा लभेत् पुत्रं षष्ठीदेवीप्रसादतः ॥
रोगयुक्ते च बाले च पिता माता शृणोति चेत्।
मासञ्च शृणुते बालः षष्ठीदेवीप्रसादतः ॥
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ४० अध्यायः ॥ * ॥
चन्द्रस्य षष्ठकलाक्रियारूपतिथिविशेषः। स तु शुक्लकृष्णपक्षभेदेन द्विविधः। तत्र चन्द्रस्य वृद्ध्यनुकूलयष्ठकलाक्रियारूपः शुक्लपक्षीयः। तस्य ह्रासानुकूलषष्ठकलाक्रियारूपः कृष्णपक्षीयः।* वैशाखादिषु तस्या विशेषनामानि यथा,—
"प्रकृत्या द्वादशे मासि सम्पूज्यापत्यवृद्धये।
सुते जाते तथा षष्ठ्यां षष्ठी द्वादशरूपिणी ॥
वैशाखे चान्दनी षष्ठी ज्येष्ठे चारण्यसंज्ञिता।
आषाढे कार्त्तमी ज्ञेया श्रावणे सुखदा तथा ॥
भाद्रे चम्पेटी विख्याता दुर्गाख्याश्वयुजे तथा।
कल्याणी कार्त्तिके मासि मार्गे च फलकरूपिणी ॥
पौषे मासवरूपा च शीतला तपसि स्मृता।
गोरूपिणी फाल्गुने च चैत्रे शोका प्रकीर्त्तिता॥"
इति स्कन्दपुराणम् ॥
तत्कृत्यादि यथा,—
अथ षष्ठी वा सप्तमीयुता ग्राह्या युग्मात्।
राजमार्त्तण्डे।
"ज्येष्ठे मासि सिते पक्षे षष्ठी चारण्यसंज्ञिता।
यजनेक्षुकरात्तस्यामटन्ति विपिने स्त्रियः ॥
तां विन्ध्यवासिनीं स्कन्दषष्ठीमाराधयन्ति च।
कन्दमूलफलाहारा लभन्ते सन्ततिं शुभाम् ॥"
कन्दं सूरणादि। मूलं तदितरत्। भविष्ये।
"येयं मार्गशिरे मासि षष्ठी भरतसत्तम।
पुण्या रामहरा धन्या शिवा शान्ता गुहप्रिया ॥"
देवीपुराणे चैत्रसधिकृत्य।
"षष्ठ्यां स्कन्दस्य कर्त्तव्या पूजा सर्व्वोपचारिका।
इहैव सुखसौभाग्यमन्ते विष्णुपुरं व्रजेत् ॥"
इयमेव स्कन्दषष्ठी पञ्चमीयुतैवोपोष्या।
"शुक्लाष्टमी स्कन्दषष्ठी शिवरात्रिश्चतुर्दशी।
एताः पूर्व्वयुताः कार्य्याः परतश्च भवेत् ॥"
इति ब्रह्मवैवर्त्तवचनात् ॥
विष्णुधर्म्मोत्तरे।
"अष्टमीञ्च तथा षष्ठीं नवमीञ्च चतुर्दशीम्।
शिरोऽभ्यङ्गं न कुर्व्वीत पर्व्वसन्धौ तथैव च ॥"
इति तिथ्यादितत्त्वम् ॥ * ॥
सा च कार्त्तिकेयाभिषेकतिथिः। यथा,—
"स्वयं स्कन्दो महादेवः सर्व्वपापप्रणाशनः।
तस्य षष्ठीं तिथिं प्रादादभिषेके पितामहः ॥
अस्यां फलाशनो यस्तु यतेन्द्रियमानसः।
अपुत्रोऽपि लभेत् पुत्रान् अधनोऽपि लभेत् धनम्।
यं यमिच्छेन मनसा तं तं लभति मानवः ॥
यश्चैतत् पठति स्तोत्रं कार्त्तिकेयस्य मानवः।
तस्य नेष्टे कुमाराणां क्षेमारोग्यं भयेदृभुवम् ॥"
इति वाराहे स्कन्दोत्पत्तिनामाध्यायः ॥ * ॥
तत्र आत्मफलम्।
"विद्वान् वरिष्ठचतुरः सुकीर्त्तिः
प्रलम्बबाहुर्बलकीर्णगात्रः।
बलप्रतिष्ठो धनपुत्रयुक्तः
शीघ्रश्रुती सप्तशतायुः ॥"
इति कोष्ठीप्रदीपः ॥ * ॥

तत्र यात्राकरणदोषो यथा,—
"पञ्चम्यामीप्सितार्थः स्यात् षष्ठ्यां व्याधियुतो भवेत्।
सप्तम्यामर्थलाभः स्यादष्टम्यामस्त्रपीड़नम्।
षष्ठ्यष्टमीद्वादशीषु न गच्छेत्त्रिदिनत्रयम् ॥"
इति ज्योतिस्तत्त्वम् ॥

षस, तु र स्नापे। इति कविकल्पद्रुमः। (अदा०-पर०-सक०-सेट्।) मूर्द्धन्यादिः। तु, सस्ति। र, वैदिकः। स्नापः प्रक्षेपणम्। इति दुर्गादासः ॥

षसुञ, सर्पणे। इति कविकल्पद्रुमः। (भ्वा०-पर०-सक०-सेट्।) दन्त्यसोपधः। क्विपि संयोगादिलोपे सक्। सच्यति। पचोऽपि पदमाचरं न च पदेषु संसज्यते। इति प्राकृतसूत्रे गणकृतानित्यत्वात्। इति दुर्गादासः ॥

षस्त, इ तु र स्वप्ने। इति कविकल्पद्रुमः। (अदा०-पर०-सक०-सेट्।) मूर्द्धन्यादिः दन्त्यसोपधः। इ, संस्यते। नमध्यपाठेऽपि नस्योपधत्वाभावादेव लोपाभावे इदनुबन्धो वैदेयूचारणभेदार्थः। तु, संस्ति। र, वैदिकः। इति दुर्गादासः ॥

षह, च ड शक्तौ। इति कविकल्पद्रुमः। (भ्वा०-आत्म०-सक०-सेट्।) इहापि शक्तिः क्षमा। च, साहः सहः। ड, अन्यायं सहते नासौ। इति फलायुधः। इति दुर्गादासः ॥

षह, य कि शक्तौ। इति कविकल्पद्रुमः। (दिवा० पुरा०-भ्वा०-च-पर०-सक०-सेट्।) शक्तिरिह देवादिकस्य शक्तिधातोरूपं तेन क्षमा इत्यर्थः। य, सह्यति दुःखं लोकः सहत इत्यर्थः। कि, साहयति। स एवायं नागः सहति कलभेभ्यः परिभवम्। इति दुर्गादासः ॥

षहसान्, पुं, क्षमावान्। यज्ञः। मयूरः। इति संक्षिप्तसारोणादिवृत्तिः ॥

षाट्, य, सम्बोधनम्। इति केचित् ॥

षाड़वः, पुं, गानम्। रसः। इति मेदिनी ॥ रागस्य जातिविशेषः। स च षट्स्वरमिश्ररागरागिण्यौ। यथा,—
"औड़वः पञ्चभिः प्रोक्तः स्वरैः षड्भिस्तु षाड़वः।
सम्पूर्णः सप्तभिर्ज्ञेय एवं रागत्रिधा मतः ॥"
इति सङ्गीतदर्पणम् ॥

षाड़्गुण्य, क्ली. (षड्गुणा एव। "चातुर्वर्ण्यादीनां स्वार्थे।" ५।१।१२४। इत्यस्य वार्त्तिकोक्त्या ष्यञ्।) राज्ञां राज्यरक्षणे उपायाः षट्। यथा। सन्धायासनं सन्धिं कृत्वा अवस्थानम् १। यात्रासन्धानं युद्धार्थंगमनम् २। विग्रहासनं वैरं कृत्वावस्थानम् ३। यानं संपरियत्नासनं शत्रोर्भयप्रदर्शनार्थं यानं प्रदर्श्य स्वस्थाने अवस्थानम् ४। द्वैधीभावः उभयत्र सन्धीकरणम् ५। अन्येषां संश्रयः दुर्गादेर्नृपाद्यस्य वा आश्रयः ६। इति महाभारते राजधर्म्मः ॥ (यथा, माघे। २।६३।
"षाड्गुण्यमुपयुञ्जीत प्रत्यपेक्षं रसायनम्।
सर्वत्रस्त्रेषमज्ञानि व्याधूनि दशन्ति च ॥")

षाण्मातुरः, पुं, (षण्णां मातृणामपत्यमिति। "मातुरुत्संख्यासंभद्रपूर्व्वायाः।" ४।१।११५। इति अण्। उकारश्चान्तादेशः।) कार्त्तिकेयः। इत्यमरः॥

षात्वणत्विकः, त्रि, षत्वणत्वविधायकशास्त्राध्याख्यानम्। तत्र भवः। यथा। षत्वणत्वयोर्विधायकं शास्त्रं षात्वणत्वं तस्याध्याख्यानन्तत्र भवो वा षात्वणत्विकः। इति सिद्धान्तकौमुदी॥

षाध, ऑ न य सिद्धौ। इति कविकल्पद्रुमः॥ (स्वा०-दिवा०च-पर०-सक०-अनिट्।) ऑ, प्रियषात्षधति। न, साध्नोति। य, साध्यति। सिद्धिर्निष्पत्तिः। इति दुर्गादासः॥

षान्त्व, क सामयोगे। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-सेट्।) क, सान्त्वयति शोकार्त्तं स्वयाशुः। सिषान्त्वयिषति। इति दुर्गादासः॥

षाष्ठ, त्रि, षष्ठः। "षष्ठ्यन्तात् स्वार्थे ण्य(ञ्य)प्रत्ययेन निष्पन्नः॥ (पुं, षष्ठो भागः। "षष्ठाष्टमाभ्यां ञ च।" ५।१।५०। इति ञ्यः। इति सिद्धान्तकौमुदी।)

षि, ग ण न वर्त्ये। इति कविकल्पद्रुमः॥ (क्र्या०-स्वा०च-उभ०-सक०-अनिट्।) सृडित्यादिः। ग ण, सिनाति सिनीते। न, सिनोति सिनुते। इति दुर्गादासः॥

षिच, प ग्र न ञौ क्षरणे। इति कविकल्पद्रुमः॥ (तुदा०-उभ०-सक०-अनिट्।) प ग्र ण, सिञ्चति सिञ्चते। ञौ, सेक्ता। सिषिचुरवनिमम्युषाः। इति भारविः। इति दुर्गादासः॥

षिट, अनादरे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) सृडित्यादिः। सेटति खलं लोकः। इति दुर्गादासः॥

षिड्गः, पुं, (षिट् अनादरे+षाधुलकात् अतोऽपि गन् सत्वाभावश्च। इत्युणादिटीकायां उज्ज्वलः। १। १२३।) कामुकः। लोचा इति भाषा। तत्पर्य्यायः। विदग्धः२ नागरः३ भविलः४ छिद्दुरः५ विटः६ धूर्त्तोकः७ धटप्रघः८ कामकेलिः९० विटूषकः१०। इति भूरिप्रयोगः॥ पौटकेलिः११ पौटमर्दः१२। इति त्रिकाण्डशेषः॥ प्रघणिकः१३। इति क्षेमशर्म्मा॥ (यथा, साधे। ५। ३४।

"मन्यानमाशु विलसीहि पुरः स्त्रियै ते
पश्यन् प्रतिद्विरदकुम्भविशङ्कितेव।
सम्भेरवः परिविनंसुरसावुपेति
विष्वग्गिरश्चलत यत्नमनेन कार्षीत्॥")

षिध, गत्याम्। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) सेधति। निष्ठायां सिधितः। इति दुर्गादासः॥

षिध, उ गत्याम्। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्। ज्ञा वेट्।) सेधति। उ, सेधित्वा सिद्ध्वा। ज्ञा वेट्त्वान्नेम् सौत्वीति। मौनिषेधे सिद्धः। इति दुर्गादासः॥

षिध, उ य ञौ सिद्धौ। इति दुर्गादासः॥ (दिवा०-पर०-अक०-अनिट्। ज्ञा वेट्।) उ, सेधित्वा सिद्ध्वा। य, सिध्यति। ञौ, असेत्सीत्। अस्मात् पुषादित्वान्नित्यं ङ इत्यन्ये। सिद्धिर्निष्पत्तिः। सिध्यति घटो निष्पन्नः स्यात् इत्यर्थः। इति दुर्गादासः॥

षिध, ऊ शिवे। शास्त्रे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-शिवे अक०-अनुशासने सक०-वेट्।) सृडित्यादिः। ऊ, असेधीत् असेत्सीत्। शिवं मङ्गलम्। तदाकर्म्मकः। सिद्धो वर्णसमाम्नाय इति कातन्त्रस्याद्यसूत्रम्। शास्त्रमनुशासनम्। सेधति शिष्यं गुरुः। इति दुर्गादासः॥

षिनभ, उ हिंसने। दीप्तौ। इति कविकल्पद्रुमः॥ (भ्वा० पर०-सक०-दीप्तौ अक०-सेट्। क्त्वावेट्।) उ, सिम्भित्वा सिम्भ्वा। इति दुर्गादासः॥

षिल, ग्र उञ्छे। इति कविकल्पद्रुमः॥ (तुदा०-पर०-सक०-सेट्।) उञ्छ उञ्छनग्रस्यैषोपादानम्। ग्र, सिलति धान्यं दीनः। सेलिता। इति दुर्गादासः॥

षिव, य उ तन्तुसन्तानयोः। इति कविकल्पद्रुमः॥ (दिवा०-पर०-सक०-सेट्। क्त्वावेट्।) तन्तुसन्तानस्तन्तुभिर्ग्रन्थनम्। य, सीव्यति वस्त्रं सौचिकः। उ, सेवित्वा सूत्वा। इति दुर्गादासः॥

षु, गतौ। ऐश्वर्य्यप्रसवयोश्च। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-अनिट्।) सवति। इति दुर्गादासः॥

षु, ण गतौ। इति कविकल्पद्रुमः॥ (भ्वा०-उभ०-सक०-अनिट्।) ण, सुषाव सुषुवे। इति दुर्गादासः॥

षु, ग ण सन्धाक्लेदपीडनग्रन्थे। इति कविकल्पद्रुमः॥ (स्वा०-उभ०-सक०-अक०च-अनिट्।) सृडित्यादिः। ग ण, सुनोति सुनुते। सन्धा सन्धानम्। क्लेद इह स्नानं मङ्गलस्नानं वा। तथा च सु ण अभिषवे इति प्राचः। अभिषवः पीडनं मन्थनं वेति त्रिलोचनादयः। स्नानचेति दुर्गः। सन्धानं मङ्गलस्नानं वेति धातुप्रदीपः। इति दुर्गादासः॥

षु, ल ऐश्वर्य्यप्रसवयोः। इति कविकल्पद्रुमः॥ (अदा०-पर०-अक०-सक० च-सेट्।) ल, सौति। इति दुर्गादासः॥

षुः, पुं, गर्भविमोचनम्। इत्येकाक्षरकोषः॥

षुट्ट, क सौच्छ्ये। अनादरे। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-सेट्।) षष्ठमन्तरी टहयान्तः। क, सुट्टयति। इत्यादिरयमिति भीमः। सौच्छ्यमस्पृहाभावः। इति दुर्गादासः॥

षुण्ढ, दीप्तगर्हितयोः। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-दीप्तौ अक० हिंसायां सक०-सेट्।) सृडित्यादिः। षष्ठमन्तरी। सुण्ढति सुषुण्ढ। इति दुर्गादासः॥

षुर, ग्र भेदनयोः। इति कविकल्पद्रुमः॥ (तुदा०-पर०-अक०-सेट्।) सृडित्यादिः। ग्र, सुरति सोरिता सुषोर। भा दीप्तिः। ऐश्यमैश्वर्य्यम् इति दुर्गादासः॥

षुर्ह, ल य क्षमि। शक्तौ। इति कविकल्पद्रुमः॥ (दिवा०-पर०-सक०-सेट्।) शक्तिः क्षमा। ल, असुषुहत्। य, सुह्यति दुःखं सुनिः सहत इत्यर्थः। सुषोह। इति दुर्गादासः॥

षू, ङ ल सुतौ। इति कविकल्पद्रुमः॥ (अदा०-आत्म०-सक०-अनिट्।) सृडित्यादिः। ङ ल, सुते। इति दुर्गादासः॥

षू, य ङ ञौ सुतौ। इति कविकल्पद्रुमः॥ (दिवा०-आत्म०-सक० अनिट्।) य ङ, सूयते। ञौ, सूनः। सूनिर्गर्भविमोचनम्। सूते पुत्रं नारी। अन्यत्रापि धर्म्मोर्थं प्रसूयते। इति दुर्गादासः॥

षू, ग्र प्रेरणे। इति कविकल्पद्रुमः॥ (तुदा०-पर०-सक०-अनिट्।) सृडित्यादिः। ग्र, सुवति। इति दुर्गादासः॥

षूः, स्त्री, गर्भविमोचनम्। इति कश्चिदेकाक्षरकोषः॥

षूद, क्षरणे। इति प्राचः। (भ्वा०-पर०-सक०-सेट्।) क्षरणमवदारणं हिंसोपलक्षणमिति रमानाथेन व्याख्यातम्। इति दुर्गादासः॥

षूद, क आस्रुतिहृत्योः। निरासे। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-सेट्।) आस्रुतिरङ्गीकारः। क, सूदयति धनं विप्राय दातुं दाता। रमानाथस्तु आस्रवण इति एन्त्यसकारं पठित्वा सूदयति महिरा मात्तात् क्षरति इत्यर्थं इत्याह। इति दुर्गादासः॥

षूद, ङ निरासे। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-सेट्।) षष्ठस्वरी। ङ, सूदते। निरासो निःशेषः। इति दुर्गादासः॥

षूर, ङ य ईं स्तम्भे। हिंसे। इति कविकल्पद्रुमः॥ (दिवा०-आत्म०-स्तम्भे अक०-हिंसे सक०-सेट्। निष्ठायां अनिट्।) ङ य, सूर्य्यते। ईं सूर्य्यः। कैश्चिदयं न मन्यते। स्तम्भो जड़ीभावः। इति दुर्गादासः॥

षूर्च्छ, नादरे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) रेफयुक्तः। षष्ठस्वरी। सूर्च्छति दुष्टं लोकः। इति दुर्गादासः॥

षूर्च्छ, ईर्गे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सेट्।) सृडित्यादिः। सूर्च्छति सुषूर्च्छ। यङ्यान्तोऽभिधेयैके। इति दुर्गादासः॥

षूष, प्रसवे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) षष्ठस्वरी सृडित्यादिः। सूषति। इति दुर्गादासः॥

षेक, ग्र ङ सर्पणे। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-सेट्।) सृडित्यादिः। अस्य 'षोपदेशविधौ वर्त्स्यतेऽधीष्ट मोदः कस्यचिदुरोधात्। ग्र, असिषेकत्। ङ, सेकते। इति दुर्गादासः॥

षेल, ग्र चालनयोः। इति कविकल्पद्रुमः॥ (भ्वा०-पर० सक०-सेट्।) सृडित्यादिः। ग्र, असिषेलत्। इति दुर्गादासः॥

षेव, ष्ट ञ ड सेवने। इति कविकल्पद्रुमः॥ (भ्वा०-उभ०-आत्म० च-सक०-सेट्।) ष्ट, असि-षेवत्। ञ, सेवति सेवते। ड, सेवते। सेवन-माराधनसुपभोग आश्रयणञ्च। विष्णुं सेवते सुखं सेवते तीर्थं सेवते साधुः। अन्ये त्वस्मात् परमेपदममन्यमानाः नीचं सन्तुमपि सेवति नीच एव। स्वार्थीने विभवेऽन्यो नरपतिं सेवन्ति किं मानिन इत्यादौ गत्यन्तानित्यत्व-माहुः। इति दुर्गादासः॥

षै, क्षये। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-अनिट्।) सृडित्यादिः। सायति। इति दुर्गादासः॥

षो, य नाशे। इति कविकल्पद्रुमः॥ (दिवा०-पर०-सक०-अनिट्।) सृडित्यादिः। नाश इह नष्टीकरणम्। य, स्यति यसो जन्तून्। इति दुर्गादासः॥

षोड़न्, [न्] पुं (षट् दन्ता अस्य। "पृषोदरा-दीनि यथोपदिष्टम्।" ६। ३। १०९। इति षस्य उत्वं दलद्दन्तयोरुत्तरपदादेर्लुप्तश्च।) षड़-दन्तयुक्तहस्तिः। इति हेमचन्द्रः॥

षोड़श, [न्] त्रि, (षट् च दश च। "पृषोदरा-दीनि यथोपदिष्टम्।" ६। ३। १०९। इति साधुः।) संख्याविशेषः। षड़धिका दश। षोल इति भाषा। तद्वाचकौ इन्दुकलामाहकाशब्दौ। इति कविकल्पलता॥ नित्यबहुवचना-न्तोऽयम्॥ (यथा, मनुः। ११। २४६।

"सप्ताहुतिप्रमाणका: प्रणायामास्तु षोड़श।
अपि भ्रूणहनं मासात् पुनन्त्यहरहःकृताः॥")

षोड़शः, त्रि, षोड़शानां पूरणः। षोड़शन्शब्दात् डटप्रत्ययेन निष्पन्नः। इति सिद्धान्तकौमुदी॥ (यथा, भागवते। २। ६। ६।

"स्वर्गेषु यन् षोड़शमेकविंशं
निष्किञ्चनानां नृप यद्धनं विदुः॥")

षोड़शकलाः, स्त्री, (षोड़शसंख्यान्विताः कलाः।) चन्द्रमण्डलस्य षड़धिकदशभागाः। तासां नामानि यथा। ततश्चन्द्रस्य अमृतादिषोड़श-कलाः पूर्ववत् प्राणप्रतिष्ठां कृत्वा पूजयेत्। अं अमृतायै नमः १। आं मानदायै २। इं पूषायै ३। ईं तुष्ट्यै ४। उं पुष्ट्यै ५। ऊं रत्यै ६। ऋं धृत्यै ७। ॠं शशिन्यै ८। ऌं चन्द्रिकायै ९। ॡं कान्त्यै १०। एं ज्योत्स्नायै ११। ऐं श्रियै १२। ओं प्रीत्यै १३। औं अङ्गदायै १४। अं पूर्णायै १५। अः पूर्णा-मृतायै १६। नमः सर्वत्र। शक्तयस्तु प्रत्येक-माहाय्य गन्धादिभिः पूजयेत्। इति तन्त्रसारः॥

षोड़शदानं, क्ली, (षोड़शप्रकारं दानम्।) आद्यादौ षोड़शप्रकारदेयद्रव्यम्। तत्क्रममाहुः साम्प्रदायिकाः।

"भूम्यासनं शयनं वस्त्रं प्रदीपोऽन्नं ततः परम्।
ताम्बूलचक्रगन्धाश्च माल्यं फलमतः परम्॥
शय्या च पादुका गावः काञ्चनं रजतं तथा।
दानमेतत् तु षोड़शकं प्रेतमुद्दिश्य दीयते॥"

तत् षोड़शषोड़शकैरेको दानसागरो भवति॥ तत्र भूमेः पूजायां दानवाक्ये च पृथिवीत्येति विशेषणम्। भूमेर्देवता विष्णुः षष्टिवर्षसह-स्रावच्छिन्नस्वर्गवासः फलम्। प्रतिग्रहे तद्भूमेः प्रदक्षिणीकरणम्। तद्भूमेरसन्निधाने तासुद्दिश्य प्रदक्षिणम्॥ १॥ आसनस्य उत्तानाङ्गिरसो देवता राज्यस्थानानुत्तमस्वर्गप्राप्तिः फलम्। तत्र विशेषानुपदेशात् करमध्यात्मकाङ्गेन तीर्थेन प्रतिग्रहः। एवमन्यत्रापि आग्नेयं कर-तलम्॥ २॥ शयनस्य वरुणो देवता क्षीरप्राप्तिः फलम्॥ ३॥ वस्त्रस्य बृहस्पतिर्देवता चन्द्र-सालोक्यप्राप्तिः फलम्। प्रतिग्रहे दक्षान्तरङ्ग-परिधाने॥४॥ दीपस्य अग्निर्देवता उत्तमचक्षुः-प्राप्तिः फलम्॥ ५॥ अन्नस्य प्रजापतिर्देवता अक्षयसुखप्राप्तिः फलम्। प्रतिग्रहे सुश्रियहण-म्॥ ६॥ ताम्बूलस्य वनस्पतिर्देवता मेधा-वित्वसुभगत्वप्राज्ञत्वदर्शनीयत्वप्राप्तिः फलम्॥७॥ छत्रस्य उत्तानाङ्गिरसो देवता सर्व्वव्याधिविनि-र्मुक्तत्वश्रीमत्त्वबहुपुत्रत्वप्राप्तिः फलम्। प्रति-ग्रहे दण्डधारणम्॥ ८॥ गन्धस्य गन्धर्व्वो देवता ब्रह्मपदप्रयाणं फलम्॥ ९॥ माल्यस्य वनस्पति-र्देवता अत्यन्तसुखित्वभवनं फलम्॥१०॥ फलस्य वनस्पतिर्देवता सदा युक्तत्वं फलम्॥ ११॥ शय्यायाः उत्तानाङ्गिरसो देवता अत्यन्तसुखित्व-भवनं फलम्। प्रतिग्रहे आरोहणम्॥ १२॥ पादुकायुगलस्य उत्तानाङ्गिरसो देवता सर्व्व-लोकसुखगमनं फलम्। प्रतिग्रहे आरोह-णम्॥ १३॥ धेनोः रुद्रो देवता सूर्य्यलोकप्राप्तिः फलम्। तत्र धेनुं प्राङ्मुखीमात्मसमीप-मानीय।

"ॐ या लक्ष्मीः सर्व्वभूतानां या च देवेष्ववस्थिता।
धेनुरूपेण सा देवी मम शान्तिं प्रयच्छतु॥
ॐ देवस्या या च रुद्राणी शङ्करस्य च या प्रिया।
धेनुरूपेण सा देवी मम शान्तिं प्रयच्छतु॥
ॐ विष्णोर्वक्षसि या लक्ष्मीर्या लक्ष्मीर्धनदस्य च।
या लक्ष्मीः सर्व्वभूतानां सा धेनुर्वरदास्तु मे॥
ॐ चतुर्मुखस्य या लक्ष्मीः स्वाहा चैव विभा-वसोः।
चन्द्रार्कशक्रशक्तिर्या धेनुरूपास्तु सा श्रिये॥
ॐ स्वधा त्वं पितृसंघानां स्वाहा यज्ञभुजां यतः।
सर्व्वपापहरा धेनुस्तस्माच्छान्तिं प्रयच्छ मे॥
ॐ सर्व्वदेवमयीं देवीं सर्व्ववेदमयीं तथा।
सर्व्वलोकनिमित्ताय सर्व्वलोकसुखि स्थिराम्।
प्रयच्छामि महाभागामक्षयाय सुखाय च॥"

इत्युच्चार्य उत्सृजेत्। प्रतिग्रहे पुच्छधार-णम्॥ १४॥ हिरण्यस्याग्निर्देवता दीर्घायुः-प्राप्तिः फलम्॥ २५॥ रजतस्य चन्द्रमा देवता उत्तमरूपप्राप्तिः फलम्॥ १६॥ इति शुद्धि-तत्त्वम्॥ * ॥ गयापञ्चलुक्तषोड़शदानं यथा,

"स्वर्णं रौप्यं तथा ताम्रं कांस्यं गावो गजा हयाः।
गृहं भूमिर्द्रुमो वस्त्रं शय्या चैत्रसुपानहौ॥
दास्यश्च पितृयज्ञेषु दानं षोड़शकं मतम्॥"

इति वायुपुराणे गयामाहात्म्यम्॥

षोड़शभुजा, स्त्री, (षोड़श भुजा यस्याः।) षोड़-शभुजयुक्ता दुर्गा। यथा,—

"यदा तु षोड़शभुजां महामायां प्रपूजयेत्।
दुर्गातन्त्रेण मन्त्रेण विशेषं तत्र वै शृणु॥
कन्यायां कृष्णपक्षस्य सप्तदश्यामुपोषितः।
द्वादश्यामेकभक्तन्तु नक्तं कुर्य्यात् परेऽहनि॥
चतुर्दश्यां महामायां वोधयित्वा विधानतः।
गीतवादित्रनिर्घोषैर्नानावैद्यवरैर्नरैः॥
अयाचितं वुधः कुर्य्यात् उपवासं परेऽहनि।
एवमेव व्रतं कुर्य्यात् यावद्वै नवमी भवेत्॥
ज्येष्ठायान्तु समभ्यर्च्च्य मूलेन प्रतिपूजयेत्।
उत्तरेणार्चनं कृत्वा अवसाने विसर्जयेत्॥"

इति कालिकापुराणे ५६ अध्यायः॥

षोड़शमातृकाः, स्त्री, (षोड़शसंख्यकाः मातृकाः।) षोड़शसंख्यकदेवीविशेषः। यथा। गौर्य्यादि-षोड़शमातृकाभ्यो नमः। इति दुर्गोत्सव-पद्धतिः॥ तासां नामानि यथा, आह तत्रैव।

"गौरी पद्मा शची मेधा सावित्री विजया जया।
देवसेना स्वधा स्वाहा मातरो लोकमातरः॥
शान्तिः पुष्टिर्धृतिस्तुष्टिरात्मदेवतया सह।
आदौ विनायकः पूज्यः अन्ते च कुलदेवता॥"

षोड़शर्त्विक्क्रतुः, पुं, (षोड़श ऋत्विजो यत्र। तादृशः क्रतुः।) षोड़शपुरोहितसाध्ययाग-विशेषः। स तु ज्योतिष्टोमयागः। द्वादशाह-साध्यसत्रयागश्च। यथा। ज्योतिष्टोमे द्वादश-प्रकृतगोदक्षिणाविभागः षोड़शर्त्विजां तद्विकृतो-भूते सत्रात्मके द्वादशाहसाध्ये शतेनार्हिनो दीक्षयन्तीत्यादिदर्शनेन निर्णीयते। तत्र विभागं मनुरुवाच।

"सर्व्वेषामर्हिनो मुख्यास्तदर्द्धेनार्हिनोऽपरे।
तृतीयिनस्तृतीयांशाश्चतुर्थांशैकपादिनः॥"

दक्षिणा गोप्रकृतिविभागाय औत्कात्यायनोऽपि।

"अथ द्वादश द्वादश आद्येभ्यः षट् षट् द्वितीयेभ्य-स्तत्सदृशतत्सदृशतृतीयेभ्यश्चतुःसदृशेभ्य इतरेभ्यः।

इत्यत्र षोड़शर्त्विजां चतुरश्चतुरः कृत्वा चत्वारो वर्गाः। इति मलमासतत्त्वम्॥ * ॥ अथ ऋत्विजां नामानि यथा। ब्रह्मा १ ब्राह्म-णाच्छंसी २ आग्नीध्रः ३ पोता ४। एते सार्व-वेदीयाः। होता ५ मैत्रावरुणः ६ अच्छावाक् ७ ग्रावस्तोता ८। एते ऋग्वेदिनः। अध्वर्युः ९ प्रतिप्रस्थाता १० नेष्टा ११ उन्नेता १२। एते यजुषः। उद्गाता १३ प्रस्तोता १४ प्रतिहर्त्ता १५ सुब्रह्मण्यः १६। एते सामगाः। इति महा-भारते मोक्षधर्म्मे ३०५ अध्याये नीलकण्ठटीका॥

षोड़शांशुः, पुं, (षोड़श अंशवो यस्य।) शुक्रः। इति शब्दमाला॥ षोड़शकिरणयुक्ते, त्रि॥

षोड़शाङ्गः, पुं, (षोड़श अङ्गानि यस्य।) षोड़शप्रकारसुगन्धिद्रव्यमिश्रितधूपः। यथा,—
"गुग्गुलुं सरलं दारु पत्रं मलयसम्भवम्।
ह्रीवेरमगुरुं कुष्ठं गुडं सर्ज्जरसं घनम्॥
हरीतकीं नखीं लाक्षां जटामांसीञ्च शैलजम्।
षोड़शाङ्गं विदुर्धूपं देवे पैत्रे च कर्म्मणि॥"
इति तन्त्रसारः॥

षोड़शावयवयुक्ते, त्रि॥

षोड़शाक्षिः, पुं, (षोड़श अक्षीणि यस्य।) कर्कटः। इति हेमचन्द्रः॥ षोड़शचरणयुक्ते, त्रि॥

षोड़शारं, क्ली, (षोड़श अराणि इव दलानि यस्य।) षोड़शदलपद्मम्। यथा, तन्त्रे।
"आधारे लिङ्गनाभौ हृदयसरसिजे तालुमूले ललाटे
द्वे पत्रे षोडशारे विहगपदयुते द्वादशार्द्धे चतुष्के।
वाद्यान्ते वादिलान्ते ङ-ञ-क-ठ-सहिते कण्ठ-देशे स्वराणां
हृत्पद्मे षोडशस्थे सकलदलगतं वर्णरूपं नमामि॥"
जलाग्नियोत्सर्गोक्तवेदिकोपरिकर्त्तव्यचक्रम्। यथा, मत्स्यपुराणे।
"रजसा मण्डलं कुर्य्यात् पञ्चवर्णेन तत्त्ववित्।
षोड़शारं भवेच्चक्रं पद्मगर्भं चतुर्मुखम्॥
चतुरस्रन्तु परितो वृत्तं मध्ये गुणोत्तरम्।
वेदाग्रोपरि तत् कृत्वा ग्रहाल्लोकांस्तथोत्तरा।
विन्यसेन्मन्त्रतः सर्व्वान् प्रतिदिक्षु विचक्षणः॥"
इति जलाग्नियोत्सर्गतत्त्वम्॥

षोड़शार्चिः, [ष्] पुं, (षोड़श अर्चींषि यस्य।) शुक्रग्रहः। इति भूरिप्रयोगः॥ षोड़शशिखायुक्ते, त्रि॥

षोड़शावर्त्तः, पुं, (षोड़श आवर्त्ता यस्य।) ग्रहः। इति हेमचन्द्रः॥ षोड़शावर्त्तनयुक्ते, त्रि।

षोड़शिकाम्लं, क्ली, पलपरिमाणम्। इति वैद्यकपरिभाषा॥

षोड़शी, [न्] पुं, यज्ञपात्रविशेषः। यथा अतिरात्रे षोड़शिनं गृह्णाति नातिरात्रे षोड़शिनं गृह्णातीति। षोड़शी सोमैकमात्रविशेषः। इति मलमासतत्त्वम्॥

षोड़शी, स्त्री, द्वादशमहाविद्यान्तर्गतविद्याविशेषः। यथा,—
"काली तारा महाविद्या षोड़शी भुवनेश्वरी।
भैरवी छिन्नमस्ता च विद्या धूमावती तथा॥
बगला सिद्धविद्या च मातङ्गी कमलात्मिका।
एता दश महाविद्याः सिद्धविद्याः प्रकीर्त्तिताः॥"
तत्र पारिभाषिकीं षोड़शीमाह ज्ञानार्णवे।
"चन्द्रान्तं वारुणान्तञ्च शक्रादिसहितं पृथक्।
वामाक्षिबिन्दुनादाढ्यं विश्वमालकलात्मकम्॥
विद्यादौ योगयेद्देवि साक्षात् चाग्नेयसंयुतौ।
त्रिकूटाः सकलाः भेदाः पञ्चकूटा भवन्ति हि।
वैष्णवी वसुकूटा स्यात् षट्कूटा शाम्भरी भवेत्॥"
अस्यार्थः। चन्द्रान्तं हकारः। वारुणान्तं भकारः। शक्रादौ रेफः। वामाक्षि ईकारः। विद्यादौ पूर्व्वोक्तद्वादशविद्यादौ।
"वेदादिमण्डिता देवि शिवशक्तिमयी सदा।
तदा भेदास्तु सकलाः षट्कूटा परमेश्वरि।
वैष्णवी नवकूटा स्यात् सप्तकूटा च शाम्भरी॥"
अस्यार्थः। शिवशक्तिमयी पूर्व्वोक्ता बीजद्वयवती। वेदादिः प्रणवः। मण्डिता आदौ भूषिता॥ * ॥ अथ महाषोड़शी।
"आद्यबीजद्वयं भद्रे विपरीतक्रमेण हि।
विलिख्य परमेशानि ततोऽन्यानि समुद्धरेत्॥
अन्तर्मुखी वरारोहे कुमारी त्रिपुरेश्वरी।
एभिस्तु पञ्चसंख्याकैर्बीजैः संपुटितां यजेत्॥
षट्कूटां परमेशानि विद्येयं षोड़शाक्षरी।
त्रिकूटाः सकला भद्रे षोड़शार्णा भवन्ति हि।
वैष्णवी नवकूटा स्यात् सप्तदशाक्षरी॥"
अस्यार्थः। आद्यबीजद्वयं मायारमात्मकम्। विपरीतक्रमः आदौ रमा पश्चान्माया। अन्तर्मध्ये स्थितं कामबीजं सुखे आदौ यस्याः कुमार्य्याः। एभिः पञ्चसंख्याकैर्बीजैः षट्कूटां सप्तकूटां नवकूटां वा संपुटितां संपुटवत् कृतां तेनानुलोमविलोमतः संपुटितामित्यर्थः। योगिनीतन्त्रे।
"श्रीबीजमायासारयोनिशक्ति-
सारश्च माया कमलाथ विद्या।
शक्त्यादिबीजेश्च विलोमतोऽया
श्रीषोड़शीयञ्च शिवप्रदिष्टा॥"
तथा च रुद्रयामले।
"श्रीर्म्माया मदनो वाणी परा तारं शिवप्रिया।
हरिप्रिया त्रिकूटा सा परा वाणी मनोभवः।
माता शक्तौ महाविद्या श्रीबीजं षोड़शी परा॥"
अथ बीजावली षोड़शी। रुद्रयामले।
"श्रीबीजमाये संलिख्य तथैव च कुमारिकाम्।
श्रीबीजमाये कामञ्च वाग्भवाया कमला तथा॥
परां कामञ्च वाग्बीजं माया श्रीबीजमेव च।
बीजावली षोड़शीयं सर्व्वतन्त्रेषु गोपिता॥
राज्यं देयं शिरो देयं न देया षोड़शाक्षरी॥"*
तन्त्रान्तरे।
"आद्या कृष्णलिनी शक्तिः शक्तिराद्या ततः परा।
निवेशयेत्तयोर्मध्ये देवि गोविन्दवल्लभाम्॥
ततस्तु मन्मथं बीजं श्रीबीजं तदनन्तरम्।
कृष्णेखा रमयोर्व्वह्निं वेदवक्त्रं विनिःक्षिपेत्॥
ततो लोपां नमेद्देवि त्रिकूटामथवा पराम्।
आद्यानि पञ्च बीजानि पञ्चाद्यिन्यस्य सुन्दरि।
षोड़शीयं समोद्दिष्टा हि लोकाद्देवि प्रकाशिता॥
अस्या माहात्म्यमतुलं जिह्वाकोटिशतैरपि।
वक्तुं न शक्यते देवि किं पुनः पञ्चभिर्मुखैः॥
अपि प्रियतमं देयं सुतदारधनादिकम्।
राज्यं देयं शिरो देयं न देया षोड़शाक्षरी॥"
तन्त्रान्तरे।
"सिन्दूरकक्षया यापि कुङ्कुमेन विलेपिते।
लिखित्वा दर्शयेद्भूमौ न च कर्षे प्रकाशयेत्॥
तत्र स्वात्मावशुद्ध्यर्थं जप्तमेकं जपेद्गुरुः॥"*
बीजषोड़शीमाह। सिद्धयामले।
"कामो माया रमा वाग्भा त्रिकूटा स्त्री भगाकुशौ।
काली कामकला कूर्च्चं सर्व्वादौ प्रणवः प्रिये॥
श्रीमहाषोड़शीयञ्च या ख्याता भुवनत्रये।
ज्ञानेन यत्सुधा विद्या सर्व्वाम्नायेनमस्कृता॥
सप्तलक्षमहाविद्यास्तन्त्रादौ कथिताः प्रिये।
सारात्सारतरा भूता या या विद्याः समोदिताः॥
बहुना किमिहोक्तेन तासां सारा तु षोड़शी।
प्रकाशिता महादेवी या दृष्टा ते पुनः पुनः॥"*
शाक्तकामराजन्तु श्रीक्रमे।
"मायाबीजं तथा भिन्नटी कामं शक्रं वियत् क्रमात्।
जातवेदो मृगाङ्केन लाञ्छितं परमेश्वरी॥
एतद्वाग्भवकूटञ्च पूर्व्ववत् कामराजकम्।
तथैव शक्तिबीजन्तु सुन्दर्य्यया प्रकीर्त्तितम्॥"
अत्रापि पूर्व्ववद्बीजसंयोगः। माया ईकारः। भिन्नटी एकारः। पुनः शाक्तमाह।
"एतद्वर्गं ततो माया ब्रह्मा शक्रो हरोऽग्निना।
वामनेत्रेण संयुक्तो नादबिन्दुविभूषितः।
एतद्वाग्भवसंदृब्धं पूर्व्ववत् कामशक्तिकम्॥"
भग एकारः। अत्रापि पूर्व्ववद्बीजसंयोगः। अत्र विशेषः।
"ब्रह्मबीजं यदा दद्यात् त्रिकूटेषु वरानने।
प्रथमा सुन्दरी देवी द्वितीया ब्रह्मसुन्दरी॥
शक्तिकूटे महेशानि अगन्तसुन्दरी मता।
एषा तु सुन्दरी विद्या मतभेदेन दर्शिता॥
त्रिकूटान्ते हंसबीजं बिन्दुसर्गविभूषितम्।
एषा श्रीब्रह्मसंयुक्ता दारिद्र्यदुःखमोचिनी॥"
इति तन्त्रसारः॥*॥

ऊनविंशतिपिण्डदानक्रिया। यथा,—
प्रेतशिलोक्तरीत्या द्वादशपिण्डान् षोड़शीपिण्डांश्च दद्यात्। इति तीर्थयात्राप्रयोगतत्त्वम्। तद्विधानं यथा,—
"अमावस्यान्तु कन्यार्के तीर्थप्राप्तौ तथा नृप।
कृत्वा श्राद्धं विधानेन दद्यात् षोड़शपिण्डकम्॥"
वायुपुराणीयवचनत्रयोगो यथा। ऊनविंशतिदास्यमानपिण्डस्थानानि यथादक्षिणं भागचतुष्टयेन कृतानि तत्र दक्षिणभागान् कृष्णान् आलीख्य।
"यस्मृतकुले मृता ये च गतिर्येषां न विद्यते।
आषाढ्यश्विने तान् सर्व्वान् दर्भपृष्ठे तिलोदकैः॥
मातामहकुले ये च गतिर्येषां न विद्यते।
आषाढ्यश्विने तान् सर्व्वान् दर्भपृष्ठे तिलोदकैः॥
बन्धुवर्गकुले ये च गतिर्येषां न विद्यते।
आषाढ्यश्विने तान् सर्व्वान् दर्भपृष्ठे तिलोदकैः॥"
इत्येतैस्तिलोदकैरावाह्य।
"ब्रह्मलोकमयं यन्तं देवर्षिपितृमानुषाः।
तृप्यन्तु पितरः सर्व्वे मातृमातामहादयः॥
अतीतकुलकोटीनां सप्तद्वीपनिवासिनाम्।
आब्रह्मभुवनाल्लोकादिदमस्तु तिलोदकम्॥"

ष्ठेनाम्बां निवेदकाञ्जलीन् दद्यात्। ततो मूलादितः पित्रर्तीर्थेन पिण्डान् दद्यात्। तत्र क्रमः।
"अमातृकुले ये च गतिर्येषां न विद्यते।
तेषामुद्धरणार्थाय इमं पिण्डं ददाम्यहम् ॥१॥
मातामहकुले ये च गतिर्येषां न विद्यते।
तेषामुद्धरणार्थाय इमं पिण्डं ददाम्यहम् ॥२॥
पत्नृपक्षकुले ये च गतिर्येषां न विद्यते।
तेषामुद्धरणार्थाय इमं पिण्डं ददाम्यहम् ॥३॥
अजातदन्ता ये केचिद् ये च गर्भे प्रपीडिताः।
तेषामुद्धरणार्थाय इमं पिण्डं ददाम्यहम् ॥४॥
अग्निदग्धाश्च ये केचिन्नाग्निदग्धास्तथा परे।
विद्युद्धौरहता ये च तेभ्यः पिण्डं ददाम्यहम् ॥५॥
दावदाहे हता ये च सिंहव्याघ्रहताश्च ये।
दंष्ट्रिभिः श्वश्निभिर्नापि तेभ्यः पिण्डं ददाम्यहम् ॥६॥
उद्बन्धनहता ये च विषशस्त्रहताश्च ये।
आत्मापघातिनो ये च तेभ्यः पिण्डं ददाम्यहम् ॥७॥
अरण्ये वर्त्मनि वने क्षुधया तृषया हताः।
भूतप्रेतपिशाचाश्च तेभ्यः पिण्डं ददाम्यहम्।
वने वर्त्मे ॥ ८ ॥
रौरवे कालसूत्रे च ये स्थिताः।
तेषामुद्धरणार्थाय इमं पिण्डं ददाम्यहम् ॥९॥
अनेकयातनासंस्था ये प्रेतलोके च ये गताः।
तेषामुद्धरणार्थाय इमं पिण्डं ददाम्यहम् ॥१०॥
अनेकयातनासंस्था ये नीता यमकिङ्करैः।
तेषामुद्धरणार्थाय इमं पिण्डं ददाम्यहम् ॥११॥
नरकेषु समस्तेषु यातनासु च ये स्थिताः।
तेषामुद्धरणार्थाय इमं पिण्डं ददाम्यहम् ॥१२॥
पशुयोनिगता ये च पक्षिकीटसरीसृपाः।
अथवा वृक्षयोनिस्थास्तेभ्यः पिण्डं ददाम्यहम् ॥१३॥
चाण्डालरौरवेष्वेषु भ्रमन्तः स्वेन कर्मणा।
मातृत्वं दुर्लभं येषां तेभ्यः पिण्डं ददाम्यहम् ॥१४॥
दिव्यान्तरीक्षभूमिष्ठाः पितरो बान्धवादयः।
तृप्ता यान्तूत्तमं ते च तेभ्यः पिण्डं ददाम्यहम् ॥१५॥
ये केचित् प्रेतरूपेण वर्त्तन्ते पितरो मम।
ते सर्वे तृप्तिमायान्तु पिण्डदानेन सर्वदा ॥१६॥
येऽबान्धवा बान्धवा वा येऽन्यजन्मनि बान्धवाः।
तेषां पिण्डो मया दत्तः अक्षय्यमुपतिष्ठताम् ॥१७॥
पितरौ तृप्तां ये च मातामहे च ये तृप्ताः।
वृद्धप्रपितृवृद्धाश्च ये चान्ये बान्धवा तृप्ताः।
ये ये कुले मुतविण्याः पुत्रदारविवर्जिताः।
क्रियालोपगता ये च ज्ञानहीनाः पशूपमाः।
विरूपा रोगिणश्चान्धा जात्यन्धाः कुले मम।
तेषां पिण्डो मया दत्तः अक्षय्यमुपतिष्ठताम् ॥१८॥

आब्रह्मणो ये पितृवंशजाता
मातुस्तथा वंशभवा मदीयाः।
कुलद्वये ये मम दासभूता
मत्तोऽथवैरिक्थिनोऽस्तथा ये।
मित्राणि मत्तः सख्यश्च ये वा
ये वा गुरवोऽधीतविद्यास्तथा ये।
तेभ्यश्च सर्वेभ्य इमं ददामि
पिण्डं सदा तृप्तिकरं भवन्तु ॥१९॥

अन्यान्तरे ये मम दासभूता-
स्तेभ्यः सधा पिण्डमहं ददानि ॥ १९ ॥
यत्रोनविंशतिपिण्डे षोड़शपिण्डत्वं पारिभाषिकं पद्मात्रवत्। इति तिथ्यादितत्त्वम् ॥*॥ एतेषां मन्त्राणां स्त्रीलिङ्गोक्तेन स्त्रीषोड़शीत्वं भवति ॥*॥

अथ माढषोड़शी।

"गर्भादवगमे चैव विगमे भूमिवर्त्तनि।
तस्या निष्क्रमणार्थाय माढपिण्डं ददाम्यहम् ॥१॥
मासि मासि हृतं कष्टं वेदना प्रसवेषु च।
तस्या निष्क्रमणार्थाय माढपिण्डं ददाम्यहम् ॥२॥
प्रौथिल्ये प्रसवे चैव मातुरत्यन्तदुष्करम्।
तस्या निष्क्रमणार्थाय माढपिण्डं ददाम्यहम् ॥३॥
पद्भ्यां जायते मातुर्दुःखमेव सुदुष्करम्।
तस्या निष्क्रमणार्थाय माढपिण्डं ददाम्यहम्।
पद्भ्यामित्यत्र दद्याभिति च पाठः ॥ ४ ॥
क्षुधिना शोषते देहं शिराजालमुनेद्ध च।
तस्या निष्क्रमणार्थाय माढपिण्डं ददाम्यहम् ॥५॥
पिबेच्च कटुद्रव्याणि क्लेद्यानि विविधानि च।
तस्या निष्क्रमणार्थाय माढपिण्डं ददाम्यहम् ॥६॥
दुर्लभं भक्षद्रव्यस्य त्यागे विन्दति यत् फलम्।
तस्या निष्क्रमणार्थाय माढपिण्डं ददाम्यहम् ॥७॥
रात्रौ मूत्रपुरीषाभ्यां भिद्यते माढकर्पटम्।
तस्या निष्क्रमणार्थाय माढपिण्डं ददाम्यहम् ॥८॥
पुत्रं व्याधिसमायुक्तं माढदुःखमहर्निशम्।
तस्या निष्क्रमणार्थाय माढपिण्डं ददाम्यहम् ॥९॥
यदा पुत्रो न लभते तदा मातुश्च शोचनम्।
तस्या निष्क्रमणार्थाय माढपिण्डं ददाम्यहम् ॥१०॥
क्षुधया विह्वले पुत्रे ददाति निर्भरं स्तनम्।
तस्या निष्क्रमणार्थाय माढपिण्डं ददाम्यहम् ॥११॥
दिवा रात्रौ यदा मातुः शोषणञ्च पुनः पुनः।
तस्या निष्क्रमणार्थाय माढपिण्डं ददाम्यहम् ॥१२॥
पूर्णे तु दशमे मासि मातुरत्यन्तदुष्करम्।
तस्या निष्क्रमणार्थाय माढपिण्डं ददाम्यहम् ॥१३॥
गात्रभङ्गो भवेन्मातुस्तृप्तिं नैव प्रयच्छति।
तस्या निष्क्रमणार्थाय माढपिण्डं ददाम्यहम् ॥१४॥
यस्याहारवती माता यावत् पुत्रोक्ति वासकः।
तस्या निष्क्रमणार्थाय माढपिण्डं ददाम्यहम् ॥१५॥
समुद्धारे महाघोरे पथि मातुश्च शोचनम्।
तस्या निष्क्रमणार्थाय माढपिण्डं ददाम्यहम्।"१६

इति गयायां प्रसिद्धिः।

षोड़शोपचारः, पुं. (षोड़शप्रकार उपचारः।) षोड़शप्रकारपूजाद्रव्यम्। यथा,—
"पाद्यञ्च स्नानञ्च माढमर्घमाचमनीयकम्।
मधुपर्कोपमनञ्चानवस्त्राभरणानि च ॥
गन्धपुष्पधूपदीपनैवेद्यवन्दनम्।
प्रयोजयेदनेनार्घा उपचारास्तु षोड़श।"

इति तन्त्रसारः।

षोड़ा, क, (षष् + डाप्। पृषोदरादित्वात् साधुः।) षट्प्रकारम्। यथा,—
"अथवा उमयोढ़ाभ्यो देवताभ्यस्तथा।
निर्वापद्वैकलार्थेषु षोड़ा कल्पितिरिष्यते।"

इत्यद्वितत्त्वे आग्नेयी षोड़ा।

संख्याया धात्वप्रकारे। इति सूत्रेण षष्ठ्यन्तात् धात्वप्रत्ययेन निपातनान्निष्पन्नम्। इति मुग्धबोधव्याकरणम्॥

षोड़ान्यासः, पुं, (षोड़ा षड्धा न्यासः।) विधिना शरीरे मन्त्रविन्यासः। यथा। अथ षोड़ान्यासः। तदुक्तं वीरतन्त्रे।
"केवलां माढकां कृत्वा माढकां तारसंपुटाम्॥
माढकापुटितं तारं न्यसेत् साधकसत्तमः॥ १॥
श्रीबीजपुटितां तान्तु माढकापुटितन्तु तत्॥ २॥
कामेन पुटितां देवीं ततु पुटं कामबीज च॥ ३॥
शक्त्या च पुटितां देवीं शक्तिञ्च ततपुटां न्यसेत्॥४॥
क्रीं इन्द्रञ्च पुनर्न्यस्य ऋ-ऋ-ऌ-ॡ पूर्ववत्॥५॥
सूक्ष्मेण पुटितां देवीं ततपुटं मन्त्रमेव च॥ ६॥
अङ्गुलोमविलोमेन न्यस्य मन्त्रं यथाविधि।
सूक्ष्मेणाष्टशतं कुर्य्यात् जापकं तदनन्तरम्॥"
यथा। प्रणवपुटितां माढकाम्। एवं माढकापुटितं तारम्। एवं श्रीबीजपुटितां ताम्। ततपुटितं श्रीबीजम्। एवं कामेन पुटितां माढकाम्। माढकापुटितं कामम्। एवं शक्त्या पुटितां माढकाम्। माढकापुटितां शक्तिं न्यसेत्। तथा क्रीं इन्द्रञ्च ऋ-ऋ-ऌ-ॡ पूर्ववत्। ततपुटितां माढकां न्यसेत्। माढकापुटितञ्च ततु। मन्त्रपुटितां माढकाम्। ततपुटितं मन्त्रम्। पुनरङ्गुलोमविलोमेन केवलं माढकास्थाने न्यस्य सूक्ष्मेणाष्टशतेन जापकं कुर्य्यात्। अयं न्यासस्तारायाः अपि कार्य्यः।
"इति गुप्तेन दुर्गायाः षड्षोढ़ा प्रकीर्त्तिता।
तारायाः कालिकायाश्च उग्रस्याश्च तथा-
परे।
एतस्मिन् न्यासवर्य्ये च सर्व्वं पापं प्रणश्यति॥"

इति तन्त्रसारः।

ष्ठक, म प्रतीघाते। इति कविकल्पद्रुमः। (भ्वा॰-पर॰-सक॰-सेट्।) म, ष्ठिष्ठकयिषति। इति दुर्गादासः।

ष्ठग, म ए संवृतौ। इति कविकल्पद्रुमः। (भ्वा॰-पर॰-सक॰-सेट्।) म, ष्ठिष्ठगयिषति। इन्त्यवर्गाद्वितीयोपध इति केचित्। इति दुर्गादासः।

ष्ठन, मि शब्दे। इति कविकल्पद्रुमः। (भ्वा॰-प॰-सक॰-सेट्।) मि, ष्ठानयति ष्ठानयति अष्ठिष्ठनत्। इति दुर्गादासः।

ष्ठभ, ट ड स्तम्भे। इति कविकल्पद्रुमः। (भ्वा॰-आत्म॰-अक॰-सक॰ च-सेट्।) ट, स्तम्भते। ड, स्तम्भते। ष्ठिष्ठम्भयिषति। टकारस्य पुनरुक्तिः पूर्णेच तत्सम्बन्धनिषेधार्थेव सिद्धन्तु सर्व्वं। अक इत्येव सूत्रयितुं वाच्य इति यत्। स्तम्भो जड़ीभावः जड़ीकरणञ्च। स्तम्भौ मूलाज्जड़ीभावौ इत्यमरोक्तेः। प्रीतेनावलम्बः जड़ीभव इत्यर्थः। इति क्षमदीश्वरोक्तेश्च। स्तम्भ इह क्रियाविरोधः। इति भीमः। न चैवल्लिङ्गिति गोविन्दभट्टः। स्तम्भो जड़ीकरणञ्च। स्तम्भते जलादेर्द्वारं रोधः। इति दुर्गादासः।

ष्टृक्ष, वैक्लव्ये। इति कविकल्पद्रमः॥ (भ्वा०-पर०-अक०-सेट्।) वैक्लव्यं विह्वलीभावः। क्लमति। अतिष्टृक्षत्। इति दुर्गादासः॥

ष्टृक्ष, तृ क वैक्लव्ये। इति कविकल्पद्रमः॥ (अदन्त चुरा०-पर०-अक०-सेट्।) मृड्न्यादिः। योपदेशपाठे भ्वाद्यादीनि इत्यत्वे कृतषकारादित्वात् षत्वार्थः। तिष्टृक्षयिषति। एवं सर्व्वत्र। इति दुर्गादासः॥

ष्टिघ, न ड आस्कन्दे। इति कविकल्पद्रमः॥ (भ्वा०-आत्म०-सक०-सेट्।) आस्कन्दं आस्कन्दनम्। अभियोग इति भट्टमल्लः। न ड, स्तिघ्नुते नदीं पान्थः। तिष्टिघे। इति दुर्गादासः॥

ष्टिप, क्ष ड क्षुभि। इति कविकल्पद्रमः॥ (भ्वा०-आत्म०-अक०-सेट्।) क्ष, अतिष्टिपत्। ड, क्षिपते तिष्टिपे। क्षुभति क्षरणे। इति दुर्गादासः॥

ष्टिम, य क्लेदे। इति कविकल्पद्रमः॥ (दिवा०-पर०-अक० सेट्।) य, क्ष्मित्यति तिष्टेम। क्लेदः आर्द्रभावः। इति दुर्गादासः॥

ष्टीम, य क्लेदे। इति कविकल्पद्रमः॥ (दिवा०-पर०-अक०-सेट्।) य, ष्टीम्यति तिष्टीम। क्लेद आर्द्रभावः। इति दुर्गादासः॥

ष्टु, य ल स्तुतौ। इति कविकल्पद्रमः॥ (अदा०-उभ०-सक०-अनिट्।) मृड्न्यादिः। य ल, ष्टौति स्तवीति स्तुते। इति दुर्गादासः॥

ष्टुच, ड प्रसादे। इति कविकल्पद्रमः॥ (भ्वा०-आत्म०-सक० सेट्।) मृड्न्यादिस्तमधः। प्रसादः प्रसन्नीभावः। ड, शोचते जनं नोष्टुच्यते। यस्यार्थो मृड्न्यश्च इति केचित्। शोचते नोष्टुच्यते। इति दुर्गादासः॥

ष्टुभ, उ ड स्तम्भे। इति कविकल्पद्रमः॥ (भ्वा०-आत्म०-अक०-सक० च-सेट्। क्त्वावेट्।) उ, स्तोभित्वा स्तुभ्वा। ड, स्तोभते स्तुष्टोभयिषति। स्तम्भो मृड्न्यीभावः तत्करणञ्च। स्तम्भौ स्तूभ्यत्यस्तोभावित्यमरोक्तेः। क्षीरेनावस्तब्धो मृड्न्यत इत्यर्थः। इति क्रमदीश्वरोक्तेश्च।

"ग्रार्द्रेण स्तोभते भूयो लघुप्रकृतिको नरः।"
इति रुद्रधरः।

स्तभ्नाते दर्भं गौतो वायुः। इति चतुर्भुजः। स्तभ्ना दृढ क्रियानिरोधः। इति भीमः। दीपदृष्टिरिति गोविन्दभट्टः। इति दुर्गादासः॥

ष्टुप, क उच्छ्राये। इति कविकल्पद्रमः॥ (चुरा०-पर०-सक०-सेट्।) मृड्न्यादिः। उच्छ्रायो राशीकरणम्। क, स्तूपयति धान्यं कृषकः। स्तूपयिष्यति। इति दुर्गादासः॥

ष्टुप, य ऐर् उच्छ्राये। इति कविकल्पद्रमः॥ (दिवा०-पर०-सक०-सेट्।) मृड्न्यादिः। य, ष्टाप्यति। ऐर्, अस्तूपत अस्तूपीत्। मृड्न्यादित्वाच्चिण्वदभावः। अस्तूपात्। इति दुर्गादासः॥

ष्टुप, स्तवने। इति कविकल्पद्रमः॥ भ्वा०-पर०-सेट्। मृड्न्यादिरुक्तः सकर्मकः। स्तूपति। स्तूपीभूयते। इति दुर्गादासः॥

ष्टृह, ऊ ग्र वधे। इति कविकल्पद्रमः॥ (तुदा०-पर०-सक०-वेट्।) मृड्न्यादिः तमधः। ऊ, अस्तृहीत्। अस्तृहत्। ग्र, स्तृहती स्तृहन्ती। तिष्टृहयिषति। इति दुर्गादासः॥

ष्टृह, ऊ ग्र वधे। इति कविकल्पद्रमः॥ (तुदा०-पर०-सक०-वेट्।) मृड्न्यादिः तमधः। अष्टमस्वरी। ऊ, अस्तृहीत् अस्तृहत्। ग्र, स्तृहती स्तृहन्ती। तिष्टृहयिषति। इति दुर्गादासः॥

ष्टेप, ऋ ड क्षुभि। इति कविकल्पद्रमः॥ (भ्वा०-आत्म०-अक०-सेट्।) ऋ, अतिष्टेपत्। ड, स्तेपते तिष्टेपे। क्षुभति चरणे। इति दुर्गादासः॥

ष्टूम:, पुं, चन्द्रः। दीप्तिः। इति केचित्॥

ष्टै, संघातौ। ध्वनौ। इति कविकल्पद्रमः॥ (भ्वा०-पर०-अक०-अनिट्।) अन्तःस्थाद्यनुक्तदन्त्यवर्गाद्यमध्यः धयोगात् टः। तेन तष्टौ। तष्टायति। ताष्टायते। संघातः सम्हः। ष्टायति लोकः एकत्र सम्हायते ग्रन्थायते वा इत्यर्थः। दन्त्यविधौ ष्टैव्यक्षष्टिवां वर्ज्जनान्न दन्त्यः। इति दुर्गादास॥

ष्ठग, र्म ए संवृतौ। इति कविकल्पद्रमः॥ (भ्वा०-पर०-अक०-सेट्।) मृड्न्यादिस्थमध्यः धयोगात् टः। म, तिष्ठगयिषति। ए, अस्थगीत्। दन्त्यवर्गप्रथममध्यः इतीन केचित्। तिष्ठगयिषति अतिष्ठगत्। इति दुर्गादासः॥

ष्ठल, ञ स्थितौ। इति कविकल्पद्रमः॥ (भ्वा०-पर०-अक०-सेट्।) ञ, स्थाल:, स्थल:। स्थलति लोकस्तिष्ठतीत्यर्थः। इति दुर्गादासः॥

ष्ठा, णि स्थाने। इति कविकल्पद्रमः॥ (भ्वा०-पर०-अक०-अनिट्।) णि, स्थितोऽस्ति। स्थानं गतिनिवृत्तिः। तिष्ठति साधुर्धर्म्मे। एष्ठत्तस्तिष्ठमान इति वीरचरिते प्रकाशार्थे आत्मनेपदविधानात् ग्रानः। अथवा ताच्छील्ये ग्रतुः ग्रानः। इति दुर्गादासः॥

ष्ठिव, उ निरासे। इति कविकल्पद्रमः॥ (भ्वा०-पर०-सक० सेट्। क्त्वावेट्।) उ, ष्ठेवित्वा ष्ठूत्वा। अस्य नेम् ष्ठीव्वी इत्यादिना इमो निषेधे निष्ठायां ऊत इति भेदः। निरासे दृढ फुत्कार इति भट्टमल्लः। सुखेन शेष्माद्यैर्व्यमनमिति केचित्। इति दुर्गादासः॥

ष्ठिव, य निरासे। इति कविकल्पद्रमः॥ (दिवा०-पर०-सक०-सेट्।) य, ष्ठीव्यति। इति दुर्गादासः॥

ष्ठीव, निरासे। इति कविकल्पद्रमः॥ (भ्वा०-पर०-सक०-सेट्।) ष्ठीवति। यं दृष्ट्वा निष्ठुरमाचष्टेऽनिष्टमिति ष्ठीविनं विद्यात्। स एवार्थे ष्ठीविष्यति इत्यादिसाधनाय ष्ठीवौ प्रयोगे। तेन दृष्ट्वा यष्ठीवनाद्विनु मृड्न्यादि ग्रः ग्र इत्यादिना मृड्न्यात्मन्त्य दन्त्यो न स्यात् एवं ष्ठिव्यादौ: रेफरिलादिना रेफलोपे सकारे तिष्ठेव ष्ठिष्ठेव इत्यपि स्यात्। यत्तु मल्लभट्टेनोक्तं ष्ठीवनमिति निपातनं तदस्य सर्व्वसम्मतत्वाभावात्। निरासे दृढ फुत्कार इति भट्टमल्लः। सुखेन शेष्माद्यैर्व्यमनमिति केचित्। ष्ठीवत्यन्नं लोकः। ष्ठीवाग्नि मुष्कोत्तुलतास्थिकल्पम्। इति दुर्गादासः॥

ष्णास, य ल उ मि निनासे। इति कविकल्पद्रमः॥ (दिवा०-पर०-अक० सेट्। क्त्वावेट्।) मृड्न्यादिर्दन्त्यनकारयुक्तः। ष्, ष्णस्यति। ल, अष्णसत्। उ, ष्णसित्वा ष्णस्त्वा। मि, ष्णसयति। ष्णासयति। इति दुर्गादासः॥

ष्णा, ल शौचे। इति कविकल्पद्रमः॥ (अदा०-पर०-अक०-अनिट्।) मृड्न्यादिरयम्। दन्त्यादिरयमिति कश्चित्। ल, ष्णाति गङ्गायां धीरः। अनुपसर्गस्य तौ ज्वलष्णसेत्यादिना ष्णस्रो वा ष्णपयति ष्णापयति। सोपसर्गस्य तु प्रष्णापयति। इति दुर्गादासः॥

ष्णिह, ऊ य ल प्रीतौ। इति कविकल्पद्रमः॥ (दिवा०-पर०-अक०-वेट्।) ऊ, स्नेहिष्यति स्नेष्यति। य, स्निह्यति बन्धुः। ल, अस्निहत्। णि, स्निग्धः स्नीहोऽस्ति। इति दुर्गादासः॥

ष्णिह, क स्नेहने। इति कविकल्पद्रमः॥ (चुरा०-पर०-अक०-सेट्।) स्नेहनं स्निग्धीभावः। क स्नेहयति वर्त्तिका तैलेन। इति दुर्गादासः॥

ष्णु, ग ल स्तुतौ। इति कविकल्पद्रमः॥ (अदा०-उभ०-सक०-अनिट्।) ग ल, स्नौति स्नवीति स्नुते। इति दुर्गादासः॥

ष्णुच, ड सेचने। इति कविकल्पद्रमः॥ (भ्वा०-आत्म०-सक०-सेट्।) स्नोचते सुष्णुचे। इति दुर्गादासः॥

ष्णुभ, य भये। इति कविकल्पद्रमः॥ (दिवा०-पर०-सक०-सेट्।) दन्त्यनकारयुक्तः। य, स्नुभ्यति सुष्णोभ। इति दुर्गादासः॥

ष्णुह, य ऊ ल उद्गारे। इति कविकल्पद्रमः॥ (दिवा०-पर०-सक०-वेट्।) दन्त्यनकारयुक्तः। उद्गारो वान्तिः। य, स्नुह्यन्नं लोकः। ऊ, स्नोहिष्यति स्नोष्यति। ल, अस्नुहत्। इति दुर्गादासः॥

ष्णै, वृद्धौ। इति कविकल्पद्रमः॥ (भ्वा०-पर०-अक०-अनिट्।) प्रकृत्या दन्त्यवर्गाद्यौधमध्यः। स्नायति दुग्धं लता। अनुपसर्गस्य तौ ज्वलष्णसेत्यादिना ष्णस्रो वा। स्नपयति स्नापयति। सोपसर्गस्य तु प्रस्नापयति। इति दुर्गादासः॥

ष्णि, ड सिचने। इति कविकल्पद्रमः॥ (भ्वा०-आत्म०-अक०-अनिट्।) सित्तमीषद्धावयम्। ड, सायते वधूः। विस्नापयते। इति दुर्गादासः॥

ष्वक्क, ड सर्पणे। इति कविकल्पद्रमः॥ (भ्वा०-आत्म०-सक०-सेट्।) वकारयुक्तादिः क्रोधः। ड, ष्वक्कते शिष्वक्किषते शाष्वक्कते। दन्त्यविधावस्य वर्ज्जनान्न दन्त्यः। चन्द्रादयस्तु कुर्म पद्मसरसिजं गत्वा युध्यन्ति युयुत्सियते योयुद्धते इत्याहुः। इति दुर्गादासः॥

स

सद, क स्वादे। द्वेदे। इति कविकल्पद्रुमः। (चुरा०-पर०-सक० सेट्।) स्वादो रसोपादानम्। क, स्वादयति क्षीरं गोकः। इति दुर्गादासः।

सद, क प्रीतिनिष्ठयोः। इति कविकल्पद्रुमः। (भ्वा०-आत्म०-अक०-सेट्।) प्रीतिः प्रीतीकरणम्। निष्ठ रसोपादानम्। क, सर्पा हि तृप्ताय न वारिधारा स्वादुः सुगन्धिः स्वदते तुषारा। इति श्रीहर्षः। इति दुर्गादासः।

सनज, सौ णि क आलिङ्गे। इति कविकल्पद्रुमः। (भ्वा०-आत्म०-सक०-अनिट्।) सकारयुक्तादिः। आलिङ्ग आलिङ्गनम्। सौ, सङ्क्ता। णि, सान्तोऽस्ति। क, सजते युवतौ युवा। परिष्वजति मायावी मधमं मायुनन्दनमिति गद्यकलानिधानात्। इति दुर्गादासः।

सप, सौ ष गु णि शपे। इति कविकल्पद्रुमः। (अदा०-पर०-अक०-अनिट्।) सकारयुक्तषष्ठ्यादिः। सौ, सस्राप्तीत्। ष गु, सर्पति। णि, सुप्तोऽस्ति। शप: शपनम्। इति दुर्गादासः।

सर्क, क गत्याम्। तर्के। इति कविकल्पद्रुमः। (चुरा०-पर०-सक०-तर्के अक०-सेट्।) सकारयुक्तसर्कादिः। तर्को दुःखेन जीवनम्। क, सर्कायति धनी गच्छति दुःखेन जीवति वेत्यर्थः। आसिष्यर्कत्। इति दुर्गादासः।

सिध, ल सौ य चा णि णिधि। इति कविकल्पद्रुमः। (दिवा०-पर०-अक०-अनिट्।) ल, असिधत्। सौ, सेधा। य, सिध्यति। चा, सौधितं सिद्धं तेन। णि, सिध्नोऽस्ति। सिध्यति मोक्षस्तेषमोक्षेषिति मोपदेशः। गाधग्रन्थरसे इति गाधः। च क सिध्यति सत्याद्यमिति शुक्लायुधः। इति दुर्गादासः।

सिध, णि चा ल क ख मोक्षसेधमोक्षेषु। इति कविकल्पद्रुमः। (भ्वा०-आत्म०-अक०-सेट्।) णि, सिध्नोऽस्ति। चा, सेधिषे सिध्यं तेन। क, सेधते सिद्धः सेधं साधयति स्वार्थः। ल, असिधत्। खेधः सिद्धौभावः। इति दुर्गादासः।

स

क, सकारः। क गु ऊकारादिर्व्यञ्जनम्। आस्योच्चारकस्थानं दन्ताः। इति भारतम्। (तथाच शिक्षायाम्। १७।

"सुमुहूर्ते का अदुका दन्ता सतुलसाः सुसाः।")

सकारवर्णं यथा,—

"सकारं तस्य वक्ष्यामि शक्तिबीजं परात्परम्।
कोटिविद्युल्लताकारं कुलकौलसमन्वितम्।
यस्मिन्नेकमं शेते सदाशिवमयं सदा।
रजःसत्त्वगुणोपेतं त्रिविधैश्वर्यदं सदा।"

इति कामधेनुतन्त्रम्। *।

अस्य मेरुतन्त्रादौ यथा,—

"कुण्डिनी वामतो देवता च सोऽस्त्रिशक्तयः।
पुनरुक्तंगता तासु वह्निचन्द्रदिवाकराः।
मात्रा भवानी विज्ञेया ध्यानमस्य प्रचक्षते।"

अस्य ध्यानादि।

"शुक्लाम्बरां शुक्लवर्णां द्विभुजां रक्तलोचनाम्।
श्वेतचन्दनलिप्ताङ्गीं सुरक्ताहारोपशोभिताम्।
गन्धर्वगीयमानाग्र्य सदानन्दमयीं पराम्।
अष्टसिद्धिप्रदां नित्यां भक्तादन्दविवर्द्धिनीम्।
एवं ध्यात्वा सकारन्तु तन्मन्त्रं दशधा जपेत्।
त्रिशक्तिसहितं वर्णं ध्यात्वादित्यसंयुतम्।
प्रणम्य सततं देवि हृदि भावय सुन्दरि।"

इति वर्णोद्धारतन्त्रम्। * ।

तत्पर्य्यायः।

"सो धंसः सुयशा विषाग्रवीग्रचन्द्रसंज्ञकः।
जगद्धीजं शक्तिनामा सोऽहं वेधवती भगुः।
प्रकृतिरीश्वरः शुक्रः प्रभा श्वेता कुलोच्चकः।
दक्षपादोऽन्तकं माद्री भरमाला परोऽधरः।
सुरूपा च गुणेशो मौः कलकण्ठो हकोदरी।
प्राणाद्याश्च पुरा देवी लक्ष्मीः सोमो हिरण्यपूः।
दुर्गोत्तारिञ्जि सम्मोहा स्त्रीवो मूर्त्तिर्मनोहरः।"

इति तन्त्रम्।

सं, [म्] य, शोभनार्थः। समार्थः। सङ्गतार्थः। प्रशस्तार्थः। इति मेदिनी। उपसर्गविशेषः। अस्यार्थाः यथा। सम् प्रकर्षाशेषनैरन्तर्यौचित्याभिमुख्येषु। इति सुग्धबोधटीकायां दुर्गादासः।

सः, पुं, ईश्वरः। सर्पः। इति शब्दरत्नावली। पक्षी। एकीकाक्षरकोषः। विष्णुः। यथा। सः स्याद्विष्णौ हरे सर्पे। इति भरतैकार्थसंग्रहः। पूर्वोक्तपरामर्शकः। से इति भाषा। तच्छब्दस्य प्रथमैकवचननिष्पन्नः। यथा, भट्टिः। १। २।

"सोऽधीष्ट वेदांस्त्रिदशानयद्
पितॄनपारीत् सममंस्त वस्तूनः।"

समासपूर्वपदत्वे सहार्थः। यथा। समालकः। क्वचित् समानार्थेच। यथा। सकृत्। इति व्याकरणम्।

संधाधी, [न्] पुं, (संधत्तीति। सं+धद+णिनिः।) कूटलेखकः। इति राजनिर्घण्टः। धारके, त्रि। (यथा, सुश्रुते। १। ४५।

"दीपनं लघु संधादि स्रोतसां शोधनं परम्।")

संग्रहकारके च। यथा, कामन्दकीयनीतिसारे। ४। १०।

"प्रख्यातवंशमक्रूरं लोकसंधादिनं शुचिम्।
कुर्वीतात्मक्षितिशक्षाङ्गी परिवारं नरोपतिः।")

संधं, क्ली, पीतकाष्ठम्। यथा,—

"धायवं धातुकं संधं जिवं प्राविरः पुमान्।
कालीयकञ्च कालानुसंधाय समर्थकम्।"

धायवादिनाम पीतकाष्ठे। इति शब्दचन्द्रिका।

संज्ञः, त्रि, (उत्तमकुलकारित्वं जानाति यः। सं+ज्ञा+कः।) सत्कुलजातः। यथा,—

"प्रभुः प्रणतवात्सल्यः स्वामी प्रश्रयदेव च दक्षिणे।
संधुः संधस्वभावश्च भवेत् संज्ञोऽपि सत्त्व हि।"

इति वाक्यपदीयटीकायां भरतः।

संज्ञपनं, क्ली, (सं+ज्ञा+णिच्+ल्युट्।) मारणम्। इत्यमरः। (यथा, भागवते। ४।५।२२।

"दृष्ट्वा संज्ञपनं योगं पशूनां स पतिर्मखे।
यजमानपशोः कस्य कायात्तेनाहरच्छिरः।")

विज्ञापनच।

संज्ञप्तिः, स्त्री, (सं+ज्ञा+णिच्+क्तिन्।) मारणम्। इति हेमचन्द्रः। विज्ञापनच।

संज्ञा, स्त्री, (सं+ज्ञा+भावे अङ्।) चेतना। (यथा, कुमारे। ६। ४४।

"रतिखेदसमुत्पन्ना निद्रा संज्ञाविपर्ययः।")

बुद्धिः। (ज्ञानम्। यथा, भागवते। ६।७।१७।

"गुरोर्नाधिगतः संज्ञां परीप्सन् भगवान् स्वराट्।
ध्यायन् धिया सुरैर्युक्तः प्रणम्य नालभतात्मनः।")

तथाच गीतायाम्। १। ७।

"नायका मम सैन्यस्य संज्ञार्थं तान् ब्रवीमि ते।")

नाम। आख्या। (यथा, मनुः। ८। १३१।

"लोकसंव्यवहारार्थं या: संज्ञाः प्रथिता भुवि।
ताम्ररूप्यसुवर्णानां ताः प्रवक्ष्याम्यशेषतः।")

हस्ताद्यैरर्थसूचना। हस्तभ्रूलोचनादिभिः प्रयोजनस्य ज्ञापना। इत्यमरभरतौ। (यथा, कुमारे। ३। ४१।

"सुखार्पितैकाङ्गुलिसंज्ञयैव
मा चापलायेति गणान् यनेषीत्।")

गायत्री। सूर्य्यपत्नी। इति मेदिनी। (यथा, मार्कण्डेये। ७७। १।

"मार्तण्डस्य रवेर्भार्या तनया विश्वकर्मणः।
संज्ञा नाम सुभागा तस्यां भानुरजीजनत्।"

अस्या विशेषविवरणन्तु तत्रैवाध्याये द्रष्टव्यम्।)

संज्ञासुतः, पुं, (संज्ञायाः सुतः।) यमिः। इति केचित्।

संजुः, त्रि, (संजते संलग्ने जानुनी यस्य। "प्रसंभ्यां जानुनोर्जुः।" ५। ४। १२८। इति जुः।) संलग्नजानुकः। इत्यमरः।

संज्वरः, पुं, (संज्वरयतीति। सं+ज्वर+णिच्+अच्।) ज्वरितताप:। इत्यमरः। (यथा, कथासरित्सागरे। ५५। ६३।

"कदलीपत्रपवनैर्वीज्यमानां सखीजनैः।
पाण्डुगण्डाभमभिगत्य संज्वरस्तत्यजे तया।")

संयः, पुं, रुद्रासः। इति शब्दचन्द्रिका।

संयत्, पुं, स्त्री, (संयमतेऽवेति। सं+यम्+क्विप्। "गमादीनाम्।" ६। ४। ४०। इत्यस्य वार्त्तिकोक्ता मलोपः। तुक्।) शुक्रम्। इत्यमरभरतौ। (यथा, रघुः। ७। ३८।

"उत्थापितः संयति रेणुरग्रे:
सान्द्रीकृतः स्यन्दनवंशचक्रैः।")

संयतः, त्रि, (सं+यम्+क्तः।) बद्धः। इत्यमरः। (यथा, रामायणे। २। १०। २५।

"मायानित्य परिस्पर्शा पतिरीवाभि संयताम्।")

शुद्धसंयमः। यथा मत्स्यपुराणम्।

"यो वः कल्पोत्थितैर्वेदैरात्मा संयत्य तिष्ठति
इन्द्रियाणि च पञ्चैव तेषां संयम उत्तमः।

क्षतोपवासः शुचिरप्रमत्तः
संपूजयेद्भक्तिनम्रो गणेशम् ॥"
इति प्रायश्चित्ततत्त्वम् ॥

संयत्वरः, पुं, वाग्यतः। जन्तुसन्दृष्टः। इति संक्षिप्तसारोणादिवृत्तिः ॥

संयदरः, पुं, (संयच्छतीति। सं+यम्+"छित्वरच्छत्वरेति।" उणा० ३। १। इति क्वरच्प्रत्ययेन साधु।) नृपः। इत्युणादिकोषः ॥

संयन्ता, [तृ] त्रि, संयमनकर्त्ता। नियन्ता। संपूर्व्वयमधातोस्तृन्प्रत्ययेन निष्पन्नः ॥ (यथा, महाभारते। १। ६२। ४८।
"तं विसंज्ञमपोवाह संयन्ता रथवाजिनाम्।
उपदेशमनुस्मृत्य रथमार्गो महारथम् ॥")

संयमः, पुं, (सं+यम्+"यमः समुपनिविषु च।" ३। ३। ६३। इति अप्।) व्रताद्यङ्गपूर्व्वदिनकर्त्तव्याचारः। तत्पर्य्यायः। वियामः २ वियमः ३ यामः ४ यमः ५ संयामः ६। इत्यमरः ॥ संयमनम् ७ नियमः ८। इति धरणिः ॥ तद्विधानं यथा। अथ दशमीनियमाः। स्मृतिसन्तोषे।
"कांस्यं मांसं मसूरञ्च चणकं कोरदूषकम्।
शाकं मधु परान्नञ्च त्यजेदुपवसन् स्त्रियम् ॥"
व्यूषोपवसन्निति तद्दिने भोजनासम्भवात् सामीप्यात् पूर्व्वापरदिनयोर्ग्रहणम्। स्मृतिः।
"शाकं मांसं मसूरञ्च पुनर्भोजनमैथुने।
नृतमत्यम्बुपानञ्च दशम्यां वैष्णवस्त्यजेत् ॥
कांस्यं मांसं सुरां चौद्रं लोभं वितथभाषणम्।
व्यायामञ्च व्यवायञ्च दिवास्वप्नं तथाञ्जनम् ॥
तैलपिष्टं मसूरञ्च दशम्यां वर्জ্জयेन् नुमान्।
दशम्यामेकभक्तञ्च कुर्व्वीत नियतेन्द्रियः ॥
आचम्य दन्तकाष्ठञ्च खादेत तदनन्तरम्।
पूर्व्वं हरिदिनाश्लोकाः सेवध्वं चैकभोजनम् ॥
त्यजतीष्टस्त्रियं नराः स्त्रियाः सङ्गविवर्জ্জिताः।
सेवध्वं देवदेवेशं पुराणं पुरुषोत्तमम्।
मद्भक्तिसंयुक्ता द्वादश्याञ्च भविष्यथ ॥"
इत्येकादशीतत्त्वम् ॥ * ॥
आद्यपूर्व्वदिनकर्त्तव्यनियमो यथा। देवलः।
"श्वः कर्त्तास्मीति निश्चित्य दाता विप्रान्निमन्त्रयेत्।
तिलामिषं यत्नात् भुक्त्वा सर्व्वसुप्रधने गृहे।
यमस्त्वे परेत्युक्त्वा ब्राह्मणांस्तान्निमन्त्रयेत् ॥"
वराहपुराणम्।
"यस्यश्राद्धादि कर्त्तव्यं श्वः कर्त्तास्मीति जानता।
स्नानोपवेशनञ्चैव कृत्वा विप्रान्निमन्त्रयेत्।
दन्तकाष्ठञ्च विधिवत् ब्रह्मचारी शुचिर्भवेत् ॥"
विष्णुः। आहूयाहूय ब्राह्मणेभ्यो दद्यात्। मार्कण्डेयपुराणम्।
"निमन्त्रयेच्च पूर्व्वेद्युः पूर्व्वोक्तान् द्विजसत्तमान्।
व्यस्तान्नो वाऽपि दिवा योषिद्व्यस्तान्नम् ॥"
यमः।
"प्रार्थयेत प्रदोषान्ते भुक्ताञ्च क्षयितान् द्विजान्।
सन्ध्यादानविनिर्मुक्तैः कामक्रोधविवर्জ্জितैः ॥
भावतव्यं भवद्भिश्च श्रोभूते श्राद्धकर्म्मणि।
दक्षिणं जानु चाज्यस्य त्वं मयाच निमन्त्रितः।
एवं निमन्त्र्य नियमान आवयेत् प्रेक्षकान् बुधः ॥"
तन्नियममाह।
"अक्रोधनैः शौचपरैः सततं ब्रह्मचारिभिः।
भवितव्यं भवद्भिश्च मया च श्राद्धकर्म्मणि ॥"
इति श्राद्धतत्त्वम् ॥ * ॥
तीर्थयात्रापूर्व्वदिनकर्त्तव्यनियममाह। ब्रह्मपुराणम्।
"यो यः कश्चित्तीर्थयात्रान्तु गच्छेत्
सुसंयतः स च पूर्व्वं गृहे स्वे।
क्षतोपवासः शुचिरप्रमत्तः
संपूजयेद्भक्तिनम्रो गणेशम् ॥
देवान् पितॄन् ब्राह्मणांश्चैव साधून्
धीमान् प्रीणयन् वित्तशक्त्या प्रयत्नात्।
प्रत्यागतश्चाप पुनस्तथैव
देवान् पितॄन् ब्राह्मणान् पूजयेच्च ॥"
एवं प्रकुर्व्वतस्तस्य तीर्थाद्यदुक्तं फलं तत् स्यान्नात्र सन्देह एव। सुसंयतः पूर्व्वदिने क्षतैकभक्तादिनियमस्तदुत्तरदिने क्षतोपवास इत्यादि। उपवासदिने सुखनमपि।
"प्रयागे तीर्थयात्रायां पितृमातृवियोगतः।
कक्षानां वपनं कार्य्यं वृथा न विकचो भवेत् ॥"
इति विष्णुपुराणात्। इति प्रायश्चित्ततत्त्वम् ॥ * ॥
प्रायश्चित्तपूर्व्वोपवासत्वं यथा। शङ्खलिखितौ।
"वाप्य केशनखान् पूर्व्वं धृतं प्राश्य वह्निनिभ्रि।
प्रत्येकं नियतं कालमाश्रमो व्रतमादिशेत् ॥"
इति प्रायश्चित्ततत्त्वम् ॥
(बन्धनम्। यथा, साहित्यदर्पणे। २। १५५।
"कापि कुन्तलसंयानसंयमव्यपदेशतः।
बाहुमूलं स्तनौ नाभिपङ्कजं दर्शयेत् स्फुटम् ॥"
संकोचः। यथा, मार्कण्डेये। ७७। ४।
"मयि दृष्टे सदा यस्मात् कुरुषे नेत्रसंयमम्।
तस्माच्चनिष्यते मूढे प्रज्ञासंयमनं यमम् ॥")

संयमकः, त्रि, (संयच्छतीति। सं+यम्+ण्वुल्।) नियन्ता। यथा,—
"स एव धाता सर्व्वस्य तन्नियोगकरा वयम्।
यमसंयमने शक्तः सोऽस्मान्संयमको हरिः ॥"
इति वह्निपुराणे नारसिंहप्रादुर्भावाध्यायः ॥
संयमी च ॥

संयमनं, क्ली, (सं+यम+ल्युट्।) बन्धनम्। (यथा, साहित्यदर्पणे। ६। ३१८।
"यथावा वेणीं द्रौपदीकेशसंयमनहेतुर्भीमसेनक्रोधापधिनी वृधिष्ठिरोनुमोदः ॥") व्रतम्। इति मेदिनी ॥ यतुःप्राणम्। इति शब्दरत्नावल्यां भरतः ॥ (यमशब्दम्। यथा, महाभारते। ३। १६३। ८।
"इतन् संयमनं पुण्यमतीवाद्भुतदर्शनम्।
प्रेतराजस्य भवनञ्छाया परमया युतम् ॥"
शासनम्। दमनम्। यथा, भागवते। १०। १६। १६।
"तं मत्वैनमधिष्ठीर्थमवेष्य तेन
दुष्टा सतीव खलसंयमनावतारः ॥" *॥

संयच्छतीति। सं+यम+क्युः। नियन्त्रि त्रि। यथा, मार्कण्डेये। ७७। ४।
"तस्माच्चनिष्यते मूढे प्रज्ञासंयमनं यमम् ॥")

संयमनी, स्त्री, (संयम्यतेऽस्यामिति। सं+यम्+अधिकरणे ल्युट्।) यमपुरी। इति मेदिनी ॥ (यथा, भागवते। १०। ४५। ४२।
"ततः संयमनीं नाम यमस्य दयितां पुरीम्।
गत्वा जनार्द्दनः शङ्खं प्रदध्मौ सहलायुधः ॥")

संयमितः, त्रि, जातसंयमः। संयमशब्दात् इतोऽस्य जाते इयनेन इतप्रत्ययेन निष्पन्नः ॥

संयमी, [न्] पुं, (संयमोऽस्यास्तीति। संयम+इनिः।) मुनिः। इति धरणिः ॥ निगृहीतेन्द्रिये त्रि। यथा,—
'या निशा सर्व्वभूतानां तस्यां जागर्त्ति संयमी।
यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः ॥'
इति श्रीभगवद्गीतायाम् २ अध्यायः ॥

संयात्रा, स्त्री, द्वीपान्तरगमनम्। संपूर्व्वो यातिर्द्वीपान्तरगमनवृत्तिस्तत्तत्त्वासुसिति चः स्त्रियामाप् संयात्रा। द्वीपान्तरगमनं सम्यग्यात्रा संयात्रा वा। इति सांयात्रिकशब्दटीकायां भरतः ॥

संयानं, क्ली, सम्यग्गमनम्। संपूर्व्वयाधातोरनट्(ल्युट्) प्रत्ययेन निष्पन्नम् ॥ (यथा, महाभारते। २। १६। ५।
"स त्वं सात्वतमुख्याद्य सत्यसन्धो यदृच्छया।
पश्यसे दयसंयानं शिखां केशवनन्दन! ॥"
प्रेतनिर्हारः। यथा, रामायणे। १। ७६। २।
"अलं शोकेन भद्रं ते राजपुत्र महायशः।
प्राप्तकालं नरपतेः कुरु संयानमुत्तमम् ॥")

संयामः, पुं, (सं+यम+"यमः समुपनिविषु च।" ३। ३। ६३। इति घञ्। संयमः। इत्यमरः ॥

संयावः, पुं, (सं+यु+"समि युद्रुवः।" ३। ३। २३। इति घञ्।) घृतक्षीरादिपक्वगोधूमः। यथा,—
"संयावस्तु घृतक्षीरगुड़गोधूमपाकजः।"
इति शब्दचन्द्रिका ॥
पिष्टकविशेषः। पेराकी इति भाषा। यथा,—
"पर्य्यसः साज्यसमिता निर्म्मिता घृतभर्জ্জिताः।
कुट्टिताश्चालिताः शुद्धाः शर्करामिश्रिमर्দ্দिताः ॥
तद्धूर्णं प्रक्षिपेद्दध्नां लवङ्गमरिचानि च।
नालिकेलं सकर्पूरं वारबीजान्यनेकशः ॥
घृताक्तसमितापूपरोटिका रचिता ततः।
तस्यां ततपूपजालस्य कुर्य्यान्मुद्रां दृढां सुधीः ॥
सर्पिषि प्रचुरे तान्तु सुपक्वान्निपुणो धनः।
प्रकारोऽयं संयाव इति कौशिकैः।
मण्डकोऽपि सखे ज्ञेयः संयावोऽपि गुणैरगैः ॥"
इति भावप्रकाशः ॥

संयुक्, [ज्] त्रि, (सं+युज्+क्विप्।) युक्तवान्। यथा,—
"समर्थो गुणवान् संयुक् मित्रयुङ्मित्रवत्सलः।"
इति त्रिकाण्डशेषः ॥

(यथा, मनुस्मृतौ । ८ । ३६ । ७३ ।
"आत्मानमात्मना वेद संयुक्तं पञ्चभिर्गुणैः ।
सत्यस्य चैव निर्वक्तृ दशधर्मधरं नरं विदुः ।")
संयुक्त ङ ।

संयुक्तः, त्रि, (सं + युज् + क्तः ।) संयोगयुक्तः ।
यथा, निरुक्तादिकर्मणि ।
"यदुच्यते संयुक्तं कारणमिति तदेतदीश्वरम् ।"

संयुक्तः, पुं, ("युक्तिर् द्वीपे ।" ७ । ३ । ६६ । उणादिसूत्रेण युज्धातोः क्तप्रत्ययान्निपातनात्साधुरयम् । 'विदि-शीङ्भ्यां दिवादेरेव' कालविशेषे दृश्यत्वात् भू० दृश्यत्वे भू० दृश्यत्वा दृश्यत्वा ३ । ३ । १८७ । २८ ।) पुरुषः । इत्यमरः । ३ । ७ । १०३ । (यथा, महाभारते । ३ । १४७ ।
"कालस्यात्मानुसारेण संयुक्तो भगवान् प्रभुः ।
संयुक्तो लोकतन्त्राय तनुषे न तनोः फलम् ।")
• दीपश्च ।

संयोजनम्, क्ली, (सं + युज् + ल्युट् ।) संयोगकरणम् । यथा । स्त्रादिरे यजुं स्त्रयति स्त्रादिरं द्वीपेऽस्मात् पूर्वं युज्यते इति भूयते । अत्र संशयः । किं कालस्यैव स्त्रादिरता निर्देशेऽपि स्त्रादुत्व भेदेति । अत्र प्रकाशैकान्तिकत्वया निश्चयो नास्ति । यद्यु निर्देशेऽपि स्त्रादिरत्वमेव तस्य कालस्यैव यजुषयनाय पूर्वावच्छेदकत्वार्थं अर्थो न निर्देशे स्त्रादिरता इति प्रादिरङ्गाभाव यजुर्भाषयत्वम् । एवञ्च तुमर्थे संयोजनकुलमिति । अत्र संयोगः समवायार्थं एवकारं भेदः । एवञ्च स्त्रादिरत्व उक्तसंस्कृतपुरुषार्थसंयोगयोग्यकाले यावद्धेन न प्रकृतिसंस्कारीयसंस्कारसंयोगोपधायकत्वात् निर्यादिकर्मसंयोगविरोधः । न चावयवद्वारार्थं निर्यावयं संस्कारादृष्टावयवद्वारात् । अत एवार्थं स्त्रादिरेति । एवं यथा शुक्लीति पशुक्रियाराम्भ एवाद्यावयवार्थमेव । एवमत्र

संयोजिन्, त्रि, (सं + युज् + णिच् + णिन् ।) यज्ञार्थं यज्ञार्थसाधनेन संयुक्तीकृतः । तत्पर्यायः । उपाधिनः २ । इत्यमरः । संयोजिनः ३ । इति भरतः । (यथा, भागवते । ५ । २६ । ३ ।
"यथा मेधीयपशव आलब्धास्तत्प्रियाय वै ।
विभिः सवनैर्यथाकल्पं मरुत्वानिन्द्र इज्यते ।")

संरम्भः, पुं, (सं + रभ + घञ् । दीर्घः ।) क्रोधः । इति शब्दरत्नावली । (यथा, मनुः । ८ । ४८ ।
"साक्षिणा हरणेनापि संरम्भात् प्रतिपूर्वकम् ।
एकविंशतिमाधत्ते भागमैणिक आत्मने ।")
आटोपः । इति त्रिकाण्डशेषः । (यजुः । यथा, भागवते । ८ । ६ । २४ ।
"न संरम्भेण सिध्यन्ति सर्वार्थाः सान्त्वया यथा ।")
वेगः । यथा, गर्गेण । ८ । १९ । ६५ ।
"संयम्य मनुसंरम्भं मानयन्तो सुरेश्वराः ।
उपसीयमानास्तत्रैतुः सर्वे त्रिदशसम् ।")

(सप्राकारतद्यानम्। इति नीलकण्ठः॥ यथा, महाभारते। ३। १६०। ३७।
"द्वारतोरणनिर्व्यूहध्वजसंबाधशोभिना॥"
सं+वह्+घञ्। विमर्द्दनम्। यथा, मार्कण्डेये। १६। १५।
"तं तथा बाधितं भार्य्या पतिं देवमिवार्च्चयत्।
पादाभ्यङ्गाङ्गसंबाधस्नानाच्छादनभोजनैः॥")
संबाधकः, त्रि, (संबाधयतीति। सं+वह्+णिच्+ण्वुल्।) अङ्गमर्द्दकारकः। तत्पर्य्यायः। अङ्गमर्द्दकः २। इति त्रिकाण्डशेषः॥ अङ्गमर्दः ३। इति हेमचन्द्रः॥ (यथा, कामन्दकीयनीतिसारे। १२। ४५।
"प्रसाधका भोजकाश्च गात्रसंबाधका अपि।
जलताम्बूलपुष्पाद्यभूषणदायकाः।
कर्त्तव्याश्च सदा क्षेत्रे ये चान्येऽभ्यासवर्त्तिनः॥")
संबाधनं, क्ली, (सं+वह्+णिच्+ल्युट्।) अङ्गमर्द्दनम्। (यथा, मार्कण्डेये। १०। ७४।
"तैलाभ्यङ्गो वान्यवानामङ्गसंबाधनञ्च यत्।
तेन चाप्यायते जन्तुर्न्नाद्यन्ति सवान्यवाः॥")
भारादिवहनम्। इति मेदिनी॥
संवित्तिः, स्त्री, (सं+विद्+क्तिन्।) प्रतिपत्तिः। जनस्याविवादः। इति मेदिनी॥ चेतना। बुद्धिः। इति शब्दरत्नावली हेमचन्द्रश्च॥ (यथा, किराते। १६। ३२।
"छायां विनिर्हृत्य तमोमयीन्तां
तत्तस्य संवित्तिरिवाप विद्याम्॥"
अनुभवः। यथा, तत्रैव। ११। ३४।
"अक्षया सुखसंवित्तिः स्मरणीयाद्युगाननी।
इति स्वप्नोपमान् मत्वा कामान् मागात्तदङ्गताम्॥")
संवित्, } स्त्री, (सं+विद्+क्विप्।) अग्नी-
संविद्, } कारः। ज्ञानम्। (यथा, श्रीधरस्वामी।
"वाणीशा यस्य वदने लक्ष्मीर्यस्य च वक्षसि।
यस्यास्ति हृदये संवित्तं वृषिंहमहं भजे॥")
समाधा। क्रियाकारः। युद्धम्। इत्यमरः॥ आधारः। (यथा, माघे। १२। ३५।
"ओजस्विगर्भोच्छ्वसितप्रणालिनः
प्रसादिनोऽनुज्झितगोचसंविदः।
श्लोकानुपेन्द्रस्य पुरः स्म भूयसो
गुणान् ससृद्धिश्च पठन्ति बन्दिनः॥")
सङ्घेतः। (यथा, रघुः। ७। ३१।
"स राजलोकः कृतपूर्वसंवित्
आरम्भिहीनं समयोपलभ्यम्।
आदास्यमा- श्रमदामिषं तत्
आश्रुत्य पन्थानमभक्षतृप्तौ॥")
नाम। बोधकम्। इति मेदिनी। समाधिः। इति शब्दरत्नावली॥
संविदितः, त्रि, (सं+विद्+क्तः।) अङ्गीकृतः। इत्यमरः॥
संविधा, स्त्री, (सं सम्यक् विधो यत्र।) अतिथिशाला। इति शब्दरत्नावली॥

संवीचनं, क्ली, (सं+वि+ईच+ल्युट्।) अन्वेषणम्। अप्रकृतवस्तुनस्तात्पर्य्येणान्वेषणम्। इत्यमरः॥ सम्यक्तात्पर्य्येण विविधप्रकारेरीक्षणं संवीक्षणं अनट्। इति भरतः॥
संवीतं, त्रि, (सं+वे+क्तः।) वृतम्। आवृतम्। इत्यमरः॥ (यथा, मनुः। ४। ४६।
"तिरस्कृत्योच्चरेत् काष्ठलोष्टपत्रतृणादिना।
नियम्य प्रयतो वाचं संवीताङ्गोऽवगुण्ठितः॥")
संवृतः, पुं, आवृतः। संपूर्ब्बवृञ्धातोः क्तप्रत्ययेन निष्पन्नः॥
संवृत्तः, पुं, (सं+वृत्+क्तः।) वरुणः। इति शब्दमाला॥
संवृत्तिः, स्त्री, (सं+वृत्+क्तिन्।) सम्यक्प्रकारेण वर्त्तनम्। (यथा, कथासरित्सागरे। ५६। ४१४।
"हृषता हृदि भीमभूभुजा
कृतसंवृत्युपचारसत्क्रियः।
पतुपार्श्वतृषोऽपि तं नलं
प्रतिपूज्याथ जगाम कोशलान्॥")
आवरणम्। इति संपूर्ब्बकवृञ्धातोः क्तिप्रत्ययेन निष्पन्ना॥ (देवीविशेषः। यथा, महाभारते। २। ११। ३६।
"संवृत्तिराप्ता नियतिः कृतिर्देवा रतिस्तथा।
एताश्चान्याश्च वै देव्य उपतस्थुः प्रजापतिम्॥")
संवेगः, पुं, (सं+विज+घञ्।) भयादिजनितत्वरा। इत्यमरः॥ (यथा, महाभारते। २। ७२। १४।
"अथ सभ्याः समाप्तेषु सत्कृतेषूक्तकारिषु।
ऊचुरुद्विग्नमनसः संवेगात् सर्व्व एव हि॥")
सम्यक्वेगश्च॥ (यथा, राजतरङ्गिण्याम्। ४। ३६०।
"अभग्नप्रसरसंवेगलब्धविद्विनैराधिषः।
श्रीपर्व्वतादावप्यापि भवागमेति दृक्पथम्॥")
संवेदः, पुं, (सं+विद्+घञ्।) अनुभवः। तत्पर्य्यायः। वेदना २। इत्यमरः॥ वे अनुभवे। विद ल सत्तौ घञ्, संवेदः। वीथिष्वन्तीति व्यधे वेदना। न नेत्युक्तेः स्त्री वेदनम्। तच्च विशेषेणापि सामान्यं बाधते न क्वचित् लवीति अनट्। इति भरतः॥ (यथा, हरिवंशे। २०३। २३।
"संवेदजननी धात्री चेति माता प्रचोदिता।
अगृतां तनुतार्थेव जन्तूनां कर्म्मभोगिनाम्॥")
संवेशः, पुं, (सं+विश+घञ्।) निद्रा। इत्यमरः॥ (यथा, रघुः। १। ६३।
"अथ प्रदोषे दोषज्ञः संवेशाय विशांपतिम्।
सुनुः सुनृतवाक् सूतः विससर्ज्जार्हतल्पियम्॥")
स्त्रीरतमन्त्रः। इति मेदिनी॥ पीठः। इति हेमचन्द्रः॥ (उपभोगस्थानम्। इति स्वामी॥ यथा, भागवते। ६। २३। २०।
"विधारस्थानविश्रामसंवेशप्राङ्गणादिभिः।
यथोपजोषं रचितैर्विलासभवनैरजः॥")

संवेशनं, क्ली, (सं+विश+ल्युट्।) रतिक्रिया। इति हेमचन्द्रः॥ (उपवेशनम्। यथा, भागवते। ५। ६। १०।
"शीतोष्णवातवर्षेषु दृष्ट्वानाढ्यान्नाद्यः पानः संहननाङ्गः स्त्रियश्चलसंवेशनाग्र्यैर्नामज्ञनरजसा महामणिरिव ***** विचकाशे॥")
संव्यानं, क्ली, (संवीयतेऽनेनेति+सं+व्य+ल्युट्।) उत्तरीयवस्त्रम्। इत्यमरः॥ (यथा, किराते। ४। २८।
"विषाङ्गसंव्यानमिवानिलोद्धतं
निरस्यतीः स्मयलाक्षणं रजः॥")
वस्त्रम्। इति मेदिनी॥
संशप्तकः, पुं, समन्तात् संग्रामादनिवर्त्तनार्थं। इत्यमरः॥ समन्तात् शपथाद्वारात् शपथाद्वा संग्रामादनिवर्त्तनेनापराद्धुरा व्यवस्थापयमानाद्याद्धोद्यन्ति ते संशप्तकाः। शपेर्भावे क्तः शप्तं सत्यं शप्तं येषां ते संशप्तकाः। इति भरतः। नारायणीसेनाविशेषैः। इति महाभारतम्॥ (यथा, महाभारते। १। १। १८७।
"यदाऽर्जुनं क्षत्रदीयान् अपाहरान्
व्यवस्थितानक्षतिलक्षणव्रतान्।
संशप्तकान् निघ्नतानक्षतेन
तदा नाशंसे विजयाय सञ्जय॥"
एतदुपाख्यानान्तरादिकं महाभारते द्रोणपर्व्वणि १७ अध्यायमारभ्य द्रष्टव्यम्॥)
संशयः, पुं, (सं+शी+अच्।) सन्देहः। इत्यमरः॥ तस्य लक्षणं यथा,—
"स संशयो भवेद्यत्र धीरेकत्वाभावभावयोः।
साधारणादिधर्म्मस्य ज्ञानं संशयकारणम्॥"
इति भाषापरिच्छेदः॥
"संशयं लक्षयति संशय इति। एकधर्म्मिकविरुद्धभावाभावप्रकारकं ज्ञानं संशय इत्यर्थः। साधारणेति उभयसाधारणो यो धर्म्मस्तज्ज्ञानं संशयसाधनम्। यथा उर्वेस्तरत्वं स्थाणुत्वसाधारणं ज्ञात्वा अयं स्थाणुर्न वेति सन्दिग्धे। एकधर्म्मसाधारणज्ञानं संशयकारणम्। यथा शब्दत्वं नित्यानित्यसाधारणं शब्दे गृहीत्वा शब्दो नित्यो न वेति सन्दिग्धे। विप्रतिपत्तिस्तु शब्दोऽनित्यो न वेति शब्दात्मिका न संशयकारणं शब्दत्वाभिज्ञानादीनां निश्चयमात्रजनकत्वस्वभावात्। किन्त्वत्र शब्देन कोटिद्वयज्ञानम् जन्यते संशयस्तु मानस एवेति। एवं ज्ञानेऽप्रामाण्यसंशयादिविषयसंशयः। एवं चाप्रसंशयादपि आपकसंशय इत्यादिकं बोध्यम्। किन्तु संशये धर्म्मिज्ञानं धर्म्मिविशेषनिष्ठकर्त्तृत्वं वा कारणमिति।" इति तर्कसंग्रहसिद्धान्तमुक्तावली॥
संशयानः, त्रि, संशयमुक्तः। संपूर्ब्बशीङ्धातोः शानचप्रत्ययेन निष्पन्नः॥
संशयापन्नमानसः, त्रि, (संशयापन्नं आपन्नं यस्य मनसि यस्य वा।) संशयविषयः। संशयकरः।

तत्पर्य्यायः। सांशयिकः २। इत्यमरः॥ ह्रि संशयविषये स्याद्यादौ। संशयमापन्नः सांशयिकः ष्ठिकः। संशयमापन्नं मानसं यत्र स्याद्यादौ स तथा। संशयमापन्नं मानसं यस्य स इतीति षष्ठ्यन्तपदार्थे संशयितरि पुरुषादावप्येतच्छब्दत्रयप्रवृत्तिः स्यात्। इति भरतः॥

संशयालुः, त्रि, संशयिता। इति हेमचन्द्रः॥

संशयिता, [तृ] त्रि, (सं+शी+ल्टच्।) संशयकर्त्ता। इति हेमचन्द्रः॥

संशरणं, क्लो, (सं+शृ+ल्युट्।) रणारम्भः। इति शब्दमाला॥ (संरक्षणम्। यथा, कामन्दकीये। ६। ४।

"लोकानुग्रहमन्विच्छन् शरीरमनुपालयेत्।
राज्ञः संशरणं धाम शरीरं धर्म्मसाधनम्॥")

संशितं, त्रि, (सं+शो+क्तः।) सम्यक्सम्पादितम्। व्रतविषयकयत्नवान्। यथा। संशितं व्रतम्। सम्यक् सम्पादितमित्यर्थः। संशितो ब्राह्मणः। व्रतविषयकयत्नवानित्यर्थः। इति सिद्धान्तकौमुदी॥

संशुद्धिः, स्त्री, (सं+शुध+क्तिन्।) सम्यक् शोधनम्। शरीरमार्জ্জनम्। यथा,—

"सम्मार्জ্জनञ्च संशुद्धिः संशोधनविशोधने॥"
इति रत्नमाला॥

संशुष्कं, त्रि, वातपादिना संशोषितवस्तु। संपूर्व्वशुषधातोः क्तप्रत्ययेन निष्पन्नम्॥

संशोधनं, क्लो, (सं+शुध+ल्युट्।) संशुद्धिः। इति रत्नमाला॥

संशोधितं, त्रि, (सं+शुध+क्तः।) शुद्धीकृतवस्तु। यथा,—

"ये लेपाः कुष्ठानां युज्यन्ते निर्गतास्रदोषाणाम्।
संशोधितशयानां सद्यः सिद्धिर्भवेत्तेषाम्॥"
इति मधुमती॥

संश्चत्, क्लो, (संचिनोति मायामिति। सं+चि+"संश्चत्तृदेहत्।" उणा० २। ८५। इति अतिप्रत्ययेन निपातनात् साधु।) कुहकः। इत्युणादिकोषः॥

संश्रान्तः, त्रि, (सं+श्रै+क्तः।) श्रीतेन सङ्कुचितः। इति सुग्धबोधव्याकरणम्॥

संश्रयः, पुं, (सं+श्रि+अच्।) आश्रयः। यथा,

"स्तुता सुरैः पूर्व्वमभीष्टसंश्रया-
तथा सुरेन्द्रेण दिनेषु सेविता।
करोतु सा नः शुभहेतुरीश्वरी
शुभानि भद्राण्यभिहन्तु चापदः॥"

इति मार्कण्डेयपुराणे दैवीमाहात्म्ये ५ अध्यायः॥ (आश्रयस्थानम्। यथा, रामायणे। ७।४१।६।

"अहो निहतनो राजा जीवलोकस्य संश्रयः।
धर्म्मो बलवतां रामं वनवासे प्रयुञ्जति॥")

संश्रयः, पुं, (सं+श्रि+अच्।) अङ्गीकारः। इत्यमरः॥ (सम्यक् श्रयणम्। यथा, महाभारते। १५। ३। ६।

"अथ भीमः सुदुर्मर्षी बाहुयुद्धं तदाकरोत्।
संश्रये चैनराक्षस्य गान्धार्य्याधाय्यमर्षणः॥")

संश्रितः, त्रि, (सं+श्रि+क्तः।) आश्रितः। यथा,

"न प्राचीमयतः श्रमोनोदीचीं प्रक्तिसंश्रिताम्।
न प्रतीचीं यतः पृष्ठमतो दत्तं समाश्रयेत्॥"
इति तिथ्यादितत्त्वम्॥

संश्रुतः, त्रि, (सं+श्रु+क्तः।) अङ्गीकृतः। इत्यमरः॥ (यथा, रामायणे। ३। १०। ३६।

"मया चैतद्वचः श्रुत्वा कार्त्तस्वरेण परिप्लवनम्।
ऋषीणां दण्डकारण्ये संश्रुतं जनकात्मजे॥")

संश्लिष्टः, त्रि, आश्लिष्टः। मिलितः। संपूर्व्वश्लिषधातोः क्तप्रत्ययेन निष्पन्नः॥

संश्लेषः, पुं, (सं+श्लिष+घञ्।) आलिङ्गनम्। इत्यमरः॥ (यथा, महाभारते। १२।१३३।१७।

"संश्लेषञ्च परस्त्रीभिर्दूरतेनानि वर्জयेत्॥")

मेलनम्॥ (यथा, मार्कण्डेये। ३७। १५।

"अनन्तरञ्च संश्लेषमग्नेय तदनन्तरम्।
तेषामन्यतमैर्भेदैः समाक्रम्यानयद्वशम्॥")

संश्वत्, क्लो, (सं+श्वि+अतिप्रत्ययेन निपातनात् सिद्धम्। "संपूर्व्वात् श्वयतेः संश्वदिति भूभूतिचन्द्रः।" इत्युणादिटीकायां उज्ज्वलदत्तः। २। ८५।) माया। यथा,—

"संश्वत्तु कुहके क्लेयं संश्वत् तत्रैव ते समे।"
इत्युणादिकोषः॥

संसक्तः, त्रि, (सं+सञ्ज+क्तः।) संलग्नः। व्यवहितः। इत्यमरः॥

संसक्तिः, स्त्री, संसक्तता। संपूर्व्वषञ्जधातोर्भावे क्तिनूप्रत्ययेन निष्पन्ना॥

संसत्, } क्लो, (संसीदन्त्यस्यामिति। सं+
संसद्, } सद्+क्विप्।) सभा। इत्यमरः॥ (यथा, रघुः। १६। २४।

"तदद्भुतं संसदि राजिवृत्तं
प्रातर्द्विजेभ्यो नृपतिः शशंस॥")

संसरणं, क्लो, (सं+सृ गतौ+ल्युट्।) प्राणिजन्म। असंबाधसैन्यगमनम्। वरटापथः। इत्यमरः॥ रणारम्भः। इति मेदिनी॥ गमनम्। इति शब्दरत्नावली॥ (संसारः। यथा, भागवते। १०। ४०। २८।

"पुंसो भवेदर्हि संसरणापवर्गः
सत्यजनाभ सदुपासनया मतिः स्यात्॥")

संसर्गः, पुं, (सं+सृज्+घञ्।) सम्बन्धः। स च समवायादिः। इति न्यायशास्त्रम्॥ * ॥ पापिष्ठान्त्यजादिसंसर्गप्रायश्चित्तम्। यथा,—

"क्लेयादिना पतितेन इत्युपक्रम्य उक्तम्। अत्राज्ञानतो वत्सरेण पातित्यम्।

'संवत्सरेण पतति पतितेन सहाचरन्।
याजनाध्यापनाद्योनादेकशय्यासनाशनात्॥'
इति हारीतवचनात्।

ज्ञानतो वत्सरार्द्धेनेति। तत्संसृष्टशूद्रीणाभाव एव। [क्षत्रियादौ।]

'शान्वयेऽपि एवमभूत्वा तत् पापं नाप्नुयात्
इति देवलवचनात्॥*॥

'यस्तस्य सुकृते पक्वान्नं भक्षयेद्वै तस्य निर्दिशेत्।
शुष्कान्नभोजिनः पादमित्याह भगवान् मनुः॥'
तस्याविज्ञातचण्डालसहितैकवेश्मस्थसङ्करीकरणरूपमूलपाककर्त्तुः द्वितीयसंसर्गिणः। तथा चापस्तम्बः।

'अन्त्यजातिरविज्ञातो निवसेद्यस्य वेश्मनि।
स वै ज्ञात्वा तु कालेन कुर्य्यात्तस्य विशोधनम्॥
चान्द्रायणं पराको वा द्विजातीनां विशोधनम्।
प्राजापत्यस्तु शूद्राणां तथा संसर्गदूषणे॥
येनैव भुक्तं पक्वान्नं भक्ष्यं तेषां विनिर्दिशेत्।
तेषामपि च यैर्भुक्तं तेषामह विधीयते।
तेषामपि च यैर्भुक्तं भक्ष्यमादौ विधीयते॥'

अत्र तृतीयसंसर्गिण एव प्रायश्चित्तदर्शनात् चतुर्थसंसर्गे दोषो नास्ति। प्रायश्चित्तविवेकोऽप्येवम्।" इति प्रायश्चित्ततत्त्वम्॥ * ॥ अथ संसर्गनिरूपणम्। तत्र महापातकिसंसर्गस्य पापहेतुत्वमाह मनुः।

"ब्रह्महत्या सुरापानं स्तेयं गुर्व्वङ्गनागमः।
महान्ति पातकान्याहुः संसर्गश्चापि तैः सह॥"
प्रायश्चित्तमपि मनुना दर्शितम्।

"एषां पापकृतामुक्ता चतुर्णामपि निष्कृतिः।
पतितैः संप्रयुक्तानामिमाः शृणुत निष्कृतीः॥
यो येन पतितेनैषां संसर्गं याति मानवः।
स तस्यैव व्रतं कुर्य्यात् ततःसंसर्गविशुद्धये॥
प्रायश्चित्तीयतां प्राप्य दैवात् पापकृतेन वा।
न संसर्गं व्रजेत् सद्भिः प्रायश्चित्तेऽकृते द्विजः।"

पापिष्ठसंसर्गी पातकी भवति इति कल्पस्मृतिः॥ विष्णुः। यश्च येन पापात्मना सह संसृजेत् स तस्यैव प्रायश्चित्तं कुर्य्यात्। गौतमोऽप्याह।

ब्रह्महसुरापगुरुतल्पगपितृमातृयोनिसम्बन्धागस्तेनाभक्ष्यभक्षकनास्तिकनिन्दकनिन्दितकर्म्मात्यागिपतितात्याग्यपतितत्यागिनः पतिताः पातकसंप्रयोजकाश्च तैश्चाब्दं समाचरन्। निषिद्धपतितसंसर्गात् पततीति श्रुतिः कल्पना॥

के ते संसर्गप्रकारा इत्यत्राह दक्षस्मृतिः।

"एकशय्यासनं पङ्क्तिर्भाण्डपक्वान्नमिश्रणम्।
याजनाध्यापनं योनिस्तथा च सहभोजनम्।
नवधा सङ्करः प्रोक्तो न कर्त्तव्योऽधमैः सह॥"
छागलेयः।

"चण्डालपाचसंस्पर्शात् निश्वासात् सहभोजनात्।
सहशय्यासनाध्यायात् पापं संक्रमते नृणाम्॥"
यमः।

"दुष्कृतं हि मनुष्याणामन्नमाश्रित्य तिष्ठति।
यो यस्यान्नमिहात्नाति स तस्याश्नाति किल्बिषम्॥"
देवलः।

"पतितेन सहोषित्वा ज्ञानन् संवत्सरं नरः।
मित्रतस्तेन सोऽब्दान्ते व्रतञ्च पतितो भवेत्।
याजनं योनिसम्बन्धं स्वाध्यायं सहभोजनम्।
त्यक्त्वा सद्यः पतत्येवं पतितेन न संशयः॥"
यमः।

"ब्रह्महा मद्यपः स्तेनो गुरुतल्पग एव च।

महापातकिनस्ते यस्य ते: सह संवसेत् ॥
संवत्सरन्तु पतितैः संसर्गं कुरुते तु यः ।
यानशय्यासनैर्नित्यं जानन् स पतितो भवेत् ॥"
ननु द्वितीयतृतीयसंसर्गिणि प्रमाणं नास्ति अतएव दृढज्ञानातपः ।
"अशुचिं संसृशेद्यस्तु एक एव स दुष्यति ।
तत्स्पृष्टान्यो न दुष्येत सर्व्वद्रव्येष्वयं विधिः ॥"
तथा ।
"संहतानान्तु पात्राणां यत्रैकमुपहन्यते ।
तस्य तत् शोधनं प्रोक्तं न तु तत्स्पृष्टिनामपि ॥"
उच्यते । यश्च येन पापात्मनेति यो येन संपिबेदिति संसर्गी येन संसर्गमिति विष्णुशातातपवचनैः सामान्येन पापिसंसर्गी पापी भवति इति प्रतिपादनात् संसर्गपापिष्ठस्यापि संसर्गी पापयुक्तो भवतीति एभिरेव प्रतिपादितम् ॥ * ॥ पतितोत्पन्नानां शुद्धिमिच्छतां पतितानां प्रायश्चित्तस्य तृतीयो भागस्तत्प्रायश्चित्तं ज्ञेयम् । स्त्री च पतितोत्पन्ना तृतीयभागस्य तृतीयभागं कुर्य्यात् । इति प्रायश्चित्तविवेकः ॥

संसर्गाभावः, पुं, (संसर्गेण सम्बन्धेन अवच्छिन्नोऽभावः ।) सम्बन्धरहितत्वम् । न्यायमते अभावपदार्थविशेषः । स तु भेदभिन्नाभावः । स च त्रिविधः । प्रागभावः १ ध्वंसः २ अत्यन्ताभावः ३ । यथा,—
"अभावस्तु द्विधा संसर्गान्योन्याभावभेदतः ।
प्रागभावस्तथा ध्वंसोऽप्यत्यन्ताभाव एव च ॥
एवं त्रैविध्यमापन्नः संसर्गाभाव इष्यते ॥"
इति भाषापरिच्छेदः ॥ * ॥
तादात्म्यं तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिनाकाभावत्वम् । विनाश्यभावत्वं प्रागभावत्वम् १ जन्याभावत्वं ध्वंसत्वम् २ नित्यसंसर्गाभावत्वमत्यन्ताभावत्वम् ३ । इति सिद्धान्तमुक्तावली ॥

संसर्गी, [न्] (संसर्गोऽस्यास्तीति । इनिः । यद्वा, सं+सृज+"संसृजाशुरुधेति ।" ३ । २ । १४२ । इति घिणुण् ।) संसर्गविशिष्टः । यथा । विभागानन्तरं मैत्र्यात् पितृभ्रातृपितृव्यभ्रातृपुत्राणां यथायथं एकत्रावस्थानं संसर्गः तद्युक्तः संसर्गी । एवम्भूतस्य संसर्गिणो मृतस्य धनं तच्छ्रातृत्वादेस्तदप्यभावे संसर्गी स्वयं गृह्णीयात् । इति दायतत्त्वम् ॥

संसर्पः, पुं, सम्यक्प्रकारेण गमनम् । सर्पादिगमनवद्गमनम् । संपूर्व्वसृपधातोर्घञ्प्रत्ययेन निष्पन्नः ॥

संसर्पी, [न्] त्रि, संसर्पशब्दादिनिप्रत्ययेन संपूर्व्वसृपधातोर्णिनिप्रत्ययेन वा निष्पन्नः ॥ संसर्पविधिः । सम्यग्गमनशीलः ॥ (यथा, रघुः । ७ । २६ ।
"कपोलसंसर्पिशिखः स तस्याः
मुहूर्त्तकर्णोत्पलतां प्रपेदे ॥")

संसारः, पुं, (संसरत्यस्मादिति । सं+सृ गतौ+घञ् ।) मिथ्याज्ञानजन्यवासना । इति नैयायिकाः ॥ यथा । संसारश्च मिथ्याधीप्रभवा वासना । इति ग्रामाग्रयवादगादाधरी टीप्पनी ॥ स्वाष्टौप्रनिवहशरीरपरिग्रहः । इति कलापटीकायां गोपीनाथः ॥ संसरणम् । इति शब्दरत्नावली ॥ तत्पर्य्यायः । दुःखलोकः २ भवः ३ कृच्छ्रकारकः ४ । इति त्रिकाण्डशेषः ॥ अपि च ।
"यस्माद्विनायते विश्वमत्रैव प्रविलीयते ।
यमायी मायया बद्धः करोति विविधाः क्रियाः ॥
न चायं संसरति न च संसारयेत् प्रभुः ।
नायं पृथ्वी न सलिलं न तेजः पवनो न तत् ॥
न प्राणो न मनो यक्तं न शब्दः स्पर्श एव च ।
न रूपरसगन्धाश्च नाहं कर्त्ता न वागपि ॥
न पाण्यादी नो पायुर्न चोपस्थो द्विजोत्तमाः ।
न कर्त्ता न च भोक्ता वा न च प्रकृतिपूरुषौ ॥
न माया नैव च प्राग्वैतन्यं परमार्थतः ।
अहं कर्त्ता सुखी दुःखी लग्नः स्खलेति या मतिः ॥
सा चाहङ्कारकर्त्तृत्वादात्मन्यारोप्यते जनैः ।
वदन्ति वेदविदांसः साक्षिणं प्रकृतेः परम् ॥
भोक्तारमचरं शुद्धं सर्व्वत्र समवस्थितम् ।
तस्मादज्ञानमूलोऽयं संसारः सर्व्वदेहिनाम् ॥"
इति कौर्म्मे ईश्वरगीतासु २ अध्यायः ॥
किञ्च ।
"पितृभ्रातृसुहृद्भ्रातृकलत्रादिकृतेन च ।
दुःखोऽवशतया दैन्यमश्नुवानो गतः ॥
एवं संसारचक्रेऽस्मिन् भ्रमता तात सङ्कटे ।
ज्ञानमेतन्मया प्राप्तं मोक्षसंप्राप्तिकारकम् ॥"
इति मार्कण्डेयपुराणे पितापुत्रसंवादनामाध्यायः ॥

संसारगुरुः, पुं, (संसारस्य गुरुः ।) कामदेवः । इति त्रिकाण्डशेषः ॥ जगद्गुरुश्च ॥

संसारमार्गः, पुं, (संसारस्य मार्गः ।) योनिः । इति त्रिकाण्डशेषः ॥

संसारमोचकं, त्रि, (संसारस्य मोचकं यस्मात् ।) भवतारकम् । यथा,—
"एवमेतन्महाशास्त्रं देवि ! संसारमोचनम् ।
मम भक्तव्यवस्थाये प्रयुक्तं परमं मया ॥"
इति वाराहे शतरुद्राभिमाहात्म्यनामाध्यायः ॥ *

(संसारस्य मोचनम् ।) भवमोचने, क्ली । तदुपाया यथा,—
बलिरुवाच ।
"संसारार्णवमग्नानां नराणामन्यचेतसाम् ।
तरणे यो भवेत् पोतस्तन्मे व्याख्यातुमर्हसि ॥
प्रह्लाद उवाच ।
ये शङ्खचक्राङ्कधरं तु शार्ङ्गिणं
खड्गेशकेतुं वरदं श्रियः पतिम् ।
समाश्रयन्ते भवभीतिनाशनं
संसारगर्त्ते न पतन्ति ते पुनः ॥
वैकुण्ठं खड्गपरशुं भवबन्धसमुच्छिदम् ।
प्रणिपत्य महात्मानं संसारे न पुनर्भवेत् ॥
श्रयेत दामोदरं यस्तु भक्तिनम्रोऽवनेत वा ।
न स संसारगर्त्तेऽस्मिन् मज्जते दानवेश्वर ! ॥
ये मानवा विगतरागपरावरज्ञा
नारायणं सुरगुरुं सततं स्मरन्ति ।
ते धौतपाण्डरपटा इव राजहंसाः
संसारसागरजलस्य तरन्ति पारम् ॥"
इति वामने ६० अध्यायः ॥

संसारी, [न्] पुं, (संसारोऽस्यास्तीति । इनिः ।) संसारविशिष्टप्राणी । इति हलायुधः ॥ शरीरी । यथा । संसारिणामिति संसारित्वं शरीरित्वम् । शरीरित्वञ्च भोगावच्छेदकत्वं न तु चेष्टावत्त्वम् । अत ईश्वरपरिगृहीतरामकृष्णादिशरीरव्युदासः मिथ्याज्ञानजन्यवासनाया अदृष्टस्य वा न संसारपदेन विवक्षासम्भवः । इति वौद्धाधिकारस्य गादाधरी टिप्पनी ॥

संसिद्धिः, स्त्री, (सं+सिध+क्तिन् ।) प्रकृतिः । स्वभावः । इत्यमरः ॥ सम्यक्सिद्धिः । मोक्षः । इति मेदिनी ॥ परमा सिद्धिः । मोक्षः । यथा,
"मासुपेत्य पुनर्जन्म दुःखालयमशाश्वतम् ।
नाप्नुवन्ति महात्मानः संसिद्धिं परमां गताः ॥"
इति श्रीभगवद्गीतायां ८ अध्याये १५ श्लोकः ॥ (फलम् । इति स्वामी ॥ यथा, भागवते । १ । २ । १३ ।
"अतः पुंभिर्द्विजश्रेष्ठा वर्णाश्रमविभागशः ।
स्वनुष्ठितस्य धर्मस्य संसिद्धिर्हरितोषणम् ॥")

संसृतिः, स्त्री, (सं+सृ+क्तिन् ।) संसारः । इति शब्दरत्नावली ॥ (यथा, भागवते । १ । १ । १४ ।
"व्यापन्नः संसृतिं घोरां यन्नाम विवशो गृणन् ।
ततः सद्यो विमुच्येत यद्बिभेति स्वयं भयम् ॥")
प्रवाहः । इति त्रिकाण्डशेषः ॥

संसृष्टः, त्रि, (सं+सृज्+क्तः ।) संसर्गः । वमनादिना संशुद्धः । इति मेदिनीकरहेमचन्द्रौ ॥ विभागानन्तरं मैत्र्यात् पितृभ्रातृपितृव्यभ्रातृपुत्राणां यथायथं एकत्रावस्थानं संसर्गस्तद्युक्तः । अथ संसृष्टधनविभागः । एकपितृजातयोरपि सोदरविमातृजयोर्मृतदेयपुरुषपिण्डदातृत्वेन सोदरस्यैव धनाधिकारो न तु पित्रादित्रयमात्रपिण्डदातुर्विमातृजस्य । क्वचित्तु संसृष्टत्वेन विमातृजस्यापि संसृष्टसोदरेण सह तुल्याधिकारिता सोदरस्य संसृष्टत्वे स एव गृह्णीयान्न संसृष्टापि विमातृज इति । तथा च याज्ञवल्क्यः ।
"संसृष्टिनस्तु संसृष्टी सोदरस्य तु सोदरः ।
दद्याच्चोपहरेदंशं जातस्य च मृतस्य च ॥
अन्योदर्य्यस्तु संसृष्टी नान्योदर्य्यो धनं हरेत् ।
असंसृष्टापि चादद्यात् संसृष्टी नान्यमातृजः ॥"
संसृष्टिनमाह बृहस्पतिः ।
"विभक्तो यः पुनः पित्रा भ्रात्रा चैकत्र संस्यतः ।
पित्र्येणार्थेन वा प्रीत्या स तु संसृष्ट उच्यते ॥"
तेन विभागानन्तरं मैत्र्यात् पितृभ्रातृपितृव्यभ्रातृपुत्राणां यथायथं एकत्रावस्थानं संसर्गः तद्युक्तः ससर्गी । एवम्भूतस्य संसर्गिणो मृतस्य

धनं तज्जातस्यापत्यस्य तदपत्याभावे संसर्गी स्वं गृह्णीयात्। एवं सोदरस्य तु सोदरः ॥ ॥ ततश्च संसृष्टिनस्तु संसृष्टीत्यत्रत्वं तुल्यरूपसम्बन्धिसंसर्गकृतविशेषप्रतिपत्त्यर्थं तेन सोदराणां सापत्नानां भ्रातृपुत्राणां पितृव्याणां तुल्यानां सद्भावे संसर्गी गृह्णीयात् वाक्यादविशेषश्रुतेः। पूर्ववचने सर्व्वेषामेव प्रकृतत्वात् सर्व्वेषु चात्रैवासम्भवात्। अतो न भ्रातृमात्रविषयमिदं वचनमिति जीमूतवाहनः॥ सोदरे त्वसंसृष्टिनि संसृष्ट्यसोदरे च सति कतरस्तावत् गृह्णीयात्। एवं सोदरासोदरयोः संसृष्टयोः सद्भावे कतर इत्यत्र प्रथमतः आह अन्योदर्य्यस्तु इति। अन्योदर्य्यः पुनः संसृष्टी सन् गृह्णीयात् नान्योदर्य्यमात्रः किन्तु असंसृष्टापि पूर्ववचनस्थसोदरपदानुषङ्गात् प्राप्तः सोदरश्च गृह्णीयात्। तेन एकत्र विषये पूर्ववचनोक्तसंसृष्टत्वसोदरत्वयोरेकशस्तुल्यत्वादुभयोर्विभज्य ग्रहणम्। तदुभयसत्त्वे च असोदर्य्यस्यासंसृष्टिनोऽतुल्यरूपत्वात् नेति। द्वितीये आह संसृष्टी नान्यमातृजः इति। सोदरे संसृष्टिनि सति अन्यमातृजः संसृष्टापि न गृह्णीयात्। अर्थात्तच्च संसृष्टी सोदर एव गृह्णीयात्। संसृष्टत्वाविशेषेऽपि सोदरत्वेन तस्य बलवत्त्वात्। दायभागकारास्तु अन्योदर्य्यस्तु संसृष्टी सन् सत्यपि सोदरेऽसंसृष्टिनि धनं हरेत् नान्योदर्य्यः संसृष्टापि गृह्णीयादिति पूर्व्वार्द्धस्यार्थः। तत्र किं सोदरस्तदानीं न गृह्णीयादित्यपेक्षायामुत्तरार्द्धेनोक्तं असंसृष्टापि चादद्यात् सोदर इत्यनुषज्यते न संसृष्टोऽन्यमातृजः केवलः। किन्तु उभाभ्यामेव विभज्य ग्रहीतव्यमित्याहुः। मिताक्षरादयोऽप्येवम्। याज्ञवल्क्यदीपकलिकायां शूलपाणिभट्टोपाध्यायास्तु। अन्योदर्य्यस्तु संसृष्टी नान्योदर्य्यो धनं हरेत्। असंसृष्टापि सोदर एव गृह्णीयात् न तु संसृष्टः सापत्नो भ्राता। संसृष्ट इति गर्भसंसृष्टः सोदर इति केचित्। नान्योदर्य्यो धनं हरेत् इति पाठे अन्योदर्य्यः सन् धनं न गृह्णीयात् इति व्याख्या असंसृष्टसोदरस्याधिकारार्थमिदं वचनमतो न पुनरुक्तिरित्याहुः। रत्नाकरप्रभृतयस्तु कल्पतरौ नान्योदर्य्यधनं हरेदिति पाठो दृश्यते स मूलभूतयाज्ञवल्क्यमिताक्षरापारिजातदत्तकचन्द्रिकादिषु अन्योदर्य्यो धनं हरेदिति पाठदर्शनात् तदनुसारव्याख्यादर्शनाच्च लिपिकरप्रमाद इत्याहुः। इति दायतत्त्वम्॥

संसृष्टित्वं, क्ली, (संसृष्ट+त्व।) संसृष्टस्य भावः। यथा। तेन एकत्र विषये पूर्ववचनोक्तसंसृष्टत्वसोदरत्वयोरेकशस्तुल्यत्वादुभयोर्विभज्य ग्रहणम्। इति दायतत्त्वम्।

संसृष्टी [न्] पु, (संसृष्टं संसृष्टमस्यास्तीति, इनिः।) संसृष्टविशिष्टः। यथा, याज्ञवल्क्यः।

"संसृष्टिनस्तु संसृष्टी सोदरस्य तु सोदरः।
दद्याच्चापहरेदंशं जातस्य च मृतस्य च॥
अन्योदर्य्यस्तु संसृष्टी नान्योदर्य्यो धनं हरेत्।
असंसृष्टापि चादद्यात् संसृष्टी नान्यमातृजः॥"

इति दायतत्त्वम्॥

संस्कारः, पुं, (सं+कृ+घञ्।) प्रतियत्नः। अनुभवः। मानसकर्म्म। इति मेदिनी॥ न्यायमते गुणविशेषः। स च त्रिविधः। वेगाख्यसंस्कारः १ अयं मूर्त्तमद्रव्यार्थस्थायी। क्वचिद्वेगजन्यः क्वचित्कर्म्मजन्यश्च। स्थितिस्थापकसंस्कारः २ अयं पृथिवीगुणः कैश्चिदप्तेजो वायुमनोवृत्तिपदार्थगुणः। अयं अतीन्द्रियः स्पन्दनकारणञ्च। भावनाख्यसंस्कारः ३ अयं आत्मनः अतीन्द्रियगुणः। उपेक्षानात्मकनिश्चयजन्यः। अयं स्मरणप्रत्यभिज्ञयोः कारणञ्च॥ ॥ अस्य प्रमाणम्।

"संस्कारभेदो वेगोऽथ स्थितिस्थापकभावने।
मूर्त्तमात्रे तु वेगः स्यात् कर्म्मजो वेगजः क्वचित्॥
स्थितिस्थापकसंस्कारः क्षितौ कैश्चित्तुर्य्यपि।
अतीन्द्रियः स विज्ञेयः क्वचित् स्पन्देऽपि कारणम्॥
भावनाख्यस्तु संस्कारो जीवदृत्तिरतीन्द्रियः।
उपेक्षानात्मकस्तस्य निश्चयः कारणं भवेत्॥
स्मरणे प्रत्यभिज्ञायामप्यसौ हेतुरुच्यते॥"

इति भाषापरिच्छेदः॥ ॥

शुद्धिः अदृष्टविशेषजनककर्म्म। यथा। यद्यग्निस्थापनानन्तरं कर्म्मकाले दृष्टादिप्रक्रिया संस्कृताग्निरन्यत्रानीयते तदा पुनर्भूसंस्कारः कर्त्तव्यः। यमुद्दिश्य उपलिप्य उल्लिख्य उद्धृत्य अभ्युक्षयेत् एष संस्कारोऽनुगतोऽग्नौ भूयः। इति गृह्यान्तरात्। इति संस्कारतत्त्वम्॥ ॥

दशविधसंस्कारा यथा। विवाहः १ गर्भाधानम् २ पुंसवनम् ३ सीमन्तोन्नयनम् ४ जातकर्म्म ५ नामकरणम् ६ अन्नप्राशनम् ७ चूड़ाकरणम् ८ उपनयनम् ९ समावर्त्तनम् १०। यथा हारीतः। गर्भाधानवदुपेतो ब्रह्मगर्भं सन्दधाति पुंसवनात् पुंसीकरोति क्षत्रस्यापनात् मातापितृजं प्राग्जातमपोहति रेतोरक्तगर्भोपघातः पञ्चगुणो जातकर्म्मणा प्रथममपोहति नामकरणेन द्वितीयं प्राशनेन तृतीयं चूड़ाकरणेन चतुर्थं स्नापनेन पञ्चमं एतैरष्टाभिः संस्कारैर्गर्भोपघातात् पूतो भवतीति। स्नानमत्र समावर्त्तनरूपमिति कल्पतरुः। इति संस्कारतत्त्वम्॥ ॥ याज्ञवल्क्यः।

"गर्भाधानरतौ पुंसः सवनं स्पन्दनात् पुरा।
षष्ठेऽष्टमे वा सीमन्तः प्रसवे जातकर्म्म च॥
अष्टमेऽब्दे नाम चतुर्थे मासि निष्क्रमः।
षष्ठेऽन्नप्राशनं मासि चूड़ा कार्य्या यथाकुलम्॥
एतैर्मलः शमं याति बीजगर्भसमुद्भवम्॥"

इति मलमासतत्त्वम्॥ ॥

संस्कृतानामधिकारमाह याज्ञवल्क्यः।

"असंस्कृतास्तु संस्कार्य्या भ्रातृभिः पूर्वसंस्कृतैः।
भगिन्यश्च तथैवादृष्टार्त्तवास्तु तुरीयकम्॥"

असंस्कृता भ्रातरो भगिन्यश्च पूर्वसंस्कृतैरपनीतैः। अन्यथा मन्त्रपाठानधिकारापत्तेः प्रत्युद्वाहतत्त्वम्॥ एषः विवरणं तत्तच्छब्दे द्रष्टव्यम्। गरुड़पुराणोक्तसंस्काराश्चैव ६३।६४।६५ अध्यायेषु द्रष्टव्याः॥ ॥

अथ जीर्णदेवगृहादिसंस्कृत्यफलम्।

"अथ चेज्जीर्णसंस्कारविधिः पुण्यो महामुने!
देवतादिषु कर्त्तव्यो महाभोगफलेप्सुभिः॥
मूलादप्यधिकं पुण्यं जीर्णसंस्कारतो भवेत्।
तस्मादनाथजीर्णेषु कार्य्यं संस्करणं सुनैः!।
स्वकीयं परकीयं वा यथाविभवविस्तरैः॥
स्वतो वा परतो वाऽपि यस्तु संस्कुरुते सुरान्।
स यावच्चन्द्रसूर्य्यौ गौस्तावत्कालं सुखी भवेत्॥
लोकेषु तेषु देवानां विरजस्केषु दृष्टधीः।
यथा गोमेधयज्ञेषु प्रसूरोमसमाः समाः॥
वसते दिवि दृष्टात्मा जीर्णसंस्कारकारकः।
अनाथा वा सनाथा वा पूजनीयाः सदा सुराः॥"

इति देवीपुराणे पूजाविधिनामाध्यायः॥

संस्कारजः, त्रि, संस्कारेण जातः। संस्कारशब्दपूर्व्वकजनधातोर्डप्रत्ययेन निष्पन्नः॥

संस्कारवर्ज्जितः, पुं, (संस्कारेण वर्ज्जितः।) उपनयनसंस्कारहीनः। तत्पर्य्यायः। व्रात्यः २। इति हैमचन्द्रः॥ दशसंस्कारहीने, त्रि॥

संस्कारहीनः, पुं, (संस्कारेण हीनः।) व्रात्यः। इत्यमरः॥ संस्कारहीनत्वकालमाह। यमः।

"पतिता यस्य सावित्री दशवर्षाणि पञ्च च।
ब्राह्मणस्य विशेषेण तथा राजन्यवैश्ययोः।
प्रायश्चित्तं भवेदेषां प्रोवाच वदतां वरः॥"

तथा मार्कण्डेयः।

"विप्रस्य षोड़शाद्वर्षात् राज्ञो द्वाविंशतेः परम्।
वैश्यस्याष्टाधिकाद्वर्षात् सावित्रीपतनं भवेत्॥"

विष्णुधर्म्मोत्तरे।

"षोड़शाब्दा हि विप्रस्य राजन्यस्य द्विविंशतिः।
विंशतिः सचतुर्थी च वैश्यस्य परिकीर्त्तिता॥
सावित्री नातिरिच्येत अत ऊर्द्धं पतत्यसौ॥"

इति मलमासतत्त्वम्॥

संस्कृतं, क्ली, (सं+कृ+क्तः।) संस्कारोपेतम्। इति मेदिनी॥ पाणिन्यादिसंस्कारसंस्कृतेन उपेत उपगतो वाऽर्थोपेतः। साधुशब्दः। इत्यमरटीकायां भरतः॥ स तु देववाणी। यथा,

"गीर्व्वाणवाणीवदनं मुकुन्द-
संवीक्षणश्रेयुभयं हि लोके।
सदुर्लभं तस्य न सुग्धबोधा-
न लभ्यतेऽतः पटवीयमेतत्॥"

इति सुग्धबोधव्याकरणप्रणेताश्लोकः॥

संस्कृतः, त्रि, (सं+कृ+क्तः।) संस्कारः। इत्यमरः॥ संस्कारेण निर्व्वृत्तः संस्कारो घटादिः। इति भरतः॥ भद्रः। स्वतो गुणान्तराधानम्।

इत्यमरटीकायां स्वामी। शुक्लः। भूषितः। इति मेदिनी। शोधितः। इति जटाधरः। (यथा, देवीभागवते। १। २। ११।
"पुराणमुत्तमं पुण्यं श्रीमद्भागवताभिधम्।
अष्टादशसहस्राणि श्लोकाश्चात्र तु संस्कृताः॥")
संस्क्रिया, स्त्री, (सं+कृ+"क्तः शुचः।" ३। ३। १००। इति शुः।) शुद्धादाद्यादिक्रिया। इति विकाण्डशेषः। संस्कारश्च॥
संस्करः, पुं, (संस्क्रीयते इति। सं+स्कृ+अप्।) शुद्धा। यज्ञः। इति हेमचन्द्रः॥ पक्षवादिरचितशुद्धा। इति शब्दरत्नावली॥ (यथा, रघुः। ८। ५७।
"नवपल्लवसंस्तरोऽपि ते
रुजति क्लेश यदङ्गमर्पितम्।
तदिदं विधिरिष्यते कथं
वद वामोरु चिताधिरोहणम्॥")
संस्तवः, पुं, (सं+स्तु+अप्।) परिचयः। इत्यमरः॥ (यथा, किराते। ७। २५।
"विहाय वाल्लासुदिते मदात्यया-
दरक्तकण्ठस्य रुते शिखण्डिनः।
स्मृतिः अचलुम्बदृढं सनिःखनं
गुणाः प्रियत्वेऽधिकता न संस्तवः॥")
सम्यक्स्तुतिश्च॥ (यथा, भागवते। १११।२३।४१।
"इति ते छिन्नसन्देहा मुनयः सनकादयः।
सभाजयित्वा परया भक्त्या गृणत संस्तवैः॥")
संस्तवान्, त्रि, (संस्तवोऽस्यास्तीति। सं+स्तु+"सम्बन्धेषु स्तुवः।" उणा० २। ८८। इति वनिप्।) सङ्गता। इत्युणादिकोषः॥ वाग्मी। उद्गाता। ऋषिः। इति संक्षिप्तसारोणादिवृत्तिः॥
संस्तावः, पुं, (समेत्य स्तुवन्ति यस्मिन् देशे ऋत्विजो इति। सम्+स्तु+"यज्ञे समि स्तुवः।" ३। ३। २१। इति घञ्।) क्रतुषु द्विजानां स्तुतिभूमिः। इत्यमरः॥ यज्ञेषु स्तुतिकारिणां ब्राह्मणानां व्यवस्थानभूमिः संस्तावः उच्यते। क्रतुषु यद्यविषयेषु द्विजानां या स्तुतिभूमिः स्यात् स संस्तावः इत्यन्वयः। समेत्य स्तूयते ऋत्विग्भिरत्र इति संस्तावः घञ्। इति भरतः॥
संस्तुतः, त्रि, (सं+स्तु+क्तः।) सम्यक्प्रकारेण स्तुतिप्राप्तः। सम्यक्स्तवविषयीभूतः। यथा,—
"भूयश्च शतवार्षिक्यामनावृष्ट्यामनन्तमपि।
आत्मभिः संस्तुता भूमौ सम्भविष्यन्त्ययोनिजाः॥"
इति देवीभागवतम्॥
संस्थायः, पुं, (सं+स्था+घञ्। आतो युक्।) संघातः। सन्निवेशः। इत्यमरः॥ संस्थानम्। विस्तृतिः। इति मेदिनी॥ गृहम्। इति हेमचन्द्रः॥
संस्थः, पुं, (संतिष्ठते स्वपरराष्ट्रेषु इति। सं+स्था+कः।) चरः। इति मेदिनी॥ निष्कण्टकः। इति हेमचन्द्रः॥ (यथा, कामन्दकीये। १५। ६६।
"संस्थाः सुसारसंश्लिष्टे दण्डायाः शुभाशयाः।")
सस्थः, त्रि, (संतिष्ठते इति। सं+स्था+कः।) अवस्थितः। इति मेदिनी॥ (यथा, हरिवंशे भविष्यपर्वणि। ८। ६६।
"यदा मे मरणं भूयात् तदा मा भूत् स्मृतिभ्रमः।
दिने दिने च यत्तं चित्तं त्वयि संस्थं भवत्विति॥")
मृतः। इति शब्दरत्नावली॥
संस्था, स्त्री, (संतिष्ठतेऽनयेति। सं+स्था+अङ्।) न्याय्यपथस्थितिः। इत्यमरः॥ सन्तिष्ठतेऽनया सम्यगवस्थानं वा संस्था। इति भरतः॥ अस्याः पर्य्यायो मर्य्यादाशब्दे द्रष्टव्यः॥ (यथा, उपदेशशतके। ८०।
"अपि शक्तः परिहर्तुं ययातिशापं हरिश्चिते कंसे।
राजासनं न मेने पुरातनीं पालयेत् संस्थाम्॥"
प्रतिज्ञा। यथा, रघुः। ११। ३८।
"तस्य वीक्ष्य लोलतं वपुः श्रियो:
पार्थिवः प्रथितवंशवत्मनः।
स्वं विचिन्त्य च धनुर्दुरानमं
पौरुषं दुरधिरूढसंस्थया॥")
स्थितिः। चाद्यश्रमः। नाशः। इति मेदिनी॥ अवस्था। (यथा, मनुः। १। ९२।
"सर्वेषान्तु स नामानि कर्माणि च पृथक् पृथक्।
वेदशब्देभ्य एवादौ पृथक् संस्थाश्च निर्ममे॥")
शक्तिः। क्रतुभेदः। (यथा, भागवते। १०। २३। ८।
"दीक्षायाः पशुसंस्थायाः सौत्रामण्याश्च सत्तमाः।
अन्यत्र दीक्षितस्यापि नान्नमश्नन् हि दुष्यति॥")
समाप्तिः। इति हेमचन्द्रः॥ प्रलयश्चतुर्थम्। यथा,—
"नैमित्तिकः प्राकृतिको नित्य आत्यन्तिको लयः।
संस्थेति कविभिः प्रोक्तश्चतुर्धास्य स्वभावतः॥"
इति पुराणम्॥
संस्थानं, क्ली, (सं+स्था+ल्युट्।) सन्निवेशः। (यथा, मनुः। ८। ३७१।
"भर्तारं लङ्घयेत् या तु स्त्रीज्ञातिगुणदर्पिता।
तां श्वभिः खादयेद्राजा संस्थाने बहुसंस्थिते॥")
चतुष्पथः। इत्यमरः॥ आकृतिः। स्वभावः। इति मेदिनी॥ चिह्नम्। इत्यजयपालः॥ सम्यक्स्थितिश्च॥ (अवस्था। यथा, भागवते। ३। ६। २७।
"लोकसंस्थानविज्ञान आत्मनं परिनिष्ठतः।
तामाद्यामाशया वाचा कश्मलं प्रमयिष्यति॥")
संस्थापनं, क्ली, (सं+स्था+णिच्+ल्युट्।) सम्यक्स्थितिप्रापणम्। स्थिरीकरणम्। यथा,
"परित्राणाय साधूनां विनाशाय च दुष्कृताम्।
धर्मसंस्थापनार्थाय संभवामि युगे युगे॥"
इति भगवद्गीतायाम् ४ अध्यायः॥
"साधुरक्षणेन दुष्टवधेन च धर्मं स्थिरीकर्तुम्।"
इति तट्टीकायां श्रीधरस्वामी॥
संस्थितः, त्रि, (सं+स्था+क्तः।) मृतः। इत्यमरः॥ (यथा, मनुः। ६। १६०।
"संस्थितस्यानपत्यस्य सगोत्रात् पुत्रमाहरेत्।
यत्र यद्कुलजातं स्यात् तत्तस्मिन् प्रतिपादयेत्॥")
सम्यक्स्थितिविशिष्टश्च॥ (यथा, कौर्मे। १। २१।
"इदन्तु पञ्चदशमं पुराणं कौर्ममुत्तमम्।
चतुर्द्धासंस्थितं पुण्यं संहितानां प्रभेदतः॥")
संस्थितिः, स्त्री, (सं+स्था+क्तिन्।) संस्थानम्। (यथा, मनुः। ६। ६०।
"यथा नदीनदाः सर्वे सागरे यान्ति संस्थितिम्।
तथैवाश्रमिणः सर्वे गृहस्थे यान्ति संस्थितिम्॥")
मृत्युः। गृहम्। इति केचित्॥
संस्पर्शः, पुं, (सं+स्पृश+घञ्।) सम्यक्स्पर्शः। स तु त्वगिन्द्रियग्राह्यगुणविशेषः। यथा, छागलेयः।
"आलापात् गात्रसंस्पर्शात् निश्वासात् सहभोजनात्।
सहशय्यासनाध्यायात् पापं संक्रमते नृणाम्॥"
इति प्रायश्चित्तविवेकः॥
संस्पर्शा, स्त्री, (संस्पृश्यतेऽसौ इति। सं+स्पृश+कर्म्मणि घञ्। टाप्।) जनीनामङ्गसङ्गद्रव्यम्। इत्यमरः॥
संस्फालः, पुं, (सम्यक् स्फालः स्फुरणं यस्य।) मेषः। इति विकाण्डशेषः॥
संस्फुटः, त्रि, (संस्फुटतीति। सं+स्फुट्+डुगुपधेति कः।) विकसितः। इति शब्दरत्नावली॥
संस्फोटः, पुं, (सं+स्फट अनादरे+अधिकरणे घञ्।) युद्धम्। इत्यमरटीकायां भरतः॥
संस्फोटः, पुं, (संस्फोटत्यत्रेति। सं+स्फुट् भेदने+घञ्।) युद्धम्। इत्यमरः॥
संस्मरणं, क्ली, (सं+स्मृ+ल्युट्।) संस्मृतिः। संस्कारजन्यज्ञानम्। यथा, योगियाज्ञवल्क्यः।
"ध्यायेन्नारायणं नित्यं स्नानादिषु च कर्मसु।
तद्विष्णोरिति मन्त्रेण स्नायादभ्युक्षणेषु च॥
गायत्री वैष्णवी शैवा विष्णोः संस्मरणाय वै।"
इति तिथ्यादितत्त्वम्॥
संस्मृतिः, स्त्री, संस्मरणम्। संपूर्वकस्मृधातोः क्तिन्प्रत्ययेन निष्पन्नः॥ (यथा, कथासरित्सागरे। ५५। २०६।
"तच्छ्रुत्वा संस्मृतिं सद्यः स राजा प्रत्युवाच तम्॥")
संहतः, त्रि, (सं+हन+क्तः।) दृढसन्धिः। इत्यमरः॥ मिलितः। दृढः। इति मेदिनीकरहेमचन्द्रौ॥ सम्यक्प्रकारेण हतश्च॥
संहतजानुः, त्रि, (संहते जानुनी यस्य।) लम्बजानुकः। यथा,—
"प्रभुः प्रगतजानुः स्यात् प्रलोलश्चैव च ह्रस्वते।
संभुः संहतजानुश्च भवेत् संशोभितश्च सः॥
जानुमुच्चैर्नतः स्थाणुर्जानुरूर्द्धजानुकः॥"
इति भरतधृतसाध्याङ्गः॥

संहतजानुकः, त्रि, (संहतजानुरेव। स्वार्थे कन्।) लग्नजानुकः। तत्पर्य्यायः। संजुः २। इत्यमरः॥ संहतजानुः ३ संक्तः ४। इति तट्टीकायां भरतः॥

संहतलः, पुं, (संहतं परस्परयोर्मेलनं लातीति। ला+कः।) मिलितपाणिद्वयम्। इत्यमरः॥ द्वौ वामदक्षिणौ प्रतलौ संहतौ मिलितौ संहतल उच्यते। प्रतलद्वयं मिलितं संहतलः स्यादित्यर्थः। संहतं लाति संहतलः हनजनादिति डः। निर्विसर्गपाठे द्वौ वामदक्षिणौ पाणी संहतौ मिलितौ चेत् तदा संहतलप्रतलायुच्येते। अस्मिन्नर्थे प्रतलोऽयं चपेटे संहतले च वर्त्तमानत्वात् नानार्थः। इति भरतः॥

संहतिः, स्त्री, (सं+हन+क्तिन्।) समूहः। इत्यमरः॥ (यथा, हरिवंशे।
"अल्पानामपि वस्तूनां संहतिः कार्य्यसाधिका।
तृणैर्गुणत्वमापन्नैर्बध्यन्ते मत्तदन्तिनः॥")

संहननं, क्ली, (संहन्यते इति। सं+हन+ल्युट्।) शरीरम्। इत्यमरः॥ (यथा, भागवते। ५। २। २१।
"आत्मौपम्येन सर्वत्र दयामैत्रीप्रवर्द्धनः।
सम्यग्घातनश्च॥ (कठिने, त्रि। यथा, भागवते। ५। ६। १०।
"शीतोष्णवातवर्षेषु इव इवानाहताङ्गः पीनसंहननाङ्गः * * * विचचार॥" "संहन्यन्ते निबिड़ीभवन्ति अङ्गानि यस्य। कठिनावयव इत्यर्थः॥" इति तट्टीकायां स्वामी॥)

संहरायाः, पुं, (संहर इति आख्या यस्य।) पावकनामाग्निः। इति मत्स्यपुराणम्॥

संहर्षः, पुं, (सं+हृष+घञ्।) प्रमोदः। स्पर्द्धा। (यथा, महाभारते। ३। २१८। २४।
"संहर्षाद्धारयन् क्रोधं धन्वी सर्वो रथ स्थितः।
समरे नाशयेत् शत्रूनमोघो नाम पावकः॥")
वायुः। इति विश्वमेदिनौ॥ (लोमहर्षः। यथा, सुश्रुते। ६। ६।
"दाहसंहर्षनाम्लत्वशोकनिस्तोदगौरवैः॥")

संहवनं, क्ली, सम्यक्प्रकारेणाहुतिः। संपूर्व्वहृधातोर्भावेल्युट्(ल्यट्)प्रत्ययेन निष्पन्नम्॥

संहारः, पुं, (संहियतेऽत्रेति। सं+हृ+"अधायायामिति।" ३।३।१२२। इति घञन्तः साधुः।) नरकविशेषः। इत्यमरः॥ प्रलयः। इति हेमचन्द्रः॥ (यथा, मनुः। १। ८०।
"मन्वन्तराणां संख्यानि सर्गः संहार एव च।
क्रीड़न्निदेतत् कुरुते परमेष्ठी पुनः पुनः॥")
संक्षेपः। इति जटाधरः॥ संहरश्च॥ (यथा, रघुः। ५। ५०।
"संमोहनं नाम सखे! ममास्त्रं
प्रयोगसंहारविभक्तमन्त्रम्॥")

संहारमुद्रा, स्त्री, (संहारस्य मुद्रा।) विसर्ज्जनमुद्रा। यथा, रावणभट्टधृतम्।
"अधोमुखे वामहस्ते ऊर्द्धास्यं दक्षहस्तकम्।
त्रिप्राङ्गुलीरङ्गुलीभिः संगृह्य परिवर्त्तयेत्।
प्रोक्ता संहारमुद्रेयमर्पणे तु प्रशस्यते॥"
अर्पणे आत्मनीति शेषः। इति तिथ्यादितत्त्वम्॥

भैरवविशेषः। यथा,—
"असिताङ्गो रुरुश्चण्डः क्रोध उन्मत्त एव च।
कपाली भीषणश्चैव संहाराश्चाष्ट भैरवाः॥"
इति तन्त्रम्॥

संहितः, त्रि, मिलितः। संपूर्व्वधाधातोः क्तप्रत्ययेन निष्पन्नः॥

संहितपुष्पिका, स्त्री, (संहितानि मिलितानि पुष्पाणि यस्याः। कापि अत इत्वम्।) मिश्रेया। इति राजनिर्घण्टः॥

संहिता, स्त्री, (सम्यक् धीयते स्मेति। धा+कर्म्मणि क्तः। यद्वा, सम्यक् हितं प्रतिपाद्यं यस्याः।) मन्वादिप्रणीतधर्म्मशास्त्रम्। तत्पर्य्यायः। स्मृतिः २ धर्म्मसंहिता ३ श्रुतिजीविका ४। इति शब्दरत्नावली। संहिताविशेषा यथा,—
"एवं पुराणसंख्यानं चतुर्लक्षमुदाहृतम्।
अष्टादशपुराणानामेवमेव विदुर्बुधाः।
एवशेषपुराणानामष्टादश प्रकीर्त्तिताः॥
इतिहासो भारतञ्च वाल्मीकं काव्यमेव च।
पञ्चकं पञ्चरात्राणां कृष्णमाहात्म्यसूत्तमम्॥
वाशिष्ठं नारदीयञ्च कापिलं गौतमीयकम्।
परं सनत्कुमारीयं पञ्चरात्रञ्च पञ्चकम्।
पञ्चन्यः संहितानाञ्च कृष्णभक्तिसमन्विताः।
ब्रह्मणश्च शिवस्यापि प्रह्लादस्य तथैव च।
गौतमस्य कुमारस्य संहिताः परिकीर्त्तिताः॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १५२ अध्यायः॥
अपि च।
"इदन्तु पञ्चदशमं पुराणं कौर्म्ममुत्तमम्॥
चतुर्धा संस्थितं पुण्यं संहितानां प्रभेदतः॥
ब्राह्मी भागवती शैवी वैष्णवी च प्रकीर्त्तिता।
चतस्रः संहिताः पुण्या धर्म्मकामार्थमोक्षदाः॥
इयन्तु संहिता ब्राह्मी चतुर्भेदैः समन्विता।
भवन्ति षट्सहस्राणि श्लोकानामत्र संख्यया॥"
इति कौर्म्मे १ अध्यायः॥

तत्र स्कन्दपुराणोक्तषट्संहिता यथा,—
"स्कान्दमद्याभिवक्ष्यामि पुराणं श्रुतिसम्मितम्।
षड्विधं संहिताभेदैः पञ्चाशत्खण्डमण्डितम्॥
आद्या सनत्कुमारोक्ता द्वितीया सूतसंहिता।
तृतीया शाङ्करी विप्राश्चतुर्थी वैष्णवी मता॥
तत्परा संहिता ब्राह्मी सौरान्ध्या संहिता मता।
यस्यां पञ्चाशत्सहस्रैस्त्रिभिर्लक्षिता॥
आद्या तु संहिता विप्रा द्वितीया षट्सहस्रिका।
तृतीया यत्र लक्ष्यन्ते सप्तसैकोनलक्षिता।
तुरीया संहिता पञ्चसहस्रैर्मेलक्षिता।
तत्परा त्रिसहस्रैस्तु ग्रन्थैरेव विनिर्म्मिता।
अन्या सहस्रतः सप्त ग्रन्थतः परिकीर्त्तिताः॥"
इति स्कन्दपुराणे सूतसंहितायां श्रीधर्म्माहात्म्ये प्रथमे २ अध्यायः॥

संहृतिः, स्त्री, (सं+हृ+क्तिन्।) बहुभिः कृताङ्गानम्। इत्यमरः॥

संहृतः, त्रि, (सं+हृ+क्तः।) कृतसंहारः। यथा,
"अहं विभूत्या बहुभिरिह रूपैर्यदा स्थिता।
तत् संहृतं मयैकैव तिष्ठाम्याजौ स्थिरो भव॥"
इति मार्कण्डेयपुराणीयदेवीमाहात्म्यम्॥

संहृतिः, स्त्री, (सं+हृ+क्तिन्।) संहारः। यथा,—
"विश्वौ सृष्टिरूपा त्वं स्थिति रूपा च पालने।
तथा संहृतिरूपान्ते जगतोऽस्य जगन्मये॥"
इति मार्कण्डेयपुराणे देवीमाहात्म्यम्॥

संचयः, पुं, (सं+चि+अच्।) नाशः। यथा,—
"रिपवः संक्षयं यान्ति कल्याणं चोपपद्यते।
नन्दते च कुलं पुंसां माहात्म्यं मम शृण्वताम्॥"
इति मार्कण्डेयपुराणे देवीमाहात्म्यम्॥
प्रलयः। इति शब्दरत्नावली॥

संक्षिप्तः, त्रि, (सं+क्षिप्+क्तः।) कृतसंक्षेपः। संक्षेपविशिष्टः। यथा,—
"समाकृष्यान्यतन्त्राणि संक्षिप्तैः प्रतिसंस्कृतैः।
सम्पूर्णमुच्यते वर्णैर्नाभिलाषानुशासनम्॥"
इत्यमरः॥
संक्षिप्तः अल्पेनैव वाक्यार्थप्रतिपादकतयाभिहितैः। इति तट्टीकायां भरतः॥

संक्षेपः, पुं, (सं+क्षिप्+घञ्।) श्लोकेन भूयसोऽभिधानम्। इत्यमरटीकायां भरतः॥ सुश्लोक इति खल्प इति च ख्यातः॥

संक्षुब्धः, त्रि, (सं+क्षुभ+क्तः।) सञ्चलनविशिष्टः। इति क्षुभधात्वर्थदर्शनात्। आकुलः। यथा,—
"दृष्ट्वा समस्तं संक्षुब्धं त्रैलोक्यममरारयः।
सन्नद्धाखिलसैन्यास्ते समुत्तस्थुरुदायुधाः॥"
इति मार्कण्डेयपुराणे देवीमाहात्म्यम्॥

संक्षेपणं, क्ली, (सं+क्षिप्+ल्युट्।) विस्तीर्णानां संक्षेपः। प्रपञ्चकरणवैपरीत्यम्। इति भरतः॥ तत्पर्य्यायः। समसनम् २। इत्यमरः॥ संहारः ३ समाहारः ४ संग्रहः ५ समायः ६। इति जटाधरः॥

संक्षोभः, पुं, (सं+क्षुभ+घञ्।) चाञ्चल्यम्। सञ्चलनम्। यथा। "संक्षोभमक्षरयुगामपि चिक्षतन्वोः।" इति श्रीभागवतम्॥

सकः, पुं, } पूर्व्वोक्तपरामर्शकः। से इति भाषा।
सका, स्त्री, } तच्छब्दस्य टेः पूर्व्वं कि परञ्च आप्प्रत्यये च कृते प्रथमैकवचननिष्पन्नं पदद्वयम्॥ (यथा, ऋग्वेदे। १। १६१। ११।
"इयत्तिका शकुन्तिका सका जघास ते विषम्॥")

सकटः, पुं, (कटेन अशुचिना शवादिना सह वर्त्तमानः।) शाखोटवृक्षः। इति भूरिप्रयोगः॥

सकटाग्रं क्ली, (कटशब्देनाशौचं लक्ष्यते तत्सहचरितमग्रं सकटाग्रम्। इति मिताक्षरा।) अशुद्धाग्रम्। इति केचित्॥ (यथा, याज्ञवल्क्यः। ३। १५।
"आचार्य्यपित्वुपाध्यायान्निर्हृत्यापि व्रती व्रतौ।
सकटाग्रं न चाश्नीयात् न च तैः सह संवसेत्॥")

प्रकाशकः, पुं, (सकाशेन सह वर्त्तमानः।) पौषधः। इति शब्दरत्नावली॥ दरदेशविशेषः। इति रत्नमाला। गाढाकरञ्ज इति भाषा॥

सकाशयुक्ते, त्रि। यथा,—

"श्रोतसीव गगनामृतसङ्गात्कर्दमात्मनि।
एष वाग्मधुमात्रां भाव्यमानः पुनः पुनः॥"

इति सिद्धान्तिनस्तम्॥

(सोमाधिपे च त्रि। यथा, कथासरित्सागरे। २५। २२०।

"न मं साहसिकस्यामीभिरिह सकाशके।
अद्रेः परममाणिक्यं तुलदे भूपतिश्चिरम्॥")

सकरः, त्रि, (करेण सह वर्त्तते यः।) राजग्रहविशिष्टः। शुल्कयुक्तः। किरणविशिष्टः। करेण सह वर्त्तते सौरभौ। इति वह्निपुराणमानिष्यम्॥

सकरुणः, त्रि, (करुणया सह वर्त्तमानः।) करुणायुक्तः। सदयः। यथा,—

"मयानि तं यासे मयि विसद दृष्टिं सकरुणामिति क्रोशं पाञ्चम् कथयसि भवानि त्वमिति यः।
तदैव त्वं तस्मै दिशसि निजमाधुर्यमपरं सुधादृष्टीदृष्टस्फटजटुकटीराजितपदान्।"

इत्यानन्दलहरी॥

सकर्णः, त्रि, (कर्णाभ्यां सह वर्त्तमानः।) सावधानः। सावधानः। मुक्तिमात्रः २। इति भरतः। कर्णयुक्तश्च॥

सकर्मकः, पुं, (कर्मणा सह वर्त्तमानः। कप्।) कर्मयुक्तधातुः। कर्मानपेक्षिक्रियार्थकः। यथा। कर्त्तृत्वं सकर्मकधातोर्भवेदपि क्रियायामिति। यथा। वां दिवं गमयन्। इति मुग्धबोधव्याख्यायां दुर्गादासः। (कर्मयुक्ते, त्रि। यथा, भागवते। ५। २०। ३३।

"अहमेवासमेवाग्रे नान्यद्यत्सदसत्परम्। पश्चादहं यदेतच्च योऽवशिष्येत सोऽस्म्यहम्।" "सकर्मकेण क्रियया योगे कर्मणि कारके।" इति स्मृतेश्च।)

सकर्मन्, त्रि, (कर्मणा सह वर्त्तमानम्।) सत्कर्मयुक्तः। सत्कर्मवान्। सकर्मन् २ कर्मन् ३ विकर्मन् ४ अकर्मन् ५ अकर्मन् ६ सकर्मन् ७ निष्कर्मन् ८ अकर्मन् ९ निष्कर्मन् १० सकर्मन् ११ पूर्वकर्मन् १२ अकर्मन् १३ अकर्मन् १४। इत्यमरः। अकर्मन् १५। इति शब्दरत्नावली॥ (यथा, भागवते। ४। २५। ४।

"इत्यं पतिव्रतासूर्यं प्रहर्षं सकर्मणोः।"

अत्र सकर्मणोरित्यत्र सह वर्त्तते इति। समर्मन्। यथा, रघुवंशे। १३। ६६। ८।

"विश्वस्य पक्षेषु सकर्मकेषु तुल्यौषधम्।")

सकलः, त्रि, (कलाभिः सह वर्त्तमानः इति।) कलायुक्तः। यथा,—

"सकलो वा अकलो वा कश्च नाथ भविष्यति।
यत्र शासनं दुःखानि शासनाद्यो न सकलः।"

इति विष्णुधर्म्मोत्तरम्।

सकलः, पुं, (कलाभिः सह वर्त्तते इति।) शशधरः। यथा,—

"देवि देवेश्वरः शम्भस्त्रैलोक्ये परमेश्वरः।
दूतोऽहं प्रेषितस्तेन तवसकाशमिहागतः॥"

इति मार्कण्डेयपुराणे देवीमाहात्म्यम्॥

कामयुक्ते, त्रि॥

सकुकुदः, पुं, साकुल्यवृक्षः। इति राजनिर्घण्टः॥

सकुलः, पुं, (कुलेन सह वर्त्तते इति।) शकुलाग्रन्थः। इति शब्दरत्नावली॥

सकुल्यः, त्रि, (समाने कुले भवः। यत्।) समीचः। यथा,—

"नारी सङ्गः समीचान्तु स्वजनज्ञातिबान्धवाः।
सकुल्यबन्धुदायादसमानोदका अपि॥"

इति भटाधरः॥ *॥

आषष्ठपुरुषनाशमावधिदशमपुरुषपर्य्यन्तपुरुषत्वम्। तेषां दशमपुरुषपर्य्यन्तसन्ततिः। आषष्ठसप्तनाशमावधिदशमपुरुषपर्य्यन्तसन्ततिश्च॥ तेषामशौचं यथा, हरीतसंहितायाम्।

"एकाहेन सपिण्डास्तु शुध्यन्ति श्रोत्रसूतके।
त्रिरात्रेण सकुल्यास्तु स्नात्वा शुध्यन्ति गोत्रजाः॥"

इति शुद्धितत्त्वम्॥ *॥

दायाधिकारिसकुल्यास्तु पञ्चमपुरुषावधयः। यथा। प्रौधायनः। प्रपितामहः पितामहः पिता स्वयं और्ध्वभ्रातरः सवर्णायाः पुत्राः पौत्राः प्रपौत्रो वा धनानपिसम्बन्धदायादान् सपिण्डान् आचक्षते। विभक्तदायादान् सकुल्यान् आचक्षते सप्तमेषु तन्नामी धर्म्मो भवतीति। इति दायतत्त्वं शुद्धितत्त्वञ्च॥ तस्य कन्यादानाधिकारित्वं यथा। विष्णुः। पिता पितामहो माता सकुल्यो मातामहो माता चेति कन्याप्रदः पूर्व्वनाशे प्रकृतिस्थः परः परः। भारद्वाजः।

"पिता दद्यात् स्वयं कन्यां भ्राता वाऽनुमतः पितुः।
मातामहो मातुलश्च सकुल्यो बान्धवस्तथा॥
माता तथाभावे सर्व्वेषां प्रकृतौ यदि वर्त्तते।
तस्यामप्रकृतिस्थायां कन्यां दद्युः समानयः॥"

इत्युद्वाहतत्त्वम्॥

सकुल्या, स्त्री, शकुलविशेषः। अक्षा शुष्कादिशालमत्स्यकारादिसकुलशब्दे द्रष्टव्यः॥

सकृत्, अ, (एक+"एकस्य सकृच्च।" ५।३।१८। इति सृट् सकृदादेशश्च। संयोगानन्तरेति सुधी शोधः।) एकवारम्। (यथा,—

"सकृदंशो निपतति सकृत् कन्या प्रदीयते।
सकृदाह ददानीति त्रीण्येतानि सकृत् सकृत्॥"

इति मदनपारिजातः।)

सकृत्। एकमरः। विद्या। इति त्रिकाण्डशेषः। (अतिकर्त्तव्ये शास्त्रव्यवहारस्य प्रथमः प्रामाण्यो दृश्यते।)

सकृत्प्रजः, पुं, (सकृत् प्रजा यस्य।) काकः। एकप्रजाः। सकृत्प्रजातयादिः, त्रि॥

सकृत्फला, स्त्री, (सकृत् एव फलानि यस्याः। अजादित्वात् टाप्।) प्रसीवृक्षः। एकफलः॥

सकृत्फली, स्त्री, (सकृत् एव फलानि यस्याः। ङीष्।) प्रसीवृक्षः। इति शब्दरत्नावली॥

सकृद्धि, [न्] स्त्री, (सकृत् एव दधाति। सकृत् + "आशिषिक्रियां कृधिन्।" उणा० ४। १५४। कृधिन्। ङीष्।) कारः। इत्यमरः॥ (यथा, मार्कण्डेये। १८। ४६।

"वृक्षो यदि क्षिपेत् साक्षी निर्दयं संप्रयच्छति।
सकृद्दोषं संलिखेत् वर्षं तथा मानाधिकं दमः।")

शकटाद्ययवविशेषः। इक्षुगन्धादिदोषः॥

सकृमः, त्रि, कृमयाविशिष्टः। कृमियुक्तः॥

सकृमकः, त्रि, (कृमिभिः सह वर्त्तमानः। कप्।) कृमियुक्तः। इति वह्निपुराणमानिष्यम्॥

सकृल्लवः, त्रि, (लवेन सह वर्त्तमानः। कप्।) लवयुक्तः। इति वह्निपुराणमानिष्यम्॥

सकेतः, त्रि, (केतेन सह वर्त्तमानः।) केतुयुक्तः। यथा,—

"सकेतो वा अकेतो वा केन वाऽपि विधर्षितः।
इन्द्र शत्रुं दुरादेव साधयस्व सकेतनम्।"

इति विष्णुधर्म्मोत्तरम्।

सकेतुः, पुं, (केतुना सह वर्त्तमानः इति।) अग्निः। यथा,—

सकेशरः, पुं, (सकेशरः इव। सकेशर + अण्।) खेसरः। इति राजनिर्घण्टः॥ एकमात्रवर्णिण्यां, स्त्री॥

सकेसरः, पुं, (सकेसर इव।) एकवीरवृक्षः। इति राजनिर्घण्टः॥

सक्तः, त्रि, (सञ्ज + क्तः।) अविरतः। इति हेमचन्द्रः॥ व्यासक्तः॥ (यथा, रामायणे। ६। ४। १८।

"अन्यान्यराक्षसाः सक्ता मद्यमांसनिषेवणाः।
जम्भनः शिम्भुराजस्य मधुमैरेयं पिबन्ति ते॥")

सक्तिः, स्त्री, सङ्गः। सञ्जनघञोः क्तिन्प्रत्ययेन निष्पन्नः। (यथा, किरातार्जुनीये। ५। ४६।

"यक्तिं मधादमनयत्तनिले लतानां
वैरोचनैरधिगुणिताः सहसा मयूखैः।
दोषोऽपि सद्गुरुगुणं शिरसाधयीनां
भासस्तडिद्विलसितानि विडम्बयन्ति॥")

सक्तुः, पुं, (सज्यते सिध्यते इति। सञ्ज सेधने + "सितनिगमिमसिसचीति।" उणा० १। ७०। इति तुन्।) भक्ष्यवादिचूर्णः। छातु इति भाषा। यथा,—

"भक्षा यवाः पुनर्धाना धानाचूर्णन्तु सक्तवः॥"

इति हेमचन्द्रः॥

अस्य गुणादिः। तालयादिशब्दे द्रष्टव्यः॥ (यथा, कथासरित्सागरे। ४। १२२।

"एकः शूरात्मसक्तूनामेकः प्रथमभक्षणः।
शकटालस्य तत्रान्तः सपुत्रस्य मधोयत॥"

अर्शआदित्वात् क्वीलिङ्गेऽपि द्रश्यते। प्रायशोऽयं शब्दः बहुवचने प्रयुज्यते॥)

सक्तुकः, पुं, (सक्तुरिव। कन्।) विषभेदः। इति हेमचन्द्रः॥ स्वार्थे के सक्तुक॥

सक्तुकणा, स्त्री, (सक्तव इव कणाः यस्याः। अजादित्वात् टाप्।) प्रसीवृक्षः। इत्यमरः॥

सक्तुकणी, स्त्री, (सक्तव इव कणाः यस्याः। ङीष्।) प्रसीवृक्षः। इति शब्दरत्नावली॥

सक्तुधि, [न्] स्त्री, (सज्यते इति। सञ्ज सेधे + "आशिषिक्रियां कृधिन्।" उणा० ४। १५४। कृधिन्। ङीष्।) कारः। इत्यमरः॥ (यथा, मार्कण्डेये। १८। ४६।

"वृक्षो यदि क्षिपेत् साक्षी निर्दयं संप्रयच्छति।
सकृद्दोषं संलिखेत् वर्षं तथा मानाधिकं दमः।")

शकटाद्ययवविशेषः। इक्षुगन्धादिदोषः॥

सक्थम्, त्रि, अस्थाविशिष्टः। अस्थियुक्तः। सक्थेन सक्थ्ना वा सह वर्त्तमानः। इति सक्थ्यादिगणः॥

सक्थारः, त्रि, सक्थियुक्तः। आदेयं सह वर्त्तमानः। इति सक्थ्यादिगणमानिष्यम्॥ (यथा, हरिवंशे। १। ३५।

"मांसक्षीद्रघृतं सार्द्धं सक्थारं सक्तुसिक्थकम्॥")

सखा, [ख्] पुं, (समानः ख्यानाद्यते इति। समान + अद + "सखायः सप्त सप्तीनाम्।" उणा० ३। १५६। इति ख्यञ्। सिद्धान्तकौमुद्यां मतान्तरमस्य।) कौल पंसुलः। समानः ख्यायते ज्ञायते सख्यौति। तद्, सख्यादिगणः

ख्यातेर्यलोपः समानस्य नभावश्च सख्युद्भावमिति सैद्धा। इत्यमरटीकायां भरतः॥ तत्पर्य्यायः। आत्मजः २ मित्रम् ३ सुहृत् ४। इति जटाधरः॥ वयस्यः ५ सवयाः ६ स्निग्धः ७ सहचरः ८। इति हेमचन्द्रः॥ (यथा, माघे। २। ७६।

"सखा गरीयान् गुरुरस्य कृत्रिमस्तौ हि कार्य्यतः। स्वातामसिद्धौ मित्रे च सहजप्राकृतावपि॥") सहायः। इति मेदिनी॥ तत्पत्नीगमने दोषो यथा,—

"गुरुतल्पव्रतं कुर्य्यात् रेतः सिक्त्वा स्वयोनिषु। सख्युः पुत्रस्य च स्त्रीषु कुमारीष्वन्त्यजासु च॥"

इति प्रायश्चित्ततत्त्वम्॥

सखिता, स्त्री, (सख्युर्भावः। सखि+तल्।) सख्यम्। यथा,—

"मीमांसे बहुसेवितासि सुहृदस्तर्काः समस्ताः स्य मे वेदान्ताः परमात्मबोधगुरवो यूयं मयोपासिताः। ज्ञाता याकरणानि बालसखिता युष्माभिरभ्यर्थये प्राप्तोऽयं समयो मनूक्तविहतौ साहाय्यमालम्ब्यताम्॥"

इति मनुटीकायां कुल्लूकभट्टः॥

सखित्वं, क्ली, (सख्युर्भावः। सखि+त्व।) सख्यम्। (यथा, भट्टिकाव्ये। १। १३७। १५।

"कृतं सर्व्वेण मेत्रेण सखित्वन्तु त्वया वृथा। इन्द्रद्युम्नस्य पार्थेन कर्त्तुमिच्छाम्यहं प्रभो!॥")

सखी, स्त्री, ("सख्यशिश्वीति भाषायाम्।" ४। १। ६२। इति ङीष्।) सहचरी। तत्पर्य्यायः। आलिः २ वयस्या ३। इत्यमरः॥ सधीची ४। इति हेमचन्द्रः॥ (यथा, रघुः। ३। १।

"अथेक्षितं भर्त्तुरपाङ्गनोदयं सखीजनोद्गीर्णकुतूहलश्रवम्। निदानमिक्ष्वाकुकुलस्य सन्ततेः सुदक्षिणा दोहदलक्षणं दधौ॥")

सख्यं, क्ली, (सख्युर्भावः कर्म्म वा। सखि+यत्।) मित्रता। तत्पर्य्यायः। सौहृदम् २ सौहार्दम् ३ साम्यमदैन्यम् ४ मैत्रम् ५ चार्य्यम् ६ सङ्गतम् ७। इति हेमचन्द्रः॥ (यथा, रघुः। १३। ५७।

"वधनिर्घृणताप्रायस्तव चन्द्रोपदेशतः। सुग्रीवं सख्यं रामस्य समानव्यसने हरौ॥")

सग, म ए संसर्गे। इति कविकल्पद्रमः॥ (भ्वा०-पर०-सक०-सेट्।) म, मिसगयिषति। ए, अगसीत्। इति दुर्गादासः॥

सगरः, पुं, (सगेन सह वर्त्तमानः इति।) ज्ञातिः। इति त्रिकाण्डशेषः॥ गत्यनुक्तौ, त्रि॥ (यथा, हरिवंशे भविष्यपर्व्वणि। ४३। ६६।

"शिरसमरमर्दः सगरोजसाऽपि- होमधुना च कृताग्नये सगर्व्वे।")

सगरः, पुं, (सगेन सह वर्त्तमानः।) अर्द्धचन्द्रः। इति हेमचन्द्रः॥ सूर्य्यवंशीयराजविशेषः। स तु अयोध्याधिपतिबाहुराजपुत्रः। तत्रोत्पत्त्यादि यथा,—

"सूर्य्यवंशे महाराजो बाहुर्नाम महानभूत्। तस्य राज्यं हृतं सर्व्वं हैहयैस्तालजङ्घकैः॥ कालोजाः पह्लवाश्चैव पारदा यवनाः शकाः। एते पक्षगणा ब्रह्मन् हैहयार्थे पराक्रमन्॥ हृतराज्यः स वै विप्र तदा बाहुर्व्वनं ययौ। पत्नी तु यादवी तस्य गुर्व्विण्यासीत् पतिव्रता॥ तत्सपत्नी पूर्व्वमेव तस्या गर्भविघांसया। भोजनेन सह प्रादात् गरं धर्म्मानवेक्षया॥ यादृच्छात् तपोयोगात् गर्भो नैव ममार ह। न ममार च सा राज्ञी देवानामनुकम्पया॥ पतिं सानुमयौ साध्वी सिषेवे तं वने सदा। स राजा विपिने तस्मिन् प्राणांस्तत्याज योगवान्॥ सा तु भर्त्तुश्चितिं कृत्वा वने तामधरोहत। और्व्वस्तां भार्गवस्तात कारुण्यात् समवारयत्॥ तस्याश्रमे च सा गर्भं सुषुवे ज्वलनप्रभम्। जज्ञायत महावाहुर्गरेणैव सह द्विज॥ सगरो नाम तेनाभूत् बालकोऽतिमनोहरः। और्व्वस्तु जातकर्म्मादि तस्य कृत्वा महात्मनः॥ अध्याप्य वेदानखिलान् शस्त्राणि प्रत्यपादयत्। आग्नेयन्तु महाघोरममरैरपि दुःसहम्॥ स तेनास्त्रबलेनाजौ बलेन च समन्वितः। हैहयांस्तालजङ्घांश्च जघ्ने रुद्रः प्रजूनिव॥ जनयामास लोकेऽस्मिन् कीर्त्तिं कीर्त्तिमतांवरः। ततः शकान् यवनान् काम्बोजान् पारदांस्तथा। पह्लवांश्चापि निःशेषान् कर्त्तुं व्यवसितो नृपः॥ ते हन्यमाना वीरेण सगरेण महौजसा। अभिपेदुः शरणं जग्मुः सूर्य्यवंशपुरोहितम्॥ वशिष्ठः शरणापन्नान् समवेक्ष्याथ तानृषिः। सगरं वारयामास तेभ्यो दत्त्वाभयं तदा॥ सगरस्तां प्रतिज्ञान्तु निशम्य गुरुभाषितः। धर्म्मं जघान तेषाञ्च वेषान्यांश्चकार ह॥ अर्द्धं शिरः शकानान्तु मुण्डयामास भूपतिः। यवनानां शिरः सर्व्वं काम्बोजानामपि द्विज॥ पारदान् मुक्तकेशांस्तु पह्लवान् श्मश्रुधारिणः। निस्वाध्यायवषट्कारान् सर्व्वानेव चकार ह॥ कोलिसर्पा माहिषिका दार्व्वाचोलाः सकेरलाः। खसास्तुषाराश्चौड्राश्च मद्राः किष्किन्धकास्तथा। कोसलाश्च तथा वन्याः शूराः कोटुलकास्तथा। सर्व्वे ते क्षत्रियास्तात धर्म्मास्तेषां निराकृताः॥ पुरोधिनस्य वाक्येन कृपा विप्रतपस्विनः। यस्मं कृत्व न राजन्यान् स्वराज्यमन्वशासत॥"

इति पाद्मे स्वर्गखण्डे १५ अध्यायः॥ * ॥

अपि च।

"रोहिताश्व इको जातो हरिताद्धारुरजायत। सगरस्तस्य पुत्रोऽभूत् राजा परमधार्म्मिकः॥ द्वे भार्य्ये सागरस्यापि प्रभा भानुमती तथा। साभ्यमाराधितः पूर्व्वमौर्व्वेणाग्निः पुत्रकाम्यया॥ और्व्वस्तुष्टस्तयोः प्रादात् यथेष्टं वरमुत्तमम्। एका षष्टिसहस्राणि सुतमेकं तथा परा॥ गृह्णातु वंशकर्त्तारं प्रभा गृह्णाद्वितीयकम्। एकं भानुमतीपुत्रमगृह्णादसमञ्जसम्॥ ततः षष्टिसहस्राणि सुषुवे यादवी प्रभा। खनन्तः पृथिवीं दग्धा विष्णुना वेदमार्गेण॥ असमञ्जसस्तु तनयः अंशुमान् नाम विश्रुतः। तस्य पुत्रो दिलीपस्तु दिलीपात्तु भगीरथः॥ येन भागीरथी गङ्गा तपः कृत्वावतारिता। भगीरथस्य तनयो नाभाग इति विश्रुतः॥"

इति मात्स्ये १२ अध्यायः॥

सगर्भः, पुं, (समानो गर्भो यस्य। समानस्य सः।) सहोदरः। इति शब्दरत्नावली॥ त्रि, अभ्यन्तरितसङ्गपत्नादियुक्तः। यथा,—

"दर्भान् सगर्भानादाय नव सप्त च पञ्च वा। साग्रान् समूलानच्छिन्नान् द्विजो दक्षिणपाणिना। अन्वारब्धेन सर्पिषा तर्पयेत् षड् विनायकान्॥"

इति काशीखण्डे सदाचारो नाम ३५ अध्यायः॥ (गर्भेविशिष्टे च त्रि। यथा, कथासरित्सागरे। २०। ८४।

"अनलोऽपि सगर्भोऽभूत् तेन वीर्य्येण धूर्जटेः।")

सगर्भा, स्त्री, (गर्भेण सह वर्त्तमाना।) गर्भवती। यथा,—

"कंचिद्गृहमाश्रित्य कंचित् पातालमाविशत्। सगर्भा चन्द्रसेनस्य भार्य्या दाल्भ्याश्रमं ययौ॥"

इति पाद्मे सृष्टिखण्डे १ अध्यायः॥

सहोदरा। इति सगर्भशब्ददर्शनात्॥

सगर्भ्यः, पुं, (समाने गर्भे भवः। "सगर्भसयूथसनुतात् यत्।" ४। ४। ११४। इति यत्।) सहोदरः। इत्यमरः॥ (यथा, वाजसनेयसंहितायाम्। ४। २०।

"अनु त्वा माता मन्यतामनु पितानु भ्राता सगर्भोऽनु सखा सयूथ्यः॥")

सगोत्रं, क्ली, (समानं गोत्रमिति। समानस्य सः।) कुलम्। यथा,—

"कुलं गोत्रं सगोत्रञ्च तुल्यगोत्रे निगद्यते।"

इति शब्दरत्नावली॥

सगोत्रः, पुं, (समानं गोत्रमस्य। "ज्योतिर्जनपदराज्ञीति।" ६। ३। ८५। इति समानस्य सः।) ज्ञातिः। यथा,—

"सगोत्रबान्धवज्ञातिवन्धुस्वजनाः समाः॥"

इत्यमरः॥

(यथा, मनुः। ८। १६०।

"संस्थितस्यानपत्यस्य सगोत्रात् पुत्रमाहरेत्॥")

सन्धिः, स्त्री, सहभोजनम्। इत्यमरः॥ समाना सह वा सन्धिः सन्धिः। अदः क्तिः सपोऽदो इति सन्धे सन्धिः निपातनात् सन्धिरादेशः। सन्धिरपि छन्दसीति परे। इत्यमरटीकायां भरतः॥

सघ, न हिंसे। इति कविकल्पद्रमः॥ (सा०-पर०-सक०-सेट्।) न, सघीति। अघीसघत्। इति दुर्गादासः॥

सङ्कट:, त्रि, (सम्+"संपोदश्च कटच्।" ५।२।२६। इति कटच्।) संबाध:। इत्यमर:॥ दे आख्यावकाशे वर्त्मादौ। सम्यक् कटति आवृणोति सङ्कटं यात्। सम्यगन्योन्यं बाधन्तेऽत्र संबाध: षष्।। बाध्यलिङ्गता च। संबाधं वृक्षदपि सङ्कटं वर्त्म इति माघ:। इति भरत:॥ दु:खे, क्ली। यथा,—
"सर्व्वापदासु घोरासु वेदगाभ्यर्दितोऽपि वा।
स्मरन्नमेतच्चरितं नरो मुच्येत सङ्कटात्॥"
सङ्कटं दु:खमुत्तरार्द्धसुत्तरान्वयि। इति देवीमाहात्म्यस्य टीकायां नागोजीभट्ट:॥

सङ्कटा, स्त्री, (सम्यक् कटति आवृणोति या। सम्+कट्+अच्। टाप्।) देवीविशेष:। सा च वाराणस्यां प्रसिद्धा। योगिनीविशेष:। यथा,
"मङ्गला पिङ्गला धन्या भ्रामरी भद्रिका तथा।
उल्का सिद्धि: सङ्कटा च योगिन्योऽष्टौ प्रकीर्त्तिता:॥"
इति ज्योतिषम्॥

सङ्कटाक्ष:, पुं, (संकटं अक्षतीति। अक्ष व्याप्तौ+अण्।) धत्तूर:। इति त्रिका:॥

सङ्कथनं, क्ली, (सम्यक् कथनम्।) सम्यगभाषणम्। यथा,—
"उपवासकृतं नश्येत् दिवास्वप्नाच्च मैथुनात्।
स्त्रीणां संप्रेक्षणात् स्पर्शात्ताभि: सङ्कथनादपि॥"
इत्येकादशीतत्त्वम्॥

सङ्कथा, स्त्री, (सम्यक् कथा।) परस्परभाषणम्। यथा,—
"उलाप: काकुवागन्योन्योक्ति: संलापसङ्कथे।"
इति हेमचन्द्र:॥
(यथा, भागवते। १०।८२।१७।
"कृपा भ्रातृन् स्वसॄंश्च तत्सुतान् पितरावपि।
भ्रातृपत्नीर्मुकुन्दस्य सर्वौ संकथया मुद:॥")
सम्यक्कथनञ्च॥

सङ्कर:, पुं, (सङ्कीर्य्यते इति। सं+कृ विक्षेपे+अप्।) समाकीर्णा मिश्रधूल्यादि:। तत्पर्य्याय:। अवकर: २। इत्यमर:॥ सङ्कार: ३। इति शब्दरत्नावली। अभिघटकार:। इति मेदिनीधरावल्यौ॥ मिश्रितत्वम्। यथा,—
"भेदाज्ञानाय न इन्दो नैकग्रामो न सङ्कर:।"
इत्यमर:॥
परस्परान्तर्भावमनाधिकरण्ययोरेकाधिकरणम्। यथा। सूर्त्तत्वं मनसि वर्त्तते भूतत्वं नास्ति आकाशे भूतत्वं वर्त्तते सूर्त्तत्वं नास्ति। एतयो: भूतत्वं वर्त्तते सूर्त्तत्वमस्तीति जातिसङ्कर्य्यम्। तथा चोक्तम्।
"एकैरेणैकसूत्रस्थं सङ्करोऽयमुदीरित:।
सम्यग्ज्ञानेऽमलधियो जातिबाधकसंक्षय:॥"
इति सिद्धान्तमुक्तावली॥॥
कर्म्मसङ्कर इति। यथा,—
वाक्यमुक्त्वा उवाच।
"अहो सङ्करमाश्रित्य सङ्कल्पविधिं परम्।
विप्रान्मूर्द्धावसिक्तो हि क्षत्रियायां विश:
स्त्रियाम्॥
अनोऽम्बष्ठस्तु शूद्रायां निषाद: पार्श्वतोऽपि वा।
माहिष्योग्रौ प्रजायेते विट्शूद्राङ्गनयोर्व्रातात्॥
वैश्यां शूद्राच्च राजन्यां माहिष्योग्रौ सुतौ
स्मृतौ।
शूद्रायां करणो वैश्यात् विद्वान् एष विधि:
स्मृत:॥
ब्राह्मण्यां क्षत्रियात् सूतो वैश्यादैदेहकस्तथा।
शूद्राज्जातस्तु चाण्डाल: सर्व्वधर्म्मबहिष्कृत:॥
क्षत्रिया मागधं वैश्यात् शूद्रात् क्षत्तारमेव च।
शूद्रादायोगवं वैश्या जनयामास वै सुतम्॥
माहिष्येण करण्यान्तु रथकार: प्रजायते।
असंस्कृताच्च विज्ञेया: प्रातिलोमानुलोमजा:॥
चाण्डालात्पुक्कशो ज्ञेय: सप्तमे पञ्चमेऽपि वा।
अन्त्ये कर्म्मण्यां माम्ये पूर्व्ववत्तोत्तरावरम्॥"
इति मात्स्ये ६६ अध्याय:॥

सङ्करी, स्त्री, (सं+कृ+अप्। गौरादित्वात् ङीष्।) नवदूषितकन्या। इति मेदिनी॥

सङ्करीकरणं, क्ली, (असङ्कर: सङ्कर: क्रियतेऽनेनेति। सङ्कर+च्वि+ल्युट्। अभूततद्भावे च्वि:।) नवविधपापान्तर्गतपापविशेष:। यथा, विष्णु:।
अथ पुरुषस्य कामक्रोधलोभाख्यं रिपुत्रयं भवति। परिग्रहप्रसङ्गेन विशेषादृग्रहाश्रमिण:। तेनायमाक्रान्तोऽतिपातकमहापातकानुपातकोपपातकेषु वर्त्तते। जातिभ्रंशकरेषु सङ्करीकरणेष्वपात्रीकरणेषु मलावहेषु प्रकीर्णकेषु। तद्यथा,—
"खराश्वोष्ट्रगवाजानामजाविकवधस्तथा।
सङ्करीकरणं ज्ञेयं मीनाहिमहिषस्य च॥"
तस्य प्रायश्चित्तं यथा,—
"सङ्करापात्रकृत्यासु मासं शोधनमैन्दवम्।
मलिनीकरणीयेषु तप्त: स्याद्यावकव्रत:॥"
तथा विष्णु।
"गव्याश्वखराणां पयसां हिंसा सङ्करीकरणम्।
सङ्करीकरणं कृत्वा मासमश्नाति यावकम्।
कृच्छ्रातिकृच्छ्रमथवा प्रायश्चित्तन्तु कारयेत्॥"
इति प्रायश्चित्तविवेक:॥

सङ्कर्षणं, क्ली, आकर्षणम्। सम्यक्प्रकारेण कर्षणम्। संपूर्व्वकृषधातोरनट्प्रत्ययेन निष्पन्नम्॥
(यथा, भागवते। १०।२।१३।
"गर्भसंकर्षणात् तं वै प्राहु: सङ्कर्षणं भुवि।")
एकीकरणम्। इति स्वामी॥ यथा, भागवते। ५।२५।१।
"तस्य मूलदेशे त्रिंशद्योजनसहस्रान्तर आस्ते या वै कला भगवतस्तामसी समाख्याता अनन्त इति सात्वतीया दृष्टदृशो: सङ्कर्षणं यदहमित्यभिमानलक्षणं यं सङ्कर्षणमित्याचक्षते॥")

सङ्कर्षण:, पुं, (सम्यक् कर्षतीति। सं+कृष्+ल्यु:।) कृषक:। इत्यमर:॥ (यथा भगवतोऽभिधानमेवा, हरिवंशे। ५८।६।
"कर्षणेनास्य गर्भस्य स्वगर्भाच्चाविलस्य वै।
सङ्कर्षणो नाम सुमे तव पुत्रो भविष्यति॥"
तथा च भागवते। १०।२।१३।
"गर्भसंकर्षणात् तं वै प्राहु: सङ्कर्षणं भुवि॥")

सङ्कल:, पुं, सङ्कलनम्। योग:। संपूर्व्वकलधातोर्भावे अलप्रत्ययेन निष्पन्न:॥

सङ्कलनं, क्ली, (सं+कल+ल्युट्।) एकत्रीकरणम्। योजनम्। इति लीलावती॥ टिक देओया इति भाषा॥

सङ्कलित:, त्रि, (सं+कल+क्त:।) लेखादिगणसंगृहीत:। तत्पर्य्याय:। संगृहीत: २। इत्यमरभरतौ॥ योजितश्च॥ टिक देओया ओंक इति भाषा। यथा। अथ सङ्कलितव्यकलितयो: करणसूत्रम्। इति लीलावती॥ पुङ्गीशसधान्यादि। इति केचित्॥

सङ्कल्प:, पुं, (सं+कृप्+भावे घञ्। गुणे छते रस्य ल:।) कर्म्मणो मानसम्। इत्यमर:॥
"सङ्कल्प एवेह नृणां। यथा। मनसा सङ्कल्पयति वाचा चाभिलपति कर्म्मणा चोपपादयति। इति। भविष्यपुराणवचनेन च।
'सङ्कल्पेन विना राजन् यत्किञ्चित् कुरुते नर:।
फलन्नाप्नोत्यसकं तस्य धर्म्मस्तस्मात्प्रभो भवेत्॥'
इति। तत्पुराणेनापि
'आशास्य च शुभं कार्य्यमुद्दिश्य च यदीप्सितम्।'
इत्यनेनोपक्रम्य उक्तम्। मनसासंकल्प्य शुभं फलं आशास्य मनसा सङ्कल्प्य उद्दिश्य वाचा अभिलप्य कार्य्यं कर्म्मणा उपपादयम्। भविष्ये।
'शुक्लिप्रतिपदारभ्य कार्त्तिकस्यादिभिस्तथा।
सङ्कल्पो नैव कर्त्तव्यो व्रतमेवेन कदाचन
गृहीत्वौदुम्बरं पात्रं वारिपूर्णं गुणान्वितम्
दर्भत्रयं सायसकं फलपुष्पतिलान्वितम्॥
बलाशुद्धारामकूपे सङ्कल्पं पूर्व्वदिङ्मुख:
साधारणे चोत्तराभ्यै दिशायां निक्षिपेज्जलम्॥
अत्र नैमित्तिकविषेषु यात्रान्तरसद्भावविषय:। शब्दादिसाहचर्य्यात् एकभक्तपरो वा।
'गृहीत्वौदुम्बरं पात्रं वारिपूर्णमुदङ्मुख:।
उपवासन्तु गृह्णीयाद् यदा कार्य्येण धारयेत्॥'
इति वराहपुराणदर्शनात्।" इति निष्यादितत्त्वम्॥॥ सङ्कल्पस्य भावे मयेदन्तु कर्म्मण्येष निर्देशे तु मयेदन्न कर्त्तव्यमिति ज्ञानविशेष:। व्रतादीनां सङ्कल्पसमावत्वं यथा,
"सङ्कल्पजन्मा कामो वै यज्ञा: सङ्कल्पसम्भवा:।
व्रता नियमधर्म्माश्च सर्व्वे सङ्कल्पजा: स्मृता:॥"
इत्येकादशीतत्त्वम्॥
सङ्कल्पकरणं यथा,—
"ओंतत् पूर्व्वमुच्चार्य्य ततो विष्णुपदं वदेत्
ॐ तत् सदित्युच्चार्य्य मास गोत्रं ततो वदेत्।
अस्य इष्टप्राप्तिकामो मत्सर्व्वेषां सङ्कल्पेत्।
ततोऽभ्यर्च्य वराहादि गन्धाद्यानमयं सत:।
करिष्ये इति सङ्कल्प्य शिर:स्थानं समाचरेत्॥
त्रि: स्नाता पयसापाद्भि: इति याम्यं वराहविधे:॥

कदेत्याह्य चाञ्जलिं । सङ्कल्पं प्रददामि ते ।"
इति कामधेनुतन्त्रे ३० पटलः । ९ ।

अपि च । अथ सङ्कल्पविधानम् ।
"कमङ्गुलिमतां यज्ञानाधिकमथापि वा ।
न सार्द्धैकदलभागभूयस्कन्यानियमाचरेत् ।
तान्त्रयार्थं सङ्कल्पञ्च मतिमं जलपूरितम् ।
सङ्कल्पञ्च दर्भैश्च । गृहीत्वाथ्य कल्पतः ।
अभ्यर्च्य च शिरःपद्मे श्रीगुरुं करुणामयम् ।
यत्किञ्चिदनो वापि देवेन्द्रवदनोऽपि वा ।
मार्गं पर्यं निधिर्दैव देवपर्वादिकल्पना ।
आत्मनकाल्पञ्च तथा गोत्रं नाम च कामिनाम् ।
क्रियाङ्गं करिष्येऽस्मिन्नमेवं समुदरेत् पयः ।"
इति योगिनीतन्त्रे प्रथमखण्डीयः २ पटलः ।१०।

अन्यच । शिवपूजायां मानसपूजायां यथा,—
"ततस्तु परमेशानि ! कृत्वा सङ्कल्पमानसम् ।
ध्यायेत्पूर्वं महादेवि ! ब्रह्माद्यालिमानसः ।
तथा भवतु सर्व्वज्ञ इति सङ्कल्प मानसः ।
न गोत्रं मम देवेशि । न नाम परमेश्वरि ।
न माता परमेशानि न पिता मम कामिनि ।
तस्मिन् काले महेशानि मम सर्व्वं न हि प्रिये ।
न धनं न निधिं देवि तस्मिन् काले गुचिस्मिते ।
न दारा न सुता देवि तस्मिन् काले परागते ।
न क्रिया परमेशानि न चार्चा परमेश्वरि ।
आत्मनं सर्व्वभूतानि सङ्कल्पं मानसं स्मृतम् ।
मानसं यदि नायाति तदा स्नानेन किं प्रिये ।
सङ्कल्पं मानसं देवि चतुर्व्वर्गप्रदायकम् ।
स्मृतं हि परमेशानि सङ्कल्पं सर्व्वसुच्यते ।
सङ्कल्पेन विना देवि यत् किञ्चित् कुरुतेऽल्पधीः ।
सङ्कल्पं परमेशानि तत् सर्व्वं मानसं परम् ।
यदुक्तं परमेशानि मुनिना सूतदर्शिना ।
तत् सर्व्वं परमेशानि सर्व्वं भवति पार्व्वति ।
इति सङ्कल्पमाचर्य्य श्रीचक्रार्चां समाचरेत् ।"
इति सिद्धार्णवतन्त्रे ५ पटलः ।

सङ्कल्पशर्म्मा, [न्] पुं, (सङ्कल्पात् शर्म्म यस्य ।) कामदेवः । इति त्रिकाण्डशेषः । (यथा, कथासरित्सागरे । १६ । २६८ ।
"इत्यौत्सुक्यं कामः सङ्कल्पशर्म्मा प्रजेन
निर्मितः ।")

सङ्कल्पभवः, पुं, (सङ्कल्पाद् भवः उत्पत्तिर्यस्य ।) कामदेवः । इति त्रिकाण्डशेषः । (अभिलाषमात्रजन्ये, त्रि । यथा, महाभारते । १३ । ४१ । ८ ।
"अदर्शनात्तं विदुः देवेन्द्रं मा मुह्यन्तिके ।
स्त्रियमानमदैन्यं सङ्कल्पभवेन च ।")

सङ्कल्पयोनिः, पुं, (सङ्कल्पात् योनिर्यस्य ।) कामदेवः । इति हेमचन्द्रः ।

सङ्कल्पवत्, त्रि, (सङ्कल्पः कर्म्म इत्यस्त्यर्थे सङ्कल्प + मतुप् मस्य वः ।) अभिलाषी । इति भरतः । ३ । ८८ । इति जटाधरः । (यथा, रामायणे । ३ । ६ । ८ ।
"सङ्कल्पवान् फलं तस्य तपसः परिकल्पितम् ।
तं वै वेद महाबाहो ! तपसो मे न संशयः ।")

सङ्कल्पसूः, पुं, (सङ्कल्पात् सूयते उत्पद्यते सङ्कल्प + सू + क्विप् ।) कामदेवः । इति हेमचन्द्रः ।

सङ्कल्पितः, त्रि, (सम्यक् कल्पितः इत्यर्थे सङ्कल्प + क्त । यद्वा, सङ्कल्पः कर्म्म इत्यस्त्यर्थे सङ्कल्प + इतच् । ८८ । इति जटाधरः ।) अभिलाषः । इति भरतः । ३ । ८८ । इति जटाधरः । इत्यादिकोषेषु । अस्यः । इति त्रिकाण्डशेषः । संकल्पितः । इति संक्षिप्तसारोणादिवृत्तिः ।

(यथा, महाभारते । १० । १८३ । १३ ।
"लोष्टमर्द्दी तृणच्छेदी नखखादी तु यो नरः ।
नित्योच्छिष्टः सङ्कुसको नैवायुर्विन्दते महत् ।")

सङ्कारः, पुं, (संकीर्य्यते इति । सं + कॄ विक्षेपे + घञ् ।) मस्मार्च्चा शिग्रुवृक्षादिः । इति शब्दरत्नावली । अभिधटत्कारः । इति मेदिनी ।

सङ्कारी, स्त्री, नवदूषितकन्या । इति मेदिनी ।

सङ्काशः, त्रि, (सम्यक् काशते प्रकाशते इति । काश + घञ्काशच् ।) सदृशः । (यथा, महाभारते । १ । १२३ । ३ ।
"आजगाम ततो देवो धर्म्मो मत्प्रभवात् तनः ।
विमाने सूर्य्यसङ्काशे कुन्ती यत्र व्यवस्थिता ।")
अन्तिकः । इति विश्वः ।

सङ्किलः, पुं, एरण्डवृक्षः । इति त्रिकाण्डशेषः ।

सङ्कीर्ण, त्रि, (सं + कॄ + क्तः ।) जनादिभिर्निरवकाशः । इति भरतः । नानाजातिसंमिश्रितम् । इति भानुदीक्षितः । तत्पर्य्यायः । सङ्कुलम् २ आकीर्णम् ३ । इत्यमरः । निचितम् ४ । इति नानार्थे अमरः । आप्तम् ५ समाकीर्णम् ६ । इति शब्दरत्नावली । (यथा, महाभारते । १ । १३८ । २८ ।
"द्रोणः सङ्कीर्णयुद्धे च शिक्षयामास वीर्य्यवान् ।")
सङ्कटः । इत्यमरः । परस्परविजातीयः । यथा,
"विशेष्यनिघ्नैः संकीर्णैर्नानार्थैरक्षरैरपि ।"
इत्यमरटीकायां भरतः ।
व्याप्तः । इति नानार्थे अमरः ।

सङ्कीर्णः, पुं, (सं + कॄ + क्तः ।) अमरकरणादिषाष्टमपर्य्यन्तसंमिश्रजातिः । इत्यमरः । मिश्रितरागः । इति संगीतशास्त्रम् ।

सङ्कीर्णनं, क्लो, स्त्री, (सं + कॄ + ल्युट् ।) समक्प्रकारेण देवसमाराधनम् । सुगादिकथनम् । यथा,—
"कलौ पापे स्थिता लोकाः पाखण्डाक्रान्तचेतसः ।
यज्ञैः सङ्कीर्त्तनप्रायैर्यजन्ति हि सुमेधसः ।"
इति श्रीभागवते ११ स्कन्धे ५ अध्यायः ।
"कलौ खलु भविष्यन्ति नारायणपरायणाः ।
क्वचित्क्वचिन्महाराज द्रविडेषु च भूरिशः ।
ताम्रपर्णी नदी यत्र कृतमाला पयस्विनी ।
कावेरी च महापुण्या प्रतीची च महानदी ।
ये पिबन्ति जलं तासां मनुजा मनुजेश्वर ।
प्रायो भक्ता भगवति वासुदेवेऽमलाशयाः ।
सङ्कीर्त्तनं भगवतः कुर्व्वन्ति जयशंसिनः ।
हरन्ति हरये भक्तिं नृणामशुभदर्शनाः ।"
इति नारदपञ्चरात्रे ज्ञानामृतसारे प्रथमैकरात्रे महोत्सवसारनो नाम १० अध्यायः ।

सङ्कीर्त्तितः, त्रि, (सं + कॄ + क्तः ।) सम्यगुच्चारितः । संस्तुतः । यथा,—
"व्यज्ञानादथवा ज्ञानादुत्तमश्लोकनाम यत् ।
संकीर्त्तितमघं पुंसो दहेदेधो यथानलः ।"
इति श्रीभागवते ६ स्कन्धे २ अध्यायः ।

सङ्कुचितं, क्लो, (सं + कुच् + क्तः ।) संकोचयुक्तम् । अप्रफुल्लम् । तत्पर्य्यायः । निमीलम् २ मीलितम् ३ मुद्रितम् ४ । इति हेमचन्द्रः । सुप्तम् ५ मिलितम् ६ नमम् ७ मिषुचितम् ८ । मनिमम् ९ अनमम् १० । इति त्रिकाण्डशेषः । (यथा, ऋग्वेदभाष्यभूमिकायाम् । ६५ ।
"सङ्कुचितार्द्धविमुकुलो मधोमाक्षिकस्फुरन्मदाम् ।
दधिनो भवति मुखमिव सुदिक्ष रस प्रसादेन ।")

सङ्कुर्म, क्लो, (सङ्कुरतीति । सं + कुरु, संकुराते + इत्यर्थेति रः ।) यज्ञम् । इत्यमरः । (यथा, रघौ । १३ । ६५ ।
"तमो वसेव सङ्कुर्मा सम्राण्मीक्ष्य साधुना ।
उत्पपातरयं नाम्ना सङ्कुर्मं रथमास्थितः ।")

परम्परपरादनाम्नाम् । तत्पर्य्यायः । लिङ्गम् । हेमचन्द्रः । "ये पुंसोऽवयवितिन्नी भागे । यथा,—
"यत्पादपङ्कजपलाशविलासभक्त्या
कर्म्माशयं ग्रथितमुद्गथयन्ति सन्तः ।
तद्वन्न खलेन मनसा रचितोरुदाम
भक्त्युत्कलं यदुपतेः क्षपयेम तीव्रम् ।"

सङ्केतः

कुलजबन्धुसंहत्योः संपूर्व्वः इगुडत्वात् कः। क्लिश्यतेः क्तः क्लिष्टम्। परस्परं पराहतं विरुद्धं परस्परपराहतम्। तत्र सरस्वतीकण्ठाभरणे तु क्लिष्टलक्षणं यथा,—

'दूरे यस्यार्थसंवित्तिः क्लिष्टं नेष्टं हि तत् सताम्।'

यथा,—

'विचिन्तितात्मभवद्विग्गुरुपादहतो जनः।
हिमापहामित्रधरेर्याम्यं व्योमाभिनन्दति॥'

अस्यार्थः। विना गरुडेन चित इन्द्रस्तस्यात्मभवोऽर्जुनस्तस्य देवौ कर्णः तस्य गुरुः पिता सूर्य्यः तस्य पादे रश्मिभिर्हतो जनो लोकः व्योम आकाशमभिनन्दति। कीदृशं हिमापहोऽग्निस्तस्यामित्रं जलं तद्धारयन्ति ये तैर्मेघैर्याम्यम्।" इति तट्टीकायां भरतः॥ (सङ्कीर्णता। यथा, महाभारते। ३। १४२। ३८।

"एतस्मिन् सङ्कुले तात वर्त्तमाने भयङ्करे।
अतिभारात् वसुमती योजनानां शतं गता॥")

सङ्कुलं, त्रि, (सं+कुल संख्याने+कः।) जनादिभिर्निरवकाशम्। तत्पर्य्यायः। सङ्कीर्णम् २। व्याकीर्णम् ३। इत्यमरः॥ कलिलम् ४ गहनम् ५। इति केचित्॥ सङ्कीर्य्यते स्म जनादिभिर्निरन्तरं व्याप्यते स्म सङ्कीर्ण क्त्र विक्षेपे क्तः। संकुलति सङ्कुलं कुल च बन्धुसंहत्योः संपूर्व्वेडुडत्वात् कः। संकुलं दन्त्यादि। भ्रकिभ्यालीढ्ये शङ्कुलं तालव्यादीति स्वामी। आकीर्णं सङ्कीर्णवत्। इति भरतः॥ (यथा, महाभारते। १। ११३। २६।

"ततः सेनासुपादाय पाण्डुर्नानाविधध्वजाम्।
प्रभूतहस्त्यश्वयुतां पदातिरथसङ्कुलाम्॥")

सङ्केतः, पुं, सङ्कित्यते उच्यतेऽत्र। (सं+कित+घञ्।) स्वाभिप्रायव्यञ्जकचेष्टाविशेषः। तत्पर्य्यायः। प्रज्ञप्तिः २ परिभाषा ३ श्रेणी ४ समयः ५ आकारः ६। इति त्रिकाण्डशेषः॥ उदाहरणं यथा,—

"सङ्केतप्रियशङ्कया निजपतिं प्रावोचदध्वश्रमम्।"

इति रसमञ्जरः॥

(यथा च वाक्यपदीये।

"सङ्केतकालमनसं विटं ज्ञात्वा विदग्धया।
हसन्नेत्रार्पिताकूतं लीलापद्मं निमीलितम्॥")

न्यायमते यथा। सङ्केतो लक्षणा चार्थे पदवृत्तिः। वृत्त्या पदप्रतिपाद्योऽर्थ एव पदार्थ इत्यभिधीयते। इदं पदमिममर्थं बोधयतीति आसाच्छब्दादयमर्थो बोद्धव्य इति वेच्छा सङ्केतरूपा वृत्तिः। तत्राधुनिकसङ्केतः परिभाषा। तया अर्थबोधकं पदं पारिभाषिकम्। यथा शास्त्रकारादिसङ्केतितदण्डादिपदम्। ईश्वरसङ्केतः शक्तिः। तया अर्थबोधकं पदं वाचकम्। यथा गोत्वादिविशिष्टबोधकगवादिपदम्। तद्बोध्योऽर्थो गवादिर्व्यक्तिः स एव मुख्यार्थ उच्यते। इति शक्तिवादे गादाधरी टीका॥

सङ्केतनिकेतनं, क्ली, (सङ्केतस्य निकेतनम्।) प्रियमेलनार्थावधारितगृहम्। यथा,—

"सङ्केतनिकेतने प्रियमनवलोक्य समाकुलहृदया विप्रलब्धा।
'सङ्केतकेलिगृहमेत्य निरीक्ष्य शून्य-
मेणीदृशो निर्गतनिःश्विताधरायाः।
अर्द्धाक्षरं वचनमर्द्धविकाशि नेत्रं
ताम्बूलमर्द्धकवलीकृतमेव तस्थौ॥'
सङ्केतस्थलं प्रति भर्त्तुरनागमनकारणं चिन्तयति या सोत्कण्ठिता॥" इति रसमञ्जरी॥

सङ्कोचं, क्ली. (सङ्कुचतीति। सं+कुच्+घञ्।) कुङ्कुमम्। इत्यमरः॥

सङ्कोचः, पुं, (संकुचतीति। सं+कुच्+घञ्।) मत्स्यभेदः। (सं+कुच्+भावे घञ्।) बन्धः। इति मेदिनी॥ (यथा, कथासरित्सागरे। ६०। ६५।

"निनाय च निशामिन्दुविधमामलिनीव ताम्।
बद्धमोहालिपटले हृदि सङ्कोचमेत्य सा॥")

बहुविषयक-वाक्यार्थादेरल्पविषय-स्थापनम्। यथा, सामान्यशब्दार्थस्य विशेषनिष्ठत्वं सङ्कोचः। इति आहवविवेकः॥ रोधः। जड़ीभाव इत्यर्थः। यथा,—

"यस्मिन् प्रसुदिते रात्रि तमः सङ्कोचति क्षितौ॥"

इति कविकल्पद्रुमटीकायां दुर्गादासः॥

सङ्कोचनी, स्त्री, (सङ्कुचतीति। सं+कुच्+ल्युः। ङीप्।) लज्जालुलता। इति रत्नमाला॥

सङ्कोचपिशुनं, क्ली, (सङ्कोचेन पिशुनम्।) कुङ्कुमम्। इति भावप्रकाशः॥

सङ्क्रन्दनः, पुं, (सङ्क्रन्द्यते असुरानिति। सं+क्रन्द+णिच्+ल्युः।) इन्द्रः। इत्यमरः॥ (भौत्यस्य मनोः पुत्रविशेषः। यथा, मार्कण्डेये। १००। ३२।

"स्त्रीभाणी च प्रतीरश्च विष्णुः सङ्क्रन्दनस्तथा।
तेजस्वी शुचलश्चैव भौत्यस्येते मनोः सुताः॥")

सं+क्रन्द+भावे ल्युट्।) रोदने, क्ली। (यथा, महाभारते। ११। २३। ४।

"दिष्ट्या नैनं महाराज दारुणं भरतक्षयम्।
कुरु सङ्क्रन्दनं घोरं युगान्तमनुपश्यसि॥")

सङ्क्रन्दयति शत्रूनिति। शत्रुतापके, त्रि। यथा, महाभारते। ४। ५। २६।

"तस्य मौर्व्वीमपाकर्षत् शूरः सङ्क्रन्दनो युधि।
कुले जातिं समो रूपे यस्येति नकुलः स्मृतः॥")

सङ्क्रमः, पुं, क्ली, दुर्गसञ्चरः। साँको इति भाषा। इत्यमरः॥ संक्रामति अनेन संक्रम्यते असौ वा संक्रमः। घञ्। दुर्गे संज्ञायां सञ्चरत्यनेन दुर्गसञ्चरः करणे ल्युट्। सञ्चरो निर्गमोऽम्बुपथः। इति रत्नकोषः। इति भरतः॥ (यथा, मनुः। ८। २८५।

"सङ्क्रमध्वजयज्ञीनां प्रतिमानाञ्च भेदकः।
प्रतिकुर्य्याच्च तत्सर्व्वं पञ्चरात्रात् प्रतस्य च॥")

सङ्क्रमः

सङ्क्रमः, पुं, (सं+क्रम+घञ्।) क्रमणम्। सञ्चयाग्निसञ्चारवस्तु। इति धरणिः॥ (यथा, भागवते। ४। १२। ४८।

"दिनत्रये व्यतीपाते सङ्क्रमेऽर्कदिनेऽपि वा॥")

रविसंक्रमकालो यथा,—

"त्रुटेः सप्तसप्तभागो यः सः कालो रविसङ्क्रमः॥"

इति तिथ्यादितत्त्वम्॥

सङ्क्रमणं, क्ली, (सं+क्रम+ल्युट्।) गमनम्। सूर्य्यस्य राश्यन्तरप्रापणम्। यथा। कालकौमुद्यां जाबालिः।

"पूर्णे चेदर्द्धरात्रे तु रविसङ्क्रमणं भवेत्।
प्राहुर्दिनद्वयं पुण्यं त्यक्त्वा मकरकर्कटौ॥"

देवीपुराणे।

"रविसङ्क्रमणे पुण्ये न स्नायात् यस्तु मानवः।
सप्तजन्म भवेत् कुष्ठी दरिद्रश्चोपजायते॥"

इति तिथ्यादितत्त्वम्॥

(प्रापणम्। यथा, हरिवंशे। ३२। १६।

"अत्रैवोदाहरन्तीमं भरद्वाजस्य धीमतः।
धर्म्मसङ्क्रमणस्यापि मरुद्भिर्भरताय वै॥")

सङ्क्रान्तः, त्रि, (संक्रान्तिरस्यास्तीति। अच्।) संक्रान्तिविशिष्टः। यथा,—

"असङ्क्रान्तमासोऽधिमासः स्फुटः स्यात्
द्विसंक्रान्तमासः क्षयाख्यः कदाचित्।"

इति मलमासतत्त्वम्॥

(सं+क्रम+क्तः।) प्राप्तः। गतः। क्रमागतधनादि। यथा। स्त्रीसङ्क्रान्तधनस्य स्त्रीधनत्वाभावात् अधिकारविशेषस्यात्र वचनादप्राप्त्याकाङ्क्षया कल्पने सदृश्यात् स्त्रीसङ्क्रान्तधनमात्रस्य पूर्वस्वामिदायादरूपोऽधिकारी कल्पनीय एतदर्थं पत्नीपदस्य स्त्रीलक्षकत्वमिति भावः। इति दायभागटीकायां श्रीकृष्णतर्कालङ्कारः॥

सङ्क्रान्तिः, स्त्री; (सं+क्रम+क्तिन्।) राश्यन्तरसंयोगानुकूलव्यापारः। यथा,—

"नाड़ीनक्षत्रदिवसे रविभौमशनैश्चराः।
सङ्क्रान्तिं यस्य कुर्व्वन्ति तस्य क्षीणोऽभिजायते॥"

इति तिथ्यादितत्त्वम्॥

रविसंक्रान्तिर्यथा। भविष्यमातृस्वज्योतिषेषु।

"स्वर्गकर्कटसंक्रान्तौ दिं तूदग्दक्षिणायने।
विषुवत्ती तुलामेषे गोलमध्ये तथापरा॥"

स्वर्गो मकरः। गोलो राशिचक्रम्।

"धनुर्मिथुनकन्यासु मीने च षड़शीतयः।
वृषवृश्चिकसिंहेषु कुम्भे विष्णुपदी स्मृता॥"

देवीपुराणम्।

"यावद्विंशकला शुक्लात्तत पुण्यं चोत्तरायणे।
निरंशे भास्करे दृष्टे दिनान्तं दक्षिणायने॥
अर्द्धरात्रे तत्संपूर्णं दिवा पुण्यमनागतम्।
अर्द्धरात्रे व्यतीते तु विन्द्यं चापरेऽहनि॥
संपूर्णे चार्द्धरात्रे च उदये रविमेव वा।
मानार्हं भास्करे पुण्यमपूर्णे शर्व्वरीदिने॥
सम्पूर्णे तूभयोर्ज्ञेयमतिरेके परेऽहनि।

इत्युक्तम्। एवञ्चैता घटिकाः पुण्यतमाः मानार्द्धादिकन्तु पुण्यमात्रमिति तस्मान्मन्दैत्यादि न सन्ध्यासंक्रान्तिविषयकमिति। सन्ध्यासंक्रान्तिविषयत्वे पारम्पर्यिकमित्यनुपपत्तेः। पुण्यमित्यनेनैव सिद्धेः। पारमार्थिकमित्यत्र कल्पनरूव्याख्यानागवलोकनात् रविसंक्रम इति पाठकल्पनं कल्पनमेव। समयप्रकाशकृतापि तथा पठितत्वात्। जीमूतवाहनोऽपि कालविवेके।

"यद्यहि संक्रमणे पुण्यमहः स्नातं प्रकीर्त्तितम्।
रात्रौ संक्रमणे भानोर्द्विनार्द्धं स्नानदानयोः॥"

इति बृहद्वशिष्ठादिवचनपर्य्यालोचनया दिवासंक्रान्तौ दिनमात्रं पुण्यं पुण्यतरात्तु विशेषविधिता गाद्यः इत्याह। अतएव तद्धृतजाबालिबृहस्पतिप्रातातपवचनमपि सङ्गच्छते। यथा,—

"वर्त्तमाने तुलामेषे नाधस्तूभयतो दश॥"

कालमाधवोऽपि। अर्द्धौदयमभिधाय प्राशस्त्यनारतम्यमुक्तम्। एवञ्च दिवासंक्रान्तौ स्नातव्यं दिनं पुण्यं षड्शीतिमुखेऽतीते इति वचनं पुण्यतरपरम्॥ * ॥ ननु देवीपुराणे दिवारात्रोः संक्रमणे विशिष्यकालाभिधानात् सन्ध्यासंक्रान्तेः कः काल इति चेत्।

"त्रिंशन्मुहूर्त्त कथितमहोरात्रन्तु यत्तया।"

इति विष्णुपुराणेन सन्ध्ययोः पृथगनुपादानात् दिवारात्रिसम्बन्धित्वाच्चमुहूर्त्तार्द्धेन तयोरन्तर्भावः। तथा च दक्षः।

"अहोरात्रस्य यः सन्धिः सूर्य्यनक्षत्रवर्जितः।
सा तु सन्ध्या समाख्याता मुनिभिस्तत्त्वदर्शिभिः॥"

योगियाज्ञवल्क्यः।

"स्नातव्यञ्च सदा तत्र दिनरात्र्योर्यथाक्रमम्।
सन्ध्या मुहूर्त्तमाख्याता स्नाने दाने तथा स्मृता॥"

यमः।

"अर्द्धास्तमयात् सन्ध्या यावद्भूता न तारका
यावत्।
तेजःपरिहानिरुषा भानोरर्द्धोदयं यावत्॥"

अतएव केनापि मुनिना नानादेशीयसंग्रहकारेण च सन्ध्यासंक्रान्तित्वेन विशेषो नाभिहितः॥ * ॥ तदयं संक्षेपः। दिनसंक्रमणे तत्तत्र दिनं पुण्यम्। षड्शीतिमुखेऽतीते इत्यादुक्तं पुण्यतरं। मन्दा मन्दाकिनीत्यादिरूपेण विंशतुरादिघटिकाः पुण्यतमाः। दिनवृद्धौत्तरायणादिविहितविंशतिदण्डादीनां रात्रिप्रविष्टभागस्यापि पुण्यत्वम्। रात्रिसंक्रमणे तु कलान्यूनषष्यर्द्धरात्रगते तद्दिवसीयषष्ट्यामार्द्धं पुण्यम्। कलाद्वयात्मकमध्यरात्रगते तद्दिवसीयतिथेरभेदे तद्दिवसीयषष्ट्यामार्द्धं पुण्यम्। भेदे तु तद्दिवसीयषष्ट्यामार्द्धं, परदिवसीयाद्ययामार्द्धञ्च पुण्यम्। उभयदिने पुण्यकालेऽपि पूर्व्वदिनाकरण एव परदिने तद्विहितं कार्य्यम्। तिथिभेदाभेदयोर्द्वित्र्याद्यने तद्दिवसीयषष्ट्यामार्द्धं उत्तरायणे तु परदिवसीयाद्ययामार्द्धं पुण्यमिति। मध्यरात्रीयकलोत्तरषष्ट्यर्द्धरात्रसंक्रमणमात्रे तु परदिनाद्ययामार्द्धं पुण्यमिति। सन्ध्यासंक्रमणे तु दिनदण्डे दिनस्य रात्रिदण्डे रात्रेर्व्यवस्थेति॥ * ॥

ब्रह्मपुराणे।

"शुक्लपक्षस्य सप्तम्यां यदा संक्रमते रविः।
महाजया तदा प्रोक्ता सप्तमी भास्करप्रिया॥
स्नानं दानं तपो होमः पितृदेवाभिपूजनम्।
सर्व्वं कोटिगुणं प्रोक्तं तपनेन महौजसा॥"

अत्र।

"मासपक्षतिथीनाञ्च निमित्तानाञ्च सर्व्वशः।"

इत्यनेन प्राप्तितिथ्युल्लेखे तद्विशेषत्वेन महाजया इत्युल्लेखम्। संज्ञाविधेरेतदेव प्रयोजनं यत्तया निर्द्देश इत्युक्तत्वात्। एवञ्च संक्रान्तिविशेषस्य निमित्तत्वेन प्राप्तौ विष्ण्वादुल्लेखोऽपि॥ * ॥ स्कान्दे।

"एकान्ततो मया प्रोक्ताः कालाः संक्रान्तिसंज्ञकाः।
नैतेषु विद्यतेऽनिष्टं यतश्चाघक्षयंकराः॥
अश्रद्धयापि यद्दत्तं कुमात्रेभ्योऽपि मानवैः।
अकालेऽपि हि तत् सर्व्वं सत्यमक्षयतां व्रजेत्॥"

मात्स्ये।

"अयने कोटिगुणितं लक्षं विष्णुपदेषु च।
षड्शीतिसहस्रन्तु षड्शीत्यासुदाहृतम्॥
घृतमिक्षुरसे पुण्यं सहस्रन्तु दिनक्षये।
विषुवे घृतमाहस्रमा-का-मा-वैष्वनन्तकम्॥"

आ-का-मा-वैषु आषाढ़ीकार्त्तिकीमाघीवैशाखीपूर्णिमासु। देवीपुराणे।

"रविसंक्रमणे पुण्ये न स्नायाद्यस्तु मानवः।
सप्तजन्मसु रोगी निर्द्धनश्चोपजायते॥"

दीपिकायाम्।

"नाड़ीनक्षत्रदिवसे रविर्भोमगृहेश्वरः।
संक्रान्तिं यस्य कुर्व्वन्ति तस्य क्षोणोऽभिजायते॥
गोरुत्तमर्षभैः स्नानं सर्व्वौषधिजलेन च।
विधृतं काञ्चनं दद्यान्नाड़ीदोषोपशान्तये॥"

नाड़ीनक्षत्राणि चाद्यदशघोड़शाष्टादशत्रयोविंशतिषष्ठविंशतयः। रत्नमालायाम्।

"तारावलादिष्टरथेन्दुवीर्य्या-
द्दिवाकरः संक्रमणात् उक्तः।
ग्रहाश्च सर्व्वे सवितुर्व्वलेन
महीसुतायाः क्रमशः प्रशस्ताः॥"*

संवत्सरप्रदीपे।

"धुस्तूरवीजचलिलैः स्नायात् संक्रान्तिशान्तये।
तथा सर्व्वौषधीभिश्च विष्णुमन्त्रांश्च संजपेत्॥
यदाहि मेषसंक्रान्तिस्तुलासंक्रमणं निशि।
तदा प्रजा विपद्येत धनधान्यचतुष्पदैः॥
कुजार्कशनिवारेण महासंक्रमणं यदा।
तदा भवेत् प्रजानाशो दुर्भिक्षादिभयं महत्॥"

षट्त्रिंशन्मतनिगमौ।

"संक्रान्त्यां षष्टदण्डाश्च द्वादश्यां श्राद्धवासरे।
यत्नं न कुर्य्याच्च न च यत्नेन शोधयेत्॥
संक्रान्त्याश्च त्रयोदश्यां पश्चान्ते नवमीदिने।
सप्तम्यां रविवारे च स्नानमामलकैस्त्यजेत्॥"

प्रातातपः।

"रविवारे कर्कसंक्रान्त्यां षष्ठ्यां वै सप्तमीतिथौ।
आरोग्यकामस्तु नरो निम्बपत्रं न भक्षयेत्॥"*

कृत्यचिन्तामणौ गुणिसर्व्वस्वे च।

"चैत्रे मासि च सम्पूज्यो घण्टाकर्णो घटात्मकः।
आरोग्याय सुहौन्नत्यं संक्रान्त्यां तत्र कारयेत्॥"

पूजामन्त्रः।

"घण्टाकर्ण महावीर सर्व्वव्याधिविनाशन।
विस्फोटकभये प्राप्ते रक्ष रक्ष महाबल!॥"

शिवपुराणे।

"घण्टाकर्णो नमः श्रीमान् शिवस्यातीव-
वल्लभः॥"*

कृत्यचिन्तामणौ।

"मत्सरं निम्बपत्रञ्च योऽत्ति मेषगते रवौ।
व्यपि रोगान्वितस्तस्य तक्षकः किं करिष्यति॥"

संवत्सरप्रदीपे तूत्तरार्द्धे।

"मेषस्थे च विधौ तस्य नाश्नीयद्वै विषं भयम्॥"

स्मृतिः।

"मेषादौ प्रकृवो देया वारिपूर्णा च गागरी॥"

वारिदानमन्त्रः।

"एष धर्म्मघटो दत्तो ब्रह्मविष्णुशिवात्मकः।
अस्य प्रदानात् सफला मम सन्तु मनोरथाः॥
वैशाखे यो घटं पूर्णं सोदकं वै द्विजन्मने।
ददात्यमुष्मा राजेन्द्र स याति परमां गतिम्॥"

पूर्णं जलेनेति शेषः। महार्णवे।

"यो ददाति हि मेषादौ प्रकृतन्मृघटान्वितान्।
पितॄनुद्दिश्य विप्रेभ्यः सर्व्वपापैः प्रमुच्यते॥
विप्रेभ्यः पाठके क्षीरं पितृभ्यो विषुवे शुभम्।"

पितृभ्यः पितॄनुद्दिश्य इत्यर्थः। अत्र विषुवस्य पुण्यविशेषजनकत्वेन विवक्षितत्वात् मेषादाविति विषुवसंक्रान्तिपुण्यकालपरम्। अन्यथा कालद्वयकल्पनापत्तेः॥ * ॥ कर्म्मोपदेशिन्यां व्यासः।

"संक्रान्त्यां पक्षयोरन्ते द्वादश्यां श्राद्धवासरे।
सायंसन्ध्यां न कुर्व्वीत कृते च पितृहा भवेत्॥"

देवीपुराणे।

"अतीतानागतौ भोगौ नाघः षष्टदश स्मृताः।
सान्निध्यन्तु भवेत्तत्र ग्रहाणां संक्रमे रवेः॥
पुण्यपापविभागेन फलं देवी प्रयच्छति।"

भोगः पुण्यपापजननयोग्यकालः। पुण्यपापविवेचने विश्वामित्रः।

"यमार्य्याः क्रियमाणं हि शूद्रसन्त्यागमवेदिभिः।
स धर्म्मो यं विगर्हन्ति तमधर्म्मं प्रचक्षते॥"

आगमवेदिभिः क्रियमाणमिति सम्बन्धः। तान्त्रिकाश्च।

"विहितक्रियया साध्यो धर्म्मः पुंसो गुणो मतः।
प्रतिषिद्धक्रियासाध्यः स गुणोऽधर्म्म उच्यते॥"

अतएकस्मिन्नेव काले पुण्यपापफलदानदर्शनात् संक्रमणपुण्यकाल एव स्नानादिरित्यागमः। एवमेव गुरुचर्य्याः। एकादशीप्रकरणोक्तसंक्रान्त्युपवासस्तु प्रतत्वेन भावरूपत्वात् भाव

घटितत्वाद्दोभयथापि तत्र पूर्व्वे विधेर्वृत्तिरित्यनेन पुण्यकालयुक्ताहोरात्रकर्त्तव्यता अष्टम्युपवासवत्। एकादशीतत्त्वे एतद्बहुधा विस्तरम्। एवञ्च रात्रिप्रागर्द्धसंक्रान्तौ दिवाग्रेषार्द्धमात्रस्य तत्पुण्यकालत्वाद्रात्रिसुहृत्तार्द्धे सायं सन्ध्योपासनं कार्य्यमेव। *। ब्रह्मपुराणे।
"नित्यं हयोरयनयोर्नित्यं विषुवनोर्दयोः।
चन्द्रार्कयोर्यहणयोर्व्यतीपातेषु पर्व्वसु॥
अहोरात्रोषितः स्नानं आर्द्रं दानं तथा जपम्।
यः करोति प्रसन्नात्मा तस्य स्यादक्षयञ्च तत्॥"
अहोरात्रोषितः पूर्व्वदिने कृतोपवासः। एतत्परमेव।
"अर्द्धरात्रे व्यतीते तु संक्रान्तिर्यदहर्भवेत्।
पूर्व्वे व्रतादिकं कुर्य्यात् परेद्युः स्नानदानयोः॥"
इति भौमपराक्षरीयम्॥
स्नानदानयोरित्यत्र सप्तमीनिर्द्देशात् परदिवसीयस्नानदानादिनिमित्तकं पूर्व्वदिने उपवाससंयमरूपं व्रतादिकं कुर्य्यादित्यर्थः। इति तिथ्यादितत्त्वम्॥* अथ रविसंक्रान्तिगणनम्।
"नवाष्टशून्यहीनेन शकाब्दाङ्केन पूरिताः।
भूवेदागचन्द्रविकाग्नी कुरामौ वेदयुग्मके॥
१। १५। ३१। ३१। २४॥
अङ्का व्यनुपलादेस्तु षष्ठ्या लब्धाङ्कमिश्रिताः।
दण्डात् खाग्नी हृषेषु च ३०।५७ पलाहित्वा
ततः पुनः॥
सप्तावशिष्टा वाराः स्युस्ततो दण्डादिकाः परे।
मेषसंक्रमणे भानोः सिद्धान्तस्फुटसम्मताः॥
सुजौ षड्रिषू रामाग्नी २।५६।३३ कालो
जातिर्गजावनी।६।२२।१८।
रामषन्द्रोऽग्नियुग्मघ ३।१।०३ तर्कोऽङ्क दृङ्
नवाशुगौ॥६।०६।५६॥
द्वावङ्कदृग्वेदवाणा २।२६।५४ अब्धिर्वाणशरौ
सुराः।४।५५।३३।
यमाग्नवेदौ भूचन्द्रू ६।४८।१० एकं शैलभुवौ
शराः॥१।१७।५५॥
द्वौ षड्भौ तथा कालाः २।३६।६ अब्धी रामाः
शरावनी।४।३।१५।
षष्ठाग्नीषू तथा रदा ५। ५३। ११ मेषसंक्रमवारतः।
अङ्केर्योज्या हृषादेषु वाराद्याः संक्रमे रवेः॥"
इति ज्योतिस्तत्त्वम्॥
षड्क्रान्तिचक्रं. क्ली, (संक्रान्त्याश्चक्रम्।) नराणां शुभाशुभ-ज्ञानार्थनक्षत्राङ्कितनराकारचक्रम्। यथा,—
"मूर्द्धि षष्ठ सुखे चीणि हृदये पञ्च विन्यसेत्।
चितयं हस्तपादेषु मध्याविषुवभक्रमात्॥
मस्तके भूपतेः सौख्यं वदने पटुता सभे।
हृदये च धनाढ्यत्वोऽर्थप्राप्तिर्दक्षिणे करे॥
वामकरे महद्दुःखं सुखं पादे च दक्षिणे।
भ्रमणं पामपादे च कथितं विषुवत्फलम्॥"
इति मध्याविषुवचक्रम्॥*॥
"षड्मूर्द्धि वदने पञ्च चत्वारि हृदये तथा।
चितयं करपादेषु पयोविषुवभक्रमात्॥
मानं मूर्द्धि सुखे चैवं हृदये सुखसम्भवः।
दोः पदोर्दक्षयोर्भोगश्चासश्च वामयोः रुमे॥"
इति जलविषुवचक्रफलम्॥*॥
"शीर्षे पञ्च सुखे चीणि हस्तयोश्च त्रयं त्रयम्।
हृदि पञ्च ग्रशी नाभौ गुदे च पादयो रसाः।
उत्तरायणभाज्ञेयं खनक्षत्रस्थितेः फलम्॥
शीर्षेऽर्थलाभो वदने सुखानि
हृदे करेऽङ्घ्रौ हृदये च सौख्यम्।
नाभौ शुभं वामकरेऽर्थनाशो
गुह्ये भयं वामपदे प्रवासः॥"
इत्युत्तरायणचक्रफलम्॥*॥
"शीर्षे चीणि सुखे चीणि हृदये पञ्च हस्तयोः।
अष्टौ पादद्वयेऽप्यष्टौ दक्षिणायनभक्रमात्॥
शीर्षे मानं सुखे विद्या हृदये वित्तसञ्चयः।
प्रवासः स्यात् करे वामे भिक्षालाभश्च दक्षिणे।
निष्फलं वामपादे च किञ्चिल्लाभश्च दक्षिणे॥"
इति दक्षिणायनचक्रफलम्॥*॥
"ऋक्षे संक्रमणं यत्र विष्णुपद्यां सुखे च तत्।
चत्वारि दक्षिणे बाहौ चीणि चीणि पदद्वये॥
चत्वारि वामबाहौ च हृदये पञ्च निर्द्दिशेत्।
अक्षणोर्द्वयं द्वयं योज्यं मूर्द्धि द्वौ चैककं
गुदे॥
रोगो भोगस्तथा यानं वस्त्रं लाभ एव च।
ऐश्वर्यं राजपूजा च अपस्मृतिरिति क्रमात्॥"
इति विष्णुपदीचक्रफलम्॥*॥
"सुखे चैकं करे वेदाः पादयुग्मे द्वयं द्वयम्।
क्रोडे वाणस्तथा वेदाः करे सप्तैतरेऽपि च॥
द्वयं द्वयं तथा नेत्रे मस्तके चितयं तथा।
द्वयञ्चैव तथा गुह्ये षड्ग्रीत्यां स्वभे स्थिते॥
सुखे दुःखं करे लाभः पादयोर्भ्रमणं हृदि।
कान्ता स्याद्वस्त्रं वामे हस्ते स्यात् स्त्रीयभे
नृणाम्॥
सन्मानं नेत्रयोश्चैव अपमानश्च मस्तके।
गुह्ये चैव भवेन्मृत्युः षड्ग्रीतिफलस्मृतिः॥"
इति षड्ग्रीतिचक्रफलम्॥*॥
इति ज्योतिस्तत्त्वम्।
षट्क्रामः, पुं, (सं+क्रम+घञ्।) दुर्गासुरः। इति हेमचन्द्रः॥
षट्क्लेदः, पुं, (सं+क्लिद्+घञ्।) आर्द्रीभावः। (यथा, हरिवंशे। ५३। ४२।
"अनया मह जाह्नव्या मोदमानो ममाज्ञया।
इमं सलिलसंक्लेदं विसारिष्यसि सागर!॥")
सङ्ख, क्ली, (सम्यक् ख्यायतेऽनेति। सं+ख्या+बाहुलकात् कः।) युद्धम्। इत्यमरः॥ (यथा, गीतायाम्। १। ४६।
"एवमुक्त्वार्জ্জুनः संख्ये रथोपस्थ उपाविशत्॥")
संज्ञायाम्, त्रि॥
सङ्खता, स्त्री, सङ्खत्वम्। सङ्ख्यता। सङ्खशब्दात् भावे तप्रत्ययेन निष्पन्नम्॥
सङ्खा, स्त्री, (संख्यायतेऽनयेति। सं+ख्या+अङ्। टाप्।) बुद्धिः। इति शब्दरत्नावलिः॥
विचारणा। इत्यमरः॥ (यथा, महाभारते। २। ५७। ७।
"यो वेत्ति संख्यां निहतौ विधिज्ञ-
श्चेष्टास्वखिन्नः कितवोऽचलासु।
महामतिर्यश्च जानाति द्यूतं
स वै सर्व्वं सहते प्रक्रियासु॥")
शकत्वादिः। इति मेदिनी॥ सङ्ख्येये, त्रि। यथा,—
"विपणो विक्रयः सङ्खा सङ्ख्येये स्त्रादश त्रिषु।
विंशत्याद्याः सदैकत्वे सर्व्वाः सङ्ख्येयसञ्ज्ञयोः॥
सङ्ख्यार्थे द्विबहुत्वे स्तस्तासु चानवतेः स्त्रियः।
षड्लक्षेः शतसहस्रादि क्रमाद्दशगुणोत्तरम्॥"
इति चामरः॥
"आदश दशशतिपर्य्यन्तं अष्टादश यावत् एकादिकाः संख्याशब्दाः संख्येये द्रव्ये वर्त्तन्ते। त्रिषु लिङ्गेषु तेन संख्यासंख्येययोः समानाधिकरण्येन वृत्तिः। यथा एका शाटी एकः पटः एकं कुण्डम्। द्वि शब्दो अवधारणे संख्येय एव नतु संख्यायामित्यर्थः। तेन घटा दश इति साधुर्न घटानां दशेति। किन्तु द्वैकयोर्द्विवचनैकवचने इति सूत्रे द्वैकयोरिति निर्द्देशात् संख्यामात्रेऽपि सम्भव इति भाष्यम्। घटानां पञ्च इत्यपि स्यादिति सुभूतिः। 'वार्त्ताकुरेषा गुणसप्तयुक्ता' इति वैद्यकम्। आड् शब्देन दशशब्दस्याव्ययीभावः। दशशब्दस्य त्रिलिङ्गत्वात् नपुंसकत्वपक्षे क्लीवादेति पक्षे यः तेन आदशं आदशेति पाठः। विंशः। अष्टादशपरा विंशत्याद्याः सर्व्वा एव संख्याः संख्यायां संख्येये च नित्यमेकवचनान्ता भवन्ति यथा विंशतिर्गावः गवां विंशतिः। संख्या। इह संख्या संख्यान्तरं अन्यथा पूर्व्वेण विरोधः स्यात् संख्या अर्थः अभिधेयो यस्य स संख्यार्थः तत्र संख्यार्थे विंशत्यादौ संख्यायां संख्येये च सामानाधिकरण्यात् द्विवचनबहुवचने भवतः यथा द्वे विंशती गावः गवां वा तिस्रो विंशतयो गावः गवां वा एवं द्वे शते दश शतानीत्यादि। अयमभिप्रायः यदा विंशत्यादीनामनाद्यत्तिरेकैव विंशतिरेकमेव शतमित्येवं स्यात् तदा पूर्व्वेण एकवचनान्ततैव यथोक्तं विंशतिर्गावः गवां विंशतिरिति। यदा विंशत्यादेरावृत्तिर्विंशतिद्वयं शतद्वयमित्येवं स्यात् तदा अनेन द्विवचनबहुवचनान्तता स्यात् यथोक्तं द्वे विंशती तिस्रो विंशतयः। अत्रैव परे परिभाषन्ते। विंशत्यादेरावृत्तौ बहुत्वेऽप्येकवचनं इति। एकशेषात् द्वे विंशती तिस्रो विंशतयः इत्यप्येव। स्वमतेऽपि आदयः संख्याशब्दा व्याख्याता इत्युक्तेः टेर्लोप इति सूत्रे विंशतेस्तेस्त्वभावेति द्विवर्जनेनैव एकवचनान्तताज्ञापकात् बहुत्वानि इत्यनेन बाहुल्यं द्वित्वबहुत्वसम्भवाच्चायमर्थोऽवगम्यः। तासु संख्यासु विंशत्याद्या नवत्यन्ताः स्त्रीलिङ्गाः भिन्नलिङ्गैरपि सामानाधिकरण्ये स्त्रिय एव

यथा विंशत्या पुरयेः विंशतिः कुलानीति विंशतिः त्रुटिरष्टाविंशतियावत् एवं त्रिंशत् त्रुटिरष्टाविंशदृयावत् एवं चत्वारिंशदादौ। षट्त्रिंशदशसङ्ख्या नामारभ्य परार्द्धान्तं दशगुणोत्तरं दशगुणाधिकं क्रमात् शतसहस्रादि भवति। क्रमादितिपदोपादानादयमर्थः एकं दशगुणितं षड्क्तिरुच्यते। दशषड्क्त्यः शतम्। दशशतानि सहस्रम्। एवं दशगुणितं सहस्रमयुतम्। एवं लक्षनियुतादि ज्ञेयम्। तथा च। ब्रह्माण्डपुराणम्।

'एकं दश शतञ्चैव सहस्रमयुतं तथा।
लक्षञ्च नियुतञ्चैव कोटिरर्बुदमेव च॥
वृन्दः खर्व्वो निखर्व्वश्च शङ्खश्चौ च जलधिः।
अन्त्यं मध्यं परार्द्धञ्च दशवृद्ध्या यथाक्रमम्॥'

शतं तालव्यप्रकारम्। सहस्रं हिदन्त्यसकारम्।" इति भरतः॥ ७॥ न्यायमते सङ्ख्या गणनव्यवहारे कारणत्वम्। एकत्वं नित्यवस्तुनि नित्यम्। अन्यत्र अनित्यम्। द्वित्वादिपरार्द्धपर्य्यन्तं अपेक्षाबुद्धिर्ज्ञायते। एवं अपेक्षाबुद्धिनाशे तेषां नाशः। पर्य्याप्तिसम्बन्धेन अनेकाश्रये तिष्ठन्ति। यथा,—

"गणनव्यवहारे तु हेतुः संख्या विधीयते;
नित्यञ्च नित्यमेकत्वमनित्यैरनित्यमिष्यते॥
द्वित्वादयः परार्द्धान्ता अपेक्षाबुद्धिजा मताः।
अनेकाश्रयपर्य्याप्ता एते तु परिकीर्त्तिताः॥
अपेक्षाबुद्धिनाशाच्च तेषां नाशो निरूपितः।
अनेकैकत्वबुद्धिर्या सापेक्षा बुद्धिरुच्यते॥"

इति भाषापरिच्छेदः॥ ८॥

अपि च।

श्रीमैत्रेय उवाच।

"परार्द्धसंख्यां भगवन्! मम ब्रूहि यथा तु वः।
द्विगुणीकृतया ज्ञेयः प्राकृतः प्रतिसञ्चरः॥

श्रीपराशर उवाच।

स्थानात् स्थानं दशगुणमेकस्मादुपजायते द्विज।
तत्तोऽपरादशगुणे भागे परार्द्धमभिधीयते॥
परार्द्धद्विगुणं यत्तु प्राकृतः प्रलयो द्विज।
सहायत्वेऽस्य यत्तं सङ्गतौ लयमेति वै॥"

इति विष्णुपुराणे ६ अंशे ३ अध्यायः॥

सङ्गातं, त्रि, (सं+खा+क्तः।) सङ्गतसङ्ख्यम्। तत्पर्य्यायः। गणितम् २। इत्यमरः॥ (यथा, भागवते। ६। १४। ३।

"दृष्टीभिः समसंख्याभिः पार्थिवैरिव जन्तवः।
तेषां वै किमनेनेह श्रेयो वै मनुवादयः॥")

सङ्ख्यानं, क्ली, (सं+ख्या+ल्युट्।) सङ्ख्या। संपूर्णसंख्याबोधकशब्दप्रयोगेण निष्पन्नम्॥ (यथा, मनुः। ८। ४००।

"निष्पावादौ च संख्याने दाम्भिकत्वमनल्पकम्॥"

यथा, भागवते। ५। २०। १०।

"ऊँ नमो भगवते महापुरुषाय सर्व्वगुणसंख्यानायारब्धसात्त्विकाय नम इति॥"

"सर्व्वेषां गुणानां संख्यानं प्रकाशो भवति॥"

इति मत्स्यपुराणे।)

सङ्गतं, त्रि, (सं+खा+क्तः।) सङ्ख्यातम्। गणितम्। इति मेदिनी॥ (यथा, काशीखण्डे। ८२। ८।

"रत्नाङ्गदे हतानाम्नः सङ्ख्यातीतं सदोचिरे॥")

सङ्ख्येयं, त्रि, (संख्यातुं योग्यमिति। सं+ख्या+यत्।) सङ्ख्यायोग्यम्। तत्पर्य्यायः। गण्येयम् २ गणनीयम् ३। इति जटाधरः॥ गण्यम् ४। इति हेमचन्द्रः॥ (यथा, साहित्यदर्पणे। ४। २५५।

"एकोऽपि भेदोऽनन्तत्वात् सङ्ख्येयस्तस्य नैव यत्॥")

सङ्गः, पुं, (सङ्ग सङ्गे+घञ्।) मेलनम्। तत्पर्य्यायः। मेलकः २ सङ्गमः ३। इत्यमरः॥ (यथा, देवीभागवते। १। २०। ६७।

"अम्बिका च यदा स्नाता गौरी ऋतुमती तदा।
सङ्गं प्राप्य तुनः पुंसमङ्गतानां महाबलम्॥")

रागः। यथा। "रागसङ्गौ तु रञ्जता।" इति त्रिकाण्डशेषः॥ (यथा, कुमारे। १। २७।

"अनन्तपुष्पस्य मधोर्हि चूते
द्विरेफमाला सविशेषसङ्गा॥"७॥)

सङ्गदोषो यथा,—

"स मे समाधिर्व्वलवानमित्र-
मत्सस्य सङ्गात् सहसैव नष्टः।
परिग्रहः सङ्गकृतो ममायं
परिग्रहोत्थाच्च महाविवित्साः॥"

इति विष्णुपुराणे ४ अंशे २ अध्यायः॥

अन्यच्च।

"यद्योऽस्य दारसंयोगः कर्त्तव्यं तन्दुरेतवः।
दृष्ट्वा तयोच्च सङ्गारं मुनिः कामी बभूव ह।
जितेन्द्रियेऽसतां सङ्गात् दोषः सांसर्गिको भवेत्॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे २१ अध्यायः॥

अपि च।

"यमनां सङ्गदोषेण को न याति पराभवम्।
विद्वद्भिर्व्वन्दितो यद्भिर्भक्तगा सहितो यया॥"

इति ज्योतिस्तत्त्वम्॥

सङ्गतिका, स्त्री, अप्रतिरूपकथा। इति त्रिकाण्डशेषः॥

सङ्गतं, क्ली, (सं+गम्+क्तः।) साधारणम्। इति हेमचन्द्रः॥ (यथा, कुमारे। ५। ३८।

"यतः सतां सङ्गतमार्य्य! सङ्गतं
मनीषिभिः साप्तपदीनमुच्यते॥")

युक्तियुक्तवाक्यम्। इति भरतः। तत्पर्य्यायः। सुसदृक्षसम् २। इत्यमरः। १।६।१८॥ (मौक्तिकग्रीवाभरणविशेषे, पुं। यथा, भागवते। १२। ११। १३।

"लक्ष्मा भविता यस्य सङ्गतः कृष्णसूनुः॥")

सङ्गतिः, स्त्री, (सं+गम+क्तिन्।) सङ्गमः। ज्ञानम्। इति मेदिनी॥ न्यायमते। व्यावर्त्तकाभिधानप्रयोजकजिज्ञासाजनकज्ञानविषयो ज्ञेयः। घा च घोड़ा। प्रसङ्गः। १। सङ्गतित्वे सति उपोद्घातादिभिन्नः। यथा सामान्यलक्षणाद्यां प्रसङ्गसङ्गतिः। उपोद्घातः २। निर्द्दिष्टोपपादकत्वम्। यथा परामर्शप्रयोजकज्ञाने च उपोद्घातसङ्गतिः। हेतुता ३। यथा। प्रत्यक्षप्रमाणे हेतुतासङ्गतिः। अवसरः ४। अनन्तरवक्तव्यत्वम्। यथा। उपमाने अवसरसङ्गतिः। निर्व्वाहकम् ५। कारणतानिर्व्वाहकं कार्य्यत्वम्। यथा। अनुमाने कार्य्यतासङ्गतिः। एककार्य्यत्वम् ६। एककार्य्यकारित्वम्। यथा हेत्वाभासे एककार्य्यकारित्वसङ्गतिः। इति अनुमितितत्त्वे जगदीशतर्कालङ्कारः॥ (मेलनम्। यथा, मोहमुद्गरे। ६।

"क्षणमिह सज्जनसङ्गतिरेका
भवति भवार्णवतरणे नौका॥"

युक्तिः। यथा,—

"त्वमद्य भव नो राजा राजपुत्र महायशः।
सङ्गत्या नापराप्नोति राज्यमेतदनायकम्॥"

इति रामायणे। २। ७८। ३॥)

सङ्गमः, पुं, क्ली, (सं+गम+"अवृदृसृत्रिगमश्च।" ३। ३। ५८। इति अप्।) सङ्गः। इत्यमरः॥ (यथा, साहित्यदर्पणे।

"सङ्गमविरहविकल्पे वरमिह विरहो न सङ्गमस्तस्याः।
सङ्गे सैव तथैका त्रिभुवनमपि तन्मयं विरहे॥")

नद्यादिमेलकः। इति पुंनपुंसकलिङ्गसंग्रहटीकायां भरतः॥ स्त्रीपुंसोर्मिथुनीभावः। स त्रिविधः। प्रथमः १। मध्यमः २। उत्तमः ३। यथा,—

"त्रिविधं तत्समाख्यातं प्रथमं मध्यमोत्तमम्।
अदेशकालमाधारनिर्व्वर्त्तने च परस्त्रियाः।
कटाक्षावेक्षयं ह्रस्वं प्रथमं साधनं स्मृतम्॥१
प्रेरणं गन्धमाल्यानां धूपभूषणवाससाम्।
प्रलोभनञ्चान्नपानैर्मध्यमं साधनं स्मृतम्॥२
सहासनं विविक्तेषु परस्परसमाश्रयः।
कैशाकेशिग्रहश्चैव सम्भोगसंग्रहणं स्मृतम्॥३॥

इति मिताक्षराधृतव्यासवचनम्॥

सङ्गरं, क्ली, (संगीर्य्यते इति। सं+गृ+अप्।) ग्रसौदनम्। इति मेदिनी॥

सङ्गरः, पुं, (संगच्छन्ति शब्दायन्ते वीरा यत्र। सं+गृ शब्दे+अप्।) युद्धम्। (यथा, कथासरित्सागरे। ३१। ८१।

"सङ्कटे हि परीक्ष्यन्ते प्राज्ञाः शूराश्च सङ्गरे॥")

अङ्गीकारः। (यथा, रघुः। १५। २८।

"तथेति सख्या विनयं प्रतीतः
प्रत्यग्रहीत् सङ्गरमग्रजस्य॥")

संवित्। इत्यमरः॥ क्रियाकारः। विषम्। इति मेदिनी॥

सङ्ग्राम

स्त्रीणान्तु वन्ध्यामयनाशनः स्यात्
कल्याणको नाम गुडः प्रसिद्धः ॥
तेषे मनाक् चित्रकं भक्षयन्वि पलं पञ्चमम् ।
सिद्धे निधेयमत्रैव गुडे कल्याणपूर्वके ॥"
इति कल्याणकगुडः ॥ ७ ॥

"पिप्पली पिप्पलीमूलं चव्यकं गजपिप्पली ।
धान्यकञ्च विडङ्गानि यवानी मरिचानि च ॥
त्रिफला चाजमोदा च नलिनी क्षीरकल्पधा ।
मैलत्वक् रौमकं चापि सामुद्रं रुचकं विडम् ॥
आरग्वधश्च त्वक् पत्रं स्वर्णक्षीरा चोपकुञ्चिका ।
शुण्ठी शुक्लयवाश्चैव प्रत्येकं कर्षसम्मिता ॥
गुडीकायाः पलान्यत्र चत्वारि कथितानि हि ।
चित्रकायाः पलान्यष्टौ गुडस्यार्द्धतुला मता ॥
सिद्धतैलपलान्यष्टौ चामलक्या रसस्य तु ।
प्रस्तावयमिदं सर्वं भृष्टैर्द्रव्यैर्विना पचेत् ॥
उदुम्बरं चामलकं बादरं वा यथाफलम् ।
तावच्चात्रमिदं खादेद्भक्षयेद्वा यथानलम् ॥
निखिलान् ग्रहणीरोगान् प्रमेहांश्चैकविंशतिम् ।
उरोघातं प्रतिश्यायं दौर्बल्यं वह्निसंक्षयम् ॥
ज्वरानपि हरेत् सर्व्वान् कुर्य्यात् कान्तिं मतिं स्मरम् ।
पिप्पलीपाठान्वयाद्यन्ति रक्तपित्तक्षयं हरेत् ॥
धातुक्षीणो वयःक्षीणः स्त्रीषु क्षीणः क्षयी क्षयः ।
तेभ्यो हितश्च वन्ध्यायै महाकल्याणको गुडः ॥"
इति महाकल्याणकगुडः ॥ ८ ॥

"कृष्णाद्यानां मयूखानां चित्रकाणां लिकुचत्वचाम् ।
सर्पिःप्रस्थे पलशतं ताम्रपात्रे घृतेः पचेत् ॥
पिप्पली पिप्पलीमूलं चित्रकं गजपिप्पली ।
धान्यकानि विडङ्गानि नागरं मरिचानि च ॥
त्रिफला चाजमोदा च कलिङ्गाजाजिसैन्धवम् ।
एकैकस्य पलं चैकं त्रिवृतोऽष्टपलानि च ॥
तैलस्य च पलान्यष्टौ गुडात् पथ्याप्रदेव तु ।
चामलक्या रसस्यात्र प्रस्थत्रयमुदीरितम् ॥
तावत् पाकं प्रकुर्व्वीत मृदुना वह्निना भिषक् ।
यावत् दर्व्वीप्रलेपः स्यात् तदेनमवतारयेत् ॥
औदुम्बरं चामलकं बादरं वा यथाफलम् ।
तावच्चात्रमिदं खादेद्भक्षयेद्वा यथानलम् ॥
अनेनैव विधानेन प्रयुञ्जश्च दिने दिने ।
निहन्ति ग्रहणीरोगान् कुष्ठान्यर्शोभगन्दरान् ॥
ज्वरमानाहगुल्मोदरविसूचिकाः ।
कामलां पाण्डुरोगञ्च प्रमेहांश्चैकविंशतिम् ॥
शोषश्लीपदवीसर्पदद्रूपक्षुद्रकीलकान् ।
रक्तपित्तकफान् सर्व्वान् दुष्टान् शुष्कान् समाचरेत् ॥
व्याधिक्षीणा वयःक्षीणा स्त्रीषु क्षीणाश्च ये नराः ।
तेभ्यो हितो गुडोऽयं स्यात् वन्ध्यानामपि पुत्रदः ।
दृष्ट्वा बलो दृढश्चैव वयसः प्रागपरः ॥"
इति कृष्णाद्यकल्याणगुडः ॥ ९ ॥

अतीसाराधिकारलिखितं विल्वं तैलञ्चाच्छितम् । इति ग्रहणीरोगाधिकारः । इति भावप्रकाशः ॥

सङ्ग्राम, क + न् + घञ् । युद्धे । इति कविकल्पद्रुमः ॥ (अदन्तपुरा०-आत्म०-उभ०-ए-अक०-सेट् ।)

सङ्घट्टः

अस्तसंग्रामात् । ए, संग्रामयते । प, संग्रामयति संग्रामयते । पितेवोभयपदसिद्धौ डित्करणं चक्रलवत्कर्त्तरि आत्मनेपदार्थम् । एवं सर्व्वत्र । किन्तु अयमात्मनेपदीति प्राहः कदाचित् परस्मैपदार्थो णकारः । इति दुर्गादासः ॥

सङ्ग्रामः, पुं, (सङ्ग्राम + णिच् + भावे घञ् ।) युद्धम् । इत्यमरः ॥ (यथा, मनुः । ७ । ८७ ।
"न निवर्त्तेत संग्रामात् क्षात्रं धर्म्ममनुस्मरन् ॥")

सङ्ग्रामपटहः, पुं, (सङ्ग्रामस्य पटहः ।) रणवाद्यम् । यथा, त्रिकाण्डशेषे ।
"रणतूर्य्यन्तु संग्रामपटहोऽभवदिण्डिमः ।"

सङ्ग्रहः, पुं, (संग्रहणमिति । सं + ग्रह + "समि मुष्टौ ।" ३ । ३ । ३६ । इति घञ् ।) फलकस्य मुष्टिः । फलकग्रहणस्थानमिति यावत् । मुष्टिबन्धनक्रिया । तत्पर्य्यायः । मुष्टिबन्धः २ । इति मुष्टिबन्धनक्रियायाम् । मुष्टेर्बन्धोऽङ्गुलिविन्यासो मुष्टिबन्धः । मुष्टिना बन्धो दृढग्रहणं संग्रह इत्यपरे । मुष्टामेव संग्रह इत्यन्ये । मुष्टिः स्त्रियाञ्च संग्रह इति मेदिनीतः । संपूर्व्वग्रहेर्घञ् संग्रहः । इत्यमरभरतौ ॥ (यथा, महाभारते । ५ । १५४ । २० ।
"सुसंग्राहाः सुसम्पन्ना हैमभाण्डपरिच्छदाः ।"
"प्रहर्षिणो नराश्चैव बभूवुर्हैमसाजिनः ॥")

सङ्ग्राही, [न्] पुं, (संग्रह्णाति गच्छति । सं + ग्रह + णिनिः ।) कुटजवृक्षः । इति राजनिर्घण्टः ॥ (गतसञ्चारके, त्रि । यथा, तन्त्रे । १ । ४५ ।
"दीपनं लघु संग्राहि श्लेष्मकाशश्वासनुत् ॥"
संग्राहके, त्रि । यथा, कामन्दकीये । ४ । १० ।
"प्रख्यातवंशमक्रूरं लोकसंग्राहिणं शुचिम् ।
कुर्व्वीतात्महिताकाङ्क्षी परिवारं महीपतिः ॥")

सङ्घः, पुं, (सं + हन + "संघोद्धौ गणप्रशंसयोः ।" ३ । ३ । ८६ । इति घप् टिलोपो धत्वञ्च निपात्यते ।) समूहः । इत्यमरः ॥ सजातीयानां विजातीयानाञ्च जन्तूनां वृन्दे सङ्घार्थौ स्याताम् । यथा भिक्षुसङ्घः वणिक्सङ्घः । संहन्यते परिच्छिद्यतेऽनेनेति सङ्घः । संपूर्व्वात् हन्धातोर्नाम्नीति दः निपातनात् धस्य घः । इति भरतः ॥ (यथा, महाभारते । १ । १२० । ११ ।
"तत्रापि तपसि श्रेष्ठे वर्त्तमानः स वीर्य्यवान् ।
सिद्धचारणसङ्घानां बभूव प्रियदर्शनः ॥")

सङ्घचारी, [न्] पुं, (सङ्घेन चरतीति । चर + णिनिः ।) मत्स्यः । इति हेमचन्द्रः ॥ बहुभिः सङ्घमागिति, त्रि ॥ (यथा, महाभारते । ६ । ११ । २६ ।
"ततस्तद्युद्धमत्युग्रमभवत् सङ्घचारिणाम् ॥")

सङ्घजीवी, [न्] पुं, (सङ्घेन जीवतीति । जीव + णिनिः ।) वानीमः । इति हेमचन्द्रः ॥

सङ्घट्टः, पुं, (सं + घट्ट + घञ् ।) व्यूहविशेषः । यथा,—
"नैवाश्वगा नरान्यिन्नुरघटासङ्घट्टसंघट्टनात्
कारंकारमसक्तवैरिनिवहालम्बस्तुतिर्भूपतिः ।"
इति वाल्मीकिरामायणटीकायां गङ्गाधरः ॥

सङ्घातः

गठनम् । यथा,—
"दृष्टान्तरणसङ्घट्टनिष्ठाङ्गागमेव च ।
रूपणं पूजनञ्चैव विसर्ज्जनमतः परम् ॥"
इति तिथ्यादितत्त्वं चक्रविशेषश्च ॥

सङ्घट्टचक्रं, क्ली, (संघट्ट एव चक्रम् ।) युद्धविचारार्थनक्षत्राङ्कितचक्रविशेषः । यथा,—
"अश्विन्यादि लिखेच्चक्रं सप्तविंशतितारकैः ।
त्रिकोणं नवभिर्भेदैः कर्त्तव्यस्तिर्य्यगाकृतिः ॥
अश्विनीरेवतीवेधो भरिणीज्येष्ठयोस्तथा ।
मघापूषणोः सर्पपित्र्योरग्नेयान्त्यलयोस्तथा ॥
ज्येष्ठाश्लेषकयोर्व्वेधो भवेत् सङ्घट्टचक्रके ।
एवं सङ्घट्टचक्रं च कार्य्यं ऋक्षज्ञता मया ॥
भूषणामर्च्चसङ्घट्टे युद्धं भवति नान्यथा ।
निर्व्वेधे सौम्यवेधे च युद्धं नास्ति रणेजयः ॥
क्रूरवेधे भवेद्युद्धं तत्काले घोरदारुणम् ।
युद्धाकाङ्क्षी भवेद्राजा यस्य भं क्रूरवेधितम् ॥
युद्धहेधी भवेत् सौम्यैर्भं च वेधविवर्ज्जितं ।
सौम्यक्रूरविभागेन मिश्रामिश्रक्रमेण च ।
वक्रातिचारगत्या च युद्धमत्रास्ति नास्ति च ॥"
इति स्वरोदये सङ्घट्टकालानलचक्रम् ॥

सङ्घट्टनं, क्लो, क्ली, (सं + घट्ट + ल्युट् । स्त्रियां युप् ।) मेलनम् । गठनम् । घटना । इति केचित् ॥ (यथा, साहित्यदर्पणे । ८ । ६२४ ।
"यदसंघट्टना रीतिरङ्गसंख्याविशेषवत् ।
उपकर्त्तृत्वं रसादीनां सा पुनः स्याच्चतुर्विधा ॥")

सङ्घट्टा, स्त्री, (संघट्टते इति । सं + घट्ट + अच् + टाप् ।) लता । इति शब्दचन्द्रिका ॥

सङ्घतलः, पुं, (सङ्घे संघते तले यस्य ।) मिलितप्रतलद्वयम् । इत्यमरः ॥ योड़ हात इति भाषा ॥

सङ्घपुष्पी, स्त्री, (संघानि पुष्पाणि यस्याः ।) धातकी । इति राजनिर्घण्टः ॥

सङ्घर्षः, पुं, (सं + घृष + घञ् ।) सङ्घर्षणम् । (यथा, महाभारते । १ । १८ । २३ ।
"तेषां सङ्घर्षजाग्निरर्च्चिर्भिः प्रज्वलन् मुहुः ।
विद्युद्भिरिव नीलाभ्रमाक्षणोत् मन्दरं गिरिम् ॥")
स्पर्द्धा । (यथा, महाभारते । १ । ७६ । ५ ।
"सुराणामसुराणाञ्च समजायत वै मिथः ।
ऐश्वर्य्ये प्रति संघर्षस्त्रैलोक्ये सचराचरे ॥")
संसर्गः । इति शब्दरत्नावली ॥

सङ्घाटिका, स्त्री, (संघाटयतीति । सं + घट + णिच् + ण्वुल् । टाप् ह्रस्वश्च इत्वम् ।) युग्मम् । कुट्टनी । जलकण्टकम् । इति मेदिनी ॥ प्राग्रम् । इति विश्वः ॥

सङ्घातः, पुं, (सं + हन + घञ् ।) समूहः । (यथा, कुमारे । ५ । ५५ ।
"न ह्यातु बाला लभते सा निर्वृतिं
तुषारसङ्घातशिलातलेष्वपि ॥")
नरकभेदः । इत्यमरः ॥ हननम् । इति मेदिनी । (विरुद्धसंयोगः । यथा, कुमारे । २ । ११ ।
"अयः सङ्घातकठिनः स्पृशः सन्तापिनो मृदुः ।
अङ्गो अङ्गेश्वरश्चापि प्राकाश्यं ते विभूतिषु ॥")

सञ्चारी

सञ्चलनं, न्ली, कम्पनम्। सपूर्ब्बचलधातोरनट्-(ल्युट्)प्रत्ययेन निष्पन्नम्। (यथा, मार्कण्डेये। ८१।१८।

"केचिद्गुरिनिपातेन केचिदौषधिवारिणा।
कोपतः सहसञ्चलनात् प्रयुयुः प्राणिनः क्षयम्॥")

सञ्चानः, पुं, श्लेष्मपक्षी। इति केचित्। शिक्रे इति भाषा।

सञ्चाय्यः, पुं, (संचीयतेऽस्मिन् सोम इति। सं+चि+"क्रतौ कुण्डपाय्यसञ्चाय्यौ।" ३।१।१३०। इति ण्यदायादेशौ निपात्येते।) यज्ञविशेषः। इति सुग्धबोधव्याकरणम्॥

सञ्चारः, पुं, (सं+चर+घञ्।) दुर्गसञ्चरः। इत्यमरटीका॥ गमनम्। यथा। सञ्चारो रतिमन्दिरावधि इत्यादि काव्यप्रकाशः॥ (यथा, रघुः। २।१५।

"सञ्चारपूतानि दिगन्तराणि
कृत्वा दिनान्ते निलयाय गन्तुं
प्रचक्रमे पल्लवरागताम्रा
प्रभा पतङ्गस्य मुनेश्च धेनुः॥")

अवहादे राज्ञान्तरसंक्रमणम्॥ (यथा, याज्ञवल्क्ये। ३।१७२।

"तारानक्षत्रसञ्चारैर्ज्ञातरैः स्वप्नजैरपि॥"॥

सञ्चरत्यस्मिन्निति। अधिकरणे घञ्। देशः। इति रामायणटीका॥ यथा, रामायणे। २।११६।१८।

"तावूचुस्ते वनचरास्तापसा धर्मचारिणः।
वनस्य तस्य सञ्चारं राघवैः सममिच्छतम्॥")

सञ्चारजीवी, [न्] त्रि, (सञ्चारेण जीवतीति। जीव+णिनिः।) धूर्त्तापजः। इति त्रिकाण्डशेषः॥

सञ्चारिका, स्त्री. (सञ्चारयति गायकयोर्भावमिति। सं+चर+णिच्+ण्वुल्।) दूती। इत्यमरः॥ शुगलम्। कुट्टनी। प्राण्यम्। इति मेदिनी॥

सञ्चारी, [न्] पुं, (सञ्चरतीति। सं+चर+णिनिः।) धूपः। इति त्रिकाण्डशेषः॥ वायुः॥ इति शब्दचन्द्रिका॥ भावविशेषः। यथा,—

"स्थायिसात्त्विकसञ्चारिप्रभेदैः स्यान्नृतिः पुनः।"
इति हेमचन्द्रः॥

अन्यच्च।

"सञ्चारिणः प्रधानानि देवादिविषया रतिः।
उद्बुद्धमात्रस्थायी च भाव इत्यभिधीयते॥'

अपि च।

"नानाभिनयसम्बन्धान् भावयन्ति रसान् यतः।
तस्माद्भावा इमे प्रोक्ताः स्थायिसञ्चारि-
सात्त्विकाः॥"

वात्सल्यरसस्य सञ्चारिणो यथा,—

"सञ्चारिणोऽत्रिधृत्याद्यर्थगर्ज्जादयो मताः॥"

वीररसस्य सञ्चारिणस्तु। "धृतिमतिगर्ब्बस्मृतितर्क-रोमाद्याः।" इति साहित्यदर्पणे ३ परिच्छेदः॥ (गतिशीले, त्रि। यथा, गीतगोविन्दे। ६। १२।

"अङ्गव्यापारणं करोति बहुशः पश्येऽपि सञ्चारिणि
प्राप्तं त्वां परिशङ्कते वितनुते श्रव्यां चिरं ध्यायति॥")

सञ्चारिणी, स्त्री, (सञ्चरतीति। सं+चर+णिनिः। ङीप्।) हंसपदी। इति राजनिर्घण्टः॥ (गतिशीला। यथा, कुमारे। ३।५४।

"पर्य्याप्तपुष्पस्तवकावनम्रा
सञ्चारिणी पल्लविनी लतेव॥")

सञ्चाली, स्त्री, गुञ्जा। यथा,—

"सञ्चाली प्रोच्यते गुञ्जा सा तिक्ता रूपकं
भवेत्॥"
इति युक्तिकल्पतरुः॥

सञ्चित्रा, स्त्री, (सम्यक् चित्रमस्यामिति।) स्त्रीकर्णी। इति शब्दरत्नावली॥

सञ्चेयं, त्रि, सञ्चयनीयम्। सञ्चेतव्यम्। संपूर्ब्बकचिधातोः कर्म्मणि यत्प्रत्ययेन निष्पन्नम्॥

सञ्जः, पुं, (सम्यक् जायते इति। सं+जन+डः। सम्यक् जयतीति। जि+अन्येष्वपीति वा डः।) ब्रह्मा। शिवः। इति मेदिनी॥

सञ्जवनं, क्ली, (सञ्जवन्ति संमिलन्त्यत्रेति। सं+जु गतौ+अधिकरणे ल्युट्।) अन्योन्याभिमुखग्रहचतुष्टयम्। तत्पर्य्यायः। चतुःशालम् २। इत्यमरः॥ संयमनम् ३ चतुःशाली ४। इति भरतः॥ सञ्जीवनम् ५ शाला ६ निलयः ७ चतुःशालकम् ८। इति शब्दरत्नावली॥ (यथा, हरिवंशे। १५५।५६।

"तस्मिन् सुविहिताः सर्व्वे यक्षसदृक्षाः पतत्रिणः।
सद्मने वासुदेवस्य मार्गसञ्जवनञ्जनाः॥")

सञ्जा, स्त्री, छागी। इति त्रिकाण्डशेषः॥

सञ्जीवनं, क्ली, (संज्ञीयतेऽस्मिन्निति। सं+जीव+अधिकरणे ल्युट्।) सञ्जवनम्। इति शब्दरत्नावली॥ (सं+जीव+भावे ल्युट्।) सम्यक्प्रकारेण प्राणधारणञ्च॥ (यथा, सुकुन्दे, माजायाम्। ३०।

"यामीशेऽहलनौषधं सुनिगमोद्वृत्तिप्रवृत्तौषधं
दैत्यानर्थकरौषधं त्रिजगतां सञ्जीवनैकौषधम्।
भक्तार्त्तिप्रशमौषधं भवभयप्रध्वंसि दिव्यौषधं
श्रेयः प्राप्तिकरौषधं पिब मनः श्रीकृष्णनामौ-
षधम्॥"

नरकविशेषः। यथा, मनुः। ४। ८८।

"नरकं कालसूत्रञ्च महानरकमेव च।
सञ्जीवनं महावीचिं तपनं सम्प्रतापनम्॥"

क्ली, विद्याविशेषः। यथा, महाभारते। १। ७६। ३३।

"ततः सञ्जीवनीं विद्यां प्रयुज्य कचमाह्वयत्॥")

सञ्ज्ञं, क्ली, संज्ञम्। इति शब्दचन्द्रिका॥

सञ्ज्ञः, त्रि, संज्ञः। इत्यमरटीकायां भरतः॥

सञ्ज्ञपनं, क्ली, (सं+ज्ञा+णिच्+ल्युट्।) संज्ञपनम्। इत्यमरः॥

सञ्ज्ञप्तिः, स्त्री, (सं+ज्ञा+णिच्+क्तिन्।) संज्ञप्तिः। इति हेमचन्द्रः॥

सञ्ज्ञाः

सञ्ज्ञा, स्त्री, (सं+ज्ञा+अङ्।) संज्ञा। इति मेदिनी॥

सञ्ज्ञुः, त्रि, (सञ्जते जानुनी यस्य। "प्रसंभ्यां जानुनोर्ज्ञुः।" ५।४।१२६। इति ज्ञुः।) संज्ञुः। इत्यमरः॥

सञ्ज्वरः, पुं, (सम्यक् ज्वरः।) संज्वरः। इत्यमरः॥

सटं, क्ली, (सटतीति। सट अवयवे+अच्।) जटा। यथा,—

"जटा जटिर्जटी जूटी जुटकन्तु सटं सटा।
कौटीरं जूटकं दृक्षं शिखायां व्रतिनामपि॥"
इति शब्दरत्नावली॥

सटा, स्त्री, (सट अवयवे+अच्।) जटा। केशरः। इति मेदिनी॥ (यथा, रघुः। ६।६०।

"तं वाहनादवगतोत्तरकायमीषत्
विध्वस्तमूढ़तसटाः प्रतिहन्तुमीहुः॥")

शिखा। इति शब्दरत्नावली॥ (यथा, भागवते। ४।५।२।

"क्रुद्धः सुदष्टौष्ठपुटः स धूर्जटि-
र्जटां तडिद्वह्निसटोग्ररोचिषम्॥")

सटाक्षः, पुं, (सटा अक्षिणी यस्य।) सिंहः। इति शब्दरत्नावली॥

सटिः, स्त्री, (सटतीति। सट अवयवे+इन्।) यष्टी। इति शब्दरत्नावली॥

सटिका, स्त्री, गन्धपत्रा। सटी। इति राजनिर्घण्टः॥

सटी, स्त्री, (सटि+वा ङीष्।) गन्धद्रव्यविशेषः॥ वन आदा इति अन्यत्रप्रसिद्धा इति च भाषा। आवेदखदी इति कोङ्कणे प्रसिद्धा। तत्पर्य्यायः। शटी २ गन्धशटी ३ सुगन्धा ४ सटिः ५ शटिः ६ गन्धमूला ७ गन्धमूली ८ पलाशः ९ कर्ब्बूरः १० षड्ग्रन्थिका ११ कर्ब्बूरः १२ गन्धोलिः १३ गन्धमूलकः १४। इति शब्दरत्नावली॥ शटी १५ षड्ग्रन्था १६ अन्यनिभा १७ वधूः १८ गन्धारी १९ सटिका २० पलाशिका २१ सप्तदा २२ छगी २३ कूर्च्चा २४ गन्धा २५ पृथुपलाशिका २६ सौम्या २७ हिमोद्भवा २८ गन्धवधूः २९। अस्या गुणाः। सुतिक्तत्वम्। चन्द्रमत्वम्। लघुत्वम्। उष्णत्वम्। रुचिप्रदत्वम्। ज्वरकफासकक्षूव्रणदोषवातामयनाशित्वम्। कटुत्वञ्च। इति राजनिर्घण्टः॥

सट्टा, स्त्री, पश्चिमेदः। वाद्यम्। इति संक्षिप्तसारोणादिवृत्तिः॥

सठ, क षाठ्यें। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) इत्यादिः। क, षाठयति षाठ्यें गत्यसंकुतसंस्कृतेषु। इति दुर्गादासः॥

सठी, स्त्री, शटी। इति राजनिर्घण्टः॥

सणसूत्रं, क्ली, (सणस्य सूत्रम्।) शणसूत्रम्। इत्यमरटीकायां रायमुकुटः॥

सणः, पुं, शणः। इत्यमरटीका॥

सल्लिशः, पुं, सन्दंशः। सँड़ाशि इति भाषा। यथा,—
"पायसं क्षयराच्छागं देवान्नानि च यानि वै।
भुक्तानि यैरसंस्कृत्य तेषामन्नानि पापिनाम्॥
निपातितानां भूपृष्ठे उद्धृतानि निरीक्षताम्।
सल्लिशैरपकृष्यन्ते नरैर्यास्यैर्मुखात्ततः॥"
इति मार्कण्डेयपुराणे १४ अध्यायः॥

सल्लीनं, क्ली, खगगतिक्रिया। इत्यमरः॥ खगानां पक्षिणां गतौ स्थानान्तरसञ्चारे सतः क्रियाः व्यापाराः। कक्षा इत्याद्यं प्रथमल्लीनं उड्डयनाय क्रमवन्तः। ऊर्द्धं लीनं उड्डीनं वियद्गमनम्। संगतं लीनं सल्लीनं वृक्षादौ पतनमिति। पृथक् पृथक् पक्षिगतिक्रियासु प्रल्लीनं सङ्गतगमनमित्यर्थः। ओ ल्ली ड य गतौ क्तः च नभोगतौ भावे क्तः सुखादयोदिति नत्वम्। इति भरतः॥

सतत, क्ली, (सन्तन्यते सेति। सं+तन+क्तः। समो वा हितततयोरिति पक्षे मलोपः।) निरन्तरक्रिया। तद्धति, त्रि। इत्यमरः॥ तत्यर्थायः अनवरतशब्दे नित्यशब्दे च द्रष्टव्यः। अपि च।
"सततं त्वनवरतानारताश्रान्तसन्ततम्।
प्रमक्तासक्तनित्याजस्रानहाविरतानिशम्॥"
इति जटाधरः॥
(यथा, मनुः। ४। २२।
"एतानेके महायज्ञान् यज्ञशास्त्रविदो जनाः।
अनीहमानाः सततमिन्द्रियेष्वेव जुह्वति॥")

सतत्वं, क्ली, स्वभावः। इति हेमचन्द्रः। ६। १३॥

सतर्कः, त्रि, तर्केण सह वर्त्तमानः। सावधानः। इति लोकप्रसिद्धिः॥

सतानन्दः, पुं, गौतमसुनिपुत्रः। स च जनकराजपुरोहितः। इति शब्दरत्नावली॥

सतिः, स्त्री, (सनु दाने+क्तिच्। "सनः क्तिचि लोपश्चास्यान्यतरस्याम्।" ६। ४। ७५। इति नलोपः।) दानम्। अवसानम्। इति मालतिशब्दटीकायां भरतः।

सती, स्त्री, (अस्यति। 'अस्+शतृ। उगितत्वात् ङीप्।) दुर्गा। साध्वी। इति मेदिनी॥ (यथा, कुमारे। १। २१।
"सती सतो योगविसृष्टदेहा
तां जन्मने शैलवधूं प्रपेदे॥")
मौराशृङ्खलिका। इति हेमचन्द्रः॥ दानम्। अवसानम्। इति नानार्थशब्दटीकायां भरतः॥ * ॥ स्थानविशेषे सत्यलोकस्थसतनामानि यथा,—
देवदास उवाच।
"सर्व्वगा सर्व्वभूतेषु दृश्या सर्व्वत्र भूतले।
सप्तलोकेषु यत्किञ्चिदृश्यं न मया विना॥
तथापि येषु स्थानेषु द्रष्टव्याः सिद्धिभीप्सुभिः।
कामेना भूमिकामैश्च ता वक्ष्यामि प्रयत्नतः॥
वाराणस्यां विशालाक्षी गौरीमुखे सिद्धचारिणी।
प्रयागे ललिता देवी कामुका गन्धमादने॥
माणके कुसुदा नाम विश्वकाया तथेश्वरे।
गोमन्ते गोमती नाम मन्दरे कामचारिणी॥
मदोत्कटा चैत्ररथे जयन्ती हस्तिनापुरे।
कान्यकुब्जे तथा गौरी रम्भा मलयपर्व्वते॥
एकाम्रके कौर्त्तिमती विश्वा विश्वेश्वरे विदुः।
पुष्करे पुरुहूतेति केदारे मार्गदायिनी॥
नन्दा हिमवतः पृष्ठे गोकर्णे भद्रकर्णिका।
स्थानेश्वरे भवानी तु विल्वके विल्वपत्रिका॥
श्रीशैले माधवी नाम भद्रा भद्रेश्वरे तथा।
जया वराहशैले तु कमला कमलालये॥
रुद्रकोट्यान्तु रुद्राणी कालञ्जरे तथा।
महालिङ्गे तु कपिला साकोटे कमलेश्वरी॥"
अत्र कपिलाम्बरा इति च पाठः।
"शालग्रामे महादेवी शिवलिङ्गे जनप्रिया।
मायापूर्य्यां कुमारी तु सन्ताने ललिता तथा॥
उत्पलाक्षी सहस्राक्षे हिरण्याक्षे महोत्पला।
गयायां मङ्गला नाम विमला पुरुषोत्तमे॥
विपाशायामघोराख्या पाटला पुण्ड्रवर्द्धने।
नारायणी सुपार्श्वे तु चिकुटे रुद्रसुन्दरी॥
विपुले विपुला नाम कल्याणी मलयाचले।
कोटवी कोटितीर्थेषु सुगन्धा माधवे वने॥
गोदाश्रमे त्रिसन्ध्या तु गङ्गाद्वारे रतिप्रिया।
शिवकुण्डे शिवानन्दा नन्दिनी देविकातटे॥
रुक्मिणी द्वारवत्यान्तु राधा वृन्दावने वने।
देवकी मथुरायान्तु पाताले परमेश्वरी॥
चित्रकूटे तथा सीता विन्ध्ये विन्ध्याधिवासिनी।
सह्याद्रे करवीरा तु हरिश्चन्द्रे तु चन्द्रिका॥
रमणा रामतीर्थे तु यमुनायां रुद्रावती।
करवीरे महालक्ष्मीरुमादेवी विनायके॥
अरोगा वैद्यनाथे तु महाकाले महेश्वरी।
अभयेलुप्ततीर्थे तु अम्बिका विन्ध्यकन्दरे॥"
उष्णतीर्थेत्यत्र अम्बतीर्थेति च पाठः।
"माण्डव्ये माण्डवी नाम स्वाहा माहेश्वरे पुरे।
कुशलाक्षे प्रचण्डा तु चण्डिकामरकण्टके॥
सोमेश्वरे वरारोहा प्रभासे पुष्करावती।
देवमाता सरस्वत्यां पारा पारातटे मता॥
महालये महाभागा पयोष्ण्यां पिङ्गलेश्वरी।
सिंहिका ताप्तपीठे तु कार्त्तिकेये तु शङ्करी॥
उत्पलावर्त्तके लोला सुभद्रा शोणसङ्गमे।
महानिधने लक्ष्मीरनङ्गा भरताश्रमे॥
जालन्धरे विश्वमुखी तारा किष्किन्धपर्व्वते।
देवदारुवने पुष्टिर्मेधा काश्मीरमण्डले॥
भीमादेवी हिमाद्रौ च तुष्टिश्चेक्षुश्वरे तथा।
कपालमोचने शुद्धिर्निर्माया कायावरोहणे॥
शङ्खोद्धारे ध्वनिर्नाम ध्रुतिः प्रियवारके तथा।
कालञ्जरे तु चन्द्रभागायामच्छोदे शिवचारिणी॥
इरायामस्वता नाम वदर्य्यां वर्षधारिणी तथा।
शोणधौ शोणकरणी कृष्णद्वीपे कृष्णोदका॥
सरयां हेमकूटे तु कुसुदे सत्यवादिनी॥
शङ्खिन्यां वरदात्री तु निश्चिरेन्द्रप्रभासके।
गायत्री वेदवदने सावित्री शिवसन्निधौ॥
देवलोके तथेन्द्राणी ब्रह्मलोकेषु धरण्यसी।
सूर्य्यबिम्बे प्रभा नाम माहृणां वेदधारी तथा॥
अरुन्धती सतीनान्तु रामासु च तिलोत्तमा।
चित्ते ब्रह्मकला नाम शक्तिः सर्व्वशरीरिणाम्॥
एतदुद्देशतः प्रोक्तं नामाष्टशतसुत्तमम्।
अथोत्तरञ्च तीर्थानां शृणमेतदुदाहृतम्।
यः पठेच्छृणुयाद्वापि सर्व्वपापैः प्रमुच्यते॥
एषु तीर्थेषु यः स्नात्वा स्नानं कुरुते मानवः।
सर्व्वपापविनिर्म्मुक्तः कल्पं शिवपुरे वसेत्॥
यस्तु मत्परमः कालं करोत्येतेषु मानवः।
स भित्त्वा ब्रह्मसदनं पदमभ्येति शाङ्करम्॥
नामाष्टशतकं यस्तु आवयेच्छिवसन्निधौ।
तृतीयायामथाष्टम्यां वह्नुपुत्रो भवेन्नरः॥
गोदाने आहकाले वा अहन्यहनि वा पुनः।
देवार्च्चनविधौ विद्वान् पठन् ब्रह्माधिगच्छति॥
एवं वदन्ती सा तत्र ददाहात्मानमात्मना।
स्वायम्भुवेऽपि काले च दक्षप्राचेतसोऽभवत्॥
पार्व्वती चाभवद्देवी शिवदेहार्द्धधारिणी।
मेनागर्भसमुत्पन्ना मुक्तिमुक्तिफलप्रदा॥
अरुन्धती जपन्त्येतत्तदाप्ता योगमुत्तमम्।
पुरूरवाश्च राजर्षिर्लोकेषु जयतामगात्॥
ययातिः पुत्रलाभन्तु धनलाभन्तु भार्गवः।
तथान्ये देवदैत्याश्च ब्राह्मणाः क्षत्रियास्तथा।
वैश्याः शूद्राश्च बहवः सिद्धिमीयुर्यथेप्सिताम्॥
यश्चेतल्लिखितं तिष्ठेत् पूज्यते देवसन्निधौ।
न तत्र शोकदौर्गत्यं कदाचिदपि जायते॥"
इति मत्स्यपुराणे १३ अध्यायः॥

सावित्री। यथा,—
यम उवाच।
"सावित्रीवरदानेन त्वं सावित्र्येकजा सती।
प्राप्ता पुरा भूपतेश्च तपसा तत्समा शुभा॥
यथा श्रीः श्रीपतेः क्रोडे भवानीव भवोरसि।
सौभाग्या सुप्रिया त्वञ्च भव सत्यवतः प्रिये॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २८ अध्यायः॥

विद्यमाना। (यथा,—
"तथा समक्षं दहता मनोभवं
पिनाकिना भग्नमनोरथा सती।
निनिन्द रूपं हृदयेन पार्व्वती
प्रियेषु सौभाग्यफला हि चारुता॥"
इति कुमारसम्भवे। ५। १॥)

सतीनः, पुं, वप्रः। इति शब्दमाला॥ सतीलकः। इत्यमरटीकायां भरतः॥ (यथा, सुश्रुते। १।४६
"हरेणवः सतीनाख्य विज्ञेया वप्रवर्त्मगः॥")

क्ली, जलम्। इति निघण्टुः। १। १२॥)

सतीनकः, पुं (सतीन एव। स्वार्थे कन्।) सतीलकः। इत्यमरटीकायां भरतः॥

सतीर्थ्यः, पुं, (समानस्तीर्थो गुरुरस्य। समानस्य सः।) परमगुरैकगुरुशिष्यः। इति शब्दरत्नावली॥

सतीर्थ्यः, पुं, (समाने तीर्थे वसतीति। "समानतीर्थे वासी।" ४। ४। १०७। इति यत्। "तीर्थे ये।" ६। ३। ८०। इति समानस्य सः।) परमगुरैकगुरुशिष्यः। इत्यमरः। रुद्रोपनिषदो

गुरुर्येषां सैन्योन्यं सतीर्थ्याः। समाने तीर्थे गुरौ वसन्ति सतीर्थ्याः। ष्ठ्येकादिति यः। ज्योतिर्जनपदेत्यादिना यः। तीर्थेनधिवुप्तजे गुरौ इति वक्ष्यते। इति भरतः॥ अपि च।

"स्यात् सतीर्थः सतीर्थ्योऽपि तथैकगुरुरित्यपि।"

इति शब्दरत्नावली॥

सतीनः, पुं, वंशः। इति हारावली॥ वायुः। इत्यमरटीकायां रायमुकुटः॥ ("तीलेन तीलवत् लक्षणवर्णचिह्नेन सह वर्त्तते इति। निपातनादिकारस्य दीर्घः।" इति भरतः॥) कलायः। यथा,

"कलायखिप्तुटः प्रोक्तः सतीलो वर्त्तुलो मतः।"

इति भरतधृतवाड़िः॥

सतीलकः, पुं, (सतील एव। स्वार्थे कन्।) कलायः। यथा,—

"कलायस्तु सतीलकः हरेणुखण्डिकौ चास्त्रिन्।"

इत्यमरः॥

"चत्वारि कलाये। मटर इति ख्याते। कलायशब्दो विशेषे सामान्ये च अतएव मापकलाय इत्यादिप्रयोगः। कथ्यते भुज्यते कलायः। कड भक्षणे नान्नीति आयः मनीषादित्वात् डस्य लः। तिलेन तिलवत् लक्षणवर्णचिह्नेन सह वर्त्तते सतीलः निपातनादिकारस्य दीर्घः स्वार्थे कः सतीलकः दक्षत्यादिः। क्रियते भक्षणार्थं हरति मनो वा हरेणुः नान्नीति एणुः। खण्ड्यते विदार्य्यते खण्डिकः पूर्ब्बेण इकः।

'कलायखिप्तुटः प्रोक्तः सतीलो वर्त्तुलो मतः।
हरेणुः कण्टका ज्ञेया————।
इति तु वाड़िः।" इति भरतः॥

सतीला, स्त्री, कलायविशेषः। तेयोड़ा इति भाषा। यथा। सतीला निष्किका तिष्टौति शब्दचन्द्रिका॥

सतुर्य, क्ली, (तुर्येण सह वर्त्तमानम्।) तुर्ययुक्तधान्यम्। धान्यम्। यथा,—

"धान्यं चैवगतं प्राहुः सतुर्यं धान्यमुच्यते।
आमं वितुषमित्युक्तं खिन्नमन्नमुदाहृतम्॥"

इति आह्निकतत्त्वम्॥

सलट, [न्] त्रि, (लया सह वर्त्तमानः।) लक्षणायुक्तः। तत्पर्य्यायः। लक्षितः २ तर्पितः ३। इति त्रिकाण्डशेषः॥

सवेरः, पुं, तुषः। इति संक्षिप्तसारोणादिवृत्तिः॥

सत्, क्ली, (अस्तीति। अस+शतृ।) ब्रह्म। यथा। भगवद्गीतायाम्।

"ओम् तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः।
ब्राह्मणास्तेन वेदाश्च यज्ञाश्च विहिताः पुरा॥"

ओम् तत् सदिति त्रिविधो ब्रह्मणो जगदीश्वरस्य निर्देशोऽभिधानं ब्रह्मविद्भिश्चिन्तितम्। तत्र तावदोमिति ब्रह्मेत्यादि श्रुतिप्रसिद्धेरोमिति ब्रह्मणो नाम। पातञ्जलिरप्याह अस्येश्वरे वाचकः प्रणवः। अस्य प्रणवस्य। ओमुकारो भगवान् विष्णुरित्यादि तु वाच्यवाचकयोरभेदेन। तथा च। ओमुकारस्यतेन प्रसिद्धत्वादविदुषो मतोच्चलाय तच्छब्दोऽपि ब्रह्मणो नाम। एवं पारमार्षसत्साधुत्वप्रशस्त्यादिभिः सच्छब्दोऽपि। अतस्तेन त्रिविधनिर्देशेन। यद्वा यस्यायं त्रिविधो निर्देशस्तेन परमात्मना ब्राह्मणादयो निर्म्मिताः॥ वैदिके कर्म्मणि तेषां प्रथमतो निर्देशो यथा,—

"तस्मादोमित्युदाहृत्य यज्ञदानतपःक्रियाः।
प्रवर्त्तन्ते विधानोक्ताः सततं ब्रह्मवादिनाम्॥"

यस्मादेवं ब्रह्मणो निर्देशस्तस्मादोमित्युदाहृत्य उच्चार्य्य कृता वेदवादिनां यज्ञाद्याः शास्त्रोक्ताः क्रियाः सततमङ्गवैकल्येऽपि प्रवर्त्तन्ते प्रकर्षेण वर्त्तन्ते सगुणा भवन्तीति भगवान् शङ्कराचार्य्यचरणाः॥

"तदित्यनभिसन्धाय यज्ञदानतपःक्रियाः।
दानक्रियाश्च विविधाः क्रियन्ते मोक्षकाङ्क्षिभिः॥"

तदिति ब्रह्मणोऽभिधानमुदाहृत्य इत्यनुषङ्गः। अनभिसन्धाय कर्म्मणः फलमिति शेषः। तस्मात् फलाभिसन्धानं विना सुसंस्कृतं कर्म्म कर्त्तव्यमित्यपि बोध्यम्।

"सद्भावे साधुभावे च सदित्येतत् प्रयुज्यते।
प्रशस्ते कर्म्मणि तथा सच्छब्दः पार्थ युज्यते॥"

यतो विद्यमानजन्मनि उत्कृष्टचरिते च सदित्येतत् प्रयुज्यते। अतो यज्ञादौ कर्म्मण्यि प्रथमतः सच्छब्दः प्रयुज्यते। इत्येकादशीतत्त्वम्॥

सत्, त्रि, (अस्तीति। अस+शतृ।) सत्यम्। साधुः। (यथा, सुग्रीवोधे।

"रामं नमति सानन्दं धर्म्मानभिनिविश्य स सत्॥")

विद्यमानम्। (यथा, हितोपदेशे।

"दुर्ज्जनः परिहर्त्तव्यो विद्ययालङ्कृतोऽपि सन्।
मणिना भूषितः सर्पः किमसौ न भयङ्करः॥")

प्रशस्तम्। अभ्यर्हितम्। इत्यमरः॥ धीरः। इति मेदिनी॥

सत्कदम्बः, पुं, (सच्च कदम्बः।) केलिकदम्बः। यथा,—

"केलिवृक्षः सत्कदम्बो व्रजभूः शिशुपालकः।"

इति शब्दचन्द्रिका॥

सत्कर्त्ता, [ऋ] पुं, (सतां कर्त्ता।) विष्णुः। यथा। सत्कर्त्ता सत्कृतः साधुरिति तस्य सहस्रनामस्तोत्रम्॥

सत्कर्म्म, [न्] क्ली, (सत् प्रशस्तं कर्म्म।) वेदविहितक्रिया। यथा। विष्णुपुराणे।

"सत्कर्म्मयोग्यो न जनो नैवायः शौचकारणम्।
यस्मिन्नुदिते तस्मै नमो देवाय भास्वते॥"

इति प्रायश्चित्ततत्त्वम्॥

सत्काञ्चनारः, पुं, (सच्च काञ्चनारः।) रक्तकाञ्चनः। यथा,—

"कोविदारे चमरिकः कुद्दालो युगपत्रकः।
सत्काञ्चनारः कामालुर्हयवाहनशङ्करः॥"

इति शब्दचन्द्रिका॥

सत्काण्डः, पुं, चिल्लः। इति शब्दचन्द्रिका॥

सत्कारः, पुं, (सत्करणमिति। सत्+कृ+घञ्।) पूजा। यथा। स्वयम्भूतः सभासदः सभायां यथा सीदन्ति उपविशन्ति तथा दानमानसत्कारे राज्ञा कर्त्तव्याः। इति श्रवणारतत्त्वम्॥

(यथा, कुमारे। ६। ५२।

"विधिप्रयुक्तसत्कारैः स्वयं मार्गस्य दर्शकः।
स तैराक्रमयामास शुद्धान्तं शुद्धकर्म्मभिः॥"

उत्सवविशेषः। यथा, मनुः। ३। ५६।

"तस्मादेताः सदा पूज्या भूषणाच्छादनाशनैः।
भूतिकामैर्नरैर्नित्यं सत्कारेषूत्सवेषु च॥"

"सत्कारेषु कौसुम्भादिषु उत्सवेषु उपनयनादिषु।" इति तट्टीकायां कुल्लूकः॥*॥)

श्रवणाद्यादिक्रिया। इति लोकप्रसिद्धिः॥

सत्कुलीनः, पुं, (सत्कुले जातः। सत्कुल+खः। सन् प्रशस्तः कुलीन इति वा।) सत्कुलोद्भवः। यथा,—

"सत्कुलीनाय शान्ताय ऋजवे दम्भवर्ज्जिते।
दद्यात् क्षौद्रमिदं पुण्यं सर्व्वकामफलप्रदम्॥"

इति विश्वसारतन्त्रे वटुकभैरवक्षौद्रम्॥

सत्कृतः, त्रि, (सत्+कृ+क्तः।) पूजितः। कृतसत्कारः। यथा,—

"नष्टौ कश्चित् स कालस्य सुनिना तेन सत्कृतः
इति देवीमाहात्म्यम्॥

(महादेवे, पुं। इति महाभारतम्। १३। १७। ११३॥)

सत्कृतिः, स्त्री, (सत्+कृ+क्तिन्।) सत्कारः। सत्क्रियाशब्दार्थदर्शनात्॥ (यथा, भागवते। १०। १५। ७३।

"तत्सत्कृतिं समधिगम्य विवेश गोष्ठं
व्रीड़ोत्सवस्तिमयं यदपाङ्गमोक्षम्॥"

पुं, विष्णुः। इति महाभारतम्। १३। १४८। ८८।)

सत्क्रिया, स्त्री, (सती क्रिया।) श्रवणाद्यादिक्रिया। तत्पर्य्यायः। संक्रिया २। इति त्रिकाण्डशेषः॥ संस्कारः ३। इति शब्दरत्नावली॥ (यथा, महाभारते। १। ११४। ५।

"ततो नृपे तक्षकतेजसा हते
प्रयुज्य सर्व्वाः परलोकसत्क्रियाः।
शुचिर्द्विजो राजपुरोहितस्तदा
तथैव ते तस्य नृपस्य मन्त्रिणः॥"

परिष्कारः। यथा, रघुः। ११। ३।

"यावदादिशति पार्थिवस्तयो-
र्निर्गमाय पुरमार्गसत्क्रियाम्।
तावदाप्तविदधे भरत्सखेः
सा सपुष्पजलवर्षिभिर्घनैः॥")

सम्मानम्। यथा, मनुः।

"घटेऽपवर्ज्यते ज्ञातिमध्यस्थो यवसं गवाम्।
प्रदद्यात् प्रथमं गोभिः सत्कृतस्य हि सत्क्रिया॥"

इति प्रायश्चित्ततत्त्वम्॥

सत्तमः, त्रि, (अयमेषामतिशयेन सत्। सत्+तमप्।) अतिशोभनः। इत्यमरः॥ पूज्यतमः। साधीयान्। उत्तमः। इति मेदिनी॥ (यथा, देवीभागवते। ११। १६। ३।

"तद्वेदानपि वक्ष्यामि शृणु देवर्षिसत्तम!।")

सत्ता, स्त्री, जातिविशेषः। इति भाषापरिच्छेदः॥ सतो भावः। सत्+तल्।) विद्यमानता।

यथा। यद्यपि पापस्य कार्य्यानन्वितत्वेन तत्सत्तायामप्रामाण्यं प्रतिभाति। इति प्रायश्चित्ततत्त्वम्॥ साधुता। सतो भाव इत्यर्थे सच्छब्दात् तप्रत्ययेन निष्पन्ना॥

सत्त्वं, क्ली, (सतः साधून् त्रायते इति। त्रै+कः। यद्वा, सीदन्ति सज्जना यत्र। सद गतौ+"गुधृवीप्रचिवचीति।" उणा० ४। १६६। इति त्रः।) यज्ञः। (यथा, मनुः। ८। ३०३।

"अभयस्य हि यो दाता संपूज्यः सततं नृपः।
सत्त्वं हि वर्द्धते तस्य सदैवाभयदक्षिणम्॥")

सदादानम्। आच्छादनम्। चरण्यम्। (यथा, किरातेः। १३। ६।

"अयमेव नगत्रयसत्त्वकामः
प्रहरिष्यन् मयि मायया समस्त्रे।
पृथुभिर्भ्रुजिनीरवैवकार्षीत्
चकितोद्भ्रान्तमृगाणि काननानि॥")

केतवम्। इति मेदिनी॥ (यथा, महाभारते। ४। ३६। ३८।

"सत्त्वेन नूनं छन्नं हि चरन्तं पार्थमच्युतम्।
उत्तरः सारथिं कृत्वा निर्यातो नगरात् बहिः॥")

धनम्। गृहम्। दानम्। वरीवरम्। इत्यमरः। कार्यकोषः॥ यागविशेषः। यथा,—

"नैमिषेऽनिमिषक्षेत्रे ऋषयः शौनकादयः।
सत्त्वं स्वर्गाय लोकाय सहस्रसममासत॥
कलिमागतमाज्ञाय क्षेत्रेऽस्मिन् वैष्णवे वयम्।
आसीना दीर्घसत्त्रेण कथायां सक्षणा हरेः॥"

इति श्रीभागवते १ स्कन्धे १ अध्यायः॥ ॥

द्वादशाहसाध्यसत्त्वं यथा। ज्योतिष्टोमे द्वादशगोप्रतदक्षिणाविभागः षोड़शर्त्विजां तदिक्षतीभूते सत्त्वाख्ये द्वादशाहसाध्ये प्रतिग्राहिणो दीक्षयज्ञौत्यादिदर्शनेन निर्णीयते। तच्च सावनमानेन कर्त्तव्यम्। यथा,—

"सत्त्राण्युपास्यान्यत्र सावनेन
लौकिकेन यत् स्याद्व्यवहारकर्म्म।"
इति मलमासतत्त्वम्॥

सदक्षिणं यतनाम्नदानम्। तन्निन्दकस्यार्थनादि-निषेधो यथा,—

"नालपेज्जनविद्विष्टान् वीरहीनां तथास्त्रियम्।
देवतापितृसत्त्राख्ययज्ञसत्त्रादिनिन्दकैः।
स्त्वा तु अर्थनालापं शुद्ध्यतार्कावलोकनात्॥"
इति मार्कण्डेयपुराणे सदाचाराध्यायः॥

सत्त्वं सदक्षिणं सततान्नदानम्। इति तट्टीका॥

सत्त्वं, [न्] त्रि, यः, सद्यः। इति शब्दरत्नावली घटादयश्च॥

सत्त्वशाला, स्त्री (सत्त्वस्य शाला।) अन्नादिदानगृहम। तत्पर्य्यायः। प्रतिश्रयः २। इति हेमचन्द्रः॥ (यथा, कथासरित्सागरे। २१। ७६।

"ततः सा सत्त्वशालान्तः प्रविवेश वणिक्सुता।
अन्यजातं राजपुत्रोऽपि सत्त्वं गुप्तमवेक्षितम्॥")

सत्त्रा, य, सद्यः। इत्यमरः॥

सत्त्राजित्, पुं, राजविशेषः। स तु श्रीकृष्णस्य श्वशुरः। परे भल्लाटनगरे शत्रुघ्नजराजो बभूव। इति कल्किपुराणे २७ अध्यायः॥

सत्त्रिः, पुं, मेघः। हस्ती। जयशीले, त्रि। इत्युणादिकोषः॥

सत्त्रिजातकं, क्ली, (सत्त्रं साधु त्रिजातकं तुल्यत्वगेलापत्रादिकं यत्र।) व्यञ्जनविशेषः। यथा,—

"मांसं बहुघृते भृष्टं क्षिप्त्वा घोष्माम्बुना सुदुः।
क्षीरकाद्वेः समाशुक्तं परिशुष्कं तदुच्यते।
तदेव घृततक्राढ्यं प्रदिष्टं सत्त्रिजातकम्॥"
इति शब्दचन्द्रिका॥

सत्त्री, [न्] पुं, (सत्त्रमस्यास्तीति। इनिः।) गृहपतिः। इत्यमरः॥ ये गृहस्थे। सत्त्रं सदा दानं विद्यतेऽस्य सत्त्री इन्। सदेहं सत्त्रं हिलकारम्। सत्त्रमाच्छादने यज्ञे सदा दाने च केतवे। इति विश्वः। गृहस्य पतिर्गृहपतिः। इति भरतः॥ नित्यप्रवृत्तान्नदानः। यथा विष्णुः। गार्हौचं राज्ञां राजकर्म्मणि न व्रतिनां व्रते न सत्त्रिणां सत्त्रे न कारूणां स्वकर्म्मणि न राजाज्ञाकारिणां तद्दिक्षया न देवप्रतिष्ठाविवाहयोः पूर्वसंहतयोः। इति। सत्त्रिणां नित्यप्रवृत्तान्नदानानां सत्त्रशब्दाने। इति शुद्धितत्त्वम्॥ (यज्ञान्विते, त्रि। यथा, महाभारते। १४। ७। ३।

"सत्यमेतद्वचो राज्ञः स मां जानाति सत्त्रियम्।
क्षत्रियस्य तदेतन्मे क्व नु सम्प्रति गारदः॥")

सत्त्वं, क्ली, (सतो भावः। सत्+त्व।) प्रकृतेर्गुणविशेषः। अत्र सत्त्वं प्रकाशकत्वानं सुखहेतुः। सतो भावः सत्त्वम्। त्वतौ भावे इति त्वं निपातनात्तलोप इति केचित्। सत्त्वं द्वितकारमिति बहवः। इत्यमरभरतौ॥ ॥ (यथा, मनुः। १२। २४।

"सत्त्वं रजस्तमश्चैव त्रीन् विद्यादात्मनो गुणान्।
तैर्व्याप्तिमांस्त्रि स्थितो भावान् महान् सर्व्वान-शेषतः॥")

महाभारतमते सुखजनकगुणः। तस्य धर्म्माः। प्रसादः १ हर्षः २ प्रीतिः ३ चसन्देहः ४ धृतिः ५ स्मृतिः ६। इति मोक्षधर्म्मः॥ बलम्। अमुः। (यथा, रामायणे। २। ६०। २।

"ततो भूतोपसृष्टेव वेपमाना पुनः पुनः।
धरण्यां पतितस्त्रेव कौशल्या वृत्तमब्रवीत्॥")

व्यवसायः। इत्यमरः॥ पिशाचादिः। (यथा, रामायणे। २। ३१। १०।

"अद्य नूनं दशरथः सत्त्वमाविश्य भाषते।
न हि राघा प्रियं पुत्रं विवासयितुमर्हति॥")

बलम्। (यथा, रघुः। ४। ७२।

"शूरैस्तुल्यसत्त्वानां सैन्यघोषेऽपसम्भ्रमम्।
गुहाशयानां सिंहानां परिवृत्तावलोकितम्॥")

स्वभावः। (यथा, किरातेः। १२। ६८।

"सत्त्वविद्वितमतुल्यमुभयो-
रक्षमस्य पक्षत रुषेऽधिकृयतः॥")

आत्मा। चित्तम्। इति मेदिनी॥ रसः। आयुः। इति धरणिः॥ कुबेरः। इति हेमचन्द्रः॥ धनम्। आत्मता। इति शब्दरत्नावली॥

सत्त्वः, पुं, क्ली, (सत्त्वमस्त्यस्येति। अर्शआदित्वादच्।) जन्तुः। इत्यमरः॥ (यथा, रघुः। २। ८।

"रक्षाधदेशाम्बुनिशीथधेनोः
वन्यान् विनेष्यन्निव दुष्टसत्त्वान्॥")

सत्त्वता, स्त्री, सत्त्वस्य भावः। सत्त्वशब्दात् भावे तप्रत्ययानन्तरं आप्प्रत्ययेन निष्पन्ना॥

सत्त्वसम्पन्नः, त्रि, (सत्त्वं सम्पन्नः।) सत्त्वप्राप्तः। इति लोकप्रसिद्धिः॥

सत्त्वस्थः, त्रि, (सत्त्वे तिष्ठतीति। स्था+कः।) सत्त्ववृत्तिप्रधानः। सत्त्वप्रधानः। यथा,—

"ऊर्द्धं गच्छन्ति सत्त्वस्था मध्ये तिष्ठन्ति राजसाः।
जघन्यगुणवृत्तिस्था अधो गच्छन्ति तामसाः॥"
इति भगवद्गीतायाम्। १४। १८॥

सत्पत्रं, क्ली, (सत् पत्रं यस्य।) पलाशवृक्षस्य पत्रम्। इति शब्दचन्द्रिका॥

सत्पथः, पुं, (सत् पन्थाः। टच्।) प्रशस्तपथः। तत्पर्य्यायः। अतिपन्थाः २ सुपन्थाः ३ अर्चिताध्वा ४। इत्यमरः॥ सुपथः ५। इति शब्दरत्नावली॥ (यथा, भागवते। ४। १२। ५०

"ज्ञानमज्ञाततत्त्वाय यो ददात् सत्पथेऽन्धतम
क्षपानोदीननाथस्य देवास्तस्यानु गृह्णते॥")

सत्पशुः, पुं, (सत् पशुः।) यज्ञीयपशुः। इति केचित्॥ शोभनपशुश्च॥

सत्पुत्रः, पुं, (सत् पुत्रः।) उत्तमसन्तानः। वेदादिविहितपित्रादिकार्य्यकर्त्ता। यथा,—

"पुन्नाम्नो नरकादस्मात्त्रायते पितरं सुतः।
सुखसन्दर्शनेनापि तदुत्पन्नौ यतेत वः॥"
इति दुःखमयनरकनिस्तारायं ब्रह्मणस्मिन् समनयति अन्वतत्यः विन्दति। पिता पुत्रस्य जातस्य मुखेन जीवतो सुखम्। इति यज्ञियोक्तकर्म्मानयनाय च यत् पश्येदिति नियमविधानं तदुक्तपुत्रकार्य्यपुत्रपरम्। सत्पुत्रस्तु सुखदर्शनं विनापि नरकनिस्तारकः। तथा च विष्णुपुराणम्।

"सत्पुत्रेण तु जातेन केवलेऽपि पितृव्रते।
पुन्नाम्नो नरकात्तातः स वेत्ति सुमहात्मना॥"
ब्रह्मपुराणेऽपि।

"सत्पुत्रेण भो विप्राः सत्पुत्रेण महात्मना।
तातः स पुरुषव्याघ्राः पुन्नाम्नो नरकात्तदा॥"
इति शुद्धितत्त्वम्॥

सत्पुरुषः, पुं, (सत् पुरुषः।) पूज्यमानपुरुषः। इति संक्षिप्तसारव्याकरणात्॥ (यथा, रामायणे। २। ४८। ८।

"एकः सत्पुरुषो लोके लक्षणः सह सीतया।
योऽनुगच्छति कामानुवृत्तं रामं महाव्रतम्॥")

सत्प्रतिग्रहः, पुं, यज्ञः शास्त्रेभ्यः प्रतिग्रहो दानग्रहणम्। यानुष्ठानतत्त्वायग्रहम्। यथा,—

"सप्तविंशतिमा धर्म्मा रायो लाभः क्रयो जयः

प्रयोगः कर्म्मयोगश्च सत्प्रतिग्रह एव च ॥"
इति मानवे १० अध्यायः ॥

सत्प्रतिपक्षः, पुं, (सत् प्रतिपक्षः।) तुल्यशक्तिः। प्रतियोगी। न्यायमते। साध्याभावव्याप्यवत्पक्षः। यथा। ह्रदो वह्निमान् धूमादित्यादौ वह्न्याभावव्याप्यवह्न्यादिः। इति सत्प्रतिपक्षलक्षणम्॥ तल्लक्षणं यथा। साध्यविरोधिधर्म्मस्यापनसमर्थसमानबलोपस्थित्या प्रतिरुद्धकार्य्यलिङ्गत्वं तत्त्वं बलञ्च व्याप्यपक्षधर्म्मतो विरोधिविरोधकान्यधर्म्मकतदीयविकरूपबलप्रतिपत्त्या ज्ञायमानैः प्रतिरुद्धकार्य्यत्वं वा तत्त्वम्। इति गङ्गेशोपाध्यायकृतचिन्तामणिः॥

सत्फलः, पुं, (सत् फलं यस्य।) दाड़िमवृक्षः। इति शब्दचन्द्रिका॥ शोभनफलवति च॥

सत्यं, क्ली, (सते हितम्। सत्+यत्।) ऋतयुगम्। प्रशस्यः। यथार्थम्। (यथा, रघुः। १२।७५।

"कामं चीवति मे नाथ इति सा विजहौ शुचम्।
प्राज्ञाव्रा सत्यमस्यान्तं जीवितास्मीति लज्जिता॥")

तद्धति, त्रि। इति मेदिनी॥ (यथा, याज्ञवल्क्ये। ३। १४६।

"महाभूतानि सत्यानि यथात्मापि तथैव हि॥")

सिद्धान्तः। इति शब्दरत्नावली॥ यथार्थस्य पर्य्यायः। तथ्यम् २ ऋतम् ३ सम्यक् ४। इत्यमरः॥ अवितथम् ५ भूतम् ६। इति जटाधरः॥ तल्लक्षणम्। यथा,—

"यथार्थकथनं यच्च सर्व्वलोकसुखप्रदम्।
तत् सत्यमिति विज्ञेयमसत्यं तद्विपर्य्ययम्॥"
इति पाद्मे क्रियायोगसारे १६ अध्यायः॥

तदाकारा यथा,—

"सत्यञ्च समता चैव दमश्चैव न संशयः।
आनृशंस्यं क्षमा चैव ह्रीरस्तितिक्षानसूयता॥
त्यागो ध्यानमथार्य्यत्वं धृतिश्च सततं दया।
अहिंसा चैव राजेन्द्र सत्याकारास्त्रयोदश॥"
इति महाभारते राजधर्म्मः॥

तस्यापालने दोषो यथा,—

"कृत्वा प्रणम्यरूपञ्च सत्यं हन्ति न पालयेत्।
स कृतघ्नः कालसूत्रे वसेदेवचतुर्युगम्॥
सप्तजन्मसु काकश्च सप्तजन्मसु पेचकः।
ततः शूद्रो महाव्याधो जन्मसप्त ततः शुचिः॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ४८ अध्यायः॥

अपि च।

"सत्येन लोकं जयति सत्यन्तु परमं तपः।
यथाभूतप्रवादन्तु सत्यमाहुर्मनीषिणः॥"
इति कौर्म्मे उपविभागे १३ अध्यायः॥

तस्य प्रशंसा यथा,—

"सत्यमाख्याति हरिः सत्यं मित्रपटं वदेत्।
वदेत् तत् सभयं त्यक्त्वा सत्यं ब्रूहि सभासदि॥
वरं क्षुण्णग्रहाद्यागो वरं वाप्यग्रतात् क्रतोः।
वरं क्रतुशतात् पुत्रः सत्यं पुत्रशतात् किल॥
नहि सत्यात् परो धर्म्मो नानृतात् पातकं परम्।
नहि मातुः परो बन्धुर्न गुरुर्मन्त्रदात् परः॥"
इति ब्रह्मवैवर्त्ते जन्मखण्डे ६५ अध्यायः॥

अपि च।

"तस्मात् सत्यं परं ब्रह्म सत्यमेव परं तपः।
सत्यमेव परो यज्ञः सत्यमेव परं श्रुतम्॥
सत्यं वेदेषु जागर्त्ति सत्यञ्च परमं पदम्।
कीर्त्तिर्यशश्च पुण्यञ्च पितृदेवर्षिपूजनम्॥
आद्यो विधिश्च विद्या च सर्व्वं सत्ये प्रतिष्ठितम्।
सत्यं यज्ञस्तथा वेदा मन्त्रा देवाः सरस्वती॥
व्रतचर्य्या तथा सत्यं ओङ्कारः सत्यमेव च।
सत्येन वायुरभ्येति सत्येन तपते रविः॥
सत्येनाग्निर्हविर्न्नित्यं स्वर्गं सत्येन गच्छति।
सत्येन चापः क्षिपति पर्जन्यो धरणीतले॥
परेण सर्व्वदेवानां सर्व्वतीर्थावगाहनम्।
सत्यस्य वचनाज्ज्ञेयं सर्व्वमाप्नोत्यसंशयम्॥
अश्वमेधसहस्रञ्च सत्यञ्च तुलया धृतम्।
अश्वमेधसहस्राद्धि सत्यमेव विशिष्यते॥
सत्येन देवाः प्रीयन्ते पितरः ऋषयस्तथा।
मनुष्याः सिद्धगन्धर्व्वाः सत्यात् सिद्धिमितो गताः॥
अगाधे विपुले शुद्धे सत्यतीर्थे शुचिह्रदे।
स्नातव्यं मनसा युक्तैः स्नानं तत् परमं स्मृतम्॥
आत्मार्थे वा परार्थे वा पुत्रार्थे वापि मानवाः।
अनृतं ये न भाषन्ते ते वृधाः स्वर्गगामिनः॥
तस्मात् सत्यकृतं पक्षं तदनन्तफलं भवेत्॥"
इति वह्निपुराणे दानावस्थानिर्णयनामाध्यायः॥

अपि च।

"तड़ागप्रतदानेन यत् पुण्यं लभते नरः।
ततोऽधिकञ्च लभते वापीदानेन निश्चितम्॥
दशवापीप्रदानेन यत् फलं लभते नरः।
ततोऽधिकञ्च लभते पुण्यं कन्याप्रदानतः॥
दशकन्याप्रदानेन यत् फलं लभते नरः।
ततोऽधिकञ्च लभते यज्ञेकेन नराधिपः॥
शतयज्ञेन लभते यत् पुण्यं पुण्यश्लोकनः।
ततोऽधिकञ्च लभते पुत्रास्यदर्शनेन च॥
दर्शने शतपुत्राणां यत् पुण्यं लभते नरः।
तत् पुण्यं लभते नूनं पुण्यवान् सत्यपालनात्॥
नहि सत्यात् परो धर्म्मो नानृतात् पातकं नरः।
नहि गङ्गासमं तीर्थं न देवः केशवात् परः॥"
इति ब्रह्मवैवर्त्तपुराणम्॥

अन्यच्च।

"सत्यमूलं जगत् सर्व्वं सर्व्वं सत्ये प्रतिष्ठितम्।
सिद्धं लभन्ते सत्येन ऋषयो वेदपारगाः॥
सत्येन दीयते कन्या सत्यं वदन्ति ब्राह्मणाः।
सत्यं वदन्ति राजानः सत्येन वसुधा धृता॥
सत्येन गम्यते स्वर्गं मोक्षं सत्येन प्राप्यते।
सूर्य्यस्तपति सत्येन भीमः सत्येन राजते॥
यमः सत्येन हरति सत्येनेन्द्रो विराजते।
वरुणश्च कुबेरश्च तौ च सत्ये प्रतिष्ठितौ॥
तत् सत्यं मम नश्येत तच्चेद् नागमे पुनः॥"
इति वाराहे मथुरामाहात्म्ये अम्बरीषतीर्थप्रभाववर्णननामाध्यायः॥

अन्यच्च।

"सत्यं सन्तोष आस्तिक्यं तथा चेन्द्रियनिग्रहः।
देवताभ्यर्चनं पूजा ब्राह्मणानां विशेषतः॥
सत्यं भूतहितं वाक्यमस्तेयं स्वागतस्मरम्।
नियमाः पञ्च सत्याद्या बाह्यमाभ्यन्तरं द्विधा॥"
इति गारुड़े ४६ अध्यायः॥

अपि च।

"येऽधर्म्मा धर्म्मेण ते सत्या येऽधर्म्मेण गतश्रियः।
सत्यशौचं मनःशौचं शौचमिन्द्रियनिग्रहः॥
सर्व्वभूतदया शौचं जलशौचञ्च पञ्चमम्।
यस्य सत्यञ्च शौचञ्च तस्य स्वर्गो न दुर्लभः॥
सत्यं हि वचनं यस्य सोऽश्वमेधादिशिष्यते॥"
इति गारुड़े ११३ अध्यायः॥

अपि च।

"न सा सभा यत्र न सन्ति वृद्धा
वृद्धा न ते ये न वदन्ति धर्म्मम्।
नासौ धर्म्मो यत्र नो सत्यमस्ति
नो तत् सत्यं यच्छलेनानुविद्धम्॥
ब्राह्मणोऽपि मनुष्याणामादित्यश्चैव तेजसाम्।
शिरोऽपि सर्व्वगात्राणां व्रतानां सत्यमुत्तमम्॥'
इति गारुड़े ११५ अध्यायः॥

ब्रह्म। यथा। यः सर्व्वज्ञः सर्व्ववित् यस्य ज्ञानमयं तपः सर्व्वस्य वशी सर्व्वेशानः यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरः सोऽकामयत बहुस्यां स ईक्षत तत्तेजोऽसृजत सत्यं ज्ञानमनन्तं ब्रह्म इत्याद्याः। इति श्रीभागवतदशमस्कन्धीय ८७ अध्यायीवल्लवीश्लोकटीकायां श्रीधरस्वामी॥

अपि च।

"अहमात्मा परं ब्रह्म सत्यं ज्ञानमनन्तकम्।
विज्ञानमानन्दो ब्रह्म सत्तत्त्वमसि केवलम्॥
नित्यं शुद्धं बुद्धियुक्तं सत्यमानन्दमद्वयम्।
योऽसावादित्यपुरुषः सोऽसावहमखण्डतः।
इति ध्यायन् विमुच्येत ब्रह्मणो भवबन्धनात्॥"
इति गारुड़े ४६ अध्यायः॥

तद्वैदिकपर्य्यायः। वट् १ ऋत् २ सत्या ३ अह्ना ४ इत्या ५ ऋतम् ६। इति षट् सत्यनामानि। इति वेदनिघण्टौ। ३। १०॥

सत्यं, [म्] अ, प्रश्नः। स्वीकारः। इति शब्दरत्नावली॥

सत्यः, पुं, (सते हितः। सत्+यत्।) श्रीरामः। यथा,—

"कौशल्यानन्दनः श्रीशः सत्यो दशरथात्मकः॥"
इति शब्दरत्नावली॥

विष्णुः। यथा,—

"औत्तमेऽप्यन्तरे विष्णुः सत्यैः सह स्वयोत्तमैः।
सत्यायामभवत् सत्यः सत्यरूपो जनार्द्दनः॥"
इति कौर्म्मे ४८ अध्यायः॥

अन्यच्च।

"सत्यव्रतं सत्यपरं त्रिसत्यं
सत्यस्य योनिं निहितञ्च सत्ये।
सत्यस्य सत्यमृतसत्यनेत्रं
सत्यात्मकं त्वां शरणं प्रपन्नाः॥"
इति श्रीभागवते १० स्कन्धे १ अध्यायः॥

धान्यैर्ब्राह्मणैश्चैव सहितो धर्मतत्परः।
नैवेद्यं भक्तितो दद्यात् सपादं भक्ष्यमुत्तमम् ॥
रम्भाफलं घृतं क्षीरं गोधूमस्य च चूर्णकम्।
अभावे शालिचूर्णं वा शर्करां वा गुडं तथा ॥
सपादसर्वभक्ष्याणि एकीकृत्य निवेदयेत्।
विप्राय दक्षिणां दद्यात् कथां श्रुत्वा जनः सह ॥
ततश्च बन्धुभिः सार्द्धं विप्रेभ्यः प्रतिपादयन्।
प्रसादं भक्षयेत् भक्त्या नृत्यगीतादिकं चरेत् ॥
ततः स्तुत्वा गृहं गच्छेत् सत्यनारायणं स्मरन्।
एवं कृते मनुष्याणां वाञ्छासिद्धिर्भवेद्ध्रुवम् ॥
विशेषतः कलियुगे नान्योपायोऽस्ति भूतले।
कथामस्य प्रवक्ष्यामि कृतकृत्यो भवेत् द्विजः ॥
कश्चित् काशीपुरे रम्ये आसीद्विप्रश्च निर्धनः।
क्षुधाश्रमाकुलो भूत्वा सततं भ्रमते महीम् ॥
दुःखितं ब्राह्मणं दृष्ट्वा भगवान् ब्राह्मणप्रियः।
वृद्धब्राह्मणरूपः सन् पप्रच्छ द्विजमादरात् ॥
किमर्थं भ्रमसे विप्र! महीं कृतस्त्वं दुःखितः।
तत् सर्वं श्रोतुमिच्छामि कथ्यतां यदि रोचते ॥

विप्र उवाच।

ब्राह्मणोऽतिदरिद्रोऽहं भिक्षार्थं भ्रमते महीम्।
उपायं यदि जानासि कृपया कथय प्रभो ॥

वृद्ध उवाच।

सत्यनारायणो देवो वाञ्छितार्थफलप्रदः।
तस्य त्वं द्विजशार्दूल कुरुष्व व्रतमुत्तमम् ॥
यत् कृत्वा सर्वदुःखेभ्यो मुक्तो भवति मानवः ॥
विधानञ्च व्रतस्यास्य विप्रायाभाष्य यत्नतः।
सत्यनारायणो वृद्धस्तत्रैवान्तरधीयत ॥
ततः प्रातः करिष्यामि व्रतं मनसि चिन्तितम्।
इति सञ्चिन्त्य विप्रोऽसौ रात्रौ निद्रां न चाल-
भत ॥
ततः प्रातः समुत्थाय सत्यनारायणव्रतम्।
करिष्येऽहञ्च सङ्कल्प्य भिक्षार्थमगमद्विजः ॥
तस्मिन्नेव दिने विप्रः प्रचुरं प्राप्तवान् धनम्।
तेनैव बन्धुभिः सार्द्धं सत्यस्य व्रतमाचरत् ॥
सर्वदुःखविनिर्मुक्तः सर्वसम्पत्समन्वितः।
बभूव स द्विजश्रेष्ठो व्रतस्यास्य प्रभावतः।
ततः प्रभृतिकालञ्च मासि मासि व्रतं कृतम् ॥

सूत उवाच।

एवं नारायणस्येदं व्रतं कृत्वा द्विजोत्तमः।
सर्वपापविनिर्मुक्तो दुर्लभं मोक्षमाप्नुयात् ॥
व्रतस्य तस्य यदा विप्रः पृथिव्यां सञ्चरिष्यति।
तदैतत् सर्वदुःखं हि नरायाश्च विनश्यति ॥
एवं नारायणेनोक्तं नारदाय महात्मने।
मयापि कथितं विप्र,किमन्यत् कथयामि ते ॥"
इति श्रीस्कन्दपुराणे रेवाखण्डे सत्यनारायण-
विप्रसंवादो नाम १ अध्यायः ॥ ॥

शौनक उवाच।

"तस्माद्विप्र व्रतं केन पृथिव्यां चरितं सुने।
तत् सर्वं श्रोतुमिच्छामि श्रद्धास्माकं प्रजायते ॥

सूत उवाच।

शृणध्वं सुनयः सर्वे तस्माद्येन कृतं भुवि।
एकदा स द्विजवरो यथाविभवविस्तरैः ॥

बन्धुभिः स्वजनैः सार्द्धं व्रतं कर्तुं समुद्यतः।
एतस्मिन्नेव काले तु काष्ठकेतुः समागतः।
बहिः काष्ठञ्च संस्थाप्य विप्रस्य मन्दिरं ययौ ॥
क्षुधया पीड़ितात्मा स विप्रं दृष्ट्वा तथाविधम्।
प्रणिपत्य द्विजश्रेष्ठं किमिदं क्रियते त्वया।
कृते किं फलमाप्नोति विस्तराद्वद मे प्रभो ॥

विप्र उवाच।

सत्यनारायणस्येदं व्रतं सर्वेप्सितप्रदम्।
दुःखशोकादिशमनं सर्वत्रैव विजयप्रदम् ॥
धनादिसन्ततिकरं सर्वेषामीप्सितप्रदम्।
यस्य प्रसादान्मे सर्वं धनधान्यादिकं महत् ॥
ततस्तु स व्रतं ज्ञात्वा काष्ठकर्त्तातिहर्षितः।
पपौ जलं प्रसादञ्च भुक्त्वा तन्नगरं ययौ ॥
सत्यनारायणं देवं चिन्तयन् स्थिरमानसः।
काष्ठं विक्रीय नगरे प्राप्यते चाद्य यद्धनम्।
तेनैव सत्यदेवस्य व्रतमद्य करोम्यहम् ॥
इति सञ्चिन्त्य मनसा काष्ठं कृत्वा तु मस्तके।
जगाम नगरे रम्ये धनिनां यत्र संस्थितिः।
तद्दिने काष्ठमूल्यञ्च द्विगुणं प्राप्तवानसौ ॥
ततः प्रसन्नहृदयः सुपक्वकदलीफलम्।
शर्कराञ्च घृतं दुग्धं गोधूमस्य च चूर्णकम् ॥
प्रत्येकन्तु सपादञ्च गृहीत्वा गृहमाययौ।
ततो बन्धून् समाकृत्य चकार विधिना व्रतम्।
तद्व्रतस्य प्रसादेन धनपुत्रान्वितोऽभवत्।
इह लोके सुखं भुक्त्वा चान्ते सत्यपुरं ययौ ॥"
इति श्रीस्कन्दपुराणे रेवाखण्डे सत्यनारायण-
कथायां विप्रकाष्ठकेतुसंवादो नाम २ अध्यायः ॥

सूत उवाच।

"पुनरन्यत् प्रवक्ष्यामि शृणुध्वं मुनिसत्तमाः।
आसीदुल्कामुखो नाम नृपतिर्ज्ञानिनां वरः ॥
जितेन्द्रियः सत्यवादी ययौ देवालयं प्रति।
दिने दिने धनं दत्त्वा द्विजान् सन्तोषयेत् सुधीः ॥
भार्या तस्य प्रमुखा च सरोजवदना सती।
सन्ततास्या प्रदिदृक्षुं सकटाक्षं च बिभ्रती ॥
काञ्चीञ्च बिभ्रती श्यामा मालतीमाल्यभूषिता।
भद्रशीला व्रतं सत्यं सिन्धुतीरेऽकरोन्मुने ॥
एतस्मिन्नन्तरे तत्र साधुः कोऽपि समागतः।
वाणिज्यार्थं बहुधनं रत्नाद्यैः परिपूरितः ॥
नावं संस्थाप्य तत्तीरे जगाम तत्तटं प्रति।
दृष्ट्वा तत्र व्रतं सम्यक् पप्रच्छ विनयान्वितः ॥

साधुरुवाच।

किमिदं कुरुषे राजन् भक्तियुक्तेन चेतसा।
प्रकाशं कुरु तत् सर्वं श्रोतुमिच्छामि सम्प्रति ॥

राजोवाच।

पूजनं क्रियते साधो विष्णोरतुलतेजसः।
व्रतस्य स्वजनैः सार्द्धं पुत्रादिप्राप्तये मया ॥

प्रत्युवाच ततो नत्वा राजानं मधुरं वचः।
सर्वं कथय मे राजन् व्रतमेतत् करोम्यहम् ॥
ममापि सन्ततिर्नास्ति सत्यमेतत् सुनिश्चितम्।
ततो निवृत्य वाणिज्यात् सानन्दं गृहमागतः ॥
भार्यायै कथितं सर्वं व्रतञ्च सन्ततिप्रदम्।
तदा व्रतं करिष्यामि यदा मे सन्ततिर्भवेत् ॥

यत्कि[illegible]द्दिवसे तस्य भार्या लीलावती सती।
गर्भयुक्तानन्दचित्तासवहर्म्मपरायणा ॥
पूर्णे गर्भे ततो जाता बालिका चातिनिर्म्मला।
दिने दिने वर्द्धमाना शुक्लपक्षे यथा शशी ॥
ततो वणिक् सुतायाश्च जातकर्म्मादिकञ्चरन्।
नाम्ना कलावती चेति तन्नामकरणं कृतम् ॥
ततो लीलावती प्राह स्वामिनं मधुरं वचः।
न करोषि किमर्थं वा पुरा यच्च प्रतिश्रुतम् ॥
विवाहसमयेऽप्यस्याः करिष्यामि व्रतं प्रिये।
इति भार्यां समाश्वास्य जगाम नगरं प्रति ॥
ततः कलावती कन्या वर्द्धिता पितृवेश्मनि।
दृष्ट्वा कन्यां ततः साधुर्नगरे बन्धुभिः सह।
मन्त्रयित्वा दृतं प्रेरयित्वा स धर्म्मवित्।
विवाहार्थञ्च कन्यायाः वरं श्रेष्ठं विचारयन् ॥
तेनाज्ञप्तश्च दूतोऽसौ काञ्चनं नगरं ययौ।
तस्मादेकं वणिक्पुत्रं समादायागतो हि सः ॥
दृष्ट्वा तं सुन्दरं बालं वणिक्पुत्रं गुणान्वितम्।
ज्ञातिभिर्बन्धुभिः सार्द्धं परितुष्टेन चेतसा।
दत्तवान् साधुराकृष्य कन्यां विधिविधानतः।
ततो भाग्यवशात्तेन विस्मृतं व्रतमुत्तमम् ॥
विवाहसमयेऽप्यस्यास्तेन रुष्टोऽभवद्विभुः ॥
ततः कालेन कियता निजधर्म्मविशारदः।
वाणिज्यार्थं गतः श्रीघ्रं जामाता सहितो
वणिक ॥
रत्नसारपुरे रम्ये गत्वा सिन्धुतटौपतः।
वाणिज्यं कुरुते साधुर्जामाता श्रीमता सह।
पुरीं निर्म्माय नगरे चन्द्रकेतोर्नृपस्य च ॥
एतस्मिन्नेव काले तु सत्यनारायणः प्रभुः।
भ्रष्टप्रतिज्ञमालोक्य शापं तस्मै प्रदत्तवान्।
अद्यप्रभृति कालस्य महादुःखं भविष्यति ॥
तस्मिन्नेव दिने राज्ञो धनमादाय तस्करः।
तेनैव वर्त्मना यातः पृष्ठदेशं विलोकयन् ॥
तत्पश्चाद्धावकान् दूतान् दृष्ट्वा भीतेन चेतसा।
धनं संस्थाप्य तत्रैव गतः शीघ्रमलक्षितः ॥
ततो दूताः समायाता यत्रास्ते सज्जनो वणिक्।
दृष्ट्वा नृपधनं तत्र बद्ध्वा दूता वणिक्सुतौ ॥
हर्षयुक्ता धावमाना ऊचुर्नृपसमीपतः।
तस्करौ द्वौ समानीतौ विलोक्याज्ञापय प्रभो ॥
ते नृपाज्ञां समादाय दृढं बद्ध्वा तु तावुभौ।
स्थापितौ द्वौ महादुर्गे कारागारेऽविचारयन् ॥

सूत उवाच।

मायया सत्यदेवस्य न श्रुतञ्च तयोर्वचः।
ततस्तद्धनं यच्च गृहीतं चन्द्रकेतुना ॥
नष्टापाच्च तयोर्गेहे भार्या च दुःखिताभवत्।
चौरेणापहृतं सर्वं गृहे यच्च स्थितं धनम् ॥
व्याधिव्याधिसमायुक्ता क्षुत्पिपासातिपीड़िता।
अन्नचिन्तापरा भूत्वा भ्रमते च गृहे गृहे ॥
ततः कलावती कन्या बभ्राम प्रतिवासरे ॥
एकस्मिन् दिवसे राज्ञो क्षुधार्त्ता द्विजमन्दिरम्।
गत्वापश्यद्व्रतं तत्र सत्यनारायणस्य सा ॥
उपविश्य कथां श्रुत्वा वरं प्रार्थयती सती।
प्रसादभक्षणं कृत्वा ययौ रात्रौ गृहं प्रति ॥

ततो लीलावती कन्यां भर्तुः सयामास तां मुदम्।
पृच्छि! रात्रौ स्थिता कुत्र किन्ते मनसि वर्त्तते॥
द्विजालये व्रतं मातर्दृष्टं वाञ्छितसिद्धिदम्॥
तत् श्रुत्वा कन्यकावाक्यं व्रतं कर्त्तुं समुद्यता।
ससुता सा वणिग्भार्य्या सत्यनारायणस्य च॥
व्रतं चक्रे च वै साध्वी बन्धुभिः स्वजनैः सह।
भर्त्तृजामातरौ क्षिप्रमागच्छेतां ममाश्रमम्॥
इति देवं वरं याचे सत्यदेवं पुनः पुनः।
अपराधन्तु भर्त्तुर्मे जामातुः क्षन्तुमर्हसि॥
व्रतेन तस्यास्तुष्टोऽसौ सत्यनारायणः प्रभुः।
दर्शयामास स्वप्नं हि चन्द्रकेतुं नृपोत्तमम्॥
बन्दिनौ मोचय प्रातर्वणिजौ नृपसत्तम!।
देयं धनञ्च तत् सर्व्वं विधिना द्विगुणीकृतम्॥
नो चेत् त्वां नाशयिष्यामि सराज्यधनपुत्रकम्।
एवमाभाष्य राजानं ध्यानगम्योऽभवत् प्रभुः॥
ततः प्रभातसमये राजा च स्वजनैः सह:
उपविश्य सभामध्ये प्राह दूतजनं प्रति।
बद्धौ महाजनौ शीघ्रं मोचयध्वं वणिक्सुतौ॥
इति राज्ञो वचः श्रुत्वा मोचयित्वा महाजनौ।
समानीय नृपस्याग्रे प्रोचुश्च विनयान्विताः॥
आनितौ द्वौ वणिक्पुत्रौ मुक्तौ निगडबन्धनात्॥
ततो महाजनौ नत्वा चन्द्रकेतुं नृपोत्तमम्।
स्मृत्वा च पूर्ववृत्तान्तं विस्मयाज्जयविह्वलौ॥
राजा वणिक्सुतौ वीक्ष्य प्रोवाच सादरं वचः।
दैवात् प्राप्तं महत् कष्टमिदानीं नास्ति ते भयम्॥
इदानीमेव मुक्तस्त्वं क्षुरकर्म्मादिकक्षरं॥
ततो नृपवरः श्रीमान् स्वर्णरत्नविभूषणैः।
अलङ्कृत्य वणिक्पुत्रौ वचसाप्रीणयद्भृशम्।
पुरा नीतञ्च यद्द्रव्यं द्विगुणीकृत्य दत्तवान्॥
प्रोवाच तौ ततो राजा गच्छ साधो निजाश्रमम्।
राजानं प्रणिपत्याह गन्तव्यं त्वत्प्रसादतः॥
याचां कृत्वा ततः साधुर्मङ्गलाचारपूर्व्विकाम्।
ब्राह्मणेभ्यो धनं दत्त्वा सहर्षो नगरं ययौ॥
कियद्दूरे गते साधौ सत्यनारायणः प्रभुः।
जिज्ञासां कृतवान् साधो किमस्ति तरणौ तव॥
ततो महाजनो मत्तो हेलया च प्रहस्य च।
कथं पृच्छसि भो दण्डिन्! सुतां किं लब्धुमिच्छसि॥
लतापत्रादिकञ्चैव वर्त्तते तरणौ मम।
निष्ठुरस्य वचः श्रुत्वा सत्यं भवतु ते वचः॥
एवमुक्त्वा गतः शीघ्रं दण्डी तस्य समीपतः।
कियद्दूरे ततो गत्वा स्थितः सिन्धुसमीपतः॥
गते दण्डिनि साधुश्च कृतनित्यक्रियस्तदा।
उत्थितस्तरणौ दृष्ट्वा विस्मयं परमं ययौ॥
लतापत्रादिकं दृष्ट्वा मूर्च्छितो न्यपतद्भुवि।
लब्धसंज्ञो वणिक्पुत्रस्ततश्चिन्तापरोऽभवत्॥
श्वशुरं दुहितुः कान्तो वचनञ्चेदमब्रवीत्॥
जामातोवाच।
किमर्थं क्रियते शोकं श्वशुरादेतु दण्डिनः।
शक्यते तेन सर्व्वं हि कर्त्तुं हर्त्तुं न संशयः॥
तत्कृपयैव यास्यामो वाञ्छितार्थो भविष्यति।
जामातुश्च वचः श्रुत्वा ततस्तस्कार्श्यं गतस्तदा॥
दृष्ट्वा च दण्डिनं भक्त्या नत्वा प्रोवाच सादरम्।
क्षमस्व चापराधं मे यदुक्तं तव सन्निधौ॥
मया दुरात्मना देव सुमोऽहं तव मायया।
यदुक्तं तदहो नाथ दुष्टं मे क्षन्तुमर्हसि॥
यतः परकृताः सर्व्वे क्षमासारा हि साधवः।
पुनः पुनस्ततो नत्वा रुरोद शोकविह्वलः॥
तदुवाच ततो दण्डी विलपन्तं विलोक्य च।
मा रोदीः शृणु मे वाक्यं मम पूजापराङ्मुखः।
मामवज्ञाय दुर्बुद्धे! लब्धं दुःखं सुदुर्मुदुः।
तत् श्रुत्वा भगवद्वाक्यं स्तुतिं कर्त्तुं समुद्यतः॥
साधुरुवाच।
त्वन्मायामोहिताः सर्व्वे ब्रह्माद्याः सिद्धिदेवौकसः।
न जानन्ति गुणं रूपं तवाश्चर्य्यमिदं प्रभो॥
मूढोऽहं त्वां कथं जाने मोहितस्तव मायया।
प्रसीद पूजयिष्यामि यथाविभवविस्तरैः॥
युक्तं वित्तञ्च मच्चित्तं पाहि मां शरणागतम्॥
श्रुत्वा भक्तियुतं वाक्यं परितुष्टो जनार्द्दनः।
वरञ्च वाञ्छितं दत्त्वा तत्रैवान्तरधीयत॥
ततोऽसौ नावमारुह्य दृष्ट्वा रत्नादिपूरिताम्।
कृपया सत्यदेवस्य यत् फलं वाञ्छितं मम॥
इत्युक्त्वा स्वजनैः सार्द्धं पूजां कृत्वा यथाविधि।
हर्षेण महता साधुः प्रयाणं चाकरोत् द्विजः॥
नावं संयोज्य वेगेन स्वदेशमगमत्तदा॥
ततो जामातरं प्राह पश्य वत्स पुरीं मम।
दूतञ्च प्रेरयामास निजवित्तस्य रक्षकम्॥
ततोऽसौ नगरं गत्वा साधुभार्य्यां विलोक्य च।
उवाच वाञ्छितं वाक्यं नत्वा बद्धाञ्जलिस्तदा॥
निकटे नगरस्यैव जामात्रा सहितो वणिक्।
आगतौ बन्धुवर्गैश्च धनैर्बहुविधैस्तथा॥
श्रुत्वा दूतमुखाद्वाक्यं महाहर्षयुता सती।
सत्यपूजां ततः कृत्वा प्रोवाच तनुजां प्रति।
व्रजामि शीघ्रमागच्छ साधुसन्दर्शनाय च॥
इति मातृवचः श्रुत्वा व्रतं कृत्वा समाप्य च।
प्रसादं संपरित्यज्य गता सा च पतिं प्रति॥
तेन रुष्टः सत्यदेवो भर्त्तारं तरणीन्तथा।
संहृत्य च धनैः सार्द्धं जले तस्मिन् समर्पयत्॥
ततः कलावतीकन्या बालोक्य वणिजं पतिम्।
शोकेन महता तत्र रुदन्ती चापतद्भुवि॥
दृष्ट्वा तथाविधां कन्यां न दृष्ट्वा तत्पतिं तरीम्।
भीतेन महता साधुः किमाश्चर्य्यमिदं महत्॥
विचिन्तयमानास्ते सर्व्वे बभूवुस्तरिवाहकाः॥
ततो लीलावती साध्वी दृष्ट्वा तद्विह्वला सती।
विललापातिदुःखेन भर्त्तारमिदमब्रवीत्॥
इदानीं नौकया सार्द्धं महाश्चर्योऽभूदलक्षितम्।
न जाने केन देवेन हेलया वापहारितम्॥
सत्यदेवस्य माहात्म्यं किं ज्ञातुं शक्यते बुधैः।
इत्युक्त्वा विललापाथ तत्सखा स्वजनैः सह॥
ततो लीलावती कन्यां क्रोडे कृत्वा रुरोद च।
तनः कलावतीकन्या नष्टे स्वामिनि दुःखिता।
गृहीत्वा पादुकां तस्य अनुगन्तुं मनो दधे॥
कन्यायाश्चरितं दृष्ट्वा समार्श्वः सुजनो वणिक्।
अतिशोकेन सन्तप्तश्चिन्तयामास धर्म्मवित्॥
हृतो हि सत्यदेवेन जामाता सत्यमायया।
सत्यपूजां करिष्यामि यथाविभवविस्तरैः॥
इति सर्व्वान् समाहूय कथितञ्च मनोरथम्।
नत्वा च दण्डवद्भूमौ सत्यदेवं पुनः पुनः॥
ततस्तुष्टः सत्यदेवो गगनाद्वाणिजं प्रति।
जगाद वचनञ्चेदं नैवेद्यमवमन्य च।
आगता स्वामिनं दृष्टुमतोऽद्यैवाभवत् प्रभुः।
गृहं गत्वा प्रसादञ्च भुक्त्वा चायाति सा पुनः।
लब्धभर्तृसुखा साधो भविष्यति न संशयः॥
ततश्च प्राणदं वाक्यं श्रुत्वा गगनमण्डलात्।
क्षिप्रं तदा गृहं गत्वा प्रसादं प्रतिभुज्य च॥
अपश्यत् पुनरागत्य पतिं नावं जनैः सह।
ततः कलावती तुष्टा जगाद पितरं प्रति॥
एहि तात गृहं याहि विलम्बं कुरुषे कथम्।
तत् श्रुत्वा कन्यकावाक्यं सन्तुष्टोऽभूद्वणिक्सुतः॥
पूजनं सत्यदेवस्य कृत्वा विधिविधानतः।
धनैर्बन्धुगणैः सार्द्धं जगाम निजमन्दिरम्॥
पौर्णमास्याञ्च संक्रान्त्यां पूजां कृत्वा यथाविधि।
इह लोके सुखं भुक्त्वा चान्ते सत्यपुरं ययौ॥"
इति श्रीस्कन्दपुराणे रेवाखण्डे श्रीसत्यनारायणकथायां वणिक्साधुमोक्षवर्णनो नाम ३ अध्यायः॥ * ॥

सूत उवाच
"अथ चान्यत् प्रवक्ष्यामि शृणुध्वं मुनिसत्तमाः।
आसीदुल्कामुखो राजा प्रजापालनतत्परः॥
प्रसादं सत्यदेवस्य त्यक्त्वा दुःखमवाप सः।
एकदा स वनं गत्वा हत्वा च विविधान् मृगान्॥
आगत्य वटमूले च दृष्ट्वा सत्यस्य पूजनम्।
गोपाः कुर्वन्ति सन्तुष्टा भक्तियुक्ताः सबान्धवाः॥
राजा दृष्ट्वा तु दर्पेण नागतो न ननाम सः।
ततो गोपगणाः सर्व्वे प्रसादं नृपसन्निधौ॥
संस्थाप्य पुनरागत्य भुक्त्वा सर्व्वे यथेप्सितम्।
ततः प्रसादं संत्यज्य राजा दुःखमवाप सः॥
तस्य पुत्रशतं नष्टं धनधान्यादिकञ्च यत्।
सत्यदेवेन तत् सर्व्वं नाशितं मम निश्चितम्॥
अतस्तत्रैव गच्छामि यत्र देवस्य पूजनम्।
मनसेति विनिश्चित्य ययौ गोपालसन्निधिम्॥
ततोऽसौ सत्यदेवस्य पूजां गोपगणैः सह।
भक्तिश्रद्धान्वितो भूत्वा चकार विधिवन्नृपः॥
सत्यदेवप्रसादेन धनपुत्रान्वितोऽभवत्।
इह लोके सुखं भुक्त्वा चान्ते विष्णुपुरं ययौ॥
य इदं कुरुते सत्यव्रतं परमदुर्लभम्।
शृणोति च कथां पुण्यां भक्तिसंयुक्तफलप्रदाम्॥
धनधान्यादिकं तस्य भवेत् सत्यप्रसादतः।
दरिद्रो लभते वित्तं बद्धो मुच्येत बन्धनात्॥
भीतो भयात् प्रमुच्येत सत्यमेतन्न संशयः।
ईप्सितञ्च फलं भुक्त्वा चान्ते सत्यपुरं व्रजेत्॥
इति वः कथितं विप्राः सत्यनारायणव्रतम्।
यत् कृत्वा सर्व्वदुःखेभ्यो मुक्तो भवति मानवः॥
विशेषतः कलियुगे सत्यपूजाकथाफलम्।
सत्यनारायणं केचित् सत्यदेवं तथापरे॥

नानारूपधरो भूत्वा सर्व्वेषामीप्सितप्रदः ।
भविष्यति कलौ सत्यव्रतरूपी सनातनः ॥
य इदं पठते नित्यं शृणोति सुनिशत्तमाः ।
तस्य नश्यन्ति पापानि सत्यदेवप्रसादतः ॥"
इति श्रीस्कन्दपुराणे रेवाखण्डे सत्यनारायणकथा-नाम ४ अध्यायः ॥ * ॥ इति श्रीसत्यनारायण-व्रतकथा समाप्ता ॥ क्वचित् पुस्तके अध्यायनाम नास्ति । क्वचिच्च भविष्यपुराणे इति श्रुत्वा एतत्कथा लिखिता ॥ * ॥ अथ सत्यनारायण-पूजाप्रकृतिः । आदौ स्वस्तिवाचनपूर्व्वकं सङ्कल्पं कुर्य्यात् । अद्येत्यादि अमुकतिथौ रात्रौ अमुकगोत्रः श्रीअमुकदेवशर्म्मा अमुककामः गणेशादिदेवतापूजापूर्व्वकश्रीसत्यनारायणपूजन-कथाश्रवणमहं करिष्ये । ततः शुक्तं पठेत् । ततः आसनशुद्ध्यादिकं कृत्वा गणेशादिदेवता-नवग्रहदिक्पालान् पूजयेत् । लक्ष्मीसरस्वत्यादि-पुरुषानादिपुरुषश्रीरामलक्ष्मणपूजां कृत्वा यव-तिलैः सत्यनारायणमावाहयेत् । प्रणवव्याहृतीः समुच्चार्य्य भगवन् सत्यनारायण इहागच्छ इहागच्छ इह तिष्ठ इह तिष्ठ मम पूजां गृहाण इत्यादिना आवाह्य पुष्पं गृहीत्वा ध्यायेत् ।
"ध्यायेत् सत्यं गुणातीतं गुणत्रयसमन्वितम् ।
लोकनाथं त्रिलोकेशं पीतामरधरं हरिम् ॥
इन्दीवरदलश्यामं शङ्खचक्रगदाधरम् ।
नारायणं चतुर्ब्बाहुं श्रीवत्सपदभूषितम् ।
गोविन्दं गोकुलानन्दं जगतः पितरं गुरुम् ॥"
इति ध्यात्वा एतत् पाद्यं सत्यनारायणाय नमः ।
अर्घ्यमन्त्रस्तु ।
"यत्नाय यत्नस्वरूपाय हृषीकपतये नमः ।
मया निवेदितो भक्त्या अर्घ्योऽयं प्रतिगृह्य-
ताम् ॥"
एषोऽर्घ्यः श्रीसत्यनारायणाय नमः । पुष्पा-ञ्जलिं गृहीत्वा ।
"नमस्ते विश्वरूपाय शङ्खचक्रधराय च ।
पद्मनाभाय देवाय हृषीकपतये नमः ।
नमोऽनन्तस्वरूपाय त्रिगुणात्मविभासिने ॥"
नैवेद्यं गृहीत्वा ।
"त्वदीयं वस्तु गोविन्द तुभ्यमेव समर्पितम् ।
गृहाण सुमुखो भूत्वा प्रसीद पुरुषोत्तम ॥"
ततः आचमनं दत्त्वा पठेत् ।
"अच्युतं पुण्डरीकाक्षं वृषिंहं दैत्यसूदनम् ।
हृषीकेशं जगन्नाथं वागीशं वरदायकम् ॥
गुणत्रयं गुणातीतं गोविन्दं गरुड़ध्वजम् ।
जगद्वन्द्यं जगानन्दं जानकीवल्लभं जयम् ॥
प्रणमामि सदा सत्यनारायणमतः परम् ।
दुर्गमे विषमे घोरे शत्रुभिः परिमोक्षिते ॥
विविधापत्सु दुष्टेषु तथान्येष्वपि यद्भयम् ।
नामान्येतानि सङ्कीर्त्त्य ईप्सितं फलमाप्नुयात् ॥
सत्यनारायणं देवं वन्देऽहं कामदं शुभम् ।
लीलया च ततं विश्वं येन तस्मै नमो नमः ॥"
ततो दक्षिणान्दद्यात् । यच्छिद्रावधारणं कुर्य्यात् । इति सत्यनारायणपूजाप्रकृतिः ॥

सत्यपुरं, क्ली, (सत्यं पुरम् ।) विष्णुलोकः । यथा,
"ईप्सितञ्च फलं भुक्त्वा चान्ते सत्यपुरं वसेत् ।
इति वः कथितं विप्राः सत्यनारायणव्रतम् ॥"
इति स्कन्दपुराणीयसत्यनारायणव्रतकथा ॥
सत्यफलः, पुं, (सत्यं फलं यस्य ।) विल्ववृक्षः । इति राजनिर्घण्टः ॥
सत्यभामा, स्त्री, कृष्णपत्नीभेदः । इति शब्दरत्ना-वली ॥ सा च श्रीकृष्णस्याष्टमहिष्यन्तर्गत-महिषीविशेषः । यथा,—
"अष्टौ महिष्यस्ताः सर्व्वा रुक्मिण्याद्या महा-त्मनः ।
रुक्मिणी सत्यभामा च कालिन्दी च शुचि-स्मिता ॥
मित्रविन्दा जाम्बवती नाम्नाजिती सुलक्षणा ।
सुशीला नाम तन्वङ्गी महिष्यश्चाष्टमाः स्मृताः ॥"
इति पाद्मे उत्तरखण्डे ६६ अध्यायः ॥
सत्यभारतः, पुं, (सत्यं भारतं यस्य ।) वेदव्यासः । इति त्रिकाण्डशेषः ॥
सत्ययुगं, क्ली, (सत्यं युगम् ।) चतुर्युगानां प्रथम-युगम् । यथा,—
"कृतं सत्ययुगं चैतन्मायौ द्वापरयज्ञियौ ।
कलिर्म्लेच्छकरः कर्म्मयुगं पापन्तु पातकम् ॥"
इति त्रिकाण्डशेषः ॥ * ॥
तस्य कृतनामकारणं यथा,—
"तदुपाधिकृतः कालो ब्रह्मणो जन्मनस्तुरीयकृतः ।
शतसंवत्सरे ब्रह्मा लयं प्राप्नोति हि त्वयि ॥
लयान्ते तन्नाभिमध्यादुत्थितः सृजति प्रभुः ।
ततः कृतयुगान्तेऽहं कालं सङ्कर्म्मयालकम् ॥
कृतकृत्याः प्रजा यत्र तन्नाम्ना मां कृतं विदुः ॥"
इति कल्किपुराणे १६ अध्यायः ॥ * ॥
तद्धर्म्मा यथा,—
"धर्म्मश्चतुष्पादभवत् कृते पूर्णे जगत्त्रयम् ।
देवा यथोक्तफलदाश्चरन्ति भुवि सर्व्वतः ॥
सर्व्वप्रजा बहुमती वृत्तपुष्टजनावृता ।
ब्राह्मचौर्य्यावृतैर्हीना व्याधिव्याधिविवर्ज्जिता ॥
विप्रा वेदविदः सुमङ्गलयुता नार्य्यस्तु चर्य्यान्विताः ।
पूजाहोमपराः पतिव्रतधरा यागोद्यताः क्षत्रियाः ।
वैश्या वस्तुषु धर्म्मतो विनिमयैः श्रीविष्णुपूजा-पराः ।
शूद्रास्तु द्विजसेवनाहरिकथालापाः सपर्य्या-पराः ॥"
इति कल्किपुराणे २८ अध्यायः ॥ * ॥
तद्युगमानं यथा,—
"चत्वारि चीणि द्वे चैकं कृतादिषु यथाक्रमम् ।
संख्यातानि सहस्राणि द्विगुणानि शतानि च ॥"
इति श्रीभागवते १२ स्कन्धे ४ अध्याये २ श्लोक-टीकायां श्रीधरस्वामी ॥ तस्योत्पत्त्यादिर्यथा ।
वैशाखशुक्लपक्षे तृतीयायां रविवारे सत्य-युगोत्पत्तिः । तत्रावतारचतुष्टयं मत्स्यकूर्म्म-वराहसिंहाः । पूर्णे पुण्यम् । प्रामं नास्ति ।

कुरुक्षेत्रं तीर्थम् । गृहाग्नौ ब्राह्मणः । मध्या-गताः प्राणाः । इच्छान्तुः । एकविंशति-हस्तपरिमितो मानवदेहः । लक्षवर्षं परमायुः । सुवर्णनिर्म्मितभोजनपात्रम् । सत्ययुगाब्दाः १७२८००० । सत्ययुगस्य राजा बलिः वेणः मान्धाता पुरोरवा धुन्धुमारिकः कार्त्तवीर्य्यः एते षट् चक्रवर्त्तिनः ॥ सत्ययुगस्य लक्षणम् ।
"सत्यधर्म्मरतो नित्यं तीर्थानाञ्च सदाश्रयम् ।
नन्दन्ति देवताः सर्व्वाः सत्ये सत्यरता नराः ॥"
तत्र तारकब्रह्मनाम यथा,—
"नारायणपरा वेदा नारायणपराः क्रियाः ।
नारायणपरा मुक्तिर्नारायणपरा गतिः ॥"
इति मुद्राङ्कितपञ्जिकातः संगृहीतम् ॥
सत्ययुगाद्या, स्त्री, (सत्ययुगस्य आद्या तिथि-रित्यर्थः ।) कृतयुगारम्भकतिथिः । सा तु वैशाखशुक्लतृतीया । तद्विवरणं युगाद्याशब्दे द्रष्टव्यम् ॥
सत्ययौवनः, पुं, (सत्यमेव यौवनमिव यस्य ।) विद्याधरः । इति जटाधरः ॥
सत्यरतः, पुं, (सत्ये रतः ।) सत्यव्रतराजपुत्रः । यथा,—
"त्रिधन्वनः सुतो जातस्त्र्यारुण इति स्मृतः ।
तस्य सत्यव्रतो नाम तस्मात् सत्यरतः स्मृतः ॥
तस्य पुत्रो हरिश्चन्द्रो हरिश्चन्द्राच्च रोहितः ।"
इति मात्स्ये १२ अध्यायः ॥
सत्यलोकः, पुं, (सत्यो लोकः ।) सप्तलोकान्तर्गत-लोकविशेषः । यथा,—
"षड्गुणेन तपोलोकात् सत्यलोको विराजते ।
अपुनर्मारका यत्र ब्रह्मलोको हि स स्मृतः ॥"
इति विष्णुपुराणे २ अंशे ७ अध्यायः ॥
जनलोकापेक्षयैव षड्गुणेन द्वादशकोटूयुक्त्रा-वेण तपोलोकानन्तरं सत्यलोकः । न तु तपो-लोकात् षड्गुणेनेति मन्तव्यम् । तथा सत्य-चत्वारिंशत्कोटूयुक्त्रायत्वेन ब्रह्माण्डे तस्यावकाशाभावात् । सूर्य्याख्यगोलयोरन्तःकोट्यः स्युः पञ्चविंशतिरिति श्रुतेश्च । सत्यलोक एव कक्षा-भेदेन ब्रह्मशिष्टात् परं वैकुण्ठलोकादि ज्ञेयम् । एवञ्च भूतलादूर्द्धं पञ्चदशलक्षोत्तराख्ययोर्वि-श्रुतिः कोट्यो भवन्ति । सत्यलोकादूर्द्धञ्च पञ्च-दशलक्षोनकोटिद्वयादण्डकटाह इति ज्ञेयम् । अपुनर्मारकाः पुनर्मृत्युशून्याः । इति तट्टीका ॥
सत्यवचाः, [स्] पुं, (सत्यं वचो यस्य ।) ऋषिः । इत्यमरः ॥ सत्यवादिनि, त्रि ॥
सत्यवती, स्त्री, (सत्यमस्यस्तीति । सत्य + मतुप् । मस्य वः । ङीप् ।) व्यासमाता । तत्पर्य्यायः । काली २ योजनगन्धा ३ गन्धकाली ४ मत्स्यो-दरी ५ व्यासमाता ६ सत्या ७ चित्राङ्गदप्रसूः ८ विचित्रवीर्य्यसूः ९ कक्षा १० दाशेयी ११ दाश-नन्दिनी १२ । इति शब्दरत्नावली ॥ (यथा, भागवते । १ । ३ । २१ ।
"ततः सप्तदशे जातः सत्यवत्यां पराशरात् ।
चक्रे वेदतरोः शाखा दृष्ट्वा पुंसोऽल्पमेधसः ।")

नारदपत्नी । (यथा, महाभारते ।५।१२७।१५।
"दमयन्ती नलश्चैव सत्यवत्यान्च नारद: ।")
अप्सरोकन्यभेदे । इति मेदिनी: (यथा, हरिवंशे । २७ । १९ ।
"गाधे: कन्या महाभागा नाम्ना सत्यवती शुभा ।
तां गाधि: काव्यपुत्राय ऋचीकाय ददौ प्रभु: ।")
सत्यविशिष्टे, त्रि । (यथा, भागवते ।८।२१।४६।
"पृच्छेन त्वयते लोकानिति सत्यवती श्रुति: ।
ब्रह्मदण्डहत: पापो वेनोऽत्यतरत्तम: ।")
ऋचीकपत्न्या: प्रमाणान्तरं यथा,—
"ब्रह्मपुत्रो भृगुर्नाम ऋचीकस्तत्सुतोऽभवत् ।
स भार्य्यार्थी चरन् भूमौ काव्यकुब्जं गत: पुरा ।
ददर्श चारुसर्वाङ्गं चन्द्रोर्व्वंशमसुद्भवम् ।
कुशिकस्य सुतं गाधिं तपसा दुष्प्रधर्षम् ।
चारुसर्वाङ्गतस्तस्य पुत्रकामस्य भूपते: ।
सभार्य्यस्य सुता यत्ने देवकन्यासमा शुभे: ।
ऋचीको भृगुपुत्रस्तां भार्य्यार्थं समयाचत ।
गाधि स्तमतिमाद्दृत्यं न चोवाच वृषो सुनिम् ।
शुल्कं: श्यामकर्णानामश्वानां चन्द्रवर्चसाम् ।
सहस्रमेकं यो दद्यात्तस्मै पुत्री प्रदीयते ।
ऋचीक उवाच ।
दास्याम्यश्वसहस्रन्तु तव राजंस्तथाविधम् ।
कन्यार्थं मम भद्रन्ते दत्तं सम्यक् प्रचेतसा ।
आदायाश्वसहस्रं स मुनिर्गाधिमथाभ्यगात् ।
ज्ञानयन् गाधिरादाय पुत्रीं सत्यवतीं सताम् ।
ऋचीकाय ददौ तस्मै कन्यामात्मानमिन्दितम् ।
मुदित: स तया रेमे यथाकामं समाश्रमे ।
ततश्चारं सुतं श्रुत्वा द्रष्टुं पुत्रं स्वकं भृगु: ।
ययौ तत्राश्रमं पुण्यं तपसा तपतां वरम् ।
दम्पती तं समासीनं भृगुं देवसमार्चितम् ।
पूजयित्वा सभार्य्यौ तौ सुखासीनौ कृताञ्जली ।
तयो भृगु: सुतां वीक्ष्य सुतीक्ष्णं इदमब्रवीत् ।
वरं वरीष्व दास्यामि यत्तेऽभिलषितं शुभे ।
अपत्यं दुष्करं वापि मत्त स्ते पतिते भृशम् ।
तत: सत्यवती पुत्रं तपोज्ञानयशस्करम् ।
मातुश्च भीरमतुलं धर्म्मं वरमयाचत ।
स चैवमस्त्विति प्रोक्त्वा भृगुर्भार्य्यामुवाच ह ।
विश्वावसौ गते स्वर्गं तव मातर्मम प्रिये ।
तपश्चरन्तौ सैवं वा मोक्षौ तौ सुतरन्त: ।
ऋचीकस्तपसोग्रेण ब्राह्मण्यं लब्धवान् परम् ।
सत्यवत्यपि कौशिक्यै भूत्वा लोकनमस्कृता ।
विश्वामित्रौ महत्वं महात्मं लब्धवती च या: ।
तस्य हि:स्वाध्यायस्य निःसृतं वै यजुर्मयम् ।
सर्वं तत् द्विगुणं तस्या भृगुरात्मिमत्मजायै ।
सत्यवत्यै ददौ तुष्टो ब्रह्मर्षित्वमवाप्तवान् ।
ततो ज्ञानदिनेऽत्यन्तमतिचारक्तकं चरुम् ।
आदात् सत्यवती तस्या माता पक्वं हितं चरुम् ।
परिवर्त्तन्तु तं ज्ञात्वा दिव्यज्ञानो भृगुर्मुनि: ।
अथागम्य सुतां तान्तु वचनचेदमब्रवीत् ।
विपर्य्ययकृतया भद्रे दृष्टालिङ्गनकर्म्मणि ।
तया चरुप्राशने च तच्चेष्टन्ते भविष्यति ।
ब्राह्मण: क्षत्रियाचारस्तव पुत्रो भविष्यति ।
क्षत्रियो ब्राह्मणाचारो मातुस्ते भविता सुत: ।
इत्युक्त्वा भृगुवा साध्वी तदा सत्यवती भृगुम् ।
पुन: प्रसादयामास पौत्रो मेऽस्त्विति तादृश: ।
एवमस्त्विति प्रोक्त्वा स तत्रैवान्तर्दधे भृगु: ।
अथ काले सुतं दीप्तं जमदग्निञ्च भार्गवम् ।
सुषुवे सत्यवती तस्या विश्वामित्रं तपोधनम् ।
जमदग्निस्तपो वेदान् चतुर: प्राप सा चिरम् ।
प्रादुरासन्तुर्व्वेदा: स्वयं तस्मिन् महात्मनि ।
विश्वामित्रोऽपि सकलान् वेदानधि तथाचिरात् ।
धनुर्व्वेदं तथा क्रतुं विप्रर्षाभूत्तपोधन: ।
याज्ञवल्क्यमानस्तेऽपत्नी जमदग्निर्महातपा: ।
वेदैस्तपोभि: स सुतीव्रकामश्च ऊर्ध्वयत् ।"
इति श्रीकालिकापुराणे जामदग्न्योपाख्याने ८४ अध्याय: ।
सत्यवतीसुत:, पुं, (सत्यवत्या: सुत: ।) व्यास: ।
इति शब्दरत्नावली । (यथा, महाभारते । १ । १५७ । १२ ।
"एवं स तान् समाश्वास्य व्यास: सत्यवतीसुत: ।
एकचक्रामभिगत: कुन्तीमाश्वासयत् प्रभु: ।"
जमदग्नि: । इति पुराणम् ।)
सत्यवाक्, [च्] पुं, (सत्या वाक् यस्य ।) ऋषि: ।
इति शब्दरत्नावली । (कश्यपपत्न्या मुने: पुत्रविशेष: । यथा, महाभारते । १ । ६५ । ४३ ।
"सत्यवाक्कर्षपश्चैव प्रयुतश्चापि विश्रुत: ।")
काक: । इति त्रिकाण्डशेष: । (मावर्णमनुपुत्रविशेष: । यथा, मार्कण्डेये । ८० । १२ ।
"विरजाश्चार्णवीरश्च निर्मोह: सत्यवाक् शुचि: ।
विष्वक्सेनश्च सनया: सावर्णस्य मनोर्सुता: ।")
सत्यवादिनि, त्रि । (यथा, रामायणे । २ । २८ । ११ ।
"ज्ञातयश्चार्य मनुष्यन्ति सत्यवाग् भवतु द्विज: ।")
सत्यवादी, [न्] त्रि, (सत्यं वदतीति । वद + णिनि: ।) यथार्थवक्ता । सत्यवाच: । अस्योदा: ७ । इति शब्दमाला । (यथा, मनुसंहितायाम् । ३ । ८८ ।
"अस्मिन् धर्म्मे त्रयोऽप्युक्ता: स्नातकव्रतभिक्षव: ।
सत्यवादी ऊर्ध्वरेता: क्षिप्रं याति परां गतिम् ।")
सत्यवान्, [त्] पुं, (सत्यमस्यास्तीति । सत्य + मतुप् । मस्य व: ।) द्यौर्नामदेव: । मतु सावित्री-पति: । इति मेदिनी । (यस्य सावित्र्युपाख्यानं, महाभारते । ३ । २६३ । ३२ ।
"सत्यं ब्रवीमि ते विप्रा यदेतत् सावितीपतेः ।
सत्यस्यापि ब्राह्मणाश्चाद्भुतमिदं सत्यवादिनि ।"
यस्य विशेषवृत्तान्तस्तु सावित्र्य २८० अध्यायस्य मध्ये: । ४ । यादृशमनुपुरुषविशेष: । यथा, भागवते । ४ । १३ । १६ ।
"स चक्षु: सुनृताकाशां पत्नीं मनुमवाप ह ।
मनोरुत मधिषी विरजानकुला सुतान् ।
पुरं ऋतस्वन्तं तुर्यं सत्यवन्तं स्वरं व्रतम् ।")
सत्यवति, त्रि । (यथा महाभारते । १३ । ७५ । ३४ ।
"सत्यवन्त: स्वर्गलोके मोदन्ते भरतर्षभ ।")
सत्यवृत्त:, त्रि, (सत्ये वृत्तं यस्य ।) सत्यवादी । इति केचित् । (सत्यचरित्रे, क्ली । यथा, महाभारते । १३ । ७३ । ११ ।
"यावच्चीर्णं सत्यवृत्ते रतस्य
दाने वृत्तो य: क्रमो चापराधे ।")
सत्यव्रत:, पुं, (सत्यमेव व्रतं यस्य ।) वैवस्वतमनुसर्व्वर्षणीयपत्यविशेषराज: । यथा,—
"विश्वन्वस्य: सुतो जातस्त्र्यारुण इति स्मृत: ।
तस्य सत्यव्रतो नाम तस्मात् सत्यव्रत: स्मृत: ।"
इति मात्स्ये १२ अध्याय: ।
स च त्रिशङ्कुराज: । यथा,—
"विश्वन्वस्य त्र्यारुणस्त्र्यारुणात् सत्यव्रत: । पौरो त्रिशङ्कुसंज्ञामवाप चाण्डालतासुपगतस्य । द्वादशवार्षिकेष्वसमाहरणां विश्वामित्रस्य कलत्रापत्यपोषणार्थं चाण्डालपरिग्रहपरिहरणार्थञ्च चाक्षुषीतीरे त्र्यम्बो त्र्यम्बांसमनुदिनं यजत: परितुष्टेन च विश्वामित्रेण सशरीर: स्वर्गे चारोपित: । त्रिशङ्कोर्विरुद्धत्व: ।" इति विष्णुपुराणे ४ अंशे ३ अध्याय: । (इक्ष्वाकुपुत्रविशेष: । यथा, महाभारते । १३।१।१५० ।
"जय: सत्यव्रतश्चैव पुरुमित्रश्च भारत ।"
महादेव: । इति महाभारतम् ।१३।१७।५१।
सत्यव्रतपत्नी, स्त्री । यथा, रामायणे ।७।५।१७।
"सा सं वर्षेण सत्यानि राज्ञ: सत्यव्रतस्य वै ।
भरतस्य रता धर्म्मे सत्यसन्धस्य धीमत: ।"
सत्यव्रतविशिष्टे, त्रि । यथा, भारते ।१३।१८।
"एतैश्चापि वंशजा: सर्व्वे राजान: कीर्त्तिता भुवि ।
सत्यव्रता महात्मान: प्रजावन्तो महाबला: ।")
सत्यसङ्गर:, त्रि, (सत्यस्य सङ्गर: सङ्गरो यस्य ।) सत्यसन्धिम: । इति केचित् ।
सत्यसङ्गर:, पुं, (सत्य: सङ्गर: प्रतिज्ञा यस्य ।) सुवेद: । इति त्रिकाण्डशेष: । (अग्निविशेष: । इति भारतम् । २ । ७ । १५ ।)
सत्यसन्ध:, पुं, (सत्ये सन्धा प्रतिज्ञा यस्य ।) रामानुजभक्त: । सत्यसन्धश्च । इति शब्दरत्नावली । (विष्णु: । इति महाभारतम् । १३ । १४८ । ४७ । एकादशरुद्र: । इति च भारतम् । १ । ११७ । ७ ।) सत्यसन्धि, त्रि । यथा,—
"रामेण सत्यसन्धेन सत्यसन्धस्य धीमत: ।
सृष्टि

वन्दे लोकाभिरामं रघुकुलतिलकं राघवं रावणारिम्॥"
इति महानाटके १ अङ्कः।

सत्यसन्धा, स्त्री, (सत्ये सन्धाभिसन्धिर्यस्याः।) द्रौपदी। इति शब्दरत्नावली॥

सत्या, स्त्री, (सत्यमस्त्यस्या इति। सत्य+अच्। टाप्।) सीता। सा च रामपत्नी। सत्यवती। सा तु व्यासमाता। इति शब्दरत्नावली॥ दुर्गा। इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम्॥ (सत्यभामा। सा च कृष्णपत्नी। यथा, भागवते। १।१४।३७।

"यत्पादशुश्रूषणमुख्यकर्म्मणा
सत्यादयो द्व्यष्टसहस्रयोषितः।
निर्जित्य सङ्ख्ये त्रिदशांस्तदाश्रयो
हरन्ति वज्रायुधवल्लभोचिताः॥"

तथा च महाभारते। ३। २३४। २।

"आरुरुहू रथं सत्यामाङ्ग्यामास केशवः॥"

ध्रुवपत्नी। यथा, महाभारते। ३। २१८। ४।

"ध्रुवोरप्रतिमा भार्य्या सत्या सत्याय धर्म्मणा।
अग्निस्वस्य सुतो दीप्तस्त्रिषु; कन्याश्च सुव्रताः॥")

सत्याकृतिः, स्त्री, (सत्यस्य अकृतिः करणम्। "सत्यादशपथे।"५।४।६६। इति डाच्।) अवश्यं मयेतत् क्रेतव्यमिति सत्यकरणम्। तत्पर्य्यायः। सत्यङ्कारः २ सत्यापनम् ३। इत्यमरः॥

सत्याग्निः, पुं, (सत्यस्य अग्निः।) अगस्त्यमुनिः। इति शब्दरत्नावली॥

सत्याकृतं, क्ली, वाणिज्यम्। इत्यमरः॥ किञ्चित् सत्यं किञ्चिदसत्यं सत्यसहितमनृतं वा यत्। इति भरतः॥ (यथा, मनुः। ४। ६।

"सत्याकृतेन वाणिज्यं तेन चैवापि जीव्यते।
सेवा व्याख्यातराख्याता तस्मात्तां परिवर्ज्जयेत्॥"

सत्यमनृतमिति द्वन्द्वे कृते द्विवचनप्रयोगः स्यात्। यथा, याज्ञवल्क्यसंहितायाम्।१।७७।

"दृष्ट्वा रूपे व्याकरोत् सत्याकृते प्रजापतिः॥")

सत्यापनं, क्ली, (सत्यस्य करणम्। सत्य+"सत्यापपाशेति।" ३।१।२५। इति णिच् ल्युक् च ततो ल्युट्।) सत्याकृतिः। इत्यमरः॥

सत्यापना, स्त्री, (सत्यस्य करणम्। सत्य+"सत्यापपाशेति।" ३।१।२५। इति णिच् आपुक् च ततो युच्।) सत्याकृतिः। इत्यमरटीकायां क्षीरस्वामिधृतः॥

सत्योद्यः, त्रि, (सत्यस्य वदनम्। वद्+क्यप्।) सत्यवादी। इति शब्दमाला॥

सद्, तुं ऊ क सम्बन्धे। सन्तौ। इति कविकल्पद्रुमः॥ (अदन्त-पुरा०-आत्म०-सक०-सेट्।) दन्त्यवर्गीयमध्यः। सन्तिर्निर्वाणक्रियेति भट्टमाघः। ऊ, सद्यते। सत्यापयते प्रतिज्ञां साधुः। सन्तिर्विचारणमिति गोविन्दभट्टः। इति दुर्गादासः॥

सद्, क्ली, (सद्यते संतन्यते इति। सद्+घञ्।) यज्ञविशेषः। यथा,—

"नैमिषेयानमिषत्त्रैत्रे ऋषयः शौनकादयः।
सत्रं स्वर्गाय लोकाय सहस्रसममासत॥
कलिमागतमाज्ञाय क्षेत्रेऽस्मिन् वैष्णवे वयम्।
आसीना दीर्घसत्रेण कथायां सक्षणा हरेः॥"
इति श्रीभागवते १ स्कन्धे १ अध्यायः॥

सत्राजित्, पुं, (सत्रेण आजयति लोकानिति। आ+जि+क्विप्।) राजविशेषः। स च श्रीकृष्णश्वशुरः। सत्यभामापिता। परे शृश्निध्वजराजश्च बभूव। इति कल्किपुराणे २७ अध्यायः॥ (त्रि, सन्ततजयशीलः। यथा, ऋग्वेदे। २। २१। १।

"सत्राजिते वृजित उर्व्वराजिते।"

"सत्राजिते सत्रा सन्ततं जयशीलाय।" इति तद्भाष्ये सायणः॥)

सत्रिजातकं, क्ली, (त्रिजातकेन सह वर्त्तमानम्।) मांसभक्षणविशेषः। यथा,—

"मांसं बहुघृतं भृष्टं सिक्थं चोष्णाम्बुना सुहृत्।
जीरकाद्यैः समायुक्तं परिशुष्कं तदुच्यते।
तदेव घृततक्राढ्यं प्रदिग्धं सत्रिजातकम्॥
इति शब्दचन्द्रिका॥"

सत्वरं, क्ली, सह त्वरया वर्त्तते इति। प्रीघ्रम्। इत्यमरः॥ (यथा, रामायणे। २। ३६। १४।

"राजा सत्वरमाहूय याचितं वित्तसञ्चये।
उवाच देशकालज्ञो निश्चितं सर्व्वतः शुचिः॥")

तद्वति, त्रि। इति भरतः॥ (यथा, मनुः। ६। ६४।

"त्रिंशद्वर्षो वहेत् कन्यां हृद्यां द्वादशवार्षिकीम्।
त्र्यष्टवर्षोऽष्टवर्षां वा धर्म्मे सीदति सत्वरः॥")

सत्वरः, पुं, (सत्वर+स्वार्थे अण्।) वृक्षविशेषः। चिचकरः। कविः। इति केचित्॥ उत्तमसारयुक्ते, त्रि॥

सत्वरकारं, क्ली, अम्बुक्तम्। इति हेमचन्द्रः॥ घृतकारेण सह वर्त्तमानम्॥

सदंशकः, पुं, (दंशकेन सह वर्त्तमानः।) कर्कटः। इति राजनिर्घण्टः॥ दंशयुक्ते, त्रि॥

सदंशवदनः, पुं, (सदंशं दंशाकारसहितं वदनं यस्य।) कङ्कपक्षी। इति राजनिर्घण्टः॥

सदञ्जनं, क्ली, (सत् अञ्जनम्।) कुसुमाञ्जनम्। यथा,—

"शैलपुष्पं पुष्पकेतु पौष्पकं कुसुमाञ्जनम्।
सदञ्जनञ्च चाक्षुष्यं माक्षिकं धातुमाक्षिकम्॥"
इति शब्दचन्द्रिका॥

सदनं, क्ली, (सीदन्त्यत्रेति। सद्+अधिकरणे ल्युट्।) गृहम्। इत्यमरः॥ (यथा, रामायणे। २। ६४। ३६।

"तिष्ठ मा मागमः पुत्र यमस्य सदनं प्रति।
त्वो मया सह गन्तासि जनन्या च सभेधितः॥")

जलम्। इति मेदिनी॥

सदः, [स्] स्त्री, क्ली, (सीदन्त्यस्मिन्। सद्+"सर्व्वधातुभ्योऽसुन्।" उणा० ४। १८८। इति असुन्।) सभा। इत्यमरः॥ (यथा, हितोपदेशे।

"विपदि धैर्य्यमथाभ्युदये क्षमा
सदसि वाक्पटुता युधि विक्रमः।
यशसि चाभिरुचिर्व्यसनं श्रुतौ
प्रकृतिसिद्धमिदं हि महात्मनाम्॥"

सदस्यः, पुं, (सदसि साधुः। सदस्+यत्। विधिदर्शी। इत्यमरः॥ न्यूनानिरिक्तानां शौनस्य परिहर्त्तुं विधिं वेदोक्तयज्ञक्रियाकलापं द्रष्टुं शीलं येषां ते सदस्याः। सदसि साधवः कारका इति विकारसंधेयादिना यः। इति भरतः॥ तस्य नामान्तरं प्रश्नवक्ता। यथा,—

"एकः कर्म्मनियुक्तः स्यात् द्वितीयस्तन्त्रधारकः।
तृतीयः प्रश्नकं ब्रूयात्तत्र कर्म्म समाचरेत्।"

कर्म्मनियुक्तः आचार्य्यः स च ब्रह्माङ्गके होमकर्म्मणि ब्रह्मा। स्वयं होमाकरणे होतापि स्वयं प्रधानकर्म्माकरणे प्रतिनिधिरपि। तन्त्रधारकः पुस्तकधारकः। प्रश्नवक्ता सदस्यः। इति संस्कारतत्त्वम्॥* सभ्यः। यथा। सभ्याः सदस्याः पार्षद्याः सभास्तारः सभासदः। सामाजिका इत्यादि हेमचन्द्रः॥

सदा, व. सर्व्वकालः। सर्व्वदा। इत्यमरः॥ यथा,

"परोपकारनिरतः सदा भव महाजन।"
इति विष्णुपुराणम्॥

सदागतिः, पुं, (सदा सर्व्वदा गतिर्यस्य।) वायुः। इत्यमरः॥ (यथा, महाभारते। १। ७२। १।

"ऐरावतस्तथा शक्रः सन्दिदेश सदागतिम्।
प्रातिष्ठत तदा काले मेनका वायुना सह॥")

सूर्य्यः। निर्व्वाणम्। सदीश्वरः। इति मेदिनी॥ (सर्व्वदा गमनशीले, त्रि। यथा, महाभारते। ३। १३३। २५।

"चतुर्विंशतिपर्व्वाणि यानि द्वादशराशयः।
तत्त्रिषष्टिशतारं वै चक्रं पातु सदागतिः॥")

सदाचारः, पुं, (सतां साधूनामाचारः।) साधूनामाचरणम्। तल्लक्षणादि यथा,—

"सरस्वतीदृशद्वत्योर्देवनद्योर्यदन्तरम्।
तं देवनिर्म्मितं देशं ब्रह्मावर्त्तं प्रचक्षते॥
तस्मिन् देशे य आचारः पारम्पर्य्यक्रमागतः।
वर्णानां सान्तरालानां सदाचारः स उच्यते॥"
इति मनुः॥*॥

अन्यच्च।

और्व्व उवाच।

"सदाचारेषु राजेन्द्र विप्रेषान् ब्रूहि संप्रति।
यागवश्यं नृपः कुर्य्यात्तान्मतः सकलान् ब्रूहि॥
साधवः क्षीणदोषास्च सच्छब्दः साधुवाचकः।
तेषामाचरणं यत्तु सदाचारः स उच्यते॥
आगमेषु पुराणेषु संहितासु यथोदितान्।
समुद्दिष्टसदाचारांस्तान् गृह्णीयाद्यथाक्रमम्॥
ऋषीन् यजेदिमाष्टेर्द्वान् होमेषु पूजयेत्।
आद्यैः पितॄन् यजेदन्नैर्भूतानि बलिभिस्तथा॥
मैत्रं प्रसाधनं स्नानं दन्तधावनमञ्जनम्।
सर्व्वं गृहस्थवत् कुर्य्यात् विधिवत्तं विधिं तथा॥
षट्कर्म्मसु नियुञ्जीत राजा विप्रान् समन्ततः।
तथैव क्षत्रियादीनि स्वे स्वे कर्म्मणि योजयेत्॥

य: स्वधर्मं परित्यज्य परधर्मं समाचरेत् ।
तं प्रतेन नृपो दण्ड्य: पुनस्तस्मिन्नियोजयेत् ॥
सांवत्सरेषु क्रत्येषु विप्रेष्वेतान् समाचरेत् ।
अवश्यं पार्थिवो राजन् विप्रेषांस्तु शृणुष्व मे ॥
शरत्काले महाष्टम्यां दुर्गाया: परिपूजनम् ।
नीराजनं दशम्यान्तु कुर्याद्वै बलवृद्धये ॥
पौषे मासि तनीयायां कुर्यात् पुष्याभिषेचनम् ।
पूजयित्वा श्रियं देवीं श्रीपञ्चम्यां नृपश्चरेत् ॥
श्रीयज्ञं धनधान्यस्य वृद्धये नृपसत्तम: ।
ज्येष्ठे दशहरायान्तु विष्णोरिष्टिं समाचरेत् ॥
रवौ हरिस्थे द्वादश्यां शक्रपूजां समाचरेत् ।
विप्रेष्वेतांस्तु नृपति: कुर्यात् सर्वं बहुव्ययै: ।
एभि: क्रतुभिर्बलं राज्यं कोषश्चापि विवर्द्धते ॥
अक्रतुष्वेषु यज्ञेषु दुर्भिक्षं मरकं तथा ।
जायते च नृपस्तस्मादेषु यज्ञं समाचरेत् ॥
शरत्काले महाष्टम्यां दुर्गाया: पूजने विधि: ।
पुरा प्रोक्तस्तु विधिना तेन कार्यस्तु पूजनम् ॥"

इति कालिकापुराणे ८६ अध्याय: ॥ ८ ॥

अपि च ।

"सदाचारे विशेषोऽयं कथितस्तव पार्थिव ! ।
निग्रहेषु विशेषांस्तु शृणु येन श्रियेष्यते ॥
अभिपूज्य तथा विष्णुं शिवामग्निं पुरन्दरम् ।
अदत्त्वा च तथा दानं न भुञ्जीयान्नृप: क्वचित् ॥
द्वावग्निहोत्रिणौ चन्तु नित्यमेव पुरोहिते: ।
अहुत्वा चाग्निहोत्रन्तु भुञ्जन्नरकमाप्नुयात् ॥
नारक्षिते गृहे राजा रक्षद्भिरपरिवर्जिते ।
स्वपेत्तथा स्त्रिया सार्द्धं न कदाचन संविशेत् ॥
भुक्त्वान्नं श्रीफलं नाद्यात्तथा धात्रीफलं नृप: ।
वृद्धिक्षयकरा एता माष व्यायतवल्लिका: ॥
निमाटरूषवृक्षाच्च वृद्धिवृद्धिकरा न ता: ।
वृद्धिवृद्धिकरान्नित्यं त्यजेद्राजा च भोजने ॥
भोजयेदन्नकं वृद्धिवृद्धिहेतुं नृपोत्तम: ।
न पर्य्यायविहीनन्तु प्रारोहेदासनं नृप: ॥
न यानं न गजानश्वमारोहेदीक्ष्य ब्राह्मणम् ।
कैकेयीं न विचरेद्राजा कदाचिदपि निर्जने ॥
मदक्षेणुं न भुञ्जीयात् कदाचिदपि भोजने ।
कदापि नोपसेवेत कृष्णां मांसमैथुने ॥
अमान्नानं यथान्नाद्यं तिलैस्तर्पणमेव च ।
न लोपयद्विजो भूप: कुर्यात् क्षत्रधमाप्नुयात् ॥
न दैवज्ञादीक्षणवान् राजा राज्यमभिषेचयेत् ।
विप्रं न आहयेद्विप्रमीक्षते नक्षये सति ॥
क्रौरव: दैवजश्चैव दक्ष: क्षत्रिय एव च ।
अहोरात्रोषितश्च भामाद्यैक्षणया क्षमे ॥
कृतीयश्च महीपश्च क्रीत: पौनर्भवस्तथा ।
सप्तैतान् पौरुषे पुत्रपांशुला: ॥
अन्यादे पूर्वपूर्वान् यान् समभिषेचनेत् ।
पौनर्भवं सार्द्धदासं राज्ये न योजयेत् ।
दत्ताद्यापि सवया निजगोत्रेण संभिता: ।
आद्यानि पुत्रता मन्यमन्यगोत्रमसूत्रया: ॥
पितामहेन य: पुत्र: संस्कृत: पृथिवीपते ।
आत्मजात्मं न पुत्र: स: पुत्रतां याति चान्यत: ॥
दत्ताद्या यदि संस्कारा निजगोत्रेण वै सता: ।
दत्तायाक्षतयोन्यै स्युरन्यथा दास उच्यते ॥
ऊर्द्धन्तु पञ्चमाद्वर्षाद्दत्ताद्याश्च सुता नृप ।
गृहीत्वा पञ्चवर्षीयं पुत्रेष्टिं प्रथमं चरेत् ॥
पौनर्भवन्तु तनयं जातमात्रं समानयेत् ।
ज्ञात्वा पौनर्भवं क्षोमं जातमात्रस्य तस्य वै ॥
सर्वान्तु कुर्यात् संस्कारान् जातकर्मादिकान्नर: ।
मृते पुनर्भवक्षोमे सुत: पौनर्भवस्तथा ॥
एकोद्दिष्टं पितु: कुर्यान्न श्राद्धं पार्वणादिकम् ।
क्रीताद्या वनिता ज्ञेया: सा दासीति निगद्यते ॥
तस्यां यो जायते पुत्रो दास: पुत्रस्तु स स्मृत: ।
न राज्ञो राज्यभाक् स स्याद्विप्रजातापि चाद्यजात् ।
अधम: सर्वपुत्रेभ्यस्तस्मात् परिवर्ज्जयेत् ॥
पुराणधर्मशास्त्राणि संहिताश्च सुनीरिताम् ।
नाध्यापयेन्नृप: शूद्रैर्विहितान्यत् यदृच्छया ॥
यस्य राज्ये सदा शूद्रा: पुराणं संहितां तथा ।
पठन्ति स्वाम्यहीनाश्चो राजा राष्ट्रेण सान्वय: ॥
मोहाद्वा कामत: शूद्र: पुराणं संहितां स्मृतिम् ।
पठन्नरकमाप्नोति पितृभि: सह पापकृत् ॥
शूद्रोक्ता विहितं यच्च यच्च मन्त्र उदाहृत: ।
तत्तयं विप्रवदनाद्याह्यं शूद्रै: सदैव हि ॥
न योजयेन्नृप: शूद्रं अवहारस्य दर्शने ।
नियोज्य तत्र तं भूप ! तामिस्रे तेन पच्यते ।
हीनायुश्च भवेल्लोको राजा चापि सबान्धव: ॥
कार्यं यज्ञमन्यपुत्रं वानभिज्ञमजितेन्द्रियम् ।
न दुष्टं व्याधितं वापि नृप: कुर्यात् पुरोहितम् ॥
लघणस्य धनं राजा न गृह्णीयात् कदाचन ।
न द्विजानां तथा दद्यात्तानि विपुलान्यपि ॥
नारोहेत् कासुकोष्ट्रं गजं राजा कदाचन ।
आरुह्य कासुकं तन्तु परत्रेह विपद्यते ॥
अनायुष्यं न कुर्य्यात्तु कर्म्म भूप: कदाचन ।
सततं आयुषो वृद्धेर्यतेत सकलैर्बलै: ॥
न क्रूरवारे गाण्यां न यष्ट्यां नृपसत्तम: ।
अक्षनाभ्यङ्गने कुर्यात्तामूलस्यापि भोजनम् ॥
अतिसूक्ष्मं तथा पूर्णं ग्रहणं चन्द्रसूर्य्ययो: ।
नालोकयेत् स्वयं राजा रक्तं सूर्यं तथैव च ॥
उत्पातं जायते यत्तु दिवं भौमञ्च नाभसम् ।
नेक्षेत यत्नान्नृपतिर्दृष्ट्वा नाद्यात् पुन: ॥
सर्वदा मङ्गलं रत्नं धारयेत् सह दूर्व्वया ।
अवश्याच्छादितं गात्रं न विप्रेभ्य: प्रदर्शयेत् ॥
न लोपे स्वं सुखं पश्येन्नाद्यान्मांसानि पर्व्वसु ।
नारोहेन्न स्वरं चोष्ट्रं न वामोभयमेव च ॥
सर्वं नयेन्नृपो राजा चतुरङ्गं विवर्द्धयेत् ।
आत्मानं सततं रक्षेत् सदा वीर्यं विवर्द्धयेत् ॥
पौष्टिकाश्वकरं नित्यं भक्ष्यं भोज्यञ्च पानकम् ।
यत्नेन धारयेन्नाद्यान्नक्तञ्च वृन्तिकम् ॥
कोम्यराजतरङ्गस्थं नीयं पात्रेण्यवर्द्धनम् ।
सूक्ष्मवृद्धिकरं पौष्टिकाश्वकारि विवर्द्धयेत् ॥
नाद्याय: सर्वभोगाद्यं पात्रस्थं फलसम्भवो: ।
शुक्रवृद्धिकरं नीयं नतुपात्रीत यत्नत: ॥
सर्वेषूत्सवेषु क्रतुषु सदाचारेष्वनुद्विग्न: ।
यत्नेन विविधान् भोगानेन्द्रं स्थानं व्रजेत् परं ॥

सदाचा

श्रीमार्कण्डेय उवाच ।

एवमौर्व्वस्तु सगरं शशास मुनिपुङ्गव: ।
शास्त्राणि चैव सर्व्वाणि सदाचारान् सशुक्रकान् ।
बहुश: कथयामास सगराय महात्मने ॥
तन्नास्ति यत् पुरौर्व्वेण कथितं सगराय न ।
राजनीति: सतां नीतिर्यच्चान्यच्छास्त्रसम्भवम् ।
संहितासु पुराणेषु यच्चागमचये स्थितम् ।
सर्व्वं शुश्राव सगरो सुखादौर्व्वस्य धीमत: ॥
तेभ्यान्तु कथितं किञ्चिदुद्धृत्य द्विजसत्तमा: ।
विष्णुधर्म्मोत्तरे पूर्व्वं मया रहसि भारते ॥
राजनीतिं सदाचारं वेदवेदाङ्गसङ्गतम् ।
रहस्यं सततं विष्णोर्वीक्ष्य द्विजसत्तमा: ॥
यच्चानुदितमन्यत्र गदितं वा ससंशयम् ।
संशयच्छेदनं तेषु युष्मभ्यं कथितं त्विदम् ॥
अनुक्तं संशयच्छेदि पुराणं कालिकाह्वयम् ।
योऽभ्यसेत् सततं विप्र: स वेदानां फलं लभेत् ॥"

इति श्रीकालिकापुराणे ८६ अध्याये राजनीति-सदाचारादिकं समाप्तम् ॥ ० ॥ अन्यच्च ।

ऋषय ऊचु: ।

"सदाचारो निगदितस्तव योऽस्माभिरादरात् ।
लक्षणं तस्य व: प्राप्तस्तत्कृणुष्व निशाचर ॥
गृहस्थेन सदा कार्य्यमाचारपरिपालनम् ।
न ह्याचारविहीनस्य भद्रमत्र परत्र च ॥
यज्ञदानतपांसीह पुरुषस्य न भूतये ।
भवन्ति य: सदाचारं प्रवर्त्तते ॥
दुराचारो हि पुरुषो नेह नामुत्र नन्दति ।
कार्य्या यत्न: सदाचारे आचारो हन्त्यलक्षणम् ॥
तस्य स्वरूपं यच्चार: सदाचारस्य राक्षस ।
शृणुष्वैकमनास्त्वत्र यदि श्रेयो हि वाञ्छसि ।
धर्म्मोऽस्य मूलं धनमस्य शाखा
पुष्पञ्च काम: फलमस्य मोक्ष: ।
असौ सदाचारतरु: सुकेशिन्
संसेवितो येन स पुण्यभोक्ता ॥
ब्राह्मे मुहूर्त्ते प्रथमे विबुध्ये-
दनुस्मरेद्देववरं मधूनि ।
प्राभातिकं मङ्गलमेव याच्यं
यदुक्तवान् देवपतिस्त्रिनेत्र: ॥

सुकेश्युवाच ।

किं तदुक्तं सुप्रभातं शङ्करेण महात्मना ।
प्रभाते यत् पठन् मर्त्यो मुच्यते पापबन्धनात् ॥

ऋषय ऊचु: ।

शृणुष्व राक्षसश्रेष्ठ सुप्रभातं हरोदितम् ।
श्रुत्वा स्मृत्वा पठित्वा च सर्व्वपापै: प्रमुच्यते ॥
ब्रह्मा मुरारिस्त्रिपुरान्तकारी
भानु: शशी भूमिसुतो बुधश्च ।
गुरु: सशुक्र: सह भानुजेन
कुर्वन्तु सर्वे मम सुप्रभातम् ॥
भृगुर्वशिष्ठ: क्रतुरङ्गिराश्च
मनु: पुलस्त्य: पुलह: सनोनन: ।
रैभ्यो मरीचिश्च्यवनो दिरुक्ष
कुर्वन्तु सर्वे मम सुप्रभातम् ॥

सनत्कुमारः सनकः सनन्दनः
सनातनोऽप्यासुरिपिङ्गलौ च ।
सप्त स्वराः सप्त रसातलाश्च
कुर्वन्तु सर्वे मम सुप्रभातम् ॥
पृथ्वी सगन्धा सरसास्तथापः
सस्पर्शवायुर्ज्वलितं च तेजः ।
नभः सशब्दं महता सहैव
कुर्वन्तु सर्वे मम सुप्रभातम् ॥
सप्तार्णवाः सप्त कुलाचलाश्च
सप्तर्षयो द्वीपवराश्च सप्त ।
भूरादि कृत्वा भुवनानि सप्त
कुर्वन्तु सर्वे मम सुप्रभातम् ॥
कृत्वं प्रभाते परमं पवित्रं
यः संस्मरेद्विष्णुमथाग्र्यभक्त्या ।
दुःस्वप्ननाशो भवतु सुप्रभाते
भवेच्च सर्वं भगवत्प्रसादात् ॥
ततः समुत्थाय विचिन्तयेच्च
धर्मं तथार्थं च विधाय शय्याम् ।
उत्थाय पश्चाद्धरितृदीच्यं
गच्छेत्समीतृसर्गविधिं हि कर्तुम् ॥
न देवगोब्राह्मणवह्निमार्गे
न राजमार्गे न चतुष्पथे च ।
कुर्याद्दृथोत्सर्गमपीह गोष्ठे
प्रच्छाद्य शीर्षं सुखनासिकश्च ॥
पतेच्च शीर्षार्धसुपाहरेत्पृथं
गृहे त्रयं पालितले च सप्त ।
तथोभयोः पञ्च चतुस्त्रयैकां
सिद्धे तथैकां गुदमाहरेच्च ॥
नाप्तार्जलादाहरणस्त्रिकस्था-
न्न चावशिष्टा गुदनाडिभस्मा ।
पञ्चौषकाश्चैव हि शौचनाथ
शस्ता मराचारविदा नरेण ॥
उदङ्मुखः शास्त्र मही सुविस्तः
समाधमेद्विरकैलिताभिः ।
आचम्य च त्रिः परिमृज्य च द्वि-
स्ततः क्षुरेणाप्यथ शिखिरः करेण ॥
नखान्न निर्लेख्य ततः क्षमेत
कृत्वापि संशौच्य च दन्तधावनम् ।
स्नात्वा तथा दर्पणदर्शनं च
कृत्वा शिरःस्नानमथाधिकं च ॥
संपूज्य गोप्तारमिमं मरुत्वान्
धौम्यश्च कृत्वाग्निमथं शुभानाम् ।
कृत्वा यथोक्तैर्नियमं प्रयत्नं
पूर्वो यथि यमिरशेषदुःखम् ;
पैतृं यशस्यं कृषिं सुखं
यद्गोमयं भस्मिकलक्षणानि ।
स्नाता मनुः प्राशनकश्च
पैशानि पुण्यानि च शोभनानि ॥
पुण्याहवाचं च ऋचश्च मन्त्रै-
मन्त्रोक्तकर्म समाचरेत् ।
...मु पुण्येषु तथाभिषेकं
कृत्वा शिरः पुण्यशोभमाप्नु ॥

स्वगोत्रधर्मं न हि सत्यजेत
तेनापि सिद्धिं समुपाचरेत् ।
नासत्प्रलापं न च सत्यहीनं
न निष्ठुरं नागमशास्त्रहीनम् ॥
वाक्यं वदेत साधुजनेन चैव
निन्द्यो भवेन्नैव च धर्मभेदी ।
सङ्गं न चासत्सु जनेषु कुर्यात्
सन्त्यास भक्ष्यं सुरतं दिवा च ।
सर्वेषु योगेषु परावलासु
रजस्वलास्वेव जलेषु धीरः ॥
वृथाटनं वृथादानं वृथा च पशुमारणम् ।
न कर्मणं गृहस्थेन वृथा दारपरिग्रहम् ॥
वृथाटनान्नित्यहानिर्वृथादानाद्धनक्षयः ।
वृथापशुघ्नः प्राप्नोति यातनानरकं महत् ॥
सन्तत्या हानिरस्माच्च वर्णसङ्करनो भयम् ।
मेतच्च भवेल्लोके वृथादारपरिग्रहात् ॥
परस्वे परदारे च न कार्या बुद्धिरुत्तमैः ।
परस्वं नरकायैव परदाराश्च मृत्यवे ॥
नेच्छेत् परस्वियं नग्नां न सभायेच्च तस्करान् ।
उदक्यां दर्शनं स्पर्शं सभाषाच्च विवर्जयेत् ॥
नैकासने तथा स्त्रियं सुच्छ्यां परजायया ।
तथैव स्नात्र मातुश्च तथैव दुहितुस्त्वपि ॥
न भार्यां वीक्ष्यते नग्नां पुरुषेण कदाचन ।
न च स्नायीत वै नग्नो न मूत्रयीत कदाचन ॥
दिवासस्योऽपि न तथा परिधानमिष्यते ।
भिन्नासनं भाजनादीन् दूरतः परिवर्जयेत् ॥
नद्यास्तु नाभ्यङ्गमुपाचरेत
चौरश्च रिक्तात् जयास्तु मासम् ।
पूर्णासु योषित् परिवर्जनीया
भद्रासु सर्वाणि समालभेत ॥
नाभ्यङ्गमर्के न च भूमिपुत्रे
चौरश्च शुक्रे रविजे च मांसम् ।
बुधेषु योषिन्न समाचरेत
शेषेषु सर्वाणि सदैव कुर्यात् ॥
चित्रासु हस्ते अवसेषु तैलं
चौरं विशाखास्वभिषेतसु वर्ज्यम् ।
मूले मृगे भाग्यदाश्च मांसं
योषिन्मघाश्लेषिकयोश्चरासु ॥
सदैव वर्ज्यं श्रवणे सुदुष्टं-
स्नया प्रतीच्यां रजनीचरेत् ।
शुक्लीत नैवेह च दक्षिणासुखो
न च प्रतीचीमभिभोजनीयम् ॥
देवालयं चैत्यतरुं चतुष्पथं
विप्राधिकक्षामि गुरुं प्रदक्षिणम् ।
कुर्याच्च वामं गमने च धीमान्
द्विषान् स्मशानं मांच निष्ठाचरेत् ॥
मार्जारगृध्रं वपनानि यज्ञतो
गार्धैर्धनानैव हि धारयेत ।
खपाणिरः स्थानतश्च नित्यं
विकारसं चैव विना निशासु ॥
सन्ध्यारागे सन्ध्यमभिधाय
स्नात्वा च सन्ध्यामुपासीत प्रयाहे ।

नाभ्यङ्गितं कायमुपस्पृशेच्च
स्नातो न कैशान् विधुनीत चा
गात्राणि चैवाम्बरपाणिना च
स्नातोऽवलम्ब्याञ्जनीचरेच्च ।
वसेच्च देशेषु सुराजकेषु
सुसंहितस्वोयजनेषु नित्यम् ।
अक्रोधना न्यायपरा अमत्सराः
क्षमोबला लोभविधानयश्च ।
न तेषु देशेषु वसेच्च बुद्धिमान्
यस्मिन्नृपो दण्डरुचिस्वशक्तः ।
जनोऽपि नित्योत्सवबद्धवैरः
सदा जिगीषुश्च निशाचरेन्द्र ॥

अथाद्य ऋतुः ।

यन्न भोज्यं महावाहो सदा धर्मस्थितैर्नरैः ।
यद्भोज्यञ्च वसुदिष्टं कथयिष्यामहे वयम् ॥
लवणमन्नं पर्युषितं स्नेहाक्तं चिरसंभृतम् ।
यस्नेहा लोहयः शुक्ला विकाराः पायसा-
क्षुधा ॥
प्रसृक्कः प्लवको गोधा तथा खड्गी च कच्छपः ।
तद्वद्विदलकादीनि भोज्यानि मनुरब्रवीत् ॥
मणिवस्त्रप्रवालानां तद्वन्मुक्ताफलस्य च ।
शैलदारुमयानाञ्च लवणौषधस्य च ॥
शाकधान्याजिनानाञ्च संहतानाञ्च वाससाम् ।
वल्कलानामशेषाणामम्भसा शुद्धिरिष्यते ॥
सस्नेहानामधोष्णेन तिलकल्केन चाविकम् ।
कार्पासिकानां वस्त्राणां शुद्धिः स्यात् सप्त
भस्मना ॥
नागदन्तास्थिशृङ्गाणां तक्रयोगाच्छुद्धिरिष्यते ।
पुनःपाकेन भाण्डानां दग्धयोगाच्च शुद्धता ॥
शुद्धं भैक्ष्यं कारुहस्तः परान्नं योषिन्मुखं तथा ।
दृष्यागतमविज्ञातं दासवर्गेण यत् कृतम् ॥
वाक्यपूतं चिरानीतमनैकान्तरितं तथा ।
चेष्टितं बालवृद्धानां बालस्त्री सर्वं शुचि ॥
म्लेच्छानामपि गोशाला स्नानत्वयमृता स्त्रियः ।
वाग्विप्रुषो द्विजेन्द्राणां पाठे वाग्मुविन्दवः ॥
भूमिर्लिंगुप्यते स्नातदाहगोक्रमसेचनैः ।
खेपादुल्लिखनात् सेकात् वेश्मसम्मार्जनाच्चलात् ॥
कैशकीटावपन्नेत्रे गोघाते मक्षिकान्विते ।
रुदद्वारिभसाचाराणि प्रक्षेप्यन्यानि शुद्धये ॥
उदुम्बराणाचाम्लेन चारेण त्रयुशीमयोः ।
कांस्यानां भस्मना शुद्धिस्तोयाच्छुद्धिर्द्रवस्य च ॥
अमेध्याक्तस्य रज्ज्वोर्मेध्यापहरणेन च ।
सर्वेषामपि तद्वत्स्यै शुद्धिर्मेध्याव्यहारतः ॥
मातुः प्रसवने वस्त्रः शुक्लानि फलयातने ।
गर्भस्रो भारहारित्वे स्त्रा स्नानमथो शुचिः ॥
रथ्याकर्दमतोयानि गावः पथि तृणानि च ।
मारुतेनैव शुध्यन्ति पङ्क्यैकक्षितानि च ॥
मृतं शोणाक्तवस्त्रस्थमस्थ्यभिमुतं भवेत् ।
अमृतमृत्र सत्यर्थं शौचस्य शौचमुत्तमम् ॥
उपवासे चिरात्रे वा दूषितास्यस्य भोजने ।
चर्वणात् शास्त्रपूर्वं च नैव शुद्धिर्विधीयते ॥
उदक्याश्च तु नमाप्य शुचिरन्तःपुराधिपः ।

"पूर्व्वसङ्कल्पितं द्रव्यं दीयमानं न दुष्यति ॥"
इति ॥

आदिपुराणे ।
"निवृत्ते कृच्छ्रहोमादौ ब्राह्मणादिषु भोजने ।
गृहीतनियमस्यापि न स्यादन्यस्य कस्यचित् ॥
निमन्त्रितेषु विप्रेषु प्रारब्धे श्राद्धकर्म्मणि ।
निमन्त्रणाद्धि विप्रस्य स्वाध्यायाद्धिरतस्य च ।
देहे पितृषु तिष्ठत्सु नाशौचं विद्यते क्वचित् ॥"
प्राजापत्यादिकृच्छ्रे समाप्ते होमयाजनेषु समाप्तेषु सम्पूर्णार्थमवश्यं मया ब्राह्मणा भोजयितव्या इति गृहीतनियमो यस्तस्याशौचेऽन्यकुलजातानामपि भुञ्जानानां दोषाभावः । कस्यचिद्दातृभोक्तॄणामित्यर्थः । एवं प्रारब्धश्राद्धेऽपि कैश्चिदित्यनेनादातृभोक्तॄणामशौचाभावः । तथा च विष्णुः ।
"व्रतयज्ञविवाहेषु श्राद्धे दानेऽर्चने जपे ।
आरब्धे सूतकं न स्यादनारब्धे तु सूतकम् ॥"
इति ॥

पराशरः ।
"दीक्षितेष्वभिषिक्तेषु व्रततीर्थपरेषु च ।
तपोदानप्रसक्तेषु नाशौचं सूतसूतके ॥"
यजमानानां सोमयागाङ्गदीक्षणीवेष्टौ कृतायां दीक्षितत्वं भवति तेन दीक्षणीवेष्ट्युत्तरकालं यजमानस्य यत् कर्म्म तत्राशौचं नास्ति । अभिषिक्तेषु चात्रियवृपतिषु । तीर्थं गङ्गादि । गुरुरिति कश्चित् ॥ कालमाधवीये कूर्म्मपुराणम् ।
"काम्योपवासे प्रक्रान्ते अन्तरा सूतसूतके ।
तत्र काम्यव्रतं कुर्य्यात् दानार्चनविवर्द्धितम् ॥"
तत्र दानार्चनं स्वयं वर्द्धयेत् अन्यद्वारा तु कारयेत् । तथा च मत्स्यपुराणम् ।
"गर्भिणी सूतिका नक्तं कुमारी च रजस्वला ।
यदाशुद्धा तदान्येन कारयेत् क्रियते सदा ॥"
उपवासाधरणे गर्भादिपीडासम्भावनायां नक्तं भोजनं कुर्य्यात् ।
"उपवासेष्वशक्तस्य तदेव फलमिच्छतः ।
अनभ्यासेन रोगार्त्या किमिष्टं व्रतमुच्यताम् ॥"
इति नारदप्रश्नानन्तरम् ।
"उपवासेष्वशक्तानां नक्तं भोजनमिष्यते ।"
इति मत्स्यपुराणं सर्व्वेश्वरप्रतिवचनात् । स्वयमशुद्धा शुद्धद्वारा पूजादिकं कारयेत् । कायिकमुपवासादि सदा शुद्धाशुद्धिकाले स्वयं क्रियते । स्मृतिपरिभाषायामप्येवम् । विष्णुः ।
"वह्निकालिकसङ्कल्पो गृहीतश्च पुरा यदि ।
सूतके सूतके चैव व्रतं तत्रैव दुष्यति ।"
एतत्काम्यव्रतपरम् । नित्यानान्त्वारब्धानामनारब्धानामविशेषेण कर्त्तव्यता । नाशौचमित्यनुवृत्तौ ब्रह्मपुराणम् ।
"नैष्ठिकस्याथवान्यस्य भिक्षार्थं प्रस्थितस्य च ॥"
नैष्ठिकस्य ब्रह्मचारिविशेषस्य । अन्यस्य चतुर्थाश्रमिणः । अशौचिभिक्षागमने दोषाभावः । इति हारलताप्रभृतयः । कौर्म्मे ।
"सद्यःशौचं समाख्यातं दुर्भिक्षे चाणुपप्लवे ।
डिम्बाहवहतानाञ्च विदुषा पार्थिवैर्द्विजैः ।
सद्यःशौचं समाख्यातं ग्रामादिमरणे तथा ॥"
उपप्लवे राजविप्लवे । औपसर्गिकात्यन्तमरकपीडने च सद्यःशौचमुक्तम् । तथा च पराशरः ।
"उपसर्गस्थिते चैव सद्यःशौचं विधीयते ।"
अतएव ।
"आपद्यपि च कष्टायां सद्यःशौचं विधीयते ।"
इति याज्ञवल्क्यवचने अनिरुद्धभट्टशूलपाणिप्रभृतिभिरौपसर्गिकात्यन्तमरकपीड़ायां सद्यःशौचं विधीयते इत्युक्तम् । उपसर्गश्च त्रिविधोत्पातः । तथा च गर्गसंहितायामार्हस्पत्ययोः ।
"अतिलोभादसत्याद्वा नास्तिक्याद्वाप्यधर्म्मतः ।
नरापचारान्निगतमुपसर्गः प्रवर्त्तते ॥
अनोऽपचारान्नियतमप्यवर्ज्जन्ति देवताः ।
ताः सृजन्त्यद्भुतांस्तावद्दिव्यनामसभूमिजान् ॥
त एव त्रिविधा लोके उत्पाता देवनिर्म्मिताः ।
विचरन्ति विनाशाय रूपैः सम्भावयन्ति च ॥"
यद्यप्युपसर्गः स्मृतौ रोगभेदोपप्लवयोरपीति विश्वकोषादुपसर्गस्योभयवाचकत्वं तथाप्यत्र मुनिप्रयुक्तत्वेनान्तरङ्गत्वात् त्रिविधोत्पातात्मकोपसर्गो गृह्यते न तु रोगविशेषात्मक इति । एतेनोपसृजन्तीति व्युत्पत्त्या देहाभ्यन्तर एव यावद्भवति तावत्कालमरण एव सद्यःशौचं बहिर्भावे व्रणपरम्परया मरणे सति स्वजातृक्ताशौचमेवेति त्राहमिति दर्शनस्मृतिसारप्रदीपा इति वाचस्पतिमिश्रोक्तं हेयम् । द्विजैर्ब्राह्मणैः । ग्रामादीत्यादिशब्देनाभिचारग्रस्तस्य ग्रहणम् । ब्रह्मकूर्म्मपुराणाभ्यां यद्ब्राह्मणहतस्याशौचाभाव उक्तः स बुद्धिपूर्व्वकहनने बोद्धव्यः । प्रमादहते त्वशौचादस्त्येव अन्यथा मरीचिवचनं निर्व्विषयं स्यात् । यथा,—
"विषशस्त्राग्न्यपादित्यैर्यो ब्राह्मणघातिनाम् ।
चतुर्दश्यां क्रिया कार्य्या अन्येषान्तु विगर्हिता ॥"
विषादिसाहचर्य्यात् ब्राह्मणहतघातोरस्राक्षीति प्रतीयते । यच्चात्र ये च वै ब्राह्मणैर्हता इति ब्रह्मपुराणीयं साधकत्वेनोपन्यस्तं आहविवेके तच्चिन्त्यम् ।
"महापातकिनो ये च पतितास्ते उदाहृताः ।"
इत्युत्तरार्द्धेन पातित्यमभिधाय तेषां आहनिषेधात् । जाबालः ।
"दुर्भिक्षे राष्ट्रसम्भ्रांते शस्त्रगोब्रह्मघातिते ।
पतितेऽनग्निसंप्रेते विदेशस्थे शिशौ न च ॥"
नाशौचमित्यर्थः । इति शुद्धितत्त्वम् ॥

सद्यस्क, त्रि, (सद्यः कार्य्यमिति । किं + कः ।) नूतनम् । इति हेमचन्द्रः ॥ (यथा, सुश्रुते । १ । ४५ ।
"नवनीतं पुनः सद्यस्कं लघु सुकुमारं मधुरमिति ॥")

सद्योजातः, पुं, (सद्यस्कजातात् जातः ।) वत्सः । इति शब्दचन्द्रिका ॥ शिवः । यथा,—
"सद्योजातं प्रपद्यामि सद्योजाताय वै नमः ।
भवे भवे नातिभवे भवस्व मां भवोद्भवाय नमः ॥"
इति मात्स्ये शिवचतुर्दशीव्रते ७६ अध्यायः ॥ सद्योजाताय नमः । इति शिवरात्रिव्रते शिवस्नानमन्त्रः । इति तिथ्यादितत्त्वम् ॥ तत्प्रशस्ते त्रि ॥

सद्योभावी, [न्] पुं, (सद्यो भवतीति । भू + णिनिः ।) तर्णकः । सद्योजातवत्सः । इति शब्दचन्द्रिका ॥

सद्गः, त्रि, (सीदति गच्छतीति । सद गतौ + "दाधेट्सिशृदसदो रूः ।" ३ । २ । १५६ । इति रूः ।) गमनकर्त्ता । इति सिद्धान्तकौमुदी ॥

सदसद्यः, पुं, श्रामः । सच्छब्दपूर्व्वकवसधातोरथच्प्रत्ययेन निष्पन्नः । इति केचित् ॥ किन्तु संपूर्व्ववसधातोरथप्रत्यये संवसथ इति सिद्धान्तकौमुद्यां निष्पादितम् ॥

सद्वृत्तं, क्ली, (सत् वृत्तम् ।) साधुस्वभावः । सच्चरितम् । इति जटाधरः ॥ (यथा, कथासरित्सागरे । ५१ । २२७ ।
"सच नरवाहनदत्तः सद्वृत्तमनोरमासुदारगुणाम् ।
प्राप्यालङ्कारवतीं वाणीमिव सुकविरास्त तद्रसिकः ॥")

तद्युक्ते, त्रि । यथा,—
"नासमञ्जसशीलैस्तु सहासीत कदाचन ।
सद्वृत्तसन्निकर्षो हि चण्डार्हमपि शस्यते ॥"
इति तिथ्यादितत्त्वम् ॥

सद्वृत्तिभाक्, [ज्] त्रि, (सद्वृत्तिं भजतीति भज् + क्विप् ।) सद्वृत्तिविशिष्टः । यथा, याज्ञवल्क्यः ।
"पञ्चाग्निनां शीलवतां नराणां
सद्वृत्तिभाजां विजितेन्द्रियाणाम् ।
एवंविधानामिदमायुरत्र
चिन्त्यं सदा शुद्धमुनिप्रवादैः ॥"
इति मलमासतत्त्वम् ॥

सधर्म्मचारिणी, स्त्री, (सह धर्म्मं चरतीति । चर + णिनिः । "वोपसर्ज्जनस्य ।" ६ । ३ । ८२ । इति सहस्य सः ।) भार्य्या । यथा,—
"सधर्म्मचारिणी पत्नी जाया च गृहिणी गृहा ॥"
इति हलायुधः ॥
(यथा, महाभारते । १३ । १४० । ४८ ।
"एतन्मे संशयं सर्व्वं वक्तुमर्हसि वै प्रभो ।
सधर्म्मचारिणी चाहं भक्ता चेति वृषध्वज ॥")

सधर्म्मा, [न्] त्रि, (समानो धर्म्मो यस्य । "धर्म्मादनिच् केवलात् ।" ५ । ४ । १२४ । इति अनिच् ।) सदृशः । यथा,—
"तुल्यः समानः सदृक्षः सरूपः सदृशः समः ।
साधारणसधर्म्माणौ सवर्णः सन्निभः सदृक् ॥"
इति हेमचन्द्रः ॥
समानधर्म्मयुक्तश्च ॥ (यथा, मनुः । १० । ४१ ।
"सजातिजानन्तरजाः षट्सुता द्विजधर्म्मिणः ।
शूद्राणान्तु सधर्म्माणः सर्व्वेऽपध्वंसजाः स्मृताः ॥")

सनः

सधर्म्मिणी, स्त्री, (सह धर्म्मोऽस्या अस्तीति। "धर्म्मशीलवर्णान्ताच्च।" ५। २। १३२। इति इनिः। "वोपसर्ज्जनस्य।" ६। ३। ८२। इति सहस्य सः।) भार्य्या। यथा,—

"सुवासिनी वधूटी स्याच्चिरञ्जीवी सधर्म्मिणी।
पत्नी सहचरी पाणिगृहीती गृहिणी गृहा॥"

इति हेमचन्द्रः॥

सधर्म्मी, [न्] त्रि, (सह धर्म्मोऽस्यास्तीति। "धर्म्मशीलवर्णान्ताच्च।" ५। २। १३२। इति इनिः। "वोपसर्ज्जनस्य।" ६। ३। ८२। इति सहस्य सः।) समानधर्म्माचारी। यथा,—

"पशूनां समजोऽन्येषां समानोऽथ सधर्म्मिणाम्॥"

इत्यमरः॥

सधवा, स्त्री, (धवेन भर्त्रा सह वर्त्तमाना।) जीवत्पतिका। तत्पर्य्यायः। सभर्तृका २ पतिवर्त्नी ३ सनाथा ४। इति जटाधरः॥ अस्या धर्म्मा यथा,—

"भर्त्तुः शुश्रूषणं स्त्रीणां परो धर्म्मो ह्यमायया।
तदृवन्धूनाञ्च कल्याण्यः प्रजानाञ्चानुपोषणम्॥
दुःशीलो दुर्भगो वृद्धो जड़ो रोग्यधनोऽपि वा।
पतिः स्त्रीभिर्न हातव्यो लोकेप्सुभिरपातकी॥"

इति श्रीभागवते १० स्कन्धे २९ अध्यायः॥

सधिः, पुं, अग्निः। इति त्रिकाण्डशेषः॥

सधिः, [सु] पुं, (सहते इति। सह+"सहेर्धश्च।" उणा० २। १२४। इति इसिन् धश्चान्तादेशः।) वृषभः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

सध्रीची, स्त्री, (सह अञ्चति या सा। अञ्च+ ऋत्विगादिना क्विन्। सहस्य सधिः। अञ्चतेश्चोपसंख्यानं इति ङीप्। अच इत्यकारलोपः। चावितिदीर्घः।) सखी। इति हेमचन्द्रः॥ (यथा, भट्टिः। ६। ७।

"मीतां सौमित्रिणा त्यक्तां सध्रीचीं चक्षुमकिकाम्।
विज्ञायामंस्त काकुत्स्थः चवे क्षेमं सुदुर्लभम्॥")

सध्र्यङ्, [च्] त्रि, (सह अञ्चतीति। अञ्च गतौ+ ऋत्विगादिना क्विन्। सहस्य सधिः।) सहचरः। इत्यमरः॥ (यथा, भागवते। २। ७। ३७।

"सध्र्यङ् नियच्च यतयो यमकामहेतिं
जघ्नुः खराडिव निपातनखनिर्भिन्नम्॥"

सम्यक्। यथा, तत्रैव। ४। २७। १।

"इत्थं पुरञ्जनं सध्र्यगमानीय विश्वसेः।
पुरञ्जनी महाराज रेमे रमयती पतिम्॥")

सन्, पुं, व्याकरणीयप्रत्ययविशेषः। तत्सूत्रादि यथा। सन्निच्छायाम्। धोः परः सन् स्यादिच्छायाम्। अत्तुमिच्छति जिघत्सति। इति मुग्धबोधव्याकरणं सनन्तपादः॥ * ॥ प्रथमैकवचनान्तपुंलिङ्गसच्छब्दरूपोऽप्येवम्। तदुदाहरणम्। यथा,—

"रामं नमति भागवं धर्म्मानभिनिविश्य सन्॥"

इति तत्रैव कारकपादः॥

सनः, पुं स्त्री, क्षत्त्रिकर्य्यास्नालः। यथा। कर्य्यास्नावे सनः सनी। इति शब्दरत्नावली॥

सनत्कु

सनः, पुं, वण्टापाटलिवृक्षः। इति शब्दचन्द्रिका॥ (सनत्कुमारः। सनकः। सनन्दनः। सनातनः। दाने, क्लीं। अखण्डिते, त्रि॥ यथा, भागवते। २। ७। ५।

"तप्तं तपो विविधलोकसिसृक्षया म
आदौ सनात् स्वतपसः स चतुःसनोऽभूत्॥"

"स हरिः चतुःसनोऽभूत्। सनत्कुमारः सनकः सनन्दनः सनातन इति चत्वारः सनशब्दान्ताः यस्य सः। कथम्भूतात् स्वतपसः सनात् अखण्डितात् यद्वा स्वतपसः सनात् दानात् समर्पणादित्यर्थः सनु दाने।" इति तट्टीकायां श्रीधरस्वामी॥)

सनकः, पुं, विष्णुपारिषदभेदः। इति शब्दरत्नावली॥ स तु ब्रह्मणश्चतुर्य्युत्पन्नान्तर्गतपुत्रविशेषः। यथा,—

"दृष्ट्वा पापीयसीं सृष्टिं नात्मानं बहुमन्यत।
भगवद्ध्यानपूतेन मनसान्यांस्ततोऽसृजत्॥
सनकञ्च सनन्दञ्च सनातनमथात्मभूः।
सनत्कुमारञ्च मुनीन् निष्क्रियानूर्द्धरेतसः॥
तान् बभाषे स्वभूः पुत्रान् प्रजाः सृजत पुत्रकाः।
तन्नैच्छन्मोक्षधर्म्माणो वासुदेवपरायणाः॥"

इति श्रीभागवते ३ स्कन्धे १२ अध्यायः॥ तस्य वासस्थानं जनलोकः। इति काशीखण्डम्॥

सनत्, पुं, ब्रह्मा। इति त्रिकाण्डशेषशब्दरत्नावल्यौ॥

सनत्, व, सर्व्वदा। इत्यमरटीकायां रामाश्रमः॥

सनत्कुमारः, पुं, (सनतो ब्रह्मणः कुमारः।) ब्रह्मणः पुत्रः। तत्पर्य्यायः। वैधात्रः २। इत्यमरः॥ वैधातकिः ३। इति भरतः॥ धातृपुत्रः ४ वेधायः ५। इति शब्दरत्नावली॥ तन्नामव्युत्पत्तिर्यथा। सनत् ब्रह्मा तस्य कुमारः सनत्कुमारः। सन्नित्यकुमारस्तेन सनत्कुमारो वापीति स्वामिमतम्। इति भरतः॥ तन्नामकारणम्। यथा,—

"यथोत्पन्नस्तथैवाहं कुमार इति विद्धि माम्।
तस्मात् सनत्कुमारेति नामैतन्मे प्रतिष्ठितम्॥"

इति महाभारते हरिवंशः॥ * ॥

स च धर्म्मस्यौरसेन अहिंसायां जातः पश्चात् ब्रह्मणो दत्तपुत्रः। अयं साध्यगणः। यथा,—

श्रीनारद उवाच।

"कोऽयं सनत्कुमारेति यस्योक्तं ब्रह्मणा स्वयम्।
तवापि तेन गदितं वद मामनुपूर्व्वतः॥

पूलस्य उवाच।

धर्म्मस्य भार्य्या हिंसाख्या तस्यां पुत्रचतुष्टयम्।
सम्प्राप्तं सुनिशार्द्दूल योगशास्त्रविचारकम्॥
ज्येष्ठः सनत्कुमारोऽभूत् द्वितीयश्च सनातनः॥
तृतीयः सनको नाम चतुर्थश्च सनन्दनः॥
सांख्यवेत्तारमपरं कपिलं वोढुमासुरिम्।
दृष्ट्वा पञ्चशिखं श्रेष्ठं योगयुक्तं तपोनिधिम्॥
ज्ञानयोगं न ते दद्युर्न्यायसोऽपि कनीयसाम्।
ज्ञानमाद्यं महायोगं कपिलादिं चावदत्॥
सनत्कुमारश्चाभ्येत्य ब्रह्माणं कमलोद्भवम्।

सनन्दः

अपृच्छद्योगविज्ञानं तमुवाच प्रजापतिः॥
कथयिष्यामि ते सांख्यं यदि पुत्रेति मे वचः।
श्रद्धोऽपि कुरुषे तच्च ज्ञानं सांख्यं श्रुतो भव॥
पितामहवचः श्रुत्वा साध्यः प्राह तपोधनः।
सर्व्वं हि तव पुत्रोऽहं देव योगं वदस्व माम्॥
तमुवाच महायोगी त्वन्मातापितरौ यदि।
दास्येते च ततः सूनुर्दायादो मेऽसि पुत्रकः॥
सनत्कुमारः प्रोवाच दायादपरिकल्पना।
येषां हि भवता प्रोक्ता तान् मे व्याख्यातुमर्हसि॥
तदुक्तं साध्यसुखेन वाक्यं श्रुत्वा पितामहः।
प्राह प्रहस्य भगवान् शृणु वत्सेति नारद!॥"

इति वामने ५७। ५८ अध्यायौ॥

स च पञ्चहायनवयस्कः चूड़ादिसंस्कारवेदसन्ध्याविहीनश्च। यथा,—

"तच्छ्रुत्वा सञ्जयो राजा रत्नभूषणभूषिताम्।
गृहीत्वा कन्यकां रम्यां नारदाय ददौ मुदा॥
गृहीत्वा च सभार्य्यं तं पुत्रं धाता सुदान्वितः।
प्रययौ ब्रह्मलोकञ्च देवैर्म्मुनिभिः सह॥
तत्राजगाम भगवान् सनत्कुमारो महामुनिः।
सनत्कुमारो भगवान् साक्षाच्च बालको यथा॥
दृष्ट्वैः पूर्व्वञ्च वयसा यथैवं पञ्चहायनः।
अचूड़ोऽनुपवीतश्च वेदसन्ध्यादिहीनकः॥
ब्रह्मेति मन्त्रं जपति यस्य नारायणो गुरुः।
अनन्तकालकल्पञ्च भालभिञ्च चिभिः सह।
वैष्णवानामग्रणीश्चो ज्ञानिनाञ्च गुरोर्गुरुः।
आराद्दृष्ट्वा नारदन्तं भ्रातरञ्च सतां वरम्॥
सहसा शिरसा भूमौ ददण्डवत् प्रणनाम तम्।
उवाच नारदं बालः प्रहस्य परमार्थकम्॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १२६ अध्यायः॥

जिनमते द्वादशसार्व्वभौमान्तर्गतसार्व्वभौमभेदः। इति हेमचन्द्रः॥

सनन्दः, पुं, ब्रह्मणः पुत्रचतुष्टयान्तर्गतपुत्रविशेषः। स तु जनलोकवासी। इति काशीखण्डम्। स एव दिव्यमनुष्यः। अस्य तर्पणं निवीतिना प्रत्यङ्मुखेन प्राजापत्यतीर्थेन सामगेन कर्त्तव्यम्। तदितरेण उदङ्मुखेन कर्त्तव्यम्। यथा दक्षः।

"प्रादेशमात्रमुत्सृत्य सलिलं प्राङ्मुखः सुरान्।
उदङ्मुख्यांस्तर्पयेत पितॄन् दक्षिणतस्त्रिधा॥
अग्नेस्तु तर्पयेद्देवान् मनुष्यान् कुशमध्यतः।
पितॄंस्तु कुशमूलाग्रे विधिः कौशो यथाक्रमम्॥
कृतोपवीती देवेभ्यो निवीती च भवेत्ततः।
मनुष्यांस्तर्पयेद्धीमान् ऋषिपुत्रान् ऋषींस्तथा॥
सनकञ्च सनन्दञ्च तृतीयञ्च सनातनम्।
कपिलञ्चासुरिञ्चैव वोढुः पञ्चशिखन्तथा।
सर्व्वे ते तृप्तिमायान्तु मदत्तेनाम्बुना सदा॥"

अनेनाञ्जलित्रयम्। यथा,—

"एकैकमञ्जलिं देवा द्वौ द्वौ तु सनकादयः।
अर्हन्ति पितरस्त्रींस्त्रीन् स्त्रियस्त्वेकैकमञ्जलिम्॥"

परिशिष्टप्रकाशधृतं सामवेदीयषट्त्रिंशद्ब्राह्मणम्। मनुष्यागामेषा दिक् वा प्रतीचीति। तथा च ज्योतिषेऽपि श्रूयते। प्राचीं

देवा अपजन्त दक्षिणां पितरः प्रतीचीं मनुष्याः उदीचीमसुराः अपरेषामुदीचीं मनुष्याः। विष्णुपुराणे
"प्राजापत्येन तीर्थेन मनुष्यांस्तर्पयेत पृथक्।"
इत्याह्निकाचारतत्त्वम्॥

सनपर्णी, स्त्री, (सनस्य पर्णमिव पर्णमस्याः। पाकर्कर्णेति ङीप्।) अम्लपर्णी। इति शब्दरत्नावली॥

सनसूत्रं, क्ली, (सनस्य सूत्रम्।) पवित्रकम्। इति प्रणसूत्रशब्दे। प्रणस्य सूत्रं प्रणसूत्रं प्रणति ददाति सूत्रं प्रणः। प्रण अन्न दाने क्यन् प्रणाल्लालयादिर्ह्रस्वान्तः। इति वह्वचः। सनो दन्त्यसादिर्दन्त्यनान्तः। इति केचित्। तन्यते षन दु ञ दाने इत्यस्य रूपम्। सणो दन्त्यसादिर्ह्रस्वान्त इत्यपरे। सण किण मणि काकण कोण.काणा इति ह्रस्वान्ते विद्याभरणः।
"कार्पासमुपवीतं स्यात् विप्रस्योर्द्धवृतं त्रिवृत्।
सनसूत्रमयं राज्ञो वैश्यस्याविकसौत्रिकम्॥"
इति मनुवचनात् पवित्रकमपि तदुच्यते। इत्यमरटीकायां भरतः॥

सना, व्य, नित्यम्। इत्यमरः॥ (यथा, ऋग्वेदे। ३। ५४। ६।
"सना पुराणमध्ये न्यारात्॥")

सनात्, व्य, नित्यम्। इत्यमरटीकायां रामाश्रमः॥ चिरात्। यथा, ऋग्वेदे। ४। २०। ६।
"सनादेव सहसे जात उग्रः॥"
"सनादेव चिरादेव जात उत्पन्नः॥" इति तद्भाष्ये सायणः॥) विष्णुः। इति तस्य सहस्रनामस्तोत्रम्॥

सनातनः, पुं, (सना भवः। "सायचिरंप्राह्णे प्रगे इति।" ४। ३। २३। इति ट्युट्युलौ तुट् च।) विष्णुः। शिवः। ब्रह्मा। पितॄणामतिथिः। इति हेमचन्द्रः॥ दिग्गजभेदः। अस्य प्रमाणं सनन्दशब्दे द्रष्टव्यम्। स च ब्रह्मणः पुत्रः। यथा,—
"सनत्कुमारो धर्मश्च सनकश्च सनातनः।
सनन्दश्चापि सूर्यश्च येऽन्ये वा ब्रह्मणः सुताः॥
विचक्षणा न यद्वक्तुं के वान्ये जडबुद्धयः॥"
इति ब्रह्मवैवर्ते प्रकृतिखण्डे ३१ अध्यायः॥
स तु जनलोकवासी। इति काशीखण्डम्॥ वह्निपुराणमते तु तपोलोकस्य इति भेदः। वैष्णवराजः। इति मत्स्यपुराणम्॥

सनातनः, त्रि, (सनाभवः। सायचिरमिति ट्युट्युलौ तुट् च।) नित्यम्। इत्यमरः॥ सुनिश्चलः। इति विश्वः॥ (यथा, मनुः। ७। ६८।
"ऋषीणामुपसृक्तः प्रोक्तो योधधर्मः सनातनः।
अस्मादुन्मार्गप्रवृत्तेन क्षत्रियेण प्रजा रक्षितव्या रिपून्॥")

सनातनतमः, पुं, (अयमेषामतिशयेन सनातनः। तमप्।) विष्णुः। इति महाभारते तस्य सहस्रनामस्तोत्रे। १३। १४८। १०८॥

सनातनी, स्त्री, (सनातन+टित्वात् ङीप्।) दुर्गा। लक्ष्मीः। सरस्वती। इति शब्दरत्नावली॥ तस्या व्युत्पत्तिर्यथा,—
"मन्त्रकाले मना प्रोक्ता विद्यमाने तनीति च।
सर्व्वत्र सर्व्वकालेषु विद्यमाना सनातनी॥"
इति ब्रह्मवैवर्ते प्रकृतिखण्डे ५४ अध्यायः॥
अपि च।
"निर्गुणस्य च नित्यस्य वाचकश्च सनातनः।
सदा नित्या निर्गुणा या कीर्त्तिता सा सनातनी॥"
इति ब्रह्मवैवर्ते श्रीकृष्णजन्मखण्डे २७ अध्यायः॥
अन्यच्च।
"स्थितिं करोति भूतानां सैव काले सनातनी।"
इति देवीमाहात्म्यम्॥

सनाथा, स्त्री, (नाथेन सह वर्त्तमाना।) जीवद्भर्त्तृका। इति जटाधरः॥ (प्रभुविशिष्टे, त्रि। यथा, भागवते। १। ११। ८।
"अहो सनाथा भवता स्म यद्वयं
त्रैविष्टपानामपि दूरदर्शनम्।
प्रेमस्मितस्निग्धनिरीक्षणाननं
पश्येम रूपं तव सर्व्वसौभगम्॥")

सनाभिः, पुं, (समानो नाभिर्गोत्रमस्य। "ज्योतिर्जनपदेति।" ६। ३। ८५। इति समानस्य सः।) सपिण्डः। ज्ञातिः। इत्यमरमेदिनीकरौ॥ (यथा, मनुः। ५। ७२।
"यथोक्तेनैव कल्पेन शुध्यन्ति तु सनाभयः॥")

सनाभिः, त्रि, (समानो नाभिर्यस्येति। समानस्य सः।) तुल्यः। इति मेदिनी॥ स्नेहयुक्तः। इति शब्दरत्नावली॥

सनामकः, पुं, शोभाञ्जनः। इति शब्दचन्द्रिका॥ (समानं नाम यस्य।) समाननामयुक्ते, त्रि॥ (यथा, हरिवंशे। ३१। १४।
"स तासु जनयामास पुत्रिकासु सनामकान्।
दश पुत्रान् महात्मासौ तपस्युग्रेरतान् सदा॥")

सनिः, पुं, (सन+"खनिकष्यञ्जीति।" उणा० ४। १३६। इति इः।) पूजा। दानम्। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ (यथा, ऋग्वेदे। १। १००। १३।
"तं सचन्ते सनयस्तं धनानि॥"
"सनयो धनस्य दानानि सचन्ते सेवन्ते।" इति तद्भाष्ये सायणः॥)

सनिः, पुं, स्त्री, ("सन+खनिकष्यञ्जीति" उणा० ४। १३६। इति इः।) अन्वेषणा। इत्यमरः॥ गुर्व्वादेः सत्कारपूर्व्वकं क्वचिदर्थे नियोजनम्। तच्च हे गुरो अस्माकं कर्म्म कुर्व्वित्यादिरूपम्। सायते दीयते पुण्यादिकमत्र सनिः यन दु ञ दाने गाङ्गीतिः इः पाच्छोगादीति ईपि सनी च। अन्वेषणादिवदध्येषणा। इति भरतः॥ दिक्। इति शब्दमाला॥

सनित, त्रि, प्रतिपन्नः। इति हेमचन्द्रः॥

सनिष्ठैवं, क्ली, (निष्ठीवेन सह वर्त्तमानम्।) सनिष्ठेवम्। इत्यमरटीकायां भरतः॥

सनिष्ठेवं, क्ली, अम्बुकृतम्। इत्यमरः॥ निष्ठेवो मुखवारिबिन्दुः तेन सह वर्त्तते इति सनिष्ठेवं निपूर्व्वष्ठिवेर्घञ् गुणः सनिष्ठीवमिति क्वचित् पाठो लिपिकरप्रमादादिति मुकुटः। इत्यमरटीकायां भरतः॥

सनी, स्त्री, (सन+इः वा ङीप्।) सनिः। इत्यमरटीकायां भरतः॥ हस्तिकर्णास्फालः। इति शब्दरत्नावली॥

सनीडः, त्रि, (नीड्येन वासस्थानेन सह वर्त्तमानः।) निकटः। इत्यमरः॥ (यथा, भट्टिः। ५। ३१।
"सम्प्राप्य तत्सनीडेऽसौ तं वृत्तान्तमशिश्रवत्॥")
नीड्युक्तश्च॥

सन्तः, पुं, संहतलः। इति शब्दचन्द्रिका॥ सच्छब्दस्य प्रथमाबहुवचनान्तरूपम्॥ (यथा, रघुः। १। १०।
"तं सन्तः श्रोतुमर्हन्ति सदसद्व्यक्तिहेतवः।
हेम्नः संलक्ष्यते ह्यग्नौ विशुद्धिः श्यामिकापि वा॥")

सन्ततं, क्ली, (सम्+तन+क्तः। समो वा हितततयोः इति पक्षे मलोपाभावः।) सततम्। तन्वति, त्रि। इत्यमरः॥

सन्ततास्यासः, पुं, (सन्ततं यथा तथा अभ्यासः।) निरन्तराभ्यासः। यथा। स्वाध्यायः सन्ततास्यासः। इति भूरिप्रयोगः॥

सन्ततिः, स्त्री, (सम्+तन+क्तिन्।) गोत्रम्। इत्यमरः॥ (यथा, रघुः। १। ६६।
"सन्ततिः शुद्धवंश्या हि परत्रेहच धर्म्मगे॥")
पंक्तिः। (यथा, कथासरित्सागरे। ११। ५१।
"ततः श्रुत्वा नेत्रयुगलात् सरागादश्रुसन्ततिम्।
हृदयाद्दीरतास्त्राणि सप्त कन्या सुमोच सा॥")
विस्तारः। (यथा, भागवते। १। ४। १६।
"यदधात् यज्ञसन्तत्यै वेदमेकं चतुर्व्विधम्॥")
परम्पराभवः। पुत्रः। कन्या। इति विश्वः॥ (यथा, स्मृतिः।
"सन्तत्या पितृऋणन्तु शोधयित्वा परिव्रजेत्॥")

सन्तप्तः, त्रि, (सम्+तप्+क्तः।) अध्वगमनादिना श्रान्तः। तत्पर्य्यायः। सन्तापितः २ धूपितः ३ धूपायितः ४ दूनः ५। इत्यमरः॥ तप्तः ६। इति शब्दरत्नावली॥ अग्निनतापयुक्तः। यथा,—
"आदित्यदादीप्तशुचानुकल्पं
सिंहासनं तस्य सपादपीठम्।
सन्तप्तचामीकरवल्गुवज्रं
विभागविन्यस्तमहार्घरत्नम्॥"
इति भट्टिकाव्ये ३ सर्गः॥

सन्तमसं, क्ली, (समन्तात् तमः। "अवसमन्धेभ्यस्तमसः।" ५। ४। ७६। इति अच्।) विश्वक्तमः। व्यापकान्धकारः। इत्यमरः॥ (यथा, माघे। १। ६। २२।
"अवधार्य कार्य्यगुरुतामभव-
न्न भयाय सान्द्रतमसन्तमसम्॥")
मोहः। यथा,—

"ममापि किं नो दयसे दयाधन
त्वदङ्घ्रिमग्नं यदि वेत्थ मे मन:।
निमज्जयन् सन्तमसे पराभवं
विधिस्तु वाच्य: क तवागस: कथा॥"
इति नैषधे ९ सर्ग:॥

सन्तर्पणं, क्ली, (सन्तर्पयति इन्द्रियाणीति। सं+तृप्+णिच्+ल्युट्।) द्राक्षादाडिमखर्जूरी-कदलीशर्करालाजाचूर्णमध्याज्यसंमिलितम्। इति राजनिर्घण्टः॥ तृप्तिकारके, त्रि। यथा,
"पुरो महान्नसन्दृब्धान्
सन्तर्पणो नाकसदां वरेण्यः।
जज्वाल लोकस्थितये स राजा
यथाध्वरे वह्निरभिप्रणीतः॥"
इति भट्टिकाव्ये १ सर्गः॥

सन्तान:, पुं, (सन्तनोति विस्तारयति पञ्चपुष्पादीनिति। सम्+तन विस्तारे+"तनोतेरुपसंख्यानम्।" ३।१।१४०। इत्यस्य वार्त्तिकोक्त्या ण:।) कल्पवृक्ष:। (संतन्यते इति। तन+घञ्।) पंक्ति:। इत्यमरः॥ विस्तारः। (यथा, महाभारते। १।१०३।१०।
"तयोरुत्पादयापत्यं सन्तानाय कुलस्य नः।
मन्नियोगात् महाबाहो धर्मं कर्त्तुमिहार्हसि॥")
अपत्यम्। इति मेदिनी॥ (यथा, मनुः।८।५६।
"दैवराते सपिण्डाद्वा स्त्रिया सम्यङ् नियुक्तया।
प्रजेप्सिताधिगन्तव्या सन्तानस्य परिक्षये॥")
तद्विषयार्थवाचः। तुक् १ लोकम् २ ननयः ३ लोकम् ४ तक्ष ५ शेषः ६ अग्रः ७ गयः ८ वाः ९ अमत्यम् १० यजुः ११ क्षुः १२ नपात् १३ प्रजा १४ बीजम् १५। इति पञ्चदशापत्यनामानि। इति वैद्यनिघण्टौ। २।२॥ (यज्ञविशेषे, क्ली। यथा, महाभारते।५।६।६।४०।
"सन्तानं नर्मकं घोरमाज्यमौदकमक्षयम्।
शतैर्विहाः सर्व्व एव मरुत्वं यान्ति मानवाः॥")
सन्तानिका, स्त्री, (सन्तानो विस्तारोऽस्त्यस्या इति। सन्तान+ठन्।) चीरसरः। मर्कटशालकः। छुरिकाफलम्। फेनः। इति हारावली॥ व्याघ्रस्य गुणाः।
"सन्तानिका गुरुः शीता तृष्णा पित्तासवातजित्।"
इति राजनिर्घण्टः॥
मिष्टान्नविशेषः। सरभाजा इति भाषा। तत्करणप्रकारो यथा। दुग्धं शरावचतुष्टयं शर्करार्द्धशरावपरिमितं घृतं शरावमात्रमेकत्र गृहीत्वा तद्दुग्धे चार्द्धपक्वेन घनीभूते सति स्थितिमत्यानन्तरेण मथनेन बहुतरफेनो भविष्यति। ततः फेनमधिदुग्धस्य तस्मादारोपरिरक्षणात् मरौ जायते। तं सरमर्द्धेन चतुष्कोणाकृतिं निर्माय एकेन भृष्ट मक्तान्तरतप्तरारसे मग्नं कुर्य्यात्। किन्तु सन्ताधिकत्वं न रचेत्। इति माकरन्दोऽरः॥ (आलकरन्दुः। यथा, सुश्रुते।१।१५।
"अथ खलु ब्रह्मणस्तनयेभ्यः। तद्यथा औरभ्राणाम्। * * विश्वरन्तुकुशफलसन्तानिकाश्चेति।")

सन्ताप: पुं, (सं+तप+घञ्।) अग्निजताप:। तत्पर्य्यायः। संज्वरः २। इत्यमरः॥ ताप: ३ प्राय: ४ उष्मा ५। इति राजनिर्घण्टः॥ सम्यक् तापनञ्च॥ (यथा, कथासरित्सागरे। १५।७५।
"जन्मना ज्वरसन्तापपीड़ां गाढ़मवाप सः॥"
दु:खम्। यथा, भागवते। ६।१४।४१।
"दासीनां कोऽनु सन्ताप: स्वामिन: परिचर्य्यया।
अभीक्ष्णं लभ्यमानानां दास्या दासीव दुर्भगाः॥")
सन्तापन:, पुं, (सन्तापयतीति। सं+तप+णिच्+ल्युः।) कामदेवस्य पञ्चबाणान्तर्गतबाणविशेषः। इति त्रिकाण्डशेषः॥ सम्यक्तापकारके, त्रि॥ (यथा, भागवते।७।१०।२६।
"दिष्ट्या ते निहत: पापो लोकसन्तापनोऽसुरः।")
सन्तापित:, त्रि, (स+तप+णिच्+क्तः।) अध्वादिना श्रान्तः। इत्यमरभरतौ॥ अस्य पर्य्यायः सन्तप्तशब्दे द्रष्टव्यः॥
सन्ति:, स्त्री, (सन् दाने+क्तिच्। "सनः क्तिचि लोपश्चास्यान्यतरस्याम्।" ६।४।४५। इति नलोपाभावः।) दानम्। अवसानम्। इत्यमरे सातिशब्दटीकायां नीलकण्ठः॥ सतिश्च सातिश्च सतिसाती। सनोतेराप्तिषु तिगन्तस्य एतौ निपातौ। पक्षे सनुतान इति वाक्ये तिकिकल्पते ह्यवचतेरिति इमनिप्रत्यये वनतनेत्यत्र तिकिवर्জनात् नलोपाभावे सन्तिः। इति सुग्धबोधटीकायां दुर्गादासः॥ सन्तिशब्दो निर्विवर्गयेन अस ल भावे इत्यसात् क्तिन्प्रत्ययेन निष्पन्नः। यथा,—
"सन्ति रम्या जनपदा बहुन्नाः परितः कुरून्।"
इति महाभारते विराटपर्व्व॥
सन्तुष्ट:, त्रि, (सं+तुष+क्तः।) सन्तोषयुक्तः। यथा,
"गच्छध्वमसरा: सर्व्वे गृहीत्वार्घ्यं स्वमालयम्।
सन्तुष्टा वरमस्माकं दत्तेदानीं सुपूजिताः॥"
इति छन्दोगपरिशिष्टसर्गतत्त्वम्॥
सन्तोष:, पुं, (सं+तुष+घञ्।) सन्तुष्टिः। तत्पर्य्यायः। धृतिः २ स्वास्थ्यम् ३। इति हैमचन्द्रः॥ (यथा, हितोपदेशे।
"सन्तोषामृततृप्तानां यत् सुखं शान्तचेतसाम्।
कुतस्तद्धनलुब्धानामितश्चेतश्च धावताम्॥")
सन्दंश:, पुं, (सन्दशतीति। सं+दंश+घञ्।) कङ्कमुखः। इति हैमचन्द्रः॥ सोंड़ासी इति भाषा॥ (यथा, मार्कण्डेये।१४।६३।
"निपातितानां भूयिष्ठं उद्बन्धाभि निरोधनाम्।
सन्दंशैः पक्ष्य कृन्तन्ति नरैर्याम्यैर्मुखात्ततः॥")
वैद्यप्रसिद्धौषधयन्त्रविशेषः। यथा, सुश्रुते।१।७।
"तत्र मनःशरीराबाधकराणि शल्यानि तेषामाहरणोपायो यन्त्राणि। तानि षट्प्रकाराणि। तद्यथा। स्वस्तिकयन्त्राणि। सन्दंशयन्त्राणि। ॥॥॥ ते सन्दंशयन्त्रे चतुरङ्गुलौ निर्व्रण

सन्दिग्धा सन्दंशौ घोड़शाङ्गुलौ भवतस्त्वग्मांसशिरास्नायुगतशल्योद्धरणार्थमुपदिश्येते॥")
सन्दंशिका, स्त्री, (सन्दंशतीवेति। सं+दंश+ण्वुल्। टापि अत इत्वम्।) सुचुटी। सोंड़ासी इति चिमटा इति च भाषा। लौहयन्त्रविशेषः॥ कातारि इति भाषा। इति मेदिनी॥
सन्दर्भ:, पुं, (सं+दृभ ग्रन्थने+घञ्।) रचना। इति हलायुधः॥ (यथा, आर्य्यासप्तशत्याम् ७००।
"कविसमरसिंहनादः स्वराक्षुवादः सुधैकसंवादः।
विदुदिनोदकन्दः सन्दर्भोऽयं मया दृष्टः॥")
प्रबन्धः। इति त्रिकाण्डशेषः॥ ग्रन्थनम्। यथा,—
"सन्दर्भो रसना गुम्फः ग्रन्थनं ग्रन्थनं नमः।"
इति हेमचन्द्रः॥
अस्य लक्षणं यथा,—
"गूढ़ार्थस्य प्रकाशश्च सारोक्तिः श्रेष्ठता तथा।
नानार्थवत्त्वं वैदग्ध्यं सन्दर्भः कथ्यते बुधैः॥"
इति रूपसनातनगोस्वामिकृत श्रीभागवतीयघट्सन्दर्भस्य प्रथमसन्दर्भकारिका॥
सन्दर्शनं, क्ली, (सं+दृश+ल्युट्।) सम्यक्प्रकारेण दर्शनम्। यथा,—
"सन्दर्शनार्थमम्बाया नदीपुलिनसंस्थितः।
स च वैश्यस्तपस्तेपे देवीसूक्तं परं जपन्॥"
इति मार्कण्डेयपुराणे देवीमाहात्म्यम्॥
(सं+दृश+णिच्+ल्युट्। कारितदर्शनम्। यथा, महाभारते। १।२।१८०।
"अक्षसन्दर्शनारम्भो धर्मराजस्य सन्निधौ॥")
सन्दानं, क्ली, (सं+दा+ल्युट्।) दाम। इत्यमरः॥ सम्यग्दानञ्च॥
सन्दान:, पुं, गलस्याधोवतोरधोभागः। इति त्रिकाण्डशेषः॥
सन्दानिका, स्त्री, खरिखदिरः। इति राजनिर्घण्टः॥
सन्दानित:, त्रि, (सन्दानं जातमस्येति। सन्दान+इतच्।) बद्धः। इत्यमरः॥
सन्दानिनी, स्त्री, गोगृहम्। इति हेमचन्द्रः॥ गोयालि इति भाषा॥
सन्दाव:, पुं, (सं+दु+"समि युदुद्रुवः।" ३।३।२३। इति घञ्।) पलायनम्। इत्यमरः॥
सन्दाह:, पुं, (सं+दह+घञ्।) सुखतास्वोष्ठदाहः। इति राजनिर्घण्टः॥
सन्दिग्ध:, त्रि, (सं+दिह+क्तः।) सन्देहयुक्तः। यथा,—
"न तावत् सन्दिग्धसाध्यधर्मत्वं पक्षत्वमिति पक्षतालक्षणम्॥"
सन्दिग्धमति:, त्रि, सन्देहविषयीभूतबुद्धियुक्तः। सन्दिग्धा मतिर्यस्य इति बहुव्रीहिसमासनिष्पन्नः॥
सन्दिग्धार्थ:, पुं, (सन्दिग्धोऽर्थः।) सन्देहविषयीभूतार्थः। (सन्दिग्धोऽर्थो यस्य।) तद्विशिष्टे, त्रि॥

सन्दित:, त्रि, (सं+दो अवखण्डने+क्तः।) वद्धः। इत्यमरः॥
सन्दिष्टं, क्ली, (सं+दिश+क्तः।) वार्त्ता। इति शब्दरत्नावली॥ कथिते, त्रि॥
सन्दिष्टार्थः, पुं, (सन्दिष्टोऽर्थो यस्य।) सन्देशहरः। इति केचित्॥
सन्दिह्यानः, त्रि, (सं+दिह+शानच्।) सन्दिग्धः। यथा, जटाधरः।
"सन्दिह्यानः सांशयिकः संशयापन्नमानसः॥"
सन्दी, स्त्री, खट्टा। यथा। निषद्वा खट्टिका सन्दी। इति त्रिकाण्डशेषः॥
सन्दीप्यः, पुं, मयूरशिखावृक्षः। इति शब्दचन्द्रिका॥
सन्देशः, पुं, (सं+दिश+घञ्।) संवादः। इति शब्दरत्नावली॥ (यथा, मेघदूते। ७।
"सन्देशं मे हर धनपतिक्रोधविश्लेषितस्य
गन्तव्या ते वसतिरलका नाम यक्षेश्वराणाम्॥")
स्वनामख्यातमिष्टान्नविशेषश्च॥
सन्देशवाक्, [च्] स्त्री, (सन्देश एव वाक्।) संवादः। तत्पर्य्यायः। वाचिकम् २। इत्यमरः॥
सन्देशहरः, पुं, (हरतीति। हृ+अच्। सन्देशस्य हरः।) दूतः। इत्यमरः॥ (यथा, रघुः। ३। ६६।
"तवैव सन्देशहरात् विशांपतिः
शृणोति लोकेश! तथा विधीयताम्॥")
सन्देशहारकः, पुं, (सन्देशं संवादं हरतीति। हृ+ण्वुल्।) दूतः। इति हेमचन्द्रः॥
सन्देहः, पुं, (सं+दिह+घञ्।) एकधर्म्मिकविरुद्धभावाभावप्रकारकं ज्ञानम्। इति सिद्धान्तमुक्तावली॥ तत्पर्य्यायः। विचिकित्सा २ संशयः ३ द्वापरः ४। इत्यमरः॥ (यथा, महाभारते। ३। ५७। १२।
"तान् समीक्ष्य ततः सर्व्वान् निर्व्विशेषाकृतीन् स्मितान्।
सन्देहादय वेदभौ नाभ्यजानामलं नृपम्॥")
सन्दोहः, पुं, (सं+दुह+घञ्।) समूहः। इत्यमरः॥ (यथा, आर्य्यासप्तशत्याम्। ५८६।
"स्तननतननखक्षेखालम्बो तव धर्म्मसिक्तसन्दोहः।
आभाति पङ्कजे प्रविशन्निव मौक्तिकप्रसरः॥")
सन्द्राव:, पुं, (सं+द्रु+"समि युद्रुवः।" ३। ३। २३। इति घञ्।) पलायनम्। इत्यमरः॥
सन्धा, स्त्री, (सं+धा+अङ्।) स्थितिः। प्रतिज्ञा। इति मेदिनी॥ (यथा, रघुः। १४। ५२।
"गङ्गां निषादाधिपतौ विशेष-
ज्ञानार सन्धामिव मत्यसन्धः॥")
सन्धानम्। इति शब्दरत्नावली॥ सन्ध्या। यथा। सन्धा दिनमणेर्द्वो प्रियप्रसः। इति भरतधृतवाचस्पतिः॥
सन्धानं, क्ली, (सन्धीयते यदिति। सं+धा+ल्युट्।) मद्यसञ्जाकरद्रव्यम्। इति नयनानन्दः॥ तत्पर्य्यायः। अभिषवः २। इत्यमरः॥ सन्धानी ३ सन्धिका ४। इति शब्दरत्नावली॥ सन्धीयते सन्धानं वंशाङ्कुरफलादीन् बहुकालं सन्धाय यत् क्रियते। इति भरतः॥ सङ्कृतम्। इति मेदिनी॥ (यथा, कुमारे। ५। २७।
"सुखेन सा पद्मसुगन्धिना निशि
प्रवेपमानाधरपत्त्रशोभिना।
तुषारवृष्टिक्षतपद्मसम्पदां
सरोजसन्धानमिवाकरोदपाम्॥")
काञ्जिकम्। इति हलायुधः॥ मदिरा। अवदंशः। सौराष्ट्रम्। इति राजनिर्घण्टः॥ धनुषि बाणयोजनम्। यथा,—
"तदाशु कृतसन्धानं प्रतिसंहर सायकम्।
आर्त्तत्राणाय वः शस्त्रं न प्रहर्त्तुमनागसि॥"
इत्यभिज्ञानशकुन्तलायाम् १ अङ्कः॥
अन्वेषणम्। इति लोकप्रसिद्धम्॥ (सन्धिः। यथा, महाभारते। ५। १०। ३३।
"एवं कृते तु सन्धाने हृष्टः प्रमुदितोऽभवत्।
यत्तः समभवचापि शक्रो हर्षसमन्वितः॥")
सन्दधातीति। सं+धा+ल्युः। धारके, त्रि। यथा, सुश्रुते। १। ४५।
"मधु तु मधुरं कषायानुरसं * * * हृद्यं सन्धानं शोधनं रोपणमिति॥")
सन्धानिका, स्त्री, (सन्धानमस्यस्या इति। सन्धान+ठन्।) खाद्यद्रव्यविशेषः। आचार इति भाषा। तत्करणप्रकारादिको यथा। अपक्वाम्रफलानि विंशतिः राजिका शरावषोड़शैकभागमिता मरिचं तोलकद्वयं लवणं षट्तोलकं मेथिकाद्वितोलकं जीरकं तोलकद्वयं हरिद्रातोलकैकं गागरसुस्तकमेकतोलकं कृष्णजीरकं तोलकैकं गृहीत्वा आम्रैभिन्नं सकलद्रव्यं चूर्णयित्वा एकत्रीकुर्य्यात्। आम्रान्तु दीर्घं द्विखण्डं चतुरखण्डं वा कृत्वा अष्टौ दूरीकृत्य तदभ्यन्तरे पूर्व्वोक्तचूर्णं पूरयित्वा शूलाकया विद्धाखण्डान्नवत् कुर्य्यात्। ततस्तैलै निमज्जयेत्। इति पाकराजेश्वरः॥
सन्धानितः, त्रि, सन्धानविशिष्टः। सङ्कुटितः। सन्धानशब्दादितप्रत्ययेन निष्पन्नः॥
सन्धानिनी, स्त्री, गोगृहम्। इति केचित्॥
सन्धानी, स्त्री, (सन्धीयते प्रस्यामिति। सं+धा+ल्युट्। ङीप्।) कृष्णशाला। इति हेमचन्द्रः॥ सन्धानम्। इति शब्दरत्नावली॥
सन्धिः, पुं, (सन्धानमिति। सं+धा+क्तिः।) राजादीनां षड्गुणान्तर्गतगुणविशेषः। स तु स्वार्थादिसाधनेन बन्धुभिः प्रीत्युत्पादनात् मित्रीकरणम्। यथा इति रेवन्त इति च भाषा। तद्विवरणं यथा,—
"प्रबलो भावेत सन्धिः स्वयं हीनस्तमाचरेत्।
मर्य्यादोल्लङ्घनं नास्ति यदि शत्रोरिति स्थितिः॥
मर्य्यादोल्लङ्घनं यत्र शत्रौ संशयितं भवेत्।
न तं संशयितं कुर्य्यादिश्वासाच्च हृष्यतिः॥
बलवद्विगृहीतः सन् नृपोऽन्यप्रतिक्रियः।
आपन्नः सन्धिभावेन विदध्यात् कालयापनाम्॥
ये च दैवेनोपहता राष्ट्रं येषाञ्च दुर्गतम्।
बहवो रिपवो येषां तेषां सन्धिर्विधीयते॥
दुर्म्मन्त्रो भिन्नमन्त्रश्च नीचधर्म्मरतश्च यः।
एतैः सन्धिं न कुर्व्वीत विशेषात् पूर्व्वपीड़ितैः।
सन्धिं हि तादृशैः कुर्व्वन् प्राणैरपि हि हीयते॥"
इति भोजराजकृतयुक्तिकल्पतरुः॥ * ॥
षोड़शविधसन्धिर्यथा,—
"बलीयसाभियुक्तस्तु नृपो नान्यप्रतिक्रियः।
आपन्नः सन्धिमन्विच्छेत् कुर्व्वाणः कालयापनम्॥
कपाल १ उपहारश्च २ सन्तानः ३ सङ्गत-४ स्तथा।
उपन्यासः ५ प्रतीकारः ६ संयोगः ७ पुरुषान्तरः ८॥
अदृष्टनर ९ आदिष्ट १० आत्मादिष्ट ११ उपग्रहः १२।
परिक्रय- १३ स्तथोच्छिन्न- १४ स्तथा च परभूषणः १५॥
स्कन्धोपनेयः १६ सन्धिश्च षोड़शैते प्रकीर्त्तिताः।
इति षोड़शकं प्राहुः सन्धिं सन्धिविचक्षणाः॥"
तेषां लक्षणानि। यथा,—
"कपालसन्धिर्व्विज्ञेयः केवलं समसन्धितः। १।
सम्यग्दानाद्भवति य उपहारः स उच्यते॥२॥
सन्तानसन्धिर्व्विज्ञेयो दारिकादानपूर्व्वकः।३।
सङ्गिस्तु सङ्गतः सन्धिर्मैत्रीपूर्व्व उदाहृतः॥
यावदायुःप्रमाणस्तु समानार्थप्रयोजनम्।
सम्यक्तौ वा विपत्तौ वा कारणैर्यो न भिद्यते॥
सङ्गतः सन्धिरेवायं प्रकृष्टत्वात् सुवर्णवत्।
तथान्यैः सन्धिकुशलैः काञ्चनः स उदाहृतः॥४॥
यथात्मा कार्य्यसिद्धिस्तु समुद्दिश्य क्रियेत यः।
स उपन्यासकुशलैरुपन्यास उदाहृतः॥ ५॥
मयास्योपकृतं पूर्व्वं ममाप्येष करिष्यति।
इति यः क्रियते सन्धिः प्रतीकारः स उच्यते॥"
अन्यच्च।
"उपकारं करोम्यस्य ममाप्येष करिष्यति।
अयञ्चापि प्रतीकारो रामसुग्रीवयोरिव॥६॥
एकार्थौ सम्यगुद्दिश्य क्रियां अत्र हि गच्छति।
समं हि तत्प्रमाणेन स च संयोग उच्यते॥७॥
आवयोर्य्यादृशस्त्वेषु मदर्थः साध्यतामिति।
यस्मिन् पक्षस्तु क्रियते स सन्धिः पुरुषान्तरः॥८॥
त्वयैकेन मदीयोऽर्थः संप्रधार्य्यस्तथेति।
यत्र शत्रुः पणं कुर्य्यात् सोऽदृष्टपुरुषः स्मृतः।९॥
यत्र भूम्यंशदेयेन धनेन रिपुवर्ज्जितः।
सन्धीयते सन्धिविद्भिः स चादिष्ट उदाहृतः॥१०॥
स्वमेवैनं तु सन्धानमात्मादिष्ट उदाहृतः।११।
क्रियते प्रागरक्षार्थं सर्व्वदानादुपग्रहः॥१२॥
कोशांशेनार्द्धकोशेन सर्व्वकोशेन वा पुनः।
शिष्टस्य प्रतिरक्षार्थं परिक्रय उदाहृतः॥१३॥
सुवां सारवतीनान्तु दानादुच्छिन्न उच्यते।१४।
भूम्युत्पत्फलदानेन सर्व्वेण परभूषणः॥ १५॥
प्रतिच्छिन्नं फलं यत्र प्रतिस्कन्धेन दीयते।

स्त्रीप्रत्ययेषं तं प्राहुः सन्धिं सन्धिविच-
क्षणाः ॥ १६ ॥
परस्परोपकारस्तु मैत्रीसम्बन्धकृत्तया ।
उपहारश्च विज्ञेयाश्चत्वारश्चैव सन्धयः ॥"
इति विष्णुधर्मोत्तरे तृतीयेऽशे सन्धिनामा चतुर्थ-
कथासंग्रहः ॥ संयोगः । तत्पर्य्यायः । श्लेषः २ ।
इत्यमरभरतौ ॥ (यथा, मनुः । ८ । २४८ ।
"महागानुपघातानि वाप्यः प्रस्रवणानि च ।
सीमासन्धिषु कार्य्याणि देवतायतनानि च ॥")
सुरङ्गा । भगम् । चतुष्टयम् । कपर्दकाणां
तुल्यात्मकम् । नाणकाग्रः । इति मेदिनी ॥ मेदः ।
इति विश्वः ॥ (साधनम् । यथा, रघुः । १८ । १६ ।
"तस्य सावरणद्वारसन्धयः
काष्ठवस्तुषु नरेषु सङ्गिनः ।
चक्रभाभिरपरत्र चक्रिरे
साभिसृक्किविषयाः समागमाः ॥")
धातूनामनेकार्थत्वम् । (यथा, तथासरित्सागरे । ६ । १११—११० ।
'अथैका तस्य महिषी राज्ञः स्वप्नमराक्षसा ।
शिरीषमृदुसङ्गारा क्रीडन्ती क्रममभ्यगात् ॥
सा पतैरभिधित्सन्तं राजानमसहा सती ।
अत्रवीन्मोदकैर्देव परिताड्य मामिति ॥
श्रुत्वा मोदकान् राज्ञा हतमानायवत् बहून् ।
सती विश्वस्ा सा राज्ञी पुनरेवमभाषत ॥
राक्षसाधम: कोऽत्र मोदकानां बलाबले ।
उदकैः सिञ्च मा त्वं मामित्युक्तं हि मया तव ॥
सन्धिमार्द्रं न जानासि माशब्दोऽकृत्रिमस्त्वयि: ।
न च प्रकरणं वेत्सि मूर्खत्वं कथमीदृशम् ॥")
तस्य तत्पर्य्यादर्थात् । अर्द्धमात्रोच्चारणकालेना-
वयविनयोर्मेलनेऽवयवद्वारं सन्धिः । अत
एव दीर्घोच्चारणेऽर्द्धमात्रोच्चारणेऽपि न सन्धिः । तत्र
अर्द्धमात्रोच्चारण-कालव्यवधानस्योचितत्वादिति
प्राहुः । यमसे तु सन्ध्यायस्तत्सन्धिहितकार्य्यं
सन्धिरिति सन्धिशब्दम् । तेन विषयादि-
शब्दानां संयोगात्मकेऽपि पुनि न सन्धावधिवी
इति निर्द्दिष्टेऽपि सन्धिशब्दात् सन्धिमुद्दिश्य न
सन्धिरिति नियमात् अवयवसंश्लेषेण अवयवौ
विघट्य विघट्य इति । अभिधेये तु सन्धिर्विभाग-
रेखेति कौक्षम् । तथा च ।
"सन्धिरेकपदे सिद्धौ सिद्धौ धातूपसर्गयोः ।
वर्णेषु च भवेत्सन्धिः सैवात्र विभाषया ॥"
इति प्राचः ।
एकपदे इति समाधावेकपदे समासेऽपि ।
राधादयं भवेत् सन्धी इत्यादि । समासे सुरारि:
कपीन्द्रः आमलकः सतीशः इत्यादि । धातु-
उपसर्गयोस्तु अवाप्य अवेक्ष्य इत्यादि । अन्यत्र
अत्र अत्या: अत्यामः इह एतः इहेत्यः
इत्यादि । धातूपसर्गयोः समासस्य सिद्धान्तादेक-
वाक्यत्वेनैवाश्रयणात् सन्धौ तयोः पुनरुक्तभावार्थं अभिधा-
शब्दे कथमित्येकपदेति सन्धिरित्यादि इति
चाक्षर्थम् । तेन उपसर्गसमासयोरपि चाक्ष-
मात्रो चतुर्थो इत्यादि सिद्धिः । इति मुग्ध-
बोधव्याकरणटीकायां दुर्गादासः ॥ * ॥ सर्व्वा-
ङ्कुरसन्धिर्म्मांसचयेऽङ्ग भवति । गात्रसन्धिः सप्त-
मासेऽर्भवति । इति सुश्रुतः ॥ युगसन्धिर्युग-
शब्दे देहसन्धिर्म्मर्म्मशब्दे च द्रष्टव्यः ॥
सन्धिका, स्त्री, (सन्धा एव । स्वार्थे कन् ।) मद्य-
सन्धानम् । इति शब्दरत्नावली ॥
सन्धिचौर:, पुं, (सन्धिकृत् सुरङ्गाकारी चौरः ।
सन्धिना चौर इति वा ।) चौरविशेषः ।
सिंधाल चोर इति भाषा । यथा । सन्धिचौरस्तु
शारकः । इति शब्दमाला ॥
सन्धिजं, क्ली, (सन्धेर्जायते यदिति । जन + डः ।)
आसवादि । यथा, काश्मीरखण्डे ।
"कार्त्तिके वर्ज्जयेत्तैलं कार्त्तिके वर्ज्जयेन्मधु ।
कार्त्तिके वर्ज्जयेत् कांस्यं कार्त्तिके मासि सन्धि-
जम् ॥"
सन्धिजमासवादि । इति तिथ्यादितत्त्वम् ॥
(सन्धिसम्भवे, त्रि । यथा, सुश्रुते । ६ । २ ।
"पक्वः शोफः सन्धिजः संवेदयः
सान्द्रं पूयं पूति पूयालसः सः ॥")
सन्धिजीवकः, त्रि, (सन्धिना अभिसन्धिना जीव-
तीति । जीव + ण्वुल् ।) कृत्वा विभवान्वेषी ।
तत्पर्य्यायः । पार्श्वकः २ । इति त्रिकाण्डशेषः ॥
सन्धितः, त्रि, (सन्धा जातार्थेति । सन्धा +
इतच् ।) सन्धियुक्तः । मिलितः । यथा,—
"अक्षद्वराद्यिवपुः सन्धितः सन्धिमानसौ ।
आर्य्यत्वादार्य्यराजाख्यः ख्यातो भुवि भवि-
ष्यति ॥"
इति राजतरङ्गिण्याम् २ तरङ्गः ॥
सन्धिदायक, त्रि, (सन्धिं दातीति । दा + ण्वुल् ।
सन्धिकारकः । इति हेमचन्द्रः ॥
सन्धिदूषकः, पुं, (सन्धिं दूषयतीति । दूष + ण्वुल् ।
सन्धिचौरः । यथा,—
"सन्धिचौरो भवेत् स्तेनः सन्धिदूषक उच्यते ।"
इति शब्दरत्नावली ॥
सन्धिनी, स्त्री, (सन्धास्यस्या इति । इनिः ।
ङीप् ।) दशमेलाक्रान्ता गौः । इत्यमरः ॥ या
चतुर्दशी दशमेन आक्रान्ता निष्पादितमैथुना
सा सन्धिनी । गर्भेण सन्धानं सन्धा सा विद्यते
अस्याः सन्धिनी इनिः । इति भरतः ॥ अक्रान्त-
दशा गौः । इति मेदिनी शब्दरत्नावली च ॥
(यथा, याज्ञवल्क्यः । १ । १०० ।
"सन्धिनीर्द्वादशाहानुयागीपयः परिवर्ज्जयेत् ॥")
सन्धिपूजा, स्त्री, (सन्धौ अष्टमीनवमीसन्धिरूपे
पूजा ।) शारदीयनवरात्रपूजायामन्तिमतृतीया पूजा ।
यथा कालिकापुराणवचनान्तरम् ।
"अष्टमीनवमीसन्धौ तृतीया तत्तु कथ्यते ।
तत्र पूजा जपं हुत्वा योगिनीशयसंयुता ॥"
इति ।
"अन्त्या सन्धिर्यतो यत्र तत्परदिने: पूजयेत्
सन्धाभावे: ।"
इत्यमीपूजायामुक्तमहाष्टम्यादिकल्पमपि यत्रोक्त-
कालाभावेन न तु परदिनीयत्वज्ञापनार्थं किन्तु
पूर्व्वोक्तसन्ध्यानुरोधान्निशादाविव खण्डतिथावपि
सन्धिपूजा । एवञ्च पूर्णाढ्यां महाष्टमीपूजा
तत्परदिने अष्टमीनवम्योः सन्धिपूजा तत्परदिने
महानवमीपूजा प्रागुक्तनन्दिकेश्वर-पुराणा-
दुक्तोदयगामितिथ्यनुरोधात् । तत्परदिने
दशम्यां विसर्जनं पूजानुरोधेनाधिकदिनलाभात् ।
अन्यत् दुर्गाशब्दे द्रष्टव्यम् ॥
सन्धिबन्धः, पुं, (सन्धिं बध्नातीति । बन्ध + अच् ।)
भूमिचम्पकः । इति शब्दचन्द्रिका ॥
सन्धिबन्धनं, क्ली, (सन्धेर्बन्धनं यस्मात् ।) शिरा ।
इति केचित् ॥
सन्धिमतिः, पुं, काश्मीरदेशीयनयेन्द्रराजमन्त्री ।
स च परे राजा बभूव । यथा,—
"ततो महीमहेन्द्रस्य नयेन्द्रस्य भूपतेः ।
श्यामाशाशुक्लो राजा बुभोजाथ प्रथुप्रथः ॥
अक्षाभूदक्षुतोदन्तभवभक्तिविभूर्यतः ।
राज्ञः सन्धिमतिर्नाम मन्त्री मतिमतांवरः ॥
अक्षद्वराद्यिवपुः सन्धितः सन्धिमानसौ ।
आर्य्यत्वादार्य्यराजाख्यः ख्यातो भुवि भवि-
ष्यति ॥"
इति राजतरङ्गिण्याम् २ तरङ्गः ॥
सन्धिरक्षिका, स्त्री, (सन्धिरक्षेव कायतीति ।
के + कः । टाप् ।) सुरङ्गा । इति केचित् ॥
सन्धिला, स्त्री, (सन्धिं लातीति । ला + कः ।)
सुरङ्गा । नदी । मदिरा । इति मेदिनी ॥
सन्धिवेला, स्त्री, (सन्धिरूपा वेला ।) काल-
विशेषः । स तु अहोरात्रादिमेलनकालरूपः ।
यथा । स्मार्त्तः ।
"उभाभ्यां सन्धिवेलायां निशाया दिवसस्य च ।
सामेव सन्ध्यां तस्मात्तु प्रवदन्ति मनीषिणः ॥"
इत्याह्निकतत्त्वम् ॥
सन्धिशारकः, पुं, (सन्धिना शरतीति । शृ +
ण्वुल् ।) सन्धिचौरः । यथा,—
"सन्धिचौरो मार्गघः स्यात् भूमिलः सन्धि-
शारकः ।"
इति शब्दरत्नावली ॥
सन्ध्या, स्त्री, (सं सम्यक् ध्यायत्यस्यामिति । सं +
ध्यै चिन्तने + "आतश्चोपसर्गे ।" इत्यङ् । यद्वा,
सन्दधातीति । सं + धा + "आधाद्यश्च ।"
उणा० ४ । १११ । इति यक्प्रत्ययेन निपा-
तितः ।) कालविशेषः । स तु दिनरात्रि-
सन्धिदेकदेशरूपः । तत्पर्य्यायः । विप्रकृष्टः २ ।
अमरः । सन्ध्या ३ द्विजप्रियेचो ४ । इति भर०
शब्दार्थचन्द्रिकाः । सायम् ५ दिवासन्धा ६
निशादि ७ दिवाद्यन्तम् ८ । इति राज-
निर्घण्टः । सायाह्नः ९ दिवाद्यः १० ब्रह्म-
भूतिः ११ सायः १२ । इति शब्दरत्नावली ॥
सा च कालस्य मार्गा । यथा,—
"कालस्य तिस्रो मार्गाश्च सन्ध्यारात्रिदिनानि च ।
आसिद्धिभ्यां दिवाद्याः स्युः सन्ध्या कर्त्तुं न शक्यते ॥"
इति स्मृतेर्ब्रह्मसिद्धान्ते । तत्पर्य्यायः ॥ ॥ ॥
रजोरहस्यस्वरूपमुक्तं यथा,—

"त्रियामां रजनीं प्राहुस्त्र्यक्षान्यन्तचतुष्टयम्।
नाड़ीनां तदुभे सन्धे दिवसाद्यन्तसंज्ञिते॥"
इति प्रायश्चित्ततत्त्वम्॥

तत्सार्धत्वं यथा,—
"वसुद्रे त्रिमधुप्रार्धे गयासत्याच्च दुर्मते।
रात्रावहनि सन्ध्यायां कस्य शुद्धः परिग्रहः॥"
इति तिथ्यादितत्त्वम्॥ ८॥

त्रिसन्ध्यकार्योनोपासका। तत्काले उपास्या देवता। यथा। अथ सन्ध्योपासनम्। तच्च छन्दोगपरिशिष्टम्।
"अत ऊर्द्धं प्रवक्ष्यामि सन्ध्योपासनिकं विधिम्।
अनुष्ठः कर्मणां विप्रः सन्ध्याहीनो यतः
स्मृतः॥"
अतः प्रातःस्नानानन्तरम्। तथा,—
"एतत् सन्ध्यात्रयं प्रोक्तं ब्राह्मण्यं यदधिष्ठितम्।
यस्य नास्त्यादरस्तत्र न स ब्राह्मण उच्यते॥"
ज्ञानानन्दः
"अस्नातस्यास्तु यत् प्रोक्तं ऋषिणा तत्त्व-
वादिना।
आद्यो राजभृतस्तस्या दितीयः क्रयविक्रयी॥
तृतीयो बहुयाज्यः स्याच्चतुर्थो यास्ययाजकः।
पञ्चमस्तु भृतश्चैव ग्रामस्य नगरस्य च॥
अनागतास्तु यः पूर्वां सादित्यांश्चैव पश्चिमाम्।
नोपासीत द्विजः सन्ध्यां स वै शूद्रसमः
स्मृतः॥"
राजभृतो राजसेवकः। ग्रामादेर्भृतो भरणीयः। ग्रामस्य शूद्रत्वात् मार्कण्डेयपुराणम्।
"तथा शूद्रसमाचारा तुल्यशुद्धयौचना।
जैवोपयोगभूयत्वे यस्तिर्यामसंज्ञिका॥"
अत्र सन्ध्यानस्य नित्यत्वाभिधानात्।
"सर्वकालमुपस्थानं सन्ध्यायाः पार्थिवेष्यते।
अन्यत्र सूतकाशौचविभ्रमातुरभीतितः॥"
इति विष्णुपुराणीये सन्ध्याया इत्येवंवचनान्तपाठो धर्मकोशोक्तो युक्तः। एवमेव गच्छन्वर्द्धमानः। सर्वकालं प्रातर्मध्याह्नसायंरूपकालत्रये। अन्यथा सदुपादानं व्यर्थं स्यात्। विभ्रमश्चित्तविक्षेपः। तेन सूतादावपि सन्ध्यामाचरन्ति। अतएव याज्ञवल्क्यः।
"सर्वावस्थोऽपि यो विप्रः सन्ध्योपासनतत्परः।
ब्राह्मण्यात्र हीयेत कल्पजालशतोऽपि सन्॥"
सर्वावस्थोऽपि नित्यं सेवकादिकर्मतत्परोऽपि। यद्योक्तिर्गौणेऽप्यशक्तोऽपि इति रत्नाकरः। अन्यायोपार्जनोऽपीति युक्तम्॥ ९॥ सन्ध्यात्रयमाधारणलक्षणमाह योगियाज्ञवल्क्यः।
"ब्रह्मणाश्चैव वेदानां ब्रह्मादीनां समागमः।
मन्त्रैः सर्वसुरादीनां तेन सन्ध्या प्रकीर्तिता॥"
सन्ध्यात्रयकालस्तु अहोरात्रसन्धिमुहूर्त्तात्मकः। तथा च स्मृतिः।
"अहोरात्रस्य यः सन्धिः सूर्य्यनक्षत्रवर्जितः।
सा च सन्ध्या समाख्याता मुनिभिस्तत्त्व-
दर्शिभिः॥"
सूर्य्यनक्षत्रवर्जितः। अर्द्धास्तमितादीतिरूपसूर्य्यमण्डलप्रकृतेर्योनक्षत्रवर्जितः। तथा च वराहः।
"अर्द्धास्तमयात् सन्ध्या यक्षीभूता न तारका
यावत्।
तेजःपरिहानिरुषा भानोरर्द्धोदयं यावत्॥"
अत्र यावत्पदेन उक्ता। परिमाणमाह स एवः।
"रात्र्यन्तकाले नाड्यौ द्वे सन्ध्यादिः काल
उच्यते।
दर्शनादृश्यविरेखायाश्चतस्रो मुनिभिः स्मृतः॥"
नाड़ीदण्डः। योगी याज्ञवल्क्यः।
"द्वासप्ततौ च सततं दिनरात्र्योर्यथाक्रमम्।
सन्ध्या मुहूर्त्तमाख्याता तत्रे तद्वौ यमा स्मृता॥"
अथोपासनायाः अपि सन्ध्यात्वमाह व्यासः।
"उपास्ते सन्धिवेलायां निशायां दिवसस्य च।
तामेव सन्ध्यां तस्मात्तु प्रवदन्ति मनीषिणः॥"
उपास्ते यद्यत्रामाणप्राणायामादिक्रियेति यावत्॥ ९॥ तत्काले उपास्या अपि देवता सन्ध्या। तथा च याज्ञवल्क्यः।
"सन्धौ सन्ध्यामुपासीत नात्तमे गोऽहनि रवौ॥"
उपासनोपक्रममाह संवर्त्तः।
"प्रातःसन्ध्यां सनक्षत्रामुपासीत यथाविधि।
सादित्यां पश्चिमां सन्ध्यां यावर्क्षास्तमितभास्क-
रम्॥"
सनक्षत्रामित्यनेन तद्युक्तकाले उपक्रम्य प्रातःसन्ध्यामुपासीत। एवमेवार्द्धास्तमितभास्करारभ्यां पश्चिमां सादित्यामित्यनेन तद्युक्तकाले उपक्रम्य उपासीतेत्यर्थः॥ ९॥ मध्याह्नसन्ध्याया अष्टमनुहूर्त्ते कालमाह स्मृतिः॥
"पूर्वापरे तथा सन्धे सनक्षत्रे प्रकीर्त्तिते।
समस्तूर्य्येऽपि मध्याह्ने मुहूर्त्तसप्तमोपरि॥"
सांख्यायनगृह्यम्। अरण्ये समितृपाणिः सन्ध्यामुपास्ते नित्यं वाग्यत उत्तरापराभिमुखोऽन्यदर्शमदिशमानक्षत्रदर्शनात्। अतिक्रान्तायां मध्याह्नसन्ध्यायां सावित्रीं स्वस्त्ययनादि जप्त्वा एवं प्रातः प्राङ्मुखस्तिष्ठन् आमण्डलदर्शनादिति। उत्तरापराभिमुखो वायुकोणाभिमुखः। कोणं विदृगोति अन्यदर्शमदिशमिति। उभयदिग्दर्शमभागमिति यावत्। व्यासः।
"गायत्री नाम पूर्वाह्णे सावित्री मध्यमे दिने।
सरस्वती च सायाह्ने सैव सन्ध्या त्रिधा स्मृता॥
प्रतिग्रहाद्य दोषाद्य पातकाद्युपपातकात्।
गायत्री प्रोच्यते तस्मात् गायन्तं त्रायते यतः॥
सवितृद्योतनात् सैव सावित्री परिकीर्त्तिता।
जगतः प्रसवित्रीत्वात् वाग्रूपत्वात् सरस्वती॥"
तैत्तिरीयब्राह्मणम्। उदयन्तमस्तं यान्तं आदित्यमभिध्यायन् कुर्वन् ब्राह्मणो विद्वान् सकलं भद्रमश्नुते। व्यासादित्यो ब्रह्मा इति ब्रह्मैव सन् ब्रह्माप्येति य एवं वेदेत्यनर्थः। वक्ष्यमाणप्रकारेण प्राणायामादिकं कुर्वन् यथोक्तनामरूपोपेतं सन्ध्याशब्दस्य वाच्यमादित्यं ब्रह्मेति ध्यायन् रेचिकमासुचिकञ्च सकलभद्रमश्नुते। य एवमुक्तध्यानेन पुण्यान्तःकरणो ब्रह्मसाक्षात् कुरुते स पूर्वमपि ब्रह्मैव सन् प्रज्ञावान् निरुजीवित्वं प्राप्तो यथोक्तज्ञानेनाज्ञानोपशमे ब्रह्मैव प्राप्नोति। इति पराशरभाष्ये माधवाचार्यः॥ अतएव व्यासः।
"न भिन्नां प्रतिपद्येत गायत्रीं ब्रह्मणा सह।
सोऽहमस्मीत्युपाचीत विधिना येन केन-
चित्॥" ९॥
गायत्र्यास्यभर्गपदप्रतिपाद्य ईश्वरः। अहं जीवरूपोऽस्मि भवामि इति। अजहल्लक्षणया जीवेश्वरयोरहंकारप्रतिफलितत्वोपाधिरहितेन चिद्रूपेणैक्यम्। घटाकाशमहाकाशयोरुपाधिरित्यवगमात्। ऐक्यमिव भावयन् उपासीत। याज्ञवल्क्योऽपि।
"या सन्ध्या सा तु गायत्री द्विधा भूत्वा प्रति-
ष्ठिता।
सन्ध्या उपासिता येन विष्णुस्तेन उपासितः॥" ९॥
उपासनायाः फलमाह स एव।
"गवां सर्पिः शरीरस्थं न करोत्यङ्गपोषणम्।
निःसृतं कर्मसंयुक्तं पुनस्तासां तदौषधम्॥
एवं स हि शरीरस्थः सर्पिर्वत् परमेश्वरः।
विना चोपासनादेव न करोति हितं नृणु॥
प्रणवव्याहृतिभ्याञ्च गायत्र्या चितयेन च।
उपास्यं परमं ब्रह्म आत्मा यत्र प्रतिष्ठितः॥"
चितयेन प्रणवादिचितयेन ब्रह्मप्रतिपादकेनोपादितेन तदर्थावगमेन उपास्यं प्रसादनीयम्। तदाह स एव।
"वाच्यः स ईश्वरः प्रोक्तो वाचकः प्रणवः स्मृतः।
वाचकेऽपि च विज्ञाते वाच्य एव प्रसीदति॥
भूर्भुवः स्वस्तथा पूर्वं स्वयमेव स्वयम्भुवा।
व्याहृता ज्ञानदेहेन तस्मात् व्याहृतयः स्मृताः॥"
ज्ञानदेहेन तत्त्वज्ञानस्य चिद्रूपेश्वरस्य देहेव शरीररूपेण व्याहृता उक्ताः। तेन तदवाप्तोऽपीश्वरः। कूर्मपुराणम्।
"प्रधानं पुरुषः कालो ब्रह्मविष्णुमहेश्वराः।
सत्त्वं रजस्तमश्चैव क्रमाद्व्याहृतयः स्मृताः॥"
एतद्रूपेणापि भावनीयाः। इत्याह्निकाचारतत्त्वम्॥ ९॥ अपि च।
"दिनान्तसन्ध्यां सूर्य्येण पूर्वाह्णेर्युक्तां बुधः।
उपतिष्ठेत यथान्यायं सन्ध्यायास्य पार्थिव॥
सर्वकालमुपस्थानं सन्ध्यायाः पार्थिवेष्यते।
अन्यत्र सूतकाशौचविभ्रमातुरभीतितः॥
सूर्य्येणाभ्युदितो यस्तु त्यक्तः सूर्य्येण यः स्वपन्।
अन्यत्रातुरभावाच्च प्रायश्चित्तीयते नरः॥
तस्मादनुदिते सूर्य्ये समुत्थाय महीपते।
उपतिष्ठेतरः सन्ध्यां सकृन्यायेन दिनान्तगाम्॥
उपतिष्ठन्ति वै सन्ध्यां ये न पूर्वां न पश्चिमाम्।
व्रजन्ति ते दुरात्मानस्तामिस्रं नरकं नृप॥"
इति विष्णुपुराणे ३ अंशे १२ अध्यायः॥ ९॥
दीक्षितविशेषस्य सन्ध्याविशेषा यथा,—
भूमिरुवाच।
"देवदेव कथं सन्ध्यां दीक्षितः कुरुते वद।
केन मन्त्रेण वा भक्तस्त्व कर्मपरायणः॥

सन्ध्या

यमाच उवाच ।
गायत्र्या सहितं सर्वैः सन्ध्याकर्मसमुत्तमम् ।
यया यस्मिन् वै सूर्यं सन्ध्यां पूर्वं चिरां तथा ।
पद्माकृतिं गहीत्वा वै मम भागे व्यवस्थितः ।
मुक्तये ज्ञानमाप्नोति कर्म सन्ध्यादरेण तु ।
मन्त्रः । अपोहिष्ठमादि यन्मन्त्रदृग्यमादित्यं सर्वं दैवं प्रणवेनोत्साद्य क्षपी यथोक्तेन ज्ञानयोगसिद्धा ते सन्ध्या संध्या वासुदेवं नमसि यथं देवमादि यन्मन्त्रदृग्यं क्षपा यामनि देवसंज्ञा तथापि भंगारार्थं कर्म तत्कारणमेव सन्ध्या संध्या वासुदेव नमो नमः ।
आत्मेन्द्रिय तु मनसा सन्ध्यां कुर्यात्तु दीक्षितः ।"
इति बाराहे चतुर्थमहीचानामाध्यायः । ७ ।
सन्ध्याप्रशंसा यथा,—
सूत उवाच ।
"अर्कं प्रति दिवं याति ब्राह्मणो दग्धकिल्बिषः ।
अनग्निको हि यो मूर्खो यद्भुक्तं बह्निना पुरा ।
सूत उवाच ।
शापं प्राप्तश्च यः सन्ध्यातुलोत्पन्नमानसः ।
आवृत्य हि यामनीं दुर्गां सावित्रीं वेदमातरम् ।
तपसा भाविनो देवा ब्राह्मणः पूतकिल्बिषः ।
न मौनेन प्रतिग्रहानी अपि दुर्गां समाहरम् ।
ये चार्घे दाक्षजाः केचित् सन्ध्या सूर्यार्घयो दिवि ।
ते चास्य मौक्षजां यान्ति क्षिप्राः क्षितलदाक्षजाः ।
अत्र तत्र मर्त्य नैनं राक्षसाः पिशिताशनाः ।
घोरकल्पा महाकाया: प्रभवन्ति न राक्षसाः ।"
इति वह्निपुराणे आह्निकोद्धिकनामाध्यायः ॥०॥
अपि च ।
"निर्मलं निर्मलं नित्यमाप्तं यस्मिन् दिने दिने ।
मध्याह्ने वापि सायाह्ने प्रातरेव मुनिः सदा ।
सन्ध्यादीनोपयुक्तानि मन्त्रैः सर्वमलापहैः ।
जपन्नुपास्ते सायं च प्रातः सन्ध्यामुपैति ।
गौरवित्यपि यः पूर्वां गौयानीं वस्तु पश्चिमाम् ।
न मुक्तदुष्टिः सायं सर्वपापात् द्विजकर्मणः ।
सायन्तीकल्पवर्षाणां सहस्रं स्वर्गी स च ।
न च सूर्यसमो विप्रैरुपास्या सततं सदा ।
सन्ध्याहीनोऽशुचिर्नित्यं सर्वकर्मसु पूजा बहुलदा ।
गौरपीत्यपि च प्रोक्तो सन्ध्यामुपो हि यो द्विजः ।
गौर्यादि च प्रविशन्ति तस्य मन्त्रोपासनाः ।
तस्मात् सायं प्रातश्च नैवेद्यादिभोजनाः ।
न कर्तव्या मुनिश्रेष्ठा विप्रैः सिद्धार्थकैरपि ।
सन्ध्या च द्विजातीनां त्रिसन्ध्यादीपिनी द्विजः ।
तस्मात्सर्वप्रयत्नेन त्रिसन्ध्यादीपिनी द्विजः ।"
इत्यादि ब्रह्मवैवर्ते प्रकृतिखण्डे २१ अध्यायः ।
अपरञ्च कौर्मे १५ अध्याये सायंप्रातः सन्ध्योपासनस्य फलम् । तं । अथ सन्ध्यारहस्यादीनि संक्षिप्तानि यथा,—
"सन्ध्याः सन्ध्यक्षराणां नैश्चित्यं सन्ध्यकर्म च ।
सन्ध्यायां ब्राह्मणैर्नित्यं रहस्यं तु पुनः क्रियाः ।"
इति हरिवंशे ७ ।

सन्ध्यांश

सन्ध्यांशनिर्णयकालः यथा । कर्मोपदेशिनां वाक्यः ।
"संक्रान्त्यां पक्षयोरन्ते द्वादश्यां श्राद्धवासरे ।
सायंसन्ध्यां न कुर्वीत कृते च विफला भवेत् ।"
इति विष्णुपुराणम् । ९ ।
तत्कालं श्रवणादिनिषेधो यथा,—
"श्रवणश्रवणं स्नानमुहूर्तं भोजनं गतिः ।
उभयोः सन्ध्ययोर्नित्यं सन्ध्यां नैव तु वर्जयेत् ।"
इति कौर्मे १५ अध्यायः ।
नदीविशेषः । युगसन्धिः । इति मेदिनी ।
क्रिया । संध्यवः । सीमा । सन्धानम् । कुसुमविशेषः । इति हेमचन्द्रः ।
सन्ध्यांशः, पुं, (सन्ध्याया अंशः ।) युगसन्धिः । यथा,—
"चत्वार्याहुः सहस्राणि वर्षाणां तत् कृतं युगम् ।
तस्य तावच्छती सन्ध्या सन्ध्यांशश्च तथाविधः ।
इतरेषु ससन्ध्येषु ससन्ध्यांशेषु च त्रिषु ।
एकापायेन वर्षाणां सहस्राणि शतानि च ।"
इति मानवे । १ । ६९-७० ।
चत्वार्याहुरिति । 'चत्वारि वर्षसहस्राणि कृतयुगं कालं सन्ध्यांशो यदन्ति तस्य तावच्छतसन्ध्यांशानि सन्ध्या सन्ध्यांशश्च भवति युगस्य पूर्वो सन्ध्या उत्तरश्च सन्ध्यांशः । तदुक्तं विष्णुपुराणे ।
"तत्प्रमाणैः शतैः सन्ध्या पूर्वा तत्राभिधीयते ।
सन्ध्यांशकश्च तत्तुल्यो युगस्यानन्तरो हि यः ।
सन्ध्यासन्ध्यांशयोरन्तर्यः कालो मुनिसत्तम ।
युगाख्यः स तु विज्ञेयः कृतत्रेतादिसंज्ञकः ।"
वर्षसंख्या देयं दिव्यमानेन गणितानवरतप्रवृत्तत्वात् ।
"दिव्यैर्वर्षसहस्रैस्तु कृतत्रेतादिसंज्ञितम् ।
चतुर्युगं द्वादशभिस्तद्विभागं निबोध मे ।"
इति विष्णुपुराणवचनाच्च ।
इतरेष्विति सप्तसु वैवस्वतादिमन्वन्तरेषु सन्ध्यासन्ध्यांशयुगेषु एकसप्तत्या सप्तगुणितानि सन्ध्या सन्ध्यांशश्च भवति । तेनेदं लभ्यते । यौगि वर्षसहस्राणि वैवस्वतस्य मनोः यौगि वर्षशतानि सन्ध्या सन्ध्यांशश्च । एवं हे वर्षसहस्रे द्वादशः शतं च वैवस्वते सन्ध्या सन्ध्यांशश्च । एवं वर्षसहस्रे एकः । तत्रैकवर्षसंख्यं सन्ध्या सन्ध्यांशश्च । इति कृष्णकान्तः ।
सन्ध्यांशकः, पुं, (सन्ध्याया अंशकः ।) वर्षसहस्रैः । यथा,—
"त्रयाणामपि संध्यांशः कार्योऽस्य वयः सदा ।
सन्ध्यासन्ध्यांशयोर्मध्ये यस्य सन्ध्यांशको भिन्नः ।
सन्ध्या यस्य यदा तस्य पश्चिमेऽवसानिका ।
सन्ध्यांशोर्मध्यमेऽपि भिन्नसन्ध्यः तथा सदा ।
सन्ध्यां वक्ष्यति ब्रह्मात्मा तस्य सन्ध्यांशकः पुनः ।
सन्ध्या सन्ध्यांशं नाम तस्य ब्रह्मर्षिः पुनः ।"
इति कात्यायनपुराणे ५० अध्यायः । ५ ।
इति च ।
"सौरशाक्तागाणपत्यवैष्णवानां पञ्चोपासकानां पञ्चसन्ध्यांशकाः ।
५८. सन्ध्यांशको नाम यस्मिन् यत् कर्म क्रियते ।

सन्ध्यावलिः

निमेषांशा तु सा ज्ञेया शाम्भवी मुनिसत्तम पुरा ।
यस्मिन्नो शरीरीभूयच्छापाच्च निमिरूपया ।
सर्वा सन्ध्योपदेशेन दिशंते कालरूपके ।
सन्ध्यादेवे तमसीये तस्य विष्णुरभूत्पुरा ।
ब्रह्मशक्त्या देवस्य वरदानात्प्रशान्तिः ।
अन्तरागवसार्थं च कृतं क्षणा निरीक्षटे ।
यत्र यावा च पीता च प्रहरेः प्राप्त पूरितम् ।
तस्मादुत्तमकृष्णासु सन्ध्या नाम वरीयसी ।
निःसंशं तम चाटुत्व भिन्नाकालवती भवेत् ।"
इति च कात्यायनपुराणे ८१ अध्यायः ।
सन्ध्याराधी, [द्] पुं, (सन्ध्यां वटतीति वट + कि: ।) क्षिप्रः । इति अमरटीकायां भरतः ।
सन्ध्यावन्दी, स्त्री, (सन्ध्यानां पूर्वं वन्दा: । ङीप् ।) आली । इति राजनिर्घण्टः ।
सन्ध्यावसः, पुं, (सन्ध्यानां वर्णं वसः ।) दाक्षयः । इति त्रिकाण्डशेषः ।
सन्ध्याशायिन्, पुं, त्रिरात्रावशिष्टतत्पश्चादिनिर्गतः । यथा,—
"ये त्रिरात्रावशेषोत्थाश्चौ सन्ध्याशयिनो नराः ।"
इति हारीतः ।
सन्ध्याभ्रं, क्ली, (सन्ध्याया अवसिन्न सन्ध्यैवात् ।) सुवर्णभेदविशेषः । इति राजनिर्घण्टः । (सन्ध्याभ्रकीर्तिभेदः । यथा, शुक्लः । १२ । २८ ।
"सन्ध्याभ्रकपिलस्तस्य विरारी नाम राक्षसः ।
अभिद्रुतो मरुद्भिश्च शाम्बरीरिव मेघः ।")
सन्ध्यारागं, क्ली, (सन्ध्याया रागो रक्तवर्ण इव रागो यस्य ।) सिन्दूरम् । इति राजनिर्घण्टः । (यथा, आर्यासप्तशत्याम् । ११२ ।
"प्राचीरागतरिवयं शिवस्य पद्मेश्वरं मम-
र्पयति ।
शाम्भवि शिरसिरुहिता दधि सन्ध्यारागं दिन-
श्रीव ।")
सन्ध्यारामः, पुं, (सन्ध्यायां रामो रमणं यस्य ।) ब्रह्मा । इति शब्दरत्नावली ।
सन्ध्यः, पुं, (सद् + क्यः ।) प्रियालवृक्षः । इत्यमरटीकायां भरतः । अवसन्ने, त्रि । (यथा, रामायणे । ६ । १२१ । ७० ।
"बलवन्तमिवात्मानं सन्ध्यं वा राक्षसोत्तम ।")
सन्धकः, पुं, (सीदति संसीदति । सद् + घञ् । सगः सार्धे कद् ।) खलः । इति धरणिकृच्छब्दरत्नावली भरतः ।
सन्धकद्रुः, पुं, प्रियालवृक्षः । इत्यमरः । सन्धकः सर्जो द्रुः सन्धोऽपीति सन्धकद्रुरिति सार्धो । सन्धको द्रुर्यस्येति वा सार्धो द्रुरिति मौनसन्धो । इति भरतः ।
सन्धतिः, स्त्री, (सं + धा + अतिच् ।) प्रबन्धः । (यथा, माघे । १ । ८० । ३३ ।
"अपि च हिमवतो ऽपि सानुमन्तो न सन्धतयः ।
अवसन्न यदाधिरूढवन्तो मे सन्धतिम् ।")
सन्धानं, क्ली, (सन्धीयते । सं + धा + ल्युट् ।) सन्धिः । (यथा, रघुवंशे । १ । ८० ।

त्रयाणामपि दोषाणां तस्य रूपाणि लक्षयेत् ॥
व्याधिभ्यो दारुणश्चैव वज्रग्रस्ताग्निसन्निभः ।
केवलोच्छ्वासपरमस्तब्धाङ्गस्तब्धलोचनः ॥
चिराच्चोपरमे तस्य जन्तोर्हरति जीवितम् ।
तदवस्थन्तु तं दृष्ट्वा मूढो बाहरते जनः ॥
धर्षितो राक्षसैर्न्यूनमवेलायां चरन्ति ये ।
अन्यया भुवते केचित् यक्षिण्या ब्रह्मराक्षसैः ॥
पिशाचैर्गुह्यकैश्चैव तथान्यैर्ग्रस्तके हृतम् ।
कुलदेवार्चनाहीनं धर्षितं कुलदेवतैः ॥
नक्षत्रपीड़ामपरे गरकर्मेति चापरे ।
सन्निपातमिमं प्राहुर्भिषजः कूटपाकलम् ॥"७॥

अथ प्रवृद्धमध्यहीनवातादिजनितसन्निपातज्वराणां लक्षणान्याह ।

"प्रवृद्धमध्यहीनेषु वातपित्तकफेषु यः ।
तेन रोगास्त एवोक्ता यथादोषबलाश्रयाः ॥
प्रलापायाससम्मोहकम्पमूर्च्छारतिभ्रमाः ।
एकपक्षाभिघातश्च तत्राप्येतद्विपर्ययः ।
एष सम्मोहको नाम्ना सन्निपातः सुदारुणः ॥"
रोगास्त एवोक्ता उक्ता एव ते रोगाः यथा-
वेपथुनिद्रानाशविस्मादयो वातजाः । दाह-
लक्षोष्णता स्वेदादयः पित्तजाः । गौरवाग्नि-
मान्द्योल्लासिका सुखप्रसेकादयः कफजाः ।
तत्रापि प्रलापादयः पक्षाघातान्ता विशेषाद्-
भवन्ति ॥ ॥ ननु वातः प्रवृद्धः सन् ज्वरं
करिष्यति पित्तन्तु मध्यं समिति यावत् तत्
कथं ज्वरं करिष्यति । यत आह ।
"धातवस्त्वसमा दोषा नाग्नयस्त्वसमास्तनुम् ।
समाः सुखाय विज्ञेया बलायोपचयाय च ॥"
इति ।

उच्यते । यत्र पित्तं मध्यमपि अप्रकृतमेव यतो-
ऽप्रकृतयोर्वातश्लेष्मणोरपेक्षया मध्यं तेन मध्यं
मध्यकुपितमित्यर्थः ॥ ॥ ननु कफः क्षीणः स कथं
ज्वरं करिष्यति क्षीणशक्तिकत्वात् । उच्यते ।
दोषाः क्षीणा अपि व्याधीन् कुर्वन्त्येव । यत
आह ।
"वातक्षयेऽल्पचेष्टत्वं मन्दवाक्यं विसंज्ञता ।
पित्तक्षयेऽधिकश्लेष्मा वह्निर्मन्दः प्रभाक्षयः ॥
ग्रन्थिसन्धयो मूर्च्छा रौक्ष्यं दाहो कफ-
क्षयः ॥"
इत्याचार्या सिद्धान्तश्चापरश्चापि ॥ ८ ॥ ॥

"मध्यप्रवृद्धहीनेषु वातपित्तकफेषु यः ।
तेन रोगास्त एवोक्ता यथादोषबलाश्रयाः ॥
मोहप्रलापमूर्च्छाः स्युर्मन्यास्तम्भः शिरोग्रहः ।
कासः श्वासो भ्रमस्तन्द्रा संज्ञानाशो हृदिग्रहः ॥
खेभ्यो रक्तं विस्रवति तन्द्रा स्यात् सर्व्वनेत्रता ।
त्वचाश्लेते विशेषाः स्युर्मृत्युरर्व्वाक् त्रिवासरात् ।
भिषग्भिः सन्निपातोऽयं कथितः पाकलाभिधः ॥ ९ ॥

हीनप्रवृद्धमध्येषु वातपित्तकफेषु यः ।
तेन रोगास्त एवोक्ता यथादोषबलाश्रयाः ॥
हृदयं दह्यते चास्य यकृत्प्लीहान्त्रकुप्फुसाः ।
पच्यन्तेऽत्यर्थमुद्वाधः पूयशोणितनिर्गमः ॥
शीर्णदन्तश्च मूत्रुश्च तत्राप्येतद्विपर्ययः ।
भिषग्भिः सन्निपातोऽयं वान्यनामा प्रकी-
र्त्तितः ॥" १० ॥ ॥

अथ प्रवृद्धवातमध्यपित्तहीनकस्य सन्निपातस्य लक्षणमाह ।

"प्रवृद्धमध्यहीनेषु वातपित्तकफेषु यः ।
तेन रोगाश्च एवोक्ता यथादोषबलाश्रयाः ॥
प्रलापायाससम्मोहकम्पमूर्च्छारतिभ्रमाः ।
मन्यास्तम्भेन मूत्रुश्च तत्राप्येतद्विपर्ययः ।
उक्तः क्रकचनामायं सन्निपातो भिष-
ग्वरैः ॥ ११ ॥ ॥

मन्यहीनप्रवृद्धेषु वातपित्तकफेषु यः ।
तेन रोगास्त एवोक्ता यथादोषबलाश्रयाः ॥
अन्तर्दाहो विशेषोऽत्र न च वक्तुं स शक्यते ।
रक्तमालक्तकेनेव लक्ष्यते मुखमण्डलम् ॥
यत्नेनाकर्षितः श्लेष्मा हृदयान्न प्रसिच्यते ।
हृद्गवेवाहतं पार्श्वं तुद्यन्ते खन्यते हृदि ॥
प्रमीलकश्वासहिक्का वर्द्धते तु दिनं दिनम् ।
जिह्वा दग्धा खरस्पर्शा गलः शूकैरिवावृतः ॥
विसर्गं नाभिजानाति कूजेच्चापि कपोतवत् ।
अतीवश्लेष्मणा पूर्णैः शुष्यत्यन्त्रोष्ठतालुकः ॥
तन्द्रानिद्रातियोगार्त्तो हतवाग्धृतिबुद्धिः ।
न चातिलभते शब्दान् विपरीतानि चेच्छति ॥
व्याय्यते च बहुशो रक्तं क्षीवति चाक्ष्णयोः ।
एष कर्कटको नाम्ना सन्निपातः सुदा-
रुणः ॥ १२ ॥ ॥

हीनमध्यप्रवृद्धेषु वातपित्तकफेषु यः ।
तेन रोगास्त एवोक्ता यथादोषबलाश्रयाः ॥
अन्तर्दाहः शूलं कटीतोदो मर्म्मणो दाहो रुजा भ्रमः ।
भृशं क्लमः शिरो वक्त्रमन्या हृदयमायुषः ॥
प्रमीलकश्वासहिक्काकासव्याधिविसंज्ञताः ।
प्रथमोत्पन्नमेतत्तु साधयन्ति कदाचन ॥
एतस्मिन् सन्निवृत्ते तु कर्णमूले सुदारुणा ।
पिड़का जायते जन्तोर्यया लक्ष्येण जीवति ॥
स वैदारिकसंज्ञोऽयं सन्निपातः सुदारुणः ।
चिराच्चोपरमे तस्य वर्षमौषधकल्पनम् ॥"१३॥

अथ तन्त्रान्तरे । वातोल्बणादीनां सन्निपात-
ज्वरविशेषाणां त्रयोदशानां शीताङ्गादीनि
त्रयोदश नामान्तराणि लक्षणान्तराणि चाह ।

"शीताङ्गस्तिमलोङ्गज्वरगण्डे तन्द्री प्रलापी ततो
रक्तष्ठीवयिता च तत्र गणितः सम्भुग्ननेत्रस्तथा ।
साभिन्यासकजिह्मकश्च कथितः प्राक्सन्निपो-
ऽथान्तको
रुग्दाहः सहचित्तविभ्रम इह द्वौ कर्णकण्ठ-
ग्रहौ ॥"

तन्द्री तन्द्रिकः । प्रलापी प्रलापकः । रक्तष्ठी-
वयिता रक्तष्ठीवी । सम्भुग्ननेत्रो भुग्ननेत्रः । अभि-
न्यासकः अभिन्यासः । कर्णकण्ठग्रहौ कर्णग्रहः
कर्णकः । कण्ठग्रहः कण्ठकुब्जकः ॥ ॥
अथ तेषां प्रत्येकलक्षणानि ।

"हिमशिशिरशरीरः सन्निपातज्वरी यः
श्वसनकसनहिक्कामोहकम्पप्रलापैः ।
क्लमबहुकफतान्तर्दाहयुग्यङ्गपीड़ा-
स्वरविकृतिभिरार्त्तः शीतगात्रः स उक्तः ॥१॥
तन्द्रातीव ततस्तृषातिसरसं श्वासोऽधिकः
कासरुक्
सन्तप्तातिनुर्गन्धे, श्वयथुना साङ्गेषु कण्डूः कफः ।
सुश्यामा रसना क्रमः श्रवणयोर्मान्द्यञ्च दाह-
स्तथा
यत्र स्यात् स हि तद्विको निगदितो दोष-
त्रयोत्थो ज्वरः ॥ २ ॥
यत्र ज्वरे निखिलदोषनिताम्तदोष-
जाते प्रलापबहुला सहसोत्थिताच ।
काम्यथयाथतनदाहविसंज्ञता स्यु-
र्ज्ञात्वा प्रलापक इति प्रथितः पृथिव्याम् ॥३॥
निष्ठीवो रुधिरस्य रक्तसदृशं क्षय्यां तनौ मण्डलं
लौहित्यं नयनेऽतिधारुचिरमित्यासातिसारभ्रमाः ।
अध्मानञ्च विसंज्ञता च तपनं हिक्काङ्गपीड़ा भृशं
रक्तष्ठीविनि सन्निपातजनिते लिङ्गं ज्वरे
जायते ॥ ४ ॥
भृशं नयनरक्तताश्वसनकासतन्द्राभ्रमाः
प्रलापमदवेपथुश्रवणहानिमोहास्तथा ।
अहो निखिलदोषजे भवति यत्र लिङ्गं ज्वरे
पुरातनभिषक्चिकित्सकवरैः स इष्टः सुनेत्रो
मतः ॥ ५ ॥
दोषाल्पीयस्तरा भवान्ति बलिनः सर्व्वेऽपि यत्र
ज्वरे
मोहोऽतीव विचेष्टता विकलता श्वासो भृशं
मूकता ।
दाहश्चिक्कणमाननञ्च दहनो मन्दो बलस्य
क्षयः
सोऽभिन्यास इति प्रकीर्त्तित इह प्राज्ञै-
भिषग्भिः पुरा ॥ ६ ॥
त्रिदोषजनिते ज्वरे भवति यत्र जिह्वा भृशं
दृता कठिनकण्टकैश्चदनु मूकता मूढ़ता ।
श्रुतिक्षतिबलक्षती श्वसनकाससन्तापयः
पुरातनभिषग्वरास्तमिह जिह्वकं चक्षते ॥७॥
यथातिशयिता भवेच्छ्वयथुसंयुता सन्धिषु
प्रभूतकफता सुखे विगतनिद्रता कासरुक् ।
समस्तमिति कीर्त्तितं भवति लक्ष्म यत्र ज्वरे
त्रिदोषजनिते बुधैः स हि निगद्यते सन्धिगः ॥८॥
यस्मिन् लक्षणमेतदस्ति सकलैर्दोषैरदीते ज्वरे-
ऽतसं मूर्द्धविधूनन सकसन सर्व्वाङ्गपीड़ाधिका ।
हिक्काश्वासमदाहमोहसहिता दैर्घ्यातिसन्तप्तता
वैकल्यञ्च तथावचांसि सुनिभिः सङ्कीर्त्तितः
सोऽन्तकः ॥ ९ ॥
दाहोऽधिको भवति यत्र लघा च तीव्रा
श्वासप्रलापविकृतिभ्रममोहपीड़ाः ।
मन्या धनुश्चयनकण्ठरुजा श्रमश्च
रुग्दाहसंज्ञ उदितस्त्रिभवो ज्वरोऽयम् ॥ १० ॥
गायति नृत्यति हसति प्रलपति विक्रतं निरी-
क्षते सक्षेत् ।
दाहश्चयाभयार्त्तो दोषत्रयचित्तविभ्रमो ज्वर-
वान् ॥ ११ ॥

निःशेषदोषजनितज्वरशेषजन्मा
स्यात् कर्णमूलविषये व्यथनं तथा च।
कण्ठग्रहो बधिरताश्वसनप्रलाप-
प्रस्वेदमोहदहनानि च कर्णकाखे ॥ १२ ॥
कण्ठः शूकशूनाक्षकण्ठवदतिश्वासः प्रलापोऽरुचि-
र्दाहो देहरुजा तृषापि च हनुस्तम्भः शिरो-
ऽतिव्यथा।
सोऽहो येन मुना सहेति सकलं लिङ्गं त्रिदोषज्वरे
यत्र स्यात् स हि कण्ठकुब्ज उदितः प्राज्ञै-
श्चिकित्सागुणैः ॥ १३ ॥ * ॥
सन्निपातेषु साध्यः स्यात्तन्द्रिकक्षिप्तविभ्रमः।
कर्णको जिह्मकः कण्ठकुब्जः पञ्चापि कष्टकाः ॥
वातादाहतिकर्णेन संसाध्येषु भाषितः।
रक्तक्षीवी शुष्कनेत्रः शीतगात्रः प्रलापकः।
अभिन्यासोऽन्तकश्चेति षड्साध्याः प्रकी-
र्तिताः ॥"*॥
अथ तत्रान्तरे। वातोल्वणादीनां सन्निपात-
ज्वरविशेषाणां त्रयोदशानां शुष्मीपाकादीनि
त्रयोदश नामान्तराणि लक्षणान्तराणि चाह।
"शुष्मीपाकः शीर्णनाद्यः प्रलापी
श्यावदंष्ट्रो दग्धपाकोऽन्तकश्च।
रक्तीदाहश्चाथ हारिद्रसंज्ञो
भेदा एते सन्निपातज्वरस्य ॥
अवघोषभूतहासौ यत्रापीड्यश्च मुंचासः।
संज्ञीघो च विशेषास्त्वेवोक्ताश्चयोदश च ॥"
अथैषां लक्षणानि।
"दोषावविरुद्धरुद्धशीघ्रावसितनीलशोणितं
सर्पि।
पक्वफलं मस्तदृशसितः शुष्मीपाकेन पीड़ितं
विद्यात् ॥
उत्क्षिप्य यः खमङ्गं क्षिपत्यधस्ताच्चिरान्त-
रुच्छ्वसिति।
तं शीर्णनादनुरं विद्यात्कफजं विज्ञानीयात् ॥
खेदभ्रमाङ्गपीड़ा कम्पो दवधूर्वमी यथा कण्ठे।
गात्रेषु गुर्वतीवं प्रलापिनुरस्य जायते
लिङ्गम् ॥
अन्तर्दाहः शीतं वक्षिश्च यस्य विशेषतः श्वासः।
अङ्गमिव दग्धकल्पं सोऽन्तर्दाहार्दितः कथितः ॥
नक्तं दिवा न निद्रामुपैति गृह्णाति वह्वीर्नभसः।
उत्थाय दग्धपादो भ्रमातुरः सर्वतो भ्रमति ॥"
नभसो गृह्णाति आकाशात् किञ्चिद्गृहीतुं
करौ प्रसारयति इत्यर्थः।
"संपूर्यते शरीरं ग्रन्थिभिरभितस्त्वयोदरं
भवति।
श्वासातुरस्य सततं विचेतनस्यान्तकार्तस्य ॥
परिधावतीव गात्रे रुक्पार्श्वे सूलमपसर्प-
द्धरिणगतिः।
वेपथुमतः सदाहस्त्वेवोदाहज्वरार्तस्य ॥"
रुक्पार्श्वे पीड़ाभाजने। गात्रस्य विशेषणमेतत्
"यस्यातिपीतमङ्गयने सुतरामलं ततोऽप्य-
धिकम्।
दाहोऽतिशीतता चक्षिरस्य स हारिद्रको ज्ञेयः॥
शूलकशरीरगन्धः स्कन्धरुजावान्निरुद्धगल-
रन्ध्रः।
अवघोषसन्निपातादातास्राधः पुमान् भवति ॥
शब्दादीनधिगच्छति न स्वान्विषयान् यदी-
न्द्रियग्रामः।
हसति प्रलपति प्रपतं स ज्ञेयो भूतहासार्तः ॥
यत्र सुदुर्वारवेगादुपजन्येवावपीड्यते गात्रम्।
रक्तं पीतश्च वमेत् यत्रापीड्यः स विज्ञेयः ॥
अतिसरति वमति कूजति गात्राण्यभितश्चिरं
नरः क्षिपति।
स न्याससन्निपाते प्रलपति शुष्माधिमण्डलो
भवति ॥
मेचकवपुरतिमेचकलोचनयुगलोऽवलो मलोत्-
सर्गात्।
संशोभिणि सितपिड़कामण्डलयुक्तो ज्वरे भवति ॥
गात्राणां एव भिषगभेषजमेतेषु जाङ्गलीनीरम्।
नैरुज्यहेतुरेको नित्यं स्तम्भोऽधोऽयः ॥"*॥
अथासाध्यसन्निपातज्वरस्य लक्षणमाह।
"सन्निपातज्वरस्यान्ते कर्णमूले सुदारुणः।
शोथः सजायते तेन कश्चिदेव प्रमुच्यते ॥"
सुदारुणः मारकत्वात् यत्तेन शोथेन कश्चि-
देव प्रमुच्यते। कोऽपि जीवितं लभते इत्यर्थः।
"सन्निपातज्वरान् कष्टानसाध्यानपरे जगुः।
दोषे विबद्धे गम्भीरे सर्वसम्पूर्णलक्षणः।
सन्निपातज्वरोऽसाध्यः कफस्त्वक्षतोऽन्यथा ॥"
दोषे पित्तकफे। विबद्धे अपक्वे सर्वसम्पूर्ण-
लक्षणः सर्वाण्यपि दाहशीतादीनि सम्पूर्णानि
अन्यूनानि प्रौढ़ानीति यावत् लक्षणानि यस्य
सः। ततोऽन्यथा दोषे पक्वे यस्मौ दोषे स्वल्प-
लक्षणकः कफसाध्य इत्यर्थः ॥ * ॥ * ॥
अथ सामान्यसन्निपातज्वरस्य चिकित्सा।
"सन्निपातार्थवे मर्मं योऽभ्युद्धरति मानवम्।
वक्ष्ये न तस्य धर्मः काश्च पूजां न सोऽर्हति ॥
स्नेहेन सह योद्धव्यं सन्निपाते चिकित्सता।
यश्च तत्र भवेज्जेता स जेतामयसङ्कटे ॥
स्नेहनिग्रहमेवादौ कुर्याद्दाधौ त्रिदोषजे।
निरूहे स्नेहने क्षीरे स्नेहक्षारेषु च।
लाघवं जायते सद्यस्तृष्णा चैवोपशाम्यति ॥"*॥
भेड़ोऽप्याह।
"सन्निपातज्वरे पूर्वं कुर्यादामरुपाचनम्।
प्रसातं स्नेहनं संशोधनं शमयेत् पित्तमारुतौ ॥"
इति ॥ * ॥
नन्वत्रान्तरे उक्तं पित्तस्य प्रतिक्रिया प्रोक्ता।
यथा,—
"शमयेत् पित्तमेवादौ ज्वरेषु सर्वेषु।
दुर्निवारतरं तद्धि ज्वरार्तेषु विशेषतः ॥" इति।
अन्यत्रापि।
"समवाये त्रिदोषाणां पूर्वं पित्तमुपाचरेत्।
ज्वरे चैवातिसारे च सर्वत्रान्यच्च मारुतः ॥"
इति ॥
तत्रान्यत्र प्रथमं वायोः प्रतिक्रिया प्रोक्ता।
यथा,—
"वातस्यानुजवेत् पित्तं पित्तस्यानुजयेत् कफम्।"
इति ॥
तत्र व्यवस्थामाह तत्रान्तरे।
"ज्वरे त्रिदोषजे सामे शमयेत् प्रथमं कफम्।
जीर्णेऽमे जयेत् पित्तं निरामे त्वनिलं जयेत् ॥"
इति। प्रथममिति स्थानत्रयेऽपि सम्बध्यते।
अन्ये त्विति समादधते।
"त्रयाणां वा जयेत् पूर्वं तं यः स्याद्बलवत्तरः।"
इति।
तथा च।
"संसर्गे यो गरीयान् स्यादुपक्रम्यः स वै भवेत्।
शोषदोषविरोधेन सन्निपाते तथैव च ॥" इति ॥
संसर्गे दोषद्वयसंसर्गे। गरीयान् बलवत्तरः।
"अंशांशं यत्र दोषाणां विवेक्तुं नैव शक्नुयात्।
क्रियां साधारणीं तत्र विदध्यात् चिकित्सकः ॥
लङ्घनं वालुकास्वेदो नस्यं निष्ठीवनं तथा।
अवलेहोऽञ्जनश्चैव प्राक् प्रयोज्यं त्रिदोषजे ॥"
ज्वर इति शेषः ॥*॥ मनु।
"क्रियायासु गुणालाभे क्रियामन्यां प्रयोजयेत्।
पूर्वस्यां शान्तवेगायां न क्रियासङ्करो हितः ॥"
इति वचनेन क्रियासङ्करस्य निषिद्धत्वात् कथ-
मत्र नस्यनिष्ठीवनावलेहाञ्जनानि युगपद्विधी-
यन्ते इत्याशङ्क्याहाम्।
"क्रियाभिस्तुल्यरूपाभिः क्रियासाङ्कर्यमिष्यते।
भिन्नरूपतयैतासु नहि कुर्वन्ति दूषणम् ॥"*॥
तत्र लङ्घनस्य अवधिमाह।
"त्रिरात्रं पञ्चरात्रं वा दशरात्रमथापि वा।
लङ्घनं सन्निपातेषु कुर्याद्दोषोद्भवदर्शनात् ॥"
लङ्घने त्रिरात्रादिविकल्प उक्तलक्षणात्। यद्यपि
दोषाणां शीघ्रमध्यमन्दशक्तिकत्वात् व्याधिस्वभा-
वाच्च। व्याधेरदर्शनात् इति यावद्रोगता-
दर्शनं स्यात्तावद्धा लङ्घनं कुर्यात्। एतेन
त्रिरात्राद्यवधेरनियतत्वं सूचितम्। अतएव
सुश्रुतः प्राह।
"सप्तमे दिवसे प्राप्ते दशमं द्वादशेऽपि वा।
पुनर्घोरतरो भूत्वा प्रथमं यान्ति हन्ति वा ॥"
घोरतर इति घोरः स्वभावादेव तदा घोरतरो
भूतेति ॥ * ॥ हननप्रशमनयोः कारणमाह।
"पित्तकफानिलहरणा दशदिवसहरादशाहसमा-
हारात्।
हन्ति विसृष्टव्यधवा त्रिदोषजो धातुमलपा-
कात् ॥"
त्रिदोषजो ज्वर इति शेषः। धातुमलपाकात्
धातुपाकाद्धन्ति मलपाकाद्धिसृष्टतीत्यर्थः।
धातुमलपाके प्राक्तनकर्मैव हेतुः। तत्र यदि
जीवनसंवर्द्धकं कर्म्मास्ति तदा मलपाकोऽन्यथा
धातुपाकः। स च रसादिशुक्रान्तधातूनां पाको
बोद्धव्यः ॥*॥ तत्र धातुपाकस्य लक्षणमाह।
"निद्रानाशो हृदि स्तम्भो विष्टम्भो गौरवा-
ऽरुचिः।
अरतिर्बलहानिश्च धातूनां पाकलक्षणम् ॥"
विष्टम्भ उदरस्य। गौरवं गात्राणाम्। अन्यच्च।

"संबाध्यमानो हृदि नाभिदेशे
गात्रेषु वा पाकरुजायुतेषु ।
पीड़ाज्वरार्त्तोऽङ्गुलिभिश्च गच्छेत्
स धातुपाकी कथितो भिषग्भिः ॥"

अपरञ्च ।

"नाभेरूर्द्धं हृदोऽधस्तात् पीड्यते यथया यदि ।
धातोः पाकं विजानीयादन्यथा तु मलस्य च ॥"

मलपाकलक्षणमाह ।

"दोषप्रकृतिवैकल्यं लघुता ज्वरदेहयोः ।
इन्द्रियाणाञ्च वैमल्यं मलानां पाकलक्षणम् ॥"

दोषप्रकृतिवैकल्यं दोषा वातादयस्तेषां प्रकृतिर्वैषम्यहेतुगौरवादिकरणं तस्य वैकल्यं वैपरीत्यम् । वैमल्यं मलराहित्यम् । मलानां दोषाणाम् । अन्यच्च ।

"मूर्ध्नश्चेन्द्रियपञ्चकस्य पटुता वह्नेश्च यत्र क्रमात्
तृष्णादिप्रशमो ज्वरस्य लघुता तं दोषपाकं वदेत् ।
हृन्नाभ्योरतिवेदनातिसरणं नीचो ज्वरस्तृष्मद-
श्वासाधिक्यमरोचको रतिरिति स्याद्धातु-पाकाकृतिः ॥"

आमस्याधिक्येन सप्तमदिवसाद्यवधतिक्रमे परमावधिमाह । हारीतः

"सप्तमी द्विगुणा यावन्नवम्येकादशी तथा ।
एषा चिदोषमर्य्यादा मोक्षाय च वधाय च ॥"

नवम्येकादशी चागमनदिवसं संविहाय बोद्धव्या तेनागमनदिवसं नीत्वा एकादशी द्वादशी च यत्र रात्रिरित्यर्थाश्रियते ।

"सन्निपातज्वरी पूर्वं सम्यगुल्लङ्घनमाचरेत् ।
ततः स्नेहं पिबेत्सम्यक् समये भेषजं भजेत् ॥
सन्निपातेन तप्तस्य पार्श्वस्थक्तं नातुशीतलम् ।
यः पाययेज्जलं शीतं स नरो दुर्गतिं व्रजेत् ॥"

शीतं अक्वथितम् । हृतं तु शीतं विहितमेव इति लक्षणम् ॥ * ॥ अथ वातुकाभेदः ।

"वातश्लेष्मकृते स्वेदान् कारयेद्वह्निनिर्मितान् ।
स्निग्धः स्वेदो निषिद्धोऽत्र विना केवलवातजान् ॥
सर्वदरभ्रपटस्थितक्षाक्षिकसंसिक्तवातुकाभेदः ।
शमयति वातकफामयमस्तकशूलाङ्गभङ्गादीन् ॥
श्रोणसामार्द्रं कृत्वा नीत्वा पाचकमाशयम् ।
हत्वा वातकफसम्भं स्वेदो ज्वरमपोहति ॥"

इति वातुकाभेदः ॥ ० ॥

अथ नस्यम् ।

"नैम्बपं नैम्बमरिचं सर्षपाः कृष्णमेव च ।
एतन्मूत्रेण संपिष्टं नस्यं सन्निपारिणम् ॥"

नैम्बमरिचं शिग्रुबीजम् । नैम्बवाहितस्थम् ॥

"मधूकसारसिन्धूत्थपोषणकणाः समाः ।
कृतं पिष्टाश्च ते नस्यं दद्यात् संज्ञाप्रबोधनम् ॥"

इति मधूकसारादिनस्यम् ॥

"मातुलुङ्गार्द्रकस्वर्जीक्षीरिणीक्षारसैन्धवम् ।
एतत् सिन्धूत्थितं नस्यं शीतं प्रयोजयेत् ॥
तेन प्रसिच्यते श्लेष्मा प्रसिच्य प्रसिच्यते ।
शिरोहृदयसन्धिस्थान्पार्श्वस्थक्तं शोषयाशु च ॥
मोहामयेन सुखं बोधयितुं यादृशः प्रकृतः ।
कल्पतरुनामधेयो रसो न तादृक् परं किञ्चित् ॥"

इति नस्यम् ॥ * ॥

अथ निष्ठीवनम् ।

"जिह्वातालुगलक्लोम मरुत्पित्तेन चोक्षितः ।
तदा स चारयेच्छ्लेष्मं जिह्वायाः खरतां तथा ॥
स्फुटनस्य तदा जिह्वां लेपयेन्मधुपिप्पली ।
द्राक्षया साज्यपातेन जिह्वा स्यात् सरसा मृदुः ॥

आर्द्रकस्य रसोपेतं सैन्धवं कटुकत्रयम् ।
आकण्ठाहारयेदाशु निष्ठीवेच्च पुनः पुनः ॥
तेनास्य हृदयक्लोममन्यापार्श्वशिरोगलात् ।
नीलोऽप्यालक्ष्यते श्लेष्मा लाघवं चास्य जायते ॥
पर्व्वभेदो ज्वरो मूर्च्छा निद्रास्वासगलामयाः ।
सुखाच्चिगौरवं चाशु सप्तरात्रेऽप्युपशाम्यति ॥
स्वल्पन् हिक्किचतुः कुर्य्यादृष्ट्वा दोषबलाबलम् ।
एतद्धि परमं प्राहुर्भेषजं सन्निपातिनाम् ॥"

इति कवलग्रहः ॥ ० ॥

अथावलेहः ।

"कट्फलं पौष्करं शृङ्गी योषं यासस्य कारवी ।
श्रक्षचूर्णीकृतं चैतत् मधुना सह लेहयेत् ॥
एषावलेहिका हन्ति सन्निपातं सुदारुणम् ।
हिक्कां श्वासस्य कासस्य कण्ठरोगस्य नाशयेत् ।
एतदूर्ध्वं कफोद्रेके चूर्णमार्द्रकजे रसैः ॥"

तत्रान्तरे च उक्तम् ।

"अष्टाङ्गं मधुना लिह्यादार्द्रकस्य रसेन वा ।
संमोहं दारुणं हन्यात्तत्काकासमन्वितम् ॥"

इति ।

"सर्व्वेषु सन्निपातेषु न शैत्यमवधारयेत् ।
शीतोपचारि शैत्यं स्याच्छीतत्वाच्च विरुध्यते ॥"

अयमभिप्रायः । सन्निपातज्वरेषु श्लेष्मनिग्रहार्थं सर्व्वदा स्वेदो हितः उक्तः । अथाग्निसम्बन्धाद्देहस्योष्णता निष्ठैव । उष्णेन मधुना विरोधः । उक्तञ्च सुश्रुतेन ।

"उष्णैर्विरुध्यते सर्व्वं विषान्वयतया मधु ।
उष्णासंसृष्टरूपञ्च सन्निहन्ति यथा विषम् ॥"

इति ।

शीतोपचारि शैत्यमिति । शीतेनोपचारोऽस्यास्तीति शीतोपचारि । शीतत्वाच्च सन्निपाते विरुध्यते । अयमवलेहः प्रायेणोर्द्ध्वजत्रुरोगहरत्वात् सायमुपयुज्यते । यत उक्तं चरकेण ।

"ऊर्द्ध्वजत्रुगदघ्नी या सा सायमवलेहिका ।
अधोरोगहरी या सा भोजनात् प्राक् प्रयुज्यते ॥"

पौष्करं पुष्करमूलं तदहमि कृष्णं देयम् । शृङ्गी कर्कटशृङ्गी । योषं शुष्कोपिप्पलीमरिचानि । यासो यवागूः । केचिदूषासस्थाने यवानी पठन्ति । कारवी प्रसिद्धैव इति लोके । अष्टाङ्गावलेहिका ॥ * ॥

"चिरमामलकं पिष्ट्वा द्राक्षया सह लेहयेत् ।
विश्वभेषजसंयुक्तं मधुना वह्नि लेहयेत् ।
तेनाशु श्राम्यति श्वासः कासो मूर्च्छारुचिस्तथा ॥"

इत्यवलेहः ॥ * ॥

अथाञ्जनम् ।

"शिरीषबीजगोमूत्रलक्षणामरिचैस्सैन्धवैः ।
अञ्जनं स्यात् प्रबोधाय सरसोनशिलावधैः ॥"

इति शिरीषबीजाद्यञ्जनम् ॥ * ॥

"त्र्यूषरजः श्वेतलोध्रमञ्जनं मरिचं तथा ।
गोपित्तेन समायुक्तं तन्द्रानाशनमुत्तमम् ॥"

गोपित्तं गोरोचना । लौहचूर्णाद्यञ्जनम् ॥ * ॥

"अञ्जनं सम्यगारब्धं मधुसिन्धुशिलोषणैः ।
प्रमोहद्रोहि भवति भाषितं भिषजां वरैः ॥"

शिला मनःशिला । उषणं मरिचम् । इत्यञ्जनम् ॥ * ॥ अथ क्वाथः ।

"हृतं विषञ्च मरिचं तुत्थकं नवसादरम् ।
चूर्णितं खरसैस्तीक्ष्णं धूर्त्तपत्रस्वरसयोगयोः ॥
सन्निपातहृते मोहे मूर्द्धं लिम्पेत् पदोपरि ।
अक्षिश्रवाञ्जनेनैव लेपं कुर्य्यात् पदोपरि ॥"

पदं पीछ इति लोके ।

"विल्वश्योनाकगम्भारीपाटलागणिकारिकाः ।
पाचनं वातकफहृत् पञ्चमूलमिदं महत् ॥
शालपर्णी पृश्निपर्णी हृती कण्टकारिका ।
गोक्षुरो वातपित्तघ्नं कनीयः पञ्चमूलकम् ॥
उभयं दशमूलं तत् पिप्पलीचूर्णसंयुतम् ।
सन्निपातज्वरं हन्ति हृत्कण्ठग्रहनाशनम् ॥
तन्द्रावातकफातङ्कश्वासपार्श्वार्त्तिकासजुत् ।
महान्ति यानि मूलानि कण्टकभाञ्जि यानि च ।
तेषान्तु वल्कलं ग्राह्यं दशमूलानि हृत्कथ्यः ॥"

अत्र विल्वादीनां पञ्चानां मूलस्य वल्कलं ग्राह्यम् । दशमूलक्वाथः ॥ ० ॥

"दशमूलीकषायस्तु स पौष्करकणान्वितः ।
सन्निपातज्वरे देयः श्वासकासमन्वितः ॥"

इति द्वादशाङ्गक्वाथः ॥ * ॥

"चिरज्वरे वातकफोल्वणे वा
त्रिदोषजे वा दशमूलमिश्रः ।
किराततिक्तादिगणः प्रयोज्यः
शुण्ठ्यर्धितं वा चिरता विमिश्रः ॥"

किराततिक्तादिर्यथा,—

"किराततिक्तो सुरदारु पौष्करं विश्वभेषजम् ।
किरातादिगणो ह्येष धातुभेदकमित्यपि ॥"

इति चतुर्दशाङ्गक्वाथः ॥ * ॥

"दशमूली पटी शृङ्गी पौष्करं सदुरालभम् ।
भार्गी शुण्ठबबीजञ्च पटोलं कटुरोहिणी ॥
एषादशाङ्ग इत्येष सन्निपातज्वरापहः ।
कासहृत्पार्श्वशिश्वासच्छायमीश्वरः ॥"

इत्यष्टादशाङ्गक्वाथः ॥ * ॥

"भूनिम्बदारुदशमूलमहौषधाब्द-
निस्तिक्तबीजधनिकभक्तार्काक्वाथः ।
सन्नाप्रलापकसनादविदाहमोह-
श्वासच्छिदाशमनितज्वरनाशनः स्यात् ॥"

इति द्विसप्तदशाङ्गक्वाथः ॥

एतस्यैव गुण उक्तो वङ्गसेनेन ।
"अष्टादशाङ्गमित्येष रत्नकर्ष्यं ज्वरं जयेत् ॥"
इति ॥ * ॥

अथ सन्निपातज्वरे रसाः ।
"विषं त्रिकटुकं गन्धं टङ्कणं रतशुल्वकम् ।
भृङ्गरसस्य च बीजानि त्रिदुर्धं नवमं स्रुतम् ॥
एतानि समभागानि दिनैकं विजयाद्रवैः ।
मर्दयेद्यत्यकाकारा कर्तव्या वटिकाथ सा ॥
भक्षणीया तु पानतो रविमूलकषायकः ।
स्रुतसंजीवनीनाम्ना सन्निपातज्वरान्तकृत् ॥"
इति स्रुतसंजीवनी वटिका ॥ ० ॥

सन्निपातज्वरे रसप्रदीपे ।
"शुद्धसूतसमं गन्धं स्रुतांशं स्रुततान्त्रकम् ।
त्रिभिस्तुल्यैर्गयां शीरैर्मर्दयेदातपे खरे ॥
मर्दयेद्दिनमेकन्तु निर्गुण्डीस्वरसद्रवैः ।
विधाय गोलं तं गोलमन्वग्नागतं पचेत् ॥
म्रियमाणं वायुकायन्ते ततः सद्यो विचूर्णयेत् ।
अष्टमांशं विषं तत्र क्षिपेत्तेनापि मर्दयेत् ॥
त्रिनेत्राक्षो रसो ह्येष त्रैयो गुञ्जाद्वयोन्मितः ।
पथ्यकोलकषायेण क्षारौदुग्धेन वा सह ॥
रसेनानेन भुक्तेन सन्निपातज्वरो महान् ।
संक्षयं व्रजति क्षिप्रं कर्षणो नात्र संशयः ॥"
इति त्रिनेत्रो रसः ॥ ० ॥

सन्निपातज्वरे रसप्रदीपे ।
"भल्लातोद्भूतनिष्कं स्यादारग्वधोपलसम्भवम् ।
मरिचं निष्कमात्रञ्च विषं निष्कं विचूर्णयेत् ॥
रसो भल्लेश्वरो नाम्ना सन्निपातज्वरान्तकृत् ।
एकगुञ्जामितो भक्ष्य आर्द्रकस्य द्रवैः क्षि ॥"
इति भल्लेश्वरो रसः ॥ * ॥

सन्निपातज्वरे रसेन्द्रचिन्तामणौ ।
"द्वौ कर्षौ स्रुतकाद्द्यार्द्धौ गन्धकार्द्धौ तथैव च ।
यवक्षारभयं सर्वं दिनं धुंसपदीरसैः ॥
कारयेच्च वटिकां कृत्वा निःक्षिपेत् काचभाजने ।
कर्षैकमात्रं तच्च क्षिप्त्वा वस्त्रं निरोधयेत् ॥
कुक्षिकायाः परौ भागौ वायुकाभिश्च पूरयेत् ।
सार्द्धं यावद्दोरात्रं तावच्च पचेन्मृदुम् ॥
दोषमात्रोन्नतो देयः शाङ्गधीतं ततस्त्यजेत् ।
तोयाहारमयं तत्र क्षिपेत्तावत्तथौषधम् ॥
भक्षितो रक्षिकामात्रो रसस्त्रिभुवनारकः ।
सन्निपातज्वरं दुष्टाद्वातं मन्दाग्निमामपि ॥
शूलं मंक्षयशौ गुल्मं पाण्डुरोगं तथा ।
श्वासकासादिकान् सर्वान् गदानेष विनाशयेत् ॥"
इति त्रिभुवनारी रसः ॥ ० ॥

सन्निपातज्वरादिषु रसेन्द्रचिन्तामणौ ।
"गन्धं टङ्कणसंभवं विषं धत्तूरजैर्द्रवैः ।
दिनमर्दितं शुल्वं भक्षणे रसो भवेत् ॥
आर्द्रकस्य द्रवैरेव दातव्यो रक्षिकामितः ।
सन्निपातज्वरं घोरं नाशयेन्नात्र संशयः ॥"
इति धात्रः । टङ्कः टङ्कणः । भक्षणे रसः ॥*
सन्निपातज्वरे रसेन्द्रचिन्तामणौ । अथ शीत-
ज्वरे रसाः ।

"स्रुतकं गन्धकश्चैव हरितालं मनःशिलाम् ।
एकनिष्कं द्विनिष्कञ्च चतुर्निष्कं तथैव च ॥
पञ्चनिष्करसैः कार्यवेल्लाः कल्कं प्रकल्पयेत् ।
ताम्रपात्राणि तुल्यानि तेन कल्केन लेपयेत् ॥
सरावसंपुटे तानि कृत्वा तेषामुपर्यपि ।
दद्यात्तां पिष्टिकां पश्चात् पुटपाकेन पाचयेत् ॥
ततः संचूर्णयेदेव रसः शीतेन भक्षितः ।
यथैकमात्रया हन्ति घोरं शीतज्वरं ध्रुवम् ॥"
पारादष्टङ्कः १ गन्धकष्टङ्कः २ हरितालष्टङ्कः ४
मनःशिलाष्टङ्कः ५ ताम्रपत्रष्टङ्कः १२ । इति
शीतज्वरारिरसः ॥ * ॥ रसप्रदीपे ।
"पारदं गन्धकं तुल्यं दरदञ्च विषं समम् ।
विषादष्टगुणं योज्यं मरिचं विश्वभेषजम् ॥
अश्वगन्धा तु विजया कासमर्दकटिल्लकः ।
चतुर्गुणञ्च रसेरेतच्चूर्णं यत्नेन मर्दयेत् ॥
तुलस्यास्तु दलैः सार्द्धं भक्षितो रक्तिकामितः ।
हन्ति शीतज्वरं घोरं नात्रायं शीतकेशरी ॥"
इति शीतकेशरीरसः ॥*॥

रसप्रदीपे ।
"तालकं शुक्तिकाचूर्णं तुल्यं तत्रोभयोपरि ।
गवसांशञ्च तुल्यं स्यान् मर्दयेत् कन्यकाद्रवैः ॥
ततु संशुष्कमुपलेवेन्मेणपुटे पचेत् ।
शीतं तच्चूर्णयेद्दं गुञ्जामात्रं घृतायुतम् ॥
प्रभाते भक्षयेत्तेन याति शीतज्वरक्षयम् ।
यान्तिर्भवति कस्यापि कस्यापि न भवत्यपि ॥"
इति शीतभञ्जी ॥ * ॥

"रसकं पारदं तुल्यं तालकं गन्धटङ्कणम् ।
सर्वमेतत् समं चूर्णं कारवेल्लीरसैर्दिनम् ॥
मर्दयेत्तेन शुद्धस्य रसकादिसमस्य तु ।
ताम्रस्य भाजनस्यान्तर्लिप्त्वेष्टकां शुलोल्लितम् ॥
तत् पचेद्वायुकायन्ते यथा यावत् स्फुटन्ति हि ।
शीतलं तद्धि गृहीयात्ताम्रपात्रोदराद्विधक् ॥
शीतभञ्जी रसो मात्रमात्रो मरिचसंयुतः ।
भक्षितः सर्वशस्तेन वाग्भवेद्विषमज्वरान् ॥"
इति शीतभञ्जी रसः ॥*॥

शीतज्वरादिविषमज्वरेषु रसेन्द्रचिन्तामणौ ।
"तालको दरदोद्भूतपारदो गन्धकः शिला ।
क्रमाद्भागार्द्धरहितं कारवेल्लाम्बुमर्दितम् ॥
त्र्यहेनास्य प्रमाणेन ताम्रपात्रौ प्रलेपयेत् ।
अधोत्तर्वी दृढे भाण्डे तान्निरुध्याथ पूरयेत् ॥
शुल्वां वालुकया सम्यगग्निं प्रज्वालयेद्दृढम् ।
शीतं संचूर्णयेत् सर्वं तस्य नागबलीदले स्थितः ॥
भक्षितो मरिचैः सार्द्धं समस्तान् विषमज्वरान् ।
शीतदाहादिकान् हन्ति मद्यं भाल्लातकं यथा ॥"
इति भ्रातभञ्जी रसः ॥*॥

रसरत्नप्रदीपे ।
"रसं गन्धं विषञ्चैव समं शुल्वञ्च टङ्कणम् ।
मर्दयेत् सप्तमर्द्धं तु यावत् कज्जलसन्निभम् ॥
गुञ्जायुग्मे क्षिपेत् सम्यक् सर्वैरुच्चैर्दृढम् ।
लापयेत् सप्तधा पार्थे अर्कक्षीरस्य सप्तधा ॥
दत्ते भाण्डं संशिरुध्य चतुर्यामं दृढाग्निना ।

स्वाङ्गशीतं समुद्धृत्य क्षत्वा खल्वेषु कज्जलीम् ।
गुञ्जाद्वयप्रमाणेन नस्यकर्मणि योजयेत् ।
वामभागे ज्वरं हन्ति ततश्चक्षात् कौतुकं महत् ।
योजयेद्दक्षिणे भागे आरोग्यं निश्चितं भवेत् ॥"
इत्यर्द्धनारीनाटेश्वरो रसः ॥ * ॥

शीतज्वरादिविषमज्वरेषु रसरत्नप्रदीपे ।
"कट्फलं त्रिफलादारुचन्दनं सपरूषकम् ।
कटुकाग्नकोशीरं विपचेत् कार्षकं जले ॥
त्रिदोषदाहतृष्णार्त्तं पानमात्रेण पूजितम् ।
दीर्घकालजरार्त्तानामेतत् स्यादमृतोपमम् ॥"
कर्षं कट्फलादुशीरान्तानां समुदितानां जले
प्रस्थमिते विपचेत् चतुर्थांशेषम् । कटफलादिपानं
तृष्णायां दाहे च ।
"सन्निपाते तु दाहार्त्तं यः सिञ्चेच्छीतवारिणा ।
आतुरः स कथं जीवेद्विषवा स कथं भवेत् ॥"
अथ सन्निपातिनो दाहे शीताम्बुसेकनिषेधो रग-
दाहान्यत्र तत्र व्याख्यावगाहनश्लोकत्वात् ॥"*
अथान्नमाह ।
"दुःस्पर्शगोचुरत्रासिद्धमाहारमर्पयेत् ।
दोषशान्तिबलाग्न्यर्थं त्रिदोषज्वरिणे भिषक् ॥"
दुःस्पर्शो यवागः । आहारस्तुचितमन्नम् ॥
"लाजशक्तून् समश्नीयात् सैन्धवेन समन्वितान् ।
ते चेच्छीर्यन्त्यविघ्नेन ज्वरी जीवेत्तदा ध्रुवम् ॥"
इति कैश्चित् ॥
"रक्तपित्ते क्षितत्वेन तृष्णादाहज्वरेषु च ।
लाजानां शक्तवः शीता न च तत्र हिता मताः ॥
पाचनो दीपनः श्लेष्मा लाजमण्डो यतः स्मृतः ।
दग्धस्फोटादिसंक्लिष्टः सन्निपातज्वरे हितः ॥
सन्निपातज्वरी यस्तु कथ्यते प्रलपत्यपि ।
किंचिदेव न जानाति चिकित्सा तस्य कथ्यते ॥
अभ्यङ्गयेत् पुराणेन सर्पिषा पूर्वमेव तम् ।
बलाराजागुडूच्यारैस्तैलैश्च परिषेचयेत् ॥
वर्षको वर्षका लाषो वार्षाकस्त्रिलिरिः शशः ।
कुलिङ्गश्च रसैर्मांसैः तर्पयेत यथानलम् ॥"
वर्षकः वटेर इति लोके । वर्षका वटई इति
लोके । वार्षाको वातपटक इति निघण्टवः ॥
वगेरा इति लोके । कुलिङ्गो गरगरैया इति
लोके ।
"सन्निपाते क्षुधार्त्तं यो भोजयेत् पिप्पलीदलम् ।
स कथं भिषगाख्यान्तु लभते मनुजाधमः ॥"*॥
अथ बालोल्बणसन्निपातज्वरस्य चिकित्सा ।
"पक्वस्त्रीक्षीरयान्तु दद्यात् बालोत्तरे ज्वरे ।
भक्षोष्णं वा सुखोष्णं वा दृष्ट्वा दोषबलाबलम् ॥"
मक्षस्त्री मक्षतो प्रथमं प्रामाण्याख्यानं वचना-
भावात् ॥ * ॥ अथ शिशोल्बणसन्निपातज्वरस्य
चिकित्सा ।
"पक्वस्त्रकाचि त्रिफला दैवदारु च कट्फलम् ।
चन्दनं पद्मकं चैव तथा कटुकरोहिणी ॥
एतेषां चूर्णं लेभिरभिर्दत्तं शीतं जलम् ।
शिशोस्तरे ज्वरामेतत् सन्निपाते चिकित्सितम् ॥"
इति पक्वस्त्रकादिकाथः ॥ * ॥

कारिका। यक्ष्मगुल्मम्। ॐ। अथ सान्निपातस्य चिकित्सा।

"घृतीसुरत्वक्त्तमाः स्थविरदारुराजाः समाः
सनागरसुधान्विताः पिब घृतावरीसंयुताः।
वृहज्ज्वलनपाचिताः सह पुरेण सन्निपह-
व्यथामहतये तथा शिशिरसेवनं भा लघाः॥"

उत्तमा त्रिफला। स्थविरदारु विधारा इति लोके। सुधा गुडूची। पुरो गुग्गुलुः।

"वचाकवचकच्छुरासहचराम्लताभसुरा-
सुराक्वथनागरातरुणदारुराजापुराः।
वृषातरुणभीरुभिः सह भवन्ति सन्निपह-
व्यथोरुजडिमक्लमभ्रमणपक्षघातज्वरः॥"

कवचः पर्पटकः। कच्छुरा ववासः। भसुरा अतिविषा। सुरादारु देवदारु। अतरुणदारु वृद्धदारु। पुरो गुग्गुलुः। वृषा वृहत्ती एरण्डवत् पत्रविटपा तद्वामे हस्ती च आह्या समानगुणत्वात्। तरुण एरण्डः। भीरुः घृतावरी।

"सुरदारु घृती सुधालता
सुवहा शुण्ठियुता पृथा पचे।
त्रपुरा भ्रमयन्ति सेविताः
सततं सन्निपजं सदागतिम्॥"

सुवहा राम्ना।

"सुरेरुप्रागदावाग्वदारु-
च्छिन्नाराम्नाभोरुकर्पूरतिक्ता।
वासा विश्वा पञ्चमूलीयुगाढ्या
हन्याद्व्याधीन्सन्निपातप्रकोपान्॥"

प्रागदा हरितकी। वाग्वः नीलपुष्पवहचरः। तिक्ता कटुका॥ ॐ॥ अधुनान्तके विधिः।

"दृषापथ्याघृतसुधाशारि
ज्वरारिपूयादिगदापहारि।
ज्वरच्छिदं जीवितदण्ड नित्यं
रसायनं चेतसि चिन्तयस्व॥"

दृषा अमलकं। व्रतं लङ्घनादिनियमम्।

"कर्पूरप्रकरावदातवपुषं सद्योगसुप्राचुरं
प्रत्यङ्गक्षणनेषु भासुरचुषं भालस्फुरच्चक्षुषम्।
संपूर्णेन्दुसुभस्मसात्करं शुभाश्चभालाधरं
पिङ्गोत्तुङ्गजटाकलापलसितं चन्द्रार्द्धमौलिं
स्तुहि॥

भिषग्भिरिति निर्गीतं सन्निपातैकजाभिधे।
मेषजं शार्ङ्गधारीरं वैद्यो गोविन्द एव हि॥"ॐ

अथ वातरक्तस्य चिकित्सा।

"उशीरचन्दनोदीच्यदाक्षामलकपर्पटैः।
शृतं शीतं पयो दद्याद्दाहरक्तज्वरशान्तये॥"

इति वातरक्तमानम्॥ ॐ॥

"वस्तिर्वा निशि पर्युषितः प्रातर्वाप्याकतण्डुल-
क्वाथः।
पीतः प्रसवत्यचिराद्गतदोषं व्यर्थमेतम्॥"

धान्याकतण्डुलाः काञ्जिकधान्यकानि। इति धान्याकक्वाथः॥ ॐ॥

"पक्वा तैलघृतक्षौद्रैर्लिप्तं दाह्यज्वरापहम्।
क्वाथाद्वदिरवीरघं पाक्यामू हन्ति वर्मीमपि॥"

तैलघृतक्षौद्रैरित्यत्र नवसुच्चयः स्नेहेन केवलेन मधुनापि लिह्यात्। इति पथ्यावलेहः॥ ॐ॥

"प्रशमयति दाहमचिरात् दधियुक्तकर्कन्धुमद्यवे लेपः।
लेपो हिमकरमलयजनिम्बदलेन्द्रक्षापटैर्वा॥"
हिमकरः कर्पूरः। तथा च भगवान्धन्वन्तरिः

"उत्तानसुप्तस्य गभीरताम्र-
कांस्यादिपात्रे निहिते च नाभौ।
शीतामृधारा वहला पतन्ती
निहन्ति दाहं त्वरितं ज्वरञ्च॥
शीताम्भसा तु घृतमक्षु विलोडितेन
गन्धेन चन्दनयुतेन घृतेन सिद्धा।
दाहज्वरी सकमलोत्पलमाल्यधारी
क्षिप्रं विमोक्षं वलिनकोष्मणश्चकालम्॥
काञ्जिकार्द्रपटेनावगुण्ठनं दाहनाशनम्।
अथ गोतक्रसंस्निग्धशीतलीकृतवाससा॥"ॐ॥

अथान्नमाह।

"दाहावमर्दितं चाम निरन्नं लङ्घयान्वितम्।
शर्करामधुसंयुक्तं पाययेल्लाजतर्पणम्॥"

लाजतर्पणं लाजशक्तुभिरुपतर्पणम्।

"वाप्यः कमलहारिण्यो जलयन्त्रयुताः शुभाः।
गार्ध्यस्वेन्द्रदिग्भाग्यो दाहदैन्यहरा मताः॥
मुक्तावलीचन्दनशीतलाङ्गां
सुगन्धपुष्पाम्बरभूषितानाम्।
नितम्बिनीनां सुपयोधराणा-
मालिङ्गनान्याशु हरन्ति दाहम्॥
प्रह्लादं चास्य विज्ञाय नाः क्षीरपनयेत् पुनः।
हितस्य भोजयेदन्नं येनाग्नीति सुखं महत्॥"

प्रह्लादकं कामशतं धर्मम्॥ ॐ॥ अथ चित्तभ्रमस्य चिकित्सा।

"कथोयकोशातकवल्लीतमानि
करञ्जबीजं चणकाश्चलानि।
पथ्याचविल्वार्धकपित्थदध्नो-
युतानि यत्नात्सुविमिश्रितानि॥
पिष्ट्वा गुटीयं शयने विधेया
प्रचेतनेति प्रथितान्विताथा।
चित्तभ्रमापस्मृतिभूतदोष-
शिरोऽक्षिरोगक्षमनाग्रहेतुः॥"

वल्लास्तु छागलूनम्।

"कुम्भीद्वयतोरमोगुडविश्वाकणान्वितम्।
निहितं नवि नूनं स्यात् चित्तभ्रमविनाशनम्॥"

कुम्भीद्वयतोरमः अगस्तिवृक्षवल्कलरसः।

"सुराक्लेदनमेधाक्षामयूकमलयोद्भवैः।
मरुत्तरुमधूत्थिस्तैः पूरमाक्षिकधातुभिः॥
लोहलाभ्यकेलाभिर्धूपितश्चभ्रमोपहः।
ग्रहदोषहरः श्रीदः सौभाग्यकर उत्तमः॥"

सुरा एकाङ्गी। सुक्लेदो बाला। मरुत्तरुः देवदारुः। पूरः गुग्गुलुः। माक्षिकः धातुः। धातुः धर्मपटकः। लोहं अगुरुः। लाभ्यकं उशीरवत् भीतच्छिल्लविशेषः। तदलाभे उशीरं ग्राह्यम्।

"वृद्धीकामरदारुमत्स्यशकलाभुक्तामलक्यौरुता
पथ्यारैवतरामसेनकरजोराजीफलैः संयुतैः।
दृष्ट्वाचित्तरजोऽथ दर्पहरणा ब्राह्मी घटोली
पयः
पथ्या पर्पटरालवृक्षकटुकाशृङ्गीकपुष्पैः शृतैः॥"

वृद्धीका ब्राह्मी। मत्स्यशकला कटुका। आरैवतः आरग्वधः। रामसेनकः किरातितिक्तकः। रजः पर्पटकः। राजीफलः घटोलः। अथ योगान्तरमाह। वृद्धवल्ला मण्डूकपर्णी। सा च आर्षा ब्राह्मी सञ्ज्ञिका शोभाञ्जनः। तथाप्यत्र ब्राह्मी ग्राह्या। यत उक्तं गुणग्रन्थे। ब्राह्मी सतिग्रदा मेध्या ज्वरघ्नी रसायनीति। ब्राह्मी वरम्भी इति लोके। पयः बालकं राजवृक्षं आरग्वधः। शृङ्गीकपुष्पी शृङ्गपुष्पी॥ ॐ॥

अथ कर्णशूलस्य चिकित्सा।

"प्रलेपः समलं गवलघ्नलेपः
सुस्निग्धशोधश्च रक्तावसेकः।
विपक्वश्च शस्त्रक्रिया पूर्वचिन्ता सा
प्रबलं शतश्च हृतं तच्चिकित्सा॥"

अयमर्थः। अथ तं कर्णकं एकः प्रलेपः अथं गाढं नयति। तच्चिकित्सा व्रणचिकित्सा।

"त्रिफाविशालामयमाक्षिकस्य-
दार्वीतुदीन्द्रलक्षतः प्रलेपः।
प्रभाकरचौरयुतप्रभावाद्-
अर्तः समस्तोऽप्यथ कर्णकः॥"

युक्तस्य कट्फलं शुण्ठी कारवी च सभाग्यकैः सुखोष्णैर्लेपनं कार्यं कर्णशूले सुदुर्मुदुः॥
गोरिकं कठिनीशुण्ठीकट्फले सुवचे समे।
उष्णैः काञ्जिकसंपिष्टैः प्रलेपः कर्णशूलजुत्॥
शिग्रुराजिकयोः पिष्टा कर्णशूलं प्रलेपयेत्।
कर्णशूलभवः शीघ्रसेन लेपेन शाम्यति॥
अग्निशिरचलपरिण्डितं सरिचकणाक्षीर-
सिन्धुभं त्वरितम्।
गरुविधिसेवितं नृणु कर्णकरुक् नाशमुद्-
गदितम्॥

भार्गीक्षयापौष्करकट्फलकारी-
कटुत्रिकोग्राघनकुष्ठलीभिः।
क्षुवीरवल्लीकटुकारसाभिः
क्षतः कषायः किल कर्णकघ्नः॥

भार्गी वमनेटी इति लोके। तद्वामे कण्टकारीमूलं ग्राह्यम्। क्षया गणिया इति लोके। पौष्करं पुष्करमूलम्। उग्रा वचा। कुष्ठली गुडूची। क्षुवीरवल्ली कर्कटशृङ्गी। रसा राम्ना।

"दृषामूलमत्स्यशकलाचपला-
त्रिफाभार्गीपौष्करविश्वतिम्।
महिषं मरिचक्षितमाशु पिबा-
दृषद्भिः कर्णरुजः शकला॥"

चपला पिप्पली॥ ॐ॥ अथ कण्ठरुजस्य चिकित्सा।

"कफजिकचूपसमुद्भवकण्ठ-
कण्डिकण्डिकाननमन्यरोगेषु।

रक्तैकवासा दण्डी च बिभर्त्ति रुत्तमरुद्भुम् ॥
सर्व्वत्र समदर्शी च स्मरेन्नारायणं सदा ।
करोति भ्रमणं नित्यं गेहे गेहे न तिष्ठति ॥
विद्यामन्त्रञ्च कस्यैचित् न ददाति च दैवतम् ।
करोति नाश्रमं भिक्षुः करोति नान्यवासनाम् ॥
करोति नान्यसङ्गञ्च निर्म्मोहः सङ्गवर्ज्जितः ।
न खादु भुङ्क्ते दैवाच्च स्त्रीमुखं न हि पश्यति ॥
न वाञ्छितं भक्ष्यवस्तु याचते गृहिणं व्रती ।
इतिसन्न्यासिनां धर्म्ममित्याह कमलोद्भवः ॥"
इति उक्त्वैवर्त्ते श्रीकृष्णजन्मखण्डे ५६ अध्यायः ॥
अन्यच्च ।
"तपसा कर्षितोऽत्यर्थं यस्तु ध्यानपरो भवेत् ।
सन्न्यासीह स विज्ञेयो वानप्रस्थाश्रमे स्थितः ॥
योगाभ्यासरतो नित्यमारुरुक्षुर्जितेन्द्रियः ।
ज्ञानार्थं वर्त्तते भिक्षुः प्रोच्यते पारमैष्ठिकः ॥
यस्यात्मरतिरेव स्यान्नित्यतृप्तो महामुनिः ।
सम्यक् च दमसम्पन्नः स योगी भिक्षुरुच्यते ॥
भैक्ष्यं श्रुतञ्च मौनित्वं तपो ध्यानं विशेषतः ।
सम्यक् च ज्ञानवैराग्यं धर्म्मोऽयं भिक्षुके मतः ॥
ज्ञानसन्न्यासिनः केचित् वेदसन्न्यासिनोऽपरे ।
कर्म्मसन्न्यासिनः केचित् त्रिविधः पारमैष्ठिकः ॥
योगी च त्रिविधो ज्ञेयो भौतिको मोक्ष एव च ।
तृतीयोऽन्त्याश्रमी प्रोक्तो योगमूर्त्तिसमाश्रितः ॥
प्रथमा भावना पूर्व्वे मोक्षे तच्चरभावना ।
तृतीये चान्तिमा प्रोक्ता भावना पारमेश्वरी ॥
यतीनां यतचित्तानां न्यासिनामूर्द्धरेतसाम् ।
आनन्दं ब्रह्म तत्स्थानं यस्मान्नावर्त्तते मुनिः ॥
योगिनामन्तकं स्थानं व्योमाख्यं परमेश्वरम् ।
आनन्दमैश्वरं यस्मान्मुक्तो नावर्त्तते नरः ॥"
इति गारुडे ४६ अध्यायः ॥*॥
अपरञ्च ।
"ज्ञानसन्न्यासिनः केचिद्वेदसन्न्यासिनोऽपरे ।
कर्म्मसन्न्यासिनश्चान्ये त्रिविधाः परिकीर्त्तिताः ॥
यः सर्व्वसङ्गनिर्म्मुक्तो निर्द्वन्द्वोऽपि निरुद्यमः ।
प्रोच्यते ज्ञानसन्न्यासी स्वात्मन्येव व्यवस्थितः ॥
वेदमेवाभ्यसेन्नित्यं स याति परमां गतिम् ।
अहिंसा सत्यमस्तेयं ब्रह्मचर्य्यं तपः परम् ।
क्षमा दया च सन्तोषो व्रतान्यस्य विशेषतः ।
वेदान्तज्ञाननिष्ठो वा पञ्चयज्ञान् समाहितः ।
कुर्य्यादहरहः स्नात्वा भैक्षान्नेनैव तेन हि ॥
होममन्त्रान् जपेन्नित्यं काले काले समाहितः ।
स्वाध्यायं चान्वहं कुर्य्यात् सावित्रीं चन्द्रयोर्व्वपेत् ॥
ध्यायेत् सततं देवमेकान्ते परमेश्वरम् ।
एकान्नं वर्ज्जयेन्नित्यं कामं क्रोधं परिग्रहम् ।
एकवासा द्विवासा वा शिखी यज्ञोपवीतवान् ।
कमण्डलुकरो विद्वांश्चिदण्डी याति तत्पदम् ॥"
इति कौर्म्मे उपविभागे २७ अध्यायः ॥*॥

व्यास उवाच ।

"एतच्चाश्रमनिष्ठानां यतीनां नियतात्मनाम् ।
भैक्षेण वर्त्तनं प्रोक्तं फलमूलैरथापि वा ॥
एककालं चरेद्भैक्षं न प्रसज्येत विस्तरे ।
भैक्षे प्रसक्तो हि यतिर्विषयेष्वपि सज्जति ॥
सप्तागारं चरेद्भैक्षमलाभे हे पुनश्चरेत् ।
प्रक्षाल्य पात्र मृज्जीयादद्भिः प्रक्षालयेत्तु तत् ॥
अथवान्यदुपादाय पात्रं मृज्जीत नित्यशः ।
भुक्त्वा च सन्त्यजेत् पात्रं यात्रामात्रमलोलुपः ॥
विधूमे सन्नमुषले अङ्गारे सक्तवज्जने ।
वृत्ते शरावसंपाते भिक्षां नित्यं यतिश्चरेत् ॥
गोदोहमात्रं तिष्ठेत कालं भिक्षुरधोमुखः ।
भिक्षित्वा सकृदश्नीयादागतः प्रयतः शुचिः ॥
प्रक्षाल्य पाणिपादौ च समाचम्य यथाविधि ।
आदित्ये दर्शयित्वान्नं भुञ्जीत प्राङ्मुखोऽव्वशः ॥
हुत्वा प्राणाहुतीः पञ्च ग्रासानष्टौ समाहितः ।
आचम्य देवं ब्रह्माणं ध्यायीत परमेश्वरम् ॥
अलाबुं दारुपात्रञ्च मृन्मयं वैणवं तथा ।
धृत्वारि यतिपात्राणि मनुराह प्रजापतिः ॥
प्रदोषे पररात्रे च मध्यरात्रे तथैव च ।
सन्ध्यास्वङ्गि विशेषेण चिन्तयेन्नित्यमीश्वरम् ॥
हत्वा हृत्पद्मनिलये विश्वाख्यं विश्वसम्भवम् ।
आत्मानं सर्व्वभूतानां परत्वात्तमसः स्थितम् ॥
सर्व्वस्याधारमव्यक्तमानन्दं ज्योतिरव्ययम् ।
प्रधानपुरुषातीतमाकाशं दहनं परम् ॥
तदन्तः सर्व्वभावानामीश्वरं प्रकृरूपिणम्
ध्यायेदनादिमद्वैतमानन्दादिगुणालयम् ॥
महान्तं परमं ब्रह्म पुरुषं सत्यमव्ययम् ।
सितेतररूपाकारं सर्व्वरूपिणम् ॥
ओङ्कारान्तोऽथवात्मानं संस्थाप्य परमात्मनि ।
आकाशे देवमीशानं ध्यायीताकाशमव्ययम् ॥
कारणं सर्व्वभूतानामानन्दैकसमाश्रयम् ।
पुराणं पुरुषं शम्भुं ध्यायन्मुच्येत बन्धनात् ॥
यदा गुहायां प्रकृतौ जगत्सम्मोहनालये ।
विचिन्त्य परमं व्योम सर्व्वभूतैककारणम् ॥
जीवनं सर्व्वभूतानां यत्र लोकः प्रलीयते ।
आनन्दं ब्रह्मणः सूक्ष्मं यत् पश्यन्ति मुमुक्षवः ॥
तस्मिन्न निहितं ब्रह्म केवलं ज्ञानलक्षणम् ।
अनन्तं सत्यमीशानं विचिन्त्यासीत संयतः ॥
गुह्याद्गुह्यतमं ज्ञानं यतीनामेतदीरितम् ।
योऽनुतिष्ठेत सततं सोऽमुते योगमीश्वरम् ॥
तस्मात् ध्यानरतो नित्यमात्मविद्यापरायणः ।
ज्ञानं समभ्यसेद्ब्राह्मं सुयेत भववन्धनात् ॥
यद्वा पृथक्त्वमात्मानं सर्व्वस्मादेव केवलम् ।
आनन्दमक्षरं ज्ञानं ध्यायीत च पुनः परम् ॥
यस्माद्भवन्ति भूतानि यद्गत्वा नेह जायते ।
स तस्मादीश्वरो देवः परस्मादधोऽधितिष्ठति ॥
यदन्तरे तद्गगनं शाश्वतं शिवमव्ययम् ।
यमाहुस्तत्परो यस्तु स देवः स्यान्महेश्वरः ।
व्रतानि यानि भिक्षूणां तथैवोपव्रतानि च ।
एकैकातिक्रमे तेषां प्रायश्चित्तं विधीयते ॥
उपेत्य च स्त्रियं कामात् प्रायश्चित्तं समाहितः ।
प्राणायामसमायुक्तं कुर्य्यात् सान्तपनं शुचिः ॥
ततश्चरेत नियमान् कृतस्नान् संयतमानसः ।
पुनराश्रममागत्य चरेद्भिक्षुरतन्द्रितः ॥
न नर्म्मयुक्तमनृतं हिनस्तीति मनोर्विधिः ।
तथापि न च कर्त्तव्यः प्रसङ्गो ह्येष दारुणः ॥
एकरात्रोपवासश्च प्राणायामशतं तथा ।
उक्तावृतं प्रकर्त्तव्यं यतिना धर्म्मलिप्सुना ॥
परमापद्गतेनापि न कार्य्यं स्त्रीयमन्यतः ।
स्त्रीयादभ्यधिकः कश्चित् नास्त्यधर्म्मः इति स्मृतिः ॥
हिंसा चैषा परा प्रोक्ता या चात्मज्ञाननाशिका ।
यदेतद्विगं नाम प्राणास्तै तु बहिश्चराः ।
न तस्य हरते प्राणान् यो यस्य हरते धनम् ॥
एवं ज्ञात्वा च दुष्टात्मा भिन्नवृत्तो व्रतच्युतः ।

छित्त्वा शिखां करे धृत्वा हृतमध्ये नियोजयेत् ॥
महाशुचि शिखे त्वं हि ब्राह्मीरूपा सनातनी ।
दीयते पावके स्थानं गच्छ देवि नमोऽस्तु ते ॥
कामं मायां कूर्च्चमन्त्रं वह्निजायान्तमीरयेत् ।
शिखामाश्रित्य पितरो देवा देवर्षयस्तथा ।
सर्व्वाश्रमकर्म्माणि निवसन्ति शिखोपरि ॥
ततः सन्तर्प्य ताः सर्व्वा देवर्षिपितृदेवताः ।
शिखोच्छेदपरित्यागात् देही ब्रह्ममयो भवेत् ॥
यज्ञोपवीतशिखात्यागात् सन्न्यासः स्याद्द्विजन्मनाम् ।
शूद्राणामितरेषाञ्च शिखां हुत्वैव सत्क्रिया ॥
ततो मुक्तशिखासूत्रः प्रणमेद्दण्डवद्गुरुम् ।
गुरुरुत्थाप्य तं शिष्यं दक्षकर्णे वदेदिदम् ॥
तत्त्वमसि महाप्राज्ञ हंसः सोऽहं विभावय ।
निर्म्ममो निरहङ्कारः स्वभावेन सुखं चर ॥
ततो घटञ्च वह्निञ्च विसृज्य ब्रह्मतत्त्ववित् ।
आत्मस्वरूपं तं मत्वा प्रणमेच्छिरसा गुरुम् ॥
नमस्तुभ्यं नमो मह्यं तुभ्यं मह्यं नमो नमः ।
त्वमेव तदहञ्चैव विश्वरूपं नमोऽस्तु ते ॥
ब्रह्ममन्त्रोपासकानां तत्त्वज्ञानां जितात्मनाम् ।
तस्मादेव शिखाच्छेदात् सन्न्यासग्रहणं भवेत् ॥
ब्रह्मज्ञानविशुद्धानां किं यज्ञैः श्राद्धपूजनैः ।
स्वेच्छाचारपराणान्तु प्रत्यवायो न विद्यते ॥
ततो निर्द्वन्द्वरूपोऽसौ निष्कामः स्थिरमानसः ।
निर्म्ममो विचरेत् शिष्यः साक्षाद्ब्रह्ममयो भुवि ॥
मुक्तो विधिनिषेधाभ्यां निर्योगक्षेम आत्मवित् ।
सुखदुःखसमो धीरो जितात्मा विगतस्पृहः ॥
त्यक्तात्मा प्राप्तदुःखोऽपि सुखे प्राप्तेऽपि निःस्पृहः ।
सदानन्दः शुचिः शान्तो निरपेक्षो निराकुलः ॥
नोद्वेजकः स्याज्जीवानां सदा प्राणिहिते रतः ।
विगतामर्षभीश्शान्तो निःसङ्कल्पो निरुद्यमः ॥
शोकहर्षविमुक्तः स्यात्तथा मित्रे समो भवेत् ।
शीतवातातपसहः समो मानापमानयोः ॥
समः शुभाशुभे बुद्धो यदृच्छालाभवस्तुना ।
निस्त्रैगुण्यो निर्व्विकल्पो निर्लोभः स्यादसञ्चयी ॥
यथाकाशमुपाश्रित्य सदा विश्वं प्रतिष्ठते ।
आत्माश्रितस्तथा देही [illegible] सुखी भवेत् ॥
अनित्यान्येव भूतानि स्वैः स्वैः कर्म्म पृथक् पृथक् ।
भुञ्जाना साक्षी निर्लिप्तो धारयेत् मोक्षभाग्भवेत् ॥
धातुप्रतिग्रहं निन्दामनृतं क्रीडनं स्त्रिया ।
रेतस्त्यागमसूयाञ्च सन्न्यासी परिवर्ज्जयेत् ॥
सर्व्वत्र समदृष्टिः स्यात् कीटे देवे तथा नरे ।
सर्व्वं ब्रह्मेति जानीयात् परिव्राट् सर्व्वकर्म्मसु ॥
विप्रान्नं श्वपचान्नं वा यस्मात्तस्मात् समागतम् ।
देशं कालं तथा पात्रमश्नीयादविचारयन् ॥
अध्यात्मशास्त्राध्ययनैः सदा तत्त्वविचारणैः ।
[illegible] ब्रह्मध्यानपरायणः ॥
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

अयस्त्वेव चानन्तस्तत्रैव दृढनिश्चयाः ।
अतः कर्म्मविधानानि प्रोक्तानि चित्तशुद्धये ॥
नामरूपं बहुविधं तदर्थं कल्पितं मया ।
ब्रह्मज्ञानं विना देवि कर्म्मसंन्यसनं विना ॥
कुर्व्वन् कल्पशतं कर्म्म न भवेन्मुक्तिभाजनः ।
कुलावधूतस्तत्त्वज्ञो जीवन्मुक्तो नराकृतिः ॥
साक्षान्नारायणं मत्वा गृहस्थस्तं प्रपूजयेत् ।
यतेर्द्दर्शनमात्रेण विमुक्तः सर्व्वपातकात् ।
तीर्थव्रततपोदानसर्व्वयज्ञफलं लभेत् ॥”
इत्यवधूताश्रमः । इति महानिर्व्वाणतन्त्रे अष्टमोल्लासः ॥

सप, सम्बन्धे । (भ्वा०-पर०-सक०-सेट् ।) असीमपत् । इति दुर्गादासः ॥ कविकल्पद्रुमे स्वर्द्दन्त्यादिरयम् ॥

सपत्त्राकरणं, क्ली, (सपत्त्र+कृ+ल्युट् । “सपत्त्रनिष्पत्त्रादतिव्यथने ।” ५ । ४ । ६१ । इति डाच् ।) अत्यन्तपीडनम् । इति हलायुधः ॥

सपत्त्राकृतः, पुं, (सपत्त्र+कृ+क्तः । डाच् ।) शरविद्धः । व्यथन्तपीडिते, त्रि । इति केचित् ॥

सपत्त्राकृतिः, स्त्री, (सपत्त्र+कृ+क्तिन् । डाच् ।) अत्यन्तपीडनम् । तत्पर्य्यायः । निष्पत्त्राकृतिः २ । इति हेमचन्द्रः ॥

सपत्नः, पुं, (सह पतति एकार्थे इति । पत+नः । सहस्य सः ।) शत्रुः । इत्यमरः ॥ (यथा, महाभारते । १ । १४५ । ५ ।
“संरक्ष तात मन्त्रञ्च सपत्नांश्च मनोहर ।
निपुणेनाभ्युपायेन यद्ब्रवीमि तथा कुरु ॥”)

सपत्नारिः, पुं, (सपत्नस्य शत्रोररिरिव दुर्गप्रभवत्वात् ।) वंशविशेषः । वेणु बाँश इति भाषा । यथा,—
“नरायष्टिः सपत्नारिर्व्वेणुरन्तनिराशुषः ।”
इति शब्दचन्द्रिका ॥

सपत्नी, स्त्री, (समानः एकः पतिर्यस्याः । “नित्यं सपत्न्यादिषु ।” ४ । १ । ३५ । इति ङीप् । पत्युर्नकारादेशः समानस्य सभावोऽपि निपात्यते ।) समानपतिका । सतीन इति भाषा ॥ (यथा, मार्य्यासप्तशत्याम् । ४६३ ।
“या नीयते सपत्न्या प्रविश्य या वर्ज्जिता सुभगेन ।
यमुनाया इव तस्याः सखि मलिनं जीवनं मन्ये ॥”)
यथा च । शौचित्राभावे सपत्नीपुत्रः । तस्य पुत्रत्वारम्भात् । यथा मनुः ।
“सर्व्वासामेकपत्नीनामेका चेत् पुत्त्रिणी भवेत् ।
सर्व्वास्तास्तेन पुत्त्रेण प्राह पुत्त्रवतीर्म्मनुः ॥”
सजन्मनीनामिति एकः पतिर्व्वासामिति ।
अत सपत्नीपुत्त्रस्य पुत्त्रत्वातिदेशात् तत्सत्त्वेऽपि स्त्रीणां सपिण्डं मैथिलैरुक्तम् । तत्र ।
“पुत्त्रेणैव तु कर्त्तव्यं सपिण्डीकरणं स्त्रियाः ।
पुत्त्राभावे तु पत्नी स्यात्तदभावे सहोदरः ॥”
इति पत्युरधिकारे तत्सत्त्वेऽपि तस्य पुत्त्राभावात् । इति शुद्धितत्त्वम् ॥

सपदि, व्य, (संपद्यते इति । पद गतौ+इन् । पृषोदरादित्वात् मलोपः ।) द्रुतम् । तत्क्षणः । इत्यमरः ॥ (यथा, कुमारे । ३ । ७६ ।
“सपदि मुकुलिताक्षीं रुद्रसंरम्भभीत्या
दुहितरमनुकम्पामद्रिरादाय दोर्भ्याम् ।
सुरगज इव बिभ्रत् पद्मिनीं दन्तलग्नां
प्रतिपथगतिरासीत् वेगदीर्घीकृताङ्गः ॥”)

सपर्य्या, स्त्री, (सपर पूजायाम्+“कण्ड्वादिभ्यो यक् ।”३।१।२७। इति यक् । “अ प्रत्ययात् ।” ३ । ३ । १०२ । इति अः । ततष्टाप् ।) पूजा । इत्यमरः ॥ (यथा, माघे । १ । १४ ।
“तमर्घ्यमर्घ्यादिकयादिपूरुषः
सपर्य्यया साधु स पर्य्यपूपुजत् ॥”)

सपादः, त्रि, पादेन सह वर्त्तमानः । स तु चरणयुक्तचतुर्थभागसहितश्च । यथा,—
“सपादपलमानेन वेला तुल्यात निश्चितम् ।”
इति सत्कृत्यमुक्तावली ॥

सपादपीठं, त्रि, (सपादं पादसहितं पीठं यत्र ।) पादपीठयुक्तसिंहासनादि । यथा,—
“आदिन्नदादीमरक्तांशुकाढ्यं
सिंहासनं तस्य सपादपीठम् ।
सन्तप्तचामीकरवल्गुवर्णं
विभागविन्यस्तमहार्हरत्नम् ॥”
इति भट्टौ ३ सर्गः ॥

सपिण्डः, पुं, (समानः पिण्डो मूलपुरुषो निवापो वा यस्य । समानस्य सः ।) सप्तपुरुषान्तर्गतज्ञातिः । तत्पर्य्यायः । सनाभिः २ । इत्यमरः ॥ स च अशौचविवाहदायभेदात् त्रिविधः । तत्राशौचसपिण्डस्य लक्षणं यथा । सप्तपुरुषान्तर्गतत्वे सति गोत्रैक्ये सति दातृत्वभोक्तृत्वान्यतरसम्बन्धेन पिण्डलेपान्यतरवत्त्वम् । दत्तकन्यानान्तु भर्त्तृत्रापिण्डेन सापिण्ड्यम् । अदत्तानां पित्रवधित्रिपुरुषसापिण्ड्यम् । विवाहसपिण्डास्तु । पितृपितृबन्धपेक्षया सप्तमपुरुषावधयः । मातामहमातृबन्धपेक्षया पञ्चमपुरुषावधयश्च । यथा,—
“पञ्चमात् सप्तमादूर्द्ध्वं मातृतः पितृतः क्रमात् ।
सपिण्डता निवर्त्तेत सर्व्ववर्णेष्वयं विधिः ॥”
इत्युद्वाहतत्त्वधृतनारदवचनम् ॥
दायसपिण्डास्तु । त्रिपुरुषावधयः । ते च पितृपितामहप्रपितामहाः तेषां पुत्त्रपौत्त्रप्रपौत्त्रदौहित्राः । मातामहप्रमातामहवृद्धप्रमातामहाः । तत्पुत्त्रपौत्त्रप्रपौत्त्राश्च । इति दायभागः ॥ अथ सपिण्डादिविचारः । मत्स्यपुराणम् ।
“लेपभाजश्चतुर्थाद्याः पित्राद्याः पिण्डभागिनः ।
पिण्डदः सप्तमस्तेषां सापिण्ड्यं साप्तपौरुषम् ॥”
मन्वादे शास्त्रादिभिः सह पिण्डलेपोक्तत्वासमानत्वं कथं सपिण्डत्वमिति वेदुष्यते । तेषामपि पिण्डलेपयोः सम्बन्धोऽस्ति । तथा च बौधायनः । प्रपितामहः पितामहः पिता स्वयं सोदर्य्यभ्रातरः । सवर्णायाः पुत्त्रः पौत्त्रः प्रपौत्त्रो

संवत्सरं वा प्राप्य पिण्डत्वप्रापकं इति न सपिण्डनान्तरम्। अत्र त्वं कर्त्तास्मीति निश्चित्य दाता विप्रान्निमन्त्रयेत्। इतिवन्निश्चित्येति उत्कटकोटिकसम्भावनोपलक्षणम्। भविष्यन्निमित्तस्य कर्म्मणः प्रत्यूहार्हत्वात्। एवञ्च वृद्धिश्राद्धं यदर्थं कृतं तत् कर्म्म चेत् विघ्नात्तद्दिने न क्रियते तदा दिनान्तरे तत्कर्म्मणि क्रियमाणे तदङ्गत्वात् पुनर्वृद्धिश्राद्धं कर्त्तव्यमेव।

"प्रधानस्याक्रिया यत्र साङ्गं तत् क्रियते पुनः।
तदङ्गस्याक्रियायान्तु नावृत्तिर्न च तत् क्रिया॥"

इति छन्दोगपरिशिष्टेन साङ्गकरणाभिधानात्॥ हेमाद्रिधृतम्

"पूर्णे संवत्सरे श्राद्धं षोढ़र्णं परिकीर्त्तितम्।
तेनैव च सपिण्डत्वं तेनैवाब्दिकमिष्यते॥"

अत्र पूर्णसंवत्सरक्रियमाणश्राद्धाद्योभयनिर्व्वाहात्। तथापक्षेऽसपिण्डनादप्युभयनिर्व्वाहान्न पूर्णसंवत्सरे आब्दिकान्तरं कार्य्यम्। एवञ्च पक्षदशश्राद्धे कृतेऽप्युन्नेयम्॥ * ॥ उदकपात्राणि इति अर्घ्यार्थमुदकयुक्तपात्राणि। अत्र त्रीणि पितृणामेकं प्रेतस्येति पाठक्रमदर्शनात् सर्व्वत्र छन्दोगानां यजुर्व्वेदिनाञ्च मन्त्रानुरोधात् सपिण्डीकरणे प्रेतकर्म्मकरणं पिण्डकर्म्मपूर्व्वकम्। तयोः पार्व्वणवत् पूर्व्वमेकोद्दिष्टमथापरम्। इति पूर्व्वलिखितवचने श्राद्धक्रमदर्शनात्। देवकृत्यपिण्डकृत्ययोर्म्मध्ये प्रेतकृत्येन व्यवधानस्यायुक्तत्वाच्च। एतेन अथ सपिण्डीकरणं सवत्सरमेकं पिण्डमुद्दिश्य संवत्सरान्ते चत्वार्य्युदकपात्राणि प्रयुनक्ति तत्रैकं प्रेतस्य त्रीणि इतरेभ्यः। इत्याश्वलायनदर्शनात् सर्व्वशाखिनां सपिण्डीकरणे प्रेतादित्वं मैथिलोक्तं निरस्तम्। एतद्वचनस्य तच्छाखिमात्रपरत्वात्। किन्त्वर्घ्यदानमात्रे पाठक्रमाच्छाब्दक्रमस्य बलवत्त्वात् ब्रह्मपुराणे प्रेतार्घ्यदानानन्तरं ततः पितामहादिभ्यः इति श्राद्धक्रमस्यावाधार्घ्यपात्रेषु गन्धपुष्पदानपर्य्यन्तं पित्रूर्द्धकता उत्सर्गे तु प्रेतपूर्व्वकतेति। तथा ब्रह्मपुराणम्।

"चतुर्थ्यार्घ्यपात्रेभ्य एकं वामेन पाणिना।
गृहीत्वा दक्षिणेनैव पाणिना च तिलोदकम्॥
सम्मार्ज्य त्रिर्वा पृथिवीं ये समाना इति स्मरन्।
प्रेतविप्रस्य हस्ते तु चतुर्भागं जलं क्षिपेत्॥
ततः पितामहादिभ्यस्तन्मन्त्रेण पृथक् पृथक्।
ये समाना इति द्वाभ्यां तज्जलन्तु समर्पयेत्॥
अर्घ्यं तेनैव विधिना प्रेतपात्राच्च पूर्व्ववत्।
तेभ्यश्चार्घ्यं निधायैव पश्चाच्च स्वयमाचमेत्॥"

एकं प्रेतपात्रं वामेन अनन्तरं दक्षिणेन गृहीत्वा इति सम्बन्धः। ये समाना इति मन्त्रद्वयं पठन् प्रेतपात्रस्थं उत्सृष्टजलं कुशत्रयमात्रेण चतुधा विभज्य भागमेकं प्रेतब्राह्मणहस्ते क्षिपेत् स्थात्। उत्सृष्टजलनिष्ठत्रीणिभागं सन्नस्य उत्तमं यक्ष्यमाह प्राजापत्यः।

"पिण्डस्य चतुरः पिण्डान् पिण्डदः प्रतिपादयेत्।
ये समाना इति द्वाभ्यामाद्येनैव विभज्य त्रिधा।
एष एव विधिः पूर्व्वमर्घ्यपात्रचतुष्टये॥"

ततस्तदनन्तरं तन्मन्त्रैः पितामहादिभेदेन त्रिरावृत्त्यैर्घ्यं दद्यात् इति मन्त्रैश्चकारात् पितामहाद्युत्सर्गवाक्यैरर्घ्यसूत्रस्थ ये समाना इति द्वाभ्यां मन्त्राभ्यामर्घ्यं पुष्पोदकं तज्जलं प्रेतपात्रस्थजलं तेनैव विधिना प्रत्येकेन पूर्व्ववत् चतुर्भागरूपं प्रेतपात्रात् समर्पयेत्। तेभ्यः पितामहादिभ्यस्त्रिभ्यस्त्रिभ्रितपुष्पतिलोदकरूपमर्घ्यं निवेद्य तत्तद्ब्राह्मणहस्ते प्रक्षिप्य पश्चादाचमेदित्यर्थः। तेन प्रेतब्राह्मणहस्ते उत्सृष्टस्य दत्तस्यैवार्घ्यजलस्य तदवशिष्टजलस्य भागत्रयं पितामहाद्युत्सृष्टार्घ्यजलेषु मिश्रीकर्त्तव्यमिति प्रतीयते। अतएव दत्तस्यैव प्रेतपिण्डस्य मिश्रीभाव इति श्राद्धविवेकः॥ * ॥

यच्च न चात्र देयं भोजयेत् प्रागेव दैवे अर्घ्यमन्नाद्यञ्च दत्त्वा गन्धमाल्यैः पात्रमर्चयित्वा हुतशेषं पितृभ्यः पात्रेषु दद्यात् इत्याश्वलायनवचने पितृपात्रे दैवं न मिश्रयेदिति कल्पतरव्याख्यानुरोधेन मैथिलोक्तं सर्व्वशाखिनान्तथाचरणम्। तन्न युक्तम्। आश्वलायनेन काण्डानुशयस्योक्तत्वात् बह्वृचानामेव तथा युक्तत्वात्। न सामगयजुर्व्वेदिनोः। तयोः पदार्थानुशयस्योक्तत्वात्। अत्र सामयजुर्व्वेदिनोः आद्यश्चे समन्वये मन्त्रदर्शनात्तत्रैव मन्त्रान्वयः पितृदयितादावुक्तः। वस्तुतस्तु पौराणिकत्वात् देवताभ्य इत्यस्य पाठवत् साधारणस्तुतिकारग्रातातपोक्तत्वाच्च विभागेऽपि मन्त्रान्वयो युक्तः। अतएव मैथिलैरपि तथा लिखितमिति॥ * ॥

एवञ्च पार्व्वणे प्रागुक्तवचनेन श्रेयत्वेन पिण्डदानविधानात् तद्विकृतावपि सपिण्डीकरणे तन्नियमात् यद्यपि श्रेषाभावे पिण्डनिवृत्तिरायाति तथापि।

"यथोक्तवस्त्वसंप्राप्तौ श्राद्धं तदनुकारि यत्।
यवानामिव गोधूमा व्रीहीणामिव शालयः॥"

इति छन्दोगपरिशिष्टवचनात् मुख्याभावे प्रतिनिधिः श्राद्धार्थ इति न्यायाच्च मध्याद्यभावे गुडादिग्रहणवत् द्रव्यान्तरेणापि पिण्डदानम्। श्रेयत्वनियमस्तु तत्सम्भवे द्रव्यान्तरत्यागाय। अन्यथा तदङ्गाभावे कर्म्मवैगुण्यं स्यात्। सह-पिण्डक्रियायां इति मनुक्तेः प्रेतपिण्डस्य सह मिश्रीकरणं यत्रेति सपिण्डीकरणसमाख्यासिद्ध्यर्थं सुतरां तत्र तथाचरणम्। प्रतिपत्तिरूपकर्म्माङ्ग एव प्रतिपाद्याभावे तन्निवृत्तिः। पशुयागे लोहितं निरस्यति सक्रुन्निरस्यति इत्यादावुक्ता। अतएव यज्ञवास्तुरूपप्रतिपत्तियागेऽपि यज्ञो यत्र वसति इति यज्ञवास्तुसमाख्यानुरोधेनास्तृतकुशविनाशेऽपि कुशान्तरप्रतिनिधिभट्टनारायणैः गोभिलभाष्ये उक्तः। प्राक् स्थिण्डिलात् आवापः इति गोभिलसूत्रस्थ आस्यानेऽपि वा उप्यते इत्यावापः प्रधानहोमः स तु स्थिण्डिलहोमात् प्राक् न पश्चादित्यर्थः। एवञ्च सुप्रसिद्धेन लक्षणे यदि चरुर्नेष्टो हुतो वा भवति तदान्यः पाच्यः सुखे कृते चेन्नाशदुष्टौ स्यातां तदाप्येनमेव स्थिष्टकृद्धोम इति स्मरणात्। एतेन श्रेषनाशे पिण्डनिवृत्तिरिति वाचस्पतिमिश्रोक्तं हेयम्॥ * ॥ एतेन पिण्ड इति। एतेनार्घ्यदानविधानेन। पिण्डः पिण्डमिश्रणप्रकारो व्याख्यातः। तथा च ब्रह्मपुराणम्।

"अथ तेनैव विधिना दर्भमूलेऽवनेजनम्।
पितुर्दत्त्वा तु पिण्डन्तु दद्याद्भक्त्या तु पूर्व्ववत्॥
दत्त्वा पिण्डान् पितृभ्यस्तु पश्चात् प्रेताय पार्थवः।
तन्तु पिण्डं त्रिधा कृत्वा आनुपूर्व्व्या च सन्ततम्॥
निदध्यात्त्रिषु पिण्डेषु एवं संसर्ज्जने विधिः॥"

पितृभ्यः पितृपितामहादिभ्यः पिण्डान् दत्त्वा पश्चात् प्रेताय पार्थवः पूर्व्वदेशे पिण्डं दद्यादित्यर्थः। तं प्रेताय दत्तपिण्डम्। आनुपूर्व्व्या पितामहादिक्रमेण। संसर्ज्जने प्रेतपिण्डमिश्रणे। भविष्यपुराणम्।

"गन्धोदकतिलैर्युक्तं कुर्य्यात् पात्रचतुष्टयम्।
अर्घ्यार्थं पितृपात्रेषु प्रेतपात्रं प्रसेचयेत्॥"

ये समाना इति द्वाभ्यामेतज्ज्ञेयं सपिण्डनम्।
तिलेन तुल्यं श्रेयं स्यादेकोद्दिष्टं स्त्रिया अपि॥"

तिलेनावश्यकेन ततश्च पार्व्वणांशे पार्व्वणेन एकोद्दिष्टांशे एकोद्दिष्टेन श्रेयं अङ्गजातं तुल्यम्। एकोद्दिष्टमिति एकोद्दिष्टं तदर्म्मताद्दित्वात् सपिण्डीकरणञ्चेत्युभयपरम्। एतत् सपिण्डीकरणमेकोद्दिष्टं स्त्रिया अपि। इति याज्ञवल्क्यवचनैकवाक्यत्वात्। तेन आद्येषु मध्ये एतच्छ्राद्धद्वयं स्त्रियाः कर्त्तव्यं न त्वाभ्युदयिकश्राद्धादि। अत्र वा कर्त्तरि क्त्वे इति कर्त्तरि षष्ठीति कर्त्तृत्वनियमः। वृद्धिश्राद्धादौ स्त्रीणां भोजनदर्शनान्न भोक्तृत्वनियमः॥ * ॥

पितरि पूर्व्व मृते तदूर्ध्वमन्तरे पितामहे प्रपितामहे च मृते यथा कर्त्तव्यं तथाह छन्दोगपरिशिष्टे कात्यायनः।

"पितुः सपिण्डतां कृत्वा कुर्य्यात्मासानुमासिकम्।
असंस्कृतौ न संस्कार्य्यौ पूर्व्वौ पौत्रप्रपौत्रकैः।
पितरं तत्र संस्कुर्य्यादिति कात्यायनोऽब्रवीत्॥
पापिष्ठमपि पुत्रेण पुत्रं पापकृतापि वा।
पितामहेन पितरं संस्कुर्य्यादिति निश्चयः॥"

पितुः सपिण्डतां कृत्वा प्रेतीभूतयोरपि पितामहप्रपितामहयोः मतोः प्रतिमासविहितं पार्व्वणं पिण्डहृप्रपितामहातिहृप्रपितामहानां कर्त्तव्यं न तु तयोः सपिण्डीकरणार्थेच्छा कार्य्या॥ * ॥ ननु सपिण्डनेनासंस्कृताभ्यां पितामहप्रपितामहाभ्यां सह पितुः कथं सपिण्डनाख्यसंस्कारस्तस्मात् तदर्थं तयोः सपिण्डीकरणमपकर्षणीयं पितुरेव वा सपिण्डनसूतकवर्ज्यमीयमित्यत आह असंस्कृताविति। उत्कर्षापकर्षौ न कार्य्यावित्यनेन वचनेनोक्तम्। कथमसंस्कृतेन सह संस्कार इत्यत्र आह पापिष्ठमपीति। पापिष्ठमकृतसपिण्डीकरणं पुत्रेण कृतसपिण्डीकरणेन पितामहेन पापकृता वा

अप्रतसपिण्डीकरणेनापि शुद्धं कुर्य्यादिति याज्ञवल्क्यनिश्चयः। अतो वचनबलाद्दोषः इति तात्पर्य्यम्। अत्र तु प्रेतीभूतपितामहेन पितुः सपिण्डने पितामहस्यैकोद्दिष्टमेव।

"असपिण्डीकृतं प्रेतमेकोद्दिष्टेन तर्पयेत्॥"

इति प्रागुक्तजाबालवचनात्। एवमन्यत्रापि बोध्यम्। वृद्धप्रपितामहस्य प्रेतत्वे तेन सह न कार्य्यमिति तात्पर्य्यम्॥*॥ अत्र मातुः सपिण्डने श्वशुरार्य्यश्वश्वोः पिण्डौ कुर्य्यैराद्यौ। तथा च गार्ग्यः।

"पतिनैकेन कर्त्तव्यं सपिण्डीकरणं स्त्रियाः।
सा गता हि मृतैकत्वं कुर्य्यैरन्तरयन् पितॄन्॥
श्वशुरस्यान्वयो यस्माच्छिरःप्रक्षादनक्रिया।
पुत्रैर्दौहित्रकैः सा कार्य्या मातुरभ्युदयार्थिभिः॥"

अन्तरयन्नित्यर्थे अन्तरयन्निति लिङ्व्यत्ययेन पुंस्त्वमिति कृष्णयजुषः। परवचनं गोभिलसूत्रभाष्यधृतानपि लिखितम्। अतश्च प्रव्रजिते पतिते वा पितरि मृते न पितामहादिभिर्मातुः सपिण्डीकरणं किन्तु पितामहादिभिरेव।

"स्वेन भर्त्रा सहैवास्याः सपिण्डीकरणं स्त्रियाः।
एकत्वं सा गता यस्माच्चतुर्मन्त्रादुदीरितात्॥
तस्मिन् सति सुताः कुर्य्युः पितामह्या सहैव तु॥"

इत्यत्र तस्मिन् सतीति आह्वानार्हभर्तृरूपलक्षणम्। अतएव।

"तस्यामेव तु जीवन्त्यां तस्याः श्वश्रूरिति निश्चयः।"

इति लघुहारीतेन श्वश्रूजीवने तस्याः श्वश्रूलुक्तं न तु श्वशुरेणेतिकश्चिदप्युक्तम्॥*॥ एवं पितामह्यादिभिर्मातुः सपिण्डीकरणेऽपि सामगेन ये चात्र त्वामनु यांश्च त्वमनु तस्मै ते स्वधा इति मन्त्रो न पाठ्यः मन्त्रलिङ्गविरोधात्। अतएव आभ्युदयिके माटपक्षे श्रीदत्तादिभिर्मन्त्रान्तरं लिखितं न तु ये यात्र त्वामिति। वस्तुतस्तु आभ्युदयिके छन्दोगानां माटपक्ष एव नास्तीति वक्ष्यते। एवञ्च।

"अर्घार्थं पितृपात्रेषु प्रेतपात्रं प्रसिच्यते।
ये समाना इति द्वाभ्यां श्रेयं पूर्ववदाचरेत्॥"

एतत् सपिण्डीकरणमेकोद्दिष्टं स्त्रिया अपि। इति याज्ञवल्क्येन पार्व्वणैकोद्दिष्टविकृतीभूतपुंसपिण्डनातिदेशात् तद्विकृतीभूतस्त्रीसपिण्डनेऽपि ये समाना इति मन्त्रद्वयस्य पार्व्वणोक्तस्य ये चात्र त्वामिति मन्त्रस्य च लिङ्गार्थासमवेतत्वेऽपि प्रकृत्यर्थस्य समवेतार्थत्वात् पाठः।

"ततश्च मातामहानामप्येवं श्राद्धं कुर्य्याद्विचक्षणः।
मन्त्रोहेन यथान्यायं श्रेयांसो मन्त्रवर्ज्जितम्॥"

इत्यनेन यच्छेयांसो मन्त्रवर्ज्जनमित्युक्तं तत् शुन्धन्तां पितरः शुन्धन्तां पितामहाः इत्यादि प्रकृत्युच्चयोच्चमन्त्रवर्ज्जनपरमिति प्रागुक्तम्। मार्कण्डेयपुराणम्।

"सर्व्वाभावे स्त्रियः कुर्युः स्वभर्तृणाममन्त्रकम्।
तदभावे च तत्पतिः कारयेत् स्वकुटुम्बतः॥
स्त्रीणामप्येवमेवैतदेकोद्दिष्टमुदाहृतम्।
मृताहनि यथान्यायं नृणां यद्दिष्टमीरितम्॥"

स्त्रियोऽपि असवर्णोढ़ा अपरिणीता वेति श्राद्धविवेकः। सवर्णोढ़ायाः पुत्रपौत्रप्रपौत्राभाव एव विधानात्। तथा शङ्खः।

"पितुः पुत्रेण कर्त्तव्या पिण्डदानोदकक्रिया।
तदभावे तु पत्नी स्यात्तदभावे सहोदरः॥"

स्त्रीणामिति तु सम्पूदानपरम्। स्त्रीकर्त्तृकत्वस्य पूर्व्वार्द्ध एवोक्तत्वात्। एकमेवामन्त्रकमित्यर्थः। इति श्राद्धविवेकः॥ अत्र स्त्रिय इत्यस्यासवर्णोढ़ा अपरिणीतापरत्वव्याख्यानात् स्त्रीणां मन्त्रनिषेधोऽपि तत्सम्पूदानकश्राद्ध एवावगम्यते। न तु स्त्रीसम्पूदानकमात्रे। कल्पतरौ तु स्त्रीणामप्येवमिति याज्ञपूर्व्वेण सम्बन्धेन पितृत्वादिना पुरुषाणामेकादशाहादिश्राद्धं ताक्षपूर्व्वेण सम्बन्धेनैव स्त्रीणामेतत् कर्त्तव्यमिति। एतद्व्याख्याने स्त्रीसम्पूदानकश्राद्धे सुतरां मन्त्राः पाठ्याः। याज्ञवल्क्योक्तापि समन्त्रकमेकोद्दिष्टं सपिण्डीकरणशेषोक्ता एतत् सपिण्डीकरणमेकोद्दिष्टं स्त्रिया अपीत्यनेन स्त्रिया अपि तथैवोक्तम्।

"मातुः सपिण्डीकरणं पितामह्या सहादितम्।
यथोक्तेनैव कल्पेन पुत्रिकाया न चेत् सुतः॥"

इति छन्दोगपरिशिष्टेनापि यथोक्तेनैव कल्पेन इत्यनेन मन्त्रादिकसर्व्वमतिदिष्टं व्यवहारोऽपि तथेति। अमन्त्रकं स्त्रीकर्त्तृकमन्त्रपाठरहितम्। अमन्त्रा हि स्त्रियो मताः। इति बौधायनेन समान्यतोऽभिधानात्। न तु ब्राह्मणकर्त्तृकमन्त्रपाठरहितम्। तथा च वराहपुराणम्।

"अयमेव विधिः प्रोक्तः शूद्राणां मन्त्रवर्ज्जितः।
अमन्त्रस्तु तु शूद्रस्य विप्रो मन्त्रेण गृह्यते॥"

अत्रामन्त्रकमिति विशेषणस्य यावद्मन्त्रशाब्दार्थत्वेन पदिभाषारूपत्वान्न प्रेतश्राद्धमात्रविषयः। न वा शूद्रकर्त्तृकश्राद्धमात्रविषयः। किन्तु स्त्रीकर्त्तृकश्राद्धसामान्यस्य विषयः। उक्तं ब्राह्मे।

"स्त्रीभिश्चावरवर्णैश्च श्राद्धं विप्रानुशासनात्।
मन्त्रवद्विधिपूर्व्वन्तु वह्निपाकविवर्ज्जितम्॥"

विप्रानुशासनात् विप्रपाठनात्। मन्त्रवन्मन्त्रयुक्तम्। वह्निपाकविवर्ज्जितमित्यसवर्णस्त्रीकर्त्तृकश्राद्धपरम्। पतिकर्त्तृकश्राद्धेऽपि पत्न्याः पाकाधिकारदर्शनात्। तथा च छन्दोगपरिशिष्टम्।

श्राकस्य कालगुणाश्च्यां स्वयं पत्न्यथवा पचेत्।

पत्नीत्वञ्च सवर्णोढ़ायाः। ज्येष्ठा पत्नीति वचनात्। ज्येष्ठामाह मनुः।

"यदि स्याद्य परायैव विन्देरन् द्वीजितो द्विजाः।
तासां वर्णक्रमेणैव ज्येष्ठां पूजां च वेद्म च॥"

कुबेरीपाध्यायधृतम्।

"असंस्कृतप्रमीतानां पिता न श्राद्धमाचरेत्।
यदि स्नेहेन कुर्व्वीत सपिण्डीकरणं विना॥"

असंस्कृतप्रमीतानाम् अनुपनीतव्रतानाम्। लघुहारीतः।

"पुत्रेणैव तु कर्त्तव्यं सपिण्डीकरणं स्त्रियाः।
पुरुषस्य पुनस्तत्र भ्रातृपुत्रादयोऽपि ये॥"

आदिशब्दश्राद्धानाह च एव।

"भ्राता वा भ्रातृपुत्रो वा सपिण्डः शिष्य एव वा।
सह पिण्डक्रियां कृत्वा कुर्य्यादभ्युदयं ततः॥"

भ्राता वा इति वाशब्दात् भ्रात्रपेक्षया प्रधानत्वेन पूर्व्वाधिकारिणां दौहित्रान्तानां समुच्चयः। अतएव सपिण्डत्वेनैव भ्रातृतत्पुत्रयोरधिकारसिद्धौ एवशब्दादानं प्राधान्यज्ञापनार्थम्॥*॥

"महागुरौ प्रेतीभूते दहिकर्म्म न युज्यते॥"

इति शूलपाणिलिखितवचनेन।

"प्रमीतौ पितरौ यस्य देहस्तस्याशुचिर्भवेत्।
नापि देवं न वा पैत्र्यं यावत् पूर्णं न वत्सरः॥"

इति देवीपुराणवचनेन च प्रेतीभूतमातापितृकस्य पितुः प्रेतीभूतमातापितृकस्य संस्कार्य्यस्य प्रेतीभूतमातापितृकायाः अनूढ़ायाः कन्यायाश्च वैदिककर्म्मकर्त्तृत्वकर्म्मत्वानर्हत्वेन तत्परीहाराय यदृच्छया दहिरापद्येत इत्यनेन पूर्व्वदिने सपिण्डनं कृत्वा पित्रादिः परदिने अभ्युदयं नामकरणादिकं कुर्य्यात्। ऊढ़ायास्तु पतिरेको गुरुः स्त्रीणाम्। इति वचनोक्तैकपदेन पत्युरेव महागुरुत्वाभिधानात् ततप्रेतत्वमात्रे तस्याः कर्म्मानधिकारः। एवञ्च पितृमात्रोर्म्महागुरुत्वव्यावर्त्तनयोर्म्मरणे ऊढ़ाया न कर्म्मानधिकारः। अत्राभ्युदयसपिण्डनयोरानन्तर्य्यमात्रं क्त्वाप्रत्ययार्थः न त्वेककर्त्तृकत्वमपि। अन्यथा सपिण्डनाधिकारिण्याः पत्न्याः पक्षे अभ्युदयाधिकारिणो भ्रातुः सपिण्डनाधिकारायोगेः। यथा,—

"नानिष्ट्वा तु पितॄन् श्राद्धैः कर्म्म वैदिकमारभेत्॥"

इति श्रातातपवचने पितृकर्त्तृकदहिश्राद्धानन्तरमेव पुत्रेण विवाहः क्रियते। न तु पुत्रेण श्राद्धान्तरं क्रियते॥*॥ अत्र पुरुषस्य पुनस्तत्र इत्यनेन पुत्रवत् शिष्यान्तस्य सपिण्डने सामान्यतोऽधिकारप्रतिपादनात् अभ्युदयं विनापि पुरुषस्य सपिण्डनं प्रतीयते।

"सह पिण्डक्रियां कृत्वा कुर्य्यादभ्युदयं ततः।"

इति तु सपिण्डीकरणात् पूर्व्वमभ्युदयाभावार्थं न त्वभ्युदयस्तत्र एव सपिण्डीकरणार्थमिति॥*॥

यत्तु।


"यानि पञ्चदशाद्यानि अपुत्रस्येतराण्यपि।
एकस्यैव तु दातव्यमपुत्रायाश्च योषितः॥"

इति छन्दोगपरिशिष्टीयं सपिण्डीकरणेतरपञ्चदशश्राद्धविधायकं तच्छिष्यपर्य्यन्ताभावे पुरुषस्य बोध्यम्। इतराणि एकोद्दिष्टविधानेनैव यानि प्राप्तानि प्रत्याब्दिकश्राद्धानि तान्येव दातव्यं दातव्यानि इत्यर्थः। अपुत्रायाश्चेति चकारोऽनुक्तसमुच्चायकः पतिरहितायां इति वसुचिनोति।

'अपुत्रायां मृतायान्तु पतिः कुर्य्यात् सपिण्डनाम्।

इति पैठीनसिवचनेकवाक्यत्वात्। अत्र छन्दोगपरिशिष्टे अपुत्रायाः षष्ठश्राद्धविधानात्।
"सपिण्डीकरणं तासां पुत्राभावे न विद्यते।"
इति मार्कण्डेयपुराणाच्च बालकपुत्रसत्त्वे सपिण्डीकरणं अन्येनापि कर्त्तव्यमिति प्रतीयते। एवं पतिः पूर्य्यादित्यत्रापि पतिसत्त्वमात्रं विवक्षितम्। तेन ऊढ़या दुहित्रा सपिण्डनं कार्य्यम्॥*॥
अत्र।
"सर्व्वासामेकपत्नीनामेका चेत् पुत्रिणी भवेत्।
सर्व्वास्तास्तेन पुत्रेण प्राह पुत्रवतीर्मनुः॥"
इति मनुवचने सपत्नीपुत्रस्य पुत्रत्वातिदेशात् तत्सत्त्वेऽपि स्त्रीणां सपिण्डनं मैथिलैरुक्तम्। तन्न। प्रागुक्तलघुहारीतवचने पुत्रेणैवेत्येवकारेणातिदिष्टपुत्रनिषेधात्। अतएव तदुत्तरार्द्धे भ्रातृपुत्रोपादानं सङ्गच्छते। अन्यथा भ्रातृपुत्रसत्त्वे।
"यद्येकजाता बहवो भ्रातरश्च सहोदराः।
एकस्यापि सुते जाते सर्व्वे ते पुत्रिणो मताः॥"
इति बृहस्पतिवचनेन पुत्रत्वातिदेशात् भ्रातृपुत्रस्य पितृश्राद्धाधिकारे प्राप्ते भ्रातृपुत्रोपादानं व्यर्थं स्यात्। पुत्रातिदेशफलन्तु तत्सत्त्वे पुत्रान्तराकरणं पुत्रामनरकत्राणञ्च॥*॥ लघुहारीतः।
"सपिण्डीकरणान्तानि यानि श्राद्धानि षोड़श।
पृथङ्नैव सुताः कुर्य्युः पृथग्व्रत्या अपि क्वचित्॥
प्रेतसंस्कारकर्म्माणि यानि श्राद्धानि षोड़श।
यथाकालन्तु कार्य्याणि नान्यथा सुखते ततः॥"
पृथग्व्रत्या अपि विभक्तधना अपि पृथक् न कुर्य्युः सुतरामपृथग्धनाः पृथक् न कुर्य्युः किन्तु पृथक् कुर्य्युः। अत्र विशेषयति मरीचिः।
"मृते पितरि पुत्रेण क्रिया कार्य्या विधानतः।
बहवः सुर्यदा पुत्राः पितुरेकत्रवासिनः॥
सर्व्वेषान्तु मतं कृत्वा ज्येष्ठेनैव तु यत् कृतम्।
द्रव्येण चाविभक्तेन सर्व्वैरेव कृतं भवेत्॥"
पुत्रेणेत्यविशेषात् सर्व्वेषामधिकारे प्राप्ते ज्येष्ठस्य भाक्तात् कर्त्तव्यतामाह बहव इति। ज्येष्ठेनापि सर्व्वेषां भ्रातॄणां मत्करणेनैव करणं भवतु इति मतं ज्ञानं कृत्वाविभक्तत्वेन द्रव्यसंश्लेषेण च कृतं कर्म्म सर्व्वैरेव कृतमेव भवेत्। तदानीं द्रव्यासंश्लेषे च तस्मात् द्रव्यं प्राप्तव्यमिति कृत्वा कर्त्तव्यम्। यदि तेन तन्न परिगृह्यते तदा च ऋणी भवति प्रत्यवायी च भवति। न तु तेन श्राद्धान्तरं कर्त्तव्यमिति श्राद्धविवेकोक्तं युक्तम्। पृथङ्नैव सुताः कुर्य्युरित्यनेन पृथक्करणस्य पर्य्युदस्तत्वेनानधिकारात्। यथाकालमिति अपीच्चाब्दादिनीचादिनद्वादशमासषट्कतन्निष्पेकाद्यूनषण्मासाहितयसंवत्सरेषु। न च विधानसामर्थ्यादेव तत्तत्कालप्राप्तेरनर्थकमिदमिति वाच्यम्। तत्तत्कालानां द्वादशाद्याद्यपेक्षया प्राधान्यबोधनार्थत्वात्॥*॥ अत्र।
"आनन्त्यात् कृत्यधर्म्माणां पुंसाञ्चैवायुषः
क्षयात्।
अस्थितेश्च शरीरस्य द्वादशाहः प्रशस्यते॥"
इति याज्ञवल्क्योक्तप्रशस्यत इत्यनेन कुलाचारज्योतिःशास्त्रादिज्ञातभटितिमरणराष्ट्रोपप्लवादिस्मृत्युक्तदेशादिगमनानुसारादेव सपिण्डीकरणापकर्षे द्वादशाद्यापेक्षया प्रागुक्तनवभमासादिगौणकालपरिग्रहः। अथवा यथाकालमित्यादेर्दर्शदर्व्वा वृद्धिरापद्येत इत्यनेनावश्यकनामकरणादिवृद्ध्यर्थमेवापकर्षो न त्वनावश्यक इष्टापूर्त्ताद्यर्थापकर्षः कार्य्य इति तात्पर्य्यम्। अतएव लघुहारीतेन। तथैव कार्य्यं यत् कर्म्म वत्सरात् प्रथमाद्भते इत्यनेन कार्य्यस्यापकर्षनिमित्तता नास्तीत्युक्तम्। यदि त्वावश्यकवृद्धिनिमित्तेनापकर्षः कृतस्तदा इष्टापूर्त्तादिकार्य्यं वत्सराभ्यन्तरेऽपि कर्त्तव्यमिति। आह्निकविवेकोऽप्येवम्। यद्यपि गोभिलसूत्रादौ सपिण्डीकरणस्यैवापकर्षः प्रागुक्तस्तथापि सपिण्डीकरणापकर्षे तत्पूर्व्वकर्त्तव्यश्राद्धानामपि तदादिनदन्तन्यायादपकर्षः।
"सपिण्डीकरणान्ता तु प्रेया प्रेतक्रिया बुधैः।"
इति शातातपवचने प्रेतक्रियायाः सपिण्डीकरणान्तत्वं प्रतीयते॥*॥ अत्र वृद्धिनिमित्तं विना सपिण्डनापकर्षे कृते पूर्णसंवत्सरकालं प्राप्य प्रेतत्वपरीहारमाह विष्णुधर्म्मोत्तरम्।
"कृते सपिण्डीकरणे नरः संवत्सरात् परम्।
प्रेतदेहं परित्यज्य भोगदेहं प्रपद्यते॥"
वृद्धिनिमित्तकसपिण्डीकरणापकर्षे कृते तत्क्षणादेव प्रेतत्वपरीहारः। तदर्थ एवापकर्षात्। एवञ्चान्यनिमित्तकापकर्षे वृद्धिकालं प्राप्य प्रेतत्वपरीहारः। तत्कालस्य पूर्णसंवत्सरकालतुल्यत्वात्।
"अर्व्वाक् संवत्सराद्वृद्धौ पूर्णे संवत्सरेऽपि वा।
ये सपिण्डीकृताः प्रेता न तेषान्तु पृथक्क्रिया॥"
इति शातातपवचनात्। इति आह्निकतत्त्वम्॥
सपीतकः, पुं, राजकोशातकी। इति राजनिर्घण्टः॥
सपीतिः, स्त्री, (पा पाने+क्तिन्। "घुमास्थागेति।"६।४।६६। इति ईत्वम्। सह एकत्र पीतिः पानम्। सहस्य सः।) आत्मीयजनसहमिलितैककालपानम्। तत्पर्य्यायः। तुल्यपानम् २। इत्यमरः॥ सहपीतिः ३। इति शब्दरत्नावली॥ (यथा, वाजसनेयसंहितायाम्। १८। ६।
"सन्धिश्च मे सपीतिश्च मे क्षत्रं च मे * * *
यज्ञेन कल्पन्ताम्॥")
सपीतिका, स्त्री, कृष्णधोषा। इति राजनिर्घण्टः॥
सप्त, [न्] त्रि, (सप समवाये+कनिन्। तुट् च। इत्युज्ज्वलः। १। १५६।) संख्याविशेषः। सात इति भाषा। बहुवचनान्तोऽयम्। तदाचकानि यथा। पातालम् १ भुवनम् २ मुनिः ३ द्वीपः ४ तुरंगाश्वः ५ वारः ६ समुद्रः ७ स्वरः ८ राज्याङ्गम् ९ ग्रहः १० वह्निशिखा ११ पर्व्वतः १२। इति कविकल्पलता॥ सप्तसंख्याविशिष्टः। यथा,
"सप्त सप्त विलिखेत् प्ररेखिका-
स्तिर्य्यगूर्द्धमथ क्षत्तिकादिकम्।
लेखवेदभिजिता समन्वितं
पैकरेखगखगेन विध्यते॥"
इति ज्योतिस्तत्त्वे दीपिका॥
अपि च।
"क्रमात् स्वराणां सप्तानामारोहश्चावरोहणम्।
मूर्च्छनेत्युच्यते ग्रामत्रये ताः सप्त सप्त च॥"
इति संगीतदर्पणम्॥
सप्तकः, त्रि, (सप्तन्+कन्।) सप्तानां पूरणः। यथा,—
"योटके सप्तके मेघतुले युग्मद्वयौ तथा।
सिंहघटौ सदा वर्य्यौ रटितं तत्राम्बोच्छिवः।"
इति ज्योतिस्तत्त्वम्॥
सप्तसंख्यावशिष्टः। यथा,—
"यच्च जाम्ब दरिद्रा च चकाश्च प्लाक्षिरेव च।
दीर्घी वेवी च विज्ञेयो यच्चादिः सप्तको गणः।"
इति सुग्धबोधटीकायां दुर्गादासः॥
सप्तसंख्या। सप्त एव सप्तकः स्वार्थे कप्रत्ययः॥
सप्तकी, स्त्री, (सप्तभिः स्वरैरिव कायति शब्दायते इति। कै+कः। गौरादित्वात् ङीष्।) काष्ठी। इत्यमरः॥
सप्तगोदावरं, क्ली, सप्तानां गोदावरीणां समाहारः। इति सुग्धबोधव्याकरणम्॥ (यथा, महाभारते। ३। ८५। ४४
"सप्तगोदावरे स्नात्वा नियतो नियताशनः।
महत् पुण्यमवाप्नोति देवलोकञ्च गच्छति॥")
सप्तच्छदः, पुं, (सप्त सप्त छदा यस्य।) वृक्षविशेषः। छातिम इति भाषा॥ (यथा, रघुः। ५। ४८।
"सप्तच्छदक्षीरकटुप्रवाह-
मसह्यमाघ्राय मदं तदीयम्।
विलङ्घिताधोरणतीव्रयत्नाः
सेनागजेन्द्रा विमुखा बभूवुः॥")
तत्पर्य्यायः। गुच्छपुष्पः २ युग्मपर्णः ३ मणिच्छदः ४ वृक्षत्वक् ५ बहुपर्णः ६ शालालिपत्रकः ७ मदगन्धः ८ गन्धिपर्णः ९। अस्य गुणाः। तिक्तत्वम्। उष्णत्वम्। त्रिदोषघ्नत्वम्। दीपनत्वम्। मदगन्धित्वम्। व्रणरक्तामयकृमिनाशित्वञ्च। इति राजनिर्घण्टः॥ अन्यत् सप्तपर्णशब्दे द्रष्टव्यम्॥
सप्तजिह्वः, पुं, (सप्त जिह्वा काल्यादयो आहुतिग्रसनार्था यस्य।) अग्निः। इति त्रिकाण्डशेषः॥ (यथा, वृहत्संहितायाम्। ७४। १६।
"सुकृतव्रतयाज्ञका गताश्च
अवगूह्य प्रविशन्ति सप्तजिह्वम्॥")
तस्य सप्तजिह्वानां नामानि यथा,—
"काली कराली च मनोजवा च
सुलोहिता चैव सुधूम्रवर्णा।
उग्रा प्रदीप्ता च सुपौटयोनेः
सप्तैव कीलाः कथिताश्च जिह्वाः॥"
टीकासर्व्वस्वे तु उग्राप्रदीप्तयोः स्थाने स्फुलिङ्गिनी विश्वरुचीति नामद्वयम्। इत्यमर-

तच्चक्ररूपं यथा।



सप्तनामा, स्त्री, (सप्त नामानि यस्याः। "ङाबुभाभ्यामन्यतरस्याम्।"४।१।१५। इति ङाप्।) आदित्यभक्ता। इति राजनिर्घण्टः॥

सप्तपः, पुं, (सप्त सप्त पत्राणि यस्य।) सुन्दरवृक्षः। इति राजनिर्घण्टः॥

सप्तपदी, स्त्री, सप्तानां पदानां समाहारः। ("द्विगोः।" ४।१।२१। इति ङीप्।) इति व्याकरणम्॥ विवाहाङ्गसप्तपदीगमनं यथा। ततो जामाता प्राग्उदीचीं गत्वा वधूं सप्तभिर्मन्त्रैः सप्तमण्डलिकासु सप्तपदानि नयेत्। वधूश्च दक्षिणपादं नीत्वा पश्चात्सप्तपदं मण्डलिकां नयेत् जामाता च वधूं ब्रूयात्। वामेन पादेन दक्षिणं पादमाक्रामयेति। सप्तानां मन्त्राणामृष्यादयः साधारणाः। प्रजापतिर्ऋषिरेकपाद्विराट् छन्दो विष्णुर्देवता पादाक्रमणे विनियोगः। ॐ एकमिषे विष्णुस्त्वा नयतु। द्वे ऊर्जे विष्णुस्त्वा नयतु। त्रीणि व्रताय विष्णुस्त्वा नयतु। चत्वारि मायोभवाय विष्णुस्त्वा नयतु। पञ्च पशुभ्यो विष्णुस्त्वा नयतु। षडृतुभ्यो विष्णुस्त्वा नयतु। सप्तसप्तभ्यो होत्राभ्यो विष्णुस्त्वा नयतु॥ ततः सप्तमं पदं गतां वधूं पतिराशास्ते। प्रजापतिर्ऋषिर्भुग्मात्रीपंक्तिश्छन्दः कन्या देवता पादाक्रमणानन्तरमाशासने विनियोगः। सखा सप्तपदी भव सख्यन्ते गमेयं सख्यन्ते मा योषा सख्यन्ते मायोष्ठाः। इति सप्तपदीगमनम्। इति भवदेवभट्टः॥

सप्तपर्णः, पुं, (सप्तानां दलादीनां पर्णमिव यत्र।) सिद्धान्तविशेषः। यथा,—

"दलाद्यैर्हिमयुक्तैरुत्थितान्नं मधूत्करम्।
सप्तपर्णं समभ्यर्च्य सप्तपर्णमुदाहृतम्॥"

इति शब्दचन्द्रिका॥

सप्तपर्णः, पुं, (सप्त सप्त पर्णानि यस्य।) वृक्षविशेषः। छातिम इति भाषा॥ (यथा, रघुः। १।३६।

"यमैः सप्तपर्णानां मदगन्धिभिराहताः।
अध्वगश्रमनिद्राणां सप्तपेष्वसुमुषः॥")

सप्तपर्णकः। विशालत्वक् २ शारदी ३ विषमच्छदः ४। दलच्छदः ५ शारदः ६ देवरुचः ७ शकुनिप्रियः ८ शिरीषकः ९ मदनाग्रयः १० सुनिषण्णः ११ मदनागरः १२। इति शब्दरत्नावली॥ शुक्लपुष्पः १३ शुक्तिपर्णः १४ सुपर्णकः १५। इति जटाधरः॥ वृहत्त्वक् १६। इति रत्नमाला॥ अस्य गुणाः।

"सप्तपर्णो व्रणश्लेष्मवातकुष्ठास्रजन्तुजित्।
दीपनः श्यामगुल्मघ्नः स्निग्धोष्णस्तुवरः स्मृतः॥"

अन्यत्र सप्तच्छदशब्दे द्रष्टव्यम्॥

सप्तपर्णी, स्त्री, (सप्त सप्त पर्णान्यस्याः। ङीप्।) लज्जालुलता। इति रत्नमालाराजनिर्घण्टौ॥

सप्तपातालं, क्ली, (सप्तानां पातालानां समाहारः।) सप्तसंख्यकाधोभुवनम्। यथा,—

"आदित्यरश्मितो देवो सप्तरूपी जनार्दनः।
निःसृत्य प्रथमं यातः पातालतलमन्ततः॥
सप्तपातालसंस्थांस्तु नागगन्धर्वराक्षसान्।
देवासुरर्षींश्च प्रेषांश्च जघान वरशूलधृक्॥"

इति कालिकापुराणे २४ अध्यायः॥

तन्नामानि यथाह भरतः।

"अतलं वितलञ्चैव नितलञ्च गभस्तिमत्।
महाख्यं सुतलाख्यं पातालं सप्तमं विदुः॥"

सप्तपुत्रकः, स्त्री (सप्त पुत्रान् स्वते इति। स्व+क्विप्।) सप्तपुत्रप्रसूता। तत्पर्य्यायः। सुतवस्करा २। इति त्रिकाण्डशेषः॥

सप्तभद्रः, पुं, (सप्तसु स्थानेषु भद्रमस्य।) शिरीषवृक्षः। इति शब्दचन्द्रिका॥

सप्तमः, त्रि, (सप्तन्+"तस्य पूरणे डट्।" ५।२।४८। इति डट्। "नान्तादसंख्यादेर्मट्।" ५।२।४९। इति मट्। डित्वाङ्गम्।) सप्तानां पूरणः। सातवाँ इत्यादि भाषा। यथा,—

"लेपभागश्चतुर्थांशः पिचाव्याः पिण्डभागिनः।
पिण्डः सप्तमलेपांशः सप्तमांशयमः॥"

इति श्रुतितत्त्वम्॥

सप्तमी, स्त्री, (सप्तम+टित्वात् ङीप्।) तिथिविशेषः। अस्यां सप्तमकलाक्रिया। तत्र शुक्लपक्षे अस्तपूर्व्वदिनविद्धसप्तमकलाक्रिया। कृष्णपक्षे तु अस्तदूरानुकूलसप्तमकलाक्रियेति विशेषः। पञ्जिकायां तस्या अङ्गः शुक्लपक्षे ७ कृष्णपक्षे २२। ॰। तत्र जातफलम्।

"कन्याप्रजो वैरिकुलेभसिंहो
विप्रानुरक्तः प्रविभक्तभावः।
देवद्विजार्चारतिको माहात्मा
स्यात् सप्तमीजः पितृवित्तहर्त्ता॥"

इति कोष्ठीप्रदीपः॥ ॰॥

अथ सप्तमी। सा च षष्ठीयुता ग्राह्या युग्मात्। पैठीनसिवचनाच्च। यथा,—

"पञ्चमी सप्तमी चैव दशमी च त्रयोदशी।
प्रतिपन्नवमी चैव कन्यया सांमुखी तिथिः॥"

सांमुख्यमुक्तं स्कान्दे।

"सांमुखं नाम सायाह्नव्यापिनी दृश्यते यदा।"

अतएव परदिने त्रिमुहूर्त्तकालाव्यापित्वे षष्ठीयुक्तसप्तम्यामुपवासमाह भविष्यपुराणम्।

"षष्ठीमेतां कृत्तिका सप्तमी नाष्टमीयुता।
यतस्तोपासनायेह षष्ठ्यामाहुरुपोषणम्॥"

यथा उपोषणे तत्रा कर्म्मान्तरे। तथा।

"षष्ठ्या युता सप्तमी च कर्त्तव्या सर्व्वदा तिथिः।
षष्ठी च सप्तमी यत्र तत्र सन्निहितो हरिः॥"

इति स्कन्दपुराणात्॥ तथा।

"शुक्लपक्षस्य सप्तम्यां सूर्य्यवारो यदा भवेत्।
सप्तमी विजया नाम तत्र दत्तं महाफलम्॥"

भविष्ये।

"प्रालेयचूलप्रस्थस्थं कृत्वादावं सुसंस्कृतम्।
सूर्य्याय चरुकं दत्त्वा सप्तम्याञ्च विशेषतः॥
यावन्तस्तण्डुलास्तस्मिंश्चरौ परिसंख्यया।
तावद्वर्षसहस्राणि सूर्य्यलोके महीयते॥"

गोपथब्राह्मणम्।

"द्वाविंशत्युत्पलिकं प्रस्थमुक्तं स्वयमथर्व्वणा॥"

ज्योतिषे।

"पलन्तु लौकिकैर्मानैः साष्टरत्तिद्विमाषकम्।
तोलकत्रितयं ज्ञेयं ज्योतिर्ज्ञैः स्तुतिसम्मतम्॥"


तेन चतूरत्तिकाधिकमाषषष्टिकाधिकषड्धिकशततोलकमिताः प्रस्थतण्डुलाः। इति। एवञ्चैतन्यूनाधिकयोः फलतारतम्यं बोध्यम्। एवं देवतान्तरेऽपि तत्तल्लोकमुचितत्वफलेन कल्पयितुं युक्तम्। अतएव शिवरहस्ये यक्ष्यते॥ ॰॥

वराहपुराणे।

"अथापरं महाराज व्रतमारोग्यसंज्ञितम्।
कथयामि परं पुण्यं सर्व्वपापप्रणाशनम्॥
तस्यैव माघमासस्य सप्तम्यां समुपोषितः।
पूजयेद्भास्करं देवं विष्णुरूपं सनातनम्॥
आदित्य भास्कर रवे भानो सूर्य्य दिवाकर।
प्रभाकरेति संपूज्यो देवः सर्व्वेश्वरो रविः॥
षष्ठ्याञ्चैकभक्ताहारः सप्तम्यां समुपोषितः।
अष्टम्यामेव भुञ्जीत एष एव विधिः स्मृतः॥
अनेन वत्सरं पूर्णं विधिना योऽर्चयेद्रविम्।

तस्मै लोकाय लोकस्य माकरी हन्तु सप्तमी ॥"
इत्युचार्य स्नायादिति मेधः। लोकं छिद्रम्। तिथिछलस्य पौर्णमास्यन्तमासाङ्गत्वात्सा करोतीति पदं मकरार्कारूढचान्द्रमासीयतिथिपरम्।
"तिथिछले च कृष्णादि व्रते शुक्लादिमेव च।
विवाहादौ च सौरादि मासं छले विनिर्दिशेत् ॥"
इति ब्रह्मपुराणात् ॥
मन्वन्तरादित्वेन तथा युक्तत्वाच्च। यथा, मत्स्यपुराणे।
"यस्मान्मन्वन्तरादौ तु रथमापुर्दिवाकराः।
माघमासस्य सप्तम्यां तस्मात् सा रथसप्तमी।
अरुणोदयवेलायां तस्यां स्नानं महाफलम् ॥"
अतएव नारसिंहे रथाख्यायामित्युक्तम्। यथा,
"महानवम्यां द्वादश्यां भरण्यामपि चैव हि।
तथाचयष्टतीयायां शिष्यान्नाधापयेद्बुधः।
माघमासे तु सप्तम्यां रथाख्यायान्तु वर्ज्जयेत्॥"
द्वादश्यां श्रयनोत्थानद्वादश्याम्। भरण्यां भक्तच्छवप्रतभरण्याम्। इति कल्पतरुः। अत्र महानवम्यादिसाहचर्य्यादुगौणचान्द्रत्वं प्रतीयते। अतएव चतुर्दश्यमन्वन्तरादिगणने क्वापि न राध्युक्तेः। यथा, भविष्यमात्स्ययोः।
"अश्वयुक्शुक्लनवमी द्वादशी कार्त्तिकी तथा।
तृतीया चैत्रमासस्य तथा भाद्रपदस्य च ॥
फाल्गुनस्याप्यमावास्या पौषस्यैकादशी तथा।
आषाढ़स्यापि दशमी तथा माघस्य सप्तमी ॥
श्रावणस्याष्टमी कृष्णा तथाषाढ़स्य पूर्णिमा।
कार्त्तिकी फाल्गुनी चैत्री ज्येष्ठी पञ्चदशी सिता।
मन्वन्तरादयस्त्वेता दत्तस्याक्षयकारिकाः ॥"
अत्रामावास्याष्टम्योरतिरिक्ताः शुक्लाः। पुनः पुनस्तथापदोपादानात् उपक्रमोपसंहारयोः शुक्लत्वकीर्त्तनाच्च। अत्र कामधेनौ तृतीया चैत्रमाघस्येति। कल्पतरौ तु तृतीया चैत्रमासस्येति लिखितम्। अत्र पाठद्वैधं श्रीपतिरत्नमालायाम्। अश्वयुजि शुक्लनवमी द्वादश्यूर्ज्जे मधौ तृतीया चेति पाठाच्चैत्रतृतीयैव ग्राह्या। श्रीदत्तोऽप्येवम्। माघसप्तम्याश्चान्द्रत्वं सौरागमेऽपि।
"अर्कपत्रैः सवदरैर्दूर्व्वाक्षतसचन्दनैः।
अर्घदानविधिना चार्घं दद्यादादित्यमुद्यते ॥
माघेऽथ फाल्गुने वापि भवेद्वै माघसप्तमी।
मादरोति च यत् प्रोक्तं तत् प्रायोऽनिदर्शनात्।"
अर्घदानविधिना।
"योऽर्घदानमर्घमासे मानोर्मासि निवेदयेत्।
सान्वयोऽधाद्यदानेन पुण्यं दशगुणं स्मृतम्।"
इति विष्णुपुराणीयेन। भविष्यपुराणे।
"अक्षरान्निर्विशेषेण यत कर्म्मोदितं नरैः।
देव वाच्यथवा चैत्रे तदनन्तमपि स्मृतम्॥"
अर्घमन्त्रस्तु।
"जननी सर्व्वभूतानां सप्तमी सप्तसप्तिके।
सप्तव्याहृतिके देवि नमस्ते रविमण्डले ॥"
प्रणाममन्त्रस्तु।
"सप्तसप्तिवह प्रीत सप्तलोकप्रदीपन।
सप्तम्यां हि नमस्तुभ्यं नमोऽनन्ताय वेधसे ॥"
सप्तिरश्वः। इति तिथ्यादितत्त्वम् ॥* ॥ सप्तमीव्रतविधिर्यथा,—
ब्रह्मोवाच।
"भगवन् भवसंसारसागरोत्तारकारकम्।
किञ्चिद्व्रतं समाचक्ष्व स्वर्गारोग्यसुखप्रदम् ॥
श्रीभगवान् उवाच।
सौरधर्म्मं प्रवक्ष्यामि नाम्ना कल्याणसप्तमीम्।
विशोकसप्तमीं तद्वत् फलदां पापनाशिनीम् ॥
शर्करासप्तमीं पुण्यां तथा कमलसप्तमीम्।
मन्दारसप्तमीं पुण्यां तथैव शुभसप्तमीम् ॥
सर्व्वाः सर्व्वफलाः प्रोक्ताः सर्व्वदेवर्षिपूजिताः।
विधानमासां वक्ष्यामि यथावदनुपूर्व्वशः ॥
यदा तु शुक्लसप्तम्यामादित्यस्य दिनं भवेत्।
सा तु कल्याणिनी नाम विजया तु निगद्यते ॥"
आसां इतिकर्त्तव्यताकालौ च मत्स्यपुराणे ६६ अध्यायावधि ७५ अध्यायपर्य्यन्तं द्रष्टव्यौ ॥*॥
सा सूर्य्यमूर्त्तिप्रकाशिका तिथिः। यथा,—
"एवमुक्तस्तदा देवैः सौम्यां मूर्त्तिमथाकरोत्।
प्रकाशत्वं जगामाशु देवतानां महाप्रभः ॥
एतत् सर्व्वं सुराणान्तु दहनं ग्रामितं पुरा।
सप्तम्यां खलु सूर्य्येण मूर्त्तिश्च कृतवान् भुवि ॥"
इति वाराहे सूर्य्योत्पत्तिनामाध्यायः ॥
सप्तरक्त, क्ली, (सप्तानां रक्तानां तदवर्णानां समाहारः।) शरीरस्य रक्तवर्णसप्तावयवाः। ते च हस्तपादतलनेत्रान्तरतालुकाधरजिह्वानखाः। यथा, सामुद्रके।
"पाणिपादतलौ रक्तौ नेत्रान्तरनखानि च।
तालुजिह्वाधरजिह्वाश्च सप्तरक्तं प्रशस्यते ॥"
सप्तर्षयः, पुं भूम्नि, (सप्त ऋषयः।) सप्तसंख्यकर्षयः। तेषां नामानि यथा। मरीचिः १ अत्रिः २ अङ्गिराः ३ पुलस्त्यः पुलहः ५ क्रतुः ६ वशिष्ठः ७। इत्यमरः ॥ अपि च।
"सप्तर्षिमण्डलं तस्माद्दृश्यते सर्व्वतोपरि।
तत्र सप्तर्षयः सन्ति विनियुक्ताः प्रजारक्षणे ॥
मरीचिरत्रिः पुलहः पुलस्त्यः क्रतुरङ्गिराः।
वशिष्ठश्च महाभाग ब्राह्मणो मानसाः सुताः ॥
सप्तब्राह्मण इत्येते उच्यन्ते ब्रह्मवादिभिः।
संभूतिरनसूया च क्षमा प्रीतिश्च सन्नतिः ॥
अरुन्धतिक्रिया लज्जा तत्पत्न्यो लोकमातरः।
एतासां तपसा चैतद्धार्य्यते भुवनत्रयम् ॥
सप्तव्याहृतिमासीना गायत्र्याजपतत्पराः।
तस्मिन् लोके वसन्त्येव ब्राह्मणा ब्रह्मवादिनः॥"
इति पाद्मे स्वर्गखण्डे ११ अध्यायः ॥
(प्रतिमन्वन्तरे सप्तर्षयो भिन्ना एवासन्। तदुत्तान्तस्तु ऋषिशब्दे द्रष्टव्यः ॥)
सप्तला, स्त्री, (सप्त लान्यीति। ला + कः। टाप्।) नवमालिका। इत्यमरः ॥ चर्म्मकषा। गुञ्जा। पाटला। इति मेदिनी ॥
सप्तसती, स्त्री, सप्तानां शतानां समाहारः। इति व्याकरणम् ॥ ("द्विगोः।" ४।१।२१। इति ङीप्।) सप्तशतिका। सप्तशतश्लोकात्मकदेवीमाहात्म्यम्। चण्डीति ख्यातम्। यथा,—
"अर्गलं कीलकञ्चादौ पठित्वा कवचं ततः।
जपेत् सप्तशतीं चण्डीं क्रमेणैव शिवोदितः॥"
इत्यर्गलस्तोत्रम् ॥
तथा च नागोजीभट्टः।
"तत्राद्ये चरिताध्याये श्लोका अशीतिरुत्तमाः।
अथ मध्ये चरित्रे तु पञ्चाष्टैकसुसंख्यकाः ॥
त्रयोऽध्यायाश्चतुःसप्तचतुर्व्वेदखवेदकाः।
अथोत्तरचरित्रे तु षट्षड़ग्निश्लोकभाक्।
अग्नीषोमाध्यायवती गीता सप्तशती स्मृता॥"
सप्तश्लोकः, पुं, (सप्त श्लोकाः तद्वृत्तरेखा यत्र।) विवाहस्य शुभाशुभदिनज्ञानार्थं तिथ्यृक्षसप्तरेखाविशिष्टचक्रविशेषः। यथा,—
"कृत्तिकादिचतुःसप्तरेखाराशौ परिभ्रमन्।
ऋक्षवेदैकरेखास्थो वेधः सप्तश्लाकजः ॥
सप्त सप्त विलिखेत् प्ररेखिका-
स्तिर्य्यगूर्द्धमथ कृत्तिकादिकम्।
वेदखेदभिजिता समन्वितं
चैकरेखगखगेन विध्यते ॥
वैश्यस्य चतुर्थेंऽशे अवर्गादौ लिप्रिकाचतुष्के च। अभिजित् तस्मे खचरे विज्ञेया रोहिणीविद्धा।"
लिप्रिका दण्डः।
"यस्याः शशी सप्तश्लाकभिन्नः
पापैरपापैरथवा विवाहे।
रक्तांशुकेनैव तु रोदमाना
श्मशानभूमिं प्रमदा प्रयाति ॥"
इति सप्तश्लाकवेधः। इति ज्योतिस्तत्त्वम् ॥

तच्चक्ररूपं यथा।



सप्तशिरा, स्त्री, (सप्त शिरा यस्याः।) नागवल्ली। इति राजनिघण्टः ॥
सप्तसप्तिः, पुं, (सप्त सप्तयो घोटका यस्य।) सूर्य्यः। इति हेमचन्द्रः ॥ (यथा, रघुः। १३।४१।
"हविर्भुजामेधवतां चतुर्णां
मध्ये ललाटन्तपसप्तसप्तिः।
असौ तपस्त्यप्रकृतापसर्पी
नम्रा मुनीच्छुश्चरितेन दान्तः ॥")

सप्तसागरः, पुं, (सप्त सागरा इव कुण्डानि यत्र ।) महादानविशेषः । यथा,—
मत्स्य उवाच ।
"अथातः संप्रवक्ष्यामि महादानमनुत्तमम् ।
सप्तसागरकं नाम सर्व्वपापविनाशनम् ॥
पुण्यं दिनमथासाद्य कृत्वा ब्राह्मणवाचनम् ।
तुलापुरुषवत् कुर्य्यात् लोकेशावाहनं बुधः ॥
ऋत्विङ्मण्डपसंभारभूषणाच्छादकादिकम् ।
कारयेत् सप्त कुण्डानि कनकानि विचक्षणः ॥
प्रादेशमात्राणि तथारत्निमात्राणि वा पुनः ।
कुर्य्यात् सप्तपलादूर्द्धमाढकाच्च शक्तितः ॥
संख्याप्यानि च सर्व्वाणि कृष्णाजिनतिलोपरि ।
प्रथमं पूरयेत् कुण्डं लवणेन विचक्षणः ॥
द्वितीयं पयसा तद्वत् तृतीयं सर्पिषा पुनः ।
चतुर्थन्तु गुडेनैव दध्ना पञ्चममेव च ॥
षष्ठं शर्करया तद्वत् सप्तमं तीर्थवारिणा ।
स्थापयेल्लवणस्यन्तु ब्रह्माणं काञ्चनं शुभम् ॥
क्षीरे चीरमथे तु घृतमध्ये महेश्वरम् ।
भास्करं गुडमध्ये तु दधिमध्ये सुराधिपम् ॥
शर्करायां न्यसेत् लक्ष्मीं जलमध्ये तु पार्व्वतीम् ।
सर्व्वेषु सर्व्वरत्नानि धान्यानि च समन्ततः ॥
तुलापुरुषवत् शेषमत्रापि परिकल्पयेत् ।
ततो वास्तुहोमान्ते स्थापितो वेदपुङ्गवैः ।
त्रिः प्रदक्षिणमाकृत्य मन्त्रानिमानुदीरयेत् ॥
नमो वः सर्व्वसिन्धूनां आधारेभ्यः सनातनाः ।
जन्तूनां प्राणदेभ्यश्च सत्रदेभ्यो नमो नमः ॥
क्षीरोदकाज्यदधिमाधवलावणैक्षु-
सारात्मतेन भुवनत्रयजीवसंघान् ।
व्यानन्दयन्ति वसुभिश्च यतो भवन्त-
स्तस्मान्ममाप्यघविघातमलं विदध्वम् ॥
यस्मात् समस्तभुवनेषु भवन्त एव
तीर्थामरासुरसुवन्द्यमणिप्रतानम् ।
पापक्षयाहरविलोपनभूषणाय
लोकस्य निर्धति तदस्तु ममापि लक्ष्मीः ॥
इति ददाति रसाम्बरसंयुतान्
शुचिरविस्मयवानिह सागरान् ।
अमलकाञ्चनवरत्नमयानसौ
पदमुपैति हरेरमरार्चितः ॥
सकलपापविघातविराजितं
पितृपितामहपुत्रकलत्रकम् ।
नरकलोकसमाकुलमण्डलं
झटिति नेतुमसौ शिवमन्दिरम् ॥"
इति मत्स्यपुराणे महादानानुकीर्त्तने सप्तसागरप्रादानिको नाम २६१ अध्यायः ॥

सप्तिः, स्त्री, (सप्त सप्तते इति । सृ + क्तिप् ।) सप्तपुत्रप्रसूता । तत्पर्य्यायः । सुतवल्करा २ । इति शब्दरत्नावली ॥

सप्तांशुपुङ्गवः, पुं, (सप्तभिरंशुभिः पुङ्गव इव श्रेष्ठत्वात् ।) अग्निग्रहः । इति जटाधरः ॥

सप्तार्चिः, [स्] पुं (सप्त अर्चींषि यस्य ।) अग्निः । (यथा, रघुः । १० । २१ ।
"सप्तसामापनीतं त्वां समार्च्चद्भक्तैश्चयम् ।
सप्तार्चिर्मुखमाचक्षुः सप्तलोकैकसंश्रयम् ॥") चित्रकवृक्षः । इत्यमरः ॥ अग्निग्रहः । इति हेमचन्द्रः ॥ क्रूरचक्षुषि, त्रि । इति मेदिनी ॥ अग्नेः सप्तानामर्च्चिषां नामानि सप्तजिह्वशब्दे द्रष्टव्यानि

सप्ताश्वः, पुं, (सप्त अश्वा यस्य ।) सूर्य्यः । अर्कवृक्षः । इत्यमरः ॥ (क्वचित् वाच्यलिङ्गेऽपि दृश्यते । यथा, ऋग्वेदे । ५ । ४५ । ६ ।
"आ सूर्य्यो यातु सप्ताश्वः चित्रं यदस्योर्विया-
दीर्घयाधे ॥"
"सूर्य्यः सर्व्वस्य प्रेरको देवः सप्ताश्वः सप्तगस्वभावाश्वोपेतः सप्तसंख्याकाश्वो वा आयातु अस्मदभिमुखमागच्छतु ॥" इति तद्भाष्ये सायणः ॥)

सप्ताश्ववाहनः, पुं, (सप्त अश्वा वाहनान्यस्य ।) सूर्य्यः । यथा,—
"लोकसाक्षी त्रिलोकेशः कर्त्ता हर्त्ता तमिस्रहा ।
तपनस्तापनश्चैव शुचिः सप्ताश्ववाहनः ॥"
इति भाम्बपुराणे सूर्य्यस्तोत्रम् ॥

सप्तिः, पुं, ("सप्त समवाये । 'सप्तिनसिवसि-पदिभ्यस्तिप्' इति श्रीभोजदेवः । सपति सङ्गामेषु सहसाभेवेति । गतिकर्म्मणो वा सप्तिः । सर्पतेः सृप्त्यर्थात् इति माधवः । क्वपि गतौ । अस्माद्वा तिप्रत्यये गुणे च रेफलोपो बाहुलकात् सर्पति सप्तिः ।" इति निघण्टुटीकायां देवराजयज्वा । १ । १४ । ५ ।) अश्वः । इत्यमरः ॥ (यथा, ऋग्वेदे । ८ । ४ । १४ ।
"अर्व्वाञ्चं त्वा सप्तयोऽध्वरश्रियो वहन्तु सवनेदुप ॥")

सफरः, पुं, मत्स्यविशेषः । पुटी इति भाषा ॥ शयाना स्फुरति पार्श्वेन गच्छतीति शफरी मनौषादिः नदादित्वादीष् । श्रोणिशफरीशय्याशकटशिलाशरशुतपत्र इत्युणादिभ्यात् तालव्यादिः । दन्त्यादिरपीति केचित् । शफरश्च । इत्यमरटीकायां भरतः ॥

सफरी, स्त्री, (सफर + ङीष् ।) मत्स्यविशेषः । इति भरतः ॥ पुँटी इति भाषा ॥ तत्पर्य्यायः । शफरी २ प्रोष्ठी ३ । इत्यमरः ॥ शफरः ४ श्वेतकोलः ५ । इति त्रिकाण्डशेषः ॥ (यथा,—
"अगाधजलसञ्चारी रोहितोऽपि स्थिरायते ।
गतप्रजलमात्रेण सफरी फरफरायते ॥"
इत्युद्भटः ॥)

सफलं, त्रि, (फलेन सह वर्त्तमानम् ।) फलविशिष्टम् । तत्पर्य्यायः । क्षमोचम् २ । इति जटाधरः ॥ (यथा, मार्कण्डेये । ६१ । ६७ ।
"सफलं मे भवेज्जन्म यदि मां नावमन्यसे ॥"
सफलम् । यथा, कथासरित्सागरे । २५ । १२ ।
"अपश्यद्दाश्रमपदं सफलस्निग्धपादपम् ॥")

सबलः, त्रि, (बलेन सह वर्त्तमानः ।) सैन्ययुक्तः । सामर्थ्यवान् । यथा,—
"सबले च सदा पापे दिनमात्रं प्रचक्षते ।
मध्ये बले तथा मासं वर्षं विद्यात्तथाबले ॥"
इति पञ्चखरा

सबलिः, पुं, विकालः । इति हेमचन्द्रः ॥

सबाधः, त्रि, पीड़ायुक्तः । निषेधयुक्तः । बाधया बाधेन च सह वर्त्तमानो यः इति बहुव्रीहि समासनिष्पन्नः ॥

सब्रह्मचारी, [न्] पुं, (ब्रह्म वेदस्तदध्ययनार्थं यद्व्रतं तदपि ब्रह्म तच्चरतीति ब्रह्मचारी समानो ब्रह्मचारी । यद्वा, समाने ब्रह्मणि चरतीति । णिनिः । "चरणे ब्रह्मचारिणि । ६ । ३ । ८६ । इति समानस्य सः ।) परस्परं ब्रह्मव्रताचारः । इत्यमरः ॥ एकस्माद्गुरोर्ब्रह्मणे वेदाय अर्थात् वेदाध्ययनाय व्रतं ब्रह्मचर्य्याख्यं आचरन्ति ये तेऽन्योन्यं सब्रह्मचारिणः उच्यन्ते । उपचारात् ब्रह्माध्ययनार्थं व्रतमपि ब्रह्म । समानं ब्रह्म चरन्तीति ग्रहादित्वाणिनि ज्योतिर्ज्जनपदेत्यादिना समानस्य सभावे सब्रह्मचारिणः । एकब्रह्मव्रताचारा इत्यत्र एकस्माद्ब्रह्मणे ब्रह्माध्येतुं व्रतमाचरन्तीति तुमर्थे चतुर्थ्या विग्रहतीति परे । सब्रह्मचारी भिन्नगुरुशिष्य इति हारलतेति नयनानन्दः । इति भरतः ॥

सभर्तृका, स्त्री, (भर्त्रा सह वर्त्तमाना । सहस्य सः ।) विद्यमानपतिका । तत्पर्य्यायः । पतिवती २ । इत्यमरः ॥ सधवा ३ सनाथा ४ । इति जटाधरः ॥

सभा, स्त्री, (सह भान्ति शोभन्ते यत्रेति । भा दीप्तौ + भिदादित्वात् अधिकरणे अङ् । सहस्य सः ।) सह भान्ति अत्र । मजलिस् इति पारसीक भाषा । पञ्चायित इति हिन्दी भाषा । मिटिं इति इङ्गरेजी भाषा । तत्पर्य्यायः । समज्या २ परिषत् ३ गोष्ठी ४ समितिः ५ संसत् ६ आस्थानी ७ आस्थानम् ८ सदः ९ समाजः १० । इत्यमरः ॥ पर्षत् ११ इति जटाधरः ॥ तल्लक्षणादि यथा । मनुः ।
"यस्मिन् देशे निषीदन्ति विप्रा वेदविदस्त्रयः ।
राज्ञः प्रतिकृतौ विद्वान् ब्राह्मणस्तां सभां विदुः ॥"
विद्वत्संवृतावपि सभापर्य्यायपरिषच्छब्दस्याह स एव ।
"त्रैविद्यो हैतुकस्तर्की निरुक्तो धर्म्मपाठकः ।
त्रयश्चाश्रमिणः पूर्व्वे परिषत् स्याद्दशावरा ॥"
त्रैविद्यः त्रिवेदपारगः । हैतुकः सद्युक्तिव्यवहारी । अतएवामरसिंहः । सभा सदसि सभ्ये च । अत्र भा दीप्तिः प्रकाशो ज्ञानमिति यावत् । तया सह साक्षात् परम्परया वा वर्त्तते इति सभा ॥ ५ ॥ कात्यायनः ।
"कुलशीलवयोवृत्तविद्यवद्भिरधिष्ठितम् ।
द्विजैर्भिः स्यात् कतिपयैः कुलवृद्धैरधिष्ठितम् ॥"
सद इति योगः । इति व्यवहारतत्त्वम् ॥ ६ ॥ सामाजिकः । द्यूतम् । यज्ञम् । इति मेदिनी ॥

समाहः। इति हेमचन्द्रः ॥* ॥ सभायां एकाकिगमननिषेधो यथा,—
"नैकश्चरेत् सभां विप्रः समवायञ्च वर्ज्जयेत् ॥"
इति कौर्म्मे उपविभागे १५ अध्यायः ॥
सभाज, त् क सेवने। प्रीतौ। दर्शने। इति कविकल्पद्रुमः ॥ (अदन्तचुरा०-परo-सकo-सेट्।) अससभाजत्। इति दुर्गादासः ॥
सभाजनं, क्ली, (सभाज त् क सेवने प्रीतौ + ल्युट्।) गमनागमनादिसमये सुहृदादेः प्रत्युत्थानारोग्यप्रश्नस्वागतादिनानन्दोत्पादनम्। तत्पर्य्यायः। आनन्दनम् २ आप्रच्छनम् ३। इत्यमरः ॥, टु नदि संज्ञायां सभाज त् क सेवनप्रीतिदर्शनेषु गच्छौ ग्रहीष्यौ अनट्। नन्दतिः पृच्छतिस्थाङ्पूर्व्वालिङ्गनादाविति सुभूतिः। गमनसमये सुहृदमालिङ्ग्य गमनानुज्ञायाचनम्। आगतस्य वा स्वागतारोग्यादिपृच्छा चानन्दनमिति रसमालाधरः। इति भरतः॥ (यथा, रघुः। १३। ४३।
"सभाजने मे सुखलब्धबाहुः
सलीलरं प्राध्वमितः प्रयुज्यताम् ॥"
सभाजयतीति। सभाज त् क प्रीतौ + ल्युः। प्रीतिदायके, त्रि। यथा, महाभारते। ४।१३।१०।
"प्रभूतनागाश्वरथं सभाजनं
सगद्गियुक्तं बहुपानभोजनम्।
मनोहरं काञ्चनचित्रभूषणं
गृहं मघत् श्रीभयतामियं मम ॥")
सभापतिः, पुं, (सभायाः पतिः।) सभाधिपतिः। (यथा, भागवते। ६। १०। ७।
"जटाधरस्तीव्रतपा ब्रह्मवर्च्ची सभापतिः।
व्यद्योतत स्त्रियश्चास्य गतह्रीः प्राकृतो यथा ॥")
द्यूतगृहस्वामी। इति कैचित् ॥
सभासत्] पुं, (सभा + सद् + क्विप्।) सभां
सभासद्] सीदति उपविशति यः। तत्पर्य्यायः। सभाकारः २ सभ्यः ३ सामाजिकः ४। इत्यमरः ॥ परिषदः ५ पर्षदः ६ परिषदः ७ पार्षदः ८ परिषत्सदः ९। इति शब्दरत्नावली ॥ सभ्यलक्षणादि यथा। कात्यायनः।
"सभ्येनाध्यक्षवक्तव्यं धर्म्मार्थसहितं वचः।
ब्रूतो यदि नो राजा स्यात् सभ्यस्तदाकुलः ॥"
सभ्यः सभायां साधुः। तथाविधानाद्य याज्ञवल्क्यः।
"श्रुताध्ययनसम्पन्नाः कुलीनाः सत्यवादिनः।
राज्ञा सभासदः कार्य्याः प्रभौ मित्रे च ये समाः ॥"
श्रुताध्ययनसम्पन्नाः धर्म्मशास्त्रज्ञाः। कुलीनाः सद्वंशादि-दोषशून्यमातापितृवंश-परम्पराकाः। सत्यवादिनः सभासदः सभायां यथा श्रोतृन्ति यथा दानमानसत्कारे राज्ञा कर्त्तव्याः। इति श्राद्धतत्त्वम् ॥ ८ ॥ अन्यच्च।
"समः प्रभौ च मित्रे च धर्म्मशास्त्रविशारदः।
विनीतश्च कुलीनश्च सभाधिकरणे भवेत् ॥
काव्योक्तयाविधानत्व द्विजमुख्याः सभासदः ॥"
इति मत्स्यपुराणे १९६ अध्यायः ॥
इदमत्रितन्तु सप्त पञ्च त्रयो वा सभासदो भवन्तीत्याह।
"लोकवेदन्यधर्म्मज्ञाः सप्त पञ्च त्रयोऽपि वा।
यत्रोपविष्टा विप्राः स्युः सा यज्ञसदृशी सभा ॥"
किञ्च।
"सप्राङ्विवाकः सामात्यः सब्राह्मणपुरोहितः।
समस्यः प्रेक्षको राजा स्वर्गे तिष्ठति धर्म्मतः ॥"
तत्र ब्राह्मणा अनियुक्ताः सभासदस्तु नियुक्ता इति भेदः। तत्र नियुक्तानां यथावस्थितार्थकथनेऽपि यदि राजान्यथा करोति तदासौ निवारणीयोऽन्यथा दोषः। उक्तञ्च कात्यायनेन।
"अन्यायेनापि तं यान्तं ये नुयान्ति सभासदः।
तेऽपि तद्भागिनस्तस्मान्नोधनीयः स तैर्नृपः ॥"
इति मिताक्षरा ॥
सभास्तारः, पुं, (सभां स्तृणातीति। स्तृञ् आच्छादने + "कर्म्मण्यण्।" ३।२।१। इत्यण्।) सभासद्। इत्यमरः ॥ (यथा, महाभारते। २।४६।२।
"के च तत्र सभास्तारो राजानो ब्रह्मवित्तम!॥")
सभिकः, पुं, (सभा द्यूतसभा आश्रयत्वेनास्त्यस्येति। सभा + ब्रीह्यादित्वात् ठन्।) द्यूतकारकः। इत्यमरः ॥ दे सहियार इति खाते। सभा द्यूतमस्याश्रयत्वेनास्ति सभिकः विकारसंधेति ष्ठिकः। सभा द्यूतं [सभा गृहमिति रुद्रः। द्यूतं कारयति द्यूतकारकः णयन्तात् स्वार्थे कः। इति भरतः ॥ तत्पर्य्यायः।
"दुरोदरश्च नियन्त्यद्यूतकारकसञ्जकाः।
सभिकः प्रतिभूस्त्वेति————————॥"
इति जटाधरः ॥
(यथा, याज्ञवल्क्ये। २। २०२।
"गच्छे शतिकदृष्टेषु सभिकः पञ्चकं शतम्।
परीयात् धूर्त्तकितवादितरद्दशकं शतम् ॥")
सभीकः, पुं, द्यूतकारकः। इति शब्दरत्नावली ॥
सभोचित, पुं, (सभायामुचितः।) पण्डितः। इति धरणिः ॥ सभायोग्ये, त्रि ॥
सभ्यः, पुं, (सभायां साधुः। सभा + "सभाया यः।" ४। ४। १०५। इति यः।) साधुः। सभासद्। इत्यमरः ॥ (यथा, मनुः। ८। १०।
"सोऽस्य कार्य्याणि संपश्येत् सभ्यैरेव त्रिभिर्वृतः ॥"
अभिमर्षे वाक्यालङ्कारेऽपि दृश्यते। यथा, रघुः। १। ५५।
"तस्मै सभ्याः सभार्य्याय गौर्मुं शुभगमेन्द्रियाः।
सर्व्वोपमाभूते चक्षुर्भुनयो नयचक्षुषे ॥")
सभिकः। इति जटाधरः ॥
सभ्य, त्रि, (सभा + यः।) प्रशस्तः। इति जटाधरः ॥ सभासमन्वी पुं॥
सम्, य, समाधौ। प्रकृष्टार्थे। सङ्गते। शोभने। इति शब्दरत्नावली ॥ अव्ययः। इति हेमचन्द्रः ॥ चतुर्थीसमः। इति भरतः ॥ अस्यार्थविशेषाः संसृष्टे दृश्याः।

समः, त्रि, (समतीति। सम वैकृत्ये + पचाद्यच्।) सर्व्वम्। (अस्मिन्नर्थे सर्व्वनामसंज्ञा भवति। यथा, मुग्धबोधे।
"नमः समस्तात् पूर्व्वस्मा अन्तरस्मा अमेधसाम् ॥")
समानम्। इत्यमरः ॥ (अस्मिन्नर्थे सर्व्वनामसंज्ञा न भवति। यथा, मुग्धबोधे।
"समायेषु परायेषां सुकृतेऽर्थान्तराय च ॥")
साधुः। इति मेदिनी ॥
समः, पुं, (सम वैकृत्ये + पचाद्यच्।) राशिविशेषाणां संज्ञाविशेषः। ते तु राशयः वृषकर्कटकन्यावृश्चिकमकरमीनाः। यथा,—
"क्रूरोऽथ सौम्यः पुरुषोऽङ्गना च
स्त्रीजोऽथ युग्मं विषमः समश्च।
चरस्थिरद्व्यात्मकनामधेया
मेषादयोऽमी क्रमशः प्रदिष्टाः ॥"
इति ज्योतिस्तत्त्वम् ॥ * ॥
मानस्य प्रकारविशेषः। स तु यदा गीतवाद्ययोस्तालः गायकस्य उत्क्षेपादिचालनञ्च एकदा समभावेन पतति तदा भवति। इति सङ्गीतशास्त्रम् ॥ * ॥ वर्गमूलानयनार्थं अङ्कोपरिदत्त ऋजुरेखाविशेषः। यथा,—
"त्यक्त्वान्त्याद्विधमात् क्षतिं द्विगुणयेन्मूलं समे तद्धृते
त्यक्त्वा लब्धकृतिं तदाद्यविषमालब्धं द्विनिघ्नं न्यसेत् ॥"
इत्यादि लीलावती ॥
समकन्या, स्त्री, (समा विवाहतुल्या कन्या।) विवाहोपयुक्ता। इति धनञ्जयः ॥ सदृशकुमारी च ॥
समकोलः, पुं, (समः कोलो यस्य।) सर्षपः। इति चिकित्साशेषः ॥
समक्षः, त्रि, गमनकर्त्ता। संपूर्व्वकात् क्षधातोः क्षप्रत्ययेन निष्पन्नः। इति सुग्धबोधव्याकरणम् ॥
समक्षं, त्रि, अक्ष्णोः समीपम्। संपूर्व्वाक्षिशब्दात् अप्रत्ययेन निष्पन्नम्। इति सुग्धबोधव्याकरणम् ॥ (यथा, कुमारे। ५। १।
"तथा समक्षं दहता मनोभवं
पिनाकिना भग्नमनोरथा सती।
निनिन्द रूपं हृदयेन पार्व्वती
प्रियेषु सौभाग्यफला हि चारुता ॥")
समगन्धकः, पुं, (समाऽतुल्या गन्धा गन्धद्रव्याणि यत्र। कप्।) क्षधिमद्रव्यः। यथा,—
"एकद्रव्ये भवेत्करो गिरिः स्यात् समगन्धकः।"
इति शब्दचन्द्रिका ॥
समग्गलिकं, क्ली, (समङ्गुलौ गच्छोऽस्येति। ठन्।) उशीरम्। इति राजनिर्घण्टः ॥ तत्र गन्धगुणे, त्रि ॥
समग्रः, त्रि, (सर्व्वं समकालमेव गृह्णातीति। ग्रह + कः।) समस्तम्। (यथा, रामायणे। २। ५२। ८५।
"चतुर्दश हि वर्षाणि समग्राण्युष्य कानने

"विद्यैव समं कामं मन्तव्यं ब्रह्मवादिना।
आपद्यपि हि घोरायां नत्वेनामरिणे वपेत्॥")
समयः, पुं, (सम्यगेतीति। सम्+इण् गतौ+पचाद्यच्।) कालः। (यथा, उत्तरचरिते १ अङ्के।
"समयः समवर्त्तत इवेव यत्र मां
समनन्दयत् सुसुखि! गौतमार्पितः।
अयमागृहीतकमनीयकङ्कण-
स्तव मूर्त्तिमानिव महोत्सवः करः॥")
शपथः। आचारः। (यथा, महाभारते। १३। ६०। ५०।
"ऋषीणां समये नित्यं ये चरन्ति युधिष्ठिर!।
निश्चिताः सर्व्वधर्म्मज्ञास्तान् देवान् ब्राह्मणान् विदुः॥")
सिद्धान्तः। संवित्। इत्यमरः॥ क्रियाकारः। निर्द्देशः। भाषा। (यथा, महाभारते। ५। ३३। ११६।
"देशाचारान् समयान् जातिधर्म्मान्
बुभूषते यः सः परावरज्ञः॥")
सङ्केतः। इति मेदिनी॥ (व्यवहारः। यथा, मनुः। १०। ५३।
"न तैः समयमन्विच्छेत् पुरुषो धर्म्ममाचरन्॥")
सम्पत्। नियमः। (यथा, भागवते। ३।२२।१८।
"अतो भजिष्ये समयेन साध्वीं
यावत्तेजो बिभृयादात्मनो मे॥")
अवसरः। इति हेमचन्द्रः॥ * ॥ कालप्रशंसा। यथा,—
परशुराम उवाच।
"राजेन्द्रोत्तिष्ठ समरं कुरु माद्यसपूर्व्वकम्।
कालभेदे जयो नृणां कालभेदे पराजयः॥
काले सिंहः शृगालश्च शृगालः सिंहमेव च।
काले आम्रं नरो हन्ति गजेन्द्रं हरिणस्तथा॥
महिषं मक्षिका काले गरुडश्च यथोरगः।
किङ्करः स्तौति राजेन्द्रं काले राजा च किङ्करम्॥
इन्द्राश्च मनवः काले काले राजा मरिष्यति।
तिरोहिता च प्रकृतिः काले श्रीकृष्णविग्रहे॥
मरिष्यन्ति सुराः सर्व्वे त्रिलोकस्थाश्चराचराः।
सर्व्वे काले लयं यान्ति कालो हि दुरतिक्रमः॥
कालस्य कालः श्रीकृष्णः स्रष्टुः स्रष्टा यथेच्छया।
संहर्त्तुः संहर्त्तुः पातुः पाता परात्परः॥
महाशूलात् शूलतमः कृतान्तात् कृतान्तकः।
क्रमः परात्मा परमः कालः कालश्च कालभेदकः॥"
इति ब्रह्मवैवर्त्ते गणपतिखण्डे ४० अध्यायः॥ *॥
अपि च।
"कालः करोति संसर्गं बन्धूनां बन्धुभिः सममं।
कालः करोति विच्छेदं विरोधं प्रीतिमेव च॥
कालः सृष्टिञ्च कुरुते कालश्च परिपालनम्।
कालः करोति संहारं कालः संहरते प्रजाः॥
सुखं दुःखं भयं शोकं जरां मृत्युञ्च जन्म च।
सर्व्वे कालानुरोधेन कालः करोति च।
सर्व्वं कालकृतं ज्ञात्वा विलापं न व्रज व्रज॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ८० अध्यायः॥

अथ कालनिरूपणम्।
"आनन्दनन्दनस्यैव परिपूर्णतमस्य च।
शृणु कालगतिं वत्स महीयज्ञानगोचराम्॥
नराणाञ्च पितॄणाञ्च सुराणाञ्चापि ब्रह्मणः।
नागानां राक्षसादीनां तत्परेषाञ्च पुत्रक॥
कथयामि निगूढार्थं सावधानं निशामय।
सर्व्वस्माच्च परः स्थूलः सर्व्वाधारो महान् विराट्॥
यस्य लोमसु विश्वानि चासंख्यानि च तानि च।
सर्व्वस्माच्च परं सूक्ष्मं परमाणुं निशामय॥
कालारम्भात्मकं सर्व्वस्यानूर्द्धं परमौपसितम्।
परमः सप्तविंशेषामामनेकोऽयुतप्रस्तथा॥
परमाणुः स विज्ञेयो नृणामेकत्रयभ्रमो यथा।
परमाणुद्वयेनाणुस्त्रसरेणुस्तु ते त्रयः॥
त्रसरेणुत्रिकेणापि त्रुटिरुक्ता मनीषिभिः।
वेधस्त्रुटिशतेनैव त्रिवेधेन लवस्तथा॥
त्रिलवेन निमेषश्च त्रिनिमेषेण च क्षणः।
काष्ठा पञ्चक्षणेनैव लघुश्च दशकाष्ठया॥
लघुपञ्चदशे दण्डस्तत्प्रमाणं निशामय।
द्वादशार्द्धपलोन्मा च चतुर्भिश्चतुरङ्गुलैः॥
स्वर्णमाषैः कृतच्छिद्रं यावत् प्रच्छन्नलम्बनम्।
दण्डद्वये च सुकृतैः षष्टिदण्डात्मिका तिथिः॥
तदष्टभागः प्रहरः प्रमाणञ्च निरूपणम्।
चतुर्भिः प्रहरै रात्रिश्चतुर्भिर्दिनमेव च॥
तिथिपञ्चदशेनैव पक्षमानं प्रकीर्त्तितम्।
पक्षद्वयेन मासः स्यात् शुक्लकृष्णाभिधेन च॥
ऋतुर्मासद्वयेनैव तत्षट्केनैव वत्सरः।
वसन्तग्रीष्मवर्षाश्च शरद्धेमन्तशैतकम्॥
वर्षाः पञ्चविधा ज्ञेयाः कालविद्भिर्निरूपिताः।
संवत्सरः परिवत्सरश्च इडावत्सर एव च॥
अनुवत्सरो वत्सरोऽयमिति कालविदो विदुः।
अब्दो द्विषट्कमासैश्च तन्नाम शृणु चोद्धव॥*॥
वैशाखो ज्यैष्ठ आषाढः श्रावणो भाद्र एव च।
आश्विनः कार्त्तिको मार्गः पौषो माघस्तु फाल्गुनः॥
चैत्रस्तु चरमो ज्ञेयो वर्षर्त्तोर्निरूपितः।
वसन्तश्चैववैशाखौ मासौ युग्मेन कीर्त्तितः॥
ज्यैष्ठाषाढद्वयेनैव ग्रीष्मस्तु परिकीर्त्तितः।
वर्षा श्रावणभाद्रेण चाश्विने कार्त्तिके शरत्॥
मार्गे पौषे च हेमन्तः शिशिरो माघफाल्गुने।
अब्दस्तु चायनं द्वे चैवोत्तरं दक्षिणायनं॥
माघादिषट्कं नियतं उत्तरायणमीपसितम्।
श्रावणादिमासषट्कं दक्षिणायनमेव च॥
माघादाषाढपर्य्यन्तं दिनवृद्धिं क्रमेण वै।
नक्तं वृद्धं श्रावणाच्च पौषपर्य्यन्तमेव च॥*॥
प्रतिपदः पूर्णिमान्तः शुक्लः पक्षः प्रकीर्त्तितः।
पूर्णिमायाः प्रतिपदः अमावास्यान्त एव च॥
कृष्णपक्षस्तु विज्ञेयो वेदविद्भिर्निरूपितः।
द्वितीया च तृतीया च चतुर्थी पञ्चमी तथा॥
षष्ठी च सप्तमी चैव अष्टमी नवमी तथा।
दशम्येकादशी चापि द्वादशी च त्रयोदशी।
चतुर्दशी कृहूर्यावद्दिनन्तु गणनं स्मृतम्॥*॥

अश्विनी भरणी चापि कृत्तिका रोहिणी तथा।
मृगशिरास्तथार्द्रा च नक्षत्रे हे पुनर्व्वसुः॥
पुष्याश्लेषा मघा चैव पूर्व्वा चोत्तरफल्गुनी।
हस्ता चित्रा तथा स्वाती विशाखा चानुराधिका॥
ज्येष्ठा मूला तथा ज्ञेया पूर्व्वाषाढोत्तरा तथा।
श्रवणाप्यभिजिच्चैव धनिष्ठा च प्रकीर्त्तिता॥
ततः शतभिषा ज्ञेया पूर्व्वभाद्रपदस्तथा।
तथोत्तरस्तु विज्ञेयो रेवती चरमा स्मृता॥
अष्टाविंशच्च नक्षत्रं कालत्वं शृणिनोद्भव।
क्रमेण ताभिः सार्द्धं च चन्द्रस्तिष्ठति नित्यशः॥
सप्तविंशतिनक्षत्रं कालत्वञ्च श्रुतौ श्रुतम्।
अभिजिच्छ्रवणाच्छाया तेनाष्टाविंशतिः स्मृता॥
एकदा च मधौ चन्द्रो रोहिण्या रामया सह।
रेमे दिवानिशं दृष्ट्वा श्रवणा च चुकोप सा॥
छायां दत्त्वा च चन्द्राय ययौ तातान्तिकं भिया।
ततः पितरमानीय सा प्रचक्रे विभागकम्॥
बभूव तेन नक्षत्रमभिज्ञानामकं पुरा।
एतत् श्रुतं क्षणसुखाच्छतशृङ्गे च पर्व्वते।
नक्षत्रं कथितं वत्स तिथ्यां भ्रमति नित्यशः॥*॥
योगश्च करणश्चैव मदृक्षेण निशामय।
विष्कम्भः प्रीतिरायुष्मान् सौभाग्यः शोभनस्तथा॥
अतिगण्डः सुकर्म्मा च धृतिः शूलस्तथैव च।
गण्डो वृद्धिर्ध्रुवश्चैव व्याघातो हर्षणस्तथा॥
वज्रश्छाद्यतीपातो वरीयान् परिघः शिवः।
सिद्धः साध्यः शुभः शुक्लो ब्रह्मेन्द्रो वैधृतिस्तथा॥
कीर्त्तितस्तु योगगणः करणं शृणुतामिति।
बवश्च बालवश्चैव कौलवस्तैतिलस्तथा॥
गरश्च वणिजश्चापि विष्टिश्च शकुनिस्तथा।
चतुष्पाच्चापि नागश्च किंस्तुघ्न इति कीर्त्तनम्॥
नराणाञ्चापि मासेन पितॄणाञ्च दिवानिशम्।
शुक्लेतेषां दिनञ्चापि कृष्णे नक्तं प्रकीर्त्तितम्॥
वत्सरेण नराणान्तु सुराणाञ्च दिवानिशम्।
दिनन्तेषामुत्तरेण नक्तञ्च दक्षिणायनं॥
मन्वन्तरन्तु दिव्यानां युगानामेकसप्ततिः।
मनोरायुःपरिमितं शक्रस्यायुः प्रकीर्त्तितम्॥
पञ्चविंशत्सहस्रञ्च तथा पञ्चशतं परम्।
तच्च सूर्य्यगतिर्नास्ति शक्रपातानुसारतः॥
युगानां षष्टिमधिकं नराणाञ्च प्रकीर्त्तितम्।
कालेनैतेन शक्रस्य पतनञ्च मनोरथा॥*॥
चतुर्दशेन्द्रावच्छिन्नकालेन ब्रह्मणो दिनम्।
एतेनैव च तद्युक्तमुक्तं धातुर्दिवानिशम्॥
एवन्तेषां निपतनं बोद्धव्यं तद्दिवानिशम्।
तच्च सूर्य्यगतिर्नास्ति शक्रपातानुसारतः॥
दिवानिशञ्च जानन्ति ब्रह्मलोकनिवासिनः।
दण्डद्वयं लवपलं शक्रपातेन तत्पलम्॥
एवं त्रिंशद्दिनेनैव धातुर्मासः प्रकीर्त्तितः।
अष्टौ द्वादशभिर्मासैरेवन्तस्य शतायुषः॥
ब्रह्मणः पतनेनैव निमेषः श्रीहरेरपि॥*॥
धातुः पातानुसारेण वैकुण्ठेन दिवानिशम्।
तच्च सूर्य्यगतिर्नास्ति चैवं गोलोकतः स्मृतम्॥

वैकुण्ठवासिनः सर्व्वे तेन जानन्त्यहर्निशम् ॥
चन्द्रस्यापि ग्रहाणाञ्च गतिर्नास्तीति तत्र वै ।
चक्रं नैव भ्रमत्येव राज्ञीनामिच्छया हरेः ॥
दिनञ्च तेजसा दीप्तं कृष्णस्य परमात्मनः ।
नक्तं तेजोविहीनञ्च हरौ च मन्दिरं गते ॥
एवं कालगतिस्तत्र विष्णुलोकेऽस्ति सन्ततम् ।
कालस्वरूपो भगवान् परमात्मा निराकृतिः ॥
चन्द्रसूर्य्यगतिर्नास्ति पातालेषु च सप्तसु ।
तद्वासिनश्च जानन्ति सङ्केतेन दिवानिशम् ॥
दिने च मूर्द्धि नागानां मणिर्ज्वलति नित्यशः ।
सन्ध्यायां दीप्तिहीनश्च रात्रौ च तमसावृता ॥
कालं तन्मणिप्रभागेण जानन्ति तन्निवासिनः ।
यथा भुवि तथा तत्र परिमाणं प्रकीर्त्तितम् ॥*॥
कृतं त्रेता द्वापरञ्च कलिश्चेति चतुर्युगम् ।
दिव्यैर्दादशसाहस्रैर्व्वत्सरैश्चापि सम्मितम् ॥
अष्टौ शतान्यप्यधिकं सहस्राणां चतुष्टयम् ।
दिव्यैर्व्वर्षैः कृतयुगं कालविद्भिर्निरूपितम् ॥
अष्टाविंशत्सहस्राण्यप्यधिकं परिमाणकम् ।
लक्षाणाञ्च सप्तदश नृमाणं परिकीर्त्तितम् ॥
अधिकं षट्शतान्येव सहस्राणां त्रयं तथा ।
दिव्यैर्व्वर्षैश्च त्रेतेति वत्स कालविदो विदुः ॥
षण्णवतिसहस्राणि लक्षैर्द्वादशभिः सह ।
नृणां वर्षैश्च त्रेतेति कालविद्भिः प्रकीर्त्तितः ॥
चतुष्टयं शतानाञ्चाप्यधिकं द्विसहस्रकम् ।
वर्षं दिव्यं द्वापरस्य कालज्ञैः परिकीर्त्तितम् ॥
चतुःषष्टिसहस्राणि लक्षैरष्टाभिरेव च ।
नृणां वर्षैर्द्वापरस्य कालज्ञैः परिकीर्त्तितम् ॥
अधिकं द्विशतञ्चैव दिव्यं वर्षसहस्रकम् ।
एवं मितं कलियुगं वत्स प्राज्ञैः प्रकीर्त्तितम् ॥
द्वात्रिंशच्च सहस्राश्च चतुर्लक्षं नृमाणकम् ।
वर्षञ्चेति कलियुगं चकार कालकोविदः ॥
लक्षैश्चित्वारिंशद्भिः सह विंशतिसहस्रकैः ।
नृमाणवर्षैः कालज्ञैर्व्यक्तमेव चतुर्युगम् ॥
इति ते कथितं वत्स कालसंख्यानिरूपणम् ।
यथाश्रुतं यथाज्ञानं गच्छ वत्स हरेः पुरम् ॥”
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे राधोपवर्णसंवादे कालनिरूपणं ६६ अध्यायः ॥ * ॥ अपि च ।

मार्कण्डेय उवाच ।

“निमेषो नाम कालाङ्गो नेत्रोन्मेषविलक्षितः ।
तैरष्टादशभिः काष्ठा काष्ठानां त्रिंशता कला ॥
कलाभिस्त्रावतीभिस्तु चणाख्यः परिकीर्त्तितः ।
चणैर्द्वादशभिः प्रोक्तो मुहूर्त्तस्तैस्तु त्रिंशता ॥
मानुष्यः स्यादहोरात्रः पञ्चसप्त दश पञ्च च ।
पक्षाभ्यां मनुजो मासः पितॄणां तदहर्निशम् ॥
मासैर्द्वादशभिर्व्वर्षो देवानां तदहर्निशम् ॥
कृष्णपक्षः पितृणान्तु कर्म्मार्थं दिवसो मतः ॥
स्वप्नार्थं शुक्लमेवन्तु रजनी परिकीर्त्तिता ।
देवानान्तु दिनं प्रोक्तं षण्मासा उत्तरायणम् ॥
रात्रिः स्वप्नाय देवानां षण्मासा दक्षिणायनम् ।
वर्षाभ्यां द्वाभ्यान्तु मासाभ्यामर्कजाभ्यान्तु ऋतुः स्मृतः ॥
ऋतुभिश्चायनं प्रोक्तं त्रिभिस्तन्मानुषं मतम् ।
ऋतुभिर्व्वत्सरः षड्भिस्तांश्च शृणु पृथक् पृथक् ॥ * ॥
चैत्रादियुगलैः संज्ञा तेस्तैः षड्भिर्द्विजोत्तमाः ।
वसन्तश्चैव वैशाखौ ग्रीष्मो ज्येष्ठः शुचिस्तथा ॥
प्रावृट् नभोनभस्यौ तु शरत् स्यादिशकार्त्तिकौ ।
सहः पौषौ च हेमन्तः शिशिरो माघफाल्गुनौ ॥
षड्इमे ऋतवः प्रोक्ताः यज्ञार्हौ विहिताः पृथक् ।
नृणां मानेन दण्डैर्मे लैः सप्तभिरुत्तरैः ॥
साष्टाविंशतिसाहस्रैर्म्मानं कृतयुगस्य च ।
सन्ध्या चतुःशतानीह वर्षाणामन्तरालतः ॥
सन्ध्यांशस्तावता प्रोक्तस्तदन्तर्गत ईप्सितः ।
त्रेता द्वादशभिर्लक्षैर्म्मानुषैर्व्वत्सरैर्भवेत् ॥
षण्णवत्या सहस्रैश्च सन्ध्या च स्यात् शतत्रयम् ।
शतत्रयन्तु सन्ध्यांशस्तदन्तः परिकीर्त्तितः ॥
चतुःषष्टिसहस्राणि लक्षाण्यष्टौ प्रमाणतः ।
भवेद्युगं द्वापराख्यं तेषु सन्ध्या शतद्वयम् ॥
शतद्वयन्तु सन्ध्यांशस्तदन्तर्गत इष्यते ।
द्वात्रिंशत्तु सहस्राणि चतुर्लक्षाणि वै कलेः ।
संवत्सरैर्भवेन्मानं सन्ध्यैकं प्रोच्यते शतम् ॥
वत्सराणामेकशतं सन्ध्यांशश्च तदन्तरे ।
एवं कृतञ्च त्रेता च द्वापरञ्च तथा कलिः ॥
मानुषेण प्रमाणेन भवेद्युगचतुष्टयम् ।
त्रिचत्वारिंशता लक्षैर्मानं चतुर्युगं भवेत् ॥
सहस्रैरपि विंशत्या सन्ध्यासन्ध्यांशसंयुतम् ।
देवं दिनं वत्सरेण मानुषेण सराचकम् ॥
एवं क्रमं गणित्वा तु मानुषैर्व्वत्सरैश्चतुर्युगम् ।
देवं द्वादशसाहस्रं वत्सराणां प्रकीर्त्तितम् ॥
देवैर्द्वादशसाहस्रैर्व्वत्सरैर्दैविकं युगम् ।
तदेकसप्ततिगुणं मन्वन्तरमिहोच्यते ॥
देवानान्तु कृतं त्रेता द्वापरादिव्यवस्थया ।
न युगव्यवहारोऽस्ति न च धर्म्मादिभिन्नता ॥
किन्तु चातुर्युगं नारं भवेद्दैवयुगं सदा ।
दैवैरेव च सप्तत्या युगैर्मन्वन्तरं भवेत् ॥
देये युगसहस्रे द्वे ब्रह्मणः स्यादहर्निशम् ।
चतुर्युगसहस्रे द्वे नृणां मानेन तद्भवेत् ॥
एकस्मिन् ब्राह्मदिवसे मनवः स्युश्चतुर्दश ।
एवं ब्राह्मेण मानेन दिवसैस्तु त्रिभिः शतैः ।
षष्टिभिर्व्वत्सरः स्यादब्राह्मो वर्षो नृणां यथा ।
ब्राह्मैः पञ्चशता वर्षैः परार्द्धः परिकीर्त्तितः ॥
तदीश्वरस्य दिवसं तावती रात्रिरिष्यते ।
शतेन ब्रह्मणो वर्षैः कालः स्यात् द्विपरार्द्धकः ॥
परार्द्धद्वितयेऽतीते ब्रह्मणः प्रलयो भवेत् ।
प्रलीने ब्रह्मणि परे जगतां प्राकृतो लयः ॥
समस्तजगदाधारमव्ययं यत् परात्परम् ।
तस्य ब्रह्मस्वरूपस्य दिवारात्रञ्च तद्भवेत् ।
तत्परं नाम तस्यार्द्धं परार्द्धमभिधीयते ॥”

इति श्रीकालिकापुराणे २४ अध्यायः ॥*॥
किञ्च ।

“अतिसूक्ष्मपरिज्ञेयो निमेषः परिकीर्त्तितः ।
द्वौ निमेषौ त्रुटिर्नाम द्वे त्रुटी तु लवः स्मृतः ॥
द्विलवः क्षण इत्युक्तः काष्ठा प्रोक्ता दश क्षणाः ।
दश काष्ठाः किला नाम तत्संज्ञा स्याच्च घाटिका ॥
घटिके द्वे मुहूर्त्तः स्यात्तस्त्रिंशत्या दिवानिशम् ।
चतुर्विंशतिवेलाभिरहोरात्रं प्रचक्षते ॥
सूर्य्योदयादिविज्ञेयो मुहूर्त्तानां क्रमः सदा ।
पश्चिमादर्द्धरात्रादिहोरात्राणां विद्यते क्रमः ॥”

इति वह्निपुराणे गणभेदनामाध्यायः ॥*॥
अपरं नृसिंहपुराणे २ अध्याये कौर्म्मे ६ अध्याये च द्रष्टव्यम् ॥

समयकारः, पुं, (समयस्य कारः करणम् ।) सङ्केतः यथा,—

“प्रज्ञाप्तिः परिभाषा श्रेणी सङ्केतसमयकाराश्च ।”
इति चिकाण्डशेषः ॥

समया, अ, (समयनमिति । सम् + इण गतौ + “आः सर्व्वधातुभ्यः ।” उणा० ४।१७४ इति आप्रत्ययः ।) निकटः । अस्य पर्य्यायः निकषा २ हिरुक् ३ । इत्यमरः ॥ (यथा शिशुपालवधे । ६ । ७३ ।

“कुटजानि वीक्ष्य शिखिभिः शिखरीन्द्रं
समयावनौ घनमदभ्रमराणि ।
गगनञ्च गौतनिनदस्य गिरोच्चैः
समया वनौघनमदभ्रमराणि ॥”)

अधः । इति हेमचन्द्रः । ३ । ३ । २५१ ॥
“समया निकटे मध्ये मध्ये च निकषान्तिके ।”
हिरुङ्नाथे विनार्थे च————॥”
इति रुद्रः ॥
हिरुगुक्तस्य सामीप्ये । इत्यमरमाला ॥ कालविज्ञापनम् । इति शब्दरत्नावली ॥

समरः, पुं, क्ली, (सम्यक् ऋच्छन्त्यत्रेति । सं + ऋ गतौ + अप् । यद्वा, सन्यक् ऋच्छत्यत्रेति । “मन्दरकन्दरशीकरेति ।” बाहुलकात् अरप्रत्ययेन साधुः । इत्युज्ज्वलः । ३ । १३१ । युद्धम् । इत्यमरः ॥ (यथा, रघुः । १२।८२।

“इतराण्यपि रक्षांसि मेतुर्वानरकोटिषु ।
रजांसि समरोत्थानि तच्छोणितनदीष्विव ॥”)

समरभः, पुं, (समरवत् भातीति । भा + कः ।) रतिबन्धविशेषः । तस्य लक्षणं यथा,—

“खण्डद्वयसंयुक्तं कृत्वा योषित्पदद्वयम् ।
क्षणौ धृत्वा रमेत् कामी बन्धः समरभः स्मृतः ॥”
इति रतिमञ्जरी ॥

समरूप्यः, त्रि, (समादागत इति । सम + “हेतुमनुष्येभ्योऽन्यतरस्यां रूप्यः ।” ४ । ३ । ८१ । इति रूप्यः ।) समस्य साधोर्भूतपूर्व्वो गवादिः । समशब्दात् रूप्यप्रत्ययेन निष्पन्नः ॥

समर्थः, त्रि, (समर्थयते इति । सं + अर्थ + घञ्यच् । यद्वा, तिथितत्त्वे ।

“ये समर्था जगत्यस्मिन् सृष्टिस्थित्यन्तकारिणः ।
तेऽपि कालेन लीयन्ते कालो हि बलवत्तरः ॥”)

सम्बन्धार्थः । हितः । इत्यमरः ॥ (यथा, महाभारते । १३ । ५ । २६ ।

“नार्हसे मां सहस्राक्ष इमं व्याजयितुं चिरात् ।
समर्थमुपलोभेयं त्वलेयं कथमद्य वै ॥”)

समर्थता, स्त्री, (समर्थस्य भावः । समर्थ+तल् ।) सामर्थ्यम् । शक्तिः । समर्थत्वम् । समर्थशब्दात् तप्रत्ययेन निष्पन्नः ।

समर्थनं, क्ली, (सम्+अर्थ+ल्युट् ।) इदमुचित-मिदमनुचितमिति निश्चयः । तत्पर्य्यायः । संप्रधारणा २ । इत्यमरः । समर्थना ३ । इति शब्दरत्नावली । (यथा, कथासरित्सागरे । २५ । ७३ ।

"शक्तिदेवस्य पार्श्वस्थो विष्णुदत्तः समर्थनम् ।
विनोदपूर्व्वकं कुर्व्वन् कथां कथितवानिमाम् ।")

सामर्थ्यञ्च । (यथा, महाभारते । १ । १३० । १० ।

"य तु ज्ञानगरीयस्त्वात् तपसश्च समर्थनात् ।
अवतस्थे महाप्राज्ञो धैर्य्येण परमेण च ।")

समर्थना, स्त्री, (सम्+अर्थ+युच् । टाप् ।) अभ्यवसायः । यथा । सिन्धुमपि शोष-यामि । इति सुधबोधव्याकरणम् । समर्थनम् । इति शब्दरत्नावली । (यथा, महाभारते । ४ । ६ । २४ ।

"समर्थनासु सर्व्वासु स्थितस्य प्रियमेव च ।
संवर्णयेत्तदैवास्य प्रियादपि हितं वदेत् ।")

समर्थकः, त्रि, (सम्पूर्णोतीति । सम्+अर्थ+ण्वुल् ।) वरदः । इष्टफलदाता देवतादिः । इत्यमरः ।

समर्पणं, क्ली, संपूर्व्वस्य अर्धातोर्णौ (णिचि) कृते पनि कृते ल्युट् (ल्युट्) प्रत्ययनिष्पन्नम् । सम्यक्-प्रकारेणार्पणम् । सौंपन इति भाषा । यथा,

"प्राणायामं ततः कृत्वा प्रणयेत् साधकाग्रणीः ।
देवाय हृदि तत्फलसमर्पणमथाचरेत् ।"

इति तोडलतन्त्रे ३ पटलः ।

समर्य्यादः, पुं, (मर्य्यादया सह वर्त्तमानः ।) समीपः । मर्य्यादायुक्ते, त्रि । इति मेदिनी ।

समर्म, क्ली, (मर्म्मणा सह वर्त्तमानम् ।) विद्धा । इति शब्दरत्नावली । आविद्धे, त्रि । इति भटाधरः । (कलहविशिष्टे च त्रि । यथा, कथासरित्सागरे । १०६ । ८२ ।

"समर्मो भोजि दृष्टोऽद्य चन्द्रोऽनेनेति कौतुकात् ।
अर्द्धोक्ति दर्शितं धात्रा चन्द्रमस्मिन्यामलम् ।")

समवकारः, पुं, (समवर्द्धीयन्ते गद्यपद्यानां यस्मिन्निति । सम्+अव+कृ+घञ् ।) नाटकभेदः । यथा,—

"समवाकारे प्रकरणं भाणः प्रहसनं डिमः ।
व्यायोगः समवकारो वीथ्यङ्कावथ नाटकम् ।
प्रकरणेषु प्रकारः स्युर्भाषा वृत्तिप्रवृत्तयः ।"

इति हेमचन्द्रः ।

(तल्लक्षणादिकं यथा,—

अथ समवकारः ।

"दृष्टं समवकारे तु स्यात् देवासुराश्रयम् ।
समवेतैः त्रिभिर्यत्र सर्गैर्द्वादश नायकाः ।
स्त्रीहेतवो हतास्तत्र तथा देवासुरैरपि ।
अङ्का द्वादशतोऽत्रापि तथा भाषा वृत्तयः ।
अत्र पुष्पं तथा देवा दीप्तरौद्ररसाश्रयः ।

वृत्तयो मन्दकौशिक्यो नात्र विन्दुप्रवेशकौ ।
वीथ्यङ्गानि च तत्र स्युर्यथासाभं त्रयोदश ।
गायत्र्युष्णिङ्नुरुयान्यत्र छन्दांसि विविधानि च ।
त्रिशृङ्गारश्चिकपटः कार्य्यत्रायं त्रिविद्रवः ।
वस्तु द्वादशनाड्यभिर्निष्पाद्यं प्रथमाङ्कगम् ।
द्वितीयेऽङ्के च तिसृभिर्द्वाभ्यामङ्के तृतीयके ।
नाडिका घटिकाद्वयमुच्यते । विन्दुप्रवेशकौ च नाटकोक्तावपि नेह विधातव्यौ । तत्र ।
धर्मार्थकामैस्त्रिविधः शृङ्गारः कपटः पुनः ।
सांसर्गिकः क्षमिश्च देवजो विद्रवः पुनः ।
अचेतनैश्चेतनैश्च चेतनाचेतनैः कृतः ।
तत्र प्राक्तनविरोधेन कृतो धर्म्मशृङ्गारः । अर्थ-लाभार्थकल्पितः अर्थशृङ्गारः । प्रहसन-शृङ्गारः कामशृङ्गारः । तत्र कामशृङ्गारः प्रथमाङ्क एव । अन्ययोस्तु न नियम इत्याहुः । चेतनाचेतना गणाद्याः । समवकीर्य्यन्ते वर्द्ध-न्तेऽर्था अस्मिन्निति समवकारः । यथा, वसुद-मयनम् ।" इति साहित्यदर्पणे । ६ । ५१५—५१६ ।)

समवतारः, पुं, तीर्थम् । समवपूर्व्वकट्धातोर्घञ्-प्रत्ययेन निष्पन्नः । (यथा, किरातार्जुनीये । ५ । ७ ।

"इयतमाकरिभिः करिभिः क्षते-
समवतारसमैरसमैरटेः ।")

समवर्त्ती, [न्] पुं, (समं वर्त्तते इति । सम्+वृत्+णिनिः ।) यमः । इत्यमरः । (यथा, महाभारते । १२ । २०७ । ३५ ।

"शासितारञ्च पापानां पितॄणां समवर्त्तिनम् ।
अदण्डयन्तं सर्व्वभूतानां निधिपञ्च धनेश्वरम् ।")

तुल्यवर्त्तनशीले, त्रि ।

समवायः, पुं, (समवायते इति । सम्+अव+अय+घञ् ।) समूहः । इत्यमरः । (यथा, मनुः । ४ । १०८ ।

"अनध्यायो बहुत्वे समवाये जनस्य च ।")

समन्वयविशेषः । यथा,—

"घटादीनां कपालादौ द्रव्येषु गुणकर्म्मणोः ।
तेषु जातेश्च सम्बन्धः समवायः प्रकीर्त्तितः ।"

इति भाषापरिच्छेदः ।

अवयवावयविनोर्गुणगुणिनोः क्रियाक्रियावतो-र्जातिव्यक्तयोर्नित्यद्रव्यविशेषयोश्च यः सम्बन्धः स समवायः । इति सिद्धान्तमुक्तावली ।

समवेतः, त्रि, (सम्+अव+इण्+क्तः ।) मिलितः । यथा,—

"धर्म्मश्चैते पुरुषैके समवेता गुणास्त्रयः ।
सात्त्विकाः पार्थ भावेन किमकुर्व्वन्त सञ्जय ।"

इति भगवद्गीतायाम् १४ अध्यायः ।

समवायसम्बन्धेन स्थितः । यथा,—

"यत् समवेतं कार्य्यं भवति
तैस्तस्य समवायिकारणं तत् ।"

इति भाषापरिच्छेदः ।

समवृत्तः, त्रि, समवृत्तप्रकारेण आवृत्तिविशिष्टः । श्रीधरस्वामिनः भावार्थप्रकाशेन निष्पन्नः ।

समष्टिः, स्त्री, (सं+अश् व्याप्तौ+क्तिन् ।) समस्तः । मिलितः । यथा,—

"समष्टिरीशः सर्व्वेषां व्यावहारादवेदनात् ।
तदभावात्तदन्ये तु ज्ञायन्ते व्यष्टिसंज्ञया ।"

इति प्रायश्चित्ती ।

समष्ठिलः, पुं, (सम्यं तिष्ठतीति । स्था+बाहु-लकात् डलच् ।) चुपविशेषः । कौकुयो इति हिन्दी भाषा । तत्पर्य्यायः । अक्षीरः २ नखाख्यः ३ आस्यगन्धः ४ कोकायः ५ कफहरि-फलः ६ उपदंशः ७ । अस्य गुणाः । कटुत्वम् । उष्णत्वम् । वश्यत्वम् । सुखविशोधनत्वम् । कफवातप्रशमनत्वम् । दाहकारित्वम् । दीपन-त्वञ्च । इति राजनिर्घण्टः ।

समष्ठिला, स्त्री, (समष्ठिल+स्त्रियां टाप् ।) गण्डीरः । इत्यमरः । के शया इति ख्याते ग्रामठ इति ख्याते । अनुपदेशके ग्रामे इति केचित् । गुण्ठिया इति ख्याते ग्रामे इति सर्व्वानन्दः । गण्डीनि अस्त्यस्मिन्निति अर्शआदि-त्वादच् । गण्डीरः पद्मः । गण्डं रोगविशेषं ईरयति गण्डीरः मूरणकन्दादिरिति भरतः । समव-गस्य लातीति समष्ठिला ड: मनीषादित्वात् वस्य लत्वम् । इति भरतः ।

समष्ठीला, स्त्री, समष्ठिला । यथा,—

"समष्ठीरपि च गण्डीरः समष्ठीला समष्ठिला ।"

इति शब्दरत्नावली ।

समसनं, क्ली, (सम्+असु+ल्युट् ।) संक्षेपकम् । इत्यमरः । (समासः । इति केचित् ।)

समसप्तिः, पुं, (समेषां सर्व्वेषां सप्तिर्यत्र ।) कल्पान्तः । महाप्रलयः । इति हेमचन्द्रः । २ । ७५ । (स्त्री, समा सप्तिरिति ।) तुल्य-गत्यनञ् ।

समस्तं, त्रि, (सम्+अस्+क्तः ।) सम्पूर्णम् । तत्पर्य्यायः । समग्रं २ सर्व्वं ३ विश्वम् ४ अशेषम् ५ कृत्स्नम् ६ निखिलम् ७ अखिलम् ८ निःशेषम् ९ समस्तम् १० सकलम् ११ पूर्णम् १२ अखण्डम् १३ अनूनकम् १४ । इत्यमरः । अनलम् १५ । इति शब्दरत्नावली । अशून्यम् १६ अनूनम् १७ । इति भटाधरः । (यथा, विष्णुपुराणे । १ । ४ । ३३ ।

"सङ्क्षान्यशेषाणि पटाक्षराणी
ग्रासं समस्तानि यथौषि देव ।")

समस्यः, त्रि, (सम्ये भिक्षतीति । स्था+कः ।) समानः । समभावेन स्थितः । समाख्यपूर्व्वक-स्याधातोर्ण्यन्तप्रत्ययेन निष्पन्नः । (यथा, हरि-संहितायाम् । १० । २० ।

"परतो न विशेषयन्ति
विषमसमज्ञानात् मानुषमसमाः ।")

समस्यां, स्त्री, (समा स्त्रियां ।) मध्यमवयसी मध्यदेशः । समत्वभावः । अन्तर्वेदिः ८ । इति हेमचन्द्रः ।

समस्या, स्त्री, (समस्तं सत्ता संक्षिप्तमनया । सम्+अस्+यत् । संज्ञापूर्व्वकत्वात् दुष्टसमाः ।) समस्ते संक्षिप्तेऽर्थजाते समस्ता व्याप्ता एव यत्र तत्र संक्षिप्तार्थजातव्याप्तौ यत्र [विशेषे-

समाग समाधा समाधिः

प्रारब्धस्य कर्मणः फलभोगेन क्षयमिच्छतां मुमुक्षूणां सञ्चितेन प्रारब्धेन वा भोगाभ्यामेव क्षयमपश्यतां सम्यगिति साधनौ। दीपस्य बाधेनैव ध्वान्ते लिखितं पुस्तकम्। यथा,—
"मुक्तौ; किं साधनाद्यैः स्यात्फलमत्रैव लभ्यते।
सत्यं ज्ञानं विना तैस्तु ध्वान्तं दीपैरिवाखिलम्॥"

"कैर्मया सह योद्धव्यमस्मिन् रणसमुद्यमे।
योत्स्यमानानवेक्षेऽहं य एतेऽत्र समागताः॥"
इति भगवद्गीतायाम्। १। २३।

समागमः, पुं, (सं + आ + गम + घञ्।) सम्यगा-

विषयेभ्यो निगृहीतस्वान्तःकरणस्य अवणादौ सद्गुणेषु सदुपकारेषु च समानिलादिसाधन-विषयेषु समाधिनैरन्तर्येण सन्निधानं समाधानमित्यर्थः। इति तट्टीकायां धरः। (यथा, भागवते। ६। २८। ६।
"सन्धिक्षणामेकदेशे मनसा प्राणधारणा।

अपि च तत्रैव २४० अध्याये।
"द्वादशध्यानपर्य्यन्तं मनो ब्रह्मणि यो नरः।
तुष्टे तु संयतो मुक्तः समाधिः सोऽभिधीयते॥
ध्येयमेव हि सर्व्वत्र ध्याना तन्मयतां गतः।
पश्यति हतरहितं समाधिः सोऽभिधीयते॥"
अन्यच्च विष्णुपुराणे। ६। ७। ६०।
"तस्यैव कल्पनाहीनं स्वरूपग्रहणं हि यत्।
मनसा ध्याननिष्पाद्यं समाधिः सोऽभिधीयते॥"
अपरञ्च।
"इमं गुणममाहारमनात्मत्वेन पश्यतः।
अन्तः प्रीतलता यस्य समाधिरिति कथ्यते॥"
इति योगवाशिष्ठे उपशमप्रकरणम्॥
योगाङ्गविशेषः। यथा। "समाधिस्तु द्विविधः। सविकल्पको निर्व्विकल्पश्चेति। तत्र सविकल्पको नाम ज्ञाताज्ञानादिविकल्पलयानपेक्षया द्वितीयवस्तुनि तदाकाराकारितायाश्चित्तवृत्तेरवस्थानम्। तदा ध्येयगजादिभावेऽपि स्वाङ्गवत् द्वैतभावेऽप्यद्वैतं वस्तु भासते। तदुक्तमभियुक्तैः।
"दृश्यि स्वरूपं गगनोपमं परं
सकृद्विभातं त्वजमेकमव्ययम्।
अलेपकं सर्व्वगतं यदद्वयं
तदेव चाहं सततं विमुक्तम्॥
दृश्यिस्तु पुद्गलोऽहमविक्रियात्मको
न मेऽस्ति बद्धो न च मे विमोचः॥'
इत्यादि॥*॥
निर्व्विकल्पकस्तु। ज्ञाताज्ञानादिभेदलयापेक्षया द्वितीयवस्तुनि तदाकाराकारितायां बुद्धिवृत्तेरतितरामेकीभावेनावस्थानम्। तदा तु जलाकाराकारितलवणानवभासेन जलमात्रावभासवद्द्वितीयवस्त्वाकाराकारितचित्तवृत्त्यनवभासेनाद्वितीयवस्तुमात्रमेवावभासते। ततश्चास्य सुषुप्तेरभेदशङ्का न भवति उभयत्र वृत्त्यभावे समानेऽपि तत्सद्भावासद्भावमात्रेणानयोर्भेदोपपत्तेः॥ अस्याङ्गानि। यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयः। तत्र अहिंसासत्यास्तेयब्रह्मचर्य्यापरिग्रहाः यमाः।१। शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः।२ करचरणादिसंस्थानविशेषलक्षणानि पद्मस्वस्तिकादीनि आसनानि।३। रेचकपूरककुम्भकलक्षणाः प्राणनिग्रहोपायाः प्राणायामाः।४। इन्द्रियाणां स्वस्वविषयेभ्यः प्रत्याहरणं प्रत्याहारः।५। अद्वितीयवस्तुन्यन्तरिन्द्रियधारणं धारणा।६। तत्राद्वितीयवस्तुनि विच्छिद्य विच्छिद्य अन्तरिन्द्रियवृत्तिप्रवाहो ध्यानम्।७। समाधिस्तु उक्तः सविकल्पक एव।८। एवमस्याङ्गिनो निर्व्विकल्पकस्य लयविक्षेपकषायरसास्वादलक्षणाश्चत्वारो विघ्नाः सम्भवन्ति। लयस्तावत् अखण्डवस्त्वनवलम्बनेन चित्तवृत्तेर्निद्रा।१। अखण्डवस्त्वनवलम्बनेन चित्तवृत्तेरन्यावलम्बनं विक्षेपः।२। लयविक्षेपाभावेऽपि चित्तवृत्तेः रागादिवासनया स्वरूपीभावात् अखण्डवस्त्वनवलम्बनं कषायः।३। अखण्डवस्त्वनवलम्बनेनापि चित्तवृत्तेः सविकल्पानन्दास्वादनं रसास्वादः। समाधारम्भसमये सविकल्पानन्दास्वादनं वा।४। अनेन विघ्नचतुष्टयेन रहितं चित्तं निर्व्वातदीपवत्सदखण्डचैतन्यमात्रमवतिष्ठते यदा तदा निर्व्विकल्पकः समाधिरित्युच्यते॥*॥ तदुक्तम्।
"लये सम्बोधयेत् चित्तं विक्षिप्तं शमयेत् पुनः।
सकषायं विजानीयात् शमप्राप्तं न चालयेत्॥
नास्वादयेद्रसं तत्र निःसङ्गः प्रज्ञया भवेत्॥"
इत्यादि। यथा दीपो निवातस्थो नेङ्गते इत्यादि च। इति श्रीसदानन्दयोगीन्द्रविरचितवेदान्तसारः॥ (स्वनामख्यातवैश्यविशेषः। अयं हि महामायामाराध्य परं ज्ञानमलभत्। अस्य विशेषवृत्तान्तस्तु देवीमाहात्म्यतो द्रष्टव्यः॥)
समाधिस्थः, त्रि, (समाधौ तिष्ठतीति। स्था+कः।) समाधियुक्तः। यथा,—
"मनः संकल्परहितमिन्द्रियार्थानचिन्तयन्।
यस्य ब्रह्मणि संलीनं समाधिस्थः स कीर्त्तितः॥
ध्यायतः परमात्मानमात्मस्थं यस्य योगिनः।
मनस्तत्त्वगतां याति समाधिस्थः स कीर्त्तितः॥"
इति गारुडे गीतासारे २४० अध्यायः॥
समानं, त्रि, (समानीति सम्यक्प्रकारेण प्राणितीति। सम्+आ+अन+क्युः। यद्वा, समानं मानमस्य। समानस्य च्छन्दसीति सः।) सत्। समम्। (यथा, रघुः। २। ७४।
"भुजे भुजङ्गेन्द्रसमानसारे
भूयः स भूमेर्धुरमाससञ्ज॥")
एकम्। इति मेदिनी॥ (यथा, मनुः।४।४०।
"नोपगच्छेत् प्रमत्तोऽपि स्त्रियमार्त्तवदर्शने।
समानप्रवने चैव न प्रयोतं तया सह॥"*॥
मानेन सह वर्त्तमानमिति विग्रहे गर्व्वसहितञ्च। यथा, भागवते। १। १६। ३६।
"स्वैर्यं समानमहरत् मधुमानिनीनां
रोमोत्सवो मम यदङ्घ्रिविटङ्कितायाः॥")
समानः, पुं, (समन्तादनित्यनेनेति। सम्+अन+घञ्।) शरीरस्थवायुविशेषः। स तु नाभिसंस्थितः। इत्यमरभरतौ॥ (यथा,—
"हृदि प्राणो गुदेऽपानः समानो नाभि-
संस्थितः॥")
वर्णभेदः। इति हेमचन्द्रः॥ सतु एकस्थानोच्चार्य्यवर्णः। यथा। सान्यन्त्येकस्थानत्वम्। इति मुग्धबोधव्याकरणम्॥
समानकालीनः, त्रि, (समानकाले भवः। समानकाल+खः।) तुल्यकालोत्पन्निकः। यथा। गोषु दुह्यमानासु आगतः दुग्धास्वागत इत्यादौ समानकालीनत्वं भाषते। तेन गोविषयकवर्त्तमानदोहनकालीनगमनानुकूलकृतिमान्। एवं गोविषयकातीतदोहनसमानकालीनातीतगमनानुकूलकृतिमानिति बोधः। इति सारमञ्जरी॥
समानोदकः, पुं, (समानं एकं तर्पणकाले देयमुदकं यस्य।) एकोदकः। स तु ज्ञातिविशेषः। तर्पणे समानं एकमुदकमस्य। यथा,
"जारो नङ्गः सगोत्रस्तु स्वजनज्ञातिबान्धवाः।
सकुल्यबन्धुदायादस्वसमानोदका अपि॥"
इति जटाधरः॥
स तु चतुर्दशपुरुषपर्य्यन्तः। जन्मनामस्मृतिपर्य्यन्तश्च। तत्र आत्मस्येकादशपुरुषावधिचतुर्दशपुरुषपर्य्यन्तस्याशौचं पक्षिणी द्वितीयस्येकाहः। यथा। उदकक्रियामधिकृत्य पारस्करः। सर्व्वे ज्ञातयो भावयन्ति। आसप्तमादृशमादा समानग्रामवासेन यावत् सम्बन्धमनुस्मरेयुर्व्वा इति भावयन्ति निगदन्ति अत्र यावत् सम्बन्धमनुस्मरेयुरेककुलजाता वयमिति स्मरणं भवतीत्यनेनैव सर्व्वेषामुदकदाने प्राप्ते यदासप्तमादृशमादुक्तं तत्सन्निकर्षतारतम्येनाशौचभेदेऽप्युदककर्म्म समानार्थमिति। अशौचभेदस्तु सप्तमपुरुषपर्य्यन्तं सपिण्डत्वादृशाहः। ततश्च दशमपुरुषपर्य्यन्तं त्र्याहः। तथा च विष्णुहरीतौ।
"दशाहेन सपिण्डास्तु शुध्यन्ति ननसूतके।
त्रिरात्रेण सकुल्यास्तु स्नात्वा शुध्यन्ति
गोत्रजाः॥"
ततश्चतुर्दशपुरुषपर्य्यन्तं पक्षिणी ततश्च जन्मनामस्मृतिपर्य्यन्तमेकाहः। तथा च मिताक्षरायां विवादचिन्तामणौ बृहन्मनुः।
"सपिण्डता तु पुरुषे सप्तमे विनिवर्त्तते।
समानोदकभावस्तु निवर्त्तेताचतुर्दशात्॥
जन्मनामस्मृतेरेके तत्परं गोत्रमुच्यते॥"
अत्र समानोदकत्वे द्विविधे पूर्व्वत्र गौतमः पक्षिणीमसपिण्डे। परत्र हारीतः। मातामहे चिरात्रं स्यादेकाहश्चसपिण्डके इति। अत्रैव गोत्रजानामहः स्मृतमिति जावालवचनम् ततः परं सर्व्वथा समानोदकतानिवृत्तेः स्नानमात्रमिति स्नात्वा शुध्यन्ति गोत्रजा इति दृष्टस्यनुक्तत्वादिति। इति शुद्धितत्त्वम्॥
समानोदर्य्यः, पुं, (समाने उदरे शयितः। "समानोदरे शयित ओ चोदात्तः।" ४।४।१०८। इति यत्। "विभाषोदरे।" ६। ३। ८८। इति पक्षे यादेशो न।) सहोदरः। इत्यमरः॥ (यथा, भट्टिः। ७। ८६।
"समानोदर्य्यमसाकं जटायुष स्नुषादरात्॥")
समापः, पुं, (समा आपो यस्मिन्। ऋक्पूरित्यः। "समाप ईत्वे प्रतिषेधो वक्तव्यः।" ६।३।६७। इत्यस्य वार्त्तिकोक्त्या ईत्वप्रतिषेधः।) देवयजनम्। इति मुग्धबोधव्याकरणम्॥
समापकः, त्रि, समापनकर्त्ता। समापयति यः संपूर्व्वाप्नुधातोर्ण्वुलप्रत्ययेन निष्पन्नः। यथा,—
"व्याख्यातास्तिवादयस्तेषाञ्च प्रधानत्वं वाक्यसमापकत्वात्।" इति दुर्गादासः॥
समापनं, क्ली, (सम्+आप्+ल्युट्।) परिच्छेदः। समाप्तिः। (यथा, मनुः। ५। ८८।
"व्याहृतीनां तु सर्व्वासां दातारं परमेष्ठिनम्।
समाप्ने तूदकं कृत्वा त्रिरात्रेणैव शुध्यति॥")

वधः । इति मेदिनी ॥ समाधानम् । इति विश्वः ॥ लब्धम् । इति धरणिः ॥

समापन्नं, त्रि, (सम्+आ+पद्+क्तः ।) समाप्तः । प्राप्तः । क्लिष्टः । वधः । इति विश्वः ॥

समापिका, स्त्री, (समापयतीति । सम्+आप+ण्वुल् । टापि अत इत्वम् ।) वाक्यसमापकक्रिया । तच्च तिवादयो भवन्ति । यथा । देवदत्तो गच्छति । क्वचित् क्त्वान्तादिपदेनापि वाक्यसमाप्तिः । यथा । स्नात्वा दृष्ट्वा स्त्रियो जग्मुः । क्वचित् तथाद्यन्तक्रियाया अपि वाक्यसमापकत्वम् । यथा । मया कां दिशं गन्तव्यम् । कार्द्दन्तिकी क्रिया असमापिका । तच्च शतृचादयो भवन्ति । यथा । गच्छन् सुकृती । सुप्त्वा व्रजति । इति व्याकरणटीका ॥

समापितं, त्रि, (सम्+आप्+णिच्+क्तः ।) कृतसमापनम् । यथा,—

"प्रारब्धं मलमासात् प्राक् यत् कर्म्म न समापितम् ।
यागते मलमासेऽपि तत् समाप्यं न संशयः ॥"

इति मलमासतत्त्वम् ॥

समाप्तः, त्रि, (सम्+आप्+क्तः ।) समाप्तप्रायः । समाप्तिविशिष्टः । यथा,—

"समाप्ते यदि जानीयान्मयेतदन्यथाकृतम् ।
यत्तत्तदन्यथाभूतं तत एव समापयेत् ॥"

इति तिथ्यादितत्त्वम् ॥

समाप्नाः, पुं, (समाप्नाय अलतीति । अल+अच् ।) पतिः । इति संक्षिप्तसारोणादिवृत्तिः ॥

समाप्तिः, स्त्री, (सम्+आप्+क्तिन् ।) अवसानम् । (यथा, कुमारे । ३ । २७ ।

"सद्यः प्रबालोद्गमचारुपत्ने
नीते समाप्तिं नवचूतवाणे ।
निवेशयामास मधुर्दिरेफान्
नामाक्षरायीव मनोभवस्य ॥")

समर्थनम् । इति मेदिनी ॥ परिप्राप्तिः । इति शब्दरत्नावली ॥

समाप्नार्था, स्त्री, (समाप्ना अर्थो यस्याः ।) समस्या । इति समासार्थशब्दटीकायां भरतः ॥

समाप्यं, त्रि, (सम्+आप्+ण्यत् ।) समापनीयम् । समापितव्यम् । अस्य प्रमाणं समापितशब्दे द्रष्टव्यम् ॥

समायोगः, पुं, (सम्+आ+युज+घञ् ।) संयोगः । (यथा, मनुः । ९ । ३३ ।

"क्षेत्रभूता स्मृता नारी बीजभूतः स्मृतः पुमान् ।
क्षेत्रबीजसमायोगात् सम्भवः सर्व्वदेहिनाम् ॥")

समवायः । प्रयोजनम् । इति मेदिनी ॥

समालभी, [न्] पुं, (समालभते इति । सम्+आ+लभ+णिनिः ।) भूतृणम् । इति राजनिर्घण्टः ॥

समालम्भः, पुं, (सम्+आ+लभ+घञ् । "उपसर्गात् स्वञ्जशब्दयोः ।" ७ । ३ । ९७ । इति नुम् ।) कुङ्कुमादिविलेपनम् । इत्यमरः ॥ (यथा, महाभारते । १३ । १७१ । ६ ।

"गोरोचनासमालम्भो वचाहस्तश्च यो भवेत् ।
घृतान्नतश्च यो दद्यात् मत्तश्चैव तत्परायणः ।
ये च मांसं न खादन्ति तान् ग्रहीतुं हिंसितुम् ॥"

मारणम् । यथा, महाभारते । १२ । ३४ । २८ ।

"इत्या पशुसमालम्भं नैव कुर्य्यान्न कारयेत् ॥")

समालम्भनं, क्ली, (सम्+आ+लभ+ल्युट् ।) कुङ्कुमादिविलेपनम् । तत्पर्य्यायः । विच्छित्तिः २ कषायः ३ । इति त्रिकाण्डशेषः ॥ समालम्भः ४ विलेपनम् ५ । इत्यमरः ॥ (यथा, रामायणे । ४ । २६ । २८ ।

"समालम्भनमादाय गोरोचनमनःशिलाम् ।
आचक्षुश्चैव सुदिता वराः कन्याश्च षोडश ॥")

सम्यङ्मारणम् । सम्यक्स्पर्शनम् । यथा । अत ऊर्द्ध्वमसमालम्भनमादशरात्रादिति गोभिलसूत्रम् ॥

समाली, स्त्री, कुसुमाकरः । इति त्रिकाण्डशेषः ॥

समावर्त्तनं, क्ली, (सम्+आ+वृत्+ल्युट् ।) वेदाध्ययनानन्तरं गार्हस्थ्याधिकारप्रयोजकं कर्म्म । यथा । "अथ समावर्त्तनम् । ज्योतिषे । 'भौमभार्गवयोर्वारे नक्षत्रे च व्रतोदिते ।
ताराचन्द्रविशुद्धौ च समावर्त्तनमिष्यते ।'
गोभिलः । अथाङ्गवनम् । अथ व्रतानन्तरमाङ्गवनं स्नानं कुर्य्यादिति शेषः । उत्तरतः पुरस्तादाचार्य्यकुलस्य परिव्रजनं भवति । आचार्य्यगृहादुत्तरस्यां पूर्व्वस्यां वा स्नानार्थं माहृतं स्नानं कुर्य्यात् । अत्र प्राग्ग्रेषु दर्भेषु उदगाचार्य्य उपविशति तत्राहृते उदक् उदङ्मुखः प्राक् ब्रह्मचार्युदग्ग्रेषु दर्भेषु । प्राक् प्राङ्मुख उपविशतीत्यन्वयः । सर्व्वौषधिविप्रुषाभिरङ्गिरस्वतीभिः शुतीयाभिराचार्य्योऽभिषिञ्चेत् । सर्व्वौषधयश्च ।
'व्रीहयः शालयो मुद्गा गोधूमाः सर्षपास्तिलाः ।
यवाश्चौषधयः सप्त विपदो घ्नन्ति धारिताः ॥'
इति छन्दोगपरिशिष्टोक्ताभिः सह या आपो विप्रुषो विषक्ता उत्पीडितास्ताः सर्व्वौषधिविप्रुषाभिरङ्गिरस्वतीभिः शुतीयाभिरित्यनेन मन्त्रेण ब्रह्मचारी आत्मानमभिषिञ्चेत् । ओम् यशसे तेजसे इति च । आत्मानमभिषिञ्चतीति वर्त्तते । येन स्त्रियमक्षत्वनमिति च । आत्मानमभिषिञ्चतीति वर्त्तते । तूष्णीं चतुर्थम् । आत्मानमभिषिञ्चतीति वर्त्तते । अभिषेकः शिरसि कर्त्तव्यः शिरः प्रधानमङ्गानामिति वचनात् । उपोत्थायादित्यमुपतिष्ठेत उद्वयं स्नातस्त्वमित्येतत्प्रभृतिमन्त्रेण । आचार्य्यमपीदानुत्थाय उद्वयन्नित्येतत्प्रभृतिमन्त्रेण मा हिंसीरित्यन्तमन्त्रेणादित्यमुपतिष्ठेत उपाक्मन्त्रेण चेत्यात्मनेपदम् । मेखलामवसृजते उदुत्तमं वरुणमिति । अवसृजते अधस्तादवतारयति अवशब्दो अधस्तादर्थे । ब्राह्मणान् भोजयित्वा स्वयं शुक्ला कैशश्मश्रुरोमनखानि वापयतीति शिखावर्ज्जम् । ब्राह्मणान् भोजयित्वा स्वयं शुक्ला नापितेन मुण्डयीत । अत्र शिखावर्ज्जमिति वचनात् प्राक् सशिखं वपनमिति दर्शयति । उक्तञ्च । सशिखं वपनं कार्य्यमात्मज्ञानात् ब्रह्मचारिणा इति । स्नात्वा अलङ्कृत्याहते वाससी परिधाय स्रजमाबध्नीत श्रीरसि मयि रमस्वेति । अलङ्कृत्य कुण्डलादिनात्मानं योजयित्वा आहते ।
'ईषद्धौतं नवं शुभ्रं सदृशं यन्न धारितम् ।
आहतं तद्विजानीयात् सर्व्वकर्म्मसु पावनम् ॥'

इति वशिष्ठोक्तलक्षणे ।

ईषत् सूक्ष्मम् । न धारितं न परिधानादि कृतम् । स्रजं ग्रथितपुष्पं आबध्नीत शिरसीति शेषः । श्रीरसीति मन्त्रेण । नेचौ स्यो नयतं मामित्युपानहौ । आबध्नीतेत्यनुवर्त्तते । उपानहौ चर्म्मपादुके योग्यत्वात् पादयोः । गन्धर्व्वोऽसीति मन्त्रेण वैश्वं दण्डं गृह्णाति । वैश्वं वंशप्रभवं गन्धर्व्वोऽसीति मन्त्रेण । आचार्य्यं उपरिष्टकमभ्येत्याचार्य्यपरिदर्शमीक्षते । यच्चक्षिव चक्षुः प्रियो मे भूयासमिति । उपरिष्टकं शिष्यादिसभासहितं अभ्येत्याभिमुखेन गत्वा आचार्य्यं परिदर्शयते यच्चक्षिति मन्त्रेण । उपोपविश्य सुखान् प्राणान् संसृजन् ओष्ठापिधानं नखकृन्तीति उपाचार्य्यसमीपे सुखान् प्राणान् सुखप्रभवान् वायून् संसृजन् ज्ञातकः । ओष्ठापिधानमिति मन्त्रं जपेत् । आचार्य्यमाचार्य्योऽर्घ्यं वेत् । अत्रावसरे स्नातकं विवाहोक्तवरार्हणविधिनार्चयेत् । तदङ्गानि गन्धपुष्पाभ्याम् । गोयुक्तं रथमुपकल्प्य पत्नी क्रूरपाकूराभिरन्वेत् । वनस्पतिविटङ्को हि भूया इति । पत्नी चक्रं । क्रूरं रथिकस्यानुम् । पाकूरं रथस्येत्यर्थः । वनस्पतीति मन्त्रेणाभिमन्त्रयेत् सूत्रेत् । आस्था ते जयतु जैत्रानीत्यातिष्ठति । रथमारुह्य आस्था ते जयतु जैत्रानीति वन-

स्नते इत्यादिमन्त्रस्य चतुर्थपादेनान्वितिष्ठति। उपविशति प्राग्वा उदग्वाभिप्रयाय प्रदक्षिणमावृत्या उपयाति। तेन रथेन प्राङ्मुखो वा प्रयाय प्रकर्षेण गत्वा उपयाति आचार्य्यसमीपमागच्छति उपयातायाचार्य्यमिति कोहनीयाः। उपयातायाचार्य्यसमीपमागतायार्घ्यं देयमिति कोहनीया आचार्य्या आहुः। रघाभावेऽपि मन्त्रपाठाचारः। पचकरणे तण्डुलादावघातादिवत्। अस्य कर्म्मणः समावर्त्तनसंज्ञापि।

'गुरुणानुमतः स्नात्वा समावर्त्तो यथाविधि।
उद्वहेत द्विजो भार्य्यां सवर्णां लक्षणान्विताम्॥'

इति मनूक्तेः॥

स्वं गौनकृत्कारिकायाम्। कुर्व्वीत स्वयमेवेतत् समावर्त्तनसंज्ञकम्।" इति संस्कारतत्त्वम्॥

स च समायः, पुं, सम्+इण्+घञ्। इत्यमरटीकायां भरतः। (यथा, भागवते। २। ८। १६।

"यस्मिन् कर्म्मसमावायो यथा येनोपपद्यते।
गुणानां गुणिनां चैव परिणामसमीक्षताम्॥")

समावृतः, त्रि, (सम्+आ+वृ+क्तः।) सम्यक्प्रकारेण आवृतः। यथा,—

"अथ त्वं कालि सर्व्वेषु सर्व्वभूतसमावृते।
रक्ष मां निजभूतेभ्यो बलिं मुङ्क्ष्व नमोऽस्तु ते॥"

इति दुर्गापूजाप्रयोगतत्त्वम्॥

समावृत्तः, पुं, (सम्+आ+वृत्+क्तः।) वेदाध्ययननिवृत्तः। तत्पर्य्यायः। स्नात्वाव्रतः २। इत्यमरः॥ साङ्गवेदाध्ययनानन्तरं लब्धसमिदानीं गृहस्थो भव इति गार्हस्थ्याय प्राप्तानुमतिः समावृत्त उच्यते। समावर्त्तत अध्ययनान्निवर्त्तते इति समाङ्पूर्ब्बाद्वृतेः कर्त्तरि क्ते समावृत्तः। इति भरतः॥

"अतः परं समावृत्तः कुर्य्यादारपरिग्रहम्।"

इति उद्वाहतत्त्वम्॥ ७॥

तस्य सर्व्वाशौचे मुख्यं यथा अशौचाधिकारे व्याख्यास्यमः। अनुभाविनाश्च परिवापनमिति। अनुभाविनां स्नात्वाशौचमनुभवतां समावृत्तानां सर्व्वाशौचे सुलभम्। यत् पुनरापस्तम्बः। न समावृत्ता वपेयुरन्यत्र वीवाहादित्येके। वीवाहान् दर्शपौर्णमासाग्न्याधेयेष्टिपशुसोमेभ्यश्च समावृत्ता यद्यस्या न वपेयुः। इत्येकेषां मतम्। तत् कामनापरम्। इति शुद्धितत्त्वम्॥

समावृत्तकः, पुं, (समावृत्त एव। स्वार्थे कन्।) समावृत्तः। इति शब्दरत्नावली॥

समावेशः, पुं, (सम्+आ+विश्+घञ्।) एकत्र सहावस्थानम्। यथा। अर्थैक्यात्तत्र धर्म्मस्य यत्रयत्रनिषादनुव्यवहार्य्यसाधनत्वम्। अनर्थसाधनत्वं यत्रयत्रनिषादसाधनत्वम्। न चानयोरेकत्र समावेशः। इति निषादित्वे वैधर्म्यिसाधिकारः॥ (यथा, हरिवंशे भविष्यपर्व्वणि। १। ६।

"चन्द्रस्यरूपमादाय जगतः प्राणदो हरिः।
तथौषधीश्च यत्पुण्याः कलाभिः पर्य्यपालयत्॥")

समावेशितः, त्रि, सह+आ+विश्+णिच्+क्तः। प्रविष्टः। समावेशप्राप्तः। समावेश-शब्दादितप्रत्ययेन निष्पन्नः॥

समाश्रयः, पुं, (सम्+आ+श्रि+अच्।) सम्यगाश्रयः। (यथा, रघुः। ८। १२।

"तमरण्यसमाश्रयोन्मुखं
शिरसा वेष्टनशोभिना सुतः।
पितरं प्रणिपत्य पादयो-
रपरित्यागमयाचतात्मनः॥")

सम्यगाधारः। सहायः। समाङ्पूर्ब्बकश्रिधातोरलप्रत्ययेन निष्पन्नः॥

समाश्रितः, त्रि, (सम्+आ+श्रि+क्तः।) सम्यक्प्रकारेणाश्रितः। यथा,—

"रवेः कवेः किं समरस्य सारः
सुधेर्भयं किं किमदन्ति भृङ्गाः।
सदा भयघ्नाश्च भवन्ति केषां
भागीरथीतीरसमाश्रितानाम्॥"

इत्यन्तर्वाहिका॥

समाशः, पुं, (सम्+अस्+घञ्।) संक्षेपः। (यथा, मनुः। ७। २०२।

"सर्व्वेषान्तु विदित्वैषां समासेन चिकीर्षितम्।
स्थापयेत् तत्र तद्वंश्यं कुर्य्याच्च समयक्रियाम्॥")

समर्थनम्। इति मेदिनी॥ समाहारः। इति एकशेषः॥ एकपदम्। इति हेमचन्द्रः॥ समसनं पदयोः पदानां वा एकपदीकरणं समासः। इति संक्षिप्तसारव्याकरणम्॥ स च षड्विधः। द्वन्द्वः १ बहुव्रीहिः २ कर्म्मधारयः ३ तत्पुरुषः ४ द्विगुः ५ अव्ययीभावः ६। तेषां लक्षणं यथा। भिन्नान्येकार्थद्रव्यादिसंख्यादीनां च-ष-य-न-या-। इति मुग्धबोधव्याकरणम्॥ ८॥

अपि च।

"नाम्नां समासो युक्तार्थलक्षणा योग्या विभक्तयः॥"

इति वैयाकरणाः। तस्य समान्यलक्षणं यथा। अभिधानाश्रितलोपाभाववद्व्यमध्यवर्त्तिविभक्तिशून्यनाम-बहुदायत्वं समासत्वम्। तत्र कर्म्मधारय-द्विगुतत्पुरुष-बहुव्रीहि-द्वन्द्वाव्ययीभावाः षट् समासा भवन्ति। तत्र कर्म्मधारयत्वं समासनियतलक्षणाशून्यसंख्यासंख्यावाचक पूर्ब्बपदकान्यमध्यवर्त्तिविभक्तिशून्यतुल्याधिकरणपदसमुदायत्वम्। यथा नीलोत्पलमित्यादि॥ १॥

तत्र द्विगुत्वम्। समासाधीनलक्षणाशून्यमध्यपदवर्त्तिविभक्ति-शून्यार्थसंख्यासंख्यावाचक-पूर्ब्बपदक-तुल्याधिकरणनामसमुदायत्वम्। स च तद्धितार्थे विषयीभूते तद्धितार्थाभिधेये उत्तरपदे वा समाहारे वाभिधेये भवति। उत्तरपदे पारिभाषिकं यत्पदघटितसमासान्तर्ब्बर्त्ति द्विगुत्वपदं तत् पदम्। तेन च पञ्चगवो धनमित्यत्र पञ्चगवधनमित्यादिप्रयोगो न तु पञ्चगवानि धनानि इति। तद्धितार्थे विषयीभूते यथा पञ्चगवेरण्यः पञ्चवाणिज्यः पञ्चनापितिः इत्यादिकमित्यादि। तद्धितार्थाभिधेये यथा पञ्चकपालः ओदनः। समासस्य संस्कृतोर्थः संस्कारे प्रयोज्यतासम्बन्धेन पञ्चकपालस्थान्वयी शुल्वसिद्धेश्चित्रात् तथा च पञ्चकपालप्रयोज्यसंस्काराश्रयाभिन्न ओदनः। तद्धितार्थस्य समासेनाभिधानात् न तद्धितप्रत्ययः। समाहारेऽभिधेये यथा पञ्चगवं चतुष्पथं द्विपात्कं त्रिभुवनं चतुर्युगमित्यादयः। उत्तरपदे यथा। पञ्चगवधनः इत्यादि॥२॥

तत्पुरुषत्वन्तु। समासाधीनलक्षणिकविशेषणपदकमध्यवर्त्तिविभक्ति-शून्यनामसमुदायत्वम्। यथा। राजपुरुषः। कष्टाश्रितः। पुरुषोत्तमः। इत्यादि॥ ३॥

समासप्रयुक्तलक्षणानियतोत्तरपदकसमासत्वं बहुव्रीहित्वम्। समासाधीनलाक्षणिकविशेषणवाचकपदकमध्यवर्त्तिविभक्तिशून्यनामसमुदायत्वं वा सत्त्वन्विलाक्षणिकत्वव्याप्योत्तरपदकत्वं वा बहुव्रीहित्वम्। बहुव्रीहिश्च द्विविधः। समानाधिकरणो व्यधिकरणश्च। यथा चित्रगुः। गृहधान्यकक्षैः। आरूढवानरो वृक्षः। इत्यादि॥ ४॥

स्वघटकीभूतप्रत्येकपदार्थान्वितार्थकसोत्तरविभक्तिकमध्यवर्त्ति विभक्तिशून्यनामसमुदायत्वं द्वन्द्वत्वम्। यथा धवखदिरपलाशाश्छिन्धि। इति। द्विविधो द्वन्द्वः। इतरेतरयोगः समाहारश्च। यत्र समाहारस्यावयवार्थः प्रधानं तत्रेतरेतरयोगः द्विवचनेऽपि तत्रैव। यथा। देवदत्तयज्ञदत्तौ। धवखदिरपलाशाः। इति। यत्र संहतिप्राधान्यं तत्र समाहारस्तत्रैकवचनं नपुंसकलिङ्गता च। यथा वाग्दण्डं दण्ड्यत्वम्। इत्यादि॥ ५॥

समासप्रयुक्तलक्षणाशून्यावयवपूर्ब्बपदकमध्यवर्त्तिविभक्तिशून्यतत्पुरुषान्यनामसमुदायत्वं अव्ययीभावत्वम्। यथा। उपकुम्भं घटं निधेहि। इत्यादि॥ ६॥ इति समासवादः॥*॥ अन्यच्च। यौगिकेषु समासं लक्षयति।

"यादृशस्य महावाक्यस्यान्तस्यादिनिवार्थके।
यादृशार्थस्य धीर्धीतुः स समासस्तदर्थकः॥"

यादृशमहावाक्यौचरः लतलादिः यादृशार्थापच्छिन्नविषयताशालिबोधे हेतुस्तादृशं तदाख्यं तथाविधार्थे समासः। विभजते।

"स चायं षड्विधः कर्म्मधारयादिप्रभेदतः।
यत्रोपपदसंज्ञोऽन्यस्तेनासौ समधा मतः॥
पूर्ब्बमध्यान्त्यसर्व्वान्यपदप्राधान्यतः पुनः।
प्राग्वै षष्ठविधः प्रोक्तः समासो वा भटादिभिः॥"

तेषु कर्म्मधारयं लक्षयति।

"क्रमिकं यन्नामयुगमेकार्थेऽन्यार्थबोधकम्।
तादात्म्येन भवेदेष समासः कर्म्मधारयः॥"

क्रमिकं यन्नामद्वयं तयोरेकस्य नाम्नोऽर्थे धर्म्मिणि तादात्म्येनानामनाम्नोऽर्थस्य अन्वयबोधं प्रति समर्थं तादृशनामद्वयं कर्म्मधारयः। यथा नीलोत्पलम्॥ १॥ द्विगुं लक्षयति।

"संख्याशब्दयुतं नाम तद्वाच्यार्थबोधकम्।
अभेदेनैव यत् स्वार्थे स द्विगुश्चिविधो मतः॥"

संख्यावच्छिन्नशक्त-यत्-पदोत्तरत्वविशिष्टयन्नामस्वार्थधर्म्मिकं तादात्म्येन तदन्यार्थान्वयबोधं

प्रति समर्थं तन्नामोत्तरतापन्नं तन्नामैव तदस्यार्थाभिन्नस्यार्थे द्विगुरुच्यते। तच्च तद्धितार्थद्विगुं लक्षयति।
"तद्धितार्थान्वितस्यार्थस्तद्धितार्थद्विगुर्मतः।
तद्धितार्थे लाक्षणिकस्तान्धेनाम लसर्जगः॥
यो द्विगुः स उत्तरतद्धितार्थान्वितस्यार्थकः।"
उत्तरपदद्विगुं लक्षयति।
"स्वान्तर्निविष्टशब्दाभ्यां शब्दान्तरसमासगः।
यो द्विगुः शाब्दिकैरुक्तः स उत्तरपदद्विगुः॥"
यो द्विगुः स्वघटकनामभ्यां सह साकाङ्क्षनामान्तरेण समासस्यान्तर्गतः स उत्तरपदद्विगुः। यथा पञ्चगवधनः। समाहारद्विगुं लक्षयति।
"स्वार्थान्वितसमाहारलक्षकः स्वान्यशब्दकः।
उक्ताभ्यामितरः किं वा समाहारद्विगुर्द्विगुः॥"
स्वोपस्थाप्यार्थस्य समाहारलक्षको यदीयान्यशब्दः स द्विगुः समाहारद्विगुः। यथा पञ्चपूलीत्यादि॥ २॥ तत्पुरुषं लक्षयति।
"यदीयेन सुवर्णेन युतयद्बोधनक्षमः।
यः समासस्तस्य च तत्पुरुष उच्यते॥"
यदर्थगतेन सुवर्णेन विशिष्टस्य यदर्थस्यान्वयबोधं प्रति यः समासः स्वरूपयोग्यः स तदर्थस्य तदर्थे तत्पुरुषः। न तु यन्नामोत्तरं यन्नाम यदर्थगतसुवर्णावच्छिन्नस्य यत् स्वार्थस्य बोधकं तदुत्तरतन्नामैव तदर्थयोस्तत्पुरुषः। पूर्वकायोऽङ्गुष्पिप्पलीत्यादावव्याप्तेः। विभजते।
"द्वितीयादिसुवर्थस्य भेदादेव च षड्विधः।
क्रियान्वयी द्वितीयादेरर्थः प्रायोऽत्र योजितः॥"३॥
अव्ययीभावं लक्षयति।
"उत्तरार्थान्वितस्वार्थाव्ययपूर्वस्तु यो भवेत्।
समासः सोऽव्ययीभावः स्त्रीपुंलिङ्गत्ववर्जितः॥"
यः समासः सोऽत्तरपदोपस्थाप्येन यदर्थेनान्वितस्य यदर्थस्य बोधकाव्ययपूर्वभागकः स तद्विशिष्टस्य तदर्थस्य बोधने अव्ययीभावः। यथा निर्मक्षिकं उपकुम्भमित्यादि।
"यमादेशं विना श्रूयमाणषष्ठी न बोधिका।
स्वार्थे यदर्थस्य यदा सोऽव्ययीभाव इष्यते॥"
यमादेशं विना श्रूयमाणषष्ठी स्वार्थे यत् समासार्थस्यान्वयबोधं प्रत्यसमर्था स एव यदाव्ययीभावः श्रूयमाणैव षष्ठी स्वार्थे समासान्तरार्थस्यान्वयबोधनेऽसमर्था न तु क्वापि॥ ४॥ बहुव्रीहिं लक्षयति।
"बहुव्रीहिः स्वगर्भार्थसम्बन्धित्वेन बोधकः।
निरूढया लक्षणया स्वांशज्ञापकशब्दवान्॥"
स्वांशस्य निरूढलक्षणया ज्ञापकेन शब्देन घटितः स्वगर्भस्य बाह्यार्थस्य सम्बन्धित्वप्रकारेणान्वयबोधं प्रति समर्थः समासः स्वगर्भतादृशार्थसम्बन्धिबोधने बहुव्रीहिः।
"अस्त्येकं प्रथमान्तं सत् सुबन्तैरितरैः सह।
यदा भेदसुबन्तेन साकाङ्क्षं नाम विग्रहः॥"
यस्य बहुव्रीहेरेकं नाम प्रथमान्तं सत् सुबन्तैरितरनामभिः सह भेदार्थकसुबन्तयच्छब्देन साकाङ्क्षं विग्रहः कथ्यते। बहुव्रीहिं विभजते।
"तदतद्गुणसंविज्ञानौ द्वौ भेदौ तदादिमः।
विग्रहस्य विशेष्यो यत्तद्विशेष्यकबोधकृत्॥"
तत्र विग्रहवाक्यस्य विशेष्यविषया प्रत्याय्यो योऽर्थस्तद्विशेष्यकबोधकृत् बहुव्रीहिस्तयोरादिमः तद्गुणसंविज्ञानः। तस्य स्वार्थगुणीभूतस्य सम्यग्विशेष्यविषया विज्ञानं यस्मिन्निति व्युत्पत्त्या स्वार्थान्वयः संजायतात् तद्विग्रहात् तद्गुणसंविज्ञानकरम इत्यर्थादवगम्यते। प्राचां मतेन तद्गुणसंविज्ञानकबहुव्रीहिलक्षणा निर्वक्ति।
"यः स्वार्थघटकार्थस्य स्वार्थान्वयिनि बोधने।
अङ्गत्वो बहुव्रीहिः स तयोरुभयादिमः॥"
यो बहुव्रीहिः स्वार्थस्यान्वयिनि स्वार्थघटकस्वाध्यर्थस्यान्वयबोधने समर्थः स तयोस्तद्गुणतद्गुणयोरादिमः। कनकवर्णमानय घटयोर्वा पश्य इत्यादि। पुनर्विभजते।
"स्वान्तर्निविष्टविग्रहादिनामभिर्विग्रहात् पुनः।
बहुव्रीहिर्बहुविधो द्विपदत्रिपदादिकः॥"
द्वित्रिचतुरादिभिरेव स्वघटकनामभिर्विग्रहवशात् द्विपदत्रिपदचतुष्पदादिको बहुव्रीहिर्बोध्यः॥ ५॥ द्वन्द्वं लक्षयति।
"यदुयदर्थकयन्नामश्रुतौ यदुयत्प्रकारके।
बोधे समर्थः स द्वन्द्वः समासस्तावदर्थकः॥"
यदुयदर्थोपस्थापकस्य प्रकृतिकथाटङ्गनामश्रौतस्य निश्चयत्तदर्थप्रकारकान्वयबोधं प्रति तत्तेन समर्थस्तादृशनामत्रिवह एव तावदर्थको द्वन्द्वसमासः। द्वन्द्वं विभजते।
"द्वौ भेदावस्य शास्त्रोक्तौ समाहारेतरेतरौ।
एकान्वयवचनाकाङ्क्षा हानोपादानतश्च तौ॥"
अस्य द्वन्द्वस्य द्वौ भेदौ समाहार इतरेतरश्च शास्त्रसिद्धौ। तत्रैकवचनान्यत्वाकाङ्क्षाविरहेण समाहारः। तथाविधसुबाकाङ्क्षत्वेनेतरेतरः। यथा। शाणिग्रहं कृष्णश्चं धवखदिरौ। इत्यादि॥ ६॥ उपपदसमासं लक्षयति।
"यदुत्तरपदं नामानुत्तरं यद्बोधकम्।
धातुलक्ष्यानुपपदसमासः स तदन्तकः॥"
धातुलक्ष्यां नित्यं यस्योत्तरपदं शब्दानुत्तरं स यादृशार्थस्य बोधं प्रत्यसमर्थं तादृशार्थं तादृशार्थकान्वयपदकः समास उपपदसंज्ञकः। कुम्भकारः क्षीरपायीत्यादि। विभजते।
"कारकैकोपपदकः षड्विधोऽयमिति भ्रमः।
कर्मकर्त्राद्युपपदभेदात् बहुविधस्त्रसौ॥" ७॥
इति शब्दशक्तिप्रकाशिका॥

समासक्तः, त्रि. (सम्+आ+सञ्ज+क्तः।) संयुक्तः। यथा, कर्पूरास्वत्तोत्रे।
"विषयारे पीठे प्रथमिवहृदि क्लेशवदनां
महाकालेनोच्चैर्मदनरसलावण्यनिरताम्।
समासक्तो नक्तं स्वयमपि रतानन्दनिरतो
जगो यो ध्यायेत्तमपि जननि स स्यात् स्मरहरः॥"

समासङ्गनं, क्ली. (सं+आ+सञ्ज+ल्युट्।) समासङ्गः। मेलनम्। संयोगः। समाङ्पूर्वकसञ्जधातोरनट्प्रत्ययेन निष्पन्नम्
समासन्नं, त्रि, निकटस्थम्। समाङ्पूर्वसद्धातोः क्तप्रत्ययेन निष्पन्नम्॥ (यथा, रघुः।१०।२
"अथ वेलासमासन्नशैलरन्ध्रानुनादिना।
स्वरेणोवाच भगवान् परिभूतार्णवध्वनिः॥")
समासवान्, [त्] पुं, (समासः संघोपोऽस्यस्तीति। समास+मतुप्। मस्य वः।) तुम्बुरुः। इति शब्दचन्द्रिका॥ समासवशिष्ठे, त्रि॥
समासादितः, त्रि, (सम्+आ+सद्+णिच्+क्तः।) आहृतः। प्राप्तः। समाङ्पूर्वकप्राप्लृसद्धातोः क्तप्रत्ययेन निष्पन्नः॥
समासार्द्धं, त्रि, (सम्+आ+सद्+क्यत्।) प्राप्यम्। इत्यमरः॥ अनुस्वारभूयस्त्वेन प्राप्यानन्तरबोधकक्रिया॥ (यथा, महाभारते। ५। १६। ६६।
"अपां वेगं समासाद्य विष्णुविक्षोभितं हितम्।
त्वया वृत्रो हतः पूर्वं देवराज! जगत्पते!॥")
समासार्था, स्त्री, (समासेन संक्षेपेण अर्थो यस्याः।) समस्या। श्लोकस्य पादेनैकेन द्वाभ्यां त्रिभिर्वा पूरणम्। इत्यमरभरतौ॥
समाहरणं, क्ली, (सं+आ+हृ+ल्युट्।) समाहारः। समाङ्पूर्वकहृञ्धातोरनट्प्रत्ययेन निष्पन्नम्॥
समाहारः, पुं, (सं+आ+हृ+घञ्।) समुच्चयः। इत्यमरः॥ बहूनां भिन्नानां बाह्यव्यापारेण बुद्ध्या वा पञ्चस्त्री त्रिभुवनवत् राशीकरणम्। इति भरतः॥ संक्षेपः। यथा,
"समासस्तु समाहारः संक्षेपः संग्रहोऽपि च।"
इति हेमचन्द्रः॥
समाहारद्वन्द्वसमाहारद्विगुसमासयोर्विशेषं समासशब्दे द्रष्टव्यम्॥
समाहितः, त्रि, (सम्+आ+धा+क्तः।) समाधिस्थः। (यथा, देवीभागवते। १। १७। ६६।
"स्नात्वा प्रातःक्रियां कृत्वा पुनरास्ते समाहितः॥")
उक्तविज्ञानः। आहितः। निर्विवादीकृतः। प्रतिज्ञातः। इति मेदिनी॥ निष्पन्नः। इति धरणिः॥ शुचौ, पुं। इति शब्दरत्नावली॥
समाहृतः, त्रि, सम्यक्प्रकारेण आहरणीकृतः। संगृहीतः। एकत्रीकृतः। संक्षेपेण प्रतिपादितः। समाङ्पूर्वकहृधातोः क्तप्रत्ययेन निष्पन्नः॥
समाहृतिः, स्त्री, (सम्+आ+हृ+क्तिन्।) संग्रहः। इत्यमरः॥ एककर्तृकाणामनेककर्तृकाणां वा एकाभिप्रायाणां क्रियाणां समाहरणं समाहृतिः। समाहियते संक्षेपेण प्रतिपद्यते अनया समाहृतिः। संपूर्वात् आङ्पूर्वात् हृ इ धरणे इत्यस्मात् क्तिन्। इति भरतः॥
समाह्वयः, पुं, (समाह्वयतेऽत्रेति। सम्+आ+ह्वे+पुंसीति घः। बाहुलकात् नालम्।)

द्यूतम्। आह्वानम्। इति शब्दरत्नावली॥ पशुपक्षिद्यूतम्। सङ्गरम्। इति मेदिनी॥ * ॥ तस्य निषिद्धत्वं यथा,—
"द्यूतं समाह्वयञ्चैव राजा राष्ट्रान्निवारयेत्।
राज्यान्तकरणावेतौ द्वौ दोषौ पृथिवीक्षिताम्॥
प्रकाशमेतत् तस्कर्य्यं यद्देवनसमाह्वयौ।
तयोर्नित्यं प्रतीघाते नृपतिर्यत्नवान् भवेत्॥
अप्राणिभिर्यत् क्रियते तल्लोके द्यूतमुच्यते।
प्राणिभिः क्रियते यस्तु स विज्ञेयः समाह्वयः॥
द्यूतं समाह्वयञ्चैव यः कुर्य्यात् कारयेत वा।
तान् सर्व्वान् बातयेद्राजा शूद्रांश्च द्विज-
लिङ्गिनः॥"
इति मानवे। ९। २२१—२२४॥

समाज्ञा, स्त्री, (सम्यक् आज्ञा यस्याः।) गोजिह्वावृक्षः। इति शब्दचन्द्रिका॥ समाख्या च॥

समिर्क, क्ली, श्लेष्मन्। इति शब्दरत्नावली॥ वँड़सा इति भाषा॥

समित, स्त्री, (समीयतेऽनयेति। सम्+इण्+क्विप्।) युद्धम्। इत्यमरः॥ (यथा, महाभारते। ५। २२। २३।
"पाण्ड्यश्च राजा समितीञ्जकल्पो
युधि प्रवीरैर्बहुभिः समेतः॥")

समित्, [ध्] स्त्री, (समीध्यतेऽनयेति। इन्ध+क्विप्।) अग्निसन्दीपनार्थेऽगकाष्ठादिः। तत्पर्य्यायः। इन्धनम् २ एधम् ३ इध्मम् ४ एधः ५। इत्यमरः॥ समिन्धनम् ६। एतत्सिन् सूक्ष्मे किलिञ्जम्। इति शब्दरत्नावली॥ * ॥ होमीयसमिद्वाक्यं मत्स्यपुराणे।
"प्रादेशमात्राः समिधः सवल्काश्च पलाशिनीः।
समिधः कल्पयेत् प्राज्ञः सर्व्वकर्म्मसु सर्व्वदा॥"
लक्षणान्तरं यथा, छन्दोगपरिशिष्टम्।
"नाङ्गुष्ठादधिका न्यूना समित् स्थूलतया क्वचित्।
न निर्म्मुक्तत्वचा चैव न वक्रीटा न पाटिता॥
प्रादेशात् नाधिका,नीना न तथा स्यादिशाखिका।
न सपत्रा न निर्वीर्य्या होमेषु च विजानता॥"
इति संस्कारतत्त्वम्॥*॥
तस्य निषिद्धलक्षणं यथा,—
"निर्वीर्य्या विदला दग्धा वक्राः स्थूला द्विधाकृताः।
समिदश्च दीर्घाश्च समिधो नैव कारयेत्॥"
अत्र दोषो यथा,—
"विर्वीर्य्यायुःक्षयं कुर्य्याद्विदला पुत्रगाग्निनी।
दग्धा नाशयते पत्नीं वक्रा वन्धुविनाशिनी॥
समिदग्धा रोगकरी विदेशकरणी द्विधा।
यमघ्नी मारयेत् दीर्घा स्थूला चार्थविनाशिनी॥"
इति तत्त्वम्॥*॥
ग्रहभेदात् समिधो यथा,—
"अर्कः पलाशः खदिरस्तथामार्गोऽथ पिप्पलः।
उदुम्बरः शमी दूर्व्वाः कुशाश्च समिधः क्रमात्॥"
इति संस्कारतत्त्वे याज्ञवल्क्यवचनम्॥

समिता, स्त्री, (सम्यक्प्रकारेण इता प्राप्ता।) गोधूमचूर्णम्। इति हेमचन्द्रः॥ मयदा इति भाषा॥ तस्या लक्षणं यथा,—
"गोधूमा धवला धौताः कुट्टिताः शोषिताः ततः।
प्रक्षिप्ताः सा विनिष्पिष्टाश्चालिता समिता स्मृता॥"
इति राजनिर्घण्टः॥

समितिः, स्त्री, (संयन्त्यस्यामिति। सं+इण्+क्तिन्।) सभा। (यथा, महाभारते। १। २। २२४।
"प्रभाते राजसमिनौ सङ्गमो यत्र वा विभोः।
ऐक्यात्मं वासुदेवस्य श्रोक्तवानर्জ্জुनस्य च॥")
युद्धम्। (यथा, भागवते। २। ७। ३४।
"ये वा मधे समितिशोभिन आत्तचापाः
काम्बोजमत्स्यकुरुसृञ्जयकैकयाद्याः॥")
सङ्गः। इत्यमरभेदिनीकरौ॥ साम्यम्। इति हेमचन्द्रः॥ (सन्निपातः। इति श्रीधरस्वामी॥ यथा, भागवते। ११। २५। ८।
"प्रवृत्तिलक्षणे निष्ठा पुमान् यर्हि गृहाश्रमे।
स्वधर्म्मे चानुतिष्ठेत गुणानां समितिर्हि सा॥")

समिधः, पुं, (समेतीति। सम्+इण्+"समीणः।" उणा० २। ११। इति धक्।) अग्निः। इत्युणादिकोषः॥ युद्धम्। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ (यथा, ऋग्वेदे। ४।२०।८।
"अग्निचानरः समिधेषु प्रहावान्
वक्षो राधिमभिनेतासि भूरिम्॥'
अस्मिन्नर्थे क्वचित् क्लीवेऽपि दृश्यते। यथा, तत्रैव। १। ५५। ५।
"स इन्महानि समिथानि मज्मना
कृणोति युध्म ओजसा जनेभ्यः॥")
आहुतिः। इति संक्षिप्तसारोणादिवृत्तिः॥

समिद्, [ध्] स्त्री, (समिध्यतेऽनयेति। सं+इन्ध+क्विप्।) समित्। इत्यमरः॥ (यथा, मनुः। २। १७६।
"नित्यः स्नात्वा शुचिः कुर्य्यात् देवर्षिपितृतर्पणम्।
देवताभ्यर्चनञ्चैव समिदाधानमेव च॥")

समिद्धः, पुं, (सं+इन्ध+क्तः।) प्रदीप्तः। यथा, काव्यायनः,
"योऽनर्चिषि शुचौ होत्र्यां यज्ञाङ्गिषु च मानवः।
मन्दाग्निरामयावी च दरिद्रश्च स जायते।
तस्मात् समिद्धे होतव्यं नासमिद्धे कदाचन॥"
इति संस्कारतत्त्वम्॥

समिधः, पुं, (समिध्यते इति। सं+इन्ध+कः।) अग्निः। इति त्रिकाण्डशेषः॥ (यथा, रामायणे। २। २४। ६।
"अयन्तु मामात्मभवस्त्वदर्शनमारुतः।
विलापदुःखसमिधो वर्द्धितामुद्धुताहुतिः॥")

समिन्धनं, क्ली, (समिध्यतेऽनेनेति। सं+इन्ध+ल्युट्।) समित्। इति शब्दरत्नावली॥ (यथा, भट्टिः। २। २८।
"तपोमरुद्भिर्भवतां शुराग्निः
संधुक्षतां नोऽरिसमिन्धनेषु॥")

समिरः, पुं, वायुः। इति हेमचन्द्रः। ४।१७२॥

समीकं, क्ली, (समं+अलीकादयश्चेति ईकः।) युद्धम्। इत्यमरः॥ (यथा, ऋग्वेदे। ४।२४।३।
"तमिन्नरो विह्वयन्ते समीके
रिरिक्वांसस्तन्वः कृण्वतत्राम्॥")

समीकृतं, त्रि, एकीकृतम्। समानीकृतम्। कृघानौ परे समशब्दात् च्विप्रत्ययेन निष्पन्नम्॥

समीक्षं, क्ली, (सम्यगीक्ष्यतेऽनेनेति। सम्+ईक्ष+घञ्।) शास्त्रशास्त्रम्। इति त्रिकाण्डशेषः॥ सम्यग्दर्शनञ्च॥

समीक्षणं, क्ली, सम्यक्प्रकारेण दर्शनम्। प्रेक्षणम्। संपूर्व्वेक्षधातोरनट्(ल्युट्)प्रत्ययेन निष्पन्नम्॥ (प्रकाशके, त्रि। यथा,भागवते। ८।२४।५०।
"त्वमर्कस्त्वमनलस्त्वं सोमो ज्योतिषां पतिः।
त्वमापस्त्वं क्षितिर्व्योम वायुर्मात्रेन्द्रियाशयः॥")

समीक्षा, स्त्री, (सम्+ईक्ष+गुरोश्चेत्यः। टाप्।) तत्त्वम्। बुद्धिः। निभालनम्। इति मेदिनी॥ मीमांसाशास्त्रम्। यत्नः। इति शब्दरत्नावली॥ (आत्मविद्या। इति स्वामी॥ यथा, भागवते। ११। २८। ३४।
"एवं समीक्षा निपुणा सती मे
हन्यात् तमिन्द्रं पुरुषस्य बुद्धेः॥"
सम्यग्दर्शनम्। यथा, भागवते। ३। ४। १०।
"त्वाम्वक्षतो मामनुरागहासं-
समीक्षया विश्रमयन्नुवाच॥")

समीचः, पुं, (संयन्ति नद्यो यस्मिन्निति। सं+इण्+"समीणः।" उणा० ४। ६२। इति चट्। दीर्घश्च।) समुद्रः। इत्युणादिकोषः॥

समीचकः, पुं, मैथुनम्। इति केचित्॥

समीची, स्त्री, (संयातीति। सं+इण्+चट्। ङीप्।) स्तुतिः। इत्युणादिकोषः॥ वन्दना। इति त्रिकाण्डशेषः॥

समीचीनं, क्ली, (सम्यगेव। सम्यक्+"विभाषाञ्चेरदिक् स्त्रियाम्।" ५। ४। ८। इति खः।) यथार्थम्। तत्पर्य्यायः। सत्यम् २ सम्यक् ३ ऋतम् ४ तथ्यम् ५ यथातथम् ६ यथास्थितम् ७ सद्भूतम् ८। इति हेमचन्द्रः॥ तद्वति, त्रि॥ (यथा, भागवते। २। ४। ५।
"समीचीनं वचो ब्रह्मन् सर्व्वज्ञस्य तवानघ।
तमो विधूयते मह्यं हरेः कथयतः कथाम्॥")

समीदः, पुं, गोधूमचूर्णम्। इति केचित्॥

समीनः, त्रि, (समामधीष्टो भृतो भूतो भावी वा। समा+"समायाः खः।" ५। १। ८५। इति खः।) वत्सरसम्बन्धी। समाशब्दात् खीनप्रत्ययेन निष्पन्नः॥

समीनिका, स्त्री, प्रतिवर्षप्रसूता गौः। इति शब्दचन्द्रिका॥

समीपः, त्रि, (सङ्गता आपो यत्र। "ऋक्पूरब्धूःपथामानक्षे।" ५। ४। ७४। इति अः। "द्व्यन्तरुपसर्गेभ्योऽप ईत्।" ६। ३। ९७ इति ईत्।) निकटः। इत्यमरः॥ (क्लीवेऽपि दृश्यते। यथा, मनुः। २। १०४।

म्रियमाणोऽपि बलिभिर्गीर्यात् प्राप्नुनन्दन ॥
ते सुनिर्वृतमनसः परिज्ञानसुखश्रियः ।
आसन् सुरौकसे नष्टे दैवेनातिबलीयसा ॥
विलोक्य विश्वेश्वरविधिं तदेश्वरो
दुरन्तवीर्योऽवितथाभिसन्धिः ।
ज्ञात्वा वधुः काञ्चपमद्भुतं महत्
प्रविश्य तोयं गिरिसुच्चहार ॥
तमुत्थितं वीक्ष्य कुलाचलं पुनः
समुद्यता निर्मथितुं सुरासुराः ।
दधार पृष्ठेन स लक्षयोजन-
प्रस्तारिणा दीप इवापरो महान् ॥
सुरासुरेन्द्रैर्भुजवीर्यवेपितं
परिभ्रमन्तं गिरिमङ्ग पृष्ठतः ।
विस्तम्भदावर्तगमादिकच्छपो
मेनेऽङ्गकण्डूयनमप्रमेयः ॥"

तथा तत्रैव । ८ । ७ । १८—१९ ।

"निर्मथ्यमानादुदधेरभूद्विषं
महोल्बणं हालाहलाख्यमग्रतः ।
संवर्तसंनीत्यकरोद्विकल्पतां
निधिक्षिपन्याहतिमिङ्गिलाङ्गणात् ॥
तदुत्थवेगं दिशि दिग्विसर्पणी
विसर्पदुत्सर्पदलक्ष्यमप्रति ।
भीताः प्रजा दुद्रुवुरङ्ग सेश्वरा
अरक्षमाणाः शरणं सदाशिवम् ॥"

तथाच तत्रैव । ८ । ७ । ३६—४२ ।

"तद्वीक्ष्य असनं तासां कृपया भृशपीडितः ।
सर्वदेवमयो देव इदमाह सतीं प्रियाम् ॥
अहो बत भवान्येतत् प्रजानां पश्य वैशसम् ।
घोरोदधिमथोद्भूतात् कालकूटादुपस्थितम् ॥
आसां प्राणपरीप्सूनां विधेयमभयं हि मे ।
एतावान् हि प्रभोरर्थो यद्दीनपरिपालनम् ॥
प्रायेण प्राणिनः सन्ति साधवः क्षणभङ्गुरैः ।
बह्वनैर्दुः भूरिषु मोहितेष्वात्ममायया ॥
पुंसः स्वयंवृतो भद्रे सर्वात्मा प्रीयते हरिः ।
प्रीते हरौ भगवति प्रीयेऽहं सचराचरः ॥
तद्वाहिदं सुरं भूमि प्रजानां क्षन्तिरस्तु मे ।
सुयमानस्य भवता भवानी विश्वभावन ॥
लज्जितं जगदुद्धर्तुरेतत्प्रव्याहृतं तव ।
ततः करतलीकृत्य व्याप्ति हालाहलं विभुः ॥
कृपणस्यजगद्देवः कृपया भूतभावनः ।
तस्याणि दधेयामास सर्वौषधं जलकल्पवत् ॥
यथाकारं सर्वं नीलं तच्च साधोर्विभूषणम् ॥"

तथा तत्रैव । ८ । ८ । १—६ ।

"नीते गरे कृपाद्वैव प्रीतास्तेऽमरदानवाः ।
ममन्थुरुत्सस्मा विभुं दधिष्ठानो ततोऽभवत् ॥
तामभिद्रोण्यथो जगदुर्मैत्रयादिनः ।
यस्य ईक्षयाभवस्य मेधाय दधिरे नृप ।
तत उच्चैःश्रवा नाम हयोऽभूत्तमसः पयः ।
तस्मिन् बलिः स्पृहाञ्चक्रे तन्न ईश्वरशिक्षया ॥
मत्त ऐरावतो नाम वारणेन्द्रो विनिर्गतः ।
दन्तैश्चतुर्भिः कैलासं किरन्निव महीम् ॥
धैरावतादयश्चाष्टौ दिग्गजा अमरेक्षया ।

अभ्रमुप्रभृतयोऽष्टौ च करिण्यस्तद्भवरूप ॥
कौस्तुभाख्यमभूद्रत्नं पद्मरागं महोदधेः ।
तस्मिन् मणौ स्पृहाशक्ते बभौऽलक्ष्मरणे हरिः ॥
ततोऽभवत् पारिजातः सुरलोकविभूषणम् ।
पूरयत्यर्थिनो योऽर्थैः शश्वद्भुवि यथा भवान् ॥
ततश्चाप्सरसो जाता निष्ककण्ठ्यः सुवाससः ।
रमण्यः सर्वगां वल्गुगतिलीलावलोकनैः ॥
ततश्चाविरभूत् साक्षात् श्रीरमा भगवत्परा ।
रक्षयन्ती दिशः कान्त्या विद्युत्सौदामनी यथा ॥
तस्यां चक्रुः स्पृहां सर्वे ससुरासुरमानवाः ।
रूपौदार्यवयोवर्णमहिमाक्षिप्तचेतसः ॥"

तथा तत्रैव । ८ । ८ । २५ ।

"तस्याः श्रियस्त्रिजगतो जनको जनन्या
वक्षोनिवासमकरोत् परमं विभूतेः ।
श्रीः स्वाः प्रजाः सकरुणेन निरीक्षणेन
यत्र स्थितैधयत साधिपतींस्त्रिलोकान् ॥"

तत्रैव । ८ । ८ । ३०—३६ ।

"बभासीद्वारुणी देवी कन्या कमललोचना ।
असुरा जगृहुस्तां वै हरेरनुमतेन ते ॥
अथोदधेर्मथ्यमानात् काश्यपैरुत्तमार्थिभिः ।
उदतिष्ठन्महाराज पुरुषः परमाद्भुतः ॥
दीर्घपीवरदोर्दण्डः कम्बुग्रीवोऽरुणेक्षणः ।
श्यामलस्तरुणः साक्षी सर्वाभरणभूषितः ॥
पीतवासा महोरस्कः सुष्टुमणिकुण्डलः ।
स्निग्धकुञ्चितकेशान्तसुभगः सिंहविक्रमः ॥
चन्दनापूर्णकलसं बिभ्रदलयभूषितः ।
स वै भगवतः साक्षाद्विष्णोरंशांशसम्भवः ॥
धन्वन्तरिरिति ख्यात आयुर्वेददृगीज्यभाक् ।
तमालोक्यासुराः सर्वे कलसं चान्तराश्रितम् ॥
लिप्सन्तः सर्वद्रव्याणि कलसं तरसाहरन् ।
नीयमानेऽसुरैस्तस्मिन् कलसेऽसुतभाजने ।
विषण्णमनसो दैवा हरिं शरणमाययुः ॥"

तत्रैव । ८ । ८ । ३१ ।

"एतस्मिन्नन्तरे विष्णुः सर्वोपायविदीश्वरः ।
योषिद्रूपमनिर्देश्यं दधार परमाद्भुतम् ॥"

तत्रैव । ८ । ९ । १२ ।

"ततो गृहीतामृतभाजनं हरि-
र्बभाष ईषत्स्मितशोभया गिरा ।
यद्यभुपेतः क्व च साध्वसाधु वा
कृतं मया वो विभजे सुधामिमाम् ॥"

तत्रैव । ८ । ९ । २० ।

"कृत्वात्मा पृथक्पङ्क्तीरुभयेषां जगत्पतिः ।
तांश्चोपवेश्यामास स्वेषु स्वेषु च वर्हिषु ॥
दैत्यान् गृहीतकलसो वञ्चयन्नुपचक्रमे ।
दूरस्थान् गाययामास जरामृत्युहरां सुधाम् ॥"

तत्रैव । ८ । ९ । २४ ।

"दैत्यास्तद्प्रतिपत्तिज्ञाः स्वभावादेव सङ्गदि ।
प्रकृत्याः सौमनस्येन लज्जायाश्च सुचित्तः ॥
कश्चिन्न चुकुशीरेय जहार पिबतः शिरः ।
हरिरस्त्र कबन्धस्तु सुधया लाविनोऽपतत् ॥
शिरस्तस्मरतां नीतमन्यो मधुसूदनम् ।
यस्तु पर्व्येति चन्द्रार्कमिधावति वैरधीः ॥

पीतप्रायेऽमृते देवैर्भगवान् लोकभावनः ।
पश्यतामसुरेन्द्राणां स्वरूपं जगृहे हरिः ॥"

पाद्मे उत्तरखण्डे ६६ अध्यायेऽप्येवम् । (अन्तरिक्षम् । इति निघण्टुः । १ । ३ । अस्य युत्पत्तिर्यथा, तट्टीकायाम् । "समुद्रवन्ति सङ्गता भवन्ति गच्छन्त्यस्मादापो रश्मिभिराक्षष्यमाणा आदित्यमण्डलम् । समुत्-पूर्व्वात् द्रवतेर्गत्यर्थात् अन्येष्वपि दृश्यते इति अपादाने ड-प्रत्यये टि-लोपे च रूपम् । यद्वा, मंहता अभिद्रवन्त्येनसार्थो भौमरसलक्षणया वायुना प्रेर्य्यमाणाः आदित्यमण्डलाद्वा वर्षाकाले रश्मिभिः प्रवर्त्तमानाः । अत्र उदित्येष उपसर्गोऽभीत्यर्थे वर्त्तते । कर्मणि ड-प्रत्यय इति विशेषः । सम्योरन्तोऽस्मिन् भूतानि अन्तरिक्षचारीणीति वा । सम्यूर्वात् सृद हर्षे इत्यस्मात् स्फायितञ्चिवञ्चि इत्यादिना अधिकरणे रक्-प्रत्यये समो म-लोपे च रूपम् । यद्वा, सम् इत्येकीभावे उदकात् उच्छन्दः दी सत्वर्थीयः । एकीभूतमुदकमस्मिन् विद्यते वर्षास्विति उदक-शब्दस्योदभावश्छान्दसः । यद्वा सम्यूर्वात् उन्दी क्लेदने इत्यस्मात् स्फायितञ्चिवञ्चि इत्यादिना कर्त्तरि रक्-प्रत्यये किच्चाद्गलोपे च समुद्रः ॥" इति देवराजयज्वनिर्व्वचनम् ।)

समुद्रकक्षः, पुं, (समुद्रस्य कक्ष इव ।) समुद्रफेनः । इति त्रिकाण्डशेषः ॥

समुद्रकान्ता, स्त्री, (समुद्रस्य कान्ता ।) नदी । इति हलायुधः । पृक्का । इति राजनिर्घण्टः ॥

समुद्रगा, स्त्री, (समुद्रं गच्छतीति । गम + डः ।) नदी । इति हेमचन्द्रः । गङ्गा । यथा,—

"यथाद्यं श्रावणादिसर्व्वा नद्यो रजस्वलाः ।
तासु स्नानं न कुर्व्वीत वर्ज्जयित्वा समुद्रगाम् ॥"

इति प्रायश्चित्ततत्त्वे छन्दोगपरिशिष्टवचनम् ॥ (यथा च महाभारते । ३ । १०६ । १० ।

"सा बभूव विवर्णेन्दी त्रिधा राघव समुद्रगा ।
फेनपुञ्जाकुलजला पुंसानामिव पङ्क्तयः ॥")

समुद्रगामिनि, त्रि ॥

समुद्रगृहं, क्ली, (समुद्र इव जलयुक्तं गृहम् ।) जलयन्त्रगृहम् । इति त्रिकाण्डशेषः ॥

समुद्रचुलुकः, पुं, (समुद्रस्य चुलुक इव अनायासेन पेयत्वात् यस्य ।) अगस्त्यमुनिः । इति त्रिकाण्डशेषः ॥

समुद्रदयिता, स्त्री, (समुद्रस्य दयिता ।) नदी । इति हेमचन्द्रः ॥

समुद्रनवनीतं, क्ली, (समुद्रस्य क्षीरोदस्य नवनीतमिव ।) अमृतम् । चन्द्रः । इति मेदिनी ॥

समुद्रफलं, क्ली, (समुद्रस्य फलमिव ।) नारिकेलफलम् । औषधविशेषः । यथा,—

"समुद्रनाम प्रथमं यथान् फलमुदाहरेत् ।
समुद्रफलमित्यादि नाम चास्य भिषग्वरैः ॥
फलं समुद्रस्य कटूष्णकारि
वातापहं भूतनिरोधकारि ।

चिद्दोषदावानलदीप्तहारि
कफामयभ्रान्तिविरोधकारि ।"
इति राजनिर्घण्टः ॥

समुद्रफेनः, पुं, (समुद्रस्य फेनः ।) खनामख्यातद्रव्यम् । तत्पर्य्यायः । फेनः २ अब्धिकफः ३ अर्णवजमलः ४ । इति रत्नमाला ॥ क्षिपुडीरः५। इत्यमरः ।२।६।१०५॥ समुद्रकफः ६ जलहासः ७ फेनकः ८ । इति त्रिकाण्डशेषः ॥ समुद्रफेनम् ९ फेनम् १० वार्द्धिफेनम् ११ पयोधिजम् १२ सुफेनम् १३ अब्धिक्षिपुडीरम् १४ सामुद्रम् १५ । अस्य गुणाः । शिशिरत्वम् । कषायत्वम् । नेत्ररोगकफकण्ठामयारुचिकर्णरोगनाशित्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।
"समुद्रफेनस्त्वतिशीतलो लेखनः शीतलश्च सः ।
कषायो विषपित्तघ्नः कर्णरुक्कफकृच्छ्रजित् ॥"
इति भावप्रकाशः ॥

समुद्रमेखला, स्त्री, (समुद्रः मेखलेव यस्याः ।) पृथिवी । इति त्रिकाण्डशेषः ॥

समुद्रयात्रा, स्त्री, (समुद्रे यात्रा गमनम् ।) समुद्रगमनम् । (यथा, हरिवंशे । १४५ । ४ ।
"द्वारवत्यां निवसतो विष्णोरतुलतेजसः ।
समुद्रयात्रा सम्प्राप्ता तीर्थे पिण्डारके नृप ! ॥")
कलियुगे तन्निषेधो यथा,—
"समुद्रयात्रास्वीकारः कमण्डलुविधारणम् ।"
इत्युपक्रम्य ।
"इमान् धर्म्मान् कलियुगे वर्ज्यानाहुर्मनीषिणः ॥"
इत्युद्वाहतत्त्वे उक्तवान् ॥

समुद्रयानं, क्ली, (समुद्रस्य यानम् ।) पोतम् । जाहाज इति भाषा । यथा,—
"पुनस्तत्रैव गमने वणिग्भावे मतिर्गता ।
समुद्रयाने रत्नानि महामौल्यानि साधुभिः ।
रत्नपारीक्षके: सार्द्धमानयिष्ये बहूनि च ॥
इदं निश्चित्य मनसा महासार्थपुरःसरः ।
समुद्रयायिभिर्लोकैः संविदं कृत्य निर्गतः ॥"
इत्युपक्रम्य ।
"गुरुणा सह संप्राप्तो महान्तं लवणार्णवम् ।
पोतारूढास्ततः सर्व्वे पोतवाहैरुपोषिताः ॥"
इति वाराहे गोकर्णमाहात्म्यनामाध्यायः ॥
(समुद्रगमनम् । यथा, मनुः । ८ । १५७ ।
"समुद्रयानकुशलाः देशकालार्थदर्शिनः ।
स्थापयन्ति तु यां वृद्धिं सा तत्राधिगमं प्रति ॥")

समुद्रयायी, [न्] त्रि, (समुद्रे गच्छतीति । गम्+णिनिः ।) समुद्रगामी । यथा, याज्ञवल्क्ये ।
"समुद्रयायिभिर्लोकैः संविदं कृत्य निर्गतः ॥"
(अस्य निन्दा यथा, मनौ । ३ । १५८ ।
"आमरदाही गरदः कुण्डाशी सोमविक्रयी ।
समुद्रयायी वन्दी च नैलिकः कूटकारकः ॥

* * *

एतान् विगर्हितानाचारानपाकृत्यान् द्विजाधमान् ।
द्विजातिप्रवरो विद्वानुभयत्र विवर्जयेत् ॥")

समुद्ररसना, स्त्री, (समुद्रो रसन इव यस्याः ।) पृथ्वी । इति हलायुधः ॥ (क्वचित् समुद्ररसना इति पाठो दृश्यते ॥)

समुद्रलवणं, क्ली, (समुद्रजातं लवणम् ।) समुद्रजलजातलवणम् । करकच् लवण इति भाषा । तत्पर्य्यायः । सामुद्रकम् २ सामुद्रम् ३ शिवम् ४ वशिरम् ५ सारोत्थम् ६ अचीवम् ७ लवणाब्धिजम् ८ । अस्य गुणाः । लघुत्वम् । हृद्यत्वम् । पलितासपित्तदत्वम् । विदाहित्वम् । कफवातघ्नत्वम् । दीपनत्वम् । रुचिकारित्वञ्च । इति राजनिर्घण्टः ॥ अपि च, भावप्रकाशे ।
"सामुद्रं यत्तु लवणमचीवं वशिरञ्च तत् ।
सामुद्रं मधुरं पाके सतिक्तं मधुरं गुरु ॥
नात्युष्णं दीपनं भेदि अत्यन्तमविदाहि च ।
श्लेष्मलं वातनुत्तिक्तमरुच्यं नातिशीतलम् ॥"

समुद्रवह्निः, पुं, (समुद्रस्य वह्निः ।) वाड़वानलः । इति हलायुधः ॥

समुद्रविजयः, पुं, इक्ष्वाकुवंशीयनृपभेदः । इति हेमचन्द्रः ॥

समुद्रसुभगा, स्त्री, (समुद्रस्य सुभगा ।) गङ्गा । इति राजनिर्घण्टः ॥

समुद्रा, स्त्री, सटी । (सन्यगुद्गतो रोमभिर्यस्याः ।) शमी । इति राजनिर्घण्टः ॥

समुद्रान्तं, क्ली, (समुद्रस्य अन्त उत्पत्तिस्थानत्वेनाख्यस्येति । अच् ।) जातीफलम् । इति शब्दचन्द्रिका ॥ (समुद्रस्य अन्तम् ।) समुद्रतीरम् ॥ (समुद्रः अन्तो यस्येति । समुद्रान्तविशिष्टे, त्रि । यथा, भागवते ।१०।४७।३३।
"एतदन्तः समाम्नायो योगः सांख्यं मनीषिणाम् ।
त्यागस्तपो दमः सत्यं समुद्रान्ता इवापगाः ॥")

समुद्रान्ता, स्त्री, (समुद्रस्य अन्तः उत्पत्तिस्थानत्वेनाख्यस्या इति । अच् । टाप् ।) दुरालभा । इत्यमरः । २।४।६२ ॥ कार्पासी । एला । इति मेदिनी ॥ वनवासः । इति राजनिर्घण्टः ॥

समुद्राम्बरा, स्त्री, (समुद्रः अम्बरमिव यस्याः ।) पृथिवी । इति त्रिकाण्डशेषः ॥

समुद्रारः, पुं, (समुद्रं ऋच्छतीति । ऋ + उण् ।) कुम्भीरः । सेतुबन्धः । तिमिङ्गिलमत्स्यः । इति मेदिनी ॥

समुद्रियः, त्रि, (समुद्रे भव दान । समुद्र + "समुद्राभ्रादृधः ।" ४ । ४ । ११८ । इति घः ।) समुद्रभवः । समुद्रसम्बन्धी । (यथा, याज्ञवल्क्यसंहितायाम् । १२ । ३६ ।
"द्रव्याणि दूषणं भरन्यासं गर्भं समुद्रियम् ॥")

समुद्रीयः, त्रि, समुद्रसम्बन्धी । समुद्रशब्दात् छप्रत्ययेन निष्पन्नः ॥

समुन्दनं, क्ली, (सम् + उन्द + ल्युट् ।) आर्द्रीभावः । तत्पर्य्यायः । क्लेमः २ क्लेमः ३ । इत्यमरः ।३।२।८॥

समुन्न, त्रि, (सम् + उन्द + क्तः ।) आर्द्रम् । इत्यमरः । ३ । २ । १०५ ॥

समुन्नतः, त्रि, (सम् + उत् + नम + क्तः ।) समुन्नतः । सम्भेदः । इति धरणिः ॥

समुन्नतिः, स्त्री, (सम् + उत् + नम + क्तिन् ।) उच्छ्रायः । उन्नतेधः । इति जटाधरः ॥ (यथा, कुमारे । ६ । ६६ ।
"उपपन्नमिदं सर्व्वमतः परमपि त्वयि ।
मनसः शिखराणाञ्च सदृशी ते समुन्नतिः ॥")

समुन्नद्धः, त्रि, (सम् + उत् + नह + क्तः ।) पण्डितमन्यः । गर्व्वितः । इत्यमरः ।३।३।१०३॥ प्रभुः । इत्यजयः ॥ समुद्भूतः । इति मेदिनी ॥ ऊर्ज्जस्वलः । इति हेमचन्द्रः ॥

समुपयोगं, [न्] क्ली, (सम् + उप + युज + घञ् ।) आनन्दः । इत्यमरटीकायां रामाश्रमः । ३ । ३ । १० ॥ तालव्यशकारादि च ॥

समुपेयिवान्, [वस्] त्रि, गमनकर्त्ता । गमनविशिष्टः । समुपपूर्ब्वधातोः क्वसुप्रत्ययेन निष्पन्नः ॥

समुज्ज्वलत्, त्रि, सम्यग्दीप्तियुक्तम् । समुत्पूर्ब्वलधातोः शतृप्रत्ययेन निष्पन्नम् ॥

समुल्लिखन्, [त्] त्रि, (सम् + उत् + लिख + शतृ ।) पादादिना भूमिखननकर्त्ता । यथा,—
"तुषारसंघातशिलाः क्षुराग्रैः
समुल्लिखन् दर्पकलः कक्षद्वान् ।
दृष्टः कथञ्चिद्गवयैर्विभिन्नै-
रक्षोढ़सिंघ्वनिरुन्नदाद्यः ॥"
इति कुमारसम्भवे । १ । ५६ ॥

समूढः, त्रि, (सम् + वह + क्तः ।) पुञ्जितः । (यथा, माघे । १ । ४ ।
"नवानघोऽधो दृषतः पयोधरान्
समूढकर्पूरपरागपाण्डुरम् ॥")
भग्नः । सञ्जोषितः । अनुपशुनः । इति मेदिनी ॥ दमितः । विवाहितः । इति धरणिः ॥ शोधितः । इति जटाधरः ॥ मूढेन सहितञ्च ॥

समूरः, पुं, मृगभेदः । इति हेमचन्द्रः ॥

समूरः, पुं, मृगविशेषः । इत्यमरः । २ । ५ । ६ ॥

समूल, त्रि, मूलेन सह वर्त्तमानम । मूलसहितम् । यथा,—
"अधर्म्मेणैधते राजंस्ततो भद्राणि पश्यति ।
ततः सपत्नान् जयति समूलन्तु विनश्यति ॥"
इति महाभारते शान्तिपर्व्वणि राजधर्म्मे युधिष्ठिरं प्रति भीष्मवाक्यम् ॥

समूहः, पुं, (समूह्यते इति । सम् + ऊह + घञ् ।) अनेकः । तत्पर्य्यायः । निवहः २ यूथः ३ सन्दोहः ४ विसरः ५ व्रजः ६ स्तोमः ७ ओघः ८ निकरः ९ व्रातः १० वारः ११ संघातः १२ सञ्चयः १३ समुदायः १४ समुदयः १५ समवायः १६ चयः १७ गणः १८ संहतिः १९ वृन्दम् २० निकुरम्बम् २१ कदम्बकम् २२ । इत्यमरः । २।५।३९-४० ॥ पूगः २३ सम्भयः २४ स्कन्धः २५ निचयः २६ जालम् २७ आयम् २८ पटलम् २९ काण्डम् ३० मण्डलम् ३१ चक्रम् ३२ । इति जटाधरः ॥ विसरः ३३ उत्कारः ३४ समुच्चयः ३५ आकरः ३६ प्रकरः ३७ संघः ३८ प्रचयः ३९ व्रातम् ४० । इति

सम्पत्

शब्दरत्नावली ॥ (यथा, मनुः । ८ । २२१ ।
"एवं दण्डविधिं कुर्य्याद्धार्म्मिकः पृथिवीपतिः ।
सामजातिसमूहेषु समयस्यभिचारिणाम् ॥")

सम्पद्दनी, स्त्री, (सम्पद्यतेऽनयेति । सम् + पद् + ल्युट् । स्त्रियां ङीप् ।) सम्मार्ज्जनी । इति हेमचन्द्रः ॥

सम्पन्नः, पुं, (सम्पद्यते इति । सम् + पद् + क्यप् ।) यज्ञाग्निः । तत्पर्य्यायः । परिचाय्यः २ उपचाय्यः ३ । इत्यमरः ।२।७।२० ॥ सम्यग्गूढयोग्ये, त्रि । निर्विसर्गश्लेषागमत्वर्य्यार्थः । यथा,—
"प्रागुदक्प्रवणं देशं समं वा परिसम्पन्नं ॥"
इति गोभिलसूत्रम् ॥

सम्पन्नः, त्रि, (सम् + पद् + क्त ।) सम्पन्नयुक्तः । तत्पर्य्यायः । अधिकर्द्धिः २ । इत्यमरः । ३।१।११ ॥ अधिसम्पत्तिशाली ३ । इति शब्दरत्नावली ॥ (यथा, रामायणे । २।१४।२७ ॥
"संपन्नमनुजोपेतां सम्पन्नविषयापणाम् ॥"
नागविशेषे, पुं । इति महाभारतम् । १ । ५७ । १७ ॥)

सम्पन्नि, स्त्री, (सम् + पद् + क्तिन् ।) सम्यग्वृद्धिः । अतिशयसम्पत्तिः । तत्पर्य्यायः । एधा २ । इत्यमरः । ३ । २ । १० ॥ विधा ३ । इति जटाधरः ॥ (यथा, रघुः । ६ । १६ ।
"चरणयोर्नखरागसम्पन्निः-
मुकुटरत्नमरीचिभिरस्पृशन् ॥")

सम्पेतः, त्रि, (सम् + आ + इण् + क्तः ।) सम्यक्प्राप्तः । संयुक्तः । यथा,—
"नामसंमेतं कृतसङ्केतं वाद्यते मृदु वेणुम् ।
बहु मनुते ननु ते तनुसङ्गतपवनचलितमपि
रेणुम् ॥"
इति श्रीजयदेवः ॥

सम्पेधितः, त्रि, सम्यग्वर्द्धितः । संपूर्ब्बेधधातोः क्तप्रत्ययेन निष्पन्नः ॥

सम्पोदकं, क्ली, (समं उदकं यत्र ।) मथिताम्बुदधि । अर्द्धजलयुक्तघोलम् । इति हेमचन्द्रः ॥ तत्पर्य्यायः । उदश्वित् २ । इत्यमरः । २ । ७ । १६ ॥

सम्प्रः, पुं, पतनम् । इति भूरिप्रयोगः ॥

सम्प्राप्तिः, स्त्री, (सं + पद् + क्तिन् ।) विभवोत्कर्षः । तत्पर्य्यायः । श्रीः २ लक्ष्मीः ३ सम्पद्४ । इत्यमरः ।२।८।८२। अर्हः५ । इति जटाधरः ॥ भूतिः ६ । इति मेदिनी ॥ (यथा, कथासरित्सागरे । २३ । १६१ ।
"तदेव च दृशौ तस्मै सुतां क्षेत्रावबर्द्धिताम् ।
निशां शिवाय सम्पत्तिमिव मूर्त्तवहारिताम् ॥")

सम्पत्, [द्] स्त्री, (सं + पद् + क्विप् ।) सम्पत्तिः । इत्यमरः ।२।८।८१। (यथा, रघुः । १ । ६४ ।
"त्वयैव चिन्त्यमानस्य गुरुणा ब्रह्मयोनिना ।
शापान्तस्ते कथं न स्युः सम्पदो मे निरापदः ॥")

सम्पोत्कर्षः । (यथा, किरातेः । ५ । २७ ।
"गुणसम्पदा समधिगम्य परं
महिमानमत्र महिते जगताम् ।

सम्पातः

नयशालिनि श्रिय इवाधिपतौ
विरमन्ति न ज्वलितुमौषधयः ॥")

हारभेदः । इति मेदिनी ॥

सम्पदं, क्ली, (सम्यक् पदं यत्र ।) समं पदयुगम् । इति शब्दमाला ॥

सम्पदूरः, पुं, (सं + पद + ऊरच् । इति पुरुषोत्तमदेवः । इत्युणादिटीकायामुज्ज्वलदत्तः ।) राजा । इति विद्वान्मनोरमदी ॥

सम्पन्नः, त्रि, (सं + पद + क्तः ।) साधितः । (यथा, पञ्चदशी । ८ । ८१ ।
"लौकिकं वचनं सार्धं सम्पन्नं तत्प्रसादतः ॥")
सम्पत्तियुक्तः । इति मेदिनी ॥

सम्पराधः, पुं, (सम्यक् परे काले ईयते इति । इण् + घञ् ।) आपत् । युद्धम् । उत्तरकालः । इत्यमरः । ३ । ३ । १५० ॥

सम्परायकं, क्ली, युद्धम् । इत्यमरटीकायां भरतः । २ । ८ । १०४ ॥

सम्पराधिकं, क्ली, युद्धम् । इत्यमरटीकायां स्वामी । २ । ८ । १०४ ॥

सम्पर्कः, पुं, (सम् + पृच् + घञ् ।) मेलकः । इतिः । इति मेदिनी ॥ संसर्गः । यथा,—
"सम्पर्कोद्भवते विप्रो जनने मरणेऽपि वा ।
सम्पर्कविनिवर्त्तानां न प्रेतं नैव सूतकम् ॥"
इति शुद्धितत्त्वम् ॥

सम्पर्की, [न्] त्रि, (स + पृची सम्पर्के + "संपृचेति ।" ३।२।१४२। इति घिनुण् ।) सम्पर्कविशिष्टः । सम्पर्कशब्दादिनुप्रत्ययेन निष्पन्नः । इति केचित् ॥

सम्पर्कीयः, त्रि, सम्पर्कयुक्तः । सम्बन्धीयः । सम्पर्कशब्दात् छीयप्रत्ययेन निष्पन्नः ॥

सम्पा, स्त्री, (संपततीति । सं + पत + डः । टाप् ।) विद्युत् । यथाह कश्चित् ।
"रागाग्नौ तमसो विसारिविरहज्वालातिदृष्टेः सरा-
विष्ठा भूतगणात् पथोऽतिविषमाद्भग्ना वधूः सत्पथात् ।
पङ्गादेन मदेन पङ्गुलतनुः सम्पाति सम्पातत:
सम्पाभासुभुजङ्गसङ्ग विलपौ यान्ती सुखङ्गा-
श्रयम् ॥"

सम्पाकः, पुं, (सम्यक् पाको यस्य ।) आरग्वधवृक्षः । इत्यमरः । २।४।२३ ॥ (यथा, हरिवंशे उत्तरपर्व्वणि ६१ अध्याये ।
"सम्पाकश्चैवसौम्यश्च ग्रामार्गपीलुभिः ॥")
सम्यक्पाकश्च ॥

सम्पाकः, त्रि, (सम्यक् पाको यस्य ।) तर्कुकः । पृषः । इति मेदिनी । अक्षः । सम्पटः । इति धरणिः ॥

सम्पाटः, पुं, तर्कुः । इति शब्दमाला ॥

सम्पातः, पुं, (सम् + पत + घञ् ।) पतनम् । इति भूरिप्रयोगः ॥ (यथा, गीतायाम् । १ । २० ।
"प्रवृत्ते शस्त्रसम्पाते धनुरुद्यम्य पाण्डवः ।

सम्पुटः

कपीकेशं तदा वाक्यमिदमाह महीपते ! ॥")
पक्षिणां गतिविशेषः । इति जटाधरः ॥

सम्पातिः, पुं, अरुणपुत्रः । स च जटायुषोऽग्रजो भ्राता । यथा, रामायणे । ४ । ५६ । २ ।
"सम्पातिर्नाम नाम्ना तु चिरजीवी विहङ्गमः ।
भ्राता जटायुषः श्रीमान् विख्यातबलपौरुषः ॥"
(यथा च तत्रैव गरुड़वाक्ये । ३ । १४ । ३२ ।
"द्वौ पुत्रौ विनतायास्तु गरुड़ोऽरुण एव च ।
तस्माज्जातोऽहमरुणात् सम्पातिश्च समाग्रजः ॥"
यथाच महाभारते । १ । ६६ । ७०।
"अरुणस्य भार्य्या श्येनी तु वीर्य्यवन्तौ महाबलौ ।
सम्पातिं जनयामास वीर्य्यवन्तं जटायुषम् ॥"
तथा तत्रैव । ३ ।२७८ ५१ ।
"सखा दशरथस्यासीत् जटायुररुणात्मजः ।
गृध्रराजो महावीरः सम्पातिर्यस्य सोदरः ॥"
अस्य पक्षदहन-विरूपम् । यथा, रामायणे । ४ । ५८ । ४—७ ।
"पुरा कृतयुगे वृत्ते स चाहत्य जयेषिणौ ।
आदित्यमुपयातौ खे ज्वलन्तं रश्मिमालिनम् ॥
आवृत्याकाशमार्गेण जवेन खगतौ भृशम् ।
मध्यं प्राप्ते तु सूर्य्ये तु जटायुरवसीदति ॥
तमहं भ्रातरं दृष्ट्वा सूर्य्यरश्मिभिरर्दितम् ।
पक्षाभ्यां छादयामास स्नेहात् परमविक्लवम् ॥
निर्दग्धपक्षः पतितो विन्ध्येऽहं वानरर्षभाः ।
अहमस्मिन् वसन् भ्रातुः प्रवृत्तिं नोपलक्षये ।
जटायुषस्त्वेवमुक्तो भ्राता सम्पातिना तदा ॥")

सम्पातिकः, पुं, (सम्पातिरेव । स्वार्थे कन् ।) गरुड़ज्येष्ठपुत्रः । इति शब्दमाला (अरुणस्य ज्येष्ठपुत्रः । इति पुराणम् ॥)

सम्पादकः, पुं, (सम्पादयतीति । सं + पद् + णिच् + ण्वुल् ।) निष्पादकः । सम्पन्नकर्त्ता ॥

सम्पादनं, क्ली, निष्पादनम् । संपूर्ब्बकृदन्तपदधातोरनट्-(ल्युट्) प्रत्ययेन निष्पन्नम् ॥ (यथा, कथासरित्सागरे । ९५ । १४६
"संभाय सिद्धादयमात्मकीर्त्तितस्य
सम्पादनाय सुतरां जगदुः प्रयत्नम् ॥")

सम्पादितः, त्रि, निष्पादितः । संपूर्ब्बकृदन्तपदधातोः क्तप्रत्ययेन निष्पन्नः ॥

सम्पीड़नं, क्ली, सम्यक्प्रकारेण यथनम् । संपूर्ब्बपीड़धातोरनट् (ल्युट्) प्रत्ययेन निष्पन्नम् ॥

सम्पीतिः, स्त्री, सम्यक्पानम् । संपूर्ब्बपाधातोः क्तिन्प्रत्ययेन निष्पन्नम् ॥

सम्पुटः, पुं, (सं + पुट् + कः ।) कुरवकः । इत्यजयः ॥ भेटा । इति हेमचन्द्रः ॥ एकजातीयोभयमध्यवर्त्ती । यथा, तन्त्रसारे ।
"सकामः संपुटो मन्त्रो निष्कामः संपुटं विना ।"
तथा च तत्रैव ।
"केवलां मालिकां कृत्वा मालिका तारसंपुटा ।
मालिकापुटितं तारं न्यसेत् साधकसत्तमः ॥"
रतिबन्धविशेषः । तल्लक्षणं यथा,—
"संप्रवार्य्योभयोः पादौ ग्रीवाभागतकौशलः ।

सम्बन्धः

सम्ब, क, सम्बन्ध। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-सेट्।) ओष्ठ्यवर्गयेरोपधः। क, सम्बयति धनं लोकः संबध्नातीत्यर्थः। तालव्यादिरयमिति धातुप्रदीपः। मूर्द्धन्यादिरित्यपरे। इति दुर्गादासः॥

सम्बं, क्ली, (सम्बति सर्पतीति। सम्ब+अच्।) जलम्। इति जटाधरः॥ वारद्वयकर्षणम्। इति सम्बाक्षतशब्ददर्शनात्॥

सम्बद्धः, त्रि, (सं+बन्ध+क्तः।) सम्बन्धयुक्तः। यथा सुमन्तुः। मातृपितृसम्बद्धा व्यासप्तमादविवाहाः कन्या भवन्ति। इत्युद्वाहतत्त्वम्॥ (यथा च भागवते। २। ६। १।

"आत्ममायामृते राजन् परस्यानुभवात्मनः।
न घटेतार्थसम्बन्धः स्वप्नद्रष्टुरिवाञ्जसा॥")

बन्धनविशिष्टः। (यथा, रामायणे। ५। ५६। २७।

"दन्तौष्ठपुटसंदष्टं वक्त्रं सापि तदाकरोत्॥")

सम्बन्धः, पुं, (सम्बध्यते इति। सं+बन्ध+घञ्।) मन्दहिः। न्यायः। इत्यजयः॥ (सख्यम्। इति मल्लिनाथः॥ यथा, रघुः। २। ५८।

"सम्बन्धमाभाषणपूर्वमाहु-
र्वृत्तः स नौ सङ्गतयोर्वनान्ते॥")

संसर्गः। यथा। एकपदार्थे अपरपदार्थसंसर्गः संसर्गमर्य्यादया भासते स च प्रतियोग्यनुयोग्याधारावधेयविषयविषयिभावादिः। इति प्रथमयुत्पत्तिवादीयगादाधरी॥ सम्यक्ः। स च त्रिविधः। विद्याजः १ योनिजः २ प्रीतिजः ३। तद्विवरणं यथा,—

"सम्बन्धो येषु येषां यः सर्वजातिषु सर्वतः।
तं त्वां ब्रवीमि वेदोक्तं ब्रह्मणा कथितं पुरा॥
पिता तातस्तु जनको जन्मदातरि वर्त्तते।
अम्बा माता च जननी गर्भधात्र्यां प्रकल्पिते॥
पितामहः पितृपिता तत्पिता प्रपितामहः।
अत ऊर्द्धं ज्ञातयश्च सगोत्राः परिकीर्त्तिताः॥
मातामहः पिता मातुः प्रमातामह एव च।
मातामहस्य जनकस्तत्पिता वृद्धपूर्व्वकः॥
पितामही पितुर्म्माता तत्श्वश्रूः प्रपितामही।
मातामही मातृमाता मातृतुल्या च पूजिता॥
प्रमातामहीति विख्याता प्रमातामहकामिनी।
वृद्धप्रमातामही ज्ञेया तत्पितुः कामिनी तथा।
पितृभ्राता पितृव्यः स्याच्छ्वातुर्भ्राता तु मातुलः।
पितुः स्वसा पितुर्भग्नी मातुर्भग्नी च मासुरी॥
सूनुश्च तनयः पुत्रो दायादस्त्वात्मजस्तथा।
धनभाक् वीर्य्यजश्चैव पुंसि जन्मनि च वर्त्तते॥
कन्यायां दुहिता कन्या चात्मजा परिकीर्त्तिता।
पुत्रपत्नी वधूर्ज्ञेया जामाता दुहितुः पतिः॥
पतिः प्रियश्च भर्त्ता च स्वामी कान्ते च वर्त्तते।
पत्नीभ्राता श्यालकश्च पत्नीभग्नी च श्यालिका॥
देवरः स्वामिनो भ्राता ननन्दा स्वामिनः स्वसा।
श्वशुरः स्वामिनस्तातः श्वश्रूश्च स्वामिनः प्रसूः॥
भार्य्या जाया प्रिया कान्ता स्त्री च पत्न्याश्च वर्त्तते।
पत्नीमाता तथा श्वश्रूस्तत्पिता श्वशुरः स्मृतः॥
सगर्भः सोदरो भ्राता सगर्भा भगिनी स्वसा।
भग्नीपुत्रो भागिनेयो भ्रातृपुत्रश्च भ्रातृजः॥
श्यालस्तु भगिनीकान्तो भगिनीपतिरेव च।
श्यालीपतिस्तु भ्राता च श्वशुरैकत्वहेतुना।
श्वशुरस्तु पिता ज्ञेयो जन्मदातुः समो मुने॥
अन्नदाता भयत्राता पत्नीतातस्तथैव च।
विद्यादाता जन्मदाता पञ्चैते पितरो नृणाम्॥
अन्नदात्री च या पत्नी भगिनी गुरुकामिनी।
माता च तत्सपत्नी च कन्या पुत्रप्रिया तथा॥
मातुर्म्माता पितुर्म्माता श्वश्रूः पित्रोः स्वसा सुता।
पितृव्यानी मातुलानी मातरश्च चतुर्दश॥
पौत्रस्तु पुत्रपुत्रे च प्रपौत्रस्तत्सुतोऽपि च।
तत्पुत्राद्याश्च ये वंश्याः कुलजाताश्च कीर्त्तिताः॥
कन्यापुत्रश्च दौहित्रस्तत्पुत्राद्याश्च बान्धवाः।
भागिनेयसुताद्याश्च पुरुषा बान्धवाः स्मृताः॥
भ्रातृपुत्राश्च पुत्राद्यास्ते पुनर्ज्ञातयः स्मृताः॥
गुरुपुत्रस्तथा भ्राता पोष्यः परमबान्धवः।
गुरुकन्या च भगिनी पोष्या मातृसमा मुने॥
पुत्रस्य च गुरुर्भ्राता पोष्यः सुस्निग्धबान्धवः।
पुत्रस्य श्वशुरभ्राता वन्धुर्वैवाहिकः स्मृतः॥
कन्यायाश्च श्वशुरे तत्सम्बन्धः परिकीर्त्तितः।
गुरुश्च कन्यकायाश्च पुरुषा बान्धवाः स्मृताः॥"
पुरुषा बान्धवाः स्मृता इत्यत्र भ्राता सुस्निग्धबान्धवा इत्यपि क्वचित् पाठः।
"गुरुः श्वशुरभ्रातॄणां गुरुतुल्यश्च पूजितः।
बन्धुता येन सार्द्धञ्च तन्मित्रं परिकीर्त्तितम्॥
मित्रं सुखप्रदं ज्ञेयं दुःखदो रिपुरुच्यते।
बान्धवो दुःखदो दैवात् निःसम्बन्धो सुखप्रदः॥
सम्बन्धस्त्रिविधः पुंसां विप्रेन्द्र! जगतीतले।
विद्याजो योनिजश्चैव प्रीतिजश्च प्रकीर्त्तितः॥
मित्रन्तु प्रीतिजं ज्ञेयं स सम्बन्धः सुदुर्लभः।
मित्रमाता मित्रभार्य्या मातृतुल्या न संशयः॥
मित्रभ्राता मित्रपिता भ्रातृपितृसमो नृणाम्।
चतुर्थं नाम सम्बन्धमित्याह कमलोद्भवः॥
जारश्चोपरतिर्बन्धुर्दुष्टसंभोगकर्त्तरि।
उपपत्न्यां नवङ्गी च प्रेयसी चित्तहारिणी॥
स्वामितुल्यश्च जारश्च नवङ्गी गृहिणीसमा।
सम्बन्धो देशभेदे च सर्व्वदेशे विगर्हितः॥
अवैदिको निन्दितस्तु विश्वामित्रेण निर्म्मितः।
दुष्यात्त्यस्तु महच्चित्र देशभेदे च सञ्चरेत्॥
अकीर्त्तिजनकः पुंसां योषितश्च विशेषतः।
तेजीयसां न दोषाय विद्यमानो युगे युगे॥"
इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे सम्बन्धजातिनिर्णयो नाम १० अध्यायः॥ * ॥ कूर्म्मपुराणे।
"एकोदकानां मरणे सूतकं चैतदेव हि।
पञ्चमीं योनिसम्बन्धे बान्धवेषु तथैव च॥"
योनिसम्बन्धे मातृस्वसीयभागिनेयेषु॥ अपि च।
"असम्बन्धिनो द्विजान् दग्ध्वा दग्ध्वा वह्निः-
शौचं सम्बन्धे तु त्रिरात्रम्। इति शुद्धितत्त्वम्॥
शब्दाकरणयोर्शुत्पाद्योत्पादकभावः सम्बन्धः।
ग्रन्थादौ तस्य वक्तव्यता यथा,—

सम्बन्धः

"सिद्ध्यर्थं सिद्धसम्बन्धं श्रोतुं श्रोता प्रवर्त्तते।
ग्रन्थादौ तेन वक्तव्यः सम्बन्धः सप्रयोजनः॥"
सप्रयोजन इत्यत्र क्वचित् पुस्तके साभिधेयक इति पाठः। इति सुग्धबोधटीकायां दुर्गादासः॥

सम्बन्धः, त्रि, (सम्बध्यते इति। सं+बन्ध+घञ्।) शुक्तः। स्निग्धः। इत्यजयः॥

सम्बन्धी, [न्] त्रि, (सम्बन्धोऽस्यास्तीति। इनिः।) सम्बन्धविशिष्टः। तत्पर्य्यायः। गुणवान् २ संयुक्त ३। इति त्रिकाण्डशेषः॥ (यथा, मनुः। ८।६४।

"नार्थसम्बन्धिनो नाप्ता न सहाया न वैरिणः।
न दृष्टदोषाः कर्त्तव्या न व्याधार्त्ता न दूषिताः॥"

पुं, मातृपक्षीयः। श्वशुरादिः। जामाता। श्यालकादिः। यथा, मनुः। २। १३२।

"विप्रोष्य तूपसंगम्य ज्ञातिसम्बन्धियोषितः॥"

"ज्ञातयः पितृपक्षाः पितृव्यादयः। सम्बन्धिनो मातृपक्षाः श्वशुरादयश्च तेषां ज्येष्ठानां या स्त्रियः।" इति कुल्लूकभट्टः॥ * ॥ तथाच मनुः। ४। १७६।

"बालवृद्धातुरैर्वैद्यैर्ज्ञातिसम्बन्धिबान्धवैः॥"

"ज्ञातयः पितृपक्षाः। सम्बन्धिनो जामातृश्यालकादयः।" इति तट्टीकायां कुल्लूकः॥ * ॥ वैवाहिकः। यथा, उत्तरचरिते। ४ अङ्के।

"स सम्बन्धी श्लाघ्यः प्रियसुहृदसौ तच्च हृदयं
स चानन्दः साक्षादपि च निखिलं जीवितपदम्।
मित्रम्। इति मल्लिनाथः॥ यथा, रघुः। २। ५८।

"तद्भूतनाथानुग नार्हसि त्वं
सम्बन्धिनो मे प्रणयं विहन्तुम्॥")

सम्बाक्षतं, त्रि, (सम्बं क्षतम्। डाच्।) वारद्वयकृष्टक्षेत्रम्। इत्यमरः। २। ९। ६॥ तालव्यादि च॥

सम्बाधः, पुं, (सम्यक् बाधा यत्र।) सङ्कटः। (यथा, माघः। ८। २।

"संसक्तैर्विपुलतया मिथो नितम्बैः
सम्बाधं वृहदपि तद्बभूव वर्त्म॥")

भयम्। इति मेदिनी॥ भयम्। (यथा, महाभारते। ४। ३८। ७।

"यायासमहमत्यर्थं बलराजसमं महत्।
सर्व्वायुधमहामात्रं शत्रुसम्बाधकारकम्॥")

नरकवर्त्म। इति शब्दरत्नावली॥

सम्बाधनं, क्ली, (सम्यक् बाधनं यत्र।) मदनस्य द्वारम्। शूलाग्रम्। द्वारपालः। इति मेदिनी॥

सम्बुद्धः, पुं, (सं+बुध+क्तः।) बुद्धावतारः। इति त्रिकाण्डशेषः॥ सम्यग्बोधाश्रये, त्रि॥

सम्बुद्धिः, स्त्री, (सं+बुध+क्तिन्।) सम्बोधनम्। यथा। स्यादर्थसम्बुद्ध्युक्तार्थे प्रौ। इति सुग्धबोधव्याकरणम्॥

सम्बोधः, पुं, (सं+बुध+घञ्।) बोधनम्। (यथा, महाभारते। ३। ३१२। ८५।

"ज्ञानं तत्त्वार्थसम्बोधः शमश्चित्तप्रशान्तता।
दयासर्व्वसुखेप्सित्वमार्ज्जवं समचित्तता॥")

क्षेपः। इति मेदिनी। नाशः। इत्यजयपालः॥

सम्बोधनं, क्ली, (सं+बुध+ल्युट्।) अन्यत्र व्यासक्तस्य कार्य्यान्तरे नियोजनार्थमाभिमुख्यविधानम्। यथा हे विष्णो। इति व्याकरणम्॥ हे वृक्ष हे लते हे फल इत्यादावचेतने तूपचारः। इति दुर्गादासः॥ तत्पर्य्यायः। आमन्त्रणम् २। इति हेमचन्द्रः॥ सम्बुद्धिः ३। इति सारबोधः॥ (यथा, साहित्यदर्पणे।६।५१३।

"सम्बोधनोक्तिप्रत्युक्तौ कुर्य्यादाकाङ्क्षभाषितैः॥")

सम्बलौ, स्त्री, कुट्टनी। इत्यमरः। २। ६। १६॥

"हे परपुरुषेण सह परनारीं योजयन्त्यां कुट्टनी इति ख्यातायाम्। कुट्टयति छिनत्ति स्त्रीपुरुषवैमत्यं कुट्टनी नन्द्यादिः। शं कल्याणं भलते निरूपयति शम्भलौ भल ड निरूपणे पचाद्यच् नदादित्वादीप् शम्भली तालव्यादिः। सम्यक् भलते सम्भली दन्त्यादिरित्यन्ये।" इति भरतः॥

सम्भवः, पुं, (सं+भू+अप्।) हेतुः। उत्पत्तिः। (यथा, आर्य्यासप्तशत्याम्। ४५८।

"महता प्रियेण निर्म्मितमप्रियमपि सुभग!
सत्यतां याति।
सुतसम्भवेन यौवनविनाशनं न खलु खेदाय॥")

मेलकः। आधेयस्य आधारानतिरिक्तत्वम्। इति मेदिनी॥ सङ्गतिः। अपायः। इत्यजयः॥ वर्त्तमानकल्पीयार्हदेवः। इति हेमचन्द्रः॥

सम्भवः, पुं, (सं+भू+अप्।) कर्त्तव्यः। इति शब्दचन्द्रिका॥ सम्भवनीये, त्रि॥

सम्भारः, पुं, (सं+भृ+घञ्।) सम्भृतिः। समूहः। इति मेदिनी॥ सर्व्वपूर्णत्वम्। इति त्रिकाण्डशेषः॥ (यज्ञादिकार्य्योपकरणद्रव्यम्। यथा, देवीभागवते। १। १६। २३।

"कृत्वा तस्य मखं पूर्णं करिष्यामि तवापि वै।
तावत् कुरुष्व राजेन्द्र सम्भारान् शनैः शनैः॥"

तथा तत्रैव। २। ६। ४।

"विवाहार्थञ्च सम्भारं रचयामासतुर्जने॥"

संग्रहः। इति मल्लिनाथः॥ यथा, कुमारे। २। ३६।

"पर्य्यायसेवामृतसूच्य पुण्यसम्भारसत्पराः।
उद्यानपालसामान्यस्तवस्तमुपासते॥")

सम्भावनं, क्ली, (सम्भाव्यतेऽनेनेति। सं+भू+णिच्+ल्युट्।) अलङ्कारविशेषः। यथा,—

"सम्भावनं यदीदं स्यादित्यूहोऽन्यस्य सिद्धये।
यदि श्रेषो भवेद्वक्ता कथिता: स्युर्गुणास्तव॥"

इति चन्द्रालोकः॥

सम्भावनं क्रियासु योग्यताध्यवसायः। इति मुग्धबोधव्याकरणम्॥ (सम्भावके, त्रि। यथा, भागवते। ४। १७। २६।

"पुमान् योषिदुत क्लीबः स्वाभासम्भावनोऽधमः।
भूतेषु निरनुक्रोशो हृषाणां तद्वधोऽवधः॥")

सम्भावना, स्त्री, (सं+भू+णिच्+युच्। टाप्।) उत्कटकोटिकसंशयः। संपूर्व्वकात् भू क शुद्धिचिन्तयोरित्यस्मात् श्रोणिश्रन्थीत्यादिसूत्रेणानप्रत्ययनिष्पन्ना। यथा, "एवं कौरवैः सौभ्रात्रस्य रूपं सम्भावनात्मकमपि विषयत्वविशेषः। इति ध्येयम्।" इति सत्यतिपक्षचिन्तामणिदीधितिगादाधरी॥ धूमदर्शनानन्तरं वह्न्यादिज्ञानवत्। रस्तु सम्भावनामात्रादिति कुसुमाञ्जलिटीकायां हरिदासः। पौराणिकास्तु सम्भवनामकं प्रमाणान्तरं मन्यन्ते तत्प्रमाणजन्या प्रमितिः सम्भावना इति वदन्ति। तन्मतन्तु न चतुष्टयमेतिऋार्थापत्तिसम्भवाभावप्रामाण्यात् इति सूत्रेणोपन्यस्य शब्द ऐतिह्यानर्थान्तरभावादनुमानेऽर्थापत्तिसम्भवाभावानामनर्थान्तरभावाच्चाप्रतिषेध इति सूत्रेण भगवदक्षपादैर्निराकृतम्। निश्चितेति उत्कटकोटिकसम्भावनोपलक्षणं इति तिथ्यादितत्त्वे स्मार्त्तभट्टाचार्य्यलिखनन्तु सम्भावनाशब्दस्य संशयमात्रपरतया सङ्गमनीयम्। इति नानाग्रन्थेभ्यः संगृहीतम्॥

सम्भावितः, त्रि, (स+भू+णिच्+क्तः।) सम्भावनाविशिष्टः। सम्भवनयोग्यः। बहुमतः। यथा, भगवद्गीतायाम्। २। ३४।

"अकीर्त्तिं चापि भूतानि कथयिष्यन्ति तेऽव्ययाम्।
सम्भावितस्य चाकीर्त्तिर्म्मरणादतिरिच्यते॥"

"सम्भावितस्य बहुमतस्य।" इति तट्टीकायां श्रीधरस्वामी॥

सम्भाषणं, क्ली, (सं+भाष+ल्युट्।) कथनम्। आलापनम्। यथा,—

"कृते सम्भाषणादेव त्रेतायां स्पर्शनेन तु।
द्वापरे त्वर्थमादाय कलौ पतति कर्म्मणा॥"

इत्युद्वाहतत्त्वम्॥

सम्भाषा, स्त्री, (सं+भाष+अङ्। टाप्।) सम्भाषणम्॥

सम्भिन्नः, त्रि, (सं+भिद्+क्तः।) सम्यग्भेदविशिष्टः। यथा,—

"सम्भिन्नकांस्यवद्घोषो निरेति वदनादयम्।
कास इत्युच्यते लोके तालव्यान्तो न कौर्त्तितः॥"

इति प्राचीनकारिका॥

सम्भुः, त्रि, (सं+भू+"विपूसंभ्यो डुसंज्ञायाम्।" ३। २। १८०। इति डुः।) सम्भवति यः। इति मुग्धबोधव्याकरणम्॥

सम्भूतः, त्रि, (सं+भू+क्तः।) उत्पन्नः। यथा, मार्कण्डेयपुराणे। ८४। ३४।

"इत्येतत् कथितं भूप सम्भूता सा यथा पुरा।
देवी देवशरीरेभ्यो जगत्त्रयहितैषिणी॥"

सम्भूतविजयः, पुं, (सम्भूतो विजयो यस्य।) श्रुतकेवलिसंज्ञकबौद्धविशेषः। इति हेमचन्द्रः॥

सम्भूयसमुत्थानं, क्ली, (सम्भूय मिलित्वा समुत्थानं कर्म्मकरणं यत्र।) मिलित्वैकमत्या वणिजां कर्म्मकरणम्। तच्च विवादपदविशेषः। यथा, सम्भूयसमुत्थानं नाम विवादपदमिदानीमभिदधाति।

"समवायेन वणिजां लाभार्थं कर्म्म कुर्व्वताम्।
लाभालाभौ यथाद्रव्यं यथा वा संविदा कृतौ॥"

सर्व्वे वयमिदं कर्म्म मिलिताः कुर्म्म इत्येवंरूपा सम्भूतिपत्तिः समवायत्वेन ये वणिङ्नटनर्त्तकप्रभृतयो लाभलिप्सवो भूत्वा प्रातिस्विकं कर्म्म कुर्व्वते तेषां लाभालाभावुपचयौ यथाद्रव्यं येन यावद्धनं पण्यग्रहणार्थं दत्तं तदनुसारेणावसेयौ। यद्वा। प्रधानगुणभावपर्य्यालोचनयास्य भागद्वयमस्त्येको भाग इत्येवंरूपया संविदा समयेन यथा संप्रतिपत्तौ तथा वेदितव्यौ। किञ्च।

"प्रतिषिद्धमनादिष्टं प्रमादात् यच्च नाश्नितम्।
स तद्व्याहिज्ञवाच्च रक्षितादृशमांशभाक्॥"

तेषां सम्भूय प्रचरतां मध्ये पण्यमिदमित्थं न व्यवहर्त्तव्यमिति प्रतिषिद्धमाचरता यन्नाश्नितं अनादिष्टमननुज्ञातं वा कुर्व्वाणेन तथा प्रमादात् प्रज्ञाहीनतया वा येन यन्नाश्नितं स तत्पण्यं वणिग्भ्यो दद्यात्। यः पुनरेषां मध्ये चौरराजादिजनितात् व्यसनात् पण्यं पालयति स तस्मादक्षितात् पण्यात् दशमभागं लभते।

"अर्घप्रक्षेपणादिंशं भागं शुल्कं नृपो हरेत्।
व्याहृतं राजयोग्यञ्च विक्रीतं राजगामि तत्॥"

इह यतः पण्यस्येयन्मूल्यं इत्यवधृतस्य प्रक्षेपणात् राजनिरूपणाहेतोरसौ मूल्यादिंशतितमभागं शुल्कार्थं गृह्णीयात्। यत् पुनर्व्याहृतमन्यत्र न विक्रेयमिति राज्ञा प्रतिषिद्धम्। यच्च राजयोग्यं माणिक्यादिप्रतिषिद्धमपि तद्राज्ञे अनिवेद्य लाभलोभेन विक्रीतक्षेत्राजगामिमूल्यदाननिरपेक्षं तत् सर्व्वं पण्यं राजापहरेदित्यर्थः।

"मिथ्या वदन् परीमाणं शुल्कस्थानादपासरत्।
दाप्यस्तद्गुणं पण्य सत्यानृतव्यवस्थितौ॥"

यः पुनर्व्वणिक् शुल्कवञ्चनार्थं परीमाणं निह्नुते शुल्कग्रहणस्थानादपसरति यच्चास्येदमस्य वेत्येवं विदादास्पदीभूतं पण्यं क्रीणाति विक्रीणीते वा ते सर्व्वे पण्यार्घगुणं दण्डनीयाः। अपि च।

"तरिकः स्थलजं शुल्कं गृह्णन् दाप्यः पणान् दश।
ब्राह्मणप्रातिवेश्यानामेतदेवानिमन्त्रणे॥"

शुल्कं हि द्विविधं स्थलजं जलजञ्च। तत्र स्थलजमर्घप्रक्षेपणादिंशं भागं शुल्कं नृपो हरेदित्युक्तम्। जलजन्तु मानवैरभिहितम्।

"पण्यं यानं तरे दाप्यं पुरुषोऽर्द्धपणन्तरे।
पादं पशुश्च योषिच्च पादार्द्धं रिक्तको पुमान्॥
भाण्डपूर्णानि यानानि तार्य्यं दाप्यानि सारतः।
रिक्तभाण्डानि यत्किञ्चित् पुमांसश्चापरिच्छदाः॥"

शुल्कदेयेऽप्ययमपरो विशेषः।

"न भिन्नकार्षापणमस्ति शुल्कं
न श्लिष्टचर्म्मौ न श्लिष्टौ न दूते।
न भेषजे न क्षतावशेषे
न श्रोत्रिये प्रव्रजिते न यज्ञे॥"इति।

तीर्य्यतेऽनेनेति तरो नावादिस्तज्जन्यशुल्कोऽधिकृतस्तरिकः स यदा स्थलोद्भवं शुल्कं गृह्णाति तदा दशपणान् दण्डनीयः। वेश्मो वेश्म प्रतिवेश्म इति स्ववेश्माभिमुखं स्ववेश्मपार्श्वयं चोच्यते तत्र भवाः प्रातिवेश्याः। ब्राह्मणाश्च ते प्रातिवेश्याश्च ब्राह्मणप्रातिवेश्यास्तेषां श्रुतवृत्तसम्प-

ज्ञानं आहादिषु विभवे सत्यनिमन्त्रणे एतदेव दृष्टपणात्मकं दण्डनं वेदितव्यम् ॥ * ॥ देशान्तरस्थतबन्धिग्रहिकं प्रत्याह ।
"देशान्तरगते प्रेते भ्रातर्यं दायादबान्धवाः ।
ज्ञातयो वा हरेयुस्तदागतास्तैर्विना नृपः ॥"
यदा सम्भूयकारिणां मध्ये यः कश्चिद्देशान्तरं गतो मृतस्तदा तदीयमंशं दायादः पुत्रात्मपत्यवर्गः भ्रातरः भ्रातृपुत्रीयाः मातुलाद्याः ज्ञातयोऽपत्यवर्गव्यतिरिक्ताः सपिण्डा वा आगताः सम्भूयव्यवहारिणो ये देशान्तरादागतास्ते वा गृह्णीयुस्तैर्विना दायाद्यभावे राजा गृह्णीयात् । वाशब्देन च दायादीनां वैकल्पिकं अधिकारं दर्शयति । पौर्वापर्यनियमस्तु पत्नी दुहितर इत्यादि प्रतिपादित एवात्रापि विज्ञेयः। शिष्यसब्रह्मचारिब्राह्मणनिषेधो वणिक्प्राप्तिश्च वचनप्रयोजनम् । वणिजामपि मध्ये यः पिण्डदानर्णदानादिसमर्थः स गृह्णीयात् । सामर्थ्याविशेषे पुनः सर्वे वणिजः संरुध्यिनो विभज्य गृह्णीयुस्तेषामभावे दृष्टवर्षं दायाद्यागमनं प्रतीक्ष्यानागतेषु स्वयमेव राजा गृह्णीयात् तदिदं नारदेन स्पष्टमुक्तम् ।
"एकस्य चेत् स्यात् मरणं दायादोऽन्यत्तदाप्नुयात् ।
अन्यो वासति दायादे शक्तश्चेत् सर्व एव ते ॥
तदभावे तु गुप्तं तन् कारयेद्दृष्टवत्सरान् ।
अस्वामिकमदायादं दृष्टवर्षस्थितं ततः ॥
राजा तदात्मसात् कुर्यात् एवं धर्मो न हीयते ॥"
किञ्च ।
"जिष्णुं त्वनेयुर्निर्लाभमभग्नस्तोऽन्येन कारयेत् ।"
जिष्णुः वणिक्; तं निर्लाभं निर्गतलाभं लाभमाक्षिप्य त्वनेयुः वहिष्कुर्युः । यश्च सम्भूयकारिणां मध्ये भाण्डप्रत्यवेक्षणादिकं कर्तुमसमर्थोऽवान्येन स्वं कर्म भाण्डभारवाहनं तदायव्ययपरीक्षणादिकं कारयेत् । इति मिताक्षरा ॥
सम्भृतः, त्रि, (सं+भृ+क्त ।) सम्यक्पुष्टः । सम्यग्भृतः । सम्यक्प्रकारेण धृतः ।
सम्भृतिः, स्त्री, (सं+भृ+क्तिन् ।) सम्यक्पोषणम् । सम्यग्भरणम् । सम्यग्धारणम् । (सम्भारः । यथा, कथासरित्सागरे । १०३ । १०१ ।
"अन्येद्युर्गगनके: खगोलंगाहे निर्गते नृपः ।
चकारामरदत्तोऽत्र तद्विवाहाय सम्भृतिम् ॥")
सम्भेदः, पुं, (सं+भिद्+घञ् ।) सिन्धुनद्योः सङ्गमः । इत्यमरः । १ । १० । ३५ ॥ (यथा, मनुः । ८ । ३५६ ।
"परस्त्रियं योऽभिवदेत् तीर्थेऽरण्ये वनेऽपि वा ।
नदीनां वापि सम्भेदे स संग्रहणमाप्नुयात् ॥")
स्फुटनम् । (यथा, सुश्रुते । २ । ५ ।
"कौण्यं गतित्रयोऽङ्गानां सम्भेदः क्षतसम्भवः ॥")
मेलनम् । इति मेदिनी ॥
सम्भोगः, पुं, (सं+भुज्+घञ् ।) भोगः । (यथा, मनुः । ८ । २०० ।
"सम्भोगो दत्तस्य यच्च न दत्तेनागमः क्वचित् ।
आगमः कारणं तत्र न सम्भोग इति स्थितिः ॥")
सुरतम् । (यथा, महाभारते । ४ । १३ । ८८ ।
"रत्नुत्पादसमारम्भाः साक्षात्कारकरा मम ।
आत्मप्रदानसम्भोगान मामुद्दिश्य त्वमर्हसि ॥")
जिनशासनम् । इति मेदिनी ॥ हर्षः । इति शब्दरत्नावली ॥ कैलिनागरः । इति जटाधरः ॥ हङ्कारभेदः । इति त्रिकाण्डशेषः ॥ तस्य लक्षणं यथा, साहित्यदर्पणे ३ परिच्छेदे ।
"दर्शनस्पर्शनादीनि निषेवेते विलासिनौ ।
यत्रानुरक्तावन्योन्यं सम्भोगः समुदाहृतः ॥"
सम्भोगी, [न्] पुं, (सम्भोगोऽस्यास्तीति । इनिः ।) कैलिनागरः । इति भूरिप्रयोगः ॥ सम्भोगविशिष्टे, त्रि ॥
सम्भ्रमः, पुं, (सं+भ्रम+घञ् ।) भयादिजनितत्वरा । (यथा, रघुः । ११ । २५ ।
"वीक्ष्य वेदिमथ रक्तबिन्दुभि-
र्बन्धुजीवदृषभिः प्रदूषिताम् ।
संभ्रमोऽभवदपीढ़कर्मणां
ऋत्विजां च्युतविकङ्कतस्रुचाम् ॥")
तत्पर्य्यायः । संवेगः २ । इत्यमरः । १ । ७ । ३३ ॥ आवेगः ३ । इति तट्टीका ॥ प्रवेगः ४ त्वरा ५ त्वरिः ६ । इति वाचस्पतिः ॥ भयम् । (यथा, रामायणे । ४ । २ । १४ ।
"सम्भ्रमस्त्यज्यतामेष सर्व्वलोकस्य साम्प्रतं ॥")
आदरः । इति मेदिनी ॥ महाभ्रमः । क्षत्रम् । इत्यजयपालः ॥
सम्मतिः, स्त्री, (सं+मन+क्तिन् ।) अभिलाषः । अनुज्ञा । इति मेदिनी ॥ (यथा, किरातें । १० । ३६ ।
"कथमिव तव सम्मतिर्भवित्री
समरतुभिर्मुनिनावधीरितस्य ॥")
आत्मज्ञानम् । इत्यजयपालः ॥
सम्मदः, पुं, (सम्+मद्+"प्रमदसंमदौ हर्षे ।" ३ । ३ । ६८ । इति घञ् ।) हर्षः । (यथा, साहित्यदर्पणे । ३ । १६७ ।
"मदसम्मदपीड़ाद्यैर्वैवर्ण्यं गद्गदं विदुः ॥")
मत्स्यविशेषः । यथा, विष्णुपुराणे । ४ । २ । १६ ।
"वहुरूपश्च सौभरिर्नाम महर्षिरन्तर्जले द्वादशाब्दं कालमुवास । तत्र चान्तर्जले मत्स्याः सम्मदो नामातिवहुप्रजोऽतिप्रमाणो मीनाधिपतिरासीत् ॥" तदति, त्रि । इत्यमरः । १ । ४ । २४ ॥
सम्मर्दः, पुं, (संमृद्यतेऽनेति । सं+मृद्+घञ् ।) युद्धम् । इति केचित् ॥ (यथा, महाभारते । ५ । १६८ । १० ।
"जवे प्रहारे संमर्दे सर्व एवातिमानुषाः ।
सर्व्वैर्जिता मही पाला दिग्गजैर्व भतरर्षभ ॥" ॥
परस्परविमर्दः । यथा, रघुः । १५ । १०१ ।
"यन्नोप्लवङ्गकण्ठोभूत् संमर्दश्चन मज्जताम् ।
अतस्तदाख्यया तीर्थं भावनं भुवि प्रथये ॥")
सम्मादः, पुं, (सं+मद्+घञ् ।) सम्यक्प्रकारेण मत्तता ॥
सम्मानः, पुं, (सम्+मन+घञ् ।) समादरः । यथा, तिथ्यादितत्त्वे ।
"जन्मर्क्षयुक्ता यदि जन्ममासे
यस्य ध्रुवं जन्मतिथिर्भवेच्च ।
भवन्ति तद्वत्सरमेव यावत्-
तस्योच्चसम्मानसुखानि तस्य ॥"
सम्मानितः, त्रि, (सम्मानोऽस्य जातः । सम्मान+इतच् ।) सभाजितः । गौरवितः । यथा, मार्कण्डेयपुराणे । ८० । ७० ।
"अन्यैरपि सुरैर्देवी भूषणैरायुधैस्तथा ।
सम्मानिता ननादोच्चैः साट्टहासं मुहुर्मुहुः ॥"
सम्मार्ज्जकः, पुं, (सम्मार्ज्जयतीति । सं+मृज्+ण्वुल् ।) सम्मार्जनी । इति शब्दरत्नावली ॥ सम्यक्सम्मार्ज्जनकर्त्तरि, त्रि ॥
सम्मार्ज्जनं, क्लीं, (सं+मृज+ल्युट् ।) संशोधनम् । यथा, रत्नमालायाम् ।
"सम्मार्ज्जनञ्च संप्रुञ्छिः संशोधनविशोधने ॥"
सम्मार्ज्जनी, स्त्री, (संमृज्यतेऽनयेति । सं+मृज+ल्युट् । ङीप् ।) धूल्यादिमार्जनसाधनी । कोँरा इति भाँटा इति च भाषा । तत्पर्य्यायः । शोधनी २ । इत्यमरः । २ । २ । १८ ॥ ऊहनी ३ सम्मृहनी ४ । इति शब्दरत्नावली ॥ वहुकरी ५ वर्द्धनी ६ । इति हेमचन्द्रः ॥
सम्मितः, त्रि, (सं+मा+क्तः ।) समानपरिमाणः । सदृशः । इति जटाधरः ॥
सम्मिश्रः, त्रि, (सम्यक् प्रकारेण मिश्रयतीति । मिश्र मिश्रणे+अच् ।) संयुक्तः । मिश्रितः । यथा, तिथ्यादितत्त्वे ।
"सम्मिश्रा या चतुर्दश्या अमावस्या भवेत् क्वचित् ।
खण्डितां तां विदुः केचिदुपेक्ष्यमिति चापरे ॥"
सम्मुखः, त्रि, (सम्यक् सुखं यस्य ।) अभिमुखागतः । तत्पर्य्यायः । अग्रपृष्ठः २ । इति त्रिकाण्डशेषः ॥ (यथा, कथासरित्सागरे । २७ । १३८ ।
"तस्यां विक्रमसिंहाख्यो वभूवान्वर्थयाख्यया ।
राजा वैरिवृथा यस्य नैवासन् सम्मुखाः क्वचित् ॥"
अभिमुखे, क्लीं । सुमुख इति भाषा । यथा, कथासरित्सागरे । ४ । ७० ।
"नाशकत् सम्मुखे स्थातुं कश्चो त्त्विनयक्रमः ॥"
तथा च साहित्यदर्पणे । ३ । १५४ ।
"दृष्ट्वा दर्शयति व्रीड़ां सम्मुखं नैव पश्यति ॥"
सर्व्वं सुखमिति निपातनात् अन्तलोपे सम्मुखमिति सिद्धम् । इति शब्दार्थचिन्तामणिः ॥ समस्तसुखे च क्लीं । इति काशिका । ५ । २ । ६ ॥)
सम्मुखी, [न्] पुं, (सम्मुखमस्यास्तीति । इनिः ।) दर्पणम् । इति केचित् ॥
सम्मुखीनः, त्रि, (सर्व्वस्य सुखस्य दर्शनः । सम्मुख+"यथामुखसम्मुखस्य दर्शनः खः ।" ५ । २ । ६ । इति खः ।) अभिमुखः । इति हेमचन्द्रः । ६ । ७३ ॥ (यथा, रघुः । १५ । १० ।
"अपश्यूलं तमासाद्य लवणं लक्ष्मणानुजः ।
उरोघ्नं सम्मुखीनो हि जयो रक्षःप्रहारिणाम् ॥")

इति विद्याकरः इति ज्योतिस्तत्त्वम् ॥ (वातः। इत्युणादिटीकायामुज्ज्वलदत्तः। ४। १०५॥)

सरटिः, पुं, (सरतीति+सृ+अटिन्।) वायुः। मेघः। इत्युणादिकोषः॥

सरटुः, पुं, (सृ+अटुः।) शकलासः। इत्युणादिकोषः॥

सरणं, क्ली, (सरतीति। सृ गतौ+"सृचट्टक्रम्यदन्म्यष्टक्ष्वधीति।" ३। २। १५०। इति युच्।) लोहमलम्। इति हेमचन्द्रः॥ (सृ+ल्युट्।) गमनम्॥ (यथा, महाभारते। १। २३१। ५।
"अज्ञानप्रभवाश्च सुता नष्टाः सरणे मम॥")

सरणा, स्त्री, (सरतीति+सृ+युच्।) प्रसारणी। इत्यमरः। २। ४। १५२॥ गन्धभादालि इति भाषा॥ चित्रता। इति शब्दमाला॥ वेउड़ी इति भाषा॥ गमनकर्त्तरि, त्रि॥

सरणिः, स्त्री, (सरन्त्यनयेति। सृ गतौ+"अर्त्तिसृधृधमीति।" उणा० २। १०३। इति अनिः।) पद्धतिः। पन्थाः। इति मेदिनी॥ (यथा, राजतरङ्गिण्याम्। ३। ४०१।
"सरसां सरणिं त्यक्त्वा जीवितस्पृहया समम्।
शुष्का तेन ततः शान्तमोभीमा थणालत॥")
प्रसारणी। इत्यमरटीकायां भरतः॥

सरणी, स्त्री, (सरणि+वा ङीष्।) पद्धतिः। पन्थाः। इति मेदिनी॥ प्रसारणी। इत्यमरटीकायां भरतः। २। ४। १५॥

सरण्डः, पुं, (सरतीति। सृ+"अण्डन् कण्डभृत्रृतः।" उणा० १। १२८। इति अण्डन्।) धूर्त्तः। वटः। भूषणभेदः। इति मेदिनी॥ कामुकः। पत्नी। इति शब्दरत्नावली॥

सरण्यं, त्रि, (सरण+ण्यप्।) गम्यम्। गन्तव्यम्। सरणशब्दात् स्वार्थप्रत्ययेन निष्पन्नम्॥

सरण्युः, पुं, (सरतीति। सृ गतौ+"सृवृवचिभ्योऽन्युगागमश्च।" उणा० ३। ८१। इति अन्युच्।) मेघः। वायुः। जलम्। इति शब्दरत्नावली॥ वसन्तः। अग्निः। इत्युणादिकोषः॥

सरत्, क्ली, (सृ+अति।) सूचम्। इति शब्दमाला॥ (गन्तरि, त्रि।)

सरत्रिः, पुं स्त्री, रश्मिः। इति केचित्॥

सरद्वान्, [त्] पुं, गौतममुनिः। गोतमसुनिपुत्रः। इति पुराणम्॥ नालवणग्रादिषु॥

सरपर्णिका, स्त्री, (सरपर्णं जलस्थपत्रमस्त्यस्या इति। इनि। टापि अत इत्वम्।) पद्मम्। पद्मपत्रम्। इति शब्दरत्नावली॥

सरमा, स्त्री, (रमया श्रीभया सह वर्त्तमाना।) राक्षसीभेदः। सा च विभीषणपत्नी। (एवं राक्षसानामसमर्थे सीतायाः प्रलोभिनी आसीत्। एतद्वृत्तान्तस्तु रामायणे लङ्काकाण्डे। ३३। ३४। अध्याययोर्द्रष्टव्यः।) कुक्कुरी। देवशुनी। इति मेदिनी॥ (यथा, महाभारते। १। ३। ११।
"अनमेजय रुद्रस्तौ देवगुप्ता सरमया भ्रमं
समुत्पन्नौ विख्यातावार्यौ।") कश्यपपत्नीविशेषः। तत्पत्यानि भमरादयः। यथा,—
"गोलाङ्गूलशकोरुच चैत्यापत्यं तथैव च।
अपत्यं सरमायाश्च गणो वै भमरादयः॥"
इति वह्निपुराणे काश्यपीयवंशनामाध्यायः॥

सरयुः, पुं, (सरतीति। सृ गतौ+"सर्त्तेरयुः।" उणा० ३। २२। इति अयुः।) वायुः। इति त्रिकाण्डशेषः॥

सरयुः, } क्ली, (सरतीति। सृ गतौ+"सर्त्तेरयुः।" उणा० ३।२२। इति अयुः।
सरयूः, } "सर्त्तेरयूः।" इति केचित्।) नदीविशेषः। इत्युणादिकोषः। अस्या जलगुणाः।
"सरयूसलिलं स्वादु बलपुष्टिप्रदायकम्।"
इति राजनिर्घण्टः॥

तस्या उत्पत्तिर्यथा,—
"एवं विवाह्य विधिवत् सौवर्णे मानसाचले।
अरुन्धतीं वशिष्ठस्तु मोदमाप तया सह॥
तत्र यत् पतितं तोयं मानसाचलकन्दरे।
तत्तोयं सप्तधा भूत्वा मानसाचलकन्दरात्॥
हेमाद्रेः कन्दरे सानौ सरय्वाश्च पृथक् पृथक्।
यत्तोयं सङ्गतं कुर्य्याद्वंशा वडवसन्निधौ।
तेनाभूत् सरयूर्नाम्ना नदी पुण्यतमा शुभा॥"
इति कालिकापुराणे २३ अध्यायः॥

सरलः, पुं, (सरतीति। सृ+"वृषादिभ्यश्चित्।" उणा० १। १०८। इति कलच्। वाहुलकात् गुणः। इत्युज्ज्वलदत्तः।) वृक्षविशेषः। (यथा, कुमारे। १। ६।
"कपोलकण्डूः करिभिर्विनेतुं
विवृद्धितानां सरलद्रुमाणाम्।
यत्र स्रुतक्षीरतया प्रसक्तः
सानूनि गन्धः सुरभीकरोति॥")
तत्पर्य्यायः। पीतद्रुः २ पूतिकाष्ठम् ३। इत्यमरः। २। ४। ६०॥ धूपवृक्षकः ४। इति शब्दरत्नावली॥ पीतदारुः ५ भद्रदारुः ६ मनोज्ञः ७। इति रत्नमाला॥ पीतः ८ स्निग्धदारुसंज्ञः ९ स्निग्धः १० मरिचपत्रकः ११ पीतवृक्षः १२ सुरभिदारुः १३। अस्य गुणाः। कटुत्वम्। तिक्तत्वम्। उष्णत्वम्। कफवातत्वग्दोषश्वोफकण्डूतिव्रणनाशित्वम्। कोष्ठशुद्धिदाढत्वम्। इति राजनिर्घण्टः॥ अन्यच्च भावप्रकाशे।
"सरलः पीतवृक्षः स्यात् तथा सुरभिदारुकः।
सरलो मधुकसिक्तः कटुपाकरसो लघुः॥
स्निग्धोष्णः कर्णकण्डाधिशिरोगरुचीहरः स्मृतः।
कफानिलस्रदयूककामलाक्षिव्रणापहः॥"
वृक्षः। अग्निः। इति धरणिः॥

सरलः, त्रि, (सृ+कलच्। वाहुलकात् गुणः।) उदारः। अवक्रः। इति मेदिनी॥ (यथा, कथासरित्सागरे। ४।
"आदिश्यानाययामास गणकान् सरलाशयः॥")

सरलद्रुः, पुं, (सरलश्चासौ द्रुः।) सरलवृक्षरसः। टारपीन इति भाषा। तत्पर्य्यायः। पायसः २ श्रीवासः ३ वृकधूपः ४ श्रीवेष्टः ५। इत्यमरः। २। ४। १२८॥ नैलवर्णी ६ श्रीपिण्डः ७। इति शब्दरत्नावली॥ श्रीवेशः ८ धूपः ९ यवासः १० घृताढ्यः ११ दधाढ्यः १२ क्षीरान्धयः १३ अवक्रः १४ क्षीरशीः १५ वायसः १६। इति शब्दरत्नावली॥ अस्य गुणाः श्रीवेष्टशब्दे द्रष्टव्याः॥

सरला, स्त्री. (सरल+टाप्।) त्रिपुटा। इत्यमरः। २। ४। १०८॥ नदीभेदः। इति भूरिप्रयोगः॥

सरलाङ्गः, पुं, (सरलः पीतदारुरङ्गमस्य।) श्रीवेष्टः। इति राजनिर्घण्टः॥

सरव्यं, क्ली, (सरं रागं अयतीति। अय+डः।) लक्ष्यम्। इत्यमरटीका॥ तालव्यशादिषु॥

सरसं, क्ली, (रसेन जलेन सह वर्त्तमानम्।) सरोवरः। इति शब्दरत्नावली॥ रसयुक्ते, त्रि। यथा,—
"कविता कोमलवनिता आयाता सुखदायिका।
बलादानीयमाना सा सरसा विरसा भवेत्॥"
इत्युज्ज्वलः॥

सरसम्भृतं, क्ली, त्रिकण्टकस्य। तेकाँटासिङ् इति भाषा॥ यथा, शब्दचन्द्रिकायाम्।
"त्रिकण्टः पत्रशुन्नस्य पेषणः सरसम्भृतम्॥"

सरसा, स्त्री, (रसेन सह वर्त्तमाना।) श्वेतचित्रता। इत्यमरटीकायां रायमुकुटः॥

सरसिजं, क्ली, (सरसि जायते इति। जन+डः। सप्तम्या अलुक्।) पद्मम्। इति राजनिर्घण्टः॥ (यथा, शाकुन्तले १ अङ्के।
"सरसिजमनुविद्धं शैवलेनापि रम्यं
मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति।
इयमधिकमनोज्ञा वल्कलेनापि तन्वी
किमिव हि मधुराणां मण्डनं नाकृतीनाम्॥"
सरोवरजाते, त्रि। यथा, सुश्रुते। १। ४६।
"अधस्तादुत्पलादीनां चेया मत्स्याः सरसिजाः
स्मृताः।")

सरसी, स्त्री, (सृ+असुन्। गौरादित्वात् ङीष्।) सरोवरः। इत्यमरः। १। १०। २८॥ (यथा, रघुः। १। ४३।
"सरसीष्वरविन्दानां वीचिविक्षोभशीतलम्।
आमोदसूचिभिस्तस्याः स्वनिश्वासानुकारिभिः॥")

सरसीकः, पुं, (सरस्यां कायति शब्दायते इति। के+कः।) सारसपक्षी। इति शब्दरत्नावली॥

सरसीरुहं, क्ली, (सरस्यां रोहतीति। रुह+कः।) पद्मम्। इत्यमरः। १। १०। ४०॥ (यथा, गीतगोविन्दे। ८। २।
"तामनुसर सरसीरुहलोचन या तव रतिविषादम्॥")

सरस्वती, स्त्री, (सरो नीरं तद्वत् रसो यास्यस्या इति। सरस्+मतुप्। मस्य वः। ततो ङीप्। अत इत्वं भत्वान्न पदकार्य्यम्।) नदी। (यथा, महाभारते। १। २१४। ३।
"ते तया तेन सा धीरैः पतिभिः सह पञ्चभिः
बभूव परमप्रीता नागैरिव सरस्वती॥")
वाणी। (यथा, रघुः। १५। ४६।
"उवाच पुरतस्तस्य भूतरूपा सरस्वती॥")
क्षीरम्। गौः। नदीभेदः। मद्यपत्नी। इति

मेदिनी । ज्योतिष्मती । ब्राह्मी । इति राजनिर्घण्टः । सोमलता । इति शब्दचन्द्रिका ॥ मुक्तशक्तिविशेषः । इति त्रिकाण्डशेषः ॥ दुर्गा । यथा, देवीपुराणे ४५ अध्याये ।

"सदाः सरणशीलत्वात् शेषाख्याः सप्त कीर्त्तिताः ।
अतिप्रागल्भदाने वा तेन देवी सरस्वती ॥"

वागधिष्ठातृदेवता । तत्पर्य्यायः । ब्राह्मी २ भारती ३ भाषा ४ गीः ५ वाक् ६ वाणी ७ । अमरः ॥ हरा ८ शारदा ९ गिरा १० गिरांदेवी ११ गौर्देवी १२ ईश्वरी १३ वाचा १४ वचनामीशा १५ वाग्देवी १६ वर्णमातृका १७ । इति शब्दरत्नावली ॥ गौः १८ श्रीः १९ । इति शटाधरः ॥ वाग्वेश्वरी २० अन्तरसन्ध्येश्वरी २१ सायंसन्ध्यादेवता २२ । इति कविकल्पलता ॥ * तस्या उत्पत्त्यादि यथा, ब्रह्मवैवर्ते ब्रह्मखण्डे ।

१ । ५२—६३ ।

सौतिरुवाच ।

"आविर्बभूव कन्यैका धर्मस्य वामपार्श्वतः ।
मूर्त्तिमूर्त्तिमती साधात् द्वितीया कमलालया ॥
आविर्बभूव तत्पश्चान्मुखतः परमात्मनः ।
एका देवी शुक्लवर्णा वीणापुस्तकधारिणी ॥
कोटिपूर्णेन्दुशोभाढ्या रत्नपङ्कजलोचना ।
बह्निशुद्धांशुकाधाना रत्नाभरणभूषिता ॥
सस्मिता सुदती वामा सुन्दरीणाञ्च सुन्दरी ।
श्रेष्ठा सुतीनां शास्त्राणां विदुषां जननी परा ॥
वागधिष्ठातृदेवी सा कवीनामीष्टदेवता ।
शुक्लसत्त्वस्वरूपा च शान्तरूपा सरस्वती ॥
गोविन्दपुरतः स्थित्वा सर्गौ प्रथमतः सुखम् ।
तन्नामगुणकीर्त्तिञ्च वीणया सा जनर्ज च ॥
तानि यानि कर्म्माणि कल्पे कल्पे युगे युगे ।
तानि सर्व्वाणि हरिणा तुष्टाव संपुटाञ्जलिः ॥

सरस्वत्युवाच ।

राधामदनमध्यस्थं राधोल्लासरसप्रदम् ।
रत्नसिंहासनस्थञ्च रत्नभूषणभूषितम् ॥
राधेश्वरं राधकरं परं राधेश्वरीश्वरम् ।
राधाधिष्ठातृदेवञ्च वन्दे राधाविनोदिनम् ॥
राधायायमरिश्रान्तं रासे राधाविहारिणम् ।
राधोत्तुङ्गानां गोपीनां कान्तं प्राप्तं मनोहरम् ॥
प्रणम्य तं यामीशुद्धा प्रफुल्लवदना सती ।
उवास सा मुकामा च रत्नसिंहासने वरे ॥
इति वाणीस्तवं स्तोत्रं प्रातरुत्थाय यः पठेत् ।
बुद्धिमान् मोऽपि विद्यावान् लक्ष्मीवान् पुत्रवान् भवेत् ॥"

अपि च ब्रह्मवैवर्ते शेषखण्डे । ८० । ६१—६७ ।

"सा च कृष्णः स्वयंकाले प्रधाया चेश्वरेच्छया ।
राधा पद्मा च सावित्री दुर्गा देवी सरस्वती ॥
प्राणाधिष्ठातृदेवी या देवी कृष्णस्य परमात्मनः ।
प्राणाधिकप्रियतमा सा राधा परिकीर्त्तिता ॥
तेजोऽधिष्ठातृदेवी सर्व्वमङ्गलकारिणी ।
परमानन्दरूपा च सा लक्ष्मीः परिकीर्त्तिता ॥
विद्याधिष्ठातृदेवी या देवी परमेशस्य दुर्लभा ।
वेदशास्त्रयोगमाता सा सावित्री प्रकीर्त्तिता ॥
दुर्गाधिष्ठातृदेवी या देवी सर्व्वशक्तिस्वरूपिणी ।
सर्व्वज्ञानात्मिका सर्व्वा सा दुर्गा दुर्गनाशिनी ॥
वाणीधिष्ठातृदेवी या देवी शास्त्रज्ञानप्रदा सदा ।
कृष्णकण्ठोद्भवा या च सा च देवी सरस्वती ॥
पञ्चधादौ स्वयं देवी मूलप्रकृतिरीश्वरी ।
ततः सृष्टिक्रमेणैव बहुधा कलया च सा ॥"७॥

तस्याः पूजादिर्यथा,—

श्रीनारायण उवाच ।

"आदौ सरस्वतीपूजा श्रीकृष्णेन विनिर्म्मिता ।
यत्प्रसादान्मुनिश्रेष्ठ सर्व्वो भवति पण्डितः ॥
आविर्भूता यदा देवी वक्तुः कृष्णस्य योषितः ।
दृष्ट्वेयं कृष्णं कामेन कामुकी कामरूपिणी ॥
स च विज्ञाय तद्भावं सर्व्वज्ञः सर्व्वमातरम् ।
तामुवाच हितं सत्यं परिणामसुखावहम् ॥

श्रीकृष्ण उवाच ।

भज नारायणं साध्वी मदंशं तं चतुर्भुजम् ।
युवानं सुन्दरं सर्व्वगुणयुक्तञ्च मत्समम् ॥
कामदं कामिनीनाञ्च नासाञ्च कामपूरकम् ।
कोटिकन्दर्पलावण्यलीलान्यक्कृतमीश्वरम् ॥
कान्ते कान्तञ्च मां कृत्वा यदि स्थातुमिहेच्छसि ।
त्वत्तो बलवती राधा न ते भद्रं भविष्यति ॥
यो यस्मात् बलवान् वह्नि ततोऽन्यं रक्षितुं क्षमः ।
कथं परान् साधयति यदि स्वयमनीश्वरः ॥
सर्व्वेशः सर्व्वशास्त्राज्ञं राधा बाधितुमक्षमः ।
तेजसा सत्त्वमा सा च रूपेण च गुणेन च ॥
प्राणाधिष्ठातृदेवी सा प्राणांस्त्यक्तुञ्च कः क्षमः ।
प्राणतोऽपि प्रियः कृष्ण कैषां वास्ति च कञ्चन ॥
त्वं भद्रे गच्छ वैकुण्ठं तव भद्रं भविष्यति ।
पतिं तमीश्वरं कृत्वा मोदस्व सुचिरं सुखम् ॥
लोभमोहकामकोपमानहिंसाविवर्जिता ।
तेजसा तत्समा लक्ष्मी रूपेण च गुणेन च ॥
तया सार्द्धं तव प्रीत्या गन्तव्यालं प्रयास्यति ।
गौरवं मद्वरात्तुभ्यं करिष्यति पतिर्ध्रुवः ॥
प्रतिविश्वेषु ते पूजा मत्तश्च ते सदान्विता ।
माघस्य शुक्लपञ्चम्यां विद्यारम्भे च सुन्दरि ॥
मानवा मनवो देवा मुनीन्द्राश्च ससृष्टयः ।
सन्तश्च योगिनः सिद्धा नागगन्धर्वराक्षसाः ॥
महत्त्वेन करिष्यन्ति कल्पे कल्पे त्वयावधि ।
भक्तियुक्ताश्च दत्त्वा चैवोपचाराणि षोडश ।
कायप्रागुक्तविधिना ध्यानेन स्तवनेन च ॥
जितेन्द्रियाः संयताश्च घटे च पुस्तकेऽपि च ।
कृत्वा सुवर्णमूर्त्तिकां गन्धचन्दनचर्चिताम् ॥
कवचं ते गृहीष्यन्ति कण्ठे वा दक्षिणे भुजे ।
पठिष्यन्ति च विद्वांसः पूजाकाले च पूजिते ॥
इत्युक्त्वा पूजयामास तां देवीं सर्व्वपूजितः ।
ततश्चतुर्मुखब्रह्मविष्णुमहेश्वराः ॥
अन्यान्यपि सुरेशाश्च मुनीन्द्राः सनकादयः ।
सर्व्वे देवाश्च मनवो नृपाश्च मानवादयः ।
बभूवुः पूजिता नित्या सर्व्वलोकैः सरस्वती ॥

नारद उवाच ।

पूजाविधानं स्तवनं ध्यानं कवचमौचितम् ।
पूजोपयुक्तनैवेद्यं पुष्पञ्च चन्दनादिकम् ॥
वद वेदविदां श्रेष्ठ श्रोतुं कौतूहलं मम ।
यद्यस्ते सास्ति तत्तत्त्वं स्तवनं किमिदं श्रुतिसुन्दरम् ॥

श्रीनारायण उवाच ।

शृणु नारद वक्ष्यामि काण्वशाखोक्तपद्धतिम् ।
जानाति सरस्वत्याः पूजां विधिसमन्विताम् ॥
माघस्य शुक्लपञ्चम्यां विद्यारम्भदिनेऽपि च ।
पूर्व्वेद्युश्चेन्द्रियं संयम्य तत्पश्चात् संयतः शुचिः ॥
स्नात्वा नित्यक्रियां कृत्वा घटं संस्थाप्य भक्तितः ।
संपूज्य देवषट्कञ्च नैवेद्यादिभिरेव च ॥
गणेशञ्च दिनेशञ्च वह्निं विष्णुं शिवं शिवाम् ।
संपूज्य संयतो गेही ततोऽभीष्टं प्रपूजयेत् ॥
ध्यानेन वक्ष्यमाणेन ध्यात्वावाह्य घटे बुधः ।
ध्यात्वा पुनः षोढ़ोपचारैश्च पूजयेद्भक्तितः ॥
पूजोपयुक्तं नैवेद्यं यद्यदेदे निरूपितम् ।
वक्ष्यामि सांप्रतं किञ्चित् यथाधीतं यथागमम् ॥
नवनीतं दधि क्षीरं खाद्यञ्चतलजडुकम् ।
इक्षुमिक्षुरसं शुक्लवर्णषड्गुडं मधु ॥
खस्तिकं शर्करा शुक्लधान्यस्याक्षतमक्षतम् ।
अस्निग्धशुक्लधान्यस्य पृथुकं शुक्लमोदकम् ॥
घृतसैन्धवसंस्कारैर्हविष्यान्नञ्च भक्षणैः ।
यवगोधूमचूर्णानां पिष्टकं घृतसंस्कृतम् ॥
पिष्टकं खस्तिकस्यापि पक्वरम्भाफलस्य च ।
परमान्नञ्च सघृतं पिष्टान्नञ्च सुधोपमम् ॥
नारिकेलं तदुदकं केशरं मूलमार्द्रकम् ।
पक्वरम्भाफलं चारु श्रीफलं बदरीफलम् ॥
कालदेशोद्भवं पक्वफलं शुक्लं सुसंस्कृतम् ।
सुगन्धि शुक्लपुष्पञ्च सुगन्धि शुक्लचन्दनम् ॥
नवीनशुक्लवस्त्रञ्च प्रशस्तञ्च सुन्दरं मुने ।
माल्यञ्च शुक्लपुष्पाणि शुक्लहारञ्च भूषणम् ॥
यदुक्तञ्च मुनौ ध्यानं प्रशस्तं श्रुतिसुन्दरम् ।
तन्निबोध महाभाग भयभञ्जनकारणम् ॥
सरस्वतीं शुक्लवर्णां सस्मितां सुमनोहराम् ।
कोटिचन्द्रप्रभासृष्टश्रीयुक्तविग्रहाम् ॥
वह्निशुद्धांशुकाधानां सस्मितां सुमनोहराम् ।
रत्नसारेन्द्रनिर्म्माणवरभूषणभूषिताम् ।
सपूजितां सुरगणैर्ब्रह्मविष्णुशिवादिभिः ॥
वन्दे भक्त्या च वन्द्यां तां मुनीन्द्रमनुमानवैः ।
एवं ध्यात्वा च मूलेन सर्व्वं दत्त्वा विचक्षणः ॥
संस्तूय कवचं धृत्वा प्रणमेद्दण्डवद्भुवि ।
यैर्यैर्मन्त्रैर्देवी तैर्यैर्नित्या क्रिया मुने ॥
विद्यारम्भे च यत्रान्ते सर्व्वत्र पञ्चमीदिने ।
सर्व्वोपयुक्तो मूलश्च वैदिकाद्यक्षरः परम् ॥
यैर्यैर्मन्त्रैर्यो वा तेषां च मूल एव च ।
सरस्वतीचतुर्थ्यन्तो वह्निजायान्त एव च ॥
सर्व्वमायादिकश्चैव मन्त्रोऽयं कल्पतरुः ।
पुरा नारायणश्चैनं बालीकाय कृपानिधिः ॥
प्रददौ लक्षवर्षान्ते पुष्करे च भारते ।
भृगुर्ददौ च शुक्राय गुरवे सर्व्वमन्त्रवित् ॥

चन्द्रपर्वणि मारीचो ददौ वाक्पतये मुदा ।
भृगवे च ददौ तुष्टो ब्रह्मा वदरिकाश्रमे ॥
आस्तीकाय जरत्कारुर्ददौ क्षीरोदसन्निधौ ।
विभाण्डको ददौ मेरौ ऋष्यशृङ्गाय धीमते ॥
शिवः कणादसुनये गोतमाय ददौ मुदा ।
सूर्यश्च याज्ञवल्क्याय तथा कात्यायनाय च ॥
घौम्यः पाणिनये चैव भरद्वाजाय धीमते ।
ददौ शाकटायनाय सुतले बलिसंसदि ॥
चतुर्लक्षजपेनैव मन्त्रः सिद्धो भवेन्नृणाम् ।
यदि स्यात् सिद्धमन्त्रोऽपि दृढप्रतिज्ञसमो भवेत् ॥
कवचं शृणु विप्रेन्द्र यद्दत्तं विधिना पुरा ।
विश्वजेष्ठं विश्वजयं भृगवे गन्धमादने ॥

भृगुरुवाच ।

ब्रह्मन् ब्रह्मविदां श्रेष्ठ ब्रह्मज्ञानविशारद ।
सर्वज्ञ सर्वजनक सर्वेश सर्वपूजित ॥
सरस्वत्याश्च कवचं ब्रूहि विश्वजयं प्रभो ।
अयातयाममन्त्राणां समूहेन संयुतं परम् ॥

ब्रह्मोवाच ।

शृणु वत्स प्रवक्ष्यामि कवचं सर्वकामदम् ।
श्रुतिसारं श्रुतिसुखं श्रुत्युक्तं श्रुतिपूजितम् ॥
उक्तं कृष्णेन गोलोके मह्यं वृन्दावने वने ।
रासेश्वरेण विभुना रासे च रासमण्डले ॥
अतीवगोपनीयञ्च कल्पवृक्षपरं वरम् ।
अयुताङ्गुतमन्त्राणां समूहेन समन्वितम् ॥
यद्धृत्वा पठनाद्ब्रह्मन् बुद्धिमांश्च बृहस्पतिः ।
यद्धृत्वा भगवान् शुक्रः सर्वदैत्येषु पूजितः ॥
पठनाद्धारणाद्वाग्मी कवीन्द्रो वाल्मिकी मुनिः ।
माधवमुनो मनुश्चैव यद्धृत्वा सर्वपूजितः ॥
कणादो गोतमः कण्वः पाणिनिः शाकटायनः ।
ग्रन्थञ्चकार यद्धृत्वा दक्षः कात्यायनः स्वयम् ॥
धृत्वा वेदविभागञ्च पुराण्यखिलानि च ।
चकार लीलामात्रेण कृष्णद्वैपायनः स्वयम् ॥
प्राणतोषञ्च संवर्त्तो वशिष्ठश्च पराशरः ।
यद्धृत्वा पठनाद्ग्रन्थं याज्ञवल्क्यश्चकार सः ॥
ऋष्यशृङ्गो भरद्वाजश्चास्तीको देवलस्तथा ।
जैगीषव्यो याज्ञवल्क्यो यद्धृत्वा सर्वपूजितः ॥
कवचस्यास्य विप्रेन्द्र ऋषिरेव प्रजापतिः ।
स्वयं छन्दश्च बृहती देवो रासेश्वरः प्रभुः ॥
सर्वतत्त्वपरिज्ञानसर्वार्थसाधनेषु च ।
विनियोगः प्रकीर्त्तितः ॥
ॐ ह्रीं सरस्वत्यै स्वाहा शिरो मे पातु सर्वतः ।
ॐ वाग्देवतायै स्वाहा भालं मे सर्वदावतु ॥
ॐ सरस्वत्यै स्वाहेति श्रोत्रं पातु निरन्तरम् ।
ॐ श्रीं ह्रीं भारत्यै स्वाहा नेत्रयुग्मं सदावतु ।
ॐ ह्रीं वाण्यै स्वाहा नासां मे सर्वतोऽवतु ॥
ह्रीं विद्याधिष्ठातृदेव्यै स्वाहा ओष्ठं सदावतु ॥
ॐ श्रीं ह्रीं ब्राह्म्यै स्वाहेति दन्तपंक्तिं सदावतु ।
वाणीमेकाक्षरो मन्त्रो मम कण्ठं सदावतु ।
ॐ श्रीं ह्रीं पातु मे ग्रीवां स्कन्धं मे श्रीं सदावतु ।
ॐ वाग्धिष्ठातृदेव्यै स्वाहा वक्षः सदावतु ॥

ॐ सर्वकण्ठवासिन्यै स्वाहा प्राच्यां सदावतु ।
ॐ सर्वजिह्वावासिन्यै स्वाहाग्निदिशि रक्षतु ॥
ॐ ऐं ह्रीं श्रीं क्लीं सरस्वत्यै बुधजनन्यै स्वाहा ।
सततं मन्त्रराजोऽयं दक्षिणे मां सदावतु ॥
ऐं ह्रीं श्रीं त्र्याक्षरो मन्त्रो नैर्ऋत्यां सर्वदावतु ॥
ॐ ऐं कविजिह्वाग्रवासिन्यै स्वाहा मां वारुणे-
ऽवतु ॥
सदम्बिकायै स्वाहा च वायव्ये मां सदावतु ।
ॐ गद्यपद्यवासिन्यै स्वाहा मामुत्तरेऽवतु ॥
ऐं सर्वशास्त्रवासिन्यै स्वाहैशान्ये सदावतु ।
ॐ ह्रीं सर्वपूजितायै स्वाहा चोर्ध्वं सदावतु ॥
ऐं ह्रीं पुस्तकवासिन्यै स्वाहाधो मां सदावतु ।
ॐ ग्रन्थबीजस्वरूपायै स्वाहा मां सर्वतोऽवतु ॥
इति ते कथितं विप्र सर्वमन्त्रौघविग्रहम् ।
इदं विश्वजयं नाम कवचं ब्रह्मरूपिणम् ॥
पुरा श्रुतं धर्मवक्त्रात् पर्वते गन्धमादने ।
तव स्नेहान्मयाख्यातं प्रवक्तव्यं न कस्यचित् ॥
गुरुमभ्यर्च्य विधिवत् वस्त्रालङ्कारचन्दनैः ।
प्रणम्य दण्डवद्भूमौ कवचं धारयेत् सुधीः ॥
पञ्चलक्षजपेनैव सिद्धन्तु कवचं भवेत् ।
यदि स्यात् सिद्धकवचो बृहस्पतिसमो भवेत् ॥
महावाग्मी कवीन्द्रश्च त्रैलोक्यविजयी भवेत् ।
शक्नोति सर्वं जेतुञ्च कवचस्य प्रसादतः ॥
इदञ्च काण्वशाखोक्तं कवचं कथितं मुने ।
स्तोत्रं पूजाविधानञ्च ध्यानञ्च वन्दनं तथा ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे सरस्वतीकवचम् ।
४ । ५६—६१ ॥ * ॥

श्रीनारायण उवाच ।

"वाग्देवतायाः स्तवनं शृणुष्व सर्वकामदम् ।
महामुनिर्याज्ञवल्क्यो येन तुष्टाव तां पुरा ॥
गुरुशापाच्च स मुनिर्हतविद्यो बभूव ह ।
तदा जगाम दुःखार्त्तो रविस्थानञ्च पुण्यदम् ॥
स प्राप तपसा सूर्यं लोकार्के दृष्टिगोचरे ।
तुष्टाव सूर्यं श्लोकेन रुरोद च मुहुर्मुहुः ॥
सूर्यस्तं पाठयामास वेदवेदाङ्गपारगः ।
उवाच स्तुहि वाग्देवीं भक्त्या च स्तुतिहेतवे ।
तमित्युक्त्वा दीननाथोऽप्यङ्गहानं चकार सः ।
मुनिः स्नात्वा च तुष्टाव भक्तिनम्रात्मकन्धरः ॥

याज्ञवल्क्य उवाच ।

कृपां कुरु जगन्मातर्नमोमेऽस्तु हततेजसम् ।
गुरुशापात् नष्टस्मृतिं विद्याहीनञ्च दुःखितम् ॥
ज्ञानं देहि स्मृतिं देहि विद्यां विद्याधिदेवते ।
प्रतिष्ठां कवितां देहि शक्तिं शिष्यप्रबोधिकाम् ॥
ग्रन्थकर्तृत्वशक्तिञ्च सच्छिष्यं सुप्रतिष्ठितम् ।
प्रतिभां सत्सभायाञ्च विचारक्षमतां शुभाम् ॥
सुतं सर्वे देवदोषात् दूरीभूतं पुनः पुनः ।
यथाङ्कुरं भस्मनि च करोति देवना पुनः ॥
ब्रह्मरूपा परमा ज्योतीरूपा सनातनी ।
सर्वविद्याधिदेवी या तस्यै वाण्यै नमो नमः ॥
यया विना जगत् सर्वं शश्वच्चीवन्मृतं परम् ।
ज्ञानाधिदेवी या तस्यै सरस्वत्यै नमो नमः ॥
यया विना जगत् सर्वं मूकमुन्मत्तवत् सदा ।

वागधिष्ठातृदेवी या तस्यै नित्यं नमो नमः ॥
हिमचन्दनकुन्देन्दुकुसुदाम्भोजसन्निभा ।
वर्णाधिदेवी या तस्यै चाक्षरायै नमो नमः ॥
विसर्गबिन्दुमात्रासु यदधिष्ठानमेव च ।
तदधिष्ठातृदेवी या तस्यै वाण्यै नमो नमः ॥
यया विनाऽऽ संख्यावान् संख्यां कर्त्तुं न शक्यते ।
कालसंख्यास्वरूपा या तस्यै देव्यै नमो नमः ॥
व्याख्यास्वरूपा या देवी व्याख्याधिष्ठातृ-
देवता ।
भ्रमसिद्धान्तरूपा या तस्यै देव्यै नमो नमः ॥
स्मृतिशक्तिर्ज्ञानशक्तिर्बुद्धिशक्तिस्वरूपिणी ।
प्रतिभाकल्पनाशक्तिर्या च तस्यै नमो नमः ॥
सनत्कुमारो ब्रह्माणं ज्ञानं पप्रच्छ यत्र वै ।
बभूव जडवत् सोऽपि सिद्धान्तं कर्त्तुमक्षमः ॥
तदाजगाम भगवानात्मा श्रीकृष्ण ईश्वरः ।
उवाच सततं स्तौहि वाणीमिति प्रजापतेः ॥
स च तुष्टाव तां ब्रह्मा चाज्ञया परमात्मनः ।
चकार तत्प्रसादेन तदा सिद्धान्तसुत्तमम् ॥
यदाप्यनन्तं पप्रच्छ ज्ञानमेकं वसुन्धरा ।
बभूव मूकवत् सोऽपि सिद्धान्तं कर्त्तुमक्षमः ॥
तदा तां स च तुष्टाव संचस्तः कृष्णमाज्ञया ।
ततश्चकार सिद्धान्तं निर्मलं भ्रमभञ्जनम् ॥
व्यासः पुराणसूत्रञ्च पप्रच्छ वाल्मिकं यदा ।
मौनीभूतः स सस्मार त्वामेव जगदम्बिकाम् ॥
तदा चकार सिद्धान्तं तत्तुल्यञ्च मुनीश्वरः ।
संप्राप निर्मलं ज्ञानं भ्रमान्धध्वंसदीपकम् ॥
पुराणसूत्रं श्रुत्वा स व्यासः कृष्णकलोद्भवः ।
त्वां विधिवे च दध्यौ च शतवर्षञ्च पुष्करे ॥
तदा त्वत्तो वरं प्राप्य स कवीन्द्रो बभूव ह ।
तदा वेदविभागञ्च पुराणञ्च चकार सः ॥
तदा महेन्द्रः पप्रच्छ तत्त्वज्ञानं शिवाग्निवम् ।
त्वां त्वामेव संचिन्त्य तस्मै ज्ञानं ददौ विभुः ॥
पप्रच्छ शब्दशास्त्रञ्च महेन्द्रश्च बृहस्पतिम् ।
दिव्यं वर्षसहस्रञ्च स त्वां दध्यौ च पुष्करे ॥
तदा त्वत्तो वरं प्राप्य दिव्यं वर्षसहस्रकम् ।
उवाच शब्दशास्त्रञ्च तदर्थञ्च सुरेश्वरम् ॥
अध्यापिताश्च ये शिष्या यैरधीतं मुनीश्वरैः ।
ते च त्वां परिसंचिन्त्य प्रवर्त्तन्ते सुरेश्वरि ॥
त्वं संस्तुता पूजिता च मुनीन्द्रमनुमानवैः ।
देवेन्द्रैश्च सुरैश्चापि ब्रह्मविष्णुशिवादिभिः ॥
जडीभूतः सहस्रास्यः पञ्चवक्त्रश्चतुर्मुखः ।
यां स्तोतुं किमहं स्तौमि त्वामेकास्येन मानवः ॥
इत्युक्त्वा याज्ञवल्क्यश्च भक्तिनम्रात्मकन्धरः ।
प्रणनाम निराहारो रुरोद च मुहुर्मुहुः ॥
तदा ज्योतिःस्वरूपा सा तेनादृष्टाप्युवाच तम् ।
शुक्रवीन्द्रो भवेत्युक्त्वा वैकुण्ठञ्च जगाम ह ॥
याज्ञवल्क्यकृतं वाणीस्तोत्रं यः संयतः पठेत् ।
सुकवीन्द्रो महावाग्मी बृहस्पतिसमो भवेत् ॥
महामूर्खश्च दुर्मेधा वर्षमेकं यदा जपेत् ।
स पण्डितश्च मेधावी सुकविश्च भवेद्ध्रुवम् ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे सरस्वत्युपाख्यानम् ।
५ । १—३५ ॥ * ।

अपि च। "संवत्सरप्रदीपे।
'पञ्चम्यां पूजयेल्लक्ष्मीं पुष्यधूपान्नवारिभिः।
मस्याधारं लेखनीञ्च पूजयेन्न लिखेत्ततः॥
माघे मासि सिते पक्षे पञ्चमी या त्रियः प्रिया।
तस्याः पूर्वाह्ण एवेह कार्यः सारस्वतोत्सवः॥'
सारस्वत इत्युपादानात् श्रियः सरस्वत्याः।
तथा च व्याडिः।
'लक्ष्मीसरस्वतीधीवृद्धिवर्गसम्पदिभूतिशोभासु।
उपकरणवेषरचनाविधासु च श्रीरिति प्रथिता॥'
तथा चोक्तं गां दयादिलादौ नानार्थशब्दस्यापि
प्रसिद्धार्थत्वेन व्यवहारः विपरीतार्थस्याप्रक-
रणप्रयोजकत्वं तु अप्रसिद्धार्थत्वेन च व्यवह्रियते
सर्वदा नानार्थानां व्यवहारस्तु शेषकाव्यादा-
विति।
'तरुणशकलमिन्दोर्बिभ्रती शुभ्रकान्तिः
कुचभरनमिताङ्गी सन्निषण्णा सिताब्जे।
निजकरकमलोद्यल्लेखनीपुस्तकश्रीः
सकलविभवसिद्ध्यै पातु वाग्देवता नः॥'
इति शारदोक्तं ध्यायेत्॥
पाद्यादिभिः पूजयित्वा।
'भद्रकाल्यै नमो नित्यं सरस्वत्यै नमो नमः।
वेदवेदान्तवेदाङ्गविद्यास्थानेभ्य एव च स्वाहा॥'
इति ब्रह्मपुराणोक्तेन घृतैः पूजयेत्॥
मत्स्यसूक्ते।
'वस्त्रजोक्षैश्च दीपैश्च सरस्वत्यै न दापयेत्॥'
सरस्वतीं संपूज्य।
'यथा न देवो भगवान् ब्रह्मा लोकपितामहः।
त्वां परित्यज्य सन्तिष्ठेत्तथा भव वरप्रदा॥
वेदाः शास्त्राणि सर्वाणि वृत्तयो गीतादिकाश्च यत्।
न विद्यीनं त्वया देवि तथा मे सन्तु सिद्धयः॥
सन्ध्यामेधा धरा पुष्टिर्गौरी तुष्टिः प्रभा धृतिः।
एताभिः पाहि तनुभिरष्टाभिर्मां सरस्वति॥'
इति मत्स्यपुराणोक्तैः प्रार्थयेत्॥"
इति तिथ्यादितत्त्वम्॥ ० ॥ अथ सरस्वती-
मन्त्रादि।
"अग्निर्वरुणसंयुक्तो दयावान्विनिवृद्धयम्।
सरस्वत्या दशार्णोऽयं वाग्वैभवफलप्रदः॥"
मन्त्रो यथा। वद वद वाग्वादिनि भगवतीति दशाक्षरः। तथा निबन्धे।
'सुवर्णेश्वरीयंपुटोऽयं महाविद्यासरस्वतप्रदः॥'०॥
अस्य यन्त्रम्।
"षोमेन्दौ रणवार्कवह्निकमलं हृन्दैः स्फुरत्-
केशरं
पत्रान्तर्गतपञ्चवर्णसयुता वर्णादिवर्णं क्रमात्।
आवाह्यस्थिर सान्निधाकृतिसुधा धौतो-
परेणाहृतं
यन्त्रं कल्पितमत्र पूजयतु तां वर्णालिकां
देवताम्॥"
गौतमीये।
"कर्णिकायां लेखनीञ्च विधिना विलिखेत् गुरुः।
ततः पीठप्रकेशरेषु विलिखेत् षोडशस्वरान्।
तथाष्टदलमध्ये च वर्णान्कं यथाविधि।
कादिमान्ताः पञ्च पञ्च वर्गाः स्युर्मालकोदिताः॥
यादिवान्ताः प्रादिक्षान्ता ळ-क्षमीग्रे प्रवि-
न्यसेत्।
चतुरस्रं चतुर्द्वारं दिक्षु वंष्ठं विदिक्षु च॥"० ॥
अस्य पूजाप्रयोगः। प्रातःस्नात्वादिपीठन्यासान्तं
कर्म विधाय केशरेषु मध्ये च पीठशक्तीर्न्यसेत्।
यथा, 'ॐ मेधायै नमः। ॐ प्रज्ञायै नमः।
ॐ प्रभायै नमः। ॐ विद्यायै नमः। ॐ धियै
नमः। ॐ धृत्यै नमः। ॐ स्मृत्यै नमः। ॐ
बुद्ध्यै नमः। ॐ विद्येश्वर्यै नमः। मध्ये तदुपरि
ॐ पद्मासनाय नमः।' प्रणवादिनमोन्तेन
पूजयेत्। तथा च सारदातिलके।
"आधारशक्तिमारभ्य पीठशक्त्यन्तमर्चयेत्।
मेधाप्रज्ञाप्रभाविद्याधीधृतिस्मृतिबुद्धयः॥
विद्येश्वरी च सम्प्रोक्ता तारादा नव शक्तयः।
वर्णालिनामनं दद्यात् मूर्त्तिं मूलेन कल्पयेत्॥"
ततः ऋष्यादिन्यासः। तद्यथा। शिरसि ॐ
कण्वऋषये नमः। मायाप्रटितयेत् ॐ बृहस्प-
तये ऋषये नमः। मुखे विराट्छन्दसे नमः।
हृदि वागीश्वर्यै देवतायै नमः॥ ० ॥ अत्र
मन्त्रन्यासः। शिरसि वं नमः। अवगण्डोर्दं नमः
वं नमः। चक्षुषोर्दं नमः वां नमः। नासि-
कयोर्वौं नमः दिं नमः। वदने निं नमः।
लिङ्गे स्वां नमः। गुह्ये धां नमः॥ ० ॥
ततो मालकायाः कराङ्गन्यासौ कृत्वा ध्यायेत्।
तथाच निबन्धे।
"शिरःअवगण्डनासावदनाम्बुगुह्यमात्।
न्यस्य वर्णान् षडङ्गानि मालकोक्तानि कल्प-
येत्॥"
ततो ध्यानम्।
"तरुणशकलमिन्दोर्बिभ्रती शुभ्रकान्तिः
कुचभरनमिताङ्गी सन्निषण्णा सिताब्जे।
निजकरकमलोद्यल्लेखनीपुस्तकश्रीः
सकलविभवसिद्ध्यै पातु वाग्देवता नः॥"
एवं ध्यात्वा मानसैः संपूज्य गुरुस्थापनं कुर्यात्।
ततः पीठपूजां कृत्वा केशरेषु मध्ये दिक्षु च
मेधादिपीठमन्त्रान्तं संपूज्य पुनर्ध्यात्वावाहनादि-
पञ्चपुष्पाञ्जलिदानपर्यन्तं कर्म विधाय आव-
रणपूजां कुर्यात्। अग्निकोणे अं कं खं गं घं
ङं चां छदयाय नमः। एवं नैर्ऋते इं चं छं जं
झं ञं ईं शिरसे स्वाहा। वायुकोणे उं टं ठं
डं ढं णं ऊं शिखायै वषट्। ईशाने एं तं थं
दं धं नं ऐं कवचाय हुं। मध्ये ओं पं फं बं
भं मं औं नेत्रत्रयाय वौषट्। दिक्षु अं यं रं लं
वं शं षं सं हं ळं क्षं यः करतलपृष्ठाभ्यां
अस्त्राय फट्। ततः पत्रेषु पूर्वादिषु ॐ योगायै
नमः। ॐ सत्यायै नमः। ॐ विमलायै नमः।
ॐ ज्ञानायै नमः। ॐ बुद्ध्यै नमः। ॐ स्मृत्यै
नमः। ॐ मेधायै नमः। ॐ प्रज्ञायै नमः।
दलाग्रेषु। ब्राह्म्यादा मातरः पूज्याः प्रणवादि-
नमोन्तिकाः। तद्बहिरिन्द्रादीन् वज्रादींश्च
पूजयेत्। ततो धूपादिविसर्जनान्तं कर्म समा-
पयेत्॥ ० ॥ अस्य पुरश्चरणं दशलक्षजपः।
तथा च।
"दशलक्षं जपेन्मन्त्रं दशांशं जुहुयात्ततः।
पुष्करीकैः पयोऽभ्यक्तैस्तिलैस्तिमधुरान्वितैः॥"
इति॥ ० ॥
मन्त्रान्तरम्।
"हृदयान्ते भगवति वदशब्दयुगं ततः।
वाग्देविवह्निजायान्तं वाग्भवाद्यं समुच्चरेत्॥"
अस्य पूजाप्रयोगः। प्रातःस्नात्वादिपीठन्यासान्तं
कर्म विधाय केशरेषु मध्ये च पूर्वोक्तमेधादि-
पीठशक्तीः पीठमनुञ्च न्यसेत्। ततः पूर्वोक्त-
ऋष्यादिन्यासं कृत्वा कराङ्गन्यासौ कुर्यात्। तद्-
यथा। ऐं अङ्गुष्ठाभ्यां नमः। नमस्तर्जनीभ्यां
स्वाहा। भगवति मध्यमाभ्यां वषट्। वद वद
अनामिकाभ्यां हुं। वाग्देवि कनिष्ठाभ्यां
वौषट्। स्वाहा करतलपृष्ठाभ्यां फट्। एवं
हृदयादिषु। तथा च निबन्धे।
"मनोः षड्भिः पदैः कुर्यात् जातियुक्तं षड-
ङ्गकम्॥"०॥
ततो ध्यानम्।
"शुभ्रां स्वच्छविलेपमाल्यवसनां प्रीतांशुखण्डो-
ज्ज्वलां
बाह्वामक्षगुणं सुधाढ्यकलशं विद्याञ्च हस्ता-
म्बुजैः।
बिभ्राणां कमलासनां कुचनतां वाग्देवतां
सस्मितां
वन्दे वाग्विभवप्रदां त्रिनयनां सौभाग्यसम्पत्-
करीम्॥"
एवं ध्यात्वा मानसैः संपूज्य गुरुस्थापनं कुर्यात्।
ततः पूर्वोक्तक्रमेण पूजयेत्। किन्त्वङ्गमन्त्र
विशेषः। अस्य पुरश्चरणमष्टलक्षजपः। तथा च।
"हविष्याशी जपेन्मन्त्रं वत्सरत्रयमन्यधीः।
दशांशं जुहुयादन्ते तिलैराज्यपरिप्लुतैः॥
तारो मायाधरो विन्दुः शक्तिसारः सरस्वती।
ङेन्ती नमोन्तको मन्त्रः प्रोक्त एकादशा-
क्षरः॥"०॥
अस्याः पूजाप्रयोगः। प्रातःस्नात्वादिपूर्वोक्त-
पीठमन्त्रान्तं विन्यस्य पूर्वोक्तं ऋष्यादिन्यासं
कुर्यात्। ततो मन्त्रन्यासः। ॐ नमो ब्रह्म-
रन्ध्रे। द्रीं नमो भ्रूमध्ये। ऐं नमः द्रीं नम-
श्चक्षुषोः। ॐ नमः सं नमः कर्णयोः। रं नमः
सं नमो नासिकयोः। त्यै नमो मुखे। नं नमो
लिङ्गे। मं नमो गुह्ये। ततः कराङ्गन्यासौ।
ऐं अङ्गुष्ठाभ्यां नमः। ऐं तर्जनीभ्यां स्वाहा।
इत्यादि। एवं हृदयादिषु। तथा च निबन्धे।
"मन्त्रवर्णान् न्यसेन्मन्त्री वाग्भवेनाङ्गकल्पना।"
इत्यादि॥०॥
ततो ध्यानम्।
"वाणीं पूर्णेन्दुशोभाहरोज्ज्वलमुखीं कर्पूरकुन्द-
प्रभा-
चन्द्रार्काङ्कितमस्तकां निजकरैः संबिभ्रतीं-
मादरात्।

षोडशमन्त्रगुणं सुधाढ्यकलसं विद्याक्षं तुङ्गस्तनीं
दिव्यैराभरणैर्विभूषिततनुं हंसाधिरूढां भजे॥"

एवं ध्यात्वा मानसैः संपूज्य ब्रह्मस्थापनं कुर्यात्। ततः पीठपूजां विधाय केसरेषु मध्ये च पूर्वोक्त-पीठशक्तीः पीठमनुञ्च यजेत्। ततः पुनर्ध्यात्वा आवाहनादि पञ्चपुष्पाञ्जलिदानपर्यन्तं कर्म समाप्य आवरणपूजां कुर्यात्। देव्या दक्षिणे ॐ संस्कृतायै वाङ्मयै नमः। वामे ॐ प्राकृतायै वाङ्मयै नमः। ततः केसरेषु अग्निकोणे ऐं हृदयाय नमः। नैर्ऋते ऐं शिरसे स्वाहा। वायव्ये ऐं शिखायै वषट्। ईशाने ऐं कवचाय हुं। मध्ये ऐं नेत्रत्रयाय वौषट्। दिक्षु ऐं अस्त्राय फट्। ततः पूर्वादिपत्रेषु ॐ प्रज्ञायै नमः एवं मेधायै श्रुत्यै प्रकृत्यै स्मृत्यै वागीश्वर्यै मत्यै स्वस्त्यै। ततः पद्मायेषु ब्राह्म्याद्याः पूजयेत्। तथा च निबन्धे।

"देव्या दक्षिणतः पूज्या संस्कृता वाङ्मयी शुभा।
प्राकृता वाङ्मयी पूज्या वामतः सर्वदा शुभा॥
दृष्ट्वा पूर्ववदङ्गानि प्रज्ञाद्याः पूजयेत् पुनः।
प्रज्ञा मेधा श्रुतिः प्रकृतिर्स्मृतिर्वागीश्वरी मतिः।
स्वस्तिश्चेति समाख्याता ब्राह्म्याद्यास्तदनन्तरम्॥"

तद्बहिरिन्द्रादीन् वज्रादींश्च पूजयेत्। ततो धूपादिविसर्जनान्तं कर्म समापयेत्। अस्य पुरश्चरणं द्वादशलक्षजपः। तथा च।

"जपेत् द्वादशलक्षाणि तत्सहस्रं सितामुजैः।
नागचम्पकपुष्पैर्वा जुहुयात् साधकोत्तमः॥"

मन्त्रान्तरं प्रारदायाम्।

"वाक्सखेऽग्नेते भूयः ध्रुवशुरिति कीर्त्तयेत्।
वागाद्यो मनुराख्यातो ब्रह्मसंख्याक्षरोऽपरः॥"

अस्य पूजादिकं पूर्ववत्। करान्यासस्तु ऐं अङ्गुष्ठाभ्यां नमः। वाक्सखे तर्जनीभ्यां स्वाहा। अग्नेते मध्यमाभ्यां वषट्। ध्रुव अनामिकाभ्यां हुं। ध्रुः कनिष्ठाभ्यां फट्। एवं हृदयादिषु। तथा च निबन्धे।

"कुर्याद्वाङ्गानि विधिवत् वागाद्यैः पञ्चभिः पदैः॥"

ध्यानन्तु।

"व्याख्यानाक्षमालके करैर्दधतीं पद्मद्वयं पुस्तकं
बिभ्राणा तरुणेन्दुखण्डमुकुटा तुङ्गेन्दुकुन्दप्रभा।
भाले भौक्तिकलोभना कुचभराक्रान्ताभव-
द्भूतये भूयाद्वागधिदेवता मुनिगणैरासेव्यमाना-
मिमम्॥"

एवं ध्यात्वा पूर्ववत् पूजादिकं कुर्यात्। अस्य पुरश्चरणमेकादशलक्षजपः। तथा च।

"ब्रह्मलक्षं जपेन्मन्त्रं दशांशं जुहुयाद्घृतैः॥"

मन्त्रान्तरं प्रारदायाम्।

"नीयर्क्ष प्रथनं विष्णोः सकेवलचतुर्मुखम्।
अर्धीशेन्द्युतो वह्निर्विन्दुमत्याम्बुमान् भृगुः।
उक्तानि त्रीणि बीजानि वह्निः सारस्वता-
धिगम्॥"

नीयं यकारः विष्णोः प्रथनमाकारः केवलेन आकाररहितेन ककारेण सहितः तेन वागिति सिद्धं वाग्भवमित्यर्थः। केचित्तु लक्षितलक्षणाभयादेवं वदन्ति आकारयुक्तो वकारः के मस्तके वलते केवलोऽनुस्वारः तदयुक्तेन ककारेण सह वर्त्तते तेन कामिति। तन्न। निरूढलक्षणायाः शक्तितुल्यत्वात्। वाक् वाग्भवं इति पर्य्यग्रः। वस्तुतस्तु ऐं रं स्वोम्।

"द्वादशस्वरसंहृत्य विन्दुनादविभूषितम्।
विन्दुनादसमायुक्तं वह्निबीजं समुद्धरेत्॥
षष्ठस्वरसमायुक्तं द्वितीयं बीजमुद्धरेत्।
चन्द्रबीजं समुद्धृत्य वरुणं योजयेत्ततः।
त्रयोदशस्वरारूढ़ं विन्दुनादविभूषितम्॥"

इति विश्वसारवचनात् वाग्भवबीजमेव। अस्य पूजादिकं पूर्ववत्। करान्यासस्तु द्विरुक्तैः क्ष्मिभिर्बीजैर्विधेयः। तथा च निबन्धे।

"अङ्गानि रुग्यवेष्यन्ती द्विरुक्तैर्नामसंयुतैः॥"

ध्यानन्तु।

"मुक्ताहारावदातां शिरसि शशिकलामुकुलां
वाहुभिः खेर्याक्षीं वर्णाक्षमालां मणिमयकलसं पुस्तक-
ञ्चोद्वहन्तीम्।
आपीनोत्तुङ्गवक्षोरुहभरविलसच्चारुदेशा-
मधीशां
वाणीमीडे चिराय त्रिभुवनगमितां पुष्करीके
निषण्णाम्॥"

एवं ध्यात्वा पूर्ववत् पूजादिकं कुर्यात्। अस्य पुरश्चरणं त्रिलक्षजपः। तथा च।

"त्रिलक्षं प्रजपेन्मन्त्रं जुहुयात्तद्दशांशतः।
पायसैराज्यसंसिक्तैः संस्कृते हव्यवाहने॥"

अथ पारिजातसरस्वतीमन्त्राः। मन्त्रदेवप्रकाशिकायाम्। स च प्रणवचन्द्रलेखा संपुटितएकारसकारौकारविन्द्युक्तः सरस्वती ङेन्ता नतिश्च। अस्य पूजा। प्रातःस्नात्वादिपीठमन्त्रान्तं विन्यस्य ऋष्यादिन्यासं कुर्यात्। शिरसि कक्षऋषये नमः। मुखे दक्षणपृष्ठन्दसे नमः। हृदि पारिजातसरस्वत्यै देवतायै नमः। ततो माढकोक्तकरान्यासौ कुर्यात्। मूर्द्धि भ्रूमध्यनेत्रकर्णनासापुटद्वयविशालिङ्गपायुषु एकादशाक्षरन्यासः। ततो हृदां अङ्गुष्ठाभ्यां नम इत्यादिना करान्यासौ कुर्यात्। अन्यत्र सर्वं पूर्ववत्। दक्षिणाम्नायसंहितायान्तु।

"सम्यक्प्रदाय मेरया वाग्भवं बीजमादिखेत्।
तारेण परया देवि संपुटीकृत्य मन्त्रवित्।
सरस्वत्यै हृदन्तोऽयं रुद्रार्णो मनुरीरितः॥"

तथाच प्रपञ्चसारे।

"आद्यन्तप्रणवप्रक्तिमध्यसंस्था
वाक् भूयो भवति च सरस्वती ङेन्ता।
मन्त्रज्ञो मनुरयमीशसंख्यवर्णः
संप्रोक्तो भजमानः पारिजातः॥

दक्षिणाम्नायर्षिर्ब्रह्मा प्रोक्तो गायत्री च्छन्द
श्चैरसम्।

पारिजातेश्वरी वाणी देवता परिकीर्त्तिता॥
तृतीयश्च द्वितीयश्च बीजशक्ती च तारकम्।
कीलकं परमेशानि महासारस्वतप्रदम्॥
षड्दीर्घस्वरसंभिन्नबीजैनाङ्गानि विन्यसेत्॥"

ततो ध्यानम्।

"हंसारूढा हरहासतुषारेन्दुकुन्दावदाता
वाणी मन्दस्मिततरसुखी मौलिवद्धेन्दुरेखा।
विद्यावीणाक्षतमयघटाक्षस्रजा दीप्तहस्ता
शुभ्राजस्रा भवदभिमतप्राप्तये भारती स्यात्॥'

अस्य पूजादिकं पूर्वोक्तैकादशाक्षरीवत्। पुरश्चरणन्तु द्वादशलक्षजपः। सितपद्मैर्नागचम्पकैर्वा जुहुयाद्द्वादशसहस्रमिति। इति तन्त्रसारः॥*॥

नदीविशेषस्य पर्य्यायः। ब्रह्मसमुद्भवा २ वाक्प्रदा ३ ब्रह्मसुता ४ भारती ५ वेदाग्रणीः ६ पयोब्जिजाता ७ वागी ८ विशाला ९ कुटिला १०। तस्यागुणाः। स्वादुत्वम्। पूतत्वम्। सर्वरुजापहत्वम्। रुच्यत्वम्। दीपनत्वम्। प्रथ्यत्वम्। देहकान्तिकरत्वम्। लघुत्वञ्च। इति राजनिर्घण्टः॥*॥ सा तु देशभेदे सप्तनाम्नी यथा। पुष्करे पितामहयज्ञे आहूता सुप्रभा १ नैमिषारण्ये सत्रयाजिभिर्ऋषिभिराहूता कांचनाक्षी २ गयदेशे गयराजयज्ञे आहूता विशाला ३ उत्तरकोशलायां औद्दालकमुनियज्ञे समाहूता मनोरमा४ ऋषभद्वीपे कुरुक्षेत्रे कुरुराजयज्ञे समाहूता ओघवती ५ गङ्गाद्वारे दक्षप्रजापतियज्ञे समाहूता सुरेणुः ६ हिमालयपर्वते ब्रह्मणः पुनर्यज्ञे समाहूता विमलोदा७। तत्र सप्तसरस्वत्यः समागताः। अतएव ततः सौधं सप्तसारस्वतनाम्ना ख्यातम्। इति महाभारते शल्यपर्व॥*॥

तस्या उत्पत्तिर्ब्रह्मपत्नीत्वकारणञ्च यथा—

नारायण उवाच

"सरस्वती सा वैकुण्ठे स्वयं नारायणान्तिके।
गङ्गाप्लावेन कलया कलहाङ्कारते सदा॥
पुण्यदा पुण्यजननी पुण्यतीर्थस्वरूपिणी।
पुण्यवह्निर्निवेश्या च स्थितिः पुण्यवतां सुने॥
तपस्विनां तपोरूपा तपस्याकारस्वरूपिणी।
कृतपापैघदाहाय ज्वलदग्निस्वरूपिणी॥
ज्ञाने सरस्वतीतोये मग्नं येर्मानवैर्भुवि।
तेषां स्थितिश्च वैकुण्ठे सुचिरं हरिसंसदि॥
भारते कृतपापौ च स्नात्वा तज्जलतीरया।
मुच्यते सर्वपापेभ्यो विष्णुलोके वसेच्चिरम्॥
चातुर्मास्यां पौर्णमास्यामक्षयायां दिनक्षये।
यतीपाते च ग्रहणेऽन्यस्मिन् पुण्यदिनेऽपि च॥
आचमेच्च यः स्नाति हेलया श्रद्धयापि वा।
सारूप्यं लभते नूनं वैकुण्ठे स हरेरपि॥
सरस्वतीमनुं तत्र मासमेकञ्च यो जपेत्।
महामूर्खः कवीन्द्रश्च स भवेन्नात्र संशयः॥
नित्यं सरस्वतीतोये यः स्नाति शुद्धयेन्नरः।
न गर्भवासं कुरुते पुनरेव स मानवः॥
इत्येवं कथितं किञ्चित् भारतीगुणकीर्त्तनम्।
सुखदं पुण्यदं सारं किं भूयः श्रोतुमिच्छसि॥*॥

नारद उवाच ।
कथं सरस्वती देवी गङ्गाशापेन भारते ।
कलया कलहेनैव बभूव पुण्यदा सरित् ।
नारायण उवाच ।
शृणु नारद वक्ष्यामि कृष्णभेनां पुरातनीम् ।
यस्या: श्रवणमात्रेण सर्वपापैः प्रमुच्यते ।
पत्नी: सरस्वती गङ्गा तिस्रो भार्या हरेरपि ।
प्रेम्णा समासनिष्ठन्ति सन्ततं हरिसन्निधौ ।
चकार मेकदा गङ्गा विष्णोर्मुखनिरीक्षणम् ।
सस्मिता च सकामा च सकटाक्षं पुनः पुनः ।
विमुक्तकेशं तत्कृत्वं निरीक्ष्य च क्षणं मुदा ।
क्षमां चकार सदृष्ट्वा लक्ष्मीर्नैव सरस्वती ।
बोधयामास तां पद्मा सत्त्वरूपा च सस्मिता ।
क्रोधयुक्ता च सा वाणी न च शान्ता बभूव ह ।
उवाच गङ्गां भर्तारं रक्ताक्षी रक्तलोचना ।
सस्मिता क्रोधवेगेन ग्रथनत्प्रस्फुरिताधरा ।
सरस्वत्युवाच ।
सर्वेषु समभावश्च सङ्गश्चैकः कामिनीं प्रति ।
धर्मिष्ठस्य परिज्ञस्य विपरीता रतस्य च ।
ज्ञानं सौभाग्यमधिकं गङ्गायां ते गदाधर ।
क्षमायाश्च समुत्कर्षं न च किञ्चिज्ञसि प्रभो ।
गङ्गायाः पद्मया सार्धं प्रीतिश्चास्ति सुसन्नता ।
क्षमां चकार तेनैव विपरीतं हरिप्रिया ।
किं जीवनेन मेऽत्रैव दुर्भगायाश्च सान्प्रतम् ।
त्यक्तं जीवनं सत्या या पत्युः प्रेमवञ्चिता ।
ते धन्यास्ते च पुण्यास्ते ये वदन्ति मनीषिणः ।
ते च सन्तो न वेदज्ञा न जानन्ति गतिं तव ।
सरस्वतीवचः श्रुत्वा दृष्ट्वा तां कोपसंयुताम् ।
लक्ष्मीश्च समाधीश्च ब्रह्मणाम प्रियःसभाम् ।
गते नारायणे गङ्गासुवाच निर्भयं वचः ।
यामधिष्ठातृदेवी सा वाञ्छाकल्पद्रुरूपिणी ।
हे त्रिनेत्रे हे सकामे स्वामिसौख्यं करोषि किम् ।
त्यक्त्वा स्वामिसौभाग्यं विलासयितुमिच्छसि ।
मायाभूमिं करिष्यामि मायाश्च हरिमायिनी ।
किं करिष्यति ते कान्तो मनेव कान्तवल्लभे ।
इत्युक्त्वा गङ्गायाः वेणीं मायीमुष्टिना ।
जघानाशु तां पद्मा मध्यदेशे स्थिता सती ।
उद्यतां दक्षिणां तां पद्मां मध्यदेशस्थितां सतीं ।
ज्ञात्वाऽऽत्मनः परिज्ञा भविष्यति न संशयः ।
अतुलाक्षात् सा तस्मात् क्रोधप्रस्फुरिताधरा ।
उवाच गङ्गा तां देवीं पद्माश्च रक्तलोचना ।
गङ्गोवाच ।
अतुलाक्षश्च सर्वेशश्च यदि किं ते करिष्यति ।
यास्यसि त्वं तत्सन्निधौ देवीत्वं कलहप्रिया ।
इत्युक्त्वा सा देवी वाक्यं शापं ददौ प्रति ।
परिज्ञरूपा भवतु सा वा श्वापि प्रधानतः ।
अधोभागं वा प्रयातु सरित्वं चैव यास्यति ।
इत्येवं शापं दत्त्वा तां प्रयाता सरस्वती ।
सर्वेषु शापदानेषु भविष्यति भविष्यति ।
इत्युक्त्वाऽन्तर्दधे तत्र सरस्वत्यै च सद्गुरुः ।
अदृश्येनैव देहेन सर्वेषां सर्वदर्शिनाम् ।
सरस्वतीं करे धृत्वा वासयामास वक्षसि ।
बोधयामास सर्वज्ञः सर्वज्ञानं पुरातनम् ।
श्रीनारायण उवाच ।
लक्ष्म्या त्वं कलया गच्छ धर्मध्वजगृहे शुभे ।
त्वयीनिसभाया योनौ तस्य कन्या भविष्यसि ।
तत्रैव देवदोषेण कृष्णस्य लभिष्यसि ।
मदंशस्यासुरस्यैव शङ्खचूडस्य कामिनी ।
भूत्वा पश्चाच्च मत्पत्नी भविष्यसि न संशयः ।
त्रैलोक्यपावनी नाम्ना तुलसीति च भारते ।
कलया च सरिद्भूत्वा शीघ्रं गच्छ वरानने ।
भारते भारतीशापात् नाम्ना पद्मावती भव ।
गङ्गे यास्यसि पश्चात्त्वमंशेन विश्वपावनी ।
भारतं भारतीशापात्पापदाहाय पापिनाम् ।
भगीरथस्य तपसा तेन नीता सुदुष्करात् ।
नाम्ना भागीरथी पूता भविष्यसि महीतले ।
मदंशस्य मनुष्यस्य भावा भव ममाज्ञया ।
मत्कलांशस्य तस्यैव शान्तनोश्च सुरेश्वरि ।
गङ्गाशापेन कलया भारतं गच्छ भारति ।
कलहस्य फलं भुङ्क्ष्व सपत्नीभ्यां सहाधुना ।
त्वयश्च ब्रह्मसदनं ब्रह्मणः कामिनी भव ।
गङ्गा यातु शिवस्थानमत्रैव तिष्ठतु ।
शान्ता च क्रोधरहिता मद्भक्ता सत्त्वरूपिणी ।
महाभाग्यो महाभागा सुशीला धर्मचारिणी ।
यदंशकलया सर्वा धर्मिष्ठाश्च पतिव्रताः ।
शान्तरूपाः सुशीलाश्च प्रतिविश्वेषु योषितः ।
तिस्रो भार्याश्चिराल्लाभश्च त्रयो भृत्याश्च
वान्यवाः ।
ध्रुवं वेदविरुद्धश्च न स्त्रीणां मङ्गलप्रदः ।
गच्छ गङ्गे शिवस्थानं ब्रह्मस्थानं सरस्वती ।
अत्र तिष्ठतु मद्भक्ते सुशीला कमलालया ।
इत्युक्त्वा जगतां नाथो विरराम च नारद ।
जातुधे रुरुदुर्देव. समालिङ्ग्य परस्परम् ।
ताश्च सर्वाः समाशोच्य क्रमेणोचुः सदीश्वरम् ।
कम्पिताः शाङ्खनेयाश्च क्रोधेन च भयेन च ।
सरस्वत्युवाच ।
विदायं देहि मे नाथ दुःखाया बलशासनम् ।
सत्सङ्गमिश्रा परित्यक्ता कृतो जीवन्ति का: स्त्रियः ।
देहत्यागं करिष्यामि योगेन भारते ध्रुवम् ।
शङ्खचूडो गिरतनं प्रायुःकर्हति निश्चितम् ।
गङ्गोवाच ।
यदहं केनापराधेन त्वया त्यक्ता ममप्रते ।
देहत्यागं करिष्यामि निर्दोषाया वदं शम ।
निर्दोषां कामिनीं त्यागं करोति यो अमो भवे ।
स याति नरकं कल्पं किं ते सर्वेश्वरस्य वा ।
लक्ष्म्युवाच ।
यत्र कृष्णस्वरूपश्च कोपः कमलजो तव ।
प्रसादं कुरु मातर्मे मदीशस्य क्षमा वरम् ।
भारतं भारतीशापात् यास्यामि कलया शिवे ।
तत्रिकालं निवासाय कथा प्रदास्यति ते वदम् ।
दृष्ट्वाऽपि पापिनः पापं मद्भक्तं स्नानरूपाकृतम् ।
तेन तेन विमुक्तास्ते मामन्निष्यन्ति तत्पदम् ।
कलया तुलसीरूपा धर्मध्वजसुता सती ।
भूत्वा कदा लभिष्यामि तत् पादाम्बुजमच्युत ।
वृक्षरूपा भविष्यामि त्वदधिष्ठातृदेवता ।
मामुद्धरिष्यसि कदा तन्मे ब्रूहि कृपानिधे ।
गङ्गा सरस्वतीशापात् यदि यास्यति भारतम् ।
सा केन सुक्ता पापाच्च कदा त्वां वा लभिष्यति ।
गङ्गाशापेन सा वाणी यदि यास्यति भारतम् ।
कदा शापाद्विनिर्मुच्य लभिष्यति पदं तव ।
तां वाणीं ब्रह्मसदनं गङ्गां वा शिवमन्दिरम् ।
गन्तुं वदसि हे नाथ तत् क्षमस्व च ते वचः ।
इत्युक्त्वा कमला कान्तपदं धृत्वा ननाम च ।
स्वकेशैर्वेष्टनं कृत्वा करोद च पुनः पुनः ।
उवाच पद्मनाभस्तां पद्मां कृत्वा स्ववक्षसि ।
दैवहास्यप्रसन्नास्यो भक्तानुग्रहकातरः ।
श्रीनारायण उवाच ।
स्वशापमाचरिष्यामि स्ववाक्यस्य सुरेश्वरि ।
शमनाय करिष्यामि शृणु तत्क्रममेव च ।
भारतीं यातु कलया सरिद्रूपा च भारतम् ।
अहोभ्यां ब्रह्मसदनं स्वयं तिष्ठतु मद्गृहे ।
भगीरथेन नीता सा गङ्गा यास्यति भारतम् ।
पूतं कर्तुं त्रिभुवनं स्वयं तिष्ठतु मद्गृहे ।
तत्रैव चन्द्रमौलेश्च मौलिं प्राप्स्यति दुर्लभम् ।
ततः स्वभावतः पूतापूततां भविष्यति ।
कलांशांशेन त्वं गच्छ भारतं कमले भव ।
पद्मावती सरिद्रूपा तुलसी वृक्षरूपिणी ।
कले: पञ्चसहस्रे च गते वर्षे च मोक्षयम् ।
युष्माकं सरितामेव मद्गृहागमिष्यति ।"
इति ब्रह्मवैवर्ते प्रकृतिखण्डे ।६।१—८८।

सरस्वान्, [त्] पुं. (सरो नीरमस्यास्तीति मतुप्। तत्रौ मत्वर्थे इति भत्वम् पदकार्य्यम्।) समुद्रः। इत्यमरः ।१।१०।१ ॥ नदः। रश्मिः, चि। इति मेदिनी ।

सरा, स्त्री, (सरति गच्छतीति। सृ+अच्। टाप्।) निर्झरः। इति भरतश्चिरूपकोषः ॥ प्रसारिणी। इति राजनिर्घण्टः ॥

सरायः, पुं, (सरात् सरणात् अवतीति। अव रक्षणे+अण्।) सरावः। इति भरतश्चिरूपकोषः ।

सरिः, पुं, स्त्री, (सरतीति। सृ+इन्।) निर्झरः। इति हेमचन्द्रः ।

सरिका, स्त्री, छिङ्गपर्णी। इति शब्दचन्द्रिका ॥ नवमल्लिका च ।

सरित्, स्त्री, (सरतीति। सृ गतौ+"सृस्मृदृजूषिभ्य इतिः।" उणा० १। ६८। इति इतिः।) नदी। इत्यमरः। १। १०। २८ ॥ (यथा, देवीभागवते ।
"सरितो मार्गबाहिन्यस्तथार्थानाञ्च यातिते ।")
सलम्। इति शब्दमाला। दुर्गा। यथा,—
"छिन्ना करस्वरूपत्वात् सरत्वाच्च सरिन्मता।
सङ्गमाद्गमनाद्गङ्गा लोके देवी विभाषते ।"
इति देवीपुराणे ४५ अध्यायः ।

सरित्पतिः, पुं. (सरितां पतिः।) समुद्रः। इत्यमरः।१।१०।११। (यथा, भागवते।५।१७।७। "एवं मात्स्यवच्चिमरान्नियतमनो तत उपरतधिगा केतुमालमभि यंतुः प्रतीच्यां दिशि सरित्पतिं प्रविशति।")

सरित्वान्, [त्] पुं, (सरितः सन्त्यस्येति। सरित्+मतुप्। मस्य वः।) समुद्रः। इति केचित्।

सरित्सुतः, पुं, (सरितो गङ्गायाः सुतः।) भीष्मः। गङ्गापुत्रत्वात्।

सरितांनाथः, पुं, (सरितां नदीनां नाथः। षष्ठीक् समासः।) समुद्रः। यथा,—

"त्वं देव सरितांनाथ! त्वं देवि सरितां वरे।
उभयोः सङ्गमे स्नात्वा सद्यो मुच्यामि दुरितात् वै।"

इति प्रायश्चित्ततत्त्वे गङ्गासागरस्नानमन्त्रः।

सरस्वत्पतिः, पुं, (सरितां पतिः। षष्ठीक् समासः।) समुद्रः। इति शब्दरत्नावली। (यथा, कुमारे। २।६७।

"तस्योपायनयोग्यानि रत्नानि सरित्पतिः।
सद्यमप्यसासात्तः स्वानिष्यति प्रतीक्षते।")

सरिद्वरा, स्त्री, (सरित्सु वरा श्रेष्ठा।) गङ्गा। इति हेमचन्द्रः। (यथा, महाभारते।१।८६।८।

"महाभिषस्तु तं दृष्ट्वा नदीं हैमवतीमुतं नृपम्।
तमेव मनसाध्यायन्मुमोचोर्ध्वं सरिद्वरा।"

नदीश्रेष्ठे, त्रि। यथा, महाभारते।१।७८।८।

"सा तमस्मिन्नमं विषमनुचिन्त्य सरिद्वरा।
ततधा विद्धता यस्माच्छतद्रुरिति विश्रुता।")

सरिन्नाथः, पुं, (सरितां नाथः।) समुद्रः। इति राजनिर्घण्टः।

सरिमा [न्] पुं, (सरतीति। सृ+"सृ-स्ट-ए-सृ-कृभ्य इमनिच्।" उणा० ४।१४०। इति इमनिच्।) गमनम्। वायुः। इत्युणादिकोषः।

सरिरं, क्ली, (सरितम्। रलयोरैक्यात् सस्य रः।) सलिलम्। इत्यमरटीकायां भरतः।

सरिरुहः, पुं, (सृ गतौ+अपः गुणागमश्च। ततः एषोदरादित्वात् साधुः। इत्युणादिवृत्तौ उज्ज्वलदत्तः। ३। १४१।) सर्षपः। इति शब्दरत्नावली।

सरी, स्त्री, (सरि+ऋदित्वादिति वा ङीष्।) निर्यासः। इति भरतसिद्धान्तकौमुदी।

सरीरुहः, पुं, (दृष्टिं सर्पतीति। सृप्+यङ् लुक्+ड प्रत्ययश्च।) सर्षपः। इत्यमरः।१।८।७। (यथा, महाभारते। ३। १२। ३।

"यस्य रोषमनुं वक्षुषाक्षसरीरुहम्।
परित्रस्तश्च यो मर्त्यः सुखं तस्य न विद्यते।"

सरुहे, त्रि। इति शब्दमाला। यथा, भागवते। ५। १८। २८।

"यार्गं न वैकुण्ठिपथस्तुपद्भः।
सरीरुहं मानु यस्य कृतते।")

सरुः, पुं, (स+उद्।) वृक्षः। शब्दमाला। इत्यमरभरतौ रामाश्रमसुन्दरौ।

सरुः, त्रि, (स+उद्।) क्षुब्धः। इति भूरिप्रयोगः।

सरूपः, त्रि, (समानं रूपं यस्य। "ज्योतिर्जनपदेति।" ६। ३। ८५। इति समानस्य सः।) सदृशः। समानरूपः। इति षटाधरः। (यथा, सुश्रुतोपनिषदि। २। १। १।

"यथा सुदीप्तात् पावकात् विस्फुलिङ्गाः
सहस्रशः प्रभवन्ते सरूपाः।
तथाक्षरादिविधाः सोम्य भावाः
प्रजायन्ते तत्र चैवापि यन्ति।")

सरूपता, स्त्री, (सरूपस्य भावः। तल्। टाप्।) समरूपत्वम्। तुल्यता। सरूपशब्दात् तत्रार्थेनार्था निष्पन्ना।

सरोजं, क्ली, (सरसि जायते इति। जन+डः।) पद्मम्। इति हेमचन्द्रः। (यथा, कुमारे। ५। २७।

"सुखेन सा पद्मसुगन्धिना निशि
प्रवेपमानाधरपत्रशोभिना।
तुषारदृष्टिक्षतपङ्कजस्रजां
सरोजसन्तानमिवाकरोदपाम्।")

सरोवरजाते, त्रि।

सरोजन्मन्, [न्] क्ली, (सरसः पद्मस्य उत्पत्तिर्यस्य।) पद्मम्। इति हेमचन्द्रः।

सरोजिनी, स्त्री, (सरोजानि सन्त्यस्यामिति। सरोज+"पुष्करादिभ्यो देशे।" ५। २। १३५। इति इनिः।) कमलाकरः। पद्मम्। इति मेदिनी। ३ पद्मः। इति रत्नमाला। (यथा, साहित्यदर्पणे। १०। ७०३।

"निसर्गसौरभोद्भान्तभृङ्गसङ्गीतशालिनी।
उदिते वासराधीशे सोराजनि सरोजिनी।")

सरोजी, [न्] पुं, (सरोजं उत्पत्तिस्थानत्वेनास्त्यस्येति। इनिः।) ब्रह्मा। इति शब्दरत्नावली-शिलारामौ।

सरोजुषः, पुं, (सरे सरोवरे जुषः सेवी यस्य।) सारसपक्षी। इति शब्दरत्नावली।

सरोधः, त्रि, (सरः। रोधेन सह वर्त्तमानः। इति बहुव्रीहिसमासनिष्पन्नः।

सरोरुट, [ट्] स्त्री, (सरसि रोहतीति। रुह+क्विप्।) पद्मम्। इति हेमचन्द्रः।

सरोरुहं, क्ली, (सरसि रोहतीति। रुह+कः।) पद्मम्। इत्यमरः। (यथा, भागवते। १। १५। २८।

"सर्वं चिरतपसो लिप्सोः सकलपदसरोरुहम्।
सौभाग्यातिशयाद्वेन श्लाघनीयमभूत् सति।")

सरोरुहासनः, पुं, (सरोरुहमासनं यस्य।) ब्रह्मा। इति हेमचन्द्रः।

सरोवरः, पुं, (सरः सु वरः श्रेष्ठः सङ्गमकरत्वात्।) जलाशयविशेषः। (यथा, भागवते।८।२।३।१।

"सत्र व्यादाय मा राज्ञा क्षिप्ता राक्षसं
सरोवरे।
तदारक्षकाणां सौख्यं महामीनोऽग्रसीत्।")

तत्पर्य्यायः। महाह्रदः २ ह्रादनः ३ सङ्घातः ४ सङ्घाटः ५ तडागः ६ सरसः ७ सरी ८ सरः ९ सरम् १० सरस्यम् ११। इति शब्द-

रत्नावली। तत्रोत्तमादि पुष्करिणीशब्दे द्रष्टव्यम्। तस्य जलगुणाः सरःशब्दे दृश्याः।

सर्कः, पुं, वायुः। मनः। प्रजापतिः। इति संक्षिप्तसारोणादिवृत्तिः।

सर्गः, पुं, (सृज्+घञ्।) स्वभावः। निर्माणः। (यथा, महाभारते। १३। १६२। ३५।

"राजमार्गे गवां मध्ये धान्यमध्ये च यस्त्रियः।
नोपसेवन्ति राजेन्द्र सर्गं सत्त्वपुरोगयोः।")

निश्चयः। (यथा, रघुः। ३। ५१।

"यदाज्ञ शस्त्रं यदि सर्ग एष ते
न खल्वनिर्जित्य रघुं क्षती भवान्।")

अध्यायः। (यथा, साहित्यदर्पणे। ६। ५५८।

"नातिस्वल्पा नातिदीर्घाः सर्गा अष्टाधिका इह।")

सृष्टिः। इत्यमरः। ३। ३। २२। (यथा मनुः। १। २८।

"हिंसाहिंसे मृदुक्रूरे धर्माधर्मानृतानृते।
यद्यस्य सोऽदधात् सर्गे तत्तस्य स्वयमाविशत्।"

संसारः। यथा, गीतायाम्। ५। १८।

"इहैव तैर्जितः सर्गो येषां साम्ये स्थितं मनः।")

मोक्षः। उत्साहः। इति मेदिनी। चतुर्दशतिः। इति हेमचन्द्रः। ६ ऋषिः। सर्गविवरणं यथा,—

"अथाक्षतगुणधीमान् महत्तत्त्वतोऽहमः।
भूतसूक्ष्मेन्द्रियार्थानां समवः सर्ग उच्यते।"

इति श्रीभागवतम्।

नवधासर्गो यथा,—

"सर्गो नवविधस्तस्य प्राकृतो वैकृतस्तु यः।
कालद्रव्यगुणैरस्य त्रिविधः प्रतिसंक्रमः।
आद्यस्तु महतः सर्गो गुणवैषम्यमात्मनः।
द्वितीयस्त्वहमो यत्र द्रव्यज्ञानक्रियोदयः।
भूतसर्गस्तृतीयस्तु तन्मात्रो द्रव्यशक्तिमान्।
चतुर्थ ऐन्द्रियः सर्गो यस्तु ज्ञानक्रियात्मकः।
वैकारिको देवसर्गः पञ्चमो यत्र सम्भवः मनः।
षष्ठस्तु तमसः सर्गो यस्त्वबुद्धिकृतः प्रभोः।
सप्तमे प्राकृताः सर्गा वैकृतानपि मे शृणु।
दशैभाणो भगवतो लीलेयं हरिमेधसः।
सप्तमो मुख्यसर्गस्तु षड्विधस्तमुपाश्रयः।
वनस्पत्योषधितालवल्लीगाश्रयो द्रुमाः।
उन्मुखोत्तमसत्तमःप्राया अन्तःसमा विशेषिणः।
तिरश्चामष्टमः सर्गः सोऽष्टाविंशद्विधो मतः।
अविदो भूरितमसो ज्ञानशक्त्यपवादिनः।
गौरव्यो महिषः कृष्णः शूकरो गवयो रुरुः।
द्विशफाः पशवश्चैते अविरुष्ट्रश्च सत्तम।
खरोऽश्वोऽश्वतरो गौरः शरभश्चमरी तथा।
एते चैकशफाः पशवः क्रव्यादांस्तु शकुन्।
श्या शृगालो वृको व्याघ्रो मार्जारः शशशल्कौ।
सिंहः कपिर्गजः कृष्णो गौरो वै शरभस्तथा।
चमूचमरशार्दूलमार्जारशशवानराः।
एकशफाः पञ्चनखाः क्रव्यादाः पशवस्त्रयः।
अर्वाक्स्रोतस्तु नवमः पुरुषाभ्यो व्यधात् प्रभुः।
रजोऽधिकाः कर्मपरा दुःखे च सुखमानिनः।
वैकृतास्तु दशैते स्युर्देवसर्गश्च सत्तम।

निर्व्यासयन्ति स्वपनर्गवां क्षीरेण मिश्रिते: ।
ये क्षापयन्ति वै नागान् भक्ष्या अह्नासमन्विता: ॥
शुतानीक उवाच ।
मात्रा शप्ता: कथं नागा: कारणं संवदस्व वै ।
कथं वानन्दकरणं कस्य वा संप्रवाहणम् ॥
सुमन्तुरुवाच ।
उच्चै:श्रवा अश्वरत्नं श्वेतो जातोऽमृतोद्भव: ।
तं दृष्ट्वा चाब्रवीत् कद्रूर्नागानां जननी स्वसा ॥
अश्वरत्नमिदं श्वेतं संपश्येऽमृतसम्भवम् ।
कृष्णांस्तु पश्यसे वालान् स वै श्वेत: सुता इये: ॥
विनतोवाच ।
सर्वश्वेतो हयवरो नास्य कृष्णो न लोहित: ।
कथं त्वं पश्यसे कृष्णं विनतोवाच तां स्वसा ॥
कद्रुरुवाच ।
पश्येऽहमेकनयना कृष्णवालसमन्वितम् ।
द्विनेत्रा त्वन्तु विनते न पश्यसि पणं कुरु ॥
विनतोवाच ।
अहं दासी भविष्यामि ते कृष्णे केशे प्रदर्शिते ।
न चेद्दर्शयतो कद्रूर्मम दासी भविष्यसि ॥
एवं तेऽविनयं कृत्वा गते क्रोधसमन्विते ।
विनतास्वसा च शयने कद्रूर्जिह्मामचिन्तयत् ॥
व्याहृत्य पुत्रान् प्रोवाच वाला भूत्वा हयानने ।
तिष्ठध्वं विपरीते वै विनतां जयगृद्धिनीम् ॥
प्रोचुस्तां जिह्मबुद्धिन्ते नागा माता विरूपा तु ।
अधर्ममेतन्मातोऽतो न करिष्याम ते वच: ॥
तान् शशाप रुषा कद्रू: पावको व: प्रधक्ष्यति ।
गते बहुतिथे काले पाण्डवो जनमेजय: ॥
सर्पसत्रं स कर्ता वै भुवि अन्ये: सुदुष्करम् ।
तस्मिन् सत्रे स तिग्मांशु: पावको व: प्रधक्ष्यति ॥
एवं शप्ता रुषा कद्रू: प्रोक्तवान्नैव किञ्चन ।
मात्रा शप्तास्तया नागा: कर्तव्यं नाव्यपद्यत ॥
वासुकिं दु:खितं ज्ञात्वा ब्रह्मा प्रोवाच सान्त्वयन् ।
मा शुचो वासुकेऽत्यर्थं शृणु मद्वचनं परम् ॥
पराशरकुले जातो जरत्कारुरिति द्विज: ।
भविष्यति महातेजास्तस्मिन् काले तपोनिधि: ॥
भगिनीं च जरत्कारुं तस्य त्वं प्रतिदास्यसि ।
भविता तस्य पुत्रोऽसौ आस्तीक इति विश्रुत: ॥
स तत् सत्रं प्रहृतं वै नागानां भयदं महत् ।
निषेधिष्यति स मुनिर्वाग्भिरग्राभिरोष्यति ॥
तदिमां भगिनीं राजन् तस्य त्वं प्रतिदास्यसि ।
जरत्कारुं जरत्कारो: प्रदद्यादविचारयन् ॥
यदासौ याचते ऽरण्ये यत्किञ्चिद्विवदिष्यति ।
तत् कर्तव्यमशङ्केन यदीच्छे: श्रेय आत्मन: ॥
पितामहस्य श्रुत्वा वासुकि: प्रपितस्य च ।
तथा करोदथो चोक्तं यच्च परमास्थित: ॥
तच्छ्रुत्वा पन्नगा: सर्वे प्रहर्षोत्फुल्ललोचना: ।
पुनर्जातमिवात्मानं मेनिरे सुभगोत्तमा: ॥
तच्च मन्त्रं महाघोरं तव पित्रा प्रवर्तितम् ।
ऋत्विग्भि: सहितेनेह सर्वलोकेषु दुष्करम् ॥
प्रोक्तश्च विष्णुना पूर्वं धर्मपुत्रस्य धीमत: ।
व्यक्तं तस्य भविता नागानां भयकारकम् ॥
तस्मात् कालान्तराज्ञात्वा यज्ञे सर्पसुषे गते ।
यस्य सर्पेण दष्टस्य रेखा दन्तस्य जायते ।
मदर्दं विजानीयात् कश्यपस्य वचो यथा ॥
द्वे च दंष्ट्रे पदे यस्य दृश्येते च महाजनम् ।
क्षुधाविष्टं विजानीयात् यथोवाच प्रजापति: ॥
द्वे दंष्ट्रे यस्य दृश्येते क्वचिद्रुधिरसंकुले ।
विषोल्बणं विजानीयाद्दृष्टन्तं नात्र संशय: ॥
अपत्यरक्षणार्थाय जानीयान्नात्र संशय: ॥
यत्तु काकपदाकारं चिह्नितं दन्तविच्छिद्रितम् ।
महानाग इति प्रोक्त: कालदष्टं विनिर्दिशेत् ॥
त्रिविधं दष्टजातेषु लक्षणं समुदाहृतम् ।
दृष्टं दृष्ट्वा तु पीतञ्च दष्टोद्भूतं तथैव च ॥
यस्तु सर्पो दशित्वा तु पिबते तु विचक्षण: ।
दृष्ट्वा तु पीतं विज्ञेयं कश्यपस्य वचो यथा ॥
विषभागौ तु सर्पस्य त्रिभागस्तत्र संक्रमेत् ।
उदरं दर्शयेद्यस्तु उद्भूतं तं विनिर्दिशेत् ॥
छर्दितं विषवेगेन निर्विष: पन्नगो भवेत् ।
असाध्यश्चापि विज्ञेयश्चतुर्दंष्ट्राभिपीडित: ॥
ग्रीवाभङ्गो भवेत् किञ्चित् संदष्टो विषयोगत: ।
आर्द्रास्वेषामघाभरणीकृत्तिकासु विशेषत: ॥
विशाखा चित्र पूर्वासु मूलास्वातिशतातारके ।
सर्पदष्टा न जीवन्ति विषं पीतञ्च यैस्त्रधा ॥
शून्यागारे श्मशाने च शुष्कवृक्षे तथैव च ।
न जीवन्ति नरा दष्टा नक्षत्रे तिथिसंयुते ।
हतो दंशस्तत: शुद्धयन्तर: परिकीर्तित: ॥"
इति भविष्यपुराणे शुतसाहस्रार्द्धसंहितायां पञ्चमीकल्पे ॥ ● ॥
कश्यप उवाच ।
"तत: परं प्रवक्ष्यामि कालदष्टस्य लक्षणम् ।
शृणु गौतम तत्त्वेन यादृशो भवते नर: ॥
जिह्वाभङ्गो हृदि शूलं चक्षुर्भ्यान्च न पश्यति ।
दंशश्च दग्धसङ्काशं पक्वजम्बूफलोपमम् ॥
वैवर्ण्यं चैव दन्तानां श्यामो भवति वर्णत: ।
सर्वेष्वङ्गेषु शैथिल्यं पुरीषस्य च भेदनम् ॥
भग्नस्कन्धकटिग्रीव ऊर्ध्वदृष्टिरधोमुख: ।
दह्यते वेपते चैव स्वपते च मुहुर्मुहु: ॥
शस्त्रेण छिद्यमानस्य रुधिरं न प्रवर्तते ।
दग्धेन ताप्यमानस्य दण्डराजी न जायते ॥
दंशे काकपदे सुनीलमसकृच्चम्पूफलाभं शमं
उच्छ्वनं रुधिराङ्गसेकवहुलं कृच्छ्रान्निरोधो
भवेत् ।
हिक्काश्वासगलग्रहश्च सुमहान् या दुस्तरा
दृश्यते
संस्थानं प्रवदन्ति शास्त्रनिपुणास्तत् कालदष्टं
विदु: ॥
दंशे यस्याथ शोथ: प्रवलितयलितं मस्तकं वा
सुनीलं
प्रस्वेदो गात्रभेद: स्रवति च रुधिरं सानुनासश्च
जल्पेत् ।
दन्तोष्ठाभ्यां वियोगो भ्रमति च हृदयं मन्नि-
रोधश्च तीव्रो
दिष्टानामेष दंशस्त्रविपुलमयो विद्धि तं
कालदष्टम् ॥

दन्तैर्दन्तान् क्षुणत्ति बहुशो दष्टिरायासखिन्ना
स्फूर्जो दंष्ट्रः स्रवति रुधिरं केकरं चक्षुरेकम् ।
प्रत्यादिष्टः श्वसिति सततं सानुनासश्च भीतः
यद्यद्ब्रूते सकलमहितं कालदष्टं तमाहुः ॥
वेपते वेदना तीव्रा रक्तनेत्रश्च जायते ।
ग्रीवाभङ्गश्च लालाभिः कालदष्टं विनिर्दिशेत् ॥
दर्पणे सलिले वापि आत्मच्छायां न पश्यति ।
मन्दरश्मिं तथा दीपं तेजोहीनं दिवाकरम् ॥
वेपते वेदनातस्तु रक्तनेत्रश्च जायते ।
स याति निधनं जन्तुः कालदष्टं विनिर्दिशेत् ॥
अष्टम्याश्च नवम्याश्च कृष्णपक्षे चतुर्दशीम् ।
नागपञ्चमीदष्टानां जीवितस्य च संशयः ।
आर्द्राश्लेषामघाभरणीकृत्तिकासु विशेषतः ।
विशाखा त्रिषु पूर्वासु मूलास्वातिशतात्मके ॥
सर्पदष्टा न जीवन्ति विषं पीतश्च यैस्तथा ।
शून्यागारे श्मशाने च शुष्कवृक्षे तथैव च ।
न जीवन्ति नरा दष्टा नक्षत्रे तिथिसंयुते ॥
अशीत्तरं मर्म्मशतं प्राणिनां समुदाहृतम् ।
तेषां मध्ये तु मर्म्माणि दश द्वे चापि कीर्त्तिते ॥
शृङ्गे नेत्रे भ्रुवोर्मध्ये वस्तिभ्यां वृषणान्तरे ।
कक्षे स्कन्धे हृदि मध्ये तालुके चिबुके गुदे ॥
एषु द्वादशमर्म्मसु दष्टः शस्त्रेण वा हतः ।
न जीवन्ति नरा लोके कालदष्टं विनिर्दिशेत् ॥*
अ-क-च-ट-त-प-म-य-शान् वदन्ति प्रोक्ष्या न
जीवन्ति हृत्तस्य गतम् ।
ब्रूयात् यदि स्खलति गिरा तस्य संप्राप्तकालः ॥
भवति च यदि दूत उत्तमस्याधमो वा
यदि भवति च दूत उत्तमो वाधमस्य ॥
आदौ दष्टस्य नाम यदि वदति कश्चिदुक्तिं
तस्याथ पश्चात्
वर्णान्तं वर्णभेदो यदि भवति समः प्राप्तकालस्य
दूतः ॥
दूतो वा दण्डहस्तो भवति च युगलं प्राप्य-
हस्तस्तथा वा
रक्तं वस्त्रञ्च कृष्णं अथ शिरसि गतं एक-
वस्त्रञ्च दूतः ।
तैलाभ्यक्तश्च तद्वत् यदि त्वरितगतिर्मुक्तकेशश्च
याति
यः कुर्यात् घोरशब्दं करचरणयुगैः प्राप्त-
कालस्य दूतः ॥*॥
नागोदयं प्रवक्ष्यामि ईशानेन तु भाषितम् ।
ब्रह्मणा तु पुरा दृष्टा ग्रहा नागास्त्वनेकशः ॥
अनन्तं भास्करं विद्यात् सोमं विद्यात् वासुकिम् ।
तक्षकं भूमिपुत्रन्तु कर्कोटश्च बुधं विदुः ॥
पद्मं दृष्टस्तथा विद्यान्महापद्मश्च भार्गवम् ।
कुलिकः शङ्खपालश्च द्वावेतौ तु शनैश्चरः ॥
पूर्वभाद्रः शङ्खपालो द्वितीयः कुलिकोऽस्य च ।
मैत्रभागे यमौ दिष्टौ दिनरात्री तथैव च ॥
शुक्रसोमौ च मध्याह्ने उदये तु चमासुतम् ।
प्रागः प्रागग्नये भागे दिवासन्ध्याविदोच्यते ॥
ग्रहाश्च भुञ्जते राजन् पथि मृत्युं व्रजत्यधः ।
अधो गत्वा भवेत् सर्पो निर्विषो नात्र संशयः ॥

श्रुतानीक उवाच ।
नागदष्टः पिता यस्य भ्राता वा दुहितापि वा ।
माता पुत्रोऽथवा भार्या किं कर्त्तव्यं वदस्व वै ॥
मोक्षाय तस्य विप्रेन्द्र दानं व्रतमुपोषितम् ।
ब्रूहि मे द्विजशार्दूल येन तद्धे करोम्यहम् ॥
सुमन्तुरुवाच ।
उपोष्या पञ्चमी राजन् नागानां पुष्टिवर्द्धनी ।
शृणुष्वैकमेकं राजेन्द्र विधानं शृणु भारत ! ॥
मासि भाद्रपदे या तु शुक्लपक्षे महीपते ।
सा तु पुण्या महाप्रोक्ता ख्याता पि च महीपते ॥
ज्ञेया द्वादश संवर्त्ते पञ्चम्यां भरतर्षभ ।
चतुर्थ्यामेकभक्तन्तु तस्यां नक्तं प्रकीर्त्तितम् ॥
भूरिचन्द्रमयं नागमथवा कलधौतकम् ।
कृत्वा दारुमयं वापि अथवा मृन्मयं नृप ॥
पञ्चम्यामर्चयेद्भक्त्या नागं पञ्चफणं नृप ।
करवीरैः शतपत्रैर्जातिपुष्पैश्च सुव्रत ॥
तथा गन्धधूपैश्च पूजां पन्नगसत्तमम् ।
ब्राह्मणं भोजयेत् पश्चात् घृतपायसमोदकैः ॥
अनन्तं वासुकिं शङ्खं पद्मं कम्बलमेव च ।
तथा कर्कोटकं नागं नागं वाश्वतरं नृप ॥
धृतराष्ट्रं शङ्खपालं कालियं तक्षकं तथा ।
पिङ्गलञ्च तथा नागं मासि मासि च कीर्त्तितम् ॥
संवर्त्तान्ते पारणं स्यान्महाब्राह्मणभोजनम् ।
इतिहासविदे नागं गौरिकैश्च कृतं नृप ॥
तथाङ्गुलीं प्रदातव्या वाचकस्य महीपते ।
एष पारणके वापि विधिः प्रोक्तो बुधैर्नृप ॥
तव पित्रा कृतञ्चैव पितुर्मोक्षाय भारत ।
शुभान्विकेयं वेधो च पञ्चमी भरतर्षभ ॥
सुवर्णभारनिष्पन्नं नागं दत्त्वा तथा च गाम् ।
व्याघ्रस्य कुरुशार्दूल पितुराऋण्यमाप्नुयात् ॥
तव पित्रा कृतन्त्वेवं पञ्चम्योपासनं नृप ।
उत्सृज्य नागतां वीर तव पूर्व्वपितामहः ॥
पुण्येतरस्रदो गत्वा तथा पुण्यस्रदो नृप ।
सुनासीरस्रदो गत्वा तथा भङ्गस्रदो गतः ॥
भूपस्रदक्रतो गत्वा कञ्चकस्य स्रदो गतः ।
अन्येऽपि ये करिष्यन्ति इदं व्रतमनुत्तमम् ।
दष्टकात् मोक्षते तेषां शुभं स्थानमवाप्नुयात् ॥
यश्चेदं शृणुयान्नित्यं नरः श्रद्धासमन्वितः ।
कुले तस्य न नागेभ्यो भयं भवति कुत्रचित् ॥"
इति भविष्यपुराणे पञ्चमीकल्पे ॥*॥
श्रुतानीक उवाच ।
"सर्पाणां कतिरूपाणि के वर्णाः किञ्च लक्षणम् ।
का जातिस्तु भवेत्तेषां केषु योनिः कुलेषु वा ॥
सुमन्तुरुवाच ।
अत्र ते वर्त्मि संवादं कश्यपस्य महात्मनः ।
यथामीदृग्गोत्रमेनेह शृणु पूर्व्वं हिमाचले ॥
हुताग्निहोत्रमासीनं कश्यपन्तु हिमाचले ।
प्रणम्य शिरसा भक्त्या गौतमो वाक्यमब्रवीत् ॥
सर्पाणां कतिरूपाणि किञ्चिद्वं किञ्च लक्षणम् ।
जातिं कुलं तथा वर्णान् ब्रूहि सर्व्वं प्रजापते ।
कथं वा जायते सर्पः कथं मुञ्चेद्विषं प्रभो ।
विषवेगाः कति प्रोक्ताः कत्येव विषनाड्यिकाः ॥

दंष्ट्राः कतिविधाः प्रोक्ताः किं प्रमाणं विषागमे ।
कदा तु गृह्णीते गर्भं कथं वेष्टं प्रसूयते ॥
कीदृशी स्त्री पुमांश्चैव कीदृशश्च नपुंसकम् ।
किं नाम दशनं चैव एतत् कथय सुव्रत ॥
तस्य तद्वचनं श्रुत्वा कश्यपः प्रत्यभाषत ।
शृणु गौतम तत्त्वेन सर्पागामिह लक्षणम् ॥*॥
मास्याषाढे तथा ज्येष्ठे प्रमादन्ति भुजङ्गमाः ।
ततो नागो नागिनी च मैथुनं संप्रपद्यते ॥
चतुरो वार्षिकान् मासान् नागी गर्भमधारयत् ।
ततः कार्त्तिकमासे तु अण्डकानि प्रसूयते ॥
अण्डकानान्तु विज्ञेयं द्वे शते द्वे च विंशती ।
तान्येव भक्षयेत् सा तु भागैकं क्षुधया त्यजेत् ॥
सुवर्णकैवर्णनिभान् शुभान् संजायतेऽण्डकात् ।
तानेव खादते सर्पो अण्डोराजाण्डि विंशतिम् ॥
अर्कोदकसुवर्णाभात् दीर्घराजीवसन्निभात् ।
तस्मादुत्पाद्यते स्त्री वै अण्डाद्ब्राह्मण-
सत्तम ॥
शिरीषपुष्पवर्णाभादण्डकात् स्यान्नपुंसकम् ।
ततो भिनत्ति चाण्डानि बलसासेन तु गौतम ॥
ततस्ते प्रीतिसंबन्धात् स्नेहं बध्नन्ति बालकाः ।
ततोऽसौ सप्तरात्रेण क्षयो भवति यत्नतः ॥*॥
आयुःप्रमाणं सर्पाणां श्रुतं विंशोत्तरं शतम् ।
मृत्युस्थानविधौ ज्ञेयः शृणुष्वाच यथाक्रमम् ॥
मयूरात् मानुषादापि चकोराल्लोध्ररात्तथा ।
विड़ालान्नकुलाच्चैव वराहादृक्षिकात्तथा ॥
एतेषां यदि सुप्येत जीवेद्विंशोत्तरं श्रुतम् ।
सप्ताहे तु ततः पूर्णे दंष्ट्राणान्तु विरोहणम् ॥
विषस्यागमनं तत्र विद्येत्थ पुनः पुनः ।
एवं ज्ञात्वा तु तत्त्वेन विषकर्म्म समारभेत् ॥
एकविंशतिरात्रेण विषं दंष्ट्रासु जायते ।
नागीपार्श्वसमावर्त्ती बालसर्पस्तु उच्यते ॥
पञ्चविंशतिरात्रस्तु सद्यः प्राणहरो भवेत् ।
यस्मात्तस्याज्जातमात्रस्तु कक्षुकं वै प्रसूयते ॥
पादानाञ्चापि विज्ञेया द्वे शते द्वे च विंशती ।
गोलोमसदृशाः पादाः प्रविशन्ति क्रमन्ति च ॥
सन्धीनां चास्य विज्ञेयं द्वे शते विंशती तथा ।
पांशुल्यञ्चापि विज्ञेया द्वे शते विंशतिस्तथा ॥
अकालजाता ये सर्पा निर्विषास्ते प्रकीर्त्तिताः ।
पञ्चसप्ततिवर्षाणि आयुस्तेषां प्रकीर्त्तितम् ॥
रक्तपीतशुक्लदन्ता आनीला मन्दवेगिनः ।
एते चाल्पायुषो ज्ञेया अल्पाहाराश्च भीरवः ।
एकचक्षुस्तु भवेद्यक्षं द्वे जिह्वे च प्रकीर्त्तिते ।
प्रथमा ब्रह्मदेवत्या द्वितीया विष्णुदेवता ॥
तृतीया रुद्रदेवत्या चतुर्थी यमदेवता ।
हीना प्रमाणतः सा तु वामनेत्रं समाश्रिता ॥
नास्यां मन्त्राः प्रयोक्तव्या नौषधं नैव भेषजम् ।
वैद्यः पराङ्मुखो याति मृत्युस्तस्या विलेखनात् ॥
चिकित्सा न वृथैः कार्य्या तदन्तं तस्य जीवितम् ।
मकरीं माक्षिकीं विद्यात् करालीञ्च हिमा-
क्षिकीम् ।
कालरात्रौ भवेत् त्रीणि चतुरो यमदूतका ॥
मकरीशुष्कं विद्यात् करालीं काकपादिकां

सुप्तस्य वै प्रमत्तस्य पदे सर्पो न दश्यते ।
दष्टरूपाण्यजानन् वै कथं वैद्यश्चिकित्सति ॥
चतुर्विधा दष्टः प्रोक्ताः पन्नगास्तु महात्मना ।
दर्वीकरा मण्डलिनो राजिला व्यन्तरास्तथा ॥
दर्वीकरा वातविषा मण्डलाः पैत्तिकाः स्मृताः ।
श्लेष्मला राजिला ज्ञेया व्यन्तराः सान्निपातिकाः ॥
रक्तं परीक्ष्यवेत्ताङ्गं सर्पाणान्तु पृथक् पृथक् ।
क्षणं दर्वीकराणान्तु जायते वातसल्यकम् ॥
रक्तं घनञ्च बहुशः श्रोणितं मण्डलीक्षते ।
पिच्छिलं राजिले ज्ञेयं तद्व्यन्तरके तथा ॥
श्वेताः सर्पास्तु चत्वारः पञ्चमो नोपलभ्यते ।
ब्राह्मणः क्षत्रियो वैश्यः शूद्रश्चैव चतुर्थकः ॥
ब्राह्मणे मधुरं दद्यात् तिक्तं दद्यात्तथोत्तरे ।
वैश्ये कषायफलं दद्यात् शूद्रे त्रिफलमेव वा ॥
ब्राह्मणेन तु दष्टस्य दाहो गात्रेषु जायते ।
मूर्च्छा च प्रबला स्याद्वै न ज्ञानमभिजायते ॥
श्यामवर्णं मुखञ्च स्यान्मनस्तम्भश्च जायते ।
तस्य कुर्य्यात् प्रतीकारं येन सम्पद्यते सुखम् ॥
अश्वगन्धामपामार्गं सिन्दुवारं सुरालयम् ।
एतत् सर्पिःसमायुक्तं पानं नस्यञ्च दापयेत् ।
एतेनैवोपचारेण सुखी भवति मानवः ॥
क्षत्रियेण तु दष्टस्य कम्पो गात्रेषु जायते ।
मूर्च्छा मोहस्तथा स्वेदो न ज्ञानमभिजायते ॥
जायते वेदना तस्य ऊर्द्ध्वञ्चैव निरीक्षते ।
तस्य कुर्य्यात् प्रतीकारं येन सम्पद्यते सुखम् ॥
अर्कमूलमपामार्गं प्रियङ्गुमथ वाकुचीम् ।
एतत् सर्पिःसमायुक्तं पानं तस्य प्रदापयेत् ।
एतेनैवोपचारेण सुखी भवति मानवः ॥
वैश्येनापि हि दष्टस्य शृणु रूपाणि यानि तु ।
श्लेष्मप्रकोपो लाला च नवोद्वेष्टति वेदना ॥
मूर्च्छा च प्रबला यस्य आत्मानं नाभिनन्दति ।
तस्य कुर्य्यात् प्रतीकारं येन सम्पद्यते सुखम् ॥
अश्वगन्धां सगोमूत्रां गृहधूमं सगुग्गुलुम् ।
शिरीषार्कपलाशञ्च श्वेतां च गिरिकर्णिकाम् ॥
गोमूत्रेण समायुक्तं पानं नस्यञ्च दापयेत् ।
एष वैश्येन दष्टानामगदः परिकीर्त्तितः ॥
शूद्रेणापि हि दष्टस्य शृणु तत्त्वेन गौतम ।
कम्पते वेपते चैव ज्वरः शीतश्च जायते ।
अङ्गानि घुनुघुनायन्ते शूद्रदष्टस्य लक्षणम् ।
तस्यागदं प्रवक्ष्यामि येन सम्पद्यते सुखम् ॥
पद्मञ्च लोध्रकञ्चैव चौद्रं पद्मस्य केशरम् ।
मधु मधुकसारञ्च श्वेता च गिरिकर्णिका ॥
एतानि समभागानि पेषयेत् शीतवारिणा ।
पानं लेपाञ्जनं नस्यं सुखी भवति मानवः ॥
पूर्व्वाह्णे चरते विप्रो मध्याह्ने क्षत्रियश्चरेत् ।
अपराह्णे चरेद्वैश्यः शूद्रः सन्ध्याचरो भवेत् ॥
आहारश्चात्र पुण्यानि ब्राह्मणानां विदुर्बुधाः ।
शुक्तिकाः क्षत्रियाणाञ्च आहारो द्विजसत्तम ॥
वैश्या मद्यकमक्षाश्च शूद्राः सर्व्वान्निगल्लथा ॥
अयतो दश्यते विप्रः क्षत्रियो दक्षिणेन तु ।
वामपार्श्वे सदा वैश्यः पश्चाद्दे शूद्र आदिशेत् ॥
मरुकान्ते तु संप्राप्ते पौषमासे मघाविधौ ।
अवेलायां दशन्ति वै मैथुनार्त्ता भुजङ्गमाः ॥
पुण्यगन्धाः स्मृता विप्राः क्षत्रियाश्चन्दनावहाः ।
वैश्याश्च घृतगन्धा वै शूद्राः शूर्म्मस्य गन्धिनः ॥
वासं तेषां प्रवक्ष्यामि यथावदनुपूर्व्वशः ।
नदीकूपतडागेषु गिरिप्रस्रवणेषु च ॥
धारानेषु पवित्रेषु शुचिष्वायतनेषु च ॥
वसन्ति ब्राह्मणाः सर्पाः शाल्मलीद्रुमे चतुष्पथे ॥
क्षत्रियो वसते नित्यं तोरणेषु पुरेषु च ।
गोशालाखड्गशालासु पलालेषु तटेषु च ॥
गोष्ठेषु पथि वृक्षेषु विप्र वैश्या वसन्ति च ।
अविविक्तेषु स्थानेषु निर्झरेषु वनेषु च ।
शून्यागारे प्रशस्ते च शूद्रा विप्र वसन्ति च ॥
श्वेताश्च कपिलाश्चैव ये सर्पाः कनकप्रभाः ।
सात्त्विका मनस्विनो विप्र ब्राह्मणास्ते बुधैः स्मृताः ॥
रक्तवर्णसुवर्णाभप्रवालसदृशप्रभाः ।
सूर्य्यप्रभास्तथा विप्र क्षत्रियास्ते भुजङ्गमाः ॥
नागाविचित्रराजीभिरतसीवर्णसन्निभाः ।
वाणपुष्पसुवर्णाभा वैश्यास्ते च भुजङ्गमाः ॥
काकोदरनिभाः केचित् ये च अञ्जनसन्निभाः ।
काकवर्णा धूम्रवर्णास्ते शूद्राः परिकीर्त्तिताः ॥
यस्य सर्पेण दष्टस्य दंशमङ्गुलमन्तरम् ।
बालदष्टं विजानीयात् कश्यपस्य वचो यथा ॥
यस्य सर्पेण दष्टस्य दंशं द्व्यङ्गुलमन्तरम् ।
यौवनस्थेन दष्टस्य एतल्लक्षणम् ॥
यस्य सर्पेण दष्टस्य सार्द्धद्व्यङ्गुलमन्तरम् ।
वृद्धदष्टं विजानीयात् कश्यपस्य वचो यथा ॥
अनन्तः प्रेक्षते पूर्व्वं वामपार्श्वं तु वासुकिः ।
तक्षको दक्षिणे पार्श्वे कर्कोटः पृष्ठतस्तथा ॥
वलेन भ्रमते पद्मो महापद्मो निमज्जति ।
विमर्ज्जयिस्यते चैव शङ्खपालो मुहुर्मुहुः ॥
सर्व्वेषां क्षरते रूपं कुलिकः पन्नगोत्तमः ।
अनन्तस्य दिशा पूर्व्वा वासुकेस्तु हुताशनः ॥
दक्षिणा तक्षकस्योक्ता कर्कोटस्य तु नैर्ऋती ।
पश्चिमा पद्मनाभस्य महापद्मस्य वायुना ॥
उत्तरा शङ्खपालस्य वैशानी कुलिकस्य तु ।
अनन्तस्य भवेत् पद्मं वासुकेः स्यात्तथोत्पलम् ॥
क्षत्रियं तक्षकस्योक्तं कर्कोटस्य चिरेखकम् ।
पद्मस्य तु भवेत् पद्मं शूलमश्वतरस्य तु ॥
शङ्खपालस्य वैच्छत्रं कुलिकस्यार्द्धचन्द्रकम् ।
अनन्तः कुलिको विप्रः क्षत्रियौ शङ्खवासुकी ॥
महापद्मस्तक्षकश्च वैश्यौ विप्र प्रकीर्त्तितौ ।
पद्मकर्कोटकौ शूद्रौ सदा ज्ञेयौ मनीषिभिः ॥
अनन्तकुलिकौ शुक्लौ वर्णतो ब्रह्मसम्भवौ ।
वासुकिः शङ्खपालश्च रक्तौ क्षत्रियसत्तमौ ॥
तक्षकश्च महापद्म इन्द्रात् पीतौ बभूवतुः ।
पद्मकर्कोटकौ विप्र सर्पौ कृष्णौ बभूवतुः ॥
एवं यागं कृतं कृत्वा राजानमथ पावकम् ।
घरणीसुतमाय घृतानेतान् सिद्धिकरान् विदुः ॥
पूर्णकुम्भः पताका च काञ्चनं मणयस्तथा ।
शरदो माणिका कम्बूर्जीवञ्जीवेति सुव्रता ॥
एतेषां दर्शनं श्रेष्ठं कन्या च प्रातिसूतिका ।
चतुःषष्टिः समाख्याता भोगिनो मणिपन्नगाः ॥
अष्टशास्त्रेषु षड्विंशा अष्टविंशा महीधराः ।
विंशास्तु कुलिताः प्रोक्ताः सप्त मण्डलिनस्तथा ॥
राजीवास्तु दश प्रोक्ता दत्ताः षोड्श पञ्च च ।
इन्दुभो दुन्दुभिश्चैव चेड्भः श्वेतवाहनः ॥
नागपुष्पसुवर्णाश्चा निर्विषा ये च पन्नगाः ।
एवमेवन्तु सर्पाणां शतविंशतिः स्मृतम् ॥
वराहकर्णं गवलिप्पलिङ्ग
गान्धारिका पिप्पलदेवदारु ।
भूकुसारं सह चिन्नुवारं
हिङ्गुञ्च पिष्ट्वा गुटिका च कार्य्या ॥
सूत उवाच ।
इत्युक्तवान् पुरा वीर गौतमस्य प्रजापतिः ।
लक्षयं सर्व्वनागानां रूपवर्णविदेक्षया
तस्मात् संपूजयेन्नागान् सदा भक्त्या समन्वितः ।
विशेषतस्तु पञ्चम्यां पयसा घावसेन च ॥
श्रावणे मासि पञ्चम्यां शुक्लपक्षे नराधिप ।
द्वारस्योभयतो लेख्या गोमयेन विधोक्षणाः ॥
पूजयेद्विविधैर्वीर दधिदूर्व्वाक्षतैः कुशैः ।
गन्धपुष्पोपहारैश्च ब्राह्मणानाञ्च तर्पणैः ॥
ये त्वां पूजयन्तीह नागान् भक्तिपुरःसराः ।
न तेषां सर्पतो वीर भयं भवति कर्हिचित् ॥”
इति भविष्ये पञ्चमीकल्पे ॥
सूत उवाच ।
“तथा भाद्रपदे मासि पञ्चम्यां श्रद्धयान्वितः ।
तथालिख्य गृहे नागान् कृष्णवर्णादिवर्णकैः ॥
पूजयेन्नन्दपुष्पेश्च सर्पिःप्रायसगुग्गुलैः ।
तस्य तुष्टिं समायान्ति पन्नगास्तक्षकादयः ॥
आसप्तमात् कुलात्तस्य न भयं नागतो भवेत् ।
तस्मात् सर्व्वप्रयत्नेन नागान् वै पूजयेद्बुधः ॥”
इति भविष्ये पञ्चमीकल्पे ॥
सूत उवाच ।
“तथा चाश्वयुजे मासि पञ्चम्यां कृष्णनन्दन ।
स्नात्वा कृष्णमयान्नागान् इन्द्राख्या सह पूजयेत् ॥
घृतोदकाभ्यां पयसा स्नापयित्वा विशान्पते ।
गोधूमैः पयसा सिद्धैर्भक्ष्यैश्च विविधैस्तथा ॥
यस्त्वां विधिवन्नागान् शुचिर्भक्त्या समन्वितः ।
पूजयेत् कुरुशार्दूल तस्य श्रेयादयो वृध ॥
नागाः प्रीता भवन्तीह शान्तिमाप्नोति मानवः ।
सुशान्तिलोकमासाद्य मोदते शाश्वतीः समाः ॥
इत्येतत् कथितं विप्र पञ्चमीकल्पमुत्तमम् ।
पन्नगानुद्यते मर्त्यः सर्व्वसर्पनिषेधकम् ॥”
ॐ कुरु कुरु नः फट् स्वाहा । इति भविष्यपुराणे श्रुतसाहस्र्यां संहितायां पञ्चमीकल्पे ॥

अन्यच्च ।

सूत उवाच ।
“प्राग्नेश्वरं गारुडञ्च शिवोक्तं स्वरान्यच्च ।
स्नानादौ प्रवक्ष्यामि नद्यां दृष्टो न जीवति ॥
चितावल्मीकशैलादौ कूपे च विवरे सरोः ।
दंशे रेखात्रयं यस्य प्राच्यां स न जीवति ॥
यस्याश्च कर्कटे मेघे मूलन्नेयामघादिषु ।
कृष्णाश्वोत्पिलके जन्मे शुक्लकर्णेरदक्षिणे ॥

दष्टो शस्त्रधरो भित्त्वलेयादि: कालदूतक: ।
वक्त्रे वाहौ च ग्रीवायां दृष्टे च नहि जीवति ॥
पूर्वे दिनपतिर्भुक्ते त्यहेयामन्ततोऽपरे ।
ग्रेषा ग्रहा: प्रतिदिनं षटसङ्ग्रापरिवर्त्तने: ॥
नागभोगक्रमो ज्ञेयो रात्रौ वागविवर्त्तने: ।
ग्रेषोऽर्क: फणिपश्चन्द्रस्तक्षको भौम ईरित: ॥
कर्कोटो ज्ञो गुरु: पद्मो महापद्मश्च भार्गव: ।
शङ्ख: शनेश्चरो राहु: कुलिकश्चाहयो ग्रहा: ॥
रात्रौ दिवा सुरगुरोर्भोगि स्यादमरान्तक: ।
पन्नो: कालो दिवा राहु: कुलिकेन सह
स्थित: ॥
ग्रामार्द्धसन्धिसंस्थ: स वेलां कालयतीश्वरेत् ।
त्रागद्विषड्वह्निवाजियुगभूरेकभागत: ॥
दिवा षड्वेदनेत्राद्रिपक्षविवसुखांशके: ।
पादाङ्गुष्ठे पादपृष्ठे गुल्फे जानुनि लिङ्गके ॥
नाभौ हृदि स्तनतटे करण्ठे नासापुटेचणे ।
कर्णयोश्च भ्रुवो: शङ्खे मस्तके प्रतिपत्क्रमात् ॥
तिष्ठेच्चन्द्रश्च जीवेन पुंसो दक्षिणभागके ।
कायस्य वामभागे तु स्त्रिया वायुवहात् करात् ॥
भ्रमवत्त्रुतो मोहो निवर्त्तेत च मर्दनात् ।
आत्मन: परमं बीजं हंसाख्यं स्फाटिकामलम् ॥
ज्ञातव्यं विषपापन्नं बीजं तस्य चतुर्विधम् ।
विन्दुपक्षस्वरयुतमाद्यमुक्तं द्वितीयकम् ॥
यष्ठारूढं तृतीयं स्यात् सविसर्गं चतुर्विधम् ।
ॐ क्रुर कुन्दे स्वाहा ॥
विद्या त्रैलोक्यरक्षार्थं गरुड़ेन धृता पुरा ।
वधेप्सुना च नागानां सुखेऽथ प्रणवं न्यसेत् ॥
गले कुरु न्यसेत् पश्चात् हृदि चैव विशेषत: ।
कुन्दे सा गुह्ययो: पादयुगे ह्यन्यास ईरित: ।
गृहेऽपि लिखिता यत्र तत्रागा: संत्यजन्ति च ॥
मन्त्रमन्त्रजपन्तु स्वं कर्णे धृतं तथा ।
यद्गृहे शर्करा चम्पा चिपा नागाश्यजन्ति च ।
सप्तलक्षस्य जप्यादे सिद्धि: प्राप्ता सुरासुरै: ॥
ॐ सुवर्णरेखे कुण्डलिन्यरूपिणि स्वाहा ॥
रक्षपाषाणदले पद्मे दले वर्णयुगं लिखेत् ।
नामैतत् वारिधारांभि: स्नातो दष्टो विषं
त्यजेत् ॥
ॐ पक्षि स्वाहा ।
न्यङ्कुलादिकनिष्ठान्तं करे न्यस्याथ देहके ।
के वक्त्रे हृदि लिङ्गे च पादयोर्गरुडो हि स: ॥
नाक्रामन्ति च तच्छायां सर्पोऽपि विषपन्नगा: ।
यस्तु मन्त्रं जपेन्नित्यं स दष्टो नाश्येद्विषम् ॥
ॐ ह्रीं श्रीं ह्रीं भिरण्डाये नम: ॥
कर्णे चम्पा स्त्रियं विद्या दष्टस्य विषं हरेत् ।
न्य-आ न्यसेत्तु पादाग्रे इ-ई गुल्फेऽथ जानुनि ॥
उ-ऊ ऋ ऋे कटितटे ऌ नाभौ विन्यसेत्
सुधी: ।
हृदि ऌ वक्षदेशे च ऐ ग्रीवे ओ: हंससंयुता: ॥
हंसो विषादि च हरेत् अग्नौ ध्यातोऽथ पूजित: ।
गरुडोऽग्निमिति ध्यात्वा कुर्याद्विषहरां क्रियाम् ॥
ॐ मन्त्रं नागपित्तस्थं विषादिहरमीरितम् ।
यस्य एवं वामकरे नोसासुरागिरोधहृत् ॥
मन्त्री हरेत् दष्टकस्य त्वङ्मांसादिगतं विषम् ।
स वायुना समाकृष्य दन्तानां गरलं हरे ।
तनौ न्यसेद्दष्टकेन नीलकण्ठादि संस्मरेत् ॥*॥
पीतं प्रत्यङ्गिरामूलं तण्डुलाद्विर्विषापहम् ।
पुनर्नवाफलिनीनां मूलं चक्रमीदृशम् ॥
मूलं शुक्लदृहत्यास्तु कर्कोट्या गैरिकार्णकम् ।
अद्भिर्दष्टतोपेतलेपोऽयं विषमर्दन: ॥
विषग्रहिं न व्रजेच्च उष्णं पिबति यो घृतम् ।
पक्षाङ्गन्तु शिरीषस्य मूलं गुञ्जनजन्तुघा ।
सर्वाङ्गलेपनस्यापि पानादा विषदृङ्नवेत् ॥
क्ष्रौं गोनसादिविषहृत् ॥
ललाटविसर्गान्तं ध्यातं वक्त्रादिदृङ्नवेत् ।
न्यस्तं योनौ वशेत् कन्यां कुर्यान्मदजलाविलाम् ॥
चम्पा सप्ताष्टसाहस्रं गरुत्मानिव सर्व्वग: ।
कवि: स्यात् द्युनिधारी स्यादग्र्यस्त्रीप्रियायुरा-
युयात् ।
विषदृत् स्यात् कथा तद्वन्मुनिर्वा सम्मतो
ध्रुवम् ॥"
इति गारुड़े प्राणेश्वरं गारुड़ं समाप्तं १६
अध्याय: ॥ * ॥ * ॥ अपरञ्च ।
अग्निरुवाच ।
"नागादयोऽथ तारादिदृग्स्थानानि मर्म्म च ।
स्मृतकं दष्टचेष्टेति सप्तलक्षणमुच्यते ॥
ग्रेषवासुकितक्षाख्या: कर्कटोऽब्जो महाम्बुज: ।
शङ्खपालश्च कुलिक इत्यष्टौ नागवर्य्यका: ॥
दृग्नाष्टपक्षत्रिगुणशून्यनन्दाब्धिता: क्रमात् ।
विप्रौ वृपौ विप्रौ शूद्रौ द्वौ द्वौ नागेषु कौत्तिनौ ॥
तदन्वया: पक्षशतं तेभ्यो जाता त्वसङ्ख्यका: ।
फणिमण्डलिराजीलवातपित्तकफात्मका: ॥
यन्तरा दोषमिश्रास्ते सर्पा दर्वीकरा: स्मृता: ।
रथाङ्गलाङ्गलच्छत्रस्वस्तिकाङ्कुशधारिण: ॥
गोनसा मन्दगा दीर्घा मण्डलैर्विविधै: स्थिता: ।
राजीलाश्चित्रिता: स्निग्धास्तिर्य्यगूर्द्ध्वं च
राजिभि: ॥
यन्तरा मिश्रचिह्नाश्च भूवर्षाभेदवायव: ।
चतुर्विधास्ते षड्विंश भेदा: षोड़श गोनसा: ॥
त्रयोदश च राजीला यन्तरा एकविंशति: ।
ये नुक्तकाले जायन्ते सर्पास्ते यन्तरा: स्मृता: ॥
आषाढ़ादित्रिमासै: स्याद्गर्भो मासचतुष्टये ।
अण्डकानां शतं हे च चत्वारिंशत् प्रसूयते ।
सर्पा ग्रसन्ति स्तनौ तान् विना स्त्रीपुंनपुंसकान् ।
उन्मीलतेऽपि सप्ताहात् कृष्णो मासाद्वयेऽहिभि: ॥
द्वादशाहात् स्ववोध: स्याद्दन्ता: स्यु: सूर्य्य-
दर्शनात् ।
द्वात्रिंशद्दिनविंशत्याद्यतसप्तेषु दंष्ट्रिका: ॥
करालो मकरी कालरात्री च यमदूतिका: ।
एताख्या: सविषा दंष्ट्रा वामदक्षिणपार्श्वगा: ॥
यस्मात्तास्वसृपते क्षिप्तं जीवेत् षष्टिसमाहृयम् ।
नागा: सूर्य्यादिवारेशा: सप्त उक्ता दिवानिशि ॥
तेषां षट् प्रतिवारेषु कुलिक: सर्वसन्धिषु ।
शङ्खेन वा महाजेन सह तस्योदयोऽथवा ॥
द्वयोर्वा नाड़िकामन्तमन्तरं कुलिकोदय: ।
दुष्ट: सकाल: सर्व्वत्र सर्व्वदंशे विनिर्द्दिशेत ॥
कृत्तिका भरणी स्वाती मूलं पूर्व्वात्रयाश्विनी ।
विशाखार्द्रा मघाश्लेषा चित्रा श्रवणरोहिणी ॥
हस्ता मन्दकुजौ वारौ पञ्चमी चाष्टमी तिथि: ।
यष्ठी रिक्ता शिवा निन्दा पञ्चमी च चतुर्दशी ॥
सन्ध्याचतुष्टयं दुष्टं दग्धयोगाश्च राशय: ।
एकद्विचतुरो दंष्ट्रा दष्टविद्धश्च खण्डितम् ॥
अदंशमवशून्नं स्यादंशमेवं चतुर्व्विधम् ।
त्रयो दंष्ट्राकृता दंष्ट्रा वेदना रुधिरो वृणाम् ॥
नक्तं दंष्ट्राकृत्कूर्म्माभा दंष्ट्राश्च यमचोदिता: ॥
दाही पिपीलिकास्पर्शी कण्डूशोथरुजान्वित: ।
सतोदो ग्रन्थितो दंश: सविषो न्यस्तनिर्विष: ॥
देवालये शून्यगृहे वल्मीकोद्यानकोटरे ।
रथ्या सन्ध्या श्मशाने च श्मशाने सिन्धुसङ्गमे ॥
द्वीपे चतुष्पथे सौधे गृहेऽर्द्धे पर्व्वताग्रत: ।
विलद्वारे जीर्णकूपे जीर्णवेश्मनि कुड्यके ॥
शिग्रुशेम्नातकाक्षेषु जम्बूडुम्बरशीग्रु च ।
वटे च जीर्णप्राकारे खास्यहृन्नकक्षजानुजि ॥
तालौ शङ्खे गले मूर्द्धि चिबुके नाभिपादयो: ।
दंशोऽशुभ: शुभो भूत:पुष्यहस्त: सुवाक् सुधी: ॥
लिङ्गवर्णसमानश्च शुक्लवस्त्रोऽमल: शुचि: ।
अपद्वारागत: शस्त्री प्रमादी भूगतेक्षण: ॥
विवर्णवासा: प्राग्दिङ्मुखो गन्धर्ववर्णभाक् ।
शुष्ककाष्ठाश्रित: खिन्नस्तिलाक्तककरांशक: ॥
आर्द्रवासा: क्षणरक्तपुष्पो हेमशिरोरुह: ।
कुचमर्द्दी नखच्छेदी गुदसृक् पादलेखक: ॥
केशलुषी क्षणच्छेदी दुष्टा दूतास्तथैकल: ।
इड़ान्यावाहयद्वेधा यदि दूतस्य चात्मन: ॥
आभ्यां द्वाभ्यां दृष्टयान्यान् विद्यात् स्त्रीपुंनपुं-
सकान् ।
दूत: स्पृशति यद्गात्रं तस्मिन् दंशसदाहरेत् ॥
दूताङ्घ्रिचलनं दुष्टं सुखिभिर्निश्चला शुभा ।
जीवपार्श्वे शुभो दूतो दुष्टोऽन्यत्र समागत: ॥
जीवो गतागते दुष्ट: शुभो दूतनिवेदने ।
दूतस्य वाक् प्रदुष्टा सा पूर्व्वामजार्हनिन्दिता ॥
विभक्तैस्तस्य वाक्यान्तैर्विषनिर्विषकालता ।
आद्यै: स्वरैश्च काद्यैश्च वर्गैर्भिन्नलिपिर्द्विधा ॥
स्वरजोवसुमान् वर्गो इति चैष्यश्च माटका: ।
वातात्मोन्द्रजलात्मानो वर्गेषु च चतुष्टयम् ॥
नपुंसका: पञ्चमा: स्यु: स्वरा: शक्रामुयोनय: ।
दुष्टौ दूतस्य वाक्पादौ वातात्मौ मध्यमौ हरि: ॥
प्रशस्ता वारुणा वर्णा अतिदुष्टा नपुंसका: ।
प्रस्थाने मङ्गलं वाक्यं गर्ज्जितं मेघदन्तिनो: ॥
प्रदक्षिणं फले दृष्टे चामस्य च रुतं जितम् ।
शुभा गीतादिशब्दा: स्युरीदृशं स्यादसिद्धये ॥
अनर्थगीताधाक्रन्दो दक्षिणे विरुतं हुतम् ।
वेश्या विप्रो नृप: कन्या गौर्दन्ती सुरध्वजौ ॥
क्षीराज्यदधिशङ्खाम्बुपूर्णं भेरी फलं सुरा: ।
तण्डुला हेमरूप्यञ्च सिद्धयेऽभिमुखा अमी ॥
मकाक्ष: मानल: कायस्थमलिनास्यरभारभृत् ।
गलस्थटङ्को गोमायुर्घोलूककपर्दिका: ॥
तेषां कपालवर्णासा निषेधो मज्जनक्रमे ।

विषवेगाश्च सप्त सुधांतोर्द्वात्वन्तराग्निः ॥
विषदंष्टो ललाटं यात्वतो नेत्रं ततो मुखम् ।
आस्याच्चरणनाभी द्वौ धातून् प्राप्नोति हि क्रमात् ॥"

इत्याग्नेये २६४ अध्याये लक्षणानि ॥*॥

अग्निरुवाच ।

"मन्त्रौषधैर्दष्टचिकित्सां प्रवदामि ते ।
ॐ नमो भगवते नीलकण्ठायेति ॥
जपनाद्विषहानिः स्यादौषधं जीवरक्षणम् ।
माष्यं सकृद्रसं पेयं द्विविधं विषमुच्यते ॥
जङ्गमं सर्पदष्टादि शुक्लादि स्यावरं विषम् ।
प्रान्तस्वरान्वितो ब्रह्मा लोहितं तारकः शिवः॥
विषते नाम मन्त्रोऽयं तार्क्ष्यः शब्दमयः स्मृतः ।
त्वल महामते हृदयाय । गरुडविलासशिरसे ।
गरुडशिखायै । गरुडविषभञ्जन ३ प्रमेदन ३ ।
विनाशय ३ विमर्दय ३ कवचाय । अप्रतिहतशासनं वँ हूँ फट् अस्त्राय । उग्ररूपधारक सर्वभयङ्कर भीषय ३ सर्वं दह ३ भस्मीकुरु कुरु स्वाहा नेत्राय ।
सप्तवर्णान्तयुग्माष्टदिग्दलस्थरकेशरात् ।
वर्णैरलं वह्निसाभूत कर्णिकं माटकासुजम् ।
कृत्वा हृदिस्थं तन्मन्त्री वामहस्ततले स्मरेत् ॥
अङ्गुष्ठादौ न्यसेद्वर्णान् विषभेदोदिताः कलाः ।
पार्श्वं वज्रचतुष्कोणं पार्थिवं शक्रदेवतम् ।
वृत्तार्हमाप्यं पद्मार्धं शुक्लं वरुणदेवतम् ।
त्र्यस्रं स्वस्तिकयुक्तास्त्र मैषत्यं वह्निदेवतम् ॥
वृत्तबिन्दुवृतं वायुदेवतं धूम्यमानिलम् ।
अङ्गुष्ठाद्यङ्गुलीमध्ये पर्व्यासेषु स्ववेश्मसु ॥
सवलेनागवाहनवेष्टितेषु न्यसेत् क्रमात् ।
विषते चतुरो वर्णान् खरुद्रलसमन्वितः ।
अरूपे वरतन्मात्रे व्याकाशे शिवदेवते ॥
कनिष्ठामध्यपर्व्यन्ते न्यसेत्तस्याद्यमक्षरम् ।
नागानामादिवर्णांश्च स्वमण्डलगतान्यसेत् ॥
भूतादिवर्णान् विन्यस्य अङ्गुष्ठाद्यन्तपर्वसु ।
तस्माच्चादिगुणाद्यर्णानङ्गुलीषु न्यसेद्बुधः ॥
स्वाङ्गादेव तार्क्ष्येण हस्ते हृन्नाभिहृदयम् ।
मण्डलादिषु तान् वर्णान् विषते करयोर्न्यसेत् ॥
त्रेखाद्यङ्गुलिभिर्दैनाभिस्थानेषु पर्वसु ।
सलोमतः सवर्णाभमानमे स्तुहिनप्रभम् ॥
कुङ्कुमारुणमाकण्ठादाकेशान्तात् सितेतरम् ।
वक्षोऽष्टपादिनं तार्क्ष्यं चन्द्राङ्गं नागभूषणम् ॥
नीलाग्रनासमात्मानं महाभद्रं स्मरेद्बुधः ।
एवं तार्क्ष्यात्मनो वाक्यान्मन्त्रः स्याच्छान्तियोगिषि॥
स्मित तार्क्ष्यकरस्पान्तःस्थिताङ्गुष्ठविषापहा ।
तार्क्ष्यहस्तं वसुदत्त्य तत्पदाङ्गुलिचालनात् ॥
जुम्भादिदस्य तस्मादीरुद्रमन्त्रवीर्यया ।
व्याकाशादेशभूबीजः पक्षाङ्गाधिपतिर्मनुः ॥
संस्तम्भयेति बीजातो भाषया स्तम्भयेद्विषम् ।
अस्त्रभूषया बीजो मन्त्रोऽयं साधुसाधितः ॥
मंत्रवः शमयत्यस्र शब्दाद्यः मंहरेद्विषम् ।
दष्टस्त्यामर्पदेहं स्वमात्मोऽभिषेकतः ॥
स्वजप्तमृत्तमैलादिनिलनस्थवरेण वा ।

संदष्टायेव संयुक्तो भूतेजोवत्ययात् स्थितः ॥
भूवायुवत्ययान्मन्त्रो विषं संक्रामयत्यसौ ।
व्यस्तो निजवेशस्थो बीजाभीष्टफलाप्तुभिः ॥
एतत् कर्म नवेन्मन्त्री गरुडाकृतिविग्रहः ।
तार्क्ष्यवारणगेहस्थस्तज्जनान्नाशयेद्विषम् ॥
जानुदण्डोन्दुसदितं स्वधाग्नीबीजलाञ्छितम् ।
स्नानपानात् सर्वविषजरारोगापमृत्युजित् ॥
पचि पचि महापचि महापचि विवि स्वाहा ।
पचि पचि महापचि महापचि चीची स्वाहा॥
द्वावेतौ पक्षिराड्मन्त्रौ विषन्नावभिमन्त्रणात् ।
पक्षिराजाय विद्महे पक्षिदेवाय धीमहि तन्नो गरुडः प्रचोदयात् ॥
वह्निस्थौ पार्श्वगतपूर्वौ दन्त्यौकौ च दन्तिनौ ।
सकलो जाङ्गली चेति नीलकण्ठाद्यमीरितः ॥
वक्त्रःकण्ठशिखास्थेतं न्यसेत् स्तम्भे सुसंस्कृतौ ।
हर हर हृदयाय नमः कपर्दिने च शिरसे नीलकण्ठाय वै शिखाम् ॥
कालकूटविषभक्षणाय स्वाहास्त्रं वर्म च ।
कण्ठिनेत्रं क्षत्रिवासं नेत्रैः प्रत्येकशस्त्रिभिः ।
पूर्वाद्यैराननैर्युक्तं श्वेतपीतारुणासितैः ॥
अभयं वरदस्पार्श्वं वासुकिश्च दृधद्भुजैः ।
यज्ञोपवीतपार्श्वस्तु गौरी सद्योऽस्य देवता ॥
पादजानुगुह्यनाभिहृत्कण्ठाननमूर्द्धसु ।
मन्त्रार्णान्न्यस्य करयोरङ्गुष्ठाद्यङ्गुलीषु च ॥
तर्ज्जन्यादिदलास्तु सर्वमङ्गुष्ठयोर्न्यसेत् ।
व्यापेवं संस्मरेत् क्षिप्रं वह्नया मूलमुद्रया ॥
कनिष्ठा व्येष्टया बद्ध्वा तिस्रोऽन्याः प्रहृतिर्जवः ।
विषनाशो वामहस्तमन्यस्मिन् दक्षिणं करम् ॥
नमो भगवते नीलकण्ठाय चिः । अमलकण्ठाय चिः सर्वज्ञकण्ठाय चिः क्षिप ओम् स्वाहा ॥
नमो नीलकण्ठाय नैकसर्वविषापहाय । नमस्ते रुद्रमन्यव इति सम्मार्ज्जनाद्विषं विनश्यति ॥
न मन्त्रैः कर्णजाप्या उपनेत्रा विधानतः ।
यजेद्रुद्रविधानेन नीलग्रीवं महेश्वरम् ।
विषव्याधिविनाशः स्यात् कल्पा रुद्र विधानतः॥"

इत्याग्नेये महापुराणे दष्टचिकित्सा नाम २६५ अध्यायः ॥*॥*॥ यात्राकाले तस्य शुभाशुभसूचकत्वं यथा,—

"गोनासदर्व्वीकरराजिलाद्या
जात्येव सर्व्वे भयदा मुजङ्गाः ।
विलोक्य सर्पं यदि निर्व्विकल्पा
निवृत्तविघ्नस्य शुभं विचिन्त्यम् ॥
पाषाणसंस्थमिलकण्टकेषु
दष्ट्वा,पदं यान्ति विनष्टविघ्नाः ।
सर्पेक्षया पंचनखाभिधेयः
प्रयाणकाले न तु वामभागे ।
दृष्टः शुभैः सिद्धिकरद्रुमस्थ-
स्त्रिक्षेत् पथोर्द्धं यदि राज्यलाभः ॥"

इति सर्पः । इति वसन्तराजशाकुने १५ वर्गः ॥

सर्पकङ्कालिका, स्त्री, (सर्पकङ्काली एव । स्वार्थे कन् ।) वृक्षविशेषः । तत्पर्य्यायः । तीक्ष्णा २ विषदंष्टा ३ विषापहा ४ । इति रत्नमाला ॥

सर्पकङ्काली, स्त्री, (सर्पस्य कङ्कालमिवाङ्गं यस्याः । ङीष् ।) सर्पकङ्कालिका । इति शब्दचन्द्रिका ॥

सर्पगन्धा, स्त्री, (सर्पं गन्धयते हिनस्तीति । गन्ध हिंसने + घञ् । टाप् ।) वृक्षविशेषः । यथा,

"कृष्णाकी सर्पगन्धा च रसना च फलङ्घा ॥"

इति जटाधरः ॥

सर्पघातिनी, स्त्री, (सर्पं हन्तीति । हन + णिनिः । ङीष् ।) सर्पकङ्कालीभेदः । यथा,—

"भर्गसहा सर्पनामा सर्पाक्षी सर्पघातिनी ॥"

इति रत्नमाला ॥

सर्पचक्षुः, पुं, (सर्पस्य चक्षुरिव क्षीणो यस्य ।) नकुलः । इति हेमचन्द्रः ॥

सर्पदंष्ट्रः, पुं, (सर्पस्य दंष्ट्रेव पुष्पमस्य ।) दन्तीवृक्षः । इति शब्दचन्द्रिका ॥

सर्पदंष्ट्रा, स्त्री, (सर्पस्य दंष्ट्रेव ।) वृश्चिकाली । इति रत्नमाला ॥

सर्पदंष्ट्रिका, स्त्री, (सर्पदंष्ट्रा + स्वार्थे कन् । टाप् अत इत्वम् ।) अजशृङ्गी । इति राजनिर्घण्टः ॥

सर्पदण्डा, स्त्री, (सर्पं दण्डयतीति । दण्ड + अच् । टाप् ।) सैंहली । इति राजनिर्घण्टः ॥

सर्पदण्डी, स्त्री, (सर्पं दण्डयतीति । दण्ड + अच् । ङीष् ।) गौरची । इति राजनिर्घण्टः ॥

सर्पदन्ती, स्त्री, (सर्पस्य दन्त इव पुष्पमस्याः । गौरादित्वात् ङीष् ।) नागदन्ती । इति राजनिर्घण्टः ॥

सर्पदमनी, स्त्री, (सर्पस्य दमनमस्याः । ङीष् ।) वन्ध्याकर्कोटकी । इति राजनिर्घण्टः ॥

सर्पनामा, स्त्री, (सर्पस्य नाम नाम यस्याः ।) सर्पकङ्कालीभेदः । इति रत्नमाला ॥

सर्पपुष्पी, स्त्री, (सर्पस्य दन्त इव पुष्पमस्याः । ङीष् ।) नागदन्ती । इति राजनिर्घण्टः ॥

सर्पफणजः, पुं, (सर्पस्य फणात् जायते इति । जन + डः ।) सर्पफणजातमणिः । इति शब्दरत्नावली ॥

सर्पसुक्, [क्] पुं, (सर्पं सृक्ते इति । सृज + क्विप् ।) मयूरः । इति हेमचन्द्रः ॥ सर्पभक्षके, त्रि ॥

सर्पमाला, स्त्री, (सर्पस्य मालेव ।) सर्पकङ्कालीभेदः । इति कांचित् रत्नमाला ॥ सर्पनामा इति चापुपाठः ॥

सर्पराजः, पुं, (सर्पाणां राजा । समासे टच् ।) वासुकिः । इत्यमरः । १ । ८ । ४ ॥ (सर्पश्रेष्ठे, त्रि । यथा, हरिवंशे ६८ । १५ ।

"एष मोहं गतः कृष्णो मग्नो वै कालिये ह्रदे ।
भक्षते सर्पराजेन तदागच्छत भारिषम ॥")

सर्पलता, स्त्री, (सर्प इव लता ।) नागवल्ली । इति राजनिर्घण्टः ॥

सर्पशत्रं, क्ली, (सर्पनाशकं शस्त्रम् ।) सर्पनाशकयन्त्रविशेषः । यथा, श्रीभागवते १२ । ६ । १६-२८ ।

"जनमेजयः स्वपितरं श्रुत्वा तक्षकभक्षितम् ।
यथा जुहाव संक्रुद्धः सर्पान् सत्रे सह द्विजैः ॥

सर्पसत्रे समिद्धाग्नौ दह्यमानान् महोरगान्।
दृष्ट्वेन्द्रं भयसंविग्नस्तक्षकः शरणं ययौ॥
व्यपध्वंसत्तक्षकं तत्र राजा पारीक्षितो द्विजान्।
उवाच तक्षकः कस्मात् दह्येतोरगाधमः॥
तं गोपायति राजेन्द्र शक्रः शरणमागतम्
तेन संस्तम्भितः सर्पस्तस्मान्नाग्नौ पतत्यसौ॥
पारीक्षित इति श्रुत्वा प्राहर्त्विज उदारधीः।
सहेन्द्रस्तक्षको विप्रा नाग्नौ किमिति पात्यते॥
तच्छ्रुत्वा तु तदुर्व्विप्राः सहेन्द्रं तक्षकं मखे।
तक्षकाशु पतस्वेह सहेन्द्रेण मरुत्वता॥
इति ब्रह्मोदितास्तेषैः स्थानादिन्द्रः प्रचालितः।
बभूव संभ्रान्तमतिः सविमानः सतक्षकः॥
तं पतन्तं विमानेन सह तक्षकमम्बरात्।
विलोक्याङ्गिरसः प्राह राजानं तं परीक्षितः॥
नैष त्वया मनुष्येन्द्र वधमर्हति सर्पराट्।
अनेन पीतमस्तमघवा अजरामरः॥
जीवितं मरणं जन्तोर्गतिः स्वेनैव कर्म्मणा।
राजंस्ततोऽन्यो नास्यस्य प्रदाता सुखदुःखयोः।
सर्पक्षौरारिवह्न्यम्बुक्षुत्तृड्व्याध्यादिभिर्नृप।
पञ्चत्वमिच्छते जन्तुर्भुङ्क्त आरब्धकर्म्म तत्॥
तस्मात् सत्रमिदं राजन् संस्थीयेतामिचारिकम्॥
सर्पा अनागसो दग्धा जनैर्दृष्टं हि मुच्यते॥
इत्युक्तः स तथेत्याह महर्षेर्मानयन् वचः।
सर्पसत्राद्परतः पूजयामास वाक्पतिम्॥"
(जरत्कारुपुत्रस्यास्तीकस्य वचनादेव जनमेजयः
सर्पमेधात् विरराम इति पुराणान्तरमतम्॥)

सर्पसत्रिन्, [न्] पुं, (सर्पसत्रमस्यास्तीति। इनिः।) जनमेजयराजः। इति शब्दरत्नावली॥

सर्पसहा, स्त्री, (सर्पं सहते इति। सह+क्विप्।) सर्पकङ्कालीभेदः। इति रत्नमाला॥

सर्पहन्, [न्] पुं, (सर्पं हन्तीति। हन्+क्विप्।) नकुलः। इति हेमचन्द्रः॥

सर्पाक्षं, क्ली, (सर्पस्य अक्षीव अक्षं यस्य। षच्।) रत्नाक्षम्। इति राजनिर्घण्टः॥

सर्पाक्षी, स्त्री, (सर्पस्य अक्षीव पुष्पं यस्याः। षच्। ङीप्।) गन्धनाकुली। इति राजनिर्घण्टः॥ वृक्षविशेषः। सहचरी इति गडिची इति च हिन्दी भाषा। तत्पर्य्यायः। गण्डाली २ नाड़ीकलापकः ३। अस्य गुणाः। कटुत्वम्। तिक्तत्वम्। उष्णत्वम्। कृमिनाशित्वम्। दृष्टिकौक्ष्ण्यसर्पाङ्गां विषनाशित्वम्। व्रणरोपणत्वञ्च। इति भावप्रकाशः॥

सर्पाख्यः, पुं, (सर्पस्य आख्या आख्या यस्य।) मल्लिकाकन्दभेदः। इति राजनिर्घण्टः। नागकेशरः। इति रत्नमाला। सर्पनामके, त्रि॥

सर्पाक्षी, स्त्री, (सर्पस्येव अक्षं यस्याः। ङीप्।) सर्पकङ्कालीभेदः। इति रत्नमाला॥ सेंहुली। इति राजनिर्घण्टः॥

सर्पादनी, स्त्री, (सर्पस्य तद्विषस्य अदनं भक्षणं यस्याः। ङीप्।) नाकुली। इति राजनिर्घण्टः॥

सर्पारातिः, पुं, (सर्पस्य अरातिः।) गरुडः। इति हेमचन्द्रः॥

सर्पारिः, पुं, (सर्पस्य अरिः।) नकुलः। इति राजनिर्घण्टः॥ गरुड़श्च॥ (यथा, हरिवंशे। ६८। ३७।
"तं दृष्ट्वा पक्षमूर्द्धानं सर्पं सर्पारिकेतनः।
अक्रुद्ध एव भगवान् प्रत्युवाचोरगेश्वरम्॥")

सर्पावासं, क्ली, (सर्पस्य आवासो यत्र।) चन्दनम्। इति राजनिर्घण्टः॥ सर्पस्थाने, पुं॥ (यथा, हरिवंशे। ६८। २५।
"यष्टीदामनुगच्छन्त्यः सर्पावासमिमं ह्रदम्।
प्रविशामो न यास्यामो विना दामोदरं व्रजम्॥")

सर्पाशनः, पुं, (सर्पमश्नातीति। अश+ल्युः।) मयूरः। इति त्रिकाण्डशेषः॥ गरुड़श्च॥

सर्पिः, [स्] क्ली, (सर्पतीति। सृप गतौ+"अर्त्तिशुचिहुसृपीति।" उणा० २। १०६। इति इसिः।) घृतम्। इत्यमरः। २। ९। ५२॥ (यथा, मनुः। ३। २७४।
"अपि नः स कुले जायात् यो नो दद्यात् त्रयोदशीम्।
पायसं मधुसर्पिर्भ्यां प्राक्छ्राद्धे कृच्छ्ररस्य च॥"
उदकम्। इति निघण्टुः। १। १२॥)

सर्पिणी, स्त्री, (सर्पतीति। सृप्+णिनिः। ङीप्।) सर्पभार्य्या। सापिनी इति भाषा॥ यथा, शब्दरत्नावल्याम्।
"आशीराशी सर्पदंष्ट्रा ततस्त्री सर्पी च सर्पिणी॥"
क्षुद्रक्षुपभेदः। तत्पर्य्यायः। भुजगी २ भोगी ३ कुण्डली ४ पन्नगी ५ फणी ६। तस्या गुणौ। विषघ्नत्वम्। कुष्ठवर्द्धनत्वञ्च। इति राजनिर्घण्टः॥

सर्पी, स्त्री, (सर्प+जातौ ङीप्।) सर्पिणी। इति शब्दरत्नावली॥

सर्पी, [न्] त्रि, गमनकर्त्ता। सृपधातोर्णिनिप्रत्ययेन निष्पन्नः॥ (यथा, किरातेः। ५। ३५।
"स एष कैलास उपान्तसर्पिणः
करोत्यकाले ऽस्मयं विवस्वतः॥")

सर्पीयं, क्ली, (सर्पीणां सर्पभार्य्याणामिदम्।) श्रीखण्डचन्दनम्। इति राजनिर्घण्टः॥

सर्प्य, सर्पणे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) दन्त्यादिः। ओष्ठ्यवर्णोपधः। सर्प्यति सिसर्प्यिषति। इति दुर्गादासः॥

सर्व्वः, पुं, (सर्व्वसिन् सर्व्वतीति। सर्व्व गतौ+पचाद्यच्। यद्वा, सृ गतौ+"सर्व्वनिषृभ्यामिति।" उणा० १। १५३। इति वनुप्रत्ययेन साधुः।) शिवः। इत्यमरः। १। १। ३२॥ क्षितिमूर्त्तिरयम्। यथा, विसर्ज्जनात् पूर्व्वं भविष्यपुराणोक्तं स्वभावसिद्धप्राचेशान्यादिदिक्षु यामावर्त्तेन पूजनम्। यथा, सर्व्वाय क्षितिमूर्त्तये नम इत्यादि तिस्रादिक्षत्वम्॥ विष्णुः। यथा,—
"असतश्च सतश्चैव सर्व्वस्य प्रभवाव्ययः।
सर्व्वस्य सर्व्वदा ज्ञानात् सर्व्वमेतं पचक्षते॥"
इति विष्णुपुराणम्॥
विष्णुसहस्रनामस्तोत्रेऽप्येवमेव॥

सर्व्वः, त्रि, (सृ+वनिप्।) सम्पूर्णः। इत्यमरः। ३। १। ६४॥ अस्य पर्य्यायः सकलशब्दे द्रष्टव्यः। प्रयोगो यथा.—
"सर्व्वरत्नमयो मेरुः सर्व्वाश्चर्य्यमयं नभः।
सर्व्वतीर्थमयी गङ्गा सर्व्वदेवमयो हरिः॥"
इति वह्निपुराणे देवासुरीयसंवादे २ अध्यायः।

सर्व्वंसहा, स्त्री, (सर्व्वं सहते इति। सह+"पूः सर्व्वयोर्दारिसहोः।" ३। २। ४१। इति खच् अरुर्द्विषदिति मुम्।) पृथिवी। इत्यमरः। १। १। ३॥ (यथा, आर्य्यासप्तशत्याम्। १३६।
"जड़ासुनातिवाहय दृष्टे तस्मापि कालमचलापि।
सर्व्वंसहे कठोरत्वः किमङ्गेन कमठस्य॥"
रात्रि, पुं। इति कालिका॥ सर्व्वंक्लेशादिसहे, त्रि। यथा, सहित्यदर्पणे। २। २०।
"कामं सन्तु दृढ़ं कठोरहृदयो रामोऽसि सर्व्वंसहो
वैदेही तु कथं भविष्यति हहा हा देवि! धीरा भव॥")

सर्व्वकः, त्रि, सकलः। सर्व्वशब्दस्य टेः पूर्व्वमकि तस्मात् स्वार्थे कै च निष्पन्नः। इति मुग्धबोधव्याकरणम्॥

सर्व्वकर्त्ता, [तृ] पुं, (सर्व्वेषां कर्त्ता।) ब्रह्मा। इति शब्दरत्नावली॥

सर्व्वकर्म्मीण, त्रि, (सर्व्वकर्म्माणि व्याप्नोतीति। सर्व्वकर्म्म+"तत्सर्व्वादेः पथ्यङ्गकर्म्मपत्रात्रं व्याप्नोति।" ५। २। ७। इति खः।) सकलकर्म्मकर्त्ता। यथा, भट्टौ ५ सर्गे।
"संग्रामे सर्व्वकर्म्मीणौ बाहू यस्योपजानुकौ॥"

सर्व्वके, अ, सर्व्वत्र। सर्व्वशब्दात् अकच्प्रत्ययेन निष्पन्नः। इति सिद्धान्तकौमुदी॥

सर्व्वकेशी [न्] पुं, (सर्व्वकेशोऽस्यास्तीति। सर्व्वकेश+"सर्व्वादेरिति वक्तव्यम्।" ५। २। १३५। इत्यस्य वार्त्तिकोक्त्या इनिः।) भटः। इति शब्दरत्नावली॥

सर्व्वचारः, पुं, (सर्व्वेषां चारः।) चारभेदः। सावान् इति भाषा। इति केचित्॥ तत्पर्य्यायः। बहुचारः २ सम्बहुचारकः ३ लोमचारः ४ महाचारः ५ मलारिः ६ चारमेलकः ७। अस्य गुणाः। अतिचारत्वम्। चक्षुष्यत्वम्। मतिशोधनत्वम्। उदावर्त्तक्रमिनाशित्वम्। मलवस्तिविशोधनत्वञ्च। इति राजनिर्घण्टः॥

सर्व्वगं, क्ली, (सर्व्वं गच्छतीति। गम+"जमाताञ्यन्ताधेति।" ३। २। ४८। इति डः।) जलम्। इति मेदिनी॥

सर्व्वगः, पुं, (सर्व्वं गच्छतीति। गम+डः।) शिवः। (यथा, महाभारते। १३। १७। १०४।
"प्रभवः सर्व्वगो वायुरर्य्यमा सविता रविः॥")
ब्रह्मा। इति मेदिनी॥ आत्मा। इति शब्द-

माला ॥ (भीमस्य पुत्रः । यथा, महाभारते । १ । ६५ । ७७ ।
"भीमोऽपि काश्यां बलधरां नामोपयेमे वीर्य्यशुल्कां तस्यां सर्व्वगं नामोत्पादयामास ॥")
सर्व्वत्रगामिनि, त्रि ॥ (यथा, याज्ञवल्क्ये । ३ । १३० ।
"करणैरन्वितस्यापि पूर्व्वज्ञानं कथञ्चन ।
वेत्ति सर्व्वगतां कस्मात् सर्व्वगोऽपि न वेद्नाम् ॥")
सर्व्वगन्धं, क्ली, (सर्व्वे गन्धा यत्रेति ।) चतुर्जातकादि । यथा, शब्दचन्द्रिकायाम् ।
"चतुर्जातककक्कोललवङ्गागुरुसिङ्कम् ।
सर्व्वगन्धमिदं चाद्यं सुनिभिः परिकीर्त्तितम् ॥"
अन्यच्च भावप्रकाशे ।
"चातुर्जातककर्पूरकक्कोलागुरुकुङ्कुमम् ।
लवङ्गसहितश्चैव सर्व्वगन्धं विनिर्दिशेत् ॥"
(पुंस्त्वेऽपि दृश्यते । यथा, हृहत्संहितायाम् । ४८ । ४२ ॥
"रत्नानि सर्व्वगन्धाश्च विल्वश्च सचित्कृतम् ।
प्रशस्तनाम्नश्चौषधयो हिरण्यं मङ्गलानि च ॥"
सर्व्वगन्धविशिष्टे, त्रि । यथा, छान्दोग्योपनिषदि । ३ । १४ । २ ।
"आकाशात्मा सर्व्वकर्म्मा सर्व्वकामः सर्व्वगन्धः सर्व्वरसः सर्व्वमिदमभ्यात्तोऽवाक्यनादरः ॥")
सर्व्वगा, स्त्री, (सर्व्वं गच्छतीति । गम + डः । टाप् ।) प्रियङ्गुवृक्षः । इति शब्दचन्द्रिका ॥
सर्व्वग्रन्थिः, पुं, (सर्व्वासु ग्रन्थिरिव यत्र ।) पिप्पलीमूलम् । इति राजनिर्घण्टः ॥
सर्व्वग्रन्थिकं, क्ली, (सर्व्वत्र ग्रन्थिरिवात्र । कन् ।) पिप्पलीमूलम् । इति हेमचन्द्रः ॥
सर्व्वचर्म्मीणः, त्रि, (सर्व्वचर्म्मणा कृतः । सर्व्वचर्म्मन् + "सर्व्वचर्म्मणः कृतः खखौ ।" ५ । २ । ५ । इति खः ।) सकलचर्म्मनिर्म्मितः । इति सिद्धान्तकौमुदी ॥
सर्व्वजनीनः, त्रि, (सर्व्वजनाय हितः । सर्व्वजन + "सर्व्वजनात् ठञ् वक्तव्यः ।" ५ । १ । ६ । इत्यस्य वार्त्तिकोक्त्या खः ।) सर्व्वजनसम्बन्धी । इति सिद्धान्तकौमुदी ॥
सर्व्वजया, स्त्री, (सर्व्वेषां जयो यस्याः ।) स्त्रीकर्त्तृकमार्गशीर्षादिद्वादशमासनिष्पाद्यव्रतविशेषः । यथा । अथ सर्व्वजयाव्रतम् । सामान्योक्तं कृत्वा अद्य मार्गशीर्षे मासि अमुकपक्षे अमुकतिथौ विष्णुपदीमक्रान्त्यामारभ्य वर्षपर्य्यन्तं अमुकगोत्रा श्रीअमुकी द्वादशमासप्राकादित्यागफलप्राप्तिपूर्व्वकपुत्रपौत्रादिसर्व्वप्राप्त्युत्तरस्वर्गकामा मनोरथकामा वा गणेशादिहरगौरीपूजात्मकसर्व्वजयाव्रतमहं करिष्ये । ततः सामान्योक्तं नवग्रहपूजान्तं कृत्वा अग्न्याधानं प्रथमेन कृत्वा गौरीमन्त्रितघटं ध्यायेत् ।
"श्वेतवर्णं त्रयश्चक्षुं शालयज्ञोपवीतिनम् ।
विभूतिभूषिताङ्गञ्च व्याघ्रचर्म्मधरं शुभम् ।
पञ्चवक्त्रं दशभुजं जटिलं चन्द्रचूडकम् ।
त्रिनेत्रं पार्व्वतीयुक्तं प्रमथैश्च समन्वितम् ।
प्रसन्नवदनं देवं वरदं भक्तवत्सलम् ॥"
इति ध्यात्वा ॐ नमः शिवाय ह्रीं दुर्गायै नमः । इति मन्त्रेणार्घ्यं कृत्वा पुनर्ध्यात्वा ॐ गौरीसहितहराय नमः । इत्यासनादिना पूजयेत् । ततः पञ्चपुष्पाञ्जलिदानं कृत्वा प्रणमेत् ।
"नमस्ते पार्व्वतीनाथ ! नमस्ते गणिशेश्वर ! ।
नमस्ते पार्व्वतीदेवे चण्डिकायै नमो नमः ॥"
अथ कथा ।
लक्ष्मीरुवाच ।
"भगवन्तं सुखासीनं लक्ष्मीः पृच्छति केशवम् ।
केन व्रतेन देवेश स्त्रीणां सर्व्वमनोरथम् ॥
सौभाग्यमतुलञ्चापि पुत्रपौत्रविवर्द्धनम् ।
नानासुखसमायुक्तं लभ्यते वैष्णवं पदम् ॥
तद्व्रतं ब्रूहि मे देव ! क्रियते च यथा प्रभो ॥
श्रीभगवानुवाच
अस्ति सर्व्वजया नाम व्रतानां व्रतमुत्तमम् ।
तस्यानुष्ठानमात्रेण स्त्रीणां सर्व्वमनोरथम् ॥
लोकत्रयहिते युक्ता सिध्यतीह न संशयः ।
कुरु त्वं तद्व्रतं देवि ! प्रचारय महीतले ॥
लक्ष्मीरुवाच ।
प्रसन्नो यदि देवेश विधानं मयि कथ्यताम् ।
सुखेन येन देवेश ! क्रियते व्रतमुत्तमम् ॥
श्रीभगवानुवाच ।
सर्व्वजयाव्रतं वक्ष्ये शृणु पद्मे सुशोभनम् ।
नैव दृष्टं व्रतं देवि यथा सर्व्वजयाव्रतम् ॥
पुरुषाणां गयाश्राद्धं स्त्रीणां सर्व्वजयाव्रतम् ।
पितृद्वारकृतं नाम मनोरथप्रदायकम् ॥
व्रतराजमिदं भद्रे नारीणां सुखदायकम् ॥
मार्गशीर्षे व्रतेनु प्राप्तं पौण्डरीकं फलं लभेत् ॥
पौषे तु लवणं त्यक्त्वा गोसहस्रफलं स्मृतम् ।
माघे तैलं परित्यज्य श्रियं प्राप्नोति मानवी ॥
फाल्गुने च व्रतेनु पूर्णं भवेत् पतिव्रता सती ।
चैत्रे पुष्पं परित्यज्य सा याति परमां गतिम् ॥
भक्तं त्यक्त्वाथ वैशाखे याति चन्द्रपुरीं शुभाम् ।
ज्येष्ठे धाराजलं त्यक्त्वा वारुणं लोकमाप्नुयात् ।
आषाढ़े च दधि त्यक्त्वा वारुणं लोकमाप्नुयात् ॥
श्रावणे वसनं त्यक्त्वा प्रजापतिपुरं व्रजेत् ।
भाद्रे तु यवनं त्यक्त्वा नारायणपुरं व्रजेत् ॥
आश्विने च घृतं त्यक्त्वा लावण्यमुत्तमं लभेत् ।
प्रश्याश्च कार्त्तिके त्यक्त्वा प्रयाति परमां गतिम् ॥
मासान्ते घोषभुञ्जीत सर्व्वं दत्त्वा द्विजातये ।
प्रश्या देया व्रते पूर्णे दानानि विविधानि च ।
गौर्य्या हरस्य संपूज्य प्राकं भुञ्जीत पायसम् ॥
एवं या कुरुते नारी वर्षे यावत् समाप्यते ।
स्वर्गे वसति सा नित्यं पुत्रपौत्रप्रतिष्ठिता ॥
तत् कुरुष्व प्रयत्नेन येन सर्व्वजया भव ॥
अथवेन्द्रस्य रतेश्च मदनस्य च ।
तत्तुल्यो भवेत् भद्रे व्रतस्यास्य प्रसादतः ॥"
इति स्कन्दपुराणोक्ता सर्व्वजयाव्रतकथा समाप्ता ॥
ततः स्नात्वा प्रणम्य विप्रञ्चेत् । वर्षान्ते प्रतिष्ठा कर्त्तव्या । अथदानेऽमुकमासासुकदेवत्यत्यागजन्यासुकफलप्राप्तिकामा शिवदुर्गाप्रीतिकामा वा ब्राह्मणायाहं ददे इति वदेत् । इति शब्दचन्द्रिका ॥
सर्व्वजित्, पुं, (सर्व्वान् जयतीति । जि + क्विप् ।) कालचक्रस्य एकविंशवर्षः । इति केचित् ॥ (त्वाष्टे युगे आद्यवत्सरः । यथा, हृहत्संहितायाम् । ८ । ३७ ।
"त्वाष्टे युगे सर्व्वजिदाद्य उक्तः
संवत्सरोऽन्यः खलु सर्व्वधारी ॥")
सकलजयकर्त्तरि, त्रि ॥
सर्व्वज्ञः, पुं, (सर्व्वं जानातीति । ज्ञा + कः ।) शिवः । (यथा, महाभारते । १३ । १७ । ३६ ।
"सुवर्णरेताः सर्व्वज्ञः सुबीजो बीजवाहनः ॥")
बुद्धः । इत्यमरः । १ । १ । ३५ । ; २ । १ । १३ ॥ (विष्णुः । यथा, महाभारते । १३ । १४६ । ६१ ।
"सर्व्वदर्शी विमुक्तात्मा सर्व्वज्ञो ज्ञानमुत्तमम् ॥")
सकलज्ञातरि, त्रि ॥ (यथा, रघुः । १० । २० ।
"सर्व्वज्ञत्वमविज्ञातः सर्व्वयोनिरयोनिजः ॥")
सर्व्वज्ञा, स्त्री, (सर्व्वं जानातीति । ज्ञा + कः । टाप् ।) दुर्गा । यथा, देवीपुराणे ४५ अध्याये ।
"उत्पत्तिस्थितिनाशेषु रजादिगुणा मता ।
सर्व्वज्ञा सर्व्ववेत्तृत्वाच्छान्तित्वाच्छान्तिरुच्यते ॥"
सर्व्वतः, अ, चतुर्दिगभिव्याप्तिः । तत्पर्य्यायः । समन्ततः २ परितः ३ विष्वक् ४ । इत्यमरः । ३ । ४ । १३ ॥ (यथा, सुश्रुते शारीरस्थाने । ३ । २ । ५ ।
"ते सर्व्वगं सर्व्वतः प्राप्य धीरा
युक्तात्मानः सर्व्वमेवाविशन्ति ॥"
सर्व्व + तसिल् । सर्व्वः । यथा, मनुः । २ । ५ ।
"अप्रतर्कमविज्ञेयं प्रसुप्तमिव सर्व्वतः ॥"
"प्रसुप्तमिव सर्व्वतः प्रथमार्थे तसिः । स्वकाव्याच्चमित्यर्थः ।" इति तट्टीकायां कुल्लूकः ॥ पञ्चम्यास्तसिल् । सर्व्वस्मात् । सर्व्वेभ्यः । यथा, मनुः । ४ । २४७ ।
"सर्व्वतः प्रतिगृह्णीयाच्छ्रद्धयाभ्यर्हणीयताम् ॥"
सप्तम्यास्तसिल् । सर्व्वस्मिन् । यथा, कृत्संहारे । १ । २३ ।
"भ्रमति गगनयूथः सर्व्वतस्तोयमिच्छन्
प्रखरभकुलमग्निं प्रोद्गरत्यम्बु कूपात् ॥")
सर्व्वतःशुभा, स्त्री, (सर्व्वतः शुभं यस्याः ।) प्रियङ्गुवृक्षः । इति शब्दचन्द्रिका ।
सर्व्वतन्त्रः, पुं, (सर्व्वं तन्त्रमस्येति ।) सकलतन्त्राधीतः । इति केचित् ॥ (क्ली, सर्व्वं तन्त्रमिति ।) सकलशास्त्रञ्च ॥
सर्व्वतापनः, पुं, (सर्व्वान् तापयतीति । तप + णिच् + ल्युः ।) कामदेवः । इति केचित् ॥ सर्व्वतापके, त्रि ॥
सर्व्वतिक्ता, स्त्री, (सर्व्वतस्तिक्ता ।) काकमाची । इति राजनिर्घण्टः ॥
सर्व्वतोभद्रं, क्ली, पुं, (सर्व्वतो भद्रमस्मादिति ।) ईश्वरगृहविशेषः । इत्यमरः । २ । २ । १०॥ द्वारालिन्दादिभेदभिन्नाद्यगृहम् । तस्य लक्षणमुपन्यस्तं साक्षेन यथा,—

"स्वस्तिकं प्राङ्मुखं यत्र स्यादस्तिन्द्रानुगतं भवेत्।
तत्पार्श्वानुगतौ चान्यौ तत्पश्चिमगतोऽपरः।
अनिविद्धालिन्दभेदं चतुर्द्वारञ्च यद्भवेत्।
सङ्केतं सर्व्वतोभद्रं चतुरालिन्द्रशोभितम्।
दक्षपश्चिमानुगतौ च शेषावुत्तरविस्तृतौ।
यत्रालिन्दौ रुचक्यतो न चेत् स्यादुत्तरानुखम्।
क्रमेणोपचीयमानं यत्रालिन्दत्रयं भवेत्।
वर्द्धमानमिदाचुर्न चेत् स्यादुत्तरानुखम्।
दक्षिणानुगतालिन्दत्रयं यत् पश्चिमानुखम्।
पूर्व्वमेयोत्तरोक्तार्थं तन्न्यासवर्त्म वदन्ति तत्।
उपर्य्युपरि यद्गेहं तद्विच्छन्दकसंज्ञकम्।"

इति वचनेषु स्वस्तिकादीनां क्लीवत्वदर्शनात् स्वस्तिकादीनां पुंनपुंसकत्वं मन्तव्यम्। एवमादिप्रासादे रुचकवर्द्धमानौ पुंलिङ्गावपि यदुक्तम्।

"स्वस्तिकः सर्व्वतोभद्रो रुचको वर्द्धमानकः।
नन्द्यावर्त्तादयश्चापि द्वारालिन्दादिभेदजाः।"

इति भरतः॥ ६॥

लक्षणान्तरं यथा, भविष्योत्तरे।

"मेघादिपञ्चे यातस्य वृषतेः स्थपतेः क्रमात्।
द्वादशैव यदा दण्डे तेषां लक्षणमुच्यते॥
मुनन्दः सर्व्वतोभद्रो भवो नान्दीमुखस्तथा।
विनोदश्च विलासश्च विजयो विमलस्तथा॥
रङ्गः कलिङ्गयो धीरो द्वादशैते प्रकीर्त्तिताः॥"

तत्साधनं यथा,—

"द्वौ राजदण्डायामे परिणाहे तथैव च।
कार्य्यं सर्व्वतोभद्रः शुक्लपक्षाधिदेवताः॥
दारुणा रुचकाश्चैव पूज्यास्ते चात्र यत्नतः।
चतुर्द्वाराणि दारूणि कृत्वा चित्राकृतानि च॥
पीठपट्टावली स्नेहः सर्व्वानिष्टविनाशनः।
त्यक्त्वा सर्व्वोपलाः सर्व्वान् शुचून् निक्षन्तीति॥"

शीर्षे २१ पृष्ठे २० इति सर्व्वतोभद्रः। इति पुष्करसपत्तरः। (सर्व्वतो भद्रप्रासादे, त्रि। यथा, भागवते। १०। ७१। ११।

"इत्युद्धवश्चो राजन् सर्व्वतोभद्रमच्युतम्।
देवर्षिर्यदुवृद्धाश्च कृष्णश्च प्रत्यपूजयन्॥")

सर्व्वतोभद्रं, क्ली, (सर्व्वतो भद्रमस्मिन्। इत्यौत्सर्गव्रतप्रतिष्ठादौ पूजाधारमण्डलविशेषः। यथा, श्राद्धदायाम्।


"चतुरस्रे चतुःकोष्ठे कर्णसूत्रसमन्विते।
चतुर्ष्वपि च कोष्ठेषु कोणसूत्रचतुष्टयम्॥
मध्ये मध्ये यथा मत्स्या भवेयुः पातयेत्तथा।
पूर्व्वापरायते द्वे द्वे मत्स्यौ याम्योत्तरायते॥
पातयेत्तेषु मत्स्येषु समं सूत्रचतुष्टयम्।
पूर्व्ववत् कोणकोष्ठेषु कर्णसूत्राणि पातयेत्॥
तद्वत् भूतेषु मत्स्येषु दद्यात् सूत्रचतुष्टयम्।
ततः कोष्ठेषु मत्स्याः स्युस्तेषु सूत्राणि पातयेत्॥
यावत् प्रतद्वयं मत्स्यौ षट्पञ्चाशत् पदान्यपि।
तावत्तेनैव विधिना तत्र सूत्राणि पातयेत्॥
षट्त्रिंशता पदैर्मध्ये लिखेत् पद्मं सुलक्षणम्।
बहिःपद्मा भवेत् पीठं पद्मत्रियुग्मेन वीथिका॥
द्वारशोभोपशोभाश्च शिष्टाभ्यां परिकल्पयेत्।
शास्त्रोक्तविधिना मन्त्री ततः पद्मं समालिखेत्॥
पद्मचैवस्य मध्यस्थ द्वादशांशं बहिः सुधीः।
तन्मध्यं विभजेत् सूत्रैस्त्रिभिः समविभागतः॥
आद्यं स्यात् कर्णिकास्थानं केशराणां द्वितीयकम्।
तृतीयं पद्मपत्राणां सूत्रांशेन दलात्मकम्॥
बाह्यसूत्रान्तरालस्थ मानेन विधिना सुधीः।
निधाय केशरास्थेषु परितोऽर्द्धनिशाकरान्॥
लिखित्वा सन्धिसंस्थानि तत्र सूत्राणि पातयेत्।
दलाग्राणाञ्च यन्मानं तन्मानाद्बहिरालिखेत्॥
तदन्तरालतन्मध्यसूत्रयोर्भवतः सुधीः।
आलिखेद्दलषट्केन दलाग्राणि समन्ततः॥
दलसन्धिषु सूत्राग्रः केशराणि प्रकल्पयेत्।
एतत् साधारणं प्रोक्तं पद्मजं तन्त्रवेदिभिः॥
पदानि त्रीणि पादार्धं पीठगात्राणि कारयेत्।
पदानि वीथिसंस्थानि मार्ज्जयेत् पद्मभेदतः।
द्वित्रं द्वाराणि रचयेत् द्वित्रकोष्ठैकसंख्यया।
पदैस्त्रिभिरथैकेन शोभाः स्युर्द्वारपार्श्वयोः॥
उपशोभाः स्युरेकेन त्रिभिः कोष्ठैरनन्तरम्।
अवशिष्टैः पदैः षड्भिः कोणानां स्याच्चतुष्टयम्।
रङ्गयेत् पञ्चभिर्वर्णैर्मण्डलं तन्मनोहरम्।
पीतं हरिद्राचूर्णं स्यात् सितं तण्डुलसम्भवम्॥
कुसुम्भचूर्णमरुणं कृष्णं दग्धपुलाकजम्।
विल्वादिपत्रजं श्यामं ह्युक्तं वर्णपञ्चकम्।
अङ्गुलोत्सेधविस्तारः शोभारेखाः सिताः शुभाः॥
कर्णिकां पीतवर्णेन केशराण्यरुणेन च।
शुक्लवर्णानि पत्राणि तत्सन्धीन् श्यामलेन च॥
रक्तसा रञ्जयेन्मन्त्री यदा पीतैव कर्णिका।
केशराः पीतरक्ताः स्युररुणानि दलान्यपि॥
सन्धयः कृष्णवर्णाः स्युः सितेनाप्यसितेन वा।
रञ्जयेत् पीठगर्भाणि पादाः स्युररुणप्रभाः॥
गात्राणि तस्य शुक्लानि वीथीषु चतुरस्रकम्।
आलिखेत् कदलीलतिका एकपुष्पफलान्विताः॥
वर्णैर्गात्राविधैश्चैव सर्व्वतोभद्रमनोहराः।
द्वाराणि श्वेतवर्णानि शोभा रक्ताः समीरिताः॥
उपशोभाः पीतवर्णाः कोणान्यसितभानि च।
तिस्रो रेखा बहिः कार्य्याः सितरक्तासिताः क्रमात्॥
मण्डलं सर्व्वतोभद्रमेतत् साधारणं स्मृतम्।"॥

प्रकारान्तरं यथा,—

"चतुरस्रां भुवं भित्त्वा दिग्भ्यो द्वादशधा सुधीः।
पातयेच्च सूत्राणि कोष्ठानां ह्युच्यते क्रमम्॥
चतुश्चत्वारिंशदाढ्यं पञ्चात् षट्त्रिंशतासुधीः।
कोष्ठैः प्रकल्पयेत् पीठं पद्मत्रा चैव वीथिका॥
द्वारशोभे यथा पूर्व्वमुपशोभा न ह्युच्यते।
अवशिष्टैः पदैः कुर्य्यात् षड्भिः कोणानि सर्व्वतः।
विदध्यात् पूर्व्ववत् शोभामेवं वा मण्डलं स्मृतम्॥"

इति तन्त्रसारे १ परिच्छेदः॥ ४॥

सर्व्वतोभद्रमण्डलस्य रूपं यथा।



नारागां शुभाशुभज्ञानार्थं चक्रविशेषः। यथा,
"अथातः संप्रवक्ष्यामि चक्रं वैलोक्यदीपनम्।
विख्यातं सर्व्वतोभद्रं सद्यः प्रत्ययकारकम्॥
ऊर्द्धगा दश विन्यस्य तिर्य्यग्रेखास्तथा दश।
एकाशीतिपदं चक्रं जायते नात्र संशयः॥
भकारादिस्वराः कोष्ठेष्वाद्यादौ विदिशि क्रमात्।
प्रदक्षिणक्रमाज्ज्ञेया ज्योतिःशास्त्रविशारदैः॥
क्षत्रिकादीनि विष्टानि पूर्व्वाशादि लिखेत्ततः।
सप्त सप्त क्रमेणैव अष्टाविंशति संख्यया॥
अ-य-क-ए ङाः पूर्व्वस्यां म-ट-प-र-ता परिति दक्षिणस्याम्।
ग-य-भ-ण-खा वारुण्यां भ-ग-ष-च ञा-छौ-त्तरस्यां स्युः॥
अयञ्चयो दृगाद्यास्तु पूर्व्वादिक्रमतो बुधैः।
राशयो द्वादश ख्याता मेषान्ता दक्षमार्गतः॥
शेषेषु कोष्ठकेष्वेवं नन्दादितिथिषट्कम्।
वारास्तां चक्रकं ज्ञेयं भौमार्कं नक्षत्रिक्रमात्॥
इत्थं सर्व्वतोभद्रप्रकारः कथितो मया।
यात्रासृष्टौ स्थितः खेटस्ततो वैधत्वं भवेत्॥
मध्यदृष्टिर्यमेनाथ यामदृष्टिश्च सुर्य्ये।
शुक्रं सौम्यं तथाक्रान्तं विद्धं क्रूरयुतेन च॥
शुभाशुभेषु कार्य्येषु वर्ज्जनीयं प्रयत्नतः।
चक्रमे दक्षिणा दृष्टिर्यामा दृष्टिश्च शैवगे॥
संयुतो मध्यचारे च ज्ञेया सौम्यादिषट्कके।
दृष्टयुक्ता यदा सौम्यास्तथा चार्के द्वितीयगे॥
समाक्षुसीयगे ज्ञेया मन्दा भानौ चतुर्थगे।
वक्रा स्युः पञ्चषेऽर्के स्तिवक्रा नगाष्टगे॥
नवमे दशमे भानौ जायते नष्टगा गतिः।
रादशैकादशे सूर्य्ये लभन्ते शीघ्रतां पुनः॥
दृष्टिस्तांशकविंशाधवे संख्याच कथ्यते।
न तु दाक्षत्वलग्नार्यात् द्वितीयादिनिरूपणम्॥
राहुकेतू सदा वक्रौ शीघ्रगौ चन्द्रभास्करौ।
गतेरेवमभावाद्यैर्दृष्टिश्चयं सदा॥
क्रूरा वक्रा महाक्रूराः सौम्या वक्रा महाशुभाः॥
स्युः सप्तकसमाख्यास्ते सौम्या क्रूराश्च शीघ्रगाः॥
ग-ट-द्वाः ख-ध-ष्टाश्चैव ध-क-छाश्च-भ-पा-स्तथा।
शनैश्चरं त्रिकं त्रिकं त्रिकं त्रिकैः क-ध-भ-दैः क्रमात्॥
ध-ट-द्वा रौद्रगे वैधे ध-ग-ष्टा अस्तगे गदे।
ध-ध-छाः पूर्व्वाषाढ़ायां ध-भ-पा भाद्रपदारे॥
रवौ शशौ सौम्यौ चैव कवौ सौम्यौ परस्परम्।
दृष्टेश्च हि वधं ज्ञेयं शुभाशुभफलादिषु।
अवशिष्टग्रहाश्चैव सौम्यैर्वाक्षत दृष्टयोगयाः।
शुभफलाधिक्ये क्रूरैर्वाक्षत दृष्टयोगयाः।"
अथ चन्द्रादिशुक्रान्तकैर्वेधादृष्टिभेदैर्यो;
शुभाशुभफलं तत्र।
"चन्द्रादित्यौ शुक्रान्तौ वैधाद्यदृष्टिभेदतो नरे।
अवश्यमेव कुरुते शुभाशुभफलं तथा॥
शुभाशुभेषु कार्य्येषु वैधं पूर्व्वैर्निषेवितम्।
वर्ज्जनीयं प्रयत्नेन कार्य्यसिद्धिकरैर्नरैः॥
चन्द्रे भमोऽम्बरे ज्ञानिः स्वरे याधिर्भयं तिथौ।
रामौ विद्धे महाविघ्नः पञ्चविद्धो न जीवति॥
एकवेधे भयं युद्धे युग्मवेधे धनक्षयः।
त्रिवेधे तु भवेन्मृत्युश्चतुर्वेधश्चतुष्टये॥"
दृष्टिवधे उदाहरणमाह।
"भरण्यकारद्वयभं नन्दा भद्रा तुलाश्च भम्।
विशाखां हरिभं विधेद्दृग्वद् आर्य्यवसंस्थितः॥"
उदाहरणान्तरमाह।
"वे युग्मसौम्यं कन्यां रेफं स्वातीसुकारकम्।
अश्विनीं रोहिणीस्थोऽभिजिद्भमेवं परेऽपि॥
यथा दृग्फलाः क्रूराश्चथा सौम्याः शुभप्रदाः।
क्रूरयुक्तः पुनः सौम्यो ज्ञेयः क्रूरफलप्रदः॥
अर्कवैधे मनस्तापो व्ययहानिश्च भूसुते।
रोगपीड़ाकरः सौरी राहुकेतू च विद्धदौ॥
चन्द्रे मित्रफलं पुंसां रतिलाभश्च भार्गवे।
बुधवैधे भवेत् प्रज्ञा जीवः सर्व्वशुभप्रदः॥
खत्रैवस्थे बलं पूर्णं प्रादीनं मित्रभे ग्रहे।
अर्द्धं समगृहे प्रोक्तं पादं शत्रुगृहे स्थिते॥
दृग्वद् सौम्यक्रूराणां बलं स्थानवशात् समम्।
रतदेव फलं विद्धि सौम्यैः क्रूरैर्विपर्य्ययात्॥
स्थानवैधसमायोगात् यत्सख्यं जायते बलम्।
तत्सख्यं वैध्यवस्तूनां फलं ज्ञेयं शुभाशुभम्॥
दृष्टिर्हीने पुनर्वैधे न स्यात् किञ्चित् शुभाशुभम्।
ग्रहाः सौम्यास्तथा क्रूरा वक्राः शीघ्रोपगोचराः॥
स्थानञ्च वैधमित्येवं बलं ज्ञात्वा फलं वदेत्।
वक्रगृहे फलं द्विगुणं नीचस्थेऽर्द्धफलो ग्रहः।
तिथिराश्यंशनक्षत्रं विद्धं क्रूरयुतेन यत्॥
सर्व्वेषु शुभकार्य्येषु वर्ज्जयेत्तत् प्रयत्नतः।
न नन्दति विवाहे च यात्रायां न निवर्त्तते॥
रोगान्न मुच्यते रोगी वैधवेलाफलोदयम्।
रोगकाले भवेद्वैद्यः क्रूरखेचरसम्भवः॥
वक्रगत्या भवेन्मृत्युः शीघ्रे आयव्ययान्वितः।
वैधस्थाने रवौ भङ्गो दुर्गे खनिः प्रजायते॥
कविप्रवेशनं तत्र योधाघातश्च तत्र वै।"
कश्चित्तौरयोक्ता।
"यत्र पूर्व्वादिकाष्ठायां दृग्राश्यादिगो रविः।
सा दिगस्तमिता ज्ञेया शेषास्तिस्रः सदोदिताः॥
ईशानस्थाः स्वराः प्राच्यां ज्ञेया याम्या-मधाग्निगाः।
नैर्ऋतस्थाश्च वारुण्यां वायव्यां सौम्यगा मताः।
नक्षत्राणि स्वरा वर्गा राशयस्त्रिषयो दिशः॥
ते सर्व्वेऽस्तमिता ज्ञेया यत्र भानुस्तिमांशिकः।
नक्षत्रैरुक्ता वर्गे ज्ञानिः शीकः स्वरेऽस्तगे।
राशौ विद्धस्त्रिधौ भीतिः पक्षात्ते मरणं भवेत्॥
यात्रा पुनः विवाहश्च द्वारं प्रासादकर्म्मणोः।
न कर्त्तव्यं शुभं नाम्नादक्षाशाभिमुखं नरैः॥
अक्षाशायां स्थितं यस्य नाम; प्रथमवर्णकम्।
न चार्कः सर्व्वकार्य्येषु ज्ञेयो दैवज्ञतो नरः॥
करौ कोष्ठे तथा कर्त्रे चतुष्कं नक्षत्रके।
अष्टाधिकां तथा धीधा मरीचिर्द्विगतं रवेः॥
दृग्वैश्वदृष्टिके पृथिवीं नामः स्वरे शुभम्।
राशौ जयस्त्रियौ तेजः पदाग्निः पञ्चकोदये॥
प्रश्नकाले भवेद्विद्धं यत्तत्क्रूरखेचरैः।
तदृक्षं शोभनं सौम्यैस्तैस्तैश्चफलं भवेत्॥
यद्दाविद्धन्तु यत्तत्र फलं लग्नस्वभावतः।
ज्ञातश्चमीक्षिते केन्द्रे भाषितं यत्तरादिकम्॥
शुक्रोदये सौम्यविलग्नवर्गे
लग्नेऽपि वा सौम्ययुते शुभं स्यात्।
अतोऽन्यथात्वे तु तदन्यथात्वं
मिश्रं विमिश्रैरधिकं बलाढ्यैः॥
केन्द्रोपगा नवमपञ्चमगाश्च सौम्याः
केन्द्राष्टवर्ज्जमशुभाश्चयषष्ठसंस्थाः।
सर्व्वार्थसाधनकराः परिपृच्छतां स्यु-
रेभिर्विपर्य्ययगतैस्तु विपर्य्ययः स्यात्॥
लग्नाधिनाथो यदि केन्द्रगः स्यात्
तन्मित्रमेतस्य च केन्द्रगं वा।
यथाष्टकेन्द्रागषडाय यापा
अन्यत्र याता यदि तद्भं स्यात्॥
यात्रो लग्नाधिपः कार्य्ये लग्ने कार्य्याधिपो यदि।
द्वितीयो लग्नपो लग्ने कार्य्ये कार्य्याधिपो यदि॥
लग्नपः कार्य्यपश्चापि लग्ने यदि तृतीयकः।
चतुर्थः कार्य्यपौ स्यातां यदि लग्नपकार्य्यपौ॥
कार्य्यसिद्धिस्तदा ज्ञेया मित्रक्षेदधिकं मतम्।
एवं दृष्टिवशाज्ज्ञेयं फलं तद्वत्तुष्टयम्॥
पूर्णनाड़ीस्थितो दूतो यत् पृच्छति शुभाशुभम्।
तत् सर्व्वं सिद्धिमाप्नोति शून्ये शून्यं समीरणे॥
आदौ शून्यगतः पृच्छेत्यचात् पूर्णो विशेद्यदि।
तदा सर्व्वार्थसिद्धिः स्यात् वामे वामं न संशय॥
श्वासप्रवेशकाले चेदूतो ऽक्ष्यति वाञ्छितम्।
तस्यार्थः सिद्धिमाप्नोति निर्गमे नास्ति सुन्दरम्॥
ऊर्द्धवामाग्रतो दूतो ज्ञेयो वामपथस्थितः।
पृष्ठे दक्षे तथाधस्ताद्दक्षवाहौ गतो मतः॥
याचादानविवादेषु वस्त्रालङ्कारभूषणे।
शुभे कर्म्मणि सर्व्वत्र प्रवेशे वामगः शुभः॥
कलहद्यूतयुद्धेषु क्षारभोजनमैथुने।
व्यवहारे भये भङ्गे दक्षनाड़ी प्रशस्यते॥
क्रूरैरुभयतो विद्धा यस्याश्चरतिथिस्मराः।
राशिर्धिष्ण्यश्च पक्षापि तस्य स्तुर्यं संशयः॥
मङ्गलं नगरं ग्रामो दुर्गं दैवालयं पुरम्।
क्रूरैरुभयतो वेधे विनश्यन्ति न संशयः॥
कृत्तिकायां तथा पुष्ये रेवत्याश्च पुनर्वसौ।
विद्धे सति क्रमाद्वेदो वर्णेषु ब्राह्मणादिषु॥
सौम्यं भार्गवं रवौ धान्यं मङ्गलादित्रितुष्टदाः।
भूमिं मन्दोवनौ याति यावत् क्रूरयुते स्थितम्॥
क्रूरवेधसमायोगे यस्योपग्रहसम्भवः।
तस्य स्तुर्यं सन्देहो रोगाद्याश्च रुजादयः॥
सूर्य्यभात् पञ्चमं विद्धं ज्ञेयं विद्युन्मुखाभिधम्।
भूम्याख्यमर्कं प्रोक्तं यद्विपातं चतुर्दशम्॥
केतुरुदादं प्रोक्तमुल्का स्याद्वैकविंशतिम्।
दाहाभिधानिकं कम्पं त्रयोविंशच्च वज्रकम्॥
निर्घातश्च चतुर्विंशमुक्ता सप्तोपसर्गकाः।
प्रश्नाने विदुषा प्रोक्ताः सर्व्वकार्य्येषु सर्व्वदा॥"
इति सर्व्वतोभद्रचक्रम्। इति ज्योतिस्तत्त्वम्॥७

सर्व्वतोभद्रचक्रस्य रूपं यथा ।

पूर्व्व

अ	इ	उ	ऋ	ऌ	ए	ऐ	ओ	औ
२	ट	ठ	ड	ढ	ण	त	थ	१०
१	ग	घ	ङ	वृषः	मिथुनः	कर्कटः	ङ	म
९०	च	मेषः	छो	नन्दा	ओ	सिंहः	ट	१२
९६	ट	गौः	रिक्ता	पूर्णा	भद्रा	कन्या	प	१६
२५	त	झषः	थः	जया	यं	तुला	र	१८
२४	ग	ऐ	मकरः	धनुः	वृश्चिकः	र	त	१५
२३	ग	रा	अ	भ	य	भ	ष	१६
९	२२		२१	२०	१८	१८	१०	६

पश्चिम

उत्तरे पूर्व्वे

सर्व्वतोभद्रः, पुं, (सर्व्वतो भद्रमस्येति ।) विष्णुः । इत्यमरः । १ । १ । ४२ । मृदङ्गविशेषः । इति मेदिनी । विष्णुरथः । इति शब्दरत्नावली । पैत्तः । इति शब्दचन्द्रिका । चित्रकायविशेषः । इति मेदिनी ।

सप्तसप्ततरं यथा ।

ध	ता	र	रा	ता	र	दा	ध
दा	ध	धा	ध	ध	धा	ध	दा
र	धा	ध	धा	धा	ध	धा	र
ता	र	दा	ध	र	धा	ध	ता

इति सर्व्वतोभद्रः । इति माघे । १८ । २० ।

अपरार्कः । "अथेति । पुनः कौतुके ।

'अथो अथे विधाने च मङ्गले प्रश्नकार्त्स्न्ययोः ।'

इति विश्वः ।

प्रकाशः सदृशः; शोभनादिः; काश्या काशनं-विकाशने । आशाः; सर्व्वतो व्याप्तः । निष्कान्तः कोशः; कोशो व्याप्तः सन्निधेयः; व्याप्तः विकासः केशो यस्य दुरोदरे; व्याप्तः । व्याप्तः व्याप्तः व्याप्तो वा सर्व्वतः । इति । शिखण्डिनी शब्दः या प्रकाशनः प्रकाशनिकः । सर्व्वतः । व्याकरणात् व्याकरणात् के व्याप्ता कैवर्त्तिनीव्याप्तो यस्य व्याप्तः सर्व्वतोभद्रः व्याप्तः । ये यत्र प्रकाशनाशयोः व्याप्तयोः व्याप्तिकाले व्याप्तः । व्याप्तः व्याप्तः व्याप्तः व्याप्तः व्याप्तः । सर्व्वतोभद्रः । व्याप्तः । व्याप्तः ।

"सर्व्वतोभद्रमेवं यः सर्व्वतः पूजयेद्बुधः ।
सर्व्वतोभद्रमाप्नोति सर्व्वतोभद्रदर्शनात् ॥"

सर्व्वतोभद्रः, क्ली, (सर्व्वतो भद्रं मङ्गलमस्य इति ।) गन्धारी । गटयोषित् । इति मेदिनी ।

सर्व्वतोमुखं, क्ली, (सर्व्वतो मुखमस्येति ।) अन्नम् । इत्यमरः । २ । १ । ४ । व्याकाशम् । इति मेदिनी । (समस्तोमुखविशिष्टे, त्रि । यथा, महाभारते । १ । २११ । १२ ।

"एवं सर्व्वान् समादिश्य पूर्व्वजोरे मनीषिणः ।
क्रूरां मतिं समास्थाय जगतुः सर्व्वतोमुखौ ।")

सर्व्वतोमुखः, पुं, (सर्व्वतः मुखमस्येति ।) शिवः । (यथा, महाभारते । १३ । १० । ६६ ।

"सर्व्वकामवरश्चैव सर्व्वदः सर्व्वतोमुखः ।")

सङ्घः । (यथा, कुमारे । २ । ७ ।

"अथ सर्व्वस्य धातारं ते सर्व्वं सर्व्वतोमुखम् ।
पाणीयं पाद्यमिर्घ्याभिः प्रतिपत्तीपतस्थिरे ।")

प्याला । इति मेदिनी । (विष्णुः । यथा महाभारते । १३ । १४८ । १०० ।

"जगन्नाथोऽव्ययभुः सर्व्वगः सर्व्वतोमुखः ।")

नाशकः । इति शब्दरत्नावली । सर्व्वः । इति शब्दमाला । व्याप्तः । यथा,—

"सर्व्वगः पाण्डिताद्यात्मा सर्व्वतोऽक्षिशिरोमुखः ।
विश्वरूपो महात्मा च प्रतीतः सर्व्वतोमुखः ।"

इति विष्णुसहस्रनामस्तोत्रम् ।

सर्व्वत्र, व्य, (सर्व्वस्मिन्निति । सर्व्व + "सप्तम्यास्त्रल् ।" ५ । ३ । १० । इति त्रल् ।) सर्व्वेष्वित्यर्थे । इति शब्दरत्नावली । (यथा, रघुः । ३ । १९ ।

"तूणीरं पीडयन्निष्कं कृतवा
सर्व्वत्र सूनृतं सूनृतिर्योगी ।")

सर्व्वदा, पुं (सर्व्वस्य शब्दस्य । दाता । "सर्व्वत्र दाने कर्म्मण्यजातौ ।" ३ । २ । ४ । इति कर्म्मणि घञ् ।) दाता । सर्व्व-दातरि, त्रि । इति शब्दरत्नावली । (यथा, रामायणम् । ६ । ६ ।

"यथाकाशस्थितो नित्यं वायुः सर्व्वत्रगो महान् ।
तथा सर्व्वाणि भूतानि मत्स्थानीत्युपधारय ॥")

सर्व्वत्रगामी, [न्] पुं, (सर्व्वत्र गच्छतीति । गम + णिनिः ।) वायुः । इति शब्दचन्द्रिका ॥ सर्व्वदिग्देशकाले गमनकर्त्तरि, त्रि ॥

सर्व्वथा, व्य, (सर्व्वैः प्रकारैः । सर्व्व + "प्रकारवचने थाल्" ५ । ३ । २३ । इति थाल् ।) सर्व्वप्रकारम् । इति व्याकरणम् ॥ (यथा, मनुः । २ । १५ ।

"उदिते ऽनुदिते चैव समयाधुषित तथा ।
सर्व्वथा वर्त्तते यज्ञ इतीयं वैदिकी श्रुतिः ॥")

प्रतिज्ञा । भयम् । हेतुः । इति शब्दरत्नावली ॥

सर्व्वदमनः, पुं, (सर्व्वान् दमयतीति । दम + ल्युः ।) भरतराजः । स तु शकुन्तलापुत्रः । इति विकाण्डशेषः ॥ (अस्य नामनिरुक्तिर्यथा, महाभारते । १ । ७४ । ५—७ ।

"षड्वर्षं एव बालः स कक्षाश्रमपदं प्रति ।
सिंहान् व्याघ्रान् वराहांश्च महिषांश्च गजांस्तथा ॥
बबन्ध वृक्षे बलवानाश्रमस्य समीपतः ।
आरोहन् दमयंश्चैव क्रीडंश्च परिधावति ॥
ततोऽस्य नाम चक्रुस्ते कक्षाश्रमनिवासिनः ।
यस्त्वयं सर्व्वदमनः सर्व्वान् हि दमयत्यसौ ॥
स सर्व्वदमनो नाम कुमारः समपद्यत ॥")

सर्व्वदमनकर्त्तरि, त्रि । इति व्याकरणम् ॥

सर्व्वदर्शी, [न्] पुं, (सर्व्वं पश्यतीति । दृश् + णिनिः ।) बुद्धः । इति शब्दरत्नावली ॥ सकलदर्शनकर्त्तरि, त्रि ॥ (यथा, रामायणे । २ । १०६ । ६ ।

"सर्व्वज्ञः सर्व्वदर्शी च बुद्धिमांश्चासि राघव ! ॥")

सर्व्वदा, व्य, (सर्व्व + "सर्व्वैकान्यकिंयत्तदः काले दा ।" ५ । ३ । १५ । इति दा ।) सर्व्वस्मिन् काले । इत्यमरः । ३ । ३ । २२ ॥ (यथा, नरसिंहपुराणे । १२ । ५६ ।

"त्वत्पादपद्मे देवेश भक्तिं मे देहि सर्व्वदा ।
यदि तुष्टो ममाश यमन्यदेकं वृणोष्यहम् ॥")

सर्व्वदुःखक्षयः, पुं, (सर्व्वेषां दुःखानां क्षयो यत्र ।) मोक्षः । इति हेमचन्द्रः ॥ सकलपीडानाशश्च ॥

सर्व्वदेवसदः, पुं, (सर्व्वेषां देवानां सदः यत्र ।) अब्धिः । इति षटाधरः ॥

सर्व्वद्रुह्, [ष्] त्रि, सर्व्वस्य द्रोहकः । सर्व्वानर्थकरि प्रत्ययं क्विप्प्रत्ययेन निष्पन्नः । इति व्याकरणम् ॥

सर्व्वधारी, [न्] पुं, (सर्व्वं धरतीति । धृ + णिनिः ।) कालचक्रस्य द्वाविंशयमेदः । इति केचित् ॥ (यथा, ज्योतिषतत्त्वे । ८ । २७ ।

"साध्ये युगे सर्व्वजिदाद्य उक्तः
संवत्सरोऽन्यः खलु सर्व्वधारी ।
तस्मात् विरोधी विजयः सारस्य ।
अन्यौ द्विसंयोऽथ भवाय शेषाः ॥")

सर्व्वधारके, त्रि ॥

सर्व्वधारणः, पुं, (सर्व्वां धात्रीं धरतीति । सर्व्वधुरा । षष्ठ्यूरिति । धृ + ल्युट् ।) बलभद्रः । इति शब्दरत्नावली ॥

सर्व्वधुरीणः, पुं, (सर्व्वधुरां वहतीति । "खः सर्व्वधुरात् ।" ४ । ४ । ७८ । इति खः ।) सकलभारवाहकः । रथलाङ्गलादीनां भारवाहकगवादिः । इत्यमरः ॥

सर्व्वधुरीयः, पुं, (सर्व्वधुरां वहतीति । "खः सर्व्वधुरात् ।" ४ । ४ । ७८ । इति खः ।) सकलभारवाहकः । रथलाङ्गलादीनां भारवाहकगवादिः । इत्यमरः । २ । ८ । ६६ ॥

सर्व्वन्दमः, पुं, (सर्व्वं दमयतीति । दम + अच् । द्वितीयाया अलुक् ।) भरतराजः । स तु शकुन्तलापुत्रः । इति हेमचन्द्रः ॥

सर्व्वपा, स्त्री, (सर्व्वं पातीति । पा + कः । टाप् ।) बलिराजपत्नी । इति केचित् ॥ सर्व्वरक्षणकर्त्तरि सर्व्वपालकर्त्तरि च त्रि ॥

सर्व्वपूर्णत्वं, क्ली, (सर्व्वैरंशैः पूर्णत्वम् ।) सम्भारः । इति विकाण्डशेषः ॥

सर्व्वप्रियः, त्रि, सर्व्वेषां जनानां प्रियः । सकललोकवल्लभः ॥ सर्व्वस्य शिवस्य प्रियः । सर्व्वः प्रियो यस्येति वा । शिवभक्तः ॥

सर्व्वभक्षा, स्त्री, (सर्व्वान् भक्षयतीति । भक्ष + अण् ।) छागी । इति हेमचन्द्रः ॥ सर्व्वभक्षणकर्त्तरि, त्रि ॥ (यथा, महाभारते । १ । ६ । १४ ।

"इति श्रुत्वा पुलोमाया भृगुः परममन्युमान् ।
सप्तार्चिमतिकुद्धः सर्व्वभक्षो भविष्यसि ॥")

सर्व्वमङ्गला, स्त्री, (सर्व्वाणि मङ्गलानि यस्याः ।) दुर्गा । इत्यमरः ॥ अस्या व्युत्पत्तिर्यथा,—

"मङ्गलं मोक्षवचनं चाप्यब्दो दाहवाचकः ।
सर्व्वान्मोक्षान् या ददाति सा एव सर्व्वमङ्गला ॥
हर्षे सम्पदि कल्याणे मङ्गलं परिकीर्त्तितम् ।
तान् ददाति च या देवी सा एव सर्व्वमङ्गला ॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ५४ अध्यायः ॥

अपि च ।

"सर्व्वमङ्गलशब्दश्च सम्पूर्णाक्षयवाचकः ।
आकारो दाहवचनस्तस्मात् सा सर्व्वमङ्गला ॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे सर्व्वमङ्गलास्तोत्रे २७ अध्यायः ॥ अन्यच ।

"सर्व्वाणि हृदयस्थानि मङ्गलानि शुभानि च ।
ददाति चेप्सितान् लोके तेन सा सर्व्वमङ्गला ॥"

इति देवीपुराणे ४५ अध्यायः ॥

सर्व्वमयः, त्रि, सर्व्वात्मकः । सर्व्वशब्दात् मयट्प्रत्ययेन निष्पन्नः ॥ (यथा, मार्कण्डेये ८८ । ३३ ।

"आप्यायन्ते च ते यज्ञास्त्वदाधारा हुताशन ।
अतः सर्व्वस्य योनित्वं वह्ने सर्व्वमयस्तथा ॥")

सर्व्वमूलं, क्ली, (सर्व्वस्य मूलम् ।) कमण्डलुः । इति विकाण्डशेषः ॥

सर्व्वमृत्यकः, पुं, (सर्व्वान् मृत्यून् हन्तीति । मृत्यु + ण्वुल् । पृषोदरादित्वात् साधुः ।) कालः । इति हेमचन्द्रः ॥

सर्व्वरसः, पुं, (सर्व्वो रसो यत्र ।) खरी । लवणम् । इति शब्दरत्नावली ॥ धूपकः । इत्यमरः ॥ वाद्यभाण्डम् । तन्त्रीवाद्यभेदः । इति मेदिनी ॥ सरव्यरसः । इति हेमचन्द्रः ॥ (मधुरादिरसः । यथा, भागवते । २ । १ । १ ।

"वाचां दुर्व्वर्णपूर्णं वेगं मुनीनां सृजन्ती मुहुः
सर्व्वरसविशिष्टे, त्रि । यथा, छान्दोग्योपनिषदि । ३ । १४ । २ ।

"सर्व्वकामः सर्व्वगन्धः सर्व्वरसः इति ॥")

सर्व्वरसोत्तमः, पुं, (सर्व्वरसेषु उत्तमः ।) लवणरसः । इति हेमचन्द्रः ॥

सर्व्वरात्रिः, पुं, (सर्व्वा रात्रिः । "अहःसर्व्वैकदेशसंख्यातपुण्याच्च रात्रेः ।" ५ । ४ । ८७ । इति अच् ।) समस्तरजनी । इति विहान्तकौमुदी ॥

सर्व्वरी, स्त्री, शर्व्वरी । रात्रिः । इति वक्ष्यमाणशब्ददर्शनात् ॥

सर्व्वरीकरः, पुं, (सर्व्वर्याः करः ।) चन्द्रः । इति धरणिः ॥

सर्व्वर्त्तुपरिवर्त्तः, पुं, (सर्व्वर्त्तूनां परिवर्त्तो यत्र ।) वत्सरः । इति षटाधरः ॥

सर्व्वर्त्तुफलं, क्ली, (सर्व्वर्त्तुजातं फलम् ।) सकलर्त्तुजातफलम् । यथा,—

"सर्व्वर्त्तुकुसुमाकीर्णं सर्व्वर्त्तुफलशोभितं ।
स्थिरच्छायद्रुमाकीर्णं सन्तानकवनोपमं ॥"

इति भविष्यपुराणे शिवरात्रिव्रतकथा ॥

सर्व्वरक्षणकवचं, क्ली, (सर्व्वरक्षणं सर्व्वरक्षाकरं कवचम् ।) कवचविशेषः । यथा,—

"शिवोः खड्गधरं चक्रतूर्णं ब्राह्मणपुङ्गवाः ।
दृष्ट्वा दत्त्वा शिवोर्गात्रे प्रणाट कवचं द्विजः ॥
वदामि तत्ते विप्रेन्द्र कवचं सर्व्वरक्षणम् ।
तद्दत्तं मायया पूर्व्वं ब्रह्मणे नाभिपङ्कजे ॥
निद्रिते जगतां नाथे जले च जलशायिनि ।
भीताय स्तुतिकर्त्रे च मधुकैटभयोर्भयात् ॥

श्रीभगवानुवाच ।

दूरीभूतं शृणु भयं भयं किन्ते मयि स्थिते ।
स्थितायां मयि च ब्रह्मन् सुखी तिष्ठ जगत्पते ॥
श्रीहरिः पातु ते वक्त्रं मस्तकं मधुसूदनः ।
श्रीकृष्णश्चक्षुषी पातु नासिकां राधिकापतिः ॥
कर्णयुग्मञ्च कण्ठञ्च कपालं पातु माधवः ।
कपोलं पातु गोविन्दः केशांश्च केशवः स्वयम् ॥
अधरौष्ठं हृषीकेशो दन्तपंक्तिं गदाग्रजः ।
रासेश्वरश्च रसनां तालुकं वामनो विभुः ॥
वक्षः पातु मुकुन्दस्ते जठरं पातु दैत्यहा ।
जनार्द्दनः पातु नाभिं पातु विष्णुश्च ते भुजम् ॥
नितम्बयुग्मं मुञ्जश्च पातु ते पुरुषोत्तमः ।
जानुयुग्मं जानकीशः पातु ते सर्व्वदा विभुः ॥
हृत्पद्मयुग्मं नृसिंहश्च पातु सर्व्वत्र सङ्कटे ।
पादयुग्मं वराहश्च पातु ते कमलोद्भव ॥
ऊर्द्धं नारायणः पातु अधस्तात् कमलापतिः ।
पातु पूर्व्वे च गोपालः पातु पश्चे दशास्यहा ॥
वनमाली पातु वायौ नैऋते खड्गधारकः ।
पातु ते सन्ततमधो वायव्यां विश्वरक्षकः ॥
उत्तरे च सदा पातु सोऽनन्तोऽनन्तकः स्वयम् ॥
ऐशान्यामीश्वरः पातु सर्व्वत्रं पातु शङ्करः ।
सदा सर्व्वे शरीरेषु निद्रायां पातु माधवः ॥

इत्येवं कथितं ब्रह्मन् । कवचं परमाद्भुतम् ।
कृष्णेन कृपया दत्तं स्मृतेनैव पुरा मया ॥
शुम्भेन सह संग्रामे निर्जिते घोरदारुणे ।
गगनस्थितो यः सख्यः प्राप्तिमात्रेण शक्तितः ॥
कवचस्य प्रसादेन धरण्यां पतितो मृतः ।
पूर्व्वं वर्षगतं खे च कृत्वा युद्धं भयावहम् ॥
मृते शुम्भे च गोविन्दः कृपालुर्गगने स्थितः ।
मालत्यै कवचं दत्त्वा गोलोकं स जगाम ह ॥
कल्पान्तरस्य वृत्तान्तं कृपया कथितं मुने ।
आभ्यां तव भयं नास्ति कवचस्य प्रभावतः ॥
कोटिघ्नः कोटिशो नष्टा मया दृष्टाश्च सर्व्वशः ।
अदृश्य हरिणा सार्द्धं कण्ठे कण्ठे स्थिरा सदा ॥
इत्युक्त्वा कवचं दत्त्वा सान्तर्द्धानं चकार ह ।
निःशङ्को नाभिकमले तस्थौ स कमलोद्भवः ॥८॥
सुवर्णगुटिकायान्तु कृत्वेदं कवचं परम् ।
कण्ठे वा दक्षिणे बाहौ बध्नीयात् यः सुधीः सदा ॥
विघ्नाग्निचलशत्रुभ्यो भयं तस्य न विद्यते ।
जले स्थले चान्तरीक्षे निद्रायां रक्षतीश्वरः ॥
संग्रामे जयमाप्नोति च विपत्तौ प्राणसङ्कटे ।
कवचस्मरणादेव सद्यो निःशङ्कतां व्रजेत् ॥
यद्वेदं कवचं कण्ठे शङ्करस्त्रिपुरं पुरा ।
जघान लीलामात्रेण दुरन्तमसुरेश्वरम् ॥
यद्वेदं कवचं काली रक्तबीजं चखाद सा ।
भक्षयन्तीषां धृत्वेदं विश्वं धत्ते तिलं यथा ॥
व्यासाय सनत्कुमारस्य धर्म्मः साक्षी च कर्म्मणाम् ।
कवचस्य प्रसादेन सर्व्वत्र जयिनो वयम् ॥
न्यस्य गन्धर्व्वराजो वः कण्ठे जगाम कवचं द्विजः ।
आत्मनः कवचं कण्ठे दधार च हरिः स्वयम् ॥
प्रभावं कथितं सर्व्वं कवचस्य हरेस्तथा ।
अनन्तस्याप्यनन्तस्य प्रभावमतुलं मुने ! ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १२ अध्यायः ॥

सर्व्वला, स्त्री, (सर्व्वं लातीति । ला + कः । टाप् ।) लोमशः । इत्यमरः । २ । ८ । ६३ ॥

सर्व्वलिङ्गी, [न्] पुं, (सर्व्वेषां वर्णाश्रमाणां लिङ्गं चिह्नमस्यास्तीति । इनिः ।) पाषण्डः । इत्यमरः । हे वेदविरुद्धाचारेषु सर्व्ववर्णचिह्नधारिषु बौद्धजैनकापालिकादिषु । पापं संवन्ति ददति पाषण्डाः मनीषादित्वात् साधुत्वं मूर्द्धन्यमध्योऽयम् । सर्व्वेषां वर्णाश्रमाणां किञ्चित् किञ्चित् लिङ्गमस्त्यस्येति । इन् । इति भरतः ॥ सकलचिह्नधारिणि, त्रि ॥

सर्व्वला, स्त्री, (सर्व्वं लातीति । ला + कः । गौरादित्वात् ङीष् ।) लोमशः । इति शब्दरत्नावली ॥

सर्व्वलोहः, पुं, (सर्व्वो लोहो यस्य ।) लोहमयबाणः । यथा,—
"अथैनयोः सर्व्वलोहौ नाराचौ रणमस्य सः ।"
इति हेमचन्द्रः ॥
सर्व्वलोहमयबाणे ॥

सर्व्वलोहिका, स्त्री, (सर्व्वं सर्व्वलोहीति । सर्व्व + लुच् । टाप् अत इत्वम् ।) गजकारीषकः । इति शब्दरत्नावली ॥

सर्व्ववल्लभा, स्त्री, (सर्व्वेषां वल्लभा ।) असती नारी । इति धरणिः । इति केचित् ॥ सकलप्रिये, त्रि ॥

सर्व्ववित्, पुं, (सर्व्वं वेत्तीति । विद् + क्विप् ।) परमेश्वरः । यथा,—
"यः सर्व्वज्ञः सर्व्ववित्त्व यस्य ज्ञानमयं तपः ।
तस्मादेतत् ब्रह्मनाम रूपमन्नञ्च जायते ॥"
इति मुण्डकोपनिषत् । १ । १ । ९ ॥
सर्व्वज्ञे, त्रि ।)

सर्व्ववेदः, पुं, (सर्व्ववेदानधीते इति । "क्रतूक्थादिसूत्रान्तात् ठक् ।" ४ । २ । ६० । इति ठक् । "सर्व्वादेः सादेश्च लुगवक्तव्यः ।" इति लुक् ।) सर्व्ववेदाध्येता ब्राह्मणः । इति केचित् ॥ सर्व्वज्ञे, त्रि, ॥

सर्व्ववेदाः, [स्] पुं. (सर्व्वं धनं वेदयति निवेदयति ऋत्विग्भ्य इति । विद् + णिच् + असुन् ।) सर्व्वस्वदक्षिणयागो देनेष्टः सः । इत्यमरः ॥ सर्व्वस्वं दक्षिणा यत्र स सर्व्वस्वदक्षिणोऽश्वमेधनामयागः स येनेष्टः सम्पादितः स सर्व्ववेदा उच्यते । सर्व्वं स्वं वेदयति लभयति ऋत्विजे इति सर्व्ववेदाः विद् ल लाभे आत्मनात् चासुसिति असुः । इति भरतः ॥

सर्व्ववेषी, [न्] पुं, (सर्व्वेषां वेषोऽस्यास्तीति । इनिः ।) नटः । इति हेमचन्द्रः ॥ सकलवेषधारिणि, त्रि ॥

सर्व्वशान्तिकृत्, पुं, (सर्व्वशान्तिं करोतीति । कृ + क्विप् ।) भरतराजः । स तु शकुन्तलापुत्रः । इति शब्दरत्नावली ॥ सकलशमकारके, त्रि ॥

सर्व्वसङ्गतः, पुं, (सर्व्वं सङ्गतमस्येति ।) यष्टिकाधान्यम् । इति शब्दचन्द्रिका ॥ सकलसङ्गतियुक्ते, त्रि ॥

सर्व्वसंसर्गलवणं, क्ली, (सर्व्वसंसर्गेण जातं लवणम् ।) औषरकम् । इति राजनिर्घण्टः ॥

सर्व्वसन्नहनार्थकः, पुं, (सर्व्वेषां सन्नहनस्य अर्थो यत्र ।) चतुरङ्गसैन्यसन्नाहः । तत्पर्य्यायः । सर्व्वाभिसारः २ सर्व्वौघः ३ । इत्यमरः ॥ सर्व्वसन्नहनं अर्थोऽभिधेयमस्य । सर्व्वैरभिसियतेऽभिसरं गम्यतेऽनेन सर्व्वाभिसारः करणे घञ् । सर्व्वेषां ओघो वृन्दमत्र सर्व्वौघः । इति भरतः ॥

सर्व्वसन्नाहः, पुं, (सर्व्वेषां सन्नाहो यत्र ।) सर्व्वात्मा । इति धनञ्जयः ॥ सर्व्वसन्नहनश्च ॥

सर्व्वसहः, पुं, (सर्व्वं सहते इति । सह + क्विप् ।) गुग्गुलुः । इति रत्नमाला ॥ सकलसहिष्णौ, त्रि । (यथा, भागवते । ८ । ५ । ६ ।
"स वै जगत्त्राणखलप्रहाणये
निरूपितः सर्व्वसहो महात्मना ॥")

सर्व्वसिद्धिः, पुं, (सर्व्वेषां सिद्धिरस्मात् ।) श्रीफलः । इति शब्दचन्द्रिका ॥ सकलसाधनश्च ॥

सर्व्वस्वं, क्ली, (सर्व्वं स्वम् ।) समुदायधनम् । यथा,
"गुरवे दक्षिणां दद्यात् प्रत्यब्दाय शिवाग्नये ।
सर्व्वस्वं वा तदर्द्धं वा तदर्द्धं वा महाशया ॥"
इति तन्त्रसारः ॥

सर्व्वस्त्री, [न्] पुं, वर्णसङ्करविशेषः । स तु गोपकन्यायां नापिताज्जातः । इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे १० अध्यायः ॥ (सकलधनविशिष्टे, त्रि ॥

सर्व्वहितं, क्ली, (सर्व्वस्मिन् हितम् ।) मरिचम् । इति राजनिर्घण्टः ॥ सकलहितकारके, त्रि ॥

सर्व्वाङ्गं, क्ली, (सर्व्वं अङ्गम् ।) सकलावयवः । यथा,—
"पादौ रक्षतु मे केतुः सर्व्वाङ्गं मे नवग्रहाः ।
आपादमस्तकञ्चैव सर्व्वविघ्नविनाशकाः ॥"
इति उन्मीलातन्त्रे नवग्रहकवचम् ॥
(पुं, महादेवः । इति महाभारतम् । १३ । १७ । ३१ ॥)

सर्व्वाङ्गसुन्दररसः, पुं, (सर्व्वस्मिन् अङ्गे सुन्दरः । स एव रसः ।) औषधविशेषः । यथा,—
"रसगन्धकतुल्यांशौ द्वौ भागौ टङ्कणस्य च ।
मौक्तिकं विद्रुमं शङ्खमवनीय समांशतः ॥
हेमभस्मार्द्धभागञ्च सर्व्वं खल्वे निधापयेत् ।
निम्बुद्रवस्य योगेन गुटिकां कारयेद्भिषक् ॥
पश्चात् गजपुटे दद्यात् शीतलञ्च समुद्धरेत् ।
हेमभस्मसमं तीक्ष्णं तीक्ष्णार्द्धं दरदो मतः ॥
एकीकृत्य समस्तानि सूक्ष्मचूर्णानि कारयेत् ।
ततः पूजां प्रकुर्व्वीत भक्षयेत् दिवसे शुभे ॥
सर्व्वाङ्गसुन्दरो ह्येष रोगराजनिकृन्तनः ।
वातपित्तज्वरे घोरे सन्निपाते सुदारुणे ॥
अर्शस्सु ग्रहणीरोगे मेहे गुल्मे भगन्दरे ।
निहन्ति वातजान्रोगान् श्लैष्मिकांश्च विशेषतः ॥
पिप्पलीमधुसंयुक्तं एतदुत्तममथापि वा ।
भक्षयेत् पर्णखण्डेन सितया चार्द्रकेण वा ॥
गुडूचीसत्त्वसहितं प्रमेहे च विशेषतः ।
रसरत्नाकरप्रोक्तः सिद्धयोगो रसोत्तमः ।
राजिकाद्विगुंजैलाञ्च लवणार्द्धं विवर्द्धयेत् ॥"
सर्व्वाङ्गसुन्दररसः । इति भैषज्यरत्नावली ॥
(यथा च ।
"रसगन्धकयोः कर्षं शाल्मलेकं सुशोधितम् ।
ततः कज्जलिकां कृत्वा गुडपाकेन साधयेत् ॥
जातीफलं तथा कोषं शवङ्गारिष्टपत्रके ।
सिन्धुपारदलवेव एलाबीजं तथैव च ॥
एषाञ्च कर्षमात्रेण तोयेनाथ विमर्द्दयेत् ।
सुक्तामर्द्धं पुनः स्थाप्यं पुटपाकेन साधयेत् ॥
घनपङ्के वह्निलिप्ता पुटमध्ये निधापयेत् ।
गुञ्जार्द्धकप्रमाणेन प्रत्यहं भक्षयेन्नरः ॥
एतत् प्रोक्तं कुमाराणां रक्षणाय महौषधम् ।
ज्वरघ्नं दीपनञ्चैव बलवर्णप्रसाधनम् ॥
दुर्द्धरं ग्रहणीरोगं जयत्येव प्रवाहिकाम् ।
सूतिकाञ्च जयेदेतन्नक्तार्शो रक्तसम्भवम् ॥
पिशाचा दानवा दैत्या बालानां विघ्नकारकाः ।
यद्यौषधवरस्निग्धे तत्र भीमां न यान्ति ते ॥
बालानां ग्रहयुक्तानां स्त्रीणामेव विशेषतः ।
महागन्धकमेतद्धि सर्व्वव्याधिनिसूदनम् ॥
विना प्राकेन सर्व्वाङ्गसुन्दरोऽयं प्रकीर्त्तितः ॥"
इति वैद्यकरत्नसारसंग्रहे ज्वरातिसाराधिकारे ॥

सर्व्वाङ्गीणः, त्रि, (सर्व्वाङ्गं व्याप्नोतीति। "तत्-सर्व्वादेः पथ्यङ्गकर्म्मणपात्रं व्याप्नोति।" ५। २। ७। इति खः।) सर्व्वावयवसम्बन्धयुक्तः। सर्व्वावयवव्याप्तः। यथा, भट्टौ। ४। १०।
"वसानस्तन्वकानिमे सर्व्वाङ्गीणे तरत्वचौ।
काश्मीरः खाड्गिकः प्राङ्गीं रचनं विभ्रांस्तु-चवान्॥"

सर्व्वाणी, स्त्री, (सर्व्वस्य पत्नी। सर्व्व+"इन्द्रवरुण-भवशर्व्वेति।" ४। १। ४६। इति ङीष्। व्याकुगागमश्च।) दुर्गा। इत्यमरः। १। १। ३६॥ अस्या व्युत्पत्तिर्यथा, ब्रह्मवैवर्त्ते प्रकृतिखण्डे ५४ अध्याये।
"सर्व्वान्मोक्षं प्रापयति जन्ममृत्युजरादिकम्।
चराचरांश्च विज्ञानात् सर्व्वाणी तेन कीर्त्तिता॥"

सर्व्वानुकारिणी, स्त्री, (सर्व्वमनुकरोतीति। कृ+णिनिः। ङीष्।) शालपर्णी। इति राजनिर्घण्टः॥

सर्व्वानुभूतिः, स्त्री, (सर्व्वेषामनुभूतिर्यत्र।) श्वेत-चिरटता। इत्यमरः। २। ४। १०८॥ (अस्याः पर्य्यायो यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमभागे।
"श्वेता चिरटिका भण्डी स्याच्चिरटता त्रिपुटापि च।
सर्व्वानुभूतिः सरला निर्गुण्डी रेचनीति च॥")
चतुर्व्विंशतिभूतार्द्धदन्तर्गतार्द्धेन्द्रः। चतुर्व्विंशति-भाग्यर्द्धदन्तर्गतार्द्धेन्द्रश्च। इति हेमचन्द्रः॥

सर्व्वान्नभक्षकः, त्रि, (भक्षयतीति। भक्ष+ण्वुल्। सर्व्वेषामन्नं सर्व्वान्नम्। तस्य भक्षकः।) सकलान्नभोजी। तत्पर्य्यायः। उदरंपिम्भाचः २ सर्व्वान्नीनः ३। इति हेमचन्द्रः॥

सर्व्वान्नभोजी, [न्] त्रि, सर्व्वेषां चतुर्णां वर्णानामेवान्नं भुङ्क्ते सर्व्वान्नभोजी। इति भरतः॥ (भुज+णिनिः।) सर्व्वेषामन्नभक्षकः। इत्यमरः। ३। १। २२॥ सर्व्वप्रकारान्नभक्षकः। इति केचित्॥

सर्व्वान्नीनः, त्रि, (सर्व्वान्नानि भक्षयतीति। सर्व्वान्न+"अनुपदसर्व्वान्नायानयमिति।" ५। २। ६। इति खः।) सर्व्वान्नभोजी। इत्यमरः॥

सर्व्वाभिसन्धी, [न्] पुं, (सर्व्वस्मिन् विषये अभि-सन्धास्यस्येति। इनिः।) वैड़ालव्रतिकः। छद्मसाधुः। इति त्रिकाण्डशेषः॥ सकलाभि-सन्धानविशिष्टे, त्रि॥

सर्व्वाभिसारः, पुं, (सर्व्वेषामभिसारो यत्र।) चतुरङ्गसैन्यसन्नाहः। इत्यमरः। २। ८। ६४॥ अस्य पर्य्यायः सर्व्वसन्नहनशब्दे द्रष्टव्यः॥

सर्व्वार्थसाधिका, स्त्री, (सर्व्वान् अर्थान् साधय-तीति। साधि+ण्वुल्। टापि अत इत्वम्।) दुर्गा। यथा, मार्कण्डेये देवीमाहात्म्ये।
"सर्व्वमङ्गलमङ्गल्ये शिवे सर्व्वार्थसाधिके।
शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तु ते॥"
सकलप्रयोजनसाधके, त्रि॥

सर्व्वार्थानुसाधिनी, स्त्री, (सर्व्वानर्थानुसाधय-तीति। अनु+साधि+णिनिः। ङीप्।) दुर्गा। यथा, देवीपुराणे ४५ अध्याये।
"धर्म्मादीन् चिन्तितान् यस्मात् सर्व्वलोकेषु यच्छति।
ततो देवी समाख्याता सा सर्व्वार्थानुसाधिनी॥"

सर्व्वार्थसिद्धः, पुं, (सर्व्वेषु अर्थेषु सिद्धः।) बुधः। इत्यमरः। १। १। २१५॥ सकलप्रयोजनसिद्धि-युक्ते, त्रि॥

सर्व्वावसरः, पुं, (सर्व्वेषामवसरो यत्र।) अर्द्ध-राचः। इति त्रिकाण्डशेषः॥

सर्व्वाक्षा, स्त्री, (सर्व्वाणि अक्षाणि यस्याः।) षोड़शविद्यादेवान्तर्गतदेवीविशेषः। इति हेम-चन्द्रः॥ सकलाक्षयुक्ता च॥

सर्व्वाक्षः, पुं, (सर्व्वमहः। "राजाहःसखिभ्यष्टच्।" ५। ४। ९१। इति टच्। "अक्षोह्न एतेभ्यः।" ५। ४। ८८। इति अच्समासान्तः। गत्वञ्च।) धर्म्म-दिनम्। इति व्याकरणम्॥

सर्व्वौयः, त्रि, (सर्व्वस्मै हितः। सर्व्व+"सर्व्वाद्यस्य वा वचनम्।" ५। १। १०। इत्यस्य वार्त्ति-कोक्त्या पक्षे छः।) सर्व्वसम्बन्धी। सर्व्वशब्दात् णीयप्रत्ययेन निष्पन्नः। इति व्याकरणम्॥

सर्व्वेश्वरः, पुं, (सर्व्वेषामीश्वरः।) शिवः। इति केचित्॥ सार्व्वभौमश्च। (निखिलप्रभौ, त्रि। यथा, भागवते। ६। ६। ३३।
"केवलजगदाधार लोकैकनाथ सर्व्वेश्वर जगन्नी-नाथ इति॥")

सर्व्वौघः, पुं, (सर्व्वेषामोघो यत्र।) चतुरङ्गसैन्य-सन्नाहः। इत्यमरः॥ गुरुवेगः। इति मेदिनी॥

सर्व्वौषधिः, पुं, (सर्व्वा ओषधयो यत्र।) औषधि-वर्गविशेषः। यथा,—
"कुष्ठमांसीहरिद्राभिर्वचाशैलेयचन्दनैः।
सुराचन्दनकर्पूरैः सुप्तः सर्व्वौषधिः स्मृतः॥"
अत्र द्वितीयचन्दनपदं रक्तचन्दनपरम्॥ इति राजनिर्घण्टः॥ (क्वचित् स्त्रीलिङ्गेऽपि दृश्यते॥)

सर्व्वौषधिगणः, पुं, (सर्व्वौषधीनां गणः।) सुरादौ-षधिसमूहः। यथा,—
"सुरा मांसी वचा कुष्ठं शैलेयं रजनीद्वयम्।
शटी चम्पकमुस्तञ्च सर्व्वौषधिगणः स्मृतः॥"
इति शब्दचन्द्रिका॥

अन्यच्च।
"हरिद्रा चन्दनं दार्व्वी मुस्तकं देवताड़कम्।
धान्याकं जीरकं मेथी धात्रीफलसुधीरकम्॥
चित्रगन्धिः शटी गन्धमार्द्री कर्पूरकं वचा।
नखी मरुवकं कुष्ठं देवदारु विड़ङ्गकम्॥
सरलं पद्मकाष्ठञ्च वालकं भद्रमुस्तकम्।
ग्रन्थिकञ्च जटामांसी प्रलाशः शैलजं शमी॥
अर्कवीरकरकं दूर्व्वा सुरा मांसी च कुङ्कुमम्।
अपामार्गो मधुरिका विकासा खदिरः कृष्णा॥
चातुर्जातकमुस्तोशीरवर्गो यज्ञडुम्बरः।
गागेश्वरञ्च कस्तूरी त्रिफला पद्मकेशरम्॥
कङ्कोलं वातकीपुष्पं त्रिकटु रेणुकं यवः।
तिलाः कुङ्कुरु लवुकं भार्गी गोरोचना वकः॥
शुण्ठी पुष्पञ्च नखुनी श्रीफलं वंशलोचना।
इन्दीवरं बहुसुता बकुलं मालतीदलम्॥
इन्द्रवीजं लोकनदं जयन्ती गवाक्षिपल्ली।
श्वेतापराजितापुष्पं सर्व्वौषधिगणः स्मृतः॥"
इति पाद्मोत्तरखण्डे १०७ अध्यायः॥

सर्षपः, पुं, (सरतीति। सृ गतौ+"सर्त्तेरपः युक्च।" उणा० ३। १४१। इति अपः युगा-गमश्च।) शस्यविशेषः। सरिषा इति भाषा॥ तत्पर्य्यायः। तन्तुभः २ कदम्बकः ३। इत्यमरः। २। ९। ७०॥ सरिषपः ४। इति भरतः॥ तन्तुकः ५। इति रभसनाथः॥ कटुस्नेहः ६। इति जटाधरः॥ भूर्षपः ७। इति शब्दरत्नावली॥ राजचवकः ८। इति राजनिर्घण्टः॥ (यथा, छान्दोग्योपनिषदि। ३। १४। ३।
"एष म आत्मान्तर्हृदयेऽणीयान् व्रीहेर्वा यवाद्वा सर्षपाद्वा श्यामाकाद्वा इति॥") अस्य गुणाः। कफवातघ्नत्वम्। तीक्ष्णत्वम्। उष्णत्वम्। रक्तपित्तकारित्वम्। कटुत्वम्। क्रिमिकुष्ठनाशित्वञ्च। सिद्धार्थस्यापि तद्गुणः। इति राजवल्लभः॥ * ॥ अमरश्च।
"आसुरी राजिका राज्ञी रक्तिका रक्तसर्षपः।
तीक्ष्णगन्धा मधुरिका चवकः चतकः चवः॥
आसुरी कटुतिक्तोष्णा वातश्लीहार्शःशूलनुत्।
दाहपित्तप्रदा हन्ति कफगुल्मकृमिव्रणान्॥*॥
सर्षपो राजचवकः क्षुण्णा तीक्ष्णफला राजिका।
राज्ञी सा क्षुण्णा सर्षपाख्या विज्ञेया राजसर्ष-पाख्या च॥
राजसर्षपकस्तिक्तः कटूष्णो वातशूलनुत्।
पित्तदाहप्रदो गुल्मकण्डूकुष्ठव्रणापहः॥"
इति कालेयसरिषपः॥ * ॥
"सर्षपस्त्वनघो गौरः सिद्धार्थो भूतनाशनः।
कटुस्नेहो ग्रहघ्नश्च कण्डूनी राजिकाफलः॥
तीक्ष्णकश्च दुराधर्षो रुचोग्नः कुष्ठनाशनः।
सिद्धप्रयोजनः सिद्धः साधनः सिद्धसर्षपः॥
सिद्धार्थः कटुकोष्णश्च वातरक्तग्रहापहः।
त्वग्दोषशमनो रुच्यो विषभूतव्रणापहः॥"
इति सर्षपः॥ * ॥

तत्तैलगुणाः।
"सर्षपतैलं तिक्तं कटुकं वातकफविकारघ्नम्।
पित्तासृग्दोषदं कृमिकुष्ठघ्नं तिलजवच्चक्षुष्यम्॥"
तत्पत्रशाकगुणाः।
"सार्षपं पत्रमल्पाग्नं रक्तपित्तप्रकोपणम्।
विदाहि कटुकं स्वादु शुक्रकृत् रुचिदायकम्॥"
इति राजनिर्घण्टः॥ * ॥

अन्यच्च।
"सर्षपः कटुकस्नेहस्तण्डुलीयः कदम्बकः।
गौरस्तु सर्षपः प्राज्ञैः सिद्धार्थ इति कथ्यते॥
सर्षपस्तु रसे पाके कटुर्हृद्यः सतिक्तकः।
तीक्ष्णोष्णः कफवातघ्नो रक्तपित्तामिवर्द्धनः॥
रुचोग्नरो जयेत् कण्डूकुष्ठकोठक्रिमिव्रणान्।
यथा रक्तक्षमा गौरः किन्तु गौरो वरो मतः॥"

अथ राइ। क्षुण्णा राइ।
"राज्ञी तु राजिका तीक्ष्णगन्धा क्षुण्णनिका सुरी।
चवः क्षुताभिजनकः क्रिमिकः कणसर्षपः॥
राजिका कफवातघ्नी तीक्ष्णोष्णा रक्तपित्तकृत्।

सखीलः

"ॐ तोय त्वं प्राणिनां प्रायः स्वेदरात्मसु
निर्मितम्।
शुद्धेच कार्यं प्रोक्तं दयाया देहिनां तथा।
यातस्तं दर्शयात्मानं शुभाशुभपरीक्षये॥"
इति मन्त्रेण॥

शोधयन्तु ॐ सत्येन मामिरक्ष वरुणेत्यनेन जलमभिमन्त्र्य गृहीतस्यूणस्य शोधनाभिमार्जोदकावस्थितस्य बलीवर्दः प्राङ्मुखस्य पुरुषस्य समीपं जलमध्ये गच्छेत्। ततः शरेषु त्रिषु सुत्तेषु मध्यमशरपतनस्थाने मध्यमशरं गृहीत्वा पश्चिमैकस्मिन् पुरुषे स्थिते अन्यस्मिंश्च तोरणस्थले स्थिते प्राङ्विवाकेन तालत्रये दत्ते शोधो गृहीतस्यूणप्राङ्मुखपुरुषस्योक्ष गृहीत्वा निमज्यति। ततस्तमकालमेव तोरणस्थलस्योऽपि मध्यमशरस्थानं दूतं गच्छति। ततः शरस्थाद्दी च तस्मिन् प्राप्ते दूतं तोरणस्थलं प्राप्य जलान्तःस्थं यदि न पश्यति तदा शुद्धः। कथंचिदङ्गं विना शिरोमात्रदर्शनेऽपि शुद्धः मज्जनस्थानादन्यत्र गमनेऽप्यशुद्धः। दक्षिणादिकं दद्यात्। इति दिव्यतत्त्वम्॥

सलिलकुन्तलः, पुं, (सलिलस्य कुन्तल इव।) ग्रैवेयः। इति त्रिकाण्डशेषः॥

सलिलजं, क्ली, (सलिले जायते इति। जन+डः।) पद्मम्। इति राजनिर्घण्टः॥ जलजाते, त्रि॥ (यथा, महाभारते। ७। १२५। २१।
"रथ शक्तिप्रवीरेण भ्रातः सलिलजो भ्रमम्।
पृथिवीषान्तरीक्षेच निगाद्यति गरुडराट्॥")

सलिलाग्रयः, पुं, (सलिलानामाग्रयः।) जलाग्रयः। तस्य वैद्यके दोषो यथा,—
गर्ग उवाच।
"नगरादपसर्पन्ति समीपमुपयान्ति च।
नद्यो हृदाः प्रस्रवणाः विरसाश्च भवन्ति ते।
विवर्णं कलुषं तप्तं फेनवच्चलसङ्कुलम्।
क्षीरं क्षेद्यं सुरां रक्तं वहन्ते चाकुलोदकाः॥
तस्त्राणाभ्यन्तरे तत्र परपक्षभयं भवेत्।
जलाग्रया गदन्ते वा प्रच्यवन्ति कथञ्चन॥
विसृजन्ति तथा क्षत्रं ज्वालाधूमरजांसि च।
ज्वलते वा जलोत्पत्तिः उच्चला वा जलाग्रयाः॥
संगीतशब्दा हसन्ती जले मारभयं वदेत्।
दिव्यमन्त्रौषधं धर्मैर्मधुना त्वक्षेचनम्।
अनया दासया मन्त्रात्तेच दोषो जले भवेत्॥
मन्त्राण्ययुक्तं परमात्ममत्र
देयं द्विजानां द्विजभोजनार्थम्।
गावश्च देयाः सितवस्त्रयुक्ता-
श्चोदकुम्भाः सलिलाग्रयान्ते॥"
इति माल्ये २०८ अध्यायः॥

सलिलेश्वरः, पुं, (सलिलं ईश्वरं यस्य।) वारुणम्। इति त्रिकाण्डशेषः॥

सलीलः, त्रि, (लीलया सह वर्त्तमानः।) लीलाविशिष्टः। यथा,—
"सरङ्गसङ्गसरले विचित्रवलनिर्मिते
कनकितानभूषिते सलीलविभ्रमाश्रयम्।
सुराङ्गनाभवल्लरीकरप्रपञ्चचामर-
स्फुरत्समीरवीजितं सदाच्युतं भजामि तम्॥"
इति छन्दोमञ्जरी॥

सल्लकी, स्त्री, (सल्लति लक्ष्यते खाद्यते गजैरिति। सल्+लक+कृन्। गौरादित्वात् ङीष्।) खनामख्यातवृक्षः। तत्पर्य्यायः। गजभक्ष्या २ सुवहा ३ सुरभी ४ रसा ५ महेरणा ६ कुञ्जरकी ७ ह्रादिनी ८। इत्यमरः।२।४।१२४॥ गजभक्षा ९ सुरभिः १० सुरभीरसा ११ महेरणा १२ शल्लकी १३ शिल्लकी १४ शिल्लकी १५ ह्रादिनी १६। इति तट्टीका॥ शल्यते शाध्यते गजैः शल्लकी। शल क ङ शाधे चुरादिः णेरभावपक्षे नान्नीति लक्ष्म। स्वार्थिकदृष्टमेदौ शल्लक्यौ शल्का चासचिन्तकयोरिति तालव्यादौ रभसः। सलति गच्छति शल्लगतौ दन्त्यादिः णकः भौवादिः निपातनात् लस्य द्वित्वम्। सल्लत्य लक्ष्यते खाद्यते गजैरिति वा सल्लकी दन्त्यादिरित्यन्ये। शिल्लकी चेत्येके। देशीप्रायेयम्। सल्लकी शिल्लकी च्छेति रुद्रः। इति स्वामी। इत्यमरटीकायां भरतः॥

संव(ब)रं, क्ली, (संव्रियते इति। सं+वृ+अप्।) संयमः। इति त्रिकाण्डशेषः॥ वौद्धव्रतविशेषः। इति मेदिनी॥ जलम्। इत्यमरः। १।१०।४॥
"सम्वति सम्वरम्। सम्व सर्वणे पूर्व्वेण अर सम्वरं दन्त्यादि। शम्व गतावित्यस्मादरे तालव्यादि च।
'क्लीवन्तु सम्वरं नीरवौद्धव्रतविशेषयोः।
विप्रेषे पुंसि दैत्यस्य मत्स्यस्य हरिणस्य च॥'
इति दन्त्यादौ रभसः॥
'शम्बरो हरिणे दैत्ये मत्स्ये च सलिले स्मृतः॥'
इति तालव्यादावजयः।" इति भरतः॥

संव(म्ब)रः, पुं, (संवृणोति आवृणोति जलमिति। सं+वृ+अप्।) सेतुः। यथा। सेतौ पल्वलिसंवराः। इति हेमचन्द्रः॥ दैत्यविशेषः। हरिणविशेषः। मत्स्यविशेषः। शैलविशेषः। जिनविशेषः। इति मेदिनी॥ स तु भाषायां। इति हेमचन्द्रः॥

संवरणं, क्ली, (सं+वृ+ल्युट्।)-आवरणम्। (यथा, महाभारते। १। १४१। ७१।
"मन्तसंवरणे यत्नः सदा कार्य्योऽनसूयता॥")
इन्द्रियसंयमः। इति संवरादिशब्दटीकायां भरतः॥ (प्राकारः। यथा, रामायणे। २। ८८। २४।
"शून्यसंवरणद्वारां शून्यसंवरणां पुरीम्।
अनाहतपुरद्वारां राक्षसानीमरक्षिताम्॥"
"शून्यसंवरणद्वारां संवरणानां प्राकाराणामाच्छन्नात् रक्षया शून्याम्।" इति तट्टीका॥)
पुं, अजमीढपुत्रः। स च कुरोः पिता। इति महाभारतम्। १। ९५। ३०॥)

संवरारिः, पुं, (संवरस्य अरिः।) कामदेवः। इत्यमरः।१।१।२९॥ "संवरस्य दैत्यविशेषस्य अरिः। 'क्लीवन्तु संवरं नीरवौद्धव्रतविशेषयोः।

संवरा:

विप्रेषे पुंसि दैत्यस्य मत्स्यस्य हरिणस्य च॥'
इति दन्त्यादौ रभसः। संवरणं संवरः भावेऽल्। इन्द्रियसंयमः संवरस्तस्यारिरिति वा। तदुक्तं साहित्यकल्पतरुणा। रुद्रस्य समरारित्व पुष्पवतीनां कुसुमधन्वेति। तदयं संवरारिरिह तालव्यादिरन्त्यादिश्च॥" इति भरतः॥

संवरी, स्त्री, शतावरी। इति शब्दचन्द्रिका॥ नवविकपर्णी। इत्यमरः। २। ४। ८८॥ इक्ष्वाकुपत्नी इति ख्यातायां धुलकुड़ी इति ख्यातायामिति केचित्। शं कल्याणं वृणोति शंवरी पूर्ब्ववदनं ङीप् तालव्यादिः दन्त्यसादिश्चेति स्वामी। इति भरतः॥

संवर्त्तः, क्ली. (संवृणोतीति। सं+वृ+घञ्। रस्य लः।) जलम्। इति शब्दरत्नावली॥

संवर्त्तः, पुं क्ली. पाथेयम्। तालव्यादिरन्त्यादिश्च। इत्यमरभरतौ॥

सर्व, क्ली, (स्रवते रसानिति। स्रु+घञ्।) जलम्। इति जटाधरः॥ पुष्परसः। इति केचित्॥

सवः, पुं, (स्रूयते सोमोऽनेति। स्रु+अप्।) यज्ञः। इत्यमरः। २।७।१३॥ (यथा, महाभारते। १। ६४। ३५।
"राजसूयाश्वमेधाद्यैः सोऽयजत् बहुभिः सवैः॥")
सन्तानः। इति मेदिनी॥ सूर्य्यः। चन्द्रः। इति केचित्॥ (अन्ने, त्रि। यथा, वाजसनेयसंहितायाम्। ६। ३६।
"सविता त्वा सवानां सुवताम्।"
"सविता सवानां प्रसवानामाधिपत्ये दैवयजनं त्वा त्वां सुवतां प्रेरयतु।" इति तद्भाष्यम्॥)

सवनं, क्ली, (सु ष्णु अभिषवे+ल्युट्।) यज्ञस्नानम्। (यथा, किरातें। १२। ६०।
"प्रविवेश ग्रामिव ज्ञानस्य
नियमसवनाय गच्छतः।
तस्य पदविगमितो हिमवान्
गुरुतां नयति हि गुणा न संहतिः॥")
तत्पर्य्यायः। सुत्या २ अभिषवः ३। इत्यमरः। २।७।४७॥ सोमसत्रानम् ४। इति जटाधरः॥ सोमपानम्। इति भरतः॥ अध्वरम्। (यथा, ऋग्वेदे। ८। ७५।
"अथ तं सवनाय दीक्षितः
प्रणिधानात् गुरुराज्यमस्यितः।
अभिषङ्गलङ्गं विजञ्जिवान्
इति शिक्षेण किलान्वबोधयत्॥",
सोमनिर्दसनम्। इति मेदिनी॥ प्रसवः। इति केचित्॥ (सु+ल्युट्। चन्द्रे, पुं। इत्युणादिवृत्तौ उज्ज्वलदत्तः।२।७४॥ वनेन सह वर्त्तमानमिति विग्रहे वनविशिष्टे, त्रि। यथा, महाभारते। १। १८। ८।
"अथ पर्व्वतराजानं तमकम्पो महाबलः।
उच्चचार वचोदुष्टमुग्रं सवनकानने॥")

सवया:, [स्] स्त्री, (समानं वयोऽस्याः। "ज्योतिर्जनपदेति।" ६।३।८५। इति समानस्य सः।)

सह, अ, सहितम्। तत्पर्य्यायः। साकम् २ सार्द्धम् ३ सत्रम् ४ समम् ५। इत्यमरः। ३। ४। ४॥ सत्रु ६। इति जटाधरः॥ (यथा, मनुः। १०। ६१।
"यत्र त्वेते परिध्वंसा जायन्ते वर्णदूषकाः।
राष्ट्रिकैः सह तद्राष्ट्रं क्षिप्रमेव विनश्यति॥")
साकल्यम्। विद्यमानम्। साट्टश्यम्। यौगपद्यम्। सङ्गतिः। सम्बन्धः। इति मेदिनी॥ सामर्थ्यम्। इति शब्दरत्नावली॥

सहं, क्ली, (सहते इति। सह+अच्।) पांशुवलवणम्। इति राजनिर्घण्टः॥

सहः, पुं, (सहते इति। सह+पचाद्यच्।) अग्रहायणमासः। (यथा, वाजसनेयसंहितायाम्। १४। २७।
"सहश्च सहस्यश्च हैमन्तिकावृतू॥"*॥
महादेवः। इति महाभारतम्। १३। १७। १२६॥) क्षमे, त्रि। इति हैमचन्द्रः॥ (यथा, महाभारते। १६। ८। १०।
"गदापरिघशक्तीनां सहः परिघबाहवः।
त एवाभिनिहताः पश्य कालस्य पर्य्ययम्॥")

सहः, पुं क्ली, (सहते इति। सह+अच्।) बलम्। इति मेदिनी॥

सहः, [स्] क्ली, (सहते इति। सह+"सर्व्वधातुभ्योऽसुन्।" उणा० ४।१९८। इति असुन्।) ज्योतिः। बलम्। इति शब्दरत्नावली॥ (यथा, रघुः। ८। ७।
"मदयं वृषभे महाभुजः
सहसोद्गमियं व्रजेदिति।
अचिरोपनतां स मेदिनीं
नवपाणिग्रहणां वधूमिव॥")

सहकारः, पुं, (सह युगपत् कारयति विच्छेपयति सौगन्ध्यमिति। सह+णिच्+अच्।) अतिसौरभाम्रः। इत्यमरः। २। ४। ३३॥ (यथा, रघुः। ४। ६।
"मन्दोत्कण्ठाः श्रुतास्तेन गुणाधिकतया गुरौ।
फलेन सहकारस्य पुष्पोद्गम इव प्रजाः॥")

सहकारी, [न्] पुं, (सह करोतीति। सह+णिनिः।) प्रत्ययः। यथा,—
"अथ हेतुरुपादानं प्रत्ययाः सहकारिणः॥"
इति त्रिकाण्डशेषः॥
न्यायमते तद्भिन्ने सति तज्जन्यजनकत्वं सहकारित्वम्॥ (मिलित्वा करणशीले, त्रि॥)

सहचरः, पुं स्त्री, (सह चरतीति। चर+अच्।) पीतझिण्टी। नीलझिण्टी। इति रत्नमाला॥ (यथा, सुश्रुते। १। ३८।
"पीतनलसहचरसमयदभेदादीति॥")

सहचरः, पुं, (सह चरतीति। चर+अच्।) झिण्टी। वयस्यः। (यथा, कथासरित्सागरे। २४। १३२।
"ततः सहचरैः सार्कं तस्यैवाभिव्ययद्गृहम्॥")
प्रतिबन्धकः। इति हैमचन्द्रः॥ नायकचरे, त्रि। इति मेदिनी॥ (यथा, कुमारे। २। ६४।
"सहचरमधुहस्तन्यस्तचूताङ्कुराक्षः
शृतमखसुप्रतस्थे प्राञ्जलिः पुष्पधन्वा॥")

सहचरी, स्त्री, (सह चरति या। चर+अच्। पचाद्यच्। यद्वा, सहचरतेरिकारणात् ङीष्।) पीतझिण्टी। इत्यमरः। २। ४। ७५॥ सखी। इति जटाधरः॥ पत्नी। इति हैमचन्द्रः॥ (यथा, रघुः। ६। ५७
"लक्ष्मीकृतस्य हरिणस्य हरिप्रभावः
प्रेक्ष्य स्थितां सहचरीं ववक्षाय देहम्।
आकर्णकृष्टमपि कामितया स धन्वी
वाणं क्षणार्द्धदुमनाः प्रतिसञ्जहार॥")

सहजः, पुं, (सह जायते इति। जन+डः।) सहोदरः। इत्यमरः। २। ६। ३४॥ निसर्गः। सहोत्थे, त्रि। इति मेदिनी॥ (यथा, रघुः। ८। ४३।
"विललाप स वाष्पगद्गदं
सजहामप्यहृदि धीरताम्।
अभितप्तमयोऽपि मार्द्दवं
भजते कैव कथा शरीरिषु॥")
जन्मलग्नात् तृतीयस्थानम्। यथा,—
"सुतमदनवान्त्ये पूर्णदृष्टिः सुरारि
र्युगलदशमराशौ दृष्टिपादव्ययार्हैः।
सहजरिपुचतुर्थैष्वष्टमे चार्द्धदृष्टिः
स्थितिभवनसुपान्त्यं नैव दृश्यं हि राहोः॥"
इति ज्योतिस्तत्त्वम्॥

सहजमित्रं, क्ली, (सहजं मित्रम्।) स्वाभाविकसुहृत्। यथा,—
"अरिर्मित्रसुदासीनोऽनन्तरस्तत्परः परः।
क्रमशो मण्डलं चिन्त्यं सामादिभिरुपक्रमैः॥"
अरिः शत्रुः। मित्रं सुहृत्। उभयविलक्षण उदासीनः। ते च त्रयस्त्रिविधाः। सहजाः कृत्रिमाः प्राकृताश्चेति। सहजं मित्रं भागिनेयपैतृस्वसीयमातृस्वसीयादिः। इति मिताक्षरायामाचाराध्याये १ अध्यायः॥

सहजातः, त्रि, (सह जातः उत्पन्नः।) सहोदरः। यमजः। इति केचित्॥ (सहोत्थे, त्रि। यथा, कथासरित्सागरे। ११३। २२।
"तारावलोकनामा च क्रमाद्दृष्टिं जगाम सः।
दानधर्मैर्विवेकाद्यैः सहजातैर्गुणैः सह॥")

सहजारिः, पुं, (सहजः स्वाभाविकः अरिः।) स्वाभाविकशत्रुः। यथा।"सहजारिः सापत्नपितृव्यतत्पुत्रादिः।" इति मिताक्षरायामाचाराध्यायः॥

सहजोदासीनः, पुं, (सहज उदासीनः।) स्वाभाविकपरतरः। यथा। "सहजकृत्रिममित्रशत्रुलक्षणरहितौ सहजकृत्रिमोदासीनौ।" इति मिताक्षरायामाचाराध्यायः॥

सहटुकं, क्ली, मांसव्यञ्जनविशेषः। यथा,—
"छागादेर्मांसमस्थ्यादेः शुष्कितं खण्डितं पुनः।
शुष्कमांसविघातेन पचेदेतत् सहटुकम्।
सहटुकं गुणवत्प्रोक्तं शुष्कमांसगुणं स्मृतम्॥"
इति भावप्रकाशः॥

सहदेवः, पुं, (पाण्डवविशेषः। इति मेदिनी॥ स च पाण्डुराजस्य पञ्चमपुत्रः। माद्रीगर्भे अश्विनीकुमाराभ्यां जातः॥ जरासन्धसुतः। स युधिष्ठिरसमकालीनो मगधेषु राजासीत्। इति श्रीभागवतम्॥ (बृहत्क्षत्रसुतः। यथा, हरिवंशे। २६। ३।
"बृहत्क्षत्रसुतो राजा सहदेवः प्रतापवान्।
सहदेवस्य धर्म्मात्मा सोमापीन इति स्मृतः॥"
सोमदत्तपुत्रः। यथा, तत्रैव। ३२। ८०।
"सोमदत्तस्य दायादः सहदेवो महायशाः।
सहदेवसुतश्चापि सोमको नाम पार्थिवः॥"
देवैः सह वर्त्तमाने, त्रि। यथा, भागवते। ४। २। ८।
"शृण्वतां ब्रह्मवर्च्चसो मे सहदेवाः सहाग्नयः।
साधूनां ब्रुवतो वृत्तं नाज्ञागान्मच्च मत्सरात्॥")

सहदेवा, स्त्री, (सह दीव्यतीति। दिव+क्विप्। टाप्।) बला। दन्तोत्पलः। शारिवौषधिः। इति मेदिनी॥ अर्द्धज्ञाता। इति हैमचन्द्रः॥ (देवकीकन्यान्यतमा। सा तु वसुदेवपत्नी। यथा भागवते। ६। २४। २३।
"शान्तिदेवोपदेवा च श्रीदेवा देवरक्षिता।
सहदेवा देवकी च वसुदेव उवाह ताः॥")

सहदेवी, स्त्री, सर्षपः। इति मेदिनी॥ पीतदन्तोत्पला। इति रत्नमाला॥ बलाभेदः। तत्पर्य्यायः। महाबला २ अतिबला ३ कटभरा ४ केशराजहा ५ केसरिका ६ गजादनी ७ वर्षपुष्पा ८ केशवर्द्धिनी ९ पुराणिनी १० देवबला ११ सारिणी १२ पीतपुष्पी १३ देवार्हा १४ गन्धवल्लरी १५ गजा १६ गजरसा १७। अस्या गुणाः। कृष्णेगवातार्त्तशोफहारित्वम्। शुक्रवृद्धिकारित्वम्। बल्यत्वम्। विषमज्वरनाशित्वञ्च। इति राजनिर्घण्टः॥ सहदेवपत्नी च॥

सहदेवीगणः, पुं, (सहदेवीनां गणः।) प्रतिष्ठायां देवस्नानार्थमोषधिसमूहः। यथा,—
"पञ्चगव्यैः स्नापयेच्च सहदेव्यादिभिस्ततः।
सहदेवी बला चैव श्रुतश्रवी श्रुतावरी॥
कुमारी च गुडूची च सिंही व्याघ्री तथैव च।
या ओषधीति मन्त्रेण स्नानमोषधिमङ्गलैः॥"
इति गारुडे ४८ अध्यायः॥

सहधर्म्मिणी, स्त्री, (सह धर्म्मोऽस्त्यस्या इति। इनिः। ङीप्।) वेदविधानेनोढ़ा। इत्यमरः। २। ६। ५॥

सहनं, क्ली, (सह+ल्युट्।) क्षान्तिः। तत्पर्य्यायः। तितिक्षा २ क्षमा ३। इति हैमचन्द्रः॥ (यथा, साहित्यदर्पणे। ६। ३६०।
"कार्य्यसंग्रह आदानं तदाक्षेपात्तदं पुनः।
कार्य्यार्थमपमानादेः सहनं खलु यत्नयेत्॥")

सहनः, त्रि, (सहते इति। सह+ल्युः।) सहनशीलः। इत्यमरः। ३। १। ३१॥ तत्पर्य्यायः। सहिष्णुः २ क्षमिता ३ क्षमी ४ तितिक्षुः ५ क्षन्ता ६। इति हैमचन्द्रः॥

सहनर्त्तनं, क्ली, (सह मिलित्वा नर्त्तनम्।) एकत्र मण्डलाकारवृत्यकरणम्। इति केचित्॥

सहपांशुक्रिलः, पुं, (सह पांशुना रजसा क्रिलति क्रीड़तीति। क्रिल क्रीड़ने + कः।) वयस्यः। इति त्रिकाण्डशेषः॥

सहपानं, क्ली, (सह मिलित्वा पानम्।) एकत्र मद्यभक्षणम्। तत्पर्य्यायः। सपीतिः २। इति हेमचन्द्रः॥ तुल्यपानम् ३। इत्यमरः। २।६।५५॥ सहपीतिः ४। इति शब्दरत्नावली॥

सहपूर्व्वाह्णं, क्ली, (पूर्व्वाह्णस्य सदृशम्। "अव्ययीभावे चाकाले। ६।३।८१। इत्यत्र अकाले इति कथनात् न सादृश्यः।) पूर्व्वाह्णसदृशम्। इति सुग्धबोधव्याकरणे अव्ययीभावसमासः॥

सहभावी, [न्] त्रि, (सह भवतीति। भू + णिनिः।) सहायः। इति त्रिकाण्डशेषः॥

सहभोजनं, क्ली, (सह मिलित्वा भोजनम्।) एकत्र भक्षणम्। तत्पर्य्यायः। सन्धिः २। इत्यमरः। २।८।५५॥ (सहभोजकरणम्। यथा, महाभारते। १।१६६।२४।
"एष नः समयो राजन् रत्नस्य सहभोजनम्।
नच नं क्षातुमिच्छामः समयं राजसत्तम॥")

सहमरणं, क्ली, (सह पत्या मरणम्।) स्वत-स्वामिसहितज्वलच्चितारोहण-पूर्व्वकमरणम्। यथा। "अथ सहानुगमनम्। अङ्गिराः।
'स्वते भर्त्तरि या नारी समारोहेद्हुताशनम्।
सारुन्धतीमसाचारा स्वर्गलोके महीयते॥
तिस्रः कोट्योऽर्द्धकोटी च यानि लोमानि मानवे।
तावत्यब्दानि सा स्वर्गे भर्त्तारं यानुगच्छति॥
व्यालग्राही यथा व्यालं बलादुद्धरते बिलात्।
तद्वद्भर्त्तारमादाय तेनैव सह मोदते॥
माहकं पेत्तकञ्चैव यत्र कन्या प्रदीयते।
पुनाति त्रिकुलं नारी भर्त्तारं यानुगच्छति।
तत्र सा भर्त्तृपरमा परा परमलालसा।
क्रीड़ते पतिना सार्द्धं यावदिन्द्राश्चतुर्द्दश॥'
भर्त्तृपरमा भर्त्ता परमो यस्याः सा तथा। परा परमलालसेत्यत्र स्त्रियमानाप्तरोगणैरिति शेषेण पठितम्।
'ब्रह्मघ्नो वा क्षतघ्नो वा मित्रघ्नो वापि यो नरः।
तं वै पुनाति सा नारी इत्याङ्गिरसभाषितम्॥
साध्वीनामेव नारीणामग्निप्रपतनादृते।
नान्यो धर्म्मो हि विज्ञेयो स्वते भर्त्तरि कर्हिचित्॥'
या नारीत्यादानात् सहमरणाभावपक्षोऽपि सूचितः। नान्यो धर्म्म इति तु सहमरणस्तुत्यर्थम्। तथा च विष्णुः। स्वते भर्त्तरि ब्रह्मचर्य्यं तदन्वारोहणं वा इति। ब्रह्मचर्य्यं मैथुनवर्জ्जनं ताम्बूलादिवर्জ्जनञ्च। यथा यमेनाः।
'ताम्बूलाभ्यङ्गपुष्पेषु क्षौम्यवासे च भोजनम्।
यतिश्च ब्रह्मचारी च विधवा च विवर्জ्जयेत्॥'
अभ्यङ्गममाल्यदोक्तं पारिभाषिकम्। यथा,—
'सकृत् दन्तं यदा नेत्रं भवेत् सर्व्वाङ्गमङ्गनम्।
मोक्षाभिकाङ्क्षिभिर्व्वेद्यैः अभ्यङ्गः स उदाहृतः॥
तैलमद्यं यदाङ्गेषु न च स्याद्दाहुनर्पणम्।
सा मार्ष्टिः पृथगभ्यङ्गो मस्तकादौ प्रकीर्त्तितः॥'
स्मृतिः।
'एकाहारः सदा कार्य्यो न द्वितीयः कदाचन।
पर्य्यङ्कशायिनी नारी विधवा पातयेत् पतिम्॥
गन्धद्रव्यस्य सम्भोगो नैव कार्य्यस्तया पुनः।
तर्पणं प्रत्यहं कार्य्यं भर्त्तुस्तिलकुशोदकैः।
ततृपितुस्तृपितुश्चापि नामगोत्रादिपूर्व्वकम्॥'
एतत् तु तर्पणं पुत्रपौत्राद्यभावविषयमिति मदनपारिजातः॥
'वैशाखे कार्त्तिके माघे विशेषनियमश्चरेत्।
स्नानं दानं तीर्थयात्रां विष्णोर्नामग्रहं सकृत्॥'
अत्र साध्वीत्वमाह।
'आर्त्ताऽपि मुदिता हृष्टे प्रोषिते मलिना क्षुधा।
स्वते म्रियेत या पत्यौ साध्वी ज्ञेया पतिव्रता॥'
छन्दोगपरिशिष्टीयमिति कल्पतरुः॥ साध्वीप्रसादेन लोकधारणमप्याह॥ मत्स्यपुराणम्।
'तस्मात् साध्व्यः स्त्रियः पूज्याः सततं देववच्चनैः।
तासां राज्ञा प्रसादेन धार्य्यते च जगत्त्रयम्॥'
महाभारते।
'अवमत्य च याः पूर्व्वं पतिं दुष्टेन चेतसा।
वर्त्तन्ते याश्च सततं भर्त्तॄणां प्रतिकूलतः॥
भर्त्तुरनुमरणं काले याः कुर्व्वन्ति तथाविधाः।
कामान् क्रोधात् भयान्मोहात् सर्व्वाः पूता भवन्ति ताः॥'
अत्र ऐहिकब्रह्मचर्य्यपतेर्द्दाहनिषेधात् जन्मान्तरीयतत्पापक्षय एव सहमरणोद्धारः। ब्रह्मपुराणे।
'देशान्तरस्थे पत्यौ साध्वी तत्पादुकाद्वयम्।
निधायोरसि संगृह्य प्रविशेज्ज्वाततवेदसम्॥
ऋग्वेदवादात् साध्वी स्त्री न भवेदात्मघातिनी।
ब्रह्महत्यापरिशिष्टे तु आह प्राप्नोति शातवत्॥'
ऋग्वेदवादात् इमा नारीरविधवा इत्यादिमन्त्रात्। एवञ्च अङ्गिरोब्रह्मपुराणवचनपर्य्यालोचनया ब्राह्मणादिसकलभार्य्याणां स्वगतभर्त्तृजनकत्वविशिष्टार्थिनानां गर्भवतीबालापत्यादिव्यतिरिक्तानां सहमरणानुमरणयोरधिकार इति। विवादकल्पतरुरत्नाकरौ। तच्च ब्राह्मण्यादनुमरणाधिकारोऽसङ्कल्पत्वात्। तथा च मिताक्षरायां देवबोधकृतयाज्ञवल्क्यटीकायाञ्च गौतमः।
'पृथक्चितिं समारुह्य न विप्रा गन्तुमर्हति।
इतरामान्तु नारीणां स्त्रीधर्म्मोऽयं परः स्मृतः॥'
तस्माद्ब्राह्मण्याः सहमरणमेव, इतरासान्तु उभयमिति। कल्पतरुरत्नाकरशुद्धिचिन्तामणिषु पादुकादयमिति दर्शनात् पादुकादिकमित्यपपाठः किन्तु पादुकादयमित्युपलक्षणम्। तृणमया विप्रेतरासां द्रव्यविशेषमनुपादाय पृथक्चित्यारोहणमात्रोक्तेः। यथोशनाः।
'पृथक्चितिं समारुह्य न विप्रा गन्तुमर्हति।
अन्यासामेव नारीणां स्त्रीधर्म्मोऽयं परः स्मृतः॥'
मदनपारिजातोऽप्येवम्। शिष्टाचारोऽपि तथा। क्षत्रियतत्त्वार्णवे दृष्टसारदीयम्।
'बालापत्याश्च गर्भिण्यो ह्यदृष्टऋतवस्तथा।
रजस्वला राजसुते! नारीहन्ति चितां शुभे॥'
राजसुते इति सगरमातुः सम्बोधनम्। दृष्टर्त्तिः।
'बालसम्वर्द्धनं त्यक्त्वा बालापत्या न गच्छति।
रजस्वला ऋतिका च रक्षेद्गर्भञ्च गर्भिणी॥'
एवमन्यतरेद्वालस्य संवर्द्धनं स्यात् तदा तस्या अप्यधिकारः। व्यासः।
'दिनैकगण्यदेशस्था साध्वी चेत् ऋतनिर्णया।
न दहेत् स्वामिनं तस्या यावदागमनं भवेत्॥'
भविष्यपुराणे।
'तृतीयेऽह्नि उदक्यायां स्मृते भर्त्तरि वै द्विजाः।
तस्यानुमरणार्थाय स्थापयेदेकरात्रकम्॥'
तस्य भर्त्तुः। तथा,—
'एकां चितां समासाद्य भर्त्तारं यानुगच्छति।
तद्भर्त्तुर्यः क्रियाकर्त्ता स तस्याश्च क्रियाचरेत्॥'
एतच्च पिण्डदानपर्य्यन्तम्।
'यश्चाग्निदाता प्रेतस्य पिण्डान्दद्यात् स एव हि।'
इति वायुपुराणैकवाक्यत्वात्॥
ब्रह्मपुराणे।
'आवयेद्भर्त्तृजायान्तु स्वभर्त्तृकुलपामिमाम्।
चितामारोपयन् प्राज्ञः प्रस्थते धर्म्मसत्तमम्॥
इमाः पतिव्रताः पुण्याः स्त्रियो या याः सुशोभनाः।
सह भर्त्तृशरीरेण संविशन्तु विभावसुम्॥
एवं श्रुत्वा ततो नारी श्रद्धाभक्तिसमन्विता।
पिटमेधेन यज्ञेन इष्ट्वा स्वर्गमवाप्नुयात्॥'
प्रस्थते भर्त्तेरीति शेषः। पिटमेधेन यज्ञेन चितारोहणरूपेण। पादुकादयमित्युपलक्षणम्। अनुमरणेऽपि सह भर्त्तृशरीरेण इत्यनूह्यः प्रयोज्यः। देशान्तरस्थे पत्यावित्यादिना शरीरप्रतिनिधित्वेन तदीयद्रव्यविधानात्। प्रतिनिधौ च यथाश्रुतमन्त्रपाठमाह कात्यायनः। ग्रन्थेऽविप्रतिपत्तिः इत्येतत् विवृतमेकादशीतत्त्वे॥
न च अग्निजलप्रविष्टानां भृगुसंग्रामदेशान्तरस्थानां गर्भिणीनां जातदग्धानां मरणे चिराशौचश्रुतिः। इति काश्यपवचनात् सहमरणतया अग्निप्रवेशेन चिराशौचं तत्रैव तस्याः पिण्डदानमिति वाच्यम्। प्रागुक्तब्रह्मपुराणे पृथक्चितिसमारोहणमात्रे त्र्यहाशौचविधानात् अन्यत्र भर्त्तृतुल्याशौचप्रतीतेः। सहमरणे काश्यपोक्तचिराचाशौचाङ्गीकारेऽपि तस्याशौचस्य दृढ़ा पत्यशौचकालावधिस्थायित्वम्।
'अन्तर्दशाहे स्नातेषु पुनर्मरणजन्मनी।
तावत्स्यादशुचिर्विप्रो यावत्तु स्यादनिर्दशम्॥'
इति मनूक्ताशौचमध्ये पराशौचस्य पूर्व्वाशौचकालावधिस्थायित्वप्रतीतेः। ततश्च यथा अशौचकालमध्ये तत्रैव सहजस्य पिण्ड-

दानं तथाशौचकालेऽपि यावदशौचं यथाक्रमं दशा पिण्डा देया इति। अतश्च त्रिकण्डीयान्त्येष्टिविधानुसारेणविवेकयोर्व्याप्तिः।
'मंत्रितं पतिमालिङ्ग्य प्रविशेदग्निं हुताशनम्।
तस्याः पित्रादिकं देयं क्रमशः पतिपिण्डवत्॥'
विष्णुः।
'अग्निना पिण्डदानन्तु यदा भर्त्तुर्दिने दिने।
तदन्नारोहिणी यस्मात्तस्मात् सा गात्रघातिनी॥'
अथातः सहशब्दार्थः। पतिमालिङ्ग्यानेनैकवाक्यत्वात्। स्मार्त्ताशौचाभ्यन्तरे पृथक्चितारोहेण पिण्डदानं स्मार्त्ताशौचापगमे तु आद्यम्।
'अग्निनायाः प्रदानन्तु दशपिण्डात्प्रहेण तु।
स्मार्त्ताशौचव्यतीते तु तस्याः श्राद्धं विधीयते॥'
इति त्रिकण्डशेषपैठीनसिवचनात्॥
अग्निपुराणस्येदमिति शूलपाणिः। अथातः पश्चादर्थः। अतीते तु भर्त्तृशौचे पाद्मोक्तादयमुपादाय ज्वलदग्निप्रवेशे ब्राह्मणाशौचव्यवस्थया पिण्डदानंचतुर्थदिने श्राद्धं पूर्व्वोक्तब्रह्मपुराणवचनात्। तच्च तु भर्त्तुः संग्रामशस्त्रघातादिना सद्यःशौचं तच्च पृथक्चितारोहणाशौचस्य पूर्व्वोक्तब्रह्मपुराणवचनात् चिराभावेन बहुकालव्यापिसंग्रामादिसम्भवात् तेनैव पूर्व्वाशौचस्य व्यपगमात् तच्च भर्त्तुरपि ब्राह्मेण पिण्डदानम्। तच्चाऽनुचितारोहणे भर्त्तृशौचव्यपगमात् शुद्धिः। मंत्रितं पतिमालिङ्ग्य इति अग्निनापिण्डदानमिति पूर्व्वोक्तवचनाभ्यां अग्निप्रवेशे सुमन्तुना सद्यःशौचविधानाच्च। यथा। शस्त्रनिधनसंग्रामदेशान्तरगमनाश्वमेधगवालम्भनिमन्त्रणानां उदकक्रिया कार्य्या सद्यःशौचं भवति इति। भगुरत्रदेशः। सहाधिकः पुरुषार्थो हिमालयाधिकसङ्गापयोगमनेन सम्पादितमरणः। न केवलं सद्यःशौचं नित्यैदाहाग्नावेरग्निहोत्रमिव एकाहाशौचमिव कर्त्तव्यमिति धारणाद्धातुविषयत्वेन नैमित्तिकमिति वाच्यम्। तस्याधुनिकत्वे प्रमाणाभावात्। सामान्यशास्त्रप्रवृत्तया पश्चात्तरसंवादितया चैतद्विषयकमिति। अन्यथा कल्पोक्तत्रिरात्राशौचमपि अग्निप्रसंग्रामप्रविष्टानां प्रमादाद्देशं अन्यं इति धारणाद्धातुत्वात् अनुमरणविषयकं न स्यात् तस्मात् कालप्रयुक्तं ब्रह्मपुराणमसाधारणविषयकं इति। सुमन्तुवचनं संग्रामशस्त्रभृन्मरणविषयकमेवेति। ॥ सद्यश्च समाधिना शास्त्रदृष्टस्य मृतस्य पुनरादृश्य प्रसादोक्तिभिः। दैवदाहकाले शस्त्रघाते शास्त्राग्नौ अग्निप्रवेशकर्म्मादिनी कालादिभेदेन मुख्यत्वेऽपि बहुप्रयुक्तत्वात् सहमरणं मुख्यम्। तेनाशक्तौ सहयुक्तम्।
'एकशय्यासनं पत्न्याः पत्युः पत्नी सहोदिते।
कर्म्मण्यिष्ट्वा यतौ वह्नौ समारोहेत्पतिं स्त्रियाः॥'
अनुमरणेन अग्निप्रवेशं करिष्यामि इति पूर्व्वोक्तेन सङ्कल्पेन मन्त्रितम्।
'दक्षिणं बाहुमुद्धृत्य सर्व्वे पुत्रा पतिव्रता।
समारोहति शीघ्राग्नौ तस्याः सिद्धिं निबोधत॥'
इति व्यासवचनादिना सहमरणानुमरणयोर्निरवकाशत्वेनैमित्तिककाम्यत्वेन मलमासादावपि कर्त्तव्यता।
'नैमित्तिकानि काम्यानि नियतान्त यथा यथा।
तथा तथैव कार्य्याणि न कालस्तु विधीयते॥'
इति दक्षवचनात्॥ * ॥
तदयं प्रयोगः। पुत्रादिना स्वगृह्योक्तविधिना अग्नौ दग्धे ज्वलितायां भर्त्तृचितायां सहशब्दो साध्वी स्नाता परिहितधौतवासोयुगा कृताहता प्राङ्मुखी वा देवतीर्थेनाचान्ता तिलकुशकृष्णत्रयमादाय ॐ तत् सदिति ब्राह्मणेऽद्यामुकारिते नारायणं संस्मृत्य नमोऽद्यामुके मासि अमुके पक्षे अमुकतिथौ अमुकगोत्रा श्रीमती अमुकीदेवी अरुन्धतीसमाचारत्वपूर्व्वकस्वर्गलोकमहीयमानत्वमानवाधिकरणकलोमसमसंख्याब्दावच्छिन्नस्वर्गवासभर्त्तृसहित-मोदमानत्वमाल-पिल-श्वशुर-कुलत्रय-पूतत्व-चतुर्दशेन्द्रावच्छिन्नकालाधिकरण्यकामरोगणस्तूयमानत्वपतिसहितक्रीड़मानत्वब्रह्मपतिपूतत्वकामा भर्त्तृज्वलच्चितारोहणमहं करिष्ये इति। अनुमरणे तु भर्त्तृज्वलच्चितारोहणमित्यत्र च ज्वलच्चिताप्रवेशेन भर्त्तुमरणमिति सङ्कल्प्य अष्टौ लोकपाला आदित्यचन्द्रानिलाग्याकाशभूमिजलहृदयावस्थितान्तर्यामिपुरुषयमदिनरात्रिसन्ध्याधर्म्मा यूयं साक्षिणो भवत ज्वलच्चितारोहणेन भर्त्तृशरीरानुगमनमहं करोमि इति। अनुमरणे तु भर्त्तृशरीरानुगमनमित्यत्र भर्त्तुमरणमित्युच्चार्य्य ज्वलच्चितामिं त्रिः प्रदक्षिणीकृत्य।
'ॐ इमा नारीरविधवाः सपत्नी-
राञ्जनेन सर्पिषा संविशन्तु।
अनश्रवो अनमीवाः सुरत्ना
आरोहन्तु जनयोयोनिमग्रे॥'
इति ऋग्वेदोक्तमन्त्रे।१०।१८।७॥
'ॐइमाः पतिव्रताः पुण्याः स्त्रियो या याः सुसौभगाः।
सह भर्त्तृशरीरेण संविशन्तु विभावसुम्॥'
इति पौराणिके मन्त्रे च ब्राह्मणेन पठिते नमो नम इत्युच्चार्य्य ज्वलच्चितां समारोहेत्। * ॥
आपस्तम्बः।
'चितिमग्नां तु या नारी मोहाद्विचलिता भवेत्।
प्रायश्चित्तेन शुध्येत सप्तरात्रं पापकर्म्मणः॥'
पाद्मात्तन्निर्म्मलत्वे स्मृतिः।
'एकचित्तां समाख्यातो दम्पत्यो निधनं गतौ।
पृथक् श्राद्धं ततः कुर्य्यादौदनन्तु पृथक् पृथक्॥'
विष्णुकरणस्मृतिः।
'एकादश समाख्यातं वृषनामथवा दधीः।
सर्व्वेण अग्नयं कृत्वा पृथक् श्राद्धं प्रवर्त्तयेत्॥'
मनुः।
'यदा स्त्री विधवाऽसिं क्लेशयेत् पतिना सह।
कायशौचमुदकं तस्याः सह भर्त्रेति निश्चितम्।
तिथ्यन्तरस्थितायान्तु पृथक् श्राद्धं न विद्यते॥"
इति चतुर्भुजभट्टाचार्य्यधृतयमवचनाद्भिन्नतिथिस्थितायां अपि पत्युर्मृततिथौ श्राद्धमिति हरिदासतर्कार्चार्य्याः। तन्न अस्य वचनस्यान्धलत्वात् सम्भवत्येव श्राद्धपदं पिण्डपरम्। एकोद्दिष्टं न्यूनाधिकमिति यमवचनविरोधात्।" इति शुद्धितत्त्वम्॥ * ॥ अन्यत् ब्रह्मवैवर्त्ते गणपतिखण्डे २८ अध्याये। मार्कण्डेयपुराणे दमचरिताध्याये। विष्णुपुराणे ५ अंशे ३८ अध्याये। कल्किपुराणे ३३ अध्याये च द्रष्टव्यम्॥

सहयायी, [न्] त्रि, (सह यातीति। या+णिनिः।) मिलितगामी। यथा,—
"न नदीषु नदीं ब्रूयात् पर्व्वतेषु च पर्व्वतान्।
आवासे भोजने वापि न त्यजेत् सहयायिनम्॥"
इति कूर्म्मपुराणे उपविभागे। १५। ५८॥

सहरसा, स्त्री, (सह रसो यस्याः।) सुन्नपर्णी। इति शब्दरत्नावली॥

सहरि, य, हरेः सदृशम्। इति सुग्धबोधव्याकरणम्॥ सूर्य्ये त्रिषु च, पुं। इति केचित्॥

सहर्षः, पुं, (सह हर्षो यत्र।) सहर्षनृ। हर्षः। इति त्रिकाण्डशेषः॥ (हर्षेण सह वर्त्तमानः।) हर्षयुक्ते, त्रि॥ (यथा, कथासरित्सागरे। २। २३।
"एतच्छ्रुत्वा वचः श्रेष्ठी सहर्षोऽहमिहागतः॥")

सहसा, य, हठात्। तत्पर्य्यायः। अतर्कितः२। इत्यमरः। ३। ४। ७॥ अकस्मात् ३। इति शब्दरत्नावली॥ सहसा कर्म्मकरणनिषेधो यथा, किरातार्জ্জुनीये। २। ३०।
"सहसा विदधीत न क्रिया-
मविवेकः परमापदां पदम्।
वृणते हि विमृश्यकारिणं
गुणलुब्धाः स्वयमेव सम्पदः॥"
हास्ययुक्ते, त्रि। यथा,—
"प्रियतमेन यया सहसा स्थितं
न सहसा सहसा परिरभ्य तम्।
अथयितुं श्रमभञ्जमतां गता
न सहसा सहसा जनवेपथुः॥"
इति माघे। ६। ५७॥

सहसाहृष्टः, त्रि, हठात् हृष्टः। इत्यकपुच्छे, पुं। इति केचित्॥

सहस्यानः, पुं, (सहते इति। सह+"अन्येभ्योऽपि दृश्यन्ते।" उणा॰ २। ८७। इति असानच्।) मयूरः। यक्षः। क्षमायुक्ते, त्रि। इत्युणादिकोषः॥ (शत्रूणामभिभवितरि, त्रि। इति भरतः॥ यथा, ऋग्वेदे। २। १८८। ८।
"मानस्य स्तुः सहस्याने अन्तरः।")

सहस्यः, पुं, (सहसि बले साधुः। तत्र साधुरिति यत्।) पौरुषम्। इत्यमरः। १। ८। १५॥ (यथा, कुमारे। ५। २५।
"निशाय सालम्बतिमौनृशंस्यशालिनीः
सहस्यराजौरुदयाससृप्सरः॥")

सहसं, क्ली, (सहो बलमस्यस्मिन्निति। सहस्+ रः। "सहो बलनामसु व्याख्यातम्। रो मत्वर्थीयः। अल्पापि भाविनी शक्तिरस्मिन्नस्ति।" इति निघण्टुटीकायां देवराजयज्वा। ३। १।) दशशतसंख्या। इति हेमचन्द्रः॥ हाजार इति पारस्यभाषा। (यथा, मनुः। ३। १७७। "यापरोगी सहस्रस्य दातुर्नाश्नुते फलम्॥") तद्वाचकानि यथा। जाह्नवीवक्त्रम् १ श्रेयश्रीर्यम् २ पद्माच्छदः ३ रविकरः ४ अर्ज्जुनबाणः ५ वेदशाखा ६ इन्द्रदृष्टिः ७। इति कविकल्पलता॥ (वसु। इति निघण्टुः।३।१॥ यथा,—

"सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्।"
इति पुरुषसूक्तम्॥)

हेमकाण्डा, स्त्री, (सहस्रं काण्डानि यस्याः।) श्वेतदूर्व्वा। इति राजनिर्घण्टः॥

सहस्रकिरणः, पुं, (सहस्रं किरणानि यस्य।) सूर्य्यः। इति हलायुधः॥ (यथा, बृहत्संहितायाम्। ४२। १३।

"राशौ राशौ यस्मिन्
शिशिरमयूखः सहस्रकिरणो वा॥")

सहस्रदंष्ट्रः, पुं, (सहस्रं दंष्ट्रा यस्य।) पाठीनमत्स्यः। इत्यमरः। १। १०। १८॥ (यथा, सुश्रुते। १ ४६। "रोहितपाठीनपाटलाराजीवचन्द्रिमगामत्स्य-कृष्णमत्स्य-वागुञ्जारसुरससहस्रदंष्ट्रप्रभृतयो गादेयाः॥")

सहस्रदंष्ट्री, [न्] पुं, (सहस्रदंष्ट्राः सन्त्यस्येति। इनिः।) बोदालमत्स्यः। इति शब्दरत्नावली॥

सहस्रदोः, [स्] पुं, (सहस्रं दोषो बाहवो यस्य।) कार्त्तवीर्य्यार्জ্জুनः। इति जटाधरः॥

सहस्रधारः, पुं, (सहस्रं धारा यस्य।) विष्णुचक्रम्। इति केचित्॥

सहस्रधारा, स्त्री, (सहस्रं बहवो धारा जलप्रपाता यत्र।) देवतास्नानार्थसहस्रच्छिद्रयुक्तपात्रगलितजलधारा। यथा,—

"सहस्रधारया देवीं स्नापयामि सुरेश्वरीम्॥"
इति दुर्गोत्सवपद्धतिः॥

सहस्रनयनः, पुं, (सहस्रं नयनानि यस्य।) इन्द्रः। इति हलायुधः॥ (यथा, कथासरित्सागरे। १०१।२२७।

"किं सहस्रनयनप्रेक्षणीया किमक्षराः।
वनश्रीरथवा पुष्पलक्षप्रकरपक्षवा॥"

वाश्वलिङ्गेऽपि दृश्यते। यथा, महाभारते। १३। १४। २०४।

"किञ्चाच बहुभिः क्षुद्रैर्हेतुवादैः पुरन्दर।
सहस्रनयनं दृष्ट्वा त्वामेव सुरसत्तम॥")

सहस्रनेत्रः, पुं, (सहस्रं नेत्राणि यस्य।) इन्द्रः। इति हेमचन्द्रः॥ (यथा, रघुः। ६। २३।

"क्रियाप्रबन्धादयमध्वराणा-
मेकस्तमाहृतसहस्रनेत्रः।
पृथ्वीश्चिरं पाण्डुकपोलताम्रान्
मन्दारशून्यानलकांश्चकार॥"

वाश्वलिङ्गेऽपि दृश्यते। यथा, महाभारते। १। २१२। २७।

"एवं चतुर्म्मुखः स्थाणुर्महादेवोऽभवत्पुरा।
तथा सहस्रनेत्रश्च बभूव बलसूदनः॥")

विष्णुः। इति श्रीभागवतम्॥

सहस्रपत्रं, क्ली, (सहस्राणि पत्राणि यस्य।) पद्मम्। इत्यमरः। १। १०। ४३॥ (यथा, रघुः। ७। ११।

"तासां सुरेभामवगन्धगर्भै-
र्व्याप्तान्तराः सान्द्रकुतूहलानाम्।
विलोलनेत्रभ्रमरैर्गवाक्षाः
सहस्रपत्राभरणा इवासन्॥")

सहस्रपात्, [द्] पुं, (सहस्रं पादा यस्य। संख्यासुपूर्व्वस्येति पादस्यान्तलोपः।) विष्णुः। यथा,

"सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्॥"
इति पुरुषसूक्तम्॥

(तथाच महाभारते। १३। १४६। ३७।

"सहस्रमूर्द्धा विश्वात्मा सहस्राक्षः सहस्रपात्॥"
महादेवः। यथा, तत्रैव। १३। १७। १३०।

"हर्य्यक्षः ककुभो वज्री शतजिह्वः सहस्रपात्॥"
ऋषिविशेषः। यथा, तत्रैव। १। १०। ७।

"अहं पुरा रुरो! नाम्ना ऋषिरासं सहस्रपात्।
सोऽहं शापेन विप्रस्य भुजङ्गत्वमुपागतः॥")

सहस्रपादः, पुं, (सहस्रं पादा यस्य।) कारण्डपक्षी। सूर्य्यः। विष्णुः। इति मेदिनी॥

सहस्रबाहुः, पुं, (सहस्रं बाहवो यस्य।) बाणराजः। यथा,—

"बाणः पुत्रशतज्येष्ठो बलेरासीन्महात्मनः।
सहस्रबाहुर्बाह्येन ताण्डवे तोषयन्मृडम्॥"
इति श्रीभागवते। १०। ६२। २॥

(कार्त्तवीर्य्यार्জ্জुनः। शिवः। यथा, महाभारते। १३। १७। १३१।

"सहस्रबाहुः सर्व्वाङ्गः शरण्यः सर्व्वलोककृत्॥"
बहुबाहुविशिष्टे, त्रि। यथा, भागवते। ४। १५। ३।

"ततोऽतिकायस्तनुवा स्पृशन् दिवं
सहस्रबाहुर्वनरुक् त्रिसूर्य्यदृक्॥")

सहस्रभुजः, पुं, (सहस्रं भुजा यस्य।) विष्णुः। यथा,—

"पश्यन्यदोरुप्रमदासहस्रचक्षुषा
सहस्रपादोरुभुजाननाद्भुतम्।
सहस्रमूर्द्धश्रवणाक्षिनासिकं
सहस्रमौल्यम्बरकुण्डलोल्लसत्॥"
इति श्रीभागवते। १। ३। ४॥

कार्त्तवीर्य्यार्জ্জुनः॥ (बाणराजश्च॥)

सहस्रभुजा, स्त्री, (सहस्रं भुजा यस्याः।) महालक्ष्मीः। सा च महिषासुरमर्द्दिनी। यथा,—

"श्वेताननां नीलभुजां सुश्वेतस्तनमण्डलाम्।
रक्तमध्यां रक्तदेशां नीलजङ्घोरुतालुकाम्॥
चित्रानुलेपनां कान्तां सर्व्वसौभाग्यदायिनीम्।
अष्टादशभुजां पूज्यां सहस्रभुजां रणे॥
आयुधान्यत्र रक्षन्ति दक्षिणाधःकरक्रमात्।
अक्षमालां च सुदलं बाणासिकुलिशं गदाम्॥
चक्रं त्रिशूलं परशुं शङ्खघण्टे च पाशकम्।
शक्तिं दण्डं चर्म्म चापं पानपात्रं कमण्डलुम्॥
अलङ्कृतभुजा ह्येभिरायुधैः परमेश्वरी।
मार्कण्डेया स्तुतिकालादौ महिषासुरमर्द्दिनी॥
इत्येषा राजसी मूर्त्तिः सर्व्वदेवमयी मता।
यां ध्यात्वा मानवो नित्यं लभते चिन्तमात्मनः॥"
इति मार्कण्डेयपुराणीयदेवीमाहात्म्यपाठक्रमः॥

सहस्रमूर्द्धा, [न्] पुं, (सहस्रं मूर्द्धानो यस्य।) विष्णुः। अस्य प्रमाणं सहस्रभुजशब्दे द्रष्टव्यम्॥ (तथाच महाभारते। १३। १४६। ३७।

"सहस्रमूर्द्धा विश्वात्मा सहस्राक्षः सहस्रपात्॥"
शिवः। यथा, महाभारते। १३। १७। १३०।

"सहस्रमूर्द्धा देवेन्द्रः सर्व्वदेवमयो गुरुः॥")

सहस्रमूली, स्त्री, (सहस्रं मूलानि यस्याः। ङीष्।) द्रवन्ती। इति राजनिर्घण्टः॥

सहस्रमौलिः, पुं, (सहस्रं मौलयो यस्य।) विष्णुः। अस्य प्रमाणं सहस्रभुजशब्दे द्रष्टव्यम्॥ (अनन्तदेवः। यथा, देवीभागवते। १। २। ७।

"विष्णुस्तु श्रेयसयनं स्वपितीति काले
तन्नाभिपद्ममुकुले खलु तस्य जन्म।
आधारतां किल गतोऽत्र सहस्रमौलिः
सम्बोधतां स भगवान् हि कथं मुरारिः॥")

सहस्ररश्मिः, पुं, (सहस्रं रश्मयो यस्य।) सूर्य्यः। इति सहस्रकिरणशब्ददर्शनात्॥ (यथा, माघे। १। ५३।

"अशक्नुवन् सोढुमधीरलोचनः
सहस्ररश्मेरिव यस्य दर्शनम्॥")

सहस्रवदनः, पुं, (सहस्रं वदनानि यस्य।) विष्णुः। इति शब्दरत्नावली॥

सहस्रवीर्य्या, स्त्री, (सहस्रं वीर्य्याणि यस्याः।) दूर्व्वा। इत्यमरः। २। ४। १५८॥ महाशतावरी। इति राजनिर्घण्टः॥ (यथा, सुश्रुते। १। १६।

"शतवीर्य्यां सहस्रवीर्य्यां सिंहार्थीञ्च शिरसा धारयेत्॥"*॥ प्रभूतवीर्य्यशालिनि, त्रि। यथा, वाजसनेयसंहितायाम्। १३। २६।

"सहस्रवीर्य्यासि मा मा हिंसीः॥")

सहस्रवेधं, क्ली, (सहस्रं वेधा यस्य।) चुक्रम्। काञ्जिकविशेषः। इति राजनिर्घण्टः॥

सहस्रवेधि, [न्] क्ली, (सहस्रं विध्यतीति। विध छिद्रीकरणे + णिनिः।) छिद्रु। इति मेदिनीराजनिर्घण्टौ॥

सहस्रवेधी, [न्] पुं, (सहस्रं वेधितुं शीलमस्य। विध छिद्रीकरणे + णिनिः।) अम्बुवेतसः। इति मेदिनी॥ कस्तूरी। इति राजनिर्घण्टः॥

सहस्रवेधकर्त्तरि, त्रि॥

सहस्रशिखरः, पुं, (सहस्रं शिखराणि यस्य।) विन्ध्यपर्व्वतः। इति केचित्॥ (यथा, मार्कण्डेये। ५५। १०।

"सहस्रशिखरस्थाद्रेः पारियात्रः समुद्भवान्॥")

सहस्रश्रवणः, पुं, (सहस्रं श्रवणानि यस्य।) विष्णुः। अस्य प्रमाणं सहस्रभुजशब्दे द्रष्टव्यम्॥

सहस्रधर्य्याक्षः, पुं, इन्द्रस्य । इति केचित् ॥
सहस्रा, स्त्री, (सहस्रं वीर्य्याणि सन्त्यस्यामिति । अच् । टाप् ।) अम्बष्ठा । इति भावप्रकाशः ॥
सहस्रांशुः, पुं, (सहस्रं अंशवो यस्य ।) सूर्य्यः । इत्यमरः । १ । ३ । २१ ॥ (यथा, मनुः । १।८।
"तदण्डमभवद्धैमं सहस्रांशुसमप्रभम् ।
तस्मिन् जज्ञे स्वयं ब्रह्मा सर्व्वलोकपितामहः ॥")
सहस्राक्षः, पुं, (सहस्रमक्षीण्यस्येति । "बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच् ।" ५।४।११३ । इति षच् ।) इन्द्रः । इत्यमरः ।१ । १ । ४३॥ (यथा, महाभारते । १ । २५ । ८ ।
"नमस्तिग्म नमस्तेऽस्तु सहस्राक्ष शचीपते ! ॥")
विष्णुः । यथा,—
"सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ।"
इति पुरुषसूक्तम् ॥
(पीठस्थानविशेषः । यथा, देवीभागवते । ७ । ३० । ६५ ।
"उत्पलाक्षी सहस्राक्षे हिरण्याक्षे महोत्पला ॥")
सहस्राननः, पुं, (सहस्रं आननानि यस्य ।) विष्णुः । अस्य प्रमाणं सहस्रभुजशब्दे द्रष्टव्यम् ॥
सहस्रानीकः, पुं, शतानीकराजपुत्रः । यथा,—
"शतानीकोऽभवत् पूर्व्वं पुराकल्पे महीपतिः ।
इन्द्राय सुवचून् यज्ञान् श्रद्धापूतेन चेतसा ॥
यज्ञे यज्ञे सहस्राणि गजाश्वरथदन्तिनाम् ।
ब्राह्मणेभ्योऽददाज्जज्ञ्यामानाश्च शतं शतम् ॥
द्विजस्तुष्टो ददौ पुत्रं कौषिको भूरते तथा ।
यस्यास्तस्य स जातोऽपि कालात् कालं अवर्द्धत ॥
वेदवेदाङ्गतत्त्वज्ञो धर्म्मज्ञो नियतव्रतः ।
कान्त्या चन्द्रमसस्तुल्यः प्रतापात् सूर्य्यवत् प्रभुः ॥
समये धर्म्मराजेव क्षमया पृथिवीसमः ।
गुणदृगुणवतो ज्ञात्वा सुतं राज्ञो दिवानिशम् ।
सहस्रानीकनामानं चक्रुस्तस्य सुहर्षिताः ॥"
इति वह्निपुराणे पापनाशनतत्त्वप्रकाशाध्यायः ॥
(तथा च भागवते । ९ । २२ । ३८—३९ ।
"तस्य पुत्रः शतानीको याज्ञवल्क्यात् त्रयीं पठन् ।
अग्न्यस्त्रज्ञान् क्रियाज्ञानं शौनकात् परमेष्यति ।
सहस्रानीकसुतयोरुक्तवैवाश्वमेधजः ॥")
सहस्रारः, पुं क्ली, (सहस्रं आराणि कीला यस्य ।) शिरोऽवस्थिताधोमुखसहस्रदलकमलम् । यथा,
"सहस्रारे हिमनिभे सर्व्वपत्रविभूषिते ।
अ-क-चादिक्षिरेखाभ-ट-ल-च-क्षयभूषिते ॥
तत्कर्णे परविन्दुश्च सृष्टिस्थितिलयात्मकम् ।
शुद्धं शरच्छशिनिभं धात्रेयाकीर्णमक्षरम् ॥"
इति तन्त्रसारोक्तान्तर्म्मातृकान्यासः ॥
(सहस्रं आराणि यस्येति । बहुव्रीह्यङ्गविशिष्टे, त्रि । यथा, देवीभागवते । ६ । ५ । १८ ।
"चक्रं सुदर्शनं विष्णोः सहस्रारं सुदर्शनम् ॥")
सहस्रीः, [स्] पुं, (सहस्रं अस्त्यस्येति । सहस्र + "तदस्यास्त्यस्मिन्निति मतुब्झलौ ।" ५ । २ । १०२ । इति इनिः ।) सहस्रेण यो वधो ।

सहाय, पर्य्यायः । साहस्रः २ । इत्यमरः । २ । ८ । ६२ ॥ हे हाजरा इति ख्याते । ये सहस्रेण सहसंख्येन गजादिना बलिनः सैन्यवन्तः ते । सहस्रं बलानि सन्त्येषामिति अस्त्यर्थे विकारसंघेत्यादिना णे नैकाजादिति इनि च रूपद्वयम् । इति भरतः ॥ (सहस्रविशिष्टे, त्रि । यथा, मनुः । ८ । ३७६ ।
"ब्राह्मणीं यत्नयुक्ताञ्च रक्षेत्तां वैश्यपार्थिवौ ।
वैश्यं प्रयत्नतं कुर्य्यात् क्षत्रियन्तु सहस्रिणम् ॥"
तथाच भागवते । १ । ६ । ३० ।
"तदोपसंहृत्य गिरः सहस्रिणी-
र्विमुक्तसङ्गं मन आदिपूरुषे ॥"
"सहस्रिणीः सहस्रार्घवतीः ।" इति तट्टीका ॥)
सहा, स्त्री, (सहत इति । सह + अच् । टाप् ।) धृतकुमारी । सुन्नपर्णी । इत्यमरः । २ । ४ । ७३ ; २ । ४ । ११३ ॥ नखभेदरजम् । दण्डोत्पला । पृथिवी । इति मेदिनी ॥ शुक्लभिण्टी । सर्षपकङ्काली । इति शब्दचन्द्रिका ॥ रात्रा । स्वर्णचोरी । पीतदण्डोत्पला । इति रत्नमाला ॥ तरणीपुष्पम् । इति राजनिर्घण्टः ॥
सहाः, [स्] पुं, (सहते इति । सह + असुन् ।) अग्रहायणमासः । इत्यमरः ॥ (यथा, भागवते । १२ । ११ । ४१ ॥
"अर्य्यमुः कक्षपक्षार्द्धे ऋतसेनस्तथोर्व्वशी ।
विद्युच्छत्रुर्महाशङ्खः सहोमासं नयन्त्यमी ॥")
हेमन्तकालः । इति मेदिनी ॥
सहाचरः, पुं, (सह आचरतीति । आ + चर + अच् ।) पीतनिर्गुण्डी । इति शब्दरत्नावली ॥ (अस्य पर्य्यायो यथा,—
"सैरेयकः श्वेतपुष्पः सैरेयः कटसारिका ।
सहाचरः सहचरः स च भिन्न्यपि कथ्यते ॥"
इति भावप्रकाश्य पूर्व्वखण्डे प्रथमे भागे ॥
यथा, सुश्रुते चिकित्सितस्थाने । ३० ।
"सहाचरवरीविल्वाकाकनाशाविदारिभिः ॥"
यथाच ।
"वासानिम्बपटोलकेतकीधवलाकुशाग्रकेन्दीवरी-
वर्षाभूकुटजाग्निमन्थसहिते द्वे मूलिकान्यानते ॥
मांसं नागबलासहाचरपुरैरिङ्गाङ्गकैः नित्यशो
यात्यास्तनुत्वमेव न द्विगुणिता ये चेक्षुजाता घनाः ॥"
इति वैद्यकपरिभाषायाम् ।)
सहचरश्च ॥
सहायः, पुं, (सह अयते इति । अय + अच् ।) अनुकूलः । तत्पर्य्यायः । अनुगवः २ अनुचरः ३ अभिसरः ४ । इत्यमरः । २ । ८ । ७१ ॥ (यथा, मनुः । ६ । ४६ ।
"अध्यात्मरतिरासीनो निरपेक्षो निरामिषः ।
आत्मनैव सहायेन सुखार्थी विचरेदिह ॥")
राज्ञां सहाया यथा, मात्स्ये । २१५ । ७४ ।
"सङ्घाश्च तथा पुष्टाः सततं प्रतिमानिताः ।
राज्ञां सहायाः कर्त्तव्याः पृथिवीं जेतुमिच्छता ॥"

सहायता, स्त्री, (सहाय + "ग्रामजनबन्धुसहायेभ्यस्तल् ।" ५ । २ । ४२ । इति तल् ।) सहायानां समूहः । इत्यमरः । ३ । ३ । ४१ ॥ (सहायस्य भावः कर्म्म वा । तल् ।) साह्यञ्च ॥ (यथा, रघुः । ६ । १६ ।
"स किल संयुगमूर्द्धि सहायतां
मघवतः प्रतिपद्य महारथः ।
खमुरुवीर्य्यमगापयदुच्छ्रितं
सुरवधूरवधूतभयाः शरैः ॥")
सहायत्वं, क्ली, सहायता । सहायस्य भावः । सहायशब्दाद्भावे त्वप्रत्ययेन निष्पन्नम् ॥ (यथा, कथासरित्सागरे । ३० । ८७ ।
"अङ्गीचक्रे सहायत्वं राजा तस्यारिमर्द्दने ॥")
सहारः, पुं, (सहते इति । सह + "तुसाहिभ्यश्च ।" उणा० ३।१३६। इत्यारन् ।) आम्रवृक्षः । इत्युणादिकोषः ॥ महाप्रलयः । इति हलायुधः ॥
सहारोग्यः, त्रि, (आरोग्येण सह वर्त्तमानः ।) नीरुक् । इति हेमचन्द्रः ॥
सहार्हः, त्रि, हार्द्देन सह वर्त्तमानः ॥ सप्रेमः । स्नेहयुक्तः ॥
सहितः, त्रि, (सं + धा + क्तः । "समो वा हितततयोः ।" ६ । १ । १४४ । इत्यस्य वार्त्तिकोक्त्या मलोपः ।) सहशब्दात् इतच् प्रत्ययेन च निष्पन्नः । इति सिद्धान्तकौमुदी ॥ समभिव्याहृतः । संयुक्तः । (मिलितः । यथा, मनुः । ६ । २१२ ।
"सोदर्य्या विभजेरंस्ते समेत्य सहिताः समम् ।
भ्रातरो ये च संसृष्टा भगिन्यश्च सनाभयः ॥")
संहितः । सम्यग्ज्ञितः । इति मुग्धबोधव्याकरणम् ॥ हितेन सह वर्त्तमानश्च ॥
सहिता, [क्र] त्रि, (सहते इति । सह + लच् । "तीषसहेति ।" ७।२।४८ । इति प्रत्ये इट् ।) सहनशीलः । सोढा । इति सिद्धान्तकौमुदी ॥
सहित्रं, क्ली, (सह्यते अनेनेति । सह + "अर्त्तिलूधूसूखनसहचर इत्रः ।" ३ । २ । १८४ । इति इत्रः ।) सहनकरणम् । इति व्याकरणम् ॥
सहिष्णुः, त्रि, (सहते इति । सह + "अलंकृञ्निराकृञ्भ्यः ।" ३ । २ । १३६ । इति इष्णुच् ।) सहनशीलः । तत्पर्य्यायः । सहनः २ क्षन्ता ३ तितिक्षुः ४ क्षमिता ५ क्षमी ६ । इत्यमरः । १ । ७ । ३१ ॥ (यथा, किरातें । २ । ५० ।
"अपरागसमीरणेरितः
क्रमशीर्णकुलम्लसन्ततिः ।
सुकरस्तरुवत्सहिष्णुना
रिपुरुन्मूलयितुं मघानपि ॥")
सहिष्णुता, स्त्री, (सहिष्णोर्भावः । सहिष्णु + तल् ।) सहिष्णोर्भावः । तत्पर्य्यायः । तितिक्षा २ क्षमा ३ क्षान्तिः ४ । इति जटाधरः ॥ (यथा, सुश्रुते । ४ । २४ ।
"अमक्षमपिपासोष्णशीतादीनां सहिष्णुना ॥")
सहुरिः, पुं, (सहते इति । सह + "अलिसहीकरिन् ।" उणा० २ । ७३ । इति उरिन् ।) सूर्य्यः । इत्युणादिकोषः ॥

सहुरिः, स्त्री, (सह सहने + उरिन् ।) पृथिवी । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

सहृदयः, त्रि, (हृदयेन अन्तःकरणेन सह वर्त्तमानः ।) प्रसन्नमनाः । इत्यमरटीकायां भरतः । ३ । १ । ३ ॥ (यथा, रामायणे । २ । ३ । २२ । "कुरु साधुप्रदानं मे वाले सहृदया त्वसि ॥")

सहृल्लेखं, क्ली, (हृल्लेखेन सह वर्त्तमानम् ।) विचिकित्सितान्नम् । यथा,—

"विचिकित्सा तु हृदये अन्ने यस्मिन् प्रजायते ।
सहृल्लेखन्तु विज्ञेयं पुरीषन्तु स्वभावतः ॥"

इति प्रायश्चित्तविवेकः ॥

सहोक्तिः, स्त्री, (सह उक्तिः ।) अलङ्कारविशेषः । यथा,—

"सहोक्तिः सहभावश्चेत् भासते जनरञ्जनः ।
दिगन्तमगमत्तस्य कीर्त्तिः प्रत्यर्थिभिः सह ॥"

इति चन्द्रालोकः ॥

(अस्य लक्षणोदाहरणानि यथा, साहित्यदर्पणे । १० । ७०१ ।

"सहार्थस्य बलादेकं यत्र स्याद्वाचकं द्वयोः ।
सा सहोक्तिर्मूलभूतातिशयोक्तिर्वदा भवेत् ॥"

अतिशयोक्तिरप्यत्राभेदाध्यवसायमूला कार्य्यकारणपौर्वापर्यविपर्य्ययरूपा च । अभेदाध्यवसायश्चात्र मूलमपि श्लेषभित्तिका अन्यथा च । क्रमेणोदाहरणम् ।

"सहाधरदलेनास्या यौवने रागभाक् प्रियः ॥"

अत्र रागपदे श्लेषः ।

"सह कुमुदकदम्बैः कामसुखानयन्तः
सह घनतिमिरौघैर्धैर्य्यसत्त्वारयन्तः ।
सह सरभिजषण्डैः स्वान्तमामीलयन्तः
प्रतिदिशमगमंतांशोरंशवः सप्तरन्ति ॥"

इदं मम । अत्रौत्पत्तादीनां सम्बन्धिभेदादेव भेदो न तु श्लिष्टतया ।

"समसेव नराधिपेन सा
गुरुणमोहविमुप्रचेतसा ।
अगमत्तरु तैलबिन्दुना
तनुदीपार्चिरिव क्षितिक्षतम् ॥"

इत्यत्र मालत्यापि सम्भवति । तयोदाहृते सह कुमुदकदम्बैरित्यादौ ।

"लक्ष्मणेन समं रामः काननं गहनं ययौ ।"

इत्यादौ चानतिशयोक्तिमूलत्वाभावान्नायमलङ्कारः ॥ * ॥)

सहोटजः, पुं, (उटजेन सह वर्त्तमानः ।) मुनीनां पर्णशाला । यथा,—

"मुनीनाञ्च विनाकृत्वा पर्णोटिजसहोटजौ ।"

इति हारावली ॥

सहोढः, पुं, (ऊढ्वा सह वर्त्तमानः ।) दारग्रहणपूर्व्वासंगतपुत्रविशेषः । इति जटाधरः ॥

"या गर्भिणी संस्क्रियते ज्ञाताज्ञातापि वा मया ।
जातो मयीति सोढुः स गर्भो भवति सहोढ इति चोच्यते ॥"

इति मानवे ८ अध्यायः ॥

या गर्भवती अज्ञातगर्भा ज्ञातगर्भा वा परिणीयते स गर्भस्तस्यां जातः परिणेतुः पुत्रो भवति सहोढ इति व्यपदिश्यते । इति कुल्लूकभट्टः ॥ (सोढ्रेन सहृदयेन सह वर्त्तमाने, त्रि । यथा, मनुः । ९ । २७० ।

"न सोढ्रेन विना चौरं घातयेद्धार्म्मिको नृपः ।
सहोढ़ं सोपकरणं घातयेद्विचारयन् ॥")

सहोदरः, पुं, (उदरेण सह वर्त्तते इति । सह समानं उदरं यस्येति वा ।) एकमाद्यगर्भजातभ्राता । तत्पर्य्यायः । सहज २ सोदर ३ भ्राता ४ सगर्भः ५ समानोदर्य्यः ६ सोदर्य्यः ७ । इति जटाधरः ॥ (यथा, मनुः । ९ । १९२ ।

"जनन्यां संस्थितायान्तु समं सर्व्वे सहोदराः ।
भजेरन् मातृकं रिक्थं भगिन्यश्च सनाभयः ॥")

सहोबलं, क्ली, (सहसा तेजसा सह वलमत्रेति ।) दौरात्म्यम् । इति केचित् ॥

सहोरः, त्रि, (सहते सर्व्वमिति । सह + "किप्रोरादयश्च ।" उणा० १ । ६६ । इति ओरन् ।) साधुः । इत्युणादिकोषः ॥

सह्यं, क्ली, (सह्यते इति । सह + यत् ।) आरोग्यम् । साम्यम् । सुमधुरम् । इति शब्दरत्नावली ॥ (प्रियम् । यथा, महाभारते । ३ । २७७ । १० ।

"ततस्तं प्रत्युवाचाथ मारीचो राक्षसेश्वरम् ।
किन्ते सह्यं मया कार्य्यं करिष्यामि वचोऽपि तत् ॥")

सह्यः, पुं, पर्व्वतविशेषः । इति मेदिनी ॥ (यथा, रघुः । ४ । ५२ ।

"अमह्यविक्रमः सह्यं दूरात् सुक्तसुदन्वता ।
नितम्बमिव मेदिन्याः सक्तांशुकमलक्ष्यत ॥")

स च पुनराख्यदेशस्य उत्तरपश्चिमदिशि वर्त्तते ॥

सह्यः, त्रि, (सोढुं शक्यः । सह + "शक्यसहोश्च ।" ३ । १ । ९९ । इति यत् ।) सोढव्यः । सहनीयः । इति मेदिनी ॥ (यथा, मार्कण्डेये । १०६ । ५६ ।

"सह्यं भवत्ते तेजो भूतानां भूतभावन ! ॥")

सा, स्त्री, गौरी । लक्ष्मीः । इति शब्दरत्नावली ॥ पूर्व्वोक्तपरामर्शविषयीभूता । प्रसिद्धा । इति स्त्रीलिङ्गतच्छब्दस्य प्रथमैकवचननिष्पन्ना । इति व्याकरणम् ॥ (यथा, साहित्यदर्पणे ।

"सङ्गमविरहविकल्पे वरमिह विरहो न सङ्गमस्तस्याः ।
सङ्गे सैव तथैका त्रिभुवनमपि तन्मयं विरहे ॥")

सांख्यं, क्ली, (संख्या सम्यग्ज्ञानं सा अस्त्यत्रेति । संख्या + अण् ।) सम्यक् ख्यायते प्रकाश्यते वस्तुतत्त्वमनयेति संख्या सम्यक् ज्ञानं तस्यां प्रकाशमानमात्मतत्त्वं सांख्यम् । इति श्रीभगवद्गीतासटीकायां श्रीधरस्वामी ॥ सकलदर्शनान्तर्गतदर्शनशास्त्रविशेषः । तत्पर्य्यायः । कापिलम् २ । इति हेमचन्द्रः ॥ यथा,—

"सप्तमः कपिलो नाम सिद्धेशः कालविप्लुतम् ।
प्रोवाचासुरये सांख्यं तत्त्वग्रामविनिर्णयम् ॥"

इति श्रीभागवते । १ । ३ । १० ॥

अपि च मातृके । ३ । २६ ।

"सांख्यं संख्यात्मकत्वाच्च कपिलादिभिरुच्यते ।"

अथ सांख्येराख्यायते परिणामवादे परिपन्थिनि जागरूके कर्षंकारं विवर्त्तवाद आदरणीयो भवेदेव हि तेषामाशयः । संक्षेपेण हि सांख्यशास्त्रे चतस्रो विद्याः संभाव्यन्ते । कश्चिदिक्षति-रेव कश्चिदिक्षतिः प्रकृतिः स । कश्चिदुभय इति । तत्र केवला प्रकृतिः । प्रधानपदेन वेदनीया मूलप्रकृतिः । नास्यावन्यस्य कस्यचिदिक्षतिः । प्रकरोतीति प्रकृतिरिति युत्पत्त्या सत्त्वरजस्तमोगुणानां साम्यावस्थाया अभिधानात् । तदुक्तम् । मूलप्रकृतिरविकृतिरिति । मूलञ्चासौ प्रकृतिश्चेति मूलप्रकृतिः । महदादेः कार्य्यकलापस्यासौ मूलं न चास्य प्रधानस्य मूलान्तरमस्ति चानवस्थापातात् । नच बीजाङ्कुरवदनवस्थादोषो न भवति इति वाच्यम् । प्रमाणाभावादिति भावः । प्रकृतयश्च महदहङ्कारतन्मात्राण्यपि । तदुक्तम् । महदाद्याः प्रकृतिविकृतयः सप्तेति । अस्यार्थः । प्रकृतयश्च ता विकृतयश्चेति प्रकृतिविकृतयः सप्त महदादीनि तत्त्वानि । तत्रान्तःकरणादिपदेनैव महत्तत्त्वमहङ्कारप्रकृतिः मूलप्रकृतेस्तु विकृतिः । एवमहङ्कारतत्त्वं अभिमानापरनामधेयमहत्तो विकृतिः । प्रकृतिश्च तदेवाहङ्कारतत्त्वं तामसं सत् पञ्चतन्मात्राणां सूक्ष्माभिधानम् । तदेव सात्त्विकं सत् प्रकृतिरेकादशेन्द्रियाणां बुद्धीन्द्रियाणां चक्षुःश्रोत्रघ्राणरसनात्वगाख्यानां कर्म्मेन्द्रियाणां वाक्पाणिपादपायूपस्थाख्यानामुभयात्मकस्य मनसश्च रजसस्तूभयत्र क्रियोत्पादनद्वारेण कारणमस्तीति न वैयर्थ्यम् । तदुक्तमीश्वरकृष्णेन ।

"अभिमानोऽहङ्कारस्तस्मात् द्विविधः प्रवर्त्तते सर्गः ।
एकादशकश्च गणस्तन्मात्रः पञ्चकश्चैव ॥
सात्त्विकमेकादशकः प्रवर्त्तते वैकृतादहङ्कारात् ।
भूतादेस्तन्मात्रः स तामसस्तैजसादुभयम् ॥
बुद्धीन्द्रियाणि चक्षुःश्रोत्रघ्राणरसनात्वगाख्यानि ।
वाक्पाणिपादपायूपस्थाख्यानि कर्म्मेन्द्रियाणाहुः ॥"

उभयात्मकमत्र मनःसङ्कल्पविकल्पाभ्यामिन्द्रियमिति । विकृतश्च तत्त्वकौमुद्यामाचार्य्यवाचस्पतिभिः । किमयता विकृतयश्च वियदादीनि पञ्चभूतानि । एकादशेन्द्रियाणि च । तदुक्तं गौडपादकारिकायां विकार इति षोडशमंख्यावच्छिन्नो गणषोडशको विकार एव न प्रकृतिरित्यर्थः । यद्यपि पृथिव्यादयो गोघटादीनां प्रकृतिस्तथापि न ते पृथिव्यादिसत्त्वान्तरमिति न प्रकृतिः । तत्त्वान्तरोपादानत्वञ्च प्रकृतित्वमभिमतं गोघटादीनां शुक्लत्वेन्द्रियग्राह्यत्वयोः समानत्वेन तत्त्वान्तरत्वाभावः । सत्त्व शब्दस्यापरसामान्यसंज्ञा पूर्व्वपूर्व्वसूक्ष्मभूतपृथिव्यादिभ्यः पञ्च महाभूतानि

विषदादीनि क्रमेणैकद्वित्रिचतुःपञ्चगुणानि जायन्ते। इन्द्रियवृत्तिषु प्रागेवोक्ता। उक्तञ्च। प्रकृतेर्महान् ततोऽहङ्कारः तस्माच्चगणश्च षोड़शकः तस्मादपि षोड़शकात् पञ्चभ्यः पञ्चभूतानीति। अनुभवात्मकः पुरुषः। तदुक्तम्। न प्रकृतिर्न विकृतिः पुरुष इति। पुरुषस्तु कूटस्थो नित्यः परिणामी न कस्यचित्। प्रकृतिर्नापि विकृतिः कस्यचिदित्यर्थः। एतत्सर्वविप्रतिपत्तिनिराकरणेन प्रमाणत्रयमभिमतम्। तदप्युक्तम्। दृष्टमनुमानमाप्तवचनं सर्वप्रमाणसिद्धत्वात् त्रिविधं प्रमाणमिष्टं प्रमेयसिद्धिः प्रमाणादृतीति। इह कार्य्यकारणभावे चतुर्द्धा विप्रतिपत्तिः प्रसरति। असतः सज्जायत इति बौद्धताः सङ्गिरन्ते। नैयायिकादयः सतोऽसज्जायते इति। वैदान्तिनः सतो विवर्त्तः कार्य्यजातं न वस्तु सदिति। सांख्याः पुनः सतः सज्जायत इति। तत्रासतः सज्जायत इति न प्रामाणिकः पक्षः। असतो निरूपाख्यस्य शशविषाणवत् कारणत्वानुपपत्तेः तुच्छानुच्छयोस्तादात्म्यानुपपत्तेश्च। नापि सतोऽसज्जायते कारकव्यापारात् प्रागसतः शशविषाणवत् सता सम्बन्धस्याक्षमोक्तेः। न हि नीलं निपुणतमेनापि पीतं कर्त्तुं पार्य्यते। ननु सत्त्वासत्त्वे घटस्य धर्म्मावितिचेत्तदयुक्तम्। असति धर्म्मिणि तद्धर्म्मे इति व्यपदेशानुपपत्तेः धर्म्मिणः सत्तापत्तेः। तस्मात् कारकव्यापारात् प्रागपि कार्य्यम्। सदेव सत्तयाभिव्यक्तिरूपपद्यते। यथा पीड़नेन तिलेषु तैलस्य दोहनेन सौरभेयीषु पयसः। असतः कारणे किमपि निदर्शनं दृश्यते। किञ्च कार्य्येण कारणं सम्बद्धं तज्जनकं असम्बद्धं वा प्रथमे कार्य्यस्य सत्त्वमायातं सत्तोरेव सम्बन्ध इति नियमात्। परमे सर्वं कार्य्यजातं सर्वस्माज्जायेत असम्बद्धत्वाविशेषात्। तदाह्यपि सांख्याचार्य्यः।

"असदकरणादुपादानग्रहणात् सर्वसम्भवाभावात्। शक्तस्य शक्यकरणात् कारणभावाच्च सत्कार्य्यम्॥"

अधोमनुष्यस्यमहदपि तदेव जनयति यच्च यस्मिन् शक्तिश्च कार्य्यदर्शनोन्नेयेति तच्च संगच्छते। तिलेषु तैलजननशक्तिरित्यत्र तैलस्यासत्त्वे सम्बद्धत्वासम्बद्धत्वविकल्पेन तच्छक्तिरिति निरूपणायोगात् कार्य्यकारणयोरभेदाच्च। कार्य्यस्य सत्त्वं कारणात् पृथक् न भवति पटस्तन्तुभ्यो न भिद्यते तद्धर्म्मत्वाच्च यदेवं न तदेवं यथा गौरश्वः। तद्धर्म्मश्च पटः तस्मान्नार्थान्तरं नहि प्रत्येकं तन्तव आवरणकार्य्यं कुर्य्युरिति चेत्र। संख्याभेदेनाविभूतपटभावानां प्रावरणार्थक्रियाकारित्वोपपत्तेः। यथा हि। कूर्म्मोऽङ्गानि कूर्म्मशरीरे निविशमानानि तिरोभवन्ति निःसरन्ति चाविर्भवन्ति सर्वं कारणमस्यादेः घटादयो विशेषा निःसरन्त आविर्भवन्त्यन्तर्भवन्ति निविशमानाश्चिरोभवन्तो विनश्यन्तीत्युच्यन्ते न पुनरसतामुत्पत्तिः सतां वा विनाशः। यथोक्तं भगवद्गीतायाम्। नासतो विद्यते भावो नाभावो विद्यते सतः। इति। ततश्च कार्य्यानुमानात्तत्प्रधानसिद्धिः। तदुक्तम्। असदकरणादुपादानग्रहणात् सर्वसम्भवात्। शक्तस्य शक्यकरणात् कारणभावाच्च सत्कार्य्यमिति। नापि सतो ब्रह्मतत्त्वस्य विवर्त्तः प्रपञ्चः बाधानुपलम्भात्। अधिष्ठानारोप्ययोः चिज्जड़योः कलधौतरौप्यादिवत् सारूप्याभेदेनापि संभवाच्च। तस्मात् सुखदुःखमोहात्मकस्य तथाविधकारणमवधारणीयम्। तथा च प्रयोगः। विमतं भावजातं सुखदुःखमोहात्मकं तदन्वितत्वात् यत् येनान्वीयते तत्तत्कारणकं यथा रूचकादिकं सुवर्णान्वितं सुवर्णकारणकं तथा चेदं तस्मात्तथेति। तच्च जगत्कारणे येयं सुखात्मकता तत् सत्त्वम्। या दुःखात्मकता तद्रजः। या च मोहात्मकता तत्तम इति त्रिगुणात्मककारणसिद्धिः। यथा हि प्रत्येकं भावास्त्रैगुण्यवन्तोऽनुभूयन्ती यथा मैत्रदारेषु सत्त्ववती मैत्रस्य सुखमाविरस्ति तं प्रति सत्त्वगुणप्राबल्यात्तत्पत्नीनां दुःखं ताः प्रति रजोगुणप्राबल्यात् तामसभृत्यानस्य चैत्रस्य मोहो भवति तं प्रति तमोगुणसद्भावात्। एवमन्यदपि घटादिकं लभ्यमानं सुखं करोति परैरपि क्रियमाणं दुःखाकरोति उदासीनस्योपेक्षाविषयत्वेनोपतिष्ठते उपेक्षाविषयत्वं नामोहः तुच्छ वैचित्र्ये प्रत्यक्षाद्वातोर्मोहशब्दनिष्पत्तेः उपेक्षणीयेषु चित्तवृत्त्यनुदयात्तस्मात् सर्वं भावजातं सुखदुःखमोहात्मकं त्रिगुणप्रधानकारणकमवगम्यते। तथा च श्वेताश्वतरोपनिषदि श्रूयते।

"अजामेकां लोहितशुक्लकृष्णां
बह्वीं प्रजां जनयन्तीं सरूपाम्।
अजो ह्येको जुषमाणोऽनुशेते
जहात्येनां भुक्तभोगामजोऽन्यः॥" इति॥

अत्र लोहितशुक्लकृष्णशब्दा रजःसत्त्वतमःप्रकाशकत्वावरकत्वसाधर्म्म्यात् रजःसत्त्वतमोगुणत्वप्रतिपादनपराः। ननुचेतनं प्रधानं चेतनानधिष्ठितं महदादिकार्य्ये न व्याप्रियते अतः केनचित् चेतनाधिष्ठात्रा भवितव्यम्। तथा च सर्व्वार्थदर्शी। परमेश्वरः स्वीकार्य्यः स्यादिति चेत्। तदसङ्गतौ अचेतनस्य। यथा वत्सविवृद्ध्यर्थमचेतनं क्षीरं प्रवर्त्तते। यथा च अचेतनं लोकोपकाराय प्रवर्त्तते। तथा च प्रकृतिरचेतनापि पुरुषविमोक्षाय प्रवर्त्स्यति। तदुक्तम्। वत्सविवृद्ध्यर्थं क्षीरस्य यथा प्रवृत्तिरेतस्याः पुरुषविमोक्षनिमित्तं तथा प्रवृत्तिः प्रधानस्येति। यस्तु परमेश्वरः करुणया प्रवर्त्तक इति परमेश्वरास्तित्वादिनां डिण्डिमः स प्रायेण गतः विकल्पानुपपत्तेः। स किं सृष्टेः प्राक् प्रवर्त्तते सृष्ट्युत्तरकालं वा। आद्ये शरीराद्यभावेन दुःखानुपपत्तौ जीवानां दुःखप्रहानेच्छानुपपत्तिः। द्वितीये परस्पराश्रयप्रसङ्गः। करुणया सृष्टिः सृष्ट्वा कारुण्यमिति तस्मादचेतनस्यापि चेतनानधिष्ठितस्य प्रधानस्य महदादिरूपेण परिणामः पुरुषार्थप्रयुक्तप्रधानपुरुषसंयोगनिमित्तः। यथा। निर्व्यापारस्याप्ययस्कान्तसन्निधानेन लोहितस्य व्यापारः। तथा निर्व्यापारस्य पुरुषस्य सन्निधानेन प्रधानव्यापारो युज्यते। प्रकृतिपुरुषसम्बन्धश्च पङ्ग्वन्धवत् परस्परापेक्षानिबन्धनः। प्रकृतिर्हि भोग्यतया भोक्तारं पुरुषमपेक्षते। पुरुषोऽपि भेदाग्रहाद्बुद्धिच्छाया पन्नो तन्नतं दुःखत्रयं वारयमाणः कैवल्यमपेक्षते। तत्प्रकृतिपुरुषविवेकनिबन्धनः। न च तदन्तरेण मुक्तमिति कैवल्यार्थं पुरुषः प्रधानमपेक्षते। यथा खलु कौचित् पङ्ग्वन्धौ पथि सार्थेन गच्छन्तौ दैवक्रतादुपप्लवात् परित्यक्तसार्थौ मन्दमन्दमितस्ततः परिभ्रमन्तौ भयाकुलौ दैवयोगात् संयोगमुपगच्छेताम्। तत्र चान्धेन पङ्गुः स्कन्धमारोपितः पङ्गुर्दृष्टिर्तेन मार्गेणान्धः समीहितं स्थानं प्राप्नोति पङ्गुरपि स्कन्धाधिरूढ़ः तथा परस्परापेक्षप्रधानपुरुषनिबन्धनः सङ्गः पुरुषस्य दर्शनार्थं कैवल्यार्थतया प्रधानस्य पङ्ग्वन्धवत् उभयोरपि समन्वस्तत्कृतः सर्गः इति। ननु पुरुषार्थनिबन्धना भवतु प्रकृतेः प्रवृत्तिः निवृत्तिस्तु कथमुपपद्यत इति चेदुच्यते यथा भर्त्रा दृष्टदोषा स्त्रैरिणी पुनर्भर्त्तारं नापेक्षति यथा वा कृतप्रयोजना नर्त्तकी नर्त्तने तथा प्रकृतिरपि यथोक्तं रङ्गस्य दर्शयित्वा निवर्त्तते नर्त्तकी यथा वृत्यात् पुरुषस्य तथानन्दं प्रकाश्य निवर्त्तते प्रकृतिरिति। तदेवं निरीश्वरसांख्यशास्त्रप्रवर्त्तकः कपिलानुसारिणां मतमुपन्यस्तम्। इति माधवाचार्य्यकृतसर्वदर्शनसंग्रहे सांख्यदर्शनम्॥ अस्य चत्वारः अध्यायाः। तत्र प्रकृतिपुरुषयोरुभयोः दृष्टिकर्त्तृत्वं अन्वयमुखेन स्थापितम्। तत्त्वानां संख्यानञ्च कृ— इति केचित्॥

सांघातिकः त्रि, (संघाते साधुः। संघात+"गुरादिभ्यष्ठञ्।" ४।४।१०३। इति ठञ्।) सम्यक्प्रकारेण घटनकारकः। मारात्मकः॥ लक्षनञ्चाधिकयोड़शकञ्चक्रम्। यथा,—

"जन्मादौ कर्म्म ततोऽपि दशमं सांघातिकं
योड़शकम्॥"

तत्फलम्।

"दैवत्रिविधवस्तूनां प्राप्तिः सांघातिके तथा।"
इति ज्योतिस्तत्त्वम्॥

सांदृष्टिकं, क्ली, (संदृष्टौ प्रत्यक्षे भवम्। सदृष्टि+ठञ्।) सद्यःफलम्। इत्यमरः॥ दृष्टिपारक्यन्यायः। यथा। दौहित्रान्नस्यसन्नाशाभावे पितुरधिकारवत् दौहित्रान्नपिण्डसन्नाशाभावे पितामहाधिकारस्य सांदृष्टिकन्यायेनासङ्गत्वाच्च। यथा पित्रभावे माता तथा पितामहाभावे पितामह्यीति सांदृष्टिकन्यायेन पितामहाधिकारस्य सिद्धत्वाच्च। इति श्रीरघुनन्दनभट्टाचार्य्यकृतकालिकाक्रमसंग्रहः॥

सांयात्रिकः, पुं, (संयात्रा द्वीपान्तरगमनम्। सा प्रयोजनमस्येति। संयात्रा+"तदस्य प्रयोजनम्।" इति ठञ्।) पोतवणिक्। इत्यमरः। १। १०। १२॥ द्वे वाहित्रगामिनि वणिग्जने। संपूर्व्वा यातिर्द्वीपान्तरगमनवृत्तिरुक्तस्तस्यानुमिनोति चः स्त्रियामाप् संयात्रा द्वीपान्तरगमनं तदस्य प्रयोजनमिति विकारसंघेति ष्ठिकः। सम्यक् यात्रा संयात्रा तया व्यवहरतीति ठक् वा कादिति ष्ठिको वा। इति भरतः॥ (यथा, हरिवंशे। ५८। १४।

"सिद्धिः सांयात्रिकाणान्तु वेला त्वं सागरस्य च॥")

सांयुगीनः, त्रि, (संयुगे साधुः। संयुग+"प्रतिजनादिभ्यः खञ्।" ४। ४। ६६। इति खञ्।) युद्धकुशलः। रणे साधुः। इत्यमरः। २। ८। ७७॥ (यथा, रघुः। ११। ३०।

"इत्यपाक्तमखविघ्नयोस्तयोः
सांयुगीनमभिनन्द्य विक्रमम्।
ऋत्विजः कुलपतेर्यथाक्रमं
वाग्यतस्य निरवर्त्तयन् क्रियाः॥")

सांवाहिकं, क्ली, (सं+रुल ध्वनौ+"अभिविधौ भावे इनुण्।" ३। ३। ४४। इति इनुण्। "अग्निगुणः।" ५। ४। १५। इति स्वार्थे अण्।) हृष्टस्य सम्यक् शब्दः। इति सुग्धबोधव्याकरणम्॥ संपूर्व्वे रुल ध्वनौ भावे णिनि णिलोपे वृद्धौ सांवाहिक इति स्थिते ततः स्वार्थे ष्ठञ् णित्त्वे त्रिवादेश्च इति वृद्धौ यथोर्लोपे इत्यकारलोपे सांवाहिकं हृष्टस्य सम्यक् शब्दो व्याप्त इत्यर्थः। इति तट्टीकायां दुर्गादासः॥ (यथा, अनर्घराघवे। ७। ५७।

"यं दोर्मात्रपरिच्छदो युधि मुहुर्निक्षिप्य प्रभीक्षन्मुहुः
संतेने दृशभिर्निजैरपि सखे! सांवाहिकं रावणः॥")

सांवत्सरः, पुं, (संवत्सरं तज्ज्ञानोपयोगि शास्त्रं वक्ति अधीते वा। संवत्सर+अण्।) गणकः। इत्यमरः। २। ८। १४॥ (यथा, वृहत्संहितायाम्। २। १०—११।

"मुहूर्त्ते निधिनक्षत्रस्तवत्सायने तथा।
सर्व्वाण्येवाकुलानि स्युर्न स्यात् सांवत्सरो यदि॥
तस्मादाज्ञाभिगन्तव्यो विद्वान् सांवत्सरो नृपैः।
जयं यशः श्रियं भोगान् श्रेयश्च समभीप्सता॥")

अस्य लक्षणादिकं तत्रैव २ अध्याये विशेषतो द्रष्टव्यम्॥ * ॥ फक्ते, पञ्चमि च क्ली। इति पाणिनिः। ४। ३। १६॥ संवत्सरस्येदमिति। अण्।) संवत्सरसम्बन्धिनि, त्रि॥ (यथा, हरिवंशे। १४०। ३।

"स सांवत्सरदीक्षायां दीक्षितः षट्पुरात्मके।
व्यपत्रीयाय गर्भे तोरे सुनक्षा सुनिजुष्टया॥")

सांवत्सरिकः, त्रि, (संवत्सर+"कालात् ठञ्।" ४। ३। ११। इति ठञ्।) संवत्सरे भवः। संवत्सरं चाप्य भूतः। प्रतिवर्षकर्त्तव्यश्राद्धम्। यथा अथ सांवत्सरिकश्राद्धम्। तत्र गोभिलः। अतः ऊर्द्धं संवत्सरे संवत्सरे प्रेतायान्नं दद्यात् यस्मिन्नहनि प्रेतः स्यात् इति। अत ऊर्द्धं सपिण्डीकरणान्तश्राद्धनिमित्तादाद्यसंवत्सरादूर्द्धं संवत्सरे संवत्सरे प्रतिवर्षं यस्मिन्नहनि मृतस्तस्मिन्नहनि मृताय दद्यात्। व्यासः। प्रतिसंवत्सरञ्चैवमेकोद्दिष्टं मृताहनि। एतेन सपिण्डीकरणापकर्षे आद्यसंवत्सरेऽपि मृताहे श्राद्धान्तरं कर्त्तव्यमिति मैथिलोक्तं हेयम्। यक्तमाह हेमाद्रिधृतं वचनम्।

"पूर्णे संवत्सरे श्राद्धं षोड्शं परिकीर्त्तितम्।
तेनैव च सपिण्डत्वं तेनैवाब्दिकमिष्यते॥"

अत्र पूर्णसंवत्सरक्रियमाणश्राद्धादूर्ध्वमुभयनिर्व्वाहस्थापकृष्टसपिण्डीकरणश्राद्धादप्युभयनिर्व्वाहो न पूर्णसंवत्सरे आब्दिकान्तरम्। एवं पक्षदशश्राद्धेऽप्यन्वयम्। मत्स्यपुराणम्।

"ततः प्रभृति संक्रान्त्युपरागादिपर्व्वसु।
त्रिपिण्डमाचरेत् श्राद्धमेकोद्दिष्टं मृताहनि॥"

ततः प्रेतत्वपरीहारात् त्रिपिण्डं चैपुरुषम्।

निरुपपदन्तु मृताहशब्दः मृतसम्बन्धिमासपक्षतिथिविशेषपरः। उपपदात्तु क्वचित्तिथिविशेषमात्रपरः। यथा मृताहे प्रतिमासं कुर्य्यादित्यादौ। शब्दः।

"सपिण्डीकरणादूर्द्धं यत्र यत्र प्रदीयते।
तत्र तत्र त्रयं कुर्य्यात् वर्জ्जयित्वा मृताहनि॥
अमावास्यां त्रयो यस्य प्रेतपक्षेऽथवा पुनः।
सपिण्डीकरणादूर्द्धं तस्योक्तः पार्व्वणो विधिः॥"

त्रयं सम्प्रदानानां त्रयं कुर्य्यात् त्रिभ्यो दद्यात् इत्यर्थः। मृताहपर्य्युदस्तत्रितयेतरस्य प्रतिप्रसवमाह। अमावास्यामिति। प्रेतपक्षोऽत्र पित्रपक्षः अश्वयुक्कृष्णपक्ष इति यावत्। न तु कृष्णपक्षमात्रं कृष्णपक्षसामान्यपरत्वे अमावास्यापदवैयर्थ्यापत्तेः॥ * ॥ पित्रपक्षं विशेषयति हेमाद्रिमाधवाचार्य्यधृतं नागरखण्डम्।

"नभो वाथ नभस्यो वा मलमासो यदा भवेत्।
सप्तमः पित्रपक्षः स्यादन्यत्रैव तु पञ्चमः॥"

अत्र आषाढभाद्रयोरन्यतरस्य मलमासत्वे आषाढप्रेतपक्षस्य सप्तमपक्षस्य पित्रपक्षत्वात्। अत्र मृतस्यैव प्रेतपक्षमृतत्वं न तु मलमासभाद्रकृष्णपक्षमृतस्य। ततश्च नच मृतस्य वर्षान्तरे अश्वयुक्कृष्णपक्षेऽपि तच्छ्राद्धकरणे न पार्व्वणम्। किन्त्वेकोद्दिष्टमिति। अत्र पार्व्वणो विधिः पार्व्वणेतिकर्त्तव्यतार्थकैकोद्दिष्टविधिरिति नयवर्द्धमानप्रभृतयः। तन्नपूर्व्ववचनोक्तचैपुरुषिकस्य मृताहे पर्य्युदस्तस्य पार्व्वणो विधिरित्यनेन प्रतिप्रसवात्। तस्मादत्र सदैवतैकोद्दिष्टं न युक्तं किन्तु चैपुरुषिकं न तु षाट्पुरुषिकम्।

"कर्त्तृसमन्वितं मुक्त्वा तथान्यं श्राद्धयोड्शम्।
प्रत्याब्दिकञ्च गौणेषु पिण्डाः स्युः प्रकृतिस्थितिः॥"

इति छन्दोगपरिशिष्टवचनेन प्रत्याब्दिकयति-रेकेण षट्संख्यानियमात्॥ * ॥ एवममावास्यादिमरणनिमित्तेन मातुरपि प्रत्याब्दिकं पार्व्वणविधिनैव।

"अपुत्रा ये मृताः कैश्चित् स्त्रियो वा पुरुषाश्च ये।
तेषामपि च दातव्यं स्यादेकोद्दिष्टं न पार्व्वणम्।"

इत्यापस्तम्बवचने अपुत्रा इति विशेषणोपादानात् सपुत्राणां पार्व्वणाभ्यनुज्ञानात्। एतच्च मात्रादिचितयदैवतं कार्य्यम्। मात्रे पितामह्यै प्रपितामह्यै च पूर्व्ववत् ब्राह्मणान् भोजयित्वा इत्यन्नश्रद्धायां तथा दर्शनात्। अन्वष्टक्यदिननिमित्तेन पार्व्वणविधिना छन्दोगैरपि मात्रादिचितिकायां श्राद्धं कर्त्तव्यम्। न योषिद्भिः पृथक्श्राद्धावश्यकादिनाद्दृते। इति छन्दोगपरिशिष्टवचने विशेषतः प्रतिप्रसवात्। एवं सपिण्डीकरणेऽपि। एतच्च मृताहपार्व्वणं मातापित्रोरेव। तथा च हेमाद्रिधृतं कात्यायनवचनम्।

"सपिण्डीकरणादूर्द्धं पित्रोरेव हि पार्व्वणम्।
पितृव्यभ्रातृमातृणामेकोद्दिष्टं सदैव तु॥"

भ्रातृपदं सपत्नीभ्रातृपरम्। सपत्नीभावित्वञ्च भ्रातृपदस्य राजदन्तादित्वात् परनिपातः। ततश्च वाक्ये भ्रातृसपत्नीति न प्रयोज्यं किन्तु सपत्नीभ्रातरित्यादिकम्॥ * ॥ एवं सामिकौरसचैत्रजाभ्यां मृताहे पार्व्वणं कर्त्तव्यम्।

"औरसश्चैत्रजौ पुत्रौ विधिना पार्व्वणेन तु।
प्रत्यब्दमितरे कार्य्युरेकोद्दिष्टं सुता दश।"

इति जाबालवचनस्य।

"यत्र यत्र प्रदातव्यं सपिण्डीकरणात् परम्।
पार्व्वणेन विधानेन देयमग्निमता सदा॥"

इति मत्स्यपुराणवचनस्य चैकवाक्यत्वात्। उशनाश्च।

"प्रत्यब्दं दर्शवच्छ्राद्धं सांग्निः कुर्व्वीत वै द्विजः।
एकोद्दिष्टं सदा कुर्य्यान्निरग्निः श्राद्धदः सुतः।"

अत्र प्रागुक्तयुक्त्या प्रेतश्राद्धस्य एकोद्दिष्टाभिधानात् सांवत्सरिकश्राद्धे यदेकोद्दिष्टपदं तत् प्रेतश्राद्धधर्म्मग्राहित्वार्थम्। ततश्च योग्यत्वादेकार्घ्यादिलाभः। न तु यथा प्रेतश्राद्धे पित्रपशब्दस्थाने प्रेतपदोक्तिः तथा अत्रामीति वाच्यं सांवत्सरिके प्रेतत्वाभावात्तथाविधाभावोपपत्तेः। एवं प्रतिसांवत्सरिकश्राद्धे सम्बन्धार्थपदं आपणीःप्रार्थनं शेषभोजनञ्च कर्त्तव्यम्॥ रजस्वलायां विशेषयति गौतमः।

"अपुत्रा तु यदा भार्य्या सम्प्राप्ते भर्त्तुरब्दिके।
रजस्वला भवेत् सा तु कुर्य्यात् तत्पञ्चमे दिने॥"

कुर्य्याच्छ्राद्धमिति शेषः। यत्तु आदित्यपुराणे।

एकोद्दिष्टं चैवर्षिकेन सिद्धान्नेन कर्त्तव्यम्।
"एकोद्दिष्टन्तु कर्त्तव्यं पाकेनैव सदा स्वयम्।
अभावे पाकपात्राणां तदहः समुपोषणम्॥"

इति लघुहारीतवचनात्।

पाकपात्राभावः पाकसामग्र्याभावोपलक्षकः। तदापि नामश्राद्धं किन्तूपोषणमेव श्राद्धमानीयमित्यर्थः। स्वयमित्यभिधानात् अपाटवादिनि

न्यद्वारा कारयितव्यम्। अनश्नत उपवासेनैव आहम्यानीयेन तदकरणप्रायश्चित्तेन वा कृतं स्यात्। अनया श्रुत्यादिवचनादपि नैकादश्यामनुष्ठानमिति तन्न। पित्रुद्देशेन जातत्वेनैकादश्यां तदनुष्ठानस्य युक्तत्वात्। अन्यथा षोडशश्राद्धाधिकारिणः कदाचित्तत्राप्ये।

"यस्येतानि न दीयन्ते प्रेताहानि षोडश।
पिशाचत्वं ध्रुवं तस्य दत्तैः श्राद्धशतैरपि॥"

इति यमवचनेन षोडशश्राद्धाभावे प्रेतत्वपरिहारो न स्यात्। तस्माद्दुपवासो न श्राद्धार्थः किन्तु तदानीन्तनाकरणप्रायश्चित्तार्थः। यथा सकालाकृतसंस्कारे प्रायश्चित्तं कृत्वा कालान्तरे तत्करणं तथाचापि तद्दिने उपवासं कृत्वा एकादश्यां श्राद्धं कर्त्तव्यमिति। एकोद्दिष्टं मासद्वारा कार्य्यमित्यत्रापि गोत्रोत्सर्गत्वेन विशेषणीयम्।

"न कदाचित् सगोत्राय श्राद्धं कार्य्यमगोत्रकैः।"

इति प्रेतश्राद्धे ब्रह्मपुराणात्।

अत्र हि नागोत्रस्य साक्षात्कर्तृत्वं निषिध्यते सगोत्रायेत्यसमन्वयात्तेः। तस्मात् अगोत्रजैर्दारभूतैः सगोत्राय श्राद्धं न कार्य्यमित्यर्थः। तथा च पर्णुदासपक्षे गोत्रजद्वारा कारयितव्यमित्युक्तमेव। प्रसव्यपक्षे तु अगोत्रजविशेषणव्यर्थत्वात् गोत्रजलाभः। प्रेतश्राद्धधर्म्याधिकात् सांवत्सरिकमपि तथेति श्राद्धविवेकः। कल्पतरुरत्नाकरयोस्तु सगोत्रायेति पठितं समाक्षीर्यं; गोत्रं यस्य स सगोत्रः विद्यमानगोत्र इत्यर्थः। यमो श्राद्धं कर्त्तव्यं तस्य सगोत्रे विद्यमानेऽन्यगोत्रेण संवातान्तर्गतेन राज्ञा श्राद्धं न कारयितव्यमिति व्याख्यातत्व। एतत्पक्षेऽप्यूढ्युद्विवाहादीनामसगोत्रत्वेऽपि न निषेधः। वस्तुतस्तु सतृपाठेऽपि कर्म्मधारयापेक्षया बहुव्रीहेर्बलवत्त्वात् समाक्षीयत्व तत् गोत्रपक्षे तत्रैव अन्यगोत्रजद्वारा श्राद्धं न कार्य्यमित्यर्थः। अतो लघुहारीतवचने स्वयं पदं सगोत्रपरम्। अन्यथा ब्रह्मपुराणोक्तगोत्रजपदवैयर्थ्यापत्तेः॥ अर्थश्च भविष्यपुराणप्रभासखण्डयोः।

"श्रद्धानि पितृपक्षेषु न कुर्य्यात् श्राद्धमादरात्।
मातुश्चैव वरारोहे वत्सरान्ते मृताहनि।
गयाश्राद्धं महादेवि! पूजां यद्यामि नो हरिः॥"

मरीचिः।

"पतिव्रता ब्राह्मणी स्यात् स्त्रियोऽथ ब्रह्मचारिणः।
श्राद्धं समातृपक्षस्य पाराशैरभिधीयते॥"

इत्याद्यैः कालमाधवीयधृतैः वचनार्थैः सांवत्सरिकश्राद्धस्य स्वाधिकर्त्तृकत्वेनावश्यकत्वात् भविष्यन्मृताहे स्वयं कर्त्तृकत्वसमावेशेन स्वासात् पूर्वकालेऽपि प्रतिनिधीयते।

"अधिश्रावणि मासेऽपि परिवत्सरतोऽपि वा।
अनेन तु कार्य्येषु विधौ श्रेयेव न चिरं क्षिपेत्॥"

इति हेमाद्रौ मरीचिवचनार्थं प्रागर्थेनैवमेतिनिबन्धनम्। एवं सति प्रतिनिधिकरणस्य एकादश्यां क्रियते॥ * ॥ न च याकस्याङ्गत्वेन प्रधानतिथिकर्त्तव्यतानियम इति वाच्यम्।

"व्रतोपवासनियमे षटतिर्केका यदा भवेत्।
सा तिथिः सकला ज्ञेया पित्रर्थे चापराह्णिकी॥"

इति वचनेन मुहूर्त्तमात्रलाभेऽपि कर्त्तव्यतोपदेशात् तदानीं पाके तदसम्भवात्। एवमुदीच्याश्चैषमभोजनेऽपि न तन्नियमः। इति श्राद्धतत्त्वम्॥ (गयकै, पुं। यथा, दुर्गासप्तशतीतायाम्। २। १२।

"नासांवत्सरिके देये वस्त्रं भूतिमिच्छता।
चक्षुर्भूतो हि यत्रैष पापं तत्र न विद्यते॥")

सांवादिकः, पुं, (सम्यक् वादाय प्रभवतीति। संवाद+ठक्।) नैयायिकः। यथा,—

"नैयायिकः साधुवादः स्यात्सांवादिक आहितः॥"

इति जटाधरः॥

संवाददातरि, त्रि॥

सांशयिकः, त्रि, (संशयमापन्नः। संशय+"संशयमापन्नः।" ५। १। ७३। इति ठक्।) संशययुक्तः। तत्पर्य्यायः। संशयापन्नमानसः २। इत्यमरः। ३। १। ५॥ सन्दिहानः ३। इति जटाधरः॥ दे संशयविषये साधादौ। संशयमापन्नः सांशयिकः णिकः संशयमापन्नं मानसं यत्र स्थाणादौ स तथा। संशयमापन्नं मानसं यस्य स तथेति यद्वान्तपदार्थत्वे संशयितरि पुरुषादावप्येतच्छब्दप्रयोगः स्यादिति भरतः॥ (संशयविषयकः। यथा, मार्कण्डेये। १०। ४५।

"तद्ब्रूहि त्वं महाभाग यत् ते सांशयिकं हृदि॥")

सांस्थानिकः, त्रि, (संस्थाने व्यवहरतीति। संस्थान+"कठिनान्तप्रस्तारसंस्थानेषु व्यवहरति।" ४। ४। ७२। इति ठक्।) समानदेशीयः। इति सिद्धान्तकौमुदी॥ संस्थानयुक्तश्च॥

सांसार्गिकं, क्ली, दूषस्य दूषं याग्य सम्यक् सावः। इति संक्षिप्तसारोणादिवृत्तिः॥

साकं, व्य, सहार्थम्। इत्यमरः। ३। ४। ४॥ (यथा, कथासरित्सागरे। ४। १३६।

"अहं जनन्या गुरुभिश्च साक-
मायास्य लक्ष्मीमवसं चिराय॥")

साकल्यं, क्ली, (सकल+भावे ष्यञ्।) समुदायः। सकलस्य भावः। (यथा, मनुः। १२। २५।

"यो यद्गुणो देहे साकल्येनातिरिच्यते।
स तदा तद्गुणप्रायं तं करोति शरीरिणम्॥")

साकारः, त्रि, (आकारेण सह वर्त्तमानः।) आकारविशिष्टः। यथा,—

"साकारश्च निराकारं सगुणं निर्गुणं प्रभुम्।
सर्व्वाधारश्च सर्व्वेश सेच्छारूपं नमाम्यहम्॥"

इति ब्रह्मवैवर्त्ते गणपतिखण्डे। ३२। ३१॥

साकुलकः, पुं, (सकुलक एव। स्वार्थे कन्।) ब्राह्मविशेषः। सकुलकर इति गुर्ज्जरदेशीयभाषा। तत्पर्य्यायः। मत्सिषण्डः २ विकटः ३ यज्ञभूतकः ४ कुलकः ५ कर्व्वटकः ६ सकुलः ७। अस्य गुणाः। कषायत्वम्। रुचिकारित्वम्। दीपनत्वम्। सारकत्वम्। श्लेष्मवातनाशित्वम्। वक्त्ररञ्जनकत्वम्। लघुत्वञ्च। इति राजनिर्घण्टः॥

साकेतं, क्ली, अयोध्यानगरम्। इति शब्दरत्नावली॥ (यथा, रघुः। ५। ३१।

"जनस्य साकेतनिवासिनस्तौ
दृशेः सपत्न्यामिव मन्युमत्तौ॥")

साकुनकः, पुं, (सकुनु साधुः। सकुन+"गुडादिभ्यष्ठञ्।" ४। ४। १०३। इति ठञ्।) यवः। इति सिद्धान्तकौमुदी॥ (सकुनां समूहः। सकुन+"अचित्तहस्तिधेनोष्ठक्।" ४। २। ४७। इति ठक्।) सकुनसमूहे, क्ली। सकुनसम्बन्धिनि, त्रि॥ (सकुनैः प्रभवतीति। "तत्रे प्रभवति संतापादिभ्यः।" ५। १। १०१। इति ठञ्। सकुनसमर्थे च त्रि॥)

साक्षरं, त्रि, अक्षरयुक्तम्। अक्षरेण सह वर्त्तमानम्। इति बहुव्रीहिसमासनिष्पन्नम्॥

साक्षात्, व्य, प्रत्यक्षम्। (यथा, कुमारे। ६। २२।

"साक्षात् दृष्टोऽसि न पुनर्विद्मस्त्वां वयमञ्जसा।
प्रसीद कथयात्मानं न धियां पथि वर्त्तसे॥")

तुल्यम्। इत्यमरः। ३। ३। २४॥

साक्षी, [न्] त्रि, (अक्षेण दर्शनेन्द्रियेण सह वर्त्तमानं यत् तत् साक्षं प्रत्यक्षज्ञानम्। तदस्यास्तीति। साक्ष+इनिः।) दृष्टज्ञः। इति हेमचन्द्रः॥ तत्पर्य्यायः। प्रत्यक्षदर्शनः २। इति शब्दमाला॥ तस्य मिथ्याकथने असत्यने च दोषो यथा, महाभारते आदिपर्व्वणि

"दृष्टो हि साक्षी यः साक्ष्यं जानन्नप्यन्यथा वदेत्।
स पूर्व्वनाशनः सप्त कुले हन्यात्तथापरान्॥
यश्च कार्य्यार्थितत्त्वज्ञो जानन्नपि न भाषते।
सोऽपि तेनैव पापेन लिप्यते नात्र संशयः॥"

अपि च।

"ब्रह्मस्वस्याप्यहारी च मिथ्यासाक्ष्यप्रदायकः।
मित्रद्रोही कृतघ्नश्च त्रयस्ते ब्रह्मकल्मषाः॥
इति महापातकिनश्चिह्नं लोकेषु निन्दिताः।
कालसूत्रे च नरके पतन्ति ब्रह्मणः शतम्॥"

इति ब्रह्मवैवर्त्ते गणपतिखण्डे। ४४। ५०; ५४। अपरञ्च।

"मिथ्यासाक्ष्यं यो ददाति कामात् क्रोधात्तथा भयात्।
सभार्य्यो याचिकं वक्ति स कृतघ्न इति स्मृतः॥
मिथ्यासाक्ष्यं याचिकं वा भारते वक्ति यो नरः।
यावदिन्द्राश्चतुर्दश सर्व्वकल्पे वसेद्ध्रुवम्।
मन्वन्तरं वसित्वेवं सर्व्वभोगसमन्वितः।
भुक्त्वा च सर्व्वविघ्नघ्नं यक्षभूतेन ताडितः॥
सकलाङ्गो भवेत्तत्र भारते जन्मजन्मनि।
सप्तजन्मसु मूकत्वं पित्तेभ्यः सप्तभिः सह॥
ततो भवेत्स यक्षश्च महारण्ये च राक्षसः।
ततो भवेत्तरुः शुष्कस्ततः शुद्धः शुचिः॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ४८ अध्यायः॥ * ॥

सर्व्वशरीरेषु श्रीकृष्णस्य साक्षिरूपत्वं यथा,—
"स्थूलात् स्थूलतरं प्राप्तमतिसूक्ष्ममदर्शनम्।
स्थितं सर्व्वशरीरेषु साक्षिरूपमदृश्यकम्।
शरीरवन्तं सगुणमशरीरं गुणोत्करम्॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे। ७।६४-६५॥
(पुं, विष्णुः। इति महाभारतम्। १३।१४६।२५॥)

साक्ष्यं, क्ली, (साक्षिणो भावः कर्म्म वा। साक्षिन्+ष्यञ्। यद्वा, साक्षिणि भवम्। साक्षिन्+"दिगादिभ्यो यत्।" ४।३।५४। इति यत्।) साक्षिकर्म्म। यथा। मनुः।
"समक्षदर्शनात् साक्ष्यं श्रवणाच्चैव सिध्यति।"
एतत् प्रमाणमात्रोपलक्षणम्।
"अनुभावी च यः कश्चित् ब्रूयात् साक्ष्यं विवादिनाम्।"
इति तद्वचनान्तरात्॥
अतएवाज्ञातमपि साक्षिणमाह। मनुः।
"यत्रानिबद्धो वोक्षेत शृणुयाद्वापि किञ्चन।
पृष्टस्तत्रापि तद्ब्रूयात् यथादृष्टं यथाश्रुतम्॥"
अनिरुद्धत्वञ्च साक्षित्वेनानियुक्तः। परम्परयापि श्रवणमाह विष्णुः।
"उद्दिष्टसाक्षिणि मृते देशान्तरगतेऽपि वा।
तदभिहितश्रोतारः प्रमाणं नात्र संशयः॥"
अस्योत्तरसंज्ञामाह नारदः।
"साक्षिणामपि यत् साक्ष्यं स्वपक्षं परिभाषताम्।
अवधात् आवधाद्वापि स साक्षुत्तमसंज्ञकः॥"
स्वपक्षसम्बन्धिसाक्ष्यं परिभाषतां साक्षिणां यः स्वयं शृणोति अर्थिना आयते वा स अवधात् आवधादुत्तमसाक्षीत्यर्थः। एवं योऽर्थिना गूढतया प्रत्यर्थिवचनं श्रावितः स गूढसाक्षीत्याह स एव।
"अर्थिना स्वार्थसिद्ध्यर्थं प्रत्यर्थिवचनं स्फुटम्।
यः श्रावयते तदा गूढो गूढसाक्षी स उच्यते॥"
तेनान्यतरवाद्यभिहितार्थविषयकदृष्टकारणकं विज्ञापनं साक्ष्यमिति स्थितम्। तत्र नारदः।
"तेषामपि न सर्व्वेषां स्त्रीणां न स्त्री न दुष्टकृत्।
न बान्धवो न चारातिर्न भृत्यो न कृतो न दुष्टकृत्।
न बान्धवो न चारातिर्न भृत्यो न स्त्री न दुष्टकृत्।
कार्य्यं सदपि अन्यथा तद्विपरीतत्वेन। एवञ्च यदि परमधार्म्मिकत्वेन बान्धवादीनामपि सत्यवादित्वं निश्चीयते तदा तेऽपि साक्षिणो भवितुमर्हन्तीति। तेषां साक्ष्यविधायकं वक्ष्यमाणमनुवचनमपि एतद्विषयम्॥" याज्ञवल्क्यः।
"बान्धवाः साक्षिणो ज्ञेयाः सर्व्वसाक्ष्यक्रियासु तु।
यथाकामि यथार्थं सर्व्वं सर्व्वेण वा स्मृताः॥"
यथोत्तरा निष्फला येषां न बान्धवाः। त्रिभ्यो न्यूनाः भवन्तीत्यर्थः। यद्यपि यो यस्यातीन्द्रियस्य तत्त्वार्थस्य साक्षी। स्त्रीणां स्त्रियोऽन्धानामन्धाः। यथायथं ब्राह्मणानां ब्राह्मणाः क्षत्रियाणां क्षत्रियादयः। अभावे तु तत्तैर्न्यूना भवन्त्येव॥ ६॥ बान्धवा दृष्टसाक्षिवादमाह स एव।
"उभयानुमतः साक्षी भवेदेकोऽपि धर्म्मवित्।"
उभयानुमतत्वं धर्म्मवित्त्वञ्च नियतं तत्त्वम्। तदाह विष्णुः। अभिमतगुणसम्पन्नस्तूभयानुमतस्त्वेकोऽपि इति। अतएव औत्रियमप्येकं निषेधयति वृहस्पतिः।
"नव सप्त पञ्च वा श्रुतवारस्तथ एव वा।
उभौ तु श्रोत्रियौ साक्ष्यौ नैकं पृच्छेत् कदाचन॥"
एको मिलितगुणसम्पन्नः प्रधानकल्पः। तदभावे उभयानुमतमात्रोऽपि साक्ष्यन्तदाह नारदः।
"उभयानुमतौ यः स्याद्व्योर्विवदमानयोः।
भवत्येकोऽपि साक्षित्वे प्रत्ययः स्यात् स संसदि॥"
उभयानुमत एकोऽलुब्धत्वादिना सर्व्वजनप्रसिद्धश्चेत्तदा साक्षित्वे संसदि बहुजनसन्निधौ प्रत्ययः। तथात्वे खेचरादिसत्त्वेऽप्यकीर्त्तिभयात् सत्याभिधानसम्भवादित्याशयः। विचारस्य तत्त्वनिर्णयार्थत्वात्। तदाह मनुः।
"एकोऽप्यलुब्धः साक्षी स्यात् वक्ष्यः शुचोऽपि न स्त्रियः।
स्त्रीबुद्धेरस्थिरत्वात्तु दोषैश्चान्योऽपि ये स्मृताः॥"
एकोऽलुब्धस्तु साक्षी स्यादिति क्वचुकभट्टधृतपाठः। एको लुब्धस्त्वसाक्षी स्यादिति जीमूतवाहनधृतपाठस्तु न युक्तः। लुब्धाश्चेद् बहवोऽप्यसाक्षिणो भवितुमर्हन्तीति। एकपदस्य व्यर्थतापत्तेः। भवतु वा तत्पाठः तथाप्येक इत्यनुरोधात् तन्निषेधस्त्वेनालुब्धस्यैकस्य अनुमतिसत्त्वे धर्म्मवित्त्वमन्तरेण साक्षित्वं बोध्यम्। इत्यर्थतो न विरोधः। अतएव विश्वरूपप्रभृतीनां उभयानुमत एक एव साक्षीति व्याख्याने धर्म्मविदिति नोक्तम्। दोषैः स्त्रैयादिभिः। तथा च नारदः।
"स्तेनाः साहसिका धूर्त्ताः कितवा योधकाश्च ये।
असाक्षिणस्तु ते दृष्टास्तेषु सत्यं न विद्यते॥"
कितवा द्यूतकराः॥*॥ अपवादमाह उशनाः।
"दासोऽन्धो बधिरः कुष्ठी स्त्री बालः स्थविरादयः।
एतेऽप्यनभिमन्यन्ताः साक्षे साक्षिणो मताः॥"
स्थविरो ग्लानेन्द्रियग्रामः। आदिशब्दात् कितवादयः। उभयानुमताभावे शुचिक्रियत्वादिगुणयुक्तयेको ग्राह्यः। तथा च व्यासः।
"शुचिक्रियश्च धर्म्मज्ञो योऽन्यत्राप्यनभूतवाक्।
प्रमाणमेकोऽपि भवेत् साहसेषु विशेषतः॥"
अनभूतवाग् न्यायान्तरे सत्यलेनेति। भवदेवभट्टोऽप्येवम्। कात्यायनः।
"अभ्यन्तरस्तु निःक्षेपे साक्ष्यमेकोऽपि दापयेत्।
अर्थिना प्रहितः साक्षी भवेदेकोऽपि याचिते॥
संस्कृतं येन यत् पक्वं तत्तेनैव विभावयेत्।
एक एव प्रमाणं स विवादे परिकीर्त्तितः॥"
संस्कृतं साधितम्। पक्वं कुलालादि। विष्णुः।
स्तेयसाहसवाग्दण्डपारुष्यसंग्रहेषु साक्षिणो न परीक्षा इति। स्तेयपरदारगमनादिकार्य्याणां निहवेनैव क्रियमाणत्वात् दैवादेव परं साक्षिणो भवन्तीति न परीक्षा इत्युक्तम्। तेषां याज्ञवल्क्यः।
"मित्रारिभावादिनिरूपणेनैवोपपत्त्यनुपपत्तिभ्यामालोचनीयं न तु वाक्यमात्रादिति व्यवहारमातृकाः॥ अतएव कात्यायनः।
"ऋणादिषु परीक्षेत साक्षिणः स्थिरकर्म्मसु।
साहसात्ययिके नैव परीक्षा क्वचित् स्मृता॥"
इति॥*॥ औत्रियादीनामसाक्ष्यमाह नारदः।
"औत्रियास्तापसा वृद्धा ये च प्रव्रजिता नराः।
वचनात्तेष्वसाक्षित्वं नात्र हेतुरुदाहृतः॥"
वचनादिति औत्रियत्वादिरूपाभिधानात् न च तत्राप्यो हेतुरित्यर्थः। तथा च स्वीयवैदिककर्म्मकरणव्यग्रतया परकीयकार्य्ये विस्मरणसम्भवात् साक्षित्वरूपलब्धकार्य्यनियोगे तत्त्वापभयेन व्यवहारद्रष्टारोऽपि तान्न पृच्छन्तीति तत्साक्षिकरणानर्थक्याच्च न ते साक्षिणः कर्त्तव्याः। किन्त्वज्ञताः स्वयं साक्षिणो भवन्त्येव। उभौ तु श्रोत्रियौ स्यातामिति स्मृतेः। वृद्धस्यासाक्षित्वं वृद्धत्वादेव ग्लानेन्द्रियत्वादित्यर्थः॥*॥ मनुः।
"स्त्रीणां साक्ष्यं स्त्रियः कुर्य्युर्द्विजानां सदृशा द्विजाः।
शूद्राश्च सन्तः शूद्राणामन्त्यानामन्त्ययोनयः॥
अन्तर्वेश्मन्यरण्ये वा शरीरस्यात्ययेऽपि च।
स्त्रियाश्चसम्भवे कार्य्यं बालेन स्थविरेण वा॥
शिष्येण बन्धुना वापि दासेन भृतकेन वा॥
देवब्राह्मणसान्निध्ये साक्ष्यं पृच्छेदृतं द्विजान्।
उदङ्मुखान् प्राङ्मुखान् वा पूर्व्वाह्णे वै शुचीन्॥
ब्रूहीति ब्राह्मणं पृच्छेत् सत्यं ब्रूहीति पार्थिवम्।
गोबीजकाञ्चनैर्वैश्यं शूद्रं सर्व्वैस्तु पातकैः॥"
गोबीजकाञ्चनापहारे यत् पापं तत्तद्वाचकाभिधाने स्यादिति वैश्यम्। एतत् साक्ष्याकृताभिधाने भवान् सर्व्वैः पातकैः सम्बध्यते इत्युक्त्वा शूद्रञ्च पृच्छेत्।
"ब्रह्मघ्ना ये स्मृता लोके ये च स्त्रीबालघातिनः।
मित्रद्रुहः कृतघ्नाश्च ते ते स्युर्व्वदतो मम॥"
इति मनूक्तं दूषणम्॥ सत्यफलञ्च।
"अश्वमेधसहस्रञ्च सत्यञ्च तुलया धृतम्।
अश्वमेधसहस्राद्धि सत्यमेवातिरिच्यते॥"
इति मनुनारदोक्तं श्रावयेत्॥*॥ याज्ञवल्क्यः।
"न ददाति हि यः साक्ष्यं जानन्नपि नराधमः।
स कूटसाक्षिणां पापैस्तुल्यो दण्डेन चैव हि॥"
कात्यायनः।
"अधोऽधिनरके वर्षं वसेयुः कूटसाक्षिणः।"
याज्ञवल्क्यः।
"सत्यां प्रतिज्ञां यस्योभुः साक्षिणः स जयीभवेत्।
अन्यथा वादिनो यस्य ध्रुवस्तस्य पराजयः॥
वर्णानां हि यथो यत्र तत्र साक्ष्यन्तु पठेत्।
तत्प्रभावाय निर्द्दोषाय शरः स्मृतो द्विजैः॥"
गौतमः। नानृतवचने दोषो जीवनार्थे सहसोत्थिते।
न तु पापीयसो जीवनम्। इति।
"देवे ब्रह्मणि वचनं समेषु मुनिषु तथा।
मृतिदेषे तु वचनं साक्ष्यं ये मुमुक्षवः॥"
तेषामिति शेषः॥ ८॥ मनुः।

"साक्षिणां लिखितानाञ्च निर्द्दिष्टानाञ्च वादिनाम्।
तेषामेकोऽन्यथावादी भेदात् सर्व्वेऽप्यसाक्षिणः॥"
इति कात्यायनवचनं तत् त्रयाणां तुल्यरूपाणां साक्षिणां मध्ये एकस्याप्यन्यथावादे अपरस्य तत्तुल्यस्य सत्प्रतिपक्षतया तृतीयस्य किञ्चिदादित्वे नच भेदात् परस्परविरुद्धार्थाभिधाने भेदात् साक्षिभ्यो न निर्णयः इति परम्॥ * ॥ बृहस्पतिः। साक्षिदैधे कर्म्मनिष्ठानां ग्रहणमाह। गुणिदैधे क्रियावतामित्यनेन। तथा। साक्षिणोऽर्थसमुद्दिष्टान् सत्सु दोषेषु दोषयेत्। अदृष्टं दूषयन् वादी तत्समं दण्डमर्हति॥" इति। तत्समं विवादसमम्। सभासदादिविदितसाक्षिदूषणमेव ग्राह्यं न तु त्रयवरादिसाक्षिभिः प्रतिपाद्यम्। अनवस्थापातात्। इत्याह नारदः।
"सभासदां प्रसिद्धं यल्लोकसिद्धमथापि वा।
साक्षिणां दूषणं ग्राह्यमसाध्यं दोषवर्ज्जनात्॥
अन्यैश्च साक्षिभिः साध्ये दूषणे पूर्व्वसाक्षिणाम्।
अनवस्था भवेद्दोषस्तेषामप्यन्यसम्भवात्॥"
असाध्यं साधनानर्हम्। सिद्धत्वाद्दोषवर्জ্জनात्। अनवस्थाविरहात्। तस्मात् प्रसिद्धदूषणमेव ग्राह्यम्॥ * ॥ दूषणमाह कात्यायनः।
"बालोऽज्ञानादसत्यात् स्त्री पापाभ्यासाच्च कूटकृत्।
विब्रूयात् बान्धवः स्नेहात् वैरनिर्यातनादरिः॥
यः साक्षी नैव निर्द्दिष्टो नाभूतो नैव दर्शितः।
ब्रूयान्मिथ्येति तथ्यं वा दण्ड्यः सोऽपि नराधमः॥"
कात्यायनः।
"क्रिया न दैविकी प्रोक्ता विद्यमानेषु साक्षिषु।
लेखे च सति वादेऽपि न दिव्यं न च साक्षिणः॥
समत्वं साक्षिणां यत्र दिव्यैस्तत्र विशोधयेत्॥"
एतत् संशयापुच्छिदे बोधम्। याज्ञवल्क्यः।
"निह्नुते लिखितानेकमेकदेशे विभाविनः।
दाप्यः सर्व्वान्नृपेणार्थान्न ग्राह्यस्तेनवेदितः॥"
यो लिखितानेकं सुवर्णादिकं अपलपति स एकदेशे साक्ष्यादिभिर्विभावितः सन् सर्व्वान् दद्यात्। कात्यायनः।
"यद्येकदेशग्राह्यापि क्रिया विद्येत मानुषी।
सा ग्राह्या न तु पूर्णापि दैविकी वदतां नृणाम्॥"
वदतां विवदतामित्यविशेषेण दर्शयति। पूर्णापि दैविकी समग्रविषयिकापि न ग्राह्या। तेनैकदेशप्रतिपादिकया मानुष्या क्रियया समस्तसाध्यनिह्नुतिरिति।
"साध्यार्थांशे निह्नुते साक्षिभिः सकलं भवेत्।
स्त्रीसङ्गे साहसे चौर्य्ये यत् साध्यं परिकल्पितम्॥"
इति कात्यायनवचनं तत्तद्विषयप्रदर्शकम्। ऋणनिक्षेपाद्यग्रहणेऽपि योज्यमिति॥ * ॥ वसु।
"अनेकार्थाभियोगे तु यावत् संशोधयेद्धनी।
साक्षिभिस्तावदेवासौ लभते साधितं धनम्॥"
तद्गायनमित्रपुत्रादिविषयकम्। तथा हि।
नानाविधप्रियवर्य्याभियुक्तेनाज्ञानता नाहं जानामीति उत्तरवादिना साक्ष्यादिभिर्यावद्धनं प्रतिपादयति तावदेव पुत्रेण दातव्यम्। एवमेव विश्वरूपनीलकण्ठप्रभृतयः॥ * ॥ कात्यायनः।
"अनुमानाद्बहुः साक्षी साक्षिभ्यो लिखितं गुरु।
अनिरुद्धा त्रिपुरुषी भक्तिस्तेभ्यो गरीयसी॥"
अनुमानं प्रत्यासङ्कलितम्। तदाह मनुः।
"वाक्चेष्टाविभावचेष्टाङ्गैर्भावमन्तर्गतं नृणाम्।
स्वरवर्णेङ्गिताकारैश्चक्षुषा चेष्टितेन च॥"
स्वरो गद्गदादिः। वर्णोऽस्वाभाविकः। इङ्गितं स्वेदवेपथुरोमाञ्चादि। आकारो विक्रतः। चक्षुषा कातरेण। चेष्टितेन स्थानत्यागादिना। एषाञ्चान्यथासिद्धेर्निरूप्यत्वादेभ्यः साक्षी बलवान् इत्यर्थः। सुखनिरूप्यत्वे तु याज्ञवल्क्यः।
"देशाद्देशान्तरं याति दृष्टकर्म्मा परिक्षिपि च।
ललाटं स्विद्यते चास्य मुखं वैवर्ण्यमेति च॥
परिशुष्यत्यलब्धाक्षो विरुद्धं बहु भाषते।
वाक् चक्षुः पूजयति नो तथौष्ठौ निर्भुजत्यपि॥
स्वभावादिक्रियां गच्छेन्मनोवाक्कायकर्म्मभिः।
अभियोगे च साक्ष्ये च स दुष्टः परिकीर्त्तितः॥"
न परोक्षां वाचं प्रतिवचनेन पूजयति। तथौष्ठौ चक्षुश्च परकीयवैकृतेन निर्भुनक्ति कुटिलीकरोति यदा मनोवाक्कायकर्म्मभिः स्वभावात् पूर्व्वोक्तां यथायोग्यां विक्रियां गच्छेत्तदा स दुष्ट इत्यर्थः। अतएव श्रीरामायणे।
"आकारश्छाद्यमानोऽपि न शक्योऽयौ निगूहितुम्।
बलाद्धि विवृणोत्येव भावमन्तर्गतं नृणाम्॥"
आकारो देहधर्म्मः सुखाप्रसादवैवर्ण्यरूपः॥
नारदः।
"सुदीर्घेणापि कालेन लिखितं सिद्धिमाप्नुयात्।
संज्ञानन्नात्मनो लेखमज्ञानंस्तच्च लेखयेत्॥"
सुदीर्घेणेति संस्कारोद्बोधकलिखनसत्त्वादयं चिरेणापि साक्ष्यं दातुं शक्नोति इत्यर्थः॥ * ॥
लिपिज्ञं स्वहस्तेन लेखयेत् तदज्ञं परहस्तेनेत्याह व्यासः।
"अलिपिज्ञो ऋणी यः स्यात् लेखयेत् स्वमतन्तु सः।
साक्षी वा साक्षिणान्येन सर्व्वसाक्षिसमीपगः॥"
बृहस्पतिः।
"स्रवितं पातितं यच्च सीमायाश्च समन्ततः।
अश्रुतोऽपि भवेत् साक्षी ग्रामस्तत्र न संशयः॥"
अश्रुता अपि साक्षिणो भवन्तीत्याहतुर्मनुकात्यायनौ।
"अन्ये पुनरनिर्द्दिष्टाः साक्षिणः समुदाहृताः।
ग्रामश्च ग्राड्विवाकश्च राजा च व्यवहारिणाम्॥
कार्य्येष्वभ्यन्तरो यः स्यादर्थिना प्रहितश्च यः।
कृत्वा कृतविवादेषु भवेयुस्तेऽपि साक्षिणः॥"
स्मृतिः।
"दत्तादत्तेऽथ भृत्यानां स्वामिनां निर्गमे सति।
विक्रीयादानसम्बन्धे क्रीत्वा धनमनिच्छति॥
द्यूते समाह्वये चैव विवादे समुपस्थिते।
साक्ष्यं साधनं प्रोक्तं न दिव्यं न च लेखकम्॥
प्रक्रान्ते साहसे वापि पारुष्ये दण्डवाचिके।
बलोद्भवेषु कार्य्येषु साक्षिणो दिव्यमेव च॥"
बृहस्पतिः।
"लेख्यं वा साक्षिणो वापि विवादे यस्य दूषिनाः।
तस्य कार्य्यं न सिध्येत यावत्तन्न विशोधयेत्॥"
तल्लेख्यसाक्षिरूपप्रमाणम्॥ * ॥ लेख्यशोधनमाह। कात्यायनः।
"सहस्रलेख्यसन्दिग्धे जीवती वा मृतस्य च।
तत् सहस्रकृतैरन्यैः पञ्चैस्तल्लेखनिर्णयः॥"
तथा।
"समवेतैश्च यद्दृष्टं वक्तव्यं तत्तथैव च।
विभिन्नैर्नैव कार्य्यं तु तद्वक्तव्यं पृथक् पृथक्॥
नाप्तैरनियुक्तैर्वा समं सत्यं प्रयत्नतः।
वक्तव्यं साक्षिभिः साक्ष्यं विवादस्थानमागतैः॥
अनुद्विग्नेन चित्तेन दृष्टं सम्यग्विदा तु यत्।
प्रत्यक्षं तत् स्मृतं कार्य्ये साक्ष्यं साक्षी तु तद्वदेत्॥"
नारदः।
"यः परार्थेऽपहरति स्वां वाचं पुरुषाधमः।
आत्मार्थे किं न कुर्य्यात् स पापी नरकनिर्भयः॥
अर्थांश्चे वाचि नियता वाङ्मूला वाग्विनिःसृता।
यस्तु तांस्तेनयेद्वाचं स सर्व्वस्तेयकृन्नरः॥"
बौधायनः।
"पञ्च पश्वनृते हन्ति दश हन्ति गवानृते।
शतमश्वानृते हन्ति सहस्रं पुरुषानृते॥
हन्ति जातानजातांश्च हिरण्यार्थेऽनृतं वदन्।
सर्व्वं भूम्यनृते हन्ति साक्षी साक्ष्यानृतं वदन्॥"
बृहस्पतिः।
"यस्यार्थेयं प्रतिज्ञातं साक्षिभिः प्रतिपादितम्।
स जयी स्यादन्यथा तु साध्यार्थं न समाप्नुयात्॥"
याज्ञवल्क्यः।
"उक्तोऽपि साक्षिभिः साक्ष्ये यत्रान्ये गुणवत्तराः।
द्विगुणा वान्यथा ब्रूयुः कूटाः स्युः पूर्व्वसाक्षिणः॥"
अन्यथा पूर्व्वविपरीतार्थप्रकारेण। कूटा अनादेयवचनाः। तथा,—
"यः साक्ष्यं श्रावितोऽन्येभ्यो निह्नुते तमसाधुतः।
स दाप्योऽष्टगुणं दण्डं वाक्पारुष्यञ्च विन्दति॥"
तमन्येभ्यः साक्ष्यं श्रावयेति वादिना प्रयुक्तो यः श्रावितः कारितदयात् पदसिद्धिः। एवम्भूतोऽपि सभायां निगदकाले साक्ष्यं निह्नुते यत्तस्याष्टगुणो दण्डः। इति व्यवहारतत्त्वम्॥ (त्रि, देयम्। इति श्रीधरस्वामी॥ यथा, भागवते। ५। ११। ७।
"तावानयं व्यवहारः सदादिः
क्षेत्रज्ञसाक्षो भवति स्थूलसूक्ष्मः॥".)
साक्षेयः, त्रि, (सक्षुरिदम्। सक्षि + "तुरुक्षुरु कदनिति।" ४। २। ८०। इति छप्रत्ययः।) साक्षिसम्बन्धी। इति सिद्धान्तकौमुदी॥
साक्ष्यं, क्ली, (सक्षुर्भावः कर्म्म वा। सक्षि + ष्यञ्। यत्। सक्षम। इति धनञ्जयकोषः॥

साङ्कर्यं

सागरः, पुं, (सगरस्य राज्ञोऽयमिति। सगर+अण्।) समुद्रः। इत्यमरः। १। १०। ९॥ सगरेणावतारितत्वात् तस्यायमिति णे सागरो इत्यादिः। क्षीरोदादिष्वप्युपमया सागरव्यपदेशः इति भट्टाः। इति भरतः॥ स तु सप्तविधः। यथा,—

"लवणः क्षीरसंज्ञश्च घृतोदो दधिसंज्ञकः।
सुरोदेक्षुरसोदौ च स्वादूदः सप्तमो भवेत्॥
चत्वारः सागराः ख्याता पुष्करिण्यश्च ताः स्मृताः॥"

इत्याद्ये वह्निपुराणे सागरभेदनामाध्यायः॥ * ॥

(सगरस्यापत्यं पुमानिति। सगर+अण्। सगरपुत्रः। यथा, महाभारते। ३। १०७। ७।

"वक्ष्यमाणास्ततो लोकाः सागरैर्मन्दबुद्धिभिः।
ब्रह्माणं शरणं जग्मुः सहिताः सर्व्वदेवतैः॥")

रत्नविशेषः। इति शब्दचन्द्रिका॥ दशपद्मसङ्ख्या। यथा,—

"विन्दः खर्व्वो निखर्व्वश्च शङ्खपद्मौ च सागरः॥"
इति ब्रह्माण्डपुराणम्॥

(सागरस्येदमिति। सागरसम्बन्धिनि, त्रि। यथा, हरिवंशे। ५३। ३८।

"आधत्स्व सरितां नाथ त्वत्क्रीमां सागरीं तनुम्॥")

सागरगामिनी, स्त्री, (सागरं गच्छतीति। गम+णिनिः। ङीप्।) नदी। इति त्रिकाण्डशेषः॥ (वाचस्पत्यङ्गेऽपि दृश्यते। यथा, रघुः। ६। ५२।

"नृपं तमावर्त्तमनोज्ञनाभिः
सा वत्सगादन्यवधूर्भवित्री।
महीधरं मार्गवशादुपेतं
सोतोवहा सागरगामिनीव॥")

सूक्ष्मैला। इति राजनिर्घण्टः॥

सागरनेमिः, स्त्री, (सागरः नेमिरिव यस्याः।) पृथिवी। इति हेमचन्द्रः॥

सागरमेखला, स्त्री, (सागरः मेखलेव यस्याः।) पृथिवी। इति हेमचन्द्रः॥ (वाचस्पत्यङ्गेऽपि दृश्यते। यथा, महाभारते। ३। १०७। ६४।

"अंशुमानपि धर्म्मात्मा महीं सागरमेखलाम्।
प्रशशास महाराज! यथैवास्य पितामहः॥")

सागरांबरा, स्त्री, (सागरः अम्बरं वस्त्रमिव यस्याः।) पृथिवी। इति हेमचन्द्रः॥ (यथा, रघुः। ३। ६।

"निधानगर्भामिव सागरांबरां
शशीमिवाभ्यन्तरलीनपावकाम्।
नदीमिवान्तःसलिलां सरस्वतीं
नृपः समक्षां महिषीममन्यत॥")

सागरालयः, पुं, (सागरः आलयो यस्य।) वरुणः। इति शब्दमाला॥

सागरोत्थं, क्ली, (सागरादुत्तिष्ठतीति। उत्+स्था+कः।) समुद्रलवणम्। इति राजनिर्घण्टः॥

साङ्गं, त्रि, (सङ्गेन+"सङ्गादिभ्यश्च।" ४। २। ८५। इति यञ्।) सङ्गेन निर्व्वृत्तम्। सङ्गसम्बन्धम्। इति सिद्धान्तकौमुदी॥

साङ्ग्रयो

साङ्कृतिः, पुं, मुनिविशेषः। स तु वैयाघ्रपद्यगोत्रस्य प्रवरः। यथा,—

"वैयाघ्रपद्यगोत्राय साङ्कृतिप्रवराय च।
अपुत्राय ददान्येतत् सलिलं भीष्मवर्म्मणे॥"
इति तिथ्यादितत्त्वम्॥

साङ्क्षेपिकः, त्रि, (सङ्क्षेपाय हितः। सङ्क्षेप+ठञ्।) संक्षिप्तः। इति सिद्धान्तकौमुदी॥ (यथा, मनुटीकायां कुल्लूकः। १२। ३१।

"इदं वक्ष्यमाणं साङ्क्षेपिकं क्रमेण लक्षणं ज्ञातव्यम्॥") संक्षेपकारकः। संक्षेपशब्दात् ष्ठिकप्रत्ययनिष्पन्नः॥

साङ्ख्यः, पुं, कपिलमुनिकृतदर्शनशास्त्रविशेषः। तत्पर्य्यायः। कापिलः २। इति हेमचन्द्रः॥ तथा च।

"साङ्ख्यं कपिलमुनिना प्रोक्तं
संसारविमुक्तिकारणं हि।
यत्रैनाः सप्रतिरार्य्या
भाष्यं चात्र गौड़पादकृतम्॥
एतत् पवित्रमग्र्यं
मुनिरासुरयेऽनुकम्पया प्रददौ।
आसुरिरपि पञ्चशिखाय
तेन च बहुधा कृतं तन्त्रम्॥
शिष्यपरम्परयागतमीश्वरकृष्णेन चेतदार्य्याभिः।
संक्षिप्तमार्य्यमतिना सम्यग्विज्ञाय सिद्धान्तम्॥
सप्तत्यां किल येऽर्थाः
स्तेऽर्थाः कृत्स्नस्य षष्टितन्त्रस्य।
आख्यायिका विरहिताः
परवादविवर्ज्जिताश्चापि॥"
इति साङ्ख्यप्रवचनभाष्यम्॥

साङ्ख्ययोगः, पुं, (साङ्ख्योक्तो योगः।) ज्ञानयोगः। स च ब्रह्मविद्या। यथा,—

"द्वितीये श्लोकसन्तप्तमर्জ্জুनं ब्रह्मविद्यया।
प्रतिबोध्य हरिश्चक्रे स्थितप्रज्ञस्य लक्षणम्॥"
इति गीताटीकायां श्रीधरस्वामी। २। १॥

तद्योगो यथा,—

श्रीभगवानुवाच।

"अशोच्यानन्वशोचस्त्वं प्रज्ञावादांश्च भाषसे।
गतासूनगतासूंश्च नानुशोचन्ति पण्डिताः॥
न त्वेवाहं जातु नासं न त्वं नेमे जनाधिपाः।
न चैव न भविष्यामः सर्व्वे वयमतः परम्॥
देहिनोऽस्मिन् यथा देहे कौमारं यौवनं जरा।
तथा देहान्तरप्राप्तिर्धीरस्तत्र न मुह्यति॥
मात्रास्पर्शास्तु कौन्तेय! शीतोष्णसुखदुःखदाः।
आगमापायिनोऽनित्यास्तांस्तितिक्षस्व भारत॥
यं हि न व्यथयन्त्येते पुरुषं पुरुषर्षभ।
समदुःखसुखं धीरं सोऽमृतत्वाय कल्पते॥
नासतो विद्यते भावो नाभावो विद्यते सतः।
उभयोरपि दृष्टोऽन्तस्त्वनयोस्तत्त्वदर्शिभिः॥
अविनाशि तु तद्विद्धि येन सर्व्वमिदं ततम्।
विनाशमव्ययस्यास्य न कश्चित् कर्त्तुमर्हति॥
अन्तवन्त इमे देहा नित्यस्योक्ताः शरीरिणः।
अनाशिनोऽप्रमेयस्य तस्माद् युध्यस्व भारत॥

साचिव्यं

य एनं वेत्ति हन्तारं यश्चैनं मन्यते हतम्।
उभौ तौ न विजानीतो नायं हन्ति न हन्यते॥
न जायते म्रियते वा कदाचि-
न्नायं भूत्वा भविता वा न भूयः।
अजो नित्यः शाश्वतोऽयं पुराणो
न हन्यते हन्यमाने शरीरे॥
वेदाविनाशिनं नित्यं य एनमजमव्ययम्।
कथं स पुरुषः पार्थ! कं घातयति हन्ति कम्॥
वासांसि जीर्णानि यथा विहाय
नवानि गृह्णाति नरोऽपराणि।
तथा शरीराणि विहाय जीर्णा-
न्यन्यानि संयाति नवानि देही॥
नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावकः।
न चैनं क्लेदयन्त्यापो न शोषयति मारुतः॥
अच्छेद्योऽयमदाह्योऽयमक्लेद्योऽशोष्य एव च।
नित्यः सर्व्वगतः स्थाणुरचलोऽयं सनातनः॥
अव्यक्तोऽयमचिन्त्योऽयमविकार्य्योऽयमुच्यते।
तस्मादेवं विदित्वैनं नानुशोचितुमर्हसि॥
अथ चैनं नित्यजातं नित्यं वा मन्यसे मृतम्।
तथापि त्वं महाबाहो! नैनं शोचितुमर्हसि॥
जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च।
तस्मादपरिहार्य्येऽर्थे न त्वं शोचितुमर्हसि॥"
इत्यादि श्रीभगवद्गीतायां साङ्ख्ययोगे। २। ११—३०॥ * ॥

साङ्गमः, पुं, (सङ्गम एव। स्वार्थे अण्।) सङ्गमः। इत्यमरटीकायां भरतः। ३। २। १६॥

साङ्ग्रामिकः, पुं, (संग्रामे साधुः। संग्राम+"गुड़ादिभ्यष्ठञ्।" ४। ४। १०३। इति ठञ्।) सेनापतिः। सङ्ग्रामशूरे, त्रि। इति सिद्धान्तकौमुदी॥ (सङ्ग्रामसम्बन्धिनि च त्रि। यथा, महाभारते। १। २। २३२।

"ते तस्य वचनं श्रुत्वा मन्त्रयित्वा च यत्नितम्।
साङ्ग्रामिकं ततः सर्व्वं सज्जं चक्रुः परन्तपाः॥")

साङ्ग्रामी, स्त्री, (सङ्ग्रामाय हिता। सङ्ग्राम+अण्। ङीप्।) सायाङ्ग्रयापिनी तिथिः। यथा,—

"षष्ठी सप्तमी चैव दशमी च यदाऽपरा।
प्रतिपन्नवमी चैव कर्त्तव्या साङ्ग्रामी तिथिः॥
इति पैठीनसिवचनस्य तु।
'साङ्ग्रामं नाम सायाङ्ग्रयापिनी दृश्यते यदा।'
इति स्कन्दपुराणेन सायाङ्ग्रयापितिथेः साङ्ग्रामविधानेन पूजादावनवकाशादुपवासपरत्वम्।
सायाङ्ग्रयापित्वमपि सूक्ष्मान्वेषणेन ज्ञेयम्।"
इति तिथ्यादितत्त्वम्॥

साचि, व्य, (सच+इञ्।) तिर्य्यगर्थः। तत्पर्य्यायः। तिरः २। इत्यमरः। ३। ४। ६॥ (यथा, किराते। १०। ५०।

"सविनयमपराभिरत्य साचि
स्मितसुभगैकसखत्वपोषलक्ष्मीः॥")

साचिव्यं, क्ली, (सचिव+ष्यञ्।) सचिवस्य भावः। सचिवशब्दात् भावे ष्यञ्प्रत्ययेन निष्पन्नम्। (यथा, रामायणे। ५। ५। १।

ते च यथा,—
"स्वेदः स्तम्भोऽथ रोमाञ्चः स्वरभङ्गोऽथ वेपथुः।
वैवर्ण्यमश्रुप्रलय इत्यष्टौ सात्त्विका मताः॥"
प्रलयो मूर्च्छा। इति भरतः॥
सात्त्विक, त्रि, (सत्त्वेन निर्वृत्तः। तेन निर्वृत्तमिति ठञ्।) सत्त्वगुणनिष्पादितः। इत्यमरः। १।७।१६॥ सत्त्वं मनोगुण आशयो वा तेन निष्पादितः सात्त्विकः स्वेदादिः। सत्त्वशब्दात् ठघे कादिति णिकः। इति भरतः॥ * ॥ सत्त्वगुणयुक्तः। तद्विवरणं यथा, गीतायाम् ।१७।४।
"यजन्ते सात्त्विका देवान् यक्षरक्षांसि राजसाः।
प्रेतान् भूतगणांश्चान्ये यजन्ते तामसा जनाः॥"
सात्त्विकयज्ञो यथा, गीतायाम्। १७। ११।
"अफलाकाङ्क्षिभिर्यज्ञो विधिदृष्टो य इज्यते।
यष्टव्यमेवेति मनः समाधाय स सात्त्विकः॥"
सात्त्विकतपो यथा, तत्रैव। १७। १७।
"श्रद्धया परया तप्तं तपस्तत्त्रिविधं नरैः।
अफलाकाङ्क्षिभिर्युक्तैः सात्त्विकं परिचक्षते॥"
सात्त्विकदानं यथा, तत्रैव। १७। २०।
"दातव्यमिति यद्दानं दीयतेऽनुपकारिणे।
देशे काले च पात्रे च तद्दानं सात्त्विकं स्मृतम्॥"
सात्त्विकयोगो यथा, तत्रैव। १८। ६।
"कार्य्यमित्येव यत् कर्म्म नियतं क्रियतेऽर्জ্জুন।
सङ्गं त्यक्त्वा फलञ्चैव स त्यागः सात्त्विको मतः॥"
सात्त्विकज्ञानं यथा, तत्रैव। १८। २०।
"सर्व्वभूतेषु येनैकं भावमव्ययमीक्षते।
अविभक्तं विभक्तेषु तज्ज्ञानं विद्धि सात्त्विकम्॥"
सात्त्विककर्म्म यथा, तत्रैव। १८। २३।
"नियतं सङ्गरहितमरागद्वेषतः कृतम्।
अफलप्रेप्सुना कर्म्म यत्तत् सात्त्विकमुच्यते॥"
सात्त्विकबुद्धिर्यथा, तत्रैव। १८। ३०।
"प्रवृत्तिञ्च निवृत्तिञ्च कार्य्याकार्य्ये भयाभये।
बन्धं मोक्षञ्च या वेत्ति बुद्धिः सा पार्थ सात्त्विकी॥"
सात्त्विकी धृतिर्यथा, तत्रैव। १८। ३३।
"धृत्या यया धारयते मनःप्राणेन्द्रियक्रियाः।
योगेनाव्यभिचारिण्या धृतिः सा पार्थ!
सात्त्विकी॥"
सात्त्विकसुखं यथा, तत्रैव। १८। ३७।
"यत्तदग्रे विषमिव परिणामेऽमृतोपमम्।
तत् सुखं सात्त्विकं प्रोक्तमात्मबुद्धिप्रसादजम्॥"
सात्त्विकपुराणानि यथा,—
"वैष्णवं नारदीयञ्च तथा भागवतं शुभम्।
गारुडञ्च तथा पाद्मं वाराहं शुभदर्शने।
सात्त्विकानि पुराणानि विज्ञेयानि शुभानि वै॥"
सात्त्विकस्तुतयो यथा,—
"वाशिष्ठञ्चैव हारीतं यामं वाराहं तथा।
भारद्वाजं काश्यपञ्च सात्त्विका सुकृदाः
शुभाः॥"
इति पाद्मोत्तरखण्डे ४३ अध्यायः॥
सात्त्विकप्रियाहारा यथा,—
"आयुःसत्त्ववलारोग्यसुखप्रीतिविवर्द्धनाः।
रस्याः स्निग्धाः स्थिरा हृद्या आहाराः
सात्त्विकप्रियाः॥"
इति श्रीभगवद्गीतायाम्। १७। ८॥
सात्त्विककर्त्तृ कर्त्तृशब्दे सात्त्विकाहार आहारशब्दे च द्रष्टव्यः॥
सात्त्विकी, स्त्री, (सात्त्वं सत्त्वगुणोऽस्त्यस्या इति। सात्त्व+ठन्। ङीप्।) दुर्गा। इति शब्दरत्नावली॥ पूजाविशेषः। यथा,—
"शारदी चण्डिकापूजा त्रिविधा परिगीयते।
सात्त्विकी राजसी चैव तामसी चेति तत्
शृणु॥"
सात्त्विकी जपयज्ञाद्यैर्नैवेद्यैश्च निरामिषैः।
महाताम्र भगवत्याश्च पुराणादिषु कीर्त्तितम्।
पाठस्तस्य जपः प्रोक्तः षष्ठेदेवीमनास्तथा॥"
इति दुर्गोत्सववतत्त्वम्॥
सात्म्य, त्रि, सुखजनकम्। आत्मनो हितं कर्म्म आत्मा आत्मत्वेन सह वर्त्तमानं सात्म्यम्। इति भेषज्यरत्नावली॥ (यथा, सुश्रुते। १।४५।
"सर्व्वप्राणभृतां तस्मात् सात्म्यं क्षीरमिहोच्यते॥"
"सात्म्यं नाम तदृतु सात्म्येनोपसेव्यमानसुखयते। तत्र ये घृतक्षीरतैलमांसरससात्म्याः सर्व्वरससात्म्याश्च ते बलवन्तः क्लेशसहाः चिरजीविनश्च भवन्ति। रूक्षनित्याः पुनरेकरससात्म्याश्च ये ते प्रायेणाल्पबलाश्चाक्लेशासहाः अल्पायुषोऽल्पसाधनाश्च।" इति चरके विमानस्थानेऽष्टमेऽध्याये॥
"योरसः कल्पते यस्य सुखायैव निषेवितः।
यायामजातमन्यदा तत्तात्म्यमिति निर्दिशेत्॥"
इति सुश्रुते सूत्रस्थाने ३६ अध्याये॥
क्ली, देवत्वम्। यथा, भागवते ।६।१८।२०
"इन्द्रेण प्रापिताः सात्म्यं किं तत् साधु
कृतं हि तैः॥"
सारूप्यम्। यथा, तत्रैव। ७। १०। ४०।
"नृपाश्चैद्यादयः सात्म्यं हरेस्तच्चिन्तया ययुः॥")
सात्यकिः, पुं, (सत्यकस्यापत्यं पुमानिति। इञ्।) वृष्णिवंशीयसत्यकपुत्रः। स तु श्रीकृष्णस्य सारथिः। तत्पर्य्यायः। शैनेयः २ शिनेर्नप्ता ३ युयुधानः ४। इति त्रिकाण्डशेषः॥ योधः ५। इति जटाधरः॥ (अयं हि अर्জ্জুनस्य शिष्य आसीत् भारतयुद्धे युधिष्ठिरपक्षमाश्रित्य तुमुलं युद्धं विधाय च हतेऽपि निखिलबले वासुदेवेन पाण्डवैश्च सह जीवित आसीत्। तथाहि महाभारते अश्वत्थामवाक्ये। १०। ६। ४७।
"मम पाण्डवतः शैक्षा धानेराद्याश्चयो वयम्।
ते चैव भ्रातरः पञ्च वासुदेवोऽथ सात्यकिः।
अहञ्च कृतवर्म्मा च कृपः शारद्वतस्तथा॥")
सात्यवतः, पुं, (सत्यवत्यां भवः। अण्।) वेदव्यासः। इति त्रिकाण्डशेषः॥
सात्यवतेयः, पुं, (सत्यवत्या अपत्यं पुमान्। सत्यवती+ढक्।) सत्यवतीसुतः। वेदव्यासः। इति हलायुधः॥
सादः, पुं, (सद+घञ्।) विषादः। (यथा, रघुः। ३। २।
"शरीरसादादसमग्रभूषणा
सुखेन सालक्ष्यत लोध्रपाण्डुना॥")
शरणम्। गतिः। (यथा, हरिवंशे। ४६। ६०।
"यानं वाहविमुक्तं यदि गच्छेन्न व्रजेच्च वाहनयुतम्।
राष्ट्रभयं भवति तदा चक्राणां सादभङ्गे च॥")
सादनं, क्ली, (सद + स्वार्थे णिच् + ल्युट्।) सदनम्। इत्यमरटीकायां भरतः॥ (यथा, महाभारते। १। १५४। २८।
"अहमेको गमिष्यामि त्वामद्य यमसादनम्॥")
सादनी, स्त्री, (सादयन्ते रोगा अनया। सद+णिच्+करणे ल्युट्। ङीप्।) कटुकी। इति राजनिर्घण्टः॥
सादिः, पुं, (सद गतौ+"वसिवपियजीति।" उणा० ४। १२४। इति इञ्।) सारथिः। इति हेमचन्द्रः॥ योद्धा। इत्युणादिकोषः॥ अवसन्नः। वायुः। इति संक्षिप्तसारोणादिवृत्तिः॥
सादितः, त्रि, (सद+णिच्+क्तः।) विषादितः। (यथा, रघुः। ७। ४४।
"ये: सादिता लक्षितपूर्व्वकेतून्
तानेव सामर्थतया निजघ्नुः॥")
शरणप्रापितः। गमितः। इति आत्मसद्यातोः क्तप्रत्ययेन निष्पन्नः॥
सादी, [न्] पुं, (सद गतौ+णिनिः।) अश्वारूढः। इत्यमरः। २। ८। ६०॥ (यथा, रघुः। ७।४०।
"पूर्व्वं प्रहर्त्ता न जघान भूयः,
प्रतिप्रहारान्तमसज्जसादी॥")
गजारोहः। रथारोहः। इति मेदिनी॥
साट्टश्यं, क्ली, (सट्टशस्य भावः। सट्टश+ष्यञ्।) सट्टशत्वम्। तच्चिह्नत्वे सति तद्गतभूयोधर्म्मवत्त्वम्। यथा, चन्द्रभिन्नत्वे सति चन्द्रगताह्लादकत्वादिमत्त्वं सुखे चन्द्रसाट्टश्यम्। इति सिद्धान्तमुक्तावली॥*॥ अथ साट्टश्यानि। वेण्याः सर्पः १ भ्रमरश्रेणिः २। केशपाशस्य चामरः १ मयूरपुच्छः २। धम्मिल्लस्य विधुन्तुदः १ अन्धकारः २। सीमन्तस्य मेघः १ पन्थाः २ दण्डः ३। ललाटस्य अष्टमीचन्द्रः १ फलकम् २। कपोलस्य चन्द्रः १ मुकुरस्थलम् २। भ्रुवोः खड्गः १ धनुर्यष्टिः २ रेखा ३ पल्लवः ४ वल्लिः ५। दृशोः चकोरचञ्चुः १ हरिणचञ्चुः २ मदिरा ३ खञ्जनः ४ अञ्जनम् ५ झषदम्पती ६ नीलपद्मम् ७ प्रोष्ठीमत्स्यः ८। कर्णस्य दोला १ पाशः २। नासायाः वंशः १ केतकीपुष्पकण्टकः २ अधोमुखतूणीरः ३ चञ्चुः ४ तिलपुष्पम् ५ दण्डः ६। अधरस्य नवपल्लवम् १ बिम्बफलम् २ प्रवालः ३। दन्तानाम् मुक्ताश्रेणिः १ कुन्दपुष्पम् २ दाडिमबीजम् ३ क्षीरकम् ४। स्मितस्य ज्योत्स्ना १ पुष्पम् २ नीपपुष्पम् ३। स्वासस्य मृगनाभिः १

मुक्ताशीतलम् २। जिह्वायाः जवापुष्पम् १ चपलवस्तु २। वाण्याः कोकिलशब्दः १ भ्रमरगुञ्जनम् २ सुधा ३ मधु ४ वीणावाद्यम्५। सुखस्य चन्द्रः १ पद्मम् २ दर्पणम् ३। कण्ठस्य शङ्खः १। चिबुकस्य दर्पणवृत्तम् १। अंसस्य कुम्भः १। बाह्वोः वज्रारी १ मृणालम्२ तरङ्गः३ शाखा ४ पाशः ५। हस्तस्य मृणालादयः १। अङ्गुल्याः पल्लवम्१ पद्मदलम् २ चम्पकपुष्पम् ३ नवदलम्४ दीपः५। नखानां रत्नम् १ ताराः २ पुष्पम् ३ चन्द्रः४। स्तनयोः पद्मसुकुलम्१ घटः२ हस्तिकुम्भः ३ गिरिः ४ चक्रवाकः ५ बिल्वयुग्मम्६। मध्यस्य वरटक्रमध्यम्१ सिंहमध्यम्२ वज्रमध्यम्३ चौणद्रव्यम्४। लोमश्रेण्याः रेखा १ नीलकान्तमणिशिखा २ ग्रैवालवल्लरी ३ धूमलता४ हस्तिशुण्डः५। नाभेः आवर्तः १ पद्मम्२ ह्रदः ३ बिवरम् ४ कूपः ५। त्रिवल्याः तरङ्गः १ सोपानम् २ निम्नेणी ३। जघनस्य पुलिनम् १ पीठः२ फलकम्३। नितम्बस्य स्थलम्१ पर्व्वतः२ पृथिवी ३ स्थूलोपलम् ४ मद्दवस्तु ५। जङ्घयोः कदलीकाण्डः १ करिकरः २। जानुयोः स्तम्भः १। पादस्य पद्मम् १ नवपल्लवम् २। गतेः हंसगमनम् १ हस्तिगमनम् २ खञ्जनगमनम् ३॥

पुरुषस्त्रियोरौचित्येन साहश्यं वर्णनीयम्। पुरुषस्यैव कीर्त्तिरपि क्वचित्क्वचित् विशेषो लिख्यते। स्कन्धस्य वृषस्कन्धः १ वक्षम् २ वक्षस्कन्धः ३। बाह्वोः दृढस्तम्भः १ हस्तिशुण्डः २ स्तम्भः ३ अर्गलदण्डः। वक्षसः शिला १ कवाटम् २। गतेः प्रमत्तगजेन्द्रगतिः १। यशसः चन्द्रकुन्दयूथिकाप्रभृतिशुक्लवर्णपदार्थाः १। प्रतापस्य अग्निः १ वाड़वाग्निः २ रविः ३ रविकिरणादिः ४ जवापद्मप्रभृतिरक्तवर्णपदार्थाः ५। पुण्यस्य संस्कारः १ गौः २ दृक्षबीजम् ३ वृक्षः ४ शुक्लवर्णपदार्थाः ५। सामर्थ्यस्य मद्दवस्तु १ सिंहविक्रमादिः २। नीतेः साध्वी स्त्री १ प्रदीपज्वाला २ खड्गादिः ३। आज्ञायाः वैदग्धाक्रमः १ गुरुपदेशः २ उत्कटेच्छादिः ३। प्रायश्चित्तस्य प्रायश्चित्तकर्म्म १ स्थिरवस्तूनि २। पापस्य कर्दमः १ कज्जलः २ अकीर्त्तिः ३ कृष्णवर्णशिखाभ्रमरीप्रभृतिवस्तूनि ४ अन्धकारः५। अकीर्त्तेः मालिन्यम् १ कृष्णवर्णवस्तूनि २ अन्धकारः ३। कस्तूरिकायाः मेघः १ भ्रमरः २ नीलकान्तमणिः ३ कज्जलम् ४ तुमालिनमद्दादयश्चत्वारः ५ कृष्णवर्णपुष्पप्रभृतिः ६ कालविशेषे कल्पार्थाः ७ कालपुरुषः ८ कालिन्यश्च ९। दन्तस्य पूर्व्वोक्तश्वेतादीनि८। कर्पूरस्य चन्द्रः१ चन्द्रकिरणः२ कुन्दपुष्पादिशुभ्रम्३ हिमवेरिवस्तुः ४ विरहिणश्चन्द्रप्रभृतिः५। मनोरथस्य कल्पद्रुमादिवृक्षाः १ कविबुद्धिरचना २। आनन्दस्य सुधासमुद्रः१ ब्रह्मणाकाशादिः२। कालिमायाः कज्जलस्य मिलसुरमाधकारः १, अमावस्या २ पूर्व्वोक्तकृष्णवस्त्वादिकाधकारः ३, अतिनिद्रायाः मृत्युप्रभृतिः ४ रात्र्यन्धकारः ५।

चन्दनस्य कामिन्यधरादिः १ सत्कारयम् २ ब्रह्मसाक्षात्कारः ३। विषस्य नाड़ीस्त्रीविरहः १ पापम् २ मलिनवस्तु ३ दुःखदवस्तु ४ ग्रीष्माग्निः५ प्रीतिकालीनग्रीनोदकम्६ अभिचारिणी भार्य्या७। विरहस्य अग्निः १ व्याधिः २ यातना ३ मसृणः ४ तप्तवस्तु ५ दुःखदवस्तूनि ६। पुण्यानां चन्द्रादिः १ कामिनी २ कर्पूरम् ३ यशः ४। चन्द्रस्य प्रमदासुखम् १ अतिशुभ्रवस्तु २ यशःपुण्यादिः ३। सूर्य्यस्य शिवनेत्राग्निः १ जवापुष्पम् २ वसन्तकालीनपलाशवृक्षः ३ काञ्चनवृक्षः ४ वाड़वाग्निः५। पद्मस्य पाटलपुष्पम् १ कामिनीसुखादिः २ रक्तवर्णद्रव्यम् ३। इन्दीवरस्य नीलकान्तमणिः १ कस्तूरी २ कामिनीनेत्रम् ३। कैरवस्य चन्द्रः १ कुन्दादिशुक्लवर्णवस्तु २। राज्ञः इन्द्रः १ कुबेरः २ चन्द्रः ३ सूर्य्यः ४ मान्धाताभगीरथप्रभृतिप्रसिद्धचक्रवर्त्तिनः ५। मेघस्य कृष्णः १ काली २ नीलपद्मसदृशः ३ भ्रमरश्रेणिः ४ इन्दीवरवनम् ५ दाक्षायणीः ६ कृष्णवर्णवस्तु ७। शरन्मेघस्य चन्द्रप्रभृतिशुक्लवर्णपदार्थाः १। कन्दर्पस्य चन्द्रः १ पुरूरवाः २ अश्विनीकुमारः ३ नलः ४। प्रदीपस्य चम्पकपुष्पम् १ प्रतापः २ शरीरम् ३ ऋषिः ४। वायोः शीघ्रगपदार्थाः १। अश्वस्य वायुः १ हरिणः २ मनः ३। हस्तिनः पर्व्वतः १ मेघः १ तमालवृक्षः ३ अन्धकारः ४। सौधस्य कैलासः १ ऐरावतः २ उच्चैःश्रवाः ३ चन्द्रः ४। शिवस्य पूर्व्वोक्तानि ४। श्रीकृष्णस्य सजलजलदः१ तमालवृक्षः२ नीलमणिः३ भ्रमरश्रेणिः ४ इन्दीवरम्५ नीलपद्मम् ६ आकाशः ७। श्रीरामस्य पूर्व्वकथिताः पदार्थाः ७ दूर्व्वादलम् ८ वृक्षपल्लवम् ९। लक्ष्म्याः पार्व्वती १ चन्द्रकान्तिः २ रतिः ३ सीता ४ द्रौपदी ५ पद्मकान्तिः ६। सरस्वत्याः चन्द्रकला १ कैलासकान्तिः २ शुक्लवर्णपदार्थः ३। विष्णोः समुद्रः १ पण्डितमनः २ नारायणोदरम् ३ ब्रह्माण्डम् ४। यमस्य मेघादिकृष्णवर्णवस्तु १ विदूरभूमिः २ महाभारतम् ३ अपस्मारी ४। पुरस्य स्वर्गः १ कैलासः २ मनोरमद्रव्यवस्तु ३। रथस्य पुष्पकम् १ वैकुण्ठः २ पुरी ३ पोतः ४ पृथ्वी ५। कामिनीसुखस्य चन्द्रः १ पद्मम् २ दर्पणः ३। कामिन्याः तड़ित् १ नारी २ स्वर्णलता ३ स्वर्णवर्णा केतकी ४। नायकस्य चन्द्रः १ कन्दर्पः २ शैलः ३ अश्विनीकुमारः ४। सभायाः सूर्य्यमण्डलम् १ सुधर्म्मा २ गन्धर्वोपवनम् ३ सुमेरुः ४ गङ्गा ५। पण्डितस्य दृष्टयस्तिः १ शुक्रः २ ऋषिः ३ सरस्वती ४। विरहिणः श्रीरामः १ मौग्धिवः २ बलः ३ दुःखिवस्तुः ४ उन्मत्तशक्तिः ५ चन्दनतरुः ६ शिवशिरश्चन्द्रः ७ वाडवाग्निर्युक्तसमुद्रः ८ चक्रवाकः ९ चन्द्रशेखरवर्णनम् १०। दातुः कर्णः १ दधीचेः २ कल्पवृक्षः३ कामधेनुः ४ रोहणः५ मनुः ६ मेघः ७ बलिः ८ कौमिनिः ९ युधिष्ठिरः १०। यशस्क्रतोः मलयवायुः १ मद्यम् २ उन्मादरोगः ३। विरहिणं प्रति यमः१ अग्निः२ विषम् ३ सर्पः४। ग्रीष्मक्रतोः अग्निः १ विरहः २ विरहिणीनिश्वासः ३ सर्पनिश्वासः ४। वर्षाक्रतोः रात्रिः१ मेघः २ गगनम् ३ नारायणः ४। शरद्क्रतोः काशपुष्पादिरूपचामरैरावतगजाः १ चन्द्रः २। शीतक्रतोः अपस्मारिशक्तिः १ राज्यसूचकराजा २। शिशिरक्रतोः राजागमनकालः १। गुणिनः समुद्रः १ पर्व्वतः २ पृथिवी ३ मदनः ४ अग्निर्नौ ५। सचिवस्य दृष्टयस्तिः १। वाद्यस्य कोकिलशब्दः १ भ्रमरगुञ्जनम् २ वीणावाद्यम् ३। इति कविकल्पलतायाम् ४ स्तवके ४ कुसुमम्॥

साध, य न ओ सिद्धौ। इति कविकल्पद्रुमः॥ (दिवा०-स्वा० च-पर०-चक०-निष्पादने सक०-अनिट्।) य, साध्यति। न, साध्नोति। ओ, सिषात्सति। सिद्धिर्निष्पत्तिः। साध्यति घटो निष्पन्नः स्यादित्यर्थः। सिद्धिर्निष्पादनेति गोविन्दभट्टः। साध्नोति साध्यति घटं कुलालः निष्पादयतीत्यर्थः। इति दुर्गादासः॥

साधकः, पुं, (साध्यति निष्पादयति कार्य्यमिति। साध+ण्वुल्।) साधनकर्त्ता। निष्पादकः। तस्य लक्षणं यथा,—

"अतः परं प्रवक्ष्यामि साधकानान्तु लक्षणम्। धर्म्मशीलास्तपोयुक्ताः सत्यवादिजितेन्द्रियाः। मात्सर्य्येण परित्यक्ताः सर्व्वसत्त्वहिते रताः॥ कर्म्मशीलास्तथोत्साहा मर्त्तालोकेऽनुशुश्रुकाः। परस्परसमत्वानुकूलाः साधकस्य तु। ईदृशैः साधनं कुर्य्यात् सुसद्भावैः सदैव तु॥"

इति देवीपुराणे नन्दामाहात्म्यसमाप्ताध्यायः॥

अपि च।

"चतुर्धा साधको ज्ञेयो मृदुर्मध्याधिमात्रकः। अधिमात्रतमः श्रेष्ठो भवाब्धौ लक्षणक्षमः॥ मन्दोत्साही सुसंस्पृष्टो व्याधिस्थो गुरुदूषकः। लोभी पापमतिश्चैव वक्त्राशी वनिताश्रयः॥ चपलः कातरो रोगी पराधीनोऽतिनिष्ठुरः। मन्दाचारी मन्दवीर्य्यो ज्ञातयो मृदुना नरः॥ द्वादशाब्दे भवेत् सिद्धिरेतस्य यदतः परम्। मन्त्रयोगाधिकारी स ज्ञातयो गुरुणा ध्रुवम्॥ समबुद्धिः क्षमायुक्तः पुण्यकार्य्यो प्रियंवदः। मध्यस्थः सर्व्वकार्य्येषु सामान्यः स्यात्र संशयः। एतज्ज्ञात्वैव गुरुभिर्दीयते युक्तिनो यदः॥ स्थिरबुद्धिर्जये युक्तः स्वाधीनो वीर्य्यवानपि। महाप्राणो दयायुक्तः क्षमावान् वीर्य्यवानपि॥ शूरो नयश्च श्रद्धावान् गुरुपादाब्जपूजकः। धीमान्यास्तरतश्चैव ज्ञातयश्चाधिमात्रकः॥ एतस्य सिद्धिः षड्वर्षभेदभ्यासयोगतः। एतस्मै दीयते धीरैष्टयोगस्य साधकः॥ महाशीलोन्नतोत्साही मनोज्ञः श्रीर्य्यवानपि। प्राज्ञश्चोभ्यासशीलश्च निर्म्मलश्च गिराकुलः॥ नवयौवनसम्पन्नो मिताहारी जितेन्द्रियः। विश्वस्य शुचिर्दक्षो दाता सर्व्वजनाश्रयः॥

अधिकारी स्थिरो धीमान् यथेच्छावस्थितः क्षमी।
सुशीलो धर्म्मचारी च गुप्तचेष्टः प्रियंवदः॥
शास्त्रविश्वाससम्पन्नो देवतागुरुपूजकः।
जनसङ्गविरक्तश्च महाव्याधिविवर्ज्जितः॥
अणिमाद्यनयोग्यश्च सर्व्वयोगस्य साधकः।
त्रिभिः संवत्सरैः सिद्धिरेतस्य स्यान्न संशयः।
सर्व्वयोगाधिकारी च नात्र कार्य्या विचारणा॥"४॥
इति शिवसंहिता॥

साधका, स्त्री, दुर्गा। यथा,—
"साधनात् सिद्धिरित्युक्ता साधका वाथ ईश्वरी।
स्वामित्वाद्दानसिद्धित्वात् सिद्धीश्वर्य्या प्रकीर्त्तिता॥"
इति देवीपुराणे ४५ देवीनिरुक्ताध्यायः॥

साधनं, क्ली, (साध+ल्युट्।) करणकारकविशेषः। तच्च तृतीया स्यात्। इति व्याकरणम्॥ साध्यते कर्म्म निष्पाद्यतेऽनेनेति साधनम्। इति दुर्गादासः॥ (कारणम्। हेतुः। यथा, मनुः। ११। २३८।
"औषधान्यगदो विद्या दैवी च विविधा स्थितिः।
तपसैव प्रसिध्यन्ति तपस्तेषां हि साधनम्॥")
मारणम्। (यथा, किराते। १४। १७।
"अयो शरस्तेन मदर्घसूचितः
फलञ्च तस्य प्रतिकायसाधनम्।
अवैति तच्च मयात्मजात् भृतेः
कृतार्थता नन्वधिका चनूपतेः॥")
कृतसंस्कारः। अग्निदानम्। गतिः। गमनम्। द्रव्यम्। धनम्। अर्थदापनम्। अर्थस्य धनभूम्यादेर्दापनम्। निर्व्वर्त्तनम्। निष्पादनम्। (यथा, रघुः। ४। १६।
"वार्षिकं सञ्चरैरिन्द्रः धनुर्जैत्रं रघुर्दधौ।
प्रजार्थसाधने तौ हि पर्य्यायोद्यतकार्म्मुकौ॥")
उपकरणम्। सामग्री। यथा युद्धोपकरणं हस्त्यश्वादिः। (यथा, ऋतुसंहारे। ६। ३४।
"रम्यः प्रदोषसमयः स्फुटचन्द्रभासः
पुंस्कोकिलस्य विरुतं पवनः सुगन्धिः।
मत्तालियूथविरुतं निशि शीधुपानं
सर्व्वं हि साधनमिदं कुसमायुधस्य॥")
अनुज्ञा। अनुगमनम्। इत्यमरभरतौ। ३। ३। ११८॥ मैत्र्यम्। सिद्धौषधिः। उपायः। इति मेदिनी॥ यथा,—
'तपोभिः प्राप्यतेऽभीष्टं नासाध्यं हि तपस्यतः।
दुर्भगत्वं दृशा लोको वदते सति भाग्ने॥"
इति तिथ्यादितत्त्वधृतमत्स्यपुराणवचनम्॥
मेढ्रः। इति च मेदिनी॥ मैत्रम्। उधः। मिधिः। इति धरणिः॥ कारकः। प्रमाणम्। इति हेमचन्द्रः॥ व्याप्यम्। यथा,—
"अनुमा लनुमानं स्यात् व्याप्यं लिङ्गञ्च साधनम्।"
इति त्रिकाण्डशेषः॥

मोहनम्। जवः। इत्यजयः॥ साधना। साधा इति भाषा। यथा,—
ब्रह्मोवाच।
"शशाप पार्व्वती रुष्टा स्त्रीस्वभावाच्च चापलात्।
सर्व्वेषां साधनेनैव चक्षुमर्हन्ति साधवः॥"
इति ब्रह्मवैवर्त्ते गणेशखण्डे। १२। ५१॥
मन्त्रसिद्धिकरणम्। यथा,—
"मत्स्यं मांसञ्च मद्यञ्च मुद्रा मैथुनमेव च।
दिव्यानाञ्चैव वीराणां साधनं भवसाधनम्॥"
इति सुरूपमालातन्त्रम्॥
ब्रह्मज्ञानसाधनन्तु नित्यानित्यवस्तुविवेकेहामुत्रफलभोगविरागशमदमादिसम्पत्मुमुक्षुत्वम्। इति वेदान्तसारः॥

साधना, स्त्री, (साध+णिच्+युच्+टाप्।) सिद्धिः। निष्पादना। इति साधधात्वर्थदर्शनात्॥ आराधना। ण्यन्तसाधधातोरनप्रत्ययनिष्पन्ना॥

साधन्तः, त्रि, (साधयति भिक्षामिति। साध+"तृभूवहिवसिभासिसाधीति।" उणा० ३।१२८। इति झच्। सच णित्।) भिक्षुकः। इत्युणादिकोषः॥

साधयन्ती, स्त्री, (साधयतीति। साध+णिच्+शतृ। ङीप्।) उपासनाकर्त्री। यथा,—
"सखि मन्त्राणनाथन्तु साधयन्ती निरन्तरम्।
अतिश्रान्तासि सद्भावस्नेहयोरिवमौचिती॥"
इति काव्यचन्द्रिका॥

साधारणः, त्रि, (आधारं अविशेषेण कार्य्यादिभारधारणं तेन सह वर्त्तते इति।) समानः। सदृशः। इत्यमरः। २। १०। ३७॥ (यथा, कुमारे। १। ४२।
"कण्ठस्य तस्याः स्तनबन्धुरस्य
सक्तांकजापस्य च निश्चलस्य।
अन्योन्यशोभाजननात् बभूव
साधारणो भूषणभूष्यभावः॥")
सामान्यम्। अनेकसम्बन्ध्येकवस्तु। इति भारतः। ३। १। ८२॥ यथा,—
"साधारणं समाश्रित्य यत्किञ्चिद्दीयतेऽनघम्।
स्त्रीर्य्यादिनाप्नोति धनं भ्रातरस्तच्च भागिनः॥"
इति दायभागः॥
तद्वैदिकपर्य्यायः। खः १ एभिः २ नाकः ३ गौः ४ विष्टप् ५ नभः ६। इति षट् साधारणनामानि। इति वैद्यनिघण्टौ। १। ४॥*॥
पुं, न्यायमते हेत्वाभासविशेषः। यथा,—
"अनैकान्तो विरुद्धश्चाप्यसिद्धः प्रतिपादितः।
कालात्ययापदिष्टश्च हेत्वाभासस्तु पञ्चधा॥
आद्यः साधारणस्तु स्यात् स्यादसाधारणोऽपरः।"
तथैवानुपसंहारी त्रिधानैकान्तिको भवेत्॥
यः सपक्षे विपक्षे च स तु साधारणो मतः।
यस्तूभयसमाद्यावृत्तः स त्वसाधारणो मतः॥
तथैवानुपसंहारी केवलान्वयिपक्षकः॥"
इति भाषापरिच्छेदः॥

(देशविशेषः। क्ली, उदकविशेषश्च। यथा,—
"मिश्रचिह्नस्तु यो देशः स हि साधारणः स्मृतः।
तस्मिन् देशे यदुदकं तत्तु साधारणं स्मृतम्॥"
इति आयुर्व्वेदशास्त्रस्य पूर्व्वखण्डे द्वितीये भागे।
"उभयतः प्रेतं गतिरुच्चं न स्थिरं
नच खरबहुलञ्च स्नेहनं कण्टकाढ्यम्।
भवति च जलमल्पं नातिशीतं नचोष्णं
समप्रकृतिसमेतं विद्धि साधारणञ्च॥"
इति हारीते प्रथमस्थाने चतुर्थोऽध्याये।
"शाङ्गणं वातभूयिष्ठमनूपन्तु कफोल्बणम्।
साधारणं समसमं त्रिधा भूदेशमादिशेत्॥"
इति वाभटे सूत्रस्थाने प्रथमेऽध्याये॥)

साधारणदेशः, पुं, (साधारणो देशः।) जाङ्गलानूपलक्षणसम्पन्नस्थानम्। तद्गुणाः। हृद्यत्वम्। दीपनत्वम्। मधुरत्वम्। बहुत्वञ्च। इति राजवल्लभः॥

साधारणधर्म्मः, पुं, (साधारणो धर्म्मः।) चतुर्व्वर्गकर्त्तव्यकर्म्म। यथा, मानवे ६ अध्याये।
"प्रजनार्थं स्त्रियः सृष्टाः सन्तानार्थञ्च मानवाः।
तस्मात्साधारणो धर्म्मः श्रुतौ पत्न्या सहोदितः॥"
अपि च।
"अहिंसा सत्यमस्तेयं शौचमिन्द्रियसंयमः।
दमः क्षमार्জ্জवं दानं सर्व्वेषां धर्म्मसाधनम्॥"
इति गारुड़े। ६६। ३०।

साधारणस्त्री, स्त्री, (साधारणा सामान्या अनेकसम्बन्धिनी स्त्री।) वेश्या। इति हेमचन्द्रः॥

साधारणी, स्त्री, (साधारणस्येयमिति। अण्। स्त्रियां ङीप्।) कुक्षिका। इति हेमचन्द्रः॥

साधारण्यं, क्ली, (साधारणस्येदमिति। ष्यञ्।) कुक्षिका। इति हेमचन्द्रः॥ साधारणस्य भावश्च॥ (यथा, साहित्यदर्पणे १ परिच्छेदे।
"कौटाशुविहरक्षादिसाधारण्येन काव्यता।
इष्टेष्वपि मता यत्र रसाद्यनुगमः स्फुटः॥")

साधिका, स्त्री, (साधयतीति। साध+णिच्+ण्वुल्। टापि अत इत्वम्।) सुषुम्निः। इति हेमचन्द्रः॥ साधनकर्त्री। अधिकेन सह वर्त्तमाने, त्रि॥ (यथा, भागवते। ३। ११। २४।
"सं सं कामं मनुभुङ्क्ते साधिकां लोकसप्तितम्।"
यथा च तत्रैव। ५। २१। १०।
"सार्द्धद्वादशलक्षाणि साधिकानि चोपयाति॥")

साधितः, त्रि, (साध+णिच्+क्तः।) दापितः। इत्यमरः। ३। १। ४०॥ ईदृ धनादिकं दापिते धृतौ इति ख्यातं यस्मै दत्तं तत्रेति रमानाथः। दण्डिते इति विद्याविनोदः। शोधितश्चर्थे इति नयनानन्दः। दद्यातेर्णान्तात् क्तः। द्वौ द्वौ रीति पनू देपो रूपमिति नयनानन्दः। दापित इति पाठ इति कलिङ्गपुरुषोत्तमौ। तत्र णि दय ऽ अहणे गतौ वधे दाने इत्यस्मात् ण्यन्तात् क्तः। साधेर्ण्यन्तात् क्ते साधितः। इति भरतः।
"दापितो दापितोऽपि स्यात् साधितः शोधितोऽपि च।"
इति शब्दरत्नावली।

साधिष्ठः, त्रि, (अयमेषामतिशयेन वाढः । वाढ + "अतिशायने तमबिष्ठनौ ।" ५ । ३ । ५५ । इति इष्ठन् । "अन्तिकबाढयोर्नेदसाधौ ।" ५ । ३ । ६३ । इति साधादेशः ।) अतिशयवाढः । दृढतमः । इत्यमरः । ३ । १ । ११२ ॥ न्याय्यः । इति हैमचन्द्रः ॥ अत्याय्यः । इति मेदिनी ॥ (यथा, छान्दोग्ये । ४ । ६ । ३ । "नूनं क्षेत्र मे भगवद्दृशेभ्य आचार्येभ्य एव विद्या विदिता साधिष्ठं प्रापयतीति ।")

साधीयान् [स्] त्रि, (अयमनयोरतिशयेन वाढः इति । वाढ + "द्विवचनविभज्योपपदे तरबीयसुनौ ।" ५ । ३ । ५७ । इति ईयसुन् । "अन्तिकबाढयोरिति ।" ५ । ३ । ६० । इति साधादेशः ।) अतिशयवाढः । अतिशयसाधुः । इत्यमरः । ३ । ३ । २३४ ॥ (यथा, साहित्यदर्पणे १ परिच्छेदे ।

"कटुकौषधोपशमनीयस्य रोगस्य सितशर्करोपशमनीयत्वे कस्य वा रोगिणः सितशर्करा प्रवृत्तिः साधीयसी न स्यादिति ।")

साधुः, पुं, (साध्नोति निष्पादयति धर्मादिकार्य्यमिति । साध + "साध्यशूभ्यामुः ।" उणा० १ । १ । इति उण् ।) उत्तमकुलोद्भवः । तत्पर्य्यायः । महाकुलः २ कुलीनः ३ आर्य्यः ४ सभ्यः ५ सज्जनः ६ । इत्यमरः । २ । ७ । ३ ॥ कुलजः ७ साधुजः ८ कुलजः ९ कुलिजः १० । इति शब्दरत्नावली ॥ कुल्यः ११ कौलेयकः १२ इति भरतः । जिनः । मुनिः । इति हैमचन्द्रः ॥ ॥

साधुलक्षणं यथा,—

"यथाकथञ्चिदपि यस्तुष्टः समधिगो जितेन्द्रियः । हरिपादाश्रयो लोके विप्रः साधुरितीष्यते ॥ १ ॥ निर्वैरः सदयः शान्तो दमाद्यङ्कारवर्णितः । निरपेक्षो मुनिर्मौनरागः साधुरिहोच्यते ॥ २ ॥ लोभमोहमदक्रोधकामादिरहितः सुखी । क्षमाद्विशरणः साधुः सहिष्णुः समदर्शनः ॥ ३ ॥ समधिगो मुनिः पूतो गोविन्दचरणाश्रयः । सर्वभूतदयः कान्तो विवेकी साधुरुत्तमः ॥ ४ ॥

क्षमार्जितमहाप्रज्ञशरीरवृद्धिः
शान्तेन्द्रियश्चलितसत्पथदर्शनादिः ।
आसक्तचित्तः अयमादिभक्ति-
र्यस्तेष साधुः सततं हरेर्यः ॥ ५ ॥
लक्षाश्रयः लक्षणबाह्यरक्तः
लक्षैरलक्ष्यस्तुतिभूषणोयः ।
लक्षाधिकं ध्यायमनाकुलाक्षो
यो वै स साधुर्मुनिसत्तमानां ॥ ६ ॥

इति पाद्मोत्तरखण्डे ६८ अध्यायः ॥ ॥

अपरञ्च ।

"न प्रभुक्ते यमलोके नामभोगेन मुच्यते ।
न मुक्तः पक्वं मधुरदेवत्वं साधोस्तु लक्षणम् ॥"

इति भारते । ११३ । ४२ । ॥ ॥

तस्य लक्षणादयो यथा,—

"अलक्षाकृतयोलिङ्गाः अलक्षसुखदेहिकः ।
मनसि स्वस्थतैवेह साधोर्लिङ्गमुदीरितम् ॥

परदुःखातुरा नित्यं स्वसुखानि महान्त्यपि ।
नापेक्षन्ते महात्मानः सर्व्वभूतहिते रताः ॥
परार्थसुहृताः सन्तः सन्तः किं किं न कुर्व्वते ।
तादृगप्यम्बुधेर्वारि जलदैस्तत् प्रपीयते ॥
एक एव सतां मार्गो यदक्लीक्षतपालनम् ।
दक्षस्तमकरोत् क्रोडे पावकं यदपां पतिः ॥
आत्मानं पीडयित्वापि साधुः सुखयते परम् ।
ह्लादयन्नाश्रितान् वृक्षो दुःखञ्च सहते स्वयम् ॥"

इति वह्निपुराणे दानावस्थानिर्णयनामाध्यायः ॥ (तथा, महानिर्व्वाणतन्त्रे । १ । २२ ।

"देवायतनगा मर्त्या देवकल्पा दृढव्रताः ।
सत्यधर्मपराः सर्व्वे साधवः सत्यवादिनः ॥")

तस्य प्रशंसा यथा,—

"यत्पूजायां भवेत् पूज्यो दृष्ट्या च यमदर्शनम् ।
पापसंघः स्पर्शनाच्च किमहो साधुसङ्गमः ॥
साधूनां हृदयं धर्म्मो वाचो वो नः सनातनाः ।
कर्म्मण्यपि कर्म्माणि यतः साधुर्हरिः स्वयम् ॥"

इति कल्किपुराणे ३० अध्यायः ॥ ॥

(एतदाचारस्तु चतुर्विंधधर्म्मप्रमाणान्यतमः । यथा, मनुः । २ । ६ ।

"वेदोऽखिलो धर्म्ममूलं स्मृतिशीले च तद्विदाम् ।
आचारश्चैव साधूनामात्मनस्तुष्टिरेव च ॥")

कलिमूलक्षीणां साधुत्वं तत्कारणञ्च यथा ।

"कलिः साधयति यत् प्रोक्तं शूद्रः साधयति योषितः ।
यच्चाह भगवान् साधुर्धर्म्यान्येति पुनः पुनः ॥
तत् सर्व्वं श्रोतुमिच्छामो न चेत् गुह्यं महामुने ।
इत्युक्तो मुनिभिर्व्यासः प्रहस्येदमथाब्रवीत् ॥
शृणुता भो मुनिगणा यदुक्तं साधु साधयति ।
यत् कृते दशभिर्व्वर्षैस्त्रेतायां हायनेन तत् ॥
द्वापरे तच्च मासेन अहोरात्रेण तत् कलौ ।
तपसो ब्रह्मचर्य्यस्य जपादेश फलं द्विजाः ॥
प्राप्नोति पुरुषस्तेन कलिः साधयति भाषितम् ।
ध्यायन् कृते यजन् यज्ञैस्त्रेतायां द्वापरेऽर्च्चयन् ॥
यदाप्नोति तदाप्नोति कलौ संकीर्त्य केशवम् ।
धर्म्मोत्कर्षमतीवात्र प्राप्नोति पुरुषः कलौ ॥
स्वल्पायासेन धर्म्मज्ञास्तेन तुष्टोऽस्माहं कलेः ॥
व्रतचर्य्यापरैर्यज्ञा वेदाः पूर्व्वं द्विजातिभिः ।
ततस्तु धर्म्मसंप्राप्तैर्यष्टव्यं विधिवद्बुधैः ॥
इयाकथा इयाभोज्यं दृष्टेष्या च द्विजन्मनाम् ।
पतनाय तथा भाव्यं तेषु संयमिभिः सदा ॥
व्यसम्यक्करणे दोषास्तेषां सर्व्वेषु वस्तुषु ।
भक्ष्याभक्ष्यादिकं चैषां नेक्षाप्राप्तिकरं द्विजाः ॥
पारतन्त्र्यं समस्तेषु तेषां कार्य्येषु वै यतः ।
जयन्ति ते निजान् लोकान् क्षेत्रेण महता द्विजाः ॥
द्विजशुश्रूषयैवेह पाकयज्ञाधिकारवान् ।
निर्धनं जयति वै लोकं शूद्रो धनवरस्ततः ॥
भक्ष्याभक्ष्येषु नास्यास्ति व्यापत्तेषु वा यतः ।
नियमो मुनिशार्दूलास्तेनासौ साध्नितीरितम् ॥
सधर्म्मैस्त्वविरोधेन नरैर्लब्धं धनं सदा ।
प्रतिग्रादेष पात्रेषु यज्ञश्च यथाविधि ॥

तस्यार्जने महान् क्लेशः पालने च द्विजोत्तमाः ।
तथा सद्विनियोगाय विज्ञेयं गहनं नृणाम् ॥
एभिरन्यैस्तथा क्लेशैः पुरुषा द्विजसत्तमाः ।
निधनान् जयन्ति वै लोकान् प्राजापत्यादिकान् क्रमात् ॥
योषित्पशूपभृत्यानां भर्त्तुः कर्म्मेणा मनसा गिरा ।
कुर्व्वती समवाप्नोति तल्लोकांश्च ततो द्विजाः ॥
नातिक्लेशेन महता तानेव पुरुषो यथा ।
लभेयं साधुतं तेन मया साध्विति योषिताम् ॥"

इति विष्णुपुराणे । ६ । २ । १२—२६ ॥

साधुः, त्रि, (साध्नोति कार्य्यमिति । साध + उण् ।) वाग्मिकः । चारुः । (यथा, महाभारते । १ । १०७ । ८ ।

"न किञ्चिदुचितं राजन्नब्रवीत् साध्वसाधु वा ॥")

सज्जनः । इति मेदिनी ॥

साधुजः, त्रि, (साधौ सत्कुले जायते इति । जन + डः ।) उत्तमकुलोद्भवः । इति शब्दरत्नावली ॥

साधुधीः, स्त्री, (साधुर्धीर्यस्याः ।) अभ्रूः । इति शब्दरत्नावली । २०१ ॥ (साधुधीः ।) सुन्दरबुद्धिः । तद्युक्ते, त्रि ॥

साधुपुष्पं, क्ली, (साधु चारु पुष्पं यस्य ।) स्वर्णपद्मम् । इति शब्दमाला ॥ उत्तमकुसुमञ्च ॥

साधुबाहुः, पुं, (साधुरुत्तमो बाहुः ।) विनीताश्वः । इति हैमचन्द्रः ॥ सुन्दरबाहुश्च ॥

साधुवाही, [न्] पुं, (साधु उत्तमं वहतीति । वह + णिनिः ।) शोभनवहनशीलघोटकः । सुशिक्षिताश्वः । तत्पर्य्यायः । विनीतः २ । इत्यमरः । २ । ८ । ४४ ॥ सुष्ठुवाहनशीलकः ३ । इति शब्दरत्नावली ॥ सुन्दरघोटकविशिष्टे, त्रि ॥ (साधुवहनशीले, च त्रि । यथा, महाभारते । ६ । ४६ । ३६ ।

"तस्य कुद्दः स नागेन्द्रो वहतः साधुवाहिनः ।
पदा युगमधिष्ठाय ययौ चतुरो हयान् ॥")

साधुवृक्षः, पुं, (साधुर्वृक्षः ।) कदम्बतरुः । इति शब्दचन्द्रिका ॥ वरवृक्षः । इति राजनिर्घण्टः ॥ शोभनतरुश्च ॥

साधुवृत्तिः, स्त्री, उत्तमजीविका । सद्विवरणम् । सुन्दरवर्त्तनम् । साध्वी चासौ वृत्तिश्चेति कर्म्मधारयसमासनिष्पन्ना । साधोर्वृत्तिरिति षष्ठीतत्पुरुषसमासनिष्पन्ना वा ॥

साधुतं, क्ली, मयूरसन्दृक् । प्रणयीयौ । इति मेदिनी ॥ अत्यल्पशैवालः ॥

साध्यः, पुं, (साध्यमस्यस्तीति । अर्शआदित्वादच् ।) मयदेवताविशेषः । इत्यमरः । १ । १ । १० ॥ स तु द्वादशसंख्यकः । यथा, भरतः ।

"साध्या द्वादश विख्याता रुद्राणामेकादश स्मृताः ।"

तेषां नामानि यथा,—

"मनो मन्ता तथा प्राणो नरोऽयानश्च वीर्य्यवान् ।
विधिर्धर्मो यमश्चैव हंसो नारायणो हयः ।
प्रसूतिमिति समाख्याताः साध्या द्वादश पौष्किलाः ॥"

इति वह्निपुराणे मयमेदनामाध्यायः ॥ ॥

देवः। विष्कम्भादिसप्तविंशतियोगान्तर्गतैकविंशयोगः। इति मेदिनी। तत्र जातफलम्।
"असाधुसाधुः किल साधुजातः
शूरोऽतिवीरो विजितारिपक्षः।
वृद्धा सुभार्यः सुतवान् विनीतः।
परं ऋतार्थः सुतरां विनीतः।"
इति कोष्ठीप्रदीपः।

साध्य, त्रि, (साध+ण्यत्।) साधनीयः। इति मेदिनी। यथा,—
"अदग्धादिषु विषादेषु स्थिरप्रायेषु निश्चितम्।
स्नेहे वाद्यधिके पार्श्वे प्रोक्ते साध्यं न सिध्यति॥"
इति जिनाक्षराहतकाव्यालंकारवचनम्॥
साधनार्थोऽभिमतः। स तु पञ्चः। यथा,—
"प्रतिज्ञादोषनिर्मुक्तं साध्यं लक्षणसंयुतम्।
निश्चितं लोकसिद्धञ्च पक्षं पण्डितो विदुः॥"
साध्यं साधनार्थोऽभिमतं पक्षं विदुः। यद्यप्यत्रैव साध्यं साध्यधर्मिविशिष्टधर्मिविशेषविशिष्टस्य पक्षतया धर्मिणोऽपि धर्मविशेषेण साध्यत्वात् साध्यपक्षयोरभेदाभिधानम्। इति व्यवहारतत्त्वम्॥ अनुमितिविधेयः। यथा। साध्यतावच्छेदकमिति अनुमितिविधेयतावच्छेदकमित्यर्थः। इति सिद्धान्तलक्षणप्रागदीधीटीका॥
मन्त्रविशेषः। यथा,—
"नामाद्यक्षरमारभ्य यावन्मध्यादिमाक्षरम्।
चतुर्भिः कोष्ठकैरेकमिति कोष्ठचतुष्टयम्॥
पुनः कोष्ठककोष्ठेषु स्वरौ नाम्नादितः।
लिखेत् साध्यः सुसिद्धोऽरिः कलाज्ञेया मनीषिभिः॥
लिखेत् सिध्यति कालेन साध्यस्तु खपरोमतः।
सुसिद्धो लक्षमात्रेण जपेन्मूलं लिखत्यपि॥"
इति तन्त्रसारः॥
साध्यतावच्छेदकं, क्ली, (साध्यतामवच्छिनत्तीति। अव + छिद + ण्वुल्।) अनुमितिविधेयांशे भासमानो धर्मः। यथा साध्यतावच्छेदकमिति अनुमितिविधेयतावच्छेदकमित्यर्थः। तथा लोकप्रामाणिकज्ञानाद्लोके दण्डत्वप्रकारिका दण्डत्वाभिन्नैकानुमितिर्न तु दण्डिमान् इत्याकारा दण्डप्रकारिकापि तस्य साधकतावच्छेदकत्वेनाप्रयोजकत्वात् गौरवायेन तदघटकत्वादिति भावः। इति सिद्धान्तलक्षणप्रागदीधीटीकायां दीपिका॥
साध्यनिह्नवादः, पुं, (साध्यस्य निह्नवेन। साध्यनिह्नवादः।) साधारण्यस्य अनुद्घाटनम्। न च निह्नवादः। यथा। अनित्यो शब्दः कृतकत्वात् घटवदित्यनुमाने साध्यं नित्यत्वं तस्य निह्नवः। अनित्यो नित्यत्वेन नास्ति इति साध्यनिह्नवादः। यथा,—
"साध्यस्वरूपिणां साधुमिहिरः क्रमवृत्तिमिः।
आदिष्टमनुरंजन्तु अनुमानविदोजनैः॥"
इति मिताक्षरा॥

साध्वस, क्ली, (साधूनस्यतीति। साधु+अस+अच्।) भयम्। इत्यमरः। १।७।२१॥ (यथा, भागवते। २।१।१५।
"अन्तकालेऽपि पुरुष आगते गतसाध्वसः।
छिन्द्यादसङ्गशस्त्रेण स्पृहां देहेऽनु ये च तम्॥"
स्यति नाशयतीति। सो+"स्यतेर्धुक्।" इति असच् धुक् च। प्रतिभा। इत्युणादिटीकायां उज्ज्वलः। ३।११७॥ भाषिकाकृविशेषः। इति साहित्यदर्पणम्। ६।५५६॥)
साध्वी, स्त्री (साधु+ङीप्।) मेदा। इति राजनिर्घण्टः॥ पतिव्रता। इत्यमरः। २।६।६॥ तल्लक्षणमाह हारीतः।
"आर्त्तर्त्ते मुदिता हृष्टे प्रोषिते मलिना कृशा।
मृते म्रियेत या पत्यौ साध्वी ज्ञेया पतिव्रता॥"
("सा स्त्री ज्ञेया पतिव्रता।" इत्यपि क्वचित् पाठः॥ * ॥) तद्धर्म्मा यथा। अङ्गिराः।
"साध्वीनामेव नारीणामग्निप्रपतनादृते।
नान्यो धर्म्मो हि विज्ञेयो मृते भर्त्तरि कर्हिचित्॥"
इति शुद्धितत्त्वम्॥
तत्प्रशंसा यथा,—
"साध्वी स्त्री भाग्यतुल्या च सर्व्वथा हितकारिणी।
असाध्वी वैरतुल्या च भवेत् सन्तापदायिका॥"
इति ब्रह्मवैवर्त्ते गणपतिखण्डे। २।२५॥ * ॥
सध्वीस्त्रीणां पतिः प्रेम्णा शतपुत्राधिकः। यथा,—
"शतपुत्राधिकः प्रेम्णा सतीनाथ पतिर्नृप!।
निरूपितो भगवता वेदेषु हरिया स्वयं॥"
इति तत्रैव। ६४।६२॥ * ॥
"कामिनीं दुःखजातोऽथ दृष्ट्वा कामिनीं सतीम्।
न पृच्छति कुले जातं स्वभावं श्रुतौ श्रुतम्॥
श्रुतौ पुराणे आम्नाये चरित्रमनिरूपितम्।
तासु को निश्चयेन् प्राज्ञो अप्रज्ञाय दुराशयाम्।
तासां को वा रिपुर्नास्ति प्रार्थयन्ती नवं नवम्।
दृष्ट्वा पुंसेवं पुरुषमिच्छन्ति हृदये सदा॥
वाक्ये स्वात्मसमत्वेन प्रापयन्ती प्रयत्नतः।
सत्त्वप्रधानं यद्पुंसत्वं शुद्धञ्च स्वभावतः।
तद्गुणमय निश्चेषु साध्वीरूपं प्रशंसितम्॥
स्वागभावात् स्वभावात् मध्यस्तैरभावतः।
दैवसंयोगेन रोगेण सन्तसंगेन सुन्दरि!॥
बहुमोक्षोक्तनैव रिपुराजभयेन च।
दर्शोस्वप्न साध्वीत्वमेतैर्नैव प्रजायते॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे १४ अध्यायः॥ ८॥
अपच।
"सुते सजाते यः स्नेहो याकाङ्क्षा स्त्रीति कोविदैः।
पतिश्रेयस्य साध्वीनां कथं नार्द्धन्ति योषितः॥
स्वामिन्यै स्वदयागन्तं निष्पापं भोजनावधि।
कार्ये शिवं सतीनाथ मन्ये ज्ञाने च मन्यतम्।
यदि हत्या यदि ब्रह्मा साध्वीनां स्वामिना विना।

यथा नारे पुंश्चलीनां साध्वीनान्तु तथा प्रिये।
श्लोकं निमग्नमन्येषां कान्तेन पानभोजनात्।
विपरीतं कान्तशोको वर्द्धते मद्यपादृते।"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे। १७। ८७,८०,८७॥ * ॥ किञ्च।
"आकाशोऽयौ दिशः सर्व्वा यदि नश्यन्ति वायवः।
तथापि साध्वीशापस्तु न नश्यति कदाचन॥"
इति तत्रैव। ४२। ६४॥
सानन्दः, पुं, (आनन्देन सह वर्त्तते इति।) षोड़शध्रुवकान्तर्गतध्रुवकभेदः। यथा,—
"अष्टादशाक्षरैर्युक्तो यशोधैर्यप्रदो ध्रुवः।
कङ्कणबन्धके ताले सानन्दो वीरके रसे॥"
इति सङ्गीतदामोदरः।
गुच्छकरञ्जः। इति राजनिर्घण्टः॥ आह्लाद युक्ते, त्रि। यथा,—
"रामं गमति सानन्दं धर्म्मानभिनिविश्य सः।"
इति सुबोधभाष्यकरणम्।
सानन्दूरः, पुं, तीर्थविशेषः। यथा,—
धरण्युवाच।
"द्वारकातः परं श्रेष्ठं क्षेत्रं गुह्यं परं क्वचित्।
ततो महीवचः श्रुत्वा विष्णुः कमललोचनः।
वाराहरूपी भगवान् प्रत्युवाच वसुन्धराम्।
वराह उवाच।
सानन्दूरेति विख्यातं भूमे! गुह्यं परं मम।
उत्तरे तु वसुक्षस्य मलयस्य च दक्षिणे।
तत्र तिष्ठामि वसुधे उदीचीदिशमाश्रितः।
प्रतिमा वै मदीयास्ति गालुचा नातिशोभका।
व्याघ्रयुतां वदन्त्येके अन्ये ताम्रमयीं तथा।
कांस्यीं रीतिमयीमन्ये केचित् सीसकनिर्मिताम्।
शिलामयीमित्यपरे महदाश्चर्यरूपिणीम्।
तत्र स्थानानि मे भूमे कथ्यमानं मया शृणु।
मनुजा यत्र सुश्रोणी गता; संसारसागरम्।
तत्राश्चर्यं प्रवक्ष्यामि सानन्दूरे यशस्विनि!।
सौवर्णे दृश्यते पद्मं मध्याह्ने तु दिवाकरे।
यत्र रामगयं नाम मम गुह्यं यशस्विनि!।
तत्रापि दृश्यते आश्चर्यं यद्यपि परिवर्त्तते।
एवं तत्र लता वृक्षगुल्मस्थूलमहाद्रुमम्।
वसुधामध्ये तिष्ठन्तं सोऽपि तत्र न पश्यति॥
अन्यच्च ते प्रवक्ष्यामि महाश्चर्यं वरानने!।
मम भक्ताश्च यत्रन्ति तिष्ठन्तो हि सकर्मजाः।
बहुमत्स्यसमाकीर्णो कूर्म्मोदेव च।
क्षिप्तः पिण्डश्च तन्मध्ये येन केन विकर्मिणा।
एकस्तत्र स्थूलमत्स्यो भूमिचक्रेण भाक्षितः।
तावत् कश्चिन्न यात्यन्तं यावत्तेन न भक्षितः।
तत्र रामसरं नाम तस्मात् श्रेष्ठं परं मम।
अगाधवाप्यपारस्थं रक्तपद्मविभूषितम्।
तत्र स्नानन्तु कुर्व्वन्ति एकरात्रोषितो नरः।
सुखस्य भवनं गत्वा मोदते नात्र संशयः।
अथ प्राणान् प्रमुञ्चेत् तस्मे रामसरे तथा।
सुखस्य भवनं त्यक्त्वा मम लोकञ्च गच्छति।
तत्र रामसरे भूमे महाश्चर्यं अवाप्य मे।
मनुजास्तत्र यान्ति मम वर्त्मधरायणाः।

वत्सरः क्षीणविस्तारं बहुगुल्मलताकुलम् ।
मनोज्ञं रमणीयञ्च जलनैश्चापि संवृतम् ॥
तत्र रूढ़ाखिपद्मानि द्योतयन्ति दिशो दश ।
एकन्तु दृश्यते चैत्यमेकं वत्सरमयं तथा ॥
तत्र ब्रह्मसरं नाम शुक्लं चैत्ये परं मम ।
उत्तरेण तु पार्श्वेन मम चैत्यस्य सुन्दरि ॥
तत्र कृष्णं महाभागे पर्व्वते च समाश्रितम् ।
धारा तत्र पतेच्चैव स्थूला सुरसन्निभा ॥
तत्र स्नानञ्च कुर्व्वीत षष्ठकालोपितो नरः ।
ब्रह्मलोकं समाप्नोति मोदते नात्र संशयः ॥
अथ प्राणान् प्रमुञ्चेत तत्र ब्रह्मसरे मम ।
ब्रह्मणा समतुल्योसौ मम लोकञ्च गच्छति ॥
तत्रार्य्ये महाभागे रम्ये ब्रह्मसरे प्रभु ।
मद्भक्ता यानि पश्यन्ति घोरं संसारमोचनम् ॥
चतुर्विंशतिहादश्यां सा धारा पृथुवेचसी ।
मध्याह्ने पतते भूमे यावत् सूर्य्यः स तिष्ठति ॥
पराङ्मुखे तु मध्याह्ने सा धारा न पतेद्भुवि ।
एवं तत्र महाचर्य्ये पुण्ये ब्रह्मसरे मम ॥"
इति वाराहे सानन्दूरमाहात्म्यनामाध्यायः ॥

सानसिः, पुं, (सन्यते दीयते दक्षिणात्वर्थमिति । षण दाने + "सानसिवर्सीति ।" उणा० ४ । १०७ । इति असिप्रत्ययेन साधुः ।) सुवर्णः । इत्युणादिकोषः ॥ (संभजनीये, त्रि । यथा, ऋग्वेदे । १० । १४० । ३ ।
"एषाचि सानसिं क्रतुम् ॥"
"सानसिं संभजनीयं क्रतुं कर्म्म एषाचि ब्रह्माभिः संपर्च्चयसि फलेन वा संयोजयसि ॥"
इति तद्भाष्ये सायणः ॥)

सानिका, स्त्री, (सनति सुखरूपेति । षण दाने + खुल् । टापि अत इत्वम् ।) वप्रः । इति शब्दरत्नावली ॥

सानुः, पुं क्ली, (सन्यते सेव्यते सानुप्रभृतिभिरिति । षण सेवायाम् + "इषियुधीन्धीति ।" उणा० १ । ३ । इति नुण् ।) पर्व्वतसमभूभागः । तत्पर्य्यायः । क्रुः २ प्रस्थः ३ । इत्यमरः । २ । ३ । ५ ॥ (यथा, रामायणे । २ । ३१ । २७ ।
"भवांस्तु सह वैदेह्या गिरिसानुषु रंस्यते ।
अहं वर्त्म करिष्यामि त्वायतः खपतश्च ते ॥")
वनम् । वाजा । मार्गः । व्यथम् । कोविदः । इति मेदिनी ॥ अर्कः । पल्लवः । इति शब्दरत्नावली ॥

सानुजं, क्ली, (सानौ जायते इति । जन् + डः ।) प्रधानशरीरम् । इति राजनिर्घण्टः ॥

सानुजः, पुं, (सानौ पर्व्वतप्रस्थे जायते इति । जन + डः ।) तुम्बुरुवृक्षः । इति राजनिर्घण्टः ॥ अनुजेन सह वर्त्तमाने सानुजाते च त्रि ॥

सानुमान्, [न्] पुं, (सानुर्विद्यतेऽस्येति । सानु + मतुप् ।) पर्व्वतः । इति हैमचन्द्रः ॥ (यथा, रघुः । ८ । ६० ।
"न पृथग्जनचक्षुर्भ्यां
प्रपन्नातुमर्हसि ।
द्रुमच्छायासतां किमन्तरं
यदि सायौ क्षितेरपि ते वयाः ॥"
वाधलिङ्गेऽपि दृश्यते । यथा, रामायणे । २ । ४८ । १० ।
"आपगाश्च महानूपाः सानुमन्तश्च पर्व्वताः ॥")

सानेयिका, स्त्री, (सानेयी + स्वार्थे कन् ।) वंशी । इति शब्दरत्नावली ॥

सानेयी, स्त्री, वंशी । इति शब्दरत्नावली ॥

सान्तपनं, क्ली, (सन्तपतीति । सम् + तप + ल्युः । ततः स्वार्थे अण् ।) व्रतविशेषः । इत्यमरः । २ । ७ । ५२ ॥ यथा,—
"गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम् ।
एकरात्रोपवासश्च कृच्छ्रं सान्तपनं स्मृतम् ॥"
इति मानवे ११ अध्यायः ॥
गोमूत्रमिति । गोमूत्रादि एकीकृत्य एकस्मिन्नहनि भक्षयेत् नान्यत् किञ्चिदश्नात् अपरदिने चोपवासः । इत्येतत् सान्तपनं कृच्छ्रं स्मृतम् । यदा तु गोमूत्रादिषट् प्रत्येकं षड्दिनान्युपभुज्येत सप्तमे दिने चोपवासः तदा महासान्तपनं भवति । तथा च याज्ञवल्क्यः ।
"कुशोदकञ्च गोक्षीरं दधि सर्पिः कुशोदकम् ।
जग्ध्वा परेऽह्युपवसेत् कृच्छ्रं सान्तपनञ्चरन् ॥
पृथक्सान्तपनप्रस्थैः षड्भिर्गोपयसादिभिः ।
सप्ताहेन तु कृच्छ्रोऽयं महासान्तपनं स्मृतम् ॥"
इति कुल्लूकभट्टः ॥
गायत्र्या १०५ अष्टाविंशत्येति । (सन्तापके, त्रि ॥ यथा, ऋग्वेदे । ७ । ५८ । ६ ।
"सान्तपना इदं हविर्मरुतस्तज्जुषन्त ॥"
"सान्तपनाः सन्तापका हे मरुतः ॥"
इति तद्भाष्ये सायणः ॥ सन्तपतस्य सूर्य्यस्येदमिति । अण् । सूर्य्यसम्बन्धिनि च त्रि । यथा, वाजसनेयसंहितायाम् । १७ । ८५ ।
'सतवाँश्च प्रघाती च सान्तपनश्च गृहमेधी च ।"
'सन्तपनः सूर्य्यसम्बन्धी सान्तपनः ।' इति तद्भाष्यम् ॥)

सान्तरं, त्रि, विरलम् । इति शब्दरत्नावली ॥ (यथा, हरिवंशसंहितायाम् । २२ । ३ ।
"यदि ता: क्षुरिकाकृपाः
शुभाश्चन्तः सान्तराश्च न शिवाय ॥")
अन्तरेण सह वर्त्तमानञ्च ॥ (सावकाशम् । यथा, महाभारते । ७ । ११ । १८ ।
"तस्य चिह्नमभिप्रायं ज्ञात्वा प्रीतोऽथ तत्त्ववित् ।
तं वरं सान्तरं तस्मै ददौ संचिन्त्य बुद्धिमान् ॥")

सान्त्व, क सामप्रयोगे । इति कविकल्पद्रुमः ॥ (चुरा० पर० सक० सेट् ।) क, सान्त्वयति प्रीतार्त्तं दयालुः । इति दुर्गादासः ॥

सान्त्व, तृ क सान्त्वने । इति कविकल्पद्रुमः ॥ (अदन्तचुरा० पर० सक० सेट ।) दन्त्यादिरमध्यः वकारोपधः । सान्त्वनं प्रियकरणम् । सान्त्वयति सान्त्वापयति । इति दुर्गादासः ॥

सान्त्वं, क्ली, (सान्त्व सान्त्वने + घञ् ।) अलार्घमधुरम् । तच्च कर्म्मणः प्रीतिजनकं वाक्यम् । (यथा, महाभारते । ५ । १३० । २ ।
"कानि सान्त्वानि गोविन्दः स्तुतपूर्व्वे प्रयुक्तवान् ॥")
दाम । तच्च प्रियवादार्थप्रदानस्तवस्तुत्यादिभिः क्रोधोपशमनम् । इत्यमरभरतौ ॥ (यथा, माघे । २ । ५४ ।
"पतुर्योपायसाध्ये तु स्थिरौ सान्त्वसमक्रिया ।
स्वेदमाश्वसरं प्राहुः कोऽलभ्या परिषिष्यति ॥")
दाक्षिण्यम् । इति मेदिनी ॥

सान्त्वनं, क्ली, (सान्त्व + ल्युट् ।) दामोपायः । इति हैमचन्द्रः ॥ प्रियकरणम् । इति सान्त्वधातुटीकायां दुर्गादासः ॥ (यथा, महाभारते । ७ । ७५ । ६ ।
"नार्हसे देवि संत्रासमेवमर्हसि सान्त्वनम् ।
क्षीणवह्नयस्तु कृष्णे क्षोद्दैनां नाभिसन्धते ॥")

सान्त्वना, स्त्री क्ली, (सान्त्व + युच् । टाप् । क्लीबत्वे ल्युट् ।) सान्त्वनम् । प्रणयः । यथा । "प्रणयः सान्त्वना च सा ।" इति शब्दरत्नावली ॥

सान्त्वसाद्यं, त्रि, (सान्त्वस्य सामस्य वादः यत्तत्तम् ।) सान्त्वसाध्यम् । इति कैयटः ॥

सान्दीपनिः, पुं, (सन्दीपनस्यापत्यमिति । सन्दीपन + इञ् ।) मुनिविशेषः ; यथा, ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे । ६६ । ३० ।
"विश्वामित्रः शतानन्दो जाबालिस्तेतिलिस्तथा ।
सान्दीपनिश्च ब्रह्मांशो योगिनां ज्ञानिनां गुरुः ॥"
अपि च ।
"विदितास्तिलोकेषु ब्रह्मज्ञानमयाविपि ।
शिष्याचार्य्यकर्म्म वीरौ ख्यातस्तौ यदुनन्दनौ ॥
ततः सान्दीपनिं काश्यमवन्तिपुरवासिनम् ।
अस्त्रार्थं जग्मतुर्व्वीरौ कलदैवज्ञदर्शनौ ॥"
काश्यं काश्यां जातम् ।
"तस्य शिष्यत्वमस्येत्य गुरुवृत्तिपरौ ह तौ ।
दर्शयामासतुर्वीरावाचारमखिलं तने ॥
सरहस्यं धनुर्वेदं सर्व्वमस्त्रमशेषतः ।
अशेषराजचतुःषष्ठा तदद्भुतमभूत्तिच ॥
सान्दीपनिरथोवाच तयोः कर्म्मातिमानुषम् ।
विचिन्त्य तौ तदा मेने प्राप्तौ चन्द्रदिवाकरौ ॥
अस्त्रग्रामपरिज्ञानं प्रोक्तमात्रमवाप्य तौ ।
ऊचतुर्गुरवे गत्वा ते दत्तवा गुरुदक्षिणा ॥
सोऽप्यतीन्द्रियमालोक्य तयोः कर्म्म महामतिः ।
अयाचत सुतं शुक्रं प्रभासे सवणार्णवे ॥"
अतीन्द्रियं अन्यवादृष्टपूर्व्वम् ।
"गृहीताज्ञौ ततस्तौ तु सार्घपाद्यो महोदधिः ।
उवाच न मया दृष्टो सुतः सान्दीपनेरिति ॥
दैत्यः पञ्चजनो नाम शङ्खरूपः स बालकम् ।
जघाह सोऽस्मिन् सलिले ममैवारिनिसूदन ॥
इत्युक्त्वोल्लङ्घ्य गात्रा शङ्खं प्रगृह्य च तम् ।
कृष्णो जघाह तस्मात्तत्प्रभवं शङ्खमुत्तमम् ॥
तं पाञ्चजन्यमापूर्य्य गत्वा यमपुरीं हरिः ।
बलदेवस्य बलवान् शिक्षा देवस्तवं यमम् ॥
तं बालं बालनाशंसं यथापूर्व्वशरीरियम् ।
पित्रे प्रदत्तवान् कृष्णो बलस्य प्रेक्षितां पुरः ॥"
इति विष्णुपुराणे । ५ । २१ । १८—३० ।

सान्दृष्टिकं, क्ली, (सन्दृष्टौ प्रत्यक्षे भवम्। सन्दृष्टि + ठक्।) सद्यःफलम्। इत्यमरः।२।८।२६॥ तत्पर्य्यायकथनन्यायः। यथा। पितामहदौहित्राभावे प्रपितामहप्रपितामह्योः क्रमेणाधिकारः प्रपितामहप्रपितामहस्य धनिभोग्यत्वात् पूर्वोक्तिर्मांदृष्टिकन्यायमिदुच्यते। इति दायक्रमसंग्रहः॥

सान्द्रं, क्ली, (सदि वस्त्रने + बाहुलकात् रक्। सान्द्रेण सह वर्त्तते इति।) घनम्। इति मेदिनी॥

सान्द्रः, त्रि, (सान्द्रेण निविड़वस्त्रनेन सह वर्त्तते इति।) घनः। इत्यमरः।३।१।६६॥ (यथा, माघे। ४।२८।

"उत्सेमेदारुणतरत्विषिराजितासौ
दूर्वांगभित्तिरिव सान्द्रसुधासवर्णा॥")

स्निग्धः। इति मेदिनी॥ स्निग्धः। मनोज्ञः। इति शब्दरत्नावली॥

सान्द्रपुष्पः, पुं, (सान्द्रं पुष्पमस्य।) विभीतकवृक्षः। इति शब्दचन्द्रिका॥

सान्द्रस्निग्धः, त्रि, (सान्द्रः स्निग्धश्च।) निविड़स्निग्धः। तत्पर्य्यायः। मेदुरः२। इति शब्दरत्नावली॥

सान्धिकः, पुं, (सन्धया मद्यशोधकरसं स्निग्धमस्य। सन्धया + ठक्।) शौण्डिकः। इति शब्दमाला॥ (सन्धिं करोतीति। ठक्।) सन्धिकर्त्ता च॥

सान्धिवेश्यं, त्रि, (सन्धिवेला + "सन्धिवेलाऋतुनक्षत्रेभ्योऽण्।" ४।३।१६। इति अण्।) सन्धिवेलायां भवम्। इति तिथ्यादितत्त्वकौमुदी॥

सान्ध्यः, त्रि (सन्ध्यायां भवः। सन्ध्या + सन्धिवेलादित्वात् अण्।) सन्ध्यासम्बन्धीयः। (यथा, रघुः। २।२३।

"गुरोः सदारस्य निषीद्य पादौ
समाप्य सान्ध्यं च दिवं दिलीपः।
दोहावसाने पुनरेव दोग्ध्रीं
भेजे भुजोच्छ्वसितप्रतिनेयवत्साम्॥")

सान्ध्यकुसुमा, स्त्री, (सान्ध्यं सन्ध्याकालोद्भवं कुसुमं यस्याः।) निर्गुण्डीवृक्षः। इति राजनिर्घण्टः॥

सान्धनिकः, त्रि, (सन्धनं प्रयोजनमस्येति। सन्धन + सप्तम्या प्रयोजनमिति ठक्।) सन्धानप्रियः। इति तिथ्यादितत्त्वकौमुदी॥

सान्नाय्यं, क्ली, (सम्यक् नीयते श्रीमार्थमिति। सं + नी + "आदृगमहनजनः किकिनौ लिट्च।" ३।२।१७१। इति स्यञ् आधारेऽर्थे किकिन् लिट्च। सम्यो दीयतेऽस्मै निधानाद्वेति।) घृतिः। इत्यमरः। ३।७।१०३॥

सान्निध्यं, क्ली, (सन्निधेर्भावः। सन्निधि + "गुणवचनब्राह्मणादिभ्यः कर्म्मणि चेति।" ५।१।१२४। इति स्वार्थे ष्यञ्।) निकटम्। यथा,—

"अर्थस्य पुरुषो दासो दासस्त्वर्थो न कस्यचित्।
इति सत्यं महाराज बन्धोऽस्म्यर्थेन कौरवैः॥"

इति तिथ्यादितत्त्वम्॥

सान्निपातिकः, त्रि, (सन्निपातस्य शमनं कोपनं वा। "सन्निपाताच्च।" ५।१।३८ इत्यस्य वार्त्तिकोक्त्या स्वार्थे ष्यञ्।) सन्निपातजरोगः। इति राजनिर्घण्टः॥ (यथा, कुमारे। २।४८।

"तस्मिन्नुपायाः सर्व्वे नः क्रूरे प्रतिहतक्रियाः।
वीर्य्यवन्त्यौषधानीव विकारे सान्निपातिके॥")

तद्विवरणं सन्निपातशब्दे द्रष्टव्यम्॥

सान्यासिकः, पुं, (संन्यासः प्रयोजनमस्येति। ठक्।) सन्न्यासी। तत्पर्य्यायः। भिक्षुः२ यतिः३ कर्म्मन्दी४ रक्तवसनः५ परिव्राजकः६ नाथसः७ पाराशरी८ पारिव्राट्टी९ मस्करी१० पारिप्लवकः११। इति हेमचन्द्रः॥

सापत्न्यः, पुं, (सपत्न एव। स्वार्थे ष्यञ्।) शत्रुः। इत्यमरटीकायां रमानाथः। २।८।१०॥ (सपत्न्या अपत्यमिति। सपत्नी + ष्यञ्।) सपत्नीपुत्रः। यथा, हरिवंशे।

"पित्रा सह विभक्ता ये सापत्न्या वा सहोदराः।
अपत्यजाश्च ये तेषां पितृभागहरास्तु ते॥"

इति दायतत्त्वम्॥

(सपत्न्या भावः। सपत्नी + ब्राह्मणादित्वात् ष्यञ्।) सपत्नीभावे, क्ली॥ (यथा, माघे। ८।१५।

"नितम्बया निजवसतेर्निरासिरे य-
द्रागेण श्रियमरविन्दतः करायैः।
अक्तव्यं नियतमनेन निर्णुरस्या:
सापत्न्यं क्षितिसुतविग्रियो महिष्यः॥")

सापिण्ड्यं, क्ली, (सपिण्डस्य भावः। सपिण्ड + ष्यञ्।) सपिण्डता। सा तु पुंसां सप्तमपुरुषपर्य्यन्तं अनृणकन्यानां त्रिपुरुषपर्य्यन्तञ्च ख्यापिनी। यथा,—

"त्रिषष्ठाश्चतुर्थ्यांताः पित्राद्याः पिण्डभागिनः।
पिण्डदः सप्तमस्तेषां सापिण्ड्यं सप्तपौरुषम्॥"

इति मत्स्यपुराणम्॥

अप्रजानां त्रिपौरुषम्। इति पद्मिनीतः॥ अपि च।

"पित्रादिषट्कैः सापिण्ड्यं तत्सप्ततिसमैर्नरैः।
गोत्रैक्ये सति तत्तु स्यात् षड्भिः पुंसादिभिस्त्रयैः।
अप्रजानान्तु कन्यानां त्रिभिः पित्रादिभिः स्मृतम्॥"

इति कारिका॥

अन्यत् सपिण्डशब्दे द्रष्टव्यम्॥

साप्तपदीनं, क्ली, (सप्तभिः पदैरयनमिति। "साप्तपदीनं सख्यम्।" ५।१।२७। इति खञ्प्रत्ययेन साधुः।) सख्यम्। इत्यमरः।२।८।१२। (यथा, कुमारे। ५।६८।

"प्रकृत्यसूयारहितेषु मादृशा
न धर्म्मं पर्य्युपितुमीश्वरेषु मे।
अयं सखा सप्तपदीनमुच्यते
मनीषिभिः साप्तपदीनमुच्यते॥")

सप्तपदमरणमिति, त्रि॥

साप्तर्ण्यं, क्ली, (सप्तर्णस्य भावः। सप्तर्ण + ष्यञ्।) सप्तर्णता। (यथा, मुण्डमालातन्त्रे। २८।

"शिष्टे श्रीकृष्णमन्त्रं जप जप सततं सप्तसाप्तर्णमन्त्रम्॥")

सांन्दी, स्त्री, मांसविशेषः। इति केचित्॥

साम, क सान्त्वे। इति कविकल्पद्रुमः॥ (भ्वरा०-पर०-सक०-सेट्।) इन्त्यादिरितीयम्परी। सान्त्वं प्रियकरणम्। क, सामयति दीनं दानेन दासः। इति दुर्गादासः॥

साम, तृ क सान्त्वने। इति कविकल्पद्रुमः॥ (चुरदन्तचुरा०-पर०-सक०-सेट्।) सान्त्वं प्रियकरणम्। असमासामत् दीनं दानेन दासः। इति दुर्गादासः॥

साम, [न्] क्ली, (स्यति क्षिणोति दुःखं शेषत्वात् स्यति दुःखयति दुरध्येयत्वादिति वा। सो + "सातिभ्यां मनिन्मनिणौ।" उणा० ४।१५२। इति मनिन्।) वेदविशेषः। इत्यमरः।१।६।३॥ स्यति पापं साम यो य नाम्ने वासुमिति मनुः। इति भरतः॥ तल्लक्षणमाह जैमिनिः। गीतेषु सामाख्या इति। गीयमानेषु मन्त्रेषु सामसंज्ञं स्यात्। इति तिथ्यादितत्त्वम्॥ तच्च चतुर्व्वेदात्मकत्वेनैतद्वेदीयवेदैः। तस्य सप्तसप्तशाखा तत्रौपनिषद् छान्दोग्यादिः। विवरणन्तु वेदशब्दे द्रष्टव्यम्॥ सामध्वनिश्रवणानन्तरं वेदपाठनिषेधकारणं छान्दोग्यदेवताकथनञ्च यथा,—

"सामध्वनावृग्यजुषी नाधीयीत कदाचन।
वेदस्याधीत्य वाप्यन्तमारण्यकमधीत्य च॥
ऋग्वेदो देवदैवत्यो यजुर्व्वेदस्तु मानुषः।
सामवेदः स्मृतः पित्र्यस्तस्मात्तस्याशुचिर्ध्वनिः॥"

इति मानवे। ४।१२५॥ ॥

(वेदोत्थं मन्त्रोत्पत्तिकारणम्। तथा च ऋग्वेदटीकायां माधवाचार्य्यधृतपाराशर्य्ये। १९।३।

"सर्व्वेभ्यश्चैव वेदेभ्यो ब्रह्मणादीन् प्रजापतिः।
दुहाभ्यां परिदग्धाभ्य सप्तसामान्यगायत।
गायतो ब्रह्मणस्तस्मात् सप्तवेदेषु सप्तधा॥")

मन्त्रवश्यीकरणोपायविशेषः। इत्यमरः।२।७।४॥ प्रियवादार्थप्रदानसम्बन्धादिभिः स्त्रीपोषणकर्म्म साम। स्यति विरोधमिति पोषणकर्म्मलोकात् वासुमिति मनुः। वाच्यं साम तृ क सान्त्वे इत्यस्मात् नाम्नीति ष्यञ् वा। साम दानादि। शमयति विरोधमिति शम नाम्नि साधकारे इति केचित्। इति भरतः॥ ॥ अपि च।

मनुरुवाच।

"उपायांश्चतुरः सम्यगुपधाभ्यां परीक्षितान्।
प्रयुञ्जीत तथा तेषां प्रयोगेषु सुरोत्तम॥

मत्स्य उवाच।

साम भेदस्तथा दानं दण्डश्च मदुपोत्तम।
उपेक्षा च तथा माया इन्द्रजालञ्च पार्थिव।
प्रयोगाः कथिताः सप्त नृणां सिद्धिकराः सदा।
द्विविधं कथितं साम सप्तप्रयोगसंश्रयं च॥
सप्तप्रयोगं साधूनां चाक्षीणार्थिनि शस्यते।
सप्तमं साधुविषये साममात्रा प्रयुज्यते॥
सप्तप्रयोगा मन्त्रज्ञैर्नृणां सिद्धिकराः स्मृताः।
सामसाध्या नरास्तस्मैतु साम प्रयोजयेत्॥

तथश्च साम कर्त्तव्यं कुलस्त्रीलादिवर्जिना।
तथा सदुपचाराणां कृतानाञ्चानुवर्त्तनम्॥
अनयैव तथा युक्त्या कृतज्ञाख्यापनं स्वकम्।
एवं सान्त्वेन कर्त्तव्या वशगा धर्म्मतत्परा:॥
साम्ना यद्यपि रक्षांसि गच्छन्तीति परा श्रुति:।
तथाप्येतदसाधूनां प्रयुक्तं नोपकारकम्।
अतिशान्तिकमित्येवं पुरुषं सामवादिनम्।
असाधवोऽवजानन्ति तस्मात् तेषु विवर्ज्जयेत्॥
ये शुद्धवंशा ऋजव: प्रतीता
धर्म्मे स्थिता: सत्यपरा विनीता:।
ते साम साध्या: पुरुषा: प्रदिष्टा
मानोन्नता ये सततञ्च राजन्॥"
इति मात्स्ये राजधर्म्मे सामविधि:।२२२।१-१०॥
(प्रियवाक्यादिना सान्त्वनम्। यथा, देवीभागवते।१।१७।३१।
"सामपूर्व्वसुवाक्यैर्यं चक्ता संस्थितं सुनिम्।
गच्छतो यत्र ते कार्य्यं यथेष्टं द्विजसत्तम!॥")

सामकं, क्ली, (समेव सामम्। अण्। तम: स्वार्थे कन्।) मूलकन्दम्। (यथा, मिताक्षरायाम्।२।६४।
"वृद्धिमात्रापाकरणार्थन्तु वन्यकं सामकं दत्त्वा-प्युदाहरणी समं मूल्यं समभेव सामकम्॥")

सामक:, पुं, (समतीति। सम अवेकल्ये+ण्वुल्।) तर्कशास्त्रज्ञ:। इति त्रिकाण्डशेष:॥ (साम अधीते वेद वा। सामन्+"क्रमादिभ्यो वुन्।"४।२।६१। इति वुन्। सामाभिधे, त्रि॥)

सामग:, पुं, (साम गायतीति। गै शब्दे+टक्।) सामवेदी ब्राह्मण:। इति जटाधर:॥ (विष्णु:। इति महाभारतम्। १३। १४८। ७५॥ * ॥ सामवेदज्ञे, त्रि। यथा, भागवते।१।४।२१।
"तत्रर्ग्वेदधर: शैल: सामगो जैमिनि: कवि:।
वैशम्पायन एवैको निष्णातो यजुषामुत॥")

सामगर्भ:, पुं, (साम गर्भे यस्य।) विष्णु:। इति शब्दरत्नावली॥

सामगी, स्त्री, (साम गायतीति। गै+टक्। ङीप्।) सामगब्राह्मणपत्नी। इति कैचित्॥

सामग्री, स्त्री, (समग्रस्य भाव:। ष्यञ्। अभिधानात् स्त्रीत्वम्। ङीप्। यलोप:।) कारणसमूह:। यथा,—
"सामग्री चेन्न फलविरहो याभिरेवेति तत्त्वम्।"
इति पदाङ्कदूत:॥
द्रव्यम्। यथा,—
"एकोद्दिष्टन्तु कर्त्तव्यं पाकेनैव सदा स्वयम्।
अभावे पाकपात्राणां तदुक्त: सक्तुपोक्षणम्॥"
इति लघुहारीतवचनात् पाकपात्राभाव: पाकसामग्र्याभावोऽवगन्तव्यम्। इति श्राद्धतत्त्वम्॥

सामग्र्य, क्ली, (समग्रस्य भाव:। समग्र+ष्यञ्।) समुदायत्वम्। (यथा, कुमारे।३।२८।
"धर्म्मप्रकर्षे सति कर्म्मकारं
ङुमेति निर्म्मत्सरया सा चेत:।
प्रायेण सामग्र्यविधौ गुणानां
पराङ्मुखी विश्वसृज: प्रवृत्ति:॥")

सामज:, पुं, (साम्नो वेदभेदात् जायते इति। जन+ड:।) हस्ती। सामोत्थे, त्रि। इति मेदिनी॥ (उभयार्थे प्रमाणम्। यथा, माघे।१२।११।
"नानाविधाविष्कृतसामजस्वर:
सहस्रवर्त्मा चपलैर्दुरध्यय:।
गान्धर्व्वभूयिष्ठतया समानतां
स सामवेदस्य दधौ बलोदधि:॥")

सामञ्जस्यं, क्ली, (समञ्जसस्य भाव:। समञ्जस+ष्यञ्।) औचित्यम्॥

सामनी, स्त्री, पशुबन्धनरज्जु:। इति शब्दरत्नावली॥

सामन्त:, पुं, (समन्ताया: संज्ञकैकदेशाया भूमेरयमिति। समन्ता+तस्येदमिति अण्। समन्तात् भव:। तत्र भव इति अण् वा।) स्वविषयानन्तरराजा। सम संज्ञकोऽन्त एकदेशो यस्या: सा समन्ता स्वविषयानन्तरा भूमि: तस्या ईश्वरा इति ये सामन्ता:। इत्यमरटीकायां भरत:॥ (यथा, रघु:।५।२८।
"सामन्तसम्भावनयैव धीर:
कैलासनाथं तरसा जिगीषु:॥"
सीमान्तरभवे, त्रि। यथा, मनु:।८।२५८।
"शस्त्रभावे तु चत्वारो ग्रामा: सामन्तवासिन:।
सीमानिर्णयं कुर्य्यु: प्रयता राजसन्निधौ॥"
"ग्रामसामन्ता: सीमान्तरवासिन: प्रष्टव्या:।"
इतिमेधातिथि:॥ "समन्तभवा: सामन्तास्तद्वास्तव्यत्वात्।" इति तट्टीकायां कुल्लूक:॥)

सामन्य, पुं, (सामसु साधु:। सामन्+"तत्र साधु:।"४।४।९८। इति यत्।) सामवेदज्ञब्राह्मण:। (यथा, भट्टि:।४।६।
"ऋग्यजुषमधीयानान् सामन्यांश्च समर्चयन्।
वुभुजे देवसातृकृत्वा शूल्यसूक्ष्मञ्च शौभवान्॥")

सामयिक:, त्रि, (समय: प्राप्तोऽस्य। समय+"समयस्तस्य प्राप्तम्।"५।१।१०४। इति ठञ्।) समयोचित:। (यथा, याज्ञवल्क्ये।२।१८६।
"निजधर्म्माविरोधेन यस्तु सामयिको भवेत्।
सोऽपि यत्नेन संरक्ष्यो धर्म्मो राजकृतश्च य:॥")

सामयोनि:, पुं, (साम्न: योनि: कारणम्।) ब्रह्मा। (साम वेदभेद: योनि: कारणं यस्य।) हस्ती। सामोत्थवस्तुनि, त्रि। इति मेदिनी॥ (यथा, रघु:।१६।३।
"चतुर्भुजोत्पत्तिभव: स तेषां
दामप्रकृत्तैरनुपारतानाम्।
सुरद्विपानामिव सामयोनि-
र्भिन्नोऽधिकं विप्रससार वंश:॥")

सामर्थ्य, क्ली, (समर्थस्य भाव:। समर्थ+ष्यञ्।) योग्यता। (यथा, रामायणे।२।४३।२०।
"न हि मे जीविते किञ्चित् सामर्थ्यमिह कल्प्यते।
अपध्वस्ता: प्रियं पुत्रं लक्ष्मणञ्च महाबलम्॥")
शक्ति:। इति मेदिनी॥ (यथा, गीतायाम्।२।३६।
"अवाच्यवादांश्च बहून् वदिष्यन्ति तवाहिता:।
निन्दन्तस्तव सामर्थ्यं ततो दु:खतरं नु किम्॥")

सामवायिक:, पुं, (समवायान् समवैति। समवाय+"समवायान् समवैति।" ४।४।४३। इति ठक्।) मन्त्री। इति हेमचन्द्र:॥ समवायसम्बन्धिनि, त्रि॥

सामाजिक:, पुं, (समाजं समवैतीति। समाज+"समवायान् समवैति।"४।४।४३। इति ठक्। यद्वा, समाजं रचतीति। "रचति।"४।४।३३। इति ठक्।) सभ्य:। इत्यमर:।२।७।१६॥ (यथा, साहित्यदर्पणे।३।२२६।
"सामाजिकैस्ततो ह्यस्यरसोऽयमनुभूयते॥")
समाजसम्बन्धिनि सभासम्बन्धिनि च त्रि॥ (यथा, साहित्यदर्पणे।३।३६।
"ननु कथं रामादिरत्यादुद्बोधकारणै: सीतादिभि: सामाजिकरत्यादुद्बोध इष्यते॥")

सामान्यं, क्ली, (समान एव। स्वार्थे ष्यञ्।) जाति:। यथा,—
"जातिर्जातिश्च सामान्यं व्यक्तिस्तु प्रथगात्मिका॥"
इत्यमर:।१।४।३०॥
तद्विविधं यथा, भाषापरिच्छेदे।
"सामान्यं द्विविधं प्रोक्तं परञ्चापरमेव च।
द्रव्यादित्रिकवृत्तिस्तु सत्ता परतयोच्यते॥
परभिन्ना च या जाति: सैवापरतयोच्यते।
व्यापकत्वात् परापि स्यात् व्याप्यत्वादपरापि च।
द्रव्यत्वादिकजातिस्तु परापरतयोच्यते॥"
तल्लक्षणं यथा। नित्यत्वे सत्यनेकसमवेतत्वम्। अनेकसमवेतत्वं संयोगादीनामव्याप्ति अत: सत्यन्तं नित्यत्वे सति समवेतत्वं गगनपरिमाणादीनामव्याप्ति अत उक्तं अनेकेति नित्यत्वे सति अनेकवृत्तित्वमत्यन्ताभावस्याव्याप्ति अतो वृत्तिसामान्यमपेक्ष्य समवेतत्वमुक्तम्। एकव्यक्तिवृत्तिस्तु न जाति:। तथा चोक्तम्।
"व्यक्तेरभेदस्तुल्यत्वं सङ्करोऽथानवस्थिति:।
रूपहानिरसम्बन्धो जातिबाधकसंग्रह:॥"
एकव्यक्तिकत्वात् आकाशत्वं न जाति:। तुल्यवृत्तिकत्वात् घटत्वं कलसत्वं न जातिद्वयम्। संकीर्णत्वात् भूतत्वं मूर्त्तत्वं न जाति:। अनवस्थाभयात् सामान्यत्वं न जाति:। विशेषस्य स्वाश्रयस्वभावस्य रूपहानि: स्यादतो विशेषत्वं न जाति:। समवायसम्बन्धाभावात् समवायो न जाति:। द्रव्यादित्रिकवृत्तिरिति परत्वं अधिकदेशवृत्तित्वं अपरत्वमल्पदेशवृत्तित्वम्। सकलजात्यपेक्षया अधिकदेशवृत्तित्वात् सत्ताया: परत्वम्। एतद्बोधनाय द्रव्यादीति। तदपेक्षया चान्यासां जातीनां अपरत्वम्। परभिन्ना सत्ताभिन्ना। व्यापकत्वात् परापि स्यात् व्याप्यत्वादपरापि च। वृत्तिवैचित्र्यापेक्षया व्यापकत्वात् अधिकदेशवृत्तित्वात् द्रव्यत्वस्य परत्वम्। सकलापेक्षया अल्पदेशवृत्तित्वाद्द्रव्यत्वस्य अपरत्वञ्च। तथा च धर्म्मद्वयसमावेशात्. उभयमविरुद्धम्। इति सिद्धान्तमुक्तावली॥ (साहश्यम्। समा-

त्वम्। यथा, महाभारते। १२। २२८। ४।
"सामान्यतिथिभिर्गत्वा ब्रह्मलोकनिवासिभिः।
ब्रह्मणेवामितदीप्तौजाः प्रान्तपाभा महातपाः।
विचचार यथाकामं त्रिषु लोकेषु नारदः॥")
सामान्यं, त्रि,, (समानस्य भावः। समान+ष्यञ्।) अनेकसमन्येकवस्तु। साधारणम्। इत्यमरः। ३। १। ८२॥ यथा, देवलः।
"सामान्यं पुत्रकन्यानां स्तायां स्त्रीधनं विदुः।
अप्रजायां हरेद्भर्त्ता माता भ्राता पितापि वा॥"
इति दायतत्त्वम्॥
(यथा च कुमारे। ७। ४४।
"एकैव मूर्त्तिर्विभिदे त्रिधा सा
सामान्यमेषां प्रथमावरत्वम्।
विष्णोर्हरत्वस्य हरिः कदाचित्
वेधास्तयोस्त्वापि धातुरादौ॥")
सामान्यलक्षणा, स्त्री, (सामान्यं साधारणधर्म्मः लक्षणं यस्याः।) अलौकिकसन्निकर्षविशेषः। स तु आश्रयज्ञापकसामान्यज्ञानम्। यथा। एकघटदर्शने सकलघटज्ञानं भवति ईदृशघटत्वादिज्ञानम्। तत्प्रमाणं यथा, भाषापरिच्छेदे।
"अलौकिकः सन्निकर्षस्त्रिविधः परिकीर्त्तितः।
सामान्यलक्षणा ज्ञानलक्षणा योगजस्तथा॥
आसत्तिराश्रयाणान्तु सामान्यज्ञानमिष्यते।
तदिन्द्रियसतद्धर्म्मबोधसामग्र्यपेक्षते॥"
सामान्यशासनं, क्ली, (सामान्यं शासनम्।) सामान्याधिकारः। यथा,—
"मन्वेकवोधौ स्यात्तत्रशासनं धर्म्मकीलकः।
सामान्यशासनं सौरं सुकृतिः शूद्रशासनम्॥"
इति पुरुषार्थशब्दरत्नावली॥
सामान्या, स्त्री, (सामान्य+टाप्।) साधारणी नायिका। यस्या लक्षणम्। धनमात्रलाभार्थं सकलपुरुषाभिलाषा॥ सा त्रिधा। अन्यसम्भोगदुःखिता। वक्रोक्तिगर्व्विता। मानवती। वक्रोक्तिगर्व्वितापि त्रिविधा। प्रेमगर्व्विता सौन्दर्य्यगर्व्विता च। एता नायिका अवस्थाभेदेन प्रत्येकं अष्टप्रकारा भवन्ति। यथा। प्रोषितभर्त्तृका १ खण्डिता २ कलहान्तरिता ३ विप्रलब्धा ४ उत्कण्ठिता ५ वासकसज्जा ६ स्वाधीनपतिका ७ अभिसारिका ८। इति रसमञ्जरी॥ (यथा च साहित्यदर्पणे। ३। १११—११२।
"धीरा कलाप्रगल्भा स्याद्दक्षिणा सामान्यनायिका।
निर्गुणानपि न द्वेष्टि न रज्यति गुणिष्वपि।
विषमाक्षं समालोक्य सा रागं दर्शयेद् बहिः॥
काममङ्गीकृतमपि परित्यागघृणं नरम्।
मात्रा निष्कासयेद्दोषा पुनः सन्धानकाङ्क्षया॥
तस्कराः पण्डकाः मूर्खाः सुखप्राप्यधनास्तथा।
सिद्धिनम्रप्रकामाद्या आर्यां प्रायेण वल्लभाः॥
क्वापि मदनाक्रान्ता क्वापि सत्यानुरागिणी।
रक्तायां वा विरक्तायां रतमस्यां सदृशम्॥"
पण्डको वातरोगपण्डादिः। छन्नं प्रच्छन्नं ये कामयन्ते ते छन्नकामाः। तत्र रागहीना यथा नटकमेलकादौ मदनमञ्जर्य्यादिः। रक्ता यथा नष्टक्षत्कटिकादौ वसन्तसेनादिः। पुनश्च।
"अवस्थाभिर्भवन्त्यष्टावेता षोढ़ाभेदिताः॥
स्वाधीनभर्त्तृका तद्वत् खण्डिताथाभिसारिका॥
कलहान्तरिता विप्रलब्धा प्रोषितभर्त्तृका।
अन्या वासकसज्जा स्याद्विरहोत्कण्ठिता तथा॥"
एतासां लक्षणानि तु तत्तच्छब्दे विशेषतो द्रष्टव्यानि॥)
सामि, य, अर्द्धम्। निन्दा। इत्यमरः। ३। ३। २४८॥
सामिक्षतः, त्रि, अर्द्धक्षतः। सामिशब्दात् क्षधातोः क्तप्रत्ययेन निष्पन्नः॥
सामिधेनी, स्त्री, (समिधां आधानी। समिध्+"सामिधामाधाने घेण्यण्।" ४। ३। १२०। इत्यस्य वार्त्तिकोक्त्या घेण्यण्। ङित्वात् ङीष्।) अग्निसमिन्धना ऋक्। अग्नेर्ज्वालने या ऋक् पठ्यते। तत्पर्य्यायः। धाया २। इत्यमरः। २। ७। २२॥ (यथा, महाभारते। ३। १३४। १६।
"नवैवोक्ताः सामधेन्यः पितॄणां
तथा प्राचुर्नवयोगं विसर्गम्॥"
समित्। इति मेदिनी॥
सामिपीतः, त्रि, अर्द्धपानकृतः। सामिशब्दात् पाधातोः क्तप्रत्ययेन निष्पन्नः॥
सामिभुक्तः, त्रि, अर्द्धभुक्तः। सामिशब्दात् भुजधातोः क्तप्रत्ययेन निष्पन्नः॥ (यथा, रघुः। १६। १६।
"वल्लभाभिरुपहृत्य चक्रिरे
सामिभुक्तविषया समागमाः॥")
सामीची, स्त्री, वन्दना। इति हारावली॥
सामीप्यं, क्ली, (समीपस्य भावः। समीप्+चतुर्वर्णादित्वात् ष्यञ्।) समीपत्वम्। नैकट्यम्। यथा,—
"यः कसामीप्यसादृश्यसाकल्यानुक्रमर्द्धिषु॥"
इति सुग्धबोधव्याकरणम्॥
अधिकरणविशेषः। आधारभेदः। यथा,—
"सामीप्यार्थेविषयेवर्त्ताभ्राधारश्चतुर्विधः।"
इति कारके सुग्धबोधव्याकरणम्॥
सासुद्रं, क्ली, (समुद्रे भवम्। अण्।) समुद्रलवणम्। इति हेमचन्द्रः॥ करकच् इति भाषा। तत्पर्य्यायः।
"सासुद्रं यत्तु लवणं त्रिकूटं कटुकञ्च तत्॥"
इति रत्नमाला॥
अस्य गुणाः।
"सासुद्रं लवणं पाके नात्युष्णमविदाहि च।
भेदनं मधुरं स्निग्धं शूलघ्नं नातिपित्तलम्॥"
इति राजवल्लभः॥
अन्यत् समुद्रलवणशब्दे द्रष्टव्यम्॥ ७॥
समुद्रफेनम्। इति राजनिर्घण्टः॥ (समुद्रेण ऋषिणा प्रोक्तमिति। अण्।) देहचिक्कम्। इति मेदिनी॥ (तल्लक्षणान्वितग्रन्थविशेषः। इति केचित्॥) समुद्रजाते, त्रि। इति च मेदिनी॥ (पुं, समुद्रगामी वणिक्। यथा, याज्ञवल्क्यः। २। ३८।
"कान्तारगास्तु दशकं सासुद्रा विंशकं शतम्।
दत्त्वा खलतां हृद्धिं सर्व्वे सर्व्वासु जातिषु॥"
मत्स्यविशेषः। यथा, सुश्रुते। ५। ८।
"मत्स्याः सासुद्रः परिमण्डलो हस्तिमत्स्यः क्षुद्राः पार्व्वतीय इति पञ्च तैर्दृष्टश्च तीक्ष्णकण्टकैः श्रोणिश्च। पार्व्वतीयस्तु कौटैः प्रायशश्चैस्तुल्यलक्षणः॥"॥ देशविशेषः। यथा, मार्कण्डेये। ५८। १३।
"प्राग्ज्योतिषाः सलौहित्याः सासुद्राः पुरयाश्रयाः।
* * * *
वर्द्धमानाः कोशलाश्च सुखे कूर्म्मस्य संस्थिताः॥")
सासुद्रकं, क्ली, (सासुद्रमेव। स्वार्थे कन्।) समुद्रलवणम्। इति राजनिर्घण्टः॥ समुद्रोत्पन्नस्त्रीपुंलक्षणग्रन्थः। तद्विवरणं यथा,—
श्रीकृष्ण उवाच।
"कीदृशः पुरुषो वन्द्योऽवन्द्यो वा कीदृशो भवेत्।
कन्या वा कीदृशी ग्राह्या गर्हिता वापि कीदृशी।
महेश उवाच।
शृणु कृष्ण प्रवक्ष्यामि सासुद्रवचनं यथा।
लक्षणन्तु मनुष्याणां एकैकेन वदाम्यहम्॥
वामभागे तु नारीणां दक्षिणे पुरुषस्य च।
निर्दिष्टं लक्षणं तेषां सासुद्रेण यथोदितम्॥
पूर्व्वमायुः परीक्षेत पश्चाल्लक्षणमेव च।
आयुर्हीनं नराणान्तु लक्षणैः किं प्रयोजनम्॥"
अथ पुरुषलक्षणम्।
"पञ्चदीर्घं चतुर्हस्वं पञ्चसूक्ष्मं षडुन्नतम्।
सप्तरक्तं त्रिगम्भीरं त्रिविशालं प्रशस्यते॥
बाहुनेत्रहनुः कुक्षी ह्रौ तु नासा तथैव च।
स्वनयोरन्तरञ्चैव पञ्चदीर्घं प्रशस्यते॥
ग्रीवाथ कर्णौ पृष्ठञ्च हस्तौ जङ्घे तु पूजिते।
चत्वारि यस्य हस्वानि पूजां प्राप्नोति नित्यशः॥
लक्ष्याग्रयङ्गुलिपर्व्वाणि दन्तकेशनखत्वचः।
पञ्च सूक्ष्माणि येषां हि ते नरा दीर्घजीविनः॥
नासा नेत्रञ्च दन्ताश्च ललाटञ्च शिरस्तथा।
हृदयञ्चैव विज्ञेयमुन्नतं षट् प्रशस्यते॥
पाणिपादतलौ रक्तौ नेत्रान्तनखानि च।
तालुकोष्ठरजिह्वाश्च सप्तरक्तं प्रशस्यते॥
स्वरो दुन्दुभिवच्च नाभिश्च त्रिगम्भीरसदाकृतम्
उरः शिरो ललाटञ्च त्रिविस्तीर्णं प्रशस्यते॥
कटिर्विशाला बहुपुत्रभागी
विशालवक्षो नरपुङ्गवः स्यात्।
उरो विशालं धनधान्यभागी
शिरो विशालं नरपूजितः स्यात्॥
न श्रीस्त्यजति रक्ताङ्गं नार्थः कनकपिङ्गलम्।
दीर्घबाहुं न चैश्वर्य्यं न मांसोपचितानकम्॥
कदाचिद्गुरुं दुःखैः कदाचित् जीवन्तः सुखैः

कदाचित् तुष्टिको दुःखी कदाचित् चपला सती ॥
नेत्रस्वेदेन सौभाग्यं दन्तस्वेदेन भोजनम् ।
शुक्लस्वेदेन वैधव्यं पादस्वेदेन वाहनम् ॥
एकरोमकिणौ दीर्घौ पादावध्वनि कोमलौ ।
यस्य पाणितलौ रक्तौ तस्य राज्यं विनिर्दिशेत् ॥
दीर्घश्लिष्टेन दारिद्र्यं स्थूलश्लिष्टेन निर्धनः ।
कृशश्लिष्टेन सौभाग्यं दृश्यश्लिष्टेन भूपतिः ॥
रेखाभिर्बहुभिर्दुःखं स्वल्पाभिर्धनहीनता ।
रक्ताभिः प्रियमाप्नोति कृष्णाभिः प्रेष्यतां व्रजेत् ॥
अङ्गुष्ठोदरमध्यं तु यवो यस्य विराजितः ।
शतं भोजनं तस्य शतं जीवति मानवः ॥
व्यङ्गुष्ठं कुत्सितं क्षुद्रं यस्य पाणितले भवेत् ।
सर्वैश्वर्यं विनिर्दिष्टं अग्नीत्यायुर्भवेद्ध्रुवम् ॥
यङ्गुष्ठस्य भवेत् पार्श्वे पङ्कजं वाथ तोरणम् ।
तस्यैश्वर्यञ्च राज्यञ्च अग्नीत्यायुर्भवेद्ध्रुवम् ॥
कनिष्ठातर्जनीं यावद्रेखा भवति चाञ्चला ।
विंशत्यब्दाधिकशतं नरो जीवत्यनामयः ॥
कनिष्ठामध्यमां यावद्रेखा भवति चाञ्चला ।
शतान्दं वाथ वाप्नोति नरो जीवेन्न संशयः ॥
कनिष्ठानामिकायावद्रेखा भवति चाञ्चला ।
यष्टिं पञ्चाशदब्दं वा नरो जीवत्यसंशयम् ॥
रेखया भिद्यते रेखा सख्यायुश्च भवेन्नरः ।
कनिष्ठाधःस्थिता रेखाः संख्या वार्त्तिकाः स्मृताः ।

सार्धकं पुरुषायान्तु नारी भवति निश्चितम् ॥
करमध्यगता रेखा भुवा सार्द्धमवेद् यदि ।
वृषो वा वृषभो वा स्यिरं स्यातोऽवेवान् भवेत् ॥
मध्यमूर्ध्वगकोणेन विद्याविनयसम्मितः ।
पितामहस्य वा किञ्चिद्गुणञ्च लभते ध्रुवम् ॥
मध्यमायां यदि यवा दृश्यन्तेऽत्यन्तशोभनाः ।
सहस्रमधिकं वित्तं प्राप्नोत्यकुतश्चिद् यत्नं ॥
यस्याश्च मध्यमूले यवः पूर्णश्च दृश्यते ।
सदा वित्तसमृद्धीनामधिकं धनमाप्नुयात् ॥
अर्धेनाग्रेण चक्रस्य मिश्रद्वारा धनम्भवेत् ।
शैलेन विपरीतस्तु व्ययो भवति निश्चितम् ॥
मध्यमायां स्थिते चक्रे शैलद्वारा धनं लभेत् ।
शैलेन विपरीतस्तु व्ययो भवति निश्चितम् ॥
कनिष्ठामिश्रयां भवेच्चक्रं चन्द्रद्वारा भवेद्धनम् ।
शैलेन विपरीतस्तु व्ययो भवति निश्चितम् ॥
न विद्यायां भवेच्चक्रं वाणिज्येन धनं भवेत् ।
शैलेन विपरीतस्तु व्ययो भवति निश्चितम् ॥
कनिष्ठे दृश्यते यस्य चक्रैरावृतपुरुषम् ।
अकीर्त्याङ्गः क्षमाभोगी प्रव्रज्येतः प्रजं क्षमाः ॥
धनोपेतश्च कनिष्ठश्च शोभनो मणौ भवेत् ।
शैलान्वीतश्च कनिष्ठश्च शोभनो मणौ भवेत् ॥
यदा छिद्रं भवेद्दीर्घो नागाग्रं दिशि गच्छति ।
दीर्घो भवति निर्दोषः दुर्गो भवति सर्वदा ॥
दृश्यश्च स्थिरा यस्य रुचिं भूपोऽपि याचते ।
यस्यैश्वर्यमयो नित्यं परश्लिष्टेन विद्यते ।
कर्कटैः कटिभिर्नित्यं क्रमाकारैर्मनोहरैः यदा ।
दृश्यते च यदा पार्श्वे निर्दोषो भवति ध्रुवम् ।

क्षयश्लिष्टेन सख्येन रक्तवर्णेन भूपतिः ।
बहुस्त्रीरमणो नित्यं नारीणां वल्लभो भवेत् ॥
यस्य पादतले पद्मं चक्रं वाथ तोरणम् ।
अक्षुद्रं कुत्सितं वापि स राजा भवति ध्रुवम् ॥
कृशानितोमशा ये स्युः केकराक्षाः कुचेलकाः ।
क्रातरं व्याधिकाक्षाश्च ते दरिद्रा न संशयः ॥
कपिला मलिनाक्षाश्च दुःखाक्षेव दृष्टनखाः ।
कृशानिदीर्घा मनुजाक्षे दरिद्रा न संशयः ॥
चिपुके क्षुद्रमुद्रया ये निर्लोमहृदयाश्च ये ।
ते धूर्त्ता नैव सन्देहः मनुवचनं यथा ॥
सूचीमुखा भग्नदृष्टाः कृशदन्ताः कुचेलकाः ।
वक्रनासा वक्रनासाक्षे नरा दुष्टमानसाः ॥
दयालवश्च दातारो रूपवन्तो जितेन्द्रियाः ।
परोपकारिणश्चैव तेऽपूज्या मानवाः स्मृताः ॥"
इति पुरुषलक्षणम् ॥ * ॥

अथ स्त्रीलक्षणम् ।

"यस्याः पादतले रेखा सा भवेत् क्षितिपालना ।
भवेदखण्डभोगा च या मध्याङ्गुलिसङ्गता ॥
उन्नतो मांसलोऽङ्गुष्ठो वर्त्तुलोऽतुलभोगदः ।
वक्रो दृश्यश्च विवृतः सुखसौभाग्यभङ्गकः ॥
दीर्घाङ्गुलीभिः कुलटा कृशाभिरतिनिर्धना ।
दृश्याभिः स्याच्च दृश्यायुः भग्नाभिर्भुंगवर्त्तिनी ॥
विवृताभिर्भवेद्दासी विरलाभिर्दरिद्रिणी ।
परस्परं समारूढा यदाङ्गुल्यो भवन्ति हि ॥
एका बहूनपि पतीन् परप्रेष्या तदा भवेत् ।
स्निग्धा सुसृतताम्राश्च दृश्याः पादनखाः शुभाः ॥
राजीवरूपकं स्त्रीणां पादयुग्मं सुसृतम् ।
समपार्ष्णी शुभा नारी दृष्टपार्ष्णी सुदुर्भगा ॥
कुलटोन्नतपार्ष्णी स्यात् दीर्घपार्ष्णी च दुःखभाक् ।
रोमशैने सभे स्निग्धे वक्रे च क्रमवर्तुले ॥
सा राजपत्नी भवति विप्रिये सुमनोहरे ।
वृत्तं पिण्डितसंलग्नं जानुयुग्मं प्रशस्यते ॥
निर्मांसं खेरचारिण्या दरिद्रायाश्च विग्रहम् ।
विप्रिये करभाकारैरूरुभिर्मध्यदेशैर्नैः ।
सुवृत्ते रोमरहितैर्भवेयुर्भूपपत्नयाः ॥
चतुर्भिरङ्गुलैः श्लक्ष्णा कटिर्विंशतिसंयुतैः ।
सुसृतानतिसम्पाद्या चतुरस्रा स्त्रीवरस्य ॥
निम्नविम्बौ नारीणां उन्नतौ मांसलः पृथुः ।
महाभोगाय संप्रोक्तः तदन्योऽप्यर्थनाय च ॥
गभीरा दक्षिणावर्त्ता नाभिः स्यात् सुखसम्पदे ।
वामावर्ता बहुत्यागा अक्षयन्त्री न शोभना ॥
उदरेणाभिमुखेन विप्रिरेऽतिदुःखदा ।
योषितं भवति भोगाढ्या नित्यमिष्टान्नसेविनी ॥
कुम्भाकारं दरिद्रायाः जठरञ्च सदृङ्गवत् ।
कृशोदरं यवाभञ्च दुर्भगं भाषते स्त्रियाः ॥
निर्मांसं पुरुषं यस्याः समं विप्रियवर्जितम् ।
रोमशं चाल्पवैधव्यं प्रियप्रेमा च सा भवेत् ॥
घनौ दृढौ सदौ पीनौ समौ श्लक्ष्णौ पयोधरौ ।
सूक्ष्माग्रौ विरलौ श्यामौ वामोन्नम्रौ न शस्यते ॥
दक्षिणोन्नतचूचीका पुत्रिणी नात्यभोगिनी ।

वामोन्नतभुजा सूते कन्यां सौभाग्यसुन्दरीम् ॥
स्थूलौ स्थूलौ क्रमश्लक्ष्णावग्रे तीक्ष्णौ पयोधरौ ।
सुखदौ बाल्यकाले तु पश्चाद्व्यक्तदुःखदौ ॥
अमोलसुकुलाकारमङ्गुष्ठाङ्गुलिसम्मुखम् ।
हस्तद्वयं नगाचीर्णां बहुभोगाय जायते ॥
मृदुमध्योन्नतं रक्तं तलं पार्श्वोरन्ध्रकम् ।
प्रशस्तं शुक्ररेखाढ्यमल्परेखं शुभप्रदम् ॥
विधवा बहुरेखेण विरेखेण दरिद्रिणी ।
भिन्नकी सुशिराढ्येन नारी करतलेन वै ॥
मत्स्येन सुभगा नारी खस्तिकेन च सुप्रजा ।
पद्मेन भूपतेः पत्नी जनयेत् भूपतिं सुतम् ॥
चक्रवर्त्तिस्त्रियः पाणौ नन्द्यावर्त्तप्रदक्षिणाः ।
शुक्लातपत्रकमठा राजमाल्यत्सुचक्राः ॥
क्षत्रीवंशस्य पत्नी स्याच्छकटेन युगेन वा ।
चामराङ्कुशकोदण्डैः राजपत्नी भवेद् ध्रुवम् ॥
अङ्गुष्ठमूलान्निर्गत्य रेखा याति कनिष्ठिकाम् ।
यदि स्यात् प्रतिहन्ती सा दूरतस्तां त्यजेत् सुधीः ॥

त्रिशूलासिगदाशक्तिदुन्दुभ्याकृतिरेखया ।
नितम्बिनी कीर्त्तिमती करेण पृथिवीतले ॥
पाटली वर्त्तुलः स्निग्धो रेखाभूषितमध्यभूः ।
सीमन्तिनीनामधरो राज्ञां चैव प्रियो भवेत् ॥
श्यामः स्थूलोऽधरोष्ठः स्यात् वैधव्यकलहप्रदः ।
मध्यो मक्षिकाश्चिन्याधोत्तरोष्ठः सुभोगदः ॥
पीताः श्यामाश्च दशनाः सूक्ष्मा दीर्घा द्विषड्-क्रयः ।

शुभाकाराश्च विरला दुःखसौभाग्यकारणम् ।
व्यक्तादधिकैर्दन्तैर्मातरं भक्षयेत् स्फुटम् ॥
पतिहीना च विकटैः कुलटा विरलैर्भवेत् ।
समदन्तपुटा नासा बहुक्षिप्ता शुभावहा ॥
स्थूलाग्रा मध्यनम्रा च न प्रशस्ता सुसम्मता ।
कलना लोचने श्लक्ष्णे रक्तान्ते कृष्णतारके ॥
गोक्षीरवर्णेविप्रदे तृप्तिर्ये कृष्णपक्ष्मिणी ।
उन्नताक्षी न दीर्घायुः दृताक्षी कुलटा भवेत् ॥
मेषाक्षी महिषाक्षी च केकराक्षी न शोभना ।
कामगृहीता नितरां गोपिङ्गाक्षी सुदुर्मदा ।
पारावताक्षी दुःशीला रक्ताक्षी भर्तृघातिनी ।
कोटरानयना दुष्टा गजनेत्रा न शोभना ।
पुंश्चली वामकाक्षाक्षी वन्ध्या दक्षिणकाक्षिका ।
मधुपिङ्गाक्षी रमणी धनधान्यसमृद्धिभाक् ।
प्रशस्यमस्तिकं यस्या देवरं घ्नन्ति सा ध्रुवम् ।
रोमशेन शिराजेन ग्रीवया रोमशी मता ।
स्थूलस्कन्धा च विधवा दीर्घग्रीवा च वन्ध्यकी ।
विशालेनापि शिरसा भवेद्दौर्भाग्यभाजनम् ॥
केशा अलिकुलश्यामाः स्निग्धाः सूक्ष्माः सुकोमलाः ।
किंपिराकुंचितायाश्च कुटिलाश्चातिशोभनाः ॥
भ्रुवोरन्तं ललाटे वा मशको राज्यसूचकः ।
वामे कपोले मशकः शोभनो मिष्टभाषकः शुभः ॥
तिलकं वाथ्नुते वापि यदि सौभाग्यकारणम्
यस्या दक्षिणवक्षोजे भवेत् तिलकाञ्चनम्
पद्मोपमुखयं सूते सुतं वा च सुतद्वयम् ।

तिलकं लाञ्छनं श्रोणं यस्या वामकुचे भवेत् ॥
एकं पुत्रं प्रसूयादौ अन्ते च विधवा भवेत् ।
गुह्यस्य दक्षिणे भागे तिलकं यदि योषितः ॥
तदा पितिपतेः पत्नी सुते च पितिपं सुतम् ।
नासाग्रे मशकः श्रोणो महिष्या एव जायते ॥
कृष्णाः स एव भर्तृघ्ना पुंश्चल्या वा प्रकीर्त्तितः ।
भ्रुवोरधस्तात् तिलकं मशको लाञ्छनं शुभम् ॥
मशकस्तिलकं चिह्नं गुह्यदेशे दरिद्रकृत् ॥
कुलक्षयापि दुःशीला कुलक्षयशिरोमणिः ॥
कुलक्षयापि या साध्वी सर्व्वसौख्यभूस्तु सा ।
कृष्णा कपिलकेशी च मिलितभ्रूकुटिस्तथा ।
गमनं सत्वरत्वेव त्यक्त्वा स्यात् सदा वृषे ॥
यस्या गमनमात्रेण भूमौ कम्पः प्रजायते ।
यज्ञाग्निर्नो प्रलोभाच्च तां नारीं परिवर्जयेत् ॥
विरला दशना यस्याः कृष्णोष्ठी कृष्णजिह्विका ।
भर्त्तारं प्रथमं हन्ति द्वितीयञ्चैव विन्दति ॥
अङ्गुली विरला यस्याः सलोमा गात्रकर्कशा ।
भेका भेकस्वनी क्षुद्रा दूरतः परिवर्जयेत् ॥
त्रीणि यस्याः प्रलम्बानि ललाटं उदरं भगम् ।
त्रीणि सा भक्षयेन्नारी श्वशुरं देवरं पतिम् ॥
ललाटे श्वशुरं हन्यात् जठरे देवरं तथा ।
भगञ्च हन्याद्भर्त्तारं महादोषाश्रयः स्मृताः ॥
यस्या अत्युत्कटं नाम्नो वक्षश्च विस्तृतं भवेत् ।
उत्तरोष्ठे च लोमानि शीघ्रं सा भक्षयेत् पतिम् ॥
चरणानामिका यस्याः छिद्यते न स्पृशते यदि ।
द्वितीया वा तृतीया वा सा कन्या सुखवर्द्धिनी ॥
नासाग्रे दृश्यते यस्याः तिलकं मशकोऽपि च ।
कृष्णदन्ता कृष्णजिह्वा दशाहेन पतिं हरेत् ॥
सूक्ष्मकेशा तु या कन्या गौरवर्णा च या भवेत् ।
सा पतिं जनयेत् पुत्रान् प्राप्नोति विपुलं सुखम् ॥"

इति सामुद्रके स्त्रीलक्षणं समाप्तम् ॥

(समुद्रसम्बन्धिनि, त्रि। यथा, महाभारते। ५। ३५। ४४।

"सामुद्रकं वाणिजकञ्च चौरं
प्रासाकृतिञ्च भिक्षिनमकञ्च ।
अरिञ्च मित्रञ्च कृशीलवञ्च
नैतान् साक्षे त्वधीकुर्व्वीत सप्त ॥")

सामुद्रिकः, त्रि, (समुद्रेण प्रोक्तं शास्त्रमधीते वेत्ति वा। ठक्।) स्त्रीपुंसलक्षणज्ञः। इति भरतः॥ समुद्रसम्बन्धी च॥ (यथा, महाभारते। १३। १६८। २।

"सामुद्रिकान् स वणिजस्तानोऽपश्यत् स्थिनान् पथि।
स तेन सह मार्गेण प्रययौ सागरं प्रति ॥")

सामुद्री, स्त्री, वैदिकच्छन्दोविशेषः। इति केचित्॥

साम्परायिकं, क्ली, (संपरायाय विपदे प्रभवतीति। संपराय+"तस्मै प्रभवति सन्तापादिभ्यः।" ५। १। १०१। इति ठक्।) युद्धम्। इत्यमरः। २। ८। १०३। (सम्परायो उत्तरकाले हितम्। सम्पराय+ठक्।) पारलौकिके, त्रि। यथा, —

"प्रभुः प्रथमकल्पस्य योऽनुकल्पेन वर्त्तते।
न साम्परायिकं तस्य दुर्म्मतेर्विद्यते फलम् ॥"

इति मनुः। ११। ३०।

(सम्परायं युद्धमर्हतीति। तदर्हतीति ठक्। युद्धार्हे, त्रि। यथा, रघुः। १७। ६२।

"पित्रा संवर्द्धितो नित्यं कृतास्त्रः साम्परायिकः।
तस्य दण्डवतो दण्डः स्वदेहान्न व्यशिष्यत ॥")

साम्यतं, व, (समं च प्रति च इयोः समाहारः। ततः प्रज्ञादित्वात् अण्।) युक्तम्। (यथा, कुमारे। २। ५५।

"इतः स दैत्यः प्राग्भ्रीर्नेत एवाहति क्षयम्।
विघट्टयोरपि संघट्टं स्वयं क्षेत्तुमसाम्यतम् ॥")

इदानीम्। इत्यमरः। ३। ४। ११; २३॥ (यथा, ऋतुसंहारे। १। ७।

"ससुन्नतस्वेदचिताङ्गसन्धयो
विसृज्य वासांसि गुरूणि साम्यतम्।
स्तनेषु तन्वंशुकसुन्नतस्तना
निवेशयन्ते प्रमदाः सयौवनाः ॥"

साम्यति भवं साम्यतम्। व्यण्। इदानीन्तने, त्रि। यथा, हरिवंशे। ६। १६।

"वैवस्वतेऽन्तरे चास्मिन् साम्यते समुपस्थिते।
वैशाखात् प्रभृति राजेन्द्र सर्व्वस्तेतस्य सम्भवः ॥"

तथाच तत्रैव। ७। ३७।

"मनोर्वैवस्वतस्येते वर्त्तन्ते साम्यतेऽन्तरे।
इक्ष्वाकुप्रमुखाश्चैव दशपुत्रा महात्मनः ॥"

तथाच तत्रैव। ८। ४३।

"तस्य ते कीर्त्तयिष्यामि मनोर्वैवस्वतस्य च।
विसर्गं भरतश्रेष्ठ साम्यतस्य महाद्युतेः ॥")

साम्र, क्ली सम्बन्धे। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-सेट्।) ओष्ठ्यवर्गद्वितीयोपधः। द्वितीयस्वरी। क, साम्बयति धनं लोकः संप्राप्नोति दत्यर्थः। इति दुर्गादासः॥

साम्बरं, क्ली, (सम्बरदेशे भवम्। अण्।) गन्धद्रव्यम्। यथा,—

"गन्धादिलवणं शुभ्रं पृथ्वीजं गन्धदेशजम्।
गन्धोत्थञ्च महारम्यं साम्बरं सम्बरोद्भवम् ॥"

इति राजनिर्घण्टः॥

साम्बरी, स्त्री, (सम्बरेण कृता। सम्बर+अण्+ङीष्।) माया। यथा,—

"शाम्बरी साम्बरी माया मायाशङ्खिचुकेनटे।"

इति शब्दरत्नावली॥

साम्बवी, स्त्री, रक्तशोभ्रः। इति शब्दचन्द्रिका॥

साम्मातुरः, पुं, (सम्मातुरपत्यं पुमान्। सम्मातृ+"मातुरुत्संयोगादेरयङ्व्यायाः।" ६।१।१३५। इति अण्। उकारश्च।) सनीतनयः। तत्पर्य्यायः। भाद्रमातुरः॥ इति हैमचन्द्रः। ३। २२०॥

साम्यं, क्ली, (समस्य भावः। सम+ष्यञ्।) समता। तुल्यत्वम्। यथा,—

"शाण्डालान्त्यस्त्रियौ गत्वा भुक्त्वा च प्रतिग्रहम्।
यत्र च।

एतज्ज्ञानतो विप्रो ज्ञानात् साम्यन्तु गच्छति।"

इति प्रायश्चित्ततत्त्वम्॥

साम्यन्त्वेकस्यानत्वम्। इति सुबोधव्याकरणम्॥ (साम्यावस्थापन्ने, त्रि। यथा, भागवते। ८। ३। १२।

"नमः शान्ताय घोराय मूढाय गुणधर्म्मिणे।
निर्विशेषाय साम्याय नमो ज्ञानघनाय च ॥")

साम्राज्यं, क्ली, (सम्राजो भावः। ष्यञ्।) समस्तराज्यम्। (यथा, रघुः। ४। ५।

"छायामण्डललक्ष्येण तमदृश्या किल स्वयम्।
पद्मा पद्मातपत्रेण मेने साम्राज्यदीक्षितम् ॥")

दशलक्षाधिपत्यम्। यथा,—

"लक्षाधिपत्यं राज्यं स्यात् साम्राज्यं दशलक्षके
प्रतलक्षे महेशानि महासाम्राज्यमुच्यते ॥"

इति वरदातन्त्रे ५ पटलः॥

साम्राणिकर्द्दमं, क्ली, गवादिनामकगन्धद्रव्यम्। इति राजनिर्घण्टः॥

साम्राणिजं, क्ली, मधुपारेवतम्। इति राजनिर्घण्टः॥

सायं, व्य, (स्यति समापयति दिनमिति। सो+वाहुलकात् णः। युगागमश्च।) सायाह्नः। इत्यमरः। ३। ४। १६॥ सन्ध्या। इति राजनिर्घण्टः॥ तथा,—

"दिनान्ते पुंसि सायः स्यात् सायाह्ने सायमव्ययम्।"

इति शब्दार्णवः॥

(यथा, रघुः। १। ४८।

"सदुपायपयज्ञा प्रादाश्रमं आन्तवाहवः।
सायं संयमिनस्तस्य महर्षेर्मेहिषीसखः ॥")

सायंकालः, पुं, (सायं सायाह्नः कालः।) सायाह्नः। सायंसन्ध्यासमयः। यथा, स्मृतिसागरधृतमत्स्यसूक्तम्।

"ज्येष्ठा वाप्यथवा षष्ठी सायंकाले न लङ्घयेत्।
सायमेव तथापि स्याद्विघ्नशान्त्यभिमन्तणम् ॥"

इति निग्रादितत्त्वम्॥

सायंसन्ध्या, स्त्री, (सायं सायाह्ने या सन्ध्या।) सायंकालोपलक्ष्या देवता। सायंकालकर्त्तव्योपासना। सायंसन्ध्योपासनाकालश्च। तत्तन्मार्गं सन्ध्याशब्दे द्रष्टव्यम्। पश्चिमा सन्ध्या। तस्या उत्पत्तिर्यथा,—

मार्कण्डेय उवाच।

"नारायणः स्वयं सन्ध्यां प्रसूयाथात्मयोनिना।
ततः पुरोडाशमयं तच्छरीरमभूत् क्षणात्।
महासुनेर्मेधायज्ञे तस्मिन् विघ्नोपकारिणि।
नाभिः कथादनं यातीत्येतदर्थं तथा कृतम्।
एवं कृत्वा जगन्नाथस्तत्रैवान्तरधीयत।
सन्ध्याप्यगच्छदृत्विजे तत्र मेधातिथिर्मुनिः।
अथ विष्णोः प्रसादेन कैनाप्यनुपलक्षिता।
प्रविवेश तदा यज्ञं सन्ध्या मेधातिथेर्मुनेः।
वशिष्ठेन पुरा या तु वर्षीभूता तु मा सुता।
उपदिष्टा तपश्चर्त्तुं वचनात् परमेष्ठिनः।

तमेव ज्ञात्वा मनसि तपस्यर्थोपदेशकम् ।
पतित्वेन तदा सन्ध्या ब्राह्मणं ब्रह्मचारिणम् ॥
वसिष्ठेऽग्नौ महायज्ञे मुनिभिर्नोपलक्षिता ।
तदा विष्णोः प्रसादेन सा विवेश विधेः सुता ॥
तस्याः पुरोडाशमयं शरीरं तत्क्षणात्ततः ।
दग्धं पुरोडाशगन्धं यत्तारयदलक्षितम् ॥
वह्निस्तस्याः शरीरं तद्ध्वा सूर्यस्य मण्डले ।
मुखं प्रवेशयामास विष्णोरेवाज्ञया पुनः ॥
सूर्यो द्विधा विभज्याथ तत्शरीरं तदा स्वयं ।
स्वके संस्थापयामास प्रीतये पितृदेवयोः ॥
यदूर्ध्वभागं तस्यास्तु शरीरस्य द्विजोत्तमाः ।
प्रातःसन्ध्याभवत् सा तु अहोरात्रादिमध्यगा ॥
यच्छेषभागस्तस्यास्तु अहोरात्रान्तमध्यगा ।
सा सायमभवत् सन्ध्या पितृप्रीतिप्रदा सदा ॥
सूर्योदयाच्च प्रथमं यदा स्यादुदयोदयः ।
प्रातःसन्ध्या तदोदेति देवानां प्रीतिकारिणी ॥
अस्तं गते ततः सूर्ये शोणपद्मनिभा सदा ।
उदेति सायंसन्ध्या सा पितॄणां मोदकारिणी ॥"

इति श्रीकालिकापुराणे अरुन्धतीजन्मकथने २२ अध्यायः ॥

सायंसन्ध्यादेवता, स्त्री, (सायंसन्ध्याया देवता ।) सरस्वती । इति कविकल्पलता ॥

सायः, पुं, (स्यति समापयति दिनमिति । सो+ ण्यासश्रन्थेति घञ् । तलो युगागमः ।) दिनान्तः । इत्यमरः । १ । ४ । ३ ॥ वायः । इति मेदिनी ॥ सायोत्सवौ विकालके । इति त्रिकाण्डशेषः ॥

सा(शा)यकः, पुं, (स्यति क्षिणोति । सो+ ण्वुल्+वुक् ।) वाणः । (यथा, रामायणे । २ । ३१ । ३० ।

"जगृहे कवचे दिव्ये तूणी चाक्षय्यसायकौ ॥") खड्गः । इत्यमरः । ३।३।२ ॥ (यथा, महाभारते । ४ । ८० । १४ ।

"कस्य पाण्डनखे कोपे सायकौ हेमविग्रहः ।
प्रभामण्डलसम्पन्नः पीत आकाशसन्निभः ॥"

षष्ठसंख्या । यथा, साहित्यदर्पणे । ४ । २६४ ।

"सङ्गरेण त्रिरूपेण संख्या चैकरूपया ।
वेदस्वामिशराः शुद्धैरिषुबाणाग्निसायकाः ॥")

सायकपुङ्खा, स्त्री, (सायकस्य पुङ्ख इव पुङ्खो यस्याः ।) शरपुङ्खा । इति राजनिर्घण्टः ॥ (सायकस्य पुङ्खे, पुं । यथा, रघुः । २ । ३१ ।

"नक्तञ्चरः सायकपुङ्ख एव
चित्रार्पितारम्भ इवावतस्थे ॥")

सायन्तनः, त्रि, (सायं भवः । सायम्+"सायं-चिरंप्राह्णेप्रगेव्यैषमःट्युट्युलौ तुट् च ।" ४ । ३ । २३ । इति ट्युल् तुट् च ।) सायंकालभवः । यथा,—

"सन्ध्यां सायन्तनीं कुर्य्यात् द्वादश्यादिष्वपि प्रिये ।
अकुर्वन्निरयं याति यतो नित्यागमक्रिया ॥"

इति दुर्गोत्सवतन्त्रे प्रथमपटलः ॥

सायम्, पुं, (सायमङ्गः । "संज्ञाविसायेति ।" ६ । ३ । २१० । आपत्यात् समासः ।) पश्चाद्-

विभक्तदिनयुग्मांशः । दिवसस्य शेषमुहूर्त्तचयम् । यथा,—

"प्रातःकालो मुहूर्त्तोऽस्मिन् सङ्गवस्तावदेव तु ।
मध्याह्नस्त्रिमुहूर्त्तः स्यादपराह्णस्ततः परम् ॥
सायाह्नस्त्रिमुहूर्त्तः स्यात् आद्यं तत्र न कारयेत् ।
राक्षसी नाम सा वेला गर्हिता सर्व्वकर्म्मसु ॥"

इति तिथ्यादितत्त्वम् ॥

तत्पर्य्यायः ।

"सायो दिनान्तः सायाह्नो विकालः सायमेव च ।"

इति शब्दरत्नावली ॥

सायिका, स्त्री, क्रमस्थितिः । इति शब्दरत्नावली ॥

सायी, [न्] पुं, (सायति नाशयति गतिक्षेपमिति । से क्विप्+णिनिः ।) अस्ताचलः । इति केचित् ॥

सायुज्यं, क्ली, (सयुजो सहयोगस्य भावः । ब्राह्मणादित्वात् ष्यञ् ।) सहयोगः । एकत्वम् । तत्तु षष्ठधाहुस्तन्मध्यगतमुक्तिविशेषः । यथा,—

"सालोक्यसार्ष्टिसामीप्यसारूप्यैकत्वमप्युत ।
दीयमानं न गृह्णन्ति विना मत्सेवनं जनाः ॥"

इति श्रीभागवते । ३ । २६ । १३ ॥

"भक्तानां निष्कामतां कैवल्यकत्वायेनाह । सालोक्यं मया सह एकस्मिन् लोके वासम् । सार्ष्टिं समानैश्वर्य्यम् । सामीप्यं निकटवर्त्तित्वम् । सारूप्यं समानरूपताम् । एकत्वं सायुज्यम् । उत अपि दीयमानमपि न गृह्णन्ति कुतश्चित्कामगा इत्यर्थः ।" इति श्रीधरस्वामी ॥

"एकत्वं भगवत्सायुज्यं ब्रह्मसायुज्यञ्च । अनयोस्तत्तीलात्मकत्वेन तत्सेवनार्थत्वाभावात् गृहणावश्यकत्वमेवेति भावः ।" इति क्रमसन्दर्भः ॥

सार्व, त्र, दिनान्ते । सायंकाले । इति केचित् ॥

सार, तृ क दौर्ब्बल्ये । इति कविकल्पद्रुमः ॥ (अदन्तचुरा०-परo-अकo-सेट् ।) रेफोपधः । असासारत् । इति दुर्गादासः ॥

सारं, क्ली, पुं,(सार तृ क दौर्ब्बल्ये+घञ् । यद्वा सृ गतौ +घञ् इति वा ।) बलम । धनम् । (यथा, रघुः । ४ । ७६ ।

"परस्परेण विज्ञातस्तेषूपायनपाणिषु ।
राज्ञा हिमवतः सारो राज्ञः सारो हिमाद्रिणा ॥")

न्याय्यम् । इति मेदिनी । (वराद् जातम् । वर+अण् ।) नवनीतम् । इति राजनिर्घण्टः ॥ (यथा, सुश्रुते उत्तरतन्त्रे । २६ ।

"क्षीरक्षौद्रघृतं तैलं शीतं सारसुपाहरेत् ॥"

अरुतम् । यथा, भागवते । ७ । ६ । २५ ।

"धर्म्मादयः किमगुणेन च काङ्क्षितेन
सारेजुषां चरणयोरुपगायतां नः ॥")

लौहम् । इति भावप्रकाशः । विधिनम् । इति शब्दरत्नावली ॥ ४ । सारवस्तुनि यथा,—

"सारं रसानान्तु घृतं घृतसारं कृतन्च यत् ।
कृतस्य सारं खण्डन्च खण्डात् सारन्तु योषितः ॥
अतो राजन् प्रदेयाः स्युः स्त्रियः स्वर्गमभीप्सता ।
तदैवेह सुखं ताभिः सह राज्यं नृपोत्तम ॥"

इति वह्निपुराणे दानोदानाध्यायः ॥

अपि च ।

"असारे खलु संसारे सारमेतच्चतुष्टयम् ।
काश्यां वासः सतां सङ्गो गङ्गाम्भः शम्भुसेवनम् ॥"

इति कवितारत्नाकरधृतपुराणवचनम् ॥

सारः, पुं, (सृ+"सृ स्थिरे ।" ३ । ३ । १७ । इति घञ् ।) बलम् । (यथा, महाभारते । १ । १५५ । २३ ।

"तस्य भीमस्य क्रीड़ञ्च हिडिम्बञ्च विभिषणम् ।
पुरा विकुरुते मायां भुजयोः सारमेव च ॥")

स्थिरांशः । इत्यमरः । ३ । ३ । १७० ॥ (यथा, रघुः । १० । १० ।

"प्रभादुलिप्तश्रीवत्सं लक्ष्मीविभ्रमदर्पणम् ।
कौस्तुभाख्यमणिं सारं बिभ्राणं हृदतोरसा ॥")

मज्जा । इत्यमरः । २।४।१२ ॥ वज्रकाण्डम् । इति राजनिर्घण्टः ॥ वायुः । इति जटाधरः ॥ रोगः । इति धरणिः ॥ पाशकः । इति शब्दरत्नावली ॥ दृढ़तरम् । इति शब्दचन्द्रिका ॥ (अर्थालङ्कारविशेषः । यथा, साहित्यदर्पणे । १० । ७३१ ।

"उत्तरोत्तरमुत्कर्षो वस्तुनः सार उच्यते ॥"

यथा,—

"राज्ये सारं वसुधा वसुधायामपि पुरं पुरे सौधम् ।
सौधे तल्पं तल्पे वराङ्गनाचर्व्वसम् ॥")

सारः, त्रि, (सृ+घञ् ।) अतिदृढ़ः । इति शब्दरत्नावली ॥ वरः । श्रेष्ठः । इत्यमरमेदिनीकरौ ॥ यथा,—

"सर्व्वसारो यथा ज्ञानी व्रतानां प्रणवं तथा ॥"

इति ब्रह्मवैवर्त्ते गणपतिखण्डे । ३ । ३० ॥

अपि च ।

श्रीमार्कण्डेय उवाच ।

"जगत् सर्व्वन्तु निःसारमनित्यं दुःखभाजनम् ।
उत्पद्यते चणादेतत् क्षणादेतत् विपद्यते ॥
यदेवोत्पद्यते सारान्निःसारं जगदक्षयं ।
पुनस्तस्मिन्नलीयन्ते महाप्रलयसङ्गमे ॥
उत्पत्तिप्रलयाभ्यान्तु जगन्निःसारतां हरिः ।
प्रथमे दर्शयामास भावेन जगतां प्रतिः ॥
एकं शिवं शान्तमनन्तमच्युतं
परात्परं ज्ञानमयं विशेषम् ।
अहैतमव्ययमचिन्त्यरूपं
सारन्त्वेकं नास्ति सारं त्वदन्यत् ॥
यस्मादेतज्जायते विश्वमग्र्यं
यस्मात्तोयं स्यात् तत्पश्चात् स्थितञ्च ।
आकाशवर्त्मेवजालस्य भूत्वा
यद्विश्वं वै प्रियते तच्च सारम् ॥
अष्टाङ्गयोगैर्यदवाप्तुमिच्छून्
योगी पुनर्ब्याह्मरूपं सदैव ।
निवर्त्तते प्राप्य यद्वेह लोके
तदे सारं सारमन्यन्न चास्ति ॥

सारङ्गः

सारो द्वितीयो धर्म्मेषु यो नित्यप्राप्तये भवेत् ।
यो वै निवर्त्तको नाम तच्चाचारः प्रवर्त्तकः ॥
सर्व्वं चरति लोकेऽस्मिन् धर्म्मो नैव श्रुतो भवेत्।
स्वधर्म्मादयो न चलति स श्रवाचर उच्यते ॥
एतदः कथितं सारं निःसारञ्च यथा जगत् ।
यथा स्वयं ददर्शाशु शम्भुर्ज्ञानेन खेऽन्तरे ॥
एतद्वै दर्शयामास स विष्णुर्जगतां पतिः ।
स्वयं जग्राह मनसा ध्यानेनात्मनि शङ्करः ॥
सारं तत्त्वं परमं निष्कलं य-
दुक्त्वा पीठं ऋषिमान् धर्म्म एषः ।
सारोऽन्योऽयौ सारहीनं तदन्यत्
ज्ञात्वैवैतत् याति नित्यं समाधीः ॥"
इति श्रीकालिकापुराणे २७ अध्यायः ॥

सारङ्गः, पुं, (सारयति मर्म्माणि । सृ + णिच् + उगुल् ।) जयपालः । इति राजनिर्घण्टः ॥ विरेचके, त्रि । इति वैद्यकम् ॥

सारखदिरः, पुं, (सारः अतिदृढः खदिरः ।) दृढखदिरः । इति राजनिर्घण्टः ॥

सारगन्धः, पुं, (सारो गन्धो यस्य ।) चन्दनम् । इति शब्दचन्द्रिका ॥

सारग्राही, [न्] त्रि, (सारं गृह्णातीति । ग्रह + णिनिः ।) सारग्रहणकर्त्ता ॥

सारघं, क्ली, (सरघाभिर्म्मधुमक्षिकाभिः कृतमिति । सरघा + अण् ।) मधु । इति जटाधरः ॥ (यथा, भागवते । १० । १६ । ३३ ।
"पीत्वा मुकुन्दमुखसारघमक्षिभृङ्गै-
स्तूष्णीं बहुर्विरहजं बजयोषितोऽद्धि ॥")

सारङ्गः, पुं, (सरतीति । सृ गतौ + "सृगृधसृकसिभ्यः ।" उणा० २ । १२१ । इति अङ्गच् । दृद्धिश्च ।) चातकपक्षी । इत्यमरः ।२।५।२७॥ (यथा, रामायणे । २ । ६३ । १६ ।
"उष्णमन्तर्दधे सद्यः क्षिप्रा दहशिरे घनाः ।
ततो जहृषिरे सर्व्वे मेकसारङ्गबर्हिणः ॥")
हरिणः । (यथा, भट्टिः । ३ । २६ ।
"गोमायुसारङ्गगणाश्च सम्यक्
गायाविधुर्भीममरालिधुश्च ॥")
मातङ्गजः । इति मेदिनी ॥ पक्षिभेदः । भृङ्गः । इति विश्वः ॥ यथा,—
"नानुद्वेष्टि कलिं सम्राट् सारङ्ग इव सारभुक् ।
कृशलाभाशु सिध्यन्ति नेतराणि शतानि यत् ॥"
इति श्रीभागवते । १ । १८ । ७ ॥
"नन्वधर्म्मैकहेतुं कलिं सर्व्वथा किं न क्षतवान् तत्राह नानुद्वेष्टीति । सारङ्गो भ्रमर इव सारभाही । सारभाह यतो यस्मिन् कृशलानि पुण्यानि आशु संकल्पमात्रेण फलन्ति इतराणि पापानि आशु न सिध्यन्ति फलन्ति यतस्तानि कृतान्येव सिध्यन्ति न तु संकल्पितमात्राणीति ।" इति श्रीधरस्वामी । छत्रम् । राजहंसः । चित्रवृक्षः । (यथा, महाभारते । ७ । २२ । २१ ।
"आक्रोशन्तो वहन्तिस्म सारङ्गध्वजसा ध्वजाः ॥")
वाद्यभेदः । अंशुकम् । इति शब्दरत्नावली ॥ नानावर्णः । मयूरः । कामदेवः । धनुः । वेणुः । स्वर्णम् । आभरणम् । पद्मम् । मृगः । चन्दनम् । कर्पूरम् । पुष्पम् । कोकिलः । मेघः । पृथिवी । रात्रिः । दीप्तिः । सिंहः । इत्यनेकार्थकोषः ॥ ॥
सारङ्गहरिणमांसगुणाः ।
"सारङ्गं जाङ्गलं स्निग्धं मधुरं लघु वृष्यदम् ।"
इति राजनिर्घण्टः ॥

सारङ्गः, त्रि, (सृ + अङ्गच् ।) शबलः । इत्यमरः । ३ । ३ । २३ ॥ "शारङ्गशातके स्यातः शबले हरिणेऽपि च । इति साजस्यादावजयः । अतएव सारङ्गो दन्त्यादिस्तालव्यादिश्च ।" इति भरतः ॥

सारङ्गिकः, पुं, (सारङ्गं हन्तीति । सारङ्ग + "पक्षिमत्स्यमृगान् हन्ति ।" ४।४।३५। इति ठक् ।) व्याधः । इति सिद्धान्तकौमुदी ॥

सारङ्गी, स्त्री, वाद्यविशेषः । इति केचित् ॥

सारजं, क्ली, (सारात् जायते इति । जन + डः ।) नवनीतम् । इति शब्दचन्द्रिका ॥

सारण्यं, क्ली, (सारयतीति । सृ + णिच् + ल्युः ।) गन्धभेदः । इति धरणिः ॥

सारणः, पुं, (सृ + णिच् + ल्युः ।) अतीसारोगः । रावणमन्त्री । इति हेमचन्द्रः ॥ भद्रबला । इति धरणिः ॥ आम्रातकः । इति शब्दचन्द्रिका ॥

सारणिः, स्त्री, (सृ + णिच् + अनिः । इत्युणादिवृत्तौ उज्ज्वलः । २ । १०३ ।) क्षुद्रनदी । प्रसारणी । इत्युणादिकोषः ॥

सारणिकः, त्रि, पथिकः । सारणिशब्दात् णिकप्रत्ययेन निष्पन्नः ॥ (यथा, महाभारते । १२ । ६२ । ३६ ।
"यदा सारणिकान् राजा पुत्रवत् परिरक्षति ।
भिनत्ति च न मर्य्यादां स राज्ञो धर्म्म उच्यते ॥")

सारणिकनः, पुं, (सारणिकान् पथिकान् हन्तीति । हन + टक् ।) दस्युः । इति केचित् ॥

सारणी, स्त्री, (सारणि + षा ङीप् ।) क्षुद्रसारणी । खल्पनदी । इति मेदिनी ॥ (यथा, रघुवंशे । २ । २५ ।
"आजवालवलयेषु भूरुहां
मांसलस्निमितमन्तरान्तरा ।
केरलीचिकुरभङ्गिभङ्गुरं
सारणीषु पुरमुः दृश्यते ॥")

सारतः, पुं, सर्पाक्षः । इति जटाधरः ॥

सारतरुः, पुं, (सारं जलं ततूप्रधानस्तरुः ।) कदलीवृक्षः । इति धनञ्जयः ॥

सारथिः, पुं, (सरत्यश्वानिति । सृ + अन्तर्भावितण्यर्थः + "सर्त्तेरिथिच् ।" उणा० ४ । ८६ । इति अथिन् ।) रथादिघोटकनियोगकर्त्ता । तत्पर्य्यायः । नियन्ता २ प्राजिता ३ यन्ता ४ सूतः ५ वक्ता ६ मर्य्यादा ७ दधिक्रस्थः ८ रथकुटुम्बी ९ । इत्यमरः ।२।८।५६-६०॥ सादी १० सर्य्यादः ११ नियामकः १२ चातुरिकः १३ । इति जटाधरः ॥ प्रवेता १४ रथनागरः १५ । इति शब्दरत्नावली ॥ सरथस्यामित्वं सारथिः याज्ञात्यन इति णिः । सह रथेन वर्त्तते योऽसौ सरथोऽश्वः तं प्रेरयति छघे कादिति णिच्वा । सारयति अश्वान् इति ण्यन्तात् इ गतावित्यस्मात् नान्त्रीति अथिप्रत्ययो वा । इत्यमरटीकायां भरतः ॥ तल्लक्षणं यथा, मात्स्ये । २१५ । २०—२१ ।
"निमित्तशकुनज्ञानी हयशिक्षाविशारदः ।
हयायुर्व्वेदतत्त्वज्ञो भूरिभागविशेषवित् ॥
स्वामिभक्तो महोत्साहः सर्व्वायुध प्रियंवदः ।
शूरश्च कृतविद्यश्च सारथिः परिकीर्त्तितः ॥"
सूतः । इति संक्षिप्तसारोद्धारवृत्तिः ॥

सारदा, स्त्री, (सारं ददातीति । दा + कः ।) सरस्वती । इति शब्दरत्नावली ॥ दुर्गा । यथा । शरत्कालबोधनीयत्वेन शारदापदश्रुत्युत्पत्तितत्पदं तालव्यादि सारं ददातीति श्रुत्युत्पत्तिस्तु काल्पनिकी । इति तिथ्यादितत्त्वम् ॥ सारदातरि, त्रि ।

सारद्रुमः, पुं, (सारः अतिदृढः द्रुमः ।) खदिरः । इति राजनिर्घण्टः ॥ (यथा, वृहत्संहितायाम् । ३३ । ५८ ।
"उत्थापयेत् लक्ष्म सहस्रचक्षुषः
सारद्रुमाभमकुमारिकान्वितम् ॥")

सारपादपः, पुं, (सारः अतिदृढः पादपः ।) धामनिवृक्षः । इति रत्नमाला ॥

सारभाण्डं, क्ली, (सारस्य भाण्डमिव ।) अक्षत्रिमपात्रम् । यथा स्मृतौ याज्ञवल्क्यः । २ । २५० ।
"वसुद्रव्यपरिवर्त्तेष्व सारभाण्डस्य क्षत्रिमम् ।
आधानं विक्रयं वापि नयतो दण्डकल्पना ॥")

सारमिति, पुं, वेदः । इति हेमचन्द्रः ॥ सारं यथार्थं मीयते ज्ञायते अनेन सारमितिः । सारोपपदात् माधातोर्नान्त्रीति तिः ॥

सारमूषिका, स्त्री, (सारे मूषिकेव ।) देवदासी । इति राजनिर्घण्टः ॥

सारमेयः, पुं, (सरमाया अपत्यं पुमानिति । ढक् ।) कुक्कुरः । इत्यमरः । २ । १० । ३१ ॥ (यथा, महाभारते । ६ । ६ । ७३ ।
"अन्योन्यस्यावलुम्पन्ति सारमेया इवामिषम् ।
राजानो भरतश्रेष्ठ भोक्तुकामा वसुन्धराम् ॥")

सारमेयी, स्त्री, (सरमाया अपत्यं स्त्री । ढक् । ङीप् ।) कुक्कुरी । इति शब्दरत्नावली ॥

सारलोहं, क्ली, (सारं श्रेष्ठं लोहम् ।) लौहसारः । इति भूरिप्रयोगः । ख्यात इति भाषा ॥

सारवः, त्रि, (सरयां भवः । अण् । "दाक्षिनायनहास्तिनायनेति ।" ६ । ४ । १७४ । इति निपातनात् साधुः ।) सरयूनदीसम्भवः । इत्यमरः । १ । १० । ३६ ॥

सारवर्ज्जितः, त्रि, स्थिरांशरहितः । यथा सारवस्तु । सारेण वर्ज्जित इति तृतीयातत्पुरुषसमासनिष्पन्नः ॥

सारसं, क्ली, (सरसि भवम् । सरस् + अण् ।) पद्मम् । इत्यमरः । १ । १० । ४० ॥ क्लीबत्वाभरणम् । इति केचित् ॥

सारथिः

सारस

सारस, त्रि, (सरसि भवम्। सरस्+अण्।) सरोवरोद्भवकमलादि। तत्पत्रसूत्रा:। यथा,—
"नत्वा: शैलवराभासो यत्र संस्तुत तिष्ठति।
तत् सरोरुहजं सूत्रं सरसं सूत्रनम्॥
सारसं सलिलं बलं लघ्वग्नं मधुरं सघु।
रोचनं तुवरं रूक्षं बहुरक्तमलं जितम्॥"
इति भावप्रकाश:॥
(यथा च।
"सारं घनं वातकफानुकारि
स्वाद्वीश्वरं तत् कटु दीपनञ्च।
प्रोक्तं विपाके भ्रमशोषकारि
स्यात् सारसं नो सुखकारि वारि॥"
इति हारीते प्रथमस्थाने सप्तमेऽध्याये॥)
सारस:, पुं, चन्द्र:। इति मेदिनी॥
सारस:, पुं स्त्री, (सरसि भव:। अण्।) सरसभवपक्षिभेदा:। तत्पर्य्याय:। पुष्करात:। २। इत्यमर:। २। ५। २२॥ गोनर्द:। नाकुर:। लक्ष्मण:। लक्ष्मण:। सरसीज:। सरोरुह:। इति शब्दरत्नावली॥ रसिक:। कामी। सर्व्वासमुखा:। मधुरत्वम्। अम्लत्वम्। कषायत्वम्। मधुरनिसारपित्तमरुत्प्रणाशित्वञ्च। इति राजनिर्घण्ट:॥ * ॥ तस्य शकुनं यथा,—
"इष्टार्थसिद्धि: सकलासु दिक्षु
स्यात् सारसस्तुन्दविलोकनेन।
सुप्तास्य दृष्टे निगदं न मन्येद्
सिध्यत्यभीष्टं शुभ एव यस्मात्॥
वामेन योषिन्मुखसाभकारी
प्रत्यक्षतार्थं वृषभोऽर्थलब्धै।
य: सारसाभ्यां युगपद्विराव:
क्षतोऽधिरेन क्रमतोऽपि याम:।
स वैदिनय: कथितार्थकारी
क्रौञ्चध्वनाप्यथमेव वर्ण:॥"
इति समरसिंहशकुने सारसवर्ण:॥
सारसनं, क्ली. (सारं धनोति दधातीति। धन् धाने+अच्।) काञ्ची। स्त्रीकट्याभरणम्। इत्यमर:। २।६।१०९॥ अस्य पर्य्याय:। काञ्ची। शब्दे दृश्य:॥ कण्ठकलापार्थे मधुकाद्यनिघण्टुकारादि। तत्पर्य्याय:। अधिकाग्रम् २। इत्यमर:। २। ८। ६१॥ दे कण्ठकलापार्थे मधुकार्थे विश्वे हारादौ। शकुना: शब्दा: मध्ये दृष्टार्थे यद्भवन्ति तत् सारसनं अधिकाग्रमीर्थते। इति भरत:। (यथा, किरातं। १८। ३२।
"सधीरधीरै: कलिङ्गैर्भागुरं
कलाभृद्भि: सारसनं मधावभि:।
समाहतैर्भीरु: पुलिन्दसुन्दरै
रुदग्र चिन्ताहीव मकरध्वजम्॥")
सारसी, स्त्री, (सारस+ङीष्।) सारसपक्षिणी। इति हैमचन्द्र:। (यथा, रघुभारते।
११। १८। १०॥
"कृष्णत्वगभ्यन्तरशुक्लरोचिषो दृशोर्विभक्तं सितकृष्णतारकम्।
सारङ्गसारङ्गवधूविलोकनं सारङ्गसारङ्गदृशां विलोकनम्॥")
सारस्त:, पुं. (सरस्वती देवतास्येति। अण्।) विल्वदृक्ष:। (सरस्वत्या अयमिति। तस्येदमित्यण्।) देशविशेष:। स तु हस्तिनापुरस्य उत्तरपश्चिमभागे प्रसिद्ध:। इति हैमचन्द्र:॥ यथा। कूर्म्मपुराणे।
"मध्ये सारस्वता मत्स्या: शूरसेना: समाधुरा:।
पाञ्चालशाल्वमात्स्यकुरुक्षेत्रगधारवा:॥"
इति ज्योतिस्तत्त्वम्॥
सरस्वतीनदीपुत्रमुनिविशेष:। सारस्वतदेशोद्भवमात्रञ्च:। यथा,—
"सारस्वता: कान्यकुब्जा गौड़मैथिलकोत्कला:।
पञ्च गौड़ा इति ख्याता विन्ध्यस्योत्तरवासिन:॥"
इति पुराणम्॥
ऋषिविशेष:॥ यथा,—
"सारस्वतस्य कल्पस्य मध्ये ये सुव्रतेश्वरा:।
तदुत्पन्नोऽहमेवं लोके तद्भावनमुच्यते॥"
इति मात्स्ये ५० अध्याय:॥
व्याकरणविशेष:। (यजमङ्गापरसुतस्य चाय:।
यथा, देवीभागवते। १। ३। २८।
"सारस्वतस्तु नवमे विधाता दशमे तथा॥"
धृतविशेषे, क्ली। यथा,—
"सक्षणपत्रामादाय मर्द्दी प्रक्षाल्य वारिणा।
उदूखले चोदखित्वा रसं वस्त्रेण गालयेत्॥
रसे चतुर्गुणे तस्मिन् घृतप्रस्थं विपाचयेत्।
औषधानि तु वक्ष्यामि तानीमानि प्रदापयेत्॥
हरिद्रा मालती कुष्ठं त्रिफला वचरीतकी।
एतेषां पलिकान् भागान् पेषयित्वा कार्षिकान्मितान्॥
पिप्पलीञ्च विडङ्गानि सैन्धवं मरिचं तथा।
सर्व्वमेतत् समालोड्य शनैर्मृद्वग्निना पचेत्॥
एतन्नाशितमात्रेण वाग्विशुद्धिश्च जायते।
सप्तरात्रप्रयोगेण किन्नरै: सह गीयते॥
अर्द्धमासप्रयोगेण सोमराजीवपुर्भवेत्।
मासमात्रप्रयोगेण श्रुतमात्रन्तु धारयेत्॥
एतन्मरुद्गणकुष्ठानि अर्शांसि विविधानि च।
प्रयुञ्जानस्तु प्रमेहांश्च कासं मन्दाग्निमेव च॥
नश्यन्त्यनायेव नरीणां नरानामस्यरेतसाम्।
एवं सारस्वतं नाम दत्तवर्षायिवर्द्धनम्॥"
इति वैद्यकचक्रपाणिदत्तसंग्रहे रसायनाधिकारे॥
इदमेव ऋषीणामित्याख्यापि प्रसिद्धम्॥ * ॥)
त्रि, सरस्वतीसम्बन्धी। (यथा, याज्ञवल्क्ये। २।
१३।
"वसिष्ठेन हि यो यज्ञ तत्र सारस्वतं वदेत्।
तनूनपादनाम निर्व्वाण्यस्य: सारस्वतो द्विजै:॥"
सारस्वतदेशवासी। (सरस्वतीनदीसम्बन्धी।
यथा, मेघदूते। ५१।
"तस्या: सानुप्रसिगमसमं सौम्य सारस्वतीना-
मम्भ: शुद्धस्फटिकविशदं त्वद्विधानाचरेण॥")
सारस्वतकल्प:, पुं, (सारस्वत: कल्प:।) सरस्वत्युपासनाप्रकरणम्। यथा,—
कवीश्वर।
"यत्र यत्र यदा यूयं यत्र यत्र यदा वयम्।
तत्र तत्रागमिष्यामि सारस्वतमुदीरयन्॥
सर्व्वशास्त्रप्रकाशश्च सर्व्वज्ञो जायतेऽचिरात्।
अभ्यासाच्च भवेद्यस्य वाग्वधिता भवन्ति हि॥
अवाग्विसर्गश्च आर्द्रं वाणीमूर्त्तं दृश्यन्ति:।
दैवायनोऽपि यो ज्ञात्वा वेदव्यासोऽभवन्मुनि:॥
मन्त्रोद्धारं प्रवक्ष्यामि साङ्गावरणपूजने:।
आनन्दं बिन्दुना युक्तं वामनेत्राक्तभूषितम्॥
पठेत् द्वादशजप्तन्तु सकोऽपि वाक्पतिर्भवेत्।
नाभौ शुभारविन्दस्थं ध्यायेद्यदर्णं सुधी:॥
तन्मध्ये भावयेन्मन्त्री मण्डलानां चयं चिरम्।
रक्तसिंहासनं तत्र वर्णव्योत्तप्रभामयं पुन:॥
तत्रोपरि पुनर्ध्यायेद्देवीं वाणीश्वरीं तत:।
शुक्लाकान्तिनिभां देवीं ज्योत्स्नाजाल-
विकाशिनीम्॥
शुक्लाहारसुतां शुभ्रां शशिखण्डविमण्डिताम्
बिभ्रतीं दक्षहस्ताभ्यां वाणीं वर्णस्य मालि-
काम्॥
अक्षतेन तथा पूर्णं घटं दिव्यञ्च पुस्तकम्।
दधतीं वामहस्ताभ्यां पीनस्तनभरान्विताम्।
मध्ये चौणां तथा वस्त्रां नागरत्नविभूषिताम्।
आत्मामेदेन ध्यात्वैवं तत: संपूजयेत् क्रमात्॥
आदौ दीर्घत्रयुक्तेन कूर्च्चाद्यङ्गानि षट्तयो:।
हृदयादौ तथा कूर्च्चाद्यैर्जीवन्यासक्रिया पुन:॥
भुजोर्मध्ये तथा नाभौ शुक्ले च देशिकस्तथा।
मस्तेष्वीशं पुनर्वक्त्रे आयकं विन्यसेत्तत:॥
पीठन्यासं ततो कुर्य्यात् देवतात्मस्वरूपवे।
मातृकायान्तु यत् प्रोक्तं पीठमन्त्रर्च्च यत्नत:॥
वर्णाङ्गेनासनं दद्यात् मूर्त्तिं मूलेन कल्पयेत्।
आवाह्य पूजयेत्तस्यां देवीं वाणीश्वरीं तत:॥
अङ्गै: प्रथमा वृत्ति: स्यात् द्वितीया शक्ति-
भिस्तत:।
दलाग्रेषु समभ्यर्च्च ब्रह्माद्याश्चा यथाविधि॥
लोकपाला बहि: पूज्यास्तेषामस्त्राणि सद्दृष्टि:।
एवं सम्पूजयेन्मन्त्री जपेल्लोमदलक्षदा॥
कवित्वं लभते वाग्मी सचैवादभिर्भुवम्।
प्रातर्जप्ता सहस्रन्तु विद्वेषयति वान्तिताम्॥
न विस्मरति मेधावी शुनान् वेदागमानपि।
कण्ठमात्रोदके स्थित्वा ध्यायेन्नाभिसमस्थले॥
ज्योति:पुञ्जनिभां देवीं परिवारसमन्विताम्।
वरामयसुतां दृष्टिं सदापुस्तकधारिणीम्॥
जपेत् सहस्रमासीन मन्त्रार्थं चिन्तयेन्नियत:।
भीमां सम्पूज्य वाक्सिद्धिं कवीनामग्रणीर्भवेत्॥
अथ वीरं प्रवक्ष्यामि वाग्मनाङ्करं परम्।
राजिकेयं समुत्पाद्य शुचिर्भूत्वा समाहित:॥
शुक्लभावेन चात्मानं शुक्लं परिकल्पयेत्।
तत्प्रभाधवलां भावात् जगत् सर्व्वं विचिन्तयेत्॥
सम्भारे स्थितां देवीं शुक्लवर्णां वरप्रदाम्।
सर्व्वां शोक्लाञ्च तां प्रज्ञां क्रमात्तत्रापि भावयेत्॥
तत: परमिदं कौला गोपयेत्तु प्रयत्नत:।
कर्त्तव्यं विधिनिष्ठेन सिद्धां श्रीपरमेश्वरीम्॥
वीरत्वप्रकाशार्थं तु श्रीसत्यां परामिकाम्।
एतद्रक्तवरारूढां सिद्धां चिन्तयेत् पुन:॥
सप्तशब्दप्रकाशार्थं धूरीं चिन्तयेत्ततः॥

नित्यं सहस्रमाणेन जपेत् संवत्सरं यदि ।
ततः संजायते मन्त्री वाचस्पतिरिवापरः ॥
कृन्दोऽलङ्कारतर्कादिज्ञानाप्यास्त्वार्थविद्भवेत् ।
कवित्वं ज्ञानशक्त्या तु पाण्डित्यमधिकं भवेत् ॥*॥
अथापरं प्रवक्ष्यामि योगं भुवि सुदुर्लभम् ।
नाभिचक्रस्थितां सौम्यां रक्ताकारां विचिन्तयेत् ॥
चौमावद्धनितम्बाढ्यां रक्ताभरणभूषिताम् ।
पाशाङ्कुशधरां दिव्यां वराभययुतां पुनः ॥
दृष्ट्वा चान्तर्वर्षिण्या पूरयन्तीं मनोरथान् ।
एवं ध्यात्वा जपेल्लक्षं मनुज्ञो विहितं ततः ॥
होमं कुर्यात् त्रिमध्वक्तं रक्तोत्पलयुतैर्द्विजः ।
ततः सन्तर्पयेद्देवीं दुग्धयुक्तेन सर्पिषा ॥
पायसेन बलिं दद्यात् दधिपिष्टमधुप्लुतैः ।
एवं कृत्वा विधानन्तु साक्षाद्देव्यंशो भवेत् ॥
सिद्धार्थैस्त्रिमधुरोपेतैर्हुत्वा जगद्वशं नयेत् ।
पद्मदानेन महतीं प्राप्नुयात् श्रियमूर्जिताम् ॥
देवीहृदयविद्याया नास्ति किञ्चित् सुदुर्लभम् ।
स्नेहभावेन सम्प्रोक्तं न देयं यस्य कस्यचित् ॥
एतत्ते कथितं दिव्यं विद्योत्पत्तेश्च कारणम् ।
विष्णुना दत्तमस्मभ्यं मया तुभ्यं द्विजोत्तम ॥
सिद्धमन्त्रो यदा मन्त्री वाग्मिप्रख्यापि सद्वृत्तिः ।
एतत् दत्त्वा जपेत् सोऽपि सौधीं वाचमनर्गलाम् ॥"

इति स्वायम्भुवमालिकातन्त्रे सारस्वतः पटलः ।
इति तन्त्रसारः ॥

सारस्वतव्रतः, पुं, (सारस्वतः सरस्वतीदेवताकः व्रतः ।) सरस्वत्या व्रतविशेषः । यथा,—

ब्रह्मोवाच ।

"मधुरा भारती केन व्रतेन मधुसूदन ।
तथैव जनसौभाग्यमतिविद्यासुकौशलम् ॥
अभेदश्चापि दम्पत्योस्तथा बन्धुधनेन च ।
आयुश्च विपुलं पुंसां तन्मे कथय माधव ॥

मत्स्य उवाच ।

सम्यक् पृष्टं त्वया राजन् शृणु सारस्वतं व्रतम् ।
यस्य सङ्कीर्तनादेव तुष्यतीह सरस्वती ॥
यो यत्नतः पुमान् कुर्यादेतद्व्रतमनुत्तमम् ।
तदाप्नुयादसौ संपूज्य विप्रानेतत् समारभेत् ॥
अथवादित्यवारेण यष्टतारात्रकेण वा ।
पायसं भोजयेद्विप्रान् कृत्वा ब्राह्मणवाचनम् ॥
शुक्लवस्त्राणि दत्त्वा च सद्विरग्र्याणि शक्तितः ।
गायत्रीं पूजयेद्भक्त्या शुक्लमाल्यानुलेपनैः ॥
यथा न देवो भगवान् ब्रह्मा लोकपितामहः ।
त्वां परित्यज्य सन्तिष्ठेत्तथा भव वरप्रदा ॥
वेदाः शास्त्राणि सर्वाणि कृत्यगीतादिकश्च यत् ।
न विद्यन्ते त्वया देवि तथा मे सन्तु सिद्धयः ॥
लक्ष्मीर्मेधा धरा पुष्टिर्गौरी तुष्टिः प्रभा धृतिः ।
एताभिः पाहि तनुभिरष्टाभिर्मां सरस्वति ॥
एवं सम्पूज्य गायत्रीं वीणापुस्तकधारिणीम् ।
शुक्लगुग्गुलनैवेद्यैः शुक्लमाल्यानुलेपनैः ॥
मौनव्रतेन भुञ्जीत सायं प्रातश्च धर्मवित् ।
मन्त्रञ्च प्रतिमध्यञ्च पूजयेत् शब्दवाग्मिनीम् ॥
तण्डुलप्रस्थं घृतपात्रेण संयुतम् ।
क्षीरं दद्याद्विरण्यञ्च गायत्री प्रीयतामिति ॥
सन्ध्यायाञ्च तथा मौनमेतत् कुर्वन् समाचरेत् ।
नान्तराभोजनं कुर्यात् यावन्मासान्त्ययोदगु ॥
समाप्ते तु व्रते दद्यात् भोजनं शुक्लतण्डुलैः ।
सुवर्णं वस्त्रयुग्मञ्च गाञ्च विप्राय शोभनाम् ॥
देया वितानं घण्टाश्च सितनेत्रपटावृताम् ।
चन्दनं वस्त्रयुग्मञ्च दध्यन्नं शिखरं पुनः ।
तथोपदेष्टारमपि भक्त्या सम्पूजयेद्गुरुम् ॥
वित्तशाठ्येन रहितो वस्त्रमाल्यानुलेपनैः ।
अनेन विधिना यस्तु कुर्यात् सारस्वतं व्रतम् ।
विद्यावानर्थयुक्तश्च वक्तृकण्ठश्च जायते ॥
सरस्वत्याः प्रसादेन ब्रह्मलोके महीयते ।
नारी वा कुरुते या तु सापि तत्फलभागिनी ॥
ब्रह्मलोके वसेद्राजन् यावत् कल्पायुतत्रयम् ।
सारस्वतं व्रतं यस्तु शृणुयादथवा पठेत् ।
विद्याधरपुरे सोऽपि वसेदब्दायुतत्रयम् ॥"

इति मत्स्यपुराणे । ६६ । १—२४ ॥

सारस्वताः, पुं भूमि, (सारस्वते भवाः । अण् ।) सारस्वतदेशजातमनुष्याः । यथा, हेमचन्द्रे ।

"काश्मीराश्च माधुमताः सारस्वतास्तु विकर्णिकाः ॥"

सारस्वतोत्सवः, पुं, (सारस्वतः सरस्वतीसम्बन्धी उत्सवः ।) सरस्वत्या उत्सवः । इति तिथ्यादितत्त्वम् ॥ अस्य प्रमाणादिकं सरस्वतीशब्दे द्रष्टव्यम् ॥

सारा, स्त्री, (सारयतीति । सृ + णिच् + अच् । टाप् ।) क्षणचित्रता । इति शब्दरत्नावली ॥ दूर्वा । इति शब्दचन्द्रिका ॥ (सेक्षुखण्डभेदः ॥ श्यामला अनेनैव नाम्ना प्रसिद्धा ॥ यथा,—

"श्यामला सप्तला सारा विमला विदुला च सा ।
तथा निगदिता भूरिफेना चर्म्मकषेत्यपि ॥"

इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे ॥)

साराल्यः, पुं, (सारेण सरणेन चलति पर्य्याप्नोतीति । अल + अच् ।) तिलः । इति शब्दचन्द्रिका ॥

सारिः, पुं, स्त्री, (सरतीति । सृ + इण् ।) पाशकः । इति शब्दरत्नावली ॥

सारिका, स्त्री, (सरति गच्छतीति । सृ + ण्वुल् । टाप् ।) पक्षिविशेषः । इत्यमरः । ३ । ५ । ८ ॥ शालिक इति भाषा ॥ (यथा, रामायणे । २ । ५३ । २२ ।

"मन्ये प्रीतिविशिष्टा सा मत्तो सत्त्वज्ञ !
सारिका ।
यत्तस्याः श्रूयते वाक्यं शुक पादमरेर्दृश ॥")

तत्पर्य्यायः । पीतपादा २ गोराटी ३ गोकिराटिका ४ । इति हेमचन्द्रः ॥ शारिका ५ सारी ६ शारी ७ चित्रलोचना ८ । इति शब्दरत्नावली ॥ मधुरालापा ९ दूती १० मेधाविनी ११ गोराटिका १२ गोकिराटी १३ गोरिका १४ कलप्रिया १५ । इति राजनिर्घण्टः ॥

सारिणी, स्त्री, (सरतीति । सृ + णिनि । ङीप् ।) सप्तदेवी । कार्पासी । दुरालभा । कपिलशिंशपा । प्रसारिणी । रक्तपुनर्नवा । इति राजनिर्घण्टः ॥

सारिवा, स्त्री, लताविशेषः । अनन्तमूल इति ख्याता । गोरिया साउ इति हिन्दी भाषा । सा तु जम्बुवत्यञ्चा दुग्धगर्भा व्रततिर्भवति । तत्पर्य्यायः । शारदा २ गोपी ३ गोपकन्या ४ गोपवल्ली ५ प्रतानिका ६ लता ७ आस्फोता ८ काकशारिवा ९ । इति राजनिर्घण्टः ॥ गोपा १० उत्पलसारिवा ११ अनन्ता १२ शारिवा १३ श्यामा १४ । इति शब्दरत्नावली ॥ अस्या गुणाः । मधुरत्वम् । स्निग्धत्वम् । वृष्यत्वम् । पित्तप्रणाशित्वञ्च । इति राजनिर्घण्टः ॥ ७ ॥ कृष्णसारिवा । सा तु इन्द्रजम्बुवत्यञ्चा सुगन्धा कलघण्टेति प्रसिद्धा । करिया साउ इति हिन्दी भाषा । श्यामालता इति वङ्गभाषा । तत्पर्य्यायः । कृष्णमूली २ कृष्णा ३ चन्दनसारिवा ४ भद्रा ५ चन्दनगोपा ६ चन्दना ७ कृष्णवल्ली ८ । अस्या गुणाः । त्रिदोषशमनत्वम् । तिक्तत्वम् । कटुरसत्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।

"सारिवाद्वौ तु मधुरौ स्निग्धौ भूतनिकृन्तनौ ।
कुष्ठकण्डूज्वरहरौ हृद्दुर्गन्धिनाशनौ ॥"

इति राजनिर्घण्टः ॥

किञ्च ।

"सारिवायुगलं स्वादु स्निग्धं शुक्रकरं गुरु ।
अग्निमान्द्यारुचिश्वासकासामविषनाशनम् ।
दोषत्रयास्रप्रदरज्वरातिसारनाशनम् ॥"

इति भावप्रकाशः ॥

सारी, स्त्री, (सारि + वा ङीष् ।) सारिकापक्षिणी । पाशकः । इति शब्दरत्नावली ॥ सप्तला । इति राजनिर्घण्टः ॥ (सप्तलाशब्दे ऽस्या गुणादयो ज्ञातव्याः ॥)

सारोष्ट्रिकः, पुं, (सारोष्ट्रे देशे भवः । सारोष्ट्र + ठक् ।) विषभेदः । सारोष्ट्रो देशभेदश्च भवः सारोष्ट्रिकः ठे वादितिं ण्विकः इत्यादिः । सुराष्ट्रशब्दात् सौराष्ट्रिकः । इति स्वामी । इत्यमरभरतौ । १ । ८ । १० ॥

सार्थः, पुं, (सरतीति । सृ + "सर्त्तेर्थिच्च ।" उणा० २ । ५ । इति थन् । सच्च णित् ।) जन्तुसंघः । इत्यमरः । २ । ६ । ४१ ॥ वणिक्समूहः । (यथा, रघुः । १७ । ६४ ।

"वापीष्विव सवन्तीषु वनगूपवनेष्विव ।
सार्थाः खेरं खकीयेषु चेरुर्वेश्मस्विवाद्रिषु ॥")

समूहमात्रम् । इति मेदिनी ॥ (यथा, हरिवंशसंहितायाम् । ८६ । ४६ ।

"पश्चिमे शब्दरौभागे गोमृगोलूकपिङ्गलाः ।
सर्व एव विपर्शन्ना आख्याः सार्थेषु योगिताम् ॥")

सार्थः, त्रि, अर्थेन सह वर्त्तमानः । अर्थयुक्तः । इति हेमचन्द्रः ॥ यथा, अनर्घराघवे ।

"सार्थः प्रसवनो मित्रं भार्या मित्रं गृहे सतः।
आतुरस्य भिषङ्मित्रं दानं मित्रं मरिष्यतः॥"
इति शुद्धितत्त्वम्॥

सार्थकः, त्रि, (सार्थ+कन्।) अर्थेन सह वर्त्तमानः। यथा,—
"शब्दान्तरमपेक्षैव सार्थकः सार्थबोधकृत्।
प्रकृतिः प्रत्ययश्चैव निरर्थकेति स त्रिधा॥"
इति शब्दशक्तिप्रकाशिका॥
(सफलः। यथा, भागवते। १०। ४१। ४५।
"प्रायो नः सार्थकं जन्म पावितञ्च कुलं प्रभो।
पित्रृदेवर्षयो मह्यं तुष्टा ह्यागमनेन वाम्॥")

सार्थवाहः, पुं, (सार्थं वहतीति। वह+अण्।) वणिक्। इत्यमरः। २। ९। ७८॥ (यथा, कथासरित्सागरे। १। १। ११।
"शक्तीश्वरं सङ्गदयैराख्यानीसंस्थितं कदाचित्तम्।
अभ्येत्य सार्थवाहो दत्तमहार्घोपहारमथिकनकः॥")

सार्ध, त्रि, (अर्धेन सह वर्त्तमानम्।) अर्धम्। इत्यमरः। ३। १। १०५॥ अर्धयुक्ते, त्रि।
"अङ्गुलमात्रं शौल्बेन वाहुमात्रः प्रमाणतः।
सार्धस्तु सप्तलाङ्गल्य इत्यभिधीयते॥"
इति प्रायश्चित्ततत्त्वधृतशङ्खिलिखितवचनम्॥

सार्धं, व्य, सहितम्। इत्यमरः। ३।२।४॥ (यथा, महाभारते। ७। २०। २।
"सुधर्म्मा भालभिः सार्धं युतार्घो दृष्टतोऽन्वयात्॥")

सार्धं, त्रि, अर्धेन सह वर्त्तमानम्। अर्धयुक्तम्। यथा,—
"मुनिभिर्हरिवंशं श्रोतुं विधानं सर्ववासिनां नित्यम्।
व्याहरति च यदा तस्मिन्सार्धप्रहरयामान्तः॥"
इति तिथ्यादितत्त्वम्॥

अपि च।
"प्रतिपन्दे हितीये सार्धं यद्यपि दिनद्वये।
दिवसस्तदहर्भागे पतत्येकोऽधिमासकः॥"
इति मलमासतत्त्वम्॥

सार्षिकः, त्रि, (सर्षिः अर्थं सर्षिषा संस्कृतो वा। सर्षिस्+ठक्।) सर्षिःसम्बन्धी। सर्षिःसंस्कृतवस्तु। सर्षिःशब्दात् ठक्प्रत्ययेन निष्पन्नः॥

सार्षिक, त्रि, (सर्षिस्+"तेन संस्कृतम्।" इति ठक्।) सर्षिषा संस्कृतम्। यथा,—
"सार्षिकं दधिकं सर्षिर्भिन्नं संस्कृतं क्रमात्।"
इति वैद्यकशब्दरत्नम्॥

सार्षेः, पुं, (सर्षेः इयमिति सर्षस्+अण्।) सर्षपतैलम्। इति हेमचन्द्रः। (यथा, रामायणे। २। १८। ३४।
"पूर्णे कलशसाहस्रे नीलमणौ प्रकल्पितैः।
सार्षेः स्नापयतु क्षौमैः कुशैरुद्धृतिभिर्दृढैः॥"
सर्षपस्यायमिति। अण्।) सर्षपसम्बन्धिनि, त्रि॥

सार्व्वः, पुं, (सर्व्वस्मै हितः। सर्व्व+"सर्व्वपुरुषाभ्यां णढञौ।" ५। १। १०। इति णः।) बुधः। जिनः। इति हेमचन्द्रः॥ सर्व्वसम्बन्धिनि, त्रि॥

सार्व्वजनिकः, त्रि, (सर्व्वजनाय हितः। "सर्व्वजनात् ठञ्वक्तव्यः।" ५। १। ९। इत्यस्य वार्त्तिकोक्त्या ठञ्।) सकलजनहितः। सर्व्वजनशब्दात् णिकप्रत्ययेन निष्पन्नः॥

सार्व्वजनीनः, त्रि, (सर्व्वजनाय हितः। सर्व्वजन+खः।) सार्व्वजनिकः। सर्व्वजनशब्दात् खीनप्रत्ययेन निष्पन्नः॥

सार्व्वभौमः, पुं, (सर्व्वभूमौ विदितः। "तत्र विदितः इति च।" ५। १। ४३। इत्यण्।) उत्तरदिग्गजः। इत्यमरः। १। ३। ४॥ सर्व्वभूमीश्वरः। तत्पर्य्यायः। चक्रवर्त्ती २ एकजन्मा ३ नृपाग्रणीः ४। इति शब्दरत्नावली॥ (यथा, महाभारते। ३। ८३। ६।
"भरतस्य च वीरस्य सार्व्वभौमस्य पार्थिव!।
ध्रुवं प्राप्स्यति दुष्प्रापान् लोकांस्तीर्थपरिप्लुतः॥")
विदूरथपुत्रः। यथा,—
"परिक्षिरनपत्योऽभूत् सुरथो नाम जाह्नवः।
ततो विदूरथस्तस्मात् सार्व्वभौमस्ततोऽभवत्॥"
इति श्रीभागवते ९ स्कन्धे २२ अध्यायः॥
(पुरुवंशीयाधःपातितृपस्य पुत्रः। यथा, महाभारते। १। ८५। १५—१६। "अधःपातिः खलु ततस्तीर्थदुहितरमुपयेमे भानुमतीं नाम। तस्यामस्य यज्ञे सार्व्वभौमः। सार्व्वभौमः खलु जित्वा जघार कैकेयीं सुनन्दां नाम तामुपयेमे॥"॥) सकलभूमिसम्बन्धिनि, त्रि॥

सार्व्वलौकिकः, त्रि, (सर्व्वलोके विदितः। "लोकसर्व्वलोकात् ठञ्।" ५। १। ४४। इति ठञ्।) सर्व्वजनविदितः। यथा,—
"भवन्तं सार्व्वभौम्यां यो हीनसन्धिमचीकरत्।
जिगाय तस्य हन्तारं स रामः सार्व्वलौकिकः॥"
इति भट्टिकाव्ये ५ सर्गः॥
सार्व्वलौकिकः सर्व्वलोकविदितः। इति तट्टीका॥

सार्व्ववेदः, पुं, (सर्व्ववेदं वेत्तीति। सर्व्ववेद+अण्।) सकलवेदज्ञमात्रः। सर्व्ववेदशब्दात् स्वार्थप्रत्ययेन निष्पन्नः॥

सार्षपः, त्रि, (सर्षपस्यायमिति। सर्षप+अण्।) सर्षपसम्बन्धीयमात्रतैलादिः। यथा,—
"हृतञ्च सार्षपं तैलं वस्त्रैलं गुप्यवासितम्।
अष्टौ यवतैलैश्च स्नानाभ्यङ्गेषु नित्यशः॥"
इति तिथ्यादितत्त्वम्॥

साल, पुं, (शालते इति। शल गतौ+घञ्।) शालमत्स्यः। इत्यमरटीकायां भरतः॥ वृक्षमात्रम्। प्राकारः। इति मेदिनी॥ शालः। इति राजनिर्घण्टः॥ (सारोऽस्यास्तीति। अच्। रस्य लः।) सप्तपर्णवृक्षः। इत्यमरः। १। १७। ६॥ सरलवृक्ष इति क्वचित् भाषा। तत्पर्य्यायः। सर्ज्जः २ सर्ज्जरसः ३ धूपः ४ धूपनिर्य्यासः ५ वृक्षः ६ वीरपर्णः ७ शालकाष्ठः ८ पुष्पकान्तरे शालः कर्म्मधेयेति शब्दद्वयम्। अजकर्णकः ९ वस्तकर्णः १० कषायी ११ ललनः १२ गन्धढक्कः १३ वंशः १४ शालनिर्य्यासः १५ दिवसारः १६ सुरेष्टकः १७ सूरः १८ अग्निवल्लभः १९ यज्ञधूपः २० सिहिकः २१। अस्य गुणाः। कटुत्वम्। तिक्तत्वम्। उष्णत्वम्। स्निग्धत्वम्। अतिसारपित्तासदोषकफव्रणविस्फोटवातनाशित्वञ्च। इति राजनिर्घण्टः। अपि च।
"सालस्तु सर्ज्जकाष्ठाख्यकर्णकः प्रांशुसञ्जरः।
अजकर्णः कषायः स्यादृजुस्कन्धेदकक्रिमीन्॥
व्रणविद्रधिवाधिघ्नयोनिकर्णगदान् हरेत्॥"
अथ सालभेदाः।
"सर्ज्जकोऽन्योऽजकर्णः स्याच्छालो मरिचपत्रकः।
अजकर्णः कटुस्तिक्तः कषायोष्णो व्रणापहः।
कफपाण्डुश्रुतिगदान् मेहकुष्ठविषव्रणान्॥"
इति भावप्रकाशः॥

सालङ्गः, पुं, रागस्य प्रकारविशेषः। यो रागो रागान्तरामिश्रितः सन् रागान्तराभाषयुक्तः। इति सङ्गीतशास्त्रम्॥

सालजः, पुं, (साल्यां कारणत्वेनास्त्यस्येति। प्रमादत्वात् नः।) सर्ज्जरसः। इति रत्नमाला॥

सालनिर्य्यासः, पुं, (सालस्य निर्य्यासः।) सर्ज्जरसः इति रत्नमाला॥

सालपर्णी, स्त्री, (सालस्य पर्णमिव पर्णमस्याः। ङीष्।) शालपर्णी। इत्यमरः। २। ४। ११५॥ शालपानि इति भाषा। यथा,—
"शालपर्णी सालपर्णी स्थिरा चांशुमती ध्रुवा॥"
इति शब्दरत्नावली॥
"अभावे पृश्निपर्ण्याश्च शालपर्णी निधीयते॥"
इति वैद्यशास्त्रम्॥

सालपुष्पं, क्ली, सालस्येव पुष्पमस्य।) खसपद्मम्। इति शब्दरत्नावली॥

सालभञ्जिका, स्त्री, (सारं भनक्तीति। भञ्ज+ण्वुल्। टापि अत इत्वम्। रस्य लः।) पुत्तलिका। यथा,—
"पाषालिका तु पाषाली पुत्रिका सालभञ्जिका।"
इति जटाधरः॥
वेश्या। यथा,—
"वेश्या तु गणिका क्षुद्रा वारस्त्री सालभञ्जिका।"
इति च जटाधरः॥

सालरसः, पुं, (सालस्य रसः।) राजः। इति राजनिर्घण्टः॥

सालवाहनः, पुं, (सालः सप्तपर्णो वाहनं यस्य।) शालिवाहनराजः। इति क्वचित्॥ (अस्य विवरणं शालिवाहनशब्दे द्रष्टव्यम्॥)

सालवेदः, पुं, (सालस्य वेदः निर्य्यासः।) धूनकः। इति भूरिप्रयोगः॥

सालवृक्षः, पुं, (सालस्य वृक्षोऽपि।) प्राकारः। इति मेदिनी॥

सावनः

साला, स्त्री, (सालः प्राकारोऽस्त्यस्या इति। अच्। टाप्।) गृहम्। इत्यमरटीकायां भरतः॥
सालाकारी, स्त्री, युद्धे पराजितनारी। इति केचित्॥
सालातुरीयः, पुं, पाणिनिमुनिः। इति हेमचन्द्रः॥ तालव्यशकारादिः साधुपाठः। यथा,—
"शालातुरीयशालङ्किदाक्षिपुत्राश्च पाणिनौ।"
इति शब्दरत्नावली॥
सालारं, क्ली, (सालां रातीति। रा+कः।) द्रव्यरक्षणार्थमिक्षुस्थकीलकः। डाखा इति भाषा। इति केचित्॥
सालावृकः, पुं, (सालाया वृक इव।) कुक्कुरः। शृगालः। तरक्षुः। इति केचित्॥ तालव्यशकारादिश्चायम्॥
सालूरः, पुं, मण्डूकः। इति शब्दरत्नावली॥ तालव्यशकारादिश्च॥
सालेयः, पुं, मधुरिका। इत्यमरटीका॥ तालव्यशकारादिश्च॥
साल्वः, पुं, विष्णुवधूराजविशेषः। इति हेमचन्द्रः॥ स तु सौभदेशाधिपतिः। इति महाभारते कर्णपर्व॥ देशविशेषः। तद्देशस्थे, पुं भूम्नि। तद्देशसम्बन्धिनि, त्रि॥ तालव्यशादिश्च॥
साल्वहा, [न्] पुं, (साल्वं हन्तीति। हन्+क्विप्।) विष्णुः। इति हेमचन्द्रः॥
साल्विकः, पुं, पक्षिविशेषः। सालिक इति भाषा। यथा,—
"शुकमल्लः सुद्रचूड़ो गूथलक्तश्च साल्विकः।"
इति शब्दचन्द्रिका॥
सावकः, त्रि, शिशुः। इति केचित्॥ तालव्यशकारादिः साधुपाठः।
सावधानः, त्रि, (अवधानेन सह वर्त्तमानः।) सचेतनः। सतर्कः। यथा, आह्निकतत्त्वे।
"आगच्छन्तु महाभागा विश्वेदेवा वरप्रदाः।
ये चात्र विहिताः श्राद्धे सावधाना भवन्तु ते॥"
सावनं, क्ली, (सवनं सोमयज्ञानं तस्येदमित्यण्।) सवनसम्बन्धिदिनम्। यथा। सोमयागे सवनत्रयस्याहोरात्रसाध्यत्वात् तत्सम्बन्धि दिनं सावनम्। इति माधवाचार्यः॥ अपि च। ब्रह्मसिद्धान्ते। सावनं दण्डाः षष्टिरहःखलमस्वगुणाप्ताप्तदैनं भवेत्। इति मलमासतत्त्वम्॥ (यथाच सूर्य्यसिद्धान्ते।
"उदयादुदयं भानोः सावनं तत् प्रकीर्त्तितम्।
सावनानि खुरेतेन यज्ञकालविधिषु तैः॥")
सावनः, पुं, (सवनस्यायमिति। अण्।) यज्ञकर्म्मान्तः। यजमानः। वरुणः। इति मेदिनी। दिवसविशेषः। यथा,—
"तिथिनैकेन दिवसश्चान्द्रमाने प्रकीर्त्तितः।
षष्टिरात्रेण तेनैव सावनो दिवसः स्मृतः॥"
इति मलमासतत्त्वम्॥
मानभेदः। स च त्रिंशदहोरात्रात्मकः। यथा,
"त्रिंशता सौरदिवसैः सावनः परिकीर्त्तितः।"
इति शब्दरत्नावली॥

सावर्णः

अपि च। ब्रह्मसिद्धान्ते।
"चान्द्रः शुक्लादिदर्शान्तः सावनस्त्रिंशता दिनैः।
एकराशौ रविर्यावत् कालं मासः स भास्करः।
सङ्क्रान्तिपरिवर्त्तेन नाक्षत्र इति चोच्यते॥"
विष्णुधर्म्मोत्तरे च।
"सन्निकर्षादथारभ्य सन्निकर्षमथापरम्।
चन्द्रार्कयोर्युधैर्मासस्त्रान्द्र इत्यभिधीयते।
सावने च तथा मासि त्रिंशत्सूर्य्योदयाः स्मृताः॥
आदित्यराशिभोगेन सौरो मासः प्रकीर्त्तितः।
सङ्क्रान्तिपरिवर्त्तेन नाक्षत्र इति चोच्यते॥" *॥
सावनमासकर्त्तव्यकर्म्मादि यथा,—
"सूतकादिपरिच्छेदो दिनमासाब्दगस्तथा।
मध्यमग्रहभुक्तिश्च सावनेन प्रकीर्त्तितः॥"
पितामहः।
"आब्दिके पिण्डदाने च मासश्चान्द्रमसः स्मृतः।
विवाहादौ स्मृतः सौरो यज्ञादौ सावनो मतः॥"
अत्र आदिपदेन सत्रभृतिवृद्धिप्रायश्चित्तायुर्दायाप्रौच-गर्भाधान-पुंसवन-सीमन्तोन्नयन-नामकरणान्नप्राशन-निष्क्रमण-चूड़ादिग्रहणम्। तथा च विष्णुधर्म्मोत्तरम्।
"अध्यायनञ्च ग्रहचारकर्म्म
सौरेण मानेन सदाध्यवस्येत्।
सत्राण्युपास्यान्यथ सावनेन
सौवञ्च यत् स्याद्व्यवहारकर्म्म॥"
इति मलमासतत्त्वम्॥ *॥
वर्षविशेषः। यथा,—
"सौरेणाब्देषु मानेन यदा भवति भार्गव।
सावनेन च मानेन दिनषट्कं प्रपूर्य्यते॥"
सौरसंवत्सरे दिनषट्काधिकः सावनः संवत्सरो भवतीति। इति मलमासतत्त्वम्॥
सावरः, पुं, (सवराणामयमिति। अण्।) लोध्रः। इत्यमरटीका शब्दरत्नावली च॥ (यथा, सुश्रुते। ४। २२।
"शारिवोत्पलयष्ट्याह्वसावरागुरुचन्दनैः॥")
पापम्। अपराधः। इति विश्वः॥ (मृगविशेषमांसे, क्ली। तस्य गुणा यथा,—
"सावरं पललं स्निग्धं शीतलं गुरु च स्मृतम्।
रसे पाके च मधुरं कफदं रक्तपित्तहृत्॥"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे॥)
तालव्यशकारादिरव्ययम्॥
सावर्णः, पुं, (सवर्ण एव। स्वार्थे अण्। सवर्णाया छायाया अपत्यमिति अण् वा।) अष्टममनुः। यथा,—
"छायासंज्ञामसूत योऽसौ द्वितीयः कथितो मनुः।
पूर्व्वजस्य सवर्णोऽसौ सावर्णस्तेन कथ्यते॥"
इति देवीभागवतम्॥
(तथाच हरिवंशे। ६। १६।
"पूर्व्वजस्य मनोर्जातः सदृशोऽयमिति प्रभुः।
मनुरेवाभवन्नाम्ना सावर्ण इति चोच्यते॥")
यथाच मात्स्ये। ६। ३१—३३।
"सावर्णस्य प्रवक्ष्यामि मनोर्भाविं तथान्तरम्।
अपत्यमा गरदांश्च कौशिको गालवस्तथा॥

सावित्रः

सनानन्दः कश्यपश्च रामश्च ऋषयः स्मृताः।
धृतिर्व्वरीयान् यवसः सुवर्णो हविरेव च॥
चरिष्णुरोजः सुमतिः वसुः सुभुश्च वीर्य्यवान्।
भविष्या दश सावर्णा मनोः पुत्राः प्रकीर्त्तिताः॥"
सावर्णलक्ष्यं, क्ली, (सावर्णस्य समानवर्णस्य पूर्व्वाकृतेरिति यावत् लक्ष्यं यस्मात्।) चर्म्म। इति शब्दरत्नावली॥
सावर्णिः, पुं, (सवर्णाया अपत्यमिति। इञ्।) अष्टममनुः। स च सूर्य्यपुत्रः। यथा,—
"विवस्वतश्च द्वे जाये विश्वकर्म्मसुते उभे।
संज्ञा छाया च राजेन्द्र ये प्रागभिहिते तव।
तृतीयां वड़वामेके तासां संज्ञासुताश्चयः।
यमो यमी श्राद्धदेवश्छायायाश्च सुतान् शृणु।
सावर्णिस्तपती कन्या भार्य्या संवरणस्य या।
शनैश्चरस्तृतीयोऽभूद्विष्टिर्नी वड़वात्मजौ॥
अष्टमेऽन्तर आयाते सावर्णिर्भविता मनुः।
निर्म्मोकविरजस्काद्याः सावर्णितनया नृप॥
तत्र देवाः सुतपसो विरजा अमृतप्रभाः।
तेषां विरोचनसुतो बलिरिन्द्रो भविष्यति॥
दत्त्वेमां याचमानाय विष्णवे यः पदत्रयम्।
राज्यमिन्द्रपदं हित्वा तपः सिद्धिमवाप्स्यति॥
योऽसौ भगवता बद्धः प्रीतेन सुतले पुनः।
निवेशितोऽधिके स्वर्गादधुनास्ते खराड़िव॥
गालवो दीप्तिमान्रामो द्रोणपुत्रः कृपस्तथा।
ऋष्यशृङ्गः पितास्माकं भगवान् बादरायणः॥
इमे सप्तर्षयस्तत्र भविष्यन्ति स्वयोगतः॥
इदानीमासते राजन् स्वे स्वे आश्रममण्डले।
देवगुह्यात् सरस्वत्यां सार्व्वभौम इति प्रभुः।
स्थानं पुरन्दराद्धृत्वा बलये दास्यतीश्वरः॥"
इति श्रीभागवते। ८। १३। ८—१७।
(अस्य विशेषविवरणन्तु मार्कण्डेयपुराणे देवीमाहात्म्ये द्रष्टव्यम्॥) गोत्रविशेषः। यथा। वात्स्यसावर्णिगोत्रयोरौर्व्वच्यवनभार्गवजामदग्न्याप्नुवत्प्रवराः। इत्युद्वाहतत्त्वम्॥
सावित्रं, क्ली, (सविता देवता अस्येति। अण्।) यज्ञोपवीतम्। इति शब्दरत्नावली॥ (तत्सम्बन्धिनि, त्रि। यथा, भागवते। ७।११।१०।
"किं जन्मभिस्त्रिभिर्य्वेह शौक्रसावित्रयाज्ञिकैः।
कर्म्मभिर्वा त्रयीप्रोक्तैः पुंसोऽपि विबुधायुषा॥")
सावित्रः, पुं, (सविता देवता अस्येति। अण्।) ब्राह्मणः। इति हेमचन्द्रः॥ शुक्रः। वसुः। इति मेदिनी॥ (स्वार्थे अण्।) सूर्य्यः। गर्भः। इति शब्दरत्नावली॥ (सवितुरपत्यं पुमान्। अण्। कर्णः। यथा, महाभारते। १। १३०। ८।
"सोऽब्रवीत् मेघगम्भीरस्वरेण वदतां वरः।
भ्राता भ्रातरमज्ञातं सावित्रः पाकशासनिम्।
सूर्य्यवंशीये, त्रि। यथा, उत्तरचरिते १ अङ्के।
"यत् सावित्रैर्दीपितं भूमिभागै-
र्लोकैश्लेष्ठैः साधु शुद्धं चरित्रम्।
मनुसम्बन्धात् कश्यपस्य क्रियद्भी
स्तावैदृक्षान् धन्य धिक् मामधन्यम्॥

सवित्रसवन्निनि च त्रि। यथा, मनुः। ४। १५०।
"सावित्यान् प्राजापत्यांश्च कुर्यात् पर्व्वसु नित्यशः॥")

सावित्री, स्त्री, शाक्तदेशीयसत्यवद्राजपत्नी। सा तु मद्रदेशीयाश्वपतिराजकन्या। (अस्या विशेषविवरणञ्च महाभारते वनपर्व्वणि २९२ अध्यायमारभ्य द्रष्टव्यम्॥१) उमा। इति मेदिनी॥ तन्नामकरणं यथा,—
"त्रिदशैरर्चिता देवी वेदयागेषु पूजिता।
भावभूतस्वरूपा तु सावित्री तेन सा स्मृता॥"
इति देवीपुराणे ४४ अध्यायः॥
अपि च।
"सर्व्वलोकप्रसवनात् सविता स तु कीर्त्यते।
अतस्तद्दैवता देवी सावित्रीत्युच्यते ततः।
वेदप्रसवनाच्चापि सावित्री प्रोच्यते बुधैः॥"
इति वह्निपुराणे ब्राह्मप्रशंसानामाध्यायः॥
गायत्री। इति त्रिकाण्डशेषः॥ ४॥ (उपनयनकर्म्म। यथा, मनुः। २। ३८।
"ब्याहीनात्तु भावत्यस्य सावित्री नातिवर्त्तते।
ब्याहादित्यात् त्रयस्यस्य सावित्री नातिवर्त्तते॥"
"सावित्रीशब्देन तदनुवचनसाधनमुपनयनाख्यं कर्म्म लक्ष्यते।" इति मेधातिथिः॥) ब्रह्मपत्नी। सा तु सवितुः दुहितुः सकाशात् जाता। अस्या उत्पत्तिनामान्तरादि यथा,—
"मनः संयमतत्त्वस्य भित्त्वा देहमकल्मषम्।
स्त्रीरूपमतिमनोहरीदर्शं पुरुषरूपवत्॥
ब्रह्मरूपा च सा ज्ञाता सावित्री च निगद्यते।
सदसद्व्यक्तरूपा च गायत्री ब्रह्मणी च परमम्॥"
इति मात्स्ये। २। ३०—३२॥ ७॥
सम्प्रति प्रसवनामानि यथा,—
विष्णुरुवाच।
"सावित्री पुष्करे नाम तीर्थानां प्रवरे शुभे।
वाराणस्यां विशालाक्षी नैमिषे लिङ्गधारिणी।
प्रयागे ललिता देवी कामुका गन्धमादने।
माणवे शुभदा नाम विमलायां तथामरे॥
सोमपे सोमरी नाम मन्दरे कामचारिणी।
मधोरण्ये वैश्वदक्षे ज्वाला दक्षिणपूरे॥
कान्यकुब्जे तथा गौरी रम्या माधवपत्तने।
कलमाषे पौरुषिकले विश्वा विश्वेश्वरे तथा॥
अत्र वराहशैले तु कमला कमलालये।
अर्बुदाख्ये तथा काली कालञ्जरे गिरौ॥
महाचैत्रे तु कपिला नकुलेशे सरस्वती।
प्रभासे पुष्करावती देवी विनायके॥
गोकर्णे भद्रकर्णी च शङ्खी शालिके तथा।
उत्पलाक्षी महाभागे विरजायां महोदये॥
भद्रायां भद्रदा नाम विमला पुरुषोत्तमे।
विमलायामनोधाख्यो गायत्रा मातृसंज्ञिते॥
मायापुरी कुमार्य्यां तु विल्वके अमृतेश्वरी।
विपुले विपुला नाम तत्तीरे मलयाचले॥
सह्यैरी सोदरीदेवि मलया मेघमालके।
कुशस्थले विशाला तु मलयाद्रौ हरिप्रिया॥
शिवचण्डे शुभा चण्डा नन्दिनी देविकातटे।
कपिलायां हरवल्यान्तु राधा वृन्दावने वने॥
देवकी मथुरायान्तु पातालेषु परमेश्वरी।
सीता विन्ध्ये तथा रौद्री कालिन्द्यां विन्ध्यवासिनी॥
सह्याद्रावेकवीरा तु हरिश्चन्द्रे तु चन्द्रिका।
रमणा रामतीर्थे तु वसुनायां रुद्रावती॥
करवीरे महालक्ष्मीरुमा देवी विनायके।
अरोगे तु रोगहन्त्री महाकाले महेश्वरी॥
अभयेत्वभयतीर्थे तु अरुन्धा विन्ध्यकन्दरे।
माण्डव्ये माण्डवी देवी महागौरी महेश्वरी॥
गणेशे च प्रचण्डा तु चण्डिकामरकण्टके।
सोमेश्वरी वराटे तु प्रभासे पुष्करावती॥
देवी माता सरस्वत्यां पारावारतटे स्थिता।
महालये महापद्मा पद्मेशाख्ये पितृश्वरी॥
सिंहिका ज्ञातसौरे च कार्त्तिकेये तु शङ्करी।
उत्पलावर्त्तके कामा सुभद्रा सिन्धुसङ्गमे॥
माता सिन्धुवने लक्ष्मीस्सरङ्गा भरताश्रमे।
जालन्धरे विश्वमुखी तारका विन्ध्यपर्व्वते॥
देवदारुवने पुष्टिर्मेधा काश्मीरमण्डले।
भीमा देवी हिमाद्रौ तु चेतुर्व्वक्रेश्वरे तथा॥
कपालमोचने शुद्धा माता कायावरोहणे।
शङ्खोद्धारे ध्वनिर्नाम हृतिः विस्तारके वने॥
काली तु चन्द्रभागायामण्डोदे सिद्धदायिनी।
नरनारायणे देवी बदर्य्यामुर्व्वशी तथा॥
ओषधीशोत्तरकुले कुशद्वीपे कुशोदका।
मन्मथा हेमकूटे तु कुसुदे सत्यवादिनी॥
अश्वत्थवनवीथा तु विविक्ते श्रमणावने।
गायत्री वेदमातायां सावित्री ब्रह्मसन्निधौ॥
सूर्य्यबिम्बे प्रभा नाम मातृणां वैष्णवी मता।
अरुन्धती सतीनान्तु रामासु च तिलोत्तमा॥
मद्ये अशोकला नाम शक्तिः सर्व्वशरीरिणाम्।
एतदुद्देशतः प्रोक्तं नामाष्टशतमुत्तमम्॥
अष्टोत्तरशतं तीर्थानां श्रुतमेतदुदाहृतम्।
यो वर्षति इदमुत्थाद्वापि सर्व्वपापैः प्रमुच्यते॥
यत्र तीर्थेषु वत् स्नात्वा स्नात्वा पर्व्वेश्वरो हि यः।
सर्व्वपापविनिर्म्मुक्तः कल्पं ब्रह्मपुरे वसेत्॥
नामाष्टशतकं यत्तु आवयेद्भक्तमानवः।
यौगमासाश्रममावस्यां वह्निपूजो भवेन्नरः॥
मोदते आहुतिने च अश्वमेधफलं वा पुनः।
देवार्च्चनविधौ विद्वान् वरं ब्रह्माधिगच्छति॥"
इति गरुडपुराणे पूर्व्वखण्डे १० अध्यायः॥१॥
अपि च।
नारद उवाच।
"सत्यमुपाख्यानमिदं पुनर्मेऽद्य सुधीश्वरम्।
तनु सावित्र्युपाख्यानं तत्त्वे ब्रह्मसुतर्षभे॥
पुरा येन मनुष्येण सा तुष्टा च तुष्टिदः।
तेन वा पूजिता देवी पथ्ये वैष वा पुरे॥
नारायण उवाच।
अत्रापि वेदवचनं पूर्व्वितं ब्रह्मणे पुरे।
द्विजेभ्यो च वेदसंस्तवनादिभ्यो गतेः॥
यदा ब्राह्मपतिः पूर्व्वं पूजयामास भारतीं।
तत्पश्चात् पूजयामासुर्व्वर्णाश्चत्वार एव च॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे। २३। १—४॥
सावित्रीव्रतं, क्ली, (सावित्र्या व्रतम्।) ज्येष्ठकृष्णचतुर्दश्यां स्त्रीकर्त्तव्यनियमविशेषः। तद्विवरणं यथा। पराशरः।
"मेषे वा वृषभे वापि सावित्रीं तां विनिर्दिशेत्॥"
तां चतुर्दशीम्।
"ज्येष्ठकृष्णचतुर्दश्यां सावित्रीमर्च्चयन्ति याः।
वटमूले सोपवासा न ता वैधव्यमाप्नुयुः॥"
राजमार्त्तण्डधृतचित्तामणेः।
"ज्येष्ठे मासि चतुर्दश्यां सावित्रीव्रततत्परम्।
अवैधव्याय कुर्व्वन्ति स्त्रियः श्रद्धासमन्विताः॥"
व्रतमासे तु अप्राप्तचतुर्दशीव्रतोक्तमाचरन्ति। दृष्टपरिकल्पनान्यायात्। तदुक्तं मत्स्यपुराणे।
"गर्भिणी सूतिका नक्तं कुमारी च रजस्वला।
यदाशुद्धा तदान्येन कारयेत् क्रियते यदा॥"
उपवासाशक्तौ नक्तं भोजनं कुर्य्यात्।
"उपवासेऽप्यशक्तानां नक्तं भोजनमिष्यते।"
इति तत्तद्वचनान्तरात्। अशुद्धा चेत् पूजां कारयेत्। कायिकक्लेशोपवासादिकं सदा शुद्धया अशुद्धया च स्वयं क्रियते। एवं स्मृतिपरिभाषायां वर्द्धमानोपाध्यायः। नारदः।
"दिवाभागे त्रयोदश्यां यदा चतुर्दशी भवेत्।
तत्र पूज्या महाभागा देवी सत्यवता सह॥"
दिवाभागे दण्डद्वयमात्रसत्त्वेऽपि व्रतस्य प्रदोषे व्रतमाचरन्ति। पूर्व्वाह्णे तत्त्रिमुहूर्त्तेऽपि पराह्णे त्रिमुहूर्त्तव्याप्तित्वे पराह्ण एव त्रिमुहूर्त्तव्याप्तिनीति वचनात्। यदा तु पूर्व्वापरयोर्न तथाविधा। तदापि पराह्ण एव। यथा। ज्योतिषे।
"चतुर्दश्यामसावास्या यदा भवति नारद!।
उपोष्य पूजनीया सा चतुर्दश्यां विधानतः॥"
सा सावित्री। तत्पूजाभावास्थायां सावित्रीव्रतविधानं शिवा घोरा तथा प्रेतेति वचनञ्चैतदुत्तरम्। पराशरः।
"सावित्रीमर्च्चयित्वा तु फलाहारा परेऽहनि।
ततस्सावित्रया नारी विधवैवाप्नुयात् सुखम्॥"
इति तिथ्यादितत्त्वम्॥
अन्यत् वटसावित्रीव्रतशब्दार्थे द्रष्टव्यम्॥
सावित्रीसूत्रं, क्ली, (सावित्र्याः सूत्रम्।) यज्ञोपवीतम्। इति शब्दरत्नावली॥
सावूकः, पुं, (सा + ऊक।) कमलः। इति शब्दरत्नावली। १५६॥
सावूकी, स्त्री, शब्दः। इति त्रिकाण्डशेषः॥
सास्थितास्थाई, क्ली, (सास्थि अस्थिमज्जादिर्न तास्थाई यत्र।) कांस्यम्। इति त्रिकाण्डशेषः॥
सास्ता, स्त्री, (सम सम्यक् + "राध्यास्थास्थासमा धोगाः।" उणा० ३। १५५। इति सम्यक्रूपेण सास्तुः।) मस्तकम्। भरतमः। २। ८। ८३॥ (यथा, माघे। ५। ६२।
"रोमाञ्चमञ्चरचलद्भुजमास्थास्था-
श्लेषे निमीलदलिपक्ष्मलदृष्टिपातैः।")

साहचर्य्यं, क्ली, (सहचरस्य भावः कर्म्म वा। सहचर+ष्यञ्।) सहचरस्य भावः। (यथा, कुमारे। ३। ११।
"मधुश्च ते मन्मथ! साहचर्य्या-
दसावनूक्तोऽपि सहाय एव।
समीरणो नोदयिता भवेति
व्याहीयते केन हुताशनस्य॥")
सहगमनम्। सहचरशब्दात् ष्यञ्प्रत्ययेन निष्पन्नम्॥ सहचारः। सामानाधिकरण्यम्। एकाधिकरणवृत्तित्वम्। यथा,—
"प्रायशो रूपमेदेन साहचर्य्याच्च कुत्रचित्।"
इत्यमरः॥
(सहधर्म्माचरणम्। इति मल्लिनाथः॥ यथा, रघुः। १६। ८७।
"तस्याः स्पृष्टं मनुजपतिना साहचर्य्याय हस्तं
माङ्गल्योर्म्मावलयिनि पुरः पावकस्योच्छिखस्य॥")
साहयः, त्रि, (साहयतीति। साहि+"अशुप-सर्गात् लिम्पविन्देति।" ३। १। १३८। इति गः।) सहनकारयिता। इति व्याकरणम्॥
साहसं, क्ली, (सहसा बलेन निर्वृत्तम्। सहस्+"तेन निर्वृत्तम्।" ४।२।६८। इति अण्।) दण्डः। इत्यमरः। २।८।२१॥ स च त्रिविधः। यथा, याज्ञवल्क्यः।
"साधीतिप्रणसाहसो दण्ड उत्तमसाहसः।
तद्वर्द्धं मध्यमः प्रोक्तस्तदर्द्धमधमः स्मृतः॥"
इति प्रायश्चित्ततत्त्वम्॥
बलात्कारकृतकार्य्यम्। इति मेदिनी॥ (यथा, "घंगरोधात् यथाचैव साहसाद्विषमाश्नतात्। चिरोषो जायते यक्ष्मा गदो हेतुचतुष्टयात्॥" इति माधवकरसंगृहीतरश्मिनिश्चये यक्ष्माधिकारे॥ "साहसादिति साहसो बलवद्विषयादि-रूपः क्षोभहेतुत्वेन कारणत्वम्॥" इति तट्टीकायां विजयरक्षितः॥* दुष्कृतकर्म्म। अविमृष्यकृतिः। (यथा, महाभारते। १।४२।१।
"यन्मेतत् साहसं नाम! यदि वा दुष्कृतं कृतम्।
प्रियं वाप्यप्रियं वा ते वागुक्ता न वृथा भवेत्॥")
देयः। इति हेमचन्द्रः॥ पश्चाद्दोषमनालोच्य करणम्। तत्तु चौर्य्यपरदारगमनादि। इति मुग्धबोधटीकायां दुर्गादासः॥* साहसमाह नारदः।
"मनुष्यमारणं स्तेयं परदाराभिमर्षणम्।
पारुष्यमनृतञ्चैव साहसं पञ्चधा स्मृतम्॥"
अत्र नत्र पर्य्युत्तरदापनम्। यथा,—
"साहसस्तेयपारुष्यगोऽभिशापान्यये स्त्रियाम्।
विवादयेत् सत्र यत्र कालोऽन्यश्चेच्छया स्मृतः॥"
विवादयेत् सत्र पर्य्युत्तरं दापयेत्। इति भूरि-प्रयोगः॥ तत्र दण्डादर्योऽपि साहसिनो भवन्ति। यथा, उशना।
'दण्डोऽन्यो वधिरः कुष्ठी स्त्रीबालस्थविरादयः।
एतेऽप्यनीप्सितमनसः साहसे साहसिनो मताः॥"
इति व्यवहारतत्त्वम्॥

(तद्युक्ते, त्रि। यथा, हरिवंशे भविष्यपर्व्वणि। ३६। ३७।
"न जाने इति यद्भूयो किमतः साहसं वचः॥")
साहसः, पुं, (सहसे बलाय हितः। सहस्+अण्।) अग्निविशेषः। यथा,—
"प्रायश्चित्ते विधुरेव पावकयज्ञे तु साहसः।
लक्षहोमे च वह्निः स्यात् कोटिहोमे हुताशनः॥"
इति तिथ्यादितत्त्वम्॥
साहसाङ्कः, पुं, (साहसः एव अङ्कश्चिह्नं यस्य।) विक्रमादित्यराजः। इति जटाधरः॥
साहसिकः, त्रि, (सहसा बलेन वर्त्तते इति। सहस्+"ओजःसहोम्भसा वर्त्तते।" ४। ४। २७। इति ठक्।) मनुष्यमारकः। चौरः। पारदारिकः। परुषवादी। अनृतवादी। इति साहसशब्दार्थदर्शनात्। इति असाक्षिणः।
यथा नारदः।
"स्तेनाः साहसिका धूर्त्ताः कितवा योधकाश्च ये।
असाक्षिणस्तु ते दुष्टास्तेषु सत्यं न विद्यते॥"
इति व्यवहारतत्त्वम्॥
(दुष्कारी। यथा। "केचित् साहसिका-स्त्रिलोचनमिति पेठुः।" इति कुमारटीकायां मल्लिनाथः। ३। ४४॥)
साहसं, क्ली, (सहसानां समूहः। सहस्+"भिक्षादिभ्योऽण्।" ४। २। ३८। इति अण्।) सहस्रसमूहः। इत्यमरः। ३। २। ४५॥ (यथा, महाभारते। २। ५८। १३।
"यतावन्ति च दासानां साहस्राण्युत सन्ति मे॥"
सहस्रमेव। स्वार्थे अण्।) सहस्रमात्रम्। यथा,—
"हरिस्ते साहसं कमलबलिमाधाय पदयो-
र्यदेकोने तस्मिन्निजमुदहरन्नेत्रकमलम्।
गतो भक्त्युद्रेकः परिणतिमसौ चक्रवपुषा
त्रायाणां रक्षायै त्रिपुरहर जागर्त्ति जगताम्॥"
इति महिम्नस्तवः॥
(सहस्रेण क्रीतमिति। "शतमानविंशतिक-सहस्रवसनादण्।" ५। १। २७। इति अण्।) सहस्रेण क्रीते, त्रि॥ (सहस्रमेवेदमिति। अण्।) सहस्रसम्मिते च त्रि॥ (यथा, विष्णुपादादि-केशान्तवर्णनस्तोत्रे। २४।
"साहस्रीवापि संख्या प्रकटमभिहिता सर्व्व-
वेदेषु येषाम्॥")
साहस्रः, पुं, (सहस्रमस्यास्तीति। सहस्र+"व्यञ्च।" ५। २। १०३। अण्।) सहस्रसङ्ख्यक-गजादिना वर्त्तौ। इत्यमरः। २। ८। ६२॥ (सहस्रविशिष्टे, त्रि। यथा, मनुः। ८। ३७३।
"सहस्रं ब्राह्मणो दण्ड्यो गुप्ते तु द्वे शतानि तु।
प्रवृद्धायां क्षत्रियविशोः साहस्रौ तौ भवेदमः॥")
साहायकं, क्ली, (सहायस्य भावः कर्म्म वा। सहाय+"ओषधात् गुरूपोत्तमात् वुञ्।" ५। ३। १३२। इत्यत्र सहायशब्देन बलत्रयमुच्यते; पाचिको वुञ्।) साहाय्यम्। सहायस्य भाव इत्यर्थे कण्प्रत्ययेन निष्पन्नम्॥ (यथा, रघुः। १७। ५।
"स कूलोचितमिन्द्रस्य साहायकमुपेयिवान्।
जघान समरे दैत्यं दुर्जयं तेन चावधि॥")
साहाय्यं, क्ली, (सहायस्य भावः कर्म्म वा। सहाय+यत्रे ब्राह्मणादित्वात् ष्यञ्।) सहायता। सहायशब्दात् ष्यञ्प्रत्ययेन निष्पन्नम्॥ (यथा, महाभारते। ९। १५५। १६।
"साहाय्येऽस्मि स्थितः पार्थ! पातयिष्यामि
राक्षसम्।")
साहित्यं, क्ली, स्त्री, (सहित+ष्यञ्।) मेलनम्। सहितस्य भावः इत्यर्थे ष्यञ्प्रत्ययेन निष्पन्नम्। परस्परसापेक्षाणां तुल्यरूपाणां युगपदेक-क्रियान्वयित्वं साहित्यम्। इति आह्निकविवेकः॥ तुल्यवदेककियान्वयित्वम्। बुद्धिविशेषविशेष्यत्वं वा। इति शब्दशक्तिप्रकाशिका॥ साहित्यं एककियान्वयित्वम्। तद्यथा। धवखदिर-पलाशांश्छिन्धि इत्यत्र धवखदिरपलाशप्रति-योगिकं यत् साहित्यं तन्निरूपितं यदवयव-विभागरूपफलं तच्चनिका या छिदिक्रिया तदनुकूलव्यापारोऽभिधेयः। इति सारमञ्जरी। मनुष्यकृतश्लोकसमयग्रन्थविशेषः। स तु भट्टि-रघु-कुमारसम्भव-माघ-भारवि-मेघदूत-विदग्धमुख-मण्डनशान्तिशतकप्रभृतयः॥
साह्यं, क्ली, (सहस्य भावः। सह+ष्यञ्।) मेलनम्। सहितत्वम्। इति धरणिः॥ (साहा-य्यम्। यथा, महाभारते। ५। ७। ११।
"ततो दुर्योधनः कर्णमुवाच प्रहसन्निव।
विग्रहेऽस्मिन् भवान् साह्यं मम दातुमिहा-
र्हति॥")
साह्यकृत्, पुं, (साह्य करोतीति। कृ+क्विप्।) समभिव्याहारी॥
साङ्गः, पुं, (आङ्गेन सह वर्त्तमानः।) मेषादि-प्राणिदूतम्। पशुयुद्धम्। यथा,—
"मेषादिप्राणिदूते स्यात् साङ्गयज्ञ समाङ्गयः।"
इति शब्दरत्नावली॥
(नामयुक्ते, त्रि। यथा, भागवते। १। ८। ६।
"कथमालक्षितः पौरैः सं प्राप्तः कुरुजाङ्गलम्।
उन्मत्तमूकजडवत् विचरन् गजसाह्वये॥")
सिंहः, पुं, (सिंघति तेजः पशुषु इति। सिंघ+"सिंघेः संज्ञायां हुमौ कथ।" उणा॰ ५। ६२। इति कः। अन्त्यादेशो हकारः। गुण च। एषोदरादित्वात् अन्तविपर्य्यये हिनस्तीति सिंह इत्यपि भवति।) खनामख्यातपशुः। (यथाह कश्चित्।
"सिंहो बली द्विरदकुञ्जरमांसभोजी
संवत्सरेण कुरुते रतिमेकवारम्।
पारावतः खलु शिलाकणमात्रभोजी
कामी भवेदनुदिनं वद कोऽत्र हेतुः॥")
तत्पर्य्यायः। मृगेन्द्रः २ पद्माक्षः ३ वर्षणः ४ केशरी ५ हरिः ६। इत्यमरः। २। ५।

सिंहविक्रान्तः, पुं, (सिंह इव विक्रान्तः।) अश्वः। इति हारावली ।५२। शब्दमाला च ॥ सिंहतुल्यविक्रमविशिष्टे, त्रि ॥

सिंहविद्या स्त्री, (सिंह इव विद्या विद्याना।) मासपर्णी। इति राजनिर्घण्टः ॥

सिंहसंहनन:, त्रि, (सिंहस्येव संहननं अवयवो यस्य।) वराङ्गरूपोपेतः। इत्यमरः ।३।१।१२ ॥ प्रत्येकमवयवशुद्धया सुन्दरः। सिंहसंहननः स स्यादयो हि सर्वाङ्गसुन्दरः। इति कोषान्तरम् ॥ सिंहस्येव संहननं देहोऽस्य सिंहसंहननः। रूढ़िशब्दोऽयं यथाकथञ्चिदन्वयः। इति भरतः॥ (सिंहस्य संहननम्।) सिंहनाशने, क्ली ॥

सिंहा, स्त्री, (सिंघतीति। सिंघ + कः। अन्यादेशो हकारः। नुम् च। टाप्।) नाड़ी। इति राजनिर्घण्टः ॥

सिंहाणं, क्ली, लौहमलम्। इत्यमरटीका। २। १। ६८ ॥

सिंहानं, क्ली, लौहमलम्। इत्यमरः। २।१।६८ ॥ तस्य रूपान्तराणि यथा। सिंघाणम्२ सिंहाणम् ३ सिंघाणम् ४। इति तट्टीका ॥ नासिकामलम्। सिक्नी इति भाषा। तत्पर्य्यायः। सिंहाणकम् २ सिंघाणम् ३ सिंघणम् ४। इति शब्दरत्नावली ॥ कफः ५ शिंघा ६ खेटः ७। इति जटाधरः ॥

सिंहासनं, क्ली, (सिंहचिह्नितमासनम्।) स्वर्णमयराजासनम्। इत्यमरः। २। ८। ३२॥ अथ सिंहासनयुक्तिः।

"राज्ञो वरासनं नाम श्रीसिंहासनमुच्यते ॥
शुभे सुवृत्ते शुभमासवर्षे
सुवारवेलातिथिचन्द्रयोगे।
काले निरुत्पातनिरीतिभावे
सिंहासनावस्थविधिं वदन्ति ॥
स्थिरराशिस्थिते भानौ चन्द्रे च स्थिरभोदिते।
आसनारम्भमिच्छन्ति गृहारम्भोऽपि येषु च ॥"

एतेन गृहारम्भसिंहासनयोरारम्भः। तत्र क्रमः।

"वाणवेदाग्निपक्षाग्नि सोपानानि युगैः क्रमात्।
चत्वारिंशत्तथा त्रिंशत् विंशतिः षोड़शैव च ॥
सिंहान्यासनि ज्ञेयानि चरणानि युगैः क्रमात्।
पद्मः शङ्खो गजो हंसः सिंहो भृङ्गो वृषो हयः ॥
अथो सिंहासनानीति नीतिशास्त्रविदो विदुः।
आदित्यादिदशाजानां भूपतीनां यथाक्रमम् ॥
राज्ञः षड्भैरष्टाभिरायामपरिणाहयोः।
राजपाद्यमिदं नाम सोपानं पुरुषोन्नतम् ॥
तदूर्द्धमासनं तस्मिंश्च राजासनसदाहृतम्।
अर्द्धोन्नतमिदं रम्यं प्रोक्तं कलिमहीभुजाम्।
दिगष्टांशाधिकोच्चः स्यादन्त्यजादीनां यथा-
क्रमम् ॥"

अथाष्टानां लक्षणानि।

"गम्भारीकाष्ठघटितः पद्ममालोपशोभितः।
पद्मरागविचित्राङ्गः शुद्धः काञ्चनसंज्ञकः ॥
चरणाग्रे पद्मकोषात् पद्मरागविचित्रिताः।
दिक्षणौ पुत्रिका राज्ञोदशाङ्गुलिसम्मिताः ॥
राजासनं चतसश्च एवं द्वादशपुत्रिकाः।
रत्नैश्च नवभिः कार्य्यं निर्म्माणं चान्तरान्तरा ॥
रक्तवस्त्रावृतं श्वेतत् पद्मसिंहासनं मतम्।
अर्चयित्वा नरपतिः प्रतापमतिविन्दति ॥१॥
भद्रेन्द्रकाष्ठघटितः शङ्खमालोपशोभितः।
शुद्धस्फटिकचित्राङ्गः शुद्धरूप्योपशोभितः ॥
चरणाग्रे शङ्खनाभिः पुत्रिकाः सप्तविंशतिः।
स्थाने स्थाने विधातव्याः शुद्धस्फटिकसंस्कृताः।
शुक्लपट्टावृतं श्वेतत् शङ्खसिंहासनं मतम् ॥२॥
पनसेनोपघटितो गजमालोपशोभितः।
विद्रुमैरपि वैदूर्य्यैः काञ्चनेनापि शोभितः ॥
चरणाग्रे गजशिरः पुच्छाद्येकैकपुत्रिका।
माणिक्यरचिता रक्तवस्त्रादिकविभूषणम्।
गजसिंहासनं नाम सान्नाय्यफलदायकम् ॥३॥
शालकाष्ठेन घटितो हंसमालोपशोभितः।
पुष्यरागैः काञ्चनेन कुरुविन्दैश्च चित्रितः ॥
चरणाग्रे हंसरूपं पुत्रिकास्त्रैकविंशतिः।
गोमेदकोपघटितापीतवस्त्रविभूषणम्।
हंससिंहासनं नाम सर्व्वानिष्टविनाशनम् ॥४॥
चन्दनेनोपघटितः सिंहमालोपभूषितः।
शुद्धहीरकचित्राङ्गः शुद्धकाञ्चननिर्म्मितः ॥
चरणानां सिंहलेखः पुत्रिकाश्चैकविंशतिः।
मुक्ताशुक्तिभिरत्यैश्च निर्म्मलैरेव भूषणम् ॥
शुद्धशुण्डावृतं श्वेतत् सिंहसिंहासनं मतम्।
अर्चयित्वा नरपतिः क्षत्रक्षां साधयति
क्षितिम् ॥५॥
भृङ्गमालोपसहितं शुद्धचम्पककल्पितम्।
शुद्धैर्म्मरकतैर्युक्तं पादाग्रे पद्मकोषिकाः ॥
द्वाविंशतिः पुत्रिकास्तु नीलवस्त्रादिभूषणम्।
भृङ्गसिंहासनं नाम शत्रुक्षयजयप्रदम् ॥६॥
निम्बकाष्ठेन घटनाश्वगमालोपशोभितम्।
इन्द्रनीलैर्म्महानीलैः काञ्चनेनापि चित्रितम् ॥
चरणाग्रे श्वगशिरश्चत्वारिंशच्च पुत्रिकाः।
नीलवस्त्रादियुक्तन्तु श्वगसिंहासनं मतम्।
लक्ष्मीविजयसम्पत्तिर्नैरुज्यपदमुत्तमम् ॥७॥
केशरेणोपघटितं हयमालोपशोभितम्।
समस्तवस्त्रैर्भूषाश्च पुत्रिकाः पञ्चसप्ततिः ॥
चरणाग्रे हयशिरश्चित्रवस्त्रादिभूषणम्।
हयसिंहासनं नाम लक्ष्मीविजयवर्द्धनम् ॥८॥
इत्येतत् कथितं सारं महासिंहासनाष्टकम्।
यथा भोजेन लिखितं यथा चान्यैश्च पण्डितैः ॥
एतस्यानिक्रमं दम्भादयः कुर्य्यात् पृथिवीपतिः।
अचिरादेव कुरुते तस्य मृत्युरनिक्रमम् ॥
परामनस्यो यो राजा यो राजा च निरासनः।
स परैर्हन्यते सिंहैरिव मत्तगजाधिपः ॥
स्वलग्नमित्रासनमध्यसंस्थिते-
र्न दुष्यतीति प्रवदन्ति तज्ज्ञाः ॥"

इति युक्तिकल्पतरुः ॥ * ॥

चतुराजौकीड़ायां जयविशेषः। यथा, तिथ्यादितत्त्व।

"अन्यद्राजपदं राजा यदा याती युधिष्ठिर।
तदा सिंहासनं तस्य भण्यते नृपसत्तम ॥
राजा च नृपतिं हत्वा कुर्य्यात् सिंहासनं यदा।
द्विगुणं वाहयेत् पण्यमन्यथैकगुणं भवेत ॥
मित्रसिंहासनं पार्थ यदा रोहति भूपतिः।
तदा सिंहासनं नाम सर्व्वं भवति तद्बलम् ॥
यदा सिंहासनं कर्त्तुं राजा षड्पदाश्रितः।
तदा घातेन हन्तव्यो बलेनापि सुरक्षितः ॥"*॥

योगासनविशेषः। यथा, हठप्रदीपे।

"गुल्फौ च वृषणस्याधः सीवन्याः पार्श्वयोः क्षिपेत्।
दक्षिणे सव्यगुल्फन्तु दक्षगुल्फन्तु सव्यके ॥
हस्तौ च जान्वोः संस्थाप्य स्वाङ्गुली: संप्रसार्य्य च।
व्यात्तवक्त्रो निरीक्षेत नासाग्रं सुसमाहितः ॥
सिंहासनं भवेदेतत् पूजितं योगिभिः सदा।
बन्धत्रयस्य सन्धानं कुरुते चासनोत्तमम् ॥"

सिंहासन:, पुं, (सिंहस्य आसनं उपवेशनमिव आसनं यत्र।) षोड़शरतिबन्धान्तर्गतचतुर्द्दशबन्धः। तस्य लक्षणं यथा,—

"स्वजङ्घाहृदयबाहू च कृत्वा योषापदद्वयम्।
स्त्रीं कृत्वा रमेत् कामी बन्धः सिंहासनो मतः॥"

इति रतिमञ्जरी ॥

सिंहासनचक्रं, क्ली, (सिंहासनमिव चक्रम्।) सप्तविंशति-नक्षत्राङ्कित-नराकार-चक्र-त्रयम्। यथा,—

"अथातः संप्रवक्ष्यामि चक्रं सिंहासनत्रयम्।
सप्तविंशतिनक्षत्रैरेकैकस्य नवात्मकम् ॥
अश्विनीमघमूलाद्यं पञ्चनाड़ीविभेदतः।
अश्विन्याद्युत्तरे भागे मघाद्यं पूर्व्वतः स्थितम् ॥
मूलाद्यं दक्षिणे भागे ज्ञातव्यं नृपतित्रयम्।
इतरेषु च राज्येषु नृपनामर्क्षतो वदेत् ॥
शुभाशुभमिदं सर्व्वं यत्र यस्य भगिः स्थितः।
नाड़िकापञ्चवेधेन एकैकस्यासनं भवेत् ॥
आधारमासनं षष्ठं सिंहं सिंहासनं तथा।
ग्रहैर्व्वेधवशाज्ज्ञेयं सौम्यैः क्रूरैः शुभाशुभम् ॥
ऋक्षे आधारगे राजा अभिषिक्तो य आसने।
पराधीनगतं राज्यं कुरुते नात्र संशयः ॥
आसनस्थेन ऋक्षेण नीतियुक्तो भवेन्नृपः।
प्रधानपुरुषो देवः प्रजाशान्तिकरो भवेत् ॥
षष्ठे ऋक्षे यदा राजा उपविष्टो नृपासने।
पूर्व्वराजास्थितेस्तुल्यं चिरं पालयते महीम् ॥
सिंहरूपी भवेद्राजा सिंहर्क्षेणासने स्थितः।
संग्रामस्य शिरो नित्यमसाध्यो मन्त्रिमण्डले ॥
सिंहासनगते धिष्ण्ये तेजस्वी भीषणाकृतिः।
चलचित्तो महाक्रोधी प्रजापीड़ाकरो नृपः ॥
तत्कालेऽङ्गते ऋक्षे क्रूरनिर्व्वेधनाड़िके।
शुभावस्था शुभे लग्ने संस्थाप्यो नृप आसने ॥
दृष्टेषु च समायोगे उपविष्टो य आसने।
उच्छाद्य शत्रुसंघातमेकच्छत्रं करोति सः ॥
क्रूरग्रहगतां नाड़ीमुपविष्टो य आसने।
बन्धनं भूमिनाशश्च तथा मृत्युः प्रजायते ॥
आधारं ऋक्षगः सौरिरनावृष्टिं करोति च।
दुर्भिक्षं रौरवं तत्र प्रजापीड़ा च जायते ॥
आसने च यदा सौरिर्युद्धे भङ्गप्रदो भवेत्।

अथवा व्याधिपीडा च मनोदुःखं प्रजायते ॥
षष्ठे चन्द्रे यदा सौरिः षष्ठराशौ विनश्यति ।
स्त्री वाथ कुमारो वा मन्त्रिवन्मुच्यतेऽपि वा ॥
सिंहे सिंहासने वापि यदा तिष्ठति सूर्यजः ।
तदा शत्रुर्न सन्देहो यदि शक्रसमो नृपः ॥
शनिराहुकर्मारिष्टा यदा चन्द्रेण संयुताः ।
यस्यासनगता एते तस्य राज्ञो भयङ्कराः ॥
क्रूरयुक्तोऽथ वक्रस्तु क्रूरनाड़ीगतोऽपि वा ।
आसने चन्द्रयोगेन कालरूपी शनैश्चरः ॥
एवं शुभफलं दद्याद्देवमन्त्री न संशयः ।
करोति विपुलं राज्यं यस्यासनगतो गुरुः ॥"
इति ज्योतिस्तत्त्वम् ॥

सिंहास्यः, पुं, (सिंहस्य आस्यमिव पुष्पमस्य ।) वासकः । इत्यमरः । २ । ४ । १०३ ॥ सिंहतुल्यमुखे, त्रि ॥

सिंहिका, स्त्री कश्यपपत्नी । राहुमाता । यथा,
"कश्यपस्य गृहिणी तु सिंहिका
राहुवाप्तुतनयावलीजनत् ।
पूर्णजो हरिनिकृत्तकन्धरो
दैवतैरवरजो निपातितः ॥"
इति वास्तुयागतत्त्वम् ॥
(पीठस्था देवीविशेषः । यथा, देवीभागवते । ७ । ३० । ७५ ।
"सिंहिका कनकाक्षे तु कार्त्तिके त्वतिशाङ्करी ॥")

सिंहिकासूनुः, पुं, (सिंहिकायाः सूनुः पुत्रः ।) राहुः । इति शब्दरत्नावली । वास्तुपुरुषः । इति वास्तुयागतत्त्वम् ॥

सिंही, स्त्री, (सिंह + ङीष् ।) सिंहपत्नी । (यथा, कथासरित्सागरे । ६ । १०२ ।
"अयं स वर्त्तितोऽनाभां सिंहीनां पयसा मया ॥")
वार्त्ताकी । इत्यमरः । २ । ४ । १२४ ॥ कण्टकारी । वासकः । इति मेदिनी ॥ दूतवती । राहुमाता । इति विश्वः ॥ सुप्रपर्णी । इति राजनिर्घण्टः ॥

सिंहीलता, स्त्री, (सिंह्याः लता ।) दूतवती । इति भावप्रकाशः ॥

सिच, सेचने । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) इत्यादिः । सिकता । इति दुर्गादासः ॥ सौचधातुरयम् ॥

सिकता, स्त्री (सिक सेचने + बाहुलकात् अतच् ।) सिकतिलः । वालुकायुक्तभूमिः । इति मेदिनी । ते, १६८ ॥ वालुका । इति राजनिर्घण्टः ॥

सिकताः, स्त्री, भूमि, (सिक + अतच् ।) वालुका । इति मेदिनी । ते, १६८ ॥ अमरश्च । ३।३।३१॥ (यथा, महाभारते । २ । ७६ । १६ ।
"सिकता वपनु सप्तमाचौ राजानमनुशाधति ।
आसक्ताः सिकतास्तस्य यथा मंप्रति भारत ।
आसक्ताः शरवर्षाणि तथा मोक्षति शत्रुषु ॥")

सिकतामय, स्त्री, (सिकताप्रकृम् । मयट् ।) वालुकामयतटम् । तत्पर्य्यायः । ऐकतम् २ । इत्यमरः । १ । १० । ६ ।

सिकतावान्, [त्] त्रि, (सिकताः सन्त्यत्रेति । मतुप् । मस्य वः ।) वालुकावहुलदेशः । तत्पर्य्यायः । सिकता २ सिकतिलः ३ सैकतः ४ । इत्यमरभरतौ । २ । १ । ११ ॥

सिकतिलः, त्रि, (सिकताः सन्त्यत्रेति । सिकता + "देशे लुबिलचौ च ।" ५ । २ । १०५ । इति इलच् ।) सिकतावान् । इत्यमरटीकायां भरतः । २ । १ । ११ ॥

सिक्, [च्] स्त्री, (सिच्यते इति । सिच् + क्विप् ।) वस्त्रम् । इति हेमचन्द्रः ॥ (जालम् । यथा, भागवते । ६ । १२ । ८ ।
"लोकाः सपाला यस्येमे श्वसन्ति विवशा वशे ।
द्विजा इव सिचावद्धाः स काल इह कारणम् ॥")

सिक्तः, त्रि, (सिच् + क्तः ।) सेकाश्रयः । क्षतसेचनः । यथा, वायुपुराणे गयापद्धतौ ।
"आत्मानः सिक्ताः पितरश्च तृप्ता
एका क्रिया द्व्यर्थकरी प्रसिद्धा ॥"

सिक्थं, क्ली, (सिच्यति चरतीति । सिच चरणे + "पातृतुदिवचीति ।" उणा० २ । ७ । इति थक् ।) मधूच्छिष्टम् । इति मेदिनी ॥ मोम इति भाषा ॥ (यथा,—
"तिक्तासिक्थनिशाग्रन्थीनक्ताङ्घ्रफलपञ्चकैः ।
षट्पलमाततोनिम्बपत्रैर्मध्यं घृतं स्रुतम् ॥"
इति तिक्ताद्यघृतम् ॥
इति वैद्यकचक्रपाणिसंग्रहे व्रणशोथाधिकारे ॥)
नीली । इति हेमचन्द्रः ॥

सिक्थः, पुं, (सिच + थक् ।) भक्तपुलाकः । (सिटी इति भाषा ॥ यथा,—
"————पेया सिक्थसमन्विता ॥"
इति वैद्यकचक्रपाणिसंग्रहे ज्वराधिकारे ॥)
ग्रासः । इति मेदिनी ॥ (यथा, कथासरित्सागरे । १०८ । ७७ ।
"भक्तसिक्थदृढं प्राप्य पाकभाण्डादभक्षयम् ॥")

सिक्थकं, क्ली, (सिक्थमेव । स्वार्थे कन् ।) मधूच्छिष्टम् । इत्यमरः । २ । ६ । १०७ ॥ (पुं भक्तपुलाकः । सिटी इति भाषा । यथा,—
"सिक्थकैरहितो मण्डः पेया सिक्थसमन्विता ।
यवागूर्बहुसिक्था स्यादिलेपी विरलद्रवा ॥"
इति वैद्यकचक्रपाणिसंग्रहे ज्वराधिकारे ॥
यथा च हरिवंशे भविष्यपर्वणि । २६ । ८ ।
"दन्तैर्नागा गोहयाश्चाश्च लोभा
हैमा भूपाः सिक्थकैर्न द्विजाद्याः ।
तद्वद्देशा वर्षमासा दिवश्च
ग्रैष्मप्रख्याश्चात्मरूपप्रमिताः ॥")

सिक्थः, पुं, स्फटिकः । इति जैनिनः ॥

सिङ्घाणं, क्ली, नासिकामलम् । इति शब्दरत्नावली ॥ सिङ्घाणी इति भाषा ॥

सिङ्घाणं, स्त्री, नासिकामलम् । इति शब्दरत्नावली ॥

सिङ्घाणकं, क्ली, नासिकामलम् । इति शब्दरत्नावली ॥ (यथा, भागवते उत्तरस्कन्धे २८ अध्याये ।
"अथवा सिङ्घाणकं पीतं गर्भे सिङ्घाणकं वमन् ।")

सिञ्चिनी, स्त्री, नासिका । इति हलायुधः ॥

सिचयः, पुं, (सिचं सिञ्चनमेति प्राप्नोतीति । इण् + अच् ।) वस्त्रम् । इति हेमचन्द्रः ॥ (यथा, रघुवंशे । १ । १ ।
"भूयोभोगिफणारत्नरोचिःसिचयचारवे ।
नमः प्रलीनसुप्ताय हरकल्पसहोरवे ॥")
औत्तरीयवस्त्रम् ॥ इति त्रिकाण्डशेषः ॥

सिञ्चनृ, [तृ] त्रि, (सिञ्चतीति । सिच् + ल्युट् ।) सेचनकर्त्ता ॥

सिञ्चिता, स्त्री, (सिच + णिच् + क्तः । टाप् ।) पिप्पली । इति शब्दचन्द्रिका ॥

सिञ्जा, स्त्री, अलङ्कारध्वनिः । इति केचित् ॥ तालव्यशकारादिः साधुपाठः ॥

सितं, क्ली, (सितः शुक्लवर्णोऽस्यास्तीति । अच् ।) रौप्यम् । मूलकम् । इति राजनिर्घण्टः ॥ चन्दनम् । इति रत्नमाला ॥ (तत्तु शुक्लचन्दनम् । यथा,—
"सितं मलयजं शीतं गौरीर्घसितचन्दनम् ॥"
इति गारुड़े २०८ अध्याये ॥)

सितः, पुं, (सिनोतीति । सि बन्धने + "अञ्जिधृसिभ्यः क्तः ।" उणा० ३ । ८६ । इति क्तः ।) शुक्लवर्णः । इत्यमरः । ३ । ३ । ८० ॥ शुक्राचार्य्यः । इति शब्दरत्नावली ॥ शरः । इति नागार्घ्वनिमञ्जरी ॥

सितः, त्रि, (सितः शुक्लवर्णोऽस्यास्तीति । अच् ।) शुक्लवर्णयुक्तः । इत्यमरः । ३ । ३ । ७६ ॥ (यथा माघे । १ । २५ ।
सितं सितिम्ना सुतरां सुनेर्वपु-
र्विभारिभिः सौधमिवाथ लम्भयन् ॥"* ॥
सी + क्तः ।) समाप्तः । निबद्धः । ज्ञातः । इति विश्वः ॥

सितकण्ठा, स्त्री, (सितः शुक्लः कण्ठो यस्याः ।) श्वेतकण्टकारी । इति राजनिर्घण्टः ॥

सितकण्टारिका, स्त्री, श्वेतकण्टकारी । इति राजनिर्घण्टः ॥

सितकण्ठः, पुं, (सितः कण्ठो यस्य ।) दात्यूहपक्षी । इति शब्दरत्नावली । श्वेतकण्ठयुक्ते, त्रि ॥

सितकरः, पुं, (सितः शुक्लः करो यस्य ।) कर्पूरः । इति राजनिर्घण्टः ॥ चन्द्रश्च ॥

सितकर्णी, स्त्री, (सितः कर्ण इव पुष्पमस्याः । ङीष् ।) वासकः । इति राजनिर्घण्टः । (सितपर्णी इति क्वचित् पाठः । गुणादयोऽस्या वासकशब्दे ज्ञातव्याः ॥)

सितकुञ्जरः, पुं, (सितः कुञ्जरो यस्य ।) इन्द्रः । (सितः शुक्लः कुञ्जरः ।) इन्द्रहस्ती । इति जैनिनः ॥

सितगुञ्जा, स्त्री, सिता गुञ्जा ।) श्वेतगुञ्जा । इति राजनिर्घण्टः ॥

सितचिद्रः, पुं, (सितानि चिह्नानि यत्र ।) वालुकाभङ्गः । इति हारावली । वेलिया मैतृक्ष भाषा ॥

सितच्छत्रं, क्ली, (सितं छत्रम् ।) राजच्छत्रम् । इति भूरिप्रयोगः ॥

सितच्छत्रा, स्त्री, (सितं छत्रमिव पुष्पमस्याः ।) श्वेतपुष्पा । इत्यमरः । २ । ४ । १५२ ॥ (विवृतिरस्याः श्वेतपुष्पाशब्दे द्रष्टव्या ॥)

सितच्छत्रिन्, पुं, (सितच्छत्रं जानमस्येति । इनच् ।) श्वेतच्छत्रयुक्तः । यथा, नैषधे । २ । १ ।

"निपीय यस्य त्रितिरश्चिणः कथां
तथाद्रियन्ते न बुधाः सुधामपि ।
नलः सितच्छत्रितकीर्त्तिमण्डलः
स राशिरासीन्महसां महोज्ज्वलः ॥"

सितच्छदः, पुं, (सितौ छदौ पक्षौ यस्य ।) हंसः । इति हेमचन्द्रः ॥

सितच्छदा, स्त्री, (सितच्छदौ यस्याः ।) श्वेतदूर्व्वा । इति राजनिर्घण्टः ॥

सितदर्भः, पुं, (सितो दर्भः ।) श्वेतकुशः । इति राजनिर्घण्टः ॥

सितदीधितिः, पुं, चन्द्रः । सिता शुक्ला दीधितिः किरणो यस्य इति बहुव्रीहिसमासनिष्पन्नः ॥

सितदीप्यः, पुं, (सितं दीप्यं दीप्तिर्यस्य ।) श्वेतजीरकः । इति राजनिर्घण्टः ॥

सितदूर्व्वा, स्त्री, (सिता दूर्व्वा ।) श्वेतदूर्व्वा । इति रत्नमाला ॥

सितद्रुः, पुं, (सितः द्रुर्वृक्षो यस्य ।) मोरटविशेषः । इति रत्नमाला ॥ (सितो द्रुरिति ।) शुक्लवर्णवृक्षश्च ॥

सितधातुः, पुं, (सितः शुक्लो धातुः ।) कठिनी । इति राजनिर्घण्टः ॥ शुक्लवर्णधातुमात्रञ्च ॥

सितपक्षः, पुं, (सितौ पक्षौ यस्य ।) हंसः । इति शब्दरत्नावली ॥ (सितः पक्षः ।) शुक्लपक्षः । (यथा, बृहन्नंदिकेश्वरपुराणे । ६० । २० ।

"उदगयने सितपक्षे
शिशिरगभस्तौ च जीववर्त्तमे ॥")

सितपर्णी, स्त्री, (सितं पर्णमस्याः । ङीष् ।) अर्कपुष्पिकावृक्षः । इति रत्नमाला ॥

सितपाटलिका, स्त्री, (सिता पाटलिका ।) शुक्लपाटलावृक्षः । श्वेतपाड़रि इति हिन्दी भाषा । तत्पर्य्यायः । सितकुम्भी २ क्षवेरात्री ३ सितामोघा ४ क्षुवेराक्षी ५ श्वेताङ्गा ६ काष्ठपाटला ७ धवलपाटली ८ । अस्या गुणाः । तिक्तत्वम् । गुरुत्वम् । उष्णत्वम् । वातदोषमेदिश्लेष्मकफश्रमशोफनाशित्वञ्च । इति राजनिर्घण्टः ॥

सितपुङ्खा, स्त्री, (सितः पुङ्खो यस्याः ।) श्वेतशरपुङ्खा । इति राजनिर्घण्टः ॥

सितपुष्पं, क्ली, (सितं पुष्पमस्य ।) कैवर्त्तीमुस्तकम् । इति शब्दार्थचन्द्रिका ॥ तालव्यप्रकारादिरपि पाठः ॥

सितपुष्पः, पुं, (सितं पुष्पमस्य ।) तगरवृक्षः । इति शब्दरत्नावली ॥ श्वेतरोहितः । काशः । इति राजनिर्घण्टः ॥

सितपुष्पा, स्त्री, (सितं पुष्पं यस्याः ।) मल्लिका । इति शब्दरत्नावली ॥

सितपुष्पी, स्त्री, (सितं पुष्पं यस्याः । ङीष् ।) श्वेतापराजिता । इति राजनिर्घण्टः ॥ अस्याः पर्य्यायो यथा, वैद्यकरत्नमालायाम् ।

"गवाक्ष्यश्वखुरी श्वेता श्वेतभण्डापराजिता ।
द्विविधा सा सिता नीला गिरिकर्णी गवादनी ॥")

सितमरिचं, क्ली, (सितं मरिचम् ।) श्वेतमरिचम् । तत्पर्य्यायः । सिताख्यम् २ सितबल्लीजम् ३ वालुकम् ४ बहुलम् ५ धवलम् ६ चन्द्रकम् ७ । अस्य गुणाः । कटुत्वम् । उष्णत्वम् । विषभूतदृष्टिरोगनाशित्वम् । अदृष्यत्वम् । युक्त्या रसायनत्वञ्च । इति राजनिर्घण्टः ॥

सितमाषः, पुं, (सितो माषः ।) राजमाषः । इति शब्दरत्नावली ॥

सितरञ्जनः, पुं, (सितं रञ्जयतीति । रञ्ज + ल्युः ।) पीतवर्णः । इति हेमचन्द्रः ॥

सितरश्मिः, पुं, चन्द्रः । सितः शुक्लो रश्मिः किरणो यस्य सः ॥

सितवर्षाभूः, पुं, (सितो वर्षाभूः ।) पुनर्नवा । इति राजनिर्घण्टः ॥

सितशायका, स्त्री, (सिता शायका ।) श्वेतशरपुङ्खा । इति राजनिर्घण्टः ॥

सितशिम्बिकः, पुं, (सिता शिम्बिर्यस्य । कप् ।) गोधूमः । इति हेमचन्द्रः ॥ शितिशिम्बिकोऽपि पाठः ॥

सितशिवं, क्ली, (सितं शुक्लं शिवं मङ्गलजनकञ्च ।) सैन्धवलवणम् । तस्य रूपान्तराणि । शितशिवम् । सितसिवम् । शीतशिवम् । शीतसिवम् । इत्यमरटीका । २ । ६ । ४२ ॥

सितशिंशपा, स्त्री, (सिता शिंशपा ।) श्वेतशिंशपावृक्षः । इति राजनिर्घण्टः ॥

सितशूकः, पुं, (सितः शूको यस्य ।) यवः । इत्यमरटीकायां भरतः ॥ (यवशब्देऽस्य विवरणं ज्ञातव्यम् ॥)

सितशूरणः, पुं, (सितः शूरणः ।) वनशूरणः । इति राजनिर्घण्टः ॥

सितसन्निः, पुं, (सिता सन्नयो घोटका यस्य ।) अर्জ্জুनः । इति केचित् ॥ (यथा, किरातेऽर्জ্জुनवाक्ये । १७ । १६ ।

"स भवस्य भवच्छिदेकहेतोः
सितसन्नेश्च विधास्यतोः सहार्थम् ।
रिपुराप पराभवाय मर्त्यं
प्रकृतिप्रत्ययवोरिवानुबन्धः ॥" * ।

सितः सन्निः ।) श्वेताश्वश्च ॥

सितसर्षपः, पुं, (सितः सर्षपः ।) गौरसर्षपः । इति राजनिर्घण्टः ॥

सितसारः, पुं, (सितः सारो निर्य्यासो यस्य ।) शालिञ्चशाकः । इति राजनिर्घण्टः ॥

सितसारकः, पुं, (सितसार एव । स्वार्थे कन् ।) शालिञ्चशाकः । इति राजनिर्घण्टः ॥ (अस्य पर्य्यायो यथा, वैद्यकरत्नमालायाम् ।

"शालिञ्चः सितसारश्च पत्तूरो लोहसारकः ॥")

सितसिंही, स्त्री, (सिता सिंहीव ।) श्वेतकण्टकारी । इति राजनिर्घण्टः ॥

सितसिन्धुः, स्त्री, (सिता शुक्लजला सिन्धुः ।) गङ्गा । इति शब्दरत्नावली ॥

सिता, स्त्री, (सित + टाप् ।) शर्करा । इत्यमरः । २ । ६ । ४३ ॥ अस्या गुणाः ।

"खण्डस्तु सिकतारूपः सुश्वेतः शर्करा सिता ।
सिता सुमधुरा रुच्या वातपित्तासदाहहृत् ।
मूर्च्छाच्छर्दिज्वरान् हन्ति सुप्रीता शुक्रकारिणी ॥"

इति राजनिर्घण्टः ॥

(यथा, भावप्रकाशे । ६ । ७८ ।

"ततो दुग्धं सितायैव दत्त्वा पाकविधानतः ।
सुपक्वेत् संस्कृते वह्नौ सावधानेन सुव्रते ॥")

सल्लिका । इति शब्दरत्नावली ॥ श्वेतकण्टकारी । वाकुची । विदारी । श्वेतदूर्व्वा । चन्द्रिका । कुटुम्बिनी । मद्यम् । पिङ्गा । चायमाणा । तेजनी । इति राजनिर्घण्टः । पर्व्वतजातापराजिता । इति रत्नमाला ॥

सितांशुः, पुं, (सिता अंशवो यस्य ।) चन्द्रः । (यथा, नैषधे । १ । १२ ।

"सितांशुवर्णैर्वयति स्म तन्तुभि-
र्मुहासिवेम्नः सहकुत्तरी वहुम् ।
दिगङ्गनाङ्गाभरणं रणाङ्गने
यशःपटं तद्भटचातुरीतुरी ॥")

कर्पूरः । इति शुभ्रांशुशब्ददर्शनात् ॥

सितांशुतैलं, क्ली, (सितांशुजातं कर्पूरसम्भवं तैलम् ।) कर्पूरतैलम् । इति राजनिर्घण्टः ॥

सिताखण्डः, पुं, (सितायाः खण्डो यत्र ।) मधुयातशर्करा । तत्पर्य्यायः । खण्डकः २ सितजा ३ शर्करजा ४ माधवी ५ मधुशर्करा ६ माक्षीकशर्करा ७ । अस्य गुणाः । अतिमधुरत्वम् । चक्षुष्यत्वम् । कृद्दिकुलव्रणकफश्वासच्छर्दिपित्तासदोषनाशित्वञ्च । इति राजनिर्घण्टः ॥

सिताग्रः, पुं, (सितः अग्रो यस्य ।) कण्टकम् । इति शब्दरत्नावली ॥

सिताङ्गः, पुं, (सितः अङ्गो यत्र ।) वालुकागङ्गमत्स्यः । इति शब्दरत्नावली । १६० ॥ (सिताङ्ग इति पाठः साधुः ॥)

सिताङ्गः, पुं, (सितमङ्गं यस्य ।) श्वेतरोहितः । इति राजनिर्घण्टः ॥ (वालुकागङ्गमत्स्यः । इति शब्दरत्नावली । १६० ॥)

सिताजाजी, स्त्री, श्वेतजीरकः । इति राजनिर्घण्टः ॥ (गुणादयोऽस्याः श्वेतजीरकशब्दे ज्ञेयाः ॥)

सितादिः, पुं, (सितायाः आदिः कारणम् ।) गुडः । इति राजनिर्घण्टः ॥

सितानगः, पुं, (सितमानगं यस्य ।) गरुडः । इति केचित् ॥ शुक्लसुखयुक्ते, त्रि ॥

सितापाङ्गः, पुं, (सितौ अपाङ्गौ यस्य ।) मयूरः । इति त्रिकाण्डशेषः ॥

सिताङ्गं, क्ली, (सितमङ्गम्।) श्वेतकमलम्। इति राजनिर्घण्टः॥ (यथा, सरस्वतीध्याने।
"कुचभरनमिताङ्गी सन्निसन्ना सिताङ्गे॥")

सिताभः, पुं. (सिता शुक्ला आभा यस्य।) कर्पूरः। इत्यमरटीकायां रायमुकुटः॥

सिताभा, स्त्री, (सिता आभा यस्याः।) तक्राङ्गा। इति राजनिर्घण्टः॥

सिताभ्रः, पुं, (सितं शुक्लमभ्रमिति प्राप्नोतीति। अभ्र गतौ + अण्।) कर्पूरः। इत्यमरः।२।६।१३०॥ (अस्य पर्य्यायो यथा,—
"पुंसि क्लीवे च कर्पूरः सिताभ्रो हिमवालुकः। घनसारश्चन्द्रसंज्ञो हिमनामापि स स्मृतः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

सिताभ्रकं, क्ली, (सितं शुभ्रमभ्रमिति प्राप्नोतीति। अभ्र + स्वुल्।) कर्पूरम्। इति रत्नमाला॥

सिताम्बरः, पुं, (सितमम्बरं यस्य।) श्वेतवस्त्रपरिच्छितव्रती। इति हलायुधः॥ शुक्लवस्त्रपरिधायिनि, त्रि॥

सिताम्भोजं, क्ली, (सितं चाम्भोजम्।) श्वेतपद्मम्। इत्यमरः। १। ६। ४१॥

सितार्च्चकः, पुं, (सितमर्च्चयतीति। अर्च्च + ण्वुल्।) श्वेततुलसी। श्वेतअपराजिता इति हिन्दी भाषा। तत्पर्य्यायः। वैकुण्ठः २ वटपत्रः ३ कुठेरकः ४ जम्बीरः ५ गन्धपत्रकः ६ सुमुखः ७ कटुपत्रकः ८। अस्य गुणाः। कटुत्वम्। उष्णत्वम्। कफवातनेत्रामयनाशित्वम्। रुच्यत्वम्। मुखप्रसवकारकत्वञ्च। इति राजनिर्घण्टः॥

सितालकः, पुं. (आलयति भूषयतीति। अल + णिच् + ण्वुल्।) सितः आलकः।) श्वेतमन्दारकः। इति राजनिर्घण्टः॥

सितालता, स्त्री, (सिता लता।) श्वेतदूर्व्वा। इति रत्नमाला॥ (श्वेतदूर्व्वाशब्देऽस्या विधयो ज्ञातव्याः॥)

सितालिकटभी, स्त्री, श्वेतकिणिहीहयः। इति राजनिर्घण्टः॥

सितावरः, पुं, (सितमावृणोतीति। आ + वृ + अच्।) शाकविशेषः। सुनुनी इति भाषा। तत्पर्य्यायः। रुष्याङ्गः २ सूचीपत्रकः ३ ग्रीवारकः ४ शिखी ५ वभ्रुः ६ खस्तिकः ७ सुनिषण्णकः ८ कुरुटः ९ कुकुटः १० सूचीदलः ११ श्वेतावरः १२ मेधाकृत् १३ शाकिकः १४। अस्य गुणाः। संग्राहित्वम्। कषायत्वम्। उष्णत्वम्। त्रिदोषनाशित्वम्। मेधाकृत्प्रदत्वम्। दाहज्वरहारित्वम्। रसायनत्वञ्च। इति राजनिर्घण्टः। निद्राकारित्वम्। इति लोकप्रसिद्धम्॥ तस्य लक्षणं यथा,—
"शाकेरीषद्गः पत्रैश्चतुर्दल इतीरितः। शाकी शशाङ्किते देशे चतुष्पत्रीति घोष्यते॥"
इति भावप्रकाशः॥

सितावरी, स्त्री, (सितमावृणोतीति। आ + वृ + अच्। ङीष्।) वाकुची। इति राजनिर्घण्टः॥

सिताश्वितः, पुं, (वर्णेन सितः वस्त्रेण च सितः।) बलदेवः। इति हेमचन्द्रः॥ शुक्लसितशब्दे, यथा। ज्योतिस्तत्त्वे।
"सिताश्वितौ चन्द्रमसो न कश्चित् बुधः शशी सौम्यसितौ रवीन्दू। रवीन्दुभौमा रविनन्दनस्य मित्रारिशेषश्च समः प्रदिष्टः॥"
शुक्लसितशब्दे॥ (यथा, महाभारते। ७। १३०। २६।
"ते हया वक्त्रशोभन्त मिश्रिता वातरंहसः। सिताश्विता महाराज यथा योनि बलाहकाः॥")

सिताक्षयः, पुं, (सित आक्षयो यस्य।) श्वेतशिग्रुः। श्वेतरोहितः। इति राजनिर्घण्टः॥

सितिः, त्रि, शुक्लः। कृष्णः। इत्यमरटीकायां रमानाथः॥

सितिकण्ठः, पुं, (सितिः कृष्णः कण्ठो यस्य।) शितिकण्ठः। शिवः। इत्यमरटीकायां सितिशब्दस्य इन्त्यादित्वदर्शनात्॥

सितिमा, [न्] पुं. (सितस्य सितेर्वा भावः। इमनिच्।) शुक्लता। (यथा, माघे। १। २५।
"सितं सितिम्ना सुतरां सुनेर्वपु- र्विसारिभिः सौधमिवाथ लम्भयन्॥")
कृष्णता। इति सितिशब्दादिमनुप्रत्ययेन निष्पन्नः॥

सितिवारः, पुं, (सितं वृणोतीति। वृ + अण्।) सुनिषण्णकः। इति भावप्रकाशः॥

सितिवासाः, [स्] पुं, (सिति नीलं वासो यस्य।) बलदेवः। इति नीलाम्बरशब्ददर्शनात्॥ (यथा, माघे। १। ६।
"पिशङ्गमौञ्जीयुगमर्ज्जुनच्छविं वसानमेनाजिनमञ्जनद्युति। सुवर्णसूत्राकलिताधराम्बरं विडम्बयन्तं सितिवाससस्तुम॥")

सितेक्षुः, पुं, (सितः इक्षुः।) श्वेतेक्षुः। इति राजनिर्घण्टः॥

सितेतरः, पुं, (सितादितरः।) श्यामश्यामलः। कृष्णः। इति राजनिर्घण्टः॥ शुक्लेतरवर्णेषु॥ (यथा, कुमारे। १। ३८।
"नौरिवातिक्रम्य सितेतरस्य तन्मेखलामध्यमणेरिवार्चिः॥"
सितच्च इतरच्च इति विग्रहे। कृष्णशुक्लौ। अत्र द्विवचनप्रयोगः स्यात्। यथा, भागवते। १०। ४१। ४१।
"नानालक्षणवेषाभ्यां कृष्णरामौ विरेजतुः। रङ्गस्थौ बालगजौ पर्व्वणीव सितेतरौ॥")

सितेतरगतिः, पुं, (सितेतरा कृष्णा गतिरस्य।) अग्निः। इति हलायुधः॥

सितोदरः, पुं, (सितमुदरं यस्य।) कुबेरः। इति हेमचन्द्रः॥ शुक्लकुक्षियुक्ते, त्रि॥ (सितमुदरमिति।) शुक्लकुक्षौ, क्ली॥

सितोद्भवं, क्ली (सित उद्भवो यस्य।) श्वेतचन्दनम्। इति कैचित्॥ (सितायाः उद्भवो यस्य।) शर्करायाते, त्रि॥

सितोपलं, क्ली, (सितमुपलमिव।) कठिनी। इति त्रिकाण्डशेषः॥

सितोपलः, पुं, (सितः उपलः।) स्फटिकः। इति राजनिर्घण्टः॥

सितोपला, स्त्री, (सित उपल इव आकृतिर्यस्याः। स्त्रियां टाप्।) शर्करा। इति हेमचन्द्रः॥ (यथा,—
"सिता सितोपला चैव मत्स्यण्डी शर्करा स्मृता॥"
इति गारुडे २०८ अध्यायः॥
अस्या गुणा यथा,—
"सितोपला सरा लघ्वी वातपित्तहरी हिमा॥"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे॥)

सिद्धं, क्ली, (सिध + क्तः।) सैन्धवलवणम्। इति राजनिर्घण्टः॥

सिद्धः, पुं, (सिध + क्तः।) देवयोनिविशेषः। इत्यमरः। १। १। ११॥ स तु अणिमादिगुणोपेतो विश्वावसुप्रभृतिः। इति भरतः॥ (यथा, कुमारे। १। ५।
"उदेजिता वृष्टिभिराश्रयन्ते भृङ्गाश्रि यस्यातपवन्ति सिद्धाः॥")
व्यासादिः। विष्कम्भादिसप्तविंशतियोगान्तर्गते- कविंशयोगः। इति मेदिनी॥ तत्र जातफलम्।
"जितेन्द्रियः सर्व्वकलानिधानो गौरोऽतिशूरो मधुरो विनीतः। सत्योपपन्नः कृतभूरिभोगी यस्य प्रसूतौ किल सिद्धयोगः॥"
इति कोष्ठीप्रदीपः॥
व्यवहारः। इति शब्दरत्नावली॥ कृष्णधुस्तूरः। गुडः। इति राजनिर्घण्टः॥

सिद्धः, त्रि, (सिध + क्तः।) प्रसिद्धः। (यथा, भागवते। १०। १८। १६।
"एवंतौ लोकसिद्धाभिः क्रीड़ाभिश्चेरतुर्वने॥")
निष्पन्नः। निष्पन्नः। इति शब्दरत्नावली॥ (यथा, रामायणे। २। ६८। ८।
"सिद्धार्थः खलु सौमित्रिर्यच्चन्द्रविमलोपमम्। मुखं पश्यति रामस्य राजीवाक्षं महाद्युतिम्॥")
सक्तः। इति हेमचन्द्रः॥ (यथा, भागवते। ६। १२। १६।
"अहो दानव सिद्धोऽसि यस्य ते मतिरीदृशी॥")
पक्वम्। यथा, सुश्रुतः।
"पर्य्युषितं पुनःसिद्धमभोज्यमन्यत्र हिरण्योदकक्षमाद्रात्।" इति आह्निकतत्त्वम्॥ मन्त्रसिद्धिर्विशिष्टः। यथा,—
अथ मन्त्रसिद्धिरुपायाः। गौतमीये।
"सम्यगनुष्ठितो मन्त्रो यदि सिद्धिर्न जायते। पुनस्तेनैव कर्त्तव्यं ततः सिद्धो भवेद्ध्रुवम्॥ पुनरनुष्ठितो मन्त्रो यदि सिद्धिर्न जायते। पुनस्तेनैव कर्त्तव्यं ततः सिद्धो न संशयः॥ पुनः सोऽनुष्ठितो मन्त्रो यदि सिद्धिर्न जायते। उपायास्तत्र कर्त्तव्याः सप्त शङ्करभाषिताः। भामगं रोधनं वह्निं पीड़नं शोषशोषणम्। दहनान्तं क्रमात् कुर्य्यात् ततः सिद्धो भवेन्मनुः॥

भ्रामणं वायुबीजेन यथाशुक्रमयोगतः ।
तन्मन्त्रं यन्त्र चालिख्य सिन्दूरकर्पूरकुङ्कुमैः ।
उशीरचन्दनाभ्यान्तु मन्त्रं संग्रथितं लिखेत् ।
क्षीराज्यमधुतोयानां मध्ये तल्लिखितं भवेत् ॥
पूजनाच्छपनाद्होमात् भ्रामितः सिद्धिदो भवेत् ।
भ्रमितो यदि न सिद्धः स्याद्रोधनं तस्य कारयेत्॥
सारस्वतेन बीजेन संपुटीकृत्य संजपेत् ।
एवं रुद्धे भवेत् सिद्धो न चेदेतद्वशीकुरु ॥
अलक्तचन्दनं कुष्ठं हरिद्रा मादनं गिला ।
एतैस्तु मन्त्रमालिख्य भूर्ज्जपत्रे सुशोभने ।
धार्य्य कण्ठे भवेत् सिद्धः पीड़नं वास्य कारयेत् ॥
अधरोत्तरयोगेन पदानि परिजप्य वै ।
ध्यायेच्च देवतां तद्वत् अधरोत्तररूपिणीम् ॥
विद्यामादित्यबीजेन लिखित्वाक्रम्य चाङ्घ्रिणा ।
तथाभूतेन मन्त्रेण होमः कार्य्यो दिने दिने ॥
पीड़ितो लज्जयाविष्टः सिद्धः स्यादथ पोषयेत् ।
बालायास्त्रितयं बीजं आद्यन्ते तस्य योजयेत् ॥
गोक्षीरमधुनालिख्य विद्यां पाणौ विभावयेत् ।
पोषितोऽयं भवेत् सिद्धो न चेत् कुर्व्वीत शोधनम् ॥
द्वाभ्यान्तु वायुबीजाभ्यां मन्त्रं कुर्य्याद्विदर्भितम् ।
एषा विद्या गले धार्य्या लिखित्वा वरभस्मना ॥
शोधितोऽपि न सिद्धः स्यात् दहनीयोऽग्निबीजतः ।
आग्नेयेन तु बीजेन मन्त्रस्यैकैकमक्षरम् ॥
आद्यन्तमध ऊर्द्धञ्च योजयेद्दाहकर्म्मणि ।
ब्रह्मवृक्षस्य तैलेन मन्त्रमालिख्य धारयेत् ॥
कण्ठदेशे ततो मन्त्रः सिद्धः स्याच्छङ्करोदितम् ।
इत्येतत् कथितं सम्यक् केवलं तव भक्तितः ॥
एकेनैव कृतार्थः स्याद्बहुभिः किमु सुव्रते ॥"
इति तन्त्रसारः ॥ * ॥

सिद्धिविशिष्टः । स च चतुस्त्रिंशद्विधः । यथा—
" चतुस्त्रिंशद्विधः सिद्धः सर्व्वकर्म्मोपकारकः ।
तमुपैति स्वयं सिद्धं भक्तस्तं नैव वाञ्छति ॥
द्वात्रिंशद्विधं सिद्धं सर्व्वसाधनकारणम् ।
मन्मुखात् श्रूयतां नन्द सिद्धमन्त्रं गृहाण च ॥
अणिमा लघिमा प्राप्तिः प्राकाम्यं महिमा तथा ।
ईशित्वञ्च वशित्वञ्च तथा कामावसायिता ॥
दूरश्रवणमेवेति परकायप्रवेशनम् ।
मनोयायित्वमेवेति सर्व्वज्ञत्वमभीप्सितम् ॥
वह्निस्तम्भं जलस्तम्भं खिरणीवित्वमेव वा ।
वायुस्तम्भं क्षुत्पिपासानिद्रास्तम्भनमेव च ॥
कायगुप्तञ्च वाक्सिद्धं रूपानयनमीप्सितम् ।
सृष्टीनां कारणत्वेन प्राणाकर्षणमेव च ॥
प्राणानाञ्च प्रदानञ्च लोभादीनाञ्च स्तम्भनम् ।
इन्द्रियाणां स्तम्भनञ्च बुद्धिस्तम्भनमेव च ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ।७८।२०-२६॥

सिद्धकः, पुं, (सिद्ध इव । इवार्थे कन् ।) सिन्धुवारः । शालः । इति राजनिर्घण्टः ॥ (यथा, सुश्रुते । ५ । ३ ।
"धवाश्वकर्णासनपारिभद्रा
पलाशाः सिद्धकमोचकौ च ॥")

सिद्धकामेश्वरी, स्त्री, (सिद्धा कामेश्वरी ।) कामाख्यायाः पञ्चमूर्त्त्यन्तर्गतप्रथममूर्त्तिः । तस्या रूपं यथा. कालिकापुराणे ६१ अध्याये ।
"रक्तिम्नस्निग्धतकर्णा कुङ्कुमापीतवर्णा
मणिकनकविचित्रा लोलकर्णा त्रिनेत्रा ।
अभयवरदहस्ता साक्षसूत्रप्रशस्ता
प्रणतसुरवरेण्या सिद्धकामेश्वरी सा ॥
अरुणकमलसंस्था रक्तपद्मासनाख्या
नवतरुणशरीरा सुक्तकेशी सुहारा ।
शुचक्षुदि पृथुतुङ्गन्यस्तयुग्मा मनोज्ञा
स्निग्धुरविसमवस्त्रा सिद्धकामेश्वरी सा ॥
विपुलविभवदात्री स्मेरवक्त्रा सुकेशी
दलितकरकदन्ता सासिचन्द्रावतंसा ।
मनसिजदृगदिस्था योनिमुद्रालसन्ती
पवनचलनशक्ता संस्तुतस्थानभागा ॥"

सिद्धगङ्गा, स्त्री, (सिद्धा गङ्गा । 'क्वचित् सिद्धजनाकीर्णां पश्य मन्दाकिनीं नदीम् ।' रामा० २ । ६५ । ६। इत्युक्तेः सिद्धसेविता गङ्गा इति वा ।) मन्दाकिनी । इति जटाधरः ॥

सिद्धजलं, क्ली, (सिद्धं पक्वं जलं यत्र ।) काञ्जिकम् । इति हारावली ॥ (सिद्धं जलमिति ।) पक्वबारि च ॥

सिद्धदेवः, पुं, (सिद्धो देवः ।) शिवः । इति शब्दरत्नावली ॥

सिद्धधातुः, पुं, (सिद्धो धातुः ।) पारदः । इति त्रिकाण्डशेषः ॥

सिद्धपीठः, पुं, (सिद्धः पीठः ।) सिद्धस्थानम् । यथा,—
"यातो लक्षबलिर्यत्र होमो वा कोटिसंख्यकः ।
महाविद्याजपः कोटिः सिद्धपीठः प्रकीर्त्तितः ॥"
इति तन्त्रम् ॥

सिद्धपुरं, क्ली, (सिद्धं पुरम् ।) भूगोलस्थाधोदेशविशेषः । यथा—
"लङ्का क्रमध्ये यमकोटिरस्याः
प्राक्पश्चिमे रोमकपत्तनञ्च ।
अधस्ततः सिद्धपुरं सुमेरुः
सौम्येऽथ याम्ये बड़वानलञ्च ॥
कुरुक्षपादान्तरितानि तानि
स्थानानि षड्गोलविदो वदन्ति ॥"
इति सिद्धान्तशिरोमणिः ॥

सिद्धपुष्पः, पुं, (सिद्धप्रियं यन्त्रसिद्धं वा पुष्पमस्य ।) करवीरवृक्षः । इति राजनिर्घण्टः ॥

सिद्धप्रयोजनः, पुं, (सिद्धानां प्रयोजनं यत्र ।) गौरसर्षपः । इति राजनिर्घण्टः ॥

सिद्धमन्त्रः, पुं, (सिद्धो मन्त्रः ।) सिद्धप्राप्तमन्त्रः । यथा, ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे । ७८ । २१ ; २७—२८ ।
"द्वात्रिंशद्विधं सिद्धं सर्व्वसाधनकारणम् ।
मन्मुखात् श्रूयतां नन्द सिद्धमन्त्रं गृहाण च ॥"
"ओं सर्व्वेश्वराय सर्व्वविघ्नविनाशिने मधुसूदनाय स्वाहेत्येवं मन्त्रश्च सर्व्वेषां कल्पपादपः ।
सामवेदे च कथितः सिद्धानां सर्व्वसिद्धिदः ॥
अनेन योगिनः सिद्धा मुनीन्द्राश्च सुरास्तथा ।
शतलक्षजपेनैव मन्त्रसिद्धिर्भवेत् सताम् ॥"

सिद्धमोदकः, पुं, (सिद्धान् मोदयतीति । मुद+णिच्+ण्वुल् ।) तवराजोड्डयखण्डः । इति राजनिर्घण्टः ॥

सिद्धयोगिनी, स्त्री, (सिद्धा योगिनी ।) योगिनीविशेषः । इत्यपराजितोक्तोत्रम् ॥ (यथा, कथासरित्सागरे । ३७ । १६१ ।
"इत्युक्त्वैव गतायाञ्च तस्यां सा सिद्धयोगिनी ।
तत्प्रतीघातहेतोर्मामवोचद्वन्धमोचिनी ॥")

सिद्धरसः, पुं, (सिद्धो रसः ।) पारदः । रससिद्धः । इत्यजयपालः ॥

सिद्धरसः, त्रि, (सिद्धो रसो यस्य ।) धातुप्रभृतिः । इति मेदिनी ॥

सिद्धविद्या, स्त्री, (सिद्धा विद्या ।) महाविद्याविशेषः । यथा,—
"काली तारा महाविद्या षोड़शी भुवनेश्वरी
भैरवी छिन्नमस्ता च विद्या धूमावती तथा ॥
वगलामुखी सिद्धविद्या मातङ्गी कमलात्मिका
एता दश महाविद्याः सिद्धविद्याः प्रकीर्त्तिताः ।'
इति तन्त्रसारः ॥

सिद्धसलिलं, क्ली, (सिद्धं पक्वं सलिलं यत्र । काञ्जिकम् । इति त्रिकाण्डशेषः ॥

सिद्धसाधनं, क्ली, (सिद्धस्य साधनम् ।) सिद्धस्य वस्तुनः साधनम् । साध्यवस्तुनिश्चयसत्त्वेऽप्यनुमानम् । यथा,—
"अतएव न स्वरूपासिद्धिः सिद्धसाधनं वा ।"
इति सिद्धान्तलक्षणे जगदीशः ॥

सिद्धसाधनः, पुं, (सिद्धानां साधनमस्मादिति । गौरसर्षपः । इति राजनिर्घण्टः ॥

सिद्धसाध्यः, पुं, (सिद्धात् साध्यः ।) मन्त्रविशेषः यथा,—
"सिद्धसिद्धो यथोक्तेन द्विगुणात् सिद्धसाधकः
सिद्धसुसिद्धोऽर्द्धजपात् सिद्धारिर्हन्ति वान्यवान् ॥
इति तन्त्रसारः ॥

सिद्धसिद्धः, पुं, (सिद्धात् सिद्धः ।) मन्त्रविशेषः यथा,—
"सिद्धसिद्धो यथोक्तेन द्विगुणात् सिद्धसाधकः
सिद्धसुसिद्धोऽर्द्धजपात् सिद्धारिर्हन्ति वान्यवान् ॥
इति तन्त्रसारः ॥

सिद्धसिन्धुः, स्त्री, (सिद्धसेविता सिन्धुः ।) गङ्गा इति त्रिकाण्डशेषः ॥

सिद्धसुसिद्धः, पुं, (सिद्धात् सुसिद्धः ।) मन्त्रविशेषः । अस्य प्रमाणं सिद्धसाध्यशब्दे द्रष्टव्यम् ।

सिद्धसेनः, पुं, (सिद्धा सेना यस्य ।) कार्त्तिकेयः इति शब्दरत्नावली ॥

सिद्धसेवितः, पुं, (सिद्धैः सेवितः ।) बटुकभैरवः । इति तन्त्रसारोत्तरशुद्धतन्त्रमस्तोत्रम् ॥ सिद्धजनोपासिते, त्रि ॥

सिद्धा, स्त्री, (सिध+क्तः । टाप् ।) ऋद्धिः । इति राजनिर्घण्टः ॥ योगिनीविशेषः । यथा, ज्ञातकदीपिकायाम् ।

"मङ्गला भिङ्गला धन्या भामरी भद्रिका तथा।
उल्का सिद्धा सङ्कटा च योगिन्योऽष्टौ प्रकीर्त्तिताः॥"

सिद्धान्तः, पुं, (सिद्धः अन्तो यस्मात्।) पूर्व्वपक्षं निरस्य सिद्धपक्षस्थापनम्। इति भरतः॥ (यथा, महाभारते। १। ७०। ४३।
"स्थापनाचैवसिद्धान्तपरमार्थज्ञतां गतैः॥") तत्पर्य्यायः। राद्धान्तः २। इत्यमरः। १।५।४॥ नवविधज्योतिर्ग्रन्थाः। यथा। ब्रह्मसिद्धान्तः १ सूर्य्यसिद्धान्तः २ सोमसिद्धान्तः ३ वृहस्पतिसिद्धान्तः ४ गर्गसिद्धान्तः ५ नारदसिद्धान्तः ६ पराशरसिद्धान्तः ७ पुलस्त्यसिद्धान्तः ८ वशिष्ठसिद्धान्तश्च ९॥ तन्त्राधिकरणाभ्युपगमसंस्थितिः सिद्धान्तः। स च चतुर्विधः। सर्व्वतन्त्रप्रतितन्त्राधिकरणाभ्युपगमसंस्थित्यर्थान्तरभावात्। सर्व्वतन्त्राविरुद्धस्तन्त्रेऽधिकृतोऽर्थः सर्व्वतन्त्रसिद्धान्तः॥ १॥ समानतन्त्रसिद्धः परतन्त्रासिद्धः प्रतितन्त्रसिद्धान्तः॥२॥ यत्सिद्धावन्यप्रकरणसिद्धिः सोऽधिकरणसिद्धान्तः॥ ३॥ अपरीक्षिताभ्युपगमात् तद्विशेषपरीक्षणमभ्युपगमसिद्धान्तः॥४॥ इति गोतमसूत्रम्॥ (तथास्य विवृतिर्यथा,—
"अथ सिद्धान्तः। सिद्धान्तो नाम यः परीक्षकैर्बहुविधं परीक्ष्य हेतुभिः साधयित्वा स्थाप्यते निर्णयः स सिद्धान्तः। स चोक्तश्चतुर्विधः। सर्व्वतन्त्रसिद्धान्तः, प्रतितन्त्रसिद्धान्तः, अधिकरणसिद्धान्तः, अभ्युपगमसिद्धान्त इति।
तत्र सर्व्वतन्त्रसिद्धान्तो नाम सन्ति गिदानानि, सन्ति व्याधयः, सन्ति सिद्धुपायाः साधना इति। प्रतितन्त्रसिद्धान्तो नाम तस्मिंस्तस्मिंस्तन्त्रे तत्तत् प्रसिद्धं यथान्यत्राष्टौ रसाः षड्रसश्च। पञ्चेन्द्रियाणि यथान्यत्र षड्रिन्द्रियाणि। वातादिप्रकृतयः सर्व्वविकारा यथान्यत्र वातादिप्रकृता भूतप्रकृताश्च प्रसिद्धाः।
अधिकरणसिद्धान्तो नाम यस्मिन्नधिकरणे संस्थाप्यमाने सिद्धान्यन्यान्यपि अधिकरणानि भवन्ति। न सूक्तः कर्म्मानुबन्धिकं फलमृते निसृष्टत्वादिति प्रस्तुते सिद्धाः कर्म्मफलमोक्षपुरुषप्रेत्यभावा भवन्ति।
अभ्युपगमसिद्धान्तः। अभ्युपगमसिद्धान्तो नाम यमर्थमसिद्धमपरीक्षितमनुपदिष्टमहेतुकं वा पारम्पर्य्यादभ्युपगच्छन्ति भिषजः। तद्यथा अर्थं न प्रधानमिति कृत्वा वक्ष्यामः। गुणाः प्रधाना इति कृत्वा वक्ष्यामः। इत्येवमादिश्चतुर्विधः सिद्धान्तः।" इति चरके विमानस्थाने ८ अध्यायः॥)

सिद्धान्ताचारः, पुं, (सिद्धोऽन्तो यस्य। तादृश आचारः।) नास्तिकाचारविशेषः। यथा,—
"त्यागार्थं हेतवो मत्वा यत्नैर्धीरैः प्रमार्जनैः।
सदा शुद्धः सदा शान्तः सिद्धान्ताचार उच्यते॥"
इत्याचारभेदतन्त्रम्॥

सिद्धान्ती, [न्] पुं, (सिद्धान्तोऽस्यास्तीति। इन्।) नैयायिकः। इति शब्दरत्नावली॥

सिद्धापगा, स्त्री, (सिद्धसेविता आपगा।) गङ्गा। इति हेमचन्द्रः॥

सिद्धायिका, स्त्री, चतुर्विंशतिवृहच्छासनदेवतान्तर्गतदेवीविशेषः। इति हेमचन्द्रः॥

सिद्धारिः, पुं, मन्त्रविशेषः। एतत्प्रमाणं सिद्धसाध्यशब्दे द्रष्टव्यम्॥

सिद्धार्थः, पुं, (सिद्धोऽर्थो यस्य।) वृक्षार्हेतिना। इति हेमचन्द्रः॥ श्वाक्यसिंहः। इति मेदिनी॥ (सिद्धोऽर्थो यस्मात्।) श्वेतसर्षपः। इत्यमरः। २। ६। १८॥ (यथा, भागवते। ४। ६। ५८।
"ध्रुवाय पथि दृष्टाय तत्र तत्र पुरस्त्रियः।
सिद्धार्थाश्चतदध्वन्यूर्ध्वायुष्यफलानि च।
उपजह्रुः प्रयुञ्जाना आत्मन्यादर्शिणः सतीः॥")
अस्य पर्य्यायगुणाः गौरसर्षपशब्दे द्रष्टव्याः॥ वटीवृक्षः। इति राजनिर्घण्टः॥ प्रसिद्धार्थः। यथा,—
"सिद्धार्थं सिद्धसम्बन्धं श्रोतुं श्रोता प्रवर्त्तते।
शास्त्रादौ तेन वक्तव्यः सम्बन्धः सप्रयोजनः॥"
इति व्याकरणटीका॥

सिद्धार्था, स्त्री, (सिद्धोऽर्थो यस्याः।) चतुर्थजिनमाता। इति हेमचन्द्रः॥

सिद्धिः, स्त्री, (सिध+क्तिन्।) दुर्गा। यथा,—
"साधनात् सिद्धिरित्युक्ता साधका बाध ईश्वरी॥"
इति देवीपुराणे ४५ अध्यायः॥
ऋद्धिनामौषधम्। इत्यमरः। २। ४। ११२॥ योगविशेषः। निष्पत्तिः। (यथा, मनुः। २। ९७।
"वेदास्त्यागश्च यज्ञाश्च नियमाश्च तपांसि च।
न विप्रदुष्टभावस्य सिद्धिं गच्छन्ति कर्हिचित्॥")
पादुका। अन्तर्द्धिः। वृद्धिः। इति मेदिनी॥ मोक्षः। इति हेमचन्द्रः॥ (यथा, मनुः। १२। ११।
"कामक्रोधौ तु संयम्य तः सिद्धिं नियच्छति॥")
सम्पत्तिः। इति धरणिः॥ बुद्धिः। इति शब्दरत्नावली॥* अष्टसिद्धिनामलक्षणानि यथा,
"अणिमा महिमा चैव लघिमा प्राप्तिरेव च।
प्राकाम्यञ्च तथेशित्वं वशित्वञ्च तथापरम्॥
यत्र कामावसायित्वं गुणानेतानधेश्वरान्।
प्राप्नोत्यतौ नरश्रेष्ठ परनिर्व्वाणसञ्चकान्॥
सूक्ष्मात् सूक्ष्मतरोऽणीयान् गीघ्रत्वाल्लघिमा गुणः।
महिमाणेर्गुरुत्वात् प्राप्तिर्नाप्राप्यस्य यत्॥
प्राकाम्यस्य व्यापित्वात् दृष्टिश्रुत्वं चेश्वरो यतः।
वशित्वात् वशिता नाम योगिनः सप्तमो गुणः॥
यत्रेच्छास्थानमणुत्वं यत्र कामावसायिता।
ऐश्वर्य्यं कारणैरेभिर्योगिनः प्रोक्तमष्टधा॥"
इति मार्कण्डेये दत्तात्रेयालर्कसंवादे योगवल्लभनामाध्यायः॥ * ॥ (अष्टादशसिद्धिनामानि यथा, ब्रह्मवैवर्त्ते। १। ६। १८—१९।
"अणिमा लघिमा प्राप्तिः प्राकाम्यं महिमा तथा।
ईशित्वञ्च वशित्वञ्च सर्व्वकामावसायिता॥
सर्व्वज्ञत्वञ्च सर्व्वत्र परकायप्रवेशनम्।
वाक्सिद्धिः कल्पवृक्षत्वं स्रष्टुं संहर्त्तुमीशता।
अमरत्वञ्च सर्व्वाङ्गे सिद्धयोऽष्टादश स्मृताः॥")
भावनासिद्धिर्यथा,—
"तीर्थे कान्तेऽभीष्टदेवे गुरौ मन्त्रे भवौषधे
आस्था च यादृशी यासां सिद्धिस्तासाञ्च तादृशी॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ३६ अध्यायः॥*
ज्ञानात् सिद्धिर्यथा,—
"तस्मात् त्वमपि भूपाल देहि न्यायार्জ्जितं धनम्।
दानात् ज्ञानं ततः प्राप्य ज्ञानात् सिद्धिमवाप्स्यसि॥"
इति वह्निपुराणे शिवेरूपाख्याननामाध्यायः॥

सिद्धिदः, पुं. (सिद्धिं ददातीति। दा+कः।) वटुकभैरवः। इति तस्य स्तोत्रम्॥ सिद्धिदातरि, त्रि। (यथा, देवीभागवते। ६। २। ५१।
"तं कुन्ती वचनं प्राह मम मन्त्रोऽस्ति कामदः।
दत्तो दुर्व्वाससा पूर्व्वं सिद्धिदः सर्व्वथा प्रभो॥")
यथा च।
"मधुमासे तु संप्राप्ते शुक्लपक्षे चतुर्दशी।
प्रोक्ता मदनभङ्गीति सिद्धिदा तु महोत्सवे॥"
इति तिथ्यादितत्त्वम्॥

सिद्धियोगः, पुं, (सिद्धैर्योगो यत्र।) तिथिवारघटितशुभयोगविशेषः। यथा,—
"शुक्रे नन्दा बुधे भद्रा शनौ रिक्ता कुजे जया।
गुरौ पूर्णा च संयुक्ता सिद्धियोगः प्रकीर्त्तितः॥"
इति ज्योतिःसागरः॥

सिद्धियोगिनी, स्त्री, (सिद्धिप्रिया योगिनी।) योगिनीभेदः। यथा,—
"प्रणवाद्याश्च या विद्याः शूद्रादौ न समीरिताः।
अस्याश्चैव विशेषो यत् योगिचित्ते समुपासयेत्॥
डाकिनी सा भवत्येव डाकिनीभिः प्रजायते।
पतिहीना पुत्रहीना यथा स्यात् सिद्धियोगिनी॥"
इति तन्त्रसारः॥ * ॥
दक्षस्य षष्टिशतं कन्याः। तथा,—
"सती ज्योतिः स्मृतिः ख्याता ज्ञानस्या स्वधा तथा।
प्रीतिः क्षमा च संभूतिः सन्नतिश्च अरुन्धती॥
कीर्त्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टिः श्रद्धा क्रिया मतिः।
बुद्धिर्लज्जा वपुःशान्तिस्तुष्टिः सिद्धिस्तथा रतिः॥
अरुन्धती वसुर्यामी लम्बा भानुर्मरुत्वती।
सङ्कल्पा च मुहूर्त्ता च साध्या विश्वा च नामतः॥
अदितिश्च दितिश्चैव दनुः कालादनायुषा।
सिंहिका सुरसा कद्रुर्विनता सुरभिः शमा॥
क्रोधा इरा च प्राधा च दक्षकन्याः प्रकीर्त्तिताः।
षष्टिशतं सिद्धियोगिन्यः सर्व्वलोकस्य मातरः॥"
इति वह्निपुराणे गणभेदनामाध्यायः॥

सिद्धिली, स्त्री, (सिद्धिं लातीति। ला+कः। ङीष्।) क्षुद्रपिपीलिका। इति केचित्॥

सिद्धिस्थानं, क्ली, (सिद्धेः स्थानम्।) पुण्यस्थानविशेषः। यथा,—
"अतः परं प्रवक्ष्यामि सिद्धिस्थानानि यानि तु।

यस्मिन्नाराधिता देवी सिघ्रं भवति सिद्धिदा ॥
तुङ्गारं शतशृङ्गञ्च त्रिकूटं पर्व्वतं तथा ।
विन्ध्या गङ्गा सरिद्यच्च रेवातीरमथापि वा ॥
पयोष्णी वासुरास्या तु अथवा मण्डलेश्वरे ।
शङ्कुरेश्वररामेशे अथवा अमरेश्वरे ॥
वेत्रवत्यास्तटे रम्ये हरिचन्द्रे तथा प्रिये ।
सरस्वतीतटे पुण्ये सुगन्धायतनेऽपि वा ॥
स्थानेष्वेषु जपं कुर्य्यात् नन्दाद्दि क्षतमानसः ।
भैरवं मूलभेदञ्च चण्डीमूर्त्तिं त्रिपुरान्तकम् ॥
अष्टचक्रं चक्रोल्लासं कपालाग्रनामकम् ।
अनाविलं खरोष्ट्राग्रं स्थानान्येतानि वर्ज्जयेत् ॥"

इति देवीपुराणे कृष्णप्रवेशनामाध्यायः ॥

सिद्धेश्वरी, स्त्री, (सिद्धा ईश्वरी ।) देवीविशेषः । यथा,—

"सिद्धां सिद्धेश्वरीं सिद्धविद्याधरगणैर्युताम् ।
मन्त्रसिद्धिप्रदां योनिसिद्धिदां लिङ्गशोभिताम् ॥"

इति सुण्डमालातन्त्रे ११ पटले महाविद्यास्तोत्रम् । अपि च ।

"कृष्णेन बलभद्रेण गोपैः कंसवधांसुभिः ।
सङ्केतकं कृतं तत्र मन्त्रनिश्चयकारकम् ॥
तदा सङ्केतके सा च सिद्धा देवी प्रतिष्ठिता ।
सिद्धिप्रदा भोगदा च तेन सिद्धेश्वरी स्मृता ।
सङ्केतकेश्वरीत्येव दृष्ट्वा सिद्धिमवाप्नुयात् ॥"

इति वाराहे मथुरापरिक्रमप्रादुर्भावनामाध्यायः ॥

सिद्धौघः, पुं, (सिद्धानामोघः ।) गुरुक्रमविशेषः । यथा, तन्त्रे ।

"अथ तारागुरून् वक्ष्ये दृष्टादृष्टफलप्रदान् ।
ऊर्द्ध्वकेशो यौमकेशो नीलकण्ठो वृषध्वजः ॥
दिव्यौघाः सिद्धिदा एतत्, सिद्धौघान् शृणु यत्नतः ।
वशिष्ठः कूर्म्मनाथश्च मीननाथो मदेश्वरः ॥
हरिनाथो मानवौघान् शृणु वक्ष्यामि तद्गुरून् ।
नारायणी भानुमती जयाविद्या मदोदरी ॥
सुयानन्दः परानन्दः पारिजातः कुलेश्वरः ।
विरूपाक्षः केरवी च कथितं नारिकोक्षकम् ।
आनन्दनाथश्चाष्टाता गुरवः सर्व्वसिद्धिदाः ।
स्त्रियोऽपि गुरवश्चाथ अमाताः प्रिय-
कौलिनाः ॥"

इति तन्त्रसारः ॥

अन्यच्च ।

"ब्रह्मानन्दः परमहंसश्चलचित्तश्चलाचलः ।
कुमारः क्रोधनश्चैव मत्ता च स्वस्त्रीपतः ॥
माया मायावती चैव मानवौघान् शृणु प्रिये ।
वशिष्ठः कूर्म्मनाथश्च मीननाथो मदेश्वरः ।
हरिनाथो मानवौघानथ वक्ष्यामि सद्गुरून् ॥"

इति शब्दरत्नाकरतन्त्रम् ॥

तथा ।

"भरतः काश्यपः शम्भुर्भोगेशः कुलकौशिकः ।
एते पञ्च महासिद्धा सिद्धौघाः परिकीर्त्तिताः ॥"

इति तन्त्रम् ॥

सिध्म, [न्] क्ली, (सिध + मन् । स च कित् ।) किलासरोगः । इत्यमरः । २ । ६ । ५३ ॥ (यथा, सुश्रुते । २ । ५ ।

"क्षुद्रकुष्ठान्यपि स्थूलारुष्कं महाकुष्ठमेककुष्ठं कुष्ठार्म्मदलं विसर्पः परिसर्पः सिध्म विचर्चिका किटिभं पामा रकसा चेति ॥")

सिध्म, क्ली, (सिध + बाहुलकात् मक् ।) किलासरोगः । इति हेमचन्द्रः ॥ सप्तमहाकुष्ठान्तर्गतकुष्ठरोगविशेषः । तल्लक्षणं यथा,—

"श्वेतं ताम्रं तनु च यद्यत्रो दृष्टं विसृष्यति ।
प्रायश्चोरसि तत् सिध्ममलायुकुसुमोपमम् ॥"

इति माधवकरः ॥

लक्ष्माचगता सिध्मपुष्पिका इति अलायुपुष्पवत् श्वेतं सिध्मं सिध्मपुष्पिका । महाकुष्ठन्तु सिध्मं धातुप्रविष्टं सिध्मपुष्पिकेतरं श्वेतलोहितवर्णम् । एतेन सिध्मस्य वैविध्यं सूचितम् । इति विजयरक्षितादयः ॥

सिध्मपुष्पिका, स्त्री, (सिध्मस्य किलासस्य पुष्पं विद्यते यस्याः । सिध्मपुष्प + टप् ।) कुष्ठव्याधिभेदः । सा च लक्ष्माचगता अलायुपुष्पवत् श्वेता । इति रुग्विनिश्चयटीकायां विजयरक्षितादयः ॥

सिध्मल, त्रि, (सिध्मं अस्त्यस्यति । सिध्म + "सिध्मादिभ्यश्च ।" ५ । २ । ९७ । इति लच् ।) किलासी । इत्यमरः । २ । ६ । ६१ ॥ (यथा, वाजसनेयसंहितायाम् । ३० । १७ ।

"विश्वेभ्यो भूतेभ्यः सिध्मलं भूत्यै जागरणमभूत्यै इति ॥")

सिध्मला, स्त्री, (सिध्मलस्या अस्तीति । लच् । टाप् ।) मत्स्यविशेषः । इति मेदिनी ॥ (औषधविशेषः । तदुयथा,—

"त्वगादिहीनाः संशुष्काः प्रत्यग्राः शुष्कशाल्यः ।
शुष्कशूर्णीकृतं तेषां पीते पलशतत्रयम् ॥
शतेन कटुतैलेऽस्य घोरारामठधान्यके ।
क्रिमिघ्नदीप्यकनिशाचविकाम्यन्त्रिकार्द्धके ॥
क्षीरकद्वयक्षीरसुरसार्द्धकसिन्धुके ।
दशमूलात्मगुप्ताभ्यां मार्कवैर्लवणैः क्षिभिः ॥
चूर्णितैः पलिकैः सार्द्धमारग्वधपरिप्लुते ।
विपक्वेन क्षेद्यार्द्धे तु धान्यराशौ पुनर्न्यसेत् ॥
सप्तरात्रात् समुद्धृत्य पानभक्षणभोजने ।
सिध्मलेयं प्रयोक्तव्या सामे वायौ विशेषतः ॥
भस्मरत्नाश्मनष्टानां कल्पनः पीठमर्दयोः ।
गृध्रगोमायुसिंहादेः शूलगृध्रोदराणि च ।
वर्षीयसिनरास्थित्वं हत्वास्तुरमनेन्द्रियाः ॥"

इति वैद्यकचक्रपाणिसंग्रहे आमवाताधिकारे ॥)

सिध्मवान्, [न्] त्रि, (सिध्ममस्त्यस्येति । सिध्म + मत्वर्थे मतुप् । मस्य वः ।) किलासरोगविशिष्टः । इति सिध्मशब्दादस्त्यर्थे वतुप्रत्ययेन निष्पन्नः ॥

सिध्मा, स्त्री, किलासरोगः । इति हेमचन्द्रः ॥

सिध्यः, पुं, (सिध्यन्त्यस्मिन्नर्था इति । सिध + "पुष्यसिध्यौ नक्षत्रे ।" ३ । २ । १२९ । इति क्यप्प्रत्ययेन निपातितः ।) पुष्यनक्षत्रम् । इत्यमरः । १ । ३ । २२ ॥

सिध्रः, पुं, साधुः । वृक्षः । इत्युणादिकोषः ॥

सिध्रका, स्त्री, (सिध्र + स्वार्थे कन् । अभिधानात् स्त्रीत्वम् ।) वृक्षविशेषः । इत्यमरः । १ । ५ । ५ ॥ सेधति रोगहन्तृत्वमिति सिध्रमा । सीध इति ख्यातो वृक्षः । सिध गत्यां नाञ्चीति रक् ततः स्वार्थे कः संज्ञाविधेरनित्यत्वात् न ह्रस्वः । इति भरतः ॥

सिध्रकाक्ष्यं, क्ली, (सिध्रकाक्ष्यां वनमिति । यत्नम् ।) देवीस्थानम् । इति त्रिकाण्डशेषः ॥

सिनं, क्ली, (सिनोति बध्नाति आत्मानमिति । षिञ् बन्धने + "इगुपधज्ञीति ।" उणा० ३ । २ । इति नक् ।) शरीरम् । इति संक्षिप्तसारोणादिवृत्तिः ॥ (अन्नम् । इति निघण्टुः । २ । ७ ।)

सिनः, पुं, (सिनोतीति । षिञ् बन्धने + "इगुपधज्ञीति ।" उणा० ३ । २ । इति नक् ।) पाशः । इति सुग्धबोधव्याकरणम् ॥ काकः । इति केचित् ॥ शुक्लगुणविशिष्टे, त्रि ॥

सिनी, स्त्री, शुक्लगुणविशिष्टा । यथा । श्वेता सिता सिनी श्येनी । इति पाढिः । इति सिनीपाढीशब्दटीकायां भरतः ॥

सिनी(वा)वाली, स्त्री, (सिनी शुक्ला वाला चन्द्रकला अस्यामिति । यद्वा, सिन्या शुक्लया चन्द्रकलया वल्यते मिश्र्यते या । वल मिश्रणे + घञ् । ततो ङीप् ।) दृष्टेन्दुकलामावास्या । इत्यमरः । १ । ४ । ६ ॥ सा चतुर्दशीयुक्तामावास्या । सिनी श्वेता बाला चन्द्रकलास्यां सिनीवाली नदादित्वादीप् । इति तट्टीकायां भरतः ॥ (यथा, भागवते । ४ । १२ । ४८ ।

"पौर्णमास्यां सिनीवाल्यां दर्शस्यां अथवैकदा ।")

दुर्गा । इति मेदिनी ॥

सिन्दूकः, पुं, सिन्दुवारवृक्षः । इत्यमरः । २ । ४ । ६ ॥ (तस्यास्य पर्य्यायगुणाश्च ।

"सिन्दुवारः श्वेतपुष्पः सिन्दूकः सिन्दुवारकः ।
नीलपुष्पो तु निर्गुण्डी शेफाली सुरसा च सा ।
सिन्दूकः स्रुतिदस्तिक्तः कषायः कटुको लघुः ।
कैफ्यो नेत्रहितो हन्ति शूलशोथामवातजित् ।
कृमिकुष्ठारुचिश्लेष्मज्वरान्नीलापि तद्विधा ।
सिन्दुवारदलं तत्तु वातश्लेष्महरं लघु ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

सिन्दु(न्धु)वारः, पुं, (सिन्धुं गजमदं वारयति निवर्त्तयति । सिन्धु + वृ + अण् । पक्षिको ह्रस्वश्च ।) वृक्षविशेषः । निसिन्दा इति भाषा । इन्दुर इति च क्वचित् । तत्पर्य्यायः । सिन्दुकः २ इन्दुरिमः ३ निर्गुण्डी ४ इन्द्राणिका ५ । इत्यमरः । २ । ४ । ६ ॥ सिन्धुकः ६ सिन्धुवारकः ७ इन्द्राणी ८ पौलोमी ९ शक्रानी १० कामसाक्षिणी ११ । इति रत्नकोषः ॥ श्वेतपुष्पः १२ सिन्दुवारः १३ सिरसाधनकः १४ अम्लकः १५ सिन्धुकः १६ अर्थसिद्धकः १७ । अस्य गुणाः । कटुत्वं तिक्तत्वम् । कफवातनाशकत्वं [illegible] शित्वम् । कायसिद्धित्वञ्च । इति राजनिर्घण्टः ।

अपि च।
"सिन्धुकः स्तुतिदम्मिक्तः कषायः कटुको लघुः।
कैश्यं नेत्रक्षतिं हन्ति शूलशोथाममारुतान्॥
क्रमिकुष्ठकफिश्लेष्मव्रणान् नीलापि तद्विधा।
सिन्धुवारदलं तत्तु वातश्लेष्महरं लघु॥"
इति भावप्रकाशः॥ *॥

"स्यन्दं वारयति सिन्धुवारः वस् निपातनात् चिः अत उच्च। सिन्धुकसिन्धुवारौ दन्त्यसादी तवर्गतृतीयवन्ताविति वक्षवः। केचित्तु सिन्धुं सस्रवनमपि वारयति शीघ्रयति तीक्ष्णरसत्वेन कफस्रवात् सिन्धुवारः सिन्धुकसिन्धुवारौ तवर्गचतुर्थवन्तावित्याहुः।" इति भरतः॥

सिन्दूरं, क्ली (स्यन्दते इति स्यन्दू ऽ चरणे+"स्यन्देः सम्प्रसारणञ्च।" उणा० १।६६। इति ऊरन्। सम्प्रसारणञ्च।) रक्तवर्णचूर्णविशेषः। सिंदूर इति भाषा। तत्पर्य्यायः। नागसम्भवम् २। इत्यमरः। २।६।१०५॥ नागरेणुः ३ रक्तम् ४ सीमन्तकम् ५ नागजम् ६ नागगर्भम् ७ शोणम् ८ वीररजः ९ गणेशभूषणम् १० सव्यारागम् ११ अङ्गारकम् १२ सौभाग्यम् १३ अरुणम् १४ मङ्गल्यम् १५। अस्य गुणाः। कटुत्वम्। तिक्तत्वम्। उष्णत्वम्। व्रणविरोपणत्वम्। कुष्ठालक्ष्मकफपूतिविसर्पशमनत्वञ्च। इति राजनिर्घण्टः॥ *॥ अपि च।
"सिन्दूरं रक्तरेणुश्च नागगर्भश्च सीसजम्।
सीसोपधातुः सिन्दूरं गुणैस्तत् सीसवज्जतम्॥
संयोगजप्रभावेण तस्माच्चन्ने गुणाः स्मृताः।
सिन्दूरसूर्यं सीसर्पकुष्ठकण्डूविषापहम्।
भक्षसन्धानजनकं नवशोधनरोपणम्॥" *॥
सिन्दूरस्य शोधनमाह।
"दुग्धाम्लयोगतस्तस्य विशुद्धिर्गदिता बुधैः।"
इति भावप्रकाशः॥ ७॥
सिन्दूरदानमन्त्रो यथा,—
"सिन्दूरञ्च वरं रम्यं भाले शोभाविवर्द्धनम्।
दूरतं भूषणानाञ्च सिन्दूरं प्रतिगृह्यताम्॥"
इति ब्रह्मवैवर्ते प्रकृतिखण्डे २१ अध्यायः॥ *॥
तस्य धारणात् यदुरायुर्वृद्धिर्भवति। यथा,—
"एतिद्रा कुङ्कुमञ्चैव सिन्दूरं कज्जलं तथा।
कार्पासकञ्च ताम्बूलं माङ्गल्याभरणं शुभम्।
केशसंस्कारकञ्चैव करकं विभूषणम्।
भर्तुरायुष्यमिच्छन्ती दूरमेव परित्यजेत्॥"
इति कार्पासखण्डे ४ अध्यायः॥

सिन्दूरः, पुं, (स्यन्दते इति। स्यन्दू+करन्।) द्रव्यविशेषः। इति मेदिनी॥

सिन्दूराकारं, क्ली, (सिन्दूरस्य आकारमिति।) सीसकम्। इति हेमचन्द्रः॥

सिन्दूरतिलकः, पुं, (सिन्दूरस्य तिलको यस्य।) कपर्दी। इति मेदिनी॥

सिन्दूरवितरणं, क्ली, (सिन्दूरस्य वितरणं यस्मात्।) माङ्गल्यं गौरी। इति मेदिनी॥

सिन्दूरपुष्पी, स्त्री (सिन्दूरवत् रक्तवर्णं पुष्पं यस्याः। ङीष्।) पुष्पवृक्षविशेषः। तत्पर्य्यायः। सिन्दूरी २ वीरपुष्पी ३ लताकुष्पी ४ करञ्जदा ५ शोणपुष्पी ६। अस्या गुणाः। कटुत्वम्। तिक्तत्वम्। कषायत्वम्। श्लेष्मवातशिरोरुजिभूतनाशित्वम्। चक्षुष्यत्वञ्च। इति राजनिर्घण्टः॥

सिन्दूरी, स्त्री, (सिन्दूरं तद्वद्वर्णोऽस्या अस्तीति। अच्। गौरादित्वात् ङीष्।) रोचनी। रक्तचेलिका। धातकी। इति मेदिनी॥

सिन्धुः, पुं, (स्यन्दते इति। स्यन्दू प्रस्रवणे+"स्यन्देः सम्प्रसारणं धश्च।" उणा० १।१२। इतिः उः। धकारादेशः सम्प्रसारणञ्च।) समुद्रः। इत्यमरः। १।१०।१॥ (यथा, भागवते। ३।११।३१।
"तावत्तिमुवनं सद्यः कल्पान्तेधितसिन्धवः।
प्लावयन्त्युत्कटाटोपचण्डवातेरितोर्म्मयः॥")
वमघुः। देशविशेषः। (यथा, रघुः। १५। ८०।
"युग्राजितश्च सन्देशात् स देशं सिन्धुनामकम्।
ददौ दत्तप्रभावाय भरताय भृतप्रजः॥")
नदविशेषः। इति मेदिनी॥ इन्दस् इति ख्यातः। (यथा, रघुः। ४।६०।
"विनीताध्वश्रमास्तस्य सिन्धुतीरविचेष्टनैः।
दुधुवुर्वाजिनः स्कन्धात् लग्नकुङ्कुमकेशरान्॥")
गजमदः। इति हेमचन्द्रः॥ सिन्धुवारवृक्षः। इति शब्दचन्द्रिका। श्वेतदूर्वम्। इति राजनिर्घण्टः॥ रागविशेषः। स च मालकौशरागपुत्रः। यथा,—
"माधवः शोभनः सिन्धुर्म्मारमेवाऽकुलाः।
कलिङ्गः सोमसंयुक्तः कौशिकस्य सुता इमे॥"
इति सङ्गीतसिन्धुः॥

सिन्धुः, स्त्री, (स्यन्दते इति। स्यन्द+उः। सम्प्रसारणम्। दस्य धः।) नदी। इति मेदिनी॥ (यथा, सप्तकोपनिषदि। २।१।६।
"अतः समुद्रा गिरयश्च सर्व्वे
ऽस्मात् स्यन्दन्ते सिन्धवः सर्व्वरूपाः।
अतश्च सर्व्वा ओषधयो रसश्च
येनैष भूतैस्तिष्ठते ह्यन्तरात्मा॥")
नदीविशेषः। तज्जलगुणाः। यथा,—
"शतद्रोर्विपाशायाश्च सिन्धुनद्याः
सुशीतं लघु स्वादु सर्व्वामयाम्।
बलं निर्म्मलं दीपनं पाचनञ्च
प्रदत्ते बलं बुद्धिमेधायुषञ्च॥"
इति राजनिर्घण्टः॥

सिन्धुकः, पुं, (सिन्धुरेव। स्वार्थे कन्।) सिन्धुवारवृक्षः। इति शब्दचन्द्रिका॥ (यथा, हरवंशे भविष्यपर्व्वणि। ५६।६।
"वैजयन्तीं शीतकक्षदिर-
सिन्धुकरञ्जनाथ शुभवल्लरीः॥")

सिन्धुकरः, पुं, (सिन्धोः करः इव।) समुद्रफेनः। इति शब्दरत्नावली॥

सिन्धुकरं, क्ली, (सिन्धौ सिन्धुदेशे कीर्य्यते इति। कृ+खच्।) श्वेतदूर्वम्। इति राजनिर्घण्टः॥

सिन्धुखेलः, पुं, (सिन्धौ तत्समीपे खेलतीति। खेल+कः।) सिन्धुदेशः। इति शब्दरत्नावली॥

सिन्धुजं, क्ली, (सिन्धोर्जायते इति। जन+डः।) सैन्धवलवणम्। इत्यमरः। २।६।४२॥ (यथा, सुश्रुते। ४।३७।
"वचापुष्करकुष्ठैलामदनामरसिन्धुजैः॥")
समुद्रजाते, त्रि॥ (यथा, महाभारते। ३।७१।१४।
"शुद्धान् दशभिराचामैः सिन्धुजान् वातरंहसः।")

सिन्धुजन्मा, [न्] क्ली, (सिन्धोर्जन्म उत्पत्तिर्यस्य।) सैन्धवलवणम्। इति रत्नमाला॥

सिन्धुजन्मा, [न्] पुं, (सिन्धोः क्षीरसमुद्रात् जन्म यस्य।) चन्द्रः। इति जटाधरः॥

सिन्धुजा, स्त्री, (सिन्धोर्जायते इति। जन+डः।) लक्ष्मीः। इति जटाधरः॥

सिन्धुड़ा, स्त्री, मालवरागभार्य्या। यथा,—
"धानुषी मालसी रामकिरी च सिन्धुड़ा तथा।
अम्बवारी भैरवी च मालवस्य प्रिया इमाः॥"
इति सङ्गीतदामोदरः॥

सिन्धुनन्दनः, पुं, (सिन्धोः क्षीरोदस्य नन्दनः।) चन्द्रः। इति त्रिकाण्डशेषः॥

सिन्धुनाथः, पुं, (सिन्धूनां नदीनां नाथः।) समुद्रः। इति केचित्॥ (यथा, माघे। १४।६८।
"मत्स्यकूर्म्मावि पुरा परिस्रवौ
सिन्धुनाथशयने निषेदुषः।
गच्छतः स मधुकैटभौ विभो-
र्यस्य नैद्रसुखविघ्नतां क्षणम्॥")

सिन्धुपुत्रः, पुं, (सिन्धोः पुत्रः।) मर्कटेन्दुः। इति शब्दचन्द्रिका॥ चन्द्रश्च॥

सिन्धुपुष्पः, पुं, (सिन्धौ पुष्पाति प्रकाशते इति। पुष्प पुष्पणे+अच्।) शङ्खः। इति शब्दचन्द्रिका॥

सिन्धुमन्मजं, क्ली, (सिन्धुमन्मात् जायते इति। जन+डः।) सैन्धवलवणम्। इति रत्नमाला॥

सिन्धुरः, पुं, (सिन्धुं मदं राति ददातीति। रा+कः।) हस्ती। इति हेमचन्द्रः॥ (यथा, आर्य्यासप्तशत्याम्। १६८।
"गतिगर्व्वितवरयुवतिः करी कपोलौ करीषु मदमलिनौ।
सुखवन्मात्रसिन्धुर सम्मोदरं किं मदं वहसि॥")

सिन्धुरदेवी, [न्] पुं, (सिन्धुरं हस्तिनं देवीति। दिव+विनिः।) गणेशः॥

सिन्धुलवणं, क्ली, (सिन्धुजातं लवणम्।) सैन्धवम्। इति रत्नमाला॥

सिन्धुवारः, पुं, (सिन्धुमपि वृणोति गच्छतीति। वृ+अण्।) वृक्षभेदः। इति त्रिकाण्डशेषः॥ (सिन्धुं मद्यजलमपि वारयति तिरस्करोतीति तिक्तरसेन। वृ+णिच्+अण्।) सिन्धुवारवृक्षः। इत्यमरः। २।४।६८॥ यथा,—
"सिन्धुवारः सिन्धुवारः सिन्धुकं सुरसोऽपि च।
नक्षेन्द्रसुरसस्त्रिस्रिः सिन्धुवारिसः।

निर्गुण्डीन्द्राणिकेन्द्राणी सुरसा सिन्धुवारकः ॥"
इति शब्दरत्नावली ॥
अस्य गुणाः ।
"सिन्धुवारो विषश्लेष्मव्रणकुष्ठक्षयापहः ।"
इति राजवल्लभः ॥
सिन्धुवारकः, पुं, (सिन्धुवार एव । स्वार्थे कन् ।) सिन्धुवारवृक्षः । इति शब्दरत्नावली ॥
सिन्धुवारितः, पुं, (सिन्धुर्मद्जलं वारितो येन ।) सिन्धुवारवृक्षः । इति शब्दरत्नावली ॥
सिन्धुवेगमः, पुं, गम्भारीवृक्षः । इति शब्दचन्द्रिका ॥
सिन्धुशयनः, पुं, (सिन्धुः क्षीरोदः शयनं यस्य ।) विष्णुः । क्षीरोदशायित्वात् ॥
सिन्धुसङ्गमः, पुं, (सिन्धूनां सङ्गमो यत्र ।) नदीनदसमुद्राणां परस्परमेलकः । तत्पर्य्यायः । सम्भेदः २ । इत्यमरः । १ । १० । ३५ ॥ सिन्धोर्नद्योः सङ्गमो मेलकः सम्भेदः । सम्भिदन्ति मिलन्ति अस्मिन्निति सम्भेदः घञ् । सिन्धुशब्देन नदी नदः समुद्रश्चोच्यते तेन नद्योर्नदयोर्नदीसमुद्रयोश्च मेलकः सम्भेदः । इति वंशब्राह्मणादयः । इति भरतः ॥
सिन्धूद्भवं, क्ली, (सिन्धोरुद्भवो यस्य ।) सैन्धवलवणम् । इति रत्नमाला ॥ (यथा, सुश्रुते । १ । ४४ ।
"विड्लवणसारो मरिचं सदारु-
योगः स सिन्धूद्भवमूत्रयुक्तः ॥")
सिन्धूपलं, क्ली, (सिन्धोः समुद्रस्य उपलमिव ।) सैन्धवलवणम् । इति धारावली । ५५ ॥
सिप्रं, क्ली, (सिच् + क्रिप् । सिचं क्षरणं रातीति । रा + कः । पृषोदरादित्वात् षस्य पः ।) सरोवरविशेषः । यथा, कालिकापुराणे ४१ अध्याये ।
"एतस्मिन्नन्तरे शम्भुः सिप्रं त्यक्त्वा तदा सरः ।
गङ्गावतारमगमत् हिमवत्प्रस्थसुत्तमम् ॥"
सिप्रः, पुं, (सिच् क्षरणे + क्रिप् । तं राति ददाति । रा + कः । पृषोदरादित्वात् साधुः ।) चन्द्रः । इति त्रिकाण्डशेषः । निदाघसलिलम् । घर्म्मः । इति मेदिनी ॥
सिप्रा, स्त्री, (सिप्र + स्त्रियां टाप् ।) नदीभेदः । इति मेदिनी ॥ सा तु उज्जयनीदेशसमीपे वर्त्तते । (यथा, रघुः । ६ । ३५ ।
"अनेन यूना सह पार्थिवेन
रम्भोरु ! कामिन मनसो रथिस्ते ।
सिप्रातरङ्गानिलकम्पितासु
विधूतसुप्तागरुवल्लरासु ॥")
तस्या उत्पत्तिर्यथा कार्त्तिकापुराणे २३ अध्याये ।
"अथ विष्णोश्च विश्वेशं गौरवं ज्ञातमादरे ।
अवन्तीं पश्चिमस्तु सोमनाथं तथा भज ॥
तत्र यत्र स्थितं गौरं ज्ञानमाधवसन्निधौ ।
विश्वेशावतरार्थाय ज्ञानार्थं च पुरा कृतम् ॥
ब्रह्मविष्णुमहादेवशक्तिभिः सप्तधैरितम् ।
तत्तीर्थं सप्तधा भूत्वा स्थितं ज्ञानमाधवात् ॥
हैमाद्रेः कन्दरे सार्गो सरस्याश्च पृथक् पृथक् ।
तत्तीर्थं पतितं सिप्रे देवभोग्ये सरोवरे ।
तेन सिप्रा नदी जाता विष्णुना प्रेरिता क्षितिम् ॥"
सिमः, पुं, (षि ञ् बन्धने + "अविमिविसिशुभिभ्यः कित् ।" उणा० १ । १४३ । इति मन् । सच कित् ।) समुदायः । सिमः सर्व्वः । इति सिद्धान्तकौमुदी ॥ (यथा, ऋग्वेदे । १ । ११५ । ४ ।
"रात्री व्यख्यदायती सिमस्मै ॥")
सिम्बा, स्त्री, (यम वैक्लव्ये + उल्वादयश्चेति साधुः ।) शमी । यथा,
"शमी समी शिम्बिशिम्बं सिम्बा सिम्बिरपीष्यते ।"
इति द्विरूपकोषः ॥
द छिमिड़ा इति ख्याते शुँठी इति ख्याते । शाम्यति दृष्टिरनया शमी शमभिर्यं शमे नाम्नीति ङीः पाक्षोणादीति ईपि शमी ताल्यादिः शमेः पूर्व्वेण वे निपातनादकारस्य इत्वे शिम्बापि तालव्यादिः । सिम्बा दन्त्यादिरिति पुरुषोत्तमादयः । सिम्बिशब्दोऽप्यत्र शिम्बिरपि तालव्यादिर्दन्त्यादिश्च । इति भरतः ॥
सिम्बिः, स्त्री, शिम्बा । इति द्विरूपकोषः ॥ नखीनाममगन्धद्रव्यम् । इति राजनिर्घण्टः ॥
सिम्बिजा, स्त्री, शमीधान्यम् । इति भावप्रकाशः ॥ तालव्यशकारादिरपि ॥
सिम्बी, स्त्री, (सिम्ब + पक्षे ङीष् ।) निष्पावी । इति राजनिर्घण्टः ॥ अपि च ।
"सिम्बा सिम्बी पुस्तसिम्बिरूक्षा पुस्तकसिम्बिका ।
शिम्बिद्वयञ्च मधुरं रसे पाके स्निग्धं गुरु ।
वल्यं दाहकरं प्रोक्तं श्लेष्मलं वातपित्तजित् ॥"
इति भावप्रकाशः ॥
सिरः, पुं, पिप्पलीमूलम् । इति हेमचन्द्रः ॥ (पिप्पलीमूलशब्देऽस्य विषयो ज्ञेयः ॥)
सिरा, स्त्री, (सिनोतीति । षिञ् बन्धने + रक् । इत्नुणादौ उव्वृत्तः । २।१३ ।) नाड़ी । (यथा, सुश्रुते । ३ । ७ ।
"आप्रुवन्त्यमितो देहं नाभितः प्रसृताः सिराः ।
प्रताना: पक्षिणीकन्दादिसादीनां यथा जलम् ॥"
यथा च ।
"आनाहमन्यः स्रवणात् स्रोतांसि सरणात् सिराः ॥"
इति चरके सूत्रस्थाने त्रिंशेऽध्याये ॥
तथा च ।
"सप्त सिराशतानि भवन्ति । याभिरिदं शरीरमारामं इव जलधारिणीभिः 'केदार इव च कुल्याभिरुपस्निह्यतेऽनुसृप्यते चाकृष्यते च प्रमाणादिभिर्वर्णैः । इमस्यपत्रसेवनीनामिव च तासां प्रतानाख्यासां नाभिर्हृदं तत्र प्रसन्नमुदकमस्तीव एक च । भवतश्चात्र ।
यावत्यस्तु सिराः काये सम्भवन्ति शरीरिणाम् ।
नाभ्यां सर्व्वा निबद्धास्ताः प्रसन्नात्र समन्ततः ॥
नाभिस्तासां प्राणिनां प्राणवायोर्निर्मुक्तोऽयं प्राणवायुश्रितो ।

सिराभिराहृता नाभिश्चक्रनाभिरिवारके: ॥
तासां मूलसिराश्चत्वारिंशत्तासां वातवाहिन्यो दश पित्तवाहिन्यो दश कफवाहिन्यो दश दश रक्तवाहिन्यः । तासान्तु वातवाहिनीनां वातस्थानगतानां पञ्चशतप्रतिशतं भवति तावत्य एव पित्तवाहिन्यः पित्तस्थाने कफवाहिन्यश्च कफस्थाने रक्तवाहिन्यश्च यकृत्प्लीहोरवमेतानि सप्त सिराशतानि ।
तत्र वातवाहिन्यः सिरा एकस्मिन् मक्ष्णि पञ्चविंशतिः एतेनेतरसक्ष्णिवाहू च व्याख्यातौ । विंशतितस्तु कोष्ठे चतुश्चिंशत्तासां गुदमेढ्राश्रिताः श्रोण्यामष्टौ द्वे पार्श्वयोः षट् पृष्ठे तावत्य एव षोडरे दश वक्षसि । एकचत्वारिंशच्चतुर्ष्वंसे तासां चतुर्दश ग्रीवायां कण्ठयोर्धमनयः । नव जिह्वायाम् षट् नासिकायाम् । अष्टौ नेत्रयोः । एवमेतत् पञ्चशतमधिकशतं वातवहानां सिराणां व्याख्यातम् । अत्र एव विभागः पित्तवाहिनीनामपि । विशेषतस्तु पित्तवाहिन्यो नेत्रयोरेव कर्णयोर्द्वे । एवं रक्तवहाः कफवहाश्च । एवमेतानि सप्त सिराशतानि सविभागानि व्याख्यातानि । भवन्ति चात्र ।
क्रियाणामप्रतीघातमभीक्ष्णं बुद्धिकर्म्मणाम् ।
करोत्यन्यान् गुणांश्चापि खाः सिराः पवनश्चरन् ॥
यदा तु कुपितो वायुः खाः सिराः प्रतिपद्यते ।
तदास्य विविधा रोगा जायन्ते वातसम्भवाः ।
आक्षिप्णुतामन्नरुचिमक्षिदौर्ग्बिल्यरोगताम् ।
संसर्पतु खाः सिराः पित्तं कुर्य्याच्चान्यान् गुणानपि ।
यदा प्रकुपितं पित्तं सेवते खवहाः सिराः ।
तदास्य विविधा रोगा जायन्ते पित्तसम्भवाः ।
स्नेहमर्द्दवं सन्धीनां स्वेदं बलमुदीर्यताम् ।
करोत्यन्यान् गुणांश्चापि बलासः खाः सिराश्चरन् ।
यदा तु कुपितः श्लेष्मा खाः सिराः प्रतिपद्यते ।
तदास्य विविधा रोगा जायन्ते श्लेष्मसम्भवाः ।
धातूनां पूरणं वर्ण्णं सार्द्रज्ञानमसंशयम् ।
खाः सिराः सञ्चरन्नूर्ध्वं कुर्य्याच्चान्यान् गुणानपि ।
यदा तु कुपितं रक्तं सेवते खवहाः सिराः ।
तदास्य विविधा रोगा जायन्ते रक्तसम्भवाः ।
नहि वातं सिराः काश्चिन्न पित्तं केवलन्तथा ।
श्लेष्माणं वा वहन्त्येता यतः सर्व्ववहाः स्मृताः ।
प्रदुष्टानां हि दोषाणामुक्तिष्टानां प्रधावताम् ।
ध्रुवमुन्मार्गगमनमतः सर्व्ववहाः स्मृताः ।
तत्रारुणा वातवहाः पूर्णास्ते वायुना सिराः ।
पित्तादुष्णाश्च नीलाश्च श्रोता नीलैः सिराः कफात् ।
शुक्लाश्च रोहिणः सिरा गम्भीरगोचराः ।
अत ऊर्द्धं प्रवक्ष्यामि न विभज्यन्ते सिरा यतः ।
वैकल्यं मरणञ्चापि यथासाम्यं भवेदिह ।
सिराशतानि चत्वारि विज्ञाप्यानीह बुद्धिमान्

षट्त्रिंशच्च शतं कोष्ठे चतुःषष्टिश्च मुष्टिनि ।
प्रायाम्ये षोडश शिराः कोष्ठे द्वात्रिंशदेव तु ॥
पञ्चाशच्चतुरश्रोर्ध्वमवेध्याः परिकीर्त्तिताः ।"
इति सुश्रुते शारीरस्थाने सप्तमेऽध्याये ।)
अम्बुवाहिनी । इति हेमचन्द्रः ॥
सिक्थकी, स्त्री, शुक्लकीटजः । इत्यमरटीकायां भरतः । २ । ६ । १०४ ॥
सिचरः, पुं, पक्षी । इति शब्दरत्नावली ॥
सिषाधयिषा, स्त्री, (साधयितुमिच्छा । साध + सन् + अः । स्त्रियां टाप् ।) साधनेच्छा । यथा, भाषापरिच्छेदे । ०० ।
"सिषाधयिषया मूत्र्या सिद्धिर्यत्र न विद्यते ।
स पक्षस्तत्र हेत्वज्ञानादनुमितिर्भवेत् ॥"
सिहुलः, पुं, चुल्लीरोगः । इति शब्दरत्नावली ॥ (चुल्लीशब्देऽस्य विवृतिर्विज्ञेया ।)
सिक्तः, पुं, (सिञ्चति मनो यत्र । सिच् + क्त, । पृषोदरादित्वात् साधुः ।) गन्धद्रव्यविशेषः । सिला इति ख्यातः । तत्पर्य्यायः । तुरुष्कः २ सिल्हकः ३ यावनः ४ । इत्यमरः । २ । ४ । १२८ ॥ सिल्हकः ५ सिल्याकः ६ कपिचक्षुः ७ तैलाक्षः ८ यावः ९ यावनः १० । इति शब्दरत्नावली ॥ सालकीमधः ११ सिल्हकः १२ तैलपर्णी १३ हक्कधूपः १४ कुलधधूपः १५ । इति घटाधरः ॥
सिल्हकः, पुं, (सिक्त एव । स्वार्थे कन् ।) सिक्तः । इति शब्दरत्नावली ॥ (शिलारसः । अस्य पर्य्यायो यथा,—
"कपिनामा कपिस्तैलं ज्ञातव्यं कपिलक्षणः ।
तुरुष्को सुरभिसुरुक्षश्च सिल्हकः स्यात् रसः ॥"
इति वैद्यकरत्नमालायाम् ।
"सिल्हकस्तु तुरुष्कः स्यादृक्षको यवनद्वीपजः ।
कपिस्तैलश्च विज्ञातस्तथाच कपिनामकः ।"
अस्य गुणा यथा,—
"सिल्हकः कटुकः स्वादुः स्निग्धोष्णः शुक्रकान्तिकृत् ।
कृमिकुष्ठज्वरश्वासशूलमेहहरः ।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।)
सिल्हकी, स्त्री, सल्लकी । इति शब्दरत्नावली ।
सिल्हभूमिका, स्त्री, सल्लकी । इति शब्दरत्नावली ।
सीक, भ्वा० क० सेके । इति कविकल्पद्रुमः । (भ्वा० आत्म० अक० सेट् ।) घ, अभिसीकते । ङ, सेकते । इति दुर्गादासः ॥
सीकृ, कि आकर्षणे । इति कविकल्पद्रुमः । (पुरा० चुरा० उभ० सक० सेट् ।) कि, सीकयति ते । आकर्षणे । अमार्क्ष सालयादौ ऊकारः । इति दुर्गादासः ॥
सीकरः, सीकरः । इत्यमरटीकायां भरतः । १ । ३ । १५ । (यथा, रघुः । ५ । ४२ ।
"अजस्रदानोत्सवसीकरार्द्रै-
र्गजैर्निषिक्तप्रकटाङ्गरागः ।
विनीतसंदेशविधिप्रजाभ्यो
यात्रां नृपोऽनुग्रहवेलमैच्छत् ।")
सीता, स्त्री, (सिनोतीति । सिञ् बन्धे + बाहुलकात् क्तः । दीर्घश्च । इत्युणादौ उज्वलः । ३ । ६० ।) लाङ्गलपद्धतिः । इत्यमरः । २ । ६ । १४ ॥
"ई लाङ्गलरेखायां सिनोति खनति भूमिं सीता ।
षिञ् ग ञ च बन्धे नाञ्चीति तः निपाननाद्दीर्घः ।
सीता इत्यसादिः । श्रेते भुवि इति श्रीता तालव्यश्चादिश्च ।" इति भरतः ॥ (यथा, कुमारे । ५ । ६१ ।
"न वेद्मि स प्रार्थितदुर्लभः कदा
सखीभिरस्योत्तरमीक्षितामिमाम् ।
तपःक्षमाभ्युपपत्स्यते सखीं
दृशेव सीतां तदवग्रहव्रताम् ।")
जनकराजनन्दिनी । सा तु श्रीरामपत्नी । तत्पर्य्यायः । वैदेही २ मैथिली ३ जानकी ४ धरणीसुता ५ । इति हेमचन्द्रः । भूमिसम्भवा ६ । इति घटाधरः । अस्या उत्पत्तिर्यथा, वाल्मीकीये रामायणे । ६६ । १५—१८ ।
"अथ मे क्षतजः क्षेत्रं लाङ्गलादुत्थिता ततः ।
क्षेत्रं शोधयता लब्धा नाम्ना सीतेति विश्रुता ।
भूतलादुत्थिता सा तु व्यवर्द्धत ममात्मजा ।
वीर्य्यशुल्केति मे कन्या स्थापितेयमयोनिजा ॥"
अपि च सङ्क्षेपादुद्धृतपद्मपुराणम् ।
"अथ लोकेश्वरी लक्ष्मीर्जनकस्य पुरे सुतः ।
शुभक्षेत्रे हलोत्खाते तारे चोत्तरफल्गुने ॥
अयोनिजा पद्मकरा बालार्कशतसन्निभा ।
सीतासुखे सुतृप्ता बालभावेन सुन्दरी ॥
सीतासुखोद्भवात् सीता इत्यसौ नाम चाकरोत् ।
ततोऽभूदौरसी तस्य ऊर्म्मिला नाम कन्यका ।"
तच्चक्षव्रतादि गौतमं प्रति विष्णुनोक्तं यथा,—
"वैशाखशुक्लपक्षे त्वत्र्यां संयमनं कुरु ।
परेद्युर्विकुरुष्वैतच्चानकीव्रतमुत्तमम् ॥
सप्तधा जानकी तेन भविष्यति न संशयः ।
एतद् व्रतं ममाप्यस्ति कर्त्तव्यं यो द्विजोत्तमः ॥
माहात्म्यं तस्य वदितुं नास्ति मे निश्चलं मनः ।
अहं तावत्सलीनोऽस्मि शक्तश्चेन्नहि तुं न हि ।
तस्मादेकं वदामि त्वां मार्कण्डेयाश्रमेऽधुना ।
गत्वा मुनीन्द्रः सकलं मार्कण्डेयोऽनुपृच्छताम् ।
सर्व्वं निवेदितं तस्मै व्रतमाद्यात्मासुत्तमम् ।
विधानञ्च फलं तस्य स मुनिस्त्वां वदिष्यति ॥
मार्कण्डेयोपदिष्टेन विधिनाचर तद्व्रतम् ।
यथाशक्त्यपि कुर्व्वाणो व्रतस्यास्यास्य मादरात् ॥
तस्मात्से सकलान् कामान्नाप्स्यसे कार्य्या विचारणा ।"
इत्यादि गौतमप्रत्युत्तरं श्रीमार्कण्डेय उवाच ।
"वैशाखे शुक्ल उत्तराजां गते कर्मणि नीपतौ ।
सर्व्वलोकिकरश्चैव यतौ तु कृतमाकरे ॥
भासि पूर्णतने विप्र माधवे माधवप्रिये ।
नवम्यां शुक्लपक्षे च वासरे मङ्गले शुभे ।
सार्द्धे चन्द्रे च मध्याह्ने जानकी जनकालये ।
आविर्भूता सर्व्व देवी योगिषु प्रतिरूपता ।
एतद्योगे व्रतश्रेष्ठं प्रोक्तमत्यन्तकम् ।
चक्रुर्या यदि विप्रा स्यात्सर्व्वसौ माधवे सिते ।
शुक्लायां प्रातरुत्थाय स्नात्वा शौचमतन्द्रितः ।
मध्याह्नव्यापिनी ग्राह्या नवमी तिथिः ।
दिनद्वयगतायान्तु तस्यां कार्य्या परा नरैः ।
एतैर्योगैर्विनापि स्यात् तद्दिनं पापनाशनम् ।
व्रतानां नित्यमाख्यातं कर्त्तव्यं व्रतमुत्तमम् ॥
यस्तु नो कुरुते मोहात् जानकीजन्मसम्भवम् ।
व्रतं स पच्यते घोरे नरके नात्र संशयः ॥
तस्मिन्नहनि मद्भक्ता भुक्त्वान्नन्तु यो नरः ।
सुते स क्षत्रियश्चातं सपूयं खादति स्फुटम् ॥
न करोति हि यः श्रुत्वा व्रतानामुत्तमं व्रतम् ।
स महापातकी ज्ञेयः सर्व्वधर्म्मबहिष्कृतः ॥
कुरुते यो व्रतं सोऽपि पृथ्वीदानफलं लभेत् ।
महाषोडशदानानां यज्ञानां सुनिपुण्यम् ।
प्राप्नोति सर्व्वतीर्थानां प्राप्नुयात् सकलं फलम् ।
सर्व्वभूतदया ज्ञात्वा फलमाप्नोति यज्ञजः ।
तस्मात्प्राप्नोति व्रतादस्मात् नात्र कार्य्या विचारणा ।
अरुणाभ्यां प्रातरुत्थाय स्नात्वा शौचमतन्द्रितः ।
महानद्यां तडागे वा कूपे वाप्यस्त्रिकेऽपि वा ॥
स्नात्वा कृत्यानित्यकर्म्म प्रातःसन्ध्यादिवन्दनम् ।
देवान् पितॄंश्च संतर्प्य हविष्याशी च संयतः ॥
एकभुक् ब्रह्मचारी स्याद्भूमिशायी च शौनक ।
नवम्यां प्रातरुत्थाय दान्तो भूत्वा समाहितः ॥
तीर्थादौ विधिवत् स्नात्वा कृतनित्यक्रियो नरः ।
कुर्व्वीत मण्डपं रम्यं षोडशस्तम्भमण्डितम् ।
अष्टस्तम्भयुतं वापि चतुःस्तम्भमथापि वा ।
तोरणैः सहितं कुर्य्यात्पताकावरशोभितम् ।
द्वारेषु शक्तिकादिप्रतिमाभिर्धनैर्जनैर्युतम् ।
अलङ्कुर्य्यात् प्रतिस्तम्भं स्थापयेत् कलसान् शुभान् ॥
शुद्धतण्डुलराशीषु पूर्णमात्रैरसङ्कृतान् ।
मध्ये तु चत्वरं कुर्य्यात् चतुर्हस्तप्रमाणतः ।
हस्तमात्रोच्छ्रितं रम्यं चतुरस्रं सदा सुने ॥
पञ्चवर्णमितां कुर्य्यात् जानकीप्रतिमां शुभाम् ।
काञ्चनीमथवा शुभ्रां कुर्य्याद्रैणुकलोन्मिताम् ।
तदर्द्धेन तदर्द्धेन कुर्य्याच्चक्षुश्चतुर्भुजाम् ॥
वित्तशाठ्यमकृत्वैवं राजतीमपि कारयेत् ।
औदुम्बरीं पैत्तलीं वा रत्नसर्षपां दृढाम् ॥
कुर्य्यात् पटेऽथ वा दिव्यां वर्णकैः प्रतिमां वराम् ।
वेश्यञ्च सूतिकागारं सर्व्वतश्च पटावृतम् ।
पर्य्यङ्कशयने सुप्ता तत्र राज्ञी महामतिः ।
तस्याः समीपतः सुप्ता मैथिली जनकाधिनी ॥
जातकर्म्मकरी धेनुं जनकश्च महीपतिः ।
प्रतानन्दः पुरोधाश्च वेश्यगीथः प्रयत्नतः ॥
इत्यादि चरितं वेश्यं जानकीजन्मसम्भवम् ।
यथाशक्ति पठं कुर्य्यात् कारणं किल गौतम ।
राजतं वेश्यमध्यस्थं स्वर्णनिष्पावसंयुतं ।
कुर्य्याच्चाम्रमयं कुम्भं पूर्णयाज्यामृतं सदा ।
तस्मिंश्च पञ्चरत्नादि गौर्यांशु निक्षिपेच्छुने ।
आचार्य्यं ज्ञानकुशलं वेदाध्ययनकोविदम् ।
रत्नयज्ञोपवीताभ्यामम्बरेणाप्यलङ्कृतं ।
अक्षतैर्धान्यदूर्वाभिश्च पुष्पमाल्यादिभिर्यजेत् ।
गीतवाद्यादिभिश्चैव गन्धमाल्यानुलेपनैः ।

ङ्गुष्ठादै विधानेन ततः षोढ़श शक्तिभिः ।
विद्यावित्तः सदाचारानर्घौ वा भक्तिसंयुतः ।
मध्ये वेदौ समालेख्या विचित्रैर्वर्णकैस्ततः ।
पद्ममष्टदलं तत्र न्यासयेत् कलसं ततः ।
रत्नसिंहासनं रम्यं संस्मार्य विजितेन्द्रियः ।
तत्राधिवासनं कुर्यादमुच्चारणपूर्वकम् ।
प्रतिमायां विधानेन देवीमावाहयेत्ततः ॥ ॥
प्राणानायम्य मनसा चिरेकाग्रेण चेतसा ।
मूलमन्त्रस्य जनकं मुनिं विन्यस्य मूर्द्धनि ॥
मुखे छन्दश्च गायत्री सीतादेवीं हृदि न्यसेत् ।
नाभौ तु विन्यसेद्ब्रह्मन् लक्ष्मीबीजं सबिन्दुकम् ॥
षाद्यौच नमः शब्दं ततो विन्यस्य मन्त्रवित् ।
श्रीँ श्रीमित्यादिभिर्ब्रह्मा हृदयं षट्स्वरसंयुतैः ।
कृत्वा करागङ्गेषु न्यासं ध्यायेत्ततो व्रती ॥
चतुर्भुजां सुवर्णाभां रामालोकनतत्परम् ।
श्रीराघवान्वितां सीतां चिन्तयेद्धृदि सर्वदा ॥
इति ध्यात्वा चतुर्थार्घ्यं मूलमन्त्रं कृताञ्जलिः ।
सबिन्दुकमशार्णोक्तं पूर्वसुद्धार्य गौतम ॥
सीतायै इति पश्चात्तु नमःशब्दं वदेत् किल ।
संपूज्य प्रतिमां राज्ञीं कृत्वैवमधिवासनम् ।
ब्रह्मचारी भूमिशायी तस्यां रात्रौ भवेद्व्रती ॥
तस्यां नवम्यां विधिवत् कृत्वा शौचमतन्द्रितः ।
नद्यादौ विमले स्नात्वा नित्यकर्म विधाय च ॥
ततस्तु प्रथमे याने नित्यपूजाविधिं व्रती ।
कृत्वा द्वितीयप्रहरे गीतवाद्यपुरःसरम् ॥
मध्याह्नसमये भक्त्या कुर्यादैकाग्यचेतसा ।
ज्ञानमे उपविश्यादौ मूलं विन्यस्य पूर्ववत् ॥
चतुरस्रस्य षट्कोणं त्रिकोणस्य पुरस्ततः ।
कृत्वा मण्डलमाधारं तत्र संपूज्य मन्त्रवित् ॥
मूलेन मूलं संस्मार्य कलसामिथ निर्मलम् ।
चिन्मयं तत्र संचिन्त्य तोयमङ्गुष्ठमुद्रया ॥
आकृष्य मूलमन्त्रेण सप्तवाराभिमन्त्रितैः ।
मन्त्रैः संप्रोक्षयेद्विद्वान् सामग्रीं पूजनोचिताम् ॥
पाद्यादि गन्धपुष्पादिनिर्मितानि ततो सुने ।
पाद्यार्घपद्मार्घाचमनीयार्घमेव च ॥
तत्तेजाममनीयार्घमेवमर्घादयेत् क्रमात् ।
एकस्मिन्नथवा पात्रे पाद्यार्घादीनि प्रकल्पयेत् ॥
पात्रान्तरं समादाय तत्तोयमभिमन्त्रयेत् ।
पुण्याह्नमिति संमार्ज्य प्रोक्षयेत् प्रतिमासनाम् ॥
प्रणवं चक्रमुद्धार्य पाद्यान्तान्यन्तरं चतुर्थ्यैः ।
मध्यमेनैव तत्पात्रं जनकस्य महात्मनः ॥
एतन्मूलमनुः साक्षादधिपूर्णो मतः प्रियम् ।
सीतां देवीं भृशं ध्यात्वा मन्त्रमन्त्रेण मन्त्रवित् ॥
पुण्याह्नमिति पूर्वं तु प्रतिमासनमर्पयेत् ।
स्थिरचित्तो मनुज्ञेन देवीमावाहयेत्ततः ॥
आवाहनादिमुद्राणामर्थं संप्रदर्शयेत् ।
सामावाह्य ततस्तत्र मनुं देव्याश्च मूलतः ॥
अर्घपूर्वोक्तमार्गेण सर्वं कार्यमिति मन्त्रवित् ।
मन्त्रमन्त्रेण मन्त्रज्ञः प्रदद्यादासनं ततः ॥
आसनस्थां ततस्तत्र पाद्यादीनि समर्पयेत् ।
आसनान्तं ततः कृत्वा मन्त्रमन्त्रेण मन्त्रवित् ।
स्थिरासनाय देव्या वै नमः प्रणवमुच्चरेत् ।
मधुना मधुवातेति ऋचया चिंतया सुने ॥
स्नादयेत्तन्मन्त्रेण ततस्तीर्थाम्बुभिः क्रमात् ।
उपेतु मामिति प्रोक्तः सीतायाः स्नपने मनुः ॥
स्नानसिंहासने रम्ये प्रतिमां स्थापयेद्व्रती ।
वासोभिः क्षुत्पिपासेति पूजयेद्विमलोत्तमैः ॥
गन्धद्वारामिति भवेद्दाने गन्धादिकस्य तु ।
मनसः काममित्याहुर्मन्त्रमाभरणादिके ॥
मधुपर्कं ततो दद्यात् सीतादेव्यै विधानतः ।
कस्तूरीकुसुमोपेतैः कर्पूरागुरुचन्दनैः ॥
प्रतिमां पूजयेद्भक्त्या यतः पुष्पैः स्वकालिकैः ।
सुगन्धैः कदंमेनेति मन्त्रेण किल गौतम ॥
अर्चयेत्तुलसीपत्रैः कोमलैर्मञ्जरीयुतैः ।
प्रतिमां मूलमन्त्रेण शतमष्टोत्तरं जपेत् ।
ततः संपूजयेद्विद्वान् राजानं जनकं व्रती ॥"
जनकपूजामन्त्रः ।
"देवी पद्मालया साक्षादवतीर्णा यदालये ।
मिथिलापतये तस्मै जनकाय नमो नमः ॥"
महामतिपूजामन्त्रः ।
"श्रीसीताजननी मातर्मध्यियो जनकस्य च ।
पूजां गृहाण मद्दत्तां महामते नमोऽस्तु ते ॥"
शतानन्दपूजनमन्त्रः ।
"निधानं सर्वविद्यानां विदुत्कुलविभूषणः ।
जनकस्य पुरोधास्त्वं शतानन्दाय ते नमः ॥"
धनपूजनमन्त्रः ।
"जीवयस्यखिलं विश्वं पालयन् वसुधातलम् ।
प्राड्भावयसे सीतां वीर तुभ्यं नमोऽस्तु वै ॥"
सुभगापूजनमन्त्रः ।
"त्वयैवोत्पादितं सर्वं जगदेतच्चराचरम् ।
त्वमेवासि महामाया मुनीनामपि मोहिनी ॥
त्वयायत्ता इमे लोकाः श्रीसीतावल्लभा परा ।
वन्दनीयासि देवानां सुभगे त्वां नमाम्यहम् ॥"
ततोऽष्टदलमध्यस्थयात्रा भक्तितः क्रमात् ।
संपूजयेद्विशुद्धात्मा गन्धपुष्पाक्षतादिभिः ॥
बहिर्मण्डलवर्तिन्यः षोढ़शाद्यास्तु देवताः ।
अग्निमारभिधाः पूज्या बहिः सर्वा अनुक्रमतः ॥
संपूज्यावरणान्येवं सुरदेव्यास्ततो व्रती ।
दशाङ्गैर्गुग्गुलैर्धूपमाघ्रापयेत् सतंविधिः ॥
दीपन्तु साज्यवर्त्तीभिरर्पयेत्परिकल्पितम् ।
नैवेद्यं घृतपक्वान्नैर्नानाषड्रसमंयुतैः ॥
प्रदद्यात् पायसाद्यैस्तु क्षीरं कल्पितमिति ।
राज्ञीं च गुडकन्दुकान् मधामत्ते निवेदयेत् ॥
ताम्बूलन्तु ततो दद्यात् कर्पूराद्यैः सुसंयुतम् ।
साष्टाङ्गमिश्रये देव्या यथाशक्ति च दक्षिणा ॥
नीराजयेत्ततो देवीं घृतमेधदनेन्तरम् ।
नामाकृष्य च मन्त्रेण पुष्पाञ्जलिमथार्पयेत् ॥
मूलेन दापयेत् विश्वैरक्षतैरक्षयकम् ।
यद्वोत्तरपदं वापि नाम्नः शब्दानुसम् ॥
नामपूर्वां नमः पश्चान्मुद्रयेत् प्रतिपादयेत् ।
पुनः पुष्पाञ्जलिं दद्यात् मौलावर्पयि भक्तितः ॥
आवाहनं सुसंस्कृत्य पूर्वं यद्विधिचोदितं वा ।
मौलादिपुष्पपात्रस्थं मन्त्रमन्त्रं विभावयन् ।
इति मन्त्रविदां श्रेष्ठो दोषैर्मुक्तः समाधिना ।
ततः सीतापदाम्भोजहृदयं संस्पृशन् मनुम् ।
कराङ्गसिंपुटं कृत्वा प्रार्थयेन्नामवल्लभाम् ।
भक्त्या परमया ब्रह्मन् नामिः कोमलशक्तिभिः ।

दुरन्तसंसारसमुद्रमग्नं
सीते शरण्यां शरणागतं त्वाम् ।
उद्धारयस्वाशु कृतं मयैत-
त्तुतं ततो देवि मयि प्रसीद ॥

संप्रार्थ्य जानकीमेवं दण्डवत् प्रणमेत् पुनः ।
पुष्पाञ्जलिं पुनर्दत्त्वा स्तुवीत परमेश्वरीम् ।

नीलनीरजदलायतेक्षणां
कौशलेशसुतसाक्षसम्बनाम् ।
साधुरागहरिमेदमीक्षतीं
भावये मनसि रामवल्लभाम् ॥
मन्दहंसगतिगाढ कृशाङ्गीं
कामकान्तिपरिभूतचन्द्रिकाम् ।
तारकारिसदृप्रेमविभग्नां
भावये मनसि रामवल्लभाम् ॥
फुल्लसालककपोलमाननां
राहुवक्त्रगसुधासमद्युतिम् ।
वाससा पिदधतीं द्रियाकुलां
भावये मनसि रामवल्लभाम् ॥
कायवाङ्मनसगीःप्रतिर्यथात्
स्वप्रजायतिषु राघवेश्वरः ।
शिवविरिञ्चिभिरक्षिवन्दितां
भावये मनसि रामवल्लभाम् ॥
भक्त्यैकगम्यां प्रकृतेः परात्प
चित्तं भृशं लोकनमस्कृतात्प ।
भूयायुवद्भिवनगाकसंस्थितां
विभावये चेतसि रामवल्लभाम् ॥
इन्द्रसद्मधनदानुपालकैः
सहिमागमगमास्थितैर्दिवि ।
पुष्पवर्षमनुसंस्तुतशीलां
भावये मनसि रामवल्लभाम् ॥
श्रीयमानमसरैश्च सस्पृहां
यामधामतनुनिर्जितैनसाम् ।
फुल्लनीरजविभावदाननां
भावये मनसि रामवल्लभाम् ॥
सख्यैर्दिनिसदां विमानगै-
र्लिप्सायाकुलमनोभिरीक्षिताम् ।
तेजसापि दधतीं सदा दिशं
भावये मनसि रामवल्लभाम् ॥
एतदष्टकमनिष्टहारिद्
यः पठेदथ शृणोत्यहर्मुखे ।
अन्तरापरहिता तु सीतिकां
तस्य भक्तिमतुलां प्रयच्छति ॥

स्तुत्वैवं जानकीदेवीं सीतायाद्यादिमिथीं ।
रात्रौ जागरणे: मन्त्रं तां स्मरेन्मनसाऽनिशम् ।
ततः प्रातर्दशम्यान्च मूर्त्तोक्तविधिनाऽन्वितः ।
प्रतिमां पूजयित्वादाचार्यं पूजयेत्ततः ।
सर्वे गोपस्करं दद्यात् भक्तानां यथाविधम् ।
दक्षिणान्च यथाशक्ति सद्गुरुभ्यश्च दापयेत् ।
पूजोपचितिविधानेन क्षमाप्य प्रतिमादिकम् ।

सीतायाः प्रीतये दद्यात् मण्डपादि विशेष्य च ॥
सीताप्रीतिं वाचयेत ब्राह्मणाचार्य्यभक्तितः ।
अन्येभ्योऽपि यथाशक्ति भूयसीं दक्षिणां ददेत् ॥
अतिथिभ्योऽन्नदानञ्च कर्त्तव्यं तद्दिने किल ।
सन्तोष्य सकलान् लोकान् कुटुम्बसहितो व्रती ॥
विधिना पारणं कुर्य्यात् भूमिशायी च मानवः ।
तस्योपरि सदा प्रीता सीता स्यान्नात्र संशयः ॥
पद्मगृहे नित्यपूज्या स्यात् प्रतिमा तत्र गौतम ।
तस्यामेवोत्सवं कुर्य्याज्जानक्याः पूजनादिकम् ॥
नित्यपूज्या न यस्य स्यात् सीतायाः प्रतिमा यदा ।
शालग्रामशिलायां च कुर्य्यात् सीतोत्सवं नृपः ॥
लक्ष्मीनारायणौ यस्मात्तस्यां संवसतः सदा ।
पूर्व्वोक्तविधिना सीतानवम्या उत्सवं द्विज ॥
पूजां कुर्व्वीत वै तस्याः सर्व्वाभिष्टाप्तसिद्धिभिः ।
तुष्येत तेन वै तस्मिन् जानकीरघुनन्दनौ ॥ * ॥
इत्थं निगदितं सर्व्वं जानकीजन्मनो व्रतम् ।
कुर्व्वन्तीन्द्राद्यः सर्व्वे व्रतमेतदनुत्तमम् ॥
गन्धर्व्वाः किन्नरा यक्षा गुह्यकाः सिद्धचारणाः ।
नागाश्च मुनयश्चापि प्रकुर्व्वन्ति व्रतं द्विज ॥
यः कुर्य्यादुत्तमेतद्धि जानकीजन्मसम्भवम् ।
स लभेत सकलं ब्रह्मन् पृथ्वीयात्राफलं किल ॥
तथा षोडशदानानां फलं प्राप्नोति मानवः ।
अश्वमेधादियज्ञानां तीर्थानामपि गौतम ॥
अनुव्रतपरा वापि वेदोक्तायुश्च विन्दति ।
गौतमेदं व्रतं तस्मादवश्यं शृणु भक्तितः ॥
नेदं वक्तुं समर्थास्ति फणीन्द्रचतुराननाः ।
कृताद्भुतोत्तमादस्माद्दीर्घायुः प्राप्तवानहम् ॥
व्रतानां नित्यमाम्नातं भक्तिदं कुर्व्वतां सताम् ॥

सूत उवाच ।

शृणुध्वं गौतमाद्येत्थं जानकीजन्मसम्भवम् ।
व्रतस्य व्रतमाहात्म्यं विधानं श्रुतिचोदितम् ।
जगाद सकलं यत्तं मार्कण्डेयो मुनीश्वरः ॥"
इत्यादि श्रीभविष्यपुराणे श्रीसीतानवमीव्रत-माहात्म्यं समाप्तम् ॥ * ॥ स्वर्गगङ्गा । इति मेदिनी ॥ सा तु भद्राश्ववर्षगङ्गा । यथा, श्रीभागवते ५ स्कन्धे । "सीता तु ब्रह्मसदनात् केशवाचलादिगिरिशिखरेभ्योधोऽध प्रस्रवन्ती गन्धमादनकूटंस्तु प्रतिलाभ्यतरेण भद्राश्वं वर्षं प्राच्यां दिशि चारसमुद्रमभिप्रविशति ॥" अपि च ।

मार्कण्डेय उवाच ।

"यत्र देवसभा भूता मेरौ तस्य महागिरेः ।
तत्र जाता देवनदी सीताख्या वचनाद्विधेः ॥
प्लावयित्वा यथा चन्द्रं सीतातोयैर्मनोहरैः ।
चन्द्रं पप्रुर्ब्रह्मवाक्यात् सर्व्वे ते द्विजपौरवः ॥
तदा सीताजलं चन्द्रस्नानयोगाच्च माङ्गलम् ।
भूत्वा निपतितं तस्मिन् हृद्यशीतसलिलके ॥
तद्दिव्यं तदा तोयं तस्मिन् सरसि निर्म्मलम् ।
तद्दृष्ट्वा स्वयं ब्रह्मा विस्मितः साधु तज्जलम् ॥
तद्भूतोच्चलाच्चलात्तादुत्थिता कनकोत्तमा ।
चन्द्रभागेति तन्नाम विधिश्चक्रे स्वयं ततः ।
भार्य्यार्थं सागरस्यान्तु जगाद ब्रह्मसम्भवे ॥"

इति कालिकापुराणे २२ अध्यायः ॥

लक्ष्मीः । उमा । अश्वाधिदेवता । इति नानार्थ-ध्वनिमञ्जरी ॥ मदिरा । इति राजनिर्घण्टः ॥ गङ्गास्रोतः । यथा,—

"गङ्गायान्तु भद्रसोमा महाभद्राथ पाटला ।
तस्याः सीतसि सीता च वङ्क्षुर्भद्रा च कीर्त्तिता ।
तद्वदेवसकनन्दापि शारिणी लक्ष्मणिम्नगा ॥"

इति शब्दमाला ॥

(नदीविशेषः । इति केचित् ॥ यथा, महाभारते । ३ । १८८ । १०० ।

"गाङ्गं शतद्रुं सीताञ्च यमुनामथ कौशिकीम् ।

* * * *

एताश्चान्याश्च सरितः पृथिव्यां या नरोत्तम ।
परिक्रामन् प्रपश्यामि तस्य कुक्षौ महात्मनः ॥")

सीतापतिः, पुं, (सीतायाः पतिः ।) श्रीरामचन्द्रः । इति शब्दरत्नावली ॥

सीतायाःपतिः, पुं, (सीतायाः पतिः । अलुक् समासः ।) श्रीरामचन्द्रः । इति शब्दरत्नावली ॥ (यथा, रामायणटीकायां मङ्गलाचरणे ।

"रामाय रामभद्राय रामचन्द्राय वेधसे ।
रघुनाथाय नाथाय सीतायाःपतये नमः ॥")

सीतालकः, पुं, सतीलकः । इत्यमरटीकायां राय-मुकुटः ॥

सीत्कारः, पुं, (सीत् + कृ + भावे घञ् ।) मनुष्याणां गुणानुरागजशब्दः । (यथा, आर्य्यासप्तशत्याम् । २१६ ।

"गेहिन्या धिक्कुरुतेऽहसमयसीत्कारमीलित-दृग्याणिः ।
बाला कपोलपुलकावलोक्य नाहन्वोऽस्मि शिरसि पदा ॥")

सीतृकृतं, क्ली, (सीत् + कृ + भावे क्तः ।) मनुष्याणां गुणानुरागजशब्दः । यथा,—

"शब्दो गुणानुरागोत्थः प्रणादः सीतृकृतं नृणाम् ॥"

इति हेमचन्द्रः ॥

सीत्यं, क्ली, (सीतया निर्वृत्तमिति । सीता + यत् ।) धान्यम् । इति हेमचन्द्रः ॥

सीत्यं, त्रि, (सीतया मितम् । सीता + "नौवयोधर्म्मेति ।" ४ । ४ । ६१ । इति यत् ।) क्षेत्रचेत्रादि । इत्यमरः । २ । ६ । ८ ॥

सीत्यं, क्ली, आलस्यम् । इति भूरिप्रयोगः ॥

सीधुः, पुं, (शीधुः । पृषोदरादित्वात् शस्य सः ।) मद्यम् । इति शब्दरत्नावली ॥ (यथा, देवीभागवते । ५ । २४ । ६० ।

"अशोकं कुरु राजानं पादघातविकाशितम् ।
वकुलं सीधुसेकेन तथा कुरवकं कुरु ॥")

मद्यभेदः । इत्यमरः । २ । १० । ४२ ॥ यथा,—

"इक्षोः पक्वे रसे सिद्धः सीधुः पक्वरसश्च सः ।
आमेक्षोरेव यः सीधुः स च शीतरसः स्मृतः ॥
सीधुः मकरसः श्रेष्ठः सरागिबलवर्द्धनः ।
वातपित्तकरो हृद्यः क्षेपनो रोचनो हरेत् ।
विबन्धभेदशीफार्शः शोफोदरकफामवान् ।
तस्मादल्पगुणः प्रीतरसः संलेखनः स्मृतः ॥"

इति राजनिर्घण्टः

(यथा च ।

"सीधुः कषायान्लकमाधुरो वा
सन्दीपनो भेदमलापहश्च ।
आमातिसारानिलपित्तशूल
श्लेष्मामयार्शोग्रहणीगदघ्नः ॥"

इति हारीते प्रथमे स्थाने ११ अध्यायः ॥)

सीधुगन्धः, पुं, (सीधोरिव गन्धो यस्य ।) वकुलः । इति शब्दरत्नावली ॥

सीधुपुष्पः, पुं, (सिधुवत् गन्धयुक्तं पुष्पं यस्य ।) कदम्बः । वकुलः । इति राजनिर्घण्टः ॥

सीधुपुष्पी, स्त्री, (सीधुवत् गन्धयुक्तं पुष्पं यस्याः । ङीप् ।) धातकी । इति राजनिर्घण्टः ॥ (धातकीशब्देऽस्या विवरणं ज्ञातव्यम्

सीधुरसः, पुं, (सीधोरिव रसो यस्य ।) आम्रवृक्षः । इति राजनिर्घण्टः ॥

सीधुसंज्ञः, पुं, (सीधोः संज्ञा संज्ञा यस्य ।) वकुलवृक्षः । इति राजनिर्घण्टः ॥

सीध्रं, क्ली, अपानम् । इति केचित् ॥

सीपः, पुं, तर्पणाद्यर्घजलपात्रम् । कोषा इति भाषा । यथा,—

"वस्तुतस्तु यत्रानुद्धृतस्य सीपासंभवात् उद्धृत-पदं हंसादन्येन सीपादिनोद्धृतपरम् । तेन सीपादियुक्तकरतर्पणे तत्रैव जले तिलान् मिश्रयेत् ।" इति गोपालन्यायप्रसाननकृत-विचारनिर्णयः ॥

सीमन्तः, पुं, (सीम्नोऽन्तः । शकन्ध्वादित्वात् साधुः ।) केशेषु वर्त्म । इति हेमचन्द्रः ॥ सिँथि इति भाषा ॥ (यथा महाभारते । १ । ४४ । २ ।

"अपश्यन्त तथा यान्तमाकाशे नागसुत्तमम् ।
सीमन्तमिव कुर्व्वाणं नभसः पद्मवर्च्चसम् ॥")

सीमन्तोन्नयनसंस्कारः । यथा, याज्ञवल्क्यः । १ । ११ ।

"गर्भाधानन्तु पुंसःसवनं स्पन्दनात् पुरा ।
षष्ठेऽष्टमे वा सीमन्तः प्रसवे जातकर्म्म च ॥"

(प्रत्यङ्गविशेषः । यथा, सुश्रुते । ३ । ५ ।

"चतुर्दशैव सीमन्ताः । ते चास्थिसंघातवद्गण-नीया यत्तस्त्वेयुक्ता अस्थिसंघाताः । ये त्वयुक्ताः संघातास्तु खल्वस्थादशैकेषाम् ॥")

सीमन्तकं, क्ली, (सीमन्ते कायति शोभते इति । कै + कः ।) सिन्दूरम् । इति राजनिर्घण्टः ॥

सीमन्तकः, पुं, नरकावासः । यथा,—

"तत्र पञ्चैव नरकावासा सीमन्तकादयः ॥"

इति हेमचन्द्रः ॥

सीमन्तिनी, स्त्री, (सीमन्तोऽस्या अस्तीति । इनिः । ङीप् ।) नारी । इत्यमरः । २ । ६ । २ ॥ (यथा, रामायणे । २ । ३५ । २१ ।

"मास सीमन्तिनी काचित् जनयेत् पुत्रमा-दृशम् ।
सौमित्रे ! योऽयमाख्याता दासु शोकमनन्त-कम् ॥")

सीमन्तोन्नयनं, क्ली, (सीमन्तस्य उन्नयनं उत्तोलनं यत्र ।) संस्कारविशेषः । इति भटाधरः ॥ तद्विधानञ्च यथा,—

अथ सीमन्तोन्नयनम् ।

"यदि पुंसवनं न कृतं तदा तस्मिन्नेव दिने प्रायश्चित्तात्मकमहाव्याहृतिहोमं कृत्वा पुंसवनञ्च कृत्वा सीमन्तोन्नयनं कार्य्यम् । तथा च नारदः ।

'वेदास्तु न कृता; पित्रा संस्कारविधयः क्रमात् ।
कर्त्तव्या भ्रातृभिस्तेषां पैतृकादेव तद्धनात् ॥
अविद्यमाने पित्र्यें स्वांशादुद्धृत्य वा पुनः ।
अवश्यकार्य्याः संस्कारा भ्रातृभिः पूर्वसंस्कृतैः ॥'

क्रमात् भ्रातॄणां संस्काराणाञ्च पौर्व्वापर्य्यक्रमात् भ्रातृक्रमस्तु सोदरविषय एव । विवादे तथा दर्शनात् । छन्दोगपरिशिष्टम् ।

'देवतानां विपर्य्यासे जुहोतिषु कथं भवेत् ।
सर्व्वं प्रायश्चित्तं कृत्वा क्रमेण जुहुयात् पुनः ॥
संस्कारा अतिपत्त्यैरन् स्वकालाच्चेत् कथञ्चन ।
कृत्वैतदेव कुर्व्वीत ये तूपनयनादयः ॥'

एतदित्यनेन सर्व्वं प्रायश्चित्तमनुकृष्टं तच्च प्रागेव विवृतम् । उभयकरणे तन्त्रेणैव भ्रातृकापूजादि ।

'गणशः क्रियमाणे तु भ्रातृभ्यः पूजनं सकृत् ।
सकृदेव भवेत् श्राद्धमादौ न पृथगादिषु ॥'

इति छन्दोगपरिशिष्टात् ॥ * ॥

गोभिलः । अथ सीमन्तोन्नयनं प्रथमे गर्भे चतुर्थे मासि षष्ठेऽष्टमे वा । अथ पुंसवनानन्तरम् । सीमन्तः केशरचनाविशेषः । वाग्ग्रन्थेष्वान्न चतुर्थादिमासाना तुल्यवद्विकल्पः । किन्तु पूर्वपूर्वकालः प्रशस्तः । समर्थस्य चैषायोगात् इति न्यायात् । ततश्च नवममासादौ प्रायश्चित्तं कृत्वैव कर्त्तव्यम् । प्रथमगर्भं इत्युपादानात् । यदि कथञ्चिदकृत एतस्मिन् संस्कारे गर्भान्तरे पुनर्गर्भान्तरे वा सीमन्तोन्नयनं यावन्न बालप्रसवः । इति शूलपाणिलिखितोक्तकालो ग्राह्यः । वृद्धशातातपेऽपि ।

'या नार्य्यकृतसीमन्ता प्रसूते च कथञ्चन ।
त्यक्त्वे निधाय तं बालं पुनः संस्कारमर्हति ॥'

षष्ठे मासेऽष्टमेऽब्दे वा विषमे शुक्लदिनकृतां नन्दभद्रे
तिथौ च
मैत्रे मूले मृगाक्षे करपिशुपवने पौष्णविष्णुत्रियुग्मे ।
पुष्याश्वादित्यरौद्रे युवतिहरिभसे वृश्चिके वापि
लग्ने
चन्द्रे तारादुकूले शुभमपि निधनं स्याच्च
सीमन्तकर्म ॥

लग्नाष्टरन्ध्रहिबुके सबुधे नवांशे पुंसश्च ।
केचिद्वदन्ति सीमन्तं तथा रिक्ततरे तिथौ ॥'

गोभिलः । प्राहुः सप्तिरस्माकृतोऽग्नयेषु दर्भेषु यथादर्शं; प्राप्नुवन्ति उत्तीर्णमेतत् । पश्चात् पतिरवस्थाय युगमन्तर्मोदुम्बरं शूलाट्टयमुभावपाति अथास्यांजलौ दध्न इति । अथ; पश्चात् पतिः स्त्रिया । युनक्ति शूलानि यस्मिन् शूलाट्टुग्रर्थे नीलस्तवके स युगमान् तं मतुवन्तम् । तथा च भट्टनारायणधृतं छन्दोगपरिशिष्टम् ।

'शूलाट्टु नीलमित्युक्तं अथस्तवक उच्यते ।
कपुच्छिकाभितः केशा मूर्द्धि पश्चात् कपुच्छलः ॥'

एतद्वचनं नारायणोपाध्यायेन धृतम् । उडुम्बरभवमौडुम्बरम् । अथमर्च्चावतो दृच्च इति मन्त्रेण भार्य्यायाः कण्ठे बध्नाति ॥ * ॥ अथ सीमन्तमूर्द्धं नयति भूरिति दर्भपिञ्जूलीभिरेव प्रथमं भुव इति द्वितीयं स्वरिति तृतीयम् । अथानन्तरं यत्र सिन्दूरं स्त्री ददाति तं सीमन्तं ललाटोर्द्धं नयति भूरिति मन्त्रेण दर्भपिञ्जूलीभिस्त्रिभिः । एकवारकरणादयावन्युन्नयनानि तावतीभिरेव तिसृभिरित्यर्थः । प्रथमादिपदानि तु याज्ञुतीनां पिञ्जूलीनाञ्च पृथङ्नियोगार्थम् । पिञ्जूली पवित्रम् । तथा च छन्दोगपरिशिष्टम् ।

'अनन्तर्गर्भिणं साग्रं कौशं द्विदलमेव च ।
प्रादेशमात्रं विज्ञेयं पवित्रं यत्र कुत्रचित् ।
एतदेव हि पिञ्जूलाः लक्षणं समुदाहृतम् ॥'

गोभिलः । अथ वीरतरेण येनादितेरित्यृचा । वीरास्तरन्त्यनेन युग्मिति वीरतरः शरः ॥ तथा च छन्दोगपरिशिष्टम् ।

'श्वाविच्छलाका शूललो तथा वीरतरः शरः ।
तिलतण्डुलसम्पाकः क्षरः सोऽभिधीयते ॥'

ततश्च शरेण येनादितेरिति मन्त्रेण सीमन्तमूर्द्धं नयतीति शेषः । त्रिः श्वेतया शूलल्या यासे वाके सुमतय इति स्थानत्रितये शुक्लेन शेषाजन्तुकण्टकेन यासे इति मन्त्रेण सीमन्तमूर्द्धं नयतीति शेषः । क्षरः स्थालीपाक उत्तरघृतसमवेक्षयेत् । क्षर उक्तः । स्थालीपाकक्षरः स उपरि दत्तघृतक्षं वध्वाः प्रदर्शयेत् । स्थालीपाकपदं चरुस्थाल्या क्षरस्य अपवार्थम् । मनुष्यार्थत्वात् हिरण्यप्रक्षालनम् । ततश्च यः कश्चिन्महानसे अग्नयित्वा स्थापयेत् । किम्पश्यसीत्युक्ता प्रजामिति वाचयेत् किं पश्यसीति पतिरुक्ता प्रजामित्यादि मन्त्रं गर्भिणीं वाचयेत् । तं सा स्वयं शृणोति । तमेवेच्छितं क्षरम् । वीरसूर्जीवपत्नीति ब्राह्मणो मङ्गलादिभिर्व्याहृतिभिरुपासीरन् । वीरान् विक्रान्तान् पुत्रान् सूत इति वीरसूस्त्वं भवेति वाचयेत् प्रतिपदं स्यात् । जीवतो दीर्घायुषः पुत्रान् सूत इति जीवसूः जीवतः पत्नी जीवपत्नी अधिविधेयर्थः । एवं प्रकाराभिर्व्याहृतिभिरनुनयेत् । क्रमश्च महाव्याहृतिभिर्हुत्वा औदुम्बरफलस्तवकं कण्ठे बध्वा प्रजामिति वाचयेदित्यन्तं तन्त्रं कृत्वा याज्ञुतिभिर्हौमिकं समापयेत् ततो ब्राह्मण्य उपासीरन् ।" इति संस्कारतत्त्वम् ॥

सीमा,[त्] स्त्री, (सीयते इति । सि + "नामन्सीमन्व्योमन्निति ।" उणा० ४।१५०।

इति मनिन्प्रत्ययेन साधुः । "डाबुभाभ्यामन्यतरस्याम् ।" ४।१।१३। इति ङाप् ।) ग्रामादीनामवधारितान्तभागः । सीमाना इति भाषा । तत्पर्य्यायः । मर्य्यादा २ अवधिः ३ आघाटः ४ । इति भटाधरः ॥ (यथा, मनुः । ८ । २५३—२५४ ।

"यदि संशय एव स्यात् लिङ्गानामपि दर्शने ।
साक्षिप्रत्यय एव स्यात् सीमावादविनिर्णयः ॥
ग्रामीयककुलानाञ्च समक्षं सीम्नि साक्षिणः ।
प्रष्टव्याः सीमलिङ्गानि तयोश्चैव विवादिनोः ॥")

स्थितिः । (यथा, माघे । ३ । ५७ ।

"यस्यामजिह्मा मरुतीमपङ्क्तः
सिमागमत्यायतयोऽलचन्तः ।
जनैरजातस्खलनैर्न यातु
द्वयेऽप्यमुष्यन्त विनीतमार्गाः ॥")

क्षेत्रम् । अश्वकोषः । इति मेदिनी ॥ (यथा,—

"केशेषु चमरी हन्ति सीम्नि पुच्छकलो हतः ॥"

इति सिद्धान्तकौमुदी । २ । ३ । ३६ ॥)

वेला । इति विश्वः ॥

सीमाविवादः, पुं, (सीमायाः विवादः ।) ग्रामादीनां सीमाविषयककलहः । यथा । बहुगा सीमाविवादनिर्णय उच्यते ।

"सीम्नो विवादे क्षेत्रस्य सामन्ताः स्थविराश्च ये ।
गोपाः सीमाक्षयाणा ये सर्व्वे च वनगोचराः ।
नयेयुरेते सीमानं स्वलाङ्गारतुषद्रुमैः ।
सेतुवल्मीकनिम्नास्थिक्षेत्राद्यैरुपलक्षिताम् ॥"

ग्रामद्वयस्वस्वामिनः क्षेत्रस्य सीम्नो विवादे तथैकग्रामान्तर्व्वर्त्तिक्षेत्रमर्य्यादाविवादे च सामन्ताद्याः स्वलाङ्गारादिभिः पूर्व्वकृतैः सीमालक्षणैरुपलक्षितां चिह्नितां सीमां नयेयुः निश्चिनियुः । सीमा क्षेत्रादिमर्य्यादा सा चतुर्व्विधा । जनपदसीमा १ ग्रामसीमा २ क्षेत्रसीमा ३ गृहसीमा ४ चेति । सा च यथासम्भवं प्रमाणलक्षणा । तदुक्तं नारदेन ।

"ध्वजिनी मत्स्यिनी क्षेत्रे नैधानी भयवर्जिता ।
राजशासननीता च सीमा पञ्चविधा स्मृता ॥"

ध्वजिनी वृक्षादिलक्षिता । वृक्षादीनां प्रकाशकत्वेन ध्वजतुल्यत्वात् । मत्स्यिनी सलिलवती मत्स्यशब्दस्य स्वधारजलसङ्गमत्वात् । नैधानी निखाततुषाङ्गारादिमती । तेषां निखातत्वेन निधानतुल्यत्वात् । भयवर्जिता व्यर्थिप्रत्यर्थिपरस्परसम्मतिपत्तिनिर्म्मिता । राजशासननीता । ज्ञातचिह्नाभावे राज्ञेच्छया निर्म्मिता । एवम्भूतायां घोरा विवादः संभवति । यथाह कात्यायनः ।

"आधिक्यं न्यूनता चापि अस्तिनास्तित्वमेव च ।
अभोगभुक्तिः सीमा च षड्भूवादस्य हेतवः ।"

इति । तथा हि । ममात्र पशुनिबन्धनाया भूमेरधिका भूरस्तीति केनचिदुक्ते पशुनिबन्धनेन नाधिक्यमधिक्ये विवादः । पशुनिबन्धना मदीया भूरित्युक्ते ततो न्यूनेति न्यूनतायाम् । पशुनिबन्धनो ममांश इत्युक्ते अंश एव नास्तीत्यस्ति-

नास्तित्वविवादः सम्भवति । मदीया भूः प्राग्विद्यमानभोगेव भुज्यत इत्युक्तेन सत्ता चिरन्तनेव मे भुक्तिरित्यभोगभुक्तौ विवादः । इयं मर्य्यादेयमिति सीमाविवाद इति षट्प्रकार एव विवादः सम्भवति । षट्प्रकारेऽपि भूविवादे मुख्यार्थाभ्यां सीमाया अपि निर्णीयमानत्वात् सीमानिर्णयप्रकरणे तस्यान्तर्भावः । समन्ताद्भवाः सामन्ताः । चतसृषु दिक्षुनन्तरा ग्रामादयस्ते च प्रतिसीमं व्यवस्थिताः ।

"ग्रामो ग्रामेषु सामन्तः चैत्यं चैत्यस्य कीर्त्तितम् ।
गृहं गृहस्य निर्दिष्टं समन्तात् परिरभ्य हि ॥"

इति कात्यायनवचनात् । ग्रामादिशब्देन तत्स्थाः पुरुषा लक्ष्यन्ते । ग्रामः पलायत इति यथा । सामन्तग्रहणञ्च तत्संसक्तानुपलक्षणार्थम् । उक्तञ्च कात्यायनेन ।

"संसक्तकास्तु सामन्तास्तत्संसक्तास्तथोत्तराः ।
संसक्तसक्तसंसक्ताः पञ्चाकाराः प्रकीर्त्तिताः ॥"

इति । स्थविरा वृद्धाः । आदिग्रहणेन मौलोद्धृतयोर्ग्रहणम् । वृद्धादिलक्षणञ्च तेनैवोक्तम् ।

"निघ्नाद्यमानं येदृष्टं तत् कार्य्यं तद्गुणान्वितैः ।
वृद्धा वा यदि वाऽवृद्धास्ते च वृद्धाः प्रकीर्त्तिताः ॥
ये तत्र पूर्वं सामन्ताः पश्चादेशान्तरं गताः ।
तन्मूलत्वात्तु ते मौला ऋषिभिः परिकीर्त्तिताः ॥
उपश्रवणसम्भोगकार्य्याख्यानोपचिन्हिताः ।
उद्धरन्ति पुनर्यस्माद्धतास्ते ततः स्मृताः ॥"

गोपा गोचारकाः ।

"सीमाज्ञयाणाः सीमासंनिधिनश्चैत्यकर्यकाः ।"

सर्व्वे च वनगोचरा वनचारिणो व्याधादयस्ते च मनुनोक्ताः ।

"व्याधान् शाकुनिकान् गोपान् केवर्त्तान्
मूलखातकान् ।
व्यालग्राहानुञ्छवृत्तीनन्यांश्च वनगोचरान् ॥"

स्थलसन्ततो भूप्रदेशः । अङ्गारोऽर्म्मरुच्छिरम् । तृणा धान्यलवः । द्रुमा न्यग्रोधादयः । सेतुर्जलप्रवाहबन्धः । चैत्यं पाषाणादिबन्धः । आदिग्रहणेन देवकुलकादीनां ग्रहणम् । एतानि च प्रकाशाप्रकाशभेदेन द्विःप्रकाराणि । तथा च मनुः ।

"सीमावृक्षांस्तु कुर्व्वीत न्यग्रोधाश्वत्थकिंशुकान् ।
शाल्मलीन् शालतालांश्च क्षीरिणश्चैव पादपान् ॥
गुल्मान् वेणूंश्च विविधान् शमीं वल्लीं स्थलानि च ।
शरान् कुब्जकगुल्मांश्च तथा सीमा न नश्यति ॥
तडागानुदपानानि वाप्यः प्रस्रवणानि च ।
सीमासन्धिषु कार्य्याणि देवतायतनानि च ॥"

इति प्रकाशगूढानि ॥

"उपच्छन्नानि चान्यानि सीमालिङ्गानि कारयेत् ।
सीमाज्ञाने नृणां वीक्ष्य निर्णयं लोकविप्लवम् ॥
अश्मनोऽस्थीनि गोवालांस्तुषान् भस्मकपालिकाः ।
करीषमिष्टकाङ्गारशर्करावालुकास्तथा ॥
यानि चैवंप्रकाराणि कालाङ्गूर्मिर्न भक्षयेत् ।
तानि सन्धिषु सीमाया अप्रकाशानि कारयेत् ॥
एतैर्लिङ्गैर्नयेत् सीमां राजा विवदमानयोः ॥"

प्रच्छन्नलिङ्गानि एतैः प्रकाशाप्रकाशरूपैर्लिङ्गैः सामन्तादिप्रदर्शितैः सीमां प्रति विवदमानयोः सीमानिर्णयं कुर्य्याद्राजा ॥ * ॥ यदा पुनश्चिह्नानि न सन्ति विद्यमानानि वा लिङ्गालिङ्गतया सन्दिग्धानि तदा निर्णयोपायमाह ।

"सामन्ता वा समग्रामाश्चत्वारोऽष्टौ दशापि वा ।
रक्तस्रग्वसनाः सीमां नयेयुः क्षितिधारिणः ॥"

सामन्ताः पूर्व्वोक्तलक्षणाः । समग्रामाश्चत्वारोऽष्टौ दशापि वा इत्येवं समसंख्याः प्रत्यासन्नग्रामीणाः । रक्तसस्रिणो रक्ताम्बरधराः मृद्धारोपितक्षितिखण्डाः सीमानं नयेयुः प्रदर्शयेयुः । सामन्ता वेति विकल्पाभिधानं स्थलपरीक्षासाध्यभिप्रायम् । यथाह मनुः ।

"साक्षिप्रत्यय एव स्यात् सीमावादविनिर्णये ।"

तच्च साक्षित्वं निर्णेतृत्वं सुखं तदभावे सामन्तानाम् । तदुक्तम् ।

"साक्ष्यभावे तु चत्वारो ग्रामाः सीमन्तवासिनः ।
सीमाविनिर्णयं कुर्युः प्रयता राजसन्निधौ ॥"

तदभावे ततसंसक्तादीनां निर्णेतृत्वम् । यथाह कात्यायनः ।

"स्वार्थसिद्धौ प्रदुष्टेषु सामन्तेष्वर्थगौरवात् ।
ततसंसक्तेषु कर्त्तव्य उद्धारो नात्र संशयः ॥
संसक्तसक्तदोषे तु ततसंसक्ता प्रकीर्त्तिताः ।
कर्त्तव्या न प्रदुष्टास्तु राजा धर्म्मं विजानता ॥"

सामन्ताद्यभावे मौलादयो ग्राह्याः । तेषामभावे सामन्ता मौलवृद्धोद्धृतादयः । स्थावरे षट्प्रकारेऽपि कार्य्या नात्र विचारणेति कात्यायनेन क्रमविधानात् । एते च सामन्तादयः संख्यागुणातिरेकेण सम्भवन्ति ।

"सामन्ताः साधनं पूर्व्वं निर्दोषाः स्युर्गुणान्विताः ।
द्विगुणास्तूत्तरा ज्ञेयास्ततोऽन्ये त्रिगुणा मताः ॥"

इति स्मरणात् ॥ * ॥

ते च साक्षिणः सामन्तादयश्च स्वैः स्वैः प्रभुभिः स्थापिताः सन्तः सीमां नयेयुः ।

"शिरोभिस्ते गृहीत्वोर्व्वीं सस्रिणो रक्तवाससः ।
नयन्तैः स्थापिताः स्वैः स्वैर्नयेयुस्ते समञ्जसम् ॥"

इति स्मरणात् ॥

नयेयुरिति बहुवचनं द्वयोर्निरासार्थं नैकस्य ।

"एकश्चेद्वृत्तवेत् सीमां सोपवासः सवस्त्रवेत् ।
रक्तमाल्याम्बरधरो भूमिमादाय मूर्द्धनि ॥"

इति नारदेनैकस्याभ्यनुज्ञानात् । यस्तु ।

"नैकः सवस्त्रवेत् सीमां नरः प्रत्ययवानपि ।
गुरुत्वादस्य कार्य्यस्य क्रियेयं बहुषु स्थिता ॥"

इत्येकस्य निषेधः । सं उभयानुमतधर्म्मविद्व्यतिरिक्तविषय इत्यविरोधः ॥ * ॥

स्थलादिचिह्नाभावेऽपि साक्षिसामन्तादीनां सीमाज्ञान उपायविशेषो नारदेनोक्तः ।

"निम्नगापर्व्वतोत्कूलनष्टचिह्नासु भूमिषु ।
तत्प्रदेशानुमानाच्च प्रमाणाज्ञोगदर्शनात् ॥"

निम्नगाया नद्या अपर्व्वतेनापर्व्वतरणेनोत्कूलस्थानि स्वस्थानात् प्रच्युतानि नष्टानि वा लिङ्गानि यासु मर्य्यादाभूमिषु तत्र तत्प्रदेशानुमानात् उत्कूलनष्टचिह्नानां प्राचीनप्रदेशानुमानाद् ग्रामादारभ्य सहस्रदण्डपरिमितं चैत्यमस्य ग्रामस्य पश्चिमे भाग इत्येवं विधानात् प्रमाणाद्वा प्रत्यर्थिसमक्षमविप्रतिपन्नायाः स्वार्त्तकालोपलक्षितेर्भुक्तेर्वा निश्चितुः । दृष्टस्मृतिना चात्र विशेषो दर्शितः ।

"आगमस्य प्रमाणस्य भोगस्य कालस्य नाम च ।
भूभागलक्षणस्यैव ये विदुस्तत्र साक्षिणः ॥"

एते च साक्षिसामन्तादयः प्रभुभिः स्थापिताः सन्तः कुलादिसमक्षं राज्ञा प्रष्टव्याः । यथाह मनुः ।

"ग्रामेयककुलानान्तु समक्षं सीम्नि साक्षिणः ।
प्रष्टव्याः सीमलिङ्गानि तयोश्चैव विवादिनोः ॥
ते पृष्टाः साक्ष्यादयः समस्ता ऐकमत्येन सीम्नि निर्णयं कुर्युः । तैर्निर्णीतां सीमां तत्प्रदर्शिनचकलिङ्गयुक्तां साक्ष्यादिनामान्वितास्ताम्रशासनैरर्थार्थं पत्रे समारोपयेत् । उक्तञ्च मनुना ।

"ते पृष्टास्तु यथा ब्रूयुः सामन्ताः सीम्नि निर्णयम् ।
निबध्नीयात्तथा सीमां सर्व्वांस्तांश्चैव नामतः ॥"

एतेषां साक्षिसामन्तप्रभृतीनां सीमाचंक्रमणदिनादारभ्य यावत् त्रिपक्षं राजदैविकं व्यसनं चेन्नोपपद्यते तदा तत्प्रदर्शनात् सीमानिर्णयः । अयञ्च राजदैविकव्यसनावधिः कात्यायनोक्तः ।

"सीमाचंक्रमणे कोशे पादसर्पे तथैव च ।
त्रिपक्षपञ्चसप्ताहं दैवराजिकमिष्यते ॥"

इति ॥

यदा त्वमीषां उक्तसाक्ष्यवचसां त्रिपक्षाभ्यन्तरे रोगादिर्दृश्यते । अथवा प्रतिवादिनिर्दिष्टेभ्योऽधिकसंख्यागुण-साक्ष्यन्तरविरुद्धवचनता तदा ते दण्ड्याभाषितया दण्डनीयाः । तदाह ।

"अनृते तु पृथग्दण्ड्या राज्ञा मध्यमसाहसम् ॥"

अनृते मिथ्यावदने निमित्तभूते सति सर्व्वे सामन्ताः प्रत्येकं मध्यमसाहसेन चत्वारिंशदधिकेन पणशतेन दण्डनीयाः । सामन्तविषयता चास्य साक्ष्यमौलादीनां स्थलान्तरे दण्डान्तरविधानादवगम्यते । तथा च मनुः ।

"यथोक्तेन नयन्तस्ते पूयन्ते सत्यसाक्षिणः ।
विपरीतं नयन्तस्तु दाप्याः स्युर्द्विशतं दमम् ॥"

नारदोऽपि ।

"अथ चैदनृतं ब्रूयुः सामन्ताः सीम्नि निर्णये ।
सर्व्वे पृथक् पृथक् दण्ड्या राज्ञा मध्यमसाहसम् ॥"

सामन्तानां मध्यमसाहसं दण्डमभिधाय ।

"ज्ञेयाश्चैदनृतं ब्रूयुर्विप्रयुक्ता भूमिकर्म्मणि ।
प्रत्येकन्तु तदन्यांस्ते विनेयाः पूर्व्वसाहसम् ॥"

तत्संयुक्तादिषु प्रथमं साहसमुक्तवान्। मौलादीनामपि तमेव दण्डमाह।
"मौलवृद्धादयस्त्वन्ये दण्डगत्या पृथक् पृथक्।
विनेयाः प्रथमेनैव साहसेनावृते स्थिताः॥"
इति।
आदिग्रहणेन गोपग्राकुनिकव्याधवनगोचराणां ग्रहणम्॥*॥ यद्यपि ग्राकुनिकादीनां पापरतत्वाल्लिङ्गदर्शन एवोपयोगो न साक्षात्सीमानिर्णये तथापि लिङ्गदर्शन एव रूपाभाषित्वसम्भवात् दण्डविधानमुपपद्यत एव। अवृते तु पृथगदण्ड्या इत्येतद्दण्डविधानमज्ञानविषयम्।
"वक्तृनान्तु गृहीतृणां न सर्वे निर्णयं यदि।
कुर्युर्भयाद्वा लोभाद्वा दण्ड्यास्तूत्तमसाहसम्॥"
इति ज्ञानविषये साक्ष्यादीनां कात्यायनेन दण्डान्तरविधानात्॥*॥ तथा साक्षिवचनभेदेऽप्ययमेव दण्डस्तेनोक्तः। कीर्त्तिते यदि भेदः स्यादण्ड्यास्तूत्तम-साहसमिति। एवमज्ञानादिना अवृतवदने साक्ष्यादीन् दण्डयित्वा पुनः सीमाविचारः प्रवर्त्तयितव्यः। अज्ञानोक्तौ दण्डयित्वा पुनः सीमां विचारयेदित्युक्तं।
"त्यक्त्वा दुष्टांस्तु सामन्तानन्यान् मौलादिभिः
सह।
मंमिश्रः कारयेत् सीमामेवं धर्म्मविदो विदुः॥"
इति निर्णयप्रकारस्तेनैवोक्तः॥*॥ यदा पुनः सामन्तप्रभृतयो ज्ञातारश्चिह्नानि च न सन्ति तदा कथं निर्णय इत्यत आह।
"अभावे ज्ञातृचिह्नानां राजा सीम्नः प्रवर्त्तिता"
ज्ञातृणां सामन्तादीनां लिङ्गादीनाञ्च। वृक्षादीनामभावे राजैव सीम्नः प्रवर्त्तिता प्रवर्त्तयिता। अन्तर्भावितोऽत्र ण्यर्थः। ग्रामद्वयमध्यवर्त्तिनोर्वा विवादास्पदीभूतां भुवं सभं प्रविभज्यास्येयं भूरस्येयमित्युभयोः समर्प्य तन्मध्ये सीमालिङ्गानि कुर्य्यात्। यदा तस्यां भूमावन्यतरस्योपकारातिशयो दृश्यते तदा तस्यैव ग्रामस्य सकलां भूः समर्पणीया। यथाह मनुः।
"सीमायामविषह्यायां स्वयं राजैव धर्म्मवित्।
प्रदिशेद्भूमिमेकेषामुपकारादिभिः स्थितिः॥"*॥
असह्यामप्यतङ्गायामस्याः स्खलेर्न्यायस्खलतां द्योतयितुमतिदेशमाह।
"पारामायतनग्रामनिपानोद्यानवेश्मसु।
एष एव विधिर्ज्ञेयो वर्षाम्बुप्रेक्षणादिषु॥"
आरामः पुष्पफलोपचयहेतुः भूभागः। आयतनं निवेशनं पलालकूटार्थं विभक्तो प्रदेशः ग्रामः प्रसिद्धः। ग्रामग्रहणञ्च नगरादुपलक्षणम्। निपानं पानीयस्थानं कूपवापीप्रभृतिकम्। उद्यानं क्रीड़ार्थो भूमिः। वेश्म गृहम्। एतेष्वारामादिष्वयमेव सामन्तसाक्ष्यादिलक्षणो विधिर्ज्ञातव्यः। तथा प्रवर्षणोद्भूतेषु जलप्रवाहेषु जनयोर्द्वयोर्मध्ये न जलौघः प्रवहत्यनयोर्वैत्थं प्रकारे विवादे आदिग्रहणात् प्रासादादिष्वपि प्राचीन एव विधिर्ज्ञेयः वेदितव्यः।
तथा च कात्यायनः।
"क्षेत्रकूपतड़ागानां केदाराराममेरपि।
गृहप्रसादावसथनृपदेवगृहेषु च॥" इति॥*॥
सीमानिर्णयमुक्त्वा तत्प्रसङ्गेन मर्य्यादाप्रभेदनादौ दण्डमाह।
"मर्य्यादायाः प्रभेदे तु सीमातिक्रमणे तथा।
क्षेत्रस्य हरणे दण्डो अधमोत्तममध्यमाः॥"
अनेकक्षेत्रव्यवच्छेदिका साधारणी भूमिर्मर्य्यादा तस्याः प्रकर्षेण भेदने सीमातिक्रमणे सीमामतिलङ्घ्य कर्षणे क्षेत्रस्य च भयादिप्रदर्शनेन हरणे यथाक्रमेणाधमोत्तममध्यमदण्डा वेदितव्याः। क्षेत्रग्रहणञ्च गृहारामाद्युपलक्षणार्थम्। यदा पुनः स्वीयभान्त्या क्षेत्रादिकमपहरति तदा दिशतो दमो वेदितव्यः॥ यथाह मनुः।
"गृहं तड़ागमारामं क्षेत्रं वा भीषया हरन्।
शतानि पञ्च दण्ड्यः स्यादज्ञानाद्दिशतो दमः॥"
इति॥
अपह्रियमाणक्षेत्रादि भूयस्त्वपर्य्यालोचनया कदाचिदुत्तमोऽपि दण्डः प्रयोक्तव्यः। अत एवाह।
"वधः सर्व्वस्वहरणं पुरान्निर्वासनाङ्कने।
तदङ्गच्छेद इत्युक्तो दण्ड उत्तमसाहसः॥"
इति॥*॥
यः पुनः परक्षेत्रे सेतुकूपादिकं प्रार्थनया अर्थदानेन वा लब्धानुज्ञो निर्मातुमिच्छति तं निषेधन्नः क्षेत्रस्वामिन एव दण्ड इत्यत आह।
"न निषेधोऽस्त्यवाधस्तु सेतुः कल्याणकारकः।
परभूमिं हरन् कूपः स्वल्पक्षेत्रोऽपि बहूदकः॥"
परकीयां भूमिमपहरन्नाप्ययमपि सेतुर्जलप्रवाहवन्नः क्षेत्रस्वामिना न प्रतिषेध्यः स चेदीदृगुपकारको बहूपकारकश्च भवति। कूपश्चास्यक्षेत्रस्यापित्वेनाल्पबाधो बहूदकत्वेन बहूपकारको नैव निवारणीयः। कूपग्रहणञ्च वापीपुष्करिण्याद्युपलक्षणार्थम्। यदा पुनरसौ सर्व्वक्षेत्रवर्त्तितया बहुबाधो नद्यादिसमीपक्षेत्रवर्त्तितया वा अल्पोपकारकस्तदासौ निषेध्य इत्यर्थादुक्तं भवति॥*॥ सेतोश्च वैविध्यमुक्तं नारदेन।
"सेतुश्च द्विविधो ज्ञेयः खेयो बन्ध्यस्तथैव च।
तोयप्रवर्त्तनात् खेयो बन्धः स्यात्रिवर्त्तनात्॥"
इति॥
यदा त्वन्यनिर्म्मितं सेतुं भेदनादिना नष्टं स्वयं संस्करोति तदा पूर्व्वस्वामिनं तदंशग्रहं वा सृष्ट्वैव संस्कुर्य्यात्। यथाह नारदः।
"पूर्व्वप्रवृत्तसेतुस्तमदृष्ट्वा स्वामिनन्तु यः।
सेतुं प्रवर्त्तयेत् कश्चित् न स तत्फलभाक् भवेत्॥
नष्टे तु स्वामिनि पुनस्तदंशे वापि मानवे।
राजानमामन्त्र्य ततः कुर्य्यात् सेतुप्रवर्त्तनम्॥"
इति॥*॥
क्षेत्रस्वामिनं प्रति उपदिष्टमिदानीं सेतोः प्रवर्त्तयितारं प्रति आह।
"स्वामिने योऽनिवेद्यैव क्षेत्रे सेतुं प्रवर्त्तयेत्।
उत्पन्ने स्वामिनो भोगस्तदभावे महीपतेः॥"
क्षेत्रस्वामिनमनभ्युपगम्य तदभावे राजानं वा यः परक्षेत्रे सेतुं प्रवर्त्तयत्यसौ न फलभागभवत्यपि तु तदुत्पन्ने फले क्षेत्रस्वामिनो भोगस्तदभावे राज्ञः। तस्मात् प्रार्थनयार्थदानेन वा क्षेत्रस्वामिनं तदभावे राजानं वाभ्युपगम्यैव परक्षेत्रे सेतुः प्रवर्त्तनीय इति तात्पर्य्यार्थः॥*॥
क्षेत्रस्वामिना सेतुर्न प्रतिषेध्य इत्युक्तमिदानीं तस्यैव प्रसक्तानुप्रसक्त्या कांचिदिध्यन्तरमाह।
"फालाहृतमपि क्षेत्रं न कुर्य्यादृणो न कारयेत्।
सं प्रदाप्यः कृष्टफलं क्षेत्रमन्येन कारयेत्॥"
यः पुनः क्षेत्रस्वामिनः पार्श्वेऽहमिदं क्षेत्रं क्षमामि इत्यङ्गीकृत्य पश्चादुत्सृजति न चान्येन कर्षयति तच्च क्षेत्रं यद्यपि फलाहृतमीषद्भवेन विदारितं न सम्यग्बीजवापार्हं तथापि तस्याकृष्टस्य फलं यावत्तत्रोत्पत्तार्हं सामन्तादिकल्पितं तावदसौ कर्षको दापनीयः। तच्च क्षेत्रं पूर्व्वकर्षकादुच्छिद्यान्येन कारयेत्। इति सीमाविवादप्रकरणम्। इति मिताक्षरा॥*॥ अपि च।
"सीमां प्रति समुत्पन्ने विवादे ग्रामयोर्द्वयोः।
ज्येष्ठे मासि नयेत् सीमां सुप्रकाशेषु सेतुषु॥
सीमावृक्षांश्च कुर्व्वीत न्यग्रोधाश्वत्थकिंशुकान्।
शाल्मलीन् शालतालांश्च क्षीरिणश्चैव पादपान्॥
गुल्मान् वेणूंश्च विविधान् शमीवल्ली स्थलानि च।
शरान् कुब्जकगुल्मांश्च तथा सीमा न नश्यति॥
तड़ागान्युदपानानि वाप्यः प्रस्रवणानि च।
सीमासन्धिषु कार्य्याणि देवतायतनानि च॥
उपच्छन्नानि चान्यानि सीमालिङ्गानि कारयेत्।
सीमाज्ञाने नृणां वीक्ष्य नित्यं लोके विपर्य्ययम्॥
अश्मनोऽस्थीनि गोवालान् तुषान् भस्म कपालिकाः।
करीषमिष्टकाङ्गारान् शर्करा वालुकास्तथा॥
यानि चैवं प्रकाराणि कालाद्भूमिर्न भक्षयेत्।
तानि सन्धिषु सीमायामप्रकाशानि कारयेत्॥
एतैर्लिङ्गैर्नयेत् सीमां राजा विवदमानयोः।
पूर्व्वभुक्त्या च सततमुदकस्यागमेन च॥
यदि संशय एव स्यात् लिङ्गानामपि दर्शने।
साक्षिप्रत्यय एव स्यात् सीमावादविनिर्णये॥
ग्रामीयककुलानाञ्च समक्षं सीम्नि साक्षिणः।
प्रष्टव्याः सीमलिङ्गानि तयोश्चैव विवादिनोः॥
ते दृष्टास्तु तथा ब्रूयुः समन्ताः सीम्नि निश्चयम्।
निबन्धीयात्तथा सीमां सर्व्वांस्तांश्चैव नामतः॥
शिरोभिस्ते गृहीत्वोर्व्वीं सस्रिणो रक्तवाससः।
सुकृतैः प्रापिताः स्वैः स्वैर्नयेयुस्ते समक्षयम्।
प्रयोक्तेन नयन्तस्ते पूजनीयाः सदा साक्षिणः।
विपरीतं नयन्तस्तु दाप्याः स्युर्दिगुणं दमम्॥
साक्ष्यभावे तु चत्वारो ग्रामाः सामन्तवासिनः।
सीमाविनिर्णयं कुर्युः प्रयता राजसन्निधौ॥
सामन्तानामभावे तु मौलानां सीम्नि साक्षिणाम्।
इमानप्युपयुञ्जीत पुरुषान् वनगोचरान्॥

खदोह्या, स्त्री, (सुखेन दोह्या दोहनयोग्या ।) सुखमंदोह्या गौः । इति हेमचन्द्रः ॥

सुखभाक् [ज्] त्रि. सुखी । सुखं भजते इति । षाञ्जभवहसहो विग् । इत्यनेन सुखशब्दपूर्व्वक-भजधातोर्विग्प्रत्ययेन निष्पन्नः । इति मुग्ध-बोधव्याकरणम् ॥ (यथा, हरिवंशे । ४७ । ५ ।

"निर्व्वैराः क्षितिपाः सुखभाजः
संहृष्टाश्च जना गतरोगाः ॥")

दृष्टपरिष्वङ्गः । इति महाभारते मोक्षधर्म्मः ॥

सुखमोदा, स्त्री, (सुखकरो मोदो यस्याः ।) सल्लकीवृक्षः । इति राजनिर्घण्टः ॥

सुखरात्रिः, सुखरात्रिका, } स्त्री, (सुखकरी रात्रिर्यस्या-मिति । पक्षे कप् ।) दीपान्वितामावास्यारात्रिः । तद्विधानं यथा, ज्योतिषे ।

"तुलाराशिगते भानौ अमावास्यां नराधिपः ।
स्नात्वा देवान् पितॄन् भक्त्या संपूज्याथ प्रणम्य च ॥
कृत्वा तु पार्व्वणश्राद्धं दधिक्षीरगुडादिभिः ।
ततोऽपराह्णसमये घोषयेन्नगरे नृपः ।
लक्ष्मीः संपूज्यतां लोका उल्काभिश्चापि वेष्टताम् ॥"*॥

दर्शदेये प्रदोषाद्याप्ता निर्णयः ।

"तुलासंस्थे सहस्रांशौ प्रदोषे भूतदर्शयोः ।
उल्काहस्ता नराः कुर्युः पितॄणां मार्गदर्शनम् ॥"
इति ज्योतिषात् ॥

उभयतः प्रदोषप्राप्तौ परदिन एव युग्मात् ।

"दर्शैकरजनीयोगो दर्शस्य स्यात् परेऽहनि ।
तदा विहाय पूर्व्वेद्युः परेऽह्नि सुखरात्रिका ॥"
इति ज्योतिर्व्वचनाच्च ॥

उभयत्र प्रदोषाणाप्राप्तावपि उल्कादानं परदिने पूर्व्वोक्तपार्व्वणानुरोधात् ।

"भूतार्हे ये प्रकुर्व्वन्ति उल्कागृहमचेतसः ।
निराशाः प्रेतरो यान्ति शापं दत्त्वा सुदारुणम् ॥"
इति ज्योतिर्व्वचनाच्च ॥ * ॥

अत्रैव लक्ष्मीः पूर्व्वाह्णे रात्रौ पूज्या ।

"अमावास्या यदा रात्रौ दिवाभागे चतुर्दशी ।
पूजनीया तदा लक्ष्मीर्निशेया सुखरात्रिका ॥"
इति ज्योतिर्व्वचनात् ॥ * ॥

उल्कागृहणादिपिशाचलक्ष्यत्वात् प्राचीनावीतिना दक्षिणासुखेन कर्त्तव्यम् । तथा च मनुः ।

"प्राचीनावीतिना सव्यमप्रसव्यमतन्द्रिता ।
पित्र्यमानिधनात् कार्य्यं विधिवद्भूतिमिच्छता ॥"

नक्त भक्षणमन्त्रः ।

"गृह्णाम्युल्कहस्तानाञ्च भूतानां भूतदर्शयोः ।
उल्कज्योतिषा देहं दहेयं योगवह्निना ॥"

दानमन्त्रस्य ।

"अग्निदग्धाश्च ये जीवा येऽप्यदग्धाः कुले मम ।
उल्कज्योतिषा दग्धास्ते यान्तु परमां गतिम् ॥"

पितर्व्वसनमन्त्रः ।

"धर्म्मलोकं परित्यज्य आगता ये महालये ।
उल्कालक्ष्योतिषा वर्त्म प्रपश्यन्तो व्रजन्तु ते ॥"*

ब्रह्मपुराणम् ।

"अमावास्यां यदा देवाः कार्त्तिके मासि केशवात् ।
अभयं प्राप्य सुप्राप्य क्षीरोदार्णवमानुषु ॥
लक्ष्मीदैत्यभयान्मुक्ता सुखं सुप्तास्तदोदरे ।
चतुर्युगसहस्रान्ते ब्रह्मा स्वपिति पद्मजे ॥
अतोऽत्र विधिवत् कार्य्या मनुष्यैः सुखरात्रिका ।
दिवा तत्र न भोक्तव्यमते बालातुराद्यनात् ॥
प्रदोषसमये लक्ष्मीं पूजयित्वा यथाक्रमम् ।
दीपवृक्षास्तथा कार्य्या भक्ष्या देवगृहेष्वपि ॥
चतुष्पथश्मशानेषु नदीपर्व्वतसानुषु ।
वृक्षस्तूपेषु गोष्ठेषु चत्वरेषु गृहेषु च ॥
वल्मीकैः पुण्यैः शोभितयाः क्रयविक्रयभूमयः ।
दीपमालापरिक्षिप्ते प्रदोषे तदनन्तरम् ॥
ब्राह्मणान् भोजयित्वादौ विभोज्य च बुभुक्षितान् ।
अलङ्कृतेन भोक्तव्यं नववस्त्रोपशोभिना ।
स्त्रिग्धैर्मधुरैर्हृद्यैश्च वान्धवैर्भृत्यकैः सह ॥"

सुभ्रुः सुन्दरैः । सुभ्रः सुन्दरभ्रूयोरिति विश्वः ॥*॥ अत्र लक्ष्मीपूजायां पुष्पदानकाले ।

"नमस्ते सर्व्वदेवानां वरदासि हरिप्रिये ।
या गतिस्त्वत्प्रपन्नानां सा मे भूयात् त्वदर्च्चनात् ॥"

लक्ष्म्यै नमः । इत्यनेन वारत्रयं पूजयेत् ।

"सुखरात्र्यां प्रदोषे तु कुबेरं पूजयन्ति ये ॥"

इति रुद्रधरधृतात् कुबेरमपि पूजयन्ति ।

"धनदाय नमस्तुभ्यं निधिपद्माधिपाय च ।
भवन्तु त्वत्प्रसादान्मे धनधान्यादिसम्पदः ॥"

इति पठित्वा कुबेराय नमः । इति त्रिः पूजयेत् । ततो देवगृहादिषु दीपान् दद्यात् । तत्र मन्त्रः ।

"अग्निज्योतीं रविज्योतिश्चन्द्रज्योतिस्तथैव च ।
उत्तमः सर्व्वज्योतीनां दीपोऽयं प्रतिगृह्यताम् ॥"

ततो ब्राह्मणान् बन्धूंश्च भोजयित्वा स्वयं भुक्त्वा सुखं सुप्त्वा प्रत्यूषे भविष्योक्तं कर्म्म कुर्य्यात् । यथा,—

"सुखरात्रेरयःकाले प्रदीपोज्ज्वलितालये ।
बन्धुबन्धूनबन्धूंश्च वाचा कुशलयार्च्चयेत् ॥
प्रदीपवन्दनं कार्य्यं लक्ष्मीमङ्गलहेतवे ।
गोरोचनाक्षतैश्चैव दद्यादर्घ्यं सर्व्वतः ॥"

लक्ष्मीपूजामन्त्रः ।

"विश्वरूपस्य भार्य्यासि पद्मे पद्मालये शुभे ।
महालक्ष्मि नमस्तुभ्यं सुखरात्रिं कुरुष्व मे ॥
वर्षाकाले महाघोरे यन्मया दुष्कृतं कृतम् ।
सुखरात्रिप्रभावेन तन्मे लक्ष्मीर्व्यपोहतु ॥
या रात्रिः सर्व्वभूतानां या च देवेष्ववस्थिता ।
संवत्सरप्रिया या च सा ममास्तु सुमङ्गला ॥
माता त्वं सर्व्वभूतानां देवानां कृतिसम्भवा ।
आख्याता भूतले देवि सुखरात्रि नमोऽस्तु ते ॥"

लक्ष्म्यै नमः । इति त्रिः पूजयेत् । इति तिथ्यादि-तत्त्वम् ॥

सुखवर्द्धकः, पुं, (सुखं वर्द्धयति उद्दीपयतीति । वर्द्ध + णिच् + ण्वुल् ।) वर्त्तिकाकारः । इत्य-मरः । २ । ६ । १०६ ॥

सुखवर्च्चाः, [स्] पुं, (सुखं वर्च्चयतीति । वर्च्च + असुन् ।) वर्त्तिकाकारः । इति राज-निर्घण्टः ॥

सुखवासः, पुं, (सुखकरो वासो यस्य ।) फल-विशेषः । तरमूज इति भाषा । तत्पर्य्यायः । शीर्णवन्तः २ । इति रत्नमाला ॥

सुखवासनः, पुं, (सुखं वासयतीति । वस + णिच् + ल्युः ।) सुखवासनगन्धद्रव्यम् । यथा,—

"सुखवासकरो गन्ध आमोदो सुखवासनः ।
सुखवासन इत्येके शुभवासन इत्यपि ॥"
इति शब्दरत्नावली ॥

सुखसन्दोह्या, स्त्री, सुशीला गौः । इत्यमरटीकायां भरतः । २ । ६ । ७१ ॥

सुखसन्दोह्या, स्त्री, (सुखेन सन्दोह्या ।) सुशीला गौः । तत्पर्य्यायः । सुव्रता २ । इत्यमरः । २ । ६ । ७१ ॥ सुखदोह्या ३ । इति हेमचन्द्रः । सुखदुह्या ४ । इति भरतः ॥

सुखा, स्त्री, (सुखमस्त्यस्यामिति । अच् । टाप् ।) वरुणपुरी । इति मेदिनी ॥

सुखाधारः, पुं, (सुखानामाधारः ।) स्वर्गः । इति शब्दरत्नावली ॥ सुखस्याधारे, त्रि ॥

सुखायतः, पुं, (सुखेन आयम्यते इति । आ + यम + क्तः ।) सुग्निग्धिताश्वः । यथा,—

"सुखायतः शुद्धसुखः सुखचारः सुखायनः ।"
इति शब्दमाला ॥

सुखायनः, पुं, (सुखेन अयति गच्छति अनेनेति । अय + ल्युट् ।) सुग्निग्धिताश्वः । यथा,—

"सुखायतः शुद्धसुखः सुखचारः सुखायनः ।"
इति शब्दमाला ॥

सुखावतीश्वरः, पुं, (सुखावत्या ईश्वरः ।) बुद्ध-भेदः । इति हेमचन्द्रः ॥

सुखावहः, त्रि, (आवहतीति । आ + वह + अच् । सुखस्य आवहः ।) सुखदाता । यथा,

"सर्व्वपापहरं पुण्यं सर्व्वापद्विनिवारकम् ।
सर्व्वकामार्थदं देवि ! साधकानां सुखावहम् ।"
इति वटुकभैरवस्तोत्रम् ॥

सुखाशः, पुं, (सुखा सुखयुक्ता आशा यस्य । यद्वा, सुखायां पूर्य्यां शेते इति । शी + डः ।) वरुणः । (सुखेन अश्यते इति । अश + घञ् ।) राज-तिनिम्बः । (अश भोजने + भावे घञ् । सुखेन आशः ।) सुखभोजनम् । इति मेदिनी ॥

सुखाशकः, पुं, (सुखाश एव । स्वार्थे कन् ।) राजतिनिम्बः । इति शब्दमाला ॥

सुखी, [न्] त्रि, (सुखमस्त्यस्येति । सुख + इन् ।) सुखविशिष्टः । यथा, रामकवचम् ।

"स चिरायुः सुखी पुत्री विनयी विजयी भवेत् ।"
"स्वजनं हि कथं हत्वा सुखिनः स्याम माधव ।"
इति भगवद्गीता ॥

"सा श्रीर्या न मदं कुर्य्यात् स सुखी तृष्णयोज्झितः ।
तन्मित्रं यस्य विश्वासः पुरुषः स जितेन्द्रियः ।"
इति गारुडे ११६ अध्यायः ॥

सुगन्धः, पुं, (सुखकरः उत्सवो यस्मात्।) पतिः। इति त्रिकाण्डशेषः॥ (सुखजनकं उत्सवः।) आनन्दोत्सवश्च॥

सुखोदकं, क्ली, (सुखजनकमुदकम्।) सुखजनकतप्तजलम्। तत्पर्य्यायः। सुखोष्णम् २। इति रत्नमाला॥

सुखोष्णिकः, पुं, सक्थिकाचारः। इति राजनिर्घण्टः॥

सुगं, क्ली, (सुखेन गच्छति निर्य्यातीति। गम+डः।) विष्ठा। इति शब्दचन्द्रिका॥ (सुखेन गच्छत्यस्मिन्निति। "सुदुरोरधिकरणे।" ३।२।८८। इत्यस्य वार्त्तिकोक्त्या डः। सुखगम्यतो देशादिः।) सुन्दरगामिनि, त्रि॥ (सुन्दरं गायतीति। गै+कः। शोभनगीतशालिनि च त्रि॥ यथा, भागवते। १०। १२। ३४।

"गोपैः सुगा वाद्यधराश्च वाद्यकैः
स्वयेश विप्रा जयनिस्वनैर्गणाः॥")

सुगम्, त्रि, (सुगमयतीति। सु+गम+क्विप्।) सुन्दरगमकः। इति सिद्धान्तकौमुदी॥

सुगतः, पुं,(सु शोभनं गतं गमनं ज्ञानं वा अस्येति।) बुद्धः। इत्यमरः। १।१।११॥ (तद्भेदो बलभी। यथा, कथासरित्सागरे। २६। ४०।

'तेनाभिपूज्य सुगतान् भावयामास तत्त्वतः॥")

सुन्दरगमनविशिष्टे, त्रि॥

सुगतिः, पुं, (शोभना गतिर्यस्य।) अतीतकल्पोत्पन्नबुद्धभेदः। इति हेमचन्द्रः॥ ग्रन्थकर्तृविशेषः। यथा, सुगतिशोभनप्रस्तुतयोः शिवमिति ज्ञापनम्॥ (नृपस्य पुत्रविशेषः। यथा, भागवते। ५।१५।१४।

"नयातु गायन्त्यां चित्ररथः सुगतिरविरोधन इति चयः पुत्रा बभूवुः।" शोभना गतिर्यस्येति। शोभनगतियुक्ते, त्रि। यथा, हरिवंशे भाषायाम्। ६।४५।

"सुगतिरविलसो जयान्वितः
शतयुगरूपकरः सिताभ्रयः॥"

स्त्री, सद्गतिः। यथा, महाभारते। १।२। ६५२।

"यत्र धर्म्मे समास्थाय विदुरः सुगतिं गतः॥")

सुगन्धं, क्ली, (शोभनो गन्धो यस्य।) क्षुद्रकोरकम्। मल्लकम्। इति रत्नमाला॥ (भूतृणम्। तत्पर्य्यायो यथा,—

"मुस्तकोशस्तु मुस्तोर्कः सुगन्धं जलमुस्तकम्।
भूतृणस्तु भवेच्छ्रेष्ठो नालदस्तकसंज्ञितः॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥) श्रीवेष्टकम्। चन्दनम्। इति राजनिर्घण्टः॥ सक्थिपर्व्वम्। इति भावप्रकाशः॥

सुगन्धः, पुं, (शोभनो गन्धो यस्य।) रक्ततुलसी। गन्धकः। इति रत्नमाला॥ गागरङ्गकः। इति त्रिकाण्डशेषः॥ कर्क्कोटकः। इति हेमचन्द्रः॥ (शालिधान्यम्। यथा,—

"रक्तशालिः सकलमः पाण्डुकः शकुनाहृतः।
सुगन्धकः कर्द्दमको महाशालिश्च दूषकः॥
पुण्याण्डकः पुण्डरीकस्तथा महिषमस्तकः।
दीर्घशूकः काञ्चनको हायनो लोहपुण्यकः॥
इत्याद्याः शालयः सन्ति बहवो बहुदेशजाः॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

सुगन्धतैलनिर्य्यासः, क्ली, (सुगन्धस्तैलस्य निर्य्यासो यत्र।) जवादिनामगन्धद्रव्यम्। इति राजनिर्घण्टः॥

सुगन्धपत्रा, स्त्री, (सुगन्धानि पत्राणि यस्याः।) रुद्रजटा। इति राजनिर्घण्टः॥

सुगन्धभूतृणं, क्ली, (सुगन्धो भूतृणम्।) गन्धतृणम्। इति राजनिर्घण्टः॥

सुगन्धमूला, स्त्री, (सुगन्धं मूलं यस्याः।) स्थलपद्मिनी। राखा। इति राजनिर्घण्टः॥ (लवली। तत्पर्य्यायो यथा,—

"सुगन्धमूला लवली पाण्डुः कोमलवल्कला॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

सुगन्धा, स्त्री, (शोभनो गन्धो यस्याः।) राखा। इत्यमरः। २।४।११४॥ भटी। इति शब्दरत्नावली॥ वन्याकर्क्कोटकी। रुद्रजटा। शतपुष्पा। नाकुली। नवमालिका। स्वर्णयूथिका। एला। गन्धापत्री। वह्निकी। माधवी। इति राजनिर्घण्टः॥ चम्पका। मालुतुल्या। तुलसी। इति रत्नमाला॥ (पीठस्थानस्थदेवीविशेषः। यथा, देवीभागवते। ७।३०।६८।

"कोटवी कोटतीर्थे तु सुगन्धा माधवे वने॥")

सुगन्धामलकं, क्ली, (सुगन्धमामलकम्।) मिलितौषधिविशेषः। यथा,—

"सर्व्वौषधिसमायुक्ता मुख्यानामलकस्य च।
यदा तदाऽयं योगः स्यात् सुगन्धामलकाभिधः॥"

इति राजनिर्घण्टः॥

सुगन्धिः, पुं, (शोभनो गन्धो यस्य। "गन्धस्येदुत्पूतिसुसुरभिभ्यः।" ५।४।१३५। इति इत्।) कपूरः। तत्पर्य्यायः। इत्यमरः। २ सुरभिः ३। शालपर्णः ४। इत्यमरः॥ (१।२।११३ मदमाता। इति श्रीपर्णमोदीकायां श्रीकल्पद्रुमे वैद्यकशब्दरत्नावल्यां प्रथमः स्तबकः॥) सुगन्धयुक्ते, त्रि। इति मेदिनी॥ (यथा, कुमारे। ३।५६।

"सुगन्धिनिश्वासविवृद्धतृष्णं
विम्बाधरासन्नचरं हरेः कम्।
प्रतिक्षणं संभ्रमलोलदृष्टि
र्लीलारविन्देन निवारयन्ती॥")

सुगन्धि, क्ली, (शोभनो गन्धो यस्य। इत्।) एलवालुकम्। इत्यमरः। २।४।१२१॥ (यथ एलवालुकं कङ्कोलसदृशं कुङ्कुमन्धि,

"एलवालुकमेवेदं सुगन्धि हरिवालुकम्।
ऐलवालुकमेलालुकप्रियं पञ्चमीरितम्॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥) मुस्ता। कपूरः। गन्धतृणम्। धान्यकम्। पिप्पलीमूलम्। इति राजनिर्घण्टः॥

सुगन्धिकं, क्ली, (शोभनो गन्धो यस्य। इत्। ततः स्वार्थे कन्।) कर्पूरम्। इति शब्दरत्नावली॥ पुष्करमूलम्। गौरसुवर्णम्। सुरपर्णम्। उशीरम्। इति राजनिर्घण्टः॥

सुगन्धिकः, पुं, (सु शोभनो गन्धो यस्य। इत्। ततः कन्।) महाशालिः। इति हेमचन्द्रः॥ तुरुष्कः। इति राजनिर्घण्टः॥ गन्धकः। इत्यमरटीकायां रायमुकुटः॥

सुगन्धिकुसुमः, पुं, (सुगन्धि कुसुमं यस्य।) पातकरवीरः। इति राजनिर्घण्टः॥ सुगन्धिपुष्पे, क्ली॥

सुगन्धिकुसुमा, स्त्री, (सुगन्धं कुसुमं यस्याः।) एलका। इति जटाधरः॥

सुगन्धिता, स्त्री, (सुगन्धेर्भावः। तल्। टाप्।) सौगन्धिः। सौरभम्। इति हलायुधः॥ (यथा, माघे। ३।५६।

"सुगन्धितामप्रतियत्नपूर्व्वां
बिभ्रन्ति यच्च प्रमदाय पुंसाम्।
मधूनि यच्चापि च कामिनीना-
मामोदकर्म्मण्यतिदोहदानीव॥")

सुगन्धिफला, स्त्री, (सुगन्धि फलं यस्याः।) जातीफलम्। पूगफलम्। जम्बुकलिकाफलम्। इति राजनिर्घण्टः॥

सुगन्धिनी, स्त्री, (सुगन्धोऽस्त्यस्या इति। इनिः। ङीप्।) आरामशैवला। इति राजनिर्घण्टः॥ (सुवर्णकेतकी। यस्याः पर्य्यायो यथा,

"केतकः सूचिकापुष्पो जम्बूकः शकचक्षुदः।
सुवर्णकेतकी स्वल्पा लघुपुष्पा सुगन्धिनी॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

सुगन्धिमूलं, क्ली, (सुगन्धि मूलमस्य।) उशीरम्। इति राजनिर्घण्टः॥

सुगन्धिमूषिका, स्त्री, (सुगन्धिर्मूलत्वगाद्या मूषिका।) कुलुञ्जरी। इति राजनिर्घण्टः॥

सुगमः, त्रि, (सु+गम+घञ्।) सुखेन गम्यते प्राप्यते यः। यथा, यत्र सुगमम्। इति सुगमोपायादिप्रकरणसिद्धान्तम्॥ (यथा, भागवते। १०।८४।५५।

"चित्तस्योपशमोऽयं वै कविभिः शास्त्रचक्षुषा। दर्शितः सुगमो योगो धर्म्यश्चात्मसुदावहः॥")

सुगहन:, त्रि. (सुन्दरो गहनः।) निविडः। इत्यमरटीकायां रामाश्रमः।

सुगहना, स्त्री, कुम्बा। सुगहनेतिविशेषणमिति केचित्। नाम इत्यन्ये। इत्यमरटीकायां रमानाथः॥

सुगहनावृतिः, स्त्री, कुम्बा। इत्यमरः॥ यज्ञस्थाने अस्पृश्यादिदर्शनवारणाय या सुगहना निरवकाशा वृतिर्वेष्टनं सा कुम्बा। इति भरतः॥

सुगृह:, पुं. (सुन्दरं गृहं यस्य।) चक्षुस्त्वक्पक्षी। इति हेमचन्द्रः॥ (सुन्दरं गृहम्।) सुन्दरालये, क्ली॥

सुगृहीत:, त्रि, (सु+ग्रह+क्तः।) सुन्दररूपेण कृतग्रहणः॥

सुगृहीतनामा, [न्] पुं, (सुगृहीतं नाम यस्य।) शुभकार्य्यया प्रातः स्मर्य्यते यः। स च युधिष्ठिरादिः। इति त्रिकाण्डशेषः॥

सुग्रन्थिः, पुं, (शोभना ग्रन्थयो यत्र।) चोरकः। इति राजनिर्घण्टः॥ सुन्दरग्रन्थियुक्ते, त्रि॥

सुग्रीवः, पुं. (शोभना ग्रीवा यस्य।) विष्णोरश्वः। (यथा, महाभारते। २। २। १४।
"प्रययौ पुण्डरीकाक्षः शैव्यसुग्रीववाहनः॥")
शाखामृगेश्वरः। इति मेदिनी॥ स तु सूर्य्यपुत्रः किष्किन्धाधिपतिः श्रीरामचन्द्रस्य सखा। यथा, वाल्मीकीये रामायणे बालकाण्डे १७ सर्गे।
"वानरेन्द्रं महेन्द्राभमिन्द्रो वालिनमात्मजम्। सुग्रीवं जनयामास तपनस्तपतां वरः॥"
किञ्च तत्रैव किष्किन्धाकाण्डे ५ सर्गे।
"दीप्यमानं ततो वह्निं पुष्पैरभ्यर्च्य सत्कृतम्। तयोर्मध्ये तु सुप्रीतौ निदधौ सुसमाहितः॥ ततोऽग्निं दीप्यमानं तौ चक्रतुश्च प्रदक्षिणम्। सुग्रीवो राघवश्चैव वयस्यत्वमुपागतौ॥"*॥
अर्हत्पिता। स च वर्त्तमानयुगीयनवमजिनपिता। इति हेमचन्द्रः॥ शिवः। इन्द्रः। राजहंसः। असुरः। पर्व्वतविशेषः। अस्त्रविशेषः। नागभेदः। इति केचित्॥ शोभनग्रीवायुक्ते, त्रि। इति विश्वः॥

सुग्रीवी, स्त्री, (शोभना ग्रीवा यस्याः। ङीप्।) तास्त्राग्भंजाता कश्यपदुहिता। यथा,—
"षट्सुतासु महासत्त्वास्ताम्रायाः परिकीर्त्तिताः।
शुकी श्येनी च भासी च सुग्रीवी शुचिगृध्रिका॥
शुकी शुकानजनयत् उलूकी प्रलुलूककान्।
गृध्रीदकान् पक्षिगणान् सुग्रीवी तु व्यजायत॥"
इति गारुडे ६ अध्यायः॥

सुग्रीवेशः, पुं, (सुग्रीवस्य ईशः।) श्रीरामचन्द्रः। इति शब्दरत्नावली॥

सुग्लः, त्रि, (सुग्लायतीति। सु+ग्लै+"आतश्चोपसर्गे।"३। १। १३६। इति कः।) अत्यन्तहर्षक्षयविशिष्टः। इति सिद्धान्तकौमुदी॥

सुचक्षुः, [स्] पुं, (शोभनं चक्षुरिव फलं यस्य।) उडुम्बरः। इति जटाधरः॥ शोभनलोचने, क्ली॥ तद्युक्ते, त्रि॥

सुचक्षुका, स्त्री, (सुष्ठु चक्षुरिव शिखा यस्याः। कप्।) महाचक्षुश्शाकः। इति राजनिर्घण्टः॥

सुचरित्रा, स्त्री, (शोभनं चरित्रं यस्याः।) साध्वी। इत्यमरः। २। ६। ६॥ शोभनचरित्रयुक्ते, त्रि॥

सुचर्म्मा, [न्] पुं, (शोभनं चर्म्म यस्य।) भूर्जवृक्षः। इति राजनिर्घण्टः॥ शोभनचर्म्मविशिष्टे, त्रि॥

सुचारुः, त्रि, (शोभनश्चारुश्च।) मनोहरः। यथा, कालिकापुराणोक्तदक्षभुजादुर्गाध्याने।
"सुचारुदशनां तद्वत् पीनोन्नतपयोधराम्॥"

सुचित्रकः, पुं. (सुन्दराणि चित्राणि यत्र।) मनुष्यरङ्गः। चित्रसर्षः। इति शब्दरत्नावली॥ सुन्दरचित्रयुक्ते, त्रि॥

सुचित्रबीजा, स्त्री, (सुचित्रं बीजं यस्याः।) विड्ङ्गा। इति राजनिर्घण्टः॥

सुचित्रा, स्त्री, (शोभनानि चित्राणि यस्याः।) चिर्भिटा। इति राजनिर्घण्टः॥

सुचिरायुः, [स्] पुं, (सुचिरं आयुर्यस्य।) देवता। इति शब्दरत्नावली॥

सुचुटी, स्त्री, अग्न्याद्युद्धरणार्थलौहादियन्त्रविशेषः। चिमटा इति भाषा। इति केचित्॥

सुचेलकः, पुं. (शोभनश्चेलकः।) शोभनवस्त्रम्। सरु कापड़ इति भाषा। तत्पर्य्यायः। पटः २। इत्यमरः। २। ६। ११६॥ पटिः ३ पटी ४। इति तट्टीका॥ सुन्दरवस्त्रयुक्ते, त्रि॥

सुच्छवी, स्त्री, शतद्रुनदी। इति शब्दरत्नावली॥ शतलज इति ख्याता॥

सुजनः, पुं, (सु सुन्दरो जनः।) साधुः। सज्जनः। यथा,—
"दुर्जनस्य हि सङ्गेन सुजनोऽपि विनश्यति।
प्रसन्नं जलमित्याहुः कर्दमैः कलुषीकृतम्॥"
इति गारुडे १५ अध्यायः॥

सुजनता, स्त्री, (सुजनस्य भावः। तल्। टाप्।) सौजन्यम्। यथा,—
"धिगस्त्वेनां विद्यां धिगपि कवितां धिक् सुजनतां
वयो रूपं वा धिक् धिगपि च यशो निर्धनवताम्।
असौ जीयादेकः सकलगुणहीनोऽपि धनवान्
बहिर्द्वारे लग्नलवसमाः सन्ति गुणिनः॥"
इत्युद्भटः॥

सुजलं, क्ली, (शोभनं जलं यस्मात्।) कमलम्। इति राजनिर्घण्टः॥ सुन्दरसलिलञ्च॥ सुन्दरजलसम्बन्धिनि, त्रि॥

सुजल्पः, पुं. (सुन्दरो जल्पः कथनम्।) वाक्यविशेषः। यथा,
"यत्राज्ञैर्वात् सभामीर्ष्यं सदैन्यं सहचापलम्।
सोत्कण्ठञ्च हरिः स्मृतः स सुजल्पो निगद्यते॥"
इत्युज्ज्वलनीलमणिः॥

सुजाता, स्त्री, (सु+जन+क्तः।) तुवरी। इति राजनिर्घण्टः॥

सुजीवन्ती, स्त्री, (सुजीवनीति। सु+जीव+शतृ। ङीप्।) स्वर्णजीवन्ती। इति राजनिर्घण्टः॥

सुट्, क तौच्छ्ये। अनादरे इति कविकल्पद्रुमः। (चुरा०-पर०-सक०-सेट्।) षष्ठस्वरोदयान्तः। क. सुट्टयति। दन्त्यादिरयमिति भीमः। तौच्छ्यमल्पीभावः। इति दुर्गादासः॥

सुत:, पुं, (स्रूयते सेनेति। सु+क्तः।) पुत्रः। इत्यमरः। २। ६। २७॥ "स्रूयते सुतः कर्म्मभिरुक्तः। पुतो नरकभेदात् त्रायते इति पुत्रः। 'पुन्नाम्नो नरकाद्यस्मात् पितरं त्रायते सुतः। तस्मात् पुत्र इति ख्यातः स्वयमेव स्वयम्भुवा।' इति स्मृतिः॥ किंवा पुनाति मातापितराविति त्रासुसिति वे निपातात् हस्वत्वे पुत्रः। पुत्रो द्विषकारः एकतकारश्च।" इत्यमरटीकायां भरतः॥ *॥ मातृपितृस्वभावर्वत्सुस्वभावे सुतकर्म्मे भवतः। यथा,—
"शीलं संभजते पुत्रो मातुस्तातस्य वै सुता।
यथाशीला भवेन्माता तथाशीलो भवेत् सुतः॥
यद्दर्णा वै भवेद्भूमिस्तद्वर्णं सलिलं भवेत्॥
मातृणां शीलदोषेण पितृशीलगुणेन च।
विभिन्नासु प्रजाः सर्व्वा भवन्ति भवशीलिनाम्॥"
इति वह्निपुराणे काश्यपीयवंशः॥ पार्थिवः। इति मेदिनी॥ *॥ (उत्पन्ने, त्रि॥)

सुतजीवकः, पुं. (सुतं जीवयतीति। जीव+ण्वुल्।) पुत्रजीवकवृक्षः। इति राजनिर्घण्टः॥

सुतनुः, स्त्री, (शोभना तनुर्यस्याः।) नाभी इति राजनिर्घण्टः॥ (शोभना तनुः शरीरम्। शोभनशरीरम्॥ तद्युक्ते, त्रि॥ (यथा, उत्तरचरिते १ अङ्के।
"सरसि सुतनु! तस्मिन् पर्व्वते लक्ष्मणेन प्रतिविहितसपर्य्यासुस्थयोस्तान्यहानि॥")

सुतपाः, [स्] पुं, (सुष्ठु तपतीति। सु+तप्+"गतिकारकरोः पूर्व्वपदप्रकृतिस्वरत्वम्।"उणा० ४।२२६। इति असिः।) सूर्य्यः। इति सिद्धान्तकौमुदी॥ शोभनं तपो यस्य। मुनिः॥ (रौच्यमनुपुत्रविशेषः। इति मार्कण्डेयपुराणम्। ६८। २५॥ विष्णुः। इति महाभारतम्। १३। १४६। ३४॥ उत्तमतपस्यायुक्ते, त्रि। यथा, कथासरित्सागरे। ११२। १४१।
"स एव जातः संकल्पदोषाद्राजकुले द्विजः।
भार्य्यास्य सा च सुतपा जातेयं ते सुता नृप॥")

सुतपादिका, स्त्री, (सुताः समकालीनसुत्यन्नाः पादा मूलानि यस्याः। कप्। टाप्। अत इत्वम्।) हंसपदी। इति राजनिर्घण्टः॥

सुतरां, अ, (सु+द्वित्वनविभक्त्यन्तादिना तरम्।) अवधारितार्थप्रतिपादकम्। यथा। क्रियैव काल इति मते तु सुतरां नाधिकरणता। इति।

सपिण्डीकरणसमाख्याविहितार्थे सुतरां तत्र तथाचरणम् । इति च तिथ्यादितत्त्वम् ॥ अपि च ।
"अपुत्रा अस्मिन् पापात् प्राणिनः समवस्थिताः ।
मनुजास्तत्र सुतरां भवन्ति गृहकर्मिणः ॥"
इति पाद्मे सृष्टिखण्डे ४३ अध्यायः ॥
"प्रभुं त्रिज मदाद्दुष्टे दर्भेनापि स्रुतो हरिः ।
ददाति मोक्षं सुतरां किं पुनर्हविषार्च्चनात् ॥"
इति तत्रैव पातालखण्डम् ॥

सुतर्कारी, स्त्री, देवदालीलता । इति राजनिर्घण्टः ॥

सुतर्दनः, पुं, (सुष्ठु तर्दति पीड़यति विरहिणमिति । तर्द् अर्दने + ल्युः ।) कोकिलः । इति त्रिकाण्डशेषः ॥

सुतलः, पुं, (शोभनं तलं यत्र ।) अट्टालिकाभेदः । नागलोकपर्वतः । इति मेदिनी ॥ स तु पातालषष्ठखण्डः । तद्विवरणं यथा,—
"ततोऽधस्तात् सुतलं उदारश्रवाः पुण्यश्लोको विरोचनात्मजो बलिर्भगवता महेन्द्रस्य प्रियं चिकीर्षयामायोगादितेर्लब्धकायो भूत्वा वटुवामनरूपेण परावरिमलोकचर्यो भगवदनुकम्पयैव पुनः प्रवेशित इन्द्रादिरूपविधमानया सुसम्पन्नया श्रियाभिजुष्टः स्वधर्मेणाराधयंस्तमेव भगवन्तमाराधनीयमप्रगतसाध्वस आस्ते अधुनापि ।" इति श्रीभागवते । ५ । २४ । १८ ॥ (तथाच देवीभागवते । ८ । १८ । १३—३२ ।
"ततो विलाधनात् प्रोक्तं सुतलाख्यं विलेश्वरम् ।
पुण्यश्लोको बलिर्नाम आस्ते वैरोचनिर्मुने ! ॥
महेन्द्रस्य च देवस्य चिकिर्षुः प्रियमुत्तमम् ।
त्रिविक्रमोऽपि भगवान् सुतले बलिमानयत् ॥
त्रैलोक्यलक्ष्मीमाक्षिप्य स्थापितः किल दैत्यराट् ।
इन्द्रादित्यपलक्ष्या या सा श्रीस्तमुपतिष्ठते ॥
तमेव देवदेवेशमाराधयति भक्तितः ।
अपेतसाध्वसोऽद्यापि वर्त्तते सुतलाधिपः ॥
* * *
अयं दैत्यपतिः सोऽयं बलिः परमपूजितः ।
सुतले वर्त्तते यस्य द्वारपालो हरिः स्वयम् ॥
यदा हि त्रिदशेशे राजा रावणो लोकरावणः ।
अधिशेते सुतले येन भक्तादरणकारिणा ॥
पादाङ्गुष्ठेन धरितो योजनायुतमञ्जसा ।
एवमानुमानोऽयं बलिः सर्व्वसुरैकभुक् ।
आस्ते सुतलराज्यस्थो देवदेवप्रसादतः ॥")

सुतवत्सरा, स्त्री, (सुताः वत्सराः यस्मिन् इव बहुत्वात् यस्याः ।) सम्पूर्णपत्रः । इति त्रिकाण्डशेषः ।

सुतश्रेणी, स्त्री, (सुता उत्पन्ना श्रेणी यस्याः । स्वार्थे बहुत्वात् तथात्वम् ।) कृमिकर्णी । इत्यमरः । २ । ४ । ८८ । उन्दुरबिलीया इति हिन्दी भाषा । तत्पर्य्यायः । अवल्गी २ मालोढी ३ सुश्रिताख्या ४ चिका ५ सुतवत्सारी ६ प्रसवश्रेणी ७ मूषकी ८ । अस्या गुणाः । चक्षुष्यत्वम् । कटुत्वम् । आखुविषव्रणदोषनेत्रामयनाशित्वञ्च । इति राजनिर्घण्टः ॥ पुस्तकान्तरे श्रुतश्रेणीति च पाठः ॥

सुतस्थिकयोगः, पुं, विवाहोक्तयोगविशेषः । यथा, ज्योतिःसारसंग्रहे ।
"सुतस्थिकविवाहिलग्नधर्म्मे-
ष्वमरगुरुर्यदि दानवार्च्चितो वा ।
यदशुभमुपयाति तच्छुभं स्यात्
शुभमतिदृढिमुपैति तत्प्रभावात् ॥"
अपि च ज्योतिस्तत्त्वे ।
"लग्ने तनुषष्ठमे तूर्य्ये नवमे दशमे तथा ।
गुरुर्भृगुर्वा दोषघ्नो विवाहे वर्त्तते शुभम् ॥"
अयमेव सुतस्थिकयोगः ॥

सुता, स्त्री, (स्वयते सा यौ । सु + क्तः । टाप् ।) स्वात्मजम् । कन्या । इति मेदिनी ॥ यथा,—
"आत्मजस्तनयः सूनुः सुतः पुत्रः स्त्रियां त्वमी ।
चातुर्दुहितरं सर्व्वे ————— ॥"
इत्यमरः । २ । ६ । २७-२८ ॥
"अमी आत्मजाद्याः स्त्रियां वर्त्तमाना दुहितरमाहुः । यथा । आत्मजा । तनया । सूनोः प्रत्ययान्तराभावात् स्त्रियामपि सूनुरेव । सुता । पुत्री । स्वार्थे के कैऽलक इति ह्रस्वत्वे ङीषन्तपुत्रीत्यादिना विभाषया अत इति पुत्रिका पुत्रिका च । शोणादिपाठात् पुत्री च । मा भैषीः पुत्रि सौतेति महानाटकम् ।" इति तट्टीकायां भरतः ॥ (यथा, भट्टिः । २ । ४७ ।
"हिरण्मयी शालभजेव जङ्गमा
द्युनादिव स्थाणुरिवाचिरप्रभा ।
शशाङ्ककान्तेरधिदेवताकृतिः
सुता ददे तस्य सुताय मैथिली ॥")
दुरालभा । इति शब्दचन्द्रिका ॥

सुतात्मजः, पुं, (सुतस्य सुतायाः वा आत्मजः ।) पौत्रः । दौहित्रः । इति सुतात्मजाशब्ददर्शनात् ॥

सुतात्मजा, स्त्री, (सुतस्य सुतायाः वा आत्मजा ।) पौत्री । दौहित्री । इत्यमरः । २ । ६ । २६ ॥

सुतारका, स्त्री, (शोभने तारके यस्याः ।) चतुस्त्रिंशन्नक्षत्रशासनदेवतान्तर्गतदेवताविशेषः । इति हेमचन्द्रः । शोभनतारकायुक्ते, त्रि ॥

सुतिक्तः, पुं, (सुष्ठु तिक्तः ।) पर्पटः । इति राजनिर्घण्टः ।

सुतिक्तकः, पुं, (सुष्ठु तिक्तः । ततः कन् ।) पारिभद्रः । इति शब्दरत्नावली ॥ भूनिम्बः । इति शब्दरत्नावली ॥

सुतिक्ता, स्त्री, (सुष्ठु तिक्ता ।) कोशातकी । इति राजनिर्घण्टः ॥

सुती, [न्] त्रि, (सुतमस्यास्तीति । इनिः ।) सुतविशिष्टः । यथा, शिशोर्यदैशे ।
"सुतिनस्तनयस्यार्त्ति
न पश्यति कदाचिनी समस्तमपि यस्य ।
तेनाम्बा यदि सुतिनी
वद वन्ध्या कीदृशी भवति ॥"

सुतीक्ष्णः, पुं, (सुष्ठु तीक्ष्णः ।) शोभाञ्जनः । इति शब्दार्थरत्नावली ॥ श्वेतशिग्रुः । इति राजनिर्घण्टः ॥ सुतिविशेषः । यथा, भट्टौ ४ सर्गे ।
"पुरो रामस्य चुक्षुवांसकार ज्वलने वपुः
शरभङ्गः प्रदिश्यारात् सुतीक्ष्णसुनिकेतनम् ।"
अतिशयखरे, त्रि ॥ (यथा, ऋतुसंहारे । १ । २८ ।
"समदमधुकराणां कोकिलानाञ्च नादैः
कुसुमितलवकारैः कर्णिकारैश्च रम्यैः ।
द्युभिरिव सुतीक्ष्णैर्मानसं मानिनीनां
तुदति कुसुमबाणो मन्मथोद्दीपनाय ॥")

सुतुङ्गः, पुं, (सुष्ठु तुङ्गः ।) नारिकेलवृक्षः । इति हारावली । १०० ॥ अट्टालिका उच्चांशविशेषः । तस्य नामान्तरं अन्यतुङ्गः । यथा, सतुङ्गत्वसूक्तावल्याम् ।
"सूर्य्यादुचान् क्रियवृषस्थाक्रीकुलीरान्त्यवृके
दिग्वह्नीन्द्रद्वयतिथिशरान् सप्तविंशांश्च विंशान् ।
अंशानेतान् वदति जवनस्थान्यतुङ्गान् सतुङ्गान्
तानेवांशान् मदनभवनेष्वाह नीचान् सुनीचान् ॥"
अतिशयोच्चे, त्रि ॥

सुतेजनः, पुं, (सुतेजयतीति । सु + तिज + ल्युः ।) धन्वनवृक्षः । इति भावप्रकाशः ॥ (तस्यास्य गुणाः ।
"धन्वनः कफपित्तासक्रकासच्छर्द्यरोचकान् लघुः ।
हंत्यंगो बलकृद्वृष्यः सन्धिकृद्व्रणरोपणः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

सुतेजाः, [स्] पुं, (सुष्ठु तेजो यस्य । यद्वा, सुतेजयतीति । सु + तिज + "गतिकारकयोरिति ।" उणा० ४ । २२६ । इति असि: ।) अतीतकल्पीयार्हदेवः । इति हेमचन्द्रः । आदित्यभक्ता । इति राजनिर्घण्टः ॥ शोभनतेजोयुक्ते, त्रि ॥ (यथा, छान्दोग्योपनिषदि । ५ । १२ । १ ।
"अथ वै सुतेजा आत्मा वैश्वानरो यत्संवत्सरमुषित्वेमं लोकमुपावृक्ते ।")

सुतैला, स्त्री, (सुष्ठु तैलमस्यामिति ।) महाज्योतिष्मती । इति राजनिर्घण्टः ॥

सुत्रामा, [न्] पुं, (सु + त्रै + मनिन् ।) इन्द्रः । इत्यमरः । १ । १ । ४५ ॥ सुष्ठु त्रायते सुवर्गं सुत्राम चासुसिति मनु सौ: पचे दीर्घत्वं सुत्रामा च इति रुद्रः । इति भरतः ॥ (यथा, ऋग्वेदे । ३ ।
"यच्चाशयो जगति सत्यागता वसतु कुत्रापि
निस्तुलशुल्क.
सुत्रामकालसुखमत्र्याश्रमप्रकरसत्त्वाश्रयकारिचरमा ।"
वाजसनेयेऽपि दृश्यते । यथा, वाजसनेयसंहितायाम् । १० । ३१ ।
"इन्द्राय सुत्रामृषे मघस्व ।"
"सुष्ठु त्रायते इति सुत्रामा तस्मै सुत्रामणे शोभनत्राणकर्त्रे सुत्रातायाय वा इन्द्राय मघस्व ।" इति तद्भाष्यम् ॥)

सुदर्शनचूर्ण, क्ली, (सुदर्शनं सुदृश्यं चूर्णं यस्य।) ज्वररोगस्य औषधविशेषः। यथा,—
"त्रिफला रजनीयुग्मं करञ्जकारीयुगं पटी।
त्रिकटु ग्रन्थिकं मूर्व्वा गुडुची धन्वयासकः॥
कटुका पर्पटो मुस्तं त्रायमाणा च वालुकम्।
निम्बं पुष्करमूलञ्च मधुयष्टी च वत्सकः॥
यवानीन्द्रयवौ भार्गी शिग्रुबीजं सुराष्ट्रजा।
वचा त्वक् पद्मकोशीरचन्दनानि विषावलाः॥
प्रपौण्डरीकं पृश्निपर्णी विडङ्गं तगरं तथा।
त्रिचक्रं देवकाष्ठञ्च चव्यं पत्रं पटोलजम्॥
जीवकर्षभकौ चैव लवङ्गं वंशलोचना।
पुष्करीकञ्च काकोलिपत्रकं जातिपत्रकम्॥
तालीशपत्रमेतानि समभागानि चूर्णयेत्।
अर्द्धांशं सर्व्वचूर्णस्य किरातं प्रक्षिपेत् सुधीः॥
एतत् सुदर्शनं नाम चूर्णं दोषत्रयापहम्।
ज्वरांश्च निखिलान् हन्यान्नात्र कार्य्या विचारणा॥
दृषग्दन्दाग्नसृक्चांच धातुस्थान् विषमज्वरान्।
सन्निपातोद्भवांश्चापि मानसानपि नाशयेत्॥
प्रीतादीनपि दाहादीन् मोहं तन्द्रां भ्रमं क्लमान्।
कासं श्वासञ्च पाण्डुञ्च हृद्रोगं कामलामपि च॥
त्रिकपृष्ठकटीजानुपार्श्वमूलञ्च नाशयेत्।
प्रीतास्मुना पिबेदेतत् सर्व्वज्वरनिवृत्तये॥
सुदर्शनं यथा चक्रं दानवानां विनाशनम्।
तद्व्वराणां सर्व्वेषां चूर्णमेतत् प्रणाशनम्॥"*॥
पुष्करमूलाभावे कुष्ठमपि दद्यात्। भार्य्याभावे करञ्जकारीमूलम्। सौराष्ट्राभावे स्फुटिकां दद्यात्। तगरालाभे कुष्ठं देयम्। जीवकर्षभयोरभावे विदारीकन्दस्य भागद्वयं दद्यात्। पुण्डरीकं श्वेतकमलम्। काकोल्याभावे अश्वगन्धामूलं दद्यात्। तालीशपत्रकाभावे स्वर्णताली प्रदीयते इति। अथवा करञ्जकारीजटा देया। इति भावप्रकाशः॥

सुदर्शनद्वीप, क्ली, (सुदर्शनस्य तन्नाम्नो प्रसिद्धस्य जम्बूवृक्षस्य द्वीपम्।) जम्बूद्वीपम्। इति पुराणम्॥

सुदर्शना, स्त्री, (सुखेन दृश्यतेऽसौ। सु+दृश्+भावायां युच्। टाप्।) सुदर्शनवृक्षः। सुदर्शनगुलञ्च इति पद्मगुलञ्च इति च ख्यातः। तत्पर्य्यायः। चक्राङ्गा २ दृषकर्णी ३ दृश्यगी ४। इति रत्नमाला। सोमवल्ली ५ मधुपर्णिका ६ चक्राङ्गा ७। अस्या गुणाः। स्वादुत्वम्। उष्णत्वम्। कफशोफासवातनाशित्वञ्च। इति भावप्रकाशः। विषनाशित्वम्। इति राजवल्लभः। आज्ञा। औषधिविशेषः। इति विश्वभेदिनौ॥

सुदर्शनी, स्त्री, (सुष्ठु दर्शनं यस्याः। ङीप्।) भ्रमराली। इति विश्वः॥

सुदलः, पुं, (सुष्ठु दलमस्य।) चीरमोरटा। इति रत्नमाला॥

सुदला, स्त्री, (सुष्ठु दलान्यस्याः।) शालपर्णी। तरुणी। इति राजनिर्घण्टः॥

सुदान्तः, पुं, (सुष्ठु दान्तः।) शाक्यमुनिशिष्यविशेषः। इति त्रिकाण्डशेषः॥ (अतिशयशान्ते, त्रि। यथा, महाभारते।१।३८।१२।
"सुदान्तानपि चैवाहं दद्यामश्वादशापरान्॥")

सुदामा, [न्] पुं, (सुष्ठु ददातीति। दा+"आतो मनिनक्वनिप्वनिपश्च।"३।२।७४। इति मनिन्।) मेघः। पर्व्वतः। इति मेदिनी॥ गोपभेदः। समुद्रः। इति शब्दरत्नावली॥ ऐरावतः। इति त्रिकाण्डशेषः॥ श्रीकृष्णपुरणागत-विप्रविशेषः। यथा, ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ११२ अध्याये।
"सद्यो जघार दारिद्र्यं सुदाम्नो ब्राह्मणस्य च।
समागतस्य स्वगृहात् द्वारकां शरणार्थिनः॥"

सुदामा, [न्] त्रि, (सु+दा+मनिन्।) सुदाता। सुष्ठु ददातीत्यर्थे मनुप्रत्ययेन निष्पन्नः। इति सुग्धबोधव्याकरणम्॥

सुदामा, स्त्री, नदीविशेषः। यथा, वाल्मीकीये रामायणे अयोध्याकाण्डे ७० सर्गे।
"स प्राङ्मुखो राजगृहादभिनिर्याय वीर्य्यवान्।
ततः सदामां द्वातिभाग सन्तीर्य्यावेक्ष्य तां नदीम्॥"

सुदायः, पुं, (सुष्ठु दीयते इति। सु+दा+घञ्। युगागमः।) देयधनकादि। इत्यमरः। २। ८। २८॥ यथा। यौतकं यादिना उपनयनभिक्षाप्रसादादि च यत् देयं तत् दायहरणपदवाच्यम्। कन्यादानकाले जामात्रादिभ्यो व्रतभिक्षादौ ब्राह्मणादिभ्यश्च यद्द्रव्यं दीयते तच्च दायादिहयमित्यर्थः। युतकं योनिसम्बन्धः तत्र भवमिति ष्ण्य यौतकम्। युतयोर्ब्भवरयोरिदमिति वा ऋणि यौतकम्। यौतुकसुकारमध्यमपि। यौतकं यौतुकञ्च तत्। इति वाचस्पतिः॥ दीयते दायः कर्म्मणि घञ्। सुष्ठु दीयते सुदाय इति पाठ इत्यन्ये। इति भरतः॥ पितृमातृभर्तृकुलसम्बन्धी। यथा,—
"सुदायेभ्यः पितृमातृभर्तृकुलसम्बन्धिभ्यो लब्धं सौदायिकम्।" इति दायतत्त्वम्॥

सुदारुः, पुं, (सुष्ठु दारु यत्र।) पारियात्रपर्व्वतः। तत्पर्य्यायः। पारियात्रिकः २। इति हेमचन्द्रः॥

सुदि, य, शुक्लपक्षः। इति पञ्चिमदेशे प्रसिद्धः॥

सुदिनं, क्ली, (सुष्ठु दिनम्।) शुभदिवसः। यथा, ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे। ६३। ४८; ५१।
"सुदिनं दुर्दिनं शश्वत् भस्मैवं भवे भव।
सर्व्वेषां प्राक्तनानाञ्च हे बीजे सुखदुःखयोः॥
सुदिनं दुर्दिनञ्चैव सर्व्वं कर्म्मोद्भवं भव।
तत्कर्म्म तपसा साध्यं कर्म्मणाञ्च शुभाशुभम्॥"

सुदिनाह्नं, क्ली, (सुदिनेषु शुभदिनेषु अह्नः शुभदिनम्। यद्वा, सुदिनं प्रशस्तमहः। टच् समासे।) प्रशस्तदिनम्। यथा। उत्तमैकाभ्याञ्च। आभ्यामह्नादेशो न। उत्तमशब्दः अन्यार्थः पुण्यशब्दमाह। पुण्यैकाभ्यामित्येव सूत्रयितुमुचितम्। पुण्याहम्। सुदिनाहम्। सुदिनशब्दः प्रशस्तवाची। इति सिद्धान्तकौमुदी॥

सुदीर्घः, त्रि, (सुष्ठु दीर्घः।) अतिविस्तारः। यथा,—
"विवाह्य ओत्रियैर्भुक्तं राज्ञामात्यैस्तथैव च।
सुदीर्घैरपि कालेन तेषां तत्तु न सिध्यति॥"
इति व्यवहारतत्त्वम्॥

सुदीर्घवर्म्मा, स्त्री, (सुदीर्घः अतिशयः वर्म्मो यस्याः।) असनपर्णी। इति शब्दचन्द्रिका॥

सुदीर्घफलिका, स्त्री, (सुदीर्घं फलं यस्याः। कप्। टापि अत इत्वम्।) वार्त्ताकुविशेषः। इति रत्नमाला॥ शिङ्गा वेगुन इति भाषा॥

सुदीर्घा, स्त्री, (सुष्ठु दीर्घा।) चीनाककर्कटी। इति राजनिर्घण्टः॥

सुदुःखितः, त्रि, (सुष्ठु दुःखितः।) अतिशयव्यथितः। यथा। ज्योतिस्तत्त्वे भीमपराक्रमवचनम्।
"विष्णुभार्य्ये चिके चित्रे ज्येष्ठायां ज्वलने वसे।
एभिर्विवाहिता कन्या भवत्येव सुदुःखिता॥"

सुदुर्लभः, त्रि, (सु+दुर्+लभ+खल्।) अतिदुष्प्राप्यः। यथा,—
"ब्रह्मत्वादपि देवत्वादिन्द्रत्वादमरादपि।
अस्तितात् सिद्धिलाभाच्च हरिदास्यं सुदुर्लभम्।"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ६७ अध्यायः॥

सुदुश्चरः, त्रि, (सु+दुर्+चर+खल्।) अतिशयदुःखेनाचरणीयः। यथा, श्रीभागवते ११। २६। १।
"सुदुश्चरामिमां मन्ये योगचर्य्यामनात्मनः।
यथाञ्जसा पुमान् सिध्येत् तन्मे ब्रूह्यञ्जसाच्युत!"
(कार्त्तिकेये, पुं। यथा, महाभारते।३। २३१। ७।
"प्रभुर्नेता विधाताच्च नैगमेयः सुदुश्चरः॥")

सुदुष्करः, त्रि, (सु+दुर्+कृ+खल्।) अत्यन्तक्लेशकरः। यथा, श्रीभागवते। ३। ८। ६६।
"सुदुष्करं कर्म्म कृत्वा लोकपालैरपि प्रभुः।
रण्यत्यचिरतो राजन् यशो विपुलयंश्च॥"

सुदुस्तरः, त्रि, (सु+दुर्+तॄ+खल्।) अतिदुःखेन तरणीयः। यथा, श्रीभागवते। १०। २। ३१।
"स्वयं समुत्तीर्य्य सुदुस्तरं द्युमन्
भवार्णवं भीममदभ्रसौहृदाः।
भवत्पदाम्भोरुहनावमत्र ते
निधाय यातः सदनुग्रहो भवान्॥"

सुदुस्त्यजः, त्रि, (सु+दुर्+त्यज+खल्।) अतिदुःखेन त्याज्यः। यथा,—
"त्याजा सुदुस्त्यजसुरेप्सितराज्यलक्ष्मीं
धर्म्मिष्ठ आर्य्यवचसा यदगादरण्यम्।
मायामृगं दयितयेप्सितमन्वधाव-
द्वन्दे महापुरुष ते चरणारविन्दम्॥"
इत्यादिकृतत्वश्रीभागवतवचनम्॥

सुदूरः, त्रि, (सुष्ठु दूरः।) अतिदूरतरः। तत्पर्य्यायः। दूरीयान् २ दविष्ठः ३। इत्यमरः। ३।१।६८॥

सुदूरपराहतः, त्रि, (सुदूरे पराहतः निराकृतः।) अतिदूरनिराकृतः। तिरस्कृतः। यथा। "अनुग्रहेण तत्त्वज्ञानिघटिताल्पलक्षणाभासवान् सलक्षणानुपपत्तिरूपसुष्ठुः सुदूरपराहतत्वात् इति भावधर्म्मनं अनुपादेयमेव।" इत्यद्वयब्रह्मवादाधरौ॥

सुदृक्, [श्] त्रि, (सुष्ठु दृक् नेत्रं यस्य।) सुन्दरचक्षुर्युक्तः। यथा, श्रीभागवते। १०।३०।२७।

"भीता सुदृक् निधायास्यं भेजे भीतिविदूषणम्॥"

"सुदृक् सुनयनं यस्यां प्रियायां। सुदृक् वराङ्गीति वा। भीतिविदूषणं भयानुकरणम्।" इति श्रीधरस्वामी॥ शोभनचक्षुषि, स्त्री॥

सुदृढं, क्ली, (सुष्ठु दृढम्।) गाढम्। तद्वति, त्रि। इति शब्दरत्नावली॥

सुदृप्तः, पुं, वैवस्वतमनुपुत्रः। स तु इक्ष्वाकुः। यथा, वह्निपुराणे सागरोपाख्याननामाध्याये।

"अलर्कोऽप्यगतौ यत्र प्रार्थ्यता सहितौ हरः।
स्त्रीरूपधारिभिर्न्यासलक्षतः स त्रिभवद्भिरौ॥
ततोऽतिदृढ़सत्त्व स्वभावाक्षुब्धचेतनः।
बभूव नृपतिः सद्यः सानुबाहबलान्वितः॥
दर्पं क्षोभितमापन्नः प्रतिभ्रमति कानने।
ततो सुधाश्रमं प्रायादिक्ष्वाकुभ्यां सती॥
सुधेनान्तरमासाद्य मैथुनायोपसर्पिता।
सोमपुत्रादुधाद्गर्भान् तस्या जज्ञे पुरञ्जयः॥
अनयित्वा पुनः सा तं पुनः सुदृप्ततां गता।
प्रसादात् शङ्करस्यापि सुधेनाराधितस्य च॥
सुदृप्तस्य तु दायादः सत्यः परधार्म्मिकः।"

सुधन्वा, [न्] त्रि, (सुष्ठु धनुर्यस्य। बहुव्रीहौ टच्।) प्रौढधानुष्कः। इति मेदिनी॥ (यथा, बालमनोरमसंज्ञितायाम्। १६। ६६।

"नमस्त्रीक्ष्णायुधाय च नमः खाण्डवाय च सधन्वने।")

सुधन्वा, [न्] पुं, (सुष्ठु धनुर्यस्य।) विश्वकर्म्मा। इति मेदिनी॥ राजविशेषः। इति पुराणम्॥ (यथा, हरिवंशे। १२। १०।

"समातस्य च दायादः सुधन्वा विपुलद्युतिः।
सुधन्वनः सुसोमोऽभूत् सिध्वन्वा नाम पार्थिवः॥"

विष्णुः। यथा, भागवते। ३। २१। ३५।

"तस्मिन् सुधन्वन्यहनि भगवान् यज्ञ ईश्वरः।
दुष्प्रापायाममरैर्मुनेः प्रादात्प्रियव्रतः॥")

सुधन्वाचार्य्यः, पुं, ब्राह्मणैक्षात् सधर्म्मायां क्षत्रियायां जातो जातिविशेषः। यथा,—

"वैश्यात्तु जायते व्रात्यात् सुधन्वाचार्य्य एव च।
चार्य्यश्च भिक्षुश्च नटः झल्ल एव च॥"

इति मानवे १० अध्यायः॥

सुधन्वाः, पुं, त्रिलवणाधिपतिदैत्यः। इति हेमचन्द्रः॥

सुधर्म्मा, स्त्री, (शोभनो धर्म्मोऽस्यामिति। अनिच्। ततः "डाबुभाभ्यामन्यतरस्याम्।"४।१।१३। इति पक्षे डाप्।) देवसभा। इत्यमरः। १।१।५१॥ (यथा, रघुः। १७।२७।

"स राजककुदश्यग्रपार्ष्णिभिः पार्श्वकर्षिभिः।
ययावुदीरितालोकः सुधर्म्मानवमां सभाम्॥"

"सुधर्म्मायां देवसभायां अनवमां अन्यूनाम्।" इति तट्टीकायां मल्लिनाथः॥)

सुधर्म्मा, [न्] पुं, (सुष्ठु धर्म्मो यत्र। "धर्म्मादनिच् केवलात्।" ५।४।१२४। इति अनिच्।) देवसभा। कुटुम्बी। इत्युणादिकोषः। २।२८७॥ (देवसभार्थे स्त्रीलिङ्गोऽपि भवति॥ सु+धृ+"मिषुमदि मनिः।" उणा०। ४।१५१। इति मनिः। धर्म्मिष्ठः। इत्यञ्जसदत्तः॥ सद्धर्म्मविशिष्टे, त्रि। यथा, हरिवंशे। ११५। ७५।

"सुधर्म्मणे सुधर्म्मां तां कृष्णायाक्लिष्टकारिणे।
देवी देवसभां दत्त्वा वायुरन्तरधीयत॥")

सुधर्म्मी, स्त्री, देवसभा। इत्यमरटीका। १।१।५१॥

सुधा, स्त्री. (सुष्ठेन धीयते पीयते इति। धेट पाने+"आतश्चोपसर्गे।"३।३।१०६। इत्यङ्। टाप्।) अमृतम्। इत्यमरः। १।१।५१॥ (यथा, रामायणे। २।६१।१३।

"न पश्यन्तीह मनुजा सुधामपि सुरोपमाः॥")

लेपनम्। (यथा, माघे। १२। ६२।

"सेनासुधाचालितसौधमन्यदां
पुरां बहूनां परभागमाप सा॥")

मृत्तिका। सुधी। (यथा,—

"सेहुण्डः सिंहतुण्डः स्याद्बको बज्रद्रुमोऽपि च।
सुधा समन्तदुग्धा च चुक् स्त्रियां स्यात् सुधी गुडा॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥) गङ्गा। इष्टका। इति मेदिनी॥ विद्युत्। रसः। तोयम्। (यथा,—

"रसायनमिवर्षीणां देवनामामृतं यथा।
सुधेवोषसनागानां भेषज्यमिदमस्तु ते॥"

इति सुश्रुते सूत्रस्थाने ४३ अध्यायः॥) धात्री। इति नानार्थध्वनिमञ्जरी॥ हरीतकी। मधु। इति शब्दचन्द्रिका॥ शालपर्णी। इति राजनिर्घण्टः॥

सुधांशुः, पुं, (सुधाशुक्लाः अंशवो यस्य।) चन्द्रः। इत्यमरः। १।३।१४॥ (यथा, कथासरित्सागरे। १०१।१२८।

"दीप्यद्रत्नावतंसप्रभाः सुधांशोरपि रश्मयः।
तस्याः सुन्दरसेनोत्कर्षिनसी इव जज्ञिरे॥"

कर्पूरः। चन्द्रसंज्ञान्वितः।)

सुधांशुतैलं, क्ली, (सुधांशोः कर्पूरस्य तैलम्।) कर्पूरतैलम्। इति राजनिर्घण्टः॥

सुधांशुरत्नं, क्ली, (सुधांशुप्रियं रत्नम्।) मौक्तिकम्। इति राजनिर्घण्टः॥

सुधाकरः, पुं, (सुधाशुक्लाः कराः यस्य।) चन्द्रः। इति शब्दरत्नावली॥ (यथा, आर्य्यासप्तशत्याम्। ११८।

"उल्लसिति लाञ्छनोऽयं ज्योत्स्नावर्षी सुधाकरः स्फुरति।
आसक्तगुणाचरणः प्रकट इव प्रकटितचौरः॥")

सुधाङ्गः, पुं, (सुधामयं अण्डनालकमङ्गमस्य। सुधेव शुक्लमङ्गमस्येति वा।) चन्द्रः। इति त्रिकाण्डशेषः॥

सुधाजीवी, [न्] पुं, (सुधा+जीव+णिनिः।) सुधया लेपनेन जीवति यः। राज इति भाषा। तत्पर्य्यायः। पलाण्डुः २ लेपकः ३। इति त्रिकाण्डशेषः॥

सुधाधारः, पुं, (सुधाया आधारः।) चन्द्रः। इति शब्दरत्नावली॥ अण्डनालञ्च॥

सुधानिधिः, पुं, (सुधाया निधिः।) चन्द्रः। इति शब्दरत्नावली॥

सुधापयः, [स्] क्ली, (सुधेव शुक्लं पयः निर्य्यासः।) सुधीक्षीरम्। इति केचित्॥

सुधापाणिः, पुं, (सुधा पाणौ यस्य।) धन्वन्तरिः। इति केचित्॥

सुधाभुक्, [ज्] पुं, (सुधां भुङ्क्ते इति। भुज्+क्विप्।) देवः। इति हेमचन्द्रः॥

सुधाभृतिः, पुं, (सुधाया भृतिर्यस्मात्।) वज्रः। यज्ञः। इति शब्दार्थचिन्तामणिः॥ इत्यमरमेदिन्यां सुधाभूतिरिति पाठः॥

सुधामयः, पुं, (सुधात्मकः इति। सुधा+मयट्।) भूपालभवनम्। इति शब्दरत्नावली॥ अमृतात्मके, त्रि। यथा, श्रीजयदेवः।

"रासोल्लासभरेण विभ्रमभृतामाभीरयोषामभूदुन्मथ्यर्जुनं परिरभ्य निर्भरसुरः प्रेमान्धया राधया।
साधु त्वद्वदनं सुधामयमिति व्याहृत्य गीतस्तुतिव्याजाट्टहसितैः स्मितमनोहारी हरिः पातु वः॥"

सुधामोदकः, पुं, (सुधेव मादयतीति। मद्+णिच्+ण्वुल्।) यवासशर्करा। इति राजनिर्घण्टः॥

सुधामोदकजः, पुं, (सुधामोदात् जायते इति। जन+डः।) तवराजीवृक्षवृक्षः। इति राजनिर्घण्टः॥

सुधावर्षी, [न्] पुं, (सुधां वर्षतीति। वृष+णिनि।) ब्रह्मा। इति शब्दरत्नावली। वृहद्भेदः। इति त्रिकाण्डशेषः॥

सुधावासः, पुं, (सुधाया आवासः।) चन्द्रः। यथा,

"ज्योत्स्नायाः पतये तुभ्यं ज्योतिषां पतये नमः।
नमस्ते रोहिणीकान्त सुधावास नमोऽस्तु ते॥"

इति सिद्धादितन्त्रम्।

(चषकम्। तत्पर्य्यायो यथा,—

"चषकं कलशं सुधावासः सुधानिलयम्।"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

सुधावासा, स्त्री, (सुधाया वासो यत्र।) भद्रवटी। इति राजनिर्घण्टः॥

सुधासिन्धुः, पुं, (सुधायाः सिन्धुः।) क्षीरसमुद्रः। यथा,—

"सुधासिन्धोर्मध्ये सुरविटपिवाटीपरिवृते
मणिद्वीपे नीपोपवनवति चिन्तामणिगृहे।
शिवाकारे मञ्चे परमशिवपर्यङ्कनिलयां
भजन्ति त्वां धन्याः कतिचन चिदानन्दलहरीम्॥"
इत्यानन्दलहरी॥

सुधाकृतिः, पुं, (सुधायाः कृतिरुत्पत्तिर्यत्र।) यज्ञः। चन्द्रः। पद्मम्। इति शब्दरत्नावली॥

सुधाकृपा, स्त्री, (सुधेति। सु+धा+क्विप्। टाप्। सुधायाः कृपा।) प्रतिनिधिका। अतिनिष्कृका। इति त्रिकाण्डशेषः॥ कृद्नीवृत्तः। इति राजनिर्घण्टः॥

सुधाकरः, पुं, (सुधां किरतीति। कृ+अच्। सुधाया करः इति वा।) गरुडः। इति शब्दरत्नावली॥

सुधाकृत्, पुं, (सुधां किरतीति। कृ+क्विप्।) गरुडः। इति हेमचन्द्रः॥

सुधितिः, पुं स्त्री, सधितिः। इत्यमरटीकायां रायमुकुटः॥

सुधीः, पुं, (सु शोभना धीर्यस्य।) पण्डितः। इत्यमरः। २। ७। ५॥

सुधीः, स्त्री, (शोभना धीः।) सुन्दरबुद्धिः। सुबुधीः। इति सुग्धबोधव्याकरणम्॥ (शोभना धीर्यस्य।) शोभनबुद्धियुक्ते, त्रि॥ (यथा, भट्टिः। १२। ६।

"साक्षात्तिमात्रं शुभयेव बुद्ध्या
चिरं सुधीरभ्यधिकं समाधात्॥")

सुध्नः, पुं, सादुनामगन्धद्रव्यम्। इति राजनिर्घण्टः॥

सुधोक्षणः, पुं, (सुधया सैव उक्षणो यस्य।) धन्वन्तरिः। इति त्रिकाण्डशेषः॥

सुधोक्षणा, स्त्री, (सुधाया उक्षणो यस्याः।) हरीतकी। इति त्रिकाण्डशेषः॥ (हरीतकीशब्दोऽस्य विवरणं द्रष्टव्यम्।)

सुनन्दं, क्ली, (सुष्ठु नन्दयतीति। नन्द+अच्।) वलभद्रस्य मुसलम्। इति शब्दमाला॥ (कृष्णभ्रातुर्बलभद्रस्य मुसलम्। यथा, मार्कण्डेये। ११६। १८।

"सुनन्दं नाम मुसलं लब्ध्वा यस्मिन्मितं पुरा।
तच्छस्त्रारं च हलाख्यं तेन हन्ति रणे रिपून्॥")

सुन्दरानन्दजनके, त्रि॥

सुनन्दः, पुं, (सुष्ठु नन्दयतीति। नन्द+अच्।) श्रीकृष्णस्य पार्षदविशेषः। यथा, श्रीभागवते १०। ८८। ५६।

"सुनन्दनन्दप्रमुखैः स्वपार्षदैः
सनादिभिर्मूर्त्तिधरैर्निजाश्रयैः।
पुष्टा श्रिया कीर्त्तिभयास्त्रलक्ष्मभि-
र्विराजमानं परमेष्ठिनं पतिम्॥"

द्वारपालविशेषः। यथा,

"यद्यपीदृशस्य मानं तस्य तेनैव कथितम्।
तथा: सदस्यमेकन्तु दीर्घं मत्वेव निर्दिशेत्॥
चण्डमेव सुनन्दः स्यात्तथाऽन्यत्रोक्त षड्भिः।
सदस्यं चतुर्भिश्च द्वारपालौ प्रतिष्ठितौ॥

अस्याधिदेवता भौमी रक्तवीर्यं वसुन्धरा।
द्वाराणि विघ्नसिद्धास्य रक्तचित्राद्वतानि च॥
रक्तपट्टावृतो गेहः सकलार्थप्रबोधकः।
अत्र स्थित्वा महीपालः सुचिरं पाति मेदिनीम्॥"

दीर्घ. ५१ पत्रम्। ४०। इति सुनन्दः॥ सुन्दरः इति च पाठः। इति मुक्तिकल्पतरुः॥

सुनन्दा, स्त्री, (सुष्ठु नन्दयति या। नन्द+अच्। टाप्।) उमा। गोरोचना। इति मेदिनी॥ नारी। इति विश्वः॥ उमासखीभेदः। इति शब्दमाला॥ (अजमत्रा इक्ष्वाकोः सखी द्वारपालिका। यथा, रघुः। ६। २०।

"ततो नृपाणां श्रुतवृत्तवेदिनां
पुंवत्प्रगल्भा प्रतिहारवर्त्तिनी।
प्राक् सन्निकर्षं मगधेश्वरस्य
नीत्वा कुमारीमवदत् सुनन्दा॥")

अकंपत्रीवृक्षः। इति रत्नमाला॥ इवेरमूल इति भाषा॥ (पुरुवंशीयराज्ञोभीमपृथोः पत्नी। यथा, महाभारते। १। ८५। १६।

"सार्व्वभौमः खलु जित्वा जहार कैकेयीं सुनन्दां नाम तासुपयेमे। तस्यामस्य जज्ञे जयत्सेनो नाम॥"* ॥ दुष्मन्तपुत्रभरतस्य पत्नी। यथा, तत्रैव। १। ८५। ३२।

"भरतः खलु काशेयीमुपयेमे सार्व्वसेनीं सुनन्दां नाम। तस्यामस्य जज्ञे सुमन्युः॥"* ॥ चेदिराजकन्या। यथा, तत्रैव। ३। ६५। ५०।

"एवमुक्ता ततो भैमीं राजमाता विशांपते।
उवाचेदं दुहितरं सुनन्दां नाम भारत॥")

सुनयनः, पुं, (शोभने नयने यस्य।) शम्भुः। इति शब्दचन्द्रिका॥ शोभनचक्षुर्युक्ते, त्रि॥ (यथा, रघुः। ८। ५२।

"दृष्टपूर्व्वमिति तं वनदेवता:
सुनयनं नयनेन्दिनकौशलम्॥")

सुनयना, स्त्री, (सु शोभने नयने यस्याः।) नारी। इति राजनिर्घण्टः॥

सुनाकृतः, पुं, कर्पूरकः। इति शब्दचन्द्रिका।

सुनाभः, पुं, (सुष्ठु नाभिरस्य। अच् समासे।) मैनाकपर्व्वतः। इति त्रिकाण्डशेषः॥ (यथा, महाभारते। ३। १०। ३०।

"इन्द्रकीलः सुनाभश्च तथा दिव्यौ च पर्व्वतौ।"

उत्तरार्द्धपुत्रविशेषः। यथा, तत्रैव। १३। १३७। ५।

"उर्णनाभः सुनाभश्च तथानन्दोपनन्दकौ।"

सुष्ठु नाभिरिवाक्षमस्येति। सुदर्शनचक्रे, क्ली। यथा, भागवते। २। ३। ६।

"सुतं रथे सं वपुषा समस्तं
दृष्ट्वा सुनाभोन्मथितं धरित्र्या।
चामीकरक्तकनयाय गर्भं
दृष्ट्वा सदस्तुरगावियेश॥

वाधलिङ्गेऽपि दृश्यते। यथा, महाभारते। ३। ३। ४८।

"तथेत्युक्त्वा ततः सर्व्वे सुनाभं विष्णुकर्म्मणः।
देवाश्चोचुर्महीं वीर गच्छिष्यन्त्यद्य॥")

सुनाम

सुनामद्वादशी, स्त्री, (सुनामा द्वादशी। यद्वा, सुनामप्रिया द्वादशी।) तादृशमासीयद्वादशकर्त्तव्यव्रतविशेषः। यथा,—

अम्बरीष उवाच।

"कथं सुनाम्नि देवेशो द्वादश्यां सुनिसत्तम।
पूज्यते केशवः सर्व्वैर्भुक्तिकामफलार्थिभिः॥

वशिष्ठ उवाच।

शृणुष्वैकमना भूत्वा सुनामद्वादशीं शुभाम्।
सर्व्वपापहरां स्वर्ग्यां मुक्तिमुक्तिप्रदायिकाम्॥
मनसापि चिकीर्षन्ति ये द्वादशीं नरोत्तमाः।
तेऽपि घोरं न पश्यन्ति पुनः संसारसागरम्॥
आद्यां सर्व्वव्रतानान्तु वैष्णवानां नृणोत्तम।
नरैः स्त्रीभिश्च कर्त्तव्यं विष्णोस्तुष्टिकरं परम्॥
मार्गशीर्षे शुभे मासि शुक्लपक्षे व्रतव्रतः।
प्रथमं चैव एकादश्यां विधिवद्वरः॥
मनोवाक्कायचेष्टाभिः स विशुद्धो जितेन्द्रियः।
दशम्यां नियतः स्नात्वा प्रणिपत्य जनार्द्दनम्॥
हविष्यान्नकृताहारः शुचिर्भूत्वा भवेद्वती।
उपलिप्ते शुचौ देशे भक्त्वेत् दन्तधावनम्॥
उपोष्यैकादशीं सम्यक् पूजयित्वा जनार्द्दनम्।
सुनामद्वादशीं देव अहं भोक्ष्ये परेऽहनि॥
एवं सङ्कल्प्य नियमं प्रणम्य गरुडध्वजम्।
दशम्यामेकभक्ताशी संयतः संयमेन्द्रियान्॥
एकादश्यां ततः कुर्य्यादेकचित्तः समाहितः।
पूर्व्वं प्रपूजयेत् स्वर्ग्यं ततो देवं प्रपूजयेत्॥
नमस्ते देवदेवेश नमस्ते भक्तवत्सल।
भास्कराय नमस्तुभ्यं नमस्ते कार्य्यभास्वते॥
नमः सूर्य्याय देवाय नमस्ते सप्तसप्तये।
एकस्मै हि नमस्तुभ्यमेकचक्ररथाय च॥
त्र्यीतनवे पतये नित्यं सर्व्वतेजोहराय च।
दिवाकर नमस्तेऽस्तु प्रभाकर नमोऽस्तु ते॥
एवं संपूज्य विधिवत् पुष्पधूपानुलेपनैः।
शेषैश्चैव तैः सुनैवेद्यैर्विष्णुपूजां समाचरेत्॥
ततोऽनु स्नापयेद्देवं दधिक्षीरघृतादिभिः।
सर्व्वौषधिजलैः पुण्यैस्तथा चन्दनवारिणा।
कुङ्कुमोशीरकर्पूरैश्चन्दनेन विलेपयेत्॥
अच्युतं चार्चयेद्भक्त्या मालतीकुसुमैर्भृशम्॥
गुग्गुलुं घृतसंयुक्तं धूपं दद्यादतन्द्रितः।
पायसापूपसंयावकरम्भाद्यैरथैव तैः।
नैवेद्यं हरये दद्यात् फलमोदकपानकैः।
गीतवाद्यैर्नरैर्नृत्यं प्रणमेच्च मुहुर्मुहुः॥
एवं पूजां हरेः कृत्वा द्विजं ज्ञानप्रदायकम्।
पूजयेद्वस्त्रं गामस्मै विप्रकेशवयोरपि॥
ततोऽन्नं समालभ्य चन्दनेन नवं घटम्।
सक्षिप्तं नीवसम्पूर्णं न्यसेद्देवस्य सन्निधौ॥
सहेमसीसिकाक्षन्तु कनकस्रुवकंकणम्।
न्यस्य गर्भे सवस्त्रन्तु पूजयेच्च केशवम्॥
यस्य रोमसु स्थिता मेघाः सर्व्वसस्याश्च सम्भवाः।
सागराः कुक्षिदेशस्था मौक्तिकादाः समुद्भवाः।
नक्षत्रतिरवो दिव्याः सर्व्वसस्येषु दीप्तयः।
घृतेन सर्षपोत्थेन धूपोऽयं प्रतिगृह्यताम्॥
केशवः केशिहा केशिकंसारिप्रियवत्सलः।

सर्व्वकामप्रदो देवः स मे पापं व्यपोहतु ॥
एवमभ्यर्च्च्य देवेशं प्रणिपत्य च माधवेत् ।
द्वादश्यां तच्च लोचेन क्षापयेत्तेन मानवः ॥
सर्व्वपापविनिर्म्मुक्तो वैष्णवीं लभते तनुम् ।
कृताभिषेकः पुण्यात्मा सम्यगभ्यर्च्च्य केशवम् ॥
नवनीतकृतां धेनुं ब्राह्मणायोपपादयेत् ।
केशवः प्रीयतां देवः केशिहन्ता महाच्युतः ।
स मे भवेत्तु सुप्रीतः इष्टान् कामान् प्रयच्छतु ।
एवं प्रदक्षिणं कृत्वा प्रह्वः तस्यापि यत् फलम् ॥
त्रिजन्मदुष्कृतं पापं हित्वा स त्रिविधं नरः ।
यदि वर्षसहस्राणि स्वर्गे मोदति देववत् ॥
यदा कालादिहायाति सधर्म्मो धनवान् भवेत् ।
अभावाद्य धेनूनां तत् पात्रं कल्पयेत्ततः ॥
तत्फलं हि विनिर्द्दिष्टं यथाशक्त्या तु दक्षिणा ।
भक्त्या फलं समाप्नोति भक्तिरेवात्र कारणम् ॥*
पौषस्यैव तु मासस्य योऽष्टम्यां तपयेन्नरः ।
समाहितमना भूप रसधेनुप्रदायकः ॥
आपो नारा इति प्रोक्ता आपो वै नरसूनवः ।
अयनं वर्त्मनी तस्मात् नारायण इति स्मृतः ॥
नारायणः प्रीयतां मे देवो नरप्रियः सदा ।
इष्टकामप्रदो नित्यं स मे पापं व्यपोहतु ॥
ततः प्रदक्षिणं कृत्वा ब्राह्मणान् भोजयेत्ततः ।
एवं हि पौषमासस्य तस्य पुण्यफलं ह्रस्व ॥
यच्चा वाङ्मे: कृतं पापं स्वल्पं वा यदि वा बहु ।
हृत्वा स्वर्गं समाप्नोति वर्षाणामयुतायुतम् ॥*॥
माघस्यैव तु मासस्य द्वादशीं शुक्लपक्षतः ।
यः क्षिपेद्धि शुचिर्भूत्वा एकचित्तः समाहितः ॥
स्नापने पूजने नित्यं ब्राह्मणानाञ्च तर्पणे ।
प्रदाने गृणाद्दूल इमं मन्त्रमुदीरयेत् ॥
मा लक्ष्मीश्च पुराचेयं भगिनी ग्रसिनोऽनुजा ।
भक्तो त्वमपि तस्याश्च सर्व्वकामद माधव ॥
प्रीयतां माधवो देवो मधुकैटभसूदनः ।
वासुदेवो जगन्नाथो मम पापं व्यपोहतु ॥
एवं यः कुरुते सम्यक्तस्य पुण्यफलं ह्रस्व ।
यावज्जन्मकृतं पापं हृत्वा सर्व्वमशेषतः ॥
त्रिंशवर्षसहस्राणि स्वर्गे वसति योऽष्टम् ।
गुडधेनुप्रदो माघे इहायात: सदा सुखी
भवेद्राजन् निरातङ्कः पुत्रैश्वर्य्यसमन्वितः ।
तत्र विष्णुपरो भूत्वा क्रमान्मोक्षमवाप्नुयात् ॥*॥
फाल्गुनामलपक्षस्य द्वादश्यां नियतः शुचिः ।
पूजयित्वा विधानेन देवदेवं सचक्रिणम् ॥
मन्त्रेणानेन राजेन्द्र गोविन्दः प्रीयतामिति ।
गावां भक्तोऽसि गोस्वामी गोगामी गोकुलालयः ॥
सर्व्वकामप्रदो नित्यं स मे पापं व्यपोहतु ।
मन्त्रेणैवं गवेधेनुं भक्त्या दद्यात् द्विजातये ॥
ततः प्रदक्षिणं कृत्वा ह्रस्व पुण्यं यथातथम् ।
यत्तीवर्षसहस्राणां दत्तानां पूर्विवाहिनाम् ।
न तैस्तत्फलमाप्नोति द्वादश्या यत्तुवैष्णव ।
दिव्यवर्षसहस्राणि स्वर्गे तिष्ठति सर्व्विवत् ॥*॥
पौषस्य द्वादशीं शुक्लां समुपोष्य तृषोत्तम ।
स्नात्वा पयोघटैर्विष्णुं सकलोत्तरचारिणम् ॥
पूजयित्वा विधिवत् स्नात्वा गोपञ्चगव्येन च ।

स्नापयित्वान्ततेनैव पश्चात्तां गन्धसंयुतैः ॥
ऋद्धिः पश्चात् प्रपूज्यैवं गन्धधूपविलेपनैः ।
पुष्पैर्व्वासोभिरेवं हि मन्त्रेणानेन बुद्धिमान् ॥
प्रवेशने यथाशीलो जगतां रक्षणाय च ।
दुर्वृत्तानां विनिर्जेतुमसि विष्णुरतो हरे ॥
विष्णुर्भवतु मे प्रीतो विष्णुर्देवः सनातनः ।
सर्व्वपापविनाशाय विष्णुर्मे प्रीयतामिति ॥
मधुधेनुमभावाच्च शक्तितः पात्रमेव च ।
दत्त्वा यत् फलमाप्नोति तदिहैकमनाः शृणु ॥
पूर्व्वजन्मनि यत् पापमिह जन्मनि सञ्चितम् ।
वर्त्तते सकलं हृत्वा स्वर्गलोके महीयते ॥ * ॥
वैशाखस्य तु मासस्य पूजयेन्मधुसूदनम् ।
पूर्व्वोक्तविधिना राजन् सौवर्णं मधुसूदनम् ॥
जलकुम्भे तु संस्थाप्य मन्त्रेणानेन पूजयेत् ।
एकार्णवे जले धातुर्हृता वेदाः पुरा हरे ॥
मधुना ते हृतः सोऽपि तेनासि मधुसूदनः ।
स मे भवतु सुप्रीतो देवदेवः सनातनः ॥
सर्व्वपापविनाशाय प्रीयतां मधुसूदनः ।
घृतधेनुमथो दत्त्वा ब्राह्मणान् भोजयेत्ततः ॥
ततः प्रदक्षिणं कुर्य्यात् दत्त्वा देयान् यथोपगान् ।
एवन्तु चपमाणस्य तस्य पुण्यफलं शृणु ॥
कपिलानां सहस्रस्य सम्यगुद्दत्तस्य पुष्करे ।
तत्फलं समवाप्नोति भक्तियुक्तोऽसंशयः ।
यावदिन्द्रो वसेत् स्वर्गे तावदेव स तिष्ठति ॥*॥
ज्येष्ठस्यैव तु मासस्य शुक्लपक्षे तु द्वादशीम् ।
पूजयेद्विधिवद्भक्त्या समुपोष्य त्रिविक्रमम् ॥
जलधेनुमथो दद्याद्विप्राय नियतः शुचिः ।
यज्ञभागभुजो दैत्यान् सन्निहत्य क्रमैस्त्रिभिः ॥
त्रैलोक्यमाहृतं तस्मात् तेनासि त्वं त्रिविक्रमः ।
त्रिविक्रमं त्रिलोकेशं प्रीणयामि त्रिविक्रमम् ॥
ततः प्रदक्षिणं कृत्वा ब्राह्मणेभ्यश्च दक्षिणाम् ।
दत्त्वा तु भोजयेत्तांस्तु शृणु तस्यापि यत् फलम् ॥
वाजपेयस्य यज्ञस्य सम्यगिष्टस्य पार्थिव ।
तत्फलं लभते मर्त्यः परत्रेह सुखी भवेत् ॥*॥
वामनस्तु तथाषाढे समुपोष्य प्रयत्नतः ।
द्वादशीनियताहारो वामनं तत्र पूजयेत् ॥
हिताय सर्व्वदेवानां आदित्यः कामदो यथा ।
तथा त्वं भव मे देव वामनो बलिबन्धन ॥
तिलधेनुं ततो दद्यात् वामनः प्रीयतामिति ।
तदभावात्तथा पात्रं यथाशक्त्या च दक्षिणाम् ॥
पूर्व्वजन्मकृतं पापमिहजन्मकृतञ्च यत् ।
तत् सर्व्वं विनिहत्याशु परत्र च शुभां गतिम् ॥*॥
श्रावणस्य तु मासस्य द्वादश्यां शुक्लपक्षतः ।
यः क्षिपेन्नियतो भूत्वा समुपोष्य जनार्द्दनम् ॥
समर्च्चयेत् यथाशक्त्या पूर्व्वोक्तविधिना ततः ।
धेनुं सर्व्वगुणोपेतां ब्राह्मणाय निवेदयेत् ॥
मन्त्रेणानेन राजेन्द्र पौराणविधिवेन च ।
समादाय ततो लक्ष्मीं लोकेभ्यः क्षीरसागरे ।
स्वपिति श्रावणे मासि श्रीधरोऽसि जगत्पते ! ॥
श्रावणे श्रीधरो देवः श्रीवत्सः श्रीनिकेतनः ।
प्रीयतां हि श्रियः कान्तो गतिमिष्टां ददातु मे ॥
गवां दशसहस्रेण पात्रदत्तेन यत् फलम् ।

सकलं लभते मर्त्यो भक्तियुक्तो न संशयः ।
स्वर्गेषु विपुलान् भोगान् भुनक्ति सुरराडिव ॥*॥
तेनैव विधिना राजन् मासे भाद्रपदे ततः ।
समुपोष्य ततो भक्त्या हृषीकेशं प्रपूजयेत् ॥
सुक्ताधेनुमथो दद्यात् यथाविभवविस्तरात् ।
हृषीकाणीन्द्रियाण्याहुस्तेषामीशो जगत्पतिः ॥
करोति कर्तृभूतोऽसौ हृषीकेशो भवानतः ।
देवदेवं हृषीकेशं भूतेषु प्रभवाव्ययम् ॥
प्रीणयामि सुसंप्रीतो मम पापं व्यपोहतु ।
एवं प्रदक्षिणं कृत्वा विष्णुलोके महीयते ॥*॥
द्वादश्यां समुपोष्यैव पद्मनाभं तथार्च्चिने ।
पूजयेद्विधिवद्भक्त्या गन्धधूपविलेपनैः ।
गन्धधेनुं ततो दद्यात् कर्पूरागुरुचन्दनैः ।
शुक्लेन हि राजेन्द्र वित्तशाठ्यं विवर्ज्जयेत् ॥
एकार्णवगते तोये स्वपतो यस्य वेधसः ।
निवासाय भवन्नाभ्यां पद्मनाभोऽसि हृत्युत ॥
प्रीयतां पद्मनाभो मे दुष्कृतं चोपशाम्यतु ।
इत्युक्त्वा तं समभ्यर्च्च्य दद्यात् धेनुं द्विजायते ॥
इत्येवं चपमाणस्य तस्य पुण्यमतः शृणु ।
समग्रजन्मकृतं पापं स्वल्पं वा यदि वा बहु ।
दग्ध्वा तत् सकलं भूप विष्णुलोकं स गच्छति ॥*॥
कार्त्तिकस्य तु मासस्य एकादश्यामुपोषितः ।
प्रसुप्तं बोधयेद्रात्रौ श्रद्धाभक्तिसमन्वितः ॥
वृत्यैर्गीतैस्तथा वाद्यैर्नृत्यतूर्यसमङ्गलैः ।
वीणापणवशब्दैश्च पुराणश्रवणेन च ॥
वासुदेवकथाभिश्च स्तोत्रैरन्यैश्च वाग्वैः ।
सुभाषितैरिन्द्रजालैर्भूमिशोभाभिरेव च ॥
पुष्पैर्धूपैश्च नैवेद्यैर्दीपवृक्षैश्च शोभनैः ।
होमैर्भक्ष्यैरपूपैश्च फलैः शाकैश्च पायसैः ।
इक्षोर्विकारैर्मधुना द्राक्षाखोड़ैः सदाड़िमैः ।
कुटेरकस्य मञ्जर्य्या सर्ज्जिकालवणेन च ॥
कूष्माण्डाभ्यां सितरक्ताभ्यां चन्दनाभ्याञ्च सर्व्वदा ।
कुङ्कुमालक्तकाभ्याञ्च रक्तसूत्रैः सकङ्कणैः ॥
तथा नानाविधैः पुष्पैर्दैवैर्वैचित्र्यक्रियाधनैः ।
तस्यां रात्रौ व्यतीतायां द्वादश्यामरुणोदये ।
स्नात्वा नदीजलैः पुण्यैः प्रतिमां स्नापयेत्ततः ।
उत्थितां त्वपरे रम्यां तास्त्रां रौप्यां सुवर्णजाम् ।
वैष्णवीं प्रतिमां यत्र चित्रे सुप्ता क्षितु भवेत् ।
तत्र स्नानादिपूजा च वेद्यां कार्य्या च विष्णवे ॥
आदौ घृतेन तैलेन मधुना तदनन्तरम् ।
दुग्धा क्षीरेण च ततः पञ्चगव्येन स्नापयित् ॥
उदर्त्तनं माषचूर्णं मसूरामलकानि च ।
रौद्रं कालीयकञ्चैव नागरं वर्णकं तथा ॥
सर्व्वपाद्य प्रियङ्गुश्च मातुलुङ्गरसैस्तथा ।
सर्व्वौषधीः सर्व्वगन्धाः सर्व्वबीजानि काणनम् ॥
माङ्गल्यानि यथालाभं रत्नानि च क्षणोदकम् ।
हस्तिदन्तोद्धृता रत्न हृयमृङ्गोद्धृता तथा ॥
नदीतीरात्तथा स्नानात् वल्मीकात् शुद्धमात्
हृदात् ।
हृदस्नानाच्च सरसस्तथा पर्व्वतमस्तकात् ॥
एताभिः स्नाप्य देवेशं ददात् गोरोचनां शुभाम् ।
ततस्तु कलसा देया यथाप्राप्तं स्वलङ्कृताः ॥

सुनासि
जातीपल्लवसंयुक्ता: सफलाश्च सकाञ्चना: ।
पुण्याहवेदघोषेण वीणावेणुरवेण च ॥
घृष्टेन मधुरेणैव सूतमागधवन्दिनाम् ।
एवं संस्थाप्य गोविन्दं स्नपनेप्सं स्नपनम् ॥
सुवासं पूजयेत्तत्तु सुमनोभिश्च कुङ्कुमैः ।
दीपैर्धूपैर्मनोज्ञैश्च पायसेन तु भूरिणा ॥
नानारत्नप्रदानैश्च होमैः पुण्यैः सदक्षिणैः ।
वासोभिर्भूषणैर्दिव्यैर्गोभिरश्वैर्गजैरपि ॥
ब्राह्मणाः पूजनीयाश्च विष्णोराद्याः सुनासयः ।
विष्णो रात्रौ प्रसुप्तस्य दामोदरगतं यतः ॥
ब्रह्माण्डानि च तेनात्र दामोदर इति स्मृतः ।
दामोदर इमां धेनुं गृह्णातु स्वयमेव हि ॥
दिव्यरूपेण ते विष्णो प्रजन्येषा सनातनी ।
इत्येवं पृथिवीदानात् फलं प्राप्नोति मानवः ॥
सुवर्णस्य महाधेनुं दत्त्वा नृपवरोत्तमः ।
हत्वा पापान्यनेकानि शतजन्मान्तराणि वै ॥
वैष्णवं लोकमाप्नोति यावदिन्द्राश्चतुर्दश ।
सम्यगत्र व्रते चीर्णे सप्तजन्मानुगं फलम् ॥
ददाति भगवान् विष्णुः कामान् मोक्षं नरेश्वर ।
ब्राह्मणान् भोजयेच्छक्त्या भक्तैरन्यैश्चरैरपि ॥
ततः प्रदक्षिणं कृत्वा यथाशक्त्या च दक्षिणाम् ।
फलवान् द्वादशैवैवं प्राह्मणेभ्यः प्रदापयेत् ॥
घृतेनाक्तैस्तिलैर्युक्तान् ईक्षुगर्भोपशोभितान् ।
दधिक्षीरयुतांश्चैव गुडान् नृप भूरिशः ।
भक्त्यर्थं तथा दद्यात् भक्तिरेवात्र कारणम् ॥
प्रमादेनापि यो राजन् सुनामद्वादशीं नरः ।
करोति पुण्यभागी स यथा वैरोचनो बलिः ॥
एवं यः कुरुते राजन् सुनामद्वादशीं नरः ।
राजसूयस्य यज्ञस्य फलं समधिकं भवेत् ॥
सर्वदानेषु यत् पुण्यं यच्च पुण्यं तपोवने ।
सर्वतीर्थेषु यत् पुण्यं तत् पुण्यं समुदाहृतम् ॥
गावो द्वादश दातव्या वस्त्रयुग्मानि काञ्चनम् ।
अशक्तौ चैव ग्रामैकां गां वा सर्वसंयुतम् ॥
मासि मासेऽथवाब्दं चरितं जीवितं यतः ।
सफलिता हि धर्मस्य कर्तुस्तिष्ठति न जायते ॥
सुतप्ताच्चा सुमेधावी न तत्र त्यजेन्मनः ।
न तस्य विघ्नबाधोऽस्ति भक्तियुक्तो हि केशवः ॥
अनेन विधिना यस्तु द्वादशीं प्रतिवत्सरम् ।
कृत्वा नरः परं याति विष्णुलोकमनामयम् ॥
सुनामद्वादशी चैव प्रजानामुत्तमा नृप ।
व्याधा नरेण कर्तव्या सौभाग्यद्वर्धनाद्भुतम् ॥
अपेतो लोकपेतं पुण्यं प्रपद्यते द्वादशीं नरः ।
साधुभी मन्यते स्वर्गे कर्ता विष्णुपुरं व्रजेत् ॥"
इति श्रीबृहद्धर्मे सुनामद्वादशीनामाध्यायः ॥

सुनाभः, पुं, (सुष्ठु नाभमस्य । बस्य वः ।) पद्मोत्पन्नब्रह्मा । सनाभिः । कालचक्रः । इति मेदिनी ॥

सुनासः, पुं, (सुष्ठु नासमस्य । कप् ।) पक्षिभेदः । इति शब्दरत्नावली । सुन्दरनासिके, त्रि ।

सुनासिका, स्त्री, (सुष्ठु नासिका यस्याः ।) कान्तनाम्नी । इति राजनिर्घण्टः । (शोभना नासिका ।) शोभननासा । तद्युक्ते, त्रि ॥ (यथा, भागवते । १ । २४ । ४६ ।
"पद्मकोशपलाशाक्षं सुन्दरभ्रु सुनासिकम् ॥")

सुनासीरः, पुं, (सुष्ठु नासीरं अग्रगामित्वेन यस्य ।) इन्द्रः । इत्यमरः । १ । १ । ४४ ॥ (देवः । यथा, भागवते । ४ । ७ । ७ ।
"ततो मौञ्जसमामन्त्र्य सुनासीरः सहर्षिभिः ।
भूयस्तद्वैवयजनं समीढुर्दधरो यतुः ॥")
सुनासीरश्च ॥

सुनिर्यासा, स्त्री, (शोभनो निर्यासो यस्याः ।) निङ्गिनीवृक्षः । इति भावप्रकाशः ॥

सुनिश्चितः, पुं, (सुष्ठु निश्चितं निश्चयो यस्य ।) बुद्धविशेषः । इति त्रिकाण्डशेषः ॥

सुनिश्चितः, त्रि, (सुष्ठु निश्चितः ।) सुन्दरनिश्चयविषयीभूतः । इति हलायुधः ॥

सुनिषण्णं, क्ली, (सुष्ठु निषण्णं निद्रा यस्मात् ।) सुनिषण्णकशाकम् । इति त्रिकाण्डशेषः ॥ (यथा, सुश्रुते । ६ । ४५ ।
"पट्टोलपिलुसुनिषण्णयूथिका
वटातिमुक्ताङ्कुरमिन्द्रवारुणम् ।
छित्त्वा शाकं घृतसंस्कृतं सदा
तथैव धात्रीफलदाडिमान्वितम् ॥"
क्वचित् पुंलिङ्गेऽपि दृश्यते । यथा,—
"सुनिषण्णो हिमो ग्राही मोहदोषत्रयापहः ।
अविदाही लघुः स्वादुः कषायो रूक्षदीपनः ।
दृष्यो रक्तो ज्वरश्वासमेहकुष्ठभ्रमप्रणुत् ॥"
इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे ॥)

सुनिषण्णकं, क्ली, पुं, (सुनिषण्णमेव । स्वार्थे कन् ।) शाकविशेषः । सुसुणी इति भाषा । तत्पर्य्यायः । वितुन्नम् २ । इत्यमरः । २ । ४ । १२६ ॥ सुनिषण्णम् ३ घुचूः ४ । इति त्रिकाण्डशेषः ॥ (यथा,
"श्रितिवारः श्रितिवरः स्वस्तिकः सुनिषण्णकः ।
श्रीवारकः सुचिपत्रः पर्णकः कुक्कुटः शिखी ॥
चाङ्गेरीसदृशं पत्रं चतुर्दलं इतीरितः ।
शाकौ बलान्विते देये चतुःपञ्चेति चोच्यते ॥"
इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे ॥)
अस्य गुणाः । यथा,—
"अविदाही त्रिदोषघ्नः संग्राही सुनिषण्णकः ।"
इति राजवल्लभः ॥
अन्यत् सितावरशब्दे द्रष्टव्यम् ॥

सुनिष्पन्नः, त्रि, अत्युत्तमः । सुपूर्वनिर्पूर्वपद्यतेः क्तप्रत्ययेन निष्पन्नः ॥

सुनीतिः, स्त्री, (शोभना नीतिः ।) शोभननयः । ध्रुवमाता । इति मेदिनी ॥ (सा तु उत्तानपादस्य राज्ञोऽप्रेयसी पत्नी । यथा, भागवते । ४ । ८ । ८ ।
"आद्ये उत्तानपादस्य सुनीतिः सुरुचिस्तयोः ।
सुरुचिः प्रेयसी यज्जनेतरा यत्सुतो ध्रुवः ॥")
शोभननीतिविशिष्टे, त्रि ॥

सुनीतिः, त्रि, (सुष्ठु नयति धर्म्ममिति । सु + नी + "इगुपधज्ञीप्रीकिरः कः ।" उणा० २ । ८० । इति कः ।) धर्म्मशीलकः । इत्यादिकोषः । पुं, साधुः । इति संक्षिप्तसारोणादिवृत्तिः ॥ (चन्द्रवंशीयालर्करानपौत्रः । यथा, भागवते । ९ । १७ । ८ ।
"अलर्कात् सन्ततिस्तस्मात् सुनीथोऽथ निकेतनः ॥")

सुनील, क्ली, (सुष्ठु नीलम् ।) लामज्जकम् । इति राजनिर्घण्टः ॥

सुनीलः, पुं (अतिशयो नीलः ।) दाडिमः । इति राजनिर्घण्टः ॥ सुन्दरनीलवर्णश्च ॥

सुनीलकः, पुं, (सुनील एव । स्वार्थे कन् ।) नीलभृङ्गराजः । नीलासनः । नीलरत्नम् । इति राजनिर्घण्टः ॥

सुनीला, स्त्री, (अतिशयनीला ।) अनन्ता । विष्णुक्रान्ता । अपराजितम् । इति राजनिर्घण्टः ॥

सुनु, [नौ] क्ली, जलम् । शोभना नौर्यत्र तत् सुनु जलम् । इति सुबोधटीकायां दुर्गादासः ॥

सुनौः, त्रि, शोभननौकाविशिष्टः । शोभना नौर्यत्र वा इति बहुव्रीहिसमासनिष्पन्नः । शोभननौकायाम्, स्त्री ॥

सुन्दः, पुं, वानरविशेषः । यथा,—
"जाम्बवान् ऋषभः सुन्दो नभः प्रतबलिः पृथुः ।
बृहानीकाश्च यत्ताश्च हुमानादाय सर्व्वतः ॥"
इति वाल्मीकीये रामायणे युद्धकाण्डे ४० सर्गः ॥
राक्षसविशेषः । यथा,—
"अथ कालोपमौ युद्धे सुनौ सुन्दोपसुन्दयोः ।
यज्ञविघ्नकरौ तौ ते नैव दास्यामि पुत्रकम् ॥"
इति रामायणे बालकाण्डे २० सर्गः ॥
(संह्रादपुत्रः । यथा, हरिवंशे । ३ । ७२ ।
"संह्रादपुत्रौ सुन्दश्च निसुन्दश्चैव तावुभौ ॥"
विष्णुः । इति महाभारतम् । १३ । १४८ । ८९ ॥)

सुन्दरं, त्रि, (सुष्ठु उनत्ति आर्द्रीकरोति चित्तमिति । सु + उन्द क्लेदने + अरः । प्रकन्यादित्वात् साधुः ।) मनोहरम् । तत्पर्य्यायः । रुचिरम् २ चारु ३ सुषमम् ४ साधु ५ शोभनम् ६ कान्तम् ७ मनोरमम् ८ रुच्यम् ९ मनोज्ञम् १० मञ्जु ११ मञ्जुलम् १२ । इत्यमरः । ३ । १ । ५१ ॥ मनोहारि १३ सौम्यम् १४ भद्रकम् १५ रमणीयम् १६ रामणीयकम् १७ । इति तट्टीका ॥ वल्गुरम् १८ वल्गुरम् १९ पेशलम् २० पेसलम् २१ वामम् २२ रामम् २३ अभिरामम् २४ नन्दितम् २५ सुमनम् २६ । इति शब्दरत्नावली ॥ वल्गु २७ हारि २८ स्वरूपम् २९ अभिरूपम् ३० दिव्यम् ३१ । इति जटाधरः ॥

सुन्दरः, पुं, (सु + उन्द + अरः ।) कामदेवः । इति केचित् ॥ वृक्षविशेषः । सुँदरी इति भाषा । यथा,—
"अम्बुवल्लीलवदिरसिन्धुवाराश्च सुन्दरः ।
एषामन्यतमाङ्गारं निर्म्मलाम्बुनि भावयेत् ॥"
इति सुश्रुतोधः ॥

सुन्दरी, स्त्री, (सुन्दर + गौरादित्वात् ङीष् ।) नारीभेदः । इत्यमरः । २ । ६ । ७ ॥ सुष्ठु उनत्ति

आर्द्रयति मनः इति सुन्दरी। उन्द घी क्लेदे सुपूर्वः नान्नीति अरः निपातनादुलोपः नदादित्वादीप्। रूपलावण्यसम्पन्ना सुन्दरी। इति तट्टीकायां भरतः॥ तरुभेदः। इति मेदिनी॥ हरिद्रा। इति शब्दचन्द्रिका॥ त्रिपुरसुन्दरी। यथा,—
"अङ्गुष्ठानामिकायोगात् वामहस्तस्य पार्वति।
तर्पयेत् सुन्दरीं देवीं ससुद्राञ्च सवाहनाम्॥"
इति तन्त्रसारे श्रीविद्याप्रकरणम्॥
योगिनीविशेषः। यथा,—
"तावन्मन्त्रं उपेद्विद्वान् यावदायाति सुन्दरी।
ज्ञात्वा हृदं साधकेन्द्र निर्भीर्घे याति निश्चितम्॥"
इति तन्त्रे योगिनीसाधनप्रकरणम्॥

सुनभ, द्वयौ। हिंसे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-हिंसे सक०-सेट्।) सुम्भते। इति दुर्गादासः॥

सुन्वन्, [त्] त्रि, यज्ञकर्त्ता। "सुञो यज्ञसंयोगे।" ३। २। १३२। इति सुनोतेः शतृप्रत्ययः॥ सर्व्वे सुन्वन्तः। सर्व्वे यजमानाः सचिवः। इति सिद्धान्तकौमुदी॥

सुपक्वः, पुं, (सु+पच्+क्तः।) सुगन्ध्याम्रः। इति शब्दचन्द्रिका॥ शोभनपरिणते, त्रि॥ (यथा, भागवते। १। ८। ४०।
"इमे जनपदाः स्वृद्धाः सुपक्वौषधिवीरुधः।
वनाद्रिनद्युदन्वन्तो ह्येधन्ते तव वीक्षिताः॥")

सुपत्रं, क्लीं, (शोभनं पत्रमस्य।) तेजपत्रम्। इति शब्दचन्द्रिका॥

सुपत्रः, पुं, (शोभनं पत्रमस्येति।) आदित्यपत्रः। प्रसिद्धवाचकशब्दम्। इति राजनिर्घण्टः॥

सुपत्रकः, पुं, (शोभनं पत्रमस्य। कप्।) शिग्रुः। इति राजनिर्घण्टः॥ (शिग्रुशब्दस्य विशेषो ज्ञातव्यः॥)

सुपत्रा, स्त्री, (शोभनं पत्रमस्याः।) गन्धतटा। शतावरी। पालङ्क्यम्। शमी। शालपर्णी। इति राजनिर्घण्टः॥

सुपत्रिका, स्त्री, चतुष्का। इति राजनिर्घण्टः॥

सुपथः, पुं, (सु शोभनः पन्थाः। वाः समासे।) सन्मार्गः। यथा,—
"मनुष्यस्तिपन्थाश्च सुपन्थाः सुपथोऽपि च।"
इति शब्दरत्नावली॥
(यथा, कथासरित्सागरे। २०। १६२।
"विषयाक्रम्यमाणा हि तिष्ठन्ति सुपथे कथम्॥")
शोभनपथयुक्ते, त्रि॥

सुपत्या, स्त्री, (सुष्ठु पत्यं यस्याः।) श्वेतचिल्ली। इति राजनिर्घण्टः॥ सत्पत्नीयुक्ते, त्रि॥

सुपत्न्याः, पुं, (शोभनः पन्थाः।) सत्पथः। इति शब्दरत्नावली॥

सुपद्मः, पुं, पद्मनाभदक्ष-कृतयज्ञाधरस्थावयवः। यथा,—
"ऐशोऽर्यमं धीरः श्रियकृताभिविदिग्रम।
ओजो आकरमादर्शः सुपद्मस्य पक्षिका॥
मर्गो हि नाम्नोऽस्य प्रयोगस्याश्च दीक्षिता।
उषादिदृक्षी रचिता तथा च धातुकौमुदी॥"
इति तदीयपरिभाषावृत्तिः॥
(पुं, क्लीं। शोभनं पद्मम्।) शोभनपद्मञ्च। शोभनपद्मविशिष्टे, त्रि॥

सुपद्मा, स्त्री, वचा। इति शब्दचन्द्रिका॥

सुपर्णः, पुं, (सुष्ठु पर्णं पक्षो यस्य।) गरुडः। इत्यमरः। १।१।३१॥ (यथा, रघुः। १०। ६१।
"उत्पत्तिं स सुपर्णेन वेगाक्षेपयोसुचा॥")
स्वर्णचूडपक्षी। कृतमालकवृक्षः। इति मेदिनी॥ (पक्षिमात्रम्। यथा, मनुः। १। ३७।
"नागान् सर्पान् सुपर्णांश्च पितॄणाञ्च पृथग्-
गणान्॥"
विष्णुः। इति महाभारतम्। १३। १४६। ३४॥) शोभनपर्णविशिष्टे, त्रि॥

सुपर्णकः, पुं, (सु शोभनानि पर्णानि यस्य। कन्।) आरग्वधवृक्षः। इति रत्नमाला॥ सप्तच्छदवृक्षः। इति घण्टापरः॥ गरुडः। इति हेमचन्द्रः॥

सुपर्णकेतुः, पुं, (सुपर्णः केतौ यस्य।) विष्णुः। इति हलायुधः॥

सुपर्णा, स्त्री, (सु शोभनानि पर्णानि पत्राणि यस्याः।) पक्षिणी। इति शब्दमाला॥

सुपर्णाख्यः, पुं, (सुपर्ण इति आख्या यस्य।) नागकेशरः। इति त्रिकाण्डशेषः॥ (अस्य पर्य्यायो यथा, वैद्यकरत्नमालायाम्।
"दीर्घः सर्पः सुपर्णाख्यश्चाम्बेयो नागकेशरः॥")

सुपर्णिका, स्त्री, (शोभनानि पर्णानि यस्याः। कप्। टापि अत इत्वम्।) स्वर्णजीवन्ती। पलाशी। शालपर्णी। रेणुका। वाकुची। इति राजनिर्घण्टः॥ (अस्याः पर्य्यायो यथा.—
"अवल्गुजो वाकुची स्यात् सोमराजी सुपर्णिका।
अग्निशिखा कृष्णफला सोमा पूतिफलेति च।
सोमवल्ली कालमेघी कुष्ठघ्नी च प्रकीर्त्तिता॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

सुपर्णी, स्त्री, (सुष्ठु पर्णान्यस्याः। गौरादित्वात् ङीष्।) कमलिनी। गरुडमाता। इति मेदिनी॥ (पक्षिणीमात्रे च। यथा, महाभारते। ३। २२४। १०।
"सुपर्णी सा तदा भूत्वा निर्जगाम महावनात्॥")

सुपर्णीतनयः, पुं, (सुपर्ण्यास्तनयः।) गरुडः। इति हलायुधः॥

सुपर्व्वा, [न्] पुं, (सुष्ठु पर्व्व यस्य।) देवता। इत्यमरः। १। १। ७॥ बाणः। वंशः। पर्व्व। धूमः। इति मेदिनी॥

सुपर्व्वा, स्त्री, (शोभनं पर्व यस्याः।) श्वेतदूर्व्वा। इति राजनिर्घण्टः॥ सुन्दरपर्व्वविशिष्टा च॥

सुपाक्यं, क्लीं, (सुपाकाय हितम्। सुपाक+यत्।) विडूलवणम्। इति राजनिर्घण्टः॥

सुपात्रं, क्लीं, (सुष्ठु पात्रम्।) योग्यव्यक्तिः। (यथा, भागवते। ७। १४। ४१।
"पुरुषेष्वपि राजेन्द्र सुपात्रं ब्राह्मणं विदुः।
तपसा विद्यया तुष्ट्या धर्म्मो वेद हरेस्तनुम्॥")
तत्र दानविधिर्यथा,—
"तस्मात्सर्व्वात्मना पात्रे दद्यात्कनकदक्षिणाम्।
इति।
सर्व्वेषामेव पात्राणां परं पात्रं महेश्वरः।
पतन्तं त्रायते यस्मादतीव नरकार्णवादिति॥
पात्राणामात्मिका सृष्टा विश्वहाद्याग्नि-
होत्रिणः।
देवताश्च तथा सृष्टा गोदानं श्रेष्ठदुत्तममिति॥
सर्व्वत्र गुणवद्दानं अपात्रादप्यपि स्मृतम्।
देशे काले विधानेन पात्रे दत्तं विशेषतः॥"
पात्रे विद्यातपस्यादिगुणयुक्ते। इति च प्रायश्चित्ततत्त्वम्॥ अपि च।
"तस्मात् सर्व्वात्मना पात्रे दद्यात् कनकमुत्तमम्।
अपात्रे पातयेद्दत्तं सुवर्णं नरकार्णवे॥"
इति शुद्धितत्त्वम्॥

शोभनभाजनम्। शोभनञ्च तत्पात्रञ्चेति कर्म्मधारयसमासनिष्पन्नम्। उत्तमपात्रयुक्ते, त्रि॥

सुपानः, त्रि, (सुखेन पीयते इति। सु+पा+"आनो युच्।" ३। ३। १२८। इति युच्।) पानयोग्यः। सुखेन पीयतेऽसौ। आनोऽनोहरिद्र इत्यनेन कर्म्मणि अनप्रत्ययेन निष्पन्नः। इति सुग्धबोधव्याकरणम्॥

सुपार्श्वः, पुं, (सुष्ठु पार्श्वोऽस्य।) चतुर्विंशतितीर्थङ्करान्तर्गततृतीयार्हद्विशेषः। इति हेमचन्द्रः॥ शुक्लवृक्षः। इति राजनिर्घण्टः॥ पक्षिविशेषः। स तु सम्पातिपुत्रः। यथा,—
"निर्दग्धपक्षं सम्पातिं वानराः सुमहौजसः।"
इत्युपक्रम्य।
"क सीता केन वा दृष्टा को वा हरति मैथिलीम्।
तदाख्यातु भवान् सर्व्वं गतिर्भव वनौकसाम्॥
सहरीन् प्रतिसंसक्तान् सीताश्रुतिसमाहितान्।
पुनराश्वासयन् प्रीत इदं वचनमब्रवीत्॥
अहमस्मिन् गिरौ दुर्गे बहुयोजनमायते।
चिरान्निपतितो वृद्धः क्षीणप्राणपराक्रमः॥
तं मामेवं गतः पुत्रः सुपार्श्वो नाम नामतः।
आहारेण यथाकालं बिभर्त्ति पततां वरः॥"
इति वाल्मीकीये रामायणे किष्किन्धाकाण्डे ५८ सर्गः॥ (पीठस्थानविशेषः। यथा, देवीभागवते। ७। ३०। ६६।
"नारायणी सुपार्श्वे तु त्रिकूटे रुद्रसुन्दरी॥")
इलावृतवर्षस्य पर्व्वतविशेषः। यथा, विष्णुपुराणे। २। २। १७।
"विपुलः पश्चिमे पार्श्वे सुपार्श्वश्चोत्तरे स्मृतः॥")

सुपार्श्वकः, पुं, (सुष्ठु पार्श्वो यस्य। कन्।) चतुर्विंशतिभावार्हदन्तर्गतार्हद्विशेषः। इति हेमचन्द्रः॥ गर्द्दभाण्डवृक्षः। इत्यमरः। २। ४। ४३॥ (अस्य विशेषभेदः। गजकुम्भमहीरुहा इति लोके।
"पारोषीरन्यः पलाशश्च कपिलश्च वासस्तुः।
गर्द्दभाण्डश्चन्दनश्च कपीतनः सुपार्श्वकः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

इत्थं प्रभाते परमं पवित्रं
यः संस्मरेद्वा शृणुयाच्च भक्त्या.
दुःस्वप्ननाशो ननु सुप्रभाते
भवेच्च सत्यं भगवत्प्रसादात् ॥"
इति वामनपुराणे १४ अध्यायः ॥

सुप्रभाता, स्त्री, नदीविशेषः। यथा। अरुणा ऋमणा आङ्गिरसी सावित्री सुप्रभाता कृतस्मरा सत्यम्भरेति महानद्यः। इति श्रीभागवते। ५। २०। ४ ॥ शोभनप्रभातयुता रात्रिश्च ॥

सुप्रयुक्तः, त्रि, (सु+प्र+युज+क्तः।) शोभनप्रयोगविशिष्टः। (यथा, साहित्यदर्पणे। १ परिच्छेदे।
"शब्दः शब्दः सुप्रयुक्तः सम्यक् ज्ञातः स्वर्गे लोके च कामधुग् भवति ॥")

सुप्रयुक्तशरः, पुं, (सुप्रयुक्तः शरो येन।) कृतहस्तः। इति हेमचन्द्रः ॥

सुप्रयोगविशिखः, पुं, सुशिक्षितबाणमोक्षकः। साधुसाधनत्वमत्वात् शोभनः प्रयोगो निक्षेपो यस्य स सुप्रयोगः तादृशो विशिखो बाणो यस्य स तथा। कृतहस्तः सुप्रयोगविशिखः कृतपुङ्खवत्। इत्यमरभरतौ। २। ८। ६८ ॥

सुप्रलभ्यः, पुं, (सु+प्र+लभ+खल्। "उपसर्गात् खलघञोः।" ७। १। ६७। इति नुम्।) सुखलभ्यः। इति सिद्धान्तकौमुदी ॥

सुप्रलापः, पुं, (सु+प्र+लप+घञ्।) सुवचनम्। इत्यमरः। १। ६। ३८ ॥

सुप्रसन्नः, पुं, (सुष्ठु प्रसन्नः।) कुबेरः। इति शब्दमाला ॥ सुप्रसादयुक्ते, त्रि ॥ (यथा, मार्कण्डेये। १०५। ७।
"तथानुकम्पां पुत्राणां सुप्रसन्नो रवे मम।
कुरु प्रसन्नार्चिरहर स्थितिकर्त्ता त्वमुच्यते ॥")

सुप्रसन्नकः, पुं, (सुप्रसन्न+संज्ञायां कन्।) क्षणार्जकः। इति राजनिर्घण्टः ॥

सुप्रसरा, स्त्री, (सुप्रसरतीति। सु+प्र+सृ+अच्। टाप्।) प्रसारिणी लता। इति राजनिर्घण्टः ॥

सुप्रसादः, पुं, (सुष्ठु प्रसादो यस्य।) शिवः। इति त्रिकाण्डशेषः ॥ (विष्णुः। इति महाभारतम्। १३। १४६। ३६ ॥ सु+प्र+सद्+घञ्।) सुप्रसन्नता च। (प्रसन्नतायुक्ते, त्रि। यथा, महाभारते। १२। ५७। ३१।
"त्रिप्रकारो जितक्रोधः सुप्रसादो महामनाः ॥")

सुप्रिया, स्त्री, (सुष्ठु प्रिया।) सुन्दरश्रद्धा। अस्याः प्रत्यायं सुभगाशब्दे द्रष्टव्यम् ॥ (अक्षरोविशेषः। यथा, महाभारते। १। १२३। ६०।
"अक्षिता च सुवाहुश्च सुप्रिया सुवपुस्तथा ॥")

सुफलः, पुं, (सुष्ठु फलं यस्य।) कर्णिकारः। दाडिमः। वदरः। तुङ्गः। इति राजनिर्घण्टः ॥ कपित्थः। इति शब्दचन्द्रिका ॥ शोभनफलयुक्ते, त्रि। (यथा, मार्कण्डेये। १२०। १६।
"सुफलानि च शस्यानि रसवन्ति फलानि च।"
शोभनफले, क्ली ॥ ६। सुष्ठु फलं यस्येति विग्रहे शोभनफलाविशिष्टे, त्रि। यथा, महाभारते। ४। ४०। १२।
"सुफलश्चित्रकोपेत किङ्किणीशायको महान्।
कस्य हेमत्सरुर्हस्यः खड्गः परमनिर्म्मलः ॥")

सुफला, स्त्री, (सुष्ठु फलं यस्याः।) इन्द्रवारुणी। कुष्माण्डी। काश्मरी। कदली। कपिलद्राक्षा। इति राजनिर्घण्टः ॥

सुफेनः, पुं, (सुष्ठु फेनः।) समुद्रफेनः। इति राजनिर्घण्टः ॥ (क्वचित् क्लीवलिङ्गोऽपि दृश्यते ॥)

सुबन्धुः, पुं, (सुष्ठु बन्धौ यस्य।) तिलः। इति शब्दचन्द्रिका ॥

सुब्रह्मण्यः, पुं, कार्त्तिकेयः। इति केचित् ॥

सुब्रह्मवासुदेवः, पुं, ब्रह्मरूपवसुदेवसुतः। यथा,—
"सुब्रह्मवासुदेवाय गोब्राह्मणहिताय च।
शान्तिरस्तु शिवञ्चास्तु इत्युक्त्वा तान् विसर्जयेत्॥"
इति तिथ्यादितत्त्वे जन्माष्टमीप्रकरणम् ॥

सुभगः, पुं, (सुष्ठु भगं माहात्म्यं श्रीर्वा यस्य।) टङ्कणः। चम्पकः। रक्तास्फानः। अशोकः। इति राजनिर्घण्टः ॥

सुभगः, त्रि (सुष्ठु भगं श्रीर्यस्य।) सुदृश्यः। तत्पर्य्यायः। चक्षुष्यः २। इति हेमचन्द्रः ॥ (यथा, रघुः। ११। ८०।
"केवलोऽपि सुभगो नवाम्बुदः
किं पुनस्त्रिदशचापलाञ्छितः ॥")
शोभने भर्य्यादियुक्तश्च ॥

सुभगा, स्त्री, (सुष्ठु भगं यस्याः।) केवर्त्ती। शालपर्णी। हरिद्रा। नीलदूर्व्वा। तुलसी। प्रियङ्गुः। कस्तूरी। सुवर्णकदली। इति राजनिर्घण्टः ॥ वनमल्ली। इति शब्दरत्नावली ॥ पतिप्रिया। यथा, मात्स्ये।
"मघा ऋक्षं परित्यज्य यदा सिंहे गुरुर्भवेत्।
तत्राब्दे कन्यका चोढ़ा सुभगा सुप्रिया भवेत् ॥"
इति मलमासतत्त्वम् ॥

सुभगासुतः, पुं, (सुभगायाः सुतः।) सौभाग्नेयः। इत्यमरः। २। ६। २४ ॥

सुभङ्गः, पुं, (सुखेन भज्यते इति। सु+भञ्ज+घञ्।) नारिकेलवृक्षः। इति शब्दार्थः ॥

सुभद्रः, पुं, (सुष्ठु भद्रं यस्मात्।) विष्णुः। इति शब्दमाला ॥ राजभेदः। इति हेमचन्द्रः ॥ (पौरवीगर्भसम्भूतो वसुदेवस्य पुत्रविशेषः। यथा, भागवते। ६। २४। ४७।
"सुभद्रो भद्रवाहुश्च दुर्म्मदो भद्र एव च।
पौरवास्त्वनया क्रीते भूतात्मा द्वादशाभवन् ॥")
शोभनमङ्गलयुक्ते, त्रि ॥ (यथा, महाभारते। १। २३३। १७।
"वत्स एतां पुनः शुक्र वीक्ष्यो हरितच्छदाः।
जायन्ते पुष्करिण्यश्च सुभद्रश्च महोदधिः ॥")

सुभद्रकः, पुं, (सुष्ठु भद्रमस्मात्। ततः कन्।) देवरथः। यथा, शब्दरत्नावल्याम्।
"श्वेतमयानं दिवरथो विमानोऽस्त्री सुभद्रकः ॥"
विल्वतरुः। इति शब्दचन्द्रिका ॥

सुभद्रा, स्त्री, (शोभनं भद्रमस्याः।) श्यामालता। इति शब्दमाला ॥ (अस्याः पर्य्यायो यथा,—
"कालपेयी महाश्यामा सुभद्रोत्पलगन्धिका।
दीर्घमूला च पालिन्दी मधुरविदलाच सा ॥"
इति वैद्यकरत्नमालायाम् ॥)
घृतमण्डा। इति शब्दचन्द्रिका ॥ काश्मरी। इति राजनिर्घण्टः ॥ श्रीकृष्णभगिनी। सा च अर्জ্জুনभार्য্যা। यथा,—
श्रीकृष्ण उवाच।
"ममैषा भगिनी पार्थ सारणस्य सहोदरा।
सुभद्रा नाम भद्रं ते पितुर्मे दयिता सुता।
यदि ते वर्त्तते बुद्धिर्व्रवीम्यहं पितरं स्वयम् ॥
अर्জ্জुन उवाच।
दुहित्रा वसुदेवस्य वासुदेवस्य च स्वसा।
रूपेण चैषा सम्पन्ना कमिवैषा न मोहयेत् ॥
निवृत्तश्चार्জ্জुनस्तत्र विवाहं कृतवान् प्रभुः।
पूर्णे तु द्वादशे वर्षे स्वराष्ट्रवप्रस्थमागतः ॥"
इति महाभारते आदिपर्व्वणि २२१ अध्यायः ॥
(पीठस्थानस्थदेवीविशेषः। यथा, देवीभागवते। ७। ३०। ७५।
"उत्पलावर्त्तके लोला सुभद्रा शोणसङ्गमे ॥")

सुभद्राणी, स्त्री, त्रायन्ती। इति रत्नमाला ॥ बहुला इति ख्याता ॥

सुभद्रेशः, पुं, (सुभद्रायाः ईशः।) अर्জ্জुनः। इति हेमचन्द्रः ॥

सुभाञ्जनः, पुं, (सु शोभनं अञ्जनं यस्मात्।) शोभाञ्जनवृक्षः। इति भरतहृदयकोषः ॥

सुभाषितः, पुं, (सुष्ठु भाषितं यस्य।) बुद्धभेदः। यथा,—
"कोमाभो द्वादशास्यश्च वीतरागः सुभाषितः ॥"
इति त्रिकाण्डशेषः ॥
सुन्दरकथिते, त्रि ॥ (सुन्दरवाक्यविशिष्टे च त्रि। यथा, महाभारते। ३। ६०। ४।
"नलश्च हृतसर्व्वस्वमुपलभ्येदमब्रवीत्।
दृष्टवानसि कामित्वयां तां वाचों परिचारिकां।
हिनां सर्व्वार्थकृच्छ्रेषु मधुरां सुभाषितम् ॥")
सुष्ठु भाषितम्। सुवाक्ये, क्ली ॥ यथा, हितोपदेशे।
"विषादप्यमृतं ग्राह्यमेध्यादपि काञ्चनम्।
नीचादप्युत्तमां विद्यां बालादपि सुभाषितम् ॥")

सुभिक्षः, त्रि, (सुखेन लभ्या भिक्षा यत्र।) सुलभभैक्षत्रयम्। सुलभभैक्षयुक्तकालादिश्च। यथा,—
"द्वाविमौ पुरुषौ लोके सूर्य्यमण्डलभेदिनौ।
दानानस्य तु दुर्भिक्षे सुभिक्षे वस्त्रहेमदः ॥"
इति वह्निपुराणे आह्निकतपोनामाध्यायः ॥
किञ्च।
"श्वेते चैमसुभिक्षं ब्राह्मण्यपीड़ाश्च निर्दिशेद्राष्ट्रे ॥"
इति तिथ्यादितत्त्वम् ॥

सुभिक्षा, स्त्री, (सुष्ठु भिक्ष्यतेऽसौ। सु+भिक्ष+घञ्।) घातपुष्पिका। इत्यमरः। २।४।१२८ ॥ (अस्याः पर्य्यायो यथा,—

"धानकी धातुपुष्पी च ताम्रपुष्पी च कुञ्जरा।
सुभिक्षा बहुपुष्पी च वह्निज्वाला च सा स्मृता॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

सुभीरकः, पुं, पलाशवृक्षः। इति हारावली॥

सुभूः, त्रि, (शोभना भूरुत्पत्तिर्यस्य।) सुजन्मा। इति सुग्धबोधव्याकरणम्॥ (शोभना भूर्भूमिः।) उत्कृष्टभूमौ, स्त्री। तत्सम्बन्धिनि, त्रि॥

सुभूतिकः, पुं, (सुष्ठु भूतिर्यत्र। कप्।) विल्ववृक्षः। इति राजनिर्घण्टः॥

सुभूमः, पुं, कार्त्तवीर्य्यः। स तु जिनानां अष्टमचक्रवर्त्ती। इति हेमचन्द्रः॥

सुभृशं, क्ली, (सुष्ठु भृशम्।) बाढ़म्। अतिशयम्। इति शब्दरत्नावली॥ (यथा, देवीभागवते। २। ६। २६।

"प्रक्षामि तं द्विजश्रेष्ठ येन मन्त्रः समर्पितः।
त्वामप्यपि सुभृशं क्षन्ति! नो चेत् मां त्वं भजिष्यसि॥")

तद्वति, त्रि॥

सुभ्रुः } स्त्री, (सुष्ठु भ्रुर्यस्याः। वा ऊङ्।)
सुभ्रूः } नारी। इति जटाधरः॥ (शोभना भ्रूः। यथा, भागवते। ३। २३। ३२।

"सुभ्रुवा सुदता श्रक्ष्णस्निग्धापाङ्गेन चक्षुषा।
प्रज्ञकोषस्मृधा नीलैरलकैश्च लसन्मुखम्॥")

सुन्दरभ्रूयुक्ते, त्रि॥ (यथा, भागवते। ४।८।४५।

"सुनसं सुभ्रुवं चारु कपोलं सुरसुन्दरम्॥")

सुमं, क्ली, (सुष्ठु मातीति। मा+कः।) पुष्पम्। इत्यमरटीकायां भरतः॥ (यथा, राजेन्द्रकर्णपूरे। ७४।

"किं हारैः किसु कङ्कणैः किसु सुमैः किं कर्णपूरैरलं
केयूरैर्मणिकुण्डलैरलमलं साड़म्बरैरम्बरैः।
पुंसामेकमखण्डनं पुनरिदं ग्रम्भोमते मण्डनं
यन्निर्व्याहितपार्व्वणेन्दुशकलस्पर्द्धोपमाः स्फुरायः॥")

सुमः, पुं, (सुष्ठु माति सौन्दर्य्यमिति। मा+कः।) चन्द्रः। नभः। इति संक्षिप्तसारोणादिवृत्तिः॥

सुमङ्गला, स्त्री, (सुष्ठु मङ्गलं यस्याः।) वायसोली। इति रत्नमाला॥ माकड़छाता इति माकड़िया इति च भाषा॥ अर्हतां माता। इति हेमचन्द्रः॥ कामाख्यादेशीयनदीविशेषः। यथा, कालिकापुराणे ८१ अध्याये।

"नदी सुमङ्गला नाम हिमपर्व्वतनिर्गता।
पूर्व्वस्यां मणिकूटस्य सदा स्रवति शोभना॥
मणिकूटं समारुह्य यस्तां पश्यति वै नदीम्।
स गङ्गास्नानजं पुण्यमवाप्य त्रिदिवं व्रजेत्॥"

अतिशयहेमयुक्ते, त्रि॥

सुमतः, त्रि, सुन्दरज्ञानविशिष्टः। सुशब्दपूर्व्वकमनधातोः क्तप्रत्ययेन निष्पन्नः॥

सुमतिः, पुं, (शोभना मतिर्यस्य।) वर्त्तमानकल्पीयार्हदेवः। भूतकल्पीयार्हदेवः। इति हेमचन्द्रः॥ सुन्दरमतियुक्ते, त्रि। (यथा, भागवते। १०। ६०। ६८।

"त्वं वै समस्तपुरुषार्थमयः फलात्मा
यद्वाञ्छया सुमतयो विसृजन्ति लब्धम्।
तेषां विभो समुचितो भवतः समाजः
पुंसः स्त्रियाश्च रतयोः सुखदुःखिनोर्न॥"*॥

शोभना मतिः।) शोभनमतौ, स्त्री॥

सुमतिः, स्त्री, (शोभना मतिर्यस्याः।) विष्णुयशसः पत्नी। सा कल्किमाता। यथा,—

"सम्भले विष्णुयशसो गृहे प्रादुर्भवाम्यहम्।
सुमत्यां मातरि विभोः कन्यायां तन्निदेशतः।
चतुर्भिर्भ्रातृभिर्देवैः करिष्यामि कलिक्षयम्॥"

इति कल्किपुराणे २ अध्यायः॥

अपि च। तत्रैव।

"सुमत्यां विष्णुयशसा गर्भमाधत्त वैष्णवम्॥"
"सुमतिस्तं सुतं लब्ध्वा विष्णुं जिष्णुं जगत्पतिम्।
पूर्णकामा विप्रसुखानाकूयादेहवां घृतम्॥"

सुमदनः, पुं, (सुष्ठु मद्यति कोकिलादीनिति। सु+मद+णिच्+ल्युः।) आम्रवृक्षः। इति राजनिर्घण्टः॥

सुमदात्मजा, स्त्री, (सुमदः आत्मन इव यस्याः। सुमदस्य आत्मजेव इति वा।) अश्वरसः। इति त्रिकाण्डशेषः॥

सुमधुरं, क्ली, (सुष्ठु मधुरम्।) अत्यर्थमधुरवाक्यम्। तत्पर्य्यायः। सान्त्वम् २। इति हेमचन्द्रः॥ अतिशयमधुररसयुक्ते, त्रि॥ (यथा, महाभारते। १३। ५४। १५।

"गौतध्वनिं सुमधुरं तथैवाध्यापनध्वनिम्।
हंसानां सुमधुरांश्चापि तत्र शुश्राव पार्थिवः॥")

सुमधुरः, पुं, (सुष्ठु मधुरो रसो यत्र।) जीवशाकः। इति राजनिर्घण्टः॥

सुमनः, पुं, (सुष्ठु मन्यते इति। सु+मन+अच्।) गोधूमः। इत्यमरः। २। ६। १८॥ (अस्य पर्य्यायो यथा,—

"गोधूमः सुमनोऽपि स्यात्त्रिविधः स च कीर्त्तितः।
महागोधूम इत्याख्यः पञ्चाद्देशात् समागतः॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
धुस्तूरः। इति शब्दमाला॥ मनोहरे, त्रि। इति शब्दरत्नावली॥

सुमनः, [स्] क्ली, (शोभनं मनो यस्मात्।) पुष्पम्। इत्यमरः॥ (यथा, भागवते। ४। १५। ७।

"प्रशंसन्ति स्म तं विप्रा गन्धर्व्वप्रवरा जगुः।
ववृषुः सुमनोधाराः सिद्धा नृत्यन्ति स्म स्त्रियः॥")

उत्तममनस्य। शोभनमनोयुक्ते, त्रि॥ (यथा, महाभारते। १। ६६। १०।

"ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चैव स्वकर्म्मसु।
स्थिताः सुमनसो राजंस्तेन राज्ञा सधिष्ठिताः॥")

सुमनःपत्रिका, स्त्री, (सुमनसो जातेः पत्रिका।) जातीपत्रिका। इति राजनिर्घण्टः॥

सुमनःफलं, क्ली, (सुमनसो जातेः फलम्।) जातीफलम्। इति राजनिर्घण्टः॥

सुमनःफलः, पुं, (सुष्ठु मनो यस्मात् स्वादुत्वं फलं यस्य।) कपित्थवृक्षः। इति शब्दचन्द्रिका॥

सुमनसः, स्त्री भूम्नि, पुष्पम्। इत्यमरः। २। ४। १७॥ सुप्रीतं मन आभिरिति सुमनसः। नित्यबहुवचनान्तत्वात् बहुवचननिर्देशः। भूम्नि स्त्रियः सुमनसः। इति रत्नकोषः॥ बहुत्वञ्च समाहिकता चप् सुमनसोऽस्यस्य इति भूम्नि वामनोऽपि। भूम्नि भूरिप्रयोगः। एकत्वञ्च दृश्यते। सुमनाः पुष्पमालत्योः स्त्रियां ना धीरदेवयोरिति मेदिनी। वेश्या श्मशानसुमना इव वर्জ্জनीया इति शूद्रकप्रयोगश्च। सुमनसः क्लीबत्वमपि पुंसं सुमनः कुसुममिति नाममालादिदर्शनात्। अप्रत्याख्येये दधिसुमनसीति क्लीबत्वं छान्दसमित्येके। इति भरतः॥ (यथा, महाभारते। १३। ६८। २०—२२।

"मनो ह्लादयते यस्मात् श्रियश्चापि ददाति च।
तस्मात् सुमनसः प्रोक्ता नरैः सुकृतकर्म्मभिः॥
देवताभ्यः सुमनसो यो ददाति नरः शुचिः।
तस्य तुष्यन्ति वै देवास्तुष्टाः पुष्टिं ददत्यपि॥
यं यमुद्दिश्य दीयेरन् देवं सुमनसः प्रभो।
मङ्गलार्थं च तेनास्य प्रीतो भवति देवप!॥")

सुमनाः, स्त्री, जातीपुष्पवृक्षः। इति शब्दरत्नावली॥ (यथा, भरतधृतसुश्रुतः।

"सुमनायाश्च पत्राणि पटोलारिष्टयोस्तथा॥")

सुमनाः, [स्] पुं, (शोभनं मनो यस्य।) देवता। इत्यमरः। १। १। ७॥ सुष्ठु मन्यते सुमनाः अस्। शोभनं मनोऽस्य इति वा। इति भरतः॥ पण्डितः। इति मेदिनी॥ पूतिकरञ्जः। इति शब्दमाला॥ निम्बः। महाकरञ्जः। गोधूमः। इति राजनिर्घण्टः॥ (शोभनचित्ते, त्रि। यथा, महाभारते। ३। २६। २१।

"ततस्ते ब्राह्मणाः सर्व्वे वकं दाल्भ्यमपूजयन्।
युधिष्ठिरे स्तूयमाने भूयः सुमनसोऽभवन्॥")

सुमनाः, [स्] स्त्री, (सुष्ठु मनो यस्याः।) पुष्पम्। मालती। इति मेदिनी॥ जाती। घृतपत्नी। इति राजनिर्घण्टः॥ "सुष्ठु मन्यते जनैर्मनोज्ञत्वात् शोभनं मनोऽस्यामिति वा सुमनाः सान्ता स्त्रीलिङ्गा च।

'स्त्रियां सुमनसौ भूम्नि पुष्पे जातौ च भेदतः।
विद्वष्यपि यदा दृष्टस्तदा भेदेन शिष्यते॥'

इति व्याडिः।

'सुमनाः पुष्पमालत्योः स्त्रियां गाधीरदेवयोः।'

इति सान्तेषु मेदिनी। आवन्तापि समनास्ति।

'सुमनायाश्च पत्राणि पटोलारिष्टयोस्तथा।'

इति सुश्रुतः।" इत्यमरटीकायां भरतः॥

सुमनोरजः, [स्] क्ली, (सुमनसां रजः।) परागः। इत्यमरः। २। ४। १७॥

सुमन्तुः, पुं, मुनिविशेषः। स चाथर्व्ववेदप्रशाखाप्रचारकः। वक्तृवारकश्च। यथा,—

"तच्चर्व्वदधरः पैलः सामगो जैमिनिः कविः।
वैशम्पायन एवैको निष्णातो यजुषामुत॥
अथर्व्वाङ्गिरसामासीत् सुमन्तुर्दारुणो मुनिः।
इतिहासपुराणानां पिता मे रोमहर्षणः॥"

इति श्रीभागवते। १। ४। २०—२२॥

"जैमिनिश्च सुमन्तुश्च वैशम्पायन एव च।
पुलस्त्यः पुलहश्चैव पञ्चैते वज्रवारकाः॥"
इति पुराणम्॥
(सुष्ठु मन्तुरपराधो यस्य।) अत्यपराधिनि, त्रि॥
सुमन्तः, पुं, कल्किदेवस्य ज्येष्ठभ्राता। यथा,—
"कल्केर्ज्येष्ठास्त्रयः शूराः कविप्राज्ञसुमन्तकाः।
तानमात्यप्रियकरा गुरुविप्रप्रतिष्ठिताः॥"
इति कल्किपुराणे २ अध्यायः॥
अपि च।
"विशाखयूपभूपालः प्रयातः साधुजनप्रियः।
कल्किं द्रष्टुं हरेरंशमाविर्भूतञ्च सम्भले॥
कविं प्राज्ञं सुमन्तञ्च पुरस्कृत्य महाप्रभम्।
आर्य्यभार्य्यविशालैश्च ज्ञातिभिः परिवारितम्॥"
इति तत्रैव ३ अध्यायः॥
दशरथराजस्य सारथिः मन्त्री च। यथा,—
"तद्गच्छ त्वरितं सूत राजपुत्रं यशस्विनम्।
राममानय भद्रं ते नात्र कार्य्या विचारणा॥
अश्रुत्वा राजवचनं कथं गच्छामि भामिनि।
तच्छ्रुत्वा मन्त्रिणो वाक्यं राजा मन्त्रिणमब्रवीत्॥
सुमन्त्र रामं द्रक्ष्यामि शीघ्रमानय सुन्दरम्॥"
इति वाल्मीकीये रामायणे अयोध्याकाण्डे १४ सर्गः॥
सुमतिः, पुं, चतुर्विंशतिवर्त्तमानार्हत्पितृवन्तर्गत-विंशार्हत्पिता। इति हेमचन्द्रः॥ इक्ष्वाकु-वंशीयदृढरथात्मजः सुरथराजपुत्रः। इति विष्णुपुराणे ४ अंशे २२ अध्यायः॥
सुमतिभूः, पुं, सगरः। स तु जिनानां चक्रवर्त्ति-भेदः। इति हेमचन्द्रः॥
सुमित्रा, स्त्री, दशरथराजपत्नी। सा तु लक्ष्मण-शत्रुघ्नमाता। यथा, भट्टौ १ सर्गे।
"प्रासोढ शत्रुघ्नसहोदरञ्च-
मेका सुमित्रा सह लक्ष्मणेन॥"
तत्पर्य्यायः। लक्ष्मणप्रसूः २। इति शब्दरत्ना-वली॥
सुसखं, क्ली, नखक्षतविशेषः। इति शब्दरत्ना-वली॥ (शोभनं सुखमिति।) उत्तमाख्यञ्च॥
सुमुखः, पुं, (शोभनं सुखं यस्य।) गरुड़पुत्रः। (यथा, महाभारते। ५। १०१। २।
"वैनतेयसुतैः सूत षड़भिक्तमिदं कुलम्।
सुनखेन सुनाम्ना च सुनेत्रेण सुवर्चसा।
सुरुचा पक्षिराजेन सुवेगेन च मातले!॥")
गन्धर्वः। नागभेदः। इति शब्द-रत्नावली॥ (यथा, महाभारते। १।३५।१४।
"इक्षपिण्डः पिठरकः सुमुखः कौरपाश्चनः।
कुठरः कुक्कुरश्चैव तथा नाग प्रभाकरः॥")
पक्षिणः। इति विश्वः॥ सिताभ्रकः। वन-वर्त्तरिका। वर्त्तरः। इति राजनिर्घण्टः॥
सुमुखः, त्रि, (सुष्ठु सुखं यस्य।) मनोज्ञः। सुन्दरानना। इति शब्दरत्नावली॥ (यथा, भागवते। ४। २१। १५।
"सुनासः सुमुखः सौम्यः पीनांसः सुविशि-खितः॥")

सुमुखसः, पुं, (सुमुखस्य सुरुतपत्तिर्यस्मात्।) गरुड़ः। इति त्रिकाण्डशेषः॥ उत्तमाननपुत्र-पिता च॥
सुमुखा, स्त्री, (शोभनं सुखं यस्याः। टाप्।) सुन्दरी नारी। सुन्दराननी। इति भरत-द्विरूपकोषः॥ सुमुखा शाला। इति सुख-बोधव्याकरणम्। दर्पणः। इति केचित्॥
सुसुखी, स्त्री, (सुष्ठु सुखं यस्याः। "स्वाङ्गा-च्चोपसर्जनादसंयोगोपधात्।" ४। १। ५४। इति ङीष्।) सुन्दरी नारी। सुन्दरानना। (यथा, कुमारे। १। २६।
"उ मेति मात्रा तपसो निषिद्धा
पश्चादुमाख्यां सुमुखी जगाम॥")
सुमृष्टिः, पुं, (सुष्ठ वच्चने + क्तिन्। शोभना सृष्टि-र्यस्मात्।) विषमुष्टिचुपः। इति राजनिर्घण्टः॥
सुमूलः, पुं, (सुष्ठु मूलं यस्य।) श्वेतशिग्रुः। इति राजनिर्घण्टः॥
सुमूलकं, क्ली, (शोभनं मूलं यस्य। कप्।) गर्जरम्। इति राजनिर्घण्टः॥
सुमूला, स्त्री, (शोभनं मूलं यस्याः।) शालपर्णी। पृश्निपर्णी। इति राजनिर्घण्टः॥ सुन्दरमूल-युक्ते, त्रि॥
सुमेखलः, पुं, (शोभना मेखला यस्मात्।) सङ्घः। इति राजनिर्घण्टः॥ (अस्य पर्य्यायो यथा,—
"सङ्घो सङ्घातको वाग्रः स्यूलदर्भः सुमेखलः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
शोभनमेखलायुक्ते, त्रि॥
सुमेधाः, [स्] स्त्री, (सुष्ठु मेधा यस्याः।
"नित्यमसिच् प्रजामेधयोः।" ५। ४। १२२।
इति असिच्।) ज्योतिष्मती। (सुष्ठु मेधा यस्य।) सुबुद्धौ, त्रि। इति मेदिनी॥ (यथा, भागवते। ६। ४। ३।
"इमे अङ्गिरसः सत्रमासतेऽद्य सुमेधसः॥")
सुमेरुः, पुं, (सुष्ठु मिनोति क्षिपति द्योतीति इति। सु + मि + "मिषीभ्यां रुः।" उणा॰ ४। १०९। रुः।) पर्व्वतविशेषः। तत्पर्य्यायः। मेरुः २ हेमाद्रिः ३ रत्नसानुः ४ सुरालयः ५। इत्य-मरः। १। १। ५२॥ अमराद्रिः ६ भूस्वर्गः ७। इति जटाधरः॥ तद्विवरणं यथा,—
"एषां मध्ये इलावृतं नाभ्यन्तरवर्षं यस्य नाभ्यामवस्थितः सर्व्वतः सौवर्णः कुलगिरि-राजो मेरुर्द्वीपायामसमुन्नाहः कर्णिकाभूतः कुवलयकमलस्य मूर्द्धनि द्वात्रिंशत्सहस्रयोजन-वितत्युच्छ्रयो मूले षोडशसहस्रं तावत्तावद्भ्यां प्रविष्टः॥"७॥
"मन्दरो मेरुमन्दरः सुपार्श्वः कुमुद इत्ययुत-योजनविस्तारोन्नाहा मेरोश्चतुर्दिशमवष्टम्भ-गिरय उपकल्पाः॥ ११॥
चतुर्षु एतेषु चूतजम्बूकदम्बन्यग्रोधाः पादपप्रवराः पर्व्वतकेतव इवाधिसहस्रयोजनो-न्नाहास्तावद्विटपवितनयः शतयोजनपरि-णाहाः॥ १२॥
हृदाश्चत्वारः पयोमधुक्षीरमृष्टजलाः यदृच्छयोपपन्ना उपदेवगणा योगैश्वर्य्याणि स्वाभा-विकानि भारतर्षभ धारयन्ति॥ १३॥
देवोद्यानानि च भवन्ति चत्वारि नन्दनं चैत्ररथं वैभ्राजकं सर्व्वतोभद्रमिति॥"१४॥
"मेरोर्मूर्द्धनि भगवत आत्मयोनेर्मध्यत उप-कल्पां पुरीमयुतयोजनसाहस्रीं समचतुरस्रां शातकौम्भीं वदन्ति॥ २८॥
तामनुपरितो लोकपालानामष्टानां यथादिशं यथारूपं तुरीयमानेन पुरोऽलायुधकल्पाः।"२९॥
इति श्रीभागवते ५ स्कन्धे १६ अध्यायः॥
"अस्मिन्नेन्द्रीं पुरीं पूर्व्वस्यां मेरोर्दैवधानीं नाम दक्षिणतो याम्यां संयमनीं नाम पश्चा-दारुणीं निम्लोचनीं नाम उत्तरतः सौम्यां विभावरीं नाम।"इति च तत्रैव।५।२१।७॥
अपि च।
"परिमण्डलस्तयोर्मध्य मेरुः कनकपर्व्वतः।
चातुर्व्वर्ण्यः स सौवर्णश्चतुरस्रः समुच्छ्रितः॥
नानावर्णः स पार्श्वे तु पूर्व्वान्ते श्वेत उच्यते।
पीतन्तु दक्षिणं तत्र भद्राश्वनिभं परम्॥
उत्तरं तस्य रक्तं वै इति वर्णसमन्वितः।
मेरुस्तु शुशुभे दिव्यो राजवत् समधिष्ठितः॥
आदित्यतरुणाभासो विधूम इव पावकः।
योजनानां सहस्राणि चतुरशीतिरुच्छ्रितः॥
प्रविष्टः षोड़शाधस्तादष्टाविंशतिविस्तृतिः।
विस्तारात्तिगुणस्तस्य परिणाहः समन्ततः॥
स पर्व्वतो महादिव्यो दिव्यौषधिसमन्वितः।
भुवनैरावृतः सर्व्वैर्जातरूपपरिष्कृतैः॥
तत्र देवगणाः सर्व्वे गन्धर्व्वोरगराक्षसाः।
शैलराजे प्रमोदन्ते सर्व्वतोऽमरसत्तमाः॥
स तु मेरुः परिवृतो भुवनैर्भूतभावनैः।
यस्येमे चतुरो देशा नानापार्श्वेषु संस्थिताः॥
भद्राश्वो भारतश्चैव केतुमालश्च पश्चिमे।
उत्तराश्चैव कुरवः कृतपुण्यप्रतिश्रयाः॥
विष्कम्भपर्व्वतास्तद्वन्मन्दरो गन्धमादनः।
विपुलश्च सुपार्श्वश्च सर्व्वरत्नविभूषितः॥"
इति मात्स्ये ६५ अध्यायः॥
किञ्च।
"मध्ये पृथिव्यामद्रीन्द्रो भास्वान् मेरुश्चिरञ्जयः।
योजनानां सहस्राणि चतुरशीतिः समुच्छ्रितः॥
प्रविष्टः षोड़शाधस्ताद्धरण्यां धरणीधरः।
तावत्प्रमाणा पृथिवी पर्व्वतश्च समन्ततः॥
तस्य शृङ्गत्रयं मूर्द्धि स्वर्गो यत्र प्रतिष्ठितः।
नानाद्रुमलताकीर्णं नानारत्नोपशोभितम्॥
मध्यगं पश्चिमं पूर्व्वं मेरोः शृङ्गाणि चोत्तमे।
प्रयुतोच्छ्रितमात्राणि हे शृङ्गे तस्य मध्यतः॥
मध्यस्थं स्फाटिकं शृङ्गं वैदूर्य्यकरकामयम्।
इन्द्रनीलमयं पूर्व्वे माणिक्यं पश्चिमं स्मृतम्॥
योजनानां सहस्राणि नियुतानि चतुर्दश।
उच्छ्रितं मध्यगं शृङ्गं स्वर्गो यत्र प्रतिष्ठितः॥
प्रयुतान्तरितं शृङ्गं मूर्द्धि चक्राकृति स्थितम्।
पूर्व्वमध्यमशृङ्गाणां सकलं मध्यमस्य च॥

त्रिपृष्ठो नाकपृष्ठो वा अक्षरःशान्तिनिर्वृतौ।
आनन्दोऽथ प्रमोदश्च स्वर्गाः पद्मे च मध्यमे॥
श्वेतश्च पौष्टिकश्चैव उपशोभनमन्मथौ।
आह्लादः स्वर्गराजश्च स्वर्गाः पद्मे तु पश्चिमे॥
निर्ममो निरहङ्कारः सौभाग्यद्यतिनिर्मलः।
स्वर्गाश्चैते द्विजश्रेष्ठ पूर्वपद्मे समर्थिताः॥
एकविंशत्यमी स्वर्गा निर्दिष्टा मेरुसद्मनि॥ ॥
अहिंसादानकर्त्ता च यज्ञानां तपसां तथा।
तेषु तेषु वसन्ति स्म जनाः क्रोधविवर्जिताः॥
जलप्रवेशी चानन्दं प्रमोदं वह्निसाहसः॥
भृगुप्रपाते सौम्यस्तु दर्पं चैवास्य निर्मलः॥
अनशने तु संवासे स्तनो गच्छेत्त्रिपिष्टपम्।
क्रतुयाजी नाकपृष्ठमग्निहोत्री च निर्वृतिम्॥
तडागकूपकर्त्ता च लभते पौष्टिकं हि च।
सौवर्णदायी सौभाग्यं लभेत् स्वर्गं महातपाः॥
शीतकाले महावह्निं प्रज्वालयति यो नरः।
सर्वसत्त्वहितार्थाय स्वर्गं चाक्षरसं लभेत्॥
हिरण्यगोप्रदानेन निरहङ्कारमाप्नुयात्।
भूमिदानेन शुद्धेन लभते शान्तिकं पदम्॥
रौप्यदानेन शुद्धेन स्वर्गं गच्छति निर्मलम्।
अश्वदानेन पुण्याढ्यं कन्यादानेन मङ्गलम्॥
द्विजेभ्यस्तर्पणं कृत्वा दत्त्वा वस्त्राणि भक्तितः।
श्वेतन्तु लभते स्वर्गं यत्र गत्वा न शोचति॥
कपिलागोप्रदानेन परार्द्धाढ्यो भूयते।
गोदृषस्य प्रदानेन स्वर्गं मन्मथमश्नुते॥
स पुमान् स सरित्स्नायी तिलधेनुप्रदस्तथा।
छत्रोपानद्दाता च स्वर्गं तत्फलशोभनम्॥
देवायतनकर्त्तारो गुरुशुश्रूषणरस्तथा।
तीर्थयात्रापरश्चैव स्वर्गराजे महीयते॥
एकान्नभोजी यो मर्त्यो नक्तभोजी च नित्यशः।
उपवासी चिराच्चाद्यः प्राप्तस्वर्गं शुभं लभेत्॥
सरित्स्नायी जितक्रोधो ब्रह्मचारी दृढव्रतः।
निर्मलं स्वर्गमाप्नोति तथा भूतहिते रतः।
विद्यादानेन मेधावी निरहङ्कारमाप्नुयात्॥
येन येन हि भावेन यद्यद्दानं प्रयच्छति।
तत्तत् स्वर्गमवाप्नोति यद्यदिच्छति मानवः॥
यस्तु सर्वाणि दानानि ब्राह्मणेभ्यः प्रयच्छति।
संप्राप्य न निवर्त्तेत दिवं प्राप्तमनामयम्॥
पद्मन्तु पश्चिमं यत्र ब्रह्मा तत्र स्थितः स्वयम्।
पूर्वपद्मे स्वयं विष्णुर्मध्ये चैव शिवः स्थितः॥"
इति गारुडे। ६०। १४—४५॥
अन्यत् कौर्म्मे ४२। ४३ अध्याययोः वाराहे रुद्रगीतासु च द्रष्टव्यम्॥

सुम्भपुष्पः, पुं, कर्पूरकः। इति शब्दचन्द्रिका॥

सुभः, पुं, देशविशेषः। इति शब्दरत्नावली॥

सुयामुनः, पुं, (शोभनं अतिप्रियं यामुनं यमुनासम्बन्धि जलं यस्य।) विष्णुः। वत्सराजः। प्रासादः। अग्निविशेषः। इति हेमचन्द्रः॥ मेघविशेषः। इति मेदिनी॥

सुयोधनः, पुं, (सुष्ठु योधनेन शुभ्यतेऽसौ। सु+युध+ल्युट्।) दुर्य्योधनराजः। इति त्रिकाण्डशेषः॥ (यथा, महाभारते। १। १५५। ६५।

"शीघ्रं गच्छाम भद्रं ते न नो विद्यात् सुयोधनः॥")

सुर, ञ भेश्वर्य्ये। इति कविकल्पद्रुमः॥ (तुदा०-पर०-अक०-सेट्।) दन्त्यादिः। ञ, सुरति सोरिता सुयोर सुसोर। भा, दीप्तिः। ऐश्वर्य्यं ऐश्वर्य्यम्। इति दुर्गादासः॥

सुरः, पुं, (सुष्ठु राति ददात्यभीष्टमिति। रा+कः। यद्वा, सुरति शोभते इति। सुर+इगुपधेति कः। यद्वा, सुनोतीति। षुञ् अभिषवे+"सुरुधाञ्सुधिभ्यः क्रन्।" उणा० २।२४। क्रन्।) देवः। इत्यमरः। १।१।७॥ (यथा, रघुः। ३।५६।

"चुकोप तस्मै स भृशं सुरश्रियः
प्रसह्य केशग्रहणेऽपरोषणादिव॥"

सूर्य्यः। पण्डितः। इति केचित्॥ (स्वरः। यथा, महाभारते। १३। ८५। ६१।

"लक्षणानि सुरास्तोमा निरुक्तं सुरपङ्क्तयः॥")

सुरकरीन्द्रदर्पापहा, स्त्री, (सुरकरीन्द्रस्य ऐरावतस्य दर्पं हन्तीति। हन+डः। टाप्।) गङ्गा। यथा,—

"भगीरथपथानुगा सुरकरीन्द्रदर्पापहा
महेशशशकुटप्रभा गिरिशिरःपताका सिता।
सुरासुरनरोरगैरभवाच्युतैः संस्तुता
विमुक्तिफलदायिनी भगवती स्वयं राजते॥"
इति कल्किपुराणे ३४ अध्यायः॥

सुरकारः, पुं, विश्वकर्म्मा। सुराणां कारः शिल्पीति बहुव्रीहिसमासनिष्पन्नः॥

सुरकृता, स्त्री, (सुरेण कृता।) गुडूची। इति राजनिर्घण्टः॥

सुरक्तः, त्रि, (सु+रञ्ज+क्तः।) शोभनरागयुक्तः। अतिशयरक्तविशिष्टः। अत्यनुरक्तः। इति केचित्॥

सुरक्तकः, पुं, (सुरक्त+संज्ञायां स्वार्थे वा कन्।) कोषाम्रः। स्वर्णगैरिकम्। इति राजनिर्घण्टः।

सुरखण्डनिका, स्त्री, वीणाभेदः। इति शब्दरत्नावली॥ सुरमण्डलिका इति पाठान्तरम्॥

सुरगण्डः, पुं, रोगविशेषः। इति भूरिप्रयोगः॥ राजगाँड़ इति भाषा॥

सुरगुरुः, पुं, (सुराणां गुरुः।) बृहस्पतिः। इति त्रिकाण्डशेषः॥ (यथा, कथासरित्सागरे। ११५। ७२।

"ततो सुक्ष्मा रयं देवसेन्येऽपीन्द्रमनुद्रुते।
निनाय ब्रह्मभवनं भीतः सुरगुरुः शचीम्॥"
देवपूज्ये, त्रि। यथा, महाभारते। १।१।३२।
"यस्मात् पितामहो ब्रह्मे प्रसूरेकः प्रजापतिः।
ब्रह्मा सुरगुरुः स्थाणुर्मनुः कः परमेष्ठ्यथ॥")

सुरग्रामणीः, पुं, (सुराणां ग्रामणीर्नेता।) इन्द्रः। इति त्रिकाण्डशेषः॥

सुरङ्गं, क्ली, (सुष्ठु रङ्गो यस्मात्।) पिप्पलम्। पत्तङ्गम्। इति राजनिर्घण्टः॥

सुरङ्गः, पुं, (सुष्ठु रङ्गो यस्मात्। रञ्ज+घञ्।) नागरङ्गः। इति राजनिर्घण्टः॥ गर्त्तविशेषः। इति सुरङ्गयुक्-शब्दरत्नावलीतः॥

सुरङ्गधातुः, पुं, (सुष्ठु रङ्गो यस्मात् तादृशो धातुः।) गैरिकम्। इति राजनिर्घण्टः॥

सुरङ्गयुक्, [ज्] पुं, (सुरङ्गं युनक्तीति। युज्+क्विप्।) सुरङ्गं कृत्वा अपहरति यः। यथा,—

"कुजम्भिलः सरङ्गाहिरधश्चौरः सुरङ्गयुक्॥"
इति शब्दरत्नावली॥)

सुरङ्गा, स्त्री, सन्धिः। सौंध इति भाषा। इति हलायुधः॥ केवाँचिका। इति राजनिर्घण्टः॥

सुरङ्गिका, स्त्री, सूच्या। इति राजनिर्घण्टः॥

सुरङ्गी, स्त्री, (सुष्ठु रङ्गो यस्याः। ङीष्।) काकनासा। इति राजनिर्घण्टः॥ रक्तशोभाञ्जनः। इति रत्नमाला॥

सुरजःफलः, पुं, (सुष्ठु रजो यत्र तादृशं फलं यस्य।) धनसम्पत्तयः। इति भूरिप्रयोगः॥

सुरजनी, स्त्री, (सु शोभना रजनी।) रात्रिः। इति शब्दचन्द्रिका॥

सुरज्येष्ठः, पुं, (सुरेषु ज्येष्ठः।) ब्रह्मा। इत्यमरः। १। १। १६॥

सुरञ्जनः, पुं, (सुष्ठु रञ्जयतीति। रञ्ज+णिच्+ल्युः।) गुवाकवृक्षः। इति त्रिकाण्डशेषः॥

सुरतं, क्ली, (सुष्ठु रतं रमणं यत्र।) निधुवनम्। इति मेदिनी॥ (यथा, कुमारे। १। १०।

"भवन्ति यत्रौषधयो रजन्या-
मतैलपूराः सुरतप्रदीपाः॥")

सुरते वर्णनीयानि। यथा,—

"सुरते सात्त्विका भावाः शीत्कारः कुट्टमं लालता।
काञ्चिकङ्कणमञ्जीररवाधरनखक्षतिः॥"
इति कविकल्पलतायाम् १ स्तवके ३ कुसुमम्॥
दयालौ, त्रि। इत्यमरटीकायां भारतसुन्दरी। ३। १। १५॥ (अत्यर्थे सुरतः इति पाठः साधुः॥ क्रीड़ायुक्तः। उणादिवृत्तौ उज्ज्वलदत्तः। ५। १४॥)

सुरततालो, स्त्री, (सुरतं तालयत्यत्र। तल+णिच्+अण्। गौरादित्वात् ङीष्।) दूती। शिरःसक्। इति मेदिनी॥

सुरता, स्त्री, (सुराणां भावः सत्त्वं वा। सुर+तल्।) देवत्वम्। इति मेदिनी॥ (यथा, महाभारते। ५। ६८। १४।

"भवनं पश्य वारुण्यं यदेतत् सर्वकाञ्चनम्।
यत् प्राप्य सुरतां प्राप्ताः सुराः सुरपतेः सखे॥")

सुरतरुः, पुं, (सुष्ठु रता। अप्सरोविशेषः। यथा, महाभारते। १।६५।५२।

"कपिलो च सुबाहुश्च सुरता सुरजा तथा॥")

सुरतोषकः, पुं, (सुरान् तोषयतीति। तुष्+णिच्+ण्वुल्।) कौस्तुभमणिः। इति शब्दरत्नावली॥ देवप्रीतिकारके, त्रि॥

सुरथः, पुं, चन्द्रवंशीयश्चैत्ररथपुत्रः। यथा,—

श्रीनारायण उवाच।

"अत्रिश्च ब्रह्मणः पुत्रस्तस्य पुत्रो निशाकरः।

स च लब्धा राज्यस्थं द्विजराजो बभूव ह ।
गुरुपत्न्यान्तु तारायां तद्बुध बुधः सुतः ।
बुधपुत्रश्च वैवस्व तनुपुत्रः सुरथश्च सः ।"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे । ५८ । ४—५ ।
स च स्वारोचिषमन्वन्तरे कोलापुर्यधिपतिः ।
तेनादौ पृथिव्यां दुर्गापूजा कृता । तत्प्रसादेन च असौ सावर्णिर्नाम मनुर्जातः । यथा,—
"कालान्तरे पूजिता सा सुरथेन महात्मना ।
राज्ञा मेधसमाख्येन स्वस्त्र्याश्च समाधिना ।
मेधादिभिश्च मुनिभिः कृष्णवारेण गह्वरे ।
हाग्नेर्मौनेन कृष्णाग्नेः पश्चिमाभिमुखेन ।
वेदोक्तानि च दत्त्वैव उपचाराणि षोड़श ।
धृत्वा च कवचं ध्यात्वा संपूज्य च विधानतः ।
राजा लब्ध्वा परीहारं वरं प्राप यथेप्सितम् ।
मुक्तिं संप्राप वैश्यश्च संपूज्य च सरित्तटे ।
तुष्टाव राजा वैश्यश्च साश्रुनेत्रः पुटाञ्जलिः ।
विसस्मर्ज स्वस्त्र्यौ तां गभीरे निर्म्मले जले ।
स्वस्त्र्यौ स्वस्त्र्यौ दृष्ट्वा जलधौतां नराधिपः ।
ऊरीए तत्र वैश्यश्च ततः स्थानान्तरं ययौ ।
उक्त्वा देवश्च वैश्यश्च पुष्करे दुष्करं तपः ।
लब्ध्वा जगाम गोलोकं दुर्गादेवीवरेण च ।
राजा ययौ स्वराज्यञ्च पूजयो निष्कण्टकं बली ।
भोगञ्च भुभुजे भूपः षष्टिवर्षसहस्रकम् ।
आर्य्यां स्वराज्यं संप्राप्य पुत्रे स कालयोगतः ।
मनुर्बभूव सावर्णिस्मृता च पुष्करे तपः ।"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ५४ अध्यायः ॥ ७ ॥
विस्तारस्तु दुर्गाशब्दे द्रष्टव्यः ।

सुरदारु, क्ली, (सुरप्रियं दारु ।) देवदारु । इति रत्नमाला । (यथा, भागवते । ७।२।१३ ।
"पिचुमर्दैः कोविदारैः सरलैः सुरदारुभिः ।")

सुरदीर्घिका, स्त्री, (सुराणां दीर्घिका ।) स्वर्गगङ्गा । इत्यमरः । १ । १ । ५२ ।

सुरदुग्धी, स्त्री, (सुराणां दुग्धमिव आह्लादकत्वात् ।) तुलसी । इति राजनिर्घण्टः ।

सुरद्रुमः, पुं, (सुराणां द्रुमः ।) देवतरुः । इति राजनिर्घण्टः । देवदारु च । (कल्पवृक्षादिः । यथा, भागवते । १० । ३८ । २२ ।
"न तस्य कश्चिद्दयितः सुहृत्तमो
न चाप्रियो द्वेष्य उपेक्ष्य एव वा ।
तथापि भक्तान् भजते यथा तथा
सुरद्रुमो यद्वदुपाश्रितोऽर्थदः ।")

सुरद्विट्, [ष्] पुं, (सुरान् द्वेष्टीति । द्विष् + क्विप् ।) असुरः । इत्यमरः । १ । १ । १२ । (यथा, रघुः । १० । १५ ।
"प्रतिषिद्धसुरास्त्रमप्यरिं सुरहिंस्राम् ।
अयमेनं सुहृदः सुखम्भरः सुरसौधेरयम् ।"
राहुः । यथा, मनौ । ८ । ८८ ।
"उपधिभिस्तु क्रीतिसंयुक्ता ये
सुरद्विजाग्र्यस्वमपो भुनक्ति ।"
तथाच रघुवंशटीकायाम् । ८० । २ ।
"बकुलि, त्रिपुरस्य मौलेरर्द्धेन मूर्द्धेः सुरद्विषो-ऽहार्षीत् ।")

देवद्वेषकः ॥ (यथा, भागवते । १ । ३ । २४ ।
"ततः कलौ संप्रवृत्ते संमोहाय सुरद्विषाम् ।
बुद्धो नामाञ्जनसुतः कीकटेषु भविष्यति ।")

सुरद्विपः, पुं, (सुराणां द्विपः ।) देवहस्ती । इति केचित् । (ऐरावतः । यथा, रघुः । ३ । ५५ ।
"हरेः कुमारोऽपि कुमारविक्रमः
सुरद्विपास्फालनकर्कशाङ्गुलौ ।
सुखे शचीपत्त्रविशेषकाङ्किते
स्वनामचिह्नं निचखान सायकम् ।")

सुरधनुः, [स्] क्ली, (सुरस्य धनुः ।) इन्द्रधनुः । इति जटाधरः ॥ (यथा, किरातें । ७।१६ ।
"यातस्य ग्रथिततरङ्गमेकातामे
विच्छिन्नं विषयसि वारिवाहजाले ।
आतेनुस्त्रिदशवधूजनाङ्गभाजां
सन्त्रासं सुरधनुषः प्रभामणीनाम् ।")

सुरधूपः, पुं, (सुरप्रियो धूपः ।) राल: । इति राजनिर्घण्टः ॥

सुरनदी, स्त्री, (सुराणां नदी ।) गङ्गा । इति भूरिप्रयोगः । (यथा, महाभारते । ६।८०।५ ।
"गङ्गायाः सुरनद्या वै स्वादुभूतं यथोदकम् ।
मद्योदधिगुणाभ्यासात् लवणत्वं नियच्छति ।")

सुरनन्दा, स्त्री, (सुरान् नन्दयतीति । नन्द + णिच् + अच् । टाप् ।) नदीविशेषः । इति शब्दरत्नावली ॥

सुरनाथः, पुं, (सुरप्रियं नाथमस्य ।) देवनाथः । इति राजनिर्घण्टः ॥

सुरनिम्नगा, स्त्री, (सुराणां निम्नगा ।) गङ्गा । इत्यमरः । १ । १० । ३९ ॥ (यथा, कथासरित्सागरे । ५९ । ३४२ ।
"व्यक्ता सर्व्वं तनुं त्यक्ष्यंस्तपसा सुरनिम्नगाम् ।")

सुरनिर्य्यास, क्ली, पत्रकम् । इति राजनिर्घण्टः ॥

सुरपतिः, पुं, (सुराणां पतिः ।) इन्द्रः । इत्यमरः । १।१।४६॥ (यथा, महाभारते । ७ । १०१ । १८ ।
"पुनर्द्दौ सुरपतिर्मेरुं धर्म्मे सुसंयतम् ।")

सुरपर्ण, क्ली, (सुराणां पर्ण्या । समासे अः ।) आकाशम् । इति हेमचन्द्रः ॥

सुरपर्णी, स्त्री, (सुरप्रियं पर्णमस्य ।) ओषधिविशेषः । मार्कोपत्री इति ख्यातः । तत्पर्य्यायः । देवपर्णम् २ वीरपर्णम् ३ सुपर्णिकम् ४ मार्कोपत्रम् ५ सुपर्णपत्रम् ६ देवार्हम् ७ गन्धपत्रकम् ८ । अस्य गुणाः । कटुत्वम् । उष्णत्वम् । कृमिश्लेष्मवातनाशकत्वम् । दीपनत्वम् । वर्ण्यत्वम् । वातघ्नित्वञ्च । इति राजनिर्घण्टः ।

सुरपर्णिकः, पुं, (सुरप्रियं पर्णमस्येति । ठन् ।) सुरपुन्नागः । इति राजनिर्घण्टः ॥

सुरपर्णिका, स्त्री, (सुरपर्णी । संज्ञायां कन् ।) पुन्नागः । इति हेमचन्द्रः ॥

सुरपर्णी, स्त्री, (सुरप्रियं पर्णमस्याः । ङीष् ।) मयूरशिखा । इति राजनिर्घण्टः ॥

सुरपालकः, पुं, (सुराणां पालकः ।) कल्पवृक्षः । देवसकाशात्प्राप्तम् । (यथा, महाभारते । ७।७१।७३
"देवकीपुत्रमेवं मां सुरपालकात् ।")

सुरपुन्नागः, पुं, (सुरप्रियः पुन्नागः ।) पुन्नागवृक्षविशेषः । तत्पर्य्यायः । नमेरुः २ सुरेष्टः ३ सुरपर्णिकः ४ सुरताड्गः ५ । अस्य गुणाः पुन्नागवत् । इति राजनिर्घण्टः ॥

सुरपुरी, स्त्री, (सुरस्य पुरी ।) अमरावती । इति चिकाण्डशेषः ॥

सुरप्रियः, पुं, (सुराणां प्रियः ।) अश्वत्थवृक्षः । इति राजनिर्घण्टः ॥ इन्द्रः । हर्षश्रुतिः । इति केचित् ॥ देवद्वेषी, त्रि ॥

सुरप्रिया, स्त्री, (सुराणां प्रिया ।) जाती । सुरंरम्भा । इति राजनिर्घण्टः ॥ (अप्सराः । यथा, भागवते । ८ । १५ । १८ ।
"हेमजालाक्षनिर्गच्छद्धूमेनागुरुगन्धिना ।
पाण्डरेण प्रतिच्छन्नमार्गे यान्ति सुरप्रियाः ।")

सुरभि, क्ली, (सुष्ठु रमतेऽनेनेति । सु + रभ + इन् ।) स्वर्गम् । गन्धाश्म । इति शब्दरत्नावली ॥ सुन्दरः । साधुगन्धः । इति धरणिः ॥

सुरभिः, पुं, (सु + रभ + इन् ।) सुगन्धिः । इत्यमरः । १ । ५ । ११ ॥ चम्पकः । वसन्तर्तुः । जातीफलवृक्षः । इति मेदिनी ॥ धर्म्मवृक्षः । कदम्बवृक्षः । कणगुग्गुलुः । गन्धतृणम् । बकुलवृक्षः । रालः । इति राजनिर्घण्टः ॥ चैत्रमासः । धीरः । इति धरणिः ॥ गन्धफलः । इति शब्दरत्नावली ॥

सुरभिः, स्त्री, (सु + रभ + इन् ।) शल्लकी । माल्लभेदः । सुरा । गौः । इति मेदिनी ॥ पुरुकालान्तरे सुराख्याने सुरा इति पाठः । वटवृक्षः । वनमालिका । तुलसी । माषी । इति राजनिर्घण्टः ॥ पृथिवी । इति धरणिः ॥ गोमाता । (यथा, रघुः । १ । ८१ ।
"सुतां तदीयां सुरभेः कृत्वा प्रतिनिधिं पुनः ।
आराधय सपत्नीकः प्रीता कामदुघा हि सा ।")
तथा उत्तमाख्यादिर्यथा,—
नारद उवाच ।
"सा का या सुरभी देवी गोलोकादागता च या ।
तत्सम्भवरितं ब्रह्मन् श्रोतुमिच्छामि तत्त्वतः ।
श्रीनारायण उवाच ।
गवामधिष्ठातृदेवी गवामाद्या गवां प्रसूः ।
गवां प्रधाना सुरभी गोलोके सा समुद्गता ।
सर्व्वोपरिष्टात्कथितं कथयामि निशामय ।
बभूव येन तत्कल्पे पुरा वृन्दावने वने ।
एकदा राधिकानाथो राधया सह कौतुकात् ।
गोपाङ्गनापरिवृतः पुण्यं वृन्दावनं ययौ ।
सहसा सप्त रश्मिभिर्विहार च कौतुकात् ।
बभूव घोरपाप्मिश्रा तदा सैकाग्रमानस च ।
सस्मरे सुरभिं देवीं गोलया वासमण्डलात् ।
तत्क्षणात् दुग्धवर्णो बली मायां समीरयः ।
दृष्ट्वा सवत्सां सुरभीं रत्नभाण्डे दुदोह च ।
क्षीरं सुधासारिरूपं अमरत्वप्रदायकम् ।
तद्भाण्डस्थं पयः स्वादु पपौ गोपीपतिः स्वयम् ।
सद्यो बभूव पथगा मायामिर्मोहनेन च ।
देवैश्च विस्मृते चैव परिपूर्णतमः स्वयम् ।

गोलोके सुप्रसिद्धञ्च स च क्षीरसरोवरः ॥
गोपिकानाञ्च राधायाः क्रीड़ावापी बभूव सा।
रत्नेन खचिता तूर्णं भूता वापीश्वरेच्छया ॥
बभूवुः कामधेनूनां सहसा लक्षकोटयः।
तावन्तो हि च वत्साश्च सुरभीलोमकूपतः ॥
तासां पुत्राः प्रपौत्राश्च सर्व्वभूतुरसंख्यकाः।
कथिता च गवां सृष्टिस्तया च पूजितं जगत् ॥
पूजाञ्चकार भगवान् सुरभ्याश्च पुरा सुते।
ततो बभूव तत्पूजा त्रिषु लोकेषु दुर्लभा ॥
दीपान्वितापरदिने श्रीकृष्णस्याज्ञया हरेः।
बभूव सुरभीपूजा धर्म्मवक्त्रादिति श्रुतम् ॥
ध्यानं स्तोत्रं मूलमन्त्रं यद्यत् पूजाविधिक्रमम्।
वेदोक्तञ्च महाभाग निबोध कथयामि ते ॥
ॐ सुरभ्यै नमः इति मन्त्रस्तस्याः षड़क्षरः।
सिद्धो लक्षजपेनैव भक्तानां कल्पपादपः ॥
ध्यानं यजुर्व्वेदोक्तं तत् पूज्यञ्च सर्व्वसम्मतम्।
कृष्णेदं वृद्धिदञ्चैव सुस्थिरं सर्व्वकामदम् ॥
लक्ष्मीस्वरूपां परमां राधासदृशरूपिणीं पराम्।
गवामधिष्ठातृदेवीं गवामाद्यां गवां प्रसूम् ॥
पवित्ररूपां पूज्याञ्च भक्तानां सर्व्वकामदाम्।
यया पूतं सर्व्वविश्वं तां देवीं सुरभीं भजे ॥
घटे वा धेनुशिरसि वह्निकुम्भे गवामपि।
शालग्रामे जले वाग्नौ सुरभीं पूजयेद्द्विजः ॥
दीपान्वितापरदिने पूर्व्वाह्णे भक्तिसंयुतः।
यः पूजयेच्च सुरभिं स च पूज्यो भवेद्भुवि ॥
एकदा त्रिषु लोकेषु वाराहे विष्णुमायया।
क्षीरं जहार सहसा चिन्तिताश्च सुरादयः ॥
ते गत्वा ब्रह्मलोकञ्च ब्रह्माणं तुष्टुवुस्तदा।
तदाज्ञया च सुरभीं तुष्टाव पाकशासनः ॥

महेन्द्र उवाच।

नमो देव्यै महादेव्यै सुरभ्यै च नमो नमः।
गवां बीजस्वरूपायै नमस्ते जगदम्बिके ॥
नमो राधाप्रियायै च पद्मांशायै नमो नमः।
नमः कृष्णप्रियायै च गवां मात्रे नमो नमः ॥
कल्पवृक्षस्वरूपायै सर्व्वेषां सन्ततं परम्।
श्रीदामशापदायै च वृद्धिदायै नमो नमः।
यशोदायै कीर्त्तिदायै धर्म्मदायै नमो नमः ॥
स्तोत्रश्रवणमात्रेण तुष्टा हृष्टा जगत्प्रसूः।
आविर्ब्बभूव तत्रैव ब्रह्मलोके सनातनी ॥
महेन्द्राय वरं दत्त्वा वाञ्छितञ्चातिदुर्लभम्।
जगाम सा च गोलोकं ययुर्देवादयो गृहम् ॥
बभूव विश्वं सहसा दुग्धपूर्णञ्च नारद।
दुग्धादृतं ततो यत्नतः पीतं सुरस्य च ॥
इदं स्तोत्रं महापुण्यं भक्तियुक्तञ्च यः पठेत्।
स गोमान् धनवांश्चैव कीर्त्तिमान् पुण्यवान् भवेत् ॥
स स्नातः सर्व्वतीर्थेषु सर्व्वयज्ञेषु दीक्षितः।
इह लोके सुखं भुक्त्वा यात्यन्ते कृष्णमन्दिरम् ॥
सुचिरं निवसेत्तत्र करोति कृष्णसेवनम्।
न पुनर्भवनं तस्य ब्रह्मपुत्र भवे भवेत् ॥"
इति श्रीब्रह्मवैवर्त्ते प्रकृतिखण्डे सुरभ्युपाख्यानं नाम ४७ अध्यायः ॥

सुरभिः, त्रि, (सु+रभ+इन्।) सुगन्धिः। (यथा, मनुः। ३।२०६।
"उपवेश्य तु तान् विप्रानासनेष्वनुगृह्यितान्।
गन्धमाल्यैः सुरभिभिरर्च्चयेद्देवपूर्व्वकम् ॥")
कान्तम्। इति मेदिनी ॥ (यथा, रघुः।२।३।
"निवर्त्त्य राजा दयितां दयालु-
स्तां सौरभेयीं सुरभिर्यशोभिः।
पयोधरीभूतचतुःसमुद्रां
जुगोप गोरूपधरामिवोर्व्वीम् ॥")
धीरः। विख्यातः। इति धरणिः ॥

सुरभिका, स्त्री, (सुरभि+स्वार्थे कन्।) स्वर्णकदली। इति राजनिर्घण्टः ॥

सुरभिगन्धिः, त्रि, (सुरभिर्गन्धो यस्य। "गन्धस्येदुत्पूतिसुसुरभिभ्यः।" ५।४।१३५। इति इकारः।) शोभनगन्धयुक्तः। इति कैचित् ॥

सुरभिचिफला, स्त्री, (सुरभिः सुगन्धिश्चिफला।) सुगन्धत्रिफला। इति राजनिर्घण्टः ॥

सुरभित्वक्, [च्] स्त्री, (सुरभिः त्वक् यस्याः।) दृढदेला। इति राजनिर्घण्टः ॥

सुरभिदारुः, पुं, (सुरभि सुगन्धि दारु यस्य।) सरलवृक्षः। इति राजनिर्घण्टः ॥

सुरभिपत्रा, स्त्री, (सुरभि पत्रं यस्याः।) जम्बूवृक्षः। राजजम्बूः। इति राजनिर्घण्टः ॥

सुरभिबाणः, पुं, (सुरभिः साधुगन्धः बकुलादिपुष्पं वा बाणो यस्य।) कामदेवः। इति कैचित् ॥

सुरभिवल्कलं, क्ली, (सुरभि सुगन्धि वल्कलं यस्य।) गुडत्वक्। इति शब्दरत्नावली ॥

सुरभिसखा, स्त्री, (सुरभिः सुगन्धिः सखी नर्म्मसखी यस्याः।) सल्लकी। इति राजनिर्घण्टः ॥

सुरभी, स्त्री, (सुरभि+वा ङीष्।) सुगन्धिः। इत्यमरटीकायां भरतः। २। ४। १२३
शल्लकी। इति शब्दचन्द्रिका ॥ (यथा,—
"शल्लकी गजभक्ष्या च सुवहा सुरभी रसा।
महेरुणा क्षुद्रुरुकी वल्लकी च बहुसवा ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ४)
ङ्यन्तेकारान्तसुरभिशब्दार्थोऽप्यत्र ॥ गोमाता। यथा,—
"सा का वा सुरभी देवी गोलोकादागता च या।
तज्जन्मचरितं ब्रह्मन् श्रोतुमिच्छामि तत्त्वतः ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ४७ अध्यायः ॥
(ङ्यन्तेकारान्तसुरभिशब्दोक्त्या विशेषविवरणं ज्ञेयम् ॥) अथ गोयात्राप्रवेशविक्रयदिनम्।
तत्र तिथय अमावस्याष्टमीचतुर्द्दशीविभिन्नाः। तत्र नक्षत्राणि रोहिणी पूर्व्वफल्गुनी पूर्व्वाषाढ़ा पूर्व्वभाद्रपद् उत्तरफल्गुनी उत्तराषाढ़ा उत्तरभाद्रपद् अवश्या भरणी चित्रा एतद्व्यतिरिक्तानि। योगाः व्यतीपातवैधृतिभिन्नाः। तत्र वाराः क्रूरग्रहभिन्नाः। इति ज्योतिस्तत्त्वम् ॥

सुरभीरसा, स्त्री, शल्लकीवृक्षः। इत्यमरटीकायां मथुरेशः। २। ४। १२३ ॥

सुरभूरुहः, पुं, (सुराणां भूरुहः।) देवदारुः। इति भावप्रकाशः ॥ (कल्पवृक्षादिश्च ॥)

सुरवल्लिका, स्त्री, (सुरप्रिया चासौ वल्लिका।) तुवरी। इति राजनिर्घण्टः ॥

सुरमेदा, स्त्री, (सुरप्रियो मेदो यस्याः।) महामेदा। इति राजनिर्घण्टः ॥ (महामेदाशब्दे २स्या विशेषो ज्ञातव्यः ॥)

सुरर्षिः, पुं, (सुरश्चासौ ऋषिश्चेति।) देवर्षिः। इत्यमरः। १।१।५१ ॥ स तु नारदतुम्बुरुकोलाहलादिः। यथा। ब्रह्मर्षिदेवर्षिराजर्षिमहर्षिपरमर्षिकाण्डर्षिश्रुतर्षिभेदात् सप्तप्रकारऋषयस्तत्र नारदाद्याः सुरर्षय उक्ता इति भरतः ॥ (यथा, भागवते। ४। २४। ६३।
"महानहं खं मरुदग्निवार्धरा:
सुरर्षयो भूतगणा इदं यतः ॥"
तथाच महाभारते। १।१। २२७।
"इति राज्ञां चतुर्व्विंशन्नारदेन सुरर्षिणा।
पुत्रशोकाभितप्ताय पुरा श्रेयाय कीर्त्तितम् ॥")

सुरलता, स्त्री, (सुरप्रिया लता।) महाज्योतिष्मती। इति राजनिर्घण्टः ॥

सुरला, स्त्री, (सुरान् लातीति। ला+कः।) गङ्गा। इति हारावली ॥ नदीविशेषः। इति शब्दचन्द्रिका ॥

सुरलासिका, स्त्री, (सुरानपि लासयति व्याकुलयतीति। लस्+णिच्+ण्वुल्। टापि अत इत्त्वम्।) वंशीवाद्यम्। यथा,—
"सार्व्वेयिका च सार्व्वेयी सालिका सुरलासिका।"
इति शब्दरत्नावलीति कैचित् ॥

सुरलोकः, पुं, (सुराणां लोकः।) स्वर्गः। इत्यमरः। १।१।६॥ (यथा, भागवते।७।१०।१३।
"कीर्त्तिं विशुद्धां सुरलोकगीतां
विधाय मामेष्यति मुक्तबन्धः ॥")

सुरवर्त्म, [न्] क्ली, (सुराणां वर्त्म।) आकाशम्। इत्यमरः। १।२।१॥

सुरवल्लभा, स्त्री, (सुराणां वल्लभा।) श्वेतदूर्व्वा। इति राजनिर्घण्टः ॥

सुरवल्ली, स्त्री, (सुराणां वल्ली।) तुलसी। इति राजनिर्घण्टः ॥

सुरवैरी, [न्] पुं, (सुराणां वैरी।) असुरः। इति शब्दरत्नावली ॥ [हलायुधः ॥

सुरशत्रुः, पुं, (सुराणां शत्रुः।) असुरः। इति

सुरशाखी, [न्] पुं, (सुराणां शाखी।) कल्पवृक्षः। इति जटाधरः ॥

सुरश्रेष्ठा, स्त्री, (सुरेषु श्रेष्ठा।) द्राक्षा। इति राजनिर्घण्टः ॥

सुरसं, क्ली, (शोभनो रसो यस्य।) दोलम्। त्वचम्। गन्धलशुनम्। इति राजनिर्घण्टः ॥ तुलसी। इति मेदिनी ॥

सुरसः, पुं, (शोभनो रसो यस्य।) सिन्धुवारः। इति शब्दरत्नावली ॥ (अस्य पर्य्यायो यथा,—
"इन्द्राणी चेन्द्रः सुरसो निर्गुण्डी श्वेतवारकः।"
इति वैद्यकरत्नमालायाम् ॥)

सुरसा

मोचरसः। इति राजनिर्घण्टः॥ (पीतशालः। अस्य पर्य्यायो यथा,—
"सुरसो बीजकश्चैव पीतशालोऽभिधीयते॥"
इति गारुड़े २०८ अध्यायः॥
तुलसीविशेषः। अस्य गुणा यथा,—
"हिक्काकासविषश्वासपार्श्वशूलविनाशनः।
पित्तक्षतकफवातघ्नः सुरसः पूतिगन्धनुत्॥"
इति चरके सूत्रस्थाने। २७ अध्यायः॥
"कफानिलविषश्वासकासदौर्गन्ध्यनाशनः।
पित्तक्षत पार्श्वशूलघ्नः सुरसः सप्तदाहृतः॥"
इति सुश्रुते सूत्रस्थाने ४६ अध्यायः॥)

सुरसः, त्रि, (शोभनो रसो यस्य।) स्वादुः। इति मेदिनी॥ सुन्दररसयुक्तश्च। (यथा, भट्टिकाव्ये। ५४। १०३।
"तस्यां प्रभूतं सुरसञ्च तोयं
क्षणाधवा यत्र च रक्तगन्धं वा॥")

सुरसद्म, [न्] क्ली, (सुराणां सद्म।) स्वर्गः। इति हलायुधः॥ (देवगृहम्। यथा, कथासरित्सागरे। ६३। ८३।
"एतं मोक्षं प्रयातेति वदन्त्याभिव दूरतः।
यातायिन्नसमुत्पन्नैः सुरसद्मध्वजांशुकैः॥")

सुरसम्भवा, स्त्री, (सुरप्रियः सम्भवो यस्याः।) आदित्यभक्ता। इति राजनिर्घण्टः॥

सुरसरित्, स्त्री, (सुराणां सरित्।) गङ्गा। इति हलायुधः॥ (यथा, रघुः। २। ७५।
"सुरसरिदिव तेजो वह्निनिष्ठ्यूतमैशम्॥")

सुरसर्षपकः, पुं, (सुरप्रियः सर्षपः। ततः कन्।) देवसर्षपः। इति राजनिर्घण्टः॥

सुरसा, स्त्री, (शोभनो रसो यस्याः।) तुलसी। यथा। सुरसा स्त्री तु पर्णासे। इति शब्दरत्नावली॥ पर्णासे तु नपुंसकम्। इति शब्दार्थचन्द्रिकाभेदिनी॥ पर्णासे पुंनपुंसकम्। इति हलायुधचरभेदिनी॥ सुरसस्तु त्रिषु स्वादौ पर्णासे न नपुंसकम्। इति च कस्यचिन्मेदिन्याः पाठः॥ राज्ञा। इत्यमरः। २। ४। ११४॥ मित्रेण। इति शब्दचन्द्रिका॥ वाक्षी। इति रत्नमाला॥ मद्यपत्नीवरी। इति राजनिर्घण्टः॥ दुर्गा। इति केचित्॥ नागमाता। इति मेदिनी॥ यथा,—
"ततो देवाः सगन्धर्वाः सिद्धाश्च परमर्षयः।
अब्रुवन् सूर्यसङ्काशां सुरसां नागमातरम्॥
अयं यानाजनः श्रीमान् प्लवते सागरोपरि।
हनूमान्नाम तस्य त्वं सकृत्तं विघ्नमाचर॥
राक्षसं रूपमास्थाय सुघोरं पर्वतोपमम्।
दंष्ट्राकरालं पिङ्गाक्षं वक्त्रं कृत्वा नभस्थलम्॥
बलमिच्छामहे ज्ञातुं भूयश्चास्य पराक्रमम्।
त्वां विघ्नेष्यत्युपायेन विषादं वा गमिष्यति॥"
इति वाल्मीकीये रामायणे सुन्दराकाण्डे १ सर्गः॥
नदीभेदः। इति श्रीभागवते ५ स्कन्धे १६ अध्यायः॥ (अप्सरोविशेषः। यथा, महाभारते। १। १२१। ६०।
"पुण्डरीका सुगन्धा च सुरसा च प्रमाथिनी॥"

सुरा

राक्षसीविशेषः। तद्विषयको मन्त्रो यथा,—
"हिमवदुत्तरे कूले सुरसा नाम राक्षसी।
तस्या नूपुरशब्देन विघ्नस्त्या गुर्विणी भवेत्॥"
इति हारीते चिकित्सितस्थाने ५१ अध्याये॥)

सुरसाह्वः, पुं, वृक्षगणविशेषः। यथा,—
"निर्गुण्डी तुलसी ब्राह्मी वृहती कण्टकारिका।
पुनर्नवेति मुनिभिः सुरसाह्वः प्रकीर्त्तितः॥"
इति शब्दचन्द्रिका॥

सुरसिन्धुः, पुं, (सुराणां सिन्धुः।) गङ्गा। इति केचित्॥ (यथा, कथासरित्सागरे। १८।६२।
"निवसन्ति च देवेऽपि सुरसिन्धुसमाश्रिते॥")

सुरसुन्दरी, स्त्री, (सुराणां सुन्दरी रमणी सुरेषु सुन्दरी इति वा।) अप्सरसः। दुर्गा। इति केचित्॥ योगिनीविशेषः। तद्विवरणं योगिनीशब्दे द्रष्टव्यम्॥ (सुरस्त्री। यथा, किरातेः। ५।२८।
"अस्मिन् रतिश्रमनुदश्च सरोजवाताः
कर्त्तुं दिशन्ति न दिवः सुरसुन्दरीभ्यः॥")

सुरा, स्त्री, (सु अभिषवे + क्रन्। स्त्रियां टाप्। इत्युणादिवृत्तौ उज्ज्वलः। २। २४। यद्वा, सुषु रायन्त्यनयेति। सु + रै शब्दे + "आतश्चोपसर्गे।" ३। ३। ११६। इत्यङ्। टाप्।) मद्यकम्। मद्यम्। इति मेदिनी॥ अस्याः पर्य्यायगुणादि मदिराशब्दे मद्यशब्दे च द्रष्टव्यम्। सुराया विशेषगुणा यथा,—
"क्षुण्णानां सक्तुमुद्गानां यवगोधूमविकारिणाम्।
सुरा प्रसन्ना वातघ्नी लघ्वरक्तक्षयेषु च॥"
इति राजवल्लभः॥

तत्पानप्रायश्चित्तं यथा,—
"ब्रह्मघ्नश्च सुरापश्च स्तेयी च गुरुतल्पगः।
सेतुं दृष्ट्वा विशुध्यन्ते ततसंयोगी च पञ्चमः।
ततो धेनुशतं दद्यात् ब्राह्मणानान्तु भोजनम्॥"
इति गारुड़े २२६ अध्यायः॥ *॥

तत्पाने शुक्राचार्य्यशापो यथा,—
"सुरापानादघनां प्रापयित्वा
संज्ञानाशं चेतनस्यातिघोरम्।
दृष्ट्वा कच्चपापि तथापि रूपं
पीतं तथा सुरया मोहितेन॥
सम्मन्युरुत्थाय महानुभाव-
स्तदोशना विप्रहितं चिकीर्षुः।
काव्यः स्वयं वाक्यमिदं जगाद
सुरापानं प्रति वै जातशङ्कः॥
यो ब्राह्मणोऽद्यप्रभृतीह कश्चित्
मोहात् सुरां पास्यति मन्दबुद्धिः।
अपेतधर्म्मा ब्रह्महा चैव स स्यात्
अस्मिन् लोके गर्हितः स्यात् परे च॥
मया चेमां विप्रधर्म्मोक्तसीमां
मर्य्यादां वै स्थापितां सर्व्वलोके।
सन्तो विप्राः शुश्रुवांसो गुरूणां
देवा देत्यश्चोपशृण्वन्तु सर्व्वे॥"
इति महाभारते। १। ७६। ५६—६२॥
ब्राह्मणक्षत्रियवैश्यानां विविधसुरापानप्रायश्चित्तादि यथा,—

सुराचा

"सुरां पीत्वा द्विजो मोहादग्निवर्णां सुरां पिबेत्।
तया स काये निर्दग्धे मुच्यते किल्बिषात्ततः॥
गोमूत्रमग्निवर्णं वा पिबेदुदकमेव वा।
पयो घृतं वा मरणाद्गोसकृदरसमेव वा॥
कणान् वा भक्षयेद्दम्भं पिण्याकं वा सकृन्निशि।
सुरापानमनुस्मृत्य वारुणीमेव वा सुराम्॥
सुरा वै मलमन्नानां पाप्मा च मल उच्यते।
तस्माद्ब्राह्मणराजन्यौ वैश्यश्च न सुरां पिबेत्॥
गौड़ी पैष्टी च माध्वी च विज्ञेया त्रिविधा सुरा।
यथैवैका तथा सर्व्वा न पातव्या द्विजोत्तमैः॥
यक्षरक्षःपिशाचान्नं मद्यं मांसं सुरासवम्।
तद्ब्राह्मणेन नात्तव्यं देवानामश्नता हविः॥
अमेध्ये वा पतेन्मत्तो वैदिकं वाप्युदाहरेत्।
अकार्य्यमन्यत् कुर्य्याद्वा ब्राह्मणो मदमोहितः॥
यस्य कायगतं ब्रह्म मद्येनाप्लाव्यते सकृत्।
तस्य व्यपैति ब्राह्मण्यं शूद्रत्वञ्च स गच्छति॥
एषा विचित्राभिहिता सुरापानस्य निष्कृतिः॥"
इति मानवे ११। ६१—६६॥

सौत्रामण्यङ्गेऽपि तत्पाननिषेधो यथा,—
"यद्ब्राह्मणस्य विहितं सुरायाः
क्षुधा पशोरालभनं न हिंसा।
एवं व्यवायः प्रजया न रत्यै
इमं विशुद्धं न विदुः स्वधर्म्मम्॥"
इति श्रीभागवते। ११। ५। १३॥ *॥
"यस्मात् सुराया ब्राह्मणस्य अवघ्राणं स एव विहितः न पानं तथा पशोरपि आलभनमेव विहितं न तु हिंसा। अतो न यथेष्टमद्यघ्राण्यङ्गीत्यर्थः। व्यवायोऽपि प्रजया निमित्तभूतया न रत्यै। अतो मनोरथवादिन इमं विशुद्धं स्वधर्म्मं न विदुरिति।" इति तट्टीकायां श्रीधरस्वामी॥ अन्यत् प्रायश्चित्तशब्दे द्रष्टव्यम्॥ *॥ सुरापाने वर्ज्जनीयानि यथा,—
"सुरापाने विकलता स्खलनं वचने गतौ।
लज्जा मानच्युतिः प्रेमाधिक्यं रक्ताश्रुता भ्रमः॥"
इति कविकल्पलतायां १ स्तवके ३ कुसुमम्॥

सुराः, [रे] पुं स्त्री, धनवान्। सु शोभनो राधो धनं यस्येति बहुव्रीहौ कृते रैशब्दस्य राईभावे निष्पन्नः॥

सुराकरः, पुं, (सुराया आकरः।) नारिकेलवृक्षः। इति केचित्। मद्योत्पत्तिस्थानम्। यथा।
"आकराः शुचयः सर्व्वे वर्ज्जयित्वा सुराकरम्।"
इति शुद्धितत्त्वे बौधायनवचनम्॥

सुराङ्गना, स्त्री, (सुराणामङ्गना।) देवपत्नी अप्सरसः॥ इति केचित्। यथा,—
"सुरद्रुमूलमण्डपे विचित्ररत्ननिर्म्मिते
सुखासितानभूषिते सुशील-विभ्रमालसम्।
सुराङ्गनाभवल्लरीकरप्रपञ्च-चामर-
स्फुरत्सुसौर-वीचितं सदाद्भुतं भजामि तम्॥"
इति छन्दोमञ्जर्य्याम् २ स्तवकः॥

सुराचार्य्यः, पुं, (सुराया आचार्य्यः।) दैत्यजातिः। इत्यमरः। १। २। २४॥

सुराजकः, पुं, (सुष्ठु राजते इति। राज+ण्वुल्।) भृङ्गराजः। इति शब्दमाला॥

सुराजा, [न्] पुं, (सुष्ठु पूजितो राजा। "न पूजनात्।" ५।४।६६। इति न टच्।) श्रीभनो राजा। इति सुग्धबोधव्याकरणम्॥ (सुष्ठु राजा यस्य। सुन्दरभूपतियुक्ते देशादौ, त्रि। यथा,—

"सुराज्ञि देशे राजन्वान् स्यात्ततोऽन्यत्र राजवान्॥"

इत्यमरः। २।१।१३॥)

सुराजीवी, [न्] पुं, (सुरया जीवतीति। जीव+णिनिः।) शौण्डिकः। यथा,—

"कल्यपालः सुराजीवी शौण्डिको मद्यविक्रयः।
वारिवाहः पानवणिक् ध्वजी ध्वज्यासुतीवहः॥"

इति हेमचन्द्रः॥

(यथा, याज्ञवल्क्यः। १।१६४।

"चैलधावसुराजीविसन्धीपपतिवेश्मनाम्॥")

सुरापः, त्रि, (सुरां पिबतीति। पा+कः।) सुरापानकर्त्ता। यथा,—

"ब्रह्महा जायते यक्ष्मी सुरापः श्यावदन्तकः।
सुवर्णहारी कुनखी दुश्चर्म्मा गुरुतल्पगः॥"

इति प्रायश्चित्तविवेकः॥

सुरापगा, स्त्री, (सुरायाः आपगा।) गङ्गा। इति जटाधरः॥ (यथा, किरातेः। ५।४०।

"इह नियमयतः सुरापगाया-
स्तुषि सपदि स्फटिकस्य पादवेद्या।
कथयति शिवयोः शरीरयोगं
विषमपदा पदवी विवर्त्तनेषु॥")

सुरापाद्यः, पुं, भूम्नि, (सुरा पानं येषाम्। "पानं देशे।" ५।४।६ इति यत्वम्।) पूर्व्वदेशस्थाः। यथा। सुरापाद्याः प्राच्याः। इति संक्षिप्तसारटीकायां गोयीचन्द्रः॥

सुरापा(र्य)नं, क्ली, (सुरायाः पानम्। "वा भावकरणयोः।" ८।४।१०। इति विभाषया णत्वम्।) मद्यपानम्। यथा,—

"ब्रह्महत्या सुरापानं स्तेयं गुर्व्वङ्गनागमः।
महान्ति पातकान्याहुः संसर्गोऽपि तैः सह॥"

इति प्रायश्चित्तविवेकः॥

सुरापेयः। इति शब्दरत्नावली॥

सुराभागः, पुं, (सुरायाः भागः।) सुराया व्ययभागः। इति शब्दचन्द्रिका॥

सुरामण्डः, पुं, (सुरायाः मण्डः।) सुराया व्ययभागः। तत्पर्य्यायः। कारोत्तरः २। इत्यमरः। २।१०।४३॥ कारोत्तमः ३। इति तट्टिका॥ कालोत्तरः ४ सुराभागः ५। इति शब्दचन्द्रिका॥

सुरारिः, पुं, (सुराणां अरिः।) असुरः। इति शब्दरत्नावली॥ (यथा, कुमारे। ३।८।

"प्रसीद विश्वाग्रयतु वीर वध्यं
श्ररैर्मदीयैः कतमः सुरारिः।
विमेतु मोघोद्यतदानुधीर्यः
स्त्रीष्वोऽपि कोपस्फुरिताधराभः॥")

सुरारिघ्नः, [क्] पुं, (सुरारीणां हन्ता।) विष्णुः। यथा,—

"मेषाद्यपादे स्वपितीह विष्णु-
र्मेषाद्यमध्ये परिवर्त्तते च।
पौष्यावसाने च सुरारिघ्नो
प्रबुध्यते माघचतुर्थ्यहेन॥"

इति तिथ्यादितत्त्वम्।

सुरार्हं, क्ली, (सुरान् अर्हतीति। अर्ह+अण्।) हरिचन्दनम्। इति राजनिर्घण्टः॥ स्वर्णम्। इति केचित्॥

सुरालयः, पुं, (सुराणां आलयः।) सुमेरुः। इत्यमरः। १।१।५२॥ स्वर्गः। यथा माघे।

"गङ्गां येऽवगाहन्ते विधिना च नराधिप।
चतुर्युगसहस्रं ते न पतन्ति सुरालयात्॥"

इति तिथ्यादितत्त्वम्॥

(देवमन्दिरम्। यथा, भागवते। ७।१५।४६।

"पूर्त्तं सुरालयारामकूपाजीवादिलक्षणम्॥")

सुरायाः आलयः।) सुरानिलयश्च॥

सुराष्ट्रः, पुं, (शोभनं राष्ट्रं यस्य।) देशविशेषः। सुरत इति ख्यातः। स तु भारतवर्षस्य प्रतीच्यां दिशि वर्त्तते। इति सौराष्ट्रिकशब्दटीकायां भरतः॥ (यथा महाभारते। ३।८८।१६।

"सुराष्ट्रेष्वपि वक्ष्यामि पुण्यान्यायतनानि च॥"

श्रीरामचन्द्रस्य परिवारविशेषः। स तु श्रीरामयन्ते पद्मदलमथतः पूज्यः। यथा, अगस्त्यसंहितायाम्।

"धूम्रं जयन्तं विजयं सुराष्ट्रं राष्ट्रवर्द्धनम्।
चकोपं धूम्रपालाक्षं सुमन्त्रं दलमथतः॥"

इति तिथ्यादितत्त्वम्॥

सुराष्ट्रजं, क्ली, (सुराष्ट्रे जायते इति। जन्+डः।) तुवरिका। इत्यमरः। २।४।१२१॥ अस्य पर्य्यायो यथा,—

"सौराष्ट्री तुवरी काष्ठी व्रतालुकसुराष्ट्रजे।
आढकी चापि साख्याता व्रतक्षा च सुरवल्लिका॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

सुराष्ट्रजः, पुं, (सुराष्ट्रे जायते इति। जन्+डः।) क्षत्रियसुतः। इति राजनिर्घण्टः॥ विषभेदः। इति शब्दचन्द्रिका॥ तद्देशजाते, त्रि॥

सुराष्ट्रजा, स्त्री, (सुराष्ट्रे जायते इति। जन्+डः। टाप्।) तुवरी। इति राजनिर्घण्टः॥ (तुवरीशब्देऽस्या विशेषो विज्ञेयः॥)

सुराङ्गः, पुं, (सुरस्य आज्ञा आज्ञा यस्य।) देवदारु। इति शब्दरत्नावली॥ (क्वचित् क्ली। अस्य पर्य्यायो यथा,—

"सुरदारु हकिलिमं सुराङ्गं भद्रदारु च।
देवकाष्ठं पीतदारु देवदारु च दारु च॥"

इति वैद्यकरत्नमालायाम्॥)

हरिद्वृक्षः। मरुवकः। इति राजनिर्घण्टः॥

सुरि, [रि] त्रि, (सु शोभनं रा धनं यस्य।) शोभनधनवत्। इति सुग्धबोधव्याकरणम्॥

सुरङ्गः, पुं, शोभाञ्जनः। इति शब्दमाला॥

सुरङ्गा, स्त्री, सुरङ्गा। सौंध इति सुरङ्ग इति च भाषा। तत्पर्य्यायः। सन्धिला २ सन्धिः ३। इति जटाधरः॥ (यथा, महाभारते। १।१४६।११।

"ज्ञात्वा तु तद्गृहं सर्व्वमादीप्तं पाण्डुनन्दनाः।
सुरङ्गां विविशुस्तूर्णं माता स्वार्द्धमरिन्दमाः॥")

सुरङ्गाहिः, पुं, (सुरङ्गायामहिरिव।) चौरविशेषः। यथा,—

"कृत्रिमिलः सुरङ्गाहिरधचौरः सुरङ्गयुक्।"

इति शब्दरत्नावली॥

सुरूपं, क्ली, (सु शोभनं रूपमस्य।) तूलम्। इति राजनिर्घण्टः॥

सुरूपः, त्रि, (सु सुन्दरं रूपमस्य।) शोभनरूपविशिष्टः। यथा,—

"सुन्दरं रुचिरं चारु मनोज्ञं मञ्जु मञ्जुलम्।
कान्तं मनोरमं रम्यं सुषमं साधु शोभनम्॥
वल्गु हारि सुरूपाभिरूपदर्शनमनोहरम्॥"

इति जटाधरः॥

(यथा, बृहत्संहितायाम्। ५८। ४०।

"ग्राम्यश्च गदाहस्तः प्रद्युम्नश्चापभृत् सुरूपश्च॥")

विद्वान्। यथा,—

"विद्वान्विपश्चिद्बोधज्ञः सन् सुधीः कोविदो बुधः।
यत्तो मनीषी ज्ञः प्राज्ञः संख्यावान् पण्डितः कविः॥
धीमान् भूरिः क्षतिः क्षत्रिर्लब्धवर्णो विचक्षणः।
प्राप्तरूपसुरूपाभिरूपदूरदृशाः समाः॥"

इति जटाधरः॥

सुरूपा यथा। नकुलः १ पुरूरवाः २ अश्विनीकुमारौ ३ नलकूबरौ ४ कन्दर्पः ५ ग्राम्यः ६। इति कविकल्पलता॥

सुरूपा, स्त्री, (सु शोभनं रूपं यस्याः।) शालपर्णी। भार्गी। इति राजनिर्घण्टः॥

सुरूपकः, पुं, गर्दभाण्डः। इति हेमचन्द्रः॥

सुरेण्यः, पुं, (सुराणां इण्यः।) वृक्षसालः। इति केचित्॥ (यथा, बृहत्संहितायाम्। ८। २३।

"विष्णुः सुरेण्यो वसभिद्रुताग्र-
स्त्वष्टोत्तरश्रोणपदाधिपस्थः॥")

सुरेण्या, स्त्री, (सुराणामिष्या।) तुलसी। इति राजनिर्घण्टः॥

सुरेन्द्रः, पुं, (सुरेषु इन्द्रः ऐश्वर्य्यशाली।) इन्द्रः। इति केचित्॥ (यथा, भागवते। ८।७।३१।

"न ते गिरित्राखिललोकपाल
विरिञ्चवैकुण्ठसुरेन्द्रगम्यम्॥"

लोकपालः। इति मल्लिनाथः॥ यथा, रघुः। ३।११।

"सुरेन्द्रमात्राश्रितगर्भगौरवात्
प्रयत्नसुक्तासनया गृहागतः॥"

तथाच मनुः। ७।५।

"यस्मादेषां सुरेन्द्राणां मात्राभ्यो निर्म्मितो नृपः।
तस्मादभिभवत्येष सर्व्वभूतानि तेजसा॥")

महारजतम् १४ काञ्चनम् १५ रुक्मम् १६ कार्त्तस्वरम् १७ जाम्बूनदम् १८ महापदम् १९। इत्यमरः। २। ६। ८६॥ शातकौम्भम् २ भर्म्मम् २१ कर्परम् २२ कर्बुरम् २३ रुग्मम् २४। इति तट्टीका॥ भद्रम् २५ भूरि २६ पिञ्जरम् २७ द्रविणम् २८ गैरिकम् २९ चामीयम् ३० भर्क: ३१ चन्द्र: ३२ कलधौतम् ३३। इति जटाधर:॥ अभ्रकम् ३४ अग्निबीजम् ३५ लोहपरम् ३६ उद्गमारूढम् ३८ सूर्य्यमणिप्रभवम् ३८ सुरधातु ३९। इति शब्दरत्नावली॥ उज्ज्वलम् ४० कल्याणम् ४१ मनोहरम् ४२ अग्निबीर्य्यम् ४३ अग्नि ४४ भास्करम् ४५ पिङ्गलम् ४६ अपिञ्जरम् ४७ तेज: ४८ दीप्तम् ४९ अग्निभम् ५० दीप्तकम् ५१ मङ्गल्यम् ५२ सौमङ्गलकम् ५३ भृङ्गारम् ५४ आम्बवम् ५५ आग्नेयम् ५६ निष्कम् ५७ अग्निशिखम् ५८। अस्य गुणा:। स्थिरत्वम्। कषायत्वम्। स्निग्धत्वम्। मधुरत्वम्। दोषत्रयध्वंसनत्वम्। शीतत्वम्। स्वादुत्वम्। रसायनत्वम्। रुचिकारित्वम्। चक्षुष्यत्वम्। आयुष्यत्वम्। प्रज्ञाधीबलस्मृतिकरत्वञ्च। महारजतस्य गुणा:। कान्तिदुरितक्षयश्रीकारित्वम्॥ * ॥ तत्परीक्षादि यथा,—

"दाहैर्निरुक्तमथ यच्च भितं छिदायां
काश्मीरकान्ति च विभाति निकाषपट्टे:।
स्निग्धञ्च गौरवनुपैति च यत्तुलायां
आनीत हेयकनकं खलु रक्तपीतम्॥
तच्चैकं रसवेधकं तदपरं जातं स्वयं भूमिजं
किञ्चान्यद्वहु लोहसङ्करभवं चेति त्रिधा
काञ्चनम्।
तत्राद्यं कलधौतरक्तसदृशं रक्तं ततोऽन्यद्यथा
गौराभं तदिति क्रमेण गदितं स्यात् पूर्व्वपूर्व्वोत्तमम्॥"

इति राजनिर्घण्ट:॥ * ॥

अपिच सुवर्णमौत्पत्तिकनामलक्षणगुणा:।
"पुरा निजाश्रमस्थानां सप्तर्षीणां जिताक्षणाम्।
पत्नीर्दृष्ट्वोरुलावण्यसम्पन्नयौवना:॥
अस्मरंस्ते परिध्वस्तचेतसो जातवेदस:।
यतिस्तं तद्गताश्चैते रेतस्तु रेतसामगात्॥
क्षणिकं प्राप्य भवति तदसौ हव्यवाहन:।
स्वर्णं सुवर्णं कनकं हिरण्यं हेम काटकम्॥
तप्तकोयं कलधौतं गाङ्गेयं धर्म्म काञ्चनम्।
शातकौम्भं शातकुम्भं तथा कार्त्तस्वरञ्च तत्॥
जाम्बूनदं जातरूपं महारजतमित्यपि।
शोणं रक्तं लितं पीतं पिङ्गलं कुङ्कुमप्रभम्॥
नारसुरभ्योऽभिधानं त्रिभं हेमजं गुरु हैम
मतम्॥"

अथ लक्षणम्।

"तत्तु हेम त्रिधं स्निग्धं विवर्णं रक्तमुच्यते।
तापे हि हेमजिं पीतं कषे कार्त्तं तदुच्यते॥"

इत्यं हेमज इति योगे। स्निग्धं बहुवर्णाक्तं स्निग्धम्।

"सुवर्णं शीतलं हृद्यं वल्यं गुरु रसायनम्।
स्वादु तिक्तञ्च तुवरं पाकेच स्वादु पिच्छिलम्॥
पवित्रं दृष्टिदं नेत्रं मेधास्मृतिमतिप्रदम्।
हृद्यमायुष्करं कान्तिवाग्मिगुह्यस्थिरत्वकृत्।
विषहृद्व्रणयोन्मादचित्तदोषज्वरशोषजित्॥
वलं सवीर्य्यं हरते नराणां
रोगवजं पोषयतीह काये।
असौख्यकार्य्यैव सदा सुवर्ण-
मशुद्धमेतन्मरणञ्च कुर्य्यात्॥
असत्यङ्गारितं स्वर्णं वलं वीर्य्यञ्च नाशयेत्।
करोति रोगान्मृत्युञ्च तद्व्यादृश्यतस्तत:।"

इति भावप्रकाश:॥ * ॥

अथ सुवर्णकरणम्।

"मध्याह्ने गुडतान्त्रस्य करेणामाक्षिकं रसम्।
घर्षणाच्च भवेद्भौम्यं सुवर्णकरणं परम्॥
पीतं धुस्तूरपुष्पस्य सीवकस्य पलं मतम्।
पाठा लाङ्गलशाखा च मूलमावर्त्तनाद्भवेत्॥"

इति गारुडे १८८ अध्याय:॥ * ॥

अपि च।

श्रीशङ्कर उवाच।

"आनीय पारदं देवि स्थापयेत् प्रस्तरोपरि।
तस्योपरि जपेन्मन्त्रं सर्व्वतन्त्रमयात्मकम्॥
साष्टसहस्रं देवेशि प्रजपेत् साधकाग्रणी:।
स्वयम्भुपुष्पसंयुक्ते पक्षे चारुणसन्निभे॥
संस्थाप्य पारदं देवि रुद्याच्चे युगले शिवे।
पुष्पयुक्तेन सूत्रेण वध्नीयात् वहुयत्नत:॥
रुक्तिकया रक्तेनैव धान्यस्य परमेश्वरि।
लेपयेद्वहुयत्नेन रौद्रे शुष्काणि कारयेत्॥
पुनश्च लेपयेद्धीमान् ततो वह्नौ विनि:क्षिपेत्।
अष्टमीनवमीरात्रौ क्षिपेन्नैव सुरेश्वरि॥
अथवा परमेशानि रुद्याच्चे स्थापयेद्रसम्।
वज्रारसेन तद्वत्तं शोधयेद्वहुयत्नत:॥
धुत्तूरारीरसेनैव तथैव शोधनं चरेत्।
एवं कृते तु गुटिका यदि स्यात् दृढवन्धनम्॥
धूस्तूरस्य समानीय मध्ये शून्यञ्च कारयेत्।
छायाशातुलसीयोगे तथा घृतकुमारिका॥
एवं कृते वह्नियोगे भस्मसात् जायते किल।
भस्मयोगे भवेत् स्वर्णं धनदाया: प्रसादत:।
विवर्णं जायते द्रव्यं यदि पूजां न चाचरेत्॥"

इति मालतीमाधवतन्त्रे ५ पटल:॥ * ॥

अस्य धार्य्यत्वं सर्व्वदेवतात्मकत्वञ्च यथा, रामायणे महाभारते च परशुरामं प्रति वशिष्ठवाक्यम्।
"सर्व्वरत्नानि निर्म्मथ्य तेजोराशि: समुत्थितम्।
सुवर्णमेरो विप्रेन्द्र रत्नं परमशोभनम्।
एतस्मात् कारणाद्देवगन्धर्व्वोरगराक्षसा:।
मनुष्याश्च पिशाचाश्च प्रयता धारयन्ति तत्॥"
तथा।
"तस्मात् सर्व्वेभ्यविप्रेभ्य: पवित्रं परमं स्मृतम्॥"
तथा।
"अग्निर्वै मरुतो देवा: सुवर्णञ्च तदात्मकम्।
तस्मात् सुवर्णं दद्यात् पुरा: सर्व्वदेवता:॥"
तस्मात्तु प्रदानं न धार्य्यं देवतात्मकत्वात्।
इति गुह्यतत्त्वम्॥ * ॥ तद्दानफलं यथा,—

अम्बरीष उवाच।

"न सुवर्णं विना दानं तिलैर्व्वा मुनिसत्तम।
कस्मात् पवित्रमित्युक्तं भवानेतत् ब्रवीतु मे॥

वशिष्ठ उवाच।

अत्र ते कथयिष्यामि इतिहासं पुरातनम्।
जामदग्न्यस्य रामस्य मुनिभि: सह पार्थिव॥
नि:सप्तकृत्व: पृथिवीं मुनीनु पप्रच्छ पार्थिव।
हत्वा तु क्षत्रयाविशो नि:क्षत्रां भार्गव: पुरा॥

राम उवाच।

क्रोधादिदं कृतं कर्म्म मया मुनिवरोत्तमा:।
कथं कस्माद्विसुच्येऽहं पापात् क्षत्रवधादत:॥
इत्युक्ता धर्म्मतत्त्वज्ञा: पापानां पावनं परम्।
दानञ्चेह सुवर्णस्य ते तस्मुर्म्महर्षय:॥
एतत् पवित्रमतुलं समृतमिह शुश्रुम।
शृम्भोर्वीर्य्यात् परं तेजो रुपत्यं जातवेदस:॥
सहजं कार्त्तिकेयस्य रुद्रशुक्रससुद्भवम्।
पवित्रं यत् सुरै: सर्व्वैर्धार्य्यन्ते मुकुटादिभि:॥
अग्निस्तु देवता: सर्व्वा: प्रीयन्ते सर्व्वदेवता:।
तस्मात् सुवर्णं दद्यात् सुवर्णञ्च तदात्मकम्॥
दश पूर्व्वापरांश्चैव प्रोवाचेदं हरस्तत:।
सुवर्णं ये प्रयच्छन्ति नरकात्तारयन्ति ते॥
सर्व्वान् कामान् प्रयान्यते पितामहसुतोऽब्रवीत्।
मरीचिर्भगवान् पूर्व्वं ये प्रयच्छन्ति काञ्चनम्॥
य: सुवर्णं नरो नित्यं ब्राह्मणेभ्य: प्रयच्छति।
स चिरं विरजा विद्वान् देववद्दिवि मोदते॥
सर्व्वेषामेव दानानामेकजन्मानुगं फलम्।
घाटकक्षितिगौरीणां सप्तजन्मानुगं फलम्॥
विद्यमानं सुवर्णं तु यो लोभान्न प्रयच्छति।
स सदा जनपार्श्वेषु वेष्टितो नरकं व्रजेत्॥
क्षत्वापि सुमहत् पापं जातरूपं ददाति य:।
स सद्यस्तेन पापेन मुच्यते नात्र संशय:॥
एवं ज्ञात्वा तु मूल्यं सुवर्णं देहि भार्गव।
तुलामारुह्य कायस्य समानमात्मनस्तथा॥
इत्युक्तो मुनिभिर्हृष्टै राम धर्म्मभृतांवर:।
प्रादात् सुवर्णं विप्रेभ्य: तत: पापादमुच्यत॥
तस्मात्त्वमपि राजेन्द्र द्विजेभ्यो देहि काञ्चनम्।
विष्वक्सेनं समुद्दिश्य यदीच्छे: शाश्वतीं गतिम्॥"

इति वह्निपुराणे तुलापुरुषदाननामाध्याय:॥ * ॥

अपि च।

"सुवर्णदानं गोदानं भूमिदानं तथैव च।
नाशयन्त्याशु पापानि महापातकजान्यपि॥"

इति प्रायश्चित्ततत्त्वम्॥ * ॥

उत्सृष्टस्वर्णस्य दृष्टे चिरस्थायनिषेधो यथा,
"न चिरं स्थापयेद्गेहे हेम संशोधितं बुध:।
निहन्तु भयदं यस्मात् शोकव्याधिकरं नृणाम्॥
शीघ्रं परस्वीकरणात् स्त्रिय: प्राप्नोति पुष्कलम्॥"

संशोधितं पात्रसुद्दिश्य लक्षम्। अतएव विष्णुपुराणे

"तस्मात् सर्व्वात्मना पात्रे दद्यात् कनकसुत्तमम्।
अपात्रे मातरेतत्तु सुवर्णं नरकायते॥

महारजतम् १४ काञ्चनम् १५ रुक्मम् १६ कार्त्तस्वरम् १७ जाम्बूनदम् १८ अग्र्यपदम् १९। इत्यमरः। २। ६। ६३॥ ज्ञातकौम्भम् २० भर्म्मम् २१ कर्बुरम् २२ कर्चुरम् २३ रुग्मम् २४। इति तट्टीका॥ भद्रम् २५ भूरि २६ पिङ्गरम् २७ द्रविणम् २८ गैरिकम् २९ चाम्पेयम् ३० भरुः ३१ चन्द्रः ३२ कलधौतम् ३३। इति जटाधरः॥ अभ्रकम् ३४ अग्निबीजम् ३५ लोहधरम् ३६ उडुमाङ्गकम् ३७ सप्तधातुमणिप्रभवम् ३८ सुरधातु ३९। इति शब्दरत्नावली॥ उज्ज्वलम् ४० कल्याणम् ४१ मनोहरम् ४२ अग्निबीर्य्यम् ४३ अग्नि ४४ भास्करम् ४५ पिञ्जानम् ४६ अपिञ्जरम् ४७ तेजः ४८ दीप्तम् ४९ अग्निभम् ५० दीप्तकम् ५१ भङ्गल्यम् ५२ सौमङ्गकम् ५३ भृङ्गारम् ५४ जाम्बवम् ५५ आग्नेयम् ५६ निष्कम् ५७ अग्निशिखम् ५८। अस्य गुणाः। स्निग्धत्वम्। कषायत्वम्। तिक्तत्वम्। मधुरत्वम्। दोषत्रयध्वंसनत्वम्। शीतत्वम्। स्वादुत्वम्। रसायनत्वम्। रुचिकारित्वम्। चक्षुष्यत्वम्। आयुष्यत्वम्। प्रज्ञावीर्य्यबलस्तुतिकरत्वञ्च। तद्धारणस्य गुणाः। कान्तिदुरितक्षयश्रीकारित्वम्॥ * ॥ तत्परीक्षादि यथा,—

"दाहेऽतिरक्तमथ यच्च सितं छिदायां
काश्मीरकान्ति च विभाति निकाषपट्टे।
स्निग्धञ्च गौरवमुपैति च यत्तुलायां
जानीत देवकनकं खलु रक्तपीतम्॥
तच्चैकं रसवेधजं तदपरं जातं स्वयं भूमिजं
किञ्चान्यद्बहु लोहसङ्करभवं चेति त्रिधा काञ्चनम्।
तच्चाद्यं कलधौतरक्तमपरं रक्तं ततोऽन्यद्यथा
गौराभं तदिति क्रमेण गदितं स्यात् पूर्व्वपूर्व्वोत्तमम्॥"

इति राजनिर्घण्टः॥ * ॥

अपिच सुवर्णस्योत्पत्तिनामलक्षणगुणाः।

"पुरा निजाश्रमस्थानां सप्तर्षीणां जितात्मनाम्।
पत्नीर्विलोक्य लावण्यलक्ष्मीसम्पन्नयौवनाः॥
कन्दर्पदर्पविध्वस्तचेतसो जातवेदसः।
पतितं तद्वराष्टे रेतस्तु हैमतामगात्॥
कृत्रिमं चापि भवति तप्तसेन्द्रस्य वेधतः।
स्वर्णं सुवर्णं कनकं हिरण्यं हेम हाटकम्॥
तपनीयं कलधौतं गाङ्गेयं भर्म्म काञ्चनम्।
जाम्बूनदं जातरूपं महारजतमित्यपि।
दाहे रक्तं सितं छेदे निघर्षे कुङ्कुमप्रभम्॥
तारशुल्वोऽभिहतं स्निग्धं कोमलं गुरु हैम मतम्॥"

मतं उत्तमम्।

"तच्छुद्धं कठिनं रूक्षं विवर्णं कमलं दलम्।
दाहे छेदेऽसितं श्वेतं कथे त्याज्यं लघु स्फुटम्॥"

दलं दोषत इति लोके। स्फुटं यद्दाहतं स्फुटति।

"सुवर्णं शीतलं हृद्यं वल्यं गुरु रसायनम्।
स्वादु तिक्तञ्च तुवरं पाके च स्वादु पिच्छिलम्॥
पवित्रं दृंहणं नेत्र्यं मेधास्मृतिमतिप्रदम्।
हृद्यमायुष्करं कान्तिवाग्विशुद्धिस्थिरत्वकृत्।
विषक्षयत्वयोन्मादत्रिदोषज्वरशोषजित्॥
बलं सवीर्य्यं हरते नराणां
रोगव्रजं पोषयतीह काये।
असौख्यकार्य्येव सदा सुवर्ण-
मशुद्धमेतन्मरणञ्च कुर्य्यात्॥
असम्यग्धारितं स्वर्णं बलं वीर्य्यञ्च नाशयेत्।
करोति रोगान्मृत्युञ्च तद्धन्यादृद्यवत्तथा॥"

इति भावप्रकाशः॥ * ॥

अथ सुवर्णकरणम्।

"मध्वाज्यं गुडतान्नञ्च करेणामाक्षिकं रसम्।
घर्षणाच्च भवेद्दीप्यं सुवर्णकरणं प्रभु॥
पीतं धुस्तूरपुष्पञ्च सीसकञ्च बलं मतम्।
पाठा लाङ्गलशाखा च मूलमावर्त्तनाङ्गवेत्॥"

इति गारुडे १८८ अध्यायः॥ * ॥

अग्निश्च।

श्रीशङ्कर उवाच।

"आनीय पारदं देवि स्थापयेत् प्रस्तरोपरि।
तस्योपरि जपेन्मन्त्रं सर्व्वबन्धमयात्मकम्॥
साष्टसहस्रं देवेशि प्रजपेत् साधकाग्रणीः।
स्वयम्भुपुष्पसंयुक्ते वस्त्रे चारुणसन्निभे॥
संस्थाप्य पारदं देवि मृत्पात्रे युगले शिवे।
पुष्पयुक्तेन सूत्रेण बध्नीयात् बहुयत्नतः॥
मृत्तिकया रुद्धेनैव धान्यस्य परमेश्वरि।
लेपयेद्दृढयत्नेन रौद्रे शुष्काग्नि कारयेत्॥
पुनश्च लेपयेद्धीमान् ततो वह्नौ विनिःक्षिपेत्।
अष्टमीनवमीरात्रौ क्षिपेन्नैव सुरेश्वरि॥
अथवा परमेशानि मृत्पात्रे स्थापयेदसम्।
वह्निरोधेन तद्दृढं शोधयेद्दृढयत्नतः॥
घृतनारीरसेनैव तथैव शोधनं चरेत्।
एवं कृते तु गुटिका यदि स्यात् दृढबन्धनम्॥
धुस्तूरञ्च समानीय मध्ये शून्यञ्च कारयेत्।
कृष्णाख्यातुलसीयोगे तथा धृतकुमारिका॥
एवं कृते वह्नियोगे भस्मसात् जायते किल।
भस्मयोगे भवेत् स्वर्णं धनदायाः प्रसादतः।
विवर्णं जायते द्रव्यं यदि पूजां न चाचरेत्॥"

इति मालतीमाधवतन्त्रे ५ पटलः॥ * ॥

अस्य धार्य्यत्वं सर्व्वदेवतात्मकत्वञ्च यथा, रामायणे महाभारते च परशुरामं प्रति वशिष्ठवाक्यम्।

"सर्व्वरत्नानि निर्मथ्य तेजोराशिः समुत्थितम्।
सुवर्णमेषो विप्रेन्द्र रत्नं परमदुर्लभम्॥
एतस्मात् कारणाद्देवगन्धर्व्वोरगराक्षसाः।
मनुष्याश्च पिशाचाश्च प्रयता धारयन्ति तत्॥"

तथा।

"तस्मात् सर्व्वप्रयत्नेन पवित्रं परमं स्मृतम्॥"

तथा।

"अग्निर्वै सकला देवाः सुवर्णञ्च तदात्मकम्।
तस्मात् सुवर्णं ददता दत्ताः स्युः सर्व्वदेवताः॥"
तस्मात्तत् प्रदाद्यौ न धार्य्यं देवतात्मकत्वात्।
इति गुह्यतत्त्वम्॥ * ॥ तद्दानफलं यथा,—

अम्बरीष उवाच।

"न सुवर्णं विना दानं तिलैर्व्वा मुनिसत्तम।
कस्मात् पवित्रमित्युक्तं भवानेतत् ब्रवीतु मे॥

वशिष्ठ उवाच।

अत्र ते कथयिष्यामि इतिहासं पुरातनम्।
जामदग्न्यस्य रामस्य मुनिभिः सह पार्थिव॥
चिःसम्प्रश्नः पृथिवीं मुनीन् पप्रच्छ पार्थिव।
श्रुत्वा तु क्षपयाविष्टो निःक्षत्रां भार्गवः पुरा॥

राम उवाच।

क्रोधादिदं कृतं कर्म्म मया मुनिवरोत्तमाः।
कथं कस्माद्विमुच्येऽहं पापात् क्षत्रवधादतः।
श्रुत्वा धर्म्मसत्रस्थाः प्राणानां प्रवणं परम्।
दानञ्चेह सुवर्णस्य ते तमूचुर्मुनयः॥
एतत् पवित्रमतुलं समृतमिह शुभ्रम्।
शुभ्रो वीर्य्यात् परं तेजो ह्यपत्यं जातवेदसः॥
सहजं कार्त्तिकेयस्य रुद्रशुक्रसमुद्भवम्।
पवित्रं यत् सुरैः सर्व्वैर्धार्य्यन्ते मुकुटादिभिः॥
अग्निस्तु देवताः सर्व्वाः प्रीयन्ते सर्व्वदेवताः।
तस्मात् सुवर्णं ददता सुवर्णञ्च तदात्मकम्॥
इमं पूर्व्वापरांश्चैव श्रोत्रांश्चैवं हरिष्यतिः।
सुवर्णं ये प्रयच्छन्ति नरकात्तारयन्ति ते॥
सर्व्वान् कामान् प्रयान्वेते पितामहसुतोऽब्रवीत्।
मरीचिर्भगवान् पूर्व्वं ये प्रयच्छन्ति काञ्चनम्॥
यः सुवर्णं नरो नित्यं ब्राह्मणेभ्यः प्रयच्छति।
स चिरं विरजा विद्वान् देववद्दिवि मोदते॥
सर्व्वेषामेव दानानामेकजन्मानुगं फलम्।
हाटकक्षितिगौरीणां सप्तजन्मानुगं फलम्॥
विद्यमानं सुवर्णं तु यो लोभान्न प्रयच्छति।
स सदा जनपापेषु वेष्टितो नरकं व्रजेत्॥
हृत्वापि सुमहत् पापं जातरूपं ददाति वः।
स सद्यस्तेन पापेन मुच्यते नात्र संशयः॥
एवं ज्ञात्वा तु शुल्वर्धं सुवर्णं देहि भार्गव।
तुलामारुह्य कायस्य समानमात्मनस्तथा॥
इत्युक्तो मुनिभिर्विप्रै राम धर्म्मभृतांवरः।
प्रादात् सुवर्णं विप्रेभ्यः ततः पापादमुच्यत॥
तस्मात्त्वमपि राजेन्द्र द्विजेभ्यो देहि काञ्चनम्।
विधिवत्सेवं समुद्दिश्य यदीच्छेः शाश्वतीं गतिम्॥"

इति वह्निपुराणे तुलापुरुषदाननामाध्यायः॥ * ॥

अपिच।

"सुवर्णदानं गोदानं भूमिदानं तथैव च।
नाशयन्त्याशु पापानि महापातकजान्यपि॥"

इति प्रायश्चित्ततत्त्वम्॥ * ॥

उत्कृष्टस्वर्णस्य गृहे चिरस्थापननिषेधो यथा,

"न चिरं स्थापयेद्गेहे हेम संप्रोक्षितं बुधः।
तिष्ठत् भयावहं यस्मात् शोकव्याधिकरं नृणाम्॥
शीघ्रं परस्त्रीकरणात् श्रेयः प्राप्नोति पुष्कलम्॥"

संप्रोक्षितं पात्रमुद्दिश्य त्यक्तम्। अतएव विष्णुपुराणे

"तस्मात् सर्व्वात्मना पात्रे दद्यात् कनकमुत्तमम्।
अपात्रे पातयेद्यत्तं सुवर्णं नरकार्णवे॥

प्रमादतस्तु तन्नष्टं तावन्मात्रं निवोधेत्।
अन्यथा क्षेयमुक्तः स्यात् हेम्नादत्ते विनाग्निना॥"
तद्धेम ब्राह्मणाय उक्तनष्टं ब्राह्मणसादकृतं यदि
चौरादिना अपहियते तदा तावदेव पुनरुत्पाद्य देयामति दानसागरः॥ ८॥ तस्य अग्निदैवतम्। यथा,—
"व्यामेयं कनकं प्रोक्तं सर्व्वलोहानि वाप्यथ।"
इति शुद्धितत्त्वम्॥
(अथास्य मारणविधिः।
"गलितस्य सुवर्णस्य षोड़शांशेन सीसकम्।
योजयित्वा समाहृत्य निम्बुनीरेण मर्दयेत्॥
गोलं कृत्वा गलच्चूर्णं समं दद्यात्तदुपरि।
शरावसंपुटे कृत्वा पुटेत्तिंशद्गुनोपलैः।
एवं मुनिपुटैर्हेम नोत्यानं लभते पुनः॥"
अस्य गुणाः।
"कषायं तिक्तमधुरं सुवर्णं गुरु लेखनम्।
हृद्यं रसायनं वल्यं चक्षुष्यं कान्तिदं शुचि॥
आयुर्म्मेधाबयःस्थैर्य्यवाग्विशुद्धिस्तुतिप्रदम्।
जयोन्मादमरागाणां कुष्ठानां नाशनं परम्॥"
इति वैद्यकरसेन्द्रसारसंग्रहे मारणमारणाधिकारे॥५॥) हरिचन्दनम्। इति मेदिनी॥ स्वर्णगैरिकम्। इति रत्नमाला॥ धनम्। इति हेमचन्द्रः॥ नागकेशरम्। इति राजनिर्घण्टः॥

सुवर्णः, पुं, क्लो, (सुष्ठु वर्णोऽस्य।) हेम्नोऽष्टः। स च अशीतिरत्तिकापरिमितस्वर्णम्। तत्पर्य्यायः। विल्वः २। इत्यमरः। २। ६। ८६॥ कर्षे सुवर्णस्य सुवर्णसंज्ञम्। इति लीलावती॥ कर्षपरिमाणम्। इति वैद्यकपरिभाषा॥ (यथा,—
"विद्यात्कर्षं तथा चापि सुवर्णं कवलग्रहम्॥"
इति गारुड़े २०८ अध्यायः॥)

सुवर्णः, पुं, (शोभनो वर्णो यस्य।) स्वर्णकर्षः। यक्षविशेषः। इति मेदिनी॥ धुस्तूरः। इत्यमरः। कणगुग्गुलुः। इति राजनिर्घण्टः॥ सुष्ठुवर्णे, त्रि। इति शब्दरत्नावली॥ (यथा, महाभारते। १३। ६८। ३३।
"वासवा सम्प्रदानेन सहारनिरतो नरः।
सुवर्णश्च सुवेषश्च भवतीत्यनुशुश्रुमः॥")

सुवर्णकं, क्लो, (सुवर्णमिव। इवार्थे कन्।) पित्तलम्। इति हेमचन्द्रः॥ (स्वार्थे कन्। सुवर्णम्। यथा, महाभारते। ३। ८२। ७५।
"तत्र स्नात्वा नरश्रेष्ठ लभेत् बहु सुवर्णकम्॥"
सुष्ठु वर्णो यस्य। कन्।) सुन्दरवर्णयुक्ते, त्रि॥

सुवर्णकः, पुं, (सुष्ठु वर्णो यस्य। कन्।) धारणवृक्षः। इत्यमरः। २। ४। २४॥

सुवर्णकदली, स्त्री, (सुवर्णा सुवर्णवर्णा सुन्दरवर्णा वा कदली।) कदलीविशेषः। चाँपा कला इति भाषा। तत्पर्य्यायः। सुवर्णरम्भा २ कनकरम्भा ३ पीता ४ सुवर्णमोचा ५ चम्पकरम्भा ६ सुरभिका ७ सुभगा ८ हेमफला ९ स्वर्णफला १० कनकरम्भा ११ पीतरम्भा १२ गौरी १३ गौररम्भा १४ काञ्चनकदली १५ सुरप्रिया १६। अस्या गुणाः। मधुरत्वम्। हिमत्वम्। स्वल्पाग्नेर्दीपनकारित्वम्। लघ्वादाहनाशित्वम्। कषावहत्वम्। दृष्यकारित्वम्। गुरुत्वञ्च। इति राजनिर्घण्टः॥

सुवर्णकारः, पुं, (सुवर्णं स्वर्णभूषणादिकं करोतीति। कृ+अण्।) स्वर्णकारः। इति हलायुधः॥ सेकरा इति भाषा॥ (यथा, मनुः। ४। २१८।
"राजान्नं तेज आदत्ते शूद्रान्नं ब्रह्मवर्चसम्।
आयुः सुवर्णकारान्नं यशश्चर्म्मावकर्त्तिनः॥")

सुवर्णगैरिकं, क्लो, (सुवर्णं सुन्दरवर्णं गैरिकम्।) गैरिकभेदः। वर्णकमाटि इति वङ्गभाषा। पीत गेरु इति हिन्दी भाषा। तत्पर्य्यायः। स्वर्णधातुः २ सुरक्तकः ३ सन्ध्याभ्रम ४ वभ्रुधातुः ५ शिलाधातुः ६। अस्य गुणाः।
"गैरिकं मधुरं शीतं कषायं व्रणरोपणम्।
विस्फोटार्शोविसर्पास्रदाहघ्नं वरं स्वर्णादिकं शुभम्॥"
इति राजनिर्घण्टः॥
(तथाच।
"गैरिकं रक्तधातुश्च गैरेयं गिरिजन्मघा।
सुवर्णगैरिकं त्वत्यन्तो रक्ततरं हि तत्॥
गैरिकद्वितयं स्निग्धं मधुरन्तुवरं हिमम्।
चक्षुष्यं दाहपित्तास्रकफच्छर्दिविषापहम्॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

सुवर्णनकुली, स्त्री, (सुवर्णा नकुली।) महाज्योतिष्मती। इति राजनिर्घण्टः॥

सुवर्णपुष्पः, पुं, (सुवर्णवत् पुष्पं यस्य।) राजतरुणौ। इति राजनिर्घण्टः॥ (यथा, हरिवंशसंहितायाम्। २६। १०।
"श्रेष्ठौ सुवर्णपुष्पैः
पद्मोद्विप्राः पुरोहिताः कुमुदैः॥")

सुवर्णप्रसरं, क्लो, (सुवर्णस्य प्रसर इव यत्र।) एलवालुकम्। इति वैद्यकम्॥

सुवर्णवणिक्, पुं, (सुवर्णस्य वणिक् क्रयविक्रयादिकर्त्ता।) जातिविशेषः। सोनार वेणिया इति भाषा। स तु चम्पष्ठादेशायां जातः मध्यमवर्णसङ्करः। इति कोचित्॥ तस्य पतितत्वकारणं यथा, ब्रह्मवैवर्त्ते ब्रह्मखण्डे। १०। ६५।
"कस्तूरिकाग्निविप्रस्य संसर्गात् स्वर्णकारिणः।
स्वर्णचौर्य्यादिदोषेण पतितो ब्रह्मशापतः॥"
अपि च।
"शाम्भिकः शाङ्खिकश्चैव कांस्यको मणिकारकः।
सुवर्णौषधिकश्चैव पञ्चैते वणिजः स्मृताः॥
चम्पष्ठात्तनयपुत्र्यान्तु जायते गान्धिको वणिक्।
गन्धचन्दनधूपादिक्रयविक्रयकारकः॥
गान्धिक्यां रजपुत्राच्च संजातः शाङ्खिको वणिक्।
शङ्खं दत्त्वा सुनेः पत्न्यां शङ्खजीवी प्रकीर्त्तितः॥
शाङ्खिक्यां गान्धिकाच्चावन्ताम्बकांस्योपजीविकः।
शाङ्खिकात् कांस्यकन्यायां मणिकारः प्रजायते।
कांस्यकाराच्च माणिक्यां सुवर्णौषधिकोऽभवत्॥"
इति परशुरामकल्पसूत्रे भार्गवरामसूत्रसुवर्णसङ्करजातिमाला॥

सुवर्णविन्दुः, पुं, (सुवर्णवत् विन्दुर्यत्र।) विष्णुः। इति हेमचन्द्रः॥

सुवर्णयूथी, स्त्री, (सुवर्णवत् पीता यूथी।) पीतवर्णयूथिका। स्वर्णयूइ इति भाषा। तत्पर्य्यायः। सुगन्धा २ हेमयूथिका ३ युवतीष्टा ४ रक्तगन्धा ५ शिखण्डी ६ नागपुष्पिका ७ हरिणी ८ पीतयूथी ९ पीतिका १० कनकप्रभा ११ मनोहरा १२ गन्धाढ्या १३। अस्या गुणाः। स्वादुत्वम्। शिशिरत्वम्। शर्करापित्तदाहच्छर्द्यनागन्तुगदोषनाशित्वञ्च। इति राजनिर्घण्टः॥ अपि च।
"यूथिका गणिकाम्बष्ठा सा पीता हेमपुष्पिका।
यूथीयुगं हिमं तिक्तं कटुपाकं सरं लघु॥
मधुरं तुवरं हृद्यं पित्तघ्नं कफवातलम्।
व्रणास्यसुखदन्ताक्षिशिरोरोगविषापहम्॥"
इति भावप्रकाशः॥

सुवर्णवर्णः, पुं, (सुवर्णवत् वर्णो यस्य।) विष्णुः। यथा,—
"सुवर्णवर्णो हेमाङ्गो वराङ्गश्चन्दनाङ्गदी।"
इति तस्य सहस्रनामस्तोत्रम्॥

सुवर्णवर्णा, स्त्री, (सुवर्णवत् वर्णो यस्याः।) हरिद्रा। इति शब्दचन्द्रिका॥ स्वर्णवर्णयुक्ते, त्रि॥

सुवर्णा, स्त्री, (सुष्ठु वर्णो यस्याः।) कृष्णागुरुः। इति मेदिनी॥ वाध्यालकः। इति शब्दचन्द्रिका॥ स्वर्णचोरी। हरिद्रा। इति राजनिर्घण्टः॥ (हास्तिनपुरकर्त्तुर्हस्तिनो माता। यथा, महाभारते। १। ६५। ३४। "सुहोत्रः खलु इक्ष्वाकुकन्यामुपयेमे सुवर्णां नाम तस्यामस्य जज्ञे हस्ती य इदं हास्तिनपुरं न्यवेशयामास एतदस्य हास्तिनपुरत्वम्॥")

सुवर्णाख्यः, पुं, (सुवर्णस्य आख्या आख्या यस्य।) नागकेशरः। इति रत्नमाला॥ धूस्तूरवृक्षः। इति कनकाह्वयशब्दादर्शनात्॥ (तीर्थविशेषे, क्लो। इति महाभारतम्। ३। ८४। १०॥)

सुवर्णी, स्त्री, (सुष्ठु वर्णो यस्याः। गौरादित्वात् ङीष्।) आखुपर्णी। इति राजनिर्घण्टः॥ (विवृतिरस्या आखुपर्णीशब्दे ज्ञातव्या॥)

सुवया, [सु] स्त्री, (सुष्ठु वयो यस्याः।) प्रौढ़ा स्त्री। इति राजनिर्घण्टः॥

सुवल्लिः, स्त्री, (शोभना वल्लिः।) सोमराजी। इत्यमरः। २। ४। ६५॥

सुवल्ली, स्त्री, (सुवल्लि+पक्षे ङीष्।) सोमराजी। इत्यमरटीकायां भरतः॥

सुवसन्तः, पुं, (शोभनो वसन्तो यत्र।) चैत्रावली। इति त्रिकाण्डशेषः॥ सुन्दरवसन्तकालः सुलालीधवसन्तरोगश्च॥

सुवसन्तकः, पुं, (शोभनो वसन्तो यत्र। कप्।) वासन्ती। मदनोत्सवः। इति मेदिनी॥

सुवहः, त्रि, (सुखेन उह्यते इति। सु+वह+खल्।) सुखवाह्यः। इति मेदिनी॥ (सुष्ठु वहतीति। वह+क्विप्।) सम्यग्वहः। इति हेमचन्द्रः॥

सुवहा, स्त्री, (सुष्ठु वहति सौगन्धमिति। सु+वह+अच्।) श्रेष्मालिका। राखा (अस्याः पर्य्यायो यथा,-
"राखा युक्तरसा रस्या सुवहा रसना रसा।
श्लेष्मघ्नी च सुरसा सुगन्धा प्रेयसी तथा॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
गोधापदी। श्लेष्मघ्नी। इत्यमरः।२।४।७०॥
शल्लकी। (अस्याः पर्य्यायो यथा,भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे।
"शल्लकी गजभक्ष्या च सुवहा सुरभीरसा।
मद्देरणा कुन्दुरुकी वल्लकी च बहुत्वचा॥")
नौका। इति मेदिनी॥ चिरहता। इति शब्दचन्द्रिका भरतश्च॥ यज्ञजटा। हंसपदी। गन्धनाकुली। सुपली। नीलसिन्धुवारः। इति राजनिर्घण्टः॥ (अस्याः पर्य्यायो यथा,—
"सिन्धुवारः श्वेतपुष्पः सिन्दुकः सिन्दुवारकः।
नीलपुष्पी तु निर्गुण्डी श्रेष्मालीं सुवहां विदुः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
सुवासः, पुं, (शोभनो वासः।) शोभनगन्धः। उत्तमनिवासः। इति कैचित्॥ (महादेवः। इति महाभारतम्।१३।१७।११५॥)
सुवासिनी, स्त्री, (सुखेन वसतीति। सु+वस+णिनिः।) चिरिण्टी। इत्यमरः।२।६।८॥ सुखेन वसतीति सुवासिनीति द्राविड़ाः। पिट्कुलक्लेदात् चिरमेटति गच्छति चिरिण्टी। इट गतौ अन् मनीषादिः। सुवासिन्यां चिरिण्टी स्यात् द्वितीयवयसि स्त्रियामिति रुद्रः। चरण्टीत्येके। इति तट्टीकायां भरतः॥
सुविद्, पुं, (सुष्ठु वेत्तीति। विद्+क्विप्।) पण्डितः। गुणयुक्तनार्य्याम्, स्त्री। इत्यमरे सौविदल्लशब्दटीकायां रामाश्रमः॥
सुविद्, पुं, (सुष्ठु वेत्तीति। सु+विद्+कः।) सौविदः। इत्यमरटीकायां रायमुकुटः॥ राजा। इति भरतः॥
सुविदत्, पुं, (सुष्ठु वेत्तीति। विद्+क्विप्। तमनतीति। अत्+क्विप्।) राजा। इत्यमरे सौविदल्लशब्दटीकायां रायमुकुटः॥
सुविदत्त, त्रि, (सुष्ठु वेत्तीति। सु+विद्+"सुविदेः कत्नच्।" उणा० ३।१०८। इति कत्नच्।) कुटुम्बः। इत्युणादिकोषः॥
सुविदल्ल, क्ली, अन्तःपुरम्। इत्यमरटीकायां रायमुकुटः॥
सुविदल्ला, स्त्री, जड़ा नारी। इत्यमरे सौविदल्लशब्दटीकायां रायमुकुटः॥
सुविधिः, पुं, (सु शोभनो विधिर्यस्य।) अर्हद्भिदेवः। इति हेमचन्द्रः॥ उत्तमविधानञ्च॥
सुविनीता, स्त्री, (सुष्ठु विनीता।) सुकरा गौः। इति शब्दरत्नावली॥ अतिशयविनयविशिष्टे, त्रि॥
सुवीजः, पुं, (सु शोभनं वीजं यस्य।) खसखसः। इति राजनिर्घण्टः॥ (महादेवः। इति महाभारतम्। १३। १७। ३६॥) सुन्दरवीजे, क्ली। तद्वति, त्रि॥

सुवीरकं, क्ली, (सु+वीर शौर्य्ये+खुल्।) सौवीराञ्जनम्। इति शब्दचन्द्रिका॥ (पर्य्यायोऽस्य यथा,—
"सुवीरकं पार्व्वतेयं सौवीरं नीलमञ्जनम्॥"
इति वैद्यकरत्नमालायाम्॥)
सुवीराम्बं, क्ली, (सुवीरं अतिशयतेजःशालि अम्बं यस्य।) काञ्जिकम्। इति जटाधरः॥
सुवीर्य्यं, क्ली, (सुष्ठु वीर्य्यं यस्याः।) वनकार्पासी। इति शब्दरत्नावली॥ (वनकार्पासीशब्दे ऽस्या विशेषो ज्ञेयः॥)
सुवृत्तः, पुं, (शोभनो वृत्तः।) शूरणः। इति राजनिर्घण्टः॥ त्रि, सुन्दरवर्त्तुलः। (यथा, महाभारते। १। १५४। ६।
"यश्च बाहू सुवृत्तौ मे हस्तिहस्तनिभाविमौ॥"
सुष्ठु वृत्तं चरित्रं यस्येति। सच्चरित्रः। यथा, रघुः। ८। ७७।
"मयि तस्य सुवृत्त! वर्णते
लघुसन्देशपदा सरस्वती।
शृणु विश्रुतसत्त्वसार! तां
हृदि चैनामुपधातुमर्हसि॥")
सुवृत्ता, स्त्री, (सुष्ठु वृत्ता।) पतपत्री। काकली-द्राक्षा। इति राजनिर्घण्टः॥
सुवेगा, स्त्री, (सुष्ठु वेगो यस्याः।) महाज्योतिष्मती। इति राजनिर्घण्टः॥
सुवेषः, पुं, (सुगता वेला वसुदकूलं येन। यद्वा, सुष्ठु वेला स्थितिर्यस्य।) त्रिकूटपर्व्वतः। इति हेमचन्द्रः॥ (यथा, अनर्घराघवे। ६। १७।
"श्रुत्वा दाशरथौ सुवेलकटके साटोपमर्धेन्दु-
दुष्कारैः परिपूरयन्ति ककुभः प्रोच्छ्रित्ति कौचेयकान्॥")
सुवेलः, त्रि, (शोभना वेला मर्य्यादा स्थितिर्यस्य।) प्रगतः। शान्तः। इति मेदिनी॥
सुवे(ष)शः, पुं, (शोभनो वेशो यस्य।) श्वेतेक्षुः। इति राजनिर्घण्टः॥ सुन्दरवेशयुक्ते, त्रि। यथा,
"सुवेशं पुरुषं दृष्ट्वा भ्रातरं यदि वा सुतम्।
योनिः क्लिद्यति नारीणां सत्यं सत्यं हि नारद॥"
इति महाभारतम्॥
सुवेशी, [न्] त्रि, (सुवेशोऽस्यास्तीति। इनिः।) सुन्दरवेशयुक्तः॥
सुव्रतः, पुं, (सुष्ठु व्रतं यस्य।) भाविकल्कीयार्हद्भिदेवः॥ वर्त्तमानकल्कीयार्हद्भिदेवः। इति हेमचन्द्रः॥ (कार्त्तिकेयः। यथा, महाभारते। ३। २३१। ७।
"सुव्रतो ललितश्चैव बालक्रीड़नकप्रियः॥")
शोभनव्रतयुक्ते, त्रि॥ (यथा, महाभारते। १। २३४। २७।
"सुव्रता चापि कल्याणी सर्व्वभूतेषु विश्रुता।
अरुन्धती महात्मानं वशिष्ठमन्वपद्यत॥")
सुव्रता, स्त्री, (सुष्ठु व्रतं यस्याः।) सुखसंदोह्या गौः। इत्यमरः।२।६।७१॥ शोभनव्रता।

इति मेदिनी॥ वर्त्तमानकल्कीयपत्नीदशकजिन-माता। इति हेमचन्द्रः॥ (शमी। तत्पर्य्यायो यथा,—
"शमी पलाशी वह्न्यत्या सव्रता गन्धसूलिका।
गन्धारिका गन्धवधूर्वधूः पृथुपलाशिका॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
सुशर्म्मा, [न्] पुं, राजविशेषः। इति पुराणम्॥ निन्दितब्राह्मणविशेषः। यथा,—
"सुशर्म्मा नाम को देव किं जातीयः किमात्मकः।
कुत्सितस्य च वै सृष्टिः केन वा यत्र हेतुना॥
श्रीभगवानुवाच।
सुशर्म्मा नाम दुर्म्मेधाः शौसा पापात्मनामभूत।
अनाम्नायविदां वंशे विप्राणां क्रूरकर्म्मणाम्॥"
इति पाद्मोत्तरखण्डे ८० अध्यायः॥
सु+शृ मि हिंसे+"अन्येभ्योऽपि दृश्यन्ते।" ३। २। ७५। इति मनिन्।) सुशर्म्माति यः। इति सुग्धबोधटीकायां दुर्गादासः॥ शोभनसुखविशिष्टे, त्रि॥
सुशल्यः, पुं, (सुष्ठु दृढं शल्यं कण्टको यस्य।) खदिरः। इति राजनिर्घण्टः॥ (खदिरशब्देऽस्य विवरणं ज्ञातव्यम्॥)
सुशर्व्वी, स्त्री, कार्पासः। जलशीरकः। इत्यमरटीकायां भरतः। २। ४। १५५॥
सुशाकं, क्ली, (सुष्ठु शाको यस्मात्।) शाकम्। इति राजनिर्घण्टः॥
सुशाकः, पुं, (सुष्ठु शाको यस्य।) चक्षुः। भिक्षा। तण्डुलीयः। इति राजनिर्घण्टः॥
सुशान्ता, स्त्री, शार्ङ्गध्वजराजपत्नी। यथा, कल्किपुराणे २२ अध्याये।
"शार्ङ्गध्वजो महातेजा गजायुतबलः सुधीः।
तस्य पत्नी महादेवी विष्णुव्रतपरायणा॥
सुशान्ता स्वामिनं प्राह कल्किना योद्धुमुद्यतम्।
नाथ कान्तं जगन्नाथं सर्व्वान्तर्यामिनं प्रभुम्।
कल्किं नारायणं साक्षात् कथं त्वं प्रहरिष्यसि॥
सुशिखः, पुं, (शोभना शिखा यस्य।) अग्निः। इति जटाधरः॥ उत्तमशिखायुक्ते, त्रि॥
सुशिखा, स्त्री, (शोभना शिखा।) मयूरशिखा। इति राजनिर्घण्टः॥ (सुन्दरकेशः। यथा, भागवते। ३। २०। ३६।
"मध्ये विधीदति दृढव्रतनम्रभारभीतं
आन्तेव दृष्टिरमला सुशिखासमूहः॥")
सुशीतं, क्ली, (शोभनं शीतम्।) शीतचन्दनम्। इति शब्दचन्द्रिका॥ अतिशयशीतले, त्रि॥
सुशीतः, पुं, (सुष्ठु शीतः।) कृष्णसारः। इति राजनिर्घण्टः॥
सुशीतजं, क्ली, (सुष्ठु शीतलम्।, गन्धलशम्। इति रत्नमाला॥ (गन्धलशशब्दोऽस्य विशेषो ज्ञेयः॥) अतिशीतगुणविशिष्टे, त्रि। (यथा, महाभारते। ३। ६५। ४।
"निर्म्मलस्वादु सलिलं मनोहारि सुशीतलम्।
युधिष्ठिरान्तरे क्षिप्त्वा निवेशाय मनो दधुः॥")

सुश्रोता, स्त्री, (सुष्ठु श्रोता।) श्रुतपत्नी। इति राजनिर्घण्टः।

सुश्रोणिका, स्त्री, कन्दविशेषः। वाराहीकन्दः। इति शब्दचन्द्रिका।

सुश्रीमः, पुं, श्रीमद्गुणः। इत्यमरटीकायां स्वामी। मदति, त्रि।

सुश्रीलः, पुं, (सु श्रीभनं श्रीलमस्य।) चोलराजः। यथा,—

"यो विष्णुदासः स तु पुण्यश्रीको
यश्चोलभूपः स सुशीलनामा।
त्यागसुभौ तत्समरूपभाजौ
द्वाःस्थौ कृतौ तेन रमाप्रियेण।"

इति पाद्मे उत्तरखण्डे ५४ अध्यायः।

श्रीभनश्रीलविशिष्टे, त्रि। (यथा, भागवते। ६। १। १७

"मश्रीचानो ह्ययं लोके पन्थाः क्षेमोऽकुतोभयः।
सुशीलाः साधवो यत्र नारायणपरायणाः।"

श्रीभनं श्रीलमिति। बहुव्रीहौ, क्लीं। यथा, महाभारते। ३। २६०। ४३।

"त्वया सुशीलवृत्तपुण्ययुक्तया
मनुष्यत्वं साध्वि पुनः कुलीनया।",

सुशीलता, स्त्री, (सुशीलस्य भावः। तल्। टाप्।) सच्चरित्रभावः। सुशीलत्वम्।

सुशीला, स्त्री, (श्रीभनं श्रीलं यस्याः। टाप्।) श्रीकृष्णस्याष्टमहिष्यन्तर्गतसप्तमहिषीविशेषः। यथा,—

"अष्टौ महिष्यस्ताः सर्व्वा रुक्मिणप्रायाः प्रधानतः।
रुक्मिणी सत्यभामा च कालिन्दी च शुचिस्मिता॥
मित्रविन्दा लक्ष्मणा नाग्नजिती सुलक्षणा।
सुशीला नाम तनया महिष्यश्चाष्टमाः स्मृताः॥"

इति पाद्मोत्तरखण्डे ५८ अध्यायः॥

यमभार्य्या। इति केचित्।

सुश्रीका, स्त्री, (शोभना श्रीः शोभा यस्याः। कप्। टाप्।) सप्तकी। इति राजनिर्घण्टः। सुन्दरश्रीयुक्ते, त्रि। (यथा, हरिवंशे। १८३। ११३।

"हारीषश्रीमतीं कृत्वा सप्तीं हारवतीं परीम्।
संग्रहस्थां सुश्रीकां बहुरत्नोपशोभिताम्।")

सुश्रुतः, पुं, विश्वामित्रसुनिपुत्रः। स तु चिकित्साशास्त्रकर्त्ता। यथा,—

"यथा धन्वन्तरिर्देवः शास्त्रं शौरक्रियमन्यते।
देवानां श्रीतनाय यानुवेदमुवाच ह।
विश्वामित्रसुतायैव सुश्रुताय महात्मने।"

इति भागवे १९८ अध्यायः।

अथ सुश्रुतवाक्यम्।

"अथ खल्वायुष्कामं विश्वामित्रपुत्रसुश्रुतोऽध्येतुमृषीनुपससाद। भगवन्भिषक्कर्म्मणि कार्त्स्न्यमधीयानाः स्मः। विश्वामित्रो भूयस्त्वेन पुत्रं सुश्रुतमब्रवीत्। तत्र प्राधान्यतश्च स्त्रीपुंसयोरभिप्रायम्। अथ खल्वयं त्रिपुरारिरौशनसं शालाक्यं [illegible] आयुर्वेदं भयानकानथ्यायत यतः। अङ्गीकृत्य वचस्तेषां नृपतिस्तानुपादिशत्। आख्यातं तेन ते यस्मात् तन्त्रं तदभवत्सुमनसो मुदा॥ काशिराजं जयाशीर्भिरभिनन्द्य मुदान्विताः। सुश्रुताद्याः समिद्धार्था जग्मुर्गेहं स्वकं स्वकम्॥ प्रथमं सुश्रुतस्तेषु स्वं तन्त्रं कृतवान् स्फुटम्। सुश्रुतस्य सखायोऽपि पृथक् तन्त्राणि तेनिरे॥ सुश्रुतेन कृतं तन्त्रं सुश्रुतं बहुभिर्यतः। तस्मात्तत् सुश्रुतं नाम्ना विख्यातं क्षितिमण्डले॥"

इति भावप्रकाशः॥

(स्त्री, गोष्ठीआदि छन्निप्रत्नः। यथा, मनुः। ३। २५४।

"पित्र्ये खदितमित्येव वाच्यं गोष्ठे तु सुश्रुतम्।
सम्पन्नमित्यभ्युदये दैवे क्षत्तमित्यपि॥")

सुश्रुतः, त्रि, (सुष्ठु श्रुतं सर्व्वं यस्मात्। "सुविनिर्दुर्भ्यः सुपिसुतिसमाः।"८। ३। ८८। इति सत्वम्।) श्रोभनम्। इत्यमरः। ३। १। ५२॥ श्रुतः। इति मेदिनी॥

सुश्रुता, स्त्री, (सु श्रोभनं श्रुतं सर्व्वं यया।) परमा श्रोभा। इत्यमरः। १। ३। १०॥ (यथा, नैषधे। १८। २।

"जयजय महाराज प्राभातिकीं सुश्रुतामिमां सफलयतमां दानाद्यैर्वेरालसपक्षयोः॥")

निद्रायां कामदः। इति हेमचन्द्रः॥

सुश्रुषा, स्त्री, (सुष्ठु श्रुतं शुश्रूषते करोति। सु+श्रु+सन्+अच्। गौरादित्वात् ङीष्।) कारयेलः। इत्यमरः। २। ४। ११५॥ कृष्णशोरकः। शोरकः। इति मेदिनी॥ चुक्रकारयेलः। इति राजनिर्घण्टः।

सुश्रूः, स्त्री, (सुष्ठु श्रूयतेऽसौ। सु+श्रु+क्विप्। सुवाद्यत्वात् ऊङ्।) श्रुतिः। इत्यमरः। १। ७। ३॥

सुश्रूषा, स्त्री, (सुष्ठु श्रूयतेऽसौ। सु+श्रु+"कृषृसृभ्यः क्षः।" उणा० ३। ५२। इति क्षः। ष्वोदेरादित्वात् षत्वम्। यद्वा, सुश्रूरस्यास्तीति सुश्रू+"कृषृसृभ्यः क्षः।" ५। २। ३०५। इति क्षः।) श्रुतिः। इत्यमरटीकायां भरतः। १। ७। ३॥ (कार्य्यम्। इति आख्यिका। विशेषणे, त्रि। यथा, रघुवंशे। १५। ८८।

"अनीकिनीमिन्द्रसखस्य सुश्रूः
शिखण्डिनः सप्त च सप्तकीं च।")

सुश्रोणः, पुं, गन्धविशेषः। इति मेदिनी॥ चन्दनमात्रम्। इति शब्दरत्नावली॥

सुश्रोणिः, त्रि, श्रीतगुणयुक्तः। इत्यमरः। १। १। ८८। मनोज्ञः। इति मेदिनी॥

सुषुप्तं, क्लीं, (सु+स्वप्+क्तः।) सुषुप्तावस्था। यथा,—

"यो जागरे बहिरनुक्षणधर्म्मिणोऽर्थान्
भुङ्क्ते समस्तकरणैर्हृदि तत्सदृक्षान्।
स्वप्ने सुषुप्त उपसंहरते स एकः
स्मृत्यन्वयात्त्रिगुणवृत्तिदृगिन्द्रियेशः॥"

इति श्रीभागवते। ११। १३। ३२॥

सुषुप्तियुक्ते, त्रि॥ (यथा, भागवते। ६। १६। ५३।

"यथा सुषुप्तः पुरुषो विश्वं पश्यति चात्मनि।
आत्मानमेकदेशस्थं मन्यते स्वप्न उत्थितः॥")

सुषुप्तिः, स्त्री, (सु+स्वप्+क्तिन्।) सत्त्वप्रधानं अज्ञानम्। तस्य नामान्तरम्। कारणशरीरम्। आनन्दमयकोषश्च। इति वेदान्तसारः। सर्व्वस्य स्थूलसूक्ष्मोपाधेः कारणोपाधौ लीनत्वं सुषुप्तित्वम्। इति तट्टीका॥ व्यवसायविशेषः। यथा,

"स्वप्नावस्था परीक्षिता सुषुप्तावस्थेदानीं परीक्ष्यते। तत्रैताः सुषुप्तविषयाः श्रुतयो भवन्ति यदृयत्रैतत् सुप्तः समस्तः सम्प्रसन्नः स्वप्नं न विजानात्यासु नाडीषु सृप्तो भवतीति। नाडीरनुक्रम्य श्रूयते। ताभिः प्रत्यवसृप्य पुरीतति शेते इति। विकल्पमानेषु तु सुषुप्तिस्थानेषु कदाचिन्नाडीभ्यः प्रतिबुध्यते कदाचित् पुरीतत्कदाचिदात्मान इत्यप्यशिष्यत्। तस्मादप्यन्यत्रैव तु सुषुप्तिस्थानमिति।" इति शारीरिकभाष्ये। अध्याये २ पादः। किञ्च। "यत्र सुप्तो न कञ्चन कामं कामयते न कञ्चन स्वप्नं पश्यति तत् सुषुप्तम्।" इति माण्डूक्योपनिषत्। सुनिद्रा च॥

सुषुम्णा, स्त्री, (सुष्ठु इत्यर्थकशब्दं स्यति। स्यो+कः।) मेरुदण्डवर्त्ती इडापिङ्गलासार्द्धमध्यस्थनाडीविशेषः। यथा,—

"मेरोर्बाह्यप्रदेशे शशिमिहिरशिरे गह्वरे तिस्रनाड्यो
मध्ये नाड्यौ सुषुम्णा त्रितयगुणमयी चन्द्रसूर्य्याग्निरूपा।"

इति षट्चक्रभेदः॥

तस्या यथाभ्यासक्रमं यथा,—

"क्रमं यामे क्रमं दृष्टे यदा वहति मारुतः
सुषुम्णा सा च विज्ञेया सर्व्वकार्य्यहरात्मिका।
तस्यां नाड्यां स्थितो यद्यत्कर्म्म सत्कुरुते नरः।
तस्मिन् तं विजानीयात् सर्व्वकार्य्यविनाशनम्।
यदानुक्रममुल्लङ्घ्य तस्यां नाड्यां वहेत् मरुत्।
तदा तस्य विजानीयादनर्थं समुपस्थितम्।"

इति ज्ञानसारम्॥

"मेरुबाह्ये इडा नाड्यौ पिङ्गला वामदक्षिणा।
सुषुम्णा मध्यमार्गेऽयं ब्रह्मद्वारमधिष्ठितम्।"

इति श्रीमन्त्रसारः॥

सुषेणः, पुं, कामदेवः। इत्यमरः। १। १। ४७॥ विष्णुः। (यथा, महाभारते। १३। १४८। ७।

सुसर्व्व। "महावराहो गोविन्दः सुवेगः कनकाङ्गदी ॥" "शोभना सेना खगणात्मिका यस्य।"इति तट्टीकायां भरतः ॥) वानरराजसुग्रीववैद्यः। इति मेदिनी ॥ वेतसः। इति राजनिर्घण्टः ॥ (वसुदेवपुत्रविशेषः। यथा, भागवते। ६। २४। ५३—५४।

"वसुदेवस्तु देवक्यामष्टपुत्रानजीजनत्।
कीर्त्तिमन्तं सुषेणञ्च भद्रसेनसुदारधीः ॥
ऋजुं समर्द्दनं भद्रं सङ्कर्षणमहीश्वरम्।
अष्टमस्तु तयोरासीत् स्वयमेव हरिः किल ॥"

नागविशेषः। इति महाभारतम्। १।५७।१६॥ नृपविशेषः। स च शूरसेनाधिपतिः। यथा, रघुः। ६। ४५।

"सा शूरसेनाधिपतिं सुषेण-
मुद्दिश्य लोकान्तरगीतकीर्त्तिम्।
आचारशुद्धोभयवंशदीपं
शुद्धान्तरक्षा जगदे कुमारी ॥")

सुषेणिका, स्त्री, क्षणचित्रता। इत्यमरः। २। ४। १०८॥

सुषेणी, स्त्री, चित्रता। इति त्रिकाण्डशेषः ॥

सुषोमा, स्त्री, नदीभेदः। इति श्रीभागवते। ५। १९। १७॥

सुष्ठु, अ, (सुनिष्ठतीति। सु+स्था+"कपटुःसुष्ठुः।" उणा० १। २६। इति कुः। सुषमादित्वात् षत्वम्।) प्रशंसा। अतिशयम्। इत्यमरः। ३। ४। १॥ क्षत्वम्। इति संक्षिप्तसारोणादिवृत्तिः॥ (यथा, भागवते। ४।२२।१७।

"पृथोस्तत्सूक्तमाकर्ण्य सारं सुष्ठु मितं मधु।
स्वयमान इव प्रीत्या कुमारः प्रत्युवाच ह॥"

"सुष्ठु गम्भीरार्थम्।" इति तट्टीका॥)

सुष्णं, क्ली, रज्जुः। इत्यमरटीकायां स्वामी॥

सुसंयतः, त्रि, (सु+सम्+यम+क्तः।) यथाविधिसंयमविशिष्टः। यथा, ब्रह्मपुराणम्।

"यो यः कश्चित्तीर्थयात्रान्तु गच्छेत्
सुसंयतः स च पूर्व्वं गृहे स्थे।
कृतोपवासः शुचिरप्रमत्तः
संपूजयेत् भक्तिमन्तो गणेशम्॥"

इति प्रायश्चित्ततत्त्वम्॥

सुसंस्कृतं, त्रि, (सुष्ठु संस्क्रियते इति। सु+सं+कृ+क्तः।) घृतादिनानाद्रव्येण प्रयत्नसंस्कृतव्यञ्जनादि। तत्पर्य्यायः। प्रयत्नम् २। इत्यमरः॥

"तैलपाकसुसंस्कारे प्रयत्नसुसंस्कृतम्॥"

इति शब्दरत्नावली॥

उत्तमसंस्कारविशिष्टश्च॥

सुसत्या, स्त्री, जनकराजभार्य्या। यथा,—

"जानामि पितरं चाहं विदेहाधिपतिं नृपम्।
तस्य भार्य्यां सुसत्याञ्चामहं जानामि मातरम्॥
भ्रातरस्तत्सुताः सर्व्वे सीता मे भगिनी शुभा।
सुसत्या मम मातेति लोको जानाति सन्ततम्॥"

इति कालिकापुराणे ३७ अध्यायः॥

सुसधी, स्त्री, सुपथी। इत्यमरटीकायां रायमुकुटः। २। ७। २५५॥

सुसम्पत् } (सुष्ठु सम्पत्। प्रादिसमासः।)
सुसम्पद् } सौभाग्यम्। तत्पर्य्यायः। परभागः २। इति त्रिकाण्डशेषः॥

सुसहः, त्रि, सुखसह्यः। दुःसहभिन्नः। सुखेन सह्यतेऽसाविति सहधातोः कर्म्मण्यल्प्रत्ययेन निष्पन्नः॥

सुसारः, पुं, (सुष्ठु सारो यस्य।) रक्तखदिरः। इति राजनिर्घण्टः॥ अतिशुद्धसारविशिष्टे, त्रि॥

सुसारवत्, क्ली, (सुसारोऽस्त्यस्मिन्। मतुप्। मस्य वः।) स्फाटिकम्। इति त्रिकाण्डशेषः॥

सुसिकता, स्त्री, (सुष्ठु सिकतैव।) शर्करा। इति राजनिर्घण्टः॥ उत्तमबालुका च॥

सुसीमा, स्त्री, वृत्ताङ्घ्रिलता। सा तु वसुजिनजननी। इति हेमचन्द्रः॥ (शोभना सीमा।) उत्तमसीमा च॥

सुस्थः, त्रि, (सु+स्था+कः।) सुखेन तिष्ठति यः। अरोगी। यथा, श्रीभागवते। १०। ३। २७।

"मर्त्यो मृत्युव्यालभीतः पलायन्
सर्व्वान् लोकान् निर्भयं नाध्यगच्छत्।
त्वत्पादाब्जं प्राप्य यदृच्छयाद्य
स्वस्थः शेते मृत्युरस्मादपैति॥"

सुस्थता, स्त्री, (सुस्थस्य भावः। तल्।) आरोग्यम्। इति शब्दचन्द्रिका॥

सुस्थिरः त्रि, (सुष्ठु स्थिरः।) स्थिरतरः। यथा, श्रीभागवते। ११। ६। ३१।

"नश्चैकस्मादगुरोर्ज्ञानं सुस्थिरं स्यात् सुपुष्कलम्।
ब्रह्मैतदद्वितीयं वै गीयते बहुधर्षिभिः॥"

सुस्नाः, पुं, (सुष्ठु स्नाव्यनेन रूक्षत्वात्। सु+स्ने+क्विप्।) शूकधान्यभेदः। खेसारी इति भाषा। अस्य गुणाः।

"सुस्ना दुर्व्वातलो रूक्षः कषायो विशदो गुरुः।"

इति राजनिर्घण्टः॥

सुस्नातः, पुं, (सुष्ठु+स्नातः।) यज्ञान्तस्नानकृत्। इति शब्दरत्नावली॥ सुन्दररूपप्रकृतस्नाने, त्रि। यथा,—

"अथाहःसु निदेशेषु सुस्नाताः कृतमङ्गलाः।
आशुश्राविप्रसक्तन्ते ब्राह्मणान् स्वस्तिवाच्य च॥"

इति शुद्धितत्त्वम्॥

सुस्मिता, स्त्री, (सुष्ठु स्मितं यस्याः।) स्त्रीभेदः। इति हेमचन्द्रः॥ सुन्दरेषद्धास्ययुक्ते, त्रि॥

सुहृत्, [द्] पुं, बौद्धभेदः। यथा,—

"महागिरिसुहृत्स्याद्या बभ्रान्ता दशपूर्विणः।"

इति हेमचन्द्रः। ३४॥

सुहितः, त्रि, (सु+धा+क्तः।) विहितः। कृतः। इति विश्वः॥ (यथा, ऋक्संहितायाम्। ५१। २६।

"अतिवहु तदा सुक्तुम्नं संस्थितः सुहितो वदेत्॥")

सुहिता, स्त्री, (सु+धा+क्तः। टाप्।) अग्निजिह्वाविशेषः। इति घटाधरः॥

सुहृत् } पुं. (सु शोभनं हृत् हृदयं यस्य।)
सुहृद् } मित्रम्। सखा। इत्यमरः। २।८।२॥ (यथा, हितोपदेशे।

"सुहृदां हितकामानां यः शृणोति न भाषितम्।
विपत्तस्तिहिना तस्य स नरः शत्रुनन्दनः॥")

एकस्माद्यत्तच्चतुर्णामन्यतमम्। यथा,—

"मातरं पितरञ्चैव सुहृदमथ चतुर्थकम्।"

इति ज्योतिस्तत्त्वम्॥

"शृणुतः सुहृदृगृहगतः करोति चातुर्य्यहास्यधनवन्तं वक्तारमधिपः।" इत्यादि कौक्षीप्रदोषः॥ (महादेवः। इति महाभारतम्। १३।१७।६६।)

सुहृदयः, त्रि, (सुष्ठु हृदयमन्तःकरणं यस्य।) प्रसन्नमनाः। तत्पर्य्यायः। हृदयालुः २। इत्यमरः। ३। १। ३॥ सहृदयः ३। इति शब्दरत्नावली॥

सुहोत्रः, पुं, चन्द्रवंशीयबृहद्दिवुराजपुत्रः। यथा,

"बृहद्दिवोऽथ दायादः सुहोत्रो नाम धार्म्मिकः।
सुहोत्रस्यापि दायादो हस्ती नाम बभूव ह॥"

इति महाभारते हरिवंशे पितृकल्पे २० अः॥ (सहदेवपुत्रः। यथा, महाभारते। १।९०।८०।

"सहदेवोऽपि माद्रीमेव स्वयंवरे विजयां नामोपयेमे मद्रराजस्य द्युमित्रो दुहितरं तस्याः पुत्रमजनयत् सुहोत्रं नाम॥"* ॥ भरतवंशीयस्य भुमन्योः पुत्रविशेषः। यथा, तत्रैव। १। ९४। २४।

"सुहोत्रश्च सुहोता च सुहविः सुयजुस्तथा।
पुष्करिण्यान्तथा चैकश्च भुमन्योरभवन् सुताः॥")

सूः, स्त्री, सूतिः। क्विप्। सूधातोः क्विप्प्रत्ययेन निष्पन्नमिति केचित्॥

सूकः, पुं, वायुः। वातः। उत्पलम्। इति मेदिनी॥

सूकरः, पुं, (सू इत्यव्यक्तशब्दं करोतीति शौलमस्य। कृ+टः।) वराहः। इत्यमरः। २। ५। २॥ (यथा, वैराग्यशतके। १६।

"कामिजनपरमभौग्ये कामसुखे धारयन्ति बौभत्सम्।
सन्तः श्रमसुखरसिका सुधाशनाः सूकरान्न इव॥"* ॥

सुष्ठु कर्त्तुं शीलमस्य। सु+कृ+टः। पचे उपसर्गस्य दीर्घत्वम्।) कुम्भकारः। इति शब्दरत्नावली॥ म्लेच्छभेदः। इति घटाधरः॥

सूकरी, स्त्री, (सूकर+जातौ ङीष्।) सूकरभार्य्या॥ (यथा, याज्ञवल्क्ये। ३। २५६।

"पतितोलोकं न सा याति ब्राह्मणी या सुरां पिबेत्।
इहैव सा शुनी गृध्री सूकरी चोपजायते॥")

वराहक्रान्ता। इति शब्दमाला॥

सूक्तं, त्रि, (सुष्ठु उक्तम्।) शोभनोक्तिविशिष्टम्। वेदोक्तस्तोत्रमन्त्रादि। यथा। ऋग्वेदस्य अग्निमीळे इत्यादि अग्निसूक्तम्। १। १। १॥ * ॥ सहस्रशीर्षेत्यादि पुरुषसूक्तम्। १०।९०।१॥ * ॥ अहं रुद्रेभिरित्यादि देवीसूक्तम्। १०।१२५।१।*

सूक्ष्मत

हिरण्यवर्णामित्यादि श्रीसूक्तम्। ७। रात्री व्यख्यदायतीत्यादि रात्रिसूक्तम्। १०।१२७।१। ॐ। आतून इन्द्र शुमन्तमित्यादि गवीश्वसूक्तम्। ८। ७०।१ ॥७॥ इयमददादमसम् इत्यादि सरस्वतीसूक्तम्। ६। ६१।१ ॥७॥ यतो देवा अवन्तु न इत्यादि विष्णुसूक्तम्।१।२२।१६ ॥ ॐ ॥ मेदिनी देवीत्यादि भूसूक्तम्। ॥ ॐ ॥ आदित्यानामित्यादि आदित्यसूक्तम्। ७।५१।१ ॥७॥ त्वं सोम इत्यादि सोमसूक्तम्।९।८१।१॥ इत्यादि ऋग्वेदस्य सूक्तमष्टमम्। यथा। सहस्रमेकं सूक्तानामित्यादि चरणव्यूहः। यजुर्वेदस्य विश्वमेधमित्यादि कुमारसूक्तम्। सोमाय पितृमते इत्यादि पितृसूक्तम्। पवमान सुष्टुत इत्यादि पावमानीसूक्तम्। इत्यादि वेदप्रसिद्धम्॥ तथा,—

"अध्यानि सूक्तानि तथैव चैषा-
मनुक्रमेणापि यथास्वरूपम्।"

इति मत्स्यपुराणस्य ॥

अपि च।

"सन्दर्शनार्थमम्नाया नदीपुलिनसंस्थितः।
च च वैश्यस्तपस्तेपे देवीसूक्तं परं जपन्॥"

इति मार्कण्डेयपुराणे देवीमाहात्म्यम्॥

सूक्ता, स्त्री,(सुष्ठु उक्तं कथनं यस्याः।) शारिका। यथा, चिकित्सायाम्।

"सूक्ता मदनशलाका चिन्ताची शारिकाया-
श्चक्षुष्या च॥"

सूक्ष्म, क्ली, (सूच्यते इति। षूच पैशुन्ये+"सूचेः साङ्।" उणा० ४।१७६। इति साङ्।) कैतवम्। अध्यात्मम्। इति मेदिनी॥ (यथा, भागवते। १।८।१४।

"तस्यार्थसूक्ष्माभिनिविष्टदृष्टे-
रन्तर्गतोऽर्थो रजसा तनीयान्॥")

अलङ्कारविशेषः। यथा,—

"सूक्ष्मं परामृश्याभिप्रे सरसाकूतचर्चितम्।
मयि पश्यति सा कैतवैः सीमन्तमणिमादृणोत्॥"

इति चन्द्रालोकः॥

सूक्ष्मः, पुं, (सूच्+सान्।) कनकसूचः। इति शब्दरत्नावली॥ अणुः। अल्पे, त्रि। इति मेदिनी॥ (यथा, महाभारते। १। २१७। १५।

"न सन्ति सूक्ष्माण्यणूनि यस्मात्ते रूपसम्पदा।
नियुक्तायव या दृष्टिं सक्तिं निरीक्षसाम्॥")

तत्पर्य्यायः।

"अल्पे स्तोके क्षणसूक्ष्मं तुलकश्च लवं तनु।
दशं रजो रजकश्च स्त्रियां मात्रा त्रुटी कला।
पुमानङ्कर्षवो वेणुः कलोऽपि च निगद्यते॥"

इति शब्दरत्नावली॥

सूक्ष्मत्वक्फला, स्त्री, (सूक्ष्मं त्वक्च फलं यस्याः।) मध्यमलम्बुजः। इति रत्नमाला॥

सूक्ष्मतण्डुला, स्त्री, (सूक्ष्मं तण्डुलं बीजं यस्याः।) शणपुष्पः। इति राजनिर्घण्टः॥

सूक्ष्मतण्डुला, स्त्री, (सूक्ष्मं तण्डुलं बीजं यस्याः।) शिग्रुवृक्षः। इति राजनिर्घण्टः॥

सूक्ष्मदर्शी, [न्] त्रि, (सूक्ष्मं पश्यतीति। दृश+णिनिः।) अतिशयबुद्धिमान्। तत्पर्य्यायः। कुशाग्रीयमतिः २ तत्कालधीः ३ प्रत्युत्पन्नमतिः ४। इति हेमचन्द्रः॥ (यथा, महाभारते। १३। १४। २३।

"न विदुर्यस्य भवनमादित्याः सूक्ष्मदर्शिनः।
स कथं नरमात्रेण शक्यो ज्ञातुं सतां गतिः॥")

सूक्ष्मदारु, क्ली, (सूक्ष्मं दारु।) तनुकाष्ठम्। तत्पर्य्यायः। कलिङ्गः २। इति चिकित्साशास्त्रम्॥

सूक्ष्मपत्रः, पुं, (सूक्ष्माणि पत्राणि यस्य।) धान्यकम्। वनजीरकः। देवसर्षपः। क्षुद्रवदरः। सुरपर्णम्। वनवर्बरी। लोहितेक्षुः। कुक्कुटः। इति राजनिर्घण्टः। यथा,—

"वावलः सूर्यपुष्पश्च सूक्ष्मपत्रश्च कण्टलः॥"

इति शब्दचन्द्रिका॥

सूक्ष्मपत्रिका, स्त्री, (सूक्ष्माणि पत्राणि यस्याः। ततः कन्। टापि अतइत्वम्।) शतपुष्पा। शतावरी। क्षुद्रोक्षी। क्षुद्रोपोदकी। दुरालभा। आकाशमांसी। इति राजनिर्घण्टः॥

सूक्ष्मपर्णा, स्त्री, (सूक्ष्मं पर्णमस्याः।) जीर्णफल्गी। छोटी। इति राजनिर्घण्टः॥

सूक्ष्मपर्णी, स्त्री, (सूक्ष्मं पर्णमस्याः। ङीप्।) रामदूतीलताः। यथा,—

"रामदूती पर्णपुष्पी विशल्या नागदन्तिका।
काकजङ्घा सूक्ष्मपर्णी च भरण्याङ्गा फणिध्वजा॥"

इति शब्दचन्द्रिका॥

सूक्ष्मपिप्पली, स्त्री, (सूक्ष्मा पिप्पली।) वनपिप्पली। इति राजनिर्घण्टः॥

सूक्ष्मपुष्पी, स्त्री, यवतिक्ता। इति राजनिर्घण्टः॥

सूक्ष्मफलः, पुं, (सूक्ष्मं फलमस्य।) भूकदम्बदारः। इति राजनिर्घण्टः॥

सूक्ष्मफला, स्त्री, (सूक्ष्मं फलमस्याः।) भूम्यामलकी। इति रत्नमाला॥

सूक्ष्मबदरी, स्त्री, (सूक्ष्मा बदरी।) भूबदरी। इति राजनिर्घण्टः॥

सूक्ष्मबीजः, पुं, (सूक्ष्मं बीजं यस्य।) खसखसः। इति राजनिर्घण्टः॥

सूक्ष्मभूतं, क्ली, (सूक्ष्मं भूतम्।) अपञ्चीकृताकाशादिभूतम्। इति वेदान्तसारः॥

सूक्ष्ममक्षिका, पुं, (सूक्ष्मा मक्षिका तद्दाकृतिरस्यस्येति। अच्।) मशकः। इति राजनिर्घण्टः॥

सूक्ष्ममूला, स्त्री, (सूक्ष्मं मूलं यस्याः।) पयस्या। इति राजनिर्घण्टः॥

सूक्ष्मवल्ली, स्त्री, (सूक्ष्मा चासौ वल्ली।) ताम्रवल्ली। जतुका। इति राजनिर्घण्टः॥

सूक्ष्मवस्त्रं, क्ली, (सूक्ष्मं वस्त्रम्।) अल्पवस्त्रम्। मरु कामज इति भाषा। यथा। उपभोगोपयिक न सूक्ष्मवस्त्रपरिधानादिना। इति दायभागः॥

सूक्ष्मशरीराणि, क्ली, (सूक्ष्माणि शरीराणि।) ज्ञानेन्द्रियपञ्चकं कर्म्मेन्द्रियपञ्चकं वायुपञ्चकं बुद्धिमनसी चेति सप्तदशावयवानि। इति वेदान्तसारः॥

सूक्ष्मशर्करा, स्त्री, (सूक्ष्मा शर्करेव।) वालुका। इति राजनिर्घण्टः॥

सूक्ष्मशाखः, पुं, (सूक्ष्मा शाखा यस्य।) शालवर्बरः। इति राजनिर्घण्टः॥

सूक्ष्मशालिः, पुं, (सूक्ष्माः शालिः।) अगुणधान्यविशेषः। तत्पर्य्यायः। सूचिशालिः २ शावशालिः ३ सूचकः ४। अस्य गुणाः। सुमधुरत्वम्। लघुत्वम्। पित्तासृदाहनाशित्वम्। इति राजनिर्घण्टः॥

सूक्ष्मषट्चरणः, पुं, (सूक्ष्माणि षट्चरणानि यस्य।) मधुपकः। इति राजनिर्घण्टः॥

सूक्ष्मा, स्त्री, (सूक्ष्म+टाप्।) यूथिका। इति शब्दचन्द्रिका॥ क्षुद्रैला। कटभी। वालुका। इति राजनिर्घण्टः॥

सूक्ष्मैला, स्त्री, (सूक्ष्मा एला।) क्षुद्रैला। गुजराटी एलाचि इति भाषा। तत्पर्य्यायः। वयस्था २ तीक्ष्णगन्धा ३ त्रुटी ४ त्रुटिः ५। इति रत्नमाला॥

सूच, तृ क पैशुन्ये। इति कविकल्पद्रुमः॥ (भ्वादि-चुरा०-परः-सकः सेट्।) दीर्घौ। अयुसूचत् कथां लोकः कथितवान् इत्यर्थः। इति रमानाथः। पैशुन्यमन्तर्भाव इत्येके। इति दुर्गादासः॥

सूचः, पुं, (सीव्यति चरणौ इति। षिव+"सिवेर्डूचः।" उणा० ४।६३। इति चट्। टेरूत्वञ्च।) कुशाङ्कुरः। इति केचित्॥

सूचकः, त्रि, (सूचयतीति। सूच पैशुन्ये+ण्वुल्।) पिशुनः। इत्यमरः। ३।१।४०॥ (यथा, मनुः। ४।७१।

"लोमहर्षी च चाक्षेपी नखखादी च यो नरः।
स विज्ञाप्यो ब्रह्मचर्य्यात् सूचकोऽशुचिरेव च॥")

अस्य विवरणं कर्णेजपशब्दे द्रष्टव्यम्॥ (सूचनकर्त्ता। यथा महाभारते। १। १५६। २७।

"द्वारदेशात् समुद्भूतो माहात्म्यबलसूचकः।
वचनैर्विश्वसद्भिः शुभ्रुये शुभनिस्वनः॥")

सूचकः, पुं, (सीव्यत्यनेनेति। षिव+"सिवेर्डूचः।" उणा० ४।६३। इति चट्। टेरूत्वञ्च। ततः स्वार्थे कन्।) सीवनद्रव्यम्। (सूचयतीति। सूच+ण्वुल्।) बोधकः। कुक्कुरः। बिडालः। काकः। इति मेदिनी। के, १८८। पिशुनः। वृक्षः। शिवः। पिशाचः। इति शब्दरत्नावली॥ सूचधारः। कथकः। इति हेमचन्द्रः॥ सूचग्राहिः। इति राजनिर्घण्टः॥

सूचनं, क्ली, (सूच+ल्युट्।) ज्ञापनम्। इत्यमरः। ३। ३। ११४॥ ज्ञापनम्। इति चिकित्साशास्त्रम्॥ (यथा, कथासरित्सागरे। १५। १८८।

"अङ्गिसूचनविधौ विशारदो
नारदो मुनिरदर्शनं यथौ॥")

सूचना, स्त्री, (सूच+णिच्+ल्युट्। टाप्।) ज्ञापनम्। दृष्टिः। ज्ञानम्। अभिप्रायः। इति

विश्वमेदिन्यौ ॥ (ज्ञापनम्। यथा, साहित्यदर्पणे। ६। ३१२।
"यत्र स्यादङ्ग एकस्मिन्नङ्गानां सूचनाखिला।
तदङ्गसुखमित्याहुर्वीजार्थव्यापकञ्च तत् ॥")

सूचि:, स्त्री, (सूचयतेऽनयेति। सूच+क्विच्+"अच इः।" उणा० ४। १३८। इति इः।) व्यधनी। इत्यमरः। ३।५।७॥ (यथा, कथासरित्सागरे। १०४। ७५।
"चन्द्रोऽभिषिषेणमाहारो गीतानि स्तुतिसूचयः।
उद्यानं वस्त्रनं पौष्पी माला दिग्धा शरावली ॥"
"विशथ भरतोऽतीव व्रणे तुद्येव सूचिना।"
इति रामायणे। २। ७५। १७। इत्यत्र तु महाकविप्रयोगवशात् साधुत्वम्॥) वृत्यप्रभेदः। शिखा। यथा,—
"सूचिर्नत्यप्रभेदे च व्यधनीशिखयोरपि।"
इति रत्नकोषः॥
(यथा, कुमारे। ५। ४३।
"अलभ्यशोकाभिभवेयमाकृति-
र्विमानना सम्भृत कृतः मितुर्गृहे।
पराभिमर्शो न तवाङ्गि कः करं
प्रसारयेत् पन्नगरत्नसूचये ॥"* ॥
केतकीपुष्पम्। इति सूचिपुष्पशब्ददर्शनात्॥ यथा, ऋतुसंहारे। २। २३।
"सुहित इव कदम्बैर्जातपुष्पैः समन्तात्
पवनचलितशाखैः शाखिभिर्भूषितेव।
पुलकितमिव विभ्रत्सूचिभिः केतकीनां
नवसलिलनिषेकात् शान्ततापो वनान्तः ॥"
व्यूहविशेषः। यथा, मनुः। ७। १६१।
"संहतान् योधयेद्व्यूहान् कामं विस्तारयेदहून्।
सूच्या वज्रेण चैवैतान् व्यूहेन व्यूह्य योधयेत् ॥")

सूचिकः, पुं, सूच्या जीवति यः। दरजी इति भाषा। तत्पर्य्यायः। सौचिकः २ सौचिः ३ तुन्नवायः ४ सूचभित् ५। इति शब्दरत्नावली॥ (यथा, बृहत्संहितायाम्। १०। ६।
"दर्शे नापितचार्त्विकचौरभिषक्सूचिकद्विषन्नाहाः।")

सूचिका, स्त्री, (सूचिरेव स्वार्थे कन्।) सूचिः। इति केचित्॥

सूचिकाधरः, पुं, (सूचिकायाः मुखस्य धरः।) पक्षी। इति शब्दमाला॥

सूचिकाभरणः, पुं, औषधविशेषः। यथा,—
"विषं पलमितं क्षतः प्राणकक्षूर्णवेद्वयम्।
तच्चूर्णं संपुटे क्षिप्त्वा काचलिप्तशरावयोः॥
सन्धां कृत्वाथ संशोष्य ततश्चुल्यां निवेशयेत्।
वह्निं मृदुं मृदुं कुर्य्यात् प्रहरद्वयसङ्ख्यया॥
ततः उद्धृत्य तत्सन्धामुपरिस्थशरावकात्।
संलग्नो यो भवेद्धूमस्तं गृहीयाच्छनैः शनैः॥
वायुसञ्चारो यथा न स्यात्ततः कूप्यां निवेशयेत्।
यावत् क्षुधा सुखे लग्नं कूप्या जायति भेषजम्॥
तावन्मात्रो रसो देयो मूर्च्छिते सन्निपातिनि॥
चुरेण प्रथमे मूर्द्धि तच्चाङ्गुल्या च घर्षयेत्॥
रक्तभेषजसम्पर्कात् मूर्च्छितोऽपि हि जीवति।
तथैव सर्पदष्टोऽपि मृतावस्थोऽपि जीवति।
यदा तापो भवेत्तस्य मधुरं तत्र दीयते॥"
इति सूचिकाभरणो रसः॥
इति भैषज्यरत्नावली॥* ॥ अपि च।
"विषं पलं रसं ग्राह्यं तच्चूर्णं काचचूर्णिते।
मृत्संपुटे च संरुध्य चुल्यां संस्थाप्य पाचयेत्॥
भृनेर्य्यामदयं पक्त्वा तं समुद्धास्य शीतलम्।
ऊर्द्धपात्रगतं धूमं गृहीत्वा सूक्ष्मारुतम्॥
यावत् क्षुधा सुखे लग्नं कूप्या जायति भेषजम्।
चुरेण प्रथमे मूर्धि तच्चाङ्गुल्या च घर्षयेत्॥
चिरोषे मूर्च्छितो जीवो रक्तभेषजसङ्गमात्।
सर्पदष्टो मृतावस्थः सोऽपि जीवति तत्क्षणात्॥
दद्याच्च मधुरं तोयं सूचिकाभरणे रसे।"
इति सूचिकाभरणरसः सन्निपाते॥
इति रसप्रदीपः॥* ॥ (अपि च।
"रसगन्धकनागञ्च विषं स्थावरजङ्गमम्।
मातुलुङ्गवाराहमायूरच्छागपित्तैर्विभावयेत्॥
सूचिकाभरणो नाम भैरवेण प्रकीर्त्तितः।
सूचिकाग्रेण दातव्यः सन्निपातनिवर्हणः॥"
इति सूचिकाभरणो रसः॥
इति वैद्यकरसेन्द्रसारसंग्रहे ज्वराधिकारे॥)

सूचिकामुखं, क्ली, (सूचिकेव क्रमसूक्ष्मं मुखं यस्य।) गृध्रः। इति हारावली। ११०॥ सूच्यास्ये, त्रि॥

सूचितः, त्रि, (सूच+क्तः।) कथितः। बोधितः। (यथा, साहित्यदर्पणे। ६। ३११।
"अङ्गान्ते सूचितः प्राज्ञैस्तदङ्गस्याविभागतः।
यथाङ्कोऽवतरत्येषोऽङ्कावतार इति स्मृतः॥")

सूचिपत्रकः, पुं, (सूचिवत् सूक्ष्माणि पत्राणि यस्य। कप्।) सितावरशाकः। इति राजनिर्घण्टः॥

सूचिपुष्पः, पुं, (सूच्याकारं पुष्पमस्य। सूचिरिति नाम्ना ख्यातं पुष्पमस्येति वा।) केतकवृक्षः। इति शब्दार्णवः॥

सूचिरोमा, [न्] पुं, (सूचिवत् रोमाणि यस्य।) वराहः। इति हारावली॥

सूचिवदनः, पुं, (सूचिवत् सूक्ष्मं वदनं यस्य।) नकुलः। मशकः। इति राजनिर्घण्टः॥

सूचिवान्, [त्] पुं, (सूचिस्तदाकारचञ्चुरस्यस्येति। मतुप्। मस्य वः।) गरुडः। इति शब्दरत्नावली॥

सूचिश्यालिः, पुं, (सूचिवत् सूक्ष्माः श्यालिः।) इति राजनिर्घण्टः॥

सूची, स्त्री, (सीव्यतेऽनया। सिव+"सिवेर्डिच्च।" उणा० ४। ६३। इति चट्। टेरूत्वम्। टित्वात् ङीप्। गौरादित्वात् ङीष् इति केचित्। सूच+इः। छादिकारादिति ङीष् वा।) सीवनद्रव्यम्। सूँच इति भाषा॥ (यथा, महाभारते। ५। ५८। १८।
"यावद्धि सूच्याकीर्च्यायां विध्येदग्रेण मारिष।
तावदप्यपरित्याज्यं भूमेर्नः पाण्डवान् प्रति॥"
वैद्यकोक्तकार्य्यमस्या यथा,—
"दृषण्यागतिमन्विष्य चारसूत्रानुसारिणीम्।
सूचीं विदध्यादगत्यन्ते चोन्मथ्याशुच निर्हरेत्॥
सूत्रस्यान्तं समानीय गाढबन्धनमाचरेत्।
ततः चारबलं बीक्ष्य सूत्रमन्यत् प्रवेशयेत्॥
चाराक्तं मतिमान्वैद्यो यावन्न क्लिश्यते गतिः।
भगन्दरेऽप्यथ विधिः कार्य्यो वैद्येन जानता॥
अर्व्बुदादिषु चोत्क्षिप्य मूले सूत्रं निधापयेत्।
सूचीभिर्विधिवक्त्राभिराचितं वासमन्ततः।
मूले सूत्रेण वध्नीयाच्छिन्ने चोपचरेद्व्रणम्॥"
इति वैद्यकचक्रपाणिसंग्रहे नाड़ीव्रणाधिकारे॥)
आङ्गिकाभिनयविशेषः। अङ्गद्वारा चेष्टा। इति मेदिनी॥ करणम्। इति हेमचन्द्रः॥ दृष्टिः। इति केचित्॥ (केतकीपुष्पम्। इति सूचिशब्ददर्शनात्॥ व्यूहविशेषः। यथा, मनुः। ७। १८७।
"वराहमकराभ्यां वा सूच्या वा गरुडेन वा॥")

सूची, [न्] त्रि, (सूचयतीति। सूच+णिनिः।) सूचकः। (पिशुनः। यथा, महाभारते। ५। ३५। ४६।
"प्रत्यक्षकारी च सूची च मित्रध्रुक् पारदारिकः॥")

सूचीदलः, पुं. (सूचीवत् दलानि यस्य।) सितावरः। इति राजनिर्घण्टः॥

सूचीपत्रा, स्त्री, (सूचीवत् पत्राणि यस्याः।) गण्डदूर्व्वा। इति राजनिर्घण्टः॥

सूचीपुष्पः, पुं, (सूचीवत् सूक्ष्मं पुष्पमस्य। सूचीति नाम्ना प्रसिद्धं पुष्पमस्येति वा।) केतकी। इति रत्नमाला॥

सूचीमुखं, क्ली, (सूचीवत् सूक्ष्मं मुखं यस्य।) हीरकम्। इति हेमचन्द्रः॥ (यथा, साहित्यदर्पणे। ८। ६१२।
"सूचीमुखेन सकृदेव कृतव्रणस्रक्
मुक्ताकलापलुठसि स्तनयोः प्रियायाः।
वाणैः स्मरस्य शतशो विनिकृत्तमर्म्मा
स्वप्नेऽपि तां कथमहो न विलोकयामि॥"*॥)
नरकविशेषः। यथा, भागवते। ५। २६। ७।
"पर्य्यावर्त्तनः सूचीमुखमित्यष्टाविंशतिर्नरका विविधयातनाभूमयः॥"* ॥ सूच्या मुखम्। यथा, कादम्बरी। "तमसि सूचीमुखाग्रसंभेद्ये इति॥")
सूच्यास्ये, त्रि। (यथा, महाभारते। ६। १०५।
"सूचीमुखमनीकं स्यादज्ञानां बहुभिः सह॥"
तथा, मार्कण्डेये। १४। ५५।
"इत्युक्ते पूयनिर्य्यासभुजः सूचीमुखास्तु ते॥")

सूचीमुखः, पुं, (सूचीवत् सूक्ष्मं मुखं यस्य।) सितकुशः। इति राजनिर्घण्टः॥

सूचीरोमा, [न्] पुं, (सूचीवत् रोमाणि यस्य।) शूकरः। इति त्रिकाण्डशेषः॥ सूचीतुल्यलोमविशिष्टे, त्रि॥

सूच्यग्रशूलकः, पुं, (सूच्या अग्रमिव शूलः। ततः कन्।) तृणविशेषः। चलु इति भाषा। यथा,—
"सूच्यग्रशूलको दर्भो तृणाख्यश्च खरच्छदः॥"
इति रत्नमाला॥

सूतः

सूच्यास्यः, पुं. (सूचीवत् आस्यं मुखं यस्य।) मशकः। इति हेमचन्द्रः॥ सूचीमुखे, त्रि॥

सूच्याक्षः, पुं, (सूच्या आक्षा आक्षा यस्य।) मित्रावरुः। इति राजनिर्घण्टः॥

सूतः, पुं (सू प्रेरणे ऐश्वर्ये प्रसवे च+क्तः।) सारथिः। (यथा, रघुः। ३। ६२।

"स पूर्वतः पर्वतपक्षशातनं
ददर्श देवं नरदेवसम्भवः।
पुनः पुनः सूतनिषिद्धचापलं
हरन्तमश्वं रथरश्मिसंयतम्॥",

तत्रैव। इत्यमरः। ३। ३। ६१॥ क्षत्रियात् ब्राह्मणीसुतः। (यथा, मनुः। १०। ११।

"क्षत्रियात् विप्रकन्यायां सूतो भवति जातितः॥"

अश्वसारथ्यमेवैतेषां जीविका। यथा, तत्रैव। १०। ४७।

"सूतानामश्वसारथ्यमम्बष्ठानां चिकित्सितम्॥")

वन्दी। (यथा, रघुः। ५। ६५।

"सूनात्मजाः सवयसः प्रथितप्रबोधं
प्रातर्बुधवदनसि वाग्भिरुदारवाचः॥")

पारदः। इति मेदिनी॥ (यथा, वैद्यकरसेन्द्रसारसंग्रहे जारणमारणाधिकारे।

"हतो हन्ति जराव्याधिं मृच्छितो व्याधिघातकः।
बद्धः खेचरतां धत्ते कोऽन्यः सूतात् कृपाकरः॥")

सूर्यः। इत्यनेकार्थकोषः॥ पुराणवक्ता। यथा,

"सम्प्राप्ते सूतमासीनं नैमिषीया महर्षयः।
पुराणसंहितां पुण्यां पप्रच्छुर्लोमहर्षणम्॥
त्वया सूत महाबुद्धे भगवान् ब्रह्मवित्तमः।
इतिहासपुराणार्थं व्यासः सम्यगुपासितः॥
अस्य ते सर्व्वरोमाणि वचसा कृषितानि यत्।
द्वैपायनस्य भगवांस्ततो वै रोमहर्षणः॥
भवन्तमेव भगवान् व्याजहार स्वयं प्रभुः।
मुनीनां संहितां वक्तुं व्यासः पौराणिकीं पुरा॥
त्वं हि स्वायम्भुवे यज्ञे सत्रादौ वितते सति।
संभूतः संहितां वक्तुं खांशेन पुरुषोत्तम॥"

इति कौर्म्मे। २। ३—६॥ ॥

अपि च।

"नियोगाद्ब्रह्मणः साक्षं देवेन्द्रेण महौजसः।
वेणपुत्रस्य वितते पुरा वैतामहे मखे॥
सूतः पौराणिको जज्ञे मायारूपः स्वयं हरिः।
प्रवक्ता सर्व्वशास्त्राणां धर्म्मज्ञो गुणवत्तमः॥
तं मे विप्र मुनिश्रेष्ठाः पूर्व्वाभूतं सनातनम्।
एतस्मिन्नन्तरे व्यासः कृष्णद्वैपायनः स्वयम्॥
आवयामास याः प्रीत्या पुराणपुरुषो हरिः।
मदन्वये च ये सूताः संभूता वेदवर्जिताः।
तेषां पुराणवक्तृत्वं वृत्तिरासीद्गुणान्वया॥"

इति कौर्म्मे १२ अध्यायः॥ ॥

किञ्च।

"ब्रह्मणः पौष्करे यज्ञे सत्राहे विततेसति।
पृथदाख्यात् समुत्पन्नः सूतः पौराणिको द्विजः॥
वक्ता वेदादिशास्त्राणां चिकालामलतत्त्ववित्।
तीर्थयात्राप्रसङ्गेन नैमिषारण्यमागमत्॥"

इति वह्निपुराणे १ अध्यायः॥ ॥

सूतकं

अन्यच्च।

"हस्ते तु दक्षिणे चक्रं दृष्ट्वा तस्य पितामहः।
विष्णोरंशं पृथुं मत्वा परितोषं परं ययौ॥११॥
तस्य वै जातमात्रस्य यज्ञे वैतामहे शुभे।
सूतः सूत्यां समुत्पन्नः सौत्येऽहनि महामते॥५०॥
तस्मिन्नेव महायज्ञे जज्ञे प्राज्ञोऽथ मागधः।
प्रोक्तौ तदा मुनिवरैस्तावुभौ सूतमागधौ॥५१॥
स्तूयतामेष नृपतिः पृथुर्वैण्यः प्रतापवान्॥"५२॥

इति विष्णुपुराणे। १। १३ अध्यायः॥ ॥

यून एव पृथोर्जातत्वात् जातमात्रस्य यज्ञ इत्युच्यते। पृथुरेवाभवत् यज्ञात्तनुः पृथुरजायत इति मात्स्योक्तेः। वैतामहे पितामहदत्ते पृथोरेव यज्ञे न तु पितामहकर्त्तृके। यथाह वायुः। वैण्यस्य हि पृथोर्यज्ञे वर्त्तमाने महात्मनः। सूतः सूत्यां समुत्पन्न इति। सूत्यामिति सूतिरभिभूतिः अभिभूयते कण्ड्यते सोमोऽस्यामिति सूतिः सोमाभिषवभूमिस्तस्याम्। सौत्येऽहनि तस्मिन्नेव दिने। इति तट्टीका॥ ॥

किञ्च।

"एतस्मिन्नेव काले तु यज्ञे वैतामहे शुभे।
सूतः सूत्यां समुत्पन्नः सौत्येऽहनि पुराणवित्॥
तेषां यज्ञे पुनस्त्वेवमुत्पन्नौ सूतमागधौ।
पृथोः स्तवार्थं तौ तत्र समाहूतौ महर्षिभिः॥
ते ऊचुर्ऋषयः सर्व्वे स्तूयतामेष पार्थिवः।
तैर्नियुक्तौ सुकर्म्माणि पृथोर्वांनि महात्मनः॥
तुष्टुवुस्तानि सर्व्वाणि आशीर्व्वादांस्ततः परान्।
तयोः स्तवान्ते सुप्रीतः पृथुः प्रादात् जनेश्वरः॥
अनूपदेशं सूताय मागधान् मागधाय च।
तं दृष्ट्वा परमप्रीताः प्रजाः प्राहुर्महर्षयः॥
वृत्तीनामेष वो दाता भविष्यति नरेश्वरः॥"

इति वह्निपुराणे पृथोरुपाख्याननामाध्यायः॥

सूतः, पुं, क्ली, (सू+क्तः।) पारदः। इत्यमरः॥ (यथा,—

"रसोनस्करसे; सूतो नागवल्लीदलोत्थिते;।
चिञ्चलायास्तथा क्वाथे रसो मर्द्यः प्रयत्नतः॥
ततस्तेभ्यः पृथक्कृत्वा सूतं प्रक्षाल्य काञ्जिकैः।
सर्व्वदोषविनिर्मुक्तं योजयेद्रसकर्म्मसु॥"

इति वैद्यकरसेन्द्रसारसंग्रहे जारणमारणाधिकारे।)

सूतः, त्रि, (सू+क्तः।) प्रसूतः। प्रेरितः। इति मेदिनी॥

सूतकं, क्ली, (सू+भावे क्तः। ततः स्वार्थे कन्।) जन्म। इति मेदिनी॥ (सूतकं जन्म कारणमस्येति। अच्।) जननाशौचम्। यथा, मनुः।

"स्पृष्ट्वा सूतकं मनुष्यान्नेतरत् सूतकेन तु।"इति।

वृद्धमनुरपि।

"ग्रामस्योपरि ग्रामे तु सूतकोपरि सूतके।
प्रेषाहोभिर्विशुद्धिः स्यादुदक्यां सूतिकां विना॥"

मरणाशौचम्। यथा,—

"सर्व्वं गोत्रमसंसृष्टं तत्र स्यात् सूतके सति।
मध्येऽपि सूतके दद्यात् पिण्डान् प्रेतस्य दशये॥"

इति शुद्धितत्त्वम्॥

सूतिका

प्रतिबन्धकम्। यथा,—

"व्रतयज्ञविवाहेषु श्राद्धे होमेऽर्चने जपे।
आरब्धे सूतकं न स्यादनारब्धे तु सूतकम्॥"

इति तिथ्यादितत्त्वम्॥

(उपरागः। ग्रहणम्। यथा, मनुः।४। ११०।

"प्रतिगृह्य द्विजो विद्वानेकोद्दिष्टस्य केतनम्।
त्रीन्नक्तं न वसेत्तत्र राज्ञो राहोश्च सूतके॥"

"राज्ञा चन्द्रमसस्तस्य सूतकं राहुं प्रत्यसनमवर्गं चशब्दात् सूर्य्यस्य च। अथवा जनपदेश्वरस्य राज्ञः सूतकं पुत्रजन्मोत्सवः। राहोः सूतकं चन्द्रसूर्य्ययोरुपरागः ग्रहणमिति प्रसिद्धम्॥" इति तत्र मेधातिथिः॥)

सूतकः, पुं, क्ली, (सूत एव। स्वार्थे कन्।) पारदः। इति मेदिनी॥ (पर्य्यायोऽस्य यथा,—

"रसेन्द्रः पारदः सूतः सूतराजश्च सूतकः।
शिवबीजो रसः सप्त नामान्येवं रसस्य तु॥"

इति वैद्यकरसेन्द्रसारसंग्रहे जारणमारणाधिकारे॥)

सूतका, स्त्री, सूतिका। इति सूतकाग्रहशब्ददर्शनात्॥

सूतकागृहं, क्ली, (सूतकायाः गृहम्।) सूतिकागृहम्। इत्यमरटीकायां भरतः। २। २। ८॥

सूतनयः, पुं, (सूतस्य अधिरथस्य सूर्य्यस्य वा तनयः।) कर्णः। इति हेमचन्द्रः॥ (सौतिः। इति महाभारतम्॥)

सूतपुत्रः, पुं, (सूतस्य अधिरथस्य सूर्य्यस्य वा पुत्रः।) कर्णः। इति शब्दरत्नावली॥ (यथा, महाभारते। १। १३५। २१।

"स्पर्द्धमानस्तु पार्थेन सूतपुत्रोऽत्यमर्षणः।
दुर्य्योधनं समाश्रित्य सोऽवमन्यत पाण्डवान्॥"

सौतिः। यथा, तत्रैव। १। ५। ११।

"सूतपुत्र! यथा तस्य भार्गवस्य महात्मनः।
अवनतं परिख्यातं तन्ममाचक्ष्व पृच्छतः॥")

सूतपुत्रकः, पुं, (सूतपुत्र एव। स्वार्थे कन्।) कर्णः। इति त्रिकाण्डशेषः॥ (सौतिः। इति महाभारतम्॥)

सूतराट्, [ज्] पुं, (सूतः सन् राजते इति। राज्+क्विप्।) पारदः। इति राजनिर्घण्टः॥

सूतिः, स्त्री, (सू+क्तिन्।) सोमाभिषवभूमिः। यथा। "अभिषूयते कण्ड्यते सोमोऽस्यामिति सूतिः सोमाभिषवभूमिः।" इति सूतशब्दे विष्णुपुराणटीका॥ जननम्। (यथा, भागवते। १। १६। १।

"यथा हि सूत्यामभिजातकोविदाः
समादिशन् विप्र महद्गुणस्तथा॥")

सन्तानः। सौवनम्। इति केचित्॥

सूतिका, स्त्री, (सू+क्तः। टाप्। ततः स्वार्थे कन्। यद्वा, सूतं प्रसवोऽस्यस्यामिति। ठन्।) नवप्रसूता। यथा,—

"ग्रामस्योपरि ग्रामे तु सूतकोपरि सूतके।
प्रेषाहोभिर्विशुद्धिः स्यादुदक्यां सूतिकां विना॥"

इति शुद्धितत्त्वम्॥ ॥

तदन्नभोजनप्रायश्चित्तं यथा । ग्रहः ।
चाण्डालान्नं भूमिपान्नमजलीविश्वजीविनाम् ।
शौण्डिकान्नं सूतिकान्नं सुक्ता मासं व्रती भवेत् ॥"
इति प्रायश्चित्ततत्त्वम् ॥ * ॥
तदवलोकनतदालपनतत्संस्पर्शनिषेधो यथा,—
"नालपेत् जनविद्विष्टान् वीरहीनां तथा स्त्रियम् ।
देवता-पितृसत्कार्य्यसत्रादिनिन्दकैः ॥
ज्ञात्वा तु स्पर्शनालापं शुध्येतार्कावलोकनात् ।
अवलोक्य तथोदक्यामन्त्यजं पतितं शवम् ॥
विप्रधर्म्मिसूतिकायण्डविक्षत्रान्तावसायिनः ।
हतनिर्यातकांश्चैव परदाररतांश्च ये ।
एतदेव हि कर्त्तव्यं प्राज्ञैः शोधनमात्मनः ॥"
पारिभाषिकसूतिकालक्षणं यथा,—
"अभोज्यसूतिकाषण्ढमार्जारास्त्रांश्च कुक्कुटान् ।
पतितापविद्धचाण्डालान्तेवासांश्च धर्म्मवित् ॥
संस्पृश्य शुध्यते स्नानात् उदग्यामसूकरौ ।
तद्वच्च सूतिकाशौचदूषितौ पुरुषावपि ॥
अलर्क उवाच ।
भवता कीर्त्तिताभोज्या ये ते सूतिकादयः ।
अमीषां श्रोतुमिच्छामि तत्त्वतो लक्षणानि च ॥
दत्तात्रेयोवाच ।
ब्राह्मणी ब्राह्मणश्चैव यावप्येतत्प्रसूयतौ ।
तावुभौ सूतिकेत्युक्तौ तयोरन्नं विगर्हितम् ॥"
इति मार्कण्डेयपुराणे सदाचाराध्यायः ॥
वामनपुराणे १४ अध्याये च द्रष्टव्यम् ॥
सूतिकागारं, क्ली, (सूतिकाया आगारम् ।) प्रसवगृहम् । इति जटाधरः ॥ (यथा, हरिवंशे । १६३ । ४७ ।
"आहृत्य शम्बरेणं त्वमिहानीतोऽसि मानद ।
सप्तरात्रे त्वसम्पूर्णे सूतिकागारमध्यतः ॥")
सूतिकागृहं, क्ली, (सूतिकाया गृहम् ।) प्रसवालयः । तत्पर्य्यायः । अरिष्टम् २ । इत्यमरः । २ । २ । ८ ॥ सूतकागृहम् ३ । इति तट्टीका ॥ सूतीगृहम् ४ सूतिगृहम् ५ । इति जटाधरः ॥ तस्याकृतिर्यथा,—
"अष्टहस्तायतं चारु चतुर्हस्तविशालकम् ।
प्राग्द्वारसुदृग्द्वारं विदध्यात् सूतिकागृहम् ॥"
इति भावप्रकाशः ॥
तत्र पिशाचानां वासो यथा,—
"सर्व्वत्रगानप्रतिघान् सूतिकागृहसेविनः ।
दृष्ट्वा पाणिपादांश्च दृष्ट्वा ब्रह्मानुकम्पया ।
अन्तर्धानं वरं प्रादात् कामगायितमेव च ॥"
इति वह्निपुराणे प्रजापतिसर्गनामाध्यायः ॥
प्रसवात् पूर्व्वं ततुसंस्कारमाह वाभ्रव्यायनगृह्यम् ।
काकादन्या मेषकधातक्या दृष्ट्वा; कोयातक्याः कालशीतकस्य मूलानि पेषयित्वा उपवेषयेद्यं यस्मिन् प्रजायते रक्षनामगृह्ये इति । काकादनी काकजङ्घा । मेषकधातकी काकमोचिका । कोयातकी घोषकम् । कालशीतकः यष्टिमधुकेति ख्यातः । इतरत्र हरिवंशे ।
"एष मानुष्यको यज्ञो मानुषैरेव साध्यते ।
अयतां येन देवं हि मद्विधैः प्रतिहन्यते ॥
मन्त्रग्रामैः सुविहितैरौषधैश्चैव योजितैः ।
यत्नेन चानुकूलेन देवमप्यनुलोम्यते ॥"
इत्यनुचरान् प्रति कंसवाक्यम् । इति ज्योतिस्तत्त्वम् ॥
सूतिकागेहं, क्ली, (सूतिकाया गेहम् ।) प्रसवगृहम् । यथा,—
"जगाम सूतिकागेहं नारीरूपं विधाय भूः ।
जयशब्दः शङ्खशब्दो हरिशब्दो बभूव ह ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ३ अध्यायः ॥
सूतिकाभवनं, क्ली, (सूतिकाया भवनम् ।) प्रसवगृहम् । इति हलायुधः ॥
सूतिकावासः, पुं, (सूतिकाया आवासः ।) प्रसवगृहम् । यथा,—
"सूतिकावासनिलया जन्मदा नाम देवताः ।
तासां यागनिमित्तन्तु शुद्धिर्जन्मनि कीर्त्तिता ।
षष्ठेऽह्नि रात्रियागन्तु जन्मदानान्तु कारयेत् ॥"
इति शुद्धितत्त्वम् ॥
सूतिकारोगः, पुं, (सूतिकाया रोगः ।) नवप्रसूताया व्याधिभेदः । तन्निदानादि यथा,—
"मिथ्योपचारात् संक्षेपात् विषमाजीर्णभोजनात् ।
सूतिकायास्तु ये रोगा जायन्ते दारुणाश्च ते ॥"
मिथ्योपचारात् अशुचिताचरणात् । प्रवातादिसेवनात् । संक्षेपात् संक्षिप्यन्ते दोषा अनेन इति संक्षेपः दोषजनकमन्नं तस्मात् । दारुणाः कष्टसाध्याः । के ते व्याधय इत्याकाङ्क्षायामाह ।
"अङ्गमर्द्दो ज्वरः कासः पिपासा गुरुगात्रता ।
शोथः शूलातिसारौ च सूतिकारोगलक्षणम् ॥"
एतेऽङ्गमर्द्दादयः प्रायेण सूतिकाया भवन्तः सूतिकारोगत्वेन लक्ष्यन्ते ॥ * ॥ ज्वरादीनां रोगविशेषाणां निदानविशेषमाह ।
"ज्वरातीसारशोथाश्च शूलानाहवलक्षयाः ।
तन्द्रारुचिप्रसेकाद्या वातश्लेष्मसमुद्भवाः ॥
कृच्छ्रसाध्या हि ते रोगाः क्षीणमांसबलाश्रिताः ।
ते सर्व्वे सूतिका नाम्ना रोगास्ते चाशुपद्रवाः ॥"
सूतिकाभवत्वेन सूतिकानाम्ना ते रोगाः । आश्रयाश्रितयोरभेदोपचारात् । ते चाशुपद्रवा इति । त एव ज्वरादय उक्तानां रोगाणामन्यतमं प्रधानीकृत्योपद्रवाश्च ॥ * ॥
अथ सूतिकारोगचिकित्सा ।
"सूतिकारोगशान्त्यर्थं कुर्य्यात् वातहरीं क्रियाम् ।
दशमूलशृतं क्वाथं कोष्णं दद्यात् घृतान्वितम् ॥
व्यष्टतानागरमरुचरभद्रोत्कटपञ्चमूलकं जलदम् ।
पृतशृतं मधुयुक्तं शमयत्यचिरेण सूतिकातङ्कम् ॥
देवदारु वचा कुष्ठं पिप्पली विश्वभेषजम् ।
भूनिम्बकटफलं सुखं तिक्ताधान्यं हरीतकी ॥
गजकृष्णा षड्ग्रन्थां गोचुरं धन्वयासकः ।
दशत्यतिविषा च्छिन्ना कर्कटः कृष्णशीरकः ॥
समभागान्वितैरेतैः सिन्धुरामठसंयुतैः ।
क्वाथमष्टांशशेषन्तु प्रसूतां पाययेत् स्त्रियम् ॥
शूलकासज्वरश्वासमूर्च्छाकम्पशिरोऽर्त्तिभिः ।
युक्तं प्रलापपरिदाहतन्द्रातीसारवान्तिभिः ॥
निहन्ति सूतिकारोगं वातपित्तकफोद्भवम् ।
कषायो देवदार्व्वादिः सूतायाः परमौषधम् ॥"
इति देवदार्व्वादिक्वाथः ॥ * ॥
"जीरकः शूलजीरश्च घृतपुष्पाह्वयं तथा ।
यवानी चाजमोदा च धान्यकं मेथिकापि च ॥
शुण्ठी क्षारा कणामूलं चित्रकं हपुषापि च ।
बदरीफलचूर्णञ्च कुष्ठं कम्पिल्लकं तथा ॥
एतानि पलमात्राणि गुडं घृतपलं मतम् ।
क्षीरं प्रस्थद्वयं दद्यात् सर्पिषः कुडवन्तथा ॥
पञ्चक्षीरकपाकोऽयं प्रसूतानां प्रशान्तये ।
युज्यते सूतिकारोगे योनिरोगे ज्वरे क्षये ।
कासे श्वासे पाण्डुरोगे कार्श्ये वातामयेषु च ॥"
इति पञ्चक्षीरकपाकः ॥ * ॥
"आढ्यस्याञ्जलियुग्मञ्च पयसः प्रस्थद्वयं खण्डतः
पक्वाघृतपलञ्च चूर्णितमथ प्रक्षिप्यते नागरम् ।
प्रस्थार्द्धं गुडवद्विपाच्य विधिना तद्दिव्यं धान्यकात्
सिद्धाः पञ्चपलं पलं कृमिरिपोः साजाजिजीरादपि ।
योगाम्भोदलोरगेन्द्रसुमनस्तत् द्राविडीनां पलं
पक्वं नागरखण्डसंज्ञकमिदं सौभाग्यदं योषिताम् ।
कट्यासज्वरदाहशोषशमनं श्वासकासापहं
क्षीरेष्टाधिविनाशनं कृमिहरं मन्दाग्निसन्दीपनम् ॥"
दलं पत्रकम् । उरगेन्द्रसुमनः नागकेशरम् । द्राविडी सूक्ष्मैला । सौभाग्यशुण्ठीपाकः । इति भावप्रकाशः ॥
सूतिकाषष्ठी, स्त्री, (सूतिकाया षष्ठी । सूतिकागृहपूज्या षष्ठीति मध्यपदलोपी कर्म्मधारयो वा ।) सूतिकागारे जातबालकस्य षष्ठदिने पूज्यदेवीविशेषः । अथ सूतिकाषष्ठी-पूजा । विष्णुधर्म्मोत्तरे ।
"सूतिकावासनिलया जन्मदा नाम देवताः ।
तासां यागनिमित्तार्थं शुद्धिर्जन्मनि कीर्त्तिता ॥
षष्ठेऽह्नि रात्रियागन्तु जन्मदानाच्च कारयेत् ।
रक्षणीया सदा षष्ठी निशां तत्र विशेषतः ॥
राम ! जागरणं कार्य्यं जन्मदानां तथा बलिः ॥"
रामेति सम्बोधनम् ॥ * ॥ तत्राशौचान्तरदोषोऽपि नास्ति ।
"अशौचे तु समुत्पन्ने पुत्रजन्म यदा भवेत् ।
कर्त्तुस्तात्कालिकी शुद्धिः पूर्व्वाशौचाद्विशुध्यति ॥"
इति प्रजापतिवचनात् । पुत्रजन्मेति अवगात् पितुरेवाशौचाभावः न तु मातुः कर्त्तुरिति पुंलिङ्गनिर्द्देशाच्च । कारयेदिति अन्यगोत्रजाभिप्रायेण ॥ * ॥ तत्रादौ विनायकादिसहितषोढ़ामातृकापूजनम् । तथा च ज्ञानसङ्कलिनी ।

"छागजागरणं कार्यं खड्गो धार्य्यः समीपतः ।
आवाह्य पूजयेद्देवीं गणेशं मातरं गिरिम् ॥"
देवीं षष्ठीम् । गिरिं मन्थानदण्डम् ॥ * ॥ मातृनामान्याह । वक्ष्यमाणपरिशिष्टम् ।
"गौरी पद्मा शची मेधा सावित्री विजया जया ।
देवसेना स्वधा स्वाहा मातरो लोकमातरः ।
शान्तिः पुष्टिर्धृतिस्तुष्टिरात्मदेवतया सह ।
आदौ विनायकः पूज्यो अन्ते च कुलदेवता ॥"
तान्यभिधाय भविष्ये ।
"पूज्याश्चैवेऽथवा कार्य्या वरदाभयपाणयः ।"
मातरः इति सर्व्वासां विशेषणम् । अतएव गौर्य्यै मात्रे नमः । इत्यादि प्रयोगः । अतो मातरो लोकमातरो ज्ञेयाः अतएव तयोर्बहुत्वेन निर्देशः ॥ * ॥ गणेशपूजायां प्रार्थनामन्त्रो यथा,
"सर्व्वविघ्नहरो देव एकदन्तो गजाननः ।
षष्ठीगृहेऽद्यैति प्रीत्या शिशुं दीर्घायुषं कुरु ॥"
ततः ।
"आयुष्मन्देहि वरदे देवि महाषष्ठीति विश्रुता ।
भक्तिरूपेण मे पुत्रं रक्ष जागरवासरे ॥"
इति षष्ठ्या आवाहनम् । ततः षष्ठीं पूजयेत् ।
"गौर्य्याः पुत्रो यथा स्कन्दः सदा संरक्षितस्त्वया ।
तथा ममाप्ययं बालो रक्षनां षष्ठि ते नमः ॥"
इतिविः पूजयेदिति । भोजराजः ।
"गवोष्ठ्यैव गन्दा च पूतना मुखमण्डिका ।
विवानिका शकुनिका शुष्कगन्दा च जम्भिका ।
आचार्य्यका रेवती च पिलिपिञ्जा ततः परम् ।
स्कन्दा च द्वादशैतेऽर्चाः रक्षार्थं बालकाग्रहाः ॥"
कृत्याचन्तामणौ स्तुतिः ।
"जय देवि जगन्मातर्जगदानन्दकारिणि ।
प्रसीद मम कल्याणि नमोऽस्तु षष्ठि देवि ते ॥"
वरप्रार्थनम् ।
"रूपं देहि यशो देहि भाग्यं भगवति देहि मे ।
पुत्रान्देहि धनं देहि सर्व्वान् कामांश्च देहि मे ॥
धात्री त्वं कार्त्तिकेयस्य महाषष्ठीति विश्रुता ।
त्वत्प्रसादादविघ्नेन चिरं जीवतु बालकः ॥
देवतानाञ्चपौत्राय सर्व्वेषां हितकारिणि ।
ममार्पितं रक्ष पुत्रं महाषष्ठि नमोऽस्तु ते ॥
इत्यनेन बालं अञ्जनञ्च दत्त्वा समर्पयेत्" ॥
मन्थानदण्डं पूजयेत् ।
"मन्थानमन्दरोऽसि त्वं मथितः सागरस्त्वया ।
तथा ममापि पुत्रस्य मन्थ विघ्नं नमोऽस्तु ते ॥"
ततः षट्खटिकाः पूजयेत् । तास्व ।
"शिवा सम्पत्तिगात्री च कीर्त्तिः सन्नतिरेव च ।
अनसूया क्षमा चैव षड्ेता ऋत्तिकाः स्मृताः ॥"
मार्कण्डेयपुराणम् ।
"अग्न्यम्बुपशुभूमौ च निर्यूपे सूतिकागृहे ।
अशौचमृत्यमूयते भूतिसर्गपवर्जिते ।
अनुपविश्य या जातमपहृत्यात्मसम्भवम् ।
अनपत्यविनी वापि तत्रैवोनत्यजेत् दिन ॥
या जातहारिणी नाम सुधीरा पिशिताशना ।
तस्मात् मेरक्षणं कार्य्यं यत्नतः सूतिकागृहे ॥"
यूपो बद्धच्छागस्तम्भः । पशुः छागः । छागजागरणं कार्य्यमित्येकवाक्यत्वात् ॥ * ॥ पाद्मे ।
"प्रायस सर्पिषा मिश्रं द्विजेभ्यो यः प्रयच्छति ।
गृहं तस्य न रक्षांसि धर्षयन्ति कदाचन ॥"
इति ज्योतिस्तत्त्वम् ॥
अन्यत् षष्ठीशब्दे द्रष्टव्यम् ॥
सूतिगृहं, क्ली, (सूत्याः प्रसवस्य गृहम् ।) प्रसवगृहम् । इति शब्दरत्नावली ॥
सूतिमासः, पुं, (सूतेः प्रसवस्य मासः ।) प्रसवमासः । तत्पर्य्यायः । वैजननः २ । इत्यमरः । २ । ६ । ३६ ॥
"सूतिमासो वैजननो नवमो दशमोऽपि च ।"
इति जटाधरः ॥
सूतीगृहं, क्ली, (सूत्याः गृहम् ।) प्रसवागारः । इति शब्दरत्नावली ॥ (यथा, भागवते । १० । ८५ । २० ।
"सूतीगृहे ननु जगाद भवानजो नौ
संजज्ञ इत्यनुयुगं निजधर्म्मगुप्त्यै ॥")
सूत्कारः, पुं, (सूत् इति शब्दस्य कारः करणम् ।) अनुकरणशब्दविशेषः । सूत् इति शब्दं करोति । यथा, सीत्कारादिः ॥
सूत्यानः, त्रि, (सुष्ठु उत्थानं उद्योगो यस्य ।) चतुरः । इत्यमरः ॥ सुन्दरोत्थाने, क्ली ॥
सूत्यरं, क्ली, सुरासन्धानम् । इति शब्दचन्द्रिका ॥
सूत्या, स्त्री, (सू + क्यप् । निपातनात् साधुः ।) यज्ञस्नानम् । तत्पर्य्यायः । अभिषवः २ सवनम् ३ । इत्यमरः ॥ सोमलतारसपानम् । इति भरतः ॥
सूत्याशौचं, क्ली, (सूतिनिमित्तकमाशौचम् ।) जननाशौचम् । यथा,—
"दशाहाभ्यन्तरे बाले प्रमीते तस्य बान्धवैः ।
आवाशौचं न कर्त्तव्यं सूत्याशौचं विधीयते ॥"
इति शुद्धितत्त्वम् ॥
सूत्र, त् क ग्रन्थने । इति कविकल्पद्रुमः ॥ (अदन्त पुरा० पर० सक० सेट् ।) दीर्घो दन्त्यवर्गाद्यमध्यः । वेष्टने इत्यन्ये । सूत्रयति सूत्रापयति सूत्रेण हस्तं लोकः । इति दुर्गादासः ॥
सूत्रं, क्ली, (सूत्रयतेऽनेनेति । सूत्रत् क ग्रन्थने + णिच् + "अर्च्च ।" इत्यच् । यद्वा णिच् तनुसन्ताने + "सिवितुयोश्च ।" उणा० ४ । १६२ । इति ष्ट्रन् । टेरू च ।) वस्त्रारम्भकम् । सूता इति भाषा । तत्पर्य्यायः । तन्तुः २ । इत्यमरजटाधरौ ॥ सूत्रतन्तुः ३ । इति भरतधृतहारावली ॥ (यथा, रघुः । १ । ४ ।
"अथवा ज्ञानवाग्द्वारे वंशेऽस्मिन् पूर्व्वसूरिभिः ।
मणौ वज्रसमुत्कीर्णे सूत्रस्येवास्ति मे गतिः ॥"
यज्ञसूत्रम् । यथा, महानिर्व्वाणे । १ । ४८ ।
"ब्राह्मण्यचिह्नमेतावत् केवलं सूत्रधारणम् ॥")
व्याख्या । शास्त्रादिसूचनाग्रन्थः । इति मेदिनी ॥ सूत्रलक्षणं यथा,—
"स्वल्पाक्षरमसन्दिग्धं सारवद्विश्वतोमुखम् ।
अस्तोभमनवद्यञ्च सूत्रं सूत्रविदो विदुः ॥"
इति मुग्धबोधटीकायां दुर्गादासः ॥
(कारणम् । निमित्तम् । यथा, भागवते । ४ । ६ । ४३ ।
"त्वमेव धर्म्मार्थदृशाभिपत्तये
दक्षेण सूत्रेण ससर्ज्जिथाध्वरम् ॥")
सूत्रकण्ठः, पुं, (सूत्रं कण्ठे यस्य ।) विप्रः । खञ्जरीटः । कपोतः । इति मेदिनी ॥
सूत्रकोणः, पुं, (सूत्रवद्वः कोणो यस्य ।) डमरुः । इति हारावली ॥
सूत्रकोणकः, पुं, (सूत्रकोण एव । स्वार्थे कन् ।) डमरुः । इति त्रिकाण्डशेषः ॥
सूत्रगण्डिका, स्त्री, (सूत्रं गण्डयतीति । गण्ड + ण्वुल् ।) तन्त्रवायोपकरणविशेषः । तत्पर्य्यायः । एषणी २ । इति शब्दमाला ॥
सूत्रतन्तुः, पुं, (सूत्रमेव तन्तुः ।) सूत्रम् । इति हारावली ॥
सूत्रतर्कुटी, स्त्री, (सूत्रस्य तर्कुटी ।) तर्कुटी । इति जटाधरः । टेको इति भाषा ॥
सूत्रधरः, पुं, (धरतीति । धृ + अच् । सूत्रस्य धरः ।) सूत्रधारः । इति कैचित् ॥
सूत्रधारः, पुं, (सूत्रं धरति धारयति वा । धृ + णिच् वा + अण् ।) शचीपतिः । इन्द्रः । गान्धर्व्वान्तरसञ्चारी । स तु रङ्गभूमिं परिक्रम्य नाटकीयकथासूत्रसूचकः । (यथा, साहित्यदर्पणे । ६ । २८३ ।
"पूर्व्वरङ्गं विधायैव सूत्रधारो निवर्त्तते ।
प्रविश्य स्थापकस्तद्वत् काव्यमास्थापयेत्ततः ॥"
शिल्पिप्रभेदः । छुतार इति भाषा । इति मेदिनी ॥ स च शूद्रागर्भे विश्वकर्म्मण औरसेन जातः । इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे १० अध्यायः ॥
सूत्रपुष्पः, पुं, (सूत्रार्थं पुष्पमस्य ।) कार्पासः । इति त्रिकाण्डशेषः ॥
सूत्रवीणा, स्त्री, (सूत्रवद्वा वीणा ।) वीणाभेदः । तत्पर्य्यायः । खावुकी २ । इति हारावली ॥
सूत्रभित्, } पुं, (सूत्रं भिनत्तीति । भिद् + क्विप् ।)
सूत्रभिद्, } सौचिकः । इति शब्दरत्नावली ॥
सूत्रमध्यभूः, पुं, (सूत्रमध्यवत् भूरुत्पत्तिर्यस्य ।) यज्ञभूपः । इति शब्दचन्द्रिका ॥
सूत्रयन्त्रं, क्ली, (सूत्रस्य यन्त्रम् ।) सूत्रवेष्टनकाष्ठम् । तॉत इति भाषा । यथा,—
"आवापनं सूत्रयन्त्रं यत्सूत्रैरभिवेष्टते ॥"
इति शब्दमाला ॥
सूत्रला, स्त्री, (सूत्रं लातीति । ला + कः ।) तर्कुटी । इति हारावली ॥
सूत्रवेष्टनं, क्ली, (वेष्टतेऽनेनेति । वेष्ट + करणे ल्युट् । सूत्रस्य वेष्टनम् ।) तन्त्रवायोपकरणम् । तासनी इति भाषा । तत्पर्य्यायः । चरखः २ । इत्यमरः । ३ । २ । २८ ॥ तसरः ३ । इति भरतः ॥

सूना

सूनामा, [न्] पुं, (सुष्ठु नायते इति। सु+नै+"सर्व्वधातुभ्यो मनिन्।" उणा० ४।१४४। इति मनिन्। पचे उपसर्गस्य दीर्घत्वम्।) इन्द्रः। इत्यमरः। २।१।४५॥

सूनाली, स्त्री, (सूनस्य नाली श्रेणिर्यत्र।) गलसूत्रम्। तत्पर्य्यायः। गलमेखला २। इति शब्दरत्नावली॥

सूनी, [न्] पुं, (सूनं सूत्रमस्यास्तीति। सूत्र+इनिः।) काकः। इति त्रिकाण्डशेषः॥ सूत्रविशिष्टे, त्रि॥

सूदः, पुं, (सूदयति रसानिति। सूद क्षरणे+णिच्+अच्।) सूपकारः। (यथा, महाभारते। १।१३४।२१।

"तं दृष्ट्वा नित्यदृप्तक्षत्रियव्रतं प्रति फाल्गुनम्। आकृष्य वचनं द्रौणी रहः सूदमभाषत॥")

व्यञ्जनम्। इत्यमरः। २।९।८०॥ (यथा, महाभारते। १।१२८।३४।

"भक्ष्यं भोज्यञ्च पेयञ्च चोष्यं लेह्यमथापि वा। उपाहृतं नरेन्द्रस्य कुशलैः सूदकर्म्मभिः॥")

सूपः। इति त्रिकाण्डः॥ सारल्यम्। अपराधः। लौल्यः। पापम्। इत्यजयपालः॥

सूदनं, क्ली, (सूद्+ल्युट्।) अङ्गीकरणम्। हननम्। (यथा, हरिवंशे। १६३।४२।

"वैणवास्त्रं प्रयत्नाच्च वधार्थं ग्रसतस्य च। अमोघं कवचं तस्य प्रयत्नासुरसूदने॥")

निःक्षेपणम्। मूदधातोरनट्प्रत्ययेन निष्पन्नम्॥ तद्वति, त्रि। (यथा, महाभारते। २।२८।२०।

"तच्च दिव्यं धनुर्दृष्ट्वा नरस्य भगवानपि। चिन्तयामास तच्चक्रं विष्णुर्दानवसूदनम्॥")

सूदशाला, स्त्री, (सूदस्य शाला।) पाकशाला। तथा,—

"सूदशाला रसवती पाकस्थानं महानसम्॥"

इति हेमचन्द्रः॥

सूदाध्यक्षः, पुं, (सूदानां सूपकाराणामध्यक्षः॥ पाकशालाध्यक्षः। तत्पर्य्यायः। पौरोगवः १। इति हेमचन्द्रः। पुरोगमः २। इति शब्दरत्नावली। तस्यकर्म्म यथा,—

"अनाधार्यः शुचिर्दक्षश्चिकित्सितविदांवरः। सूदशास्त्रविशेषज्ञः सूदाध्यक्षः प्रशस्यते॥"

इति मात्स्ये १९८ अध्यायः॥

सूनं, क्ली, (सू+क्तः। यद्वा सूनौ+कः।) प्रसवः। पुष्पम्। विकसति, त्रि। इति विश्वप्रकाशः॥

सूनः, त्रि, (सू+क्तः। "ग्लोदितश्च।" ८।२।४५। इति निष्ठानत्वस्य नः।) ज्ञातः। इति सुग्धबोधव्याकरणम्॥

सूनवान् [न्] त्रि, (सू+क्त्वतु।) ज्ञातः। इति सुग्धबोधव्याकरणम्॥

सूना, स्त्री, (सूयते क्षीयते। सू+क्तः। टाप्। पृषो।) (सूयत इति सू+"सुवो धुगौषच।" उणा० ३।१४। इति नः। धोर्घश्च पृषो।) यज्ञपशुहिंसा। शस्त्रपुत्रिका। इति मेदिनी। ने, २८॥ कसाईखानाविशेषः। तत्पर्य्यायः। मांसशिक्षा। इति संक्षिप्तसारोणादिवृत्तिः॥

सूपकार

(यथा, भागवते। १।१७।।३८।

"अभ्यर्थितस्तदा तस्मै स्वान्यङ्गानि ददौ दृतं पानं स्त्रियः सूना यत्राधर्म्मस्त्वतुर्विधः॥")

जाता। इति सूनशब्दार्थदर्शनात्। सूनाप्रकाराश्च तत्पापनाशप्रकाराश्च पचसूनाशब्दे द्रष्टव्याः॥

सूनी, [न्] पुं, (सूना अस्त्यस्येति। इनिः।) व्याधः। मांसविक्रयी। (यथा, याज्ञवल्क्ये। १।१६१।

"प्रतिग्रहे मृतौ क्लिष्टविक्रयेष्वानराधिपाः। दुष्टा दशगुणं पूर्व्वात् पूर्व्वादेते यथाक्रमम्॥")

सूनुः, पुं, (सूयते इति। सू+"सुवः किन्।" उणा० ३। ३५। इति नुः। च च कित्।) पुत्रः। यथा, रघुः। १।६५।

"सूनुः सूनृतवाक् सक्तः विभक्तर्व्वादितश्रियम्॥", अनुजः। सूर्य्यः। इति मेदिनी॥ अर्कवृक्षः। इत्यमरः॥

सूनुः, } स्त्री, (सू+नुः। वा ऊङ्।) कन्या।
सूनूः, } इति हेमचन्द्रः॥

सूनृतं, क्ली, (सुनृत्यत्यनेनेति। सु+नृत्+घञर्थे कः। उपसर्गस्य दीर्घः।) सत्यप्रियवाक्यम्। इत्यमरः। १।६।१६॥ (यथा, साहित्यदर्पणे। ३।१५५।

"भाषते सूनृतं स्निग्धमनुरक्ता नितम्बिनी॥")

मङ्गलम्। इत्यजयः॥ तद्वति, त्रि। (यथा, भागवते। १।१६।३१।

"प्रणम्य मूर्द्ध्नावहितः कृताञ्जलि-
र्नत्वा गिरा सूनृतयाऽवहूच्छत्॥")

सून्मदः, त्रि, (सुष्ठु उन्मदः।) उन्मत्तः। उन्मादिष्णुः। इत्यमरे उन्मदशब्दटीकायां भरतः। ३।१।२०॥

सून्माद, त्रि, (सुष्ठु उन्मादः।) उन्मादरोगविशिष्टः। इत्यमरे उन्मदशब्दटीकायां रमानाथः॥

„ पुं, (सौति रसानिति। सु+"सुसूधाञ्गृधिभ्यः क्रन्।" उणा० २।२४। इति यः। चकारात् किन् दीर्घत्वञ्च।) व्यञ्जनविशेषः। डाल इति भाषा। सूदः। इति मेदिनी॥ भारतम्। शाकम्। इति शब्दरत्नावली॥ ७॥ अथ दालौ।

"दलितस्तु ग्रमीधान्यं दालिर्द्दालौ स्त्रियामुभे। दालौ तु मलिले क्षिप्ता लवणार्द्रकसंयुक्ता॥
संयुक्ता सूपनामौ स्यातु कथ्यते तद्गुणा अथ॥
सूपो विरूक्षको रूक्षः प्रीतस्तु च विशेषतः।
निस्नेहो भृष्टसिद्धः स लाघवं सुतरां व्रजेत्॥"

इति भावप्रकाशः॥

सूपकारः, पुं, (सूपं करोतीति। क+अण्।) पाककर्त्ता। तत्पर्य्यायः। पाचकः २ आरालिकः ३ आग्नेयिकः ४ सूदः ५ औदनिकः ६ ओदनः ७। इत्यमरः। २।९।८०॥ पाचकः ८। इति शब्दरत्नावली॥ पाकुकः ९। इत्युणादिकोषः॥ भक्षकारः १०। इति हेमचन्द्रः॥ तस्य गुणकर्म्म यथा, भावप्रकाशे।

"इष्टिकाकारसदृक्षो वक्त्रान्तः स्निग्धपाचकः।
सूपश्च कठिनश्चैव समकारः स उच्यते॥"

सूर

सूदमार्गोपजीवी। यथा, ब्रह्मवैवर्त्ते प्रकृतिखण्डे २७ अध्याये।

"देवोपजीवी वार्द्धुषी यः देवलश्च प्रकीर्त्तितः।
सूदपाकोपजीवी यः सूपकारः प्रकीर्त्तितः॥
सन्ध्यापूजाविहीनश्च प्रमत्तः पतितः स्तब्धः।
उक्तपूर्व्वप्रकारेण लक्षणं हरलीपतेः॥
एते महापातकिनः कुम्भीपाकं व्रजन्ति ते।
कृष्णान्यन्यानि ते यान्ति निबोध कथयामि तान्॥"

सूपधूपनं, क्ली, (सूपस्य धूपनमस्मादिति।) छिद्रम्। इति त्रिकाण्डशेषः॥

सूपपर्णी, स्त्री, (सूपकरं सूपस्य स्वादुताकरं पर्णमस्याः। ङीष्।) सुद्गपर्णी। इति रत्नमाला॥

सूपश्रेष्ठः, पुं, (सूपेषु तत्साधनेषु श्रेष्ठः।) मुद्गः। इति राजनिर्घण्टः॥

सूपाङ्गं, क्ली, (सूपस्य साधनम्। तत्साधनत्वात्।) हिङ्गु। इति राजनिर्घण्टः॥

सूर्म, क्ली, (सू+"इषियुधीति।" उणा० १।१४४। इति मक्।) क्षीरम्। आकाशम्। इति मेदिनी॥ जलम्। इति शब्दरत्नावली॥

सूरः, पुं, (सूते जगदिति। सू+"सुसूधाञ्गृधिभ्यः क्रन्।" उणा० २। २४। इति क्रन्।) सूर्य्यः। (यथा, ऋग्वेदे। १।१६३।२।

"सूरादश्वं वसवो निरतष्ट॥")

अर्कवृक्षः। इत्यमरः। १।३।२८; २।४।८०॥ तस्यार्द्रतुपिलविशेषः। इति हेमचन्द्रः॥ पण्डितः। इति केचित्

सूरणः, पुं, सूरणं। इति शब्दरत्नावली॥ कार्त्तिकमासे तस्य भक्षणनिषेधो यथा, कर्म्मलोचने।

"मकरे मूलकञ्चैव सिंहे चालावुकं तथा।
कार्त्तिके सूरणञ्चैव मद्यं गोमांसभक्षणम्॥"

सूरतः, त्रि, (सुष्ठु रमते इति। सु+रम+"सौ रमतेः क्तौ दमे पूर्व्वपदस्य च दीर्घः।" उणा० ५।१४। इति क्तः सुशब्दस्य च दीर्घः।) कृपालुः। इत्यमरः। ३।१।१५॥

सूरसूतः, पुं, (सूरस्य सूर्य्यस्य सूतः सारथिः।) अरुणः। स सूर्य्यसारथिः। इत्यमरः। १।३।३२॥

सूरिः, पुं, (सूते वक्तव्यानीति। सू+"सृवृभूशुषिमुष्टिविदिभ्यः किः।" उणा० ४।६४। इति किः।) पण्डितः। इत्यमरः। २।७।६॥ (यथा, भागवते। १।१।१।

"जन्माद्यस्य यतोऽन्वयादितरतश्चार्थेष्वभिज्ञः स्वराट्
तेने ब्रह्म हृदा य आदिकवये मुह्यन्ति यत् सूरयः॥")

यादवः। सूर्य्यः। इत्युणादिकोषः॥

सूरी, [न्] पुं, (सूरः सूर्य्य उपास्यतया अस्त्यस्येति। सूर+इनिः।) पण्डितः। इति शब्दरत्नावली।

सूरी, स्त्री, (सू+किः। ङीष्।) राजसर्षपः। इति रत्नमाला॥ (विदग्धी। इत्युणादिकोषौ

उज्ज्वलः । ४ । ६४ ॥ ॥ ॥ सूर्य्यस्य स्त्री । "पुंयोगादाख्यायाम् ।"४।१ । ४८ । इति ङीष् । सूर्य्यतिष्यागस्त्येति यलोपः । जुन्नौ । इति शाकरणम् ॥)

सूर्च्च, नारदे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) रेफयुक्तः षष्ठस्वरी दन्त्यादिः । सूर्च्चति इदं लोकः । सुसूर्च्च । इति दुर्गादासः ॥

सूर्च्चनं, क्ली, (सूर्च्च + ल्युट् ।) अनादरः । इति शब्दरत्नावली ॥

सूर्च्छ, अनादरे । ईर्षे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) दन्त्यादिर्दीर्घो रेफमध्यः । सूर्च्छति सुसूर्च्छ । इति दुर्गादासः ॥

सूर्च्छः, पुं, (सूर्च्छते अनादियते इति । सूर्च्छ + घञ् ।) मापः । इति शब्दरत्नावली ॥

सूर्पः, पुं, क्ली, शूर्पः । इति शब्दरत्नावली ॥ कुम्भपरिमाणम् । द्विद्रोणपरिमाणम् । इति वैद्यकपरिभाषा ॥

सूर्म्मी, स्त्री, शूर्म्मी । इति केचित् ॥

सूर्य्यः, पुं, (सरति आकाशे सुवति कर्म्मणि लोकं प्रेरयति वा । सृ गतौ सू प्रेरणे वा + "राजसूय-सूर्य्यमृषोद्यरुच्येति ।"३।१।११४ । इति क्यप्प्रत्ययेन साधुः ।) ग्रहविशेषः । अर्कपर्णः । इति मेदिनी ॥ बलिपुत्रः । इति केचित् ॥ (यथा, हरिवंशे । ३ । ७१ ।

"बलेः पुत्रशतञ्चासीत् बाणज्येष्ठं नराधिप ।
धृतराष्ट्रश्च सूर्य्यश्च चन्द्रमाश्चेन्द्रतापनः ॥")

दानवविशेषः । यथा,—

"अभवन् दनुपुत्राश्च वंशे ख्याता महासुराः ।
विप्रचित्तिप्रधानास्ते शतं तीव्रपराक्रमाः ॥
स्वर्भानुर्वृषपर्व्वा च कुहूश्च महासुरः ।
धृतराष्ट्रश्च सूर्य्यश्च दनुमानिन्द्रतापनः ॥"

इति वह्निपुराणे काश्यपीयवंशः ॥

ग्रहविशेषस्य पर्य्यायो यथा । सूरः २ अर्य्यमा ३ व्यादित्यः ४ द्वादशात्मा ५ दिवाकरः ६ भास्करः ७ अहस्करः ८ ब्रध्नः ९ प्रभाकरः १० विभाकरः ११ भास्वान् १२ विवस्वान् १३ सप्ताश्वः १४ हरिदश्वः १५ उष्णरश्मिः १६ विकर्त्तनः १७ अर्कः १८ मार्त्तण्डः १९ मिहिरः २० अरुणः २१ पूषा २२ दामनिः २३ तरणिः २४ मित्रः २५ विचभानुः २६ विरोचनः २७ विभावसुः २८ अहपतिः २९ त्रियाम्पतिः ३० अहःपतिः ३१ भानुः ३२ शंसः ३३ सहस्रांशुः ३४ तपनः ३५ सविता ३६ रविः ३७ । इत्यमरः ।१।३।२८—३१॥ शूरः ३८ भगः ३९ हरः ४० पद्मिनीवल्लभः ४१ हरिः ४२ दिनमणिः ४३ चण्डांशुः ४४ सप्तसप्तिः ४५ गभस्तिमान् ४६ अंशुमाली ४७ कश्यपेयः ४८ खगः ४९ भानुमान् ५० लोकलोचनः ५१ पद्मयनुः ५२ द्योतिषान् ५३ अघघः ५४ तापनः ५५ विचरथः ५६ रामणिः ५७ दिवामणिः ५८ गभस्तिहस्तः ५९ रविः ६० प्रसप्तः ६१ अर्चिः ६२ दिनप्रभुः ६३ वेदोदयः ६४ कालकः ६५ अहराजः ६६ तमोनुदः ६७ रसाधारः ६८ प्रतिदिवा ६९ द्योतिःपीथः ७० इनः ७१ । इति शब्दरत्नावली ॥ कर्म्मसाक्षी ७२ जगच्चक्षुः ७३ त्रयीतपः ७४ प्रद्योतनः ७५ खद्योतः ७६ लोकबान्धवः ७७ पद्मिनीकान्तः ७८ अंशुहस्तः ७९ पद्मप्राणिः ८० हिरण्यरेताः ८१ पीतः ८२ अद्रिः ८३ अगः ८४ हरिवाहनः ८५ अम्बरीषः ८६ धामनिधिः ८७ हिमारातिः ८८ गोपतिः ८९ कुञ्जरः ९० प्लवगः ९१ मनुः ९२ तमोपहः ९३ गभस्तिः ९४ । इति जटाधरः ॥ ॥ अस्य वर्णः रक्तश्याममिश्रितः । स च पूर्व्वदिक्पुरुष-क्षत्रियजाति-सत्त्वगुण-कटुरससिंहराशीनामधिपतिः । धान्यादिसुवर्णद्रव्यचतुष्पदगोभूमिस्वामी । घृतुष्कोणाकृतिः । मध्याह्नकाले प्रबलः । दृढः । रणचारी । तिक्तरसप्रियश्च । इति दृष्ट्वज्ञातकादयः ॥ ॥ अर्घ्यमन्त्रे तु । वर्त्तुलाकारः । मण्डलमध्यस्थः । अस्य जन्मभूमिः कलिङ्गदेशः । गोत्रः काश्यपः । वर्णः रक्तः । पूर्व्वमुखः । जातिः ब्राह्मणः । बलिर्गुग्गुलोदनम् । धूपो गुग्गुलुः । गन्धो रक्तचन्दनम् । समित् रक्तः । अस्य ध्यानम् ।

"क्षत्रियं काश्यपं रक्तं कालिङ्गं द्वादशाङ्गुलम् ।
पद्महस्तद्वयं पूर्व्वाननं सप्ताश्ववाहनम् ।
शिवाधिदैवतं ध्यायेद्दक्षिणप्रत्यधिदैवतम् ।"

अस्य मन्त्रः ।

"आकृष्णेन रजसा वर्त्तमानो निवेशयन्नमृतं मर्त्यञ्च हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् ॥" दक्षिणा येनुः । इति ग्रहयागसंस्कारतत्त्वे ॥ ॥ तस्योत्पत्त्यादिर्यथा,—

"अथान्तरीक्षादाभाष्य काश्यपं मुनिसत्तमम् ।
सतोयमेघगम्भीरा वागुवाचाशरीरिणी ॥
मारितश्च यतः प्रोक्तमेतदण्डं त्वयादितिम् ।
तस्मात्सुते सुतस्तेयं मार्त्तण्डाख्यो भविष्यति ॥
सृष्ट्यधिकारश्च विसृष्ट्यगत्यैव करिष्यति ।
हनिष्यत्यसुरांश्चायं यज्ञभागहरानरीन् ॥
देवा निश्चिन्तेति वचो गगनात् समुपागतम् ।
प्रहर्षमतुलं यातो दानवाश्च हतौजसः ॥
ततो युद्धाय दैतेयानाजुहाव शतक्रतुः ।
सह देवैर्मुदा युक्तो दानवाश्च समभ्ययुः ॥
तेषां युद्धमभूद्घोरं देवानामसुरैः सह ।
ब्रह्माण्डदीप्तिसंदीप्तसप्तसप्तभुवनान्तरम् ॥
तस्मिन् युद्धे भगवता मार्त्तण्डेन निरीक्षिताः ।
तेजसा दह्यमानास्तु भस्मीभूता महासुराः ॥
ततः प्रहर्षमतुलं प्रापुः सर्व्वे दिवौकसः ।
तुष्टुवुस्तेजसो योनिं मार्त्तण्डमदितिं तथा ॥
स्वाधिकारं ततः प्रापुर्यज्ञभागांश्च पूर्व्ववत् ।
भगवानपि मार्त्तण्डः स्वाधिकारमथाकरोत् ॥
कदम्बपुष्पयज्ञाम्नायशोभेव रश्मिभिः ।
दृष्टोऽपिपिङ्गलश्मश्रुर्दधे नाविष्कृतं वपुः ॥"

इति मार्कण्डेयपुराणे मार्त्तण्डोत्पत्तिः ॥ ॥

मार्कण्डेय उवाच ।

"अथ तस्मै ददौ कन्यां संज्ञां नाम विवस्वते ।
प्रजापतिः प्रसादात्तु प्रणतो भूत्वा विश्वकर्म्मा प्रजापतिः ॥
विवस्वतस्तु संभूतौ मनुर्द्यौ चरितं तयोः ।
पूर्व्वमेव तवाख्यातं सर्व्वमेतदखिलं द्विज ॥
त्रीण्यपत्यान्यसौ तस्यां जनयामास गोपतिः ।
द्वौ पुत्रौ सुमहाभागौ कन्याञ्च यमुनां नदीम् ॥
मनुश्चैवरतो ज्येष्ठः श्राद्धदेवः प्रजापतिः ।
तेषां यमो यमी चैव यमलौ संबभूवतुः ॥
तत्तेजोऽभ्यधिकं चैव मार्त्तण्डस्य विवस्वतः ।
असहन्ती तु तत्तेजः स्वां छायां वीक्ष्य साब्रवीत् ॥

संज्ञोवाच ।

अहं यास्यामि भद्रं ते स्वकञ्च भवनं पितुः ।
निर्विकारं त्वयाप्यत्र स्थेयं मच्छासनात् शुभे ॥
इमौ च बालकौ मह्यं कन्या च वरवर्णिनी ।
संभाष्या नैव चाख्येयमिमं भगवते त्वया ॥

छायोवाच ।

आक्रोशग्रहणाद्देवि आज्ञाभाङ्गेन कर्हिचित् ।
आख्यास्यामि मतं तुभ्यं गम्यतां यत्र वाञ्छितम् ॥
इत्युक्ता छायया संज्ञा जगाम पितृमन्दिरम् ।
तत्रावसत् पितृगृहे कञ्चित् कालं शुभेक्षणा ॥
भर्त्तुः समीपं यास्यीति पित्रोक्ता सा पुनः पुनः ।
अगच्छद्वडवा भूत्वा कुरून् विप्रोत्तरांस्ततः ॥
तत्र तेपे तपः साध्वी निराहारा महासुने ।
पितुः समीपं यातायाः संज्ञाया वाक्यतत्परा ।
तद्रूपधारिणी छाया भास्करं समुपस्थिता
तस्याञ्च भगवान् सूर्य्यः संज्ञेयमिति चिन्तयन् ।
तथैव जनयामास पुत्रौ द्वौ कन्यकां तथा ।
पूर्व्वजस्य मनोस्तुल्यः सावर्णिस्तेन सोऽभवत् ॥
यस्तयोः प्रथमं जातः पुत्रयोर्द्विजसत्तम ।
द्वितीयो योऽभवच्चान्यः स ग्रहोऽभून् शनैश्चरः ॥
कन्याभूत्तपती या तां वव्रे संवरणो नृपः ।
संज्ञा तु मार्यिवी तेषामात्मजानां यथाकरोत् ॥
स्नेहं न पूर्व्वं जातानां तथा कृतवती सती ।
मनुस्तान् चिन्तयांस्तस्या यमश्चास्या न चक्षमे ॥
बहुशः पीड्यमानस्तु पित्रा सुदुःखितः ।
स वै कोपाच्च बाल्याच्च भाविनोऽर्थस्य वै बलात् ॥
पदा संतर्जयामास छायां संज्ञासुतो यमः ।
तं शशाप ततः क्रुद्धा संज्ञा सा मार्यिवी शुभम् ॥

छायोवाच ।

पदा तर्जयसे यस्मां पितृभार्य्यां गरीयसीम् ।
तस्मात्तवैष चरणः पतिष्यति न संशयः ॥
यमस्तु तेन शापेन भृशं पीडितमानसः ।
मनुना सह धर्म्मात्मा सर्व्वं पित्रे न्यवेदयत् ॥

यम उवाच ।

स्नेहेन तुल्यमस्मासु माता देव न वर्त्तते ।
विशेष्य न्यायशोऽप्यस्मान् कनीयांसो बुभूषति ॥
तस्या मयोद्यतः पादो न तु देहे निपातितः ।
बाल्याद्वा यदि वा मोहात्तत्क्षमस्व जगत्पते ॥
शप्तोऽहं तात कोपेन जनन्या सत्यया यतः ।
ततो न मन्ये जननी समेया तपतां वर ॥
निर्गुणेष्वपि पुत्रेषु न माता निर्दया भवेत् ।
पादस्ते पतितो पुत्र कथमेतत्त्वयोदितम् ॥
सत्य प्रसादार्थरयं न पतेत् भगवन् मया ।

माहात्म्यादयं मेऽद्य तथा चिन्तय गोपते ॥
रविरुवाच ।
असंशयमिदं पुत्र भविष्यत्यत्र कारणम् ।
येन त्वामाविशत् क्रोधो धर्म्मज्ञं सत्यवादिनम् ॥
सर्व्वेषामेव प्राणानां प्रतिजातो हि विद्यते ।
न तु मात्राभिशप्तानां क्वचिच्छापनिवर्त्तनम् ॥
न शक्यमेतन्मिथ्या तु कर्त्तुं मातुर्व्वचस्तव ।
किं ते प्रियं संविधास्यामि पुत्रस्नेहादनुग्रहम् ।
कृमयो मांसमादाय प्रयास्यन्ति महीतलम् ।
श्रुतं तस्या वचः सत्यं त्वत्र त्राता भविष्यसि ॥
मार्कण्डेय उवाच ।
आदित्यस्त्वम्रवीच्छायां किमर्थं तनयेषु वै ।
तुल्येष्वप्यधिकस्नेह एकत्र क्रियते त्वया ॥
नूनं न चैषां जननी संज्ञा क्वापि त्वमागता ।
विगुणेष्वप्यपत्येषु माता शापं न दास्यति ॥
सा तत् परिहरन्तीव नाचचक्षे विवस्वतः ।
स चात्मानं समाधाय युक्तस्तत्त्वमवैक्षत ॥
तं प्रसुप्तसुतं दृष्ट्वा छायासंज्ञा दिनाधिपम् ।
भयेन कम्पिता ब्रह्मन् यथावृत्तं न्यवेदयत् ॥
विवस्वांस्तु तदा क्रुद्धः श्रुत्वा श्वशुरमभ्यगात् ।
स चापि तं यथान्यायमर्च्चयित्वा दिवाकरम् ।
निर्दग्धुकामं रोषेण शान्तयामास सुव्रतः ॥
विश्वकर्म्मोवाच ।
तपोबलेन यान्नित्यं रूपं सुदुःसहम् ।
असहन्ती ततः संज्ञा वने चरति वै तपः ॥
ब्रह्मन्ते तां भवानद्य स्वां भार्य्यां शुभचारिणीम् ।
रूपार्थं भवतोऽरण्ये चरन्तीं सुमहत्तपः ॥
मतं मे ब्रह्मणो वाक्यात् यदि ते देव रोचते ।
रूपं निवर्त्तयाम्यद्य तव कान्तं दिवाकर ॥
मार्कण्डेय उवाच ।
ततो हि भास्वतो रूपं प्रागासीत् परिमण्डलम् ।
ततस्तथेति तं प्राह त्वष्टारं भगवान् रविः ॥
विश्वकर्म्मा त्वगुत्तप्तः प्राक्षिपे विवस्वतः ।
भ्रमिमारोप्य तच्चेजः शातनार्थमथक्रमी ॥
देवाश्च ब्राह्मणा सार्द्धं भास्वन्तमभितुष्टुवुः ।
लिख्यमानं सहस्रांशुं प्रणेतुः सर्व्वदेवताः ॥
ततः कोलाहले तस्मिन् सर्व्वदेवसमागमे ।
तेजसः शातनं चक्रे विश्वकर्म्मा शनैः शनैः ॥"
इति मार्कण्डेयपुराणे सूर्य्यतेजःशातनम् ॥*॥
"शातितं चास्य यत्तेजस्तेन चक्रं विनिर्मितम् ।
विष्णोः शूलस्य सर्व्वस्य शिविका धनदस्य च ॥
दक्षः प्रेतपतेः शक्तिर्देवसेनापतेस्तथा ।
अन्येषाञ्चैव देवानामायुधानि स विश्वकृत् ।
चकार तेजसा भानोर्भास्वराण्यरिशान्तये ॥
इति शातिततेजाः स श्वशुरेणातिशोभनम् ।
वपुर्दधार मार्त्तण्डः पुण्यश्रवणमनोरमम् ॥
स ददर्श समाधिस्थां स्वां भार्य्यां वडवाकृतिम् ।
अपापां सर्व्वभूतानां तपसा नियमेन च ॥
ततो जगाम भास्वान् वै संज्ञा यत्र व्यवस्थिता ।
सा च दृष्ट्वा तमायान्तं परपुंसो विशङ्कया ।
जगाम संसुतं तस्य एकरश्मितमारा-

ततश्च नासिकायोगात् तयोस्तत्र समेतयोः ।
नासत्यदस्रौ तनयावश्ववक्त्रादिनिर्गतौ ॥
रेतस्त्रोऽन्ते च रेवन्तः खड्गी धन्वी तनुत्रधृक् ।
अश्वारूढः सप्तरश्मिर्वागतूणसमन्वितः ॥
ततः स्वरूपमतुलं दर्शयामास भानुमान् ।
तस्याश्च सा समालोक्य स्वरूपं सुदमादरौ ॥
स्वरूपधारिणीं चैनामानिनाय निजालयम् ।
संज्ञां भार्य्यां प्रीतिमतीं भास्करो वारितस्करः ॥
ततः पूर्वसुतां छोस्त्राः सोऽभूद्वैवस्वतो मनुः ।
द्वितीयश्च यमः प्राप्तात् पापदर्शननत्वरः ॥
कृमयो मांसमादाय पादतस्ते महीतलम् ।
प्रतियन्तीति शप्तान्तं तस्य चक्रे पिता स्वयम् ॥
धर्म्मदृष्टिर्यतश्चासौ समो मित्रे तथाहिते ।
ततो नियोगे तं यम्ये चकार तिमिरापहः ॥
यमुनाञ्च नदीञ्चक्रे कलिन्दान्तरवाहिनीम् ।
अश्विनौ देवभिषजौ कृतौ पित्रा महात्मना ॥
गुह्यकाधिपतित्वे च रेवन्तो विनियोजितः ।
रेवन्तमब्रवीत् ततो भगवान् लोकभावनः ।
त्वमश्वरूपोत्तलोकस्य पूज्यो वत्स भविष्यसि ॥
अरण्येऽश्वी महादावे वैरिदस्युभयेषु च ।
त्वां स्मरिष्यन्ति ये मर्त्या मोक्ष्यसे ते महाभयात् ॥
क्षेमं वृद्धिं सुखं राज्यं आरोग्यं कीर्त्तिसुन्नतिम् ।
नराणां परितुष्टस्त्वं पूजितः संप्रदास्यसि ॥
छायासंज्ञासुतश्चापि सावर्णः सुमहाद्यशाः ।
भाव्यः सोऽनागते काले मनुः सावर्णिकोऽष्टमः ॥
मेरुपृष्ठे तपो घोरमद्यापि चरति प्रभुः ।
भ्राता शनैश्चरस्तस्य यमोऽभूच्छासनात्रवेः ॥
यवीयसी च या कन्या तस्य चासीद्विजोत्तम ।
अभवत् सा सरिच्छ्रेष्ठा तपती लोकपावनी ॥
यस्तु ज्येष्ठो महाभाग सर्गो तस्येह साम्प्रतम् ।
विस्तरं तस्य वक्ष्यामि मनोर्वैवस्वतस्य ह ॥
य इदं जन्म देवानां श्रृणुयाद्वा पठेत्तथा ।
विवस्वतस्तु जातानां रवेर्माहात्म्यमेव च ।
आयुः प्राप्य सुखेत प्राप्नुयाच्च महद्यशः ॥
अघोरावहतं पापमेतत् शमयति श्रुतम् ।
माहात्म्यमादिदेवस्य मार्त्तण्डस्य महात्मनः ॥"
इति मार्कण्डेयपुराणे मार्त्तण्डमाहात्म्यनामाध्यायः ॥ अपि च ।
प्रजापाल उवाच ।
"ग्रहाराज्यं कथं सूर्त्तिर्यज्ञभागं ज्योतिषां हिज ।
एतन्मे संशयं छिन्धि प्रणतस्य द्विजोत्तम ॥
महातपा उवाच ।
योऽसावात्मा ज्ञानशक्तिरेक एव सनातनः ।
स हितीयं यदा चैच्छत् तदा तेजः समुत्थितम् ॥
तत् सूर्य्य इति भास्वन्तं अन्योन्येन महात्मनः ।
लोलीभूतानि तेजांसि भासयन्ति जगत्त्रयम् ॥
तस्मिन् सर्व्वे सुराः लिङ्गा गणाः सर्व्वे महर्षिभिः ।
स्वयं भूता इति विभो तस्मात् सूर्य्यस्तु सोऽभवत् ॥
लोलीभूतस्य तस्याशु तेजसोऽभूच्छरीरकम् ।
पृथक्त्वेन रविः सोऽथ कीर्त्यते वेदवादिभिः ॥
भासयन् सर्व्वलोकांस्तु यतोऽसावुत्थितो दिवि ।

अतोऽसौ भास्करः प्रोक्तः प्राकर्षाच्च प्रभाकरः ।
दिवा दिवस इत्युक्तस्तत्कारित्वाद्दिवाकरः ।
सर्व्वस्य जगतस्त्वादिरादित्यस्तेन उच्यते ॥
एतस्य द्वादशादित्याः संभूतास्तेजसा पृथक् ।
प्रधान एक एवार्यः जगत्सु परिवर्त्तते ॥
तं दृष्ट्वा जगतो याम्निं कृत्वाग्रं परमेश्वरम् ।
तस्थेवान्तःस्थिता-देवा विनिष्क्रम्य स्तुतिं जगुः ॥"
इति वाराहे आदित्योत्पत्तिनामाध्यायः ॥*॥
उत्तरायणदक्षिणायनयोरनुलोमप्रतिलोमं गन्तव्यानि मण्डलानि प्रतिमासं सूर्य्यश्रमणाधिकारिगणाश्च यथा,—
"अशीतिमण्डलशतं कालयोरन्तरं द्वयोः ।
आरोहणावरोहाभ्यां भानोरब्देन या गतिः ॥
स रथोऽधिष्ठितो देवैरादित्यैर्ऋषिभिस्तथा ।
गन्धर्व्वैरप्सरोभिश्च ग्रामणीसर्पराक्षसैः ॥
धाता कृतस्थला चैव पुलस्त्यो वासुकिस्तथा ।
रथकृद्ग्रामणीर्हेतिस्तुम्बुरुश्चैव सप्तमः ॥
एते वसन्ति वै चैत्रे मधुमासे सदैव हि ।
मैत्रेय स्यन्दने भानोः सप्त मासाधिकारिणः ॥
अर्य्यमा पुलहश्चैव रथौजाः पुञ्जिकस्थला ।
प्रहेतिः कच्छनीरश्च नारदश्च रथे रवेः ।
माधवे निवसन्त्येते शुचिसंज्ञे निबोध मे ॥
मित्रोऽत्रिश्चक्रको रक्षः पौरुषेयोऽथ मेनका ।
हाहा रथस्वनश्चैव मैत्रेयेते वसन्ति वै ॥
वशिष्ठो वरुणो रम्भा सहजन्यो हुहूर्वधः ।
रथचित्रस्तथा शुक्रे वसन्त्याषाढसंज्ञिते ॥
इन्द्रो विश्वावसुः सोत एलापत्रस्तथाङ्गिराः ।
प्रम्लोचा च नभस्येते सर्पश्चार्के वसन्ति हि ॥
विवस्वानुग्रसेनश्च भृगुरापूरणस्तथा ।
प्रम्लोचा शङ्खपालश्च व्याघ्रो भाद्रपदे तथा ॥
पूषा च सुरविर्व्वातो गौतमोऽथ धनञ्जयः ।
सुषेणोऽन्यो घृताची च वसन्त्याश्वयुजे रवौ ॥
विश्वावसुर्भरद्वाजः पर्जन्यैरावतौ तथा ।
विश्वाचीसेनजित्संज्ञौ कार्त्तिके चाधिकारिणः ॥
अंशुकश्चपतार्चास्तु महापद्मस्तथोर्व्वशी ।
चित्रसेनस्तथा विद्युत् मार्गशीर्षाधिकारिणः ॥
ऋतुर्भगस्तथोर्णायुस्पूर्ज्जः कर्कोटकस्तथा ।
अरिष्टनेमिश्चैवान्या पूर्व्वचित्तिर्व्वराश्वराः ।
पौषमासे वसन्त्येते सप्त भास्करमण्डले ॥
लोकप्रकाशनार्थाय विप्रवर्य्याधिकारिणः ।
त्वष्टा च जमदग्निश्च कम्बलोऽथ तिलोत्तमा ॥
ब्रह्मापेतोऽथ ऋतजित् धृतराष्ट्रश्च सप्तमः ।
माघमासे वसन्त्येते सप्त मैत्रेय भास्करे ॥
श्रूयतां चापरे सूर्य्ये फाल्गुने निवसन्ति ये ।
विष्णुरप्सतरो रम्भा सूर्य्यवर्चाश्च सत्यजित् ॥
विश्वामित्रस्तथा रक्षो यज्ञापेतो महासुने ।
मासेष्वेतेषु मैत्रेय वसन्त्येतेषु सप्तकाः ॥
सवितुर्मण्डले ब्रह्मन् विष्णुप्रक्रमुपस्थिताः ।
स्तुवन्ति सूनयः सूर्य्यं गन्धर्व्वैर्गीयते पुरः ॥
नृत्यन्त्यप्सरसो यान्ति सूर्य्यस्याग्रे निशाचराः ।
वहन्ति पन्नगा यत्नः क्रियतेऽभीषु संग्रहः ॥
बालखिल्याऋषैवेनं परिवार्य्य समासते ।

सूर्य:

एतेन गतियोगेन यदा काष्ठान्तु दक्षिणाम् ।
पर्य्यागच्छत् पतङ्गोऽसौ वामकोष्ठेऽन्तरेऽहनि ॥
मध्येन पुष्करस्याथ भ्रमते दक्षिणायने ।
मानसोत्तरमेरोस्तु अन्तरं त्रिगुणन्तु तत् ॥
सर्पतो दक्षिणायान्तु काष्ठायान्तु निबोधत ।
नवकोट्यः प्रसंख्याता योजनैः परिमण्डलम् ॥
तथा शतसहस्राणि चत्वारिंशच्च पञ्च च ।
अहोरात्रा पतङ्गस्य गतिरेषा विधीयते ॥
दक्षिणादिनिवृत्तोऽसौ विषुवस्थो यदा रविः ।
क्षीरोदस्य समुद्रस्य उत्तरान्तो दिशञ्चरन् ।
मण्डलं विषुवच्चापि योजनैस्तन्निबोधत ॥
तिस्रः कोट्यस्तु संपूर्णा विषुवस्याथ मण्डलम् ।
तथा शतसहस्राणां विंशत्येकाधिका पुनः ॥
आवर्त्ते चोत्तरां काष्ठां चित्रभानुर्यदा भवेत् ।
गोमेदकस्य द्वीपस्य उत्तरास्तु दिशञ्चरन् ॥
उत्तरायाः प्रमाणन्तु काष्ठाया मण्डलस्य तु ।
दक्षिणोत्तरमध्यानि तानि विद्याद् यथाक्रमम् ॥
स्थाणं चरन्तं मन्ये तथैरावतमुत्तमम् ।
वैश्वानरं दक्षिणतो निर्दिष्टमिह तत्त्वतः ॥
नागवीथ्युत्तरा वीथी अजवीथ्यास्तु दक्षिणे ।
उभे व्याषाढ्यलम्बन्तु अजवीथ्युदगायनम् ॥
अभिजित् पूर्वतः स्वाती नागवीथ्युत्तरास्मृताः ।
अश्विनी कृत्तिका याम्या नागवीथ्युत्तरा स्मृता ॥
रोहिण्यार्द्रा पुनश्चैषा नागवीथीरिति स्मृता ।
पुष्याश्लेषा पुनश्चैषा वीथीरैरावती स्मृता ॥
तिस्रस्तु वीथयो ह्येता उत्तरो मार्ग उच्यते ।
पूर्वा उत्तरफल्गुन्योर्मघा चैवार्क्षभी भवेत् ॥
पूर्वोत्तरे प्रोष्ठपदे गोवीथी रेवती स्मृता ।
अश्वयुक् च धनिष्ठा च वारुणश्च नरश्चरन् ।
एताश्च वीथयस्तिस्रो मध्यमो मार्ग उच्यते ॥
हस्ता चित्रा तथा स्वाती नागवीथीरिति स्मृता ।
विशाखासु चतसृषु नागवीथीरिहोच्यते ॥
मूलपूर्वोत्तराषाढा विथीर्ज्ञेयास्तु नारद ।
स्मृतास्तिस्रस्तु वीथ्यस्तु मार्गे वै दक्षिणे बुधैः ॥
काष्ठयोरन्तरं त्रिंशत् वक्ष्यन्ते योजनैः पुनः ।
एतच्छतसहस्राणामेकत्रिंशत्तु वै स्मृतम् ॥
एतानि त्रीणि चान्यानि त्रयस्त्रिंशच्च योजनैः ।
काष्ठयोरन्तरं ह्येवं योजनाग्रात् प्रकीर्तितम् ॥
काष्ठयोर्जेष्ठयोश्चैव अयने दक्षिणोत्तरे ।
ते वक्ष्यामि प्रसंख्याय योजनैस्तु निबोधत ॥
एकैकमन्तरस्थे युक्तान्येतानि सप्तभिः ।
सप्तसैरतिरिक्ता च ततोऽन्या पञ्चविंशतिः ॥
त्रयाणां काष्ठयोश्चैव बाह्याभ्यन्तरयोश्चरन् ।
अभ्यन्तरं स पर्य्येति मण्डलानुत्तरायणम् ॥
दक्षिणो दक्षिणेनैव सततं सूर्यमण्डलम् ।
चरत्यसौ प्रतीच्यान्तु व्याप्नोतिमण्डलं शतम् ॥
तस्मिन्नेवन्तिके तावत् क्रमते मण्डलानि तु ।
प्रमाणं मण्डलस्यापि योजनायानुनिबोधत ॥
योजनानां सहस्राणि दश चार्धे तत: स्मृतः ।
अधिकान्यष्टपञ्चाशत् योजनानि च वै पुनः ॥
विष्कम्भो मण्डलस्यैतत्सिकं मे तु विधीयते ।

अहस्तु चरते नाभिं सूर्यो वै मण्डलक्रमात् ॥
कुलालचक्रमध्यस्थो यथा रविः ध्रुवो तथा ।
दक्षिणे चक्रवत् सूर्यस्तथा शीघ्रं निवर्त्तते ॥
तस्मात् प्रक्षद्यां भूमिन्तु कालेनाल्पेन गच्छति ।
सूर्यो द्वादशभिः शीघ्रं मुहूर्त्तैर्दक्षिणायने ॥
त्रयोदशार्द्धसंख्याणां मध्ये चान्तरमण्डलम् ।
मुहूर्त्तैस्तानि ऋक्षाणि नक्षत्राद्यैश्चरन् ॥
कुलालचक्रमध्यस्थो यथामन्दं प्रसर्पति ।
उदगयने तथा सूर्यः स सर्पेत् मन्दविक्रमः ॥
तस्मात् दीर्घेण कालेन भूमिं सोऽल्पां प्रसर्पति ।
सूर्योऽहादशभिर्वृद्धो मुहूर्त्तैरुदगायने ॥
त्रयोदशानां मध्ये तु ऋक्षाणां चरते रविः ।
मुहूर्त्तैस्तानि ऋक्षाणि रात्रौ द्वादशभिश्चिरम् ॥
ततो मन्दतरं ताभ्यां चक्रन्तु भ्रमतां पुनः ।
नृतपिण्ड इव मध्यस्थो भ्रमतेऽसौ ध्रुवस्तथा ॥
मुहूर्त्तैस्तावत् त्रिंशद्भिरहोरात्रं ध्रुवं भ्रमन् ।
उभयोः काष्ठयोर्मध्ये भ्रमते मण्डलानि तु ॥
उत्तरे प्रक्रमेऽर्कस्य दिवा मन्दगतिः स्मृता ।
तस्यैव तु पुनर्नक्तं शीघ्रा सूर्यस्य वै गतिः ॥
दक्षिणे क्रमणे चापि दिवा शीघ्रं विधीयते ।
गतिः सूर्यस्य वै नक्तं मन्दा चापि पुनः स्मृता ॥
एवं गतिविशेषेण विभजेदाहरहानि तु ।
अजवीथ्या दक्षिणं यल्लोकालोकस्य चोत्तरम् ॥
लोकसन्तानको ह्येष वैश्वानरपथाद्बहिः ।
युष्टा यावत् प्रभा सौरी पुष्करान् संप्रकाशते ।
पार्श्वेभ्यो बाह्यतस्तावत् लोकालोकस्तु पर्वतः ॥
योजनानां सहस्राणि दशोर्द्धे चोच्छ्रितो गिरिः ।
प्रकाशश्चाप्रकाशश्च सर्वतः परिमण्डलः ॥
नक्षत्रचन्द्रसूर्याश्च ग्रहास्तारागणैः सह ।
अभ्यन्तरे प्रकाशन्ते लोकालोकस्य वै गिरेः ॥"

इति मात्स्ये १०१ अध्यायः ॥

अस्य राहुग्रस्तत्वादिकारणं यथा,—

नन्द उवाच ।

"राहुग्रस्तः कथं सूर्यश्चन्द्रो वापि जगत्प्रभो ।
नक्षत्रैः कथं भाद्रे चतुर्थ्यामसितेतरे ।
वेदानां जगतश्चैव तं पृच्छामि त्वया विना ॥

श्रीभगवान् उवाच ।

शृणु नन्द प्रवक्ष्यामि कथामेतां पुरातनीम् ।
यां श्रुत्वा निष्कलङ्कश्च तीर्थस्नायी भवेन्नरः ॥
एकदा यमदग्निश्च महाकौतूहलान्वितः ।
रेणुकासहितस्तुष्टो जगाम नर्म्मदातटम् ।
निर्जने नर्म्मदातीरे विजहार तया सह ॥
चन्दनोचितसर्व्वाङ्गं वल्कलाम्बरधारिणम् ।
महाराजसवाटे तत्तवाच भास्करः स्वयम् ॥
वेदकर्त्तुः प्रपौत्रस्त्वं ब्रह्मणश्च जगत्पतेः ।
चतुर्ब्भेदविधेयेषु सुनिष्णातः सदा शुचिः ॥
वेदप्रणिहितो धर्म्मो ह्यधर्म्मस्तद्विपर्य्ययः ।
धर्म्मं त्वयति धर्म्मज्ञो अधर्म्मेण रतः कथम् ॥
दिवामैथुनदोषश्च वक्ति वेदो विशेषतः ।
अहश्च कर्म्मणां साक्षी तेन त्वां कथयामि ते ॥
सूर्यस्य वचनं श्रुत्वा तत्याज मैथुनं द्विजः ।
दृष्ट्वा पुरो विपरूपं सूर्यं तेजस्विनं शरम् ।

सूर्य:

उवाच सूर्यं रक्ताक्षः कोपलज्जासमन्वितः ॥
रेणुका लज्जिता तत्र विधाय वाससी सती ॥

यमदग्निरुवाच ।

अद्य मे निर्जनस्थाने रसभङ्गस्त्वया कृतः ।
मम शापात् पापदृष्टो राहुग्रस्तो भविष्यति ॥
द्रष्टुं त्वां मेघगणाः सर्व्वे दूरीभूता भवन्ति ते ।
त्वामाच्छन्नं करिष्यन्ति वायुना प्रेरितास्तथा ॥
स्वतेजसा भवान् गर्व्वी हृततेजा भविष्यति ।
मेघाच्छन्नः सदातेजा राहुग्रस्तो भवान् भव ॥
ब्राह्मणस्य वचः श्रुत्वा भगवान् भास्करः स्वयम् ।
उवाच प्रणताञ्जलिर्भूत्वा तुष्टाव सुनिपुङ्गवम् ॥

सूर्य उवाच ।

अहमेव त्वया शप्तो मया शप्तो भवान् भव ।
अन्यथा मां वदन्त्येवं सूर्यं निस्तेजसं जनाः ॥
पराभूतः क्षत्रियेण भविष्यसि द्विजेश्वरः ।
मरणं क्षत्रियास्त्रेण भवतश्च भविष्यति ॥
सूर्यस्य वचनं श्रुत्वा चुकोप ब्राह्मणः पुनः ।
तं शशापातिरक्ताक्षः शम्भुना च जितो भवान् ॥
उभयोः कलहं ज्ञात्वा कश्यपेन सह व्रजन् ।
आजगाम स्वयं ब्रह्मा विधाता जगतामपि ॥
आगत्य ब्रह्मा संचक्षे बोधयामास भास्करम् ।
मुनिश्रेष्ठश्च धर्म्मज्ञं धर्म्मज्ञानां गुरोर्गुरुः ॥

ब्रह्मोवाच ।

क्षमस्व भास्कर त्वञ्च साक्षान्नारायणो भवान् ।
युष्माकं परिपालयाप्यवध्यो ब्राह्मणः सदा ॥
अहं करोमि भवतो विप्रशापान्तमुत्तमम् ।
शान्तो भव सुरश्रेष्ठ साक्षी त्वं सर्व्वकर्म्मणाम् ॥
कुत्रचिद्दिवसे ब्रह्मन्नृतौ त्वं कुत्रचित् क्षणम् ।
भविष्यसि घनाच्छन्नः सदो मुक्तो भविष्यसि ॥
न्यूनातिरिक्ते वर्षे वा राहुग्रस्तो भविष्यसि ।
तत्राहृश्यश्च केषाञ्चित् पुण्यदृश्यो हि कस्यचित् ॥
अन्यथा सर्व्वकाले नापुण्यदृश्यो भवान् भुवि ।
त्वां दृष्ट्वा च नमस्कृत्य सर्व्वे निष्पापिनो जनाः ॥
जन्मसप्तारिपक्षाङ्गचतुर्थे दर्शने विधौ ।
जन्मर्क्षे निधने नृणां अदृश्यत्वं भविष्यति ॥
अक्षकाले घनाच्छन्ने मध्याह्ने जलेऽपि वा ।
अहोरात्रे च काले च पापदृष्टो भविष्यसि ॥
भार्य्यादुःखनिमित्तेन भार्य्या हेतुभूतया ।
श्वशुरेण श्यालकेन हृततेजा भविष्यसि ॥
अन्यथा तव तेजश्च शक्ता सहितुमक्षमा ।
मालिमुमालिमुद्दैत्यं शम्भुना त्वं पराजितः ॥
इत्येवमुक्त्वा सूर्य्यश्च बोधयामास ब्राह्मणम् ॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ।७८।१—५०॥

ब्रह्माण्डपुराणे ५६ अध्यायेऽप्येवमेव ॥

अथ सूर्यमन्त्राः ।

"नारो घृणिर्भगः पश्चाद्वामकर्णविभूषितः ।
वह्निजायो मयन्तु ग्रैवः सनेत्रोऽस्त्रिद्यषश्चिमः ।
अष्टाक्षरो मनुः प्रोक्तो मानोरभिमतः परः ॥"
ॐ घृणि सूर्य आदित्य । अस्य पूर्वा । प्रातः
ब्रह्मादिप्राणायामान्तंविधाय पीठन्यासं कुर्य्यात्
तत्र विन्यसेत् । हृदयस्य पूर्वादिदिक्षु मध्ये च ।

सूर्यः

प्रभूतं विमलं सारं समाराध्यं परमसुखं विज्ञाय आधारशक्त्यादि सूर्यमण्डलाय द्वादशकलात्मने नमः इत्यनेन विन्यसेत्। तथा च निगदे।

"मस्तके वदने च हृदयं दिक्षु मध्ये च संन्यसेत्।
प्रभूतं विमलं सारं समाराध्यमनन्तरम्।
परमादि सुखं पीठं सर्वविद्यात्मं प्रकल्पयेत्।
ततः केसरेषु मध्ये च सं सोमायै नमः।
इयं सौं सत्यायै तृं नित्यायै तें भद्रायै तैं विमलायै सौं विमलायै सौं अमोघायै पं विद्युतायै नः सर्वतोमुख्यै। तथा च निगदे।

"दीप्ता सूक्ष्मा जया भद्रा विभूतिर्विमला पुनः।
अमोघा विद्युता सर्वतोमुखी पीठशक्तयः।
सोमसौम्यशिखाकारान् सौम्यत्वाद्यान् विदुः क्रमात्।
त्यक्तोदकमणिनयनरान् विन्दुत्रिसंयुतान्।"

तद्यथा। ब्रह्मविष्णुशिवात्मकाय सौराय योगपीठाय नमः। तथा च शारदायाम्।

"पीठेतु पद्मं चतुरस्रं ब्रह्मविष्णुशिवात्मकम्।
सौराय योगपीठाय नमः पद्ममनन्तरम्।
पीठमनोन्मथमाकाशो दिनेशस्य नमस्यतेः।"

नमः अस्त्रादिभ्यः। शिरसि देवभास्कराय नमः। मुखे सावित्रीभास्कराय नमः। हृदि आदित्याय देवनाथाय नमः। निगदे।

"देवभासो मुखि प्रोक्तो सावित्री च्छन्द ईरितम्।
आदित्यो देवता प्रोक्तो हृदाद्यष्टकप्रदः।"

नमः करादिभ्यः। सत्याय तेजोज्वालामयं हूं फट् स्वाहा अङ्गुष्ठाभ्यां नमः। सर्वं ब्रह्मणे २० सर्वलोकाय स्वाहा। विष्णवे १० मध्यमाभ्यां वषट्। रुद्राय १० अनामिकाभ्यां हुम्। अग्नये १० कनिष्ठिकाभ्यां वौषट्। अन्तराय १० करतलपृष्ठाभ्यां फट्। एवं हृदयादिषु। तथा च शारदायाम्।

"सत्याय हृदयं प्रोक्तं ब्रह्मणे शिर इरितम्।
विष्णवे शिखाविद्यायै रुद्राय परिकीर्तितम्।
अग्नये देवभास्कराय सर्वायास्त्रमुदीरितम्।
अन्तरायास्त्रं हूं फट् विद्याताः परिकीर्तिताः।"

ततो मन्त्रिणः। तथा हिरण्यं ऊं आदित्याय नमः। सूर्यं हूं रवये। भूरसे हूं भास्कराय। भुवर्णः हूं सवित्रे। स्वः हूं सूर्याय। तथा च निगदे।

"आदित्यं तिमिरिघ्नं हूं रविं सुरगणं तथा।
भूरसे भास्करस्यार्थं भास्वरं भुवरीरितम्।
भूर्भुवःस्वरितैर्मन्त्रैः सत्यादिषडिभिः।"

ततो ब्रह्मणः। शिवाय ऊं ईं नमः। सूर्यं ऐं ए नमः। ब्रह्मणे ॐ ऐं नमः। भूरि ओं ए नमः। कूर्माय ऊं कें नमः। भानवे ओं आं नमः। शिवे ॐ हिं नमः। भास्वरे ऊं ह नमः। तथा च।

"सर्वोपचारद्रव्याणि शिवादिभ्यो निवेदयेत्।
ब्रह्मणोऽस्त्रेण सौरेण ब्रह्मणेन यथाक्रमम्।"

ततो विष्णवे।

सूर्यः

"रक्ताम्बुजासनमनेकगुणैकसिन्धुं
भानुं समस्तजगतामधिपं भजामि।
पद्मद्वयाभयवरान् दधतं कराब्जै-
र्माणिक्यमौलिमरुणाङ्गरुचिं त्रिनेत्रम्।"

एवं ध्यात्वा मानसैः संपूज्य अर्घस्थापनं कृत्वा पूर्वोक्तक्रमेण पीठपूजां विधाय मूर्तिमन्त्रेण मूर्तिं संकल्प्य पुनर्ध्यात्वा आवाहनादिपञ्चपुष्पाञ्जलिदानपर्यन्तं विधायावरणपूजामारभेत्। तथा च निगदे।

"तारादि नमो रवीन्द्राय मनुना मूर्तिकल्पना।
मानसं सर्वलोकानां तस्यामावाह्य पूजयेत्।"

केसरेष्वग्न्यादिकोणेषु मध्ये दिक्षु च सत्याय तेजोज्वालामयं हूं फट् स्वाहा हृदयाय नमः। सर्वं ब्रह्मणे शिरसे स्वाहा। विष्णवे शिखायै वषट्। रुद्राय कवचाय हुम्। अग्नये नेत्रत्रयाय वौषट्। सर्वाय अस्त्राय फट्। दिक्षुपत्रेषु पूर्वादि ॐ आदित्याय नमः। सर्वं हंरवये ऊं भानवे हूं भास्कराय। विदिक्षुपत्रेषु अग्न्यादि उं उषायै पं प्रज्ञायै पं प्रभायै सं सन्ध्यायै। तथा च।

"अङ्गानि पूजयेदादौ दिक्षुपत्रेष्वनुक्रमैः।
आदित्याद्याश्चतस्रोऽर्च्याः प्रकृतयः कोण-पत्रगाः।
सन्ध्यासामादिवर्णाः स्युस्तासां पीताम्बुजक्रमात्।
उषा प्रज्ञा प्रभा सन्ध्या प्रकृतयः परिकीर्तिताः।
ततः प्रधानेषु आत्मादाः संपूज्य पुरतोऽस्त्रमर्चयेत्। तथा च शारदायाम्।

"प्रधानमेवमात्मादाः पुरतोऽस्त्रमर्चयेत्।"

तदाज्ञां चन्द्रादीन् पूजयेत्। यथा चन्द्राय नमः। एवं मङ्गलाय बुधाय बृहस्पतये शुक्राय शनैश्चराय राहवे केतवे। तथा च शारदायाम्।

"चन्द्रादीन् पूजयेत्पश्चात् सत्यानर्चा ततो यजेत्।"

ततः इन्द्रादीन् वज्रादींश्च सम्पूज्य धूपादिनिवेदनान्तं कर्म समापयेत्। अस्य पुरश्चरणमन्त्रस्य। तथा च।

"वसुवर्णं अर्कमन्त्रं सप्तभिः शीरजादिनाम्।
सकलं प्रजपेद्वान् शीरान्नाभिर्जितेन्द्रियः।"

पात्रासिक्तथाश्वत्थसमिधोमः। तथा च शारदायाम्,

"आकाशमग्निरैन्द्रेषु संयुतं सूर्यमेश्वरे।
सप्तार्चिषो मनुमांसोत्थाक्षरोर्धं नमोन्तिमः।"

हौं हौं नमः। स्वाहा पूजाधरोमः। ततः ब्रह्मादिपूर्वेशानान्तेषु दिक्षु पत्रेषु पूजां विधाय पूर्वोक्तं अष्टाङ्गादिकां कुर्यात्। ततो 'मन्त्रयागः। तथा आधाराद्यैरात्मादर्कं हौं नमः। ब्रह्मादयायावरणकं हौं नमः। सर्वौकिकयावरणकं नमः। शारदायाम्।

"आधाराद्यैरात्मादर्कं ब्रह्मादयायावरणकं।
सर्वौकिकयावरणं समाहीत्यर्चनं भवेत्।"

नमः अस्त्रायनमः। हूं अङ्गुष्ठाभ्यां नमः। हौं सर्वशक्त्यै स्वाहा। हूं तर्जनीभ्यां वषट्। हौं अनन्तशक्त्यै हूं। हौं कनिष्ठाभ्यां

सूर्यः

वौषट्। हः करतलपृष्ठाभ्यां फट्। एवं हृदयादिषु। तथा च निगदे।

"षट्दीर्घभाजा मध्येन बीजेनाङ्गानि कल्पयेत्।"

ततो ध्यानम्।

"रक्ताम्बुजासनमनेकगुणैकसिन्धुं
भानुं समस्तजगतामधिपं भजामि।
पद्मद्वयाभयवरान् दधतं कराब्जै-
र्माणिक्यमौलिमरुणाङ्गरुचिं त्रिनेत्रम्।"

एवं ध्यात्वा मानसैः संपूज्य अर्घस्थापनं कृत्वा पूर्वोक्तक्रमेण पीठपूजां विधाय मूर्तिमन्त्रेण मूर्तिं संकल्प्य पुनर्ध्यात्वा आवाहनादिपञ्चपुष्पाञ्जलिदानपर्यन्तं विधायावरणपूजामारभेत्। अग्निनिर्ऋतिवायवीशानेषु मध्ये दिक्षु च हां हृदयाय नमः इत्यादिना पूजयेत्। मध्ये चन्द्रादीन् पूजयेत्। ततश्चन्द्रादीन् वज्रादीश्च पूजयेत्। ततो धूपादिविसर्जनान्तं कर्म समापयेत्। अस्य पुरश्चरणं द्वादशलक्षजपः। तथा च।

"भानुवर्णं अर्कमन्त्रमाप्तेन च दशांशतः।
तिलैर्जुहुयान्मधुराक्तैर्धूपाद्यन्तिमलिप्सयः।"

मन्त्रान्तरम्।

"आकाशमग्नियवनमन्त्रार्णैरविभूषितम्।
मार्तण्डभैरवं नाम बीजमेतदुदाहृतम्।
पुटितं विम्बबीजेन सर्वकामफलप्रदम्।"

विम्बबीजमाह।

"टान्तं दहनसंयुक्तमिदं सदुदाहृतम्।"

ह्रौं ह्रौं ह्रिम्। अस्य पूजाप्रयोगः। प्राग्वत्पूर्ववत् एतन्मन्त्रोक्तपीठन्यासान्तं कर्म विधाय ध्यानादिन्यासं कुर्यात्। ततो मूर्तिन्यासः। ह्रां मृत्यवे नमोऽङ्गुष्ठयोः। ह्रिं भास्कराय नमस्तर्जन्योः। ह्रूं भानवे नमः मध्यमयोः। ह्रैं रवये नमोऽनामिकयोः। ह्रौं दिवाकराय नमः कनिष्ठयोः। ततः शिरसि मुखे हृदये गुह्ये पादयोश्च साङ्गषडङ्गादिका न्यसेत्। तथा च निगदे।

"मस्तकवदनहृदयगुह्येषु पादयुग्मयोः प्रविन्यसेत्
अङ्गुष्ठादिकनिष्ठान्तं प्रकृतिषु क्रमादिमाः।
मृत्यवे भास्करो भानुस्तथा रविर्दिवाकरो।
शिरोवदनहृद्गुह्यपादेषु स्युः क्रमात्।"

ततः करादिभ्यः। ह्रां अङ्गुष्ठाभ्यां नमः। ह्रीं सर्वशक्त्यै स्वाहा। ह्रूं तर्जनीभ्यां वषट्। ह्रैं अनन्तशक्त्यै ह्रूं। ह्रौं कनिष्ठाभ्यां

ॐ ह्रीं सर्वाय सूर्यमण्डलाधिपतये सकल-
प्राणप्रतिष्ठां कुर्यात्।

एताभ्यामेवैर्ध्यानं विनयनपिलषदेवक्त्राभिरामं
मार्त्तण्डं वल्लभार्द्धं मणिमयमुकुटं चारदीप्तं
भजामः ॥"

एवं ध्यात्वा मानसैः सम्पुष्पार्घस्थापनं कुर्य्यात्। ततः पूर्व्वोक्तक्रमेण पीठं संपूज्य पूर्व्वादिदिक्षु कर्णिकायाम्। ॐ उषायै नमः। एवं पं प्रभायै पं प्रज्ञायै सं सन्ध्यायै इति संपूज्य मूर्त्तिं मूलेन कल्पयेत्। ततः पूर्व्वादिदिक्षु सूर्य्यं भास्करं भानुं रविञ्च पूजयेत्। कोणेषु दिवाकरम्। ततः पूर्व्वदक्षिणपश्चिमोत्तरेषु दिक्षु ह्रां हृदयाय नमः। इत्यादिना पूजयेत्। ईशाने ह्रौं नेत्रत्रयाय वौषट्। आग्नेयादिषु।

"सूर्य्यादीन् चतुरो दिक्षु विदिक्षूच्चं समर्च्चयेत्। अङ्गपूजा यथापूर्व्वा नेत्रमीशानदिग्गतम्॥"

ततः पूर्व्ववच्चन्द्रादिग्रहान् पूजयेत्। ततो लोकपालान् पूजयेत्। तथा च निबन्धे।

"अग्नानथो तथा वाय्वे लोकपालांस्ततः परम्॥"

ततो धूपादिविसर्ज्जनान्तं कर्म्म समापयेत्। अस्य पुरश्चरणञ्च लक्षत्रयसंख्यः। विल्वमधुरोपेतैः कमलैर्दशांशहोमः। तथा च।

"लक्षत्रयं जपेन्मन्त्री बीजं विल्वपुटीकृतम्।
दशांशं कमलैः पुण्यैर्जुहुयान्मधुरोक्षितैः॥
इमं मन्त्रं जपन्मर्त्यः कान्तिं पुत्रान् धनं द्युतिम्।
वाक्सिद्धिमभितां लक्ष्मीं सौभाग्यमपि साधयेत्॥"

इति तन्त्रसारः॥ ❀॥

अस्य प्राकारान्तरमन्त्रध्यानपूजादिकं भविष्यपुराणे ३६ अध्याये द्रष्टव्यम्॥ ❀॥ सूर्य्ये वर्ज्यनीयानि यथा। अक्षतता १ रविमणिप्रकाशः २ चक्रवाकप्रीतिः ३ पद्मप्रकाशः ४ पथिकप्रीतिः ५ लोचनप्रीतिः ६ तारार्क्षिः ७ चन्द्राप्रकाशः ८ दीपाप्रकाशः ९ ओषधप्रकाशः १० मेषार्क्षिः ११ तमोऽभावः १२ चौरार्क्षिः १३ क्षुद्रार्क्षिः १४ कृष्णार्क्षिः १५। इति कविकल्पलता॥

सूर्य्यकान्तः, पुं, (सूर्य्यः कान्तो यस्य। सूर्य्यस्य कान्तः प्रियो वा।) स्फटिकः। इति हेमचन्द्रः॥ मणिविशेषः। (यथा, रघुवंशे। ११। २१।

"ज्योतिरिन्धनविधौ निधाय भास्करात्
सूर्य्यकान्त इव ताडकान्तकः॥")

तत्पर्य्यायः। सूर्य्यमणिः २ रव्यश्मा ३ रवनीमः ४। इति हेमचन्द्रः। तपनमणिः ५ तापनः ६ रविकान्तः ७ दीप्तोपलः ८ अग्निगर्भः ९ ज्वलनाश्मा १० अर्कोपलः ११। अस्य गुणाः। शुक्लत्वम्। निर्म्मलत्वम्। दाहकत्वम्। वातपैत्तिकदोषत्वम्। मेधत्वम्। पूजनात्रविदिदत्वञ्च। इति राजनिर्घण्टः। पुण्यवृक्षविशेषः। तत्पर्य्यायः। सूर्य्यभक्तः २ पुण्यरसः ३ मधुपुष्पः ४। इति शब्दचन्द्रिका।

सूर्य्यकान्तिः, स्त्री, (सूर्य्यस्य कान्तिरिव कान्तिर्यस्याः।) पुष्पविशेषः। यथा,—

"सूर्य्यकान्तिस्तास्ववर्णा ओड्रपर्य्याय इत्यपि॥"
इति शब्दचन्द्रिका॥

सूर्य्यस्य दीप्तिश्च॥

सूर्य्यकालः, पुं, (सूर्य्येणोपलक्षितः कालः।) दिवसः। इति शब्दचन्द्रिका॥

सूर्य्यकालागलचक्रं, क्ली, नराणां शुभाशुभज्ञानार्थं नक्षत्रघटितचक्रविशेषः। यथा,—

"ऊर्द्धगाश्विचित्रमूलमाक्तसक्तिर्य्यत्रयस्थिताः।
द्वे द्वे नाड्यौ स्थिते कोणे ऋङ्नयुग्मं तदेकया॥
मध्यत्रिमूलदण्डादौ भानुभाद्यं भमण्डलम्।
साभिजित्तत्र दातव्यं सव्यमार्गेण सर्व्वदा॥
नाम ऋक्षं स्थितं यत्र ज्ञेयं तत्र शुभाशुभम्।
अधोगतैस्त्रिनक्षत्रैरहेगो वधबन्धनम्॥
रेखाष्टके जयो लाभ ऋक्षषट्के तथा पुनः।
ऋङ्नयुग्मे रुजाभङ्गो मृत्युः मूलत्रये स्फुटम्॥
विवादे व्यसने युद्धे रोगार्त्ते गमने तथा।
सूर्य्यकालागलं चक्रं ज्ञातव्यन्तु प्रयत्नतः॥"

इति स्वरोदयः॥

सूर्य्यग्रहः, पुं, (सूर्य्यरूपो ग्रहः।) नवग्रहाणां प्रथमग्रहः। (सूर्य्यस्य ग्रहः ग्रहणम्।) सूर्य्योपरागः। यथा, गारुडे।

"सूर्य्यग्रहः सूर्य्यवारे सोमे सोमग्रहो भवेत्।
चूड़ामणिरयं योगस्तत्रानन्तफलं स्नृतम्॥"

इति तिथ्यादितत्त्वम्॥

सूर्य्यग्रहणं, क्ली, (सूर्य्यस्य ग्रहणम्।) सूर्य्योपरागः। तत्कारणं यथा, वह्निपुराणे ग्रहभेदनामाध्याये।

"सूर्य्येन्दोरुपरागस्तु गोलकच्छायया भवेत्।
अन्योन्ययोस्तयोरेव व्यत्ययोरेव कारणात्॥
त्रासमोक्षौ तु जायेते तत्रातः पूर्व्वपश्चिमौ।
तत्र पुण्यफलाद्यागः स्नानो दानोक्त विष्णुना॥"

अन्यत् ग्रहणशब्दे द्रष्टव्यम्॥

सूर्य्यज, पुं, (सूर्य्यात् जायते इति। जन + डः।) सुग्रीववानरः। इति जटाधरः॥ शनिग्रहः। (यथा, हरिवंशे विष्णुपर्व्वणि। १०४। ४४।

"गच्छत्यधानं सप्तमे चाष्टमे च
हीनः स्त्रीपुत्रैः सूर्य्यजे दीनचेष्टः॥"

यमः। मनुः। रेवन्तः। कर्णश्च॥)

सूर्य्यजा, स्त्री (सूर्य्यात् जायते इति। जन + डः। टाप्।) यमुना नदी। इति हेमचन्द्रः॥

सूर्य्यतनयः, पुं, (सूर्य्यस्य तनयः।) शनैश्चरग्रहः। यमः। (सावर्णिमनुः। रेवन्तः।) यथा,—

"तस्य पत्नीत्रयस्तत्र संज्ञा राज्ञी प्रभा तथा।
रेवतस्य सुता राज्ञी रेवन्तं सुषुवे सुतम्॥
प्रभा प्रभातं सुषुवे लाज्ञी संज्ञा तथा मनुम्।
यमञ्च यमुना चैव यमजौ तु बभूवतुः॥
तनयामास तत्रान्तु पुत्रञ्च मनुरुत्तमम्।
नवमेऽन्तरे सावर्णिर्मनोर्वैवस्वतस्य च॥
ततः शनिश्च तपतो विशिष्टेन क्रमेण तु।
छायायां जनयामास यजेयमिति भास्करः॥"

इति मानसे ११ अध्यायः॥

(पाण्डवराजः सुग्रीवः। कर्णश्च॥)

सूर्य्यतनया, स्त्री, (सूर्य्यस्य तनया।) यमुना नदी। इत्यमरः। १। १०। ३२॥

सूर्य्यपत्रः, पुं, (सूर्य्य इव तीक्ष्णं पत्रमस्य।) आदित्यपत्रः। इति राजनिर्घण्टः॥

सूर्य्यपुत्रः, पुं, (सूर्य्यस्य पुत्रः।) वरुणः। अग्निः। इति केचित्॥ (यथा, महाभारते। ६। ३। १३।

"महाखड्गधरो वक्रः अक्षयी च दृढ़व्रतिः।
भार्य्यं नक्षत्रमाक्रम्य सूर्य्यपुत्रेण पीड्यते॥")

यमः। यथा,—

"धर्म्मराज नमस्तुभ्यं नमस्ते यमुनाग्रज।
पाहि मां किङ्करैः सार्द्धं सूर्य्यपुत्र नमोऽस्तु ते॥"

इति तिथ्यादितत्त्वम्॥

(अश्विनीकुमारौ। यथा, महाभारते। १३। १५७। १६।

"पिबेतामश्विनौ सोमं भवद्भिः सहितावुभौ।
उभावेतावपि सुरौ सूर्य्यपुत्रौ सुरेश्वर!॥")

अन्यत् सूर्य्यतनयशब्दे द्रष्टव्यम्॥

सूर्य्यपुत्री, स्त्री, (सूर्य्यस्य पुत्री।) यमुना। यथा, महाभारते।

"यमस्वसर्नमस्तेऽस्तु यमुने लोकपूजिते।
वरदा भव मे नित्यं सूर्य्यपुत्रि नमोऽस्तु ते॥"

इति तिथ्यादितत्त्वम्॥

विद्युत्। इति केचित्॥

सूर्य्यफणिचक्रं, क्ली, सर्व्वकार्य्यशुभाशुभज्ञापकचक्रविशेषः। यथा,—

"सप्तविंशतिभान्यत्र षड्वृत्तियुक्तया क्रमेण तु।
त्रान्तरत्रान्तरे वेधः फणिचक्रं त्रिनाड़िकम्॥
यत्र ऋक्षे स्थितो भानुर्भेदादौ गण्यवेद्बुधः।
नाम ऋक्षं स्थितं यत्र ज्ञेयं तत्र शुभाशुभम्॥
कुर्य्यान्मृत्युञ्च रोगञ्च नाड़ीवेधगतं त्र्यम्।
वर्ज्जयेत् सर्व्वकार्य्येषु युद्धकाले विशेषतः॥
निर्व्वेधऋक्षमध्यस्थं यस्य नाम प्रजायते।
सिध्यन्ति सर्व्वकार्य्याणि संग्रामे च जयो भवेत्॥"

इति स्वरोदयः॥

सूर्य्यभक्तः, पुं, (सूर्य्यस्य भक्तः प्रियः।) पन्नूकपुष्पवृक्षः। सूर्य्यपूजके, त्रि। इति मेदिनी॥

सूर्य्यभक्तकः, पुं, (सूर्य्यभक्त एव। स्वार्थे कन्।) पन्नूकपुष्पवृक्षः। इति शब्दमाला॥ सूर्य्यपूजके, त्रि॥

सूर्य्यमणिः, पुं, (सूर्य्यः प्रियो मणिः।) सूर्य्यकान्तमणिः। इति हेमचन्द्रः॥ पुण्यवृक्षविशेषः। यथा, शब्दचन्द्रिकायाम्।

"सूर्य्यकान्तः सूर्य्यमणिः पुण्यरक्तः पचम्पटः॥"

सूर्य्यमण्डलं, क्ली, (सूर्य्यस्य मण्डलम्।) सूर्य्यसन्निधिवेष्टनम्। तत्पर्य्यायः। परिवेषः २ परिधिः ३ उपसूर्य्यकम् ४ मण्डलम् ५। इत्यमरः। १। ३। ३२॥ यथा,—

"छायाङ्गे शिखरस्पार्श्वे दृष्टा दृषदवाहिनीम्।
सूर्य्यमण्डलमध्यस्थां गामवेदमभाषताम्॥"

इत्याह्निकतत्त्वम्॥

सूर्य्यलता, स्त्री, (सूर्य्यप्रिया लता।) व्याघ्रनखा। इति राजनिर्घण्टः॥

सूर्यलोकः, पुं, (सूर्यस्य लोकः।) सौरभुवनम्। यथा,—
"त्रिभिर्यथैर्विना वेदैर्विना पत्न्यपरिग्रहैः।
कालेन निधनं प्राप्य सूर्यलोके महीयते॥"
इति काशीखण्डे सूर्यार्च्चादानफलम्॥
अपि च।
"सौरं लोकमथावाप्य चक्रेण स विमानगः।
यथा कदम्बकुसुमं किञ्जल्कैः सर्व्वतोवृतम्॥
दीप्यमानं हि तथा समन्ताद्रश्मिभासुभिः।
दूरादविं स विज्ञाय धृतसारसहायम्॥
नवभिर्योजनानाञ्च सहस्रैः सम्मितेन च।
विचित्रैरेकचक्रेण सप्तसप्तियुतेन च॥
अनूरुणाधिष्ठितेन सर्व्वतो धृतरश्मिना।
अक्षरोसङ्गिगन्धर्व्वसर्पग्रामणिनेर्व्वृते॥
स्यन्दनेनातिवेगेन प्रणाम ज्ञताञ्जलिः।
तस्य प्रणामं देवोऽपि भूभङ्गेनानुमन्य च।
अतिदूरं नभोवर्त्म प्रतिचक्राम स च्यवात्॥
प्रक्रान्ते द्युमणौ दूरं शिवधर्म्मातिशर्म्मवान्।
प्रोवाच भगवद्दृष्ट्यौ कथं लभ्यं रवेः पदम्॥"
इति स्कन्दपुराणे काशीखण्डे सूर्यलोकवर्णनं नाम ६ अध्यायः॥

सूर्यवंशः, पुं, (सूर्यस्य वंशः।) सूर्यस्य सन्तानः। तद्विवरणं यथा। परमेश्वरात् ब्रह्मा जातः। तस्य पुत्रो मरीचिः। तस्य कश्यपः। तस्य सूर्य्यः। तस्य वैवस्वतो मनुः। सत्ययुगे मनुरेव राजासीत्। त्रेतायुगे तस्य पुत्रः इक्ष्वाकुः अयोध्यायां राजासीत्। अस्मिन् युगे अतिदीर्घायुषो राजानो बहुकालं राज्यं कृतवन्तः। द्वापरयुगे सन्धौ श्रीरामचन्द्रो दशरथसुतरूपेण अवतीर्णः। द्वापरयुगस्य प्रथमे तस्य पुत्रः कुशो जातः। तदंशाः सुमित्रान्ताः कलेः सहस्रवर्षपर्य्यन्तं राज्यं कृतवन्तः एतत्पर्य्यन्तं सूर्य्यवंशविद्यान्तिः। पुनः सत्ययुगे मनुः नष्टं सूर्य्यवंशं भावयिष्यति। यः योगसिद्धः सन् कलापग्रामे आस्ते। इति श्रीभागवतमतम्। त्रेतायुगेविस्तारस्तु मत्स्यपुराणे ११ अध्यायादौ गरुडपुराणे १३३ अध्याये च द्रष्टव्यः॥

सूर्यसखी, स्त्री, (सूर्यप्रिया चासौ सखी।) चक्रपुष्पिकावृक्षः। इति रत्नमाला॥

सूर्यसंज्ञा, स्त्री, (सूर्यस्य संज्ञा संज्ञा यस्याः।) कङ्कुमम्। इति त्रिकाण्डशेषः। (पुं, अर्कवृक्षः। यथा, भट्टौ। ८। ४। ८०।)

सूर्यसारथिः, पुं, (सूर्यस्य सारथिः।) अरुणः। इति शब्दरत्नावली। (यदुक्तं महाभारते। १।१६।२७।
"अरुणो दृश्यते श्रीमान् प्रभानसमये सदा।
आदित्यरथमध्यास्ते सारथ्यं समकल्पयत्॥")

सूर्यहृदय, क्लीं, (सूर्यस्य हृदयमिव।) सूर्यस्य स्तवविशेषः। यथा,—
"अथोपसिष्ठेदादित्यहृदयं समाहितः।
सर्व्वेषु विषयेषु शौर्यदेहयशःसमन्वितः॥
उपसाय महाबाहो देवदेवं दिवाकरम्।
जुहोति मन्त्रतः भक्त्या सदा नियत मानसः॥
ॐ खं खखोल्काय शान्ताय कारणत्रयहेतवे।
निवेदयामि चात्मानं नमस्ते ज्ञानरूपिणे॥
क्वचित् पुस्तके खखोल्कायेति च पाठः।
नमस्ते रुद्रिणे तुभ्यं सूर्य्याय ब्रह्मरूपिणे।
त्वमेव ब्रह्म परममापो ज्योती रसोऽमृतम्॥
भूर्भुवः स्वस्त्रयोङ्कारः सर्व्वे ऋचः सनातनाः।
पुरुषः सम्महोऽतस्त्वां प्रणमामि कपर्द्दिनम्॥
त्वमेव विश्वं बहुधा जातं वै जायते च न।
नमो रुद्राय सूर्य्याय त्वामहं शरणं गतः॥
प्रचेतसे नमस्तुभ्यमुमायाः पतये नमः।
नमो नमस्ते रुद्राय त्वामहं शरणं गतः॥
हिरण्यबाहवे तुभ्यं हिरण्यपतये नमः।
अम्बिकापतये तुभ्यमुमायाः पतये नमः॥
नमस्ते नीलकण्ठाय नमस्तुभ्यं पिनाकिने।
विलोहिताय भर्गाय सहस्राक्षाय ते नमः॥
नमो हंसाय ते नित्यं आदित्याय नमोऽस्तु ते।
प्रपद्ये त्वां विरूपाक्ष महतं परमेश्वरम्॥
हिरण्मये गृहे गुप्तमात्मानं सर्व्वदेहिनाम्।
नमस्यामि परं ज्योतिर्न्नक्षत्राणां त्वां परायणम्॥
विश्वं पशुपतिं भीमं नरनारीशरीरिणम्।
नमः सूर्य्याय रुद्राय भास्वते परमेष्ठिने॥
उग्राय सर्व्वभक्षाय त्वां प्रपद्ये सदैव हि॥
एतद्वै सूर्य्यहृदयं जप्यं स्तवमनुत्तमम्।
प्रातःकालेऽथ मध्याह्ने नमस्कुर्य्याद्दिवाकरम्॥
इदं पुत्राय शिष्याय धार्म्मिकाय द्विजातये।
प्रदेयं सूर्य्यहृदयं ब्रह्मणा तु प्रदर्शितम्॥
सर्व्वपापप्रशमनं वेदसारं समुद्धृतम्।
ब्राह्मणानां हितं पुण्यं ऋषिसङ्घैर्निषेवितम्॥
यस्तु नित्यं पठेद्धीमान् प्रेक्षन्नादित्यमण्डलम्।
महापातकयुक्तोऽपि पूयते नात्र संशयः॥
व्यपमारकुष्ठाद्यैर्व्याधिभिः पीड़ितोऽपि सन्।
जप्या प्रतयुगं स्तोत्रं स ह्याधो भवति द्रुतम्॥
भूतप्रेतपिशाचादिवीजयन्त्रकर्म्मभिः।
स्तुवन् ध्यात्वा हरिं विप्रो सुखते महतो भयात्॥"
इति कूर्म्मपुराणे उपविभागे १७ अध्यायः॥
गारुड़े पू० अध्याये चैतद्दृश्यम्॥ (भविष्योत्तरोक्तसूर्य्यहृदयन्तु बहुभिः समादियते पठ्यते च अतस्तत् सप्रक्रियमुच्यते। अथ आदित्यहृदयारम्भः। आचम्य देशकालौ संकीर्त्य ममारोग्यावाप्तये श्रीसवितासूर्य्यनारायणप्रीत्यर्थं हादृशनमस्कारात्मकं कर्म करिष्ये। अथ ध्यानम्।
"ध्येयः सदा सवितृमण्डलमध्यवर्त्ती
नारायणः सरसिजासनसन्निविष्टः।
केयूरवान् मकरकुण्डलवान् किरीटी
हारी हिरण्मयवपुर्धृतशङ्खचक्रः॥
एकचक्रो रथो यस्य दिव्यः कनकभूषितः।
स मे भवतु सुप्रीतः पद्महस्तो दिवाकरः॥"
मित्राय नमः। रवये नमः। सूर्य्याय नमः। भानवे नमः। खगाय नमः। पूष्णे नमः। हिरण्यगर्भाय नमः। मरीचये नमः। आदित्याय नमः। सवित्रे नमः। अर्काय नमः। भास्कराय नमः।
"नमः सवित्रे जगदेकचक्षुषे
जगत्प्रसूतिस्थितिनाशहेतवे।
त्रयीमयाय त्रिगुणात्मधारिणे
विरिञ्चिनारायणशङ्करात्मने॥
नमोऽस्तु सूर्य्याय सहस्रशक्तये
सहस्रशाखान्वितसम्भवात्मने।
सहस्रयोगोद्भवभावभागिने
सहस्रसङ्ख्यायुगधारिणे नमः॥
आदित्यस्य नमस्कारं ये कुर्व्वन्ति दिने दिने।
जन्मान्तरसहस्रेषु दारिद्र्यं नोपजायते॥
इति नमस्काराः॥

शतानिक उवाच।
"कथमादित्यमुद्यन्तमुपतिष्ठेद्विचोत्तम।
एतन्मे ब्रूहि विप्रेन्द्र प्रपद्ये शरणं तव॥
सुमन्तुरुवाच।
इदमेव पुरा पृष्टः शंखचक्रगदाधरः।
प्रणम्य शिरसा देवमर्জ্জুनेन महात्मना॥
कुरुक्षेत्रे महाराज निहत्ते भारते रणे।
कृष्णनाथं समासाद्य प्राथयित्वाब्रवीदिदम्॥
अर्জ্জুन उवाच।
ज्ञानञ्च धर्म्मशास्त्राणां गुह्यागुह्यतरं तथा।
मया कृष्ण परिज्ञातं वाङ्मयं सचराचरम्॥
सूर्य्यस्तुतिमथं व्यासं वक्तुमर्हसि माधव।
भक्त्या पृच्छामि देवेश कथयस्व प्रसादतः॥
सूर्य्यभक्तिं करिष्यामि कथं सूर्य्यं प्रपूजयेत्।
तदहं श्रोतुमिच्छामि त्वत्प्रसादेन यादव॥
श्रीभगवानुवाच।
रुद्रादिदेवतैः सर्व्वैः पृष्टेन कथितं मया।
वक्ष्येऽहं सूर्य्यविन्यासं शृणु पाण्डव यत्नतः॥
अस्यार्कं वत्सया पृष्टमेकचित्तो भवार्জ্জुन।
तदहं सम्प्रवक्ष्यामि आदिमध्यवसानकम्॥
अर्জ্জुन उवाच।
नारायण सुरश्रेष्ठ पृच्छामि त्वां महायशाः।
कथमादित्यमुद्यन्तमुपतिष्ठेत् सनातनम्॥
श्रीभगवानुवाच।
साधु पार्थ महाबाहो बुद्धिमानसि पाण्डव।
यस्मां पृच्छस्युपस्थानं तत् पवित्रं विभावसोः॥
सर्व्वमङ्गलमाङ्गल्यं सर्व्वपापप्रणाशनम्।
सर्व्वरोगप्रशमनमायुर्व्वर्धनमुत्तमम्॥
अमित्रदमनं पार्थ संग्रामे जयवर्द्धनम्।
वर्द्धनं धनपुत्राणामादित्यहृदयं शृणु॥
यच्छ्रुत्वा सर्व्वपापेभ्यो मुच्यते नात्र संशयः।
त्रिषु लोकेषु विख्यातं निःश्रेयसकरं परम्॥
देवदेवं नमस्कृत्य प्रातरुत्थाय पार्জ্জुन।
विघ्नान्यनेकरूपाणि नश्यन्ति नरकादपि॥
तस्मात् सर्व्वप्रयत्नेन सूर्य्यमेवाहयेत् सदा।
आदित्यहृदयं नित्यं जाप्यं वृष्ण्यं शृणु पाण्डव॥
यच्चापाकुरुते जन्तुर्दारिद्र्यादादु दुस्तरात्।
लभते च महासिद्धिं कुष्ठव्याधिविनाशिनीम्॥
अस्मिन् मन्त्रे ऋषिश्छन्दोदैवताक्तिरेव च।
सर्व्वमेव महाबाहो कथयामि तवाग्रतः॥
मया ते गोपितं न्यासं सर्व्वशास्त्रप्रबोधितम्।

अथ ते कथयिष्यामि उत्तमं मन्त्रमेव च ॥"
ॐ अस्य श्रीआदित्यहृदयस्तोत्रमन्त्रस्य । श्रीकृष्ण ऋषिः । श्रीसूर्यात्मा त्रिभुवनेश्वरो देवता । अनुष्टुप् छन्दः । हरितहयरथं दिवाकरं हृषिरिति बीजम् । ॐ नमो भगवते वित-वैश्वानरजातवेदसे इति शक्तिः । ॐ नमो भगवते आदित्याय नम इति कीलकम् ॥ ॐ अग्निगर्भदेवता इति मन्त्रः ॥ ॐ नमो भगवते तुभ्यमादित्याय नमो नमः । श्रीसूर्य नारायणप्रीत्यर्थे जपे विनियोगः । अथ न्यासः । ॐ हृां अङ्गुष्ठाभ्यां नमः । ॐ हृीं तर्जनीभ्यां नमः । ॐ हृूं मध्यमाभ्यां नमः । ॐ हृैं अना-मिकाभ्यां नमः । ॐ हृौं कनिष्ठिकाभ्यां नमः । ॐ हृः करतलकरपृष्ठाभ्यां नमः । ॐ हृां हृदयाय नमः । ॐ हृीं शिरसे स्वाहा । ॐ हृूं शिखायै वषट् । ॐ हृैं कवचाय हुम् । ॐ हृौं नेत्रप्रयाय वौषट् । ॐ हृः अस्त्राय फट् । ॐ हृां हृीं हृूं हृैं हृौं हृः । इति दिग्बन्धः ॥ अथ ध्यानम् ।

'भास्वद्रत्नाढ्यमौलिं स्फुरदधररुचा रञ्जितं चारुकेशं
भास्वन्तं दिव्यतेजः करकमलयुतं स्वर्णवर्ण-
प्रभाभिः ।
विश्वाकाशावकाशग्रहपतिशिखरे भाति
यद्योदयाद्रौ
सर्वानन्दप्रदाता हरिहरनमितः पातु मां
विश्वचक्षुः ॥

पूर्वमष्टदलं पद्मं प्रणवादिप्रतिष्ठितम् ।
मायाबीजं दलाष्टाग्रे यन्त्रमुद्धारयेदिति ॥
आदित्यं भास्करं भानुं रविं सूर्यं दिवाकरम् ।
मार्तण्डं तपनं चेति दलेष्वस्तु योजयेत् ॥
दीप्ता सूक्ष्मा जया भद्रा विभूतिर्विमला तथा ।
अमोघा विद्युता चेति मध्ये श्रीः सर्वतोमुखी ॥
सर्वज्ञः सर्वगश्चैव सर्वकारणदेवता ।
सर्वेशं सर्वहृदयं नमामि सर्वसाक्षिणम् ॥
सर्वात्मा सर्वकर्ता च सृष्टिजीवनपालकः ।
हितः स्वर्गापवर्गश्च भास्करेश नमोऽस्तु ते ॥"
इति प्रार्थना ॥

"नमो नमोऽस्तु सदा विभावसो
सर्वात्मने सप्तहयाय भानवे ।
अनन्तशक्तिर्नवभूषणेन
ददस्व मुक्तिं मम मुक्तिमव्ययाम् ॥

अर्कन्तु मूर्ध्नि विन्यस्य ललाटे तु रविं न्यसेत् ।
विन्यसेन्नेत्रयोः सूर्यं कर्णयोश्च दिवाकरम् ॥
नासिकायां न्यसेद्भानुं मुखे वै भास्करं न्यसेत् ।
पर्जन्यमोष्ठयोश्चैव तीक्ष्णं जिह्वान्तरं न्यसेत् ॥
सुवर्णरेतसं कण्ठे स्कन्धयोस्त्विन्द्रतेजसम् ।
बाहोस्तु पूषणं चैव मित्रं वै पृष्ठतो न्यसेत् ॥
वरुणं दक्षिणे हस्ते त्वष्टारं वामतः करे ।
हस्ताङ्गुलकरः पातु सूर्यं पातु भानुमान् ।
उदरे तु यमं विन्यादादित्यं नाभिमण्डले ।
कट्यां तु विन्यसेद्धातं सदसवांस्तु विन्यसेत् ॥
जान्वोस्तु गोपतिं न्यस्य सवितारन्तु जङ्घयोः ।
पादयोश्च विवस्वन्तं गुल्फयोश्च दिवाकरम् ॥
बाह्यतस्तु तमोध्वंसं भगमभ्यन्तरे न्यसेत् ।
सर्वाङ्गेषु सहस्रांशुं दिग्विदिक्षु भगं न्यसेत् ॥"
इति दिग्बन्धः ॥

"एष आदित्यविद्यासा देवानामपि दुर्लभः ।
इमं भक्त्या न्यसेत् पार्थ स याति परमां गतिम् ॥
कामक्रोधकृतात् पापात् मुच्यते नात्र संशयः ।
सर्पादपि भयं नैव संग्रामेषु प्रविध्वपि ॥
रिपुसंघट्टकालेषु तथा चोरसमागमे ।
त्रिसन्ध्यं जपतो न्यासं महापातकनाशनम् ॥
विस्फोटकसमुत्पन्नं तीव्रज्वरसमुद्भवम् ।
शिरोरोगं नेत्ररोगं सर्वव्याधिनिनाशनम् ॥
कुष्ठव्याधिस्तथा दद्रुरोगाश्च विविधाश्च ये ।
जपमानस्य नश्यन्ति ह्रस्व भक्त्या तदर्जुन ॥
आदित्यो मन्त्रसंयुक्त आदित्यो भुवनेश्वरः ॥
आदित्यान्नापरो देवो ह्यादित्यः परमेश्वरः ॥
आदित्यमर्चयेद् ब्रह्मा शिव आदित्यमर्चयेत् ।
यदादित्यमयं तेजो मम तेजस्तदर्जुन ॥
आदित्यं मन्त्रसंयुक्तमादित्यं भुवनेश्वरम् ।
आदित्यं ये प्रपश्यन्ति मां पश्यन्ति न संशयः ॥
त्रिसन्ध्यमर्चयेत् सूर्यं स्मरेद्भक्त्या तु यो नरः ।
न स पश्यति दारिद्र्यं जन्मजन्मनि चार्जुन ॥
एतत्ते कथितं पार्थ आदित्यहृदयं मया ।
ह्रस्वस्मुक्ता च पार्थेभ्यः सूर्यलोके महीयते ॥
ॐनमो भगवते तुभ्यमादित्याय नमो नमः ।
आदित्यः सविता सूर्यः खगः पूषा गभस्तिमान् ॥
सुवर्णः स्फाटिको भानुः स्फुरितो विश्वतापनः ।
रविर्विश्वो महातेजाः सुवर्णः सुप्रबोधकः ॥
हिरण्यगर्भस्त्रिशिरास्तपनो भास्करो रविः ।
मार्तण्डो गोपतिः श्रीमान् कृतज्ञश्च प्रतापवान् ॥
तमिस्रहा भगी हंसो नासत्यश्च तमोनुदः ।
शुद्धो विरोचनः कैशी सहस्रांशुर्महाप्रभुः ॥
विवस्वान् पूषणो ह्यर्कुर्मिहिरो रामदग्न्यजित् ।
धर्मरश्मिः पतङ्गश्च शरण्योऽमिततपः ॥
दुर्निरीक्ष्यगतिः शूरस्तेजोराशिर्महाद्युतिः ।
ग्रस्तुचिताङ्गदः सौम्यो ह्यकल्यप्रदायकः ॥
अंशुमालुत्तमो देव ऋग्यजुः साम एव च ।
हरिदश्वस्तमोदारः सप्तसप्तिर्मरीचिमान् ॥
अग्निगर्भोऽदितेः पुत्रः शम्भुस्त्विष्टकृतां वरः ।
पूषा विश्वम्भरो मित्रः सुवर्णः सुप्रतापवान् ॥
आतपी मण्डली भास्वान् तपनः सर्वतापनः ।
हतविश्वो महातेजाः सर्वरत्नमयोद्भवः ॥
अक्षरश्च चरश्चैव प्रभाकरविभाकरौ ।
चन्द्रश्चन्द्राङ्गदः सौम्यो ह्यकल्यप्रदायकः ॥
अङ्गारकोऽङ्गदोऽग्नी रक्ताङ्गश्चाङ्गवर्तनः ।
बुधो बुद्धासनो बुद्धिर्बुद्धात्मा बुद्धिवर्धनः ॥
बृहद्भानुर्बृहद्भासो बृहद्भामा बृहस्पतिः ।
शुक्रस्त्वं शुक्रदेवास्त्वं शुक्राङ्गः शुक्रभूषणः ॥
शनिमान् शनिरूपस्त्वं शनैश्चरसि सर्वदा ।
अनादिरादिरादित्यस्तेजोराशिर्महातमाः ॥
अनादिरादिरूपस्त्वमादित्यो दिक्पतिर्यमः ।
भानुमान् भानुरूपस्त्वं स्वर्भानुर्भानुदीप्तिमान् ॥
धूमकेतुर्गणाध्यक्षः केतुः सर्वकेतुरनुत्तमः ।
तिमिरारयः शम्भुः स्थाणुः स्थाता मार्तण्ड एव च ॥
नमः पूर्वाय गिरये पश्चिमाय नमो नमः ।
नमोत्तराय गिरये दक्षिणाय नमो नमः ॥
नमो नमः सहस्रांशो ह्यादित्याय नमो नमः ।
नमः पद्मप्रबोधाय नमस्ते द्वादशात्मने ॥
नमो विश्वप्रबोधाय नमो भास्करशक्तये ।
ज्योतिषे च नमस्तुभ्यं ज्ञानार्काय नमो नमः ॥
प्रदीप्ताय प्रगल्भाय युगान्ताय नमो नमः ।
नमस्ते होलपतये पृथिवीपतये नमः ॥
नमोङ्कार वषट्कार सर्वयज्ञ नमोऽस्तु ते ।
ऋग्वेदादि यजुर्वेद सामवेद नमोऽस्तु ते ॥
नमो हाटकवर्णाय भास्कराय नमो नमः ।
जयाय जयभद्राय हरिदश्वाय ते नमः ॥
दिव्याय दिव्यरूपाय ग्रहाणां पतये नमः ।
नमस्ते शुचये नित्यं नमः क्रूर क्रूरात्मने ॥
नमः स्त्रैलोक्यनाथाय भूतानां पतये नमः ।
नमः कैवल्यनाथाय नमस्ते दिव्यचक्षुषे ॥
त्वं ज्योतिस्त्वं द्युतिर्ब्रह्मा त्वं विष्णुस्त्वं प्रजापतिः ।
त्वमेव रुद्रो रुद्रात्मा वायुरग्निस्त्वमेव च ॥
योजनानां सहस्रे द्वे द्वे शते द्वे च योजने ।
एकेन निमिषार्द्धेन क्रममाण नमोऽस्तु ते ॥
नवयोजनलक्षाणि सहस्रद्वितयानि च ।
यावद्घटीप्रमाणेन क्रममाण नमोऽस्तु ते ॥
अग्रतश्च नमस्तुभ्यं पृष्ठतश्च सदा नमः ।
पार्श्वतश्च नमस्तुभ्यं नमस्ते चासु सर्वदा ॥
नमः सुरारिहन्त्रे च सोमसूर्याग्निचक्षुषे ।
नमो दिवाय सोमाय सर्वतत्त्वमयाय च ॥
नमो वेदान्तवेद्याय सर्वकर्मादिसाक्षिणे ।
नमो हरितवर्णाय सुवर्णाय नमो नमः ॥
अरुणो भावमासे तु सूर्यो वै फाल्गुने तथा ।
चैत्रमासे तु वेदाङ्गो भानुर्वैशाखतापनः ॥
ज्येष्ठमासे तपेदिन्द्र आषाढे तपते रविः ॥
गभस्तिः श्रावणे मासि यमो भाद्रपदे तथा ॥
इषे सुवर्णरेताश्च कार्त्तिके च दिवाकरः ॥
मार्गशीर्षे तपेन्मित्रः पौषे विष्णुः सनातनः ॥
पुरुषस्त्वधिके मासे मासाधिपे तु कल्पयेत् ।
एते द्वादशादित्याः काश्यपेयाः प्रकीर्तिताः ॥
उग्ररूपा महात्मानस्तपन्ति विष्णुरूपिणः ।
धर्मार्थकाममोक्षाणां प्रस्फुटा हेतवो नृप ॥
सर्वपापहरश्चैवमादित्यं संप्रपूजयेत् ।
एकधा दशधा चैव शतधा च सहस्रधा ॥
तपन्ति विश्वरूपेण रक्षन्ति संहरन्ति च ।
एष विष्णुः शिवश्चैव ब्रह्मा चैव प्रजापतिः ॥
महेन्द्रश्चैव कालश्च यमो वरुण एव च ।
नक्षत्रग्रहताराणामधिपो विश्वतापनः ॥
वायुरग्निर्नभश्चन्द्रो भूतकर्ता स्वयं प्रभुः ।
एष देवो हि देवानां सर्वमाप्याययते जगत् ॥
एष कर्ता हि भूतानां संहर्ता रक्षकस्तथा ।
एष लोकानुलोकश्च समुद्रद्वीपाश्च सागराः ॥
एष पातालसप्तस्थो देवदानवराक्षसाः ।

एष धाता विधाता च वीजं चेत्रं प्रजापतिः ॥
एष एव प्रजा नित्यं संवर्द्धयति रश्मिभिः ।
एष यज्ञः स्वधा स्वाहा श्रीः श्रीश्च पुरुषोत्तमः ॥
एष भूतात्मको देवः सूक्ष्मो व्यक्तः सनातनः ।
ईश्वरः सर्वभूतानां परमेष्ठी प्रजापतिः ॥
कालात्मा सर्वभूतात्मा वेदात्मा विश्वतोमुखः ।
जन्ममृत्युजराव्याधिसंसारभयनाशनः ॥
दारिद्र्यव्यसनध्वंसी श्रीमान् देवो दिवाकरः ।
विकर्त्तनो विवस्वांश्च मार्त्तण्डो भास्करो रविः ॥
लोकप्रकाशकः श्रीमाँल्लोकचक्षुर्ग्रहेश्वरः ।
लोकसाक्षी त्रिलोकेशः कर्त्ता हर्त्ता तमिस्रहा ॥
तपनस्तापनश्चैव शुचिः सप्ताश्ववाहनः ।
गभस्तिहस्तो ब्रह्मण्यः सर्वदेवनमस्कृतः ॥
आयुरारोग्यमैश्वर्यं नरा नार्यश्च मन्दिरे ।
यस्य प्रसादात् मनुजस्तिरादित्यहृदयं जपेत् ॥
इत्येतैर्नामभिः पार्थ आदित्यं स्तौति नित्यशः ।
प्रातरुत्थाय कौन्तेय तस्य रोगभयं नहि ॥
पातकान्मुच्यते पार्थ व्याधिभ्यश्च न संशयः ।
एकसन्ध्यं द्विसन्ध्यं वा सर्वपापैः प्रमुच्यते ॥
त्रिसन्ध्यं जपमानस्तु पश्येच्च परमं पदम् ॥
यद्दहः कुरुते पापं तद्दहः प्रतिमुच्यते ॥
यद्रात्र्याः कुरुते पापं तद्रात्र्याः प्रतिमुच्यते ।
दुःस्वप्नोटककुष्ठानि मण्डलानि विसूचिका ॥
सर्वव्याधिमहारोगभूतबाधाश्चतैव च ॥
डाकिनी शाकिनी चैव महारोगभयं कृतः ॥
ये चान्ये दुष्टरोगाश्च ज्वरातीसारकादयः ।
जपमानस्य नश्यन्ति जीवेच्च शरदां शतम् ॥
संवत्सरेण मरणं यदा तस्य ध्रुवं भवेत् ।
व्याधीर्यो पश्यति च्छायामधीरात्वं धनक्षय ॥
यस्त्विदं पठते भक्त्या भानुवारे महात्मनः ।
प्रातःस्नाने कृते पार्थ एकाग्रकृतमानसः ॥
सुवर्णचक्षुर्भवति न चान्यस्तु प्रजायते ।
पुत्रवान् धनसम्पन्नो जायते चारुजः सुखी ॥
सर्वसिद्धिमवाप्नोति सर्वत्र विजयी भवेत् ।
आदित्यहृदयं पुण्यं सूर्यनामविभूषितम् ॥
श्रुत्वा च निखिलं पार्थ सर्वपापैः प्रमुच्यते ।
अतःपरतरं नास्ति सिद्धिकामस्य पाण्डव ॥
अतश्चास्य कौन्तेय येन श्रेयो ह्यवाप्स्यसि ।
आदित्यहृदयं नित्यं यः पठेत् समाहितः ॥
मुच्यते सुच्यते पापात् भ्रूणहा ब्रह्महा तथा ।
गोघ्नः सुरापो दुर्भागो दुश्चिन्त्यकारकः ॥
पातकानि च सर्वाणि दहत्येव न संशयः ।
य एवं जपमाप्तिकं जपेन्नरोपि समाहितः ॥
सर्वपापविशुद्धात्मा सूर्यलोके महीयते ।
अपुत्रो लभते पुत्रान् निर्धनो धनमाप्नुयात् ॥
दुरोगी मुच्यते रोगाद्भक्त्या यः पठते सदा ।
यस्मादित्यदिने पार्थ गामिभावत्रजेत् स्थितः ॥
तदर्थाचन्तमाश्रित्य भास्करं प्रणतः स्थितः ।
जपते भानवो भक्त्या ह्यरण्यादपि भक्तितः ॥
न याति परमं स्थानं यत्र देवो दिवाकरः ।
अभिषदमनं पार्थ यदा कर्त्तुं समारभेत् ॥
तदा प्रविश्यतं कृत्वा प्रणीय च यथाविधि ॥
आक्रम्य वामपादेन आदित्यहृदयं जपेत् ॥
एतन्मन्त्रं समाचृत्य सर्वसिद्धिकरं परम् ॥"
ॐ ह्रीं हिमालोटं स्वाहा । ॐ ह्रीं निलोटं स्वाहा । ॐ ह्रीं मालोटं स्वाहा । इति मन्त्रः ॥
"त्रिभिश्च रोगी भवति ज्वरी भवति पञ्चभिः ।
जपेत्तु सप्तभिः पार्थ राक्षसीं तनुमाविशेत् ॥
राक्षसीभिभूतस्य विकारान् शृणु पाण्डव ।
गीयते नृत्यते नग्न आस्फोटयति धावति ॥
शिवारुतञ्च कुरुते हसते क्रन्दते पुनः ।
एवं संपीड्यते पार्थ यद्यपि स्यान्महेश्वरः ॥
किंपुनर्मानुषः कश्चिच्छौचाचारविवर्जितः ।
पीड़ितस्य न संदेहो ज्वरो भवति दारुणः ॥
यदा चानुग्रहं तस्य कर्त्तुमिच्छेच्छुभङ्करम् ।
तदा सलिलमादाय जपेन्मन्त्रमिमम्बुधः ॥
नमो भगवते तुभ्यमादित्याय नमो नमः ।
जयाय जयभद्राय हरिदश्वाय ते नमः ॥
स्नापयेत्तेन मन्त्रेण शुभं भवति नान्यथा ॥
अन्यथा च भवेद्दोषो नश्यते नात्र संशयः ॥
अतस्ते निखिलः प्रोक्तः पूजाश्चैव निबोध मे ।
उपलिप्ते शुचौ देशे नियतो वाग्यतः शुचिः ॥
वृत्तं वा चतुरस्रं वा लिप्तभूमौ लिखेच्छुचिः ।
त्रिधा तत्र लिखेत् पद्ममष्टपत्रं सकर्णिकम् ॥
अष्टपत्रं लिखेत् पद्मं लिप्तगोमयमण्डले ।
पूर्वपत्रे लिखेत् सूर्यमाग्नेय्यान्तु रविं न्यसेत् ॥
याम्यायाञ्च विवस्वन्तं नैर्ऋत्यान्तु भगं न्यसेत् ।
प्रतीच्यां वरुणं विन्द्याद्वायव्यां मित्रमेव च ॥
आदित्यमुत्तरे पत्रे ईशान्यां विष्णुमेव च ।
मध्ये तु भास्करं विन्द्यात् क्रमेणैव समर्चयेत् ॥
अतःपरतरं नास्ति सिद्धिकामस्य पाण्डव ।
महातेजःसमुद्यन्तं प्रणमेत् सकृताञ्जलिः ॥
सकेसराणि पद्मानि करवीराणि चार्जुन ।
तिलतण्डुलमंयुक्तं कुशाग्रोदकेन च ॥
रक्तचन्दनमिश्राणि कृत्वा वै ताम्रभाजने ।
धृत्वा शिरसि तत्पात्रं जानुभ्यां धरणीं स्पृशेत् ॥
मन्त्रपूतं गुडाकेशं पार्थं दद्यान्नभस्तले ।
सायुधं सरथञ्चैव सूर्यमावाहयाम्यहम् ॥"
स्वागतो भव । सुप्रतिष्ठो भव । सन्निधो भव ।
सन्निहितो भव । सन्मुखो भव । इति पञ्चमुद्राः ॥
स्फुटयित्वार्घ्यं सूर्यं सूक्तं सूक्तं जपेन्नरः ॥
ॐ ह्रीं विद्मे किलिकिलि कटकेऽसर्व्वार्घ्य-
साधनाय स्वाहा । ॐ ह्रीं ह्रीं हः हंसः सूर्याय
नमः स्वाहा । ॐ ह्रीं ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः
सूर्यमूर्त्तये स्वाहा । ॐ ह्रीं ह्रीं खं खः लोकाय
सर्वमूर्त्तये स्वाहा । ॐ ह्रूं मार्त्तण्डाय स्वाहा ।
"नमोस्तु सूर्याय सहस्रभानवे
नमोस्तु वैश्वानर जातवेदसे ।
त्वमेव चार्घ्यं प्रतिगृह्ण देव
देवाधिदेवाय नमो नमस्ते ॥
नमो भगवते तुभ्यं नमस्ते जातवेदसे ।
इदमर्घ्यं मया भक्त्या दत्तं गृहाण नमोस्तु ते ॥
रश्मिं सूर्यसहस्रांशो तेजोराशे जगत्पते ।
अनुकम्पय मां देव गृहाणार्घ्यं नमोस्तु ते ।
नमो भगवते तुभ्यं नमस्ते जातवेदसे ।
ममेदमर्घ्यं गृह्ण त्वं देवदेव नमोस्तु ते ॥
सर्वदेवाय देवाय आधिव्याधिविनाशिने ।
इदं गृहाण मे देव सर्वव्याधिर्विनश्यतु ॥
नमः सूर्याय शान्ताय सर्वरोगविनाशिने ।
ममेप्सितं फलं दत्वा प्रसीद परमेश्वर ॥"
ॐ नमो भगवते सूर्याय स्वाहा । ॐ शिवाय
स्वाहा । ॐ सर्वात्मने सूर्याय नमः स्वाहा ।
ॐ अच्युततेजसे नमः स्वाहा ।
"सर्वसंकटदारिद्र्य शत्रु नाशय नाशय ।
सर्वलोकेषु विश्वात्मा सर्वात्मा सर्वदर्शकः ॥
नमो भगवते सूर्य कुष्ठरोगान् विनाशय ।
आयुरारोग्यमैश्वर्यं देहि देव नमोस्तु ते ॥
नमो भगवते तुभ्यमादित्याय नमो नमः ॥"
ॐ अच्युततेजसे नमः । ॐ सूर्याय नमः ।
ॐ विश्वमूर्त्तये नमः ।
"आदित्यश्च शिवं विन्द्याच्छिवमादित्यरूपिणम् ।
उभयोरन्तरं नास्ति आदित्यस्य शिवस्य च ॥
एतदिच्छाम्यहं श्रोतुं पुरुषो वै दिवाकरः ।
उदये ब्रह्मणो रूपं मध्याह्ने तु महेश्वरः ॥
अस्तमाने स्वयं विष्णुस्त्रिमूर्त्तिश्च दिवाकरः ।
नमो भगवते तुभ्यं विष्णवे प्रभविष्णवे ॥
ममेदमर्घ्यं प्रतिगृह्ण देव
देवाधिदेवाय नमो नमस्ते ॥"
श्रीसूर्याय साङ्गाय सपरिवाराय श्रीसूर्यनारा-
यणायेदमर्घ्यम् ।
"हिमघ्नाय तमोघ्नाय रक्षोघ्नाय च ते नमः ।
कृतघ्नाय सत्याय तस्मै सत्यात्मने नमः ॥
जयो जयस्य विजयो जितप्राणो जितश्रमः ।
मनोजवो जितक्रोधो वाजिनः सप्त कीर्त्तिताः ॥
हरितश्चयरथं दिवाकरं
कनकमयाम्बुजरेणुपिञ्जरम् ।
प्रतिदिनमुदयं नवं नवं
शरणमुपैमि हिरण्यरेतसम् ॥
न तं व्याला: प्रबाधन्ते न व्याधिभ्यो भयं भवेत् ।
न नागेभ्यो भयञ्चैव न च भूतभयं क्वचित् ॥
अग्निशत्रुभयं नास्ति पार्थिवेभ्यस्तथैव च ।
दुर्गतिं तरते घोरां प्रणाञ्च लभते ध्रुवम् ॥
सिद्धिकामो लभेत् सिद्धिं कन्याकामस्तु
कन्यकाम् ।
एतत्पठेत्त कौन्तेय भक्तियुक्तेन चेतसा ।
अश्वमेधसहस्रस्य वाजपेयशतस्य च ।
कन्याकोटिसहस्रस्य दत्तस्य फलमाप्नुयात् ॥
इदमादित्यहृदयं योधीते सततं नरः ।
सर्वपापविशुद्धात्मा सूर्यलोके महीयते ॥
नास्त्यादित्यसमो देवो नास्त्यादित्यसमा गतिः ।
प्रत्यक्षो भगवान् विष्णुर्येन विश्वं प्रतिष्ठितम् ॥
नवतिर्योजनं सूत्रं सहस्राणि शतानि च ।
यावच्छटोप्रमाणेन तावच्चरति भास्करः ॥
गवां शतसहस्रस्य सम्यग् दत्तस्य यत् फलम् ।
तत् फलं लभते विद्वान् श्रान्तात्मा स्तौति यो
रविम् ॥

योऽधीते सूर्य्यहृदयं सकलं सफलं भवेत्।
अष्टांगं ब्राह्मणाग्राच्च लेखयित्वा समर्पयेत्॥
ब्रह्मलोकऋषीणाच्च जायते मानुषोऽपि वा।
अतिस्मरत्वमाप्नोति शुद्धात्मा नात्र संशयः॥
अजाय लोकत्रयपावनाय
भूतात्मने गोपतये दृशाय।
सूर्य्याय सर्व्वप्रलयान्तकाय
नमो महाकारणिकोत्तमाय॥
विवस्वते ज्ञानभृतान्तरात्मने
जगत्प्रदीपाय जगद्धितैषिणे।
स्वयम्भुवे दीप्तसहस्रचक्षुषे
सुरोत्तमायामिततेजसे नमः॥
सुरैरनेकैः परिसेविताय
हिरण्मयाय हिरण्मयाय।
महात्मने मोक्षपदाय नित्यं
नमोऽस्तु ते वासरकारणाय॥
आदित्यवृत्तिर्वितो देव आदित्यः परमं पदम्।
आदित्यो मातृको भूत्वा आदित्यो वाङ्मयं जगत्।
आदित्यं पश्यते भक्त्या मां पश्यति ध्रुवं नरः।
नादित्यं पश्यते भक्त्या न स पश्यति मां नरः॥
त्रिगुणश्च त्रितत्त्वश्च त्रयो वेदास्त्रयोऽग्नयः।
त्रयाणाच्च त्रिमूर्त्तिस्त्वं तुरीयस्त्वं नमोऽस्तु ते॥
नमः सवित्रे जगदेकचक्षुषे
जगत्प्रसूतिस्थितिनाशहेतवे।
त्रयीमयाय त्रिगुणात्मधारिणे
विरिञ्चिनारायणशङ्करात्मने॥
यस्योदये नेह जगत्प्रवृत्तते
प्रवर्त्तते चाखिलकर्म्मसिद्धये।
ब्रह्मेन्द्रनारायणरुद्रवन्दितः
स नः सदा यच्छतु मङ्गलं रविः॥
नमोऽस्तु सूर्य्याय सहस्ररश्मये
सहस्रशाखान्वितसम्भवात्मने।
सहस्रयोगोद्भवभावभागिने
सहस्रसंख्यायुगधारिणे नमः॥
यन्मण्डलं दीप्तिकरं विशालं
रत्नप्रभं तीव्रमनादिरूपम्।
दारिद्र्यदुःखक्षयकारणञ्च
पुनातु मां तत्सवितुर्वरेण्यम्॥
यन्मण्डलं देवगणैः सुपूजितं
विप्रैः स्तुतं भावनसक्तिकोविदम्।
तं देवदेवं प्रणमामि सूर्य्यं
पुनातु मां तत्सवितुर्वरेण्यम्॥
यन्मण्डलं ज्ञानघनं त्वगम्यं
त्रैलोक्यपूज्यं त्रिगुणात्मरूपम्।
समस्ततेजोमयदिव्यरूपं
पुनातु मां तत्सवितुर्वरेण्यम्॥
यन्मण्डलं गूढमतिप्रबोधं
धर्म्मस्य वृद्धिं कुरुते जनानाम्।
यत् सर्व्वपापक्षयकारणञ्च
पुनातु मां तत्सवितुर्वरेण्यम्॥
यन्मण्डलं व्याधिविनाशदक्षं
यदृग्यजुःसामसु सम्प्रगीतम्।
प्रकाशितं येन च भूर्भुवः स्वः
पुनातु मां तत्सवितुर्वरेण्यम्॥
यन्मण्डलं वेदविदो वदन्ति
गायन्ति यच्चारणसिद्धसङ्घाः।
यद्योगिनो योगजुषाञ्च सङ्घाः
पुनातु मां तत्सवितुर्वरेण्यम्॥
यन्मण्डलं सर्व्वजनेषु पूजितं
ज्योतिश्च कुर्य्यादिह मर्त्यलोके।
यत्कालकालादिमनादिरूपं
पुनातु मां तत्सवितुर्वरेण्यम्॥
यन्मण्डलं विद्युतुमुखाख्यं
यदक्षरं पापहरं जनानाम्।
यत्कालकल्पक्षयकारणञ्च
पुनातु मां तत्सवितुर्वरेण्यम्॥
यन्मण्डलं विश्वसृजं प्रसिद्ध-
मुत्पत्तिरक्षाप्रलयप्रगल्भम्।
यस्मिन् जगत् संहरतेऽखिलञ्च
पुनातु मां तत्सवितुर्वरेण्यम्॥
यन्मण्डलं सर्व्वगतस्य विष्णो-
रात्मा परं धाम विशुद्धतत्त्वम्।
सूक्ष्मान्तरैर्योगपथानुगम्यं
पुनातु मां तत्सवितुर्वरेण्यम्॥
यन्मण्डलं ब्रह्मविदो वदन्ति
गायन्ति यच्चारणसिद्धसङ्घाः।
यन्मण्डलं वेदविदः स्मरन्ति
पुनातु मां तत्सवितुर्वरेण्यम्॥
यन्मण्डलं वेदविदोपगीतं
यद्योगिनां योगपथानुगम्यम्।
तत् सर्व्ववेदं प्रणमामि सूर्य्यं
पुनातु मां तत्सवितुर्वरेण्यम्॥
मण्डलाष्टमिदं पुण्यं यः पठेत् सततं नरः।
सर्व्वपापविशुद्धात्मा सूर्य्यलोके महीयते॥
ध्येयः सदा सवितृमण्डलमध्यवर्त्ती
नारायणः सरसिजासनसन्निविष्टः।
केयूरवान् मकरकुण्डलवान् किरीटी
हारी हिरण्मयवपुर्धृतशङ्खचक्रः॥
सङ्गृह्य चक्रं रविमण्डले स्थितं
भूमेरधश्चाक्रान्तमनन्तमच्युतम्॥
भजामि भक्त्या तपनीयमूर्त्तिं
सुरोत्तमं चित्रविभूषणोज्ज्वलम्॥
एवं ब्रह्मादयो देवा ऋषयश्च तपोधनाः।
कीर्त्तयन्ति सुरश्रेष्ठं देवं नारायणं विभुम्॥
वेदवेदाङ्गधारीरं दिव्यदीप्तिकरं परम्।
रथोग्रं रक्तवर्णञ्च सृष्टिसंहारकारकम्॥
एकचक्रो रथो यस्य दिव्यः कनकभूषितः।
स मे भवतु सुप्रीतः पद्महस्तो दिवाकरः॥
आदित्यः प्रथमं नाम द्वितीयन्तु दिवाकरः।
तृतीयं भास्करः प्रोक्तं चतुर्थन्तु प्रभाकरः॥
पञ्चमन्तु सहस्रांशुः षष्ठञ्चैव त्रिलोचनः।
सप्तमं हरिदश्वश्च अष्टमन्तु विभावसुः॥
नवमं दिनकृत् प्रोक्तं दशमं द्वादशात्मकः।
एकादशं त्रयीमूर्त्तिर्द्वादशं सूर्य्य एव च॥

द्वादशादित्यनामानि प्रातःकाले पठेन्नरः।
दुःस्वप्ननाशनञ्चैव सर्व्वदुःखञ्च नश्यति॥
दृष्टक्षुद्दरञ्चैव दारिद्र्यं हरते ध्रुवम्।
सर्व्वतीर्थप्रदञ्चैव सर्व्वकामप्रवर्द्धनम्॥
यः पठेत् प्रातरुत्थाय भक्त्या नित्यमिदं नरः।
सौख्यमायुस्तथारोग्यं लभते मोक्षमेव च॥
अग्निमौलेः नमस्तुभ्यमग्नेर्जातस्वरूपिणे।
अय आयाहि वीतस्व नमस्ते ज्योतिषां पते॥
अग्नेर्देवी नमस्तुभ्यं जगच्चक्षुर्नमोऽस्तु ते।
पद्ममायोपवेदाय नमस्तुभ्यं नमो नमः॥
पद्मासनः पद्मकरः पद्मगर्भसमद्युतिः।
सप्ताश्वरथसंयुक्तो द्विभुजः स्यात् सदा रविः॥
आदित्यस्य नमस्कारं ये कुर्व्वन्ति दिने दिने।
जन्मान्तरसहस्रेषु दारिद्र्यं नोपजायते॥
उदयगिरिमुपेतं भास्करं पद्महस्तं
निखिलभुवननेत्रं भक्तरत्नोपमेयम्।
तिमिरकरिदृगेन्द्रं बोधकं पक्षिणीनां
सुरवरमभिवन्दे सुन्दरं विश्ववन्द्यम्॥"
इति श्रीभविष्योत्तरपुराणे श्रीकृष्णार्জ্জুनसंवादे आदित्यहृदयस्तोत्रं संपूर्णम्॥ * ॥)

सूर्या, स्त्री, (सूर्य्यस्य भार्य्या। टाप्।) सूर्य्यभार्य्या। संज्ञा। इति शब्दरत्नावली॥ इन्द्रवारुणी। इति राजनिर्घण्टः॥ नवोढ़ा। इति शब्दरत्नावली। यथा, श्रीभागवते। १०। १। २६।
"तस्यां हि कर्हिचित्कौरव्यसुदेवः सुतोद्वहः।
देवक्या सूर्यया सार्द्धं प्रयाणे रथमारुहत्॥"
(वाक्। इति निघण्टुः। १। ११। "सर्त्तेर्गत्यर्थात् सुवतेर्व्वा प्रेरणार्थात् राजसूय-सूर्य्येत्यादिना निपातनात् क्यपि सर्त्तेरुत्वं सुवतेर्व्वा रुड़ागमः। सरति गच्छति स्तौत्रून् प्रति, कर्म्मण्युत्सुकं वा सुवति प्रेरयति चोदना-रूपा पुरुषादीनिति कुर्व्वन्ति। यद्वा, सुपूर्व्वा-दीरते, सत्यत्सुटो बहुलम् इति कर्म्मणि क्यपि निपातनाद्रूपसिद्धिः। सुष्ठु ईर्यते उच्चार्य्यते इति सूर्य्या। यद्वा, सु प्रेरणे सुसूधीगृधिभ्यः क्रन् इति क्रन्-प्रत्ययः। ईर्यते उच्चारणकाले प्राणेन स्वरा छन्दसि स्वाध इति यत्प्रत्ययः सूर्य्या। यद्वा, सूरयो मेधाविनः तानर्हति छन्दसि च इति यत्-प्रत्ययः। यद्वा, सूरिषु साधुः तत्र साधुः इति यत्।" इति तट्टीकायां देवराजयज्वा॥)

सूर्य्यार्घ्य, क्ली, (सूर्य्याय देयमर्घ्यम्।) सूर्य्यसम्-दानकार्घ्यम्। प्रक्तिपूजायां अच्छिद्रावधार-णार्थं सूर्य्यार्घ्यदानम्। यथा,—
"ततो भास्करबीजेन सहितेनासुना पुनः।
मन्त्रेण भास्करायार्घ्यमच्छिद्रार्थं निवेदयेत्॥
नमो विवस्वते ब्रह्मन् भास्वते विष्णुतेजसे।
जगत्सवित्रे शुचये सवित्रे कर्म्मदायिने॥
ततः कृताञ्जलिर्भूत्वा पठित्वा मन्त्रमीरितम्।
एकाग्रमनसा वाग्भिरच्छिद्रमवधारयेत्॥
यन्मया क्षिप्तं तपक्षिप्तं यत्किञ्चित् पूजने मम।
सर्व्वं तदच्छिद्रमस्तु भास्करस्य प्रसादतः॥"
इति कालिकापुराणे ५६ अध्यायः॥ * ॥

रोगादिशान्त्यर्थं सूर्य्यस्य हंसादिसप्ततिनामभिः सप्ततिधार्घ्यप्रदानप्रमाणं यथा,—
"हंसो भानुः सहस्रांशुस्तपनस्तापनो रविः।
विकर्त्तनो विवस्वांश्च विश्वकर्म्मा विभावसुः॥
विश्वरूपो विश्वकर्त्ता मार्त्तण्डो मिहिरोंऽशुमान्।
आदित्यश्चोष्णगुः सूर्य्योऽर्य्यमा ब्रध्नो दिवाकरः॥
द्वादशात्मा सप्तहयो भास्करोऽहस्करः खगः।
हरः प्रभाकरः श्रीमान् लोकचक्षुर्ग्रहेश्वरः॥
त्रिलोकेशो लोकसाक्षी तमोऽरिः शाश्वतः शुचिः।
गभस्तिहस्तस्त्वष्टांशुस्तरणिः शुभदोरणिः॥
शुभाण्डैरिन्दवोऽर्कौ भानुमान् भयनाशनः।
छन्दोऽश्वो वेदवेद्यश्च भास्वान् पूषा दृषाकपिः॥
एकचक्ररथो मित्रो मन्देहारिस्तमिस्रहा।
दैत्यहा पापहर्त्ता च धर्म्माधर्म्मप्रकाशकः॥
हैलिकश्चित्रभानुश्च कलिघ्नस्तार्क्ष्यवाहनः।
दिक्पतिः पद्मिनीनाथः कुष्ठेशश्यकरो हरिः॥
घर्म्मरश्मिर्दुर्निरीक्ष्यश्चण्डांशुः कश्यपात्मजः।
एभिः सप्ततिसंख्याकैः पुण्यैः सूर्य्यस्य नामभिः॥
प्रणवादिचतुर्थ्यन्तैर्नमस्कारसमन्वितैः।
प्रत्येकसचरन्नाम दत्वा दत्वा दिवाकरम्॥
विशुद्ध पाणियुग्मेन ताम्रपात्रं सुनिर्म्मलम्।
जानुभ्यामवनीं गत्वा परिपूर्य्य जलेन च॥
करवीरादिकुसुमै रक्तचन्दनमिश्रितैः।
दूर्व्वाङ्कुरैश्चतैश्च निःछिद्रैः पात्रमध्यतः॥
दद्यादर्घ्यमनन्याय सवित्रे ध्यानपूर्व्वकम्।
उपमौलि समानीय तत्पात्रं नान्यदृष्टयः॥
प्रतिमन्त्रं नमस्कुर्य्यादुदयास्तमये रविम्।
अनया नाम सप्तम्या महामन्त्ररूपिण्या॥
एवं कुर्व्वन्नरो जातु न दरिद्रो न दुःखभाक्।
व्याधिभिर्मुच्यते घोरैरपि जन्मान्तरार्ज्जितैः॥
विनौषधैर्विना वैद्यैर्विना पथ्यपरिग्रहैः।
कालेन निधनं प्राप्य सूर्य्यलोके महीयते॥"
इति स्कन्दपुराणे काशीखण्डे ६ अध्यायः॥

सूर्य्यालोकः, पुं, (सूर्य्यस्य आलोकः।) आतपः। इति राजनिर्घण्टः॥

सूर्य्यावर्त्तः, पुं, (सूर्य्य इव आवर्त्तते इति। आ+वृत्+घञ्।) क्षुपविशेषः। छुइछुड़िया इति भाषा। अस्य गुणः। सूर्य्यावर्त्तो विषन्यग्रः। इति राजवल्लभः॥ शाकविशेषः। सूलचिया इति भाषा। तत्पर्य्यायः।
"पार्व्वतेयश्च करभो यशिरः कपिपिप्पली।
नामतामी कथितः सूर्य्यावर्त्तस्तु शाल्मिकैः॥"
इति रत्नमाला॥
"वराहकाली कथितः सूर्य्यावर्त्तस्तु शाल्मिकैः॥"
इति धारावली॥

सूर्य्यावर्त्ता, स्त्री, (सूर्य्य इव आवर्त्तते या। आ+वृत्+घञ्। टाप्।) आदित्यभक्ता। इति राजनिर्घण्टः॥

सूर्य्यांशुः, [न्] पुं, (सूर्य्यप्रियोऽंशुः प्रस्तरः।) सूर्य्यकान्तमणिः। इति हेमचन्द्रः॥

सूर्य्याश्वः, पुं, (सूर्य्यस्य अश्वः।) सूर्य्यघोटकः। तत्पर्य्यायः। वातायुः २ हरितः ३। इति त्रिकाण्डशेषः॥

सूर्य्यास्तं, क्ली, (सूर्य्यस्य अस्तम्।) सूर्य्यास्ताचलगमनम्। यथा,—
"निशीथादध इत्यनेन अर्द्धरात्रपूर्व्वकालत्वेन सूर्य्यास्तमयकालस्यापि लाभात्॥" इति तिथ्यादितत्त्वम्॥

सूर्य्याह्नं, क्ली, (सूर्य्यस्य आह्ना आह्ना यस्य।) ताम्रम्। इति त्रिकाण्डशेषः॥ सूर्य्यनामके, त्रि॥

सूर्य्याह्वः, पुं, (सूर्य्यस्य आह्वा आह्वा यस्य।) अर्कवृक्षः। इति राजनिर्घण्टः॥

सूर्य्येन्दुसङ्गमः, पुं, (सूर्य्येण सह इन्दोः सङ्गम एकराश्यवस्थानरूपमेलनं यत्र।) अमावास्या। इत्यमरः। १। ४। ८॥ सूर्य्यचन्द्रमेलनञ्च॥

सूर्य्योढ़ः, पुं, (सूर्य्य ऊढ़ोऽस्तगतो यत्र।) सूर्य्यास्तकालप्राप्तोऽतिथिः। यथा,—
"सूर्य्योढ़स्तु स सम्प्राप्तो यः सूर्य्येऽस्तं गतेऽतिथिः॥"
इति हेमचन्द्रः॥

यथा, विष्णुपुराणम्।
"दिवातिथौ तु विमुखे गते यत् पातकं भवेत्।
तदेवाष्टगुणं विद्यात् सूर्य्योढ़े विमुखे गते॥"
इत्याह्निकाचारतत्त्वम्॥

सूर्य्योदयः, पुं, (सूर्य्यस्य उदयः।) सूर्य्यस्य प्रकाशः। यथा, विष्णुधर्म्मोत्तरे।
"श्रावणे च तथा मासि चिंशत्सूर्य्योदयाः स्मृताः।
आदित्यरश्मिभोगेन सौरो मासः प्रकीर्त्तितः॥"
इति मलमासतत्त्वम्॥

तच्च श्रयननिषेधो यथा,—
"सूर्य्योदये चास्तमिते च श्रायिनं
विलुम्पति श्रीरपि चक्रपाणिनम्॥"
इति लक्ष्मीचरित्रम्॥ *॥

तत्काले स्नानादेः कर्त्तव्यता यथा,—
"सूर्य्योदयं विना नैव स्नानदानादिका क्रियाः॥"
इति प्रायश्चित्ततत्त्वम्॥

सृग, प्रसवे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) षष्ठस्वरौ। सृगति। इति दुर्गादासः॥

सृ, गतौ। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-अनिट्।) सरति। नालतं करिणा मत्तं इति रघौ कर्म्मकर्त्तृत्वादिति रमानाथः। तच्चिन्त्यं कर्त्तृस्थभावधातूनां तन्निषेधात्। वस्तुतस्तु गणकृतानित्यत्वादात्मनेपदम्। नालानेरिति वा पाठ्यं तच्च कर्म्माधिकारायां भावे प्रत्ययः। इति दुर्गादासः॥

सृ, क्ष गतौ। सृतौ। इति कविकल्पद्रुमः॥ (तुदा०-पर०-सक०-सेट्।) क, सारयति। इति दुर्गादासः॥

सृ, र ञि गतौ। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-अनिट्।) र, वैदिकः। ञि, ससर्त्ति। इति दुर्गादासः॥

सृक्, [ञ्] पुं, (सृजतीति। सृज्+क्विप्।) सृष्टिकर्त्ता। तस्य रूपान्तराणि। स्रग्। स्रट्। स्रड्। इति सिद्धान्तकौमुदी॥

सृक, पुं, (सरतीति। सृ गतौ+"सृवृभूशुषिमुषिभ्यः कक्।" उणा० ३। ४१। इति कक्।) कैरवः। वायुः। इत्युणादिकोषः॥ पद्मम्। वायुः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ (वचः। इति निघण्टुः। १। ११॥ सरणशीले, त्रि। यथा, ऋग्वेदे। १०। १८०। २।
"सृकं संशाय पविमिन्द्रतिग्मम्॥"
"सृकं सरणशीलम्।" इति तद्भाष्यम्॥)

सृकण्डुः, स्त्री, कचूरीशः। इति शब्दरत्नावली॥

सृकालः, पुं, शृगालः। इति शब्दचन्द्रिका॥

सृक्क, [न्] क्ली, (सृजति लालादीनिति। सृज्+बाहुलकात् कनिन्।) स्रक्कणी। इति सुभूतिः॥ इत्यमरटीकायां भरतः॥ (यथा, महाभारते। ३। १२५। २।
"भयात्संस्रमितसृजः सृक्कणी लेलिहच्छुचः॥")

सृक्कं, क्ली, सृक्कणी। इत्यमरटीकायां भरतः॥ (यथा, सुश्रुते। २। १६।
"जन्तवश्चात्र मूर्च्छन्ति सृक्कस्रोभयतोसृजात्॥")

सृक्कणी, स्त्री, ओष्ठयोः प्रान्तभागः। इति पाणिनिः। इत्यमरटीकायां भरतः॥ (यथा, सुश्रुते। ६ ५६०।
"भ्रूमौ यः प्रसरति सर्पवत् कदाचित्
सृक्कण्यौ विलिहति जिह्वया प्रसक्तम्॥")

सृक्कि, क्ली, सृक्कणी। इत्यरुणः। इत्यमरटीकायां भरतः॥

सृक्क, [न्] क्ली, (सृजति लालादीनिति। सृज्+बाहुलकात् कनिन्।) ओष्ठप्रान्तभागः। यथा,—
"————————प्रान्तावोष्ठस्य सृक्कणी।"
इत्यमरः॥
"ओष्ठयोर्व्वामदक्षिणौ प्रान्तौ सृक्कणी उच्येते। ओष्ठस्येति जातावेकत्वम्। सृजतो लालादि स्रावयतीति क्विनिप् निपातनात् कुः। सृक्कणा कर्त्तीत्ययोगात् षसंयोगः। अमावास्यायां सदानोऽशोप इत्यशोपः स्यात्। 'मघास्वजाय गोभिलो वृषिं घृतसरायवत्।' इति शैषात् ककारद्वयसंयोगोऽपि। सृक्क मांसं क्लीवे, सृक्कणौ क्लीबे इति सुभूतिः। प्रान्तावोष्ठस्य सृक्कणौ क्लीबकावोऽमरदत्तश्च। दूषणादपि सृक्कणी। सृक्कणौ विलिहति जिह्वया तदेवेति रन्तिदेवः।
'न सृक्कणीप्रान्तमरुक्प्रदिग्धं
प्रलेलिहानो हरिणा विजग्धेः।'
इति पालिनिः॥
सृक्कि क्लीबमिदन्तश्च मरुत्यस्त्रियां मरुद्भेदे सृगाले पारिः स्यादिति रभसः। सृक्कं क्लीबमदन्तश्च।
'सृक्के दे चैव विज्ञेये मत्स्यादिमांसयोः पुमान्।'

द्रत्युक्तेः। वामं लिहन् स्रक्कमरण्यघूर्ण इति वसन्तराजप्रयोगाच्च।" इति भरतः॥

स्रक्, क्ली, ओष्ठप्रान्तभागः। इति वसन्तराजप्रयोगः। इत्यमरटीकायां भरतः॥

स्रक्कणी, स्त्री, ओष्ठप्रान्तभागः। कस इति भाषा। इति पाणिनिः। इत्यमरटीकायां भरतः। २। ६। ८१॥

स्रक्कि, क्ली, ओष्ठयोः प्रान्तभागः। इत्यरणः। इत्यमरटीकायां भरतः। २। ६। ८१॥

स्रक्किणी, स्त्री, ओष्ठयोरन्तरम्। इति राजनिर्घण्टः॥

स्रग्, पुं, (सरतीति। स्रु+वाहुलकात् गक्।) भिन्दिपालः। इत्यमरः। २। ८। ६१॥

स्रगाल, पुं, (स्रजति मायामिति। स्रज्+वाहुलकात् कालन्। न्यङ्क्वादित्वात् कुत्वम्।) जम्बुकः। इति शब्दरत्नावली॥ दैत्यविशेषः। इति केचित्॥

स्रङ्का, स्त्री, शब्दवती रत्नमयी माला। यथा,—

"तमब्रवीत् प्रीयमाणो महात्मा
वरं तवेहाद्य ददामि भूयः।
तवैव नाम्ना भवितायमग्निः
स्रङ्कां चेमामनेकरूपां गृहाण॥"

इति कठोपनिषदि प्रथमा वल्ली॥

"स्रङ्कां शब्दवतीं रत्नमयीं मालां इमामनेकरूपां विचित्रां गृहाण स्वीकुरु। स्रङ्कां वाङ्मयीं गतिं कर्म्ममयीं गृहाण। अन्यदपि कर्म्मविज्ञानमनेकहेतुत्वात् स्वीकुर्व्वित्यर्थः।" इत्यादि शाङ्करभाष्यम्॥

स्रज, ञौ शृ विसर्गे। इति कविकल्पद्रुमः॥ (तुदा॰ पर॰-सक॰-अनिट्।) ञौ, अस्राक्षीत्। शृ, स्रजति। इति दुर्गादासः॥

स्रज, य ङ ञौ विसर्गे। इति कविकल्पद्रुमः॥ (दिवा॰-आत्म॰-सक॰-अनिट्।) य ङ, स्रज्यते। ञौ, सस्रजे। सस्रीस्रज्यते। विसर्गस्त्यागः। त्यागो बुद्धां पर एव अन्यत्र करोतीत्यर्थः। यथा। उपासनामेत्य पितुः स्व स्रज्यते इति नैषधम्। संपूर्व्वोऽयमेककर्म्मकः। यथा। संस्रज्यते सरसिजैरलंकृतिभिः निशाकरिणामवतीति रघुः। इति दुर्गादासः॥

स्रजकाचार्य, पुं, सज्जिकाचारः। इत्यमरटीकायां रमानाथः॥

स्रज्, पुं, (सरतीति। स्रु+"स्रुविधिभ्यां किच्।" उणा॰ ४। ४८। इति निः। सच्च किच्। गत्वञ्च।) शब्दः। इति शब्दमाला॥

स्रज्, स्त्री, (स्रु+निः। गत्वञ्च।) अङ्कुशः। इत्यमरः। २। ८। ४१। (स्रजिदृशोरित्युणादिवृत्तौ उज्ज्वलदत्तः। तथा च शिशुपालवधे। ५। ५।

"आरुक्षमक्षमवमत्य रुजं क्षितायमेकः प्रलायत वधेन कृतार्त्तनादः॥")

स्रजिका, स्त्री, माला। इत्यमरः। २। ६। ६७॥

स्रञ्जी, स्त्री, (स्रज्+ऋदिकारादिति ङीप्।) अङ्कुशः। इत्यमरः। २। ८। ४१॥

स्रणीका, स्त्री, शाला। इत्यमरटीकायां रामाश्रमः। २। ६। ६७॥

स्रत, त्रि, (स्रु+क्तः।) गतः। (यथा, महाभारते। ६। २३। २६।

"गान्धारराजस्तु पुनर्वाक्यमाह ततो बली।
निवर्त्तध्वमधर्म्मज्ञा युध्यध्वं किं स्रतेन वः॥")

स्रतिः, स्त्री, (स्रु+क्तिन्।) गमनम्। मार्गः। इति मेदिनी॥ (यथा, गीतायाम्। ८। २७।

"नैते स्रती पार्थ जानन् योगी मुह्यति कश्चन।
तस्मात् सर्व्वेषु कालेषु योगयुक्तो भवार्জ্জুন॥"*

जन्म। इति स्वामी॥ यथा, भागवते। १०। ६०। ४३।

"स्याच्चे तवाङ्घ्रिवरणं स्रतिभिर्मृगन्त्या
यो वै भजन्तमुपयात्यनृतापवर्गः॥"

निर्म्माणम्। यथा, भागवते। ३। २। १३।

"कार्त्स्न्येन चाद्येह गतं विधातुरर्वाक्स्रतौ कौशलमित्यमन्यत॥"

"अर्व्वाक्स्रतौ अर्व्वाचीनसंसारनिर्म्माणे मनुष्यनिर्म्माणे वा।" इति तट्टीका॥)

स्रत्वरः, त्रि, (सरति तच्छीलः। स्रु गतौ+"इनण्गृनिसर्त्तिभ्यः क्वरप्।" ३। २। १६३। इति क्वरप्।) गमनकर्त्ता। स्रवातीः चुरप्रत्यये तनागमेन निष्पन्नः। इति सुग्धबोधव्याकरणम्॥

स्रत्वरी, स्त्री, (स्रु+क्वरप्। स्रु+क्वनिप् वा। ङीप्।) माता। इति संक्षिप्तसारोणादिवृत्तिः॥ गमनकर्त्री। इति सुग्धबोधव्याकरणम्॥

स्रष्टा, [तृ] पुं, (स्रु गतौ+"शॄस्रुधृसिभ्यः क्तः।" उणा॰ ४। ११३। इति क्तिन्।) विष्णुः। वृद्धिः। प्रजापतिः। इति संक्षिप्तसारोणादिवृत्तिः॥

स्रदरः, पुं, (दृ विदारणे+"स्रदरादयश्च।" उणा॰ ५। ४१। इति अच्प्रत्ययेन निपातनात् साधुः।) वर्म्मः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

स्रदाक्षः, पुं, (सरतीति। स्रु+"सर्त्तेर्दुक् च।" उणा॰ ३। ७८। इति काक्षुर्दुगागमश्च।) वायुः। वज्रम्। अग्निः। प्रतिसूर्य्यकः। इति मेदिनी॥ रथः। इति संक्षिप्तसारोणादिवृत्तिः॥

स्रदाक्षः, स्त्री, (सरतीति। स्रु गतौ+काक्षुर्दुगागमश्च।) नदी। इत्युणादिकोषः॥

स्रप, ल ञौ गत्याम्। इति कविकल्पद्रुमः॥ (भ्वा॰-पर॰-सक॰-अनिट्।) ल, अस्रपत्। अस्य लदित्वेऽपि॰ क्षयस्रप्सृप इति विशेषविधानात् पक्षे च्लौ सिः तेन अस्राप्सीत् अस्रापीत् इत्यपि। ञौ, सस्रौ। इति दुर्गादासः॥

स्रपाटः, पुं, स्रपाटी। इति स्त्रीपुंलिङ्गसंग्रहटीकायां भरतः। ३। ५। ३८॥

स्रपाटिका, स्त्री, चक्षुः। इति हेमचन्द्रः॥

स्रपाटी, स्त्री, (स्रपाट+गौरादित्वात् ङीष्।) परिमाणभेदः। इति स्त्रीपुंलिङ्गसंग्रहटीकायां भरतः। ३। ५। ३८॥ रक्तधारा। इति तत्रैव गोवर्द्धनः॥

स्रप्, पुं, (स्रप गतौ+"स्कायितञ्चिवञ्चीति।" उणा॰ २। १३। इति रक्।) चन्द्रः। इत्युणादिकोषः॥

स्रभ, उ हिंसे। इति कविकल्पद्रुमः॥ (भ्वा॰-पर॰-सक॰-सेट्। क्वाविट्।) सप्तमस्वरी। उ, सर्भित्वा स्रब्ध्वा। इति दुर्गादासः॥

स्रमरः, पुं, (सरति तच्छीलः। स्रु गतौ+"स्रुघ स्रद्यः कमरच्।" ३।२।१६०। इति कमरच्।) पशुविशेषः। इत्यमरः। २। ५। ११॥ बालमृगः। इति केचित्॥ (यथा, रामायणे। ३। १०३। ४२।

"वराहऋष्यसिंहाश्च माहिषाः स्रमरास्तथा।
व्याघ्रगोकर्णगवया विचेरुः पृषतैः सह॥")

स्रष्टं, त्रि, (स्रज्+क्तः।) निर्म्मितम्। युक्तम्। निश्चितम्। वहुलम्। इति मेदिनी॥ भूषितम्। इत्यजयः॥ व्यक्तम्। (यथा, रामायणे। २। ३५। १५।

"महाव्रतर्षिसदृशा वा ज्वलन्तो भीमदर्शनाः।
धिक्वाग्दण्डा न हिंसन्ति रामप्रव्राजने स्थिताम्॥")

स्रष्टिः, स्त्री, (स्रज्+क्तिन्।) निर्म्मितिः। स्वभावः। इति मेदिनी॥ निर्गुणः। इति शब्दरत्नावली॥* ब्रह्माण्डसृष्टिर्यथा। सृष्टेः पूर्व्वं मनश्चक्षुराद्यगोचरो भगवान् एक एवासीत्। यदा स स्वेच्छया द्रष्टा सन् दृश्यं नापश्यत् तदा त्रिगुणमयीं मायां प्रकाशयामास। ततो भगवान् स्वांशेन पुरुषरूपं कृत्वा तस्यां मायायां स्ववीर्य्यं चैतन्यं आधत्त। सा समष्टिजीवरूपं महत्तत्त्वं जनयामास। तस्मात् त्रिविधोऽहङ्कारो जातः तत्र सात्त्विकाहङ्कारात् मनइन्द्रियाधिष्ठातृदेवताश्च जाताः। राजसाहङ्कारात् दशेन्द्रियाणि जातानि। तामसाहङ्कारात् पञ्च महाभूतानि तेषां पञ्च गुणाश्च जाताः। एवं प्रकृत्यादिभिरेतैश्चतुर्विंशतितत्त्वैर्ब्रह्माण्डं निर्म्माय भगवान् तस्मिन्नेकेनांशेन प्रविश्य गर्भोदकसंज्ञकं जलं ससर्ज्ज। तज्जलमध्ये योगनिद्रया सहस्रयुगमितं कालं स्थितवान्। तदन्ते उत्थाय स्वयमंशेन ब्रह्मा भूत्वा सर्व्वान् सृष्ट्वा नानावतारान् कृत्वा पालयति। कल्पान्ते रुद्ररूपेण संहरति च। इति श्रीभागवतमते संक्षेपसृष्टिः॥ * ॥ अपि च।

"स्थावरान्ताः सुरादास्तु प्रजा ब्रह्मांशतुल्यिकाः।
ब्रह्मणः कुर्व्वतः सृष्टिं जज्ञिरे मानसीस्तु ताः॥
ततो देवासुरपितॄन् मनुष्यांश्च चतुष्टयम्।
सिसृक्षुरन्यांश्चेतांसि स्वमात्मानमयूयुजत्॥
युक्तात्मनस्तमोमात्रा उद्रिक्तामभूत् प्रजापतेः।
सिसृक्षोर्जघनात् पूर्व्वमसुरा जज्ञिरे ततः॥
उत्ससर्ज्ज ततस्तान्तु तमोमात्रात्मिकां तनुम्।
सा तु त्यक्ता तनुस्तेन मेदेयाभूद्विभावरी॥
सिसृक्षुरन्यदेहस्थः प्रीतिमाप ततः सुराः।
सत्त्वोद्रिक्ताः यतो भूता सुखतो ज्ञानतो द्विज॥

अक्षा मापि तनुक्षेन सत्यप्रायमभूद्दिनम् ।
ततो हि बलिनो राक्षावसुरा देवता दिवा ॥
सत्यमात्रात्मिकामेव ततोऽन्यां जगृहे तनुम् ।
धिक्रियमाणमानस्य पितरक्षस्य जज्ञिरे ॥
उत्पसर्ज ततक्षान्तु पिठून् सृष्ट्वापि स प्रभुः ।
सा चोनसृष्टाभवत् सन्ध्यादिननक्षान्तरस्थितिः ॥
रजोमात्रात्मिकामन्यां जगृहे स तनुं ततः ।
रजोमात्रोत्कटा जाता मनुष्या द्विजसत्तम ॥
तामप्यासु स तत्याज तनुमाद्यः प्रजापतिः ।
ज्योत्स्ना समभवत् सापि प्राकसन्ध्या याभिधी-
यते ॥
ज्योत्स्नोद्भवे तु बलिनो मनुष्याः पितरस्तथा ।
मैत्रेय सन्ध्यासमये तस्मादेते भवन्ति वै ॥
ज्योत्स्ना रात्र्यहनी सन्ध्या चत्वार्येतानि वै
प्रभोः ।
अक्षणस्तु शरीराणि त्रिगुणोपाश्रयाणि तु ॥
रजोमात्रात्मिकामेव ततोऽन्यां जगृहे तनुम् ।
ततः क्षुद्भक्षणो जाता जज्ञे कोपवशा ततः ॥
क्षुत्तामानन्यकारेण सोऽरक्षङ्गणांस्ततः ।
क्षिप्ताः क्षणेन जाताक्षेऽधावन्त तं
प्रभुम् ॥
मैवं भो रक्षनामेष येरक्षं राक्षसास्तु ते ।
ऊचुः स्वादाम दत्यमे ये ते यक्षास्तु यक्षणात् ॥
अभिधेनाथ तान् दृष्ट्वा केशाः शीर्यन्त वेधसः ।
शीनाश शिरसो भूयः समारोपत्त ते शिरः ॥
सर्पणात्तु भवन् सर्पा शीनत्वादहयः स्मृताः ।
ततः क्रुद्धो जगत्स्रष्टा क्रोधात्तानो विनिर्ममे ॥
वर्णेन कपिशेनोग्रा भूतास्ते पिशिताशनाः ।
धयन्तो गां मनुष्यांश्च गन्धर्वांस्तस्य तन्वजात् ॥
पितरो जज्ञिरे यांच गन्धर्वांस्तेन ते द्विज ।
एतानि सृष्ट्वा भगवान् ब्रह्मा तत्क्षुत्क्षितोदितः ॥
ततः सन्ध्यातनोरन्यानि ययांसि वयसोऽसृजत् ।
जघनो यक्षमसृजे तनोरन्या स सृष्टवान् ॥
सृष्ट्वानुदरतश्चाप पार्श्वाभ्यां प्रजापतिः ।
मद्यां चाश्वान् समातङ्गान् राक्षभान् गवयान्
गवान् ॥
उष्ट्रावश्वतरांश्चैव व्यालक्षांश्च जज्ञिरे ।
ओषधः पक्षलाश्चैव रोमाण्यस्य जज्ञिरे ॥
त्रैवायुगमुखे ब्रह्मा कल्पसन्ध्यादौ द्विजोत्तम ।
सृष्ट्वा पशूंस्तथो सम्यक् नुयोज च तदाध्वरे ॥
गौरजो पौरुणो मेषो अश्वाश्वतरगर्दभाः ।
श्वानः शाक्यमृगाश्चोष्ट्रारक्षाश्च विबोध मे ॥
गावयो विधुरो रुरुः शरभः पृषितस्तथा ।
ओदकाः पशवः सृष्टाः सप्तमास्तु सरीसृपाः ॥
गायत्र्याश्च जगत्यैव त्रिष्टुभामरपत्तम् ।
अविरोधेन यज्ञानां निर्ममे प्रथमान्मुखात् ॥
यजूंषि चैकुभं छन्दः स्तोमं पञ्चदशं तथा ।
बृहत्साम तथोष्णिह दक्षिणादक्षतोऽसृजत् ॥
सामानि जगती चन्दः स्तोमं सप्तदशं तथा ।
वैरूपमतिरात्रश्च पश्चिमादत्पतोऽसृजत् ॥
एकविंशस्तथाप्तोर्यामावेव च ।
अनुष्टुभं च वैराजमुत्तरादक्षतोऽसृजत् ॥
उद्भवानि भूतानि गार्हस्थ्यस्य च जज्ञिरे ।
देवासुरपितॄन् सृष्ट्वा मनुष्यांश्च प्रजापतिः ॥
ततः पुनः सन्ध्यादौ सञ्जगात् स पितामहः ।
यक्षान् पिशाचान् गन्धर्वान् तथैवाप्सरसां
गणान् ॥
नरकिन्नररक्षांसि पशुपक्षिमृगोरगान् ।
अन्यांश्च तथैवेव यादृशं स्मासृजत्प्रभुः ॥
तत् सर्गं तदा दृष्ट्वा भगवानादिशत् प्रभुः ।
तेषां ये यानि कर्माणि प्राक्सृष्टानां प्रतिपेदिरे ।
तान्येव ते प्रपद्यन्ते सृज्यमानाः पुनः पुनः ॥
हिंस्राहिंसे मृदुक्रूरे धर्माधर्मानृतानृते ।
तद्भाविताः प्रपद्यन्ते तस्मात्तत्तस्य रोचते ॥
इन्द्रियार्थेषु भूतेषु शरीरेषु च स प्रभुः ।
नानात्वं विनियोगञ्च धातैव सृजति स्वयम् ॥
नाम रूपञ्च भूतानां कृत्यानाञ्च प्रपञ्चनम् ।
वेदशब्देभ्य एवादौ देवादीनां चकार सः ॥
ऋषीणां नामधेयानि यंया वेदश्रुतानि वै ।
तथा नियोगयोग्यानि सर्वेषामपि सोऽकरोत् ॥
यथर्त्वादिषु तल्लिङ्गानि नानारूपाणि पर्यये ।
दृश्यन्ते तानि तान्येव तथा भावा युगादिषु ॥
करोत्येवंविधां सृष्टिं कल्पादौ स पुनः पुनः ।
विशेषाच्छक्तियुक्तोऽसौ स्वयम्भूशक्तिप्रचोदितः ॥"

इति विष्णुपुराणे । १ । ५ । २७—६५ ॥

सृष्टिप्रदा, स्त्री, (सृष्टिं तद्धेतुभूतगर्भं प्रदत्तेति । प्र + दा + कः । ।) गर्भदात्रीत्युमः । इति—राजनिघण्टः ॥

सृ, गि हिंसे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-अनिट् ।) एत्वादिर्वकारोपधः तदहितोऽयमिति केचित् । गि, गृणाति । शीर्णः शीर्णिः । इति दुर्गादासः ॥

सेक, षच सेचने । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-सेट् ।) स, अभिसेकते । ष, सेकते । इति दुर्गादासः ॥

सेक:, पुं, (सिच् + घञ् ।) सेचनम् । तत्पर्य्यायः । धारः २ । इति हेमचन्द्रः ॥ (यथा, रघुः । १ । ५१ ।

"सेकान्ते मुनिकन्याभिस्तत्पर्योन्मिश्रसैकतम् ।
विश्वासाय विहङ्गानामालवालाम्बुपायिनाम् ॥"

तथास्यगृहाः ।

"सेकः श्रमापनिनुदुन्नमनिप्रबाधकः ।
सतामिवेन्द्रियाभिरुद्विषिष्टानां दमागमः ॥
अवसिक्तस्य वर्द्धन्ते यथा मूलेऽङ्कुरास्तरोः ।"
"तथा धातुविशेषेषु सेकश्चिकित्सकस्य सारते ॥"

इति सुश्रुते चिकित्सास्थाने २८ अध्याये ॥)

सेकपात्रं, क्ली, (सेकाय पात्रम् ।) जलसेचनाधारः । सिंचनी इति भाषा । तत्पर्य्यायः । सेचनम् २ । अमरः । २ । १० । १६ ॥

सेकिमँ, क्ली, (सेकेन निर्वृत्तमिति । सेक + "भावप्रत्ययान्तादिमन् वक्तव्यः ।" ५ । १ । २० । इत्यस्य वार्त्तिकोक्त इमन् ।) सूपकृत् । इति हेमचन्द्रः ॥ (सेकमिमँते, मि ।)

सेक्ता, [क्तृ] पुं, (सिच्यति रेतः । सिच् + तृच् ।) भर्त्ता । इति हेमचन्द्रः ॥ सेचनकर्त्तरि, त्रि । (यथा, ऋग्वेदे । ३ । ३२ । १५ ।

"सेक्तेव कोशं सिसिचे पिपर्त्ति ॥")

सेकं, क्ली, (सिच्यतेऽनेनेति । सिच् + "दाम्नीशसयुयुजेति ।" ३ । २ । १८२ । इति करणे ष्ट्रन् ।) सेकपात्रम् । इति सिद्धान्तकौमुदी ॥

सेचकः, पुं, (सिञ्चतीति । सिच् + ण्वुल् ।) मेघः । सेककर्त्तरि, त्रि । इति मेदिनी ॥

सेचनं, क्ली, (सिच चरणे + ल्युट् ।) चरणम् । सेकः । (यथा, मार्कण्डेये । ९१ । १३ ।

"सञ्जां चाषामतां यच जलं यचाप्तिसेचने ।
नाक्षत्यानां तथैवान्ये तेन तृप्तिं प्रयान्ति वै ॥")

नौकायाः सेकभाजनम् । इति मेदिनी ॥ (अभिषेकः । यथा, महाभिषेके । २ । ११५ ।

"तद्भाण्डेन ध्रुवं सर्पिः तद्भाण्डात् ।
सेचनं तद्भाण्डेन तद्भाण्डेन सुन्दरि ! ॥")

सेटुः, पुं, फलविशेषः । तरसुज् इति भाषा । तत्पर्य्यायः । पेलागः २ चिचफलम् ३ सुरालः ४ राजसेमिः ५ लताफलः ६ गाटालः ७ । इति चिकाण्डशेषः ॥ अटाधरश्च ॥

सेतिका, स्त्री, अयोध्या । इति भूतशुद्धितन्त्रम् ॥

सेतुः, पुं, (सिनोति बध्नाति जलमिति । सि बन्धने + "तृसिनिमिमसीति ।" उणा० । १ । ७० । इति तुन् ।) सेवादेरालिः । इत्यमरः । २ । १ । १४ ॥ तत्पर्य्यायः । आली २ । इति भरतः ॥ पूरयः ३ प्रिक्षः ४ । इति धारावली ॥ पद्धारः ५ पद्धालः ६ अपरः ७ । इति षटाधरः ॥ प्रिक्षिणः ८ । इति शब्दरत्नावली ॥ धरणः ९ । इति शिकाण्डशेषः ॥ ० ॥ तद्दानादिफलं यथा,—

"सेतुप्रदानादिन्द्रस्य लोकमाप्नोति मानवः ।
प्रपाप्रदानाद्वरुणलोकमाप्नोत्यसंशयम् ॥
संक्रमाणान्तु यः कर्त्ता स नरं तरते नरः ।
स्वर्गलोके च निवसेदिष्टकासेतुकृत् सदा ॥"

इति तद्दानादिविशिष्टफलम् ॥ ० ॥

यज्ञभङ्गः । इति मेदिनी राक्षसनिर्घण्टश्च ॥ (अस्य पर्य्यायो गुणाश्च यथा,—

"यज्ञो यज्ञः सेतुरिज्याध्वरविधयः ।
यज्ञः सिद्धान्तो भेदो वेदाङ्गाध्वमार्गाः ॥
क्रियन्ति गुल्मवासाग्निमौञ्जीरविदीपकः ।
कषायो मधुरस्तिक्तः कटुको रुक्षको लघुः ॥"

इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे ॥)

प्रभवः । इति त्रिकाण्डः ॥ आप्तश्च ।

"सत्यानां प्रभवः सेतुर्नानासेतुः प्रभुः ।
सप्तसन्तानगं पूर्वं परमाप्त इति स्मृतः ॥
सप्तसन्तारको मन्त्रो देव इत्युच्यते बुधैः ।
विद्यागोत्रमतं मन्त्रः सूत्रार्थो मन्त्रसंज्ञितः ॥
अक्षरार्थाश्रयश्चैव मन्त्रश्च प्रथमार्थतः ।
देहस्थान् मनुजान् सप्त तारयेत् निर्मलं पुरा ॥
स उक्तो द्विजवर्णानां सप्तानां कारणत्वतः ।
सप्तसिन्धूद्भवत्वात् सप्तधातुमयत्वतः ॥

चतुर्दशस्वरो योऽसौ सेतुरौकारसंज्ञकः।
स चानुस्वारचन्द्राभ्यां भूद्राभ्यां सेतुरुच्यते॥
निःसेतुश्च यथा तोयं चणान्निम्नं प्रसर्पति।
मन्त्रस्त्वेव निःसेतुः चणात् क्षरति यज्वनाम्॥
तस्मात् सर्व्वेषु मन्त्रेषु चतुर्व्वर्णा द्विजादयः।
पार्श्वयोः सेतुमादाय जपकर्म्म समारभेत्॥
भूद्राभ्यामादिसेतुर्व्वा द्विसेतुर्व्वा यथेच्छया।
ते सेतू वः समाख्याता सर्व्वदैव द्विजातयः॥"
इति कालिकापुराणे ५५ अध्यायः॥

सेतुकः, पुं, (सेतुरेव। स्वार्थे कन्।) वरणवृक्षः। इति शब्दरत्नावली॥

सेतुबन्धः, पुं, (सेतोर्बन्धः।) लङ्कागमनार्थश्रीरामकृतसमुद्रबन्धनसेतुः। तत्पर्य्यायः। समुद्रारः २। इति जटाधरः॥ तद्विवरणं यथा,—
"ततोऽब्धीन्द्रधुरेष्ठं सागरो विनयान्वितः।
नलः सेतुं करोत्वस्मिन् जले मे विघ्नकर्म्मणः॥
सुतो धौम्यस्य समर्थोऽस्मिन् कार्य्ये लब्धवरो हरिः।
कीर्त्तिं गायन्तु ते लोकाः सर्व्वलोकमलापहाम्॥
इत्युक्त्वा राघवं नत्वा ययौ सिन्धुरदृश्यताम्।
ततो रामस्तु सुग्रीवलक्ष्मणाभ्यां समन्वितः।
नलमाज्ञापयच्छीघ्रं वानरैः सेतुबन्धने॥
ततोऽतिहृष्टः प्लवगेन्द्रयूथपै-
र्महागिरीन्द्रप्रतिमैर्युतो नलः।
बबन्ध सेतुं शतयोजनायतं
सुविस्तरं पर्व्वतपादपैर्दृढम्॥"
इति श्रीमदध्यात्मरामायणे लङ्काकाण्डे ३ अः॥
"सेतुमारभ्यमाणस्तु तत्र रामेश्वरं शिवम्।
सङ्कल्पनियतो गत्वा पुरीं वाराणसीं नरः॥
आनीय गङ्गासलिलं रामेशमभिषिच्य च।
शिवा सहस्रे तद्वारि ब्रह्म प्राप्नोत्यसंशयः॥
क्षतानि प्रथमेनाह्ना योजनानां चतुर्दश।
द्वितीयेन तथा चाह्ना योजनानाञ्च विंशतिः॥
तृतीयेन तथा चाह्ना योजनान्येकविंशतिः।
चतुर्थेन तथा चाह्ना द्वाविंशति तथा शतम्॥
पञ्चमेन त्रयोविंशद्योजनानां समन्ततः।
बबन्ध सागरे सेतुं नलो वानरसत्तमः॥
तेनैव जग्मुः कपयो योजनानां शतं द्रुतम्।
असंख्याताः सुबलाद्रिं रुरुहुः प्लवगोत्तमाः॥
आरुह्य मारुतिं रामो लक्ष्मणोऽप्यङ्गदं तथा।
ददृशुः राघवो लङ्कां नानाचित्रध्वजाकुलाम्॥"
इति तत्रैव ४ अध्यायः॥
(सेवादेरालिङ्गनम्। यथा, महाभारते। ७। ८४। २।
"गतोदके सेतुबन्धो यादृक् तादृगयं तव।
विलापो निष्फलो राजन् मा शुचो भरतर्षभ॥")

सेतुभेदी, [न्] पुं, (सेतुं भिनत्तीति। भिद्+णिनिः।) दन्तीवृक्षः। इति शब्दचन्द्रिका॥

सेतुवृक्षः, पुं, (सेतुनामको वृक्षः।) वरणवृक्षः। इति शब्दमाला राजनिर्घण्टश्च॥ (अस्य पर्य्यायो यथा, वैद्यकरत्नमालायाम्।
"वरणश्चित्रशाकश्च सेतुवृक्षोऽभया प्रतिः॥")

सेत्रं, क्ली, (सीयतेऽनेनेति। षिञ् बन्धने+"दान्शान्सञ्जुषीति।" ३। २। १८२। इति ष्ट्रन्।) निगडः। इति सिद्धान्तकौमुदी॥ बेड़ी इति भाषा॥

सेना, स्त्री, चतुर्विंशतिवृत्ताक्षैर्ज्ञातृणां तृतीया माता। इति हेमचन्द्रः॥ इनेन प्रभुणा सह वर्त्तते या। (यद्वा, सिनोति क्षत्रुमिति। षिञ् बन्धने+"कृसृभृवृधीति।" उणा० ३। १०। इति नः। स च नित्। टाप्।) चतुरङ्गबलम्। फौज इति पारस्यभाषा। (यथा, रघुः। १।१६।
"सेनापरिच्छदस्तस्य द्वयमेवार्थसाधनम्।
शास्त्रेष्वकुण्ठिता बुद्धिर्मौर्व्वी धनुषि चातता॥")
तत्पर्य्यायः। अक्षिणी २ वाहिनी ३ पृतना ४ अनीकिनी ५ चम्पूः ६ वरूथिनी ७ बलम् ८ सैन्यम् ९ चक्रम् १० अनीकम् ११। इत्यमरः। २। ८। ७८॥ वाहना १२ पूतना १३ गुल्मिनी १४ वरचक्षुः १५। इति शब्दरत्नावली॥ कैश्चित् अक्षिण्यादि सप्तकं सेनायाम्। बलादि चतुष्कं सेनाङ्गे इत्याहुः। अतएव अक्षिण्यादि सप्तकं सामान्येन सेनायाम्। बलादि चतुष्कन्तु सामान्येन सेनायां सेनाङ्गे च इति मतम्॥ इति भरतः॥

सेनाङ्गं, क्ली, (सेनाया अङ्गम्।) हस्त्यश्वरथपदातीनां समूहः। यथा,—
"हस्त्यश्वरथपादातं सेनाङ्गं स्याच्चतुष्टयम्॥"
इत्यमरः। २। ८। ३३॥
(यथा, हरिवंशे भविष्यपर्व्वणि। ११। ४२।
"सेनाङ्गेषु तृणाग्रं गृहतरुशैलेषु चापि देशानाम्॥")

सेनाचरः, त्रि, (सेनायां चरतीति। चर+"भिक्षासेनादायेषु।" ३। २। १७। इति टः।) सेन्यानुगामी। सेनया सह गन्ता। इति कैश्चित्॥ (यथा, महाभारते। १। १३०। १४।
"नृगायाश्चरतो राज्ञः शालनोऽथ यदृच्छया।
कञ्चित् सेनाचरोऽरण्ये मिथुनं तदपश्यत॥")

सेनानीः, पुं, (सेनां नयतीति। नी+"सत्सूद्विषेति।" ३। २। ६१। इति क्विप्।) कार्त्तिकेयः। इत्यमरः। १। १। ४२॥ (यथा, रघुः। १२। ७।
"अथैनमह्नेतनया गुरोश्च
सेनान्यमासीढ़मिवासुरास्त्रैः।")
वाहिनीपतिः। इति चामरः। २। ८। ६२॥ (यथा, महाभारते। ४। २। ६।
"स तु कामान्वितस्तप्तः सुदेष्णामभिगम्य वै।
प्रहसन्निव सेनानीरिदं वचनमब्रवीत्॥")

सेनापतिः, पुं, (सेनायाः पतिः।) कार्त्तिकेयः। (क्वचित् वाह्यलिङ्गेऽपि दृश्यते। यथा, महानिर्व्वाणतन्त्रे। १। १४।
"किमुच्यते महाप्राज्ञे कथ्यतां प्राग्वचो मम।
यदकार्य्यं गणेशेऽपि स्कन्दे सेनापतावपि॥")
अनीकाधिपतिः। इति मेदिनी॥ अस्य पर्य्यायः। सेनानीः २ वाहिनीपतिः ३। इत्यमरः। २।८।६२॥ सेनापतिलक्षणं यथा,—
"कुलीनः शीलसम्पन्नो धनुर्व्वेदविशारदः।
हस्तिशिक्षाश्वशिक्षासु कुशलः शास्त्रभाषणः॥
निमित्ते शकुनज्ञाने वेत्ता चैव चिकित्सिते।
कृतज्ञः कर्म्मणां शूरस्तथा क्लेशसहो नृपः॥
व्यूहतत्त्वविधानज्ञः फल्गुसारविशेषवित्।
राज्ञा सेनापतिः कार्य्यो ब्राह्मणः क्षत्रियोऽथवा॥"
इति मात्स्ये राजधर्म्मे। २१५। ८—१०॥
सेनापतौ वर्णनीयानि यथा,—
"सेनापतिर्व्वितावासः स्वामिभक्तः सुधीरभीः।
अश्वारोही वाहने शस्त्रे शास्त्रे च विजयी रणे॥"
इति कविकल्पलतायाम् १ स्तबके वर्णयेत्तिर्नाम ३ कुसुमम्॥

सेनासुखं, क्ली, (सेनाया सुखम्।) पत्तित्रयः। स तु सेनासङ्ख्याविशेषः। तद्यथा। हस्ती ३ रथः ३ अश्वः ९ पदातिः १५ सत्तदाख्येन चिह्नेन ३०। इत्यमरः। २। ८। ८१॥ (यथा च महाभारते। १। २। १६।
"एको रथो गजश्चैको नराः पञ्च पदातयः।
त्रयश्च तुरगास्तज्ज्ञैः पत्तिरित्यभिधीयते॥
पत्तिस्तु त्रिगुणामेतामाहुः सेनामुखं बुधाः॥")
पुरद्वारसंमुखवृत्तिपथः। इति केचित्॥

सेनारचः, पुं, (सेनां रचयतीति। रच+अण्।) सेनारचकग्रहरिकादिः। तत्पर्य्यायः। सैनिकः २। इत्यमरः। २। ८। ६१॥

सेफः, पुं, शेफः। इति जटाधरः॥

सेमन्ती, स्त्री, पुष्पविशेषः। सेँउती इति भाषा। यथा, नारसिंहे ५२ अध्याये।
"चम्पकानां पुष्पशतादशोकं पुष्पसप्तमम्।
अशोकानां सहस्राद्धि सेमन्ती पुष्पमुत्तमम्।"

सेराहः, पुं, पीयूषवर्णाश्वः। स तु दुग्धवर्णस्तुवर्णः। इति हेमचन्द्रः॥

सेरः, त्रि, (षि ञ् बन्धने+"दाधेट्सिघ्सदो रः।" ३। २। १५६। इति रः।) बन्धनकर्त्ता। इति मुग्धबोधव्याकरणम्॥

सेल, ऋ चालगत्योः। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) ऋ, असिसेलत्। इति दुर्गादासः॥

सेलुः, पुं, शैलुवृक्षः। स तु शैग्रातकः। इति भरतद्विरूपकोषः॥

सेव, ञ ऋ सेवने। इति कविकल्पद्रुमः॥ (भ्वा०-उभ०-आत्म०-च सक०-सेट्।) ञ, सेवति सेवते। ऋ, सेवते। ऋ, असिसेवत। सेवनं आराधनं उपभोगः आश्रयणञ्च। विष्णुं सेवते। सुखं सेवते। तीर्थं सेवते साधुः। अन्ये त्वज्ञानं परमपदमनन्यभागाः। नीचं सन्तमपि सेवति नीच एव। स्वाधीने विभवेऽप्यहो नरपतिं सेवन्ति किं मानिनः॥ इत्यादौ गणकृतानित्यत्वमाहुः। इति दुर्गादासः॥

सेवं, क्ली, (सेव्यते यदिति। सेव+घञ्।) सेचिफलम्। इति राजनिर्घण्टः॥ (अस्य पर्य्यायो गुणाश्च यथा,—

"मृद्विप्रमाणं यदरं सेवं सिविलिकाफलम्।
सेवं समीरवित्तघ्नं दृष्टिदं कफदृग्गुरु:।
रसे पाके च मधुरं स्निग्धं रुचिशुक्रकृत्।"
इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे।)

सेवक:, पुं, (सेवते इति। सेव+ण्वुल्।) प्रसेवक:। इति मेदिनी।

सेवक:, त्रि, (सेवते इति। सेव् सेवने+ण्वुल्।) अनुजीवी। भृत्य:। इति मेदिनीशब्दरत्नावली।
(यथा, हरवंशे विष्णुपर्वणि।५।३४।
"पूर्वेण वयसापूर्णो करोति बहुधा समाप्तो
दैत्य:।
यथात् कर्षणसेवकवीजविनाशाय निर्दिष्ट:।")
तस्य प्रभुलक्षणं प्रजापतिरुवाच यथा,—
"किङ्कर: किङ्करी वापि सर्वथा प्रभुमीश्वर:।
यो यस्य सेवानिरत: स कं पृच्छति तं विना।"
इति ब्रह्मवैवर्ते श्रीकृष्णजन्मखण्डे १३ अध्याय:।
(आश्रिता। यथा, भागवते। ४।१६।१६।
"दक्षस्य सप्तदश्यां ये दुहितृणां प्रजेश्वरा:।
भरतर्षभ! सर्वेषां मातरो लोकमातर:।")
सेवकाशु:, पुं, निशाभ्राड्दृष्ट:। दृग्रोगेषा इति स्यात:। इति शब्दचन्द्रिका।
सेवनी, स्त्री, पुत्रिकेभेद:। सेउली इति भाषा। तत्पर्य्यायगुणा:।
"शतपर्वी तरुस्फोटा कण्टिका चारुकेसरा।
महाकुमारी गन्धाढ्या सप्तपुष्पातिमञ्जुला।
शतपर्वी हिमा पृथ्वी साहिनी शुक्रला लघु:।
दोषत्रयास्रविषहृत् स्निग्धा कण्ठ्या च पाचनी।"
इति भावप्रकाश:।
सेवधि:, पुं, (सेव्यते सेवनं क्रियतेऽस्मिन्निति। सेवा विद्या निधिलाभाभावादिकर्म्म:। धा+कि:।) निधि:। इत्यमरटीकायां भरत:। साहसकप्रकारादिरत्नम्।
सेवर्त्त, क्ली, (सिव तन्तुसन्ताने+क्त।) सूच्यादिना चर्म्मादिसीवनम्। सेलाई इति सेवानी इति च भाषा। तत्पर्य्याय:। सीवनम् २ सृति: ३। इत्यमर:। ३। २। ५। सृति: ४ सृति: ५। इति शब्दरत्नावली। (यथा, सुश्रुते। १। ८।
"सूच्य: सेवने। इत्यष्टविधे कर्म्मण्युपयोग:
भक्षार्थं चात्मान:।"क:। सेव् सेवने+क्त।) उपासित:। उपासना। इति मेदिनी। (यथा, भागवते। ७। १६। १६।
"सम्भोजनोपायनदानधर्म्म-
योगप्रधानैर्नियमैश्च पुंसाम्।"
आराधन:। यथा, भागवते। ७। १२। ६०।
"सत्सङ्गश्च साधूनां सर्व्वकर्म्मोपशान्तये।
दयां भूतेषु सन्तोषं सेवेत साधुसङ्गमम्।"
उपभोग:। यथा, मनु:। ११। ६८।
"यत् करोत्येकरात्रेण वैराग्यात् तत्त्वदर्शि:।
अभ्यासयोगयुक्तात्मा दीर्घरात्रेऽपि तत्।")
सेवनी, स्त्री, (सेव्यते सेवनं क्रियतेऽनया। सेव्+करणे ल्युट्। ङीप्।) सीवनी। इति हेमचन्द्र:। सृतेरयं पक्षे सैवनी। इति भेदे:। यथा,—
"सिव्यते यत्र यानाच्छादनीयं वस्त्र यत्नतः।

एका शैवलिनी विद्यायामेको विल्वेऽपरा:।
इति भावप्रकाश:।
(यथा च भावप्रकरणे मद्यौषधविनिश्चयेऽधिकारे।
"सामान्यलिङ्गं यद्यभिसेवनीयस्य।")
सेवा, स्त्री, (सेव् सेवने+"गुरोश्च हल:।" ३। ३। १०३। इत्य:। टाप्।) सेवनम्। तत्पर्य्याय:। भक्ति: २। इत्यमर:। २। ८। २।
(यथा, मनु:। ४। ६।
"सत्यानृतन्तु वाणिज्यं तेन चैवापि जीव्यते।
सेवा श्ववृत्तिराख्याता तस्मात् तां परिवर्ज्जयेत्।")
आराधना। उपभोग:। आश्रयणम्। इति सेवाशब्दार्थगर्भगात्। (यथा, मनु:। १२। ८७।
"वेदाभ्यासस्तपो ज्ञानमिन्द्रियाणाञ्च संयम:।
अहिंसा गुरुसेवा च नि:श्रेयसकरं परम्।")
अथ माघादिद्वादशमासेषु विष्णुसेनाविधिस्तत्फलञ्च। यथा,—
व्यास उवाच।
"विप्र द्वादशमासेषु माघादिषु यतात्मन:।
पूजितस्य विधानेन यत् तानि वदाम्यहम्।
माघे मासि समायाते सर्व्वमासोत्तमे शुभे।
आमिषं मैथुनञ्चैव वर्ज्जयेद्वैष्णवो जन:।
प्रात:स्नायी भवेन्नित्यं तैलाभ्यङ्गं च वर्ज्जयेत्।
द्विर्भोजनं परान्नञ्च माघे मासि परित्यजेत्।
प्रात: शुक्लाम्बरधर: कृतपञ्चमहाधार:।
पञ्चभिर्मासमेकन्तु स्थिरबुद्धो हि वैष्णव:।
दूर्व्वाङ्कुरैर्बिल्वदलै: शालपेद्विष्णुमव्ययम्।
अतिश्वेतैश्चन्दनेन विष्णोरग्रञ्च लेपयेत्।
पूजायै जगदीशस्य वैष्णवैस्तत्र चर्च्चित:।
प्रक्षालितानि मांसानि जलधौतानि कारयेत्।
शालपित्वा जगन्नाथमौदुम्बरफलेक्षत:।
मोक्तुकामं तत्करीरं दिनवर्ज्जेन यत्नत:।
बिल्वैरीषदुपेतैश्च य: शालपति केशवम्।
माघे मासि द्विजश्रेष्ठ सर्व्वं तस्य मयोदितं।
विष्णुत: पालयेत्: सर्व्वैर्भोगान्तान्तरान्वितै:।
इष्ट्वा सुतं सर्व्वं माघे मासि हरेर्व्रतम्।
यस्मात् प्रक्षाल्य पात्राणि दत्त्वा दीनानि
भारिभि:।
य: पूजयेच्चतस्रार्घं तस्य पुत्रं निशामय।
इष्ट्वा भोगान् भोगवतो दीर्घकालमिलन्नर:।
अन्ते कुलशतोपेतो विष्णुं वैष्णवमन्दिरे।
प्रयाणेऽपि च तस्यार्घा पुरुषस्य प्रयच्छत:।
शालपं शालपेद्यस्तु विष्णुं वैष्णवो जन:।
श्रीलक्ष्मीवरणार्थाय प्रात: स्नात्वा यतो जन:।
माघे विष्णुव्रती सद्यो मुच्यते सर्व्वपातकै:।
इष्ट्वा सुकालिताम् श्रीमान् पुत्रसौख्यसमन्वित:।
पूजयेद्विष्णुपुरं प्राप्य देवैरपि दुरासदम्।
सर्व्वैश्वर्य्या तथा विष्णु: सर्व्वेषां प्रभुरीश्वर:।
तस्मात्तस्मात्तमासेन विष्णोरेव विशिष्यते।
यस्मात् श्रीमद्भि न पर्व्वं माघमेकमिदं।
न मुक्तिं दिवसेनैव लभते श्रीं सदृग्नरम्।
तस्मात् वैष्णवैर्नरं सर्व्वश्रीमरि वैष्णवम्।

स्थापयेन्निशि निर्व्यातं देवे च वैष्णवी जन:।
न प्राप्नोति यथा श्रीमं देवदेवो जगद्गुरु:।
मुनै: पवित्रैर्दिवसं पक्षेराकादशैर्नृप:।
आत्मन: कुरुते सर्व्वं यथा शीतनिवारणम्।
तथा शीतभयं कुर्य्यादेवदेवस्य चक्रिण:।
क्षीरेण स्नापयेद्यस्तु माघे मासि जगद्गुरुम्।
सर्व्वे देवोत्तमो विष्णु: सन्तुष्टो न ददाति किम्।
य: पूजयेत् सकृन्माघे स्नापयित्वा जगद्गुरुम्।
नारिकेलोदकैर्हृद्यै: सर्व्वं तस्य प्रजायते।
नरकार्त्तो मज्जमानान् दुस्तरे स्वेन कर्म्मणा।
उद्धृत्य कोटिपुरुषान् मन्दिरं याति चक्रिण:।
माघे मासि च शुक्लायां पञ्चम्यां दिवसक्षये।
स्नाप्यस्नाप्य सम्पूज्य हरि: पूज्यो विशेषत:।
दानमो देवदेवाय सम्प्राप्य सुरारये।
पायसेनापूपसहितो माघे मासि दिने दिने।
अपूपं पायसं यस्तु माघे यच्छति चक्रिणे।
तस्य पुण्यमहं वक्ष्मि शृणु वैष्णव सोमिने।
यमो विष्णुपुरं गत्वा मन्वन्तरचतुष्टयम्।
सङ्क्लृप्तैर्मनोरम्यान् भोगान् प्रासादसञ्ज्ञितान्।
पुनरागत्य धरणीं चक्रवर्त्ती नृपो भवेत्।
सुकृत्तै भोगवृन्दं स्वं सुचिरं रसतो याति हरेर्गृहम्।
पञ्चम्यामेव सम्प्राप्तमेकादश्यान्तु सोमिने।
स्नापयेत् वैष्णवो दद्यात् परमान्नं सुरारये।
लक्ष्मणाहिजनेऽह्नि गुरुपञ्चमी विशिष्यते।
शुक्लपक्षे तिथिष्वासु दद्यादन्नं सुरारये।
सकाशमपि यो माघे विष्णवे वैष्णविप्रये।
स्नापूपं पायसं दद्यात् तस्य दुर्लभो हरि:।
यत्किञ्चित् विष्णुलाभार्थं माघे मासि प्रदीयते।
तदक्षयं भवेत् सर्व्वं कोऽपि नास्यान्तकृत्।
माघे मासि तिलं कर्म्म शुभं वाप्यशुभेन च।
तस्य नाशि क्षयं विप्र सम्पत्कारणमेव हि।
माघे चर्म्मकुशैर्म्म योऽर्च्चयेत् पुरुषोत्तमम्।
स नरोहेत् परमं धाम विष्णुत: सर्व्वमाप्नुयै:।
यावन्ति सर्व्वपुण्यानि क्षीरमे चक्रपाणये।
तावत् पुण्यफलान्यत्र क्षीरमे विष्णुमन्दिरे।
मेरुतुल्यसुवर्णानि दत्त्वा भवति यत् फलम्।
दूर्व्वैस्तु सर्व्वपूजैस्तु दत्त्वा भवति तत् फलम्।
सुवर्णपुष्पं विप्रेन्द्र सर्व्वकाम फलप्रदम्।
माघे मासि विशेषेण पूजने वैष्णवोत्तमे।
सुवर्णकुसुमैर्हृद्यैर्नित्यं हारिणी हरि:।
दत्तैर्येन: सुवर्णाद्यै: स अर्च्चयत्यच्युतम्।"
इति वाह्नि जिनवीजमाहात्म्ये ८७० अध्याये।

व्यास उवाच।
"माघपूजे माघस्नाने वैष्णवं पुरुषोत्तमम्।
पूजयेद्यो नरो भक्त्या स याति परमं पदम्।
माघपूजे स्नापयेद्यस्तु सर्व्वेषां वैष्णवोत्तमम्।
सर्व्वं तस्य प्रसन्नानि मनो: सत्यं द्विजोत्तम।
सर्व्वेषामपि यज्ञानां सर्व्वेषामपि चैव हि।
पुण्यं कोटिगुणं प्राप्य श्रीमं याति हरेर्गृहे।
तस्मिन् श्रीमाहात्म्ये शृण्वता कारयेत्तथा।
तस्य सम्पूजा हरयाद्य द्विजिरे श्रीमसर्व्वदै।

तिलानां मोदकं दिव्यं स गच्छेद्धरिमन्दिरम् ॥
यो दुग्धलड्डुकं दद्यात् केशवाय महात्मने ।
स विवेदन्तं ज्वाला मन्वन्तरशतावधि ॥
हरये ललितं खण्डं यस्तु यच्छति जैमिने ।
तस्य विष्णुः प्रसन्नात्मा छिनत्ति भवबन्धनम् ॥
विचित्रपायितं यस्तु दद्याद्भगवते द्विज ।
अन्ते शुक्लपुरं गत्वा स भवेत् सुरवन्दितः ॥
निर्मलां शर्करां यच्छेद्यस्तु कृष्णाय भक्तिमान् ।
स किं न लभते विप्र वासुदेवप्रसादतः ॥
सुपक्वं फाल्गुने मासि मधुरं बदरीफलम् ।
यस्तु यच्छति कृष्णाय फलं तस्य मयोच्यते ॥
दश सप्तकुलं सर्वं पुत्रपौत्रसमन्वितः ।
अन्ते हरेर्गृहं याति रथमारुह्य शोभनम् ॥
न दद्यादुपसंयुक्तं हरये बदरीफलम् ।
अज्ञानाद्ब्राह्मणश्रेष्ठ दद्याच्चेन्नारकी भवेत् ॥
फाल्गुने मासि यो दद्याद्धरये दाडिमीफलम् ।
सुपक्वं तत् फलं विप्र वदतो मे निशामय ॥
तत्र यावन्ति बीजानि तिष्ठन्ति दाडिमीफले ।
तावत्कल्पान्तरं विष्णोर्गृहे तिष्ठति वैष्णवः ॥
फाल्गुने मासि यो दद्याद्धरये गुडपिष्टकम् ।
स विज्ञेयो द्विजश्रेष्ठ वाजिमेधसहस्रकृत् ॥ ❀ ॥
चैत्रे मासि द्विजश्रेष्ठ मधुना मधुसूदनम् ।
स्नापयेच्छभते मर्त्यस्त्रिशीः परमं पदम् ॥
मधुना स्नापयेत् यस्तु नारायणमनामयम् ।
न चर्चा क्रियते तस्य कदाचिन्नरकिल्बिषा ॥
चैत्रे किंशुकपुष्पेण योऽर्चयेत् कमलापतिम् ।
तन्नाम चित्रगुप्तेन पञ्जिकायां न लिख्यते ॥
चैत्रिके जगतामीशं कृष्णं तिलकपुष्पकैः ।
यजतो नास्ति वै जन्म पुनरस्मिन् महीतले ॥
कृष्णं वञ्जुलपुष्पेण सर्वदेवशिरोमणिम् ।
पूजयेत्सुशुभो विप्र लभते नामदं क्वचित् ॥
वासन्तीभिः सुगन्धाभिर्जन्ती यस्तु पूजयेत् ।
भवन्तं परात्मानं स देवैरपि पूज्यते ॥
जपाकिंशुकपद्मैश्च रक्तकैरोऽर्चयेद्धरिम् ।
तं वन्दते सहस्राक्षः स्वयं पीठादधोऽपि च ॥
धात्रीपत्रैर्नवीनैश्च कोमलैर्हरिमर्चयेत् ।
अचिरेणैव लभते सकलं वाञ्छितं जनः ॥
शालिच्याख्यखण्डपत्रैश्च धुस्तूरैश्चार्कपुष्पकैः ।
योऽर्चयेद्विष्णुमीशञ्च स संसाराब्धिपारगः ॥
यो दद्याद्विष्णवे विप्र कदलीफलसत्तमम् ।
प्रकाशाक्षिदशाः सर्वे वन्दन्ते तमहर्निशम् ॥
यो दद्याच्चैत्रिके मासि भक्त्या गोपालरूपिणे ।
गोधूमपिष्टकं विप्र सर्वपापैः प्रमुच्यते ॥ ❀ ॥
आयाते माधवे मासि पवित्रे माधवप्रिये ।
त्यजेत् मैथुनं तैलं विष्णुभक्तः परित्यजेत् ॥
प्रातः स्नानाचरेत् स्नानं माधवे मासि वैष्णवः ।
परित्यजेत् परान्नञ्च न च कुर्यात् द्विभोजनम् ॥
प्रभाते पूजयेद्विष्णुं पूर्वोक्तविधिना द्विजः ।
वैशाखे स्नापयेद्विष्णुं पुण्यवासितवारिणा ॥
स्नापयेत् प्रीतलोपेन मन्त्रापूर्णन्तमच्युतम् ।
त्रिसन्ध्यं पूजयेद्भक्त्या नैवेद्यैर्विविधैः प्रभुम् ॥
वैशाखे यामलस्तम्भिलक्ष्मीपतिरुदाहृतः ।
न किं ददाति विप्रर्षे प्रसन्नः परमेश्वरः ॥
वैशाखे मासि यो दद्यात् यवान्नं चक्रपाणये ।
तस्य पुण्यानि संख्यातुं कः समर्थोऽस्ति पण्डितः ॥
यत्किञ्चिन्माधवे मासि माधवप्रीतिहेतवे ।
दीयते मानवैर्विप्र तत् सर्वमक्षयं भवेत् ।
यदन्यत् सुकृतं कर्म क्रियते मासि माधवे ।
माधवप्रीतये विप्र क्षयं तस्य न विद्यते ॥
वैशाखो दुर्लभो मासः सर्वकामफलप्रदः ।
पूजितव्यो हरिस्तत्र हित्वा कार्पण्यतान्यपि ॥
एकाहमपि यः पूजां वैशाखे कुरुते हरेः ।
घृतवर्णं हरिं यष्ट्वा यत् फलं लभते स तत् ॥
वैशाखे मासि यः कुर्यात् प्रपां माधवतुष्टये ।
दिने दिनेऽश्वमेधस्य फलं प्राप्नोति मानवः ॥
वैशाखे सिञ्चयेन्नित्यं विष्णुमभ्यर्चयन्निव ।
चतुर्जन्मफलावाप्तिहेतवे वैष्णवो जनः ॥
गण्डूषमात्रतोयेन कुर्यादर्घोऽच्युतस्य च ।
सोऽपि याति परं स्थानं विमुक्तः प्राप-
कोटिभिः ॥

व्यास उवाच ।

साक्षादेवः स्वयं विष्णुरभ्यर्थोऽखिलविश्वराट् ।
तद्भक्तिं कुर्वतः पुंसो विद्यते नाशुभं क्वचित् ॥
अश्वत्थं सेवते यस्तु विष्णुब्रह्मा नरोत्तमः ।
तस्य प्रसन्नो भगवान् ददाति परमं पदम् ॥"

इति पाद्मे क्रियायोगसारे ११ अध्यायः ॥❀॥

व्यास उवाच ।

"ज्येष्ठे मासि द्विजश्रेष्ठ भगवन्तं जनार्दनम् ।
पूजयेद्भक्तिभावेन जलैः संस्राव्य शीतलैः ॥
उद्वर्तनेन दातव्यं सुगन्धामलकी तथा ।
तैलं सुगन्धं हरये ग्रीष्मकाले दिने दिने ॥
सुवासिते शीतले च मन्दिरोत्तमनोहरे ।
प्रत्यहं कमलाकान्तं स्नापयेत् जलमध्यगे ॥
न रौद्रदेशे विप्रेन्द्र सधूमे रत्नशालये ।
न स्तुतिकामुके चैव स्नापयेत् कमलापतिम् ॥
चामरैर्वीजितः श्वेतैः सुरभैः कमलापतिः ।
ज्येष्ठे मासि द्विजश्रेष्ठ सुप्रीतः किं न यच्छति ॥
मयूरपुच्छरचनैर्निदाघे पूजितो हरिः ।
ददात्यभिमतं सर्वं अचिरेणैव सत्तम ॥
तालवृन्तकवातेन पवित्राम्बरवायुना ।
यैर्नीतो वीज्यते विष्णुस्ते सर्वे स्वर्गगामिनः ॥
यो गात्रलेपनं कुर्यात् सुगन्धैर्यक्षकर्दमैः ।
ग्रीष्मे हरेश्चन्दनेन स विष्णोस्तादधर्वी तनुम् ॥
गन्धैर्मृगमदाद्यैश्च यो लिम्पेन्माधवीं तनुम् ।
उद्यानगे द्विजश्रेष्ठ स मुक्तो नात्र संशयः ॥
प्रफुल्लकुन्दवोद्याने तुलसीकानने तथा ।
सन्ध्यायां स्नापयेद्विष्णुं देशे धीरसमीरणे ॥
सङ्गीतैः पाटलिपुत्र्यायां वेत्र विष्णुरकल्पतः ।
ज्येष्ठे मासि स विज्ञेयो वाजिमेधसहस्रकृत् ॥
यस्तु मुक्तावलीं दद्यात् ग्रीष्मे श्रीपतये जनः ।
भूपालत्वं हरिस्तस्मै यच्छेच्चक्रादि जन्मनि ॥
यस्तु भक्षयति ग्रीष्मे श्रीकृष्णं मणिमालया ।
तस्य पुण्यफलं विप्र वदतो मे निशामय ॥
यावद्ब्रह्मा सृजत्येनत् जैमिने सकलं जगत् ।
तावद्विष्णुपुरे तिष्ठेन्मणिमालाविभूषितः ॥
सुवर्णाभरणैर्वस्त्रै रजताभरणैस्तथा ।
कृष्णं भक्षयति ग्रीष्मे योऽपि तत्फलमाप्नुयात् ।
विचित्रं यस्तु पर्यङ्कं सगण्डूकं प्रयच्छति ।
हरये देवदेवाय न स्याद्दुःखी कदापि सः ॥
ग्रीष्मकाले न देयानि गुरूणि वसनानि च ।
हरये ब्राह्मणश्रेष्ठ देयं तत्त्वंशुकं शुचि ॥
यस्तु चूतफलैर्दिव्यैः सुपक्वैः पूजयेद्धरिम् ।
अन्ते शुक्लपुरं गत्वा स विवेदन्तं सुदा ॥
पियालानां फलैः पक्वैर्योऽर्चयेत् कमलापतिम् ।
सोऽपि तत्फलमाप्नोति किमन्यैरेकभाषितैः ॥
निदाघे हरये दद्यादृषवागमनिश्रीतलाम् ।
गानायज्ञसंयुक्तां श्रद्धया वैष्णवो जनः ॥❀॥
आषाढे मासि विप्रेन्द्र देवदेवं जगत्पतिम् ।
दधिभिः स्नापयित्वा तु पूजयेद्भक्तितो बुधः ॥
दधिभिः स्नापयेद्यस्तु भगवन्तं जनार्दनम् ।
मातुः पयोधरस्यः पुनर्जन्म न पीयते ॥
घनागमे घनश्यामं कदम्बकुसुमैर्हरिम् ।
आराध्य यान्ति विप्रर्षे प्राणिनोऽपि परां
गतिम् ॥
कदम्बपुष्पमालाभिस्तमभ्यर्च्य जलोचनम् ।
यत्तस्य ब्राह्मणश्रेष्ठ पुण्यं वाग्मि निशामय ॥
तस्यां यावन्ति मालायां तिष्ठन्ति कुसुमानि वै ।
प्रतिपुण्ये द्विजश्रेष्ठ वाजिमेधफलं लभेत् ॥
सुगन्धैः कैतकीपुष्पैः पूजितः कमलेक्षणः ।
सर्वं दुःखं हरत्येव मानवानां द्विजोत्तम ॥
घनसारां फलैर्दिव्यैः सुपक्वैर्हेतसम्भितैः ।
पूजितो भगवान् विष्णुर्ददात्यैश्वर्यसुत्तमम् ॥
आषाढे मासि दध्यन्नं हरये प्रतिवासरम् ।
श्रद्धया वैष्णवो दद्यान्मुक्तिमिच्छुर्द्विजोत्तम ॥
कृष्णाय नवनीतं यो ददाति वैष्णवो जनः ।
तस्य पुण्यं न संख्यातुं शक्नोत्यब्दशतैरपि ॥
दैवज्ञवीनं यो दद्याद्गोपालाय महात्मने ।
आमिषां लघुदाद्येव स महात्मा हरेः प्रियः ॥
सघृतकरान्नं दुग्धानि कृष्णाय यस्तु यच्छति ।
तस्य प्रसन्नो भगवान् ददात्यभिमतं फलम् ॥❀॥
श्रावणे मासि विप्रेन्द्र देवकीनन्दनं प्रभुम् ।
स्नापयेन्निर्मलैस्तोयैः शुद्धैः कलुषवर्जितैः ॥
मल्लिकाकुसुमैर्विष्णुं योऽर्चयेत् वनमाली जनः ।
विमुक्तः सकलैः पापैर्वैष्णवीकं स गच्छति ॥
शेफालिकाप्रसूनैश्च यूथिकाकुसुमैस्तथा ।
अर्चयन् कमलाकान्तं मनुजो नावसीदति ॥
सुगन्धैस्तगरैः पुष्पैः नवमल्लीकुसुमैस्तथा ।
योऽर्चयेत् कमलाकान्तं तस्य वश्यं जगत्त्रयम् ॥
प्रफुल्लैर्मालतीपुष्पैः सुगन्धैर्योऽर्चयेद्धरिम् ।
तत्पुण्यं नास्ति तत्तुल्यो येन स्यात्सदृशि
मानवः ॥
कुन्दपुष्पैश्च वन्यैश्च कैर्वगन्धं जनार्दनम् ।
अर्चयेत् सकलं कामानाप्नोति सुचि मानवः ॥
मल्लिकाप्रसूनैश्च तथा कुरबकैर्हरिम् ।
कुरबकैः पूजयेद्यस्तस्य तुष्टः सदा हरिः ॥
शेरीषकुसुमैर्विष्णुं वरपुष्पैश्च योऽर्चयेत् ।

पुनरागत्य धरणीं चतुर्वेदी द्विजो भवेत् ॥
तत्र भुक्त्वा सुखं सर्वं शोकदुःखविवर्जितः ।
पुनर्विष्णुपुरं गत्वा मोक्षं प्राप्नोत्यसंशयम् ॥
वीणां वादयते यस्तु पूजाकाले जगत्पतेः ।
पञ्चितानामयुतं स्यात् प्रतिजन्मनि जन्मनि ॥
मृदङ्गवाद्यकृद्यस्तु पूजायां कैटभद्विषः ।
तस्य प्रसन्नो देवेशो ददात्यभिमतं फलम् ॥
उत्सवं लिङ्गमप्येव भर्करीं मधुरीं तथा ।
पटहं दुन्दुभिश्चैव काहलं विष्णुवादनम् ॥
कांस्यञ्च करतालञ्च वेणुं वादयते च यः ।
पूजाकाले मधाविष्णोस्तस्य पुण्यं निशामय ॥
लक्षवर्षैः पातकैर्मुक्तो मन्दिरं याति चक्रिणः ।
परमं ध्यानमासाद्य तत्रैव परिमुच्यते ॥
करणञ्च यः कुर्य्यात् पूजाकाले जगद्गुरोः ।
सुखवाद्यञ्च विप्रेन्द्र तस्य पुण्यं मयोच्यते ॥
कोटिकोटिकुलैर्युक्तः प्रयाति हरिमन्दिरम् ।
ज्ञानमासाद्य तत्रैव मोक्षमक्षयमाप्नुयात् ॥
विष्णोरायतने यस्तु भक्तियुक्तः प्रनृत्यति ।
स याति ब्राह्मणश्रेष्ठ तद्विष्णोः परमं पदम् ॥
यस्तु गायति गीतानि भक्त्या नारायणाग्रतः ।
स नरस्तत्फलमाप्नोति गन्धर्व्वाणां पुरेषु च ॥
स्तौति स्तोत्रं जगन्नाथं यो भक्त्या वैष्णवो जनः ।
तस्य प्रसन्नो भगवान् सर्व्वान् कामान् प्रयच्छति ॥
मासि मासि हरिं यस्तु विधिनानेन पूजयेत् ।
ऋक्षिरेणेह विप्रर्षे प्रसादयति केशवम् ॥
जगदुदधिमिमं ये तर्त्तुमिच्छन्ति मर्त्याः
प्रपुरतरभीरं सर्व्वदुःखप्रदञ्च ।
परमपुरुषपादाम्भोजयुग्मं मनोज्ञं
त्रिदशनिवहसेव्यं ते तु सर्व्वे व्रजन्तु ॥"
इति पाद्मे क्रियायोगसारे १३ अध्यायः ॥६॥

अथ वर्ज्जितं सेवापराधाः । भगवद्भक्तानां भक्तियुक्तान्नभोजनम् १ अतिथिहृदिने दन्तधावनमकृत्वा विष्णोरुपसर्पणम् २ मैथुनं जग्ध्वाकृत्वा विष्णोरुपसर्पणम् ३ मृतं नरं स्पृष्ट्वाकृत्वा विष्णुकर्म्माचरणम् ४ रजस्वलां स्पृष्ट्वा विष्णुगृहप्रवेशनम् ५ मानवं शूद्रं स्पृष्ट्वाकृत्वा विष्णुसन्निधावस्थानम् ६ विष्णुं स्पृशतः पापुरुषप्रयोगः ७ विष्णोः कर्म्म कुर्व्वतः पुरोधसस्त्यागः ८ विष्णुगन्धमनाघ्राय घ्राणान्तरप्रशंसा ९ अतिमलिनं वासः परिधाय विष्णुकर्म्माचरणम् १० अविधानेनाचम्य विष्णोरुपसर्पणम् ११ विष्णोरग्रतो हसित्वा विष्णोरुपसर्पणम् १२ क्रुद्धस्य विष्णुस्पर्शनम् १३ निषिद्धगुल्फेन विष्णुस्पर्शनम् १४ रक्तं वासः परिधाय विष्णोरुपसर्पणम् १५ अन्धकारे दीपेन विना विष्णोः स्पर्शनम् १६ क्षुत्क्षामं परिधाय विष्णोः कर्म्माचरणम् १७ वामपार्श्वेनोपविष्टस्य परिधाय विष्णोः कर्म्माचरणम् १८ विद्धदं क्षुरोच्छिष्टस्नानम् १९ वराहमांसं भुक्त्वा विष्णोरुपसर्पणम् २० पलाण्डुगृञ्जनवाराहिमांसं भुक्त्वा विष्णोरुपसर्पणम् २१ दीपं स्पृष्ट्वा ज्वलन्तमकृत्वा विष्णोः [illegible] २२ मद्यमांसं भुक्त्वाकृत्वा विष्णूपसर्पणम् २३ पिण्याकं भुक्त्वा विष्णोरुपसर्पणम् २४ विष्णवे वराहमांसनिवेदनम् २५ मद्यमादाय पीत्वा वा स्पृष्ट्वा विष्णुगृहप्रवेशनम् २६ परकीयेणाशुचिना वस्त्रेण परिहितेन विष्णुकर्म्माचरणम् २७ विष्णवे गवान्नमप्रदाय तद्भोजनम् २८ गन्धपुष्पैरप्रदाय धूपदीपदानम् २९ उपानद्भ्यामारुह्य विष्णुस्थानप्रवेशनम् ३० नैरीशब्देन विना विष्णुप्रबोधनम् ३१ अजीर्णे सति विष्णुसपर्य्यानम् ३२ । एतद्विपरीतलक्षणम् । इत्याह्निकाचारतत्त्वम् ॥ ❀ ॥

अपि च ।

धरण्युवाच ।

"तवापराधात् देवेश वर्ज्यान् यान् वैष्णवेन च ।
निरापराधी मनुजः सापराधश्च जायते ॥
कर्म्मणाचरणे येन करणेन जुगुप्सितम् ।
तच्च पूजाफलं सर्व्वं जायते तद्वदस्व मे ॥

वराह उवाच ।

कर्म्मणा मनसा वाचा ये पापरुचयो जनाः ।
भक्षणं दन्तकाष्ठस्य राजान्नस्य तु भोजनम् ॥
मैथुनं शवसंस्पर्शं पुरीषोत्सर्गमेव च ।
क्षतक्षुद्व्यथाः क्षपणं स्पर्शनं मेहनं तथा ॥
अभाष्यभाषणं कोपं पिण्याकस्य च भक्षणम् ।
रक्तपारक्यमलिनं वस्त्रधारित्वमौलिजम् ॥
गुरोश्चालीकनिर्ब्बन्धं पतितान्नस्य भक्षणम् ।
अभक्ष्यभक्षणञ्चैव तक्षुलीयविभीतकम् ॥
अदानं तु वराहस्य ज्ञानपादवराकयोः ।
भक्षणं देवतागारे सोपानत्कोपसर्पणम् ॥
तथैव देवपूजायां निषिद्धकुसुमार्च्चनम् ।
अनुक्तार्थे च निर्म्माल्यं पूजा जीर्णान्नकारयोः ॥
यानं सुरायाः देवस्य अत्यन्तारे प्रबोधनम् ।
पातकर्म्मार्चने विष्णोरनमस्करणं तथा ॥
अपराधाश्चयश्चिन्त्य क्षमाख्याता मया धरे ।
एभिर्युक्तस्तु पुरुषो विष्णुं नैव प्रपश्यति ॥
दूरस्थो न नमस्कारं कुर्य्यात् पूजा तु राजसी ।"
तत्प्रायश्चित्तं यथा,—
"एकरात्रं त्रिरात्रं वा त्रिरात्रं स्नानमेव च ।
त्रयाणां पञ्चगव्याशी मनसस्त्वालिकं क्रमात् ॥
नीलीरङ्गपनोदार्थं गोमयेन प्रघर्षणम् ।
प्राणायामेन शुद्धिः स्यात् नीलीवस्त्रस्य धारणात् ।
चान्द्रायणत्रयं कुर्य्यात् गुरोः क्षमितमुत्तमम् ।
चान्द्रायणं परान्नस्य पतितान्नस्य भक्षणात् ॥
चान्द्रायणं परान्नस्य प्राणायामं तथैव च ।
गोप्रदानस्य भोक्तुश्च अभक्ष्यस्य च भक्षणे ॥
उपवासस्तु पर्य्यायं पञ्चगव्येन शुध्यति ।
गोपानत्पादरेणुं पादं क्षत्वस्य हरिभोजनम् ॥
पुष्पाणामर्च्चनं स्नानं देवस्यैव कारयेत् ।
अनिर्म्माल्ये नमस्कारं स्नानं पञ्चान्तेन तु ॥
सुरापाने द्विजातीनां चान्द्रायणशतत्रयम् ।
तथैव ब्राह्मणो तु पाराकत्रयं चरेत् ॥
पञ्चकृच्छ्रेण शुद्धिः स्यात् गोप्रदानत्रयेण च ।
क्षत्राद्यानामकामेन पञ्चान्तनिष्कृतात् ॥

मुच्यते त्वपराधैस्तु तथा विष्णोः स्तवं पठन् ।
एतत्ते कथितं गुह्यं किमन्यत् श्रोतुमिच्छसि ॥

धरण्युवाच ।

अस्ति कश्चिदुपायोऽत्र येन त्वं शृणु तुष्यसि ।
पूजितः सकलश्चासि अपराधविशोधनः ॥

वराह उवाच ।

संवत्सरस्य मध्ये तु तीर्थे सौकरवे मम ।
उपोषितः स्नानेन गङ्गायां शुद्धिमाप्नुयात् ।
मथुरायां तथाप्येवं सापराधः शुचिर्भवेत् ॥
अनयोस्तीर्थयोरेवं यः सेवेत सकृन्नरः ।
सहस्रजन्मजनितानपराधान् जहाति सः ।
ज्ञानात् पानात् तथा ध्यानात् कीर्त्तनाद्धारणात्तथा ।
अवगाहननाच्चैव दर्शनाद्याति पातकम् ॥"
इति वाराहपुराणे अपराधप्रायश्चित्तनामाध्यायः ॥

सेवि, स्त्री, (सेव्यते लोकैरिति । सेव + इन् ।) फलविशेषः । सेऊ इति हिन्दी भाषा । तत्पर्य्यायः । वदरम् २ सिद्धितिकाफलम् ३ सुष्टिप्रमाणम् ४ सेवितम् ५ सेवम् ६ । अस्य गुणाः । वातपित्तहरत्वम् । गुरुत्वम् । दृंहणत्वम् । कफकरत्वम् । दृढत्वम् । पाके स्वादुरसत्वम् । हितत्वञ्च । इति राजनिर्घण्टः ॥

सेविका, स्त्री, मिष्टान्नविशेषः । सेऊँयाभि इति भाषा । यथा,—
"समितावर्णिकाः कृत्वा सुरक्षा यवमात्रकाः ।
शुष्काः क्षीरेण संस्राव्या भोज्या घृतसिता-
न्विताः ॥"
अस्या गुणाः ।
"सेविका तर्पणी वल्या गुर्व्वी पित्तानिलापहा ।
बाहिणी बल्यिबृंहण्या तां खादेन्नातिमात्रया ॥"
इति भावप्रकाशः ॥
(दासी । भाजनम् । इति केचित् ॥)

सेवित, त्रि, (सेव + क्तः ।) सम्पासितगुर्व्वादिः । तत्पर्य्यायः । वरिवसित २ वरिवस्यित ३ उपासित ४ उपचरित ५ । इति शब्दरत्नावली ॥ आराधितः । उपभुक्तः । आश्रितः । इति सेवधात्वर्थदर्शनात् । (यथा, महाभारते । १ । १७ । ६ ।
"कामनाभरणं चित्रं देवगन्धर्वसेवितम् ।")

सेविकेये, क्ली । इति राजनिर्घण्टः ॥

सेव्यं, क्ली, (सेव्यते इति । सेव + ण्यत् ।) वीरणमूलम् । इत्यमरः । २ । ४ । १४३ ॥ (अस्य पर्य्यायो यथा,—
"वीरणस्य तु मूलं स्यादुशीरं नलदञ्च तत् ।
खसमूलञ्च सेव्यञ्च वमनान्निकमित्यपि ॥"
इति भावप्रकाशे पूर्व्वखण्डे १ भागे ॥
कामष्कम् । उशीरवत्पीतच्छविविशेषः । तत्पर्य्यायो यथा,—
"कामष्कं गुणतो ज्ञेयं स्वादुशीतं सुगन्धकम् ।
इष्टकापथकं सेव्यं नलदञ्चावदातकम् ॥"
इति च भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।

"स्यादुशीरं नगालस्थ सेव्यं लामज्जकन्तथा।"
इति गारुडे २०८ अध्यायः॥)

सैक्यः, पुं, (सेक्येन इति। सेक+ष्यञ्।) अश्वत्थवृक्षः। इति राजनिर्घण्टः॥ शिञ्चलवृक्षः। इति शब्दरत्नावली॥

सेक्यः, त्रि, (सेक्र सेवने+ण्यत्।) सेवार्हः। इति मेदिनी॥ (यथा, कथासरित्सागरे। ५२। १३०।
"अहं तं सेव्यमन्येद्युः करिष्यामीश्वरं सखात्।
तस्मं वृणीष्व भर्त्तारं यदि ते पुत्रि रोचते॥")

सेक्या, स्त्री, (सेक्य+ष्यञ्। टाप्।) वन्दाकृक्षः। इति शब्दरत्नावली॥

सेङ्, त्रिलाम्। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-अनिट्।) सायति। त्रिति। क्षयः। इति दुर्गादासः॥

सैंहः, त्रि, (सिंहस्यायमिति। सिंह+अण्।) सिंहसम्बन्धी। सिंहतुल्यः। इति सिद्धान्तकौमुदी॥ (स्त्रियां ङीप्। यथा, माघे। १।४०।
"मटाकूटाभिन्नवनेन विभ्रता
नृसिंह सैंहीमनतुं तनुं त्वया।
स मुग्धकान्तास्तनभङ्गभङ्गुरे-
ष्वरोविहारं प्रतिचक्करे नखैः॥")

सैंहली, स्त्री, (सिंहले देशे भवा। सिंहल+अण्। ङीप्।) सिंहलिप्पली। तत्पर्य्यायः। सर्पदन्ता २ सर्पाक्षी ३ व्रजभूमिजा ४ पार्व्वती ५ प्रौढजा ६ नाम्बा ७ लम्बबीजा ८ उत्कटा ९ अहिजा १० सिंहलस्था ११ लम्बदन्ता १२ जीवन्ता १३ जीवाला १४ जीवनेष्टा १५ कुरण्टी १६। अस्या गुणाः। कटुत्वम्। उष्णत्वम्। अग्निनाशित्वम्। दीपनत्वम्। कफश्वासमेदोरोगनाशित्वम्। कोष्ठशोधनत्वञ्च। इति राजनिर्घण्टः। सिंहलदीपभवे, त्रि॥

सैंहिकः, पुं, (सिंहिकायां भवः। अण्।) राहुः। इति शब्दरत्नावली॥

सैंहिकेयः, पुं, (सिंहिकाया अपत्यं पुमानिति। सिंहिका+ढक्।) राहुः। इत्यमरः॥ (यथा, माघे। २। ३५।
"प्रियते यावदेकोऽपि त्रिपुरावन् कुतः सुरम्।
पुरः क्षिपति भीमं हि सैंहिकेयोऽसुरक्षियम्॥")

सैकतं, क्ली, (सिकता: सन्त्यत्रेति। अण्।) वालुकामयतटम्। इत्यमरः। १। ३। २६॥ (यथा, कुमारे। १। ५८।
"मन्दाकिनीसैकतवेदिकाभिः
सा रत्नदीपैः कृतिमैरनल्पैः।
रेमे मरुत्संभृतया मरीचि-
कोद्गारमिश्रेण मरुप्रवाले॥")

सैकतः, त्रि, (सिकता: सन्त्यत्रेति। सिकता+"सिकताशर्कराभ्याञ्च।" ५। २। १०४। इति अण्।) सिकतामयः। इत्यमरः। १। १०। ८॥ तत्पर्य्यायः। सिकतिलः २ सिकतावान् ३। इति राजनिर्घण्टः। त्रिषा, भागवते। १२। २८। १२।
"शैली दारुमयी लौही लेप्या लेखा च सैकती।
मनोमयी मणिमयी प्रतिमाष्टविधा स्मृता॥")

सैकतिकं, क्ली, माल्यजाता। मङ्गलसूत्रकर्म्म। इति मेदिनी॥

सैकतिकः, पुं, (सैकतं पुलिनं प्रियत्वेनास्यास्तीति। सैकत+ठन्।) संन्यस्तः। क्षपणकः। सन्देहजीविनि, त्रि। इति मेदिनी॥

सैकतेष्टं, क्ली, (सैकतं स्थानमिष्टमस्य।) आर्द्रकम्। इति राजनिर्घण्टः॥ वालुकामयप्रिये, त्रि॥

सैतवाहिनी, स्त्री, वालुदानदी। इत्यमरः। १। १०। ३३॥

सैद्धान्तिकः, त्रि, (सिद्धान्तं वेत्तीति। सिद्धान्त+ठक्।) सिद्धान्तज्ञः। इति हेमचन्द्रः कौमुदी च॥

सैनापत्यं, क्ली, (सेनापतेर्भावः कर्म्म वा। सेनापति+"पत्यन्तपुरोहितादिभ्यो यक्।" ५। १। १२८। इति यक्।) सेनापतेर्भावः। तत्कर्म्म च। इति सिद्धान्तकौमुदी॥ (यथा, मनुः। १२। १००।
"सेनापत्यञ्च राज्यञ्च दण्डनेतृत्वमेव च।
सर्व्वलोकाधिपत्यञ्च वेदशास्त्रविदर्हति॥"
सेनापतेरिदमिति। "दित्यदित्यादित्येति।" ४। १। ८५। इति ण्यः।) सेनापतिसम्बन्धिनि, त्रि॥

सैनिकः, पुं, (सेनां समवैतीति। सेना+"सेनाया वा।" ४। ४। ४५। इति प्रत्ये ठक्।) सेनायां समवेतः। इत्यमरः। २। ८। ६१॥ मिलितदृश्यश्चरथपादातं सेना तत्र ये समवेताः एकदेशीभूतास्ते सैन्याः सैनिकाश्च। इति भरतः॥ (यथा, रघुः। ३। ६१।
"निमेषमात्रादवधूय तद्भयं
नयोत्सिनः सैनिकहर्षनिस्वनैः॥")
सैन्यरक्षकः। इति मेदिनी॥ अश्वारूढः। इति हेमचन्द्रः॥ प्राप्तिवर्धनियुक्तः। यथा, श्रीभागवते षष्ठस्कन्धे। ४। ४२।
"ये त्विह वै पुरुषाः पुरुषमेधेन यजन्ते याश्च स्त्रियो वृषलीः खादन्ति तांश्च तांश्च ते पशव इह निहता यमसदने यातयन्तो रक्षोगणाः सैनिका एव सधिनिका अवदायावद्यं क्षिपन्तीति। सैनिकाः प्राप्तिवर्धनियुक्ताः। इति तिथ्यादितत्त्वम्॥ सेनासम्बन्धिनि, त्रि॥ (यथा, महाभारते। ७। १६०। ४९।
"एवं तं निहतं संख्ये दृष्ट्वा सैनिको नरः॥")

सैन्धवं, क्ली, पुं, (सिन्धौ भवमुद्भवोर्हे सिन्धुदेशे वा भवम्। सिन्धु+"तत्रभवो।" ४। ३। ५३। इति अण्।) लवणविशेषः। स तु सिन्धूद्भवपश्चिमदेशोद्भवः। तत्पर्य्यायः। शीतशिवम् २ मालिमन्थम् ३ सिन्धुजम् ४। इत्यमरः। २। ८। ४०॥ घनसारम् ५ सिन्धुदेशजम् ६ मालिकाख्यम् ७। इति भट्टारः॥ शिलाशिवम् ८। इति शब्दरत्नावली॥ नादेयम् ९ शिवम् १० सिन्धुम् ११ शिलाशुक्लम् १२ पथ्यम् १३। अस्य गुणाः।
"सैन्धवं लघ्वग्निदृग्यं चक्षुष्यं दीपनं रुचि।
पूतं स्वादु त्रिदोषघ्नं त्रयदोषविनाशनम्॥
सैन्धवं त्रिविधं ज्ञेयं सितं रक्तमिति क्रमात्।
रसवीर्य्यविपाकेषु गुणाढ्यं कथितं सितम्॥"
इति राजनिर्घण्टः॥
अपि च।
"सैन्धवं लवणं स्वादु दीपनं पाचनं तनु।
स्निग्धं रुच्यं हिमं हृद्यं लघ्वनेत्रं त्रिदोषहृत्॥"
इति भावप्रकाशः॥
किञ्च।
"सैन्धवं दोषजिद्दृश्य चक्षुष्यमविदाहि च।
अग्निसन्दीपनं स्निग्धं रोचनं मधुरं लघु॥"
इति राजवल्लभः॥
तस्य गुणविशेषाः। यथा, स्मृतिः।
"सर्व्वेषु सैन्धवस्नानं श्राद्धे च दधिसर्षपौ।"
इति हविष्यान्नगणने तिथ्यादितत्त्वम्॥

सैन्धवः, पुं, (सिन्धुरभिजनोऽस्येति। सिन्धु+"सिन्धुतक्षशिलादिभ्योऽणञौ।" ४। ३। ९३। इति अण्।) घोटकः। स तु सिन्धोरदूरभवः। विकारसंघेति चादूरभवार्थे ण्यः। इत्यमरभरतौ। २। ८। ४४॥ (यथा, भागवते। ६। १। २३।
"स एकदा महाराज! विचरन् मृगयां वने।
हृतः कतिपयामात्यैरश्वमारुह्य सैन्धवम्॥"
सिन्धुदेशाधिपतिः। जयद्रथः। यथा, महाभारते। १। १। १६६।
"यदा द्रौणिः कृतवर्म्मा कृपश्च
कर्णो दौःशासिर्मद्रराजश्च शूरः।
अमर्षयन् सैन्धवं वध्यमानं
तदा नाशंसे विजयाय सञ्जय॥"
सिन्धुदेशोत्पन्नमात्रे। यथा, तत्रैव। ३। ५१। २४।
"दारुकांश्चीनांश्च तुखारान् सैन्धवांस्तथा॥")

सैन्धी, स्त्री, तालादिरसनिर्य्यासः। तत्पर्य्यायः। हाला २। अस्या गुणाः। ग्रीतत्वम्। कषायत्वम्। अग्नित्वम्। पित्तदाहनाशित्वम्। वातदत्वञ्च। इति राजनिर्घण्टः॥

सैन्यं, क्ली, (सेना एव। चतुर्व्वर्णादित्वात् ष्यञ्।) सेना। इत्यमरः। २। ८। ७८॥ (यथा, मार्कण्डेये। ८७। २१।
"दृष्ट्वैतत् तत् सैन्यं दृष्ट्वा दूतं निपातितम्।
सुरथश्च समहावीर्य्यो दिशो मेने भयातुरः॥")

सैन्यः, पुं, (सेनां समवैतीति। सेना+"सेनाया वा।" ४। ४। ४५। इति ण्यः।) सेनासमवेतः। इत्यमरः। २। ८। ६१॥ "मिलितदृश्यश्चरथपादातं सेना तत्र ये समवेता एकदेशीभूतास्ते सैन्याः सैनिकाश्च।" इति भरतः॥ क्लिञ्च।
"सैन्यं स्त्रीपं पुंसि वा समवेते तु यावति॥"
इति मेदिनी॥

सैन्यष्टं, क्ली, (सैन्यस्य पृष्टम्।) सैन्यस्य पश्चाद्भागः। यत्रस्थिते राज्ञा सर्व्वं सैन्यं प्रतिष्ठति। तत्पर्य्यायः। प्रतिग्रहः २। इत्यमरः। २। ८। ७६॥ परिग्रहः ३। इति भरतः॥ पतद्ग्रहः ४। इति टीकान्तरम्॥

सोपाधि:, त्रि, (उपाधिना सह वर्त्तमान:।) उपाधियुक्त:। प्रतिलाभेच्छादिना दानादि:। यथा नारद:।
"अदत्तन्तु भयक्रोधकामशोकरुगन्वितै:।
बालमूढ़ास्वतन्त्रार्त्तमत्तोन्मत्तापवर्जितै:॥
कर्त्ता ममेदं कर्म्मेति प्रतिलाभेच्छया च यत्॥"
प्रतिलाभेच्छया सोपाधिदत्तमपार्थसिद्धावपिद्धमिति विवादचिन्तामणि:। इति शुद्धितत्त्वम्॥

सोपानं, क्ली, (उपानसुपरिगमनं तेन सह विद्यमानम्।) आरोहणम्। इत्यमर:। २।२।१८॥ इष्टकादिरचिते पविठा इति ख्याते। देशान्तरे सड़खड़ीति यत् प्रसिद्धम्। आरुह्यते अनेन आरोहयं अनट्। उपपूर्ब्बादनितिर्भावे अल् अनेकार्थत्वादुपानं ऊर्द्ध्वगमनं तेन सह वर्त्तते सोपानम्। सोपानसिद्धसाधा: संबाधसमूहसञ्चारीति दन्त्यादाद्यविवेक:। इति भरत:॥
किञ्च।
"आरोहणञ्च सोपानं पैठा इति समाख्ये।
सोपाने काष्ठघटिते नि:श्रेण्यिस्त्रधिरोहिणी॥
नि:श्रेणी स्यान्नि:श्रयणी तथा नि:श्रेयिणी-
त्यपि॥"
इति शब्दरत्नावली॥
(यथा, कुमारे। १। ३६।
"मध्येन सा वेदिविलग्नमध्या
वलित्रयं चारु बभार बाला।
आरोहणार्थं नवयौवनेन
कामस्य सोपानमिव प्रयुक्तम्॥")

सोभाञ्जन:, पुं, (शोभाञ्जन:।) इत्यमरटीकायां भरत:। २। ४। ३१॥

सोमं, क्ली, (सु प्रसवैश्वर्य्ययो:+मन्।) काञ्जिकम्। स्वर्ग:। इति केचित्॥

सोम:, पुं, (सौति अस्तमिति। सु प्रसवे+"अर्त्तिसुसृधृसीति।" उणा० १। १३६। इति मन्।) चन्द्र:। इत्यमर:। १। ३। १४॥ (यथा, हरिवंशे। ४। २।
"द्विजानां पीवरश्चैव मद्यजश्चयवोऽथवा।
यज्ञानां तपसाञ्चैव सोमं राज्ञेऽभ्यषेचयत्॥")
कर्पूर:। इति धरणि:। २।६।१७०॥ यानर:। कुबेर:। यम:। वायु:। वसुभेद:। (यथा, मात्स्ये। ५। २१।
"आपो ध्रुवश्च सोमश्च धरश्चैवानिलोऽनल:।
प्रत्यूषश्च प्रभासश्च वसवोऽष्टौ प्रकीर्त्तिता:॥")
अम्बु। सोमलतौषधि:। इति मेदिनी॥ (अस्य विवरणं यथा,—
"ब्रह्मादयोऽप्यस्य पुरं सोमसंज्ञितम्।
वराम्बुविनाशाय विधानं तस्य पश्यति॥
एष एव खलु भगवान् सोम: स्थानगामाद्यतिसौम्यविशेषैश्चतुर्विंशतिधा भिद्यते। तद्यथा, अंशुमान् शुक्लवर्णश्चैव चन्द्रमा रजतप्रभ:। पूर्णसोम: कलीयांश्च श्वेताख्य: कनकप्रभ:॥ प्रत्यक्षवर्णकालाख्य: कर्पूरोत्पलसन्निभ:। सप्तमश्चो महासोमो पञ्चमि मणिसन्निभ:॥ गायत्र्यक्षेष्टुभ: पाङ्क्तो जागत: शाङ्करस्तथा। अग्निसोमो रैवतश्च यथोक्त इति संज्ञित:॥ गायत्र्या त्रिपदा युक्तो यश्चोष्णपतिरुच्यते। एते सोमा: समाख्याता वेदोक्तैर्नामभि: शुभै:॥ सर्व्वेषामेव चैतेषामेको विधिरुपासने। सर्व्वे तुल्यगुणाश्चैव विधानं तेषु वक्ष्यते॥
अतोऽन्यतमं सोमसुपयुञ्जीत सर्व्वौषधरसपरिचारकोपेत: प्रशस्तदेशे चित्रतमागारं कारयित्वा कृतदोष: प्रतिसंरुद्धभक्त: प्रशस्तेषु तिथिकरणमुहूर्त्तनक्षत्रेषु अंशुमन्तमादायाध्वरकर्म्मणाकृतमभिश्रुतमभिहुतं चान्तरागारे कृतमङ्गल: सोमकन्दं सुवर्णरूप्या विदार्य्य पयो गृह्णीयात् सौवर्णे पात्रेऽञ्जलिमात्रं तत: सद्यदेवोपयुञ्जीत नाखादयंस्तत उपसृज्य शेषमभ्युक्षेच्च यमनियमाभ्यामात्मानं संयोज्य वाग्यतोऽभ्यन्तरत: शुद्धक्षिप्तपाश्यमानो विहरेत्॥ रथायनं पीतवांस्तु निवाते तल्पगा: शुचि:। आसीत तिष्ठेत् क्रामेच्च न कथञ्चन संविशेत्॥ सायं वा भुक्तवान् घृतप्राशि: शुभ्रशय्यायां शुभ्रावनिजोत्तरायां शुद्धक्षिप्तपाश्यमान: शयीत लघितो वा शीतोदकमात्रां पिबेत्तत: प्रातरुत्थायोपसृतप्राशि: कृतमङ्गलो गां स्पृष्ट्वा तथैवासीत। तस्य जीर्णे सोमे हृदिरुपपद्यते तत: शोणितात्तं क्षमिथामिश्रं हृद्धितवत: सार्धं घृतशीतं क्षीरं पिबेत्। ततस्तृतीयेऽहनि क्षमिथामिश्रमतिचार्य्यते स तेनानिष्टप्रतिरुद्धप्रभृतिभिर्विरेचनैर्मुक्त: शुद्धतनुर्भवति तत: सोयं स्नातस्य पूर्ब्ववदेव क्षीरं पिबेत्। चौमवस्त्रावृतायां चैनं शय्यायां शाययेत् ततश्चतुर्थेऽहनि तस्य क्षयपुरुत्थास्यते। तत: सर्व्वाङ्गेभ्य: क्षमयो निष्क्रामन्ति तदस्य शय्यायां पांशुभिरवकीर्य्यमाण: शयीत। तत: सायं पूर्ब्ववदेव क्षीरं पिबेत्। एवं पञ्चमषष्ठयोर्दिवसयोर्यवैर्यवागूं कृत्वा केवलसुभयकालमश्नीयात् क्षीरं पिबेत्तत: सप्तमेऽहनि निर्म्मांसस्नायुभूत: कृशं सोमपरिग्रहाद्येषोच्यते। तदस्य क्षीरेण सुतोल्लेन परिषिच्य तिलमधुकचन्दनाक्तानुत्पिण्डेदं पय: पाययेत्। ततोऽष्टमेऽहनि प्रातरेव क्षीरपरिषिक्तं चन्दनप्रदिग्धमात्रं पय: पाययित्वा पांशुशय्यां वस्तृतस्यास्य चौमाक्तायां शाययेत्ततो मांसमाप्याय्यते तक्त्वावदग्धति। एतन्नवरोमाणि चास्य पतन्ति। तस्य नवमदिवसात् प्रभृत्यस्यैतेष्वाप्यन्न: सोमवल्कक्वाथपरिषेक:। ततो दशमेऽप्येतदेव पिबेत्ततोऽस्य तत्कल्किरगात्रमुपैति। एवमेकादशद्वादशयोर्येवैत। तत्र पयोदधाज्यं प्रभृति सोमवल्ककषायपरिषेक:। एवमायोदशाहेन तत: सप्तदशाहाष्टादशयोर्दिवसयोर्दधना शाययेत् स्निग्धरुक्षयोर्दूर्व्वस्तटिकनिकाशा: समा: स्थिरा: सहिष्णव:। सदा प्रभृति चानयो: स्नायितव्यं क्षीरयवागूसमेतं यावत् षष्ठविंशतिरिति। ततोऽस्ये दशाष्टाक्षोदं यदूधमकार्षं मयका ततोऽस्य नखा जायन्ते विद्रुमेन्द्रगोपकतरुणादित्यप्रकाशा: स्थिरा: स्निग्धा लक्षणसम्पन्ना: केशाश्च जायन्ते त्वक् च नीलोत्पलजातसौपुष्पवैदूर्य्यप्रकाशा। जर्ज्जरेष्वसामान् केशान् वापयेत् वापयित्वा क्षीरवृक्षचन्दनक्षौद्रतिलकल्कै: शिर: प्रक्षिप्तात् पयसा वा स्नापयेत्॥

ततोऽस्यानन्तरं सप्तरात्रात् केशा जायन्ते भ्रमराञ्जननिभा: कुञ्चिता: स्निग्धाग्रतश्चिरात्प्रथमपरिसरान्निष्क्रम्य सुकूर्च्चं स्थित्वा पुनरेवान्त: प्रविशेत्। ततोऽस्य बलातैलमभ्यङ्गार्थेऽवचार्य्यम्। यवपिष्टमुद्वर्त्तनार्थे। सुखोष्णेन पय: परिषेकार्थे। त्रपणकर्ण्डकषायसुखोदनार्थे। क्षीरं क्षीरपोदकं स्नानार्थे। चन्दनमनुलेपनार्थे। आमलकरस-विमिश्राभ्यास्य यूषस्त्रपिकल्या:। क्षीरमधुकसिद्धस्त्रं क्षालितलसवचारणार्थे। एवं दशरात्रं ततोऽन्यद्दशरात्रं द्वितीये परिसरे वर्त्तेत। ततस्तृतीये परिसरे स्थिरीकुर्व्वन्नात्मानमन्यदशरात्रमासीत। किञ्चिदातपवनान् वा सेवेत पुनश्चान्त: प्रविशेत्। न चात्मानमादर्शेषु वा निरीक्षेत रूपप्रशंसित्वात् ततोऽन्यद्दशरात्रं क्षौद्रादीन् परिहरेदेवं सर्व्वेषामुपयोग:। विशेषतस्तु वक्ष्यीप्रतानक्षुपाद्य: सोमा भक्षयितव्या:। तेषान्तु प्रसन्नमर्द्धचतुर्थसुख्य:।

अंशुवर्णं सौवर्णे पात्रेऽभिषुणुयात्। चन्द्रमसं रजते चोपयुञ्जीताष्टगुणमेवं सर्व्वमयाप्येषान्देवमनुप्रविशति। शेषांस्तु ताम्रमये मृण्मये वा रोहिते वा चर्म्मणि वितते भूमावर्च्चे भिर्मन्त्रै: सोमा उपयोक्तव्या:। ततश्चतुर्थे मासे पौर्णमास्यां शुचौ देशे ब्राह्मणानर्घयित्वा कृतमङ्गली नि:क्षत्र यथोक्तं भक्षयेदिति॥
ओषधीनान्यतिं सोमसुपयुञ्ज्य विचक्षय:।
दशवर्षसहस्राणि नयान् धारयते तनुम्॥
जानिर्न तोयं न विषं न शस्त्रं नाग्निमेव च।
तस्यात्मायु:प्रभवे समर्थाश्च भवन्ति हि॥
भार्य्यायां षष्टिवर्षायां प्रसूतानामनेकधा।
कुमारायां सहस्रस्य वर्षं वक्ष्यभिजायते॥
क्षीरोदं प्रकृतदनसुतरांश्च कुरुतेऽपि।
यत्रेच्छति च गन्तुं वा तत्राप्रतिहतामति:॥
कन्दर्प इव रूपेण कान्त्या चन्द्र इवापर:।
प्रज्ञादयति भूतानां मनांसि स मनस्विनि:॥
साङ्गोपाङ्गांश्च निखिलान् वेदानिच्छति तत्क्षत:।
चरत्यमोघसङ्कल्पो देवपक्षीयितं जगत्॥
सर्व्वेषामेव सोमानां पत्राणि दृढ़ानि च।
तानि शुष्कानि च क्षिप्ते चूर्णायन्ते भिषजन्ति च॥
एकैकं चायते मद्यं सोमस्यापरसंज्ञया।
शुक्लपक्षे पौर्णमास्यान्तु भवेत् पक्षद्वयोदय:॥
क्षीयते पक्षमेकैकं दिवसे दिवसे पुन:।
कृष्णपक्षस्य चापि क्षतो भवति केवला॥
अंशुमानाप्यमन्यस्तु कान्त्यानुकृतप्रभ:।
कल्याकारकन्दस्तु शुक्लवार्क्षशुनच्छद:॥
चन्द्रमा: कनकाभासो जले चरति सर्व्वदा।
शकटाकृतिनामा च चैताश्चापि प्राकुरौ॥

सोमः

तस्य राहुग्रासकारणं यथा,—
ब्रह्मोवाच ।
"यदयं वदते लोको वालिशत्वान्महामते ।
तदहं संप्रवक्ष्यामि चन्द्रसूर्योपरागिकम् ॥
यदि सत्यमयं भक्तस्तेजोराशिर्दिवाकरः ।
तत् कथं नोदरस्थेन राहुणं ग्रसतात् क्षतः ॥
अथवा राहुणाक्रान्त्य ग्रसनेवं प्रवेशितः ।
तन् कथं दृश्यतेस्पष्टः क्षतया न विखण्डितः ॥
विमुक्तश्च पुनर्दृश्यतेपाखण्डसन्निभः ।
न चास्यापहृतं तेजो न स्थानादपसारितः ॥
यदि वा ग्रस्त निर्यातः कथं सोमतरोऽभवत् ।
तस्मान्न तेजसा राज्ञो राहोर्वक्त्रं गमिष्यति ॥
भक्ष्यार्थं सर्वदेवानां सोमः सृष्टः स्वयम्भुवा ।
तत्रस्थमग्रतश्चापि चरमूर्तं सूर्यतेजसा ॥
पिबन्त्यमृतमं देवाः पितरश्च स्वधात्मकम् ।
क्षयश्च त्रिंशतश्चैव क्षयश्चिंशत्तथैव च ।
क्षयश्च त्रिसहस्राच्च देवाः सोमं पिबन्ति ये ॥
राहोरग्रस्तं भागं पुरा दृष्टं स्वयम्भुवा ।
तस्मात्तद्राहुरागत्य पातुमिच्छति पर्वसु ॥
उद्भूत्य पार्थिवीं छायामभ्याकारां तमोमयः ।
पातुमिच्छन् तनश्चेन्दुमाच्छादयति छायया ॥
शुक्ले च चन्द्रमस्येति कृष्णे पर्वणि भास्करम् ।
सूर्यमण्डलमंस्थस्तु चन्द्रमेव जिघांसति ॥
तस्मात् पिबति तं राहुस्तमस्यावरणाश्रयम् ।
अधिपिंबन् यथा पद्मं पिबति भ्रमरो मधु ।
चन्द्रस्यमण्डलं तद्वदेवाद्राहुरश्नुते ॥
चन्द्रकान्तो मणिर्यद्वदुष्णिकं धरते क्षणात् ।
धरमपि न दीपेत तेजसा नैव मुच्यते ॥
यथा सूर्यमणिः सूर्यादुत्पाद्य पावकं शुभम् ।
न भवत्यूष्णहीनोऽपि तेजसा नैव मुच्यते ॥
एवं चन्द्रस्य सूर्येण छादितोऽपि राहुणा ।
स्वतेजसा न सुषिरे नाङ्गहीनो बभूवतुः ॥
पञ्चमस्य च चन्द्रस्य मणिकाकनकाकृतिः ।
सोमो देवनलंयोगात् छायायोगाच्च पार्थिवात् ।
राहोश्च परलाभाद्वै प्रथमेऽन्नं प्रभौ ॥
स्वदोषकाले सम्प्राप्ते पतनं दृष्ट्वा च गौरवात् ।
स्वाङ्गादेव क्षरेत् क्षीरं तथेन्दुः क्षरतेऽन्नम् ॥
पितृभ्यश्च सुरेभ्यश्च सोमो मासेन लभ्यते ।
यथा मातुः स्तनं पीत्वा जीवन्ति सर्वजन्तवः ।
पीत्वान्नं तथा सोमात् क्षयन्ते सर्वदेवताः ॥
समृतं सर्वयोगेषु तथा यं चरते प्रभौ ।
तं चरन्तं यथाभागमुपजीवन्ति देवताः ॥
तस्मिन् काले समाप्तेऽसि राहुरप्यक्षयं क्षिपेत् ।
सर्वस्यैकं त्रिभागस्य पादं पादार्धमेव च ॥
आकृत्य पार्थिवोच्छायां यावन्तं चन्द्रमण्डलम् ।
स्पृशन् स भागो राहोस्तु देवभागात्तु शीतगः ॥
दृष्ट्वा विघ्नं देवानां राहोः पर्वणस्य च ।
चन्द्रो न क्षयमायाति तेजसा नैव मुच्यते ॥
त्रिंशद्भागाच्च यावन्तः पुनस्तर्कं प्रमाणतः ।
सर्वच्छायामितः कालश्छायानैव प्रकीर्तितः ॥
अतो राहुमुखः सोमः सोमाद्दृष्टिं दिवाकरः ।
सर्वेभ्यो प्रीतिसंयोगं विपरीतो पुनः पुनः ॥

सोमतीर्थ

अतश्चादयते राहुरभवच्छशिभास्करौ ।
राहुरभक्षसंस्थानः सोममाच्छाद्य तिष्ठति ॥
उद्भूत्य पार्थिवीं छायां घूमभेघ इवोत्थितः ।
चन्द्रस्य यदवस्थं राहुणा भास्करस्य च ॥
तन्नावस्थितं तस्य केवलं श्यामलीकृतम् ।
कृष्णेन यथा वस्त्रं शुक्लमण्डूपहन्यते ॥
एकदेशेऽथ सर्वं वा राहुणा चन्द्रमास्तथा ।
प्रक्षालितं तदैवेह पुनः शुक्लतरं भवेत् ॥
राहुयुक्तं भवेच्चन्द्रं निर्मलं चन्द्रमण्डलम् ।
राहुणाच्छादितौ वापि दृष्ट्वा चन्द्रदिवाकरौ ॥
विप्राः भ्रान्तिपरा भूत्वा पुनराप्यायन्ति तम् ।
एवं न गृह्यते सूर्यचन्द्रमास्तच्च भक्ष्यते ॥
अबुधार्ता न पश्यन्ति मानुषा मांसचक्षुषः ।
जगत्सम्मोहनश्चैतत् ग्रहणं चन्द्रसूर्ययोः ॥"
इति देवीपुराणे ग्रहणविवेकनामाध्यायः ॥

सोमक्षयः, पुं, (सोमस्य चन्द्रस्य क्षयो यत्र ।) अमावास्या । इति महाभारते दानधर्मः ॥

सोमगर्भः, पुं, (सोमः अन्तर्गतः तद्वद्भोचो गर्भे यस्य ।) विष्णुः । इति त्रिकाण्डशेषः ॥

सोमजं, क्ली, (सोमवत् जायते इति । जन + डः ।) दुग्धम् । इति हेमचन्द्रः ॥ चन्द्रजाते, त्रि ॥

सोमतीर्थं, क्ली, (सोमेन कृतं तीर्थम् ।) प्रभासतीर्थम् । इति त्रिकाण्डशेषः ॥ (यथा, महाभारते । ३ । ८२ । १८ ।
"ततो जग्मुर्नरेन्द्र सोमतीर्थं समाविशेत् ।
स्नात्वा फलमवाप्नोति राजसूयस्य मानवः ॥")
तस्य विवरणं यथा,—
"यत्र तप्तं तपस्तेन सोमेन सुमहात्मना ।
षष्टवर्षसहस्राणि एकपादेन तिष्ठता ॥
षष्टवर्षसहस्राणि तथैवोर्ध्वसुखः स्थितः ।
एवम्भूतः पुनः षष्टपद्मभौनव्रतस्तथा ॥
तथैवैकेन पादेन दृष्ट्वा यच्च तिष्ठता ।
यत्तपः तप्तं स्वल्पं कान्तिमानभवच्च यः ॥
संमापराधात्सुक्तस्य ब्राह्मणानां मतिस्तथा ।
प्राप्नोति यत्तदाभागे सोमतीर्थे स्नातोदकः ॥
त्रिंशद्वर्षसहस्राणि त्रिंशद्वर्षशतानि च ।
जायते ब्राह्मणः सुभुः वेदवेदाङ्गपारगः ॥
द्रव्यवान् गुणवांश्चैव संविभागी यशस्विनि ।
सद्भक्तश्चैव जायेत अपराधविवर्जितः ॥
न एष ब्राह्मणो भूत्वा संसारादिप्रमुच्यते ।
तस्य किञ्चित् प्रवक्ष्यामि सोमतीर्थस्य सुन्दरि ॥
तत्तीर्थं येन विज्ञेयं मम मार्गानुसारिणा ।
वैशाखस्य तु मासस्य शुक्लपक्षस्य द्वादशीम् ॥
प्रदोषे चान्धकारे तु यत्र क्वचिद् दृश्यते ।
सोमेन च विना भूमे दृश्यते चन्द्रमःप्रभा ॥
आलोकश्च दृश्यते सोमस्तत्र न दृश्यते ।
एवं त्वां वच्मि हे भद्रे एष वै विषयः पुरः ॥
यतश्चित्तं महाभागे पुण्ये सौकरवे मम ।
सोमतीर्थे विजानाहि येन सुश्रोणि तत्त्वतः ॥
अन्यच्च ते प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे ।
प्रभावस्य च चैतस्य विस्तरं परमं महत् ॥
अकामा तु स्त्री गौर्वा ब्राह्मणं कर्मनिश्चयात् ।

सोमया

सम्यं चैत्रप्रभावेण शृगाली मानुषी भवेत् ।
रूपवती गुणवती चतुःषष्टिकलान्विता ॥"
इति वाराहे सौकरवतीर्थमाहात्म्यनामाध्यायः ॥

सोमधारा, स्त्री, (सोमस्य धारेव ।) आकाशम् ।
इति त्रिकाण्डशेषः ॥

सोमपः, पुं, (सोमं पिबतीति । पा + कः ।) यागे पीतसोमलतारसः । तत्पर्य्यायः । सोमपीती २ । इत्यमरः । २ । ७ । ८ ॥ सोमपाः ३ । इति तट्टीका ॥ (यथा, गीतायाम् । ६ । २० ।
"त्रैविद्या मां सोमपाः पूतपापा
यज्ञैरिष्ट्वा स्वर्गतिं प्रार्थयन्ते ॥")

सोमपत्रः, पुं, (सोमस्य पत्रमिव पत्रमस्य ।) लताविशेषः । उलु खड़ इति भाषा । यथा,—
"दर्भः पुरश्छदः शुभ्रः सोमपत्रः परात्रियः ॥"
इति शब्दचन्द्रिका ॥
दर्भशब्देऽस्य गुणादयो ज्ञातव्याः ॥

सोमपाः, पुं, (सोमं पिबतीति । पा + क्विप् ।) यज्ञे सोमलतारसपानकर्त्ता । इत्यमरटीकायां रामाश्रमः । २ । ७ । ८ ॥ (सोमरसपानशीले, त्रि । यथा, भागवते । ३ । ३२ । ३ ।
"ततश्चतुर्थ्यामात्मभूतिः पितृदेवव्रतः पुमान् ।
गत्वा चान्द्रमसं लोकं सोमपाः पुनरेष्यति ॥")

सोमपीती, [न्] पुं, (सोमस्य पीतं पानमस्यास्तीति । इनिः ।) सोमपः । इत्यमरः । २ । ७ । ८ ॥ (वाप्यलिङ्गोऽपि दृश्यते । यथा, महाभारते । १ । २ । १६४ ।
"सौवन्यमपि चाख्यानं श्वपनो यत्र भार्गवः ।
ऋष्यानियज्ञे गास्तौ क्षतवान् सोमपीतिनौ ॥")
तस्य रूपान्तरं सोमपीथी । सोमपीवी । इति केचित् ॥

सोमबन्धुः, पुं, (सोमो बन्धुर्यस्य ।) बुधग्रहः । इति शब्दरत्नावली ॥ सूर्य्यः । बुधः । यथा,—
"त्रिनाभि सूर्य्याच्छशिभौमजीवाः
सूर्येन्दुजौ सूर्यसुताद्गुजीवाः ।
आदित्यशुक्रौ रविचन्द्रभौमा
बुधार्कजौ चन्द्रजभार्गवौ च ॥"
इति ज्योतिस्तत्त्वम् ॥

सोमभूः, पुं, (सोमात् भूरुत्पत्तिर्यस्य ।) जिनराजभेदः । इति हेमचन्द्रः ॥ बुधग्रहः । सोमपुत्रत्वात् । सोमवंशोद्भवे, त्रि ॥

सोमयागः, पुं, (सोमात्मको यागः ।) सोमलतारसपानाङ्गकत्रैवार्षिकयज्ञविशेषः । यथा,—
नारद उवाच ॥
"सोमयागविधानञ्च ब्रूहि मां सुनिसत्तम ।
कथं तं कारयामास गुरुश्च किं फलं परम् ॥
नारायण उवाच ॥
सङ्क्षेपात्प्रशमं सोमयागफलं शृणु ।
यं सोमलतापानं यजमानः करोति च ॥
वर्षमेकं फलं भुङ्क्ते वर्षमेकं वसेत् सुरा ।
त्रैवार्षिकमिदं यागं सर्वपापप्रणाशनम् ॥
यस्य त्रैवार्षिकं पानं निश्चितं भूतिवृद्धये ।
अग्निकं यापि विप्रेन्द्र न सोमं पातमर्हति ।

मधारात्रश्च देवो वा यागं कर्त्तुमर्हति ।
न सर्व्वसाध्यो यज्ञोऽयं यज्ञो बहुदक्षिणः ।"
इति मन्त्रवैवर्त्ते श्रीकृष्णजन्मखण्डे ६०।५४-५८ ॥
सोमयाजी, [न्] पुं, (सोमेन यजते इति । यज + णिनिः ।) सोमयागकर्त्ता ॥
सोमयोनि, स्त्री, (सोमो योनिर्यस्य ।) चन्दन-विशेषः । यथा,—
"सुशीतलं चन्दनं यत् तेषामर्थिकसुप्यते ।
ज्ञेयौ तु तस्य पर्य्यायौ सोमयोनि शिलोद्भवम् ॥"
इति धन्वन्तरिका ॥
सोमराजिका, स्त्री (सोमराजी एव । स्वार्थे कन् ।) सोमराजी । इति शब्दरत्नावली ॥
सोमराजी, [न्] पुं, (सोमेन सोमपदा राजते इति । राज + णिनिः ।) श्वेतधविविशेषः । सोमराज इति हाङ्गच इति च भाषा । तत्-पर्य्यायः । अवल्गुजः २ सुवल्लिः ३ सोमवल्लिका ४ कामनेयी ५ लक्ष्मणकला ६ वाकुची ७ पूति-फली ८ । इत्यमरः । २ । ४ । ६६ ॥ सोमराणी ९ सुवल्ली १० सोमवल्लिः ११ कामनेयी १२ । इति भरतः । सोमवल्ली १३ वायुपी १४ वाकुची १५ कामनेयिका १६ सोमराजिका १७ । इति शब्दरत्नावली ॥ अन्यच्च ।
"वायुपी चन्द्रलेखा स्यात् सोमराजी लवङ्ग-पुष्पा ।
लक्ष्मा पूतिफला कृष्णाग्निनी या सिता परा ॥"
इति रत्नमाला ॥
अस्या गुणाः । वातकफकृष्ठलग्दोषनाशित्वम् ।
इति राजवल्लभः ॥ अपि च ।
"अवल्गुजो वाकुची स्यात् सोमराजी सुपर्णिका ।
अग्निरेखा लक्ष्मफला सोमा पूतिफलीति च ॥
सोमवल्ली कामनेयी कृष्णा च प्रकीर्त्तिता ।
वाकुची मधुरा तिक्ता कटुपाका रसायनी ॥
चित्रकृष्णिमा चक्षुष्या वरा केशामितप्रदा ।
लक्ष्मा कृष्णा श्वासकुष्ठमेहव्रणविनाशिनी ॥
तत्फलं पित्तलं कृष्णकफानिलहरं कटु ।
केशं लक्ष्म्यं रसिम्बातकृमिशोथमपाकुरुते ॥"
इति भावप्रकाशः ॥
राजनिर्घण्टोक्तगुणपर्य्यायौ वाकुचीशब्दे द्रष्टव्यौ ॥
सोमराजी, स्त्री, (सोमेन राजते इति । राज + णिनिः + ङीप् । यौगादिकात् ङीष् ।) वाकुची । इत्यमरटीकायां भरतः । २ । ४ । ६६ ॥ (यथा, देवीभागवते ७ । ३० । १० ।
"श्वेता वधूर्भवेत्तस्या
कलमराख्यानकप्रदेवीः ।
वामकुक्षौ स्मृता
प्रभावती सोमराजीव ॥")
सङ्गीतरत्नाकरोक्तेः । यथा,—
"अथ सोमराजीभक्षा ते यक्षाः श्रीः ।
तालकेतुश्च त्रिलोकपालकारम् ।"
इति कृष्णोत्तरी ।
अस्यैवी च ।

सोमरोगः, पुं, स्त्रीरोगविशेषः । यथा,—
अथ सोमरोगाधिकारः ।
तत्र सोमरोगस्य निदानपूर्व्विकां सम्प्राप्तिमाह ।
"स्त्रीणामतिप्रसङ्गेन शोकाद्यापि श्रमादपि ।
अतिसारप्रयोगाद्वा नरयोगात्तथैव च ॥
आपः सर्व्वशरीरस्थाः क्षुभ्यन्ति प्रस्रवन्ति च ।
तस्मात्ताः प्रभुताः स्रोतान्तूत्सर्गं प्रवन्ति हि ॥"
अथ तस्य लक्षणमाह ।
"प्रसन्ना विमला शीता निर्गन्धा नीरुजः सिताः ।
स्रवन्ति चातिमात्रं ताः सा न शक्नोति दुर्ब्बला ॥
वेगं धारयितुं ताभां न विन्दति सुखं क्वचित् ।
शिरःशिथिलता तस्या सुखं तालु च शुष्यति ॥
मूर्च्छा जृम्भा प्रलापश्च खमूर्ध्वा चातिसारतः ।
भक्षेभोज्येषु पेयेषु न तृप्तिमभते यदा ॥
सम्प्राप्ताच्छरीरस्य ता आपः सोमसंज्ञिताः ।
ततः सोमक्षयात् स्त्रीणां सोमरोगे इति स्मृतः ॥"
अथ सोमरोगस्य चिकित्सा ।
"कदलीनां फलं पक्वं क्षौद्रेणैकत्रसंयुतम् ।
प्रत्यहं भक्षितं खादेत् सोमधारयसुत्तमम् ॥१॥
मासपूर्वं मधुयुतं विदारीं मधुसर्पिषाम् ।
मयसा भावयेत् प्रातः सोमधारणमुत्तमम् ॥२॥
स एव सरलः सोमः सर्व्वमूत्रेषु वैमुखः ।
तत्रैलामलचूर्णेन पाययेत्तण्डुलाम्बुना ॥ ३ ॥
जलेनामलकीवीजकल्कं यमसुशर्करम् ।
पिबेद्दिनत्रयेणैव श्वेतप्रदरनाशनम् ॥ ४ ॥
तक्रोदनाशनरता संपिबेन्नागकेशरम् ।
चाढ्यं तक्रेण संपिष्टं श्वेतप्रदरनाशनम् ॥"५॥
तत्रैव सूत्रातीसारस्य लक्षणं चिकित्साञ्चाह ।
"सोमरोगे चिरं जाते यदा सूत्रमतिसेवते ।
सूत्रातिसारं तं प्राहुर्भेषजविधिवंशगं परम् ॥
तालकन्दं खर्ज्जूरं मधुकञ्च विदारिकाम् ।
सितामधुयुतां खादेत् सूत्रातीसारनाशनम् ॥१॥
चक्रमर्द्दकमूलञ्च संपिष्टं तण्डुलाम्बुना ।
प्रभातसमये पीतं बलप्रदरनाशनम् ॥" २ ॥
इति सोमरोगे सूत्रातिसाराधिकारः । इति भावप्रकाशः ॥ (तथाचास्य चिकित्सोपयोगि-पटिकौषधं यथा,—
"कर्षं चारितलौहस्य तदर्द्धं रसगन्धकम् ।
कृत्वापूपं निधातव्यं जम्बुवीरसभावितम् ॥
विल्वमूलं शौरकं पाठा धात्रीदाडिमटङ्गणम् ।
चन्दनं गुडगुडुं शोधशालाभ्यङ्गरसाञ्जनम् ॥
छागीदुग्धेन वटिकां कारयेद्भास्करिकाम् ।
निर्मितो निम्बुनाथेन सोमनाथरसस्त्वयम् ॥
सोमरोगं बहुविधं प्रदरं घोरं दुर्जयम् ।
योनिशूलं मेहशूलं सर्व्वमेव चिरकालजम् ।
बहुसूत्रं विशेषेण दुर्जयं धन्वन्तरेः ॥"
इति सोमनाथरसः ॥
इति वैद्यकरत्नेन्द्रसारसंग्रहे सोमरोगाधिकारः ॥)
सोमलता, स्त्री, (सोम एव लता ।) सोमल-स्वामी लता । तत्पर्य्यायगुणाः ।
"सोमवल्ली सोमलता सोमा पीथी द्विजप्रिया ।

सोमवल्ली विदीवल्ली कटुस्तिक्ता रसायनी ।"
इति भावप्रकाशः ॥
अपि च ।
"सोमवल्ली मधुरसा यज्ञश्रेष्ठा बहुर्जलता ।
सोमाह्वा शुक्लवल्ली च यज्ञवल्ली द्विजप्रिया ।
सोमचीरा च सोमा च यज्ञाङ्गा बहुसंज्ञया ॥
सोमवल्ली कटुः शीता मधुरा मित्रदायिनी ।
क्षया विषोपशमनी पावनी यज्ञसाधनी ॥"
इति राजनिर्घण्टः ॥
सोमलतिका, स्त्री, (सोमलतैव । स्वार्थे कन् ।) गुडूची । इति राजनिर्घण्टः ॥
सोमवंशः, पुं, (सोमस्य वंशः उत्पत्तिस्थानत्वेना-स्त्यस्य ।) युधिष्ठिरराजः । इति मेदिनिः ॥ (सोमस्य वंशः ।) चन्द्रसन्तानः । तद्विवरणं यथा, हरिरुवाच ।
"धर्म्मस्य कथितो वंशः सोमवंशं शृणुष्व मे ।
नारायणसुतो ब्रह्मा ब्रह्मणोऽत्रिस्तदुद्भवः ॥
अत्रेः सोमस्तस्य भार्य्या तारा बृहस्पतेः प्रिया ।
सोमात्तस्यां बुधो जज्ञे बुधपुत्रः पुरूरवाः ॥
बुधपुत्रादथैलस्यां षट् पुत्रास्तु बृहायुषः ।
विश्वायुः श्रुतायुश्च शतायुर्दीप्तजीवयुः ॥
अमावसोरथूर्ज्जायां भीमपुत्रश्च काञ्चनः ।
काञ्चनस्य सुहोत्रोऽभूत् जह्नुश्चाभूत् सुहोत्रतः ॥
जह्नोः सुमन्त्रकन्यायां सुमन्त्रो ऋषिराजकः ।"
ऋषिराजकन्यायां सुमन्त्रापत्योऽपि पाठः ।
"यज्ञाङ्गायोरथ पुरोऽभूत् बलाकाश्वात् कुशः स्मृतः ॥
कुशाश्वः कुशनाभश्चामूर्त्तरयो वसुः कुशात् ।
गाधिः कुशाच्चातिबले विश्वामित्रस्तदात्मजः ॥
कन्या सत्यवती दत्ता ऋचीकाय द्विजाय सा ।
ऋचीकादृषभत्विञ्च रामस्त्वञ्चाभवत् सुतः ॥
विश्वामित्राद्देवरातमधुच्छन्दादयः सुताः ।
आयुषो नहुषः पुत्रस्तस्मिन्नेवान्वयश्चिरम्भवौ ॥
क्षत्रवृद्धः क्षत्रवृद्धात् सुहोत्रस्याभवन्नृपः ।
काश्यकाशगलमदाः सुहोत्रादभवंस्त्रयः ॥
गृत्समदाच्छौनकोऽभूत् काश्याद्धैतमक्षया ।
वैद्यो धन्वन्तरिस्तस्मात् केतुमांश्च तदात्मजः ॥"
वैद्यस्याने रैभ्य इत्यपि पाठः ।
"भीमरथः केतुमतो दिवोदासस्तदात्मजः ।
दिवोदासात् प्रतर्दनोऽभूच्छत्रजित् शौनक विभुतः ॥
क्षत्रधर्म्मस्य पुत्रो वै सुकर्म्मेव क्षतध्वजात् ।
धृष्टकेतुः सुनक्षत्रिर्य्यो सुनीथः प्रजातेः सुतः ॥
सत्यकेतुः सुनीथस्य सत्यजेतोऽभिभुः सुतः ।
विभोस्तु सुविभुः पुत्रः सुधीभिः स्वर्गमारुहः ॥"
स्वर्गमारुहस्याने सुकुमारकोऽपि पाठः ।
"स्वर्गमारुहसूनुश्चेतुर्धौतकेशोऽजनालयः ।
वीतिहोत्रस्य भार्गोऽभूत् भार्गभूमिरुहात्मजः ॥"
भार्गभूमिस्याने भानुभूमिरिति च पाठः ।
"दृषद्वतः सुमहाभाने धृष्टिरे पाण्डवी नृपः ॥
मनुपुत्रप्रजाख्यानुः प्रजेन संभृताः ।
प्रतिक्षत्रः क्षत्रवृद्धात् महावीर्य्यः सुहोत्रकः ।

विजयः सञ्जयस्यापि विजयस्य कृतः सुतः ।
कृताहुर्धर्वर्हनश्च सहदेवस्तदात्मजः ॥"
धर्मवर्हनस्थाने दृढधल इति च पाठः ।
"सहदेवादहीनोऽभूत् जयत्सेनोऽप्यहीनतः ॥
जयत्सेनात् संकृतिश्च क्षत्रधर्मा च संकृतेः ।
यतिर्ययातिः संयातिरायातिर्वियतिः कृतिः ॥
नहुषस्य सुताः ख्याता ययातेर्नृपतेस्तथा ।
यदुश्च तुर्वसुश्चैव देवयानी व्यजायत ॥
द्रह्युश्चानुश्च पूरुश्च शर्मिष्ठा वार्षपर्वणी ।
सहस्रजित् क्रोष्टुतमा रघुश्चैव यदोः सुतः ॥
सहस्रजितः शतजित्तस्माद्विशुहयहैहयौ ।
सुतो वेणुहयपुत्रो धर्मा हैहयनोऽभवत् ॥
धर्मस्य धर्मनेत्रोऽभून् कुन्तिर्वै धर्मनेत्रतः ।
कुन्तेर्बभूव सातृञ्जिर्मातृष्यांश्च तदात्मजः ॥"
सातृञ्जिस्थाने साहञ्जिरिति च पाठः ।
"भद्रश्रेण्यस्तस्य पुत्रो भद्रश्रेण्यस्य दुर्मदः ॥"
दुर्मदस्थाने दुर्दम इति च पाठः ।
"धनको दुर्मदाच्चैव कृतवीर्यश्च धानकिः ।
कृताग्निः कृतकर्मा च कृतौजाश्च सुमहाबलः ॥"
कृतौजास्थाने कृतौजा इति च पाठः ।
"कृतवीर्यादर्जुनोऽभूत् अर्जुनाच्छूरसेनकः ।
जयध्वजो मधुः शूरो वृषणः पञ्च सूनृताः ॥
जयध्वजात्तालजङ्घो भरतस्तालजङ्घतः ।
वृषणस्य मधुः पुत्रो मधोर्वृष्णादिवंशकः ॥
क्रोष्टोर्वृजिनवान् पुत्र आहिस्तस्य महात्मनः ।"
आहिस्थाने स्वाहिरिति च पाठः ।
"आहेरुशङ्गुः संजज्ञे तस्य चित्ररथः सुतः ॥
शशबिन्दुश्चित्ररथात् पत्नयो लक्षं तस्य तु ।
दशलक्षं पुत्राणां पृथुकीर्त्यादयो वराः ॥
पृथुकीर्त्तेः पृथुजयः पृथुदानः पृथुश्रवाः ।
पृथुश्रवसोऽभूत्तम उशना तमसोऽभवत् ॥
ततपुत्रः शितयुर्नाम श्रीरुक्मकवचस्ततः ।"
शितयुर्नामस्थाने श्वेतऋर्ष्यायुरिति च पाठः ।
"रुक्मेषुः पृथुरुक्मश्च ध्यामघः पालितो हरिः ।
श्रीरुक्मकवचस्येते विदर्भो ध्यामघात्तथा ।
भार्यायाश्चैव शैव्यायां विदर्भात् क्रथकौशिकौ ॥
रोमपादो रोमपादादभूर्बभ्रोर्धृतिस्तथा ।
कौशिकस्य चिदिः पुत्रस्तस्येदो नृपः किल ॥
युन्तिः किलस्य पुत्रोऽभूत् कुन्तेर्वृष्णिः सुतः स्मृतः ।
वृष्णेश्च निर्वृतिः पुत्रो दशार्हो निर्वृतेस्तथा ॥
दशार्हस्य सुतो व्योमो व्योमस्यापि तदात्मजः ।"
व्योमस्थाने व्योमा इति च पाठः ।
"व्योमादिकृतिर्जज्ञे ततो भीमरथोऽभवत् ।
ततो मधुरथो जज्ञे शकुनिस्तस्य चात्मजः ।
करम्भिः शकुनेः पुत्रस्तस्य देवसनः सुतः ॥
देवक्षत्रो देवसनाद्देवक्षत्रात्मधुः स्मृतः ।
कुरुवंशो मधोः पुत्रो ह्यनुश्च कुरुवंशतः ॥
पुरुहोत्रो ह्यनोः पुत्रः अंशुश्च पुरुहोत्रतः ।
सत्वतः सुतवांशोरेते वै सात्वता नृपाः ॥
भजिनो भजमानश्च सात्वतादन्धकः सुतः ।
महाभोजो वृष्णिदेवाभन्धो देवार्हतोऽभवत् ॥
निमिवृष्णी भजमानादश्मभाजित्तथैव च ।"
अश्मभाजित्स्थाने अयुताजित् इति च पाठः ।
"शतजिच्च सहस्राजित् वभ्रुर्देवो वृहस्पतिः ॥
महाभोजात्तु भोजोऽभूत् वृष्णिश्चैव सुमित्रकः ।
सुधाजित् मंत्रकस्तस्मादनमित्रश्च तथा ॥
अनमित्रस्य निघ्नोऽभूत् निघ्नात् सत्राजितो-
ऽभवत् ।
प्रसेनश्चापरः ख्यातो ह्यनामञ्चाक्षिनिस्तथा ॥
शिनेस्तु सत्यकः पुत्रः सत्यकात् सात्यकिस्तथा ।
सात्यकेः सञ्जयः पुत्रः कुणिश्चैव तदात्मजः ॥
कुणेर्युगन्धरः पुत्रस्तस्य शैनेया प्रकीर्तिताः ॥"
कुणिस्थाने कुलिरिति च पाठः । ॥ ।
"अनमित्रान्वयो वृष्णिः स्वफल्कश्चित्रकस्तथा ॥"
चित्रकस्थाने चित्रक इति च पाठः ।
"स्वफल्काच्चैव गान्दिन्यामक्रूरो वैष्णवोऽभवत् ।
उपमद्गुरथाक्रूराम्बृदवाश्वास्तः स्मृताः ॥
देववानुपदेवश्च अक्रूरस्य सुतौ स्मृतौ ।
पृथुर्विपृथुश्चित्रस्य चात्मकस्य शुचिः स्मृतः ॥
कुकुरो भजमानस्तु तथा कम्बलबर्हिषः ।
वृष्णस्तु कुकुराज्जज्ञे तस्मात् कापोतरोमकः ॥
तदात्मजो विलोमा च विलोमास्तुम्बुरुः स्मृतः ।
तस्माच्च दुन्दुभिर्जज्ञे पुनर्वसुरतः सुतः ॥
तस्याहुकश्चाहुकी च कन्या चैवाहुकस्य च ।
देवकश्चोग्रसेनश्च देवकात् देवकी त्वभूत् ॥
हृकदेवोपदेवा च सहदेवा सुरक्षिता ।
श्रीदेवी शान्तिदेवी च वसुदेव उवाह ताः ॥
देवश्चानुपदेवश्च सहदेवासुतौ स्मृतौ ।
उग्रसेनस्य कंसोऽभून् सुनामा च वटाश्वयः ॥
विदूरथो भजमानाच्छूरस्याभूद्विदूरथात् ।"
शूरस्थाने शिव इति च पाठः ।
"विदूरथसुतस्याथ शूरस्यापि शमी सुतः ॥
प्रतिक्षत्रस्तु शमिनः स्वयम्भोजस्तदात्मजः ।
हृदिकश्च स्वयम्भोजात् कृतधर्मा तदात्मजः ॥
देवः शतधनुश्चैव शूरादेव देवमीढुषः ।
दशपुत्रा मारिषायां वसुदेवादयोऽभवन् ॥
पृथा च श्रुतदेवी च श्रुतकीर्त्तिः श्रुतश्रवाः ।
राजाधिदेवी शूराच्च पृथां कुन्तेः सुतामदात् ॥
सा दत्ता कुन्तिना पाण्डोस्तस्यां धर्मा-
निलेन्द्रकैः ।
युधिष्ठिरो भीमपार्थौ नकुलः सहदेवकः ॥
माद्र्यां गान्धर्यदस्राभ्यां कुन्त्यां कर्णः पुरा भवत् ।
श्रुतदेव्यां दन्तवक्रं जज्ञे वै वृद्धशर्मणः ॥
सप्तैवैनादयः पञ्च श्रुतकीर्त्याश्च केकयात् ।
राजाधिदेव्यां विन्दश्च अनुविन्दश्च जज्ञिरे ॥
श्रुतश्रवा दमघोषात् प्रजज्ञे शिशुपालकः ।
पौरवी रोहिणी भार्या मदिरानकदुन्दुभेः ॥
देवकीप्रमुखा भद्रा रोहिण्यां बलभद्रकः ।
सारणाद्या गदश्चैव रेवत्यां बलभद्रतः ॥
निशठश्चोल्मुको जातौ देवक्यां षट् च जज्ञिरे ।
कीर्त्तिमांश्च सुषेणश्च उदायी भद्रसेनकः ॥
ऋतुदासो भद्रदेव कंस एवावरोऽष्टमः तान् ।
वसुर्वसुः सभोऽभद्रसः क्षत्र एव च ॥
षोडश स्त्रीसहस्राणि भार्याणामाभवन् हरेः ।
रुक्मिणी सत्यभामा च लक्ष्मणा चारुहासिनी ।
श्रेष्ठा जाम्बवती चाष्टौ जज्ञिरे तान् वदून्
सुतान् ।
प्रद्युम्नश्चारुदेष्णश्च प्रधानाः प्राम्ब एव च ॥
प्रद्युम्नादनिरुद्धोऽभून्मनस्विन्यां महाबलः ।"
मनस्विन्यां स्थाने कक्कुद्मिन्यामिति पाठः ।
"अनिरुद्धात् सुभद्रायां वज्रो नाम सुतोऽभवत् ॥
प्रतिबाहुर्वज्रसुतस्तारुकस्य सुतोऽभवत् ।
वह्निश्चारोः सुतो जज्ञे वह्नेर्भागोऽभवत् सुतः ।"
इत्यत्र वह्निस्तु तुर्वसोर्वंश्य इत्याद्यपादे पाठः ।
"भर्गाद्भानुरभूत् पुत्रो भानोः पुत्रः करन्धमः ।
करन्धमस्य मरुतो दुष्मन्तोर्वंशं निबोध मे ॥
दुष्मन्तस्य तनयः सेतुरानवश्च तदात्मजः ।
आवहस्यैव गान्धारी धर्मो गान्धारतोऽभवत् ।"
आवहस्थाने आरब्ध इति आवर इति च पाठः ।
"घृतस्तु धर्मपुत्रोऽभूद्दुर्दमस्य घृतस्य तु ।
प्रचेता दुर्दमस्यैव अनोर्वंशं शृणुष्व मे ॥
अनोः सभानवः पुत्रस्तस्मात् कालञ्जयोऽभवत् ।"
सभानवस्थाने स्वभावन इति सुतारय इति च
कालञ्जयस्थाने कालानल इत्यपि पाठः ।
"कालञ्जयात् सृञ्जयोऽभूत् सृञ्जयात्तु पुरञ्जयः ।
जनमेजयस्ततश्चाभूत् महाशालस्तदात्मजः ।
महामना महाशालादुशीनर इति स्मृतः ।
उशीनरश्चित्रिवर्ज्ञे वृषदर्भः शिविः सुतः ।
महामनो भातिभिषोः पुत्रौऽभूत्तु जयद्रथः ।
हेमो जयद्रथाज्जज्ञे सुतपा हेमतोऽभवत् ।"
जयद्रथस्थाने वृषद्रथ इति च पाठः ।
"बलिः सुतपसो जज्ञे अङ्गवङ्गकलिङ्गकाः ।
पुण्ड्रपौण्ड्राश्च वालेया अनपानस्तथाङ्गतः ।
अनपानादिविरथस्ततो धर्मरथोऽभवत् ॥
रोमपादो धर्मरथाच्चतुरङ्गस्तदात्मजः ।
पृथुलाक्षः सुतस्तस्य चम्पोऽभूत् पृथुलाक्षतः ॥
चम्पपुत्रस्तु हर्यङ्गस्तस्य भद्ररथः सुतः ।
बृहत्कर्मा सुतस्तस्य बृहद्भानुस्ततोऽभवत् ॥
बृहन्मना बृहद्भानोस्तस्य पुत्रो जयद्रथः ।
जयद्रथस्य विजयो विजयस्य धृतिः सुतः ॥
धृतेर्धृतव्रतः पुत्रः सत्यकर्मा धृतव्रतात् ।
तस्य पुत्रस्त्वधिरथः कर्णस्तस्य सुतोऽभवत् ॥
वृषसेनस्तु कर्णस्य पूरुवंशं शृणुष्व मे ॥"
इत्यादि गारुडे १३३ अध्यायः ॥
हरिरुवाच ।
"जनमेजयस्य पूरोश्च मनस्युर्जनमेजयात् ।
तस्य पुत्राश्चाभयदः सुदुस्याभूत्तदात्मजः ॥"
सुदुस्थाने स्वस्तिरिति च पाठः ।
"सुधोर्ब्बहुगतः पुत्रः संयातिस्तस्य चात्मजः ।
वत्सजातिस्तु संयाते रौद्राश्वस्य तदात्मजः ॥"
वत्सजातिस्थाने वर्गजातिरिति च पाठः ।
"ऋतेयुः स्रक्तिलेयुश्च कक्षेयुश्च ऋतेयुकः ।
ऋक्षेयुः संहतेयुश्च रौद्राश्वस्य सुता वराः ॥
रतिनावः ऋतेयोऽथ तस्य प्रतिरथः सुतः ।
तस्य मेधातिथिः पुत्रस्तुर्वसोस्तेनिकः सुतः ॥

रेनिलस्य तु दुष्मन्तो भरतस्तस्य चात्मजः।
शकुन्तलायां संजज्ञे वितथो भरतादभूत॥
वितथस्य मन्युः पुत्रो मन्योश्चैव नरः सुतः।
नरस्य संकृतिः पुत्रः सुवन्तिः संकृतेः सुतः॥"
सुवन्तिस्थाने गर्गश्च इति पाठः।
"गर्गादमन्युपुत्रो वै शिनिस्तस्य यजायत।"
शमन्युस्थाने शुमन्युरिति च पाठः।
"शमन्योश्च महावीर्यादुरुक्षयः सुतोऽभवत॥
उरुक्षयात् त्रय्यारुणिदेवदत्तकवी च मनुजात्।
सुहोत्रस्य हस्ती च अजमीढद्विमीढकौ॥
हस्तिनः पुरमीढस्य कण्वोऽभूदजमीढतः।
कण्वान्मेधातिथिर्जज्ञे यतः काण्वायना द्विजाः॥
अजमीढादृक्षसुस्तपुत्रश्च दृक्षदुग्रः।
दृक्षकर्म्मा तस्य पुत्रस्तस्य पुत्रो जयद्रथः॥
जयद्रथादिश्वजिच्च सेनजिच्च तदात्मजः।
रुचिराश्वः सेनजितः पृथुसेनस्तदात्मजः॥
पारस्तु पृथुसेनस्य पारान्नीपोऽभवन्नृपः।
नीपस्य समरः पुत्रः सुक्रतिस्तु ततोऽभवत॥
विभ्राजः सुक्रतेः पुत्रो विभ्राजादनुहोऽभवत्।
छत्र्यां तस्माद्बृहद्दत्तो विश्वक्सेनस्तदात्मजः॥
यवीनरो द्विमीढस्य धृतिमांश्च यवीनरात्।
धृतिमतः सत्यधृतिर्दृढनेमिस्तदात्मजः॥
दृढनेमेः सुपार्श्वोऽभूत् सुपार्श्वात् सन्नतिस्तथा।
कृतस्तु सन्नतेः पुत्रः कृताद्युग्रायुधोऽभवत॥
उग्रायुधाच्च क्षेम्योऽभूदम्बरीषस्तदात्मजः।
पुरञ्जयस्त्वम्बरीषात् तस्य पुत्रो विदूरथः॥"
अम्बरीषस्थाने सुवीर इति च पाठः।
"अजमीढान्नलिन्यां च नीलो नाम सुतोऽभवत्।
नीलाच्छान्तिरभूत् पुत्रः सुशान्तिस्तस्य चात्मजः॥
सुशान्तेश्च पुरुजातो ह्यर्कस्तस्य सुतोऽभवत्।
अर्कस्य चैव हर्य्यश्वो हर्य्यश्वान्मुद्गलोऽभवत॥
यवीनरो बृहद्दिषुः कम्पिल्यः सृञ्जयस्तथा।
पाञ्चालान्मुद्गलाच्चक्रे शरद्वांस्तस्य चात्मजः॥"
तस्य चात्मजस्थाने वेद्यादो महान् इति च पाठः।
"दिवोदासो द्वितीयश्च अहल्यायां शरद्वतः।
शतानन्दोऽभवत् पुत्रस्तस्य सत्यधृतिः सुतः॥
कृपः कृपी सत्यधृतेर्ब्रह्मणो वीर्य्यसंभवौ।
द्रोणपत्नी कृपी चक्रे अश्वत्थामानमुत्तमम्॥
दिवोदासाच्चिवयुश्च मित्रयोश्चयवनोऽभवत्।
सुदासश्चयवनाच्चक्रे सौदासस्तस्य चात्मजः॥
सहदेवस्तस्य पुत्रः सहदेवात्तु सोमकः।
जन्तुस्तु सोमकाच्चक्रे पृषतश्चापरो महान्॥
पृषतात् द्रुपदो जज्ञे पृषदुग्रस्ततोऽभवत्।
पृषदुग्रात् पृषत्कर्त्रो भूदजमीढतः॥
ऋक्षात् संवरणो जज्ञे कुरुः संवरणादभूत्।
सुधन्वश्च परिक्षित्तु जह्नुश्चैव कुरोः सुताः॥
सुधनुषः सुहोत्रोऽभूत् च्यवनोऽभूत् सुहोत्रतः।
च्यवनात् कृतको जज्ञे ऽथोपरिचरो वसुः॥
बृहद्रथश्च प्रथमः सत्याद्याश्च वसोः सुताः।
बृहद्रथात् कुशाग्रश्च कुशाग्रात् ऋषभोऽभवत॥
ऋषभात् पुष्पवांस्तस्माज्जज्ञे सत्यहितो नृपः।
सत्यहितात् सुधन्वाभूज्जह्नुश्चैव सुधन्वतः॥"
जह्नुस्थाने जन्हुरिति च पाठः।
"बृहद्रथाच्च रासत्यः सहदेवस्तदात्मजः।
सहदेवाच्च सोमापिः सोमापेः श्रुतवान् सुतः॥
भीमसेनप्रसेनौ च श्रुतसेनोऽपराजितः।"
प्रसेनस्थाने उग्रसेन इति च पाठः।
"जनमेजयश्चान्योऽभूज्जह्नोस्तु सुरथोऽभवत्।
विदूरथस्तु सुरथात् सार्व्वभौमो विदूरथात्॥
जयत्सेनः सार्व्वभौमादराधीतस्तदात्मजः।
अयुतायुस्तस्य पुत्रस्तस्य चाक्रोधनः सुतः॥
अक्रोधनस्यातिथिश्च ऋक्षोऽभूदतिथेः सुतः।
ऋक्षाच्च भीमसेनोऽभूद्दिलीपो भीमसेनतः॥
प्रतीपोऽभूद्दिलीपात्तु देवापिस्तु प्रतीपतः।
शान्तनुश्चैव बाह्लीकश्चयस्ते भ्रातरो नृपाः।
बाह्लीकात् सोमदत्तोऽभूत् भूरिभूरिश्रवास्ततः॥
शलश्च शान्तनोर्भीष्मो गङ्गायां धार्म्मिको महान्।
चित्राङ्गदश्चित्रवीर्य्यो तु अम्बिकाम्बालिका तयोः।
धृतराष्ट्रश्च पाण्डुश्च तद्दास्यां विदुरस्तथा॥
व्यास उत्पादयामास गान्धार्य्यां धृतराष्ट्रतः।
शतं पुत्रं दुर्य्योधनाद्यं पाण्डोः पञ्च प्रजज्ञिरे॥
प्रतिविन्ध्यः सुतः सोमः श्रुतकीर्त्तिस्तु चार्জ্জुनात्।
शतानीकः श्रुतकर्म्मा द्रौपद्यां पञ्च वै क्रमात्॥
यौधेयी च हिडिम्बा च काशी चैव शुभद्रिका।
विजया वै पाण्डुमतौ पञ्चभ्यस्तु सुताः क्रमात्॥
देवकी षट्कचश्च अभिमन्युश्च सर्व्वगः।
सुहोत्रो निरमित्रश्च परिक्षिदभिमन्युजः॥"
अत्र अहोत्रो निरपत्रश्चेति तृतीयचरणे पाठः।
"जनमेजयश्च ततो भविष्यांश्च नृपाञ्छृणु॥"
इति गारुडे १४४ अध्यायः॥

सोमवल्कः, पुं, (सोमस्येव वल्को यस्य।) श्वेतखदिरः। इत्यमरः। २।४।५०॥ (अस्य पर्य्यायो यथा,—
"सोमवल्को नक्षमुख्यः कदरः खदिरोपमः॥"
इति वैद्यकरत्नमालायाम्॥)
कट्फलः। इति मेदिनी॥ (अस्य पर्य्यायो यथा,
"कट्फलः सोमवल्कश्च कैटर्य्यः कुम्भिकापि च।
श्रीपर्णिका कुसुदिका भद्रा भद्रवतीति च॥"
इति भावप्रकाशे पूर्व्वखण्डे प्रथमे भागे॥)
करञ्जः। इति शब्दरत्नावली॥

सोमवल्लरिः, स्त्री, (सोमस्य वल्लरिः। वा ङीष्।) सोमलता। तत्पर्य्यायः। ब्राह्मी २ मत्स्याक्षी ३ वयस्था ४। इत्यमरः। २।४।१३७॥ चत्वारि सोमलतायाम्। ब्राह्मीप्राक इति केचित्। अतिपवित्रत्वेन ब्रह्मणः प्रियत्वात् ब्रह्मणो ब्राह्मणस्य वा इयं ब्राह्मी यः वेदा निर्दिष्टं अभिचरतीति. मत्वर्थीयेति निषेधाभावे नीलीपौ तावितिवत्।

सोमवल्लरी, स्त्री, (सोमस्य वल्लरी इव।) गुडूची। इत्यमरः। २।४।४३॥ सोमलता इति तट्टीकायां भरतः॥ सोमराजी। इति शब्दरत्नावली॥ पातालगरुडी। ब्राह्मी। सुदर्शना। इति राजनिर्घण्टः॥ (यथा, बृहत्संहितायाम्। ५४।१०८।
"यां सोमवल्लाश्च समानरूपा
साध्याशु तोयं कुरुतेऽत्यवश्यं॥")

सोमवारः, पुं, (सोमस्य वारः।) सोमस्य भोग्यदिनम्। चन्द्रवासरम्। यथा,—
"सोमवारेऽप्यमावास्या आदित्यादि च सप्तमी।
चतुर्थी भौमवारे च अक्षयादपि चाक्षया॥"
इति तिथ्यादितत्त्वम्॥ * ॥
तद्दिवसीयवारवेला यथा,—
"रवौ वर्ज्यं चतुः पञ्च सोमे सप्त द्वयं तथा।"
इति ज्योतिःसागरसारः॥
तद्रात्रौ कालवेला यथा,—
"रवौ यष्ठं विधौ वेदं कुजवारे द्वितीयकम्।
बुधे सप्त गुरौ पञ्च भृगुवारे तृतीयकम्।
शनावाद्यं तथा चान्तं रात्रौ कालं विवर्ज्जयेत्॥"
इति ज्योतिःसागरः॥

सोमवारव्रतं, क्ली, (सोमवारकर्त्तव्यं व्रतम्।) प्रतिसोमवारोपवासपूर्व्वकसायंकालकर्त्तव्यशिवदुर्गापूजारूपव्रतविशेषः। तद्विवरणं यथा,—
"सोमवारे विशेषेण प्रदोषादिगुणैर्युते।
केवलं वापि ये कुर्युः सोमवारे शिवार्चनम्।
न तेषां विद्यते किञ्चिदिहामुत्र च दुर्लभम्॥
उपोषितः शुचिर्भूत्वा सोमवारे जितेन्द्रियः।
वैदिकैर्लौकिकैर्वापि विधिवत्पूजयेच्छिवम्॥
ब्रह्मचारी गृहस्थो वा कन्या वापि समर्च्चका।
विभूतिका वा संपूज्य लभते वरमीप्सितम्॥*॥
तत्राहं कथयिष्यामि कथां श्रोतमनोरमाम्।
श्रुत्वा शुनधिः शुभ्रोर्भक्तिं कुर्व्वन्तु निश्चलाम्॥
आर्य्यावर्त्ते नृपः कश्चिदासीद्धर्म्मभृतां वरः।
चित्रवर्म्मेति विख्यातो धर्म्मराजो दुरात्मनाम्॥
सोऽनुकूलः स्वपत्नीषु पुत्रमेकं न लब्धवान्।
चिरेण प्रार्थितां हैमे कन्यामेकां मनोहराम्॥

स एकदा जातकलत्रपुत्रा-
नाहूय सर्व्वान् द्विजसङ्घवर्गान्।
क्रतूद्यतेनापि निविष्टचेताः
पप्रच्छ तस्या जनने विचारम्॥ ॐ॥
अथ तं प्रावदत् कोऽपि बहुज्ञो द्विजसत्तमः।
एका सीमन्तिनी मान्या कन्या तव महीपते॥
अथान्योऽपि द्विजः प्राह धैर्य्यवानविशङ्कितः।
एषा चतुर्दशे वर्षे वैधव्यं प्रतिपत्स्यति॥
इत्याकर्ण्य वचस्तस्य वज्रनिर्घातनिष्ठुरम्।
मुहूर्त्तमभवद्राजा चिन्ताव्याकुलमानसः॥
सापि सिमन्तिनी बाला क्रमेण गतशैशवा।
वैधव्यमात्मनो भावि सा शुश्राव सखीमुखात्॥
परं निर्व्वेदमापन्ना तदाकर्ण्य शुचिस्मिता।
याज्ञवल्क्यमुनेः पत्नीं मैत्रेयीं पर्य्यपृच्छत॥
मातस्त्वच्चरणाम्भोजं प्रपन्नाहं भयाकुला।
सौभाग्यवर्द्धनं कर्म्म मम संशितुमर्हसि॥ ॐ॥
इति प्रपन्नां नृपतेः कन्यामाह सुनेः सती।
भूरणं व्रज तन्वङ्गि पार्व्वतीं शिवसंयुताम्॥
सोमवारे शिवं गौरीं पूजयस्व समाहिता।
उपोषिता वा सुस्नाता विरजाम्बरधारिणी॥
यतवाङ्निश्चलमतिः पूजां कृत्वा यथोचिताम्।
ब्राह्मणान् भोजयित्वा च शिवं सम्यक् प्रसादय॥
पापक्षयोऽभिषेकेण सान्नाज्यं पीठपूजनात्।
सौभाग्यमखिलं सौख्यं गन्धमाल्याक्षतार्चनात्॥
धूपदानेन सौगन्ध्यं कान्तिर्दीपप्रदानतः।
नैवेद्येन महाभोगी लक्ष्मीस्ताम्बूलदानतः॥
धर्म्मार्थकाममोक्षाणां नमस्कारः प्रसाधनम्।
अष्टैश्वर्य्यादिसिद्धीनां जप एव हि साधनम्॥
होमेन सर्व्वकामानां सम्पत्तिरपि जायते।
सर्व्वेषामेव देवानां तृप्तिर्ब्राह्मणभोजनात्॥
इत्यमाराधय शिवं सोमवारे शिवामपि।
प्राप्ता विपद्भिर्व्वहुभिर्दुःखैर्वा न विहन्यसे॥
घोरात् घोरं प्रपन्नापि महाक्लेशं भयानकम्।
शिवपूजाप्रभावेण तरिष्यति महद्भयम्॥ ॐ॥
इत्थं सीमन्तिनी सम्यक् तन्निशम्य सतीसुखात्।
ययौ सापि वरारोहा राजपुत्री तथापि च॥"
इत्यादि स्कन्दपुराणे ब्रह्मोत्तरखण्डे सोमवार-व्रतमाहात्म्यम् ८ अध्यायः॥

सोमविक्रयी, [न्] पुं, (सोमं विक्रीणातीति। वि+क्री+णिनिः।) सोमलतारसविक्रयकर्त्ता। यथा, "पापो हि सोमविक्रयी।" इति मलमासतत्त्वे आश्वलायनब्राह्मणम्॥ (एतत्सम्पदानादेव दातुः प्रत्यवायो भवति। यथा, मनुः। ३।१८०।
"सोमविक्रयिणे विट्ठा भिषजे पूयशोणितम्।
नष्टं देवलके दत्तमप्रतिष्ठन्तु वाहुयौ॥"*)

सोमवृक्षः, पुं, (सोमस्येव वृक्षो यस्य।) कट्फलवृक्षः। इति रत्नमाला॥ श्वेतखदिरः। इति राजनिर्घण्टः॥

सोमशकला, स्त्री, (सोमस्य शकलमिव यत्र।) ब्रह्मयष्टिका। इति राजनिर्घण्टः। चन्द्रखण्डविशिष्टा च॥

सोमसंज्ञं, क्ली, (सोमस्य चन्द्रस्य संज्ञा संज्ञा यस्य।) कर्पूरम्। इति रत्नमाला॥

सोमसारः, पुं, (सोमस्येव शुक्लः सारो यस्य।) श्वेतखदिरः। इति राजनिर्घण्टः॥

सोमसिद्धान्तः, पुं, बुधभेदः। इति जटाधरः॥ ज्योतिर्ग्रन्थविशेषश्च॥ कापालिकवेशधारी। यथा,
"ततः प्रविशति कापालिकवेशधारी खड्गहस्तः सोमसिद्धान्तः।" इति श्रीकृष्णमिश्रकृतप्रबोधचन्द्रोदयनाटके ३ अङ्कः॥ सोमसिद्धान्त इति उमया सह वर्त्तमानः सोमो महादेवस्तेनाख्यातसिद्धान्त आगमशास्त्रम्। इति श्रीयुक्तहरिहरतर्कालङ्कारतनूजश्रीरुद्रविनिर्म्मिततट्टीका॥

सोमसिद्धान्ती, [न्] पुं, सोमसिद्धान्तवेत्ता। सोमसिद्धान्तग्रन्थादिनृप्रत्ययेन निष्पन्नः॥

सोमसिन्धुः, पुं, (सोमस्यान्ततस्य तद्वत्सोमस्य वा सिन्धुरिव।) विष्णुः। इति त्रिकाण्डशेषः॥

सोमसुत्, त्रि, (सोमं सुनोतीति। सोम+सु+क्विप्। मन्यने+"सोमे सुनः।" ३।२।६०। इति क्विप्।) यागे सोमलतारसचेपकर्त्ता। इति सिद्धान्तकौमुदी॥ (यथा, रघुः। १८।२७।
"तस्यौरसः सोमसुतः सुतोऽभूत्
नेत्रोत्सवः सोम इवातिरिक्तः॥")

सोमसुता, स्त्री, (सोमस्य सुता।) नर्म्मदानदी। इति राजनिर्घण्टः॥ बुधे, पुं॥ (यथा, मार्कण्डेये। १२३।११।
"अवेक्षतेमं देवानां गुरुः सोमसुतो बुधः।
नावेक्षतेनमादित्यो नार्कसूनुर्न भूमिजः॥")

सोमस्रुवं, क्ली, (सोमस्य जलस्य स्रुवं निर्गमप्रणालीव।) प्रणालम्। तत्तु शिवलिङ्गस्य गौरीपट्टजलनिर्गमस्थानम्। यथा,—
"शिवप्रदक्षिणे मन्त्री अर्द्धचन्द्रक्रमेण तु।
यथा सर्वक्रमेणैव सोमस्रुवं न लङ्घयेत्॥"
सोमस्रुवं जलनिःसरणस्थानम्। इति तन्त्रसारे सामान्यपूजापद्धतिः॥

सोमाख्यं, क्ली, (सोमं सोमलतां आख्याति वर्णयतीति। आ+ख्या+कः।) रक्तकैरवम्। इति रत्नमाला॥

सोमाभा, स्त्री, (सोमस्य आभा इव आभा यस्याः।) चन्द्रावली। इति भक्तिरसान्तसिन्धुः॥

सोमाल्यः, त्रि, (सोमाय अलति पर्य्याप्नोतीति। अल+क्यप्।) कोमलः। इति हेमचन्द्रः॥

सोमाहः, पुं, (सोमस्य अहः। समासे टच्।) सोमवारः। इति ज्योतिषम्॥

सोमेश्वरः, पुं, (सोमस्य ईश्वरः।) काश्यां सोमकर्त्तृकप्रतिष्ठितशिवः। यथा,—
"शिवरूपाधिष्ठितस्तु शिवरूपो गिरिः स्मृतः।
सोमेन तत्र संस्थाप्य स्थानमा लिङ्गमुत्तमम्॥
वर्षाणान्तु सहस्रं वै स्वप्राणस्य निवृत्तये।
ततः क्षयादिनिर्म्मुक्तश्चेजसा च परिप्लुतः॥
स्वकं तेजोबलं प्राप्य तुष्टाव गिरिजापतिम्।
सोमेश्वराच्च वरदमाविर्भूतं प्रियंकरम्॥"
इति वाराहे सोमेश्वरादिलिङ्गमहिमावसुक्षित्रक्षेत्रविशेषादिमहिमनामाध्यायः॥ (पीठस्थानविशेषः। यथा, देवीभागवते। ७।३०।७३।
"सोमेश्वरे वरारोहा प्रभासे पुष्करावती।")

सोमोद्भवा, स्त्री, (सोमादुद्भवो यस्याः।) नर्म्मदानदी। इत्यमरः। १।१०।३२॥ (यथा, रघुः। ५। ५६।
"तयेत्युपस्पृश्य पयः पवित्रं
सोमोद्भवायाः सरितो नृसोमः।
उदङ्मुखः सोऽस्त्रविदस्त्रमन्त्रं
जग्राह तस्मान्निगृहीतशापात्॥")

सोमयते, त्रि॥

सोलुखलः, पुं, (उलूखलेन सह वर्त्तमानः।) सोलुखलम्। इति हलायुधः॥ (वाप्यलिङ्गोऽयमिति केचित्॥)

सोलुखलं, क्ली, (उलूखलेन सह वर्त्तमानम्।) स्तुतिपूर्व्वकदुर्व्वादः। यथा,—
"दुर्व्वादः स्याद्वृथालम्भस्तत्र यः स्तुतिपूर्व्वकः।
सोलुखलं वनिन्द्यस्तु यत्तत्र परिभाषणम्॥"
इति जटाधरः॥
(वाप्यलिङ्गोऽयमिति केचित्॥)

सोलुखलोक्तिः, स्त्री, (सोलुखलस्य उक्तिः।) सत्यप्रोक्तिः। यथा। उपनायकमानेतुं प्रेषितां तदुपभोगलुब्धचन्द्रनामदूतीं वाप्यीक्षानन्यायेन गोपयन्तीं दूतीं प्रति सोलुखलोक्तिरियमिति निःशेषच्युतचन्दनं इति शोकव्याख्याने काव्यप्रकाशटीकायां महेश्वरन्यायालङ्कारः॥

सौकरः, त्रि, (सूकरस्यायमिति। सूकर+अण्।) सूकरसम्बन्धी। (यथा, किराते। १२। ५१।
"स तमाससाद घनगौरमभिमुखसुपस्थितं सुनेः।
गोचरिकरणविभिन्नसुवं
दशनं दधानमथ सौकरं वपुः॥")

सौकरिकः, पुं, (सूकरं हन्तीति। सूकर+ठक्।) व्याधः। सिकारी इति भाषा। इति केचित्॥ (यथा, हरिवंशे। १५। २२।
"वरूथेषु पाशिकमत्स्यबन्ध-
जलजीवानि जलचराजीवाः।
सौकरिकरजकशौण्डिक-
शाकुनिकाश्चापि वर्जयेत्॥")

सौकर्य्यं, क्ली, (सुकरस्य भावः कर्म्म वा। सुकर+ष्यञ्।) अनायासः। (यथा, साहित्यदर्पणे। १०। ६८।
"सौकर्य्येण च कार्य्यस्य क्रियते यदि॥")
सूकरस्य भावः कर्म्म वा। सूकर+ष्यञ्।) सूकरस्य क्रिया। इति विश्वः॥

सौक्ष्म्यं, क्ली, सूक्ष्मता। सूक्ष्मस्य भावः इत्यर्थे ष्यञ्(ष्यञ्)प्रत्ययेन निष्पन्नम्॥

सौखसुप्तिकः, त्रि, (सुखसुप्तिं सुखेन शयनं इच्छतीति। सुखसुप्ति+ठक्।) वैतालिकः। यथा,
"वैतालिका बोधकरा अर्थिकाः सौखसुप्तिकाः।"
इति हेमचन्द्रः॥

सौखिकः, त्रि, (सुखेन जीवतीति। सुख+"वेतनादिभ्यो जीवति।" ४।४।१२। इति ठक्।) सुखार्थी। सौखीन इति भाषा॥ (यथा, महाभारते। १२।१८।२९।
"प्रिया विहीनैरधनैरयत्नसमितैरकिञ्चनैः।
सौखिकैः सत्यसन्धांस्तु यः सन्त्यजति किन्नु तत्॥")

सौख्यं, क्ली, (सुखमेव। स्वार्थे ष्यञ्।) सुखम्। इति हेमचन्द्रः॥ यथा, उत्तररामचरिते २ अङ्के।
"अकिञ्चिदपि कुर्वाणः सौख्यैर्दुःखान्यपोहति।
तस्य किमपि द्रव्यं यो हि यस्य प्रियो जनः॥"
(सुखस्य भावः कर्म्म वा। सुख+ष्यञ्।) सुखत्वम्। सुखस्य भावः इत्यर्थे गुणवचनेन ष्यञ्॥

सौगतः, पुं, (सुगत एव। स्वार्थे अण्।) बुद्धविशेषः। तत्पर्य्यायः। शून्यवादी २। इति हेमचन्द्रः॥ (यथा, माघे। २। २८।
"सर्व्वकार्य्यशरीरेषु सुखाद्वैरूप्यदर्शकम्।
सौगतानामिवात्मान्यो नास्ति मन्तो महीभृताम्॥"
सुगतसमन्धिनि, सुगतमताध्यायिनि च त्रि॥)

सौगतिकः, पुं, (सौगतं मतं वेत्तीति। ठक्।) बुद्धविशेषः। इति केचित्॥

सौगन्ध्यं, क्ली, (सुष्ठु गन्धो यस्य। ततः स्वार्थे ष्यञ्।) कह्लारम्। यथा,—
"सौगन्धिकञ्च सौगन्ध्यं रामकर्पूरके त्रयी॥"
इति शब्दरत्नावली॥
(पुं, वसुरुद्रजातिविशेषः। यथा, महाभारते। १३। ४८। २२।
"चतुरो मागधी क्षत्रे क्रूरान्नायोपजीविनः।
मांसं खादुकरं क्षौद्रं सौगन्ध्यमिति विश्रुतम्॥")
शोभनगन्धयुक्ते, त्रि॥

सौगन्धिकं, क्ली, (सुगन्धीरस्यस्येति। सुगन्ध+ठन्। ततः स्वार्थे अण्।) कह्लारम्। (अस्य पर्य्यायो यथा,—
"कह्लारं रौधिरं देवगन्धं सौगन्धिकन्तथा।
भूसिरं व्यामसौरभ्यं ज्ञानकं षड्गन्धिकम्॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ६) कह्लारम्। इत्यमरः। १। १०। ३६॥ पद्मरागमणिः। इति मेदिनी॥ नीलोत्पलम्। इति राजनिर्घण्टः॥ (अस्य पर्य्यायो यथा,—
"इन्दीवरं कुवलयं पद्मं नीलोत्पलं स्मृतम्।
सौगन्धिकं शतदलमम्बं कमलमुच्यते॥"
इति गारुडे २०८ अध्यायः॥ यथा, महाभारते। ३। १५१। २।
"कह्लारञ्च पाण्डवी सौगन्धिकमनुत्तमम्।
अनिर्द्देश्यमिदं वर्णं सा वनानि परीप्सति॥")

सौगन्धिकः, पुं, (सौगन्धीरस्यतीति। ठन्।) मत्स्यः। इत्यमरः। २। ६। १०२॥ सुगन्धद्रव्यवणिक्। इति मेदिनी॥ मत्स्यीति स्त्रियां भाषा॥ (मैथुनिमिथुनकक्षिमिथिषेषः। यथा, भरते विभावसोः ७ अध्याये। "येषां विधिवानां मैथुनिमिथुनानां स्त्रियोनां नामानि व्यत्यादा उदराद्या हृदयादाद्यूरवो दर्भपुष्याः सौगन्धिका महागुदाश्च इति॥")

सौगन्ध्यं, क्ली, सुगन्धत्वम्। सुगन्धस्य भाव इत्यर्थे सुगन्धशब्दात् ष्यञ् (यञ्) प्रत्ययेन निष्पन्नम्॥ (यथा, महाभारते। १। ६३। ७६।
"एवमुक्त्वा वरं वव्रे गात्रसौगन्ध्यमुत्तमम्॥")

सौचिः, पुं, सौचिक इति शब्दरत्नावली॥

सौचिकः, पुं, (सूच्या जीवतीति। सूची+ठक्।) सूचीकर्म्मोपजीवी। दर्जी इति भाषा। तत्पर्य्यायः। तुन्नवायः २। इत्यमरः। २।१०।६॥ सूचिकः ३ सौचिः ४ सूत्रभृत् ५। इति शब्दरत्नावली॥

सौजन्यं, क्ली, (सुजनस्य भावः कर्म्म वा। सुजन+ष्यञ्।) सुजनता। यथा,—
"सौजन्यं वरवंशजस्य विभवो दीर्घायुरारोग्यता
विज्ञानं विनयित्वमिन्द्रियवशः सत्पात्रदाने रुचिः।
सच्चन्द्रो सुसुतः प्रिया प्रियतमा भक्तिश्च नारायणे
सत्पुरुषेण विना त्वयोदय गुणाः संसारिणां दुर्लभाः॥"
इत्युद्भटः॥

सौञ्जी, स्त्री, पिप्पली। इति शब्दचन्द्रिका॥ (पिप्पलीशब्देऽस्या विशेषो विज्ञेयः॥)

सौत्रः, पुं, (सूत्रं यज्ञसूत्रमर्हतीति। सूत्र+अण्।) ब्राह्मणः। इति हेमचन्द्रः॥ (सूत्रे पठितः पाणिन्यादिभिः कर्म्मविशेषार्थेति। अण्।) नियतप्रयोगाभावधातुविशेषः। यथा,—
"धातूनामिह सौत्राणां द्विचत्वारिंशदीरिताः॥"
इति कविकल्पद्रुमः॥
(सूत्रस्येदमित्यण्।) सूत्रसम्बन्धिनि, त्रि॥

सौत्रामणी, स्त्री, (सुत्रामा इन्द्रो देवता अस्याः। सुत्रामन्+अण्। बहुलवचनात् न टिलोपः। ततः स्त्रियां ङीप्।) यागविशेषः। यथा।
अथ सौत्रामणी त्रिभिरध्यायैः प्रक्रियते। य एतं महाक्रतुमपश्यत् सौत्रामणीमिति श्रुतेः। तत्र सुरा सञ्जीयते। तत्र मन्त्रः। स्वादीन्द्रा स्वादुना तीव्रां तीव्रेणान्तामरंतेन। मधुमतीं मधुमता सृजामि च ५ सोमेन सोमोऽस्त्वभिभ्यां पथस्त्र सरस्वते पथस्त्रेन्द्राय सुत्रामणे पथस्त्र॥ सौत्रामण्याः ऋषिः प्रजापतिः। सुरा देवता। अनुष्टुप् छन्दः। इति यजुर्व्वेदस्य काण्वशाखायाम् २१ अध्यायः॥ विस्तारस्तु तत्रैव २१। २२। २३। अध्यायेषु द्रष्टव्यः। यागक्रमस्तु कात्यायनसूत्रभाष्ये दृश्यः॥ (अत्र सुरां पित्वा ब्राह्मणः पतितो न भवति। यदुक्तम्।
"सौत्रामण्यां कृताचारे ब्राह्मणः प्रपिबेत् सुराम्।
अन्यत्र कामतः पीत्वा पतितस्तु द्विजो भवेत्॥")

सौदामनी, स्त्री, (सुदामा मेघः, तत्रेयं वा। तत्र भवेति। "तत्रेकदिक्।" ४। ३। ११२। इति अण्।) विद्युत्। इत्यमरः। १। ७। ६।
सुदामा शैरावतस्तस्य स्त्री सौदामनी पद्माप्रीम् ङीङ्च मनीषादित्वात्। श्वेतद्विपः सुदामा चेति शैरावतपर्य्यायौ त्रिकाण्डशेषः॥
"क्षेत्रं जगाम कार्ष्णग-
रसमसौदामनीलताधामास्तम्।
कुवलयमयमिव सरजः
सरसमसौदामनीलताधामास्तम्॥"
इति हरिप्रबोधधर्म्मकाव्ये सौदामिनीत्यपपाठ इति सुकविः। इति भरतः॥* (यथा, महाभारते। १। १७२। ४२।
"ततो जातप्यमानस्य प्राधिवस्यायतेजसा।
सौदामनीव चाबभ्रेषु तत्रैवान्तरधीयत॥")
अप्सरोभेदः। विद्युद्भेदः। इति मेदिनी॥ (यथा, भागवते। १। ६। २८।
"एवं छायामतेर्ज्जज्ञासक्तस्यामलात्मनः।
कालः प्रादुरभूत् काले तडित् सौदामनी यथा॥
सुदामा माला तत्र भवा सौदामनी माला-कारा इत्यर्थः। सुदामा पर्व्वतः तत्रैकदिग्भिति सूत्रेण अण् स्फटिकमयपर्व्वतप्रान्तभागभवा हि विद्युदतिस्फुटा भवति। इति तट्टीकायां श्रीधरस्वामी॥)

सौदामिनी, स्त्री, विद्युत्। इत्यमरटीका। १।३।६॥ (यथा, ऋतुसंहारे। ३। १२।
"गर्ज्जं धनुर्वलभिदो जलदोदरेषु
सौदामिनी स्फुरति गाढ वियत्पताका॥")
तड़िद्भेदः। (यथा, महाभारते। ३।५३।१२।
"तत्र सा राजते भैमी सर्व्वाभरणभूषिता।
सखीमध्येऽनवद्याङ्गी विद्युत् सौदामिनी यथा॥")
अप्सरोभेदः। इति हेमचन्द्रः॥ देशविशेषः। इत्यजयः॥

सौदामनी, स्त्री, सौदामनी। इति शब्दरत्नावली॥

सौदायिकं, त्रि, (सुदायेभ्यः पितृमातृभर्तृकुलसम्बन्धिभ्य आगतमिति। सुदाय+ठञ्।) पितृमातृभर्तृकुलसम्बन्धिधनम्। येषां, कात्यायनः।
"जन्यया कन्यया वापि पत्युः पितृगृहेऽथवा।
भर्तुः सकाशात् पित्रोर्वा लब्धं सौदायिकं स्मृतम्॥
सौदायिकं धनं प्राप्य स्त्रीणां स्वातन्त्र्यमिष्यते।
यस्मात् तदापदर्थाय तेनैतत् सत्रजीवनम्॥
सौदायिके सदा स्त्रीणां स्वातन्त्र्यं परिकीर्त्तितम्।
विक्रये चैव दाने च यद्येषं स्यादरेष्वपि॥"
सुदायेभ्यः पितृमातृभर्तृकुलसम्बन्धिभ्यो लब्धं सौदायिकम्। आदृणंस्यमनेडमूकम्। इति दायतत्त्वम्॥

सौदासः, पुं, इक्ष्वाकुवंशीयः अयोध्याधिपतिः। अस्य नामान्तरम्। कल्माषपादः १ मित्रसहः २। इति पुराणम्॥ (यथा, महाभारते। १। १७२। २१।
"सौदासेन च रक्षोरूपं नियुक्ता पुत्रजक्षणे।
मदयन्ती जगामर्षिं वसिष्ठमिति नः श्रुतम्॥"
अस्य विशेषविवरणन्तु कल्माषपादशब्दे दृश्यम्॥)

सौधः, पुं, क्ली, (सुधा लेपोऽस्यास्तीति। ज्योत्स्नादित्वादण्।) राजसदनम्। इत्यमरः। २।२।१०॥ (यथा, रघुः। ८। ६३।
"तस्य प्रसक्तं हृदयं किल श्रीकण्ठस्य
न्यग्रोध इव सौधतलं विभेद॥")
सौधिन्। इति राजनिर्घण्टः॥ सुधासम्बन्धिनि, त्रि॥ (यथा, रामायणे। २। ८०। १६।
"प्रासादमालासंयुक्ताः सौधप्राकारसंवृताः॥"
तथाच सुश्रुते। १। ४४।
"विरेचनानां तीक्ष्णानां पयः सौधं परं मतम्॥")
सौधः, पुं, दुग्धपाषाणः। इति राजनिर्घण्टः॥
सौधारः, पुं, नाटकस्य चतुर्दशभागेकभागः। इति केचित्॥
सौधालं, क्ली, (सौधवत् अलति पर्य्याप्नोतीति। अल्+अच्।) शिवमन्दिरम्। इति केचित्॥
सौनन्दं, क्ली, (सुनन्देव। स्वार्थे अण्।) बलदेवसूपलम्। इति हेमचन्द्रः॥ (यथा, हरिवंशे। ६। ६३।
"सौनन्दश्च ततः श्रीमान्निरानन्दकरं द्विषाम्।
मथन साक्षतां श्रेष्ठो जग्राह मुसलोत्तमम्॥")
सौनन्दी, [न्] पुं, (सौनन्दं मुसलमस्यास्तीति। इनिः।) बलदेवः। इति त्रिकाण्डशेषः॥
सौनिकः, पुं, (सुनया पश्वादिवधस्यान्नेन चरतीति। सुना+ठक।) पशुपक्षिमांसविक्रयकर्त्ता। तत्पर्य्यायः। वैतंसिकः २ मौनिकः ३ कौटिकः ४। इति हेमचन्द्रः॥ (यथा मनुः। ४। ८६।
"दश सूनासमाणि यो वाहयति सौनिकः।
तेन तुल्यः सुनो राजा घोरस्तस्य प्रतिग्रहः॥")
तालव्यशकारादिरपि॥
सौन्दर्यं, क्ली, (सुन्दरस्य भावः। सुन्दर+ष्यञ्।) सुन्दरत्वम्। सुन्दरस्य भावः। तस्य लक्षणं यथा,
"अङ्गप्रत्यङ्गकानां यः सन्निवेशो यथोचितम्।
सुश्लिष्टः सन्धिबन्धः स्यात् तत् सौन्दर्यमुदाहृतम्॥"
इत्युज्ज्वलनीलमणिः॥
(यथा, कुमारे। १। ३८।
"सर्व्वोपमाद्रव्यसमुच्चयेन
यथाप्रदेशं विनिवेशितेन।
सा निर्म्मिता विश्वसृजा प्रयत्ना-
देकस्थसौन्दर्य्यदिदृक्षयेव॥")
सौपर्णं, क्ली, (सुपर्णे गरुडे भवमित्यर्थः। अण्।) मरकतम्। शुक्तौ। इति राजनिर्घण्टः॥ (गरुडपुराणम्। यथा, भागवते। १२। १६। ८।
"एकोनविंशं सौपर्णं प्रोक्तं द्वादशमेव तु॥"
मारकतास्त्रम्। यथा, रघुः। १४। ८०।
"विभूषणप्रत्युपहारहस्त-
मुपस्थितं सौम्य विधाम्यनिष्टम्।
सौपर्णमस्त्रं प्रतिमुञ्चतारं
प्रत्येत्यनिष्टस्त्रयी हि तस्य॥")
सुपर्णसम्बन्धिनि, त्रि॥ (यथा, महाभारते। १। ८७। ४८।
"क्षाद्यमानस्तु नागैः स थात्वा राज्ञस्पुङ्गवः।
सौपर्णं रूपमास्थाय भक्षयामास पन्नगान्॥")
सौपर्णी, स्त्री, पातालगरुडी लता। इति राजनिर्घण्टः॥
सौपर्णेयः, पुं, (सुपर्ण्या अपत्यं पुमानिति। "स्त्रीभ्यो ढक्।" ४। १। १२०। इति ढक्।) गरुडः। इति हेमचन्द्रः॥ गायत्र्यादिच्छन्दांसि। यथा,
"विनतायास्तु पुत्रौ द्वावरुणो गरुडस्तथा।
प्रभावज्ञः सुसारश्च यवीयस्त्वत्तयोः स्मृतः॥
गायत्र्यादीनि च्छन्दांसि सौपर्णेयानि पक्षिणः।
एतावन्ति सर्व्वाणि दिक्षु संनियतानि च॥"
इति वह्निपुराणे काश्यपीयवंशकथननामाध्यायः॥
सौप्तिकं, क्ली, (सुप्तौ सुप्तिकाले भवम्। सुप्ति+ठञ्।) रात्रियुद्धम्। तत्पर्य्यायः। निघ्नारणम् २। इति जटाधरः॥ रात्रिमारणम् ३। इति त्रिकाण्डशेषः॥ (यथा, महाभारते। १०। ८। ३३।
"अथ्वत्थु कदनं कृत्वा प्रचूर्णामद्य सौप्तिके।
ततो विश्रमिता चैव स्वप्ता च विगतज्वरः॥")
महाभारतीयपर्व्वविशेषः। यथा,—
"व्यासः सभावनविराटमथोद्यमश्च
भीष्मो गुरुः रविजमद्रवसौप्तिकश्च।
स्त्रीपर्व शान्तिरनुशासनमश्वमेध-
आश्रमो मुसलयानदिवावरोहः॥"
इति महाभारतटीका॥
सुप्तसम्बन्धिनि, त्रि॥
सौभं, क्ली, हरिश्चन्द्रपुरम्। इति त्रिकाण्डशेषः॥ तत्पर्य्यायः। कामचारिपुरम् २। इति जटाधरः॥ (शाल्वराजपुरम्। यथा, महाभारते। ३। १२। ३३।
"एनः सौभपतेः शाल्वस्तया सौभञ्च पातितम्।"
अस्य विशेषविवरणन्तु तत्रैव १४ अध्यायमारभ्य विस्तरशो द्रष्टव्यम्॥)
सौभद्रः, पुं, (सुभद्रायाः अपत्यं पुमानिति। सुभद्रा+अण्।) सुभद्रापुत्रः। स चाभिमन्युः। यथा,—
"सौभद्रो द्रौपदेयाश्च सर्व्व एव महारथाः॥"
इति भगवद्गीतायां १ अध्यायः॥
(सुभद्रा प्रयोजनमस्य। "संग्रामे प्रयोजनयोर्भुग्भ्यः।" ४। ३। ५६। इति अण्। संग्रामविशेषः। सुभद्रामधिकृत्य कृतो ग्रन्थः। "अधिकृत्यकृते ग्रन्थे।" ४। ३। ८७। इत्यण्। ग्रन्थविशेषः। इति काशिका॥ ॐ॥ सौधर्मविशेषे, क्ली। यथा, महाभारते। १। २१७। ६-८।
"अगस्त्यतीर्थं सौभद्रं सौलोमश सुपावनम्।
कारन्धमं प्रभासश्च हयमेधफलञ्च तत्॥
भारद्वाजस्य सौवर्णं पापघ्नममलं महत्।
एतानि यश्च सौवर्णानि ददर्श कुरुनन्दन॥")
सुभद्रासम्बन्धिनि, त्रि॥
सौभद्रेयः, पुं, (सुभद्रायाः अपत्यं पुमानिति। सुभद्रा+"स्त्रीभ्यो ढक्।" ४। १। १२०। इति ढक्।) अभिमन्युः। सुभद्रायाः अपत्यत्वात्॥ विभीतकवृक्षः। इति शब्दचन्द्रिका॥
सौभरिः, पुं, मुनिविशेषः। यथा,—
"मीनान् सुदुःखितान् दृष्ट्वा दीनान् मीनपतौ हृते।
कृपया सौभरिः प्राह तत्तत्क्षेममाचरन्॥"
इति श्रीभागवते। १०। १७। १०॥
(अस्य विशेषविवरणन्तु विष्णुपुराणे ४ अंशस्य २ अध्यायमारभ्य द्रष्टव्यम्॥)
सौभागिनेयः, पुं, (सुभगायाः अपत्यं पुमानिति। सुभगा+"कल्याण्यादीनामिनङ्।" ४।१।१२६। इति ढक् इनङादेशश्च। "वृद्धिनिमित्तयोर्यो पूर्व्वपदस्य च।" ७। ३। १५। इति उभयपदवृद्धिः।) सुभगापुत्रः। तत्पर्य्यायः। सुभगासुतः २। इत्यमरः। २। ६। २४॥ सुभागिनेयसम्बन्धिनि, त्रि॥
सौभाग्यं, क्ली, (सुभगायै हितम्। सुभगा+ष्यञ्। "वृद्धिनिमित्तयोः।" ७। ३। १५। इत्युभयपदवृद्धिः।) सिन्दूरम्। टङ्कणः। इति राजनिर्घण्टः॥ (अस्य पर्य्यायो यथा,—
"सौभाग्यं टङ्कणं चारो धातुद्रावकसुच्यते॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥
सुभगायाः सुभगस्य वा भावः। ष्यञ्।) सुभगत्वम्। (यथा, कुमारे। ५। १।
"तथा समक्षं दहता मनोभवं
पिनाकिना भग्नमनोरथा सती।
निनिन्द रूपं हृदयेन पार्व्वती
प्रियेषु सौभाग्यफला हि चारुता॥")
योगभेदः। इति मेदिनी॥ स च विष्कम्भादिसप्तविंशतियोगान्तर्गतचतुर्थयोगः। तत्र जातफलम्।
"सौभाग्यजन्मा सुभगो मनुष्यः
ज्ञाढ्यो जनानां धनवान् गुणज्ञः।
उदारचित्तो बलवान् विवेकी
महाभिमानी प्रियभाषणश्च॥"
इति कोष्ठीप्रदीपः॥ ॐ॥
व्रतविशेषः। यथा,—
जगस्य उवाच।
"अतः परं महाराज सौभाग्यकरणं व्रतम्।
श्रृणु येनाशु सौभाग्यं स्त्रीपुंसोरुपजायते॥
फाल्गुनस्य तु मासस्य तृतीया शुक्लपक्षगा।
उपोषितया तत्रैव शुचिना सत्यवादिना॥
सश्रीकञ्च हरिं पूज्य कृष्णं वा लोमया सह।
या श्रीः सा गिरिजा प्रोक्ता यो हरिः स त्रिलोचनः॥
एवं सर्व्वेषु शास्त्रेषु पुराणेषु च पठ्यते।
एतस्मादन्यथा यस्तु भूते शास्त्रं पृथक्कृतम्॥
स्त्रीणां जनानां मर्त्यानां वाक्यं शास्त्रं न लङ्घयेत्।
विष्णुं कृष्णन्तु वा शम्भुं श्रीगौरीति निगद्यते॥
एतयोरन्तरं यस्तु भूयात् लोकस्य उच्यते।
तं नास्तिकं विजानीयात् सर्व्वधर्म्मबहिष्कृतम्॥
एवं ज्ञात्वा सदा स्त्रीभिः हरिं संपूज्य भक्तिमान्॥

प्रदेन्द्रवारुणी। वृद्धदारु। महाज्योतिष्मती। महिषवल्ली। गुडूचा। शालपर्णी। ब्राह्मी। घण्टी। मल्लिका। इति राजनिर्घण्टः॥

सौम्याः, स्त्री, (सोमो देवता यासाम्। सोम+यञ्।) दक्षकन्याः। तासु सप्तविंशतिनक्षत्राणि सोमपत्न्याः सन्ति। इति विश्वकोषः॥

सौरः, पुं, (सूरस्य सूर्यस्यायमिति। सूर+अण्।) शनैश्चरः। इत्यमरटीकायां भरतः। १। ३। २६॥ (यथा, हरिवंशे। १०। ४।

"बहवस्ते पीयन्ते सौरेणुपजीविन-
समूपाय॥")

वृक्षविशेषः। इति राजनिर्घण्टः॥ सूर्य्यैकराशिभोगावच्छिन्नमासादिः। यथा, विष्णुधर्म्मोत्तरम्।

"आदित्यराशिभोगेन सौरो मासः प्रकीर्त्तितः॥"

विवाहादिकर्म्मसु सौरमासस्योक्तेः कर्त्तव्यः। यथा, पितामहः।

"आब्दिके पिण्डकर्त्ते च मासचन्द्रमसः स्मृतः।
विवाहादौ स्मृतः सौरो यज्ञादौ सावनो मतः॥"

विवाहादावित्यादिपदं याज्ञवल्क्यवचनपरम्। यत्कर्म्म सूर्य्यभोग्यराश्युल्लेखेन विहितं यच्च विशेषोदयास्तादिविहितं तत्परम्। अयनस्य सौरमासघटितत्वेन वक्ष्यमाणत्वात्। तच्च चूडोपनयनादि। विष्णुधर्म्मोत्तरम्।

"अध्वायनस्य यच्चारकर्म्म
सौरेण मानेन तदाध्यवस्येत्।
सचाग्र्यपास्यान्यच्च सावनेन
लौक्यञ्च यत् स्यात्तदुपव्यवहारकर्म्म॥"

अध्वायनं अध्वगमनं यात्रेति यावत्। इति ज्योतिस्तत्त्वम्॥ ४॥ सूर्य्योपासकः। (यथा, महानिर्व्वाणतन्त्रे। ३। १४०।

"शाक्ताः शैवा वैष्णवाश्च सौरा गाणपनास्तथा।
विप्रा विप्रेतराश्चैव सर्व्वेऽप्यत्राधिकारिणः॥")

गरुडविशेषः। यथा,—

"गौडाः शाक्ताश्च सौरा मागधाः केरलास्तथा।
कौशलाश्च दशार्णाश्च गुरवः सप्त मध्यमाः॥"

इति तन्त्रसारे १ परिच्छेदः॥ (उपपुराणविशेषः, स्त्री। यथा, देवीभागवते। १। ३। १५।

"सौरं परात्मरूपोक्तमादित्यमहिमोदयम्॥"

सूर्य्यसम्बन्धिनि, त्रि। यथा,—

"शैवानि शाक्तयानि शाक्तानि वैष्णवानि च।
साधनानि च सौराणि गाणपत्यानि यानि वानि च।
यज्ञानि सानि देवेश सफलानि फलानि च॥"

इति तन्त्रसारे ७ परिच्छेदः॥ ७॥

यथा च चतुर्विंशे भविष्यपर्व्वणि। ४६। ५०।

"यदा मीनं व्रजत्यर्कः सर्व्वा व्याधीस्तदा हरेत्।
तदा यज्ञव्रतोद्योगान् सूर्य्य एव विनाशयेत्॥")

सौरजः, पुं, (सौरात् तेजसः जायते इति। जन+डः।) सुवर्णवृक्षः। इति राजनिर्घण्टः॥ सौरजाते, त्रि॥

सौरदिवसः, पुं, (सौरो दिवसः।) सूर्य्यसम्बन्धिदिनम्। तच्च रविसुक्तांशाधिकषष्टिदण्डैर्भवति। यथा, "सावनं दण्डाः षष्टिरहः खलमखगुणांशाप्तास्तदैनं भवेत॥" इति मलमासतत्त्वम्॥ "त्रिंशता सौरदिवसैः सावनः परिकीर्त्तितः॥"

इति शब्दरत्नावली॥

सौरनक्तं, क्ली, व्रतविशेषः। यथा,

"हस्तर्क्षे चार्कदिने सौरनक्तं समाचरेत्।
स्नात्वा चार्कं समभ्यर्च्य नीरोगी चिरजीवति॥
आत्मनो द्विगुणच्छायं यदा सन्तिष्ठते रविः।
सौरनक्तं विजानीयात् नक्तञ्च निशिभोजनम्॥"

इति नारसिंहे ६४ अध्यायः॥

सौरभं, क्ली, (सौरभमस्यास्तीति। अच्।) कुङ्कुमम्। इति त्रिकाण्डशेषः॥ वालम्। इति राजनिर्घण्टः॥ वृक्षभेदः। सौरभमस्यास्तीति। अण्(अण)प्रत्ययेन निष्पन्नम्॥ (यथा, नैषधे। २। ६२।

"समभेषमदैर्यदापये
तुलयन् सौरभलोभनिश्वसम्।
पथिता न जनारवैरवे-
दपि गुञ्जन्तमलिं मलीमसम्॥"

तद्विशिष्टे, त्रि। यथा, भागवते। ८। २। ८।

"सरित्सरोभिरच्छोदैः पुलिनैर्मण्डिताङ्गणैः।
देवक्रीमज्जनामोदसौरभाम्बुनिलेर्युतः॥")

सौरभेयः, पुं, (सुरभेरपत्यमिति। सुरभि+ढक्।) वृषः। इत्यमरः। २। ६। ६०॥ (यथा, भागवते। १। १७। ६।

"मा सौरभेयाच्च सुचो येतु ते वृषलात् भयम्॥")

सुरभिसम्बन्धिनि, त्रि॥

सौरभेयी, स्त्री, (सुरभेरपत्यं स्त्री। सुरभि+ढक्। ङीप्।) गौः। इत्यमरः। २। ६। ६३॥ (यथा, रघुः। २। ३।

"निवर्त्त्य राजा दयितां दयालु-
र्न्यां सौरभेयीं सुरभियशोभिः।
पयोधरीभूतचतुःसमुद्रां
जुगोप गोरूपधरामिवोर्व्वीम्॥"

अप्सरोविशेषः। यथा, महाभारते। १। १०। ११।

"विश्वाची सहजन्या च प्रम्लोचा उर्व्वशी तथा।
वर्गा च सौरभेयी च समीची बुदुदा लता॥")

सौरभ्यं, क्ली, (सुरभेर्भावः। सुरभि+ष्यञ्।) मनोज्ञत्वम्। सौगन्ध्यम्। (यथा, आर्य्यासप्तशत्याम्। २१३।

"गुरुविधुना यसि तिष्ठसि नयेव देहेन किन्तु
सूर्य्यं से।
कृतसमुना मालायाः समीरणेनेव सौरभ्यम्॥")

गुणगौरवम्। इति मेदिनी॥

सौरभ्यः, पुं, (सौरभ्यं गुरुगौरवमस्यास्तीति। अण्।) कुबेरः। इति शब्दरत्नावली॥

सौरमासः, पुं, (सौरो मासः।) सूर्य्यैकराशिभोगावच्छिन्नकालः। यथा, ब्रह्मसिद्धान्ते।

"एकराशौ रविर्यावत् कालं मासः स भास्करः॥"

इति मलमासतत्त्वम्॥

सौरिः, पुं, (सूरस्यापत्यमिति। सूर+इञ्।) शनिः। इत्यमरः। १। ३। २६॥ (यथा, हरिवंशे। १०। ४०।

"लक्षदर्शः सौरिः सौम्यो मणिरत्नविलक्षः
कुसुमैर्गुरुः परिणीतकः॥")

अमरवृक्षः। आदित्यभक्तः। इति राजनिर्घण्टः॥

सौवर्च्य

सौरिकः, पुं, (सुरेभ्यो हितः। सुर+ठक्।) स्वर्गः। इति शब्दरत्नावली। (सुरया चरतीति। सुरा+ठक्।) सुराविक्रयकर्त्ता। इति केचित्। स्वार्थे कप्रत्यये शूनेश्वरः। (सुरायाः अयमिति। सुराखण्डिनि, त्रि। यथा, मनुः। ८। १५६।
"प्रातिभाव्यं वृथादानमाक्षिकं सौरिकञ्च यत्।
दण्डशुल्कावशेषञ्च न पुत्रो दातुमर्हति॥")

सौरिरत्नं, क्ली, (सूरेः शूनेश्चरस्य रत्नम्।) नीलमणिः। इति राजनिर्घण्टः।

सौरी, स्त्री, (सूर्य+अण्। ङीप्। "सूर्यतिष्येति।" ६। ४। १४८। इति यलोपः।) सूर्यस्यापत्यं स्त्री। इति सुग्धबोधव्याकरणम्।

सौरीयं, त्रि, (सूर्य+छ।) "सूर्यागस्त्ययोश्छे च ढ्यञौ च।" ६। ४। १४८। इत्यस्य वार्त्तिकोक्त्या यलोपः।) सूर्याय हितम्। इति सुग्धबोधव्याकरणम्। सौर्य्ये भवः। यथा। सूर्य्यस्येदं इत्यर्थे ष्यः सौर्य्यं तेजः पुनः सौर्य्ये भव इत्यर्थे ईयप्रत्यये यलोपे सौरीयः। इति सुग्धबोधटीकायां दुर्गादासः।

सौरेयः, } पुं, शुक्लभिण्टीवृक्षः। यथा,—
सौरेयकः, }
"सौरेयकः सैलपुष्पः सौरेयः कटसारिका।
सहाचरः सहचरः स च विन्ध्यादि कथ्यते॥
कुरण्टकोऽथ पीते स्यात्तक्तः कुरयकः स्मृतः।
नीली याचो द्वयोस्तो राथ आर्क्षगन्धश्च सः॥
सौरेयः कुलथाभाषकक्कटूविषामपः।
तिक्तोष्णो मधुरो दन्यः कृमिघ्नः केशरञ्जनः॥"
इति भावप्रकाशः॥

सौल्विकः, पुं, (सुल्वं ताम्रपात्रादिनिर्म्माणं शिल्पमस्य। सुल्व+ठक्।) ताम्रकुट्टकः। इत्यमरटीका।

सौवं, त्रि, स्वस्य इदम्। (स्व+अण्।) स्वसम्बन्धि। स्वर्गे भवम्। इति सुग्धबोधव्याकरणम्। (स्वःसम्बन्धि। यथा, वाराहसंहितायाम्। १३। ५७।
"तस्य सौवं सौवम्।"
"तस्य स्वर्गस्य भवन्ति सौम्यं कौबेरं सौवं स्वः इदं सौवं तस्येदमिति अण्। वाराहिवादेशागमः। अव्ययानां भमात्रे टिलोपः।" इति गङ्गाधरम्।) ज्ञानम्। इति केचित्।

सौवर्गामिकं, त्रि, (स्वर्गाय भवम्। स्वर्ग+ठक्।) स्वर्गसम्बन्धयुक्तं। इति सुग्धबोधव्याकरणम्।

सौवर्चलं, क्ली, (स्वरस्येदमिति। स्वर+अण्। "द्वारादीनाञ्च।" ७।१।४। इति ऐकागमः।) स्वरसम्बन्धि। स्वरशब्दात् ष्यञ्प्रत्यये उकारागमेन सिध्यम्। इति सुग्धबोधव्याकरणम्।

सौवर्चलं, क्ली, (सुवर्चलेन देवेन भवम्। सुवर्चल+अण्।) सुवर्चलदेवतासम्बन्धम्। यथा, यजुर्वेदे इति भाष्ये। सायणाचार्यः। अष्टम् २ २ अष्टम् ३। ऋचमः। २। ८। १२। ऋक्सम्बन्धम् ४। इति दुर्गादासः। त्रिष्टुभम् ५ संज्ञासम्बन्धम् ६ कौद्रविकम् ८। इति राजनिर्घण्टः। अस्य गुणाः। अग्निकारित्वम्। उष्णवीर्य्यत्वम्। निर्लेखत्वम्। कटुत्वम्। गुल्ममूलविबन्धनाशित्वम्। किञ्चित्पित्तकरत्वम्। अश्मघ्नत्वञ्च। इति राजवल्लभः। अपि च।
"सौवर्चलं लघु चारं कटुष्णं गुल्ममूलजुत्।
जह्येवातामशूलार्शोविबन्धारोचकान् जयेत्॥"
इति राजनिर्घण्टः॥
अन्यच्च।
"सौवर्चलं स्याद्दृचकमम्लं पाचनञ्च तन्मतम्।
दृचकं रोचनं भेदि दीपनं पाचनं परम्॥
लघ्वेदवातगुल्मार्शःपित्तघ्नं विशदं जघु।
उद्गारशुद्धिदं रूक्षं विबन्धानाहशूलजित्॥"
इति भावप्रकाशः॥
अर्शिकाचारः। इत्यमरः। २। ८। १०६॥
सुवर्चलासम्बन्धिनि, त्रि।

सौवर्ण, त्रि, (सुवर्णस्येदम्। सुवर्ण+अण्।) सुवर्णसम्बन्धि। कार्षमितरूपसम्बन्धि। यथा, मत्स्यपुराणम्।
"सौवर्णीं राजतीं वापि ताम्रीं रत्नमयीं तथा।"
इत्युपक्रम्य।
"शुभदारुमयीं वापि देवतार्चां प्रशस्यते॥"
इति देवप्रतिष्ठातत्त्वम्॥

सौवर्णभेदिनी, स्त्री, (सौवर्णमिव वर्णं भिनत्ति प्रकाशयतीति। भिद्+णिनिः। ङीप्।) शिबुकः। इति शब्दमाला।

सौवस्तिकः, पुं, (स्वस्ति तत्करणे साधुः। स्वस्ति+ठक्।) पुरोहितः। इति हेमचन्द्रः॥ स्वस्तिसम्बन्धिनि, त्रि। इति व्याकरणम्॥

सौवाक्षवः, त्रि, (सुवाक्षोरिदम्। सुवाक्षु+"सुवाक्षादिभ्योऽण्।" ४। २। ७७। इत्यण्।) सुन्दरवाक्षुसम्बन्धी। सुशब्दपूर्व्वकवाक्षुशब्दात् स्वार्थेऽण्प्रत्ययेन निष्पन्नः॥ (सुवाक्षोरदूरभवः। इति काशिका॥)

सौविदः, पुं, (सुष्ठु वेत्तीति। सु+विद्+कः। ततः प्रज्ञाद्यण्।) अन्तःपुररक्षकः। इत्यमरः। २। ८। ८॥

सौविदल्लः, पुं, (सुष्ठु विदन्तं विघ्नमपि लाति यन्निवर्त्तनं करोतीति। सुविदत्+ला+कः। ततः स्वार्थे अण्।) अन्तःपुररक्षकः। (यथा, कथासरित्सागरे। ३८। २८।
"तदस्य न लाभोऽस्ति सौविदल्लाभिरक्षितैः।
अन्तःपुरेऽथ पुंसो यद्दोषो सौ तेन संगता॥")
तत्पर्य्यायः। कञ्चुकी २ स्थापत्यः ३ सौविदः ४। इत्यमरः। २। ८। ८। स्थपतिः ५ सुविदः ६। इति तट्टीका। चत्वारि मङ्गलरक्षके। दधिः सपरन्तीनां पुरस्त्रीणां प्रेक्षकपुरुषान्तरवारणाय राज्ञा स्थापारे ये नियुक्ताः। मनुष्यास्ते यष्टिसैन्यकाः सौविदल्लादिशब्दवाच्याः। सौभरं विदन्ति सुविदः षष्ठिताः क्विप् तान् अस्ति मत्वेन मन्यति सुविदत् भूमानः संज्ञायां सुविदत्तं अन्तःपुरं तत्रभवादित्यः यः सौ

सौष्ठव

सत्तोरिति सः तत्र नियुक्ता इति ढ्यै कादित्वे सौविदिकाः। इति भरतः॥

सौविदल्लकः, पुं, (सौविदल्ल एव। स्वार्थे कन्।) सौविदल्लः। इति शब्दरत्नावली॥

सौवीरं, क्ली, वदरम्। काञ्जिकम्। सोनोञ्जनम्। इत्यमरः। २। ४। ३०; २। ६। ३६; २। ६। १०० ॥ इतियां विशेषो यथा,—
"————————सौवीरं वदरं मधु।"
इति रत्नमाला॥
"सौवीरञ्च यवेरामैः पक्वैर्वा जिन्तुषैः कृतम्।
गोधूमैरपि सौवीरमाचार्य्यैः कीर्त्तितं बुधैः॥
सौवीरन्तु अम्लवर्गैः कफघ्नं भेदि दीपनम्।
उदावर्त्तांशमर्दाग्निशूलानाहेषु प्रस्यते।"
इति भावप्रकाशः॥
सावाराञ्जनम्। यथा,—
"सुवीरकं पार्व्वतेयं सौवीरं नीलमञ्जनम्।"
इति रत्नमाला॥

सौवीरः, पुं, (सुष्ठु वीरा यत्र। ततः स्वार्थे अण्।) देशविशेषः। इति मेदिनी॥ (यथा, हरिवंशे। ८०। १८।
"सौवीरराजः शैब्यश्च प्राच्याश्च बलिनां वरः।")

सौवीरकं, क्ली, (सौवीरमेव। स्वार्थे कन्।) काञ्जिकविशेषः। तत्पर्य्यायः। सुरीराम्लम् २ सोधुसम्लम् ३ वराम्लम् ४ यवोत्थम् ५ तुषोत्थम् ६ तुषोदकम् ७। अस्य गुणाः। अम्लरसत्वम्। लेखत्वम्। मस्तकदौर्ब्बल्यश्लैष्मिल्यनाशित्वम्। बलकारित्वम्। मन्दपित्तत्वञ्च। इति राजनिर्घण्टः॥

सौवीरकः, पुं, (सौवीर+संज्ञायां कन्।) वदरवृक्षः। इति राजनिर्घण्टः॥

सौवीरसारं, क्ली, सोनोञ्जनम्। इति राजनिर्घण्टः॥

सौवीराञ्जनं, क्ली, (सौवीरनामकमञ्जनम्।) अञ्जनप्रभेदः। तत्पर्य्यायः। अञ्जनम् २ यामुनम् ३ कृष्णम् ४ नादेयम् ५ मेघकम् ६ सोनोञ्जम् ७ दृग्दम् ८ नीलम् ९ सुवीरजम् १० नीलाञ्जनम् ११ चक्षुष्यम् १२ वारिसम्भवम् १३ कपोतकम् १४ कापोतम् १५। अस्य गुणाः। शीतत्वम्। कटुत्वम्। तिक्तत्वम्। कषायत्वम्। चक्षुष्यत्वम्। कफवातविषनाशित्वम्। रसायनत्वञ्च। इति राजनिर्घण्टः।

सौष्ठव, क्ली, (सुष्ठु भावः। सुष्ठु+"प्राग्भवज्ञातिवयोवचनोद्गमादिभ्योऽण्।" ५। १। १२६। इत्यण्।) ज्ञातिशब्दम्। (यथा, महाभारते। १। १६४। १७।
"तुलेवाक्षप्रयोगेषु ज्ञाने सौष्ठवेषु च।
सर्व्वेषामेव शिष्याणां बभूवाधिकोऽर्জ্জुनः॥")
प्रशस्तत्वम्। इति सुष्ठुशब्दादैदर्थ्यात्। (यथा, हरिवंशे। ४०। ६६।
"आयुःशैवाक्षुपवधो लक्षणं कथसौष्ठवम्।")
नाटकादिविशेषः। इति केचित्।

सौहार्द्दं, क्ली. (सुहृदः सुहृदयस्य वा भावः कर्म्म वा। सुहृत् सुहृदय वा+"हायनान्तयुवादिभ्योऽण्।"५।१।१३०। इत्यण्। हृदयस्य हृदादेशः। "हृद्भगसिन्ध्वन्ते पूर्व्वपदस्य च।" ७।३।१८। इति उभयपदवृद्धिः।) सुहृदो भावः। तत्पर्य्यायः। सख्यम् २ सौहृदम् ३ साम्प्रदीनम् ४ मैत्री ५ अनार्य्यम् ६ मङ्गनम् ७। इति हेमचन्द्रः॥ (यथा, महाभारते। १। ७७। ११।

"सौहार्द्दे चानुरागे च वेत्थ मे भक्तिमुत्तमाम्।
न मामर्हसि धर्म्मज्ञ वक्तुं भक्तामनागसम्॥")

सौहार्द्दः, पुं, (सुहृदोऽपत्यमिति। सुहृद्+अण्।) सुहृत्पुत्रः। इति कैचित्॥

सौहार्द्दं, क्ली. (सुहृदयस्य भावः। सुहृदय+अण्। "वा शोकष्यञ्रोगेषु।" ६।३।५१। इति हृदयस्य हृदादेशः।) सौहार्द्दम्। इति सिद्धान्तकौमुदी॥

सौहित्यं, क्ली, (सुहितस्य भावः कर्म्म वा। सुहित+"पत्यन्तपुरोहितादिभ्यो यक्।" ५।१।१२८। इति यक्।) हविः। इत्यमरः। २।८।५६॥ (यथा, महाभारते।१२।२४४।१३।

"अक्षैरिव गणाङ्गीतः सौहित्यान्नरकादिव।
क्रमणादिव च स्त्रीभ्यस्तं देवा ब्राह्मणं विदुः॥")

सौहृदं, क्ली. (सुहृदः कर्म्म भावो वा। सुहृत्+अण्।) सख्यम्। सौहार्द्दम्। इति हेमचन्द्रः॥

तस्य प्राशस्त्यं यथा,—

"तद्भुज्यते यद्विजभुक्तशेषं
न बुद्धिमान् यो न करोति पापम्।
तत् सौहृदं यत् क्रियते परोक्षे
दम्भैर्विना यः क्रियते स धर्म्मः॥"

इति गारुड़े ११५ अध्यायः॥

स्कद, इ ऽ आप्तवे। उद्गतौ। उत्पत्तय गत्याम्। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-अक०-सक० च-सेट्।) आत्मम्भरी। इ, स्कन्दते। ऽ, स्कन्दते चिस्कन्दिषते। पक्षमस्खरीति धातुप्रदीपरामौ। स्कन्दते स्कुन्दते चापि षड़ाननवाचिनः। इति भट्टमल्लोऽपि। चुस्कुन्दिषते। इति दुर्गादासः॥

स्कन्द, इर् औ शोषण, गत्याम्। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-अनिट्।) इर्, अस्कन्दत्। अस्कान्सीत्। औ, स्कन्ता चस्कन्द। इति दुर्गादासः॥

स्कन्द, त ऽ क समाहृतौ। इति कविकल्पद्रुमः॥ (भ्वादुरा०-पर०-सक०-सेट्।) दध्यवर्म्मलतीयोपधोऽयम्। नच्चतुर्थोपध इति कैचित्। स्कन्दयति स्कन्दापयति अचस्कन्दत्। इति दुर्गादासः॥

स्कन्दः, पुं, (स्कन्दते उत्पत्य गच्छति स्कन्दति शोषयति दैत्यान् वा। स्कन्द+अच्।) कार्त्तिकेयः। इत्यमरः। १।१।४२॥ तस्य उत्पत्तिषड़ाननपक्षनामशक्तयुर्म्मूर्त्ताभिषेकगणवाहनाद्यादि यथा,—

नारद उवाच।

"किमर्थमेषकः क्रौञ्चो भिन्नः स्कन्देन सुव्रत।
एतन्मे विस्तराद्ब्रह्मन् कथयस्वामितद्युते॥

पुलस्त्य उवाच।

एनां ते कथयिष्यामि कथां पुण्यां पुरातनीम्।
यशोवृद्धिं कुमारस्य कार्त्तिकेयस्य नारद॥
यत् पीतं वातिहोत्रेण वीर्य्यं त्यक्तं पिनाकिनः।
तेनाक्रान्तोऽभवद्ब्रह्मन् मन्दतेजा हुताशनः॥
ततो जगाम देवानां सकाशममितद्युतिः।
देवैः प्रक्षिप्तस्तूर्णं ब्रह्मलोकं जगाम ह॥
स गच्छन् कुटिलां देवीं ददर्श पथि पावकः।
तां दृष्ट्वा प्राह चाधत्स्व तेजो यन्मम दुर्द्धरम्॥
महेश्वरेण सन्त्यक्तं निर्दहेत् भुवनान्यपि।
तद्धारणाच्च कुटिले पुत्रो धन्यो भविष्यति॥
इत्यग्निना सा कुटिला श्रुत्वा सुतमनुत्तमम्।
प्रक्षिप्तमात्रं जग्राह तेजः रेतः महात्मनः॥
ततस्त्वधारयद्देवी गार्ब्भं तेजः स्वपूषधत्।
हुताशनोऽपि च भयात् यत्र तत्र परिभ्रमन्॥
षष्टवर्षसहस्राणि ह्यधास्त्वे हव्यभुक् ततः।
मांसमस्थीनि रक्तानि मेदोमज्जखचस्तथा॥
रोमाणि चात्त्विक्शाट्या सर्व्वे जाता हिरण्मयाः।
हिरण्यरेता लोकेऽस्मिन् विख्यातः पावकस्ततः॥
षष्टवर्षसहस्राणि कुटिला ज्वलनोपमम्।
धारयन्ती तदा गर्भं ब्रह्मणः स्थानमागता॥
पितामहस्तां चिरार्त्तां सन्तप्यन्तीं महात्मनाम्।
दृष्ट्वा पप्रच्छ कैनायं तव गर्भः समाहितः॥
सा चाह प्राङ्करं तेजः पावकेन समर्पितम्।
अप्यशक्तेन तेनाद्य निक्षिप्तं मयि सत्तम॥
षष्टवर्षसहस्राणि धारयन्त्याः पितामह।
अन्नपानादिकमपि न मेऽपद्यत कर्हिचित्॥
तच्छ्रुत्वा भगवानाह गच्छ त्वमुदयं गिरिम्।
तत्रास्ति योजनशतं विस्तीर्णं सुरसेवितम्॥
तमनुप्राप्य सुश्रोणि विस्तीर्णे गिरिसानुनि।
दशवर्षसहस्रान्ते ततो बालो भविष्यति॥
ब्रह्मणो वचनं श्रुत्वा कुटिला गिरिमागता।
आगत्य गर्भं तत्याज सुखेनैवाग्निनन्दिनी॥
सा तु संत्यज्य तं बालं ब्रह्माणं सहसागमत्।
आपोमयी मन्त्रवशात् संयता कुटिला सती॥
तेजसा चापि गार्ब्भेण रौक्मः शरवणोऽभवत्।
तन्निवासवतश्चाग्रे पादपा स्वगप्लक्षयः॥
ततो दशसु पूर्णेषु शरदृश्नतेष्वथ।
बालार्कदीप्तिः संजातो बालः कमललोचनः॥
उत्तानशायी भगवान् दिव्ये शरवणे स्थितः।
सुखेऽङ्गुष्ठं समाक्षिप्य रुरोद घनराडिव॥
एतस्मिन्नन्तरे देव्यः कृत्तिकाः षट् सुतेजसः।
दृदृशुः खेऽक्षया यान्त्यो बालं शरवणे स्थितम्॥
कृपायुक्ताः समाजग्मुर्यत्र स्कन्दः स्थितोऽभवत्।
अहं पूर्व्वमहं पूर्व्वं तस्मै स्तन्यं हि चुक्रुशुः॥
विवदन्तीः स ता दृष्ट्वा षण्मुखः समजायत।
अयीभरन्तस्ताः सर्व्वाः शिशुं स्नेहार्द्रचेतसः॥
कृत्तिकाः॥

म्रियमाणाः सतीभिस्तु बालो दृष्टिमगाकुनैः।
कार्त्तिकेय इति ख्यातो जातः स बलिनांवरः॥
एतस्मिन्नन्तरे ब्रह्मन् पावकं प्राह पद्मभूः।
कियत्प्रमाणः पुत्रस्ते वर्त्तते साम्प्रतं गुहः॥
स तद्वचनमाकर्ण्य त्र्यजानन् तं हरात्मजम्।
प्रोवाच पुत्रं देवेश न वेद्मि कतमो गुहः॥
तं प्राह भगवान् युक्तं तेजः पीतं पुरा त्वया।
त्रैयम्बकं त्रिलोकेशं ज्ञातः शरवणे शिशुः॥
श्रुत्वा पितामहवचः पावकस्त्वरितोऽभ्यगात्।
उदयाद्रिञ्च कुटिला तं ददर्श स्थितं रहः॥
पप्रच्छ कुटिला देवी क्व शीघ्रं व्रजसे कवे।
सोऽब्रवीत पुत्रदृष्ट्यर्थं जातं शरवणे शिशुम्॥
साब्रवीत्तनयो मह्यं ममेत्याह च पावकः।
विवदन्तौ ददर्शाथ स्वेच्छाचारी जगद्गुरुः॥
तौ पप्रच्छ किमर्थं वा विवदन्तिह चक्रतुः।
तमूचतुः पुत्रहेतो रुद्रशुक्रोद्भवादिति॥
तावुवाच हरिर्देवो गच्छतं त्रिपुरान्तकम्।
स यद्वक्ष्यति देवेशः कृरुतं तदसंशयम्॥
इत्युक्तौ वासुदेवेन कुटिलाग्नी हरान्तिकम्।
समभ्येत्योचतुस्तथ्यं कस्य पुत्रो भवेद्गुहः॥
रुद्रस्तद्वाक्यमाकर्ण्य हर्षनिर्भरमानसः।
दिष्ट्या दिष्ट्येति गिरिजां प्रीदभूतपुलकोऽब्रवीत्॥
ततोऽम्बिका प्राह हरं देव गच्छाव तं शिशुम्।
दृष्ट्वा समागमेदृश्यां स तस्याः पुत्रो भविष्यति॥
वाढ़मित्येव भगवान् समुत्तस्थौ वृषध्वजः।
सहोमया कुटिलया पावकेन च धीमता॥
सम्प्राप्ते शरवणं हरोमाकुटिलाग्नयः।
ददृशुः शिशुकं तत्र कृत्तिकौत्सङ्गशायिनम्॥
ततः स बालकस्तेषां मत्वा चिन्तितमादरात्।
योगी चतुर्म्मूर्त्तिरभूत् षण्मुखः स शिशुः पितुः॥
कुमारः शङ्करमगात् विशाखो गिरिजामगात्।
कुटिलामगमच्छाखो नैगमेयोऽग्निमभ्यगात्॥
ततः प्रीतियुतो रुद्रः उवाच कुटिला तथा।
पावकस्यापि देवेशः परां मुदमवाप च॥
ततोऽब्रुवन् कृत्तिकास्ताः यस्य स्तः किं हरात्मजः।
ता अब्रवीत् हरः प्रीत्या विवेश वचनं सुने॥
नाम्ना तु कार्त्तिकेयेति युष्माकंष भवत्वसौ।
कुटिलायाः कुमारेति पुत्रोऽयं भवितास्वयः॥
स्कन्द इत्येव विख्यातो गौरीपुत्रो भवत्वसौ।
गुह इत्येव नाम्ना च ममासौ तनयः सुतः॥
महासेन इति ख्यातो हुताशस्यास्तु पुत्रकः।
सारस्वत इति ख्यातः सुतः शरवणस्य च॥
एवमेष महायोगी पृथिव्यां ख्यातिमेष्यति।
षड़ास्यत्वान्महाबाहुः षण्मुखो नाम गीयते॥
इत्येवमुक्त्वा भगवान् शूलपाणिः पितामहम्।
सस्मार देवैः सार्द्धं तेऽप्यागमुरुदारधियः॥
प्रणिपत्य च कामारिं उमाञ्च गिरिनन्दिनीम्।
दृष्ट्वा हुताशनं प्रीत्या कुटिलां कृत्तिकास्तथा॥
ददृशुर्ब्बालमतुलं षण्मुखं सूर्य्यसन्निभम्।
सृणन्तमिव चक्षूंषि देवानां स्वेन तेजसा॥
कौतुकाभिहताः सर्व्वे ययमुः शरवणम्॥

देवकार्यं त्वया देव कृतं देवाग्निना तथा ॥
तदुत्तिष्ठ व्रजामोऽद्य तीर्थमोजसमन्वयम् ।
कुरुक्षेत्रे सरस्वत्यामभिषिञ्च मयूरकम् ॥
सेनायाः पतिरस्त्वेष देवगन्धर्वकिन्नराः ।
महिषं घातयत्वेष तारकस्य सुदारुणम् ॥
वाढमित्यब्रवीच्छर्व: सस्तस्थुः सुरास्ततः ।
कुमारसहिता जग्मुः कुरुक्षेत्रं महाफलम् ।
तत्रैव देवताः सेन्द्रा ब्रह्मविष्णुजनार्दनाः ।
यज्ञमस्याभिषेकार्थं चक्रुर्मुनिगणैः सह ॥
ततोऽम्बुना सप्तसमुद्रवाहिनो-
नदीजलेनापि महाफलेन ।
वनौषधीभिश्च सहस्रसंख्यि-
स्तदाभ्यषिञ्चन्त हाराधुतात्मा: ॥
अभिषिच्यति सेनान्यां कुमारे दिव्यरूपिणि ।
जगुर्गन्धर्वपतयो ननृतुश्चाप्सरोगणाः ॥
अभिषिक्तं कुमारञ्च गिरिपुत्री निरीक्ष्य हि ।
स्नेहात्तत्पङ्गं स्कन्दं मूर्ध्न्याघ्रिन्मुहुर्मुहुः ॥
जिघ्रती कार्त्तिकेयस्य अभिषेकाद्ममाननम् ।
भात्यद्रिजा यथेन्द्रस्य देवमातादितिः पुरा ॥
तदाभिषिक्तं ननयं दृष्ट्वा शर्व्वो मुदं ययौ ।
पावकः कृत्तिकाश्चैव कुटिला च यशस्विनी ॥
ततोऽभिषिक्तस्य हरः सेनापत्ये गृहस्य तु ।
प्रथमांश्चतुरः प्रादाच्छक्रतुल्यपराक्रमान् ॥
घण्टाकर्णं लोहिताक्षं नन्दिषेणं सुदारुणम् ।
चतुर्थं बलिनां श्रेष्ठं स्कन्दं कुसुदमालिनम् ॥
दृष्ट्वा तान् गणान् दृष्ट्वा देवाः स्कन्दस्य नारद ।
प्रदुः प्रमथानग्र्यान् सर्व्वे ब्रह्मपुरोगमाः ॥
स्वागुर्वक्षा गणं प्रादाद्विष्णुः प्रादात् गणाग्र्यम् ।
संक्रमं विक्रमश्चैव तृतीयश्च पराक्रमम् ॥
उत्क्रोशं पङ्कजं शुक्रो रविर्दण्डकपिङ्गलौ ।
चन्द्रो मणिं वसुमणिं वह्निर्नन्दिनन्दिनौ ॥
ज्योतिर्द्युतामृणः प्रादात् ज्वालाजिह्वं तथा-
ऽरुणम् ।
स्कन्दनिष्कुन्दकुसुदान् धाता चानुचरान् ददौ ॥
चक्रानुचक्रौ त्वष्टा च वैधातिखिरदुस्खिरौ ।
पाणिग्रहं कालकर्ष प्रादात् पूषा महाबलौ ॥
सर्व्वमालं घनार्कञ्च हिमवान् प्रमथोत्तमौ ।
प्रादादैवोच्चितो विन्ध्यस्तिग्मदंष्ट्रश्च मार्दवम् ॥
सुवर्चसञ्च वरुणः प्रददौ चातिवर्चसम् ।
संग्रहं विग्रहञ्चैव नाभागिभयसंजयौ ॥
उन्मादं शङ्कुकर्णञ्च पुष्पदन्तं तथाम्बिका ।
दुर्मुखातिबलञ्चैव श्रेष्ठौ चानुचरायुतौ ॥
परिघं घटकं भीमं दाहाभिदहनौ तथा ।
प्रददावंशुमालिञ्च प्रमथान् भगवाञ्छिवः ॥
यमः प्रमाथसुग्रीवौ कालसेनमजाजवम् ।
तालग्रहं गाढ़िपञ्च वडवेयानुचरान् ददौ ॥
सुप्रभं शुभकर्माणं विष्णुर्दानवेश्वरौ ।
सुप्रसूतं समजिवं सुप्रभञ्च दिनोत्तम ॥
व्यक्तः भ्रुकुटीमुखं विभुमक्रुसदावलः ।
एकाक्षं कुलटीमुखं किरीटः कुलमोदरः ॥"
किरीटस्थाने किरीट: इति च पाठः ।
"सचीवत्सः कौक्कुनः प्रदात्रः सितकोऽजयः ।

गणाः पञ्चदशैते वै यश्चैतान् गृहस्य च ॥
कालिन्द्याः कलकन्दश्च नर्म्मदाया रणोत्कटः ।
गोदावर्य्याः सिद्धपात्रस्तमसायास्तु पञ्चजः ॥
सहस्रबाहुः सीताया वङ्गुलायाः स्रितोदरः ।
मन्दाकिन्याः सुबाहुश्च विपद्यायाः प्रियङ्करः ॥
ऐरावत्याश्चतुर्दंष्ट्रः षोड़शाद्योऽपरस्तथा ।
मार्जारं कौशिकी प्रादात् क्रथक्रोष्टो च
गौतमी ॥
बाहुदा घृतपृष्ठौ च वाहा गोनन्दनन्दिनौ ।
भीमं भीमरथौ प्रादात् दुर्गारिं सरयूर्ददौ ॥
अष्टबाहुं ददौ काशी सुबाहुमपि गण्डकी ।
महानदी चित्रदेवं चित्रा चित्ररथं ददौ ॥
कुहूः कुवलयं प्रादात् मधुवर्णं मंधूदका ।
जम्बूकं घृतपापा च वेत्रा पेटानन ददौ ॥
स्तुता प्रथमपर्णञ्च रेवा सागरवेगिनम् ।
प्रभावा प्राञ्जनं प्रादात् काञ्चना कनकप्रभम् ॥
घृतपद्मञ्च विमला चारुवक्त्रं मनोहरा ॥
अपापा च महारामं वेत्रा विद्रुमसुप्रभम् ॥
सुप्रसादं सुवेत्रा च लिखुं मोघवती ददौ ।
यज्ञबाहुं विशाखा च सरस्वत्या दृढ़गणान् ॥
कुटिलातनयस्यादात् दशशक्रबलाङ्गजान् ।
करालं शितकेशञ्च क्षत्राक्षेत्रं जटाधरम् ॥
मेघनादं चतुर्दंष्ट्रं विद्युज्जिह्वं दशाननम् ।
सीमाप्यायनमेवोग्रं देवयाजिनमेव च ॥
हंसास्यं कुक्कुजठरं बहुग्रीवं हयाननम् ।
कूर्मग्रीवञ्च पद्मेतान् ददुः पुत्राय कृत्तिकाः ॥
शूलनखं कुण्डवक्त्रं लोहजङ्घं महाननम् ।
पिङ्गारकञ्च पद्मेतान् ददुः स्कन्दाय चर्षयः ॥
नागजिह्वं चन्द्रभासं पाशिकूर्म्मं प्रशिष्करम् ।
वासवक्त्रं सजम्बूकं ददौ तीर्थः पृथूदकः ॥
चक्रतीर्थं सुचक्राख्यं मकराक्षं गयाशिरः ।
गयं पञ्चशिखं नाम ददौ कनखलः स्वयम् ॥
वसुदत्तं बालिशिरो बालुसारञ्च पुष्करम् ।
सर्व्वौजसं माधिपकं मानसं पिङ्गलं तथा ॥
यज्ञमोक्षनसः प्रादात् ततोऽन्या मातरो ददुः ।
वसुदामां श्रोणतीर्थः प्रभासो नन्दिनीमपि ॥
इन्द्रतीर्थं विशोकाख्यं उदपानं धनञ्जयम् ।
सप्तसारस्वतः प्रादात् मातरश्चतुरोऽद्भुताः ॥
जितप्रियां माधवीञ्च तीर्थनेमिं सितानताम् ।
एकलूतां गागतीर्थः कुरुक्षेत्रं फलाशदाम् ॥
अशोकानिः खड्गिलां भद्रकालीं त्रिपिष्टपः ।
भैरवी भैरवी घोषभैरवी प्रादादुदरपावनः ॥
सोपानीयां महान् प्रादाच्छालिकां मानसो ह्रदः ।
घृतपृष्ठां शतानन्दां तथोलूखलमेखलाम् ॥
मङ्गावतीं माधवीञ्च ददौ वदरिकाश्रमः ।
सुखसामेकचूलाञ्च देवीं धर्म्मधरां तथा ॥
उकाधनीं वेदमित्रां केदारो मातरो ददौ ।
सुनक्षत्राञ्च करवां सुप्रभावां सुमङ्गलीम् ॥
वेदमित्रां चित्रसेनां ददौ रुद्रो महाबलः ।
कौटराक्षीं संयताक्षामजटां बहुपुत्रिकाम् ।
पलितां कमलाक्षीञ्च प्रभावां मानसो ददौ ॥
रूपलीं मधुकुम्भाञ्च ख्यातिं रुद्रदुहां पराम् ।

प्रादाद्वै कार्त्तिकेयाय सर्व्वपापविमोचनः ॥
शान्तानिकां विकलिकां क्रमुकां खरवासिनीं ।
जलेश्वरीं कुकुटिकां सदामां लोहमेखलां ॥
वपुष्मत्पुष्मुकाक्षीं च केकनामां महाघनीं ।
रौद्रां भूर्भुविकां तुष्टां श्वेततीर्थो ददौ विभुः ॥
एतानि भूतानि गणाश्च मातरो
दृष्ट्वा महात्मा विततानतनूजः ।
ददौ मयूरं क्रमुतं महाबलं
तथारुणञ्चाद्भुतरत्नमुत्तमम् ॥
ऋक्षिं हुताशोऽग्निसुता च वह्निं
ऋक्षं गुरुः सा कुटिला कमण्डलुम्
मालां हरिः शूलधरः पताकां
कण्ठे च हारं मघवानुरुस्रः ॥
गर्ग्गेर्वृतो मालभरन्वितश्च
मयूरसंस्थो वरशक्तिपाणिः ।
सेनाधिपत्ये स वृतो भवेन
रराज सूर्य्येव महाविभूत्या ॥"
इति वामनपुराणे कार्त्तिकेयोत्पत्तौ ५४ अध्यायः ॥
देया द्वारपालविशेषः । तस्य बलिर्यथा,—
"महानवम्यां पूरयित्वा स्कन्दविशाखयोः ।
यवचूर्णमयं कृत्वा रिपुं रुक्षसमेव वा ॥
शिरश्छित्त्वा बलिं दद्यात् कृत्वा तस्य तु मन्त्रतः ।
अनेनैव तु मन्त्रेण खड्गमामन्त्र्य यत्नतः ॥
रक्तं किलकिली घोरघोरा धारविहिंसकः ।
रक्षाग्निज्वालाशिखमसकं चारिसत्तमम् ॥
शान्तो विसर्गसहितः स च विन्दुयुतोऽपरः ।
रक्षाग्नियोगश्चन्द्रेण विन्दुना च समन्वितः ॥
शिरश्छित्त्वा बलिं दद्यात् कृत्वा तस्य तु
मन्त्रतः ।
अनेनैव तु मन्त्रेण विन्दुना च समन्वितः ॥
खड्गो बलिषु प्रोक्तः खड्गे स्कन्दविशाखयोः ।
रक्तपद्मैः सेचयित्वा क्षत्रियं तं रिपुं बलिम् ॥
कृत्वन्दनस्य तिलकं ललाटेऽभिनिवेशयेत् ।
रक्तमाल्यधरं कृत्वा रक्तवस्त्रधरं तथा ॥
कण्ठे बद्ध्वा रक्तसूत्रैर्नाभौ माल्यञ्च कृत्रिमम् ।
दक्षोत्तरशिरःस्कन्धं कृत्वा खड्गेन छेदयेत् ॥
शिरस्तस्य ततो दद्यात् स्कन्दाय तेन मन्त्रतः ।
चतुर्दशस्वरान्मिभ्यां संयुक्तः स परः समम् ॥
परतः परतः पूर्व्वं चन्द्रविन्दुसमन्वितः ।
स्कन्दस्य मूलमन्त्रोऽयं तेन तस्मै बलिं क्षिपेत् ॥
चतुर्दशस्वरान्मिभ्यां पल्लवीयन्तु पूर्व्ववत् ।
प्रीतो विशाखमन्त्रोऽयं तेन तस्मै बलिं क्षिपेत् ॥
कुटिलाख्यो क्षणपिङ्गवर्णौ रक्तांशुधारिणौ ।
त्रिशूलं करवालञ्च दक्षिणे तथा ॥
विभ्रतौ कृकपालञ्च कर्त्तृकाञ्चापि वामतः ।
त्रिनेत्रौ नरसुक्तानां मालासुरसि बिभ्रतौ ॥
विकटौ दक्षनेमौ मेघजिह्वौ द्वारपालकौ ।
ध्यानेन चिन्तयेद्देव्याः पुरतः संस्थितौ सदा ॥"
इति कालिकापुराणे ६६ अध्यायः ॥ ॥
(महादेवः । इति महाभारतम् १३ । १७ । १०६ ।)
वृषभिः । इति षटाधरः । अरीरम् । इति
त्रिकाण्डशेषः । पारदः । इति राजनिर्घण्टः ॥

गढीतटम् । पल्लितः । इति केचित् ॥ बालकस्य ग्रहविशेषः । (यथा,—
"स्कन्दो विशाखो मेषाख्यः ग्रसहः पिङ्ग-संज्ञितः ।
शकुनिः पूतना शीतपूतना दधिपूतना ॥
सुखमण्डिका तद्वद्रेवती शुष्करेवती ।
तेषां गृहीष्यतां रूपं व्रतं रौद्रं ज्वरः ॥
यामान्यं रूपसत्त्वासवृम्भाभूषैप्रदीनताः ।
फेनसावोर्द्धदृष्टीष्टदन्तदंशप्रजागराः ॥
रौद्रं क्रूरं स्कन्दविद्येश्वरवेद्यतम् ।
नखैरकस्मात् परितः खधात्राङ्गविलेखनम् ॥
तत्रैकनयनस्रावी शिरो विक्षिपते मुहुः ।
एतैरुपद्रवैः स्कन्दाङ्गः सक्लेदो गतकन्धरः ॥
दन्तखादी स्तनद्वेषी त्रस्तनू रौदिति विस्वरः ।
वक्त्रवक्त्रं वमेद्यावां भृशमूर्द्धं निरीक्षते ॥
यक्षाग्न्यग्निरुद्रस्त्रीवह्नसूग्रक्तक्षिप्रभुः ।
स्खलितैकाक्षिगण्डभूः संरक्तो भयलोचनः ॥
स्कन्दार्त्तस्तेन वैकल्यं मरणं वा भवेद्ध्रुवम् ॥"
इत्युत्तरस्थाने तृतीयेऽध्याये वाग्भटेनोक्तम् ॥) तस्य चिकित्सा बालग्रहशब्दे द्रष्टव्या ।

स्कन्दनं, क्ली, (स्कन्द+ल्युट् ।) रेचनम् । इति त्रिकाण्डशेषः ॥ (यथा, सुश्रुते । १ । १४ ।
"चतुर्विधं यदेतद्धि रुधिरस्य निवारणम् ।
सन्धानं स्कन्दनञ्चैव पाचनं दहनन्तथा ॥") गमनम् । प्रेरणम् । इति स्कन्दधात्वर्थदर्शनात् ॥

स्कन्दषष्ठी, स्त्री, (स्कन्दप्रिया षष्ठी ।) चैत्रमासीयशुक्लषष्ठी । तत्रमाघादि षष्ठीशब्दे द्रष्टव्यम् । अन्यच्च ।
"अमावस्यासमुत्पन्नः स्कन्दः पूर्वं हुताशनात् ।
ततः षष्ठ्यान्तु शुक्लायां माघे तु चैत्रनामनि ।
सेनापत्येऽभिषिक्तस्तु देवानां ब्रह्मणा स्वयम् ॥
इति संवत्सरकौमुदीधृतब्रह्मपुराणवचनम् ॥

स्कन्दोग्रकः, पुं, (स्कन्दस्य अंश्व इव अंशो यत्र । स्त्रियवीर्य्योऽङ्गवत्वात् । ततः कन् ।) पारदः । इति राजनिर्घण्टः ॥

स्कन्धः, [ष्] क्ली, (स्कन्दते इति । स्कन्द+"स्कन्देश्चाङ्गे ।" उणा० ४ । २०६ । इति असुन् धश्चान्तादेशः ।) अंसः । प्रकाण्डः । यथा "स्कन्धः शाखां नपुंसकमिति केचित् ।" इत्यमरटीकायां भरतः ॥ (यथा, ऋग्वेदे । १ । ३२ । १५ ।
"स्कन्धांसीव कृणुहि शोशुचानो विश्वक्रत्वा ॥")

स्कन्धः, पुं, (स्कन्द्यतेऽसौ इति । स्कन्द+घञ् । पृषोदरादित्वात् साधुः । स्कन्द+असुन् । धश्चान्तादेशः । सर्व्वे सान्ता अदन्ताश्च इति न्यायात् अकारान्तो वा ।) अवयवविशेषः । काँध इति भाषा ॥ तत्पर्य्यायः । भुजशिरः २ अंसः ३ । इत्यमरः । २ । ६ । ७८ ॥ स्कन्धः ४ । इति शब्दरत्नावली ॥ दोःशिखरम् ५ । इति राजनिर्घण्टः ॥ (यथा, भागवते । ४ । २६ । ३३ ।
"यथा हि पुरुषो भारं शिरसा गुरुमुद्वहन् ।
तं स्कन्धेन स आधत्ते तथा सर्व्वाः प्रतिक्रियाः ॥")

तरोर्मूलादिशाखापर्य्यन्तम् । गुँड़ी इति भाषा ॥ तत्पर्य्यायः । प्रकाण्डः २ । इत्यमरः ॥ काण्डम् ३ । इति शब्दरत्नावली ॥ दण्डः ४ । इति जटाधरः ॥ (यथा, रघुः । ४ । ५७ ।
"खर्ज्जूरीस्कन्धनद्धानां मदोद्गारसुगन्धिषु ।
कटेषु करिणां पेतुः पुन्नागेभ्यः शिलीमुखाः ॥")
वृन्दम् । समूहः । समूहः । काव्यः । (यथा, महाभारते । १२ । १५ । २६ ।
"सञ्चयोनीनि भूतानि तर्कगम्यानि कानिचित् ।
पञ्चाशोऽपि निपातेन येषां स्यात् स्कन्धपर्य्ययः ॥")
भेदादिः । छन्दोभेदः । इति मेदिनी ॥ विज्ञानादिपञ्च । (यथा, शिशुपालवधे । २ । २८ ।
"सर्व्वकार्य्यशरीरेषु सुखाङ्गस्कन्धपञ्चकम् ।
सौगतानामिवात्मानो नास्ति मन्यो महीभृताम् ॥"
"रूपवेदनाविज्ञानसंज्ञासंस्काराः पञ्च स्कन्धाः । तत्र विषयप्रपञ्चो रूपस्कन्धः । तज्ज्ञानप्रपञ्चो वेदनास्कन्धः । आलयविज्ञानसन्तानो विज्ञानस्कन्धः । नामप्रपञ्चः संज्ञास्कन्धः । वासनाप्रपञ्चः संस्कारस्कन्धः । एवं पञ्चधा परिवर्त्तमानो ज्ञानसन्तान एवात्मा इति बौद्धाः ।" इति तट्टीकायां मल्लिनाथः ॥) यूथः । इति हैमचन्द्रः ॥ (यथा, रघुः । ४ । ३० ।
"प्रतापोऽग्रे ततः शब्दः परागस्तदनन्तरम् ।
ययौ पश्चाद्यथादीप्ति चतुस्कन्धेव सा चमूः ॥")
पन्थाः । इति शब्दरत्नावली ॥ (यथा, महाभारते । ३ । २० । ५५ ।
"तथाव्रतीं मधासेनं महादेवो ददर्श ह ।
वसन्तं मारुतस्कन्धं रक्षन् निलमतन्द्रितः ॥")
ग्रन्थपरिच्छेदः । यथा,—
श्रीपार्व्वत्युवाच ।
"स्कन्देनैवाग्निभिः प्रोक्तं श्रीमद्भागवतं प्रभो ।
शुकस्यास्यान्वयात् सारादारं परीक्षितम् ॥"
इति माघे मांसाशनाख्ये ७१ अध्यायः ॥

स्कन्धचापः, पुं, (स्कन्धे चाप इव ।) पंक्षादिनिर्म्मितशिक्षाधारणम् । तत्पर्य्यायः । शिक्षिका २ । इति शब्दरत्नावली ॥

स्कन्धजः, पुं, (स्कन्धात् जायते इति । जन+डः ।) शल्लकीवृक्षः । यथा, हैमचन्द्रे ।
"पर्य्ययोनय इक्षुवा स्कन्धजाः शल्लकीसुजाः ॥"
तन्त्राभिधानेऽपि चन्द्रे कल्पद्रुम इति पाठः ॥ (यथा, । अस्य पर्य्यायो यथा,—
"वटो रक्तफलः शृङ्गी न्यग्रोधः स्कन्धजो ध्रुवः ।
क्षीरी वैश्रवणावासो बहुपादो वनस्पतिः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

स्कन्धतरुः, पुं, (स्कन्धप्रधानस्तरुः ।) नारिकेलवृक्षः । इति राजनिर्घण्टः ॥

स्कन्धदेशः, पुं, (स्कन्धस्य देशः ।) गवयस्य स्कन्धः । यत्र वस्तिपक उपविशति । तत्पर्य्यायः । आसनम् २ । इत्यमरः ॥ स्कन्धमात्रम् । यथा,—
"त्रिपुरारिः स्कन्धदेशे कर्त्रे कौमारकाङ्गनाम् ॥"
इति भृगुनरतसंवादे माहेश्वरखण्डे ॥

स्कन्धफलः, पुं, (स्कन्धे फलमस्य ।) नारिकेलवृक्षः । इति राजनिर्घण्टः ॥ उडुम्बरवृक्षः । इति शब्दचन्द्रिका ॥

स्कन्धवन्दना, स्त्री, (स्कन्धे वन्दनमिवास्याः ।) मधुरिका । इति शब्दचन्द्रिका ॥

स्कन्धमल्लकः, पुं, (स्कन्धेन मल्ल इव । कन् ।) कङ्कपक्षी । इति हैमचन्द्रः ॥

स्कन्धरुहः, पुं, (स्कन्धात् रोहतीति । रुह+कः ।) वटवृक्षः । इति राजनिर्घण्टः ॥

स्कन्धवाहः, पुं, (स्कन्धेन वाह्यतीति । वह+णिच्+घञ् ।) शकटादिवाह्यकरणः । यथा,
"स्कन्धवाहस्तु शकट्यां शकटी गौरधूर्त्तिषः ॥"
इति हारावली ॥

स्कन्धवाहकः, पुं, (स्कन्धेन वहतीति । वह+ण्वुल् ।) शकटादिवाह्यकरणः । तत्पर्य्यायः । स्कन्धिकः २ । इति हैमचन्द्रः ॥ स्कन्धेन वहनकर्त्तरि, त्रि ।

स्कन्धशाखा, स्त्री, (स्कन्धस्य शाखा ।) वृक्षस्य सुखशाखा । तत्पर्य्यायः । शाखा २ । इत्यमरः । २ । ४ । ११ ॥ (यथा, भागवते । ८ । ५ । ३६ ।
"यथा हि स्कन्धशाखानां तरोर्मूलावसेचनम् ।
एवमाराधनं विष्णोः सर्व्वेषामात्मनश्च हि ॥")

स्कन्धसङ्गः, पुं, (स्कन्धमर्यन्तं सङ्गमस्य ।) महिषः । इति केचित् ॥

स्कन्धा, स्त्री, शाखा । लता । इति केचित् ॥

स्कन्धाग्निः, पुं, (स्कन्धस्य काष्ठस्य अग्निरिव ।) वृक्षकाष्ठाग्निः । इति त्रिकाण्डशेषः ॥

स्कन्धानलः, पुं, (स्कन्धस्य काष्ठस्य अनल इव ।) वृक्षकाष्ठाग्निः । तत्पर्य्यायः । शूलकाष्ठधकृत् २ । इति जटाधरः ॥

स्कन्धावारः, पुं, (स्कन्धेन सैन्यसमूहेन व्यूहेन वृषसिना वा आश्रियते इति । आ+वृ+घञ् ।) सैन्यस्थितिः । (यथा, रामायणे । ६ । ४२ । २२ ।
"एतस्मिन्नन्तरे चक्रुः स्कन्धावारनिवेशनम् ॥")
राजधानी । इति हैमचन्द्रः ॥ (यथा, महाभारते । १ । १०५ । ६ ।
"ते तु दृष्ट्वा परं तत्र स्कन्धावारेण पाण्डवाः ।
शून्यकारस्य शालायां निवासं चक्रिरे तदा ॥")
कटकः । इति भूरिप्रयोगः ॥

स्कन्धिकः, पुं, (स्कन्धेन वहतीति । स्कन्ध+ठक् ।) स्कन्धवाहकरणः । इति हैमचन्द्रः ॥

स्कन्धी, [न्] पुं, (स्कन्धोऽस्यास्तीति । इनिः ।) वृक्षः । इति रत्नमाला ॥ स्कन्धयुक्ते, त्रि ॥ (काण्डविशिष्टे, त्रि । यथा, महाभारते । १२ । १५४ । ५ ।
"हिमवन्तं समासाद्य मृगाणामीदृशस्तिः ।
यत्र यूथानभिसंहृत्य शार्दूलः स्कन्धी पलाशवान् ॥")

स्कन्न, त्रि, (स्कन्द+क्तः ।) च्युतम् । इत्यमरः । ३ । १ । २०१ ॥ (यथा, महाभारते । १ । ६३ । ८६ ।
"स्कन्नमात्रञ्च तत्तेषां वृक्षपर्णेषु भूमयः ।
प्रतिपद्याद्य मिथ्या मे न गच्छेत्त इदुत ॥")
शुष्कम् । गतम् । इति शब्दमालायां धरणिः ॥

स्खभ, इ ऊ स्तम्भे। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-सेट्।) स्तम्भ इह यङ्लीकरणम्। इ, स्खम्भाते। ऊ, स्खम्भते कवाटेन द्वारं लोप्टः। यङ्लुप्ते। इति दुर्गादासः॥

स्खन्द, क्षी, (स्कन्दस्येदमिति। स्कन्द+अण्।) स्कन्दकरणम्। यथा,—

"धारादत्त तथा स्कान्दं वासवं कूर्मसंज्ञकम्।"

इत्यादि नारदीयपुराणम्॥

अस्य विवरणं पुराणशब्दे द्रष्टव्यम्॥

स्कु, ग न ण उद्भवौ। आप्लावने। इति कविकल्पद्रुमः॥ (क्रया०-स्वा० प-उभ०-सक०-सेट्।) ग ण, स्कुनाति स्कुनीते। न ण, स्कुनोति स्कुनुते। पुस्कावं। उद्भूतिरुद्धरणम्। आप्लावने। इति प्राचः।

"स्कुनाति च स्कुनीते च स्कुनात्यादत्तेऽपि च।
स्कन्दते स्कुन्दते चापि षड़ाप्लवनवाचिनः॥"

इति भट्टमल्लः।

आवरणे इति माधिनोयाः। स्कुनाति अम्बु वायेन मटः आच्छादयतीत्यर्थः। इति रमानाथः। इति दुर्गादासः॥

स्कुद, इ ऊ आप्लवे। उद्भवौ। उत्प्लुत्य गत्याम्। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-चक० च-सेट्।) "पञ्चमस्वरोऽयं धातुप्रदीपकारमतेन। 'स्कन्दते स्कुन्दते चापि षड़ाप्लवनवाचिनः।' इति भट्टमल्लोऽपि। चुस्कुन्दिषते॥" इति दुर्गादासः॥

स्कुभ, ग न ज रोधने। इति कविकल्पद्रुमः॥ (क्रया०-स्वा० च-पर०-सक०-सेट्। क्वाचित्।) दन्त्यादिः। पञ्चमस्वरी। ग, स्कुभ्नाति। न, स्कुभ्नोति। उ, स्कुम्भित्वा स्कुब्ध्वा। रोधनमावरणम्। इति दुर्गादासः॥ सौत्रधातुरयम्॥

स्कोटिका, स्त्री, पक्षिविशेषः। यथा,—

अथ सर्षपी।

"शकुलिका स्खलनिका तुलिकाकोटिकस्त्रसे॥"

इति त्रिकाण्डशेषः॥

स्खद, ग ण ड विशरे। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-सेट्।) ग, स्खदयते। एतद्धातोः परस्य तु वा ग्रमं यस्य कृत्य इत्यादिना वा लुक्। अस्खदयति अस्खादयति। अवधरिष्यन्तीत्युपसर्गात् परस्य पटादित्वं नास्ति इति ज्ञातव्यम्। तत्रैव अवस्खाने अप इति औमः। अस्खादयति अवस्खदयति परिस्खदयति। अवधरिष्यन्तीत्युपसर्गात् परस्य पटादित्वं नास्तीति औमरः। अवस्खादयति परिस्खादयति अस्खदयति। स्खद स्खदने इति प्राचः। स्खदनं स्रैस्यमिति त्रिलोचनरामौ। पाटनमिति गोपिन्दः। स्रैस्योत्पाद्यमिति गोपीनाथम्। दिंसेति रमानाथः। इति दुर्गादासः॥

स्खदन, क्षी, (स्खद+ल्युट्।) विदारणम्। इति रभसश्चार्थदर्शनात्॥ स्रैस्यम्। पाटनम्। स्रैस्योत्पादनम्। हिंसा। इति कविकल्पद्रुमटीकायां दुर्गादासः॥

स्खल, भि चये। चये। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-चये चक०-सेट्।) भि, स्खलयति वचनं ते सर्व्वथा सभु खेदमिति मालत्याम्। स्खालयति चस्खाल। चयः सञ्चयः। स्खलति पुण्यं मालिकः सञ्चिनोतीत्यर्थः। चयः स्खलनम्। स्खलति पत्रं वृक्षस्य।

"दृढ़ः प्रेमा मम सदसिरिव सन्धिं न लभते
जनेवापि प्रायः स्खलति खलु यत्नैरपि सतः।"

इति दुर्गादासः॥

स्खलनं, क्षी, (स्खल+ल्युट्।) पतनम्। तत्पर्य्यायः। रिङ्खणम् २। इत्यमरः। १।७।३६॥ रिङ्खणम् ६। इति हेमचन्द्रः॥ (यथा, सुश्रुते। ४। २४।

"अमरुजनदोषज्ञ स्त्रविरे च प्रशस्यते।
सशोत्पाद्यवयस्त्रैर्मैर्यैर्यैर्विदर्शनम्॥"

अभिघातः। इति मल्लिनाथः॥ यथा, माघे। ६। ५२।

"निजपाणिपल्लवतलस्खलना-
दभिनाविकाविवरसुप्तलतैः।
अपरा परीत्य भ्रमकेर्सुहृदे
सुखवासमाल्यकमलन्यसने॥"

उपारत्नम्। यथा, याज्ञिकदर्पणे। ३।२१६।

"उत्खन्नायितभोगाङ्गगोचस्खलनसम्भवा॥"

तथाच भागवते। ५। १। १२।

"अथ कथञ्चित् स्खलनचुत्पतनजृम्भगदुरवस्थानादिषु विषमानां नः सहस्राय व्यरमस्यदृशायामपि सकलकश्मलनिरसनानि तव गुणस्तनामधेयानि वचनगोचराणि भवन्तु॥")

स्खलितं, क्षी, (स्खल+क्तः।) भूपतनादिना युक्तस्यादायाः स्खलनम्। तत्पर्य्यायः। स्खलम् २। इत्यमरः। २। ८। १०८॥ भंशः। चि, स्खलितम्। इति मेदिनी। ते, १६४॥ (यथा, आर्य्यासप्तशत्याम्। ६७२।

"सौधगवाक्षगतापि हि दयितं स्खलितव्रतप्रयत्नसमि।
हिमगिरिशिखरस्खलिता गङ्गेवेरावतं
वरति॥")

स्खल, ग प्रबोधाते। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) ग, स्खलयति। स्खालयति। इति दुर्गादासः॥

स्खल, तृ क अभ्रशब्दे। इति कविकल्पद्रुमः॥ (अदन्तचुरा०-पर०-सक०-सेट्।) स्खलयति नेपः। इति दुर्गादासः॥

स्खल, भि शब्दे। इति कविकल्पद्रुमः॥ (भ्वा०-पर० सक०-सेट्।) भि, स्खलयति स्खालयति। अतिस्खलत्। इति दुर्गादासः॥

स्खलः, पुं, (स्खलते शब्दायते कामुकः स्खलयति कथयति वचःशोभासिति वा। स्खल शब्दे+घञ्।) अवयवविशेषः। मार इति पुँस्त्री इति च भाषा। पर्य्यायः। कुचः २। इत्यमरः। २। ६। ७०॥ कुचः ३ उरोजः ४ वक्षोजः ५ पयोधरः ६ वक्षोरुहः ७ उरसिजः ८। तत्स्थानं चूचुकम्। इति शब्दरत्नावली। तस्य शुभलक्षणं यथा, गारुड़े। ६५। ६५।

"चरोमशौ स्तनौ पीनौ घनावविषमौ शुभौ।
कठिनावरोमसुरौ वृत्तग्रीवा च कम्बुभा॥"

तस्य मनोहरत्वकारकौषधं यथा, तत्रैव। १६४। ४।

"कुष्ठनागबलाचूर्णं नवनीतसमन्वितम्।
तल्लेपो युवतीनाञ्च कुर्य्यान्मनोहरं स्तनम्॥"

अथ स्तनरोगस्य संप्राप्तिमाह।

"सक्षीरे वाप्यदुग्धे वा दोषः प्राप्य स्तनौ स्त्रियः।
रक्तं मांसञ्च संदूष्य स्तनरोगाय कल्पते॥"

अदुग्धायामपि स्तनौ प्रसूतायां गर्भिण्याञ्च स्त्रियां बोद्धव्यौ। यत आह सुश्रुतः।

"धमन्यः संवृतद्वाराः कन्यानां स्तनसंज्ञिताः।
दोषाविसर्ग्याः सततं गर्भिणीनां सुताः पुनः॥
स्वभावादेव विवृता जायन्ते सप्तमस्वयः॥"

स्तनरोगानामतिदेशेन लक्षणान्याह।

"मन्थानामपि तेषान्तु त्रिधा शोणितविद्धिम्।
लक्षणानि समानानि वातश्लेष्मविद्धिलक्षणे॥"

मन्थानां वातपित्तकफसन्निपातागन्तुजानाम्। आगन्तुस्तनरोगाभिघातेन शूलेन च बोद्धव्यः। रक्तक्षयात्स्तनस्रवः। स्वभावात्॥ *॥

अथ स्तनरोगस्य चिकित्सा।

"श्रोथं स्तनौत्थितमवेक्ष्य भिषग्विदध्यात्
यद्विस्रधावभिहितं बहुधा विधानम्।
आमे विदाहिनि तथैव च तस्य पाके
तस्याः स्तनौ सततमेव च निर्व्रणौ तौ॥
पित्तघ्नानि तु शीतानि द्रव्याण्यत्र प्रयोजयेत्।
घृतौदकाभिर्हरिद्रञ्च न स्तनावुपनाहयेत्॥"

उपनाहयेत् लेहयेत्।

"श्वेतो विशालाकल्केन शृतं क्षीरं स्तनौत्थितान्।
निशाकल्ककृतस्नाय्यां लेपः श्रोथस्य शान्तिदः॥"

विशाला इन्द्रवारुणी। काकजङ्घा मयूरस्य पर्णं गाङ्गेयम्।

"लेपानिमान्नि सूत्रं स्तनरोगं वन्ध्यकादयः।
निर्व्याप्य तत्स्तनौ स्त्रिग्धे सङ्घा पिबेत्तक्रम्॥"

इति भावप्रकाशः॥

स्तनं, क्षी, (स्तन शब्दे+घञ्।) ध्वनिमात्रम्। मधशब्दः। कुन्तितम्। इति मेदिनी॥

स्तनन्धयः, पुं, क्षी, (स्तनं धयति पिबतीति। स्तन+धेट पाने+"नासिकास्तनयोर्धमोधेटोः।" ३। २। २६। इति खश्। चर्त्वविधिरिति सुम्।) शिशुः। तत्पर्य्यायः। उत्तानशयः २ उत्तानशया ३ शिशा ४ शिक्षा ५ क्षीरपः ६ क्षीरपा ७ क्षीरभुक् ८ स्तनन्धया ९। इत्यमरभरतौ॥ (यथा, रघुः। १३। ७८।

"पयोधरेराश्रमबालवृक्षकान्
संवर्द्धयन्ती स्वबलानुरूपैः।
असंशयं प्राक् तनयोपपत्तेः
स्तनन्धयप्रीतिमवाप्स्यसि त्वम्॥")

स्तनन्धया, स्त्री, (स्तनन्धय+टाप्।) अतिबालिका। इत्यमरटीकायां भरतः। २।६।४१॥

स्तनन्धयी, स्त्री, (स्तनन्धय+ष्टित्त्वात् ङीप्।) अतिबालिका। इत्यमरः। २। ६। ४१॥

स्तनपः, पुं, (स्तनं पिबतीति। पा+कः।) अतिशिशुः। इति भरतः॥ स्तनपानकर्त्तरि, त्रि॥

स्तनपा, स्त्री, (स्तनं पिबति या। पा+कः। टाप्।) अतिबालिका। इत्यमरः।२।६।४१॥

स्तनपायिका, स्त्री, अतिबालिका। दुग्धपोष्या। स्तनशब्दपूर्ब्बकपाधातोर्ण्वुल्(ण्वुल्) प्रत्यये आप्-प्रत्ययेन निष्पन्नम्।

स्तनभरः, पुं, (स्तनयोर्भरः।) स्थूलस्तनभारः। तत्पर्य्यायः। स्तनाभोगः २। इति त्रिकाण्डशेषः॥

स्तनभवः, पुं, (स्तनाभ्यां भव उत्पत्तिर्यस्य।) रतिबन्धविशेषः। यथा,—

"स्वनखाङ्कमधो तु कृत्वा योषित्पदद्वयम्।
स्तनौ धृत्वा रमेत् कामी बन्धः स्तनभवः स्मृतः॥"

इति स्मरदीपिका॥

स्तनयति, त्रि॥

स्तनमुखः, पुं, (स्तनयोर्मुखम्। अभिधानात् पुंस्त्वम्।) स्तनाग्रभागः। यथा। चूचुकस्तु स्तनाङ्कुराग्रशिखासमाः। इति हेमचन्द्रः। ३।२६७॥

स्तनयित्नुः, पुं, (स्तनयतीति। स्तन क्लाभशब्दे+"स्तनिक्षिपिपुषीति।" उणा० ३। २६। इति इत्नुच्। "अयामन्ताल्।" ६। ४। ५५। इति आयादेशः।) मेघः। इत्यमरः। १। ३। ६॥ (यथा, उत्तररामचरिते ३ अङ्के।

"किमयं कलभोऽसि निर्गतः कुलशैलेऽपि त्वमीदृशो।
स्तनयित्नोर्मयूरीव स्वकिलोत्कण्ठिता स्थिता॥")

मुस्तकः। इति चामरः।२।४।१५८॥ मेघध्वनिः। इति मेदिनी॥ विद्युत्। इति शब्दरत्नावली॥ रोगः। इति हेमचन्द्रः॥

स्तनवृन्तः, पुं, (स्तनयोर्वृन्तम्। अभिधानात् पुंस्त्वम्।) स्तनमुखम्। इति हेमचन्द्रः।३।२६७॥ स्तनेर बोंटा इति भाषा॥

स्तनशिखा, स्त्री, (स्तनयोः शिखा।) स्तनवृन्तः। इति हेमचन्द्रः। ३। २६७॥

स्तनाग्रं, क्ली, (स्तनयोरग्रम्।) स्तनवृन्तम्। इति राजनिर्घण्टः॥

स्तनान्तरं, क्ली, (स्तनयोरन्तरम्।) हृदयम्। इति हेमचन्द्रः॥ (यथा, रघुः। १०। ४२।

"विभक्ता कौसुभव्यामं स्तनान्तरविलम्बिनम्।
पयोधरमिव क्षीरं प्रभाजनमभक्षयत्॥")

स्त्रीवैधव्यलक्षणविशेषः। इति केचित्॥

स्तनाभोगः, पुं, (स्तनयोराभोगः।) स्तनभरः। इति त्रिकाण्डशेषः। स्तनस्य परिपूर्णता च॥

स्तनितं, क्ली, (स्तन+क्तः।) मेघनिर्घोषः। इत्यमरः। १। ३। ८॥ (यथा, मनुः। ४। १०३।

"विद्युत्स्तनितवर्षेषु महोल्कानाञ्च संभवे।
आकालिकमनध्यायमेतेषु मनुरब्रवीत्॥")

करतालिशब्दः। इति केचित्॥ (शब्दमात्रम्। यथा, हरिवंशे। ६६। ४७।

"आर्त्तस्तनितसंनादे बधिरासुखदाकुले॥")

शब्दिते, त्रि॥

स्तनितफलः, पुं, (स्तनितानि फलानि यस्य।) विकङ्कटवृक्षः। इति राजनिर्घण्टः॥

स्तन्यं, क्ली, (स्तने भवम्। स्तन+"शरीरावयवाच्च।" ४। ३। ५५। इति यत्।) दुग्धम्। इति हेमचन्द्रः॥ (यथा, रघुः। २। ६६।

"स नन्दिनीस्तन्यमनिन्दितात्मा
सद्वत्सलो वत्सहुतावशेषम्।
पपौ वसिष्ठेन कृताभ्यनुज्ञः
शुभं यशो भूमिमिवातितृष्णः॥"

स्तनाय हितमिति।"शरीरावयवात् यत्।"५। १। ६। इति यत्। स्तनधिते, त्रि॥)

स्तब्धः, त्रि, स्तम्भितः। जड़ीभूतः। स्तम्भधातोः क्तप्रत्ययेन निष्पन्नः॥ (यथा, कथासरित्सागरे। २०। ६६।

"स्वयमुन्निद्रकलसस्तब्धबाहुरभूत्तदा॥")

स्तब्धरोमा, [न्] पुं, (स्तब्धानि रोमाणि यस्य।) शूकरः। इत्यमरः। २। ५। २॥ स्तम्भितलोमयुक्ते त्रि॥ (यथा, आर्य्यासप्तशत्याम्।५३२।

"विमुखे चतुर्मुखेऽपि श्रितवति चानीशभावभीरोऽपि।
मयमहीनिस्तारे हरिः परं स्तब्धरोमाभूत्॥")

स्तभ, ष्टु ञ स्तम्भे। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-अक०-सक०-च-सेट्।) दन्त्यादिः। ट, स्तम्भते। ड, स्तम्भते। तिष्ठम्भयिषति। तिस्तम्भयिषति। स्तम्भो जड़ीभावस्तत्करणञ्च। स्तम्भः स्तूणाजड़ीभावाद्यित्वमरोक्तेः। शीतनावस्तब्धो जड़ीकृतः इत्यर्थ इति क्रमदीश्वरोक्तेश्च। स्तम्भ इह क्रियानिरोधः इति भीमः। दोषवृद्धिरिति गोविन्दभट्टः। स्तम्भो रुद्धीकरणञ्च। स्तम्भते कवाटेन द्वारं लोकः। इति दुर्गादासः॥

स्तम्भः, पुं क्लागः। इति शब्दरत्नावली॥

स्तम्भः, पुं, (निष्ठतीति। ष्ठा+"स्थः स्कोऽन्यतरस्याम्।" उणा० ४। ६६। इति अन्यत्। स्तादेशश्च।) प्रकाशरहितवृक्षः। स तु भिण्टकादिः। तत्पर्य्यायः। गुल्मः २। इत्यमरः। २। ४। ६॥ क्लागादिः। तत्पर्य्यायः। गुच्छः २। इति चामरः॥ गुलमः ३। इति नट्टीकाः। तिटपः ४। इति जटाधरः॥

स्तम्भकारिः, पुं, (स्तम्भं करोतीति। स्तम्भ+कृ+"स्तम्भशुल्वोरिन्।" ३। २। २४। इति इन्।) धान्यम्। इत्यमरः। २। ६। ८॥ अपि च। "पुंसि स्तम्भकरिर्ग्रन्थे क्षीबिनां धान्यमात्रके।" इति शब्दरत्नावली॥

स्तम्बकारः, त्रि, (स्तम्बं करोतीति। कृ+अण्।) गुच्छकारकः। स्तम्बशब्दात् कृञधातोः घञ्-प्रत्ययेन निष्पन्नः॥

स्तम्बघनः, त्रि, (स्तम्बः हन्यतेऽनेनेति। स्तम्ब+हन्+"स्तम्बे क च।"३।३।८३। इति कात् अप् घनादेशश्च।) तृणाद्युन्मूलनकारिखनित्रादिः। तत्पर्य्यायः। स्तम्बघ्नः २। इत्यमरः। ३।२।३५॥ स्तम्बहननः ३। इति भरतसुन्दरी॥

स्तम्बघ्नः, त्रि, (स्तम्बो हन्यते येनेति। स्तम्ब+हन्+"स्तम्बे क च।"३। ३। ८३। इति कः।) स्तम्बघनः। इत्यमरः। ३। २। ३५॥

स्तम्बपूः, [र्] स्त्री, (स्तम्बानां पूरिव।) पुरीभेदः। तत्पर्य्यायः।

"तामलिप्तं दामलिप्तं तामलिप्ती तमालिनी।
स्तम्बपूर्विष्णुगृहच्च स्याद्विदर्भा तु कुण्डिनम्॥"

इति हेमचन्द्रः॥

स्तम्बहननः, त्रि, (स्तम्बो हन्यतेऽनेनेति। हन+करणे ल्युट्।) स्तम्बघनः। इत्यमरटीकायां भरतसुन्दरी। ३। २। ३५॥

स्तम्बेरमः, पुं, (स्तम्बे रमते इति। स्तम्ब+रम+"स्तम्बकर्णयो रमिजपोः।"३। २। १३। इत्यच्। "ततपुरुषे कृति बहुलम्।"६। ३। १४। इति सप्तम्या अलुक्।) हस्ती। इत्यमरः।२।८।३५॥ (यथा, रघुः। ५। ७२।

"शय्यां जहात्युभयपार्श्वविनीतनिद्राः
स्तम्बेरमा रुचरशृङ्खलकर्षिणस्ते॥")

स्तम्भ, ग न उं रोधने। इति कविकल्पद्रुमः॥ (क्र्या० स्वा०-च-पर०-सक०-सेट्। क्र्यादिट्।) ग, स्तम्भ्नाति। न, स्तम्भ्नोति। उ, स्तम्भित्वा स्तम्भ्वा। रोधनमावरणम्। इति दुर्गादासः। सौत्रधातुरयम्॥

स्तम्भः, पुं, (स्तम्भ्नातीति। स्तम्भ+घञ्यप्।) स्तूणा। थाम इति खुँटी इति च भाषा। जड़ीभावः। स तु निष्क्रियतया। इत्यमरभरतौ। ३। ३। १३४॥ (यथा, माघः। ५।४५

"स्तम्भं महान्तमुचितं सहसा समोच
दानं ददावतितरां महसामहस्तः।
बद्धाग्रराशि परितो निगड़ान्यलावीत्
खातन्त्र्यशुल्बलभवापि करेणुराजः॥"

"महान्तं स्तम्भं आलानं बाधञ्च सहसा समोच। स्तम्भः स्तूणाजड़त्वयोरिति विश्वः।" इति तट्टीका॥ काष्ठम्। यथा, रघुः।५।१५।

"आरण्यकोपात्तफलप्रसूतिः
स्तम्बेन नीवार इवावशिष्टः॥")

स्तम्भकरः, पुं, (करोतीति। कृ+अच्। स्तम्भस्य करः।) वेष्टनम्। इति केचित्॥ स्तूणाकारके लाघवकारके च त्रि॥

स्तम्भकी, [न्] पुं, वाद्यविशेषः। इति काशत्॥

स्तम्भनं, क्ली, (स्तम्भ+ल्युट्।) जड़ीकरणम्। यथा, कालिकापुराणे।

"दृक्स्तम्भनमृगक्षिप्रशमनं दारिद्र्यविद्रावणम्॥"

षट्कर्म्मान्तर्गताभिचारकर्म्मविशेषः। यथा,—

"उलूककाकयोः पक्षौ गृहीत्वा मन्त्रवित्तमः।
आलिख्य वै गृहद्वारे निशायाञ्च साधाचर-
संपुटितम् ॥
मन्त्रं स्थापितपवनं षड्रसजप्तं चतुष्पथे निखनेत्।
स्तम्भनमेतदवश्यं भविता जगतान्च नात्र
सन्देहः ॥"
स्थापितपवनं ज्ञातप्राणप्रतिष्ठम्।
"लत्वा प्रतिकृतिमथवा
प्रज्ञानाङ्गारकेशपत्रवसनजाम्।
सव्यगधिष्ठितपवनां
कृकलासीं समस्तललाटाम्॥
वसनाधिष्ठितपवनां
षड्रसजप्तां तदुक्तया वसनाम्।
दग्धां लत्वा निखनेत्
प्रज्ञानदेशे यदि वाक्स्तम्भः॥
आलिख्य पेटकायुग्मे मन्त्रं सनामपुटितम्।
निशया निशीथकाले षड्रसजप्तं प्रतिष्ठित-
प्राणम्॥
सव्यगमतितीक्ष्णतरं स्तम्भगमतितीक्ष्णास्यु-
निःक्षिप्तम्।
लिखितमन्त्रचित्रमयकीलकं,
ग्रथितकर्म्म सनामसमारतम्॥
क्षतजपं त्रिषड्रसकसंख्यया
पथि खनेदघ याननिवारणम्।
विहितनिष्पतरो रिपुनामयुतं,
मनुमिमं निशया क्षतनामकम्।
गवषड्रसजप्तादिसुसाधितं
पथि खनेदथ सैन्यनिरोधनम्॥"
इति स्तम्भनम्॥
इति फेत्कारिणीतन्त्रे ५ पटलः॥ ७॥
अथाग्निस्तम्भनम्।
"माहुरस्य रसं ग्राह्य जलौकां तत्र पेषयेत्।
दृतौ तु लेपयेत्तेन अग्निस्तम्भनमुत्तमम्॥
ग्राह्यजलौकसमादाय शरपुङ्खे निधाय तम्।
व्यग्रागारे विवेशेन अग्निस्तम्भनमुत्तमम्॥
नायमौ उदरं ग्रस्य मण्डूकवसया सह।
गुटिकां कारयेत्तेन ततोऽग्नौ प्रविशेद्भयी॥
अग्निस्तम्भयतीत्येव अग्निस्तम्भनमुत्तमम्॥
रक्तपाटलस्तालु अवष्टब्धस्य मूलके।
दिनं स्नायते क्षिप्रं जयः सिद्धं जलौकसम्॥
सुकीलकपलाशं मरीचं नागरं तथा।
चालित्वा च इमं यन्त्रो लिखेत्या व्यसनं लिखेत्॥
गोरोचनां मृगनाभिं कुंकुमेन युतं समम्।
लिखित्वाथ पीत्वा स्यात् मन्त्रेणानेन वै तथा॥
ॐ ह्रीं अग्निस्तम्भं कुरु॥ ॐ नमो भगवते
अग्नि स्तम्भय स्तम्भय ह्रीं स्वाहा कीले कीले कवर।
अग्निस्तम्भनमेतीर्थं सर्व्व स्तम्भयते शिव॥"
इति मातृकायां पूर्व्वखण्डे। १८। ११—१८॥
पक्षाघातस्य बहुकर्म्मनाशौ दृष्टम्॥

स्तम्भनः, पुं, (स्तम्भयतीति। स्तम्भ + णिच् + ल्युः।) कार्य्यविशेषस्य प्रत्यवायजनक-वाक्य-विशेषः। यथा,—

"उत्सादनः शोषणश्च तापनस्तम्भनस्तथा।
सम्मोहनश्च पञ्चैते विख्याताः कामसायकाः॥"
इति जटाधरः॥
(स्तम्भके, त्रि। यथा, हरिवंशे। १। ४२।
"कषायः संग्राहको रोपणः स्तम्भनः शोषणो
लेखनः शोषणः पीडनः क्लेदोपशोषणश्चेति॥")
स्तम्भितः, त्रि, जड़ीभूतः। जड़ीकृतः। इति स्तम्भ-शब्दात् इतोऽस्य जाते इतप्रत्ययेन स्तम्भधातोः क्तप्रत्ययेन वा निष्पन्नः॥
स्तरिमा, [न्] पुं, (स्तृणोति आच्छादयतीति। स्तृ + "हृभृधृसृभ्य इमनिच्।" उणा० ४। १४७। इति इमनिच्।) तल्पम्। इत्युणादि-कोषः॥
स्तरी, स्त्री, (स्तृणोति आच्छादयतीति। स्तृ + "अवितृस्तृतन्त्रिभ्य ईः।" उणा० ४। १५८। इति ईः।) धूमः। इति हेमचन्द्रः॥
स्तवः, पुं, (स्तूयतेऽनेनेति। स्तु + अप्।) प्रशंसा। तत्पर्य्यायः। स्तोत्रम् २ नुतिः ३ स्तुतिः ४। इत्यमरः। १। ६। ११॥ स्तवनम् ५। इति शब्दरत्नावली॥ वर्णः ६। इति जटाधरः॥ (यथा, हरिवंशे। १२६। २८।
"तुष्टाव च तमीशानं मारीचः कश्यपस्तदा।
वेदोक्तैः स्वकृतैश्चैव स्तवैस्तुत्यं जगद्गुरुम्॥")
स्तवकः, पुं, (स्तिष्ठतीति। स्था + "स्थः स्तोऽम-जवकौ।" उणा० ४। ६६। इति अवकः धातोश्च स्तादेशः।) गुच्छकः। इत्यमरः। २। ४। १६॥ "द्वे स्तवके यमौ इति ख्याते बहुभिः पुष्पैः फलैर्वा संबाधः पल्लवग्रन्थिः गुच्छः। गूयते ध्वन्यते भ्रमरैरत्र गुच्छः। गु घु ङ ङ ध्वनौ नाम्नीति छक्" 'पुष्पादिस्तवके गुच्छो गुल्माहारकलापयोः।' इति भवर्गान्तेषु रन्तिदेवः॥ 'स्यात् गुच्छः स्तवके स्तम्बे हारभेदकलापयोः॥' इति भवर्गद्वितीयान्ते मेदिनी॥ स्वार्थे कः गुच्छकः, गुत्सकः इति च पठन्ति। तदा गुध्यति वेष्टते इति गोधन्ते क्रीड़न्ति भ्रमरा अत्रेति वा गुत्सः। गुध्य वेष्टे गुध ङ क्रीड़े इत्यस्मादा नाम्नीति सः। स्वार्थे कः गुत्सकः। 'स्तवके हारभेदे च गुत्सः स्तम्बे च कीर्त्तितः।' इति एकाक्षरकोषे रुद्रः। 'गुत्सः स्यात् स्तवके स्तम्बे हारभिद्ग्रन्थि-पर्व्वयोः।' इति एकाक्षरकोषे मेदिनी। 'सुगुरः कुटजेऽपि स्तवको गुत्सकाविति॥' इति हेमचन्द्रः। स्तूयते इति स्तवकः। टुष्टु ञ स्तुतौ अच् स्तवः स्वार्थे अभिधानात् निरर्थकः।" इति भरतः॥ ७॥ स्तुतिः। इति विश्वः॥ मन्त्रपरिच्छेदः। समूहः। इति केचित्॥ स्तवकारके, त्रि॥
स्तवरकः, पुं, स्तवकः। इति केचित्॥
स्तावः, पुं, स्तवः। स्तुधातोर्भावे घञ् प्रत्ययेन निष्पन्नः॥

स्तावकः, त्रि, (स्तौतीति। स्तु + ण्वुल्।) स्तव-कर्त्ता। स्तुधातोर्ण्वुलप्रत्ययेन निष्पन्नः॥ (यथा भागवते। ४। १५। २१।
"स्तावकान् तानभिप्रेत्य पृथुर्वैण्यः प्रतापवान्।
मेघनिर्ह्रादया वाचा प्रहसन्निदमब्रवीत्॥")
स्तिमितः, त्रि, (स्तिम + क्तः।) अचञ्चलः। (यथा रघुः। १३। ४८।
"एषा प्रसन्नस्तिमितप्रवाहा
सरिद्विदूरान्तरभावतन्वी।
मन्दाकिनी भाति नगोपकण्ठे
मुक्तावली कण्ठगतेव भूमेः॥")
स्तार्द्रः। यथा, "स्तिमितोऽचञ्चलार्द्रयोः।" इति मेदिनी॥
स्तिम्भिः, पुं, (स्तम्भ्नातीति। स्तम्भ + "क्रमितमि-मितिस्तम्भामत इच्।" उणा० ४। १२१। इति इन् अत इच्।) वसुः। वायुः। इत्युणादि-कोषः॥
स्तीर्व्विः, पुं, (स्तृणातीति। स्तृ + "कृञ्कृगृकृजा-मभ्यः क्विन्।" उणा० ४।५४। इति क्विन्।) नभः। रुधिरम्। लवणजातिः। अश्वर्य्युः। पयः। शुक्रः। इति संक्षिप्तसारोणादिवृत्तिः॥
स्तुतः, त्रि, (स्तु + क्तः।) स्तुतिविषयः। तत्-पर्य्यायः। ईडितः २ शस्तः ३ पशंसितः ४ पनायितः ५ प्रशस्तः ६ पशितः ७ पनितः ८ अपिगीर्णः ९ वर्णितः १० अभिष्टुतः ११। इत्य-मरः।३।२।११०॥ गीर्णः १२ ईड्तिः १३। इति शब्दरत्नावली॥ नुतः १४। इति जटाधरः। (यथा, महाभारते। १२। २८४। १८।
"नमः स्तुताय स्तुत्याय स्तूयमानाय वै नमः॥")
स्तुतिः, स्त्री, (स्तु + क्तिन्।) स्तवः। इत्यमरः। १। ६। ११॥ (यथा, नैषधे। ३। ११६।
"इतः स्तुतिः का खलु चन्द्रिकाया
धैरश्विमण्डूकरजीकरोति॥")
दुर्गा। यथा,—
"स्तुतिः शिष्टिरिति ख्याता। अथाः संश्रयणाच्च सा।
लक्ष्मीर्वा लक्षणा वापि क्रमात् सा कान्तिरुच्यते॥"
इति देवीपुराणे ४५ अध्यायः॥
स्तुतिपाठकः, पुं, (स्तुतिं पठतीति। पठ + ण्वुल्।) राजादेर्यशादौ वीर्य्यस्तुतिकर्त्ता। तत्पर्य्यायः। वन्दी २। इत्यमरः। २। ८। ६७॥ सूतः ३ स्तुतिव्रतः ४ सूतः ५ मागधः ६ मधुकः ७। इति जटाधरः॥ प्रातर्गेयः ८। इति त्रिकाण्ड-शेषः॥
स्तुतिव्रतः, पुं, (स्तुतिरेव व्रतं यस्य।) स्तुति-पाठकः। इति जटाधरः॥
स्तुत्यः, त्रि, स्तवनीयः। स्तुधातोः क्यप्प्रत्ययेन निष्पन्नः। इति सुबोधव्याकरणम्॥ (यथा, रघुः। ४। ६।
"प्रदिक्षिणप्रक्रमणात्तदानीं
सप्तार्च्चिषस्तुत्यमिवाग्निहोत्रम्॥")
स्तुत्यं स्तुतिभिरर्थ्याभिरुपतस्थे सरस्वती॥")
स्तुनकः, पुं, द्वागः। इति शब्दचन्द्रिका।

स्तोकः, पुं, (स्तुयते इति। स्तुर्वा प्रशंसे + घञ्।) चातकः। इति मेदिनी॥ विन्दुः। कणा। इति केचित्॥ (यथा, मार्कण्डेये। ४६। ५६।
"हृष्टावरुद्धैरभवत् स्रोतःस्रोतांसि निम्नगाः।
ये पुरस्तादृषां स्तोका आपन्नाः पृथिवीतले॥"
तथा च भागवते। ६। ६। ४८।
"एवं गृहेष्वभिरतो विषयान् विविधैः सुखैः।
सेवमानो न चातुष्यदाज्यस्तोकैरिवानलः॥")

स्तोकः, त्रि, (स्तुच् + घञ्।) अल्पः। इत्यमरः। ३। १। ६१॥ (यथा, महाभारते। १।१।२२८।
"सङ्गयेनंगते प्राणांस्त्यक्तुमिच्छामि साम्प्रतम्।
स्तोकं क्षणमपि न मज्जामि फलं जीवितधारणे॥")

स्तोकः, पुं, (स्तोक एव। स्वार्थे कन्।) चातकपक्षी। इत्यमरः॥ (यथा, मनुः। १२। ६०।
"रक्तानि हत्वा वासांसि जायते जीवजीवकः।
हंसो गृध्रश्च बाकश्च सप्तसप्तसु सर्वटः।
स्तोकश्चक्रोकको वारि यागान्युद्रः पयूषनः॥")

स्तोता, [तृ] त्रि, (स्तौतीति। स्तु + तृच्।) स्तवकर्त्ता। पुमांसौ तृच्प्रत्ययेन निष्पन्नः॥ (यथा, ऋग्वेदे। ८। ४४। १८।
"स्तोता स्यां तव शूरस्य॥")

तद्धितप्रकरणम्। रेभः १ धरिता २ कादः ३ नदः ४ ज्ञातुः ५ कीरिः ६ गौः ७ हरिः ८ नादः ९ छन्दः १० सूप् ११ ऋक्षः १२ ज्ञानयुः १३। इति त्रयोदश स्तोत्रनामानि। इति वैद्यनिघण्टौ। ३। १६॥ (विष्णुः। इति महाभारतम्। १३। १४८। ७८॥)

स्तोत्रं, क्ली, (स्तूयतेऽनेनेति। स्तु + "दात्रीशस्युसुयुजेति।" उणा० २। १८२। इति ष्ट्रन्।) स्तवः। इत्यमरः। १। ६। ११॥ तच्चतुर्विधं यथा, मात्स्ये १२१ अध्याये।
"अत्र वो वर्णयिष्यामि विधिं मन्वन्तरस्य तु।
ऋचो यजूंषि सामानि तथावत् प्रति देवतम्।
विधिस्तोत्रं तथा स्तोत्रं पूर्ववत् संप्रवर्त्तते॥
प्रथमस्तोत्रं कर्म्मस्तोत्रं विधिस्तोत्रं तथैव च।
तथैवाभिजनस्तोत्रं स्तोत्रमेतच्चतुष्टयम्॥
मन्वन्तरेषु सर्वेषु यथा मेधाग्नयश्च ये।
प्रवर्त्तयन्ति तेषां वै प्रथमस्तोत्रं पुनः पुनः॥"

स्तोभः, पुं, (स्तुभ + घञ्।) सामावयवविशेषः। न तु गीतसाधनपूरणाक्षरः। स च त्रयोदशविधो यथा। अयं वायवीयो ह्याउकारो १ वायुर्हंकारस्तस्मा अथकारः २। आत्मेहकारो ३ ऽग्निरीकारः ४ आदित्य ऊकारः ५। निहव एकारो ६ विश्वेदेवा औहोइकारः ७ प्रजापतिर्हिंकारः ८। प्राणः स्वरो९ऽन्नं या १० पानिरानूनिरुक्त ११ स्त्र्योदशः स्तोभः सप्तरो हुंकारः १२। दुग्धेऽसौ वाग्दोहं यो वाचो दोहोऽन्नमश्नादो भवति य एतामेवं वायव्यां सामावयवस्तोभाक्षरविषयामुपनिषदं वेदोपनिषदं वेद। इति छान्दोग्योपनिषदि प्रथमः प्रपाठकः समाप्तः॥ ७॥
अस्य भाष्यम्। भक्तिविषयोपासनं सामावयवसम्बन्धिनाम् सामावयवाक्षरस्तोभाक्षरविषयाणामुपासनान्तराणि संहितानुपदिश्यन्ते। अनन्तरं सामावयवसम्बन्धत्वाविशेषादयं वायवमेव स्तोभो ह्याउकारः स्तोभो ह्यथान्तरे वाग्नि प्रविश्य इयं वै ह्यथान्तरमित्यस्मात् सम्बन्धसामान्याद्ह्याउकारः स्तोभोऽयं लोक इत्येवमुपासीत। १।
वायुर्हंकारो वामदेव्ये सामनि ह्याइकारः प्रविष्टो वायुश्चसम्बन्धश्च वामदेव्यस्य साम्नो योनिरित्यस्मात् सामान्याद्ह्याइकारं वायव्यस्तोभमुपासीत। २।
चन्द्रमा अथकारः चन्द्रदृशा अथकारमुपासीत अन्ने हीदं स्थितमन्नाला चक्षुः अथाराकारसामान्याच्च। ३।
आत्मा इहकार इहेति स्तोभः प्रत्यञ्चौ ह्यात्मा इहेति अपदिश्यते इहेति च स्तोभः। ४।
ततुसामान्यादग्निरीकार इति। इ निधानानि चार्चेयानि सर्वाणि सामानीत्यतः। ५।
ततुसामान्यादादित्य ऊकारः। उषेरूर्ध्वं अन्नं आदित्यं गायत्र्युकारश्चार्यं स्तोभ आदित्यदैवत्ये सामनि स्तोभश्च दर्शनात्। ६।
निहव एकाक्षरमेकारस्तोभः एहीति चाक्षयतीति। ७।
ततुसामान्याद्विश्वेदेवा औहोइकारो वैश्वदेवे सामनि स्तोभश्च दर्शनात्। ८।
प्रजापतिर्हिंकार आनिरुक्तार्द्धिंकारश्च चायुक्तत्वात्। ९।
प्राणः स्वरः स्वर इति स्तोभः प्राणश्च स्वरहेतुत्वसामान्यात्। १०।
अन्नं या या इति स्तोभोऽन्नं अन्नेन हीदं यातीत्यतः। ११।
ततुसामान्यात् वागिति स्तोभो विराडन्नं देवताविशेषो वा वैराजे सामनि स्तोभदर्शनात् अनिरुक्तोऽयुक्तत्वात् इदमेवेति निर्व्वक्तुं न शक्यत इयतः। १२।
सप्तरो विकल्पमानस्वरूप इत्यर्थः कोऽसावित्याह हुंकारोऽयुक्तो ह्ययमतोऽनिरुक्तविशेष एवोपास्य इत्यभिप्रायः॥ १३॥
स्तोभाक्षरोपासनाफलमाह। दुग्धेऽसौ वाग्दोहमित्यादुक्तार्थं च एतामेवं यथोक्तलक्षणां साम्नां सामावयवस्तोभाक्षरविषयामुपनिषदं दर्शनं वेद तस्यैतत् यथोक्तं फलमित्यर्थः। हिरण्यशब्दोऽध्यायपरिसमाप्त्यर्थः सामावयवविषयोपासनाशेषः परिसमाप्त्यर्थो वेति॥ ७॥ इति श्रीमद्गोविन्दभगवत्पूज्यपादशिष्यस्य परमहंसपरिव्राजकाचार्यस्य श्रीमच्छङ्करभगवत्पादस्य कृतौ छान्दोग्योपनिषद्विवरणे प्रथमः प्रपाठकः समाप्तः॥ ७॥ ७॥ हेतनम्। स्तम्भनम्। इति हेमचन्द्रः॥ अपि च।
"वाक्यं पारिप्लवं वा स्तोभं हेतनमेव वा।
देवकृत्यनामप्रत्यक्षमेघाक्षरं विदुः॥"
इति श्रीभागवते। ६। २। १४॥
"वाक्यं पुनरादौ वाक्येतिवत्। पारिप्लवं परिप्लावेन कृतम्। स्तोभं गीतास्यापूरणार्थं कृतम्। हेतनं किं विष्णुनेति वावच्चमपि च वैकृतगानोच्चारणम्।" इति तट्टीकायां श्रीधरस्वामी॥

स्तोम, तृ क स्तवने। इति कविकल्पद्रुमः॥ (अदन्त चुरा०-पर०-सक०-सेट्।) अतुस्तोमत्। इति दुर्गादासः॥

स्तोमः, क्ली, (स्तूयते इति। स्तु + "अर्त्तिस्तुसुहुसीति।" उणा० १। १३९। इति मन्।) मस्तकम्। धनम्। श्लक्ष्णम्। औहोग्रदक्षः। वक्रे, त्रि। इति केचित्॥

स्तोमः, पुं, (स्तुं + मन्।) समूहः। इत्यमरः। २। ५। ३६॥ (यथा, उत्तररामचरिते। २ अङ्के।
"श्रवणेषु सुखं वसन्तकाले यदनाकर्णितपूर्वमुत्कलासु।
कलकण्ठनिकूजितेषु तस्मात् क्वणितं कोकिलबालिकास्तोमस्य॥")
यज्ञः। इति हेमचन्द्रः॥ स्तवः। इति धरणिः। ३। ३। १४

स्तौपिकं, क्ली, पुष्पद्रव्यविशेषः। इति त्रिकाण्डशेषः॥ ओषा इति हिन्दी भाषा॥

स्त्यानं, क्ली, (स्त्यै + क्तः।) स्निग्धम्। प्रतिघ्नागम्। घनत्वम्। (यथा, उत्तररामचरिते। २ अङ्के।
"दधति कुहरभाषामत्र भल्लूकयूना-
मतुरसितगुरूणि स्त्यानसम्वृतानि॥")
आलस्यम्। इति विश्वमेदिन्यौ॥

स्त्यानः, त्रि, संहतिकर्त्ता। घनिकर्त्ता। इति स्त्यैधातोः कर्त्तरि क्तप्रत्ययेन निष्पन्नः। इति मुग्धबोधव्याकरणम्॥

स्त्यैनः, पुं, (स्त्यायतीति। स्त्यै + "स्त्यायेर्ह्रस्वश्च विश्च इनच्।" उणा० २। ७६। इति इनच्।) चौरः। स्त्यै क्तम्। इत्युणादिकोषः॥

स्त्यै, संहतौ। ध्वनौ। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-अनिट्।) दन्त्यादिरन्तःस्थायुक्ततमध्यः। स्त्यायति तिस्त्यासति। इति दुर्गादासः॥

स्त्री, स्त्री, (स्त्यायति गर्भो यस्यामिति। स्त्यै + "स्त्यायतेर्ड्रट्।" उणा० ४। १६५। ड्रट्। ङित्त्वात् टिलोपः। टित्त्वात् ङीप्।) सन्योन्यादिमती। सत्यर्थायः। योषित् २ अबला ३ योषा ४ नारी ५ सीमन्तिनी ६ वधूः ७ प्रतीपदर्शिनी ८ वामा ९ वनिता १० महिला ११। इत्यमरः। २। ६। २॥ प्रिया १२ रामा १३ जनिः १४ धनी १५ योविता १६ योषित् १७ योषा १८ योषिता १९ वनिता २० महिला २१ महेला २२। इति शब्दरत्नावली॥ भ्रूर्ब्बरी २३ सिन्दूरतिलका २४ सुभूः २५। इति जटाधरः॥ सुनयना २६ वामदृक् २७ अङ्गना २८ ललना २९ कान्ता ३० पुरन्ध्री ३१ परयष्टिनी ३२ सुतनुः ३३ तन्वी ३४ वधूः ३५ कामिनी ३६ तन्वङ्गी ३७ रमणी ३८ सुरङ्गनयना ३९ भीरुः ४० भाविनी ४१ विलासिनी ४२ नितम्बिनी ४३ अक्षताङ्गिनी ४४ सुनेत्रा ४५ प्रमदा

४६ सुन्दरी ४७ चकितभ्रूः ४८ ललिता ४९ वासिता ५० भामिनी ५१ वरारोहा ५२ ननाङ्गी ५३ विनता ५४ वरा ५५ श्यामा ५६ चारुवर्हणा ५७। इति राजनिर्घण्टः॥ * ॥

सा चतुर्विधा। पद्मिनी १ चित्रिणी २ शङ्खिनी ३ हस्तिनी ४। तासां लक्षणानि यथा,—

"भवति कमलनेत्रा नासिकात्युन्नरन्ध्रा
अविरलकुचयुग्मा दीर्घकेशी सुकेशी।
मृदुवचनसुशीला नृत्यगीतानुरक्ता
सकलतनुसुवेशा पद्मिनी पद्मगन्धा॥ १॥
भवति रतिरसज्ञा नातिदीर्घा न खर्व्वा
तिलकुसुमसुनासा स्निग्धदेहोत्पलाक्षी।
कठिनघनकुचाढ्या सुन्दरी सा सुशीला
सकलगुणविचित्रा चित्रिणी चित्रवक्त्रा॥२॥
दीर्घा सुदीर्घनयना वरसुन्दरी या
कामोपभोगरसिका गुणशीलयुक्ता।
रेखात्रयेण च विभूषितकण्ठदेशा
सम्भोगकेलिरसिका किल शङ्खिनी सा॥३॥
स्थूलाधरा स्थूलनितम्बभागा
स्थूलाङ्गुली स्थूलकुचा सुशीला।
कामोत्सुका गाढ़रतिप्रिया च
नितम्बखर्व्वा खलु हस्तिनी सा॥ ४॥

पद्मिनी पद्मगन्धा च मीनगन्धा च चित्रिणी। शङ्खिनी चारगन्धा च मदगन्धा च हस्तिनी॥ शशके पद्मिनी तुरा स्टगे तुरा च चित्रिणी। वृषभे शङ्खिनी तुरा हये तुरा च हस्तिनी॥ पद्मिनी शशयोर्योनिर्मेढ्रौ चतुरङ्गुलौ। चित्रिणीन्दुगयोर्योनिर्मेढ्रौ च तथाविधौ॥ शङ्खिनीवृषयोरष्टाङ्गुलौ तावेव सम्मतौ। हस्तिनीवाजिनोरेव तावेव द्वादशाङ्गुलौ॥"*॥

तस्या अवस्था यथा,—

"आ षोड़शात् भवेद्बाला तरुणी त्रिंशता मता।
चत्वारिंशत्तं यावत् प्रौढ़ा वृद्धा ततः परम्॥"

इति रतिमञ्जरी॥ * ॥

'बाला तु प्राणदा प्रोक्ता युवती प्राणधारिणी। प्रौढ़ा करोति वृद्धत्वं वृद्धा मरणमादिशेत्॥ निदाघशरदोर्बाला प्रौढ़ा वर्षावसन्तयोः। हेमन्ते शिशिरे योग्या न वृद्धा क्वापि शस्यते॥ नार्त्तवे षोड़शादर्वाक् सम्प्राप्याः परतो न च। आयुःकामो नरः स्त्रीभिः संयोगं कर्त्तुमर्हति॥ त्रिभिस्त्रिभिरहोभिश्च सेवेत प्रमदां नरः। सर्व्वेष्वृतुषु शीघ्रेषु पञ्चाम्नामाद्यवेदुधः॥ षट्पञ्चाशतो नारी सप्तसप्ततितः पुमान्। द्वावेतौ न प्रशस्येते प्रशस्येते विपर्य्ययात्॥"

इति राजवल्लभे रात्रिकृत्यम्॥ * ॥

स्त्रियाः शुभाशुभलक्षणानि यथा,—

श्रीहरिरुवाच।

"यस्यास्तु कुक्षिताः केशा सुखञ्च परिमण्डलम्। नाभिश्च दक्षिणावर्त्ता सा कन्या कुलवर्द्धिनी॥ या च काञ्चनवर्णाभा रक्तोत्पलसरोरुहा। सप्तजन्मानु नारीणां भवेत् सापि पतिव्रता॥ पद्मदेशा च या कन्या मत्स्याक्षी च या भवेत्। भर्त्ता च म्रियते तस्या नियतं दुःखभागिनी॥ पूर्णचन्द्रमुखी कन्या वासकुसुमसमप्रभा। विशालनेत्रा बिम्बोष्ठी सा कन्या लभते सुखम्॥ रेखाभिर्बहुभिः क्षीणं स्वल्पाभिर्धनहीनताम्। रक्ताभिः सुखमाप्नोति कृष्णाभिः प्रेष्यतां व्रजेत्॥ कार्य्येऽपि मन्त्री पत्नी स्यात् सखी स्यात् करणेषु च।
खेदेषु भार्य्या माता स्यात् वेश्या च शयने शुभा॥
अङ्कुशं कुण्डलं चक्रं यस्याः पाणितले भवेत्।"

पुस्तकान्तरे चक्रं स्थाने छत्रमिति च पाठः।

"पुत्रं प्रसूयते नारी नरेन्द्रं लभते पतिम्॥ यस्यास्तु रोमशौ पार्श्वौ रोमशौ च पयोधरौ। उन्नतौ चाधरौष्ठौ च क्षिप्रं मारयते पतिम्॥ यस्याः पाणितले रेखा प्राकारं तोरणं भवेत्। अपि दासकुले जाता राज्ञीवत्सुपजायते॥ उद्वृत्तकपिला यस्या रोमराजी निरन्तरम्। अपि राजकुले जाता दासीवत्सुपजायते॥ यस्या जघनमाकाङ्क्षेत् पृथिव्यां नैव तिष्ठतः। पतिं मारयते क्षिप्रं स्वातन्त्र्येणैव वर्त्तते॥ यस्या गमनमात्रेण भूमिकम्पः प्रजायते। पतिं मारयते क्षिप्रं स्वेच्छाचारेण वर्त्तते॥ चक्षुःस्नेहेन सौभाग्यं दन्तस्नेहेन भोजनम्। त्वचः स्नेहेन शय्याञ्च पादस्नेहेन वाहनम्॥ स्निग्धोन्नतौ ताम्रनखौ नार्य्याश्च चरणौ शुभौ। मत्स्याङ्कुशाब्जचिह्नौ च चक्रलाञ्छनलक्षितौ॥ अस्वेदिनौ मृदुतलौ प्रशस्तौ चरणौ स्त्रियाः। शुभे जङ्घे विरोमे च ऊरू हस्तिकरोपमौ॥ अश्वत्थपत्रसदृशं विपुलं गुह्यमुत्तमम्। नाभिः प्रशस्ता गम्भीरा दक्षिणावर्त्तिका शुभा। अरोमा त्रिवली नार्य्या वृत्तस्तनो रोमवर्जितौ॥"

इति गारुड़े नरस्त्रीलक्षणम् ६४ अध्यायः॥

तस्याश्चरित्रं यथा,—

"विषकुम्भाकाररूपामन्तस्ताम्राञ्च सन्ततम्। हृदये क्षुरधाराभां शश्वच्छुरभाषिणीम्॥ स्वकार्य्यपरिनिष्पन्नतत्परां सततं सदा। स्वान्तर्मलिनरूपाञ्च प्रसन्नवदनेक्षणाम्॥ श्रुतौ पुराणे यासाञ्च चरित्रमनिरूपितम्। तासु को विश्वसेत् प्राज्ञः अप्राज्ञाश्च दुराशयाः॥ तासां को वा रिपुम्मित्रं प्रार्थयन्ती नयं नवम्। दृष्ट्वा सवेशं पुरुषमिच्छन्ती हृदये सदा॥ वाक्ये स्वात्मसतीत्वञ्च प्रापयन्ती प्रयत्नतः। शश्वत्कामाञ्च वामाञ्च कामाधारां मनोहराम्॥ वाक्ये भावं छादयन्तीं स्वान्तर्मैथुनमानसाम्। कान्तं गमन्तीं रहसि वाक्येनैव सुलक्षिताम्॥ मानिनीं मैथुनाभावे कोपनां कलहाङ्कुराम्। सुप्रीतौ भूरिसंयोगात् स्वल्पमैथुनदुःखिताम्॥ सुमिष्टान्नात् प्रीतलोयादाकाङ्क्षन्तीञ्च मानसे॥ सुन्दरं रसिकं कान्तं युवानं गुणिनं सदा॥ सुतात् परमपि स्नेहं कुर्व्वतीं रतिकर्कशे। प्राणाधिकं प्रियतमं सम्भोगकुशलं प्रियम्॥ पश्यन्तीं रिपुतुल्यञ्च दृष्ट्वा मैथुनाक्षमम्। कलहं कुर्व्वतीं शश्वत् तेन सार्द्धं सुकोपनाम्। चर्च्चया भक्षयन्तीं तं कीनाशं इव गोचरम्। दुःसाध्यसाध्यरूपाञ्च सर्व्वदोषाश्रयां सदा॥ शश्वत् कपटरूपाञ्च दुःसाध्यमप्रतीतकाम्। ब्रह्मविष्णुशिवादीनां दुस्त्याज्यां मोहकारिणीम्॥ तपोमार्गार्गलां शश्वत् मुक्तिमार्गकपाटिकाम्। हरेर्भक्तिप्रवहितां सर्व्वमायाकरण्डिकाम्॥ संसारकारागारे च शश्वन्निगड़रूपिणीम्। इन्द्रजालस्वरूपाञ्च मिथ्यातिसत्यरूपिणीम्॥ बिभ्रतीं बाह्यसौन्दर्य्यमधोऽङ्गमतिकुत्सितम्। लालाविण्मूत्रपूयानामाधारं मलसंयुतम्॥ दुर्गन्धिदोषसंयुक्तं रक्ताक्तकमसंस्कृतम्॥ मायारूपां मायिनाञ्च विधिना निर्म्मितां पुरा। विषरूपां सुसुचूणामदृश्यामप्यवाञ्छिताम्॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे १६ अध्यायः॥*॥

अस्याः निन्दा यथा,—

"दुर्निवार्य्यस्य सर्व्वेषां श्रीखभावस्य चापलः। दुस्त्याज्यं योगिभिः सिद्धैरज्ञाभिश्च तपस्विभिः॥ जितेन्द्रियैर्जितक्रोधैः स्त्रीरूपं मोहकारणम्। सर्व्वमायाकरञ्चैव कामवर्द्धनकारणम्॥ ब्रह्मास्त्रं कामदेवस्य दुर्भेद्यं जयकारणम्। सुनिर्म्मितेन विधिना सर्व्वाद्यं ब्रह्मपूर्व्वजम्॥ मोक्षद्वारकवाटञ्च हरिभक्तिविरोधनम्। संसारबन्धनस्तम्भरज्जुरूपमकृन्तनम्॥ वैराग्यनाशबीजञ्च शश्वद्रागविवर्द्धनम्। पत्तनं साहसानाञ्च दोषाणामालयं सदा॥ अप्रत्ययानां चैतच्च खयं कपटमूर्त्तिमत्। अहङ्कारास्पदं शश्वद्विषकुम्भं सुधामुखम्॥ सर्व्वैरसाध्यमानञ्च दुराराध्यञ्च सर्व्वदा। स्वकार्य्यसाध्यं स्वाराध्यं कलहाङ्कुरकारणम्॥"

इति ब्रह्मवैवर्त्ते गणपतिखण्डे ६। ५५—६१॥

स्त्रीसंसर्गयुक्तपुंदर्शननिषेधो यथा,—

"रहःस्थलनियुक्तञ्च न दृश्यः स्त्रीयुतः पुमान्। स्त्रीसंसक्तञ्च पुरुषं यः पश्यति नराधमः॥ करोति रसभङ्गं वा कालसूत्रं व्रजेत् ध्रुवम्। तत्र तिष्ठति पापीयान् यावच्चन्द्रदिवाकरौ॥ विशेषतश्च पितरं गुरुं वा भूमिपं द्विज। रहःसु रतिसंसक्तं नहि पश्येद्विचक्षणः॥ कामतः कोपतो वापि यः पश्येत् सुरतोन्मुखम्। स्त्रीविच्छेदो भवेत्तस्य ध्रुवं सप्तसु जन्मसु॥ श्रोत्रौ वक्षःस्थलं वक्त्रं यः पश्यति परस्त्रियाः। कामतो वापि मूढ़श्च षण्डो भवति निश्चितम्॥"

इति ब्रह्मवैवर्त्ते गणपतिखण्डे। ४२। १०—१७॥

सा च त्रिधा रक्षितव्या यथा,—

"स्त्रीजातिरबला शश्वदधर्म्मीया स्वबन्धुभिः। जनकस्वामिपुत्रैश्च गर्हितार्थैश्च निश्चितम्॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे। ४। १८॥*॥

अपि च।

"पिता रक्षति कौमारे भर्त्ता रक्षति यौवने। पुत्रश्च स्थाविरे रक्षेत् न स्त्री स्वातन्त्र्यमर्हति॥"

इति दायतत्त्वम्॥ * ॥

अन्यच्च ।
"कौमारे रक्षिता तातो दत्त्वा पात्राय सत्कृती ।
सर्व्वदा रक्षिता कान्तस्तदभावे च तत्सुतः ॥
विश्ववश्यासु नारीणां रक्षितारश्चयः सदा ।
याः स्वतन्त्राश्च ता नष्टाः सर्व्वधर्म्मबहिष्कृताः ॥
अस्तत्कुलप्रसूतास्ताः कुलटा दुष्टमानसाः ।
मृतजन्मसमं पुण्यं तासां नश्यति पद्मज ! ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ।१७।८७-८४॥
अपरञ्च ।
"रक्षेत् कन्यां पिता बाल्ये यौवने पतिरेव ताम् ।
वार्द्धके रक्षते पुत्रो न स्त्रीणां स्वातन्त्र्यमर्हति ॥
पतिं विना न तिष्ठेत दिवा वा यदि वा निशि ॥"
इति गारुड़े । ६५ । ३१—३२ ॥*॥
सा सूर्य्यैरपि अदृश्या कर्त्तव्या । यथा,—
"परस्पृष्टा च या नारी या स्पृहां कुरुते परम् ।
सापि दुष्टा परित्याज्या चेत्याह कमलोद्भवः ॥
तस्मान्नारी परैर्यत्नाददृष्टा कृतिभिः सदा ।
अस्वर्य्यमस्पृशा या रामाः शुद्धास्ताश्च पतिव्रताः ॥
स्वच्छन्दगामिनी या च स्वतन्त्रा शूकरीसमा ।
अन्तर्दुष्टा सदा सैव निन्दितं परगामिनी ॥
स्वामिसाध्वी च या नारी कुलधर्म्मभिया स्थिता ।
कान्तेन सार्द्धं सा कान्ता वैकुण्ठं याति
निश्चितम् ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ।१८।११६-११६॥
तस्या मानावमानयोर्गुणदोषौ यथा,—
"पदे पदे शुभं तस्य यः स्त्रीमानञ्च रक्षति ।
अवमन्य स्त्रियं मूढो यो याति पुरुषाधमः ।
पदे पदे तदशुभं करोति पार्व्वती सती ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ३२ अध्यायः॥
उपपातिकास्त्रीत्यागे दोषो यथा,—
मोहिन्युवाच ।
"इङ्गितेनैव नारीणां सद्यो मत्तो भवेत् पुमान् ।
करोत्याकृष्य सम्भोगं यः स एवोत्तमो विभो ॥
ज्ञात्वा स्फुटमभिप्रायं नार्य्या संप्रेरितो हि यः ।
प्रयात् करोति यद्भारं पुरुषः स च मध्यमः ॥
पुनः पुनः प्रेरितश्च स्त्रिया कामार्त्तया च यः ।
तया न लिप्तो रहसि च स्त्रीवो न पुमानहो ॥
गृही तपस्वी कामी वा त्यजेत् स्त्रियमुपस्थिताम् ।
व्रजेत् परत्र नरकमपूज्यश्च भवेदिह ॥
भ्रष्टश्रीर्भ्रष्टरूपश्च भ्रष्टदर्पो भवेद्ध्रुवम् ।
स सद्यः स्त्रीवतां याति ब्रह्मन् शापेन योषितः॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ।३३।३—७ ॥
परस्त्रीसङ्गदोषो यथा,—
"सदापकीर्त्तिर्लभते परस्त्रीषु च वस्तुषु ।
तस्मात्तं नैव गच्छन्ति सन्तः सत्कीर्त्तिकारणे ॥
सार मामन्तरे बाल्ये मदीयं विषयं कुरु ।
अतस्तेन मनो लोलं भविता परवस्तुषु ॥
योषिद्रूपा च मे माया सर्व्वेषां मोहकारिणी ।
लीलया कुरुते मोहं स्वात्मारामस्य सन्ततम् ॥
दृष्ट्वा सञ्जायते देहे रागिणां सन्ततं रतिः ।
स्वभावभिधे मांसपिण्डेऽधरे लालालयेऽशुचौ ॥
श्रोणौ उरु स्तनं तासां कामदेवालयं सदा ।
तस्मात्ता न हि पश्यन्ति सन्तो हि धर्म्मभीरवः॥
को धर्म्मः किं यशस्तेषां का प्रतिष्ठा च किन्तपः।
किं वृद्धिर्विद्या ज्ञानञ्च परस्त्रीषु च यत्नतः ॥
इहाप्ययशो दुःखं नरकेषु परत्र च ।
वासः प्रहारस्तेषाञ्च ताड़नैः क्षमिभर्त्तृभिः ॥
दुःखबीजं सुखं मत्वा मूढ़ाश्च देवदोषतः ।
परस्त्रीसेवनं प्रीत्या कुर्व्वन्ति सततं सुदा ॥
उत्तमा मत्प्रदानोत्थं मत्कर्म्म मध्यमाः सदा ।
स्मरन्ति मूढ़धमाः परस्त्रीसेवनं सुदा ॥
विपत्तिः सन्ततं तस्य परवस्तुषु यत्नतः ।
विशेषतः परस्त्रीषु सुवर्णेषु च भूमिषु ॥
देवात् परस्त्रियं दृष्ट्वा विरमेद्यो हरिं स्मरन् ।
स्पृष्ट्वा परस्परवर्षं हस्तप्रक्षालनाच्छुचिः ॥
सन्ततं नातिसंसक्तः सन्तः स्त्रीषु च कामतः ।
यस्मायाधिज्ञानहानिलोकनिन्दाभयेन च ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ।३५।७८-८६॥
सभर्त्तृकायास्तु व्रतोपवासादिः पृथङ्निषिद्धो मनुना यथा,—
"नास्ति स्त्रीणां पृथक् यज्ञो न व्रतं नाप्युपोषणम् ।
पतिं शुश्रूषते यत्तु तेन स्वर्गे महीयते ॥"
विष्णुनापि भर्त्तुः समानव्रतचारित्वमित्युक्तम् ।
समानव्रतचारित्वं भर्त्तुर्व्रताचरणे तदानुकूल्यकारित्वम् । यत्र तु सावित्रीव्रतादौ विशेषविधिस्तत्र भर्त्तुरनुज्ञया पृथगपि । यथा ब्रह्मः ।
कामं भर्त्तुरनुज्ञया व्रतोपवासनियमेष्यादीनामभ्यासः स्त्रीधर्म्म इति । यत्तु ।
"पत्यौ जीवति या नारी उपोष्य व्रतमाचरेत् ।
आयुः संहरते पत्युः सा नारी नरकं व्रजेत् ॥"
इति विष्णूक्तं तदनुज्ञातविषयम् । इत्येकादशीतत्त्वम् ॥*॥ स्त्रीधर्म्मादि यथा,—
"या स्त्री भर्त्तुरसौभाग्या सासौभाग्या च
सर्व्वतः ।
शयने भोजने तस्या न सुखं जीवनं वृथा ॥
यस्या नास्ति प्रियप्रेम तस्या जन्म निरर्थकम् ।
तत् किं पुत्रे धने रूपे सम्पत्तौ यौवनेऽथवा ॥
यद्भक्तिर्नास्ति कान्ते च सर्व्वप्रियतमे परे ।
साशुचिर्धर्म्महीना च सर्व्वकर्म्मविवर्जिता ।
पतिर्व्यभिचरेद्भर्त्ता देवतं गुरुरेव च ।
सर्व्वस्माच्च गुरुः स्वामी न गुरुः स्वामिनः परः ॥
पिता माता सुतो भ्राता क्षिप्रो दातुमिदं धनम् ।
सर्व्वस्वदाता स्वामी च नृणां योषितां सुराः ॥
काचिदेव हि जानाति महासाध्वी च
स्वामिनम् ।
अतिसद्गुणयुक्ता च सुशीला कुलपालिका ॥
असद्गुणप्रसक्ता या दुःशीला धर्म्मवर्जिता ।
सुखदुष्टा योनिदुष्टा पतिं निन्दति कोपतः ॥
या स्त्री देहि सर्व्वपरं पतिं विष्णुसमं गुरुम् ।
कुम्भीपाके वसति सा यावदिन्द्राश्चतुर्दश ॥
व्रतं स्नानमृणं दानं सत्यं पुण्यं तपश्चरम् ।
पतिभक्तिविहीनाया भस्मीभूतं निरर्थकम् ॥
अतः किमत्र बहुना निबुरं पतिसौख्यदम् ।
अल्पाक्षरार्थदैवेन ब्रवीम्यस्मि निश्चितम् ॥
पतिदोषे महासाध्वी पतिं न निष्ठुरं वदेत् ।
यदि सोढुमशक्ता च प्राणांस्त्यजति धर्म्मतः ॥
पतिसेवा व्रतं स्त्रीणां पतिसेवा परं तपः ।
पतिसेवा परो धर्म्मः पतिसेवा सुरार्च्चनम् ।
पतिसेवा परं सत्यं दानतीर्थाद्युतीर्थकम् ॥
सर्व्वदेवमयः स्वामी सर्व्वदेवमयः शुचिः ।
सर्व्वपुण्यस्वरूपश्च पतिरूपी जनार्द्दनः ॥
या सती भर्त्तुरुच्छिष्टं भुङ्क्ते पादोदकं सदा ।
तस्या दर्शनपुण्यार्थं नित्यं वाञ्छन्ति देवताः ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे । ४७ । ७-२० ॥
अपि च ।
"भर्त्ता हि देवतं स्त्रीणां भर्त्ता च गतिरुच्यते ।
जीवपत्याः स्त्रियो भर्त्ता देवतं प्रसुरेव च ॥
या धर्म्मचारिणी नारी पतिव्रतपरायणा
नानुवर्त्तति भर्त्तारं सा सद्भिर्न प्रशस्यते ॥
पतिव्रता भर्त्तृपरा नारी भर्त्तृपरायणा ।
इह कीर्त्तिं परां प्राप्य प्रेत्य स्वर्गे महीयते ।
भर्त्तुश्चित्तानुगामिन्या देवाराधनशीलया ।
गार्हस्थ्यधर्म्मरतया भर्त्ता सेव्यस्त्रिया त्वया ॥"
इति वह्निपुराणम् ॥*॥
गृहिणीधर्म्मा यथा,—
"गृहिणीनां सदाचारं शृणुतां यत् श्रुतौ श्रुतम् ।
गृहिणी पतिभक्ता च देवब्राह्मणपूजिता ॥
सा शुद्धा प्रातरुत्थाय नमस्कृत्य पतिं गुरुम् ।
प्राङ्गणे मण्डलं दद्यात् गोमयेन जलेन च ॥
गृहकृत्यञ्च कृत्वा च स्नात्वागत्य गृहं सती ।
गुरुं विप्रं पतिं नत्वा पूजयेत् गृहदेवताम् ॥
गृहकृत्यं सुनिर्व्वर्त्य भोजयित्वा पतिं सती ।
अतिथिं पूजयित्वा च स्वयं भुङ्क्ते सुखं सती ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ।८४।१३—१६॥
स्त्रीणां त्रैविध्यं यथा,—
"उत्तमा पतिभक्ता सा किञ्चिद्धर्म्मसमन्विता ।
प्राणान्तेऽपि न कुरुते तं भारमयशस्करम् ॥
पूजयेत् सा यथा कान्तं तथा देवद्विजातिथिम् ।
व्रतानि चोपवासांश्च कुरुते सर्व्वपूजनम् ॥
गुरुणा रचिता यत्नात् भारञ्च न भजेत् भयात् ।
सा क्षत्रिया मध्यमा च यथाकिञ्चित् पतिं व्रजेत् ॥
स्थानं नास्ति क्षयं नास्ति नास्ति प्रार्थयिता नरः ।
तेन हे नन्द तासाञ्च सतीत्वमुपजायते ॥
अधमा परमा दुष्टास्वन्तासदृशा तथा ।
अधर्म्मशीला दुःशीला दुर्म्मुखा कलहप्रिया ॥
पतिं भर्त्सयते नित्यं भारञ्च सेवयेत् सदा ।
दुःखं ददाति कान्ताय विषतुल्यञ्च पश्यति ॥
भारद्वारमुपायेन हन्ति कान्तं मनोहरम् ॥"
भारद्वारं स्थाने न्यायद्वारमिति पाठः ।
"ददाति भर्त्रे नाधारं विषोक्तिं वक्ति सन्ततम् ।
धर्म्मिष्ठञ्च वरिष्ठञ्च गरिष्ठञ्च महीपते ॥
कामदेवसमञ्चापि भारं पश्यति कामतः ।
भ्रुभङ्गदृग्-कटाक्षेण शुभ्रस्यामीयसी सदा ॥
सुवेषं पुरुषं दृष्ट्वा युवानं रतिसूरकम् ।
योनिः क्लिद्यति नारीणां कामुकीनां निरन्तरम्॥
अधर्म्मं चिन्तयेत् शश्वत् भारञ्च परमं सुदा ॥

गुरुभिर्भर्त्सिता सा च रक्षिता च प्रतेन च ।
तथापि चारं कुरुते नापि साध्वी नृपैरपि ॥
नास्ति तस्याः प्रियं किञ्चित् सर्व्वं कार्य्यवशेन च ।
गावस्तृणमिवारण्ये प्रार्थयन्ती नवं नवम् ॥
विद्युल्लेखा जले रेखा तस्याः प्रीतिस्तथैव च ।
अधर्म्मयुक्ता सततं कपटं वक्ति निश्चितम् ॥
मृते तपसि धर्म्मे च न मनो यत्नकर्म्मणि ।
न गुरौ न च देवेषु चारे स्त्रियश्च चञ्चलम् ॥
स्त्रीजातित्रिविधानाञ्च कथा च कथिता मया ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ।८।२६-४०॥
स्त्रीसंसर्गे दोषो यथा,—
सनत्कुमार उवाच ।
"अयि भातः किं करोषि कुशलं युवतीपते ।
स्त्रीपुंसोर्व्वर्त्तते प्रेम नित्यं तन्नित्यनूतनम् ॥
अर्गलं ज्ञानमार्गस्य भक्तिद्वारकपाटकम् ।
मोक्षमार्गव्रजस्थितं चिरं बन्धनकारणम् ॥
गर्भवासस्य बीजञ्च परं नरककारणम् ।
योषिद्वक्षा गरलं सद्यः सद्यो याति नराधमः ॥"
इति च नवमे । १२० । ३१—३३ ॥
स्त्रीणां स्वभावा यथा,—
"स्त्रीस्वभावं परिचक्ष्व आश्चर्य्यं पापकारकम् ॥
स्वर्गे नास्ति रहो नास्ति नास्ति छले विभावना ।
तेन नारद नारीणां सतीत्वमुपजायते ॥
एकवामा तथा गौरी श्यामा वा वरवर्णिनी ।
मध्यगता प्रगल्भा च वयोऽनीतास्तथा स्त्रियः ॥
सुरूपं पुरुषं दृष्ट्वा चरन्ति मुनिसत्तम ।
स्वभाव एष नारीणां प्रायस्य हरणे कारणम् ॥"
इति वाराहे स्वयंप्रतिष्ठानमाहात्म्यनामाध्यायः ॥ ७ ॥
अपि च ।
"विद्याधारो ज्ञानभ्यां स्त्रीणां घातः कुचेलता ।
व्याधीनां भोजनं शीघ्रं शत्रोर्घातः प्रगल्भता ॥
नरकस्य पथो दक्षः कुमित्रस्यात्मभावनम् ।
दूषयन् पुण्यानु नारीणां ब्राह्मणस्यानिमन्त्रिता ॥
दुर्व्वाक्यः शिल्पिनो दासा दुष्टाश्च षटपदाः
स्त्रियः ।
नार्च्चिता मार्दवं यान्ति न ते सत्कारभाजनाः ॥
त्यागीयात् प्रेयसे भृत्यान् दान्यवान् यमनागमे ।
मित्रत्यागादि काले च भार्य्यान् विभवक्षये ॥
स्त्रीणां द्विगुणमाहारः प्रज्ञा चैव चतुर्गुणा ।
षड्गुणो व्यवसायश्च कामश्चाष्टगुणाः स्मृताः ॥
न मन्त्रेण जयेन्निद्रां न कामेन स्त्रियं जयेत् ।
न चेन्धनैर्जयेद्वह्निं न सर्व्वेण जयां जयेत् ॥
समाधिभोजनैः स्त्रिग्धैर्मैथुनैः शीघ्रसादनैः ।
पञ्चेन्द्रियाणां दर्पेण कामः स्त्रीषु विजृम्भते ॥
ब्रह्मचर्य्येण वक्तव्यः प्राप्तं ममाधर्षिणम् ।
दृष्ट्वं हि पुरुषं दृष्ट्वा योनिः प्रसूयते स्त्रियाः ॥
सर्व्वेषां पुरुषं दृष्ट्वा भावरं यदि वा तृणम् ।
युवं वा भिक्षुकं वाऽपि स्रवति सततं स्त्रियः ॥
नदश्च नार्य्यश्च समस्वभावाः
चञ्चलता वेगवताधिकत्व ।
दोषैश्च दोषैश्च निपातयन्ति
नदी हि कूलानि कुलानि नार्य्यः ॥
नदी पातयते कूलं नारी पातयते कुलम् ।
नारीणाञ्च नदीनाञ्च स्वच्छन्दललिता गतिः ॥
नाग्निस्तृप्यति काष्ठानां नापगानां महोदधिः ।
नान्तकः सर्व्वभूतानां न पुंसां वामलोचना ॥
मनोऽनुकूलाः प्रमदा रूपवत्यः स्वलङ्कृताः ।
वासः प्रासादपृष्ठेषु स्वर्गः स्याच्छुभकर्म्मणः ॥
न दानेन न मानेन नार्জ্জवेन न सेवया ।
न प्रश्रयेण न श्राद्धेन सर्व्वदा विषमाः स्त्रियः ॥"
इति गारुडे १०६ अध्यायः ॥७॥
स्त्रीवधनिषेधो यथा,—
"अवध्याश्च स्त्रियं प्राहुस्तिर्य्यग्योनिगतेष्वपि ।
स त्वं सुपृथिवीपाल न धर्म्मं त्यक्तुमर्हसि ॥"
इति वह्निपुराणे पृथोरुपाख्यानमाध्यायः ॥
स्त्रीणामात्मदाने अस्वातन्त्र्यं यथा,—
"ततोऽब्रवीच्छाण्डवला नाहं त्वां पार्थिवात्मज ।
दातुं शक्ता तथात्मानं स्वतन्त्रा नहि योषितः ॥"
इत्युपक्रम्य ॥
"विश्वकर्म्मसुता साध्वी नाम्ना चित्राङ्गदाभवत् ।
सा कदाचिन्महारण्यं सखीभिः परिवारिता ।
जगाम नैमिषं नाम स्नातुं कमललोचना ।
सा स्नातुमवतीर्णा च यथाभ्यागमरेश्वरः ॥
सुदेवतनयो धीमान् सुरथो नाम नामतः ।
तां ददर्श च तन्वङ्गीं शुभाङ्गीं मदनातुरः ॥
संदृष्टः सा वरारोहा प्राह वचनं सत्यसंयुता ।
असौ नराधिपसुतो मदनेन कदर्थते ।
मदर्थेन चमं मेऽस्य स्वप्रदानं सुरूपिणः ॥
सखस्तामब्रुवन् बाले न प्रगल्भासि सुन्दरि ।
न स्वातन्त्र्यं तवास्तीह प्रदाने स्वात्मनोऽनघे ॥
पिता तवास्ति धर्म्मिष्ठः सर्व्वशिल्पविशारदः ।
न ते युक्तमिहात्मानं दातुं नरपतेः स्वयम् ॥"
इति वामनपुराणे ६० अध्यायः ॥ ७ ॥
स्त्रीणां मध्ये गुरवो यथा,—
"माताग्र्या मातुलानी तथा मातुश्च सोदरा ।
श्वश्रूः पितामही ज्येष्ठा धात्री च गुरवः स्त्रीषु ॥
इत्युक्तो गुरुवर्गोऽयं माननः पितृतो द्विजाः ।
अनुवर्त्तनमेतासां मनोवाक्कायकर्म्मभिः ॥"
इत्यादि ॥
गुरुस्त्रीरपि वर्त्तेषां पूज्याः पञ्च विशेषतः ।
तेषामाद्याश्चयः श्रेष्ठास्तिस्रो माता सुपूजिता ॥
यावत् पिता च माता च द्वावेतौ निर्व्वि-
कारिणौ ।
तावत् सर्व्वं परित्यज्य पुत्रः स्यात्परायणः ॥
माता पिता च सुप्रीतौ स्यातां पुत्रगुणैर्यदि ।
स पुत्रः सकलं धर्म्मं प्राप्नुयात्तेन कर्म्मणा ॥
नास्ति मातृसमं देवः नास्ति मातृसमं गुरुः ।
तयोः प्रत्युपकारोऽपि न कथञ्चन विद्यते ॥
तयोर्नित्यं प्रियं कुर्य्यात् कर्म्मणा मनसा गिरा ।
न ताभ्यामनृतं ब्रूयाद्यो धर्म्ममयं समाचरेत् ॥"
इति कौर्म्मे उपविभागे ११।२०,३१,३२-३७॥
अभिचारिण्याः स्त्रिया निर्व्वास्यत्वं यथा,—
"कृत्याभिचारं सततं विषमाशीविषोपमाम् ।
परिभूतामपत्न्यां वाप्यभिचारिणीम् ॥"
स्त्रीणां मेध्यत्वं वाच्यत्वञ्च यथा,—
"सोमः शौचं ददौ तासां गन्धर्व्वश्च शुभां
गिरम् ।
पावकः सर्व्वभक्षित्वं मेध्या वै योषितो मृताः ॥
अभिचाराहतौ शुद्धिर्गर्भे त्यागो विधीयते ।
गर्भभर्तृवधे तासां तथा महति पातके ॥
सुरापी व्याधिता दुष्टा वन्ध्यार्थघ्न्यप्रिया च या ।
भर्त्सना वाच्यता स्त्रीणां त्रयो ह्येते भयेष्वपि ॥"
तस्याः प्रशंसा यथा,—
"यत्राविरुद्धं दम्पत्योस्त्रिवर्गश्चेह वर्त्तते ।
मृते जीवति वा पत्यौ या नान्यमुपगच्छति ॥
सेह कीर्त्तिमवाप्नोति मोदते चोमया सह ।
शुभां गतिं सतीनाञ्च प्राप्नो त्यापरजां स्त्रियः ॥
स्त्रीभिर्भर्त्तृवचः कार्य्यं एष धर्म्मः परः स्त्रियाः ॥"
स्त्रीगमनार्हकालो यथा,—
"षोडशर्त्तुर्निशाः स्त्रीणां तासु युग्मासु
संविशेत् ।
ब्रह्मचार्य्येव पर्व्वण्याद्याश्चतसस्तु वर्জ্জयेत् ॥
एवं गच्छेत् स्त्रियं कामी सर्व्वा रूपेण वर्জ্জयेत् ।
लक्षणं जनयेदेव पुत्रं रोगविवर्জ্জितम् ॥
यदा कामी भवेदापि स्त्रीणामपरमुत्सृजन् ।
स्वदारनिरतश्चैव स्त्रियो रक्ष्या यतस्ततः ॥"
भूषणादिना भर्त्रादिभिः स्त्रियः पूज्या यथा,—
"भर्त्तृभ्रातृपितृज्ञातिश्वश्रूश्वशुरदेवरैः ।
बन्धुभिश्च स्त्रियः पूज्या भूषणाच्छादनाशनैः ॥"
स्त्रीभिः श्वश्रूश्वशुरयोः पादवन्दनं सदा कार्य्यम् ।
यथा,—
"संयतोपस्करा दक्षा शुद्धा व्ययपराङ्मुखी ।
श्वश्वाः श्वशुरयोः कुर्य्यात् पादयोर्वन्दनं सदा ॥"
प्रोषितभर्तृकया क्रीड़ादिकं वर्জ্জनीयं यथा,—
"क्रीड़ां शरीरसंस्कारं समाजोत्सवदर्शनम् ।
हास्यं परगृहे यानं त्यजेत् प्रोषितभर्तृका ॥"
ज्येष्ठया स्त्रिया सह धर्म्मकर्म्मानुष्ठानं दर्शयम् ।
यथा,—
"ज्येष्ठां धर्म्मविधौ कुर्य्यान्न कनिष्ठां कदाचन ।
दारयित्वाग्निहोत्रेण स्त्रियं हीनवर्णां यतिः ॥
आहरेद्विधिवद्दारानग्निहोत्रसमन्वितः ।
द्विजो भार्य्यादिवं सद्भिर्दीक्षितश्च यदा च ॥"
इति गारुडे । ८५ । ३२—३६ ॥
अधमस्त्रीणां कुलनाशकत्वं यथा,—
"अधमाश्च स्त्रियः पुंसां कुलनाशाय मैथुनम् ।
पैशुन्यं जनवार्त्तान्तं चित्तं दुःखयतीक्षणम् ॥
राज्यधैर्य्यप्रशमापान्तं ज्ञानान्तं ब्रह्मचर्य्यकम् ।
आचारं धीगधायान्तं कुलस्त्रान्तं स्त्रियश्चताः ॥
सर्व्वे क्षयान्ता निचयाः पतनान्ता समुच्छ्रिताः ॥"
स्त्रीनायके वासनिषेधादि यथा,—
"अनायके न वसेत्तत्र वसेत्तत्र बन्धुनायके ।
स्त्रीनायके न वसेत्तत्र वसेत्तत्र राजनायके ॥
त्रयोदश्यामष्टमाद्यां नवमे तु चतुर्दशीम् ।
दशम्यां स्त्रीधनं यत्नाद्यात्रायां परिवर्জ্जयेत् ॥
अनधिष्ठाताधुष्यां भिक्षां परिवर्जयेत् च ।

स्त्रीगवी, स्त्री, (स्त्री चासौ गौश्चेति। समासे पच्। स्त्रीयां ङीप्।) धेनुः। गाइ इति भाषा। तत्पर्य्यायः। तुम्बा २ निजिम्बा ३ रोहिणी ४। इति त्रिकाण्डशेषः॥ (यथा, काशिकायाम्। ३। ३। ७१। "स्त्रीगवीषु पुङ्गवानां गर्भाधानाय प्रथमसुपसरणमुच्यते॥")

स्त्रीगुरुः, पुं, (स्त्री चासौ गुरुश्चेति।) दीक्षाकर्त्री। मन्त्रमात्रोपदेष्ट्री। लक्षणञ्च यथा,—
"साध्वी चैव सदाचारा गुरुभक्ता जितेन्द्रिया।
सर्व्वमन्त्रार्थतत्त्वज्ञा सुशीला पूजने रता॥
सर्व्वलक्षणसम्पन्ना रूपिका पद्मलोचना।
रत्नालङ्कारसंयुक्ता स्वर्णाभरणभूषिता॥
शान्ता कुलीना कुलजा चन्द्रास्या सर्व्व-
बुद्धिगा।
अनन्तगुणसम्पन्ना रुद्रत्वदायिनी प्रिया॥
गुरुरूपा शक्तिदात्री शिवज्ञानविरूपिणी।
गुरुयोग्या भवेत् सा हि विधवापरिवर्ज्जिता॥*
स्त्रियो दीक्षा शुभा प्रोक्ता मातुश्चाष्टगुणा
स्मृता।
पुत्रिणी विधवा यात्रा केवलानन्दकारिणी॥
मिश्रमन्त्रं यदि तदा गृह्णीयाद्विधवासुखे।
केवलं सुफलं तत्र मातुरष्टगुणं स्मृतम्॥
स्वयं वा स्वप्नविलये ददाति यदि मन्त्रराजम्।
तत्राष्टगुणमाप्नोति यदि सा पुत्रिणी सती॥
यदि माता स्वीयमन्त्रं ददाति तनुजाय च।
तदाष्टसिद्धिमाप्नोति भक्तिमार्गे न संशयः॥
तदैव दुर्लभं दैवं यदि माता प्रदीयते॥
आदौ भक्तिं ततो मुक्तिं सम्प्राप्य कामरूप-
धृक्।
सप्तमकोटिविद्यार्थं जानाति गात्र संशयः॥
स्वप्ने वा यदि वा माता ददाति च स्वमन्त्रकम्।
पुनर्दीक्षां सोऽपि कृत्वा दानवत्स्वमवाप्नुयात्॥
यदि भाग्यवशेनैव जननीच्छानुवर्त्तिनी।
तदा सिद्धिमवाप्नोति तत्र मन्त्रं विचारयेत्॥
स्वीयमन्त्रोपदेशेन न कुर्य्यादगुरुचिन्तनम्॥"
इति रुद्रयामले उत्तरखण्डे २ पटलः पूर्व्वभागे १५ पटलश्च॥* तन्त्रान्तरं गुप्तसाधनतन्त्रे २ पटले तन्त्रपुरन्दरतन्त्रे ७ पटले तन्त्रान्तरं कवचस्य मालतीभैरवतन्त्रे ७ पटले द्रष्टव्यम्। तन्त्रान्तरे च कङ्कालमालिनीतन्त्रे २ पटले वैष्णवेन्या॥

स्त्रीघोषः, पुं, (स्त्रीणां घोषो यत्र।) प्रत्यूषः। इति केचित्॥

स्त्रीचित्तहारी, [न्] पुं, (स्त्रीणां चित्तं हरतीति। हृ+णिनिः।) शोभाञ्जनः। इति त्रिकाण्डशेषः॥ नारीमनोहारिणि, त्रि॥

स्त्रीचिह्नं, क्ली, (स्त्रियश्चिह्नम्।) योनिः। इति जटाधरः॥ नारीलक्षणे च॥

स्त्रीचौरः, पुं, (स्त्रियाश्चौरः।) कामुकः। तत्पर्य्यायः। रतश्चिन्तकः २। इति त्रिकाण्डशेषः। नारीहरणेऽपि॥

स्त्रीजितः, पुं, (स्त्रिया जितः।) स्त्रीवशीभूतः। यथा, ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे। ४२। १५।
"स्त्रीजितस्पर्शमात्रेण सर्व्वं पुण्यं प्रणश्यति।
न भूमौ पातकी पापात् पापिनां स्त्रीजितात्
परः॥"

स्त्रीता, स्त्री, स्त्रीत्वम्। स्त्रिया भावः इत्यर्थे तल्-प्रत्ययटाप्प्रत्ययाभ्यां निष्पन्नम्॥

स्त्रीधनं, क्ली, (स्त्रिया धनम्।) स्त्रीस्वत्वास्पदीभूतधनम्। तत् षड्विधम्। यथा,—
"अध्यग्न्यध्यावाहनिकं भर्त्तृदायं तथैव च।
भ्रातृदत्तं पितृभ्याप्त षड्विधं स्त्रीधनं स्मृतम्॥"
इति दायभागधृतनारदवचनम्॥*॥
अथ स्त्रीधनम्। तच्च कात्यायनः।
"प्राप्तं शिल्पेषु यद्वित्तं प्रीत्या चैव यदन्यतः।
भर्त्तुः स्वाम्यं भवेत्तच्च शेषस्तु स्त्रीधनं स्मृतम्॥"
अन्यतः पितृमातृभर्त्तृकुलव्यतिरिक्तादन्यस्मात्। शिल्पेन वा यदर्জ্জितं तत्र भर्त्तुः स्वातन्त्र्यं तेन स्त्रिया अपि धनं न स्त्रीधनं व्यवस्वातन्त्र्यात् यतद्व्यतिरिक्तधने स्वत्वं स्त्रिया एव दानाद्यधिकारात्। मनुर्विष्णुः।
"पत्यौ जीवति यः कश्चिदृणकारो धृतो भवेत्।
न तं भजेरन् दायादा भजमानाः पतन्ति ते॥"
पत्युरदत्तेऽपि तदनुज्ञया परिहितोऽलङ्कार-स्तावता एव भार्य्यायाः स्त्रीधनो भवतीति मेधातिथिः॥ कात्यायनः।
"ऊढया कन्यया वापि पत्युः पितरि वा गृहे।
भर्त्तुः सकाशात् पित्रोर्वा लब्धं यौतादिकं
स्मृतम्॥
यौतादिकं धनं प्राप्य स्त्रीणां स्वातन्त्र्यमिष्यते।
यस्मात्तदाकृष्टसारार्थं तेनेदं तत् प्रजीवनम्॥
यौतादिके सदा स्त्रीणां स्वातन्त्र्यं परिकीर्त्तितम्।
विक्रये चैव दाने च यथेष्टं स्थावरेष्वपि॥"
यौतादेयः पितृमातृभर्त्तृकुलसम्बन्धिभ्यो लब्धं यौतादिकम्। आकृष्टसारमनेकार्थम्। नारदः।
"भर्त्रा प्रीतेन यद्दत्तं स्त्रियै तस्मिन् मृतेऽपि तत्।
सा यथाकामसमर्थीयाद्दाद्वा स्थावरादृते॥"
भर्त्तृदत्तविशेषणात् भर्त्तृदत्तस्थावरादन्यत्स्थावरं देयमेव। अन्यथा यथेष्टं स्थावरेष्वपि इति कात्यायनोक्तं विरुध्यते। कल्पतरुरत्नाकरयोः कात्यायनः।
"अपकारक्रियायुक्ता निर्लज्जा चार्थनाशिनी।
अभिचाररता या च स्त्रीधनं न च सार्हति॥"
याज्ञवल्क्यः।
"दुर्भिक्षे धर्म्मकार्य्ये वा व्याधौ सम्प्रतिरोधके।
गृहीतं स्त्रीधनं भर्त्रा नाकामो दातुमर्हति॥"
सम्प्रतिरोधके भोजनाद्यवरोधकारिण्युत्तमर्णादिके। अन्यत्र तु कात्यायनः।
"न भर्त्ता नैव च सुतो न पिता भ्रातरो न च।
आददीरन् वा विमर्गे वा स्त्रीधनं प्रमदाः स्वयं॥"*
अथ स्त्रीधनाधिकारिणः। देवलः।
"सामान्यं पुत्रकन्यानां सतायां स्त्रीधनं प्रति।
अप्रजायां हरेद्भर्त्तुः माता भ्राता पितापि वा॥"

यत्र द्वन्द्वनिर्देशात् पुत्रकन्ययोस्तुल्याधिकारः। अन्यतराभावे अन्यतरस्य तद्ग्रहणम्। एतयोरभावे ऊढाया दुहितुः पुत्रवत्याः सम्भावितपुत्रायाश्च तुल्याधिकारः। स्वपुत्रद्वारेण पार्व्वण्ये।
"सपिण्डीकरणादूर्द्ध्वं यत् पितृभ्यः प्रदीयते।
सर्व्वेष्वंशहरा माता इति धर्म्मेषु निश्चयः॥"
इति भ्रातृतदपोक्तसपिण्डीकरणसम्भवात्। तथा च नारदः।
"पुत्राभावे तु दुहिता तुल्यसन्तानदर्शनात्।"
अतएव एतदप्रदुहित्रभावे दौहित्राधिकारः। तदभावे दौहित्र्याधिकारः।
"दौहित्रोऽपि च्यवनेन सन्तारयति पैतृकात्।"
इति मनुवचने दौहित्रे पैतृकधर्म्मातिदेशात्। पुत्रेण परिणीतदुहितुर्व्यभिचाद्व्याधकर्त्तृकेण वाध्यदुहितृपुत्रवाधस्य न्याय्यत्वात्। एवं तदभावे प्रपौत्रः तद्दौहित्रदौहित्रत्वात्। तदभावे वन्ध्याविधवयोर्म्मातृधनाधिकारः तयोरपि तत्सन्तानत्वात्। तदभावे तु भर्त्ता। तच्च न पितृमातृदत्तधनविषयं तत्र भ्रातुरधिकारात्। तथा च वृद्धकात्यायनः।
"पितृभ्यां यद्धनं दत्तं दुहितुः स्यादयं धनम्।
अप्रजायामतीतायां भ्रातृगामि तु सर्व्वदा॥"
मातुः परिणयनकालसम्भवन्तु पुत्रसत्त्वेऽपि क्रमेणानूढोढदुहितृणामेवाधिकारः। मातुः पारिणाय्यं स्त्रियो भर्त्तरश्नित्रि वशिष्ठोक्तेः। स्त्रीधनं दुहितृणामप्रजायामप्रतिष्ठितानामिति गौतमवचनेन प्रथममप्रजानामवाग्दत्तानां तदभावे त्वप्रतिष्ठितानां वाग्दत्तानां देयदर्शे नष् तदभावे चकारसमुच्चितानामूढानां स्त्रीधनं दुहितृणामिति बालम्भट्टः प्रागुक्तत्वात् अप्रतिष्ठितानामित्यादेस्तु क्रमार्थत्वेनोपसंहारार्थत्वात्। यत्त आह भगुः।
"मातुश्च यौतुकं यत् स्यात् कुमारीभाग एव सः॥"
यौतुकपदं तु मिथुनेऽप्यस्मात् सिद्धं मिथुनता च स्त्रीपुंसयोर्विवाहाङ्गत्वात्। यदेतत् हृदयन्तव तदस्तु हृदयं मम यदिदं हृदयं मम तदस्तु हृदयं तव इति मन्त्रलिङ्गात्। यौतुकं तदिति वाचस्पतिमिश्रायस्मकुटधृतात् यौतुकं यौतकमपि साधु। परिणयनकालः परिणयनपूर्व्वापरीभूतकालः स च वृद्धारम्भपक्षभिवादनान्तो विवाहतत्त्वे विवृतः। यत्तु मनुवचनम्।
"स्त्रियास्तु यद्भवेद्वित्तं पित्रा दत्तं कथञ्चन।
ब्राह्मणी तद्धरेत् कन्या तदपत्यस्य वा भवेत्॥"
इति तत् पित्रा दत्तमिति विशेषणाद्विवाहसमयादन्यदपि पितृदत्तं कन्याया एवेत्यतदर्थम्। ब्राह्मणीपदन्तु कन्यामात्रपरम्। यदा क्षत्रियादिस्त्रीणामसपत्नानां पितृदत्तं धनं सपत्नीदुहिता ब्राह्मणीकन्या हरेत् न पुनरप्रस्त्रीधनं भर्त्तुरिति यत्नाबकाशः। इति वर्षनाथः। तदभावे पुत्राधिकारः।

"दुहितॄणामभावे तु रिक्थं पुत्रेषु तद्भवेत् ।"
इति मनुवचनात् ।

एवं पुत्राधिकारात् प्राक् दुहितृधिकारविधायकवचनान्तरार्थमेतद्विषयकालि । पुत्राद्यभावे तु आसुरादिपञ्चकविवाहकर्त्रीनं स्त्रीधनं भर्त्तुः। स्यातुरादिचयविवाहकर्त्रीनन्तु मातुः तदभावे पितुः । यथा मनुः ।

"आसुरे दैवार्षगान्धर्व्वप्राजापत्येषु यद्धनम् ।
अप्रतीतायामप्रजायां भर्त्तुरेव तदिष्यते ।
यत्तस्याः स्यात् धनं दत्तं विवाहेष्वासुरादिषु ।
अप्रतीतायामप्रजायां मातापित्रोस्तदिष्यते ।"

कन्याधनाधिकारे क्रममाह बौधायनः ।

"रिक्थं दुहितायाः कन्याया ब्रह्मीयुः सोदराः
समम् ।

तदभावे भवेन्मातुस्तदभावे भवेत् पितुः ।"

अत्र क्रमदर्शनात् पूर्ब्बवचने मातापित्रोरित्यत्र माहक्रमेणाधिकारो नतु इन्द्वनिर्द्देशात् समुच्चितेन । इत्यृतिः ।

"माहस्वसा मातुलानी पितृष्वस्री पितृस्वसा ।
श्वश्रूः पूर्ब्बजपत्नी च माहतुल्या प्रकीर्त्तिता ।
यदागामौरसो नष्टात् सुतो दौहित्र एव वा ।
तत्सुतो वा धनं तासां स्वसीयाद्याः समाप्नुयुः ।"

स्त्रीरत्नपरं कन्यापुत्रोभयपरम् । सुत इति सपत्नीपुत्रपरम् ।

"सर्व्वासामेकपत्नीनामेका चेत् पुत्रिणी भवेत् ।
सर्व्वास्तांस्तेन पुत्रेण प्राह पुत्रवतीर्मनुः ।"
इति मनुस्मृतेः ।

एकपत्नीनामिति एकः पतिर्यासां ताः । न तु मुख्यपरमौरसविशेषणं वैयर्थ्यात् । सपत्नीपुत्राद्यभावे स्वसीयाद्यधिकारापत्तेश्च । ततश्च इति यौक्तः सपत्नीपौत्रपरं नतु दौहित्रपुत्रपरं तस्य स्वमौत्र्यभर्त्तृपिण्डदानानाधिकारात् । अत्र प्रागुक्तानुसारात् दौहित्रपर्य्यन्तानन्तरमेव सपत्नीपुत्रतत्पुत्रयोरधिकारः । न तु प्रागुक्तभर्त्रादिपिण्डपर्य्यन्ताभावेऽपीति वाच्यं भर्त्रादीनां धनिभौत्र्यधनं पिण्डदानानधिकारात् । तस्मादेतेषां सपत्नीपौत्रान्तानां ततश्च इति वाक्यस्थतच्छिब्दानाम् ।

"भ्रातॄणां पुत्रकन्याया स्तयां स्त्रीधनं
विदुः ।
अप्रजासां हरेत् भर्त्ता माता भ्राता पितापि
वा ।"

इति देवलोक्तानां भर्त्रादिपिण्डपर्य्यन्तानामभावे तु मातरि श्वश्रूश्चाश्वश्रूरादिषु स्त्रीयाद्या स्त्रमेव भगिनीसुतभर्त्तृभागिनेयभर्त्तृपुत्रकनिष्ठो भ्रातृपुत्र-भ्रातृपुत्र-भ्रातृ-देवराणां माहस्वस्रादिधने अधिकारः । अनन्यगतेरंशत्वात् । अत्र ।

"अप्रजास्तु मृते भर्त्तरि पितुः पित्रोः पतत्यसौ ।
अपुत्रे श्वश्रूदत्तेषां पञ्चमी गोपपद्यते ।"

इति दायभागधृतबृहस्पतिवचनात् ।

V. 111

स्त्रीपण्योपजीवी, [न्] पुं, (स्त्रीपण्येन उपजीवतीति । उप + जीव + णिनिः ।) स्त्रीभोगार्थमन्यस्मै स्त्रियं दत्त्वा तद्धनोपजीवी । इति महाभारते दानधर्म्मः ॥

स्त्रीपुंधर्म्मः, पुं, (स्त्री च पुमांश्च स्त्रीपुंसौ । तयोर्धर्म्मः ।) स्त्रीपुंसयोर्व्यवहारः । स च चतुर्दशविवादपदान्तर्गतविवादविशेषः । यथा,—

"स्त्रीपुंधर्म्मो विभागश्च द्यूतमाङ्क्ष्यमेव च ।
पदान्यष्टादशैतानि व्यवहारस्थितावहि ॥"
इति मानवे ८ अध्यायः ॥

तद्विवरणं यथा,—

"पुरुषस्य स्त्रियाश्चैव धर्म्मे वर्त्मनि तिष्ठतोः ।
संयोगे विप्रयोगे च धर्म्मान् वक्ष्यामि शाश्वतान् ॥
अस्वतन्त्राः स्त्रियः कार्य्याः पुरुषैः स्वैर्दिवानिशम् ।
विषयेषु च सज्जन्त्यः संस्थाप्या आत्मनो वशे ॥
पिता रक्षति कौमारे भर्त्ता रक्षति यौवने ।
रक्षन्ति स्थविरे पुत्रा न स्त्री स्वातन्त्र्यमर्हति ॥
कालेऽदाता पिता वाच्यो वाच्यश्चानुपयन् पतिः ।
मृते भर्त्तरि पुत्रस्तु वाच्यो मातुररक्षिता ॥
रक्षेभ्योऽपि प्रयत्नेभ्यः स्त्रियो रक्ष्या विशेषतः ।
द्वयोर्हि कुलयोः शोकमावहेयुररक्षिताः ॥
इमं हि सर्व्ववर्णानां पश्यन्तो धर्म्मसुत्तमम् ।
यतन्तां रक्षितुं भार्य्यां भर्त्तारो दुर्ब्बला अपि ॥
अपि प्रवृत्तिं चरित्रञ्च कुलमात्मानमेव च ।
स्वञ्च धर्म्मं प्रयत्नेन जायां रक्षन् हि रक्षति ॥
पतिर्भार्य्यां संप्रविश्य गर्भो भूत्वेह जायते ।
जायायास्तद्धि जायात्वं यदस्यां जायते पुनः ॥
यादृशं भजते हि स्त्री सुतं सूते तथाविधम् ।
तस्मात् प्रजाविशुद्ध्यर्थं स्त्रियं रक्षेत् प्रयत्नतः ॥
न कश्चित् योषितः शक्तः प्रसह्य परिरक्षितुम् ।
एतैरुपाययोगैस्तु शक्यास्ताः परिरक्षितुम् ॥
अर्थस्य संग्रहे चैनां व्यये चैव नियोजयेत् ।
शौचे धर्म्मेऽन्नपक्त्यां च पारिणाह्यस्य वेक्षणे ॥
अरक्षिता गृहे रुद्धाः पुरुषैराप्तकारिभिः ।
आत्मानमात्मना यास्तु रक्षेयुस्ताः सुरक्षिताः ॥
पानं दुर्জ্জनसंसर्गः पत्या च विरहोऽटनम् ।
स्वप्नोऽन्यगेहवासश्च नारीसंदूषणानि षट् ॥
नैता रूपं परीक्षन्ते नासां वयसि संस्थितिः ।
सुरूपं वा विरूपं वा पुमानित्येव भुञ्जते ॥
यौवनाच्चलचित्ताच्च नैस्नेह्यात् स्वभावतः ।
रक्षिता यत्नतोऽपीह भर्त्तृष्वेता विकुर्व्वते ॥
एवं स्वभावं ज्ञात्वासां प्रजापतिनिसर्गजम् ।
परमं यत्नमातिष्ठेत् पुरुषो रक्षणं प्रति ॥
प्रच्यासनमलङ्कारं कामं क्रोधमनार्জ্জवम् ।
द्रोहभावं कुचर्य्याञ्च स्त्रीभ्यो मनुरकल्पयत् ॥
नास्ति स्त्रीणां क्रिया मन्त्रैरिति धर्म्मे व्यवस्थितः ।
निरिन्द्रिया ह्यमन्त्राश्च स्त्रियोऽनृतमिति स्थितिः ॥
तथा च श्रुतयो वक्ष्यो निगीता निगमेष्वपि ।
स्वातन्त्र्यप्रतिषेधार्थं तासां प्रस्तुत्य निष्कृतीः ॥
यस्मै माता प्रतुतुभे विश्वरूपमपत्नता ।
तस्मै रेतः पिता तक्षामित्यस्यैतदिदर्शनम् ॥
ध्यायन्तमिष्टं यत्किञ्चित् मानस्याश्च चेतसा ।

स्त्रीपरः, पुं. (स्त्रीणां परः प्रियः ।) पुरुषः । इति जटाधरः ॥

स्त्रीपरः, पुं. (स्त्रीषु परः निरतः ।) मिथुनः । कामुकः । इति केचित् ॥

तस्येव अभिचारस्य निष्कृतिः सम्यगुच्यते ॥
यादृग्गुणेन भर्त्रा स्त्री संयुज्येत यथाविधि ।
तादृग्गुणा सा भवति समुद्रेणेव निम्नगा ॥
अक्षमाला वशिष्ठेन संयुक्ताधमयोनिजा ।
शारङ्गी मन्दपालेन जगामाभ्यर्हणीयताम् ॥
एताश्चान्याश्च लोकेऽस्मिन्नपकृष्टप्रसूतयः ।
उत्कर्षं योषितः प्राप्ताः स्वैः स्वैर्भर्तृगुणैः शुभैः ॥
एवोदितो लोकयात्रा नित्यं स्त्रीपुंसयोः शुभाः ।
प्रेत्येह च सुखोदर्कान् प्रजाधर्मान्निबोधत ॥
प्रजनार्थं महाभागाः पूजार्हाः गृहदीप्तयः ।
स्त्रियः श्रियश्च गेहेषु न विशेषोऽस्ति कश्चन ॥
उत्पादनमपत्यस्य जातस्य परिपालनम् ।
प्रत्यहं लोकयात्रायाः प्रत्यक्षं स्त्रीनिबन्धनम् ॥
अपत्यं धर्मकार्याणि शुश्रूषा रतिरुत्तमा ।
दाराधीनस्तथा स्वर्गः पितॄणामात्मनश्च ह ॥
पतिं या नाभिचरति मनोवाग्देहसंयता ।
सा भर्तृलोकानाप्नोति सद्भिः साध्वीति चोच्यते ॥
अभिचाराच्तु भर्तुः स्त्री लोके प्राप्नोति निन्द्यताम् ।
शृगालयोनिञ्चाप्नोति पापरोगैश्च पीड्यते ॥
पुत्रं प्रत्युदितं सद्भिः पूर्वजैश्च महर्षिभिः ।
विश्वजन्यमिमं पुण्यमुपन्यासं निबोधत ॥
भर्तुः पुत्रं विजानन्ति श्रुतिद्वैधन्तु भर्तरि ।
आहुरुत्पादकं केचिदपरे क्षेत्रिणं विदुः ॥
क्षेत्रभूता स्मृता नारी बीजभूतः स्मृतः पुमान् ।
क्षेत्रबीजसमायोगात् सम्भवः सर्वदेहिनाम् ॥
विशिष्टं कुत्रचिद्बीजं स्त्रीयोनिस्त्वेव कुत्रचित् ।
उभयन्तु समं यत्र सा प्रसूतिः प्रशस्यते ॥
बीजस्य चैव योन्याश्च बीजमुत्कृष्टमुच्यते ।
सर्वभूतप्रसूतिर्हि बीजलक्षणलक्षिता ॥
यादृशं तूप्यते बीजं क्षेत्रे कालोपपादिते ।
तादृग्रोहति तत्तस्मिन् बीजं स्वैर्यञ्जिनं गुणैः ॥
इयं भूमिर्हि भूतानां शाश्वती योनिरुच्यते ।
न च योनिगुणान् काञ्चिद्बीजं पुष्यति पुष्टिषु ॥
भूमावप्येककेदारे कालोप्तानि कृषीवलैः ।
नानारूपाणि जायन्ते बीजानीह स्वभावतः ॥
व्रीहयः शालयो मुद्गास्तिला माषास्तथा यवाः ।
यथाबीजं प्ररोहन्ति तथुनागीक्षवस्तथा ॥
अन्यदुप्तं जातमन्यद्विलक्षणमुपपद्यते ।
उप्यते यद्धि यद्बीजं तत्तदेव प्ररोहति ॥
तत् प्राज्ञेन विनीतेन ज्ञानविज्ञानवेदिना ।
आत्मश्रेयोऽभिकामेन वपव्यं न जातु परयोषिति ॥
अत्र गाथा यायुगीताः कीर्तयन्ति पुराविदः ।
यथा बीजं न वप्तव्यं पुंसा परपरिग्रहे ॥
गच्छन्तीमुर्वशीं विप्रः सेवे विद्युमतीमहम् ।
यथा गच्छति वै क्षिप्रं बीजं परपरिग्रहे ॥
एषोरुणा पृथिवीं भार्यां पूर्वविदो विदुः ।
स्थाणुश्चेदस्य केदारमादुः शस्यावनी मृगम् ॥
एतायानेव पुरुषो यज्जायात्मा प्रजेति ह ।
विप्राः प्राहुस्तथा चैतदृषयो भवो मा स्मृताङ्गजाः ॥
न निष्क्रयविसर्गाभ्यां भर्तुर्भार्यो विमुच्यते ।
एवं धर्मं पुराकल्पः प्राह प्रजापतिर्निमिम् ॥
सकृदंशो निपतति सकृत् कन्या प्रदीयते ।
सकृदाह ददानीति त्रीण्येतानि सतां सकृत् ॥
यथा गोरश्वोष्ट्रदासीषु महिष्यजाविकासु च ।
नोत्पादकः प्रजाभागी तथेवान्याङ्गनास्वपि ॥
ये क्षेत्रिणो बीजवन्तः परक्षेत्रप्रवापिणः ।
ते वै पुत्रस्य जातस्य न लभन्ते फलं क्वचित् ॥
यदन्यगोषु वृषभो वत्सानां जनयेच्छतम् ।
गोमिनामेव ते वत्सा गोषं स्कन्दितमार्षभम् ॥
तथेवाक्षेत्रिणो बीजं परक्षेत्रप्रवापिणः ।
कुर्वन्ति क्षेत्रिणामर्थं न बीजी लभते फलम् ॥
फलन्त्वनभिसन्धाय क्षेत्रिणां बीजिनां तथा ।
प्रत्यक्षं क्षेत्रिणामर्थो बीजाद्योनिर्गरीयसी ॥
क्रियाभ्युपगमात्क्षेत्रबीजार्थं यत् प्रदीयते ।
तस्येह भागिनौ दृष्टौ बीजी क्षेत्रिक एव च ॥
योषवानाहृतं बीजं यस्य क्षेत्रे प्ररोहति ।
क्षेत्रिकस्यैव तद्बीजं न वप्ता लभते फलम् ॥
एष धर्म्यो गवाश्वस्य दास्युष्ट्राजाविकस्य च ।
विपङ्क्तमहिषीणाञ्च विज्ञेयः प्रसवं प्रति ॥
एतद्धः सारफल्गुत्वं बीजयोन्योः प्रकीर्तितम् ।
अतःपरं प्रवक्ष्यामि योषितां धर्ममापदि ॥
भ्रातुर्ज्यैष्ठस्य भार्या या गुरुपत्न्यनुजस्य सा ।
यवीयसस्तु या भार्या स्नुषा ज्यैष्ठस्य सा स्मृता ॥
ज्यैष्ठो यवीयसो भार्यां यवीयान् वाप्यनुज्येयम् ।
पतितौ भवतो गत्वा नियुक्तावप्यनापदि ॥
देवराद्वा सपिण्डाद्वा स्त्रिया सम्यङ्नियुक्तया ।
प्रजेप्सिताधिगन्तव्या सन्तानस्य परिक्षये ॥
विधवायां नियुक्तस्तु घृताक्तो वाग्यतो निशि ।
एकमुत्पादयेत् पुत्रं न द्वितीयं कथञ्चन ॥
द्वितीयमेके प्रजनं मन्यन्ते स्त्रीषु तद्विदः ।
अनिर्वृत्तं नियोगार्थं पश्यन्तो धर्मतस्त्रयोः ॥
विधवायां नियोगार्थे निर्वृत्ते तु यथाविधि ।
गुरुवच्च स्नुषावच्च वर्तेयातां परस्परम् ॥
नियुक्तौ यौ विधिं हित्वा वर्तेयातान्तु कामतः ।
तावुभौ पतितौ स्यातां स्नुषागमगुरुतल्पगौ ॥
नान्यस्मिन् विधवा नारी नियोक्तव्या द्विजातिभिः ।
अन्यस्मिन् हि नियुञ्जाना धर्मं हन्युः सनातनम् ॥
नोद्वाहिकेषु मन्त्रेषु नियोगः कीर्त्यते क्वचित् ।
न विवाहविधायुक्तं विधवावेदनं पुनः ॥
अयं द्विजैर्हि विद्वद्भिः पशुधर्मो विगर्हितः ।
मनुष्याणामपि प्रोक्तो वेने राज्यं प्रशासति ॥
स महीमखिलां भुञ्जन् राजर्षिप्रवरः पुरा ।
वर्णानां सङ्करं चक्रे कामोपहतचेतनः ॥
ततः प्रभृति यो मोहात् प्रमीतपतिकां स्त्रियम् ।
नियोजयत्यपत्यार्थं तं विगर्हन्ति साधवः ॥
यस्या म्रियेत कन्याया वाचा सत्ये कृते पतिः ।
तामनेन विधानेन निजो विन्देत देवरः ॥
यथाविध्यधिगम्यैनां शुक्लवस्त्रां शुचिव्रताम् ।
मिथो भजेतामप्रसवात् सकृत सकृदृतौ ॥
न दत्त्वा कस्यचित् कन्यां पुनर्दद्यात् विचक्षणः ।
दत्त्वा पुनः प्रयच्छन् हि प्राप्नोति पुरुषानृतम् ॥
विधिवत् प्रतिगृह्यापि त्यजेत् कन्यां विगर्हिताम् ।
व्याधितां विप्रदुष्टां वा छद्मना चोपपादिताम् ॥
यस्तु दोषवतीं कन्यामनाख्यायोपपादयेत् ।
तस्य तद्दितथं कुर्यात् कन्यादातुर्दुरात्मनः ॥
विधाय वृत्तिं क्षात्र्यायाः प्रवसेत् कार्यवान्नरः ।
अवृत्तिकर्शिता हि स्त्री प्रदुष्येत् स्थितिमत्यपि ॥
विधाय प्रोषिते वृत्तिं जीवेन्नियममास्थिता ।
प्रोषिते त्वविधायैव जीवेच्छिल्पैरगर्हितैः ॥
प्रोषितो धर्मकार्यार्थं प्रतीक्ष्योऽष्टौ नरः समाः ।
विद्यार्थं षट् यशोऽर्थं वा कामार्थं त्रींस्तु वत्सरान् ॥
संवत्सरं प्रतीक्षेत द्विषन्तीं योषितं पतिः ।
ऊर्ध्वं संवत्सरात्त्वेनां दायं हृत्वा न संवसेत् ॥
अतिक्रामेत् प्रमत्तं या मत्तं रोगार्तमेव वा ।
सा त्रीन् मासान् परित्याज्याविभूषणपरिच्छदा ॥
उन्मत्तं पतितं क्लीबमबाजं पापरोगिणम् ।
न त्यागोऽस्ति द्वियन्याश्च न च दायापवर्तनम् ॥
मद्यपासाधुवृत्ता च प्रतिकूला च या भवेत् ।
व्याधिता साधिवेत्तव्या हिंस्रार्थघ्नी च सर्वदा ॥
वन्ध्याष्टमेऽधिवेद्याब्दे दशमे तु मृतप्रजा ।
एकादशे स्त्रीजननी सद्यस्त्वप्रियवादिनी ॥
या रोगिणी स्यात्तु हिता सम्पन्ना चैव शीलतः ।
सानुज्ञाप्याधिवेत्तव्या नावमान्या च कर्हिचित् ॥
अधिविन्ना तु या नारी निर्गच्छेद्गृहितो गृहात् ।
सा सद्यः सन्निरोद्धव्या त्याज्या वा कुलसन्निधौ ॥
प्रतिषिद्धा पिबेद्यदि तु मद्यमभ्युदयेष्वपि ।
प्रेक्षासभाजं गच्छेद्वा सा दण्ड्या कृष्णलानि षट् ॥
यदि स्वाचारयोगेन विन्देरन् योषितो द्विजाः ।
तासां वर्णक्रमेणैव ज्येष्ठं पूजा च वेश्म च ॥
भर्तुः शरीरशुश्रूषां धर्मकार्येषु नैत्यिकम् ।
स्वा चैव कुर्यात् सर्वेषां नान्यजातिः कथञ्चन ॥
यस्तु तत् कारयेन्मोहात् स्वजात्या स्त्रियान्यया ।
यथा ब्राह्मणचाण्डालः पूर्ववदृष्टस्तथैव सः ॥
उत्कृष्टायाभिरूपाय वराय सदृशाय च ।
अप्राप्तामपि तां तस्मै कन्यां दद्यादथाविधि ॥
काममामरणात्तिष्ठेद्गृहे कन्यर्तुमत्यपि ।
न चैवैनां प्रयच्छेत्तु गुणहीनाय कर्हिचित् ॥
त्रीणि वर्षाण्युदीक्षेत कुमार्यृतुमती सती ।
ऊर्ध्वन्तु कालादेतस्माद्विन्देत सदृशं पतिम् ॥
अदीयमाना भर्तारमधिगच्छेद्यदि स्वयम् ।
नैनः किञ्चिदवाप्नोति न च यं साधिगच्छति ॥
अलङ्कारं नादद्यात् पित्र्यं कन्या स्वयंवरा ।
मातृकं भ्रातृदत्तं वा स्तेना स्यात् यदि तं हरेत् ॥
पित्र्यं न दद्याच्छुल्कन्तु कन्याहरमतीं हरन् ।
न हि स्वाम्यमतिक्रामेदृतूनां प्रतिरोधनात् ॥
त्रिंशद्वर्षो वहेत् कन्यां हृद्यां द्वादशवार्षिकीम् ।
त्र्यष्टवर्षोऽष्टवर्षां वा धर्मे सीदति सत्वरः ॥
देवदत्तां पतिर्भार्यां विन्दते नेच्छयात्मनः ।
तां साध्वीं बिभ्रतो भर्तुर्देवा दानं प्रियमाचरन् ॥

प्रजनाय स्त्रियः सृष्टाः सन्तानार्थेष मानवाः।
तस्मात् साधारणो धर्मः सुतौ पत्या सहोदितः॥
कन्यायां दत्तशुल्कायां म्रियेत यदि शुल्कदः।
देवराय प्रदातव्या यदि कन्यानुमन्यते॥
आदद्यात न शुल्कोऽपि शुल्कं दुहितरं ददत्।
शुल्कं हि गृह्णतां शुल्कं छन्न दुहितृविक्रयम्॥
अतश्च न परे चक्रुर्मांपरे धातु साधयः।
यदन्यस्य प्रतिज्ञाय पुनरन्यस्य दीयते॥
नाशुश्रूषुस्त्वाचक्षीत पूर्व्वेष्वपि हि वक्षसु।
शुल्कसंज्ञेन मूल्येन छन्न दुहितृविक्रयम्॥
अन्योन्यस्याभिचारी भवेतामरणान्तिकः।
एष धर्म्मः समासेन ज्ञेयः स्त्रीपुंसयोः परः॥
तथा नित्यं यतेयातां स्त्रीपुंसौ तु कृतक्रियौ।
यथा नाभिचरेतां तौ वियुक्तावितरेतरम्॥
एष स्त्रीपुंसयोक्तो धर्म्मो यो हतिसंक्षितः।
आपद्यप्यन्यथा नित्य दायभाजं नियोजयेत्॥"

इति मानवे ९ अध्यायः॥

स्त्रीपुंसलक्षणा, स्त्री, स्त्रीपुंसयोर्लक्षणं चिह्नं स्तन-मश्वादिरूपं यस्यां या। इति भरतः॥ तत्पर्य्यायः। पोटा २। इत्यमरः॥

स्त्रीपुंसौ, पुं, (स्त्री च पुमांश्च। "अचतुरविचतु-रेति।" ५।४।७७। इति अच्प्रत्ययेन साधुः।) स्त्रीपुंसयोर्युग्मम्। तत्पर्य्यायः। मिथुनम् २ यमम् ३। इत्यमरः। २।५।३८॥ दिवचनान्तोयम्॥ (यथा, मनुः। ९।२५।

"एवमादिता लोकयात्रा नित्यं स्त्रीपुंसयोः शुभा॥")

स्त्रीपूर्त्तः, पुं, (स्त्री पूर्त्ते प्रधानतया सर्व्वकार्य्येषु व्यवस्थासिनीव यस्य।) स्त्रीजितः। इति महा-भारते दानधर्म्मः॥

स्त्रीप्रियः, पुं, (स्त्रियाः प्रियः।) आम्रवृक्षः। इति त्रिकाण्डशेषः। नारीप्रियवृक्षे, त्रि॥

स्त्रीभुग्नकः, पुं, (स्त्रीभुग्नं भाषीति। भा+कः।) शौण्डः। इति राजनिर्घण्टः॥

स्त्रीरक्षणं, क्ली, (स्त्रियमपि रक्षयति रागे-णेति। रक्ष+ल्युट्।) ताम्बूलम्। इति केचित्।

स्त्रीरोगः, पुं, (स्त्रियाः रोगः।) नारीणामामयः। तस्य चिकित्सा यथा,—

धन्वन्तरिरुवाच।

"स्त्रीरोगादिचिकित्सासु वक्ष्ये सुश्रुत तां शृणु।
योनिस्थानन्तु भूषित्वं गच्छते कर्म्म यातत्रित्।
वर्षाकालुपिकाशालीनाद्यशूकशमीमुद्गम्।
अश्वमोदा मयस्यारं चित्रकं मूलकैरालिनम्।
पिण्डालीञ्च शणाद्यैश्च शाकैर्दुग्धसमन्वितम्।
योनिस्थानेषु दोषेषु मूलान्योनिविनिश्चये।
यदोषजन्तेषान्तु योनिभिर्भिन्ना प्रजायन्ति।
तेषां मूलैश्च शाकैश्च योनिदुष्टिं करोति च।
मधुयष्टयश्वगन्धाभ्यां माक्षीकुसुमैर्घृतम्।
रोगाणां शमनात्मा योनिव्यापत्तिनाशनम्।"

अत्रान्यत्रापि अशक्तायां इति च पाठः।

"अशक्तं स्त्रीकृतं भक्तं दुष्टं स्त्रीरोगदोषजम्।
दुष्टोपचितं संघातं क्षिप्त्वा कार्य्यं समेत्य।
आपाततः समालक्ष्य दोषं तस्यां यदा भवेत्।"

यदा भवेदित्यत्र रक्षो हरेदिति च पाठः।

"सदुग्धा लक्षणा पीता नखाग्रा पुत्रदा स्मृता॥
दुग्धस्याहार्य्यकं चाप्यमश्नन्ती च पुत्रदा।
वन्ध्या पुत्रं लभेत् पीत्वा एतेन योगकेशरम्॥
कृष्णकाशीरयूकानां सर्व्वेषाञ्चुरकस्य च।
दुग्धेनैव सितायुक्तं गर्भिण्याः मूलमुत्तमम्॥
पाठालाङ्गलिसिंहास्यमयूरशुटनैः पृथक्।
नाभिवस्तिभगाबाधात् सुखं नारी प्रसूयते॥
रुतायां शुष्किरोगस्तिमूलं वै मन्दसंज्ञितम्।
यवक्षारं पिबेत्तच्च मस्तुनोष्णोदकेन वा॥
कृष्णमूलीशतः काथः साध्यः सूतिरुजापहः।
प्रालिनशुलचूर्णन्तु सदुग्धं दुग्धवत्तथा।
विदारिक्षुसुमरसं मूलं कार्पासजं तथा।
धात्री स्वयंविशुष्कार्थं सप्तपूरेषायनी॥
कृष्णा वचाभया शाली मधुरी चौद्रसर्पिषी।
वर्णायुःकान्तिजननं श्रेष्ठं वाजे प्रदापयेत्॥
स्नन्याभावे मयस्यारं गव्यं वा तद्गुणं भवेत्।
सप्तपुष्पीविषा यासा कुटजा चातिसारजुत्॥
योगं मधु सातुगुप्तं पिबाच्छर्द्दिनिवारणम्।
कुष्ठेन्द्रयवसिद्धार्थैर्निशा दूर्व्वा च कुष्ठजित्॥
सप्तच्छदामयनिशाचन्दनैरानुलेपनम्।
प्रलालजीवरक्तास्रवत्रणालोषादिहारणम्॥"

इति गारुडे। १०६। १—१६॥

स्त्रीसभं, क्ली, (स्त्रीणां सभा। अप्राणाचेति नपुं-सकत्वम्।) नारीणां सभा। इति केचित्॥

स्त्रीस्वभावः, पुं, (स्त्रीणां स्वभाव एव स्वभावो यस्य।) मद्गुकः। इति शब्दमाला॥ नारीणां शीलञ्च॥ (यथा, महाभारते। ३। ०१। ६।

"स्त्रीस्वभावञ्च लोके मम दोषञ्च दारुणम्।
स्वादेवमपि कुर्य्यात् वा विषया गतसौहृदा॥")

स्त्रैणं, क्ली, (स्त्रिया इदम्। स्त्री+अण्।) स्त्री-स्वभावः। यथा, भट्टिः।

"कर्त्रेऽपरैरधिनराज्यलोभा
स्त्रैणेन नीता विकृतिं जघिष्णा।
रामप्रयासे अवतत्य दीर्घं
अन्यापवादं जनरेन्द्रलुप्तम्॥"

(यथा, च भागवते। ४। ४। ३।

"प्रियोरगत्व स्त्रैणविसृष्टधीर्वान्
प्रेमण्णालनो योगमदात् सतां प्रियः॥")

स्त्रैणः, त्रि, (स्त्रीषु भवः। स्त्रीभ्य आगतः। स्त्रीभ्यो हितो वा। स्त्री+"स्त्रीपुंसाभ्यां नञ्स्नञौ भवनात्।" ४।१।८७। इति नञ्।) स्त्री-सम्बन्धी। इति मुग्धबोधव्याकरणम्॥ स्त्रिया अयमिति स्त्रैणः। स्त्रिया इदं स्त्रीणां समूहो वा स्त्रैणम्। इति नदीकायां दुर्गादासः॥ (रमणी रतः। यथा, भागवते। १।१।११। २०।

"सैनेयैरसुभृत्स्त्रैणात् स्त्रैणं चाटुभरं हरः।
अवमार्ष्टीर्दृशौ मर्षुरीक्षां मनसो वधा॥")

स्थः, त्रि, (तिष्ठत्यस्मिन्निति। स्था+घञर्थे कः।) स्थानम्। यथा,—

"स्थली हैवकर्षूकेऽप्यत् स्थानं स्त्रीवे स्थ इत्यपि।"

इति शब्दरत्नावली॥

(स्थलोपपदे तु "सुपि स्थः।" ३।२।४। इति कप्रत्ययः। स्थितिशीलः। यथा, रघुः। १२।१५।

"चित्रकूटवनस्थस्य कथयन्तर्गतिं रोः।
लक्ष्मणा निमग्नयाचक्षे तमनुच्छ्वसदम्बुदा॥")

स्थग, म ए संवृतौ। इति कविकल्पद्रुमः। (भ्वा०-पर०-सक०-सेट्।) एत्वादिरसकथः। ५, सिस्थगयिषति। ए, अस्थगीत्। इति दुर्गादासः।

स्थगः, त्रि, (स्थगति संवृणोति आत्मानमिति। स्थग+अच्।) धूर्त्तः। यथा,—

"धूर्त्ते स्थगश्च निर्लज्जः षट्टः पाटविकोऽपि च।"

इति शब्दरत्नावली चिकाण्डशेषश्च॥

स्थगनं, क्ली, (स्थग+ल्युट्।) अपवारणम्। यथा,—

"अपधानं तिरोधानमन्तर्हितमपवारणम्।
छदनं अवधानञ्चापिधानस्थगनानि च॥"

इति हेमचन्द्रः॥

स्थगितं, त्रि, (स्थग+क्तः।) तिरोहितम्। तत्पर्य्यायः। संवीतम् २ छन्नम् ३ आवृतम् ४ संवृतम् ५ पिहितम् ६ छन्नम् ७ अपवारितम् ८ अन्तर्हितम् ९ तिरोधानम् १०। इति हेम-चन्द्रः॥ (यथा, किरातें। १४। ३१।

"उद्भूतवक्षः स्थगितेकदिग्मुखो
विलम्बिविस्फारिनखाग्रमण्डलः॥")

स्थगी, स्त्री, (स्थग्यतेऽनयेति। स्थग+घञर्थे कः। गौरादित्वात् ङीष्।) ताम्बूलपात्रम्। पानेर बाटा इति भाषा। तत्पर्य्यायः। ताम्बूलकरङ्कः २। इति हेमचन्द्रः॥

स्थगु, क्ली, गण्डः। कुज इति भाषा। यथा,—

"हृदये ते निविष्टास्ता भूयश्चाग्नाः सहस्रशः।
तदेव स्थगु यद्दीर्घं रघवोगमियायतम्॥
लक्ष्मणार्य्या च यतीता च वैयधिष्यामि ते स्थगु।
सुखे च तिलकं चित्रं जातरूपमयं शुभम्॥"

इति रामायणे अयोध्याकाण्डे ६ सर्गः॥

स्थण्डिलं, क्ली, (तिष्ठत्यस्मिन्निति। स्था+मिषिला-दयश्चेति इलच्प्रत्ययेन निपातनात् साधुः।) चत्वरम्। इत्यमरः। २।७।१८॥ हे वेदी-रभिलोऽन्यत्र वा यज्ञार्थं परिष्कृतायामनिन्दो-नतायां विस्तृतायां भूमौ। अमरबाधेन तिष्ठ-त्यत्र स्थण्डिलं नागरोति दण्डिनः। चत्वरं चतुष्पथं निवा-सार्थं वास्तु चत्वरं चते च वाचे पूर्व्वेण परः। इति भरतः। यथाच।

"अग्नौ परिष्कृतस्थाने स्थानां स्थण्डिलसंज्ञरे।"

इति शब्दरत्नावली॥

हेमचन्द्रेणाप्यस्यार्थे स्थण्डिलविधिर्यथा, वह्निपुराणे।

"तस्मात् सम्यक् परिक्षेत्रे कर्त्तव्यं शुभवेदिकम्।
एकमार्त्तं स्थण्डिलं वा मंडले शोभनेऽपि।"

क्रियासारेऽपि ।
"कुण्डमेवंविधं न स्यात् स्थण्डिलं वा समाश्रयेत् ॥"
शारदातिलकेऽपि ।
"नित्यं नैमित्तिकं काम्यं स्थण्डिले वा समाचरेत्।
हस्तमात्रन्तु तत् कुर्य्यात् चतुरस्रं समन्ततः ॥"
इति तिथ्यादितत्त्वम् ॥ * ॥
अपि च । गोभिलः । अनुगुप्रा अप आहृत्य प्रागुदक्प्रवणं देशं समं वा परिसमूह्य उपलिप्य मध्यतः प्राचीं रेखामुल्लिख्य उदीचीष्व संहतां पश्चान्मध्ये प्राचीमित्रं उल्लिख्याभ्युन्नयेत् लक्षणार्थेन सर्व्वत्रेति । अनुगुप्रा व्याख्यादिताः । प्रतितादिभिरदृष्टा इति यावत् । प्राङ्नीचादिफलमाह गृह्यासंग्रहे गोभिलपुत्रः ।
"प्राङ्नीचं ब्रह्मवर्चस्यमुदङ्नीचं यशोत्तमम् ।
पित्र्यं दक्षिणतो नीचं प्रतिष्ठालाभकं समम् ॥"
यशोत्तममित्यत्र मात्रा अप्यदन्ता इत्युक्तेरन्योऽपि यशशब्दः गयाशिरः इतिवत् । परिसमूह्य सर्व्वतः कुशैः पांचादिकमपवार्य्य उत्तरस्यां दिशि सार्द्धहस्तोपरि क्षिपेत् । परिसमूह्य विलक्षित्वेति उत्तरत उत्करं करोतीति हरिस्वामिभाष्यवचनात् । तत उपलेपनम् ॥ * ॥ तत्र कारणमाह गृह्यासंग्रहः ।
"इन्द्रेण वज्राभिहतः पुरा वृत्रो महासुरः ।
मेदसा तस्य संक्लिन्ना तदर्थमुपलेपयेत् ॥" इति ।
मध्यतः स्थण्डिलाभ्यन्तरे दक्षिणांशे न तु मध्यांशे उदग्गतैकविंशत्यङ्गुलरेखानुरोधात् । अन्यथा ।
"कुशैः संमार्ज्जयेद्भूमिं शुद्धामाहृत्य शुचिस्मितः ।
हस्तमात्रां चतुरस्रां गोमयेनोपलेपयेत् ॥"
इति भारद्वाजीयहस्तप्रमाणस्थण्डिले तदनुपपत्तेः । प्राचीं प्राग्गताम् । उदीचीष्व संहतां पश्चादिति । प्राग्गतायाः पश्चिमे भागे संलग्नामुदग्गताम् । मध्ये उदग्गतायाः प्राचीः प्राग्यास्तिस्रो रेखा उल्लिख्याभ्युन्नयेदिति । रेखाश्च उद्धृतस्रुक्तिकोद्धरणपूर्व्वकमभ्युन्नयेत् । उल्लिख्य उद्धृत्याभ्युन्नयेदिति कात्यायनसूत्रात् ॥ * ॥
उत्करप्रक्षेपदेशमाह गृह्यासंग्रहः ।
"उत्करं गृह्य रेखाभ्योऽग्निमात्रे निधापयेत् ।
दारमेतत् पदार्थानां प्रागुदीच्यां दिशि स्मृतम्॥"
इति ॥
परिसमूहनादिपरियन्तं कर्म्म लक्षणमंत्रकं तस्य लक्षणस्यात्र प्रक्रिया सर्व्वत्र यत्र यत्राभिप्रायवशं तत्र बोध्या ॥ * ॥ रेखाप्रमाणमाह छन्दोगपरिशिष्टे कात्यायनः ।
"दक्षिणे प्रागुगतायास्तु प्रमाणं द्वादशाङ्गुलम् ।
तस्मात्तस्मात् योदीची तस्या एवं नवोत्तरम् ॥
उदग्गतायाः संलग्नाः प्रेषाः प्रादेशमात्रिकाः ।
मध्ये मध्यङ्गुलांस्त्यक्त्वा कुशेनैव तु लक्षयेत् ॥"
नवोत्तरं नवाधिकं द्वादशाङ्गुलमेकविंशत्यङ्गुलमित्यर्थः । प्रेषाः उत्तरेरस्योरधिष्ठाश्रिताः । कुशेन इति सर्व्वत्राभिसम्बध्यते । एवकारेण प्राक्तान्तरोक्तस्य व्यावृत्तिः ॥ * ॥ रेखाणां देवता वर्णांश्चाह स्मृतिः ।
"प्राग्गता पार्थिवी ज्ञेया याम्येयी चाप्युदग्गता ।
प्राजापत्या तथा चैन्द्री सौमी च प्राक्प्रवणा स्मृता ॥
पार्थिवी पीतवर्णा स्यादाग्नेयी लोहिता भवेत् ।
प्राजापत्या भवेत् कृष्णा नीला चैन्द्री प्रकीर्त्तिता ॥
श्वेतवर्णेन सौमी स्यात् रेखाणां वर्णलक्षणम् ॥"
अग्निस्थापनपर्य्यन्तं मध्यहस्तप्रदेशस्य विधानमाह । गृह्यासंग्रहः ।
"सर्वं भूमौ प्रतिष्ठाप्य प्रोक्षिखेदक्षिणेन तु ।
तावन्नोत्थापयेत् पाणिं यावदग्निं निधापयेत् ॥"
मानकर्म्मारभाह छन्दोगपरिशिष्टे कात्यायनः ।
"मानक्रियायामुक्तायामनुक्ते मानकर्म्मणि ।
मानदृष्टमानः स्यादिदुमामेष निश्चयः ॥"
अङ्गुष्ठाङ्गुलिमानमाह स एव ।
"अङ्गुष्ठाङ्गुलिमानन्तु यत्र यत्रोपदिश्यते ।
तत्र तत्र दृष्टमर्द्धमन्थिभिर्मिनुयात् सदा ॥"
यजमानासन्निधौ होमे तु साधारणाङ्गुलिमानम् । यथा कपिलपञ्चरात्रम् ।
"अष्टभिस्तैर्भवेज्ज्येष्ठं मध्यमं सप्तभिर्यवैः ।
कन्यसं षड्भिरुद्दिष्टमङ्गुलं मुनिसत्तमैः ॥"
तैः प्रक्रम्यमाणयवैः । कन्यसं कनिष्ठम् । मानन्तु पार्श्वेन । षड्यवाः पार्श्वसंमिताः । इति कात्यायनवचनात् । इति संस्कारतत्त्वम् ॥
स्थण्डिलशायी, [न्] पुं, (स्थण्डिले शेते इति । शी + "व्रते ।" ३ । २ । ८० । इति इनिः ।) यो व्रतवशात् स्थण्डिले शेते सः । तत्पर्य्यायः । स्थाण्डिलः २ । इत्यमरः । २ । ७ । ४४ ॥ स्थण्डिलेशयः ३ । इति शब्दरत्नावली ॥ (वाच्यलिङ्गेऽपि वर्त्तते । यथा, भट्टिः । ३ । ४१ ।
"वाचंयमान् स्थण्डिलशायिनश्च
युयुत्समानाननिशं सुसत्त्वान् ।
अध्यापयन्तं विगयात् प्रजेशः
पद्मा भरद्वाजसुनिं सशिष्यम् ॥")
स्थण्डिलसिक्तकं, क्ली, (स्थण्डिले सिक्ता यत्र ।) वेदिः । इति हारावली ॥
स्थण्डिलेशयः, पुं, (स्थण्डिले शेते इति । शी + अच् । अनुकसमासः ।) स्थण्डिलशायी । इति शब्दरत्नावली ॥ (वाच्यलिङ्गोऽप्ययमिति केचित् । यथा, भागवते । ४ । २३ । ६ ।
"आकल्पमस्य शिशिरे उदके स्थण्डिलेशयः ।")
स्थपतिः, पुं, (तिष्ठत्यस्मिन्निति । स्था + कः । स्थः स्थानम् । तं पातीति । पा + डाचुलकात्वतिः । इत्युणादिवृत्तौ उज्ज्वलः । ४ । ५८ ।) गोष्पतीत्यन्यः । दृष्टप्रतिषवनामकयागकर्त्ता । कारुभेदः । राज इति भाषा । इत्यमरः । २ । ७ । ६ ॥ कारुः शिल्पी तद्भेदे चर इति ख्याते । स्थपतिः कारुभेदो तुल्यवदेति स्वामी । दृष्टप्रतियागयाजिनि कुशुकिनि च । इति भरतः । ४ ॥ तस्य लक्षणं यथा,—
"वास्तुविद्याविधानज्ञो लघुहस्तो जितश्रमः ।
दीर्घदर्शी च शूरश्च स्थपतिः परिकीर्त्तितः ॥"
इति मात्स्ये । २१५ । ३८ ॥
कशुकी । इति मेदिनी ॥ कुबेरः । इत्यजयपालः ॥ अधीशः । इति हेमचन्द्रः ॥ (यथा, रामायणे । २ । ५२ । ५ ।
"स तु रामस्य वचनं निशम्य प्रतिगृह्य च ।
स्थपतिस्तूर्णमाकृष्य सचिवानिदमब्रवीत् ॥")
स्थपतिः, त्रि, (तिष्ठन्ति स्वधर्म्मे इति स्थाः सत्तस्तेषां पतिः ।) सत्तमः । इति मेदिनी ॥
स्थपुटः, त्रि, विषमसंस्कारजौषधौ । इति त्रिकाण्डशेषः ॥ विषमौषधम् । इति हेमचन्द्रः ॥
स्थल, ञ स्थाने । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-सेट् ।) ञ, स्थालः स्थलः । तिस्थालयिषति । अयं नास्तीति केचित् । इति दुर्गादासः ॥
स्थलं, क्ली स्त्री, (स्थल + अच् ।) जलशून्यालक्षिमभूभागः । तत्पर्य्यायः । स्थली २ । इत्यमरः । २ । १ । ५ ॥ स्थल्यते स्त्रीयतेऽत्र स्थलं स्थल ञ स्थाने अल् । एवं स्थली नारी सखी इत्यादिना अलक्षिमत्वे ङीपि स्थली निपात्यते । लक्षिमत्वे तु आधेव स्थला । लक्षिमालक्षिमसामान्ये तु स्थलं प्रयुज्यते । इति भरतः । स्थलशब्दः स्त्रीलिंगपुंसकलिङ्गः । इति भरतः ॥ (यथा, मनुः । ७ । १६२ ।
"स्यन्दनाश्वैः समे युध्येदनूपे नौद्विपैस्तथा ।
वृक्षगुल्मावृते चापैरसिचर्म्मायुधैः स्थले ॥"
यथा च तैत्तिरीयसंहितायाम् । १ । ६ । १० । ५ ।
"यज्ञो यजमानाय वर्षति स्थलयोदकं परिप्लवन्ति ॥")
स्थलं, क्ली, (स्थल + अच् ।) जलशून्यलक्षिमालक्षिमभूभागः । इत्यमरटीकायां भरतः । २ । १ । ५ ॥ (स्थानमात्रम् । यथा, रघुः । ५ । ५२ ।
"उषाच वामी दशनप्रभाभिः
संवर्द्धितोरःस्थलतारहारः ॥")
वस्त्रगृहम् । यथा,—
"पटवासः पटमयं दूष्यं वस्त्रगृहं स्थलम् ॥"
इति त्रिकाण्डशेषः ॥
स्थलकन्दः, पुं, (स्थलजातः कन्दः ।) अश्वाख्यकन्दः । इति रत्नमाला ॥ बनओल इति भाषा ॥
स्थलकमलं, क्ली, (स्थलस्य कमलम् ।) स्थलपद्मम् । (यथा, गीतगोविन्दे । १० । ७ ।
"स्थलकमलगञ्जनं मम हृदयरञ्जनं
जनितरतिरङ्गपरभागम् ॥")
तत्पर्य्यायः । पद्मचारिणी २ अतिचरा ३ यथा ४ पद्मा ५ चारटी ६ । अस्य गुणाः । अम्लत्वम् । कटुत्वम् । तिक्तत्वम् । कषायत्वम् । कफवातमूत्रकृच्छ्राश्मशूलश्वासकासविषापहत्वञ्च । इति भावप्रकाशः ॥

स्थलकुसुदः, पुं, (स्थलस्य कुसुदः।) करवीरः। इति राजनिर्घण्टः॥

स्थलपद्मं, क्ली, (स्थलस्य पद्मम्।) खगामख्यातपुष्पविशेषः। (यथा, भट्टिः। २। ३।
"विश्वागतेस्तीरवनैः सुगन्धिं
निर्यां विलोक्याप्तकृतां पयोभिः।
कूलानि सामर्षतयेव तेषुः
सरोजलक्ष्म्यो स्थलपद्महासैः॥")
तत्पर्य्यायः। छत्रपत्रम् २ तमालकम् ३। इति त्रिकाण्डशेषः॥ तच्चतुर्विधं यथा,—
"चतुर्धा स्थलपद्मानि सेवन्ती गुलदावदी।
नेपाली च गुलाबश्च बकुलश्च कदम्बकः॥"
इति रावणकृतार्कप्रकाशः॥

स्थलपद्मः, पुं, (स्थलजातः पद्म इव।) मागधकः। इति रत्नमाला॥ मागधकपु इति भाषा॥ (यथा,—
"स्थलपद्ममयं कल्कं पयसा लोध्र पाचयेत्।
क्षौद्रामयहरश्चैव सर्व्वाङ्गैकाङ्गशोथजित्॥"
इति वैद्यकचक्रपाणिसंग्रहे शोथाधिकारे॥)

स्थलपद्मिनी, स्त्री, (स्थलस्य पद्मिनी।) स्थलपद्मम्। वेटतामर इति हिन्दी भाषा। तत्पर्य्यायः। पद्माक्षा २ चारटी ३ पद्मचारिणी ४ सुगन्धमूला ५ अम्बुरुहा ६ लक्ष्मीः ७ श्रेष्ठा ८ सुपुष्करा ९ रम्या १० पद्मावती ११ अतिचरा १२ स्थलरुहा १३ पुष्करिणी १४ पुष्करधर्षिका १५ पुष्करगाढ़ी १६। अस्या गुणाः। गौल्यत्वम्। तिक्तत्वम्। शीतत्वम्। वान्तिरक्तपित्तमेहभूतातीसारनाशित्वञ्च। इति राजनिर्घण्टः॥

स्थलमञ्जरी, स्त्री, (स्थलस्य मञ्जरी।) अपामार्गः। इति रत्नमाला॥

स्थलशृङ्गाटः, पुं, (स्थलजातः शृङ्गाटः।) गोक्षुरवृक्षः। इति रत्नमाला॥

स्थलशृङ्गाटकः, पुं, (स्थलशृङ्गाट एव। स्वार्थे कन्।) गोक्षुरकः। इति राजनिर्घण्टः॥

स्थलसीमा, [न्] पुं, (स्थलस्य सीमा।) स्थलिजः। इति भूरिप्रयोगः॥

स्थली, स्त्री, (स्थल+ङीष्।) जलशून्याकृत्रिमभूमिः। इत्यमरटीकायां भरतः। २। १। ५॥ (अस्याः प्रमाणं स्थलशब्दे द्रष्टव्यम्॥)

स्थली, स्त्री, (स्थल+ङीष्।) जलशून्याकृत्रिमा भूमिः। इत्यमरटीकायां भरतः। २। १। ५॥ (यथा, साहित्यदर्पणे।
"सैषा स्थली यत्र विचिन्वता त्वां
भग्नं मया गुप्तमनेकशस्त्र्याम्।
अदृश्यत स्वयरणारविन्द-
विश्लेषदुःखादिव बद्धमौनम्॥")

स्थलीदेवता, स्त्री, (स्थल्या देवता।) याम्यदेवता। इति केचित्॥

स्थलेरुहा, स्त्री, (स्थले रोहतीति। रुह+कः।) अपामार्गः। इति राजनिर्घण्टः॥

स्थलेशयः, पुं, (स्थले शेते इति। शी+अच्।) क्रोड़रथकुररङ्गादयः। इति राजनिर्घण्टः॥ स्थलशायिनि, त्रि॥

स्थविः, पुं, (तिष्ठतीति। स्था+"क्विष्ठ्वीति।" उणा० ४। ५६। इति क्विनूप्रत्ययेन साधुः।) तन्तुवायः। खर्गः। जङ्गमः। इति संक्षिप्तसारोणादिवृत्तिः॥

स्थविरं, क्ली, (स्था+"अजिरशिशिरेति।" उणा० १। ५४। किरच्प्रत्ययेन साधुः।) शैलेयम्। इति राजनिर्घण्टः॥

स्थविरः, पुं, (स्था+किरच्।) ब्रह्मा। इति हेमचन्द्रः॥

स्थविरः, त्रि, (तिष्ठतीति। स्था+"अजिरशिशिरेति।" उणा० १। ५४। इति किरच्प्रत्ययेन साधुः।) वृद्धः। इत्यमरः। २। ६। ४२॥ (यथा, मनुः। २। १२०।
"जन्मतः प्रभृति यत्किञ्चित् पुण्यं समुपसञ्चितम्।
प्रत्युत्थानाभिवादाभ्यां पुनस्तत् प्रतिपद्यते॥"
भिक्षुः। इत्यादिदर्शनात् उच्चसदनः॥ १।४५॥)
अचलः। इत्यादिकोषः॥

स्थविरा, स्त्री, (स्था+किरच्। टाप्।) महाश्रावणी। इति राजनिर्घण्टः॥ वृद्धा च॥

स्थविष्ठः, त्रि, (अयमेषामतिशयेन स्थूलः। स्थूल+इष्ठन्। "स्थूलदूरेति।" ६। ४। १५६। इति साधुः।) अतिशयस्थूलः। इत्यमरः। ३। २। १११॥ (यथा, भागवते। २। १। २४।
"विशेषस्तस्य देहोऽयं स्थविष्ठश्च स्थवीयसाम्॥")

स्थाणुः, पुं, (तिष्ठतीति। स्था+"स्थो णुः।" उणा० ३। ३७। इति णुः।) शिवः। इत्यमरः। १। १। ३६॥ (यथा, रघुः। ११। १३।
"स्थाणुदग्धवपुषस्तपोवनं
प्राप्य दाशरथिरात्तकार्मुकः।
विघ्नहेतु मदनस्य चारुधा
सोऽभवत् प्रतिनिधिर्न कर्म्मणा॥")
तन्नामकारणं यथा,—
"वसन्तिष्ठन् जलात्तस्मात् प्रजास्तः स्थवानहम्।
ततोऽहं ता॥ प्रजा दृष्ट्वा रहिता एव तेजसा॥
क्रोधेन महता युक्तो लिङ्गमुत्पाट्य चाक्षिपम्।
उत्क्षिप्तं सरसो मध्ये ऊर्द्धमेव यदा स्थितम्।
तदा प्रभृति लोकेषु स्थाणुरित्येव विश्रुतम्॥"
इति वामने ४६ अध्यायः॥
(ब्रह्मा। यथा, महाभारते। १। १। ३२।
"यस्मात् पिता महो जज्ञे प्रथमैकः प्रजापतिः।
ब्रह्मा सुरगुरुः स्थाणुर्मनुः कः परमेष्ठ्यथ॥")
कीलः। इति मेदिनी॥ जीवकगन्धद्रव्यम्। यथा,
"जीवके जीवनो जीवो निधिः स्थाणुः प्रकीर्त्तितः॥"
इति शब्दचन्द्रिका॥

स्थाणुः, पुं क्ली, (स्था+णुः।) निःशाखवृक्षः। सुड़ा गाछ इति भाषा॥ (यथा, देवीभागवते। १। १७। ५३।
"छायायामाश्रयेत् नैव यमदग्नौ महातपाः।
ध्यानं कृत्वा वयैकान्ते स्थितः स्थाणुरिवाचलः॥")
तत्पर्य्यायः। ध्रुवः २ ग्रुकुः ३। इत्यमरः। २। ४। ८॥ अशाखवृक्षः ४। इति जटाधरः॥ अस्त्रभेदः। इति नीलकण्ठः॥

स्थाणुः, त्रि, (स्था+णुः।) स्थिरः। इति धरणिः॥ (यथा, विष्णुपुराणे। १। ५। ५८।
"अव्ययस्य यथैवेह यदिदं स्थाणुजङ्गमम्।
तत् सर्व्वं तदा ब्रह्मा भगवानादिशत् विभुः॥")

स्थाणुतीर्थं, क्ली, (स्थाणोस्तीर्थम्।) तीर्थविशेषः। यथा, वामने ४३ अध्याये।
"स प्रोवाच महादेवो ब्रह्माणं प्रणतस्थितम्।
पुण्यप्रदं तृतीयञ्चैव तीर्थमाहात्म्यमुत्तमम्॥
एतत् सन्निहितं प्रोक्तं सरः पुण्यप्रदं महत्।
स्थाणुलिङ्गस्य माहात्म्यं ब्रह्मन् मेऽवहितः शृणु॥
अचेतनः सचेता वा अन्धो वा प्राज्ञ एव वा।
लिङ्गस्य दर्शनादेव मुच्यते सर्व्वपातकैः॥
पुष्करादीनि तीर्थानि सप्तसप्तचरणानि च।
स्थाणुतीर्थे समेष्यन्ति मधं प्राप्ते दिवाकरे॥
तत्र स्नास्यति यो ब्रह्मन् माघे सोऽयति भक्तितः।
तस्याहं सुलभो नित्यं भविष्यामि न संशयः॥
इत्येवमुक्त्वा वचनं देवदेवो गतः प्रभुः।
देवाश्च ऋषयः सर्व्वे स्नानि स्थानानि मेनिरे॥
ततः प्रभृति लोकेऽस्मिन् स्थाणुतीर्थं वदन्ति हि॥"

स्थाण्डिलः, पुं, (स्थण्डिले शयितुं व्रतमस्य। स्थण्डिल+"स्थण्डिलात् शयितरि व्रते।" ४। २। १५। इति अण्।) स्थण्डिलशायी। इत्यमरः। २। ७। ४५। (वार्थण्डिलोऽयमिति केचित्॥)

स्थाणवीश्वरः, पुं, (स्थाणुरीश्वरश्च।) शिवलिङ्गविशेषः। यथा,—
"स्थाणुर्गङ्गा हि लोकेषु पूजनीयो दिवौकसाम्।
स्थाणुरीश्वरः स्थितो यस्मात् स्थाणवीश्वरस्ततः स्मृतः॥
ये स्मरन्ति सदा स्थाणुं ते मुक्ताः सर्व्वकिल्बिषैः।
भविष्यन्ति शुद्धदेहा दर्शनात्तीर्थगामिनः॥
इत्येवमुक्त्वा देवेन ऋषयो ब्रह्मणा सह।
तस्माद्धरणवर्यं लिङ्गं नेतुं समुपचक्रमुः॥'
इति वामने ४२ अध्यायः॥

स्थातव्यं, त्रि, (स्था+तव्य।) स्थेयम्। स्थानीयम्। यथा, कालिदासकृतशृङ्गारतिलके।
"वाचिक्येन गतः स मे गुरुपतिर्वार्त्तापि न श्रूयते
प्रातस्तच्चरणौ प्रणम्य शरणं यामाद्य मेऽहं गता।
बालाहं नवयौवना निधि कथं स्थातव्यमस्मद्गृहे
सर्व्वं सम्प्रति वर्त्तते प्रथिक हे स्थानान्तरे गम्यताम्॥"

स्थानं, क्ली, (स्था+ल्युट्।) नीतिवेदिनां त्रिदशगौतमवर्गविशेषः। इत्यमरः। २। ८। १८॥

नीतिवेदिनां नीतिशास्त्रज्ञानां व्ययादिभिस्त्रिवर्गः। अन्येषान्तु धर्म्मकामार्थैः पूर्व्वसूक्तः। अपवर्गस्यापचयः क्षयः। तस्यैवोपचयो वृद्धिः। तस्य नोपचयो नाप्यपचयः स्थानम्। अपवर्गो यथा,—

"क्षुधिर्व्वणिक्पथो दुर्गं सेतुर्व्याघ्ररवन्धनम्।
कन्याकरबलादानं सैन्यानाञ्च निषेधनम्॥
अपवर्गः स्मृतो राज्ञामिति————॥"

इति भरतः॥*॥

साहश्यम्। व्यवकाशः। स्थितिः। इति मेदिनी। (यथा, मनुः। ६। २२।

"स्थानासनाभ्यां विहरेदनेकमुपयत्नपः॥")

सन्निवेशः। इति हेमचन्द्रः॥ वसतिः। इति चतुर्थकाण्डे हेमचन्द्रः॥ (यथाच कश्चित्।

"स्थानं प्रधानं न बलं प्रधानं
स्थानस्थितः कापुरुषोऽपि सिंहः॥")

ग्रन्थसन्धिः। इति त्रिकाण्डशेषः॥ भाजनम्। इति हलायुधः॥ निकटम्। यथा,—

"त्वमत्र कृत्तिकास्थाने कथयामासुरीश्वर।
सर्व्वे धर्म्मादयो देवा धर्म्माधर्म्मस्य साक्षिणः॥"

इति ब्रह्मवैवर्त्ते गणपतिखण्डे। १५। १६॥

अपि च।

"एते स्वपत्यात्तस्यर्थे धारयन्ति चराचरम्।
पुरा मङ्कनकः सिद्धस्तत्स्थाने इति मे श्रुतम्॥"

इति वामने ३७ अध्यायः॥*॥

स्वधर्म्मानुष्ठायिनां व्यवस्थवर्त्तिनाञ्च स्थानविशेषप्राप्तिर्यथा,—

"वर्णानामाश्रमाणाञ्च सम्यग्धर्म्मानुपालिनाम्।
व्यवस्थवर्त्तिनां लोकान् ब्रह्मा चक्रे यथा च यत्॥
प्राजापत्यं ब्राह्मणानां स्मृतं स्थानं क्रियावताम्।
क्षत्रियाणां तथा चेन्द्रं संग्रामेष्वनुवर्त्तिनाम्॥
वैश्यानां मारुतं स्थानं स्वधर्म्ममनुवर्त्तिनाम्।
गान्धर्व्वं शूद्रजातीनां परिचर्य्यानुकारिणाम्॥
अष्टाशीतिसहस्राणां यतीनामूर्द्ध्वरेतसाम्।
स्मृतं तैषान्तु यत् स्थानं तदेव गुरुवासिनाम्॥
ब्रह्मर्षीणाञ्च यत् स्थानं स्मृतं तद्वत् वनौकसाम्।
प्राजापत्यं गृहस्थानां गृहधर्म्मानुवर्त्तिनाम्॥
न्यासिनान्तु परं ब्रह्म योगिनामक्षतं स्मृतम्।
अकाम्यवासिनां ब्रह्मध्यायिनां परमं पदम्॥
नास्तिकमन्यतामिस्रं महारौरवरौरवम्।
असिपत्रवनं घोरं कालपत्रमवीचिमत्॥
वेदस्य निन्दकानान्तु यज्ञघातकारिणाम्।
स्थानमेतत् समाख्यातं स्वधर्म्मविनियर्त्तिनाम्॥"

इति वह्निपुराणे सर्गकथननामाध्यायः॥

स्थानकं, क्ली, (स्थानमिव। कन्। स्थाने कं जलं यत्रेति वा।) आलवालम्। इति हेमचन्द्रः॥ नगरम्। फेनम्। इति केचित्॥ (स्थानमेव। स्वार्थे कन्। स्थानशब्दार्थोऽप्यत्र। यथा, महाभारते। १३। २६। ८४।

"तत् स्थानकं ब्राह्ममभीप्समाने-
र्नेहा सदेवासवरैरुपास्या॥")

स्थानच्युतः, त्रि, (स्थानात् च्युतः।) वर्व्वरीवृक्षः। इति शब्दचन्द्रिका॥

स्थानच्युतः, त्रि, (स्थानात् च्युतः।) स्थानभ्रष्टः। यथा, गारुडे। ११५। ७१।

"स्थानस्थितस्य पद्मस्य मित्रौ वरुणभास्करौ।
स्थानच्युतस्य तस्यैव क्लेदशोषणकारकौ॥"

स्थानपालः, पुं, स्थानं पालयति यः। (स्थान+पालि+अण्।) स्थानरक्षकः। (यथा, याज्ञवल्क्ये। २। १७६।

"शौल्किकैः स्थानपालैर्व्वा नष्टापहृतमाहृतम्।
अर्व्वाक् संवत्सरात् स्वामी हरेत परतो नृपः॥")

स्थानभ्रष्टः, त्रि, (स्थानात् भ्रष्टः।) पदच्युतः। यथा,—

"स्थानस्थितानि पूज्यन्ते पूज्यन्ते च पदस्थिताः।
स्थानभ्रष्टा न पूज्यन्ते केशा दन्ता नखा नराः॥"

इति गारुडे। ११५। ७३॥

स्थानाध्यक्षः, पुं, (स्थानस्य अध्यक्षः।) स्थानरक्षकः। तत्पर्य्यायः। स्थानिकः २। इति हेमचन्द्रः॥

स्थानिकः, पुं, (स्थानमस्यस्येति। ठन्।) स्थानाध्यक्षः। इति हेमचन्द्रः॥

स्थानी, [न्] त्रि, स्थानविशिष्टः। स्थानं विद्यतेऽस्य इत्यर्थे इनिप्रत्ययेन निष्पन्नः। यथा, स्थानिवदादेशः। इति सुग्धबोधव्याकरणम्॥

स्थानीयं, क्ली, (स्थानाय हितमिति। स्थान+छः।) नगरम्। इत्यमरः। २। २। १॥ स्थानसम्बन्धिनि, त्रि॥

स्थाने, य, योग्यम्। (यथा, रघुः। ५। १६।

"स्थाने भवानेकनराधिपः स-
नकिञ्चनत्वं मखजं व्यनक्ति॥"

कारणार्थः। साहश्यम्। सत्यम्। इति शब्दरत्नावली॥

स्थापकः, त्रि, (स्थापयतीति। स्था+णिच्+ण्वुल्।) स्थापनकर्त्ता। अन्तःस्थाधातोर्ण्वुलप्रत्ययेन निष्पन्नः॥

स्थापर्य्यः, पुं, (स्थपतिरेव। स्थपति+यञ्।) अन्तःपुररक्षकः। इत्यमरः। २। ८। ८॥ स्थपतेर्भावे, क्ली॥

स्थापनं, क्ली, (स्था+णिच्+ल्युट्।) रोपणम्। पुंसवनम्। इति मेदिनी॥ समाधिः। इति विश्वः॥ (पादादिपिण्डीकरणम्। इति श्रीधरस्वामी॥ यथा, भागवते। १०। ४४। ५।

"उत्थापनैरुन्नयनैश्चालनैः स्नापनैरपि।
परस्परं निर्जीयन्तावमचक्रतुरातुरान्॥")

स्थापना, स्त्री, (स्था+णिच्+युच्+टाप्।) स्थापनम्। निषेधनम्। (यथा, महाभारते। १२। ८८। २४।

"स्थापना वै मृषा सत्या त्वया देव प्रवर्त्तिता॥"

विचाराङ्गविशेषः। तद्यथा,—

"अथ स्थापना। स्थापना नाम तस्या एव प्रतिज्ञायाः हेतुभिर्दृष्टान्तोपनयनिगमैः स्थापना पूर्व्वं हि प्रतिज्ञा पश्चात् स्थापना किञ्चप्रतिज्ञातं स्थापयिष्यति यथा नित्यः पुरुष इति प्रतिज्ञा हेतुरकृतकत्वात् इति। दृष्टान्तः यथा, अकृतकमाकाशं तथा नित्यम्। उपनयो यथा चाकृतकमाकाशन्तथा पुरुषः। निगमनन्तस्मान्नित्य इति।" इति चरके विमानस्थानेऽध्याये।)

स्थापनी, स्त्री, (स्थाप्यतेऽनयेति। स्था+णिच्+ल्युट्। ङीप्।) पाठा। इति मेदिनी। अमरश्च। २। ४। ८४॥

स्थापितं, त्रि, (स्था+णिच्+क्तः।) निक्षिप्तम्। न्यस्तम्। इति मेदिनी॥ (यथा, देवीभागवते। २। ६। ४६।

"मणिमन्तधराः शूराः स्थापितास्तत्र रक्षणे।")

स्थाम, [न्] क्ली, (तिष्ठत्यनेनेति। स्था+"सर्व्वधातुभ्यो मनिन्।" उणा०। ४। १४४। इति मनिन्।) सामर्थ्यम्। इत्यमरः। २। ८। १०२॥ (नाद्यः। यथा, महाभारते। १। १३१। २४।

"अश्वस्येवास्य यत् स्थाम नदतः प्रदिशो गतम्।
अश्वत्थामेव बालोऽयं तस्मान्नाम्ना भविष्यति॥")

स्थायिभावः, पुं, (स्थायी भावः।) रसस्य त्रिधाभावान्तर्गतभावविशेषः। यथा,—

"सञ्चारिणः प्रधानानि देवादिविषया रतिः।
उद्बुद्धमात्रः स्थायी च भाव इत्यभिधीयते॥
न भावहीनोऽस्ति रसो न भावो रसवर्জ্জितः।
परस्परकृता सिद्धिरनयो रसभावयोः॥"

इत्युक्तदिशा परमालोचनया परमविश्रान्तिस्थानेन रसेन सहैव वर्त्तमाना अपि राघवानुगतविहारप्रवृत्तभृत्यवत् आपाततो यत्र प्राधान्येनाभिधत्ता अभिचारिणः देवमुनिगुरुनृपादिविषया रतिः उद्बुद्धमात्रा विभावादिभिरपरिपुष्टतया रसतामनापाद्यमानाश्च स्थायिनो भावा भावशब्दवाच्याः। उद्बुद्धमात्रस्थायी भावो यथा,—

"हरन्तु किञ्चित् परिरभ्य धैर्य्यं
चन्द्रोदयारम्भ इवाम्बुराशिः।
उमामुखे बिम्बफलाधरोष्ठे
व्यापारयामास विलोचनानि॥"

अत्र पार्व्वतीविषया भगवतो रतिः। इति साहित्यदर्पणे रसभावादिनिरूपणो नाम ३ परिच्छेदः॥

स्थायी, [न्] पुं, (तिष्ठतीति। स्था+णिनिः।) भावभेदः। यथा,—

"स्थायिसात्त्विकसञ्चारिप्रभेदैः स्याद्रतिः पुनः॥"

इति हेमचन्द्रः॥

(यथा, साहित्यदर्पणे। ३। २०५—२०७।

"अविरुद्धा विरुद्धा वा यं तिरोधातुमक्षमाः।
आस्वादाङ्कुरकन्दोऽसौ भावः स्थायीति सम्मतः॥

यदुक्तम्।

सकृदनुभवसिद्धा भावनामन्तरासङ्गमनुभवसाक्षः।
न तिरोधीयते स्थायी तेरसौ पुष्यते परम्॥

तद्भेदानाह।

रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा।
जुगुप्सा विस्मयश्चेत्यष्टौ प्रोक्ताः शमोऽपि च॥

प्रभृ ।
इतिसंनोदनुकूलेऽर्थे मनसः प्रवणायितम् ।
मात्रादिवैकृतात्चेतोविकासो हास उच्यते ॥
इष्टनाशादिभिश्चेतोवैक्लव्यं शोकशब्दभाक् ।
प्रतिकूलेषु तैक्ष्ण्यस्यावबोधः क्रोध उच्यते ॥
कार्य्यारम्भेषु संरम्भः शौर्यानुत्साह उच्यते ।
रौद्रशब्दात् तु जनितं चित्तवैक्लव्यं भयम् ॥
दोषेक्षणादिभिर्गर्हा जुगुप्सा विषयोद्भवा ।
विविधेषु पदार्थेषु लोकसीमानिवर्त्तिषु ॥
विस्मारश्चेतसो यस्तु स विस्मय उदाहृतः ।
श्रमो गिरीणामवस्थायामालस्यिमाश्रमं सुखम् ॥
यथा मालतीमाधवे रतिः । नटकमेलके हासः ।
रामायणे शोकः । महाभारते श्रमः । एवमन्येऽपि । एते हि एतेभ्यस्तेभ्यस्तैस्तैर्विरुद्धैरविरुद्धैश्च भावैरनुच्छिन्नाः प्रत्युत परिपुष्टा एव स्वकृत्यानुभवसिद्धाः ।"*।) स्थितिविशिष्टे, त्रि ॥ (यथा, महाभारते । ६।६।२६ ।
"संवत्सरस्थायिनौ च यदौ प्रज्वलितावुभौ ॥")

स्थालुकः, पुं, (स्थातुं शीलमस्य । स्था + "लसपतपदेति ।" ३ । २ । १५४ । इति उकञ् ।) एकग्रामाधिकृतः एकस्मिन् ग्रामे नियोजितः । इत्यमरः । २ । ८ । ७ ॥ (स्थितिशीले, त्रि । यथा, भट्टिः । २ । २२ ।
"न्यायोद्धते न्यायुकमल्लजाते-
मनोधमभ्यर्णमहाधिकाय ।
ददौ नयाय जयदाधराय
तस्मै मुनिः श्रेयसि जागरूकः ॥")

स्थालं, क्ली, (तिष्ठत्यस्मिन् अग्न्यादिकमिति । स्था + "स्थाघ्वदाजिगातिभ्य इति ।" उणा० १ । ११५ । इति आलच् ।) पाकाद्यर्थमृण्मयभाजनम् । थाल इति भाषा । इत्यमरः । ३ । ५ । ३२ ॥ स्थलति तिष्ठति अग्न्यादिकमत्र स्थालं स्थल + ष्यञ् । इति भरतः ॥ (अस्थिविशेषः । यथा, याज्ञवल्क्यः । ३ । ८ । ।
"स्थाली सप्त चतुःषष्टिर्द्रोणा वै मिणुतिर्नरा ॥"
"स्थालानि दशनलप्रदेशस्थान्यस्थीनि ।" इति तत्र मिताक्षरा ॥)

स्थाली, स्त्री, (तिष्ठत्यत्राग्न्यादीनीति । स्था + आलच् । गौरादित्वात् ङीष् । इत्युणादिवृत्तौ उज्ज्वलः । १ । ११५ ।) पाकपात्रविशेषः । चाँकी इति थाली इति च भाषा । तत्पर्य्यायः । सिक्थः २ उमा ३ कुल्यम् ४ । इत्यमरः । २ । ८ । ५१ ॥ पिठरी ५ स्थानम् ६ उषा ७ कुल्मी ८ । इति शब्दरत्नावली ॥ कुल्या ९ कुल्यका १० । इति शब्दरत्नावली ॥ पाकः ११ प्रतिसी १२ । इति भरतः ॥ (यथा, हरिवंशे । ७६।७ ।
"दूरनिक्षिप्तया स्थाल्या यत्पक्वमुपजायते ।
अमेध्यं च भवेत्तस्य प्राजापत्यं व्रतार्धिकम् ॥")
पाठान्तरम् । इत्यमरटीका । २ । ९ । ५६ ॥ मेदिनी च ।

स्थालीपक्व, त्रि (स्थाल्यां पक्वम् ।) स्थाल्यां पक्वान्नादि ॥

स्थालीपाकः, पुं, (स्थाल्यां पाको यस्य ।) भाजनपक्वान्नादिः । यथा, चातुर्म्मास्यव्रते मात्स्ये ।
"लभते सन्ततिं दीर्घां स्थालीपाकमभक्षयन् ॥"
इति तिथ्यादितत्त्वम् ॥
(स्थाल्यां पच्यते इति । पच् + घञ् । स्थालीकृतपाकविशेषे, चरुविशेषे च पुं । यथा, महाभारते । ३ । २२२ । ३२ ।
"वे च धर्म्मा क्षुद्रुजेषु श्रुत्या मे कथिताः पुरा ।
भिक्षाबलिग्रहमिति स्थालीपाकाश्च पर्व्वसु ॥
मान्यानां मानसत्कारो ये चान्ये विहिता मम ।
तान् सर्व्वाननुवर्त्तामि दिवारात्रमतन्द्रिता ॥")
मांसाष्टकाश्राद्धे स्थालीपाकस्य मांसप्रतिनिधित्वं यथा, "अभ्यभावे स्थालीपाकेन यथा गोभिलः । 'अपि वा स्थालीपाकं कुर्व्वीत इति ।' तद्विधानन्तु ।
'स्थालीपाकं पशुस्थाने कुर्य्यादद्यात्तु कल्पिकम् ।
अपयेत्तं सवत्साया सद्यस्या गोः पयस्तु ॥'
इति क्षुद्रोगपरिशिष्टोक्तं ग्राह्यम् । अन्विति ओदनचरोः पश्चात् ।" इति तिथ्यादितत्त्वम् ॥
(वैद्यकोक्तस्थालीपाकविधिर्यथा,—
अथ स्थालीपाकविधिः ।
"इत्यमादित्यपाकान्तं स्थाल्यां पाकमुपाचरेत् ।
स्थालीपाके फलद्रव्यमष्टवस्तिगुणीकृतम् ॥
तस्य षोड्शिकं तोयमष्टभागावशेषितम् ।
मृदुमध्यकठोराणामन्येषामयवा समम् ॥
क्वथनीयं समादाय चतुरश्रौ च षोड्श ।
गुणानां स्राव्यते तोयं शेषयेदयवा समम् ॥
स्वरसस्यापि लौहेन स्थालीपाके समानता ।
स्थाल्यां क्वाथादिकं दत्त्वा यथाविधिविनिर्म्मितम् ॥
पाकेन क्षीयते यस्मात् स्थालीपाक इति स्मृतः ।
इक्ष्विक्वर्जयवाग्रस्य भूलक्ष्म घृतमूलिका ॥
भृङ्गराजाक्षराजानामेषां निरसैः सह ।
मिलित्वा वा विधातव्यं स्थालीपाके फलादिषु ।
यथा दीर्घायुषेणापि स्थालीपाको विधीयते ॥"
इति वैद्यकरसेन्द्रसारसंग्रहे चारयमारणाधिकारे ॥)

स्थालीपुलाकः, पुं, (स्थालीस्थः पुलाको भक्तगुलिका यत्र ।) न्यायविशेषः । यथा,—
"स्थालीस्थास्तण्डुला इते सर्व्वे विक्लित्तिभागिनः ।
समकालाग्निसंयोगभागित्वात् प्रतिमन्यवत् ॥"
इति स्थालीपुलाकन्यायेन वैदिकलिङ्गलाघवेनैवापूर्व्वं शक्तिकल्पनात् । प्रतिपन्नं हस्तमर्दनादिना स्फुटित्वेन ज्ञातम् । इति मलमासतत्त्वम् ॥

स्थालीबिलं, क्ली, (स्थाल्या बिलम् ।) पाकपात्रस्याभ्यन्तरम् । स्थाल्याः शून्यभागः । इति सिद्धान्तकौमुदी ॥

स्थालीबिलीयः, } त्रि, (स्थालीबिलमर्हतीति ।
स्थालीबिल्यः, } "स्थालीबिलात् ।" ५ । १ । ७० ।
इति छः यत्र ।) पाकपात्रस्याभ्यन्तराहः । यथा, स्थालीबिलीयास्तण्डुलाः । स्थालीबिल्याः पाकपात्रस्याभ्यन्तरा इत्यर्थः । इति सिद्धान्तकौमुदी ॥

स्थावरः, पुं, (स्थालीवत् वृक्षः ।) नक्षत्रभेदः । बेलिया पीपर इति हिन्दी भाषा । तत्पर्य्यायः । नन्दीवृक्षः २ अश्वत्थभेदः ३ प्ररोही ४ राजपादपः ५ क्षयतरुः ६ चीरी ७ वनस्पतिः ८ । अस्य गुणाः । लघुत्वम् । स्वादुत्वम् । तिक्तत्वम् । तुवरत्वम् । उष्णत्वम् । कटुपाकरसत्वम् । आध्मित्वम् । विषपित्तकफास्रनाशित्वञ्च । इति भावप्रकाशः ॥

स्थावरं, क्ली, (तिष्ठति अनुमीयते । स्था + वरच् ।) धनुर्गुणः । इति त्रिकाण्डशेषः ॥

स्थावरः, पुं, (तिष्ठतीति । स्था + वरच् ।) पर्व्वतः । इति शब्दरत्नावली त्रिकाण्डशेषश्च ॥

स्थावरः, त्रि, (तिष्ठतीति । स्था + "शेश्छन्दसि बहुलम् ।" ३ । १ । ७ । इति वरच् ।) जङ्गमेतरः । अचलवस्तु । इत्यमरः । ३ । १ । ७३ ॥ जङ्गमा गोमहिष्यादयः तभ्योऽन्ये वृक्षादिः स्थावरः । इति भरतः ॥ ❁ । स च त्रिलक्षणः सप्तमः सर्गः षड्विधश्च । यथा,—
"सप्तमो मुख्यसर्गस्तु षड्विधस्तरुपादपाः ।
वनस्पत्योषधिलता त्वक्सारो वीरुधो द्रुमाः ॥"
तेषां लक्षणं यथा,—
"उत्स्रोतसस्तमःप्राया अन्तःसंज्ञा विशेषिणः ॥"
इति श्रीभागवतम् ॥
"ये पुष्पैः विना फलन्ति ते वनस्पतयः । ओषधयः फलपाकान्ताः । लता आरोहणापेक्षाः । त्वक्सारो वेणवादयः । लता एव काठिन्येन आरोहणानपेक्षा वीरुधः । ये पुष्पैः फलन्ति ते द्रुमाः । ऊर्द्ध्वस्रोत आहारसञ्चारो येषां ते । तमःप्रायाः अव्यक्तचेतन्याः । अन्तःसंज्ञाः सुप्तमेव जानन्ति नान्यत् तदापि अन्तरेव न बहिः विशेषिणः अवयवस्थितपरिणामाद्यनेकभेदवन्तः ।"
इति तट्टीकायां श्रीधरस्वामी ॥ ❁ ॥ स्थावरधनं सान्निध्येतरेभ्यो न विक्रेतव्यम् । यथा,—
"स्थावरं धनमन्यस्मै स्थिते सान्निध्यवर्त्तिनि ।
योग्ये क्रेतरि विक्रेतुं न शक्तः स्थावराधिपः ॥
सान्निध्यवर्त्तिनां ज्ञातिः सवर्णो वा विशिष्यते ।
तयोरभावे सुहृदो विक्रेतिच्छा गरीयसी ॥
निर्णीतमूल्ये प्रणये स्थावरस्य क्रयोत्तमे ।
तन्मूल्यक्षेपे संमीयस्यो दाति क्रेता न चापरः ॥
मूल्यं दातुमशक्तश्चेत् सम्मतौ विक्रयेऽपि वा ।
सन्निधिस्यलदान्यस्मै गृही शक्तात् विक्रये ॥
क्रीतमेतत् स्थावरं देयि ! परोक्षे प्रतिवासिनः ।
अवधार्य तन्मूल्यं एतावत् प्राप्तुमर्हति ॥
क्रेता तत्र गृहारामान् विनिर्म्माति भुनक्ति वा ।
मूल्यं दत्त्वापि नाप्नोति स्थावरं सन्निधिस्थितः ॥"
इति महानिर्व्वाणतन्त्रे द्वादशोल्लासः ॥
स्थावरे विशेषो यथा, याज्ञवल्क्यः ।
"मणिमुक्ताप्रवालानां सर्व्वस्येव पिता प्रभुः ।
स्थावरस्य तु सर्व्वस्य न पिता न पितामहः ॥"
अपि च ।
"स्थावरं द्विपदश्चैव उभयं स्वयमर्जितम् ।
स्वयमस्य सुतान् सर्व्वान् न दद्यात् अन्य विक्रयः ॥"

किञ्च ।
"पितुः प्रसादान् भुञ्यन्ते वस्त्राण्याभरणानि च ।
स्थावरन्तु न भुञ्जीत प्रसादे सति प्रेतके ।"
इति मिताक्षराधृतवचनमपि पितामहधनपरम् । पित्रा च स्वोपार्जितं स्थावरं दत्तं भुञ्जत एव इति ॥
"स्थावरे विक्रयो नास्ति कुर्य्यादाधिमनुज्ञया ।"
इति स्थावरस्य केवलविक्रयप्रतिषेधात् विक्रयेऽपि कर्त्तव्ये सक्षिरण्यतृदकं दत्त्वा दानरूपेण स्थावरविक्रय इति विज्ञानेश्वरः । वस्तुतस्तु स्थावरविक्रयनिषेधोऽविभक्तस्थावरविषयः ॥ ७ ॥ पूर्व्वपुरुषार्जितनष्टोद्धारे विशेषयति मिताक्षरायाम् ।
"स्थावरं द्विपदश्चैव यद्यपि स्वयमर्जितम् ।
अमन्त्र्य सुतान् सर्व्वान् न दानं न च विक्रयः ॥"
अस्याप्यपवादमाह ।
"एकोऽपि स्थावरे कुर्य्यात् दानाधमनविक्रयम् ।
आपत्काले कुटुम्बार्थे धर्म्मार्थे च विशेषतः ॥"
अनुपभोगे तु सर्व्वस्य क्षौताद्देहान्निवर्त्तया दृष्टस्मृतिः ।
"संविभागक्रयप्राप्तं पित्र्यं लब्धञ्च राजतः ।
स्थावरं सिद्धिमाप्नोति भुक्त्वा दानानुरूपतया ॥ ८ ॥
औदायिके सदा स्त्रीणां स्वातन्त्र्यं परिकल्पितम् ।
विक्रये चैव दाने च यद्देयं स्थावरेष्वपि ॥"
नारदः ।
'भर्त्रा प्रीतेन यद्दत्तं स्त्रिये तस्मिन् मृतेऽपि तत् ।
सा यथाकाममश्नीयात् दद्याद्वा स्थावरादृते ॥"
यमः ।
"अविभक्तं स्थावरं यत् सर्व्वेषामेव तद्भवेत् ।
विभक्तं स्थावरं प्राप्तं नान्योदर्य्यैः कदाचन ॥"
सर्व्वेषां सोदराणां सोदराणाम् । स्थावरातिरिक्तन्तु विभक्ताविभक्तसोदरसामेवेत्यर्थः । सिद्धम् । तेषां मनुपितृदाहृत्वेन तस्मात्पौर्व्वापर्य्यपरिष्टदाहृत्वेन बाधिकाराद् । इति दायतत्त्वम् ॥ ७ ॥
अथातः स्थावरविषयविज्ञानीयमध्यायं व्याख्यास्यामः ।
"स्थावरञ्चाश्मधैव द्विविधं विद्यादुच्यते ।
दशाधिष्ठानमाद्यन्तु द्वितीयं गोढ़मात्रयम् ॥
शृङ्गं पर्णं दलं पुष्पं त्वक् क्षीरं सार एव च ।
निर्य्यासो धातवश्चैव कन्दश्च दशमः स्मृतः ॥
सप्त क्षीरकाण्डमारभ्य गुल्मान्तवल्मीकरुक्षपाटविकुलक्षणविषयाणीत्यर्थः । मूलविषाणि । विषपत्रिका-लम्बाचरदारुककरम्भ-मण्डूकरम्भाणि पञ्च पञ्चविषाणि । कुमुदकोविदारकाकरम्भमण्डूकरम्भकङ्कोटिकरञ्जकपत्रीशुकशमीरीभल्लातपलाशनिम्बसारपाकामीति दादश दलविषाणि । वेल्लकारम्भपत्रीशुकरम्भमण्डूकरम्भाणि पञ्च पुष्पविषाणि । अम्लपाचकर्कशपत्रीशोभाञ्जनकरञ्जातकरम्भसप्तपलाशकानि सप्तत्वक्सारनिर्य्यासविषाणि । कुमुदप्रपौण्डरीकासतपत्रीशोभाञ्जनानि क्षीरविषाणि । वेल्लाम्लभल्लातरिष्टालाबूनि ये धातुविषे । कालकूटवत्सनाभमहेन्द्रपाककर्कटमण्डलवैराटकगुलकमत्स्यौविषप्रपौण्डरिकन्मूलकपलालाण्डलमहाविषकर्कटकानीति चतुर्दश कन्दविषाणि । इत्येवं षष्ठपञ्चाशत् स्थावरविषाणि भवन्ति ॥
चत्वारि वत्सनाभानि सप्तकं ये प्रकीर्त्तिते ।
षट् चैव वर्षणाग्र्याहुः शेषाण्येकैकमेव तु ॥
उद्देशनं मूलविषैः प्रलापो मोह एव च ।
तृष्णाक्लोद्देष्टनेच्छासा ज्ञेयाः पत्रविषेण तु ॥
सुप्तक्षोफः फलविषैर्दाहोन्नद्धेय एव च ।
भवेत् पुष्पविषैस्तद्वि राध्मानं मोह एव च ॥
त्वक्सारनिर्य्यासविषैरुपयुक्तैर्भवन्ति हि ।
वान्त्यौर्गन्ध्यपारुष्यग्लिरोरुक्कफसंस्रवाः ॥
फेणागमः शीरविषे विड्भेदो जिह्मजिह्मता ।
क्लम्योढ़नं धातुविषैर्मूर्च्छा दाहश्च तालुनि ॥
प्रायेण कालघातीनि विषाण्येतानि निर्द्दिशेत् ।
कन्दजानि तु तीक्ष्णानि तेषां वक्ष्यामि विस्तरम् ॥
सर्व्वाङ्गान्तं कालकूटे वेपथुः स्तम्भ एव च ।
श्वेतास्यो वत्सनाभे पीतविण्मूत्रनेत्रता ॥
सर्षपे वातवेगुण्यमागाहो मन्त्रिणश्च ह ।
श्वेता दौर्ब्बल्यवाक्सङ्गौ पालके शुमतावपि ॥
प्रसेकः कर्द्दमाख्ये तु विड्भेदो नेत्रपीतता ।
वैराटकेनाङ्गदुःखं शिरोरोगश्च जायते ॥
गात्रस्तम्भो वेपथुश्च जायते सुप्तकेन तु ।
पङ्गुत्वविषेणाङ्गसादो दाहोदरविड्ग्रहः ॥
पृथरीकेण रक्तत्वमर्च्छोर्द्ध्वित्तोदरे ।
वेपथुं मूलकेऽर्द्धाङ्गैकाङ्गोष्मप्रमूढ़ता ॥
चिरेणोच्छ्वसिति म्लायो नरो हालाहलेन वै ।
महाविषेण हृदये मन्त्रिमूलोष्मभो भृशम् ॥
कर्कटेनोत्पतत्यूर्द्ध्वं दन्तान् दशत्यपि ।
कन्दजान्यूर्द्ध्वगत्यानि प्रयुक्तानि त्रयोदश ॥
सद्यानि कुशलैर्ज्ञेयान्येतानि दशभिर्गुणैः ।
रूक्षसूक्ष्मं तथा तीक्ष्णं सूक्ष्ममाशु व्यवायि च ॥
विकासि विशदञ्चैव लघ्वपाकि च तत् स्मृतम् ।
तन्नीत्वात् कोपयेद्वायुमौष्ण्यात् पित्तं सशोणितम् ॥
मानसं मोहयेत्तैक्ष्ण्यादक्लेदवत्त्वात् क्षिणत्यपि ।
शरीरावयवान् सौक्ष्म्यात् प्रविश्येह्निकरोति च ॥
व्यापत्त्वादाशु सद्यन्ति व्यवायात् प्रकृतिं भजेत् ।
कफपित्ते विकाशित्वादोषान् धातुमलानपि ॥
वेगव्यादनिरिद्धेन दुष्किरित्वेन लाघवात् ।
दुर्ज्ञेयत्वाविपाकित्वात्तस्मात् क्षीयते चिरम् ॥
स्थावरं जङ्गमं यच्च कृत्रिमं चापि यद्विषम् ।
सद्यो व्यापादयेत्तच्च ज्ञेयं दशगुणान्वितम् ॥

यत् स्थावरं जङ्गमकृत्रिमं वा
दैवादगेयं यदनिर्गमं तत् ।
क्षौद्रं विषघ्नौषधिमिश्रितं वा
दोषाधिक्यानामपशोधितं वा ॥
क्षमावतो वा गुरुविप्रहीनं
विषं हि दूषीविषतामयेति ।
यौक्त्याभावात् निपानयेत्तत्
कफाशनं पर्य्यगमत्पवनि ॥
तेनाहितो मिश्रपुरोधवर्त्मा
विषाग्नेरेणसुतः पिशाचः ।

मूर्च्छन् वमन् गद्गदवाग्विषण्णो
भवेच्च दूषीदरलिङ्गचुष्टः ॥
श्यामाग्न्यये कफवातरोगी
पित्ताग्न्यये नीलपित्तरोगी ।
सदेसरो धस्तशिरोरुहाङ्गो
विलूनपक्षस्तु यथा विहङ्गः ॥
क्षिते रसादिष्वथ वा यथोक्तान्
करोति धातुप्रभवान् विकारान् ।
कोपञ्च शीतानिलदुर्हिनेषु
यात्याशु पूर्व्वं प्रगुणं तच्च रूपम् ॥
निद्रा गुरुत्वञ्च विषूचिकाच
विशेषदर्शावधवाङ्गमर्दः ।
ततः करोत्यन्नमहाविपाका-
वरोचकं मण्डलकोठमोहान् ॥
धातुक्षयं पादकरास्यशोफं
हृत्कोदरं कृद्दिमघातिसारम् ।
वैवर्ण्यमूर्च्छाविषमज्वरान् वा
कुर्य्यात् प्रबद्धां प्रबलां दशां वा ।
उन्मादमन्यष्ठनवेपथाश्म-
हानाहमन्यत् व्यथयेच्च शुक्रम् ।
गात्रग्रहन्यष्ठनवेपथुं वा
तांस्तान् विकारांश्च बहुप्रकारान् ॥
दूषितं देशकालाग्निदिवास्वप्नैरभिग्रहः ।
यस्माद्दूषयते धातून् तस्माद्दूषीविषं स्मृतम् ॥
स्थावरस्योपयुक्तस्य वेगे तु प्रथमे नृणाम् ।
श्यावा शिक्षा भवेत् तस्य मूर्च्छाश्वासश्च जायते ॥
द्वितीये वेपथुः स्वेदो दाहः कण्डूरुजस्तथा ।
विषमामाग्न्यये प्राप्तं कुरुते हृदि वेदनाम् ।
तालुशोषं हृतीये तु मूर्द्धं श्यामाग्न्यये भृशम् ।
दुर्ब्बलं हरिते मूत्रे जायते चास्य शोचने ।
मन्दाग्न्यये तोदो दिक्षाकासोच्छ्वासकूजनम् ।
चतुर्थे जायते वेगे शिरसश्चातिगौरवम् ॥
कफप्रसेको वैवर्ण्यं पर्व्वभेदश्च पञ्चमे ।
सर्व्वदोषप्रकोपश्च पक्वाधाने च वेदना ।
षष्ठे प्रपक्वमाशय भृशं वाप्यतिसार्य्यते ।
स्फुरत्यष्ठकटीभङ्गः सन्निरोधश्च सप्तमे ।
प्रथमे विषवेगे तु पानं शीतानुसेवितम् ।
अगदं मधुसर्पिर्भ्यां पाययेत समांशकम् ।
द्वितीये पूर्व्ववद्दानं पाययेच्च विरेचनम् ।
तृतीयेऽगदपानन्तु स्निग्धं भक्षे तथाशनम् ।
चतुर्थे क्षेद्यसंसिद्धं पाययेन्नागदं भिषक् ।
पञ्चमे क्षौद्रसधुकक्वाथयुक्तं प्रदापयेत् ।
षष्ठेऽनिसारयत्युच्चैरधोऽथ सप्तमे ।
सर्पिर्गुडं काकपदं खादेत् सार्द्धञ्च शीतं पिबेत् ।
वेगान्तरे तत्सप्तमे क्षते कर्म्मणि शीतलाम् ।
यवागूं मधुसर्पिर्भ्यामिमां दद्यादिचक्षणः ।
शोभाञ्जनोरुबिल्वः पाठासुरभिवत्सकाः समधाः ।
शिरीषः खदिरश्चेति क्षुद्रशोफहरो गणः ।
पुनर्नवेरुबुकश्चित्रकः सारिवे वला ।
एषां यवागूर्निर्वाप्ये क्षते श्वित्रविषापहम् ।
मधूकं नागरं कुष्ठं भद्रदारु हरेणुका ।
पुनर्नवैरण्डबलामूलानि सगुडोदकम् पिबेत् ।

स्थिरकः

पिङ्गं चन्दनं पत्रं प्रियङ्गु श्यामकं तथा।
हरिद्रे द्वे दृषत्यौ च सारिवे च स्थिरासहा॥
कल्कैरेषां हृतं सिद्धमक्षमेयमिति विद्युतम्।
विषाणि हन्ति सर्व्वाणि शीघ्रमेवाचितं क्षणात्॥
दूषीविषार्त्ते तु स्निग्धमर्कक्षाधश्च शोधितम्।
पाययेतामृतं नित्यमिमं दूषीविषापहम्॥
पिप्पली श्यामकं मांसी सारिवः परिपेलवम्।
तुवरिका यष्टिमधुका तोयं कनकगैरिकम्॥
क्षौद्रयुक्तोऽगदो ह्येष दूषीविषमपोहति।
एष ज्ञात्वा विचारिस्तु न चाप्यत्रापि वार्य्यते॥
ज्वरे दाहे च हिक्कायामानाहे शुक्रसंक्षये।
शीतोष्णातिसारे मूर्च्छायां छर्दिरोगे जठरेऽपि वा॥
उन्मादे वेगयोर्द्वे द्वे चाग्ये स्वरुपमात्रया।
यथास्वं तेषु कुर्व्वीत विषघ्नं दौषधं क्रियाम्॥
साध्यमात्रावतः सद्यो वाप्यं संवत्सरोत्थितम्।
दूषीविषमसाध्यन्तु क्षीणक्षाधितसेविनः॥"

इति सुश्रुते कल्पस्थाने ७ अध्यायः॥

स्थावरादि, क्ली, (स्थावरं आदिः कारणं यस्य।) वत्सनाभविषम्। इति राजनिर्घण्टः॥

स्थाविरं, क्ली, (स्थविरस्य भावः कर्म्म वा। स्थविर + "प्रायेणाम्नुवादिभ्योऽण्।" ५। १। १३०। इत्यण्।) स्थविरत्वम्। वृद्धत्वम्। इत्यमरः। २। ३। ४०॥ (यथा, महाभारते। २। १६८। ३।

"गार्हस्थ्येऽप्यथवा भाक्षे यौवने स्थाविरेऽपि वा।
यत्पापकं समश्नाति तथा त्वं कथयस्व मे॥")

तत्तु सप्ततिवर्षात् परम्। यथा,—

"या वोदग्राङ्गपेक्षाङ्गसत्त्वयुक्तत उच्यते।
हृद्धः स्यात् सप्ततेरूर्द्धं वर्षीयान् नवतेः परम्॥"

इति भरतधृतस्मृतिवचनम्॥

स्थायकः, पुं, पार्श्वियम्। इत्यमरः। २। ६। १२९॥ अधारेर्नुदुपम्। इति मेदिनी॥

स्थायु, क्ली, शारीरबलम्। धातोः सुप्रत्ययेन निष्पन्नम्। इति केचित्॥

स्थायुः, त्रि, (तिष्ठतीति। स्था + "स्थाणिरुचारुः।" उणा० १। ९२। इति युः।) स्थिरतरः। इत्यमरः। ३। १। ७३॥ (यथा, भट्टिः। २। ४०।

"स्थिरस्तयो भ्रातरतेव भक्तमा
भुना दिवः स्थायुरिवाचिरप्रभा।
अथाङ्गकान्तेरधिदेवताश्रुतिः
सुता दरे तस्य सुताय मैथिली॥")

स्थायुतः। इति भरतः॥ (यथा, किरातेः। ५। १८।

"अभिमानधनस्य मानवै-
रसुभिः स्थायु यशश्चिकीर्षतः।
अविचारितमप्रियक्षमा
वत यत्तैः क्षमसाहसक्रियम्॥")

स्थावरः। इति भीमसेनटीकायां श्रीधरस्वामी। २। ६। ४०॥ (यथा, भट्टः। १। ५६।

"अदाक्षमाक्षिको भूत्वा चौर्यं स्थायु चरिष्णु च।
स्थानिकमपि संरक्षदत्ता मूर्खं विमुञ्चति॥")

स्थिरकः, पुं, कटिरोगः। यथा, भावप्रकाशस्य।

"कटिरोगः कटिर्यस्य पृष्ठः स्थिरः स्थिरो स्थिरा॥"

स्थिरः

स्थितः, त्रि, (स्था + क्तः।) प्रतिज्ञातवान्। (यथा, हरिवंशे। २५५। ६५।

"पक्षीन्द्रवचनं श्रुत्वा दानवेन्द्रोऽब्रवीदिदम्।
स्थितोऽस्मि समये तस्य यत्तस्य महात्मनः॥")

ऊर्द्धः। निश्चलः। इति मेदिनी॥ (वर्त्तमानः। गतिनिवृत्तिविशिष्टः। यथा, रघुः। २। ६।

"स्थितः स्थितासुच्चलितः प्रयातां
निवेदुधीमासनबन्धधीरः।
जघाभिलाषी चलमादधानां
छायेव तां भूपतिरन्वगच्छत्॥")

क्ली, स्था + भावे क्तः। अवस्थानम्। कुलमर्य्यादा। यथा, रामायणे। २। ३६। २४।

"साध्वीनान्तु स्थितानान्तु शीले सत्ये श्रुते स्थिते।
स्त्रीणां पवित्रं परमं पतिरेको विशिष्यते॥")

स्थितप्रज्ञः, त्रि, (स्थिता प्रतिष्ठिता आत्मानात्मविवेकजा प्रज्ञा यस्य।) मनोगतसर्व्ववासनारहितः। यथा, श्रीभगवद्गीतायाम् २। ५५—५६।

"प्रजहाति यदा कामान् सर्व्वान् पार्थ! मनोगतान्।
आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते॥
दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः।
वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते॥"

स्थितप्रेमा, [न्] पुं, (स्थितं प्रेम यस्य।) स्थिरतरबन्धुः। इति केचित्॥

स्थितिः, स्त्री, (स्था + क्तिन्।) न्याय्यपथस्थितिः। तत्पर्य्यायः। संस्था २ मर्य्यादा ३ धारणा ४। इति क्षत्रियवर्गे अमरः। २। ८। २६॥ संस्थितिः ५। इति शब्दरत्नावली॥ (यथा, कुमारे। १। १८।

"स मानदण्डो मेरुसारः पितॄणां
वाच्यं कुलस्य स्थितये स्थितिज्ञः।
मेनां मुनीनामपि माननीयां
मालामुरूणां विधिनोपयेमे॥")

अवस्थानम्। तत्पर्य्यायः। आसा २ आसना ३। इति यज्ञौर्व्वर्गे अमरः। ३। २। २१॥ (यथा, रघुः। १। ८।

"प्रस्थितायां प्रतिष्ठेयाः स्थितायां स्थितिमाधरेः॥")

सीमा। इति मेदिनी॥ ७॥ (नियमः। यथा, महाभारते। ३। १३१। २०।

"क्षत्रैः कृपोऽसीति स्थितिरेषा समातनी।
मा राजन् पारमप्राप्य बहवोऽस्मत्समाहताः॥")

प्रलयविशेषे स्थितिनिषेधो यथा,—

"नाक्षिभक्षकवाक्यानि न केशानु वा कथञ्चन।
तृणाङ्गारकविद्यानामधितिष्ठेत् कदाचन॥"

इति कौर्म्मे उपविभागे। १६। ७६॥

स्थिरः, पुं, (तिष्ठतीति। स्था + "अतिरञ्जिस्थिरेति।" उणा० १। ५४। इति किरच्प्रत्ययेन साधुः।) देवः। पर्व्वतः। कार्त्तिकेयः। वृक्षः। इति शब्दरत्नावली॥ अग्निः। मीनः। इति मेदिनी॥ अवस्कारः। इति राजनिर्घण्टः॥

स्थिरजी

धवश्चः। इति भावप्रकाशः॥ वृषसिंहवृश्चिककुम्भराशयः। यथा,—

"क्रूरोऽथ सौम्यः पुरुषाङ्गना च
योऽथ युग्मं विषमः समश्च।
चरस्थिरद्वात्मकनामधेया
मेषादयोऽमी क्रमशः प्रदिष्टाः॥"

इति ज्योतिस्तत्त्वम्॥

तच्च मांसफलं यथा,—

"अस्थिरविभूतिमिदं चलमटनं स्खलितनियमपि चरमे।
स्थिरमे तद्विपरीतं क्षेमान्वितं दीर्घसुखमथ॥
द्विशरीरे त्यागयुक्तं कृतदुष्कृतसाहिनं विविधचेष्टम्॥"

इति दीपिका॥ *॥

स्थिरवस्तूनि यथा। भूमि १ प्रधानभटः २ साध्वी ३ धर्म्मः ४ चधर्म्मः ५ वन्धनः ६। अस्थिरवस्तूनि यथा। जवनी १ दोला २ अपाङ्गः ३ यौवनम् ४ दुर्जनः ५ स्वामिप्रसादः ६ हस्तिकर्णः ७ स्वर्गम् ८ मत्स्यः ९ कपिः १० स्त्रीः ११। इति कविकल्पलता॥

स्थिरः, त्रि, (स्था + किरच्।) कठिनः। निश्चलः। इति धरणिः। यथा,—

"अवश्यच्छाया खलेः प्रीतिः परनारीषु सङ्गतिः।
पश्यैते अस्थिरा भावा यौवनानि धनानि च॥
अस्थिरं जीवितं लोके अस्थिरं धनयौवनम्।
अस्थिरं पुत्रदारादि धर्म्मः कीर्त्तिर्यशः स्थिरम्॥"

इति गारुडे। ११५। २५,—२६॥

स्थिरगन्धः, पुं, (स्थिरो गन्धो यस्य।) चम्पकवृक्षः। इति राजनिर्घण्टः॥ स्थिरस्थायिसौरभयुक्ते, त्रि॥

स्थिरगन्धा, स्त्री, (स्थिरो गन्धो यस्याः।) पाटला। केतकी। इति राजनिर्घण्टः॥

स्थिरचक्रः, पुं, (स्थिरं चक्रं यस्य।) जिनविशेषः। तत्पर्य्यायः। मञ्जुश्रीः २ ज्ञानदर्पणः ३ मञ्जुभद्रः ४ मञ्जुघोषः ५ कुमारः ६ अक्षरचक्रवान् ७ वज्रधरः ८ प्रज्ञाकायः ९ वादिराट् १० नीलोत्पली ११ महाराजः १२ नीलः १३ शार्दूलवाहनः १४ विद्याम्बनिः १५ पूर्व्वजिनः १६ खड्गी १७ दण्डी १८ विभूषयः १९ बालमतः २० पद्मवीरः २१ सिंहकेसिः २२ शिखाधरः २३ वागीश्वरः २४। इति विकाण्डशेषः॥

स्थिरच्छदः, पुं, (स्थिरा छदा यस्य।) भूर्ज्जवृक्षः। इति रत्नमाला॥

स्थिरच्छायः, पुं, (स्थिरा निश्चला छाया यस्य।) लक्ष्मणवृक्षः। इति शब्दमाला॥ छायातरुः। इति विकाण्डशेषः॥ (निश्चलच्छायायुक्ते, त्रि। यथा, महानिर्व्वाणे। १। ३।

"स्थिरच्छायद्रुमच्छायाच्छादिते शिवमञ्जुले॥")

स्थिरजिह्वः, पुं, (स्थिरा जिह्वा यस्य।) मत्स्यः। इति हेमचन्द्रः॥

स्थिरजीविता, स्त्री, (स्थिरं बहुकालस्थायि जीवितं प्राणाः यस्याः।) प्राक्तनिकृष्णः। इति शब्दमाला॥

स्थूलकणा ६ पृथुः ७ मनोज्ञा ८ चारुकी ९ धौर्णा १० तरला: ११ सुषवी १२ कारवी १३ पृथ्वीका १४ । अस्य गुणाः । कटुत्वम् । तिक्तत्वम् । उष्णत्वम् । वातगुल्मामशोगच्छेदग्राहानाहानुलोमित्वम् । लीर्णत्वम् । दीपनत्वञ्च । इति राजनिर्घण्टः ॥ ७ ॥ विविधक्षीरकणागुणाः ।

"क्षीरकी चरणीजाती कणा स्यादीर्घजीरकः ।
कृष्णजीरः सुगन्धश्च तद्वेवाहारशोधनः ॥
कलाधाणी तु सुषवी कालिका चोपकालिका ।
पृथ्वीका कारवी पृथ्वी पृथुः छत्रोपकुञ्चिका ।
उपकुञ्ची च कुञ्ची च दृष्यक्षीरक इत्यपि ।
क्षीरकाक्षितयं रूक्षं कटुकं दीपनं लघु ।
संग्राहि पित्तलं मेध्यं गर्भाशयविशुद्धिकृत् ॥
ज्वरघ्नं पाचनं वल्यं हृद्यं रुच्यं कफापहम् ।
चक्षुष्यं पवनाध्मानगुल्मच्छर्दतिसारहृत् ॥"

इति भावप्रकाशः ॥

स्थूलताल:, पुं, (स्थूलस्तालः ।) छिन्नालः । इति राजनिर्घण्टः ॥

स्थूलत्वचा, स्त्री, (स्थूला त्वक् यस्याः ।) काश्मरी । इति राजनिर्घण्टः ॥

स्थूलदण्डः, पुं, (स्थूलो दण्डो यस्य ।) देवनलः । इति राजनिर्घण्टः ॥

स्थूलदर्भः, पुं, (स्थूलो दर्भो यस्य ।) शुन्नः । इति राजनिर्घण्टः ॥

स्थूलदला, स्त्री, (स्थूलं दलं यस्याः ।) गृहकन्या । इति राजनिर्घण्टः ॥

स्थूलनाल:, पुं, (स्थूलो नालः ।) देवनलः । इति राजनिर्घण्टः ॥

स्थूलनास:, पुं, (स्थूला नासा यस्य ।) शूकरः । इति हेमचन्द्रः ॥

स्थूलनासिक:, पुं, (स्थूला नासिका यस्य । "अच्नासिकायाः संज्ञायां नसं चास्थूलात् ।" ५ । ४ । ११८ । इत्यच स्थूलवर्णनात् न नसादेशः ।) शूकरः । इति विकाण्डशेषः ॥ पीवरनासायुक्ते, त्रि ॥

स्थूलपट:, त्रि, (स्थूलः पटो यस्य ।) पीवरवस्त्रयुक्तः । यथा,—

"दृश्यन्ते यत्र स्थूलपटा यवगोधूमशालिनः ।
प्रत्यक्षेऽपि न मोदन्ति यदि कन्या न विद्यते ॥"

इति पुराणम् ॥

(स्थूलपर्णी, पुं स्त्री ।)

स्थूलपट्ट:, पुं, (स्थूलः पट्टः कौशेय इव ।) कार्पासः । इति शब्दरत्नावली ॥

स्थूलपट्टाक:, पुं, (स्थूलपट्टं कार्पासं वस्त्रं अश्नोति व्याप्नोति अश्नुते वा अश्नेः + कन् ।) स्थूलवस्त्रम् । इति शब्दरत्नावली ॥

स्थूलपर्ण:, पुं, (स्थूलं पर्णं यस्य ।) पक्षी । इति शब्दमाला । ओषधी च ॥

स्थूलपुच्छ:, पुं (स्थूलं पुच्छमस्य ।) वकपक्षः । इति शब्दमाला । ३५ पुच्छः । इति राजनिर्घण्टः ॥

स्थूलपुष्पा, स्त्री, (स्थूलं पुष्पं यस्याः । टाप् ।) यवतिक्ता । इति राजनिर्घण्टः ॥

स्थूलफल:, पुं, (स्थूलं फलं यस्य ।) शाल्मलिवृक्षः । इति राजनिर्घण्टः ॥

स्थूलफला, स्त्री, (स्थूलं फलं यस्याः ।) शुक्लपुष्पी । इति राजनिर्घण्टः ॥

स्थूलभद्र:, पुं, (स्थूलं प्रचुरमित्यर्थं भद्रं शुभं यस्य ।) शुनकैवलिनामजैनभेदः । इति हेमचन्द्रः ॥

स्थूलभूतं, क्ली, (स्थूलं भूतम् ।) पञ्चीकृताकाशादिभूतम् । इति वेदान्तसारः ॥

स्थूलमरिचं, क्ली, (स्थूलं मरिचम् ।) कक्कोलम् । इति राजनिर्घण्टः ॥

स्थूलमूलं, क्ली, (स्थूलं मूलमस्य ।) पाण्डवमूलम् । इति राजनिर्घण्टः ॥

स्थूलरजा:, त्रि, (स्थूलं प्रचुरं रजो यस्य । "दाम्नशसयुयुजस्तुतुदसिसिचमिहपतदशनहः करणे ।" ३ । २ । १८२ । इति टरक् । टित्वात् ङीप् ।) बहुप्रदः । इत्यमरटीकायां रायमुकुटः । ३ । १ । ६ ॥ (यथा, याज्ञवल्क्यः । १ । ३०८ ।

"मधोन्मादः स्थूलरजः सततो दृढसेवकः ।
विनीतः सत्यसम्पन्नः क्षमावान् सत्यवाक् शुचिः ॥")

स्थूलरजस:, त्रि, (स्थूलं प्रचुरं रजो यस्य ।) बहुप्रदः । इत्यमरः । २ । ५ । ६ । (यथा, महाभारते । ३ । ४५ । ११ ।

"अकत्थनो मानयिता स्थूलरजः प्रियंवदः ।
सुहृदन्नान्नपानेन विविधेनाभिवर्षति ॥")

स्थूलवल्कल:, पुं, (स्थूलस्य वर्त्मनः छत्रं कारकः ।) प्राक्षणग्रहिका । इति शब्दचन्द्रिका ॥

स्थूलवल्कल:, पुं, (स्थूलं वल्कलं यस्य ।) रक्तलोध्रः । इति जटाधरः ॥

स्थूलवृक्षफल:, पुं, (स्थूलं वृक्षफलं यस्य ।) क्षिप्रपिष्टीतकः । इति राजनिर्घण्टः ॥

स्थूलवेदेही, स्त्री, (स्थूला वेदेही विदेहभवा च ।) गजपिप्पली । इति राजनिर्घण्टः ॥

स्थूलशर:, पुं, (स्थूलः शरः ।) शरविशेषः । मोटा शर इति भाषा । तत्पर्यायः । महाशरः २ स्थूलशायकः ३ इक्षुरकः ४ क्षुरपत्रः ५ वक्रफलः ६ दीर्घस्तम्बकः ७ । अस्य गुणाः । मधुरत्वम् । गुरुत्वम् । कोष्णत्वम् । कफभ्रान्तिमदापहरत्वम् । बलवीर्यकारित्वम् । नित्यं सेवितश्चेत् किञ्चिद्वातकरत्वञ्च । इति राजनिर्घण्टः ॥

स्थूलशाटक:, पुं, (स्थूलः शाटकः ।) पीनवस्त्रम् । मोटा कापड़ इति भाषा । तत्पर्यायः । वराशिः २ । इत्यमरः । २ । ६ । ११६ ॥ वराशिः ३ । इति जटाधरः ॥

स्थूलशाटका, स्त्री, स्थूलवस्त्रम् । इत्यमरटीका । २ । ६ । ११६ ॥

स्थूलशाटिका, स्त्री, (स्थूला शाटिका ।) स्थूलवस्त्रम् । इत्यमरटीका । २ । ६ । ११६ ॥

स्थूलशाटि:, पुं, (स्थूलः शाटिः ।) वराशिः । इति हेमचन्द्रः ॥

स्थूलशालि:, पुं, (स्थूलः शालिः ।) शालिधान्यभेदः । तत्पर्यायः । महाशालिः २ स्थूलाङ्गः ३ स्थूलसकुलः ४ । अस्य गुणाः । स्वादुत्वम् । मधुरत्वम् । शिशिरत्वम् । पित्तश्रमनत्वम् । जीर्णज्वर-दाह-जठरज्वाला-शीघ्र-शमनत्वम् । त्रिगुणं वृषं वरतां च दिनकरत्वम् । सदा सेवनेनानलबलवीर्यकारित्वञ्च । इति राजनिर्घण्टः ॥

स्थूलशिर:, [स्] क्ली, (स्थूलं शिरः ।) दृढस्नकम् । (स्थूलं शिरो यस्य । मुनिविशेषः । यथा, महाभारते । २ । ४ । १९ ।

"वक्त्रो दालभ्यः स्थूलशिराः कृष्णद्वैपायनः शुकः ॥")

स्थूलसक्तुके, त्रि । इति केचित् ॥

स्थूलशीर्षिका, स्त्री, शरीरावयवेषु स्थूलं शीर्षमस्याः स्थूलशीर्षा स्वार्थे कन् स्थूलशीर्षिका ॥ क्षुद्रमिश्रीलिका । इति हेमचन्द्रः ॥ दृढस्नकके, त्रि ॥

स्थूलषट्पद:, पुं, (स्थूलः षट्पदः ।) वरेलः । इति सूरिप्रयोगः ॥ बोलता इति भाषा ॥

स्थूलस्कन्ध:, पुं, (स्थूलः स्कन्धो यस्य ।) वकृक्षः । इति राजनिर्घण्टः ॥

स्थूलहस्त:, पुं, (स्थूलो हस्तः ।) हस्तिशुण्डम् । इति विकाण्डशेषः ॥ (यथा, भैक्षवृत्तौ । १४ ।

"स्नानादस्मात् सरसनिकुलात्फुल्लनीलोत्पलानां मत्ता एते परिपतत स्थूलहस्तावलेपात् ॥"

स्थूलौ हस्तौ यस्येति ।) पीनसुत्रे, त्रि ॥

स्थूला, स्त्री, (स्थूल + टाप् ।) गजपिप्पली । इति शब्दचन्द्रिका ॥ रजोनीः । इति राजनिर्घण्टः ॥ दृढदेला । इति रत्नमाला ॥

स्थूलोष्णा, स्त्री, (स्थूलोष्णी यस्याः ।) गजपिप्पली । इति राजनिर्घण्टः ॥

स्थूलाक्ष:, पुं, (स्थूलः क्षाक्षः ।) महाराजचूनः । इति राजनिर्घण्टः ॥

स्थूलाक्ष:, पुं, (स्थूलं क्षाक्षं यस्य ।) सर्षः । इति शब्दचन्द्रिका ॥ बहुस्नुषे, त्रि ॥

स्थूणी, [न्] पुं, (स्थूलं शरीरमस्यास्तीति । इनिः ।) उदुः । इति केचित् ॥

स्थूलैरण्ड:, पुं, (स्थूल एरण्डः ।) दृढैरण्डवृक्षः । तत्पर्यायः । महैरण्डः २ महागन्धाकुलः ३ । अस्य गुणाः ।

"स्थूलैरण्डो गुणाढ्यः स्यादनलबीर्यविवर्द्धिनी ॥"

इति राजनिर्घण्टः ॥

स्थूलैला, स्त्री, (स्थूला चासौ एला ।) एलाविशेषः । बड़ एलाचि इति भाषा । तत्पर्यायः । दृढैला २ त्रिपुटा ३ त्रिदिवीडुका ४ सुरभीलका ५ सहैला ६ पृथ्वी ७ कणा ८ कुमारिका ९ काश्मरा १० गौरेटा ११ सहैला १२ कामा १३ एलापीलुभेदभेदयोः १४ एलाली १५ दिव्यगन्धा १६ केली १७ । अस्याः गुणाः । पीनत्वम् । लिङ्गत्वम् । खण्डत्वम् । तुम्बित्वम् ।

पित्तानिलकफापहत्वम्। वृद्धोगमलार्शोवस्तिकारित्वम्। पुंस्त्वनाशित्वम्। अत्र स्थविराया गुणाधिक्यञ्च॥ स्थूलेलागुणाः। रोचनत्वम्। तीक्ष्णत्वम्। लघुत्वम्। उष्णत्वम्। कफपित्तहृल्लासविषवस्त्यास्यशिरोरुग्वमिकासनाशित्वञ्च। इति राजनिर्घण्टः॥

स्थलोच्चयः, पुं, (स्थूलानामुच्चयो यत्र।) गण्डोपलः। गजानां मध्यमगतिः। (यथा, माघे। १२। १६।

"स्थूलोच्चयेनागमदन्तिकागतां
गजोऽन्यधानाग्रकरः करेणुकाम्॥")

व्यासाकल्यम्। वरण्डः। इति मेदिनी॥ हस्तिदन्तरन्ध्रम्। इति शब्दमाला॥

स्थेयः, पुं, (तिष्ठति विवादनिर्णयार्थमस्मिन्निति। स्था+यत्।) विवादपक्षस्य निर्णेता। (यथा, राजनरङ्गिण्याम्। ६। १३।

"कार्त्तान्तिको भिषक् सभ्यो गुरुर्मन्त्री पुरोहितः।
धृतः स्थेयो लेखको वा न तदाभूदपण्डितः॥")

पुरोहितः। इति मेदिनी। स्थिरतरे, त्रि। इति हेमचन्द्रः॥ (क्ली, स्था+भावे यत्। स्थातव्यम्। यथा, हरिवंशे। ६५। ७।

"बलिनः सन्निकर्षे तु न स्थेयं पण्डितेन वै।
अपक्रामेद्धि कालज्ञः समर्थो युद्धमावहेत्॥")

स्थेयान्, [स] त्रि, (अयमनयोरतिशयेन स्थिरः। स्थिर+इयसुन्। "प्रियस्थिरेति।" ६। ४। १५७। इति स्थादेशः।) स्थिरतरः। इत्यमरः। ३। १। ७३॥ (यथा, महाभारते। १५।

"श्रेयः स्थेयः स देयान् मम विमलदृशो वन्धुरं सिन्धुराज्ञः॥")

प्राप्यतः। इति भरतः॥

स्थेष्ठः, त्रि, (अयमेषामतिशयेन स्थिरः। स्थिर+इष्ठन्। "प्रियस्थिरेति।" ६। ४। १५७। इति स्थादेशः।) अतिस्थिरः। इति हेमचन्द्रः॥

स्थैर्य्यं, क्ली, (स्थिरस्य भावः। स्थिर+ष्यञ्।) स्थिरत्वम्। गर्भस्थस्याङ्गानां स्थैर्य्यं चतुर्थे मासि भवति। इति सुश्रुतः॥ (यथा, याज्ञवल्क्यः। ३। ८०।

"स्थैर्य्यं चतुर्थे त्वङ्गानां पञ्चमे शोणितोद्भवः।
षष्ठे बलस्य वर्णस्य नखरोम्णाञ्च सम्भवः॥")

दृढता। यथा, महाभारते। ३। १३। ८।

"मरुद्भिरुद्धः स्थैर्य्ये स्थैर्य्ये च हिमवानिव।
समुद्र इव गाम्भीर्य्ये महिम्नि धरया समः॥")

स्थौरी, [न] पुं, भारवाहकाश्वः। इति भरतहिरूपकोषः॥

स्थौल्यं क्ली, (स्थूलायां भवम्। स्थूला+ष्यञ्।) ग्रन्थिपर्व्वनामकगन्धद्रव्यम्। इत्यमरः। २। ४। १२२॥ गाँटिया ला इति भाषा। अथ ग्रन्थिपर्व्वण्येव भेदः। इतस्ततोग्रन्थि स्थौल्यं पुनर इति लोके।

"स्थौल्यकं सार्षपं तुल्यं कृष्णं च शुक्लपुष्पकम्।
स्थौल्यं रोम शुक्लं यापि शुक्लपुष्पं शुक्लच्छदम्॥
स्थौल्यकं कटु स्वादु तिक्तं स्निग्धं श्लेष्मौषधम्।
मेधाशुक्रकरं लघ्वं रुचोऽग्नीन्द्रियजन्तुजित्॥
हन्ति कुष्ठासृदृद्दाहदौर्गन्ध्यतिलकालकान्॥"

अथ ग्रन्थिपर्व्वण्येव भेदो भण्डिउर इति नेपालदेशे भवति।

"निशाचरो धनहरः कितवो गण्डहासकः।
रोचको मधुरस्तिक्तः कटुः पाके कटुर्लघुः॥
तीक्ष्णो हृद्यो हिमो हन्ति कुष्ठकण्डूकफानिलान्।
रुचोऽग्निस्वेदमेदोऽसृग्ज्वरगन्धविषव्रणान्॥"

इति भावप्रकाशः॥

स्थौगेयकं, क्ली, (स्थौगेयमेव। स्वार्थे कन्।) सुगन्धद्रव्यभेदः। थुनिरा इति हिन्दी भाषा। तत्पर्य्यायः। वर्हिशिखम् २ शुकच्छदम् ३ मयूरचूडम् ४ शुकपुच्छकम् ५ विकीर्णरोम ६ कीरवर्णकम् ७ विकीर्णसंज्ञम् ८ हरितम् ९। अस्य गुणाः। कफवातनाशित्वम्। सुगन्धित्वम्। कटुत्वम्। तिक्तत्वम्। पित्तप्रकोपशमनत्वम्। बलपुष्टिविवर्द्धनत्वञ्च। इति राजनिर्घण्टः। भावप्रकाशोक्तगुणपर्य्यायौ पूर्व्वोक्तशब्दौ द्रष्टव्यौ॥

स्थौरी, [न्] पुं, खरत्वमवत् पृष्ठेन भारवाहकोऽश्वः। तत्पर्य्यायः। पृष्ठ्यः २। इत्यमरः। २। ८। ४६॥ ह्रे खरत्वमवत् पृष्ठेन भारवाहकेऽश्वे। पृष्ठेन वहति पृष्ठस्यमपि वाच्यमुपचारात् तद्वहति वा पृष्ठ्यः ढ्यै क्यादिति यः। स्थूलयते संव्रियते पृष्ठमनया स्थूरा स्थूल तु क ऽ ढंढगे सेमक्तान् सरोरिति यः; निपातनात् लस्य रत्वं स्थूरा पर्य्ययं तस्या इदमिति ष्ये स्थौरं पृष्ठारोपितभारादिकं तदस्यस्येति इनि स्थौरी स्थूरी च स्थौरीति स्वामी। इति भरतः॥

स्थौलशीर्षि, त्रि, (स्थूलशिरस इदमिति। स्थूलशिरस्+अण्। "अत्रि शीर्षः।" ६। २। ६२। इति शीर्षादेशः।) दृढमस्तकसम्बन्धि। इति काशिका॥

स्थौल्यं, त्रि, (स्थूलस्य भावः। स्थूल+ष्यञ्।) स्थूलता। (यथा, भागवते। ३। ११। ३।

"एवं कालोऽप्यनुमितः सौक्ष्म्ये स्थौल्ये च सत्तम॥")

स्नपनं, क्ली, (स्ना+णिच्+ल्युट्।) स्नानम्। यथा, दुर्गोत्सवप्रकरणे तिथ्यादितत्त्वे।

"पूजनात् स्नपनं श्रेष्ठं अपनात्तर्पणं स्मृतम्।
तर्पणान्मांसदानन्तु मद्दिष्याजनिपातनम्॥"

स्नपितः, त्रि, (स्ना+णिच्+क्तः।) स्नातस्नानः। (यथा, गीतगोविन्दे। १२। १।

"मतवति मयीन्द्रे मन्दचापाभरनिर्भर-
खरशरवशाकृत्तम्लीनसिन्नस्नपिताधराम्॥")

स्नयः, पुं, (स्नु प्रस्रवणे+"स्नदेरयः।" इत्यप्।) स्नायुः। स्नायुः। इत्यमरः। २। ६। ८॥

स्नमा, स्त्री, स्नायुः। इति हेमचन्द्रः॥

स्नातः, त्रि, (स्ना+क्तः।) कृतस्नानः। यथा,—

"स्नातोऽधिकारी भवति दैवे पैत्रे च कर्म्मणि।
अस्नातस्य क्रियाः सर्व्वा भवन्ति हि यतोऽफलाः।
प्रातः समाचरेत् स्नानमतो नित्यमतन्द्रितः॥"

इति प्रायश्चित्ततत्त्वम्॥

स्नातकः, पुं, (स्नान एव। स्ना+"यावादिभ्यः कन्।" ५। ४। २६।' इति स्वार्थे कन्।) व्याहृतव्रती। इत्यमरः। २। ७। ४३॥ ह्रे समाप्तवेदाध्ययने स्नानशीले स्नातं स्नानं शीलमस्य। स्नातकः विकारसंधेति कः। व्याहृतं स्नानं तत्र व्रती नित्यस्नायी। स्ना भुव्यां भावे क्तः व्याहृवव्रतीति क्वचित् पाठः। ब्रह्मचर्य्यं त्यक्त्वा यो गृहाश्रमं गतः स स्नातकः। समाप्तवेदाध्ययनो यः स्नानशीलः आश्रमान्तरं न गतः सोऽपि स्नातकः। स्नातकस्त्रिविधः। ब्रह्मचर्य्याचरणस्य यः शास्त्रबोधितोऽवधिः तावद्वेदमुपास्यासमाप्तवेद एवाश्रमान्तरं गतो यः स व्रतस्नातकः। वेदमधीत्य गुरुसन्निधौ वेदाभ्यासं यः करोति स विद्यास्नातकः। प्राप्तिसभ्यग्व्रतः प्राप्तवेदो यो द्वितीयाश्रमं गतः स उभयस्नातकः। इति टीकान्तरे। इति भरतः॥

स्नानं, क्ली, (स्ना+ल्युट्।) मज्जनम्। अवगाहनम्। तत्पर्य्यायः। आप्लावः २ प्लावः ३। इत्यमरः। २। ६। १२१॥ अभिषेकः ४। इति शब्दरत्नावली॥ उपस्पर्शनम् ५ सवनम् ६ सर्व्वनम् ७। इति जटाधरः॥ तदनुकल्पः सप्तविधः। मान्त्रम् १ भौमम् २ आग्नेयम् ३ वायव्यम् ४ दिव्यम् ५ वारुणम् ६ मानसम् ७। एतेषां विवरणं पश्चात् स्फुटीभविष्यति॥ * ॥ अस्य गुणाः।

"स्नानं पवित्रमायुष्यं श्रमस्वेदमलापहम्।
शरीरबलसन्धानं कैशिक्यौजस्करं परम्॥
उष्णाम्बुनाधःकायस्य परिषेको बलावहः।
तेनैव तूत्तमाङ्गस्य बलकृत् केशचक्षुषोः॥
विनिहन्ति शिरःस्नानं क्षणात्तास्यशिरोग्रहम्।
मलोष्णपीडकाकण्डूं शिरोरोगांश्च पैत्तिकान्॥
मधुकामलकैः स्नानं पित्तघ्नं तिमिरापहम्।
स्नानं वचाघनेरिण्डश्लेष्मघ्नं तिमिरापहम्॥
स्नानं क्षणात्तिलैश्चापि चक्षुष्यमनिलापहम्।
अस्नातस्य शरीरस्य उष्मा सर्व्वाङ्गगोचरः॥
स्नानेनैकत्वमायाति तेन दीप्यति पावकः।
स्नानमर्हत्तनत्रास्यकर्णरोगातिसारिषु॥
आध्मानपीनसाजीर्णभुक्तवत्सु च गर्हितम्।
दौर्गन्ध्यं गौरवं कण्डूं कफं मलमरोचकम्।
स्वेदं वीभत्सतां हन्ति शरीरपरिमार्ज्जनम्॥"

इति राजवल्लभः॥ * ॥

अथ स्नानविधिः। दक्षः।

"चतुर्थे च तथा भागे स्नानार्थं तदमाहरेत्।
तिलपुष्पकुशादीनि स्नानद्रव्याणि वै क्रमे॥"

कुशादितिशब्दः। तथा च।

"अस्नात्वा चाप्यकुशा च मुक्तकेशश्च यो नरः।
देवादीनाञ्च्युतो भूत्वा नरकं प्रतिपद्यते॥" * ॥

शान्तिप्रदायिनीत्यन्तेन मन्त्रेण गङ्गामावाहयेत्। सप्तवाराभिजप्तेनेति सप्तवाराभिजप्तेन नमो नारायणायेति मन्त्रेणाभिमन्त्रितेति शेषः। एकवचननिर्देशात् तस्य मूलमन्त्रतोक्ता च अत्रापि विनियोगोऽवगम्यते। ततश्च सप्तवारपठितनारायणमन्त्रेण जलमभिमन्त्र्य करयुगेन त्रिवारादि मूर्द्धि क्षिपेत्। ततश्चाक्रान्त इति मन्त्राभ्यां नङ्गदिति जप्ताभ्याम्।

"शतिका: सप्त न यात्रा वल्मीके मूषिकोत्करे।
अन्तर्जले श्मशाने च वृक्षमूले सुरालये।
परस्नानावशिष्टे च श्रेयस्कामैः सदा नरैः॥"

इति दक्षप्रतिषिद्धेतरां स्वदेशमन्त्र्य तया स्वदेशिरःप्रभृत्यालभ्यानुवृत्तैर्वा जलैः शिरःप्रभृत्यङ्गक्षालनमवगाहनरूपप्रधानं वारुणस्नानं समाचरेदिति पूर्वोक्तेनान्वयः। स्वदेशमन्त्रे प्रभवारिणि इति प्रभवसुत्पत्तिमर्हं प्रापयितुं शीलमस्यास्तत्प्रबोधनमिदम्। अवगाहनन्तु चक्षुःकर्णनासिकामङ्गुलीभिराच्छाद्य कुर्यात्।

"अङ्गुलीभिः पिधायैवं श्रोत्रहङ्गासिकासुखम्।
निमज्जेत प्रतिस्रोतस्त्रिः पठेदघमर्षणम्॥"

इति मनुप्रकरणतात्।

अत्रानुवृत्ते वारुणमेवावगाहनं प्रागुक्तवामनपुराणात्। एष विधिः पौराणिकत्वात् सर्वप्राणिसाधारणः। वेदमन्त्ररहितत्वादनधीतवेदानामपि सर्वथादरणीयः॥ ७॥ मत्स्यपुराणम्।

"नद्यां प्रत्येकशः स्नाने भवेद्गोदानजं फलम्।
गोप्रदानेन दशभिस्तासां पुण्यन्तु सङ्गमे॥"

यमिष्ठः।

"योऽनेन विधिना स्नाति यत्र तत्राम्भसि द्विजः।
स तीर्थफलमाप्नोति तीर्थे तु द्विगुणं फलम्॥"

अनेन तीर्थावाहनादिना। अतो गङ्गायामप्यावाहनं कुर्वन्ति शिष्टाः। अत्र च। माघस्नानाद्यभिनिमित्तकनीर्थविशेषनिमित्तक-मन्त्रपाठस्तु स्नानसमूनानन्तरं कार्यः। आगन्तुकानामन्तेऽभिनिवेश इति न्यायात्। एवं गङ्गायां विशेषमन्त्रानन्तरमेव दशहरादिमन्त्राः पाठ्याः। तत्र गङ्गायां विशेषमन्त्रौ विष्णुधर्मोत्तरौ।

"विष्णुपादार्घसम्भूते गङ्गे त्रिपथगामिनि।
धर्मद्रवीति विख्याते पापं मे हर जाह्नवि॥
भक्त्या भक्तिप्रिये देवि भागीरथि सुनन्दिनि।
प्रणतेनाम्बुना देवि भागीरथि नमोऽस्तु ते॥"

गोविन्दराजस्तु स्नाने गङ्गायां पद्मपुराणीयो मन्त्रः।

"महापातकसंज्ञानि यानि पापानि सन्ति मे।
गोविन्दराद्यां प्राप्य तानि मे हर जाह्नवि!॥"

गङ्गामात्रसङ्गमे मन्त्रः।

"त्वं देवि सरितां श्रेष्ठा सर्वं देवि सरिद्वरे।
त्रयाणां सङ्गमे स्नात्वा सुपापेभ्यो दिवं व्रजेत्॥"

सोमेश्वरस्तु मन्त्रः।

"नमस्ते सर्वभावेशि सरिद्वरे महाफले।
त्राहि मां देवि दुर्धर्षे सर्वपापहरे शिवे॥"

करतोयास्नानमन्त्रः।

"करतोये सदानीरे सरित्श्रेष्ठे सुविश्रुते।
पौष्कान् भावयसे नित्यं पापं हर करोद्भवे॥"

विष्णुः। स्नातः शिरो नावधुनेत् नाङ्गेभ्यस्तोयमुद्धरेत्। न तैलं वा संस्पृशेत् नाधौतं पूर्वधृतं वासो बिभृयात्। स्नात एव सोत्तरीयो धौते वाससी बिभृयात् न म्लेच्छान्त्यजपतितैः सह सम्भाषणं कुर्यात् इति। नाङ्गेभ्यस्तोयमुद्धरेदिति स्नानशाटीपाणिभ्यां पूरणीयम्।

"स्नातो नाङ्गानि निर्मृज्यात् स्नानशाट्या न पाणिना॥"

इति विष्णुवचनात्।

अत्र वासोऽन्तरधारणात् प्राक्कृततैलसंसर्गनिषेधः प्रतीयते।

"शिरःस्नातस्तु तैलेन नाङ्गं किञ्चिदुपस्पृशेत्॥"

इति मनुवचनमेतत्परम्॥ ७॥

याज्ञवल्क्यः।

"ब्रह्मक्षत्रविशामेव मन्त्रवत् स्नानमिष्यते।
तूष्णीमेव हि शूद्रस्य सनमस्कारकं मतम्॥
अगम्यागमनात् स्तेयात् पापिभ्यश्च प्रतिग्रहात्।
रहस्याचरितात् पापात् मुच्यते स्नानमाचरन्॥
प्रकर्तुमसमर्थश्चेत् जुहोति यजति क्रियाः।
स्नानध्यानजपैर्देवोरात्मानं शोधयेद्बुधः॥"

ब्रह्मपुराणम्।

"नद्यां प्रत्येकशः स्नाने भवेत् गोदानजं फलम्।
गोप्रदानेन दशभिस्तासां पुण्यन्तु सङ्गमे॥"७॥

मनुः।

"न स्नानमाचरेद्भुक्त्वा नातुरो न महानिशि।
न वासोभिः सहाचम्य नाविज्ञाते जलाशये॥"

न स्नानमाचरेद्भुक्तेति रागप्राप्तस्नाननिषेधः। नित्यस्याप्राप्तत्वात्। नैमित्तिकस्य च निषेद्धुमशक्यत्वात्। आतुरः स्नानसमर्थकरोगवान्।

"महानिशा तु विज्ञेया मध्यं प्रहरद्वयम्।
तस्यां स्नानं न कर्त्तव्यं काम्यनैमित्तिकादृते॥"

न वासोभिः सह इत्यनेन बहुवासोनिषेधात् स्नाने द्विवासस्त्वं प्रतीयते। अक्षमं पुनः पुनः। तेन वारुण्यादिमंक्रान्त्यादि-निमित्तभेद-प्राप्तमेकदा नानास्नानं निषिध्यते। किन्तु तत्तेन प्रसङ्गेन चैकं स्नानम्। तथा च निगमः।

"नावर्त्तयेत् पुनः कर्म्म तर्पणादिकमन्वहम्।
काम्यनैमित्तिके त्यक्त्वा एकं तत्कच वासरे॥
पितृवद्दिवसे प्राप्ते पक्षयोर्वा विधानतः।
स्नात्वा सङ्कल्पयेत् कर्म्म कृत्वा मध्याह्न मौ द्विजाः।
नरः समस्तयज्ञानां फलं प्राप्नोति दुर्लभम्॥"

इति ब्रह्मपुराणोक्तमाकैलेयदृष्टे प्रतुल्यमहोरात्रे सप्तदशरूपादिसौर्योदौ मन्त्रप्रसङ्गाभावात् पुनः पुनरेकस्मिन्नपि नानास्नानमिति॥ ८॥

"परकीयनिषानेषु तथा वापीषु चैव कदाचन।
निषानकर्त्तुः स्नात्वा हि दुष्कृतांशेन लिप्यते॥"

निषानं जलाधारसाधम्। यमः च याज्ञवल्क्यः।

"यत्र विक्रान्तमृक्षेण न स्नायात् परवापिषु।"

योगियाज्ञवल्क्यः।

"अनुद्धृत्य तु यः स्नायात् परकीयजलाशये।
तथा तस्य भवेत् स्नानं कर्त्तुः पापेन लिप्यते॥
स्नानं दानं तपो ध्यानं पितृदेवार्चनं तथा।
पावनानि मनुष्याणां दुष्कृतस्येह कर्म्मणः॥"

छन्दोगपरिशिष्टम्।

"यत्पतन्ति शवाद्यास्तु सर्वा गावो रजस्वलाः।
तासु स्नानं न कुर्वीत वर्जयित्वा ससृग्गाः॥
उपाकर्म्मणि चोत्सर्गे प्रेतस्नाने तथैव च।
चन्द्रसूर्यग्रहे चैव रजोदोषो न विद्यते॥"

निगमः। न दुग्धीरवासिनाम्। याज्ञपादः।

"अभावे कूपवापीनामन्येनापि समन्ततः।
रजोदुष्टेऽपि पयसि स्नानभोगो न दुष्यति॥"

अन्येन कुम्भादिना।

"अन्येरपि कृते कूपे सेतौ वाप्यादिके तथा।
तत्र स्नात्वा च पीत्वा च प्रायश्चित्तं समाचरेत्॥"

तथा।

"प्रभूते विद्यमाने तु उदके ह्रस्वगोदरे।
नाल्पोदके द्विजः स्नायात् नदीष्वोत्सृष्टवर्ष्मसु॥"

इति मे॥"

इति बहुभिर्धृतम्॥

ब्रह्मपुराणे।

"नित्यं नैमित्तिकं काम्यं त्रिविधं स्नानमिष्यते।
तर्पणन्तु भवेत्तस्य यावज्जीवं व्यवस्थितम्॥
श्मश्रुकर्म्माश्रुपातश्च मैथुनं क्षुदनं तथा।
यस्मृत्यसंज्ञानं कृत्वा स्नायाद्वर्ष्मा यथाक्रियम्॥"

यत्र तु रोगादिना स्नानं न कृतं तत्रापि गात्रमार्जनादिना शौचसुत्पाद्य पितृयज्ञसिद्धये तर्पयेत्। तदाह प्रातातपः।

"तर्पयन्तु पुनिः कुर्यात् प्रत्यहं स्नायको द्विजः।
देवेभ्यश्च ऋषिभ्यश्च पितृभ्यश्च यथाक्रमम्॥"

पुत्रे वा चक्रमन्यत्रे यतीपाते च यैधनौ।
अमावास्यां नदीस्नानं दृष्ट्वाजस्रदुष्कृतम्॥"

पराशरपुराणम्।

"दक्षिणावर्त्तशङ्खे च पात्रेष्वौदुम्बरे स्थितम्।
उदकं यः पतीच्छेत शिरसा धूयमानसः।
तस्य जन्मकृतं पापं तत्क्षणादेव नश्यति॥
यच्छिन्नपद्मपत्रेण सर्वरन्ध्रोदकेन च।
स्नानं पवित्रं माङ्गल्यं तथा काञ्चनवारिणा॥"

गर्गः।

"स्नानस्य वह्निनैवन्तथा च परवारिणा।
कायशुद्धिं विधानीयात् न तु स्नानफलं क्वचित्॥"

स्नानफलं वेगम। आयुर्वेदीयस्तु भवदेवः। यमः।

"नित्यं नैमित्तिकञ्चैव क्रियाङ्गमलकर्षणम्।
तीर्थमार्षं च कर्त्तव्यमुद्धरोदकैः॥"

विष्णुपुराणम् ।
"स्नानार्द्रो धरणीपैव दूरतः परिवर्जयेत् ।"
इत्याह्निकतत्त्वम् । ८ ।
नान्दिकस्नानविधिर्यथा । तत्र तत्रादौ वैदिकस्नानं कृत्वा तान्त्रिकस्नानमाचरेत् । तथा च गौतमीये ।
"अथ स्नानं तथा कुर्यात् यथाशास्त्र-
विधानवित् ।
मन्त्रप्रक्षालनं स्नानं स्नानशास्त्रोक्तं समाचरेत् ।
मन्त्रस्नानं ततः कुर्यात् कर्मणां सिद्धिहेतवे ।"
तद्यथा । अमुकेत्यादि अमुकदेवताप्रीतये मन्त्रस्नानमहं करिष्ये इति सङ्कल्पं कुर्यात् । तथा च मूलचूडामणौ ।
"तान्त्रपात्रं समादाय ततिलं सजलं ततः ।
गृहीत्वामुकदेवस्य प्रीतये स्नानमाचरेत् ।"
ततः षडङ्गन्यासप्राणायामौ कृत्वा गङ्गे च इत्यनेनाङ्गुष्ठसहितया कनिष्ठमध्यमार्द्धमादाय वमिति धेनुमुद्रयाऽमृतीकृत्य कवचेनावगुण्ठ्याऽस्त्रेण संरक्ष्य मूलेन एकादशधाभिमन्त्र्य सूर्याभिमुखं द्वादशधारा विनिःक्षिप्य तस्मिन्निष्टदेवतार्चनारविन्दनिःसृतजले निमग्नं देवतां ध्यायन् मूलमन्त्रं यथाशक्ति जपन् उद्धृत्य उदकेन त्रिवारमूलेन कलसमुद्रया त्रिवारमात्मानमभिषिच्य वैदिकसन्ध्यादिकं कृत्वा सूर्यार्घ्यं दत्त्वा तान्त्रिकावमर्षणादिधारिधारान्तं कर्म कुर्यात् । इति तन्त्रसारः । ८ । अन्यच ।
"जन्मान्तरसहस्रेषु यत् पापं कुरुते नरः ।
तत्सर्वं नाशमायाति स्नात्वा सारार्णवे सकृत् ।
यान्ति हि यातनाद्युःखं नित्यस्नायी न पश्यति ।
स्नानं मध्यंदिने कुर्यात् तीर्थेष्वन्यत्र तु निशायाः ।
तथामलसमेते स्नानं न कुर्वीत कदा चन ।
नद्यां स्नात्वा नदीं चान्यां न प्रशंसेत् कथञ्चित् ।
अप्रशस्तं निशि स्नानं रात्रौ स्नात्वा रविं नयेत् ।
स्नानं दानं तपः आद्यमनन्तं रात्रिदर्शने ।
आतुरो रात्रिशेषे च तडागेषु सरःसु च ।
नदीदेवनिशासेषु सङ्गमेषु सरःसु च ।
स्नानं समाचरेन्नित्यं सर्वपापक्षयेषु च ।
निर्मलाम्बुपूर्णं पुण्यं ततः प्रस्रवणादिकम् ।
ततोऽपि सारसं पुण्यं ततो नादेयमुच्यते ।
शैवैतरोक्तं ततः पुण्यं गङ्गातोयं ततोऽधिकम् ।"
इति वह्निपुराणे आह्निकतत्त्वोनामाध्यायः । ९ ।
अथ ।
"नित्यं नैमित्तिकं काम्यं क्रियाङ्गं मलकर्षणम् ।
क्रियास्नानं तथा षष्ठं पौढ़ास्नानं प्रकीर्तितम् ।
अमृतस्तु ध्यानाद्यैर्यो मन्त्रादिस्नानमादिशेत् ।
प्राहुः स्नानं तदप्येतु त्रिविधस्नानं प्रकीर्तितम् ।
वाह्यान्तरविशुद्ध्यर्थं दृष्ट्वा स्नानं रजस्वला ।
स्नानार्हेण यदा स्पृष्टा स्नानं नैमित्तिकं हि
तत् ।
पुण्यस्नानादिकं स्नानं दैवज्ञैस्त्रिविधोदितम् ।
यस्मिन् कर्मणि यत्स्नानं तत्तत्कर्मणि तत्तथा ।
यदुक्तं नारदीये तत्तत्कर्मणि दैवज्ञैरिति ।
स्नानं समाचरेद्यस्तु क्रियाङ्गं तत् प्रकीर्तितम् ।
मलापकर्षणं नाम स्नानमभ्यङ्गपूर्वकम् ।
मलापकर्षणार्थाय प्रवृत्तिस्तत्र नान्यथा ।
सर्वेषु देवखातेषु तीर्थेषु च नदीषु च ।
स्नानमेव क्रिया यस्मात् क्रियास्नानमतः स्मृतम् ।"
इति गारुडे १०५ अध्यायः । ९ ।
कृष्णभक्तस्य वैष्णवविशेषस्य स्नानादिनिषेधो मानसस्नानप्रशंसा च यथा,—
"सर्वकर्मफलत्यागी हरेः संकल्पवर्जितः ।
नो द्विजः कृष्णभक्तः स्यात् स्नानपूजाजपादिषु ।
कदाचिद्भक्तिको न व्यक्तकामस्तु वैष्णवः ।
स्नानादिषु च सर्वेषु गोविन्दस्यार्चनादिषु ।
रुद्राक्षनः कृष्णकरो वैष्णवो न भवेद्द्विज ।
हरेः कुर्यात् प्रयत्नेन सर्वसेवासपादिषु ।
अस्नातो न जपेन्नित्यं गोविन्दस्य महात्मनः ।
कदाचिदशुचिर्भूत्वाप्यस्नातोऽपि च मानवः ।
मानसस्नातको लोको मुकुन्दस्यार्चनादिषु ।
पूतात्मा यदि मन्त्रस्य शुद्धो भवति जापकः ।
भवेत्तु मानसस्नायी यो बाह्याभ्यन्तरः शुचिः ।
जपाधिकारी स भवेत् सर्वमन्त्रस्य मानवः ।
ऐन्द्रस्नानादरं काम्यं काम्यादामेयमेव च ।
आग्नेयादाप्यं श्रेष्ठं वारुण्याप्यादपि ।
अवगाहं वारुणात्तु वैदिकाद्यवगाहनात् ।
वैदिकादपि नैमित्तं तस्मादे मार्जनं वरम् ।
मार्जनान्मान्त्रिकं श्रेष्ठं भौमं स्यान्मान्त्रिकाधिकम् ।
भौमस्नानादरं वाह्यं वाह्यात् पौण्यमेव च ।
पौण्यतो नैर्मलं स्नानं वायव्यञ्च ततोऽधिकम् ।
वायव्यान्मानसञ्चैव सर्वस्नानात् परं वरम् ।
मनोयेत् मानसस्नातः सर्वत्र विजयी भवेत् ।
गोविन्दसर्वसेवासु चार्हतामेति धारणा ।
स जापको वैष्णवः स्यात् हरेर्भजनतत्त्ववित् ।
मानसस्नानवान् यो वा भक्तश्चाच सदा सुखी ।"
इति पाद्मोत्तरखण्डे १०८ अध्यायः । ९ ।
अन्यच ।
"मानसं वैदिकं चैव मान्त्रिकं मार्जनं तथा ।
अवगाहनञ्च नैमित्तमाप्यं पुण्यमेव च ।
नैर्मलं वारुणं वाह्यं मैत्रं काम्यञ्च नारद ।
वायव्यं भौममाग्नेयं षोढ़ास्नानमीरितम् ।
गोविन्दमन्त्रजपनं दीक्षया तु गुरोर्नृणाम् ।
यदाभिषिक्तं चित्तं स्यात्तत् स्नानं मानसं शुभम् ।
मन्त्रस्य नामजपनं यदा कर्णान्तरे गुरोः ।
स्नातदेहेन्द्रियमनस्तत् स्नानं मानसं भवेत् ।
नामसंकीर्तनं विष्णोर्नरः कुर्यादहैतवात् ।
सदैव वैष्णवस्नानं शरीरशुद्धकारणम् ।
कथा कत्था सक्ति नखेत् यदि दैवेन वैदिकम् ।
दर्भस्नानादहे स्नानं यत्नाच्चे क्षभिषेचनम् ।
मरुस्थलीयां तद्विद्धीरिति मन्वादिभिर्दिवं ।
वैष्णवोऽभुक्तं स्नानं मान्त्रिकं गदितं ।
ॐ अग्न आयौहिहेति ऋतवेत्यादिभिर्यदि ।
पाठे कुर्यात् कृष्णस्नानं मार्जनं द्विज ईरितम् ।
अपो । मन्त्रतो मृद्धां मन्त्रेणतु यदा शिरः ।
तदा सर्वेषु स्यादवगाहनमुच्यते ।
गोविन्दहादशीमाघीवारुण्यर्क्षोदयादिषु ।
स्नानं यत्तच्च नैमित्तं ग्रहणे चन्द्रसूर्ययोः ।
मैथुने वमने रेतःस्खलने क्षतके तथा ।
विण्मूत्रादिष्ववस्थासु श्वाद्यनुगमनेऽपि च ।
निद्रान्ते जातके नृणामस्पृश्यस्पर्शनादिषु ।
रजस्वलाचतुर्थाहे यत् स्नानं स्यात्तदाशुचम् ।
गङ्गादिसर्वतीर्थेषु विष्णुपादोदकैस्तथा ।
यत् स्नानमभिषेकाख्यं पुण्यं तत् परिकीर्तितम् ।
दैवया अथवा नृणां भक्त्या यत्नेन नारद ।
गङ्गास्नानोपयिकस्नानं महापापादिनाशनम् ।
गङ्गास्नानं मनुष्याणां सर्वकल्मषनाशनम् ।
क्षणवचापि काष्ठस्य भवेत्सूपलवत् यदि ।
स्नानं स्यात् सर्वतीर्थेषु नानायज्ञफलप्रदम् ।
ग्रालग्रामशिलावारि योऽभिषेकं समाचरेत् ।
अकालमृत्युहरणं सर्वव्याधिविनाशनम् ।
विष्णोः पादोदकं पीत्वा शिरसा धारयेद्यदि ।
यदि सर्वमनुष्याणां वाह्यान्तर्मलशोधनम् ।
तदेव नैर्मलस्नानं शरीराणां भवेत् ध्रुवम् ।
खेदास्रुमध्वाविण्मूत्रचिकुरः क्षतजा वसा ।
दूषिका कर्णविट्श्लेष्मा नृणां वाह्यमलाः स्मृताः ।
मलेषु मलिनो देहो नवच्छिद्रेषु छिद्रितः ।
सर्वव्यविरतं पूर्णो दिवारात्रौ मलानतः ।
अद्भिश्च गोमयेनापि मलानामपमार्जनम् ।
सर्वेषु चालनं कृत्वा सर्वात्मप्रयतो मुनिः ।
अथाङ्गयोगाभ्यासेन देहप्रक्षालनं ततः ।
नरोऽमुमज्जनं कुर्वन् स्नानं भवति नैर्मलम् ।"
इति पाद्मे उत्तरखण्डे ११६ अध्यायः । ९ ।
किञ्च ।
"तुलामकरमेषेषु प्रातःस्नानं विधीयते ।
एविषं ब्रह्मचर्यञ्च महापातकनाशनम् ।
अमास्नानं गयाश्राद्धं दधिक्षीरसुखभोजनम् ।
न जीवत्पितृकः कुर्यात् कृते च पितृहा भवेत् ।
करेण मार्जयेन्नाङ्गं स्नानवस्त्रेण वा यदि ।
पुनः स्नानं भवेन्नाङ्गं पुनः स्नानेन शुध्यति ।
अप्रक्षाल्य तु पादौ यः स्नात्वा गच्छति मन्दिरम् ।
संचितस्तस्य पुण्यं तत्क्षणादेव नश्यति ।
स्नानं रजस्वलीर्चेषु भोजनं गणिकालये ।
शयनं पूर्वयादे च ब्रह्महत्या दिने दिने ।"
इति कर्मलोचनः ।
अन्यत् मलस्नानतत्त्वे ३६ पटले द्रष्टव्यम् ।

स्नानदण्ड, क्ली, (स्नानाय दण्डः ।) कुण्डः । इति शब्दमाला ।

स्नानयात्रा, स्त्री, (स्नानस्य यात्रा उत्सवः ।) ज्येष्ठमौर्ण्यमास्यां श्रीविष्णोर्मेरुमानरूपोत्सवः । यथा, पद्मपुराणम् ।
"माघि ज्येष्ठे तु संप्राप्ते नक्षत्रे प्रक्रमैष्यते ।
पौर्णमास्यां तदा स्नानं सर्वपापं हरेद्धि वः ।
तस्मिन् काले तु ये मर्त्याः पश्यन्ति पुरुषोत्तमम् ।
बलभद्रं सुभद्रां च ते यान्ति परमव्ययम् ।"
स्कन्दपुराणविष्णुधर्मोत्तरयोः ।
"ज्येष्ठामूलचतुर्दश्यां पुण्यं पञ्चदिवासरम् ।

स्नेहस्य दुःखमूलत्वम्। यथा,—
"यत्र स्नेहो भयं तत्र स्नेहो दुःखस्य भाजनम्।
स्नेहमूलानि दुःखानि तस्मिंस्त्यक्ते महत् सुखम्॥"
इति गारुडे। ११३। ५८॥
तैलादिरभेदः। इति मेदिनी॥ (यथा, माघः। २। ८५।
"स्नदुपचयहितं तेजो भोक्तुमर्थान् प्रकल्पते।
प्रदीपः स्नेहमादत्ते दृश्यार्थमन्तरस्यया॥"
यथा च मनुः। ५। २४।
"यत्किञ्चित् स्नेहसंयुक्तं भक्ष्यं भोज्यमगर्हितम्।
तत् पर्युषितमप्यानं हविःशेषञ्च यद्भवेत्॥")
आयमते गुणविशेषः। अस्यैवपरमाणावयं निलः। अन्यत्र त्वनिलः। तैलादावस्य प्रकर्षो वर्त्तते अतस्तेषां दाही भवति। यथा,—
"स्नेहो जलेऽयौ निलोऽयमनिलोऽवयविन्यौ।
तैलाज्यादे तत्प्रकर्षात् दहनस्यानुकूलता॥"
इति भाषापरिच्छेदः॥
स्नेहनं, क्ली, (स्निह्यत्यनेनेति। स्निह्+ल्युट्।) तैलमर्दनम्। तत्पर्यायः। स्नेहः २ स्निग्धता ३ स्नेहनम् ४ स्नसः ५ स्नायनः ६ स्नायनम् ७। इति राजनिर्घण्टः॥ (स्नेहयतीति। स्निह्+णिच्+ल्युः। स्निग्धकारिणि, त्रि। यथा, सुश्रुते। १। ४५।
"पृथं सौम्यं शीतवीर्यं मृदुमधुरमसाभिष्यन्दि स्नेहनमिति॥")
स्नेहप्रियः, पुं, (स्नेहः प्रियो यस्य।) प्रदीपः। इति हेमचन्द्रः॥ तैलादिप्रिये, त्रि॥
स्नेहयोनिः, पुं, (स्नेहयुक्तानि योनानि यस्य।) प्रियालवृक्षः। इति राजनिर्घण्टः॥ स्नेहकारणे, क्ली॥
स्नेहगः, पुं, (स्नेहात् गुरुगन्धत्वेन।) तैलम्। इति हेमचन्द्रः॥ (स्नेहा भूमिरिति।) स्निग्धभूमौ, स्त्री॥ (स्नेहानिला भूयस्त्वेति स्निग्धभूमिविशिष्टे, त्रि॥)
स्नेहगन्धः, पुं, (स्नेहेन दृश्यते इति। दृश+घञ्।) तिलः। इति शब्दरत्नावली॥
स्नेहचर्म्मी, स्त्री, (स्नेहोऽस्या अस्तीति। स्नेह+मनुप्। ङीप्।) नेत्रा। इति राजनिर्घण्टः॥ (तैलादिरक्षाविशिष्टे त्रौतिविशिष्टे च त्रि। यथा, भागवते। २३। ७७।
"एवमुत्तमौ तमसीव मिथा स्नेहचर्मणा तु तौ।
तमसः तस्य दुर्वर्णं तस्तु रेमाते तेन मोहिता॥")
स्नेहजीवकः, क्ली, (स्नेहस्य जीवकः।) अञ्जनभेदः। सौवीरकुर्करी इति भाषा। यथा,—
"स्नेहजीवकनामानौ स्निग्धश्च मसृणः परः।
तः स्नेहैर्नेत्रयोर्न्यस्तः स्नेहनञ्जनसंज्ञकः॥"
इति भावप्रकाशः॥
स्नेहनिर्यासं तैलनिर्यासे द्रव्यम्।
स्नेहपात्रं, क्ली, स्नेहस्य पात्रम्।) तैलपात्रम्। इति अमरः॥
स्नेहपानं, [न्] क्ली, (स्निह्यतेऽनेनेति। स्निह्+"सृस्निहीति।" उणा० १। १२। इति उः।) रोगभेदः। इत्युणादिकोषः॥ चन्द्रः। इति विज्ञानकौमुद्यामुणादिवृत्तिः॥
स्नेहाशः, पुं, (स्नेहमश्नातीति। अश भोजने+अण्।) प्रदीपः। इति त्रिकाण्डशेषः॥
स्नेहितः, पुं, (स्नेहोऽस्य जातः। स्नेह+इतच्।) बन्धुः। स्नेहयुक्ते, त्रि॥
स्नेही, [न्] पुं, (स्नेहोऽस्यास्तीति। इनिः।) वयस्यः। इति त्रिकाण्डशेषः॥ चित्रकरः। इति केचित्॥ स्नेहयुक्ते, त्रि॥
स्नेहुः, पुं, (स्निह्यतीति। स्निह+"शृस्निहीति।" उणा० १। ११। इति उः।) रोगभेदः। इत्युणादिकोषः॥ चन्द्रः। इति विज्ञानकौमुद्यामुणादिवृत्तिः॥
स्नद, ऐ ऽ ईषत्कत्थने। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-अक०-सेट्।) ऐ, स्नन्दते। ऽ, स्नन्दते चक्षुः। अस्नन्दिष्ट। काशे स्नन्द कुशे स्नन्द स्नन्दत्वं शत्रुमस्तके। इत्यादौ गणकृतानित्यत्वमिति रमानाथः। वस्तुतस्तु स्नन्दते स्नन्दः पचाद्यच्प्रत्ययात् ततः स्नन्द इवाचरति इति क्यङि सिद्धिः। इति दुर्गादासः॥
स्नन्दः, पुं, (स्नन्द+घञ्।) प्रस्फुरणम्। ईषत्कम्पनम्। यथा,—
"चक्षुःस्नन्दं भुजस्नन्दं तथा दुःस्वप्नदर्शनम्।
शत्रूणाञ्च समुत्थानमल्पे ह्यशुभदा मे॥
अथवाऽरूपी भगवान् प्रीयतां मे जनार्दनः॥"
इति मत्स्यसावित्रम्॥ ०॥
अङ्गविस्फुरणं शुभाशुभफलं यथा,—
मनुरुवाच।
"ब्रूहि मे त्वं निमित्तानि चाशुभानि शुभानि च।
अथधर्मज्ञतां श्रेष्ठ! त्वं हि धर्मविदुच्यते॥
मत्स्य उवाच।
ऊर्द्धादक्षिणभागे तु प्रस्फुरणं भवेत्।
अधःप्रस्फुरणं यद्वा वामे दक्षस्य च॥
मनुरुवाच।
अङ्गानां स्नन्दनस्यैव शुभाशुभविचेष्टितम्।
तत्त्वं विस्तरतो ब्रूहि येन सुखमिहेदो भवि॥
मत्स्य उवाच।
एकीभावो भवेत् यद्धि ललाटे रविनन्दन।
स्थानं विपद्विनाशाति भ्रुवोः प्रियसङ्गमः॥
भ्रुवश्चविघातिदेशे द्युपाप्ते धनागमः।
उत्कण्ठोपगमो मध्ये दृष्टं राजन् विचक्षणैः॥
दक्षनेत्रे स्फुरे च स्यं श्रीमन्तमनुयान्।
योषितामोष्ठपार्श्वेऽपि वामेऽपि प्रिया श्रुतिः॥
नासिकायां प्रीतिलाभः प्रियाप्तिरधरोष्ठयोः।
कण्ठे तु भोगलाभः स्यात् भोगहानिरधोऽधयोः॥
सक्थ्नश्चैव पार्श्वयो धनलाभस्तथैव च।
पृष्ठे पराजयो वीरे पार्श्वे वक्षःस्थले भवेत्॥
कुक्षिस्थाः प्रीतिदाहिन्यः स्फिजः प्रस्फुरणे स्मृताः।
गोलाभवृद्धी वामेऽपि ऊरौ चैव धनागमः॥
जानुस्थानी वरैः सन्निवेशश्चाङ्गिमेदनुप।
दिष्टैर्वरैरनुज्ञातोऽथ यद्वाभ्यां रविनन्दन॥
उत्तमं स्थानमाप्नोति पद्मां प्रस्फुरणाद्भृप!।
सलाभश्चाध्वगमनं भवेत् पादतले नृप!॥
लाञ्छनं पिटकश्चैव भयं प्रस्फुरणं तथा
विपर्ययेण विहितं सर्व्वं स्त्रीणां विपर्ययम्।
दक्षिणेऽपि प्रशस्तेऽङ्गे प्रशस्तं स्यादिशेषतः।
अप्रशस्ते तथा वामे त्वप्रशस्तं विशेषतः॥
अतोऽन्यथाशिष्टिरनल्पनाशु
फलस्य शस्तस्य च निन्दितस्य।
अनिष्टचिह्नोपगमे द्विजानां
कार्य्यं सुवर्णेन च तर्पणं स्यात्॥"
इति मात्स्ये याचानिमित्तदेहस्पन्दं नाम २४१। ३-१४॥
स्पन्दनं, क्ली, स्पन्द+ल्युट्।) प्रस्फुरणम्। ईषत्कम्पनम्। (यथा, याज्ञवल्क्यः। १। ११।
"गर्भाधानरतौ पुंसःसवनं स्पन्दनात् पुरा।
षष्ठेऽष्टमे वा सीमन्तो मासेऽष्टमे जातकर्म्म च॥")
स्परिता, [ऋ] त्रि, दुःखकारणम्। तच्च शत्रुदुर्जनरोगादि। इति केचित्॥
स्परिः, पुं, स्पर्शः। इति केचित्॥
स्पर्द्ध, ऽ संघर्षे। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-सेट्।) संघर्षः परिभवेच्छा। इति वोपदेवः॥ ऽ, स्पर्द्धते बलिनं बली। पस्पर्द्धे। इति दुर्गादासः॥
स्पर्द्धा, स्त्री, (स्पर्द्ध+भिदादित्वादङ्। टाप्।) संघर्षः। (यथा, महाभारते। १। २१। १०।
"महानदीभिर्वेगेन: स्पर्द्धयेव महाजवः।
अभिसम्पतमाणमनिशं दृढधावति मद्दार्थवम्॥")
क्रमसुन्नतिः। साम्यम्। इति मेदिनी॥
स्पर्श, क ऽ स्पर्शने। स्पर्शे। इति कविकल्पद्रुमः॥ (तुदा०-आत्म०-सक०-सेट्।) क ऽ, स्पर्शयते। इति दुर्गादासः॥
स्पर्शः, पुं, (स्पृश स्पर्शने स्पर्शे यद्वा वा+घञ्।) यत्ना। दानम्। स्पर्शनम्। (यथा, उत्तररामचरिते। १ अङ्के।
"विनिश्चेतुं शक्यो न सुखमिति वा दुःखमिति वा
प्रमोहो निद्रा वा किमु विषविसर्पः किमु मदः।
तवं स्पर्शे स्पर्शे मम हि परिमूढेन्द्रियतया
विकारश्चैतन्यं भ्रमयति च संमीलयति च॥")
साधनम्। सत्यराशयः। प्रतिभिदः। इति मेदिनी॥ उपलब्धिः। इत्यमरः। ३। २। १४॥ वर्णाक्षरम्। इति हेमचन्द्रः॥ (यथा, भागवते। २। ८। ६।
"स चिन्तयन् द्व्यक्षरमेकदाम-
स्युपाशृणोद् द्विर्गदितं वचो विभुः।
स्पर्शेषु यत् षोडशमेकविंशं
निष्किञ्चनानां नृप यद्धनं विदुः॥")
वायुः। इति केचित्। कामिनां वस्त्रभेदः। इति शब्दरत्नावली॥ कादिपञ्चमवर्णकम्। यथा,—
"स्पर्शसंख्यासमक्षीणः सरो देवः उदाहृतः।"
इति श्रीभागवते ३ स्कन्धे १२ अध्यायः॥
स्पर्शः कादिपञ्चमम्। इति तट्टीकायां श्रीधरस्वामी॥ स्पर्शयते सन्निधियाऽनुभ-

विशेषः। त्वगुपकारकः। स च त्रिविधः। उष्णः। शीतः। अनुष्णाशीतः। पृथिव्याः स्पर्शः काठिन्यादिः पाकजः। जलपरमाणुस्पर्शः स्निग्धः। अन्यत्रानित्यः। वैशेषिकमते पार्थिवपरमाणुमात्रस्य पाकजस्पर्शः। नैयायिकमते तु द्व्यणुकादिस्पर्शोऽपि पाकजः। यथा,—

"स्पर्शस्त्वगिन्द्रियग्राह्यस्त्रयः स्यादुपकारकः।
अनुष्णाशीतशीतोष्णभेदात् स त्रिविधो मतः॥
काठिन्यादिः चितावेव नित्यतादि च पूर्ब्ववत्।
एतेषां पाकजत्वन्तु क्षितौ नान्यत्र कुत्रचित्॥
नत्वापि परमाणौ स्यात् पाको वैशेषिके नये।
नैयायिकानान्तु नये द्व्यणुकादावपीष्यते॥"

इति भाषापरिच्छेदः॥

स्पृश निरूपयति। स्पर्श इति। उपकारक इति स्पर्शनप्रत्यक्षे स्पर्शः कारणमित्यर्थः। अनुष्णाशीतेति। पृथिव्या वायोः स्पर्शोऽनुष्णाशीतः। जलस्य शीतः। तेजस उष्णः। काठिन्येति। कठिनसुकुमारस्पर्शः पृथिव्या एव इत्यर्थः। कठिनत्वादिकन्तु न संयोगनिष्ठो जातिविशेषः चक्षुर्ग्राह्यतापत्तेः। पूर्ब्ववत् जलतेजोवायुपरमाणुस्पर्शा नित्याः इत्यर्थः। तद्भिन्नाः स्पर्शास्त्वनित्या इत्यर्थः। एतेषां रूपरसगन्धस्पर्शानाम्। नान्यत्रेति। पृथिव्या हि रूपरसगन्धस्पर्शपरावृत्तिः पाकरूपसंयोगादुपलभ्यते। नहि घृतधौतेऽपि स्थायिनि जलादौ रूपादिकं परावर्त्तते नीरे क्षीरमौष्ण्यञ्च नयत्यतिरेकाभ्यामुपाधेरेवेति निर्णीयते पवनपृथिव्योः शीतस्पर्शादिवत् पृथिवीव्यपि मधौ परमाणावेव रूपादीनां पाकः इति वैशेषिका वदन्ति। नैयायिकानामिति नैयायिकानां मते द्व्यणुकादौ अवयविन्यपि पाको भवति। इति सिद्धान्तमुक्तावली॥ * ॥

पराणमते एकादशविधस्पर्शो यथा। उष्णः १ शीतः २ सुखः ३ दुःखः ४ स्निग्धः ५ विशदः ६ खरः ७ मृदुः ८ श्लक्ष्णः ९ लघुः १० गुरुः ११। इति मलमासतत्त्वे भोजधर्म्मः॥ कठिनः। इति तत्रैव आग्नेयेऽधिकपर्ब्व॥ आचमनाङ्गस्पर्शनं आचमनशब्दे द्रष्टव्यम्॥ * ॥ उच्छिष्टस्य स्पर्शनिषेधो यथा,—

"न स्पृशेत् पाणिनोच्छिष्टो विप्रोऽज्ञानाच्छमात्।
न चानमं पदा वापि न देवप्रतिमां स्पृशेत्॥"

इति कौर्म्मे उपविभागे १६। ३५॥

अथ उच्छिष्टस्य चाण्डालादिस्पर्शप्रायश्चित्तम्। आपस्तम्बः।

"भुक्तोच्छिष्टस्त्वनाचान्तश्चाण्डालैः स्वपचेन वा।
प्रमादात् स्पर्शनं गच्छेत् तत्र कुर्य्यादिदं शोधनम्।
गायत्र्याश्चसहस्रन्तु दृष्ट्वा वा शतं जपेत्।
त्रिरात्रोपोषितो भूत्वा पञ्चगव्येन शुध्यति॥
भुक्तोच्छिष्टोऽभ्यशैः स्पृष्टः प्राजापत्यं समाचरेत्।
अश्नोच्छिष्टे स्नुतः पादः पाद ग्रामाशये यथा॥"

प्राजापत्यं स्नाने। अश्नोच्छिष्टो येन आद्यग्रासः आस्ये निःक्षिप्तः न तु निगीर्णः। दक्षः।

"पाने मैथुनसंसर्गे तथा मूत्रपुरीषयोः।
स्पर्शनं यदि गच्छेत्तु ग्रावोदक्यान्त्यजैः सह॥
दिनमेकं चरेन्मूत्रे पुरीषे तु दिनद्वयम्।
दिनत्रयं मैथुने स्यात् पाने स्याच्च चतुष्टयम्॥"

काश्यपः।

"स्वमूकरैरन्त्यचाण्डालमद्यभाण्डरजस्वलाः।
यदुच्छिष्टः स्पृशेत् तत्र क्रुच्छ्रं सान्तपनं चरेत्॥"

एतज्ज्ञानाभ्यासे। सान्तपने धेनुद्वयम्। ब्रह्मपुराणे।

"उच्छिष्टेन तु मूढेन विप्रः स्पृष्टस्तु तादृशः।
उपवासेन शुद्धिः स्यात् स्नुना संस्पृष्ट एव वा॥
उच्छिष्टेन तु विप्रेण विप्रः स्पृष्टस्तु तादृशः।
उभौ स्नानं प्रकुरुतः सद्य एव समाहितौ॥"

अनुच्छिष्टब्राह्मणस्य नक्तमिति प्रायश्चित्तविवेकः॥ * ॥ अथ रजस्वलास्पर्शप्रायश्चित्तम्। काश्यपः।

"रजस्वला तु संस्पृष्टा ब्राह्मण्या ब्राह्मणी यदि।
एकरात्रं निराहारा पञ्चगव्येन शुध्यति॥
रजस्वला तु संस्पृष्टा राजन्या ब्राह्मणी तु या।
त्रिरात्रेण विशुद्धिः स्यात् व्याघ्रस्य वचनं यथा॥
रजस्वला तु संस्पृष्टा वैश्यया ब्राह्मणी च या।
पञ्चरात्रनिराहारा पञ्चगव्येन शुध्यति॥
रजस्वला तु संस्पृष्टा शूद्रया ब्राह्मणी यदि।
षड्रात्रेण विशुध्येत्तु ब्राह्मणी कामचारतः॥
अकामतस्त्वदर्द्धं ब्राह्मणी सर्ब्वजातिषु॥"

एतेन रजस्वलाया ब्राह्मण्याः सवर्णरजस्वलास्पर्शे एकरात्रोपवासः पञ्चगव्यपानं कामतः। अकामतस्त्वदर्द्धं नक्तव्रतम्। असवर्णरजस्वलास्पर्शे त्रिरात्रपञ्चरात्रषड्रात्रोपवासाः। अकामतस्त्वदर्द्धं एतच्चतुर्थाहानन्तरं कर्त्तव्यम्।

"चाण्डालेन त्वपाकेन संस्पृष्टा चेद्रजस्वला।
अतिक्रम्य तान्यहानि प्रायश्चित्तं समाचरेत्॥
त्रिरात्रमुपवासः स्यात् पञ्चगव्येन शुध्यति।
तां निगृह्यातिक्रम्य स्नानात्युक्तन्तु कारयेत्॥"

इति वचनान्तरदर्शनात्॥

एतत् कामतः। अत्र दिनभेदोऽपि नास्ति। अज्ञाने द्रष्टव्यम्।

"पतितान्त्यश्वपाकैस्तु संस्पृष्टा स्त्री रजस्वला।
तान्यहानि व्यतिक्रम्य प्रायश्चित्तं समाचरेत्॥
प्रथमेऽह्नि त्रिरात्रन्तु द्वितीये द्व्यहमाचरेत्।
अहोरात्रं तृतीयेऽह्नि चतुर्थे नक्तमाचरेत्॥"

चतुर्थेऽह्नीति शुद्धिस्नानात् पूर्ब्वम्। व्याघ्रः।

"रजस्वला यदा स्पृष्टा अन्त्यशूकरकैः क्वचित्।
निराहारा भवेत्तावत् यावत् स्नानेन शुध्यति॥"

अत्रापि दृष्टमात्रादिभेदव्यवस्था। बृहद्यमः।

"रजस्वलं तु ये नार्य्यावन्योन्यं स्पृशतो यदि।
सवर्णे पञ्चगव्यन्तु ब्रह्मकूर्चमतः परम्॥"

पञ्चगव्यपानं व्रतरूपं तेनोपवासः। ब्रह्मकूर्चमाह व्यासः।

"अहोरात्रोषितो भूत्वा पौर्णमास्यां विशेषतः।
पञ्चगव्यं पिबेत् प्रातः ब्रह्मकूर्चविधिः स्मृतः॥"

तदशक्तौ पुराणैकं दातव्यम्। उच्छिष्टस्पृष्टादिस्पर्शे दृष्टव्यम्।

"मृता चोच्छिष्टया स्पृष्टा संस्पृष्टा ह्यन्त्यमाचरेत्।
अहोरात्रं तृतीयेऽह्नि परतो नक्तमाचरेत्॥"

परतश्चतुर्थदिने स्नानात् पूर्ब्वमिति ज्ञेयम्। इति प्रायश्चित्ततत्त्वम्॥ मत्स्यसूक्तोक्तास्पृश्यस्पर्शनप्रायश्चित्तं स्नानशब्दे द्रष्टव्यम्॥ (त्रि, स्पर्शकः। आनन्दजनकः। यथा, भागवते। ३। २१। ६।

"श्वेतोत्पलक्रीड़नकं मनःस्पर्शस्तितेक्षणम्॥")

स्पर्शकः, त्रि, (स्पृशतीति। स्पृश+ण्वुल्।) स्पर्शनकर्त्ता। स्पृशधातोः कर्त्तरि ण्वुलप्रत्ययेन निष्पन्नः॥

स्पर्शनं, क्ली, (स्पृश+ल्युट्।) दानम्। स्पर्शः। इति मेदिनी॥ (यथा, भागवते। १।१०।१२।

"तस्मिन्नन्तर्धियः पार्थाः सह कृष्णेन विरहं कथम्।
दृग्भिर्नस्पर्शनालापप्रेष्यनासनभोजनैः॥"

सम्बन्धः। इति मल्लिनाथः॥ यथा, रघुवंशे। २।५०।

"तद्गच्छ कल्याणपरम्पराणां
भोक्तारमूर्ज्जस्वलमात्मदेहम्।
मधीतलस्पर्शनमात्रभिन्न-
मृद्धं हि राजपदमेन्द्रमाहुः॥")

स्पर्शनः, पुं, (स्पृशतीति। स्पृश+ल्युः।) वायुः। इत्यमरः। १। १। ६४॥

स्पर्शमणिः, पुं, (स्पर्शप्रधानो मणिः। स्पर्शेन स्वर्णोत्पादकत्वात् तथात्वम्।) स्पर्शमात्रेण स्वर्णजनकप्रस्तरविशेषः। परशपातर इति भाषा। इति वक्ष्यमाणशब्ददर्शनात्॥

स्पर्शमणिप्रभवं, क्ली, (स्पर्शमणेः प्रभवो यस्य।) स्वर्णम्। इति शब्दरत्नावली॥

स्पर्शलज्जा, स्त्री, (स्पर्शात् लज्जा संकोचनरूपत्वमस्याः।) लज्जालुवृक्षः। इति शब्दचन्द्रिका॥

स्पर्शशुद्धा, स्त्री, (स्पर्शे शुद्धा।) धृतमूला। इति शब्दचन्द्रिका॥

स्पर्शस्यन्दः, पुं, (स्पर्शेन स्यन्दते मूत्रयतीति। स्यन्द+घञ्।) भेकः। इति केचित्॥

स्पर्शा, स्त्री, (स्पृशति परपुरुषमिति। स्पृश+घञ्। टाप्।) कुलटा। इति धरणिः॥

स्पर्शानन्दाः, स्त्री (स्पर्शेन आनन्दो यासाम्।) अप्सरसः। इति त्रिकाण्डशेषः॥

स्पर्शी, [न्] त्रि, (स्पृशतीति। स्पृश+णिनि।) उपलक्षकमात्रम्। रोगः। इत्येके। इत्यमरटीकायां भरतः। ३। २। १४॥

स्पृश, न अन्यबाधयोः। इति कविकल्पद्रमः॥ (भ्वा०-उभ०-सक०-सेट्।) न, स्पृशति स्पर्शति। पस्पार्श। अन्यत्र स्पर्शनं पठन्ति केचित्। इति दुर्गादासः॥

स्पृक्, पुं, (स्पृशतीति। स्पृश+क्विप्।) घरः। (यथा, महाभारते। १। १४०। ८५।
"यद्यस्य यदि दाहस्य विघ्नः प्रजवेमहि।
अग्नेर्नो,प्रातवेत्त यस्मात् राज्यमुच्यः सुयोधनः।)
अभिगरः। इत्यमरः। ३। ३। २१६। घरो गृहपुरुषः। अभिगरो गृहम्। प्राप्तनिरपेक्षो यो यथार्थे याचं चक्षिनं वा योधयति सोऽभिगरः। इत्यैके। इमौ दौ साधौ। इति भरतः।

स्पर्श, त्रि, (स्पृश्यते सेति। स्पृश+क्विप्+क्तः। "वा दान्तशान्तेति।" ७। २। २०। इति वागुः।) चक्षुम्। तत्पर्यायः। स्फुटम् २ प्रत्यक्षम् ३ उत्तत्वम् ४। इत्यमरः। ७।२।८९। चक्षिनम् ५ प्रकटम् ६। इति चटाधरः। (यथा, श्रीमद्भागवते। ४। १५। २२।
"भोः स्वस्ति ते भागध सौम्य वन्दिन्
क्षीणेऽशुना अक्षयुक्षसा मे खातु।
किमाशयो मे खल एव योत्स्यते
मा मन्मृषन् पितरा शिरो यः।")

स्पाक्षीलम्, त्रि, चक्षीलम्। क्षयातौ परे चक्षन्शब्दाद्भूतद्वादि क्विप्प्रत्ययेन निष्पन्नम्।

स्पृ, न प्रीतिरक्षणयोः। इति कविकल्पद्रुमः। (भ्वा०-पर०-सक०-सेट्।) न, स्पृणोति। इति दुर्गादासः।

स्पृक्का, स्त्री, एला। स्पृक्यते भोगस्थात् स्पृश संघर्षे कान्दृशात् कः, पृषोदरादित्वात् शैक्ष कः, स्पृक्का एलादिरिति केचित्। इत्यमरटीकायां भरतः। ९।८।१६३। (यथा,हरिवंशे।७७।५।
"लक्ष्मीरेलालिका
कृष्णागरुसरलाकैतुल्यैः।
कैवरपत्रिमिश्रै-
रेवरपत्रियोयं शिरःस्नानम्।")

स्पृक्, न स्त्री स्पृष्टि। इति कविकल्पद्रुमः। (तुदा०-पर०-सक०-अनिट्।) न, स्पृक्ति। स्त्री, अन्नादौ। अन्नमिश्रे यजादौ तदन्नम्। इति भरतः। इति दुर्गादासः।

स्पृक्का, स्त्री, (स्पृक्यते। स्पृश+क्तः। टाप्।) मरुद्भवानिलोक्तः। मरुद्भवानिला इति ख्याता। इति शब्दरत्नावली।

स्पृक्षी, स्त्री, कटभेदी। इत्यमरः। २।४।९३।

स्पृक्तः, त्रि, (स्पृक्+क्तः।) संसृष्टः। यथा, मार्कण्डेयपुराणे ४५।३०।
"अस्थिकेशैश्च कर्पैश्च विषः स्पृक्तश्च गुल्मकः।
उपघातेन सृष्टिः स्यात् पूजा संस्कार एव वा।"

स्पृहणीयं, त्रि, (स्पृहेरिच्छार्थात् कर्मणि अनीयर्।) अभिलषणीयम्। यथा,—
"अहो आश्चर्यमेतत् यत् कन्यारत्नं महीपतिः।
अयोनेः किमयत्नेन लोकेऽस्मिन् स्पृहणीयते।
अक्षयश्च प्रभावश्च चक्रिणोऽस्य महात्मनः।
भूमावस्य च भोगेषु कस्तृष्णां न विहन्यते।
स्पृहणीयं वरं लोके यत्नेनापि हि लभ्यते।
स्पृहणीयं वरं लोके यत्नेनापि हि रक्ष्यते।
स्पृहणीयं वरं लोके यत्नेनापि हि रक्षितम्।
स्पृहणीयं वरं लोके यत्नेनापि हि वर्द्धते।

स्पृहयालुः, त्रि, (स्पृहयति तच्छीलः। स्पृह+"सृहिधृषिक्षिपेलीति। ३। २। १५८। इति आलुच्।) स्पृहणशीलः। लोभी। इति शब्दरत्नावली।

स्पृहयीयं, त्रि, (स्पृह+अनीयर्।) वाञ्छनीयम्। यथा, मृच्छकटिके। १। १।
"प्रणयकलहः स्पृहणीयवस्तुषु
उदयगामिषु चतुरश्चिरोदयः।
दिनान्तरन्योरभुपगान्तमध्ययो
निदाघकालः सदृशागतः प्रिये।"

स्पृहयालुः, त्रि, (स्पृहयति तच्छीलः। स्पृह+"सृहिधृषिक्षिपेलीति। ३। २। १५८। इति आलुच्।) स्पृहणशीलः। लोभी। इति शब्दरत्नावली। चक्षुम्। इति शब्दरत्नावली। वाञ्छनीये, त्रि।

स्पृहा, [ह्] त्रि, (स्पृहयतीति। स्पृह+क्विप्। उपतापकमात्रम्। इत्यमरः। ३। २। १४। रोगः। इत्यैके। इति भरतः। (स्पृहकः। यथा, महाभारते। १४। २०। २२।
"भ्राता भक्षयिता मम्रा स्पृहा श्रोता च षष्ठमः।
मन्ता बोद्धा च सप्तैते भवन्ति परमर्त्विजः।")

स्फट ६ } धौर्यो। इति कविकल्पद्रुमः। (भ्वा०-
स्फट ९ } पर०-अक०-सेट्।) दावाग्नस्थरिणाबोष्ठ्यवर्णेतीयुक्तौ। षष्ठमस्थरिणाविति भभौ ज्ञेयः। तथाचे चक्षातीयतया स्फुटक् भिदीत्यादीनां चक्षिणावेवामठिष्यत्। एवं संस्कापि न संगच्छते। स्फुटिर्विशरणे इत्यनेनैवेष्टसिद्धेः धौधातोश्च वैयर्थ्यं स्यात्। अतएव रमाणाथोऽपि स्फुटिर्विशरणे इत्यत्र उकारश्रुन्यः स्फट इति केचित् पठन्ति। यथाहिलादनि स्फटा फणा इति सुभूतिरित्यमरमाह। ६, स्फण्टते। स्फटति गात्रं वायुः। मस्फट मस्फाट स्फटिकम्। इति दुर्गादासः।

स्फटः, पुं, (स्फटतीति। स्फट+घञ्।) फणा। इत्यमरः। १। ८। ६।

स्फटा, स्त्री, (स्फट+घञ्। टाप्।) फणा। इत्यमरः। १। ८। ६।

स्फटिकः, पुं, (स्फट धौर्यो+बाहुलकात् इकन्।) कर्पूरकान्तमणिः। इति शब्दरत्नावली। समानार्थकमणिः। फटिक् इति भाषा। तत्पर्यायः। स्फाटिकम् २ स्फाटकम् ३। इति शब्दरत्नावली। भासुरः ४ स्फाटिकोपलः ५ प्राग्गिरिजम् ६ पौलस्त्यिकम् ७। इति त्रिकाण्डशेषः। सितोपलः ८ विमलमणिः ९ निर्मलोपलः १० स्वच्छः ११ स्वच्छमणिः १२ चमररत्नम् १३ निसुषरत्नम् १४ शिवप्रियः १५। अस्य गुणादि यथा,—
"स्फटिकः समवीर्यश्च पित्तदाहार्तिरोगनुत्।
तस्याश्मभागां अपतां एके कोटिगुणं फलम्।"
तत्परीक्षा यथा,—
"यद्भ्रासोयस्विष्टस्विभसदृशं निसुषं नैव-
स्वयं
स्निग्धं गुरुश्लक्ष्णतरालं मधुरमतिघिमं शिव-
दाहाश्मरहरि।
भाषायै यात्यद्य स्फुटयमाप निजां सत्यतां
नैव यस्मात्
तस्माच्च खातु यस्य शुभमभिचुरे श्रेयस्त्वय
एवम्।"
विष्णुस्नाते। चतुर्दशात च माहः। इति राज-निर्घण्टः। अपि च।
"शुक्लादिभेदतश्चैव दुःस्फटिकादिकम्।
मणिरत्नं सदा दीप्तं कथितं सर्वदा बुधैः।
चतुर्थं भारत्याश्च मायाबीजाक्षरम्।"
इति राजवल्लभः। ६।
तस्य जातिभेदाः यथा,—
"कार्पेरदिव्यवस्तुसौभाग्यमणिभूमिः।
शाङ्खो मणिरत्नादी दाक्षाश्च इत्यमरः।

आकाशशुद्धं तैलाख्यसुत्पन्नं स्फटिकं ततः।
मृणालशङ्खधवलं किञ्चिदर्णान्तरान्वितम्॥
न तत्तुल्यं हि रत्नानामथवा पाषनाशनम्।
संस्कृतं शिल्पिना सद्यो मूल्यं किञ्चिल्लमेत्तत:॥"
इति गारुड़े पूर्व्वविभागे। ७६।१—३॥*॥
तथा।
"हिमालये सिंहले च विन्ध्याटविनटे तथा।
स्फटिकं जायते चैव नानारूपं समप्रभम्॥
हिमाद्रौ चन्द्रसङ्काशं स्फटिकं तत् द्विधा भवेत्।
सूर्य्यकान्तञ्च तच्चैकं चन्द्रकान्तं तथा परम्॥
सूर्य्यांशुस्पर्शमात्रेण वह्निं वमति यत् क्षणात्।
सूर्य्यकान्तं तदाख्यातं स्फटिकं रत्नवेदिभिः॥
पूर्णेन्दुकरसंस्पर्शादुद्गतं स्रवति क्षणात्।
चन्द्रकान्तं तदाख्यातं दुर्लभं तत् कलौ युगे॥
अशोकपल्लवच्छायं दाड़िमीबीजसन्निभम्।
विन्ध्याटविनटे देशे जायते मन्दकान्तिकम्॥
सिंहले जायते क्षणमाकरे गन्धनीलके।
पद्मरागभवे स्थाने विविधं स्फटिकं भवेत्॥
अत्यन्तनिर्म्मलं स्वच्छं स्रवतीव जलं शुचि।
ज्योतिर्व्वलनमाश्रित्य मुक्ताज्योतीरसं द्विज॥
तदेव लोहिताकारं राजावर्त्तमुदाहृतम्।
श्यामलं तत्तु पाषाणं प्रोक्तं राजमयं शुभम्॥
ब्रह्मसूत्रमयं यत्तु प्रोक्तं ब्रह्ममयं द्विज॥"
इति स्फटिकपरीक्षा। इति भोजराजकृतयुक्तिकल्पतरुः॥
स्फटिका, स्त्री, स्फटिकारिः। इति भावप्रकाशः॥
स्फटिकाचलः, पुं, (स्फटिकवत् शुभ्रोऽचलः। स्फटिकस्य अचलो वा।) कैलासपर्व्वतः। इति हेमचन्द्रः॥
स्फटिकात्मा, [न्] पुं, (स्फटिक एव आत्मा स्वरूपं यस्य।) स्फटिकः। इति शब्दरत्नावली॥
स्फटिकाद्रिभिदः, पुं, (स्फटिकाद्रिं कैलासपर्व्वतमपि भिनत्ति वर्णेनेति। भिद+"इगुपधज्ञेति।" ३।१।१३५। इति कः।) कर्पूरः। इति केचित्॥
स्फटिकाभः, पुं, (स्फटिकवत् शुभ्रो यो अभ्रः स इव शुक्लत्वात्।) कर्पूरः। इति राजनिर्घण्टः॥
स्फटिकारिः, स्त्री, (स्फटिकस्य अरिः।) श्वेतवर्णविशिष्टद्रव्यविशेषः। फटकिरी इति भाषा॥ यथा,—
"नवसारयवक्षारस्फटिकारित एव काचवर्क्षैः।
बहुशः पात्यं सत्यं तर्हि महाद्रावकं नाम॥"
इति रत्नावली॥
तदूषान्तराणि। स्फटिकारी। स्फटिकारिका। फट्करी। इति महाद्रावकप्रकरणे भैषज्यरत्नावली॥
स्फटी, स्त्री, (स्फटतीति। स्फट+अच्। ङीष्।) स्फटिकारिः। तत्पर्य्यायः। स्फटिकी २ श्वेता ३ शुभ्रा ४ रङ्गदा ५ रङ्गड़ा ६ दृढ़रङ्गा ७ रङ्गाङ्गा ८। अस्या गुणाः। कटुत्वम्। स्निग्धत्वम्। कषायत्वम्। प्ररोहेष्वक्लृप्तमिश्रोपरोधनाशित्वम्। दृढ़रङ्गदाढ्यत्वञ्च। इति राजनिर्घण्टः॥ अपि च।
"स्फटिका तु कषायोष्णा वातपित्तकफव्रणान्।
निहन्ति श्वित्रवीसर्पान् योनिसङ्कोचकारिणी॥"
इति भावप्रकाशः॥
स्फड, इ क नर्म्मणि। (चुरा०-पर०-सक०-सेट्।) यथा। स्फुड़ि क नर्म्मणि इत्यत्र नर्म्म इह परीहासः। आद्यक्षरीति कातन्त्राद्याः। इति दुर्गादासः॥
स्फर, प्र स्फूर्त्तौ। चले। इति कविकल्पद्रुमः॥ (तुदा०-पर०-अक०-सेट्।) प्र, स्फरती स्फरन्ती। प्रस्फार। स्फरणं स्फुरणमित्यमरः। इति दुर्गादासः॥
स्फरणं, क्ली, (स्फर+ल्युट्।) स्फुरणम्। इत्यमरः। ३।२।१०॥
स्फल, प्र चले। स्फूर्त्तौ। इति कविकल्पद्रुमः॥ (तुदा०-पर०-अक०-सेट्।) प्र, स्फलती स्फलन्ती। प्रस्फाल। सुरद्विषास्फालनकर्कशाङ्गुलाविति रघुः। चालश्चलनम्। इति दुर्गादासः॥
स्फाटकं, क्ली, स्फटिकम्। इति काचित् शब्दरत्नावली॥ जलबिन्दौ, पुं। इति केचित्॥
स्फाटिकं, क्ली, (स्फटिकमेव। स्वार्थे अण्।) स्फटिकम्। इति शब्दरत्नावली॥ (यथा, महाभारते। २।५५।१७।
"सहस्रस्तम्भां हैमवैदूर्य्यचित्रां
शुतद्वारां तोरणस्फाटिकाख्याम्।
सभामग्र्यां क्षोभमाचायतां मे
तद्विस्तारामाशु कुर्व्वन्तु युक्ताः॥"
स्फटिकस्येदमिति। स्फटिक+अण्। यथा, महाभारते। १।६३।१३।
"देवोपभोग्यं दिव्यञ्च आकाशे स्फाटिकं महत्।
आकाशगं त्वां महत्तं विमानमुपपत्स्यते॥")
स्फाटिकाम्बलः, पुं, (स्फाटिक उपलः।) स्फटिकम्। इति त्रिकाण्डशेषः॥
स्फाटीकं क्ली, स्फटिकम्। इति शब्दरत्नावली॥
स्फातः, त्रि, वृद्धियुक्तः। स्फाधधातोः क्तप्रत्ययेन निष्पन्नः। इति व्याकरणम्॥
स्फाति., स्त्री, (स्फाय+क्तिन्।) वृद्धिः। इत्यमरः। ३।२।६॥
स्फाय, ई ओ वृद्धौ। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-अक०-सेट्। निष्ठायामनिट्।) ई, स्फीत स्फातः। ओ, स्फायते पस्फाये। स्फायिम्रोर्वीवसन्वीति गणसूत्रानित्यत्वात्। इति रमानाथः। वस्तुतस्तु स्फायतेः स्फायः पचाद्यजादन् ततः स इवाचरतीति क्वौ शब्दचन्द्रम्। इति दुर्गादासः॥
स्फारं, क्ली, (स्फायते इति। स्फाय+"स्फायितञ्चीति उणा० २।१२। इति रक्।) प्रभुरम्। इत्यमरः। ३।१।६३॥
स्फारः, पुं स्फाय+रक्। यद्वा, स्फुर चलने+घञ्। "स्फुरतिस्फुलत्योर्घञि।" ६।१।४७। इति रुच आत्वम्।) विकटः। कनकादेर्ब्बुद्बुदः। इति मेदिनी॥ विपुले, त्रि। इति हेमचन्द्रः॥ (यथा, साहित्यदर्पणे। ३।१०१।
"असकृदसकृत् स्फारस्फारैरपाङ्गविलोकितैः
त्रिभुवनजये सा प्रत्येयोः करोति सहायताम्॥")
स्फारणं, क्ली, (स्फर+णिच्+ल्युट्।) स्फुरणम्। इत्यमरटीकायां रमानाथः। २।३।१०॥
स्फालः, पुं, (स्फल चलने+घञ्। "स्फुरतिस्फुलत्योर्घञि।" ६।१।४७। इति रुच आत्वम्।) स्फूर्त्तिः॥
स्फिक्, [च्] स्त्री, (स्फाय वृद्धौ+वाहुलकात् क्विप्।) कटिप्रोथः। इत्यमरः। २।६।७५॥ (यथा, मनुः। ८।२८१।
"सहासनमभिप्रेप्सुरुत्कृष्टस्यापकृष्टजः।
कट्यां कृताङ्को निर्व्वास्यः स्फिचं वास्यावकर्त्तयेत्॥")
स्फिक्घातनकः, पुं, (स्फिचं घातयतीति। स्फिच्+हन+णिच्+ल्युः। ततः स्वार्थे कन्।) कट्फलः। इति शब्दचन्द्रिका॥
स्फिट, क इत्याम्। हिंसे। अनादरे। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-सेट्।) क, स्फेटयति। वृत्तिरन्येनैनं मन्यते। इति दुर्गादासः॥
स्फिरं, त्रि, (स्फाय वृद्धौ+"अजिरशिशिरशिथिलेति।" उणा० १।५४। इति किरच्प्रत्ययेन साधुः।) प्रचुरम्। इत्यमरः। ३।१।६३॥
स्फीतः, त्रि, (स्फाय+क्तः। "स्फायः स्फी निष्ठायाम्।" ६।१।२२। इति धातोः स्फी।) वर्द्धितः। यथा,—
"स्फीतान् जनपदांश्चैव पुरग्रामव्रजाकरान्।
खेटखर्व्वटवाटीश्च तथान्युपवनानि च॥"
इति श्रीभागवते। १।६।११॥
"स्फीतान् समृद्धान् देशान्। तत्र तस्यां दिशि। पुरग्रामव्रजाकरान् तत्र पुराणि राजधान्यः। ग्रामा भृगुप्रोक्ताः
'विप्राश्च विप्रभृत्याश्च यत्र चैव वसन्ति वै।
स तु ग्राम इति प्रोक्तः शूद्राणां वास एव चेति॥'
व्रजा गोकुलानि। आकरा रत्नाद्युत्पत्तिस्थानानि। तान्। खेटाः पर्व्वतग्रामाः। खर्व्वटाः गिरितटग्रामाः। भृगुप्रोक्ता वा।
'एकतो यत्र तु ग्रामो नगरं चैकतः स्थितम्।
मिश्रन्तु खर्व्वटं नाम नदीगिरिसमाश्रयमिति॥'
वाट्यः पुष्पपुष्पवाट्यक्षाः। वनानि खतः सिद्धवृक्षाणां समूहाः। उपवनानि रोपितवृक्षाणां समूहाः तानि च।" इति तट्टीकायां श्रीधरस्वामी॥
स्फुट, इर क नर्म्मणि। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-सेट्।) नर्म्मेह परीहासः। इर क, स्फुण्टयति सखायं लोकः। अयमन्येनैनं मन्यते। इति दुर्गादासः॥
स्फुट, इर् विप्रा(च)रणे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-भेदने सक०-सेट्।) इर्, अस्फुटत् अस्फोटीत्। विप्रारणं भेदनम्।

स्फोट्यति गात्रं वाणः। विसरण इति दन्त्यमध्यपाठे विकसन इत्यर्थः। स्फोटति मल्लिकाकलिका ॥

स्फुट, क भिदि। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-सेट्।) क, स्फोटयति कण्टकः पदम्। इति दुर्गादासः॥

स्फुट, ड विसरणे। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-अक०-सेट्।) ड, स्फोटन्ते नवकुट्मलानि कुटजप्रायेषु वृक्षेष्विति हलायुधः। इति दुर्गादासः॥

स्फुट, तृ क विसरणे। इति कविकल्पद्रुमः॥ (अदन्त-चुरा०-पर०-अक०-सेट्।) विसरणं विकसनम्। स्फुटयति चम्पककलिका। अपुस्फुटत्। इति दुर्गादासः॥

स्फुट, णि विकासे। इति कविकल्पद्रुमः॥ (तुदा०-पर०-अक०-सेट्।) विकास इति कस ज्ञतावितीदन्तस्य घञि रूपं विपूर्व्वेणार्थान्तरवाचितया विकसनमित्यर्थः। णि, स्फुटति केतकीकोरकः। अस्फुटीत् पुष्पोट। इति दुर्गादासः॥

स्फुट, क हिंसे। आङ्पूर्व्वोऽयम्। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-सेट्।) आङ् उपसर्गः। क, आस्फोटयति। इति दुर्गादासः॥

स्फुटः, त्रि, (स्फुटति प्रकाशते इति। स्फुट्+कः।) व्यक्तः। (यथा, रघुः। ३। ६३।

"अवेहि मां प्रीतमते तुरङ्गमात्
किमिच्छसीति स्फुटमाह वासवः॥")

प्रफुल्लः। इति मेदिनी॥ शुक्लः। इत्यमरः॥ भिन्नः। इति स्फुटधात्वर्थदर्शनात्॥ * ॥ स्फुटश्चा यथा,—

"स्यात् संस्कृतो मध्यफलेन मध्यो
मन्दस्फुटः स्यात् चलकेन्द्रसङ्गम्।
विधाय शैघ्र्येण चलेन चैवं
स्पष्टस्फुटः स्यादचलात् फलाभ्याम्॥"

कुणस्य विशेषमाह।

"दलीकृताभ्यां प्रथमं फलाभ्यां
ततोऽखिलाभ्यामसकृत् कुणस्तु।
स्फुटौ रवीन्दू वदुनैव वेद्यौ
प्रोन्नाणतुङ्गस्य तयोरभावात्॥"

इति सिद्धान्तशिरोमणिः॥

स्फुटनं, क्ली, (स्फुट्+ल्युट्। कुटादित्वात् न गुणः।) विदरणम्। इत्यमरः। ३। २। ५॥ विकसनम्। इति स्फुटधात्वर्थदर्शनात्॥

स्फुटपत्रिणी, स्त्री, (स्फुटं पत्रं यस्याः। ङीप्।) पारावतपदी। नकट्की इति भाषा। इति रत्नमाला॥ स्फुटपत्र्यपीति केचित्॥

स्फुटा, स्त्री, (स्फुटति विकाशते इति। स्फुट+कः। टाप्।) कटा। कण्या। इत्यमरटीकायां रामाश्रमः। ३। २। ५॥

स्फुटिः, स्त्री, (स्फुटतीति। स्फुट+इन्।) पादस्फोटरोगः। निर्भिन्नकर्कटीफलम्। इति मेदिनी॥

स्फुटितः, त्रि, (स्फुट+क्तः।) विकसितः। इति हेमचन्द्रः॥ भिन्नः। (यथा, मृच्छकटिके ३ अङ्के।

"असदृग्जनसंप्रयोगभीरो-
र्हृदयमिव स्फुटितं महाग्रहस्य॥")

परिक्षतः। इति स्फुटधात्वर्थदर्शनात्। व्यक्तीकृतः। इति स्फुटशब्दार्थदर्शनात्॥

स्फुटी, स्त्री, (स्फुटि+ऋदिकारादिति ङीप्।) पादस्फोटरोगः। कर्कटीफलम्। फुटी इति भाषा। इति शब्दरत्नावली॥

स्फुट्ट, क चनादरे। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-सेट्।) क, स्फुट्टयति। इति दुर्गादासः॥

स्फुड, इ क नर्म्मणि। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-सेट्।) नर्म्म इह परीहासः। इ क, स्फुण्डयति सखायं लोकः। पुरस्फुण्डयिषति। 'आद्यक्षरादिति कातन्त्रात्। षष्ठमक्षरमुक्त्वा नर्म्म। इति गोविन्दभट्टः। इति दुर्गादासः॥

स्फुड, इ ड मुक्ते। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-अक०-सेट्।) मुक्तं विकसनम्। इ, स्फुण्डते। ड, स्फुण्डते मुन्दकोरकः। पुस्फुण्डे। इति दुर्गादासः॥

स्फुड, णि दृत्वाम्। इति कविकल्पद्रुमः॥ (तुदा०-पर०-सक०-सेट्।) णि, स्फुडति। अस्फुडीत्। पुस्फोडत्। दृत्वां वरणे। इति दुर्गादासः॥

स्फुत्करः, पुं, (करोतीति। कृ+अच्। स्फुदित्यव्यक्तशब्दस्य करः।) व्यक्तिः। इति शब्दचन्द्रिका॥

स्फुत्कारः, पुं, फुत्कारः। स्फुदिति क्रियते इति स्फुत्शब्दपूर्व्वकृधातोर्भावे घञ्प्रत्ययेन निष्पन्नः॥

स्फुर, णि स्फुर्त्तौ। चल। इति कविकल्पद्रुमः॥ (तुदा०-चुरा०-पर०-अक०-सेट्।) स्फुर्त्तिः प्रकाशः। चलचलनम्। णि, स्फुरति चामरम्। अस्फुरीत्। पुस्फोर। इति दुर्गादासः॥

स्फुरः, पुं, (स्फुरतीति। स्फुर+कः।) फलकम्। इति हेमचन्द्रः॥ (स्फुर+भावे घञ्।) स्फुरणम्। इत्यमरटीका। ३। २। ६॥

स्फुरणं, क्ली, (स्फुर+ल्युट्।) क्षिप्तिचलनम्। इति भरतः॥ तत्पर्य्यायः। स्फारणम् २। इत्यमरः। ३। २। ६॥ स्फुलनम् ३ स्फोरणम् ४ स्फुरः ५ स्फुरणा ६ स्फारणम् ७। इति तट्टीका॥ स्फूर्त्तिः। इति शब्दरत्नावली॥ * ॥ चक्षुःस्फुरणस्य शुभाशुभफलं यथा,—

"भ्रूमोर्धुनाङ्गस्फुरितस्य सम्यक्
प्रत्येकमन्यत्फलप्रभावम्।
सर्व्वत्र यत्रावगते स्वदेहा-
दुत्पद्यते कर्म्मविपाकसंवित्॥
मूर्द्धि स्फुरत्याशु पृथिव्यवाप्तिः
स्यात्प्रस्फुरिच्च ललाटदेशे।
भ्रूप्राग्यमध्ये प्रियसङ्गमः स्यात्
नाशाग्रिमध्ये च सहायलाभः॥

दृगन्तमध्यस्फुरणेऽर्थलाभोत्-
कण्ठौ क्रमाद्दिस्फुरिते दृगादौ।
जयो दृशाधःस्फुरणे रणः स्यात्
प्रियश्रुतिः स्यात् स्फुरिते च कर्णे॥
योषित्सन्दर्शिः स्फुरिते च गण्डे
घ्राणे तु सौख्यसुदौ भवेताम्।
ओष्ठेऽसङ्गावधरोर्द्वयोश्च
स्फुर्ये गवे भोगविदर्शिलाभौ॥
स्पन्दो भुजस्येऽसमागमाय
स्पन्दः करस्य द्रविणाप्तिहेतुः।
स्पन्दश्च पृष्ठस्य पराजयाय
स्पन्दो जयायोरसि मानवानाम्॥
पार्श्वप्रकम्पे विषयस्य लाभः
कटिप्रकम्पे तु वलप्रमोदौ।
वाभिप्रकम्पे निजदेशलाभः
धनर्द्धिबन्धुश्च भुवि प्रकम्पे॥
दुःखं धनान्तं हृदयस्य कम्पे
स्फिक्प्रायुकम्पेऽपि च वाहनाप्तिः।
वराङ्गकम्पे वरयोषिदाप्ति-
र्मुष्के सकम्पे तनयस्य जन्म॥
वस्तौ सकम्पे युवतिप्रदृत्तिः
दोषश्च कम्पे पुनरूरुदृष्टे।
उरः पुनः स्यात् सुसहायलाभः
स्याज्जानुकम्पे त्वचिरेण सिद्धिः॥
जङ्घाप्रकम्पे निजदेशनाशः
स्यानाप्तिरुच्चरणस्य कम्पे।
याचा वलाभाङ्घ्रितलप्रकम्पे
पुंसां सदा दक्षिणदेहभागे॥
स्त्रीणाञ्च वामावयवे प्रजातः
स्पन्दः फलानि प्रदिशत्यवश्यम्॥"

इति वसन्तराजशाकुने नरेक्षितेऽङ्गस्फुरणप्रकरणं चतुर्थम्॥

स्फुरणा, स्त्री, (स्फुर+णिच्+युच्। टाप्।) स्फुरणम्। इत्यमरटीका। ३। २। १०॥

स्फुरत्, [त्] त्रि, (स्फुर+शतृ।) कम्पनयुक्तः। स्फूर्त्तिविशिष्टः। यथा,—

"गङ्गोत्तुङ्गतरङ्गचङ्गतनटाचूटाग्रजाग्रत्फणि-
स्फूर्जत्स्फुत्कृतिभीतिसम्भृतचमत्कारस्फुरत्-
सम्भ्रमा।
आनन्दान्तरवारिकां विदधती चित्तं गिरीशप्रभो-
स्त्वां पायान्नवसङ्गमे भगवती सच्चावती
पार्व्वती॥"

इति कायचन्द्रिका॥

स्फुरितं, क्ली, (स्फुर+क्तः।) स्फुरणम्। स्फुरणविशिष्टे, त्रि। यथा। भ्रूमोर्धुनाङ्गस्फुरिते च सम्यक् इति। प्रिया श्रुतिः स्यात् स्फुरिते च कर्णे इति च। वसन्तराजशाकुनम्॥

स्फुर्च्छ, आ. विस्तृतौ। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) क्विपि राङ्कोऽपि स्फूः स्फुरौ स्फुरः। आ स्फूर्च्छितं स्फूर्त्या तेन। स्फूर्च्छेति कथां मयपः। इति दुर्गादासः॥

स्फूर्त्तिः

स्फु(स्फू)र्ज, टु ओ श्वा वचनिर्घोषे ॥ (भ्वा०-पर०-अक०-सेट् ।) टु, स्फुर्जुः । ओ, स्फूर्णः । श्वा, स्फूर्जितं स्फूर्णं तेन । वचनिर्घोषो वचकर्तृकः शब्दः । स्फूर्जति वज्रम् । इति दुर्गादासः ॥

स्फुर्ज्जकः, पुं, (स्फुर्ज्जतीति । स्फुर्ज्ज+ण्वुल् ।) स्फुर्जकवृक्षः । इत्यमरटीकायां रायमुकुटः ॥

स्फुर्जथुः पुं, (स्फुर्ज्ज+अथुच् ।) वज्रपतनजनितशब्दः । इत्यमरटीकायां भरतः ॥

स्फुल, शि स्फूर्त्तौ । चले । चये । इति कविकल्पद्रुमः ॥ (तुदा०-फुटा०-पर०-अक०-सेट् ।) शि, स्फुलति अस्फुलीत् पुस्फोल । स्फूर्त्तिः प्रकाशः । चलः स्खलनम् । चयः सञ्चयः । इति दुर्गादासः ॥

स्फुलं, क्ली, (स्फुलतीति । स्फुल स्फूर्त्तौ चले+कः ।) वज्रवेश्म । इति शब्दरत्नावली ॥ ताँयु इति भाषा ॥

स्फुलनं, क्ली, (स्फुल+ल्युट् ।) स्फुरणम् । इत्यमरटीकायां गोकुलनाथः ॥

स्फुलिङ्गः, पुं, (स्फुल+इङ्गच् । यद्वा, स्फुत्कारेण लिङ्गतीति । लिङ्ग+अच् ।) अग्निकणः । इत्यमरः । १ । १ । ६० ॥ फिनूकी इति फिनुफुटी इति च भाषा ॥ हे अग्निचूर्ण । स्फुत्कारेण लिङ्गति गच्छति स्फुलिङ्गः । इति तट्टीकायां भरतः ॥ (यथा, महाभारते । ५ । ४८ । ५४ ।

"बलाहकादुच्चरतः सुभीमान्
विद्युत्स्फुलिङ्गानिव घोररूपान् ॥")

स्फुलिङ्गिनी, स्त्री, (स्फुलिङ्गोऽस्या अस्तीति । इनिः । ङीप् ।) अग्निसम्भिन्नसङ्गान्तर्गतनिङ्गाविशेषः । इति षटाधरः ॥ (यथा, सुश्रुतकोपनिषदि । १ । २ । ४ ।

"काली कराली च मनोजवा च
सुलोहिता या च सुधूम्रवर्णा ।
स्फुलिङ्गिनी विश्वरुची च देवी
लोलायमाना इति सप्त जिह्वाः ॥")

स्फूर्जकः, पुं, (स्फूर्ज्जति अयौ क्षिप्रः सन्निति । स्फूर्ज्ज+ण्वुल् ।) तिन्दुकवृक्षः । इत्यमरः । २ । ४ । ३८ । स्फूर्ज्जति वह्नौ क्षिप्रः स्फूर्जकः । द्वौ स्फुर्णावचनिर्घोषे शकः । स्फुर्जेर्वा दीर्घः सञ्च इति परवाद्यात् स्फूर्ज्जकः स्फुर्जकश्च स्फुर्जो वज्रः स एव दृढत्वात् स्फुर्जक इत्यपि । इति भरतः ॥

स्फूर्जथुः, पुं, (स्फुर्ज्जतीति । स्फुर्ज्ज वचनिर्घोषे+अथुच् ।) वज्रपातजनितशब्दः । तत्पर्य्यायः । वचनिर्घोषः २ । इत्यमरः । १ । ३ । १०४ स्फुर्जथुः ३ विस्फूर्जथुः ४ विस्फुर्जथुः ५ वचनिर्घोषः ६ । इति तट्टीका ॥

स्फूर्जिः, स्त्री, (स्फुर् + क्तिन् ।) स्फुरणम् । इत्यमरटीकायां रमानाथः । ३ । २ । १० ॥ (यथा, पद्मपुराणे । ८ । ६० ।

"सत्त्वसङ्गविकाराभ्यां विभक्तेऽहीनगा ।
स्फूर्जिरूपत्वमेतस्य विभवद् भासनं विदुः ॥")

स्फूर्जिमान्, [त्] त्रि, (स्फुर्जिरस्यास्तीति । स्फुर्जि + मतुप् ।) पाशुपतः । यथा,—

"पाशार्थिकः पाशुपतश्चिद्रूपः स्फूर्जिमान् मतः ॥"

इति त्रिकाण्डशेषः ॥

स्फूर्त्तिविशिष्टे, त्रि ॥

स्फेयान्, [स्] त्रि, (इदमनयोरतिशयेन स्फिरः । स्फिर + ईयसुन् । "प्रियस्थिरस्फिरेति ।" ६ । ४ । १५७ । इति स्फादेशः ।) अतिशयः । इति व्याकरणम् ॥

स्फेष्ठः, त्रि, (अयमेषामतिशयेन स्फिरः । स्फिर + इष्ठन् । "प्रियस्थिरेति ।" ६ । ४ । १५७ । इति स्फादेशः ।) अतिशयः । इत्यमरः । ३ । १ । ११२ ॥

स्फोटः, पुं, (स्फुटतीति । स्फुट+अच् ।) स्फोटकः । इति राजनिर्घण्टः ॥ (यथा, सुश्रुते । १ । १२ ।

"स्फोटाः शीघ्रं प्रजायन्ते ज्वरसृष्टा च वर्द्धते ॥"*॥

स्फुट+भावे घञ् । विदारणम् । यथा, महाभारते । ३ । ११ । ५८ ।

"तयोर्भुजविनिर्घोषाद्भयोर्बलिनोस्तदा ।
शब्दः समभवद् घोरो वेणुस्फोटसमो युधि ॥"

स्फुटते अव्यते वर्णैरिति स्फुटव्यक्तौ यस्मादिति वा । स्फुट विकसने+घञ् । शब्दव्यापारविशेषः । तथा चोक्तम् । "वर्णानां वाचकत्वानुपपत्तौ यद्बलादर्थप्रतिपत्तिः स स्फोट इति वर्णातिरिक्तो वर्णाभिव्यङ्ग्योऽर्थप्रत्यायको नित्यः शब्दः स्फोटः ॥" यथा, हरिवंशे भविष्यपर्व्वणि । १६ । ५२ ।

"अक्षराणामकारस्तं स्फोटस्तं वर्णसंश्रयः ॥")

स्फोटकः, पुं, (स्फुटतीति । स्फुट+ण्वुल् ।) रोगविशेषः । फोड़ा इति भाषा । तत्पर्य्यायः । भिड़कः २ गण्डः ३ । इति हेमचन्द्रः ॥ स्फोटः ४ विस्फोटः ५ । इति राजनिर्घण्टः ॥ अस्य विवरणं विस्फोटशब्दे द्रष्टव्यम् । भेदकपरीक्षाकथोक्तिः ॥

स्फोटनं, क्ली, (स्फुट+ल्युट् ।) विदारणम् । इत्यमरटीकायां भरतः । ३ । २ । ५ ॥ (यथा, सुश्रुते । ६ । ४२ ।

"भृङ्गस्फोटनवक्त्रस्य यस्माच्चीघ्राच्च वेदनाः ।
मूलाक्षक्तस्य लक्ष्यन्ते तस्मात् मूलमिहोच्यते ॥")

प्रकाशनम् । इति स्फुटधात्वर्थदर्शनात् ॥ (शब्दः । यथा, साहित्यदर्पणे । ३ । २३२ ।

"भुविभङ्गोऽनिर्देश्यबाहुस्फोटनतर्ज्जना: ॥"

स्फोटयतीति । स्फुट+णिच्+ल्युः । भेदके, त्रि ॥ यथा, हरिवंशे । २४० । १२ ।

"घृतपर्व्वमहारौद्रं स्फोटनं सर्व्वतोमुखम् ।
प्रयुक्तं रुचिरं यज्ञं दीप्तं रौद्राट्टहासिनम् ।
देव्यानयोधयत् सर्व्वान् महेन्द्रः प्राक्प्रशासनः ॥")

स्फोटनी, स्त्री, अक्षिश्रवणयोर्मलापकरणम् । भोजरी इति ख्याता । यथा,—

स्फोटनी

"व्यास्फोटनी स्फोटनी च तत्र व्यास्फोटनी मता ॥"

इति भरतविरूपकोषः ॥

किञ्च ।

"व्यास्फोटन्यां वेधनी च स्फोटनी दृषदंशिका ।"

इति भरतधृतवाचस्पतिः ॥

स्फोटबीजकः, पुं, (स्फे टकारकं बीजं यस्य । ततः कन् ।) भल्लातकः । इति राजनिर्घण्टः ॥

स्फोटा, स्त्री, सर्षपशाका । इति केचित् ॥

स्फोटायनः, पुं, (स्फोट एव अयनं परायणं यस्य ।) मुनिविशेषः । तत्पर्य्यायः । कक्षीवान् २ । इति हेमचन्द्रः ॥

स्फोटिका, स्त्री, (स्फुटतीति । स्फुट+ण्वुल् । टापि अत इत्वम् ।) क्षुद्रपुत्रिका । इति त्रिकाण्डशेषः ॥ अन्यान्तरे फोटिका इति पाठः ॥

स्फ्यं, क्ली, खड्गाकारकाष्ठम् । यथा । स्फ्याग्निहोत्राधिकरणञ्च । स्फ्यस्य खड्गाकारकाष्ठस्य भक्षाग्नेयनिमित्तकेष्यायामिष्टित्वेन प्रकृतिवद्विकृतिरित्यतिदेशेन दर्शाख्यप्रकृतिधर्म्माणां प्राप्तौ पूर्व्वदिनप्रातःकालीनं हवनीयदेवताव्याहवनमपि प्राप्तं तच्च तदानीं न विधीयते नैमित्तिके निमित्तनिश्चयवतोऽधिकारितया प्रकृते श्येनाभिभक्षाग्नेयरूपनिमित्तसंशयेन प्रधानानधिकारिणोऽङ्गानधिकारात् । तदुत्तरदिने च निमित्तनिश्चये तदधिकारसिद्धावपि नावाहनानुष्ठानं व्याव्याहनस्य पूर्व्वदिनप्रातःकालनेयत्वादित्येष्यायां व्याव्याहनं विनैवानुष्ठानमिति । इति तिथ्यादितत्त्वम् ॥

स, य, श्लोकपादपूरणम् । इत्यमरः । ३ । ४ । ५ ॥ (यथा, रामायणे । २ । ६४ । २२ ।

"यद्येतदशुभं कर्म्म न स्म मे कथयेः स्वयम् ।
फलेन् मूर्द्धा स्म ते राजन् सद्यः शतसहस्रधा ॥")

तद्योगे व्यतीतकाले कीर्त्तिभक्तिर्भवति । यथा,

"हन्ति स्म रावणं रामः ।"

इति सुग्धबोधव्याकरणम् ॥

सयः, पुं, (सयनमिति । सि+अच् ।) व्यङ्गुलः । गर्व्वः । इति मेदिनी ॥ (यथा, रघुः । ५ । १६ ।

"ततो यथावद् विहिताध्वराय
तस्मै सयावेशविवर्द्धिताय ।
वर्णाश्रमाणां गुरवे स वर्णी
विचक्षणः प्रस्तुतमाचचक्षे ॥")

सारः, पुं, (सारयति उत्कर्षयतीति । सृ+णिच्+अच् ।) कामदेवः । इत्यमरः । १ । १ । २६ ॥ (यथा, कुमारे । ४ । ८ ।

"सरसि सार मेखलागुणै-
रत गोचरखलितेषु वस्त्वनम् ।
च्युतकेसरदूषितेक्षणा-
न्यवतंसोत्पलताडनानि वा ॥"*॥

सृ+घञ् ।) स्थिरत्वञ्च ॥

सारकूपकः, पुं, (सारस्य कूप इव कन् ।) भगम् इति त्रिकाण्डशेषः ॥

स्मरकूपिका, स्त्री, योनिः। स्मरकूपकशब्दादाप्-प्रत्ययेन निष्पन्ना॥

स्मरगुरुः, पुं, (स्मरस्य गुरुः पिता। कथावतारे प्रद्युम्नजनकत्वात् तथात्वम्।) विष्णुः। इति केचित्॥

स्मरगृहं, क्लीं, (स्मरस्य गृहम्।) योनिः। इति चटाधरः॥

स्मरचक्रः, पुं, (स्मरस्य चक्रमिव चाकृतिर्यस्य।) रतिबन्धविशेषः। यथा, स्मरदीपिकायाम्।

"धृत्वा वामकरेणोरुं स्वपादस्योपरिस्थितम्।
दक्षं रमते कामी स्मरचक्रप्रकीर्त्तितः॥"

स्मरच्छत्रं, क्लीं, (स्मरस्य च्छत्रमिव।) योनिः। इति केचित्॥

स्मरणं, क्लीं, (स्मृ+ल्युट्।) स्मृतिः। तत्पर्य्यायः। आध्यानम् २ स्मृतिः ३। इति हेमचन्द्रः॥ चिन्ता ४ चर्चा ५। इति चटाधरः॥ (यथा, कुमारे। ६। १६।

"सत्यमर्कोच सोमाच परमध्यासहे पदम्।
अय तूचैस्तरं ताभ्यां स्मरणानुग्रहात् तव॥"

अलङ्कारविशेषः। यथा, साहित्यदर्पणे। १०। ६६८॥

"सदृशानुभवाद्वस्तुस्मृतिः स्मरणमुच्यते।"

यथा,—

"अरविन्दमिदं वीक्ष्य खेलत्खञ्जनमञ्जुलम्।
स्मरामि वदनं तस्याश्चारु चञ्चललोचनम्॥"

"मयि सकपटमित्यादौ च" स्मृतेः सादृश्यानुभवं विनोत्यापितत्वान्नायमलङ्कारः। राघवानन्दमहापात्रास्तु वैसादृश्यात् स्मृतिमपि स्मरणालङ्कारमिच्छन्ति। तन्मतोदाहरणं तेषामेव यथा,—

"शिरीषमृद्वी गिरिषु प्रवेदे
यदा यदा दुःखमृतानि सीता।
तदा तदास्याः सदनेषु सौख-
न्यान्यपि दध्यौ गलदश्रु रामः॥"

स्मरणापत्यतर्पकः, पुं, (स्मरणेन स्मरत्वं तर्पयतीति। तृप्+ण्वुल्।) कच्छपः। इति केचित्॥

स्मरदशा, स्त्री, (स्मरस्य दशा।) कामावस्था। तद्दशविधा यथा, उज्ज्वलनीलमणिः।

"नयनप्रीतिः प्रथमं चिन्तासङ्गस्ततोऽथ सङ्कल्पः।
निद्राच्छेदस्तनुता विषयनिवृत्तिस्त्रपानाशः।
उन्मादो मूर्च्छा मृतिरित्येताः स्मरदशा दशैव सुरिभ्याचष्टते॥"

स्मरध्वजं, क्लीं, (स्मरस्य ध्वजमिव।) योनिः। इति शब्दरत्नावली॥

स्मरध्वजः, पुं, (स्मरस्य ध्वज इव।) वाद्यम्। इति हेमचन्द्रः। लिङ्गम्। इति केचित्॥

स्मरध्वजा, स्त्री, (स्मरस्य ध्वजो गर्व्वो यया।) स्त्रीलक्षणादिः। इति केचित्॥

स्मरप्रिया, स्त्री, (स्मरस्य प्रिया।) रतिः। इति चटाधरः॥

स्मरमन्दिरं, क्लीं, (स्मरस्य मन्दिरम्।) योनिः। इति हेमचन्द्रः॥

स्मरलेखनी, स्त्री, (स्मरस्य लेखनीव।) शारिकापक्षी। इति शब्दरत्नावली॥

स्मरवल्लभः, पुं, (स्मरस्य प्रद्युम्नस्य वल्लभः।) आनेयद्रुः। इति केचित्॥

स्मरवीथिका, स्त्री, (स्मरस्य वीथिका।) वेश्या। इति राजनिर्घण्टः॥

स्मरवृद्धिसंज्ञः, पुं, (स्मरस्य वृद्धिर्यस्मात् स स्मरवृद्धिः। स एव संज्ञा यस्य।) कामवृद्धिद्रुपः। इति राजनिर्घण्टः॥

स्मरसखः, पुं, (स्मरस्य सखा। समासे टच्।) चन्द्रः। इति केचित्॥ (स्मरस्य उद्दीपके, त्रि। यथा, रघुः। ६। ३६।

"पतिषु निर्विविशुर्मधुमङ्गना
स्मरसखं रसखण्डनवर्ज्जितम्॥")

स्मरस्तम्भः, पुं, (स्मरस्य स्तम्भ इव।) उपस्थः। इति शब्दरत्नावली॥

स्मरसर्व्यः, पुं, (स्मरः सर्व्यो यस्य।) गर्दभः। इति चिकाण्डशेषः॥

स्मरहरः, पुं, (स्मरं हरति नाशयतीति। हृ+हरतेरनुद्यमने अच्।) शिवः। इत्यमरः। १। १। ३५॥

स्मरागारं, क्लीं, (स्मरस्य आगारम्।) भगम्। इति शब्दरत्नावली॥

स्मराङ्कुशः, पुं, (स्मरस्य अङ्कुश इव।) नखम्। इति शब्दरत्नावली॥

स्मराम्लः, पुं, (स्मरोद्दीपक आम्लः।) राजाम्लः। इति राजनिर्घण्टः॥

स्मरासवः, पुं, (स्मरस्य आसव इव।) लाला। यथा,—

"स्मरासवो सुखसुरं पारि स्यात् पानभाजनम्।"

इति चिकाण्डशेषः॥

मद्यभेदः। इति केचित्॥

स्मार्त्त, क्लीं, (स्मृतेरिदम्। स्मृति+अण्।) स्मृतिशास्त्रोक्तकर्म्म। यथा,—

"श्रौतं कर्म्म स्वयं कुर्य्यादन्योऽपि स्मार्त्तमाचरेत्।
अशक्तौ श्रौतमप्यन्यः कुर्य्यादाचारमन्ततः॥"

इति तिथ्यादितत्त्वम्॥

अपि च।

"श्रुतिस्मृतिविरोधे तु श्रुतिरेव गरीयसी।
अविरोधे सदा कार्य्यं स्मार्त्तं वैदिकवत् मता॥"

इति आह्निकतत्त्वम्॥

स्मार्त्तः, त्रि, (स्मृतेरिदमिति। अण्।) स्मृतिसम्बन्धीयः। (यथा, मनुः। १। १०८।

"आचारः परमो धर्म्मः श्रुत्युक्तः स्मार्त्त एव च।
तस्मादस्मिन् सदा युक्तो नित्यं स्यादात्मवान् द्विजः॥")

स्मृतिशास्त्रयवसायी। स्मृतिशब्दात् ष्यञ्प्रत्ययेन निष्पन्नः॥

स्मि, क ङ अनादरे। इति कविकल्पद्रुमः॥ (चुरा०-आत्म०-सक०-अनिट्।) दन्त्यादिः। क ङ, स्मायते। इति दुर्गादासः॥

स्मिट, क अनादरे। स्मेटे। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-सेट्।) ओष्ठ्यवर्गशेषयुक्तः। क, स्मेटयति। इति दुर्गादासः॥

स्मितं, क्लीं, (स्मि ङ ईषद्धसनम्+क्तः।) ईषद्धास्यम्। इत्यमरः। १। ७। ३४॥ (यथा, महाभारते। १। १५३। २२।

"विलज्जमानेव नता दिव्याभरणभूषिता।
स्मितपूर्व्वमिदं वाक्यं भीमसेनमथाब्रवीत्॥"

विकसिते, त्रि। इति चिकाण्डशेषः॥ (यथा, माघे। ६। ५४।

"स्मितसरोरुहनेत्रसरोरुहा-
मतिसिताङ्गविहङ्गहसद्विजम्॥")

स्मील, निमेषणे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सेट्।) ओष्ठ्यवर्गशेषयुक्तः। स्मीलति चक्षुः पक्ष्मभिराहतं स्यादित्यर्थः। इति दुर्गादासः॥

स्मृ, स्मृतौ। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-अनिट्।) स्मरति स्मृतिर्ज्ञानविशेषः। तथा च।

"सन्निङ्गवती द्वेधा स्मृत्यनुभवभेदिका॥"

इति तार्किकाः॥

तेन णौ अन्यान्तकर्त्तुः कर्म्मत्वम्। गुरुः शिष्यं शास्त्रं स्मारयति। इति दुर्गादासः॥

स्मृ, म औत्कर्ये। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सक० इति केचित्-अनिट्।) म, स्मरयति। उत्कः उत्कण्ठितः तस्य भावः औत्कर्य्यमुत्कण्ठा। आध्याने इति प्राचः। आ समन्तात् ध्यानमाध्यानं इति कश्चित्। उत्कण्ठिका इति काश्मिकाः। उत्कण्ठापूर्व्वकं स्मरणमिति वृद्धाः। सुदुरनुस्मरयन्तमनुक्षणं त्रिपुरदाहमिति किराते। इति दुर्गादासः॥

स्मृतः, त्रि, (स्मृ+क्तः।) स्मृतिविषयः। कृतस्मरणः। यथा,—

"आब्दिके पिण्डदाने च मासश्राद्धमसः स्मृतः।
विवाहादौ स्मृतः सौरो यज्ञादौ सावनो मतः॥"

इति मलमासतत्त्वम्॥

स्मृतिः, स्त्री, (स्मृ+क्तिन्।) अनुभूतविषयज्ञानम्। इति चण्डीटीकायां नागोजीभट्टः॥ संस्काराश्रितक्रियाजन्यसंस्कारजन्यज्ञानम्। इति रसमञ्जरी॥ अनुभव-संस्कार-जन्य-ज्ञानम्। यथा,—

"सन्निङ्गवती द्वेधा स्मृत्यनुभवभेदिका॥"

इति कविकल्पद्रुमटीकायां दुर्गादासः॥

किञ्च।

"विभुर्विभ्वादिगुणवान् बुद्धिस्तु द्विविधा मता।
अनुभूतिः स्मृतिश्च स्यादनुभूतिश्चतुर्व्विधा॥"

इति भाषापरिच्छेदः॥

अन्यच्च ।
"अनुभूतं प्रियादिनामर्थानां चिन्तनं स्मृतिः ।
तच्च कर्म्माङ्गवैवश्यवासनिश्चसितादयः ॥"
इत्युज्ज्वलनीलमणिः ॥
तत्पर्य्यायः । चिन्ता २ आध्यानम् ३ । इत्यमरः । १ । ७ । २६ ॥ चिन्तिया ४ । इति भरतधृतधरणिः ॥ चिन्त ५ । इति वीरस्वामी ॥ आधा ६ । इति रामाश्रमः ॥ चिन्तिति: ७ ध्यानम् ८ । इति शब्दरत्नावली ॥ स्मरणम् ९ चर्चा १० । इति जटाधरः ॥ सा तु गर्भस्थस्य अष्टभिर्मासैर्भवति । इति सुखबोधः ॥ ॐ ॥
स्मृतिकारकौषधं यथा,—
"ब्रह्मपुष्पी वचा सोमा ब्राह्मी ब्रह्मसुवर्चला ।
अभया च गुडूची च जटारूपकवाकुची ॥
शतैरष्टसमैर्भागैर्हृतं प्रस्थं विपाचयेत् ।
कर्षोन्मितं रसं प्रस्थं हृत्वा च समन्वितम् ॥
शतद्वाक्षीहृतं नाम स्मृतिमेधाकरं परम् ॥"
इति गारुडे १६८ अध्यायः ॥ ॐ ॥
मन्वादिमुनिप्रणीतशास्त्रविशेषः । स्मरन्ति वेदमनया स्मृतिः । महर्षिभिर्वेदार्थचिन्तनं स्मृतिः (तदुपजीव्यन्योऽपि स्मृतिरिति शब्दः । स्मृतिकर्त्तॄणां नामानि धर्म्मशास्त्रशब्दे द्रष्टव्यानि । तत्र मनोः स्मृतेः प्राधान्यम् । यथा,—
"वेदार्थोपनिबन्धृत्वात् प्राधान्यं हि मनोः स्मृतम् ।
मन्वर्थविपरीता तु या स्मृतिः सा न प्रशस्यते ॥"
इति कुल्लूकभट्टधृतबृहस्पतिवचनम् ॥
तत्पर्य्यायः । धर्म्मसंहिता २ । इत्यमरः । १ । ६ । ६ ॥ धर्म्मशास्त्रम् ३ । इति जटाधरः ॥ संहिता ४ श्रुतिर्लोकिका ५ । इति शब्दरत्नावली ॥ सा च सात्त्विकराजसतामसभेदेन त्रिविधः । यथा,—
"तत्रैव स्मृतयः प्रोक्ता ऋषिभिस्त्रिगुणान्विताः ।
सात्त्विका राजसाश्चैव तामसाः शुभदर्शने ॥
याज्ञिष्कं चैव हारीतं यमं पाराशरं तथा ।
भारद्वाजं काश्यपञ्च सात्त्विका मुक्तिदाः शुभाः ॥
आत्रेयं याज्ञवल्क्यञ्च आत्रेयं दाक्षमेव च ।
जामदग्न्यं वैष्णवञ्च राजसाः सर्व्वदा मताः ॥
गौतमं सार्ङ्गलिखञ्च संवर्त्तञ्च यमं स्मृतम् ।
सांख्यं पौलस्त्यकं देवि तामसा निरयप्रदाः ॥
किमत्र बहुनोक्तेन पुराणेषु स्मृतिष्वपि ।
तामसा नरकायैव वर्त्तयेयुर्न विप्रकाः ॥
यतो हि राजसं कर्म्म तामसञ्च वरानने ।
प्रायशः सेवते कृत्स्नं विप्रको गतविग्रहः ॥
विना तु सात्त्विकं कर्म्म यजनाध्यापनादिकम् ।
कदाचिदपि कार्य्यं ब्राह्मणैस्तामसं न तु ॥
श्रुतिस्मृतिपुराणोक्तपुराणेषागमेषु च ।
अविरोधात्तत्प्रशस्तेषु निरतं यत्तमस्तदि ।
यद्यद्राजादिधर्म्मेषु सारो यः सात्त्विको मतः"
इति मात्स्ये उत्तरखण्डे २६ अध्यायः ।

स्मृतिमान्, [त्] त्रि, (स्मृतिर्ब्विद्यतेऽस्येति । स्मृति + मतुप् ।) स्मृतिविशिष्टः । चिन्तावान् । (यथा मनुः । ७ । ६४ ।
"चतुरङ्गः शुचिर्दक्षः स्मृतिमान् देशकालवित् ।
वपुष्मान् वीतभीर्वाग्मी दूतो राज्ञः प्रशस्यते ॥")
स्मृतिविरुद्धः, त्रि, (स्मृतेर्विरुद्धः ।) धर्म्मशास्त्रविपरीतः । यथा, कूर्म्मपुराणे हिमालयं प्रति देवीवाक्यम् ।
"यानि शास्त्राणि दृश्यन्ते लोकेऽस्मिन् विविधानि च ।
श्रुतिस्मृतिविरुद्धानि निष्ठा तेषां हि तामसी ॥
करालभैरवञ्चैव यामलं नाम यत् कृतम् ।
एवमादीनि चान्यानि मोहनार्थानि तानि वै ॥
मया दृष्टानि चान्यानि मोहायैषां भवार्णवे ॥"
इति मलमासतत्त्वम् ॥
स्मृतिशास्त्रं, क्ली, (स्मृतिरेव शास्त्रम् ।) धर्म्मसंहिता । यथा, एकादशीतत्त्वधृतभविष्यपुराणवचनम् ॥
"स्मृतिशास्त्रे विकल्पस्तु याकाङ्क्षापूरणे सति ॥"
स्मृतिहेतुः, पुं, (स्मृतेर्हेतुः ।) स्मरणकारणम् । तत्पर्य्यायः । वासना २ संस्कारः ३ भावना ४ । इति जटाधरः ॥
स्मृत्यपेतः, त्रि, (स्मृतेरपेतः ।) स्मृतिविरुद्धः । इति केचित् ॥
सेरः, त्रि, (सिर ईषद्गमने + "नमिकम्पिस्मिजसकमहिंसदीपो रः ।" ३ । २ । १४० । इति रः ।) विकसितः । इति हेमचन्द्रः ॥ (यथा, साहित्यदर्पणे । ३ । १०० ।
"कान्तिः काञ्चनचम्पकप्रतिनिधिर्व्यक्तौ सुधासन्निभौ ॥")
ईषद्गमनशीलः । इति संक्षिप्तसारोणादिवृत्तिः ॥ (यथा, कुमारे । ५ । ७० ।
"दृष्ट्वा तत्र पुरो विडम्बनपरा
यद्भूत्या वारणराजदार्ढ्यमुषा ।
विलोक्य वृद्धोक्षमधिष्ठितं त्वया
मघोनः सेरसखो भविष्यति ।")
सेरविष्किरः, पुं. (सेरः प्रफुल्लः विष्किरः पक्षी ।) मयूरः । इति केचित् ॥
स्यदः, पुं, (स्यन्द + घञ् । "स्यदो जवे ।" ६ । ४ । २८ । इति निपातनात् साधुः ।) वेगः । इत्यमरः । १ । १ । ६७ ॥
स्यन्द, क ट त प स सुनौ । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-वेट् ।) अन्तःस्याद्यक्तः । क, अस्यन्दिष्ट अस्यन्त । ट, स्यन्दते । त, स्यन्दयति स्यन्दिष्यति । प, अस्यदत् । सुतिः अस्यन्दम् । अस्यन्दमादनन्यसुखमर्पयत्यत्र मयत्नसाधनमित्यस्मिन् रमानाथः । वस्तुतस्तु प्रस्यन्दते प्रस्यन्दः यथादित्वादन् सतः प्रस्यन्द इत्याचरणोक्तौ क्षौ प्रस्यन्दनम् । इति दुर्गादासः ॥
स्यन्दः, पुं, स्यन्दनम् । स्यन्दशब्दोऽयं प्रत्ययेन निष्पन्नः ॥ (यथा, राजतरङ्गिण्याम् । १ । २७ ।
"तदमन्दमदस्यन्दसुन्दरेयं निपीयताम् ।
श्रोत्रशुक्तिपुटैः स्वर्गसङ्गराजतरङ्गिणी ॥"
रोगविशेषः । यथा, सुश्रुते । १ । ४६ ।
"स्यन्दाभिसादक्लेदादीनामयान् जनयेद्वृक्कौ ॥"
स्वेदोद्गमः । इति श्रीधरस्वामी ॥ यथा, भागवते । ५ । २१ । ६ ।
"यत्रोदिते तस्य समागमोत्सवनिपाते निस्त्रोपति यत्र तत्र स्यन्देनाभितपतीति ॥")
स्यन्दनं, क्ली, (स्यन्द + ल्युट् ।) चरणम् । (स्यन्दते इति । स्यन्द + "बहुलमन्यत्रापि ।" उणा० २ । ७८ । इति युच् ।) जलम् । इति मेदिनी ॥ गमनम् ॥
स्यन्दनः, पुं, (स्यन्दते चलतीति । स्यन्द + युच् ।) चक्रयुक्तयुग्यप्रयोजनयानम् । रथ इति ख्यातम् । (यथा, रघुः । १ । ३६ ।
"स्निग्धगम्भीरनिर्घोषमेकं स्यन्दनमास्थितौ ।
प्रावृषेण्यं पयोवाहं विद्युदैरावताविव ॥")
तिनिशवृक्षः । इत्यमरः । २ । ४ । ९६ ॥ वृक्षविशेषः । इति हेमचन्द्रः ॥ वायुः । इति केचित् ॥ शीघ्रे, त्रि ॥ (स्यन्दके, च त्रि ॥ यथा, कथासरित्सागरे । १०२ । ६२ ।
"अहेः परिहृतं चन्दनवतीर्व्यमिवाम्बरात् ।
रूपोपमानमन्येषामन्यत्स्यन्दनं दृशोः ।")
स्यन्दनद्रुमः, पुं, (स्यन्दन एव द्रुमः ।) तिनिशवृक्षः । इति शब्दरत्नावली ॥
स्यन्दनारोहः, पुं, (स्यन्दनमारोहतीति । आ + रुह + घञ् ।) रथस्थितयोद्धा । रथी । इत्यमरः । २ । ८ । ६० ॥
स्यन्दनिः, पुं, तिनिशवृक्षः । इति रत्नमाला ॥
स्यन्दनी, स्त्री, (स्यन्दते इति । स्यन्द + ल्युः । ङीप् ।) लाला । इति राजनिर्घण्टः ॥ नक्षनाड़ीति केचित् ॥
स्यन्दिनी, स्त्री, (स्यन्दते इति । स्यन्द + णिनिः । ङीप् ।) लाला । इत्यमरः । २ । ६ । ६० ॥
स्यन्दी, [न्] त्रि, स्रवति यः । सावकः । स्यन्दातीर्णिनृप्रत्ययेन निष्पन्नः । इत्यमरटीकायां रामाश्रमः ॥ (यथा, उत्तररामचरिते १ अङ्के ।
"जीवयन्निव ससाध्वसश्रम-
स्वेदबिन्दुरधिकक्षमर्पयताम् ।
बाहुरेष मम मूर्च्छयन्निव
स्यन्दिचन्दनमिवोरसि क्षिपन् ॥")
स्यमः, त्रि, (स्यन्द + क्तः ।) स्रुतः । इत्यमरः । ६ । १ । ६२ ॥ (यथा, भट्टिः । ५ । ८३ ।
"अथायास्यन् कथायाश्च स्यमस्वेदकणोदयः ।
सन्धिनालानराजूनक्षामवादीद्यशानसः ॥")
स्यमवीयः, त्रि, (स्यमा वीर्य्या यस्य ।) स्रुतः । इति हेमचन्द्रः ॥
स्यम, उ ग प्र ध्वनने । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् । क्षान्तः ।) स्यमः-स्यादियुक्तः । उ, स्यमित्वा स्यान्त्वा । ग, स्यमितुः स्यन्तुम् । प्र, स्यमती स्यन्ती । इति दुर्गादासः ॥

स्यम, भ क सावतर्के । इति कविकल्पद्रुमः ॥ (चुरा०-उभ०-सक०-सेट् ।) अन्तःस्यादियुक्तः । अस्य स्वार्थे णौ प्रयो न स्यात् प्रेरणे णौ तु स्यादेवेति प्राहुः । स्यमते मनीषादित्वात् सिद्धिः । भ क स्यामयति स्यामयते लोकः पुरुषं स्थाणुत्वेन । इति दुर्गादासः ॥

स्यम, तृ क ध्याने । इति कविकल्पद्रुमः ॥ (अदन्त-चुरा०-परः०-सक०-सेट् ।) अन्तःस्यादियुक्तः । स्यमयति । इति दुर्गादासः ॥

स्यमन्तकः, पुं, (श्रीकृष्णस्य एकमणिः । यथा,—

"मणिः स्यमन्तको यस्ते शुभसंधे तु कौस्तुभः ।"

इति हैमचन्द्रः ॥ ❀ ॥

अथ स्यमन्तकोपाख्यानम् ।

श्रीशुक उवाच ।

"आसीत् सत्राजितः सूर्यो भक्तस्य परमः सखा ।
प्रीतस्तस्मै मणिं प्रादात् स च तुष्टः स्यमन्तकम् ॥
स तं बिभ्रन्मणिं कण्ठे भ्राजमानो यथा रविः ।
प्रविष्टो द्वारकां राजंस्तेजसा नोपलक्षितः ॥
तं विलोक्य जना दूरात्तेजसा मुष्टदृष्टयः ।
दीप्यतेऽर्चिर्भगवते शङ्खचक्रगदाधर ।
दामोदरारविन्दाक्ष गोविन्द यदुनन्दन ॥
एष आयाति सविता त्वां दिदृक्षुर्जगत्पते ।
मुष्णन् गभस्तिचक्रेण दृशां चक्षूंषि तिग्मगुः ॥
नन्वन्विच्छन्ति ते मार्गं त्रिलोक्यां विबुधर्षभाः ।
ज्ञात्वाथ गूढं यदुषु द्रष्टुं त्वां यात्यजः प्रभो ॥

श्रीशुक उवाच ।

निशम्य बालवचनं प्रहस्याम्बुजलोचनः ।
प्राह नासौ रविर्देवः सत्राजिन्मणिना ज्वलन् ॥
सत्राजितं स्वगृं श्रीमत् सतकौस्तुकमङ्गलम् ।
अविज्ञ दैवसृष्टे मणिं विप्रैर्व्यवेदयत् ॥"
दिने दिने सार्धभारानष्टौ स उरुगत प्रभो ।
दुर्भिक्षमार्तिदान्यानि व्याधियोऽशुभाः ।
न सन्ति मायिनश्च यत्रास्तेऽभ्यर्चितो मणिः ॥
स याचितो मणिं क्वापि यदुराजाय भौरिणा ।
नैवार्थकामुकः प्रादात् याच्ञाभङ्गमतर्कयन् ॥
तमेकदा मणिं कण्ठे प्रतिमुच्य महाप्रभम् ।
प्रसेनो हयमारुह्य मृगयां जगहे वने ॥
प्रसेनं सहयं हत्वा मणिमाच्छिद्य केशरी ।
गिरिं विशन् ऋक्षवता निहतो मणिमिच्छता ॥
सोऽपि चक्रे कुमारस्य मणिं क्रीडनकं गले ।
अभ्यनन् भ्रातरं भ्राता सत्राजित् पर्यतप्यत ॥
प्रायः सर्वेण निहतो मणिर्योषो वनं गतः ।
भ्राता मम मणिग्रीव्यं कण्ठे कण्ठेऽनयत् प्रभोः ॥
भगवांस्तदुपश्रुत्य दुर्यशो विममार्ज तत् ।
मार्गन् प्रसेनपदवीमन्वपद्यत साग्रतः ॥
हतं प्रसेनमश्वं च वीक्ष्य केशरिणा वने ।
तस्यानुपदवीं निपतनश्चैक्ष दृक्षजनाः ॥
ऋक्षराजबिलं भीममन्धेन तमसावृतम् ।
एको विविश भगवान्यत्रास्ते जाम्बवान् बलिः ॥
तत्र दृष्ट्वा मणिप्रेष्ठं बालक्रीडनकं कृतम् ।
हर्तुं कृतमतिस्तिग्मस्तत्कर्मभिरजायत ॥

तमपूर्वं नरं दृष्ट्वा धात्री चुक्रोश भीतवत् ।
तत् श्रुत्वाभ्यद्रवत् क्रुद्धो जाम्बवान् बलिनां वरः ॥
स वै भगवता तेन युयुधे स्वामिनात्मनः ।
आसीत्सप्तदिनं विंशाहमितरेतरमुष्टिभिः ॥
वज्रनिष्पेषपरुष खिन्नगात्रस्तमाहातीवविस्मितः ।
जाने त्वां सर्वभूतानां प्राण ओजः सहो बलम् ।
विष्णुं पुराणपुरुषं प्रभविष्णुमधीश्वरम् ॥
इति विज्ञातविज्ञानश्चरणावनतमच्युतः ।
आनधार महाराज भगवान् देवकीसुतः ॥
मणिहेतोरिह प्राप्ता वयं चाक्षपते विभम् ।
मिथ्याभिशापं प्रस्पृज्यात्मनो मणिनाहना ॥
इत्युक्तः खां दुहितरं कन्यां जाम्बवतीं मुदा ।
कृष्णायोपजहारासौ सः ॥
संस्थापितं समाकृत्य सभायां राजसन्निधौ ।
प्राप्तिषाख्याय भगवान् मणिं तस्मै न्यवेदयत् ॥
सोऽनुध्यायंस्तदेवाघं बलवद्विमनाकुलः ।
कथं मृजान्यात्मरजः प्रसीदेदाच्युतः कथम् ॥
एवं व्यवसितो बुद्ध्या सत्राजित् सप्तसां शुभाम् ।
मणिं स्वयमुपाकृत्य कृष्णायोपजहार सः ॥
भगवानाह न मणिं प्रतीच्छामो वयं नृप ।
तवास्तु देवभक्तस्य वयं च फलभागिनः ॥"

इति भागवते १० स्कन्धे ५६ अध्यायः ॥

सौरभाष्यीयचतुर्थी चन्द्रदर्शने तदुपाख्यानश्रवण-विधिर्वर्ण्यः, ब्रह्मपुराणे सिंहार्काधिकारे ।

"नारायणोऽभिशप्तस्तु निशाकरमरीचिषु ।
स्थितश्चतुर्थ्यामद्यापि मनुष्यापपतेच्च सः ॥
अतश्चतुर्थ्यां चन्द्रन्तु प्रमादाद्दीक्ष्य मानवः ।
पठेद्वाचेयिकावाक्यं प्राङ्मुखो वाप्युदङ्मुखः ॥"

अभिशप्तः परीवादविषयीभूतः । सोऽभिशापः । धाचेयिकावाक्यं विष्णुपुराणे ।

"सिंहः प्रसेनमवधीत् सिंहो जाम्बवता हतः ।
सुकुमारक मारोदीस्तव ह्येष स्यमन्तकः ॥"

अनेन मन्त्रेणाभिमन्त्रितं जलं पेयम् । आचारात् स्यमन्तकोपाख्यानञ्च श्रोतव्यम् । इति तिथ्यादितत्त्वम् ॥

स्यमीकः, पुं, (स्यमतीति । स्यम शब्दे + "स्यमेरीट् च ।" उणा० ३।१६६ । इति कन् । ईट् च ।) वल्मीकम् । वृक्षविशेषः । इति मेदिनी ॥ काशः । मेघः । इति केचित् ॥

स्यमीका, स्त्री, नीलिका । इति मेदिनी ॥

स्यामः, पुं, श्यामकः । इत्यमरटीकायां स्वामी । २ । ६ । ३२ ॥ (यथा कथासरित्सागरे । ४।८६।

"अतः स्यामः स ते किञ्चित् तदृणैः सम-
वाप्यते ॥")

स्युवं, क्ली, आज्यम् । इति केचित् ॥

स्यूतः, त्रि, (सिव तन्तुसन्ताने + क्तः । ष्ठीवेरित्वम् ।) सूचितः । तन्तुसन्ततम् । सीना इति भाषा ॥ तत्पर्य्यायः । ओतम् २ उतम् ३ । इत्यमरः ॥ (यथा, महाभारते । ३ । १५७ । ४२ ।
"सङ्क्षिप्तीर्यं त्वया यस्तः कालस्यैव चोदितः ।
अस्तोऽभाषीव सूतास्तः कथमद्य भविष्यति ।")

स्यूतः, पुं, (सिव + क्तः ।) सूत्रग्रथितभाण्डम् । धोकड़ा इति ख्यातम् । तत्पर्य्यायः । थैवेयः २ । इत्यमरः । २ । ६ । २६ । स्यूनः ३ स्योनः ४ धौतकटः ५ स्योतः ६ । इति भरतः ॥

स्यूतिः, स्त्री, (सिव + क्तिन् । जट् ।) सूच्यादिना वस्त्रादिसीवनम् । सीयनी इति सेलाई इति च भाषा । तत्पर्य्यायः । सेवनम् २ सीवनम् ३ । इत्यमरः । ३ । २ । ५ ॥ जतिः ४ यूतिः ५ । इति शब्दरत्नावली ॥

स्यूनः, पुं, (सीव्यते इव वेनेति । सिव + "सिवेष्टेर्यूच ।" उणा० ३ । ६ । इति नः । टेर्यूच ।) किरणः । सूर्य्यः । इति मेदिनी ॥ स्यूतः । धुकड़ी इति भाषा । इत्यमरटीकायां भरतः । २ । ६ । २६ ॥ शब्दरत्नावली च ॥

स्यूमं, क्ली, (सिव + "अविसिविसिधुम्यः किति ।" उणा० १ । १४३ । इति मन् । ज्वरत्वरेत्यूट् ।) जलम् । रश्मिः । इति संक्षिप्तसारोणादिवृत्तिः ॥

स्यूमः, पुं, (सिव + मन् । जट् ।) किरणः । इत्युणादिकोषः ॥

स्योतः, पुं, स्यूतः । इत्यमरटीकायां भरतः । २ । ६ । २६ ॥

स्योनः, पुं, (सिव + बाहुलकात् कर्त्तरीऽपि नः । जड़ादेशो गुणश्च । इत्युणादिवृत्तौ उज्ज्वलः । ३ । ६ ।) धौतकटः । धुकड़ी इति भाषा । इत्यमरटीकायां भरतः । २ । ६ । २६ ॥ सूर्य्यः । किरणः । इति मेदिनी ॥ आगन्दे, क्ली । इति केचित् ॥

संस्नं, क्ली, (संस + ल्युट् ।) जङ्घागतदोषस्रावोनयनम् । इति सुश्रुतटीका ॥ (यथा सुश्रुते । ६ । १० ।

"पित्तस्यन्दे पैत्तिके चाधिमन्थे
रक्तास्रावः संस्नमाप्यं कार्य्यम् ॥"

अधःपतनम् । भ्रंशः । इति संधावार्थदर्शनात् ॥ ❀ ॥ संस्रयतीति । संस्र + णिच् + ल्युः । अधःपतनकारके, त्रि । यथा, सुश्रुते । २ । ७६ ।
"संस्नं कटुकं पाके वातकफापहम् ।")

संस्निनीफलः, पुं, शिरीषवृक्षः । इति शब्दमाला ॥

सः, [स्] पुं, (संस्रते इति । संस्र + क्विप् ।) पीलुवृक्षः । इत्यमरः । २ । ४ । २८ ॥ अधःपतनशीले, त्रि ॥

सक, ष क गत्याम् । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-सेट् ।) ष, सकते । क, सकते । इति दुर्गादासः ॥

सक्, [क्] } क्षी, (सजति शोभामिति सञ्जते
सग्, [ग्] } इति वा । सज + क्विबादिना कर्त्तरि कर्मणि वा क्विप् ।) मालम् । इति त्रिकाण्डशेषः । इत्यमरः । २ । ६ । १३५ । (यथा, मनुः । ४ । ६६ ।
"उपानहौ च वासश्च धृतमन्यैर्न धारयेत् ।
उपवीतमलङ्कारं स्रजं करकमेव च ।")

अस्याः पर्य्यायादि मालाशब्दे द्रष्टव्यम् ॥

स्रवान्, [न्] त्रि, (स्रक् विद्यतेऽस्येति। स्रज्+मतुप्। मस्य वः।) मालाविशिष्टः। इति व्याकरणम्॥

स्रवी, [न्] त्रि, (स्रगस्त्यस्येति। स्रज्+"अस्मायामेधास्रजो विनिः।"५।२।१२१। इति विनिः।) मालाविशिष्टः। इति व्याकरणम्॥ (यथा, रघुः। १७। २५।

"आमुक्ताभरणः स्रवी हंसचिह्नदुकूलवान्।
आसीदभिमुखप्रेक्षः स राजश्रीवधूवरः॥")

स्रजिष्टः, त्रि, (अयमेषामतिशयेन स्रवी। स्रजिन्+इष्ठ। "विन्मतोर्लुक्।" ५।३।६५। इति विनो लुक्।) मालाविशिष्टः॥

स्रजीयान्, [स्रजीयस्] त्रि, (अयमनयोरतिशयेन स्रवी। स्रजिन्+ईयसुन्। "विन्मतोर्लुक्।" ५।३।६५। इति विनो लुक्।) मालाविशिष्टः।

स्रष्टा, [ष्टृ] पुं, (सृजतीति। सृज+तृच्।) ब्रह्मा। इत्यमरः। १।१।१७॥ (यथा, महाभारते। ३।४०।

"कारणं सर्व्वभूतानां स एकः परमेश्वरः।
लोकेषु सृष्टिकरणात् स्रष्टा ब्रह्मेति गीयते॥")

शिवः। इति हलायुधः॥ (विष्णुः। इति महाभारतम्। १३।१४६।११६॥) सृष्टिकर्त्तरि, त्रि। इति सृजधात्वर्थदर्शनात्॥ (यथा, महाभारते। ७।७८।४५।

"स्रष्टारं वारिधाराणां भुवश्च प्रकृतिं पराम्।
देवदानवयज्ञानां मानवानाञ्च साधनम्॥")

स्रस्तं, त्रि, (स्रंस+क्तः।) च्युतम्। इत्यमरः। ३।१।१०४॥ (यथा, माघे। ५।१७।

"सस्तावगुरुजघनपटाः शशलक्ष्यमाण-
वल्कश्रियः सभयकौतुकमीक्षते सा॥")

स्रस्तरः, पुं, आसनम्। यथा। अघमस्तरे ब्राह्मणमगच्छन्त आमीरन्। इति अघमस्तरे उपवेशनादौ पौटादिनिषेधात् अघनिमित्तेन कटादिविधानात् अघमस्तरः कटादिः। इति प्रुहितत्त्वम्॥

स्राक्, य, द्रुतम्। इत्यमरः। ३।४।२॥

स्रावः, पुं, (सु+घञ्।) सवः। इत्यमरटीकायां भरतः। ३।२।६॥ (यथा, महाभारते। ६।१७।७६।

"ततो सृक्कणात् तेऽपश्यन् रजो भीमं ससृत्वितम्।
विविधैः शोणितस्रावैः प्रम्लानं पुरुषर्षभ॥"

नेत्ररोगान्तर्गतसन्धिगतरोग विशेषो यथा,—

"गत्वा सन्धीनसृग्मार्गेण दोषाः
कुर्युः स्रावान् रक्तिमश्वेतकृष्णान्।
तान् ये स्रावान् नेत्रनाड्यो मध्यैकै-
स्रस्रा लिङ्गं कीर्त्तयिष्ये चतुर्धा॥
पाकः सर्षपसंभवस्य पूयं
पूयास्रावो नैकरूपः प्रदिष्टः।
श्वेतं मान्द्रं पिच्छिलं यः सवेच
श्लेष्मास्रावी नीरुजः स प्रदिष्टः॥
रक्तास्रावः शोणितोत्थः सरक्तं
कोष्णं नानं संभवेन्नातिमान्द्रम्।
पीतास्रावं नीलसृग्जं तथाभं
पित्तस्रावं संभवेत्तत्प्रभावात्।"

इत्युत्तरतन्त्रे द्वितीयेऽध्याये सुश्रुतेनोक्तम्।)

स्रावकः, क्ली, (स्रावयतीति। सु+णिच्+ण्वुल्।) मरीचम्। इति शब्दचन्द्रिका॥ चरके, त्रि॥

स्रावणी, स्त्री, वल्लिवृक्षः। इति केचित्॥

सिनृभ, उ हिंसे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्। क्रावेट्।) रेफयुक्तादिः। तृतीयस्वरी। उ, स्रिम्भिता स्रिम्भ्वा। इति दुर्गादासः॥

सिभ, उ हिंसे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्। क्रावेट्।) रेफयुक्तादिः। तृतीयस्वरी। उ, स्रेभिता स्रिम्भ्वा। इति दुर्गादासः॥

स्रिव, य उ शौचे। गतौ। इति कविकल्पद्रुमः॥ (दिवा०-पर०-सक०-सेट्। क्रावेट्।) रेफयुक्तः। सकारादिः। तृतीयस्वरी। य, स्रीयति। उ, स्रेविता स्रिव्वा। स्रिस्रेव। इति दुर्गादासः॥

सु, सुतौ। गतौ। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सुतौ अक०-गतौ सक०-अनिट्।) सवति। इति दुर्गादासः॥

सुक्[च्] } स्त्री, (सवति घृतादिकमस्मा
सुग् } दिति। सु+"सुविकुषि।" उणा० २।६२।[७] इति किच्।) यज्ञपात्रविशेषः। यथा,—

"ध्रुवोपभृच्छ्रुर्गा तु सुची भेदाः सुचः स्त्रियः॥"
इत्यमरः। २।७।२५॥

ध्रुवा वटपत्राकृतिः। उपभृच्छकाकारा। स्रुचः अर्द्धचन्द्राकृतिः।

"वैकङ्कती ध्रुवा प्रोक्ता आज्यस्थी चोपभृन्मता।
स्रुचः प्रसाग्रकाष्ठस्य खदिरस्य सुवो मतः॥"
इति भरतः॥

"सुवादिकन्तु यज्ञादौ पात्रमित्यभिधीयते।
सुवः पुमानेकहस्तो बाहुमात्रा सुगीरिता।
तद्विशेषाः शरावाद्याः स्त्री स्रुचूरूपभृत् ध्रुवा॥"
इति शब्दरत्नावली॥

सुगुदारु, क्ली, (सुचोदारु।) यज्ञपात्रवृक्षः। इति शब्दार्थः॥

सुची, स्त्री, सर्ज्जिकाक्षारः। यथा, हेमचन्द्रः

"समासु सर्ज्जिकाक्षारकापोतसुखवर्चिकाः।
सर्जिस्तु सर्जिका सुची योगवाही सुवर्चिका॥"

सुतं, त्रि, (सु+क्तः।) चरितचलादि। तत्पर्य्यायः। स्रस्तम् २ रीणम् ३ च्युतम् ४। इत्यमरः। ३।१।६२॥ (यथा, मनौ। ७।१२२।

"अतिथिर्यस्य भग्नाशो गृहात् प्रतिनिवर्त्तते।
स दत्त्वा दुष्कृतं तस्मै पुण्यमादाय गच्छति॥")

सुतम्। इति शब्दार्थः॥

सुता, स्त्री, (सु+क्तः। टाप्।) शिंशुपावल्ली। इति शब्दचन्द्रिका॥

सुवः, पुं, क्ली, (सवति घृतादिकमस्मादिति। सु+"सुवः कः।" उणा० २।६१। इति कः।) यज्ञपात्रविशेषः। इति मेदिनी॥ (यथा, मनुः। ५।११०।

"चक्रुणां सृक्कणीनाञ्च शुद्धिरुष्णेन वारिणा॥")

वदिवरणं सृक्कणीन्द्र द्रष्टव्यम्॥

स्रुवा, स्त्री, (स्रु+कः। टाप्।) शल्की। मूर्वा। इति मेदिनी। (स्रुक्। इति च मेदिनी। अस्याः पर्य्यायो यथा,—
"शल्की मधुरसा वैरी मोरटा तेजनी स्रुवा।
मधुलिका मधुश्रेणी मोक्षणी मीलुमूर्व्वपि।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे।)

स्रुवाहस्तः, पुं, (स्रुवायाः हस्तः।) विकङ्कतवृक्षः। इत्यमरः। २।४।३०। (यथास्य पर्य्यायाः यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे।
"विकङ्कतः स्रुवाहस्तो वज्रिणः खादुकण्टकः।
स एव यज्ञवृक्षश्च कण्टकी शाल्मलादपि।"

स्रू, स्त्री, (स्रु सुतौ+"क्विप् च।" उणा० ४। १५०। इति क्विप् दीर्घश्च।) यज्ञपात्रविशेषः। स्रवति इत्यादिकमूलात्। इत्यमरटीकायां भरतः। २।७।२५। निर्झरः। यथा, "स्रूः स्रवे निर्झरेऽपि च।" इति हेमचन्द्रः।

स्रो, पक्षि। इति कविकल्पद्रुमः। (भ्वा०-परः-सक०-अनिट्।) रेफयुक्तः। स्रायति। स्रपि पाके। इति दुर्गादासः।

स्रोतं, स्त्री, स्रोतः। इत्यमरटीकायां भरतः। (यथा, महाभारते। ३। ९८। १३।
"प्रतिस्रोताकुलां दीनां शुष्कस्रोतां नदीमिव।"
"शुष्कस्रोतोरयमिति उमापतिटीकायां उच्चुलदत्तः। ३। २०१।)

स्रोतः, [स्] क्ली, (स्रवतीति। स्रु गतौ+"स्रुदीभ्यां तुट् च।" उणा० ४। २०१। इति असुन्। तुट् च।) स्रवोऽम्बुसमूहकम्। इत्यमरः। १। १०। ११। वेगेन जलवहनं स्रोतः। यत्। स्वयमम्बु। सरसं सलिलं स्रोतः। इत्यत्ययः। यत इत्यत्रहेतुकं न सरहेतुकम्। तत्त्वकौमुदीति सांख्यीयायाञ्चम्। स्रवति स्रोतः। स्रु+असुन्। यद्वा निपातनात् स्रोसः। सामान्यम्। स्रोतः यथा सरसामस्मिन् सिंहलं सलिलम्। इति दण्यादयः। स्रोतसमुद्भवश्च। स्रोसः स्रोतं सदाम्बुः सरः। पैङ्गलमस्मिन्यामि। इति शब्दचन्द्रः। इत्यमरटीकायां भरतः। (यथा, धार्म्मिकस्याम्। ३।१।
"महुसरपल्वरकल्लोलिनीरयं नतं प्रियं प्रति मे।
स्रोत्रं च दर्शनिर्यं प्रति रागतः शिशुत्वं व्यापेक्षः।"
नदी। यथा, गीतायाम्। १०। ३१।
"पवनः पवतामस्मि रामः शस्त्रभृतामहम्।
झषाणां मकरश्चास्मि स्रोतसामस्मि जाह्नवी।")
शरीरस्थरसवाहिनाडि। (यथा, सुश्रुते शारीरस्थाने प्रथमाध्याये। "तत्र पुरुषस्य दश मूलसिराः दश च मूलधमन्यः। ताभिरिदं शरीरं कृत्स्नं पूर्णं वहति। तद्यथा। हृदयं क्लोमकं यकृत् प्लीहा वृक्कौ क्लोमधरा कला नाभिः सीवनी गुदं वङ्क्षणौ श्रोणी च। एतासु खलु सिरास्वसृग्वहासु सर्व्वशरीरानुगतासु सर्व्वशरीरं व्याप्य तिष्ठति। तासु पुनः सर्व्वासु सर्व्वशरीरचरासु सर्व्वसिराणां चयनभूतानि। तद्यथा नीलिकायां पुनः कृष्णादीनां केवलं चेतनावत् शरीरमयनभूतमधिष्ठानभूतञ्च तदेतत् स्रोतसां प्रकृतिभूतत्वात् न विकारैरुपलक्ष्यते शरीरम्। इति चरके विमानस्थाने षष्ठमध्याये।)

स्रोतईशः, पुं, (स्रोतस्वतीशः।) वसुधः। इति हेमचन्द्रः।

स्रोतस्कः, पुं, शिवः। चौरः। स्रोतःशब्दात् स्वार्थे कप्रत्ययेन निष्पन्नः। इति केचित्। (स्रोतसि भवः। स्रोतस्+"स्रोतसो विभाषाञ्यौ।" ४। ३। ११३। इति यः। स्रौतोयसे, त्रि। इति काशिका।)

स्रोतस्वती, स्त्री, (स्रोतोऽस्त्यस्यामिति। मतुप्। मस्य वः। ऊमित्यपि ङीप्।) नदी। इत्यमरः। १। १०। ६०।

स्रोतस्विनी, स्त्री, (स्रोतोऽस्त्यस्यामिति। स्रोतस्+"अस्मायामेधास्रजो विनिः।" ५। २। १२१। इति विनिः।) नदी। इत्यमरटीकायां भरतः। १। १०। ६०।

स्रोतोञ्जनं, क्ली, (स्रोतोभवमञ्जनम्।) वसुनाञ्जनोद्भवाञ्जनम्। तत्पर्य्यायः। सौवीरम् २ कापोताञ्जनम् ३ यासनम् ४। इत्यमरः। २।६। १००। अञ्जाति नयनमनेन चक्षुष्यत्वादञ्जनं घनट्। वसुनायाः स्रोतोभवत्वात् स्रोतसोञ्जनं स्रोतोञ्जनम्। सुवीरदेशे भवं सौवीरं षः। स्रोतोञ्जनादिशब्दं सौवीरमिति ख्यातम्। अदूरभवत्वाद्धेतोरपि सकलीयनिबन्धनमिति भूभूतिः। कपोतस्यार्थे कापोती वर्णः तद्युक्तमञ्जनं कापोताञ्जनम्। कापोतवर्णमञ्जनं कापोताञ्जनमिति स्वामी। वसुनायां भवं यासनं षः। इति तट्टीकायां भरतः। ४।
अपरञ्च।
"स्रोतोञ्जनं मदीनञ्च शुभ्रं श्वेतञ्च लोचितम्।"
इति रत्नमाला।
तत्पर्य्यायाश्चैते यथा। पारिभद्रम् १ स्रोतोभवम् २ स्रोतनदीभवम् ३ सौवीरम् ४ कपोतसारम् ५ वल्कीजम् ६। अस्य गुणाः। दीपनम्। कटुत्वम्। कषायम्। श्लेष्मनाशित्वम्। रसायनत्वम्। इति सौवीरम्। स्रवद्रोगकरत्वञ्च। अस्य यथा,—
"सौवीराञ्जनसंस्कारं स्निग्धं स्रोतोभवम्।

इष्टे च नेत्रिकार्य्ये श्रेष्ठं स्रोतोञ्जनञ्च तत्।"
इति राजनिर्घण्टः।
अपि च।
"स्रोतोञ्जनं मतं श्रेष्ठं विशुद्धं स्निग्धसंभवम्।
इष्टे कण्डूमलहरं दाहक्लेदरुजापहम्।
अच्छो रूपावहश्चैव वक्ष्यते मायनात्मजौ।
नेत्ररोगा न जायन्ते तस्मादञ्जनमाचरेत्।"
स्रोतोञ्जनं शुभ्रं सुरमा इति। श्रोतनं विनापि स्निग्धमानमर्व्वसस्यञ्च भवम्। इति।
अथ सुरमा सौवीरं।
"अञ्जनं यासनञ्चापि कापोताञ्जनमित्यपि।
तत्र स्रोतोञ्जनं श्रेष्ठं सौवीरं चेतनीरितम्।
स्रोतोञ्जनत्रयं श्रेयं सौवीरं तत्तु पाण्डुरम्।
स्रोतोञ्जनं स्रुतं स्वादु चक्षुष्यं कफपित्तजित्।
कषायं लेखनं स्निग्धं आहि छर्द्दिविषापहम्।
विधानयात्रुच्यते सैवनीयं सदा बुधैः।
स्रोतोञ्जनगुणाः सर्व्वे सौवीरेऽपि मता बुधैः।
किन्तु द्वयोरञ्जनयोः श्रेष्ठं स्रोतोञ्जनं स्रुतम्।"
इति च भावप्रकाशः।

स्रोतोवहा, स्त्री, (वहतीति। वह+अच्। टाप्। स्रोतसो वहा।) नदी। इति जटाधरः। (यथा, रघुः। ६। ५२।
"दृषत्तमावर्त्तसमीक्षणानां
सा चक्षुषामन्यवधूर्बभूविव।
मधोर्धरं मार्गवशादुपेतं
स्रोतोवहा सागरगामिनीव।")

स्रं, पुं, क्ली, (स्रन्द्र शब्दे+अन्येभ्योपीति डः।) धनम्। इत्यमरः। ३। ३। २१०। (यथा, मनुः। ८। ४१७।
"विस्रब्धं ब्राह्मणः शूद्रात् द्रव्योपादानमाचरेत्।
नहि तस्याऽस्ति किञ्चित् स्वं भर्त्तृहार्य्यधनो हि सः।")

स्रं, त्रि, श्लाघनीयम्। इत्यमरः। ३। ३। २१०। (यथा, कथासरित्सागरे। २६। १०५।
"मया खड्ग प्रवेष्टव्या सा तनुश्च पुरी च सा।")

स्रः, पुं, श्रोत्रिः। (यथा, मनुः। ५। १०४।
"न विप्रं स्रेषु निष्क्रमेषु स्रतं शूद्रेण भाषयेत्।
असमञ्जा ह्याहुतिः सा स्यात् शूद्रसंस्पर्शदूषिता।")
श्राद्धं। इत्यमरः। ३। ३। २१०। (यथा, रघुः। २। ५५।
"सेयं स्वदेहार्पणनिष्क्रयेण
त्वामहं मोचयितुं भवत्तः।"
विष्णुः। इति महाभारतम्। १३। १४८। ११७।)

स्रव्यं, त्रि, (स्रवेभवं। कृत्।) स्रौवम्। स्राक्षीयम्। यथा,—
"स्राक्षिभ्यामेव कुरुते, तद्वत्तं स्राक्षिभिः, सदम्।
अदत्तग्रहणिर्दीप्तो ह्यत्र सर्व्वमपि धरेः।"
इति प्रायश्चित्ततत्त्वम्।

स्रष्टृमत्, पुं, (सृष्टिः अस्त्यस्य इति। अस्य+क्तुः।) मङ्गः। इति अमरटीकायां भरतः।

स्वकर्म्म, [न्] क्ली, (स्वस्य कर्म्म।) आत्मकृतकार्य्यम्। यथा,—

कुन्त्युवाच।

“स्वकर्म्मफलनिर्द्दिष्टां यां यां योनिं व्रजाम्यहम्।
तस्यां तस्यां हृषीकेश त्वयि भक्तिर्दृढास्तु मे॥”

इति पाण्डवगीता॥

स्वकर्म्मकृत्, त्रि, निजकार्य्यकारी। इति स्वकर्म्म-शब्द-पूर्व्वक-कृधातोः कर्त्तरि क्विप्-प्रत्ययेन निष्पन्नः॥

स्वकीय, त्रि, (स्वस्यायमिति। गहादिषु स्वस्य चेति छः कुगागमश्च।) स्वीयः। तत्पर्य्यायः। निजः २ आत्मीयः ३ स्वः ४। इति हेमचन्द्रः॥

स्वकुलक्षयः, पुं, (स्वकुलस्य क्षयो यस्मात्।) मत्स्यः। इति हेमचन्द्रः॥ निजवंशनाशश्च। तत्कर्त्तरि तद्विशिष्टे च त्रि॥

स्वक्क, ऋ वर्जने। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) षकारमध्यः। ऋ, स्वक्कते। इति दुर्गादासः॥

स्वगतं, क्ली, (स्वस्मिन् गतम्।) मनोगतम्। (तत्तु नाट्योक्तीनामन्यतमम्। तल्लक्षणं यथा, साहित्यदर्पणे। ६। ४२५।

“अश्राव्यं खलु यद्वस्तु तदिह स्वगतं मतम्॥”)

यथा। कथं स्वगतम्। दम्भस्तावदयं देवः। आत्मनिवासमेवं उपविशामि। इति प्रबोधचन्द्रोदयनाटके २ अङ्कः॥ आत्मगामिनि तद्गामिनि च त्रि॥

स्वगुप्ता, स्त्री, (स्वेन गुप्ता।) शूकशिम्बी। इति शब्दरत्नावली॥ लज्जालुः। इति राजनिर्घण्टः॥

स्वगृहः, पुं, (स्वकृतं गृहं यस्य।) कलिकारपक्षी। इति जटाधरः॥ निजालये, पुं, क्ली॥

स्वङ्गः, त्रि, (सु शोभनानि अङ्गानि यस्य।) सुन्दराङ्गविशिष्टः। तत्पर्य्यायः। सिंहसंहननः २। इति हेमचन्द्रः॥ (सु शोभनमङ्गमिति।) शोभनावयवे, क्ली॥

स्वच्छं, क्ली, (सुष्ठु अच्छम्।) विमलोपरसः। मुक्ता। इति राजनिर्घण्टः॥

स्वच्छः, त्रि, (सुष्ठु अच्छः।) रोगविमुक्तः। इति शब्दरत्नावली॥ सुस्थः। निर्म्मलः। इति मेदिनी॥ (यथा, महाभारते। ८। ६९।

“[illegible] निर्म्मलम्।
[illegible] प्रपश्यति॥”

[illegible]। यथा, [illegible]। ८। ५२।

“[illegible] [illegible]॥”)

स्वच्छः, पुं, ([illegible] निर्म्मलः।) [illegible]। इति राजनिर्घण्टः॥

स्वच्छन्दः, त्रि, ([illegible] अभिप्रायो यस्य।) स्वाधीनः। [illegible]। इत्यमरः। ३। १। १५॥ [illegible]। १४। १०॥

“[illegible] [illegible]॥”

[illegible], पुं। यथा, हरिवंशे। १६३। २८।

“बुभुक्षा वा पिपासा वा ग्लानिर्मृत्युरथवा जरा।
देवद्वारयन्यास्ते स्वच्छन्दो न भविष्यति॥”)

स्वच्छपत्रं, क्ली (स्वच्छं पत्रं यस्य।) अभ्रकम्। इति हेमचन्द्रः॥

स्वच्छमणिः, पुं, (स्वच्छो मणिः।) स्फटिकः। इति राजनिर्घण्टः॥

स्वच्छवालुकं, क्ली, (स्वच्छं वालुकम्) विमलोपरसः। इति राजनिर्घण्टः॥

स्वच्छा, स्त्री, (सुष्ठु अच्छा।) श्वेतदूर्व्वा। इति राजनिर्घण्टः॥

स्वजं, क्ली, (स्वस्मात् जायते इति। जन+डः।) रक्तम्। इति मेदिनी॥

स्वजः, पुं, (स्वस्मात् जायते इति। जन+डः।) पुत्त्रः। स्वेदः। इति मेदिनी॥ त्रि, आत्मजातः॥ (स्वाभाविकः। यथा, रामायणे। २। ११२। १६।

“आगता त्वामियं बुद्धिः स्वजा वैनयिकी च या।
भृशमुत्सहसे तात रक्षितुं पृथिवीमपि॥”)

स्वजनः, पुं, (स्वस्य जनः।) ज्ञातिः। इत्यमरः। २। ६। ३४॥ आत्मीयलोकश्च॥ (यथा, कुमारे। ४। २६।

“स्वजनस्य हि दुःखमग्रतो
विवृतद्वारमिवोपजायते॥”)

स्वजा, स्त्री, (स्वस्मात् जायते या। जन+डः। टाप्।) कन्या। इति शब्दरत्नावली॥

स्वठ, क गत्यसंस्कृतसंस्कृतेषु। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-सेट्।) क, स्वाठयति। इति दुर्गादासः॥

स्वतः [स्] व्य (स्व+तसिल्।) आत्मनः। आपन इहते इति भाषा। यथा। स्वतोऽसुगप्रियं स्वतः। इत्यमरः। १। १०। ११॥ (यथा, रघुः। ३। ५८।

“अतिप्रबन्धप्रहितास्त्रवृष्टिभि-
स्तमाश्रयं दुष्प्रसहस्य तेजसः।
शशाक निर्व्वापयितुं न वासवः
स्वतश्च्युतं वह्निमिवाद्भिरम्बुदः॥”

प्रमाणात्। यथा, मनुः। ८। १६६।

“वसीता यदि नष्टः स्यात् कुटुम्बार्थे कृतोऽव्ययः।
दातव्यं बान्धवैस्तत् स्यात् प्रविभक्तैरपि स्वतः॥”)

स्वतः प्रामाण्यतप्रमाणं यथा। तद्धितस्वामन्वे-विभक्तिः। यस्मात् सर्व्वा विभक्तिर्निपद्यते स तद्धितस्तोऽनयं स्यात्। परिमाणं कर्णयम्। वल्मिकादयः प्राक् पाशपः। इति सिद्धान्तकौमुदी॥

स्वतन्त्रः, त्रि, (स्वम् तन्त्रं प्राधान्यं यस्य।) स्वाधीनः। तत्पर्य्यायः। अपावृतः २ स्वैरी ३ स्वच्छन्दः ४ निरवग्रहः ५। इत्यमरः। ३। १। १३॥ निर्यन्त्रणः ६ यथाकामी ७ निरङ्कुशः ८ निष्कुष्टः ९। इति जटाधरः॥ स्वैरीति १०। इति हेमचन्द्रः॥ [illegible] यथा, मानवे।

“[illegible]।

अस्वतन्त्राः प्रजाः सर्व्वाः स्वतन्त्रः पृथिवीपतिः॥
अस्वतन्त्रः स्मृतः शिष्य आचार्य्ये स्वतन्त्रता।
अस्वतन्त्राः स्त्रियः सर्व्वाः पुत्त्रा दासाः परिग्रहाः॥”

परिग्रहा अनुजीविप्रभृतयः।

“स्वतन्त्रस्तत्र तु गृही यस्य तत् स्यात् क्रमागतम्।
गर्भस्थैः सदृशो ज्ञेयो अष्टमाद्वत्सरात् शिशुः॥
बाल आषोड़शाद्वर्षात् पौगण्डोऽपि निगद्यते।
परतो व्यवहारज्ञः स्वतन्त्रः पितरावृते॥
जीवतोर्न स्वतन्त्रः स्यात् जरयापि समन्वितः।
तयोरपि पिता श्रेयान् बीजप्राधान्यदर्शनात्॥
अभावे बीजिनो माता तदभावे च पूर्व्वजः।
स्वतन्त्रोऽपि हि यत् कार्य्यं कुर्य्यादप्रकृतिं गतः।
तदप्यकृतमेव स्यादस्वातन्त्र्यस्य हेतुतः॥”

इति व्यवहारतत्त्वम्॥

स्वत्रः, पुं, अन्धः। इति केचित्॥

स्वत्वं, क्ली, (स्वस्य भावः। स्व+त्व।) शास्त्रसम्मतयथेष्टविनियोगार्हत्वम्। अप्रपदार्थातिरिक्तपदार्थः। निरूपकताअनन्येन स्वामित्वम्। यथा। स्वत्वञ्च यथेष्टविनियोगार्हत्वेन शास्त्रबोधितत्वमिति प्राञ्चः॥ अतिरिक्तपदार्थ इति शिरोमणिः॥ स्वामित्वञ्च तन्निरूपकताम्। निरूपकतया तदेव वा। तत्र तत्र गृहात् गुणमतञ्च। तस्य दानादिश्रुतेः। नौरजा दृश्यतुरुवेदित्यादौ लौहित्यादिगुणविशिष्टपारिभाषिकनीलवृषोत्सर्गश्रुतेश्च। वस्तुतस्तु आत्मसमवेतं स्वामित्वमेवातिरिक्तपदार्थः। विक्रयदानादीनां तन्नाशकत्वे क्रयप्रतिग्रहादीनाञ्च तद्धेतुत्वे समन्वयापवादाभावात् तदेव निरूपकतया स्वत्वव्यवहारहेतुः। अतएव निवन्धादौ भाविन्यपि स्वत्वमिति। अन्यथा प्रतिमासं प्रतिवर्षं वा देवत्वेन प्रतिज्ञातधान्यादिरूपस्य भाविनि तत्र तदनुत्पत्तावनुपपत्तेरिति दूरावगन्तव्यौ वीतानर्त्तौ [illegible] समीचीनः। तत्र [illegible] [illegible] प्रति [illegible] विरोधि [illegible] [illegible] यथा-दिना [illegible] [illegible] तथा [illegible] [illegible] [illegible] [illegible] पातेऽपि न व्यभिचार इति संक्षेपः। इति दायभागटीकायां श्रीकृष्णतर्कालङ्कारः॥

स्वदनं, क्ली, (स्वद+ल्युट्।) भक्षणम्। इति हेमचन्द्रः॥ [illegible]। इति राजनिर्घण्टः॥

स्वदाराः, पुं, (स्वस्य दाराः।) स्वस्त्री। यथा, [illegible]।

“[illegible]
[illegible]॥
[illegible]
[illegible]॥”

“[illegible]।

स्वधर्म्मः, पुं क्ली, (स्वस्य धर्म्मः। स॰तत्पु॰।) स्वजात्युक्ताचारः। यथा,—
"श्रेयान् स्वधर्म्मो विगुणः परधर्म्मात् स्वनुष्ठितात्।
स्वधर्म्मे निधनं श्रेयः परधर्म्मो भयावहः॥"
इति श्रीभगवद्गीतायां ३ अध्यायः॥ ७॥
अपि च।
"यो यस्य विहितो धर्म्मः स तस्यातिः प्रकीर्त्तितः।
तस्मात् स्वधर्म्मं कुर्व्वीत द्विजो नित्यमनापदि॥
चत्वारो वर्णा राजेन्द्र चरेयुश्चापि चाश्रमाः।
ऋते स्वधर्म्मं विपुलं न ते यान्ति परां गतिम्॥
स्वधर्म्मेण यथा नृणां नरसिंहः प्रतुष्यति।
न तुष्यति तथान्येन वेदवाक्येन कर्म्मणा॥"
इति श्रीनारसिंहपुराणम्॥ ८॥
स्वधर्म्मत्यागी क्षतघ्नः। यथा,—
सनातन उवाच।
"स्वधर्म्मं हन्ति यो विप्रः सन्ध्याचयविवर्ज्जितः।
व्यतर्पणञ्च यत् स्नानं विष्णुनैवेद्यवर्ज्जितः॥
विष्णुमन्त्रविष्णुपूजाविष्णुभक्तिविहीनकः।
एकादशीविहीनश्च श्रीकृष्णजन्मवासरे॥
शिवरात्रौ च यो भुङ्क्ते श्रीरामनवमीदिने।
पितृक्षयं देवक्षयं स क्षतघ्न इति स्मृतम्॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे। ५१। ४५—४७॥
स्वधा, व्य, (स्वयतेऽनेनेति। स्वद आस्वादने+आ। "स्वदेर्धश्च।" इति दस्य धः। इलुणादिवृत्तौ उज्ज्वलदत्तः।) देवहविर्दानमन्त्रः। यथा,
"स्वाहा देवहविर्दाने औषट् वौषट् वषट् स्वधा।
इत्यमरः। ३। ४। ८॥
स्वाहा औषट् वौषट् वषट् स्वधा एते पञ्चशब्दा देवहविर्दाने वह्निमुखहुतौ वर्त्तन्ते देवाय हविषो दानं देवहविर्दानं तच्च देवा इन्द्राद्यः। अत्र पितरो देवताः इति स्मृतेस्तेऽपि देवाः। हविर्दानं श्रुत्यनेन मन्त्रा इति स्थितम्।
"अमन्त्रन्तं स्वाहयेव हविर्भुजमिति रहुः।"
स्वाहाशब्दो मन्त्रभेदे स्त्रियां स्वाहाग्नियोषितीति कोषान्तरम्। स्वाहा इत्यादिः। औषट् तालव्यादिमूर्द्धन्यमध्यम्। वौषट् वषट्द्वयं मूर्द्धन्यमध्यम्। स्वधा इत्यादि। इन्द्राय स्वाहा इत्यादिप्रयोगः। इति भरतः॥ ९॥ पितृसम्बोधनमन्त्रः। यथा,—
"देवेभ्योऽन्नं हरिः पूर्व्वे वषट् यज्ञो हितं सुखम्।
स्वाहाग्नये स्वधा पित्रे स्वस्ति धात्रे नमः सते।"
इति सुग्धबोधव्याकरणम्॥
हरिर्देवेभ्योऽन्नं समर्थः पूर्व्वे वषट् यज्ञो हितं सुखं ब्रह्मः सुखं अग्नये स्वाहा पित्रे स्वधा धात्रे स्वस्ति सुखानि सन्तानि। नमः सते इति सते नित्याय विष्णवे नमः इत्यर्थः। सर्व्वत्र भवतेर्मम्यमानत्वादकर्म्मकाद्भावसमभिव्याहारः। वषट्स्वाहास्वधानमस्कारत्यागार्थतया चन्दनदानलक्षणेनेष्ट विद्वौ पृथगग्रहणं मन्त्रान्तर्गतानामपि प्राप्त्यर्थं तेन शिखायै वषट् शिरसे स्वाहा पितृभ्यः स्वधोच्यताम्। हृदयाय नमः। इत्यादि विहम् इति तट्टीकायां दुर्गादासः॥ पितृणामन्नम्। यथा,—
"भुङ्क्ते त्वं यथा वै स्वधारूपा
तद्वत् स्वाहा हव्यभोक्त्री स्वयं देवि।"
इति ऋग्वेदे देवीसूक्तम्॥
स्वधा वै पितृणामन्नम्। इति श्रुतिश्च॥
स्वधा, स्त्री, (स्वान् दधातीति। धा+क्विप्।) दक्षकन्या। सा तु पितॄणां पत्नी। तस्या दे कन्ये। यमुना धारिणी च। एतयोरुपख्यिन्यो सन्ततिर्नास्ति। इति श्रीभागवतमतम्॥ सा च ब्रह्मणो मानसी कन्या। यथा,—
श्रीनारायण उवाच।
"शृणु नारद वक्ष्यामि स्वधोपाख्यानमुत्तमम्।
पितॄणाञ्च तृप्तिकरं श्राद्धानां फलवर्द्धनम्॥
सृष्टेरादौ पितृगणान् ससर्ज्ज जगतां विधिः।
चतुरश्चतुर्म्मूर्त्तिमतश्चैव तेजःस्वरूपिणः॥
दृष्ट्वा तान् पितृगणान् सिद्धरूपान्मनोहरान्।
आहारं सृष्टये तेषां श्राद्धं तर्पणपूर्व्वकम्॥
स्नानं तर्पणपर्य्यन्तं श्राद्धान्तं देवपूजनम्।
श्राद्धिकञ्च त्रिसन्ध्यान्तं विप्राणाञ्च श्रुतौ श्रुतम्॥
नित्यं न कुर्य्यादयो विप्रस्त्रिसन्ध्यं श्राद्धतर्पणम्।
बलिं वैश्वदेवञ्च सोऽपि विप्रहीनो यथोरगः॥
हरिसेवाविहीनश्च श्रीहरेरनैवेद्यभुक्।
भस्मान्तं शवकं तस्य न कर्म्मार्हः स नारद॥
ब्रह्मा श्राद्धादिकं सृष्ट्वा जगाम पितृहेतवे।
न प्राप्नुवन्ति पितरो ददति ब्राह्मणादयः॥
सर्व्वे प्रजग्मुः क्षुभिता विधेरन्या ब्रह्मणः सभाम्।
सर्व्वं निवेदनं चक्रुस्तमेव जगतां विधिम्॥
ब्रह्मा च मानसीं कन्यां सस्मरे तां मनोहराम्।
रूपयौवनसम्पन्नां शरच्चन्द्रसमप्रभाम्॥
विद्यावतीं गुणवतीमतिरूपवतीं सतीम्।
श्वेतचम्पकवर्णाभां रत्नभूषणभूषिताम्॥
विष्णुभक्तां प्रकृतेरंशां सम्मितां वरदां शुभाम्।
स्वधाभिधानां सुदतीं लक्ष्मीलक्षणसंयुताम्॥
शरत्पद्मदलन्यस्तपादपद्मञ्च बिभ्रतीम्।
पत्नीं पितॄणां पद्माक्षीं पद्मानां पद्मलोचनाम्॥
पितृभ्यस्तां ददौ ब्रह्मा तुष्टेभ्यस्तुष्टरूपिणीम्।
ब्राह्मणांश्चोपदेशञ्च चकार गोपनीयकम्॥
स्वधान्तं मन्त्रमुच्चार्य्य पितृभ्यो देहि चेति च।
क्रमेण तेन विप्राश्च पित्रे दानं ददुः पुरा॥
स्वाहा श्रुत्वा देवदाने पितृदाने स्वधा परा।
सर्व्वत्र दक्षिणा श्रुत्वा हतयज्ञमदक्षिणम्॥
पितरो देवता विप्रा मुनयो मनवस्तथा।
पूजां चक्रुः स्वधां श्रुत्वा तुष्टाव परमादरम्॥
देवादयश्च सन्तुष्टाः परिपूर्णमनोरथाः।
विप्रादयश्च पितरः स्वधादेवीवरेण च॥
इत्येवं कथितं सर्व्वं स्वधोपाख्यानमुत्तमम्।
सर्व्वेषाञ्च तुष्टिकरं किं भूयः श्रोतुमिच्छसि॥

नारद उवाच।
स्वधापूजाविधानञ्च ध्यानं स्तोत्रं तथा मुने।
श्रोतुमिच्छामि यत्नेन वद वेदविदांवर॥
श्रीनारायण उवाच।
तद्ध्यानं स्तवनं ब्रह्मन् वेदोक्तं सर्व्वसम्मतम्।
सर्व्वं जानासि च कथं श्रोतुमिच्छसि बुद्धये॥
पुरा कृष्णवचोदृष्ट्या सभायां आह्ववासरे।
स्वधां संपूज्य यत्नेन ततः श्राद्धं समाचरेत्॥
स्वधां नाभ्यर्च्च्य यो विप्रः श्राद्धं कुर्य्यादहम्मतिः।
न भवेत् फलभाक् सद्यं श्राद्धस्य तर्पणस्य च
ब्रह्मणो मानसीं कन्यां शश्वत् सुस्थिरयौवनाम्।
पूज्यां पितॄणां देवानां श्राद्धानां फलदां भजे॥
इति ध्यात्वा शालग्रामेऽथवा मङ्गले घटे।
दद्यात् पाद्यादिकं तस्यै स्तवेनेति श्रुतौ श्रुतम्॥
ॐ ह्रीं श्रीं क्लीं स्वधादेव्यै स्वाहेति च महामनुम्।
समुच्चार्य्य च संपूज्य स्तुत्वा तां प्रणमेद्विजः॥
स्तोत्रं शृणु मुनिश्रेष्ठ ब्रह्मपुत्र विशारद।
सर्व्वबाञ्छाप्रदं नृणां ब्रह्मणा यत् कृतं पुरा॥
ब्रह्मोवाच।
"स्वधोच्चारणमात्रेण तीर्थस्नायी भवेन्नरः।
मुच्यते सर्व्वपापेभ्यो वाजपेयफलं लभेत्॥
स्वधा स्वधा स्वधेत्येवं यदि वारत्रयं स्मरेत्।
श्राद्धस्य फलमाप्नोति वसेच्च तर्पणस्य च॥
श्राद्धकाले स्वधास्तोत्रं यः शृणोति समाहितः।
लभेत् श्राद्धशतानाञ्च पुण्यमेव न संशयः॥
स्वधा स्वधा स्वधेत्येवं त्रिसन्ध्यं यः पठेन्नरः।
प्रियां विनीतां च लभेत् साध्वीं पुत्रं गुणान्वितम्॥
पितॄणां प्राणतुल्या त्वं द्विजजीवनरूपिणी।
श्राद्धाधिष्ठातृदेवी च श्राद्धादीनां फलप्रदा॥
यज्ञैश्च मन्त्रतः पितॄणां तृप्तिहेतवे।
संप्रीतये द्विजातीनां गृहिणां वृद्धिहेतवे॥
नित्या त्वं नित्यरूपासि पुण्यरूपासि सुव्रते।
आविर्भावतिरोभावौ सृष्टौ च प्रलये तव॥
ॐ स्वस्ति च नमः स्वाहा स्वधा त्वं दक्षिणा तथा।
निरूपिताश्चतुर्व्वेदे षट् प्रशस्ताश्च कर्म्मणाम्॥
पुरा सीत्वं स्वधा गोपी गोलोके राधिकासखी।
हृतोरसि स्वमात्मानं कृष्णस्त्वेन स्वधा स्मृता॥
शप्ता त्वं राधिकाशापात् गोलोकाद्विश्वमागता।
कृष्णश्लिष्टा तया दृष्टा पुरा वृन्दावने वने॥
कृष्णालिङ्गनपुण्येन भूता मे मानसी सुता।
अतस्ता सुरतौ तेन चतुर्थी स्वामिनां प्रिया॥
स्वाहा च सुन्दरी गोपी पुरासीद्राधिकासखी।
त्वं कृष्णमाह रतये तेन स्वाहा प्रकीर्त्तिता॥
कृष्णेन सार्द्धं सुचिरं रमते रासमण्डले।
प्रमत्ता सुरतौ श्लिष्टा दृष्टा सा राधया पुरा॥
तस्याः शापेन प्रस्खल्य गोलोकाद्विश्वमागता।
कृष्णालिङ्गनपुण्येन बभूव वह्निकामिनी॥
सर्व्वरूपा परमा देवानां वन्दिता सदा।
यन्नामोच्चारणेनैव मेरौ सुस्थिर पातकात्॥

सा सुशीलाभिधागोपी पुरासीद्राधिकासखी।
उवास दक्षिणे क्रोड़े कृष्णस्य राधिकायतः॥
प्रध्वस्ता सा च तच्छापात् गोलोकादिश्यमागता।
कृष्णालिङ्गनपुण्येन सा बभूव च दक्षिणा॥
प्रेयसी सुरतौ दत्ता प्रशस्ता सर्व्वकर्म्मसु।
उवास दक्षिणे भर्त्तुर्दक्षिणा तेन कीर्त्तिता॥
बभूवुस्तिस्रो गोप्यश्च स्वधा च दक्षिणा तथा।
कर्म्मिणां कर्म्मपूर्णार्थं पुरा चैवेश्वरेच्छया॥
इत्येवमुक्त्वा स ब्रह्मा ब्रह्मलोके स्वमंसदि।
तस्यौ च सहसामात्यः स्वधा चाविर्ब्बभूव ह॥
तदा पितृभ्यः प्रददौ तामेव कमलालयाम्।
तां संप्राप्य यतस्ते च पितरश्च सहर्षिताः॥
स्वधास्तोत्रमिदं पुण्यं यः शृणोति समाहितः।
स स्नातः सर्व्वतीर्थेषु वेदपाठफलं लभेत्॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ४९ अध्यायः॥

स्वधाप्रियः, पुं, (स्वधायाः प्रियः।) कृष्णतिलः। इति शब्दरत्नावली॥ अग्निश्च॥

स्वधासुक्, [ज्] पुं, (स्वधां सुङ्क्ते इति। सुच्+क्विप्।) पितृगणः। इति त्रिकाण्डशेषः॥ (यथा, रघुः। ८। ३०।
"ऋषिदेवगणस्वधाभुजां
श्रुतयागप्रसवैः स पार्थिवः।
अमृतत्वमुपेयिवान् बभौ
परिधेर्मुक्त इवोष्णदीधितिः॥")
देवता। इति हेमचन्द्रः॥

स्वधितिः, पुं, क्ली, (स्वं धियति दधातीति। धि+क्तिच्।) कुठारः। इत्यमरः। २। ८। ६२॥ सालक्षण्यादिति॥ (यथा, भागवते। १०। ५५। ५।
"स्वदा मज्जनमं गीलावत्यन् स्वधितिमाद्भुतम्॥"
वज्रः। इति निघण्टुः। २। २०॥)

स्वधितिधैतिकः, पुं, (स्वधितिर्धैतिर्यस्य। कन्।) परशुधारियोद्धा। इति केचित्॥

स्वन, शब्दे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सेट्।) वकारयुक्तः। स्वेनतुः, स्वनतुः। अत्र स्वन च स्वन च इत्युभयपाठो वैरक्तप्रमादजन्यः। इति दुर्गादासः॥

स्वन, तृ च ध्याने। इति कविकल्पद्रुमः॥ (चुरादि-पर०-अक०-सेट्।) वकारयुक्तः। स्वनयति। इति दुर्गादासः॥

स्वन, मि संभजने। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सेट्।) वकारयुक्तः। शब्दे इत्यनुवर्त्तने। संभजने भूयसि कर्त्तरि शब्देऽर्थेऽयमर्थः। स्वेनतुः, स्वनतुर्नृपौ। मि, स्वनयति स्वानयति कङ्कं बधूः। अन्यत्र स्वानयति पक्षी जनः। इति दुर्गादासः॥

स्वनः, पुं, (स्वनत्यनेन। स्वन शब्दे+"स्वनहन्योर्भावे।" ३। ३। ६२। इति अप्।) शब्दः। इत्यमरः। १। ७। २२॥ (यथा, महाभारते। २। १२३। ८६।
"आकाशे दुन्दुभीनाञ्च बभूव तुमुलः स्वनः।")

स्वनचक्रः, पुं, रतिबन्धविशेषः। तस्य लक्षणं यथा,—
"धृत्वा बाहू तथा कण्ठं पादतोऽपि शिरः स्थितः।
गूढ़ञ्च कामयेत् कामी स्वनचक्रः प्रकीर्त्तितः॥"
इति रतिमञ्जरी॥

स्वनिः, पुं, (स्वन+इन्।) शब्दः। इति हेमचन्द्रः॥

स्वनितं, क्ली, (स्वन+क्तः।) गर्ज्जितम्। मेघशब्दः। इति हेमचन्द्रः॥ ध्वनिते, त्रि। इत्यमरः। ३। १। ६४॥

स्वनिताङ्घ्रयः, पुं, (स्वनितं आङ्घ्रयते इति। आ+ङ्घ्रि+अच्।) तण्डुलीयः। इति राजनिर्घण्टः॥

स्वनोत्साहः, पुं, (स्वनेन उत्साहो यस्य।) गण्डकः। इति रत्नावली॥ पुस्तकान्तरे श्वनोत्साह इति च पाठः॥

स्वपनं, क्ली, (स्वप+ल्युट्।) निद्रा। इति शब्दरत्नावली॥ (यथा, सुश्रुते। ३। ४।
"बालवृद्धस्त्रीकर्शितक्षतक्षीणमद्यनित्ययानवाहनाध्वकर्म्मप्रतिश्रान्तानामसृक्प्रवृतां मेदःस्वेदकफरसरक्तक्षीणानामजीर्णिनाञ्च मुहूर्त्तं दिवास्वपनमप्रतिषिद्धम्॥")

स्वपिण्डा, स्त्री, पिण्डखर्জ্জूरी। इति राजनिर्घण्टः॥

स्वपितृकर्म्मा, [न्] पुं, (स्वपितृ इति कर्म्म यस्य।) शयनकर्त्ता। तद्वैदिकपर्य्यायौ। स्वपितृ१ स्वप्ति२। इति द्वौ स्वपितृकर्म्मार्थौ। इति वेदनिघण्टौ ३ अध्यायः॥

स्वप्नः, पुं, (स्वप+"स्वपो नन्।" ३। ३। ६१। इति नन्। यद्वा "कृवृजिदृपनीति।" उणा० ३। १०। इति नन्।) निद्रा। इत्यमरः। १। ७। ३६॥
("तस्मान्न जाग्रयादात्रौ दिवास्वप्नञ्च वर्জ্জयेत्। ज्ञात्वा दोषकरावेतौ बुधः स्वप्नं मितञ्चरेत्॥")
प्रसुप्तस्य विज्ञानम्।
("पूर्व्वदेहानुभूतांस्तु भूतात्मा स्वपतः प्रभुः। रजोयुक्तेन मनसा गृह्णात्यर्थान् शुभाशुभान्॥ करणानान्तु वैकल्ये तमसाभिप्रवर्त्तिते। असुप्तमपि भूतात्मा प्रसुप्त इव चोच्यते॥"
इति सुश्रुते शारीरस्थाने चतुर्थेऽध्याये॥)
दर्शनम्। इति मेदिनी॥ ॰॥ सुखप्रा यथा,—
नन्द उवाच।
"केन स्वप्नेन किं पुण्यं केन पुंसां भवेत् सुखम्।
कोऽपि कोऽपि च सुखप्रस्तत् सर्व्वं कथय प्रभो॥"
श्रीभगवानुवाच।
"वेदेषु सामवेदश्च प्रशस्तः सर्व्वकर्म्मसु।
सर्व्वेषु फाल्गुमासायां पुण्यकाले मनोहरे॥
शुक्लो यश्च शुक्लपक्षः प्रशस्तः पुण्यवासरः।
तत्र सर्व्वं लिखितं तात कथयामि निशामय॥
स्वप्नाध्यायं प्रवक्ष्यामि बहुपुण्यफलप्रदम्।
स्वप्नाध्यायं नरः श्रुत्वा ज्ञानज्ञानफलं लभेत्॥
स्वप्नस्तु प्रथमे यामे सम्वत्सरफलप्रदः।
द्वितीये चाष्टभिर्म्मासैस्त्रिभिर्म्मासैस्तृतीयके॥
चतुर्थे चार्द्धमासेन स्वप्नः स्याच्तु फलप्रदः।
दशार्द्धे फलदः स्वप्नोऽप्यरुणोदयदर्शने॥
प्रातः स्वप्नश्च फलदस्तत्क्षणं यदि बोधितः।
दिने मनसि यद्दृष्टं तत् सर्व्वत्र लभेद्ध्रुवम्॥
चिन्ताव्याधिसमायुक्तो दुःखः स्वप्नञ्च पश्यति।
तत् सर्व्वं निष्फलं तात प्रयात्येव न संशयः॥
जड़ो मूत्रपुरीषेण पीड़ितश्च भयाकुलः।
शिश्नमरो मुक्तकेशो न लभेत् स्वप्नजं फलम्॥
दृष्ट्वा स्वप्नञ्च निद्रालुर्यदि निद्रां प्रयाति च।
विस्फुरो वक्ति चेन्नाशो न लभेत् स्वप्नजं फलम्॥
उक्त्वा काश्यपगोत्रे च विपत्तिं लभते ध्रुवम्।
दुर्गते दुर्गतिं याति नीचे व्याधिं प्रयाति च॥
शूद्रो भवञ्च लभते सूर्खे च कलहो भवेत्।
कामिन्यां धनहानिः स्याद्राजौ चौरभयं भवेत्॥
निद्रायां लभते शोकं पण्डिते वाञ्छितं फलम्।
न प्रकाशश्च सुस्वप्नः पण्डितैः काश्यपे वचः॥
गवाश्च कुञ्जराणाञ्च दृषानाश्च वृषेश्वर।
प्रसादानाञ्च शैलानां वृक्षाणाञ्च तथैव च॥
आरोहणञ्च धनदं भोजनं रोदनं तथा।
प्रतिग्रहञ्च तथा वीणां शस्याढ्यां भूमिमालभेत्॥
शस्याढ्येन यदा चिह्नो व्रणेन क्षमिणा तथा।
विद्यया धनिरेवैव संयुक्तोऽप्यर्थमालभेत्॥
स्वप्नेऽप्यगम्यागमनं भार्य्यालाभं करोति च।
मूत्रविष्ठां पिबेत् शुक्रं नरकञ्च विगच्छति॥
नगरं प्रविशेद्रक्तं समुद्रं वा सुधां पिबेत्।
शुभवार्त्तामवाप्नोति विपुलश्चार्थमालभेत्॥"
रक्तं स्थाने नक्तं समुद्रं स्थाने सरक्तं सुधां स्थाने सुरां इति च पाठः।
"गजं वृषं सुवर्णञ्च वृषभं धेनुमेव च।
दीपमन्नं फलं पुष्पं कन्यां छत्रं रथं ध्वजम्॥
कुटुम्बं लभते दृष्ट्वा कीर्त्तिञ्च विपुलां श्रियम्।
पूर्णकुम्भं दिनं वह्निं पुष्पं ताम्बूलमन्दिरम्॥
सुकृतान्नं नटं वेश्यां दृष्ट्वा श्रियमवाप्नुयात्।
गोधीरञ्च वृषं दृष्ट्वा चार्थं पुण्यं धनं लभेत्॥
पायसं पद्मपत्रे च दधि दुग्धं घृतं मधु।
मिष्टान्नं खलिकं शुक्लं ध्रुवं राजा भविष्यति॥
पक्षिणां मानुषाणाञ्च भुक्तौ मांसं नरो यदि।
दक्षिणे शुभवार्त्ताञ्च लभते वाञ्छितं फलम्॥
छत्त्वा पादुकामापि खड्गाश्चाग्नञ्च गच्छति।
असिञ्च निर्म्मलं तीक्ष्णं तत्क्षणेव भविष्यति॥
मैथुनं यत्तरेद्दृष्टो हि स प्रधानं भविष्यति।
दृष्ट्वा च कलिनं वृक्षं धनमाप्नोति निश्चितम्॥
यस्य खेलेन सर्पेण दश्यते दक्षिणे भुजे।
सोऽचिराल्लभते भार्य्यां विनीतां प्रियवादिनीम्॥
सर्पेण भक्षितो यो हि सर्व्वलाभञ्च तद्भवेत्।
स्वप्ने सूर्य्यं विधुं दृष्ट्वा मुच्यते व्याधिबन्धनात्॥
पश्येत् कुकुटीं क्रौञ्चीं दृष्ट्वा भार्य्यां लभेद्ध्रुवम्।
स्वप्ने यो निजदेहेन प्रतिष्ठासुखमाप्नुयात्॥
उत्तमां शय्यां प्रकल्पयति या पाठः।

स्वप्नः

दध्यन्नं पायसं शुक्ले तड़ागे वा नदीतटे ।
विप्रीर्ये पद्मपत्रे च सोऽपि राजा भविष्यति ॥
तड़ागे वा स्थाने पद्मपत्रे इति वा पाठः ।
चक्षौकसं वृश्चिकञ्च सर्पञ्च यदि पश्यति ।
धनं पुत्रञ्च विजयं प्रतिष्ठाञ्च लभेदिति ॥
वृश्चिभिर्दंशिभिः कीलैर्वानरैः पीड़ितो यदि ।
निश्चितञ्च भवेद्राजा धनञ्च विपुलं लभेत् ॥
मद्यं मांसं मौक्तिकञ्च शङ्खचन्दनकौरकम् ।
यस्तु पश्यति स्वप्नान्ते विपुलं धनमालभेत् ॥
सुराञ्च रुधिरं स्वर्णं शुक्ला विष्ठां धनं लभेत् ।
प्रतिमां शिवलिङ्गञ्च लभेद्दृष्ट्वा जयं धनम् ॥
फलितं पुष्पितं विल्वमात्रं दृष्ट्वा लभेद् धनम् ।
दृष्ट्वा च ज्वलदग्निञ्च धनं बुद्धिं श्रियं लभेत् ॥
आमलकं धात्रीफलं उत्पलञ्च घनागमम् ।
देवनाञ्च द्विजा गावः पितरो जिघ्रिनस्तथा ।
उत्पलं स्थाने तत्पद्ममिति वा पाठः ।
यद्ददाति सिधः स्वप्ने तत्तथैव भविष्यति ॥
शुक्लाम्बरधरां नारीं शुक्लमाल्यानुलेपनाम् ।
समाश्लिष्यति यः स्वप्ने तस्य श्रीः सर्व्वतः सुखम् ॥
पीताम्बरधरां नारीं पीतमाल्यानुलेपनाम् ।
उपगूहति यः स्वप्ने कल्याणं तस्य जायते ॥
सर्व्वाणि शुक्लानि प्रशंसितानि
भक्ष्याण्यिकार्पासविवर्जितानि ।
सर्व्वाणि क्षाणानि विनिन्दितानि
गोदन्तिदेवद्विजवर्जितानि ॥
द्विजा स्त्री वत्सिता विप्रा रत्नभूषणभूषिता ।
यस्य मन्दिरमायाति स श्रियं लभते ध्रुवम् ॥
स्वप्ने च ब्राह्मणो देवो ब्राह्मणी देवकन्यका ।
कुमारी चाष्टवर्षीया रत्नभूषणभूषिता ।
यस्य तुष्टा भवेत् स्वप्ने तस्य तुष्टा च पार्व्वती ॥
एतच्च स भवेत् कविपण्डितः इति च पाठः ।
ब्राह्मणो ब्राह्मणी वापि वस्तुः वत्सिता सती ।
पुत्रं ददाति यस्मै च तस्य पुत्रो भविष्यति ॥
यं स्वप्ने ब्राह्मणो गन्ध । करोति च शुभा
शिषम् ।
यद्ददाति भवेत्तस्य तस्मैवार्थं भवेद्ध्रुवम् ॥
परितुष्टो द्विजश्रेष्ठश्चायाति यस्य मन्दिरम् ।
नारायणः शिवो ब्रह्मा प्रविशेयु स्तदाश्रमम् ॥
सम्पत्तिस्तस्य भवति यशश्च विपुलं शुभम् ।
पदे पदे सुखं तस्य सम्मानं गौरवं लभेत् ॥
अकस्मादपि स्वप्ने तु लभते सुरभीं यदि ।
भूमिलाभो भवेत्तस्य भार्य्या चापि पतिव्रता ॥
करेण छत्रा पृथ्वी यं मस्तके स्थानमेवेद्यदि ।
राज्यलाभो भवेत्तस्य निश्चितञ्च सुतो सुतम् ॥
स्वप्ने तु ब्राह्मणसुतः समाश्लिष्यति यं नरः ।
तीर्थचायी भवेत् सोऽपि निश्चितञ्च श्रिया-
न्वितः ॥
स्वप्ने ददाति पुष्पञ्च यस्मै पुत्रवते द्विजः ।
अयुक्तो भवेत् सोऽपि यशस्वी च धनी सुखी ॥
स्वप्ने दृष्ट्वा च तीर्थानि सौधरत्नगृहाणि च ।
अयुक्तश्च धनलक्ष्मीर्चचायी भवेन्नरः ॥
स्वप्ने तु पूर्णकलसं कश्चित् यस्मै ददाति वा ।
पुत्रलाभो भवेत्तस्य सम्पत्तिश्च समालभेत् ॥
दृष्ट्वे छत्रा तु कूष्माण्डं चाढ़कं वापि सुन्दरी ।
यस्य मन्दिरमायाति स लक्ष्मीं लभते ध्रुवम् ॥
दिशा स्त्री यदृच्छं गत्वा पुरीषं विसृजेद्विज ।
अर्थलाभो भवेत्तस्य दारिद्रञ्च प्रयाति च ॥
यस्य गेहं समायाति भार्य्यया सह ब्राह्मणः ।
पार्व्वत्या सह शम्भुर्व्वा लक्ष्मीनारायणोऽथवा ॥
ब्राह्मणो ब्राह्मणी वापि स्वप्ने यस्मै ददाति वा ।
धान्यं पुष्पाञ्जलिं वापि तस्य श्रीः सर्व्वतोसुखी ॥
सर्व्वतोसुखीत्यत्र सर्व्वतः सुखीति च पाठः ।
सुक्ताहारं पुष्पमाल्यं चन्दनञ्च शुभं नरः ।
शुभं नर स्थाने लभेद्विज इति वा पाठः ।
स्वप्ने ददाति विप्रश्च तस्य श्रीः सुर्व्वतः सुखी ॥
गोरोचनां पताकां वा हरिद्राभिक्षुदण्डकम् ।
स्निग्धान्नञ्च लभेत् स्वप्ने तस्य श्रीः सर्व्वतः सुखी ॥
स्निग्धान्नस्थाने स्निग्धान्नमिति वा पाठः ।
ब्राह्मणो ब्राह्मणी वापि ददाति यस्य मस्तके ।
छत्रं वा शुक्लधान्यं वा स च राजा भविष्यति ॥
स्वप्ने रथस्थः पुरुषः शुक्लमाल्यानुलेपनः ।
तस्यो दधि सुक्ले च पायसं वा दृषो भवेत् ॥
स्वप्ने ददाति विप्रश्च ब्राह्मणी वा सुधां दधि ।
प्रशस्तपात्रं तस्मै वा सोऽपि राजा भवेद्ध्रुवम् ॥
ददाति पुस्तकं स्वप्ने यस्मै पुण्यवते द्विजः ।
स भवेद्विश्वविख्यातः कवीन्द्रः पण्डितेश्वरः ॥
यं पाठयति स्वप्ने या मातेव च सुतं यथा ।
सरस्वतीसुतः सोऽपि तत्परो नास्ति पण्डितः ॥
ब्राह्मणः पाठवेद्यश्च पितेव यत्नपूर्व्वकम् ।
ददाति पुस्तकं प्रीत्या स च तत्सदृशो भवेत् ॥
प्राप्नोति पुस्तकं स्वप्ने पथि वा यत्र तत्र वा ।
स पण्डितो यशस्वी च विख्यातश्च महीतले ॥
स्वप्ने यस्मै महामन्त्रं विप्रो विप्रा ददाति चेत् ।
स भवेत् पुरुषः प्राज्ञो धनवान् गुणवान् सुधीः ॥
स्वप्ने ददाति मन्त्रं वा प्रतिमां वा शिलामयीम् ।
यस्मै ददाति विप्रश्च मन्त्रसिद्धिश्च तद्भवेत् ॥
विप्रा विप्रसदृशञ्च दृष्ट्वा गत्वाशिषं लभेत् ।
राजेन्द्रः स भवेद्वापि विद्वान् च कविपण्डितः ॥
शुक्लधान्ययुतां भूमिं यस्मै विप्रः वसुन्धरेत् ।
स्वप्ने च परितुष्टश्च स भवेत् पृथिवीपतिः ॥
स्वप्ने विप्रो रथे कृत्वा नानारत्नं प्रदर्शयेत् ।
चिरजीवी भवेदायुर्धनवृद्धिर्भवेद् ध्रुवम् ॥
विप्रा विप्रश्च सन्तुष्टो यस्मै कन्यां ददाति च ।
स्वप्ने च स भवेन्नित्यं धनाढ्यो भूपतिः स्वयम् ॥
स्वप्ने सरोवरं दृष्ट्वा वसुधं वा नदीं नदम् ।
शुक्लाब्धिं शुक्लशैलञ्च दृष्ट्वा प्रियमवाप्नुयात् ॥"
प्रियं स्थाने श्रियमिति च पाठः ।
यः पश्यति गतं स्वप्ने स भवेच्चिरजीवनः ।
अरोगोऽरोगिणं दृष्ट्वा सुखिनञ्च सुखी भवेत् ॥
दिशा स्त्री यं प्रवदति मम स्वामी भवान् भव ।
स्वप्ने दृष्ट्वा च जागर्त्ति स च राजा भवेद्ध्रुवम् ॥
स्वप्ने च बालिकां दृष्ट्वा लब्ध्वा स्फाटिक-
मालिकाम् ।
इत्यमार्यं शुक्लवर्णं च प्रतिष्ठां लभेद् ध्रुवम् ॥

स्वप्नः

स्वप्ने विप्रो वदति यं मम दासो भवेति च
हरिदासस्य तज्ज्ञानं लब्ध्वा स वैष्णवो भवेत्
स्वप्ने विप्रो हरिः शम्भुर्ब्रह्मणी कमला शिवा ।
शुक्ला स्त्री वेदमाता वा जाह्नवी वा सरस्वती ॥
गोपालिकावेशधरा बालिका राधिका मम ।
बालश्च बालगोपालः स्वप्नविद्भिः प्रकाशितः ॥
एष ते कथितो नन्द सुस्वप्नः पुण्यहेतुकः ।
श्रोतुमिच्छसि किं वा त्वं किं भूयः कथयामि
ते ॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे सुस्वप्नदर्शन
७७ अध्यायः ॥ * ॥

अक्रूरदृष्टसुस्वप्ना यथा,—

"यथाक्रूरः स्वभवनं गत्वा कंसेन प्रेरितः ।
चकार शयनं तस्मै शुक्ला मिष्टान्नमुत्तमम् ॥
सकर्पूरञ्च ताम्बूलं चखाद वासितं जलम् ।
जगाम निद्रां सुखतः सुखसम्भोगमात्रतः ॥
ततो ददर्श सुस्वप्नं पुराणश्रुतिसम्मतम् ।
निशावशेषसमये वायुादिपरिवर्जितः ॥
अरोगी बहुकैशञ्च वस्त्रयुग्मसमन्वितः ।
सुतल्पाशायी सुस्निग्धचिन्ताशोकविवर्जितः ॥
किशोरवयसं श्यामं द्विभुजं सुरलीधरम् ।
पीतवस्त्रपरीधानं वनमालाविभूषितम् ॥
चन्दनोक्षितसर्व्वाङ्गं मालतीमाल्यशोभितम् ।
भूषितं भूषिताङ्गैश्च नवरत्नमणिभूषणैः ॥
मयूरपुच्छचूड़ञ्च वलितं पद्मलोचनम् ।
एवम्भूतं द्विजश्रेष्ठं ददर्श प्रथमे सुने ॥
ततो ददर्श रुचिरां पतिपुत्रवतीं सतीम् ।
पीतवस्त्रपरीधानां रत्नभूषणभूषिताम् ॥
ज्वलत्प्रदीपहस्ताञ्च शुक्लमाल्यकरां वराम् ।
शरच्चन्द्रनिभास्याञ्च वलितां वरदां शुभाम् ॥
ततो ददर्श विप्रश्च कुञ्जरञ्च शुभाशिषम् ।
श्वेतपद्मगतं पूर्णं तुरगञ्च वरोवरम् ॥
ददर्श चित्रितं चारु फलितं पुष्पितं शुभम् ।
आम्रनिम्बनारिकेलगुवाकककदलीतरुम् ॥
शृङ्गं श्वेतपर्व्वञ्च स्वात्मानं पर्व्वतस्थितम् ।
वृषञ्च गजञ्च तरिस्थं तुरगस्थितम् ॥
वीणां वादितवन्तञ्च शुक्लवस्त्रञ्च गायकम् ।
दधिक्षीरयुतान्नञ्च पद्मपत्रस्थमीक्षितम् ॥
लसिविट्सहितान्नञ्च रुदन्तं भीक्षितं तथा ।
शुक्लधान्यपुष्पाक्षतं चरुं चन्दनचर्चितम् ॥
वसुद्रव्यं प्रासादमात्मानञ्च वलोक्षितम् ।
छिन्नभिन्नक्षतान्नञ्च भेदःपूयसमन्वितम् ॥
ततो ददर्श रत्नं मणिशुभञ्च काञ्चनम् ।
सुक्तामाणिक्यरत्नञ्च पूर्णकुम्भं वरं जलम् ॥
सुरभिञ्च सवत्साञ्च दृषभेन्द्रं मयूरकम् ।
शुक्लञ्च सारसं पक्षं छिन्नं खञ्जनमेव च ॥
ताम्बूलं पुष्पमालाञ्च ज्वलदग्निं सुरार्चनम् ।
प्रार्व्वतीप्रतिमां कृष्णप्रतिमां शिवलिङ्गकम् ॥
विप्रबालाञ्च बालञ्च सुपक्वफलितं क्षितिम् ।
देवस्थलीञ्च राजेन्द्र सिंहं आत्मं गुरुं सुरम् ॥
दृष्ट्वा स्वप्नं वसुतत्त्वज्ञो चकारात्मिकमीक्षितम् ।
उद्धवं कथयामास सर्व्वज्ञानान्तमेव च ॥"

इति ब्रह्मवैवर्ते श्रीकृष्णजन्मखण्डे ७०।१-२८॥

दुःस्वप्ना यथा,—

नन्द उवाच।

"श्रुतं सर्वं महाभाग दुःस्वप्नं कथय प्रभो।
उवाच तच्च भगवान् श्रूयतामिति तत्त्वतः॥"

श्रीभगवानुवाच।

"स्वप्ने हसति यो दर्याद्विवाहं यदि पश्यति।
नर्त्तनं गीतमिश्रञ्च विपत्तिस्तस्य निश्चितम्॥
दन्ता यस्य विपीयन्ते विचरन्तश्च पश्यति॥
धनहानिर्भवेत्तस्य पीड़ा चापि शरीरजा॥
अग्निना तु तैलेन यो गच्छेद्दक्षिणां दिशम्।
शरीरमहियारूढो मृत्युस्तस्य न संशयः॥
स्वप्ने चूर्णं जवापुष्पमशोकं करवीरकम्।
विपत्तिस्तस्य तैलञ्च लवणं यदि पश्यति॥
नग्नां कृष्णां छिन्ननासां शूद्रस्य विधवां तथा।
कपर्दकं तालफलं दृष्ट्वा शोकमवाप्नुयात्॥
स्वप्ने रुष्टं ब्राह्मणञ्च ब्राह्मणीं कोपसंयुताम्।
विपत्तिश्च भवेत्तस्य लक्ष्मीर्याति गृहाद्ध्रुवम्॥
वनपुष्पं रक्तपुष्पं पलाशञ्च सुपुष्पितम्।
कार्पासं शुक्लवस्त्रञ्च दृष्ट्वा दुःखमवाप्नुयात्॥
गायन्तीञ्च हसन्तीञ्च कृष्णाम्बरधरां स्त्रियम्।
दृष्ट्वा कृष्णाञ्च विधवां नरो मृत्युमवाप्नुयात्॥
देवता यत्र नृत्यन्ति गायन्ति च हसन्ति च।
आस्फोटयन्ति धावन्ति तस्य देशो विनश्यति॥
वान्तं मूत्रं पुरीषं वा वेत्रं रौप्यं सुवर्णकम्।
प्रलम्बमथवा स्वप्ने जीवितं दशमासिकम्॥
कृष्णाम्बरधरां नारीं कृष्णमालानुलेपनाम्।
दृष्ट्वा हसति यः स्वप्ने तस्य मृत्युर्भविष्यति॥
मृतं वत्सञ्च सुप्तञ्च मृगस्य च नरस्य वा।
यः प्राप्नोत्यस्थिमालाञ्च विपत्तिस्तस्य निश्चितम्।
अग्निना तु घृतेनाथ क्षीरेण मधुनापि वा।
तप्तेनापि गुडेनैव पीड़ा तस्य विनिश्चितम्॥
स्वयं सर्पैर्वृतं रुक्षां योषितं रोहयेत्तनुम्।
तस्यापि च भवेन्मृत्युर्नात्र कार्य्या विचारणा॥
रक्ताम्बरधरां नारीं रक्तमालानुलेपनाम्।
दृष्ट्वा हसति यः स्वप्ने व्याधिस्तस्य विनिश्चितम्॥
अतीतं मस्तकेशञ्च नित्यानाङ्गारमेव च।
भस्मपूर्णां चितां दृष्ट्वा लभते मृत्युमेव च॥
शुष्काणि शुष्ककाष्ठञ्च लवणानि तीक्ष्णमेव च।
अन्नेन सिक्थं कृष्णं वा दृष्ट्वा दुःखं लभेत्
ध्रुवम्॥
वादुकां पङ्कजं रक्तपुष्पमाल्यं भयानकम्।
मांसं मद्यं गुडं वा दृष्ट्वा मद्यो व्रणं लभेत्॥
कण्टकं मरुजं काष्ठं भल्लकं वानरं खरम्।
पूर्यं गोमयसंस्थं स्वप्ने केशं व्याधिकारणम्॥
भस्मात्मकं धूमं शूलं मस्तकस्य रोगिणम्।
रक्ताम्बरञ्च कटिलं शूकरं महिषं खरम्॥
भस्मकारं महाघोरं पङ्कजोपं भयानकम्।
दृष्ट्वा स्वप्ने योगिनिष्ठं विपत्तिं लभते ध्रुवम्॥
कृष्णाक्षरं मे कृष्णञ्च यमदूतं भयङ्करम्।
ब्राह्मणं ब्राह्मणं दृष्ट्वा मृत्युं लभेन्नरः॥
ब्राह्मणो ब्राह्मणीं वापि बालकौ वा सुतौ सुतां।
विहायं क्षुधते कोपात् दृष्ट्वा दुःखमवाप्नुयात्॥
कृष्णपुष्पञ्च तन्माल्यं शुष्कशस्यास्थधारिणम्।
स्वेच्छाञ्च विश्रृताकारां दृष्ट्वा मृत्युं लभेत् ध्रुवम्॥
वाद्यञ्च नर्त्तनं गीतं गायनं रक्तवाससम्।
दृष्ट्वा वाद्यमानन्दं दृष्ट्वा दुःखं लभेद्ध्रुवम्॥
वार्द्धा स्थाने वाद्यमिति वा पाठः।
व्यानन्दं स्थाने व्यानद्धमिति युक्तम्।
मत्स्यादि धारयेद्दर्यो हि तद्भ्रातुर्म्मरणं ध्रुवम्॥
छिन्नं वापि कबन्धं वा विश्रृतं शुष्ककेशिनम्।
छिन्नं शून्यञ्च कुर्व्वन्तं दृष्ट्वा मृत्युं लभेन्नरः॥
मृतो वापि मृता वापि कृष्णा स्वेच्छा भवानका।
उपगूहति यं स्वप्ने तस्य मृत्युर्विनिश्चितः॥
वेश्या दन्ताश्च भग्नाश्च केशाश्चापि पतन्ति च।
धनहानिर्भवेत्तेषां पीड़ा वा तच्छरीरजा॥
उच्चद्रवन्ति यं स्वप्ने श्वश्रिणो दंशिनोऽपि वा।
बालका मानवास्तेन तस्य राजकुलाद्भयम्॥
छिन्नशृङ्गं पतन्तञ्च शिलाशृष्टिं तुषं क्षुरम्।
रक्ताङ्गारं भस्मशृष्टिं दृष्ट्वा दुःखमवाप्नुयात्॥
गृहं पतन्तं शैलं वा धूमकेतुं भयानकम्।
भग्नस्कन्धं तरोर्व्वापि दृष्ट्वा दुःखमवाप्नुयात्॥
रथगेहशैलवृक्षगोहस्तितुरगात् खरात्।
पतन्ति भूमौ ये स्वप्ने विपत्तिस्तस्य सङ्कुला॥
उच्चैः पतन्ति गर्त्तेषु भस्माङ्गारचितासु च।
चारकूपेषु चूर्णेषु मृत्युस्तेषां न संशयः॥
बलाद्गृह्णाति दुष्टश्च क्षुत्तञ्च यस्य मस्तकात्।
पितुर्नाशो भवेत्तस्य गुरोर्व्वापि नृपस्य वा॥
सुरभी यस्य गेहाच्च याति वत्सा सवत्सिका।
प्रयाति पापिनस्तस्य लक्ष्मीरपि वसुन्धरा॥
पाशेन बद्ध्वा वक्षश्च यं गृहीत्वा प्रयान्ति च।
यमदूताश्च ये स्वेच्छास्तस्य मृत्युर्न संशयः॥
ब्राह्मणो ब्राह्मणो वापि ब्राह्मणी वा गुरुस्त्रिया।
परिदृष्टः प्रयति यं विपत्तिस्तस्य निश्चितम्॥
विरोधिनश्च काकाश्च कुक्कुरा भल्लुकास्तथा।
पतन्त्यागत्य यद्गात्रे तस्य मृत्युर्न संशयः॥
महिषा भल्लुका उष्ट्राः शूकरा गर्द्दभास्तथा।
दृष्ट्वा धावन्ति यं स्वप्ने सरोगी निश्चितं भवेत्॥"

तेषां शान्तिर्यथा,—

"रक्तचन्दनकाष्ठानि घृताक्तानि च यो क्षिपेत्।
गायत्र्याश्च सहस्रं वा तेन शान्तिर्विधीयते॥
सहस्रधा जपेद्दर्यो हि भक्त्या तं मधुसूदनम्।
निष्पापोऽपि भवेन्नोऽपि दुःस्वप्नः सुस्वप्नो
भवेत्॥
स्वप्नं वेत्ति हरिं विष्णुं हरिं सर्व्वं जनार्द्दनम्।
ध्यायेन्नारायणमेव यतस्तामाह्यकं शुभम्॥
शुचिः पूर्व्वमुखः धात्री दशकृत्वश्च यो जपेत्।
निष्पापो हि भवेन्नोऽपि दुःस्वप्नः सुस्वप्नो भवेत्॥
विष्णुं नारायणं कृष्णं माधवं मधुसूदनम्।
हरिं नरहरिं रामं गोविन्दं दधिवामनम्॥
शुचिः पूर्व्वमुखो भूत्वा भक्तिश्रद्धायुतो जपेत्।
निष्पापो हि भवेन्नोऽपि दुःस्वप्नः सुस्वप्नो
भवेत्॥
भक्त्या चैतानि भद्राणि दश नामानि यो जपेत्।
शतलक्षो भक्तियुक्तो जप्ता रोगी च रोगतः॥
लक्षधा हि जपेद्यो हि बन्धनान्मुच्यते ध्रुवम्।
जप्ता च दशलक्षेण महाबन्धा प्रमुच्यते॥
दरिद्राणी यतः सुखी दरिद्रो धनवान् भवेत्।
शतलक्षेण जप्ता च जीवन्मुक्तो भवेन्नरः॥
ॐ श्रियं दुर्गां भगवतीं कार्त्तिकेयं दिनेश्वरम्।
धर्म्मं गङ्गाञ्च तुलसीं राधां लक्ष्मीं सरस्वतीम्।
नामान्येतानि भद्राणि जपे त्वा च यो जपेत्।
वाञ्छितञ्च लभेत् सोऽपि दुःस्वप्नः सुस्वप्नो भवेत्॥
ॐ ह्रीं श्रीं क्लीं पूर्व्वं दुर्गतिनाशिन्यै महामायायै स्वाहा।
कल्पवृक्षो हि लोकानां सद्यः सद्यदशाक्षरः।
शुचिश्च दशधा जप्ता दुःस्वप्नः सुस्वप्नो भवेत्॥
शतलक्षजपेनैव मन्त्रसिद्धिर्भवेन्नृणाम्।
सिद्धमन्त्रश्च लभते सर्व्वसिद्धिञ्च वाञ्छितम्॥
ॐ नमो मृत्युञ्जयायेति स्वाहान्तं लक्षधा जपेत्।
दृष्ट्वा च मरणं स्वप्ने शतायुश्च भवेन्नरः॥
पूर्व्वोत्तरमुखो भूत्वा स्वप्नं प्रातः प्रकाशयेत्॥
काश्यपे दुर्गते नीचे देवब्राह्मणनिन्दके।
मूर्खे चैवागमिन्ने च न च स्वप्नं प्रकाशयेत्॥
अश्वत्थे गणके विप्रे पितृदेवार्चनेषु च।
आचार्य्ये वैष्णवे सिद्धे दिवास्वप्नं प्रकाशयेत्॥
इति ते पुण्यमाख्यानं कथितं पापनाशनम्।
धन्यं यशस्यमायुष्यं किं भूयः श्रोतुमिच्छसि॥"

इति ब्रह्मवैवर्ते श्रीकृष्णजन्मखण्डे दुःस्वप्नदर्शनम्
८२ अध्यायः॥ ८॥ कंसदृष्टदुःस्वप्ना यथा,—

नारायण उवाच।

"अथ कंसो विचिन्त्यैवं दृष्ट्वा दुःस्वप्नमेव च।
उत्तस्थौ भयभीतो निराहारो निरुत्सवः॥
पार्श्वं मित्रं बुधगणं बान्धवञ्च पुरोहितम्।
समानीय सभामध्ये तानुवाच सुदुःखितः॥"

कंस उवाच।

"मया दृष्टो निशाशेषे यो दुःस्वप्नो भयप्रदः।
तं निबोध बुधाः सर्व्वे बान्धवाश्च पुरोहित॥
बिभ्रती पीतपुष्पाणां मालां सरक्तचन्दनाम्।
रक्ताम्बरं रक्तगतीच्छं खर्परञ्च भयङ्करम्॥
प्रहस्यात्तट्टहासञ्च लोलजिह्वा भयङ्करी।
चतोवशृङ्गा कृष्णाङ्गी नगरे मम नृत्यति॥
शुक्लकेशी छिन्ननासा कृष्णा कृष्णाम्बरापि सा।
विधवा सा महाशूद्री मामालिङ्गितुमिच्छति॥
मलिनं चैलमञ्चलञ्च बिभ्रती रक्तमर्द्दनात्।
ददाति शूर्पतिलकं कपाले मम वक्षसि॥
कृष्णवर्णानि पक्वानि छिन्नभिन्नानि मस्तक।
पतन्ति क्षत्वा शब्दांश्च शूर्पशालफलानि च॥
दुःखेनो विश्रुताकारो नैक्षो हि रुक्षगर्जनः।
ददाति भस्मशूर्पायां छिन्नभिन्नफलेक्षुकान्॥
महाकाया च दिग्वासा स्त्री पतिपुत्रवती सती।
यमञ्च पूजयित्वाञ्च अभिशप्य पुनः पुनः॥
अङ्गानामोड़माक्षाञ्च रक्तचन्दनचर्चिताम्।
ददाति सर्वं विषञ्च मद्यार्थेनाभिशप्य च॥
शुष्कशङ्खारदृष्टिञ्च भस्मदृष्टिः शवं शवम्।

चर्मं चर्मं रक्तदृष्टिर्भवेच्च नगरे मम ॥
वानरं वायसं श्वानं भल्लुकं शूकरं खरम् ॥
पश्यामि विकृताकारं शब्दं कुर्वन्तमुल्वणम् ॥
पश्यामि शुष्ककाष्ठानां राशिमस्थानकज्वलम् ।
अरणीोदयवेलायां कर्पं छिन्नकरवानि च ॥
पीतवस्त्रपरीधाना शुक्लचन्दनचर्चिता ।
बिभ्रती मालतीमाला रत्नभूषणभूषिता ॥
क्रीडाकमलहस्ता सा सिन्दूरबिन्दुशोभिता ।
कृत्वाभिशापं मां रुष्टा याति मन्मन्दिरात् सती॥
पाशहस्तांश्च पुरुषान् मुक्तकेशान् भयङ्करान् ।
अतिरूक्षांश्च पश्यामि विशतो नगरं मम ॥
नग्ना नारीर्मुक्तकेशीर्नृत्यन्तीश्च गृहे गृहे ।
अतीव विकृताकारा: पश्यामि सस्मिता: सदा ॥
छिन्ननासा च विधवा मद्दाभूमौ दिगम्बरी ।
सा तैलाभ्यङ्गितं मां च करोत्यतिभयङ्करी ॥
निर्व्यामाङ्गारसंयुक्ता भस्मपूर्णा भयङ्करा: ।
अतिप्रभातसमये चिता: पश्यामि सस्मित: ।
पश्यामि च विवाहञ्च वृत्यगीतमहोत्सवम् ।
रक्तवस्त्रपरीधानान् पुरुषान् मुक्तमूर्द्धजान् ॥
रक्तं वमन्तं पुरुषं वृत्यन्तं नग्नमुल्वणम् ।
धावन्तञ्च भयानञ्च पश्यामि सस्मितं सदा ॥
राहुग्रस्तञ्च गगने मण्डलं चन्द्रसूर्ययो: ।
एककाले च पश्यामि सर्व्वग्रासञ्च वान्धवा: ॥
उल्कापातं धूमकेतुं भूकम्पं राष्ट्रविप्लवम् ।
झञ्झावातं महोत्पातं पश्यामि च पुरोहित ॥
वायुना चूर्ण्यमानांश्च छिन्नस्कन्धान् महीरुहान् ।
पतितान् पर्व्वतांश्चैव पश्यामि पृथिवीतले ॥
पुरुषं छिन्नशिरसं वृत्यन्तं नग्नमुत्कटम् ।
मुण्डमालाधरं घोरं पश्यामि च गृहे गृहे ॥
दृप्तं सर्व्वाश्रमं भस्मपूर्णमङ्गारसङ्कुलम् ।
हाहाकारञ्च कुर्व्वन्तं सर्व्वं पश्यामि सर्व्वत: ॥
इत्येवमुक्त्वा राजा स विरराम सभातले ।
श्रुत्वा स्वप्नं बान्धवाश्च गतवक्त्रा निरुद्यमा: ॥
अचार चेतनं सद्य: सत्यकश्च पुरोहित: ।
मत्वा विनाशं कंसस्य यज्ञमागस्य नारद ॥
रुरोद नारीवर्गश्च पिता माता च शोकत: ।
मेनिरे नाशकालञ्च सद्य: स्वप्नमुपस्थितम् ॥",
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ६३ अध्याय: ॥
परशुरामदृष्ट:स्वप्ना: ब्रह्मवैवर्त्ते गणेशखण्डे ३३ अध्याये कार्त्तवीर्य्यार्জ্জুनदृष्ट:स्वप्नास्तत्रैव ३४ अध्याये घोरासुरदृष्ट:स्वप्ना देवीपुराणे २२ अध्याये कालिकापुराणे पुष्याभिषेके ८७ अध्याये मत्स्यपुराणे यात्रानिमित्तस्वप्नाध्याय-स्थने २४२ अध्याये च ते द्रष्टव्या: ॥ (वैद्य-शास्त्रोक्तस्वप्नशकुनं यथा,—
"दुष्टं दूतशकुनं स्वप्नानूर्द्धं प्रचक्षते ।
स्वप्ने मद्यं यद्य प्रेतैर्य: पिबन् कथ्यते जना ।
स मर्त्यो रुग्णता शीघ्रं ज्वरदुःखेन नीयते ॥
रक्तमाल्यानुलेपी यो एवन् दृश्यते स्त्रिया ।
सोऽपक्षिप्तेन महिषव्यराहीयुग्दंष्ट्रिभि: ॥
य: प्रयाति दिशं याम्यां मरणं तस्य यत्नया ।
लम्बाकरुटकिनी वेश्यकाली वा यदि जायते ॥

यस्य तस्याशु गुल्मेन यस्य वह्निमनर्च्चियम् ।
क्षुद्रतो घृतसिक्तस्य नग्नस्योरसि जायते ॥
मद्यं च नग्नेन कुद्देन चण्डालै: सह य: पिबेत् ।
क्षेहं बहुविधं स्वप्ने स प्रमेहेण गच्छति ॥
उन्मादेन जले मज्जेद्यो वृत्यन् राक्षसै: सह ।
अपस्मारेण यो मर्त्यो वृत्यन् प्रेतेन नीयते ॥
यानं खरोष्ट्रमार्জ্জারकपिशार्দূল सूकरै: ।
यस्य प्रेतै: शृगालैर्वा स वृत्योर्वर्त्तते वशे ॥
व्यपप्रश्नाकुलोजंघा विवृद्धस्तद्विधं वमन् ।
न जीवत्यचिरोगाय सूर्य्येन्दुग्रहणीक्षणम् ॥
सूर्य्याचन्द्रमसो: पातदर्शनं दक्षिणाग्रगम् ।
मूर्द्धिवंशलतादीनां समवो वयसां तथा ॥
निलयो सुण्डताकाकगृध्राद्यै: परिवारणम् ।
तथा प्रेतपिशाचस्त्रीव्रविड़ान्त्रगवाशने: ॥
सङ्गो वेत्रलतावंशगुल्मकण्टकसङ्कटे ।
स्वभ्रभ्मशानशयनं पतनं पांशुभस्मनो: ॥
मज्जनं जलपङ्कादौ शौचेन सोतसाहुति: ।
वृत्यवादित्रगीतानि रक्तसस्यस्यधारणम् ॥
वयोऽङ्गदृद्विरभ्यङ्गो विवाह: श्मश्रुकर्म्म च ।
पक्वान्नक्षेहमद्याश्च: प्रच्छर्द्दनविरेचने ॥
हिरण्यलोहयोर्लाभ: कलिर्वैत्यपराजयौ ।
उपानद्युगनाशश्च प्रपात: पादचर्म्मणो: ॥
हर्षो भ्रष्टं प्रकुपिते: पित्तभिक्षावभर्त्सनम् ।
प्रदीप्तदहनश्चन्द्रदन्तदेवतचक्षुषां ॥
पतनं वा विनाशो वा भेदनं पर्व्वतस्य च ।
कानने रक्तकुसुमे पापकर्म्मनिवेदने ॥
चितान्धकारसम्बाधे जनस्याच्च प्रवेशनम् ।
पात: प्रासादशैलादेर्मत्स्येन गमनन्तथा ॥
कायायिगामसौन्यानां नमानां दण्डधारिणाम् ।
रक्ताम्बराणां च स्त्रीणां दर्शनं जातु नेष्यते ॥
कृष्णा पापा स्त्रनाचारा दीर्घकेशनखस्तनी ।
विरागा चाप्यवसना स्वप्नकालनिशा मता ॥
मनोवहानां पूर्णत्वात् स्रोतसां प्रबलेमले: ।
दृश्यन्ते दारुणा: स्वप्ना रोगी यैर्याति पञ्चताम् ॥
अरोग: संभ्रयं प्राप्य कश्चिदेव विमुच्यते ।
दृष्ट: श्रुतोऽनुभूतश्च प्रार्थित: कल्पितस्तथा ॥
भाविको दोषजश्चेति स्वप्न: सप्तविधो मत: ।
तेष्वाद्या निष्फला: पञ्च यथा स्वप्नप्रकृतिर्द्विजा ॥
विस्तृतो दीर्घदृश्योऽति पूर्व्वरात्रे चिरात् फलम् ।
दृष्ट: करोति तुच्छश्च गोसर्गे तदहर्मितम् ॥
निद्रया चानुपहत: प्रतीपैर्व्रचनैस्तथा ॥
याति प्रायोऽल्पफलतां दानहोमजपादिभि: ॥
अकल्याणमपि स्वप्नं दृष्ट्वा तत्रैव य: पुन: ।
पश्येत् सौम्यं शुभं तस्य शुभमेव फलं भवेत् ॥
देवान् द्विजान् गोवृषभान् जीवत: सुहृदो गुरून् ।
साधून् यशस्विनो वह्निमिक्षं स्वच्छान् जलाशयान् ॥
कन्यां कुमारकान् गौरान् शुक्लवस्त्रान् सुतेजस: ।
नराश्वं दीप्तमुं समन्ताद्वृधिरोक्षित: ॥
य: पश्येत्लभते यो वा छत्रादर्शविधामिषम् ।

शुक्ला: सुमनसो वस्त्रमेध्यालेपनं फलम् ॥
शैलप्रासादसफलवृक्षसिंहनरद्विपान् ।
आरोहेन्नोऽश्वयानञ्च तरेन्नदह्रदोदधीन् ॥
पूर्व्वोत्तरेण गमनमभ्यागमनं स्तनम् ।
सम्बाधाग्नि:स्तुतिर्देवै:पित्तभिक्षाभिनन्दनम् ।
रोदनं पतितोत्थानं दिवताक्षावमर्द्दनम् ।
यस्य स्मादायुरारोग्यं वित्तं बहु च सोऽश्नुते ॥"
इति वाभटे शारीरस्थाने षष्ठेऽध्याये ॥)
स्वप्नकृत्, क्ली, (स्वप्नं निद्रां करोतीति। कृ+क्विप्। तुगागमश्च।) सुनिषण्णकम्। सुशुनी भाषा। इति शब्दचन्द्रिका ॥ स्वप्नकारके, त्रि ॥
स्वप्नक्, [ञ्] त्रि, (स्वपितिं तच्छील: इति। स्वप+"स्वपिहनोर्नञिङ्।" ३ । २ । १७२। इति नञिङ्।) निद्राशील:। इत्यमर:। ३ । १ । ३३ ॥ यथा, भट्टि:। ७ । २५ ।
"अहं स्वप्नक् प्रसादेन तव बन्धुभि: सह ॥")
स्वप्नदोष:, पुं, (स्वप्नस्य दोष:।) निद्रावस्थायां रेत:स्खलनम्। इति लोकप्रसिद्धम् ॥ (अस्यौषधं यथा,—
"वटाङ्कुरस्य निर्य्यासान् माक्षिकेण समन्वितान्।
सायं प्रयोज्य मतिमान् स्वप्नदोषं निवारयेत् ॥"
इति वैद्यकम् ॥)
स्वप्नविचारी, [न्] त्रि, स्वप्नविचारकर्त्ता। शुभाशुभस्वप्नशास्त्रज्ञाकर्त्ता। स्वप्नं विचारयतीत्यर्थे णिनिप्रत्ययेन निष्पन्न:॥
स्वभाजनं, क्ली, (स्वस्य भाजनम्।) आत्मदनम्। इत्यमरटीकायां रायमुकुट:। ३ । २ । ७ ॥
स्वभाव:, पुं, (स्वस्य भाव:।) स्वकीयभाव:। तत्पर्य्याय:। संसिद्धि: २ प्रकृति: ३ स्वरूपम् ४ निसर्ग: ५। इत्यमर:। १ । ७ । ३८ ॥ भाव: ६। इति शब्दरत्नावली ॥ सर्ग: ७। इति जटाधर: ॥ स्वत एव आविर्भाव:। यथा,—
"दृष्टिर्हेतुमपेक्षी तु स्वभावोऽयं प्रकीर्त्तित:।
निसर्गश्च स्वरूपञ्चेत्येषोऽपि भवति द्विधा ॥
निसर्ग: सुदृढ़ाभ्यासजन्य: संस्कार उच्यते।
अजन्यस्तु स्वत: सिद्ध: स्वरूपं भाव इष्यते ॥
इत्युज्ज्वलनीलमणि: ॥
"वचनेषु च वृद्धौ च स्वभावे च चारुचेत:।
आचारे व्यवहारे च ज्ञायते हृदयं नृणाम् ॥"
लोका: कर्म्मवशीभूतास्तत् कर्म्म यत् कृतं पुरा।
स्वकर्म्मणां फलं भुङ्क्ते जन्तुर्जन्मनि जन्मनि ॥
केचिद्दृष्टात्तीति भवेत् सुकृतेन च कर्म्मणा।
केचिद्दृष्टन्ति दैवेन स्वभावेनेति केचन ॥
त्रिविधाश्च मता वेदे वेदवेदाङ्गपारगा: ॥
स्वयञ्च कर्म्मजनकस्तत् कर्म्म दैवकारणम्।
स्वभावो जायते नृणामालय: पूर्व्वकर्म्मणा ॥"
स एवात्मा सर्व्वसिद्ध: सर्व्वेषाञ्च फलप्रद:।
स च सृजति दैवञ्च स्वभावं कर्म्म एव च ॥"
अहो श्रीकृष्णदासानां व: स्वभाव: सुनिर्म्मल:।
कृतभार्य्यसुखितस्य न प्रशाम्य रिपुं गुरु: ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे। ५७। २१—२८। ३१। ४१ ॥ आत्मा च।

सदिनं दुर्दिनस्यैव सर्वं कर्मोद्भवे भव।
तनु कर्म तपसां साध्यं कर्मणाश्च शुभाशुभम्॥
तपः स्वभावसाध्यश्च स्वभावोऽभ्यासतो भवेत्।
संसर्गसाध्योऽभ्यासश्च संसर्गः पुण्यतो भवेत्॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ४३।५१-५२॥
अन्यच्च। चाणक्यवाक्यम्।
"स्वभावो यादृशो यस्य न जहाति कदाचन।
अङ्गारः शतधौतेन मलिनत्वं न मुञ्चति॥
सर्वस्य हि परीक्ष्यन्ते स्वभावा नेतरे गुणाः।
अतीत्य हि गुणान् सर्वान् स्वभावो मूर्द्धि वर्त्तते॥"
इति हितोपदेशे मित्रलाभनामप्रथमकथा-संग्रहः॥

स्वभूः, पुं, (स्वेनैव भवतीति। भू+क्विप्।) विष्णुः। इत्यमरः। १।१।१८॥ ब्रह्मा। इति मेदिनी॥ (यथा, भागवते। ३।१२।५।
"तान् बभाषे स्वभूः पुत्रान् प्रजाः सृजत पुत्रकाः॥")
शिवश्च॥

स्वमेकः, पुं, संवत्सरः। यथा,—
"स्वमेकमेकं वरदा लभा भवति चण्डिका।
रुधिरेणोरणस्थेह तर्पिता विधिवन्नृप॥"
स्वमेकं संवत्सरम्। स्वमेकः संवत्सरः यज्ञो मासः। इति श्रुतेः। उरणस्य मेषस्य। इति तिथ्यादितत्त्वम्॥

स्वयं, [म्] अ, आत्मना। आपनि इति भाषा। इत्यमरः। ३।४।१६॥ आत्मनेत्यर्थे स्वयं तृतीयान्तम्। यथा। स्वयम्भूः। इति भरतः॥ (यथा, रघुः। १।७०।
"यथा दीनं विधातर्मां कर्षं पश्यन्न दूयसे।
सिक्तं स्वयमिव स्नेहाद् वन्यमाश्रमपादपम्॥")

स्वयंवरा, स्त्री, (स्वयं+वृ+अच्। टाप्।) स्वयं वृणोति पतिं या। स्वेच्छया पत्यन्वेषिणी। तत्पर्य्यायः। पतिंवरा २ वर्या ३। इत्यमरः। २।६।७॥ स्वयंवरे वर्णनीयानि यथा। प्रकीरत्या १ मण्डपज्यता २ मण्डपसज्यता ३ राजपुत्र्याः सन्निधौ राजसौन्दर्य्यादिवर्णनेच्छा-वर्णनम् ४। इति कविकल्पलतायां १ स्तवके ३ कुसुमम्॥

स्वयंहारिका, स्त्री, स्त्रीविशेषः। सा च ब्रह्म-मानसस्वदुःखस्य निर्माण्यां पत्न्यां जाता। यथा,—
"दुःसहस्याभवत् भार्य्या निर्माणिर्नाम नामतः।
जाता कन्येतु पाण्यायां सुतौ चाण्डालसर्गजात॥
तयोरपत्यान्यभवन् जगद्व्याप्तानि योगिभ।
अष्टौ कुमाराः कन्याश्च तथाष्टावतिभीषणाः॥
नियोजिका वै प्रथमा तथैवान्या विरोधिनी।
स्वयंहारकरी चैव भामनी क्रतुहारिका॥
क्षुत्निद्रौजघरे चान्ये तयोः कर्णे सुदारुणे।
प्रथमो दैगणो नाम कन्या चातिभयावहा॥
एतासां कर्म वक्ष्यामि दोषप्रशमनञ्च यत्।
भोज्यम् खलाग्रहाणोऽतः पयः सर्पिःसमन्वितम्॥
सप्तद्विसप्तद्विमद्वादपहन्ति च कन्यका।
सा स्वयंहारिकेत्युक्ता सदान्तर्हृगततत्परा॥
महानसादर्हसिहमन्नागारस्थितम् तथा।
परिवेश्यमानञ्च सदा सार्द्धम् भुङ्क्ते च भुञ्जता॥
उच्छिष्टानां मनुष्याणां हरत्यन्नञ्च दुर्हरा।
कर्म्मान्ताङ्गारशालाभ्यः सिद्धार्द्धं हरति द्विज॥
गोक्षीरनेभ्यश्च पयः क्षीरहारी सदैव सा।
दध्नो घृतं तिलात्तैलं सुरागारात्तथा सुराम्॥
रङ्गं कुसुम्भकादिभ्यः कार्पासात् सूत्रमेव च।
सा स्वयंहारिका नाम हरत्यविरतं द्विज॥"
तच्छान्तिर्यथा,—
"कुर्य्यात् शिखण्डिकोद्वहां रत्नार्थे क्षत्रिम-स्त्रियम्।
रत्ना चैव गृहे लेख्या वर्ण्या चोच्छिष्टता तथा॥"
शिखण्डिकोद्वहाम् स्थाने शिखाण्डिनी वहनिमिति च पाठः।
"होमाग्निदेवताधूपभक्षणा च परिक्रिया।
कार्य्या क्षीरादिभाण्डानामेवं तद्गच्छति क्षतम्॥"
इति मार्कण्डेयपुराणे दुःसहवंशोत्पत्तिनामाध्यायः॥

स्वयंकृतः, स्त्री, (स्वयमात्मना कृतः।) आत्मकृतः। यथा,—
"ऋत्विक् च त्रिविधो दृष्टः पूर्व्वैर्व्वृष्टः स्वयंकृतः।
यदृच्छया च यः कुर्य्यादार्त्विज्यं प्रीति-पूर्व्वकम्॥"
इति तिथ्यादितत्त्वम्॥

स्वयंगुप्ता, स्त्री, (स्वयमात्मना गुप्ता) शूकशिम्बिका। इति शब्दरत्नावली। (गुणादायोऽस्याः शूकशिम्बिकाशब्दे ज्ञातव्याः॥)

स्वयंदत्तः, पुं, (स्वयमात्मना दत्तः) द्वादशविध-पुत्रान्तर्गतपुत्रविशेषः। इति जटाधरः॥ तल्लक्षणम् यथा। दत्तात्मा तु स्वयंदत्तः। इति याज्ञवल्क्यवचनम्॥ दत्तात्मा तु पुत्रो मातापितृविहीनस्ताभ्यां सृष्टो वा तवाहं पुत्रो भवामीति स्वयंदत्त उपगतः। इति मिताक्षरा॥

स्वयमुपस्थितः, त्रि, (स्वयमात्मना उपस्थितः।) स्वयमागतः। यथा,—
"यदि त्यजसि मां मूढ़ कामात् स्वयमुपस्थिताम्।
युवयोश्च विपत्तिस्तु भविष्यति न संशयः॥
कामातुरां यौवनस्थां भार्य्यां स्वयमुपस्थिताम्।
न त्यजेद्धर्म्मभीरुश्च सुतं मथ्नन्दिने पुरा॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ६२। ७०। ७५। अध्यायः॥ (तथा च भागवते।१।१३।१०॥
"गन्धर्व्यश्चिरं दुर्विषहं नृणां स्वयमुपस्थितम्।
नाधेदयन् सकरुणो दुःखितान् द्रष्टुमक्षमः॥"

स्वयंप्रभः, पुं, (स्वयं प्रभा यस्य।) चतुर्विंशतिभाग-षष्ठदन्तर्गतचतुर्थार्हन्। इति हेमचन्द्रः॥ (स्वयं प्रकाशी, त्रि। यथा, भागवते।३।१६।२७।
"अथ वै सुतयो द्रष्टुं नयनानन्दभाजनम्।
वैकुण्ठं तदधिष्ठानं विबुधैश्च स्वयंप्रभम्॥"
स्त्री, अप्सरोविशेषः। यथा, महाभारते।३।४३।२६॥
"घृताची मेनका रम्भा पूर्व्वचित्तिः स्वयंप्रभा॥"
रसायनाधिकारोक्तसोमसंज्ञकौषधिविशेषः।
स्वयंप्रभो महासोमो यद्यपि गरुडाहृतः॥"
इति सुश्रुतेचिकित्सितस्थाने २६ अध्याये॥)

स्वयम्भुः, पुं, (स्वयम्भवतीति। स्वयं+भू+डुः।) ब्रह्मा। इति द्विरूपकोषः॥

स्वयम्भुवः, पुं, (स्वयम्भवतीति। भू+कः।) आदि-मनुः। ब्रह्मा। इति केचित्॥ (स्वयमुत्पन्न, त्रि। यथा, महाभारते।१२।३३७।८॥
"कृते युगे महाराज पुरा स्वायंभुवेऽन्तरे।
नरो नारायणश्चैव हरिः कृष्णः स्वयंभुवः॥")

स्वयम्भुवा, स्त्री, (स्वयम्भवतीति। भू+कः। टाप्) धूम्रपत्रा। इति राजनिर्घण्टः॥

स्वयम्भूः, पुं, (स्वयम्भवतीति। भू+क्विप्।) ब्रह्मा। इत्यमरः। १।१।१६॥ जिनचक्र-वर्त्तिविशेषः। तत्पर्य्यायः। ऋषभनाथः २। इति हेमचन्द्रः॥ कालः। इति शब्दरत्नावली॥ कामदेवः। विष्णुः। शिवः। इति केचित्॥ मायपर्णी। लिङ्गिनी। इति राजनिर्घण्टः॥ (स्वयमुत्पन्ने, अपौरुषेये च त्रि॥ यथा मनुः।१।३।
"त्वमेकोऽस्य सर्वस्य विधानस्य स्वयंभुवः।
अचिन्त्यस्याप्रमेयस्य कार्य्यतत्त्वार्थवित् प्रभो॥")

स्वर, तृ क आच्छादे। इति कविकल्पद्रुमः॥ (अदन्त-चुरा०-परo-सकo-सेट्।) वकारयुक्तः रेफोपधः। स्वरयत्यतिरथोऽपि न कञ्चन परि-ग्रहम्। इति भट्टौषधिः। षष्ठस्वरयुक्तः इति चतुर्भुजः। स्वरयति। इति दुर्गादासः॥

स्वर्, अ, स्वर्गः। (यथा, रामायणे।२।७६।८।
"त्वयि प्रयाते स्वस्तात रामे च वनमाश्रिते।
विधवा पृथिवी राजंस्त्वया हीना न राजते॥")
परलोकः। इत्यमरः।१।१।५।३।४।२५३॥ आकाशम्। शोभनम्। इति शब्दरत्नावली॥ (व्याहृतिविशेषः। यथा, मनुः।२।७६॥
"अकारञ्चाप्युकारञ्च मकारञ्च प्रजापतिः।
वेदत्रयान्निरदुहद्भूर्भुवः स्वरितीति च॥")

स्वरः, पुं, (स्वर+अच्) उदात्तादिस्वयः। इत्य-मरः। १।६।४॥ उदात्तानुदात्तस्वरितास्त्रयः स्वरशब्दवाच्याः। स्वरन्ति शब्दायन्ते स्वराः। सृ ञ शब्दोपतापयोः। अन् उत्तेरादीयते उदा-ग्यते उदात्तः। उदाङ्पूर्व्वादाञ्। कर्म्मणि क्तः। तद्विपरीतोऽनुदात्तः। समाहृतः स्वरितः स्वरः। सञ्ज्ञायोरिति इतोऽस्य जाते इति इतः। यदाहुः। उच्चैरुदात्तः। नीचैरनुदात्तः। समाहारः स्वरितः। इति। छान्दसस्तु नोक्तः। तदुक्तं उदात्तश्चानुदात्तश्च स्वरितश्च प्रचितस्त्रयो वयः स्वराः। चतुर्थः प्रश्लिष्टो नोक्तो यतोऽसौ छान्दसः स्मृतः। इति भरतः। यथा, माघे।२।८५।

स स्वरस्तस्य वर्णस्य वर्णस्वर इहोच्यते ॥
स प्रोक्ता ऽ-अ-आ वर्णा नामादौ सन्ति ते न हि ।
चेद्भवन्ति तदा ज्ञेया ग च ङास्ते यथाक्रमम् ॥
यदि नाम्नि भवेद्वर्णः संयुक्ताक्षरलक्षणः ।
ग्राह्यस्तस्यादिमो वर्णः इत्युक्तं ब्रह्मयामले ॥
इति वर्णस्वरचक्रम् ॥*॥

अस्वरे मेषसिंहालि: कन्यायुग्मककर्कटाः ।
उस्वरे च धनुर्मीनौ एस्वरे च तुलावृषौ ॥
ओस्वरे मकरकुम्भौ च राशिसम्भूग्रहस्वराः ।
स्वराधः स्थापयेत् खेटं राशेर्यो यस्य नायकः ॥
मेषवृश्चिकयोर्भौमः शुक्रो वृषतुलाश्रयोः ।
बुधः कन्यामिथुनयोः कर्कटस्य च चन्द्रमाः ॥
स्यान्मीनधनुषोर्जीवः शनिर्मकरकुम्भयोः ।
सिंहास्याधिपतिः सूर्यः कथितो गणकोत्तमैः ॥
इति ग्रहस्वरचक्रम् ॥*॥

षोडशार्णाक्षरोवर्गः स्यात् कादिवर्गास्तु पञ्चकाः ।
चतुर्थो यशो वर्गो सप्ता वर्गेषु कीर्त्तिताः ॥
नान्त्यो वर्णाः स्वरा ज्ञेया वर्गाणां वर्णसंख्यया ।
त्रिखिताः पञ्चभिर्भक्ताः शेषं जीवस्वरं विदुः ॥
इति जीवस्वरचक्रम् ॥*॥

मेषवृषाक्षरे च मिथुनाद्याः षड्भूचकाः ।
मिथुनांशाक्षयश्चैव इकारे सिंहकर्कटौ ।
कन्या तुला उकारे च वृश्चिकस्य त्रयोऽंशकाः ।
एकारे वृश्चिकस्यान्त्याः कार्मुकः षड्भागादिमाः ॥
अंशाक्षयो धनुषस्यान्त्याः कुम्भमीनौ तथास्वरे ।
एवं राशिस्वरः प्रोक्तो नवांशप्रक्रमोदयः ॥
इति राशिस्वरचक्रम् ॥*॥

अकारे सप्त ऋक्षाणि रेवत्यादिक्रमेण च ।
पञ्च पञ्च इकारादावेवमृक्षस्वरोदयः ॥
इति नक्षत्रस्वरचक्रम् ॥*॥

माद्या वर्णस्वरात् सप्ता सप्ता जीवस्वरात्तथा ।
पिण्डीकृते स्वरैः शेषः पिण्डस्वर इहोच्यते ॥
इति पिण्डस्वरचक्रम् ॥*॥

मात्रादिवर्णभेदेन स्वरानुत्थाय नामतः ।
योगे प्रश्नेऽथ नष्टे च शेषो योगस्वरो मतः ॥
इति योगस्वरचक्रम् ॥

प्रोक्ता नैसर्गिकाश्चाष्टौ मात्राद्या नामजाः स्वराः ॥॥
मात्रादिस्वरचक्रप्रयोगेन कर्त्तव्यकर्माणि यथा,—
"साधनं मन्त्रयन्त्रस्य यन्त्रयोगश्च सर्व्वदा ।
अघोमुखानि कर्माणि मात्रास्वरवशे कुरु ॥*॥
वर्णस्वरज्ञ सर्व्वं कर्त्तव्यञ्च शुभाशुभम् ।
सिद्धिदः सर्व्वकार्य्येषु गुरुकार्ये विशेषतः ॥*॥
मारणं मोहनं स्तम्भं विद्वेषोच्चाटने वशम् ।
विवादं विषयं घातं कुर्य्यादृक्षस्वरोदये ॥*॥
यानपानादिकं सर्व्वं यन्त्रालङ्कारभूषणम् ।
विद्यारम्भं विवाहञ्च कुर्य्यात् जीवस्वरोदये ॥*॥
प्रासादारामदर्शनानि देवताकल्पनानि च ।
राजाभिषेचनं दीक्षा कर्त्तव्यं राशिके स्वरे ॥*॥
शान्तिकं पौष्टिकञ्चैव प्रवेशो बीजवापनम् ।
स्त्रीविवाहस्तथा यात्रा कर्त्तव्या भस्वरोदये ॥*॥
शत्रूणां देशभङ्गश्च कौटयुद्धञ्च वेष्टनम् ।
सेनाध्यक्षस्तथा मन्त्री कर्त्तव्यः पिण्डकोदये ॥*॥
योगेन साधयेद् योगं देहस्थं ज्ञानसम्भवम् ।
आग्नेयं शाम्भवञ्चैव शाक्तेयञ्च तृतीयकम् ॥*॥
तिथिवारौ च नक्षत्रं पृथक् पृथक् प्रभाविनम् ।
यत् तदेकत्र सम्मिल्य कुर्य्याद्वर्णस्वरोदये ।
यस्य नामादिको वर्णस्तिथिवारर्क्षजं शुभम् ।
तद्दिनं वर्जयेत्तस्य हानिमृत्युकरं यतः ॥
अनेन स्वरयोगेन शत्रूणां मारणादिकम् ।
मन्त्रयन्त्रक्रियां मोहं साधयेत्तद्दिने बुधः ॥"
इत्यादि नरपतिजयचर्य्यास्वरोदयधृतब्रह्मयामलम् ॥*॥ नासावायुः । इति मेदिनी ॥ तच्च अजपाजपप्रमाणं यथा,—
"हंस हंसेति यन्मन्त्रं जीवो जपति सर्व्वदा ।
शतैः षड्भिश्च युक्तानि सहस्राण्येकविंशतिः ॥
अजपा नाम गायत्री योगिनां मोक्षसाधनम् ।
अस्याः सङ्कल्पमात्रेण सर्व्वपापैः प्रमुच्यते ॥"
इति महाभारते आश्वमेधिकपर्व्वणि उत्तरगीता ॥*॥ अपि च ।
"इडा च पिङ्गला चैव नासिकाद्वारगामिनी ।
आमूलाद्ब्रह्मरन्ध्रान्तं सुषुम्ना मध्यगामिनी ॥
वहत्यूर्द्धसुखेनैव प्राणवायुश्च सर्व्वदा ।
पानं करोत्यपानश्च अधोवक्त्रेण चैव हि ॥
शक्तिरूपः स्थितश्चन्द्रो वामनासापुटे तथा ।
शिवरूपधरः सूर्य्यो दक्षनासापुटे तथा ॥
हकारे निःसरेद्वायुः सकारश्च प्रवेशने ।
अजपानाममन्त्रोऽयं जीवो जपति सर्व्वदा ॥*॥
मुक्तिसोपानेऽप्युक्तम् ।
षट्शतानि दिवारात्रौ सहस्राण्येकविंशतिः ।
एतत्सङ्ख्यं महामन्त्रं जीवो जपति सर्व्वदा ॥
आधारे सुषुम्णे योगीन्द्रो जपमेवं समर्पयेत् ।
समर्पणक्रमश्चैव उच्यते गुरुतन्त्रतः ॥
मूलाधारे गणेशाय षट्शतञ्च समर्पयेत् ।
तत्रैव ब्रह्मणे नित्यं षट्सहस्रं निवेदयेत् ॥
स्वाधिष्ठाने च हरये षट्सहस्रं निवेदयेत् ।
षट्सहस्रं मणिपूरे हराय च समर्पयेत् ॥
जीवात्मने सहस्रञ्च नत्वैव परिकल्पयेत् ।
परमात्मने सहस्रन्तु अनाहते निवेदयेत् ॥
सहस्रन्तु परशिवे सहस्रारे समर्पयेत् ।
एवं समर्पयेद्यस्तु पापैः पुण्यैर्न लिप्यते ॥"
इति श्रीपूर्णानन्दविरचितश्रीतत्त्वचिन्तामणौ नक्षत्रसारपरिच्छेदे षट्चक्रकथनम् ॥*॥ अन्यत् स्वरोदयशब्दे द्रष्टव्यम् ॥ * ॥ * ॥

अथ पक्षिस्वरज्ञानम् ।
"पोतकीस्वरविचारमिदानीं
कुर्महे यमधिगम्य मनुष्यः ।
भाविकर्मफलपाकपरीक्षा-
स्वतृचमो भवति योगिमदृश्यः ॥
लाभदक्षिणि चिलीति निनादः
शूकि शूलि निनदोऽपि तथैव ।
कुचि कुचि निनदोऽपि जलार्थे
याहतः कूचि कूचि स्वरयुक्तेः ॥
कीरु कीरु इति यो मधुरोऽसौ
कामतस्तु निनदः खलिताख्यः ।
स्नाद्यर्थाय नियमेन च चौ चि-
र्निस्वनो ज्ञसुकुनाद इहार्थः ॥
कण्टचिरि चिरीति विराव-
चीकुचीकुरिति चान्यविरावौ ।
एवमीदृगफला दश नादाः
प्रस्फुटा निगदिता भगवत्या ॥
प्रत्येकमाख्यातफलं नराणां
यस्मिन् दशानां शकुनस्वराणाम् ।
जानात्यवश्यं पुरुषो विशेषं
प्रयोजनं भावि स वेत्त्यशेषम् ॥*॥
वामो निनादः फलदः प्रवासे
स्याद्दक्षिणेऽनर्थफलाभिधेतुः ।
पृष्ठस्थितानां फलदश्च पृष्ठे
निषेधकारी पुनरग्रभागे ॥
युद्धप्रवेशेऽथ गृहप्रवेशे
श्रेयः प्रदद्यान्निनदोऽग्रसंस्थः ।
वामः पुनः पाण्डवयुद्धवत्या
भवत्यभीष्टप्रतिकूलवर्त्ती ॥ * ॥
पार्थिवश्चिलिचिलिस्वर उक्तः
शूलि शूलिरिति यः स तथैव ।
कूचि कूचि कुचि कुचीति च शब्दौ
ह्यावितौ निगदितौ पुनराप्यौ ॥
कीरु कीररिति तैषसंज्ञ-
स्त्वेजसाश्च निनदाः खलिताख्याः ।
मारुतावपि चिलिस्वनवीचि-
निस्वनौ निगदितौ मुनिसुखैः ॥
अम्बरश्चिरि चिरीति निनाद-
श्चीकु चीकुरिति तादृगुदश्वः ।
पञ्च चैव निनदा दश नादा
भूतपञ्चकनिवासभवेन ॥
क्रमादमी पार्थिवनादपूर्व्वाः
पञ्चापि शब्दाः शकुने कदेयाः ।
भवन्ति चेत्तन्नियतं भवन्ति
फलानि पूर्णान्यधिरेव पुंसाम् ॥
क्रमेण पृथ्वीजलपावकानां
भवन्ति शब्दा यदि कृष्णिकायाः ।
मृगोरगेभ्योऽभ्यधिकानि तूर्णं
तदा फलानि ध्रुवमुद्दिशन्ति ॥
अम्बरे चिरि चिरीति निनाद-
श्चीकु चीकुरिति तादृगुदश्वः ।
वह्निस्वरस्तत्फलमत्यनर्थं स्यात् ।
वायव्यशब्दौ यदि नामगौ वा
भूत्वा फलं गच्छति तत् समस्तम् ।
शान्तौ निनादौ पृथिवीजलाख्यौ
दीप्तौ समीराम्बरनामधेयौ ।
तेजःप्रधानो विषयावसन्नो
भवेत् सदं येन फलेन नाद्यः ।

शुभेषु कार्य्येष्वशुभाय शान्तौ
दीप्तौ भवादौ भयनाशनाय।
विपर्यये द्वावपि न प्रशस्ता-
वस्तित्वनास्तित्वफलौ यतस्तौ॥"
इति वसन्तराजशाकुने स्वरप्रकरणम्॥

स्वरपत्तनं, क्ली, (स्वराणां षड्जादीनां पत्तन-मात्रयस्थानम्।) सामवेदः। इति त्रिकाण्ड-शेषः॥

स्वरभङ्गः, पुं, (स्वरस्य भङ्गो यस्मात्।) गल-रोगविशेषः। अस्य विवरणं स्वरभेदशब्दे द्रष्टव्यम्॥

स्वरभङ्गी, [न्] पुं, (स्वरस्य भङ्गोऽस्यास्तीति। इनिः।) पक्षिविशेषः। यथा,—
स्वरभङ्गी नवो दृङ्नुविरुट्शकुनभेदकाः॥"
इति शब्दचन्द्रिका॥

स्वरभेदः, पुं, (स्वरस्य भेदो यस्मात्।) (स्वरभङ्ग-रोगः। यथा। अथ स्वरभेदाधिकारः। तत्र स्वरभेदस्य निदानसम्प्राप्तिपूर्ब्बकं लक्षणमाह।
"श्लेष्मचभाषणविषाध्ययनाभिघातैः
सन्दूषणैः प्रकुपिताः पवनादयस्तु।
स्रोतःसु ते स्वरवहेषु गताः प्रतिष्ठां
कुर्य्युः स्वरं भवति चापि हि षड्विधः सः॥
अध्ययनमुच्चैर्वेदादिपाठः। अभिघातः कण्ठादि-देशे लगुडादिभिः। एतैरश्लेष्मभाषणादिभि-श्चतुर्भिः संदूषणैरन्यैरपि निर्ब्बुद्धिहेतुभिः। स्रोतःसु सुश्रुतोक्तेषु चतुर्षु। प्रतिष्ठां स्थितिम्। कुर्य्युः स्वरमिति लक्षणम्। स्वरभेदः षड्विधः। वातपित्तकफसन्निपातक्षयभेदोभवभेदैः॥* तत्र वातिकस्वरभेदिनो लक्षणमाह।
"वातेन क्षामनयनाननमूत्रवर्चा
भिन्नं भृशं वदति गद्गदवत् स्वरञ्च।"*।
तेनाह।
"पित्तेन पीतनयनाननमूत्रवर्चा
भूयात्तनुश्च स च दाहसमन्वितेन॥"
गलदाहोऽत्र वचनसमय एव बोद्धव्यः॥* ॥
कफेनाह।
"भूयात् कफेन सततं कफरुद्धकण्ठः
श्राव्यं शृणोत्यति चापि दिवाविशेषात्॥"
दिवा सर्व्वरात्रिभिः कफस्याप्यौभावात्। *।
सन्निपातेनाह।
"सर्व्वात्मके भवति सर्व्वविकारसम्य-
क्चाधाप्रसाध्यलक्षणैः स्वरभेदमाहुः॥"*॥
अथक्षयमाह।
"शूयेत वाक्क्षयकृते क्षयमाप्नुयाच्च
स्यादेषु चापि हतवाक्परिवर्ज्जनीयः॥"
वाक् शूयेत यद्यपि निःसरति क्षयञ्चाप्नुयात् वामेव। *। भेदोभयमाह।
"यस्तार्क्ष्यसं स्वरमलक्षणवर्त्म चिरेण
भेदोऽन्यथाऽनुदति दिग्धगलस्तृषार्त्तः॥"
तार्क्ष्यसं गलमध्य एव स्वरं वदति। दिग्धगलः लेपना श्लेष्मलावलिप्तगलः। तृषार्त्तः भेदोपद्र-वाभ्यां रोधात्। *। व्याधिनाह।

"चीणस्य दृष्टस्य क्षतस्य चापि
चिरोत्थितो यश्च सदोपजातः।
भेदस्विनः सर्व्वसमुद्भवश्च
स्वरामयो यो न च सिद्धिमेति॥"
चीणस्य क्षयरोगिणः। क्षतस्य व्रणितस्य॥* ॥
अथ स्वरभेदस्य चिकित्सा।
"वातादिजनितश्वासकासग्ना ये प्रकीर्त्तिताः।
योगास्तानत्र युञ्जीत यथादोषं चिकित्सकः॥
वाते सलवणं तैलं पित्ते सर्पिः समाक्षिकम्।
कफे सक्षारकटुकक्षौद्रः कवल इष्यते॥
गले तालुनि जिह्वायां दन्तमूलेषु चाश्रितः।
तेन निष्कृष्यते श्लेष्मा स्वरश्चाशु प्रसीदति॥
आद्ये कोष्णं जलं पेयं शुक्ता घृतगुडौदनम्।
क्षीरानुपानं पित्तोत्थे पिबेत् सर्पिरतन्द्रितः॥
पिप्पलीं पिप्पलीमूलं मरिचं बिल्वभेषजम्।
पिबेन्मृद्वग्नि मतिमान् कफजे स्वरसंक्षये॥
निदिग्धिका तुला ग्राह्या तदर्द्धं यष्टिकस्य तु।
तदर्द्धं चित्रकस्यापि दशमूलस्य तत्समम्॥
जलद्रोणद्वये क्वाथ्यं गृह्णीयादाढकं ततः।
पूते क्षिपेत्तदर्द्धन्तु पुराणस्य गुड़स्य च॥
सर्व्वमेकत्र कृत्वा तु लेहवत् साधु साधयेत्।
अष्टौ पलानि पिप्पल्याश्चिनातकपलं तथा॥
मरिचस्य पलं चैकं सर्व्वमेकत्र चूर्णितम्।
मधुनः कुड़वं दत्त्वा तदर्द्धीयाद्यथानलम्॥
निदिग्धिकावलेहोऽयं भिषग्भिर्भुक्तिभिर्म्मतः।
स्वरभेदहरो मुख्यः प्रतिश्यायहरस्तथा॥
कासश्वासाग्निमान्द्यादीन् गुल्ममेहगलामयान्।
आनाहं सूत्रकृच्छ्राणि हन्याद्गण्डार्ब्बुदानि च॥"
निदिग्धिकावलेहः॥* ॥
"रङ्गनाभिः सुरक्ष्मैलालवङ्गकुसुमान्वितैः।
त्वक्क्षीरी चेति लेहोऽयं सर्पिर्मधुसमायुतः॥
ब्राह्मी वचाभया वासा पिप्पली मधुसंयुता।
यस्य प्रयोगात् सन्नाहात् किन्नरैः सह
गायति॥"
इति स्वरभेदाधिकारः॥ इति भावप्रकाशः॥*॥
अन्यच्च।
"विभीतकस्य वै चूर्णं पिप्पलीसैन्धवस्य च।
पीतं सकाङ्क्षिकं हन्ति स्वरभेदं महेश्वर॥"
इति गारुड़े १८१। २८॥
(तथास्य चिकित्सान्तरं यथा,—
"भृङ्गराजास्तावल्ली वासकदशमूलकाक्षमर्द-
रसैः।
सर्पिः सपिप्पलीकं सिद्धं स्वरभेदकासशिम-
धुना॥"
इति भृङ्गराजाद्यं घृतम्।
इति वैद्यकचक्रपाणिसंग्रहे स्वरभेदाधिकारः॥
तथास्य पथ्यापथ्यनियमो यथा,—
"खेदो वस्तिर्धूमपानं विरेकः कवलग्रहः।
नस्यं भाले शिरावेधो यवा लोहितशालयः॥
एणाटवीतान्त्रचुकैकिमांसरसाः सुरा।
नीलकण्ठः काकमाची जीवन्ती बालमूलकम्॥
द्राक्षा पथ्या मातुलुङ्गं लशुनं लवणाम्लकम्।
ताम्बूलं मरिचं सर्पिः पथ्यानि स्वरभेदिनाम्॥"
अपथ्यानि यथा,—
"आमं कपित्थं वकुलं शालूकं जम्बवानि च।
तिन्दुकानि कषायाणि वर्म्मि स्वप्नं प्रजल्पनम्।
अतुमानञ्च यत्नेन स्वरभेदी विवर्ज्जयेत्॥"
इति वैद्यकपथ्यापथ्यविधिः॥)

स्वरमण्डलिका, स्त्री, (स्वराणां मण्डलमस्यन्तेति। स्वरमण्डल+टन्।) वीणाविशेषः। इति शब्द-रत्नावली॥ क्वचित् पुस्तके सुरखण्डलिका इति पाठः॥

स्वरलासिका, स्त्री, (स्वरैर्लसतीति। लस+ण्वुल्-टापि अतइत्वम्।) वंशी। इति शब्दरत्नावली॥

स्वरसः, पुं, (स्वस्य रसः। स्व आत्मीयो रसो वा।) शिलापिष्टकल्कः। यथा,—
"स्वो रसः स्वरसः प्रोक्तः कल्को दृषदि
पेषितः॥"
इति शब्दचन्द्रिका॥* ॥
कषायविशेषः। यथा,—
"सद्यः क्षुण्णादार्द्रतादक्षयन्त्रादिपीड़नात्।
यो रसस्त्वभिनिर्यांति स्वरसः स प्रकीर्त्तितः॥"
इति वैद्यकम्॥
अन्यच्च।
"पिष्टः कल्को विनीयश्च स्वरसः पीड़ितो रसः।
क्वाथः कषायो निर्य्यूहो निर्य्यासो वेष्टकस्तथा॥"
इति रत्नमाला॥
("यन्त्रप्रपीड़नाद्यद्यत्सः स्वरस उच्यते॥"
इति चरके सूत्रस्थाने चतुर्थेऽध्याये॥
"शुष्कद्रव्यमुपादाय स्वरसानामसम्भवे।
द्विगुणे साध्य ग्राह्यं पादावशेषितम्॥"
इति वैद्यकचक्रपाणिसंग्रहे स्वरसाधिकारे॥)

स्वरा, स्त्री, ब्रह्मणो ज्येष्ठपत्नी। गायत्रीसपत्नी। यथा,—
"चाक्षुषस्यान्तरे पूर्व्वं मनोर्दैवः पितामहः।
सह्याद्रिशिखरे रम्ये यजनायोद्यतोऽभवत्॥
स ज्ञात्वा यज्ञसम्भारान् सर्व्वदेवगणैर्वृतः।
युक्तो हरिहराभ्यां हि तत्रैवः शिखरं ययौ॥
भृग्वादयो मुनिगणा ऋत्विर्त्ते ब्रह्मदैवते।
तस्य दीक्षाविधानाय समाजं चक्रुराहृताः॥
अथ ज्येष्ठा सरां पत्नीमाज्ञायाथ्वकुरीश्वराः।
सा अग्नेरायथौ तावत् भृगुर्विष्णुसुवाच ह॥*॥
भृगुरुवाच।
विष्णो स्वरा त्वयाहूता साध्वायाति नहि
त्वरम्।
सङ्कोचातिक्रमे चैककार्य्ये दीक्षाविधिः कथम्॥
विष्णुरुवाच।
नायाति चेत् स्वरा शीघ्रं गायत्र्याश्च विधी-
यताम्।
अन्यापि न भवेदस्य भार्य्या किं गुरुकर्म्मणि॥
नारद उवाच।
एवमेव हि सर्व्वोऽपि विष्णुवाक्यमनन्यत।
तच्छ्रुत्वा स भृगुर्ब्रह्मा गायत्रीं ब्रह्मजज्ञिवान्।

पृथ्वीतत्त्वस्य वर्णः पीता चतुष्कोणाकारेण लक्षयेत् ।
नाभौ वा हृदिये वापि पञ्चतत्त्वस्थितः शिवे ।
जलतत्त्वस्य वर्णश्च तिमिरकुलसंस्थः प्रभञ्जनः ।
मध्ये तु वृत्तिपो ज्ञेया नाभः सर्वत्र सर्वदा ।
तेजः स्वतुरस्रः स्यात्तिर्यक् श्वेताटयेत् सुधीः ।
मध्ये सत्त्वं विजानीयान्मोक्षः सर्वत्र सर्वगे ।"
इति ज्ञानार्णवे प्रवनविषयादिः ६७ अध्यायः ॥४॥

अथाह ।

जीवानुवाच ।

"देवदेव महादेव तत्त्वज्ञ परमेश्वर ।
कथयस्व प्रभो ज्ञानं कृपां कृत्वा ममोपरि ॥
कथं ब्रह्माण्डसंभूतं कथं वा परिवर्तते ।
कथं विलीयते देव वद ब्रह्माण्डनिर्णयम् ॥

श्रीमहादेव उवाच ।

तत्त्वाद्ब्रह्माण्डसंभूतं तत्त्वेन परिवर्तते ।
तत्त्वेन लीयते देवि तत्त्वाद्ब्रह्माण्डनिर्णयः ॥

देव्युवाच ।

तत्त्वमेव परं सूक्ष्मं निष्कलं तत्त्ववेदिभिः ।
तत्त्वसंज्ञं किं देव तत्त्वमेव प्रकाशय ॥

ईश्वर उवाच ।

निरञ्जनो निराकार एकदेवो महेश्वरः ।
तस्माद्वाकाशमुत्पन्नं आकाशाद्वायुसम्भवः ॥
वायोस्तेजस्समुत्पन्नं तेजस्तः सृष्ट्यापसुद्भवः ।
एतानि पञ्चतत्त्वानि विलोमानि च पञ्चधा ॥
तेभ्यो ब्रह्माण्डसंभूतं तेनैव परिवर्तते ।
विलीयते च तत्रैव तत्त्वे रमते पुनः ॥ ५ ॥
पञ्चतत्त्वमये देहे पञ्चतत्त्वानि सुन्दरि ।
तत्त्वस्वरूपेण वर्णैस्ते ज्ञायते तत्त्वयोगिभिः ॥
अथ एव प्रवक्ष्यामि शरीरस्थं स्वरोदयम् ।
ओंकारस्वरूपेण भवेद् ज्ञानं त्रिकालगम् ॥
शुक्लाद्यं शुक्लवर्णं सारसूपकारप्रकाशकम् ।
इदं शरीरगं ज्ञानं ज्ञानिनां मस्तके स्थितः ॥
तस्मात् तत्त्वाधारं ज्ञानं सुखेन सत्यमक्षयम् ।
आत्मनि आत्मिके लोके आधारस्थात्मिके स्थले ॥
ज्ञानी पुरुषे महाकारे शुक्लवर्णे त्रिकोणके ।
तत्रस्थं तु शरीरे च देवदेव स्वरोदयम् ॥
यदि च पुरुषे शुक्ले ब्रह्माण्डे शुक्लकोणके ।
तत्रस्थं तु शरीरं स्वरज्ञानं न दीयते ॥ ६ ॥
प्रभुर्यं कथितं देवि पुंदेहस्य ज्ञानमुत्तमम् ।
येन विज्ञानमात्रेण सर्वज्ञत्वं प्रजायते ॥
स्वरे वेदाश्च शास्त्राणि स्वरे ज्ञानमनुत्तमम् ।
स्वरे मन्त्रेण यैर्लोकाः स्वरे ब्रह्मस्वरूपकः ।
स्वरयोगेन वैद्यो ज्ञानयोगं प्रजायते ॥
ज्ञानयोगो यथा ब्रह्मा शिरोयोगेन यदुः ।
ज्ञानयोगेन तथा ज्ञानं स्वरयोगेन सर्वदा च ॥
एतज्ज्ञानविहीनस्तु यो ज्ञानानि न मुञ्चति ।
आकारे वा विकारादि मुक्तिस्तस्य न जायते ।
तस्मात्सर्वं मुखं कृत्वा स्वरज्ञानं समाचरेत् ।
ब्रह्मज्ञानमयज्ञानं यदि वेत्ति हि सिद्धिदम् ।
ब्रह्मविष्णुश्च रुद्रश्च सदा ब्रह्माण्डेश्वरः ।
स्वरज्ञानात् परं गुह्यं न वा दृष्टं न वा श्रुतम् ॥
शक्तुं दृष्यात् स्वरबलेनैव मित्रसमागमम् ।
लक्ष्मीप्राप्तिः स्वरबलैः कीर्तिः स्वरबलेनैव ॥
कन्याप्राप्तिः स्वरबलैः स्वरबले राजदर्शनम् ।
स्वरबलैर्दैवतासिद्धिः स्वरबलैः क्षितिपो वशः ॥
स्वरबलैर्गम्यते देशे भोज्यं स्वरबलेनैव ।
लघु दीर्घं स्वरबलैर्मलद्वैव निवारयेत् ॥
सर्वशास्त्रपुराणादिस्तुतिवेदाङ्गपूर्वकम् ।
स्वरज्ञानात् परं मित्रं नास्ति किञ्चिद्वरानने ॥
नामरूपादिकाः सर्वे मिथ्या सर्वे कविभ्रमाः ।
अज्ञानमोहिता मूढा यावत्तत्त्वं न विद्यते ॥
इदं स्वरोदयं शास्त्रं सर्वशास्त्रोत्तमोत्तमम् ।
बालघटप्रकाशार्थं प्रदीपकलिकोपमम् ॥
यस्मै कस्मै परस्मै वा न प्रोक्तं प्रब्रवीतवे ।
तस्मादेतत् स्वयं ज्ञेयमात्मनैवात्मनात्मनि ॥
न तिथिर्न च नक्षत्रं न वारश्चन्द्रदेवताः ।
न तिथिर्न यतीपातो विष्टिर्व्याक्षयैव च ॥
कुयोगा नैव देवेशि प्रभवन्ति कदाचन ।
प्राप्ते स्वरबले सिद्धिं सर्वमेव फलं शुभम् ॥ ८ ॥
देहमध्ये स्थिता नाड्यो बहुरूपाः सविस्तराः ।
ज्ञातव्याश्च बुधैर्नित्यं स्वदेहे ज्ञानहेतवे ॥
नाभिस्थानककन्दोर्ध्वं मङ्गुरादेव निर्मिताः ।
द्विसप्ततिसहस्राणि देहमध्ये व्यवस्थिताः ।
नाड्यस्ता मुख्यतो ज्ञेया मुक्तिभुक्तिप्रदायिनी ।
ततो दशोर्ध्वगा नाड्यो दशैवाधः प्रतिष्ठिताः ॥
देहे तिर्यग्गता नाड्यस्तुर्विंशतिसंख्यया ।
प्रधाना दश नाड्यस्तु दश वायुप्रवाहकाः ॥
तिर्यगूर्ध्वमधस्ताद्वा वायुर्देहे समन्वितः ।
चक्रवत् स्थिता देहे सर्वाः प्राणसमाश्रिताः ॥
तासां मध्ये दश श्रेष्ठा दशानां तिस्र उत्तमाः ।
इडा च पिङ्गला चैव सुषुम्ना च ह्तौयिका ॥
गान्धारी हस्तिजिह्वा च पूषा चैव यशस्विनी ।
अलम्बुषा कुहूश्चैव शङ्खिनी दशमी तथा ॥
इडा वामे स्थिता भागे दक्षिणे पिङ्गला तथा ।
सुषुम्ना मध्यदेशे तु गान्धारी वामचक्षुषि ॥
दक्षिणे हस्तिजिह्वा च पूषा कर्णे च दक्षिणे ।
वामकर्णे यशस्विनी वाक्यसम्भवा ।
कुहूश्च लिङ्गदेशे तु मूलस्थाने च शङ्खिनी ।
एवं द्वारं समाश्रित्य तिष्ठन्ति दशनाड्यिकाः ।
इडा पिङ्गला सुषुम्ना च प्राणमार्गे समाश्रिताः ।
एता हि दश नाड्यस्तु देहमध्ये व्यवस्थिताः ।
तासामपि चतस्रोऽपि नाडीनां प्रवदाम्यहम् ।
प्राणोत्पानः समानश्चोदानो व्यानश्चैव च ।
नागः कूर्मश्च कृकरो देवदत्तो धनञ्जयः ।
एषु प्राणो वहेन्नित्यमन्यो मुद्गलके ।
समानो नाभिदेशे तु उदानः कण्ठमध्यगः ।
व्यानो व्यापी शरीरेषु प्रधानाः पञ्च वायवः ।
प्राणाद्याः पञ्च विख्याता नागाद्याः पञ्च वायवः ।
उद्गारे नाग आख्यातः कूर्मो उन्मीलने स्मृतः ।
कृकरः क्षुत्करो ज्ञेयो देवदत्तो विजृम्भणे ।
न जहाति मृते कापि सर्वव्यापी धनञ्जयः ।
एते नाडीषु सर्वासु भ्रमन्ते जीवरूपिणः ॥
प्रकटप्राणसञ्चारं लक्षयेत् देहमध्यतः ।
इडापिङ्गलासुषुम्नाभिर्नाडीभिस्त्रिदशैर्बुधः ॥
इडा वामे च विज्ञेया पिङ्गला दक्षिणे स्थिता ।
इडानाड्यास्थिता वामा ततो यस्ता च पिङ्गला ॥
इडायां संस्थितश्चन्द्रः पिङ्गलायाञ्च भास्करः ।
सुषुम्ना ब्रह्मरूपेण ब्रह्मरूपेण हंसरूपकः ॥
हंकारो निर्गमे प्रोक्तः सकारस्तु प्रवेशने ।
हंकारः शिवरूपेण सकारः शक्तिरुच्यते ॥
शक्तिरूपः स्थितश्चन्द्रो वामनाड्याप्रवाहकः ।
दक्षनाड्याप्रवाहश्च ब्रह्मरूपी दिवाकरः ॥
श्वासे सकारसंज्ञे तु यदानं दीयते बुधैः ।
तदानं जीवलोकेऽस्मिन् कोटिकोटिगुणं भवेत् ॥
अनेन लक्षयेद् योगी चैकचित्तः समाहितः ।
सर्वमेव विजानीयान्मार्गं तत्त्वस्वरूपयोः ॥
ध्यायेत्तत्त्वं स्थिरे जीवे अस्थिरे न कदाचन ।
इत्यविद्यिर्भवेत्तस्य महाकामो जयस्तथा ॥
चन्द्रसूर्यौ यदाभ्यासौ वै कुर्वन्ति सदा नराः ।
अतीतानागतज्ञानं तेषां हस्तगतं सदा ॥
वामे चाप्यतरूपस्या जगदाप्यायिनी परा ।
दक्षिणा चरते भागे जगदुत्पादयेत् सदा ॥
मध्यमा भवति क्रूरा हुडा सर्वत्र कर्मसु ।
सर्वत्र शुभकार्येषु वामा भवति पुष्टिदा ॥
निर्गमे च शुभा वामा प्रवेशे दक्षिणा शुभा ।
शुभकार्ये शुभा वामा दक्षिणा क्रूरकर्मसु ॥
चन्द्रः समस्तु विज्ञेयो रविस्तु विषमः सदा ।
चन्द्रः स्त्री पुरुषः सूर्यश्चन्द्रो गौरो रविः सितः ॥
इडा पिङ्गला सुषुम्ना च तिस्रो नाड्याः प्रकीर्तिताः ।
इडायाश्च प्रवाहेण सौम्यकर्माणि कारयेत् ॥
पिङ्गलायाः प्रवाहेण रौद्रकर्माणि कारयेत् ।
सुषुम्नायाः प्रवाहेण सिद्धिमुक्तिफलानि च ॥९॥
आदौ चन्द्रः सिते पक्षे भास्करस्तु सितेतरे ।
प्रतिपक्षो दिनाद्याहुः शेषाणि क्षोणि क्रमोदये ॥
सार्धसप्तघटिका ज्ञेया शुक्ले कृष्णे त्रयो रविः ।
वहत्येकदिनेनैव यथायष्टिघटीक्रमात् ॥
वहेत्तावद्घटीमध्ये पञ्चतत्त्वानि निर्दिशेत् ।
प्रतिपक्षो दिनाद्याहुर्विपरीते विपर्ययः ॥
शुक्लपक्षे वहेद्वामा कृष्णपक्षे च दक्षिणा ।
ज्ञातीयात् प्रतिपत्पूर्वं योगी तत्त्वमानसः ॥
उदयास्तक्रमायेन एवं यावत् गतो यदि ।
उदेति शुद्धमेवात्मं विपरीते विपर्ययम् ॥
अष्टार्द्धं वारयेद्वायौ दिवा वामे दिवाकरः ।
एकधाकरणे योगी न योगी नाथ जायते ॥
सूर्येण वहते सूर्यचन्द्रश्चन्द्रेण वहते ।
यो जानाति क्रियाभेदं योगेशत्वं वशयेत्
तथात् ॥१०॥
गुरुशुश्रूषणपरो वामरे वामनादिधा ।

स्वरोद

सिद्धिदा सर्व्वकार्य्येषु शुक्लपक्षे विशेषतः ॥
सूर्य्याङ्गारकसौरीणां वासरे दग्धनाड़िका ।
चान्द्रेषा चरकार्य्येषु कृष्णपक्षे विशेषतः ॥
एकैकस्य घटीपञ्चक्रमेणैवोदयन्ति च ।
क्रमादेकैकनाड्यन्तु तत्त्वानां पृथगुद्भवः ॥
अहोरात्रस्य मध्ये तु ज्ञेया द्वादश संक्रमाः ।
दृषकर्कटकन्यालिनक्रमीने निशाकरः ॥
मेषे सिंहे च धनुषि तुलायां मिथुने घटे ।
उदयो दक्षिणे ज्ञेयः शुभाशुभविनिर्णयः ॥*॥
तिष्ठेत् पूर्व्वोत्तरे चन्द्रः सूर्य्यो दक्षिणपश्चिमे ।
वामाचारप्रवाहेण न गच्छेत् पूर्व्व उत्तरे ॥
दक्षनाड़ीप्रवाहे तु न गच्छेत् याम्यपश्चिमे ।
परिपन्थिभयं तस्य गतोऽसौ न निवर्त्तते ॥
तस्मात्तत्र न गन्तव्यं बुधैः सर्व्वहितैषुभिः ।
तदा तत्र तु संघातस्त्वरैव न संशयः ॥
सूर्य्योदये यदा सूर्य्यचन्द्रचन्द्रोदये यदा ।
सिध्यन्ति सर्व्वकार्य्याणि दिवारात्रिगतान्यपि ॥
शुक्लपक्षे द्वितीयायामर्के वहति चन्द्रमाः ।
दृश्यते लाभदः पुंसां सोमे सौम्यं प्रजायते ॥
चन्द्रकाले यदा सूर्य्यः सूर्य्यचन्द्रोदये भवेत् ।
उद्वेगः कलहो दानिः शुभं सर्व्वं निवारयेत् ॥*॥
विपरीतलक्षणम् ।
यदा प्रत्यूषकाले तु विपरीतोदयो भवेत् ।
चन्द्रस्थाने वहत्यर्कौ रविस्थाने च चन्द्रमाः ॥
प्रथमे मानसोद्वेगं धनहानिं द्वितीयके ।
तृतीये गमनं प्रोक्तमिष्टनाशं चतुर्थके ॥
पञ्चमे राज्यविध्वंसं षष्ठे सर्व्वार्थनाशनम् ।
सप्तमे व्याधिदुःखानि अष्टमे मृत्युमादिशेत् ॥
कालचक्रे दिनान्यष्टौ विपरीतं यदा भवेत् ।
तदा दुष्टफलं प्रोक्तं किञ्चिन्मूने तु शोभनम् ॥
प्रातर्मध्याह्नयोश्चन्द्रः सायंकाले दिवाकरः ।
तदा नित्यं भयं लाभं विपरीतन्तु दुःखदम् ॥
दक्षिणे यदि वा वामे यत्र संक्रमते शिवः ।
तत्पादमग्रतः कृत्वा निःसरेत् निजमन्दिरे ॥
चन्द्रः समगतः कार्य्यो रविस्तु विषमः सदा ।
पूर्णधारं पुरस्कृत्य यात्रा भवति सिद्धिदा ॥
चन्द्रधारे चतुष्पादं पञ्चपादाश्च भास्करे ।
स्थानं गमनं श्रेष्ठं साधयेदुभयत्रयम् ॥
यत्राङ्गे चरते वायुस्तदङ्गस्य करस्थलम् ।
सुगीतितो सुखं मृत्वा लभते वाञ्छितं फलम् ॥
यत्रस्थे तथा चार्द्धे यदातिगमनेऽपि च ।
यदि वहते नाड़ी चार्द्धं मलिकरादिशेत् ॥
न हानिः कलहो नैव कष्टकैर्नापि भिद्यते ।
स्थिरकर्म्मसु सर्व्वेषु सर्व्वसिद्धिर्ध्रुवं नृणाम् ॥
गुरुशुक्लसमायोगे अग्नेयीमिश्रदायिकः ।
पूर्णाङ्गे यद्द कर्त्तव्या कार्य्यसिद्धिमभीप्सता ॥
चार्द्धे पूर्णे यदि पूर्णा रिक्तिकेऽपि शिवा ।
चन्द्रोऽस्मिन् कालिको न कर्त्तव्यं विषमासनम् ॥
अहोरात्रमाद्यान्ते अर्के उत्पातविग्रहाः ।
कर्त्तव्याः सन्धि विज्ञाने चन्द्रभास्करयोगिनः ॥
पूर्वदेशे दिवाकर्त्तव्यं गमनं पूर्वदक्षिणे ।
चन्द्रस्तेषु दोषं तु सन्धाविति वैदिक ॥

स्वरोद

यत्किञ्चिन् पूर्व्वसूचितं लाभादिसमरागमः ।
तत् सर्व्वं पूर्णनाड़ीषु जायते निश्चितकल्पकम् ॥
शून्यनाड्यां रिपुं जेतुं यत् पूर्व्वं प्रतिपादितम् ।
जायते नान्यथा चैव यथा सर्व्वज्ञभाषितम् ॥
रिपुं जेतुमित्यत्र विषमस्तमिति च पाठः ।
व्यवहारे खलोच्चाटे देषिविद्यादिवञ्चकाः ।
कुपितस्वामिचौराद्याः पूर्णस्था स्युर्भयङ्कराः ॥
दूराध्वनि शुभचन्द्रो निर्विघ्नमिष्टसिद्धिदः ।
प्रवेशकार्य्यहेतुः स्यात् सूर्य्यः शीघ्रं प्रशस्यते ॥
अयतो वामिका श्रेष्ठा पृष्ठतो दक्षिणा शुभा ।
वामे च वामिका प्रोक्ता दक्षिणे दक्षिणा स्मृता ॥
चन्द्रचारे विषं हन्ति सूर्य्यो बालावधं नयेत् ।
सुषुम्नायां भवेन्मोक्ष एक एव त्रिधा स्मृतः ॥
अयोग्ये योग्यता नाड़ी योग्यस्थानेऽप्ययोग्यता ।
कार्य्यानुबन्धतो जीवः कथं स्वं समाचरेत् ॥
शुभाशुभानि कार्य्याणि क्रियन्तेऽहर्निशं यदा ।
तदा कार्य्यानुबन्धेन कार्य्यं नाड़ीप्रचालनम् ॥*॥

अथ इड़ा ।

स्थिरकर्म्मण्यलङ्कारे दूराध्वगमने तथा ।
आश्रमे धर्म्मप्रासादे वस्तूनां संग्रहेऽपि च ॥
वापीकूपतड़ागादिप्रतिष्ठा स्तम्भदेवयोः ।
यात्रादाने विवाहे च वस्त्रालङ्कारभूषणे ॥
भ्रान्तिकं पौष्टिकं चैव दिशोषधिरसायने ।
स्वस्वामिदृष्टने मैत्रे वाणिज्ये धनसंग्रहे ॥
गृहप्रवेशे सेवायां क्रय्यां बीजादिवापने ।
शुभकर्म्मणि सर्व्वो च निर्म्मले च शुभः शशी ॥
चिन्तारम्भादिकार्य्येषु वान्धवानाञ्च दर्शने ।
जलमोक्षेषु धर्म्मेषु शीक्षायां मन्त्रसाधने ॥
कालविज्ञानसूत्रेषु चतुष्पाद्गृहागमे ।
कलाद्याधिचिकित्सायां स्वामिसम्बोधने तथा ॥
गजाश्वारोहणे धन्वी गजाश्वानाञ्च बन्धने ।
परोपकरणे चैव निधीनां स्थापने तथा ॥
गीतवाद्येऽपि वृत्तौ च गीतशास्त्रविचारणे ।
पुरग्रामप्रवेशे च तिलके क्षत्रधारणे ॥
पुत्रजन्मनि विवादे च त्वरिते मूच्छितेऽपि वा ।
क्षत्रनगरामिसम्बन्धे धान्यादिदारसंग्रहे ॥
स्त्रीणां दत्तादिभूषायां क्षत्रियागमने तथा ।
गुरुपूजा विवादेषु चालनञ्च वहानने ॥
दृढायां सिद्धिदं प्रोक्तं योगाभ्यासादिकर्म्म च ।
सर्व्वापि वर्ज्जयेद्वायुं सैव आकाशमेव च ॥
सर्व्वमार्गेषु सिध्यन्ति दिवारात्रिगतान्यपि ।
सर्व्वेषु शुभकार्य्येषु चन्द्रचारः प्रशस्यते ॥*॥

अथ पिङ्गला ।

कठिनक्रूरविद्यानां पठने पाठने तथा ।
स्त्रीसङ्गवेषरागमने मद्यमांसाधिरोहणे ॥
शत्रुकार्य्ये सुरापाने वीरसत्त्वानुधावने ।
शत्रुसंग्रहणाद्यादिविषदानादिवैरिणि ॥
शस्त्राभ्यासे च गमने शस्त्रागमनुधावने ।
दृढकाष्ठपाषाणरत्नधर्म्मेष्वादरे ॥
गजाश्वे शस्त्रसङ्गे दुर्गाधर्म्मनरोदये ।
क्रूरे चौर्ये सशस्त्रादिरक्षणाधनबाहने ॥

स्वरोद

यात्रामे मारणोच्चाटे षट्कर्म्मादिकसाधने ।
नदीजलौघतरणे मैथुने लिपिलेखने ॥
मारणं मोहनं स्तम्भं विद्वेषोच्चाटनं वशम् ।
प्रेरणाकर्षणे क्षोभे दाने च क्रयविक्रये ॥
खड्गयुद्धे वैरियुद्धे भोगे वा राजदर्शने ।
भोज्ये स्नाने व्यवहारे क्रूरे दीप्ते रविः शुभः ॥
सुक्तमात्रेण मन्दाग्नौ स्त्रीणां वश्यादिकर्म्मणि ।
शयनं सूर्य्यवाहेन कर्त्तव्यन्तु सदा बुधैः ॥
क्रूराणि यानि कर्म्माणि चराणि विविधानि च ।
तानि सिध्यन्ति सूर्य्येण नात्र कार्य्या विचारणा ॥*॥

अथ सुषुम्ना ।

चरं वामे चरं दक्षे यदा वहति मारुतः ।
सुषुम्ना सा च विज्ञेया सर्व्वकार्य्यहरा स्मृता ॥
तस्यां नाड्यां स्थितो वह्निर्ज्वलन्तं कालरूपिणम् ।
विद्युवन्तं विजानीयात् सर्व्वकार्य्यविनाशनम् ॥
यदानुक्रमसुसङ्क्रम्य यस्य नाड़ीद्वयं वहेत् ।
तदा तस्य विजानीयादशुभं सप्तपञ्चितम् ॥
चरं वामे चरं दक्षे विषमं भावमादिशेत् ।
विपरीतफलं ज्ञेयं ज्ञातव्यञ्च वरानने ॥
उभयोरेव सञ्चारे विद्युवन्तं समादिशेत् ।
न कुर्य्यात् क्रूरसौम्यानि तत्सर्व्वं निष्फलं भवेत् ।
जीविते मरणे प्रश्ने लाभालाभौ जयाजयौ ।
विद्युवे विपरीतं स्यात् संस्मरेच्छङ्करीश्वरम् ॥
ईश्वरस्मरणं कार्य्यं योगाभ्यासादिकर्म्मसु ।
अन्यत्तत्र न कर्त्तव्यं जयलाभसुखार्थिभिः ॥
सूर्य्येण वहमानायां सुषुम्नायां सुदुर्म्मतिः ।
शापं दद्यात् वरं दद्यात् सर्व्वथा च तदन्यथा ।
नाड़ीसंक्रमणे काले तत्त्वसंक्रमणे तथा ।
शुभं किञ्चिन्न कर्त्तव्यं पुण्यदानादि कोटिधा ॥
विषमस्योदये यात्रां मनसापि न चिन्तयेत् ।
यात्रा हानिकरी तस्य खलु क्लेशो न संशयः ॥
पुरो वामोर्द्धतश्चन्द्रो दक्षाधः पृष्ठतो रविः ।
पूर्णरिक्तविवेकोऽयं ज्ञातव्यो देशिकैः सदा ॥
ऊर्द्धवामायतो दूती ज्ञेयो वामपथि स्थितः ।
पृष्ठे दक्षे तथाधस्तात् सूर्य्यवाहगतः शुभः ॥
अनादिविषमं सन्धिं निराधारं निराकुलम् ।
परे ब्रह्मणि विलीयेत सा सन्ध्या सन्धिरुच्यते ॥
न सन्ध्यां सन्धिमित्याहुः सन्ध्या सन्धिर्निगद्यते ।
विद्युवत् सन्धिगः प्राणः सा सन्ध्या सन्धिरुच्यते ॥
न वेदं वेदमित्याहुर्वेदे वेदो न विद्यते ।
परात्मा विद्यते येन स वेदो वेद उच्यते ॥"

इति नाड़ीभेदः समाप्तः ॥*॥

अथ तत्त्वनिर्णयः ।

ईश्वरोवाच ।

"देवदेव महादेव संसारार्णवतारक ।
ब्रूहि मे हृदयं रहस्यं यदि मे प्रभो ॥

ईश्वर उवाच ।

शरभाङ्गं रहस्यं तु न कस्यचिदुदीरितम् ।
शून्यागारगतो योगी न योगी पवनो मतः ॥
मध्यनाड्यां भवेत् सृष्टिस्तत्त्वं विद्धीपते ।

पञ्चतत्त्वं परं तत्त्वं तत्त्वातीतं निरञ्जनम् ॥
तत्त्वानां नाम विज्ञेयं सिद्धियोगेन योगिनाम् ।
भूतानां दृश्यचिह्नानि जानन्ति हि स्वरोत्तमाः ॥
पृथिव्यापस्तथा तेजो वायुराकाशमेव च ।
पञ्चभूतात्मकं सर्वं यो जानाति स पूजितः ॥
सर्वलोकेषु जीवानां न देहे भिन्नतत्त्वकम् ।
भूर्लोकात् सत्यपर्यन्तं नाड़ीभेदः पृथक् पृथक् ॥*
वामे वा दक्षिणे वापि उष्वाः पञ्च कीर्तिताः ।
अथवा तत्त्वविज्ञानं शृणु वक्ष्यामि सुन्दरि ॥
प्रथमे तत्त्वसंख्यायां द्वितीये श्वाससञ्चिये ।
तृतीये स्वरचिह्नानि चतुर्थे स्थानमेव च ॥
पञ्चमे तस्य वर्णश्च षष्ठे तु प्राणमेव च ।
सप्तमे स्वादुसंयुक्तमष्टमे गतिलक्षणम् ॥
एवमष्टविधं प्राणं विद्युवन्तं चराचरम् ।
स्वरात् परतरं देवि नान्यथा त्वमुजासने ॥
निरीक्षितव्यं यत्नेन यदा प्रत्यूषकालतः ।
कालस्य वञ्चनार्थाय कर्म कुर्वन्ति योगिनः ॥
भ्रुवोरन्तरकौ मध्याङ्गुल्यौ नासापुटद्वये ।
वदनप्रान्तयोरन्ते तर्जन्यौ तु दृगन्तयोः ॥
अस्यान्तरं पार्थिवादितत्त्वज्ञानं भवेत् क्रमात् ।
पीतश्वेतारुणश्यामैर्निर्भ्रुभिर्निरुपाधि खम् ॥
दर्पणेन समालोक्य श्वासं तत्र विनिक्षिपेत् ।
आकारैस्तु विजानीयात् तत्त्वभेदं विचक्षणः ॥
चतुरस्रं चार्द्धचन्द्रं त्रिकोणं वर्तुलं स्मृतम् ।
बिन्दुभिस्तु नभो ज्ञेयमाकारैस्तत्त्वसञ्चयम् ॥
मध्ये पृथ्वी ह्यधश्चापश्चोर्ध्वं वहति चानलः ।
तिर्यग् वायुप्रचारश्च नभो वहति संक्रमे ॥*॥
माधुर्यं मधुरं स्वादु कषायं जलमेव च ।
तिक्तं तेजश्च वायुश्च आकाशं कटुकं तथा ॥
अधश्चाङ्गुलं वह्नेश्चतुरङ्गुलम् ।
द्वादशाङ्गुलमाधिक्यं षोड़शाङ्गुलवारुणम् ॥
आपः श्वेताः क्षितिः पीता रक्तवर्णो हुताशनः ।
मारुतो नीलजीमूत आकाशं भूमिवर्णकम् ॥*॥
स्कन्धदेशे स्थितो वह्निः नाभिमूले प्रभञ्जनः ।
जानुदेशे महीतोयं पादान्ते मस्तके नभः ॥
ऊर्ध्वं मृत्युरधः शान्तिस्तिर्यग्गुच्चाटनं तथा ।
मध्ये क्षमां विजानीयात् नभः सर्वत्र मध्यगम् ॥
पृथिव्यां स्थिरकर्माणि चरकर्माणि वारुणे ।
तैजसे शमकार्याणि मारणोच्चाटने ऽनिले ॥
व्योम्नि किञ्चित् कर्तव्यमभ्यसेत् योगसेवया ।
शून्यता सर्वकार्येषु नात्र कार्या विचारणा ॥*
पृथ्वीजलाभ्यां सिद्धिः स्यात् मृत्युर्वह्नौ वायौ-
ऽनिले ।
नभसि निष्फलं सर्वं ज्ञातव्यं तत्त्ववेदिभिः ॥
चिरलाभः क्षितौ ज्ञेयस्तृतीयात्तोयतत्त्वतः ।
हानिः स्याद्वह्निवाताभ्यां नभसो निष्फलं
भवेत् ॥
पीतः शुक्रेमेध्यगोऽसृग्यात्र गुरुश्चन्द्रिम ।
कपोतः पार्थिवो वायुः स्थिरकार्यप्रसाधकः ॥
अधोगामी गुरुध्यानः शीघ्रगः शीतलः स्मृतः ।
यः षोड़शाङ्गुलो वायुः स प्रायः शुभकर्मसाधनः ॥
आयुर्बलाधानकरश्च शीघ्रमध्यतुरङ्गलः ।

ऊर्ध्ववाही तु यः क्रूरः कर्मकारी स तैजसः ॥
उष्णशीतः क्षयावर्णस्तिर्यग्गामी षडङ्गुलः ।
वायुः प्रवहसंज्ञो यः चरकर्मसु सिद्धिदः ॥
यः समीरः समरसः सर्वतत्त्वगुणावहः ।
अक्षरं तं विजानीयात् योगिनां योगदायकम् ॥
पीतश्चैव चतुष्कोणं मधुरं मध्यमाश्रयम् ।
भोगदं पार्थिवं तत्त्वं प्रवाहे द्वादशाङ्गुलम् ॥
श्वेतमर्द्धेन्दुसङ्काशं स्वादु कषायमादकम् ।
लाभक्षेमकरार्थं तत्त्वं प्रवाहे षोड़शाङ्गुलम् ॥
रक्तं त्रिकोणं तिक्तं स्यात् ऊर्ध्वं मार्गप्रवाहकम् ।
दीप्तश्च तेजसं तत्त्वं प्रवाहे चतुरङ्गुलम् ॥
नीलवर्तुलसङ्काशं स्वाम्लं तिर्यग्गाश्रितम् ।
चपलं मारुतं तत्त्वं प्रवाहेऽष्टाङ्गुलं स्मृतम् ॥
वर्णाकारं स्वादुवाहं अयत्नं सर्वगामि च ।
मोक्षदं योगितत्त्वं हि सर्वकार्येषु निष्फलम् ॥
पृथ्वीजले शुभे तत्त्वे तेजोमिश्रफलोदये ।
हानिर्मृत्युकरौ पुंसामशुभौ व्योममारुतौ ॥
अपूर्वा पश्चिमे पृथ्वी तेजश्च दक्षिणे तथा ।
वायुरुत्तरदिग्भागे मध्यकोणे गतं नभः ॥
चिरलाभः क्षितौ ज्ञेयस्तृतीयात्तोयतत्त्वतः ।
हानिः स्याद्वह्निवाताभ्यां नभस्यालिङ्गनं लभेत् ।
चन्द्रे पृथ्वीजले स्यातां सूर्ये चाग्नियदा भवेत् ।
तदा सिद्धिर्न सन्देहः सौम्यासौम्येषु कर्मसु ॥
लाभः पृथ्वीजतो वह्निर्निशायां लाभसञ्चलम् ।
वह्नौ मृत्युः क्षतिर्वायौ नभःस्थानं दहेत् क्वचित् ॥
जीवितव्ये जये लाभे क्रव्याद्य धनकर्षणे ।
मन्त्रार्थे युद्धप्रश्ने च गमनागमने तथा ॥
आयाति वारुणे तत्त्वे तत्स्थोऽपि शुभं क्षितौ ।
प्रयाति वायुतोऽन्यत्र हानिर्मृत्युर्नभेऽनले ॥ * ॥
पृथिव्यां मूलचिन्ता स्यात् जीवस्य जलवातयोः ।
तेजसा धातुचिन्ता स्यात् शून्यमाकाशतो वदेत् ॥
पृथिव्यां वसुपादाः स्युर्द्विपदास्तोयवायुतः ।
तेजसा च चतुष्पादा नभसा पादवर्जिताः ॥
कुजो वह्नौ रविः पृथ्वी सौरिरापः प्रकीर्तिताः ।
वायुस्थानस्थितो राहुर्दक्षचरन्यूप्रवाहकः ॥
जलं चन्द्रो बुधः पृथ्वी गुरुर्वायुः सितोऽनलः ।
वामनाड्यां स्थिताः सर्वे सर्वकार्येषु निन्दिताः ॥
प्रवासिप्रश्नः ।
"चन्द्रादित्यौ परित्यज्य यदा राहुगतोऽनिलः ।
तदाऽसौ चलितो ज्ञेयः स्थानान्तरमपेक्षते ॥
आयाति वारुणे तत्त्वे तत्रैवास्ति शुभं क्षितौ ।
प्रवासी पवनेऽन्यत्र मृत्युरेवानले वदेत् ॥
पृथ्वीतो मूलचिन्तां जीवज्ञानं जले यथा ।
अग्नेयां धातुविज्ञानं व्योम्नि शून्यं विनिर्दिशेत् ॥
तुष्टिपुष्टिरतिक्रीड़ा जयो हास्यं धरातले ।
तेजो वायुश्च सुप्ताच्च ज्वरकम्पप्रवासिनः ॥
मृतायुर्मृत्युराकाशे चन्द्रावस्थाः प्रकीर्तिताः ।
ह्रादशैता प्रयत्नेन ज्ञातव्या देशिकोत्तमैः ॥
पूर्वायां पश्चिमे याम्ये उत्तरायां यथाक्रमम् ।
पृथिव्यादीनि भूतानि बलिष्ठानि विनिर्दिशेत् ॥*
पृथिव्यापस्तथा तेजो वायुराकाशमेव च ।
पञ्चभूतात्मकं देहं ज्ञातव्यं वरानने ॥

अस्थि मांसं त्वचा नाड़ी रोम चैव तु पञ्च-
मम् ।
पृथ्वी पञ्चगुणोपेता ब्रह्मज्ञानेन भाषितम् ॥
शुक्रशोणितमज्जा च लालामूत्रञ्च पञ्चमम् ।
आपः पञ्चगुणाः प्रोक्ता ब्रह्मज्ञानेन भाषितम् ॥
क्षुधा तृष्णा तथा निद्रा आन्तिरालस्यमेव च ।
तेजःपञ्चगुणाः प्रोक्ता ब्रह्मज्ञानेन भाषितम् ॥
धारणं चालनं गन्धं सङ्कोचनप्रसारणे ।
वायोः पञ्चगुणाः प्रोक्ता ब्रह्मज्ञानेन भाषिताः ॥
रागद्वेषौ तथा लज्जा भयं मोहश्च पञ्चमः ।
नभःपञ्चगुणाः प्रोक्ता ब्रह्मज्ञानेन भाषितम् ॥*॥
पृथिवीपलपञ्चाशत् चत्वारिंशदपस्तथा ।
तेजस्त्रिंशद्विजानीयाद्वायोर्विंशतिर्द्विनैभः ॥
पार्थिवे चिरकालेन लाभक्षेमे क्षणात् भवेत् ।
जायते पवनात् स्वप्नः सिद्धोऽध्यर्धो विनश्यति ॥
वह्निवायुक्षते प्रश्ने लाभालाभं वदेद्बुधः ।
परतो वारुणे लाभः स्थिरेण च पुरन्दरे ॥
ज्ञातव्यं जीवने शून्यं सिद्धो व्योम्नि विनश्यति ॥
पृथ्वी पञ्च अपां वेदाः गुणास्त्रेजो द्विवायुतः ।
नभ एकगुणश्चैव तत्त्वज्ञानमिदं भवेत् ॥
प्लुतुकारक्षतं प्रस्फुटिता विद्वीर्णा पतिता
धरा ।
ददाति सर्वकार्येषु अवश्यासदृशं फलम् ॥*॥
भरणी कृत्तिका पुष्या मघा पूर्वा च फल्गुनी ।
पूर्वभाद्रपदः स्वातिः तेजस्तत्त्वमिति प्रिये ॥
विशाखोत्तरफल्गुन्यौ हस्ता चित्रा पुनर्वसुः ।
अश्विनी मृगशीर्षा च वायुतत्त्वमुदाहृतम् ॥
पूर्वाषाढ़ा तथाश्लेषा मूलमार्द्रा च रोहिणी ।
उत्तरभाद्रपदा तोयतत्त्वं श्रुतिभिषा प्रिये ॥
धनिष्ठा रोहिणी ज्येष्ठानुराधा अवणा तथा ।
अभिजिच्चोत्तराषाढ़ा पृथ्वीतत्त्वमुदाहृतम् ॥
वहन्नाड़ीस्थितो दूतो यत् पृच्छति शुभाशुभम् ।
तत् सर्वं सिद्धिमायाति शून्ये शून्यं न संशयः ॥
तत्त्वे रामो जयं प्राप्तः सुतत्त्वे च धनक्षयः ।
कौरवा निहताः सर्वे युद्धे तत्त्वविपर्यये ॥
जन्मान्तरीयसंस्कारात् प्रसादादथवा गुरोः ।
केषाञ्चिज्जायते तत्त्वं वाचना विमलात्मनाम् ॥"
अथ पञ्चतत्त्वध्यान-
"लं बीजं धरणीं ध्यायेत् चतुरस्रां सुपीतभाम् ।
सुगन्धं स्वर्णवर्णत्वमारोग्यं देहलाघवम् ॥
वं बीजं वारुणं ध्यायेदर्द्धचन्द्रं शशिप्रभम् ।
क्षुत्पिपासासहिष्णुत्वं चलमर्थेषु मज्जनम् ॥
रं बीजं शिखिनं ध्यायेत् त्रिकोणमरुणप्रभम् ।
वह्निपानभोक्तृत्वमातपाग्निसहिष्णुता ॥
यं बीजं पवनं ध्यायेद्वर्तुलं श्यामलप्रभम् ।
आकाशगमनात्वञ्च पक्षिवद्गमनं तथा ॥
हं बीजं गगनं ध्यायेत् निराकारं बहुप्रभम् ।
ज्ञानं त्रिकालविषयमैश्वर्यमणिमादिकम् ॥
स्वरज्ञानी नरो यत्र यत्र नास्ति ततः परम् ।
स्वरज्ञानेन गमयेत् अनायासफलं भवेत् ॥
सर्वेषु धनमधनं सर्वाधिकारसंयुतम् ।
लक्षैकेन न सिध्यन्ति तत्त्वहीना यदा नराः ॥

स्वरोद

स्थानं तेन समस्ततीर्थसलिलैः सर्वाधिशक्तावनि-
र्यज्ञानाच्च कृतं हि कार्यमखिलं देवाश्च
सन्तर्पिताः ।
संसाराच्च समुद्धृताः स्वपितरः त्रैलोक्य-
पूज्योऽप्यसौ
यस्य ब्रह्मविधारणे चलमपि स्थैर्यं मनः
प्राप्नुयात् ॥"
इति तत्त्वज्ञानं संपूर्णम् ॥

अथ युद्धप्रकरणम् ।

देव्युवाच ।

"देवदेव महादेव महाज्ञानं सरोदयम् ।
त्रिकालविषयज्ञानं कथं भवति शङ्कर: ॥

ईश्वर उवाच ।

अर्थकार्यं जयप्रश्नं शुभाशुभमिति त्रिधा ।
अतस् त्रिकालविज्ञानं नान्यद्भवति सुन्दरि ॥
तत्र शुभाशुभं कार्यं तत्र जयपराजयौ ।
तत्र समर्थमाख्यातं तत्र त्रिपदसुच्यते ॥

श्रीदेव्युवाच ।

देवदेव महादेव सर्वज्ञं सारतारक ।
किं नराणां परं मित्रं सर्वकार्यार्थसाधकम् ॥

शिव उवाच ।

प्राण एव परं मित्रं प्राण एव परः सखा ।
प्राणतुल्यः परो बन्धुर्नास्ति नास्ति वरानने ॥

देव्युवाच ।

कथं प्राणस्थितो वायुर्देहे किं प्राणरूपकम् ।
तत्त्वेषु सञ्चरेत् प्राणो ज्ञायते योगिभिः कथम् ॥

शिव उवाच ।

कायानलस्वरूपेण मारुतः क्षितिपालकः ।
भोजने वपने चैव गतिरष्टाङ्गुला ॥
प्रवेशे दशभिः प्रोक्तो निर्गमे द्वादशाङ्गुलः ।
प्राणस्थे तु गतिर्देवि स्वभावाद्द्वादशाङ्गुला ॥
गमने च चतुर्विंशा नवधेदासु धावने ।
मैथुने षण्णवत्यिष्ट प्रयाणे च प्रकीर्तिता ॥
एकाङ्गुलक्रमे क्षीणे प्राणे निष्कामता मता ।
आनन्दस्तु द्वितीये स्यात् कवित्वशक्तिस्तृतीयके ॥

चतुर्थेऽङ्गुलकार्ये तु दूरदर्शित्वं पञ्चमे ।
षष्ठे व्याधिसमर्थं च सप्तदेशत्व सप्तमे ॥
अष्टमे निधुवत्वं च नवमे निधनो नव ।
दशमे दशमासेऽपि जीवनाशो न संशयः ॥
द्वादशे देहसंत्यागः प्राणस्यास्य निर्णयः ।
आसनाग्रे प्राणपूर्णे कार्य भक्ष्यं भोजनम् ॥
सर्वं प्राप्तविधिः प्रोक्तः सर्वकार्यफलप्रदः ।
ज्ञायते गुरुवाक्येन न विज्ञानशतकोटिभिः ॥
प्राणश्चरति नाड्यां यदि देवाङ्ग सत्यके ।
सम्पाद्यानन्दधारा परस्तु प्रवर्तते ॥
दक्षपूर्णे जयो ज्ञेयः शशीति च दिवाकरः ।
वहत्यां तत्र: प्राप्तं मध्यमिति प्रकाशते ॥
आकाशे दिवसे च प्रवेशे शक्तिदिने ।
भूमिवर्तेषु सर्वेषु जयस्तत्र: प्रकल्पते ॥
अन्यस्मिन्दिवसेऽङ्ग: शोधयेत्तेन पूर्वो
यदि स्यात्तत्र कस्मिंश्चित् वैधर्योनेन हेतुना ।

स्वरोद

स जयति रिपुसैन्यं क्षम्यमाक्षरेण
प्रभवति न च विघ्नः कोऽपि वक्त्रेऽपि लोके ॥
जीवलक्षं जीवरन्ध्रां जीवाङ्गे परिधाय च ।
जीवो व्रजति यो युद्धे जीवो जयति मेदिनीम् ॥
भूमौ जये च कर्तव्यं गमनं शान्तिकर्मसु ।
वह्नौ वायौ प्रदीप्ते तु खे पुनर्न भवत्यपि ॥
जीवेन शस्त्रं वक्षीयात् जीवेनैव विकाशयेत् ।
जीवेन निक्षिपेत् शस्त्रं युद्धे जयति सर्वथा ॥
आक्रम्य प्राणपवनं समारोहेत वाहनम् ।
वसुन्धरेत् पदं दत्त्वा सर्वकार्याणि साधयेत् ॥
अपूर्णशत्रुचामग्रीं पूर्णं वा सबलं यदा ।
कुरुते पूर्णतत्त्वस्थो जयस्तेषां वसुन्धराम् ॥
यस्याङ्गे वहते चाङ्गे तस्यामेवाधिदेवता ।
सम्मुखापि दिशा तेषां सर्वकार्यफलप्रदा ॥
आदौ तु क्रियते सद्मा पश्चाद्युद्धं समाचरेत् ।
सर्वा सद्मा हता येन तेषां सिद्धिर्न संशयः ॥
चन्द्रप्रवाहेऽथ सूर्यवाहे
भटाः समायान्ति च युद्धकामाः ।
समीरणस्तत्त्वविदा प्रयातो
या शून्यता सा प्रतिकूलदृष्टा ॥
यद्दिशं वहते वायुर्युद्धं तद्दिशि दापयेत् ।
जयस्तेषां न सन्देहः शक्रोऽपि यदि वाग्रतः ॥
यत्र नाड्यां वहेद्वायुस्तदन्तः प्राणमेव च ।
आक्रम्य गच्छेत् कर्णान्तं जयस्तेषां पुरन्दरम् ॥
प्रतिपक्षप्रहारेण: पूर्णाङ्गे योऽभिरक्षति ।
न तस्य रिपुभिः शक्तिर्बलिष्ठैरपि हन्यते ॥
अङ्गुलत्रयनोवह्नौ पादाङ्गुलसाधनि ।
युद्धकाले च कर्तव्यं जयार्थेन जयी भवेत् ॥
निशाकरे रवौ चारे मध्ये यस्य समीरणः ।
स्थिरो रचेत् दिगन्तानि जयाकाङ्क्षी नरः
सदा ॥
श्वासप्रश्नकालेषु दूतो याचति वाञ्छितम् ।
तस्यार्थाः सिद्धिमायान्ति निर्गमे नैव सुन्दरि ॥
लाभादीन्यपि कार्याणि प्रश्नानि कौलितानि च ।
जीवे विशति सिध्यन्ति प्राणिनिःसरणे भवेत् ॥
नरि दत्ता स्वकीया च स्त्रियां वामा प्रशस्यते ।
कुम्भके युद्धकाले च तिस्रो नाड्यस्य या गतिः ॥
एकारस्य मकारस्य विना भेदं स्वरः कथम् ।
योऽयं शंभुपदेनैव जीवो जयति सर्वदा ॥
शून्याङ्गं पूरितं ज्ञात्वा जीवाङ्गं गोपयेद् यदि ।
जीवाङ्गे वासमाप्नोति शून्याङ्गं रक्षते सदा ॥
वामे वाम्यया दत्ते यदि प्रश्नति प्रश्नकः ।
तत्र घातो न वायेन शस्त्रे घातं विनिर्दिशेत् ॥
भूतत्त्वं नीरदे घातः पादस्थानेऽम्बुना भवेत् ।
उरःस्थानेऽग्नितत्त्वेन करस्थाने च वायुना ॥
शिरसि व्योमतत्त्वेन क्षत आघातनिर्णयः ।
सर्वं प्रकथितं घातः स्वरशास्त्रे प्रकाशितः ॥
युद्धकाले यदा शस्त्रः स्याद्वो जयति निश्चितम् ।
यदा सूर्यस्वरेणैव याति विजयते तदा ॥
जयमर्णे तु सर्वेषां याद्दीमध्ये तु सञ्चरेत् ।
सुषुम्नायां गतः प्राणः समरे प्राणनाशकृत् ।
यस्यां काले भवेत्सारस्तत्र युद्धमाचरेत् ।

स्वरोद

तेनासौ जयमाप्नोति नात्र कार्या विचारणा ॥
यदि संग्रामकाले तु वामनाड्यां सदा वहेत् ।
स्थायिनो विजयं विन्द्यात् रिपुवक्त्रादयोऽपि च ॥
यदि संग्रामकाले तु सूर्यस्तु यातितो वसेत् ।
तदा जयी जयं विन्द्यात् स देवासुरमानवात् ॥
रणे हरति शस्त्रस्थं वामायां प्रविशेन्नरः ।
स्थानं द्विधावचाराभ्यां जयं सूर्येण धावति ॥
योऽहरयत्नते प्रश्ने पूर्णस्य प्रथमो जयः ।
रिक्ते चैव द्वितीयस्तु जयी भवति नान्यथा ॥
पूर्णनाड्यागतः पृष्ठे शून्याङ्गेष्व तदगतः ।
शून्यस्थाने हतः शत्रुर्म्रियते नात्र संशयः ॥
वामचारे समं नाम यस्य तस्य जयी भवेत् ।
पृच्छको दक्षिणे भागे विजयी विषमाचरः ॥
यदा पृच्छति चन्द्रस्थस्तदा सन्मानमादिशेत् ।
पृच्छेद्यदा च सूर्यस्थस्तदा जानीहि विग्रहम् ॥
पार्थिवे च समं युद्धं सिद्धिर्भवति वारुणे ।
वह्नौ युद्धे जयस्तस्य मृत्युर्वायौ च नाभसे ॥
नैमित्तिकप्रमादाद्वा यदा न ज्ञायतेऽनिलः ।
प्रश्नकाले तदा कुर्यात् द्वन्द्वं यत्नेन बुद्धिमान् ॥
निश्चलां धारणां कृत्वा पुण्यं दक्षात् निपातयेत् ।
पूर्णाङ्गे पुण्यपतनं शून्ये वा तत्फलं वदेत् ॥
निष्ठत्तुपविशन् वापि प्राणमाकर्षयेन्निजम् ।
मनोभङ्गमकुर्वाणः सर्वकार्येषु पूजितः ॥
न कालो विविधं घोरं न शस्त्रं न च पन्नगाः ।
न शत्रुव्याधिचौराद्याः शून्यस्थं नाशितुं क्षमाः ॥
जीवेन स्थापयेद्वायुं जीवेनारम्भयेत् पुनः ।
जीवेन क्रीडते नित्यं द्यूतं जयति सर्वदा ॥
कथञ्चिद्विजयी युद्धे स्वरज्ञानं विना नृपः ।
स्वरज्ञानबलाद्यत्ने निष्फलं कोटिधा भवेत् ।
इह लोके परत्रैव स्वरज्ञानी बली सदा ॥
इष्टप्राप्तावुतं सत्यं देव्याधिपत्यं क्षितिं ।
शतक्रतुसुरेन्द्राणां बलं कोटिगुणं भवेत् ॥
ॐकारः सर्वमन्त्राणां ब्रह्मरूपे भास्करी यथा ।
मर्त्यलोके तथा पूज्यः स्वरज्ञानी गुणानपि ॥
एकाक्षरप्रदातारं गाङ्गीभेदनिषेदकम् ।
पृथिव्यां नास्ति तद्द्रव्यं यद्दत्त्वा चाऽनृणी भवेत् ॥

देव्युवाच ।

परस्परं मनुष्याणां युद्धे प्रोक्तो जयस्त्वया ।
यमयुद्धे समुत्पन्ने मनुष्याणां कथं जयः ॥

ईश्वर उवाच ।

ध्यायेदेवं स्थिरे चित्ते शुक्लध्यानं जीवसङ्गमे ।
इत्यभिप्रेतसिद्धस्य महालाभो जयो भवेत् ॥
निराकारात् समुत्पन्नं साकारं सकलं जगत् ।
तत्र साकारं निराकारे ज्ञाने भवति सम्भवम् ॥"
इति युद्धप्रकरणम् ॥

श्रीदेव्युवाच ।

"सरहस्यं यमयुद्धं त्वया प्रोक्तं महेश्वर ।
इदानीं देवदेवीनां वर्णीकरणमुच्यताम् ॥

ईश्वर उवाच ।

चन्द्रं सूर्येण चाक्रम्य मायाबीजेन मध्यगे ।
आत्मजयप्रदा वामा त्रिधोद्धर्यं समाधिने: ॥
जीवेन संयुते जीवो जीवो जीवस्य दीयते ।

स्वरोदय

जीवस्थाने गतो जीवो वालजीवान्तवच्चलत् ।
चन्द्रं पिबति सूर्य्येण सूर्यं पिबति चन्द्रतः ।
अन्योन्यकालभावेन जीवेदाचन्द्रतारकम् ॥
एतज्जानाति यो योगी एतत् पठति नित्यशः ।
सर्व्वदुःखविनिर्म्मुक्तो लभते वाञ्छितं फलम् ॥
सेफोऽङ्गे वहते नाड़ी तन्नाड़ीवोधनं कुरु ।
करे वहां खमुष्कच्च चरणं जयते युवा ॥
उभयोः क्षुभकं कृत्वा सुखे श्वासं निपीयते ।
निश्चला च यदा नाड़ी देवकन्यावशं कुरु ॥
रात्रौ च यामवेलायां प्रसुप्ते कामिनीजने ।
वक्त्रबीजं पिवेद् वस्तु वालजीवहरो नरः ॥

इति देवीवश्यप्रकरणम् ॥*॥

अहाचरं जपित्वा तु तस्मिन् काले ऋतौ सति ।
तत्क्षणं दीयते चन्द्रो मोहमायाति कामिनी ॥
शयने वा प्रसङ्गे वा चुम्बनालिङ्गनेऽपि वा ।
यः सूर्य्येण पिवेच्चन्द्रं च भवेत्सकरध्वजः ॥
शिवमालिङ्गते शक्ता प्रसङ्गे दक्षिणेऽपि वा ।
तत्क्षणाद्दापयेद्यस्तु मोहयेत् कामिनीशतम् ॥
सप्तनवत्रयपञ्चवारान् सङ्ख्यांस्तु सूर्य्यगे ।
चन्द्रे द्वित्र्यंषट् कृत्वा वश्या भवति कामिनी ॥
सूर्य्यचन्द्रौ समाकृष्य सर्पाक्रान्त्याधरोष्ठयोः ।
महापद्मे सकृं सृष्ट्वा वारं वारमिदं चरेत् ।
आघ्राणमेति पद्मस्य यावन्निद्रावशं गता ।
पश्चाच्चायति वेलायां शोष्यते गलुचक्षुषी ॥
अनेन विधिना कामी वशयेत् सर्व्वकामिनीम् ।
इदं न वाच्यमन्यस्मिन्नित्याज्ञा परमेश्वरि ॥

इति रतिस्त्रीवश्यप्रकरणम् ॥*॥

अथ गर्भप्रकरणम् ।

ऋतुकालभवा नारी पञ्चमेऽह्नि यदा भवेत् ।
सूर्य्याचन्द्रमसोर्योगे सेवनात् पुत्रसम्भवः ॥
शुक्लपक्षी गवां दुग्धं पृथ्व्यापो वहते यदा ।
भर्त्तुरग्रे वदेद्वाक्यं अर्थं देहि त्रिभिर्वचः ॥
ऋतुस्नाता पिवेन्नारी ऋतुदानञ्च योजयेत् ।
रूपलावण्यसम्पन्नो नरसिंहः प्रसूयते ॥
सुषुम्ना सूर्य्यगन्धेन ऋतुदानञ्च योजयेत् ।
अङ्गहीनः पुमान् यस्तु जायते लक्षविग्रहः ॥
विषमाङ्के दिवा रात्रौ विषमाङ्के दिनाधिपः ।
चन्द्रनेत्रास्थितत्त्वेषु कन्या पुत्रमवाप्नुयात् ॥
रतारम्भे रविः पुंसां सुरतान्ते सुधाकरः ।
अनेन क्रमयोगेन नादत्ते देवदक्षकः ॥
रतारम्भे रविः पुंसां स्त्रियाश्चैव सुधाकरः ।
उभयोः सङ्गमे प्राप्ते वन्ध्या पुत्रमवाप्नुयात् ॥
चन्द्रनाड़ी वहेत् प्रश्ने गर्भे कन्या तदा भवेत् ।
सूर्य्ये भवेत्तदा पुत्रो सूर्य्ये गर्भो निहन्यते ॥
चन्द्रे स्त्री पुरुषः सूर्य्ये मध्यमार्गे नपुंसकः ।
गर्भप्रश्ने यदा दूतः तदा पुत्रः प्रजायते ॥
पृथ्व्यां पुत्री जले पुत्रः कन्यका तु प्रभञ्जने ।
तेजसा गर्भपातः स्यात् नभस्यपि नपुंसकम् ॥
शून्ये शून्यं युगे युग्मं गर्भपातस्तु सङ्क्रमे ।
सूर्य्यभागे कृते पुत्रश्चन्द्रचारे तु कन्यका ॥
विप्लवे गर्भपातः स्यात् भावी वाथ नपुंसकः ।
तत्त्वे वित्तं विजानाति कथितं तत्र सुन्दरि ॥

स्वरोदय

गर्भाधानं मारुते स्याच्च दुःखी
दिग्नाम्नातो वारुणे सौख्ययुक्तः ।
गर्भस्रावी खल्वजीवी च वह्नौ
भोगी भव्यः पार्थिवेनार्थयुक्तः ॥
धनवान् सौख्यसंयुक्तो भोगवान् गर्भसंस्थितः ।
स्यान्नित्यं वारुणे तत्त्वे योनिः गर्भं निहन्यते ॥
माहेयेषु सुतोत्पत्तिर्वारुणे दुहिता भवेत् ।
शेषेषु गर्भहानिः स्यात् जातमात्रस्य वा मृतिः ॥
रविमध्यगतचन्द्रश्चन्द्रमध्यगतो रविः ।
ज्ञातव्यं गुरुतः शीघ्रं न विद्याशास्त्रकोटिभिः ॥

इति गर्भप्रकरणम् ॥*॥

अथ संवत्सरप्रकरणम् ।

चैत्रशुक्लप्रतिपदि प्रातस्तत्त्वविभेदतः ।
प्रश्नेऽहिचक्रगो योगी दक्षिणे चोत्तरायणे ॥
चन्द्रस्योदयवेलायां वहमानोऽथ तत्त्वतः ।
पृथिव्यापस्तथा वायुः सुभिक्षं सर्व्वशस्यकम् ॥
तेजो योनिः भयं घोरं दुर्भिक्षं कालतत्त्वतः ।
एवं तत्त्वफलं ज्ञेयं वर्षे मासे दिने तथा ॥
पृथिव्यादिकतत्त्वेन दिनमासाब्दजं फलम् ।
शोभनञ्च तथा दृष्टं शोममारुतवह्निभिः ॥
मध्यमा भवति क्रूरा दुष्टा च सर्व्वकर्म्मसु ।
देशभङ्गमहारोगक्लेशकष्टादिदुःखदा ॥
मेषसंक्रान्तिदिवसे खरमेतं विचारयेत् ।
संवत्सरफलं ब्रूयात् लोकानां तत्त्वचिन्तकः ॥
सुभिक्षं राष्ट्रवृद्धिः स्यात् वहुशस्या वसुन्धरा ।
वहुवृष्टिस्तथा सौख्यं पृथ्वीतत्त्वं वहेद्यदि ॥
अतिवृष्टिः सुभिक्षं स्यादारोग्यं सौख्यमेव च ।
वहुशस्या तथा पृथ्वी कालतत्त्वं वहेद्यदि ॥
दुर्भिक्षं राष्ट्रभङ्गः स्यान्नीलोत्पत्तिस्तु दारुणा ।
अल्पादल्पतरा वृष्टिरमितत्त्वं वहेद्यदि ॥
उल्कातोयप्रदा भीतिरल्पवृष्टिः क्षुरीतयः ।
मेषसंक्रान्तिवेलायां वायुतत्त्वं वहेद्यदि ॥
उल्कारतापज्वरा भीतिरल्पा वृष्टिः क्षितौ भवेत् ।
मेषसंक्रान्तिवेलायां योमतत्त्वं वहेद्यदि ॥
तत्रापि शून्यता ज्ञेया शस्यादीनां सुखस्य च ।
पूर्णे प्रवेशने श्वासे स्वस्वतत्त्वेन सिद्धिदः ॥
सूर्य्ये चन्द्रेऽन्यथाभूते संग्रहः सर्व्वसिद्धिदः ।
विषमे वह्नितत्त्वस्य ज्ञायते केवलं नमः ॥
तत् क्रूर्य्याहस्तु संग्राह्यं द्विमासे च महार्घता ।
स्वरज्ञानं शिवः पश्येल्लक्ष्मीप्रतिष्ठया भवेत् ॥
एकत्र शरीरं यस्य सुखं तैस्य सदा भवेत् ।
नाड़ीत्रयं विजानाति तत्त्वज्ञानं तथैव च ॥
नैव तेन भवेत्तुल्यं लक्षकोटिरसायनम् ।
रवौ संक्रमणे नाड़ी गलान्ते च प्रवर्त्तते ॥
खलिले वह्नियोगेऽपि रौरवं जगतीतले ।

इति संवत्सरफलम् ॥*॥

अथ रोगप्रकरणम् ।

महीतत्त्वे स्वरोगश्च जले च जलमातरः ।
रवौ चारे तेजस्तत्त्वे वायुतत्त्वे च शाकिनी ॥
शून्यतत्त्वे न रोगश्च पित्तदोषसमुद्भवः ।
दानपुण्यं द्विजातीनां प्रिश्नाद्यं विधीयते ॥

स्वरोदय

आदौ शून्यगतं पृच्छेत् पश्चात् पूर्णो विशेद्-
यदि ।
मूर्च्छितोऽपि ध्रुवं जीवेत् यद्यर्धं परिपृच्छति ॥
चन्द्रस्थाने स्थितो जीवः सूर्य्यस्थाने च पृच्छति ।
तदा प्राणविनिर्म्मुक्तो यदि वैद्यशतैर्दृतः ॥
पिङ्गलायां स्थितो जीवो वामे दूतश्च पृच्छति ।
तदापि म्रियते रोगी यदि ज्ञाता महेश्वरः ॥
दक्षिणेन यदा वायुर्दुःखं रौद्राक्षरं वदेत् ।
तदा जीवति जीवोऽसौ चन्द्रे समफलं भवेत् ॥
जीवाकारश्च वा भूत्वा जीवाकारं विलोकयन् ॥
जीवस्थो जीवितं पृच्छेत्तस्माज्जीवन्ति ते
ध्रुवम् ॥
प्रश्ने वायः स्थितो जीवस्तदा जीवो हि जीवति ।
ऊर्द्धचारगतो जीवो याति जीवो यमालयम् ॥
विपरीताक्षरं प्रश्ने दिशायां पृच्छको यदि ।
विपर्य्ययश्च विज्ञेयं विषमस्योदये सति ॥
यस्मिन् भागे चरेत् जीवस्तस्य परिपृच्छति ।
तदा जीवति जीवोऽसौ यदि रोगैः प्रपीड़ितः ॥
वातोदये वातकरश्च भक्ष्यं
पित्तोदये पित्तकरश्च भक्ष्यम् ।
श्लेष्मोदये श्लेष्मकरश्च भक्ष्यं
पुंसि प्रसुप्ते प्रभवन्ति रोगाः ॥
एकस्य भूतस्य विपर्य्ययेण
रोगाभिभूतिर्भवतीह पुंसाम् ।
तयोर्द्वयोर्वन्धुसुहृद्विपत्तिः
पञ्चत्वये चलयतो गतिः स्यात् ॥

इति रोगज्ञानम् ॥*॥

अथ कालज्ञानम् ।

मासादौ वत्सरादौ च पक्षादौ च यंथाक्रमम् ।
त्रयं कालं परीक्षेत वायुचारवशात् सुधीः ॥
पञ्चभूतात्मकं देहं शून्यो क्षेहेन सिञ्चति ।
रक्षयेत् सूर्य्यवातेन तेन जीवः स्थिरो भवेत् ॥
मारुतं वन्धयित्वा तु सूर्य्यं वन्धयते यदि ।
अभ्यासाच्चीयते जीवः सूर्य्यकालेऽपि वर्द्धते ॥
गगनादवते चन्द्रः कायापङ्गानि सिञ्चति ।
कर्म्मयोगः सदाभ्यासात् रमते शून्यिनः शवान् ॥
शशाङ्के वारयेदात्मा दिवा वार्य्यो दिवाकरः ।
एवमभ्यासरतो योगी स योगी नात्र संशयः ॥
दिवा न पूजयेत् लिङ्गं रात्रौ देवीं न पूजयेत् ।
रहसि ज्ञानजनकं पश्यन्ते समन्वितम् ॥
अहोरात्रं वहेन्नित्यं वहते यस्य मारुतः ।
तदा तस्य भवेदायुः संपूर्णं वत्सरद्वयम् ॥
अहोरात्रद्वयं यस्य पिङ्गलायां सदागतेः ।
तस्य वर्षद्वयं ज्ञेयं जीवितं तत्त्ववेदिभिः ॥
चिरात्रं वहते यस्य वायुरेकपुटे स्थितः ।
वत्सरं यावदायुः स्यात् प्रवदन्ति मनीषिणः ॥
रात्रौ चन्द्रो दिवा सूर्य्यो वहेद्यस्य निरन्तरम् ।
विजानीयात्तस्य मृत्युः षण्मासाभ्यन्तरे सुधीः ॥
एकादिषोड़शाहानि यदि श्वासनिरन्तरम् ।
वहेद्यस्य च वै मृत्युः शेषाहेन च माधिके ॥
सम्पूर्णं वहते सूर्य्यचन्द्रमा नैव दृश्यते ।
प्रत्येन जायते मृत्युः कालज्ञानेन भाषितम् ॥

मध्यमं वहते चन्द्र: सध्यं नैव च दक्षिणे।
मासेन दक्षिणे स्वामु: कालज्ञानेन भाषितम्॥
सार्धं पूर्णेषु मानुष्य समकालं प्रजायते।
अन्यथा चलिनो दैवी दशाधै म्रियते ध्रुवम्॥
दक्षे चन्द्रप्रवाहश्च सुखसामान्यसूचक:।
कृष्णचन्द्रप्रवाहे तु सद्यो मरणं संशय:॥
आरुह्यनी पुरुषेण विष्टीकौलि पदानि च।
आनुपूर्व्या न पश्यन्ति चतुर्थं मासमरणम्॥
आनन्दी भवेन्निद्रा ध्रुवो नासाग्रमुच्यते।
भ्रुवोर्मध्ये विष्णुपदं मारकं मासमरणम्॥
नवमुन: सप्तमो वा पञ्चनारा विनासिका।
त्रिमासिकदिनं प्रोक्तं म्रियते मानवो ध्रुवम्॥
दीपमध्योर्ध्वभागान्तु किञ्चिन् पीत्व निरी-
क्षयेत्।
यदा न दृश्यते विन्दुर्दशाहेन मृतो ध्रुव:॥
इति कालज्ञानम्।६॥
इडा गङ्गेति विख्याता पिङ्गला यमुना नदी।
मध्ये सरस्वती विद्यात् प्रयागादि समन्तत:॥
आदौ साधनमात्मानं मन:प्रत्ययकारकम्।
सहजप्राणनो योगी मनवेदुदियानकम्॥
पुरक: पूरणे पुष्टीधातुसाम्यं तथैव च।
कुम्भक: साम्यं कुर्यात् जीवरक्षाविवर्द्धनम्॥
रेचको दूरतो वायुं कुर्यादूर्ध्वगयं त्यजेत्।
तस्मात् संग्रामसन्तिष्ठेत् प्रश्नं वक्ष्ये च कारयेत्॥
पूरयेत् सकलं वायुं यथाशक्त्या प्रयत्नत:।
रेचयेत्सकलमार्गेण सर्व्वेण पूरयेत् सुधी:॥
सूर्य्यं विशति सूर्य्यश्च सूर्य्यं विशति चन्द्रमा:।
अन्योन्यलक्षणाभावेन जीवेदाश्चन्द्रतारकम्॥
कोष्ठाग्नि वहते नाड्यौ तस्मात्पीरीक्षणं कुरु।
सप्तधातुसमत्वञ्च वै यत्नं जायते ध्रुवा॥
सुखदासनिकर्मांगमङ्गुलीभिर्निरोधयेत्।
नासोदरसमिति प्रेयं सप्तधीजरणं प्रिये॥
तस्य कर्म गति: स्वाद्यो मरणं लक्षणन्विदम्।
यो वेत्ति वा नरो लोके स तु मृत्योरपि योग-
वित्॥
त्रिमासोर्ध्वमेतो योगी न दिक्षिद्यति त्रिमासेन्।
आकाशमण्डलं तस्य दानं भवति नीश्चयम्॥
त्रिमास मेलिता ऋत्विर्जेवाग्यो परिकल्पते।
तस्मात् तु सर्व्व यत्न यत्नमात्मं भवेदिह॥
यत्नात्पूर्व्वेहि विप्रं चक्षिका विप्रमानत:।
दिवेनोर्ध्वं पुरा तस्य विप्रस्य मुखमण्डलम्॥
यद: प्रदक्षणमो: मुखवस्त्रं संनिवीक्ष्यो-
त्तरे:
यदि दर्शे न मुखमण्डलमिदं प्रकाशते
विप्रस्य।
तस्यैकं एतल्लक्षणमुक्तं ब्रह्मज्ञै च
योगी
दि विप्रस्य प्रकाशते मासि दे
वेदि मरण:॥७॥
दक्षनाड्यां यो योगी वामं चरति नित्यश:।
वर्षमेकं तु मुक्तात्मा भवेत्स योगिपुङ्गव:॥
वर्षमेकं त्रिसन्ध्यासु यो नर: कुरुते क्रियाम्।
सर्व्वपापविनिर्मुक्तो लभते वाञ्छितं फलम्॥
स्वरज्ञानं श्रियो यस्य लक्ष्मी: करतले भवेत्।
एतत्तु शरीरे यस्य सुखं तस्य सदा भवेत्॥
प्रलय: सर्व्ववेदानां शब्दाक्षे भास्करो यथा।
सर्व्वलोके तथा पूज्य: स्वरज्ञानी पुमानपि॥
नाड़ीचक्रं विजानाति तत्त्वज्ञानं तथैव च।
नैव तेन भवेत्तुल्य लक्षकोटिरसायनम्॥
एकाक्षरप्रदातारं नाड़ीभेदनिवेदकम्।
पृथिव्यां नास्ति तद्द्रव्यं यद्दत्वा चानृणी भवेत्॥
स्वरस्वरूपं तथा युद्धं देवयज्ञं क्रियस्तथा।
गर्भान्दरोगकालाख्यं नवप्रकरणान्वितम्॥
एवं प्रवर्त्तितं लोके सिद्धिदं सिद्धयोगिभि:।
यावच्चन्द्रार्कं मही स्थीयात् प्रवणात् सिद्धि-
दायकम्॥
सुखासने समासीनं निद्राहारमत्यकम्।
चिन्तयेत् परमात्मानं यदीच्छेद्भविष्यति॥"
इति शिवगौरीसंवादे नवप्रकरणान्वितपवन-
विजयं नाम स्वरोदयं समाप्तम्॥

स्वर्ग:, पुं, (स्वरिति गीयते इति। गै+क:। यद्वा, सुष्ठु अर्च्यते इति। अर्च पूजने+घञ्। ग्रहादित्वात् कुत्वम्।) देवतानामालय:। तत्-पर्य्याय:। स: २ नाक: ३ त्रिदिव: ४ त्रिदशा-लय: ५ सुरलोक: ६ द्यौ: ७ द्यौ ८ त्रिपि-ष्टपम् ९। अमर:। १। १। ६॥ मन्दर: १० अवरोध: ११ गौ: १२ रमति: १३ क्लीब-उदय: १४। इति जटाधर:॥ देवलोक: १५ स्वर्लोक: १६ ऊर्ध्वलोक: १७ सुमाधार: १८ सौरिक: १९ शक्रभुवनम् २० दिवानम् २१। इति शब्दरत्नावली॥ ७॥ तस्य गुणदोषा यथा,—

सुवाहुरुवाच।

"स्वर्गस्य मे गुणान् सृष्टि साम्यूनं दिवसत्तम।
यतन् मर्त्यं दिव्यैश्च करिष्यामि न संशय:॥

जैमिनिरुवाच।

मन्दाकादीनि दिव्यानि रम्याणि विविधानि च।
सर्व्वोद्यानानि पुण्यानि सर्व्वकामसुखानि च॥
सर्व्वकामफलैपूर्णै: क्रीडितानि सदासदा:।
विमानानि सुदिव्यानि यदिच्छागमनानि च॥
सर्व्वैश्चैव विचित्राणि कामगानि रथानि च।
सरस्तादिलक्षाणि सुखालाभाम्बराणि च॥
चन्दनस्वच्छसुभानि दिव्यगन्धानुलेपनानि च।
सर्व्वकामसमृद्धाश्च सुखदु:खविवर्जिता:॥
नरा: सुकृतिनश्चैव विचरन्ति यथासुखम्।
न तत्र व्याधिता व्याधि न क्लेशो नाधिनिष्ठिता:॥
न दुर्भगा न विकृता: दुष्टवर्णा न च मानिन:।
अल्पायुषश्चिरा: शूरा एकपत्न: समासरा:॥
सर्व्वाणी दानशीलाश्च सत्य सन्धश्च ते नरा:।
न क्रोधी न कदा लुब्धो क्रोधो न द्विजसत्तम:॥
न तत्र भूतविद्याश न च तत्र स्त्रीवैरं दृश्यते।
दृष्टे चार्के न तत्रस्थो मुक्त: पश्चि न मुच्यते॥
दीपालोकैव दे तत्रस्थि यत्नु प्राप्तश्च तत्रत्यम्।
सुखस्य प्रभोक्ष: कृत्स्नं वर्षं तत्रैव मुच्यते।
न चात्र म्रियते भूय: योऽत्र दीर्घो महान् गुण:॥
व्यसनोदयश्च भवति दृष्ट्वा दीप्तां परश्रियम्।
संप्राप्ते कर्मसंक्षये सहसा पतनं तथा॥
दृष्ट यत् म्रियते कर्म्म फलं तत्रैव भुज्यते।
कर्म्मभूमिरियं राजन् फलभूमिस्तवौ स्मृता॥"
इति वायुपुराणे ८० अध्याय:॥
अन्यत् वह्निपुराणे शिवेकपाख्यानाभाधाये
मात्से १०९। १०४ अध्याययोरपि द्रष्टव्यम्॥
अपि च।

सुनन्द उवाच।

अत्र राजन् प्रवक्ष्यामि विष्णोरद्भुतकर्म्मण:।
विराड्रूपस्य संस्थानमाख्यानं मधुसूदनम्॥
यावती भू: समुद्दिष्टा सप्तद्वीपादिकानना।
प्रतिभाता महाराज किरणैश्चन्द्रसूर्य्ययो:॥
वियच्च तावदुपरि विस्तारपरिमण्डलम्।
षष्टिविंशतिकोत्यस्तु योजनानान्तु सत्तमम्॥
नवतीनां सहस्राणि योजनानि मही पते।
भूमेरूर्द्ध्वं लोकानां सिद्धचारणसङ्गमा:॥
ये च विद्याधरा यक्षराक्षोगन्धर्व्वकिन्नरा:।
भूतप्रेतपिशाचाश्च तेषां तत् स्थानमीरितम्॥
ततो राहुर्महाबाहो त्रयोदशसहस्रकम्।
योजनानां प्रविस्तार: सप्तमं तस्य कथ्यते॥
स्मरन् वैरं पुरा प्राप्तं य: पर्व्वणि मधोमध:।
व्यासाय याचते क्रोधात् पुत्रयस्मै मही पते॥
तदेव भगवच्चक्रं सदासार्कोपमद्युति।
उपतिष्ठति सङ्क्रीडा पुनरेव निवर्त्तते॥
उपरागं वदन्त्येवं पुरुषकाश्च कथ्यते।
लक्षयोजनतो भानुर्भूमेरेव व्यवस्थित:॥
भानो: सकाशादुपरि सप्ते रश्मय: सप्तकर:।
नक्षत्रमण्डलं चन्द्रालक्षयोजनसुच्छ्रितम्॥
नक्षत्रमण्डलात् सौम्य उपरिष्टाच्छुक्रज:।
बुधात् शुक्रो द्विलक्षे तु शुक्राङ्गारो द्विलक्षके॥
मङ्गलादुपरिष्टाच्च सौम्यसिर्पशकर्द्धके।
द्विलक्षयोजनोत्सेध: सौरिर्दैवपुरोहितात्॥
ग्रहाणुत्तमसृष्टायं सौर: सप्तर्षिमण्डलम्।
सप्तर्षिभ्य: सप्तगुणा ग्रसादूर्द्ध ध्रुवस्थिति:॥
यादृग्मानं हि यत्किञ्चिदन्तरिक्षे धरणीतले।
तदूर्द्धलोक इति ज्ञानं ग्राकङ्गोपादिकानकम्॥
भूर्लोकाश्च भुवर्लोक: सूर्य्यस्यधिष्ठदारिस:।
ग्रादित्यादाधुवं राजन् सप्तलोक: प्रकाशते बुधै:॥
सप्तलोक: स्थितैरूर्द्धमेकैकोद्दियमालय:।
कोटिद्वये तथा सार्द्धे ग्रहो भूर्लोकगो ध्रुव॥
उपरिष्टात् स्थितश्चन्द्रो लोटय: सप्तलोकिनम्।
सप्ताधुपरि वैदूर्य्यो योजनाना प्रमाणत:॥
भूर्लोकात् परिमंडलात् कोटिद्वादश यो
दयते दिवि: सप्तात् ग्रहेभ्यस्तत्र:।
वैदूर्य्यादुपरि शैत्रो लोक: शीतप्रकोटिक:॥
तिसृभिश्च सहस्राद्य वैशाखस्तु पुनर्व्व:।
सप्तेता सहिता: सप्तयोजनानां सहस्रकै:॥"
इति वायुपुराणे सूर्य्यसिद्धान्तकर्त्तृत्व:॥
सूर्य्यसूनुत्व सूर्य्यसिद्धान्तवेत्तृत्वेन तस्य
उक्त:,—

स्वर्णतरिङ्गा, स्त्री, (स्वर्णस्य तरिङ्गरा।) गङ्गा। इति राजनिर्घण्टः॥

स्वर्णनदी, स्त्री, (स्वर्णस्य नदी।) गङ्गा। इति हेमचन्द्रः॥

स्वर्णनिरिः, } पुं, (स्वर्णस्य पक्षे स्वः गिरिः
स्वर्णिरिः, } पर्व्वतः।) सुमेरुः। इति हेमचन्द्रः॥

स्वर्णमधूः, स्त्री, (स्वर्णेनां देवानां वधूः।) अप्सरसः। इति हेमचन्द्रः॥

स्वर्गी, [न्] पुं, (स्वर्गोऽस्त्यस्य भोग्यत्वेनेति। स्वर्ग+इनिः।) देवता। इति त्रिकाण्डशेषः॥ (यथा, कुमारे। २। ४५।

"भुवनालोकनप्रीतिः स्वर्गिभिर्नानुभूयते।
विलीभूते विमानानां तदापातभयात् पथि॥")

स्वर्गगामिनि, त्रि। तल्लक्षणं यथा,—

"दया भूतेषु संवादो परलोके प्रतिक्रिया।
मलं परहिता चोक्तिर्वेदप्रामाण्यदर्शनम्॥
गुरुदेवर्षिपूजा च केवलं साधुसङ्गमः।
मत्क्रियाध्ययनं मैत्री स्वर्गिणां लक्षणं विदुः॥"

इति गारुडे २२६ अध्यायः॥

स्वर्गौकाः, [स्] पुं, (स्वर्गं ओको वासस्थानं येषाम्।) देवता। इति शब्दरत्नावलिः॥ (यथा, कुमारे। २॥ ५८।

"अनर्घ्यमर्घ्येण तमद्रिनाथः
स्वर्गौकसामर्चितमर्चयित्वा।
आराधनायास्य मरीचिमेतां
समादिदेशप्रयतां तनूजाम्॥")

स्वर्ग्यः, त्रि, (स्वर्गस्य निमित्तं संयोगउत्पातो वा। स्वर्ग+गोहेतौ मंज्ञापरिमाणाच्चादेर्यत्।" ५। १। ३६। इति यत्। यद्वा स्वर्गः प्रयोजनमस्य। "स्वर्गादिभ्यो यदुक्तयः।" ५। १। १११। इत्यस्य वार्त्तिकोक्त्या यत्।) स्वर्गीयः। स्वर्गशब्दात् ष्यञ्प्रत्ययेन निष्पन्नः॥ (यथा, भागवते। ४। १२। ४४।

"धन्यं यशस्यमायुष्यं पुण्यं स्वस्त्ययनं महत्।
स्वर्ग्यं यौधं सौमनसं प्रशस्यमघमर्षणम्॥")

स्वर्ज्जिकः, पुं, स्वर्ज्जिकाक्षारः। इति राजनिर्घण्टः॥ यवक्षारः। यथा,—

"पाक्यः क्षारो यवक्षारो यावशूको यवाग्रजः।
स्वर्ज्जिकोऽपि स्मृतः क्षारः कायोत्थः सुरवल्लभकः॥
कथितः स्वर्ज्जिकाभेदो विशेषैः सुवर्चिका।
यवक्षारो लघुः स्निग्धः सुस्वादी वह्निदीपनः॥
निहन्ति गुल्मं वातामश्लेष्मोदावर्तमामयान्॥
स्वर्ज्जिकाक्षयुगलं समात्रं विद्धि पाठं गुल्मकृच्छ्रनुत्।
सुवर्चिका स्वर्ज्जिकायाः क्षौद्रा गुल्मी जयेत्॥"

इति भावप्रकाशः॥

स्वर्ज्जिकाक्षारः, पुं, स्वर्ज्जिक्षारः। साजिखार इति भाषा। अस्य गुणाः।

"यवक्षारो यवैर्ज्ज्ञेयस्तीक्ष्णोष्णः कफवातजित्।
गुल्मप्लीहोदरश्वासकासार्शोजीर्णशूलजित्॥
सर्व्वक्षारगुणश्चोक्तः स्वर्ज्जिकाक्षार उच्यते॥"

इति राजवल्लभः॥

स्वर्ज्जिक्षारः, पुं, (स्वर्ज्जी एव क्षारः।) स्वर्ज्जिकाक्षारः। तत्पर्य्यायः। स्वर्ज्जिकः २ क्षारः ३ स्वर्ज्जी ४ सुखोज्जिकः ५ सुवर्चिकः ६ सुवर्चिः ७ सुखवर्च्चाः ८। अस्य गुणाः। पटुत्वम्। कटुपाकत्वम्। तीक्ष्णत्वम्। वातकफकृमिनाशित्वम्। गुल्माध्मानक्रमिमन्दाग्निजठरदोषनाशित्वञ्च। इति राजनिर्घण्टः॥

स्वर्ज्जी, [न्] पुं, (सुखेन अर्ज्जयतीति। सु+अर्ज्ज+णिनिः।) स्वर्ज्जिक्षारः। इति राजनिर्घण्टः॥

स्वर्ण, क्ली, (सुष्ठु अर्णो वर्णो यस्य।) सुवर्णम्। धुस्तूरः। इत्यमरः। २। ८। ६४॥ गौरसुवर्णाख्यकम्। नागकेशरम्। इति राजनिर्घण्टः॥

स्वर्णस्योत्पत्तिर्यथा,—

"एकदा सर्व्वदेवाश्च समयुः स्वर्गसंसदि।
तत्र कृत्वा च नृत्यञ्च गायन्त्यश्चरसां गणाः॥
विलोक्य रम्भां सुश्रोणीं सकामो वह्निरेव च।
पपात वीर्य्यं चच्छाद लज्जया वामसा तथा॥
उत्तस्थौ स्वर्णपुङ्खश्च वह्निः क्षिप्रा ज्वलत्प्रभः।
त्रयेण वर्द्धयामास स सुमेरुर्बभूव ह॥
हिरण्यरेतसं वह्निं प्रवदन्ति मनीषिणः॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १३१। ३३-३७॥

तस्य गुणाः।

"सुवर्णं तिक्तमधुरं कषायं गुरु लेखनम्।
हृद्यं रसायनं बल्यं चक्षुष्यं कान्तिदं शुचि॥
आयुर्मेधाबलश्रैष्ठ्यवाग्विशुद्धिद्युतिप्रदम्।
क्षयोन्मादग्रहार्त्तानां शमनं परमुच्यते॥"

इति राजवल्लभः॥ ७॥

सुवर्णस्य शोधनमारण्यविधिर्यथा। मारणाय योग्यं सुवर्णमाह।

दार्ढे रक्तं स्थिरं स्निग्धे निकषे कुङ्कुमप्रभम्।
तारशुक्लाभिभं स्निग्धं कोमलं गुरु हेम सत्॥
सत् उत्तमम्।
तप्तेऽतिकठिनं रूक्षं विवर्णं समलं द्रलम्।
दार्ढे स्निग्धेऽस्थिरं श्वेतं कषे स्फुटलघु त्यजेत्॥"

अथ शोधनविधिः।

"पत्रलीकृतपत्राणि हेम्नो वह्नौ प्रतापयेत्॥
निक्षिपेत्तप्ततप्तानि तैले तक्रे च काञ्जिके॥
गोमूत्रे च कुलत्थानां कषाये तु त्रिधा त्रिधा।
स्वं हेम्नः परेषाञ्च धातूनां शोधनं भवेत्॥"

अथ शुद्धस्य सुवर्णस्य दोषमाह।

"बलं मेधामग्निं हरते नराणां
रोगव्रजं पोषयतीह कामे।
अधोरुकार्श्वे च सदा सुवर्णं-
मनुद्धमेतत्परमस्य कुर्य्यात्॥"

अथ स्वर्णमारणविधिः।

"स्वर्णस्य द्विगुणं रूक्षमर्केण सह मर्दयेत्।
तद्गोलकसमं गन्धं निक्षिपादधरोत्तरम्॥"

स्वर्णस्य अधिगुणकमम्लरस। गन्धं गन्धकचूर्णम्।

"गोलकञ्च ततो रुद्धा सरावद्वन्द्वसंपुटे।
क्षिप्त्वा कोपरसैर्देयान् पुटान्येवं चतुरेव॥
त्रिवृत्तं जायते भस्म ततो हेम पुनः पुनः।"

स्वर्णका रुद्धा सरावद्वन्द्वसंपुटिकया। यत्नोपलः गोरटा इति लोके। निरुत्थं यत् पुनर्न्न जीवति॥ ८॥ अथान्यप्रकारः।

"काञ्चनेन गलिते नागं षोढ़ार्द्धेन निःक्षिपेत्।
चूर्णयित्वा तथाग्नेन दृष्ट्वा क्षत्वा तु गोलकम्॥
गोलकेन समं गन्धं दत्त्वा चैवाधरोत्तरम्।
सरावसंपुटे धृत्वा पुटे दिव्यौषधैः॥
एवं सप्तपुटैर्हेम निरुत्थं भस्म जायते।
अत्रापि पूर्व्ववद्गन्धः प्रदातव्यः पुनः पुनः॥
काञ्चनारिरसैर्घृष्ट्वा समस्तकगन्धयोः।
कज्जलीहेमपत्राणि लेपयेत् समया तया॥
काञ्चनारित्वचः कल्कैर्गुञ्जागुग्गं प्रलेपयेत्।
धृत्वा तत् संपुटे गोलं रुद्धासंपुटे च तत्॥
निधाय सन्धिरोधञ्च क्षत्वा संशोष्य गोलकम्।
वह्निं खरतरं कुर्य्यादेवं दद्यात् पुटत्रयम्॥
निरुत्थं जायते भस्म सर्व्वकर्म्मसु योजयेत्।
काञ्चनारिप्रकारेण लाङ्गली क्षन्ति काञ्चनम्॥
लाङ्गली करिहारी।
ज्वालामुखी तथा हन्यात्तथा हन्ति मनःशिलाम्॥
शिलासिन्दूरयोर्पूर्णसमयोरर्कदुग्धके॥
सप्तधा भावना दद्याच्छोषयेच्च पुनः पुनः।
ततस्तु गलिते हेम्नि कल्कोऽयं दीयते समः॥
पुनर्द्विगुणितं यावत् कल्कं हेमस्तदा भवेत्॥"
एवं वेलाचूर्णं दद्यात् कल्कं हेमस्तदा भवेत्॥"
एवं मारितस्य सुवर्णस्य गुणाः।
सुवर्णं शीतलं हृद्यं बल्यं गुरु रसायनम्।
स्वादु तिक्तञ्च सुवरं पाके च स्वादु पिच्छिलम्॥
पवित्रं वृंहणं नेत्र्यं मेधास्मृतिमतिप्रदम्॥
वृद्धमायुष्करं कान्तिवाग्विशुद्धिस्थिरत्वकृत्।
विषदग्धक्षयोन्मादविषदोषज्वरश्रीपथित्॥"
हृद्यं हृद्याय कामुकाय हितम्॥ ९॥
अस्मत्प्रकाशितं स्वर्णं बलं वीर्य्यञ्च गाङ्गयेत्।
करोति रोगान्मृत्युञ्च तद्भस्माद् यत्नतस्त्यजेत्॥"

इति भावप्रकाशः॥

अन्यत् सुवर्णशब्दे द्रष्टव्यम्॥

स्वर्णकदः, पुं, (स्वर्णवत् पीतः कदो यस्य।) कणगुग्गुलुः। इति राजनिर्घण्टः॥ (स्वर्णस्य कदः।) सुवर्णकदया च॥

स्वर्णकदिका, स्त्री, (स्वर्णस्य कदिका।) कनककदया। यथा,—

"कुर्व्वला मरिचं क्षारं पालेवान्तु शुरीरुहाः।
निःस्नुहा स्वर्णकदिकाक्षा वल्लभि जलौरिमाः॥"

इति कालिकापुराणे ८२ अध्यायः॥

स्वर्णकायः, पुं, (स्वर्णं इव पीतः कायो यस्य।) गरुडः। इति हेमचन्द्रः॥ सुवर्णमयशरीरे, त्रि॥

स्वर्णकारः, पुं, (स्वर्णं स्वर्णालङ्कारं करोतीति। कृ+अण्।) जातिविशेषः। सेकरा इति भाषा। तत्पर्य्यायः। वाडोत्थमः २ कलादः ३ रूपकारः ४। रत्नसारः। ५। १०। ६। कलादः ५। इति हट्टविलासरत्नदीपौ ६। इति अद्वैतः। स्वर्णोत्पत्तिर्यथा,—

"विश्वकर्म्मा च मूढायां वीर्य्याधानं चकार ह:।
ततो बभूवु: पुत्राश्च नवैते शिल्पकारिण:॥
माणाकार: कर्म्मकार: शङ्खकार: कुविन्दक:।
कुम्भकार: कंसकार: षड्वैते शिल्पिनां वरा:॥
सूत्रधारश्चित्रकर: स्वर्णकारस्तथैव च।
पतितास्ते ब्रह्मशापादद्याप्या वर्णसङ्कर:॥
स्वर्णकार: स्वर्णचौर्य्यात् ब्राह्मणानां द्विजोत्तम।
बभूव सद्य: पतितो ब्रह्मशापेन कर्म्मणा॥"
इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे। १०। १६—२२॥
तस्य कर्म्मविपाको यथा,—
तैलचौरस्तैलकीटो मूर्द्धि कीटश्च जन्मकम्।
ततो भवेत् स्वर्णकारो जन्मैकं दुरमानस:॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ८५।१२८॥

स्वर्णकृत्, पुं, (स्वर्णं सुवर्णालङ्कारं करोतीति। कृ+क्विप् तुक् च।) स्वर्णकार:। इति शब्दमाला॥

स्वर्णकेतकी, स्त्री, (स्वर्णवर्णा केतकी।) हरिद्रावर्णकेतकीपुष्पम्। तत्पर्य्याय:। हेमकेतकी २ कनकप्रसवा ३ हैमी ४ छिन्नरुहा ५ विशारुहा ६ स्वर्णपुष्पी ७ कामखड्गदला ८। अस्या गुणा:।
"केतकीकुसुमं वर्ण्यं केशदौर्गन्ध्यनाशनम्।
हैमाभं मदनोन्मादवर्द्धनं सौख्यकारि च॥
तस्यास्तनोति शिशिर: कटु: पित्तकफापह:।
रसायनकरो वर्ण्यो देहदार्ढ्यकर: पर:॥"
इति राजनिर्घण्ट:॥

स्वर्णक्षीरी, स्त्री, (स्वर्णवर्णा क्षीरी।) क्षीरौषधिविशेष:। तत्पर्य्याय:। पटुपर्णी २ हैमवती ३ हिमावती ४। इत्यमर:। २। ४। १३८॥
पत्वारि स्वर्णक्षीर्याम्। इयं पीतक्षीरा नागजिह्विकाकारा।
"हेमवर्णं पयस्तस्या हिमवद्भूमिसम्भवा।
सा नागजिह्विकाकारा तत्फलं वाजिनौषधमिति॥"
षट्पानि निस्त्रिंशानि पर्णानि यस्या: षट्पर्णी पातेरत इति ईप्। हिमवति जाता हैमवती सा:। स्वर्णमिव पीतत्वात् क्षीरमस्या: स्वर्णक्षीरी नदादि:। हिमयुक्तोत्पत्तिस्थानयोगात् हिमावती सौक्ष्म्यपाटवतुरिति वतु, नागाह्वयेति दीर्घ:। इति भरत:॥ ॥ अपि च।
"स्वर्णक्षीरी स्वर्णदुग्धा स्वर्णाङ्गा रुक्मिणी तथा।
सुपर्णी हैमदुग्धी च हैमक्षीरी च काञ्चनी॥
स्वर्णक्षीरी हिमा तिक्ता ज्वरमिश्रकफापहा।
मस्तिष्कपूयास्रदोषदाहव्रणहरा परा॥"
इति राजनिर्घण्ट:॥

स्वर्णगैरिकं, क्ली, (स्वर्णवत् पीतं गैरिकम्।) वर्णक् माटी इति भाषा। इति राजनिर्घण्ट:॥ अस्य विवरणं गैरिकशब्दे द्रष्टव्यम्॥

स्वर्णगौरी, स्त्री, (स्वर्णवर्णा चासौ गौरी यस्या:।) शालकटङ्कटीपुरुभागात् निःसृतनदीविशेष:। यथा,—
"सा निःसृता पूर्वभागात् शालकिरिवराद् नदी।
स्वर्णगौरीति विख्याता सा गङ्गासदृशी फले॥"
इति कालिकापुराणे ८२ अध्याय:॥

स्वर्णचूड:, पुं, (स्वर्णवर्णा चूडा यस्य।) पक्षिविशेष:। यथा,—
"चाष: कीकीदिवि: स्वर्णचूडोऽथ पीतसूचक:॥"
इति जटाधर:॥

स्वर्णजं, क्ली, (स्वर्णात् जायते इति। जन+ड:।) रङ्गम्। यथा,—
"वङ्गं त्रपु: स्वर्णजनागजीवने
मृदङ्गरङ्गे गुरुपत्रपिच्छटे।
स्याच्चक्रमङ्गं तमरञ्च नागजं
कस्तीरमालीनकसिन्दुरे अपि॥"
इति हेमचन्द्र:॥

स्वर्णजीवन्ती, स्त्री, (स्वर्णवर्णा जीवन्ती।) वृक्षविशेष:। सोनाजीवड इति हिन्दी भाषा। तत्पर्य्याय:। हेमाह्वा २ हेमजीवन्ती ३ वृक्षग्रन्थि: ४ हिमाह्वया ५ स्वर्णपर्णी ६ सुजीवन्ती ७ स्वर्णजीवा ८ सुपर्णिका ९ हेमपुष्पा १० स्वर्णलता ११ हेमवल्ली १२ हेमलता १३। अस्या गुणा:। वृष्यत्वम्। मधुरत्वम्। चक्षुष्यत्वम्। शिशिरत्वम्। वातपित्तासृदाहनाशित्वम्। बलवर्द्धनत्वञ्च। इति राजनिर्घण्ट:॥

स्वर्णदी, स्त्री, (स्व: स्वर्गस्य नदी।) मन्दाकिनी। इत्यमर:। १। १। ५२॥ दृषिकाली। इति राजनिर्घण्ट:॥ सितगङ्गा। सा तु कामाख्याया: पूर्व्वभागे दिक्करवासिन्या: प्रान्ते स्थिता। यथा,—
"नद्या: स्वर्णश्रिया पूर्व्वं नदी कामाङ्गया तथा।
कामाख्याया: पूर्व्वभागे नदी सोमासनाङ्गया।
सोमासनाया: पूर्व्वस्यां नदी नाम्ना दृषोदका॥
तत: पूर्व्वे कामरूपपीठान्ते जगतां प्रसू:।
जगन्माया महामाया देवी दिक्करवासिनी॥
एता या कथिता नद्य: सकला दक्षिणस्रवा:।
तासु स्नात्वा च पीत्वा च स्वर्गलोकमवाप्नुयात्॥
प्रान्ते दिक्करवासिन्या: सदा वहति स्वर्णदी।
सितगङ्गाङ्गया लोके साक्षात् गङ्गाफलप्रदा॥
सा भूमिपीठसंस्था तु देवी दिक्करवासिनी।
अन्तर्जले: ज्ञावयन्ती याति प्रत्यूषतां सुरै:॥
सितगङ्गाजले स्नात्वा दृष्ट्वा शम्भुं हरिं विधिम्।
दृष्ट्वा ललितकान्ताख्यां पुनर्योनौ न जायते॥"
इति कालिकापुराणे ८२ अध्याय:॥

स्वर्णदीधिति:, पुं, (स्वर्णवत् दीधिति: किरणं यस्य।) अग्नि:। इति त्रिकाण्डशेष:॥

स्वर्णद्रु:, पुं, (स्वर्णवर्णो द्रु:।) आरग्वध:। इति राजनिर्घण्ट:॥

स्वर्णपक्ष:, पुं, (स्वर्णवत् पीतौ पक्षौ यस्य।) गरुड:। इति त्रिकाण्डशेष:॥

स्वर्णपङ्खा, स्त्री, (स्वर्णस्य पङ्खौ यस्यामिति।) स्वर्णझा। इति शब्दरत्नावली॥

स्वर्णपाटका:, पुं, (स्वर्णं पाटयतीति। पट+क्विप् णुल्।) टङ्कण:। इति शब्दमाला॥ (क्वचित् स्वर्णपाचक: पठ्यते॥ तत्पर्य्याया यथा। टङ्कण:। स्वर्णपाचक:। इति वैद्यकरत्नमालायाम्॥)

स्वर्णपारेवतं, क्ली, (स्वर्णवर्णं पारेवतम्।) महापारेवतम्। इति राजनिर्घण्ट:॥

स्वर्णपुष्प:, पुं, (स्वर्णवर्णं पुष्पमस्य।) आरग्वध:। चम्पक:। इति राजनिर्घण्ट:। चम्पकपुष्पैर्विष्णुपूजाफलं यथा,—
"माघे चम्पकपुष्पैश्च यो ऽर्च्चयेत् कमलापतिम्।
स गच्छेत् परमं धाम विमुक्त: सर्व्वपातकै:॥
यावन्ति स्वर्णपुष्पाणि दीयन्ते चक्रपाणये।
तावद्युगसहस्राणि स्थीयते विष्णुमन्दिरे॥
मेरुतुल्यसुवर्णानि दत्त्वा भवति यत् फलम्।
एकेन स्वर्णपुष्पेण दत्त्वा भवति तत् फलम्॥
सुवर्णपुष्पं विप्रेन्द्र सर्व्वदा केशवप्रियम्।
माघे मासि विशेषेण पवित्रं केशवार्चने॥
सुवर्णकुसुमैर्दिव्यैर्येन नाराधितो हरि:।
रत्नैर्हीन: सुवर्णाढ्यै: स भवेच्चर्मजन्मनि॥"
इति पाद्मे क्रियायोगसारे ६ अध्याय:॥
वावलवृक्ष:। इति शब्दचन्द्रिका॥

स्वर्णपुष्पा, स्त्री, (स्वर्णवत् पुष्पं यस्या:।) कलिकारि:। स्वर्णुली। सातला। इति राजनिर्घण्ट:॥ (स्वर्णुलीशब्देऽस्या गुणा: ज्ञातव्या:॥)

स्वर्णपुष्पी, स्त्री, (स्वर्णवत् पीतं पुष्पं यस्या:। ङीष्।) आरग्वध:। इति शब्दचन्द्रिका॥ स्वर्णकेतकी। इति राजनिर्घण्ट:॥

स्वर्णफला, स्त्री, (स्वर्णवत् पीतं फलं यस्या:।) पीतरम्भा। इति राजनिर्घण्ट:॥

स्वर्णवणिक्, [ग्] पुं, (स्वर्णस्य वणिक्।) वर्णसङ्करजातिविशेष:। सोनार वैसे इति भाषा। तस्य कर्म्मविपाको यथा,—
"तैलचौरस्तैलकीटो मूर्द्धि कीटश्च जन्मकम्।
ततो भवेत् स्वर्णकारो जन्मैकं दुरमानस:॥
तम:कुण्डे वर्षशतं स्थित्वा स्वर्णवणिग् भवेत्।
जन्मैकञ्च दुराचारो जन्मैकं वारयो भवेत्॥
विश्वैकलिपिकर्त्ता च भक्षदातुर्हरेत् हरे:।
कायस्थेनोदरस्थेन मातुर्मांसं न खादितम्।
तत्र नास्ति कृपा तस्य दन्ताभावेन केवलम्॥
स्वर्णकार: स्वर्णवणिक् कायस्थश्च प्रजेश्वर।
नरेषु मध्ये ते धूर्त्ता: कृपाहीना महीतले॥
हृदयं क्षुरधाराभं तेषाञ्च नास्ति सादरम्।
प्रतीयं सज्जन: कोऽपि कायस्थो नेतरौ न तौ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ८५।१२८-१३२॥

स्वर्णविन्दु:, पुं, (स्वर्णस्य विन्दुर्यत्र।) विष्णु:। इति त्रिकाण्डशेष:॥ सुवर्णकणिका च॥

स्वर्णशृङ्गार:, पुं, (स्वर्णवर्णो शृङ्गार:।) स्वर्णभृङ्गराज:। इति राजनिर्घण्ट:॥ सुवर्णकलसश्च॥

स्वर्णसरा, स्त्री, (नदीविशेष:। यथा,—
"तत्रोमाया: शरीरात्तु संभवन्ति जले: हृद।
तत: स्वर्णसरा नाम स्वर्णश्री: सर्व्वतोऽधिका॥
एतासु क्षेत्रमासे तु स्नात्वा मर्त्यो नरर्षभ।
कल्पपद्मे चतुर्दश्यां त्रिकालं यश्च मानव:

चिरं शिवगृहे स्थित्वा शेषे ब्रह्मपदं व्रजेत् ।
भूमावबन्धतः पश्चात् सार्व्वभौमनृपो भवेत् ॥"
इति कालिकापुराणे ८२ अध्यायः ॥

स्वर्णमाक्षिकं, क्ली, (स्वर्णवत् पीतं माक्षिकम् ।) स्वनामख्यात उपधातुः । तस्य नामानि गुणाश्च । "स्वर्णमाक्षिकमाख्यातं तापिञ्जं मधुमाक्षिकम् । तोक्ष्णं माक्षिकधातुश्च मधुधातुश्च स स्मृतः ॥ किञ्चित्तुत्तवर्णसाधित्वात् स्वर्णमाक्षिकमीरितम् । उपधातुः सुवर्णस्य किञ्चित्स्वर्णगुणान्वितम् ॥ तया च काञ्चनाभावे दीयते स्वर्णमाक्षिकम् । किन्तु तस्यानुकल्पत्वात् किञ्चिद्धीनगुणास्मृतः ॥ न केवलं स्वर्णगुणा वर्त्तन्ते स्वर्णमाक्षिके । द्रव्यान्तरस्य संसर्गात् सन्त्यन्येऽपि गुणास्मृतः ॥ सुवर्णमाक्षिकं स्वादु तिक्तं हृद्यं रसायनम् । चक्षुष्यं वस्तिरुक्कण्डपाण्डुमेहविषोदरम् । अर्शः श्लीपं विषं कण्डूं त्रिदोषमपि नाशयेत् ॥"*॥

अशुद्धस्वर्णमाक्षिकस्य दोषमाह ।
"मन्दानलत्वं बलहानिमुग्रां
पित्तस्रितां नेत्रगदान् सकुष्ठान् ।
मालां तथैव व्रणपूर्व्विकाश्च
कुर्य्यादशुद्धं खलु माक्षिकञ्च ॥"*॥

तदोषशान्त्यर्थं शोधनमाह ।
"माक्षिकस्य त्रयो भागा भागैकं सैन्धवस्य च ।
मातुलुङ्गद्रवैर्व्वाप्य सप्तधा तं पचेत् ॥
चालयेल्लोहपात्रे यावत् पात्रं सुलोहितम् ।
भवेत्तत्तु संशुद्धं स्वर्णमाक्षिकमुच्यते ॥"*॥

तन्मारणं यथा,—
"कुलत्थस्य कषायेण दृष्ट्वा तेलेन वा पुटेत् ।
तेनैवाजस्रशेषेण म्रियते स्वर्णमाक्षिकम् ॥"
इति भावप्रकाशः ॥

(तस्यास्य शोधनं यथा,—
"स्वर्णमाक्षिकचूर्णन्तु वह्नौ वह्ना विपाचयेत् ।
कालमाविषगन्धाभिश्च कार्षे दोलाविधानतः ।
तदधःपतितं शुभ्रमेवं शुध्यति माक्षिकम् ॥"
इति वैद्यकरत्नेन्द्रसारसंग्रहे आरग्वधारोधिकारे ।)

स्वर्णयूथी, स्त्री, (स्वर्णवर्णा यूथी ।) पीतवर्णयूथिका । तत्पर्य्यायः । स्वर्णिनी २ पीतिका ३ हेमपुष्पिका ४ । इति शब्दरत्नावली ॥

स्वर्णलता, स्त्री, (स्वर्णवर्णा लता ।) ज्योतिष्मती । इति राजनिर्घण्टः ॥ (ज्योतिष्मतीशब्देऽस्याविवरणं द्रष्टव्यम् ॥)

स्वर्णवल्ली, स्त्री, (स्वर्णवत् वर्णो यस्याः ।) धरिका । इति राजनिर्घण्टः ॥ सुवर्णवल्लरीशब्देऽपि, क्ली । (यथा, भागवते । १ ।
"गन्धाद्यामी भुवनविजयी कैतवे स्वर्णवल्ली
सद्वीजानां शुचिमधुपः पुष्पमाली पयोदः ।
आनन्दोत्थः कुमुदसरसां कश्चकोरेक्षणायाः
स्तात् सम्भूत्यै मम यदपि मतिर्नैव मुक्तौ विरेजे ॥")

स्वर्णवल्कलः, पुं, (स्वर्णवत् वल्कलं यस्य ।) योगाकवृक्षः । इति शब्दचन्द्रिका ॥

स्वर्णवल्ली, स्त्री, (स्वर्णवर्णा वल्ली ।) लताविशेषः । तत्पर्य्यायः । रक्तफला २ काकाण्डुः ३ काकवल्ली ४ । अस्या गुणाः । शिरःपीड़ात्रिदोषनाशित्वम् । दुग्धदाढत्वञ्च । इति राजनिर्घण्टः ॥ (तथास्याः पर्य्यायो गुणाश्च ।
स्वर्णवल्लीरक्तफला काकाण्डुः काकवल्लरी ।
स्वर्णवल्ली शिरःपीड़ां त्रिदोषान् हन्ति दुग्धदा ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

स्वर्णसेफालिका, स्त्री, (स्वर्णवर्णा सेफालिका ।) आरग्वधः । इति शब्दमाला ॥ पीतसेफालिका च ॥

स्वर्णाङ्गः, पुं, (स्वर्णवत् पीतमङ्गं यस्य ।) आरग्वधः । इति राजनिर्घण्टः ॥ (तथास्य पर्य्यायाः ।
"आरग्वधो राजवृक्षः सम्याकश्चतुरङ्गुलः ।
आरेवतो व्याधिघातः शतमालः सुवर्णकः ॥
कर्णिकारो दीर्घफलः स्वर्णाङ्गः स्वर्णभूषणः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

स्वर्णारिः, पुं, (स्वर्णस्य अरिः ।) गन्धकम् । इति कैचित् ॥

स्वर्णुली, स्त्री, (क्षुपविशेषः । तत्पर्य्यायः । हेमपुष्पी २ स्वर्णपुष्पा ३ अध्वगा ४ । अस्या गुणाः । कटुत्वम् । शीतत्वम् । कषायत्वम् । व्रणापहत्वञ्च । इति राजनिर्घण्टः ॥

स्वर्त्त, क गत्यातङ्के । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-गतौ सक०-आतङ्के अक० सेट् ।) तङ्को दुःखेन जीवनम् । क स्वर्त्तयति जनं गच्छति दुःखेन जीवति यैत्यर्थः । अपिस्वर्त्तत् । इति दुर्गादासः ॥

स्वर्द, ऊ, प्रीतिलिप्सोः । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-सेट् ।) प्रीतिः प्रीतिकरणम् । लिट्रसोपादानम् । ऊ, स्वर्दते विविधास्वादं स्वादते च रसायनमिति दुर्गादासः । इति दुर्गादासः ॥

स्वर्नदी, स्त्री, (स्वः स्वर्गस्य नदी ।) स्वर्गङ्गा । इत्यमरः ॥ स्वः स्वर्गस्य नदी स्वर्नदी यूनि इति योगविभागात् यत्वम् । पूर्व्वपदे संज्ञायां गत्वमिति परेषाम् । प्रकरणे गिरिनद्यादीनामुपसंख्यानमिति वा णत्वम् । इति मधुसूदनः ॥ स्वर्णदी इत्यनकारवर्त्तीत्येके । इति भरतः ॥

स्वर्भानवः, पुं, (स्वर्भानोरयं प्रियत्वात् । स्वर्भानु + अण् ।) सोमवृक्षः । इति राजनिर्घण्टः ॥

स्वर्भानुः, पुं, (स्वरत्यापि भवतीति । स्वर् + भा + "दाभाभ्यामुः ।" उणा० ३ । ३२ । इति नुः ।) राहुः । इत्यमरः । १ । ३ । २६ ॥ (यथा, माघे । २ । ४८ ।
"तुल्येऽपराधे स्वर्भानुर्भानुमन्तं शिरश्चयत् ।
दिग्भीरुमाशु यमने तन्मुहिरः स्फुटं क्षमम् ॥"
सत्यभामागर्भजातः श्रीकृष्णपुत्रविशेषः । यथा, भागवते । १० । ६१ । १३ ।
"भानुः सुभानुः स्वर्भानुः प्रभानुर्भानुमांस्तथा ।
चन्द्रभानुर्बृहद्भानुरतिभानुस्तथाष्टमः ।
श्रीभानुः प्रतिभानुश्च सत्यभामात्मजा दश ॥")

स्वर्भानुसूदनः, पुं, (स्वर्भानोः सूदनं यत्र ।) सूर्य्यः । इति पुराणम् ॥ (यथा, महाभारते । ३ । ३०१ । १८ ।
"तच्छ्रुत्वा भगवान् देवो भानुः स्वर्भानुसूदनः ।
उवाच तं तथेत्येव कर्णं सूर्य्यः सायमिव ॥")

स्वर्यातः, त्रि, (स्वः स्वर्गं यातः ।) मृतः । यथा, याज्ञवल्क्यः ।
"पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा ।
तत्सुतो गोत्रजो बन्धुः शिष्यः सब्रह्मचारिणः ॥
एषामभावे पूर्व्वस्य धनभाग्युत्तरोत्तरः ।
स्वर्यातस्य ह्यपुत्रस्य सर्व्ववर्णेष्वयं विधिः ॥"
इति दायभागः ॥

स्वर्लोकः, पुं, (स्वरेव लोकः ।) स्वर्गः । इति शब्दरत्नावली ॥ (यथा, भागवते । २ । ५ । ४२ ।
"भूर्लोकः कल्पितः पद्भ्यां भुवर्लोकोऽस्य नाभितः ।
स्वर्लोकः कल्पितो मूर्द्धा इति वा लोककल्पना ॥")

स्वर्वधूः, स्त्री, (स्वः स्वर्गस्य वधूः ।) अप्सरसः । इति हेमचन्द्रः ॥ (यथा, कथासरित्सागरे । १० । १६ ।
"अथाजगाम भूलोकं तामादाय पुरूरवाः ।
स्वर्वधूदर्शनाघर्षमपश्यन् मर्त्यचक्षुषाम् ॥")
स्वर्गीयस्त्रीमात्रेऽपि ॥

स्वर्वापी, स्त्री, (स्वः स्वर्गस्य वापी ।) गङ्गा । इति हेमचन्द्रः ॥

स्वर्वेश्या, स्त्री, (स्वः स्वर्गस्य वेश्या ।) उर्व्वशीप्रभृतयश्चरसः । इत्यमरः । १ । १ । ५५ ॥

स्वर्व्वैद्यौ, पुं, (स्वः स्वर्गस्य वैद्यौ ।) अश्विनीकुमारौ । तत्पर्य्यायः । अश्विनीसुतौ २ नासत्यौ ३ अश्विनौ ४ दस्रौ ५ आश्विनेयौ ६ । इत्यमरः । १ । १ । ५४ ॥ द्विवचनविशिष्टादिरूपवचनाभावः । इति स्वामी । सर्व्वे एते नित्यद्विवचनान्ता एकत्वविवक्षायां एकवचनान्ता अपि । यथा,—
"नासत्यश्चैव दस्रश्च स्मृतौ तौ नासतोऽश्विनौ ।"
इति मार्कण्डेयपुराणम् ॥ इति भरतः ॥

स्वलीनः, पुं, (स्वस्मिन् लीनः ।) दानवविशेषः । यथा,—
"तामायान्तीन्तु रौद्राय स्वलीनो नाम दानवः ।
पार्श्वतं रूपमास्थाय पर्य्यायान्तु प्रतीक्षितः ॥
ततो भगीरथो राजा रामयामास कौशिकम् ।
स तुष्टः प्रददौ तस्मै बाहनं तं भगीरथः ।
तमारुह्याश्रमस्थश्च यज्ञ कर्त्ता भगीरथः ।
तेन यागेन तं देवं संविधाय न सङ्गमम् ।
गमिष्यति समाधाय सर्व्वदेवैरावृतो मखः ।
मद्दोत्तमं समासेदे न यावन्नागयाङ्गणम् ।
तस्मादायतनादेषा त्वभूत्तामसुरं वरम् ॥"
इति वह्निपुराणे गङ्गापतरणनामाध्यायः ॥

स्वस्थः, त्रि, (सुष्ठु अस्थः।) अत्यस्थः। यथा,—
"नेहातिक्रमनाशोऽस्ति प्रत्यवायो न विद्यते।
स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात्॥"
इति भगवद्गीतायाम्। २। ४०॥

स्वल्पकेशरी, [न्] पुं, (स्वल्पः केशरोऽस्यास्तीति। इनिः।) कीविदारः। इति राजनिर्घण्टः॥ (पर्य्यायोऽस्य यथा,—
"कोविदारश्चमरिकः कुद्दालो युगपत्रकः।
कृष्णस्तो ताम्रपुष्पश्च अन्तकः स्वल्पकेशरी॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

स्वल्पकेशी, [न्] पुं, (स्वल्पः केशोऽस्यास्तीति। इनिः।) भृतकेशः। यथा,—
"गोलोमी स्वल्पकेशी च भूतकेशश्च केशहृत्॥"
इति शब्दचन्द्रिका॥

स्वल्पकेशधिक्षिप्ते, त्रि॥

स्वल्पपत्रकः, पुं, (स्वल्पानि पत्राणि यस्य। कप्।) गौरशाकः। स तु मधूकभेदः। यथा,—
"गौरशाकी मधुस्रोन्नो गिरिजः स्वल्पपत्रकः॥"
इति रत्नमाला॥

स्वल्पफला, स्त्री, (स्वल्पं फलं यस्याः।) क्षुद्रभाभेदः। तत्पर्य्यायः। कच्छ्वी २ श्वाङ्गनाग्निनी ३ श्रीवृक्षवृत्तः ४ विश्वघ्नी ५ कक्षघ्नी ६ अपराजिता ७। अस्या गुणाः क्षुद्राग्नुगुणतुल्याः। इति राजनिर्घण्टः॥

स्वावासिनी, स्त्री, (स्वस्मिन् चिरालये वसतीति। वस+णिनिः। ङीप्।) जटा जटामूढ़ा वा चिरबद्धस्थिता। तत्पर्य्यायः। चिरिण्टी २। इत्यमरः॥ "द्वे जटायामटूढायां वा चिरबद्धस्थितायाम्। चिरबद्धत्वेनैवात् चिरं रटति गच्छति चिरिण्टी रट गतौ अन् मनीषादिः।
'स्वावासिन्यां चिरिण्टी स्यात् द्वितीयवयसि स्त्रियाम्॥'
इति भरतः॥
चिरिण्टीत्येके। स्वेषु ज्ञातिषु वसति स्वावासिनी अण्णादित्वात्खिन्। सुखेन वसति सुवासिनीति वाविकाः।" इत्यमरटीकायां भरतः॥

स्वयोनिः, पुं, (स्वं स्वस्य योनं यस्य।) आत्मा। इति शब्दरत्नावली॥ निजकारणे स्वीयवीर्य्ये च स्त्री॥

स्वरा, [ऋ] स्त्री, (सुष्ठु अस्यते क्षिप्यते इति। सु+अस्+"सुघ्रुवस्त्रिङ्न।" उणा० २। ६७। इति ऋन् यणादेशश्च।) भगिनी। इत्यमरः। २। ६। ८८॥ (यथा, मनुः। २। ५०।
"मातरं वा स्वसारं वा मातुलां भगिनीं निजाम्।
भिक्षेत भिक्षां प्रथमं या चैनं नावमानयेत्॥")

स्वरक, क गतौ। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-सेट्।) क, स्वरकते। इति दुर्गादासः॥

स्वस्ति, व्य, (सु+अस्+"मानसे।" उणा० ६। १७०। इति ति। बहुलवचनात् न भूभावः।) आशीः। क्षेमम्। (यथा, महाभारते। ६। १६६। १६।
"स्वस्ति प्राप्नुहि कौन्तेय कार्य्यं पुरुषसत्तम॥")

पुण्यादि। इत्यमरः। ३। ३। २४०॥ आशीराशीर्व्वादः। क्षेमं निरुपद्रवः। पुण्यं पापप्रक्षालनम्। क्षु। आदिना मङ्गलादौ च स्वस्ति। स्वस्ति मङ्गलाशीर्व्वादपापनिर्ग्रहणादिषु इति भागुरिः। इति भरतः॥ दानस्वीकारमन्त्रः। यथा, "ओमित्युक्त्वा प्रतिगृह्य स्वस्तीत्युक्त्वा चाविर्वीं पठित्वा कामस्तुतिं पठेत्॥" इति शुद्धितत्त्वम्॥ तद्योगे चतुर्थी स्यात्। यथा,—
"स्वाहाग्नये स्वधा पित्रे स्वस्ति वाचे नमः सते॥"
इति सुग्धबोधव्याकरणम्॥
(स्त्रीलिङ्गेऽपि दृश्यते। यथा, भागवते। ४। २४। ३६।
"शिवं त आत्मन्विद्धं स्वस्तये स्वस्तिरस्तु मे।
भवता रक्षसा राद्धं सर्व्वसा आत्मने नमः॥"
तथाच वाजसनेयसंहितायाम्। १३। १६।
"अग्निष्ठाभिर्यातु मघा स्वस्या छर्दिषा शन्तमेन॥")

स्वस्तिकः, पुं, क्ली, (स्वस्ति क्षेमं कायति कथयतीति। कै+कः।) आख्यानां ग्रहविशेषः। इत्यमरः। २। २। १०॥ तस्य लक्षणं यथा,—
"स्वस्तिकं प्राङ्मुखं यत्तु स्यादलिन्दानुगतं भवेत्।
तत्पार्श्वानुगतौ चान्यौ तत्पर्य्यन्तगतोऽपरः॥"
इति भरतधृतवाक्यः॥
अन्यद्वास्तुशब्दे द्रष्टव्यम्। सितावरशाकः। इति राजनिर्घण्टः॥
("श्रितिवारः श्रितिवरः स्वस्तिकः सुनिषण्णकः।
श्रीवारकः स्वस्तिपत्रः पर्णकः कुक्कुटः शिखी॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
योगाङ्गासनविशेषः। तस्य लक्षणं आसनशब्दे द्रष्टव्यम्॥

स्वस्तिकः, पुं, (स्वस्ति क्षेमं कायतीति। कै+कः।) मङ्गलद्रव्यम्। तत्तु तण्डुलचूर्णनिर्म्मितत्रिकोणाकाराधिवासद्रव्यम्। चतुष्पथः। गृहभेदः। इति मेदिनी॥ पिष्टकविकारः। रतताल्किः। इति विश्वः॥ जिनानां चतुर्विंशतिविद्यान्तर्गतविद्याविशेषः। यथा,—
"हयो गजोऽथ शवरः क्रौञ्चोऽजं स्वस्तिकः शशी।
मकरः श्रीवत्सः खड्गी महिषः सूकरस्तथा॥
श्येनो वर्द्धमानश्चाथो नन्द्यावर्त्तो घटोऽपि च।
कूर्म्मो नीलोत्पलं शङ्खः पद्मो विंशोऽर्हतां ध्वजाः॥"
इति हेमचन्द्रः॥
रसोनकः। इति त्रिकाण्डशेषः। (सर्व्वप्रकाशितलोहरेखाविशेषः। यथा, रामायणे। १। २६। ५।
"शिरोभिः पृथुभिर्बाहू बाहुभिश्चन्दनोक्षितैः।
शयानः पावकं घोरं ददर्शाद्भुतदर्शनैः शिवाः॥")

स्वस्तिमुखः, पुं, (स्वस्ति सुखे प्रथमे वदने वा यस्य।) शैवः। ब्राह्मणः। बन्दिनि, त्रि। इति मेदिनी॥

स्वस्तीयः, पुं, (स्वस्तिरस्त्यस्मिन्नर्थे छः।) स्वस्तिवाचनं, क्ली, (स्वस्ति मङ्गलस्य वाचनम्।) माङ्गल्यकर्म्मारम्भकालीनवरकर्त्तृमन्त्रोच्चारणपूर्व्वकतण्डुलविकिरणम्। तन्मन्त्रो यथा। अमुककर्म्मणि पुण्याहं भवन्तो ब्रुवन्तु। इत्युक्ते पुण्याहमिति ब्राह्मणैरुक्ते अमुककर्म्मणि ऋद्धिं भवन्तो ब्रुवन्तु। ततः ऋद्ध्यतामिति ब्राह्मणास्त्रिर्ब्रूयुः। एवं स्वस्ति भवन्तो ब्रुवन्तु। इत्युक्ते स्वस्ति इति ब्राह्मणास्त्रिर्ब्रूयुः। ततः। स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः। स्वस्ति नस्तार्क्ष्योऽरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु। इति पठित्वा तण्डुलान् विकिरेत्॥ * ॥ प्रमाणं यथा, यास्कः।
"संपूज्य गन्धपुष्पाद्यैर्ब्राह्मणान् स्वस्ति वाचयेत्।
धर्म्मे कर्म्मणि माङ्गल्ये संग्रामाद्भुतदर्शने॥"
धर्म्मे कर्म्मणि इति सप्तमीनिर्द्देशात् अमुककर्म्मणि स्वस्ति भवन्तो ब्रुवन्तु इति ब्रूयात्। यमः।
"पुण्याहवाचनं दैवे ब्राह्मणस्य विधीयते।
एतदेव निरोङ्कारं कुर्य्यात् क्षत्रियवैश्ययोः॥
सोङ्कारं ब्राह्मणे ब्रूयात् निरोङ्कारं महीपतौ।
उपांशु च तथा वैश्ये शूद्रे स्वस्ति प्रयोजयेत्॥"
इत्युद्वाहतत्त्वम्॥*॥
अपि च।
नन्द उवाच।
"अलक्षितोऽस्मिन्नृक्षे मामकैरपि गोव्रजे।
कुरु द्विजातिसंस्कारं स्वस्तिवाचनपूर्व्वकम्॥"
इति श्रीभागवते १० स्कन्धे ८ अध्यायः॥

स्वस्थः, त्रि, (स्वस्मिन् तिष्ठतीति। स्व+स्था+कः।) सुस्थः। यथा,—
"दुर्गे स्मृता हरसि भीतिमशेषजन्तोः
स्वस्थैः स्मृता मतिमतीवशुभां ददासि।"
इति देवीमाहात्म्यम्॥
("स्वस्थस्यापि समधातूनां साम्यानुग्रहार्थमेव कुशला रसगुणानाहारविकारांश्च पर्य्यायैरुच्चैरुपयोक्तुम्। सात्म्यसमाख्यातानेकप्रकारभूयिष्ठांश्चोपयुञ्जानास्तद्विपरीतकरणलक्षणसमाख्यातेष्टया समभिच्छन्ति कर्त्तुम्। देशकालात्मगुणविपरीतानां हि कर्म्मणां आहारविकाराणाञ्च क्रमेणोपयोगः सम्यक्। सर्व्वाभियोगोऽनुदीर्णानां सञ्चारणमसञ्चारणमुदीर्णानाञ्च गतिमतां साहसानाञ्च वर्জ্জनम्। स्वस्थवृत्तमेतद्धातूनां साम्यानुग्रहार्थमुपदिश्यते।"
इति चरके शारीरस्थाने षष्ठेऽध्याये॥ * ॥
"उत्थायोत्थाय सततं स्वस्थेनारोग्यमिच्छता।
धीमता यदनुष्ठेयं तत् सर्व्वं संप्रचक्ष्यते॥
तत्रादौ दन्तधावनं दन्तधावनमाचरेत्।
कनिष्ठिकाङ्गुलीयाङ्गुष्ठतर्জ্জनीभिर्दक्षिणहस्तेन॥
इत्यादिकं सुश्रुते चिकित्सितस्थाने २४ अः॥
"समदोषः समाग्निश्च समधातुमलक्रियः।
प्रसन्नात्मेन्द्रियमनाः स्वस्थ इत्यभिधीयते॥"
इति च तन्त्रोत्तरतन्त्रे ४० अध्यायः॥)

स्वस्थीयः, पुं, (स्वस्थस्यं पुमानिति। स्वस्थ+"स्वस्थस्यः।" ४। १। १२६। इति छः।)

भागिनेयः । इत्यमरः । २ । ६ । ३२ । (यथा, मनुः । ९ । १९८ ।
"मातामहं मातुलञ्च स्वसीयं श्वशुरं गुरुम् ।
दौहित्रं विट्पतिं बन्धुरुत्थाप्यौ च भोजयेत् ।")

स्वसीया, स्त्री, (स्वसुरपत्यं स्त्री । स्वसृ + छः । टाप् ।) भागिनेयी । (यथा, मनुः ।११।१७२।
"पैतृष्वसेयां भगिनीं स्वसीयां मातुरेव च ।
मातुष्च मातुलानीं गत्वा चान्द्रायणं चरेत् ।")

स्वाक्षपादः, पुं, (अक्षपादः न्यायशास्त्रप्रवर्त्तयिता । तस्येदमित्यण् । स्वाक्षपादं न्यायशास्त्रं सूत्रं स्वाक्षपादं अधीते इति यत् ।) नैयायिकः । इति शब्दरत्नावली ।

स्वाक्षरः, पुं, (स्वस्य अक्षराणि यत्र ।) स्वीयाक्षरः । यथा इति दक्षस्वत इति च पारस्यभाषा ।

स्वागतं, क्ली, (सुखेनागतमिति ।) कुशलप्रश्नः । इति शारावली । (यथा, कुमारे । २ । १८ ।
"स्वागतं स्वागताधिकारान् प्रभावैरवलम्ब्य वः ।
मृगयानुगताभ्युच्चैः प्राप्तिभ्यः प्राप्यविक्रमाः ।")

सुखेनागतं स्वेनागतञ्च । (सुखु आगते, क्ति । यथा, मनुः । ४ । २२६ ।
"अहुयेच्च पूर्णपात्रं नित्यं कुर्यादतन्द्रितः ।
अह्नाञ्चैव क्षयाये ते भवतः स्वागतेर्धनैः ।")

स्वाङ्गिकः, पुं, आङ्गिकः । इति शब्दरत्नावली ।

स्वाच्छन्द्यं, क्ली, (स्वच्छन्द + ष्यञ् ।) स्वच्छन्दस्य भावः । स्वच्छन्दता । स्वच्छन्दशब्दात् ष्यञ्प्रत्ययेन निष्पन्नम् । (यथा, मनुः । ३ । ६१ ।
"प्रातिलोम्यं विवाहं दृष्ट्वा कर्म्मापि चैव प्रकृतिषु ।
क्रमादागं स्वाच्छन्द्यादासुरो धर्म उच्यते ।")

स्वातन्त्र्यं, क्ली, (स्वतन्त्रस्य भावः । स्वतन्त्र + ष्यञ् ।) स्वतन्त्रस्य भावः । यथा,—
"पिता रक्षति कौमारे भर्त्ता रक्षति यौवने ।
पुत्रश्च स्थविरे रक्षेन्न स्त्री स्वातन्त्र्यमर्हति ।"
इत्युद्वाहतत्त्वम् ।
"यौवनादिषु यदा स्त्रीणां स्वातन्त्र्यं परिकीर्त्तितम् ।"
इति दायतत्त्वञ्च ।

स्वातिः, स्त्री, स्वर्भानुपत्नीविशेषः । यथा,—
"अंशा मे यमकात्तिस्रोरेवमत्रिसुतस्य वः ।
अरेरुर्ध्वभुवोंशेन स्वातिः स्वर्भानुपत्निका ।
अरेरुर्ध्वभुवो साध्वी प्रिये नैते विसस्मरः ।"
इति विष्णुपुराणे ।
शक्रः । इति धरणिः ।

स्वातिः, } पुं, स्त्री, (स्वेनैव अश्नोति । अश + क्तिः ।
स्वाती, } ङीष् । वा ङीप् ।) अश्विन्यादिसप्तविंशतिनक्षत्राणामेतन्नक्षत्रस्याधिदेवतायाः । इत्यमरः । ३ । ५ । १८ । अस्या स्वातौ अवतारः अजनि । इति विष्णुपुराणम् । ५ अ ३३ अ । कृष्णसारस्त्रीजातिविशेषः । अस्याधिदेवता पवनः । यथा,
"कृष्णसारस्त्रियां स्वातौ
आयुधं पुरुषः सौम्यभागतः ।

शावकाम्बरचरायणा कला-
कथकाचि जगदुर्मुनोदयात् ।"
इं ३ । १५ । इति कालिदासकृतरघुवंशमहाकाव्यस्य । तस्य रूपं विद्रुमप्रवालसङ्काशम् । इति सुकृतसंचितनामनि । ॥ तस्य पातालम् ।
"कन्दर्परूपप्रभया समेतः
कान्ताजनप्रीतिरतिप्रयत्नः ।
स्वातिः प्रहर्षी यदि नित्यं स्यात्
महामतिः प्राप्तविभूतियोगः ।"
इति कोष्ठीप्रदीपः ।

स्वाद, ङ प्रीतिलिप्सोः । इति कविकल्पद्रुमः । (भ्वा०-आत्म०-सक०-सेट् ।) दन्त्यादिः । प्रीतिः प्रीतिकरणम् । लिट् रसोपादानम् । ङ ।
"चर्म हि त्वचाय न वारिधारा
स्वादुः सुगन्धिः स्वदते तुषारा ।"
इति श्रीहर्षः ।
"स्वदते विविधास्वादं स्वादने च रसायनम् ।"
इति हलायुधः । इति दुर्गादासः ।

स्वादः, पुं, (स्वाद् + घञ् ।) रसग्रहणम् । (यथा, कथासरित्सागरे । ६५ । १८१ ।
"सभार्यः स तदा सुप्तः सर्व्वावयवसन्धिषु ।
अन्वस्यान्नस्य बुबुधे नैव स्वादं च जातुचित् ।")
प्रीतिकरणम् । इति स्वादधातोरल्प्रत्ययेन निष्पन्नः ।

स्वादनं, क्ली, (स्वाद् + ल्युट् ।) प्रीतिकरणम् । रसग्रहणम् । स्वादधातोरनट्प्रत्ययेन निष्पन्नम् ।

स्वादितः, त्रि, प्रीतः । आस्वादितः । इति स्वादधातोः क्तप्रत्ययेन निष्पन्नः ।

स्वादुः, पुं, (स्वद आस्वादने + "कृवापाजीति ।" उणा० १ । १ । इति उण् ।) मधुररसः । यथा,—
"मधुरस्तु रसश्रेष्ठो गुरुः स्वादुर्मनोरमः ।"
इति हैमचन्द्रः ।
गुरुः । यथा,—
"गव्यं क्षीरं स्मृतं गुरु स्वादुः ।"
इति त्रिकाण्डशेषः ।
जीवकौषधिः । यथा,—
"इक्षाकौ मधुरः स्वादुः शावकस्तिरः
जीवकः ।"
इति अष्टाङ्गः ।
सुगन्धिद्रव्यभेदः । लक्षणादयः । ' अमृतसारः २ सुगन्धः ३ मनोरमः ४ । अस्य गुणाः । कटुत्वम् । कषायत्वम् । उष्णत्वम् । मधुरगन्धित्वम् । वातश्लेष्मनाशित्वञ्च । इति राजनिर्घण्टः ।

स्वादुः, स्त्री, (स्वद् + उण् ।) द्राक्षा । इति शब्दरत्नावली । अस्य गुणाः । ३ । ४ । १०० ।

स्वादुः, त्रि, (स्वद् + उण् ।) हृद्यः । मनोज्ञः । मधुरः । प्रियः । इत्यमरमेदिनौ ३ । ३ । ८८ । (गुणवान् । यथा,—
"स्वादुं सुरसं सुरभिं सुकुमारं ये भुञ्जते सालमा-

स्वेषामिन्द्रियनिग्रहो यदि भवेत् पङ्क्तेरयं शेषकः ।")

स्वादुकण्टकः, पुं, (स्वादूनि कण्टकानि यस्य ।) विकङ्कतवृक्षः । गोक्षुरकः । इत्यमरः । २ । ४ । ६७ ; २ । ४ । ८८ । विकङ्कतकण्टकः । इति राजनिर्घण्टः । (विकङ्कतार्थे पर्य्यायो यथा,
"विकङ्कतो सुवाहश्च मत्स्यिकः स्वादुकण्टकः ।
स एव यन्त्रकण्टश्च कण्टकी शाल्मलाविप ।"
गोक्षुरकार्थे पर्य्यायो यथा,—
"गोक्षुरः क्षुरकोऽपि स्यात् त्रिकण्टः स्वादुकण्टकः ।
गोकण्टको गोक्षुरको वनकण्टाट इत्यपि ।
वनकण्टा च वर्षाभू च तथा स्वादिष्टगन्धिका ।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।)

स्वादुकन्दा, स्त्री, (स्वादुः कन्दो यस्याः ।) विदारी । इति राजनिर्घण्टः । (अस्याः पर्य्यायः ।
"विदारी स्वादुकन्दा च सा तु क्षीरी शिवा खगा ।
इक्षुगन्धा क्षीरबली क्षीरशुक्ला पयस्विनी ।
वराहवदना गृष्टिर्पदरेत्यपि कथ्यते ।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।)

स्वादुका, स्त्री, (स्वादुना रसेन कायतीति । के + कः ।) नागदन्ती । इति राजनिर्घण्टः ।

स्वादुखण्डः, पुं, (स्वादुः खण्डो यस्य ।) गुडः । इति शब्दरत्नावली । मधुरभागश्च ।

स्वादुगन्धा, स्त्री, (स्वादुर्गन्धो यस्याः ।) भूमिकुष्माण्डः । इति अष्टाङ्गः । रक्तशोभाञ्जनः । इति रत्नमाला ।

स्वादुघण्टा, [न्] पुं, (स्वादु घण्टयेव ।) कामदेवः । इति केचित् ।

स्वादुपर्णी, स्त्री, (स्वादूनि पर्णानि यस्याः । ङीप् ।) दुग्धिका । इति राजनिर्घण्टः । (अस्याः पर्य्यायः ।
"दुग्धिका स्वादुपर्णी स्यात् क्षीरा विक्षीरिणी तथा ।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।)

स्वादुपाका, स्त्री, (स्वादुः पाको यस्याः ।) काकमाची । इति राजनिर्घण्टः । (काकमाच्याः प्रकारभेदा विषयो ज्ञातव्याः ।)

स्वादुपित्ता, स्त्री, (स्वादुः पित्तो यस्याः ।) पित्तकारवेल्लः । इति राजनिर्घण्टः ।

स्वादुपुष्पः, पुं, (स्वादूनि पुष्पाणि यस्य ।) कदली । इति राजनिर्घण्टः । (अस्याः पर्य्यायान्तरं यथा,—
"कदली स्वादुपुष्पश्च मोचिका कदलस्तथा ।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।")

स्वादुपूर्णं, क्ली, (स्वादुभिः पूर्णानि यत्र ।) वदरीवृक्षः । इति शब्दरत्नावली ।

स्वादुफला, स्त्री, (स्वादु फलं यस्याः ।) द्राक्षा । इति शब्दरत्नावली । (राजा । अस्याः पर्य्यायो यथा,—
"राजा स्वादुफला द्राक्षा यथा मधुरसा च सा ।

[illegible] कीर्त्तिता ॥”

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

स्वादुमज्जा, [न्] पुं, (स्वादु मज्जा यस्य ।) पर्व्वत-पीलुः । इति जटाधरः ॥

स्वादुमांसी, स्त्री, (स्वादु मांसं फलान्तस्थं यस्याः । ङीप् ।) काकोली । इति राजनिर्घण्टः ॥ (गुणाश्चास्याः काकोलीशब्दे विज्ञेयाः ॥)

स्वादुमूलं, क्ली, (स्वादु मूलं यस्य ।) गर्ज्जरम् । इति राजनिर्घण्टः ॥

स्वादुरसा, स्त्री, (स्वादुः रसो यस्याः ।) काकोली । इत्यमरः । २ । ४ । १३४ ॥ आम्रातकवृक्षः । इति शब्दरत्नावली ॥ मदिरा । इति हेमचन्द्रः ॥ शतावरी । इति राजनिर्घण्टः ॥ द्राक्षा । इति केचित् ॥

स्वादुलता, स्त्री, (स्वादुः लता ।) विदारी । इति राजनिर्घण्टः ॥

स्वादुशुद्धं, क्ली, (स्वादु शुद्धञ्चेति ।) सैन्धवलवणं सामुद्रलवणं वा । इति केचित् ॥

स्वाद्वम्लः, पुं, (स्वादुरम्लरसो यस्य ।) दाडिम-वृक्षः । इति त्रिकाण्डशेषः ॥

स्वाद्वी, स्त्री, (स्वादु+“वोतो गुणवचनात् ।” ४ । १ । ४४ । इति ङीष् ।) द्राक्षा । इत्यमरः । २ । ४ । १०७ ॥

स्वाधिष्ठानं, क्ली, (स्वं लिङ्गं तस्य अधिष्ठानं यस्य । स्वस्य लिङ्गस्य अधिष्ठानं यस्मात् इति वा । स्वशब्देन परं लिङ्गं स्वाधिष्ठानं ततो विदु-रित्युक्तेश्चाभावात् ।) षट्चक्रान्तर्गतद्वितीय-चक्रम् । तत्तु लिङ्गमूलस्थाद्भुताभवर्णयुक्त-षड्दलकमलस्वरूपम् । अथ विवरणं कथ्यते । यथा,—

“[illegible] स्वाधिष्ठानमथाधिलिधि ।
[illegible] सुमत ॥”

अपि च ।

“स्वाधिष्ठानाख्यमेतत् तु [illegible] ।
[illegible] ॥”

इति तन्त्रसारः ॥

अन्यच्च ।

“[illegible]
[illegible]
[illegible]
[illegible]
नानायुधोद्यतकरैर्नलिनाप्तलक्ष्मी-
दिव्याम्बराभरणभूषितमत्तचित्ता ॥
स्वाधिष्ठानाख्यमेतत् सरसिजममलं चिन्तयेद् यो मनीन्द्र-
स्तस्याहङ्कारदोषादिकसकलरिपुः क्षीयते तत्क्षणेन ।
योगीशः सोऽपि मोहाद्भुततिमिरचये भानु-तुल्यप्रकाशी
गद्यैः पद्यैः प्रबन्धैर्विरचयति सुधावाक्यसन्दोह-लक्ष्मीम् ॥”

इति पूर्णानन्दगिरिकृतषट्चक्रक्रमः ॥

स्वाधीनः, त्रि, (स्वस्य अधीनः ।) स्वतन्त्रः । अपराधीनः । यथा,—

“स्वाधीनवृत्तेः साफल्यं न पराधीनवर्त्तिता ।
ये पराधीनकर्म्माणो जीवन्तोऽपि च ते मृताः ॥”

इति गारुडे । ११५ । ३७ ॥

स्वाधीनपतिका, स्त्री, नायिकाविशेषः । तस्या लक्षणं यथा । स्वाधीनः पतिर्यस्याः सा स्वाधीनपतिका । सदाज्ञाकरप्रियतमा । अस्याश्चेष्टा वनविहारादिमहोत्सवदर्शनं मदाहङ्कारमनोरथावाप्तिप्रभृतयः । सा षड्विधा । मुग्धा मध्या प्रौढ़ा परकीया सामान्या चेति । मुग्धा स्वाधीनपतिका यथा,—

“मध्ये नो तनिमा स्तने न गरिमा देहे न वा कान्तिमा
श्रोण्यौ न प्रथिमा गतौ न जड़िमा नेत्रे न वा वक्रिमा ।
हास्ये न द्रढ़िमा न चापि पटिमा वाक्ये न वा स्फीतिमा
प्रायस्तस्य तथापि मज्जति मनो मय्येव किं कारणम् ॥१॥

मध्या स्वाधीनपतिका यथा,—

यद्यपि दर्शितमौलितवे नकारो
यद्यपि करोति च नीविधारणानि ।
प्रियपति पतिरेव पार्श्वदेशं
सदपि न मुञ्चति [illegible] ॥२॥

प्रौढ़ा स्वाधीनपतिका यथा,—

[illegible]
[illegible] ॥

परकीया स्वाधीनपतिका यथा,—

[illegible]
[illegible]
आयान्तीमपि पल्लवस्य परितो हरिणै मां सृपति ॥४॥

सामान्या स्वाधीनपतिका यथा,—

अन्येष प्रतिमन्दिरं मृगदृशो यान्तां सुधा-सागर-
स्रोतःस्नुतसरोजसुन्दरचमत्कारा दृशो-विभ्रमाः ।
चित्रं किन्तु विचित्रसम्भ्रमकलावैदग्ध्यहेतोः पुन-
र्वित्तं चित्तहरं प्रयच्छति मुधा मय्येव किं कारणम् ॥”५॥

इति रसमञ्जरी ॥

स्वाधीनभर्त्तृका, स्त्री, (स्वस्याः निजायाः अधीनो भर्त्ता यस्याः । कप् ।) स्वाधीनपतिका । सा च नायिकाभेदः ॥ यथा,—

“खण्डितोत्कण्ठिता लब्धा तथा प्रोषितभर्त्तृका ।
कलहान्तरिता वासकसज्जा स्वाधीनभर्त्तृका ॥”

इति जटाधरः ॥

(तल्लक्षणं यथा, साहित्यदर्पणे । ३ । ११३ ।

“कान्तो रतिगुणाकृष्टो न जहाति यदन्तिकम् ।
विचित्रविभ्रमासक्ता सा स्यात् स्वाधीन-भर्त्तृका ॥”)

स्वाध्यायः, पुं, (सुष्ठु आरभ्य अध्यायः वेदाध्ययन-मिति ।) आरभ्य वेदाध्ययनम् । तत्पर्य्यायः । जपः २ । इत्यमरः । २ । ७ । ४७ ॥ जापः ३ । इति जटाधरः ॥

“स्वाध्यायो जप इत्युक्तो वेदाध्ययनकर्म्मणि ।”

इति शब्दरत्नावली ॥

इङ् अध्ययने । सु सुष्ठु आङ् आरभ्य अध्यायोऽधीतिः स्वाध्यायः । इङो घञ् । जपनं जपः अल् घञि जापश्च । इति भरतः ॥

स्वाध्यायवान्, [त्] पुं, (स्वाध्यायोऽस्त्यस्येति । मतुप् । मस्य वः ।) स्वाध्यायविशिष्टः । वेद-पाठकः । (यथा, महाभारते । १ । ४० । १० ।

“स गुरुदेवाक्षयमि प्रयत्नः
स्वाध्यायवान् वीतभयः कृतात्मा ।
चचार सर्व्वां पृथिवीं महात्मा
न चापि दारान् मनसाप्यकाङ्क्षत ॥”)

स्वाध्यायी, [न्] पुं, (स्वाध्यायोऽस्त्यस्येति । इनिः ।) वणिक् । इति त्रिकाण्डशेषः ॥ त्रि, वेदपाठकश्च ॥ (यथा, महाभारते । ६ । ७४ । १५ ।

“ब्राह्मणाः सात्त्विकाश्चैव तथैव च निरग्नयः ।
स्वाध्यायिनो निरन्नाश्च तथैव वनवासिनः ॥”)

स्वानः, पुं, (स्वननमिति । स्वन शब्दे+“स्वन हसोर्वा ।” ३ । ३ । ६२ । इति घञ् ।) शब्दः । इत्यमरः । १ । ७ । २३ ॥ (यथा, माघे । ६ । ५४ ।

“[illegible]
[illegible]
[illegible]
[illegible] ॥”)

स्वान्तं, क्ली, (स्वनति स्मेति । स्वन+क्त । “क्षुब्ध-स्वान्तध्वान्त…” ७ । २ । १८ । इति निपातनात् …

कर्त्तरि निपातितश्च।) मनः। इत्यमरः।१।४।३१॥
(यथा, भट्टिः। ६। २२।
"तस्यालिप्तप्रतोकाग्निः स्वान्तं काष्ठमिव ज्वलन्।
अलिप्तेवानिलः प्रीतो वने तं न व्यलिङ्गदत्॥")
गङ्गरम्। इति मेदिनी॥ (स्वस्य अन्ते, पुं, क्ली।
यथा, भागवते। २। ६। ३४।
"यो ह्यात्ममायाविभवेषु पर्य्यगाद्
यथा नभः स्वान्तमथापरे कुतः॥")
ग्रन्थिते, त्रि॥
स्वापः, पुं, (स्वप+घञ्।) निद्रा। इत्यमरः।
१। ७। ३६॥ (यथा, भागवते।३।२६।२८।
"संप्रयोऽथ विप्रयोगो नियमः स्मृतिरेव च।
स्वाप इत्युच्यते बुद्धेर्लक्षणं वृत्तितः पृथक्॥")
प्रयत्नम्। सम्पर्कता। अज्ञानम्। इति विश्व-
मेदिन्यौ॥ (विषयोऽस्य यथा,—
"सर्व्वेषु दिवास्वापः प्रतिसिद्धोऽन्यत्र ग्रीष्मात्॥"
इति सुश्रुते शारीरस्थाने चतुर्थेऽध्याये॥)
स्वापतेयं, क्ली, (स्वपतौ धनस्वामिनि साधुः।
स्वपति+"पथ्यतिथिवसतिस्वपतेर्ढञ्।" ४।
४। १०४। इति ढञ्। स्वागतादित्वान्नेनागमः।) धनम्। इत्यमरः।२। ६। ६०॥
(यथा, माघे। १४। ६।
"स्वापतेयमधिगम्य धर्म्मतः
पर्य्यपायमवीक्षितुश्च यत्।
तीर्थगामि करवै विधानतः
स्तल्लुषश्च जुहवानि चानले॥")
स्वापदः, पुं, (श्वापदः। पृषोदरादित्वात् साधुः।)
श्वापदः। इति हलायुधः॥
स्वाभाविकः, त्रि, (स्वभावे भवः। स्वभाव+ठक्।)
स्वभावसिद्धः। स्वभावतः उत्पन्नः। यथा,—
"श्रेयं नाम गुणस्तवैव सहजः स्वाभाविकी स्वच्छता
किं ब्रूमः शुचितां भवन्ति शुचयः सार्थेन यस्यापरे।
किंत्वात्मन् कथयामि ते स्तुतिपदं त्वं जीवितं जीवनं
त्वय्येतीव पयेन गच्छसि पयः कर्त्तुं निषेद्धुं क्षमः॥"
इति वल्लालसेनं प्रति लक्ष्मणसेनप्रेरितश्लोकः॥
(व्याधिप्रकारभेदः। यथा,—
"तद्दुःखसंयोगा व्याधय इत्युच्यन्ते। ते चतुर्व्विधाः आगन्तवः शारीरा मानसाः स्वाभाविकाश्चेति। स्वाभाविकाः क्षुत्पिपासाजराव्यु निद्राप्रभृतयः॥" इति सुश्रुते सूत्रस्थाने प्रथमेऽध्याये॥)
स्वामिकर्त्ती, [र्त्तृ] पुं, परशुरामः। इति शब्द-
माला॥
स्वामी, [न्] त्रि, (स्वमस्यास्तीति। स्व+"स्वामि-
न्यैश्वर्य्ये।" ५। २। १२९। इति आमिनुप्रत्ययेन
निपातितः।) अधिपतिः। तत्पर्य्यायः। ईश्वरः
२ पतिः ३ इन्द्रियेशः ४ अधिभूः ५ नायकः ६
नेता ७ प्रभुः ८ परिवृढः ९ अधिपः १० इत्यमरः। ३। १। १०॥ अवमतिः ११ ईशः
१२ आर्य्यः १३। इति जटाधरः॥ पालकः १४।
इति शब्दरत्नावली॥
स्वामी, [न्] पुं, (स्वमस्यास्तीति। स्व+आमिन्।)
कार्त्तिकेयः। इति मेदिनी॥ राजा। यथा,—
"स्वाम्यमात्यः सुहृत् कोषो राष्ट्रदुर्गबलानि च।
राज्याङ्गानि प्रकृतयः पौराणां श्रेण्ययोऽपि च॥"
इत्यमरः। २। ८। १७॥
विभुः। हरः। हरिः। इति शब्दरत्नावली।
गुरुः। भर्त्ता। इति धरणिः॥ वात्स्यायनसुनिः।
इति त्रिकाण्डशेषः॥ गरुड़ः। इति केचित्॥
अतीतकल्पीयार्द्धेन्दुः। इति हेमचन्द्रः॥ परम-
हंसः। यथा, श्रीधरस्वामिप्रभृतयः॥ * ॥
स्वाम्यर्थमरणे फलं यथा, वह्निपुराणे संग्राम-
प्रकरणानामाध्याये।
"हस्तिभिर्हेषिभिर्व्वापि तथा स्वेच्छेच तस्करैः।
स्वाम्यर्थे ये हता राजन् तेषां स्वर्गो न संशयः॥
हते गोस्वामिविप्रार्थे नरमेधफलं हि तत्॥"
स्वामिप्रशंसा यथा,—
"स्त्रीगर्व्वः पतिसौभाग्याद्दृश्यते च दिने दिने।
सुस्त्री चेद्विभवो यस्यात्तं भजेद्दुर्म्मतः सदा॥
पतिर्बन्धुः कुलस्त्रीणामधिदेवः सदा पतिः।
परं सम्यक्सुरूपञ्च सुखरूपञ्च मूर्त्तिमान्॥
धर्म्मदः सुखदः शश्वत् प्रीतिदः शान्तिदः सदा।
सम्मानदो मानदश्च मान्यश्च मानखण्डनः॥
सारात्सारतमः स्वामी बन्धूनां बन्धुदर्शनः।
न च भर्त्तुः समो बन्धुर्बन्धोर्बन्धुषु दृश्यते॥
भरणादेव भर्त्तारं पालनात् पतिरुच्यते।
शरीरेशाच्च स स्वामी कामदात् कान्त उच्यते॥
बन्धुश्च सुखबन्धाच्च प्रीतिदानात् प्रियः परः।
ऐश्वर्य्यदानादीशश्च प्राणेशात् प्राणनाथकः॥
रतिदानाच्च रमणः प्रियो नास्ति प्रियात् परः।
पुत्रस्तु स्वामिनः सुक्रात् जायते तेन स प्रियः॥
शतपुत्रात् परः स्वामी कुलजानां प्रियः सदा।
असतकुलप्रसूता या कान्तं विज्ञातुमक्षमा॥
स्नानञ्च सर्व्वतीर्थेषु सर्व्वयज्ञेषु दीक्षणम्।
प्रादक्षिण्यं पृथिव्याश्च सर्व्वाणि च तपांसि च॥
सर्व्वान्नदेव व्रतानीति मद्दानानि यानि च।
उपोषणानि पुण्यानि यान्यन्यानि च विश्वतः॥
गुरुसेवा विप्रसेवा देवसेवादिकञ्च यत्।
स्वामिनः पादसेवायाः कलां नार्हन्ति षोड़-
शीम्॥
गुरुविप्रेष्टदेवेषु सर्व्वेभ्यश्च पतिर्गुरुः॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे। ४२। २०—३०॥
स्वाम्युपकारकः, पुं, (स्वामिन उपकारकः।)
अश्वः। इति केचित्॥ प्रभुहितकारके, त्रि॥
स्वायम्भुवः, पुं, (स्वयम्भुवोऽपत्यमिति। स्वयम्भू+
अण्। संज्ञापूर्व्वकस्य विधेरनित्यत्वात् न गुणः।)
प्रथममनुः। स च सृष्टिकर्त्तुर्ब्रह्मणो दक्षि-
णाङ्गाज्जातः। वामाङ्गात् शतरूपा स्त्री तस्य
महिषी आसीत्। अस्मिन्मन्वन्तरे यज्ञोऽवतारः
स एव इन्द्रः। यमादयो देवाः मरीच्यादिसप्त-
र्षयः। स्वायम्भुवो मनुः। प्रियव्रतोत्तानपादौ
मनुपुत्रौ। आकूतिः देवहूतिः प्रसूतिः कन्याः।
इति श्रीभागवतमतम्॥ * ॥ अपि च।
"यामा नाम पुरा देवाः आसन् स्वायम्भुवे-
ऽन्तरे।
सप्तैव ऋषयः पूर्व्वं ये मरीच्यादयः स्मृताः॥
अग्निबाह्यशिवाहुच रिपुः सवन एव च।
ज्योतीरथान् द्युतिमान् हव्यो मेधा मेधातिथि-
र्व्वसुः॥
स्वायम्भुवस्यास्य मनोर्दशैते वंशवर्द्धनाः।
प्रतिस्वर्गममी ज्ञात्वा जग्मुस्ते परमं पदम्॥
एतत् स्वायम्भुवं प्रोक्तं स्वारोचिषमतः परम्॥'
इति मात्स्ये। ९। ३—६॥ * ॥
अपरञ्च।
"ततो ब्रह्मात्मसंभूतं पूर्व्वं स्वायम्भुवं प्रभुः।
आत्मनः सदृशं चक्रे प्रजापालं मनुं तदा॥
शतरूपाञ्च तां नारीं तपोनिर्धूतकल्मषाम्।
स्वायम्भुवो मनुर्देवः पत्नीत्वे जगृहे प्रभुः॥
तस्याञ्च पुरुषात् पुत्रौ शतरूपा व्यजायत।
प्रियव्रतोत्तानपादौ प्रख्यातावात्मकर्म्मभिः॥
कन्ये द्वे च तथाकूतिः प्रसूतिश्च ततः पिता।
ददौ प्रसूतिं दक्षाय तथाकूतिं रुचेः पुरा॥
प्रजापतिः स जग्राह तयोर्यज्ञः सदक्षिणः।
पुत्रो जज्ञे महाभागः दम्पत्योर्मिथुनं ततः॥
यज्ञस्य दक्षिणायान्तु पुत्रो द्वादश जज्ञिरे।
यामा इति समाख्याता देवाः स्वायम्भुवेऽन्तरे।
तस्य पुत्रास्तु यज्ञस्य दक्षिणायां सुभास्वराः॥
प्रसूत्याञ्च तथा दक्षश्चतस्रो विंशतिस्तथा।
सप्तर्षे कन्यास्तासान्तु सम्यक् नामानि मे
शृणु॥")
इति मार्कण्डेयपुराणे दुःसहशासननामाध्यायः॥
(तत्सम्बन्धिनि, त्रि। यथा, हरिवंशे। ७। ६।
"यामा नाम तथा देवा आसन् स्वायम्भुवे-
ऽन्तरे॥"
ब्रह्मसम्बन्धिनि च त्रि। यथा, कुमारे।२।१।
"तस्मिन् विप्रकृताः काले तारकेण दिवौकसः।
तुरासाहं पुरोधाय धाम स्वायम्भुवं ययुः॥")
स्वायम्भुवपितृपिता, [तृ] पुं, (स्वायम्भुवमनोः
पिता।) ब्रह्मा। इति पुराणम्॥
स्वायम्भुवी, क्ली, (स्वयम्भुव इयमिति। अण्।
ङीप्।) ब्राह्मी। इति राजनिर्घण्टः॥
स्वाराट्, [ज्] पुं, (स्वः स्वर्गे राजते इति। राज्
+क्विप्।) इन्द्रः। इत्यमरः। १। १। ४६॥
स्वारोचिषः, पुं, (स्वरोचिषोऽपत्यमिति। अण्।)
द्वितीयो मनुः। अस्मिन् मन्वन्तरे विभुरव-
तारः। रोचन इन्द्रः। तुषितादयो देवाः।
ऊर्জ্জस्तम्बादयः सप्तर्षयः। अस्मिंसुतः स्वारो-
चिषो मनुः। दुश्मतसुषेणरोचिष्मत्प्रमुखा मनु-
पुत्राः। इति श्रीभागवतमतम्॥ अपि च।
"स्वारोचिषस्य तनया पुत्रास्तारो देववर्षयः।

मनोरमस्यप्रकृतिभागम: कीर्तिवर्द्धना: ॥
दुर्गोत्तिनाशरक्षम: प्राप्त: कल्पश्च सुव्रत च । ,
श्रीर्यो हृदयतिर्वेव यत्र मन्त्रेय: स्मृता: ॥
देवाश्च तुष्टिया नाम स्मृता: सारोत्थिमोत्तरे ।
श्रुतीव: सुकृतो सक्तिरायष्योत्तिरय: सय: ॥
यत्रिश्चत्व सुता: सप्त ये प्रजापतयस्तदा ।
द्विगीयमेनत् कथितं मन्वन्तरत: परम् ।"

इति मार्के । ८ । ७—१० ॥

स्वार्थ:, पुं, (स्वस्य अर्थ:।) स्वीयाभिधेय: । स्वकीयधनम् । स्वीयवस्तु । स्वात्मप्रयोजनम् । (यथा, मार्के । २ । ६५ ।

"यत्नतां प्राप्तव: सर्वमनयत्तिन्दतपत्तिन: ।
अर्थं धनाम दिवत: सर्व: स्वार्थं समीहते ।")

स्वार्थिन्: । इति अर्थशब्दार्थदर्शनात् । त्रिप्रार्थे-त्रिशेष: । यथा,—

"स्वार्थो धनश्च लिङ्गश्च संख्या कर्मादिरेव च ।
अर्थो पर्थैव लिङ्गार्थात्यय: कैवाचिदस्मिन: ।"

स्वार्थो विशेषणम् । अर्थं विशेष्यम् । लिङ्गं पुंस्त्वादि । संख्या एकत्वादि: । कर्मादिर्द्वादि: । इति मुग्धबोधटीकायां दुर्गादास: ॥

स्वार्थ्य, क्ली, (स्वस्य भाव: । स्वस्य + ष्यञ् ।) स्वारीयम् । इति शब्दरत्नावली । (यथा,—

"स्वत्वेन भोक्तुं स्वार्थ्यं सर्वेष्वाप्तेषकादिषु ।"

इति माघकरकृतनवसिनिधयसंज्ञे वाल-व्याकरणाधिकारे ।) मन्त्रोष: । इति हेमचन्द्र: । (यथा, भाद्रिकरणे । ६ । २६८ ।

"किं स्वाहाध्यमकल्पाना: हवधिप: सप्तेऽपि
या दुर्मेधा
चैव: स्वाहासुमेदि क: सतु सुता धनोधरं
धारयति ।")

स्वाहा, प, (सुहु आहूयन्ते देवा अनेनेति । सु + आ + हे + क्विप् + टा ।) देवपत्निमन्त्र: । मन्त्रभेद: । औंभद्र २ औंभद्र ३ वषट् ४ स्वधा ५ । इत्यमर: । १ । ७ । ८ । अग्नि-जीया स्वाहाशब्दे दृश्या । (यथा, देवी-भागवते । १ । ५३ ।

"यं स्वाहा तं यथा सोऽपि वषट्कार: स्वरा-लिका ।")

स्वाहा, स्त्री, अग्निभार्य्या । सा दक्षकन्या । इति देवीभागवतम् । तत्पर्य्याय: । अग्नायी २ पुत्र-प्रसविनी ३ । इत्यमर: । १ । १ । ६३ । दिट: २ अग्निपत्निका ४ । इति हेमचन्द्राभिधानम् । अग्निप्रिया ५ । इति शब्दरत्नावली ॥ स्वाहा-शब्दे उदाहरणमिदम्,—

नारद उवाच ।

स्वाहया देवपत्नित्वे स्वाहा: सर्वेश्वरेश्वर: ।
त्रिलोकस्थे स्वाहा दत्तं कस्मिन् कर्मणि वर: ।
कस्मात् स्वाहेति मन्त्रान्ते देवेभ्यो दत्तमुत्तमम् च ।
कथमाविर्भूता सा पुरा देवेषु वा पुन: ॥

श्रीनारायण उवाच ।

स्वाहया देवपत्नित्वे स्वाहा: सर्वेश्वरेश्वर: ।
प्रकृतेरंशसम्भूता सर्वशक्तिस्वरूपिणी ॥
सर्वाधिष्ठातृदेवी च सर्वपूज्या जगत्प्रसू: ।
सर्वेषां सर्वदा सर्वैर्यत: सर्वफलप्रदा ॥
सर्वेभ्यश्च परा देवी सर्वसम्पत्स्वरूपिणी ।
सर्वसम्पत्प्रदा तेन सर्वैर्देवैश्च पूजिता ॥
पुरा बभूव सा देवी दक्षकन्या पतिव्रता ।
अग्नेर्दाहिका शक्तिरग्निसौभाग्यरूपिणी ॥
अतीव सुन्दरी रम्या रमणीया मनोहरा ।
ईषद्धास्यप्रसन्नास्या भक्तानुग्रहकातरा ॥
उवाचेति विधेरग्रे पद्मयोने ! वरं वृणु ।
विधिस्तद्वचनं श्रुत्वा सम्भ्रमात् समुवाच ताम् ॥

ब्रह्मोवाच ।

त्वन्मन्त्रदायिका शक्तिर्भव पत्नी च सुन्दरि ! ।
दग्धुं न शक्तस्त्वत्पती हुताशश्च त्वया विना ॥
तस्मात्तोषाय मन्त्रान्ते यो दास्यति हविर्नर: ।
सुरेभ्यस्तत् प्रभुवन्ति सुरा: सानन्दपूर्वकम् ॥
अग्ने: सत्यस्वरूपा च श्रीरूपा सा परेश्वरी ।
देवानां पूजिता श्रेष्ठा मुनीनां मानवादीनां भयान्तिके ॥
ब्रह्मणश्च वच: श्रुत्वा सा विवक्षा बभूव ह ।
तमुवाच ततो देवी स्वाभिप्रायं स्वयम्भुवम् ॥

स्वाहोवाच ।

अहं तथं भविष्यामि तपसा सुचिरेण च ।
ब्रह्मंस्तदन्यत् यत्किञ्चित् सर्वमेतन्मम वृथा च ॥
विधाता जगतां त्वञ्च प्रभुर्वृद्धक्षय: प्रभो ।
विभर्त्ति देवो विश्वञ्च धर्म: साक्षी च
धर्मिलाम् ।
सर्वेषु पूज्यो देवानां मनीषु च मनीश्वर: ।
प्रकृति: सर्वेश: सर्वपूजिता यत्प्रभाषत: ॥
ऋषयो मनवश्चैव पूजिता ये त्वया च ।
तत्पश्चात्यं प्रदेष्यामि विधायाम्यहम् ॥
प्रसन्ना प्राह्मभिमुखा प्रणताभ्युत्थारत: ।
ब्रह्मा तथेति सा प्राह प्रहारोक्त्य प्रणता ।
सर्वेषिद्धे प्रदास्यत्येवमुक्त्वा ।
तदा दृष्ट्वा श्रीकृष्णं निर्गुणं प्रकृते: परम् ।
सर्वाधिष्ठातृदेवश्च सर्वं ब्रह्मा च ब्राह्मणी ।
सर्वां संपाद्य कामेन सोपचारेण च यत्नत: ।
विधाय सर्वसिद्धार्थं सर्वैश्वर्यसुखाय च ।
प्रणताय च सर्वेषां सौभाग्यां तपसा निधिम् ।

श्रीकृष्ण उवाच ।

वरेण च सर्वेषां मम प्रकृतौ भविष्यसि ।
स्वाहा: स्वाहाकरी पत्नी त्वामेव प्राप्स्यति ध्रुवम् ।
अनुग्रहेण तेषां मम पत्नी च भविष्यसि ।
मन्त्राङ्गं त्वं पुरा च मन्त्राधारा भविष्यसि ।

वह्निस्त्वां भक्तिभावेन संपूज्य च सुरेश्वरीम् ।
रमिष्यते त्वया सार्द्धं रामया रमणीयया ।
इत्युक्त्वान्तर्दधे देवी देवीमाश्वास्य नारद ! ।
तत्त्वागाम मंत्रसो वह्निर्मन्त्रनिदेशत: ॥
सामवेदोक्तध्यानेन ध्यात्वा तां जगदम्बिकाम् ।
संपूज्य परितुष्टाव पार्श्वे तस्याश्च सन्तत: ।
तदा दिव्यवर्षशतं स रेमे रामया सह ।
अतीवनिर्जने रम्ये संभोगसुखदे सदा ।
बभूव गर्भस्तस्याश्च हुताशस्य च तेजसा ।
तद्धार च सा देवी दिव्यं वर्षशतत्रयम् ।
तत: सुषाव पुत्रांश्च रमणीयान्मनोहरान् ।
दक्षिणाग्निर्गार्हपत्याहवनीयान् क्रमेण च ।
अग्नयो सुनयश्चैव ब्राह्मणा: क्षत्रियादय: ।
स्वाहान्तं मन्त्रसुत्वार्य्य हविर्ददति नित्यश: ।
स्वाहायुक्तेन मन्त्रेण यो गृह्णाति प्रसन्नकम् ।
सर्वसिद्धिर्भवेत्तस्य प्रभुत्वं वर्धते सदा ।
विधवीनो यथा सर्पो वेदहीनो यथा द्विज: ।
पतिसेवाविहीना स्त्री विद्याहीनो यथा नर: ।
फलशाखाविहीनश्च यथा वृक्षो हि निष्फल: ।
स्वाहाहीनस्तथा मन्त्रो न हुतं फलदायक: ।
परितुष्टा: द्विजा: सर्वे देवा: संग्रापुराहुतिम् ।
स्वाहान्तेनैव मन्त्रेण सफलं सर्वकर्म च ।
इत्येवं कथितं सर्वं स्वाहोपाख्यानमुत्तमम् ।
तुलसं मोक्षदं सारं किं भूय: श्रोतुमिच्छसि ॥

नारद उवाच ।

स्वाहापूजाविधानञ्च ध्यानं स्तोत्रं सुनीश्वर ।
संपूज्य वह्निस्तुष्टाव वेन तं वद मे प्रभो ! ॥

श्रीनारायण उवाच ।

ध्यानञ्च सामवेदोक्तं स्तोत्रं पूजाविधानकम् ।
वदामि शृणुतं ब्रह्मन् सावधानं निशामय ॥
सर्वयज्ञारम्भकाले प्रातरुत्थाय यत्नत: ।
स्वाहां संपूज्य यत्नेन यज्ञं कुर्यात् फलाप्तये ॥
स्वाहां मन्त्राङ्गभूतां च मन्त्रसिद्धिस्वरूपिणीम् ।
सिद्धाञ्च सिद्धिदां नृणां कर्मणां फलदां भजे ॥
इति ध्यात्वा च यत्नेन दत्त्वा पाद्यादिकं नर: ।
सर्वसिद्धिं लभेत् स्तुत्वा शृणु स्तोत्रं मुने वदे ॥
ॐ ह्रीं श्रीं वह्निजायायै देव्यै स्वाहेत्यनेन च ।
य: पूजयेच्च तां देवीं सर्वेष्टं लभते ध्रुवम् ॥

वह्निरुवाच ।

स्वाहाता: प्रकृतेरंशा मन्त्राङ्गाङ्गस्वरूपिणी ।
मन्त्राणां फलदात्री च धात्री च सम्पदां सती ॥
सिद्धिरूपा च सिद्धा च सिद्धिदा सर्वदा नृणाम् ।
दुःखशोकाधिकाव्याधिक्लेशप्राणाधिकरूपिणी ।
संसारसारदुःखा च घोरसंसारतारिणी ।
देवसौभाग्यदा च देवसौख्यकारिणी ।
दौर्भाग्यनाशिनी नामानि य: पठेच्छृणुयान्नर: ।
सर्वसिद्धिमवाप्नोति सर्वत्रैव सुखी भवेत् ।
अन्ते स याति परमं स्थानं वह्नेश्च निश्चयम् ।"

इति श्रीकृष्णजन्मखण्डे स्वाहोपाख्यानं नाम । ४०-१ । ७—२५ । ॥ श्रीकृष्णसिद्धिविशेष: । तत्पर्य्याय: । नारदा २ सङ्गाधी: ३ श्रीदुर्गा: ४ दुर्गा: ५ मनोरमा ६ सारिकी ७ अम्बा ८

अनन्ता ९ शिवा १० लोकेश्वरात्मजा ११ खदूरवासिनी १२ भद्रा १३ वैष्णवी १४ नीलसरस्वती १५ शङ्खिनी १६ महातारा १७ वसुधारा १८ धनन्ददा १९ त्रिलोचना २० लोचनास्या २१ । इति त्रिकाण्डशेषः ॥

स्वाहापतिः, पुं, (स्वाहायाः पतिः ।) अग्निः । इति धरणिः ॥

स्वाहाप्रियः, पुं, (स्वाहायाः प्रियः ।) अग्निः । इति हलायुधः ॥

स्वाहाभुक्, [ज्] पुं, (स्वाहया भुङ्क्ते इति । भुज + क्विप् ।) देवता । इति त्रिकाण्डशेषः ॥

स्विन, अ, प्रश्नः । (यथा, महाभारते । ५ । ३५ । ८ ।

"किं ब्राह्मणा वै श्रेयांसो दितिजाः स्विदिरोचन ॥")

वितर्कः । इत्यमरः । ३ । ३ । २४१ ॥ (यथा, मेघदूते । १४ ।

"अद्रेः शृङ्गं हरति पवनः किं स्विदित्युन्मुखीभिर्दृष्टोत्साहश्चकितचकितं मुग्धसिद्धाङ्गनाभिः ॥")

पादपूरणम् । इति मेदिनी ॥ प्रश्ने पृच्छायाम् । यथा स्विदेकाकी विचरसि । वितर्के नानाप्रस्तावमर्शः । स्वित् प्रश्ने च वितर्के च तथैव पादपूरणे । इति मेदिनी । इति भरतः ॥

स्विन्नः, त्रि, स्वेदितः । यथा । विभाषायामादिकर्म्मणोः । भावे आदिकर्म्मणि चादितो निष्ठाया वट्वा स्यात् । प्रस्वेदितश्चैत्रः । प्रेस्वेदितं तेन । अि स्विदेति भादिरत्र गृह्यन्ते अिज्ञिः साहचर्य्यात् । स्विद्यतेस्तु स्विदित इत्येव । इति सिद्धान्तकौमुदी ॥

स्विन्नः, त्रि, (स्विद् + क्तः ।) घर्म्मयुक्तः । यथा । स्विन्नो घर्म्मोपितो जनः । इति हलायुधः ॥ (यथा च कुमारे । ७ । ७७ ।

"रोमोद्गमः प्रादुरभूदुमायाः स्विन्नाङ्गुलिः पुङ्खकेतुरासीत् ॥")

पक्वम् । यथा,—

"श्रव्यं चेत्रगतं प्राहुः सतूर्यं धान्यमुच्यते । श्यामं वितुषमक्लुप्तं स्विन्नमन्नमुदाहृतम् ॥"

इति श्राद्धतत्त्वधृतवशिष्ठवचनम् ॥

स्वीकारः, पुं, (स्वस्य स्वस्य कारः करणम् । स्व + ङ + घञ् । अभूततद्भावे च्विः ।) अङ्गीकारः । यथा,—

"सम्प्रदानं प्रतिज्ञा च सत्यवाचश्च सङ्करः । अङ्गीकाराभ्युपायप्रतिश्रवसमाधयः ॥ संश्रयोद्धारनियमोरङ्गीकाराश्रया अपि ॥"

इति शब्दरत्नावली ॥

प्रतिज्ञानम् । इति शब्दरत्नावली ॥ अस्वं स्वं कुर्व्वन् व्यापारः । यथा । न च श्लोकादात् स्वं स्वीकर्त्तुरेव शास्त्रव्यापारः । किञ्च । मनसा वाचमुद्दिश्य इत्यादि शास्त्रं स्वीकारात् प्रागेव दानपदं रूढम् । ननु यत्र स्वीकारोऽभूततद्भावे च्व्यर्थात् अस्वं स्वं कुर्व्वन् व्यापारः भवति तत्र तत: प्रागेव स्वत्वं सम्प्रदानव्यापारेण ममेदमिति ज्ञानेन व्यवहारार्हं क्रियत इति स्वीकारशब्दार्थः । इति दायभागः ॥

स्वीयः, त्रि, (स्वस्यायमिति । स्व + छः ।) स्वकीयः । आत्मीयः । यथा, स्कान्दे शिववाक्यम् ।

"शूद्रः कर्म्माणि यो नित्यं स्वीयानि कुरुते प्रिये । तस्याहमर्च्चां गृह्णामि चन्द्रखण्डविभूषिते ! ॥"

इति तिथ्यादितत्त्वम् ॥

स्वीया, स्त्री, (स्वस्येयमिति । स्व + छः । टाप् ।) नायिकाभेदः । तस्या लक्षणम् । स्वामिन्येवानुरक्ता पतिव्रता इति यावत् । अस्याश्चेष्टा स्वामिशुश्रूषा शीलरक्षा सरलता क्षमा च । सा च त्रिविधा । मुग्धा मध्या प्रगल्भा च । एताः सर्व्वा नायिका अवस्थाभेदेन प्रत्येकं नवविधा । प्रोषितभर्त्तृका खण्डिता कलहान्तरिता विप्रलब्धा उत्कण्ठिता वासकसज्जा स्वाधीनपतिका अभिसारिका प्रवत्स्यत्पतिका च । एताः प्रत्येकं उत्तममध्यमाधममेदेन अष्टाविंशत्युत्तरशतनायिका भवन्ति । एतासां द्विरद्विगणनाभेदेन चतुरशीत्युत्तरशतत्रयप्रकारा भवन्ति । तत्र प्रमाणं यथा । नायिका त्रिविधा । स्वीया परकीया सामान्यवनिता चेति । तत्र स्वामिन्येवानुरक्ता स्वीया । न च परिणीतायां परगामित्वामतियाप्तिश्च पतिव्रतायां एव लक्ष्यत्वात् । तस्या परगामितया परकीयत्वमेव समायाति । अस्याश्चेष्टा । भर्त्तुः शुश्रूषा । शीलसंरक्षणम् । आर्ज्जवम् । क्षमा च । यथा,—

"गतागतक्लमूहूलं नयनयोरपाङ्गावधि स्खलितं कुलनतभ्रुवामधर एव विश्राम्यति । वचः प्रियतमश्रुतेरतिथिरेव कोपक्रमः कदाचिदपि चेत्तदा मनसि केवलं मज्जति ॥"

अपि च ।

"सञ्चारो रतिमन्दिरावधि सखीकर्णावधि श्राकृतं चेतः कान्तसमीहितावधि पदन्यासावधि प्रेक्षितम् । हास्यश्चाधरपल्लवावधि महामानोऽपि मौनावधि सर्व्वं स्वावधि नावधिः कुलभुवां प्रेम्णः परं केवलम् ॥"

अपि च ।

"पद्मानां मेघदृष्टिरिक्षुकणिकाशीकणसमः स्वर्गोदात्मन् यद्वचनमपरद्वीपतुलितम् । वचो लोकालभ्यं क्षणधनतुल्यं रूपदृशः पुमानन्यः कान्ताद्विधुरिव चतुर्थोंसुदितः ॥"

स्वीयापि त्रिविधा । मुग्धा मध्या प्रगल्भा च । तत्राकूतिनवयौवना मुग्धा । सा च ज्ञातयौवना अज्ञातयौवना च । सैव क्रमशो लज्जामदयुक्तारतिर्नवोढ़ा । सैव क्रमशो ज्ञातप्रश्रया विश्रब्धनवोढ़ा । अस्याश्चेष्टा । क्रिया मनोहरा कोपे मार्द्दवं नवविभूषणे समीहा च ॥ ॥

मुग्धा यथा,—

"आज्ञप्तं किल कामदेवधनुषीपालेन काले शुभे वस्तुं वासुविधिं विधास्यति तनौ तारुण्यमेणीदृशः । दृष्टा खञ्जनचातुरी सुखरुचा सौधाकरी माधुरी वाचा किञ्च सुधासमुद्रलहरी लावण्यमामन्यते ॥"

ज्ञातयौवना यथा,—

"नीरात्तीरसुपागता श्रवणयोः सीन्नि स्फुरन्नेत्रयोः श्रोत्रे लग्नमिदं किमुत्पलमिति ज्ञातुं करं न्यस्यति । सैवालाङ्कुरशङ्कया भ्रमिसुखी रोमावलीं प्रोञ्छति श्रान्तासीति सखुः सखीमविदितश्रोणीभरा पृच्छति ॥"

ज्ञातयौवना यथा,—

"स्वयम्भुः शम्भुरम्भोजलोचने ! तत्पयोधरः । नखेन कस्य धन्यस्य चन्द्रचूडो भविष्यति ॥"

नवोढ़ा यथा,—

"हस्ते धृतापि शयने विनिवेशितापि क्रोड़े कृतापि यतते बहिरेव गन्तुम् । जानीमहे नववधूरथ तस्य वश्या यः पारदं स्थिरयितुं क्षमते करेण ॥"

यथा च ।

"बलान्नीता पार्श्वं सुखमनुसुखं नैव कुरुते धुनाना सद्धानं क्षिपति वदनं चुम्बनविधौ । हृदि न्यस्तं हस्तं क्षिपति गमनारोपितमना नवोढ़ा बोढ़ारं रमयति च सन्तापयति च ॥"

विश्रब्धनवोढ़ा यथा,—

"दरमुकुलितनेत्रपाणिनीवी-नियमितवाहुलतोरुयुग्मबन्धम् । करकलितकुचस्रजं नवोढ़ा स्वपिति समीपमुपेत्य कस्य पुण्यैः ॥"

समानलज्जामदना मध्या । एषैव चातिप्रश्रयादतिविश्रब्धनवोढ़ा । अस्याश्चेष्टा सामसि प्रेयसि धैर्य्ये वक्रोक्तिरधैर्य्ये परुषवाक् । यथा,—

"स्वप्ने प्रियाननविलोकनहानिरेव स्वापप्रबुद्धौ प्रियकरस्पृष्टप्रसङ्गः । इत्थं वरोरुरसुखी परिचिन्तयन्ती स्वापं विधातुमपि हातुमपि प्रपेदे ॥"

पतिमात्रविषयकेलिकलाप्रकोविदा प्रगल्भा । येषां कुलटायाश्च पतिमात्रविषयलाभावान् न तत्रातिव्याप्तिः । अस्याश्चेष्टा रतिप्रीतिरानन्दादालिङ्गनं च । प्रथमं यथा,—

"संस्पृश्य स्तनमाकलय्य वदनं संछिद्य कक्षतलं निष्पीयाधरबिम्बमम्बरमपाकृत्य कुदस्यालकम् ।

देवस्यानुजिनीपतेः वसुदयं जिज्ञासमाने प्रिये
यामाभ्यौ वसनाञ्चले: अवयवोर्गोलोत्पलं
निह्नुते ॥"*॥
यथा च।
"नखाङ्कितसुरःस्त्रयेऽधरतले रदस्य चतं
पुना वक्षसमालिका विगलिता च मुक्तावली।
रतान्तसमये मया सकलमेतदालोकितं
स्मृतिः का च मतिः का च का च तवापि प्रियचा-
विधिः ॥"
अपि च।
"कान्ते तल्पमुपागते विगलिता नीवी स्वयं
वस्त्रतात्
यास्यन्त्या जघनेक्षणाय्युपहृतं किञ्चित् नितम्बे
स्थितम्।
एतावत् सखि वेद्मि केवलमहो तस्याङ्गसङ्गे पुनः
कोऽसौ कास्मि रतं क्वेदृशमिति स्वप्नापि मे
न स्मृतिः ॥"*॥
मध्याप्रगल्भे मानावस्थायां प्रत्येकं त्रिविधे।
धीरा अधीरा धीराधीरा चेति। अश्रुकोप-
प्रकाशा धीरा। अश्रुरहितकोपप्रकाशा अधीरा।
अप्राप्तश्रुकोपप्रकाशा धीराधीरा। इयांस्तु
विशेषः। मध्यमायाः धीरायाः कोपव्यञ्जिका
गीः। अधीरायाः परुषवाक्। धीराधीरायाः
वचनरहिते प्रकाशिके। प्रौढ़ाधीरायास्तु
रतावौदास्यम्। अधीरायास्तर्ज्जनताड़नादिः।
धीराधीरायाः रतावौदास्यं तर्ज्जनादि च कोप-
प्रकाशकम्। यत्तु धीरादिभेदः स्त्रीयाया एव
न परकीयाया इति प्राचीनलिखनं तदाज्ञा-
मात्रं धीरात्वमधीरात्वं तदुभयत्र मानसंभवत-
मेव परकीयाया मानश्च नेति वक्तुमशक्यत्वात्
परकीयाया मानस्वीयसामान्यधर्म्मत्वादिति-
भावः ॥ * ॥ मध्या धीरा यथा,—
"लोलालिपुञ्जे भ्रमतो निकुञ्जे
स्कारा बभूवुः भ्रमवारिधाराः।
दैवे समीचे भवतो विधातुं
धीरं समीरं नलिनीदृशेव ॥"*॥
मध्या अधीरा यथा,—
"जातखेदे निशि जागरो मम पुनर्गेहागुचे
प्रोषिता
निर्व्याजं भवता मधु पिबितं आपूर्णितं मे
मनः।
आस्यदृष्टवधूके निकुञ्जभवने लब्धं त्वया श्रीफलं
पश्येदः पुनरेव मां नहुतरैः कूरैः शरैः
क्षन्तति ॥"*॥
मध्या धीराधीरा यथा,—
"कान्तानुरागमधुरोऽसि मनोहरोऽसि
नाथोऽसि किञ्च नवयौवनभूषितोऽसि।
इत्यं निगद्य सुदृशा वदने प्रियस्य
निश्वस्य वाष्पलुलिता निहिता हताशा: ॥"*॥
प्रौढ़ा धीरा यथा,—
"दो तथ्यं भणसे न जल्पसि सुधाधारानुकारा गिरो
दृक्पातं कुरुषे न वा परिजने कोपप्रकाशं-
क्षमात्।
इत्थं केतकगर्भगौरि दयिते कोपस्य संगोपनं
किं स्यादेव न चेत् पुनः सहचरी कुर्व्वीत
साक्षि स्मितम् ॥"*॥
प्रगल्भा अधीरा यथा,—
"प्रतिफलमवलोक्य स्वीयमिन्दोः कलायां
हरशिरसि परस्यावासमाशङ्कमाना।
गिरिसुमचलकन्या तर्ज्जयामास कम्प-
प्रचलवलयवेल्लत्कान्तिभाजा करेण ॥"*॥
प्रगल्भा धीराधीरा यथा,—
"तल्पोपान्तसुपेशुषि प्रियतमे साचीकृतग्रीवया
काकुव्याकुलवाचि साचिहसितस्फूर्ज्जत्कपोल-
श्रिया।
हस्तन्यस्तकरे पुनर्मृगदृशा साचारसञ्चालित-
प्रौढ़ौष्ठमभूखमांसलरुचो विस्कारिता
दृश्यः ॥"*॥
एते धीरादिषड्भेदा द्विविधा। धीरा ज्येष्ठा
कनिष्ठा च। अधीरा ज्येष्ठा कनिष्ठा च
धीराधीरा ज्येष्ठा कनिष्ठा च इत्यपि क्वचित्
पाठः। एते धीरादित्रयो भेदात् द्विविधा
भवन्ति। ज्येष्ठा कनिष्ठा च। परिणीतत्वे
सति भर्त्तुरधिकस्नेहा ज्येष्ठा। परिणीतत्वे
सति भर्त्तुर्न्यूनस्नेहा कनिष्ठा। अधिकस्नेहासु
न्यूनस्नेहासु सामान्यवनितादिषु गतिस्याप्तिः।
परिणीतत्वपदेन आवर्त्तनात्। नापि परकी-
यायामतिव्याप्तिः। भर्त्तृपदेन तद्व्यावृत्तेः। धीरा
ज्येष्ठा कनिष्ठा च यथा,—
"एकस्मिन् शयने सरोरुहदृशोर्विन्यस्य निद्रां
तयो-
रेकां पल्लवितावगुण्ठनपटासुत्कन्धरो दृष्टवान्।
अन्यस्याः सविधं समेत्य निभृतं आलोलदृष्टा-
क्षुलि-
व्यापारैर्वसनाञ्चलञ्चपलयन् स्वापच्युतिं कुर्व्वव-
वान् ॥"*॥
अधीरा ज्येष्ठा कनिष्ठा यथा,—
"अन्तःकोपकषायिते प्रियतमे पश्यन् घने
कानने
पुष्पस्तावचयाय नम्रवदनामेकां समायोजयन्।
व्यक्तोन्मीलितलोचनाञ्चलचमत्कारोभिरामा-
ननां
खेदार्द्राधरपल्लवां नवनधूमन्यां समालिङ्गति ॥"
धीराधीरा ज्येष्ठा कनिष्ठा च यथा,—
"धैर्य्याधैर्य्यपरिग्रहग्रहिलयोरेगोदृशोः प्रीतये
रत्नद्वन्द्वमनन्तकान्तिरुचिरं सृष्टिद्वये न्यस्तवान्।
एकस्याः कलयन् करे प्रथमतो रत्नं परस्याः
प्रियो
दक्षाक्षिमियात् मृगन् कुचतटीमानन्दमा-
विन्दति ॥"
इति रसमञ्जरी ॥

स्वूर्च्छ, या विस्तृतौ। इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट्।) इत्यादिः ऋकारो-
उक्तः। क्विपि राल्लोपे स्वूः स्वुरौ स्वुरः।
या स्वूर्च्छितं स्वूर्णं तेन। स्वर्च्छति कर्णा
मद्यपः। इति दुर्गादासः ॥
स्वृ, ऋ शब्दोपतापयोः। इति कविकल्पद्रुमः ॥
(भ्वा०-पर०-शब्दे अक०-उपतापे सक०-सेट्।)
इत्यादिर्वकारोपधः। ऋ, अस्वारीत् पिकः।
अस्वार्षीत् खलं राजा। इति दुर्गादासः ॥
स्वृ, गि हिंसने। इति कविकल्पद्रुमः ॥ (क्रया०-
पर०-सक०-अनिट्।) इत्यादिर्वकारोपधः।
तन्नहितोऽपीति केचित्। गि, स्वृणाति स्वर्णः
स्वर्णिः। इति दुर्गादासः ॥
स्वेक, ऋ ङ गतौ। इति कविकल्पद्रुमः ॥ (भ्वा०-
आत्म०-सक०-सेट्।) वकारयुक्तः। ऋ, असि-
स्वेकत्। ङ, स्वेकते। इति दुर्गादासः ॥
स्वेच्छा, स्त्री, (स्वस्य इच्छा।) स्वकीयेच्छा।
तत्पर्य्यायः। यदृच्छा २ स्वैरिता ३। इति
हेमचन्द्रः ॥ (यथा, कथासरित्सागरे। २५।४८।
"स च मत्स्योऽभिमधेन तत्कालं स्वेच्छया
चरन्।
उत्स्यलद्वीपनिकटं जगाम विधियोगतः ॥")
स्वेच्छामृत्युः, पुं, (स्वेच्छया स्वतुर्यस्य।) भीष्मः।
इति त्रिकाण्डशेषः ॥ स्वेच्छया मरणञ्च। तद्-
युक्ते, त्रि ॥
स्वेदः, पुं, (स्विद्+घञ्।) घर्म्मः। इत्यमरः
१।७।३३ ॥ स्वेदनम्। इति मेदिनी ॥ भावरा
इति भाषा ॥ * ॥ उष्मा। तापः। अथातः
स्वेदाध्यायं व्याख्यास्यामः। इति ह स्माह
भगवानात्रेयः।
"अथ स्वेदान् प्रवक्ष्यामि वैर्यथावत् प्रयोजितैः।
स्वेदसाध्याः प्रशाम्यन्ति गदा वातकफात्मकाः ॥
स्नेहपूर्व्वैः प्रयुक्तेन स्वेदेनावजितेऽनिले।
पुरीषमूत्ररेतांसि न सज्जन्ति कदाचन ॥
शुष्काण्यपि च काष्ठानि स्नेहस्वेदोपपादनैः।
नमयन्ति यथान्यायं किं पुनर्जीवतो नरान् ॥
योगश्चाधिक्यपेक्षी गात्रगुणोऽतिस्विदुर्न च।
प्रथमवान् कल्पितो देशे स्वेदः कार्य्यकरो मतः ॥
व्याधौ शीते शरीरे च महान् स्वेदो महाबले।
दुर्ब्बले दुर्ब्बलः स्वेदो मध्यमे मध्यमो हितः ॥*॥
वातश्लेष्मणि वाते वा कफे वा स्वेद इष्यते।
स्निग्धरूक्षक्रियाक्लिन्नोरूक्षयाप्युपकल्पितः ॥
आमाशयगते वाते कफे पक्वाशयाश्रिते।
रूक्षपूर्व्वो हितः स्वेदः स्नेहपूर्व्वस्तथैव च ॥
दृष्ट्वा हृदयं दृष्ट्वा स्वेदयेन्मृदु वा न वा।
मध्यमं वेक्षणो श्रेष्ठमङ्गावयवमिश्रितः ॥
शुशुक्षैर्लक्षकैः पिण्डैः गोधूमानामथापि वा।
पद्मोत्पलपलाशैर्वा स्वेदः सम्यक् प्रचक्षते ॥
शुक्लावलीभिः श्रीताभिः श्रीतलैर्भाजनैरपि।
जलार्द्रैर्वेत्रजैर्हस्तैः स्विद्यतो हृदयं स्पृशेत् ॥
श्रीतस्पृशुशुरभे स्नग्भिर्गौरवनिग्रहे।
संजाते मार्द्दवे स्वेदे स्वेदनाद्विरतिर्भवेत् ॥
पिपासा गात्रसदनं मूर्च्छाश्रिप्रकोपणम्।
दाहः स्वेदोऽतिदौर्ब्बल्यमतिस्विन्नस्य लक्षणम् ॥

उक्तस्त्राग्नितीवे यो त्रैणिकः सर्वतो विधिः।
चोऽतिस्निग्धस्य कर्त्तव्यो मधुरस्निग्धशीतलः॥"
अग्निवेश अग्न्याध्याये॥ ॥
"कषायमद्यनित्यानां गर्भिण्या रक्तपित्तिनाम्।
पित्तिनां सातिसाराणां रूक्षाणां मधुमेहिनाम्॥
विदग्धभक्षवमनानां विषमद्यविकारिणाम्।
तान्तानां नष्टसंज्ञानां शूलानां पित्तमेहिनाम्॥"
तान्तानां क्लान्तानाम्।
"क्षुधितां क्षुत्परीतानां क्षुद्वतां शोचतामपि।
कामलुब्धस्त्रियश्चैव यतानामाचारीगिणाम्॥
दुर्बलातिविशुष्काणामसपत्नीगौरवान्तथा।
भिषक् तैमिरिकाणाञ्च न स्वेदमवतारयेत्॥"
प्रतिश्याये च कासे च हिक्कायाञ्चासेष्वलाघवे।
कर्णमन्याशिरःशूले स्वरभेदे गलग्रहे॥
अर्दितैकाङ्गसर्वाङ्गपक्षाघाते विनामके।
कोष्ठानाहविबन्धेषु मूत्राघाते विजृम्भके॥
पार्श्वपृष्ठकटीक्षुद्विसंग्रहे ग्रहणीषु च।
मूत्रक्षये मरुत्वे च शुक्रयोरङ्गमर्दके॥
शीतोपजातानुशयार्त्तिसंग्रहे क्षयेष्वपि।
खल्लीष्वाने च शीते च वेपथौ वातकण्टके॥
सङ्कोचायामशूलेषु स्तब्धगौरवसुप्तिषु।
सर्वेष्वेषु विकारेषु स्वेदनं हितमुच्यते॥
तिलमाषकुलत्थानामतसीसर्षपस्य च।
पायसैः क्षीरमांसैः पिण्डस्वेदान् प्रयोजयेत्॥
गोखराश्ववराहोष्ट्रक्षुद्रः मत्कुणपक्षिभिः।
सिकतापांशुपाषाणकरीषायसपूटकैः॥
त्रैणिकान् स्वेदयेत् पूर्व्वैर्वातिकान् समुपाचरेत्।
क्षणाग्नेतानि शस्यन्ते यथास्वं पस्तरेष्वपि॥
भूमिष्वेषु च चैलान्तकेषूणगर्भगृहेषु च।
विधमाङ्गारतप्तेष्वभ्यक्तः स्विद्यति वा सुखम्॥
माम्यानूपौदकं मांसं पयोवस्तिशिरस्तथा।
वराहमध्यपित्तास्रक्लेदयस्तिलतण्डुलाः॥
एतेनानि समुत्क्राथ्य नाड्यस्वेदं प्रयोजयेत्।
देशकालविभागज्ञो युक्तिपेक्षी भिषक्तमः॥
घोरणाष्टकैरण्डियुमूलकसर्षपैः।
वामार्कशुक्तरङ्गार्कपत्रैरम्लकस्य च॥
श्लेष्मान्तकस्य शीर्षैर्वा रसस्य लवणस्य च।
पत्रैरेतत्समस्तैर्वा नाड्यस्वेदं प्रयोजयेत्॥
भूमौ पक्वसुरायां सुरया दधिमस्तुना।
मूत्रैरम्लैश्च सर्वैर्वा नाड्यस्वेदं प्रयोजयेत्॥
एत एव च निर्यूहाः प्रयोज्या बस्तकोष्टके।
स्वेदनार्थे घृतक्षीरतैलकोष्ठांश्च कारयेत्॥
गोधूमयवकोलकुलत्थैर्माषानसंयुतैः।
गर्भस्रविकिरातक्षपत्रैरण्डाः प्रशस्यते॥
मद्यैः सुराया विकृतैः शोधनैश्च प्रयत्नतः।
उष्णया कुशलैर्लाभ्यां सुरया शोधनाहयेत्॥
अन्नैर्भिषोपनाह्यः स्युः शोभनैरपूपैश्च।
उत्क्लेदैरुत्कारिकाभिः कौशेयाविकशाटकैः॥
शाणी वस्त्रं द्विगुणितं सुखेष्वाणी द्विगुणम्।
प्रावारपरिहारार्थं स्यात् प्रकर्षस्तु शीतले॥
सङ्करः १ प्रस्तरो २ नाड़ी परिषेकौ४ावगाहनम् ५।
चेलान्तकौ६श्मघनः ७ कर्षुः ८ कुटी ९ भूः १० कुम्भिरेव च ११॥
कूपो १२ द्रोलाक १३ इत्येते स्वेदयन्ति त्रयोदश।
ते यथावत् प्रवक्ष्यन्ते सर्व्व एवानुपूर्व्वशः॥"
इति॥
तत्र वस्त्रान्तरितैरवस्त्रान्तरितैर्वा पिण्डैर्यथोक्तैरुपस्वेदनं सङ्करस्वेद इति विद्यात्॥ १॥ शूकशमीधान्यपुलाकानां वेशवारपायसक्षशरोतुकारिकादीनां वा प्रस्तरे कौशेयाविकोत्तरच्छदे प्रच्छादितोरुयुक्कार्कपत्रच्छदे वा स्वभ्यक्तसर्व्वगात्रस्य शयानस्योपरि स्वेदनं प्रस्तरस्वेद इति विद्यात्॥ २॥ स्वेदनद्रव्याणां पुनर्मूलफलपत्रभङ्गादीनां शुष्कशुक्तिपिण्डितशिरःपदादीनामुष्णस्वभावानां वा यथार्हमम्लवणस्नेहोपसंहितानां मूत्रक्षीरादीनां वा कुम्भ्यां वाष्पमनुद्वमन्त्यासुतृप्तिकृतितानां नाद्या शरेषीकावंशपलाशकरञ्जार्कपत्रान्यतमतया गलाग्रपक्षसंस्थानया यामदीर्घया यामार्द्धदीर्घया वा यामचतुर्भागाष्टभागमूलाग्रपरिणाहस्रोतसा सर्व्वतो वातहरपत्रसंवृतच्छिद्रया छिद्रिक्वा विनमितया वातहरसिद्धस्नेहाभ्यक्तगात्रस्य वाष्पमुपहरेत्। वाष्पो ह्यूर्द्धगामी विपक्वतरुवेगस्त्वचमविदह्य सुखं स्वेदयतीति नाड़ीस्वेदः॥३॥ वातिकोत्तरवातिकानां पुनर्मूलादीनामुतृप्ताधे: सुखोष्णैः कुम्भीर्व्वधूनिका: प्रणाड़ीर्वा पूरयित्वा यथार्हसिद्धस्नेहाभ्यक्तगात्रं वस्त्रावच्छन्नं परिषेचयेदिति परिषेकः॥ ४॥ वातहरोत्क्वाथक्षीरोष्णतैलपिच्छितरसोष्णसलिलकोष्ठकावगाहेषु यथोक्त एवावगाहः॥५॥ अथ चैलान्तकं चिकीर्षुर्भूमिं परीक्षेत। तत्र पूर्व्वस्यां दिश्युत्तरस्यां वा गुणवति प्रशस्ते भूमिभागे क्षणाद्धत्तिके सुवर्णवर्णमृत्तिके वा परीवापपुष्करिण्यादीनां चलाग्रयानामन्यतमस्य कूपे दक्षिणे पश्चिमे वा सूपतीर्थे समसुविभक्तभूमिभागे समार्यो वा व्यरत्नीः सुप्रक्रम्योदकात् प्राङ्मुखसुदङ्मुखं वा व्यभिमुखतीर्थं कूटागारं कारयेत्। चतुरश्रविस्तारतः परमरत्नीः षोड़श समन्तात् सुवृत्तं स्तब्धस्निग्धश्लक्ष्णमनेकवातायनम्। अस्य कूटागारस्यान्तः समन्ततो भित्तिमरत्निविस्तारोत्सेधां पिण्डिकां कारयेत् आकपाटात्। मध्ये चास्य कूटागारस्य चतुरश्रकुण्डं पुरुषप्रमाणं रत्नमर्थं कन्दसंस्थानं बहुस्थण्डिलमङ्गारकोष्ठकस्तम्भं सपिधानं कारयेत्। तच्च खादिरासनार्कशमीकरञ्जादीनां वा काष्ठानां पूरयित्वा प्रदीपयेत्। स यदा चार्चीषात् साधु दग्धानि काष्ठानि गतधूमानि व्यवतप्तश्च भवेत्तदाग्निगुणं स्वेदयोग्येन चोपधा वस्त्रमित्यत्र वस्त्रेण पुरुषं वातहराभ्यक्तगात्रं यथार्हवस्त्रं प्रावेष्टयेत्। प्रवेष्टयंश्चैनमनुशिष्यात् सौम्य प्रविश कल्याणायारोग्याय चेति। प्रविश्य चैनां पिण्डिकामधिरूढ्य पार्श्वापरपार्श्वाभ्यां यथासुखं शयीथाः। न च त्वया स्वेदमूर्च्छापरीतेनापि सता पिण्डिकेयं विमोक्तव्या त्वात्प्राणोच्छ्वासात्। भ्रश्यमानो ह्यतः पिण्डिकावकाशात् द्वारमनधिगच्छन् स्वेदमूर्च्छापरीततया सद्यः प्राणान् जह्याः। तस्मात् पिण्डिकामेनां न कथञ्चन सृजेथाः। त्वं यदा जानीयाः विगताभिष्यन्दमात्मानं सम्यक् प्रसन्नस्वेदपिच्छं सर्व्वस्रोतोविसृक्तं लघुभूतमपगतविवृद्धस्तम्भसुप्तिवेदनागौरवमिति ततस्त्वां पिण्डिकामनुसरन् द्वारं प्रपद्येथाः। निष्क्रम्य च न सहसा चक्षुषोः परिपालनार्थं शीतोदकमुपसृजेथाः। अपगतसन्तापक्लमस्तु सुशीतात् सुखोष्णेन वारिणा यथान्यायं परिषिक्तोऽन्वीयाः। इति चैलान्तकः स्वेदः॥ ६॥
"शयानस्य प्रमाणेन घनमश्मसमर्थां शिलाम्।
तापयित्वा मारुतस्नेहाक्तैरुभिः संप्रदीपितैः॥
यथोक्तैश्च सर्व्वानङ्गारान् प्रोक्ष्य चैवोष्णवारिणा।
तां शिलामथ कुर्व्वीत कौशेयाविकसंस्तरात्॥
तस्यां स्वभ्यक्तसर्व्वाङ्गः शयानः स्विद्यते सुखम्।
रौरवाजिनकौशेयप्रावारार्द्रैः सुसंवृतः॥
इत्युक्तोऽश्मघनस्वेदः कर्षूस्वेदः प्रवक्ष्यते॥७॥
खानयेत् शयनस्याधः कर्षूं स्थानविभागवित्।
दीर्घैरधूमैरङ्गारैस्तां कर्षूं पूरयेत्ततः॥
तस्यासुपरि शय्यायां स्वपन् स्विद्यति वा सुखम्॥८
अनल्पतृणसेवित्रीं दृताकारामलोचनाम्।
घनभित्तिं कुटीं कृत्वा कुड्यादेः संप्रवेशयेत्॥
कुटीमध्ये भिषक् शय्यां स्वास्तीर्णां चोपकल्पयेत्।
प्रावाराजिनकौशेयकुथकम्बलगोपकैः॥
दृषन्तिकाभिरङ्गारैः पूर्णाभिश्चाप सर्व्वशः।
परिवार्य्यान्तरारोहैरभ्यक्तः स्विद्यति वा सुखम्॥९॥
य एवाश्मघनस्वेदविधिर्भूमौ स एव तु॥१०॥
प्रशस्तायां निवातायां समायामुपदिश्यते।
कुम्भीं वातहरक्वाथपूर्णां भूमौ निखानयेत्॥
अर्द्धभागं त्रिभागं वा शयनं तत्र चोपरि।
स्थापयेदासनं वापि गातिसाम्यपरिच्छदम्॥
अथ कुम्भ्यां सुसन्तप्तान् प्रक्षिपेदयसो गुड़ान्।
पाषाणान् वोष्मणा तेन ततस्त्वं स्विद्यति वा सुखम्॥११॥
सुसंवृताङ्गः स्वभ्यक्तः स्वेदैरनिलनाशनैः।
कूपं शयनविस्तारं द्विगुणात्वापि वेधतः॥
देशे निवाते प्रच्छे च कुर्य्यादृक्षः सुमार्जितम्।
दृष्यशमीखरीदार्वां करीषैरग्निपूरितैः॥
सवक्त्रः सुसंवृतोर्ध्वोऽभ्यक्तः स्विद्यति वा सुखम्॥१२॥
द्रोणीकाश्च करीषाग्नौ यथोक्तानां प्रदीपयेत्॥
द्रोणीकां गृहिताम्।
शयनात्प्रमाणेन शय्यामुपरि तच्च च।
सुदग्धायां विधूमायां यथोक्तानुपकल्पयेत्॥
सवक्त्रः सुखं शय्यायां स्विद्यति वा सुखम्।

शीताम्बुसेक इत्येष सुखयोगो मयेरितः ॥१२॥
इति सर्वोदकविधिः स्वेदोऽग्निमुखसंज्ञयः ॥*॥
आयामं उष्णसदनं गुरुप्रावरणं क्षुधा ।
वातघ्नानां मलक्लेदपसादश्चानलस्य च ।
स्वेदयन्ति दृतीनाभि नरमग्निमुखाश्रिते ॥
एकद्वौ त्रिविधः स्वेदः संयुक्तोऽग्निमुखेन च ।
कफवातसमुद्भूतः स्त्रियो वृद्धश्च बालकः ॥
एतेषां त्रिविधं दुःखं स्वेदसाध्यं प्रकीर्तितम् ।
त्रिभ्यस्तेभ्यश्च सिद्धः पश्चाद्गामी भवेत् ।
सदृष्टः स्निग्धमात्रस्तु व्यायामं वर्जयेन्नरः ॥"

इति ॥ * ॥

तत्र श्लोकाः ।
"स्वेदो यथा कार्यकरो दिनो येभ्यश्च यद्विधः ।
यत्र देये यथायोगो देयो रूक्षस्य यो यथा ॥
त्रिभातिनिग्धरूक्षाणि तथानग्निमुखेषु च ।
यत्रेष्टाः स्वेदयोग्याश्च स्वेदसाध्यानि कल्पना ॥
यथोद्दिष्टविधः स्वेदो विना दशविधोऽग्निना ।
संक्षेपेण च षट्स्वेदाः स्वेदाध्याये निदर्शिताः ॥
स्वेदाधिकारे यदाप्तमुक्तमेतन्मयर्षिणा ।
त्रिंशेषेषु मतिमताप्तमुदेहा पुनर्मयुः ॥"

इति चरकीयस्वेदाध्यायः समाप्तः ॥ * ॥

अथ स्वेदविधिः ।
"स्वेदश्चतुर्विधः प्रोक्तस्तापोष्मसदनैर्वृतः ।
उपनाही द्रवस्वेदः सर्वे वातादिजिद्गणः ॥"
तापस्वेदः उष्मस्वेदश्च तापो व्याख्यातः । उपनाहः उपनाहस्वेदः ।
"स्वेदो नाडीमुखो प्रायः स्वेदाद्यो मसूरीरितौ ।
उपनाहस्तु वातघ्नः पित्तरोगे द्रवो हितः ॥"
द्रवो द्रवस्वेदः ।
"गदाक्ते मदाभावो प्रीतिस्वेदो मदात् स्मृतः ।
दुःखैः दुर्बलस्वेदो माक्षे मध्यमो मतः ॥
प्रमाणे रूक्षतः स्वेदो रूक्षः स्निग्धः कदाचित् ॥"

रूक्षतः रूक्षस्वेदीति रूक्षतः तत्पादिष्वपि द्रष्टव्यम् ।
"रूक्षस्वेदीहते वाते स्नेहस्वेदं दयेः ततः ।
स्निग्धं मार्दवकरं गुरुप्रावरणं मुखम् ॥
स्निग्धाम्लागमभारांश्च स्वेदयेत्तमनुक्रमे ।
येषां वर्षं प्रधानं वातिकादि हि देहिनाम् ॥
श्लेष्मश्लेष्माक्ष ये केचित् दूर्वास्वेदाक्ष ते मताः ।
स्वेदाः सर्वे सर्वरोगेषु मार्दवर्तुमुखाः ।
आमस्वेदे मारुतो वन्हः क्लमस्वेदक्षयोदयः ॥"
क्लमक्षयोदय इति क्लमक्षयोदयः कृतः ।
"तस्मात् स्वेदा युक्ते सर्वरोगेषु सदा ।
दाहे मूर्छाभिरते च तस्मात् स्वेदा
स्निग्धिनी ।
तत्रैव : स्वेदनाधिक्ये चौरोऽग्नेः वा विना-
दयेत् ॥
स्वेदनाधिक्यजा रोगा स्वेदक्षिकाय देहिनः ।
तत्रं तत्र रोगाणां तत्र स्वेदविधिः स्मृतः ।
स्वेदनाधिक्यजेषेषु स्वेदेषु स्वेदनाधिक्यजा रोगाः ।
स्वेदाधिक्ये च सर्वेषु स्वेदेषु स्वेदः स्मृतः ॥"

शीतैरार्द्रवस्त्रादिभिः ।
"अतीवाँ दुर्बलो मेही वातरोगी विपाण्डुरः ।
अतीसारी रक्तमिसी पाण्डुरोगी तथोदरी ।
मेदस्वी गर्भिणी चैव न हि स्वेद्या विजानता ॥
स्वेदादेषां यान्ति देहा विनाशं
नो साध्यत्वं यान्ति चैषां विकाराः ॥
एतानपि मृदुस्वेदैः स्वेदसाध्यानुपाचरेत् ।
मृदुस्वेदं प्रयुञ्जीत तथा रूक्षोष्णरूक्षिषु ॥
अतिस्वेदात्, अग्नियोगात् दाहतृष्णा क्लमो भ्रमः ।
पित्तासृक्पिडकाकोपस्तत्र शीतैरुपाचरेत् ॥"
तत्र तापस्वेदमाह ।
"तेषु तापाग्निः स्वेदो वालुकावस्त्रपाणिभिः ।
प्रयतैरवलिप्तेच कार्पासवल्कवेष्टिते ॥"*॥
उष्मस्वेदमाह ।
"अथवा वातनिर्याससुरसाकाथरसादिभिः ।
उष्णैर्घटं पूरयित्वा पार्श्वे च्छिद्रं विधाय च ॥
विसुप्तावं विलग्नस्य धातुनां काष्ठवासुत ।
मृदुभुजाभ्यां गोपुच्छां गार्द्रीं मुञ्चात् विच्छिकाम् ॥
सुखोपविष्टं सम्यक्तं गुरुप्रावरणावृतम् ।
दक्षिणुच्छिकया नाभ्या स्वेदयेद्वातरोगिणम् ॥"
त्रिभ्यश्चमिति स्वेदसौकर्य्यार्थम् । मृदुभुजाभ्यामिति सहे मृदुभुजत्रिपाशसुखाम् । गोपुच्छमिव क्रमशश्चां तेनाग्रे गोपुच्छाग्रपरिमाणेन छिद्रां गार्द्रीं यतः सरन्ध्राम् । छिद्रच्छिकां पक्षदयपरिमाणाम् । दक्षिणुच्छिकयेति दक्षिणुच्छवत् क्रमशश्चत्वात् नाभ्या एवं संज्ञा ।
"पुरुषायाममात्रान्तु भूमिं संमार्ज्य खादिरैः ।
काष्ठैरंग्नं तथाभ्युप्य शीरधान्याम्लवारिभिः ।
पाशमपैरास्तार्य प्रयत्नं स्वेदयेन्नरम् ।
एवं मासादिभिः स्निग्धैः प्रयोगैः स्वेदमाचरेत् ॥"
उपनाहस्वेदः ।
"तथोपनाहस्वेदश्च कुर्याद्वातहरौषधैः ।
प्रस्थिन्न देहं वासार्थं क्षीरमांसरसादिभिः ॥
आमपिण्डैः सलवणैः सुखोष्णैः स्वेदसंयुतैः ।
तथा श्याम्यामयवैर्यवैर्माषैश्च ॥
एषिकौरण्डकैरैरण्डवीरणैरुदिना तथा ।
कुलत्थमाषगोधूमैरनगीतिलसर्षपैः ॥
प्रलम्बमूलादिवदारुशैवालोत्पलकोरकैः ।
सरदारुशतपुष्पैश्च दशमूलशतक्रियुभिः ॥
सिलिकाभाकुटीरैश्च सक्तिरामलकैर्युतैः ।
प्रमारुपत्रमालाभ्यां पलाशैर्बदरस्य च ॥
कुलत्था वातरोगेषु वैदलं समाचरेत् ।
कुर्यात् सिद्धेन सक्तेन पत्रैः संस्वेदयेन्नरम् ॥
मधुकाक्षतसंयोगं योगः सर्वत्रिदोषजि-
दुच्यते ॥"
अम्लाम्लैः । उपनाहमेवाह कुर्यादात् । तेन प्रकारेण प्रकारमाह वातहरौषधैः । इत्यर्थः । आमपिण्डैः आमेन रात्रिकृतेन पिण्डैः गलपिण्डैः, स्वेदयुतैः क्षीरमांसरसादिभिः । सुखोष्णैः । श्यामादिभिः यवैः यवैरिति यवैर्यवैः । अम्लवर्गेण संयुक्तैः

कोष्णैः सुखावगाहितैः । भेषजैः स्वेदयेत् । किंवा स्निग्धैः कोष्णैः प्रवाहितैः ॥ * ॥ द्रवस्वेदमाह ।
"द्रवस्वेदस्तु वातघ्नद्रव्यक्काथेन पूरिते ।
कटाहे कोष्ठके वापि सुपविष्टोऽवगाहयेत् ।
सौवर्णे राजते वापि ताम्रे लौहेऽथ दारुजे ।
कोष्ठकं तत्र कुर्वीतोष्ट्राद्यं षड्विंशदङ्गुलम् ।
आयामे तावदेव स्याच्चतुष्कोणन्तु विस्तरम् ॥"
पश्चान्तरमाह ।
"नाभेः षड्ङ्गुलं यावन्नरः क्वाथस्य धारया ।
कोष्णया स्कन्धयोः सिक्तसिक्तेत् स्निग्धतनुर्नरः ॥"
अयमर्थः । प्रथमतो वातघ्नद्रव्यक्काथेन कटाहं पूरिते कोष्ठके कटाहे वा सुपविष्टसिक्तेत् । अथवा नाभेः षड्ङ्गुलमूर्ध्वं यावत् क्वाथे मग्न उपविष्टः । पश्चात् क्वाथस्य धारया स्कन्धयोः सिच्यमानसिक्तेत् । तथा च कोष्ठकं परिपूर्णं भवतीत्यर्थः । क्वाथपक्षे प्रथमतः स्नेहाभ्यक्ततनुरुपविशेत् ।
"सकृत्तैलं समारभ्य यावत् स्नानचतुष्टयम् ।
तावत्तदवगाहेत यावदारोग्यनिश्चयम् ।
एवं तैलेन दुग्धेन सर्पिषा स्वेदयेन्नरम् ।
एकान्तरो द्व्यन्तरो वा युक्तः स्नेहोऽवगाहने ॥"
एतावता क्वाथो दुग्धच नित्यमेव युज्यते । स्नेहस्तु दिनमेकं द्वे वा दिने गमयित्वा युक्तः । अग्निमान्द्यमजुर्वेति भावः ।
"शिरासुस्नेहनिकृपैर्धमनीभिश्च तर्पयन् ।
शरीरे बलमाधत्ते युक्तः स्नेहोऽवगाहने ॥
बलसिक्तस्य वह्नन्ति यथा मूलेऽङ्कुरादयः ।
तथैव धातुवृद्धिर्हि स्नेहसिक्तस्य जायते ॥
नातः परतरः कश्चिदुपायो वातनाशनः ।
शीतशूलप्रपरमे स्वप्नगौरवनिद्रये ।
देहेऽग्नौ मार्दवे जाते स्नेहनाद्विरतिर्मता ॥"

इति भावप्रकाशः ॥

स्वेदयूषकः, पुं, (स्वेदं यूषति मिश्रयतीति । यूष + ण्वुल् ।) शीतलवायुः । इति केचित् ॥

स्वेदजः, त्रि, (स्वेदात् जायते इति । जन + डः ।) स्वेदाज्जातजन्तुः । क्रमिदंशादिः । इत्यमरः । ३ । २ । ५१ ॥ तद्गुणा यथा,—
"संस्वेदजविकाराश्च यथा येभ्यो भवन्ति च ।
मांसमेदोमलजा मक्षिकाद्या भवन्ति च ॥
नवमेघप्रवृद्धायां विधौ लिक्षणादयः ।
संस्वेदजाश्च विज्ञेया दृष्टगोमयजन्मजाः ॥
मक्षिकाणां मशकानां मत्कुणानां तथैव च ।
आमजा मिश्रजा विद्या; कोष्ठेभ्यो मुक्तकादयः ॥
तथा मृद्भविकारेभ्यः पूतिकाः प्रभवन्ति च ।
संस्वेदजाश्च जायन्ते दधिजाः शुक्तजास्तथा ॥
कीटाः पिपीलिकाद्याश्च मांसमेदोमलोद्भवाः ।
मक्षिकाद्या विज्ञेयाश्च दृष्टगोमयजन्मजाः ॥

शरावति विकाराश्च करीषेभ्यो भवन्ति हि ॥
एवमादिरसंख्यातो गणः संखेदजो मया ।
समासान्निहितो ह्येष प्राक्कर्म्मवशजः स्मृतः ॥"
इति वह्निपुराणे काश्यपीयवंशनामाध्यायः ॥

स्वेदनं, क्ली, (स्विद्+ल्युट्।) स्वेदः। इति मेदिनी ॥ स्वेदनयन्त्रं यथा,—
"निवङ्गमौषधं स्तूतं भूर्ज्जे तत्त्रिगुणाम्बरे।
रसपोटलिकां काष्ठे दृढं बद्ध्वा गुणेन हि ॥
मत्स्यानपूर्णं कुम्भान्तःस्थावलम्बनसंस्थितम्।
अधस्ताज्ज्वालयेद्वह्निं तत्तदुक्तक्रमेण हि।
दोलायन्त्रमिदं प्रोक्तं स्वेदनाख्यं तदेव हि ॥"
सन्धानं काञ्जिकादि।
"साम्बुस्थालीमुखे बद्धे वस्त्रे स्वेदं निधाय च।
निधाय पच्यते यत्र तदूर्ध्वं स्वेदनं स्मृतम् ॥"
इति भावप्रकाशः ॥
(स्वदयतीति। स्विद्+णिच्+ल्युः। स्वेदके, त्रि। यथा, सुश्रुते। ३। ४।
"स्वेदनो दुर्गन्धः पीतशिथिलाङ्गस्ताम्रनखनयनतालुजिह्वोष्ठपाणिपादतल इत्यादि ॥")

स्वेदनिका, स्त्री, (स्वेदनमस्त्यस्या इति। ठन्।) कन्दुः। इति हेमचन्द्रः ॥ भर्ज्जनपात्रम्। भर्ज्जनशाला च ॥

स्वेदनी, स्त्री, (स्विद्यतेऽनयेति। स्विद्+ल्युट्। ङीप्।) लौहमयपात्रम्। ताम्रोया इति लोहिता इति च ख्यातम्। इति भरतः ॥ तत्पर्य्यायः। कन्दुः २। इत्यमरः। २। ६। ३०॥ स्वेदनिका ३। इति हेमचन्द्रः ॥

स्वेदमलोद्भिन्नदेहः, पुं, (स्वेदमलेन उद्भिन्नः देहो यस्य।) सर्व्वकल्मषयुक्तनीचतमः। इति हेमचन्द्रः ॥ स्वेदमलाद्यक्तकायश्च। तद्युक्ते, त्रि ॥

स्वेदविप्रुट्, [ष्] स्त्री, घर्म्मबिन्दुः। स्वेदस्य विप्रुट् बिन्दुः। इति षष्ठीतत्पुरुषसमासनिष्पन्नः ॥

स्वैरः, त्रि, (स्वेन स्वातन्त्र्येण ईर्त्ते इति। ईर गतौ+अच्। "स्वादीरेरिणोः।" ६। १। ८६। इत्यस्य वार्त्तिकोक्त्या दृद्धिः।) स्वच्छन्दः। (यथा, रघुः। २। ५।
"अथाहृतेः स्वैरगतेः स तस्याः
सस्नाट् समाराधनतत्परोऽभूत् ॥")
मन्दः। इति मेदिनी ॥ (यथा, महाभारते। ४। ६६। ४६।
"अथोत्तरः शुभैर्गन्धैर्माल्यैश्च विविधैस्तथा।
आकीर्य्यमाणः संहृष्टो नगरं स्वैरमागमत् ॥"
व्यालापः। यथा, तत्रैव। १। ४२। २।
"नैवान्यथेदं भवता पितरेव ब्रवीमि ते।
नाहं मृषा ब्रवीम्येव स्वैरेष्वपि कुतः प्रभुः ॥")

स्वैरता, स्त्री, (स्वैरस्य भावः। स्वैर+तल्।) स्वैरिता। इत्यमरटीकायां राजमुकुटः। ३। २। २॥

स्वैरिणी, स्त्री, (स्वेनैव ईरयितुं शीलमस्याः। ईर+णिनिः। ङीप्। स्वादीरेरिणोरिति वृद्धिः।) अभिचारिणी। इत्यमरः। २। ६। ९॥ सा तु भर्तुः पुरुषगामिनी। (यथा, महाभारते। १। १२६। ७२—७४।
"पाण्डुस्तु पुनरेवैनां पुत्रलोभात् महायशाः।
वक्तुमैच्छद्धर्म्मपत्नीं कुन्तीं तिस्रः मघात्रवीत् ॥
नातश्चतुर्थं प्रसवमापन्नस्त्रि वदन्युत।
अतः परं स्वैरिणी स्याद्वन्ध्यकी पञ्चमे भवेत् ॥")

स्वैरिता, स्त्री, (स्वैरिणो भावः। तल्। टाप्।) स्वच्छन्दता। तत्पर्य्यायः। यदृच्छा २। इत्यमरः। ३। २। २ ॥

स्वैरिन्त्री, स्त्री, परवेश्मस्था स्ववशा शिल्पकारिणी नारी। इति शब्दरत्नावली ॥ परगृहस्था स्वतन्त्रा प्रसाधनानुलेपनादिशिल्पकारिणीति विशेषणत्रययुक्ता या सा स्वैरिन्त्री। स्वैरं स्वाच्छन्द्यं धरतीति स्वैरिन्त्री निपातनात्। स्वैरिन्त्री परवेश्मस्था शिल्पकृत् स्ववशा स्त्रियाम्। इति दन्त्यादौ रभसः। इत्यमरटीकायां भरतः ॥ अस्या रूपान्तरं स्वैरन्त्री स्वैरिन्त्रिः। इति च टीकान्तरम् ॥

स्वैरी, [न्] त्रि, (स्वेनैव ईरितुं शीलमस्य। ईर गतौ+णिनिः।) स्वतन्त्रः। इत्यमरः। ३। १। १५॥ (यथा, महाभारते। १३। १४२। २१।
"सिंहव्याघ्रेषु संसिद्धास्तथा वननिवासिनः।
स्वैरिणो दारसंयुक्तास्तेषां धर्म्मः कथं स्मृतः ॥")

स्वोपार्जित, त्रि, (स्वेनोपार्जितः।) स्वयमर्ज्जितः। स्वयमुपात्तः। यथा, पिता चेत् पुत्रान् विभजेत् तस्य स्वेच्छा स्वयमुपात्तेऽर्थे प्रेतामहे तु पितापुत्रयोस्तुल्यं स्वामित्वम्। इति विष्णुसूत्रम्। अपि च। मनुर्विष्णुः।
"पैतृकन्तु पिता द्रव्यमनवाप्तं यदाप्नुयात्।
न तत् पुत्रैर्भजेत् सार्द्धमकामः स्वयमर्ज्जितम् ॥"
तत् स्वयमर्जितमिति ज्ञात्वा न विभजेदित्यन्वयः। एतत्तु स्थावरविषयम्। मणिमादावनुद्धृतेऽपि पितुरेव स्वाच्छन्द्यम्।
"स्थावरं द्विपदश्चैव यद्यपि स्वयमर्ज्जितम्।
असम्भूय सुतान् सर्व्वान् न दानं न च विक्रयः ॥
पितुः प्रसादात् भुज्यन्ते वस्त्राण्याभरणानि च।
स्थावरन्तु न भुज्यते प्रसादे सति पैतृके ॥"
इति मिताक्षराधृतवचनमपि पितामहधनपरम्। पित्रा च स्वोपार्जितं स्थावरं दत्तं भुज्यत एवेति। अन्यथा मूलभूतस्वत्वान्तरकल्पनापत्तेः। इति दायतत्त्वम् ॥ * ॥ स्वोपार्जितं द्विविधम्। पित्रादिधनानुपघातेन स्वेनोपार्जितम्। तदनुपघातेन उपार्जितञ्च। तद्वनविभागविधिर्यथा। व्यासः।
"अनाश्रित्य पितृद्रव्यं स्वशक्त्याप्नोति यद्धनम्।
दायादेभ्यो न तद्दद्यात् विद्यालब्धञ्च यद्भवेत् ॥"
कात्यायनः।
"द्रव्यग्रहरोऽर्द्धहरो वा पुत्रवित्तार्जनात् पिता।"
पुत्रवित्तार्जनात्। कृद्धिहितो भावो द्रव्यवत् प्रकाशते इति न्यायात् पुत्रार्जितवित्तात् पितुर्द्रव्यग्रित्वं पितृधनानुपघातविषयं भ्रातृधनोपघातविषयञ्च। अर्ज्जकस्य तु द्रव्यग्रित्वम्। भ्रातृधनोपघाते तु तेषामर्द्धांशित्वं वक्ष्यमाणवचनात्। पितुरर्द्धहरत्वन्तु पितृद्रव्योपघातादुपपद्यते। तेन पुत्रादा इति दायभागः ॥ अनुपघाते पिता द्रव्यग्रहरः। अर्जकत्वात् स्वयमपि द्रव्यग्रहरः। इतरेषामनंशित्वम्। भ्रातृद्रव्योपघाते तु तेषामप्यंशांशित्वम्। इति द्रव्यग्राह्यांशयोर्भेदकथनम् ॥ * ॥ साधारणधनार्जितेऽपि विशेषमाह व्यासः।
"साधारणं समाश्रित्य यत्किञ्चित् वाहनायुधम्।
शौर्य्यादिनाप्नोति धनं भ्रातरस्तत्र भागिनः।
तस्य भागद्वयं देयं शेषास्तु समभागिनः ॥"
अत्र भ्रातर इत्युपलक्षणं पितृव्यादयोऽपि बोद्धव्याः। तस्यार्जकस्य। साधारणोपघाते यस्य यावतोंऽशस्याल्पस्य महतो वा उपघातस्तस्य तदनुसारेण भागकल्पना कार्य्या ॥ इति दायभागः ॥ इति च दायतत्त्वम् ॥

स्वोरसः, पुं, शिलापिष्टकल्कः। यथा,—
"स्वोरसः स्वरसः प्रोक्तः कल्को दृषदि पेषितः ॥"
इति शब्दचन्द्रिका ॥

ह

ह, हकारः। स तु यज्ञनत्रयस्त्रिंशद्वर्णः। अष्टमवर्गीयचतुर्थवर्णश्च। तस्य उच्चारणस्थानं कण्ठः। इति व्याकरणम् ॥ (यथा च शिक्षायाम्। १७।
"कण्ठ्या वह्निविसर्ज्जनीयभया ओष्ठ्यावुपू।")
अस्य स्वरूपं यथा,—
"हकारं शृणु चार्व्वङ्गि! चतुर्व्वर्गप्रदायकम्।
शुक्लवीर्य्यसंयुक्तं रक्तविद्युल्लतोपमम्।
रजःसत्त्वतमोयुक्तं पञ्चदेवमयं सदा ॥
पञ्चप्राणात्मकं वर्णं त्रिशक्तिसहितं सदा।
त्रिबिन्दुसहितं वर्णं हृदि भावय पार्व्वति! ॥"
इति कामधेनुतन्त्रम् ॥ * ॥
(वर्णीयवर्णमालायाम्) अस्य लेखनप्रकारो यथा,—
"ऊर्द्धादाकुञ्चिता मध्ये कुण्डलीवं गता त्वधः।
ऊर्द्धं गता पुनः सैव तासु ब्रह्मादयः क्रमात्।
माता च पार्व्वती ज्ञेया ध्यानमस्य प्रचक्ष्यते ॥
करीषभूषिताङ्गीञ्च वाङ्मृद्वाचां दिगम्बरीम्।
अक्षिमाल्यामलभुजां वरदामम्बुजेक्षणाम् ॥
नागेन्द्रहारभूषाढ्यां जटासुकुटमण्डिताम्।
सर्व्वसिद्धिप्रदां नित्यां धर्म्मकामार्थमोक्षदाम् ॥
एवं ध्यात्वा हकारन्तु सन्मन्त्रं दशधा जपेत् ॥"
इति वर्णोद्धारतन्त्रम् ॥ * ॥
अस्य नामानि यथा,—
"हः शिवो गगनं हंसो नागलोकोऽम्बिकापतिः।
नक्षत्रेशो जगत्प्राणः प्राणेशः कपिलात्मजः ॥
परमात्मात्मजो जीवो यवाकः भ्रान्तिदोऽक्षनः।
स्तंभो भयोऽरुणा स्थाणुः क्रूटकूपविरावणः ॥
लक्ष्मीर्म्मविहरः शम्भुः प्राणशक्तिर्लताटजः।
खकोपवारयः शूली चैतन्यं पादपूरणः।
महालक्ष्मीः परं शम्भुः शाखोटः सोममण्डलः ॥"
इति वर्णाभिधानम् ॥ * ॥

हड्डिः, पुं, काष्ठयन्त्रविशेषः। हाड़ इति भाषा। यथा,—
"निगड़ो लोहबन्धोऽस्त्री हड्डिः काष्ठस्य यन्त्रणे॥"
इति चन्द्रियवर्गे शब्दमाला॥
हड्डिकः, पुं, नीचजातिविशेषः। हाड़ि इति भाषा। तत्पर्य्यायः।
"हड्डिकस्तु मलाकर्षी डुङ्कश्चावपुञ्जिका॥"
इति शब्दमाला॥
हड्डुं, क्ली, अस्थि। हाड़ इति भाषा। इति शब्दचन्द्रिका॥
हड्डुकः, पुं, नीचजातिविशेषः। इति शब्दमाला॥ हाड़ि इति भाषा॥
हड्डुञ्ज, क्ली, मज्जा। इति शब्दचन्द्रिका॥
हड्डिः, } पुं, हड्डिपजातिः। हाड़ि इति
हड्डिकः, } भाषा। स तु चाण्डालीगर्भे लेटस्य औरसेन जातः। यथा,—
"सद्यचाण्डालकन्यायां लेटवीर्य्येण शौनक!।
बभूवतुस्तौ द्वौ पुत्रौ हड्डिकशौण्डिकौ तथा॥"
हड्डिकशौण्डिकावित्यत्र दुष्टौ हड्डिडौ तथेत्यपि पाठः। इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे १० अध्यायः॥
हड्डिपः, पुं, मत्स्यग्राहिः। इति मुग्धबोधव्याकरणम्॥ हाड़ि इति भाषा॥
हड्डा, य, नाट्योक्तौ नीचसम्बोधनम्। इत्यमरटीकायां भरतः॥ स्त्री, हत्याचभेदः। हाँड़ा इति भाषा। इति वक्ष्यमाणशब्ददर्शनात्॥
हड्डिका, स्त्री, (हड्डा+स्वार्थे कन्। टापि अत इत्वम्।) हत्याचविशेषः। हाँड़ी इति भाषा। इति वक्ष्यमाणशब्ददर्शनात्॥
हड्डिकामुखः, पुं, (हड्डिकायाः मुख इव।) क्षुद्रहड्डिका। तत्पर्य्यायः। क्षणनः २। इति त्रिकाण्डशेषः॥
हड्डी, स्त्री, हड्डिका। हाँड़ी इति भाषा। इति केचित्॥
हड्डे, य, नाट्योक्तौ नीचसम्बोधनम्। इत्यमरः। १। ७। १५॥
हतः, त्रि, (हन+क्तः।) आघातरहितः। तत्पर्य्यायः। मनीहतः २ प्रतिहतः ३ प्रतिबद्धः ४। इत्यमरः। ३। १। ४१॥ नष्टः। तत्पर्य्यायः। प्रमाथितः २ निबर्हितः ३ निकारितः ४ निर्णाशितः ५ प्रवासितः ६ पराजितः ७ निषूदितः ८ निर्हिंसितः ९ निर्व्वासितः १० संज्ञपितः ११ निर्व्वेष्टितः १२ अपाशितः १३ निस्तर्हितः १४ निहतः १५ क्षपितः १६ परिवर्ज्जितः १७ निर्व्वापितः १८ विघसितः १९ मारितः २० प्रतिघातितः २१ उद्घासितः २२ प्रमथितः २३ क्षपितः २४ उच्छासितः २५ व्यालम्बितः २६ पिष्टिनः २७ विघातितः २८ घातितः २९ उच्छ्वसितः ३० यधितः ३१। इत्यमरदर्शनात्॥ चूर्णितान्नः। तत्पर्य्यायः। पिष्टितम् २ गुणितम् ३। इति त्रिकाण्डशेषः॥ हनने, क्ली॥ ॥ पारिभाषिकसंज्ञा यथा,—
"अवेद्यपो हतो विप्रो हतं व्राह्मणभूसुरम्।
यज्ञक्षणं हतं चेत्रमनाचारं हतं कुलम्॥
सदभक्ष हतो धर्म्मः क्रोधेनैव हतं तपः।
अदृष्ट हतं ज्ञानं प्रमादेन हतं श्रुतम्॥
गुर्व्वभक्त्या हता नारी ब्रह्मचारी तथा हतः।
अदीक्षेऽग्नौ हतो होमो हता खलिरमक्षिका॥
उपजीव्या हता कन्या स्वार्थे पाकक्रिया हता।
शूद्रभिक्षोर्हतो योगः कृपणस्य हतं धनम्॥
अनभ्यासहता विद्या हतो राजा विरोधकृत्।
जीवनार्थे हतं तीर्थं जीवनार्थे हतं व्रतम्॥
असत्या च हता वाणी तथा पैशुन्यवादिनी।
सन्दिग्धोपहतो मन्त्रो यस्तच्चित्तो हतो जपः॥
हतमश्रोत्रिये दानं हतो लोकश्च नास्तिकः।
अश्रद्धया हतं सर्व्वं यत् कृतं पारलौकिकम्॥
इहलोको हतो नृणां दरिद्राणां परन्तप।
मनुष्याणां तथा जन्म स्नानं विना हतम्॥"
इति पाद्मोत्तरखण्डे ४ अध्यायः॥
हतकः, पुं, (हत इव। कन्।) नीचलोकः। इति केचित्॥ (यथा, साहित्यदर्पणे। ६। ३६५।
"देव व्रजातपुत्रो व्रजापि दुर्य्योधनहतकः॥")
हतमूर्खः, पुं, (मूर्खः हत इव।) अतिमूर्खः। यथा,—
"क्रूरः खलो हतमूर्खः पापशीलो भवेन्नरः।
बुधस्यागमने नित्यं जायते स नराधमः॥"
इति जातरत्नकोष्ठीप्रदीपौ॥
हताशः, त्रि, (हता आशा यस्य।) निर्दयः। आशारहितः। पिशुनः। इति मेदिनी॥ वन्ध्यः। इति शब्दरत्नावली॥
हतिः, स्त्री, (हन+क्तिन्।) अपकर्षः। यथा। सुखार्थं हतिर्दोषः। हतिरपकर्षः। इति काव्यप्रकाशे ७ उल्लासः॥ हत्वा च॥ (यथा, महाभारते। १२। ३६०। ६।
"आज्ञया ह्यभिपन्नानामहत्वाशुप्रमार्ज्जनम्।
राजा वा राजपुत्रो वा मृगहत्येव युज्यते॥"
ताड़नम्। यथा, गीतगोविन्दे। १। १२।
"वहसि वपुषि विशदे वसनं जलदाभं
हलहतिभीतिमिलितयमुनाभम्॥"
विनाशः। यथा, भागवते। १२। ३। १८।
"कर्म्माण्यारभमाणानां दुःखहत्यै सुखाय च।
पश्येत् पाकविपर्य्यासं मिथुनीचारिणां नृणाम्॥")
हत्नुः, पुं, (हन्ति शरीरमिति। हन+"कृहनिभ्यां क्नुः।" उणा० ३। ३८। इति क्नुः। अनुदात्तोपदेशेति।" ६। १। ३७। इति अनुनासिकलोपः।) व्याधिः। शत्रुः। इति उणादिकोषः॥ (हननशीले, त्रि। यथा, ऋग्वेदे। १। २५। २।
"मा नो वधाय हत्नवे जिहीडानस्य रीरधः।")
हत्या, स्त्री, (हन+भावे क्यप्।) हननम्। वधः। यथा,—
"ब्रह्महत्या सुरापानं स्तेयं गुर्व्वङ्गनागमः।
महान्ति पातकान्याहुः संसर्गश्चापि तैः सह॥"
इति प्रायश्चित्तविवेकादिः॥
हृद्यः, पुं, (हन्ति सुखमिति। हृद+"हनिकुषीति।" उणा० २। २। इति कृधन्।) विषम्। इति संक्षिप्तसारोणादिवृत्तिः। उणादिकोषश्च॥
हृद, ड औ वर्षे। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-अक०-अनिट्।) वर्षः विष्ठोत्सर्गः। ड, हृदते जनः। औ, हृत्त। इति दुर्गादासः॥
हृदगं, क्ली, (हृद+लुट्।) विष्ठात्यागः। हागा इति भाषा। यथा। विट्स्खलिर्हृदनम्। इति गूढातुटीकायां दुर्गादासः॥ हृदधात्वर्थोऽप्येवम्॥
हृद्दा, स्त्री, मेषादिलग्नानां त्रिंशद्दंशः। तैरंशैर्द्वादशलग्नेषु पञ्चानां पञ्चानां ग्रहाणां सञ्चारविशेषेण भागविशेषो भवति। नराणां वर्षप्रवेशादौ शुभाशुभगणनायामस्य प्रयोजनम्। तद्भागविशेषो यथा।
मेषलग्ने प्रथमं हृदस्यते६ भागाः। ततः शुक्रस्य ६ अंशाः। ततो बुधस्य ८ भागाः। ततो मङ्गलस्य ५ भागाः। ततः शनैरपि ५ अंशाः। समुदायेन त्रिंशद्दंशाः भवन्ति॥
वृषलग्ने प्रथमं शुक्रस्य ८ भागाः। ततो बुधस्य ६ अंशाः। गुरोः ८ भागाः। शनेः ५ अंशाः। मङ्गलस्य ३ अंशाः॥
मिथुनलग्ने प्रथमं ६ भागाः बुधस्य। ततः शुक्रस्य ६ भागाः। हृदस्यते ५ अंशाः। मङ्गलस्य ७ अंशाः। शनेः ६ अंशाः॥
कर्कटलग्ने प्रथमं मङ्गलस्य ७ अंशाः। ततः शुक्रस्य ६ भागाः। बुधस्यापि ६ भागाः। हृदस्यते ७ अंशाः। शनेः ४ अंशाः॥
सिंहलग्ने प्रथमं ६ भागाः हृदस्यते। शुक्रस्य ५ अंशाः। शनेः ७ भागाः। बुधस्य ६ भागाः। मङ्गलस्यापि ६ भागाः॥
कन्यालग्ने प्रथमं बुधस्य ७ अंशाः। शुक्रस्य १० अंशाः। गुरोः ४ अंशाः। मङ्गलस्य ७ भागाः। २ भागौ शनैश्चरस्य॥
तुलालग्ने आदौ ६ अंशाः शनेः। ८ भागाः बुधस्य। गुरोः ७ भागाः। शुक्रस्यापि ७ अंशाः। २ भागौ मङ्गलस्य॥
वृश्चिकलग्ने आदौ मङ्गलस्य ७ भागाः। शुक्रस्य ४ अंशाः। ८ भागाः बुधस्य। हृदस्यते ५ अंशाः। ६ भागाः शनेः॥
धनुर्लग्ने प्रथमं हृदस्यते १२ अंशाः। ततः शुक्रस्य ५ अंशाः। बुधस्य ४ अंशाः। मङ्गलस्य ५ भागाः। शनेः ४ अंशाः॥
मकरलग्ने आदौ बुधस्य ७ अंशाः। गुरोरपि ७ भागाः। ८ अंशाः शुक्रस्य। शनेः ४ अंशाः। मङ्गलस्यापि ४ अंशाः॥
कुम्भलग्ने प्रथमं बुधस्य ७ भागाः। शुक्रस्य ६ भागाः। हृदस्यते ७ अंशाः। मङ्गलस्य ५ भागाः। शनेरपि ५ भागाः॥
मीनलग्ने आदौ १२ अंशाः शुक्रस्य। ४ भागाः हृदस्यते। बुधस्य ३ अंशाः। मङ्गलस्य ६ भागाः। ततः शनेः २ भागौ॥

तनुष्मानेव चाप्नोति सर्वं सर्वं सुनिश्चितम् ।"
इति च तत्सारः ॥

हनूः, स्त्री, (हनु + पचे ऊङ् ।) हनुः । इत्यमरटीकायां भरतः ॥ (यथा,—
"शास्त्राणु हन्वोः कथाश्च चेष्टावन्तस्तु सन्यवः ।"
इति सुश्रुते शारीरस्थाने पञ्चमेऽध्याये ॥)

हनूमान्, [त्] पुं, (हनूरस्यास्तीति । हनु + मतुप् ।) हनुमान् । इति विकाण्डशेषः ॥ (यथा, महाभारते । ३ । १४७ । २७ ।
"अहं केसरिणः क्षेत्रे वायुना जगदायुना ।
जातः कमलपत्राक्ष हनूमान्नाम वानरः ॥")

हनूषः, पुं, (हन्ति मानुषानिति । हन + "अहन्निष्यामघत्वम् ।" उणा० ४।७३। इति ऊषन् ।) राक्षसः । इति विकाण्डशेषः ॥

हन्त, अ, हर्षः । अनुकम्पा । (यथा, गीतायाम् । १० । १८ ।
"हन्त ते कथयिष्यामि दिव्या ह्यात्मविभूतयः ।
प्राधान्यतः कुरुश्रेष्ठ नास्त्यन्तो विस्तरस्य मे ॥")
वाक्यारम्भः । विषादः । इत्यमरः ।३।३।२४३॥ (यथा, भर्तृहरौ । ८ ।
"शम्भुस्वयम्भुहरयो हरिणेक्षणानां
यैरुज्झिता स्त्रितृणाय मनो न तस्मै ।
राजा स कोऽपि तदहं पुरुषाभिमानदग्धान्
विचिन्तयति कोऽयमतो हरीरेकः ।
धिग् धिग् धिग् मनिनीं मयि साऽतिरक्ता ॥")
खेदः । वादः । भर्त्सनम् । इति शब्दरत्नावली ॥ खेदः । इति मेदिनी ॥ (यथा, रामायणे ।
"कामयन्तीन विक्रीतो हन्त चिन्तामवाप्स्यसि ।")
असाधुकत्थनम् । इत्यजयपालः ॥

हन्तकारः, पुं, (हन्त इत्यस्य कारः करणम् ।) स्तुतिविद्वेषणकुत्सम् । इति केचित् ॥ हन्तशब्दः । यथा । यजुः ।
"निर्याचो हन्तकारेण मनुष्यांश्चैवेदच ।
मुखस्य मध्यदेशेन दुर्गीर्णेन उदङ्मुखः ॥"
इति सायणविवृतम् ॥
हन्तशब्दयोरेव सम्बोधनमुक्तं मनु सम्बन्धादिप्रत्येकमर्थे । यथा । सम्बन्धस्थानां सम्बोधनमुदाहृतं हन्त ।
हन्तादौ । न तु पत्नपुत्रादीयमित्यतमर्थे ।
इत्यादिशब्दारत्नम् । ८ । स्तुतिमर्थे हर्षार्थे-
शब्दः । यथा । यथा,—
"पूर्वमेतानिदं हित्वं यमक्षोदर्थमेहितम् ।
मनोरात्मकर्मभिः ह्यात्मानं सम्यगन्वतः ॥
हन्तकारमपात्रं वा हित्वा वाऽहितो हितः ।
हन्तादिमन्त्रे हित्वं कुर्या तं परमेश्वरम् ।
निन्दामात्मर्यमाक्षमत्वं ह्यात्मनुर्मुखम् ।
एकमं हन्तकारश्च सप्तदुर्मुखतो ।"
इति कूर्मपुराणे उपविभागे । १८।११८-११६ ॥
अपि च ।
"निन्द्याश्च गर्हणां हन्तु परिवादुकत्वादि-
नाम् ।
सम्बन्धार्थं हित्वा ह्यादर्थं सम्बन्धुकम् ।
हन्तं चतुर्थं चतुर्थेकार्थं हित्वोत्तमाः ।
भोजनं हन्तकारं वा त्यजं मिश्रमथापि वा ।
यदृच्छा तु न भोक्तव्यं यथाविभवमात्मनः ।"
इति मार्कण्डेयपुराणे मदालसोपाख्याने । २६ । ३४—३६ ॥

हन्ता, [तृ] त्रि, (हन्तीति । हन + लृच् ।) हननकर्त्ता । यथा, भट्टौ ५ सर्गे ।
"भवन्तं कार्तवीर्यो यो हीनसन्धिमचीकरत् ।
जिगाय तस्य हन्तारं स रामः सार्व-
लौकिकः ॥"

हन्तुः, पुं, स्तम्बः । हयः । हनधातोः तुप्रत्ययेन निष्पन्नः । इति केचित् ॥ (विनाशः । यथा, भागवते । ११ । ५ । ५० ।
"भूभारासुररात्रन्यहन्तवे गुप्तये सताम् ।
अवतीर्णस्य निर्हृत्यै यशो लोके वितन्यते ॥")

हन्तोक्तिः, स्त्री, (हन्त इत्यस्य उक्तिः ।) अनुकम्पोक्तिः । इति केचित् ॥

हन्नः, त्रि, (हद् + क्तः ।) क्षतपुरीषोत्सर्गः । इत्यमरः । ३ । १ । ८६ ॥

हन्यमानः, त्रि, (हन + कर्मणि शानच् ।) वर्त्तमानहननीयवस्तु । हनधातोः कर्मणि शानप्रत्ययेन निष्पन्नः । यथा,—
"हन्यमानं महासैन्यं विलोक्यामर्षसंहतम् ।
अभ्यधावन्निशुम्भोऽथ निजसैन्यमहन्नया ॥"
इति मार्कण्डेये देवीमाहात्म्यम् ॥

हपुषा, स्त्री, वनिगन्द्रव्यविशेषः । तच्च मरीचहन्तवद्दीर्घकृष्णवर्णवस्तु । हपुष इति ख्यातम् । इति वैद्याः ॥ हौवेर इति हिन्दीभाषा । तत् द्विविधम् । तत्राद्यं प्रथमं वर्णं मत्स्यसदृशं विसगन्धम् । द्वितीयमल्पवर्णसदृशं मत्स्यगन्धम् । तयोर्गुणानि यथा ।
"हपुषा वपुषा विद्या परावत्यकफा स्मृता ।
मत्स्यगन्धा शीतघ्नी विषघ्नी व्याधुनाशिनी ॥
हपुषा दीपनी तिक्ता स्वरूपा तुवरा गुरुः ।
पित्तोदरप्रमेहार्शोग्रहणीगुल्ममूलहृत् ॥
परार्थ्यसदृगुणा प्रोक्ता रूपभेदो द्वयोरपि ॥"
इति भावमिश्रकृतभावप्रकाशः ॥७॥
अपि च ।
"हपुषा हपुषा विद्या विसगन्धा विसनिका ।
अन्या पाली मत्स्यकला कफघ्नी व्याधुनाशिनी ॥
शीतघ्नपुरिषघ्नी च कफघ्नी वातरोगिणी ।
पूर्वा तु मत्स्यगन्धी स्यादपरा मत्स्यगन्धिका ॥
हपुषा व्याधिनिर्मोक्षा गुरुर्दीपनरोचनी ।
प्रहरीरतिविष्टम्भगुल्मार्शांसि हरा ॥"
इति श्रीवैद्यविद्याविशारदराजनिघण्टे शब्दादिवर्गश्चतुर्थः ॥

हपुषा, स्त्री, हपुषा । इति भावप्रकाशः ॥

हमा, स्त्री, गोधनिः । सत्यभामा । हन्ता च हेमन्तः । इति शब्दरत्नावली ॥ हन्ता च हेमन्तः । इति हेमचन्द्रः ॥ (यथा, भट्टौ । १ । ६१ । ६१ ।
"गोधरक्षेऽन्ता या गौरेमारक्षतमन्ता ।
विन्नामिरक्ष तनूर्यं यशोधन धर्मतः ।")

हम्म, स्त्री, गोधनिः । इति हेमचन्द्रः । विकाण्डशेषश्च ॥

हम्म, गतौ । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) मङ्क्षयान्तः । हम्मति । इति दुर्गादासः ॥

हय, क्षमे । गतौ । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-क्षमे अक०-गतौ सक०-सेट् ।) हयति । क्षमो ख्यातिः । इति दुर्गादासः ॥

हयः, पुं, (हयति गच्छतीति । हय + अच् । हिनोतीति । हि + अच् वा ।) घोटकः । इत्यमरः । २ । ८ । ८४ ॥ अथ हयायुर्वेदः ।
धन्वन्तरिरुवाच ।
"हयायुर्वेदमाख्यास्ये हये; सर्वार्थसञ्चयम् ।
काक्षटी कृष्णजिह्वश्च कृष्णाख्यः कृष्णताम्रकः ॥
करालो घोरदन्तश्च मद्गुरो वाधिकदन्तकः ।
एकाक्षश्चैव जातायः कपुको दिक्षुरो खनी ।
मार्जारपादो व्याघ्राभः कृष्णपिङ्गलविग्रहः ।
यमघो वामनश्चैव मार्जारकपिलोचनः ॥
एतद्दोषी हयस्त्याज्य उत्तमोऽन्यचतुष्करः ।
एते दोषाश्च कथिता हयदूष्यादिदूषणाः ॥
मध्योऽर्द्धदग्धहीनोऽन्यो नृपिङ्गलविहीनकः ।
कनीयांश्चार्द्धमानः स्यादर्द्धदग्धस्तु दीर्घतः ॥
पञ्चपिङ्गहीनः पक्षीन उत्तमाश्चास्तु दीर्घतः ।
असंपृक्ता ये च यादा दूषकर्मोक्तयश्च ये ॥
खरनेत्रप्रभावेषु न हीनाधिरयौवनः ।
रेवन्तपूजनाद्योमाश्वा स्यात् दिव्यभोजनात् ॥
लोष्टकं निम्बपत्राणि गुग्गुलुसर्षपा घृतम् ।
तिलश्चैव यवा पिण्डु कीर्यादाग्निर्न गवे ॥
आगन्तुकं दोषशान्तु प्रथमं दिवसत्रीरितम् ।
चिरपाकं स्वरं पातात् पित्तजं शिरप्रपाकिनम् ॥
कफजं कफात् यस्मिन्नात् सर्वलक्षणं दिर्शयकम् ।
आगन्तुकन्तु प्रथमाद्दैर्दुष्टव्रणविशोधनम् ।
एतौ लक्षणं हरिदे ये चिपक्वं चिन्तयेत्तम् ॥
दशेनं सैन्धवं वापि सक्षाक्षिकपेशितम् ।
तिलाक्तकुलिरीका दधियुक्ता वमेन्नरा ॥
निम्बपत्रयुतं पिण्डं तिलैः श्रोधनरोपणम् ।
करवीरकदलार्कसुधोत्कटपिचण्डैः ॥
भल्लातस्य पलैर्लेपं मार्दवाभ्यङ्गं परम् ।
पञ्चपल्लवसंयुक्तं दूषितं च प्रलेपयेत् ॥
ये चरिदे विदृष्टानि तथा सव्रणपक्वकम् ।
पटोलं निम्बपत्रञ्च यवा चिपक्वमेव च ॥
पिण्डको मद्गुरेश्चैव पूर्वमेवच कारयेत् ।
एतत्सर्वं समिश्रीकृत्यादाग्निविनाशनम् ॥
निम्बपत्रं पटोलञ्च पिण्डा खदिरं तथा ।
लाक्षयित्वा ततो वाष्पं ह्यन्तरङ्गं विशोधनम् ॥
प्राक्तनेन प्रलेपस्य पानं कुर्योन्नरान्तरे ।
सप्तरात्रं च कुर्वन्तु तैलं सर्वव्रणं हितम् ॥
मधुकाक्षतैलं वा व्रणानाञ्च शोधनम् ।
सप्तरात्रान्तु यदि व्रणाः शुष्यन्ति वा ॥"
शोफव्रणादौ शोणाक्षमिति च पाठः ।

"रसं दशाक्षचोरस्य चन्द्रैर्वा तैलसंयुतैः ।
पलद्वयं प्रथमेऽह्नि एकैकपलवर्द्धितः ॥
यावद्धि प्राप्तिपूर्णा स्यात्तस्मात्तैलुप्तमात्मके ।
मध्यमे चतुर्दश स्युरधमेऽष्टपलानि च ॥
शरन्निदाघयोर्नैव देयो नैव तु दापयेत् ।
तैलेन वातिके पित्ते शर्करान्यपयोऽन्विते ॥
कटुतैलैः कफे योगैः कफे सुक्षान् कुलत्थकान् ।
शालिषष्टिकदुग्धाभ्यां हयोऽखिलगुग्गुलैः ॥
पक्वजम्बूनिभो हेमवर्णः श्रेष्ठश्च गुग्गुलुः ।
चतुर्थप्रहरे हृद्यं गुग्गुलुं पाययेद्धयम् ॥
भोजने पायसं दुग्धं नाड़ीस्विन्नस्तनोति सः ।
विकाले भोजयेदन्नं शाल्यन्नं वातुले ददेत् ॥
मांसानाश्च रसैः पित्ते मधुसक्तरयाज्यकैः ।
कफे तुक्षान् कुलत्थान् वा कटुतिक्तान् हृतान् हृदे ॥

आधिते आधिते श्वासे त्रिदोषादौ तु गुग्गुलुम् ।
वासेर्दूर्व्वा सर्व्वरोगे प्रथमेऽह्नि पलं ददेत् ॥
विवर्द्धयेन् ततो वर्षमेकादिपलपञ्चकम् ।
उत्तमे स्याच्चत्वारि त्रीणि मध्यजघन्ययोः ॥
पानेन भोजनेनैव व्यत्ययेतिपलकं त्वरे ।
मध्ये वल्लिशाधमेऽथ चत्वारिंशच्च भोगिषु ॥
अन्ये कुक्षुषु खञ्जेषु त्रिफलाक्षायसंयुतम् ।
मन्दाग्नौ शीघरोगे च गवां मूत्रेण योजयेत् ॥
वातपित्तोल्वणे शाखौ गोक्षीरेक्षुरसंयुतम् ।
देयं क्षयार्थां पुष्ट्यर्थं मार्दवैर्वक्षश्च भोजनम् ॥
सुपिष्टायाः प्रदातव्यं गुडूच्याः पलपञ्चकम् ।
प्रभाते हृतसंयुक्तं शरद्ग्रीष्मेषु वाजिनाम् ॥
रोगघ्नं पुष्टिदञ्चापि वक्ष्यतेऽविवर्द्धनम् ।
तदेवाश्वाय दद्याद्वै क्षीरयुक्तमथापि वा ॥
गुडूचीकल्कयोगेन घृतवर्य्यश्चगन्धयोः ।
चत्वारि त्रीणि मध्यस्य जघन्यस्य पलानि हि ॥
अकस्माद्व्यत्ययं वाहनामेकरूपं यदा भवेत् ।
म्रियते च तदा क्षिप्रं ज्वरसर्पं तमादिशेत् ॥
होमाद्यैरथवा विप्रभोजनैर्वैष्णिकर्म्मणा ।
शान्त्योपसर्गशान्तिः स्यादरीतक्यादिकल्पतः ॥
हरीतकी सगोमूत्रा तैलेन लवणान्विता ।
खादेत् पञ्च ततः पञ्चदशा पूर्णा घृतावधि ।
उत्तमाश्चे घृतं प्रोक्तमशीतिः वल्लिशस्तरे ॥८॥
शालोत्तुर्व्वेदमार्ग्गाख्ये उक्ता: कल्पा मते हिताः ।
मते चतुर्गुणा मात्रा ताभिर्मलरुगर्दनम् ॥
शलोपसर्गशान्तीनां शमनं शान्तिकर्म्म च ।
पूजयित्वा सुरान् विप्रान् शाकुने कपिलां ददेत् ॥
इन्द्रिदन्तद्वये मालां विबध्नीयादुपोषितः ।
मन्त्रतं मन्त्रिता वैद्यो वचासिद्धार्थकामसे ॥
सूर्य्याद्याः शिवदुर्गाश्रीविष्णुता रक्षसां गणाः ।
बलिं रक्षाय भूतेभ्यः सामवेद चतुर्वेदैः ॥
भोजनं मन्त्रितं दद्यात् भक्षणोद्भूतवेद्यकम् ।
भूती रक्षा शुभा मेधा वारुणी रक्षसां वधः ॥
त्रिफला पञ्चकोले च दशमूलं विडङ्गकम् ।
शतावरी गुडूची च शिववासकिंशुकाः ॥
शरीरोगविनाशाय प्रोक्ताः सारक्षकायकाः ।

आयुर्व्वेदो गजाश्वागासक्तः संक्षेपसारतः ॥"
इति गारुडे हयायुर्व्वेदः २०७ अध्यायः ॥
युक्तिकल्पतरूक्तहयपरीक्षा घोटकशब्दे द्रष्टव्या ॥ * ॥ हये वर्णनीयानि यथा। वेगः १ औन्नत्यम् २ तेजः ३ सत्त्वगस्थितिः ४ खुरोत्खातरजः ५ रूपम् ६ जातिः ७ गतिविचित्रता ८। इति कविकल्पलता ॥ * ॥ अथ हयशकुनः ।
"हेषारवं सृजति वामतो यः
क्षुण्णक्षितिर्दक्षिणपादघातैः ।
कण्डूयते दक्षिणमङ्गभागं
तुङ्गं तुरङ्गः स पदं ददाति ॥"
इति वसन्तराजे हयशकुनः १३ वर्गः ॥
हयकातरा, स्त्री, (हयः कातरो यस्याः ।) अश्वकातराख्यः । घोड़काथरा इति हिन्दी भाषा ॥
हयकातरिका, स्त्री, (हयकातरा एव । स्वार्थे कन् । टाप् अत इत्वम् ।) अश्वकातराख्यः । घोड़काथरा इति हिन्दी भाषा । यथा,—
"कातरा हयपर्य्यायैः कातरान्तैः प्रकीर्त्तिताः ।
अश्वकातरिका तिक्ता वातघ्नी दीपनी परा ॥"
इति राजनिर्घण्टः ॥
हयगन्धं, क्ली, (हयस्येव गन्धो यस्य ।) काचलवणम् । इति राजनिर्घण्टः ॥ (विवरणमस्य काचलवणशब्दे ज्ञातव्यम् ॥)
हयगन्धा, स्त्री, (हयस्येव गन्धो यस्याः ।) अश्वगन्धा । इति रत्नमाला ॥ (अस्याः पर्य्यायो यथा,—
"गन्धान्ता वाजिनामादिरश्वगन्धा हयाह्वया ।
वराहकर्णी वरदा वलदा कुष्ठगन्धिनी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
अजमोदा । इति राजनिर्घण्टः ॥
हयग्रीवः, पुं, (हयस्य ग्रीवा इव ग्रीवा यस्य ।) मधुकैटभहृत्तवेदोद्धारार्थं विष्णोरवतारविशेषः । तस्य रूपं यथा,—
"सुनासिकेन कायेन भूत्वा चन्द्रप्रभस्तदा ।
कृत्वा हयशिरः शुभ्रं वेदानामालयं प्रभुः ॥
तस्य कक्षां समभपत् द्यौः सनक्षत्रतारका ।
केशाश्चास्याभवद्दीर्घा रवेरंशुसमप्रभाः ॥
कर्णावाकाशपातालौ ललाटं भूतधारिणी ।
भ्रुवौ सरस्वती श्रोणौ भुवावासां महोदधी ॥
चक्षुषी सोमसूर्य्यौ ते गाधा सन्ध्या पुनः स्मृता ।
प्रणवश्चास्य संस्कारो विद्युज्जिह्वा च निर्मिता ॥
दन्ताश्च पितरो राजन् सोमपा इति विश्रुताः ।
गोलोको ब्रह्मलोकश्च ओष्ठावास्तां महात्मनः ॥
ग्रीवा चास्याभवद्राजन् कालरात्रिर्गुणोत्तरा ।
एतद्धयशिरः कृत्वा नागास्थिभिरावृतम् ।"
इति महाभारतम् ॥
(हयग्रीवदेवतयवधार्थमेव भगवान् हयग्रीवमूर्त्तिरभवत् । इति देवीभागवतमतम् ॥ अस्य विवरणञ्च सदेव १ स्कन्धे ५ अध्याये द्रष्टव्यम् ॥) विष्णुवश्वदेवविशेषः । इति हेमचन्द्रः ॥ स च

कल्पान्ते ब्रह्मणि प्रसुप्ते वेदं हृतवान् । तदेवोद्धारार्थं विष्णुना मत्स्यावतारेण स हतः ॥
इति केचित् ॥ * ॥ अपि च ।
"बृहद्गङ्गाजलस्यान्तीरे ब्रह्मसुतस्य च ।
विश्वनाथाह्वयो देवः शिवलिङ्गसमन्वितः ।
विश्वदेवी महादेवी योनिमण्डलरूपिणी ॥
हयग्रीवेण युयुधे तत्र देवो जगत्पतिः ।
हयग्रीवं वध्य हत्वा मणिकूटं तथागमत् ॥"
इति कालिकापुराणे ८२ अध्यायः ॥
हयग्रीवहा, [न्] पुं, (हयग्रीवं हन्तीति । हन् + क्विप् ।) विष्णुः । इति हेमचन्द्रः ॥
हयग्रीवा, स्त्री, दुर्गा । यथा,—
"नारसिंही हयग्रीवा हिरण्याक्षविनाशिनीति"
इति तस्याः सहस्रनामस्तोत्रम् ॥
हयङ्गवः, पुं, (हयं उच्चैःश्रवसं कषतीति । कष + खच् ।) मातलिः । स तु इन्द्रसारथिः । इति त्रिकाण्डशेषः ॥
हयनं, क्ली, (हयति गच्छत्यनेनेति । हय + ल्युट् ।) कर्णीरथः । इत्यमरः ॥ तस्य रूपान्तरं हयनम् । इति तट्टीकायां भरतः ॥
हयपुच्छी, स्त्री, (हयस्य पुच्छमिव आकृतिर्यस्याः । ङीष् ।) माषपर्णी । इत्यमरः । २।४।१३८ ॥
हयप्रियः, पुं, (हयस्य प्रियः ।) यवः । इति हेमचन्द्रः ॥ (यवशब्दस्य गुणादयो ज्ञेयाः ॥)
हयप्रिया, स्त्री, (हयस्य प्रिया ।) अश्वगन्धा । खर्জ্জूरी । इति राजनिर्घण्टः ॥
हयमारः, पुं, (हयं मारयतीति । मृ + णिच् + अण् ।) करवीरः । इति राजनिर्घण्टः ॥
हयमारकः, पुं, (हयं मारयतीति । मृ + णिच् । ण्वुल् ।) करवीरवृक्षः । इत्यमरः । २।४।९६ ॥
हयमारणः, पुं, (हयं मारयतीति । मृ + णिच् + ल्युः ।) अश्वत्थवृक्षः । इति शब्दचन्द्रिका ॥
हयवाहनः, पुं, (हयो वाहनमस्य ।) रेवन्तः । स तु सूर्य्यपुत्रः । इति हेमचन्द्रः ॥ कुबेरः । इति केचित् ॥
हयवाहनशूकरः, पुं, रक्तकार्पासः । इति शब्दचन्द्रिका ॥
हयशाला, स्त्री, (हयस्य शाला ।) अश्वालयः । यथा, माघे । २१७ । १६—२३ ।
"गवां स्थानं तथैवाच तुरगाणान्तथैव च ।
उत्तराभिमुखा अग्र्या तुरगाणां विधीयते ॥
दक्षिणाभिमुखा वाथ परिशिष्टास्तु गर्हिताः ।
तुरगास्तु तथा धार्य्याः प्रदेशैः सर्व्वराजिकैः ॥
कुलुटा वानराश्चैव मर्कटाश्च नराधिप ।
धारयेदश्वशालायां सर्व्वत्रा श्वेतमेव च ॥
अश्वाश्च धार्य्या यत्नेन तुरगाणां हितैषिणा ॥
गोगवाश्वादिशालासु नतपूरीयस्य निर्गमम् ।
अस्तं गते न कुर्व्वीत देवदेवे दिवाकरे ॥"
हयशीर्षः, पुं, (हयस्य शीर्षं शीर्षं यस्य ।) विष्णुः । यथा,—
"ततो जगाम हयोऽब्धौ हन्तुं वाजिमुखं
प्रसुप्त

तत्र देवह्रदे स्नात्वा तर्पयित्वा पितॄन् सुरान्।
संपूज्य हयशीर्षञ्च जगाम गजसाह्वयम्॥"
इति वामनपुराणे ७१ अध्यायः॥

हया, स्त्री, (हयस्तन्नामोऽस्त्यस्या इति। अच्। टाप्।) अश्वगन्धा। इति राजनिर्घण्टः॥

हयाध्यक्षः, पुं, (हयस्य अध्यक्षः।) अश्वाध्यक्षः। तस्य लक्षणं यथा,—
"हयशिक्षाविधानज्ञस्तच्चिकित्सितपारगः।
अश्वाध्यक्षो महीभर्तुः स्वासनञ्च प्रशस्यते॥"
इति मात्स्ये। २१५। ६७॥

हयानन्दः, पुं, (हयस्य आनन्दो यस्मात्।) मुद्गः। इति राजनिर्घण्टः॥ (गुणाद्योऽस्य मुद्गशब्दे ज्ञातव्यः॥)

हयायुर्व्वेदः, पुं, (हयस्य आयुर्व्वेदः।) घोटकचिकित्साशास्त्रविशेषः। तच्छास्त्रं हयशब्दे द्रष्टव्यम्॥

हयारिः, पुं, (हयस्य अरिः।) करवीरः। इति रत्नमाला॥

हयाशना, स्त्री, (हयानामशनं यस्याः।) शल्लकीवृक्षः। इति शब्दचन्द्रिका॥

हयी, स्त्री, (हयस्य स्त्री। हय+ङीप्।) घोटकी। इति जटाधरः॥

हयेष्टः, पुं, (हयानामिष्टः।) यवः। इति राजनिर्घण्टः॥

हयोत्तमः, पुं, (हयेषु उत्तमः।) कुलीनाश्वः। तल्लक्षणं यथा,—
वाताश्वः २ जाश्वः ३ अजानेयः ४। इति त्रिकाण्डशेषः॥

हरः, पुं, (हरति पापानीति। हृ+अच्।) शिवः। इत्यमरः। १।१। ३५॥ (यथा, रघुः। ४। ३२।
"मरुद्गणानां मरुतां कर्षन् पूर्व्वसागरगामिनम्।
बभौ हरजटाभ्रष्टं गङ्गास्रोत इवाम्बरम्॥")
अग्निः। गर्दभः। इति केचित्॥ हरणम्। हृत्यङ्गाद्यर्थम्॥ त्रि, हरणकर्त्ता। (यथा, भागवते। ३। १८। ११।
"अतः पुत्रा मन्नामहरा रक्षोकसां
ततश्चियो गदया दाविनास्ते॥")

हरकः, पुं, (हर एव। स्वार्थे कन्।) शिवः। चौरः। इति केचित्॥ हरणकर्त्तरि, त्रि॥

हरगौरी, स्त्री, (हरेण सह गौरी।) अर्द्धनारीश्वरमूर्त्तिः। यथा,—
देव्युवाच।
"यथा त्वयाहं सततं छायेवानुगता हर।
भवेयं मादृशत्वेन तथा मां कर्त्तुमर्हसि॥
भस्मगात्रेण संस्पृष्टं नित्यमिङ्गनविभस्मम्।
अहमिच्छामि भवतस्तत्त्वं कर्त्तुमर्हसि॥
श्रीभगवानुवाच।
रोचते मम्मनस्यमपि यत्त्वमिच्छसि भाविनि!।
तत्रोपायमहं वक्ष्ये यदि शक्नोषि तत् कुरु॥
अर्द्धं मम शरीरस्य शुद्धाम्ब त्वं मनोहरे।
अर्द्धं भवतु मे नारी वयेवार्द्धं प्रमानिनि॥
यदि त्वं नहि शक्नोषि दर्शं तत्त्वार्द्धमीहशम्।
तदाहं ते हरिष्यामि शरीरार्द्धं वरानने!॥
तवैवार्द्धं तथा नारी अर्द्धं भवतु पूरुषः।
विद्यते तत्र शक्तिर्मे त्वमनुज्ञातुमर्हसि॥
श्रीदेव्युवाच।
"तवैवार्द्धं हरिष्यामि शरीरार्द्धं वृषध्वज!।
किन्त्वहं त्रिक्रमिच्छामि यत्तेत्तं हर इच्छसि॥
तथाहमर्द्धं भवतो हृत्वा तिष्ठामि तावता।
व्रजाम्यहं यदा तेऽर्द्धं सम्पूर्णं स्यात्तदा वपुः॥
इत्यर्द्धभागहरणं भवेद्यदि वृषेक्षितम्।
तदैवाहं तदा शम्भो! शरीरार्द्धं हराम्यहम्॥"
ईश्वर उवाच।
एवमस्तु भवेन्नित्यं यथा त्वं कर्त्तुमिच्छसि।
शरीरार्द्धस्य हरणं भूयात्तव यथेप्सितम्॥
श्रीऔर्व्व उवाच।
अथ गौरी तदा पूर्व्वमनुभूतं तपःस्थितौ।
योगनिद्रास्वरूपं तदात्मानोऽचिन्तयद्विया॥
हरं प्रणम्य प्रथमं ब्रह्माणञ्च ततः परम्।
ततश्चिजगतामीशं हरिं नारायणं प्रभुम्॥
चिन्तयित्वा तथा तेषामेकतां सा जगन्मयी।
आत्मानं योगनिद्राञ्च चिन्तयित्वा मनस्विनी॥
दक्षिणे स्वशरीरस्य भागार्द्धं ग्रहणेच्छुतः।
शरीरस्य तथा वाममतिप्रेम्णा निजं हरे॥
हरोऽपि स्वशरीरार्द्धं गौरीकाये तदा स्वयम्।
प्रेम्णा निषेधयत्तस्याश्चिकीर्षुः प्रियमद्भुतम्॥
अथ स्थित्वा तदा भर्गः कालीं सह चिरं तदा।
परित्यज्य शरीरार्द्धं पृथगेव बभौ रुचा॥
काली भूत्वा स्वयंगौरी शरीरार्द्धन्तु शाङ्करम्।
प्राप्य मोदात्तदात्मानं सन्तुष्टा च जगन्मयी॥
एवं यदा शरीरार्द्धमादाय परमेश्वरी।
हरस्य तिष्ठति तदा राजतेऽतीवशोभना॥
अर्द्धं धम्मिलसंयुक्तं जटाजूटार्द्धयोजितम्।
एकस्मिन् श्रवणे भोगी भागे जाम्बूनदोचितम्।
कुण्डलं श्रवणेऽन्यस्मिन् भूषितं तस्या बराजत॥
अर्द्धं शशाङ्कि चास्यार्द्धं वृषभाङ्कि बराजत।
अर्द्धं स्खलनमं चारु तिलपुष्पनसं परम्॥,
दीर्घेक्षणं तथैवार्द्धमर्द्धं भ्रूविवर्ज्जितम्।
आरक्तचारुदशनं रक्तौष्ठमेकतस्तथा॥
अपरं पृथुविपुलदीर्घाकृति रदं परम्।
अर्द्धं नीलगलव्याप्तमपरं हारसंयुतम्॥
अर्द्धं कङ्कणकेयूरयुक्तबाहु तथापरम्।
नागकेयूरसंयुक्तस्थूलबाहु निरूर्म्मिकम्॥
अर्द्धं विषायतभुजं करिहस्तभुजं परम्।
एकत्र रोम्मिकाः शाखाः करस्यान्यत्र तां विना॥
एकस्तनस्तु हृदयं रोमावल्यर्द्धसंयुतम्।
रमास्तम्भसमानोरु सुपार्श्वि स्टदुपादकम्॥
एकं तथापरं स्थूलसंहतोरु पदाम्बुजम्।
एकचारु स्टदु स्थूलजघनं सुमनोहरम्॥
तथापरं दृढकटि संहतोर्द्धपदाम्बुजम्।
एकं वैयाघ्रचर्म्मयुक्तं भूमिधिर्णपनम्॥
अपरं स्टदुकौषेयवसनं चन्दनोक्षितम्।
एवमर्द्धं तथा जातं योषिल्लक्षणसंयुतम्॥
अपरं बलवद्भूरि सुदृढं पुरुषाकृति।
एवमर्द्धं सरीरिपोर्व्व्यहार गिरिजा सती॥
हिताय सर्व्वजगतां कामाख्या कालिकोपमा।
तस्याः शरीरं राजेन्द्र हरतन्वर्द्धसंयुतम्।
येनोपमेयं तन्नास्ति मार्गितं भुवनत्रये॥
सन्तानः पारिजातो वा एकान्तविषदस्करः।
अमोघया तया बन्दौ तौ चापि ययतुर्नहि॥
बहुधा च पृथक्तेन तौ रेमाते नरेश्वर।
अर्द्धनारीश्वरी भूत्वा स तु रेमे कदा च न॥
इति यद्यपि भूतेशः स्वयं शक्नोति कालिकाम्।
गौरीं कर्त्तुं तदा सर्व्वभूतकारणकारणः॥
तथापि तां गिरिसुतां संयोज्य विविधैः पुरा।
तपस्ययोजयद्देव क्रियोपायैरनेकशः॥
तपोनिर्धूतसर्व्वाङ्गीं पश्चाद्गौरीमथाकरोत्।
अर्द्धञ्च प्रददौ तस्मै शरीरस्य महेश्वरः॥
नैवास्य तत्त्वं जानन्ति शक्राद्याः सकलाः सुराः।
शरीरार्द्धप्रदानस्य तपसो योजनस्य च॥
अतस्य तत्त्वं जानन्ति महात्मानो महाबलाः।
नन्दी भृङ्गी महाकालो वेतालो भैरवस्तथा।
अङ्गभूता महेशस्य वीतभीतास्तपोधनाः॥
ये मानुषशरीरेण प्राप्तिरे तपसो बलात्।
गणानामाधिपत्यन्तु ते जानन्ति हरं परम्॥
एवं सदा त्वया योज्याः सानुगा नृपसत्तम!।
वनिताः सत्क्रियोपायैस्ततो भद्रमवाप्स्यसि॥
य इदं शृणुयान्नित्यमद्भुतं पुण्यदायकम्।
शिवयोः प्रीतिकरणं शरीरार्द्धयहं तथा॥
गौरीत्वापादनञ्चैव कालिकायाः शुभावहम्।
न तस्य विघ्ना जायन्ते स च पुण्यतमो मतः।
दीर्घायुः स सुखी भूयात् पुत्रपौत्रसमन्वितः॥
सततं परिशृण्वानः शिवयोश्चरितं महत्।
शिवलोकमवाप्नोति सुचिरं शिववल्लभः॥"
इति श्रीकालिकापुराणे ७४ अध्यायः॥

हरचूड़ामणिः, पुं, (हरस्य चूड़ामणिः शिरोभूषणमिव।) चन्द्रः। इति भूरिप्रयोगः॥ शिवशिरोरत्नञ्च॥

हरणं, क्ली, (ह्रियते इति। हृ+ल्युट्।) यौतकादिदेयद्रव्यम्। (यथा, रघुः। ७। ३२।
"सत्त्वानुरूपाहरणोचितश्रीः
प्रास्थापयत् राघवमन्वगाध्व॥")
तत्पर्य्यायः। दायः २। इत्यमरः। २। ८। २८॥ यौतकं यादिना उपनयनभिक्षाप्रसादादि च यत् देयं तत् दायहरणपदवाच्यं कन्यादानकाले जामात्रादिभ्यो व्रतभिक्षादौ ब्रह्मणादिभ्यश्च यत् द्रव्यं दीयते तत्र दायादिदेयमित्यर्थः। युतकं योनिसम्बन्धः तत्र भवमिति ष्ण्यि यौतकं युतयोर्बधूवरयोरिदमिति वा कण्यि यौतकं यौतुकञ्च संस्कारमध्यमपि। यौतकं यौतुकञ्च तत् इति वाचस्पतिः। दीयते दायः कर्म्मणि घञ् शुद्धं दीयते सुदायः इति पाठः इत्यन्ये। ह्रियते हरणं कर्म्मणि ल्युट्। इति भरतः॥ *॥

सुतः। सुतिः। इति मेदिनी। (यथा, भागवते। १०। ५०। ८।
"अवतीर्णोऽवतारोऽयं भूभारहरणाय मे।
संरक्षणाय साधूनां हनोऽमीषां वधाय च।")
शुक्रम्। स्वर्णम्। कपर्दकम्। उच्चोदकम्। इति केचित्। भाव्याकृतु भावकाकृद्वारा भावप्रकाशम्। इति लीलावती।

हरतेजः, [स्] क्ली, (हरस्य तेजः।) पारदम्। इति राजनिर्घण्टः। शिवबीर्य्यं च।

हरनेत्रं, क्ली, (हरस्य नेत्रम्।) शिवचक्षुः। संज्ञायाम्। इति ज्योतिःशास्त्रम्।

हरबीजं, क्ली, (हरस्य बीजम्।) पारदम्। इति भूरिप्रयोगः।

हररूपः, पुं, (हरस्य रूपमिव रूपमस्य।) शिवः। इति शब्दरत्नावली।

हरशेखरा, स्त्री, (हरस्य शेखरं आधारत्वेनास्त्यस्या इति। अच्।) गङ्गा। इति हेमचन्द्रः।

हरशूरा, स्त्री, हारशूरा। द्राक्षा। इति केचित्।

हरादिः, पुं, (हरस्य आदिः।) कैलासपर्व्वतः। इति केचित्। (यथा, कथासरित्सागरे। १२६। ६६।
"विद्याधराः ग्रहगणा यः कुरुते ममाज्ञां
धर्म्मश्चतिक्रममितः प्रभवति प्रणाम्।
वधः स मे नियतमित्यभितो हरादि-
सुद्घोषणाय स ततो भ्रमयांचकार।")

हरिः, पुं, (हरति पापानीति। हृ+"हृषिमृडीति।" उणा० ३। ११८। इति इन्।) विष्णुः। (यथा, रघुः। १०। ८६।
"हरिरिव युगदीर्घैर्बाहुभिर्यो दधार
क्षितिरवनिपतीनां लेखकाये चतुर्भिः।")
सिंहः। (यथा, रघुः। २। ५८।
"स ज्यानग्नो धनुषि सदृशं
योजयन् विल्लमिवानिलस्य।")
शुक्लपक्षी। सर्पः। वानरः। भेकः। इन्द्रः। सूर्य्यः। वायुः। अश्वः। (यथा, महाभारते। ३। १६६। ५।
"नमः स हरिभिर्युक्तं आस्थानपरिरक्षितम्।
मेघजादित्यमाख्यं श्रिया परमया ज्वलन्।)
यमः। शिवः। ब्रह्मा। किरणः। इन्द्रः। (यथा, रघुः। १२। १०३।
"अथा हरेः क्षयदि संस्तुतकार्म्मुकस्य-
माहत्य राघवमहस्त्रिदशैकवीर्य्यम्।")
अर्जुनवृक्षः। इति केचित्। मयूरः। कोकिलः। अंशुः। अग्निः। इति शब्दरत्नावली। भङ्गः। इति। इति विकाण्डशेषः। विष्णुवर्णः। अग्निवर्णः। इति हेमचन्द्रः। ७। हरेरुत्पत्तिरुत्तमाख्याने यथा,—
श्रीमदङ्गिरस उवाच।
"अथान्यदीश्वरस्यैव शृणु मङ्गलदायकम्।
सनत्कुमार सर्व्वज्ञ सर्व्वैश्वर्य्यप्रदायकम्।
ब्रह्मणः पुत्रवीर्य्याणां पुत्रवीरेण धीमता।
भारावतीर्णदैत्यानां पुत्रवीरेण धीमता।

गोविन्दः केशवोऽनन्तो वामनो मधुसूदनः।
दामोदरो हृषीकेशः पद्मनाभस्त्रिविक्रमः॥
वैकुण्ठश्चाच्युतो रामश्चक्रपाणिरधोक्षजः।
पीताम्बरो जगन्नाथो नृसिंहो गरुडध्वजः॥
राधिकापतिरानन्दस्वरूपो विश्वमोहनः।
यशोदानन्दनः सत्यः श्रीगोपीजनवल्लभः॥
गदाधरो हयग्रीवो वराहश्च गवीश्वरः।
गोवर्द्धनधरो विश्वबीजं कमलशोचनः॥
सर्व्वान्तर्यामी जगदीशश्चागूरमर्द्दनः प्रभुः।
विश्वम्भरो यज्ञभोक्ता वनमाली सनातनः॥
पुराणपुरुषो नन्दालयः श्रीवत्सलाञ्छनः।
देवकीनन्दनः श्यामः श्रीश्यामाप्राणवल्लभः॥
अनिरुद्धः परं ब्रह्म मुरारिः श्रीधरस्तथा।
श्रीगोपीमोहनः शार्ङ्गधन्वा तु ब्राह्मणप्रियः॥
ब्रह्मण्यदेवः सैवज्ञब्राह्मणव्रतविनाशनः।
कैटभारिर्गुणातीतो यज्ञिनयीरमणो विराट्॥
सङ्कर्षणः शेषशायी दत्तात्रेयकपिस्तथा।
सर्व्वशास्त्रप्रणेता च सुकन्दो भक्तवत्सलः॥
अघासुरघ्नः प्रद्युम्नो हंसश्च सुरसौधरः।
कुवलयापीडघाती च पद्मधारी चतुर्भुजः॥
भक्तलोकैकशरण्यो गोपालो वेणुप्रियः।
पक्षीपार्थिगुणमयः कोटिकन्दर्पमोहनः॥
वेणुवाद्यविनोदी च कंसारिर्वासवस्तथा।
चतुर्व्वेदमयो नित्यः सच्चिदानन्दविग्रहः।
दीननाथैकशरणं भक्तानुग्रहकारकः॥
एतद्दशोत्तरशतं कृष्णनाम वृषद्गलम्।
प्रत्यहं यः पठेत् प्रातस्तिसन्ध्यं वा विशेषतः॥
दिनादिचित्तरो भक्त्या ग्रहणेति जपति स्मरेत्।
दुःस्वप्ननाशनं तस्य मनोमलविनाशनम्॥
सर्व्वापराधशमनं सर्व्वपापक्षयो भवेत्।
मारणं शान्तिदं पुण्यं तापत्रयविनाशनम्॥
आयुष्यं सर्व्वसुखदं सर्व्वदुःखापहं सुने!।
व्रतयज्ञतपोदानयागतीर्थफलप्रदम्॥
पुत्रदं वाणु वन्ध्यानां अपमृत्युहरं नृणाम्।
सर्व्वाभीष्टप्रदं सर्व्वैश्वर्य्यदं विघ्ननाशनम्॥
सर्व्वापद्वारिद्र्यनाशनं मानवस्य तु।
सद्बुद्धिविद्याविज्ञानयशोधर्म्मप्रदं तथा॥
सर्व्वभीतिहरं भक्तिमुक्तिधान्यधनप्रदम्।
सर्व्वरोगक्षयकरं बाह्यान्तःशुद्धिदं परम्॥
सकलकामिनो वैष्णवस्य सर्व्वकामफलप्रदम्।
सर्व्वग्रहक्षयो याति हरिभक्तिश्च जायते॥
सरस्वती च वक्त्रात् कमलाविरतं भवेत्।
चैत्रशीर्षे च मरणं गङ्गायां वा विशेषतः॥
मोक्षणं भवत्यस्य यमभीतिविनाशनम्।
निष्कामिनश्चनन्यस्य प्रेमभक्तिसुखप्रदम्।
भवेदेतत्कृतं ज्ञानं मायातः कृष्ण! प्रसीदति!"
इति ब्राह्मोत्तरखण्डे १११ अध्यायः॥
श्रीहरिवंशविग्रहाः यथा,—
श्रीवशिष्ठ उवाच।
"सच्चिदानन्दरूपस्य कृष्णस्याद्भुतकर्म्मणः।
संसरेतु यादविग्रहाः प्रणमेत्ता नरोत्तमः॥
अनिरुद्धादि देवर्षे! यानि भक्तिप्रदानि च।

सर्व्वसुखप्रदानीह तव प्रोक्तानि वेधसा॥
मयापि सुवनेश्वर्य्यं कथितानि प्रयत्नतः।
पुरावौ तुष्टचित्ताभूत् श्रुत्वा कृष्णसुखप्रदा॥
दिलीप उवाच।
कानि कानि च चिह्नानि कृष्णस्य पादयोर्मुने।
वशिष्ठ! श्रोतुमिच्छामि कथयस्वानुपूर्व्वकम्॥
वशिष्ठ उवाच।
यदूचिवान् स्वयं ब्रह्मा नारदाय नराधिप!।
तत् शृणुष्व महत् पुण्यमतिगोप्यतमं वचः॥
विधिर्देवर्षिणा पृष्ट उपाख्यानमिदं पुरा।
महाभागवतं पुण्यमेकदा तमुवाच ह॥
ब्रह्मोवाच।
शृणु नारद वक्ष्यामि पादयोश्चिह्नलक्षणम्।
भगवत्कृष्णरूपस्य ज्ञानैकरसस्य च॥
अवतारा ह्यसंख्याश्च कथिता वै तवाग्रतः।
परं सम्यक् प्रवक्ष्यामि कृष्णस्तु भगवान् स्वयम्॥
देवानां कार्य्यसिद्ध्यर्थमधर्म्मस्य वृथा तथा।
आविर्भूतस्तु भगवान् स्वानां प्रियचिकीर्षया॥
कैनैव ज्ञायते देवो भगवान् भक्तवत्सलः।
तान्यहं वेद्मि नान्योऽस्ति सत्यमेतन्मयोदितम्॥
ऊनविंशतिचिह्नानि मया दृष्टानि तत्त्वतः।
दक्षिणे दश चिह्नानि वामे च नव नारद!॥
ध्वजातपत्रं कमलं वज्राङ्कुशयवः।
स्वस्तिकं चोर्द्धरेखा चाष्टकोणं चक्रमेव च॥
नवान्यानि प्रवक्ष्यामि साम्प्रतं वैष्णवोत्तम!।
चिह्नानि वामचरणे गोविन्दस्याद्भुतानि च॥
इन्द्रचापं त्रिकोणञ्च कलसश्चार्द्धचन्द्रकम्।
शङ्खोऽरं मत्स्यचिह्नं गोष्पदं जाम्बवं स्रुतम्॥
अङ्कान्येतानि भो विप्र! दृश्यन्ते च यदा कदा।
कृष्णाख्यस्तु परं ब्रह्म भुवि जातं न संशयः॥
द्वयं वाथ त्रयं वाथ चत्वारः पञ्च एव वा।
दृश्यन्ते ब्रह्मवित्प्रज्ञ! भुवनारः कथञ्चन॥
मध्ये ध्वजं तु विज्ञेयं पद्मं द्वादशमानतः।
वज्रञ्च दक्षिणे पार्श्वे चाङ्कुशो वै तदग्रतः॥
यवोऽप्यङ्कुशचिह्ने स्यात् स्वस्तिकं यत्र कुत्रचित्।
छातपत्रं चोर्द्धरेखा वामे चक्रञ्च दक्षिणे॥
आदमङ्गुलिमारभ्य यावद्वै मध्यमा स्थिता।
तावद्वै चोर्द्धरेखा च कथिता पद्मसंज्ञके॥
अष्टकोणं ततो वत्स! समानाद्भुलेश्च तत्।
निर्द्दिष्टं दक्षिणे पादे चैवाङ्गुष्ठमूलयोः परे॥
एवं पादस्य चिह्नानि नान्यं वदति वैष्णवः।
दक्षिणेतरज्ञानानि संवदामीह संसदि॥
चतुरङ्गुलमानेन द्व्यङ्गुलिमण्डलम्।
इन्द्रचापं ततो विद्यादन्यत्र च न ते क्वचित्॥
त्रिकोणं मध्यनिर्द्दिष्टं कलसो यत्र कुत्रचित्।
अष्टाङ्गुलप्रमाणेन तद्वेरर्द्धचन्द्रकम्॥
अर्द्धचन्द्रसमाकारं निर्द्दिष्टं तस्य सूत्रतः।
दृष्टं वै यत्र चिह्नेषु ज्ञातव्यं वै विचक्षणैः॥
त्रिकोणं दक्षिणे भागे जम्बरं तदधो यवः।
जम्बूफलं त्रिकोणस्य वामपार्श्वे विलक्षणम्॥

हरिः

गोष्पदं त्रिगुणं ज्ञेयं तदा ह्यङ्गुलमानतः ।
त्रिकोणाग्रस्तु निर्दिष्टमथवा कलसो यथा ॥
श्रीनारद उवाच ।
न श्रुतं न च दृष्टञ्च चिह्नमेतन्मयोदितम् ।
रूपं वै सदृशं ब्रह्मन् वद त्वं यामृतं मम ॥
श्रीब्रह्मोवाच ।
नाका च ध्वजा प्रोक्ता प्रान्ते चैलोक्यकालयः ।
यद्यं वै वाद्यपत्रञ्च ज्ञातव्यं श्रुतिनोदितम् ॥
वज्रं खड्ग इति प्रोक्तं दृष्टं वै गोत्रभित्करे ।
सदृसारं समाख्यातं कचिद्वेदविदो विदुः ॥
अङ्कुशो नागशिक्षार्थं निर्मितं यद्धि पुत्रक ।
तादृशं तद्भवेच्चिह्नं विज्ञेयं वैष्णवैर्नरैः ॥
यवोऽप्यङ्कुशलक्षेषु कथितो मुनिभिर्ध्रुवम् ।
व्रातपत्रं नृपच्छत्राकारं वनुष सुशोभनम् ॥
चक्रं सुदर्शनाकारं यच्चिह्नं तच्चगोचरम् ।
वासुदेवकरे यद्वत् मुनिभिः परिकीर्तितम् ॥
विवाहादौ च माङ्गल्ये पुत्रे जाते तथैव च ।
स्त्रीभिश्चैव सदा कार्यं स्वस्तिकश्च तदुच्यते ॥
रेखाश्चतस्रः संख्याताश्चित्रांगगूर्ह्या यदीचिताः ।
पद्मवेन च संयुक्तमष्टकोणं तदुच्यते ॥
एताकारोर्ध्वरेखा स्यात् न वक्रा दृश्यते यदा ।
मध्यमाङ्गुष्ठमानेन कथिता मुनिभिः किल ॥
दशभिश्चिह्नितैः पादं वन्द्यं पूज्यञ्च सर्वदा ।
चिह्नान्येतानि भो विप्र दक्षिणे चरणे विभोः ।
न श्रीकृष्ण इति श्रेयो बुद्धिमद्भिर्नरोत्तमैः ॥*॥
यद्यपाणि च चिह्नानि वामपादे च तत् शृणु ।
ऊर्द्धरेखार्यं यवमुक्तिंयात् ह्यङ्गुलञ्च चतुर्गुणम् ।
सौव्वीसंयुक्तवक्रं चेत्तदाहुर्मुनयो ध्रुवम् ॥
त्रिकोणस्तु त्रिरेखाढ्यं शकटाकारकं यदा ।
तदा वै तत्त्रिकोणाख्यं चिह्नन्तु मुनिनोदितम् ॥
कलसो वर्तुलाकारो ग्रीवया सहितो यदा ।
दृश्यते तादृशं पुत्र चिह्नितं सकलाधिकम् ॥
द्वितीयायां यथा चन्द्रो दृश्यते चाम्बरे क्वचित् ।
तद्वच्चन्द्रं विजेयं मुनौ च प्रतिपादितम् ॥
अम्बरं त्रिरेखात्मं त्रिरेखासुसमन्वितम् ।
यत्पुत्रञ्च सदा दृष्टं श्रीकृष्णे परमात्मनि ॥
लक्ष्याकारो भवेद्यत्र तच्चिह्नं मनुष्यसंज्ञकम् ।
अम्बुजाक्षमाकारं अम्बुचिह्नं विदुर्बुधाः ॥
मृगचिह्नं समाख्यातमनविंशतिसंख्यकम् ।
पादयोरुभयोराहुः लक्षणज्ञा मुनयोऽनघाः ॥०॥
एवं वृन्दावनेशस्य पादयोर्मुनिसत्तम ! ।
ऊनविंशतिचिह्नानि सन्ति वामेऽथ तत् शृणु ॥
दक्षिणे नव चिह्नानि राधाया एव वामतः ।
मैथिल्याः कथितो विप्र कृष्णलक्षणवेदिभिः ॥
एतानि पदचिह्नानि दृष्टानि च मुनानि च ।
अन्यत्र कथितान्येव पुनः किं कथयाम्यहम् ॥
नारद उवाच ।
चिह्नान्येतानि मो ब्रह्मन् किं कर्माणि वैष्णवैः ।
सदयस्व हि सर्वज्ञ मुनयोः पादयोर्मम ॥
श्रीब्रह्मोवाच ।
गोपदं दक्षिणं यत्र प्राधान्यं ब्राह्मणादिकम् ।
मुनिं मुनिं पादं ज्ञात्वा स्थिरेण स्थिरतां गतम् ॥
स्वगात्रे विष्णुयागानि पदचिह्नानि वैष्णवः ।
नामैरूर्द्धं मुनिः स्नात्वा वृन्दावनेशयोः ॥
अथवा चिह्नितं पादं ज्ञात्वा भागवतोत्तम ! ।
पूजामारभते तावत् यावज्जीवति नारद ! ॥
पूजितो देवदेवेशः फलं भवति देहिनाम् ।
तथा तच्चिह्नितं पादं अर्चनं कुरुते यदि ॥
राजसूयाश्वमेधादिफलं भवति सर्वथा ।
तदनन्तगुणं प्रोक्तं यद्येकं पूजयेत् सुधीः ॥"
इति पाद्मोत्तरखण्डे श्रीकृष्णपदचिह्नमाहात्म्यं नाम ११२ अध्यायः ॥*॥ तन्नाममाहात्म्यं यथा,
श्रीसदाशिव उवाच ।
"शृणु नारद ! भद्रं ते कथयिष्यामि चानघ ।
पार्वत्यै यदहं पृष्टः प्रावोचन्तु यथातथम् ॥
वेदस्याध्ययनं यज्ञं तपो योगः शमो दमः ।
कृष्णनामसहस्राग्रैर्दैवर्षे ! नहि तुल्यकम् ॥
ध्यानं देवार्चनं ध्यानं धारणा नियमो यमः ।
प्रत्याहारः समाधिश्च हरिनामसमं न च ॥
गोविन्दनामशब्दं न त्यागो न व्रतं सुने ! ।
न सङ्कल्पो नापि शौचं न पुण्यं न फलं तथा ॥
वानप्रस्थं ब्रह्मचर्यं गार्हस्थ्यं कर्मसन्न्यासकम् ।
धर्म्म एव सदाचारो न हरेर्नामतुल्यकः ॥
न हरेर्नामसदृशं कर्म्म किञ्चित् तपस्तथा ।
सर्वतीर्थावगाहेषु चतुर्द्धा मुक्तिरेव च ॥
कृष्णनाम परा मुक्तिः कृष्णनाम परा गतिः ।
कृष्णनाम परं पुण्यं कृष्णनाम परं फलम् ॥
कृष्णनाम परो धर्म्मः कृष्णनाम परं तपः ।
कृष्णनाम परा शान्तिः कृष्णनाम परा स्तुतिः ॥
कृष्णनाम परा भक्तिः कृष्णनाम परा स्तुतिः ।
कृष्णनाम परं यज्ञं कृष्णनाम परा मतिः ॥
कृष्णनाम परं ज्ञानं कृष्णनाम परा स्थितिः ।
कृष्णनाम परं दानं कृष्णनाम जगत्प्रियम् ॥
कृष्णनाम परं श्राद्धं पितृणां तर्पणं सदा ।
कृष्णनाम परा प्रीतिः कृष्णनाम परः प्रभुः ॥
कृष्णनाम जगत् सत्यं भक्तानां कारणं परम् ।
जीवनं शरणं कृष्णनामैव विपुलं धनम् ॥
कृष्णनाम जगद्वन्द्यं गङ्गातीर्थं गुरुः परः ।
विद्याधारं कृष्णनाम जगतां पावनं परम् ॥
कृष्णनाम जगच्छ्रेष्ठं यत्किञ्चित् सचराचरम् ।
भाव्यते भाव्यते विश्वं कृष्णनाम्ना प्रतीयते ॥
यत्किञ्चित् क्रियते कर्म्म कृष्णनाम परायणः ।
तत् कर्म्म कर्म्म एव स्यात् साधादृक्षाति केशवः ॥
श्रीहरेर्नाम शब्दं प्रशस्तञ्च युगे युगे ।
कृत्वापि न भवेत् सिद्धिर्हित्वा तन्नाम कर्म्म च ॥
विशेषतः कलियुगे कृष्णनामैव केवलम् ।
त्यक्त्वा नान्यैव दैवर्षे ! लोकस्य गतिरन्यथा ॥
हरिनामपरः शान्तः क्षमाशीलो जितेन्द्रियः ।
नीत्वा कल्पसहस्राणि कृष्णं प्राप्नोति स्वानि च ॥
श्रीकृष्णहरिगोविन्दहरिनामादिको जगः ।
यः कथिदुयाति कलुषं सर्वं तन्नामकीर्त्तनात् ॥
दुष्यन्तु पातकसहस्रमुग्रं
दुर्वह्मनाकोटिनिषेवणञ्च ।

हरिः

स्त्रयान्यनेकानि हरेः प्रियेण
गोविन्दनाम्ना निहतानि सद्यः ॥
अनृच्छयापि दहति स्पृष्टो हुतवहो यथा ।
हरिनाम दहेत् पापं तथाज्ञसुखनिर्गतम् ॥
सकृदुच्चारितं येन हरे कृष्णेति निश्चयम् ।
यमाधिकारं नो याति कायक्लेशं विना सुने ॥
अज्ञानादथवा ज्ञानाद्दुभावेन वा पुनः ।
कृष्णनामैव यच्चिन्ता स याति परमं पदम् ॥
ब्रह्महा मद्यपः स्तेयी ह्यज्ञानाद्गुरुतल्पगः ।
भवार्णवं तरेदन्ते कृष्णनामपरायणः ॥
पितृहा नृपहा गोघ्नः स्त्रीहन्ता पापिनोऽपरे ।
गोविन्दनामोच्चारेण पश्चात्ते शुद्धिमाप्नुयुः ॥
यद्भूतं पापमज्ञानाद्वर्त्तमानञ्च नारद ! ।
यद्भविष्यति तत् सर्वं कृष्णनाम दहेद्ध्रुवम् ॥
जीवानान्तु सदा द्रोही चात्महा निन्द्यकर्म्मकृत् ।
स पूतो जायते धन्यो नामकीर्त्तनतो हरेः ॥
क्षेत्रतीर्थतपोदानव्रताद्यैर्नं फलं तथा ।
भक्तिश्च सर्वयज्ञानां सुक्तैरध्यात्मवस्तुनः ॥
ज्ञानञ्च देवमहतां सर्वसिद्धिप्रदं फलम् ।
नैमित्तिकानां नित्यानां तथा च काम्यकर्म्मणाम् ॥
वर्णाश्रमाणां योगानां स्थापितं येषु नामसु ।
आहृत्य सर्वाघहरं पुरा कृष्णेन नारद ॥
त्रैलोक्ये यानि पुण्यानि धर्म्मकर्म्मफलानि च ।
तुल्यतां तानि नो यान्ति हरिनामानुकीर्त्तने ॥
नाम्नोऽस्य यावती शक्तिः पापनिर्हरणे हरेः ।
तावत् कर्त्तुं न शक्नोति पातकं पातकी जनः ॥
स्वपचो दूषितं कर्त्तुं नहि शक्नोति यत्नतः ।
तावद्दूषितुं सुने यावत् कृष्णनामानुकीर्त्तनम् ॥
मानसं कर्म्मजं वाग्जं लोके तन्नास्ति कल्मषम् ।
सर्वाशुभन्नं श्रिवदं यद्धरेर्नामकीर्त्तनम् ॥
चान्द्रायणादिभिः कृच्छ्रैः शुद्धिर्न स्यात्तथा नृणाम् ॥
कीर्त्तनेन हरेर्नाम्नः सकृदेव भवेद्यथा ।
सकृदाख्यातितं येन कृष्णनाम सुमङ्गलम् ।
तच्छिक्षा वैष्णवी नान्यं वचो यमयमाकारणम् ॥
ऋग्वेदो हि यजुर्वेदः सामवेदोऽप्यथर्ववेदम् ।
अधीतास्तेन येनोक्तं हरिरित्यक्षरद्वयम् ॥
पापिनोऽपि हरेर्नाम कीर्त्तयन्ति यथा यथा ।
सर्वाघं भस्मसात् कृत्वा कृष्णभक्तिस्तथा तथा ॥
सकृन्नारायणेत्युक्ता पुमान् कल्पशतत्रयम् ।
गङ्गादिसर्वतीर्थेषु स्नातो भवति नारद ! ॥
पुराणशास्त्रागमवेदपाट-
तीर्थावगाहादिफलं यदेहम् ।
गोविन्दनाम्नोऽपि कलाशतांशे-
सुल्यं भवेन्नेव सुने कदाचित् ॥
मा शब्दो मा यजुश्चिह्न न साम पट किञ्चन ।
कृष्णगोविन्दनामादि गेयं गायस्व नित्यशः ॥
गोकोटिदाने ग्रहणे रागस्य
प्रयागगङ्गाम्बुनि कल्पवासः ।
यज्ञायुतं मेरुसुवर्णदाने
गोविन्दनाम्नो न समं शतांशैः ।

हरिः

ऋग्वेदेश्च किं तस्य किं काश्या पुष्करेण च ।
जिह्वाग्रे वर्त्तते यस्य हरिरित्यक्षरद्वयम् ॥
विश्रुतानि बहून्येव तीर्थानि बहुधा न च ।
कोटिशैनापि तुल्यानि नामकीर्त्तनतो हरेः ॥
दुष्टापूर्णानि कर्म्माणि सुबहूनि शतान्यपि ।
भवेयुस्तूनि तान्येव हरेर्नाम तु सुस्थितम् ॥
परिहासेऽपि हासार्त्तैर्विष्णोर्यैः सन्ति नाम ये ।
कृतार्थास्तेऽपि मद्वाक्येभ्योऽपीह नमो नमः ॥
स्त्री शूद्रः पुरुषो वापि ये चान्ये पापयोनयः ।
कीर्त्तयन्ति हरिं भक्त्या तेभ्योऽपीह नमो नमः ॥
न देशनियमस्तत्र न कालनियमस्तथा ।
दीक्षितादौ निषेधश्च नामसुब्धस्य श्रीहरेः ॥
चक्रायुधस्य नामानि यदा सर्व्वत्र कीर्त्तयेत् ।
नाशौचं कीर्त्तने तस्य स पवित्रकरो यतः ॥
न कालशौचनियमो न देशाशौचनिर्णयः ।
हरेः संकीर्त्तनादेव नाम्नो नारद मुच्यते ॥
स्नाने कालोऽस्ति दाने च कालोऽस्ति जप-
यज्ञयोः ।
कृष्णसङ्कीर्त्तने कालो नास्त्यत्र पृथिवीतले ॥
किं सांख्ययोगैः किं यज्ञैस्तपोभिः किं करिष्यति ।
चेन्मुक्तिमिच्छेत्तत्क्षिप्र कुर्य्याद्गोविन्दकीर्त्तनम् ॥
परदाररतः पापी परहिंसोपकारकः ।
मुक्तिमायाति संशुद्धो हरेर्नामानुकीर्त्तनात् ॥
कृष्णनामधनः कृष्णनामभोजी सदा नरः ।
तत्त्वतः कृष्णमाप्नोति कृष्णनामधनप्रियः ॥
हित्वा गोविन्दनामानि सर्व्वकर्म्म करोति यः ।
पन्थाय तस्य तत् कर्म्म न मोक्षाय तु नारद ! ॥
सर्व्वकर्म्म परित्यज्य हरिनाम स्मरेत् सदा ।
यस्तस्य कर्म्मभिः स्यात् कृष्णनामप्रसङ्गतः ॥
कामांस्त्यक्त्वा मनोभोगान् विषयांश्च चरन्ति ये ।
तेषां ददात् परां भक्तिं हरिनामपरायणः ॥
हरिनामरतो भूत्वा सर्व्वकर्म्म परित्यजेत् ।
य सर्व्वपापान् मुक्तो यः पद्मं छित्वोदकं यथा ॥
कृष्णनामैव यश्चिन्ते दैवं तस्य कर्म्म च ।
स लोकान् सकलान् हित्वा तत्पदं कृष्ण-
माप्नुयात् ॥
हरिनाम सदा गीत्वा विचरन्ति महीतले ।
न प्राप्नुवन्ति तद्राज्यं देवा इन्द्रादयोऽपरे ॥
अहन्या देवया ये तु हरिनाम सुमङ्गलम् ।
गायन्तेकान्तिनस्तेषां मुक्तिस्तिष्ठति सन्ततम् ॥
मुक्तात्मनः कृष्णनामाश्रया ये च हरेः प्रियाः ।
यदि स्युस्तत्कथा वेदसारगा न तथा मुने ! ॥
कृष्णनामानि गायन्ति तस्य सेवादिकर्म्म च ।
सदा कुर्व्वन्ति ये विप्र ! तेभ्यो नित्यं नमो नमः ॥
योगी मुक्तिफलप्राप्तो ब्रह्मज्ञो मदनः खलः ।
तस्माद्भिन्नः न मुक्तोऽयं श्रीहरेर्नाम यजनः ॥
पूर्णब्रह्मकवेर्हस्ते प्राप्तः कृष्णमानसः ।
यथाश्वा मौक्तिकादेत्य न मुक्तः सर्व्वथात्मतः ॥
हरिनाम परं ब्रह्म हरिनाम च मन्त्रकः ।
सर्वं मन्त्रेषु यज्ञा मौक्तिकी मुक्तिमुद्रा ॥
कृष्णः कृष्णेति कृष्णनामसङ्गी भवः ।
कृष्णेति कृष्ण सर्व्वत्र लोकाः कृष्णमयाः कृतः ॥

हरिः

मात्सर्य्यलोभमोहेच्छ कामक्रोधमदैर्युतः ।
सर्व्वापहारी तत्मुक्तः कृष्णनामैव यत्तपः ॥
सर्व्वदोषयुतो विप्र यात्रचाण्डेषपातके ।
मुक्तः स हरिनादस्तात् कृष्णनामैव यत्तपः ॥
स्वधर्म्मवर्जितः पापी जीवद्रोही च हिंसकः ।
स मुक्तः सर्व्वपापेभ्यः कृष्णनामैव यत्तपः ॥
विप्रक्षत्रियविट्शूद्राः सङ्करान्त्यजचारजाः ।
कानीना गोलकाश्चैव पितृजातास्च चेत्रजाः ॥
ब्रह्मचारी गृहस्थश्च वानप्रस्थो यतिस्तथा ।
यद्येते पापिनो विप्र ! महापातकिनोऽपि वा ॥
उपपातकिनश्चातिपापिनो क्षुद्रपापिनः ॥
भ्रष्टाचाराश्च पाषण्डाः स्वधर्म्मविवर्जिताः ॥
जीवहत्यारता मूढा निन्दकाश्चाजितेन्द्रियाः ।
पश्चात्तापसमुत्पन्ना गुरोः कृष्णप्रसादतः ॥
ततस्तु यावज्जीवन्ति हरिनामपरायणाः ।
शुद्धास्तेऽखिलपापेभ्यः पूर्व्वजेभ्यो हि नारद ! ॥
नामादेशं रटन्तस्तु श्रीहरेः स्तुतिपूर्व्वकम् ।
महद्भयं यमं जित्वा परं गोविन्दमाप्नुयुः ॥
महान्धकूपपतिता सर्व्वदोषैस्तु संयुताः ।
संसारवासनाक्लिष्टा सर्व्वधर्म्मबहिष्कृताः ॥
सकृन्नाम सर्व्वतस्तस्मादुच्चरन्तो हरेर्हि ते ।
गत्वोर्ध्वमहद्भये नाम यान्ति गोविन्दमव्ययम् ॥
हरिनामानि तिष्ठन्ति सन्ति वक्त्राणि प्राणिनाम् ।
भवन्ति कर्म्मसम्बद्धा लोका नरकगामिनः ॥
विहस्य कृष्णनामानि कर्म्ममार्गरता नराः ।
पुनर्जन्म पुनर्मृत्युं भ्रमन्तः सुस्थतस्ततः ॥
कृष्णनामानि गायन्ति कुर्व्वन्ति तस्य सेवनम् ।
ते यान्ति वासुदेवस्य स्थानं परममव्ययम् ॥
वर्णाश्रमस्थिता विप्र ! हरिनामपरायणाः ।
तेषां वक्तुं न शक्नोमि महिमानमहं यदि ॥
हित्वा गोविन्दनामानि कर्म्माण्येवं करोति यः ।
पथमप्राप्य कृष्णस्य भ्रमते कर्म्मवर्त्मनि ॥
मायामोहितचित्तेन पापिष्ठास्ते नराधमाः ।
त्यक्ता कृष्णस्य नामानि भ्रमन्ते सर्व्वयोनिषु ॥
यदृच्छयाप्रया नाम शिक्षया यः स्मरेद्धरेः ।
सर्व्वाघमुक्तो देवर्षे ! सततं कृष्णनामतः ॥
येन तेन प्रकारेण सकृन्नामकरूपकः ।
घोराद्घोरतरात् पूतो मुक्तः स कृष्णनामतः ॥
नामास्तिकं वचं दृष्ट्वा यस्य ब्रह्मा भवेद्धरेः ।
न याति वैष्णवं धाम परमं कृष्णनामतः ॥
दृष्ट्वा प्रणामं कुर्व्वन्ति हरेर्नामाश्रयं जनम् ।
मत्कन्दर्पक्षयो मुक्ता मानवाः साधुवत्सलाः ॥
कृष्णनाम सदा गीत्वा विचरेत् कृष्णसन्निधौ ।
सत्यं ब्रवीमि ते विप्र ! क्रीतस्तस्य जनार्द्दनः ॥
गीत्वा करोति नामानि श्रीहरेः करतालिकाम् ।
विक्रीतोऽहं तस्य तस्य ददामि तव नारद ! ॥
एकाक्षी नाम गीत्वा तु सन्निधौ कर्म्मवैहरेः ।
सर्व्वं तस्य हरिः दोषौ देवतानाथ का कथा ॥
ये मानवत्वमूढा मूत्वा सदस्तुतसन्निधौ ।
तेषां कृतः सन्निधौ प्रह्लादीनाथ का कथा ॥
ये मनुष्यत्वमूढा गीत्वा हरेर्नामानि सदा ।
मानवे तेषां गोविन्दः क्रीतो नारद ! नान्यथा ॥

हरिः

कर्म्मणा ये न गृह्यन्ति कृष्णदीक्षां सती गुरोः ।
तेषां न दर्शनं कार्य्यं दूरतः परिवर्जयेत् ॥
कदाचित् यो न गृह्णाति कृष्णनाम भवाष्टतम् ।
ततः खरखरीलानां स तु योनिषु जायते ॥
देवर्षे ! हरिनामानि भवनिस्तारहेतुनि ।
न गृह्णीयात्तु यो मोहान्मृते स्यात्तदधोगतिः ॥
गुणकर्म्माणि नामानि न गृह्णाति च यो हरेः ।
दर्शनस्पर्शने चैव भ्रुवं तस्य विवर्जयेत् ॥
मनुष्यजन्म संप्राप्य न नामग्रहणं हरेः ।
कुर्य्यात् कदापि स्वप्ने वा स्वदक्षः स नराधमः ॥
ध्यानं सत्ययुगे विष्णोः त्रेतायां यज्ञसाधनम् ।
अर्चनं द्वापरयुगे हरिनाम कलौ तुने ॥
ध्यानं तपः सत्ययुगे त्रेतायां यज्ञकर्म्म च ।
द्वापरे पूजनं दानं हरेर्नाम कलौ युगे ॥
कलौ भवार्णवोत्तीर्णो मानवो सुनिपुङ्गव ! ।
वर्त्तते यस्य जिह्वाग्रे हरिरित्यक्षरद्वयम् ॥
सर्व्वलोको जितस्तेन कृष्णः प्राप्तः सनातनः ।
सकृदुच्चारितं येन हरेर्नाम चिदात्मकम् ॥
फलं नाल्प क्षमो वक्तुं सहस्रवदनो विधिः ।
जितं तेन जितं तेन जितं तेनेति निश्चितम् ।
वर्त्तते यस्य जिह्वाग्रे हरिरित्यक्षरद्वयम् ।
सत्यं कलियुगे विप्र ! श्रीहरेर्नाम मङ्गलम् ।
परं स्वस्ययनं नृणां नास्त्येव गतिरन्यथा ॥"
इति पाद्मोत्तरखण्डे श्रीकृष्णनाममाहात्म्ये ६८
अध्यायः ॥ कलौ दशसहस्रवर्षपर्य्यन्तं पृथिव्यां
तस्यावस्थितिर्यथा,—
"शालग्रामो हरेर्मूर्त्तिर्व्वर्णाश्रमश्च भारतम् ।
कलेर्दशसहस्रान्ते ययौ त्यक्ता हरेः पदम् ॥
वैष्णवाश्च पुराणानि शुक्लानि आहृतर्षयम् ।
वेदोक्तानि च कर्म्माणि यज्ञैः सार्द्धमेव च ॥
हरिपूजा हरेर्नाम तत्कीर्त्तिगुणकीर्त्तनम् ।
वेदाङ्गानि च शास्त्राणि ययुस्तैः सार्द्धमेव च ॥
सत्यश्च धर्म्मः सत्यश्च वेदाश्च सामदेवताः ।
व्रतं तपश्चानशनं ययुस्तैः सार्द्धमेव च ॥
वामाचाररताः सर्व्वे मिथ्या कामक्रमेव च ।
तुलसीवर्जिता पूजा भविष्यन्ति ततः परम् ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे । ७ । १२—१६ ।
तस्य स्वरूपं यथा,—
गर्ग उवाच ।
"अये नन्द प्रवक्ष्यामि वचनं ते सुखावहम् ।
प्रस्थापितोऽयं वसुना येन तत् श्रुयतामिति ॥
वसुना सूतिकागारे शिशुः प्रत्यर्पणीकृतः ।
पुत्रोऽयं वसुदेवस्य त्वयेदृक् तस्य च ध्रुवम् ॥
कथा ते च येन नीता मथुरां कंसभीरुणा ।
अस्याग्रप्राशनायाशु नामानुकरणाय च ॥
महिष प्रेषितस्तेन तस्य योगं कुरु त्वम् ।
पूर्णब्रह्मसहस्रेऽयं शिशुस्ते मायया महीम् ।
आगत्य भारहरणं कर्त्ता धाता च मेदिनः ॥
गोलोकनाथो भगवान् श्रीकृष्णो राधिकापतिः ।
नारायणो वा वैकुण्ठे कमलाकान्त एव च ॥
क्षीरोदशायिनां देवः प्राप्तो विष्णुश्च गोपतिः ।
अभिधोऽयं तवैवाथ नरनारायणावृषी ॥

एकीभूय च सर्व्वेषां तेजसां राशिरूर्जितमान् ।
तं वसुं दर्शयित्वा च शिशुरूपो बभूव ह ॥
सम्प्राप्तं सूतिकागारादाजगाम तवालयम् ।
अयोनिसम्भवस्यायमाविर्भूतो महीतले ॥
वायुपूर्णं माल्लगर्भं कृत्वा च मायया हरिः ।
आविर्भूय वसुं मूर्त्तिं दर्शयित्वा जगाम ह ॥
युगे युगे वर्णभेदो नामभेदोऽस्य वल्लव ! ।
शुक्लो रक्तस्तथा पीत इदानीं कृष्णतां गतः ॥
शुक्लवर्णः सत्ययुगे सुतीव्रतेजसा वृतः ।
त्रेतायां रक्तवर्णोऽयं पीतोऽयं द्वापरे विभुः ॥
कृष्णवर्णः कलौ श्रीमांस्तेजसां राशिरेव च ।
परिपूर्णतमं ब्रह्म तेन कृष्ण इति स्मृतः ॥"*॥
तस्य कृष्णनाम्नः व्युत्पत्तिर्यथा,—
"ब्रह्मणो वाचकः कोऽयत्कारोऽनन्तवाचकः ।
शिवस्य वाचकः षश्च णकारो धर्म्म एव च ॥
अकारो विष्णोर्व्वचनं श्वेतद्वीपनिवासिनः ।
नरनारायणोऽर्थस्य विसर्गो वाचकः स्मृतः ॥
सर्व्वेषां तेजसां राशिः सर्व्वमूर्त्तिस्वरूपकः ।
सर्व्वाधारः सर्व्वबीजरूपेण कृष्ण इति स्मृतः ॥
कृषिर्निर्व्वाणवचनो णकारो मोक्ष एव च ।
अकारो दातृवचनस्तेन कृष्ण इति स्मृतः ॥
कृषिर्निश्चेष्टवचनो णकारो भक्तिवाचकः ।
अकारो दातृवचनस्तेन कृष्ण इति स्मृतः ॥
कर्म्मनिर्म्मूलवचनः कृषिर्गो दास्यवाचकः ।
अकारः प्राप्तिवचनस्तेन कृष्ण इति स्मृतः ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे । १३ । ४५—६२ ॥
तस्य नामान्तराणां व्युत्पत्तिर्यथा,—
"रामनारायणानन्त मुकुन्द मधुसूदन ।
कृष्ण केशव कंसारे हरे वैकुण्ठ वामन ॥
इत्येकादश नामानि पठेद्वा पाठयेदयदि ।
जन्मकोटिसहस्राणां पातकादवमुच्यते ॥
राशब्दो विश्ववचनो मश्चापीश्वरवाचकः ।
विश्वानामीश्वरो यो हि तेन रामः प्रकीर्त्तितः ॥
रमते रमया सार्द्धं तेन रामं विदुर्बुधाः ।
रमाया रमणस्थानं रामं रामविदो विदुः ॥
रा चेति लक्ष्मीवचनो मश्चापीश्वरवाचकः ।
लक्ष्मीपतिं पतिं रामं प्रवदन्ति मनीषिणः ॥
नाम्नां सहस्रं दित्यानां स्मरणे यत् फलं भवेत् ।
तत्फलं लभते नूनं रामोच्चारणमात्रतः ॥
नारशब्दस्तुक्तिवचनो नारेति च विदुर्बुधाः ।
यो देवोऽयनं तस्य स च नारायणः स्मृतः ॥
नाराश्च कृतपापाद्याप्ययनं गमनं स्मृतम् ।
यतो हि गमनं तेषां सोऽयं नारायणः स्मृतः ॥
सकलनारायणैर्युक्ता पुमान् कल्पशतत्रयम् ।
गङ्गादिसर्व्वतीर्थेषु स्नातो भवति निश्चितम् ॥
नारस्य मोक्षणं पुण्यमयनं ज्ञानमीप्सितम् ।
तयोर्ज्ञानं भवेद्यस्मात् सोऽयं नारायणः प्रभुः ॥
नास्पन्नो यस्य वेदेषु पुराणेषु चतुर्षु च ।
आध्यात्मिकेषु योगेषु तेनानन्तं विदुर्बुधाः ॥*॥
सकलभयमात्मन्य निर्व्वाणमोक्षवाचकम् ।
ददाति च यो देवो गकारस्तेन कीर्त्तितः ॥
सकलं भक्तिरूपेभ्यश्चरणं वेदसम्मतम् ।
यस्मद्ददाति भक्तेभ्यो सुकुन्दस्तेन कीर्त्तितः ॥*॥
सूदनं मधुदैत्यस्य यस्मात् च मधुसूदनः ।
इति सन्तो वदन्त्यार्यं वेदैर्भिन्नार्थमीप्सितम् ॥
मधु क्लीवञ्च माध्वीके कृतकर्म्मशुभाशुभे ।
भक्तानां कर्म्मणाश्चैव सूदनं मधुसूदनः ॥
परिणामाशुभं कर्म्म भ्रान्तानां मधुरं मधु ।
करोति सूदनं यो हि स एव मधुसूदनः ॥*॥
कृषिरुत्कृष्टवचनो णश्च सद्भक्तिवाचकः ।
अश्चापि दातृवचनः कृष्णं तेन विदुर्बुधाः ॥
कृषिश्च परमानन्दे णश्च तद्दास्यकर्म्मणि ।
तयोर्दाता च यो देवस्तेन कृष्णः प्रकीर्त्तितः ॥
कोटिजन्मार्ज्जिते पापे कृषिः क्लेशे च वर्त्तते ।
भक्तानां णश्च निर्व्वाणे तेन कृष्णः प्रकीर्त्तितः ॥
नाम्नां सहस्रं दित्यानां चिरादुच्चार्य्य तु यत् फलम् ।
एकादुच्चार्य्य तु कृष्णस्य तत् फलं लभते नरः ॥
कृष्णनाम्नः परं नाम न भूतं न भविष्यति ।
सर्व्वेभ्यश्च परं नाम कृष्णेति वेदिका विदुः ॥
कृष्ण कृष्णेति हे गोपि यस्तं स्मरति नित्यशः ।
जलं भित्त्वा यथा पद्मं नरकादुद्धरत्ययम् ॥
कृष्णेति मङ्गलं नाम यस्य वाचि प्रवर्त्तते ।
भस्मीभवन्ति सद्यस्तु महापातककोटयः ॥
अश्वमेधसहस्रेभ्यः फलं कृष्णजपस्य च ।
वरं तेभ्यः पुनर्ज्जन्म नातो भक्तः पुनर्भवः ॥
सर्व्वेषामपि यज्ञानां लक्षाणि च व्रतानि च ।
तीर्थस्नानानि सर्व्वाणि तपांस्यनशनानि च ॥
वेदपाठसहस्राणि प्रादक्षिण्यं भुवः शतम् ।
कृष्णनामजपस्यास्य कलां नार्हन्ति षोडशीम् ॥
तेषां भोगाश्च वेत् स्वर्गफलञ्च सुचिरं नृणाम् ।
स्वर्गादवश्यं पुंसश्च जपकर्त्तुर्हरेः पदम् ॥*॥
के चले सर्व्वदेहेऽपि शून्यं यस्य चात्मनः ।
वदन्ति वेदिकाः सर्व्वे तं देवं केशवं परम् ॥
कंसस्य पातके विप्रे रोगे शोके च दानवे ।
तेषामरिर्निहर्त्ता यः स कंसारिः प्रकीर्त्तितः ॥
सूदरूपेण संहर्त्ता विश्वानामपि नित्यशः ।
भक्तानां पालको यो हि हरिस्तेन प्रकीर्त्तितः ॥
कुण्ठं जडञ्च विश्वौघं विशिष्टञ्च करोति या ।
विकुण्ठां प्रकृतिं वेदास्तत्त्वारश्च वदन्ति ताम् ॥
गुणाश्रयेण भगवान् तस्यां जातः स्वरूपतः ।
परिपूर्णतमं तेन वैकुण्ठश्च विदुर्बुधाः ॥*॥
वामो विपक्षो नष्टेऽहे साधादेवेषु वर्त्तते ।
सुराणां विपदां छेत्ता वामनस्तेन कीर्त्तितः ॥
एवं नाम्नाञ्च सर्व्वेषां व्युत्पत्तिश्च श्रुतौ श्रुता ।
यथागमञ्च कथितं सर्व्वं जानाति माधवः ॥*॥

यशोदोवाच ।

वासुदेवश्च गोविन्दो सुरारिर्मधुसूदनः ।
नाम्नां चतुर्णां व्युत्पत्तिं वद चास्यच तिष्ठतु ॥

राधिकोवाच ।

वसुः सर्व्वनिवासश्च विश्वानि यस्य लोमसु ।
स च देवः परं ब्रह्म वासुदेव इति स्मृतः ॥१॥
गश्च विश्वसमूहश्च विन्दते योऽवलीलया ।
ज्ञानविष्णुस्वरूपश्च गोविन्दस्तेन कीर्त्तितः ॥२॥

सुरः क्लेशे च सन्तापे कर्म्मभोगे च कर्म्मिणाम् ।
दैत्यभेदेऽप्यरिस्तेषां सुरारिस्तेन कीर्त्तितः ॥३॥
मा च ब्रह्मस्वरूपा या मूलप्रकृतिरीश्वरी ।
नारायणीति विख्याता विष्णुमाया सनातनी ॥
महालक्ष्मीस्वरूपा च वेदमाता सरस्वती ।
राधा वसुन्धरा गङ्गा तासां स्वामी च माधवः ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे । १ । १ । १६—५२ ; ५५—६० ॥ तस्य भूषणास्त्रस्वरूपं यथा,—

श्रीमैत्रेय उवाच ।

"भूषणास्त्रस्वरूपेण यथैतदखिलं जगत् ।
विभर्त्ति भगवान् विष्णुस्तन्ममाख्यातुमर्हसि ॥

श्रीपराशर उवाच ।

नमस्कृत्याप्रमेयाय विष्णवे प्रभविष्णवे ।
कथयामि यथाख्यातं वशिष्ठेन ममाभवत् ॥
आत्मानमस्य जगतो निर्लेपमगुणामलम् ।
विभर्त्ति कौस्तुभमणिस्वरूपं भगवान् हरिः ॥
श्रीवत्ससंस्थानधरमनन्तं च समाश्रितम् ।
प्रधानं बुद्धिरप्यास्ते गदारूपेण माधवे ॥
भूतादिमिन्द्रियादींश्च दधाहङ्कारमीश्वरः ।
विभर्त्ति शङ्खरूपेण शार्ङ्गरूपेण च स्थितम् ॥
बलस्वरूपमत्यन्तवेगान्तरितानिलम् ।
चक्रस्वरूपञ्च मनो धत्ते विष्णुः करस्थितम् ॥
पद्मरूपा तु या माला वैजयन्ती गदाभृतः ।
सा भूतहेतुसंघातो भूतमाला च वै द्विज ॥
यानीन्द्रियाण्यशेषाणि बुद्धिकर्म्मात्मकानि वै ।
शरीरूपाण्यशेषाणि तानि धत्ते जनार्द्दनः ॥
विभर्त्ति यच्चासिरत्नमच्युतोऽत्यन्तनिर्म्मलम् ।
विद्यामयन्तु तज्ज्ञानमविद्याचर्म्मसंस्थितम् ॥
इत्थं पुमान् प्रधानञ्च बुद्ध्यहङ्कारमेव च ।
भूतानि च हृषीकेशो मनः सर्व्वेन्द्रियाणि च ।
विद्याविद्ये च मैत्रेय सर्व्वमेतत् समाश्रितम् ॥
यच्चाभूषणसंस्थानस्वरूपं रूपवर्ज्जितः ।
विभर्त्ति मायारूपोऽसौ श्रेयसे प्राणिनां हरिः ॥
सविकारं प्रधानं यत् पुमांश्चैवाखिलं जगत् ।
विभर्त्ति पुण्डरीकाक्षस्तदेवं परमेश्वरः ॥
या विद्या या तथाविद्या यत् सत् यच्चासदक्षयम् ।
तत् सर्व्वं सर्व्वभूतेशे मैत्रेय मधुसूदने ॥
कलाकाष्ठानिमेषादिदिगलंयनहायने ।
कालस्वरूपो भगवानपरो हरिरव्ययः ॥
भूर्लोकोऽथ भुवर्लोकः स्वर्लोको मुनिसत्तम ! ।
महश्चैवतयः सत्यः सप्त लोका इमे विभुः ॥
लोकात्मवृत्तिः सर्व्वेषां पूर्व्वेषामपि पूर्व्वजः ।
आधारः सर्व्वविद्यानां स्वयमेव हरिः स्मृतः ॥
देवमानुषपश्वादिस्वरूपैर्बहुभिर्विभुः ।
स्थितः सर्व्वेश्वरोऽनन्तो भूतभृत्तिकरस्थितिः ॥
एतौ यज्ञानि नामानि तथैवाकल्पितानि च ।
इतिहासोपवेदाश्च वेदास्तेषु तथोक्तयः ॥
वेदाङ्गानि समस्तानि मन्वादिस्मृतयश्च याः ।
आन्वीक्षिक्यश्च विद्याश्चानालस्यादाश्च ये

हरिः

ख्यानानाप्य ये केचित् गीतकान्यखिलानि च।
सर्वमृग्यिधरस्तेते वपुर्विष्णोर्महात्मनः॥
यान्यमूर्त्तानि मूर्त्तानि यान्यन्यान्यच यानि चित्।
सन्ति वै वस्तुजातानि तानि सर्व्वाणि तद्वपुः॥"

इति विष्णुपुराणे १ अंशे २२ अध्यायः॥

इदमाख्यिध्यानानि यथा,—

भरद्वाज उवाच।

"केषु केषु विभो नित्यं स्थानेषु पुरुषोत्तम!।
सान्निध्यं भवतो ब्रूहि ज्ञातुमिच्छामि तत्त्वतः॥

वामन उवाच।

शृणुष्व कथयिष्यामि येषु येषु पुरो मुदम्।
निवसामि सुपुण्येषु स्थानेषु बहुरूपवान्॥

समावतारैर्बहुधा नभःस्थलं
पातालमम्भोनिचयं दिवच्च।
दिशः समस्ता गिरयोऽम्बुदाश्च
व्याप्ता भरद्वाज मयातुरूपैः॥

ये दिव्या ये च भौमा जगमगनचरा स्थावरा येऽन्तरिक्षे
ये चान्ये विश्वेदेवा: साध्याः सपक्षा यमवसुवरुणा: सामयः
सर्व्वपालाः।
अश्वाश्वाः स्थावराश्वा द्विजवरसहिता मूर्त्तिमन्तो मुनीन्द्रा-
स्ते सर्व्वे सत्यसन्धा बहुविधयुगयाः पूरयार्थं
पृथिव्याः॥

एते हि मुख्याः सुरसिद्धसङ्घैः
पूज्यास्तथा सन्निहिता मदीये।
वैकुण्ठमाजेः सदृशेव भाग्यं
प्रयाति यावं द्विजवर्य्य कीर्त्तितैः।"

इति वामने ५५ अध्यायः॥

अपि च।

श्रीभगवानुवाच।

"शृणुष्वं भक्तं महद्गुह्यं संक्षिप्तं मानसे हृदे।
सर्व्वपापक्षयकरं कीर्त्तनश्रवणादिभिः॥
कौर्म्मसन्तु मन्निधानं कौश्चिक्यां पापनाशनम्।
पृथग्नीथ शालग्रामे गोविन्दं द्वारिके पुरे॥
विल्वकेऽथ वाराह्यां विष्णुमेदे भवं विभुम्।
केदारे माधवं पौष्यं कुशाग्रे लक्ष्मणार्जुनम्॥
नारायणं वदर्य्याच्च वाराहे सकलोद्भवम्।
नागेशं रुक्मके च विमलायां द्विजप्रियम्॥
दण्डपाणिमिहाश्वत्थे कुरुक्षेत्रे मुखस्थितम्।
कुब्जाम्रके त्रिविक्रमं गोकर्णे विष्णुकर्णिकम्॥
प्राचीनं कामगाक्षञ्च पुष्करेऽहं महामखि।
विल्वाग्रके च शालग्रामं पुण्ये पुण्यदे तथा॥
पयोष्ण्यान्तु नमःसङ्गे विमलायां सरस्वतिम्।
मलिनायान्तु मलजं! ब्रह्माणञ्च प्रयागतिम्॥
मधुवटां शक्रपदं शक्रवाटे हिमाचले।
विष्णुं विल्वे सुनिश्चित्रे नित्यमौपयकादिके॥—
भद्रवटे सुवर्णाक्षं वैणवे गोतमाश्रमे।
कनखले गोपतिं पुरे महादित्येश्वरं हरिम्॥
वैकुण्ठाख्यं सदा गोमान्ते कुशेशयम्।
सर्व्वतीर्थेश्वरं पुण्ये मरुदे दक्षिणे तिरौ।
गोपालमुत्तरे सिन्धे मरुदे गोसहस्रिणम्।
वैकुण्ठमपि सङ्ग्रामे पार्थिपाये पराजितम्॥
कपोतदेशे देवेशं विश्वरूपं तपोधन!।
मलयाद्रौ च सौगन्धिं विन्ध्यपादे सदाशिवम्।
अवन्तिविषये विष्णुं निवेशेष्वमरेश्वरम्।
पाण्डालिकच्च ब्रह्मर्षे पण्डालेषु अवस्थितम्॥
मधोदये हयग्रीवं प्रयागे योगशायिनम्।
स्वयम्भुवं मधुवने अयोगन्धिच्च पुष्करे॥
तथैव विप्रप्रवर वाराणस्याच केशवम्।
अविमुक्तकमत्रैव लोलार्कत्रैव गीयते॥
पद्माचां पद्मकिरणं वसुदे वडवामुखम्।
कुमारवने वाराहीं काञ्चिकेयच्च वर्द्धिनम्॥
यज्ञेशं शम्भुमनघं स्थाणुच्च कुरुजाङ्गले।
वनमालिनमाहुर्म्मो किष्किन्धावासिनो जनाः॥
वीरं कुवलयारूढं शङ्खचक्रगदाधरम्।
श्रीवत्साङ्कुदाराङ्गं नर्म्मदायां त्रिवःपतिम्॥
माहिष्मत्यां त्रिनयनं तत्रैव च हुताशनम्।
अर्बुदेषु त्रिसौपर्णं प्लाक्षं शूकरावटे॥
त्रिलोचिकेतं ब्रह्मर्षे प्रभासेषु कपर्द्दिनम्।
तथैवाम्बापि विख्यातं हतीयं अग्निशेखरम्॥
उदये अग्निगं सूर्य्यं ध्रुवच्च चितयं स्थितम्।
मन्दरे यज्ञपुरुषं स्कन्दं गुरुपथे स्थितम्॥
मधालये स्थितं रुद्रं चत्वरेषु कुरुष्वथ।
पद्मनाभं मुनिश्रेष्ठ सर्व्वौषधप्रदायकम्॥
सप्तगोदावरे ब्रह्मन् विख्यातं हाटकेश्वरम्।
तत्रैव च मधावासं प्रयागेऽपि वटेश्वरम्॥
भक्तीवने मधायोगं मन्त्रेषु पुरुषोत्तमम्।
ब्रह्मावतरणे श्रीमत्श्रीनिवासं द्विजोत्तमम्॥
सूर्पारके चतुर्बाहुं मगधायां सुधापतिम्।
गिरिव्रजे पशुपतिं श्रीकण्ठं यमुनातटे॥
वनपार्श्वे समाख्यातं दण्डकारण्यवासिना।
कालञ्जरे नीलकण्ठं शरण्यं शम्भुमुत्तमम्॥
धर्म्मपृष्ठे मधाकौण्यां सर्व्वपापप्रणाशनम्॥
गोकर्णे दधिगे सर्व्वं वासुदेवं प्रणासुखे॥
विन्ध्यशृङ्गे मधाचौरं कथायां मधुसूदनम्।
त्रिशूटशिखरे ब्रह्मंश्चक्रपाणिमनीश्वरम्॥
सौपदन्ते हृषीकेशं कौशलायां मनोहरम्।
मधावाहुं सरार्द्धे च नवरार्द्धे यशोधरम्॥
भूधरं देविकातीर्थे मधोदायां कुशप्रियम्।
गोमत्यां दामनगदं शङ्खोद्धारे च शङ्खिनम्॥
सुनेत्रं नैमिषारण्ये शूरं शूरपुरे स्थितम्।
भद्राश्वच हरिश्रेष्ठं वीरभद्रं विपिष्टपे॥
शङ्कुकर्णच भीमायां भीमं शालवने विभुः।
विश्वामित्रच मदितं कैलासे वृषभध्वजम्॥
मन्दरे मन्थनाक्षेत्रे कामरूपे अग्निप्रभम्।
वदर्य्यामपि नीलिन्तं षट्टे मदनप्रियम्॥
उत्तरे सिंहलद्वीपे शङ्खाख्ये कुन्दमालिनम्।
रमाख्ये च विख्यातं सदासन्निधमं हरे!॥
कालाधिपतिं तत्रैव तथान्ते कौशिकाश्रमम्।
सुमेरौ कुमुमसरसि विष्णुं मधुवनम्॥
मधावटे नरौ स्थातं देवेशं दानवेश्वरम्।
तत्रे सहस्रसरसं सहस्रमुखमीश्वरम्॥
सहस्रार्कं परिस्थानं सुपुण्यादृष्टदानुम्।

हरिः

पातालेषु योगिनामीशं स्थितञ्च हरिशङ्करम्॥
धरातले कोकनदं मेदिन्याश्चक्रपाणिनम्।
भुवर्लोके च गरुड़ं स्वर्लोके विष्णुमव्ययम्॥
मर्त्यलोके तथागस्त्यं कपिलञ्च जले स्थितम्।
तपोलोके स्थितं ब्रह्मन्! वाङ्मयं सत्यसंश्रुतम्॥
ब्रह्मार्यं ब्रह्मलोके तु सप्तमे वै प्रतिष्ठितम्।
सनातनं तथा श्वेते वरं ब्रह्म च वैष्णवे॥
अप्रतर्क्यं निरालम्बे निराकाशे तपोमयम्।
जम्बूद्वीपे चतुर्बाहुं कुशद्वीपे कुशेशयम्॥
ब्रह्मद्वीपे मुनिश्रेष्ठ स्थातं गरुड़वाहनम्।
पद्मनाभं तथा क्रौञ्चे शाल्मले वृषभध्वजम्॥
सप्तसांशुः स्थितः शाके धनराट् पुष्करे स्थितः।
तथा पृथिव्यां ब्रह्मर्षे! शालग्रामे स्थितोऽस्म्यहम्॥

सकलस्थलपर्य्यन्तं चरेषु स्थावरेषु च॥
एतानि पुण्यानि ममालयानि
ब्रह्मन् पुराणानि सनातनानि।
धर्म्मप्रधानानि महौजसानि
संकीर्त्तनीयान्यघनाशनानि॥
सङ्कीर्त्तनात् स्मरणाद्दर्शनाच्च
संस्पर्शनादेव च देवताद्याः।
धर्म्मार्थकामान्यपवर्गमेव
लभन्ति देवा मनुजाः ससाध्याः।
एतानि तुभ्यं विनिवेदितानि
ममालयानीह सुनिश्चितानि।"

इति वामनपुराणे स्वस्थानोक्तिर्नाम ९६ अः॥

हरिहरयोरभेदो यथा,—

"या श्रीः सा गिरिजा प्रोक्ता यो हरिः स त्रिलोचनः।
एवं सर्व्वेषु शास्त्रेषु पुराणेषु च पठ्यते॥
एतस्मादन्यथा वस्तु ब्रूते शास्त्रं पृथक्कृतया।
तं नास्तिकं विजानीयात् सर्व्वधर्म्मबहिष्कृतम्॥"

इति वाराहे सौभाग्यव्रततामाध्यायः॥

ब्रह्मविष्णुमहेश्वराणामेकत्वं तत्त्वादिरूपञ्च यथा,—

महेश्वर उवाच।

"नारायणः परो देवः सत्यरूपो जनार्दनः।
विधात्मानं च भगवान् सर्व्वज्ञं परमेश्वरः॥
रजस्तमोभ्यां युक्तोऽभूदजःसत्त्वाधिकं विभुः
सर्व्वज्ञं नाभिकमलात् ब्रह्मार्यं कमलासनम्॥
रजसा तमसा युक्तं सोऽपि मां ससृजत् प्रभुः।
यत् सत्त्वं स हरिर्देवो यो हरिस्तत् परं पदम्॥
ये सत्त्वरूपी सोऽपि ब्रह्मा कमलसम्भवः।
यो ब्रह्मा सैव देवस्तु यो देवः स चतुर्मुखः॥
यद्रजस्तमसीयुक्तं सोऽयं नास्त्यत्र संशयः।
सत्त्वं रजस्तमसैव तृतीयं चैतदुच्यते॥
सत्त्वेन सृजते ब्रह्मा सत्त्वं नारायणात्मकम्।
न तस्मात् परतो देवो भविता न भविष्यति॥
यो विष्णुः स स्वयं ब्रह्मा यो ब्रह्मा सोऽहं

शम्भुश्च।

येऽत्रचोपि यज्ञेऽस्मिन् यजिष्यन्तीह मां नराः।
यो भेदं कुरुतेऽस्माकं मयाचा द्विजरूपम्।

हरिः

स पापकारी दुष्टात्मा दुर्गतिं समवाप्नुयात् ॥"

इति तत्रैव श्रीगीतानामाध्यायः ॥४॥

तद्गुणा यथा,—

"ब्रह्मादयः सुराः सर्व्वे ये चान्ये देवदानवाः ।
मनुष्याः पक्षिवृक्षाद्याः सर्व्वे तद्गुणसंभवाः ॥
तत्र योऽसौ परो देवो व्यापको मुनिसत्तम ।
निर्लेपो ह्यचलः सूक्ष्मः कारणैः परिवर्जितः ॥
अनौपम्यस्वनिर्देश्यो ह्यचराद्यचरं परम् ।
नित्यपक्षो निरालम्बो विषयातीतगोचरः ॥
सर्व्वज्ञः सर्व्वकर्त्ता च प्रत्यक्षं सर्व्वदाक्षरम् ।
अनामा नामकोटीनां गीयते तदनेकधा ॥
अगम्यमथवा गम्यमदृश्यं दृश्यमेव च ।
अस्वरं स्वरसंयुक्तमघोषं घोषरूपकम् ॥
सकलं निष्कलं देवं निर्म्मलं मलसंयुतम् ।
हरिमेतद्गुणैर्युक्तं मया ते परिकीर्त्तितम् ॥५॥

मरीचिरुवाच ।

अक्षयं चाव्ययं चैव यद्यद्वै ते प्रकीर्त्तितम् ।
कथं तस्य विनाशोऽस्ति सर्व्वज्ञः केन हेतुना ॥
अगम्यं कीर्त्तितं यद्वै गम्यं चैव कथं भवेत् ।
अवर्णश्च समाख्यातं वर्णयुक्तं हि कारणम् ॥
अस्वरं स्वरसंयुक्तं कथं तद्ब्रूयते हरिः ।
अप्रमाणं त्वया प्रोक्तं प्रमाणञ्च कथं भवेत् ॥
अनादेस्तु कथं चादिर्लभ्यते किं विभावसो ।
कथयस्व विशेषेण येन सम्यद्यते सुखम् ॥६॥

वह्निरुवाच ।

स्थावरं जङ्गमञ्चैव अण्डजं स्वेदजं तथा ।
विनश्यन्तीह भूतानि विनाशी तेन कथ्यते ॥
अगम्यमप्रबुद्धानां कामाद्यासक्तचेतसाम् ।
स्वकर्म्मविनिवृत्तानां गम्यं तच्चक्षुभक्तिमताम् ॥
ज्ञानचक्षुर्विहीनानामदृश्यं सर्व्वचक्षुषु ।
ज्ञानचक्षुःसमायुक्ता स्थितं पश्यन्ति नित्यशः ॥
अन्धकारे यथा दीपो दर्शयेन् नृपमेधिनाम् ।
विद्याचक्षुस्तथा विप्रो दर्शयेन् परमं पदम् ॥
ये नरा देवसिद्धान्तैर्व्याधिता गुरुणा च ये ।
अनेकरूपसंयुक्तं पश्यन्ति परमेश्वरम् ॥
ये सत्कर्म्मसमापन्नविषयासक्तचेतसः ।
अयं रूपं न जानन्ति वेदसिद्धान्तवर्जिताः ॥
भ्रान्तिं पश्यन्ति सर्व्वत्र सविकल्पाश्च मानवाः ॥
जायाद्यं वर्णनिर्मुक्तं शून्यमंशन्तु कथ्यते ।
यदा वर्णसमायुक्तस्तदा वर्णस्तु जायते ॥
स्वरं तु यद्यते यावत्तावद्घोषस्तु कीर्त्यते ।
विसर्गान्तस्तु निर्व्याधो निराकारः स एव तु ॥
यदा सृजति भूतानि प्रकृतिस्थो हरिः स्वयम् ।
तावत् कर्त्ता स वै ज्ञेयः कर्त्ता प्रकृतिवर्जितः ॥
नामाख्यातं न निर्याति अनुलानि दशद्वयम् ।
निर्म्मलं निर्गुणं शुद्धं समलो देहवर्जितः ॥
अप्रमाणं भवेत्तावत् यावत् ग्राह्यं न विन्दति ।
ज्ञानज्ञानमधीते यः प्रमाणं तस्य लभ्यते ॥
तेन सर्व्वमिदं विश्वं व्याप्तं सचराचरम् ।
अतः सर्व्वगतत्वात्तु सकलोऽयमवस्थितः ॥"

इत्याग्नेये महापुराणे सर्व्वदेवतानामाध्यायः ॥५॥

मूर्त्तिविष्णुर्दशाद्यधिकं वह्निपुराणे गुह्यतम.

हरिः

नामाध्याये क्रियायोगनामाध्याये च यत्फलम् ।
तस्य यमाष्टकस्तोत्रं नृसिंहपुराणे ६ अध्याये
ततपूजायां ब्रह्मविष्णेयदानफलञ्च तत्रैव ३२
अध्याये द्रष्टव्यम् ॥ ॥ शिवस्य हरेराराधन-
प्रमाणं यथा,—

ब्रह्मोवाच ।

"अहं गतोऽद्रिं कैलासमिन्द्राद्यैर्दैवतैः सह ।
तत्र दृष्टो महारुद्रो ध्यायमानः परं पदम् ॥
दृष्टो नमस्कृतो देवः किं त्वं ध्यायसि शङ्कर ।
त्वत्तो नान्यं परं देवं जानामि ब्रूहि मां ततः ।
सारात् सारतरं तत्त्वं श्रोतुकामः सुरैः सह ॥

रुद्र उवाच ।

अहं ध्यायामि तं विष्णुं परमात्मानमीश्वरम् ।
सर्व्वगं सर्व्वदं सर्व्वं सर्व्वप्राणिहृदि स्थितम् ॥
भस्मोद्धूलितदेहस्तु जटामण्डलमण्डितः ।
विष्णोराराधनार्थं मे व्रतचर्य्या पितामह ॥
तमेव गत्वा पृच्छामः सारं यच्चिन्तयाम्यहम् ।
विष्णुं जिष्णुं पद्मनाभं हरिं देहविवर्ज्जितम् ॥
शुचिं शुचिपदं हंसं तत्परं परमेश्वरम् ।
ब्रह्मा सर्व्वात्मनात्मानं तं देवं चिन्तयाम्यहम् ॥
यस्मिन् विश्वानि भूतानि तिष्ठन्ति च विशन्ति च ।
गुणभूतानि भूतेशे सूत्रे मणिगणा इव ॥
सहस्राक्षं सहस्राङ्घ्रिं सहस्रोरुकराननम् ।
अणीयसामणीयांसं स्थविरञ्च स्थवीयसाम् ॥
गरीयसां गरिष्ठञ्च श्रेष्ठञ्च श्रेयसामपि ।
यं वाक्येष्वनुवाकेषु निषत्सूपनिषत्सु च ॥
गृणन्ति सत्यकर्म्माणं सत्यं सत्येषु सामसु ।
पुराणे पुरुषः प्रोक्तो ब्रह्म प्रोक्तो द्विजादिषु ॥
तथैव सङ्कर्षणः प्रोक्तस्तमुपास्यनुपास्महे ।
यस्मिन् लोकाः स्फुरन्तीमे जले शकुनयो यथा ॥
अतमेकाक्षरं ब्रह्म यत्तत् सदसतः परम् ।
अर्चयन्ति च यं देवा यक्षराक्षसकिन्नराः ॥
यस्याग्निरास्यं द्यौर्मूर्द्धा खं नाभिश्चरणौ
क्षितिः ।
चन्द्रादित्यौ च नयने तं देवं चिन्तयाम्यहम् ॥
यस्य त्रिलोकी जठरं यस्य काष्ठाः सुबाहवः ।
यस्योच्छ्वासस्य पवनस्तं देवं चिन्तयाम्यहम् ॥
यस्य क्रोधेन कालेन तनवः सर्व्वजन्तवः ।
भुवौ वसुमासत्वारस्तं देवं चिन्तयाम्यहम् ॥
परः कालात् परो यज्ञात् परः सदसदश्च यः ।
अनादिरादिर्विश्वस्य तं देवं चिन्तयाम्यहम् ॥
मनसश्चन्द्रमा यस्य चक्षुश्च दिवाकरः ।
सुखादश्च संभूतं तं देवं चिन्तयाम्यहम् ॥
पद्भ्यां यस्य क्षितिर्ज्जाता श्रोत्राभ्याञ्च तथा
दिशः ।
नाभ्यां यस्य हि खं तं देवं चिन्तयाम्यहम् ॥
सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च ।
वेदाश्चरितं यस्मात् तं देवं चिन्तयाम्यहम् ॥
यं तं आत्मानमं यस्मादुत्थाम सारं-
मीक्षितुम् ॥"

इति गारुडे । २ । ६—२७ ॥

हरिः

तद्भक्तिर्यथा,—

सूत उवाच ।

"विष्णुभक्तिं प्रवक्ष्यामि यया सर्व्वमवाप्यते ।
यथा भक्त्या हरिस्तुष्येत्तथा नान्येन केनचित् ।
महतः श्रेयसो मूलं प्रसवः पुण्यसन्ततेः ।
जीवितस्य फलं स्वादु ददाति स्मरणं हरेः ॥
भज इत्येष वै धातुः सेवायां परिकीर्त्तितः ।
तस्मात् सेवा बुधैः प्रोक्ता भक्तिसाधनभूयसी ॥
ते भक्ता लोकनाथस्य नामकर्म्मादिकीर्त्तने ।
सुखन्त्यश्रूणि संहर्षात् ये च हृष्टतनूरुहाः ॥
जगद्धातुर्महेशस्य दिव्याश्चारणवाश्रयाः ।
इह नित्यक्रियाः कुर्य्युः स्निग्धा ये वैष्णवास्तु ते ॥
प्रणामपूर्व्वकं चान्त्या यो वदेत् वैष्णवो हि सः ।
तद्भक्तजनवात्सल्यं पूजायाश्चाश्रुमोदनम् ॥
तत्कथाश्रवणे प्रीतिः स्मरणेचाङ्गविक्रिया ।
येन सर्व्वात्मना विष्णौ भक्त्या भावो निवेशितः ॥
विप्रेभ्योऽस्मद्विधेभ्यश्च महाभागवतो हि सः ।
विष्णोश्च कारणं नित्यं तदन्नं हव्यवर्ज्जितम् ॥
स्वयमभ्यर्चनञ्चैव यो विष्णोः पोषणीयति ।
भक्तिरष्टविधा ह्येषा यस्मिन् म्लेच्छेऽपि वर्त्तते ॥
स विप्रेन्द्रो मुनिः श्रीमान् स ज्ञानी स च पण्डितः ।
तस्मै देयं ततो ग्राह्यं स च पूज्यो यथा हरिः ॥
स्तुतः संभाषितो वापि पूजितो वा द्विजोत्तमः ।
पुनाति भगवद्भक्तश्वपाकोऽपि यदृच्छया ॥
प्रणताय प्रपन्नाय तवास्मीति च यो वदेत् ।
अभयं सर्व्वभूतेभ्यो ददाम्येतद्व्रतं हरेः ॥
मन्त्रयाणिसहस्रेभ्यः सर्व्ववेदान्तपारगाः ।
सर्व्ववेदान्तवित्कोट्या विष्णुभक्तो विशिष्यते ॥
ऐकान्तिकाश्च पुरुषाः प्राप्नुवन्ति परमं पदम् ।
एकान्तिनां वसो विष्णुर्यस्मादेषां परायणः ॥
तस्मादैकान्तिनः प्रोक्तास्तद्भागवतचेतसः ।
प्रियाणामपि सर्व्वेषां देवदेवस्य ते प्रियः ।
आपत्स्वपि सदा यस्य भक्तिरव्यभिचारिणी ॥
या प्रीतिरविवेकानां विषयेष्वनपायिनी ।
त्वामनुस्मरतः सा मे हृदयान्मापसर्पतु ॥
अन्तर्गतोऽपि वेदानां सर्व्वज्ञाख्यार्थवेद्यपि ।
यो न सर्व्वेश्वरे भक्तिं विद्यात् पुरुषाधमम् ॥
नाधीतवेदशास्त्रोऽपि न ज्ञानं यामसंयुतः ।
यो भक्तिं वहते विष्णौ तेन सर्व्वं कृतं भवेत् ॥
यज्ञानां क्रतुसंस्थानां सर्व्वेषां पारगा अपि ।
न तां यान्ति गतिं भक्त्या यां यान्ति मुनिसत्तमाः ॥
यः कश्चित् वैष्णवो लोके मिथ्याचारोऽयमानी ।
पुनाति सकलान् लोकान् यद्यसौ गुरुरित्युत ॥
ये तूपेक्षा दुरात्मानः पापाचारपरायणाः ।
तेऽपि यान्ति परं स्थानं नारायणपरायणाः ॥
दृढा जनार्द्दने भक्तिर्यस्यैवास्मिन्निवर्त्तिनी ।
तदा कियत् स्वर्गसुखं तस्य निर्व्वाणहेतुकी ॥
भाग्यानां तत्र संसारे नराणां कर्म्मदूषणे ।
उत्तमावस्थनो लोके भक्तिर्मुख्या जनार्द्दने ॥
न ह्यणोति गुणान् दिव्यान् देवदेवस्य चक्रिणः ।

स नरो बधिरो ज्ञेयः सर्व्वधर्म्मबहिष्कृतः ॥
नाम्नि संकीर्त्तिते विष्णोर्यस्य पुंसो न जायते ।
शरीरं पुलकोद्भासि तद्भवेत् कृष्णयोषमम् ॥
वक्ष्मिन् स्फुते द्विजश्रेष्ठ ! सुस्थिरप्यचिराद्भवेत् ।
विष्णौ निविष्टमनसां किं पुनर्वृजिनक्षयः ॥
स्वपुरुषमभिवीक्ष्य पाशहस्तं
वदति यमः किल तस्य कर्णमूले ।
परिहर मधुसूदनप्रपन्नान्
प्रभुरहमन्यनृणां न वैष्णवानाम् ॥
अपि चेत् सुदुराचारो भजते मामनन्यभाक् ।
साधुरेव स मन्तव्यः सम्यग्व्यवसितो हि सः ॥
क्षिप्रं भवति धर्म्मात्मा शश्वच्छान्तिं निगच्छति ।
विप्रेन्द्र ! प्रतिजानीहि विष्णुभक्तो न नश्यति ॥
धर्म्मार्थकामैः किन्तस्य मुक्तिस्तस्य करे स्थिता ।
समस्तजगतां मूले यस्य भक्तिः स्थिरा हरौ ॥
दैवी ह्येषा गुणमयी हरेर्म्मायाऽतिदुरत्यया ।
तमेव ये प्रपद्यन्ते मायामेतां तरन्ति ते ॥
किंवदाराधने पुंसां सिध्यते हरिमेधसः ।
भक्त्यैवाराध्यते विष्णुर्नान्यं तत्तोषकारकम् ॥
न दानैर्व्विविधैर्दत्तैर्न पुष्पैर्नानुलेपनैः ।
तोषमेति महाभागो यथा भक्त्या जनार्द्दनः ॥
संसारविषवृक्षस्य द्वे फले ह्यमृतोपमे ।
कदाचित् केशवे भक्तिस्तद्भक्तैर्व्वा समागमः ॥
पत्रेषु पुष्पेषु फलेषु सत्सु
तोयेषु लभ्येषु सदैव सत्सु ।
भक्त्यैकलभ्ये पुरुषे पुराणे
मूर्खः कथं नु क्रियते प्रयत्नः ॥
आस्फोटयन्ति पितरः प्रहृष्यन्ति पितामहाः ।
वैष्णवोऽस्मत्कुले जातः स नः सन्तारयिष्यति ॥
अज्ञानिनः सुरवरं नमधिक्षिपन्ति
ये पापिनोऽपि शिशुपालसुयोधनाद्याः ।
मुक्तिं गताः स्मरणमात्रविधूतपापाः
कः संशयः परमभक्तिमतां जनानाम् ॥
शरणं तं प्रपन्ना ये ध्यानयोगविवर्ज्जिताः ।
तेऽपि खल्वतिक्रम्य यान्ति तद्वैष्णवं पदम् ॥
भवोद्भवक्लेशशतार्त्तचेतसा
परिश्रमन्निन्द्रियबन्धकैः पथैः ।
नियम्यतां माधव ! मे मनोऽय-
स्त्वदङ्घ्रिशङ्खौ दृढभक्तिबन्धने ॥
विष्णुरेव परं ब्रह्म त्वमेव दृश्य पद्यते ।
वेदसिद्धान्तमार्गेषु तं न जानन्ति मोहिताः ॥
यमनि हृदि यजनने च तस्मिन्
भवति पुमान् जगतोऽस्य सौम्यरूपः ।
त्रिगुणसुमतिरक्षमाक्षनोक्त.
कथयति भागवतैवमात्मपते ॥"

इति मात्स्ये भगवद्भक्तिः २३१ अध्यायः ॥

तस्य नामस्मरणादिके सर्व्वमेव २३२ । २३३ । २३४ अध्यायेषु द्रष्टव्यम् । ॥ तस्य माहात्म्यमामलकं यथा,—

"मामलकं प्रवक्ष्यामि विष्णोः प्रीतिकरं परम् ।
यस्मिन् तु दत्तमक्षयं भवेत्तु श्रीविष्णोः सन्निधावे ।
दैवात्प्राप्तं दुरितं पद्ममाहात्म्यमम् ।
ब्रह्महत्यासहस्राणि ज्ञानाज्ञानकृतानि च ॥
स्वर्णस्तेयसुरापानगुरुतल्पाप्लुतानि च ।
कोटिकोटिसहस्राणि क्षुत्प्रपापानि यानि च ॥
सर्व्वाण्यपि प्रणश्यन्ति पौर्णमास्यान्तु वासरे ।
अभिषिञ्चेच्च तन्मूर्द्ध्नि तदेतत् कलसोदकम् ॥
पुरुषसूक्तेन मन्त्रेण पावमानी ऋचा तथा ।
नारिकेलोदकेनाथ तथा तालफलाम्बुना ॥
रम्भोदकेन गन्धेन तथा पुष्पोदकेन च ।
पञ्चोपचारैराराध्य यथाविभवविस्तरैः ॥
घं घण्टायै नम इति घण्टावाद्यं निवेदयेत् ॥
पादे तस्य महाघ्राणं घ्वस्तपातकपङ्कजे ।
पाहि मां पापिनं घोरं संसाराम्बुपपातितम् ॥
य एवं कुरुते विद्वान् ब्राह्मणः श्रोत्रियः शुचिः ।
सर्व्वपापैः प्रमुच्येत विष्णुलोकं च गच्छति ॥ १ ॥
आषाढ़शुक्लैकादश्यां कुर्य्यात् स्नापमहोत्सवम् ।
आषाढ़े च रथं कुर्य्यात् श्रावणे श्रवणा-
विधिम् ॥ २ ॥ ३ ॥
भाद्रे च जन्मदिवसे उपवासपरो भवेत् । ४ ।
प्रसुप्तस्य परिवर्त्तमाश्विने मासि कारयेत् ॥
उत्थानञ्च हरेः कुर्य्यादन्यथा विघ्नदोऽस्यत् ।
शुभे चैवाश्विने मासि महामायां प्रपूजयेत् ॥५॥
कार्त्तिके मासि यत् कर्म्म प्रोक्तं देवि वरानने ! ।
सप्तवर्त्या प्रमाणेन दीपः स्याच्चतुरङ्गुलः ॥
पञ्चान्ते च प्रकर्त्तव्या दीपमालावलिः शुभा ।६।
मार्गशीर्षे मिते पक्षे षष्ठ्याञ्च सितवस्त्रकैः ।
पूजयेच्चन्दनैश्चैव तूलवस्त्रैर्विशेषतः ॥ ७ ॥
पौषि पुष्याभिषेकञ्च वर्ज्जयेच्चन्दनं तथा । ८ ।
संक्रान्त्यां माघमासे च साधिवासिततण्डुलान् ।
निवेद्य विष्णवे भक्त्या रसं मन्त्रसुदीरयेत् ॥
जीवर्गं सर्व्वभूतानां जनकस्त्वं जगद्गुरो !।
त्वच्छायालीनतां प्राप्ता त्वयैव जनिता प्रभो ! ॥
कर्पूराक्तत्रिशतानि घृताक्तानि निवेदयेत् ।
माषान्नान् भोजयेद्भक्त्या देवदेवपुरस्थितान् ॥
अभ्यर्च्चा भगवद्भक्त्या द्विजांश्च भगवद्धिया ।
एकस्मिन् भोजिते भक्ते कोटिर्भवति भोजितः ।
विप्रभोजनमात्रेण यज्ञः साङ्गः भवेत् ध्रुवम् ॥
पक्वान्नं शुक्लपक्षे तु स्नापयित्वा च केशवम् ।
पूजयेद्भगवद्भक्त्या चूतपल्लवसंयुतैः ॥ ९ ॥
फलगुच्छैश्च विविधैर्व्वासितैः पटवासितैः ।
कानने रम्यायञ्च प्रदीप्तदीपदीपितम् ॥
द्राक्षेक्षुरम्भाजम्बीरनागरङ्गफूगकम् ।
नारिकेलञ्च धात्रीं च पंक्तितालहरीतकीं ॥
अन्यैश्च ऋतुसंजैश्च सर्व्वर्त्तुकुसुमान्वितम् ।
पुष्पैश्च विविधैश्चैव फलपुष्पसमन्वितम् ॥
वितानैः कुसुमोद्यानैर्व्वारिपूर्णघटैस्तथा ।
चूतशाखोपशाखाभिः शोभितं छत्रचामरैः ॥
विशेषतः कलियुगे दोलोत्सवो विधीयते ।
फाल्गुने च चतुर्दश्यामथवे यात्रसंज्ञके ॥
अथवा पौर्णमास्यान्तु प्रतिपत्सन्धिसंस्थितौ ।
पूजयेद्विधिवद्भक्त्या फलगुच्छैश्चतुर्विधैः ॥
सितरक्तैर्नीलपीतैः कर्पूरादिविभूषितैः ।
हरिताचारयोगार्थं रङ्गरम्यैर्मनोहरैः ॥
अन्यैर्व्वा रङ्गरम्यैश्च प्रीणयेत् परमेश्वरम् ।
एकादश्यां समारभ्य पञ्चरात्रं समापयेत् ॥
पञ्चाहानि चाहानि क्षुद्रोत्सवो विधीयते ।
दक्षिणाभिसुखं कृत्वा दोलयागं समाचरेत् ॥
दृष्ट्वापराधनिचयैर्मुक्तास्ते नात्र संशयः ॥ १० ॥
निःक्षिप्य जलमाचे तु मासे माधवसंज्ञिते ।
सौवर्णपात्रे ताम्रे वा रौप्ये वा स्फटिकेऽपि वा ॥
तोयस्थं शोर्च्चयेद्देवं शालग्रामसमुद्भवम् ।
प्रत्यहं मां महाभागे तस्य पुण्यं न गच्छति ॥
दमनारोपणं कृत्वा श्रीविष्णौ च समर्पयेत् ।
वैशाख्यां श्रावणे भाद्रे कार्त्तिकञ्च तदर्पणम् ॥११॥
वैशाखे च तृतीयायां जलमध्ये विशेषतः ।
अथवा मण्डपे कुर्य्यात् मण्डले वा दृढद्रुजे ॥
मृगलक्ष्मचन्द्रेणाङ्गं सुपुष्टाङ्गो दिने दिने ।
यथा प्रयत्नतः कार्य्यः क्षपाङ्गो नैव पूजितः ॥
चन्दनागुरुकस्तूरीकुष्ठं कुङ्कुमरोचना ।
जटामांसी वचा चैव विष्णोर्गन्धाष्टकं तथा ।
एतैर्गन्धयुतैश्चापि अङ्गानि च विलेपयेत् ॥
दृष्ट्वा तुलसीकाष्ठं कर्पूरागुरुयोगतः ।
अथवा केशरैर्योज्यं हरिचन्दनमच्युते ॥
अस्मिन् काले कृष्णभक्त्या ये प्रपश्यन्ति मानवाः ।
न तेषां पुनरावृत्तिः कल्पकोटिशतैरपि ॥
सुगन्धिमिश्रितैस्तोयैः स्नापयित्वा जगद्-
गुरुम् ।
अथवा पुण्यमध्यं च स्नापयेच्चन्दनीश्वरम् ॥
वृन्दावनं तत्र कृत्वा उपस्कृतफलानि च ।
विष्णुभक्तेन योग्येन भोजयेत्तद्विशेषतः ॥
नारिकेलं फलं नीरं कोषस्थीकृत्य दापयेत् ।
कण्टाफलञ्च पनसं कोषसंकृत्य दापयेत् ॥
यथा पचेत्तथा दद्यादृथाशक्तिनियोगतः ।
दध्ना विमिश्रितषान्नं घृतेनाप्लुत्य दापयेत् ॥
पाचितं पिण्डकं धातुरवादश घृतेन च ।
तिलेश्च तिलसंमिश्रैः फलं गुडस्य दापयेत् ॥
यदृच्छयालाभः श्रेयस्तत्तदीशाय कल्पयेत् ।
दत्त्वा नैवेद्यवस्त्रादीन्नादद्यात् कथञ्चन ॥
त्यक्तं विष्णुनिमित्तं तद्भक्तेभ्यो विशेषतः ।
इति ते कथितं किञ्चित् समासेन महेश्वरि ! ।
गोप्तव्यञ्च प्रयत्नेन स्वयोनिरिव पार्व्वति ! ॥१२॥
श्रीकृष्णरूपगुणवर्णनशास्त्रवर्गे
बोधाधिकार इह चेदलमन्यपारैः ।
तत्प्रेमभावबलभक्तिविलासनाम-
घासेषु चेद्यदि रतिः किमु कामिनीभिः ॥
तप्तेतसा विभवतां व्रजबालकेन्द्र
वृन्दावनं क्षितितलं यमुनाजलञ्च ।
तल्लोकनाथपदपङ्कजधूलिभिर्ये-
क्षिप्तं वपुः किल तयागुरुचन्दनादौ ॥"

इति पाद्मे पातालखण्डे १२ अध्यायः ॥

हरिः, त्रि, (हरति नेत्रदुःखमिति । हृ + इन् ।) पिङ्गलवर्णः । हरिर्दर्भः । इति मेदिनी ॥ (यथा, रघुः । ३ । ३३ ।

"ततैकमक्लामनिमेषवृत्तिभि-
र्हरिं विदित्वा हरिभिश्च वाजिभिः ।

अयोगदैनं गगनस्पृशा रघुः
स्मरेण धीरेण नियन्त्रयिष्यसि ।")
पीतवर्णः । इत्यनेकार्थकोषः ॥
हरिकः, पुं, (हरिरेव । हरि+स्वार्थे संज्ञायां वा कन् ।) पीतहरितवर्णाश्वः । तत्पर्य्यायः । घोटकः २ । इति हेमचन्द्रः ॥ चौरः । अश्वक्रीडकः । इति केचित् ॥
हरिकेलीयः, पुं, (हरिकेलिमर्हतीति । हरिकेलि +छः ।) बङ्गदेशः । इति हेमचन्द्रः । तद्देशार्हे, त्रि ॥
हरिकेशः, पुं, (हरिः पिङ्गलः केशो यस्य ।) शिवः । इति केचित् ॥ (यथा, महाभारते । १३ । १७ । ४४ ।
"शौचञ्च हरिकेशश्च मुनीषः क्षान्त एव च ॥"
विष्णुः । यथा, महाभारते । ६ । ६२ । ५० ।
"महोरगं वराहञ्च हरिकेशं विभो ! नय ॥")
शिवभक्तयक्षविशेषः । स तु शिवप्रसादात् दक्षपार्श्वित्वं क्षेत्रपालत्वादिकञ्च प्राप्तवान् । यथा,
"एवमुक्ता ततो देवः सह देव्या जगत्पतिः ।
जगाम यक्षो यत्रास्ते क्षुण्णो धमनिसन्ततः ।
तं दृष्ट्वा प्रणतं भक्त्या हरिकेशं वृषध्वजः ।
दिव्यं चक्षुरदात्तस्मै येनापश्यत् स शङ्करम् ॥
स्कन्द उवाच ।
अथ यक्षस्तदा तत्र प्रणेरुश्चीन्द्र चक्षुषी ।
अपश्यत् स शिवं देवं दृग्भ्यां येनसुपाश्रितम् ॥
देव उवाच ।
अरामरणनिर्मुक्तः सर्व्वशोकविवर्जितः ।
भविष्यसि गणाध्यक्षो वरतः सर्व्वपूजितः ॥
अक्षयेष्वपि लोकानां योगैश्वर्य्यसमन्वितः ।
अजरश्चापि लोकेभ्यः क्षेत्रपालो भविष्यसि ॥
महाबलो महाभक्षो ब्रह्मण्यो मम च प्रियः ।
नागश्च यक्षपालिश्च महायोगी तथैव च ॥
उद्भमः सप्तमश्चैव यमौ ते परिचारकौ ।
तवाज्ञया करिष्यन्ति लोकस्योद्भममप्रमौ ॥"
इति मात्स्ये । १८० । ८८—९० ; ९६—९८ ॥
हरिक्रान्ता, स्त्री, (हरिणा क्रान्ता ।) विष्णुक्रान्ता । इति राजनिर्घण्टः ॥
हरिक्षं, क्ली, (हरेरिदमक्षम् ।) हरेरक्षम् । इन्द्रियम् । तत्पर्य्यायः । एकचक्रम् २ भुजाङ्गुलौ ३ । इति त्रिकाण्डशेषः ॥
हरिचन्दनं, पुं, क्ली, (हरेरिन्द्रस्य प्रियं चन्दनम् ।) पीतचन्दनविशेषः । यथा,—
"मलये रेवतारौ मन्दरः पारियात्रकः ।
सह्यः कल्पद्रुमश्च पुंसि वा हरिचन्दनम् ॥"
इति राजनिर्घण्टे अमरः । १ । १ । ५६ ॥
देवभूमावेव समुत्पन्नं देवतरुः । अन्यत्रापि जातमपि चन्दनं यदि चाक्षादि दोषो नास्ति तदा तत्तुल्यगुणः । हरिन्द्रस्य चन्दनं हरिचन्दनम् । इति भरतः ॥ तत्पर्य्यायः । गोशीर्षम् २ श्रीखण्डम् ३ । इति त्रिकाण्डशेषः ॥
हरिचन्दनं, क्ली, (हरिश्चन्द्रः पर्व्वतभागः । तत्र जातत्वात् तस्य तथात्वम् ।) पीतचन्दनम् । इति केचित् ॥
हरिचन्दनः, पुं, (हरिश्चन्द्रः पर्व्वतभागः । तत्र जातत्वात् तस्य तथात्वम् ।) पीतचन्दनम् । इति केचित् ॥
हरिचन्दनी, स्त्री, (हरिचन्दनं तद्वर्णोऽस्यास्तीति । अर्श आद्यच् ।) द्युतिलता । कुङ्कुमम् । इति मेदिनी ॥ पद्मकेशरम् । इति धनञ्जयः ॥ कान्ताङ्गम् । इति शब्दरत्नावली ॥
हरिणः, पुं, (हरति मनः हियते गीतादिना वा । हृ+"ग्याख्यासृहृभ्य इनच्" उणा० २ । ९६ । इति इनच् ।) मनोमत्यानपशुः । तत्पर्य्यायः । रङ्गः २ कुरङ्गः ३ वातायुः ४ अग्निजयोनिः ५ । इत्यमरः । २ । ५ । ८ ॥ मारङ्गः ६ चलनः ७ एणः ८ भीरुहृदयः ९ मधुः १० । इति जटाधरः ॥ चारुलोचनः ११ जिनयोनिः १२ कुरङ्गमः १३ अजयः १४ अजः १५ दिव्यः १६ विभुः १७ एणः १८ एणकः १९ । इति शब्दरत्नावली ॥ लम्बनादः २० सुलोचनः २१ एणः २२ । अस्य मांसगुणाः ।
"एणस्य मांसं लघु शीतवीर्य्यं
त्रिदोषजुष्टं षड्रसदृश्य कण्ठ्यम् ।
कुरङ्गमांसं मधुरस्य यद्वत्
क्षयापहं पित्तहरं मरुद्घ्नम् ॥"
इति राजनिर्घण्टः ॥
अपि च ।
"हरिणः शीतलो वृष्यो रूक्षो मेध्यो लघुः ।
रसे पाके च मधुरः सृमरश्च सविषाणघ्नः ।
एडः कषायो मधुरः पित्तास्रकफनाशनः ।
मेध्यो रोचनो दृष्टो बलकृद्वातनाशनः ॥"
इति राजवल्लभः ॥
हरिणी, स्त्री, (हरिण+ङीप् ।) हरिणः । (यथा, रघुः । २ । ११ ।
"धनुर्भृतोऽप्यस्य दयार्द्रभाव-
मा ख्यातमन्तःकरणैर्विभज्य ।
विलोकयन्ती वपुरात्मरक्षणा-
प्रकामविस्तारफलं हरिण्याः ॥")
स्वर्णप्रतिमा । इत्यमरः । ३ । ३ । ५० ॥ (हरिण+ङीप् । तस्य नः ।) हरिता । नारीभेदः । इत्यमरः । इति मेदिनी ॥ (लक्षणं यथा,—
"समसक्था सः यद्वेदैर्ध्येर्हरिणी सता ।"
विस्तारतु छन्दःशब्दे द्रष्टव्यः ।) मञ्जिष्ठा । स्वर्णयूथी । इति राजनिर्घण्टः ॥ तरुणी । वरस्त्री । इति शब्दरत्नावली ॥ (सुराङ्गनाभेदः । यथा, रघुः । ८ । ७८ ।
"चरतः किल कृष्णसारं तप-
स्विनीः परिवार्य्य पुरः ।
प्रणिपाय गणाधिनेतिनां
हरिणीं हरिणी सुराङ्गनाम् ॥")

हरित्, पुं, (हरति नयनमनांसीति। हृ+"हृदृ-रुहिमुहिभ्य इतिः।" उणा० २। ६६। इति इतिः।) नीलपीतमिश्रितवर्णः। सबुजरङ् इति भाषा॥ तत्पर्य्यायः। पालाशः २ हरितः ३। इत्यमरः। १। ५। १४॥ श्यामः ४। इति शब्दरत्नावली॥ अश्वविशेषः। इति मेदिनी॥ सूर्य्याश्वः। इति त्रिकाण्डशेषः॥ (यथा, कुमारे। २। ४६।

"उत्पाट्य मेरुशृङ्गाणि भुजानि हरितां खुरैः।
आक्रीडपर्व्वतांस्तेन कल्पिता इव वेधसा॥")

सूर्य्यः। इति हेमचन्द्रः॥ सिंहः। सूर्य्यः। विष्णुः। इति केचित्॥ हरिद्वर्णविशिष्टे, त्रि॥

हरित्, स्त्री, (हृ+इतिः।) दिक्। इत्यमरः। १। ३। १॥ (यथा, रघुः। ३। ३०।

"ततार विद्याः पवनातिपातिभि-
र्दिशो हरिद्भिर्हरितामिवेश्वरः॥")

हरिद्रा। इति राजनिर्घण्टः॥

हरित्, पुं, क्ली, (हृ+इतिः।) हयम्। इति मेदिनी॥

हरितं, क्ली, (हृ+इतन्।) स्रौणेयकम्। इति राजनिर्घण्टः॥

हरितः, पुं, (हरति नयनमनांसीति। हृ+"हृशा-भ्यामितन्।" उणा० ३। ६३। इति इतन्।) हरिद्वर्णः। इत्यमरः। १। ५। १४॥ सिंहः। इति केचित्॥ मन्थानकलक्षणम्। इति राज-निर्घण्टः॥ (हारीत इति लोके। तदर्थे पर्य्यायो यथा—

"हारीतो रक्तपित्तः स्याद्धरितोऽपि स कथ्यते॥"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे॥)

हरिद्वर्णयुक्ते, त्रि। इति मेदिनी॥ (यथा, किराते। ५। ३८।

"परिसरविषयेषु लीढसस्याः
हरितलघोरुमधूकया मृगीभिः॥")

हरितकं, क्ली, (हरिनो वर्णोऽस्यस्येति। अच्। ततः कन्।) शाकम्। इत्यमरः। २। ६। ३४॥ (यथा, माघे। ५। ५८।

"अथावि भूमिपतिभिः अथवीतनिद्रै-
रन्वं पुरो हरितकं सदमादधानः॥")

हरितपत्रिका, स्त्री, (हरितानि पत्राणि यस्याः। ततः स्वार्थे कन्। टाप् च अत इत्वम्।) पाची। इति राजनिर्घण्टः॥

हरितशाकः, पुं, (हरितः हरिद्वर्णः शाकः।) शिग्रुः। इति राजनिर्घण्टः॥ (शिग्रुशब्दस्यास्य गुणादयो ज्ञातव्याः॥)

हरिता, स्त्री, (हरिनो वर्णोऽस्यस्या इति। अच्। टाप्।) दूर्व्वा। इति मेदिनी॥ हयमारी। कपिलक्रान्ता। पाची। नीलदूर्व्वा। इति राजनिर्घण्टः॥

हरितालं, क्ली, (हरितं तद्वर्णं व्यालातीति। ला+क+कः।) पीतवर्णधातुविशेषः। स तु हरेर्मांसम्। यथा,—

"हरितालं हरेर्मांसं मधुशिग्रुश्च पारदं शिववीर्य्यं स्यात् गन्धकं पार्व्वतीरजः॥"
इति वैद्यकम्॥

तत्पर्य्यायः। पिञ्जरम् २ पीतकम् ३ तालम् ४ व्यालम् ५ हरितालकम् ६। इत्यमरः। २। ६। १०३॥ गौदन्तम् ७ पीतलम् ८ नटमण्डनम् ९ हरि-बीजम् १० सिद्धधातुः ११। इति जटाधरः॥ वर्णकम् १२ नटभूषणम् १३। इति रत्नमाला॥ पीतम् १४ गोरोचम् १५ चित्राङ्गम् १६ पिञ्ज-रकम् १७ वेदलम् १८ तालकम् १९ कनक-रसः २० काञ्चनकम् २१ विड्डालकम् २२ चित्र-गन्धम् २३ पिङ्गम् २४ पिङ्गसारम् २५ गौरी-ललितम् २६। अस्य गुणाः। कटुत्वम्। उष्ण-त्वम्। स्निग्धत्वम्। त्वग्दोषभूतभौतिविषवात-कुष्ठानाग्नित्वञ्च। इति राजनिर्घण्टः॥ * ॥ अपि च।

"हरितालं द्विधा प्रोक्तं पत्राख्यं पिण्डसंज्ञकम्। तयोराद्यं गुणैः श्रेष्ठं ततो हीनगुणं परम्॥ स्वर्णवर्णं गुरु स्निग्धं सपत्रं चाभ्रपत्रवत्। पत्राख्यं तालकं विद्यात् गुणाढ्यं तद्रसायनम्॥ निष्पत्रं पिण्डसदृशं स्वल्पसत्त्वं तथा गुरु। स्त्रीपुष्पहारकं स्वल्पगुणं तत्पिण्डतालकम्॥ हरितालं कटु स्निग्धं कषायोष्णं हरेद्विषम्। कण्डूकुष्ठास्ररोगास्रकफपित्तव्रणान्॥

हरति च हरितालं चाखतां देहजातां
क्षपति च बहुतापानङ्गसङ्कोचपीडाः।
वितरति कफवातौ कुष्ठरोगं विदध्या-
दिदमसितमशुद्धं मारितं चाप्यसम्यक्॥"
इति भावप्रकाशः॥ * ॥

अथ तालस्याशुद्धस्य दोषमाह।

"अशुद्धं तालमाधुर्त्तं कफमारुतमेहकृत्। तापस्फोटाङ्गसंकोचान् कुरुते तेन शोधयेत्॥"

अथ तालकस्य शोधनविधिः।

"तालकं कणशः छित्वा तच्चूर्णं काञ्जिके क्षिपेत्। दोलायन्त्रेण यामैकं ततः क्षुण्णाम्बुजे द्रवे॥ तिलतैले पचेद्यामं यामञ्च त्रिफलारसे। दोलायन्त्रे चतुर्य्यामं पक्वं शुध्यति तालकम्॥"*

अथ तालकस्य मारणविधिः।

"सदलं तालकं शुद्धं पौनर्नवरसेन तु। खल्वे विमर्द्य वेदैकं दिनं पश्चाद्विशोधयेत्॥ संशोध्य गोलकं तस्य कुर्य्याच्च विशोधयेत्। ततः पुनर्नवाचारैः स्वाङ्गामर्द्धं प्रपूरयेत्॥ तत्र तन्गोलकं क्षिप्त्वा पुनस्तेनैव पूरयेत्। आकर्षं पिठरं तस्य पिधानं धारयेन्मुखे॥ स्याल्यां चूल्यां समारोप्य क्रमादग्निं विवर्द्धयेत्। दिनान्यन्तरशून्यानि पञ्चवह्निं प्रदीपयेत्॥ एवं तन्म्रियते तालं माक्षा तस्यैकरक्तिका। अनुपानान्यनेकानि यथायोग्यं प्रयोजयेत्॥"*

एवं शोधितस्य मारितस्य तालकस्य गुणाः।

"हरितालं कटु स्निग्धं कषायोष्णं हरेद्विषम्। कण्डूकुष्ठास्ररोगास्रकफपित्तव्रणान्॥"
अन्वयः।

"तालकं हरते रोगान् कुष्ठमेहकृमिव्रणम्।
शोधितं कुरुते कान्तिं वीर्य्यवृद्धिं तथायुषः॥"
इति च भावप्रकाशः॥

हरितालः, पुं, पीतवर्णपक्षिविशेषः। हरियाल इति भाषा। तस्य मांसगुणाः।

"हरितालोऽक्षिविट्कः स्यात् कषायो मधुरो लघुः।
रक्तपित्तप्रशमनस्तृष्णाघ्नो वातकोपनः॥"
इति राजवल्लभः॥

हरितालकं, क्ली, (हरितालमेव। स्वार्थे कन्।) हरितालम्। इत्यमरः। २। ६। १०३॥

हरितालिका, स्त्री, दूर्व्वा। इति त्रिकाण्डशेषः॥ सौरभाद्रशुक्लचतुर्थी हरितालिका। सौरभाद्र-शुक्लचतुर्थ्यामुदितचन्द्रस्य नष्टचन्द्र इति संज्ञा। इति पञ्जिकायां प्रसिद्धा। तत्र चन्द्रदर्शननिषेधो यथा। भोजदेवः।

"शुक्लपक्षे चतुर्थ्यान्तु सिंहे चन्द्रस्य दर्शनम्। मिथ्याभिशापं कुरुते न पश्येत्तत्र तत्ततः॥"

चतुर्थ्यां दर्शननिषेधात् तत्रोदितस्य चन्द्रस्य पञ्चम्यां दर्शने तु न दोषः। अतः।

"प्रक्षालनगते भानौ पक्षयोरुभयोरपि।
चतुर्थ्यामुदितश्चन्द्रो नेक्षितव्यः कदाचन॥"

चतुर्थ्यां नेक्षितव्य इति मुनिभिरुदित उक्त इत्यर्थः। अथवा चतुर्थ्यामित्यस्य प्रधानक्रिया-न्वयाभ्यर्हितत्वादीक्षितव्य इत्यनेनान्वयो न तूदित इत्यनेन। तथा च अश्वक्ते प्रधानगामि इति सूत्रे अश्वक्तस्य शब्दस्य प्रधानेन सह सम्बन्ध इति भट्टनारायणव्याख्यानं इति। उदितखर्क्षो-दितव्याप्तिपरः खरूपाख्यानपरो वा।

"ब्राह्मणी तु भुना दष्टा जम्बुकोष्ठेन वा गवा उदितं सोमनक्षत्रं दृष्ट्वा स्नात्वा शुचिर्भवेत्॥"
इति पराशरोक्तोदित इतिवत्॥ * ॥

नन्वेकपदस्य कथमनेकार्थता इति चेन्न यावन्तो-ऽर्थास्तावन्ति पदानीति। तथा चोक्तम्।

"यावतामेव धातूनां लिङ्गं रूढिगतं भवेत्।
अर्थस्यैवाभिधेयस्तु तावद्भिर्गुणविग्रहः॥"

लिङ्गं समार्थम्। रूढिगतं प्रसिद्धम्। न त्वप्रसिद्धम्। हन हिंसागत्योरित्यादौ गमनादिकम्। अभिधेयो वाच्यः। तावद्भिर्धातुभि-र्गुणविग्रहो गुणेर्गुणनाभिर्विग्रहो ग्रहणं यत्रार्थे न तथा। एतेन धातुसमसंख्यार्थत्वं पदस्य। ब्रह्मपुराणे सिंहाकांधिकारे।

"नारायणोऽभिशप्तस्तु निशाकरमरीचिषु।
स्थितश्चतुर्थ्यामद्यापि मनुष्याय पतेच्च सः॥
अतश्चतुर्थ्यां चन्द्रन्तु प्रमादाद्दीक्ष्य मानवः।
पठेद्वाचेयिकावाक्यं प्राप्नुयाद्दोषदुःखयोः॥"

अभिशप्तः परीवादविषयीभूतः। सोऽभिशापः। धाचेयिकावाक्यं विष्णुपुराणे।

"सिंहः प्रसेनमवधीत् सिंहो जाम्बवता हतः।
सुकुमारक मा रोदीस्तव ह्येष स्यमन्तकः॥"

अनेन मल्लेयाभिमलितं जलं पेयं व्याचारात् स्यमन्तकोपाख्यानञ्च श्रोतव्यम्। इति तिथ्यादि-तत्त्वम्।

हरितालो, स्त्री, (हरिताल+ङीष्।) दूर्व्वा। आकाशरेखा। इति मेदिनी॥ खड्गलता। इति विश्वः॥ सौरभाद्रीयनक्षत्रविशेषयुक्त-चतुर्थी। यथा,—

"भाद्रे मासि सिते पक्षे वसुदैवतसंयुता।
हरितालो चतुर्थी स्यात् सर्व्वाणीप्रीतिदा सदा॥
भाद्रे मासि सिते पक्षे चतुर्थ्यामभियोगतः।
ददाति किल्बिषं घोरं दृष्टश्चन्द्रो न संशयः॥
कदाचिन्नानलर्क्षेषु हरौ सूर्य्ये चतुर्थिका।
हरितालो समाख्याता रुद्राणीप्रीतिदा सदा॥"

इति राजमार्त्तण्डः॥

हरिताश्म, [न्] क्ली, (हरितं अश्म।) तुत्थम्। पेरोजम्। इति राजनिर्घण्टः॥

हरित्पर्ण, क्ली, (हरित् पर्णमस्य।) मूलकम्। इति राजनिर्घण्टः॥ हरिद्वर्णपत्रयुक्ते, त्रि॥

हरिदश्वः, पुं, (हरित् अश्वो यस्य।) सूर्य्यः। (यथा, रघुः। ३। २२।

"पुपोष वृद्धिं हरिदश्वदीधिते-
रनुप्रवेशादिव बालचन्द्रमाः॥")

अकवृक्षः। इत्यमरः। १। ३। २६॥

हरिदेवः, पुं, (हरिर्देवोऽधिष्ठात्रीदेवता यस्य।) श्रवणानक्षत्रम्। इति हेमचन्द्रः॥ हरिर्देवो यस्य इति बहुव्रीहौ, त्रि। हरिश्चासौ देवश्चेति कर्म्मधारये हरिमात्रबोधकः॥

हरिद्गर्भः, पुं, (हरिद्वर्णो गर्भे यस्य।) हरिद्वर्णकृष्णः। हरिदर्भ इति च पाठः। तत्पर्य्यायः। खरपत्रः २ दृढच्छदः ३ अत्र पृथुच्छदोऽपि पाठः। शूरी ४ रूक्षदर्भः ५ दीर्घपत्रः ६ पवित्रकः ७। अस्य गुणाः।

"दर्भौ द्वौ च गुणे तुल्यौ तथापि च सिताधिकः।
यदि श्वेतकुशाभावे त्वपरं पीतयेद्भिषक्॥"

इति राजनिर्घण्टः॥

अपि च।

"दर्भद्वयं त्रिदोषघ्नं मधुरं तुवरं हिमम्।
मूत्रकृच्छ्राश्मरीहरणावस्तिरुक्प्रदरान्नजित्॥"

इति भावप्रकाशः॥

तन्मूलगुणाः।

"कुशमूलं हिमं रूक्षं मधुरं पित्तनाशनम्।
रक्तज्वरहरश्वासकासमेदोदमीच्छति॥"

इति राजनिर्घण्टः॥

हरिद्रवः, पुं, (हरिवर्णः पिङ्गलवर्णः द्रव इव।) गागकेशूरचूर्णम्। इति त्रिकाण्डशेषः॥

हरिद्रा, स्त्री, (हरितं पीतवर्णं रातीति। हरित्+रा+कः। टाप्।) ओषधिविशेषः। हलुद इति भाषा। तत्पर्य्यायः। निशाख्या २ काञ्चनी ३ पीता ४ वरवर्णिनी ५। इत्यमरः। २। ४। १२१॥ कावेरी ६ उमा ७ वर्णवती ८ गौरी ९ पीडा १०। इति जटाधरः॥ पीतवालुका ११ हेमनाशा १२ भङ्गवासा १३ वर्षिणी १४। इति शब्दरत्नावली॥ पीतिका १५ रजनी १६ निशा १७ मेहघ्नी १८ बहुला १९ वर्णिनी २० रात्रिनामिका २१। इति रत्नमाला॥ हरित् २२ रञ्जनी २३ स्वर्णवर्णा २४ सुवर्णा २५ शिवा २६ दीर्घरागा २७ हलदी २८ वराङ्गी २९ वनेष्टा ३० वरा ३१ वर्णदात्री ३२ पवित्रा ३३ हरिता ३४ विषघ्नी ३५ पिङ्गा ३६ मङ्गल्या ३७ मङ्गला ३८ लक्ष्मीः ३९ भद्रा ४० शिफा ४१ शोभा ४२ शोभना ४३ सुभगाक्षया ४४ श्यामा ४५ चयन्तिका ४६। अस्य गुणाः। कटुत्वम्। तिक्तत्वम्। उष्णत्वम्। कफवातास्रकुष्ठमेहकण्डूव्रणनाशित्वम्। देहवर्णविधायित्वञ्च। इति राजनिर्घण्टः॥*॥ अन्यच्च।

"हरिद्रा कफपित्तास्रशोथकण्डूव्रणापहा।"

इति राजवल्लभः॥

अपि च।

"हरिद्रा काञ्चनी पीता निशाख्या वरवर्णिनी।
क्रमिघ्ना हलदी योषित्प्रिया हरिविलासिनी॥
हरिद्रा कटुका तिक्ता रूक्षोष्णा कफपित्तनुत्।
वर्ण्या त्वग्दोषमेहास्रशोथपाण्डुव्रणापहा॥"*॥

अथ वनहरिद्रा।

"अरण्यहलदीकन्दः कुष्ठवातास्रनाशनः।"*॥

अथ कर्पूरहरिद्रा।

"दार्व्वीभेदास्रगन्धा च सुरभिश्चारु दारु च।
कर्पूरा पद्मपत्रा स्यात् सुरभिः सुरनायिका॥
आम्रगन्धिहरिद्रा या सा पीता वातला मता।
पित्तघ्नमधुरा तिक्ता सर्व्वकण्डुविनाशिनी॥"

इति भावप्रकाशः॥

हरिद्रागणेशः, पुं, (हरिद्रावर्णो गणेशः।) गणेशविशेषः। तन्मन्त्रो यथा,—

अथ हरिद्रागणेशः।

"पञ्चान्तको धरासंस्थो विन्दुभूषितमस्तकः।
एकाक्षरो महामन्त्रः सर्व्वकामफलप्रदः॥"

अथ वसिष्ठ ऋषिर्गायत्री छन्दो हरिद्रागणपतिर्देवता गकारो बीजं लकारः शक्तिर्वोजेनैव षड़ङ्गकम्। ध्यानम्।

"हरिद्राभं चतुर्ब्बाहुं हारिद्रवसनं विभुम्।
पाशाङ्कुशधरं देवं मोदकं दन्तमेव च॥"

एवं ध्यात्वा मानसैः संपूज्य शङ्खस्थापनादिपीठमन्त्रान्तं पीठपूजां विधाय पुनर्ध्यात्वा गणपतिं पूजयेत्। आवरणपूजाविनियोगादिकं एकाक्षरगणपतिवत्। अस्य पुरश्चरणं चतुर्लक्षजपः। त्रिमधुरयुक्तहरिद्राचूर्णमिश्रितैस्तण्डुलैरयुतहोमः। इत्यादि तन्त्रसारः।

हरिद्राङ्गः, पुं, (हरिद्राया इव अङ्गं यस्य।) हरितालपक्षी। इति शब्दचन्द्रिका॥

हरिद्राभः, पुं, (हरिद्राया आभा इव आभा यस्य।) पीतशालः। कर्पूरकः। इति शब्दचन्द्रिका॥ पीतवर्णः। तद्युक्ते, त्रि॥ इत्यमरः। १। ५। १४॥ (यथा, तन्त्रसारे।

"हरिद्राभं चतुर्ब्बाहुं हारिद्रवसनं विभुम्॥")

हरिद्रारागः, त्रि, (हरिद्राया राग इव रागो यस्य। अचिरस्थायित्वादेवास्य तथात्वम्।) अस्थिरसौहृदः। इति हेमचन्द्रः॥ तत्पर्य्यायः। क्षणमात्रानुरागी २। हरिद्रारागं इव रागोऽस्येति हरिद्रारागः। हरिद्रारागस्याचिरस्थायित्वात् तथेति यावत्। यथा,—

"क्षणमात्रानुरागी च हरिद्रारागं उच्यते॥"

इति हलायुधः॥

हरिद्रुः, पुं, (हरिवर्णः द्रुर्वृक्षः।) वृक्षः। इति हेमचन्द्रः॥ दारुहरिद्रा। इत्यमरः। २। ४। १०१॥ तथा चोक्तम्।

"दार्व्वी दारुहरिद्रा च पर्ज्जन्या पर्ज्जनीति च।
कटङ्कटेरी पीता च भवेत् सैव च पचधा॥
सैव कालीयकः प्रोक्तस्तथा कालेयकोऽपि च।
पीतद्रुश्च हरिद्रुश्च पीतदारु कपीतकम्।
दार्व्वी निशागुणा किन्तु नेत्रकर्णस्य रोगनुत्॥"

इति भावप्रकाशः॥*॥

द्रुविशेषः। हलदीवा इति हिन्दी भाषा। तत्पर्य्यायः। पीतदारु २ पीतकाष्ठः ३ पीतकः ४ कृतमकः ५ सुपुष्पः ६ सुराङ्गः ७ पीतकदुमः ८। अस्य गुणाः। पीतत्वम्। तिक्तत्वम्। मङ्गल्यत्वम्। पित्तवातनाशित्वम्। अङ्गकान्तिकरत्वम्। बल्यत्वञ्च। इति राजनिर्घण्टः॥

हरिद्वारं, क्ली, (हरेस्तत्प्राप्तेर्द्वारमिव।) स्वनामख्यातनगरम्। तत्तु तीर्थविशेषः। यथा,—

"शृणु देवि महामाये पवित्राणां पवित्रकम्।
गयायाश्चैव यत् पुण्यं काश्यां विश्वेश्वरार्चने॥
प्रयागे मज्जनाच्चैव हरिद्वारे हरेर्गृहे।
तुल्यं पुण्यं भवेद्देवि सत्यं दुर्गे शिवे शिवे॥"

इति रुद्रयामले हरगौरीसंवादे रुद्रचण्डी॥*॥

तत्र गङ्गावतरणात् गङ्गाद्वारमिति ख्यातम्। तत्र स्नानादिफलं यथा,—

"ततो गच्छेत धर्म्मज्ञ नमस्कृत्य महागिरिम्।
स्वर्गद्वारेण तत्तुल्यं गङ्गाद्वारं न संशयः॥
तत्राभिषेकं कुर्व्वीत कोटितीर्थे समाहितः।
लभते पुण्डरीकन्तु कुलञ्चैव समुद्धरेत्॥
तत्रैकरात्रिवासेन गोसहस्रफलं लभेत्॥"

इति प्राग्ने भूमिखण्डे १२ अध्यायः॥

अपि च।

"सर्व्वत्र सुलभा गङ्गा त्रिषु स्थानेषु दुर्लभा।
गङ्गाद्वारे प्रयागे च गङ्गासागरसङ्गमे॥
सवासवाः सुराः सर्व्वे गङ्गाद्वारं मनोरमम्।
समागत्य प्रकुर्व्वन्ति स्नानदानादिकं मुने!॥
देवयोगान्मुने तत्र ये त्यजन्ति कलेवरम्।
मनुष्यपक्षिकोटाद्यास्ते लभन्ते परं पदम्॥"

इति तत्रैव क्रियायोगसारे ३ अध्यायः॥*॥

पुस्तकान्तरे गङ्गाद्वारस्थाने हरिद्वारमिति पाठः॥

हरिनाम, [न्] क्ली, (हरेर्नाम।) श्रीहरेराख्यानम्। तन्माहात्म्यं यथा,—

"न कालनियमस्तत्र न देशनियमस्तथा।

नोच्छिष्टादौ निषेधोऽस्ति हरेर्नामनि मुख्यक ॥
स्नानं देवार्चनं ध्यानं धारणा नियमो यमः ।
प्रत्याहारः समाधिश्च हरिनामक्रमं न च ॥"
इति पाद्मोत्तरखण्डे ६८ अध्यायः ॥

अपि च ।
"हरेर्नाम हरेर्नाम हरेर्नामैव केवलम् ।
कलौ नास्त्येव नास्त्येव नास्त्येव गतिरन्यथा ॥"
इति श्रीहरिभक्तिविलासस्य ११ विलासे बृहन्नारदीयपुराणवचनम् ॥ * ॥ वैष्णवानां जप्यहरिनामानि यथा,—
"हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे ।
हरे राम हरे राम राम राम हरे हरे ॥"
अस्य प्रमाणादि यथा,—
त्रिपुरोवाच ।
"वासुदेव महाबाहो ! शृणुष्व परमं वचः ।
त्वं हि देव सुरश्रेष्ठः किमर्थं तप्यते तपः ॥
कुलाचारं विना पुत्र ! नहि सिद्धिः प्रजायते ।
शक्तिहीनस्य ते सिद्धिः कथं भवति रे सुत ! ॥
ममांशसम्भवां लक्ष्मीं लब्ध्वा किं तप्यते तपः ।
वृथा श्रमं वृथा पूजां जपञ्च विफलं सुत ! ॥
संयोगं कुरु यत्नेन शक्त्या सह तपोधन ! ।
सुखं विना सुतश्रेष्ठ ! विद्यासिद्धिर्न जायते ॥
साधके चोभमापन्ने देवता चोभमाप्नुयात् ।
तस्माद्योगयुतो भूत्वा जपकर्म समारभेत् ॥
भोगं विना सुतश्रेष्ठ ! नहि मोक्षः प्रजायते ।
शृणु पुत्र सुतश्रेष्ठ दीक्षाया आनुपूर्विकीम् ॥
द्वादशवर्षे तु संप्राप्ते द्वादशाभ्यन्तरे सुत ! ।
शृणुयाद्धरिनामानि षोड़शानि पृथक् पृथक् ।
हरिनाम विना पुत्र ! कर्णशुद्धिर्न जायते ॥
श्रीवासुदेव उवाच ।
शृणु मातर्महामाये विश्वबीजस्वरूपिणि ! ।
हरिनाम महामाये क्रमाच्चव मतं वद ॥*॥
त्रिपुरोवाच ।
हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे ।
हरे राम हरे राम राम राम हरे हरे ॥
द्वात्रिंशदक्षराण्येवं कलानामन्तं सदा ।
शृणु छन्दः सुतश्रेष्ठ ! हरिनाम्नस्तु चैव हि ॥
छन्दो हि परमं गुह्यं महत् पदमनश्वरम् ।
सर्वशक्तिमयं नित्यं हरिनाम तपोधन ! ।"*॥
अस्य श्रीहरिनाममन्त्रस्य वासुदेव ऋषिर्गायत्री छन्दः श्रीत्रिपुरा देवता मम महाविद्यासिद्ध्यर्थे विनियोगः ॥ * ॥
"शृणुष्वं सुतश्रेष्ठ ! प्रथमं शृणुयान्नरः ।
श्रुत्वा द्विजसुखात् पुत्र दक्षकर्मे तपोधन ! ॥
आदौ छन्दश्च मन्त्रं श्रुत्वा गुरौ भवेन्नरः ।
द्वादशाभ्यन्तरे श्रुत्वा कर्णशुद्धिमवाप्नुयात् ॥
कर्णशुद्धिं विना पुत्र महाविद्यामुपालभेत् ।
नारी वा पुरुषो वापि तत्क्षणाच्चारकी भवेत् ।
तस्मात्तु षोड़शे वर्षे संप्राप्ते गुरवन्वित ! ।
महाविद्यां ततः शृणुयात् सिद्धां ब्रह्मस्वरूपिणीम् ।
श्रुत्वा कुलसुराधिप्राप्तं साक्षाद् ब्रह्ममयी भवेत् ॥
कुर्यादेवमतस्तं यः शिष्येभ्यश्च तपोधन ! ।
तस्य सिद्धिर्भवेद्विद्या अष्टैश्वर्यमवाप्नुयात् ॥
रहस्यं हि विना पुत्र ! श्रम एव हि केवलम् ।
अतएव सुतश्रेष्ठ ! रहस्यरहितस्तव ।
रहस्यरहितां विद्यां न जपेत्तु कदाचन ॥ * ॥
हकारस्तु सुतश्रेष्ठ ! शिवः साक्षान्न संशयः ।
रेफस्तु त्रिपुरादेवी मम मूर्त्तिमयी सदा ॥
एकारश्च भगं विद्यात् साक्षाद्योनिं तपोधन ! ॥
एकारः शून्यरूपी च रेफो विश्वप्रचारिणः ।
हरे तु त्रिपुरा साक्षान्मम मूर्त्तिर्न संशयः ॥
ककारः कामदा कामरूपिणी स्फुरदव्ययम् ।
ऋकारश्च सुतश्रेष्ठ ! ज्येष्ठा शक्तिरितीरिता ॥
ककारश्च ऋकारश्च कामिनी वैष्णवी कला ॥
षकारश्चन्द्रमा देवः कलाषोड़शसंयुतः ॥
णकारश्च सुतवर ! साक्षान्निर्गुणरूपिणी ।
इयोरैक्यं तपःश्रेष्ठ ! महामाया जगन्मयी ॥
कृष्ण कृष्ण सुतश्रेष्ठ ! महामाया जगन्मयी ।
हरे हरे ततो देवि ! शिवशक्तिस्वरूपिणी ॥
हरे रामेति च पदं शिवशक्तिमयं सुत ! ।
हरे हरे इति पदं शक्तिद्वयसमन्वितम् ॥
आद्यन्ते प्रणवं दत्त्वा यो जपेद्दशधा द्विजः ।
स भवेत् सुतवर ! श्रेष्ठो महाविद्यासु सुन्दरः ॥
हरिनाम सुतश्रेष्ठ ! ज्येष्ठं तु वैष्णवं मतम् ॥
एवं षोड़श नामानि द्वात्रिंशदक्षराणि च ।
आद्यन्ते प्रणवं दत्त्वा चतुस्त्रिंशदनुत्तम ! ॥
हरिनाम विना पुत्र ! दीक्षा च विफला सदा ।
कुलदेवसुखाच्छ्रुत्वा हरिनाम पराचरम् ॥
ब्राह्मणच्चत्रवैश्याच्च शूद्रः श्रुत्वा पराचरम् ।
दीक्षां कुर्य्यात् सुतश्रेष्ठ ! महाविद्यासु सुन्दर ! ॥
दीक्षां वापि हरेर्नाम यदि शूद्रसुखात् प्रिये ! ।
अज्ञानाद्यदि गृह्णीयात् तस्य पापफलं शृणु ॥
शूद्रः शूद्रसुखात् श्रुत्वा विद्यां वा मन्त्रमुत्तमम् ।
कोटिवर्षाणि समादाय रौरवं प्रति गच्छति ।
अपि दाक्षयणीजीवो द्वयोरपि समं फलम् ॥
ब्रह्महत्यामवाप्नोति अक्षरं अक्षरं प्रति ।
शृणु पुत्र ! वासुदेवप्रसङ्गाद्वचनं मम ॥"
इति श्रीवासुदेवमाहात्म्ये राधातन्त्रे त्रिपुरावासुदेवसंवादे द्वितीयपटलः ॥

हरिनामा, [न्] पुं, (हरेर्नाम नाम यस्य ।) सुहृत्। इति त्रिकाण्डशेषः ॥

हरिनेत्रं, क्ली, (हरेर्नेत्रमिव ।) श्वेतपद्मम् । इति राजनिर्घण्टः ॥ श्रीहरेर्लोचनम् । यथा,—
"विबोधनार्थाय हरेर्हरिनेत्रकृतालयाम् ।
विशेश्वरीं जगद्धात्रीं स्थितिसंहारकारिणीम् ॥"
इति मार्कण्डेयपुराणे देवीमाहात्म्यम् ॥
हरिवर्णेक्षुच ॥

हरिनेत्रः, पुं, (हरेर्नेत्रकोटरस्येव नेत्रमस्य ।) पेचकः । इति त्रिकाण्डशेषः ॥

हरिन्मणिः, पुं, (हरिद्वर्णो मणिः ।) मरकतमणिः । इत्यमरः । २।९।९३ । (यथा, माघे । ३ । ६८ ।
"हरिन्मणिप्रस्तरलाञ्छितोरसे-
र्मुहुर्मुहुः कौस्तुभ एव पप्रथे ॥")

हरिन्मुद्गः, पुं, (हरिद्वर्णो मुद्गः ।) शारदमुद्गः । इति राजनिर्घण्टः ॥

हरिपर्णं, क्ली, (हरिः हरिद्वर्णं पर्णं यस्य ।) सूरणकम् । इति हेमचन्द्रः ॥

हरिप्रियं, क्ली, (हरेः प्रियम् ।) कृष्णचन्दनम् । इति शब्दचन्द्रिका ॥ तच्च कालीयकम् । कालियकाष्ठमिति ख्यातम् । इति रत्नमाला ॥ (यथा,
"कालीयकन्तु कालीयं पीताभं हरिचन्दनम् ।
हरिप्रियं कालसारं तथाकालानुसार्य्यकम् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।)
उशीरम् । इति राजनिर्घण्टः ॥

हरिप्रियः, पुं, (हरेः प्रियः ।) कदम्बवृक्षः । इति शब्दचन्द्रिकामरौ । २ । ४ । ४२ ॥ पीतभृङ्गराजः । विष्णुकन्दः । करवीरः । शुकः । वन्धूकः । इति राजनिर्घण्टः ॥ शिवः । वातुलः । कक्षुकः । इति केचित् ॥

हरिप्रिया, स्त्री, (हरेः प्रिया ।) लक्ष्मीः । इत्यमरः । १ । १ । २९ ॥ तुलसी । द्वादशीतिथिः । पृथिवी । इति केचित् ॥

हरिबालुकं, क्ली, (हरिप्रिया बालुका यत्र ।) गलबालुकम् । इत्यमरः । २ । ४ । १२१ ॥

हरिभक्तः, पुं, (हरेर्भक्तः ।) हरिसेवकः । तस्य लक्षणं यथा,—
"सर्व्वजीवेषु यो विष्णुं भावयेत् समताधिया ।
हरौ करोति भक्तिञ्च हरिभक्तः स च स्मृतः ॥"
इति ब्रह्मवैवर्त्ते गणपतिखण्डे ३५ अध्यायः ॥

हरिभद्रं, क्ली, (हरेर्भद्रं लक्ष्म्यैरस्मात् ।) हरिबालुकम् । इति शब्दचन्द्रिका ॥

हरिभाविणी, स्त्री, हरिं भावयितुं शीलं यस्याः सा । (हरि + भू + णिनि । ङीप् ।) हरिभावनाशीला । इति मुग्धबोधव्याकरणम् ॥

हरिभुक्, [ज्] पुं, हरिं भेकं भुङ्क्ते इति । भुज् + क्विप् ।) सर्पः । इति शब्दरत्नावली ॥

हरिमन्थः, पुं, गणिकारिका । इति शब्दरत्नावली ॥ चणकः । इति राजनिर्घण्टः ॥ (अस्य पर्य्यायो यथा,—
"चणको हरिमन्थः स्यात् सकलप्रिय इत्यपि ।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।)
देशविशेषः । इति हरिमन्थशब्दटीकायां भरतः ॥

हरिमन्थकः, पुं. (हरिमन्थ एव । स्वार्थे कन् ।) चणकः । इत्यमरः । २ । ९ । १९ ॥

हरिमन्थजः, पुं, चणकः । इत्यमरः । २ । ९ । १९ ॥ हरिमन्थे देशे प्रादुर्भवेण जातत्वात् हरिमन्थजः । जनजनादिति डः । इति भरतः । (क्लीवेऽपि ङीष्यते। यथा, सुश्रुते सूत्रस्थाने ४६ अध्याये ।
"स्वादुप्रायरसं प्रायो दुर्जरं हरिमन्थजम् ॥")
लाक्षद्रुः । इति हेमचन्द्रः ॥

हरियः, पुं, (हरिं पीतवर्णं याति प्राप्नोतीति । या + कः ।) पीतवर्णघोटकः । इति हेमचन्द्रः ।

हरिले, य, नाशोत्सौ चेष्टायामेधनम् । इति कविकल्पद्रुमः ॥

हरिलोचनः, पुं, (हरेरिव लोचनमस्य।) कुलीरः। इति त्रिकाण्डशेषः॥ मेचकः। इति केचित्॥ हरिदर्णेचक्षुर्युक्ते, त्रि॥

हरिवर्षं, क्ली, (हरिप्रियं वर्षम्।) जम्बुद्वीपस्य नववर्षान्तर्गतवर्षविशेषः। इति त्रिकाण्डशेषः॥ स तु निषधहेमकूटपर्व्वतयोर्म्मध्ये वर्त्तते। यथा। एवं दक्षिणेनेलावृतं निषधो हेमकूटो हिमालय इति प्रागायता यथा नीलादयः। अयुतयोजनोत्सेधा हरिवर्षकिंपुरुषभारतानां यथासंख्यम्। इति श्रीभागवते ५ स्कन्धे १६ अध्यायः॥ किञ्च। हरिवर्षे चापि भगवान् नरहरिरूपेणास्ते। तद्प्रग्रहणनिमित्तमुत्तरत्राभिधास्ये तद्दयितं रूपं महापुरुषगुणभाजनो महाभागवतो दैत्यदानवकुलतीर्थीकरणशीलाचरितः प्राक्तादोऽवधानानन्यभक्तियोगेन सह तद्वर्षपुरुषैरुपास्ते। इति च तत्रैव १८ अध्यायः॥

हरिवंशः, पुं, (हरेर्वंशः।) श्रीकृष्णस्य सन्तानः। यथा,—

"हरिवंशं प्रवक्ष्यामि कृष्णमाहात्म्यलक्षणम्।
वसुदेवात्तु देवक्यां वासुदेवो बलोऽभवत्॥
रुक्मिणीसत्यभामाद्या अष्टौ पत्न्यो हरेः पुरा।
षोड़शस्त्रीसहस्राणि अन्योन्यासन् महात्मनः॥
तासां पुत्राश्च पौत्राद्याः शतशोऽथ सहस्रशः।
रुक्मिण्याश्चैव प्रद्युम्नो न्यवधीत् समरेषु यः॥
तस्य पुत्रोऽनिरुद्धोऽभूत् उषावाणसुतापतिः।
अनिरुद्धादभूद्वज्रः स च राजा गते हरौ।
साम्बोपनिं गुरुं चक्रे सपुत्रं यादवाधिपः॥"

इति गारुड़े १४८। १; ६—८; ११॥

विस्तारस्तु महाभारतीयहरिवंशपर्व्वणि द्रष्टव्यः॥

हरिवल्लभा, स्त्री, (हरेर्वल्लभा।) जया। तुलसी। इति राजनिर्घण्टः॥ लक्ष्मीश्च॥

हरिवान्, [त्] पुं, (हरिरश्वोऽस्यास्तीति। मतुप्। "छन्दसीरः।" ८।२।१५। इति मस्य वः।) इन्द्रः। इति हलायुधः॥ हरिविशिष्टे, त्रि॥ (यथा, वाजसनेयसंहितायाम्। २०। ३६।

"सुपाणो कर्हिहरिवान्न इन्द्रः
प्राचीनं सीदत्प्रदिशा पृथिव्याः।")

हरिवासरः, क्ली, (हरेर्वासरम्।) श्रीहरेर्दिनम्। तच्च एकादशीद्वादशीतिथिरूपम्। यथा,—

"एकादशी द्वादशी च प्रोक्ता श्रीचक्रपाणिनः।"
"एकादशीमुपोष्यैव द्वादशीं समुपोषयेत्।
न चात्र विधिलोपः स्याद्भयोर्देवता हरिः॥"

इति च तिथ्यादितत्त्वम्॥

अपि च।

"यानि कानि च पापानि ब्रह्महत्यादिकानि च।
अन्नमाश्रित्य तिष्ठन्ति हरिवासरे॥
अघं स केवलं भुङ्क्ते यो भुङ्क्ते हरिवासरे।"

इत्येकादशीतत्त्वम्॥ *॥

द्वादश्याः प्रथमपादः। यथा। विष्णुधर्म्मोत्तरे।

"द्वादश्याः प्रथमः पादो हरिवासरसंज्ञकः।
तमतिक्रम्य कुर्व्वीत पारणं विष्णुतत्परः॥"

इति नित्यादितत्त्वम्॥ *॥

अथ हरिवासरे जागरणादिविधिः। स्कान्दे श्रीब्रह्मनारदसंवादे।

"शृणु नारद! वक्ष्यामि जागरस्य तु लक्षणम्।
येन विज्ञानमात्रेण दुर्लभो न जनार्द्दनः॥
गीतं वाद्यं च नृत्यं च पुराणपठनं तथा।
धूपं दीपं च नैवेद्यं पुष्पगन्धानुलेपनम्॥
फलमर्घ्यञ्च श्रद्धा च दानमिन्द्रियनिग्रहः।
सत्यान्वितं विनिद्रञ्च सदा युक्तं क्रियान्वितम्॥
सौख्यं चैव सोत्साहं पापालस्यादिवर्জ্জितम्।
प्रदक्षिणाभिसंयुक्तं नमस्कारपुरःसरम्॥
नीराजनसमायुक्तमनिर्विण्णेन चेतसा।
यामे यामे महाभाग! कुर्य्यादारात्रिकं हरेः।
एतैर्गुणैः समायुक्तं कुर्य्याज्जागरणं हरेः॥"*॥

किञ्च।

"य एवं कुरुते भक्त्या वित्तशाठ्यविवर्জ্জितः।
जागरं वासरे विष्णोर्लभते परमां गतिम्॥
धनवान् वित्तशाठ्येन यः करोति प्रजागरम्।
तेनात्मा हारितो नूनं कितवेन दुरात्मना॥"

तत्रैव श्रीमदुमामहेश्वरसंवादे।

"सशास्त्रं जागरं यच्च नृत्यगान्यर्चसंयुतम्।
सवाद्यं तालसंयुक्तं सदीपं साधुभिर्युतम्॥
उपचारैश्च संयुक्तं यथोक्तैर्भक्तिभावितैः।
मनसस्तुष्टिजननं सस्यं लोकरञ्जनम्॥
गुणैर्द्वादशभिर्युक्तं जागरं माधवप्रियम्।
कर्त्तव्यं तत् प्रयत्नेन पक्षयोः शुक्लकृष्णयोः॥"*॥

किञ्च।

"परापवादयुक्तं तु मनः प्रशमवर्জ্জितम्।
शास्त्रहीनमगान्धर्व्वं तथा दीपविवर्জ্জितम्॥
शून्योपचाररहितमसुदासीनं सनिद्रकम्।
कलियुक्तं विशेषेण जागरं नवधाधमम्॥"*॥

किञ्च। तत्रैव।

"अभावे वाचकस्याथ गीतं नृत्यञ्च कारयेत्।
वाचके सति देवेशि! पुराणं प्रथमं पठेत्॥"*॥

अथ जागरणनित्यत्वम्।

स्कान्दे ब्रह्मनारदसंवादे।

"अतीतानागतान् वापि पातयिष्यन्ति पूर्व्वजान्।
अकुर्व्वाणाः प्रपत्स्यन्ति पुत्रधर्म्मवसुत्तमम्।
जायते नरके वासः पितृभिः सह कालयः॥
न पुरश्चरणात् पापं व्रतैर्दानैः समाधिभिः।
विलयं याति विप्रेन्द्र! विना द्वादशीजागरम्॥"

तत्रैवोमामहेश्वरसंवादे।

"संप्राप्ते जागरे विष्णोर्ये न कुर्व्वन्ति जागरम्।
भक्ष्यते सुकृतं तेषां वैष्णवानाञ्च निन्दया॥
मतिर्न जायते यस्य द्वादश्यां जागरं प्रति।
न हि तस्याधिकारोऽस्ति पूजने केशवस्य हि॥"

अतएवोक्तं ब्रह्मणा। तत्रैव।

"हृदये वर्त्तते यस्य सदा योगेश्वरो हरिः।
मतिरुत्पद्यते तस्य द्वादशीजागरोपरि॥"*॥

सामान्येन पुराणेषु गीतनृत्यादिनित्यता।
अधुना लिख्यते सेयं जागरे च विशेषतः॥"

अथ जागरे गीतादिनित्यत्वम्। स्कान्दे उमामहेश्वरसंवादे।

"मूकवत्तिष्ठते यो वै गानं पाठञ्च नाचरेत्।
सप्त जन्मानि मूकत्वं जायते जागरे हरेः॥
यो न नृत्यति मूढात्मा पुरतो जागरे हरेः।
पङ्गुत्वं जायते तस्य सप्त जन्मानि पार्व्वति!॥"

पाद्मे पञ्चवर्द्धनीप्रसङ्गे।

"स्तुवन्ति न प्रशंसन्ति ये जना जागरं हरेः।
नोत्सवो भवते तेषां गृहे जन्मानि सप्त च॥
स्तुवन्ति ये प्रशंसन्ति जागरं चक्रपाणिनः।
नित्योत्सवो भवेत्तेषां जन्मानि दश पञ्च च॥"

अथ जागरणमाहात्म्यम्।

स्कान्दे ब्रह्मनारदसंवादे तथा श्रीप्रह्लादसंहितायाञ्च।

"न गयापिण्डदानेन न तीर्थैर्बहुभिर्मखैः।
पूर्व्वजा मुक्तिमायान्ति विना द्वादशीजागरम्॥
सर्व्वावस्थोऽपि यः कुर्य्याद्द्वादश्यां जागरं हरेः।
यामेनैकेन दहते पापं जन्मसहस्रजम्॥*॥
यः कुर्य्याद्दीपदानन्तु रात्रौ जागरणे हरेः।
निमिषे निमिषे विप्र! लभते गोशतं फलम्॥
यः कुर्य्याज्जागरे पूजां द्वादश्यां कुसुमैर्हरेः।
पुण्ये पुण्येऽश्वमेधस्य फलमाप्नोति मानवः॥
यो दत्त्वागुरुं विष्णोः पूजां कृत्वा तु जागरे।
निमिषार्द्धेन लभते तिलपात्रघृतं फलम्॥
निमेषञ्च दहेद्धूपं सघृतं गुग्गुलुं हरेः।
लभते जागरे विप्र! पुण्यं मासचतुष्टयम्॥
यो दद्याज्जागरे विष्णोर्हविष्यान्नचतुष्टयम्।
नैवेद्यं लभते पुण्यं शालिगोधूमचतुष्टयम्॥
पक्वान्नानि च यो दद्यात् फलानि विविधानि च।
जागरे पद्मनाभस्य लभते गोशतं फलम्॥
सकर्पूरञ्च ताम्बूलं यो ददाति हि जागरे।
पद्मनाभप्रसादेन श्वेतद्वीपे वसेच्चिरम्॥
जागरे पद्मनाभस्य यः कुर्य्यात् पुष्पमण्डपम्।
स पुष्पकविमानेषु क्रीड़ते ब्रह्मसद्मनि॥
जागरे पद्मनाभस्य सकर्पूरं तथागुरुम्।
दहते दहते पापं जन्मलक्षचतुष्टयम्॥
स्नानं ददाति कृष्णस्य दधिक्षीरघृतादिभिः।
रात्रौ जागरणे विप्र! मुक्तिभागी भवेद्धि सः॥
दिव्याम्बराणि यो दद्याज्जागरे चतुरश्रिते।
मन्वन्तराणि वसते तन्तुसंख्यासमानि वै॥
दद्यादाभरणं विष्णोर्हेमजं रत्नसम्भवम्।
सप्तकल्पानि वसते सोत्सङ्गे मत्स्ययो हि सः॥
श्रीचन्दनं सकर्पूरं सागुरुं तु सकेशरम्।
युक्तं न्यगमदेनापि यच्छते हरिजागरे॥
एकैकं सुनिशार्दूल! अश्वमेधाधिकं फलम्।
कलौ भवेन्न सन्देहो वासुदेवप्रसादतः॥
घृतेन दीपकं विष्णोर्गव्येन च विशेषतः।
ज्वालयेज्जागरे रात्रौ निमेषे गोशतं फलम्॥
जागरे वासुदेवस्य कर्पूरेण च दीपकम्।
यो ज्वालयति कोटीनां कपिलानां लभेत्
फलम्॥
आरात्रिकं हरेर्यस्तु सकर्पूरन्तु जागरे।
कुरुते मोक्षमाप्नोति कुलायुतसमन्वितः॥
विना हि योऽपि कर्पूरं कुर्य्यादारात्रिकं हरेः।

निःस्रोऽपि जागरे विष्णोर्दत्ता भूरिफलं लभेत् ॥
घारिघं घारिणा पूर्णं शिरसि स्थापयेद्धरिम् ।
विमर्च्य शिरसा सोऽयं गङ्गास्नानफलं फलम् ॥
स्नात्वा पूजां हरेर्यस्तु जागरे पुरतः शुचिः ।
पठेन्नामसहस्रन्तु गीतां नागरिमोत्तमम् ॥
गाङ्गस्नानफलं पुण्यं सप्तरात्रमनुस्मृतिम् ।
वैदिकानि च सूक्तानि भक्त्या रात्रौ सुखुर्मुहुः ॥
भवेत् प्रत्यक्षरं पुण्यं कपिलागोशतोद्भवम् ।
जागरे यज्ञरूपस्य पुरतः पठतो हरेः ॥
यः पुनः कुरुते गीतं सकृत्तं वाद्यसंयुतम् ।
न तत् क्रतुशतैः पुण्यं प्रदानशतैरपि ॥
यः पुनः कुरुते गीतं विलप्यो नृत्यते यदि ।
लभते निमिषार्द्धेन चतुराश्रमजं फलम् ॥
जागरे पद्मनाभस्य जृम्भणात् पुत्रकवाचनम् ।
श्लोकसंख्यां वसेत् स्वर्गे युगानि हरिसन्निधौ ॥
जृम्भणाद्धस्तमात्रां यो रमाकान्तस्य सद्मनि ।
घृतकृष्णाग्नये पक्वैर्जागरे चक्रपाणिनः ॥
युगानि पञ्चसंख्यानां स्वर्गे तस्योत्सवो भवेत् ।
पूज्यते वासवाद्यैश्च क्रीडते चाप्सरोगणैः ॥
मृत्युमानस्य मर्त्यस्य ये केचिन्निरयं गताः ।
विमुक्ता धर्मराजेन मुक्तिं यान्ति हरेः पदम् ॥
गीतध्वनिसुखमुष्टौ जागरे तु रमापतिः ।
यामयुग्माधिकं सौख्यं दत्त्वात्मन्यन्तरं व्रजेत् ॥
मुक्तेन मर्त्ये सौख्यं तु स्वर्गे मुक्तेन जागरे ।
रमाप्तये तथा सौख्यं मुक्तिर्नृत्यादवाप्यते ॥
प्रेक्षणीयप्रदानेन यत् पुण्यं कथितं बुधैः ।
न तत् कोटिभवैः पुण्यं योगैः सांख्यैरवाप्यते ॥
दीपमालां हरेरग्रे यः करोति प्रजागरे ।
विमानकोटिसंयुक्तः कल्पान्तं वसते दिवि ॥
चरितं रामचन्द्रस्य यः प्रबोधि हरेर्दिने ।
रात्रौ वाल्मीकिना प्रोक्तं तत्फलं न हि वैष्णवः ॥
यः पुनः पठते रात्रौ महाभारतसम्भवाम् ।
कथां जागरके विष्णोः कुलकोटिं नयेद्दिवम् ॥
पौराणपाठकश्चैनं पुरुषं च प्रपूजयेत् ।
स्नानस्य वाससश्चैनं जागरे पठते हि यः ॥
मुक्तकोटिसहस्रस्य अथः पापस्य जायते ।
सनत्कुमारकं कार्यं मत्स्यपोः शुक्लकृष्णयोः ॥
गीतनृत्यादिकं भक्त्या पठते विष्णुसन्निधौ ।
जागरे सत्यं यानि कुरुक्षेत्रसमानि वै ॥
अष्टादश पुराणानि पुराणपुरुषस्य च ।
श्रविष्यन्ति यदा विष्णोर्जागरे तु जागरे ॥
यो गीतां पठते रात्रौ विष्णोर्निमिषसङ्गमम् ।
वैष्णवानां पुराणानां जागरे पुण्यमाप्नुयात् ॥
पौराणार्थं तु यः कुर्याज्जागरे मद्भक्तानाम् ।
सभायां वाच गर्वेन्द्रः सभरीपात्रमीक्षयम् ॥
जागरे मद्भक्तानां यः कुर्यात्पुरुषकथम् ।
मद्भक्ते पुरतोऽत्यन्तं मोदते मद्गुरुः ॥
सर्वेषामेव पुण्यानां भवेत् पुण्यं मनोनते ।
द्वादश्यां जागरे विष्णोः श्रुतवत्यै ।
जागरं ये विकुर्वन्ति कर्मणा मनसा गिरा ।
न तेषां पुनरावृत्तिर्नरकेषु कदाचन ।
जागरे हरिवासस्तु रात्रौ वै द्वादशीदिने ।

रात्रौ मार्जयते शौरिः पापं तस्य युगार्जितम् ॥"

इति श्रीहरिभक्तिविलासे १३ विलासः ॥

हरिवाहनः, पुं, (हरेर्वाहनः ।) गरुडः । इति हारावली ॥ (हरिरूपेण वाहनं यस्येति । इन्द्रः । यथा, महाभारते । १ । २६ । १ ।
एवं स्तुतस्तदा कद्रू भगवान् हरिवाहनः ।
नीलजीमूतसङ्घातैः सर्व्वमम्बरमाहृणोत् ॥"
तथाच तत्रैव । ३ । ४६ । ५२ ।
"तत आनाय्य सलिलं विविक्ते हरिवाहनः ।
मार्ज्जयित्वा शुभैर्वाक्यैः स्नाप्यमानोऽभ्यभाषत ॥")

हरिवीजं, क्ली, (हरेर्बीजं वीर्य्यम् ।) हरितालम् । इति शब्दरत्नावली ॥

हरिवर्षं, क्ली, हरिवर्षम् । इति भूरिप्रयोगः ॥

हरिशयनं, क्ली, (हरेः शयनम् ।) श्रीहरेर्निद्रा । यथा । उपनयने दीपिकायाम् ।
"जीवार्केन्दुशुद्धौ हरिशयनबहिर्भास्करे पौषरस्थे
स्वाध्याये वेदवर्जाधिप इह शुभदे चौरमे
नादिशौ च ।"
इत्यादि ज्योतिस्तत्त्वम् ॥ * ॥

तद्विधिर्यथा । वामनपुराणे ।
"एकादश्यां जगत्स्वामिशयनं परिकल्पयेत् ।
भोगादिभोगपर्यङ्कं कृत्वा संपूज्य केशवम् ॥
अनुज्ञां प्राप्तवांश्चैव द्वादश्यां प्रयतः शुचिः ।
लब्ध्वा पीताम्बरधरं देवं निद्रां समानयेत् ॥"
अनुज्ञा लक्ष्मीपत्नयः । एकादशीसमये दिवा शयनं परिकल्पयेत् रात्रौ द्वादशीसमये निद्रेति ॥ * ॥ पक्षं पाराशरे ।
"आषाढशुक्लद्वादश्यां पौर्णमास्यामथापि वा ।
चातुर्मास्यव्रतारम्भं कुर्यात् कर्कटसंक्रमे ॥
अभावे तु तुलार्केऽपि मलेऽपि नियमं व्रती ।
कार्त्तिके शुक्लद्वादश्यां विधिवत्तत् समापयेत् ॥
चतुर्षापि हि मासेषु चातुर्मास्यं व्रतं नरः ।
कार्त्तिक्यां शुक्लपक्षे तु द्वादश्यां तत्समापयेत् ॥"
मात्स्ये ।
"चतुरो वार्षिकान् मासान् देवस्योत्थापनावधि ।
मधुसूदनो भवेन्नित्यं नरो गुरुविपर्य्ययात् ॥
तैलस्य वर्ज्जनादेव सुन्दराङ्गः प्रजायते ।
कटुतैलपरित्यागात् प्रद्युम्नाङ्गः प्रजायते ॥
सक्तून्नेत्यपरित्यागात् अनिरुद्धः प्रजायते ॥
सर्व्वान् सस्यान् दधीन् क्षीरोपाकसम्भक्षयन् ।
यदा सुप्तः सदा योगी मधुमांसस्य वर्ज्जनात् ॥
निरापदं नरो लोकं विष्णुभक्तश्च जायते ।
सकामश्चेत्समाप्नोति विष्णुलोकमवाप्नुयात् ॥
धारणाव्रतलोभाच्च मद्व्रतानां दिने दिने ।
सामुद्रपर्व्वतानद्यो रत्नकुम्भश्च जायते ॥
व्रतकालात् सुखालाभं सर्व्वं रैत्यं समुत्सृजेत् ।
व्रतकालात् सलिलात् पद्मपुष्पञ्च जायते ॥
सर्व्वे नारायणाधिक्ष्यं व्रतानामुत्तमं व्रतम् ।
द्वादशीदिनपर्य्यन्तं नियमैर्देहशोषणम् ।

एवमादिव्रतैः पार्थ! तुष्टिमायाति केशवः ॥"

सनत्कुमारः ।
"इदं व्रतं मया देव! गृहीतं पुरतस्तव ।
निर्विघ्नां सिद्धिमाप्नोतु प्रसन्ने त्वयि केशव! ॥
गृहीतेऽस्मिन् व्रते देव! यन्न्यूनं त्वद्दिने ।
तत्सर्वं भवतु संपूर्णं त्वत्प्रसादाज्जनार्द्दन! ॥"
समाप्तौ च ।
"इदं व्रतं मया देव! कृतं प्रीत्यै तव प्रभो! ।
न्यूनं संपूर्णतां यातु त्वत्प्रसादाज्जनार्द्दन! ॥"*।
अत्रैव यतिमधिकृत्य काठकश्रुत्यम् ।
"एकरात्रं वसेद् ग्रामे नगरे पञ्चरात्रकम् ।
वर्षाभ्योऽन्यत्र वर्षासु मासांश्च चतुरो वसेत् ॥"
एतदप्रवृत्तविषयम् । अतो वार्षिकाभ्यां मासाभ्यां नैकस्थानवासीति शङ्खोक्तेः ॥ * ॥ मात्स्ये ।
"शेते विष्णुः सदाषाढे भाद्रे च परिवर्त्तते ।
कार्त्तिके परिबुध्येत शुक्लपक्षे हरेर्दिने ॥"
भविष्यनारदीययोः ।
"मैत्राद्यपादे खपितीह विष्णु-
र्वैष्णवमध्ये परिवर्त्तते च ।
पौष्णावसाने च सुरारिहन्ता
प्रबुध्यते मासचतुष्टयेन ॥"
मैत्रमनुराधा । वैष्णवं श्रवणा । पौष्णं रेवती ॥*
भविष्ये ।
"निशि स्वापी दिवोत्थानं सन्ध्यायां परिवर्त्तनम् ।
अन्यत्र पादयोगेऽपि द्वादश्यामेव कारयेत् ॥"
अन्यत्र स्वापादिविहितरात्र्यादीतरकाले दशमी प्रतिपदीत्यर्थः ।
"किं तस्यैकादशपादेन दशम्यंशेन यो दिवा ।
पौष्णेनैवेह किन्तेन प्रतिपद्यथ यो निशि ॥"
दशम्यंशेन दशम्या अंशो यत्र पादे तेन यः पादो दिवा प्राप्तस्तेन वा किम् । अत्र दशमी प्रतिपदोर्ऐक्येनात् तद्वितरैकादश्यादिपक्षतिथिषु मैत्रादिनक्षत्रपादविशेषसामे द्वादशीं विनापि शयनादिरिति प्रतीयते ॥ * ॥ वचनान्तरम् ।
"रेवत्यन्तो यदा रात्रौ द्वादश्या च समायुतः ।
तदा विबुध्यते विष्णुर्दिनान्ते प्राप्य रेवतीम् ॥"
दिनान्ते त्रिधाविभक्तदिनचतुर्थभागे दिवोत्थानमित्यनुरोधात् । विष्णुधर्म्मोत्तरे ।
"विष्णुर्दिवा न स्वपिति न च रात्रौ प्रबुध्यते ।
द्वादश्याद्यन्तसंयोगे पादयोगो न कारयेत् ॥
अप्राप्ते द्वादशीयुक्ते उत्थानशयने हरेः ।
पादयोगेन कर्त्तव्ये नाधोरात्रं विचिन्तयेत् ॥"
वराहपुराणम् ।
"द्वादश्यां सन्धिसमये नक्षत्रागमसम्भवे ।
श्रा-भा वा-त्रिनक्षत्रेषु शयनावर्षणादिकम् ॥"*॥
तत्र द्वादश्यां निशादौ नक्षत्रमात्रयोगात् । द्वादश्यादयस्तामपि निशामर्के विद्धादशादेरेव पादविशेषयोगात् । तदभावे द्वादश्यां सन्ध्यायामेव शयनादिकम् । बोधस्तु द्वादश्यां रात्रौ

रेवत्यन्तपादयोगे दिनदलतृतीयभागे इति विशेषः ॥ अथ नैमित्तिकमाह वराहपुराणम् ।
"नमो नारायणायेत्युक्त्वा इमं मन्त्रमुदीरयेत् ।
पश्यन्तु मेघान्यपि मेघश्यामं
क्षुपगतं सिच्यमानं महीमिमाम् ।
निद्रां भगवान् गच्छातु लोकनाथ
वर्षास्विमं पश्यतु मेघवृन्दम् ॥
ज्ञात्वा च पश्येव च देवनाथ
मासाश्चतुरो वैकुण्ठस्य तु पश्य नाथ ! ॥"
तत्रैव ।
"सुप्ते त्वयि जगन्नाथे जगत् सुप्तं भवेदिदम् ।
विबुद्धे त्वयि बुध्येत जगत् सर्व्वं चराचरम् ॥"
इत्यनेन पूजयेत् ॥*॥ पार्श्वपरिवर्त्तने तु ।
"वासुदेव जगन्नाथ प्राप्तेयं द्वादशी तव ।
पार्श्वेन परिवर्त्तस्व सुखं स्वपिहि माधव ! ॥"
इति पठेत् ॥
"त्वयि सुप्ते जगन्नाथे जगत् सुप्तं भवेदिदम् ।
विबुद्धे त्वयि बुध्येत जगत् सर्व्वं चराचरम् ॥"
इत्यनेन पूजयेत् ॥
नैमित्तिककल्पतरौ ब्रह्मपुराणम् । कार्त्तिकशुक्लपञ्चमधिकृत्य ।
"उपवासः प्रकर्त्तव्य एकादश्यां प्रजागरः ।
द्वादश्यां वासुदेवस्य पूजितव्यः प्रयत्नतः ॥"*॥
उत्थानमन्त्रस्तु ।
"महेन्द्ररुद्रैरभिनूयमानो
भवान्मुनिर्वन्दितवन्दनीयः ।
प्राप्ता तवेयं किल कौमुदाख्या
जागृध्व जागृध्व च लोकनाथ ! ॥
मेघा गता निर्म्मलपूर्णचन्द्रः
प्रारब्धपुष्पाणि च लोकनाथ ! ।
अर्घं ददानीति च पुण्यहेतो-
र्जागृध्व जागृध्व च लोकनाथ ! ॥"
ततः ।
"उत्तिष्ठोत्तिष्ठ गोविन्द त्यज निद्रां जगत्पते ! ।
त्वया चोत्थीयमानेन उत्थितं भुवनत्रयम् ॥"
इति पठित्वा पूजयेत् ॥
इति तिथ्यादितत्त्वम् ॥

हरिश्वरः, पुं, (हरिः श्वरो यस्य ।) शिवः । इति केचित् ॥ त्रिपुरदहनार्थं हरिरेव यतस्तस्य शरीरमभूत्तस्मात् । यथा, पुष्पदन्तः ।
"रथः शौणो यन्ता श्रुतिरयमगेन्द्रो धनुरथो
रथाङ्गे चन्द्रार्कौ रथचरणपाणिः शर इति ।
दिधक्षोस्ते कोऽयं त्रिपुरतृणमाडम्बरविधि-
र्विधेयैः क्रीड़न्तो न खलु परतन्त्राः प्रभुधियः ॥"

हरिश्चन्द्रः, पुं, नृपविशेषः । स तु त्रेतायुगे सूर्य्यवंशीयः अष्टाविंशराजः । तत्पर्य्यायः । त्रिशङ्कुजः २ । इति हेमचन्द्रः ॥ अपि च । त्रिशङ्कोरभिषेकस्तमाक्षिप्तानाश्वस्तस्य हरितः । इति विष्णुपुराणे । ४ । ३ । १५ ॥

हरिश्चन्द्रपुरं, क्ली, (हरिश्चन्द्रस्य पुरम् ।) हरिश्चन्द्रराजनगरम् । तत्पर्य्यायः । श्रीभपुरम् २ । इति त्रिकाण्डशेषः ॥

हरिषः, पुं, हर्षः । इति केचित् ॥

हरिषेणः, पुं, जिनचक्रवर्त्तिविशेषः । तत्पर्य्यायः ।
हरिसुतः २ । यथा,—
हरिषेणो हरिसुतो जयो विजयनन्दनः ।
नवमश्चक्रवर्त्ती च सर्व्वे चेक्ष्वाकुवंशजाः ॥"
इति हेमचन्द्रः ॥

हरिसङ्कीर्त्तनं, क्ली, (हरेः सङ्कीर्त्तनम् ।) श्रीहरेर्नामोच्चारणम् । यथा,—
"दानं व्रतं तपो यज्ञः श्राद्धं वा पितृतर्पणम् ।
सकलं निष्फलं राजन् ! हरिसङ्कीर्त्तनं विना ॥"
इति कर्म्मलोचनम् ॥
अपि च ।
"नरके पच्यमानानां नराणां पापकर्म्मणाम् ।
मुक्तिः संजायते तस्मात् नामसंकीर्त्तनाद्धरेः ॥"
इति हरिभक्तिविलासधृतं इतिहासोत्तमवचनम् ॥

हरिसुतः, पुं, (हरेः सुत इव ।) हरिषेणराजा । इति हेमचन्द्रः ॥ हरेः पुत्रश्च ॥

हरिहयः, पुं, (हरिरेव हयो यस्य ।) इन्द्रः । इत्यमरः । १ । १ । ४६ ॥ (यथा, महाभारते । १ । ६७ । ५० ।
"द्वितीयस्तु ततस्तेषां श्रीमान् हरिहयोपमः ।
अपराजित इत्येव स बभूव नराधिपः ॥")
सूर्य्यः । कार्त्तिकेयः । गणेशः । इति केचित् ॥

हरिहरः, पुं, (हरिणा सह हरः ।) संयुक्तहरिहरमूर्त्तिः । यथा,—
पुलस्त्य उवाच ।
"विमुक्तपापा देवेशं वासुदेवमथाब्रुवन् ।
क्वासौ वद जगन्नाथ ! शम्भुस्तिष्ठति केशव ।
यं क्षीराद्यभिषेकेण स्नापयामो विधानतः ॥
अथोवाच सुरान् विष्णुरेष तिष्ठति शङ्करः ।
मद्देहे किन्न पश्यध्वं योगप्राप्यं प्रतिष्ठितम् ॥
तमूचुर्नैव पश्यामस्त्वत्तो वै त्रिपुरान्तकम् ।
सत्यं वद सुरश्रेष्ठ ! मद्देहात् क्व तिष्ठति ॥
ततोऽब्रवीन्महा स हरिः स्वकृतपङ्कजप्राप्तिनम् ।
दर्शयामास देवानां सुरारिलिङ्गमेश्वरम् ॥
ततः सुराः क्रमेणैव क्षीरादिभिरनन्तरम् ।
स्नापयाञ्चक्रिरे लिङ्गं प्राप्तनं ध्रुवमव्ययम् ॥
गोरोचनया चालिप्य चन्दनेन सुगन्धिना ।
विल्वपत्रैस्तुलसीभिः पूजयामासुरक्षमा ॥
पूजयित्वा गुरुं भक्त्या शिवेन्द्र परमौषधीः ।
जघ्राणप्रणतानाशु प्रणामं चक्रिरे ततः ॥
इत्थंवं चिन्तयन्तश्च देवा देवौ हराच्युतौ ।
कथं योगात्समापन्नौ संराधतमसात्मनः ॥
सुराणां चित्तितं ज्ञात्वा विश्वस्थितिरभूदिभुः ।
सर्व्वलक्षणसंयुक्तः सर्व्वायुधधरोऽव्ययः ॥
सार्द्धं त्रिनेत्रं कमलाधिकृष्णं
जटामहाभारधरिरोत्तमस्थितम् ।
हरिं हरञ्चैव नगेन्द्रभूषणं
पीताजिनाच्छन्नकटिप्रदेशकम् ॥
चक्रासिहस्तं धनुःशार्ङ्गपाणिं
पिनाकशूलाजगवान्वितञ्च ।

कन्दर्पखट्वाङ्गकपालघण्टा-
सशङ्खचक्राब्जधरं महर्षे ! ॥
दृष्ट्वैव देवा हरिशङ्करं तं
नमोऽस्तु ते सर्व्वगतायेति ॥"
इति वामनपुराणे ५६ अध्यायः ॥ * ॥

शिवविष्णोरभेदेनार्च्चकस्य रूपन्त्वेवम् । यथा,—
"निरामया नाम गणाः समायाता जगद्गुरो ।
सार्द्धद्विनेत्राः पद्माक्षाः श्रीवत्साङ्कितवक्षसः ॥
समायाताः खगारूढ़ा वृषभध्वजनीतयाः ।
महापाशुपता नाम शूलचक्रधरास्तथा ।
भैरवो विष्णुना सार्द्धमभेदेनार्च्चितो हि यैः ॥"
इति तत्रैव ६७ अध्यायः ॥
अन्यच्च ।
"अथवा विष्णुरूपेण पूजयेच्छङ्करं सदा ।
शङ्करं वामभागस्थं सर्व्वकाममवाप्नुयात् ॥"
इति देवीपुराणे १२ अध्यायः ॥

हरिहरक्षेत्रं, क्ली, (हरिहरस्य क्षेत्रम् ।) तीर्थविशेषः । स तु पाटलिपुत्रनगरस्यभागीरथ्युत्तरपारे वर्त्तते । तस्य नामान्तरं ददरिक्षेत्रं तदेशीया वदन्ति । तत्र गङ्गागण्डकीसङ्गमे कार्त्तिकपौर्णमास्यां स्नानार्थं जनसङ्घमेलनं भवति । तस्य नामकारणं यथा,—
"ततः स पञ्चरात्रेण स्थित्वा वै विधिपूर्व्वकम् ।
गोधनान्यतः कृत्वा हरिक्षेत्रं जगाम ह ।
हरिणाधिष्ठितं क्षेत्रं हरिक्षेत्रं ततः स्मृतम् ॥
सदा नन्दी शूलपाणिर्गोधनेन पुरस्कृतः ।
स्थितवांस्तद्दिनादेव ततः क्षेत्रं हरिहरात्मकम् ।
देवागमनतश्चैव देवाट इति संज्ञितम् ॥"
इति वाराहे भगवच्छास्त्रे सोमेश्वरादिलिङ्गमहिमाविमुक्तक्षेत्रक्षिप्तेश्वरादिमहिमानामाध्यायः ॥

हरिहरात्मकः, पुं, (हरिहरौ आत्मानौ यस्य । कप् ।) गरुड़ः । शिवबृषः । इति शब्दरत्नावली ॥
हरिहरक्षेत्रे, क्ली ॥ (हरिहरात्मरूपे, त्रि । यथा, हरिवंशे । १८१ । ३० ।
"अनादिमध्यनिधनमेतदक्षरमव्ययम् ।
तदेव ते प्रवक्ष्यामि रूपं हरिहरात्मकम् ॥")

हरितकी, स्त्री, (हरि पीतवर्णं फलमिता प्राप्ता इति हरीतना । ततः संज्ञायां कन् गौरादित्वात् ङीष् ।) स्वनामख्यातवृक्षः । हरड़ इति हिन्दी भाषा । तत्पर्य्यायः । अभया २ अव्यथा ३ पथ्या ४ वयस्था ५ पूतना ६ अन्दना ७ हैमवती ८ चेतकी ९ श्रेयसी १० शिवा ११ । इत्यमरः । २ । ४ । १५६ ॥ सुधा १२ कायस्था १३ कन्या १४ रसायनफला १५ । इति शब्दरत्नावली ॥ विजया १६ । इति धन्वन्तरिः ॥ जया १७ चेतनकी १८ रोहिणी १९ प्रथमा २० जीवप्रिया २१ जीवनिका २२ भिषग्वरा २३ पुस्तकान्तरे भिषक्प्रिया इति पाठः । जीवन्ती २४ प्राणदा २५ चोया २६ देवी २७ दिव्या २८ । अस्या गुणाः ।

"हरीतकी पञ्चरसा च रेचनी
कोष्ठामयघ्नी लवणेन वर्जिता।
रसायनी नेत्ररुजापहारिणी
त्वगामयघ्नी किल योगवाहिनी॥"

अन्यच्च।

"वीर्याग्निसिद्धिं मधुरा तदन्त-
स्त्वगागता: सा कटुरुष्णवीर्या।
मांसांगता स्वाम्लकषाययुक्ता
हरीतकी पञ्चरसा स्मृतेयम्॥

पथ्यामज्जा तु चक्षुष्यो वातपित्तहरो गुरु:॥"

तस्या भेदा यथा,—

"हरीतक्यष्टधोत्पन्ना सप्तभेदैरुदीरिता।
तस्या नामानि वर्णांश्च वक्ष्याम्यथ यथाक्रमात्॥
विजया रोहिणी चैव पूतना चाम्रताभया।
जीवन्ती चेतकी चेति नाम्ना सप्तविधा स्मृता॥
अलाबुवृत्ता विजया सुवृत्ता रोहिणी मता।
स्वल्पवक्त्र पूतना ज्ञेया स्थूलमांसाम्रता स्मृता॥
पञ्चसा चाभया ज्ञेया जीवन्ती स्वर्णवर्णभाक्।
त्रासा तु चेतकी विद्यादित्यासां रूपलक्षणम्॥
विन्ध्याद्रौ विजया हिमाचलभवा स्याच्चेतकी
पूतना
सिन्धौ स्यादथ रोहिणी तु विजया जाता
प्रतिस्थानके।
चम्पायामम्रताभया च जनिता देशे
सुराष्ट्राह्वये
जीवन्तीति हरीतकी निगदिता सा सप्तभेदा
बुधै:॥ * ॥

सर्व्वप्रयोगे विजयाथ रोहिणी
क्षतेषु लेपेषु च पूतनोदिता।
विरेचने स्यादम्रता गुणाधिका
जीवन्तिका स्यादिह जीर्णरोगजित्॥
स्याच्चेतकी सर्व्वरुजापहारिका,
नेत्रामयघ्नीमभयां वदन्ति ताम्।
इत्थं यथारोगमियं प्रयोजिता
ज्ञेया गुणाढ्या न कदाचिदन्यथा॥

चेतकी च धृता हस्ते यावत्तिष्ठति देहिन:।
तावद्विरिच्यते वेगात्तत्प्रभावान्न संशय:॥
सप्तानामपि जातीनां प्रधाना विजया स्मृता।
सुखप्रयोगसुलभा सर्व्वव्याधिषु शस्यते॥
चिन्तासु निमज्जति या सा ज्ञेया गुणवती
भिषग्वरै:।
यस्या यस्या भूयो निमज्जनं सा गुणाढ्या
स्यात्॥

हरते प्रसभं व्याधीन् भूयस्त्वकृति यदपु:।
हरीतकी तु सा प्रोक्ता तत्कृतिर्दीप्तवाचिका॥
हरीतकी तु हरणाया हरुस्तस्मै गरुत्यते।
शोषे नवज्वरे चीर्णे गुर्विण्यां नैव शस्यते॥"

इति राजनिर्घण्ट:॥ * ॥

अपि च।

"स्वस्थं प्रजापतिं स्वस्थं स्वश्विनौ वाक्यमब्रुवन्।
भगवन् हरितकी ज्ञाता तस्यास्तु कति जातय:॥
रसा: कति समाख्याता: कति चोपरसा: स्मृता:।
नामानि कृति चोक्तानि कस्य तासाञ्च लक्षणम्॥
के च वर्णा गुणा: के च का च कुत्र प्रशस्यते।
केन द्रव्येण संयुक्ता कांश्च रोगान् व्यपोहति॥
पृच्छाम्येतदृषया एष्टं भगवन्! वक्तुमर्हसि।
अश्विनोर्व्वचनं श्रुत्वा दृष्टो वचनमब्रवीत्॥
पपात बिन्दुर्मेदिन्यां शक्रस्य त्रिवतोऽम्बुतम्।
ततो दिव्यात् समुत्पन्ना सप्तजातिर्हरीतकी॥
हरीतक्यभया पथ्या कायस्था पूतनाम्रता।
हैमवत्यव्यथा चापि चेतकी श्रेयसी शिवा।
वयस्था विजया चापि जीवन्ती रोहिणीति च।
विजया रोहिणी चैव पूतना चाम्रताभया।
जीवन्ती चेतकी चेति पथ्याया: सप्तजातय:॥*॥
अलाबुवृत्ता विजया वृत्ता सा रोहिणी स्मृता।
पूतनास्थिमती ह्रस्वा कथिता मांसलाम्रता॥
पञ्चरेखाभया प्रोक्ता जीवन्ती स्वर्णवर्णिनी।
त्रिरेखा चेतकी ज्ञेया सप्तानामियमाकृति:॥*॥
विजया सर्व्वरोगेषु रोहिणी व्रणरोहिणी।
प्रलेपे पूतना योज्या शोधनार्थेऽम्रता हिता॥
अक्षिरोगेऽभया प्रस्था जीवन्ती सर्व्वरोग-
हृत्॥

चूर्णार्थं चेतकी प्रस्था यथा युक्तं प्रयोजयेत्॥*॥
चेतकी त्रिविधा प्रोक्ता श्वेता कृष्णा च वर्णत:।
षड्ङ्गुलायता शुक्ला कृष्णा चैकाङ्गुलायता॥
काचिदास्वादमात्रेण काचिद्गन्धेन भेदयेत्।
काचित् स्पर्शेन दृष्ट्या चतुर्धा भेदयेच्छिवा।
चेतकीपादपच्छायामुपसर्पन्ति ये नरा:।
भिद्यन्ते तत्क्षणादेव पशुपक्षिमृगादय:॥
चेतकी तु धृता हस्ते यावत्तिष्ठति देहिन:।
तावद्विरेचयेद्वेगैस्तु प्रभावान्नात्र संशय:॥
नृपादिसुकुमाराणां क्षीणानां भेषजद्विषाम्।
चेतकी परमा प्रस्था हिता सुखविरेचनी॥
सप्तानामपि जातीनां प्रधाना विजया स्मृता।
सुखप्रयोगा सुलभा सर्व्वरोगेषु प्रस्यते॥
हरीतकी पञ्चरसालवणा तुवरा परम्।
रूक्षोष्णा दीपनी मेध्या खादुपाका रसायनी॥
चक्षुष्या लघुरायुष्या दृष्टिणी चाग्निबोधिनी।
श्वासकासप्रमेहार्शःकुष्ठशोथोदरक्रिमीन्॥
वैस्वर्य्यग्रहणीरोगविबन्धविषमज्वरान्॥
गुल्माध्मानव्रणक्षर्दिहिक्काकण्डूहृदामयान्॥
व्रणस्थाने त्वचा इति क्वचित् पुस्तके पाठ:।
कामलां शूलमानाहं क्षीहानञ्च यकृत्तथा।
अश्मरीमूत्रकृच्छ्रञ्च रक्तपित्तञ्च नाशयेत्॥
स्वादुतिक्तकषायत्वात् पित्तघ्नी कफघ्नी सा।
कटुतिक्तकषायत्वाद्रक्तत्वाद्वातघ्निका च॥
पित्तघ्नी कटुकास्वत्वात् वातघ्नी कथं शिवा।
प्रभावाद्दोषघ्नत्वं सिद्धं यत्तत् प्रकाश्यते॥
हेतुभि: शिष्यबोधार्थं न पूर्वं क्रियतेऽधुना।
कर्म्मणश्च गुणै: साम्यं दृष्टमाश्रयभेदत:।
यतस्ततो नेति चिन्त्यं धात्रीलकुचयोर्यथा॥
पथ्याया मज्जनि स्वादु: स्नायावम्लो व्यव-
स्थित:।
वृन्ते तिक्तश्च कटुरस्थिस्थस्तुवरो रस:॥*॥

नवा स्निग्धा घना वृत्ता गुर्व्वी स्थिरा च
याम्भसि।
निमज्जेत् सा सुप्रशस्ता कथितातिगुणप्रदा॥
नवादिगुणयुक्तत्वं तथैकत्र हिकर्षता।
हरीतक्या: फले यत्र हयं तच्छ्रेष्ठमुच्यते॥
चर्चिता वर्द्धयत्यग्निं पेषिता मलशोधिनी।
स्निग्धा संग्राहिणी पथ्या भृष्टा प्रोक्ता त्रिदोष-
नुत्॥

उन्मीलिनी बुद्धिबलेन्द्रियाणां
निर्म्मूलिनी पित्तकफानिलानाम्।
विसूचिनी सूत्रशकृच्छ्लानां
हरीतकी स्यात् सह भोजनेन॥

अन्नपानकृतान् दोषान् वातपित्तकफोद्भवान्।
हरीतकी हरत्याशु सूक्तशोषरियोजिता॥
लवणेन कफं हन्ति पित्तं हन्ति सशर्करा।
घृतेन वातजान् रोगान् सर्व्वरोगान् गुडान्विता॥
सिन्धूत्थशर्करागुडीकृताममधुगुडै: क्रमात्।
वर्षादिष्वभया प्राश्या रसायनगुणैषिणा॥

अध्वातिखिन्नो बलवर्जितश्च
रूक्ष: कृशो लङ्घनकर्शितश्च।
पित्ताधिको गर्भवती च नारी
विसूक्तरक्तक्षयभयां न खादेत्॥"

इति भावप्रकाश:॥ * ॥

अन्यच्च।

"जीवन्ती रोहिणी चैव विजया चाभयाम्रता।
पूतना कालिका चेति सप्तजातिर्हरीतकी॥
सुवर्णवर्णा जीवन्ती रोहिणी कपिलद्युति:।
अलाबुवृत्ता विजया पञ्चांगा चाभया स्मृता॥"

पञ्चांगा पञ्चशिरा।

"स्थूलमांसाम्रता ज्ञेया पूतनास्थिमती मता।
चांगेरा च कालिकेयं सप्तजातिर्हरीतकी॥
स्नेहपानेषु सर्व्वेषु जीवन्ती तु प्रशस्यते।
रोहिणी व्रतरोगेषु विजया सर्व्वकर्म्मसु॥
पूतना लेपने ज्ञेया अम्रता तु विरेचने।
अभया नेत्ररोगेषु गन्धयुक्तौ तु कालिका॥
हरस्य भवने जाता हरिता च स्वभावत:।
हरते सर्व्वरोगांश्च तेन नाम्ना हरीतकी॥*॥
पीयूषं पिबतस्त्रिपिष्टपपतेर्यें विन्दवो निर्गता-
स्तेभ्योऽभूदभया दिवाकरकरश्रेणीव दोषापहा।
कालिन्दीव बलप्रमोदजननी गौरीव शूलिप्रिया
वह्निद्योतकरी हुताहुतिरिव श्रीरीव नाना-
रसा॥

पथ्या पञ्चरसायुष्या चक्षुष्यालवणा मता।
मेध्योष्णा दीपनी कुष्ठदोषशोथव्रणापहा॥"*॥

पञ्चरसस्य विवरणम्। त्वक् कटु:। मांसं अम्ल-
कषायम्। अस्थि तिक्तम्। तन्मध्ये मधुरंस्यु:॥०॥

तत्तद्गुणा:

"पथ्यामज्जा तु चक्षुष्यो वातपित्तहरो गुरु:॥"

इति राजवल्लभ:॥

हरीषा, स्त्री, मांसवृद्धिरोगभेद:। खाक इति
हिन्दी भाषा। यथा,—

"मांसप्राचे तु हृद्रोगे मांसरुक्षाणि निर्दिशेत्।

यानीयं प्रचुरं सर्पिः प्रभूतं क्षिप्तु चीरकम् ॥
हरिद्रामार्द्रकं शुण्ठी लवणं मरिचानि च ।
तण्डुलांश्चापि गोधूमान् जम्बीराणां रसान्
बहून् ॥
यथा सर्व्वाणि वस्तूनि सुपक्वानि भवन्ति हि ।
तथा पचेत निपुणो बहुमध्यस्थितिर्यथा ॥
एषा हरीषा बलकृद्वातपित्तापहा गुरुः ।
प्रीतोष्णा शुक्रदा स्निग्धा सरा सन्धान-
कारिणी ॥"
इति भावप्रकाशः ॥

हरेणुः, स्त्री, (ह्रियते इति । हृ + "हृञ्हृभ्या-मेणुः ।" उणा० २ । १ । इति एणुः ।) रेणु-कानामगन्धद्रव्यम् । इत्यमरः । २ । ४ । १२० ॥ कुलयोषित् । इति मेदिनी ॥

हरेणुः, पुं, (ह्रियते इति । हृ + एणुः ।) खलीलः । इति मेदिनी ॥ (गुणाद्योऽस्य खलीलशब्दे ज्ञातव्याः ॥)

हरेणुकः, पुं, (हरेणुरिव । कन् ।) कलायः । इति राजनिर्घण्टः ॥ (पर्य्यायोऽस्य यथा,—
"कलायो वर्त्तुलः प्रोक्तः खलीलश्च हरेणुकः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

हर्य्यः, [श्व] पुं, (हरति ध्वान्तमिति । हृ + ण्यत् ।) सूर्य्यः । यथा,—
"लोकसाक्षी त्रिलोकेशः कर्त्ता हर्त्ता तमिस्रहा ।
तपनस्तापनश्चैव शुचिः सप्ताश्ववाहनः ॥"
इति भाम्बपुराणे सूर्य्यस्तवः ॥
हरणकर्त्तरि, त्रि ॥ (यथा, भागवते । ४ । २४ । १५ ।
"अन्तर्धानो नभस्वान् हविर्धानमविन्दत ।
य इन्द्रमश्वहर्त्तारं विद्वानपि न जघ्निवान् ॥")

हर्म्म, [न्] क्ली, (हरति ग्लानिमिति । हृ + मनिन् ।) गृहम् । इति शब्दरत्नावली ॥

हर्म्मितं, त्रि, (हर्म्म जातमस्येति । इतच् ।) खिन्नम् । दग्धम् । इति मेदिनी ॥ गृम्भितम् । इति हर्म्मशब्दार्घदर्शनात् ॥

हर्म्मुटः, पुं, सूर्य्यः । कच्छपः । इति केचित् ॥

हर्म्म्य, क्ली, (हरति जनमनांसीति । हृ + अन्नादित्वात् यत् सुट् च ।) धनिनां वासः । इत्यमरः । २ । २ । ६ ॥ धनिनां वासयोग्यादीनां वासः काष्ठेष्टकादिना कृतं धवलगृहं हर्म्म्यादि-संज्ञकं स्यात् । हरति मनो हर्म्म्यं नाम्नीति कृत्यो म्यः इति भरतः । अन्यच्च । हरति मनो हर्म्म्यं अन्नादित्वात् यत् सुट् च हर्म्म्यम् । आदिशब्देन स्फिक्काट्टालिकादेर्ग्रहणम् । धनिनां राजव्यतिरिक्तानां वासो गृहम् । एकं काष्ठेष्टकादिकृतस्य धनिगृहस्य । इत्यमर-टीकायां रायमुकुटः ॥ (यथा,—
"हर्म्म्याग्रमेदिभूमिनैमसि च शयनं शीकरोष्ण-
प्रदोषे ॥"
इति वैद्यकपथ्यापथ्यविधौ वर्षोपचारे ॥)

हर्ष, हर्षे । गतौ । इति कविकल्पद्रुमः ॥ (भ्वा० पर०-हर्षे सक०-सेट् ।) रेफोपधः । हर्षति । हर्षी हर्षितः । इति दुर्गादासः ॥

हर्य्यः, पुं, (हरि पिङ्गलं अर्चि यस्य । यत् ।) सिंहः । इत्यमरः । २ । ५ । १ ॥ कुबेरः । इति जटाधरः ॥ (पिङ्गलनेत्रे, त्रि । यथा, महाभारते । ३ । ३०७ । ५ ।
"तथैवावद्धकवचं कनकोज्ज्वलकुण्डलम् ।
हर्य्यक्षं हयभस्कन्धं यथास्य पितरं तथा ॥")

हर्य्यतः, पुं, (हर्य्यति गच्छतीति । हर्य + "भूरुट-हृशियजीति ।" उणा० ६ । ११० । इति अतच् ।) घोटकः । इति सिद्धान्तकौमुद्या-मुणादिवृत्तिः ॥ अश्वमेधीयाश्वः । इत्युणादि-कोषः ॥

हर्य्यश्वः, पुं, (हरिनामा हरिवर्णो वा अश्वो यस्य ।) इन्द्रः । इति केचित् ॥ (यथा, भाग-वते । ८ । ११ । २१ ।
"हरीन् दशशतान्याजौ हर्य्यश्वस्य बलः शरैः ।
तावद्भिरर्दयामास युगपल्लघुहस्तवान् ॥"
हरिनामा हरिवर्णो वा अश्वः इति कर्म्मधारयेण इन्द्राश्वः । यथा, महाभारते । ३ । २८६ । १३ ।
"अयं हर्य्यश्वयुग् नैचो मघोनः स्यन्दनोत्तमः ।
अनेन शक्रः काक्षस्थः समरे दैत्यदानवान् ।
शतशः पुरुषव्याघ्र ! रथोदारेण जघ्निवान् ॥")

हर्षः, पुं, (हृष तुष्टौ + घञ् ।) इष्टावगमजन्य-सुखम् । इति महाभारते मोक्षधर्म्मः ॥ आह्लादः । तत्पर्य्यायः । मुत् २ प्रीतिः ३ प्रमदः ४ प्रमोदः ५ आमोदः ६ सम्मदः ७ आनन्दथुः ८ आनन्दः ९ धर्म्मे १० शातम् ११ सुखम् १२ । इत्यमरः । १ । ४ । २४ ॥ मुदा १३ मुदिता १४ आनन्दिः १५ नन्दिः १६ शातम् १७ सौख्यम् १८ । केचित्तु मुदादिसप्तकं प्रीतौ आनन्दथ्वादिपञ्चकं सुखे । प्रीतिश्च सुखजो विकारः इत्याहुः । इति तट्टीकायां भरतः ॥ तथा च ।
"मुत् प्रीतिः प्रमदामोदसम्मोदोदसम्मदाः ।
प्रमोदो हर्ष इत्येव हर्षपर्य्याय ईरितः ॥
आनन्दो नन्दथुर्नन्दः सुखमानन्दथुर्मुदा ।
सौख्यं धर्म्मोपजोषः स्यादानन्दं चोपमित्यपि ॥
मुदादिजोषपर्य्यन्तमेकपर्य्याय इत्यपि ॥"
इति शब्दरत्नावली ॥ ॥
हर्षस्य पुत्रः कन्दर्पः । यथा;—
पुलस्त्य उवाच ।
"कन्दर्पो हर्षतनयो योऽसौ कामो निगद्यते ।
स शङ्करेण संदग्धो ज्ञानज्वलमुपागतः ॥"
इति वामने ५ अध्यायः ॥
(रोमाणः । यथा । "हृष्यते हर्षयुक्तो भवतः हर्षश्च रोमाञ्चप्रायः ।" इति कविनिचयस्य धातव्याधिव्याख्याने विजयरक्षितः ।)

हर्षकः, पुं, (हर्षयतीति । हृष् + णिच् + ण्वुल् ।) पर्व्वतविशेषः । इति शब्दमाला ॥ हर्षकारके, त्रि । इति शब्दरत्नावली ॥

हर्षं, क्ली, (हृष + क्विप् ।) हर्षः । इति धरणिः ॥ (यथा, महाभारते । ७ । १४४ । ११५ ।
"तस्करः सिन्धुराजश्च शरैर्दशभिरार्दयत् ।
दुर्हृदामप्रहर्षाय सुहृदां हर्षणाय च ॥")

हर्षणः, पुं, (हर्षयतीति । हृष् + णिच् + ल्युः ।) विष्कम्भादिसप्तविंशतियोगान्तर्गतचतुर्दशयोगः तत्र जातफलम् ।
"सुचारुगात्रं स्फुटपद्मनेत्रं
शास्त्रप्रयत्ने विनयोपपन्नः ।
प्रसूतिकाले यदि हर्षणः स्या-
दमर्षणो नैव जनः कदाचित् ॥"
इति कोष्ठीप्रदीपः ॥
चक्षूरोगविशेषः । आह्लविशेषः । आह्लदेवः । हर्षकारके, त्रि । इति शब्दरत्नावली ॥ (यथा, महाभारते । ७ । ३१ । ७६ ।
"एवं सुकलिलं युद्धमासीत् क्रव्यादहर्षणम् ।
महद्भिस्त्रैरभीतानां यमराष्ट्रविवर्द्धनम् ॥")

हर्षमाणः, त्रि, (हर्ष + ताच्छील्ये शानच् ।) हर्षयुक्तः । तत्पर्य्यायः । विकुर्व्वाणः २ प्रमनाः ३ हृष्टमानसः ४ । इत्यमरः । ३ । १ । ७ ॥ प्रीत-मानसः ५ । इति शब्दरत्नावली ॥

हर्षयितृः, पुं, (हर्षयतीति । हृष तुष्टौ + णिच् + "स्नात्रिहृषिपुषीति ।" उणा० ३ । २६ । इति यौगिकतृच् ।) पुत्रः । स्वर्गे, क्ली । इति मेदिनी ॥ हर्षणशीले, त्रि ॥

हर्षस्वनः, पुं, (हर्षसूचकः स्वनः ।) आनन्द-ध्वनिः । तत्पर्य्यायः । किलकिला २ । इति त्रिकाण्डशेषः ॥

हर्षिणी, स्त्री, (हर्षयतीति । हृष् + णिच् + णिनिः । ङीप् ।) विजया । इति राजनिर्घण्टः ॥

हर्षितः, त्रि, आह्लादितः । हर्षोऽस्य जात इत्य-नेन इतप्रत्ययेन निष्पन्नः ॥

हर्षुलः, पुं, (हृष तुष्टौ + "हृषेरुलच् ।) उणा० १ । ६८ । इति उलच् ।) नगः । कासुकः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ हर्षण-शीले, त्रि ॥ (यथा, कथासरित्सागरे । १२२ २६ ।
"प्राभृतं प्रभुतेर्हृष्मे सिद्धमद्येति हर्षुलः ॥")

हल, भ्रु विलेखे । इति कविकल्पद्रुमः ॥ (भ्वा० पर०-सक०-सेट् ।) भ्रु, हालः हलः । हलति भूमिं कृषकः । इति दुर्गादासः ॥

हलं, क्ली, (हलति भूमिमिति । हल + अच् ।) लाङ्गलम् । इत्यमरः । २ । ९ । १३ ॥ तत्पर्य्यायः । "हलन्तु लाङ्गलं गोदारणश्च सीरकुन्तली ।"
इति जटाधरः ॥
तच्च गोयोजने दीर्घादीर्घौ । हारीतः ।
"अष्टौगवं धर्म्महलं षड्गवं जीवितार्थिनाम् ।
चतुर्गवं वृत्तिसानां द्विगवं ब्रह्मघातिनाम् ॥"
इति तृतीययामार्द्धकृत्ये आह्निकतत्त्वम् ॥
लप्रवाहदिनादि यथा । दीपिकायाम् ।
"पूर्व्वाश्विमियोन्यैकृत्तिपित्र्याग्नेयभेषु
रिक्ताष्टमीविगतचन्द्रतिथिं विहाय ।
हस्तालिमोसमृगहस्तेषु निष्कलंकीवारे
शस्तेन्दुयोगकरणेषु हलप्रवाहः ॥
हलप्रवाहप्रदेशवपनस्य विधिः स्मृतः ।
चित्रायाश्च शुभे केन्द्रे स्थिरर्क्षमनुकूलये ॥"

भीमपराक्रमे ।
"वामे क्षयं बलीवर्दं दक्षिणे लोहितं न्यसेत् ।
उत्तराभिमुखो भूत्वा कर्षकः क्षपिमारभेत् ॥
हले तु योजिते यत्र क्षेत्रे शस्यं करोति गौः ।
तत्र स्यादिगुणं शस्यमवश्यं गर्गभाषितम् ॥"
शल्यचिन्तामणौ बलभद्रः ।
"सुखदा प्रतिपच्चैव द्वितीया कार्यसाधिनी ।
धारोच्चदा तृतीया च चतुर्थी कीटकृत् सदा ॥
पञ्चमी श्रीप्रदा नूनं षष्ठी च कलहप्रिया ।
सप्तमी क्षयदा भोग्या हन्ति हन्ति तथाष्टमी ॥
नवमी शस्यनाशाय दशमी भूतिदा सदा ।
एकादशी तथा कुर्याद्धनं धान्यं मनोरथम् ॥
द्वादशी प्राणसन्देहा सर्वसिद्धा त्रयोदशी ।
चतुर्दशी प्रतिं हन्ति पक्षदग्धैव निष्फला ॥
अमावस्याष्टमीषष्ठीरिक्ताश्च परिवर्जयेत् ।
सौरिभौमदिने चैव क्षय्यारम्भे धनक्षयः ॥
प्राजेशशक्रविष्णुतिथिषु सिद्धकरोत्तरेषु च ।
अश्विनीवातपौष्णेषु मूलादितीन्द्रभे तथा ॥
वारे भानुगुरुशुक्रे च क्षीवे प्रीतकरे तथा ।
लग्ने स्त्रीगोमीनयुग्मे क्षय्यारम्भं शुभं विदुः ॥
ऐशान्यां पुण्यनैवेद्यैः क्षेत्रपालञ्च पूजयेत् ।
सालङ्कारो हलधरः सगन्धिश्च पूजितं हलम् ॥
दध्याज्यमधुभिः श्रेष्ठं बलायच प्रवेपितम् ।
कर्षं प्रारभयेत् प्राज्ञो नूतनेन हलेन च ॥
हस्ताश्वित्यश्चचन्द्रेषु ब्रह्मेन्द्रविष्णुवारयोः ।
वायवेन्द्राग्निभे चैव रोहिण्यासूत्तरासु च ॥
वारे क्षीवज्ञशुक्रे च सौम्ये दिनकरे तथा ।
युग्मे युवतिगोमीने शस्यं स्याद्द्विगुणोपमम् ॥"
राजमार्तण्डे ।
"प्राजेशाश्वयमोत्तरादितिमघामार्तण्डतिष्या-
श्विनी-
पौष्णाश्लेषमरीचयः श्रुतभिषा स्वाती विशाखा
तथा ।
सौम्यार्केन्द्वसितेऽह्नि नन्दतिथिके वारे स्थिरक्षोदये
शस्यानां वपने भवन्ति सफले शस्ये तिथौ
रोपये ॥"
हेमाद्रौ ।
"शुक्लपक्षसमुद्भूताः क्षेत्र्याः सम्यक्करा-
शुभाः ।
सुधार्किभूमिपुत्राश्च न भवन्ति फलप्रदाः ॥
हन्ति मेषः पशून् सर्वान् स्वभावेनाथ वृश्चिकः ।
कर्कटेन भवेत् गौख्यं तुलायां न प्ररोहति ॥
केशरी क्षयकारी स्यात् मार्गशीर्षवृषौ मधु ।
मकरे चैव कुम्भे च भयमेव विनिर्दिशेत् ॥
मीनस्थितसमर्थेषु क्षस्यं सम्यग्भवेत् सदा ॥
क्षस्ये चन्दनकारे च शुचिः शुक्लेन वाससा ।
स्नात्वा गन्धैश्च पुष्पैश्च पूजयित्वा विधानतः ॥
एकोद्दिष्टं महत्तुल्यं पूजयित्वा प्रजापतिम् ।
क्षपिं प्रदक्षिणीकृत्य दीक्षते भूरिदक्षिणा ॥
कर्षो वर्षो विलोकार्थो वपनीतेर्हलेन वा ।
तस्मात्तार्थं तयोर्लिङ्गात् कालार्थं कर्षकैः पृथोः ।
कर्षकाभिमुखो भूत्वा चीरेणार्थी प्रदापयेत् ।
ततः शुभकरः श्रीमान् क्षपिकर्म समाचरेत् ॥
वर्जयेत् भग्नशृङ्गञ्च क्षुरभङ्गञ्च वर्जयेत् ।
विकलं छिन्नलाङ्गूलं कपिलं वृषभं तथा ॥
एतत्प्रकारगं कार्यं नीरुग्भिः क्षपिकर्मकैः ।
हलादिभिर्हलैः क्षेममङ्गैर्न शुभं भवेत् ॥
वृषभा यदि सुस्थन्ति तस्य विघ्नप्रदा भवेत् ॥"
क्षपिरिति शेषः ।
"तस्मात् सर्वप्रयत्नेन निर्विघ्नं कारयेत् सदा ॥
एका जयकरी रेखा तृतीया चार्थदायिका ।
पञ्चमी या भवेद्रेखा वसुशस्यफला हि सा ॥
अत ऊर्द्धं न कर्त्तव्यं महादोषस्ततो भवेत् ॥
संपूज्याग्निं द्विजं देवं कुर्याद्धलप्रवर्त्तनम् ।
हैमनि वृष्टशालायं छिन्नरेखां न कारयेत् ॥
सर्त्तव्या वसवश्चेन्द्रः पृथू रामः सचक्रमाः ।
पराशरो बलभद्रः सर्वविघ्नोपशान्तये ॥"
हले प्रवाह्यमाणे तु कूर्म्म उत्पद्यते यदि ।
गृहिणी म्रियते तस्य ततोऽर्थेश्च भयं भवेत् ॥
लाङ्गलं भिद्यते चापि प्रभुस्तत्र विनश्यति ।
ईषाभङ्गो वदा कर्तुः संशयो जीवितस्य च ॥
सूतनाशो युगभङ्गे समीनं म्रियते सुतः ।"
समीनं योक्त्रबन्धनकाष्ठदये ।
"योक्त्रच्छेदे तु यात्रङ्गः शस्यहानिश्च जायते ।
हले प्रवाह्यमाणे तु गौरेकः प्रपतेद्यदि ।
प्रपतेद्युक्तमात्रस्तु वन्धनं च प्रपद्यते ।
ज्वरातिसाररोगेण क्षपिभङ्गं विनिर्दिशेत् ॥
प्रवहेत् युक्तमात्रस्तु ततो गौः म्रियते यदि ।
वत्सालोढ़ेन नर्हन्ति ततः शस्यं चतुर्गुणम् ॥"
हैमवारिविलिप्तस्य बीजस्योन्नयतः शुचिः ।
इन्द्रं चित्ते विधायाथ स्वयं तृप्तिञ्च वपेत् ॥
ज्ञात्वा चान्योन्यप्रीत्याहं कर्षको हृष्टमानसः ।
प्राङ्मुखः कलसं गृह्य इमं मन्त्रमुदीरयेत् ॥
त्वं वै वसुन्धरे सौते बहुपुण्यफलप्रदे ।
नमस्ते मे शुभं नित्यं क्षपिं मेधां शुभे कुरु ॥
रोदन्तु सर्वशस्यानि काले देवः प्रवर्षतु ।
कर्षकास्तु भवन्त्वद्या धान्येन च धनेन च
स्वाहा ॥"
क्षयरत्नाकरे ब्रह्मपुराणम् ।
"चैत्रे च क्षयपक्षस्यां काश्मीरा च रजस्वला ।
नित्यं भवति तस्यां तां त्वा शैलमयीं स्त्रियम् ॥
अभ्यङ्गवस्त्रनैवेद्यैः पूजयेच्च दिनत्रयम् ।
पुष्पालङ्कारधूपैश्च गौरसं वर्द्धयन्ति च ॥"
काश्मीरा एषा ।
"वपस्याश्च ततः स्नाप्य तामिरेव गृहे गृहे ।
सुवासाभिः प्रहृष्टाभिर्वीक्षणीभिरेव च ॥
अनन्तरं दिवैः स्नाप्या सर्वौषधियुतैर्जलैः ।
गन्धैर्वासैलता रक्तैः फलैः सिद्धार्थकैस्तथा ॥
स्नापयित्वा च तां देवीं गन्धैर्माल्यैश्च पूजयेत् ।
तस्मिन्देवितशिरश्च प्राशितव्यं गृहे गृहे ॥
अतः परन्तुस्नाता गर्भं गृह्णाति मेदिनी ।"
तथा ।
"ब्रह्मा विष्णुश्च रुद्रश्च काश्यपः सुरभी तथा ।
दुग्धः प्रवेता पर्जन्यः सेवश्चन्द्रार्कवत्सपः ॥
बलदेवो हलं भूमिर्वृषभो रामलक्ष्मणौ ।
रज्जोपौ जानकी सीता युगं गगनमेव च ॥
सीता लाङ्गलपद्धतिः । युगं युगकाष्ठम् ।
"एते द्वाविंशतिः प्रोक्ताः प्रजानां पतयः शुभाः ।
गोमङ्गले तु संपूज्याः क्षय्यारम्भे महोत्सवे ॥
सर्वैः पुष्पैश्च धूपैश्च माल्यैः रत्नैः पृथक् पृथक् ।
हलेन वाहयेद्भूमिं स्वयं स्नातः सलङ्कृतः ॥"
तथा ।
"उप्ता बीजन्तु तत्रैव भोक्तव्यं वान्यवैः सह ॥"
बीजवपनं प्राजापत्यतीर्थेन । यथा, हारीतः ।
कनिष्ठायाः पश्चात् प्राजापत्यमावपनं होम-
तर्पणे प्राजापत्येन कुर्यात् । इति । होमतर्पणे
लाजहोमसमकादितर्पणे । राजमार्तण्डे ।
"नित्यं दशहले लक्ष्मीर्नित्यं पञ्चहले धनम् ।
नित्यञ्च त्रिहले भक्तं नित्यमेकहले क्षयम् ॥"
क्षपिपराशरः ।
"वैशाखे वपनं श्रेष्ठं मध्यमं रोहिणीरवौ ।
अतः परन्निन्दितं न जातु श्रावणे शुभम् ॥"
ज्योतिषे ।
"पूर्वभाद्रपदा मूलं रोहिण्युत्तरफल्गुनी ।
विशाखा श्रुतभिषा चाथ धान्यानां रोपणे
वराः ॥
सदोम्नां रजनीं नीलीं पुत्रविच्चैर्विवुध्यते ।
स्वयं जाते पुनस्ते हे पालयन्नेव दुष्यति ॥
आरामे गृहमध्ये वा मोहात् सर्वत्रमावपन् ।
पराभवं रिपोर्याति सबान्धवधनक्षयम् ॥
निम्बा नीली पलाशश्च चिञ्चा श्वेताऽपराजिता
कोविदारश्च सर्वत्र सर्वं निघ्नन्ति मङ्गलम् ॥"
निम्बा हरिद्रा । कोविदारो रक्तकाञ्चनः ।
"हैमाम्भसा हृत्तनयं स्नातो मन्त्रेण रोपयेत्
वसुधेति सुधीरेति पुण्यदेति धरेति च ।
नमस्ते सतते नित्यं हुमोऽयं वर्द्धतामिति ॥
लिखित्वालक्तकेनापि मन्त्रं शस्येषु वन्धयेत् ।
न व्याधिकीटहिंसाभ्यां भयं तत्र भवेत् क्वचित् ॥
सिद्धिः प्रवलतरङ्गतरलितद्रुतरसमीरण
वनोद्देशे श्रीमद्रामभद्रपादाः कुशलिनः समुद्र
तटे नानाश्रुतसच्चवागराणां मध्ये खरनखर
प्रभोर्हलाङ्गूलं पवनसुतं वायुवेगं परचक्रप्र
श्रीमद्गुप्तमन्त्रमाम्नायन्ति [illegible]
वाताभोगो गान्धीरुती प्राङ्करमुखी धूर्त
गृहारम्भस्था क्षयराज्ञता कर्कृष्णा एला वा
गरुड़ा इमङ्का मधिषादिरोगं खण्डयत यत्र
मपि विलम्बं मा चरत यदि विलम्बं चारय
तदा शस्यान् श्रुतस्थं कारयामीति । ॐ श्रीं
श्रीं श्रीं श्रीरामाय नमः । इति शस्येषु बन्ध
येत् ॥" धान्यच्छेदनम् । दीपिकायाम् ।
"धान्यानामपहृद्धिवनानन्तरीयशुक्र-
त्रिचोत्तरोद्भुत क्रूरार्कजवारवर्जम् ।
शस्त्रेन्द्रयोगकरणेषु तिथौ विरिक्ते
धान्यच्छिदिः स्थिरनरस्वशोभयेत्र ॥"
बलभद्रः ।
"रेवतीहस्तशक्रेषु अश्वे गोमाश्वयोः ।

पितृदेवे तथा सौम्ये धान्यच्छेदं न्यगोदये ॥"
अथ धान्यच्छेदनप्रकारः ।
"यवचौ माषमुद्गौ च यवधान्ये सकाण्डके ।
छिन्द्यात्तिलञ्च निष्पत्रमेसतं पाराशरं मतम् ॥"
पराशरः ।
"न सृष्टिग्रहणं कुर्य्यात् कदाचिद्दुष्टपौधयोः ।
देशानां लवनं कुर्य्यात् सार्द्धसृष्टिद्वयं शुचिः ॥
पौष्णे पुष्ये शुभाहे वा पूजयित्वेष्टदेवताम् ।
शस्त्रविघ्नप्रशान्त्यर्थं क्षेत्रे वाहकभोजनम् ॥"
बौधायनः ।
"दृषाश्वगजधान्यानां गवां चैव रजः शुभम् ।
यथाशस्त्रं समूहिन्याः स्वाभाविखरवायसाम् ॥"
समूहिनी संमार्ज्जनी ॥ * ॥ इत्यचिन्तामणौ मेधिरोपणम् ।
वटश्च सप्तपर्णश्च गम्भारी शालली तथा ।
औडुम्बरी तथा धात्री या चान्या क्षीरधारिणी ।
स्त्रीनाम्नी कर्षकैर्नित्यं मेधिः कार्य्या फलप्रदा ॥"
योजनत्रयदिनादि तच्छब्दे द्रष्टव्यम् ॥ * ॥ * ॥
अथ प्रयोगः ।
पौर्णमास्यन्तचैत्रीयकृष्णपक्षस्थां पृथ्वीं रजस्वलां दिनत्रयमेकस्मिन् पर्व्वताकारे उच्चप्रदेशे सधवाः स्त्रियः प्रपूजयेयुरहन्यां तां स्नापयित्वा नाः पूजयेयुः । ततः शुभदिने बीजवपनदिने वा सर्व्वौषधिगन्धबीजरत्नफलश्वेतसर्षपैः पृथ्वीं स्नापयित्वा गन्धादिभिः पूजयेत् । नैवेद्यप्रभृतयश्च पक्षाङ्गोक्तायम् ॥* अथ हलप्रवाहदिने बीजवपनदिने च स्नानादिरात्रान्तो गत्वा क्षेत्रे कृत्वा जलेनापूर्य्य तत्र प्रजापतिं सूर्य्यादिनवग्रहान् पृथ्वीञ्च पूजयेत् ।
"हिरण्यगर्भे वसुधे ग्रहयस्योपरिशायिनि ।
यस्माद्यं तव पृष्ठे गृहाणार्घ्यं धरित्रि मे ॥"
इति मन्त्रेण क्षोरेणार्घ्यं दद्यात् । ऐशान्यां पुष्पनैवेद्यैः प्रणवादिनमोऽन्तेन ब्रह्मणे विष्णवे । नमस्ते बहुरूपाय विष्णवे परमात्मने स्वाहा ॥ इत्यनेन त्रिः पूजयेत् । रुद्राय कश्यपाय सुरभ्यै इन्द्राय । इदमर्घ्यमन्वस्तु ।
"शक्रः सुरपतिः श्रेष्ठो वज्रहस्तो महाबलः ।
गृहाणार्घ्यमिमं देव तुभ्यमिन्द्राय वै नमः ॥"
प्रचेतसे पक्षेत्यादि शेषाय चन्द्राय चर्काय वसुवे बलदेवाय हलायभूमये हरयाय रामाय सस्याय लाङ्गले सीतायै युगाय गगनाय इति द्वात्रिंशन्नामभिः पूजयेत् क्षेत्रपालमन्त्रैः द्विरपि पूजयेत् । अग्निं प्रदक्षिणीकृत्य ब्राह्मणाय दक्षिणां दद्यात् । आम्रपल्लवौदनदधीनि गर्त्ते निःक्षिप्य गतिकामिः पूरयेत् । कृष्णौ द्वौ नवनीतेर्शेवेन वा सुवर्णपात्रेणोत्क्षिप्यते । हलप्रवाहकान् गन्धादिना भूषयित्वा हलं माल्यादिभिः पूजयित्वा दधिघृतमधुभिः फालाग्रं प्रक्षिप्य त्रिवा फालाग्रं घर्षयित्वा कर्षयेत् । यस्मिन्नृतुपक्षमेऽपराह्णरक्षभवात् स्मरेत् । एका तिस्रः पञ्च वा रेखा हलेन कार्य्याः । भग्नशृङ्गखुरलाङ्गूलाः कपिलाश्च वृषा न योक्तव्याः । हलप्रवाहकाश्च समर्थाः कर्त्तव्याः । हलानि नवानि दृढानि कर्त्तव्यानि । वृषभयुहादिकं न शुभदं वृषभाणां नर्द्दनेन चतुर्गुणं शुक्लं सूत्रपुरीषोत्सर्गे तथा ॥ * ॥ बीजवपने त्विदमधिकम् । सुवर्णजलसंयुक्तं बीजसृष्टिद्वयं इन्द्रं ध्यायन् स्वयं प्राजापत्येन तीर्थेन वपेत् । उभयत्रैव प्राङ्मुखः जलपूर्णं कलसं गृहीत्वा ।
"त्वं वै वसुन्धरे सीते बहुपुष्पफलप्रदे ।
नमस्ते मे शुभं नित्यं कृषिं मेधां शुभे कुरु ॥
रोहन्तु सर्व्वशस्यानि काले देवः प्रवर्षतु ।
कर्षकास्तु भवन्त्वाढ्या धान्येन च धनेन च
स्वाहेति प्रार्थयेदिति ॥"
इति ज्योतिस्तत्त्वम् ॥*॥
अपि च ।
"अमावस्यां पितृश्राद्धे अम्बुवाचीदिने तथा ।
लाङ्गलेन क्षतं क्षेत्रं पृथिवी कम्पते सदा ॥"
इति कर्म्मलोचनम् ॥*॥
स्मृतिसागरसारे गोभिलः ।
"हलैर्वा प्रकटैर्व्वापि वाहयेत् यो वृषं स्वयम् ।
प्राजापत्यद्वयं कुर्य्यात् द्विगुणं योषितां गवाम् ॥
वृषभन्तु सुतत्पृष्टं कपिलां वापि कामतः ।
योजयित्वा हले कुर्य्यात् व्रतं चान्द्रायणद्वयम् ॥"
इति तिथ्यादितत्त्वम् ॥
हलद्री, स्त्री, हरिद्रा । इति राजनिर्घण्टः ॥
हलधरः, पुं, (धरतीति । धृ+अच् । हलस्य धरः ।) बलदेवः । यथा,—
"नीलाम्बरो हलधरो हलभृद्धालभृत् बलः ॥"
इति शब्दरत्नावली ॥
(यथा च महाभारते । १ । २२० । ७ ।
"ततो हलधरः श्रीमो रेवतीसहितः प्रभुः ।
अनुगम्यमानो गन्धर्व्वैरचरत्तत्र भारत ! ॥")
हालिकः । यथा, ज्योतिस्तत्त्वे ।
"सालङ्कारो हलधरः सगुणश्च पूजितं हलम् ॥"
हलभूतिः, स्त्री, (हलसाध्या भूतिः ।) कृषिकर्म्म । यथा,—
"अथ सेवा श्वतृत्तिः स्यात् स्त्रियां कृषिश्च कर्षणम् ।
कर्षोऽस्तस्य प्रकृतं हलभूतिर्महाधनम् ॥"
इति शब्दरत्नावली ॥
हलभृत्, पुं, (हलं बिभर्त्तीति । भृ+क्विप् । हलस्य भृदिति वा ।) बलदेवः । इति त्रिकाण्डशेषः ॥ (यथा, मेघदूते । ६१ ।
"श्यामन्यस्तं सति हलभृतो मेचकं वाससीव ॥")
हलभृतिः, पु, (हलेन भृतिर्भरणमस्य ।) मुनिविशेषः । तत्पर्य्यायः । उपवर्षः २ क्षतकोटिः ३ याचितः ४ । इति त्रिकाण्डशेषः ॥ (हलस्य हलेन वा भृतिः ।) कृषिकर्म्म च ॥
हलराजं, क्ली, वाङ्मुखम् । इति राजनिर्घण्टः ॥
हला, य, नाम्नी सखी प्रत्याह्वानम् । इत्यमरः । १ । ७ । १५ ॥
हला, स्त्री, सखी । इति जटाधरः ॥ मद्यम् । पृथिवी । जलम् । इत्यनेकार्थकोषः ॥
हलायुधः, पुं, (हलमायुधं यस्य ।) बलदेवः । इत्यमरः । १ । १ । २४ ॥ (यथा, महाभारते । १ । २२१ । २३ ।
"ततस्ते तदचः श्रुत्वा आत्मरूपं हलायुधात् ।
तूष्णीभूतास्ततः सर्व्वे साधु साध्विति चाब्रुवन् ॥")
हलाहः, पुं, चित्रितास्यः । इति हेमचन्द्रः ॥
हलाहलः, पुं, (हलमिव या समन्तात् सर्व्वाङ्गेषु हलति कर्षतीति । या+हल+अच् ।) विषभेदः । यथा,—
"समौ कक्षुकनिर्म्मोकौ चुक्रस्तु गरलं विषम् ।
पुंसि क्लीवे च काकोलकालकूटहलाहलाः ॥"
इत्यमरः । १ । ८ । १० ॥
हलमिव या समन्तात् हलति विलिखति हलाहलः । हल ज विलेखे अच् स्वार्थे णौ हालाहलश्च । निपातनात् लत्वेपि हाहलश्च । "हालाहलं हालहलं हाहलश्च हलाहलम् ॥"
इति रुद्रः ॥
अते काकोलादयश्चयः पुंसि क्लीवे चेत्यन्वयः । केचित्तु चुक्रभेदा इति पुंस्त्वे वक्ष्यमाणत्वात् पुंसि क्लीवे चेत्यस्य विषमित्यनेन सम्बन्धः । इत्याहुः । तन्नातिहृद्यम् ।
"काकोलसमतेजः स्यात् कृष्णच्छवि महाविषम् ।"
इति वैद्यकम् ।
"तत् कालकूटं विषमुग्रतेजः
कण्ठे धृतं पर्व्वतराजकन्यया ॥"
इति व्यासः ॥
हालाहलं विषमिव प्रगुणं तदेव इति वामनः ॥
"मधु तिष्ठति वाचि योषितां हृदये हलाहलं महद्वयम् ।
अतएव निपीयतेऽधरो हृदयं सुहृदिभिरेव ताड्यते ॥"
इति कुलचरितेऽश्वघोषः । इति भरतः ॥
(मूलजविषभेदः ।
"सक्षौद्रं मर्कटं शृङ्गिविषं हलाहलन्तथा ।
एवमादीनि चान्यानि मूलजानि स्थिराणि च ॥"
इति चरके चिकित्सास्थाने २५ अध्याये ॥)
हलाहलः, पुं, (हलाहलोऽस्त्यस्मादिति । अच् ।) ब्रह्मसर्षपः । अञ्जना । इति मेदिनी ॥ वृद्धविशेषः । इति त्रिकाण्डशेषः ॥
हलिः, पुं, (हलति कर्षति भूमिमिति । हल+"सर्व्वधातुभ्य इन् ।" उणा० ४ । ११७ । इति इन् ।) हरिद्रासम् । इति शब्दरत्नावली ॥ तत्पर्य्यायः । जित्वा २ । इति हेमचन्द्रः ॥
हलिनी, स्त्री, (हलमिव आकारो ऽस्यस्या इति । इनिः । ङीप् ।) लाङ्गलिकीवृक्षः । विषलाङ्गला इति भाषा । इति रत्नमाला ॥ (पर्य्यायोऽस्य यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।
"कलिहारी तु हलिनी लाङ्गली शक्रपुष्पिका ।
विषल्याग्निशिखानन्ता वह्निवक्त्रा च गर्भतुत् ॥"

"लाङ्गली हलिनौ च स्यात्" इति भागुरेः २०८ अध्याये ॥) हलसम्बन्धिच ॥

हलिप्रियः, पुं, (हलिनो बलदेवस्य प्रियः ।) कदम्बवृक्षः । इत्यमरः । २ । ४ । ४२ ॥ (पर्य्यायो यथा,—

"कदम्बः प्रियको नीपो वृत्तपुष्पो हलिप्रियः ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

हलिप्रिया, स्त्री, (हलिनो बलदेवस्य प्रिया ।) मदिरा । इति राजनिर्घण्टः । अमरश्च । २ । १० । ३६ ॥ (विवरणमस्या मदिरा शब्दे ज्ञातव्यम् ॥)

हली, स्त्री, (हलति इति । हल + इन् । ङीष् ।) कलिकारीवृक्षः । इति राजनिर्घण्टः ॥

हली, [न्] पुं, (हलमस्यास्तीति । हल + इनि ।) बलदेवः । इत्यमरः । १ । १ । २४ ॥ क्षत्रियकर्म्मकर्त्ता । तत्पर्य्यायः । कुटुम्बी २ कर्षकः ३ क्षेत्री ४ क्षत्रिकः ५ कार्षिकः ६ हलीबलः ७ । इति हेमचन्द्रः ॥ (यथा, उपदेशशतके । ६६ ।

"क्रुद्धो हली कुरुणां पुरस्तस्याप्य विपन्नद्याम् ।
अयुनीतस्तदसुषत् क्रोधाविष्टोऽनुनेतव्यः ।")

हलीनः, पुं, (हलाय हितः । हल + छः ।) शाकवृक्षः । इति शब्दचन्द्रिका ॥

हलीमकः पुं, रोगविशेषः । यथा पाण्डुरोगस्यैव भेदं हलीमकमाह ।

"यदा तु पाण्डोर्वर्णः स्याद्धरितशावपीतकः ।
बलोत्साहः क्षयश्चान्नमान्द्यमित्यं दुष्करः ॥
क्लैव्यदुर्बलोऽङ्गमर्द्दश्च श्वासश्चाप्यतिभ्रमः ।
हलीमकं तदा तस्य विद्यादतिपित्ततः ॥"

पाण्डोः पाण्डुरोगिणः ॥ ७ ॥ तस्य चिकित्सा यथा,—

"मारितस्यायसचूर्णं सक्षाचूर्णेन संयुतम् ।
खदिरस्य कषायेण पिबेद्गुडं हलीमकम् ॥
सिता तिक्ता बला यष्टी त्रिफला रजनीयुगे ।
क्षेद्यं तिक्तात् समभ्यास्यं हलीमकनिवृत्तये ॥
अश्वत्थलवणारक्तप्रसाधितं तुरगविड्रसः सर्पिः ।
क्षीरचतुर्गुणमेतद्विततरेच हलीमकार्त्तेभ्यः ॥"

इति अष्टताष्टतम् ॥ ८ ॥

"मधुरैरन्नपानैस्तं वातपित्तहरैर्हरेत् ।
कामलापाण्डुरोगोक्तक्रियाश्चात्रोपयोजयेत् ॥"

अथ सामान्यतः पाण्डुरोगकामलाहलीमकचिकित्सा ।

"पक्वविल्वोत्पलाशातिक्ताभूनिम्बनिम्बजः ।
क्वाथः क्षौद्रयुतो हन्यात् पाण्डुरोगं सकामलम् ॥
चूर्णं त्रिफला मुस्तं विड्गं चव्यचित्रके ।
दार्व्वी त्वक्षीरिकी धातुर्यस्थिकी देवदारु च ॥
समां द्विपलिकान् भागान् कृत्वा चूर्णं पृथक् पृथक् ।
मक्षिकं द्विगुणं चूर्णान्मुद्गमक्षनिभम् ॥
सर्व्वे चाष्टगुणे पाठा तस्मिंस्तत् प्रक्षिपेत्ततः ।
क्षौद्रेणमसमान् कृत्वा वटकांस्तान् यथाग्नि च ॥
उपयुञ्जीत तक्रेण क्षीरेण मांसभोजनम् ।
मद्यमरिष्टका सीधुं प्रायशः पाण्डुरोगिणाम् ॥
कुष्ठानि जठरं शोथमरुक्षमं कफामयान् ।
अर्शांसि कामलां मेहं क्षीहानं शमयन्ति च ॥"

इति चक्रपाणिदत्तपाण्डुरवटकः ॥ २ ॥

"किराततिक्तं सुरदारु दार्व्वी
मुस्ता गुडूची कटुका पटोलम् ।
इरालभा पर्पटकं वनिम्बं
कटुत्रिकं वह्निफलत्रिकञ्च ॥
फलं विड्गस्य समांशकानि
सर्व्वैः समं चूर्णमथायसञ्च ।
सर्पिर्मधुभ्यां वटिका विधेया
तक्रानुपानात् भिषजा प्रयोज्या ॥
निहन्ति पाण्डुञ्च हलीमकञ्च
शोथं प्रमेहं ग्रहणीरुजञ्च ।
श्वासञ्च कासञ्च सरक्तपित्त-
मर्शांस्यघोरञ्चमामवातम् ॥
व्रणांश्च गुल्मान् कफविद्रधिञ्च
त्रिदोषकुष्ठं ततः प्रयोगात् ॥"

इति अष्टादशाङ्गलोहम् ॥ ३ ॥

"यवगोधूमशाल्यन्नं रसैर्जाङ्गलजैर्हितैः ।
मुद्गाढकीमसूराद्यैरेषु भोजनमिष्यते ॥"

इत्यु पाण्डुरोगकामलाहलीमकेषु ॥ ४ ॥

इति भावप्रकाशः ॥

हलीषा, स्त्री, (हलस्य ईषा । प्रकृत्यादित्वात् साधुः ।) लाङ्गलदण्डः । इति मुग्धबोधव्याकरणम् ॥

हल्य, त्रि, (हलेन कृतम् । हल + यत् ।) कर्षितक्षेत्रम् । इत्यमरः । २ । ६ । ८ ॥ अस्य पर्य्यायः क्षेत्रशब्दे द्रष्टव्यः ॥ (हलस्येदमिति ।) हलसम्बन्धि च ॥ (पुं, हलस्य कर्षः । हल + "मतजनहलात् करणजल्पकर्षेषु ।" ४ । ४ । ६७ ॥ इति यत् ॥)

हल्य, क्ली, (हलस्येदमिति । यत् ।) वेरूपम् । इति केचित् ॥

हल्या, स्त्री, (हलस्य समूहः । हल + "प्राग्वतीयष्ठक्छौ ।" ४ । २ । ३६ । इति यः ।) हलसमूहः । इत्यमरः । ३ । ३ । ४१ ॥

हल्लक, क्ली, रक्तकङ्कारम् । हेला इति भाषा । तत्पर्य्यायः । रक्तसन्ध्यकम् २ । इत्यमरः । १ । १० । ३६ ॥ रक्तसौगन्धिकम् ३ रेचना ४ । इति जटाधरः ॥ अम्बगन्धम् ५ सौगन्धम् ६ रक्तकेरवम् ७ । इति रत्नमाला ॥

हल्लन, त्रि, प्रचलाधिनम् । इति जटाधरः ॥

हल्लीय, क्ली. स्त्रीणां सह नर्त्तनम् । इति त्रिकाण्डशेषः ॥ (पुं, उपरूपकविशेषः । तल्लक्षणं यथा, साहित्यदर्पणे । ६ । ५५५ ।

"हल्लीश एव एकाङ्कः सप्ताष्टौ दश वा स्त्रियः ।
वागुदात्तैकपुरुषः केशिकीवृत्तसङ्कुलः ।
सुखान्तिमौ तथा सन्धी बहुनाटलवस्थितिः ॥")

हल्लीषक, क्ली, (हल्लीषमेव । स्वार्थे कन् ।) स्त्रीणां सह नर्त्तनम् । इति जटाधरः ॥

"मद्यपेन तु यन्नृत्यं स्त्रीणां हल्लीषकन्तु तत् ॥"

इति हेमचन्द्रः ॥

एकस्य पुंसो बहुभिः सह रासक्रीड़ा । यथा,—

"गोपीनां मण्डलीवृत्तबन्धे हल्लीषकं विदुः ॥"

इति शब्दरत्नावली ॥

तल्लक्षणञ्च ।

"पृथु सुवृत्तं मसृणं वितत्ति-
मान्नोन्नतं कौ विनिखन्य शङ्कुकम् ।
आक्रम्य पद्भ्यामितरेतरन्तु
हस्तैर्भ्रमोऽयं खलु रासगोष्ठी ॥"

इति हरिवंशटीकायां नीलकण्ठः ॥

हल्लीषकं दन्त्यसकारमध्यमपि ॥

हव्यः, पुं, (हु लि होमे + क्यप् ।) होमः । आह्वा । (ह्वे + "भावेऽनुपसर्गस्य ।" ३ । ३ । ७५ । इति क्यप् सम्प्रसारणञ्च ।) आह्वानम् । अध्वरः । इत्यमरः । ३ । २ । ८ ॥

हवङ्गः, पुं, कांस्यपात्रे दधिमिश्रितान्नभक्षणम् । इति केचित् ॥

हवनं, क्ली, (हु + ल्युट् । होमः । इति शब्दरत्नावली ॥ (यथा, महाभारते । १ । १६८ । ३४ ।

"यावत्तु हवनस्यान्तं देवीमाज्ञापयत्तदा ।
प्रेहि मां रात्रि इत्यति ! मिथुनं त्वामुपस्थितम् ॥)

हवनायुः, [स्] पुं, (हवनमेव आयुर्यस्य ।) अग्निः । इति शब्दरत्नावली ॥

हवनी, स्त्री. (हूयतेऽत्रेति । हु + ल्युट् । ङीप् ।) होमकुण्डम् । इति त्रिकाण्डशेषः ॥

हवनीय, त्रि, होमीयद्रव्यम् । हव्यम् । हुधातोरनीयप्रत्ययेन निष्पन्नम् ॥

हविः, [स्] क्ली, (हूयतेऽनेनेति । हु + "अर्त्तिहुह्वीभ्य इः ।" उणा० २ । १०६ । इति इसिः ।) हवनीयद्रव्यम् । तत्पर्य्यायः । आज्यम् २ । घृतम् । इत्यमरः । २ । ३ । २७ ॥ (यथा, महाभारते । १ । ८५ । ११ ।

"न जातु कामः कामानामुपभोगेन शाम्यति ।
हविषा कृष्णवर्त्मेव भूय एवाभिवर्द्धते ।")

जलम् । इति केचित् ॥ (विष्णुः । इति महाभारतम् । १३ । १४६ । ५२ ॥ शिवः । इति च तत्रैव । १३ । १७ । १०२ ॥)

हविर्द्धानी, स्त्री, होमकुण्डम् । इति हेमचन्द्रः ॥

हविरशनः, पुं, (हविरशनं यस्य ।) अग्निः । इति हेमचन्द्रः ॥ घृतभोजने, क्ली ॥

हविर्गन्धा, स्त्री, (हविषो गन्धो यस्याम् ।) शमी । इति राजनिर्घण्टः ॥ (शमीशब्देऽस्या गुणादयो ज्ञातव्याः ॥)

हविर्गेहं, क्ली, (हविषो गेहम् ।) होमगृहम् । तत्पर्य्यायः । होत्रीयम् २ । इति हेमचन्द्रः ॥

हविर्म्मन्थः, पुं, (हविषो हवनीयाय मथ्यते इति । मन्थ + घञ् ।) गणिकारीवृक्षः । इति रत्नमाला ॥

हविर्य्य, क्ली, (हविषे हितम् । हविस् + "उगवादिभ्यो यत् ।" ५ । १ । २ । इति यत् ।) घृतम् । यथा,—

"घृतं हविष्यमाज्यञ्च हविराघारसर्पिषी ।"
इति हैमचन्द्रः ॥

हविष्यान्नम् । यथा,—
"अर्घः दग्धा जलस्नानो ब्रह्मचारी समाहितः ।
निरामिषं हविष्यं वा सकृद्भुञ्जीत नान्यथा ॥"
इति शिवरात्रिव्रतकथा ॥*॥

अन्यच्च ।
"हैमन्ती प्रथमे मासि नन्द व्रजकुमारिकाः ।
चेरुर्हविष्यं भुञ्जानाः कात्यायन्यर्चनव्रतम् ॥"
इति श्रीमद्भागवतम् ॥

हविष्यान्न, क्ली, (हविष्यमन्नम् ।) व्रतादौ भक्ष्यभोज्यरूपविशेषः । यथा, स्मृतिः ।
"हैमन्तिकं सितामिश्रं धान्यं मुद्गाढकी यवाः ।
कलायकङ्गुनीवारा वास्तूकं हिलमोचिका ॥
वर्षिका कालशाकञ्च सूरणं केसुकेतरत् ।
लवणं सैन्धवाद्यन्तु गव्यं च दधिसर्पिषी ॥
पर्णेः पनसमारभ्य पनसाम्रहरीतकी ।
निम्बिडी चोरकञ्चैव नागरङ्गकपिप्पली ॥
कदली लवली धात्री फलान्यगुडमैक्षवम् ।
अनेलपक्वं सुनयो हविष्यान्नं प्रचक्षते ॥"
अत्राभिन्नमित्युपादानादन्यच्च स्निग्धधान्यतण्डुलेन दोषः । हैमन्तिकमित्यभिधाय अगस्त्यसंहितायाम् ।
"नारिकेलफलञ्चैव कदलीं लवलीन्तथा ।
आम्रमामलकञ्चैव पनसञ्च हरीतकीम् ।
मनान्तरप्रसूतञ्च हविष्यं मन्वते बुधाः ॥"
इति निष्पादितत्वम् ॥

हव्य, क्ली, (हूयते इति । हु + यत् ।) देवाद्यन्नम् । इत्यमरः । २ । ७ । २४ । (यथा, मनुः । ३ । ८७ ।
"नक्षत्रैश्च दृश्यकाव्यानि गदानामविचारतः ।
भस्मीभूतेषु विप्रेषु मोहाद्दत्तानि दातृभिः ॥")
हव्यभोजनञ्च ।

हव्यवाट्, पुं, (हव्यं वहतीति । वह + क्विप् ।) अग्निः । इति रत्नमाला ॥ (यथा, महाभारते । १ । २२४ । ५८ ।
"अनक्षुषा क्षुधयद्भ्यमवान् सञ्जीवकेतुः ।
हव्यवाहमिदं वाक्यमुवाच प्रहसन्निव ॥")

हव्यवाहनः, पुं, (हव्यं वाहयतीति । वह + णिच् + ल्युः ।) अग्निः । इत्यमरः । १ । १ । ५८ । (यथा, महाभारते । १ । २२४ । १३ ।
"गहनेतत् कारणं ब्रह्मन्नस्य मन्युनिमित्तजम् ।
यदर्थं हव्यवाहः स्यात्सर्वं हव्यवहः ॥")

हव्यवाहः, पुं, (हव्यमवहतीति । हव्य + अव + वह + अण् ।) कुशाग्रः । इति शब्दरत्नावली ॥

हव्यवाहनः, पुं, (हव्यं वहनं यस्य ।) अग्निः । इति हैमचन्द्रः ॥

हव, व हवे । इति कविकल्पद्रुमः । (भ्वा-उभ-सक-सेट् ।) व, व्यहोत्रा । हवोर्ध्वदन्तोष्ठा कर्णौष्ठ्य विकसितौ । इत्यमरः । (यथा, हरिवंशे । १४६ । २७ ।
"हसन् विहायांश्च जहाति हर्षात्
वाप्यागमं क्षय्यविनोदनार्थम् ॥")

हसन, क्ली, (हस + ल्युट् ।) हास्यम् । इति मेदिनी ॥ (यथा, हरिवंशे । १४६ । २५ ।
"हसने देशभङ्गं रुदिते च व्याधिवाङ्गुल्यम् ॥")

हसनी, स्त्री, (हसतीति । हस + ल्युट् इति ल्युट् । टिड्ढेति ङीप् ।) अङ्गारधानी । इति मेदिनी ॥

हसनीमणिः, पुं, अग्निः । इति त्रिकाण्डशेषः ॥

हसन्तिका, स्त्री, अङ्गारधानी । इति हैमचन्द्रः ॥

हसन्ती, स्त्री, (हसतीति । हस + शतृ । ङीप् ।) अङ्गारधानिका । इत्यमरः । २ । ६ । २८ ॥ मल्लिकाविशेषः । ग्राकिनीभेदः । इति मेदिनी ॥ (हास्यं कुर्वतो । यथा कथासरित्सागरे । ११ । २१ ।
"अस्तीहोज्जयिनी नाम नगरी भूषणं भुवः ।
हसन्तीव सुधाधौतैः प्रासादैरमरावतीम् ॥")

हसिकः, त्रि, (हसो हास्योऽस्यास्तीति । ठन् ।) हास्यकर्त्ता । इति कैचित् । हसशब्दात् णिजन्तात् ण्वुल्प्रत्ययेन निष्पन्नः ॥

हसित, क्ली, (हस + क्तः ।) हास्यम् । (यथा, हरिवंशे । ६८ । ७३ ।
"हसितं शुभदर्शकर्म
च निमीलितलोचनञ्च पापस्य ।
हृदयस्य हसितमसङ्गत
मोष्मादस्यासकृत् प्राप्तौ ॥")
कामदेवधनुः । इति कैचित् । (हास्यकरणम् । यथा, कथासरित्सागरे । ५६ । १५८ ।
"अथ कर्णमसिं चिक्षा दृष्ट्वास्य हसितं मया ।")
परिहासः । यथा, किरातार्जुनीये । १३ । ४७ ।
"कौटिल्यानि हसितेऽपि तानि यैः
स्त्रीदृशन्ति चरितानि मानिनम् ॥")

हसितः, त्रि, (हस + क्तः ।) विकसितः । इति शब्दमाला । ह्रस्वदीर्घश्च ।

हस्तं, क्ली, (हस + तन् ।) अर्थसम्प्रेषिका । इति कैचित् ॥

हसः, पुं, (हसति विकसतीति । हस + "हसिमृग्रिण्वामीति ।" उणा० ३ । ८५ । इति सन् ।) प्रकीर्णावयवविशेषः । स च कर्म्मेन्द्रियः । दाम इति भाषा । तत्पर्य्यायः । पाणिः २ समः ३ हस्तः ४ । इत्यमरमाला ।
पञ्चशाखः ५ । इत्यमरः ॥ करः ६ भुजः ७ । इति जटाधरः ॥ कुलिः ८ भुजादण्डः ९ । इति शब्दरत्नावली ॥
"हस्तावध्यात्ममित्याहुरध्यात्मविदुषो जनाः ।
व्याधिभूतश्च कर्म्मासि शुक्रस्तत्राधिदैवतम् ॥"
इति महाभारते आश्वमेधिकपर्व्व ॥
हस्तस्य शुभाशुभलक्षणं वाङ्मयशब्दे द्रष्टव्यम् ॥*॥
विस्तृतकरप्रकोष्ठः । इत्यमरः । २ । ६ । ६८ ॥
स च चतुर्व्विंशत्यङ्गुलपरिमाणम् । इति भरतः ॥
यथा,—
"यवानां तण्डुलैरेकमङ्गुलं चाष्टभिर्भवेत् ।
अदीर्घयोजितैर्हस्तश्चतुर्विंशतिभिरङ्गुलैः ॥"
इति तिथ्यादितत्त्वधृतकालिकापुराणम् ॥
अपि च ।
"यवोदरैरङ्गुलमष्टसंख्यै-
र्हस्तोऽङ्गुलैः षड्नवभिश्चतुर्भिः ।
हस्तैश्चतुर्भिर्भवतीह दण्डः
क्रोशः सहस्रद्वितयेन तेषाम् ॥"
इति लीलावती ॥*॥
हस्तमात्रदत्तस्नेहादिद्रव्यभक्षणनिषेधो यथा,
"हस्तदत्तांश्च ये स्नेहा लवणं व्यञ्जनानि च ।
दातारं नोपतिष्ठन्ति भोक्ता भुङ्क्ते तु किल्बिषम् ॥
तस्मादन्तर्दृशं कृत्वा पर्णेनाथ दलेन वा ।
प्रदद्यात् न तु हस्तेन नायसेन कदाचन ॥"
इति आहृतत्त्वधृतवशिष्ठवचनम् ॥*॥
एकहस्तदत्तद्रव्यभोजननिषेधो यथा,—
"एकेन पाणिना दत्तं शूद्रदत्तं न भक्षयेत् ।"
इति तद्धृतादिपुराणवचनम् ॥*॥
हस्तिशुण्डः । (यथा, रामायणे । २ । २३ । ४ ।
"अग्रहस्तं विधुन्वन्तु हस्तो हस्तमिवात्मनः ।")
हस्तानवचनम् । (यथा, मार्कण्डेये । ३३ । ११ ।
"प्रयाति श्रेष्ठतां सद्यं हस्ते आहृतदो नरः ।")
कैशान्ते परे तत्तुल्यहस्तवाचकः । इति मेदिनी ॥

हस्तयोड़िः, पुं, करञ्जोड़िदृशः । हातासुड़ि इति हिन्दी भाषा । अस्य गुणः । रसवद्दोषिदीपनत्वम् । इति राजनिर्घण्टः ॥

हस्तधारणं, क्ली, (हस्तस्य धारणम् ।) मारणोद्यतस्य निवारणम् । इति हस्तधारणशब्दटीकायां रामाश्रमः । ३ । २ । ५ । (परित्राणम् । यथा, महाभारते । १ । २१३ । १० ।
"प्राणात्यये तथा चौरैर्धर्म्मार्थे च विलोपिते ।
दौरात्म्यमार्ये च मयि क्रियतां हस्तधारणम् ॥")

हस्तपुष्पं, क्ली, (हस्तस्य पुष्पम् ।) हस्तावयवविशेषः । हातेर फूल इति भाषा । तत्पर्य्यायः । कल्याणम् २ । इति त्रिकाण्डशेषः ॥

हस्तबिम्बं, क्ली, (हस्तस्य बिम्बं यत्र ।) ज्योतिषः । यत्तु चन्द्रादिना ग्रहविशेषनिर्णयः । इति हैमचन्द्रः । करप्रतिबिम्बञ्च ॥

हस्तभारणं, क्ली, (हस्तेन भारणम् ।) परिमाणम् । तच्च भारलोहस्य विंशतिपलम् । इत्यमरः । ३ । २ । ५ । इत्यत्र क्षीरस्वामी ॥

हस्तिगिरिः, पुं,(हस्तिप्रधानो गिरिर्यत्र।) काञ्ची-देशः। इति केचित्॥

हस्तिघोषा, स्त्री, (हस्तीव दृप्तती घोषा।) वृद्धदघोषा। बड़ी तोरई इति हिन्दी भाषा। तत्पर्य्यायः। रेभी २ महत्पुष्पा ३ सपीतिका ४ महाकोशातकी ५। अस्या गुणाः। स्निग्धत्वम्। मारकत्वम्। पित्तानिलनाशित्वञ्च। इति मदन-निघण्टुः॥ (पर्य्यायान्तरं यथा,—

"महाकोषातकी प्रोक्ता हस्तिघोषा महाफला।
धामार्गवी घोमकञ्च हस्तिपर्णञ्च सा स्मृता॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

हस्तिघोषातकी, स्त्री, (हस्तीव दृप्तती घोषा-तकी।) हस्तिघोषा। इति रत्नमाला॥ (गुणादिकमस्यां हस्तिघोषाशब्दे ज्ञातव्यम्॥)

हस्तिन्, पुं, (हस्तिनं हन्तुं शक्तः। हस्तिन्+हन+"शक्तौ हस्तिकपाटयोः।"३।२।५४। इति टक्।) मनुष्यः। इति केचित्॥ करि-नाशके, त्रि॥

हस्तिचारिणी, स्त्री, (हस्तीव चरतीति। चर+णिनिः। ङीप्।) महाकरञ्जः। इति राज-निघण्टुः॥

हस्तिदन्तं, क्ली, (हस्तिनो दन्त इव आकारोऽस्य-स्येति। अच्।) मूलकम्। इति राजनिघण्टुः॥

हस्तिदन्तः, पुं, (हस्तिनो दन्त इव आकारोऽस्य। अच्।) मूलकम्। इति शब्दरत्नावली॥ (हस्तिनो दन्त इव।) क्षवरचार्थेभित्तिस्थकीलकः। (हस्तिनो दन्तः) गजदन्तश्च॥ (यथा,—

"हस्तिदन्तमयीं कृत्वा सुखण्डेन रसाञ्जनम्।
लोमान्यनेन जायन्ते नृणां पाण्डितलेष्वपि॥"

इति वैद्यकचक्रपाणिसंग्रहे क्षुद्ररोगाधिकारे॥)

हस्तिदन्तकं, क्ली, (हस्तिदन्तमेव। कन्।) मूलकम्। इति शब्दमाला॥ (मूलकशब्देऽस्य-गुणादयो ज्ञातव्याः॥)

हस्तिदन्तफला, स्त्री, (हस्तिदन्त इव फलमस्याः।) एरण्डः। इति राजनिघण्टुः॥

हस्तिदयसः, त्रि, गजैपरिमाणम्। हस्तिप्रत्ययात् दयसच्प्रत्ययेन निष्पन्नः। इति सिद्धान्तकौमुदी॥

हस्तिनखः, पुं, (हस्तिनो नख इव।) पुष्पादि यत् कूटं तत्। इत्यमरः। २। २। १७॥ द्वारो-परि दुर्गार्थं यत् कूटं स्थपतिकाराश्चिक्कान्नि हस्तिनखः इत्यमरः इति टीकायां भरतः। दुर्गद्वारा-वरणार्थः क्रमनिम्नोन्नतस्थानोत्तम्भनकूटो हस्तिनख इत्यन्योऽपि। दुर्गपुरद्वारसमीपे सुखार्थं यदधिरतटमन्तःसोपानयुक्तं स्थलकूटं यच्च स्थित्वा विषये काष्ठादिकं क्षिपति तच्च हस्तिनखो युक्तश्च इति ख्यातं त्वपरे। हस्ति-नख इव हस्तिनखः। इति तट्टीकायां भरतः॥ (यथा, माघे। ३। ६८।

"क्षेपैरनीयन्त रथान् पतन्तो
रथाः क्षितिं हस्तिनखादवेदैः।
गवाक्षजालायतरश्मिमुक्त-
मायामवंशक्षपुषेषुरुद्रैः॥")

हस्तिनपुरं, क्ली, हस्तिनापुरम्। इति हेम-चन्द्रः॥

हस्तिनापुरं, क्ली, चन्द्रवंशीयहस्तिनामकराज-निर्म्मितनगरम्। परिच्छित्गढ़ इति दिल्ली इति च ख्यातम्। तत्पर्य्यायः। नागाह्वः २ हस्तिन-पुरम् ३ हास्तिनम् ४ गजाह्वयम् ५ गजाह्वम् ६ गजसाह्वयम् ७। इति शब्दरत्नावली॥ हस्तिनीपुरम् ८। इति हेमचन्द्रः। अनागीका-दश्वमेधदत्तो भविता। तस्मादप्यधिसीमकृष्णः; अधिसीमकृष्णात् निचक्षुः। यो गङ्गयापहृते हस्तिनापुरे कौशाम्ब्यां निवत्स्यति। इति विष्णुपुराणे ४ अंशे २१। ३॥

हस्तिनी, स्त्री, (हस्तिनः स्त्री। ङीप्।) गज-पत्नी। हातिनी इति भाषा। तत्पर्य्यायः। करेणुः २ करेणुः ३ रेणुका ४ करेणुका ५ धेनुका ६ वासिता ७ वासा ८ करिणी ९ विशा १०। इति शब्दरत्नावली॥ कटम्भरा ११ पुष्करिणी १२ कक्षा १३ वसा १४ गणिका १५ गजयोषित् १६। इति घटाधरः॥ इभी १७ पद्मिनी १८ मातङ्गी १९। अस्या दुग्धगुणाः। मधुरत्वम्। दृष्यत्वम्। गुरुत्वम्। कषायत्वम्। स्निग्धत्वम्। स्थैर्य्यकरत्वम्। शीतत्वम्। चक्षु-ष्यत्वम्। बलवर्द्धनत्वञ्च॥ तद्घृतगुणाः। कषायत्वम्। लघुत्वम्। उष्णत्वम्। पक्तिशूल-भ्रमनत्वम्। रुचिप्रदत्वम्। दीप्तिदत्वम्। बलाव-हत्वम्। वीर्य्यवर्द्धनत्वम्। उत्तमबल-प्रदत्वञ्च॥ तन्नवनीतगुणाः। कषायत्वम्। शीतलत्वम्। लघुत्वम्। तिक्तत्वम्। विष्मि-नन्तुपित्तकफकृमिनाशित्वञ्च॥ तद्दुग्धगुणाः। कफपित्तविषकृमिनाशित्वम्। कषायत्वम्। विष्-मित्वम्। तिक्तत्वम्। वह्निकरत्वञ्च। इति राजनिघण्टुः॥ * ॥ चतुर्विंधस्त्रीमध्ये स्त्री-विशेषः। तल्लक्षणं यथा,—

"स्थूलाधरा स्थूलनितम्बभागा
स्थूलाङ्गुली स्थूलकुचा सुशीला।
कामोत्सुका गाढ़रतिप्रिया च
नितम्बखेला खलु हस्तिनी स्यात्॥"

इति रतिमञ्जरी॥

हस्तिनीविलासिनी। इति शब्दचन्द्रिका॥

हस्तिनीपुरं, क्ली, हस्तिनापुरम्। इति हेमचन्द्रः॥

हस्तिप, पुं, (हस्तिनं पाति रक्षतीति। पा+क।) हस्त्यारोहः। इति शब्दमाला॥ (यथा, मार्कण्डेये। ३८। १८।

"यच्चं मत्तं यथेच्छातो गाढं नयति हस्तिपः।
तथैव योगी सच्छन्दः प्राणं नयति साधितम्॥")

हस्तिपकः, पुं, (हस्तिप एव। कन्।) गजारोहः। माहुत इति भाषा। तत्पर्य्यायः। व्याधोरथः २ हस्त्यारोहः ३ निषादी ४। इत्यमरः। २। ८। ५६॥ मादौ मालकौ मरौ मौहारावित्यपि केचित्। इति भरतः। (यथा, माघे। १५। ६८।

"अङ्गे अनेर्मुकुलिताक्षमनादराणि
वैरम्भहस्तिपकनिष्ठुरपीडनानि।

गम्भीरवेदिनि पुरः कवलं करीन्द्रे
मन्दोऽपि नाम न महानवधत्त साधः॥")

हस्तिपत्रः, पुं, (हस्तिनः कर्ण इव पत्रमस्य।) हस्तिकन्दः। इति राजनिघण्टुः॥

हस्तिपर्णिका, स्त्री, (हस्तिनः कर्ण इव पर्णमस्याः। कन्। टापि अत इत्वम्।) राजकोशातकी। इति राजनिघण्टुः॥

हस्तिपर्णी, स्त्री, (हस्तिनः पर्णमिव पर्णमस्याः। ङीप्।) मोरटालता। इति रत्नमाला॥ कर्कटी। इति राजनिघण्टुः॥

हस्तिमदः, पुं, (हस्तिनो मदः।) करिगण्डच्युत-मदजलम्। तत्पर्य्यायः। गजमदः २ गज-दानम् ३ मदः ४ कुम्भिमदः ५ हस्तिमदः ६ दानम् ७ द्विपमदः ८। अस्य गुणाः। स्निग्ध-त्वम्। तिक्तत्वम्। कैश्यत्वम्। अपस्मारविष-कुष्ठकण्डूतिव्रणदद्रुविसर्पनाशित्वञ्च। इति राज-निर्घण्टुः॥

हस्तिमल्लः, पुं, (हस्तिषु मल्लः।) गजेशः। शुभ्र-नागः। ऐरावतः। इति मेदिनी॥

हस्तिरोहणकः, पुं, (हस्तीव रोहति इति। रुह+ल्युः। ततः कन्।) महाकरञ्जः। इति राज-निघण्टुः॥

हस्तिलोध्रकः, पुं, (हस्तीव महान् लोध्रः। ततः कन्।) लोध्रः। इति राजनिघण्टुः॥

हस्तिवाहः, पुं, (हस्तिनं वाहयतीति। वह+णिच्+अण्।) अङ्कुशः। इति शब्दरत्नावली॥ गजवाहकश्च॥

हस्तिविषाणी, स्त्री, कदली। इति राजनिघण्टुः॥ (विवरणमस्याः कदलीशब्दे ज्ञातव्यम्॥)

हस्तिशाला, स्त्री, (हस्तिनः शाला।) गज-गृहम्। फीलखाना इति पारस्यभाषा। तत्-पर्य्यायः। चतुरम् २। इति हेमचन्द्रः॥

हस्तिशुण्डा, स्त्री, (हस्तिनः शुण्ड इव आकारो-ऽस्यास्येति। अच्। विभाषया ङीप्।) क्षुपविशेषः। हातिशुँड़ा इति भाषा। तत्पर्य्यायः। हस्तिनी १ सुशुण्डी २ अजे-क्षया ३। इति शब्दचन्द्रिका॥ गजशुण्डी ४ शुण्डी ५ घृतदुग्धिका ६। (पर्य्यायान्तरं यथा, "हस्तिशुण्डी भातिविषा शूकशं हेमभाह्वयम्॥" इति वैद्यकरत्नेन्द्रसारसंग्रहे ज्वराधिकारे॥) अस्या गुणाः। कटुत्वम्। उष्णत्वम्। सन्निपात-ज्वरनाशित्वञ्च। इति राजनिघण्टुः॥ करि-करे, पुं॥

हस्तिश्यामाकः, पुं, (हस्तीव स्थूलः श्यामाकः।) शस्यविशेषः। हातियाश्यामा इति भाषा। अस्य गुणाः। धातुशोषकत्वम्। पित्तकफे-नाशित्वम्। गात्रबलनत्वम्। रूक्षत्वञ्च। इति राजवल्लभः॥

हस्ती, [न्] पुं, सुहोत्रराजपुत्रः। यथा। अजमी-ढस्य सुहोत्रः पुत्रः सुहोत्राद्धस्ती च इदं हस्तिनापुरम् निर्म्मायथामास। इति विष्णु-पुराणे ४ अंशे १९ अध्यायः॥ अपि च।

"सुहोत्रस्यापि दायादो हस्ती नाम बभूव ह।
तेनेदं निर्मितं पूर्वं पुरैव हस्तिनापुरम्॥
हस्तिनश्चैव दायादास्त्रय: परमधार्मिका:।
अजमीढो द्विमीढश्च पुरुमीढस्तथैव च॥"
इति हरिवंशे पितृकल्पे २० अध्याय:॥*॥
अजमीढा। इति राजनिर्घण्ट:॥ (हस्त्यस्त्यस्येति। हस्त+इनि:।) दृष्टत्पशुविशेष:। हाती इति भाषा। तत्पर्य्याय:। दन्ती २ दन्तावल: ३ द्विरद: ४ अनेकप: ५ द्विप: ६ मतङ्गज: ७ गज: ८ नाग: ९ कुञ्जर: १० वारण: ११ करी १२ द्विप: १३ रम्भेरम: १४ पद्मी १५। इत्यमर:। २। ८। ३४॥ मतङ्ग:१६ मातङ्ग: १७ पीलु: १८ वराङ्ग: १९ पुष्करी २० अलकङ्ग: २१ महाङ्ग: २२ स्तरम: २३ सूर्पकर्ण: २४ सिन्धुर: २५ सामज: २६ कटी २७ अन्त:खेद: २८ दीर्घनादत: २९ विलोमजिह्व: ३० करटी ३१ प्रिरुग्राह: ३२ महामद: ३३ पेटकी ३४ कटकी ३५ जम्भी ३६ निर्झर: ३७। इति शब्दरत्नावली॥ सिन्दूरतिलक: ३८ पद्मनख: ३९ प्रङ्गारी ४० करेणु: ४१ कर्णिकी ४२ खिङ्गी ४३ सामयोनि: ४४। इति जटाधर:॥ राजीव: ४५ अलकाङ्ग: ४६ खलासक: ४७ पेचिल: ४८। इति त्रिकाण्डशेष:॥ द्विरद:ग: ४९ करभी ५० विषाणी ५१ रदनी ५२ महाबल: ५३ भद्र: ५४ द्विमारि: ५५ षष्टिहायन: ५६। इति राजनिर्घण्ट:॥*॥ स च चतुर्जातिर्यथा,—

"भद्रो मन्द्रो मृगो मिश्रश्चत्वो गजजातय:॥"
इति हैमचन्द्र:॥*॥

तद्धारा भद्रगुणा:। वातकोपनत्वम्। अङ्गस्थैर्य्यबलाधिकारित्वञ्च। इति राजवल्लभ:॥*॥ कासकोन्मत्तगजारोहणदोषो यथा।

"नारोहेत् कासकोन्मत्तं गजं राजा कदाचन।
आरुह्य कासकं तन्तु परत्रेह विनीदति॥"
इति कालिकापुराणे ८६ अध्याय:॥*॥

अथ गजायुर्वेद:।

"गजायुर्वेदमाख्यास्ये उक्ता: कण्वा गजे हिता:।
गजे चतुर्गुणा मात्रा तामिर्मेलनमर्दनम्॥
गजोपसर्गबाधीनां शमनं शान्तिकर्म च।
पूजयित्वा सुरान् विप्रान् ब्राह्मणे कपिलां ददेत्॥
दन्तिदन्तद्वये मात्रां निबध्नीयादुपोषित:।
मन्त्रज्ञं मन्त्रिसा वैद्यो यथा सिद्धार्थकामले॥
सूर्य्याद्या: ग्रिवदुर्गा श्रीर्विष्णुना रक्षसाङ्गज:।
बलिं दद्याच्च भूतेभ्य: स्थापयेच्च चतुर्घटे॥
भोजनं मन्त्रितं दद्यात् भसनोलूनयेत्तमम्।
भूतो रक्षा शुभा मध्या वारुणी रक्षसां सदा॥
त्रिदला पद्मकोशे च दशमूलं विडङ्गकम्।
प्रतावरी गुडूची च निम्बवासकिंशुका:॥
गजरोगविनाशाय प्रोक्त: कल्क: कषायक:।
आयुर्वेदो गजाश्वानासुक्त: संक्षेपसारत:॥"
इति गारुडे। २०७। ३६—४२॥*॥ गजे वर्णभेदादि यथा,—

"गजे सहस्रयोधित्वमुच्चत्वं कर्णचापलम्।
अरिव्यूहविभेदित्वं कुम्भमुक्तामजादय:॥"
इति कविकल्पलतायां १ स्तवके २ कुसुमम्॥*॥

तच्छकुनानि यथा।

"ऊर्द्धं करं य: कुरुतेऽथवा यो
धत्ते करं दक्षिणदन्तभागे।
यो वा भवेत् दृंहितपूरिताङ्ग:
करी भवेदध्वगपूरिताङ्ग:॥"
इति वसन्तराजशाकुने चतुष्पदशाकुनम्॥*॥

स च प्रजापतिदेवताक:। यथा विष्णुधर्म्मोत्तरे।

"अभयं सर्व्वदैवत्यं भूमिर्वै विष्णुदेवता।
कन्या दासस्तथा दासो प्राजापत्या: प्रकीर्त्तिता:।
प्राजापत्यो गज: प्रोक्तस्तुरगो यमदैवत:॥"
इत्यादि॥*॥

तस्य प्रतिग्रहे आरुह्य गाह्यम्। यथा।

"करे गृह्य तथा कन्यां दासदासौ द्विजोत्तमा:।
करन्तु हृदि विन्यस्य धर्म्मो ज्ञेय: प्रतिग्रह:।
आरुह्य च गजस्योक्त: कर्णे चाश्वस्य
कीर्त्तित:॥"
इत्यादि॥*॥

प्रतिग्रहाशक्तेन तदग्राह्यम्। यथा, ब्रह्मपुराणम्।

"ब्राह्मण: प्रतिगृह्णीयादृत्त्यर्थं साधुतस्तथा।
अयज्ञमपि मातङ्गतिलगौहांश्च वर्ज्जयेत्॥"
इत्यादि॥

तद्दानफलम्। यथा नन्दिपुराणम्।

"योऽश्वं रथं गजञ्चापि ब्राह्मणे प्रतिपादयेत्।
"स शुक्लस्य वसेल्लोके शुक्रतुल्यो युगान् दश।
प्राप्यान्ते चैव मानुष्यं राजा भवति बुद्धिमान्॥"
इति शुद्धितत्त्वम्॥*॥

अपि च।

"गामश्वञ्च महीं हैम मणीनथ गजांस्तिलान्।
ये प्रयच्छन्ति पापेषु निरता: सर्व्वदा नृणां।
न तेषां रौरव: पन्था दक्षिणा दानमिष्यते॥"
इति वह्निपुराणे यमशर्म्मिलोपाख्याननामाध्याय:॥*॥ अथ गजपरीक्षा। तत्र काल:।

"ऐन्द्रमित्रवरुणानिलपुष्या-
चन्द्रतोयरविवारिजतारे।
सूर्य्यशुक्रगुरुसोमजवारे
श्रेयसे भवति कुञ्जरयानम्॥
लग्ने चरे शुभसमाश्रितवीक्षिते वा
चन्द्रस्य दृष्टिरिभयानविधौ विरुद्धा।
सौम्ये दिने करनिशाटवसुव्ययय-
तोयेशमैत्रसदितिश्च शुभग्रहाढ्य:॥
स्यात् कुञ्जरक्रयणदर्शनदानकाल:
शेषेषु दु:खफलमार्कसुतेऽह्नि चैव॥
गजानामष्टधा भेदा: संक्षेपेण प्रकाश्यते।
ऐरावत: पुण्डरीको वामन: कुमुदोऽञ्जन:॥
पुष्पदन्त: सार्व्वभौम: सुप्रतीकश्च दिग्गजा:।
एषां वंशप्रसूतत्वादृगजानामष्टजातय:॥
ये कुञ्जरा: पाण्डरसर्व्वदेहा:
सुदीर्घदन्ता: सितपुष्पदन्ता:।

अलोमशा अल्पमुखो बलाढ्या
महाप्रमाणा लघुपुच्छलिङ्गा:॥
कुम्भा: समीके रुदतोऽन्यकाले
लघुप्रपाना बहुलोग्रदाना:।
विस्तीर्णदानास्तनुलोमपुच्छा
ऐरावतस्याभिजनप्रसूता:॥
तैर्व्वेव सर्व्वेषु विशुद्धवर्णा
अतीवदृप्ता: प्रभवन्ति मुख्या:
नाल्पेन पुण्येन महीपतीनां
स्पृशन्ति भूमण्डलमध्यमेते।
दन्ता विभग्ना अपि युद्धरङ्गे
पुन: प्ररोहन्ति पुरैव तेषाम्॥ १॥
ये कुञ्जरा: कोमलसर्व्वदेहा:
पुच्छा न दग्धा: खरगण्डदेशा:।
सवन्मदा: सन्ततरोषभाजो-
मरप्रिया: सर्व्वसुखी बलाढ्या:॥
सुतीक्ष्णदन्ता रचना गजानां
ते पुण्डरीकप्रवरप्रसूता:।
ते पद्मगन्धं विकिरन्ति रेतो
दानञ्च तेषां बहुधा प्रभूतं॥
न तोयपानेऽभ्यधिका सृहा च
श्रमेऽपि नैते बलसूदयन्ति।
अमी तु येषां निवसन्ति राज्ञां
ते वै समस्तक्षितिशासनार्हा:॥ २॥
ये कुञ्जरा: कर्कशरूक्षसर्व्वदेहा:
कदापि माद्यन्ति गलन्मदाश्च।
आहारयोगाद्बलवीर्य्यभाजो
गाढ्यम्बुकामा बहुलोमगण्डा:।
विरूपदन्तास्तनुपुच्छकर्णा
ज्ञेया बुधैर्व्वामनवंशजाता:॥ ३॥
ये दीर्घदेहास्तनुदीर्घशुण्डा:
कृदन्तभाजो मलपूर्णदेहा:।
स्यविष्ठगण्डा: कलहप्रियाश्च
ते कुञ्जरा: स्यु: कुमुदस्य वंशा:।
अन्यद्विपान् दर्शनमात्रतस्तु
निघ्नन्ति ते दुर्गमनाश्च पुंसाम्॥ ४
ये स्निग्धदेहा: सलिलाभिलाषा
महाप्रमाणास्तनुशुण्डदन्ता:।
स्यविष्टदन्ता: अमदु:सहाश्च
ते कुञ्जराश्चाञ्जनवंशजाता:॥ ५॥
रेतश्च दानञ्च रुजन्ति ग्रन्थ-
दानूपदेशे प्रभवन्ति ये तु।
ते पुष्यदन्ताभिजनप्रसूता
महालवाले तनुपुच्छभागा:॥ ६॥
सुदीर्घदन्ता बहुलोमभाजो
महाप्रमाणाश्च सुकर्कशाङ्गा:।
भ्राम्यन्ति नाध्वभ्रमणाभियोगा-
न्नाहारपानादिषु चातिशक्ति:॥
मरुप्रदेशे विचरन्ति ते वै
सुताफलानामिव भक्ष्य मध्ये।
महाशरीरातिसुकर्कशाङ्गा
नारिष्टदन्ता रुदशुक्लदन्ता:॥

महाशनाः चीणपुरीषमूत्र-
विस्तीर्णकर्णोत्तुरोमगण्डाः ।
ते सार्व्वभौमाभिजनप्रसूता
विशुद्धसूक्ताः प्रभवन्ति चेषु ॥ ७ ॥
ये दीर्घशुण्डाः शुविभक्तदेहा
महाजवाः क्षीवपरीतकाश्च ।
विस्तब्धकर्णोत्तुपुच्छदन्ताः
सदाशनाश्चैव वशाप्रियाश्च ॥
प्रवृद्धगण्डास्तनुलोमयुक्ताः
ते सुप्रतीकप्रवरप्रसूताः ।
महाप्रमाणामितमौक्तिकानि
भवन्ति चैतन्निजगाद काव्यः ॥८॥*

एकजातिसमुत्पन्नो गजः शुद्ध इति स्मृतः ।
लक्षणञ्च यथा प्रोक्तं शुद्धश्चैतच्च दृश्यते ।
शुद्धद्विजातिसम्भूतस्तल्लक्षणसमन्वितः ।
जारजो नाम विख्यातो यथास्वं बलवीर्य्यवान् ॥
द्विजातिहयजातो यः स शूर इति कथ्यते ।
द्विजातिजारयोर्जातः स उद्दान्त इति कथ्यते ॥
एवं संयोगभेदेन गजजातिरनेकधा ।
तां यो जानाति तत्त्वेन स राज्ञः पात्रमर्हति ॥
ब्रह्मादिजातिभेदेन तेषां भेदश्चतुर्विधः ।
विप्राला ब्राह्मणाः प्रोक्ता रक्ताश्च क्षत्रिय-
जातयः ॥९"

अथ शुभाः ।

"यथा रक्तं यथा खड्गो यथा स्त्री सप्तयो यथा ।
परीक्ष्यन्ते गुणैरेवं गजानामपि निश्चयः ॥
रम्यो भीमो ध्वजोधीरो वीरः शूरोऽथ-
मङ्गलः ।
सुनन्दः सर्व्वतोभद्रः स्थिरो गम्भीरवेद्यपि ।
वरारोह इति प्रोक्ता गजा द्वादश सप्तमाः ।"

तदुक्तं भोजः ।

विभक्तावयवः पुष्टः सुदन्तः सुमहानपि ।
तेजस्वी रम्य इत्युक्तो गजः सत्त्वसमन्वितः ॥ १ ॥
अङ्कुशादिप्रहारेण यस्य भीतिर्न जायते ।
स भीमोऽयं गजः शुद्धो राज्ञः सर्व्वार्थसाधनः ॥२
शुण्डाग्रात् पुच्छपर्य्यन्तं रेखा यस्यैव दृश्यते ।
ध्वजः शुद्धो गजो नाम सङ्ग्राम्यप्राणदा-
यकः ॥ ३ ॥
समौ कुम्भौ खराकारौ आवर्त्तौ तत्र चोच्छ्रयौ ।
अधोरोऽयं गजो ज्ञात्वा राज्ञा विप्र विना-
शनः ॥ ४ ॥
आवर्त्तः पृष्ठतो यस्य स्वनाभिमभिविन्दति ।
पृष्ठाङ्गो बलवान् धीरो राज्ञामभिमतप्रदः ॥५॥
महाप्रमाणः पृष्ठाङ्गः सुदन्तश्चारुगण्डकः ।
भद्रये भद्रये जातः शूरो लक्ष्मीविवर्द्धनः ॥६॥
सितौ दन्तौ सितः पुच्छः सिता रेखा सिता
नखाः ।
रक्तकृष्णाक्षिवर्णाङ्गैर्विज्ञेयः सोऽथमङ्गलः ॥
अयं गजेन्द्रो यस्यास्ते तस्य स्यात् सकला मही ।
सारिष्टलोलयक्षश्च यस्यासौ गजेश्वरः ॥
आयोजनशतं यावदनर्घं कुरुते क्षयम् ।
नाल्पपुण्यैरयं प्राप्यो मनुजेन्द्रैः कलौ युगे ॥८॥
शुभौ दन्तौ शुभः शुण्डः शुभौ कुम्भौ शुभस्तनुः ।
गण्डयोर्गण्डयोर्मध्ये आवर्त्तः शुभलक्षणः ॥
प्रभ्रश्यन्मदसुतिपरिप्लुतगण्डदेशा-
स्तीक्ष्णाङ्कुशेन विनिवारयितुं न शक्याः ।
ज्ञातिद्विषो नवपयोदरवा गभीराः
पृष्ठीसुतां सकलसौख्यकरा भवन्ति ॥*"

अथ दोषाः ।

"दानः क्षीणोऽथ विषमो विरूपो विकलः
खरः ।
विमदो शापकः काको धूम्रो जटिल इत्यपि ॥
अग्निनी मण्डली श्वित्री हतावर्त्तो महाभयः ।
राक्षसा सुबली भाली निःसत्त्व इति विंशतिः ।
महादोषाः समाख्याता गजानां भोजभूभुजा ।"

तदुक्तं यथा,—

"अतिक्षीणतरः क्षीणदन्तोऽतिनिष्प्रभः ।
दीनाक्षः कुरुते दीनं भूभुजं नात्र संशयः ॥१॥
सर्व्वशुण्डो महापुच्छो निश्चाधो वेगवर्जितः ।
क्षीणोऽयं कुरुते क्षीणं स्वामिनं धनसम्पदा ॥२
कुम्भे दन्तेऽथिकर्णे च वैषम्यं पार्श्वयोस्तथा ।
यस्यायं विषमो नागो नागवत् कुरुते क्षयम् ॥३
आस्कन्दात्तु शिरः क्षीणं पश्चाद्भागस्य पृष्ठता ।
विरूप इति नागोऽयं कुरुते भूधनक्षयम् ॥४॥
नानाभोगैरपि कृतैर्यस्य नो जायते मदः ।
युद्धाय नोपक्रमते विकलं तं विवर्ज्जयेत् ॥५॥
खरता सहजा यस्य शरीरेऽस्तीति लक्ष्यते ।
तनुदन्तकरो हस्ती खरः कुलविनाशनः ॥६॥
न जायते मदो यस्य स्वकाले जायतेऽथवा ।
विरूपो विवशो वापि विमदं दूरतस्त्यजेत् ॥७॥
लघुप्रमाणः क्षीणाङ्गस्तनुशुण्डशिरोदरः ।
अश्नन्तं त्रसति क्षुद्रः पतेद्वै नेत्रयोर्मलम् ॥
चिरं पुच्छाग्रतो वापि आवर्त्तो मण्डलोऽथवा ।
बहिः प्रकुरुते लिङ्गं सर्व्वथा गतचेष्टवत् ॥
भूभुजा नहि वीक्ष्योऽयं शापकाखो गजाधमः ।
यदीच्छेच्छात्मनो भूतिं शरीरारोग्यमेव वा ॥८॥
शुद्धदेशौ यस्य भग्नौ स्कन्धदेशोऽतिशुष्कवः ।
काकोऽयं कुरुते क्षत्युं स्वामिनो नात्र संशयः॥९॥
विषमौ शुद्धगौ दन्तौ यस्य शुण्डविरोधिनौ ।
भिद्येते वा विदीर्य्येतां स्वयं शून्यान्तरावुभौ ।
कुरुते व्याधितं नाथं धूम्रगामा गजाधमः ॥१०॥
रूक्षेण कर्कशा रूक्षा जटारूपानुबन्धिनः ।
यस्यायं जटिलो नागः कुरुते धनसंक्षयम् ॥११॥
स्कन्धे वा गात्रदेशे वा स्वयं चर्म्मोऽवलम्बते ।
अग्निनी नाम नागोऽयं कुरुते भूधनक्षयम् ।
नैनं भूपेन्द्र वीक्षेत यदीच्छेदात्मनः श्रियम् ॥१२
मण्डलानि प्रदृश्यन्ते एकं द्वे वा बहूनि वा ।
विरूपाण्युद्गतानीव मण्डली कुलनाशनः ॥१३॥
तानि चेन्नानि यस्य स्युः श्वित्री स धननाशनः ॥१४
हृदये उदरे चैव शिरे पुच्छस्य मूलतः ।
गुदे मेढ्रे पदे चैव आवर्त्तेन हतश्रियम् ।
योजितं कुरुते भूपं प्रदक्षिणमुपद्रुतम् ॥ १५ ॥
गच्छतो यस्य गुल्फाभ्यां भवेत् संघर्षणं
मुहुः ।
अपि सर्व्वगुणैर्युक्तस्त्याज्यश्च स महाभयः ॥
राष्ट्रं धनं कुलं सैन्यं मेघं दारान् तथा प्रजाः ।
क्षपयत्यशुभो नागो दृष्टमात्रो न संशयः ॥
तत्रापत्रियते लोकस्तत्र वज्रभयं भवेत् ।
व्याधिवह्निभयत्वाच्च वर्जास्तं स महाभयः ॥१६॥
भृशं सन्ताड्यमानस्तु पार्श्वेकं यो न गच्छति ।
पृष्ठोदरं समादत्ते रेखा रक्तसमा यदि ॥
न्यस्ताग्निमपदस्थाने पश्चात् पातः पदे यदि ।
अपि सर्व्वगुणैर्युक्तो राष्ट्रहार्य्यं गजाधमः ॥
राष्ट्रादप्याक्रियतेऽयं भूसुता श्रियमिच्छता ।
राष्ट्रान्ते रचितो मोहात् कुरुते राष्ट्रसंक्ष-
यम् ॥१७॥
पादाक्षात्यन्तविषमा दन्तौ चान्योन्यवैषमौ ।
पञ्जरो दृश्यते भग्न एको वापौ द्वयोऽथवा ॥
दन्तौ वा चलतो यस्य किम्बु वा न प्ररोहतः ।
कुम्भौ वा विषदौ यस्य सुबली स गजाधमः ।
राष्ट्रदुर्गबलामात्यक्षयकृत्तं परित्यजेत् ॥१८॥
चर्म्मखड्ग इवाभाति भाले यस्यातिकर्कशः ।
भाली स कुरुते नाशो भर्तुः कुलधनक्षयम् ॥१९
पुष्टो विशालः सदन्तः सत्कारोऽपि शुभोऽपि-
सनः ।
न रणे साहसो यस्य स निःसत्त्वो गजाधमः ॥
सर्व्वेषां गजदोषाणामुक्त एव महानयम् ।
येनैकेन गुणाः सर्व्वे त्यज्यन्ते सुनिश्चितम् ॥"२०

पालकाप्यस्तु ।

"क्षीणदन्ताङ्गशुष्कत्वं विषमत्वं रदादिषु ।
शिरः क्षीणमधःपुष्टिरेते दोषा गजे मताः ॥"*

गार्ग्यस्तु ।

"ये कुब्जराखनुरदास्तनुगण्डशुण्डाः
क्षीणाः सुदीनवपुषो गुरुदीर्घपुच्छाः ।
वक्षादिभिः खलु गुणैरहिता हिताय
ते भूभुजामभिमता नहि वीक्ष्यजीयाः ॥
यो न स्ववेन्मदजलं तनुसूर्द्धभागो
निर्व्वीर्य्यतासुपगतानपराजिष्णुं
भूमीसुता न हि गजोऽयमवेक्षणीयः ॥
दोषैर्दुष्टान् गजानाज्ञा न योजेत कदाचन ।
न्यसेद्वा पररा(ष्ट्रेषु नगरात् क्रियते बहिः ॥
दद्यात् द्विजेभ्यः शुद्धेभ्यो गजकायाथवा नृपः ।
दृष्ट्वा यदि गजान् दुष्टान् दद्याच्छुद्धिमृतं द्विजे ।
पुरं नीराजयेद्वापि आत्मानमथवा सुतम् ।
दैवज्ञेन सुहृद्यादयुतव्याप्ततत्परः ॥
तिलान् वा जुहुयादग्नौ तत्प्रतीकारहेतवे ।
ब्रह्मादिजातिभेदेन जातिरुक्ता चतुर्विधा ॥
चतुर्विधानां भूपानां वाहने ते शुभप्रदाः ।
ये दोषा दोषवत्त्वानां त एव स्युः स्वजातितः ॥
ये व्याधयो नराणां स्युस्ते गजानामपि स्मृताः ।
चिकित्सापि तथा तेषां मात्रा चैव गरीयसी ।"

इति गजपरीक्षा ॥

इति भोजराजकृतयुक्तिकल्पतरुः ॥

हाटकं, क्ली, (हटति शोभते इति। हट दीप्तौ + घञ्।) सुवर्णम्। (यथा, माघे। १३। ६३।
"नवपाटलेक्षुकपितं दरदग्धं च
क्षितिपस्य वस्त्वमव तत्र संवदि॥"
अस्य पर्य्यायो यथा,—
"स्वर्णं सुवर्णं कनकं हिरण्यं हेम हाटकम्।
तपनीयञ्च गाङ्गेयं कलधौतञ्च काञ्चनम्॥
चामीकरं शातकुम्भं तथा कार्तस्वरञ्च तत्।
जाम्बूनदं जातरूपं महारजत इत्यपि॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥
हाटकपरिमितः। "जातरूपेभ्यः परिमाणे।" ४। ३। १५३। इति यञ्॥) सुवर्णम्। इत्यमरः। २। ६। ६४॥ सुवर्णनिर्म्मिते, त्रि॥

हाटकमयं, त्रि, सुवर्णमयम्। हाटकशब्दात् मयट्-प्रत्ययेन निष्पन्नम्॥

हाटकेश्वरः, पुं, (हाटकस्य ईश्वरः।) गोदावरी-तीरस्थशिवः। यथा,—
"एतस्मिन्नन्तरे प्राप्ताः सर्व्वे एवर्षयोऽर्थिनः।
द्रष्टुं त्रैलोक्यभर्त्तारं चास्मत्कं हाटकेश्वरम्॥
ततः कपिवरः प्राप्तो हृताशा सह सुन्दरि!।
स्नात्वा गोदावरीतीर्थे दिदृक्षुर्हाटकेश्वरम्॥"
इति वामने ६२ अध्यायः॥
(वितस्तिस्थितो महादेवः। यथा, भागवते। ५। २४। १७। "ततोऽधस्तादितले हरो भगवान् हाटकेश्वरः स्वपार्षदभूतगणावृतः प्रजापतिसर्गोपबृंहणाय भवो भवान्या सह मिथुनीभूयास्ते। यतः प्रवृत्ता सरित्प्रवरा हाटकी नाम भववीर्य्येण। यत्तच्चित्रभानुर्मातरिश्वना समिध्यमान ओजसा पिबति। तन्निष्ठ्यूतं हाटकाख्यं सुवर्णं भूषणेनासुरेन्द्रावरोधेषु पुरुषाः सह पुरुषीभिर्धारयन्ति।")

हातव्यं, त्रि, (हा + तव्य।) त्यक्तव्यम्। यथा।
"हातव्योऽयमसार एव विरसः संसार इत्यादिकम्
सर्व्वस्येव हि वाचि चेतसि पुनः कस्यापि
पुण्यात्मनः।"
इति शान्तिशतकम्॥

हानं, क्ली, (हा + ल्युट्।) वेतनम्। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ प्रमथनम्। मरणम्। राक्षसः। इति संक्षिप्तसारोणादिवृत्तिः॥

हानं, क्ली, (हा + क्तः।) त्यागः। इति जटाधरः॥

हानिः, स्त्री, (हा + "वहिश्रिश्रुयुद्रुस्रुभ्यः कित्।" उणा० ४। ५१। इति निः। यद्वा, हा + क्तिन्।) "ग्लास्त्याह्याभ्यो निः।" ३। ३। ६७। इत्यस्य वार्त्तिकोक्त्या निः।) क्षतिः। तत्पर्य्यायः। अपहारः २ अपचयः ३। इति जटाधरः॥ (यथा, महाभारते। ५। ६६। ४।
"अवाप्तं सरैः पीत्वा निहतं निहतारिभिः।
यतः सोमस्य हानिश्च वृद्धिश्चैव प्रदृश्यते॥")

हानुकः, त्रि, (हानुक + अण्।) हानुकसम्बन्धी। इति कैचित्॥

हान्तं, क्ली, (हन + "भस्मिगमिनमिहनीति।" उणा० ४। १५६। इति क्तन् हश्च।) मरणम्। इत्युणादिकोषः॥

हापुत्तिका, स्त्री, (हापुत्ति + स्वार्थे कन्।) हापुत्ति-शब्दार्थः। तत्पर्य्यायः। सर्षपी २ खञ्जनिका ३ तुलिका ४ स्तोटिका ५। इति त्रिकाण्डशेषः॥

हापुत्ती, स्त्री, हापुत्तिका। यथा,—
"गोभक्षीरः पङ्कजीरी हापुत्ती राजभद्रिका॥"
इति हारावली॥

हाक्षिका, स्त्री, जृम्भा। हाइ इति भाषा। तत्पर्य्यायः। उपजृम्भिका २। इति हारावली॥

हायनः, पुं, क्ली, (जहाति त्यजति विहीनो प्राप्नोति वा सावानिति। हा त्यागे हा गतौ वा + "हन्त्र ब्रीह्यिकालयोः।" ३। १। १४८। इति ल्युट्।) वत्सरः। इत्यमरः। १। ४। २०॥ (यथा, भागवते। १। ६। ८।
"अहञ्च तद्ब्रह्मकुले ऋषिर्वाक्षदृषेक्षया।
दिग्देशकालाव्युत्पन्नो बालकः पञ्चहायनः॥")

हायनः, पुं, (जहात्युदकमिति। हा + "हन्त्र ब्रीह्यिकालयोः।" ३। १। १४८। इति ल्युट्।) ब्रीहिभेदः। अग्निशिखा। इति मेदिनी॥

हारं, त्रि, (हरेरिदं। हरि + "अण्।" पचे हरतीति। हरं तदेव। हर + स्वार्थे अण्।) हरिसम्बन्धीयम्। हरणकर्त्तृ। यथा,—
"यच्छ्रुखलोऽपैत्यरतिर्विलज्जया
सत्त्वञ्च शुध्यत्यचिरेण पुंसः।
भक्तिर्हरौ तत्पुरुषे च सख्यं
तदेव हारं वद मन्यसे चेत्॥"
इति श्रीभागवते १०। ७२॥
"तदेव हारं हरेश्चरितं मनोहरं वा॥"
इति तट्टीकायां श्रीधरस्वामी॥

हारः, पुं, (ह्रियते मनो येन। हृ + घञ्।) मुक्ता-माला। तत्पर्य्यायः। मुक्तावली २। इत्यमरः। २। ६। १०५॥ हारा ३ यष्टिः ४ यष्टी ५ लता ६। इति शब्दरत्नावली॥ (यथा, कुमारे। ५। ८।
"विमुच्य सा हारमहार्य्यनिश्चया
विलोलयष्टिप्रविलम्बचन्दनम्।
बबन्ध बाष्पाकुलयभु वल्कलं
पयोधरोत्सेधविशीर्णसंहति॥"
ह्रियन्ते प्राणा यत्रेति।) युद्धम्। इति मेदिनी॥ (हृ + भावे घञ्। हरणम्। यथा, भागवते। १०। ६३। २७।
"हंस्युन्मार्गान् हिंसया वर्त्तमानान्
जन्मैतत्ते भारहाराय भूमेः॥")

हारकः, पुं, (हरतीति। हृ + ण्वुल्।) कितवः। चौरः। गन्धमेदः॥ विज्ञानविशेषः। इति मेदिनी॥ शाखोटवृक्षः। इति शब्दचन्द्रिका॥ भागकाङ्क्षः। इति जीमावली॥ हरणकर्त्तरि त्रि॥ (यथा, मनुः। ११। ५१।
"वस्त्रापहारकः श्वेतं पतत्यम्बुहारकः।")

हारहारा, स्त्री, कपिलद्राक्षा। इति राजनिर्घण्टः॥

हारहूरः, पुं, मद्यम्। इति हैमचन्द्रः॥

हारहूरा, स्त्री, द्राक्षा। इति धन्वन्तरिः॥ (पर्य्यायो यथा,—
"द्राक्षा खादुफला प्रोक्ता तथा मधुरसापि च।
गोस्तनी हारहूरा च गोक्षीरी चोपि
कीर्त्तिता॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

हस्ते, य, पाणौ। यथा। हस्ते करोति। इति मुग्धबोधव्याकरणम्॥

हस्तेक्षरणं, क्ली, पाणिग्रहणम्। विवाहः। इति केचित्॥

हस्त्यः, त्रि, (हस्त+"तेन यथाकथाचहस्ताभ्यां णयतौ।" ५।१।६८। इति यत्।) हस्तेन दत्तः। हस्तेन कृतः। इति सिद्धान्तकौमुदी॥

हस्त्यश्वः, पुं, (हस्तिषु अश्वश्चः।) गजाश्वः। तल्लक्षणं यथा,—

"हस्तिशिक्षाविधानज्ञो वन्यजातिविशारदः।
क्लेशक्षमक्षमा राज्ञो गजाश्वश्च प्रशस्यते॥"

इति मात्स्ये १९६ अध्यायः॥

हस्त्यायुर्व्वेदः, पुं, (हस्तिन आयुर्व्वेदः।) गजायुर्व्वेदः। हस्तिचिकित्साशास्त्रम्। तत्प्रमाणं हस्तिशब्दे द्रष्टव्यम्॥

हस्त्यारोहः, पुं, (हस्तिनमारोहतीति। आ+रुह+कः।) हस्तिपकः। इत्यमरः।२।८।५६॥ तल्लक्षणं यथा,—

"एतैरेव गुणैर्युक्तः खासनश्च विशेषतः।
गजारोहो नरेन्द्रस्य सर्व्वकर्म्मसु शस्यते॥"

एतैर्हस्त्यश्वगुणैः। इति मात्स्ये १९६ अः॥

हस्रः, त्रि, (हसति निरर्थकमिति। हस+"स्फायितञ्चीति।" उणा० २। १३। इति रक्।) मूर्खः। इत्युणादिकोषः॥

हस्सलं, क्ली, हालाहलम्। इति शब्दचन्द्रिका॥

हहाः, पुं, हाहानामगन्धर्व्वः। इति शब्दमाला॥

हा, ओ ल्लि त्यागे। इति कविकल्पद्रुमः॥ (ज्ञा०-पर०-सक०-अनिट्।) ओ हाक त्यागे इति प्रसिद्धोऽयम्। यत्र हाक इति शब्दयं तत्रास्यैव। तेन दामा गे हाक इत्यादि क्वचेणास्य होयते इत्यादि। अन्यस्य हायते इत्यादि। ओ हीनः। लि जहाति। अकर्म्मकश्चायम्। यथा। स्वार्थाद्धीनः। एवं जहाति अपेति स्वार्थो यस्मादिति पञ्चम्यर्थो वृत्तिः। इति दुर्गादासः॥

हा, ओ ङ लि गतौ। इति कविकल्पद्रुमः॥ (ज्ञा०-आत्म०-सक०-अनिट्।) ओ हान्। ङ लि, जहीते। इति दुर्गादासः॥

हा, य, विषादः। शोकः। खेदः। इत्यमरः। ३। ४। २५५॥ (यथा, महाभारते।३।६३।३॥

"हा नाथ! हा महाराज! हा स्वामिन्!
किं जहासि माम्।
हा दयासि विनश्यासि भीतासि विजने वने॥")

क्षुत्सा। इति मेदिनी॥

हाङ्गरः, पुं, खनामख्यातजलजन्तुः। इति शब्दचन्द्रिका॥ तत्पर्य्यायः व्यवहारकशब्दे द्रष्टव्यः॥

हाटकं, क्ली, (हटति शोभते इति। हट शोभौ+ण्वुल्।) स्वर्णम्। (यथा, माघे। १३। ६३।

"नवहाटकेष्टकचितं ददृशे सः
क्षितिमस्य यत्स्वमिव तत्र संवदि॥"

अस्य पर्य्यायो यथा,—

"स्वर्णं सुवर्णं कनकं हिरण्यं हेम हाटकम्।
तपनीयञ्च गाङ्गेयं कलधौतञ्च काञ्चनम्॥
जामीकरं शातकुम्भं तथा कार्त्तस्वरञ्च तत्।
जाम्बूनदं जातरूपं महारजत इत्यपि॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥

हाटकपरिमितः। "जातरूपेभ्यः परिमाणे।" ४।३।१५३। इति यण्॥) घुत्तूरः। इत्यमरः।२।६।६४॥ स्वर्णनिर्म्मिते, त्रि॥

हाटकमयं, त्रि, स्वर्णमयम्। हाटकशब्दात् मयट्-प्रत्ययेन निष्पन्नम्॥

हाटकेश्वरः, पुं, (हाटकस्य ईश्वरः।) गोदावरी-तीरस्थशिवः। यथा,—

"एतस्मिन्नन्तरे प्राप्ताः सर्व्वे एवर्षिपार्थिवाः।
द्रष्टुं त्रैलोक्यभर्त्तारं चाम्बकं हाटकेश्वरम्॥
ततः कपिवरः प्राप्तो हृताशा सह सुन्दरि!।
स्नात्वा गोदावरीतीर्थे दिदृक्षुर्हाटकेश्वरम्॥"

इति वामने ६२ अध्यायः॥

(वितलस्थितो महादेवः। यथा, भागवते। ५। २४। १७। "ततोऽधस्तादितले हरो भगवान् हाटकेश्वरः खपार्षदभूतगणावृतः प्रजापतिसर्गोपबृंहणाय भवो भवान्या सह मिथुनीभूयास्ते। यतः प्रवृत्ता सरित्प्रवरा हाटकी नाम भवयोर्वीर्य्येण। यत्तच्चिन्मात्रमात्मतत्त्वमनया सम्मिध्यमान ओजसा पिबति। तन्निर्भृतं हाटकाख्यं सुवर्णं भूषणेनासुरेन्द्रावरोधेषु पुरुषाः सह पुरुषीभिर्धारयन्ति॥")

हातव्यं, त्रि, (हा+तव्य।) त्यक्तव्यम्। यथा।

"हातव्योऽयमसार एव विरसः संसार इत्यादिकम्
सर्व्वस्यैव हि वाचि चेतसि पुनः कस्यापि
पुण्यात्मनः।"

इति भ्रान्तिशतकम्॥

हार्च्चं, क्ली, (हा+ऋच्।) वेतनम्। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ प्रसवनम्। मरणम्। राक्षसः। इति संक्षिप्तसारोणादिवृत्तिः॥

हार्त्तं, क्ली, (हा+क्तः।) त्यागः। इति जटाधरः॥

हार्त्तिः, स्त्री, (हा+"वहिश्रिस्रुयुद्रुस्रुभ्यः क्तिच्।" उणा० ४। ५२। इति क्तिः। यद्वा, हा+क्तिच्। "स्त्यान्याय्याह्याभ्यो क्तिः।"३।३।६४। इत्यस्य वार्त्तिकोक्त्या क्तिः।) क्षतिः। तत्पर्य्यायः। अपहारः २ अपचयः ३। इति जटाधरः॥ (यथा, महाभारते। ५। ६६। ४।

"अन्यान्तं सुरैः पीत्वा निर्हितं निर्हतारिभिः।
यतः सोमस्य हार्त्तिश्च दृष्टिश्चैव प्रदृश्यते॥")

हार्त्तुकः, त्रि, घातुकः। इति केचित्॥

हार्द्रं, क्ली, (हृद+"अमृत्युनिगमनिमहनीति।" उणा० ४। १५६। इति ष्ट्रन् दृद्भावश्च।) मरणम्। इत्युणादिकोषः॥

हार्द्धुत्रिका, स्त्री, यष्टिविशेषः। तत्पर्य्यायः। सर्व्वपी २ खञ्जनिका ३ तुलिका ४ स्फोटिका ५। इति चिकित्साशेषः॥

हापुत्ती, स्त्री, हापुत्रिका। यथा,—

"गोमक्षीरः पङ्कजीरो हापुत्री राजभट्टिका॥"

इति धारावली॥

हाफिका, स्त्री, जृम्भा। हाइ इति भाषा। तत्पर्य्यायः। उपजृम्भिका २। इति धारावली॥

हायनः, पुं, क्ली, (जहाति त्यजति जिहीते प्राप्नोति वा मासानिति। हा त्यागे हा गतौ वा+"हृञ्हन्मीहिकालयोः।" ३।१।१४८। इति ल्युट्।) वत्सरः। इत्यमरः॥१।४।२०॥ (यथा, भागवते। १। ६। ८।

"अहञ्च तद्ब्रह्मसुखे जविर्व्वाक्षदमेजया।
दिग्देशकालाद्यपत्रो बालकः पञ्चहायनः॥")

हायनः, पुं, (जहात्युदकमिति। हा+"हृञ्हन्मीहिकालयोः।" ३।१।१४८। इति ल्युट्।) व्रीहिभेदः। अग्निशिखा। इति मेदिनी॥

हारं, त्रि, (हरेरिदं। हरि+"अण्। पचो हरं तीति। हरं तदेव। हर+स्वार्थे अण्।) हरिसम्बन्धीयम्। हरणकर्त्तृ। यथा,—

"यच्छ्रुखतोऽपैत्यरतिर्विलक्षणा
सत्त्वञ्च शुध्यत्यचिरेण पुंसः।
भक्तिर्हरौ तत्पुरुषे च सख्यं
तदेव हारं वद मन्यसे चेत्॥"

इति श्रीभागवते १०। ७२॥

"तदेव हारं हरेश्चरितं मनोहरं वा॥"

इति तट्टीकायां श्रीधरस्वामी॥

हारः, पुं, (हियते मनो येन। हृ+घञ्।) मुक्तामाला। तत्पर्य्यायः। मुक्तावली २। इत्यमरः २। ६। १०५॥ हारी ३ यष्टिः ४ यष्टी ५ लता ६। इति शब्दरत्नावली॥ (यथा, कुमारे। ५। ८।

"विसृज्य तं हारमहार्य्यनिश्चया
विलोलयष्टिप्रविलम्बचन्दनम्।
नवस्य बालारुणवस्तु वल्कलं
पयोधरोत्सेधविशीर्णसंहति॥"

हियन्ते प्राणा यत्रेति।) युद्धम्। इति मेदिनी॥ (हृ+भावे घञ्। हरणम्। यथा, भागवते। १०। ६३। २७।

"हृंसुन्मार्गान् हिंसया वर्त्तमानान्
यच्छेतत्ते भारहाराय भूमेः॥")

हारकः, पुं, (हरतीति। हृ+ण्वुल्।) कितवः। चौरः। गन्धमेदः॥ विज्ञानविशेषः। इति मेदिनी॥ शाखोटवृक्षः। इति शब्दचन्द्रिका॥ भाजकाङ्कः। इति लीलावती॥ हरणकर्त्तरि त्रि॥ (यथा, मनुः। ११। ५१।

"वस्त्रापहारकः श्वेतं पशुतामश्वहारकः॥")

हारहारा, स्त्री, कपिलद्राक्षा। इति राजनिर्घण्टः॥

हारहूरः, पुं, मद्यम्। इति हैमचन्द्रः॥

हारहूरा, स्त्री, द्राक्षा। इति धन्वन्तरिः॥ (पर्य्यायो यथा,—

"द्राक्षा खादुफला प्रोक्ता तथा मधुरसापि च।
गोस्तनी हारहूरा च गोक्षनी चोपि
कीर्त्तिता॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

हारावली, स्त्री, पुरुषोत्तमकृतकोषविशेषः। यथा,
"सुक्तामयातिमधुरा मरुन्नावदात-
च्छायाधिरागतरलामलसद्गुणश्रीः।
साध्वी सतां भजतु कण्ठमसौ प्रियेव
हारावली विरचिता पुरुषोत्तमेन॥"
इति तट्टीकायां श्लोकः॥
(हारस्य आवली।) हारश्रेणी च॥ (यथा, गीतगोविन्दे। ११। १३।
"हारावलीतरलकाञ्चनकाञ्चिदाम-
मञ्जीरकङ्कणमणिद्युतिदीपितश्च॥")

हारिः, स्त्री, (हरतीति। हृ+बाहुलकात् इन्। इत्युणादिवृत्तौ उज्ज्वलदत्तः। ४।१२४।) पथिकस्नानः। द्यूतादिभङ्गः। इति मेदिनी॥ रुचिरे, त्रि॥

हारिकण्ठः, पुं, (हारी मनोहरः कण्ठो कण्ठरवो यस्य।) कोकिलः। (हारी हारयुक्तः कण्ठो यस्य।) हारान्वितगले, त्रि। इति मेदिनी॥

हारिणिकः, पुं, (हरिण हन्तीति। हरिण+"पक्षिमत्स्यमृगान् हन्ति।" ४। ४। ३५। इति ठक्।) व्याधः। हरिणघातकः। इति केचित्॥

हारितः, पुं, पक्षिविशेषः। तत्पर्य्यायः। हरितालुकः २। इति जटाधरः॥ हारीतः ३। इति मेदिनी॥ अस्य मांसगुणाः हारीतकशब्दे द्रष्टव्याः। हरिदर्णश्च॥ (हरितस्य हरिचन्द्रौत्तस्यापत्यं पुमानिति। हरित+अण्। हरितपुत्रः। यथा, हरिवंशे। १३। २८।
"हरिनो रोहितस्याथ चक्षुर्हारित उच्यते॥")

हारितकं, क्ली, (हरितकमेव। स्वार्थे अण्।) शाकम्। इति शब्दरत्नावली॥

हारिद्रः, पुं, कदम्बवृक्षः। (हरिद्रया रक्तम्। हरिद्रा+"हरिद्रामञ्जिष्ठाभ्यामण् वक्तव्यः।" ४। २। २। इत्यस्य वार्त्तिकोक्त्या अण्।) हरिद्रारञ्जिते, त्रि। इति मेदिनी॥ (यथा, हरिवंशे ५। ५८।
"दूर्वाकाण्डश्यामे हारिद्रे वापि निर्देशेश्वरकम्॥")

हरिद्रायाः। इति हेमचन्द्रः॥ विषभेदः। यथा,—
"हरिद्रातुल्यमूलो यो हारिद्रः स उदाहृतः।"
इति भावप्रकाशः॥

हारी, स्त्री, मुक्ता। यथा,—
"मुक्ता मुक्ताफलं शुक्तिबीजं हारी च मौक्तिकम्॥")
इति शब्दरत्नावली॥

हारी, [न्] त्रि, (हारोऽस्यास्तीति। इनिः।) हारविशिष्टः। यथा,—
"केयूरवान् कनककुण्डलवान् किरीटी
हारी हिरण्मयवपुर्धृतशङ्खचक्रः।"
इति नारायणस्थानम्॥
(हरतीति। हृ+णिनिः।) हरणकर्त्ता। यथा, महाभारते। १। २। ६५।
"क्षिप्यते वध्यमानोऽपि नरो हारिभिरिन्द्रियैः।
विमुक्तसङ्गो दुष्टाश्वैरुद्भ्रान्तैरिव सारथिः॥"
मनोहरः। यथा, शाकुन्तले प्रस्तावनायाम्।
"तवाक्षि गौतरागेण हारिणा प्रसभं हृतः।
एष राजेव दुष्मन्तः सारङ्गेणातिरंहसा॥")

हारीतः, पुं, पक्षिभेदः। (अस्य लक्षणं गुणाश्च।
"हारीतो रक्तपित्तः स्याद्धरिणोऽपि स कथ्यते।"
हारीतो हारील इति लोके।
"हारीतो रूक्ष उष्णश्च रक्तपित्तकफापहः।
खेदस्वरकरः प्रोक्तः ईषद्दातकरश्च सः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे॥
आयुर्व्वेदकर्त्तरि च। यथा,—
"अग्निवेशश्च भेलश्च जतूकर्णः पराशरः।
हारीतः क्षारपाणिश्च जगृहुस्तस्य संहिताः॥"
इति चरके सूत्रस्थाने प्रथमेऽध्याये॥)
मुनिभेदः। स च धर्म्मशास्त्रकर्त्ता। (यथा, याज्ञवल्क्यः। १। ४।
"मन्वत्रिविष्णुहारीतयाज्ञवल्क्योशनोऽङ्गिराः।
यमापस्तम्बसंवर्त्ताः कात्यायनबृहस्पती॥
पराशरव्यासशङ्खलिखिता दक्षगौतमौ।
शातातपो वशिष्ठश्च धर्म्मशास्त्रप्रयोजकाः॥"
अयञ्च पौराणिक आसीत्। यथा, भागवते। १२। ७। ५।
"त्रय्यारुणिः कश्यपश्च सावर्णिरकृतव्रणः।
वैशम्पायनहारीतौ षड् वै गौराणिका इमे॥")
कैतवः। इति मेदिनी॥

हारीतकः, पुं, (हारीत एव। स्वार्थे कन्।) हारीतपक्षी। हारिल इति हरिताल इति च भाषा। तस्य मांसगुणाः। स्वादुत्वम्। कफपित्तास्रदोषनाशित्वञ्च। इति राजनिर्घण्टः॥

हार्द्द, क्ली, (हृदयस्य भावः कर्म्म वा। हृदय+"हृदयस्य हृल्लेखयदण्लासेषु।" ६। ३। ५०। इत्यण्। "हृदयस्य हृल्लेखयदण्लासेषु।" ६। ३। ५०। इति हृदादेशः।) प्रेम। स्नेहः। इत्यमरः। १। ७। २०॥ (यथा, महाभारते। १३। ७१। ५२।
"गावो लोकांस्तारयन्ति चरन्त्यो
गावश्चान्नं संजनयन्ति लोके।
यज्ञज्ञानं न गवां हार्द्दमेति
स वै गन्ता निरयं पापचेताः॥"
अभिप्रायः। यथा, भागवते। १। ७। ५५।
"अर्जुनः सप्तसाद्याय धरेर्हार्द्दमथाविशत्।
मह्यं यदाह भगवान् द्विषस्य सह मृत्युभम्॥")

हार्द्दी, [न्] त्रि, (हार्द्दमस्यास्तीति। इनिः।) स्नेहयुक्तः। यथा,—
"अथ च निकृतः पुत्रैर्हार्द्दैर्विभेत्यतथोज्झितः।
स्वजनेन च सत्यक्तस्तेषु हार्द्दी तथाप्यति॥"
इति देवीभागवतम्॥

हार्य्यः, पुं, (हियते इति। हृ+"अर्हकीर्य्यतः।" ३। १। १२४। इति ण्यत्।) विभीतकवृक्षः। हरीतकी, स्त्री। इति मेदिनी॥ (यथा, कुमारे। ५। ७०।
"इयञ्च तेऽन्या पुरतो विडम्बना
यदूढया वारणराजहार्य्यया।
विलोक्य दृष्टोत्तमधिष्ठितं त्वया
महाजनः खेरसुखो भविष्यति॥")
हरणीयाङ्गः। तत्पर्य्यायः। भाव्यः २। इति लीलावती॥

हालः, पुं, (हलेन क्रीड़तीति। अण्। यद्वा, हलतीति। हल+"ज्वलितिकसन्तेभ्यो णः।" ३। १। १४०। इति णः।) बलरामः। इति त्रिकाण्डशेषः॥ शालिवाहनराजः। इति हेमचन्द्रः॥ हलः। इति मेदिनी॥

हालकः, पुं, पीतहरितवर्णाश्वः। यथा,—
"हरितः पीतहरितच्छायः स एव हालकः।"
इति हेमचन्द्रः॥

हालहलं, क्ली, विषभेदः। इति शब्दरत्नावली॥

हालाहालं, क्ली, विषभेदः। इति शब्दरत्नावली॥

हाला, स्त्री, (हलते क्षयते इव चित्तमनयेति हल+घञ्। टाप्।) मद्यम्। इत्यमरः। २। १०। ३६॥ (पर्य्यायो यथा,—
"मद्यन्तु सौधुमैरेयमिरा च मदिरा सुरा।
कादम्बरी वारुणी च हालापि बलवल्लभा॥"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे॥)
तालादिनिर्य्यासमद्यम्। इति राजनिर्घण्टः॥ (यथा, माघे। १०। २१।
"योषिदित्यभिलषाय न हालां
दुष्यजः खलु सुखादपि मानः॥")

हालाहः, पुं, चित्रवर्णचोटकः। इति केचित्॥

हालाहलं, क्ली, पुं, (हालामपि हलतीति। हल+अच्।) विषभेदः। तत्पर्य्यायः। हालहलम् २ हाहलम् ३ हलाहलम् ४ हालहलम् ५ हाहालम् ६। इति शब्दरत्नावली॥ तस्य स्वरूपं यथा,—
"गोस्तनाभफलो गुच्छस्तालपत्रैकदम्बकः।
तेजसा यस्य दह्यन्ते समीपस्था द्रुमादयः॥
असौ हालाहलो ज्ञेयः किञ्चिन्न्यायां द्विमाषके॥
दक्षिणाब्धितटे देशे कोङ्कणेऽपि च जायते॥"
इति भावप्रकाशः॥
मद्यम्। इति राजनिर्घण्टः॥ (यथा च भागवते उत्तरस्थाने ३५ अध्याये।
"काकूटेन्द्रयतसाख्यहृल्लीहालाहलादि-" कम्॥")

हालाहलः, पुं, (हालाहलमस्त्यस्येति। अच्।) कीटविशेषः। तत्पर्य्यायः। चक्षुलिका २ कुटिलकीटकः ३। इति राजनिर्घण्टः॥

हालाहलधरः, पुं, (धरतीति। धृ+अच्। हालाहलस्य धरः।) शिवः। इति शब्दरत्नावली॥

हालाहला, स्त्री, (हालाहलमस्त्यस्या इति। अच्। टाप्।) क्षुद्रमूषिका। यथा,—
"हालाहलाक्षुलिका गिरिका वालमूषिका।"
इति जटाधरः॥

हालाहली, स्त्री, मदिरा। इति राजनिर्घण्टः॥
हालिकः, त्रि, हलेन खनति यः। (हलस्यायमिति वा। हल+"हलसीरात् ठक्।" ४।३।१२४। इति ठक्।) हलस्य वोढा। हलवन्ती। तत्पर्य्यायः। सैरिकः २। इत्यमरः।२।६।६४॥ (यथा, वक्रोक्तिप्रपञ्चिकायाम्। २।
"त्वं हालाहलभट्टकरोषि मनसो मूर्च्छां ममालिङ्गितो
हालां नैव बिभर्मि नैव च हलं मुग्धे! कथं हालिकः।
सत्यं हालिकतैव ते वसुचिता गृह्णस्य गोवाहने,
वक्रोक्तेति जितो हिमाद्रिसुतया स्मेरो हरः पातु वः॥")
हालिनी, स्त्री, स्थूलपक्षी। इति हेमचन्द्रः॥
हाली, स्त्री, कनिष्ठा श्यालिका। इति हेमचन्द्रः॥
हावः, पुं, (हल्यतेऽनेनेति। हल+उण्। इत्युणादिवृत्तौ उव्वलः। १।१।) दन्तः। इति त्रिकाण्डशेषः॥
हावः, पुं, (हे+घञ्।) व्याह्वानम्। इति जटाधरः॥ स्त्रीणां शृङ्गारभावजाः क्रियाः। यथा,
"स्त्रीणां विलासविब्बोकविभ्रमा ललितं तथा।
हेला लीलेत्यमी हावाः क्रियाः शृङ्गारभावजाः॥"
इत्यमरः। १।७।३१॥
स्त्रीणां विलासाद्याः शृङ्गारभावजाः क्रियाः हावशब्देनोच्यन्ते। क्रियाः चेष्टाः। शृङ्गारभावो रतिः तत्र जाताः शृङ्गारभावजाः। हूयन्ते रागिणोऽत्र हावः हुलि होमेऽदन्ताधारे घञ्। हूयन्ते रागिणः कामाद्यावनेनेति करणे वा घञ्। यदुक्तम्।
"युवानोऽनेन हूयन्ते नारीभिर्म्मदनानले।
अतो निरुच्यते हावस्ते विलासाद्यो मताः॥"
इति।
हा कष्टं वयति शोषयतीति वै शोषे इत्यसात् डे वा। यदाह भरतः।
"अलङ्काराश्च नाट्यज्ञैर्येऽन्या भावरसाश्रयाः।
यौवनेष्वधिकाः स्त्रीणां विकारा वल्गुगात्रजाः॥"
तथा।
"लीला विलासो विच्छित्तिर्विभ्रमः किल-किञ्चितम्।
मोट्टायितं कुट्टमितं बिब्बोको ललितं तथा।
विहृतमिति मन्तव्या दश स्त्रीणां स्वभावजाः॥"
इत्यमरभरतौ॥*॥
तल्लक्षणं यथा,—
"शोकादेरकसंयुक्तो भ्रूनेत्रादिविकाशवान्।
भावादीषत्प्रकाशो यः स हाव इति कथ्यते॥"
इत्युज्ज्वलनीलमणिः॥
हासः, पुं, (हस+घञ्।) हास्यम्। इत्यमरः। १।७।१८॥ (यथा, रघुः। १२। ३६।
"संरम्भं मैथिलीहासः परुषत्वं निनाय ताम्।
शिशावस्त्रिमितां वेलां चन्द्रोदय इवोदधेः॥"
विकाशः। यथा, भट्टिः। २। ३॥
"विम्बागतैस्तीरवने: सम्पृक्तं
निजां विलोक्यापहृतां पयोभिः।
कूलानि सामर्षतयेव तेनुः
सरोजलक्ष्मीं स्खलपद्महासैः॥")
हासः, [स्] पुं, (जहाति शीतकिरणमिति। हा+"बहिहाधाभ्यश्छन्दसि।" उणा० ४। २२०। इति असुन्। तस्य सुट् च।) चन्द्रः। वैदिकशब्दोऽयम्॥
हासिका, स्त्री, हास्यम्। इति हेमचन्द्रः॥
हास्तिकं, क्ली, (हस्तिनां समूहः। हस्तिन्+"अचित्तहस्तिधेनोष्ठक्।" ४।२।४७। इति ठक्।) हस्तिसमूहः। इत्यमरः। २। ८।३६॥ (यथा, महाभारते। ६। ४८। १०।
"दत्वा च दानं विविधं नानारत्नसमन्वितम्।
सगोहास्तिकदासीकं साजाविं गतवान् वनम्॥"
हस्तिना चरतीति। "चरति।" ४।४।८। इति ठक्।) हस्त्यारोहे, त्रि॥
हास्तिनं क्ली, (हस्तिना नृपेण निर्वृत्तमिति। हस्तिन्+अण्।) हस्तिनापुरम्। इति त्रिकाण्डशेषः। (हस्ती प्रमाणमस्य। हस्तिन्+"पुरुषहस्तिभ्यामण् च।" ५।२।३८। इति अण्।) गजपरिमाणे हस्तहस्तिसम्बन्धिनि च त्रि॥
हास्तिनपुरं, क्ली, (हास्तिनं पुरम्।) हस्तिनापुरम्। इति हेमचन्द्रः॥ (यथा, महाभारते। ६। ३५। ६।
"स गत्वा हास्तिनपुरं धृतराष्ट्रं समेत्य च।
उक्तवान् वचनं तथ्यं हितञ्चैव विशेषतः॥")
हास्यं, क्ली, (हस+ण्यत्।) रसविशेषः। स च कौतुकोद्भवम्। तत्पर्य्यायः। हासः २ हसः ३। इत्यमरः। १।१।१६॥ हसनम् ४ घर्घरः ५ हासिका ६। इति हेमचन्द्रः॥*॥ अथ हासः।
"विकृताकारवाक्वेषचेष्टादेः कुतुकाद् भवेत्।
हास्यो हासः स्थायिभावः श्वेतः प्रमथदैवतः॥
विकृताकारवाक्चेष्टं यदालोक्य हसेज् जनः।
तद्विभावत्वमाप्नोति तच्चेष्टोद्दीपनं मतम्॥
अनुभावोऽक्षिसङ्कोचवदनस्मेरतादिकः।
निद्रालस्यावहित्याद्या अत्र व्यभिचारिणः॥
ष्मेरानां स्मितहसिते मध्यानां विहसिताऽपहसिते च।
नीचानामपहसितं तथातिहसितञ्च षड्भेदाः॥
ईषद्विकासि नयनं स्मितं स्यात् स्पन्दिताधरम्।
किञ्चिल्लक्ष्यदन्तं तन्न हसितं कथितं बुधैः॥
मधुरस्वरं विहसितं सांसशिरःकम्पवक्रमंहसितम्।
अश्रुमदपहसितं सास्राक्षं विद्यात्राङ्गं भवत्यतिहसितम्॥
यथा मनः।
"गुरोर्गिरः पञ्च दिनान्यधीत्य
वेदान्तशास्त्राणि दिगन्तराच्च।
भ्रमी समाप्याय च तर्कवादान्
समागताः कुण्डलिनः प्रवादाः॥"
अस्य नाटकमेलकप्रभृतिषु परिपोषो द्रष्टव्यः। अत्र च।
"यस्य हासः स चेत् क्वापि साक्षान्नैव निबध्यते।
तथाऽपि विभावादिसामर्थ्यादुपलभ्यते॥
अभेदेन विभावादि साधारण्यात् प्रतीयते।
सामाजिकैस्ततो हास्यरसोऽयमनुभूयते॥"
एवमन्येष्वपि रसेषु द्रष्टव्यम्। इति साहित्यदर्पणे ३ परिच्छेदः॥*॥ तस्य शुभाशुभलक्षणं यथा,—
"अकस्मं हसितं श्रेष्ठं मीलिताक्षमवाग्रहम्।
अवक्त्रहसितं दुष्येत् तत् शोन्मादस्य नैकधा॥"
इति गारुडे ६५। ३५ अध्यायः॥
(हासयोग्ये, त्रि। यथा, रघुः। २। ४३।
"संरुद्धचेष्टस्य मृगेन्द्र! कामं
हास्यं वचस्तद्वयसश्च विक्लुः॥")
हाहलं, क्ली, हलाहलविषम्। इति शब्दरत्नावली॥
हाहाः, [स्] पुं, देवगन्धर्वविशेषः। इत्यमरटीकायां भरतः॥
हाहाः, पुं, देवगन्धर्वविशेषः। यथा,—
"हाहा हूहूश्चैवमाद्या गन्धर्व्वास्त्रिदिवौकसाम्।"
इत्यमरः। १।१।५५॥
देवतानां हाहाहूहूविश्वावसुतुम्बुरुचित्ररथप्रभृतयो गन्धर्व्वशब्दवाच्याः। उपास्योपासकलक्षणसम्बन्धः। अयुत्पन्नोऽयं हाहाशब्दः। हौहति शब्दं जहतीति त्रासुसिति हाको विच् इत्येवं युत्पन्ने तु शृणात्यचि धोरालोपोऽथवावित्यालोपः सात्। असि प्रत्यये हाहःशब्दश्च सान्तोऽपि। गन्धर्व्वो हाहसि प्रोक्तो गन्धर्व्वो गायनेऽपि च। इति साहसाहः। गन्धर्वः प्रीतिहाहवीरिति वाचस्पतिः। हाहाशब्दोऽपि दृश्यते। हंहो हाहा हूहू च हौ देवगणश्चैव तुम्बुरुरिति वाढ़िप्रभृतयः। इति भरतः॥*॥ विस्मयशब्दे शोकशब्दे च च। यथा,—
"ततो हाहा कृतं सर्व्वं दैत्यसैन्यं ननाश तत्।
प्रहर्षञ्च परं जग्मुः सकला देवतागणाः॥"
इति मार्कण्डेयपुराणे देवीमाहात्म्ये ६। ४०॥
हाहाकारः, पुं, (हाहा इत्यव्यक्तशब्दस्य कारः करणम्। युद्धकलरवः। इति केचित्॥ (यथा, महाभारते। २। १६। १६।
"हाहाकारः समभवत्तत्र सङ्घशः।
अन्योन्यं छिन्दतां शस्त्रैरादित्ये लोहितायति॥")
शोकध्वनिः। यथा,—
"उद्वहो विकटो वायुः करालो वाल्यवान्वितः।
देशवृक्षलतानाञ्च हाहाकाराय कल्पते॥"
इति ज्योतिषे वायुफलम्॥
हाहालं, क्ली, विषम्। इति शब्दरत्नावली॥
हि, न वर्द्धने। गतौ। इति कविकल्पद्रुमः। (भ्वा० पर०-सक०-अनिट्।) गतिरिह अन्तर्भूतार्थत्वात् गतिप्रेरणम्। न, प्रहिणं स्वस्तुसिति भट्टिः। वर्द्धने विरलप्रयोगः। इति दुर्गादासः॥

इति वा हिक्का के शब्दे धनञ्जयादिति हः। इति भरतः ॥ * ॥ अथ हिक्कारोगनिदानम्।

धन्वन्तरिरुवाच।

"हिक्कारोगनिदानञ्च वक्ष्ये सुश्रुत! तच्छृणु।
श्वासैकहेतुप्राग्रूपसंख्याप्रकृतिसंश्रया॥
हिक्का भक्तोद्भवा क्षुद्रा यमला महतीति च।
गम्भीरा च मरुत्तच्च त्वरया मुक्तिसेविते:॥
क्षुत्नतीक्ष्णखराप्यन्नैरन्नपानैरपीड़ित:।
करोति हिक्कामरुजां मन्दशब्दां क्षुधानुगाम॥
समं मत्स्यान्नपानेन या प्रायाति च सान्नजा।
आयासात् पवन: क्षुब्ध: क्षुद्रां हिक्कां प्रवर्त्तयेत्॥
जत्रुमूलप्रविस्तामल्पवेगयुताञ्च सा।
वृद्धिमायासतो याति मुक्तमात्रे च मार्दवम्॥
चिरेण यमलैर्वेगैराहारेष्वनुवर्त्तते।
परिणामसुखे दृष्टिं परिणामे च गच्छति॥
कम्पयन्ती शिरो ग्रीवामाक्षातस्थातिदृष्यत:।
प्रलापच्छर्दितीसारनेत्रविप्लुतवृष्मिता॥
यमलावेगिनी हिक्का परिणामवती च सा।
ध्वस्तभ्रूभृशशब्दस्य मृतिविप्लुतचक्षुष:॥
स्तम्भयन्ती तनुं वाचं स्मृतिं संज्ञाञ्च सुश्रुती।
तुदन्ती मार्गमन्यस्य कुर्व्वती मर्म्मघट्टनम्॥
दृष्टतो नमनं सार्य्यं महाहिक्का प्रवर्त्तते।
महाशूला महाशब्दा महावेगा महाबला॥
पक्वाशयाधो नाभेर्व्वा पूर्व्ववत् सा प्रवर्त्तते।
तद्रूपा सा महत् कुर्य्याच्छ्वासमङ्गप्रसारणम्॥
गम्भीरेण निनादेन गम्भीरां तु सुसाधयेत्।
आद्ये द्वे वर्ज्जयेदन्ते सर्व्वलिङ्गाञ्च वेगिनीम्॥
सर्व्वेषु सञ्चितामस्य स्वविरस्य व्यथायिन:।
व्याधिभि: क्षीणदेहस्य भक्तच्छेदकृशस्य च॥
सर्व्वेऽपि रोगा नाशाय मत्सर्वं क्षीप्रकारिण:।
हिक्काश्वासौ तथा तौ हि शत्रुकार्ये कृतालयौ॥"

इति गारुड़े १५५ अध्याय:॥*॥

तदौषधं यथा,—

"कृतघ्न: श्वासहिक्कासु कफगुल्मानिलापह:॥
त्रिदोषघ्नं मधु प्रोक्तं वातलञ्च प्रकीर्त्तितम्।
हिक्काश्वासकृमिच्छर्दिमेहकुष्ठाविषापहम्॥"

इति च गारुड़े १०३। ६; ५० अध्याय:॥

"तथा हिक्कां हरेत् पीता सौवर्चलयुता सुरा।"

इत्यपि गारुड़े १६० अध्याय:॥*॥

अन्यच्च।

अथ हिक्काधिकार:।

तत्र हिक्काया विप्रकृष्टनिदानमाह।

"विदाहिगुरुविष्टम्भिरूक्षातिष्यन्दिभोजने:।
शीतपानाशनस्यामरजोधूमेक्षतानिले:॥
व्यायामकर्म्मभाराध्वरोगाघातात्प्रतप्यते:।
हिक्काश्वासश्च कासश्च नृणां मरणायते॥"

अपतर्पणमग्न्यादि॥*॥

सम्प्राप्तिमाह।

"वायु: कफेनानुगत: प्रपद्य हिक्कां करोति हि।
अतश्चतुर्विधा यमलां क्षुद्रां गम्भीरां महतीं तथा॥"

सामान्यलक्षणमाह।

"सुहुर्मुहुर्व्वायुरुदेति सस्वनो
यकृत्प्लिहान्त्राणि मुखादिवाक्षिपन्।
स दोषवानाशु हिनस्त्यरून् यत-
स्ततस्तु हिक्केत्यभिधीयते बुधै:॥"

वायुरत्र सोदान: प्राणो वोह्य:। उदेति ऊर्द्धं याति। सस्वनो हिगिति शब्दवान्। ऊर्द्ध-गमनं विशिनष्टि यकृदित्यादि। क्षिपन्शब्दो-ऽप्यक्षि दीर्घत्वविकल्पात्। मुखादिति स्वतन्त्रीपे पञ्चमी। तेन यकृत्प्लीहान्त्राणि मुखमानीय आक्षिपन् नि:सारयन्निवेत्यर्थ:। स वायु:। दोषवान् दोषोऽत्र कफ: तद्वान्। वायु: कफे-नानुगत: इति संप्राप्ते:। हिनस्तीति हिक्का पृषोदरादित्वात् रूपसिद्धि:। हिगिति कायति शब्दं करोतीति वा॥*॥ पूर्व्वरूपमाह।

"कण्ठोरसोर्गुरुत्वञ्च वदनस्य कषायता।
हिक्कानां पूर्व्वरूपाणि कुक्षेराटोप एव च॥"

वदनस्य कषायता वातात्। न तु कफात् माधुर्य्य व्याधिप्रभावात्॥*॥ अन्नजाया लक्षणमाह।

"प्रानाग्नेरतिसंयुक्ते: सहसा पीड़ितोऽनिल:।
हिक्कायत्यूर्द्धगो भूत्वा तां विद्यादन्नजां भिषक्॥"

अनिल: प्राणो वायु:॥*॥ यमलालिङ्गमाह।

"चिरेण यमलैर्वेगैर्या हिक्का संप्रवर्त्तते।
कम्पयन्ती शिरोग्रीवं यमलां तां विनिर्द्दिशेत्॥"

क्षुद्रामाह।

"विकृष्टकालैर्या वेगैर्मन्दै: समभिवर्त्तते।
क्षुद्रिका नाम सा हिक्का जत्रुमूलात् प्रधा-
वति॥"

विकृष्टकालै: चिरेण। जत्रु कण्ठोरसो: सन्धि:॥

गम्भीरामाह।

"नाभिप्रदृत्ता या हिक्का घोरा गम्भीरनादिनी।
अनेकोपद्रववती गम्भीरा नाम सा स्मृता॥"

अनेकोपद्रववती तृष्णाज्वरादियुक्ता॥*॥

महतीमाह।

"मर्म्माण्यापीड़यन्तीव सततं या प्रवर्त्तते।
महाहिक्केति सा ज्ञेया सर्व्वमाहप्रकम्पनी॥"

मर्म्माणि वक्षिहृदयशिर:प्रभृतीनि॥*॥ असाध्यत्वमाह।

"व्यायम्यते हिक्कते यस्य देहो
दृष्टिर्भ्रुवोर्भ्रम्यते नित्यमेव।
क्षीणोऽन्नद्विट् क्षौति यश्चातिमात्रं
तौ द्वौ चान्त्यौ वर्ज्जयेद्धिक्कमानौ॥"

व्यायम्यते विस्तार्य्यत इव। तौ द्वाविति व्याय-म्यत इत्यादिना नित्यमेवेत्यन्तेनैको हिक्कमान:। क्षीण इत्यादिनातिमात्रमित्यन्तेनापर:। तौ द्वौ। अन्त्यौ च गम्भीरया महत्या च हिक्क-मानौ वर्ज्जयेत्। अपरच्च।

"अतिसञ्चितदोषस्य भक्तच्छेदकृशस्य च।
व्याधिभि: क्षीणदेहस्य वृद्धस्यातिव्यथायिन:॥
व्यायामाच्च समुत्पन्ना हिक्का हन्त्याशु जीवि-
तम्।
श्वसिका च प्रलापार्त्तिमोहक्षयसमन्विता॥"

साध्यत्वमाह।

"अचीरव्याप्यदीनञ्च स्थिरधात्विन्द्रियञ्च य:।
तस्य साधयितुं शक्या यमिका हन्यतोऽन्यथा॥"*॥

अथ हिक्कायाश्चिकित्सा।

"यत्किञ्चित् कफवातघ्नमुष्णं वातानुलोमनम्।
भेषजं पानमन्नञ्चा हिक्काश्वासेषु तद्धितम्॥
हिक्काश्वासान्तरे पूर्व्वं तैलाक्तं स्वेद उच्यते।
ऊर्द्धाध: शोधनं शक्ते दुर्ब्बले शमनं मतम्॥
प्राणावरोधतर्ज्जनविस्मापनशीतवारिपरिषेकै:
चित्रै: कथाप्रयोगै: शमयेद्धिक्कां मनोऽभि-
घातैश्च॥
हिक्कार्त्तस्य पयश्छागं हितं नागरसाधितम्।
मधु सौवर्चलोपेतं मातुलुङ्गरसं पिबेत्
मधुकं मधुसंयुक्तं पिप्पली शर्करान्विता।
नागरं गुड़संयुक्तं हिक्काघ्नं लावणत्रयम्॥
क्षणामलकशुण्ठीनां चूर्णं मधु सिताप्लुतम्।
सकृन्मुहु: प्रयोक्तव्यं हिक्काश्वासेषु तद्धितम्॥
चूर्णं कणागैरिकयो: सक्षौद्रं चावलेहयेत्॥
प्रवालशृङ्गबिल्वाचूर्णं मधुघृतप्लुतम्।
पिप्पली गैरिकश्चेति लेहो हिक्कानिवारण:॥
नेपाल्या गोविषाणाद्वा कुष्ठात् सर्व्वरसस्य वा।
धूपं कृष्णस्य वा साध्यं पिबेद्धिक्कोपशान्तये॥"

नेपाली मन:शिला।

"निर्धूमाङ्गारनि:क्षिप्तहिङ्गुमाषबलोद्भव:।
हिक्कापघ्नापि हन्त्याशु धूम: पीतो न संशय:॥
हरेणूनां कणानाञ्च काथो हिङ्गुसमन्वित:।
हिक्काप्रशमन: श्रेष्ठो धन्वन्तरिवचो यथा॥
चन्द्रशूरस्य बीजानि चिपेदङ्गुणे जले।
यदा स्फुटन्ति शक्तीयात्ततो वाससि गालयेत्॥
हिक्कातिवेगविकलस्तच्चूर्णं पलमात्रया।
पिबेत् पुन: पुनश्चापि हिक्काश्चर्यं प्रशाम्यति॥"

चन्द्रशूररस:॥*॥ इति हिक्काधिकार:। इति भावप्रकाश:॥

हिङ्कार:, पुं, (हिं इत्यव्यक्तशब्दं करोतीति। हिं + कृ + अण्।) आग्र:। इति केचित्॥ (हिं इत्यस्य कार:। करणम्। यथा, वालमनेयसंहितायाम्। २२। ७।

"हिङ्काराय स्वाहा हिङ्कृताय स्वाहेति॥")

हिङ्गु, क्ली, स्थूलविशेषनिर्य्यास:। स तु पारस्य-खोरासानस्थूलतानादिदेशे भवति। हिं इति भाषा। तत्पर्य्याय:। सहस्रवेधि २ जतुकम् ३ वाह्लीकम् ४ रामठम् ५। इत्यमर:। २।६।४०॥ वाह्लिकम् ६ रमठम् ७। इति भरत:॥ जन्तु-घ्नम् ८। इति रत्नमाला॥ पिण्याकम् ९ वाह्नी १० सहस्रवेधी ११ बह्वी १२ मधुरा १३ स्वधुपनम् १४ जतु १५। इति शब्दरत्नावली॥ केशरम् १६। इति शटाधर:॥ उग्रगन्धम् १७ भूतारि १८ जन्तुगन्धनम् १९ कृपाङ्गम् २० रसोत्तमम् २१ उग्रवीर्य्यम् २२ अगूढ़गन्धम् २३ वरदम् २४ भेदनम् २५ दीप्तम् २६। अस्य गुणा:। कटुत्वम्। कटुरसम्। उष्णत्वम्।

कृमिवातकफविबन्धाध्मानशूलगुल्मनाशित्वम्। चक्षुष्यत्वञ्च। इति राजनिर्घण्टः॥ अपि च॥
"हिङ्गूष्णं पाचनं रुच्यं तीक्ष्णं वातबलासहृत्। रसे पाके च कटुकं स्निग्धञ्च वह्निदीपनम्। शूलगुल्मोदरानाहकृमिघ्नं पित्तवर्द्धनम्॥"
इति भावप्रकाशः॥ * ॥

अन्यच्च।
"हिङ्गु तीक्ष्णं कटुरसं शूलानीर्णविबन्धनुत्। लघूष्णं पाचनं स्निग्धं दीपनं कफवातजित्॥"
इति राजवल्लभः॥

वंशपत्री। इति भावप्रकाशः॥ (काकादनी। तदर्थे पर्य्यायो यथा,—
"हिङ्गु काकादनी मता।"
इति गारुडे २०८ अध्याये॥

क्वचिद्रामठार्थे, पुं। तत्पर्य्यायो यथा,—
"रामठं हिङ्गुरुच्यते।"
इति च तत्रैव २०८ अध्याये।)

हिङ्गुनाड़िका, स्त्री, (हिङ्गुनः नाड़िरिव नाड़िर्यस्याः। कप्।) नाड़ीहिङ्गु। इति राजनिर्घण्टः॥

हिङ्गुनिर्य्यासः, पुं, (हिङ्गुन इव निर्य्यासोऽस्य।) निस्तृणः। इत्यमरः। २। ४। ६२॥ (पर्य्यायो यथा,—
"निस्तः स्यात् पिचुमर्दश्च पिचुमदश्च तिक्तकः। अरिष्टः पारिभद्रश्च हिङ्गुनिर्य्यास इत्यपि॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥).

हिङ्गुरसः। इति मेदिनी॥

हिङ्गुपत्रः, पुं, (हिङ्गुन इव पत्रमस्य।) द्रुहीवृक्षः। इति राजनिर्घण्टः॥ (विवरणमस्येङ्गुदीशब्दे ज्ञातव्यम्॥)

हिङ्गुपत्री, स्त्री, हिङ्गुनः पत्रम्। हिङ्गुपत्रमिव पत्रमस्याः। इत्यमरटीकायां भरतः॥ तत्पर्य्यायः। कारवी २ पृथुला ३ पृथुः ४ बाष्पीका ५ कवरी ६ पृथ्वी ७ त्वक्पत्री ८ कर्व्वरी ९। इति जटाधरः॥ पृथ्वीका १० बाष्पिका ११ बाष्पका १२ बाष्पा १३ पत्री १४। इति शब्दरत्नावली॥ दीर्घिका १५ तन्वी १६ शारपत्री १७ विष्वी १८ बाष्पी १९। अस्या गुणाः। कटुत्वम्। तीक्ष्णत्वम्। तिक्तत्वम्। उष्णत्वम्। कफवातामक्लमिहरत्वम्। रुच्यत्वम्। ५ अग्नित्वम्। दीपनत्वम्। पाचनत्वञ्च। इति राजनिर्घण्टः॥ अपि च।
"हिङ्गुपत्री भवेद्रुच्या तीक्ष्णोष्णा पाचनी कटुः। वृद्धिरुग्विबन्धार्शःश्वासगुल्मानिलापहा॥"
इति भावप्रकाशः॥

हिङ्गुपर्णी, स्त्री, (हिङ्गुन इव पत्रमस्याः। ङीप्।) वंशपत्री। इति रत्नमाला॥

हिङ्गुलः, पुं, क्ली, (हिङ्गु तद्वर्णं लातीति। ला+कः।) रागद्रव्यविशेषः। तत्पर्य्यायः। हिङ्गुलुः २। इत्यमरभरतौ। २। ५। २०॥ हिङ्गुलम् ३ रक्तम् ४ मर्कटश्रोणम् ५ दरदः ६ रसः ७। इति रत्नमाला॥ हंसपादम् ८ कुरुविन्दः ९। इति हेमचन्द्रः॥ हिङ्गुलिः १० रक्तपारदः ११। इति जटाधरः॥ वर्व्वरम् १२ सुरङ्गम् १३ सुगरम् १४ रञ्जनम् १५ दरदम् १६ म्लेच्छम् १७ चित्राङ्गम् १८ चूर्णपारदम् १९ चर्म्मारकम् २० मणिरागम् २१ रसोद्भवम् २२ रञ्जकम् २३ रसगर्भम् २४। अस्य गुणाः। मधुरत्वम्। तिक्तत्वम्। उष्णत्वम्। वातकफत्रिदोषद्वन्द्वदोषज्वरनाशित्वञ्च। इति राजनिर्घण्टः॥ * ॥ अपि च।
अथ हिङ्गुलस्य नामानि लक्षणानि गुणाश्च।
"हिङ्गुलं दरदं म्लेच्छं चित्राङ्गं चूर्णपारदम्। दरदस्त्रिविधः प्रोक्तश्चर्म्मारः शुकतुण्डकः। हंसपादस्तृतीयः स्यादुत्तरोत्तरगुणवान्॥ चर्म्मारः शुकवर्णः स्यात् सपीतः शुकतुण्डकः। जवाकुसुमसङ्काशो हंसपादो महोत्तमः॥
तिक्तं कषायं कटु हिङ्गुलं स्या-
न्नेत्रामयघ्नं कफपित्तहारि।
कुष्ठासक्रुष्ठज्वरकामलांश्च
श्लीहामवातौ च परं निहन्ति॥
ऊर्द्धपातनयुक्त्या तु क्रमरुद्धत्वपाचितम्। हिङ्गुलं तस्य सूतं तु शुद्धमेव न शोधयेत्॥"
इति॥ * ॥

तत्र हिङ्गुलस्य शोधनविधिः।
"मेषीक्षीरेण दरदमम्लवर्गेण भावितम्। सप्तवारान् प्रयत्नेन शुद्धिमायाति निश्चितम्॥"
एवं शोधितस्य हिङ्गुलस्य गुणाः।
"तिक्तं कषायं कटु हिङ्गुलं स्या-
न्नेत्रामयघ्नं कफपित्तहारि।
कुष्ठासक्रुष्ठज्वरकामलांश्च
श्लीहामवातौ च परं निहन्ति॥" इति॥ *
(पर्य्यायः शोधनप्रकारान्तरञ्च यथा,—
"हिङ्गुले हिङ्गुलुर्यातिदरदः शुकतुण्डकः। रसगन्धकसम्भूतो हिङ्गुलो दैत्यरक्तकः॥ अम्लवर्गद्रवैः पिष्टा दरदो माक्षिकेण च। दुग्धेन सप्तधा पिष्टः शुक्लीभूतो विशुध्यति॥"
तथाच प्रकारान्तरम्।
"आर्द्रकैर्लकुचाद्यैः सप्तधा भाविनो यदि। हिङ्गुलः शुद्धतां याति निर्दोषो जायते खलु॥ विम्बाभं हिङ्गुलं दिव्यं रसगन्धकसम्भवम्। मेहकुष्ठहरं रुच्यं पत्यं मेधाग्निवर्द्धनम्॥"
इति हिङ्गुलशुद्धिः॥ * ॥
इति वैद्यकरसेन्द्रसारसंग्रहे चारणमारणाधिकारे।) अथ हिङ्गुलादिरसाकर्षणविधिः।
"निम्बरसैर्निम्बपत्ररसैर्वा यामसाप्तकम्। पृष्ट्वा दरदमर्द्धं तु पातयेत् स्वेदयुक्तिवत्॥ सचोर्द्धपिठरोत्थं यल्लीयादग्रसमुत्तमम्। शुद्धमेव हि तत् सूतं सर्व्वकर्म्मसु योजयेत्॥"
इति च भावप्रकाशः॥

हिङ्गुला, स्त्री, देवीविशेषः। यथा,—
"ब्रह्मरन्ध्रे हिङ्गुलायां भैरवो भीमलोचनः। कोट्टरी सा महामाया त्रिगुणा या दिगम्बरी॥"
इति तन्त्रचूड़ामणौ पीठमाला॥ * ॥

अन्यच्च।
"कन्या चोत्खेदसंजाता सास्रविलिलिहेऽद्भुता। ततस्तामाह बालार्कप्रभां भैरवमूर्त्तिमान्॥ शङ्करो वरदो लोकश्रेयार्थाय वचो महत्। त्वां पूजयिष्यन्ति सुरा ऋषयः पितरस्तथा॥ यक्षविद्याधराश्चैव मानवाश्च शुभङ्करि!। त्वां स्तोष्यन्ति सदा देवि बलिपुष्पोत्करैः करैः॥ चर्च्चिकेति शुभं नाम यस्माद्रुधिरचर्च्चिता॥
इत्येवमुक्ता वरदेन चर्च्चिका
भूतानुयाता हरिचर्म्मवासिनी।
महीं समन्ताद्विचचार सुन्दरी
स्थलं गता हैङ्गुलमाद्यमुत्तमम्॥"
इति वामनपुराणे ६७ अध्यायः॥

हिङ्गुलिः, पुं, (हिङ्गु इव वर्णं लातीति। ला+कः।) हिङ्गुलः। इति जटाधरः॥

हिङ्गुलिका, स्त्री, (हिङ्गुल इव वर्णोऽस्या अस्तीति। हिङ्गुल+ठन्।) कण्टकारी। इति शब्दचन्द्रिका॥ (कण्टकारीशब्देऽस्या विषयो ज्ञातव्यः॥)

हिङ्गुली, स्त्री, वार्त्ताकी। इत्यमरः। २। ४। १२४॥ दूहली। इति भावप्रकाशः॥

हिङ्गुलुः, पुं, क्ली, हिङ्गुलः। इत्यमरः। ३। ५। २०॥ (पर्य्यायोऽस्य यथा,—
"हिङ्गुले हिङ्गुलुर्यातिदरदः शुकतुण्डकः। रसगन्धकसम्भूतो हिङ्गुलो दैत्यरक्तकः॥"
इति वैद्यकरसेन्द्रसारसंग्रहे चारणमारणाधिकारे॥)

हिङ्गुशिराटिका, स्त्री, (हिङ्गुल इव शिरां अटतीति। अट्+ण्वुल्। टाप्। अत इत्वम्।) वंशपत्री। इति रत्नमाला॥

हिङ्गूलं, क्ली, मधुमूलम्। इति शब्दचन्द्रिका। आलु इति ख्यातम्॥

हिच्चः, पुं, हिच्चलवृक्षः। इति शब्दचन्द्रिका॥

हिच्चलः, पुं, (हिच्च इति नाम लातीति। ला+कः।) वृक्षविशेषः। हिजल इति बङ्गभाषा। इजर इति हिन्दी भाषा। तत्पर्य्यायः। निचुलः २ इच्चलः ३। इति हेमचन्द्रः॥ पिच्चुलः ४ नदीकान्तः ५ अम्बुजः ६। इति जटाधरः॥ धनदः ७ कान्तः ८ जलजः ९ दीर्घपत्रकः १० नदीजः ११ रक्तः १२ कार्म्मुकः १३। अस्य गुणाः। कटुत्वम्। उष्णत्वम्। पवित्रत्वम्। भूतवातामयनाशग्रहचारादिदोषनाशित्वञ्च। इति राजनिर्घण्टः॥ अपि च।
"इच्चलो हिच्चलश्चापि निचुलश्चाम्बुजस्तथा। जलवेतसवद्दोषो हिच्चलोऽयं विषापहः॥"
इति भावप्रकाशः॥

हिङ्गोरः, पुं, हस्तिपादवन्यः। यथा,—
"विन्ध्यजालं पुनः पद्मं पद्मजो निगड़ोऽङ्कुशः। हिङ्गोरश्च पादपाशो वारिस्तु गजबन्धभूः॥"
इति हेमचन्द्रः।

हिण्ड, इ ड गतौ । अनादरे । इति कविकल्पद्रमः ॥ (भ्वा०-आत्म०-सक०-सेट् ।) इ, हिण्डते । ड, हिण्डते । इति दुर्गादासः ॥

हिडिम्बः, पुं, राक्षसविशेषः । स भीमसेनेन हतः । इति महाभारतम् ॥ (एतद्विवरणन्तु तत्रैव आदिपर्वणि १५३ अध्यायादारभ्य द्रष्टव्यम् ॥) हिडुम्ब इति च पाठः ॥

हिडिम्बजित्, पुं, (हिडिम्बं जितवानिति । जि+क्विप् ।) भीमसेनः । इति त्रिकाण्डशेषः ॥

हिडिम्बनिसूदनः, पुं, (हिडिम्बं निसूदयतीति । नि+सूद+क्विप्+ल्युः ।) भीमसेनः । इति भूरिप्रयोगः ॥

हिडिम्बभित्, [द्] पुं, (हिडिम्बं भिनत्तीति । भिद्+क्विप् ।) भीमसेनः । इति भूरिप्रयोगः ॥

हिडिम्बा, स्त्री, हिडिम्बराक्षसभगिनी । यथा,—

"सुतो मानुषमांसस्य महाकायो महाबलः ।
आजाय मानुषं गन्धं भगिनीमिदमब्रवीत् ॥
उपपन्नश्चिरस्याद्य भक्षोऽयं मम सुप्रियः ।
सोऽहमस्यास्य प्रमथति शिरा मर्म्माणि मे सुखम् ॥
एवमुक्ता हिडिम्बा तु हिडिम्बिनं तदा वने ।
भ्रातुर्व्यवसायज्ञाय स्वरमाणेव राक्षसी ॥"

इति महाभारते आदिपर्वणि १५६ अध्यायः ॥ तत्कर्म्म भीमसेनेनैव पटोत्क्षेपो जातः । यथा,

"प्रजज्ञे राक्षसी पुत्रं भीमसेनात्महाबलम् ।
विक्रान्तं महावीर्य्यं शत्रुकर्म्म विभीषणम् ॥
प्रत्यक्षं विदुषः पाण्डवस्यैवात् स पितुस्तदा ।
मातुश्च परमेष्वासौ च नामास्य चक्रतुः ॥
घटो यास्योत्कच इति माता तं प्रत्यभाषत ।
तस्मिन्नेव नामास्य घटोत्कच इति स्म ह ॥"

इति महाभारते आदिपर्वणि १५६ अः ॥

हिडिम्बापतिः, पुं, (हिडिम्बायाः पतिः ।) भीमसेनः । इति शब्दरत्नावली ॥

हिडिम्बारसजः, पुं, (हिडिम्बाया रसजः ।) घृतम् । इति त्रिकाण्डशेषः ॥

हिण्डनं, क्ली, (हिण्ड+ल्युट् ।) भ्रमणम् । रतम् । इति मेदिनी । ऐश्वर्य्यम् । इति विश्वः ॥

हिण्डिकः, पुं, कर्म्मकारः । इति हारावली ॥

हिण्डिरः, पुं, हिण्डीरः । इति शब्दरत्नावली ॥

हिण्डी, स्त्री, दुर्गा । इति त्रिकाण्डशेषः ॥

हिण्डीमिश्रकः, पुं, (हिण्डायाः दुर्गायाः प्रियसखः ।) शिवः । इति शब्दरत्नावली ॥

हिण्डीरः, पुं, (हिण्डते इतस्ततो भ्रमतीति । हिण्ड+ईरच् । इदुपधादित्वात् कुत्वाभावः । ७ । १ । ९ ।) समुद्रफेनः । इत्यमरः । २ । ६ । १५५ । (यथा, माघे । १० । ६८ ।

"अनाहितभ्रमाकृष्टभुजभूमि
हिण्डीरपिण्डपरिशीतलमर्णवेभ्यम् ।
अध्यासितुं प्रथमतो महदासनञ्च
पूर्वं दधाव इव दक्षिणबाहुदण्डः ॥")

शङ्खः । दुग्धम् । इति मेदिनी । वस्त्रम् । इक्षुभेदः । (स्त्री, पक्षिणम् । इक्षुगुण-२ आसवकी । २ । ५० ।)

हितं, त्रि, (हि गतिवृद्धौ धा धारणे पुष्टौ वा+क्तः ।) पथ्यम् । धनम् । एतम् । इति मेदिनी । इष्टसाधनम् । इति तन्त्रबोधटीकायां दुर्गादासः । मङ्गलम् । यथा,—

"शक्नुवन्त्यक्षितो वापि जायतः क्षपतो न यत् ।
सर्व्वमत्यहिनार्थाय तत् पण्डोरिव चेष्टितम् ॥
अधिहितहितविचारशून्यबुद्धेः
धृतिसमयैर्व्यभिचारवर्जितस्य ।
उदरभरणमात्रतुष्टबुद्धेः
पुरुषपशोः पशोश्च को विशेषः ।"

इति गारुडे ११५ अध्यायः ॥

मित्रम् । यथा,—

"हितसमरिपुसंज्ञा ये निसर्गे नियुक्ता
अधिहितहितमध्यास्तेऽपि तत्कालमित्रैः ।"

इति ज्योतिस्तत्त्वम् ॥

हितकः, पुं, (हितमर्हतीति । हित+संज्ञायां कन् ।) शिग्रुः । इति राजनिर्घण्टः ॥

हितकारी, [न्] त्रि, (हितं करोतीति । कृ+णिनिः ।) मङ्गलकारकः । शुभकारकः । यथा,—

"लक्ष्मणेन च धर्म्मात्मन् ! भ्राता तव हितकारिणा ।
माल्यभिर्म्माल्यसदृशं पश्यामोऽद्य वयं नृप ! ॥"

इति श्रीरामायणे उत्तरकाण्डे १ सर्गः ॥

हितप्रणीः, पुं, (हितं प्रणयतीति । प्र+नी+क्विप् ।) चारः । इति शब्दरत्नावली ॥

हितवादी, [न्] त्रि, हितकथनशीलः । सत्यरामर्शी । हितशब्दपूर्व्वकवदधातोर्णिनिप्रत्ययेन निष्पन्नः ॥

हितावली, स्त्री, (हितानां आवली यत्र ।) औषधविशेषः । हिंयावली इति हिन्दी भाषा । तत्पर्य्यायः । कुक्कुरी २ कुक्कुरः ३ अङ्गारकुक्कः ४ अङ्गारपत्रिः ५ अन्धिः ६ अन्धिलः ७ । अस्या गुणाः । वातकफत्वम् । तिक्तत्वम् । श्रीहगुल्मोदरकृमिकुष्ठप्रदाहकफदूषितनाशित्वञ्च । इति राजनिर्घण्टः ॥

हितैषी, [न्] त्रि, (हितमिच्छतीति । इष+णिनिः ।) हितेच्छाकारी । यथा, दुष्टदाक्षमार्क्कटे ।

"यात्राविवाहव्रतबन्धयज्ञ-
प्रासाददुर्गाकरणं हितैषी ।
नष्टे मृतौ नोपदिशेन्नराणां
दैवप्रतिष्ठामपि कर्त्तुमेषः ॥"

इति मत्स्यपुराणतत्त्वम् ॥

हितोक्तिः, स्त्री, (हितस्य उक्तिः ।) पथ्यवचनम् । इति धरणयः ॥

हितोपदेशः, पुं, (हितानामुपदेशः ।) सत्यरामर्शदानम् । (यथा, महाभारते । १ । ३ । १ । २ ।

"हितोपदेशश्च यथा धर्म्मराजस्य धीमतः ।
विदुरेण कृतो यत्र हितार्थं सौक्ष्म्यमाश्रया ॥"

हितानामुपदेशो यत्र ।) विष्णुशर्म्मकृतनिजनामप्रसिद्धसंस्कृतसन्धिनामकणाक्षुद्रबालबोधिनीशास्त्रम् । यथा,—

हिन्दोलः

"सिंहः साधो वतामस्तु प्रसादात्तस्य भूयसे ।
जाह्नवीकेशरेखेव यन्मूर्द्धि भ्रमिनः कला ॥
श्रुत्वा हितोपदेशोऽयं पाटवं संस्कृतोक्तिषु ।
वाचां सर्व्वत्र वैचित्र्यं नीतिविद्यां ददाति च ॥"

इति हितोपदेशप्रथमश्लोकद्वयम् ॥

हिन्ताल, पुं, वृक्षविशेषः । हैंताल इति भाषा । तस्य फलं उड्डुगम् । इत्यमरः । २ । ४ । १६८ ॥ तत्पर्य्यायः । पूगफोटः २ । तत्फलम् किरिटि । इति त्रिकाण्डशेषः ॥ ४ ॥ तस्य पर्य्यायान्तरं गुणाश्च ।

"हिन्तालः स्थूलनालश्च बलपत्री दृढद्रुमः ।
स्थिरपत्रो द्विधाचिह्नः शिरापत्रोऽस्थिराह्विकः ॥
गर्भसारी नीलनालो भीषणो बहुकण्टकः ।
अम्लसारी दृढत्वालः स्वाद्वम्लो दीर्घधाभिधः ॥
हिन्तालो मधुरास्वश्च कफकृत् पित्तदाहजित् ।
श्रमछर्द्यापहारी च शिशिरो वातदोषकृत् ॥"

इति राजनिर्घण्टः ॥

(व्यवहारोऽस्य यथा,—

"गुडूचीबालहिन्तालवानरीनीलझिण्टिकाः ।"

इति वैद्यकरत्नेन्द्रसारसंग्रहे कुष्ठाधिकारे मालिकायरसे ॥) च तु ढगराजविशेषः । यथा, क्रियाकौमुद्यां वशिष्ठः ।

"गुवाकतालहिन्तालास्तथा ताडी च केतकी ।
खर्ज्जूरनारिकेलौ च सप्तैते ढगराजकाः ॥
ढगराजशिरापत्रैः कुर्य्याद्दन्तधावनम् ।
तावद्भवति चण्डालो यावन्नां नैव पश्यति ॥"

इत्याह्निकाचारतत्त्वम् ॥

हिन्दुः, पुं, (हीनं दूषयतीति । दुष+डुः । इषोदरादित्वात् साधुः ।) जातिविशेषः । हिंदु इति भाषा । यथा,—

पश्चिमाम्नायमन्त्रास्तु प्रोक्ताः पारस्यभाषया ।
षष्ठीत्तरशतान्यौतिर्वेषां संसाधनात् कलौ ॥
पञ्च स्नानाः सप्त मौरा नव शाक्ता महाबलाः ।
हिन्दुधर्म्मप्रणेतारो जायन्ते चक्रवर्त्तिनः ॥
हीनञ्च दूषयत्येव हिन्दुरित्युच्यते प्रिये ! ॥
पूर्व्वाम्नाये गयप्रान्तं बङ्गपीठाः प्रकीर्त्तिताः ।
शिरश्चिह्नभाषया मन्त्राक्षरैः संसाधनात् कलौ ॥
अधिपा मन्त्रजानाश्च संग्रामेष्वपराजिताः ।
दक्षेणा नव षट् पञ्च जनुर्जाताश्च भामिनि ! ॥"

इति मेरुतन्त्रे २६ प्रकाशः ॥

हिन्दोलः, पुं, (हिन्दोल+घञ् ।) आयतशुद्धपञ्चविधिस्वभावदृश्याश्रयविशेषः । झुलनयात्रा इति यस्य प्रसिद्धिः । षड्रागान्तर्गतरागविशेषः । हिंडोल इति हिन्दी भाषा । यथा,

"भैरवः कौशिकश्चैव हिन्दोलो दीपकस्तथा ।
श्रीरागो मेघरागश्च षडेते पुरुषाश्रयाः ॥"

अस्य स्त्रियः ।

"वैशाखी रामकली देशाख्या पटमञ्जरी ।
सहिता सहिता एता हिन्दोलस्य वराङ्गनाः ॥"

अथ हिन्दोलध्यानम् ।

"नितम्बश्रोणिसन्दरहिताङ्गा
शोकाङ्गा सेवासुरागमादधानः ।

खर्वः कपोलद्युतिकामयुक्तो
हिन्दोलरागः कथितो मुनीन्द्रैः ॥"

ततपुत्त्रा यथा, सङ्गीतदर्पणे ।

"आभीरः शुभ्रधवली चन्द्रकाचविमोहिका ।
चन्द्रकान्तः क्रमेणैव हिन्दोलाताश्च कीर्त्तिताः ॥"

तस्य गानसमयो यथा,—

"हिन्दोलः पञ्चमः सिन्धुर्ललितश्च वसन्तकः ।
भखारी भटीयारी च आद्ययामे प्रगीयते ॥"

इति बृहत्सङ्गीतरत्नाकरः ॥ * ॥

हनूमन्मते षड्रागाणां मध्ये द्वितीयरागः । ब्रह्मणः शरीरान्निर्गतः । केचिन्मते नाभितः । अस्य धातिः औडवः । अर्थात् प ग म प नि इति पञ्चस्वरमिलितः । अस्य गेयं षड्जस्वरः । वसन्तर्त्तौ दिवाप्रथमभागे गानसमयः । रागमालायामस्य रूपम् । अल्पवयःसुन्दरः पीतवर्णः उत्तमाङ्गः स्वर्णमयहिन्दोलारूढः सुवक्षोजसुन्दरीस्त्रीभिः गीतं गायन्तीभिः हिन्दोलान्दोलयन्तीभिश्च सह परमानन्देन हास्यकौतुककारी । अस्य पञ्च रागिण्यः । यथा । रामकरी १ देशाखी २ ललिता ३ विलावली ४ पटमञ्जरी ५ । अस्य पुत्त्रा अष्टौ यथा । चन्द्रबिम्बः १ मङ्गलः २ शुभः ३ आनन्दः ४ विनोदः ५ प्रघनः ६ गौरः ७ विभासः ८ ॥ * ॥ भरतमते अस्य रागिण्यो यथा । रामकली १ मालावती २ आशावरी ३ देवारी ४ गुणकली ५ । तन्मते पुत्त्रा यथा । वसन्तः १ मालवः २ मागः ३ कुशलः ४ वखारचन्दः ५ लक्ष्मीदत्तः ६ नागधुनः ७ धवलः ८ । एषां भार्य्या यथा । लीलावती १ केरवी २ चपती ३ पूरवी ४ पारावती ५ तिरवणी ६ देवगिरी ७ सुरमती ८ । इति सङ्गीतशास्त्रम् ॥

हिन्दोलकः, पुं, (हिन्दोल एव । कन् ।) यानविशेषः । तत्पर्य्यायः । प्रेङ्खा २ दोला ३ । इति जटाधरः ॥ दोलिका ४ हिन्दोला ५ । इति हारावली ॥

हिन्दोला, स्त्री, (हिन्दोल + घञ् + टाप् ।) दोलिका । झूलना इति भाषा । इति हारावली ॥

हिम, त्रि, (हन्ति उष्णमिति । हन + "हनिहिमी च ।" उणा० १ । १४६ । इति मक् हिं च ।) शीतगुणविशिष्टः । शीतलवस्तु । तत्पर्य्यायः । सुशीमः २ शिशिरः ३ जडः ४ तुषारः ५ शीतलः ६ शीतः ७ । इत्यमरः । १ । ३ । १६ ॥ (यथा, भागवते । ४ । २८ । "त्वयाहं हिमभिन्नेव परिम्लानगात्रः शालीनां यवीकानाञ्च पयसा शर्करामधुरेक्षौदनमश्नीयात् ॥")

हिमं, क्ली, (हन + मक् । हन्तेर्हिं च ।) अकाशगाय्यः । तत्पर्य्यायः । अवश्यायः २ नीहारः ३ तुषारः ४ तुहिनम् ५ प्रालेयम् ६ महिका ७ । इत्यमरः । १ । ३ । १८ ॥ इन्द्रायिधूमः ८ मरायः ९ रजनीशकम् १० । इति हारावली । (यथा, रघुः । ८ । ४५ ।

"अथवा दृढुवस्तु हिंसितुं
दृढुनैवारभते प्रजान्तकः ।
हिमसेकविपत्तिरत्र मे
नलिनी पूर्व्वनिदर्शनं मता ॥")

अस्य गुणः । कफवायुवर्द्धकत्वम् । इति राजवल्लभः ॥ चन्दनम् । इति मेदिनी ॥ पद्मकाष्ठम् । रङ्गम् । मौक्तिकम् । इति राजनिर्घण्टः ॥ नवनीतम् । इति शब्दचन्द्रिका ॥ शीतम् । इति हेमचन्द्रः ॥ (कर्पूरः । पर्य्यायो यथा,—

"पुंसि क्लीवे च कर्पूरः सिताभो हिमवालुकः ।
घनसारश्चन्द्रसंज्ञः हिमनामापि स स्मृतः ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।)

हिमः, पुं, (हन + मक् हन्तेर्हिं च ।) चन्दनवृक्षः । इति हेमचन्द्रः । चन्द्रः । इति शब्दचन्द्रिका ॥ कर्पूरः । इति राजनिर्घण्टः ॥ हेमन्तर्त्तुः । च तु अग्रहायणपौषमासात्मकः । यथा,—

"हिमशिशिरवसन्तग्रीष्मवर्षाशरत्सु
स्नपनपवनवार्भोहर्म्यगोचीरपाने ।
सुखमनुभव राजंस्त्वद्वियो यान्तु नाशं
दिवसकमललक्ष्माश्चर्व्वरीरेणुपङ्काः ॥"

इति ऋतुसंहारः ॥

हिमालयपर्व्वतः । इति हिमजादिशब्ददर्शनात् ॥

हिमकः, पुं, (हिमेन कायतीति । कै + कः ।) विकङ्कतवृक्षः । इति राजनिर्घण्टः ॥

हिमकरः, पुं, (हिमः शीतलः करः किरणो यस्य ।) चन्द्रः । यथा,—

"दृशा द्राघीयस्या दरदलितनीलोत्पलरुचा
दवीयांसं दीनं स्नपय कृपया मामपि शिवे ! ।
अनेनायं धन्यो भवति न च ते हानिरियता
वने वा हर्म्ये वा समकरनिपातो हिमकरः ॥"

इत्यानन्दलहरी ॥

कर्पूरः । इति राजनिर्घण्टः ॥

हिमकूटः, पुं, (हिमस्य कूटो यत्र ।) गिरिवर्षः । इति राजनिर्घण्टः ॥ (हिमस्य कूट इति । हिमालयपर्व्वते, पुं, क्ली ॥ यथा, भागवते । ५ । १७ । ६ । "तत्रैवाखलकन्दरा दक्षिणेन ब्रह्ममदनाद् बहूनि परिकूटान्यतिक्रम्य हेमकूटहिमकूटान्यतिरभसतरंहसा लङ्घयतीति ॥")

हिमगिरिः, पुं, (हिमप्रधानो गिरिः ।) हिमालयपर्व्वतः । यथा,—

"धनुः पौष्पं मौर्व्वी मधुकरमयी पञ्च विशिखा
वसन्तः सामन्तो मलयमरुदायोधनरथः ।
तथाप्येकः सर्व्वं हिमगिरिसुते ! कामपि कृपा-
मपाङ्गात्ते लब्ध्वा जगदिदमनङ्गो विजयते ॥"

इत्यानन्दलहरी ॥

(यथा च ।

"आसेया विन्ध्यशैलाद्याः सौम्यो हिमगिरिर्मतः ॥"

इति पूर्व्वखण्डे द्वितीयाध्याये ग्राङ्गेधरेणोक्तम् ॥)

हिमजः, पुं, (हिमात् हिमालयात् जायते इति । जन + डः ।) मैनाकगिरिः । इति मेदिनी ॥

हिमजा, स्त्री, (हिमात् हिमालयात् जायते इति । जन + डः । टाप् ।) पार्व्वती । गौरी । इति मेदिनी ॥ चोरिणी । इति राजनिर्घण्टः ॥

हिमजम्भटिः, पुं, (हिमानां जृम्भटिः । षृषोदरादित्वात् साधुः ।) कृष्णभटिः । इति हारावली ॥ क्वचित् पुस्तके हिमभ्रमटिरिति पाठः ॥

हिमतैलं, क्ली, (हिमजातं तैलमिति ।) कर्पूरतैलम् । इति राजनिर्घण्टः ॥

हिमदुग्धा, स्त्री, (हिमवत् शुभ्रं दुग्धमस्याः ।) चोरिणी । इति राजनिर्घण्टः ॥

हिमदुर्दिनं, क्ली, (हिमेन दुर्दिनम् ।) हिमसम्भवपातेन दुःखदायकदिनम् । तत्पर्य्यायः । पक्षहिमम् २ । इति त्रिकाण्डशेषः ॥

हिमद्युतिः, पुं, (हिमा द्युतिर्यस्य ।) चन्द्रः । इति शब्दमाला ॥ (यथा, माघे । ६ । १२ ।

"अविभाव्यतारकमदृष्टहिम-
द्युतिबिम्बमस्तमितभानुगभः ॥")

हिमद्रुमः, पुं, (हिमो द्रुमः ।) सप्तपर्णवृक्षः । इति राजनिर्घण्टः ॥

हिमधातुः, पुं, (हिमो धातुरिव यत्र ।) हिमालयपर्व्वतः । इति केचित् ॥

हिमप्रस्थः, पुं, (हिमप्रधानः प्रस्थो यत्र ।) हिमालयः । इति हेमचन्द्रः ॥

हिमवत्सुतः, पुं, (हिमवतः सुतः ।) मैनाकपर्व्वतः । इति त्रिकाण्डशेषः ॥

हिमवत्सुता, स्त्री, (हिमवतः सुता ।) गङ्गा । इति धनञ्जयः ॥ (यथा, महाभारते । ३ । १०६ । ८ । "ततः पपात गगनाद् गङ्गा सा हिमवत्सुता ॥") उमा च ॥

हिमवान्, [त्] पुं, (हिममस्यास्तीति । हिम + मतुप् । मस्य वः ।) हिमालयपर्व्वतः । इत्यमरः । २ । ३ । ३ ॥ तत्कन्या गङ्गा । यथा,—

"गङ्गा हिमवतो जज्ञे सर्व्वलोकैकपावनी ।
स्वयोगाग्निवलाद्देवी लेभे पुत्त्रौ महेश्वरीम् ॥"

इति देवीपुराणे १२ अध्यायः ॥

हिमविशिष्टे, त्रि ॥

हिमवालुकः, पुं, (हिमस्य वालुका इव ।) कर्पूरः । इति राजनिर्घण्टः ॥ (पर्य्यायोऽस्य यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।

"पुंसि क्लीवे च कर्पूरः सिताभो हिमवालुकः ।
घनसारश्चन्द्रसंज्ञः हिमनामापि स स्मृतः ॥")

हिमवालुका, स्त्री, (हिमस्य वालुकेव ।) कर्पूरः । इत्यमरः । २ । ६ । १३० ॥ (यथा,—

"प्रनीरनीरं हिमवालुका च
मिलं नृणां स्यात् सति शुक्लपक्षे ॥"

इति वैद्यकपथ्यापथ्यविधौ शुक्लपक्षाधिकारे ॥)

हिमशर्करा, स्त्री, (हिमस्य शर्करेव ।) यवनाली । इति राजनिर्घण्टः ॥

हिमशैलजा, स्त्री, (हिमशैलात् जायते इति । जन + डः ।) दुर्गा । इति शब्दरत्नावली ॥ (हिमालयोद्भवे, त्रि । यथा, याज्ञवल्क्ये । २ । २२१ । "श्रवणाद्या विषं श्राद्धे भक्षयेत् हिमशैलजम् ॥")

हिमसंहतिः, स्त्री, (हिमानां संहतिः।) हिमसमूहः। यथा इति भारवभाषा। तत्पर्य्यायः। हिमानी २। इत्यमरः। १। ३। १८॥ मघहिमम् ३। इति जटाधरः॥

हिमहासकः, पुं, (हिममपि हसति श्वेतत्वात्। हस+ण्वुल्।) हिमालुकः। इति शब्दरत्नावली॥

हिमा, स्त्री, (हिम+अर्श आद्यच्। टाप्।) सप्तपर्णला। रेणुका। मल्लिका। नागरङ्गला। एला। अम्बिका। इति राजनिर्घण्टः॥

हिमांशुः, पुं, (हिमा अंशवो यस्य।) चन्द्रः। इत्यमरः। १। ३। १३॥ (यथा, रघुः। ५। १६।

"पर्य्यायपीतस्य सुरैर्हिमांशोः
क्षयोदयः प्राच्यतरो हि दृष्टः॥")

कर्पूरः। इति राजनिर्घण्टः॥

हिमांशुभिल्लः, स्त्री, (हिमांशोरिव अभिख्या शोभा यस्य।) रौप्यम्। इति हेमचन्द्रः॥

हिमागमः, पुं, (हिमस्य आगमो यत्र।) हेमन्तः। इति राजनिर्घण्टः॥ (यथा, महाभारते। ५। ८३। ७।

"कौसुदे मासि रेवत्यां प्रारब्धे हिमागमे।
प्रतीतप्रस्थसुखे काले कल्पः सत्पतां परः॥")

हिमाद्रिः, पुं, (हिमप्रधानोऽद्रिः।) हिमालयपर्व्वतः। इति भूरिप्रयोगः॥ (यथा, रघुः। ४। ७८।

"परस्परेण विख्यातसेतूपायनमाश्रिताः।
राजा हिमवतः शास्ता राजा शास्ता हिमाद्रिणः॥")

हिमाद्रिजा, स्त्री, (हिमाद्रौ जायते इति। जन+डः।) पौरिणी। इति राजनिर्घण्टः॥ पार्व्वती च॥ (यथा, पद्मोत्तिपद्माधिकायाम्। १।

"मैवं वत्सेति किं वत्सं मधु चक्रं क्षतुं मधैर्योज्यते
वत्सोऽसौति हिमाद्रिजामवचसं कुर्व्वन् हरः पातु वः॥")

हिमाद्रितनया, स्त्री, (हिमाद्रेस्तनया।) दुर्गा। इति वस्तुमालाग्रन्थदर्शनात्॥

हिमाद्रितनयाभर्त्ता, स्त्री, (हिमाद्रितनयाया दुर्गायाः पतिः।) शिवः। इति कविकल्पलता॥

हिमानी, स्त्री, (बहुहिममिति। "हिमारण्ययोर्महत्त्वे।" ४। १। ४८। इत्यस्य वार्त्तिकोक्ता ङीष् आदेश्च।) हिमसंहतिः। इत्यमरः। १। ३। १८॥ (यथा, राजतरङ्गिण्याम्। १। ३१८।

"हिमानीं शैलशास्त्राय मन्यमानं प्रतिक्षणम्।
क्षीरे दार्व्वीमिवाराद्रौ अस्त्रावान् जातिधीरयम्॥")

आस्रावाख्यरोगः। इति राजनिर्घण्टः॥

हिमाम्बु, क्ली, (हिमे हेमन्ते अम्बु अम्बम्।) अम्बुम्। इति राजनिर्घण्टः॥

हिमारातिः, पुं, (हिमस्य अरातिः।) अग्निः। सूर्य्यः। इति केचित्। (हिमनाशकः। अग्नेः। इति हेमचन्द्रः। सूर्य्यस्य वह्निसंयुक्तकार्काभ्रशब्दयोर्देशनात्॥

हिमालयः, पुं, (हिमस्य आलय इव शुक्लत्वात्।) शुक्लखदिरः। इति शब्दचन्द्रिका॥ (हिमानामालयः।) स्वनामख्यातपर्व्वतः। तत्पर्य्यायः। नगपतिः २ मेनाधवः ३ उमागुरुः ४। इति विकाण्डशेषः॥ हिमाद्रिः ५ नगाधिपः ६। इति जटाधरः॥ उदगाद्रिः ७ अद्रिराट् ८ मेनकाप्राणेशः ९ हिमवान् १० हिमप्रस्थः ११ भवानीगुरुः १२। इति हेमचन्द्रः॥ (यथा, कुमारे। १। १।

"अस्त्युत्तरस्यां दिशि देवतात्मा
हिमालयो नाम नगाधिराजः।
पूर्व्वापरौ तोयनिधी वगाह्य
स्थितः पृथिव्या इव मानदण्डः॥")

स तु लङ्कायाः उत्तरे वर्त्तते। भारतवर्षस्य सीमापर्व्वतोऽयम्। अस्य दीर्घं दशसहस्रयोजनानि। प्रस्थे द्विसहस्रयोजनानि। यथा,—

"एवं दक्षिणेनेलावृतं निषधो हेमकूटो हिमालयः इति प्रागायता यथा नीलादयः। अयुतयोजनोत्सेधा हरिवर्षकिंपुरुषभारतानां यथासंख्यम्।" इति श्रीभागवते ५ स्कन्धे १६ अः॥

हिमालयसुता, स्त्री, (हिमालयस्य सुता।) उमा। इति कविकल्पलता॥

हिमालया, स्त्री, (हिमस्य श्वेतस्य आलयो यत्र।) भूम्यामली। इति राजनिर्घण्टः॥

हिमावती, स्त्री, सर्षपशोरी। इत्यमरः। २। ४। १९८॥ (पर्य्यायो यथा,—

"कटुपर्णी हैमवती हैमशोरी हिमावती।
हैमाह्वा पीतदुग्धा च तण्डुलीयकशुष्यते॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

हिमाह्वः, पुं, (हिममपि आह्वयते स्पर्द्धते वर्णेनेति। हि+आ+ह्वे+कः।) कर्पूरः। इति केचित्॥ (वर्षविशेषः। यथा, मार्कण्डेये। ५३। ३६।

"यानि किंपुरुषवर्षाणि वर्षयित्वा हिमाह्वयम्।
सेवां स्वभावतः सिद्धिः सुखप्राया श्रयन्ति तः॥")

हिमाह्वया, स्त्री, (हिमस्य शीतलस्य आह्वयो यस्याः।) सर्षपशोरवती। इति राजनिर्घण्टः॥

हिमिका, स्त्री, तलोपरि पतितहिमम्। इति केचित्॥

हिमेषुः, पुं, (हिमं न सहते इति। हिम+"सह सहते इति हिमाषेषुः।" ५। २। १२२। इत्यस्य वार्त्तिकोक्त्या इषुः।) हिमलेशितः। हिमार्त्तः। इति केचित्॥

हिमोत्करा, स्त्री, (हिमः उत्करो यस्याः।) दधिफलाम्लः। इति राजनिर्घण्टः॥

हिमोत्पन्ना, स्त्री, (हिमे हिमप्रधाने उत्पन्ना।) यावनाली। इति राजनिर्घण्टः॥

हिमोद्भवा, स्त्री, (हिमे हैमन्ते उद्भवो यस्याः।) जटी। इति राजनिर्घण्टः॥

हिम्यः, त्रि, हिमभवः। हिमशब्दात् यत्प्रत्ययेन निष्पन्नः। इति सिद्धान्तकौमुदी। ५। २। १२०॥

हिरङ्गुः, पुं, राहुः। इति केचित्॥

हिरण्यं, क्ली, रेतः। सुवर्णम्। वराटकः। इति मेदिनी॥

हिरण्यकर्षं, क्ली, (हिरण्यस्य विकारः। हिरण्य+मयट्। "दाक्षिण्यायनहारिद्रवेति।" ६। ४। १७४। इति निपातितः।) भारतवर्षादिनववर्षान्तर्गतवर्षविशेषः। इति विकाण्डशेषः॥ तद्विवरणं यथा। उत्तरोत्तरशैलाहृतं नीलः श्वेतः शृङ्गवान् इति त्रयो रम्यकहिरण्मयकुरूणां वर्षाणां मर्य्यादागिरयः प्रागायता उभयतः क्षारोदावधयो द्विसहस्रयोजनपृथव एकैकशः पूर्व्वस्मात् पूर्व्वस्मादुत्तरोत्तरो दशांशाधिकांशेन दैर्घ्ये एव भवन्ति। इति श्रीभागवते ५ स्कन्धे १६ अध्यायः॥

हिरण्मयः, पुं, (हिरण्य+मयट्।) ब्रह्मा। सुवर्णमये, त्रि। इति मेदिनी॥ (यथा, भट्टिः। २। ६७।

"हिरण्मयी प्राक्तनजेव जङ्गमा
युता दिवः स्वादुविराचिराप्रभा।")

हिरण्यं, क्ली, (हृयते हीयते इति। हृयं गतिकान्तयोः+"हृयतेः कन्यन् हिर च।" उणा॰ ५। ४४। इति कन्यन्। हिरादेशश्च धातोः।) सुवर्णम्। (यथा, मनुः। २। २४६।

"क्षेत्रं हिरण्यं गामश्वं छत्रोपानहमाशनम्।
धान्यं शाकञ्च वासांसि गुरवे प्रीतिमावहेत्॥")

तस्यैदिकपर्य्यायाः। हेम १ चन्द्रम् २ रुक्मम् ३ अयः ४ हिरण्यम् ५ पेशः ६ कञ्चनम् ७ लोहम् ८ कनकम् ९ काञ्चनम् १० भर्म्म ११ आटतम् १२ मरुत् १३ दत्तम् १४ जातरूपम् १५। इति पञ्चदश हिरण्यनामानि। इति वैद्यनिघण्टौ १ अध्यायः॥ धुत्तूरम्। इत्यमरः। २। ६। ८४॥ रेतः। द्रव्यम्। वराटः। अक्षयम्। मानभेदः। अक्षय्यम्। इति मेदिनी॥ रजतम्। धनम्। इति शब्दरत्नावली॥ (पुं, गुग्गुलुविशेषः। तत्प्रकारो यथा,—

"मरिष्यामो मरामीति कुतद्दः पद्म दृश्यसि।
हिरण्यः पद्मसो देवो गुग्गुलुः पञ्च जातयः॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

हिरण्यकशिपुः, पुं, दैत्यविशेषः। स तु कश्यपस्य दितौ पत्न्यां जातः। तस्य सपोदरः हिरण्याक्षः। तस्य भार्य्या कयाधुः। तस्य चत्वारः संह्रादः १ अनुह्रादः २ ह्रादः ३ प्रह्रादः ४। कन्या सिंहिका। इति भागवतम्। अपि च।

"त्वया यौ निहतौ देव! दानवौ मधुकैटभौ।
अवतीर्णौ धरणेर्द्धौ भूत्वा कश्यपनन्दनौ।
हिरण्यकशिपुश्चैव हिरण्याक्षो महासुरः॥

सुदर्जयोद्यतौ तौ तु पुनर्जातौ महाबलौ।
पुलस्त्यस्य कुले देव्या राक्षसेन्द्रावरौ च तौ॥
तयोस्तु पादविन्यासमसंहन्ती जनार्दन!।
नवान्तिक्रमनुप्राप्ता दशास्यकुम्भकर्णयोः॥"
इति वह्निपुराणे वैश्रवणवरप्रदाननामाध्यायः॥

तट्टुलक्षणादि यथा,—
"दिव्याः पुत्रद्वयं जज्ञे कश्यपादिति नः श्रुतम्।
हिरण्याक्षश्च दुर्द्धर्षो हिरण्यकशिपुस्तथा॥
कश्यपस्याश्रमोऽप्यासीत् पुष्करे वै पुष्करे पुरा।
ऋषिभिर्देवताभिश्च गन्धर्वैरुपशोभितः॥
श्यामनान्युपकल्पानि काञ्चनानि तु पश्य वै।
ऋषीणामात्मजा ते वै उपविष्टा यथाक्रमात्॥
होतुस्तत्रासनं यत्तु हविस्तत्राथ जुह्वतः।
अन्तर्वत्नी दितिश्चैव पत्नी च वसुपागता॥
दशवर्षसहस्राणि गर्भस्तस्यामवर्त्तत।
स तु गर्भो विनिःसृत्य मातुर्वै उदराच्चदा॥
निषसादासने गर्भः कश्यपस्यापि सन्निधौ।
तं दृष्ट्वा सुनयस्तस्य नामाकुर्व्वन्त तद्दितम्।
हिरण्यकशिपुस्तस्मात् कर्म्मणानेन स स्मृतः।
हिरण्याक्षोऽनुजस्तस्य सिंहिका च तथानुजा।
राहोः सा जननी देवी विप्रचित्तेः परिग्रहः।
हिरण्यकशिपुर्दैत्यश्चचार परमं तपः।
ततो वर्षसहस्राणि निराहारो ह्यधःशिराः॥
तं ब्रह्मा छन्दयामास देवं तुष्टो वरेण तु।
सर्व्वामरत्वं वव्रे स ह्यस्त्रार्थेन दिवा निशि॥
अहं सर्व्वं विनिर्जित्य सर्व्वदैवत्वमाश्रितः।
अणिमादिगुणैश्वर्य्यमेष मे दीयतां वरः॥
तेनैवमुक्तो ब्रह्मा तु तस्मै दत्त्वा यथेप्सितम्।
दत्त्वा चास्य सभां दिव्यां तत्रैवान्तरधीयत॥
हिरण्यकशिपुर्दैत्यः श्लोकैर्गीतः पुरातनः॥
राजा हिरण्यकशिपुर्दैत्यो यां यां निषेवते।
तस्यां तस्यां नमश्चक्रुर्देवता ऋषिभिः सह॥
गर्व्वप्रभावो दैत्योऽभूत् हिरण्यकशिपुः पुरा।
स्वयमेवाग्निश्च सूर्य्यश्च वायुरिन्द्रो जलं स्वयम्।
भूत्वा चकार राज्यं स मन्वन्तरचतुर्दश॥
तस्यामीत् नरसिंहस्तु स्तम्भे पूर्व्वम्; पुरा किल।
नखैस्तेन विनिर्भिन्नो नार्द्रशुष्का नखाः स्मृताः॥

हिरण्याच्चसुताः पञ्च विक्रान्ताः सुमहाबलाः।
हिरण्यकशिपोः पुत्राश्चत्वारः सुमहाबलाः॥
प्रह्लादः पूर्व्वजस्तेषामनुह्लादश्चथैव च।
संह्लादश्चैव ह्लादश्च ह्लादपुत्रान् शृणुष्व तान्॥"
इति वह्निपुराणे कश्यपीयप्रजासर्गनामाध्यायः॥

हिरण्यकशिपुहा, [न्] पुं, (हिरण्यकशिपुं हतवानिति। हन्+क्विप्।) विष्णुः। इति हेमचन्द्रः॥

हिरण्यकामधेनुः, स्त्री, (हिरण्यनिर्म्मितो कामधेनुर्यत्र।) षोड़शमहादानान्तर्गतमहादाननिर्म्मेषः। यथा,—
मत्स्य उवाच।
"अथातः संप्रवक्ष्यामि कामधेनुविधिं परम्।
सर्व्वकामप्रदं नृणां महापातकनाशनम्॥
लोकेशावाहनं तद्वद्धोमकार्य्याधिवासनम्।
तुलापुरुषवत् कार्य्यं कृष्णमण्डपवेदिकम्॥
स्वल्पैवैकाग्निवत् कुर्य्यादृग्गुरुरेकः समाहितः।
काञ्चनस्यातिशुद्धस्य धेनुं वत्सञ्च कारयेत्॥
उत्तमा पलसाहस्रा तदर्द्धेन तु मध्यमा।
कनीयसी तदर्द्धेन कामधेनुः प्रकीर्त्तिता।
प्रक्लृप्तस्त्रिपलादूर्द्धं अशक्तोऽपीह कारयेत्॥
वेद्यां कृष्णाजिनं न्यस्य गुडप्रस्थसमन्वितम्।
न्यसेदुपरि तां धेनुं महारत्नैरलङ्कृताम्॥
कुम्भाष्टकसमोपेतां नानाफलसमन्विताम्।
तथाष्टादशधान्यानि समन्तात् परिकल्पयेत्॥
इक्षुदण्डाष्टकं तद्वत् नानाफलविभूषितम्।
भाजनञ्चासनं तद्वत्ताम्रदोहनकं तथा॥
कौषेयवस्त्रद्वयसंप्रयुक्तां
दीपान्तपत्राभरणाभिरामाम्।
सचामरां कुण्डलिनीं सघण्टां
मणित्रिकां चन्द्रकरौप्यपादाम्॥
सरेच सर्व्वैः पुरतोऽभिजुष्टां
हरिद्रया पुष्पफलैरनेकैः।
अजाजिकुस्तुम्बुरुपर्पटाभि-
र्वितानकक्षोपरि पक्वगर्भाम्॥
स्नानं ततो मङ्गलवेदघोषैः
प्रदक्षिणीकृत्य च पुण्यहस्तैः।
आवाहयेत् तां गुडधेनुमन्त्रै-
र्द्विजाय दद्यादथ दर्भपाणिः॥
त्वं सर्व्वदेवगणमन्दिरमङ्गभूता
विश्वेश्वरत्रिपथगोदधिपर्व्वतानाम्।
त्वद्दानगस्तनगतक्लीकृतपातकौघः
प्राप्नोऽस्मि निर्व्वृतिमतीव परां नमामि॥
लोके यथेप्सितफलार्थविधायिनीं त्वा-
मासाद्य को हि भवदुःखमुपैति मर्त्यः।
संसारदुःखशमनाय यतस्व कामं
त्वां कामधेनुमिति वेदविदो वदन्ति।
आमन्त्र्य शीलकुलरूपगुणान्विताय
विप्राय यः कनकधेनुमिमां प्रदद्यात्।
प्राप्नोति धाम च पुरन्दरदेहजुष्टं
कन्यागणैः परिवृतः प्रमिलम्भकैश्च॥"
इति मात्स्ये हिरण्यकामधेनुप्रदानिको नाम २५६ अध्यायः॥

हिरण्यकोषः, पुं, (हिरण्यस्य कोष इव।) क्षताक्षतस्वर्णरूपम्। इति हेमचन्द्रः॥

हिरण्यगर्भः, पुं, (हिरण्यं हेममयाण्डं गर्भ उत्पत्तिस्थानमस्य।) ब्रह्मा। इत्यमरः॥१।१।१६॥
हिरण्यं गर्भ उत्पत्तिस्थानमस्य हिरण्यस्य गर्भो भूण इति वा हिरण्यगर्भः। एतस्यार्द्धं हिरण्यवर्णमभवत्। तथा च स्मृतिः।
"हिरण्यवर्णमभवत्तदण्डमुदकेशयम्।
तत्र जज्ञे स्वयं ब्रह्मा स्वयम्भुरिति विश्रुतः॥"
इति।
उपचारात् हिरण्यवर्णमद्यं हिरण्यम्। इति भरतः॥ अन्यच्च।
"हिरण्यगर्भोऽभूद्ब्रह्मा तेन मुष्टिर्मिता ह्यसौ।"

इति देवीपुराणे देवीनिरुक्ते ४५ अध्यायः॥

षोड़शमहादानान्तर्गतद्वितीयमहादानम्। यथा,
मत्स्य उवाच।
"अथातः संप्रवक्ष्यामि महादानमनुत्तमम्।
नाम्ना हिरण्यगर्भाख्यं महापातकनाशनम्॥
पुण्यां तिथिं समासाद्य तुलापुरुषदानवत्।
ऋत्विग्भ्यश्च पलम्भारभूषणाच्छादनादिकम्॥
कुर्य्यादुपोषितस्तद्वल्लोकेशावाहनं बुधः।
पुण्याहवाचनं कृत्वा तद्वत् कृत्वाधिवासनम्।
ब्राह्मणैरानयेत् कुम्भं तप्तनीयमयं शुभम्॥
द्वात्रिंशत्पलकुलोच्छ्रायं हेमपङ्कजगर्भवत्।
त्रिभागहीनं विस्तारमाश्यद्यौराभिपूरितम्॥
दशाक्षाणि सरक्तानि दात्रं सूची तथैव च।
हेमनालं सपिटकं वहिरादित्यसंयुतम्॥
तथैवावरणं नाभेरुपवीतञ्च काञ्चनम्।
पार्श्वतः स्थापयेत्तद्वदेमदण्डं कमण्डलुम्॥
पद्माकारं पिधानं स्यात् समन्तादङ्गुलाधिकम्।
सुक्तावलीसभोपेतं पद्मरागदलान्वितम्॥
तिलद्रोणोपरिगतं वेदिमध्ये ततोऽर्च्चयेत्।
ततो मङ्गलशब्देन ब्रह्मघोषरवेण च॥
सर्व्वौषध्युदकं स्नानं स्नापितो वेदपुङ्गवैः।
शुक्लमाल्याम्बरधरः सर्व्वाभरणभूषितः।
इमसुच्चारयेन्मन्त्रं गृहीतकुसुमाञ्जलिः॥
नमो हिरण्यगर्भाय हिरण्यकवचाय च।
सप्तलोकसुराध्यक्ष जगद्धात्रे नमो नमः॥
भूर्लोकप्रमुखा लोकास्तव गर्भे व्यवस्थिताः।
ब्रह्मादयस्तथा देवा नमस्ते विश्वधारिणे॥
नमस्ते भुवनाधार! नमस्ते भुवनाश्रय!।
नमो हिरण्यगर्भाय गर्भो यस्य पितामहः॥
यतस्त्वमेव भूतात्मा भूते भूते व्यवस्थितः।
तस्मान्नासुहरां शैघ्र्यदुःखसंसारसागरात्॥
एवमामन्त्र्य तन्मध्यमाविश्याज्य उदङ्मुखः।
सुस्थितां परिसंगृह्य धर्म्मराजचतुर्मुखौ।
जानुमध्ये शिरः कृत्वा तिष्ठेत श्वासषट्कम्॥
गर्भाधानं पुंसवनं सीमन्तोन्नयनं तथा।
कुर्य्युर्हिरण्यगर्भस्य ततस्ते द्विजपुङ्गवाः॥
गीतमङ्गलशब्देन शुभरत्यापयेत्ततः।
जातकर्म्मादिकाः कुर्य्युस्तु क्रियाः षोड़श चापराः।
यथादक्षञ्च गुरवे दत्त्वा मन्त्रमिमं जपेत्॥
नमो हिरण्यगर्भाय विश्वगर्भाय वै नमः।
चराचरस्य जगतो गृहभूताय वै नमः॥
माचार्यं जनितः पूर्व्वं मर्व्वधर्म्मा सुरोत्तम।
त्वद्गर्भसम्भवादेव द्वितीयो भवान्यहम्॥
चतुर्भिः कलसैर्भूयस्तस्मै द्विजपुङ्गवाः।
स्नानं कुर्य्युः प्रसन्नाङ्गाः सर्व्वाभरणभूषिताः॥
देवस्यत्वेति मन्त्रेण क्षितस्य कनकासने।
अद्यणातस्य तेऽङ्गानि अभिषेणामहे वयम्॥
स्थिरेणानेन वपुषा शिरं जीव शतं भव।
ततो हिरण्यगर्भन्तु तेभ्यो दद्याद्विचक्षणः॥
ते पूज्याः सर्व्वभावेन वस्तुभो वा तदाज्ञया।
तत्तोपकरणं सर्व्वं गुरवे विनिवेदयेत्॥

पादुकोपानहं छत्रं चामरासनभोजनम् ।
ग्रामं वा विषयं वापि यदन्यद्दयितं भवेत् ॥
अनेन विधिना यस्तु पुण्येऽह्नि विनिवेदयेत् ।
हिरण्यगर्भदानं स ब्रह्मलोके महीयते ॥
पुरेषु लोकपालानां प्रतिमन्वन्तरं वसेत् ।
कल्पकोटिशतं यावत् ब्रह्मलोके महीयते ॥
कलिकलुषविमुक्तः सेवितः सिद्धसंघै-
रमरचमरमालावीज्यमानोऽधरोभिः ।
पितृशतमथ बन्धून् पुत्रपौत्रप्रपौत्रा-
नपि नरकनिमग्नांस्तारयेदेक एव ॥
इति पठति य इत्थं यः शृणोतीह सम्यक्
मधुसूदरिपुलोके पूज्यते सोऽपि सिद्धैः ।
मतिमपि च जनानां यो ददाति प्रियार्थं
विबुधपतिजनानां नायकः स्यादमोघम् ॥"

इति मात्स्ये २७५ अध्यायः ॥८॥

विष्णुः । इति तस्य सहस्रनामस्तोत्रम् ॥ सूक्ष्म-शरीरसमष्ट्युपहितचैतन्यम् । तत्पर्यायः । प्राणात्मा २ सूत्रात्मा ३ । इति वेदान्तसारः ॥

हिरण्यदः, पुं, (हिरण्यं ददातीति । दा + कः ।) वसुदः । इति केचित् । हिरण्यदातरि, त्रि ॥ (यथा, मनुः । ४ । २३० ।

"भूमिदो भूमिमाप्नोति दीर्घमायुर्हिरण्यदः ।
गृहदोऽग्र्याणि वेश्मानि रूप्यदो रूपमुत्तमम् ॥")

हिरण्यदा, स्त्री, (हिरण्यं ददातीति । दा + कः । टाप् ।) पृथिवी । इति केचित् ॥

हिरण्यनाभः, पुं, (हिरण्यं नाभौ यस्य ।) मेनाकपर्वतः । इति हेमचन्द्रः ॥ (मुनिविशेषः । यथा, भागवते । ६ । १५ । १५ ।

"हिरण्यनाभः कौशल्यः श्रुतदेव ऋतध्वजः ।
एते परे च सिद्धाश्चरन्ति ज्ञानचेतवः ॥")

हिरण्यबाहुः, पुं, (हिरण्यवत् बाहुर्यस्य ।) शोणनदः । इत्यमरः । १ । १० । ३४ ॥ शिवः । इति केचित् ॥ (यथा, महाभारते । १४ । ८ । १५ ।

"हिरण्यबाहवे राजन्नुग्राय पतये दिशाम् ।")

हिरण्यरेताः, [तृ] पुं, (हिरण्यं रेतो यस्य ।) अग्निः । (यथा, महाभारते । १ । ५५ । १० ।

"विभावसुश्चित्रभानुर्महाद्युतिः
हिरण्यरेता हुतभुक् शुक्रयोनिः ॥")

पिङ्गलाक्षः । इत्यमरः । १ । १ । ५८ । सूर्यः । इति मेदिनी । शिवः । इति शब्दरत्नावली ॥ अस्येदं नामकारणं यथा,—

"यतु गीतं वीतिहोत्रेण वीर्यं व्यक्तं पिनाकिनः ।
तेनाङ्गात्तोऽभवद्ब्रह्मन् ! मन्दरेजा सुताग्नयः ॥
ततो जगाम देवानां सकाशमसितद्युतिः ।
देवैः प्रधिततूर्णं ब्रह्मलोकं जगाम ह ॥
स गत्वेलं कुटिलां देवीं दर्शं प्रधि भास्वतः ।
तां दृष्ट्वा प्राह भास्वन्तं देवो वज्रमं दुर्धरम् ॥
अरिष्टरेण संयुक्तं निर्हेतुमनलादपि ।
तेजोरत्नाख्य कुटिले ! पुत्री धन्यो भविष्यति ॥
इत्युक्त्वा सा कुटिला सुता सुतसमुद्यताम् ।
प्रक्षिप्तमात्रं जग्राह तेजः रेतः सहाप्रगा ।
ततस्त्वधारयद्देवी गार्भं तेजः स्वपुत्रवत् ।
हुताशनोऽपि च भयाद्दयत्र तत्र परिभ्रमन् ॥
पञ्चवर्षसहस्राणि ह्यधास्ते हव्यभुक् ततः ।
मांसमस्थीनि रक्तानि मेदोमज्जत्वचस्तथा ॥
रोमाणि चाचिकेशाद्याः सर्वं जाता हिरण्मयाः ।
हिरण्यरेतसु लोकेऽस्मिन् विख्यातः पावकस्तदा ॥"

इति वामने ५४ अध्यायः ॥

हिरण्यवः, पुं, (हिरण्यानि सन्त्यस्येति । हिरण्य + "वप्रकरणेऽन्येभ्योऽपि दृश्यते इति वक्तव्यम्।" ५ । २ । १०६ । इत्यस्य वार्तिकोक्त्या वः ।) देवधनम् । देवस्वम् । इति केचित् ॥

हिरण्यवर्णा, स्त्री, (हिरण्यवत्वर्णो यस्याः ।) नदी । इति हेमचन्द्रः ॥

हिरण्यवाहः, पुं, (हिरण्यं वहतीति । वह + अण् ।) शोणनदः । इति शब्दरत्नावली भरतश्च ॥

हिरण्याक्षः, पुं, (हिरण्यवत् प्रीते आक्षणी यस्य । अच् समासे ।) आदिदैत्यविशेषः । स च दितिगर्भे कश्यपाज्जातः वराहरूपिविष्णुना हतः । यथा,—

"दितिस्तु भर्तुरादेशादपत्यपरिशङ्किनी ।
पूर्णे वर्षशते साध्वी पुत्रौ प्रसुषुवे यमौ ॥
प्रजापतिर्नाम तयोरकार्षीत्
यः प्राक् स्वदेहात् यमयोरजायत ।
तं वै हिरण्यकशिपुं विदुः प्रजा
यं तं हिरण्याक्षमसूत सायतः ॥"

इति श्रीभागवते ३ स्कन्धे १७ । २ ; १८ ॥

"हतो हिरण्यकशिपुर्हरिणा सिंहरूपिणा ।
हिरण्याक्षो धरोद्धारे विस्तृता शौकरं वपुः ॥"

इति तत्रैव ७ स्कन्धे १ अध्याये ४० श्लोकः ॥ अपिच ।

"तेजस्वी नाम वै पुत्रो हिरण्याक्षो रिपुः स्मृतः ।
हतो वराहरूपेण हिरण्याक्षोऽथ विष्णुना ॥"

इति गारुडे ८७ । ३० ॥

(पीठस्थानविशेषः । यथा, देवीभागवते । ७ । ३० । ६४ ।

"उत्पलाक्षी सहस्राक्षे हिरण्याक्षे महोत्पला ॥")

हिरण्याश्वः, पुं, (हिरण्यस्य अश्वो यत्र ।) तुलापुरुषादि-षोडशमहादानान्तर्गतमहादानविशेषः । यथा,—

मत्स्य उवाच ।

"अथातः संप्रवक्ष्यामि हिरण्याश्वविधिं परम् ।
यस्य प्रदानाद्भुवने चानन्यफलमश्नुते ॥
पुण्यां तिथिं समासाद्य कृत्वा ब्राह्मणवाचनम् ।
लोकेशावाहनं कुर्याद्यथा पुरुषदानवत् ॥
ऋत्विक्छत्रोपसम्भारभूषणाच्छादनादिकम् ।
स्थापयेदग्निमध्ये तु कृष्णाजिनतिलोपरि ।
कौशेयवस्त्रसंवीतं कारयेद्धेमवाजिनम् ॥
शक्तितस्त्रिपलादूर्ध्वमाषट्पलादृषभः ।
पादुकोपानहच्छत्रचामरासनभाजनैः ॥
पूर्णकुम्भाष्टकोपेतं माल्येक्षुफलसंयुतम् ।
शय्यां सोपस्करां तद्वद्धेममार्गणसंयुताम् ॥
ततः सर्वौषधीस्नातः स्नापितो वेदपुङ्गवैः ।
इममुच्चारयेन्मन्त्रं गृहीतकुसुमाञ्जलिः ॥
नमस्ते सर्वदेवेश ! वेदाहरणलम्पट ।
वाजिरूपेण मामस्मात् पाहि संसारसागरात् ॥
त्वमेव चण्डधा भूत्वा छायारूपेण भास्करः ।
यस्मादक्षमयसे लोकानतः पाहि सनातन ! ॥
एवमुच्चार्य गुरवे तमश्वं विनिवेदयेत् ।
दत्त्वा यात्यश्ववाह्यानोर्लोकमक्षयेति श्राश्वतम् ॥
गोभिर्विभवतः सर्वानृत्विजश्चापि पूजयेत् ।
सर्वधान्योपकरणं गुरवे विनिवेदयेत् ॥
सर्वशय्यादिकं दत्त्वा भुञ्जीतातैलमेव हि ।
पुराणश्रवणं तद्वत् कारयेद्भोजनादनु ॥
इमं हिरण्याश्वविधिं करोति यः
पुण्यं समासाद्य दिनं नरेन्द्र ! ।
विमुक्तपापः स पुरं सुरारेः
प्राप्नोति सिद्धैरभिपूजितः सन् ॥
इति पठति य इत्थं हेमवाजिप्रदानं
सकलकलुषमुक्तः सोऽश्वयुक्तेन भूयः ।
कनकमयविमानेनार्कलोकं प्रयाति
त्रिदशपतिवधूभिः पूज्यते योऽथ पश्येत् ॥
यो वा शृणोति पुरुषोऽनघः स्मरेद्वा
हेमाश्वदानमभिनन्द्यतीह लोके ।
सोऽपि प्रयाति हतकल्मषस्तु देहः
स्थानं पुरन्दरमहेश्वरलोकजुष्टम् ॥"

इति मात्स्ये हिरण्याश्वप्रदानिको नाम २८० अध्यायः ॥

हिरण्याश्वरथः, पुं, (हिरण्याश्वः सुवर्णघोटकयुक्तः रथो यत्र ।) षोडशमहादानान्तर्गतमहादानविशेषः । यथा, मात्स्ये ।

"अथातः सर्वदानानां तुलापुरुषसंज्ञितम् ।
हिरण्यगर्भदानञ्च ब्रह्माण्डं तदनन्तरम् ॥
कल्पपादपदानञ्च गोसहस्रञ्च पञ्चमम् ।
हिरण्यकामधेनुञ्च हिरण्याश्वरथावपि च ॥
पञ्चलाङ्गलकञ्चैव धरादानं तथैव च ।
हिरण्याश्वरथञ्चैव दत्त्वा हेमद्विरथस्तथा ॥
द्वादशं विष्णुचक्रञ्च ततः कल्पलतालिकम् ।
सप्तसागरदानञ्च रत्नधेनुरथैव च ॥
महाभूतघटञ्चैव दत्त्वा षोडश परिकीर्तिताः ।"

इति मलमासतत्त्वम् ॥ ७ ॥

तद्विधिर्यथा,—

मत्स्य उवाच ।

"अथातः संप्रवक्ष्यामि महादानमनुत्तमम् ।
हिरण्याश्वरथं नाम महापातकनाशनम् ॥
पुण्यन्तिथिमथासाद्य कृत्वा ब्राह्मणवाचनम् ।
लोकेशावाहनं कुर्यात्तुलापुरुषदानवत् ॥
ऋत्विक्छत्रोपसम्भारभूषणाच्छादनादिकम् ।

कृष्णाजिने तिलान् कृत्वा काञ्चनं कारयेद्घृतम्।
सप्ताश्वं चतुरश्वं वा चतुश्चक्रं सकूबरम्।
रेन्द्रनीलेन कुर्मेण ध्वजरूपेण संयुतम्।
लोकपालाष्टकोपेतं पद्मरागदलान्वितम्॥
चतुरः पूर्णकलसान् धान्यान्यष्टादशैव तु।
कौषेयवस्त्रसंयुक्तमुपरिष्टादितानकम्॥
माल्येक्षुफलसंयुक्तं पुरुषेण समन्वितम्।
यो यद्यत्तः पुनः कुर्य्यात् स तन्नाम्नाधिवासनम्॥
छत्रचामरकौषेयवस्त्रोपानद्युपादुकाः।
गोभिर्विभक्तः सार्द्धं दद्याच्च शयनादिकम्॥
अभावात् त्रिपलादूर्द्धं शक्तितः कारयेच्छुभम्॥
अश्वाष्टकेन संयुक्तं चतुर्भिरथ वाजिभिः।
द्वाभ्यामथ युतं दद्यादिमं मन्त्रमुदीरयेत्॥

नमो नमः पापविनाशनाय
विश्वात्मने वेदतुरङ्गमाय।
धाम्नामधीशाय भवाभवाय
पापौघदावानल देहि शान्तिम्॥
वस्वष्टकादित्यमरुद्गणानां
त्वमेव धाता परमं निधानम्।
यनत्ततो मे हृदयं प्रयातु
धर्म्मैकनाम त्वमघौघनाशात्॥
इति तुरगरथप्रदानमेतत्
भवभयसूदनमत्र यः करोति।
स कलुषपटलैर्विमुक्तदेहः
परममुपैति पदं पिनाकपाणेः॥
देदीप्यमानवपुषा विजितप्रभाव-
माक्रम्य मण्डलमखण्डलचण्डभानोः।
सिद्धाङ्गनानयनषट्पदपीयमान-
वक्त्राम्बुजोऽम्बुजभवेन चिरं सहास्ते॥
इति पठति शृणोति वा य इत्थं
कनकरथतुरगप्रदानमस्मिन्।
न स नरकपुरं व्रजेत् कदाचित्
नरकरिपोर्भवनं प्रयाति भूप!॥"

इति मात्स्ये हिरण्याश्वरथप्रदानिको नाम २५५ अध्यायः॥

हिरुक्, अ, विनार्थः। मध्यार्थः। स्वामीप्यार्थः। इत्यमरभरतौ॥ अधमार्थः। इति शब्दरत्नावली॥

हिल, श हावकृतौ। इति कविकल्पद्रुमः॥ (तुदा०-पर०-अक०-सेट्।) एकोऽर्थः। श, हिलति तरुणा तरुणः। इति दुर्गादासः॥

हिलमोचिः, स्त्री, हिलमोचिका। इति शब्दरत्नावली॥

हिलमोचिका, स्त्री, शाकविशेषः। इत्यमरः। २। ४। १५७॥ हिंचा इति हिलचा इति च बङ्गभाषा। हरहुच् इति हिन्दी भाषा। तत्पर्य्यायः। हिलमोचिः २ हिलमोची ३ रोची ४। इति शब्दरत्नावली॥ मन्वी ५ विषघ्नी ६ मत्स्याक्षी ७ चक्राङ्गी ८। इति रत्नमाला॥ शाक्षी ९ शुक्लधरा १० आचारी ११। तस्या गुणाः। यथा, भावप्रकाशे।

"शोषं कुष्ठं कफं पित्तं हरते हिलमोचिका॥"

अपि च।

"हिलमोची सरा तिक्ता कुष्ठघ्नी कफवातजित्॥" श्लेष्मपित्तजित् इति वा पाठः। इति राजवल्लभः॥

हिलमोची, स्त्री, (हिलमोचि + ङ्यादिकारादिति ङीष्।) हिलमोचिका। इति शब्दरत्नावली॥ (तस्यास्या गुणाः।

"हिलमोची सरा तिक्ता कुष्ठघ्नी कफपित्तजित्॥"

इति वैद्यकराजवल्लभे चतुर्थपरिच्छेदे॥)

हिल्लः, पुं, शरारिपक्षी। इति शब्दचन्द्रिका॥

हिल्लोल, तृ क दोलने। इति कविकल्पद्रुमः॥ (अदन्तचुरा०-पर०-अक०-सेट्।) अन्तःस्थतृतीयद्वयमध्यस्थदेकोपधश्चायम्। अजिहिल्लोलद्दायुर्जनाम्। इति दुर्गादासः॥

हिल्लोलः, पुं, (हिल्लोलयति दोलयतीति। हिल्लोलत् क दोलने + अच्।) तरङ्गः। ढेउ इति भाषा। यथा,—

"श्लाघ्यं नीरसकाष्ठताड़नभृतं श्लाघ्यः प्रचण्डातपः
क्लेशः श्लाघ्यतरः सुपङ्कनिचयः श्लाघ्योऽतिदाहानलः।
यत्कान्ताकुचकुम्भबाहुलतिकाहिल्लोललीलासुखं
लब्धं कुम्भवर! त्वया न हि सुखं दुःखैर्विना लभ्यते॥"

इति कालिदासकृतशृङ्गारतिलकः॥ * ॥

रतिबन्धविशेषः। स च षोड़शबन्धान्तर्गताष्टमबन्धः। तस्य लक्षणं यथा,—

हृदि कृत्वा स्त्रियाः पादौ कराभ्यां धारयेत् करौ।
यथेष्टं ताड़येद्योनिं बन्धो हिल्लोलसंज्ञकः॥"

इति रतिमञ्जरी॥

हिल्वला, स्त्री, स्तनशिरोनक्षत्रशिरोदेशस्थाः पञ्च स्वल्पतारकाः। यथा,—

"स्तनशीर्षशिरोदेशे तारका या वसन्ति हि।
हिल्वला इत्यकास्ताः स्युरिल्वला इति क्वचित्॥"

इति शब्दरत्नावली॥

हिव, इ प्रीतौ। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) इ, हिम्बते। प्रीतिरिह प्रीतीकरणम्। हिम्बति लोकः पितरम्। इति दुर्गादासः॥

हिवुक्, क्ली, एकस्नायुमात्रतुर्यलग्नम्। तत्पर्य्यायः।

"पातालं हिवुकञ्चैव मुहृदम्भस्तुर्यकम्।"

अपि च।

"सपापात् भार्गवात् पापो हिवुके मालनाशकृत्॥"

इति ज्योतिस्तत्त्वम्॥

हिस, इ ध कि हिंसे। इति कविकल्पद्रुमः॥ (रुधा०-चुरा०-पक्षे भ्वा०-पर०-सक०-सेट्।) इ, हिंसते। घ, हिनस्ति। कि, हिंसयति हिंसति। हन्त्यर्थेनैव पाक्षिकचुरादित्वे सिद्धे किकरणं भ्वादित्वार्थम्। इति दुर्गादासः॥

हिहि, अ, आह्लादजनकानुकरणशब्दः। इति केचित्॥ दीर्घान्तद्वयमिति साधुपाठः॥

ही, अ, विस्मयः। इत्यमरः। ३। ४। ६॥ दुःखम्। हेतुः। विषादः। इति मेदिनी॥ शोकः। इति शब्दरत्नावली॥ (यथा, वक्रोक्तिपञ्चाशिकायाम्। ३१।

"ही नाहं भवतोऽतिरूक्षवचसा दातुं
प्रवीणोत्तरं
का ते सुन्दरि! हीनता ननु नता सर्व्वा
त्रिलोक्यैव ते॥")

हीनः, त्रि, (ओ हा क लि त्यागे + क्तः।) "ओदितश्च।" ८। २। ४५। इति नत्वम्। "युमास्यागापाजहातीति।" ६। ४। ६६। इति ईत्वम्।) ऊनः। (यथा, रघुः। १। ७०।

"तया हीनं विधातर्मां कथं पश्यन्न दूयसे।
सिक्तं स्वयमिव स्नेहाद् वन्यमाश्रमपादपम्॥")

गर्ह्यः। इत्यमरः। ३। ३। १२७॥ अधमः। इति जटाधरः॥ (यथा, मनौ। ३। १०७।

"आसनावसथौ शय्यामनुव्रज्यासुपासनम्।
उत्तमेष्वुत्तमं कुर्य्यात् हीने हीनं समे समम्॥")

प्रतिवादिविशेषः। स च षड्विधः। यथा, नारदः।

"अन्यवादी क्रियाहीनो नोपन्यासी निरुत्तरः।
आकृतप्रपलायी च हीनः षड्विधः स्मृतः॥"

इति व्यवहारतत्त्वम्॥

हीनजातिः, त्रि, (हीना जातिर्यस्य।) नीचवर्णः। इति केचित्॥ (यथा, मनुः। ३। १५।

"हीनजातिस्त्रियं मोहादुद्वहन्तो द्विजातयः।
कुलान्येव नयन्त्याशु ससन्तानानि शूद्रताम्॥")

हीनवर्णः, त्रि, (हीनो वर्णो यस्य।) नीचजातिः। यथा,—

"हीनवर्णोपसृक्ता या ब्राह्मी वध्यापि वा भवेत्।"

इति प्रायश्चित्ततत्त्वम्॥

हीनवादी, [न्] त्रि, (हीनं वदतीति। वद + णिनिः।) वाक्यवर्जितः। बोवा इति भाषा। सत्पर्य्यायः। अधरः २ इति हेमचन्द्रः॥ विरुद्धार्थवादी। यथा, नारदः।

"पूर्व्ववादं परित्यज्य योऽन्यमालम्बते पुनः।
वादसंक्रमणाच्चैव हीनवादी स वै नरः॥"

इति।

हीनवादी दण्ड्यो भवति न प्रकृतादर्थाद्धीयते।

इति च मिताक्षरा॥

हीनसख्यं, क्ली, (हीनेन सह सख्यम्।) नीचेन सह मित्रता। इति केचित्॥

हीनाङ्गः, त्रि, (हीनमङ्गं यस्य।) स्वभावतो न्यूनावयवविशिष्टः। तत्पर्य्यायः। पोगण्डः २ विकलाङ्गकः ३ खञ्जः ४ श्यमाङ्गः ५ श्यपोगण्डः ६। इति जटाधरः। तेन सह परीहासनिषेधो यथा,—

"जातिहीनं वित्तहीनं रूपहीनमदर्शनम्।
हीनाङ्गमतिरिक्ताङ्गं तेन दोषेण नाक्षिपेत्॥

क्षीराब्धः

इति ब्रह्मा पुरा प्राह वेदौघार्थविनिश्चयम्।
सत्यावमन्य भवता परीक्षामेऽप्यभाषत॥"
इति कालिकापुराणे ३४ अध्यायः।

क्षीराब्धी, स्त्री, (क्षीरं क्षुदत्वात् अधमं अब्धिः यस्याः। ङीष्।) क्षुद्रमिश्रीलिका। इति हेमचन्द्रः॥

क्षीराशः, पुं, (क्षीरमश्नाति। अश्+घञ्।) दुग्धमक्षकः। इत्यमरटीका॥

क्षीरं, क्षी, (क्षरति मार्द्दवमिति। क्षर+अच्। पृषोदरादित्वात् साधुः। यद्वा, क्षीरं विस्मयं दानीति। दा+कः।) दधम्। इति राजनिर्घण्टः॥ (यथा, रसेन्द्रसारसंग्रहे।

"क्षीरं सुवर्णं सुरतप्त तार-
मेषां समं तीक्ष्णरजचतुर्णाम्।")

क्षीरः, पुं, (क्षरति सर्व्वं प्रलये इति। क्षर+अच्। पृषोदरादित्वात् ईत्वम्।) शिवः। दधम्। इति मेदिनी॥ सर्पः। इति हेमचन्द्रः॥ क्षारः। इति जटाधरः॥ सिंहः। इति केचित्॥ श्रीहर्षपिता। यथा,—

"श्रीहर्षं कविराजराजिमुकुटालङ्कारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मा मञ्जदेवी च
यम्।
यैनीर्यीकृतया जितोऽयमनया तस्य प्रबन्धैर्महा-
काव्ये खण्डनि नैषधीयचरिते सर्गो निसर्गो-
ज्ज्वलः॥"
इति नैषधे २ सर्गः॥

क्षीरकः, पुं, (क्षीर एव। स्वार्थे कन्।) रत्नविशेषः। अयं श्वेतवर्णः बहुमूल्यः शुक्लदेवनाकच। तत्पर्य्यायः। पयः २ क्षीरः ३ क्षीरोदधिजः ४ पयसम् ५। इति शब्दरत्नावली॥ दधीसुतम् ६ वरारकम् ७ रत्नसुरसम् ८ पयःपर्य्यायगाम् ९। विराटदेशजक्षीरकपर्य्यायः। विराटजः १० राजगर्भः ११ राजावर्त्तः १२। इति हेमचन्द्रः॥ अस्य गुणाः। शारकत्वम्। शीतत्वम्। कषायत्वम्। स्वादुत्वम्। वान्तिनाशित्वम्। चक्षुर्हितकारित्वम्। धारणे पापाराक्षीनाशित्वञ्च। इति राजवल्लभः॥ अन्यत् दधिशब्दे दृश्यम्॥ (यथास्य पर्य्यायादि।

"क्षीरदः पुंसि पयसि क्लीबे स्यात् पयसि स्त्रियाम्।
न तु क्षीरः स्त्रियां क्षीरी क्षीरिणी क्षीरिणः
स्त्रियः॥
क्षीरी क्षैरेयकः क्षीरिकः क्षीरकश्च सः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

क्षीरा, स्त्री, (पयसी।) सैन्धवमुक्ता। इति मेदिनी॥ विदारीलता। इति हेमचन्द्रः॥ काकोली। इति राजनिर्घण्टः॥ (पर्य्यायो यथा,—

"क्षीरशुक्ली मधुरसा क्षीरी क्षीरविदारिणी।
काकोली काकरी क्षीरा क्षीरमेषः क्षीर-
रोहिणी।
क्षीरपर्णी क्षीरलता महाकुलिकापि च॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

क्षीराजः, पुं, (क्षीरमेव कल्किं अजं यस्य।) दुग्धम्। इति शब्दमाला॥

क्षुड्

क्षीलं, क्ली, (क्षी विस्मयं लातीति। ला+कः।) रेतः। इति केचित्॥

क्षीलुकं, क्ली, गौड़ीमद्यम्। इति शब्दचन्द्रिका॥

क्षीवी, य, विस्मयः। हास्यम्। इति मेदिनी॥

क्षु, लि क्षोभे। अदने। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-अनिट्।) क्षोभो देवतासम्प्रदानकवह्न्यधिकरणकवस्तुत्यागः। लि लुक्षोति हुतमग्नौ क्षणाय होता। प्रचेपेऽप्ययम्।

"चिराय सन्तर्प्य समिद्धिरग्निं
यो मन्त्रपूतां तनुमप्यहौषीत्।"
इति रघुः।

"जटाधरः सन् जुहुधीह पावकम्।"
इति किरातेऽपि प्रयोगदर्शनात्। इति दुर्गादासः॥

क्षुंस्तं, क्ली, (क्षुं इत्यव्यक्तशब्दस्य स्तं करणम्।) हुङ्कारः। इति धरणिः॥ (यथा, भागवते। ४। १४। ३४।

निशम्य क्षुंस्तैर्वैवं हतमधुतनिन्द्या॥")

क्षुक्षवराहशब्दः। इति केचित्॥ क्षुँ इति मन्त्रोच्चरिते, त्रि॥ (क्षुं इत्यनेन तिरस्कृतः। यथा, महाभारते। १२। ११८। १।

"स त्वा प्रकृतिमापन्नः परं दैन्यमुपागतः।
ऋषिणा क्षुंकृतः प्राप्तस्तपोधनविहिंसकः॥"
क्षुंकृतमस्यास्तीति। अच्। क्षुङ्कारविशिष्टः। यथा, हरिवंशे। ३८। १९।

"अचिरप्रस्तक्षुत्क्षुतवल्लितवत्सोत्सवे गोष्ठे॥")

क्षुड, ड ड संवृते। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-सेट्।) ड, क्षुण्डते। ड, क्षुण्डते धनं लोकः। राशीकरोतीत्यर्थः। इति दुर्गादासः॥

क्षुट, छ ड गतौ। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-सेट्।) छ, अक्षुटोड्त्। ड, क्षोडते। इति दुर्गादासः॥

क्षुड, शि मर्दे। संहे। इति कविकल्पद्रुमः॥ (तुदा०-पर०-मर्दे अक०-संहे सक०-सेट्।) शि, क्षुड्नति अक्षुडीत् क्षुडोड्। मर्दमिह मर्द्दनम्। इति दुर्गादासः॥

क्षुड्ः, पुं, (क्षुड्यतीति। क्षुड्+कः।) मेघः। इति हेमचन्द्रः॥ रोगनिर्घण्टश्च॥ चौरादिनिवारणार्थभूमिनिहितलौहमयनीक्ष्ण-शङ्कुविशेषः॥ तस्य नामान्तरं गुडः। पाँजिकाटा इति भाषा। लगुडः। इति महाभारतम्॥ सैन्यावयवस्थानम्। डुरुज् इति भाषा। रथोपरि विभूषणत्यागप्रकरणम्। यथा,—

"पुरी समन्ताद्विहिता पताका सतोरणा।
मचका सक्षुड़ा चैव सयन्त्रसनका तथा॥"
इति महाभारते वनपर्व्वणि सौभवधे १५ अध्यायः॥ पताका अध्यायः। तोरणानि बहिर्द्वाराणि। यन्त्राणि योधनार्थानि। क्षुड़ादयोऽवयवानानि। भाषायां डुरुजुर्व्वाणि। अन्ये न विभूषणत्यागेऽन्यत्रापि क्षुड़ा रथाङ्गाः। उदाहरन्ति च।

क्षुताग्रः

"कल्पान्ते क्षुड़यङ्गानि रथस्योपरि सूरिभिः।
विभूषणत्यागशुद्ध्यर्थकरादिसर्गे उच्यते॥"
इति॥

यन्त्राणि आग्नेयौषधबलेन दूरात्प्रक्षोतुश्चेपणानि। महान्ति कामानसंज्ञानि क्षुद्राणि शीघ्रगुलिकोत्क्षेपणानि बन्दूकसंज्ञानि। खनकाः सुरङ्गद्वारा गुप्तमार्गकर्त्तारः। इति तट्टीकायां नीलकण्ठः॥

क्षुड्डुकः, पुं, (क्षुड्डुक् इति शब्देन कायति शब्दायते इति। कै+कः।) वाद्यभेदः। दाल्बूहपक्षी। मदमत्तः। इति मेदिनी॥ दण्डकः। क्षुड्का इति भाषा। इति शब्दरत्नावली॥ तत्र क्षुण्डुक इति च पाठः॥

क्षुड्डत्, क्ली, क्षुधशब्दः। इति काशीखण्डमिति केचित्॥

क्षुड्डुभः, पुं, अवक्षिप्तः। क्षुड़म् इति भाषा। इति शब्दमाला॥

क्षुण्डः, पुं, ग्राम्यः। ग्राम्यसूकरः। राक्षसः। इति केचित्॥

क्षुत्तं, त्रि, (क्षु+क्तः।) अग्नौ प्रक्षिप्तं हुतादि। तत्पर्य्यायः। वषट्कृतम् २। इत्यमरः॥ (यथा, गीतायाम्। ८। १६।

"अहमग्निरहं हुतम्॥"
तर्पितम्। यथा, रघुः। २। ७१।

"प्रदक्षिणीकृत्य हुतं हुताग्नि-
मनन्तरं भर्तुरनुव्रतीष॥)

होमे, क्ली॥

हुतभुक्, [ज्] पुं, (हुतं भुङ्क्ते इति। भुज्+क्विप्।) अग्निः। (यथा, भागवते। ३। १६। ८।

"नाहं तथाद्मि यजमानहविर्विताने
स्रोततदृग्हुतमुखैर्हुतभुङ्मुखेन॥")

चित्रभानुः। इत्यमरः। १। १। ५८॥ (यथा, सुश्रुते। ६। ५३।

"पालाविड्योषविड्लवणसिन्धु-
चिकटरास्नाहुतभुग्वलाभिः॥"
महादेवः। इति महाभारतम्। १३। १७। ८१॥ विष्णुः। इति च तत्रैव। १३। १४८। १०८॥)

हुतभुक्प्रिया, स्त्री, (हुतभुजो वह्नेः प्रिया।) अग्निभार्य्या। स्वाहा इत्यमरः। १। ७। २१॥

हुतवहः, पुं, (वहतीति। वह+अच्। हुतस्य वहः।) अग्निः। इति हेमचन्द्रः॥ (यथा, महाभारते। १। २२४। ५८।

"एतच्छ्रुत्वा हुतवहात् भगवान् सर्व्वलोकहृत्।
हयवाहमिदं वाक्यमुवाच प्रहसन्निव॥")

हुताशः, पुं, (हुतं अश्नाति इति। अश+अच्।) अग्निः। इति शब्दरत्नावली॥ (यथा, भागवते। १। १२। २१।

"धन्विनामग्रणीरेषः सुकृताऽर्जुनयोर्द्वयोः।
हुताशः इव दुर्द्धर्षः सतृढ इव दुस्तरः॥")

भयम्। इति अवहारशिरोमणिः॥ (मुनिविशेषः। स चाङ्गिर्लोदर्शिताकारः। अग्निवेशमुनिः। तद्यथा,—

"भस्मं समासाद्विविधं हुताशः
कार्ये च सन्धौ च हि तत्र सन्धौ ॥"
इति वैद्यकरत्नविनिश्चयसंग्रहे भस्माधिकारे ॥
हुताश इति अग्निवेशसम्बोधनं चरके हुताशशब्देनाग्निवेशोऽभिधीयते पदैकदेशे पदप्रवृत्तेः।
इति तट्टीकायां श्रीकण्ठदत्तः ॥)
हुताशनः, पुं, (हुतं आहुतद्रव्यं अशनमस्य।) अग्निः। यथा, गोभिलपुत्रकृतगृह्यासंग्रहे।
"लक्षहोमे तु वह्निः स्यात् कोटिहोमे हुताशनः।
पूर्णाहुत्यां भवेद्धोमो नाम शान्तिके वरदः सदा ॥"
इति तिथ्यादितत्त्वम् ॥
अपि च।
"आरोग्यं भास्करादिच्छेद्धनमिच्छेद्धुताशनात्।
ज्ञानन्तु शङ्करादिच्छेन्मुक्तिमिच्छेज्जनार्दनात्॥"
इति गुणविष्णुधर्मोत्तरपुराणम् ॥
शिवः। इति केचित् ॥ (वटिकौषधविशेषः। तदुक्तं यथा,—
"एकद्विकद्वादशभागयुक्तं
योज्यं विषं टङ्कणसप्तयुक्तम्।
हुताशनो नाम हुताशनस्य
करोति वृद्धिं कफजिन्नराणाम् ॥"
इति हुताशनो रसः ॥*॥
इति वैद्यकरत्नसारसंग्रहेऽजीर्णाद्यधिकारे ॥)
हुतिः, स्त्री, हवनम्। हुधातोः क्तिप्रत्ययेन निष्पन्ना ॥
हुम् य, (हूयते इति। हु + बाहुलकात् मः।) स्तुतिः। अपाकृतिः। अर्थप्रश्नः। अभ्यनुज्ञा। इति मेदिनी ॥ तर्के वितर्के हूँ शब्दो दीर्घादिदूखादिरयमिति केचित्। इत्यमरटीकायां भरतः ॥
हुर्च्छ, आ कौटिल्ये। इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-सेट्।) हुर्च्छी। किपि राछोर्नोपे हूः। हुरो हुरः। आ हुर्च्छितं कृतं तेन। हुर्च्छति खलः कुटिलः स्यादित्यर्थः। हुर्च्छनि चौरः अपसरतीत्यर्थः। इति धातुप्रदीपः। इति दुर्गादासः ॥
हुल, ञ, क्षतिसञ्चरणयोः। इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट्।) ञ चौलः हुलः। इति दुर्गादासः ॥
हुलहुली, स्त्री, (हुल + क। आभीक्ष्ण्ये द्वित्वं गौरादित्वात् ङीष्।) स्त्रीणां मङ्गलजनकमुखशब्दः। उलु उलु इति भाषा। तत्पर्य्यायः। मुखवाद्यं २। इति क्रियाकाण्डशेषः ॥
हुहुः, } पुं, आह्वयतीति। हे + निपातनात्
हुहूः, } हूः वृधः।) गन्धर्वविशेषः। यथा,—
"हुहूर्हुहुश्च निधिपौ हुहूर्हुहुश्च कुत्रचित्।"
इति शब्दरत्नावली ॥
(यथा, महाभारते। १३। ८५। ६।
"पर्जन्यमग्न कौरव्य! कदाचिद्वै पितामहम्।
नारदः पर्वतश्चैव विज्ञापयतुरीश्वरौ हुहूः ॥")
हू, य, (हे + हूः। निपातनम्।) आह्वानम्। अवज्ञा। अपहारः। शोकः। इति केचित् ॥
हूँ, य, मन्त्रविशेषः। तदुद्धारप्रकारो यथा,—
"हकारो वामकर्णाढ्यो नादबिन्दुविभूषितः।
कूर्चं क्रोध उगदर्णो दीर्घहूङ्कार उच्यते।
शब्दश्च दीर्घकवचं तारात्रयव इत्यपि ॥"
किञ्च।
"शिखावषट् च कवचं क्रोधो वर्म्म हमित्यपि।
क्रोधाख्यो हूं तनुत्रञ्च शस्त्रादौ रिपुसंज्ञकः ॥"
अपि च।
"वामस्थं तालचक्राख्यं नादबिन्दुविभूषितम्।
कूर्चं कालो महाकाशः क्रोधबीजं निरञ्जनम् ॥"
इति गानातन्त्रम् ॥
हूङ्कारः, पुं, (हूम् + ङ + भावे घञ्।) हूमिति भयानकध्वनिः। यथा,—
"इत्युक्तः सोऽभ्यधावत्तामसुरो धूम्रलोचनः।
हूङ्कारेणैव तं भस्म सा चकारामिका ततः ॥"
इति मार्कण्डेये देवीमाहात्म्यम् ॥
हूड, वृ ड गतौ। इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-सेट्।) नद्ध अजुहूडत्। ड, हूडते। इति दुर्गादासः ॥
हूर्त, त्रि, (हूर्छ + क्त।) आहूतम्। आह्वानीकृतम्। हूर्छ ण धातोः क्तप्रत्ययेन निष्पन्नम् ॥
हूर्तिः, स्त्री, (हूर्छ + क्तिन् + सम्प्रसारणञ्च।) आह्वानम्। इत्यमरः। १। ६। ८ ॥
हूणः, पुं, (हूर्छ + नक् सम्प्रसारणञ्च।) म्लेच्छजातिविशेषः। यथा,—
"खपाकस्य तुरुष्कस्य हूणो यवन इत्यपि।
लोकबाह्यस्तु यो वाजिगवाद्याचारवर्जितः।
म्लेच्छः किरातशबरपुलिन्द्याद्यास्तु तद्भिदा ॥"
इति जटाधरः ॥
माहराजदेशीयस्वर्णसुद्राविशेषश्च ॥
हूम, य, (हूयते इति। बाहुलकात् मः।) प्रश्नः। वितर्कः। इत्यमरः। ३। ४। १८ ॥ सम्मतिः। क्रोधः। भयम्। निन्दा। अवज्ञा। इत्यमरटीकायां नारायणचक्रवर्त्ती ॥ वितर्के हूं चेत्योऽपि पठ्यते। प्रश्ने हूं को लङ्काधिपतिः। अनुमतौ च हूं ज्ञानं हूम्। भये च हूं न गन्तव्यम्। इत्यमरटीकायां भरतः ॥ अन्यत् हुँशब्दे द्रष्टव्यम् ॥
हूरवः, पुं, (हू इति रवोऽस्य।) शृगालः। इति हेमचन्द्रः ॥
हूर्च्छनं, क्ली, (हूर्च्छ + भावे ल्युट्।) कौटिल्यम्। इति केचित् ॥
हृङ्कः, } पुं, (आह्वयतीति। हे + ङ आह्वाने।
हृङ्कृः, } क्विप्। सम्प्रसारणम्। आभीक्ष्ण्ये द्वित्वं निपातनात् ह्रस्वः। पक्षे तु न।) गन्धर्वविशेषः। इति शब्दरत्नावली ॥ (यथा, भागवते। ८।४।३।
"योऽसौ ग्राहः स वै सद्यः परमाश्चर्यरूपधृक्।
मुक्तो देवलशापेन हूहूर्गन्धर्वसत्तमः ॥")
हृ, ण हृत्याम्। इति कविकल्पद्रुमः ॥ (भ्वा०-उभ०-सक०-अनिट्।) हृतिर्दशाहे श्राद्धान्नाग्रापणा। ण हरति हरते वा वर्णं गोपः। इति दुर्गादासः ॥
हृ, त्रि + हृञ् हरणे। इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-अनिट्।) प्रसह्यहरतीत्यर्थः। त्रि जहर्त्रिधनं दस्युः। र वैदिकः। इति दुर्गादासः ॥
हृच्छयः, पुं, (हृदि शेते इति। शी "अधिकरणे शेतेः। ३। २। १५। इति अच्।) कामदेवः। इति हलायुधः ॥ (यथा, महाभारते। ३। ४६। ४२।
"तत् प्रसीद न मामार्त्तां विवर्ज्जयितुमर्हसि।
हृच्छयेन च सन्तप्तां भक्तां भज भामिनि! ॥")
हृदयग्राहिणि त्रि ॥ (यथा, महाभारते।१३। ८५। १७।
"जगत्पतिरनिर्देश्यः सर्व्वगः सर्व्वभावनः।
हृच्छयः सर्व्वभूतानां श्रेष्ठो ब्रह्मादिरप्रभुः ॥"
पुं, कामः। यथा, भागवते। १। ६। ७।
"यद्यद्धृदय्यभिमतं रूपमेतत् कामाय तेऽनघ!।
मत्कामः शमको धीरः सर्व्वान् संसृजति
हृच्छयान् ॥"
"हृच्छयान् कामान्।" इति तट्टीकायां श्रीधरः ॥)
हृच्छूलं, क्ली, (हृदयजातं शूलमिति मध्यलोपी समासः।) हृदयजातशूलरोगः। तदौषधं यथा, गारुडे १८६ अध्याये।
कथितोदकयागन्तु शम्बूका चारकं तथा।
एतच्चूर्णं क्षिपेद्दध्नि शर्करायुक्तमेव च समन्वितम्।
पीतं क्षुत्पण्मुखानां भवेन्नाशकरं शिव! ॥"
अपि च।
विल्वाग्निमन्थश्योनाकपाटलापारिभद्रकम्।
प्रसारण्यश्वगन्धा च हृच्छूलं कण्टकारिका ॥
बलाचातिबला राना ऋद्धिर्वृद्धा च पुनर्नवा।
शरश्चगारिवा पर्णी गुडूची कपिकच्छुरा ॥
एषां दश पलिकान् भागान् क्वाथयेत् सलिलेद्रोणे।
तेन पादावशेषेण तैलं पात्रे विपाचयेत् ॥
क्षीरं वा यदि वा मद्यं चौरं दत्त्वा चतुर्गुणम्।
शतावरीरसेनैव तैलतुल्यं प्रदापयेत् ॥
अन्यानि यानि पेयानि तानि वक्ष्यामि तत्र
प्रश्ने ॥
शतपुष्पा देवदारु शालपर्णी बलागुडूः।
दुग्धं मांसी सैन्धवञ्च पलमेकं पुनर्नवा।
पाने नस्ये तथाभ्यङ्गे तैलमेतत् प्रदापयेत् ॥
हृच्छूलं पार्श्वशूलञ्च गुल्ममालाञ्च नाशयेत्।
अपस्मारं वातरक्तमायुष्यांश्च पुमान् भवेत् ॥"
इति च गारुडे १८८ अध्यायः ॥
हृणिया, स्त्री, (हृणीयते इति। हृणीङ् + कर्त्तरि क्विप्। ततः यः। निपातनात् ह्रस्वः।) हृणीया। इत्यमरटीकायां रायमुकुटः। १। २। ६२ ॥
हृणीया, स्त्री, (हृणीङ् + कर्त्तरि क्विप्। यः।) निन्दा। इत्यमरः। ३। २। ६२ ॥
हृत, [द्] क्ली, (हरति ह्रियते येति। हृ + "हृञो दुक् च।" उणा० ४।१००। इतिवार्त्तिकात् कर्त्तरि क्तादपि दुक्।) हृदयम्। तत्पर्य्यायः।

चित्तञ्च चेतो हृदयं स्वान्तं हृन्मानसं मनः ।"
इत्यमरः । १ । ४ । ३१ ॥
(यथा, भावप्रकाशस्य मध्यखण्डे द्वितीये भागे ।
"ज्ञानेन्द्रियाग्निपक्वानां सत्त्वस्य रुधिरस्य च ।
हृदुत्पलः पुण्डरीक कोष इत्यभिधीयते ।")
हृत्कन्यः, पुं, (हृदयस्य कन्यः । हृदादेशः ।)
हृदयकन्यनम् । यथा,-
"हृत्कन्यो जायते तावत् यावत् तस्य क्षया
न चेत् ॥"
इति समयाचारतन्त्रोक्तं भद्रकालीकवचम् ॥
हृत्तं, त्रि, (हृ + क्तः ।) अपहृतवस्तु । यथा,-
"पुरा शुम्भनिशुम्भाभ्यामसुराभ्यां श्रियीपतेः ।
त्रैलोक्यं यज्ञभागाच्च हृता मदबलाश्रयात् ॥
इति देवीमाहात्म्ये ५ अध्यायः ॥
हृद्, क्ली, (हृ + बाहुलकात् डुक् ।) हृदयम् ।
मनः । इत्यमरः । २ । ६ । ६९ ॥
हृदयं, क्ली, (हियते विषयैरिति । हृ + "हृञो-
सुगुडुकौ च । उणा० ४ । १०० । इति कयन्
दुक् च ।) वृक्कम् । वक्षः । मनः । यथा,—
"उरस्यपि च वृक्काया हृदयं मानसेऽपि च ॥"
इति त्रिकाण्डशेषः ॥
वृक्कायमांसं हृदयं हृदिति । चत्वारि हृदये ।
केचित्तु वृक्कात् पृथगेव हृदयान्तर्गते मांस-
विशेषे पद्माकारे हृदयादिद्वयमाहुः । धानो-
रनेकार्थत्वात् । इत्यमरटीकायां भरतः ।२।६।६४॥
अस्य अनाहतनामकहृदयदेशपद्मभेदः । यथा,
"आधारे लिङ्गनाभौ हृदयसरसिजे नासुखे
सलाटे
मे पद्मे षोडशारे द्विदशदशदले द्वादशार्णे
चतुष्के ।
धामान्ते वाहिलान्ते च-ख-क-ठसहिते कण्ठदेशे
स्वराणां
षष्ठी कोदण्डमध्ये सकलदलगतं वर्णरूपं
नमामि ॥"
इति षट्चक्रभेदः ॥
किञ्च ।
"तस्योर्द्ध्वे हृदि पङ्कजं सुललितं वन्धूककान्तु-
ज्ज्वलं
कान्तैर्द्वादशवर्णकैरुपचितं सिन्दूरसामाश्रितैः ॥
यामान्तःस्थसकारकं सुरसकं बान्धूलिरक्तप्रभं
वायोर्मैथुनमत्र भूमसदृशं षट्कोणशोभान्वितम् ॥"
इति षट्चक्रक्रमः ॥
अस्य शुभाशुभस्थानं यथा,—
"मनोऽनन्तञ्च सत्त्वमन्तर्यं मांसं हृदु ।
शुभाशुभसमायोगे सुखदुःखविपर्ययम् ॥"
इति भारते ३६ अध्यायः ॥
(अस्य लक्षणम् ।
"अर्धं पद्मं महामूल्यं मनोमत्तं मनोहरम् ।
सदा सर्वेषु हृदयं सर्वदैकमते सुखैः ॥
सहजं सकलज्ञानमिन्द्रियाणां प्रवर्तकम् ।
आत्मा च यत्र तिष्ठेच्च स्थितश्च हृदि संस्थितम् ।
प्रतिष्ठार्थं हि भावानामेषां हृदयमिष्यते ।
शोणितस्यैनामागारकर्मणि कार्यचिन्तकैः ।
तस्यापवादात्तूर्द्ध्वं भेदात्सरणमिच्छति ॥
यद्धि तत् सर्वविज्ञानव्यापित्तञ्च संश्रितम् ।
ततुपरक्षोऽजस्रः स्यात्तच्च चैतन्यसंग्रहः ॥
हृदयं मर्महृदयैश्च तस्मादुत्क्वाचिकित्सकैः ।
तेन सूक्ष्मेण महता महामूला मता दश ॥"
इति चरके सूत्रस्थाने त्रिंशेऽध्याये ॥
"हृदयमिति हृतवीर्य्यो बुद्धिर्मनसश्च स्थानत्वात् ॥"
इति सुश्रुते शारीरस्थाने चतुर्थेऽध्याये ॥
"श्लेष्मशोणितकफप्रसादजं हृदयं तदाश्रया हि
धमन्यः प्राणवहाः । तस्याधो वामतः श्लीहा
यकृच्च दक्षिणतो यकृत् क्लोम च ॥
तद्धृदयं विशेषेण चेतनास्थानमतस्तस्मिन्नभिहते
सर्वप्राणिनः स्वपन्ति । भवति चात्र ।
पुण्डरीकेण सदृशं हृदयं स्यादधोमुखम् ।
आयतस्तद्विकसति स्वपतश्च निमीलति ॥"
इति च सुश्रुते शारीरस्थाने चतुर्थेऽध्याये ॥)
हृदयग्रन्थिः, पुं, (हृदयस्य ग्रन्थिरिव अविद्या-
सम्बन्धेन दुर्भेद्यत्वात् ।) हृद्रन्थः । यथा,—
"भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ।
क्षीयन्ते चास्य कर्माणि दृष्ट एवात्मनीश्वरे ॥"
इति श्रीभागवते । १ । ७।२१ ॥
हृदयङ्गमं, क्ली, (हृदयं गच्छतीति । गम + खच् ।
मुम् च ।) युक्तियुक्तवाक्यम् । इति भरतः ॥
तत्पर्य्यायः । सङ्गतम् २ । इत्यमरः । १।६।१८ ॥
(मनोहरे, त्रि । यथा, कुमारे । २ । १६ ।
"इति तेभ्यः स्तुतीः श्रुत्वा यथार्था हृदयङ्गमाः ।
प्रसादाभिमुखो वेधाः प्रत्युवाच दिवौकसः ।"
'हृदयङ्गमाः मनोहराः।' इति तट्टीकायां मल्लि-
नाथः ॥)
हृदयवान्, [न्] त्रि, (हृदयमस्यास्तीति । मतुप् ।
मस्य वः ।) हृदयालुः । इत्यमरटीकासार-
सुन्दरी ॥
हृदयस्थानं, क्ली, (हृदयस्य स्थानम् ।) वक्षः-
स्थलम् । तत्पर्य्यायः । क्रोडम् २ उरः ३ वक्षः ४
वक्षम् ५ सुजान्तरम् ६ । इति हेमचन्द्रः ॥
हृदयात्मा, [न्], पुं, (हृदयमेव आत्मा प्रधान-
देहभागो यस्य ।) कङ्कपक्षी । इति शब्द-
चन्द्रिका ॥
हृदयालुः, त्रि, (प्रशस्तहृदयमस्यास्ति । हृदय +
उ । २ । १२२ । इत्यत्र "हृदयाच्चासुरन्तर-
स्याम् ।" इति काशिकोक्तेः चासुः ।) प्रशस्त-
मनाः । तत्पर्य्यायः । सुहृदयः २ । इत्यमरः ।
३ । १ । ३ । सहृदयः ३ । इति भरतः ॥ हृदयी ४
हृदयिकः ५ हृदयवान् ६ । इति टीकान्तरम् ॥
भिक्षुः ७ । इति जटाधरः ॥
हृदयिकः, त्रि, (प्रशस्तं हृदयमस्यास्तीति ।
हृदय + ठन् ।) हृदयालुः । इत्यमरटीकासार-
सुन्दरी ॥
हृदयी, [न्] त्रि, (प्रशस्तं हृदयमस्यास्तीति ।
इनिः ।) हृदयालुः । इति जटाधरः ॥
हृदयेश, पुं, (हृदयस्य ईशः ।) भर्त्ता । इति
त्रिकाण्डशेषः ॥ तत्पर्य्यायः ।
"प्रेयस्यायाः पुंसि पत्यौ भर्त्ता सेक्ता पतिर्वरः ।
विधोढ़ा रमणे भोक्ता स्वयो वरयिता धवः ॥"
इति हेमचन्द्रः ॥
हृदयेशा, स्त्री, (हृदयस्य ईशा ।) भार्य्या । यथा,
"प्रेयसी दयिता कान्ता प्राणेशा वल्लभा
प्रिया ।
हृदयेशा प्राणसमा श्रेष्ठा प्रणयिनी च सा ॥"
इति हेमचन्द्रः ॥
हृदावर्त्तः, पुं, (हृदयस्थितः आवर्त्तः ।) अश-
हृदयावर्त्तः । तत्पर्य्यायः । श्रीवृक्षकः २ । इति
त्रिकाण्डशेषः ॥
हृदिस्पृक्, [ग्] त्रि, (हृदि हृदये स्पृशतीति ।
स्पृश् + क्विन् । "हृदुदुभ्यां डेः ।" ६ । ३ ।
६ । इत्यस्य वार्त्तिकात् अलुक्समासः ।)
हृद्यः । इति केचित् ॥ (यथा, भागवते । ६ ।
१४ । ४३ ।
"यो दुस्त्यजान् दारसुतान् सुहृद्राज्यं हृदि-
स्पृशः ।
जहौ युवैव मलवदुत्तमश्लोकलालसः ॥")
हृदयस्पृगुत्कर्षा च ॥
हृन्नोलः, पुं, पर्व्वतविशेषः । इति कश्चित् ॥
हृन्नोलीयः, त्रि, (हृन्नोलोऽभिजनोऽस्येति । छः ।)
हृन्नोलपर्व्वतोद्भवः । इति केचित् ॥
हृद्गन्धः, पुं, (हृत् हृदयं गच्छतीति । गम +
खच् ।) हृद्गमः । इति राजनिर्घण्टः ॥
हृद्यं, क्ली, (हृदयस्य प्रियं मनोज्ञत्वात् । हृदय
+ "हृदयस्य हृल्लेखयदण् लासेषु ।" ६।३।५० ।
इति यत् हृदादेशश्च ।) गुडत्वक् । इति शब्द-
रत्नावली ॥
हृद्यः, पुं, (हृदय + यत् । हृदादेशः ।) वंशरुद्-
वेदमन्थः । इति मेदिनी ॥
हृद्यः, त्रि, (हृदयस्य प्रियमिति । हृदय + "हृद-
यस्य हृल्लेखयदण्लासेषु ।" ६ । ३ । ५० ।
इति यत् हृदादेशश्च ।) मनोहरः । इत्यमरः ।
३।१।५३ । अस्य पर्य्यायः मनोज्ञमनोहरौ ॥
हृद्यः । हृद्यितः । हृत्प्रियः । इति मेदिनी ॥
(यथा, मनौ । ३ । २२७ ।
"भक्ष्यं भोज्यञ्च विविधं मूलानि च फलानि च ।
हृद्यानि चैव मांसानि पानानि सुरभीणि च ॥")
हृद्यगन्धं, क्ली, (हृद्यो गन्धोऽस्य ।) हृद्यगन्धरसम् ।
इति शब्दचन्द्रिका । सौवर्चलम् । इति राज-
निर्घण्टः ॥
हृद्यगन्धः, पुं, (हृद्यो मनोहरो गन्धोऽस्य ।) बिल्व-
वृक्षः । इति जटाधरः ॥
हृद्यगन्धा, स्त्री, (हृद्यो गन्धोऽस्याः ।) जाती ।
इति राजनिर्घण्टः ॥
हृद्यगन्धि, क्ली, (हृद्यो गन्धोऽस्य । इदं समा-
सान्तः ।) हृद्यगन्धरसम् । इति रत्नमाला ॥
हृद्या, स्त्री, (हृद् + यत् । टाप् ।) हरिद्रानामौषधि-
इति मेदिनी ॥

हृद्रोगः, पुं, कृमिराशिः। इति भरतसेनिका। (हृदयस्य रोगः इव।) कामः। यथा,—
"हृद्रोगमाशु पिशुनीयचिरेण धीरः।"
इति श्रीभागवतम्।
(हृदयस्य रोगः।) हृदयपीड़ा। तच्च हृद्रोगस्य विप्रकृष्टं निदानमाह।
"व्यक्तुच्चगुर्वम्लकषायतिक्त-
अमाभिघातात्ययनप्रसङ्गैः।
सञ्चिन्तनैर्वेगविधारणैश्च
हृदामयः पञ्चविधः प्रदिष्टः॥"
प्रसङ्गः सततं सेवा। सञ्चिन्तनमतिचिन्ता राजभयादिकमिति यावत्। पञ्चविधः वातिकः पैत्तिकः श्लैष्मिकः सान्निपातिकः क्रिमिजश्चेति। * । तस्य संप्राप्तिपूर्व्वकं लक्षणमाह।
"दूषयित्वा रसं दोषा विगुणा हृदयङ्गताः।
हृदि बाधां प्रकुर्व्वन्ति हृद्रोगं तं प्रचक्षते।"
विगुणाः दुष्टाः। बाधां दोषभेदे नानाविधां व्यथाम्। भङ्गयन् पीड़ामिति गयदासः। * । वातिकं हृद्रोगमाह।
"आयम्यते मारुतजे हृदयं तुद्यते तथा।
निर्मथ्यते दीर्य्यते च स्फोट्यते पाट्यतेऽपि च।"
मारुतजे हृद्रोगे इति शेषः। आयम्यते यथा विस्तार्य्यते इव। तुद्यते सूचीभिरिव। निर्मथ्यते मन्थानेनेव। दीर्य्यते करपत्रेण छिद्यत इव। स्फोट्यते व्यादार्य्येव। पाट्यते कुठारेण बहुधा क्रियत इव। * । पैत्तिकमाह।
"सञ्जोक्तदाहोषाः स्युः पैत्तिके हृदये भ्रमः।
धूमायनञ्च मूर्च्छा च क्लेदः शोषो मुखस्य च।"
उक्त शीतमात्रस्यैव शीतवातादिभिन्नहेतुकिञ्चिदन्यत्वांशम्। दाहः पार्श्वस्थेन वह्निनेव दुःसहेतुर्गात्रसन्तापः। शोषः मुखस्येव पीड़ा। हृदये भ्रमः हृदयाकुलत्वं ग्लानिरित्यर्थः। धूमायनं कण्ठादुद्गमनमिव इव। क्लेदः किञ्चिद्गैन्यः सहित इव। * । श्लैष्मिकमाह।
"गौरवं कफसंसर्गाद्रोचकोऽग्निमार्द्दवम्।
माधुर्य्यमपि चास्यस्य वक्त्रता वर्त्तते हृदि।"
वक्त्रता वर्त्तते हृदि कफिलकण्ठत्वमिव। गौरवं हृदयस्य। रोचकः अरुचा। मार्द्दवं अवसन्नमिव। माधुर्य्यं सुखे। * । सान्निपातिकमाह।
"लिङ्गान् त्रिदोषजन्यैर्य सर्व्वैर्लिङ्गं हृदामयम्।"
क्रिमिजमाह। क्रमयो यत्रस्थे व्यक्तिमिति क्रिमिज इति निरुक्तिः। * । तस्य निदानपूर्व्वकं संप्राप्तिमाह।
"विरोधिभैषजैर्हृद्रोगे यो दुराक्ता निषेवते।
विरुद्धोरुहृदर्य्यैश्च सञ्चिन्तक्लेशमाप्नुते।
सर्व्वैरेतैर्नरैर्हृद्यं क्रमशोऽनुक्रमात्यलम्।
सर्व्वैरेतैः हृद्रोगैर्यैर्यं सञ्चिन्तं एव उपक्रमति सर्व्वैरेतैः। हृद्यं सञ्चिन्तनात्। उपक्रमात्यः निदानादिभिरादरेण। * । तस्य रूपमाह।
"हृदयेन्द्रः शोषं शोफ मूर्च्छं हृल्लासहर्षणः।
अरुचिः श्यावनेत्रत्वं शोषश्च क्रमिजे भवेत्।"
उन्क्लेदः वमनमिवोपस्थितम्। शोषो यक्ष्मा। हृद्रोगस्योपद्रवानाह।
"क्रोमनादो भ्रमः शोषो ज्ञेयास्तेषामुपद्रवाः।
क्रमिजे तु क्रमीणां ये वैशेषिकाणां हि ते मताः॥"
क्रोमः पिपासास्थानस्य नादः शोषः। शोषो सुखस्य। तेषां हृद्रोगाणाम्। क्रमिजे तु हृद्रोगे वैशेषिकाणां क्रमीणां ये उपद्रवा शूलासात् प्रसवणान्ता विषाकादयस्ते मताः। * । अथ हृद्रोगस्य चिकित्सा।
"हृतेन दुग्धेन गुड़ाम्भसा वा
पिबन्ति चूर्णं कवलत्रयो ये।
हृद्रोगजीर्ण्वररक्तपित्तं
हत्वा भवेयुश्चिरजीविनस्ते॥ १॥
हरीतकी वचा राखा पिप्पली नागरोद्भवम्।
शटी पुष्करमूलोत्थं चूर्णं हृद्रोगनाशनम्॥२॥
पुटदग्धहरिणशृङ्गविष्ठं गव्येन सर्पिषा पिबतः।
हृत्पङ्कजमूलमचिराद्रुपैति भ्रान्तिं सुकष्टमपि॥३॥
तैलाज्यगुडविषकंचूर्णं गोधूमपार्थोत्थम्।
पिबति पयोसुक् स भवति गतसकलहृदामयः पुरुषः॥
पार्थः कौह इति लोके। ४॥
गोधूमकवृकभचूर्णं पक्वसजाक्षीरगव्यघृतपिण्ड्याम्।
मधुशर्करासमेतं शमयति हृद्रोगदुस्त्यजं पुंसाम्॥५॥
पार्थेन कल्केन रसेन सिद्धं
शृतं घृतं सर्पुहृदामयेषु॥
चक्रदत्तम्। ६।
घृतं बला नागबलार्जुनानां
क्वाथेन कल्केन च सर्पिषायाः।
सिद्धं निहन्याद्धृदयामयं हि
यथातरक्तक्षतरक्तपित्तम्।"
चक्रदत्तम्। ७। इति हृद्रोगाधिकारः।
इति भावप्रकाशः। ७। अपि च।
धन्वन्तरिरुवाच।
"हृद्रोगादिनिदानं ते वक्ष्येऽहं सुश्रुताधुना।
क्रमिहृद्रोगनिर्द्देश्य स्मृताः षष्ठ तु हृद्गदाः।
वातेन शूलनेत्यर्थं तृष्णया सदृशीति च।
भिद्यते शूलते सत्यं हृदयं शूलसादवः।
शुक्रौजोहीनता शोकौ भयं भ्रान्तोऽथिलुप्ता।
वेगधुर्य्यैर्न शोषः स्याद्रोगोऽन्यनिमित्ता।
विषाक्षुण्णा क्रमो दाहः सन्तोषः सक्षयः क्रमः।
हृदयेनाभिधिक्तस्य धूमरुद्धसिता दरः।
वैक्लव्या हृदयस्यार्त्तिर्भवेत् वातकमर्भवम्।
कामाभिघातजिह्मेच्छ विद्वेषाद्यैर्विरोधैः।
सर्व्वैर्लिङ्गं भिषग्भिर्हि क्रिमिभिः स्यादसंशयः।
सन्तःप्रवेदो हृदयः शोषः मुखः श्वसनम्।
हृदयं सततक्लेश कण्डूयेव च जायते।
क्रिमिभिर्हृद्गतैर्घोरं सद्यो हृद्रोगकारणम्।"
इति माधवे। १६ अ।—७। * ।

"शुण्ठी सौवर्चलं क्षिप्त्वा पीत्वा हृदयरोगवान्।"
इति च गारुडे। १८८। ४३।
हृद्रोगवैरी, [न्] पुं, (हृद्रोगस्य वैरी।) अर्जुनवृक्षः। इति शब्दचन्द्रिका।
हृद्वस्तकः, पुं, (हृदो वस्तकः।) जठरम्। इति शब्दचन्द्रिका।
हृल्लासः, पुं, (हृदयस्य लासोऽत्र। "हृदयस्य हृल्लेखयदग्लासेषु।" ६। ३। ५०। इति हृदादेशः।) छर्दिका। यथा,
"छर्दिका हिक्का च हृल्लासः प्रतिश्यायस्तु पीनसः।"
इति हेमचन्द्रः।
(यथा, सुश्रुते उत्तरस्थाने २६ अध्याये।
"धमनीस्थे सर्पिषि रक्तमोक्षणनिलः सशब्दो निर्गच्छत्यङ्गमर्दः पिपासा हृल्लासश्च।") अस्य निदानादि छर्दिकाशब्दे द्रष्टव्यम्।
हृल्लेखः, पुं, (हृदयं लिखतीति अण्। "हृदयस्य हृल्लेखेति।" ६। ३। ५०। इति हृदादेशः।) व्याधिः। इति राजनिर्घण्टः। तर्कः। इति त्रिकाण्डशेषः।
हृल्लेखा, स्त्री, *(हृल्लेख+अजादित्वात् टाप्।) ओतुसञ्ज्ञम्। इति धनञ्जयः।
हृष, उ हृष्टौ। इति कविकल्पद्रुमः। (भ्वा०-पर०-अक०-सेट्। ज्ञापेट्।) हृष्टिस्थितौत्साहः। उ, हर्षित्वा हृष्ट्वा। ज्ञा हर्षो वेटत्वात्सेम क्तौ-श्वीत्यादिना इर्भो निषेधे निष्ठायां हृषः अस्मात् पृषादित्वात्सिद्धं क इत्यन्ये। इति दुर्गादासः।
हृष, उ णि अलीके। इति कविकल्पद्रुमः। (भ्वा०-पर०-सक०-सेट्। ज्ञापेट्।) उ, हर्षित्वा हृष्ट्वा। णि, हृषीयन्ति। अलीकं मिथ्याकरणम्। हर्षयति कर्त्ता नीचः मिथ्या करोतीत्यर्थः। इति दुर्गादासः।
हृष, य णि रट् हृषौ। इति कविकल्पद्रुमः। (दिवा०-पर०-अक०-सेट्।) य, हृष्यति लोकः सुखात्। णि, हृषीयन्ति। रट् अहृषत् अहर्षीत्। अस्मात् पृषादित्वात्सिद्धं क, इत्यन्ये। इति दुर्गादासः।
हृषित, त्रि, (हृष+क्त। वा इट्।) विस्मितम्। प्रीतम्। प्रहृष्टम्। हृष्टरोम। इति मेदिनी। प्रसन्नम्। वर्षितम्। इति धरणिः।
हृषी, पुं, ऋषिभेदौ। इति महाभारते मोक्षधर्म्मः।
हृषीक, क्लो, (हृष्यतेऽनेनेति। हृष+"सनिहृषिभ्यां कित्।" उणा०। ४। १७। इति ईकन्। स कित्। हर्षिकम्। हर्षकरः। १। ५। ८।
(यथा, भागवते। २। ६। ३७।
"न भारती मेऽङ्गजसंप्रगल्भा
न वै लक्षणं ममृषे तथा गतेः।
न मे हृषीकाणि पटुत्वमत्यगी
यदूचे दुरन्तश्रवसो वपुर्हरेः।")
हृषीकेश, पुं, (हृषीकाणां ईशः।) विष्णुः। इति हेमचन्द्रः। १।१।८। हृषीकाणामिन्द्रियाणा-

भोगी हृषीकेशः चैतन्यरूपकत्वात् परमात्मत्वाद्वा। इन्द्रियाणि यद्वशे वर्त्तन्ते स परमात्मा। इति शङ्कराचार्यः। पौराणिकास्त्वाहुः। हृष्टा जगत् प्रीतिकराः केशा रश्मयोऽस्य हृषीकेशः। हृषेरादिः। अयं हि सूर्यरूपश्चन्द्ररूपश्च। तथा च भोजधर्मे।

"सूर्याचन्द्रमसोः शश्वत् अंशुभिः केशसंज्ञितैः।
बोधयत् स्वापयत्येव जगदुद्भिद्यते पृथक्।
बोधनात् स्वापनाच्चैव जगतो हर्षणं भवेत्॥
अर्यामोमऋतैरेव कर्म्मभिः पाण्डुनन्दन!।
हृषीकेशोऽहमीशानो वरदो लोकभावनः॥",

इति भरतः॥

अपि च।

'हृषीकाणि नियम्याहं यतः प्रत्यक्षतां गतः।
हृषीकेश्म इति ख्यातो नाम्ना तत्रैव संस्थितः॥"

इति वाराहे रत्नजेत्रहृषीकेशमहिमनामाध्यायः॥ ९॥

"हृषा धर्म्मश्चरिष्यन्ति कलौ तस्मिन् युगान्तिमे॥
ये चान्यशास्त्रनिर्दग्धा गौतमस्य महात्मनः।
सर्व्वे ते ह भविष्यन्ति ब्राह्मणाद्यासु जातिषु॥
विनिन्दन्ति हृषीकेशं ब्राह्मणान् ब्रह्मवादिनः।
वेदबाह्या मताचारा दुराचारा हृषात्मजाः॥
मोहयन्ति जगान् सर्व्वान् दर्शयित्वा फलानि च।
तस्माद्विष्णुमनसो वैडालव्रतिकाधमाः॥
कर्त्ता रुद्रो महादेवो लोकानामीश्वरः परः॥
न देवता भवो नृणां देवतानाञ्च दैवतम्।
करिष्यत्यवतारांश्च शङ्करो नीललोहितः॥
औतथ्यार्थप्रतिष्ठार्थं भक्तानां हितकाम्यया।
उपदेक्ष्यन्ति तज्ज्ञानं गिरिशाय ब्रह्मसंहितम्॥"

इति कौर्म्मे २७ अध्यायः॥

हृष्टः, त्रि, (हृष् + क्त। वा इट्।) प्रीतः। जातधर्षः। इत्यमरः। ३। १। २०३॥ अस्य पर्य्यायः। प्रीतश्चेटे प्रहृष्टः। रोमाञ्चितः। प्रहर्षितः। विस्मितः। इति विश्वमेदिन्यौ॥ प्रतिहृतः। इति हेमचन्द्रः॥

हृष्टमानसः, त्रि, (हृष्टं मानसं यस्य।) हृष्टचित्तः। तत्पर्य्यायः। हृष्टमानः २। विकृतीनः ३ प्रमनाः ४। इत्यमरः। ३। १। ७॥ प्रीतमानसः ५। इति शब्दरत्नावली॥

हृष्टरोमा, [न्] त्रि, (हृष्टानि रोमाण्यस्य।) रोमाञ्चितः। इति त्रिकाण्डशेषः॥ (यथा, कथासरित्सागरे जरायुधिकारे।

"यो हृष्टरोमा रक्षार्थी हृदि महासत्त्वमूलवान्।
यद्वेग धैर्योच्छ्वसितं सं व्यरौत्सीत् मानवम्॥")

हृष्टिः, स्त्री, (हृष् + क्तिन्।) प्रीतिः। मानः। इति धरणिः॥

हे, क्ली, (हियतेऽनेनेति। हि + बाहुलकात् डे।) धर्म्मोपदेशः। (यथा, अग्निपुराणे ३७१।१२।

"वाचा वा लक्षणेनैवं वा धर्म्मस्य कौशलं
हेतुम्।
ये शास्त्रमर्थतोऽवेदुं हृष्टेनां यः कृतः
श्रमम्॥")

आज्ञानम्। अमुखादि। इति मेदिनी॥ आद्यस्य पर्य्यायः। प्याट् २ पाट् ३ अङ्ग ४ हे ५ भोः ६। इत्यमरः। ३। ४। ७॥ हंहो ७ हुंहो ८ अरे ९ अये १० अयि ११। इति भरतः॥

हेक्का, स्त्री, (हेक् इति अव्यक्तं शब्दं कायतीति। के + कः। टाप्।) हिक्का। इति हेमचन्द्रः॥

हेट, वाधे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) हेटति। बाधो विहेटिः। इति दुर्गादासः॥

हेट, ऋ ङ वाधे। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-सेट्।) ऋ, अजिहेटत्। ङ, हेटते मत्सरः साधुम्। इति दुर्गादासः॥

हेट, ग्र खचे। इति कविकल्पद्रुमः।) तुदा०-पर०-उत्पत्तौ अक०-प्रविचीकरणे सक०-सेट्।) खचो भूतपूर्व्वोत्पत्तिः। ग्र, हेटती हेटन्ती। इति दुर्गादासः॥

हेटः, पुं, (हेट + घञ्।) बाधा। विहेटः। इति मेदिनी॥

हेड, ङ ऋ अनादरे। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-सेट्।) ङ, हेडते। जिहेडे। ऋ, अजिहेडत्। इति दुर्गादासः॥

हेड, म वेष्टे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) म, हेडयति अजिहेडि अहेडीत् हिडं हिडं हीडं हीडम्। एकारस्य ह्रस्वविधाने कण्ठ्यत्वेन समानोच्चकारो न स्यात् एषो युगस्मिन्युक्तैरिकार एव स्यात्। इकारस्य दीर्घविधौ ईकार एव एकारस्य आभ्यन्तरकण्ठ्यत्वेन विरुद्धत्वात्। केचित्तु दीर्घत्वे गुणं विधाय अहेडि अहेडीत्यादि मन्यन्ते। इति दुर्गादासः॥

हेडचः, पुं, (हेडादनादराज्जायत इति। जन + डः।) क्रोधः। इति केचित्॥

हेडायुकः, पुं, अश्वविक्रयकारी। इति त्रिकाण्डशेषः॥

हेतिः, स्त्री, (हन्यतेऽनयेति। हन + "अतियूतिजूतिसातिहेतिकीर्त्तयश्च।" ३। ३। ९७। इति क्तिन्। निपातितश्च।) अस्त्रम्। (यथा, रघुः। १०। १२।

हैडम्बीनखलेखानां मदरागविलोभिनः।
हेतिभिश्चेतनावद्भिरुदीरितजयस्वनम्॥"

हिनोति इति। हि + क्तिन्। निपातितश्च।) सूर्य्यकिरणः। अग्निशिखा। इत्यमरः। ३। ३। ७०। शिखा। तत्रैव। १। १। ६०॥ तेजोमात्रम्। इति भरतः॥ साधनम्। यथा,—

"सङ्घट्टनियम्य यतयो यमकर्मनैर्हेतिं
सुः खराश्चिव निधानसनित्रमिन्द्रः॥"

इति श्रीभागवते २। ७। ४०॥

वर्त्तो भेदः तन्निरासोऽकर्त्तः तत्र हेतिं साधनं ब्रूते। इति श्रीधरस्वामी॥ (पुं, असुरविशेषः। यथा, भागवते। ६। १८। २०।

"पूषणा हेतया दक्षो यथा रुद्रश्च यज्ञहा॥")

हेत्वाभा, स्त्री, (हेतुरिव आभासते। आ + भास + घञ्।) हेतोराभासो वेति। आ + भास + घञ्।) हेतुदोषः। स तु पञ्चविधः। अभिचारः १ विरुद्धः २ अभिहः ३ सत्प्रतिपक्षः ४ बाधः ५। यथा,—

"अनैकान्तो विरुद्धश्चाप्यभिहः प्रतिपक्षितः।
कालात्ययापदिष्टश्च हेत्वाभासास्तु पञ्चधा॥
आद्यः साधारणस्तु स्यात् स्यादसाधारणोऽपरः।
तथैवानुपसंहारी विपक्षैकाश्रितो भवेत्॥

हेतुः, पुं, (हिनोति याप्नोति कार्य्यमिति। हि + "कृमिमनिजनिगाभायाहिभ्यश्च।" उणा० १। ७३। इति तुः।) कारणम्। इत्यमरः। १। ८। २६॥ (यथा, मनुः। ८। ३।

"प्रत्यक्षं देशदृष्टैश्च शास्त्रदृष्टैश्च हेतुभिः।
अष्टादशसु मार्गेषु निबद्धानि पृथक् पृथक्॥")

न्यायमते व्याप्यज्ञापकः। व्याप्य इति यावत्। तमेव लिङ्गमामनन्ति। तस्य लक्षणं यथा। हेतुत्वञ्च अनुमितिकारणीभूतलिङ्गपरामर्शप्रयोजकशब्दज्ञानकारणसाध्याविषयकशाब्दधीजनकहेतुविभक्तिमच्छब्दत्वम्। हेतुत्वप्रतिपादकविभक्तिमन्न्यायावयवत्वम्वा। उदाहरणप्रयोजकाकाङ्क्षाजनकशाब्दज्ञानजनकन्यायावयवत्वं वा। साध्याविषयकज्ञानजनकहेतुपरेवन्यन्तानुमितिपरशब्दत्वं वा। प्रतिज्ञावाक्यधीजन्यकारणाकाङ्क्षानिवर्त्तकज्ञानजनकहेतुविभक्तिमद्वाक्यत्वं वा। पञ्चम्यन्तलाक्षणिकपदवदनुमितिपरवाक्यत्वं वा। इति गङ्गेशोपाध्यायकृतावयवचिन्तामणिः॥ (तथास्य लक्षणम्।"अथ हेतुः। हेतुर्नामोपलब्धिकारणं तल्लक्ष्यमनुमानमेतिलक्षणमौपम्यमेभिर्हेतुभिर्यदुपलभ्यते तल्लक्ष्यम्। इति चरके विमानस्थाने अष्टमेऽध्याये॥ तथास्य पर्य्यायः। "इह खलु हेतुर्निमित्तमायतनं कर्त्ता कारणं प्रत्ययः समुत्थानं निदानमित्यनर्थान्तरम्।" इति च चरके निदानस्थाने प्रथमेऽध्याये॥ तैजसधातुविशेषः। तत्पर्य्यायो यथा,—

"यत्तदं रङ्गवद्रूपं रीति हेतुश्च तत्तमम्।"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

हेतुकः, पुं, कारणम्। हेतुरेव स्वार्थे कः। तत्समन्विनि त्रि। अत्र बहुव्रीह्यर्थे कप्रत्ययः। यथाप्रकृतसाध्यहेतुकानुमितिपरत्वमावश्यकम्। इति सामान्यनिरुक्तिगादाधरी॥

हेतुता, स्त्री, (हेतोर्भावः। हेतु + तल्।) कारणता। हेतुत्वम्। यथा,—

"सम्बन्धे सत्युद्घातो हेतुतावसरत्यधा।
निर्व्याहैकैककार्य्यत्वे षोढ़ा सङ्गतिरिष्यते॥"

इत्यनुमितिकागदीशी॥

हेतुमान्, [तृ] त्रि, (हेतुरस्यास्तीति। हेतु + मतुप्।) कारणवान्। यथा। हेतुहेतुमतोर्लिट्। इति पाणिनिसूत्रम्॥

हेतौ, व्य, हेतुना। हेतोर्द्वारा। इति केचित्॥

हेत्वाभासः, पुं, (हेतुरिव आभासते। आ + भास + घञ्।) हेतोराभासो वेति। आ + भास + घञ्।) हेतुदोषः। स तु पञ्चविधः। अभिचारः १ विरुद्धः २ अभिहः ३ सत्प्रतिपक्षः ४ बाधः ५। यथा,—

"अनैकान्तो विरुद्धश्चाप्यभिहः प्रतिपक्षितः।
कालात्ययापदिष्टश्च हेत्वाभासास्तु पञ्चधा॥
आद्यः साधारणस्तु स्यात् स्यादसाधारणोऽपरः।
तथैवानुपसंहारी विपक्षैकाश्रितो भवेत्॥

यः सपक्षे विपक्षे च स तु साधारणो मतः।
यस्तूभयस्माद्व्यावृत्तः स त्वसाधारणो मतः॥
तथैवानुपसंहारी केवलान्वयिपक्षकः।
यः साध्यवति नैवास्ति स विरुद्ध उदाहृतः॥
आद्यव्याप्तिद्विरादा स्यात् स्वरूपाप्तिरथाय।
आप्त्वाप्तिद्विरपरा स्यादप्तिद्विरनिन्दिधा॥
पक्षाप्तिर्यत्र पक्षो भवेन्महानसमयो गिरिः।
दूरो दृश्यं धूमवत्त्वादप्तिद्विरथापरा॥
आप्त्वाप्तिद्विरपरा नीलधूमादिके भवेत्।
विरुद्धयोः परामर्शो हेत्वोः सत्प्रतिपक्षता॥
साध्यशून्ये यत्र पक्षत्वसौ बाध उदाहृतः।
उत्पत्तिकालीनघटे गन्धादित्वं च साध्यते॥"

इति भाषापरिच्छेदः॥ * ॥

तस्य सामान्यलक्षणानि यथा। अनुमितिकारणीभूताभावप्रतियोगि यथार्थज्ञानविषयत्वम्। यद्दृष्यत्वेन लिङ्गज्ञानस्यानुमितिप्रतिबन्धकत्वम्। ज्ञायमानं सत् यदनुमितिप्रतिबन्धकं तत्त्वं वा हेत्वाभासत्वम्॥ * ॥ तस्य विशेषलक्षणानि यथा। उभयकोट्युपस्थापकनावच्छेदकरूपवत्त्वं तत्त्वम्। विरुद्धान्यपक्षवृत्तित्वं सति अनुमितिविरोधिसम्बन्धाद्यावृत्तित्वं वा अनैकान्तिकः। विपक्षवृत्तित्वं साधारणत्वम्। सर्वसपक्षाद्यावृत्तो हेतुरसाधारणः। व्याप्यत्वासंभवत्कूटकेवलान्वयिनोरभावो यत्र स हेत्वभिमतोऽनुपसंहार्यः॥ * ॥ साध्याभावप्रतियोगित्वं विरुद्धत्वम्॥ * ॥ साध्यविरोध्युपस्थापनसमर्थसमानबलोपस्थित्या प्रतिरुद्धकार्यलिङ्गत्वं तत्त्वं सत्प्रतिपक्षितत्वम्॥ * ॥ व्याप्यत्वधर्मतानिश्चयविरोधिरूपवत्त्वं व्यभिचारः। पक्षनिष्ठ-प्रमाविषयत्व-प्रकाराभाव-प्रतियोगिसाध्यकत्वं बाधः। इति चिन्तामणिः॥

हेम, [न्] क्ली, (हिनोति वर्द्धते स्फुटति वेति। हि + मनिन्।) सुवर्णम्। (यथा, रघौ। १।९०।

"हेम्नः संलक्ष्यते ह्यग्नौ विशुद्धिः श्यामिकापि वा॥")

धुस्तूरम्। इत्यमरः। १। ८। ८४; ३।५।२३॥ केशरम्। इति राजनिर्घण्टः॥ हिमः। इति हेमन्तशब्दटीकायां भरतधृतमाधवी॥

हेमं, क्ली, (हि + मन्।) सुवर्णम्। इति केचित्॥

हेमं, पुं, (हि + मन्।) साधकपरिभाषम्। इति मेदकपरिभाषा॥ क्षत्रवर्णोऽस्यः। बुधः। इति केचित्॥ (ययातिवंशजरुपदपुत्रः। यथा, विष्णुपुराणे। ४। १८। १। "तितिक्षोरुपदपुत्रः सुधन्वोऽभूत ततो हेमः हेमात् सुतपाः।")

हेमकन्दलः, पुं, (हेमवर्णं कन्दलं नवाङ्कुरोऽस्य। यद्वा, हेमवर्णं कन्दं जानीते। ज्ञा + कः।) प्रवालः। इति हेमचन्द्रः॥

हेमकान्तिः, स्त्री, (हेमवत् कान्तिरस्याः।) दारुहरिद्रा। इति राजनिर्घण्टः। सुवर्णद्युतिमति, त्रि॥ (यथा, हरिवंशे तृतीयाध्याये। ७। २०।

"हेमकान्तिरथा मुक्तकेशः सम्मुक्तेन मनिना सुतेजा वा।
स्निग्धमूर्तिरलक्ष्यश्च हितायव्ययेन शुभलक्षणपुत्रः॥")

हेमकारः, पुं, (हेम हेममयं भूषणं करोतीति। कृ + अण्।) हेमकर्त्ता। स्वर्णकारः। यथा,

"सर्वसङ्करपापिष्ठं हेमकारं नराधिपः।
अन्यायेन वर्त्तमानञ्च क्षेदयेत्तरसा क्षुरैः॥"

इति मत्स्यपुराणे। २२७। १८५॥

हेमकिञ्जल्कं, क्ली, (हेमवर्णं किञ्जल्कमस्य।) नागकेशरम्। इति राजनिर्घण्टः॥ (नागकेशरशब्दस्य विषयो ज्ञातव्यः॥)

हेमकूटः, पुं, (हेममयः कूटो यस्य।) पर्वतविशेषः। इत्यमरः। २।३।३॥ स तु किंपुरुषवर्षस्य सीमापर्वतः। नवतिसहस्रयोजनदीर्घः। द्विसहस्रयोजनप्रस्थः। द्विसहस्रयोजनविस्तारः। हिमालयादुत्तरे स्थितः। इति श्रीभागवतमतम्॥ (यथा, महाभारते। ३। ११०। २।

"पर्वतं स समासाद्य हेमकूटमनामयम्।
अचिन्त्यानद्भुतान् भावान् ददर्श सुबहून् नृपः॥")

हेमकेतकी, स्त्री, (हेमवर्णा केतकी।) स्वर्णकेतकी। इति राजनिर्घण्टः॥

हेमकेलिः, पुं, (हेमवर्णः केलिः कम्पनादिः यस्य।) अग्निः। इति शब्दमाला॥

हेमकेशः, पुं, (हेमवर्णः केशोऽस्य। जटाया पीतत्वात् तथात्वम्।) शिवः। इति केचित्॥

हेमक्षीरी, स्त्री, (हेमेव पीतवर्णं क्षीरं निर्यासो यस्याः। ङीष्।) स्वर्णक्षीरी। इति राजनिर्घण्टः॥ (पर्य्यायोऽस्या यथा,—

"हेमक्षीरी स्वर्णा पीता गौरी च कालदुग्धिका।"

इति गारुडे २०८ अध्यायः॥

"कटुपर्णी हेमवती हेमक्षीरी हिमावती।
हेमाह्वा पीतदुग्धा च तन्मूलश्लोकमुच्यते॥"

इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे॥)

हेमगन्धिनी, स्त्री, (हेम्नः नागकेशरस्येव गन्धोऽस्ति अस्याः। इनिः।) रेणुकाख्यगन्धद्रव्यम्। इति रत्नमाला॥

हेमगौरः, पुं, (हेमवत् गौरः।) किन्नरानवृक्षः। इति राजनिर्घण्टः॥ (यथास्य प्रयोगः।

"किन्नरातो हेमगौरः पीतकः पीतभद्रकः॥"

इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे॥)

स्वर्णवद्गौरवर्णयुक्ते, त्रि॥

हेमगौराङ्गः, त्रि, (हेमानीव गौराणि अङ्गानि अस्य।) स्वर्णतुल्यगौरवर्णाङ्गविशिष्टः। यथा,

"विषेणोच्छिष्टमानेन कालानलसमत्विषा।
निर्दग्धहेमगौराङ्गः कृतः कृष्णो जनार्दनः॥
तं दृष्ट्वा हेमगौराङ्गं कृतं कृष्णं जनार्दनम्।
ततः सर्वे वयं भीतास्त्वामेव शरणं गताः॥"

इति स्कान्दे नीलकण्ठस्तोत्रम्॥

हेमचन्द्रः, पुं, अभिधानचिन्तामणिनामकोषकर्त्ता। यथा,—

"यानेकार्थनाममालातिलकः कोषवरः शुभः।
हेमचन्द्रप्रणीताभिधानचिन्तामणिर्नृणाम्॥
इति तस्य सूचीकारश्लोकः॥

स्वर्णमयभूषणो च। सोनार चाँद इति भाषा॥

हेमज्वालः, पुं, (हेमवर्णा ज्वालास्य।) अग्निः। इति शब्दमाला॥

हेमतारं, क्ली, (हेम तारयति उत्कर्षं नयति। तॄ + णिच् + अच्।) तुत्थम्। इति हेमचन्द्रः॥ (तुत्थशब्दोऽस्य विवृतिज्ञातव्या॥)

हेमदुग्धः, पुं, (हेमवर्णं दुग्धं निर्य्यासोऽस्य।) उडुम्बरवृक्षः। इति शब्दरत्नावली॥

हेमदुग्धकः, पुं, (हेमवर्णं दुग्धं निर्य्यासोऽस्य। कप्।) उडुम्बरवृक्षः। इत्यमरः। २। ४। १२॥ (पर्य्यायो यथा,—

"उदुम्बरो जन्तुफलो यज्ञाङ्गो हेमदुग्धकः।"

इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे॥)

पीतवर्णक्षीरयुक्ते, त्रि॥

हेमदुग्धा, स्त्री, (हेमवर्णं निर्य्यासोऽस्याः।) स्वर्णक्षीरी। इति जटाधरः॥ (गुणाद्योऽस्या स्वर्णक्षीरीशब्दे वोद्धव्याः॥)

हेमदुग्धी, [न्] पुं, (हेमवर्णं दुग्धं निर्य्यासोऽस्यास्तीति। इनिः।) यज्ञोडुम्बरवृक्षः। इति शब्दरत्नावली॥

हेमदुग्धी, स्त्री, (हेमवर्णं क्षीरं निर्य्यासोऽस्याः। ङीष्।) स्वर्णक्षीरी। इति राजनिर्घण्टः॥

हेमन्तः, पुं, क्ली, (हन्ति लोकान् शीतेनेति। हन् + "हन्तेर्मुट्च हि च।" उणा० ३। १२६। इति झच् हन्तेर्हि चेति हिरादेशः सुडागमो गुणश्च।) ऋतुविशेषः। स तु अग्रहायणपौषमासात्मकः। यथा। षड्भी ऋतवः पुंसि मार्गादीनां युगैः क्रमादिति वक्ष्यमाणेनान्वयः। ते के इत्याह हेमन्त इत्यादि मार्गपौषाभ्यां ऋतुर्हेमन्तः। हन्ति सन्तापमिति। हिमोऽस्त्यस्येति वा मनीषादित्वात् हेमन्तः। अर्शआदिरयमिति केचित्। तेन अच्प्रत्ययमित्यनेनापि सम्बन्धः। हेमन्तशब्दोऽप्यस्तीति माधवी। इति भरतः। तत्पर्य्यायः। हैमनः २। इति शब्दरत्नावली॥ उग्गादयश्च ३ शरदन्तः ४ हिमागमः ५। तत्कालोद्भवजलगुणाः।

"हैमन्तिकं जलं स्निग्धं वृष्यं वल्यं हितं गुरु।"

इति राजनिर्घण्टः॥*॥

तत्र लोकप्रतपनार्थमग्निप्रदानफलं यथा,—

"हेमन्ते शिशिरे चैव पुण्याग्निं यः प्रयच्छति।
सर्वलोकप्रतापार्थं स पुण्यां गतिमाप्नुयात्॥"

इति वह्निपुराणे कन्यादाननामाध्यायः॥

तत्र भगवत्समीपे अग्निप्रज्वालनविधिः सेवाशब्दे द्रष्टव्यः॥*॥ तत्र वर्णनीयानि।

"हेमन्ते दिगलङ्घना शीतवस्त्रसमरुचकहिमानि।"

इति कविकल्पलता॥

हेमन्तनाथः, पुं, (हेमन्ते नाथ्यते याच्यते इति। नाथ + कर्म्मणि घञ्।) कपित्थः। इति शब्दचन्द्रिका॥ (कपित्थशब्दस्य विषयो ज्ञातव्यः॥)

हेमवर्त्तः, पुं, (हेममयः पर्व्वतः।) सुमेरुगिरिः। इति हलायुधः॥
हेमपुष्पं क्ली, (हेमवर्णं पुष्पम्।) अशोकपुष्पम्। जवापुष्पम्। इति मेदिनी॥
हेमपुष्पः, पुं, (हेमवर्णं पुष्पं यस्य।) चम्पकवृक्षः। इति शब्दचन्द्रिका॥ (अस्य पर्य्यायो यथा,—
"चाम्पेयश्चम्पकः प्रोक्तो हेमपुष्पश्च स स्मृतः॥"
अशोकः। अस्य पर्य्यायो यथा,—
"अशोको हेमपुष्पश्च बञ्जुलस्ताम्रपल्लवः।
कङ्केलिः पिण्डपुष्पश्च गन्धपुष्पो नटस्तथा॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
हेमपुष्पकः, पुं, (हेमवर्णं पुष्पं यस्य। कप्।) चम्पकवृक्षः। इत्यमरः। २। ४। ६३॥ लोध्रः। इति राजनिर्घण्टः॥
हेमपुष्पिका, स्त्री, (हेमवर्णं पुष्पं यस्याः। कन्+टाप्। अत इत्वम्।) स्वर्णयूथिका। इत्यमरः। २। ४। ७१॥ (तथास्याः पर्य्यायः।
"यूथिकाजातिकाख्या सा पीता हेमपुष्पिका।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
हेमपुष्पी, स्त्री, (हेमवर्णं पुष्पमस्याः। गौरादित्वात् ङीष्।) मञ्जिष्ठा। इति शब्दमाला॥ स्वर्णजीवन्ती। इन्द्रवारुणी। स्वर्णुली। सुवली। कण्टकारी। इति राजनिर्घण्टः॥
हेमफला, स्त्री, (हेमवर्णानि फलान्यस्याः।) स्वर्णकदली। इति राजनिर्घण्टः॥
हेममाला, स्त्री, यमपत्नी। इति केचित्। (हेमनिर्म्मिता माला।) स्वर्णसक्॥
हेममाली, [न्] पुं, (हेमैव किरणानां मालास्यस्य। इनिः।) सूर्य्यः। यथा, भविष्ये।
"या शुक्ला कृष्णपार्श्वे! वैशाखे मासि वै तिथिः।
तत्रोषा याचया लोके गौर्य्यागौरिमवन्दिता॥
योऽस्यां ददाति करकान् वारिवासःसमन्वितान्।
स याति पुरुषो वीर! लोकान् वै हेममालिनः॥"
हेममालिनः सूर्य्यस्य। इति तिथ्यादितत्त्वम्॥ (स्वर्णमालाविशिष्टे, त्रि॥)
हेमयूथिका, स्त्री, (हेमवर्णा यूथिका।) स्वर्णयूथिका। इति राजनिर्घण्टः॥
हेमरागिणी, स्त्री, (हेम्न इव रागोऽस्या अस्तीति। इनिः। ङीप्।) हरिद्रा। इति त्रिकाण्डशेषः॥
हेमलः, पुं, (हेम तदर्थं लाति गृह्णातीति। ला+कः।) स्वर्णकारः। कृष्णलायः। प्रस्तरभेदः। स तु कषपाषाणः। इति मेदिनी॥
हेमलता, स्त्री, (हेमवर्णा लता।) स्वर्णजीवन्ती। इति राजनिर्घण्टः॥ (स्वर्णजीवन्तीशब्देऽस्या विषयो ज्ञातव्यः॥)
हेमवल्कं, क्ली, (हेम्ना वल्क्यते वीयते इति। वल्क+घञ्।) सौक्तिकम्। इति राजनिर्घण्टः॥ (हेमवल्कोमणि पाठः॥)
हेमशृङ्गः, पुं, (हेमवर्णः शृङ्गोऽस्य।) विष्णुः। इति त्रिकाण्डशेषः॥
हेमशिखा, स्त्री, (हेमवर्णा शिखास्याः।) स्वर्णचोरी। इति शब्दरत्नावली॥
हेमसारं, क्ली, (हेम सारयति निर्म्मलीकरोतीति। सृ+णिच्+अण्।) तुत्थम्। यथा—
"तुत्थके तु शिखिग्रीवं हेमसारं मयूरकम्।"
इति रत्नचन्द्रिका॥
हेमसूत्रकं, क्ली, (हेम्नः सूत्रमत्र। कप्।) हारविशेषः। इति धरणिः॥
हेमहस्तिरथः, पुं, (हेमनिर्म्मितहस्तिविशिष्टो रथो यत्र। स तु दानार्थं कल्पितः।) महादानविशेषः। तद्विवरणं यथा,—
"अथातः संप्रवक्ष्यामि हेमहस्तिरथं शुभम्।
यस्य प्रदानात् भवनं वैष्णवं याति मानवः॥
पुण्यां तिथिं समासाद्य तुलापुरुषदानवत्।
विप्रवाचनकं कुर्य्यात् लोकेशावाहनं बुधः॥
ऋत्विङ्मण्डपसम्भारभूषणाच्छादनादिकम्।
अत्राप्युपोषितस्तत्र ब्राह्मणैः सह भोजनम्॥
कुर्य्यात् पुण्यरथाकारं काञ्चनं मणिमण्डितम्।
बलभीभिश्चित्राभिश्चतुश्चक्रसमन्वितम्॥
लोकपालाष्टकोपेतं ब्रह्मार्कध्वजसंयुतम्।
मध्ये नारायणोपेतं लक्ष्म्या चैव समन्वितम्॥
कृष्णाजिनतिलद्रोणं कृत्वा संस्थापयेद्रथम्।
तथाष्टादश धान्यानि भाजनाच्चत्वरे॥
दीपकोपानहच्छत्रदर्पणं पादुकान्वितम्।
ध्वजे तु गरुडं कुर्य्यात् कूबराग्रे विनायकम्॥
नानाफलसमायुक्तमुपरिष्टाद्वितानकम्।
कौशेयपट्टवस्त्रैश्च अश्वानङ्गसुमान्वितम्॥
चतुर्भिः कलसैः सार्द्धं गोभिरष्टाभिरन्वितम्।
चतुर्भिर्हेममालाभिर्मुक्तादामविभूषितम्॥
स्वरूपतः करिष्यन्तु युक्तं कृत्वा निवेदयेत्।
कुर्य्यात् पञ्चपलादूर्द्धमभावादपि शक्तितः॥
ततो मङ्गलशब्देन स्नापितो वेदपुङ्गवैः।
त्रिः प्रदक्षिणमाकृत्य गृहीतकुसुमाञ्जलिः॥
इमसुच्चारयन्मन्त्रं ब्राह्मणेभ्यो निवेदयेत्॥
नमो नमः प्रभुरूपाजार्क-
लोकेशविद्याधरवासुदेवैः।
त्वं भन्यसे वेद पुराण यज्ञ
तेजोमयस्त्वन्न पाहि तस्मात्॥
यत्तत् पदं परमगुह्यतमं मुरारे-
रानन्दहेतु गुणरूपविमुक्तमन्तः।
योगैकमानमहतो मुनयः समाधौ
पश्यन्ति तत्त्वमसि नाथ रथेऽधिरूढः॥
यस्मात्त्वमेव भवभागरसंप्लुतानां-
मानन्दभाक्षयतमध्वरपानपात्रम्।
तस्मादघौघशमनेन कुरु प्रसादं
चामीकरैरमरमाधवबंधदानात्॥
एवं प्रणम्य कनकैरमरप्रदानं
यः कारयेत् सकलपापविमुक्तदेहः।
विद्याधरामरसुनीन्द्रगणाभिजुष्टं
प्राप्नोत्यसौ पदमतीन्द्रियमिन्दुमौलेः॥
कृतदुरितवितानाद्गुप्तसद्वृत्तजाल-
व्यतिकरकृतदाहोद्वेगभाजोऽपि वन्यून्।
नयति च पितृपुत्तान् बान्धवानप्येषान्
कृतगजरथदानं प्राप्यते सद्म विष्णोः॥"
इति मत्स्यपुराणे महादानानुकीर्त्तने हेमहस्तिरथप्रदानिको नाम २८२ अध्यायः॥
हेमा, [न्] पुं, बुधग्रहः। इति त्रिकाण्डशेषः॥
हेमा, स्त्री, (हेम हेमवर्णमस्त्यस्या इति अच्। टाप्।) अप्सरसः। सुन्दरी स्त्री। इति केचित्॥
हेमाङ्गः, पुं, (हेमेव पीतवर्णमङ्गं यस्य।) गरुडः॥ सिंहः। सुमेरुः। ब्रह्मा। इति मेदिनी॥ चम्पकवृक्षः। इति शब्दरत्नावली॥ विष्णुः। इति तस्य सहस्रनामस्तोत्रम्॥ हेमवर्णशरीरे, क्ली। तद्युक्ते, त्रि॥
हेमाद्रिः, पुं, (हेममयोऽद्रिः।) सुमेरुपर्व्वतः। इत्यमरः। १। १। ५२॥ चक्रवर्त्तिराजविशेषः। स च चिन्तामणिकामधेनुकल्पद्रुमनामकस्तुतिसंग्रहकारकः। यथा,—
"तस्यास्ति नाम हेमाद्रिः सर्व्वस्वीकरणप्रभुः।
निजोदारतया यस्य सर्व्वत्रीकरणप्रभुः॥
अनेन चिन्तामणिकामधेनु-
कल्पद्रुमानर्थिजनाय दत्तान्।
विलोक्य गृह्णे किमसुष्य सर्व्व-
गौर्व्वाणनाथोऽपि करप्रदोऽभूत्॥
अथासुना धर्म्मकथादरिद्रं
त्रैलोक्यमालोक्य कलेर्बलेन।
तस्योपकारे दधतानुचिन्तां
चिन्तामणिः प्रादुरकारि चारुः॥
पञ्चखण्डात्मके शास्त्रे व्रतखण्डादनन्तरम्।
दानखण्डमिदं तत्र द्वितीयमथ कथ्यते॥"
इति तत्कृतचतुर्व्वर्गचिन्तामण्यौ दानखण्डीयश्लोकाः॥
हेमाद्रिजत्रयः, पुं, (हेमाद्रौ जीर्य्यतीति। जॄ+क्युः।) स्वर्णचोरी। इति रत्नमाला॥ (अस्य पर्य्यायविवरणादिकं स्वर्णचोरीशब्दे ज्ञातव्यम्॥)
हेमाङ्गः, पुं, (हेम हेमवर्णमाङ्गयते स्वर्णेन स्वर्द्धते इति। आ+कृ+कः।) वनचम्पकः। इति राजनिर्घण्टः॥ (हेम आङ्गा आङ्गा यस्य।) धुस्तूरः। कनकाह्वयशब्ददर्शनात्॥
हेमाङ्गा, स्त्री, (हेम आङ्गा आङ्गा यस्याः।) स्वर्णजीवन्ती। इति राजनिर्घण्टः॥
हेम्ना, पुं, बुधग्रहः। यथा,—
"हेलिः सूर्य्यसुतः प्रोक्तस्तिमिः
हेम्ना विज्ञो बोधनश्चेन्दुपुत्रः।"
इति ज्योतिस्तत्त्वम्॥
हेयः, त्रि, (हा+"अचो यत्।" ३। १। ९७। इति यत्। "ईद्यति।" ६। ४। ६५। इति

जात ईत्। गुणः।) त्याज्यः। यथा,—
"ऊषरा वालुकाक्षिप्ता" इत्यादुपक्रम्य।
"वास्तुखण्डे महादोषा हेयास्तस्मादिचक्षणैः॥"
इति युक्तिकल्पतरुः॥

हैरं, त्रि, (हि+रन्।) सुकुटभेदः। हरिद्रा। आसुरी माया। इति केचित्॥

हैरम्बः, पुं, (हे रणे शिवसमीपे वा रम्बते इति। रवि शब्दे+पचाद्यच्।) गणेशः। इत्यमरः।१।१।४१॥ महिषः। प्रौढ़ार्थगर्जितः। इति मेदिनी॥ बुद्धविशेषः। तत्पर्य्यायः। हैरुकः २ चक्रसम्बरः ३ देवः ४ वज्रकपाली ५ निशुम्भी ६ शशिशेखरः ७ वज्रटीकः ८। इति त्रिकाण्डशेषः॥ * ॥ अथ हैरम्बमन्त्रः। स च ऊकारयुक्तो गकारः सबिन्दुः प्रणवादिनमोऽन्तश्चतुरक्षरः। निबन्धे।
"पञ्चान्तको बिन्दुयुक्तो वामकर्णविभूषितः।
नारादिर्हृदयान्तोऽयं हैरम्बमनुरीरितः।
चतुर्वर्गात्मको नृणां चतुर्वर्गफलप्रदः॥"
अस्य पूजाप्रयोगः। प्रातःस्नात्यादिपीठन्यासान्तं विधाय गणेशोक्तपीठशक्तीः पीठमनुञ्च विन्यस्य ऋष्यादिन्यासं कुर्य्यात्। अस्य गणक ऋषिर्गायत्री छन्दो हैरम्बो देवता गकारो बीजं बिन्दुः शक्तिश्चतुर्वर्गसिद्ध्यर्थे विनियोगः। शिरसि गणकऋषये नमः। इत्यादि। ततः करान्यासौ। गां गीं गूं गैं गौं गः इत्यनैः षड़ङ्गानि कुर्य्यात्। तथा च।
"षड्दीर्घभाजा बीजेन षड़ङ्गानि प्रकल्पयेत्॥"
ततो ध्यानम्।
"सृक्काकाक्षनलीलकुन्दरुचिरच्छायैस्त्रिनेत्रान्वितै-
र्नागास्यैरिवाहतं शशिधरं हैरम्बमर्कप्रभम्।
दन्तं दानमभीतिमोदकरदान् टङ्कं शिरोऽक्षावलिं
मालां सङ्गरमङ्कुशं त्रिशिखकं दोर्भिर्दधानं भजे॥"
एवं ध्यात्वा मानसैः संपूज्य शङ्खस्थापनं कुर्य्यात्। ततो गणेशोक्तपीठपूजान्तं कृत्वा ॐ हूं हुं मदासिंहाय गां हैरम्बासनाय नमः इत्यासनं पूजयेत्। तथा च निबन्धे।
"प्रणवं कवचहृद्दं मदासिंहाय मां ननः।
हैरम्बेति पदं पश्चात् आसनाय हृदन्ततः॥
अयमासनमन्त्रः स्यात् प्रदद्यादसनासनम्॥"
इति॥
पीठन्यासोऽप्येवं मन्त्रः। यथा ॐ गां मन्त्रेण मूर्त्ति सकल्पयेत्। तथा च, निबन्धे।
"नारादिर्वायुबीजेन मूर्त्तिं तस्य प्रकल्पयेत्।"
उक्तशङ्खस्थापनादिपञ्चपुष्पाञ्जलिदानपर्य्यन्तं विधाय आवरणपूजामारभेत्। यथा अग्न्यादिकोणे मध्ये दिक्षु च गः हृदयाय नमः इत्यादिना पूजयेत्। महासिंहादीन् वज्रादींश्च संपूज्य धूपादिविसर्जनान्तं कर्म समापयेत्। अस्य पुरश्चरणं लक्षजपः। तथा च।
"लक्षञ्च जपेन्मन्त्रं दशांशं जुहुयात्ततः।"
होममन्त्रः यथा,—
"लक्षञ्च जपेन्मन्त्रमिक्षुदण्डैर्दशांशतः।
अपूपैराज्ययुक्तैर्वा जुहुयान्मन्त्रसिद्धये॥"*॥
मन्त्रान्तरम्। गं क्षिप्रप्रसादनाय हृत्। तथा च निबन्धे।
"सम्वर्त्तको नेत्रयुतः पार्श्वौ वह्न्यक्षिणे स्थितः।
प्रसादनाय हृन्मन्त्रं खबीजाद्यो दशाक्षरः॥"
अस्य पूजा प्रातःस्नात्यादिपीठन्यासान्तं कर्म्म विधाय ऋष्यादिन्यासं कुर्य्यात्। शिरसि गणकऋषये नमः। मुखे विराट्छन्दसे नमः। हृदि क्षिप्रप्रसादनाय देवतायै नमः। तथा च निबन्धे।
"गणको मुनिराख्यातो विराट् छन्द उदीरितम्।
क्षिप्रप्रसादनो विघ्नो देवतास्य प्रकीर्त्तिता।
दीर्घयुक्तेन बीजेन षड़ङ्गानि प्रकल्पयेत्॥"
एकाक्षरवत् करान्यासौ कृत्वा ध्यायेत्।
"पाशाङ्कुशौ कल्पलतां विषाणं
दधत्सृणिघण्डाञ्चितबीजपूरः।
रक्ताम्बिनेत्रस्तरुणेन्दुमौलि-
र्हारोज्ज्वलो हस्तिसुखोऽवताद्वः॥"
इति ध्यात्वा मानसैः संपूज्य शङ्खस्थापनं कृत्वा पीठपूजां विधाय पुनर्ध्यात्वावाहनादिपञ्चपुष्पाञ्जलिदानपर्य्यन्तं विधाय आवरणपूजामारभेत्। अग्न्यादिषु गां हृदयाय नमः इत्यादिना पूजयेत्। तथा च निबन्धे।
"अङ्गानि पूर्वमभ्यर्च्य विघ्नानथो बलेस्ततः।
पत्राद्ये पूजयेदेता ब्राह्म्याद्यास्तदनन्तरम्॥"
पत्राद्येषु।
"विघ्नं विनायकं शूरं वीरं वरदसंज्ञकम्।
एभवक्त्रं चैकरदं लम्बोदरं प्रपूजयेत्॥"
पत्राग्रेषु ब्राह्म्याद्यास्तद्बहिरिन्द्रादीन् वज्रादींश्च पूजयेत्। ततो धूपादिविसर्जनान्तं कर्म्म समापयेत्। अस्य पुरश्चरणं लक्षजपः। तथा च।
"लक्षं जपेच्चपस्थान्नं जुहुयादयुतं तिलैः।
मधुरत्रितयेनापि द्रव्यैरष्टाभिरीरितैः॥"
इति कृष्णानन्दकृततन्त्रसारः॥

हैरम्बजननी, स्त्री, (हैरम्बस्य जननी।) दुर्गा। इति शब्दरत्नावली॥

हैरम्बदट्टः, पुं, देशविशेषः। स च दक्षिणप्रदेशे वर्त्तते। इति शब्दरत्नावली॥

हैरिकः, पुं, (हि+इक। रुट् च।) चरः। इति हेमचन्द्रः॥

हैरुकः, पुं, (हि+उक। रुट् च।) बुद्धभेदः। महाकालगणः। इति मेदिनी॥ शिवलिङ्गविशेषः। यथा,—
"शिवलिङ्गञ्च तत्राग्नि शिलायां हैरुकाह्वयम्।
नदीदक्षिणपूर्व्वस्यां नायकं तन्तु पूजयेत्॥"
इति कालिकापुराणे कामाख्यारूपनिर्णये ८१ अध्यायः॥ गणेशः। इति त्रिकाण्डशेषः॥

हैलञ्चो, स्त्री, (हैलं चिनोतीति। चि+ड। ङीष्। पृषोदरात् साधुः।) छिलमोचिका। हैलञ्चा इति भाषा। इति शब्दचन्द्रिका॥ (छिलमोचिकाशब्देऽस्या गुणादयो ज्ञेयाः॥)

हैलनं, क्लीं, (हेड़+ल्युट्। डलयोरैक्यम्।) अवहेला। इति शब्दरत्नावली॥ (यथा, भागवते। ६। २। १४।
"साङ्केत्यं पारिहास्यं वा स्तोभ्यं हेलनमेव च।
वैकुण्ठनामग्रहणमशेषाघहरं विदुः॥")

हैला, स्त्री, (हिल्+घञ्। टाप्।) स्त्रीणां शृङ्गारभावजक्रियाविशेषः। इत्यमरः।१।७।३२॥
सुरते प्रौढ़िच्छा हैला। यदाह।
"प्रौढ़िच्छा याति रूढ़ानां नारीणां सुरतोत्सवे।
शृङ्गारप्राक्कृतत्वज्ञैर्हैला सा परिकीर्त्तिता॥"
इति।
अन्ये तु।
"स एव हैला सुव्यक्तः शृङ्गाररसद्योतकः।"
इत्याहुः। अस्यार्थः। हाव एव स्फुटशृङ्गारानुभावो हैलेति। अन्ये त्वाहुः विलासादयो दश स्वाभाविकाः भावहावहैलास्त्वयोऽङ्गजाः। स्त्रीभावाः सप्त प्रयत्नजाः। इति विंशतिरलङ्काराः। तेषु।
"देहात्मकं भवेत् सत्त्वं सत्त्वाज्जायाः समुत्थितः।
भावात् समुत्थितो हावो हावाद्धैला समुत्थिता॥"
इति॥
हिल शृ हावकृतौ घञ्। स्त्रीत्वं लोकाश्रयात्। हैलिरपि।
"हैलिः पुंसि रयौ हैलिर्हैलायामपि योषिति।"
इति हेमः। इति भरतः॥
अपि च।
"हाव एव भवेद्धैला व्यक्तः शृङ्गाररञ्जकः।"
इत्युज्ज्वलनीलमणिः॥*॥
अवज्ञा। इति मेदिनी॥ (यथा, मार्कण्डेयपुराणे। १४। २६।
"स्वल्पं पुण्यं प्रभं नन्दं हैलया सम्प्रयच्छति।
सर्गं वाप्यथवा शब्दं रसं रूपमथापि वा॥")
व्योत्स्ना। इति केचित्॥

हैलाबुकः, पुं, अश्वविक्रयी। इति हारावली॥

हैलिः, पुं, (हिलति। हिल+"सर्व्वधातुभ्य इन्।" उणा० ४। ११७। इति इन्।) सूर्य्यः। इति त्रिकाण्डशेषः॥ आलिङ्गनम्। इति केचित्॥

हैलिः, स्त्री, (हिल शृ हावकृतौ+इन्।) हैला। इति हेमः। इत्यमरटीकायां भरतः॥

हैष, क्ष्वेड़ अव्यक्ते शब्दे। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-अक०-सेट्।) ड, हैषते घोटकः। लिहैषे। क्ष, अलिहैषत्। इति दुर्गादासः॥

हैषा, स्त्री, (हैष+भावे अः।) अव्यक्तशब्दः। (यथा, मार्कण्डेयपुराणे। २२। २०।
"क्षतार्त्तिहैषाशब्दो वै यस्याः सास्रविलोचनः।
नीतः सोऽपश्च तेनैव दानवेन दुरात्मना॥")

होः, अ, (हूयते अनेनेति। हु + डो। निपातनात् साधुः।) वह्नेराननम्। आज्ञानम्। इति मेदिनी॥ (यथा, किरातार्जुनीये। १५। २०।
"ननु होमधनाराधो घोरानाथ महोतु न।
तवदा तवदा भीमा मालीदावत दायत॥")
विस्मयः। इत्यमरः॥

होड, ऋ ड गतौ। अनादरे। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-सेट्।) ऋ, अजु होड्ते। ड, होड़ते। इति दुर्गादासः॥

होड़ः, पुं, (होड़ते गच्छतीति। होड़ गतौ + अच्।) नौकाविशेषः। हुड़ी इति भाषा। तत्पर्य्यायः। तरान्तुः २ वहनम्३ वहित्रम् ४ वाजेटः ५। इति त्रिकाण्डशेषः॥ (होयते इति। होड़ अनादरे + कर्म्मणि घञ्।) दक्षिणराढ़ीयमौलिककायस्थानां द्विसप्ततिपङ्क्त्यन्तर्गतपङ्क्तिविशेषः। इति कुलाचार्य्यग्रन्थः॥ गौड़देशीयश्रोत्रियब्राह्मणविशेषाणामुपाधिश्च। अस्य प्रमाणं अन्नदामङ्गलग्रन्थे ध्रुवानन्दमिश्रग्रन्थे च द्रष्टव्यम्॥

होडा, [क्] पुं, चोरः। इति केचित्॥

होता, [तृ] पुं, (जुहोतीति। हु + "नप्तृनेष्टृत्वष्टृहोतृ।" उणा० २। ९९। इति तृन् निपातितश्च। यद्वा, हु + तृच्।) ऋग्वेदवेत्ता। इत्यमरः। २। ७। १७॥ होमकर्त्ता। यथा। विशिष्टदेशावच्छिन्नप्रक्षेपोपचितहविर्द्रव्यागम्य होमत्वात् प्रक्षेपस्य तदभिधाननिमित्तमित्यर्थः। तेन बुधान्वर्थतावच्छेदकप्रक्षेपानुकूलव्यापारवति क्रतिवि होता इत्यादिशब्दः। इति दायभागटीकायां श्रीकृष्णतर्कालङ्कारः॥

होत्कारः, पुं, होतुर्ऋकारः। होतुर्मात्रा। इति मुग्धबोधव्याकरणम्॥

होत्रं, क्ली, (हूयते इति। हु + "हुयामाश्रुभसिभ्यस्त्रन्।" उणा० ४। १६०। इति त्रन्।) हविः। इति त्रिकाण्डशेषः॥ होमः। इति हेमचन्द्रः॥

होत्रा, स्त्री, (हु + त्रन् + टाप्।) स्तुतिः। इति केचित्॥ (आहूयमाना देवता। यथा, ऋग्वेदे। १। १८। ८।
'ताहोति हविष्कृतिं प्राचं कृणोत्यध्वरम्।
होत्रा देवेषु गच्छति————————॥"
'होत्रा हूयमाना देवता।' इति तद्भाष्ये सायणः॥)

होत्री, [तृ] पुं, होता। होत्रं विद्यतेऽस्य इति होत्रशब्दात् इनप्रत्ययेन निष्पन्नः॥

होत्री, स्त्री, (हु + क्तच् + ङीप्।) यजमानरूपा शिवस्य सृष्टिः। यथा,—
"या सृष्टिः स्रष्टुराद्या वहति विधिहुतं या हविर्या च होत्री
ये द्वे कालं विदुः श्रुतिविषयगुणा या स्थिता व्याप्य विश्वम्।
यामाहुः सर्व्वबीजप्रकृतिरिति यया प्राणिनः प्राणवन्तः
प्रत्यक्षाभिः प्रसन्नस्तनुभिरवतु वस्ताभिरष्टाभिरीशः॥"
इत्यभिज्ञानशकुन्तलायां प्रथमश्लोकः॥

होत्रीयं, क्ली (होत्राय हितम् होतुरिदं वेति। छः।) हविर्द्रव्यम्। इति हेमचन्द्रः॥ होत्रसम्बन्धिनि, त्रि॥ (यथा, शतपथब्राह्मणे। ६। ४। ३। ७।
"एकविंशतिं होत्रीय उपदधाति॥")

होमः, पुं, (हूयतेऽग्नाविति। हु + "अर्त्तिस्तुसुहुसृधृक्षिभ्यो मन्।" उणा० १। १५६। इति मन्।) पञ्चमहायज्ञान्तर्गतयज्ञविशेषः। इत्यमरः। २। ७। १४॥ स तु देवयज्ञः। यथा,—
"अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम्।
होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम्॥"
इति मनुः॥

तल्लक्षणं यथा,—
"विशिष्टदेशावच्छिन्नप्रक्षेपोपचितत्यागः॥"
इति श्रीकृष्णतर्कालङ्कारः॥

अथ नित्यहोमः। तदुक्तं सोमशुक्रागाचल्याम्।
"नाजप्तः सिद्ध्यते मन्त्रो नाहुतश्च फलप्रदः।
नानिष्टो यच्छते कामान् तस्मात्त्रितयमर्च्चयेत्॥
पूजया लभते पूजां जपात् सिद्धिर्न संशयः।
विभूतिं चाग्निकार्य्येण सर्व्वसिद्धिञ्च विन्दति॥"
गौतमतन्त्रेऽपि।
"नित्यहोमं प्रवक्ष्यामि सर्व्वार्थं येन विन्दति।
सपर्य्यां सम्यगाधाय बलिपूर्व्वं चरेद्विधिम्॥
ततो होमं तर्पणञ्च चरेत् साधकसत्तमः।
बलिवैश्वादिकं चैव ब्राह्मणः समुपाचरेत्॥
अग्नीदृक्केन संप्रोक्ष्य तिस्रो रेखाः समालिखेत्।
विधिवदग्निमागोद्य क्रमादेभ्यो नमस्तथा॥
स्थण्डिलं समुपाधाय कुण्डे वा स्थण्डिलेऽपि वा।
भूमौ वा संस्तरेद्वह्निं व्याहृतिवितयेन च।
स्वाहान्तेन विधा हुत्वा षड़ङ्गदहनं चरेत्॥"
तथा।
"ततो देवीं समाधाय स्थण्डिले षोड़शाङ्गुलिम्।
हुत्वा स्रुत्वा नमस्कृत्य विधिवद्दिङ्मण्डले॥"
ध्यानादौ विशेषः।
"मैरवांश्च दशैवाशा व्याप्यावितिस्थिलैः शुभैः।
पूर्व्वादिदिक्क्रमेणैव ततो होमं समाचरेत्॥"
अथ संक्षेपहोमप्रयोगः।
"कुण्डे वा स्थण्डिले वापि वीक्षणादिभिः संस्कृते।
प्रागग्रा उदगग्राश्च तिस्रो रेखाः समालिखेत्॥"
तथा च।
"वीक्षणं स्थलमन्त्रेण प्रोक्षणं ताड़नं मतम्।
तेनैव प्रोक्षणं प्रोक्तं वर्म्मणाभ्युक्षणं मतम्॥"
ततो स्थलसुपाधाय कुशाय नमः इति संपूज्य प्रागग्रा उदगग्राश्चिस्रो रेखाः कुर्य्यात्। प्रागग्रेण सुक्तुण्डेनपुरन्दरान् प्रादक्षिण्येन संपूज्य उदगग्रासु वह्नयेवमग्नेतन्दून् पूजयेत्। सुन्दरीपक्षे तु मन्त्रेण षट्कारी प्रयोगः। षट्कारी च यैं ह्रीं श्रीं ऐं क्लीं यौः अग्नये नमः। एवं क्रमेण पूजयेत्। तथा ब्रह्मसंहितायां होमकुण्डे।
"ऐशान्यां वेदिकां हस्तविस्तारोन्नतिशालिनीम्।
कृत्वास्मिन् स्थापयेत् कुम्भं यथोक्तक्रमयोगतः॥
तत्र संपूजयेद्देवं यथाविभवोपचारकैः।
ततो होमं प्रकुर्व्वीत देवतासन्निधानतः॥"
ततः कुम्भमध्ये षट्कोणवृत्तत्रिकोणं तद्बहिरष्टदलपद्मं तद्बहिश्चतुरस्रं चतुर्द्वारसमेतं लिखित्वा तदुपरि स्रुवेण पुष्पाञ्जलीन् दद्यात्। सुन्दरीपक्षे तु वालया। ततः सर्व्वाणि प्रणवेनाभ्युक्ष्य वह्नेर्योगपीठमर्च्चयेत्। तद्यथा। कर्णिकोपर्य्याधारशक्त्यादीन् संपूज्य अग्न्यादिकोणचतुष्केषु ॐ धर्म्माय नमः ॐ ज्ञानाय वैराग्याय ऐश्वर्य्याय पूर्व्वादिदिक्षु अधर्म्माय अज्ञानाय अवैराग्याय अनैश्वर्य्याय मध्ये ॐ अनन्ताय नमः। एवं पद्माय सं सूर्य्यमण्डलाय द्वादशकलात्मने नमः। उं सोममण्डलाय षोड़शकलात्मने नमः। मं वह्निमण्डलाय दशकलात्मने नमः। ततः केशरेषु पूर्व्वादिमध्ये च ॐ पीतायै नमः। एवं श्वेतायै नमः अरुणायै नमः। कृष्णायै धूम्रायै तीव्रायै स्फुलिङ्गिन्यै रुचिरायै ज्वालिन्यै ततो रं वह्न्यासनाय नमः। ततः।
"वागीश्वरीं चतुर्हस्तां नीलेन्दीवरलोचनाम्।
वागीश्वरेण संयुक्तां क्रीड़ाभावसमन्विताम्॥"
इति ध्यात्वा ॐ ह्रीं वागीश्वराय नमः ॐ वागीश्वर्य्यै नमः। इति मन्त्रैर्य पचोपचारैः संपूज्य सूर्य्यकान्तादिसम्भूतं श्रोत्रियगेहजं वा वह्निमानयेत्। सुन्दरीपक्षे तु कामेश्वरं कामेश्वरीं पूजयेत्। गौतमीये।
"पाषाणभवपात्रेण यदि वारिसमानयम्।
श्रोत्रियाणां गेहजेन वनजं वाथवा हरेत्॥
यद्वक्त्रलाभसंयुक्तो व्ययोन्यो यागकर्म्मणि।
निरग्निब्राह्मणाद्यो स्यादुंछाभकरो भवेत्॥
चत्वन्योषचतुर्थांशफलं दत्वाहुनाग्नयः।
वैश्वात् भूमाथ विप्रस्य जायते होमकर्म्मणि।
तस्मात् सर्व्वप्रयत्नेन वह्निसूक्तं समाहरेत्॥"
तत्रान्तरे।
"द्विजातिभवनाद्यापि वह्निमानीय साधकः।
वौषड़न्तेन स्रुवेण मन्त्रितं तं विलोकयेत्॥
अग्निमावाहयेद्दक्षमन्त्रेण तदनन्तरम्।
हूं फड़न्तेन स्रुवेण क्रव्यादांशं परित्यजेत्॥"
ततः ॐ वह्नेर्योगपीठाय नमः चतुर्दिक्षु ॐ वामायै नमः एवं ज्येष्ठायै रौद्र्यै अम्बिकायै। ततो स्थलसुपाधाय असुकदेवताकुलाय नमः। इति कुम्भं संपूज्य तद्धो वागीश्वरीं तत्तद्देवतारूपां चतुर्भुजां ध्यात्वा यथोक्तवह्निमानीय वौषड़ादिभिः संस्कृत्य रमिति तस्मात् वह्निसूक्तं स्थलसुपाधाय हूं फट् क्रव्यादेभ्यः स्वाहा स्रुवेण क्रव्यादांशं परित्यज्य वह्निमन्त्रेण संरक्ष्य हूं स्रुवमुखस्थ घृतबुद्धया चतुर्भीस्रुक् गृहीत्वा

मन्तुरुक्त कुशोपरि त्रिः प्रादक्षिण्य जानुमृष्ट-मर्घीतस्थः प्रियवीक्षणद्वारा वासनोऽभिमर्शं कृत्वा योनौ रेतः क्षिपेत्। ततो द्वौ वह्निपुरुषौ नमः इत्यभ्यर्च्य रं वह्निचैतन्याय नमः इति चैतन्यं तत्र संयोज्य ॐ क्षिन् क्षिप्रप्रसन्न वन वन्द वन्द सर्वं शापय शापय स्वाहा इति व्याहरेत्। ततः।

"अग्निं प्रज्वलितं वन्दे जातवेदं हुताशनम्।
सुवर्णवर्णममलं समिद्धं विश्वतोमुखम्॥"

इत्युपतिष्ठेत्॥

ततो अथ वसुकनामाग्नीति नाम कृत्वा ॐ वैश्वानर जातवेद इहावह लोहिताक्ष सर्वकर्माणि साधय स्वाहा। अनेनार्घादिभिः संपूज्य ॐ अग्नेर्हिरण्यादिपतिभ्यो नमः। ॐ सहस्राक्षिणे हृदयाय नमः इत्यादि अग्नि-गर्भेभ्यो नमः। ॐ अग्नये जातवेदसे इत्या-वाहनादिभ्यो नमः। तद्दक्षे ॐ आज्याहावह-प्रतिष्ठाभ्यो नमः। तद्वहिः ॐ पद्मादावनिधिभ्यो नमः। तद्दक्षे ॐ इन्द्रादिलोकपालेभ्यो नमः। तद्वक्षे ॐ वज्रादिभ्यो नमः। ततः प्रादेश-मात्रं कुशपत्रद्वयं एतमध्ये निधिप्य सव्यमन्य-मध्यमाभ्यां दर्भा पिञ्जलां सुग्रुवां आज्य होमं कुर्यात्। सुवेण दक्षिणभागादाज्यं गृहीत्वा ॐ अग्नये स्वाहा इति अग्नेर्दक्षिणनेत्रे जुहु-यात्। तथा वामभागादाज्यं गृहीत्वा ॐ सोमाय स्वाहा इति वामनेत्रे जुहुयात्। ततो मध्यभागादाज्यं गृहीत्वा ॐ अग्निषोमाभ्यां स्वाहा इत्यग्नेर्ललाटनेत्रे जुहुयात्। पुनर्दक्षि-णतः नमः इति स्रुवं गृहीत्वा ॐ अग्नये शिरसे स्वाहा इत्यग्निमुखे। ततो महा-व्याहृतिहोमः। ॐ भूः स्वाहा ॐ भुवः स्वाहा ॐ स्वः स्वाहा ॐ वैश्वानर जातवेद इहावह लोहिताक्ष सर्वकर्माणि साधय स्वाहा इत्यनेन त्रिवारं जुहुयात्। ततः अर्घा स्थित मौद-पूर्णकं देवतां संपूज्य तन्मुखे इतेन स्रुवमन्त्रेण पञ्चविंशतिवारं जुहुयात्। वह्निदेवयोरा-त्मनः मह्यं इदं विभाग सप्तमन्त्रेण एकादशा-हुतीर्जुहुयात्। ततो स्रुवमन्त्रस्य अङ्गदेव-ताभ्यः स्वाहा इत्यनेन प्रतिमन्त्रमेकैकाहुतिं जुहुयात्। ततः सकृत्स्रुवं विधाय तन्मन्त्रयोक्त-प्रकारेण होमं कुर्यात्। ततो मूलमन्त्रेण पूर्णाहुतिं दत्वा संहारमुद्रया मेदिन्यां सुदर्वे समानीय मूलमन्त्रेण विसृज्य दक्षिणां दत्वा अग्निहोत्र-भारमं कुर्यात्। इति तन्त्रसारः। अग्निहोम-पद्धतिग्रन्थे तत्रैव द्रष्टव्यः।

श्रौमक, पुं, (श्रौमान संज्ञायां कन्।) श्रौमा। यथा, माघमासे ८६। १२८—१२८ श्लोके।

"पुनर्दाने च संप्राप्ते वस्त्रमेव प्रदापयेत्।
वस्त्रमेव यथा दाने श्रौमके दक्षिणेऽहनि।
अन्यथा नैव गृह्णन्ति ब्राह्मणा वेदपारगाः।
श्रौमं तु श्रौमकः प्रोक्तं वेदवेदाङ्गवेदिभिः॥"

श्रौमकर्ण, क्ली, (श्रौमार्थं कृष्णम्।) श्रौमार्थ-कृष्णम्। तत्पर्य्यायः। हयकर्णी २। इति चिकाण्ड-शेषः। अस्य विवरणं कृष्णशब्दे द्रष्टव्यम्॥

श्रौमधान्यं, क्ली, (श्रौमोपयुक्तं धान्यम्।) तिलः। इति राजनिर्घण्टः॥

श्रौमधूमः, पुं, (श्रौमजातः धूमः।) श्रौमोत्थ-धूमः। तत्पर्य्यायः। निगमः २। इति हेमचन्द्रः॥

श्रौमभक्ष, [न्] क्ली, (श्रौमजातं भक्षः। तत्-पर्य्यायः। वैष्णवम् २। इति हेमचन्द्रः॥

श्रौमाग्निः, पुं, (श्रौमस्य अग्निः। यत्नवह्निः। तत्पर्य्यायः। महाज्वालः २ महावीरः ३ प्रथमः ४। इति हेमचन्द्रः॥

श्रौमिः, पुं, (क्रियते अस्मिन्निति। हु+इन्। सुट् च।) अग्निः। (क्रियते अनेनेति। इन् सुट् च।) हृतम्। इति मेदिनी॥ अन्नम्। इति शब्दरत्नावली॥

श्रौमी, [न्] पुं, (श्रौमः अस्यास्तीति। इनिः।) श्रौमकर्त्ता। यथा, तिथ्यादितत्त्वे।

"तिलोत्तमौ तिलस्रायी तिलश्रौमी तिलप्रदः।
तिलभुक् तिलवापी च षट्तिलो नावसीदति॥"

(जुहोतीति। हु+"उखास्रुदर्विहोमिनः।" उणा० ३। ८४। इति मिनि:। निपातितश्च। यजमानः। इत्युणादिवृत्तौ उज्ज्वलदत्तः॥)

श्रौम्य, क्ली, (श्रौमाय हितम्। यत्।) हृतम्। इति राजनिर्घण्टः॥ श्रौमीयद्रव्यमात्रे, त्रि॥ (यथा, हरिवंशे भविष्यपर्व्वणि २५१ अध्याये।

"श्रौम्या पीता हुता नेता मन्ता श्रौम्यश्रौता परात्परस्त्रम्॥")

श्रौर, क्ली, (श्रौलति छुल्यते वेति। छुल छिया-समरणयोः+अच् घञ् वा। रलयोरैक्यम् टाप्।) लवणम्। राजार्हम्। रेखा। ग्राम्य-मेदः। इति मेदिनी। द्वितीयार्थस्य विशेषो यथा, ज्योतिस्तत्त्वे।

"विषमर्क्षेषु प्रथम श्रौरः खण्डश्चरोत्थितः।
द्वितीयः अग्निजो मुक्तः यत्नयाद्रक्षयेत् सदा॥"

मार्हदलक्षणाक्रकालः। स तु ६ रेखानां आद्य-चार इति ख्यातः। यथा, वह्निपुराणे मकरभेदाध्याये।

"चतुर्विंशतिरेखाभिश्चौरार्कं प्रचक्षते।
मकरादर्कराशादिश्चौराणां विद्यते क्रमः॥"

श्रौलक, पुं, (छुल+विच्। लक्ष्यते आस्वाद्यते इति। लक्ष+अच्।) लवणाभिन्नाहार्यपदार्थमात्रम्। श्रौरा इति हिन्दी भाषा। यथा, भावप्रकाशे।

"अर्द्धपक्वैः शमीधान्यैस्तक्रयुक्तैश्च श्रौलकः।
श्रौलकोऽत्यग्निदो मेदःकफदोषक्रमापहः॥
अपेक्षितो श्रौलकी यस्य स च तक्रद्वयुषो भवेत्॥"

श्रौलाक, पुं, गोत्रविशेषः। यथा, चरकसंहितायां।

"श्रौलीलाम्बु करीषाग्नौ यवोलाननुपक्रमेत्।
मद्यपानप्रसक्तेषु मद्यात्ययहरेषु च।
सुदग्धान्विषमाग्नौ यवोलाननुपक्रमेत्।
कफपित्तहरः सूत्रं वातानुलोम्यकृत् परम्।
श्रौलाकस्तैर्द एवेष सुयवोलो मधूच्छिष्टः॥"

श्रौलिका, स्त्री, (छुल+विच्। ङीं कापि स्व-

मंज्ञायां कन् टाप्।) वमनौषधम्। श्रौल्ली इति भाषा। इति दायभागटीका॥ तदधि-करणन्यायो यथा। अथ श्रौलाकाधिकरणम्। प्रतीत्यानां श्रौलाकाचारदर्शनेन तदर्था श्रौलाका आचरणीया इति सामान्यविधिः कल्प्यते। न तु प्राथ्यानामनाचरणात् प्रतीत्यैरिति तत्र पदं देयं सामान्यविधिनैव प्रतीत्याचारोपपत्तेः। प्राथ्यानामनाचारस्य दृष्टाविरुद्धत्वेन उपपत्तेः। दृष्टाविरुद्धस्य तदृष्टीयपूर्व्वपूर्व्वानाचारदर्शनात्। प्रतीत्यानामुत्कादानाद्याचारविरुद्धवत्। न ह्यनाचारार्थं वेदः कल्प्यते। तथा च यत्र सामान्यश्रुत्या उपपत्तिस्तत्र विशेषविधिर्न कल्प्यते गुरुरनुगन्तव्यः सदेतिवत्। न हि कर्म्मकाले सदसत्त्ववात् तदन्यकाले इति विशेष-णीयम्। इति अधिकरणकौमुदी॥ अन्यच्च। यथा श्रौलाकाधिकरणे प्राथ्यकर्त्तृकश्रौलाकानु-ष्ठानोपपत्तये श्रौलाका कर्त्तव्येत्येव श्रुतिः कल्पिता। तावतैव तदुपपत्तेः। न तु प्राथ्यादि-पदवती कल्पनागौरवात्। तद्वदत्रापि अर्थ्यको अंशुग्रहयं ग्रहीष्यादिति श्रुतिः कल्पनीया न तु प्रित्रादिपदवती तदयुक्तं तत्र प्राथ्यकर्त्तृकानु-ष्ठानस्यावश्यकल्पनीयसामान्यश्रुतेरेवोपपत्तेः। न चाप्राथ्यागमनगुरुत्वार्थं प्राथ्यपदवती कल्प्यतामिति वाच्यम्। तेषामनगुरुत्वानाचाररूपस्य श्रुतिकल्पनानिमित्तत्वानुपपत्तेः। इति दाय-भागः॥

श्रौ, य, (क्रियते अनेनेति। श्रि+औ।) यज्ञो-धनम्। आज्यानम्। इति मेदिनी॥

श्रौढ, ऋ ड गतौ। अनादरे। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-सेट्।) चतुर्दन्तसरी। ऋ, अचुश्रौढत्। ड, श्रौढते। इति दुर्गादासः॥

श्रौतक, त्रि, (श्रौतुरागतम्। "अतश्च्।" ४। ३। ७८। इति ठञ्।) श्रौत्समन्धीयः। इति श्रौत्रशब्दात् कल्प्रत्ययेन निष्पन्नः॥

श्रौत्य, क्ली, (श्रौमाय अर्थं। यत्।) हृतम्। इति राजनिर्घण्टः॥ श्रौमीयमात्रे, त्रि॥

श्रौत्यधान्यं, क्ली, (श्रौत्यञ्च तत् धान्यञ्च।) तिलः। इति राजनिर्घण्टः॥ इति केचित्॥

श्रु, ड सु गतौ। इति कविकल्पद्रुमः॥ (अदा०-आत्म०-सक०-अनिट्।) ड सु श्रुते। इति दुर्गादासः॥

श्रुक, म आलै। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सेट्।) म प्रश्लेषणे। मिश्रेऽर्थस्य श्रौ अश्लक्ष्णश्लक्ष्णत्व इत्यादिना वैपक्षस्य कुत्वविकल्प-नात् श्रौदर्थमेवैव नित्यं क्रमः। श्लाघयति श्लक्ष्णयति। श्लाघ्यश्लक्ष्णम्। इति दुर्गादासः॥

श्रुत, [त्] त्रि, (श्रवणमस्यः। श्रु+क्तः।) श्रव-णविषयम्। श्रवणकरः। ३। ३। २२। (यथा, रामायणरक्षिरक्षाम्। ६। ६६।

"यदि वाल्मीकि विप्रैरयमभिहितः सुश्रुतम्।
श्रीमद्भगवद्गीतासु ते दिवाकरे आत्मजः सिनिः।")

श्रुतकर्ण, त्रि, (श्रुतं श्रवणं कर्णः यस्य। कुत्व-"येषमीक्षः-